॥ श्रीः ॥

श्रीमद्वाल्मीकिरामायणम्

नानादेशीयकोशानुसारेण संशोधितम्।

श्रीमद्गोविन्दराजीयव्याख्यानेन तिलकप्रभृत्यनेकापूर्वव्याख्यानोद्धृतैः
गोविन्दराजीयानुक्तापूर्वविषयैश्च समलंकृतम्।

बालकाण्डम्
अयोध्याकाण्डम्

पद्मभूषण-आचार्य-बलदेव-उपाध्याय-भूमिकया-विभूषितम्

उत्तर प्रदेश संस्कृत संस्थान
लखनऊ

श्रीः।

श्रीमद्वाल्मीकिरामायणम्।

नानादेशीयकोशानुसारेण संशोधितम्।

श्रीमद्गोविन्दराजीयव्याख्यानेन तिलकप्रभृत्यनेकापूर्वव्याख्यानोद्धृतैः

गोविन्दराजीयानुक्तापूर्वविषयैश्च समलंकृतम्।

बालकाण्डम् १—अयोध्याकाण्डम् २.

पद्मभूषण-आचार्य-बलदेव-उपाध्याय-भूमिकया-विभूषितम्

उत्तर प्रदेश संस्कृत संस्थान, लखनऊ

दुर्लभ एवं अप्राप्य महत्त्वपूर्ण ग्रन्थ-प्रकाशन
योजनान्तर्गत नवम पुष्प

प्रकाशक : डा० (श्रीमती) अलका श्रीवास्तवा
निदेशक
उत्तर प्रदेश संस्कृत संस्थान, लखनऊ
दूरभाष - ३८७२५१

प्राप्तिस्थान : विक्रय विभाग
उत्तर प्रदेश संस्कृत संस्थान
नया हैदराबाद, लखनऊ-२२६००७

प्रथम संस्करण : वि० स० २०५४ (१९९७ ई.)
प्रतियाँ : १०००
मूल्य : २२० (दो सौ बीस रुपये)
© उत्तर प्रदेश संस्कृत संस्थान, लखनऊ

मुद्रक : आइडियोग्राफिक प्रोसेसिंग कामर्शियल आफसेट (इपको)
77, लीडर रोड, इलाहाबाद
दूरभाष - 402604

उपोद्घातः

महर्षिवाल्मीकिप्रणीतं रामायणमुच्यते लौकिकसंस्कृतसाहित्यस्यादिकाव्यम्। अत एव वाल्मीकिर्लोके आदिकविर्निगद्यते। आसीदादिकवेर्वाल्मीके रामायणरचनाप्रयासः सोद्देश्यः। स हि लोकमङ्गलायैकं गुणवन्तं, शक्तिमन्तं, धर्मपरायणं, लोकप्रियं सर्वभूतहितकरं सच्चरितं महापुरुषं स्वीयकाव्यस्य नायकं निर्मातुमियेष। उद्देश्यमिदं पूरयितुं देवर्षिनारदस्तमिक्ष्वाकुकुलोद्भवं रामं चरितनायकं विधातुमादिदेश। परन्तु तत्कार्यसिद्ध्यै स तदा प्रेरणामवाप यदा तमसायास्तटे शोकाकुलाया एकस्याः क्रौञ्च्याः करुणक्रन्दनं शुश्राव। श्रुत्वा च तस्या आर्त्तनादं दृष्ट्वा च बाणविद्धं भूमौ लुठन्तं म्रियमाणं क्रौञ्चं समुत्थिता महर्षेर्विशुद्धान्तःकरणादेका शोकलहरी, निःसृतमकस्मात् तन्मुखादिदं वाक्यम् -

"मा निषाद! प्रतिष्ठां त्वमगमः शाश्वतीः समाः।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्"।।

नासीत् तत् सामान्यं वाक्यम्, तदासीत् करुणरसमयं विलक्षणं पद्यं यस्मादभूत् संस्कृतवाङ्मये आदिकाव्यस्य सूत्रपातः। तदा हि क्रान्तदर्शिनो महर्षेः शोक एव श्लोकरूपेण परिणतो जातः-'क्रोञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः। नास्य महनीयकाव्यस्योद्भवः शृङ्गारभावनया वीरभावनया वा, इदन्तु विद्यते करुणाकलितस्य कोमलनिश्छलस्य हृदयस्य प्राञ्जलोद्गारः । रामायणमिदं वस्तुत आदिकाव्यमथ च महाकाव्यस्य समस्तैरपि गुणैरापूर्णमित्यत्र नास्ति कापि संशीतिः।

अस्ति रामायणस्य वर्ण्यो विषयो रामकथा। सा हि सप्तसु काण्डेषु विभक्ता अयोध्यानगरवर्णनादारभ्यते समाप्यते च सीताया रसातलगमनात्। करुणरसोपक्रमितस्य महाकाव्यस्य करुणरस एवोपसंहार इत्यहोऽग्य रामकथानकस्य ,मार्मिकता।

भवतु नाम कदाचन रामायणमेकाकिनः कवेः काव्यम्, किन्तु साम्प्रतं तत् प्रत्येकं गृहस्य विद्यते महनीयो निधिः । अत्र हि यत्र रचयितुर्लोकोत्तरा काव्यप्रतिभा दृश्यते, तत्रैवास्य भारतस्य धार्मिकाध्यात्मिकादर्शजीवनस्य समग्रताऽप्यालोक्यते। काव्यमिदं भारतीयगृहाणाम्, आचार – विचार - संस्काराणाम्, चिरन्तनज्ञानस्य, भक्तेर्मैत्री भावनायाश्च वर्तत आदर्शग्रन्थरत्नम्। रामायणं हि न केवलं भारतीयधर्मस्य संस्कृतेश्च स्वरूपं प्रस्तौति, अपि तु परवर्तिनां काव्यानामप्युपजीव्यतां भजते। रामायणस्यैव कथावस्तु आदाय भास - कालिदास - भवभूति - भट्टि - राजशेखर - जयदेवप्रभृतयः कविवराः स्वानि काव्यानि रूपकादीनि च व्यरचयन्। रामायणं हि विश्वसाहित्यस्य प्राचीनतमेषु महाकाव्येषु भाषा - भाव - रचना - विधान - छन्दोयोजना - रसाभिव्यञ्जनानां दृष्ट्या समुत्कृष्टं महाकाव्यं प्रमाणितं भवति।

काव्यालोचनपरम्परायां रामायणस्य सिद्धरसत्वं प्रतिपादयता ध्वनिकृताऽऽनन्दवर्धनेनैवमुक्तम् -

सन्ति सिद्धरसप्रख्या ये च रामायणादयः ।
कथाश्रया न तैर्योज्या स्वेच्छा रसविरोधिनी ।। (ध्व० पृ० १४८)

आचार्योऽभिनवगुप्तः 'सिद्धरस' पदस्यार्थं स्फोटयति सिद्धः आस्वादमात्रशेषः, न तु भावनीयो रसो यस्मिन्। अर्थात् यत्र काव्ये रसस्य भावना न क्रियत अपि तु रस एव आस्वादरूपेण परिणमते, तत् सिद्धरसं काव्यमिति भावः। आसीद् वाल्मीकिर्विमलप्रतिभासम्पन्नो दैवीगुणान्वित आर्षदृष्टिमण्डितो महनीयः कविः। कवेर्वास्तविकस्वरूपस्य निदर्शनं तु समालोचकैर्वाल्मीकावेव प्राप्तम्। कवेः कल्पनायां दर्शनेन सह वर्णनस्यापि मणिकाञ्चनसंयोगो भवति। आसीन्महर्षेर्वस्तूनां निर्मलदर्शनं नित्यरूपम्।, परन्तु कवितायाः प्राकट्यं तदाभूद् यदा वर्णनस्योदयो जातः।

उक्तञ्चास्मिन् विषये भट्टतौतेन-

यथा हि दर्शने स्वच्छे नित्येऽप्यादिकवेर्मुनेः।
नोदिता कविता लोके यावज्जाता न वर्णना ।।

संस्कृतस्य काव्यधारा रसकूलमाश्रित्य प्रवक्ष्यतीत्यस्याभासस्तु तदैवाऽभूद् यदा स्नेहपरायणस्य सहचरस्याकस्मिकवियोगसन्तप्तायाः क्रौञ्च्याः करुणनिनादमाकर्ण्य महर्षेर्हृदयस्य शोकः श्लोकत्वमागतः। काव्यस्य जीवितं रसः, काव्यस्यात्मा रस इत्यस्ति प्रथमकवेर्महदवदानं समालोचनसंसारे।

मानवमूल्यस्याङ्कने, काव्यादर्शचित्रणे, जीवनस्योदात्तीकरणे, सत्येन शिवेन च सह सुन्दरस्य मञ्जुले समन्वये वाल्मीकेर्भारती विश्वसमक्षं भव्यमेकमादर्शं प्रस्तुत्य सज्जनानां चेतांस्यानन्दयिष्यतीति निश्चप्रचम्।

जानन्त्येव भवन्तो यदस्ति रामायणं महर्षेर्वाल्मीकेर्हृदयनिस्यन्दभूतं काव्यामृतम्। मर्यादापुरुषोत्तमस्य श्रीमद्रामस्य लोकोत्तरचरितवर्णनपरस्यास्य ग्रन्थरत्नस्य लोकप्रियतां निभाल्य नैके शेमुषीजुषो मनीषिणा ग्रन्थमिममाधृत्य तिलकशिरोमणितीर्थीयादीनि बहूनि व्याख्यानानि रचयामासुः। व्याख्यानेषु तेष्वन्यतमं वरीवर्ति गोविन्दराजीयं व्याख्यानम्। अस्य व्याख्यानस्य प्रणेता गोविन्दराजः स्वीयव्याख्यानस्य वास्तविकं नाम रामायणभूषणं' चक्रे। तथा हि-

पूर्वाचार्यकृतप्रबन्धजलधेस्तात्परत्नावली
ग्राहंग्राहमहं शठादिगुरुणा संदर्शितेनाध्वना।
अन्यव्याकृतिजातरूपशकलैरायोज्य सज्जीकृतैः
श्रीरामायणभूषणं विरचये पश्यन्तु निर्मत्सराः ।। (प्रस्ता०श्लो०,५)

व्याख्यानमिदं स्वप्रणेतृनाम्ना 'गोविन्दराजीय'मित्यपि लोके प्रथितमभूत्। आसीद् गोविन्दराजः काञ्चीवासिनः कौशिकगोत्रोत्पन्नस्य वरदराजस्यात्मजः। गोविन्दराजस्य गुरोर्नाम शठकोपदेशिक इत्यासीत्। तथाहि-

इत्थं कौशिकवंशमौक्तिकमणिर्गोविन्दराजाभिधो।
वात्स्यश्रीशठकोपदेशिकपदद्वन्द्वैकसेवारतः। (व्याख्यानस्यान्तिमः श्लोकः)

आसीद् गोविन्दराजगुरुः शठकोपदेशिकोऽहोविलाख्यस्य मठस्य षष्ठः स्वामी, यस्य स्थितिकालः षोडशशताब्द्या आरम्भः स्वीक्रियते। शठकोपदेशिको विजयनगरशासकस्य रामरायस्य समकालिको बभूव इत्यामनन्ति ऐतिह्यविदः। भावनाचार्येण प्रोत्साहितो गोविन्दराजः स्वकीयं रामायणव्याख्यानं विरचितवानिति युद्धकाण्डीय व्याख्यानस्य चरमपद्यात् ज्ञायते। बभूव भावनाचार्यो वाधूलगोत्रीय कण्डालवंशोद्भवस्तत्कालिकोऽतिविशिष्टः पुरुषः । भावनाचार्यस्य समयो विजयनगरनृपस्य कृष्णरायस्य राजकालसम्बद्धो मन्यते।

गोविन्दराजस्तिरुपतियात्राप्रसङ्गे स्वप्ने भगवतो वेङ्कटेशस्यादेशमवाप्य व्याख्यानमिदं विरचयामासेति तथ्यं व्याख्यानकृता स्वयमेवोरीकृतम्। तथा हि -

श्रीमत्यञ्जनभूधरस्य शिखरे श्रीमारुतेः सन्निधा
वग्रे वेङ्कटनाथकस्य सदनद्वारे यतिक्ष्माभृतः।
नानादेशसमागतैर्बुधगणै रामायणव्याक्रियां
विस्तीर्णां रचयेति सादरमहं स्वप्नेऽस्मि संचोदितः।। (प्रस्ता० श्लो० २)

गोविन्दराजस्य कालस्तेनोद्धृतग्रन्थकारसाहाय्येन निर्णेतुं शक्यते। गोविन्दराजेनोद्धृतस्य वेदान्तदेशिकास्यावसानसमयः १३६६ ईसवी विद्यते। वेदान्तदेशिकस्य पश्चाद्वर्तिनः शठकोपदेशिकभावनाचार्ययोः समकालिकस्य गोविन्दराजस्याविर्भावकालः षोडशशताब्दीति वक्तुं पार्यते।

गोविन्दराजीयाभिधे व्याख्याने वैष्णवसिद्धान्तसमीक्षया प्रतीयते यदयं गोविन्दराजो 'वेंगलइ' वंशोद्भवः किन्तूदारवृत्तिकः सन् 'वडगलइ' मतं प्रत्याकृष्टस्तन्मतस्य मान्याचार्ये वेदान्तदेशिकेऽतीव श्रद्धालुरासीत्[१]। तिरुपतिमधिवसन्नयं गोविन्दराजो रामायणस्य व्याख्यानं श्रावयतिस्म[२]।

सन्ति रामायणस्य त्रयो पाठाः । यथा (१) दाक्षिणात्यपाठः, (२) गौडीयपाठः, (३) पश्चिमोत्तरीयपाठः। एषु त्रिषु पाठेषु दाक्षिणात्यपाठमेवाधारीकृत्य गोविन्दराजेन स्वव्याख्यानं व्यरचि, गोविन्दराजकृतेन रामायणभूषणामिधेन गोविन्दराजीयापरनामधेयेन समलङ्कृतं रामायणं टी० आर० कृष्णाचार्यव्यासाचार्याभ्यां संशोध्य मुंवापुर्यां निर्णयसागरयन्त्रे मुद्रापयित्वा प्रकाशितम्। तस्मिन् संस्करणे गोविन्दराजीयव्याख्यानेन सह टिप्पण्यां स्थाने - स्थाने तिलक - तीर्थीय - शिरोमणि - तनिश्लोकी - विषमपदविवृतिप्रभृतिटीकामतानां समावेशो महत्त्वपूर्णो विद्यते। तत्संस्करणस्येदमेव वैशिष्ट्यं निपुणमाकलय्य-उत्तरप्रदेशसंस्कृतसंस्थानेन तस्य पुनर्मुद्रणमकारि। संस्थानद्वारा प्राकाश्यं नीतस्य दुर्लभव्याख्यानयुतस्यास्यास्ति महनीयमुपादेयत्वम्।

आशासे प्रामाणिकव्याख्यानसंवलितस्य रामायणस्य पुनः प्रकाशनेन प्रशस्तरामचरितानुरागिणो रामायण-कथापीयूषं पातुकामाः सहृदयाः परां मुदं प्राप्स्यन्तीति शम्।

- बलदेव उपाध्यायः

१- द्रष्टव्यम् ऐनल्स आफ भण्डारकर इन्स्टिच्यूट १९४२, पृ ३०-५४

२- आचार्य बलदेवोपाध्यायः, संस्कृतसाहित्य का इतिहास, पृ० २८-२९।

॥ श्रीः ॥

श्रीमद्वाल्मीकिरामायणम् ।

श्रीमद्गोविन्दराजीयव्याख्यासमलंकृतम् ।

॥ बालकाण्डम् १ ॥

॥ श्रीः ॥

श्रीमद्वाल्मीकिरामायणम् ।

श्रीमद्गोविन्दराजीयव्याख्यासमलंकृतम् ।

बालकाण्डम् १

श्रीरामचन्द्राय नमः ॥

प्रथमः सर्गः ॥ १ ॥

लोके उत्तमः पुरुषः क इति नारदंप्रति वाल्मीकिप्रश्ने तेन तंप्रति श्रीरामस्य पुरुषोत्तमत्वज्ञापनाय तद्गुणानुवादपूर्वकं संक्षेपेण तच्चरित्रकथनम् ॥ १ ॥

तपस्स्वाध्यायनिरतं तपस्वी वाग्विदां वरम् । नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुङ्गवम् ॥ १ ॥

श्रीरामचन्द्राय नमः ॥ ॥ आचार्यं शठकोपदेशिकमथ प्राचार्यपारंपरीं श्रीमल्लक्ष्मणयोगिवर्ययमुनावास्तव्यनाथादिकान् । वाल्मीकिं सह नारदेन मुनिना वाग्देवतावल्लभं सीतालक्ष्मणवायुसूनुसहितं श्रीरामचन्द्रं भजे ॥ १ ॥ श्रीमत्यञ्जनभूधरस्य शिखरे श्रीमारुतेः सन्निधावग्रे वेङ्कटनायकस्य सदनद्वारे यतिक्ष्माभृतः । नानादेशसमागतैर्बुधगणै रामायणव्याक्रियां विस्तीर्णां रचयेति सादरमहं स्वप्नेऽस्मि संचोदितः ॥ २ ॥ क्वाहं मन्दमतिर्गभीरहृदयं रामायणं तत्क च व्याख्यानेऽस्य परिभ्रमन्नहमहो हासास्पदं धीमताम् । को भारोत्र मम स्वयं कुलगुरुः कोदण्डपाणिः कृपाकूपारो रचयत्यदः सपदि मज्जिह्वाग्रसिंहासनः ॥ ३ ॥ वैयर्थ्यं पुनरुक्ततामनुचितारंभं विरोधं मिथोस्साधुत्वं च पदप्रबन्धरचनावाक्येषु निश्शेषयन् । स्वारस्यं च पदेपदे प्रकटयन् रामायणस्य स्वयं व्याख्यामेष तनोति सज्जनमुदे गोविन्दराजाह्वयः ॥ ४ ॥ पूर्वाचार्यकृतप्रबन्धजलधेस्तात्पर्यरत्नावलीर्ग्राहंग्राहमहं शठारिगुरुणा संदर्शितेनाध्वना । अन्यव्याकृतिजातरूपशकलैरायोज्य सज्जीकृतैः श्रीरामायणभूषणं विरचये पश्यन्तु निर्मत्सराः ॥ ५ ॥ सुस्पष्टमष्टादशकृत्व एत्य श्रीशैलपूर्णाद्यतिशेखरोयम् । शुश्राव रामायणसंप्रदायं वक्ष्ये तमाचार्यपरंपरात्तम् ॥ ६ ॥ क्वचित्पदार्थं क्वचिदन्वयार्थं क्वचित्पदच्छेदसमर्थनानि । क्वचित्क्वचिद्गाढनिगूढभावं वक्ष्ये यथापेक्षमवेक्षणीयम् ॥ ७ ॥

अवतारिका ॥ श्रियःपतिरवाप्तसमस्तकामः समस्तकल्याणगुणात्मकः सर्वेश्वरः "वैकुण्ठेतु परे लोके श्रिया सार्धं जगत्पतिः । आस्ते विष्णुरचिन्त्यात्मा भक्तैर्भागवतैः सह ।" इत्युक्तरीत्या श्रीवैकुण्ठाख्ये दिव्यलोके श्रीमहामणिमण्टपे श्रीभूमिनीलाभिःसह रत्नसिंहासनमध्यासीनो नित्यैर्मुक्तैश्चनिरन्तरपरिचर्यमाणचरणनलिनोपि तद्वदेवस्वचरणयुगलपरिचरणार्हानपितद्धीनान् प्रलयेप्रकृतिविलीनान् मधूच्छिष्टमग्नहेमकणसदृक्षान् क्षीणज्ञानान् जीवानवलोक्य "एवं संसृतिचक्रस्थे भ्राम्यमाणे स्वकर्मभिः । जीवे दुःखाकुले विष्णोः कृपा काप्युपजायते ।" इत्युक्तरीत्या दयमानमनाः "विचित्रा देहसंपत्तिरीश्वराय निवेदितुम् । पूर्वमेव कृता ब्रह्मन् हस्तपादादिसंयुता ।" इत्युक्तप्रकारेण महदादिसृष्टिक्रमेण तेषां स्वचरणकमलसमाश्रयणोचितानि करणकलेवराणि दत्त्वा नदीतरणाय दत्तैः प्लवैर्नदीरयानुसारेण सागरमवगाहमानेष्विव तेषु तैर्विषयान्तरप्रवणेषु तेषांसदसद्विवेचनाय "शासनाच्छास्त्रं "इत्युक्तरीत्या स्वशासनरूपं वेदाख्यं शास्त्रं प्रवर्त्यापि तस्मिन्नप्रतिपत्तिविप्रतिपत्त्यन्यथाप्रतिपत्तिभिस्तैरनादृते स्वशासनातिलङ्घिनं जनपदं स्वयमेव साधयितुमभियियासुरिव वसुधाधिपतिः स्वाचारमुखेन तान् शिक्षयितुं रामादिरूपेण चतुर्धाऽवतितीर्षुरन्तराऽमरगणैः सद्रुहिणैरभ्यर्थितः स्वाराधकस्य दशरथस्य मनोरथमपि पूरयितुं चतुर्धाऽवततार ।

तत्ररामरूपेणावतीर्य रावणं निहत्य पितृवचनपरिपालनादिसामान्यधर्ममन्वतिष्ठत् । लक्ष्मणरूपेण रावणिं निरस्य भगवच्छेषत्वरूपंविशेषधर्मं भरतरूपेण गन्धर्वान्निर्वास्य भगवत्पारतन्त्र्यरूपं शत्रुघ्नरूपेण लवणासुरं ध्वंसयित्वा भागवतशेषत्वं। तानिमान् धर्मान् तानीमानि चापदानानि तत्कालमात्रपर्यवसितानि भविष्यन्तीतिमन्वानः सर्वलोकहितपरः पितामहो भगवान् ब्रह्मा रामचरित्रपवित्रितं शतकोटिप्रविस्तरं प्रबन्धंनिर्माय तं नारदादीनध्याप्य भूलोकेऽपिसंततरामसन्त्रानुसन्धानसन्धुक्षितहृदयवाल्मीकिमुखेन संग्रहेणप्रवर्तयितुं नारदंप्रेषयामास। तदुक्तंमात्स्ये "वाल्मीकिना च यत्प्रोक्तं रामोपाख्यानमुत्तमम् । ब्रह्मणाचोदितं तच्च शतकोटिप्रविस्तरम्। आहृत्य नारदेनैव वाल्मीकाय निवेदितं"इति। वाल्मीकिरपिनिखिलवेदान्तविदितपरतत्त्वनिर्दिधारयिषया यदृच्छयोपगतंनारदंपृष्ट्वाऽवगतपरतत्त्वस्वरूपः तदनुप्रसन्नेन विधिनादत्तसकलसाक्षात्कारप्रबन्धनिर्माणशक्तिर्वेदोपबृंहणमारभमाणः तस्यार्थप्रधानसुहृत्संमितेतिहासतां व्यङ्ग्यप्रधानकान्तासंमितकाव्यतांच पुरस्कुर्वन् "काव्यालापांश्चवर्जयेत्" इतिनिषेधस्यासत्काव्यविषयतां चनिर्धारयन्स्वग्रन्थेप्रेक्षावतांप्रवृत्त्यर्थंतदङ्गानिदर्शयति प्रथमतश्चतुस्सर्ग्या । तत्रप्रथमसर्गेणविषयप्रयोजनेदर्शयति। तत्रच "तद्विद्धिप्रणिपातेनपरिप्रश्नेनसेवया" इतिवेदान्तरहस्यस्यप्रश्नपूर्वकंज्ञेयत्वविधानात् "नापृष्टःकस्यचिद्ब्रूयात्" इत्यपृष्टोत्तरस्यप्रत्यादिष्टत्वाच्च प्रश्नभाविष्करोत्यादितःपञ्चश्लोक्या ।

अथप्रारिप्सितस्यग्रन्थस्यनिष्प्रत्यूहपरिपूरणायप्रचयगमनायचगुरुनमस्कारंदेवतानमस्कारंचविदधाति—

तपस्स्वाध्यायेति। तत्र "आचार्याद्धैवविद्याविदितासाधिष्ठंप्रापत् । आचार्यवान् पुरुषोवेद" इत्यादिश्रुत्या सदाचार्योपदेशस्यैवातिशयावहत्वात्स्वगुरोराचार्यलक्षणपूर्तिंदर्शयति द्वितीयान्तपदैः । तत्रवेदसंपन्नत्वमाह तपस्स्वाध्यायनिरतमिति । तपश्चस्वाध्यायश्चतपस्स्वाध्यायौ "अल्पाच्तरं" इतितपश्शब्दस्यपूर्वनिपातः। तपः चान्द्रायणादि स्वाध्यायो वेदः । "स्वाध्यायोवेदतपसोः" इतिवैजयन्ती। तयोर्निरतंनिरन्तरासक्तं। आवश्यकत्वादेतदुभयमुक्तम्। तदाहमनुः "तपोविद्याचविप्रस्यनिश्श्रेयसकरंपरं । तपसाकल्मषंहन्तिविद्ययाज्ञानमश्नुते"इति। यद्वा तपोज्ञानं तपआलोचनइत्यस्माद्धातोरसुन्प्रत्ययः। श्रुतिश्चात्रभवति "यस्यज्ञानमयंतपः" इति। योगइतियावत्। स्वाध्यायोवेदः तयोर्निरतं "स्वाध्यायाद्योगमासीतयोगात्स्वाध्यायमावसेत्। स्वाध्याययोगसंपत्त्यागमिष्यतिपरांगतिं" इत्युक्तप्रकारेणसक्तमित्यर्थः। यद्वा तपोवेदः "तपोहिस्वाध्यायः"इतिश्रुतेः। स्वाध्यायोजपः "स्वाध्यायो वेदजपयोः"इत्युक्तेः। तत्रनिरतम्। "स्वाध्यायान्मा प्रमदः। वेदमेवजपेन्नित्यं" इत्युक्तरीत्यासक्तमित्यर्थः। यद्वा तपोब्रह्म "ब्रह्मैतदुपास्स्वैतत्तपः" इतिश्रुतेः तपःप्रधानःस्वाध्यायस्तपस्स्वाध्यायः । शाकपार्थिवादित्वान्मध्यमपदलोपीसमासः। वेदान्तइतियावत्। तत्रनिरतम् "स्वाध्यायप्रवचनाभ्यांनप्रमदितव्यम्" इत्युक्तरीत्याऽध्ययनाध्यापनादिपरमित्यर्थः । यद्वा तपो व्याकरणम्। तथोक्तंवाक्यपदीये । "आसन्नंब्रह्मणस्तस्यतपसामुत्तमंतपः । प्रथमंछन्दसामङ्गमाहुर्व्याकरणंबुधाः इति"। तत् इतरेषामङ्गानामुपलक्षणम्। तत्सहितःस्वाध्यायःतपस्स्वाध्यायः तत्रनिरतं साङ्ग-

श्रीरामचन्द्रायनमः । **महेश्वरतीर्थीयं**। परब्रह्मात्मिकां देवीं भुक्तिमुक्तिफलप्रदाम् । प्रणम्य स्तौमि तामेव ज्ञानशक्तिं सरस्वतीम् ॥ १ ॥ कारुण्यामृतनीरमाश्रितजनश्रीचातकानन्ददं शार्ङ्गाखण्डलचापमम्बुजभवोग्रेन्द्रादिबर्हीष्टदम् । चारुस्मेरमुखोल्लसज्जनकजासौदामिनीशोभितं श्रीरामांबुदमाश्रयेऽखिलजगत्संसारतापापहम् ॥ २ ॥ प्रणम्य नारायणतीर्थदेशिकान्भवानलार्तामृतपूरनीरदान् । करोति रामायणतत्वदीपिकां महेशतीर्थाख्यमुनिर्यथामति ॥ ३ ॥ सर्वेषां ग्रन्थकर्तॄणां लेखकोऽहं न कल्पकः । लिखितान्यत्र तैर्यानि लिख्यन्ते तान्यतो मया ॥ ४ ॥ ग्रन्थबाहुल्यभीत्याऽत्र क्वचिच्छब्दसुशोधनम् । निघण्टुकथनं चार्थः पदानां लिख्यतेऽधुना ॥ ५ ॥ सीतारामौसमुद्दिश्य विराधखररावणैः । उक्तानां परुषोक्तीनां वास्तवार्थोचवर्ण्यते ॥ ६ ॥ ब्रह्मलोकप्रसिद्धंशतकोटिप्रविस्तरंरामचरितं भूलोकवर्तिनांचतुर्णांवर्णानांतापत्रयविमोचनाय संक्षिप्यरचयितुमुद्युक्तः परमकारुणिकोब्रह्मा वाल्मिकिरूपेण भूमौ स्वांशेनसमभवत्। तथाचस्कान्दे पार्वतींप्रति शिववचनम्। "वाल्मीकिरभवद्ब्रह्मा वाणी वाक्तस्य रूपिणी। चकार रामचरितं पावनं चरितव्रतः " इति । एवंच ब्रह्मांशभूतोभगवान्प्राचेतसः स्वचिकीर्षितं श्रीमद्रामचरितं गुरुमुखाच्छ्रोतव्यमिति न्यायेन भगवत्कथोपदेशेन स्वगुरुं नारदं प्रतीक्षमाण आस्तेस्म। अथब्रह्मनियोगेनसमागतंभगवन्तं नारदमभ्यर्च्य वाल्मीकिः कोन्वस्मिन्नित्यादिपप्रच्छ। सचदेवर्षिः परमेश्वरकथाप्रश्नमुदितमनाः श्रीरामचरितंसंक्षिप्यवाक्यरूपेणोपदि-

वेदाध्यायिनमित्यर्थः । यद्वा तपः स्वं यस्यासौ तपस्वः । अध्यायोवेदः इङ्अध्ययनेइत्यस्माद्धातोः "अध्यायन्याय—" इत्यादिनानिपातनात् । अतएव "स्वाध्यायोध्येतव्यः" इत्यत्रस्वस्यअध्यायःस्वाध्यायःस्वशाखेत्याचार्यैर्व्याख्यातं तत्रनिरतोऽध्यायनिरतः । तपस्वश्चासावध्यायनिरतश्च तपस्वाध्यायनिरत इतिकर्मधारयः तम् । यद्वा तपोब्रह्म तद्रूपः स्वाध्यायः तपस्वाध्यायः तस्मिन्निरतं सामगानलोलमित्यर्थः । "वेदानांसामवेदोस्मि" इतिभगवतागीतत्वात् । एवंवेदाध्ययनमुक्तम् । अथ "यदधीतमविज्ञातंनिगदेनैवशब्द्यते । अनग्नाविवशुष्कैधोनतज्ज्वलतिकर्हिचित्" इतिकेवलाध्ययनस्यनिन्दितत्वात्तदर्थज्ञत्वमाह । वाग्विदांवरमिति । वाक् वेदः "अनादिनिधनाह्येषावागुत्सृष्टास्वयंभुवा" इतिवाक्शब्दस्यवेदेप्रयोगात् । तांविदन्तिजानन्तीतिवाग्विदः वेदार्थज्ञाः तेषांमध्येवरंश्रेष्ठं । निर्धारणेषष्ठी । यद्वा वाक् व्याकरणं "यश्चव्याकुरुतेवाचम्" "वाग्योगविदुष्यतिचापशब्दैः" इत्यादौव्याकरणपर्यायत्वेनशिष्टैर्व्यवहृतत्वात् । एतदङ्गान्तराणामुपलक्षणं । षडङ्गविदामग्रेसरमित्यर्थः । एतेनवेदार्थाभिज्ञत्वमर्थसिद्धम् । यद्वा वाग्विदः यावद्विवक्षितार्थप्रतिपादनक्षमशब्दप्रयोगविदः तेषांवरम् । पूर्ववेदाध्ययनमुक्तं अत्रतदध्यापनम् । यद्वा गोवलीवर्दन्यायेन वाचः वेदव्यतिरिक्तानिशास्त्राणि तद्विदांवरम् । अनेनचतुर्दशविद्यास्थानवेदित्वमुक्तम् । यद्वा भूमविद्योपक्रमे नारदेनात्मनःसर्वविद्याभिज्ञत्वमुक्तम् "ऋग्वेदंभगवोध्येमियजुर्वेदंसामवेदमाथर्वणंचतुर्थमितिहासपुराणंपञ्चमंवेदानांवेदंपित्र्यंराशिंदैवंनिधिंवाकोवाक्यमेकायनंदेवविद्यांब्रह्मविद्यांभूतविद्यांक्षत्रविद्यांनक्षत्रविद्यांसर्पदेवजनविद्यामेतद्भगवोध्येमि" इति । तदिदमुच्यतेवाग्विदांवरमिति । यद्वा वाक्सरस्वती "गीर्वाग्वाणीसरस्वती" इतिवचनात् । तयाविद्यन्तेलभ्यन्तइतिवाग्विदः सरस्वतीपुत्रामरीच्यादयः । विद्लृलाभइत्यस्माद्धातोःकर्मणिक्विप् । भगवद्भक्ततयातेषांवरम् । अनेनाभिजात्यमुक्तम् । तपस्वाध्यायनिरतमित्यनेन विद्योक्ता । समाहितत्वमाह—मुनिपुङ्गवमिति । तेन "अभिजनविद्यासमुदेतंसमाहितंसंस्कर्तारमीप्सेत्" इत्यापस्तंबोक्तमाचार्यलक्षणंज्ञापितम् । मुनयोमननशीलाः "मनेरुच्च" इतिइन्प्रत्ययः । पुमांश्चासौगौश्चेतिपुंगवः "गोरतद्धितलुकि" इतिसमासान्तष्टच्प्रत्ययः । श्रेष्ठइत्यर्थः । "वुधेचपुङ्गवःश्रेष्ठेवृषभेभिषजांवरे" इतिविश्वः । मुनिषुपुङ्गवोमुनिपुङ्गवः । "सप्तमी" इतियोगविभागात् नागोत्तमादिवत्समासः तं । तपस्वाध्यायनिरतमित्यनेनवेदार्थस्यश्रवणमुक्तम् । वाग्विदांवरमित्यनेनमननम् । मुनिपुङ्गवमित्यनेननिदिध्यासनम् । यद्वा "तस्माद्ब्राह्मणःपाण्डित्यंनिर्विद्यबाल्येनतिष्ठासेत् । बाल्यंचपाण्डित्यंचनिर्विद्याथमुनिः" इत्युक्तक्रमेणत्रिभिरेतैःपदैः पाण्डित्यबाल्यमौनान्युक्तानि । नरस्यसंबन्धि नारं "नराच्चेतिवक्तव्यं" इत्यण् । अज्ञानमित्यर्थः । तत्द्यतिखण्डयतीतिनारदः । दोअवखण्डनेइत्यस्माद्धातोः "आदेचउपदेशेऽशिति" इत्यात्वेसति "आतोनुपसर्गेकः" इतिकप्रत्ययः । अज्ञाननिवर्तकइत्यर्थः । उक्तंचनारदीये "गायन्नारायणकथांसदापापभयापहाम् । नारदोनाशयन्नेतिनृणामज्ञानजंतमः" इति । यद्वा नारंज्ञानंतद्ददातीतिनारदः । यद्वा नरतिसद्गतिंप्रापयतीतिनरः परमात्मा । नृनयइत्यस्माद्धातोःपचाद्यच् । तदुक्तंभारते "नरतीतिनरःप्रोक्तःपरमात्मासनातनः" इति । सएवनारः । तंददात्युपदिशतीतिनारदः तं । एवमाचार्यलक्षणपूर्तिमुक्त्वा अधिकारित्वसंपूर्तिप्रदर्शनाय शिष्यलक्षणमाह—तपस्वीत्यादिना । तपोस्यास्तीतितपस्वी "तपस्सहस्राभ्यांविनीनी" इतिमत्वर्थीयोविनिप्रत्ययः । भूमादयोमत्वर्थाः । तदुक्तं "भूमनिन्दाप्रशंसासुनित्ययोगेऽतिशायने । संसर्गेऽस्तिविवक्षायांभवन्तिमतुवादयः" इति । प्रशस्ततपस्कइत्यर्थः । तेन "तपसाब्रह्मविजिज्ञासस्व । सतपोतप्यत । सतपस्तप्त्वा आनन्दोब्रह्मेतिव्यजानात्" इतिश्रुतंब्रह्मज्ञानसाधनंतपउक्तम् । यद्वा तपोवेदोव्याकरणंज्ञानंच तद्वान् । तपश्शब्दानांतत्रावृत्त्येकशेषाद्यन्यतमेन अर्थस्मरणेसति

इय जगाम । तदनु तमसातीरमुपसृत्यचरतः व्याधविद्धक्रौञ्चदर्शनजनितशोकस्यवाल्मीकेर्वदनात् मानिषादेतिश्लोकउदभूत् । ततः स्वाश्रममागत्य तमेवानुसंदधानः सविस्मयमास्त । अथभगवांश्चतुर्मुखआगत्य "मच्छन्दादेवतेब्रह्मन्" इत्यभिधाय रामचरितं सर्वंविदितंभवत्वितिवरंप्रदाय पद्यैरेवरामायणंकुर्वित्युपदिश्य स्वधामजगाम । अथचतुर्विंशत्यक्षरगायत्र्याख्यपरब्रह्मविद्याविलासभूतंरामायणं चतुर्विंशतिसहस्रैःश्लोकैश्चकार तदिदंव्याक्रियते । तपःस्वाध्यायेत्यादिगायत्रीवर्णसंयुक्तश्लोकसंकेतः । चतुर्विंशतिसंख्याका गायत्रीवर्णसंयुताः । ये श्लोकाः सन्ति तानत्र विलिखामि यथाक्रमम् ॥ १ ॥ श्लोके च प्रतिसाहस्रं प्रथमेप्रथमे क्रमात् । गायत्र्यक्षरमेकैकं स्थापयामास वै मुनिः ॥ २ ॥ गायत्र्यास्त्रीणि चत्वारि द्वेद्वे त्रीण्यथ षट्क्रमात् । चत्वारि सप्तकाण्डेषु

एकपदोपात्तकृतिकालादीनामिव अन्वयबोधःसुलभः । तथ चाधीतसाङ्गसशिरस्कवेदोऽधिगताल्पास्थिरफलकेवलकर्मज्ञानइत्युक्तं । निर्वेदश्चतपः "तपस्वीतापसेशोच्ये" इतिवैजयन्ती । तेन संजातमोक्षाभिलाष इत्युक्तं । तादृशएवहि ब्रह्मज्ञानाधिकारी । तपस्वीत्यनेन शमदमादिसंपत्तिरपिसिद्धा । यद्वा तपोन्यासः "तस्मान्न्यासमेषांतपसामतिरिक्तमाहुः" इतिश्रुतेः । न्यासःशरणागतिःप्रणिपातरूपा । एवं "तद्विद्धिप्रणिपातेनपरिप्रश्नेनसेवया" इत्याद्युक्तानिप्रणिपातपुरःसराणिदर्शितानि । वल्मीकस्यापत्यंवाल्मीकिः । "अतइञ्" इतीञ्प्रत्ययः । नन्वसौकथंवल्मीकापत्यं । यतोयंभृगुपुत्रएवप्रतीयते । तथाचश्रीविष्णुपुराणे "ऋक्षोभूद्भार्गवस्तस्माद्वाल्मीकिर्योभिधीयते" इति । अत्रापि उत्तरकाण्डेवक्ष्यति "भार्गवेणेतिसंस्कृतौ । भार्गवेणतपस्विना" इतिच । अन्यत्रचप्रचेतोपत्यत्वमभिधीयते "चक्रेप्रचेतसःपुत्रस्तंब्रह्माप्यन्वमन्यत" इति "वेदःप्राचेतसादासीत्" इतिच प्रसिद्धं । अतः कथमस्यवल्मीकापत्यत्वम् । उच्यते । निश्चलतरतपोविशेषेणास्यवल्मीकावृतौजातायांप्रचेतसावरुणेनकृतनिरन्तरवर्षेणप्रादुर्भावोऽभूदिति भृगुपुत्रस्यैवास्यप्रचेतसःपुत्रत्वंवल्मीकापत्यत्वंचसंगच्छते । ननुकथंतत्प्रभवत्वमात्रेणतदपत्यत्वम् । मैवम् । गोणीपुत्रःकलशीसुतइत्यादिव्यवहारस्यतत्प्रभवेपिबहुलमुपलब्धेः । उक्तं चब्रह्मवैवर्ते "अथाब्रवीन्महातेजाब्रह्मालोकपितामहः । वल्मीकप्रभवोयस्मात्तस्माद्वाल्मीकिरित्यसौ" इति । मास्त्वपत्यार्थत्वं । तथापिवाल्मीकिशब्दस्साधुरेव गहादिषुपठितत्वात् । यद्वाभृगुवंश्यःकश्चित् प्रचेतानाम तस्यायंपुत्रः ऋक्षोनाम । "चक्रेप्रचेतसः पुत्रः" इतिपुत्रत्वाभिधानात् । भार्गवभृगुनन्दनशब्दौ रामेराघवरघुनन्दनशब्दवत् उन्नेयौ । वाल्मीकिशब्दः पुत्रत्वोपचारात् । अतएव क्वचित् "वाल्मीकेनमहर्षिणा" इतिसंबन्धमात्रेऽण्प्रयुज्यते । सत्स्वपिनामान्तरेषुवाल्मीकिशब्देनाभिधानं ज्ञानाङ्गशमदमाद्युपेतत्वस्फोरणाय । परिपप्रच्छ परि विशेषेण पृष्टवान् । "कोन्वस्मिन्" इत्यादिवक्ष्यमाणमितिशेषः । तपइतिभिन्नंपदंवाब्रह्मवाचि । नारदंब्रह्मपरिपप्रच्छेत्यर्थः । अतोनद्विकर्मकत्वहानिः । उक्तंहिसूत्रकृता "दुह्याच्पच्दण्ड्रुधिप्रच्छिचिब्रूशासुजिमथ्मुषां" इत्यादिनाप्रच्छेर्द्विकर्मकत्वं । परिपप्रच्छेति परोक्षेलिट् । प्रश्नस्यपरोक्षत्वं विवक्षितभगवद्गुणानुसंधानकृतवैचित्यात् । "सुप्तोहंकिलविललाप" इतिवत् । विभक्तिप्रतिरूपकमव्ययंवा । स्वविनयव्यञ्जनायप्रथमपुरुषनिर्देशोवा "ईश्वरःसर्वभूतानांहृद्देशेऽर्जुनतिष्ठति" इतिवत् । स्वस्मिन्नन्यत्वमारोप्यपरोक्षनिर्देशोवा । अनेन "परीक्ष्यलोकान्कर्मचितान् ब्राह्मणोनिर्वेदमायात् नास्त्यकृतःकृतेन । तद्विज्ञानार्थंसगुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियंब्रह्मनिष्ठं । तस्मैसविद्वानुपसन्नायसम्यक्प्रशान्तचित्तायशमान्विताय । येनाक्षरंपुरुषंवेदसत्यंप्रोवाचतांतत्त्वतोब्रह्मविद्याम्" इत्याथर्वणिकीश्रुतिर्गुरूपसदनविषयोपबृंह्यते । तथाहि तपस्वीत्यनेन "परीक्ष्यलोकान् कर्मचितान् ब्राह्मणोनिर्वेदमायात्" इत्यस्यार्थोऽदर्शि । अधीतसाङ्गसशिरस्कवेदोऽधिगताल्पास्थिरफलकेवलकर्मज्ञानतयासंजातमोक्षाभिलाषोहि तपस्विशब्दार्थोवर्णितः । वाल्मीकिरित्यनेन "सम्यक्प्रशान्तचित्तायशमान्विताय" इत्यस्यार्थोदर्शितः । स्वाध्यायनिरतमित्यनेन श्रोत्रियपदार्थउक्तः । "श्रोत्रियंश्छन्दोऽधीते" इतिश्रोत्रियशब्दार्थप्रकाशनात् । वाग्विदांवरमित्यनेन विद्वच्छब्दार्थः । मुनिपुङ्गवमित्यनेन ब्रह्मनिष्ठशब्दार्थः । नारदशब्देनगुरुशब्दार्थः । "गुशब्दस्त्वन्धकारःस्याद्रुशब्दस्तन्निरोधकः । अन्धकारनिरोधित्वाद्गुरुरित्यभिधीयते" इतितन्निरुक्तिः । परिपप्रच्छेत्यनेन तद्विज्ञानार्थंसगुरुमेवाभिगच्छेदित्येतदुपपादितं "विधिवदुपसन्नः पप्रच्छ" इति श्रुतेः । अत्र ब्रह्मवाचितपःशब्दप्रयोगेण देवतानमस्काररूपंमङ्गलमाचरितं । तथोक्तं । "अइतिभगवतोनारायणस्यप्रथमाभिधानमभिदधताकिंनाममङ्गलंनकृतम्" इति । "देवतावाचकाःशब्दायेचभद्रादिवाचकाः । ते सर्वेमङ्गलार्थाःस्युर्लिपितोगणतोपिच" इति निरन्तरनिरतिशयानन्दरूपंतपोज्ञानरूपंब्रह्म स्वाध्याय सुष्ठुध्यात्वेतिवा देवतानमस्कारः । गुरुनमस्कारश्चकृतोभवति । कथम् । तपस्सुनिरतंनारदमाध्याय परिपप्रच्छेति । यद्वा परि पूजयित्वेत्यर्थः "परिः समन्ततोभावव्याप्तिदोषकथासुच । भाषाश्लेषेपूजनेचवर्जनेव्वसनेशुभे" । इतिवचनात् नारदंसंपूज्यपप्रच्छेत्यर्थः । "पराशरंमुनिवरंकृतपौर्वाह्णिकक्रियम् । मैत्रेयःपरिपप्रच्छप्रणिपत्या

स्थापितान्यक्षराणितु ॥ ३ ॥ तत्र तत् इतिगायत्र्याःप्रथमाक्षरम् । तपःस्वाध्यायेति । **शिरोमणिः** । वाल्मीकिरिति । "ऋक्षोभूद्भार्गवस्तस्माद्वाल्मीकिर्योऽभिधीयते" इति विष्णुपुराणवचनात् ऋक्षइतितस्यरूढंनाम । तस्यात्रानुक्तिस्तु "आत्मनामगुरोर्ना-

को न्वस्मिन्सांप्रतं लोके गुणवान्कश्च वीर्यवान् । धर्मज्ञश्च कृतज्ञश्च सत्यवाक्यो दृढव्रतः ॥ २ ॥

भिवाद्यच" इतिवत् । अस्यश्रीरामायणस्यगायत्र्यक्षर-
सङ्ख्यानुसारेणचतुर्विंशतिसहस्रग्रन्थसङ्ख्ययाप्रवृत्तत्वा
त्प्रथमसहस्रोपक्रमेतकारःप्रयोक्तव्यइति सत्स्वपिब्रह्म-
वाचकेषुशब्दान्तरेषु तपश्शब्दस्यैवप्रयोगः । प्रबन्धा-
दौतकारप्रयोगश्चावश्यकः । तस्यवक्तुर्वाचकस्यचसौ-
ख्यकरत्वात् । तथोक्तं "वस्तुलाभकरोणस्तुतकारःसौ-
ख्यदायकः" इति । साहित्यचूडामणौतु "तकारोवि-
घ्ननाशकः" इत्युक्तम् । किंच तकारस्यजलंभूतंबृहस्प-
तिर्देवता । अतःशुभावहोऽनेनप्रबन्धारंभः । अतएवो-
क्तंचमत्कारचन्द्रिकायाम् "वर्णानामुद्भवःपश्चाद्व्यक्तिः
सङ्ख्याततःपरम् । भूतबीजविचारश्चततोवर्णग्रहाअ-
पि" इत्यारभ्य "एतत्सर्वमविज्ञाययदिपद्यंवदेत्कविः ।
केतकारूढकपिवद्भवेत्कण्टकपीडितः" इति । "कार-
णात्पञ्चभूतानामुद्भूतामातृकायतः । अतोभूतात्मकाव-
र्णाःपञ्चपञ्चविभागतः । वाय्वग्निभूजलाकाशाःपञ्चा-
शल्लिपयःक्रमात् । पञ्चह्रस्वाःपञ्चदीर्घाबिन्द्वन्ताःसन्ध-
यस्तथा । तत्रस्वरेशःसूर्योयंकवर्गेशस्तुलोहितः । चव-
र्गप्रभवःकाव्यष्टवर्गाद्बुधसंभवः । तवर्गोत्थःसुरगुरुः
पवर्गोत्थःशनैश्चरः । यवर्गजोयंशीतांशुरितिसप्तग्रहाः
क्रमात्" इति । अत्रतपस्स्वाइतियगणः आदिलघुत्वात् ।
तदुक्तं "आदिमध्यावसानेषुयरतायान्तिलाघवम् ।
भजसागौरवंयान्तिमनौतुगुरुलाघवम्" इति । यगण-
प्रयोगश्चार्थकरइत्युक्तंचमत्कारचन्द्रिकायाम् "करोत्य-
र्थानादिलघुर्यगणोवायुदैवतः" इति । ननुतपस्तापः सु-
तरामाधिःस्वाधिः तयोरायेनिरतमितिग्रन्थारंभेअश्ली-
लवचनमनुचितम् । तदुक्तं "अश्लीलंथदमाङ्गल्यजुगु-
प्साव्रीडभीकरम्" इति । मैवम् । प्रसिद्धिविशेषेणत-
पोवेदयोरेवप्रथमतरंबुद्ध्यारोहेणाश्लीलत्वप्रसङ्गाभावा-
त् । यथाभगिनीलिङ्गादिप्रयोगेषु । अत्रसर्वत्रप्रायेणप-
थ्यावक्त्रंवृत्तम् । तदुक्तंवृत्तरत्नाकरे "युजोर्जेनसरि-
द्भर्तुःपथ्यावक्त्रंप्रकीर्तितम्" इति । वृत्तविशेषास्तुतत्र-
तत्रवक्ष्यन्ते । अत्रवृत्त्यनुप्रासःशब्दालंकारः तकारा-
दीनामावृत्तेः । तदुक्तंकाव्यप्रकाशे "वर्णसाम्यमनुप्रा-
सः" इति । विशेषणानांसाभिप्रायत्वात्परिकरोनामा-
र्थालंकारः । उक्तमलंकारसर्वस्वे "विशेषणानांसाभि-
प्रायत्वेपरिकरः" इति । तपस्स्वाध्यायनिरतत्वादीनांगु-
रूपसत्तिहेतुज्ञानानुष्ठानप्रतिपादकत्वात् पदार्थहेतुकं-
काव्यलिङ्गमलंकारः "हेतोर्वाक्यपदार्थत्वेकाव्यलि-
ङ्गमलंकृतिः" इतिलक्षणात् । अत्रवाल्मीकिनारदयोः
स्वरूपकथनेन शिष्याचार्याभ्यामेवंभवितव्यमितिद्योत
नात् वाक्यगतवस्तुनावस्तुध्वनिः ॥ १ ॥

॥ कथंपरिपप्रच्छेत्याकाङ्क्षायांप्रश्नप्रकारंदर्शयति—को
न्वित्यादिश्लोकत्रयेण । "नुपृच्छायांविकल्पेच"इत्यम-
रः । अस्मिन्लोके भूलोके सांप्रतं अस्मिन्काले । "अ-
स्मिन्कालेधुनेदानींसंप्रत्येतर्हिसांप्रतम्" इतिवाणः ।
लोकान्तरेविष्णोर्विदितत्वात् अत्रैवकालान्तरेनृसिंहादेः
प्रसिद्धत्वाच्चतद्व्यावृत्त्यर्थमेवमुक्तम् । गुणाअस्यसन्तीति
गुणवान् । भूमादयोमत्वर्थाः । अस्मिँल्लोकेअस्मिन्काले-
कोवासकलकल्याणगुणसंपन्नइत्यर्थः । एवंसामान्येन
गुणसमुदायं पृष्ट्वा विशिष्यतत्तद्गुणाश्रयंपृच्छति—कश्च
वीर्यवान्इत्यादिना । यद्वा गुण्यतेआवर्त्यते पुनःपुनरा-
श्रितैरनुसन्धीयतइतिगुणः सौशील्यम् । "गुणस्त्वावृ-
त्तिशब्दादिज्येन्द्रियामुख्यतन्तुषु"इतिविश्वः । सुशीलं
हिनाम महतोमन्दैःसहनीरन्ध्रेणसंश्लेषः । तस्याधिक्यं
सौशील्यं तद्वान् । सौशील्येगुणशब्दोभियुक्तैःप्रयुक्तः ।
"वशीवदान्योगुणवानृजुःशुचिः" इति । कोवासौशी-
ल्यवानित्यर्थः । सर्वत्र प्रश्ने नु इति किंशब्दोपियत्रनप्र-
युक्तस्तत्रानुषञ्जनीयः । एकेनैवकिंशब्देनोपपत्तावप्या-
दरातिशयात् पुनःपुनस्तत्प्रयोगः । "प्रदानवदेवतदु-
क्तं" इतिन्यायेन प्रतिगुणंगुण्यावृत्त्यभिप्रायेणवा लोके
गुण संबन्धाद्गुण्यतिशयः इहतुगुणिसंबन्धाद्गुणातिशय
इतिद्योतनाय गुणिनःप्रथमंनिर्देशः । "गुणास्सत्यज्ञा-
न—"इत्युक्तेः । कश्चवीर्यवान् चकारउक्तसमुच्चये ।
सत्स्वपिविकारहेतुष्वविकृतत्वंवीर्यं औषधंवीर्यवदित्या-
दौतथादर्शनात् तद्वान् । धर्मः अलौकिकश्रेयस्साधनं
तंसामान्यरूपंविशेषरूपंचजानातीतिधर्मज्ञः । चका-

म—"इतिस्मृत्याआत्मनामग्रहणस्यनिषिद्धत्वात् । निषेधस्यचरूढनामविषयत्वात् । वस्तुतस्तु स्मृतौग्रह उच्चारणमर्थः ज्ञानाद्यर्थत्वे निषेधस्यासंभवापत्तिः । यदि लेखनमात्रेचनोच्चारणमित्यङ्गीकारः तदा रामचरितस्यदुर्लभत्वबोधनफलकस्वतपःप्रख्यापनार्थयौगिक-नामोक्तिरितिबोध्यम् ॥१॥ **तनिश्लोकी** ॥ हेमारविन्दवदाश्रयवैलक्षण्येन निस्सीमाभ्यधिकत्वंवक्तुं कोन्वितिप्रथमंधर्मिनिर्देशः । स्वस्याविकृतत्वेसतिपरविकारकारित्वंवीर्यंतद्वान् वीर्यवान् ॥ २ ॥

चारित्रेण च को युक्तः सर्वभूतेषु को हितः । विद्वान् कः कः समर्थश्च कश्चैकप्रियदर्शनः ॥ ३ ॥
आत्मवान् को जितक्रोधो द्युतिमान् कोऽनसूयकः । कस्य बिभ्यति देवाश्च जातरोषस्य संयुगे ॥४॥
एतदिच्छाम्यहं श्रोतुं परं कौतूहलंहि मे । महर्षे त्वं समर्थोसि ज्ञातुमेवंविधं नरम् ॥ ५ ॥

रोऽनुक्तसमुच्चयार्थः परिहार्याधर्मज्ञश्चेत्यर्थः । कृतमुपकारंस्वल्पंप्रासङ्गिकमपिबहुतयाजानातीतिकृतज्ञः अपकारास्मरणंचशब्दार्थः । वक्ष्यति "नस्मरत्यपकाराणां शतमप्यात्मवत्तया । कथंचिदुपकारेणकृतेनैकेनतुष्यति"इति । सत्यं कृच्छ्रेष्वप्यनृतशून्यं वाक्यं वचनं यस्यसः सत्यवाक्यः । तथावक्ष्यति "अनृतंनोक्तपूर्वं मेनचवक्ष्ये कदाचन"इति । दृढव्रतः निश्चलसंकल्पः "अप्यहंजीवितंजह्यांत्वांवासीतेसलक्ष्मणाम् । नहिप्रतिज्ञांसंश्रुत्यब्राह्मणेभ्योविशेषतः"इति ॥ २ ॥ चरित्रमाचारःतदेवचारित्रं वायसराक्षसादिवत्स्वार्थेऽणप्रत्ययः तेनयुक्तःसर्वदाप्यनुल्लङ्घितकुलाचारइत्यर्थः । सर्वभूतेषु सर्वप्राणिषुविषये "भूतंक्ष्मादौचजन्तौचनस्त्रियां गुणसत्त्वयोः"इतिवाणः । हितःहितकरः । हितशब्दात् "तत्करोति"इतिणिच् पचाद्यच् णिलोपेपूर्वरूपेचरूपम् । भूतशब्देनस्वपरतारतम्याभावउक्तः । सर्वशब्देनसापराधेष्वपिहितकरत्वमुक्तम् । वेत्तीतिविद्वान् सर्वशास्त्रज्ञः "विदेःशतुर्वसुः" । समर्थः सर्वकार्यधुरंधरः । प्रियंदर्शनंयस्यासौप्रियदर्शनः एकश्चासौप्रियदर्शनश्चएकप्रियदर्शनः । अयमिवनान्योलोकेप्रियदर्शनोस्तीत्यर्थः । यद्वा एकप्रियदर्शनः एकरूपप्रियदर्शनः । लोकेहिकस्यचिद्दर्शनं कदाचित्प्रियंभवति कदाचिदप्रियंचभवति "तस्माद्दुःखात्मकंनास्तिनचकिंचित्सुखात्मकम्"इतिवचनात् । अयंतुनतथा । किंतु "क्षणेक्षणेयन्नवतामुपैतितदेवरूपंरमणीयतायाः"इत्युक्तरीत्यासदानुभवेप्यपूर्ववद्विस्मयमादधानइत्यर्थः । तथैवोत्तरयिष्यति—सदैकप्रियदर्शनइति । "एकेमुख्यान्यकेवलाः"इत्युभयत्राप्यमरः ॥ ३ ॥ आत्मवान् धैर्यवान् "आत्माजीवेधृतौदेहेस्वभावेपरमात्मनि"इत्यमरः । अप्रकंप्यधैर्यइत्यर्थः । जितक्रोधः विधेयकोपः । दण्डार्हेष्वेवाहितकोपइत्यर्थः । "क्रोधमाहारयत्तीव्रम्" इति हिवक्ष्यति । द्युतिमान् कान्तिमान् । "रूपसंहननंलक्ष्मीं सौकुमार्यंसुवेषतां । ददृशुर्विस्मिताकारारामस्यवनवासिनः"इतिहिवक्ष्यति । गुणेषुदोषाविष्करणमसूया "असूयातुदोषारोपोगुणेष्वपि"इत्यमरः । अविद्यमानाऽसूयायस्यासावनसूयकः । "शेषाद्विभाषा"इतिकपि "आपोन्यतरस्यां" इतिह्रस्वः । यद्वा असूयकःअसूञ् कण्ड्वादौपठितः । तस्मात् "कण्ड्वादिभ्योयक्"इतियक्प्रत्ययः । "अकृत्सार्वधातुकयोः"इतिदीर्घः । ततो "निन्दहिंस—"इत्यादिनावुञ् सनभवतीत्यनसूयकः । देवाश्चेतिचकारेणासुरादयःसमुच्चीयन्ते । जातरोषस्य कस्यसंयुगे देवादयःसर्वेबिभ्यतीत्यन्वयः । अतोन "भीत्रार्थानां—" इतिकिंशब्दात्पञ्चमी । शत्रुविषयः कोपोमित्राणामपिभयमावहतीत्यर्थः । यद्वा चकारोप्यर्थः । अनुकूलाअपिबिभ्यति किंपुनःप्रतिकूलाइत्यर्थः । यद्वा संयुगेजातरोषस्यकस्यविभ्यतीत्येवान्वयः । शेषेषष्ठी । "संज्ञापूर्वकोविधिरनित्यः" इत्यपादानसंज्ञापूर्वकपञ्चम्यभावः ॥ अत्रश्लोकत्रयेसमृद्धिमद्वस्तुवर्णनादुदात्तालंकारः ॥ ४ ॥ अथायंप्रश्नोविजिगीषामूलमितिनारदोमन्येतापीतिमन्वानः स्वप्रश्नोजिज्ञासाहेतुकइतिदर्शयन्प्रश्नमुपसंहरति—एतदिति । एतत्पूर्वोक्तगुणाश्रयभूतंवस्तु अहं जिज्ञासुः नविजिगीषुः श्रोतुं नतुक्षेप्तुं इच्छामि नतुब्रूहिइतिनिर्बध्नामि । अहंतावदिच्छामिमयिभवतःप्रसादोस्तिचेद्वक्तुमर्हसीतिभावः । तत्रहेतुमाह—परमिति । हिर्हेतौ "हिर्हेतावववधारणे" इतिवाणः । यस्मात्कारणान्मेपरमुत्कृष्टंकौतूहलंविस्मयोस्तितस्मादिच्छामि । यद्वा हिःप्रसिद्धौ । मुखविकाराद्यनुभावैर्ममहर्षस्तवस्पष्टइत्यर्थः । स्वप्रश्नोत्तरदानेदेशिकालाभान्निर्विण्णः संप्रतिभवद्दर्शनेनसंजाताभिलाषोस्मि ब्रूहिमत्पृष्टमितिभावः । "आचार्यस्यज्ञानवत्तामनुमायशिष्येणोपसत्तिःक्रियते"इतिन्यायेननारदस्यप्रष्टव्यविषयज्ञानसंभावनामाह—महर्षइति । ऋषिः ज्ञानस्यपारंगन्ता । ऋषगतावित्यस्माद्धातोः "इगुपधा-

तिलकं ॥ लौकिकव्यवहारे प्रजारञ्जनादौचातुर्यसामर्थ्यं तद्वान् समर्थः । एकप्रियदर्शनः । कन्दर्पाधिकसौन्दर्यवत्त्वेन नित्यसुखरूपत्वेनच एकप्रियं केवलप्रियं दुःखासंभिन्नप्रियत्ववद्दर्शनंयस्यसः ॥ ३ ॥ **तीर्थी०** आत्मवान् वशीकृतान्तःकरणः । जितक्रोधः अत्रक्रोधशब्दःकामादीनामुपलक्षकः जितारिषड्वर्गइत्यर्थः ॥ ४ ॥ **तनि०** कथंममसामर्थ्यं तत्राह—महर्ष इति । ऋषयो ह्यलौकिकार्थद्रष्टारः तत्रमहर्षित्वात्त्वमत्तोपि वेदान्तरहस्यज्ञानमधिकमिति । एवंविधंनरं परमपुरुषम् ॥ ५ ॥

श्रुत्वा चैतत्त्रिलोकज्ञो वाल्मीकेर्नारदो वचः । श्रूयतामिति चामन्त्र्य प्रहृष्टो वाक्यमब्रवीत् ॥ ६ ॥
बहवो दुर्लभाश्चैव ये त्वया कीर्तिता गुणाः । मुने वक्ष्याम्यहं बुद्ध्वा तैर्युक्तः श्रूयतां नरः ॥ ७ ॥

त्कित्'' इतीन् । गत्यर्थोज्ञानार्थः । महांश्चासौऋषिश्च महर्षिः । ''आन्महतः समानाधिकरणजातीययोः'' इत्यात्वं । हेतुगर्भविशेषणं । महर्षित्वात्त्वमेवंविधं नरं पुरुषं ज्ञातुमर्हसि । ब्रह्मणःसकाशाद्विदितसकलविशेषस्त्वंकथंमेजिज्ञासोर्नवदेरितिभावः । अत्रपूर्वार्धेकाव्यलिङ्गमलंकारः । उत्तरवाक्यार्थस्यपूर्ववाक्यार्थहेतुत्वात् । ''हेतोर्वाक्यपदार्थत्वेकाव्यलिङ्गमलंकृतिः'' इतिलक्षणात् । उत्तरार्धेपरिकरइत्यनयोःसंसृष्टिः । अन्तेचास्येतिकरणंबोध्यं । इतिपरिपप्रच्छेतिसंबन्धः । नन्वयंप्रश्नोवाल्मीकेर्नसंगच्छते तस्यविदितसकलरामवृत्तान्तत्वेननिश्चयेसंशयायोगात् । वक्ष्यतिह्ययोध्याकाण्डे । ''इतिसीताचरामश्चलक्ष्मणश्चकृताञ्जलिः । अभिगम्याश्रमंसर्वेवाल्मीकिमभिवादयन्''इति । कथंरामविषयमध्यवर्तीवाल्मीकिस्तद्गुणान्नविजानीयात् । वक्ष्यतिहि ''विषयेतेमहाराजरामव्यसनकर्शिताः । अपिवृक्षाःपरिम्लानाःसपुष्पाङ्कुरकोरकाः''इति । कथंवा ''रामोरामोरामइतिप्रजानामभवन्कथाः । रामभूतं जगदभूद्रामेराज्यंप्रशासति''इतिपृथग्जनैरपिविदितंरामवैभवंमुनिरेषनजानीयात् । कथंचैतावन्मात्रं सत्यलोकादागतोनारदःप्रष्टुमर्हति । यएवमुत्तरयति ''रामो नामजनैःश्रुतः'' इति । तत्रोच्यते । नायमापाततोभासमानःप्रश्नार्थः । नाप्युत्तरार्थः । अत्रकरतलामलकवद्विदितरामवृत्तान्तस्यवाल्मीकेःकुतूहलासंभवात् बुद्ध्वावक्ष्यामीत्युत्तरवाक्यानुपपत्तेश्च । किंतु वक्तृबोद्धानुगुण्यात् वेदान्तेपुनानाविद्यासुतत्तद्गुणविशिष्टतयाऽवगम्यमानंपरंतत्त्वं किंविष्णुरुतरुद्रादिष्वन्यतमइतिप्रश्नार्थः । तदिदंवाल्मीकेर्हृदयमाकलयन्भगवान्नारदोपि रामत्वेनावतीर्णोविष्णुरेववेदान्तवेद्यःपुरुषः ब्रह्मादयः सर्वेतद्भ्रुकुटीभटास्तत्परतन्त्राः । सद्ब्रह्मात्मादिशब्दाश्च पर्यवसानवृत्त्याऽवयववृत्त्याच विष्णुपराइत्येवमाशयेन सकलवेदान्तोदितगुणजातं रामेयोजयन्नुत्तरयतीति सर्वमनवद्यम् ॥ ५ ॥ एवं''तद्विज्ञानार्थंसगुरुमेवाभिगच्छेत्''इत्युक्तं गुरूपसदनविधिमुपबृंह्य ''येनाक्षरंपुरुषंवेदसत्यंप्रोवाचतांतत्त्वतोब्रह्मविद्यां''इत्युक्तंप्रवचनविधिमुपबृंहयति–श्रुत्वेत्यादिना । तत्र ''नासंवत्सरवासिनेप्रब्रूयात्'' इतिनियमस्यज्येष्ठपुत्रव्यतिरिक्तविषयत्वात् वाल्मीकेश्चभृगुपुत्रतया भ्रातृपुत्रत्वात्शुश्रूषानिरपेक्षंप्रीत्योपदिदेशेत्याह—श्रुत्वाचेति । त्रयाणांलोकानांसमाहारस्त्रिलोकं । पात्रादित्वान्नङीप् । यद्वा त्रित्वविशिष्टोलोकस्त्रिलोकः । ''नवरसरुचिरां''इत्यत्रकाव्यप्रकाशेतथैवव्याख्यानात् । यद्वा त्रयोलोकायस्मिन् तत्त्रिलोकमितिब्रह्माण्डमुच्यते । तज्जानातीतित्रिलोकज्ञः । भूर्भुवःस्वरितित्रैलोक्यं । यद्वा विष्णुपुराणोक्तरीत्या कृतकमकृतकंकृतकाकृतकमिति त्रयोलोकाः । महर्लोकपर्यन्ताःकृतकाः । जनोलोकः कृतकाकृतकः । सत्यलोकोकृतकइति । यद्वा लोकाःजनाः । ''लोकस्तुभुवनेजने''इत्यमरः । बद्धनित्यमुक्तास्त्रयोलोकाः । नारदः ब्रह्मपुत्रतयातज्ज्ञानार्हः । एतत् पूर्वोक्तरीत्याव्यङ्ग्यार्थगर्भं वाल्मीकेःस्वाभिमतस्यपुत्रस्यवचःपरिपूर्णार्थंवाक्यं श्रुत्वा निशम्य चकारेणतदूहित्वाचेत्यर्थः । प्रहृष्टः स्वेनोपदिदिक्षितस्यैवपृष्टत्वेनसंतुष्टः शतकोटिप्रविस्तररामायणेस्वावगतस्यैवानेनपृष्टत्वात् रामगुणस्मरणामृतपानलाभादपूर्वशिष्यलाभाद्वा ''सोहंमन्त्रविदेवास्मिनात्मवित्''इत्युक्तरीत्या सनत्कुमारंप्रति स्वस्योपसर्पणस्मारकत्वाद्वा प्रहृष्टःसन् । कर्तरिक्तः । रामगुणानुसन्धानजनितंनिजवैचित्यंव्याजेनपरिहर्तुं श्रूयतामित्यामन्त्र्य अभिमुखीकृत्य वाक्यमुत्तररूपंअब्रवीत् व्यक्तमुक्तवान् ॥ ६ ॥ वक्ष्यमाणस्यासदुत्तरत्वपरिहाराय आत्मनोवाल्मीकेराशयाभिज्ञत्वमाह बहवइति । यद्वा वेदान्तोदितगुणानां विष्णोरन्यत्रासंभवात् तेषांपुरुषशब्दवाच्यत्वासंभवात् चतुर्मुखसंप्रदायाच्च विष्णावेवपरतत्त्वतांपारिशेष्ययन्नाह—बहवइति । बहवो विपुलाः अनेकगुणविततिमूलभूताइत्यर्थः । ऽनेनापृष्टानामपिवक्ष्यमाणानांगुणानांनिदानमुपदर्शितम् । यद्वा बहवः अपरिच्छिन्नाइत्यर्थः । श्रूयते ह्यपरिच्छिन्नत्वंगुणानां । ''यतोवाचोनिवर्तन्ते

तीर्थी० प्रहृष्टः ''कस्यबिभ्यतिदेवाश्च'' इतिदृष्टदेवादिभीषकत्वगुणसंपत्तेः ब्रह्मादिष्वप्रसक्तोयंप्रश्नः सकलगुणविशिष्टसार्वभौमविषयकः इत्यवगम्यते । तत्रापि सार्वभौममात्रे पृष्टप्रशस्तसकलगुणसंपत्तेरसंभवात् सकलजगद्रक्षणार्थं नृरूपेणावतीर्णेपरमपुरुषएवसंभवात् दिष्ट्यातद्गुणकीर्तनंलब्धमितिप्रहर्षः ॥ ६ ॥

इक्ष्वाकुवंशप्रभवो रामो नाम जनैः श्रुतः । नियतात्मा महावीर्यो द्युतिमान्धृतिमान्वशी ॥ ८ ॥

अप्राप्यमनसासह । आनन्दंब्रह्मणोविद्वान् । नबिभेतिकुतश्चन''इति । अत्रानन्दस्यैकस्यापरिच्छिन्नत्वोक्तिः इतरेषामप्यपरिच्छिन्नत्वप्रदर्शनार्था । उक्तंहियामुनाचार्यैः''उपर्युपर्यब्जभुवोपिपूरुषान्''इत्यादिना । दुर्लभाः परमपुरुषादन्यत्रासंभाविताः । अन्येषां ''न ब्रह्मानेशानः''इत्यादिनाऽसंभाव्यत्वादिवचनादितिभावः । अनेनप्रश्नस्यदेवताविशेषनिर्धारणपरत्वमात्मनाऽवगतमितिव्यञ्जितम् । चकारउक्तसमुच्चयार्थः अनुक्तसमुच्चयार्थोवा । तेन स्वाभाविकानवधिकातिशयाऽसङ्ख्येयकल्याणरूपाः इत्युक्तम् । एवकारः इतरत्रसर्वात्मनाऽसंभावितत्वमभिव्यनक्ति । यइतिवेदान्तप्रसिद्धिरुच्यते । गुणाःवीर्यादयः कीर्तिताइत्यनेनगुणानां प्रश्नकालेपिभोग्यतातिशयःसूच्यते । तैर्युक्तोनतुकल्पितइतिनिर्गुणवादनिरासः । नरः पुरुषः । ''पुरुषाः पूरुषानराःइतिनिघण्टुः । ''यएषोऽन्तरादित्येहिरण्मयःपुरुषोदृश्यते । पुरुषःपुण्डरीकाक्षः''इतिश्रुतिस्मृत्यनुगतः पुरुषशब्दोऽनेनप्रत्यभिज्ञाप्यते । श्रूयतां नतुयथाकथंचित्परिकल्प्यताम् । शृण्वित्यनभिधानात् विनयोक्तिरियम् । तात्कालिकंकिंचित्प्रकल्प्यतइतिभ्रमंवारयति—अहंबुद्ध्वावक्ष्यामीति । मत्पितुर्ब्रह्मणः सकाशात्शतकोटिप्रविस्तररामायणमुखेनविदित्वावक्ष्यामि । अनेनसंप्रदायाभिज्ञत्वमात्मनोदर्शितम् । यद्वा रामगुणानुसंधानवैचित्र्येन नमेकिंचित्प्रतिभाति क्षणात्बुद्ध्वावक्ष्यामीत्यर्थः । अतोमध्येवाक्यान्तरमलंकाराय । अन्यथा वाक्यगर्भितमितिकाव्यदोषःस्यात् । अहंवक्ष्यामि अहंभूत्वावक्ष्यामि नेदानींनारदोस्मि रामगुणश्रवणशिथिलत्वात् । रामगुणमग्नोयंनदीप्रवाहमग्नइवावलंबनयष्टिमपेक्षते—हेमुनइति । यद्वा प्रश्नकालेसमवधानविशेषमालक्ष्य श्लाघते—मुनइति । अथक्षणात्संधुक्षितोनारदोवाक्यशेषंपूरयति—तैरिति । नरइत्यनेन परतत्त्वनिर्धारणंप्रश्नफलितार्थंद्योतयति । बुद्ध्वा इत्यनेन श्रुतिस्थतत्तच्छब्दार्थोविवृतः ॥ ७ ॥ अथवेदान्तोदितगुणानांरामेप्रदर्शनमुखेन रामत्वेनावतीर्णोविष्णुरेव वेदान्तवेद्यंपरंतत्त्वमितिदर्शयति—इक्ष्वाकुवंशप्रभवइत्यादिनासर्गशेषेण । तत्रवेदान्तोदितगुणगणानांनिधीरामत्वेनावतीर्णोविष्णुरेवेतिमहावाक्यार्थः । ''इक्ष्वाकुवंश'' इत्यारभ्य ''सत्येधर्मइवापरः'' इत्यन्ता सार्धैकादशश्लोकी एकान्वया । इक्ष्वाकुर्नाम वैवस्वतमनोर्ज्येष्ठःपुत्रः तस्यवंशः पुत्रपौत्रादिपरंपरा । प्रभवत्यस्मादितिप्रभवः प्रादुर्भावस्थानम् । इक्ष्वाकुवंशःप्रभवोयस्यसः इक्ष्वाकुवंशप्रभवः । जनकादिमहाकुलेषुविद्यमानेषु कुतोत्रैवभगवानवतीर्णइत्यपेक्षायांइक्ष्वाकुपदंप्रयुक्तम् । इक्ष्वाकुर्हि चिरंहरिमाराध्य तन्मूर्तिविशेषं रङ्गनाथमलभतेति पौराणिकीगाथा । अतस्तत्पक्षपातेनतद्वंशेऽवतीर्णइतिसूचयितुमिक्ष्वाकुपदम् । वंशेत्यनेन गुणवान्कइतिपृष्टंसौशील्यमुक्तम् । रमयतिसर्वान्गुणैरितिरामः ''रामोरमयतांवरः'' इत्यार्षनिर्वचनबलात् कर्तर्यपिकारकेघञ्वर्ण्यते । यद्वा रमन्तेस्मिन्सर्वेजनागुणैरितिरामः । ''अकर्तरिचकारकेसंज्ञायां''इतिघञ् । तथाचागस्त्यसंहितायामुक्तं ''रमन्तेयोगिनोऽनन्तेसत्यानन्देचिदात्मनि । इतिरामपदेनासौपरंब्रह्माभिधीयते''इति । नामेतिप्रसिद्धौ । चित्रकूटवासिनात्वया विदितोहीत्यर्थः । नकेवलंभवता पामरैरपिविदितइत्याह—जनैःश्रुतइति । श्रुतः अवधृतः । ''श्रुतंशास्त्रावधृतयोः'' इत्यमरः । ताटकाताटकेयवधविश्वामित्राध्वरत्राणाहल्याशापविमोक्षहरधनुर्भङ्गपरशुरामनिग्रहसप्ततालवेधवालिवधसिन्धुबन्धमूलबलनिबर्हणादिभिरवधारितनारायणभावइत्यर्थः । यएवंभूतःसएवनियतात्मा सएवमहावीर्य इत्येवंप्रतिपदंवक्ष्यमाणंतत्पदमनुषज्यते । रामरूपेणावतीर्णोविष्णुरेव

तनि० बहवः पृष्टगुणानांद्व्यष्टकत्वेपिप्रत्येकमेकैकस्यानेकगुणविततितयाराशीकरणादसंख्याताः । दुर्लभाःअनीश्वरेईश्वरेपरमव्योमवासिन्यवतारांतरेचदुर्लभाःकीर्तिताः । वाचिकव्यापारप्रतिपन्नाअपिदुर्लभाः । एवंविधेप्रश्नेअन्यस्यनाधिकारइत्याह—मुनइति । मुनिर्मननशीलः । तेनशशश्रृङ्गप्रश्नवत्नरेउक्तगुणवैशिष्ट्यप्रश्नस्यदोषमूलत्वंव्युदस्तं । उत्तरेपिनान्यस्याधिकारइत्याह—अहमिति । ममापि सहसावक्तुंनशक्यमित्याह—बुद्ध्वेति । **तीर्थी०** बुद्ध्वावक्ष्यामि महापुरुषंनिश्चित्यवक्ष्यामि । श्रूयतां प्राप्तकालेलोट् । तस्य श्रवणं ते प्राप्तकालमित्यर्थः ॥७॥ **तनि०** इक्ष्वाकुवंशप्रभवः तपस्समासादितश्रीरङ्गनाथाराधनफलतया तद्वंशएवावतीर्णइतिइक्ष्वाकुग्रहणम् । ''वैष्णवो नः कुले जातः स नः संतारयिष्यति'' इत्येकवैष्णवजनिमात्रेण तद्वंशस्यसर्वस्याप्युत्तारः । यत्रतुसर्वेगृहाराधनीकृतश्रीरङ्गनाथाः तस्यवंशस्यमहत्त्वे किंवक्तव्यमितिवंशपदाभिप्रायः । वशी गुणवशीकृतसर्वजनः । **तीर्थी०** नियतात्मा शिक्षितमनाः । वशी जितेन्द्रियः ॥ ८ ॥

बुद्धिमान्नीतिमान्वाग्मी श्रीमाञ्शत्रुनिबर्हणः । विपुलांसो महाबाहुः कंबुग्रीवो महाहनुः ॥ ९ ॥
महोरस्को महेष्वासो गूढजत्रुररिंदमः । आजानुबाहुः सुशिराः सुललाटः सुविक्रमः ॥ १० ॥

वेदान्तोदिततत्तद्गुणकइति सर्वत्रतात्पर्यार्थः । आदौस्वरूपनिरूपकधर्मानाह—नियतात्मेत्यादिना । नियतात्मा नियतस्वभावः । निर्विकारइतियावत् । " नास्यजरयैतज्जीर्यते नवधेनास्यहन्यते अपहतपाप्माविजरोविमृत्युर्विशोकोविजिघत्सोपिपासः " इत्यादिश्रुतेः । महावीर्यः अचिन्त्यविविधविचित्रशक्तिकः । " परास्यशक्तिर्विविधैवश्रूयते स्वाभाविकीज्ञानबलक्रियाच " इतिश्रुतेः । द्युतिमान् स्वाभाविकप्रकाशवान् स्वयंप्रकाशः ज्ञानस्वरूपइतियावत् । " विज्ञानघनएव प्रज्ञानघनः " इतिश्रुतेः । धृतिमान् निरतिशयानन्दः । " धृतिस्तुतुष्टिः संतोषः " इतिवैजयन्ती । " आनन्दोब्रह्म " इतिश्रुतेः । सर्वजगद्वशेऽस्यास्तीति वशी सर्वस्वामीत्यर्थः । " सर्वस्यवशी सर्वस्येशानः " इतिश्रुतेः ॥ ८ ॥ अथ सूक्ष्मुपयोगिगुणानाह—बुद्धिमानित्यादिना । बुद्धिमान् सर्वज्ञः । " यःसर्वज्ञः सर्ववित् " इतिश्रुतेः । नीतिमान् मर्यादावान् । श्रुतिरत्र " धातायथापूर्वमकल्पयत् । एषसेतुर्विधरणएषांलोकानामसंभेदाय " इति । शोभनावागस्यास्तीति वाग्मी । " वाचोग्मिनिः " इतिग्मिनिप्रत्ययः कुत्वेजश्त्वेचकृतेगकारलाभात् पुनर्गकार उक्तिशोभनत्वज्ञापनार्थेतिन्यासकारः । सर्ववेदप्रवर्तकइत्यर्थः । "योब्रह्माणंविदधातिपूर्वंयोवैवेदांश्चप्रहिणोतितस्मै " इति श्रुतिः । श्रीमान् समृद्धोभयविभूत्यैश्वर्यः । " श्रीः कान्तिसंपदोर्लक्ष्म्यां " इतिबाणः । "सर्वमिदमभ्यात्तः "इतिश्रुतिः । शत्रून् तद्विरोधिनोनिबर्हयतिनाशयतीति शत्रुनिबर्हणः । बर्हहिंसायामित्यस्माद्धातोःकर्तरिल्युट् । " एषभूतपतिरेषभूतपालः " इतिश्रुतेः । " अथयएषोन्तरादित्येहिरण्मयःपुरुषोदृश्यते हिरण्यश्मश्रुर्हिरण्यकेशः आप्रणखात्सर्वएवसुवर्णस्तस्ययथाकप्यासंपुण्डरीकमेवमक्षिणी तस्योदितिनाम सएषसर्वेभ्यःपाप्मभ्यउदित उदेतिहवैसर्वेभ्यःपाप्मभ्योयएवंवेद " इत्यन्तरादित्यविद्योदितंसर्वाङ्गसुन्दरविग्रहंदर्शयति—विपुलांसइत्यादिनासार्धश्लोकद्वयेन । विपुलांसः उन्नतस्कन्धः । उन्नतस्कन्धत्वंचमहापुरुषलक्षणमिति सामुद्रिकोक्तं—" कक्षःकुक्षिश्चवक्षश्चघ्राणःस्कन्धोललाटिका । सर्वभूतेपुनिर्दिष्टाउन्नतास्तुसुखप्रदाः " इति । महाबाहुः वृत्तपीवरबाहुः । आयतत्वंतुवक्ष्यति " आजानुबाहुः " इति । " आजानुलंबिनौबाहूवृत्तपीनौमहीश्वरः" इतिसामुद्रिकलक्षणम् । "कंबुग्रीवः शङ्खतुल्यकण्ठः । " इन्दुमुखीतिवत्शाकपार्थिवादित्वान्मध्यमपदलोपीसमासः । " कंबुग्रीवश्चनृपतिर्लेवकर्णोतिभूषणः " इतिलक्षणम् । " रेखात्रयान्विताग्रीवाकंबुग्रीवेतिकथ्यते " इतिहलायुधः । महत्यौहनूयस्यासौ महाहनुः । " स्त्रियाःपुंवत्–" इत्यादिनापुंवद्भावः । हनुःकपोलोपरिभागः । " अधस्ताच्चिबुकंगण्डौकपोलौतत्परोहनुः " इत्यमरः । " मांसलौतुहनूयस्यभवतस्त्वीपदुन्नतौ । सनरोमृष्टमश्नातियावदायुःसुखान्वितः " इतिलक्षणम् ॥ ९ ॥ महोरस्कइति । महद्विशालमुरोयस्यासौमहोरस्कः । " उरःप्रभृतिभ्यःकप् " इतिकप् । लक्षणंतु "स्थिरंविशालं कठिनमुन्नतंमांसलंसमम् । वक्षोयस्यमहीपालस्तत्समो वाभवेन्नरः " इति । मांसलत्वंतुवक्ष्यति पीनवक्षा इति । महानिष्वासोधनुर्यस्यासौमहेष्वासः । अनेन तदुचितसंहननविशेषोलक्ष्यते । अतोनप्रक्रमविरोधः । गूढे मांसलत्वेनाप्रकाशे जत्रुणी अंसद्वयसन्धिगतास्थिनी यस्यासौ गूढजत्रुः । " स्कन्धोभुजशिरोंसोस्त्री सन्धीतस्यैवजत्रुणी " इत्यमरः । " विषमैर्जत्रुभिर्निस्वाअतिसूक्ष्मैश्चमानवाः । उन्नतैर्भोगिनोनिम्नैर्निस्वाः पीनैर्नराधिपाः" इतिलक्षणम् । अरीन्दमयतिनिवर्तयतीत्यरिंदमः । " संज्ञायांभृतृवृजिधारिसहितपिदमः"

तीर्थी० बुद्धिमान् प्रशस्तधीः । बुद्धेः प्राशस्त्यंनाम "शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा । ऊहापोहार्थविज्ञानं तत्वज्ञानं च धीगुणाः " इत्युक्तगुणविशिष्टत्वम् । श्रीमान् सर्वातिशायिश्रीः । "ऋचःसामानियजूꣳषि साहिश्रीरमृतासताम्" इत्युक्तश्रौतश्रीरत्रविवक्षिता। **तिल०** नीतिमान् कामन्दकादिनीतिमान् । महाबाहुः अस्यसुलक्षणत्वमुक्तंब्राह्मे—"शिरोललाटश्रवणे ग्रीवा वक्षश्च हृत्तथा । उदरं पाणिपादं च पृष्ठं दश महत्सुखम्" इति । महाहनुःमांसलकपोलापरभागः । "पूर्णमांसलहनुस्तुभूपतिः" इतिसंहिता ॥ ९ ॥ **तीर्थी०** अरीन्कामादीन्दमयतीति अरिंदमः । **तिल०** निजभक्तानां अरीन्कामादीन्दमयतीति अरिन्दमः ॥ १० ॥

समः समविभक्ताङ्गः स्निग्धवर्णः प्रतापवान् । पीनवक्षा विशालाक्षो लक्ष्मीवाञ्शुभलक्षणः ॥ ११ ॥
धर्मज्ञः सत्यसन्धश्च प्रजानां च हिते रतः । यशस्वी ज्ञानसंपन्नः शुचिर्वश्यः समाधिमान् ।
प्रजापतिसमः श्रीमान्धाता रिपुनिषूदनः ॥ १२ ॥

इतिखच् असंज्ञायामप्यार्षः । अरिशब्देनपाप्मावि-
वक्षितः अपहतपाप्मेत्यर्थः । अनेनायंविग्रहपरिग्रहो
नकर्ममूलः किन्त्वनुग्रहमूलः । "इच्छागृहीताभिम-
तोरुदेहः" इतिस्मृतेः । अतोनप्रक्रमभङ्गः । जानु
ऊरुपर्व तत्पर्यन्तंविलंबिबाहुः आजानुबाहुः । सुष्ठुस-
मंवृत्तंछत्राकारंशिरोयस्यासौसुशिराः । "समवृत्तशि-
राश्चैवच्छत्राकारशिरास्तथा । एकच्छत्रांमहींभुङ्क्तेदीर्घ-
मायुश्चजीवति" इतिलक्षणम् । सुललाटः । लला-
टसौष्ठवंप्रोक्तम्—"अर्धचन्द्रनिभंतुङ्गंललाटंयस्यसप्र-
भुः" इति । शोभनःविक्रमःपदविक्षेपोयस्यासौसुवि-
क्रमः । शोभनत्वंचगजादितुल्यत्वम् । तथोक्तंजगद्वल्ल-
भायाम् "सिंहर्षभगजव्याघ्रगतयोमनुजामुने ।
सर्वत्रसुखमेधन्तेसर्वत्रजयिनःसदा" इति ॥ १० ॥
समः नातिदीर्घोनातिह्रस्वः । तथात्वंचतत्रैवोक्तम्—
"षण्णवत्यङ्गुलोच्छ्रायःसार्वभौमोभवेन्नृपः" इति ।
समानिअन्यूनाधिकपरिमाणानि विभक्तानिअश्लिष्टा-
नि अङ्गानिकरचरणाद्यवयवायस्यसः समविभक्ताङ्गः ।
तानिचोक्तानि सामुद्रिकैः—"भ्रुवौनासापुटेनेत्रेक-
र्णावोष्ठौचचूचुकौ । कूर्परौमणिबन्धौचजानुनीवृषणौ
कटी । करौपादौस्फिचौ यस्यसमौज्ञेयःसभूपतिः"
इति । स्निग्धः स्नेहयुक्तो वर्णोयस्यसः स्निग्धवर्णः ।
तत्रोक्तंवररुचिना—"नेत्रस्नेहेनसौभाग्यंदन्तस्नेहेन-
भोजनम् । त्वचःस्नेहेनशय्याचपादस्नेहेनवाहनम्"
इति । प्रतापवान् तेजस्वी समुदायशोभासंपन्नइत्यर्थः ।
पीनवक्षाः मांसलवक्षाः । विशाले पद्मपत्रायते अक्षि-
णीयस्यसः विशालाक्षः । "बहुव्रीहौसक्थ्यक्ष्णोः
स्वाङ्गात्—" इतिषच् । अत्रसामुद्रिकम् । "रक्तान्तैः
पद्मपत्राभैर्लोचनैःसुखभोगिनः" इति । लक्ष्मीवान्
अवयवशोभायुक्तः शुभलक्षणः अनुक्तसकललक्ष-
णसंपन्नः ॥ ११ ॥ एवमाश्रितानुभाव्यदिव्यमङ्गलवि-
ग्रहशालित्वमुक्त्वाऽऽश्रितरक्षणोपयोगिगुणानाह—
धर्मज्ञइत्यादिना स्वजनस्यचरक्षितेत्येतेन । धर्मशरणाग-
तरक्षणरूपं जानातीति धर्मज्ञः । वक्ष्यति "मित्र-
भावेनसंप्राप्तंनत्यजेयंकथंचन । दोषोयद्यपितस्यस्या-
त्सतामेतदगर्हितम्" इति । सत्या सन्धा प्रतिज्ञा
यस्यस सत्यसन्धः । "प्रतिज्ञानेऽवधौसन्धा" इति-
वैजयन्ती । "अप्यहंजीवितंजह्यांत्वांवासीतेसलक्ष्म-
णाम् । नहिप्रतिज्ञांसंश्रुत्यब्राह्मणेभ्योविशेषतः" इति ।
प्रजानां प्राणिनां हिते हितकरणे रतः तत्परः । यशस्वी
आश्रितरक्षणैककीर्तिः । "तस्यनाममहद्यशः" इतिश्रु-
तेः । ज्ञानसंपन्नः "यःसर्वज्ञःसर्ववित्" इत्युक्त-
रीत्यास्वरूपतःस्वभावतश्चसर्वविषयज्ञानशीलः । शुचिः
पावनः परिशुद्धोवा ऋजुरितियावत् । वश्यःवशंगतः ।
"वशंगतः" इतिनिपातनाद्यत् । आश्रितपरतन्त्र-
इत्यर्थः । समाधिमान् समाधिः आश्रितरक्षणचिन्ता
तद्वान् । प्रजापतिसमः "मध्येविरिञ्चिगिरिशंप्रथ-
मावतारः" इत्युक्तरीत्या जगद्रक्षणाय प्रजापतितुल्य-
तयाऽवतीर्णः । श्रीमान् पुरुषकारभूतया लक्ष्म्या अ-
विनाभूतः । धाता पोषकः । डुधाञ्धारणपोषणयो-
रितिधातोस्तृच् । रिपून् शत्रून् निषूदयति निरस्यती-
ति रिपुनिषूदनः । "सूददीपदीक्षश्च" इति प्रतिषे-
धस्यानित्यत्वात् "अनुदात्तेतश्चहलादेः" इतियुच्

तीर्थी० प्रतापवान् श्रवणमात्रेणशत्रुहृदयविदारणेनप्रशस्तपौरुषः । **तिल०** स्निग्धवर्णः स्निग्धश्यामलवर्णइत्यर्थः । "स्निग्धे-न्द्रनीलवर्णस्तुभोगंविन्दतिपुष्कलम्" इत्युक्तेः । लक्ष्मीवान् सीतारूपलक्ष्मीवान् ॥ ११ ॥ **तीर्थी०** शुचिः बाह्याभ्यन्तरशु-द्धियुक्तः । वश्यः पित्राचार्यादिविनीतः । **तिल०** सत्यसन्धः सत्याअमोघासन्धा "सकृदेव प्रपन्नाय तवास्मीति च याचते । अभयं सर्वभूतेभ्यो ददामीति व्रतं मम" इत्यादिरूपिणीप्रतिज्ञायस्यसः । ज्ञानसंपन्नः ब्रह्मज्ञानपरिपूर्णः । अतएवजटायुषंप्रति "मयात्वं समनुज्ञातो गच्छ लोकाननुत्तमान्" इत्युक्तिः संगच्छते । ब्रह्मज्ञस्यैव ब्रह्मोपदेशेऽधिकारात् । विना ब्रह्मोपदेशं अनु-त्तमलोकावाप्त्यसंभवात् । नविद्यन्तेउत्तमायेभ्यस्ते अनुत्तमाः । "आत्मानंमानुषंमन्येरामंदशरथात्मजम्" इतिवचस्तु मायामात्र-मित्यन्यत्र विस्तृतम् । **तीर्थी०** श्रीमान् अखण्डितैश्वर्यसंपन्नः । रिपुनिषूदनः आश्रितजनानांयेरिपवस्तेषां नाशकः । **तिल०** प्रजापतिसमः यद्यपिरामोब्रह्मैवतथापिमानुषधर्माणांशोकमोहादीनांमायिकानांतत्रदर्शनेन औपाधिकभेदमादायतत्समत्वोक्तिः । भार्गवलोकप्रतिबन्धरूपाज्जटायुषोमोक्षप्रदानरूपात् स्वेनसहसर्वायोध्यावासिजनस्यसशरीरस्यब्रह्मलोकनयनरूपाच्चकारणात् तत्सम-त्वम् । सर्वथास्वतन्त्रस्यैवेदृशेंपुयोग्यत्वात् ॥ १२ ॥

रक्षिता जीवलोकस्य धर्मस्य परिरक्षिता । रक्षिता स्वस्य धर्मस्य स्वजनस्य च रक्षिता ॥ १३ ॥
वेदवेदाङ्गतत्त्वज्ञो धनुर्वेदे च निष्ठितः । सर्वशास्त्रार्थतत्त्वज्ञः स्मृतिमान् प्रतिभानवान् ॥ १४ ॥

नन्द्यादिपाठाद्वा ल्युः । सुपामादित्वानपत्वं । आश्रितविरोधिनिरसनशीलइत्यर्थः ॥ १२ ॥ अथावतारैकान्तान्गुणानाह—रक्षितेति । लोकेसार्वभौमःस्वकीयजनरक्षणएवयतते । अयंतुनतथा किंतुसर्वस्यप्राणिजातस्य रक्षिता । ताच्छील्येतृच् । शेषेषष्ठी । ननु यदिसर्वेषांरक्षिता तर्हिदुष्कृतिनमपि सुखिनमापादयेदित्यत्राह—धर्मस्यपरिरक्षितेति । आचरणप्रचारणाभ्यां सर्वधर्मस्य व्यवस्थापयिता । उच्छास्त्रप्रवर्तिनोपि चिकित्सकन्यायेन अनघयितेत्यर्थः । स्वस्य स्वकीयस्य शरणागतरक्षणरूपस्यधर्मस्य विशेषधर्मस्य विशिष्यरक्षिता । यद्वा धर्मस्य तत्तद्वर्णाश्रमधर्मस्य समन्ततोरक्षिता । लोकेसर्वधर्मप्रवर्तकोपि "धर्मोपदेशसमयेजनाःसर्वेपिपण्डिताः । तदनुष्ठानसमयेमुनयोपिनपण्डिताः" इतिन्यायेनस्वधर्मानुष्ठानेस्खलति नतथाऽयमित्याह । स्वस्यधर्मस्यरक्षिता स्वासाधारणस्य क्षत्रियधर्मस्यरक्षितेत्यर्थः । लोकेसर्वरक्षकोपिकश्चित्स्वजनरक्षणंकर्तुंनप्रगल्भते । "दास्यमैश्वर्यभावेन ज्ञातीनांचकरोम्यहम् । अर्धभोक्ताच भोगानां वाग्दुरुक्तानिचक्षमे" इतिभगवताप्युक्तेः । तदपिकर्तुमीहतइत्याह—स्वजनस्यचरक्षितेति । स्वजनस्यच स्वजनस्यापीत्यर्थः । अनेनस्वजनरक्षणस्यदुर्घटत्वंसूचितं । यद्वा चस्त्वर्थः । स्वजनस्य शरणागतस्य विशेषेणरक्षिता । विशेषस्तु तदपराधसहिष्णुत्वं । वक्ष्यति "मित्रभावेनसंप्राप्तंनत्यजेयंकथंचन । दोषोयद्यपितस्यस्यात्सतामेतदगर्हितम्" इति । यद्वा लोकेकश्चित्सर्वान्रक्षन् स्वजनंपीडयति । असौतु स्वजनस्यापिरक्षितेत्यर्थः । अथवा स्वावतारप्रयोजनमाह—रक्षितेति । गीतंहि "परित्राणायसाधूनांविनाशायचदुष्कृताम् । धर्मसंस्थापनार्थायसंभवामियुगेयुगे" इति । स्वजनस्य स्वशेषभूतस्येतिसर्वलोकविशेषणं रक्षणहेतुसंबन्धद्योतनार्थम् । रक्षिताइष्टप्रापकः । अनेन साधुपरित्राणमुक्तं । चशब्दोऽन्वाचये । रक्षिताच अनिष्टनिवर्तकः । अनेनानुषङ्गिकदुष्कृद्विनाशउक्तः । धर्मस्यसामान्यविशेषरूपस्य स्थापनमाहेतरवाक्यद्वयेन । रक्षितास्वस्यधर्मस्य सीतापरिणयमुखेन स्वाश्रमोचितधर्माणामनुष्ठाता । यद्वा स्वस्यधर्मःपरत्वं तस्य रक्षिता । हरधनुर्भङ्गपरशुरामजयादिनाहि परत्वं स्थापितम् । यद्वा धर्मोधनुः । "स्वाम्यस्वभावसुकृतेष्वस्त्रीधर्मंतुकार्मुके" इतिवाणः । सदाधनुर्धरः । स्वजनस्यचरक्षिता स्वभूतोजनः स्वजनः ज्ञानी । "ज्ञानीत्वात्मैवमेमतं" इतिगीतत्वात् । तस्यरक्षिता । आत्मनइवसर्वयोगक्षेमावहइत्यर्थः ॥ १३ ॥ अथास्याष्टादशविद्यास्थानाभिज्ञत्वमाह—वेदेति । विदन्त्यनेनधर्मादिकमितिवेदः । करणेघञ् । सचतुर्विधः । ऋग्यजुस्सामाथर्वणभेदात् । वेदस्यकिंचित्कराणिवेदाङ्गानि । तानिचषट् । तथोक्तं "शिक्षाकल्पोव्याकरणंनिरुक्तंज्योतिषांगतिः । छन्दसांविचितिश्चेतिषडङ्गानिप्रचक्षते" इति । तत्रशिक्षानाम अकारादीनांवेदवर्णानां स्थानकरणप्रयत्नस्वरादिबोधिका । यागक्रियाक्रमोपदेशः कल्पः । साधुशब्दव्याख्यानं व्याकरणं । "वर्णागमो वर्णलोपोवर्णविपर्ययः" इत्यादिना निश्चयेनोक्तंनिरुक्तं । कर्मानुष्ठानकालादिप्रतिपादकंशास्त्रंज्यौतिषम् । छन्दसांपद्यानांशास्त्रंछन्दोविचितिः । वेदाश्चवेदाङ्गानिच वेदवेदाङ्गानि तेषांतत्त्वं तत्त्वार्थः तंजानातीतितथोक्तः । "इगुपधज्ञाप्रीकिरःकः" इतिकप्रत्ययः । धनुर्वेदोनामधनुर्हस्तमुष्टिस्थितिविशेषाकर्षणविमोक्षणदिव्यास्त्रादिप्रयोगप्रतिपादकोग्रन्थः । चकारः इतरोपवेदसमुच्चयार्थः । क्षत्रियोधनुर्वेदप्रधान इतितस्यनिर्देशः । तेचोपवेदाश्चत्वारः । तथाहि । "आयुर्वेदोधनुर्वेदोवेदोगान्धर्वएवच । अर्थशास्त्रमितिप्रोक्तमुपवेदचतुष्टयम्" इति । आयुर्वेदोवाहटं वैदिकधर्मानुष्ठानविरोधिरोगनिवर्तकौषधादिप्रतिपादकम् । गान्धर्ववेदोभरतशास्त्रं सामगानोपयोगि । अर्थशास्त्रं चाणक्यादिप्रणीतं नीतिशास्त्रं कर्मानुष्ठानेषूपयोग्यर्थसाधनं तेषुनिष्ठितः निष्ठावान् । सर्वशास्त्रार्थतत्त्वज्ञइति । सर्वशास्त्राणि उपात्तव्यतिरिक्तानिउपाङ्गानि गोबलीवर्दन्यायात् । "धर्मशास्त्रंपुराणंचमीमांसाऽऽन्वीक्षिकीतथा । चत्वार्येतान्युपाङ्गानिशास्त्रज्ञाःसंप्रचक्षते" इति ।

तिल० स्वजनस्य स्वभक्तजनस्य । अवश्यभाविनोप्यनिष्टस्यनिरासपूर्वकंपरमेष्टमोक्षदानेनरक्षिता । तच्च अंबरीषप्रह्लादध्रुवादीनांरक्षणेनप्रसिद्धमेव ॥ १३ ॥

सर्वलोकप्रियः साधुरदीनात्मा विचक्षणः । सर्वदाभिगतः सद्भिः समुद्र इव सिन्धुभिः ॥ १५ ॥
आर्यः सर्वसमश्चैव सदैकप्रियदर्शनः । स च सर्वगुणोपेतः कौसल्यानन्दवर्धनः ॥ १६ ॥

तत्रधर्मशास्त्रंपूर्वकाण्डोपबृंहणं पुराणंवेदान्तोपबृंहणम् । न्यायमीमांसे सर्ववेदसाधारण्यौ तेषामर्थतत्वं अर्थयाथात्म्यं निगूढाशयमित्यर्थः । तत्जानातीतितथा । अष्टादशविद्यास्थानतत्वज्ञइत्यर्थः । स्मृतिमान् ज्ञातार्थविषयेविस्मरणलेशरहितः । प्रतिभानवान् व्यवहारकाले श्रुतस्याश्रुतस्यवाझटितिस्फुरणंप्रतिभानं तद्वान् ॥ १४ ॥ अथसर्वदासदुपास्यत्वमाह—सर्वेति । सर्वेलोकाःप्रिया यस्यसः सर्वलोकप्रियः । सर्वेषांलोकानांप्रियः सर्वलोकप्रियः । सर्वलोकप्रियत्वात्सद्भिरभिगन्तव्यइत्यर्थः । साधुः तत्कार्यसाधकः । उण्प्रत्ययः । यद्वा साधुः उचितः सदभिगमनोचितइत्यर्थः । "साधुस्त्रिपृचितेसौम्येसज्जनेवार्धुषावपि " इतिवैजयन्ती । अदीनात्मा अकार्पण्यात्मा । अतिगंभीरप्रकृतिरिति यावत् । विचष्टइतिविचक्षणः । नन्द्यादित्वाल्ल्युः " अस्युस्यनेचक्षिङःख्याञ्नेतिवाच्यं" इतिख्याञादेशाभावः । विविधंवक्तीत्यर्थः । अतएवसर्वदासदुपास्यमानत्वमाह—सर्वदेति । सर्वदा अस्त्राभ्यासकालादिष्वपि सद्भिः सत्पुरुषैः अभिगतःपरिगतः । परिवारितइत्यर्थः । कथमिव समुद्रःसिन्धुभिरिव नदीभिरिव । "स्त्रीनद्यांनानदेसिन्धुर्देशभेदेंबुधौगजे" इतिवैजयंन्ती । सर्वदाभिगतः सद्भिः खुरलीकेलिश्रमविश्रान्तयेकांचिच्छायामवगाहमानेरामेसन्तःसर्वेतत्तदर्थविशेषश्रवणायपरिवृत्यस्थिताइत्यर्थः । तथाचवक्ष्यति । " ज्ञानवृद्धैर्वयोवृद्धैःशीलवृद्धैश्चसज्जनैः । कथयन्नास्तवैनित्यमस्त्रयोग्यान्तरेष्वपि " इति । अस्त्रयोग्यः अस्त्राभ्यासः । समुद्रइवसिन्धुभिः । एवंसद्भिरभिगमनंनरामस्याज्ञातज्ञापनाय तस्यस्वतएवपूर्णत्वात् । किंतुस्वेषामेवापूर्वार्थविशेषलाभाय गत्यन्तराभावादितिभावः । सिन्धवोहि स्वसत्तालाभायैवसमुद्रमभियान्ति । नतुतस्यातिशयापादनाय ॥ १५ ॥ एवमभिगमनहेतुभूतंसौलभ्यादिकंविशदयति—आर्यइति । आङ्पूर्वाद्गतावित्यस्माद्धातोःकर्मणिण्यत्प्रत्ययः । अभिगन्तुमर्हइत्यर्थः । किंसतामेव नेत्याह—सर्वसमः । जातिगुणवृत्त्यादितारतम्यंविनासर्वेषामाश्रयणीयत्वेतुल्यः । अस्यकादाचित्कत्वंवारयत्येवकारः । चकारउक्तसमुच्चयार्थः । किंचिदुपदेशाभावेऽपिसौन्दर्यादभिगन्तव्यत्वमाह—सदैकप्रियदर्शनइति । सदाऽनुभवेऽपि नवनवतयाभासमानइत्यर्थः । अथ " इषुक्षयान्निवर्तन्तेनान्तरिक्षक्षितिक्षयात् । मतिक्षयान्निवर्तन्तेनगोविन्दगुणक्षयात् " इतिभगवद्गुणानांवर्षायुतेनापिवर्णयितुमशक्यत्वेन संग्रहेणवदन्नुत्तरमुपसंहरति । सचेति । कोसलस्यराज्ञोपत्यंस्त्रीकौसल्या । " वृद्धेत्कोसलाजादाञ्ञ्यङ् " इति ञ्यङ्प्रत्ययः । " यङश्चाप् " इतिचाप् । तस्याआनन्दंवर्धयतीति कौसल्यानन्दवर्धनः । चशब्दएवकारार्थः । कौसल्यासुतत्वेनावतीर्णोविष्णुरेववेदान्तोदितसकलगुणसंपन्नः परमात्मा नतुब्रह्मादिष्वन्यतमइत्यर्थः । दशरथनन्दनइत्यनुक्तिः पुत्रलाभफलस्य कौसल्ययैवलाभात् । अतएववक्ष्यति "कौसल्या लोकभर्तारं सुषुवेयंमनस्विनी " इति ॥ १६ ॥

तीर्थी० साधुः अपकारिष्वपिउपकारशीलः । अदीनात्मा अतिव्यसनपरंपरायामपिअक्षुभितान्तःकरणः । विचक्षणः तत्तत्कालकर्तव्यवैदिकलौकिकक्रियासुकुशलः । **तनि०** सिन्धुभिः अनर्गलप्रवाहाभिर्यथासमुद्रोक्षोभ्यः एवंजाबालिप्रभृतिभिः क्षोभितोपि अक्षोभ्यइतिव्यञ्जितम् । सर्वदेत्यनेन कालविशेषेएकदासिन्धुभिः परिगतः समुद्रः अयंतु सर्वदेति वैलक्षण्यंद्योत्यते । सर्वदाभिगतइत्यनेन लोकेप्रयोजनवशेनसतामभिगमनेतैःसहजल्पवितण्डादिकरणेतेचासह्यतयापुनर्नाभिगच्छेयुः रामस्तुनतथेतिध्वन्यते । वक्ष्यतिच "नविगृह्यकथारुचिः" इति । रत्नाकराभिगतसिन्धूनांतदभिगमनदेशएवकतिपयरत्नसंबन्धः । एवं गुणाकररामसंबन्धादेवकतिपयगुणाः प्रकाश्यन्तइतिअभिगतपदव्यङ्ग्यं । लोके राजकुमाराः कदाचिद्विनोदार्थेएकान्तगोष्ठ्यां शृङ्गारहास्यरसविद्भिः परिगताभवन्ति अयंतुनतथेतिसत्पदव्यङ्ग्यम् । सिन्धुभिः समुद्रइवेति सतांप्राप्यान्तरराहित्यंरामस्यसौलभ्यं चव्यज्यते । **तीर्थी०** सर्वदेत्यनेन नदीनांसमुद्रसेवायामिवभक्तानांभगवत्सेवायांकालनियमोनास्तीत्युक्तंभवति । अभिगतइत्यनेन परमप्राप्यत्वं समुद्रइव सिन्धुभिरित्यनेन सतांप्राप्यान्तरराहित्यं प्राप्तानांच सतांतेनैक्यंच प्रतीयते ॥१५॥ **ती०** आर्यः पूज्यः । सर्वसमः शत्रुमित्रोदासीनेषुवैषम्यरहितः । **तिल०** सर्वेषु सुखदुःखोदर्केषु समः हर्षविषादरहितः । **ति० शि (पा०)** सदैवप्रियदर्शनः । सदैव सर्वावस्थासु । **तिल०** कौसल्यानन्दवर्धनइत्यनेन महाकुलप्रसूतत्वप्रधानमहिषीपुत्रत्वादिरूपस्यअभिषेकोचितधर्मस्यसत्तादर्शिता ॥ १६ ॥

समुद्र इव गांभीर्ये धैर्येण हिमवानिव । विष्णुना सदृशो वीर्ये सोमवत्प्रियदर्शनः ॥ १७ ॥
कालाग्निसदृशः क्रोधे क्षमया पृथिवीसमः । धनदेन समस्त्यागे सत्ये धर्म इवापरः ॥ १८ ॥
तमेवंगुणसंपन्नं रामं सत्यपराक्रमम् । ज्येष्ठं श्रेष्ठगुणैर्युक्तं प्रियं दशरथः सुतम् ॥ १९ ॥

अथास्य निस्समाभ्यधिकत्वंवक्तुं लोकेप्रकृष्टवस्तूनांतदे-
कैकगुणसाम्यमाह—समुद्रइवेत्यादिश्लोकद्वयेन । गां-
भीर्यंनाम स्वान्तर्गतपदार्थाप्रकाशकत्वं । यथासमुद्रः-
स्वान्तर्गतंरत्नादिकमप्रकाशयन्नेववर्तते तथाऽयमपि
स्वीयंपरत्वमप्रकटयन्नेवास्तइत्यर्थः । वक्ष्यति "आत्मा-
नंमानुषंमन्ये" इति । धैर्यंनाम शोकहेतुसद्भावेपि नि-
श्शोकत्वम् । तेन हिमवानिव हिमवत्सदृशः । "गिर-
योवर्षधाराभिर्हन्यमानानविव्यथुः । अभिभूयमाना-
व्यसनैर्यथाऽधोक्षजचेतसः" इतिह्युक्तं । अत्रवस्तुतः
समुद्रादेरुपमानत्वाभावेपिप्रतिपत्तॄणामुपमानत्वंसंभव-
तीत्येवमुक्तं। यथा "इषुवद्गच्छतिसविता" इत्यत्र । वि-
ष्णुनेति । वीर्येविषयेविष्णुनासदृशः । विष्णोरर्धत्वेन
रामस्यविष्णुसादृश्यंसुवचमेव । "सउश्रेयानभवति
जायमानः" इत्युक्तत्वेनतदंशस्यापितत्सदृशत्वंयुक्त-
मेव । सोमवत्प्रियदर्शनः शोकनिवृत्तिपूर्वकमाह्लादकरः
॥ १७ ॥ क्रोधेकालाग्निसदृशः कालाग्निक्रोधसमक्रोध
इत्यर्थः।स्वविषयापराधमेवस्वयंसहते। स्वाश्रितविषया-
पराधकरणेतु ज्वलज्ज्वलनइव शीतलतरेपिहृदये कोप-
मावहतीत्यर्थः। जलेहि कालाग्निर्ज्वलति। क्षमया क्षमा-
रूपसदृशधर्मेण पृथिवीसमः पृथिवीतुल्यक्षमइत्यर्थः ।
स्वस्मिन्नपकारकरणेअचेतनवद्वर्ततइत्यर्थः । "नस्मर-
त्यपकाराणांशतमप्यात्मवत्तया" इतिवक्ष्यति।त्यागे त्या-
गविषये धनदेनकुबेरेणसमः तद्वद्दातेत्यर्थः।कुबेरस्यत्या-
गित्वं "त्यागेचधनदोयथा" इत्यादिवक्ष्यमाणवचनश-
तसिद्धं। नचतस्यलुब्धत्वंकुतश्चित्सिद्धं। त्यागेसत्यपिध-
नदवदाढ्यइतिव्याख्यानंतुप्रक्रमविरुद्धं। नह्याढ्यत्वंक-
श्चिद्गुणः । तथासति लुब्धत्वमेवास्यसिद्धंस्यात् । सत्ये-
सत्यवचने अपरः उत्कृष्टवस्त्वन्तररहितः । धर्मः धर्मदे-
वतेवस्थितः । धर्मदेवतेवनिरपायसत्यवचनइत्यर्थः ।
सत्ये अपरोधर्मइवस्थितइतिव्याख्याने प्रकृतौपम्ये-
विरोधः । तस्योत्प्रेक्षारूपत्वात् । क्वचिदुपमाक्व-
चिदुल्लेखः क्वचिदुत्प्रेक्षेतिविजातीयसंकरइत्यप्याहुः
॥ १८ ॥ एवंवेदान्तोदितजगत्कारणत्वसर्वज्ञत्वसर्वश-
क्तित्वसर्वान्तर्यामित्वप्रमुखसमस्तकल्याणगुणाकरंब्रह्म
किंरामत्वेनावतीर्णोविष्णुरुतब्रह्मरुद्रादिष्वन्यतमइति-
वाल्मीकिनावेदोपबृंहणायपृष्टे वेदान्तोदितगुणानांतद-
न्येष्वसंभवात्तस्यैवसंभवाच्च सएववेदान्तोदितंपरंतत्व-
मित्युपदिष्टं । तत्रतत्रजगत्कारणप्रकरणेषुप्रयुक्ताःस्वयं-
भूशिवादिशब्दाः सद्ब्रह्मादिसामान्यशब्दवदपर्यवसान-
वृत्त्यावयववृत्त्यावापरमात्मपराइत्यप्यर्थसिद्धम् । ए-
वंवेदान्तसारार्थः संदर्शितः । ननु ब्रह्मस्वरूपमिवफल-
स्वरूपं तदुपायस्वरूपमपि वेदार्थत्वादुपबृंहणीयं तदु-
भयंकिमितिनपृष्टं नोपदिष्टंच । मैवं । परिपप्रच्छेत्यत्र
परिणा तदुभयस्वरूपमपिपृष्टमेव । उत्तरेच "प्रजा-
नांचहितेरतः" इत्यादिनोपायत्वं "सदैकप्रियदर्श-
नः" इत्यादिनोपेयत्वं चतस्यैवेत्युक्तं । ननु सिद्धस्यै-
वतस्योपायत्वे सर्वमुक्तिप्रसंगइतिचेन्न । यउपायोपे-
याधिकारी तस्यैवफलंदिशति नानधिकारिणइतिव्यव-
स्थापनात् । अधिकारश्च तत्प्राप्त्यपेक्षासाधनान्तरपरि-
त्यागश्चेत्युत्तरग्रन्थेसुव्यक्तं । ननु वेदोपबृंहणमिदंरामा-
यणमित्युक्तं धर्मोपि वेदार्थः सकथं नोपबृंहितः । किंचे-
यताग्रन्थेनवेदान्तार्थउपबृंहितः किमतःपरेणग्रन्थेन ।
उच्यते । उक्तानुक्तांश्चकल्याणगुणांस्तच्चरित्रनिदर्श-
नमुखेनप्रतिपादयितुमुत्तरग्रन्थः पूर्वभागोपबृंहणंच
रामायणपुरुषाचारमुखेनहि सामान्यधर्मो विशेषधर्म-
श्चोपबृंहितः । ननु तथापिकथंबालकाण्डकथानोपद-
र्शिता । मैवं । तत्रप्रदर्शनीयगुणविशेषाभावात् । नच
साप्यत्यन्तमप्रदर्शिता । इक्ष्वाकुवंशप्रभवइत्यवतरणं
महावीर्यइतिताटकाताटकेयादिवधः धनुर्वेदेचनिष्ठित-
इतिकौशिकाधिगतनिखिलदिव्यास्त्रवत्त्वं श्रीमानिति-

तीर्थी० यद्यपि अयमेवरामोविष्णुः । मानुषोपाधिभेदाद्विष्णुनेतिसादृश्यम् । यद्वा विष्णुनाम्नेनैववीर्येसदृशः । उपमानान्तरराहित्यमनेनोक्तम् । **तिल०** सोमवत् व्यवहारनिरीक्षणकालेसौम्यदर्शनः ॥ १७ ॥ **तिल०** क्षमया प्रतीकारसामर्थ्येपि अपकारसहिष्णुतया । **विषमपदविवृतिः** । धनंददतीतिधनदाः धनदातारः तेषांइना अधिपतयः चिन्तामणिकल्पवृक्षप्रभृतयः तैः रामः ॥ १८ ॥

प्रकृतीनां हितैर्युक्तं प्रकृतिप्रियकाम्यया । यौवराज्येन संयोक्तुमैच्छत्प्रीत्या महीपतिः ॥ २० ॥
तस्याभिषेकसंभारान्दृष्ट्वा भार्याऽथ कैकयी । पूर्वं दत्तवरा देवी वरमेनमयाचत ।
विवासनं च रामस्य भरतस्याभिषेचनम् ॥ २१ ॥

वैदेहीलाभश्चेतिबालकाण्डकथासूचनात् । अथायोध्याकाण्डकथांप्रस्तौति—तमेवमित्यादिना । आदौश्लोकद्वयमेकान्वयं । दशसु दिक्षुरथोयस्यसदशरथः । अप्रतिहतरथत्वेन रामायराज्यंदत्तं । भीतिदत्तत्वाभावेन पुनरनादातव्यत्वमुक्तं । महीपतिः अस्वामिदत्तत्वाभावउच्यते । एवंदात्रदोषेण पुनरनाहरणीयत्वमुक्त्वा संप्रदानगुणेनाप्याह—तमित्यादिना । तं प्रसिद्धं । एवंगुणसंपन्नं पूर्वोक्तसर्वगुणसमृद्धं । सर्वस्यस्वामिभूतमितियावत्।सत्यपराक्रमं अमोघपराक्रमं । सर्वरक्षणशक्तमितियावत् । ज्येष्ठं जन्मक्रमेणापिराज्यार्हं । श्रेष्ठगुणैर्युक्तं नीतिशास्त्रोक्तषाड्गुण्ययुक्तं । सन्धिविग्रहयानासनद्वैधीभावसमाश्रयाः षड्गुणाः कामन्दकोक्ताः । प्रियं प्रीतिविषयं । अनेन तात्कालिकप्रीतिदानव्यावृत्तिः । सुतं जन्मनैवराज्यार्हं ॥ १९ ॥ प्रकृतीनां प्रजानां हितैः हितकरणैर्युक्तं । अनेन सर्वानुकूल्यमुक्तं । एवंभूतं रामं प्रकृतिप्रियकाम्यया अमात्यादीनां प्रीतिकरणेच्छया । इच्छायांकाम्यच्प्रत्ययः । " अप्रत्ययात् " इत्यप्रत्ययः । " अजाद्यतष्टाप् " । प्रीत्या स्वप्रीत्याच । चकारोर्थसिद्धः । "गामश्वंपुरुषं जगत्" इतिवत् । मन्त्रिवृद्धैरालोचनपूर्वकंकृतत्वादप्रत्याख्येयत्वमुच्यते । "प्रकृतिःपञ्चभूतेषु स्वभावेमूलकारणे । छन्दःकारणगुह्येषुजन्सामात्यादिमातृषु " इत्युभयत्रवैजयन्ती । युवाचासौराजाचयुवराजः तस्यभावःकर्मवायौवराज्यं । ब्राह्मणादित्वात्ष्यञ् । तेन पितरिराज्यं निर्वहत्येव सर्वनिर्वाहकत्वेनाभिषिक्तःपुत्रोयुवराजः तस्यभावेनेत्यर्थः । संयोक्तुं घटयितुं ऐच्छत् तत्संभारान्समभरदित्यर्थः ॥ २० ॥ एवंपुनरादानायोग्यं रामायराज्यप्रदानमुक्त्वा अपरिहरणीयमनन्तरभावि कैकेय्यायाचनमाह—तस्येति । सार्धश्लोकएकान्वयः । अथ रामायराज्यप्रदानेच्छानन्तरं तस्य रामस्यअभिषेकःकर्मविशेषः । तस्यसंभारान् उपकरणानि—"औदुंबर्यासन्दी तस्यैप्रादेशमात्राःपादाःस्युः" इत्यादीनि" "दधिमधुसर्पिरातपवर्ष्याआपः" इत्यन्तानि ब्राह्मणोक्तानि दृष्ट्वा मन्थरामुखेनदर्शनइवज्ञात्वा। भार्या भर्तुयोग्या नतु स्वातन्त्र्यार्हा । पूर्वंपूर्वकाले । विभक्तिप्रतिरूपकमव्ययं । तेन दशरथेन दत्तवरा शंबरासुरविजयकाले सारथ्यकरणपारितोषिकतया दत्तवरा । याच्नहेतुत्वेनेदमुक्तं । दीव्यतीतिदेवी । पचाद्यच् । देवडिति टित्त्वेनपाठात् ङीप् । भोगोपकरणभूतेति व्यामोहमूलोक्तिः । कैकयी केकयानां राजा केकयः । " क्षत्रियसमानशब्दाज्जनपदात्तस्यराजन्यपत्यवत् " इत्यञ् । " जनपदेलुप् " केकयस्यापत्यंस्त्रीकैकयी । "जनपदशब्दात्क्षत्रियादञ् " इत्यपत्यार्थेऽञ् " टिड्ढाणञ्—" इत्यादिनाङीप् । नन्वञ्प्रत्यये " केकयमित्रयुप्रलयानांयादेरियः " इतीयादेशःकिंनस्यात् । उच्यते । " जरायाजरसन्यतरस्याम् " इत्यतोऽन्यतरस्यामित्यनुवृत्तेस्तस्यवैकल्पिकत्वात् । नचेयादेशाभावआर्षइतिवाच्यं । कैकेयीकैकयीतिशब्दभेदप्रकाशिकायामुक्तेः । " प्राक्कैकयीतोभरतस्ततोभूत् " इतिभट्टिप्रयोगात् । केकयीतिपाठेतुकेकयान्जन्मभूमित्वेनाचष्ट इतिकेकयी । तदाचष्टइतिणिजन्तादौणादिकेस्त्रियामिकारप्रत्ययेटिलोपेणिलोपेचकृते " कृदिकारादक्तिनः " इतिङीषित्याहुः । " पुंयोगादाख्यायां " इतिवाङीप् तत्रयोगशब्देनाविशेषात् जन्यजनकभावोपिगृह्यते । केकयशब्दोमूलप्रकृतिरेवोपचारात्तदपत्येवर्तते । शार्ङ्गरवादिपाठात्ङीनितिन्यासकारः । कैकयी । एनंदश-

तिल० प्रकृतिप्रियकाम्यया प्रकृतीनां प्रियंकर्तुमिच्छया । युवराजेनहि प्रजाकृत्येसंपादितेसति व्यवहारादिनिरीक्षणजन्यश्रमनिवृत्तिरूपंप्रियंस्वस्यापिभवति ॥ २० ॥ **तीर्था०** पूर्वं पुरादत्तौवरौयस्यै इन्द्रसहायार्थं प्रवृत्तदशरथयुद्धकाले दशरथेपरप्रयुक्तामासुरींमायां धवलाङ्गाख्यमुनिदत्तविद्ययावारयन्त्यैकैकेय्यै तुष्टेनदशरथेनदत्तंवरद्वयमितिपौराणिकीप्रसिद्धिः । **तिल०** कैकयी राज्ञः कनीयसीभार्या । अत्रयद्यपिकेकयशब्दादञि "केकयमित्रयु—" इत्यादिनायादेरियादेशेगुणे आदिवृद्धौङीपियस्येतिलोपेकैकेयीत्येवसाधुः । तथापि "अपिमाषंमषं कुर्याच्छन्दोभङ्गंनकारयेत्" इतिन्यायेन कैकयीतिप्रयोगः । पुंयोगलक्षणेङीषि केकयीतिपाठइत्यन्ये । **शिरो० (पा०)** अथकेकयी । केकयस्य केकयजनपदाधिपतेः कन्या । "पुंयोगादाख्यायाम्" इतिङीष् । तत्रयोगशब्देन अविशेषाज्जन्यजनकभावोपिगृह्यते । केकयीतिपाठे कंसुखमेव एकं केवलं कैकं तद्याति देवादीन्प्रापयतीति कैकयी । गौरादित्वंप्रज्ञादित्वंवाकल्प्यमिति ॥ २१ ॥

स सत्यवचनाद्राजा धर्मपाशेन संयतः । विवासयामास सुतं रामं दशरथः प्रियम् ॥ २२ ॥
स जगाम वनं वीरः प्रतिज्ञामनुपालयन् । पितुर्वचननिर्देशात्कैकेय्याः प्रियकारणात् ॥ २३ ॥
तं व्रजन्तं प्रियो भ्राता लक्ष्मणोनुजगामह । स्नेहाद्विनयसंपन्नः सुमित्रानन्दवर्धनः ।
भ्रातरं दयितो भ्रातुः सौभ्रात्रमनुदर्शयन् ॥ २४ ॥

रथं । " द्वितीयाटौस्स्वेनः " इत्यन्वादेशेएनादेशः । रामस्यविवासनं भरतस्याभिषेचनंच वरमयाचत अर्थितवती । याचिर्द्विकर्मकः ॥२१॥ सइति । राजासर्वरञ्जकः । " राजाप्रकृतिरञ्जनात् " इतिप्रयोगात् । औणादिकःकनिन्प्रत्ययः । यद्यपि " रजकरजनरजस्सूपसंख्यानं " इतिवचनादत्रनलोपप्रसक्तिर्नास्ति तथापिरजस्साहचर्यादौणादिकस्यतत्रग्रहणं । स पूर्वरामायदत्तराज्यः । मन्त्रिप्रमुखैरालोचनपूर्वकंप्रतिज्ञातरामाभिषेकइत्यर्थः । दशरथः । धर्मः पाशइवधर्मपाशः । " उपमितंव्याघ्रादिभिः—" इतिसमासः । व्याघ्रादेराकृतिगणत्वात् । तेनसंयतः बद्धः सन् सत्यवचनात् स्त्रीविषयवचनसिद्धिहेतोः । प्रियं सुतं विवासयामास । " रामोविग्रहवान्धर्मः " इत्युक्तरीत्याप्रथमंअङ्गीकृतंपरमधर्मपरित्यज्यानन्तरंप्रवृत्तंस्त्रीविषयंक्षुद्रधर्ममवलंबितवानित्यर्थः । एतेन " सांकेत्यंपारिहास्यंवा स्तोभंहेलनमेववा । वैकुण्ठनामग्रहणमशेषाघविनाशनं " "आक्रुश्यपुत्रमघवान्यदजामिलोपिनारायणेतिम्रियमाणउपैतिमुक्तिं । " " कामाद्गोप्यो भयात्कंसः" इत्येवं यथाकथंचित्भगवन्नामवतांमुक्तिसिद्धौ सर्वदारामपरायणस्यदशरथस्य कथंनमुक्तिरितिशङ्कादूरोत्सारिता । सिद्धसाधनत्यागात्काशकुशावलंबनात् धर्मपाशप्रतिबन्धाच्चमुक्तिप्रसङ्गाभावात् । तथाच मुमुक्षुणादशरथवन्नवर्तितव्यमित्युक्तंभवति ॥ २२ ॥ पितृवचनपरिपालनमवश्यंकर्तव्यमित्येतद्रामाचारमुखेनदर्शयति—सजगामेति । सरामः वीरोपि राज्यपरिपालनसमर्थोपि कैकेय्याःप्रियकारणात् प्रीतिहेतुभूतात् स्त्रीपारवश्येनोक्तादपीत्यर्थः । पितुर्वचननिर्देशात् वचनमेवनिर्देशः आज्ञा । " आज्ञायामपिनिर्देशः " इतिबाणः । तस्माद्धेतोः प्रतिज्ञां कैकेयीसमक्षंकृतांप्रतिज्ञां अनुपालयंश्च । " लक्षणहेत्वोः क्रियायाः " इतिहेत्वर्थे शतृप्रत्ययः । वक्ष्यति । " तदब्रूहिवचनं देविराज्ञोयदभिकाङ्क्षितं । करिष्येप्रतिजानेचरामो द्विर्नाभिभाषते " इति स्वप्रतिज्ञापालनार्थं पितृवचनपालनार्थंचेत्यर्थः । वनंदण्डकावनमुद्दिश्यजगाम ॥ २३ ॥ " इक्ष्वाकुवंश— " इत्यादिना समस्तकल्याणगुणपरिपूर्णत्वोक्त्या परत्वमुक्तं "तमेवम्—" इत्यादिनाऽभिषेकप्रवृत्तिनिवृत्तिकथनात् सौलभ्यमुक्तं । अथ परत्वसौलभ्यानुगुणं समाश्रयणमाह—तंव्रजन्तमिति । यद्वा । अथसिद्धसाधननिष्ठैःलक्ष्मणवत्कैङ्कर्यपरैर्भवितव्यमितिव्यञ्जयन्नाह । तंव्रजन्तमिति सार्धश्लोकएकान्वयः । प्रीणातीति प्रियः । रामेप्रीतिमान् । "इगुपधज्ञाप्रीकिरःकः" इति कः । अनेनानुगतिहेतुर्भक्तिरुक्ता । भ्राता"भ्रातास्वामूर्तिरात्मनः"इति मूर्तिभूतः । विनयसंपन्नः कैङ्कर्यहेतुविनययुक्तः । विनयः शेषत्वज्ञानं रामकैङ्कर्यरूपाचारोवा । "विनयोधर्मविद्यादिशिक्षाचारप्रशान्तिषु" इति वैजयन्ती । सुमित्रायाःआनन्दंवर्धयतीति सुमित्रानन्दवर्धनः।"सृष्टस्त्वंवनवासाय" "रामंदशरथंविद्धिमांविद्धिजनकात्मजाम् । अयोध्यामटवींविद्धिगच्छतातयथासुखं"इति सुमित्रयैवोक्तत्वात् । दयितःरामस्येष्टतमः । "यमेवैषवृणुतेतेनलभ्यः"इत्युक्तरीत्याप्रियतमत्वेनवरणीयइत्यर्थः । लक्ष्मणःकैङ्कर्यलक्ष्मीसंपन्नो भविष्यतीतिज्ञात्वा लक्ष्मणइति वसिष्ठेनकृतनामधेयः "सतुनागवरःश्रीमान्" " अन्तरिक्षगतःश्रीमान् " इत्युक्तेः। कैङ्कर्यलक्ष्मीवत्त्वं लक्ष्मणोलक्ष्मिसंपन्नइतिवक्ष्यति । "लक्ष्म्याअच्च" इतिपामादिगणसूत्रान्मत्वर्थीयोनप्रत्ययः अकारश्चान्तादेशः । "लक्ष्मीवाँल्लक्ष्मणः श्रीमान्" इति पर्यायपाठश्च । सुभ्रातुर्भावः सौभ्रात्रं । भावे अण् अनुशतिकादित्वात् उभयपदवृद्धिः । रामं विना क्षणमपिजीवनाक्षमत्वं सुभ्रातृत्वम् । वक्ष्य-

शिरो० धर्मस्यपः पालनं तस्याशोव्याप्तिः तेनसंयतः धार्मिकशिरोमणिरित्यर्थः ॥ २२ ॥ **शिरो०** कैकेय्याः प्रिये विवासनेयत्कारणं ब्रह्मप्रार्थनास्वीकारसिद्ध्याभवितव्यं तस्माज्जातात्पितुर्वचननिर्देशाद्धेतोः प्रतिज्ञां स्वकृतप्रतिश्रवमनुपालयन्सवीरो रामोवनंजगाम ॥ २३ ॥

रामस्य दयिता भार्या नित्यं प्राणसमा हिता । जनकस्य कुले जाता देवमायेव निर्मिता ॥ २५ ॥
सर्वलक्षणसंपन्ना नारीणामुत्तमा वधूः । सीताप्यनुगता रामं शशिनं रोहिणी यथा ॥ २६ ॥
पौरैरनुगतो दूरं पित्रा दशरथेन च । शृङ्गिबेरपुरे सूतं गङ्गाकूले व्यसर्जयत् ।
गुहमासाद्य धर्मात्मा निषादाधिपतिं प्रियम् ॥ २७ ॥

ति । "नचसीतात्वयाहीनानचाहमपिराघव । मुहूर्तमपिजीवावोजलान्मत्स्याविवोद्धृतौ" इति रामस्यलक्ष्मणविरहासहत्वंसुभ्रातृत्वं । तच्चवक्ष्यति । "नचतेनविनानिद्रांलभतेपुरुषोत्तमः।मृष्टमन्नमुपानीतमश्नाति नहि तंविना " इति । तदनुदर्शयनसन । यद्वा एवं सुभ्रातृभिर्वर्तितव्यमिति दर्शयन्निवेति गम्योत्प्रेक्षा । व्रजन्तं एकान्तस्वाभिमतसकलकैङ्कर्यप्रधानप्रवृत्तं भ्रातरं उपलक्षणमिदं । "मातापिताचभ्राताचनिवासः शरणं सुहृत् । गतिर्नारायणः " इत्युक्तसकलविधबन्धुः । वक्ष्यति । " अहंतावन्महाराजेपितृत्वंनोपलक्षये । भ्राताभर्ताचबन्धुश्च पिताचममराघवः" इति स्नेहात् " बाल्यात्प्रभृतिसुस्निग्धोलक्ष्मणोलक्ष्मिवर्धनः " इत्युक्तरामभक्तेरेवहेतोः अनुजगाम । " येनयेनधातागच्छतितेनतेनसहगच्छति " इतिवदपूर्वोयंकश्चिद्वृत्तिविशेषइतिऋषिर्विस्मयते हेति । " हविस्मयेविषादे च " इतिबाणः । आशालेशमात्रेण स्वस्मिन्नेवाधिकप्रेमाणंभगवन्तंकुत्रचिदेकान्तस्थले स्वमनोरथानुरूपविशिष्टविषयसकलकैङ्कर्यलाभायानुसरन्नधिकारी अत्रध्वन्यते ॥ २४ ॥ अथसीतायाः साधनदशायांपुरुषकारतया फलदशायांप्राप्यतयाचान्वयान् तयानित्ययोगंदर्शयति—रामस्येत्यादिश्लोकद्वयेन । रामस्य अभिरामस्यापि दयिता अभिरामा नित्यंभार्या हृदिसंततंधार्या । बिभर्तेः " ऋहलोर्ण्यत् " इतिण्यत् । प्राणसमा उक्तार्थद्वयेहेतुरयं । हिता चेतनहितकरा । " मित्रमौपयिकंकर्तुं " इत्यादि वक्ष्यति । रामहितपरावा । वक्ष्यति " स्मारयेत्वांनशिक्षये " इति । जनकस्यकुलेजाता आचारप्रधानेत्यर्थः । देवमायेव निर्मिता अमृतमथनानन्तरमसुरमोहनार्थंनिर्मिताविष्णुमायेवस्थिता । "माययामोहयित्वातान्विष्णुःस्त्रीरूपमास्थितः " इत्युक्तेः । यद्वा निर्मिता कृतमूर्तिः । देवमाया विष्णोराश्चर्यशक्तिरिवस्थिता । अनेन सौन्दर्यस्यपराकाष्ठोक्ता । अथवा निर्मिता कृतावतारा देवमाया देवस्य विष्णोर्लक्ष्मीः । वक्ष्यति उत्तरकाण्डे "ऋतेमायांविशालाक्षींतवपूर्वपरिग्रहाम्" इति । इवशब्दोवाक्यालंकारे एवकारार्थेवा ॥ २५ ॥ सर्वलक्षणसंपन्ना सामुद्रिकोक्तैःसर्वैरुत्तमस्त्रीलक्षणैःसंपन्ना । नारीणामुत्तमा पूर्वोक्तसर्वप्रकारेणसर्वस्त्रीश्रेष्ठा । पुरुषोत्तमरामानुरूपनार्युत्तमेत्यर्थः । वधूः दशरथस्नुषा अचिरोढावा । " अचिरोढावधूः " इतिवैजयन्ती । सीता । " सीतालाङ्गलपद्धतिः " । तज्जन्यत्वात्तद्व्यपदेशः । अनेनायोनिजत्वोक्तिः दिव्यलोकवासकालिकसौन्दर्यान्यूनतोक्ता । अपिशब्देनलक्ष्मणानुगतिःसमुच्चीयते । राममनुगता निरवधिकसौन्दर्याकृष्टहृदयतयानुगतवती । रोहिणीयथा । यथाशब्दइवार्थः । " यथातथेवैवंसाम्ये " इत्यमरः । रोहिणीनामचन्द्रस्यासाधारणपत्नी । " वरिष्ठासर्वनारीणामेषाचदिवि देवता । रोहिणीनविनाचन्द्रंमुहूर्तमपिदृश्यते " इति । नकेवलंरामसौन्दर्याकृष्टानुगता किंतु कलङ्किनं रोहिणीव पातिव्रत्यस्वरूपप्रयुक्तागतेत्यर्थः । अयमर्थोऽनसूयासमक्षंव्यक्तीभविष्यति ॥ २६ ॥ रामभक्त्यविशेषाल्लक्ष्मणसीतावत्पौराणामप्यनुवृत्तिंदर्शयति—पौरैरिति । पुरेभवाः पौराः । अनेनस्त्रीबालवृद्धाविशेषउक्तः । दूरमनुगतइत्यनेन विरहासहिष्णुत्वोक्त्या पौराणांपरमाभक्तिरुक्ता । " पुनर्विश्लेषभीरुत्वंपरमाभक्तिरुच्यते " इतिवचनात् । पौरैरित्यनेन तद्देशवासएव रामभक्तिहेतुरित्युक्तं । पित्रादशरथेनच । चशब्दोऽन्वाचये अल्पमनुगतइत्यर्थः । आद्वारंहितेनानुगतं । पित्रेत्यनेन पुत्रकृतवात्सल्यादनुगतइत्युक्तं । एवंपरत्वसौलभ्ये दर्शिते । अथवात्सल्यसौशील्ये दर्शयति —शृङ्गिबेरपुरइति । धर्मौ आश्रितवात्सल्यसौशील्ये

ती॰ देवमायेव सुन्दोपसुन्दमोहनार्थं देवैरुत्पादिता सर्वोत्तमसौन्दर्यातिलोत्तमेव । तिल॰ जनकस्यकुले अन्वयेजाता । यद्यप्येषा अयोनिजैव तथापि सीरध्वजस्य देवयजनलाङ्गलपद्धतौ आविर्भूतत्वाद्देवमुक्तिः । अतएवाह—देवमायेवेति । सेव अचिन्त्योदयस्थितिलया देवैरेव स्वकार्यसिद्ध्याकाङ्क्षिभिः निर्मिता आविर्भाविता ॥ २५ ॥

गुहेन सहितो रामो लक्ष्मणेन च सीतया ॥ २८ ॥

ते वनेन वनं गत्वा नदीस्तीर्त्वा बहूदकाः । चित्रकूटमनुप्राप्य भरद्वाजस्य शासनात् ॥ २९ ॥

आत्मास्वभावोयस्यसतथा । आश्रितवात्सल्यसौशील्यस्वभावोरामः । शृङ्गिवेरपुरे शृङ्गिणः कृष्णसारादयः तेषांवेराणि कृत्रिमशरीराणि । "प्रतिछन्दः प्रतिनिधिर्वेरंचप्रतिरूपकं" इतिवैजयन्ती । वञ्चनेनसजातीयमृगग्रहणार्थानियस्मिन् तत् शृङ्गिवेरं । तथात्वात् तदाख्येपुरेगङ्गाकूलेशृङ्गिवेरपुरसन्निहितगङ्गातीरइत्यर्थः । एतेन गङ्गातीरत्वमात्रेणनोद्देश्यत्वं किंतु भक्तसेवितत्वेनेत्युक्तं । "साकाशीतिनचाकशीति—" इतिवेदान्तदेशिकाद्यभियुक्तोक्तेः । निषादाः प्रतिलोमजातिविशेषाः । "निषादोमृगघातीस्यात्" इतिवैजयन्ती । तेषामधिपतिरितिजात्यपकर्षउक्तः । प्रीणातीतिप्रियःतं स्वस्मिन्प्रीतिमन्तमित्यर्थः । गूहति गोपयतिवञ्चयतिपरस्वमितिगुहः । इगुपधलक्षणःकप्रत्ययः । तं । जातितोवृत्तितोगुणतःकुलतश्चहीनमपि स्वस्मिन्नानुकूल्यमात्रेणादरणीयत्वमुक्तं । निषादाधिपतिमासाद्येत्यनेन सौशील्यमुक्तम् । महतोमन्दैस्सह नीरन्ध्रसंश्लेषोहि सौशील्यं । धर्मात्मेत्यनेन महत्त्वमुक्तं । आसाद्येत्यत्राभिविधिवाचिनाआङाअर्थान्नैरन्ध्र्यमुक्तं । शृङ्गिवेरपुरेगुहमासाद्येत्यनेन दोषेपि भोग्यत्वरूपंवात्सल्यमुक्तं । सूतं सुमन्त्रं । पारंपर्येणानुवर्तमानमपिव्यसर्जयत् व्यसृजत् । स्वार्थेणिच् । सद्यःप्रसूतवत्सवात्सल्यात् पूर्ववत्संपरिहरन्त्याधेनोरिव वात्सल्यातिशयउक्तः ॥ २७ ॥ स्वस्मिन्नाश्लेशमात्रेणजनितंगुहविषयप्रेमातिशयंदर्शयति— गुहेनेति । रामः गुहेनसहितःसन् लक्ष्मणेनसीतयाच सहितः । गुहसन्धानानन्तरमेव लक्ष्मणसीताभ्यां नित्यानपायिभ्यांसाहित्यमासीत् । ततःपूर्वसिद्धमपि सदसत्प्रायमासीदित्यर्थः । यद्वा दृष्टान्तार्थलक्ष्मणसीतासाहित्यकथनं तादृशसौहार्दंगुहेप्यासीदितिभावः । सहितःसंहितः । "समोवाहिततत्तयोः" इतिमलोपः । सःरामः । लक्ष्मणेनसीतयाचसहगुहेनहितः प्रहितः गङ्गांतारितइत्यप्याहुः ॥ २८ ॥ तेवनेनेति श्लोकद्वयमेकान्वयं । ते रामादयस्त्रयइत्यनेन गुहनिवर्तनंद्योतितं । वनेनवनंगत्वा वनाद्वनंगत्वा । पञ्चम्यर्थेतृतीया हेतौतृतीयावा । अनेन नूतनवनावलोकनकुतूहलित्वं नगरप्रवेशस्यस्वाधिकारविरुद्धत्वंच द्योत्यते । यद्वा अवनेनवनंगत्वा अन्योन्यरक्षणेनवनंगत्वेत्यर्थः । वक्ष्यति "अग्रतोगच्छसौमित्रेसीतात्वामनुगच्छतु । पृष्ठतोऽहंगमिष्यामित्वांचसीतांचपालयन् । अन्योन्यस्येहनोरक्षाकर्तव्यापुरुषर्षभ" इति । यद्वा अवनेन पितृवचनपरिपालनेनहेतुना वनंगत्वा । अवनेन लोकरक्षणेनहेतुनावा । रावणादिदुष्टनिबर्हणमुखेन लोकरक्षणार्थंहि तेषां वनगमनं । यद्वा तेवृदेवनइतिधातोर्भावेल्युट् । तेवनेन देवनेन लीलया अनायासेनेत्यर्थः । मृगयाक्रीडनेनवा । अनयैवव्युत्पत्त्या तेवनंपादसंचारइतिलभ्यते । सूतविसर्जनानन्तरंरथादवरुह्यपादसंचारेणवनंगत्वेत्यर्थः । यद्वा अवनेनसहवनंगत्वा मध्येमध्येस्थलप्रदेशंवनंचगत्वेत्यर्थः । वनेन जलेन सहितंवनं नतु मरुकान्तारमितिवार्थः । "पयःकीलालममृतंजीवनंभुवनंवनं" इत्यमरः । बहूदकाः विपुलोदकाः अधिकोदकावा । "विपुलानेकयोर्बहुः" इतिवैजयन्ती । नौतार्याइत्यर्थः । नदीःगङ्गां । तीर्त्वा उत्तीर्य । "गङ्गानदीनां" इति नदीमुख्यत्वात् निरुपपदनदीशब्देनगङ्गोच्यते । "जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्यां" इतिबहुवचनं पूजायांबहुवचनंवा । "अदितिःपाशान्" इतिवदवयवबहुत्वाभिप्रायेणवा बहुवचनं । अत्र "अग्निहोत्रंजुहोति" "यवागूंपचति" इतिवत् अर्थक्रमेण नदीस्तीर्त्वावनंगत्वेतियोजनीयं । यद्वा अपूर्वकालेपिक्त्वा—"आस्यंव्यादायस्वपिति" इतिवत् । यद्यपि "आस्यंव्यादायस्वपितिसंमील्यहसतिइत्युपसंख्यानं" इतिवार्तिकेस्थलद्वयमेवोपात्तं तथापिन्यासकृता "परावरयोगेच" इतिपूर्वसूत्रे चकारात् सर्वत्रायंप्रयोगःसंभवतीत्युक्तं । यद्वा तेवनेनेत्यनेन गङ्गातरणमर्थसिद्धम् । नदीशब्दो यमुनापरः । यद्वा नदीः गङ्गायमुनामन्दाकिनीः । मन्दाकिनीनाम चित्रकूटपरिसरेपरिसरन्तीस्रवन्ती । सौकर्याययुगपदुक्तं । यद्वा पूर्वार्धेसरामोलक्ष्मणेनसीतयाचसहगुहेनहितः प्रहितः । सीतालक्ष्मणरामाःगुहेनगङ्गांतारिताइत्यर्थः । अतः पादसंचारेणवनगमनमत्रोक्तम् ॥ २९ ॥ भरद्वाजस्यशासनात् चित्रकूटमनुप्राप्य । प्रजाभरणशीलोभरद्वाजः । इत्थंनिरुक्तमृगारण्यके । "एपएव-

रम्यमावसथं कृत्वा रममाणा वने त्रयः । देवगन्धर्वसंकाशास्तत्र ते न्यवसन्सुखम् ॥ ३० ॥
चित्रकूटं गते रामे पुत्रशोकातुरस्तथा । राजा दशरथः स्वर्गं जगाम विलपन्सुतम् ॥ ३१ ॥
मृते तु तस्मिन्भरतो वसिष्ठप्रमुखैर्द्विजैः । नियुज्यमानो राज्याय नैच्छद्राज्यं महाबलः ॥ ३२ ॥

विभ्रद्वाजःप्रजावैवाजःताएषबिभर्तियद्बिभर्तितस्माद्भरद्वाजइत्याचक्षते " इति । यद्वा वाजं रेतः वाजकरणमित्यादौ तथाप्रयोगात् । विभ्रद्वाजं भरद्वाजः । नित्यब्रह्मचारीत्यर्थः । "भरद्वाजोहत्रिभिरायुर्भिर्ब्रह्मचर्यमुवास" इतिश्रुतेः । तस्यशासनात् नियमनात् चित्रकूटेभवद्भिःस्थातव्यंतस्यायमेवमार्गइत्येवंरूपात् । अनुसदृशं । "पश्चात्सादृश्ययोरनु" इत्यमरः । राजकुमाराणांस्वेषामुचितमित्यर्थः । "सुभगश्चित्रकूटोसौगिरिराजोपमोगिरिः । यस्मिन्वसतिकाकुत्स्थःकुबेरइव नन्दने" इतिवक्ष्यति । पश्चाद्भागेवा चित्राणि । आश्चर्यावहानि कूटानि शिखराणियस्यासौ चित्रकूटः तं । "आश्चर्यालेख्ययोश्चित्रं " इत्यमरः । प्राप्य गत्वा रम्यं रमणीयं जलरामणीयकस्थलरामणीयकादियुक्तं आवसथं पर्णशालारूपंगृहं । "धिष्ण्यमोकोनिवसनं स्थानावसथवास्तुच" इत्यमरः । कृत्वा निर्माय । अत्रपर्णशालानिर्माणेलक्ष्मणस्यसाक्षात्कर्तृत्वं । इतरयोस्तु उचितदेशप्रदर्शनादिनाप्रयोजककर्तृत्वं । "समानकर्तृकयोःपूर्वकाले" इत्यत्रसूत्रे गृहैकत्ववदुद्देश्यगतत्वेन द्वित्वस्याविवक्षितत्वादनेकक्रियास्वपि क्त्वाप्रत्ययस्संभवतीति न्यासकारोक्तेःक्त्वाप्रत्ययबाहुल्यं । तत्रवने चित्रकूटोपान्तवने । रममाणाः लीलारसमनुभवन्तः सन्तः । सीतारामयोःपुष्पापचयसलिलक्रीडादिकंरतिः । "वैदेहिरमसेकच्चिच्चित्रकूटेमयासह । पश्यन्तीविविधान्भावान्मनोवाक्कायसंयुतान्" इतिहिवक्ष्यति । लक्ष्मणस्यतुविशिष्टविषयकैङ्कर्यलाभजाप्रीतिः । वक्ष्यति "भवांस्तुसहवैदेह्यागिरिसानुपुरंस्यते । अहं सर्वंकरिष्यामिजाग्रतःस्वपतश्चते" इति । त्रयोरममाणाइत्यनेनानन्दहेतुभेदेऽपि आनन्दांशेतौल्यमुच्यते । "परमंसाम्यमुपैति" "भोगमात्रसाम्यलिङ्गाच्च" इतिवत् । रममाणाइति वर्तमाननिर्देशेन नैरन्तर्यमुक्तं । वर्तमानार्थकस्याप्यस्यन्यवसन्नितिभूतप्रत्ययान्तविशेषणत्वं "धातुसंबन्धेप्रत्ययाः" इत्यनुशासनात् "अग्निष्टोमयाजीपुत्रस्तेभविता" इतिवत्संभवति । अतएवदेवगन्धर्वसंकाशाःसन्तः । देवगन्धर्वामनुष्यगन्धर्वेभ्योऽधिकानन्दाः । यद्वा देवीचदेवश्चदेवौ लक्ष्मीनारायणौ । "पुमान्स्त्रिया" इत्येकशेषः । गानंधारयतीति गन्धर्वः । "एतत्सामगायन्नास्ते" इत्युक्तः सर्वदासामगानपरोमुक्तः । देवौचगन्धर्वश्चदेवगन्धर्वाः । तत्सदृशाः देवगन्धर्वसंकाशाः । निभादित्वादुत्तरपदभूताएवसन्तःसदृशवचनाः । तथाह्यमरः । "स्युरुत्तरपदेत्वमी । निभसंकाशनीकाशप्रतीकाशोपमादयः" इति । ते तएवसन्तः साकेतवासिन एवसन्तः । सुखंन्यवसन् । वक्ष्यति "सुरम्यमासाद्यतु चित्रकूटंनदींचतांमाल्यवतींसुतीर्थां । ननन्दरामोमृगपक्षिजुष्टांजहौचदुःखंपुरविप्रवासात्" इति । यद्वा तएवसन्तः वनवासिनएवसन्तः । नागरिकाअपि चिरंवनचराइवावसन्नित्यर्थः । मुखग्लान्यादिभिस्तेषां वैदेशिकत्वगन्धोपिनाज्ञायतेतिभावः । सुखंयथाभवतितथा न्यवसन् । कदाचिदपिदुःखलेशोपिनान्वभावीत्यर्थः । अत्र क्रियाभेदात्तच्छब्दद्वयप्रयोगइत्यप्याहुः । तेतीर्त्वाजग्मुरिति क्रियापदमध्याहृत्यकेचिद्योजयन्ति । अत्र देवगन्धर्वसंकाशाइतिपदगतेनोपमालंकारेणकिंचिद्वस्तुध्वन्यते । यस्तावत्स्वरूपज्ञानपूर्वकंभगवत्यनुरक्तोभवति तं भगवान्देव्यासमागत्य दिव्यंविमानमारोप्यआतिवाहिकगणैःसत्कार्य विरजां तीर्त्वातिल्यकान्तारमासाद्यअमानवेनानुज्ञाप्यदिव्यलोकेमहामणिमण्टपमुपेत्यदिव्यसिंहासनारूढः श्रियासहमोदमानस्तद्रचितसर्वदेशसर्वकालसर्वावस्थोचितसकलविधकैङ्कर्योस्मैस्वानन्दसममानन्दंदत्वातेनसह यावत्कालमास्तइति ॥ ३० ॥ एवंलक्ष्मणस्यभगवच्छेपत्ववृत्तिंप्रतिपाद्यभरतस्यपारतन्त्र्यवृत्तिंदर्शयति—मृते तुतस्मिन्नित्यादिना । तदुपोद्घातत्वेनाह—चित्रेति । रामेचित्रकूटं तथा उक्तप्रकारेणगतेसति । दशरथो राजा । पुत्रशोकेनपुत्रादर्शनजदुःखेनातुरः पीडितःसन् । सुतमुद्दिश्य हासुतेत्येवंविलपन् प्रलापंकुर्वन् । स्वर्गंजगाम ॥ ३१ ॥ तस्मिन्दशरथेमृतेसति । स्वर्गप्राप्तिरपिनश्वरत्वेनानुपादेयेतिमृतेइत्युक्तं । महाबलः राज्यभरणसमर्थः । अतएवभरतः "भरतइतिराज्य-

तिल० तथापुत्रशोकातुरः अनिर्वाच्यपुत्रवियोगजन्यशोकपीडितः । क० [पा०] पुत्रशोकातुरस्तदा ॥ ३१ ॥

स जगाम वनं वीरो रामपादप्रसादकः ॥ ३३ ॥
गत्वा तु सुमहात्मानं रामं सत्यपराक्रमम् । अयाचद्भ्रातरं राममार्यभावपुरस्कृतः ॥ ३४ ॥
त्वमेव राजा धर्मज्ञ इति रामं वचोऽब्रवीत् । रामोपि परमोदारः सुमुखः सुमहायशाः ।
न चैच्छत्पितुरादेशाद्राज्यं रामो महाबलः ॥ ३५ ॥
पादुके चास्य राज्याय न्यासं दत्त्वा पुनःपुनः । निवर्तयामास ततो भरतं भरताग्रजः ॥ ३६ ॥

स्यभरणात्" इत्युक्तरीत्या भावज्ञेनवसिष्ठेनभरतइतिकृतनामा । वसिष्ठप्रमुखैर्द्विजैः वसिष्ठादिभिर्ब्राह्मणैः । राज्याय राज्यंकर्तुंनियुज्यमानः । "क्रियार्थोपपदस्य चकर्मणिस्थानिनः" इतिचतुर्थी । राज्यं राजत्वं । "येचाभावकर्मणोः" इतिप्रतिषेधादनोनप्रकृतिभावः । नैच्छत् नाभ्यलषत् । महाबलइत्यनेन सत्यामेवशक्तौ स्वरूपविरुद्धत्वाद्राज्यंनाङ्गीचकारेत्यवगम्यते । अतएववक्ष्यति "राज्यं चाहंचरामस्यधर्मंवक्तुमिहार्हसि । विललापसभामध्येजगर्हेचपुरोहितं । कथंदशरथाज्जातोभवेद्राज्यापहारकः" इति ॥ ३२ ॥ सजगामेत्यर्धमेकंवाक्यं । वीर्येणयुक्तोवीरः । वीर्यमत्र शत्रुभूतरागादिजेतृत्वं विषयानाकृष्टचित्तइत्यर्थः । यद्वा "एभिश्चसचिवैःसार्धंशिरसायाचितोमया । भ्रातुःशिष्यस्यदासस्यप्रसादंकर्तुमर्हसि" इत्युक्तरीत्या चतुरङ्गबलसहितः सभरतः रामपादप्रसादकः । पादशब्दः पूज्यवाची । "पूज्येतुपादनामाङ्कः" इत्यमरशेषः । प्रसादकः "तुमुन्ण्वुलौक्रियायांक्रियार्थायां" इति ण्वुल् । पूज्यंरामंप्रसादयितुमित्यर्थः । यद्वा रामचरणयोःप्रसादकः रामस्यैवप्रसाद्यत्वेपिपादयोःप्रसाद्यत्वोक्तिः शेषभूतव्यवहारानुसारेण । राजानंद्रष्टुमितिवक्तव्येराजपादौद्रष्टुमितिहिभृत्यजनोव्यवहरति । वनंजगाम प्राप । वस्तुतोरामस्यकोपाभावेपि भरतायराज्यंदत्तमितिबुद्धिंनिवर्तयितुमित्यर्थः । "पूजिता मामिकामातादत्तंराज्यमिदंमम । तद्ददामिपुनस्तुभ्यं यथात्वमददामम" इत्युत्तरत्रापिवक्ष्यति ॥ ३३ ॥ अत्र सइत्यनुषज्यते । सआर्यभावपुरस्कृतः पुरस्कृतः आर्यभावःयेनसः । आहिताग्न्यादित्वात् परनिपातः । यद्वा आर्यभावेन स्वस्यार्यभावेन पुरस्कृतः पूजितः उचितमनेनक्रियतइतिश्लाघितइत्यर्थः । "पूजितःस्यात्पुरस्कृतः" इतिबाणः । तथाविधःसन् । सुमहान् आत्माअन्तःकरणंयस्यतं सुमहात्मानं स्वतःप्रसन्नहृदयमित्यर्थः । सत्यपराक्रमं सत्येपराक्रमोऽप्रच्युतत्वंयस्य तं रामं । गत्वातु प्राप्य तुविशेषोक्ति । तस्याग्रेस्थितिरेवालंयाचनमतिरिच्यतइतिभावः । भ्रातरं रामं । अयाचत् प्रार्थयामास । स्वाभीष्टमितिशेषः । याचेर्द्विकर्मकत्वात्स्वरितेत्त्वादुभयपदी । क्रियाभेदाद्रामशब्दस्य नपुनरुक्तता ॥ ३४ ॥ स्वाभीष्टमेवाह—त्वमेवेति । धर्मज्ञः ज्येष्ठेविद्यमाने नकनिष्ठोराज्यमर्हतीतिधर्मं जानन् त्वमेवराजानान्यइतिरामंवचोब्रवीत् । "अकथितंच" इतिद्विकर्मकत्वं । ननुभरतकृताप्रपत्तिःकुतोनाफलत् अधिकारिवैगुण्याद्वा शरण्यवैगुण्याद्वा । नाद्यः । अपेक्षातिरिक्तस्याभावात् । नान्त्यः । तस्य सर्वगुणपरिपूर्णत्वादित्याशङ्क्य प्रबलप्रतिबन्धकस्यप्रारब्धस्यसद्भावान्नसाफलितेत्याह—रामोपीति । अपिशब्दः प्रतिविशेषणमन्वेति । रामोपि रमयतीतिव्युत्पत्त्या स्वरूपरूपगुणैराश्रितचित्तरञ्जनस्वभावोपि । परमोदारोपि स्वपर्यन्तापेक्षितार्थप्रदोपि । "यआत्मदाबलदा" इति श्रुतेः । सुमुखोपि अर्थिजनलाभेनप्रसन्नमुखोपि । सुमहायशाअपि "नह्यर्थिनःकार्यवशादुपेताःककुत्स्थवंशेविमुखाःप्रयान्ति" इतिविष्णुपुराणोक्तरीत्या महाकीर्तिरपि । महाबलोपि आश्रितमनोरथपूरणेनिपुणोपि । रामः पितुरादेशात् बलवत्प्रतिबन्धकात् । नैच्छत् । चकारात्तदवसानेत्वैच्छदित्यर्थः । आदेशोनियोगः ॥ ३५ ॥ सर्वथा प्रपत्तेर्वैफल्यमनुचितमिति यावत्प्रतिबन्धकानिवृत्ति फलप्रतिनिधिंदिशतिस्मेत्याह—पादुकेचेति । चस्त्वर्थः । किंतु भरताग्रजः फलप्रदानोचितसंबन्धशीलः । राज्याय राज्यंकर्तुं । "क्रियार्थोपपदस्यचकर्मणिस्थानिनः" इतिचतुर्थी । अस्य भरतस्य पादुके न्यासं स्वप्रतिनिधिं दत्वा रामपादुकेराज्यंकुरुतः अहंतयोःपरिचारकइतिभावयेति दत्वेत्यर्थः । पुनःपुनर्भरतंतस्मादेशान्निवर्तयामास । पुनःपुनरित्यनेन भरतस्य राम-

तीर्थी० रामं अभिरामम् ॥ ३४ ॥ कतकम् सुमहायशाः प्रतिज्ञापालनजन्ययशोभङ्गभियानैच्छत् ॥ ३५ ॥ तीर्थी० अहल्यादृष्टवैभवपादस्पृष्टेपादुके न्यासरूपेणदत्त्वा । तिल० राज्याय राज्यलक्षणसामर्थ्यंलंभयितुम् ॥ ३६ ॥

कामममनवाप्यैव रामपादावुपस्पृशन् । नन्दिग्रामेऽकरोद्राज्यं रामागमनकाङ्क्षया ॥ ३७ ॥
गते तु भरते श्रीमान्सत्यसन्धो जितेन्द्रियः । रामस्तु पुनरालक्ष्य नागरस्य जनस्य च
तत्रागमनमेकाग्रो दण्डकान्प्रविवेश ह ॥ ३८ ॥
प्रविश्य तु महारण्यं रामो राजीवलोचनः । विराधं राक्षसं हत्वा शरभङ्गं ददर्श ह ।
सुतीक्ष्णं चाप्यगस्त्यं च अगस्त्यभ्रातरं तथा ॥ ३९ ॥

विरहासहिष्णुत्वंद्योत्यते । स्वार्थत्वनिवृत्तिपूर्वकपरस्वत्वापादनरूपत्वाभावात् नचतुर्थी । किंतु संबन्धसामान्ये षष्ठी ॥ ३६ ॥ अथप्रपन्नस्य यावत्प्रारब्धनिवृत्ति शेषिणि वृत्तिंदर्शयन्नाह—स इति। सभरतःकामं रामकैङ्कर्यमनोरथमप्राप्यैव। रामपादौ रामस्यपादुके। पादशब्दः पादुकोपलक्षकः । उपस्पृशन् प्रत्यहंसेवमानःसन् । रामागमनकाङ्क्षया कदारामआगमिष्यतीतिप्रत्याशया । चतुर्दशवर्षरूपप्रतिबन्धकमुत्तीर्य कदारामकैङ्कर्यंलप्स्यइतिमनोरथमभिवर्धयन्नित्यर्थः । रामरहिततन्निवासस्यातिदुःखावहतयाऽयोध्यांविहाय । नन्दिग्रामे नन्दिग्रामाख्येअयोध्यासन्निहितेकुत्रचिन्ग्रामे । राज्यमकरोत् तदाज्ञाकैङ्कर्यमकरोत् । परस्मैपदेन स्वस्यतस्मिन्फलत्वनिवृत्तिरवगम्यते॥३७॥
अयोध्याकाण्डप्रतिपाद्यपितृवचनपरिपालनसिद्धिंनिगमयन्नुत्तरकाण्डार्थंप्रस्तौति—गतेत्विति। अत्रार्धत्रयमेकंवाक्यं। भरते गतेतुविशेषोस्तीतितमेवाह। श्रीमान् प्रतिज्ञाभङ्गभयजनितविषादविगमादुत्पन्नकान्तिविशेषः। सत्यसन्धः भरतनिर्बन्धेनाप्यविचाल्यप्रतिज्ञः । "सन्धाप्रतिज्ञामर्यादा" इत्यमरः। जितेन्द्रियः मातृभरतादिप्रार्थनाव्याजेसत्यपिराज्यभोगलौल्यरहितः । रामः । नगरेभवोनागरः। "तत्रभवः" इत्यण्। तस्य जनस्य। तत्र चित्रकूटे। पुनरागमनमालक्ष्य आलोच्य। चकारादपिविप्रकारदर्शनाच्च तत्प्रदेशंविहाय । एकाग्रः पितृवचनपालनेदत्तावधानः विरोधिभूयिष्ठदेशत्वेन सावधानोवा । दण्डकान्प्रविवेश । हेति विषादे। "एकसर्गोनन्यवृत्तिरेकाग्रैकायनावपि" इतिवैजयन्ती। सीतालक्ष्मणयोश्चप्रवेशोर्थसिद्धः। दण्डकस्यराज्ञोजनपदोदण्डकः "तस्यनिवासः" इत्यण् । जनपदेलुप्" इति लुप् । शुक्रशापेन वनतांप्राप्तः । कुत्सायांकन् । अवान्तरवनबहुत्वाद्बहुवचनं । वक्ष्यत्युत्तरकाण्डे । "शप्तोब्रह्मर्षिणातेनपुरावैदण्डकोहतः । ततःप्रभृतिकाकुत्स्थदण्डकारण्यमुच्यते । तपस्विनः स्थितायत्रजनस्थानमतोऽभवत्" इति । दण्डकामितिपाठे दण्डकोनामराजाऽस्यामटव्यामस्तीतिदण्डका "अर्शआदिभ्योच्" इत्यच्प्रत्ययः। ततष्टाप् क्षिपकादित्वान्नेत्वं ॥ ३८ ॥ एवमयोध्याकाण्डवृत्तान्तसंग्रहेण पितृवचनपरिपालनरूपसामान्यधर्मः शेषभूतस्यशेषिविषयकैङ्कर्यवृत्तिः प्रपन्नस्यभगवत्पारतन्त्र्यंचप्रदर्शितं । शत्रुघ्नवृत्तान्तप्रदर्शनेन तस्यभागवतपारतन्त्र्यंचसूचितं। अथब्राह्मणेषुविशिष्य सत्यप्रतिज्ञत्वप्रतिपादनपरं आरण्यकाण्डवृत्तान्तंसंगृह्णाति—प्रविश्येत्यादिना। रामोमहारण्यंदण्डकारण्यं । प्रविश्य । तुर्विशेषोस्ति तमाह । राजीवलोचनः अपूर्वसंस्थानविपिनविलोकनजनितकुतूहलेनविकसितनयनारविन्दःसन् । तेनैवोत्साहेन विराधंराक्षसंहत्वा "रिक्तहस्तेननोपेयाद्राजानं दैवतंगुरुं" इतिस्मरणात् तद्धननमुपहारीकृत्य शरभङ्गं ददर्श । हेत्यैतिह्ये । तदनुज्ञया सुतीक्ष्णं चापीत्येकनिपातः समुच्चयार्थकः, अगस्त्यमगस्त्यभ्रातरंचददर्श । तथेति समुच्चये । अगस्त्यभ्राता सुदर्शनाख्यः । तदुक्तं सनत्कुमारसंहितायामगस्त्येन । "यवीयानेषमेभ्राता सुदर्शनइतिस्मृतः" इति । कुंभसंभवस्यागस्त्यस्यभ्राता सहपोषणादिति बोध्यं । अगस्त्यंच अगस्त्यभ्रातरं इत्यत्रसन्धिकार्याभावोवाक्येसंहितायाअनित्यत्वात् । तथोक्तं । "संहितैकपदेनित्यानित्याधातूपसर्गयोः । नित्यासमासेवाक्येतुसाविवक्षामपेक्षते" इति ॥३९॥

तीर्थी० कामं अभिप्रेकार्थं रामप्रत्यानयनलक्षणमनोरथम् । **विषम०** एवंलक्षणस्य भरतस्य च क्रमेणश्रीरामकैङ्कर्यं तत्पारतन्त्र्यंचप्रदर्शितम् । शत्रुघ्नवृत्तान्ताप्रदर्शनेनतस्यभागवतपारतन्त्र्यंसूचितम् ॥ ३७ ॥ **तिल०** आलक्ष्य संभाव्य तेषां प्रतिनिवर्तनप्रयासात् वरमितोपिदूरगमनमितिसंचिन्त्येतियावत् । **शिरो०** एकां मुख्यां समाधिकरहितां अग्रं गतिं रातिददातीति एकाग्रः परमपुरुषार्थदाता ॥ ३८ ॥ **तीर्थी०** राजीवलोचनविशेषणं रामस्यमहावनप्रवेशसंभावितराक्षसयुद्धार्जितंहर्षंद्योतयति ॥ ३९ ॥

अगस्त्यवचनाच्चैव जग्राहैन्द्रं शरासनम्। खड्गं च परमप्रीतस्तूणी चाक्षयसायकौ।। ४०।।
वसतस्तस्य रामस्य वने वनचरैः सह। ऋषयोऽभ्यागमन्सर्वे वधायासुररक्षसाम्।। ४१।।
स तेषां प्रतिशुश्राव राक्षसानां तथा वने।। ४२।।
प्रतिज्ञातश्च रामेण वधः संयति रक्षसाम्। ऋषीणामग्निकल्पानां दण्डकारण्यवासिनाम्।। ४३।।

अगस्त्येति। अत्ररामइत्यनुषज्यते। रामः परमप्रीतःसन् जगदेकवीरस्यस्वस्यसदृशायुधजाललाभात्भृशंसंतुष्टःसन्। अगस्त्यवचनादेव नतुस्वाभ्यर्थनात्। ऐन्द्रं इन्द्रेणदत्तं। "तस्येदं" इति संबन्धसामान्येऽण्। "दत्तोममहेन्द्रेण" इतिवक्ष्यमाणत्वात्। इदंशरासनादित्रयसाधारणंविशेषणं। शराअस्यन्ते क्षिप्यन्तेऽनेनेतिशरासनं धनुः। तच्च खड्गं। अक्षयसायकौ समरसीम्निसहस्रशोविनियोगेप्यक्षयशरौ। तूणी निषङ्गौ। जग्राह स्वीकृतवान्। वचनाज्जग्राहेत्यनेन खड्गादिकमगस्त्योनस्पृष्टवान् किंतु निर्दिष्टवानित्युच्यते।। ४०।। एवं विरोधिनिरसनानुकूल्य दर्शन लब्धावसर-मुनिजनाभ्यर्थनमाह-वसतइति। वने शरभङ्गवने। तस्यवसतः तस्मिन्वसतीत्यर्थः। "षष्ठीच" इति योगविभागात् "यस्यचभावेनभावलक्षणं" इत्यस्मिन्नर्थे षष्ठी। यद्वा षष्ठ्यर्थसंबन्धसामान्यस्य उक्तविशेषे पर्यवसानं। "शरभङ्गाश्रमे राममभिजग्मुश्च . तापसाः" इतिवक्ष्यमाणत्वाच्छरभङ्गवनइतिसिद्धं। सर्वे वैखानसवालखिल्यादयः। ऋषयः शरभङ्गाश्रमवासिनः। वनचरैः चित्रकूटपंपावनप्रभृतिवनवासिभिःसह। वक्ष्यति "पंपावननिवासानामनुमन्दाकिनीमपि। चित्रकूटाल-यानांचक्रियतेकदनंमहत्" इति। यद्वा वनचरैःसह वनेवसतस्तस्य। "षष्ठीचानादरे" इत्यनादरेषष्ठी। "सविशेषणेहि-" इतिन्यायेन तस्यवनेवासमनादृत्येत्यर्थः। वक्ष्यतिहि "ते वयंभवतारक्ष्याभवद्विषयवासिनः। नगरस्थोवनस्थोवात्वंनोराजाजनेश्वरः" इति। यद्वा वनेवसतस्तस्य समीपमित्युपस्कार्यं। आसुराणि असुरप्रकृतीनिरक्षांसि। अनेन "विभीषणस्तु धर्मात्मानतुराक्षसचेष्टितः" इत्युक्तविभीषणव्यावृत्तिः। यद्वा असुराश्चरक्षांसिचेतिद्वन्द्वः। असुराः कवन्धादयः तत्रदनुशब्दप्रयोगात्। यद्वा असून्प्राणान्रान्ति गृह्णन्तिइत्यसुराणि। असुराणिच तानिरक्षांसिचेति कर्मधारयः। तेषां बधाय बधंकारयितुं। प्रार्थयितुंवा। "क्रियार्थोपपदस्यचकर्मणिस्थानिनः" इतिचतुर्थी। अभ्यागमन् अभिमुखतयाआगताः। नह्यभिमुख्यादन्यत् शरणागतिर्नामास्ति। "सत्सुकार्यवतांपुंसाम-लमेवाग्रतःस्थितिः"। यद्वा असुररक्षसांवनेवसतस्तस्य असुररक्षसांवधायाभ्यागमन्नित्युभयत्राप्यन्वयः काकाक्षिन्यायात् मध्यमणिन्यायाद्वा।। ४१।। मुनीनांदुर्दशामालोक्यतद्विरोधिनि-रसनंप्रतिज्ञातमित्याह-सइति। सरामः। राक्षसानांवने दण्डकारण्ये। तेषां ऋषीणां। तथाप्रतिशुश्राव यथातैरर्थितं तथाप्रतिजज्ञइत्यर्थः। "आश्रवसंगरसन्धाःप्रतिश्रवः संश्रवःप्रतिज्ञाच" इतिहलायुधः।। ४२।। मुनिभिरर्थिताऽरामेणप्रतिज्ञातश्चकोर्थ इत्यत्राह- प्रतिज्ञातश्चेति। रामेणप्रतिज्ञातोर्थस्तु। अग्निकल्पानां ईषन्न्यूनमग्निसादृश्यंप्राप्तानां। "ईषदसमाप्तौकल्पब्देश्यदेशीयरः" इतिकल्पप्प्रत्ययः। अतएवदण्डकारण्यवासिनामृषीणां। चतुर्थ्यर्थेषष्ठी। संयति युद्धे। "समुदायःस्त्रियांसंयत्समित्याजिसमिद्युधः" इत्यमरः। रक्षसांवधः। "कर्तृकर्मणोःकृति" इति कर्मण्यर्थेषष्ठी। प्रतिज्ञातंत्वितिपाठे सामान्येनपुंसकं।

तीर्थी. इन्द्रः परमेश्वरोविष्णुः तस्येदमैन्द्रं। निजायुधलाभात्परमप्रीतः। तिल. पूर्वं भार्गवंजित्वा ततः प्राप्तंयद्वैष्णवंधनुभगवतारामेणवरुणेन्यस्तं तत् इन्द्रेणवरुणादानीय अगस्त्येस्थापितमित्यग्रे आरण्यकाण्डेस्फुटीभविष्यति।। ४०।। तीर्थी. वनेवसतइत्यनादरेषष्ठी। हिंसानर्हरामस्यतापसरूपेणावस्थानंअनादृत्य। अभ्यागमन् सर्वेश्वरोयंदुष्टान्संहृत्यअंस्मान्रक्षिष्यतीतिनिश्चित्यराघवंशरणमागताइत्यर्थः।।४१।। तीर्थी. सः रामः। राक्षसानां वने। राक्षसावासभूतेवने। तेषा ऋषीणां। तथा प्रार्थनावचनं। प्रतिशुश्राव अङ्गीचकारेत्यर्थः। शिरो. (पा.) राक्षसानांतदावने। तदा तस्मिन्काले। अवनेसर्वरक्षणेप्रवृत्तः सरघुनाथः। राक्षसानांसंबन्धि तेषामृषीणांप्रार्थनावचनं प्रतिशुश्राव अङ्गीचकार। यद्वा तेषामृषीणां प्रति प्रत्येतिप्रत्याययतिबोधयत्यर्थमिति वचनं। प्रतिपूर्वकेण्धातुप्रकृतिकक्विबन्तप्रयोगः। नपुंसकत्वाच्च ह्रस्वत्वं। आगमशास्त्रस्यानित्यत्वात्तुगभावः। गत्यर्थकदीर्घप्रकृतिकक्विबन्तोवा। गत्यर्थानां ज्ञानार्थकत्वं प्रसिद्धमेव। अतएवानेनप्रतिज्ञातश्चेत्यस्यनपौनरुक्त्यम्। अन्यथा प्रतिपूर्वकश्रुधातोः प्रतिज्ञार्थकत्वेन तद्वुरुपपादंस्यात्।।४२।। तिल. अग्निकल्पानां ऋषीणां संनिधावितिशेषः। अपेक्षितइतिवा शेषः।।४३।।

तेन तत्रैव वसता जनस्थाननिवासिनी। विरूपिता शूर्पणखा राक्षसी कामरूपिणी।। ४४।।
ततः शूर्पणखावाक्यादुद्युक्तान्सर्वराक्षसान्। खरं त्रिशिरसं चैव दूषणं चैव राक्षसम्।
निजघान रणे रामस्तेषां चैव पदानुगान्।। ४५।।
वने तस्मिन्निवसता जनस्थाननिवासिनाम्। रक्षसां निहतान्यासन्सहस्राणि चतुर्दश।।४६।।
ततो ज्ञातिवधं श्रुत्वा रावणः क्रोधमूर्च्छितः। सहायं वरयामास मारीचं नाम राक्षसम्।।४७।।
वार्यमाणः सुबहुशो मारीचेन स रावणः। न विरोधो बलवता क्षमो रावण तेन ते।।४८।।
अनादृत्य तु तद्वाक्यं रावणं कालचोदितः। जगाम सहमारीचस्तस्याश्रमपदं तदा।।४९।।
तेन मायाविना दूरमपवाह्य नृपात्मजौ। जहार भार्यां रामस्य गृध्रं हत्वा जटायुषम्।।५०।।

प्रतिज्ञातंवस्तु वधइत्यर्थः।।४३।। अथप्रतिज्ञानिर्वाहवीजमुपक्षिपति-तेनेति। तत्रैव जनस्थाने। वसता तेन रामेण। जनस्थानेनिवसतीति जनस्थाननिवासिनी। "सुप्यजातौणिनिस्ताच्छील्ये" इतिणिनिः। कामेनेच्छया रूपमस्याअस्तीति कामरूपिणी। शूर्पतुल्यानखायस्याः सा शूर्पणखा। "पूर्वपदात्संज्ञायामगः" इतिणत्वं। "नखमुखात्संज्ञायां" इतिङीषूप्रतिषेधः शूर्पणखाख्याराक्षसी। विरूपिता कर्णनासिकाछेदेनवैरूप्यंप्रापिता। "रामस्यदक्षिणोबाहुः" इतिलक्ष्मणस्यरामबाहुत्वात् रामस्यविरूपकरणकर्तृत्वोक्तिः। शूर्पनखीतिपाठे नसासंज्ञा।।४४।। ततइत्यादिसार्धश्लोक एकंवाक्यम्। ततः शूर्पणखावैरूप्यकरणानन्तरं। शूर्पणखावाक्यात्उद्युक्तान् युद्धार्थं संनद्धान्। सर्वराक्षसान् चतुर्दशसहस्रसंख्याकप्रधानराक्षसान्। तेष्वपिप्रधानं। खरं त्रिशिरसंचैव दूषणंचैव राक्षसम्। चैवेतिनिपातद्वयसमुदायः समुच्चयार्थः। तेषां पूर्वोक्तानांराक्षसानां खरादीनांच। पदानुगान् अनुचरांश्च। रणे युद्धे। निजघान हतवान्। यद्वा खरादीन् तेषांपदानुगानूसर्वराक्षसांश्च निजघानेतियोजना ।।४५।। हतान्राक्षसान्परिसंचष्टे - वनइति। तस्मिन्वनेनिवसतारामेणेत्येननासहायत्वंदर्शितं। जनस्थाननिवासिनामित्यनेनारण्यवर्तित्वेनातिघोरत्वमुक्तं। रक्षसांचतुर्दशसहस्राणीतियौगपद्यमुक्तं। निहतानीतिनिश्शेषत्वमुच्यते। सहस्राणीतिसंख्यासंख्येययोरभेदेननिर्देशः। चतुर्दशसहस्रसंख्याकानि सैन्यानिवा।।४६।। एवंरामस्यसत्यप्रतिज्ञत्वेदर्शिते सीतायाः पुरुषकारत्ववक्तुंबीजमुपक्षिपति- ततइति। ततः खरादिवधानन्तरं। ज्ञातिवधं खरवधं। खरस्यज्ञातित्वं स्वमातृष्वसुर्विश्रवसोजातत्वादित्यारण्यपर्वणिव्यक्तम्। श्रुत्वा अकंपनशूर्पणखामुखेनज्ञात्वा। रावणः रौतिरावयतीति रावणः। वक्ष्यत्युत्तरकाण्डे। "यस्माल्लोकत्रयंह्येतद्रावितंभयमागतं। तस्मात्वंरावणोनाम नाम्नाराजन्भविष्यसि" इति। यद्वा विश्रवसोपत्यंरावणः। शिवादिगणे "विश्रवसो विश्रवणरवण" इतिपाठात् रवणादेशःअण्च। क्रोधमूर्च्छितः क्रोधेनमूर्च्छितःमूढः। "मूर्च्छितौमूढसोच्छ्रायौ" इतिवैजयन्ती। नचायंप्रत्ययोमूर्च्छतेर्निष्ठा मूर्तइतितद्रूपत्वात्। किंतुमूर्च्छास्यसंजातेतिमूर्च्छितः तारकादित्वादितच्। मारीचंनाम राक्षसं सहायं वरयामास।।४७।। अत्र अन्ते इतिकरणंद्रष्टव्यं। सरावणः। हेरावण। ते तेन बलवता खरादिषुदृष्टापदानवतावलीयसा। रामेण। विरोधोनक्षमः नयुक्तः। "क्षमस्त्रिपुहितेयोग्ये युक्तेशक्तेपटावपि" अतिशब्दरत्नाकरे। इति सुबहुशो मुहुर्मुहःवार्य- माणोऽभूत्।।४८।। रावणः कालचोदितः कालेनमृत्युना प्रेरितःसन्। तद्वाक्यं मारीचवाक्यं अनादृत्य। सहमारीचः मारीचसहितः। "तेनसहेतितुल्ययोगे" इतिसमासः। "वोपसर्जनस्य" इतिसहशब्दस्य सभावाभावः। तदा तस्मिन्नेवकाले। तस्य खरदूषणादिहन्तृत्वेनप्रसिद्धस्य रामस्य। आश्रमपदं आश्रमस्थानं। "पदंव्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु" इत्यमरः। जगाम प्राप।।४९।। मायाविना प्रशस्तमृगमायावता। "अस्मायामेधास्रजोविनिः" इतिविनिप्रत्ययः। लोभनीयविचित्रकनकमृगवेषधारिणेत्यर्थः। तेन मारीचेन प्रयोज्येन। नृपात्म-

तीर्थी. जनस्थानंनाम दण्डकारण्येरावणस्यबलनिवेशस्थानम्।।४४।। शिरो. रक्षसामित्यत्रषष्ठी राहोःशिरइतिवद्बोध्य।।४६।। तिल. बलवता विश्वामित्राश्रमेमदनुभूतवलेन।।४८।।

गृध्रं च निहतं दृष्ट्वा हृतां श्रुत्वा च मैथिलीम्। राघवः शोकसंतप्तो विललापाकुलेन्द्रियः।।५१।।
ततस्तेनैव शोकेन गृध्रं दग्ध्वा जटायुषम्।
मार्गमाणो वने सीतां राक्षसं संददर्श ह। कबन्धं नाम रूपेण विकृतं घोरदर्शनम्।।५२।।

जौ दशरथपुत्रौ। दूरंयथाभवतितथा। अपवाह्य अपसार्य। दृश्यादृश्यतयारामं रामस्वरतुल्यस्वरेण लक्ष्मणंच दूरंनिस्सार्येत्यर्थः। मध्येसीताविमोचनाय प्राप्तं जटायुषं जटायुर्नामकंगृध्रं। हत्वा मरणपर्यवसायिनींहिंसांकृत्वा। रामस्यभार्यां नित्यानपायिनींसीतां। जहार हृतवान्। अत्र "आस्यंव्यादायस्वपिति" इतिवदपूर्वकालेक्त्वाप्रत्ययः। सीतांहृत्वाजटायुषंजघानेत्यर्थः। अत्रमायानिर्मितासीतैवापहृता स्वयमग्नावन्तर्हिता। अतएवमायासीतायामग्निप्रविष्टायां-निजसीतायाउत्थानं यथाकथंचिल्लोकापवादात्पुनः संत्यागश्चोपपद्यतइत्याहुः।। ५०।। मृगरूपमारीचहननं पर्णशालायांसीतायाअदर्शनेनतदन्वेषणंच चकारेणसमुच्चीयते। निहतं मुमूर्षुं। गृध्रं जटायुषं। दृष्ट्वा। तद्वचनान्मैथिलीं सीतां। हृतां रावणेनापहृतां। श्रुत्वा राघवः। शोकेनसंतप्तः सम्यक्तप्तःसन् सीतायाअदर्शनेनतप्तः जटायुर्मरणेन-सुतरांतप्तः। अतएव आकुलेन्द्रियः कलुषितसर्वेन्द्रियस्सन्। विललाप परिदेवनमकरोत्। "विलापःपरिदेवनं" इत्यमरः। "राज्याद्भ्रंशोवनेवासः सीतानष्टाहतोद्विजः ।। ईदृशीयंममालक्ष्मीर्निर्दहेदपिपावकं" इति। अत्र राघवमैथिलीशब्दाभ्यां कुलद्वयावद्यकरमिदमपहरणमिति शोकातिशयहेतुरुच्यते। ननु विष्णववतारभूतस्यास्य-कथंशोकमोहौसंभवतइति। संभवतएवपुरुषधौरेयस्य। यदि हिलोकोत्तरगुणविशिष्टवस्तुविनाशेपितौनस्यातां तर्हि सकथंपुरुषधौरेयःस्यात्। तच्चकथमतिसुन्दरंस्यात्। तयोरुभयोर्नमस्कारएवस्यात्। वक्ष्यतिचमहापुरुष-गुणमणिवर्णनप्रकरणे "व्यसनेषुमनुष्याणांभृशंभवतिदुःखितः" इति। मारुतिश्चवक्ष्यति "दुष्करंकृतवान् रामोहीनोयदन-याप्रभुः। धारयत्यात्मनोदेहंनशोकेनावसीदति" इति।।५१।। अर्धत्रयमेकंवाक्यं। तेनैवशोकेन गृध्रहननजनितेनैवशोकेन सीतापहरणजशोकादप्यधिकेनेत्यर्थः। ततः व्याप्तोरामः। गृध्रं तिर्यग्विशेषमपिजटायुषं । पितृसखत्वात् शेषिकार्यायत्यक्त-प्राणत्वाच्च दग्ध्वा ब्रह्ममेधेनसंस्कृत्य। "यत्तुप्रेतस्य मर्त्यस्यकथयन्तिद्विजातयः। तत्स्वर्गगमनंतस्यक्षिप्रं रामोजजापह" इति वक्ष्यमाणत्वात् मुक्तत्यक्तशरीरत्वाच्च इदंब्रह्ममेधमर्हतीति। तथोक्तंनृसिंहपुराणे "मत्कृतेनिधनं-यस्मात्त्वयाप्राप्तंद्विजोत्तम। तस्मात्त्वं मत्प्रसादेनविष्णुलोक-मवाप्स्यसि" इति। सामान्यतश्चोक्तं। यथाऽऽग्नेये। "विष्णोःकायेसमुद्दिश्यदेहत्यागोयतःकृतः। ततोवैकुण्ठमा-साद्यमुक्तोभवतिमानवः" इति। आश्वमेधिकेच "प्राणांस्त्यजतियोमर्त्योमां प्रपन्नोपिमत्कृते। बालसूर्य-प्रकाशेनव्रजेद्यानेनमद्गृहं" इति। अत्रापिवक्ष्यति "यागतिर्यज्ञशीलानामाहिताग्नेश्चयागतिः। अपरावर्तिनांयाचयाचभूमिप्रदायिनां। मयात्वंसमनुज्ञातो-गच्छलो[illegible]माननुत्तमान्" इति। अत्रा[illegible]वृत्तिः 'नचपुनरावर्तते" इत्युक्ता मुक्तिरेव नतु युद्धे अप[illegible]यनं। तत्फलस्यस्वतः सिद्धत्वेन तदनुग्राह्यत्वाभावात्। नच संस्काराभावेसुकृतफलस्यानुत्पत्यातत्करणेनतदनुग्राह्यत्वमेवे[illegible]वाच्यं। तिरश्चो यज्ञानधिकारेण तस्यतद्भावेनतस्यतदनुग्रा[illegible]वात्। अङ्गिफलस्यैवाङ्गफलत्वेन उपासनाङ्गानांयज्ञदानादी-नामपि मुक्तिरेवफलमित्यभिप्रायेण "यागतिर्यज्ञशीलानां" इत्याद्युक्तम्। यद्वा "इमांलोकान्कामान्नीकामरूप्यनुसंचरन्" इत्यादिश्रुत्युक्तरीत्या मुक्तस्यसर्वलोकसंचारसंभवात् यागतिरित्याद्युक्तंक्रममुक्तिपरमिदंवचनं। ननु "आत्मानंमानुषंमन्ये" इति मनुष्यत्वंभावयतः कथं परत्वासाधारणचिह्नंमोक्षप्रदत्वमुच्यतइतिचेन्न। "सत्येनलोकाञ्जयति" इत्युक्तस्यसर्वलोकज-यस्यमानुषत्वेप्यविरोधात्। एवं जटायुषंदग्ध्वा वने सीतांमार्गमाणः अन्वेषणंकुर्वन्। मृगअन्वेषण-इत्यस्माद्धातोःशानच्। "आधृषाद्वा" इतिविकल्पाण्णिजभावः। रूपेण शरीरेण। विकृतं विकारयुक्तं। "येनाङ्गविकारः" इतितृतीया। कुक्षिनिक्षिप्तमस्तकनिमत्यर्थः। घोरदर्शनं भयंकरदर्शनं। कबन्धं कबन्धाकारत्वात्कबन्धनामकंराक्षसं। ददर्श। हेतिखेदे। अमृतमन्वेषता कालकूटमलंभीत्यर्थः। यद्यप्ययंदानवएव तथापिराक्षसप्र-

तीर्थी. ततः प्रलापानन्तरं शोकेन उपलक्षितः। तिल. तेनैवशोकेन निवृत्तिहेतुमप्राप्तेनअभिभूयमानएवसन्।। ५२।।

तं निहत्य महाबाहुर्ददाह स्वर्गतश्च सः।। ५३।।
स चाऽऽस्य कथयामास शबरीं धर्मचारिणीम्। श्रमणीं धर्मनिपुणामभिगच्छेति राघवम्।। ५४।।
सोऽभ्यगच्छन्महातेजाः शबरीं शत्रुसूदनः। शबर्या पूजितः सम्यग्रामो दशरथात्मजः ।। ५५।।
पंपातीरे हनुमता संगतो वानरेण ह। हनुमद्वचनाच्चैव सुग्रीवेण समागतः।। ५६।।
सुग्रीवाय च तत्सर्वं शंसद्रामो महाबलः। आदितस्तद्यथावृत्तं सीतायाश्च विशेषतः।। ५७।।

कृतित्वात्तथोक्तमितिज्ञेयम्।। ५२।। महाबाहुः कबन्धभुजनिकर्तनक्षमभुजो रामः। तं कबन्धंनिहत्य। तत्प्रार्थनया ददाह दग्धवान्। सच कबन्धो दाहेनहेतुना। स्वः स्वर्गंगतः। इदमर्धमेकंवाक्यम्।। ५३।। सः स्वर्गं-गच्छन्कबन्धोपि। आस्य उपकारस्मृत्या क्षणमाकाशेस्थित्वा। धर्मचारिणीं गुरुशुश्रूषादिधर्माचरणशीलां आचार्याभिमानरूप-चरमपर्वनिष्ठामित्यर्थः "पादमूलंगमिष्यामियानहंपर्यचारिषं" इतिवक्ष्यमाणत्वात्। धर्मे अतिथिसत्काररूपे। निपुणां समर्थां धर्मसूक्ष्मज्ञामित्यर्थः। रामः समागमिष्यतीति स्वादूनिफलान्या-स्वाद्यास्वाद्य परीक्ष्य निक्षिप्तवतीतिप्रसिद्धिः। श्रमणीं परिव्राजिकां। "चतुर्थमाश्रमंप्राप्ताःश्रमणा नामतेस्मृताः" इतिस्मरणात्। शबरींप्रतिलोमस्त्रियं। तदुक्तंनारदीये। "नृपायांवैश्यतोजातःशवरःपरिकीर्तितः। मधूनिवृक्षादानीय-विक्रीणीतेस्ववृत्तये" इति। "जातेरस्त्रीविषयात्-" इतिङीष्। अभिगच्छ आभिमुख्येनगच्छेति राघवंकथयामास। राघवइतिपाठे तस्योत्तरश्लोकेनान्वयः। यद्वा राघवेतिपाठे हे राघवशबरीमभिगच्छेति-अस्यरामस्यकथयामासेत्यर्थः। अत्रभागवतभक्तिमहिम्नाहीन-जातेरप्यभिगन्तव्यत्वमुक्तम्।। ५४।। महातेजाः चरमपर्व-निष्ठजनलिप्सयातिसंतुष्टः। सः राघवः। शत्रुसूदनः "गमिष्याम्यक्षयाँल्लोकांस्त्वत्प्रसादादरिंदम" इत्युक्तरीत्या तत्प्राप्तिप्रतिबन्धकनिवर्तकः। "सात्पदाद्योः" इति परत्वाभावः। शबरीं नीचत्वसीमाभूमिभूतां अभ्यगच्छदितिसौशील्या-तिशयोक्तिः। दशरथात्मजः रामः। शबर्या सम्यक्पूजितः। षष्टिवर्षसहस्राणिबन्ध्यस्यदशरथस्यप्रसादे अत्यन्तादरकृतभो-जनादप्यतिशयितं तत्कालमात्रसमागतशबरी-समर्पितमृष्टान्नमितिभावः। शरभङ्गादिभिरगस्त्यान्तैः कृतं पूजामात्रं शबर्याकृतं तुसम्यक्पूजा। तस्याश्चरमपर्व-निष्ठत्वादितिभावः। उक्तंहि "ममभद्भक्तभक्तेषुप्रीतिरभ्य-धिकाभवेत्" इति। यद्वा सम्यक्पूजनं परीक्षितरसैःफलैर्भोजनं। पूजितइत्यत्र "मतिबुद्धिपूजार्थेभ्यश्च" इति वर्तमानेक्तः। तथाचशबर्येत्यत्र "क्तस्यचवर्तमाने" इति कथंनषष्ठीतिचेत् अत्रकेचिदाहुः। आर्षःषष्ठ्यभावइति। अन्येतु नायंवर्तमानेक्तः। किंतु भूते। तद्योगेच "नलोकाव्यय-" इत्यदिना षष्ठीप्रतिषेधात्तृतीयैवेति। वस्तुतः पूजास्यसंजातेतिपूजितः। तारकादित्वादितच्प्रत्ययः। अनेनतृतीयाभवत्येव।। ५५।। एवं सत्यप्रतिज्ञत्वप्रधानमारण्यकाण्डचरितं संगृह्य मित्रकार्यनिर्वाहकत्वपरां किष्किन्धाकाण्डकथां संगृ[illegible]गाति-पंपेति। पंपानामपद्मसरः तस्यास्तीरे तटकानने इत्यु[illegible]कसं-निधानोक्तिः। हनुमता प्रशस्तहनुना वीरकिणाङ्कितमु-खेनेत्यर्थः। वानरेणसंगतः संयुक्तोरामइतिशेषः। हे महर्षे। विरहिजनप्राणापहारिणिपंपोपवने स्वकामिनीघटकसमागमोऽयं चोरैर्वनेऽपहृतसर्वस्वस्य स्वजनमुखावलोकनवदतीवाश्वास-नमितिमुनेर्हर्षः। हनुमता कागतिरिहेदानीमिति अतिमात्रपर्याकुलतादशायांविजय- किणाङ्कितवदनवतापुरुषेण संगमोयदृच्छयासंजातः। वानरेणेतिविशेषणेन रावणवत्संन्या-सिवेषर-हिततयास्ववेषेणसमागमाद्विश्वसनीयताद्योत्यते। हनुमद्वचनात्सुग्रीवेणसमागतः। चैवेतिनिपातसमुदाय-स्समुच्चयार्थः। अनुकूलपुरुषकारलाभादुचितमित्रलाभोजा-तइतिभावः।। ५६।। अथसख्यहेतुंरहस्योद्भेदं दर्शयति-सुग्रीवायेति। महाबलइत्यनेन वृत्तस्मरणकालिककातर्यगो-पनहेतुर्धैर्यमुच्यते। रामः आदितः जन्मनआरभ्य। तत्प्रसिद्धं। सर्ववृत्तं। सुग्रीवाय

तिल. स्वर्गतः स्वर्गगमनयोग्यंस्वकीयंगन्धर्वरूपंप्राप्तवानित्यर्थः।। ५३।। तिल. (पा.) ततोस्यकथयामास। ततः तेनरूपेण। श्रमणीमित्यत्रकर्तरिल्युट् तपसाश्राम्यतीत्यर्थात्।। ५४।। शिरो. दशरथात्मजः दशरथनित्यसुतः दशरथस्यजन्मान्तरेपिरामएवसुतइतियावत्।। ५५।। तीर्थी. महाबलइतिविशेषणसामर्थ्यात्सहायमन्तरेण सर्वनिर्वाहकत्वेपिलोकरीतिमनुसृत्यसुग्रीवसहायमुद्दिश्यसर्वंमकथयदित्यवगम्यते।। ५७।।

सुग्रीवश्चापि तत्सर्वं श्रुत्वा रामस्य वानरः। चकार सख्यं रामेण प्रीतश्चैवाग्निसाक्षिकम्।। ५८।।
ततो वानरराजेन वैरानुकथनं प्रति। रामायावेदितं सर्वं प्रणयाद्दुःखितेन च।। ५९।।
प्रतिज्ञातं च रामेण तदा बालिवधं प्रति। बालिनश्च बलं तत्र कथयामास वानरः।। ६०।।
सुग्रीवः शङ्कितश्चासीन्नित्यं वीर्येण राघवे।। ६१।।
राघवप्रत्यार्थे तु दुन्दुभेः कायमुत्तमम्। दर्शयामास सुग्रीवो महापर्वतसन्निभम्।। ६२।।
उत्स्मयित्वा महाबाहुः प्रेक्ष्य चास्थि महाबलः। पादाङ्गुष्ठेन चिक्षेप संपूर्णं दशयोजनम्।। ६३।।

शंसत्। अनित्यमागमशासनमित्यडभावः। अकथयदित्यर्थः। सीतायाः तद्वृत्तंच रावणहृतत्वादिकं। यथावृत्तं वृत्तमनतिक्रम्य। पदार्थाऽनतिवृत्तावव्ययीभावः। तदन्वेषणस्यावश्यकर्तव्यतया विशेषेणाशंसत्।। ५७।। चापीतिनिपातसमुदायः समुच्चयार्थः। वानरः सुग्रीवोपि। रामस्य संबन्धि तत्सर्वं पूर्वोक्तंवृत्तान्तं। श्रुत्वा प्रीतः रामस्यप्रयोजनापेक्षित्वान्मामकमपिप्रयोजनंनिर्वर्तयिष्यतीतिसंतुष्टः सन्। अग्निः साक्षीसाक्षाद्द्रष्टा-यस्यतत् अग्निसाक्षिकं। "शेषाद्विभाषा" इतिकप्रत्ययः।। रामेणसख्यं सखित्वं। "सख्युर्यः" इतिभावार्थेयप्रत्ययः। चकार कृतवान्। वानररामशब्दाभ्यां सख्यस्यासदृशत्वंव्यज्जितं। तेनच रामस्यसौशील्यातिशयोव्यज्यते। गुहस्यहीनमनुष्यजातितया तत्सख्यंसौशील्यहेतुः। तत्रापि स्त्रीत्वेनशवर्यभिगमनं ततस्तरांसौशील्यं। सुग्रीवस्यतिर्यक्त्वेन ततस्तमांसौशील्य-मितिभावः।। ५८।। ततः सख्यकरणानन्तरं। दुःखितेन परमसुहृद्भूतरामसन्निधानादुद्बुद्धपूर्ववृत्तान्ततया वाष्पंमुच्च-तेत्यर्थः। वानरराजेन सुग्रीवेण। "कर्तृकरणयोस्तृतीया" इति कर्तरितृतीया। वैरस्य बालिविरोधस्यानुकथनं अनुकूलकथनं प्रश्नानुकूलमुत्तरमित्यर्थः। वालिनासहतवकुतोवैर-मासीदित्येवंप्रश्नः। तंप्रतिवक्तव्यं सर्वे रहस्यप्रकाशरूपं। प्रणयात् स्नेहाद्विस्रंभाद्वा। "प्रणयास्त्वमी। विस्रंभयाच्ञा-प्रेमाणः" इत्यमरः। रामायावेदितं आसमन्तादुक्तं कार्त्स्न्येनोक्त-मित्यर्थः।। ५९।। प्रतिज्ञातंचेतिचशब्दोभिन्नक्रमः। रामेणच तदा आवेदनानन्तरकाले। वालिवधंप्रति प्रतिज्ञातं वालिवधप्रतिज्ञाकृतेत्यर्थः। भावेक्तः। वानरः सुग्रीवश्च। तत्र ऋश्यमूके। बालिनोबलं "समुद्रात्पश्चिमात्पूर्वंदक्षिणादपिचोत्तरं। क्रामत्यनुदितेसूर्येबालीव्यपगतक्लमः" इत्यादिनावक्ष्यमाणंबलं। उत्साहवर्धनायकथयामास।। ६०।। सुग्रीवो राघवे विषये। वीर्येणहेतुना नित्यं दर्शनमारभ्यसालभेदनपर्यन्तं। मुहुर्मुहः शङ्कितः आशीच्च। अयंबालितुल्यवीर्यो-नवेतिश[illegible]्कितवानित्यर्थः। नित्यशब्दस्यवीप्सा[illegible]र्थंमहाभाष्ये "नित्यग्रहसितोनित्यप्रजल्पितः" इति। "मतिबुद्धि-" इत्यादिसूत्रेशङ्कितादयोप्यर्थसिद्धाइतिसूचनात्कर्तरिनिष्ठा।। ६१।। तुशब्दो विशेषवाची। नकेवलंशङ्कितोऽभूत्। किंतु प्रत्ययार्थमन्वदर्शयामासचेत्यर्थः राघवप्रत्ययार्थे रामविषयज्ञानार्थे रामबलविज्ञानार्थमित्यर्थः। रामविषयविश्वासहेतुषु" इत्यमरः। दुन्दुभेः दुन्दुभ्याख्यस्यवालिहतस्यासुरस्य। उत्तमं अशिथिलम्। अतएव महापर्वतसन्निभं। उत्तमं उन्नतंवा। कायं कायाकारास्थि। दर्शयामास। रामायेतिशेषः। वालीएतदस्थि-पादाग्रेन्यस्यऊर्ध्वंक्षिपतीत्युक्त्वा दर्शयामासेत्यर्थः।। ६२।। महाबलः अपरिमेयबलः। महाबाहुः बलानुगुणकार्यकरण-समर्थभुजः रामः। अस्थिप्रेक्ष्य। स्मयित्वा कियन्मात्रमेतदित्य-नादृत्यस्मित्वा। इडार्षः। पादाङ्गुष्ठेन। सम्पूर्णं अन्यूनं। दशयोजनं। पात्रादित्वात्समाहारे ङीबभावः। अत्यन्तसंयोगे द्वितीया। उच्चिक्षेप उद्यम्यचिक्षेप। "व्यवहिताश्च" इति उपसर्गस्य व्यवहितप्रयोगः। बालिनापादेनक्षिप्तं रामेणतुपादांगुष्ठेनउत्क्षिप्यते। तेन द्वैधनुश्शते

तीर्थी. स्वसमानदुःखमहाबलसंबन्धलाभात् प्रीतःसन्।। ५८।। तिल. बालिनोबलं अरुणोदयानन्तरंसूर्योदयात्प्रागेव रावणंगृहीत्वाचतुस्समुद्रलङ्घनादिरूपम्। शिरो. चोप्यर्थे। तत्रच तस्मिन्नपिसमये।। ६०।। शिरो. नित्यं शङ्कितश्चशङ्कितएवासीदित्यनेनबलवद्द्रोहस्यदुर्निवारत्वंसूचितम्।। ६१।। तीर्थी. महाबाहुः बाहोर्महत्त्वंनाम अङ्गुल्येकदेशेनलोकविरोधिसकलदैत्यादिहननशक्तत्वम्। तथायुद्धकाण्डे "पिशाचान्दानवान्यक्षान्पृथिव्यांचैवराक्षसान्। अङ्गुल्यग्रेणतान्हन्यामिच्छन्हरिगणेश्वर" इति। ज्ञानिनोपिमुह्यन्ति किंवनकपिरित्युत्स्मयित्वा उदारमीषद्धास्यंकृत्वा।। ६३।।

विभेद च पुनस्सालान्सप्तैकेन महेषुणा। गिरिं रसातलं चैव जनयन्प्रत्ययं तदा।। ६४।।
ततः प्रीतमनास्तेन विश्वस्तः स महाकपिः। किष्किन्धां रामसहितो जगाम च गुहां तदा।। ६५।।
ततोऽगर्जद्धरिवरः सुग्रीवो हेमपिङ्गलः। तेन नादेन महता निर्जगाम हरीश्वरः।। ६६।। अनुमान्य
तदा तारां सुग्रीवेण समागतः। निजधान च तत्रैनं शरेणैकेन राघवः।। ६७।।
ततः सुग्रीववचनाद्धत्वा बालिनमाहवे। सुग्रीमेव तद्राज्ये राघवः प्रत्यपादयत्।। ६८।।
स च सर्वान्समानीय वानरान्वानरर्षभः। दिशः प्रस्थापयामास दिदृक्षुर्जनकात्मजाम्।। ६९।।
ततो गृध्रस्य वचनात्संपातेर्हनुमान्बली। शतयोजनविस्तीर्णं पुप्लुवे लवणार्णवम्।। ७०।।

अनेन दशयोजनमितिविशेषः।। ६३।। चिरंयुद्धपरिश्रान्तेन- वालिनाआर्द्रशरीरंप्रक्षिप्तं त्वयातुस्वस्थेनशुष्क- मित्यनाश्वसन्तंप्रति- प्रत्ययान्तरमकरोदित्याह-बिभेदेति। अत्र रामइत्यनुषज्यते। पुनश्चसप्तसालान् सर्जकतरून्। तत्समीपस्थंगिरिं। रसातलं अधोलोकेषु षष्ठलोकंच। प्रत्ययं विश्वासं। जनयन् प्रत्ययजननार्थं। "लक्षणहेत्वोः-" इतिशतृप्रत्ययः। एकेन महेषुणाबिभेद। महेषुणेत्यनेन सुग्रीवकार्यसाधनायरामेणतप्तपरशुधारणंकृतमितिध्वन्यते।।६४।। ततः सालादिभेदनानन्तरं। तेन अतिमानुषचरित्रेण। विश्वस्तः अयमवश्यंवालिहननक्षम- इतिविश्वासंप्राप्तः। प्रीतमनाः अचिरादेवराज्यंलप्स्यइति- संतुष्टचित्तः। महाकपिः आत्मानंकपिराजंमन्यमानः सः सुग्रीवः। रामसहितःसन्। तदा तस्मिन्नेवकाले। किष्किन्धां किष्किन्धाख्यां। गुहां गुहावत्पर्वतमध्यवर्तिनींपुरीं। जगाम। चकारेण पुनर्गमनंसमुच्चीयते।।६५।। ततः किष्किन्धागमनानन्तरं। हरिवरः आत्मनःकपिवरत्व- निश्चयवान्। हेमपिङ्गलः स्वर्णवत्पिङ्गवर्णः। हर्षप्रकर्षेण निवृत्तवैवर्ण्यइत्यर्थः। सुग्रीवः गर्जितानुगुणकण्ठध्वनिः। अगर्जत् घोषंचकार। महता पूर्वगर्जितविलक्षणेन। तेन नादेनहेतुना। हरिवरः वाली। गृहान्निर्जगाम।।६६।। वाली। तदा निर्गमनकाले। तारां अद्यवनादागतेनाङ्गदेनसुग्रीवोराम- सहायस्तिष्ठतीतिकथितं अद्यपराजितोनिर्गतः पुनरागतः अतस्त्वद्गमनमनुचितमितिवारयन्तींतारां। अनुमान्य धार्मिकाग्रेसरोरामः कथंमामनपराधिनंहन्यादितिपरिसान्त्व्य। सुग्रीवेण समागतः अयुध्यतेत्यर्थः। राघवः महाकुलप्रसूतत्वेन- धर्मसूक्ष्मज्ञः। तत्र युद्धभूमौ। एनं परेणयुद्धकृतमपिवालिनं। तदा परेणयुद्धकाले। चोवधारणार्थः। एकेनशरेण निजघान। द्वितीयशरप्रयोगेतदाभिमुख्येनतद्वधोदुर्लभइतिभावः। युद्धेऽभिमुखस्यबलं बालिनमेवगच्छतीतिवरप्रसिद्धिः। सुग्रीववचनात् "वालिनंजहिकाकुत्स्थमयाबद्धोऽयमञ्जलिः" इतिसुग्रीवप्रार्थनावचनात् आहवे सुग्रीवस्ययुद्धे। वालिनंहत्वा। ततः वालिवधानन्तरं राघवः। तद्राज्ये वालिराज्ये। सुग्रीवमेव। प्रत्यपादयत् स्थापयामासेत्यर्थः।।६७।।६८।। अथ सुग्रीवस्यप्रत्युपकारंदर्शयति- सचेति। वानरर्षभः वानरराजत्वेनाभिषिक्तः। सच सुग्रीवोपि। जनकात्मजांदिदृक्षुः द्रष्टुमिच्छुःसन्। सर्वान् नानादेशनिवासिनः। वानरान् समानीय आहूय। दिशश्चतस्रःप्रति। प्रस्थापयामास शीघ्रंसीतांदृष्ट्वाऽऽगच्छ- तेति आदिष्टवानित्यर्थः।।६९।। ततः सुन्दरकाण्डकथांसंगृह्णाति-ततइति। ततः प्रस्थानानन्तरं। बली अपरिच्छेद्यबलः। भूमार्थेमत्वर्थीयः। हनुमान् प्रशस्तहनुः। अन्वर्थसंज्ञेयं। तथाचेन्द्रोवक्ष्यति। "मत्करोत्सृष्टवज्रेणहनुस्तस्यतदाक्षतः। नाम्नैषहरिशार्दूलोभविताहनुमानिति" इति। आभ्यांपदाभ्यांपूर्वकथाप्रस्तावेन जांबवता कृतोत्साहत्वं तदुद्भूतनिरवधिकबलवत्त्वंचद्योत्यते। संपातेः संपातिनामकस्यजटायुर्ज्येष्ठस्यपक्षिणः। वचनात् इतः- शतयोजनात्परे समुद्रमध्येलङ्कायांसीतावर्तते तर समुद्रं तांपश्यसीतिवचनात्। शतयोजनविस्तीर्णलवणा-

तीर्थी. एकसालमात्रभेदनेअस्यवालिनासाम्यशङ्काजायतेतन्माभूदिततन्निवृत्त्यर्थं अचोदितानामपिअन्यसालप्रस्थादीनांभेदनमितिमन्तव्यम्। शिरो. जनयन् हेत्वर्थकः शतृप्रत्ययः।।६४।। शिरो. निजघान भक्तापकारजनितंवालिनोदोषंनिवर्तयामास। अतएवनिशब्दप्रयोगः।।६७।। तिल. सुग्रीववचनादित्यनेनानपकारिवालिवधस्यायुक्तत्वेपिमित्रापकारित्वेनतदुक्त्याहननमितिध्वनितम्। शिरो. एवकारेणाङ्गदव्यवच्छेदः।।६८।। तीर्थी. चकारात् अशोकवनंचमर्दयामास।।६९।।

तत्र लङ्कां समासाद्य पुरीं रावणपालिताम्। ददर्श सीतां ध्यायन्तीमशोकवनिकां गताम्।।७१।।
[1]निवेदयित्वाऽभिज्ञानं प्रवृत्तिं च निवेद्य च। समाश्वास्य च वैदेहीं मर्दयामास तोरणम्।।७२।।
पञ्च सेनाग्रगान्हत्वा सप्त मन्त्रिसुतानपि। शूरमक्षं च निष्पिष्य ग्रहणं समुपागमत्।७३।।
अस्त्रेणोन्मुक्तमात्मानं ज्ञात्वा पैतामहाद्वरात्। मर्षयन्राक्षसान्वीरो यन्त्रिणस्तान्यदृच्छया।।७४।।
ततो दग्ध्वा पुरीं लङ्कामृते सीतां च मैथिलीम्। रामाय प्रियमाख्यातुं पुनरायान्महाकपिः।।७५।।
सोऽभिगम्य महात्मानं कृत्वा रामं प्रदक्षिणम्। न्यवेदयदमेयात्मा दृष्टा सीतेति तत्त्वतः।७६।।
ततः सुग्रीवसहितो गत्वा तीरं महोदधेः। समुद्रं क्षोभयामास शरैरादित्यसन्निभैः।।७७।।
दर्शयामास चात्मानं समुद्रः सरितांपतिः। समुद्रवचनाच्चैव नलं सेतुमकारयत्।।७८।।

र्णवं पुप्लुवे प्लुत्वाततारेत्यर्थः ।।७०।। हनुमान् रावणपालितांलङ्कांपुरींसमासाद्य। तत्र लङ्कायां। अशोकवनिकां अन्तःपुरोद्यानं गतां। ध्यायन्तीं राममेव नैरन्तर्येणस्मरन्तीं। सीतां ददर्श।।७१।। ततोहनुमान्। अभिज्ञानं अङ्गुलीयकरूपंरामचिह्नं। निवेदयित्वा समर्प्य। अनित्यत्वात्समासेपिल्यबभावः। अतएवन्यासकारः "वाछन्दसीतिवक्तव्ये "क्त्वापिच्छन्दसि" इतिवचनसमासेपिल्यबर्थं तेनार्च्यदेवानागतइतिसिद्धं" इति। अनेनव्यभिचारेण समासेल्यब्विधेरनित्यत्वंसिद्धमेव। प्रवृत्तिं सुग्रीवसख्यकरणसेनासमूहीकरणप्रभृतिरामागमनवृत्तान्तं। "वार्ताप्रवृत्तिर्वृत्तान्तः" इत्यमरः। चकारात् "नैवदंशान्नमशकान्नकीटान्नसरीसृपान्। राघवोपनयेद्गात्रात्त्वद्गतेनान्तरात्मना" इति रामस्यसीतैकपरायणत्वादिकंसमुच्चीयते। निवेद्य उक्त्वाच। वैदेहींसमाश्वास्य सद्यस्ते कान्तःसमागमिष्यतीतिसान्त्वयित्वा। तोरणं अशोकवनिकाबहिर्द्वारं। मर्दयामास। "तोरणोस्त्रीबहिर्द्वारं" इत्यमरः।।७२।। अग्रेगच्छन्तीत्यग्रगाः सेनायाअग्रगाः सेनाग्रगाः। अन्तादिष्वपाठेपि "अन्यत्रापिदृश्यते" इतिडप्रत्ययः। तान् पञ्च पिङ्गलनेत्रप्रमुखान्। जंबुमालिप्रमुखान्सप्तमन्त्रिसुतानपिहत्वा। शूरं अक्षं अक्षकुमारं रावणद्वितीयपुत्रं। निष्पिष्य चुर्णीकृत्य। ग्रहणं इन्द्रजित्प्रयुक्तब्रह्मास्त्रेणबन्धनं। समुपागमत् प्राप्तः ।।७३।। अस्त्रेणेत्यादिश्लोकद्वयमेकान्वयं। वीरः सुरासुराप्रधृष्यरावणपालितलंकाप्रधर्षणादिना प्रख्यातवीर्यः। महाकपिः स्वयमक्षतएवानेकराक्षसहननक्षमइत्यर्थः। पैतामहात् पितामहदत्तात् वरात्। आत्मानं यदृच्छया प्रयत्नंविना। अस्त्रेण ब्रह्मास्त्रेण। उन्मुक्तं परित्यक्तं। ज्ञात्वा यन्त्रिणः आत्मानंरज्जुयन्त्रेणबद्ध्वाइतस्ततः कृषतइत्यर्थः। राक्षसान् मर्षयन् तदपराधानूक्षममाणइत्यर्थः। मैथिलीं मिथिलराजसुतांसीतांऋते विना। कुलप्रभावात्तन्मात्रमदग्ध्वा। लङ्कांपुरींदग्ध्वा। रामाय प्रियं सीतादर्शनप्रियं। आख्यातुं वक्तुंपुनरायात्।।७४।।७५।। अमेयात्मा अपरिच्छेद्यबुद्धिः। सः हनुमान्। महात्मानं सीतावियोगज्वरेप्यवार्यधैर्यं। रामं। अभिगम्य आभिमुख्येनप्राप्य। अनेन हनुमतःकृतकार्यत्वंद्योतितं। प्रदक्षिणंचकृत्वा। सीता तत्वतो यथावत्। दृष्टेति। न्यवेदयत् अकथयत्। सीतादृष्टेतिवक्तुंशक्यत्वेपि दृष्टासीतेत्युक्तिः रामस्यसीतादर्शनजीवनादिविषयसंशयोमाभूदितीतिवदन्ति। अन्येतु अदृष्टेतिप्रतिभासेतेति दृष्टेत्युक्तमिति। अपरेतु संतोषातिशयप्रकटनाय प्रथमंकृतकार्यनिर्देशइति।।७६।। अथयुद्धकाण्डकथांसंगृह्णाति-ततइत्यादि। ततः हनुमद्वाक्यश्रवणानन्तरं। सुग्रीवसहितः सन्। महोदधेः शतयोजनविस्तीर्णसिन्धोः तीरंगत्वा। आदित्यसंनिभैः शरैः। समुद्रं मार्गदानेउदासीनं क्षोभयामास आपातालमाकुलीचकार।।७७।। सरितां नदीनांपतिः। अनेन रामकोपशान्तये कालीयंदवसमुद्रःसपत्नीकःसमागतइतिध्वन्यते। समुद्रः आत्मानं निजरूपं। दर्शयामास। रामायेतिशेषः। समुद्रवचनादेव नलं सेतुमकारयच्च नलेनसेतुं कारयामास। "हृक्रोरन्यतरस्यां" इतिप्र-

तीर्थी. ब्रह्मास्त्रस्यअमोघतयाबन्धनमात्रंपञ्चघटिकानन्तरंतन्मोक्षश्चभवतीतिब्रह्मणाहनूमतेवरोदत्तः।।७४।। शिरो. चकारात्स्वापराधक्षमापनवचनंसमुच्चारयामासेत्यर्थः।।७८।।

[पा.] १. झ. गृहीत्वाप्रत्यभिज्ञानंप्रवृत्तिंविनिवेद्यच।

तेन गत्वा पुरीं लङ्कां हत्वा रावणमाहवे। रामः सीतामनुप्राप्य परां व्रीडामुपागमत्।। ७९।।
तामुवाच ततो रामः परुषं जनसंसदि। अमृष्यमाणा सा सीता विवेश ज्वलनं सती।। ८०।।
ततोऽग्निवचनात्सीतां ज्ञात्वा विगतकल्मषाम्। १बभौ रामः संप्रहृष्टः पूजितः सर्वदैवतैः।। ८१।।
कर्मणा तेन महता त्रैलोक्यं सचराचरम्। सदेवर्षिगणं तुष्टं राघवस्य महात्मनः।। ८२।।
अभिषिच्य च लङ्कायां राक्षसेन्द्रं विभीषणम्। कृतकृत्यस्तदा रामो विज्वरः प्रमुमोद ह।।८३।।

योज्यकर्तुःकर्मत्वं।। ७८।। रामस्तेन सेतुना लङ्कांपुरीं गत्वा। आहवे युद्धे। रावणंहत्वा सीतांप्राप्य। अनु पश्चात्। परां अतिशयितां। व्रीडां लज्जां। उपागमत्। पौरुषनिर्वहणाय-रिपुहननपूर्वकंसीतापुनःप्राप्ता परगृहस्थितांकथंअङ्गी-करिष्यामीतिलोकापवादशङ्कयालज्जितोभूदित्यर्थ।। ७९।। ततः व्रीडाप्राप्तेर्हेतोः। "यत्तद्यतस्ततोहेतौ" इत्यमरः। तां तादृशपातिव्रत्यांसीतां। जनसंसदि देवादिसभायां। परुषं वचनमुवाच। "अकथितंच" इति द्विकर्मकत्वं। जनसंसदीत्यनेन प्रत्ययोत्पादनार्थं शपथंकुर्वितिसूचितं। सती पतिव्रतासीता। अमृष्यमाणा रामोक्तपरुषवचनमसहमाना। ज्वलनं लक्ष्मणानीतमग्निं विवेश।।८०।। "ततोऽग्नि-वचनात्सीतांज्ञात्वाविगतंकल्मषां। बभौ रामःसंप्रहृष्टः पूजितःसर्वदैवतैः" इत्येवक्रमः। अन्यस्तुलेखकप्रमादकृतः। ततः अग्निप्रवेशानन्तरं। अग्निवचनात्सीतां विगतकल्मषां करणत्रयेपिदोपगन्धरहितां। ज्ञात्वा रामः संप्रहृष्टःसन्। बभौ सर्वदैवतैःपूजितश्च बभूव। अहोरामस्यधर्मापेक्षितेतिस्तु-तोऽभूदित्यर्थः।। ८१।। महात्मनो महास्वभावस्यराघवस्य। तेनकर्मणा रावणबधेन। सचराचरं स्थावरजंगमसहितं सदेवर्षिगणं। त्रैलोक्यं त्रिलोकी। स्वार्थेष्यञ्। तुष्टं संतुष्ट-मासीत्। स्थावरस्यसंतोषः पल्लवोद्गमादिना ऽवगम्यते। "अन्तःसंज्ञाभवन्त्येते" इतिविष्णुपुराणं। ८२।। यद्यपि सीतासमागमात्पूर्वंविभीषणाभिषेकः तथाप्यत्रक्रमोनविवक्षित-इतिज्ञेयं। रामः। विभीषयतीति विभीषणः। नन्द्यादित्वाल्ल्युः। शत्रुभयंकरइत्यर्थः। तं लङ्कायांचाभिषिच्य। समुद्रतीरेभिषेकः समुच्चीयते। यद्वा चोऽवधारणार्थः। अभिषिच्यैवकृतकृत्यः नतु रावणंहत्वैव। लङ्कायां विभीषणमभिषिच्य स्नुहिवनंछित्त्वासहकारंस्थापयित्वेतिवत्। यद्वा चोऽन्वाचये। प्रधानतयाऽपवर्गमनुगृह्य आनुषङ्गिकतयाराज्येभिषिच्येत्यर्थः। शरीरारोग्यमर्थांश्चभोगांश्चैवानुषङ्गिकान्। ददाति ध्यायतांपुंसामपवर्गप्रदोहरिः" इतिवचनात्। अभिषिच्य तदा रामः। अभिषेकात्पूर्वं कथंस्यादितिविवर्णोऽभूत्। अथ रमणीयोभूत् तदारामोरामोऽभूत्। विज्वरः भरतोऽग्रराज्यं-नस्वीकृतवान् तथाऽयमपिचेत् किंकुर्यामितिपूर्वंज्वरोऽभूत्। सइदानींनिवृत्तइत्यर्थः। यद्वा नागपाश-

शिरो. सतीं सतीभिःपतिव्रताभिःईयतेमनसाप्राप्यते स्वसतीत्वनिर्वाहार्थंनित्यंस्मर्यतइत्यर्थः ।।८०।। तिल. तत अग्निवचनात् "विशुद्धभावांनिष्पापांप्रतिगृह्णीष्वराघव" इत्येवंरूपात्। विगतकल्मषां निष्पापां। स्वयं ज्ञात्वा लोकस्यचतथात्वं याप्य सीतामङ्गीचकारेतिशेषः। क्वचित्तु "अग्रहीदमलांरामोवचनाच्चगुरोस्तदा" इतिपठ्यते। तत्रामलामितिपुनरुक्तमापद्यते। तेनकर्मणा सीताप्रत्यायनान्तेनकर्मणा। ऋषिदेवगणसहितंचराचरप्रजासहितंत्रैलोक्यंतुष्टंतुतोष। तत्संतोषेणचप्रहृष्टः संतोषवशादेवसर्वदैवतैः पूजितश्चरामोबभौ। अत्रकेचित् अचराणांवृक्षादीनांरावणकृतपीडापरिज्ञानाभावेनरावणवधजन्यसंतोषाभावात्एवंव्याचक्षते। देवऋषिगणं इतिपाठः "ऋत्यकः" इतिप्रकृतिभावः। तत्रदेवगणाइन्द्रादयः ऋषिगणाविश्वामित्रादयः एतद्रूपंयत्त्रैलोक्यंसचराचरं। अत्रचरप्रजाः गतिभक्षणमात्रप्रधानास्तिर्यक्स्रोतसः पशुपक्ष्यादयः ऐरावतादयः। अजरप्रजाः चरप्रजाभिन्नाः ज्ञानयुक्तप्रजाअवाक्स्रोतसोमनुष्याः। एवंचस्वस्वशेषतिर्यगवाक्स्रोतोयुतदेवऋषिगणरूपंत्रैलोक्यंतुष्टं। रावणस्यमर्त्योपेक्षित्वात्प्राधान्येनदेवर्षिग्रहणमिति। शिरो. विगतकल्मषां कल्मषसंबन्धशून्यांसीतां। ज्ञात्वा जनान्बोधयित्वा स्वीचकारेतिशेषः। श्लोकद्वयंसंमिलितान्वयि। विगतकल्मषांबोधयित्वेत्यनेन रामस्यलोकापवादभीरुत्वंबोधितं। तेनरघुनाथेसौशील्यगुणोव्यक्तः। सर्वदैवतैः पूजितइत्यनेन यदिसर्वदैवतैःपूजितस्तर्हिमनुष्यादिभिःपूजितइतिकिंवक्तव्यमितिकाव्यार्थापत्तिरलंकारोव्यक्तः। ज्ञात्वेत्यत्रान्तर्भावितोणिच्।।८१।। ।।८२।। तनि. प्रधानाभिलषितकैङ्कर्यसाम्राज्यलाभेनयदिलङ्कैश्वर्यमनभ्युपगतंस्यात्तदा "अहंहत्वादशग्रीवंसप्रहस्तंसबान्धवम्। राजानंत्वांकरिष्यामिलङ्कायांराक्षसेश्वर।" इतिकृताप्रतिज्ञाविफलास्यादितिमहाज्वरःप्रवृत्तः सइदानींनिवृत्तइतिप्रमुमोद।।८३।।

[पा.] १. झ.ट. कर्मणातेनमहतात्रैलोक्यंसचराचरम्। सदेवर्षिगणंतुष्टं राघवस्यमहात्मनः। बभौरामःसंप्रहृष्टःपूजितः सर्वदैवतैः।

देवताभ्यो वरं प्राप्य समुत्थाप्य च वानरान्। अयोध्यां प्रस्थितो रामः पुष्पकेण सुहृद्वृतः।।८४।।
भरद्वाजाश्रमं गत्वा रामः सत्यपराक्रमः। भरतस्यान्तिकं रामो हनूमन्तं व्यसर्जयत्।।८५।।
पुनराख्यायिकां जल्पन्सुग्रीवसहितस्तदा। पुष्पकं तत्समारूह्य नन्दिग्रामं ययौ तदा।।८६।।
नन्दिग्रामे जटां हित्वा भ्रातृभिस्सहितोऽनघः। रामः सीतामनुप्राप्य राज्यं पुनरवाप्तवान्।।८७।।
प्रहृष्टमुदितो लोकस्तुष्टः पुष्टः सुधार्मिकः। निरामयो ह्यरोगश्च दुर्भिक्षभयवर्जितः।।८८।।

प्रभृतिषु "यन्मयानकृतो राजाराक्षसानांविभीषणः। तच्चमिथ्याप्रलप्तंमांप्रधक्ष्यतिनसंशयः" इति योयमन्तस्तापः सइदानींनिवृत्तइत्यर्थः। नकेवलंविज्वरः प्रमुमोदच प्रकर्षेणमोदंप्राप्तश्च। चक्षिङोङित्करणादनित्यमनुदात्तेतआत्मनेपदत्वं। अतोऽत्रपरस्मैपदप्रयोगः।। अनेनरामस्यरावणवधसीताप्राप्ती आनुषङ्गिकफले। स्वाश्रितविभीषणाभिषेचनमेव परमपुरुषार्थइत्यवगम्य ते। यद्वा। वौ पक्षिणिजटायुषि ज्वरोयस्यसः। यथालोकेकस्यचित्पुत्रस्योत्सवे कथंचिन्मोदमानोपिपिता पूर्वातीतपुत्रस्मरणातुसंतप्तएवभवति। एवं सर्वलोकपितास्वामीच विभीषणाभिषेकसमये विनाभिषेकमतीतंजटायुषंस्मरन् किंचिदन्तरस्तापोपपत्रएवमुमुदइत्यर्थः। यद्वा। विज्वरइत्यनिष्टनिवृत्तिरुक्ता। प्रमुमोदेतीष्टप्राप्तिः। हेति प्रसिद्धौ विस्मयेवा। हन्त रामस्यसत्यप्रतिज्ञत्वमित्यर्थः।।।८३।। रामः देवताभ्यः रामविजयश्लाधनायागताभ्यः। वरंप्राप्य तेनवरेण। वानरान् रणेमृतान्। समुत्थाप्य सुप्तानिवोत्थाय। सुहृद्भिः सुग्रीवविभीषणादिभिर्वृतःसन्। पुष्पकेण कुबेरंविजित्यरावणेनसमानीतेनपुष्पकाख्यविमानेन। अयोध्यांप्रति प्रस्थितः।। ८४।। सत्पराक्रमः सत्यविषयपराक्रमवान्। रामइति क्रियाभेदात्द्विरुक्तिः। भरद्वाजाश्रमंगत्वा। भरतस्यान्तिकं समीपंप्रति। हनूमन्तं व्यसर्जयत् व्यसृजत्। हनूशब्दऊकारान्तोप्यस्ति। भरद्वाजेनात्रस्थातव्यमितिप्रार्थिते तद्दिवसेन चतुर्दशवर्षपूर्तेः पूर्णेचतुर्दशेवर्षेआगमिष्यामीति भरतंप्रत्युक्तेःसत्यत्वरक्षयाय हनूमन्तंप्रेरितवानितिभावः।।८५।। रामस्तत्पुष्पकं समारुह्य सुग्रीवसहितःसन्। तदा गमनकाले। आख्यायिकां पूर्ववृत्तकथां। "आख्यायिकोपलब्धार्था" इत्यमरः। पुनःपुनःजल्पन् कथयन्। अर्थात्भरतविषयाख्यायिकां सुग्रीवेणजल्पन्निति गम्यते। नन्दिग्रामं भरतस्थानं। तदा तस्मिन्नेवकाले शीघ्रमित्यर्थः। ययौ प्राप।।८६।। अनघः सम्यगनुष्ठितपितृवचनः। यद्वा "शिरसायाचतस्तस्यवचनंन कृतंमया" इत्युक्तपापरहितइत्यर्थः। यद्वां निरस्तसमस्त व्यसनः। "दुःखैनोव्यसनेष्वघं" इतिवैजयन्ती। रामः भ्रातृभिःसहितः। "कदान्वहंसमेष्यामिभरतेनमहात्मना। शत्रुघ्नेनचवीरेणत्वयाचरघुनन्दन" इत्युक्तमनोरथपूर्णइत्यर्थः। नन्दिग्रामे जटांहित्वा शोधयित्वा। उपलक्षणमेतत्। "विशोधित जटःस्नातश्चित्रमाल्यानुलेपनः। महार्हवसनोरामस्तस्थौ तत्रश्रियाज्वलन्" इत्युक्तरूपः। सीतामनुप्राप्य समीपेप्राप्य। "रामंरत्नमयेपीठेसहसीतंन्यवेशयत्" इत्याद्युक्तरीत्यादिव्यसिंहासनेसीतयाभिषेकंप्राप्येत्यर्थः। राज्यंपुनरवाप्तवान्। पितुर्वचनात्पूर्वंप्राप्तंविशिष्यपुनरद्यप्राप्तमित्यर्थः।।८७।। रामस्यराज्यप्राप्तिकृतं लोकस्यातिशयंदर्शयति-प्रहृष्टेति। लोकः जनः। प्रहृष्टमुदितः तदानीमासीदितिशेषः। एवमुत्तरत्रापि। प्रहृष्टः संजातरोमाञ्चः। "हृषेर्लोमसु" इति अनिट्त्वविधानात्। मुदितइतितन्मूलसंतुष्टान्तःकरणत्वमुच्यते। तुष्टः समस्तकामलाभजनितप्रीतियुक्तः। यद्वा। "इच्छामोहिमहाबाहुंरघुवीरंमहाबलं। गजेनमहतायान्तंरामंछत्रावृताननं" इत्यभिलषितलाभउच्यते। पुष्टः "विषयेतेमहाराजरामव्यसनकर्शिताः। अपिवृक्षाः परिम्लानाः सपुष्पाङ्कुरकोरकाः" इत्युक्तरामविर-

तिल. महत्यावानरसेनयासहअकस्माद्गमनेभरतादेःशङ्कामाभूदितितद्विसर्जनम्। शिरो. सत्यपराक्रमः सत्योध्वंसाप्रतियोगीपराक्रमोयस्य। किंच सत्याअयोध्या साऽस्त्याधारत्वेनयेषांतेसत्याअयोध्यावासिनः तान्नित्यंपिपर्तीतिसत्यपरः अतएवनक्रमते अयोध्यांपरित्यज्यनक्वचिद्गच्छतीत्यक्रमः सचासौसचेतिउभयपदविशेषणकर्मधारयः।।८५।। तिल. पुनरिति। पुष्कादवतीर्णत्वात्पुनस्तत्पुष्पकंसमारुह्य।।८६।। तीर्थी. सीतामनुप्राप्य सीतासादृश्यंप्राप्य। मुनिवेषत्यागेनसीतामनुरूपः प्राप्येतियावत्।। शिरो. अनघः दूरीकृतदेवव्यसनः।।८७।। तीर्थी. एतदन्तंचरितंवृत्तत्वेनोपदिश्यदेवर्षिरतः परंउत्तरकाण्डविषयंभविष्यत्वेनोपदिशति-प्रहृष्टेति।।८८।।

न पुत्रमरणं किंचिद्रक्ष्यन्ति पुरुषाः क्वचित्। नार्यश्चाविधवा नित्यं भविष्यन्ति पतिव्रताः।।८९।।
न चाग्निजं भयं किचिन्नाप्सु मज्जन्ति जन्तवः। न वातजं भयं किंचिन्नापि ज्वरकृतं तथा।
न चापि क्षुद्भयं तत्र न तस्करभयं तथा।।९०।।
नगराणि च राष्ट्राणि धनधान्ययुतानि च। नित्यं प्रमुदिताः सर्वे यथा कृतयुगे तथा।।९१।।
अश्वमेधशतैरिष्ट्वा तथा बहुसुवर्णकैः। गवां कोट्ययुतं दत्त्वां ब्रह्मलोकं प्रयास्यति।
असङ्ख्येयं धनं दत्त्वां ब्राह्मणेभ्यो महायशाः।।९२।।

हजकार्श्यत्यागातपुष्टः। सुधार्मिकः सुधर्मःरामभक्तिपूर्वकंकर्म तच्चरतीतिसुधार्मिकः। ''धर्मं चरित'' इति ठक्। ''स्त्रियोट्टद्धास्तरुण्यश्च'' इत्युक्तधर्मफलभागित्यर्थः। निरामयः शरीररोगरहितः। अरोगः मानसव्याधिरहितः। दुर्भिक्षभयवर्जितः। भिक्षाणांव्यृद्धिःदुर्भिक्षं। व्यृद्धाव्ययीभावः। दुर्भिक्षात् भयं दुर्भिक्षभयं तेनवर्जितः। अनेन पूर्वंसीताविशिष्टरामवियोगे प्रजानामामयादिकमासीत्। तदिदानीं निवृत्तमित्युच्यते। प्रहृष्टेत्यादि रामाभिषेकदर्शनसंतोषो-नवर्णयितुंशक्यइत्याहकविः प्रहृष्टमुदितोलोकस्तुष्टःपुष्टः इति। अथ प्रीतिकारितकैङ्कर्यसिद्धिं दर्शयति-सुधार्मिकइति। शोभनोधर्मः विशिष्टविषयकैङ्कर्यमेव। अथकैङ्कर्यविरोधि-निवृत्तिमाह-निरामयोह्यरोगश्चेति। कैङ्कर्योपकरण-समृद्धिमाह-दुर्भिक्षेति।।८८।। अथ वर्णाश्रमधर्मपरिपाल-नप्रधानामुत्तरकाण्डकथां संगृह्णाति-नपुत्रेत्यादि। केचिदपि-पुरुषाः क्वचित् कुत्रापिदेशे किंचित् कादाचित्कम्पि। पुत्रमरणं नद्रक्ष्यन्ति। नद्रक्ष्यन्तीत्यनेन ब्राह्मणपुत्रइव कदाचित्प्राप्तमपिपरिहरिष्यतीतिभावः। नार्यश्चाविधवाः नित्यंपतिव्रताश्च भविष्यन्ति। यद्वा। विविधाधवायासांताः विधवाव्यभिचारिण्यः। अव्यभिचारित्वेपि पत्यावप्यननुरागः कासांचित्स्यात्सनेत्याह-पतिव्रताइति। कौसल्यादयस्तु पुत्रवत्तयावृद्धतयाचनविधवाइतिभावः।।८९।। तत्र राज्ये तापत्रयगन्धोपिनभविष्तीत्याह-नचेत्याद्यर्धत्रयं। अग्निजंभयं नकिंचित् नभविष्यति। जन्तवःनाप्सुमज्जन्ति।

मङ्क्त्वानमरिष्यन्तीत्यर्थः। एवमाधिदैविकनिवृत्तिरुक्ता अथाध्यात्मिकादिनिवृत्तिमाह-नापिज्वरकृतंतथानचापिक्षुद्भयमिति। नतस्करभयमित्याधिभौतिकोपलक्षणं।।९०।। तत्ररामराजये अनिष्टनिवृत्तिमुक्त्वेष्टसिद्धिमाह-नगराणीति। नगराणि धनयुतानि राष्ट्राणिधान्ययुतानिचभविष्यन्ति। एतएव सर्वेनागरिकाजानपदाश्च यथाकृतयुगे तथात्रेतायामपि नित्यंप्रमुदिताभविष्यन्ति। ''गत्यर्थाकर्मक-'' इत्यादिना कर्तरिक्तः।।९१।। एवं क्षत्रियासाधारणं प्रजापालनरूपंधर्म-मुक्त्वा द्विजातिधर्मानाह-अश्वमेधेति। अर्धत्रयमेकान्वयम्। महायशाः प्रजापालनलब्धमहाकीर्तिः। अनेनद्रव्यशुद्धिरुक्ता। अश्वमेधशतैः अनेकाश्वमेधैः। ''दशवर्षसहस्राणिवाजिमेध-मुपाकरोत्'' इति वक्ष्यमाणत्वात्। तथा बहुसुवर्णकैः बहुसुवर्णकाख्यक्रतुविशेषैश्च। ''सुबहूनिसुवर्णानियत्रोप-करणत्वतः। विन्दतेसक्रतुःसद्भिः स्मृतोबहुसुवर्णकः'' इतिवचनात्। एवमुत्तरक्रत्वनुष्ठानप्रदर्शनेन पूर्वक्रतवोग्निष्टोमादयोपिह्यनुष्ठिताइतिसिद्धम्। गवांकोट्ययुतंदत्त्वा दशसहस्रकोटिपरिमिताःगाःब्राह्मणेभ्योदत्त्वा। ब्रह्मलोकं ब्रह्मणः स्वस्य लोकं अप्राकृतस्थानं परमपदं प्रयास्यति। अत्रमहायशाइत्यनेन यत्किंचिदपवादश्रवण-मात्रेणसीतात्यागःसूचितः। दशवर्षसहस्राणिअश्वमेधानुष्ठान-कालइत्युत्त्या सीतांविनैव ऋत्वनुष्ठानस्यवक्ष्यमाणतवाच्च अभिषेकात्परं स्वल्पएव-

---

तिल. अविधवाः भर्त्रनुगमनात् धवांशपुत्रसद्भावाद्वा ।।८९।। तीर्थी. असङ्ख्येयंधनंदत्वाब्रह्मलोकंप्रयास्यतीतियोजना। ब्रह्मैक्लोकः तंपरमात्मस्वरूपं सगुणस्यब्रह्मणोविष्णोः स्वस्यलोकंवैकुण्ठाख्यंचप्रयास्यतीत्यर्थः। तिल. इष्ट्वादत्त्वेत्यादिस्वरूपकथनं नतुतेपांरोक्ष्यस्वलोकप्राप्तिंप्रतिहेतुतेतिबोध्यम्। यत्तुकतककृता अश्वमेधाद्यनुष्ठानस्यमानुषोपाधिप्रयुक्तावर्ज्याघशमनद्वाराब्रह्मलोकप्राप्तौहेतुत्वमित्युक्तं तत्र। भगवदवताराणांपुण्यपापसंबन्धस्यसर्वतन्त्रविरुद्धत्वात्। अश्वमेधाद्यनुष्ठानंतु लीलामात्रं लोकोपदेशायेत्यन्यत्रविस्तरः। शिरो. विद्वद्भ्योब्राह्मणेभ्यः विधिपूर्वकं यथाविधि। गवांकोट्ययुतंदत्वा। विषम. गवांकोट्ययुतं दशसहस्रोत्तरकोटिपरिमितागाः विद्वद्भ्योब्राह्मणेभ्यः विधिपूर्वकंदत्वाब्रह्मलोकंप्रयास्यतीत्युत्तरेणान्वयः।।९२।।

ख्या., १. झ. ञ. ट. विद्वद्भ्योविधिपूर्वकं।

राजवंशाञ्शतगुणान्स्थापयिष्यति राघवः । चातुर्वर्ण्यं च लोकेऽस्मिन्स्वे स्वे धर्मे नियोक्ष्यति ॥ ९३ ॥
दशवर्षसहस्राणि दशवर्षशतानि च । रामो राज्यमुपासित्वा ब्रह्मलोकं गमिष्यति ॥ ९४ ॥
इदं पवित्रं पापघ्नं पुण्यं वेदैश्च संमितम् । यः पठेद्रामचरितं सर्वपापैः प्रमुच्यते ॥ ९५ ॥
एतदाख्यानमायुष्यं पठन्रामायणं नरः । सपुत्रपौत्रः सगणः प्रेत्य स्वर्गे महीयते ॥ ९६ ॥

वर्षसहस्रकाले सीतावियोगइत्यवसीयते । अश्वमेधारंभश्च रावणवधरूपपापनिवर्हणार्थतयाप्रसक्तइत्यविलंवितः । ततःपूर्वमेवसीतावियोगः प्रथमाश्वमेधे सीताप्रतिरूपकरणात् । प्रतिकृत्यापियज्ञानुष्ठानस्यप्रामाणिकत्वंवक्ष्यतिदर्भशयनप्रकरणादौ ॥ ९२ ॥ एवं धर्मानुष्ठातृत्वमुक्त्वा धर्मप्रवर्तकत्वमाह—राजेति । अस्मिनलोके राघवः राजवंशान् क्षत्रियवंशान् शतगुणान् शतगुणितान् । स्थापयिष्यति । शतगुणंविवृद्धान्राजवंशान प्रत्येकंराज्यप्रदानेनपालयिष्यतीत्यर्थः । चत्वारोवर्णाः चातुर्वर्ण्यं । स्वार्थेष्यञ् । स्वेस्वे स्वस्ववर्णाश्रमोचिते । धर्मे । पूर्वादित्वात्सर्वनाम्नत्वविकल्पः । नियोक्ष्यति प्रवर्तयिष्यति ॥ ९३ ॥ धर्मसंस्थापनातिशयप्रदर्शनायराज्यपरिपालनकालवहुत्वंदर्शयति—दशेति । दशवर्षसहस्राणिदशवर्षशतानिच । एकादशसहस्रसंवत्सरानित्यर्थः । उपासित्वा उपास्य । वाछन्दसीतिवक्तव्ये "क्त्वापिच्छन्दसि" इतिप्रयोगादनित्योल्यवादेशः । सान्त्वपूर्वंजनानुवर्तनेनपरिपाल्येत्यर्थः । अत्यन्तसंयोगेद्वितीया । राज्यपालनेव्यासङ्गाभावोदर्शितः । ब्रह्मलोकं वैकुण्ठं । गमिष्यति ॥ ९४ ॥ अथैतत्पठनस्यमोक्षसाधनत्वमाह—इदमिति । पूयतेनेनेति पवित्रं । "कर्तरिचर्षिदेवतयोः" इतिकरणेइत्रप्रत्ययः । परिशुद्धिसाधनमित्यर्थः । नकेवलंशुद्ध्यापादकं किंतुपापघ्नं । "अमनुष्यकर्तृकेच" इतिटक्प्रत्ययः । पुण्यं लाङ्गलंजीवनमितिवत् पुण्यसाधनं । अनेनप्रायश्चित्तव्यावृत्तिरुक्ता । तद्धि पापमेवनिवर्तयति । उक्तार्थत्रयेहेतुमाह—वेदैश्चसंमितमिति । सर्ववेदसदृशमित्यर्थः । इदंरामचरितं संक्षेपरूपं । यःपठेत् वेदवत्सनियमंप्रतिदिनंपठेत् । ससर्वपापैः पूर्वोत्तराघैः । प्रमुच्यते । तदुक्तं रामोपनिषदि "ब्रह्महत्यासहस्राणिवीरहत्याशतानिच । स्वर्णस्तेयसुरापानगुरुतल्पायुतानिच । कोटिकोटिसहस्राणिउपपातकजान्यपि । सर्वाण्यपिप्रणश्यन्तिरामचन्द्रस्यकीर्तनात्" इति ॥ ९५ ॥ एवं रामचरितपाठस्यमोक्षंफलमुक्त्वा आनुषङ्गिकफलोक्तिपूर्वकं तस्यसंवान्धिसंवन्धपर्यन्ततामाह—एतदिति । आयुः प्रयोजनमस्य आयुष्यं । "स्वर्गादिभ्योयद्वक्तव्यः" इति यत्प्रत्ययः । आख्यानं आख्यायिकारूपं । एतद्रामायणं वालरामायणं । रामस्यायनं रामायणं । अयगताविति धातोर्भावेल्युट् । रामचरितमित्यर्थः । रामः अय्यते प्राप्यतेअनेनइतिवा रामायणं । रामः अयनं प्रतिपाद्योयस्येतिवा रामायणं । "पूर्वपदात्संज्ञायामगः" इतिणत्वम् । पठन्नरः वर्णाश्रमादिनियमंविना योपिकोपि । सपुत्रपौत्रः दशपूर्वापरसहित इत्यर्थः । सगणः सभृत्यवन्धुः । प्रेत्य आत्यन्तिकशरीरनाशंप्राप्य । स्वर्गे परमपदे । "तस्मिन् हिरण्मयःकोशःस्वर्गोलोकोज्योतिषावृतः" इतितस्मिन्स्वर्गशब्दप्रयोगात् । विमुक्तसर्वपापंप्रति स्वर्गमात्रस्याफलत्वाच्च । महीयते पूज्यते । "तंपञ्चशतान्यप्सर-

तनि० राज्येनखलुरामःस्वयमुपास्यःस्वयमत्यन्तानुकूल्याचरणेनराज्योपासनंचकारेतिसौशील्यमुक्तं । तिल० अवतारत्यागकालमाह—दशेति । उपासित्वा नित्यवदनुष्ठायेत्यर्थः । ब्रह्मलोकं मायिकवैकुण्ठादिलोकं । अनेननिजनित्यकर्मयोगोपेतस्यैवपाञ्चरात्रपरंपरयावात्रब्रह्मलोकप्राप्तिरितिध्वनिः । शिरो० दशवर्षसहस्राणिदशसङ्ख्यागुणितानिवर्षसहस्राणि त्रिसहस्रसङ्ख्यासङ्ख्यातवर्षाणि त्रिंशत्सहस्रवर्षाणीत्यर्थः । दशवर्षशतानिच दशसङ्ख्यागुणितानिवर्षशतानेशतत्रयवर्षाणि सहस्रत्रयवर्षाणीत्यर्थः । एवंचत्रयस्त्रिंशत्सहस्रवर्षाणिराज्यंरामोनित्यरमणशीलः उपासित्वाकृत्वेत्यर्थः । ल्यवभावआर्षः । आब्रह्मलोकं अःविष्णुः आःप्रजापतिः ब्रह्मशिवः तैर्लोक्यतेहृदिनित्यंस्मर्यतेतत् । किंच ब्रह्माभिन्नंलोकंआनन्दघनं अप्रकटायोध्यापुरंप्रयास्यतिप्राप्स्यति । अप्रकटतयातत्रैवस्थास्यतीत्यर्थः । अत्रप्रशब्दोपादानेनतत्परिकराणामपितादृक्स्थितिरितिव्यञ्जितम् । वहुवचनान्तसहस्रशब्देनवहुवचनान्तशतशब्देनच सहस्रत्रयशतत्रयलाभः कपिञ्जलाधिकरणन्यायेनावगन्तव्यः । एकसहस्रैकशतार्थकत्वंतुनोपपद्यते तयोर्बहुवचनान्तत्वात् । "विंशत्याद्याःसदैकत्वे" इत्यनुशासनेनैकशेषमन्तरावहुवचनान्तत्वस्यदुर्लभत्वात् । अतएव "त्रयोदशाब्दसाहस्रंत्रह्मचर्यमखण्डितं" इति ॥ ९४ ॥

[पा०] १- च—ट प्रयास्यति ।

पठन्द्विजो वागृषभत्वमीयात्स्यात्क्षत्रियो भूमिपतित्वमीयात् । वणिग्जनः पण्यफलत्वमीयाज्जनश्च शूद्रोपि महत्त्वमीयात् ॥ ९७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे श्रीमद्रामायणकथासंक्षेपोनाम प्रथमः सर्गः ॥ १ ॥

सांप्रतिधावन्तिशतंमालाहस्ताःशतंचूर्णहस्ताः" इतिश्रुतेः ॥ ९६ ॥ अथ चातुर्वर्ण्यव्यतिरिक्तस्यनाधिकारइतिसूचयन्वर्णविशेषनियतानिफलानिदर्शयति—पठन्निति । स्यादित्येतदव्ययंयद्यर्थे । इदंवालरामायणं पठन् द्विजोयदि । वागृषभत्वं वाचिश्रैष्ठ्यं वेदवेदाङ्गपारगत्वं । ईयात् प्राप्नुयात् । ईङ्गतावित्यस्माद्धातोःलिङ् । पठन् क्षत्रियोयदि भूमिपतित्वं चक्रवर्तित्वमीयात् । पठन् वणिग्जनोयदि पण्यफलत्वमीयात् । पणंमूल्यंतदर्हतीतिपण्यं क्रयविक्रयार्हवस्तु तदेवफलं लाभोयस्य स पण्यफलः । तस्यभावः पण्यफलत्वं । "पणोद्यूतादिपूत्सृष्टेभृतौमूल्येधनेपिच" इत्यमरः । पणशब्दादर्हार्थेयत्प्रत्ययः । "अवद्यपण्य—" इत्यादिना पणतेर्यत्प्रत्ययान्तोनिपातोवा । पठन् शूद्रोपि जनोयदि महत्त्वं स्वजातिश्रेष्ठत्वमीयात् । यद्वा । स्यादित्येतदल्पार्थेऽव्ययं । स्यान्क्षत्रियः अल्पनृपतिः । भूमिपतित्वं अखण्डभूमण्डलेश्वरत्वमीयात् । एवमल्पब्राह्मणइत्यादि नेयम् । यद्वा स्याच्छब्दः कथंचिदर्थेनिपातः । "स्यादस्तिस्यान्नास्ति—" इत्यादिसप्तभङ्गीव्याख्याने तथोक्तत्वात् । तथाच कथंचित्पठन् शास्त्रोक्तनियमंविनापिपठन्नित्यर्थः । एकदेशंपठन्निति वा । अथवा वागृषभत्वादिकमीयात् । स्याच्च सत्तांलभतचेति सर्वसाधारणंसत्तालाभरूपंफलं । "अस्तिब्रह्मेतिचेद्वेद । सन्तमेनंततोविदुः" इतिश्रुतेः । कांश्चन "स्यात्प्रबन्धेचिरातीते" इतिवचनात् स्याच्छब्दःप्रबन्धपरइत्याह । तदज्ञानविजृंभित । "स्यात्प्रबन्धेचिरातीतेनिकटागामिकेपुरा" इति वाक्यशेषात् पुराशब्दस्यनानार्थत्वंहितत्रोच्यतइति । यद्यपि "श्रावयेच्चतुरोवर्णान्कृत्वाब्राह्मणमग्रतः" इतिशूद्रस्येतिहासपुराणयोःश्रवणमात्रंस्मृतिभिरनुज्ञातं नतु पठनं । तथापि "पठन्" इत्यादिऋषिवचनप्रामाण्यात् "वचनाद्रथकारस्य" इतिन्यायेनास्मिन्संक्षेपपाठमात्रेऽधिकारोस्तीतिसिद्धं । तथा सहस्रनामाध्यायान्तेचदृश्यते "यइदंशृणुयान्नित्यंयश्चापिपरिकीर्तयेत्" इत्यारभ्य "वेदान्तगोब्राह्मणःस्यात्क्षत्रियोविजयीभवेत् । वैश्योधनसमृद्धःस्याच्छूद्रःसुखमवाप्नुयात्" इति । यद्वा वेदोपबृंहणेशूद्रस्यसर्वथाऽनधिकारात् शूद्रइत्यत्र पठन्नितिनानुषज्यते किंतु शृण्वन्नित्यध्याह्रियते । "शृण्वन्रामायणंभक्त्या" इतिश्रवणस्यापिमहाफलत्ववचनात् । अत्रसंक्षेपे तकारेणोपक्रम्य यादितिसमापनात् गायत्रीरूपत्वमस्यगम्यते । अत्रश्लोके उपजातिवृत्तं । "स्यादिन्द्रवज्राततजास्ततोगौ" । "उपेन्द्रवज्राजतजास्ततोगौ" । "अनन्तरोदीरितलक्ष्मभाजःपादायदीयाउपजातयस्ताः" इतिलक्षणात् ॥९७॥ प्रथमसर्गमुपसंहरति—इतीति । ऋषिणाप्रोक्तमार्षं "तेनप्रोक्तं" इत्यण् । श्रीमद्रामायणे श्रीमद्रामायणाख्ये । आदिकाव्ये प्रथमकाव्ये । बालकाण्डे संक्षेपोनाम प्रथमःसर्गः । समाप्तइतिशेषः । काव्यलक्षणंसर्गलक्षणंचोक्तंदण्डिनाकाव्यादर्शे "नगरार्णवशैलर्तुचन्द्रार्कोदयवर्णनैः । उद्यानसलिलक्रीडामधुपानरतोत्सवैः । विप्रलंभैर्विवाहैश्चकुमारोदयवर्णनैः । मन्त्रद्यूतप्रयाणाजिनायकाभ्युदयैरपि । अलंकृतमसंक्षिप्तंरसभावनिरन्तरं । सर्गैरनतिविस्तीर्णैःश्राव्यवृत्तैःसुसन्धिभिः । सर्वत्रभिन्नवृत्तान्तैरुपेतं लोकरञ्जनं । काव्यंकल्पान्तरस्थायिजायतेसदलंकृति" इति ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने प्रथमः सर्गः ॥१॥

द्वितीयः सर्गः ॥ २ ॥

वाल्मीकिना सादरपूजितेनारदे ब्रह्मलोकंप्रति प्रस्थिते शिष्येणभारद्वाजेनसह स्नानायतमसातीरंगतेनतेन तत्र क्रौञ्चमिथुनदर्शनम् । १ ॥ व्याधेन क्रौञ्चमिथुने पुंसोवधे वाल्मीकिना तंप्रति मानिपादेत्यादिशापवचनोक्तिः । २ ॥ तथा पश्चाद्विमर्शेन स्वोक्तशापवचनस्यानुष्टुप्छन्दोबद्धश्लोकरूपत्वावधारणम् । ३ ॥ तदनु सविस्मयं शिष्येतन्निवेद्य माध्याह्निकमज्जनादिकरणपूर्वकं पुनस्स्वाश्रमंप्रत्यागमनम् । ४ ॥ तदनु वाल्मीक्याश्रममुपागतेनब्रह्मणा तंप्रति रहस्यप्रकाशरूपश्रीरामादिनिखिलवृत्तान्तप्रतिभानरूपवरदानेन श्रीरामायणप्रणयनप्रेरणापूर्वकं स्वलोकगमनम् । ५ ॥

नारदस्य तु तद्वाक्यं श्रुत्वा वाक्यविशारदः ॥ पूजयामास धर्मात्मा[1] सहशिष्यो महामुनिः[2] ॥ १ ॥
यथावत्पूजितस्तेन देवर्षिर्नारदस्तदा ॥ [3]आपृष्ट्वैवाभ्यनुज्ञातः [4]स जगाम विहायसम् ॥ २ ॥
स मुहूर्तं[5] गते तस्मिन्देवलोकं मुनिस्तदा ॥ जगाम तमसातीरं जाह्नव्यास्त्वविदूरतः ॥ ३ ॥

श्रीमच्छठारिगुरुणागुरुणोपदिष्टंरामायणस्यहृदयंसरसंगृहीत्वा ॥ श्रीकौशिकान्वयकुलेन्दुरशेषबन्धुर्गोविन्दराजविबुधोविशदीकरोति ॥ १ ॥ अथपरमकारुणिकोवाल्मीकिः "इष्टंहिविदुपांलोकेसमासव्यासधारणं" इत्युक्तरीत्यासंक्षेपेणोक्तंरामचरित्रंपुनर्विस्तरेणप्रतिपिपादयिषुः तत्रप्रेक्षावत्प्रवृत्त्यर्थं वक्तृवैलक्षण्यंप्रबन्धवैलक्षण्यंप्रतिपाद्यवैलक्षण्यंचेति वैलक्षण्यत्रयंनिदिदर्शयिषुः वक्तृवैलक्षण्यंतावदादौदर्शयति नारदस्येत्यादिनाद्वितीयसर्गेण । वक्तृवैलक्षण्यंतु परमाप्तत्वं । आप्तत्वंच यथार्थदर्शित्वेसति यथार्थवादित्वं । तस्यपरमत्वं तु पितामहवरप्रसादलब्धत्वं तदेतदुपदर्शयितुमुपोद्घातत्वेनाह—नारदस्येत्यादि । तुशब्दोवैलक्षण्यपरः । "तुःस्याद्भेदेऽवधारणे" इत्यमरः । सचकाकाक्षिन्यायेनोभयत्रान्वेति । त्रिलोकज्ञतयेतरविलक्षणस्यनारदस्य शब्दतोर्थतश्चेतरवाक्यविलक्षणोत्कर्षं । तत् पूर्वसंक्षेपरूपेणोक्तं । वाक्यं संपूर्णार्थप्रतिपादकपदसमूहं प्रश्नानुरूपोत्तरं । श्रुत्वा निशम्य । वाक्ये विशारदो विद्वान् । "विद्वत्सुप्रगल्भौविशारदौ" इत्यमरः । वाक्यविशेषज्ञइत्यर्थः । धर्मेआत्माबुद्धिर्यस्यासौ धर्मात्मा । धर्मस्वभावो वा । अत्र प्रकरणाद्गुर्वनुवर्तनधर्मज्ञइत्यर्थः । महामुनिः वेदान्तार्थनिर्णयसंपत्त्यासर्वोत्कृष्टमुनिर्वाल्मीकिः । सहशिष्यः शिष्यसहितःसन् । "वोपसर्जनस्य" इति पक्षे सहशब्दस्यसभावाभावः । पूजयामास अहोवाक्यवैखरीतितद्वाक्यंश्लाघयामासेतिवाक्यविशारदत्वोक्तिभङ्ग्याऽवगम्यते । महामुनिमितिपाठे वाल्मीकिपदाध्याहारः । तमितिप्रयोक्तव्ये अन्यत्वप्रतीतिकरमहामुनिपदप्रयोगास्वारस्यं ॥ १ ॥ देवश्चासौऋषिश्च देवर्षिः नारदः । "नारदाद्याःसुरर्षयः" इत्युक्तेः । तेन वाल्मीकिना । यथावत् यथार्हं । पूजितः प्रदक्षिणनमस्कारादिभिरर्चितःसन् । तदा पूजावसाने । आपृष्ट्वा आपृच्छ्य । "क्त्वापिछन्दसि" इतिल्यबभावः । अभ्यनुज्ञातः गच्छत्वमितिवाल्मीकिनाकृताभ्यनुज्ञानः । विहायसं आकाशं जगाम ॥ २ ॥ तस्मिन् नारदे । मुहूर्तं अल्पकालं । "मुहूर्तमल्पकालेस्यात्" इतिनिघण्टुः । अत्यन्तसंयोगेद्वितीया । देवलोकं ब्रह्मलोकं । गते वाल्मीकेरामभक्तिब्रह्मणेकथयितुंप्राप्तेसति । समुनिः वाल्मीकिः । तदा नारदगमनोत्तरकाले । जाह्नव्याः गङ्गायाः । अविदूरतः समीपे । सप्तम्यर्थेतसिः । स्थितमितिशेषः । तु गङ्गातोपिविलक्षणं । तमसातीरं जगाम माध्याह्निकाभिषेकायप्राप्तः ॥ ३ ॥

तिल० वाक्यविशारदः विशिष्टा व्याकरणसंस्कारादिविशेषवतीविचित्रार्थाचशारदावाणीयस्यसःविशारदः । **शिरो०** धर्मात्मा धर्मेआत्मायत्नोयस्य परमधर्मोपदेष्टेत्यर्थः । तत् वाङ्मनसागोचरेश्वरेश्वरबोधकं । वाक्यं । **विषम०** महामुनिं शतकोटिविस्तररामायणमननशीलं । नारदंपूजयामास । १ ॥ **तिल०** मुहूर्तंस्वाश्रमेस्थित्वापश्चान्माध्याह्निकार्थं जाह्नव्याअविदूरतःसमीपेवर्तमानं तमसातीरंजगाम । यत्तु मुहूर्तमात्रेण देवलोकंगतइत्यन्वयइति तन्न । छान्दसत्वकल्पनेमानाभावात् अव्ययत्वकल्पनस्यागतिकगतित्वाच्च । ३ ॥

[**पा०**] १ घ. ङ. धर्मं. २ ङ. च. ञ. मुनिम्. ३ ङ. च. छ. ज. झ. ञ. पृच्छ्य. ४ ग. जगामज. ५ च. ह्रते.

स तु तीरं समासाद्य तमसाया मुनिस्तदा ॥ शिष्यमाह स्थितं पार्श्वे दृष्ट्वा तीर्थमकर्दमम् ॥ ४ ॥
अकर्दममिदं तीर्थं भरद्वाज निशामय ॥ रमणीयं प्रसन्नांबु सन्मनुष्यमनो यथा ॥ ५ ॥
न्यस्यतां कलशस्तात दीयतां वल्कलं मम ॥ इदमेवावगाहिष्ये तमसातीर्थमुत्तमम् ॥ ६ ॥
एवमुक्तो भरद्वाजो वाल्मीकेन महात्मना ॥ प्रायच्छत मुनेस्तस्य वल्कलं नियतो गुरोः ॥ ७ ॥
स शिष्यहस्तादादाय वल्कलं नियतेन्द्रियः ॥ विचचार ह पश्यंस्तत्सर्वतो विपुलं वनम् ॥ ८ ॥
तस्याभ्याशे तु मिथुनं चरन्तमनपायिनम् ॥ ददर्श भगवांस्तत्र क्रौञ्चयोश्चारुनिस्स्वनम् ॥ ९ ॥
तस्मात्तु मिथुनादेकं पुमांसं पापनिश्चयः ॥ जघान वैरनिलयो निषादस्तस्य पश्यतः ॥ १० ॥
तं शोणितपरीताङ्गं वेष्टमानं महीतले ॥ भार्या तु निहतं दृष्ट्वा रुराव करुणां गिरम् ॥ ११ ॥

समुनिः तमसायाविलक्षणंतीरमासाद्य । तदा आसादनकाले । अकर्दमं अपङ्कं । तीर्थं जलावतरणं । " तीर्थमन्त्राद्युपाध्यायशास्त्रेष्वंबुनिपावने । पात्रोपायावतारेषु " इतिवैजयन्ती । दृष्ट्वा पार्श्वेस्थितं शिष्यं आह ॥४॥ भरद्वाजइतिवाल्मीकेःप्रधानशिष्यस्यनाम । हेभरद्वाज । अकर्दमं अपङ्कं । अधःप्रदेशेपङ्करहितमित्यर्थः । अन्यत्र पापरहितं । प्रसन्नांबु प्रसन्नसलिलं । लोकेकिंचिदधःपङ्करहितत्वेपिजलंकलुषमेवभवति । किंचिन्निर्मलोदकत्वेप्यधःसपङ्कमेवदृश्यते नतथेदमितिभावः । अन्यत्रांबुवत्प्रसन्नं । अतएवरमणीयं । सन्मनुष्यमनोयथा सत्पुरुषहृदयसदृशमिदंतीर्थं । निशामय पश्य । " शमोऽदर्शने " इतिमित्वाभावाद्दर्शनार्थोऽयंशब्दः । सन्मनुष्यमनोवत्प्रसन्नांब्वितिवा योजना ॥ ५ ॥ हेतात वत्स ! कलशः उदपात्रं । न्यस्यतां भूमौस्थाप्यतां । ममवल्कलं स्नानशाट्यर्थोवृक्षत्वक् । दीयतां । किमर्थमित्यत्राह—इदमेवेति । उत्तमं अकर्दमत्वादिगुणयोगेनजाह्नवीतीर्थात्श्रेष्ठं इदमेवतमसातीर्थं अवगाहिष्ये अत्रैवस्नास्यामि । माध्याह्निककालातिक्रमादगत्वाजाह्नवीमितिशेषः । स्वमप्यत्रैव स्नाहीत्यर्थः ॥ ६ ॥ महात्मना महामनसा । वाल्मीकेन वाल्मीकिना । " तस्येदं " इतिसंबन्धमात्रेऽण् । संबन्धश्चात्रपुत्रत्वं । एवं पूर्वोक्तरीत्या । उक्तः । गुरोर्नियतः परतन्त्रः भरद्वाजः । मुनेस्तस्य वाल्मीकेः । वल्कलं । प्रायच्छत प्रादात् । दाणः यच्छादेशः । छन्दसिबहुलग्रहणादात्मनेपदं संबन्धसामान्येषष्ठी तस्मा इत्यर्थः ॥ ७ ॥ नियतेन्द्रियः निगृहीतेन्द्रियोपि । सः वाल्मीकिः । शिष्यहस्ताद्वल्कलमादाय । विपुलं विशालं । वनं । सर्वतःपश्यन्सन् । विचचार । हेतिविस्मये । निगृहीतेन्द्रियस्यविपुलवनावलोकनं दैवकृतत्वाद्विस्मयनीयमित्यर्थः ॥ ८ ॥ भगवान् माहात्म्यवान् । " भगःश्रीकाममाहात्म्यवीर्ययत्नार्ककीर्तिषु " इत्यमरः । शापानुग्रहसमर्थइत्यर्थः । वाल्मीकिः । तत्र वने । तस्य तीर्थस्य । अभ्याशे समीपे । चरन्तं वर्तमानं । अनपायिनं अविनाभूतं । क्षणविरहासहिष्णु क्रौञ्चमिथुनमितिप्रसिद्धं । चारुनिस्स्वनमितिरतिकालिकस्वरोक्त्या रतिर्द्योत्यते । क्रौञ्चयोर्मिथुनं द्वन्द्वं । पुँल्लिङ्गत्वमार्षं । ददर्श ॥ ९ ॥ पापनिश्चयः रतिसमयेपिहननकरणात्क्रूरनिश्चयः । वैरनिलयः सर्वजन्तुविषयसहजशात्रवयुक्तः । निषादः । तस्मान्मिथुनात् तन्मिथुनमासाद्य । ल्यब्लोपेपञ्चमी । पुमांसंएकं अवयवं । तस्यपश्यतः तंपश्यन्तंमुनिमनादृत्य "षष्ठीचानादरे " इत्यनादरेषष्ठी । जघान हतवान् ॥ १० ॥ भार्या क्रौञ्ची । निहतं व्याभहतं । अतएव । महीतले भूतले । वेष्टमानं घूर्णमानं । शोणितपरीताङ्गं रुधिरव्याप्तशरीरं । तं क्रौञ्चं । दृष्ट्वा । करुणां श्रोतुः कारुण्यावहां । गिरं । रुराव करुणशब्दमकरोत् । ओदनपाकंपचतीतिवत् । अरोदीत् ॥ ११ ॥

शिरो० तीर्थं ऋषिसेविततमसाजलं । "तीर्थंशास्त्राध्वरक्षेत्रमन्त्रोपाध्यायमन्त्रिषु । अवतारर्षिजुष्टांभस्स्त्रीरजस्सुचविश्रुतं" इतिविश्वकोशात्तीर्थशब्दस्यऋषिजुष्टांभःपरत्वं । ४ **शिरो०** प्रायच्छत । संज्ञापूर्वकविधेरनित्यत्वादात्मनेपदम् । ७ ॥

[पा०] १ छ. सन्मनु. २ न्मानुष. ३ ग. स्नावहा. ४ ख. च. कान्ति.

वियुक्ता पतिना तेन द्विजेन सहचारिणा ॥ ताम्रशीर्षेण मत्तेन पत्रिणा सहितेन वै ॥ १२ ॥
तथा तु तं द्विजं दृष्ट्वा निषादेन निपातितम् ॥ ऋषेर्धर्मात्मनस्तस्य कारुण्यं समपद्यत ॥ १३ ॥
ततः करुणवेदित्वादधर्मोऽयमिति द्विजः ॥ निशाम्य रुदतीं क्रौञ्चीमिदं वचनमब्रवीत् ॥ १४ ॥
मानिषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः ॥ यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम् ॥१५॥

पतिना पत्या । नाभावआर्षः । सहचारिणा सहचारशीलेन । ताच्छील्येणिनिः । सहितेनेत्यनेन मनस्सङ्गतिरुच्यतइति नतेनपुनरुक्तिः । ताम्रशीर्षेण रक्तशिरसा । " उत्तमाङ्गंशिरःशीर्षं " इत्यमरः । मत्तेन रतिपरवशेनेत्यर्थः । पत्रिणा प्रशस्तपक्षेण । तेनद्विजेन पक्षिणा । " दन्तविप्राण्डजाद्विजाः " इत्यमरः । भार्या वियुक्ता विरहितासती । करुणांगिरं रुरावेतिपूर्वेणान्वयः । वै इतिपादपूरणे । " तुहिचस्महवैपादपूरणे " इत्यमरः । अत्रविशेषणानि भार्यायाः शोकातिरेकहेतुत्वेननिर्दिष्टानि ॥ १२ ॥ तथा शोणितपरीताङ्गमित्याद्युक्तरीत्या । निषादेन निपातितं हिंसितमित्यर्थः । तंद्विजंदृष्ट्वा स्थितस्य । धर्मात्मनः धर्मस्वभावस्य । ऋषेर्वाल्मीकेः । करुणैव कारुण्यं । स्वार्थेष्यञ् । दया । समपद्यत आसीत् ॥ १३ ॥ ततः क्रौञ्चीविषयकारुण्यसंपत्त्यनन्तरं । द्विजः सहजकारुण्यस्वभावोमुनिः । रुदन्तींक्रौञ्चीं । निशाम्य दृष्ट्वा । करुणवेदित्वात् कारुण्यभाक्त्वात् । विदुलाभइत्यस्मात्णिनिः । अयं रतिकालेहिंसनमधर्मइतिमत्वा इदं वक्ष्यमाणं । वचनमब्रवीत् ॥१४॥ तदेववचनमाह—

मानिषादेति । हेनिषाद त्वं शश्वदेव शाश्वत्यः । स्वार्थेअण् । ततोङीप् । ताः अनारताइत्यर्थः । समाः संवत्सरान् । "संवत्सरोवत्सरोब्दोहायनोस्त्रीशरत्समाः" इत्यमरः । अत्यन्तसंयोगेद्वितीया । प्रतिष्ठां कचित्स्थानं । "प्रतिष्ठास्थितिमाहात्म्य—" इतिवैजयन्ती । मागमः माप्राप्नुहि । "आशंसायांभूतवच्च" इतिलुङतिदेशात्लुङ् लृदित्वादङ् । नायंमाङ् अपितुमाशब्दइतिकाशिकाकारः तेनाडागमेपिनविरोधः । दुर्घटवृत्तिकारस्तु अमेतिपदच्छेदः हेअम हेअलक्ष्मीक इतिनिषादविशेषणं ततो "नमाङ्योगे" इत्यडभावइत्याह । एवंपूर्वार्धेनशापउक्तः तत्रहेतुरुत्तरार्धेनोच्यते। यद्यस्मात्कारणात क्रौञ्चमिथुनात् क्रौञ्चमिथुनमासाद्य ल्यब्लोपेपञ्चमी । एकंकाममोहितं कामेनमोहंप्रापितं रतिक्रीडाविवशमित्यर्थः । एकमवयवमवधीः हिंसितवानसि । तस्मात्त्वदेवप्रतिष्ठांमागमइतियोजना । चतुर्मुखप्रसादेनवाल्मीकिमुखात्प्रथमोदितोऽयंश्लोकः केवलंशापपरोनभवितुमर्हतीतिभगवन्मङ्गलाशासनपरतयामङ्गलाचरणपरोऽयंप्राथमिकश्लोकइतिपूर्वाचार्यावर्णयन्ति । तथाहि । निषीदन्त्यस्मिन्निति निषादो

तनि० हेनिषाद, त्वंशाश्वतीःसमाःप्रतिष्ठांमागमः । नगतोसीतिकाकुः । भार्यासहितएकत्रनिवासेस्थित्वासांसारिकसुखंनानुभूतवानित्यर्थः । यद्यस्मात् क्रौञ्चमिथुनादेकंकाममोहितमवधीः । एवंदुस्सहजीवनादपिस्वहननमेवश्रेयइतिभावः । तिल० ममतुप्रतिभाति । नारदात्स्वगुणश्रवणानन्तरंमुनेःस्ववर्णनेच्छांज्ञात्वा स्वचरित्रस्यचकरुणारसमयत्वेन तत्प्रधानकाव्येऽतिकरुणचित्तस्यैवाधिकारात्स्वेः करुणचित्तत्वजिज्ञासयेवपूर्वंभृगुदत्तशापस्यपुनरुक्तत्वकरणेनदार्ढ्यसंपादनायमुनेरीक्षणायचभगवान्रामएवनिषादरूपेणपश्यतोमुनेःपुरतस्तमनादृत्य क्रौञ्चंरक्षोविशेषरूपंजघान । ततस्तदिच्छावशादन्तर्यामितयातथाप्रेरणाच्चमहानधर्मोऽयमनेनकृतइतिरुषा पापमते निषाद यत्त्वंकाममोहितंक्रौञ्चमिथुनात् मिथुनीभूतात्क्रौञ्चयुगाद्विभक्तमेकमवधीः तत्त्वमपिशाश्वतीःसमाः आयुश्शेषभूतानिबहूनिवर्षाणि । प्रतिष्ठां स्वस्त्रीसाहित्येनस्थितिं । इहलोके मागमोमाप्राप्नुहि । किंतु अत्यल्पकालमेवतथावासः एकमिथुनीभावपर्यन्तमितियावत् । इतिशप्तवान्मुनिः । एकमवधीरित्युक्तेः यथासत्वयास्त्रीविरहितःकृतः, साचनायकहीनाकृता तथात्वमपि प्रियया स्वभार्यया हीनोभव । साचत्वयाहीनाभवत्वितिपर्यवसानम् । अगमइत्यडागमस्तुमाङ्योगेप्यार्षत्वात् । तस्यरक्षोरूपत्वंत्वेतदुत्तरंब्रह्मणः सकाशात्सकलरामवृत्तान्तज्ञानवरलाभोत्तरकालकृतेतस्मात्तुमिथुनादेकमितिश्लोके वैरनिलयइतिविशेषणेनसूचितम् । रक्षस्त्वेचतस्य लोकदृष्ट्यावैरनिलयत्वप्रसिद्धेः । निषादस्यापिप्राणिषुनवैरं किंत्वाहारार्थमेवतद्धननमितिप्रसिद्धेश्च । अतएवारण्यकाण्डेमृगयाव्यसनमुपक्रम्य "विनावैरंचरौद्रः" इति "तृतीयंयदिदंरौद्रंपरप्राणाभिहिंसनं । निर्वैरंक्रियतेमोहात्तच्चतेसमुपस्थितम्" इतिचवक्ष्यति । "त्रीण्येवव्यसनान्यत्रकामजानिभवंतुते" इतिचोपक्रमेउक्तम् । नन्वीदृशोर्थस्त्वयाकेनमानेननिर्णीतइतिचेच्छृणु । ऋष्यक्षरस्वार-

[पा०] १ घ. तथागतं. ङ. च. छ. ञ. तथाविधं.

निवासः । अधिकरणेघञ् । मालक्ष्मीःतस्यानिषादो-मानिपादः श्रीनिवासः । तत्रसंबुद्धिः हेश्रीनिवास । त्वं शाश्वतीःसमाःसर्वकालंप्रतिष्ठांमाहात्म्यंअगमः गच्छ । लकारव्यत्ययः । यद्यस्मात्क्रौञ्चमिथुनात् राक्षसमिथुनाद्रावणमन्दोदरीरूपात् कामेनमन्मथेनमोहितंसीतापहर्तारमेकंरावणमवधीः रावणंहत्वाकृतत्रैलोक्यत्राणस्त्वंयावत्कालंविजयीभवेत्यर्थः । वाक्यार्थहेतुकं-काव्यलिङ्गमलंकारः । एवमनेनश्लोकेनेष्टदेवतास्मरणरूपंमङ्गलमाचरितं । "काव्यार्थसूचनंकैश्चिन्नान्यामेवनिरूप्यते" इतिवचनादस्मिन्नेवश्लोकेवक्ष्यमाणकाव्यार्थःसंक्षेपेणदर्शितः । तथाहि । मानिषादेत्यनेन सीतापरिणयपर्यवसायिनीबालकाण्डकथोद्बोधिता । प्रतिष्ठांत्वमगमइत्यनेन पितृवचनपरिपालनप्रतिष्ठाभिधायिन्ययोध्याकाण्डकथाऽऽवेदिता । शाश्वतीःसमाइत्यनेन ऋषिगणविषयप्रतिज्ञानिर्वहणेनरामस्यप्रतिष्ठानुवृत्तिमभिदधत्यारण्यकाण्डकथासूचिता । क्रुञ्चगतिकौटिल्याल्पीभावयोरित्यस्माद्धातोः "ऋत्विक्–"इत्यादिनाक्विन्निपातनात् नलोपःसंयोगान्तलोपश्चनभवति । क्रुञ्चेवक्रौञ्चः स्वार्थेअण् । तथाचक्रौञ्चयोः कुटिलयोस्तिरश्चोस्तारावालिनोर्मिथुनादेकंकाममोहितंसुग्रीवभार्यापहर्तारंवालिनमवधीरितिकिष्किन्धाकाण्डकथाऽभिहिता । क्रौञ्चौ अल्पीभूतौ कृशावितियावत् । तयोरन्योन्यविरहक्लेशकृशीयसोःसीतारामयोरेकमवयवंसीतारूपंअवधीः भृशंपीडितवानसीति । सीताविरहदुःखातिशयवर्णनपरासुन्दरकाण्डकथाबोधिता । क्रौञ्चौकुटिलौराक्षसौतन्मिथुनादेकंकाममोहितंरावणमवधीरितियुद्धकाण्डकथासूचिता । दण्डकारण्यवासिऋषिपत्नीदर्शनाभिलाषमोहितसीतापीडाभिधानेनोत्तरकाण्डार्थोपिसंक्षिप्तः । ननुमृगपक्ष्यादिवधस्यव्याधकुलधर्मत्वात् कथमनपराधिनमेनंमुनिःशप्तुमर्हति । वक्ष्यति रामएववालिवधप्रस्तावे । "प्रमत्तानप्रमत्तान्वानरामांसार्थिनोभृशं । बध्यन्तिविमुखांश्चापिनचदोषोत्रविद्यते" इति । सत्यं । तथापि रतिपरवशतादशायां तद्वधोदोषएवेतिमुनेराशयः । सूचयतिहिरतिपरवशत्वांकाममोहितमितिपदेन । अतएवभारतेपाण्डुंप्रतिमुनिः । "अस्वर्ग्यमयशस्यंत्वमनुतिष्ठसिभारत ॥ कोहिविद्वान्मृगंहन्याच्चरन्तंमैथुनंवने" इति । नन्विदं मलयंगच्छतोमन्दरपथोपवर्णनं । यदयमात्मनोवैलक्षण्यंपरमाप्तत्वंवक्तुमारभ्य स्वचरित्रवर्णनंकरोति । ब्रह्मागमनवरप्रदानादेरेवतदर्थवक्तव्यत्वात् । उच्यते । श्रूयतामवधानेन । "अर्थतःशब्दतोवाऽपि मनाकाव्यार्थसूचनं" इतिदर्शितरीत्याकाव्यार्थसूचनमियताग्रन्थसंदर्भेणक्रियते । तथाहि । अकर्दममित्यादिना पावनंसमुद्रसेतुस्थलमुच्यते । तस्याभ्याशइत्यादिना तत्तीरेमन्दोदर्यासहचरन्तंभोगान्भुञ्जानं अनपायिनं चतुर्मुखवरप्रदानेनलब्धचिरायुष्कं चारुनिस्वनंरम्यवीणादिविनोदं क्रौञ्चयोराक्षसयोर्मिथुनंददर्श धर्मबलेनालोकितवान् तस्मादित्यादिना पापनिश्चयो निश्चितरावणपापः । वैरनिलयः हिरण्यकशिपुरावणशिशुपालरूपजन्मत्रयानुसारित्वात्सहजशात्रवः । निषीदन्त्यत्रसर्वाणिजगन्तीतिनिषादोविष्णुः । पुमांसंरावणंजघानेत्युच्यते । भार्यात्वित्यादिना मन्दोदरीप्रलापः । द्विजेन पुलस्त्यवंशत्वात् ब्राह्मणेन । ताम्रशीर्षेण रत्नमुकुटधारित्वात् । पत्रिणा वाहनपरिच्छदादिमता ।

म्यान् । तच्चाग्रे स्फुटम् । तत्रसंदेहश्चेत्स्वान्तर्यामिणंपृच्छ । तदुक्तंपाद्मेशिवाशिवसंवादेरामैश्वर्यवर्णनेचतुर्विंशेध्याये । "ततोजानपदःकश्चित्पामरःकाष्ठविक्रयी । स्ववधूगर्हणद्वारारावणस्यगृहोषिताम् । गर्हयामासवैदेहींदुर्वृत्तोलोकनिन्दकः । तच्छ्रुत्वादेविचारेभ्योभीतोलोकापवादतः । आहूयलक्ष्मणंप्राहरामोराजीवलोचनः । शृणुमेवचनंगुह्यंसीतासंत्यागकारणम् । वाल्मीकिनाथभृगुणाशप्तोस्मिकिललक्ष्मण । तस्मादेनांत्यजाम्यद्यजनोनैवात्रकारणम्" इति । **कत०** प्रत्यक्षसंहन्तृनिषादशापरूपोऽर्थस्तु स्पष्टएव । किंचनितरां सदेवर्षिगणंत्रैलोक्यंसादयतिपीडयतीतिनिषादः तस्यसंबुद्धिर्हेनिषादरावण । यद्यस्मात् क्रौञ्चमिथुनात् । अल्पीभावार्थकक्रुञ्चेःपचाद्यच् । क्रुञ्चं । ततस्स्वार्थिकोऽण् । क्रौञ्चं राज्यक्षयवनवासादिदुःखेनात्यल्पीभूतं परमकार्श्यंगतंयन्मिथुनंसीतारामरूपं तस्मादेकं सीतारूपं यस्मादवधीः वधाभ्यधिकपीडांप्रापितवानसि तस्मात्त्वं प्रतिष्ठांयालङ्कापुरेपुत्रपौत्रभृत्यगणवैशिष्ट्येन ब्रह्मणा प्रतिष्ठादत्तानाभ्यतःपरं मागमइतिकाव्यार्थसूचनम् ॥ **शिरो०** त्वमितिनिषादविशेषणं त्वेन आत्मभिन्नेनरागादिना मःबन्धनंयस्य नात्मभूःरागादिवशइत्यर्थः । "माचमातरिमोमानेबन्धनेचप्रकीर्तितः" इतिमशब्दस्य बन्धनवाचकत्वं । लशब्दस्यान्यपरत्वंतु सर्वादिगणेप्रसिद्धम् । अत्रपक्षे अड्विरहः भविष्यत्कालबोधकलुङ्चसिद्धइतिबोध्यम् ॥ मानिषाद मानिनांगर्वविशिष्टानां पः श्रेष्ठः परशुरामः तं आसमन्ताद्भावेन द्यतिखण्डयति वैष्णवधनुस्सज्जीकरणादिनातद्गर्वं निवर्तयतीतिमानिषादः तत्संबुद्धिः । इति बाल-

तस्यैवं ब्रुवतश्चिन्ता बभूव हृदि वीक्षतः ॥ शोकार्तेनास्य शकुनेः किमिदं व्याहृतं मया ॥ १६ ॥
चिन्तयन्स महाप्राज्ञश्चकार मतिमान्मतिम् ॥ शिष्यं चैवाब्रवीद्वाक्यमिदं स मुनिपुङ्गवः ॥ १७ ॥
पादबद्धोऽक्षरसमस्तन्त्रीलयसमन्वितः ॥ शोकार्तस्य प्रवृत्तो मे श्लोको भवतु नान्यथा ॥ १८ ॥
शिष्यस्तु तस्य ब्रुवतो मुनेर्वाक्यमनुत्तमम् ॥ प्रतिजग्राह संहृष्टस्तस्य तुष्टोऽभवद्गुरुः ॥ १९ ॥

सहितेन कुंभकर्णेन्द्रजिदादिसहायसंपन्नेन । कारुण्यं जुगुप्सा "जुगुप्साकरुणाघृणा" इतिनिघण्टुः। अधर्मोयमितिरावणकृतोयमधर्मइति एतत्सर्वंरावणवधवृत्तान्तमवलोक्यपौलस्त्यवधाभिधानं तद्विषयप्रवन्धंनिरमिमीतेतिमानिषादेत्यस्यरामायणार्थसंग्रहपरत्वंचोक्तं । अथवा । अकर्दममित्यादिना गोदावरीतीर्थमुच्यते । तत्तीरे पञ्चवट्यांरामस्यसीतयासहवर्तनं तयोरेकस्याःसीतायारावणेनदुरासनाहिंसनंपीडनमित्येतत्सर्वंसाक्षात्कृत्य विधिचोदितोमुनिःसीतायाश्चरितमितितद्विषयंप्रबन्धमकरोदित्यर्थः । तस्मिन्पक्षेअनपायिनमाद्यन्तशून्यं । चारुनिस्स्वनंसर्ववेदान्तप्रवर्तकं । क्रौञ्चयोःकृशयोःतपस्विनोःसीतारामयोःपापनिश्चयोवैरनिलयः निषादोलोकहिंसको रावणःसीतामपजहार साचरुरोद । द्विजेनक्षत्रियेणताम्रशीर्षेणरत्नमुकुटारुणेन पत्रिणाशरेणोपलक्षितेन सहितेनलोकहितपरेण । अन्यत्सर्वंसमानं । मानिषादेत्याद्यर्थःशापार्थेनदर्शितः ॥ १५ ॥ वीक्षतः तन्मिथुनंवीक्षमाणस्य । "संज्ञापूर्वकोविधिरनित्यः" इतिवा चक्षिङोनुदात्तत्वङित्करणज्ञापितानित्यत्वेनवा परस्मैपदं । एवं मानिषादेत्येवं । ब्रुवतः क्रौञ्चींदृष्ट्वामानिषादेत्येवंवदतइत्यर्थः । तस्य वाल्मीकेः हृदि।अस्यशकुनेः एतत्पक्षिनिमित्तंशोकार्तेनमया। व्याहृतमिदंवाक्यं किं किंरूपमितिचिन्ताबभूव ॥ १६ ॥ प्रकर्षेणजानातीतिप्रज्ञःऊहापोहसमर्थः प्रज्ञएवप्राज्ञः । "प्रज्ञादिभ्यश्च" इतिस्वार्थेऽण् । यद्वा । प्रज्ञाधीः "धीः प्रज्ञाशेमुषीमतिः इत्यमरः" । साऽस्यास्तीतिप्राज्ञः । "प्रज्ञाश्रद्धार्चाभ्योणः" इतिमत्वर्थीयोणः । महांश्चासौ प्राज्ञश्चेतिमहाप्राज्ञः । मतिमान् शास्त्रज्ञानवान् । सः वाल्मीकिः ; मतिं उत्तरश्लोकेवक्ष्यमाणंनिश्चयं । चकार । समुनिपुङ्गवः । शिष्यमिदंवाक्यमब्रवीच्च । "ब्रूशासि" इत्यादिनाद्विकर्मकत्वं । अयोगव्यवच्छेदकएवकारः ॥ १७ ॥ शोकार्तस्य क्रौञ्चीशोकेनार्तस्य । मेप्रवृत्तः मत्तः प्रवृत्तः अयंसंदर्भइत्यर्थः । पादबद्धः । चतुर्भिःपादैर्युक्तः । अक्षरसमः प्रतिपादंसमाक्षरः । तन्त्री वीणागुणः । लयः तौर्यत्रिकस्यैककालविरामः । "नाशेसंश्लेषणेतौर्यत्रिकसाम्येभवेल्लयः" इतिरत्नमाला । ताभ्यांसमन्वितः तन्त्र्यामारोप्यवाद्यैःसहगातुंशक्यइत्यर्थः । श्लोकोभवतु श्लोकलक्षणलक्षितत्वात् श्लोकशब्दवाच्योभवतु । नान्यथा श्लोकादन्यः केवलपदसंदर्भोनभवति । इतिमतिंचकारेतिपूर्वेणान्वयः ॥ १८ ॥ शिष्यः भरद्वाजः । तस्यमुनेर्ब्रुवतः तस्मिन्मुनौब्रुवतिसति । "यस्यचभावेनभावलक्षणं" इत्यस्मिन्नर्थेषष्ठी । अनुत्तमं सर्वरामायणार्थसंग्रहरूपत्वेन

काण्डकथासूचिता ॥ १५ ॥ **तिल०** मयामुनिनाशान्तेनतपस्विनाशकुनिशोकपीडितेनइदं ईदृशं क्रूरं तपोनाशकरं किंव्याहृतमितिवीक्षतोऽन्तर्यामिप्रेरणयानिषादेसर्वतोमहत्त्वसंभावनया दृश्यमानक्रौञ्चेतद्वैपरीत्यसंभावनयाऽतिनिन्द्यमयशस्करंमहापातकेभ्योप्यधिकंपापंवृत्तमितिचिन्ताबभूव। यद्यप्येतत्सर्ववाल्मीकिकृतमेव तथापि कुशलवगेयतयाअस्यकाव्यस्यकरणात् तदुक्तितयैवमुक्तिः । अन्यथा स्वचिन्तायाःस्वापरोक्षत्वात् बभूवेतिलिडसंगतिःस्यात् । यद्वा सर्गचतुष्टयमाद्यमुपोद्घातरूपंकस्यचिच्छिष्यस्य । वाल्मीकीयोपोद्घातत्वाच्च वाल्मीकीयोक्तिः । पारोक्ष्यमारोप्यस्वयमपि तथोक्तिरुपोद्घातत्वद्योतनायेत्यन्ये । **विष०** इदंवाक्यं किं किंरूपं गद्यंपद्यंवेतिचिन्ताबभूवेतिसंबन्धः ॥ १६ ॥ **तिल०** अतःशोकार्तस्यशापरूपतयाऽनौचित्येनप्रवृत्तोपिमेममश्लोकोयशोरूपोभवतु अन्यथा अयशोरूपोमाभूदित्यर्थः । "श्लोकोयशसिपद्येच" इतिनिघण्टुः ॥ **शिरो०** तन्त्रीलयसमन्वितः तन्त्रिणांशास्त्राभिज्ञानां इलंप्रतिष्ठांतत्कृतमहत्त्वंतस्य यः प्राप्तिः तेनसमन्वितःयुक्तः । पादबद्धोक्षरसमः पादेबद्धोयऽक्षरः उक्षावृषभश्चासौ रश्चेति वृषभश्रेष्ठइत्यर्थः । तत्समःतत्सदृशःशोकार्तस्यमेप्रवृत्तःश्लोकः अन्यथा अन्यपरकः नभवतु । यथाबद्धोवृषभःस्वस्थानादन्यत्रगन्तुंनशक्तो ति तथाऽयंश्लोकः तात्पर्यविषयीभूतरघुनाथादन्यत्रनगच्छत्विति फलितोऽर्थः । "रश्चभूपेप्रकीर्तितः" इतिकोशात् रशब्दः श्रेष्ठपरः ॥ १८ ॥

[पा०] १ ङ. झ. ञ. स्येत्थं. २ घ. यन्मनसा प्रा. ३ ग. त्तोयं. ४ ङ. च. झ. यन्मुनिः ।

सोऽभिषेकं ततः कृत्वा तीर्थे तस्मिन्यथाविधि ॥ तमेव[1] चिन्तयन्नर्थमुपावर्तत वै मुनिः ॥ २० ॥
भरद्वाजस्ततः शिष्यो विनीतः श्रुतवान्मुनिः[2] ॥ कलशं पूर्णमादाय पृष्ठतोऽनुजगाम ह ॥ २१ ॥
स प्रविश्याश्रमपदं शिष्येण सह धर्मवित् ॥ उपविष्टः कथाश्चान्याश्चकार ध्यानमास्थितः ॥ २२ ॥
आजगाम ततो ब्रह्मा लोककर्ता स्वयं प्रभुः ॥ चतुर्मुखो महातेजा द्रष्टुं[3] तं मुनिपुङ्गवम् ॥ २३ ॥
वाल्मीकिरथ तं दृष्ट्वा सहसोत्थाय वाग्यतः ॥ प्राञ्जलिः प्रयतो[4] भूत्वा तस्थौ परमविस्मितः ॥२४॥

स्वापेक्षयोत्तमान्तररहितं । वाक्यं मानिपादेत्यादिकं । संहृष्टःसन् । प्रतिजग्राह वाग्विधेयंचकारेत्यर्थः । गुरुः । वाल्मीकिः तस्य तुष्टोऽभवत् स्वश्लोकधारणात्तस्मिन्प्रीतोभवदित्यर्थः ॥ १९ ॥ ततः शिष्यविषयसंतोषानन्तरं । सः मुनिः । तस्मिन्तीर्थे अकर्दममिदंतीर्थमित्यादिनावर्णितेतीर्थे । यथाविधि विधिमनतिक्रम्य । अभिषेकं माध्याह्निकस्नानं । कृत्वा । तमेवार्थं अवशात्श्लोकोत्पत्तिरूपमेवार्थं । चिन्तयन्सन् । उपावर्तत आश्रममागच्छत् । अभिषेकविधिस्तुव्यासस्मृतौविशेषतोदर्शितः । "ततोमध्याह्नसमयेस्नानार्थंमृदमाहरेत् । पुष्पाक्षतान्कुशतिलान्गोमयंगन्धमेवच । नदीषुदेवखातेषुतटाकेषुसरस्सुच । स्नानंसमाचरेन्नित्यंनदीप्रस्रवणेषुच । मृदैकयाशिरःक्षाल्यद्वाभ्यांनाभेस्तथोपरि । अधश्चतसृभिःक्षाल्यंपादौषड्भिस्तथैवच । मृत्तिकाचसमादिष्टात्वार्द्रामलकमात्रतः । गोमयस्यप्रमाणंतत्तेनाङ्गंलेपयेत्ततः । लेपयेदथतीरस्थस्तल्लिङ्गैनैवमन्त्रतः । प्रक्षाल्याचम्यविधिवत्ततःस्नायात्समाहितः । अभिमन्त्र्यजलंमन्त्रैरब्लिङ्गैर्वारुणैःशुभैः ॥ आपोनारायणोद्भूतास्ताएवास्यायनंपुनः । तस्मान्नारायणंदेवं स्नानकालेस्मरेद्बुधः । प्रेक्ष्यसोङ्कारमादित्यंत्रिर्निमज्जेज्जलाशये । अथोपतिष्ठेदादित्यमूर्ध्वंपुष्पंजलान्वितं । प्रक्षिप्यालोकयेद्देवमृग्यजुःसामरूपिणं" इत्यादि ॥ २० ॥ ततः मुनेरुपावर्तनानन्तरं । विनीतः विनयसंपन्नः । श्रुतवान् शास्त्रवान् अवधृतवान्वा । "श्रुतंशास्त्रावधृतयोः" इत्यमरः । धृतगुरुश्लोकइत्यर्थः । मुनिः मननवान् । भरद्वाजः भरद्वाजाख्यःशिष्यः । पूर्णं जलपूर्णं । कलशमादाय । पृष्ठतः पश्चात् । अनुजगाम । अनुगमनोक्तौपृष्ठतइत्युक्तिरव्यवधानसूचनार्था ॥ २१ ॥ सः वाल्मीकिः । शिष्येणसह । आश्रमपदं आश्रमस्थानं । प्रविश्य । धर्मवित् कृतदेवपूजादिधर्मः । उपविष्टः कृतसुखासनःसन् । ध्यानं अवशोत्पन्नश्लोकविषयचिन्तां । आस्थितः प्राप्तएवसन् । अन्याःकथाः पुराणपारायणानि । चकार ॥ २२ ॥ लोककर्ता लोकस्रष्टा । प्रभुः स्वामी । चतुर्मुखः वेदचतुष्टयोच्चारणोपयोगिमुखचतुष्कः । महातेजाः महाप्रभावः । ब्रह्मा । मुनिपुङ्गवं नारदोक्तवैभवंवाल्मीकिं । द्रष्टुंकुतूहलात्स्वयमाजगाम स्वस्थानस्थितएवरामायणप्रवर्तनसमर्थोप्यादरातिशयेनस्वयमेवाजगामेत्यर्थः ॥ २३ ॥ अथ ब्रह्मागमनानन्तरं । तं ब्रह्माणं दृष्ट्वा सहसाउत्थाय "ऊर्ध्वंप्राणाह्युत्क्रमन्तेयूनःस्थविरआगते । प्रत्युत्थानाभिवादाभ्यांपुनस्तान्प्रतिपद्यते" इतिवचनात् स्वप्राणाउत्क्रामेयुरितिसहसोत्थायेत्यर्थः । परमविस्मितः सन् । वाग्यतः यतवाक् । आहिताग्न्यादित्वात्परनिपातः । प्रयतः नियतमनस्कः । प्रकृष्टःअञ्जलिर्यस्यासौप्राञ्जलिः सचभूत्वा । तस्थौ स्थितवान् ॥ २४ ॥

तनि० तमेवार्थंशापापदेशेनप्रवृत्तस्ववाक्यस्यव्यञ्जितंलोकोत्तरचमत्कारंलक्ष्मीपतिप्रतिष्ठारूपं ॥ २० ॥ **तिल०** मुखतोऽन्याः कथाश्चकार मनसातुशापार्थकश्लोकविषयंध्यानमास्थितः ॥ २२ ॥ **तिल०** अथतच्चिन्तांनिवर्तयितुंब्रह्मागमनमाह—आजगामेति । स्वयंप्रभुः अनन्यमुखनिरीक्षकतया सर्वलोकमृत्युपयोगिज्ञानैश्वर्यादिशक्तिमान् अतएव भूरादिलोकनिर्माता तं चिन्ताक्रान्तं ॥ २३ ॥ **तनि०** परमविस्मितः । प्रथममतर्कितंनारदागमनं । ततोलोकोत्तरविषयप्रश्नः । तदनुरूपमुत्तरं । अतर्कितमेवशकुनिमिथुनदर्शनं । तत्रच करुणरसोदयः । एतत्सर्वं दैवतन्त्रमितिविस्मितः । अनन्तरं अतर्कितचतुर्मुखागमनेनपरमविस्मितः ॥ **तिल०** प्रयतः अतिनम्रः ॥ २४ ॥

[पा०] १ ख. ज. तमेवं. २ ग. वान्मुनेः. ङ. झ. ञ. वान्गुरोः. ३ च. प्रष्टुंतं. ख. दृष्टवान्मुनि. ४ ग. प्रणतो.

पूजयामास तं देवं पाद्यार्घ्यासनवन्दनैः ॥ [1]प्रणम्य विधिवच्चैनं [2]पृष्ट्वाऽनामयमव्ययम् ॥ २५ ॥
अथोप[3]विश्य भगवानासने परमार्चिते ॥ वाल्मीक[4]ये महर्षये [5]संदिदेशासनं ततः ॥
ब्रह्मणा समनुज्ञातः सोप्युपाविशदासने ॥ २६ ॥
उपविष्टे तदा तस्मिन्साक्षाल्लोकपितामहे ॥ तद्गतेनैव मनसा वाल्मीकिर्ध्यानमास्थितः ॥ २७ ॥
पापात्मना [6]कृतं कष्टं वैरग्रहणबुद्धिना ॥ यस्तादृशं चारुरवं क्रौञ्चं हन्यादकारणात् ॥ २८ ॥
शोचन्नेव मुहुः क्रौञ्चीमुप श्लोकमिमं पुनः ॥ जगावन्तर्गतमना भूत्वा शोकपरायणः ॥ २९ ॥
तमुवाच ततो ब्रह्मा प्रहसन्मुनिपुङ्गवम् ॥ श्लोक एवं त्वया बद्धो नात्र कार्या विचारणा ॥ ३० ॥

मुनिः तंदेवं ब्रह्माणं । पाद्यार्घ्यासनवन्दनैः पाद्यं पादोदकप्रदानं अर्घ्यं अर्घजलसमर्पणं वन्दनं स्तुतिः एतैरुपचारैःपूजयामास । एनं ब्रह्माणं । अन्वादेशेइदमएनादेशः । विधिवत् शास्त्रोक्तरीत्या । प्रणम्य । अव्ययं अविच्छिन्नं । अनामयं कुशलं । पृष्ट्वा च पूजयामासेतियोजना । प्रणामशास्त्रंतु "मनोबुद्ध्यभिमानेनसहन्यस्यधरातले । कूर्मवच्चतुरःपादाञ्शिरस्तत्रैवपञ्चमं । प्रदक्षिणसमेतेनह्येवंरूपेणसर्वदा । अष्टाङ्गेननमस्कृत्यह्युपविश्याग्रतःप्रभोः" इति । यद्वा तमेनंदेवंविधिवत्प्रणम्यानामयंपृष्ट्वाचपाद्यार्घ्यासनवन्दनैः पूजयामास । वदिअभिवादनस्तुत्योरितिधातुः ॥२५॥ अथेतिसार्धश्लोकएकः । अथ पूजानन्तरं । भगवान् ब्रह्मा । परमार्चिते परमंयथाभवतितथावाल्मीकिनार्चिते । ब्रह्मोपवेशार्थंपूजिते । आसने विष्टरे । उपविश्य स्थित्वा । महर्षये वाल्मीकये । आसनं उपवेशनं । संदिदेश आज्ञापयामास । सोपि ब्रह्मणासमनुज्ञातःसन् । आसने उचितनीचासने । उपाविशत् । आसनानुज्ञानं लोकहितार्थमनेनकाव्यंकारयितुं । वाल्मीकयेमहर्षयइत्यत्रायुजिपादेपथ्यावक्त्रस्यगणनियमाभावात्तथोक्तं । नन्वर्धत्रयकरणमीदृशैः करवाण्यहमित्यनेन विरुध्यते । मैवं । लेखकदोषेणार्धान्तरपतनसंभवात् ॥ २६ ॥ लोकपितामहे तस्मिन् साक्षात् प्रत्यक्षतया । उपविष्टेपि तदा तद्गतेन क्रौञ्चहननगतेन मनसा ध्यानमास्थितः तद्विषयचिन्तामकरोत् ॥ २७ ॥ वैरग्रहणबुद्धिना वैरेणक्रौञ्चग्रहणबुद्धिना । पापात्मना पापस्वरूपेणव्याधेन । कष्टं कुत्सितं कर्म । कृतं । कथमित्यत्राह—यइति । योव्याधः । तादृशं रतिलालसमित्यग्राह्यत्वोक्तिः । चारुरवं रम्यरतिकूजितं । क्रौञ्चं । अकारणात् निष्कारणं । "निमित्तकारणहेतूनांप्रयोगेसर्वासांप्रायदर्शनं" इत्युक्तेःपञ्चमी । हन्यात् हन्तुंशक्नुयात् । शकिलिङ् ॥ २८ ॥ शोकपरायणः क्रौञ्चवधदर्शनेनदुःखपरवशः । पुनः क्रौञ्चींगतमनाभूत्वा क्रौञ्चींविचिन्त्येत्यर्थः । मुहुःशोचन्नेव वाल्मीकिः इमं मानिषादेत्यादिंश्लोकं । अन्तः मनसि । उपजगावित्यन्वयः । "व्यवहिताश्च" इत्युपसर्गस्यव्यवहितप्रयोगः ॥ २९ ॥ ततः मनसिश्लोकपाठश्रवणानन्तरं । मुनिपुङ्गवंप्रहसन् मन्नियोगेनस्वजिह्वाग्रेऽवतीर्णांसरस्वतीमयंनजानातीतिप्रहसन् । उवाच । मानिषादेत्यस्यश्लोकत्वनिश्चयंद्रढयति—श्लोकइति । त्वया बद्धः मानिषादेत्यादिः । श्लोकएव । अत्र श्लोकविषये ।

तिल० एनमित्याद्युत्तरान्वयि । अनामयं आमयःपीडातद्रहितं । अव्ययं व्ययहीनं । तपइतिशेषः । एतेन "ब्राह्मणंकुशलंपृच्छेत्क्षत्रबन्धुमनामयम्" इत्युक्तेः ब्राह्मणंप्रत्ययंप्रश्नः स्मार्ताचारविरुद्धः तंदेवमित्यनेनैवसिद्धे एनमित्यस्यवैयर्थ्यापत्तिश्चेत्यपास्तम् । **विषम०** अनामयं अनामयोपलक्षितं अव्ययं नित्यसिद्धं कुशलं ॥२५॥ **शिरो०** तद्गतेन रघुनाथचरिताविष्टेनैव ॥२७॥ **तिल०** हन्यात्हतवानित्यर्थेछान्दसम् । पापात्मनेति । मयेतिशेषः । तपोनाशसंपादकशापनिःसारणेनकष्टंकृतमितिवार्थः ॥ **शिरो०** यः व्याधः चारुरवंमनोहरशब्दं तादृशंपूर्वोक्तविशेषणविशिष्टं क्रौञ्चंअकारणाद्धन्यात् अहन् तस्य उपसमीपेइतिउत्तरेणान्वयः ॥२८॥ **शिरो०** उप व्याधस्यसमीपे क्रौञ्चींशोचन्नेवअहं इमं व्यर्थकंमानिषादेतिश्लोकं जगौ अवदम्, "बहुजगदपुरस्तात्तस्यमत्ताकिलाहम्" इतिवत् लिट्प्रयोगः । अन्तर्गतमनाः अन्तः अन्तरङ्गार्थेगतंनिविष्टंमनोयस्यतादृक् शोकपरायणः शोकात्परः सकारणशोकसंबन्धशून्यः नारदोपदिष्टरघुनाथः तस्मिन् अयनंस्थितिर्यस्यसः आससितिशेषः ॥ २९ ॥ **तनि०** श्लोकएवयशोभिव्यञ्जकंपद्यमेवनतुकेवलपदसमुदायः नापिकेवलनिषादशापरूपार्थश्च ॥ ३० ॥

[पा०] १ घ. विधिवच्चैनमामन्त्र्य. २. ङ. झ. पृष्ट्वाचैवनिरामयं. ३ ख. पविष्टो. ४ झ. कये च कृषये. ५ ख. ग. नं तदा. ६ घ. कृतमिदं. ७ ङ. झ. एवास्त्वयं.

मच्छन्दादेव ते ब्रह्मन्प्रवृत्तेयं सरस्वती ॥ रामस्य चरितं कृत्स्नं कुरु त्वमृषिसत्तम ॥ ३१ ॥
धर्मात्मनो गुणवतो लोके रामस्य धीमतः ॥ वृत्तं कथय धीरस्य यथा ते नारदाच्छ्रुतम् ॥ ३२ ॥
रहस्यं च प्रकाशं च यद्वृत्तं तस्य धीमतः ॥ रामस्य सहसौमित्रे राक्षसानां च सर्वशः ॥ ३३ ॥
वैदेह्याश्चैव यद्वृत्तं प्रकाशं यदि वा रहः ॥ तच्चाप्यविदितं सर्वं विदितं ते भविष्यति ॥ ३४ ॥
न ते वागनृता काव्ये काचिदत्र भविष्यति ॥ कुरु रामकथां पुण्यां श्लोकबद्धां मनोरमाम् ॥३५॥
यावत्स्थास्यन्ति गिरयः सरितश्च महीतले ॥ तावद्रामायणकथा लोकेषु प्रचरिष्यति ॥ ३६ ॥

विचारणा चिन्ता । नकार्या ॥ ३० ॥ अकारणकार्योत्पत्तिकृतविस्मयंवारयति—मदिति । हेब्रह्मन्, ते इयंसरस्वती मानिषादेत्यादिरूपा । मच्छन्दादेव मदभिप्रायादेव । नतुकारणान्तरात् प्रवृत्ता । प्रवर्तनप्रयोजनमाह—रामस्येति । हेऋषिसत्तम "नानृषिःकुरुतेकाव्यं" इत्युक्तरीत्याप्रतिलब्धकाव्यनिर्माणशक्तिक । सर्वं रामस्यचरितं रामचरितविषयप्रबन्धं । कुरु । ईदृशैःश्लोकैरितिशेषः । ईदृशैःकरवाण्यहमित्यनुवादात् ॥ ३१ ॥ एवंसामान्येनरामचरितविषयप्रबन्धनिर्माणमनुज्ञायसंक्षेपकरणमादिशति—धर्मेति । अत्र विशेषणैःप्रबन्धनायकस्यरामस्य नायकगुणादर्शिताः । नायकगुणवर्णनेनहिकाव्यंप्रथते । उक्तंहिभोजेन "कवेरल्पापिवाग्वृत्तिर्विद्वत्कर्णावतंसति । नायकोयदिवर्ण्येतलोकोत्तरगुणोत्तरः" इति । नायकगुणास्तु "महाकुलीनतौज्ज्वल्यंमहाभाग्यमुदारता । तेजस्विताविदग्धत्वंधार्मिकत्वादयोगुणाः" इत्युक्ताः । तत्रधर्मात्मनइत्यनेन धार्मिकत्वमुक्तं । लोके लोकमध्ये । गुणवतः बहुगुणकस्य । अनेनउदारतोक्ता । रामस्येत्यनेन तेजस्वित्वमौज्ज्वल्यंच । धीमतइत्यनेन पण्डितत्वं । धीरस्येत्यनेन वसुंधराधुरंधरत्वरूपंमहाभाग्यं । अन्यद्गुणशब्देनज्ञेयं । एवंभूतस्यरामस्य वृत्तं चरित्रं । "वृत्तं पद्येचरित्रे" इत्यमरः । यथा येनप्रकारेण । नारदात् ते त्वया । श्रुतं । तेनप्रकारेण । कथय संक्षेपेणकथयेत्यर्थः ॥३२॥ पुनर्विस्तरेणरामचरित्रवर्णनंनियोक्ष्यमाणस्तद्विषयज्ञानलाभमनुगृह्णाति—रहस्यमित्यादिना । श्लोकद्वयमेकवाक्यं । धीमतइतिरहस्यवृत्तसंभवहेतुतयोक्तं । सुमित्रायाअपत्यंपुमान्सौमित्रिः । बाह्वादित्वादिञ् । सहसौमित्रेः सौमित्रिसहितस्य । धीमतस्तस्य रामस्य । रहस्यं अनितरविदितंच । प्रकाशं सर्वविदितंच । यद्वृत्तं । राक्षसानां रावणादीनांच । सर्वशः सर्वप्रकारं रहस्यप्रकाशरूपंयद्वृत्तंतत् । वैदेह्याः सीतायाश्च । अपिशब्दाद्भरतादीनांच । प्रकाशं । यदिवा रहो रहस्यंवा । यद्वृत्तं तच्चसर्वमविदितमपिनारदमुखेनाज्ञातमपि । तेविदितंभविष्यतीतियोजना ॥ ३३ ॥ ॥ ३४ ॥ एवंयथार्थदर्शित्वमनुगृह्ययथार्थवादित्वमनुगृह्णाति—नेति । अत्र करिष्यमाणेकाव्ये ते वाक्काचिदपि किंचिदपिवाक्यमित्यर्थः । अनृता बाधितार्था । नभविष्यति । यद्वा । वाक् पदं । कदाचिदपि । अनृता दुष्टा । नभविष्यति । तेन काव्यदोषत्वेनोक्तपदवाक्यतदर्थदोषशून्यत्वमुक्तं । अतः रामकथां रामविषयप्रबन्धकल्पनां । कुरु । काव्यनिर्माणप्रयोजनमाह । पुण्यां पापहरां । प्रयोजनान्तरमाह । मनोरमां शब्दश्रवणसमनंतरमेवविगलितवेद्यान्तरमानन्दंजनयन्तीमित्यर्थः । श्लोकबद्धामित्यनेन गद्यप्रबन्धेभ्योहर्षचरितजातीयेभ्योमिश्रप्रबन्धेभ्योनाटकादिभ्यश्चव्यावृत्तिरुक्ता ॥३५॥ यशोपिकाव्यनिर्माणप्रयोजनमित्याह—

तनि० मच्छन्दात् भगवच्छन्दानुवृत्तमत्संकल्पादेव नतु घुणाक्षरन्यायात् । प्रवृत्ता "स्वयमेवागतावरा" इतिस्वारसिकतया प्रवृत्ता । इयं रसभावालंकारवस्तुभेदभिन्नध्वनिसमुदायाश्रयतयाप्रवृत्ता । सरस्वती सृगतावितिधातोरुत्पन्नःसरश्शब्दःप्रवाहेवर्तते । सरोस्यास्तीतिसरस्वती । तेनानर्गलप्रवाहतयासर्वतोमुखत्वमुक्तं । रूढ्यादेवताविशेषोक्तिः । वागधिष्ठानदेवतैवजिह्वाग्रेवर्ततइति भावः । सरस्वतीत्यन्तर्वाहिनीत्वप्रतीत्याकाव्यस्यानेकध्वनिगर्भितत्वंद्योत्यते : रामस्य रमतइति रमन्तेऽत्रेतिच स्वयमानन्दपूर्णतयास्वेतररमयितृत्वेनप्रसिद्धस्य । एतेन "नायकोयदिवर्ण्येतलोकोत्तरगुणोत्तरः" इतिप्रसिद्धलोकोत्तरनायकत्वंद्योत्यते । कृत्स्नं चरितं रहस्यप्रकाशात्मकं सर्वंचरितंत्वंकुरु राममन्त्रानुसंधानजनितजन्मपरिशुद्धिस्त्वमेवकुर्वित्यर्थः । ऋषिसत्तम जन्मान्तरसहस्रतपोध्यानादिपरिपक्वकषायतयानिष्पन्नभगवद्भक्तिपरीवाहप्रवृत्तरामावताररहस्यज्ञानेन चिकीर्षितप्रबन्धेसामर्थ्यं तवैवास्तीतिभावः ॥ ३१ ॥ **शिरो०** यद्वा अलोकेषुप्राकृतलोकविलक्षणेषुवैकुण्ठादिषुगीयमाना रामायणकथा यावत्कालं गिरयःपर्वताः सरितो नद्यश्चस्थास्यन्ति तावत्कालंमहीतलेप्रचरिष्यतित्वन्नाम्नाप्रचारंप्राप्स्यति अतएवमहीतलेइत्यस्यनवैयर्थ्यम् ॥ ३६ ॥

[पा०] १ ख. श्रीरामचरितं. २ ज. लोकनाथस्य. ३ ख. वीरस्य. घ. तत्त्वेन. ङ. रामस्य. ४ घ. ह्याश्चापि.

यावद्रामस्य च कथा त्वत्कृता प्रचरिष्यति ॥ तावदूर्ध्वमधश्च त्वं मल्लोकेषु निवत्स्यसि ॥ ३७ ॥
इत्युक्त्वा भगवान्ब्रह्मा तत्रैवान्तरधीयत ॥ ततः सशिष्यो वाल्मीकिर्मुनिर्विस्मयमाययौ ॥ ३८ ॥
तस्य शिष्यास्ततः सर्वे जगुः श्लोकमिमं पुनः ॥ मुहुर्मुहुः प्रीयमाणाः प्राहुश्च भृशविस्मिताः ॥३९॥
समाक्षरैश्चतुर्भिर्यः पादैर्गीतो महर्षिणा ॥ सोनुव्याहरणाद्भूयः श्लोकः श्लोकत्वमागतः ॥ ४० ॥
तस्य बुद्धिरियं जाता वाल्मीकेर्भावितात्मनः ॥ कृत्स्नं रामायणं काव्यमीदृशैः करवाण्यहम् ॥४१॥
उदारवृत्तार्थपदैर्मनोरमैस्तदास्य रामस्य चकार कीर्तिमान् ॥
समाक्षरैः श्लोकशतैर्यशस्विनो यशस्करं काव्यमुदारधीर्मुनिः ॥ ४२ ॥

यावदिति । गिरयः सरितश्च । महीतले भूतले । यावत्स्थास्यन्ति । तावत् । रामायणकथा रामायणरूपा कथा । लोकेषु सप्तसु । प्रचरिष्यति । यावत्त्वत्प्रबन्धप्रचारस्तावत्तव यशो भविष्यतीतिहृदयं ॥३६॥ यशसःस्वतोऽपुरुषार्थत्वात्तत्फलमाह—यावद्रामेति । किंच त्वत्कृता रामस्यकथा । यावत्प्रचरिष्यति तावत् । मल्लोकेषुमध्ये यावच्छरीरपातं अधः भूमौ । तदुपरि ऊर्ध्वंच । निवत्स्यसि ॥ ३७ ॥ तत्रैव आसनएव ॥ ३८ ॥ ततः मुनिविस्मयानन्तरं । सर्वे तस्य वाल्मीकेः । शिष्याः । मुहुर्मुहुःप्रीयमाणाःसन्तः । इमं मानिषादेतिश्लोकं । पुनर्जगुः । भृशंविस्मिताः अत्यन्तंविस्मिताःसन्तः । "अव्ययमात्रस्यसमासेतुलोपः" इतिमलोपः । प्राहुश्च अन्योन्यमिदमद्भुतमितिप्राहुश्चेत्यर्थः । आश्रमएवस्थिताभ्यांकुशलवाभ्यांभरद्वाजेनचात्रबहुवचनं ॥ ३९ ॥ यः । समाक्षरैरिति विषमवृत्तव्यावृत्तिः । चतुर्भिरित्यर्धसमवृत्तव्यावृत्तिः । पादैश्चतुर्थांशैः । महर्षिणा गीतः उक्तः । सः श्लोकः । अनुव्याहरणात् शिष्यैःपुनःपुनर्व्यवह्रियमाणत्वात् । भूयः श्लोकत्वमागत इति । पूर्वश्लोकलक्षणलक्षितत्वात् श्लोकत्वंगतः संप्रतिश्लोक्यमानत्वात् पुनःश्लोकत्वंगतइत्यर्थः । शोकःश्लोकत्वमागत इतिपाठे शोककृतश्लोकएवशोकइत्युच्यतइतिज्ञेयं । यःश्लोकः महर्षिणासमाक्षरैश्चतुर्भिःपादैर्बद्धःश्लोकःक्रौञ्चीविषयः तादृशश्लोकत्वमागतः सशोकवेगादुत्पन्नइत्यर्थः । कथमवगम्यते । अनुव्याहरणात् । अनु पश्चात् शोकानन्तरं उच्चारणात् शोकेसतिजातत्वादित्यर्थः ॥४०॥ अथमुनेःकृतिप्रणयनविषयसंकल्पमाह—तस्येति । भावितात्मनः चिन्तितपरमात्मनः । अनेनारंभकर्तव्यं विघ्नविघातकंमङ्गलंमुनिनाआचरितमित्युक्तं । तस्य वाल्मीकेः । इयंबुद्धिर्जाता ॥ इदंशब्दार्थमाह—कृत्स्नमित्यादिना । सर्वंरामायणाख्यंकाव्यं । ईदृशैः मानिषादेतिश्लोकप्रकारैःश्लोकैः । करवाणि इतिइयंबुद्धिरित्यन्वयः । ईदृशैरिति प्रायिकाभिप्रायमेतत् । वृत्तान्तराणामपितत्रतत्रप्रयोगात् ॥ ४१ ॥ अथयथासंकल्पं काव्यरचनामाह—उदारेति । कीर्तिरस्यास्तीतिकीर्तिमान् । अनेन "काव्यंयशसेऽर्थकृतेव्यवहारविदेशिवेतरक्षतये । सद्यःपरनिर्वृतयेकान्तासंमिततयोपदेशयुजे" इत्यालंकारिकोक्तकाव्यप्रयोजनेष्वस्ययशएवप्रधानंप्रयोजनमितिदर्शितं । काव्यनिर्माणानन्तरंभाविनोयशसःपूर्वभावोक्त्याऽतिशयोक्तिरुक्ता । उदारामहती

शिरो० मल्लोकेषु ममलोकोदर्शनं येषुतेषुस्थानेषु निवत्स्यसि । मत्समीपएव त्वां निवासयिष्यामीत्यर्थः । एतेनवाल्मीकिमुखनिस्सृतरामायणकथातिशुश्रूषा ब्रह्मणोस्तीति ध्वनितम् ॥ ३७ ॥ **तिल०** अनु अतिशयितशोकोत्पत्त्यनन्तरंव्याहरणात्भूयः शोकोविपुलः शोकएवश्लोकत्वंप्राप्तइति वयंमन्यामहेइतिप्राहुरितिपूर्वेणसंबन्धः । उत्प्रेक्षाचेयं । तेनास्य श्लोकस्य करुणरसमयत्वं ध्वनितम् । अत्र नष्टक्रौञ्चालंबनकःक्रौञ्चीविरावानुदीपितः निषादविषयक्रोधव्यभिचारिकः "मानिषाद" इत्यादिवाक्यानुभाविकः करुणोरसइतिबोध्यम् ॥ ४० ॥ **तिल०** ईदृशैः "मानिषाद" इतिवत् करुणरसप्रधानैरित्यर्थः । अनेनान्येरसाः अत्रगुणीभूता इतिध्वनितम् । **शिरो०** ईदृशैः "मानिषाद" इतिवद्गानयोग्यैः पद्यैः ॥ ४१ ॥ **तिल०** उदारस्ययद्वृत्तं चरितं उदारंवायच्चरितं तद्रूपार्थवोधकैः पदैः । मनोरमैः श्रुतिकटुत्वादिदोषरहितैः अस्य यशस्विनोरामस्यदाशरथेरामस्यनारदोपदिष्टस्य । श्लोकशतैरिति शतशब्दोऽनन्तवाची । **शिरो०** उदारवृत्तार्थपदैः उदाराः अभीष्टार्थदातारः वृत्तार्थाः रघुनाथचरितरूपार्थाःयेषु तान्येव पदानितैः "उदारोदातृमहतोः" इतिकोशः ॥ ४२ ॥

[पा०] १ घ. मम लोके. २ क.—झ. भगवान्मुनिः. ३ क.—झ. शोकः श्लोकत्वं. ४ ङ. च. ज. झ. महर्षेर्भा. ५ घ. च. छ. तदस्य. ६ ङ. झ. मुदारदर्शनः.

तदुपगतसमाससन्धियोगं सममधुरोपनतार्थवाक्यबद्धम् ॥
रघुवरचरितं मुनिप्रणीतं दशशिरसश्च वधं निशामयध्वम् ॥ ४३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे द्वितीयः सर्गः ॥ २ ॥

धीर्यस्यासौ उदारधीः । "उदारोदात्तमहतोः" इत्यमरः । तेन कवित्वबीजभूता निपुणतोक्ता । तदुक्तंकाव्यप्रकाशे "शक्तिर्निपुणतालोककाव्यशास्त्राद्यवेक्षणात् । काव्यज्ञशिक्षयाभ्यासइतिहेतुस्तदुद्भवे" इति । मुनिः मननशीलः । अनेन विविक्तसेवित्वमरोचकित्वंचोक्तं । तदुक्तंवामनेन "द्वयेहिकवयःअरोचकिनःसतृणाऽभ्यवहारिणश्च" इत्यादि । तदा ब्रह्मवरप्रदानानन्तरकाले । अनेनकवित्वहेतुभूताशक्तिरुक्ता । यशस्विनोपिरामस्य यशस्करं । तदुक्तंदण्डिना "आदिराजयशोबिंबमादर्शंप्राप्यवाङ्मयं । तेषामसन्निधानेपिनस्वयंपश्यनश्यति" इति । इतरकीर्त्यपेक्षयाकाव्यनायकत्वकृताकीर्तिरनुपमेत्यर्थः । काव्यं । कविर्लोकोत्तरवर्णननिपुणः । कवेःकर्मकाव्यं शब्दार्थयुगलं । तथोक्तं "सगुणौसालंकारौशब्दार्थौदोषवर्जितौकाव्यं" इति । अत्रकाव्यशब्देनकाव्यसंदर्भरूपंमहाकाव्यमुच्यते । तल्लक्षणमुक्तंकाव्यादर्शे "सर्गबन्धो महाकाव्यमुच्यतेतस्यलक्षणं । आशीर्नमस्क्रियावस्तुनिर्देशोवाऽपितन्मुखं । इतिहासकथोद्भूतमितरद्वारसंश्रयं । चतुर्वर्गफलायत्तंचतुरोदात्तनायकं । नगरार्णवशैलर्तुचन्द्रार्कोदयवर्णनैः । उद्यानसलिलक्रीडामधुपानरतोत्सवैः । विप्रलंभैर्विवाहैश्चकुमारोदयवर्णनैः । मन्त्रदूतप्रयाणाजिनायकाभ्युदयैरपि । अलंकृतमसंक्षिप्तंरसभावनिरन्तरं । सर्गैरनतिविस्तीर्णैःश्राव्यवृत्तैःसुसन्धिभिः । सर्वत्रभिन्नसर्गान्तैरुपेतंलोकरञ्जनं । काव्यंकल्पान्तरस्थायिजायतेसदलंकृति" इति । एवंभूतंकाव्यंश्लोकशतैरवयवैश्चकार । श्लोकशब्देनगद्यपद्यमिश्रप्रबन्धेपुस्वग्रन्थस्यपद्यरूपतादर्शिता । शतैरित्यनेन शतकादिक्षुद्रप्रबन्धव्यावृत्तिरुक्ता । बहुवचनार्थंच स्वयमेवविवरिष्यति "चतुर्विंशत्सहस्राणि" इति । कीदृशैःश्लोकशतैः । उदारवृत्तार्थपदैः उदाराणिमहान्ति वृत्तार्थपदानियेषांतैः । वृत्तानिपथ्यावक्त्रोपजातिवंशस्थवसन्ततिलकादीनि । तेषामुदारत्वंनामतत्तद्रसाभिव्यञ्जकत्वं । अर्थाः वाच्यलक्ष्यव्यङ्ग्याः । तेषामुदारत्वंद्राक्षापाकनारिकेलपाकरसालपाकेपुद्राक्षापाकवत्त्वं । एतल्लक्षणमुक्तंरुद्रटेन "द्राक्षापाकःसकथितोबहिरंतःस्फुरद्रसः" इति । पदानि वाचकलक्षकव्यञ्जकानि । तेषामुदारत्वं "यापदानांपरान्योन्यंमैत्रीशय्येतिकथ्यते" इत्युक्तलक्षणशय्यावत्त्वं । पुनःकीदृशैः । मनोरमैः रमणीयैः । अनेन वैदर्भीगौडीपाञ्चालीचेत्युक्तासुरीतिपुवैदर्भीरीतिमत्त्वमुक्तं । तल्लक्षणंचोक्तं "बन्धपारुष्यरहिताशब्दकाठिन्यवर्जिता । नातिदीर्घसमासाचवैदर्भीरीतिरिष्यते" इति । समाक्षरैः प्रतिपादंसमानाक्षरैः । अनेन विषमवृत्तादिरूपताव्यावृत्ता ॥ ४२ ॥ एवंप्रबन्धनिर्माणमभिधायकुशलवादिभ्यस्तत्प्रतिपादनंसंग्रहेणदर्शयति—तदिति । स्वग्रन्थस्योत्तमकाव्यत्वप्रदर्शनायनिर्दोषत्वमाह—उपगतसमाससन्धियोगमिति । समासास्तत्पुरुषादयः । सन्धयःसंहिताः । योगःपदव्युत्पत्तिः । उपगताः शास्त्रानुरूपेणप्राप्ताः समाससन्धियोगायस्मिन्तत्तथोक्तं । अनेन समासदोषसन्धिदोषपददोषशून्यत्वमुक्तं । प्रधानमल्लनिबर्हणन्यायेनैतत्सर्वदोषराहित्यस्योपलक्षणं । अथकाव्यगुणान्प्राधान्येनदर्शयति —समेति । समैर्मधुरैरुपनतार्थैर्वाक्यैर्बद्धंरचितं । तत्रसमतालक्षणमुक्तंदण्डिना " समंबन्धेष्वविषमंतेमृदुस्फुटमध्यमाः " इति । माधुर्यलक्षणंचतेनैवोक्तं । " मधुरंरसवद्वाचिवस्तुन्यपिरसस्थितिः । येनमाद्यन्तिधीमन्तोमधुनेवमधुव्रताः " इति । उपनतार्थत्वं अर्थव्यक्तिः । तत्स्वरूपंचतेनैवोक्तं " अर्थव्यक्तिरमेयत्वमर्थ-

तीर्थी० सममधुरोपनतार्थवाक्यबद्धं समः सर्वोपादानत्वेनसर्वानुरागः मधुरः आनन्दैकरसः उपनतः नित्यापरोक्षतया प्राप्तः । यत्साक्षादपरोक्षाद्ब्रह्मेतिश्रुतेः । अर्थः श्रीरामब्रह्मरूपार्थो येषांतैर्वाक्यैर्बद्धम् ॥ **तिल०** एवंकाव्यनिर्माणमुक्त्वातत्रश्रोतृनभिमुखीकरोति—तदिति ॥ ईदृशस्यापिमिथ्यार्थकत्वेऽनुपादेयत्वंस्यादतआह । मुनिप्रणीतं ब्रह्मानुग्रहप्राप्तसत्ताकृषिप्रणीतम् । पुरुषार्थस्वर्गमोक्षादिसाधनत्वंतु रघुवरचरितमित्यनेनोक्तप्रायमेव । दशशिरसश्चवधमित्यनेन वनान्तमिदं श्रोतव्यमितिसूचितम् । तेनैवसूचितफलत्वाभाग् । उत्तरकाण्डंत्वस्यखिलं भारतस्यहरिवंशवत् । अतएवाग्रिमसर्गे वनसंचरणपर्यन्तवृत्तान्वेषणेऽप्युक्ताविनाक्षेपवेक्ष्यतीतिप्राञ्चः । परेतुदशशिरसोवधंचेत्यन्वयः । चेनसीतात्यागादिरूपोत्तरकाण्डीयवृत्तान्तसंग्रहइत्याहुः ॥

तृतीयः सर्गः ॥ ३ ॥

वाल्मीकिना ब्रह्मप्रसादाद्योगेन यावदर्थापरोक्षीकरणपूर्वकं काण्डसप्तकात्मकश्रीरामायणप्रणयनम् ॥ १ ॥

श्रुत्वा वस्तु समग्रं तद्धर्मात्मा धर्मसंहितम् ॥ व्यक्तमन्वेषते भूयो यद्वृत्तं तस्य धीमतः ॥ १ ॥
उपस्पृश्योदकं सम्यङ्मुनिः स्थित्वा कृताञ्जलिः ॥ प्राचीनाग्रेषु दर्भेषु धर्मेणान्वेषते गतिम् ॥ २ ॥
रामलक्ष्मणसीताभी राज्ञा दशरथेन च ॥ सभार्येण सराष्ट्रेण यत्प्राप्तं तत्र तत्वतः ॥ ३ ॥
हसितं भाषितं चैव गतिर्या यच्च चेष्टितम् ॥ तत्सर्वं धर्मवीर्येण यथावत्संप्रपश्यति ॥ ४ ॥

स्य " इति । रघुवंश्यारघवस्तेषुवरोरामस्तच्चरितं तच्च-रितविषयकं । मुनिनावाल्मीकिनामयाप्रणीतं । मुनि-नानारदेनवाप्रणीतं । दशशिरसः रावणस्य वधमधिकृ-त्यकृतंग्रन्थं । " अधिकृत्यकृतेग्रन्थे " इतिविहितस्या-णोलुप् । निशामयध्वं निशामयध्वंनिशामयध्वमिति न्यशामयतेत्यर्थः । " क्रियासमभिहारेलोट्लोटोहि-स्वौवाचतध्वमोः " इतितध्वमोर्हिस्वादेशस्यवैकल्पिक-त्वात्ध्वमःपाक्षिकस्वादेशाभावः । " मितांह्रस्वः " इतिविहितस्यह्रस्वस्य " संज्ञापूर्वकोविधिरनित्यः " इतिअनित्यत्वात् तदभावः । किंतुणिचिदीर्घएव । अश्रावयदित्यर्थः । शिष्यानितिशेषः । " णिचश्च " इत्यात्मनेपदं । यद्वा । मुनिःरघुवरचरितंचकार । तन्निशामयध्वमितिशिष्यान्प्रतिपरोक्षतयोच्यते । श्र-वणेपिचरितस्यदर्शनसमतयाभानान्निशामयध्वमित्यु-च्यते। "चिरनिर्वृत्तमप्येतत्प्रत्यक्षमिवदर्शितं" इतिहि वक्ष्यते । पूर्वश्लोकेवंशस्थवृत्तं । "जतौतुवंशस्थमुदीरि-तंजरौ " इतिलक्षणात् । अत्रपुष्पिताग्रावृत्तं । "अयु-जिनयुगरेफतोयकारोयुजिचनजौजरगाश्चपुष्पिताग्रा" इतिलक्षणात् ॥४३॥ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्ड-व्याख्याने द्वितीयः सर्गः ॥ २ ॥

पूर्वस्मिन्सर्गेस्वग्रन्थस्यात्यन्तादरणीयत्वद्योतनायप-रमाप्तत्वरूपंवक्तृवैलक्षण्यंप्राधान्येनोक्तं । संप्रतितद-र्थमेवविषयवैलक्षण्यंदर्शयति । विषयस्यवैलक्षण्यंनाम सम्यग्ज्ञानावधृतत्वं लोकोत्तरनायकगुणपरिष्कृतत्वं च । तत्रप्रथमंसम्यग्ज्ञानावधृतत्वंविवक्षंस्तद्धेत्वन्वेषण-माह—श्रुत्वेति । धर्मेआत्मास्वभावोयस्यासौधर्मात्मा इत्यन्वेषणहेतूक्तिः । धर्मसंहितं धर्मसहितं "समो-वाहिततततयोः" इतिविकल्पितत्वान्मकारलोपाभावः । समग्रं कृत्स्नं । तत् नारदोक्तं । वस्तु कथाशरीरं । श्रुत्वा भूयः ततोधिकं । धीमतोरामस्य यद्वृत्तं चरि-त्रमस्ति तद्व्यक्तंयथाभवतितथा । अन्वेषते पर्यालोच-यतिस्म । "वर्तमानसामीप्येवर्तमानवद्वा" इति लट् ॥ १ ॥ धर्मात्मेत्यनेनसूचितमन्वेषणप्रकारमाह— उपेति । मुनिः सम्यक्यथाशास्त्रं उदकं उपस्पृश्य आचम्येत्यर्थः । " उपस्पर्शस्त्वाचमनं " इत्यमरः । प्राचीनाग्रेषु दर्भेषु स्थित्वा निजगुरुमुद्दिश्यकृताञ्जलिः-सन् । धर्मेण ब्रह्मप्रसादरूपश्रेयस्साधनेन । गतिं रामादिवृत्तं । अन्वेषते ॥२॥ गतिशब्दार्थंविवृण्वन्धर्मे-णअन्वेषणफलमाह—रामेति । रामादिभिर्यत्प्राप्तं तत्र विषये । तत्वतः तत्वेन । संप्रपश्यति समन्तात्प्रकर्षे-णपश्यति । तत्सर्वंविशदतरंपश्यतीत्यनुषज्यते ॥ ३ ॥ किंप्राप्तंतत्राह—हसितमिति । पूर्वोक्तरामादीनांयत् हसितं हासः । यच्चभाषितं भाषणं भावोक्तः । याच-गतिः गमनं । यच्चचेष्टितं चेष्टा युद्धादिकमितियावत् । तत्सर्वं । धर्मवीर्येण ब्रह्मवरप्रसादशक्त्या । यथावत् तत्वेन । संप्रपश्यति । अत्रयोगजधर्मस्थानीयत्वात् ब्रह्मप्रसादोधर्मशब्देनोच्यते । सचसाक्षात्कारहेतुश्च-

विषम० अत्ररघेर्गत्यर्थान्निष्पन्नरघुवरशब्देनतस्यसर्वान्तर्यामित्वंध्वनितं तेनतच्चरितस्य स्वर्गमोक्षादिसर्वपुरुषार्थसाधनत्वमुक्तं भवति ॥ ४३ ॥ इतिद्वितीयःसर्गः ॥ २ ॥

तिल० धर्मार्थसहितं धर्मार्थेतित्रिवर्गोपलक्षणम् फलत्वेनतत्सहितम् । हितंमोक्षफलकम् अन्वेषतेस्मेतिशेषः ॥ १ ॥ तिल० धर्मेणयोगजेन । अन्वेषतेअतियत्नेनपश्यतिस्म । शिरो० कृताञ्जलिः प्रार्थनासूचकबद्धकरयुगलः ॥ २ ॥ तीर्थी० तत्र राष्ट्रे । तिल० तत्रसमाधौ पश्यतिस्म ॥ ३ ॥ शिरो० धर्मवीर्येण रघुनाथस्मरणरूपबलेन ॥ ४ ॥

[पा०] १ क. ङ. छ. झ. मार्थसहितं हितं. घ. ज. मार्थसमसम्मितं. २ ख सभार्येणचयत्प्राप्तंतत्रतत्रचतत्वतः ३ घ. ङ. च. छ. झ. यांवच.

स्त्रीतृतीयेन च तथा यत्प्राप्तं चरता वने ॥ सत्यसन्धेन रामेण तत्सर्वं चान्ववेक्षितम् ॥ ५ ॥
ततः पश्यति धर्मात्मा तत्सर्वं योगमास्थितः ॥ पुरा यत्तत्र निर्वृत्तं पाणावामलकं यथा ॥ ६ ॥
तत्सर्वं तत्वतो दृष्ट्वा धर्मेण स महाद्युतिः ॥ अभिरामस्य रामस्य चरितं कर्तुमुद्यतः ॥ ७ ॥
कामार्थगुणसंयुक्तं धर्मार्थगुणविस्तरम् ॥ समुद्रमिव रत्नाढ्यं सर्वश्रुतिमनोहरम् ॥ ८ ॥
स यथा कथितं पूर्वं नारदेन महर्षिणा ॥ रघुवंशस्य चरितं चकार भगवानृषिः ॥ ९ ॥
जन्म रामस्य सुमहद्वीर्यं सर्वानुकूलताम् ॥ लोकस्य प्रियतां क्षान्तिं सौम्यतां सत्यशीलताम् ॥१०॥
नानाचित्रकथाश्चान्या विश्वामित्रसमागमे ॥ जानक्याश्च विवाहं च धनुषश्च विभेदनम् ॥ ११ ॥

क्षुरादिवदितिप्रमाणतोऽध्यवसीयते ॥ ४ ॥ नगरनिवासकालिकचरितावलोकनमभिधायवनवासकालिकवृत्तान्तनिरीक्षणमाचष्टे—स्त्रीति । स्त्रीतृतीयायस्यतेन सीतालक्ष्मणसहितेनेत्यर्थः । वने दण्डकारण्ये । चरता। सत्यसन्धेन सत्यप्रतिज्ञेन । रामेण । यत्प्राप्तं तत्सर्वंच । अन्ववेक्षितं साक्षात्कृतं । वाल्मीकेनेतिशेषः । धर्मवीर्येणेतिसिद्धं ॥ ५ ॥ एवंरामादिवृत्तान्तदर्शनस्यविशदतमत्वमाह—ततइति । ततः अवेक्षणानन्तरं । धर्मात्मा वाल्मीकिः । योगं ब्रह्मप्रसादरूपोपायं । आस्थितःसन् । " योगःसन्नहनोपायध्यानसंगतियुक्तिषु " इत्यमरः । तत्र रामादौ । पुरा यन्निर्वृत्तं निष्पन्नं । तत्सर्ववृत्तं पाणौ आमलकमिवपश्यतिस्म ॥ ६ ॥ अथदर्शनफलग्रन्थनिर्माणोद्योगमाह—तदित्यादि । श्लोकद्वयमेकान्वयं । महाद्युतिः रामगुणानुभवजनितहर्षप्रकर्षकृतद्युतियुक्तः । सः वाल्मीकिः । तत्सर्वं रामवृत्तान्तं । तत्वतोधर्मेण पूर्वोक्तेन दृष्ट्वा । अभिरामस्य निरवधिकभोग्यस्य । चरितं चरितविषयप्रबन्धं । कर्तुमुद्यतः उद्युक्तोऽभूत् । कीदृशंचरित्रमित्यत्राह—कामार्थेति । कामश्चार्थश्चकामार्थौ गुणशब्देनाप्राधान्यमुच्यते । अप्रधानाभ्यामर्थकामाभ्यांसंयुक्तं त्याज्यताप्रदर्शनार्थंतत्रतत्रार्थकामप्रतिपादकमित्यर्थः । धर्मार्थयोर्धर्ममोक्षयोर्गुणोतिशयस्तंविस्तृणातीति धर्मार्थगुणविस्तरं । पचाद्यच् । प्राधान्येनधर्मापवर्गप्रतिपादकमित्यर्थः । " अर्थःस्याद्विषयेमोक्षेशब्दवाच्येप्रयोजने " इतिवैजयन्ती । अतएव रत्नाढ्यंसमुद्रमिवस्थितं । समुद्रोयथाशङ्खशुक्त्यादियुक्तोपि प्राधान्येनरत्नानिवहतितथास्थितमित्यर्थः । सर्वेषांजनानां । श्रुतिमनसीश्रोत्रहृदये हरतीति सर्वश्रुतिमनोहरं । शब्दमाधुर्याच्छ्रोत्राकर्षकं अर्थसौष्ठवाच्चित्ताकर्षकमित्यर्थः ॥ ७ ॥ ८ ॥ यथोद्योगंप्रबन्धनिर्माणमाह—सइति । भगवान्सऋषिः । रघुवंशस्य रघुवंशोद्भवस्यरामस्य । चरितं । पूर्वंनारदेनमहर्षिणा । यथा कथितं येनप्रकारेणोक्तं । तथा चकार ॥ ९ ॥ अथ विस्तरेणब्रह्मोपदिष्टरीत्यारामचरितनिर्माणंदर्शयति—जन्मेत्यादिनासर्गशेषेण । द्वितीयान्तानांतत्प्रतिपादकपरत्वंबोध्यं । वाल्मीकिर्भगवानृषिश्चकारेतिवक्ष्यमाणेकर्तृक्रिये अनुषञ्जनीये । जन्मनःसुमहत्त्वं दशरथमहातपोबललभ्यत्वं विष्णोरवतारत्वंच । वीर्यं ताटकाताटकेयादिहननक्षमंबलं । सर्वानुकूलतां सर्वानुवर्तित्वं आर्जवमितियावत् । लोकस्यप्रियतां प्रेमास्पदत्वं । क्षान्तिं अपराधसहिष्णुतां । सौम्यतां रम्यतामनुग्रतांवा । " सौम्यःपुमान्बुधेविप्रेत्रिषुस्यात्सोमदैवते । रम्येनुग्रेच " इतिरत्नमाला । सत्यशीलतां सत्यस्वभावतां " शीलंस्वभावेसद्वृत्ते " इत्यमरः ॥ १० ॥ विश्वामित्रसमागमे विश्वामित्रेणरामलक्ष्मणयोःसंयोगेसति । अन्याः रामचरितादन्याः । नाना नानाप्र-

तिल० तत्सर्वंचेतिचस्यतदुत्तरकालिकमुत्तरकाण्डस्थंचेत्यर्थइत्यपरे ॥ ५ ॥ तीर्थी० रत्नाढ्यं रत्नतुल्यैःपदैरर्थैः आढ्यं संपूर्णम् । सर्वश्रुतिमनोहरम् सर्वाभिः पड्जादिसर्वसंबन्धिनीभिः कान्ताप्रभावतीप्रभृतिभिः द्वाविंशतिश्रुतिभिः मनोहरम् । श्रुतिशब्देन नाडीसमुद्भवःसुखहेतुर्ध्वनिविशेषउच्यते ॥ यद्वा सर्वासांश्रुतीनामुपनिषदांमनोहृदयंतात्पर्यंहरतिगृह्णातिप्रतिपादयतीतितथा । तिल० रत्नाढ्यंरत्नैः काव्यगुणालंकारव्यङ्ग्यैः आढ्यंपूर्णम् ॥ ८ ॥ तिल० विश्वामित्रसहायनेविश्वामित्रेण सहगमने

[पा०] १ क. ख. ग. घ. च. छ. तदा. २ ङ. ज. झ. चान्ववैक्षत. ३ क. ग. ङ. झ. महामतिः. ज. महामुनिः. ४ क. ग. ङ. च. छ. झ. तत्सर्वंकर्तुं. ५ ख. संपन्नं. ६ घ. तद्यथा. ७ ङ—झ. महात्मना. ख. सुरर्षिणा. ८ क. ख. रघुनाथस्य. ९ ङ. च. छ. झ. वान्मुनिः. ख. सुमहानृषिः. १० ग—छ. झ. चित्राः कथाः. क. विधाः कथाः. ११ ङ. च. छ.झ. सहायने. ज. समागमं.

रामरामविवादं च गुणान्दाशरथेस्तथा ॥ तथा[1]भिषेकं रामस्य कैकेय्या दुष्टभावताम् ॥ १२ ॥
वि[2]घातं चाभिषेकस्य रामस्य च विवासनम् ॥ राज्ञः शोकं[3]विलापं च परलोकस्य चाश्रयम् ॥ १३ ॥
प्रकृ[4]तीनां विषादं च प्रकृतीनां विसर्जनम् ॥ निषादाधिपसंवादं सूतो[5]पावर्तनं तथा ॥ १४ ॥
गङ्गायाश्चापि संतारं भरद्वाजस्य दर्शनम् ॥ भरद्वाजाभ्यनुज्ञानाच्चित्रकूटस्य दर्शनम् ॥ १५ ॥
वास्तुकर्म नि[6]वेशं च भरतागमनं तथा ॥ प्रसादनं च रामस्य पितुश्च सलिलक्रियाम् ॥ १६ ॥
पादुकाग्र्याभिषेकं च नन्दिग्रामनिवासनम् ॥ दण्डकारण्यगमनं विराधस्य वधं तथा ॥ १७ ॥
दर्शनं शरभङ्गस्य सुतीक्ष्णे[7]नाभिसंगमम् ॥ अनसूयासहा[8]स्यामप्यङ्गरागस्य चार्पणम् ॥ १८ ॥
अगस्त्यदर्शनं[9]चैवजटायोरभिसंगमम् ॥ पञ्चवट्याश्च गमनं शूर्पणख्याश्च दर्शनम् ॥ १९ ॥
शूर्पणख्याश्च संवादं विरूपकरणं तथा ॥ वधं खरत्रिशिरसोरुत्थानं रावणस्य च ॥ २० ॥
मारीचस्य वधं चैव वैदेह्या हरणं तथा ॥ राघवस्य विलापं च गृध्रराजनिबर्हणम् ॥ २१ ॥
कबन्धदर्शनं चापि पंपायाश्चापि दर्शनम् ॥ शबर्या[10] दर्शनं चैव हनूमद्दर्शनं तथा ॥
विलापं चैव पंपायां राघवस्य महात्मनः ॥ २२ ॥

काराः चित्रकथाः आश्चर्यावहकथाश्च । जानक्याश्चेतिचकारेणोर्मिलादयः समुच्चीयन्ते । धनुषः हरचापस्य । विभेदनं भङ्गंच ॥११॥ रामेण परशुरामेण । रामस्य राघवस्यविवादं । रामेणरामविवादमित्यत्रतृतीयेतियोगविभागात्समासः । अतोनैकशेषप्रसक्तिः । दाशरथेर्गुणान् अयोध्याकाण्डादौवक्ष्यमाणान् । तथेति समुच्चयार्थःसर्वत्रद्रष्टव्यः । रामस्यअभिषेकं अभिषेकोद्योगं कैकेय्यादुष्टभावतां दुष्टहृदयत्वंच ॥ १२ ॥ अभिषेकस्य रामाभिषेकस्य । विघातं कैकेयीदुष्टहृदयत्वकृतंविघ्नंच । रामस्यविवासनंच राज्ञः दशरथस्य । शोकेनविलापं प्रलापंच । राज्ञः परलोकस्य स्वर्गस्य । आश्रयं आश्रयणं च ॥ १३ ॥ प्रकृतीनां प्रजानां । विषादं दुःखं । प्रकृतीनांविसर्जनं वञ्चनेननिर्यापणंच । निषादाधिपसंवादं गुहेनसहसंभाषणं । सूतस्योपावर्तनं पुनरागमनंच ॥ १४ ॥ १५ ॥ वास्तुकर्म शास्त्रोक्तप्रकारेणयथोचितमन्दिरनिर्माणं । निवेशं शास्त्रोक्तवास्तुपूजादिपूर्वकंगृहेप्रविश्यावस्थानं । रामस्यप्रसादनं भरतेनेतिशेषः । सलिलक्रियां सलिलदानं ॥ १६ ॥ पादुकाग्र्ययोःपादुकाश्रेष्ठयोः । श्रैष्ठ्यंधृतत्वात् । अभिषेकं राज्यनियंतृतयास्थापनं । नन्दिग्रामे निवासनं निवसनं । स्वार्थेण् । पादुकयोःस्थापनं वा ॥ १७ ॥ अनसूयया अत्रिपत्न्या । सहास्यां सहासनं । सीतायाइतिशेषः । "आस्यात्वासनमासीनं—" इत्यमरः । यद्यप्येतद्विराधवधात्पूर्वमेवतथापि अत्रसर्वत्रक्रमोनविवक्षितः । रामायणप्रतिपाद्यसंक्षेपमात्रेतात्पर्यात् । अङ्गरागस्य चन्दनस्य ॥ १८ ॥ शूर्पणख्याइतिङीबत्रार्षः ॥ १९ ॥ खरत्रिशिरसोरितिदूषणादीनामुपलक्षणं । उत्थानं निर्गमनं ॥ २० ॥ एवकारःपादपूरणार्थः । एवमुत्तरत्रसर्वत्रद्रष्टव्यं ॥ २१ ॥ चापीत्येकनिपातःसमुच्चयार्थः

तदुपस्थितिकालेसभायां मार्गेगमनकालेच । चित्रानानाकथाः अन्याश्चकथाः योगवासिष्ठोक्ताःब्रह्मप्रतिपादिकाःकथाः अत्रग्रंथेउक्तागङ्गादिकथाश्चेत्यर्थः । एतेनात्र श्लोके नानेति अन्याइतिचव्यर्थमित्यपास्तम ॥११॥ **शिरो०** दुष्टभावतां प्रातिभासिकदुष्टस्वभावत्वं ॥ १२ ॥ **शिरो०** शोकं प्रकटीभूतरामवियोगजनितशोचनम् । विलापं तच्छोकजनितहारामेत्याद्युच्चारणंच । परलोकस्य अप्रकटायोध्यापुरस्य आश्रयंस्थितिंच ॥ १३ ॥ **तिल०** अभ्युज्ञानात् संमतेः ॥ १५ ॥ **तीर्थी०** निवेशं तत्रगृहेऽवस्थानम् ॥ १६ ॥ **तिल०** नन्दिग्रामनिवासनं नन्दिग्रामस्य नितरां अतिशयेनवासनम् । भरते तत्रगते सर्वप्रजास्तत्रैव वासंकृतवत्यइत्यर्थः ॥ १७ ॥ **तिल०** धनुषोग्रहणं अगस्त्यसकाशादितिशेषः ॥ १९ ॥ **विषम०** उत्थानं जानकीहरणोद्योगम् ॥ २० ॥

[पा०] १ ख. तथारामाभिषेकंच. २ ख. ग. घ. ज. व्याघातं. ३ ङ—झ. ट. शोकंविलापं. ४ प्रकृतेः सामवादंच. ५ ख. सूतस्यपरिवर्तनं. ६ क—झ. निवेशं. ७ क—झ. क्ष्णेनसमागमं. ८ क. ग—छ. झ. समास्यां च अङ्ग. ख. सपर्यांच. ९ क. ख. छ. झ. दर्शनं चाप्यगस्त्यस्यधनुषोग्रहणंतथा. १० घ—छ. झ. शबरीदर्शनं. ङ. झ. शबरीदर्शनंचैवफलमूलाशनंतथा. प्रलापंचैवपम्पायांहनूमद्दर्शनंतथा. ऋश्य०.

ऋश्यमूकस्य गमनं सुग्रीवेण समागमम् ॥ प्रत्ययोत्पादनं सख्यं वालिसुग्रीवविग्रहम् ॥ २३ ॥
वालिप्रमथनं चैव सुग्रीवप्रतिपादनम् ॥ ताराविलापं समयं वर्षरात्रनिवासनम् ॥ २४ ॥
कोपं राघवसिंहस्य बलानामुपसंग्रहम् ॥ दिशः प्रस्थापनं चैव पृथिव्याश्च निवेदनम् ॥ २५ ॥
अङ्गुलीयकदानं च ऋक्षस्य बिलदर्शनम् ॥ प्रायोपवेशनं चैव संपातेश्चैव दर्शनम् ॥ २६ ॥
पर्वतारोहणं चैव सागरस्य च लङ्घनम् ॥ समुद्रवचनाच्चैव मैनाकस्य च दर्शनम् ॥ २७ ॥
राक्षसीतर्जनं चैव छायाग्राहस्य दर्शनम् ॥ सिंहिकायाश्च निधनं लङ्कामलयदर्शनम् ॥
रात्रौ लङ्काप्रवेशं च एकस्य च विचिन्तनम् ॥ २८ ॥
आपानभूमिगमनमवरोधस्य दर्शनम् ॥ दर्शनं रावणस्यापि पुष्पकस्य च दर्शनम् ॥ २९ ॥
अशोकवनिकायानं सीतायाश्चैव दर्शनम् ॥ अभिज्ञानप्रदानं च सीतायाश्चाभिभाषणम् ॥ ३० ॥
राक्षसीतर्जनं चैव त्रिजटास्वप्नदर्शनम् ॥ मणिप्रदानं सीताया वृक्षभङ्गं तथैव च ॥ ३१ ॥
राक्षसीविद्रवं चैव किङ्कराणां निवर्हणम् ॥ पञ्चसेनाग्र्यनिधनं सप्तमन्त्रिनिवर्हणम् ॥ ३२ ॥
तथाऽक्षस्यापि निधनं तोरणस्य विभञ्जनं ॥ ग्रहणं वायुसूनोश्च लङ्कादाहाभिगर्जनम् ॥ ३३ ॥
प्रतिप्लवनमेवाथ मधूनां हरणं तथा ॥ राघवाश्वासनं चैव मणिनिर्यातनं तथा ॥ ३४ ॥
संगमं च समुद्रेण नलसेतोश्च बन्धनम् ॥ प्रतारं च समुद्रस्य रात्रौ लङ्कावरोधनम् ॥ ३५ ॥
विभीषणेन संसर्गं वधोपायनिवेदनम् ॥ कुंभकर्णस्य निधनं मेघनादनिवर्हणम् ॥ ३६ ॥

॥ २२ ॥ ऋश्यमूकस्येतिकर्मणिषष्ठी । प्रत्ययोत्पादनं सालभेदनादिभिःसुग्रीवस्यविश्वासजननं । वालिसुग्रीवविग्रहं वालिसुग्रीवयुद्धं । वालिसुग्रीवयोर्वैरानुकथनंवा ॥ २३ ॥ वालिप्रमथनं वालिवधं । सुग्रीवप्रतिपादनं सुग्रीवायराज्यप्रदानमित्यर्थः । ताराविलापं ताराप्रलापं । समयं शरदिसीतान्वेष्टव्येतिरामसुग्रीवयोः-संकेतं । "समयःकालसिद्धान्तप्रतिज्ञाशपथेषुच । संकेताचारयोश्च" इतिरत्नमाला । ताराविलापसमयमितिपाठे "सर्वोद्वन्द्वोविभाषयैकवद्भवति" इत्येकवद्भावः । वर्षरात्रनिवासनं वर्षवृष्टिः तद्युक्तारात्रयोवर्षरात्राः "रात्राह्नाहाःपुंसि" इतिपुँल्लिङ्गत्वं । तेषुनिवासनंनिवसनं । स्वार्थेण् । वर्षदिनेष्वित्यर्थः । रात्रिशब्दस्यदिवसपरत्वं त्रिरात्रादौदृष्टं ॥ २४ ॥ राघवसिंहस्य राघवाणांश्रेष्ठस्य । कोपं सुग्रीवविषयक्रोधं । बलानां सेनानां । उपसंग्रहं संमेलनं । दिशः प्रति वानराणांप्रस्थापनं । पृथिव्याश्चनिवेदनं पृथिव्याः द्वीपसमुद्रादिसंनिवेशकथनं ॥ २५ ॥ अङ्गुलीयकदानं हनुमतइतिशेषः । ऋक्षस्य बिलं स्वयंप्रभाबिलं । तस्यतथासंज्ञा । प्रायोपवेशनं प्रायायमरणाय उपवेशनं शयनं । संपातेः जटायुग्रजस्य ॥ २६ ॥ पर्वतारोहणं समुद्रलङ्घनायमहेन्द्रपर्वतारोहणं । समुद्रवचनाच्चेतिचकारेण देवानुज्ञासमुच्चीयते । मैनाकस्य हिमवत्पुत्रस्यगिरेः ॥ २७ ॥ सिंहिकायाः असुरस्त्रियः । लङ्कामलयस्य लङ्काधारपर्वतैकदेशस्य । "मलयःपर्वतान्तरे । पर्वतांशेप्रियोद्याने" इतिरत्नमाला । एकस्य हनुमतः ॥ २८ ॥ आपानभूमिः मद्यपानभूमिः । अवरोधस्य अन्तःपुरस्य ॥ २९ ॥ अशोकवनिकायानं हनुमतोशोकवनिकागमनं । अभिज्ञानप्रदानं सीतायैअङ्गुलीयकदानं ॥ ३० ॥ राक्षसीनांतर्जनं सीतांप्रतीतिशेषः । त्रिजटाविभीषणपुत्री । तस्याःस्वप्नदर्शनं रामश्रेयोविषयस्वप्नदर्शनं । मणिप्रदानं हनुमतेचूडामणिप्रदानं । वृक्षभङ्गं अशोकवनिकावृक्षभङ्गं ॥ ३१ ॥ राक्षसीविद्रवं एकाक्ष्येककर्णीप्रभृतिराक्षसीनांपलायनं हनुमद्भयादितिशेषः । किङ्कराणां रावणभटानां ॥ ३२ ॥ वायुसूनोः हनुमतः । ग्रहणं इन्द्रजितेतिशेषः । लङ्कादाहेनाभिगर्जनं राक्षसानामित्यर्थः ॥ ३३ ॥ प्रतिप्लवनं पुनःसमुद्रलङ्घनं । मधूनां मधुवनस्थमधूनां हरणं ग्रहणं । वानरैरितिशेषः । मणिनिर्यातनं रामायचूडामणिप्रदानं ॥ ३४ ॥ नलसेतोः नलेनबन्धनीयसेतोः । प्रतारं प्रतरणं ॥ ३५ ॥ वधोपायनिवेदनं इन्द्रजिदादि-

विषम० प्रायोपवेशनं प्रायेण अनशनेन वानराणां उपवेशनंसमुद्रसमीपेवासः ॥ २६ ॥ तिल० लङ्कादाहाभिगर्जनं लङ्कादाहे हनुमद्गर्जनमित्यर्थोवा । अभिमर्दनमितिपाठे लङ्कायादाहेनाभितोमर्दनमित्यर्थः ॥ ३२ ॥

रावणस्य विनाशं च सीतावाप्तिमरेः पुरे ॥ विभीषणाभिषेकं च पुष्पकस्य च दर्शनम् ॥ ३७ ॥
अयोध्यायाश्च गमनं भरतेन समागमम् ॥ रामाभिषेकाभ्युदयं सर्वसैन्यविसर्जनम् ॥
स्वराष्ट्ररञ्जनं चैव वैदेह्याश्च विसर्जनम् ॥ ३८ ॥
अनागतं च यत्किंचिद्रामस्य वसुधातले ॥ तच्चकारोत्तरे काव्ये वाल्मीकिर्भगवानृषिः ॥ ३९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे तृतीयः सर्गः ॥ ३ ॥

चतुर्थः सर्गः ॥ ४ ॥

रामायणषट्ककाण्डसर्गश्लोकसङ्ख्यानिर्धारणम् ॥ १ ॥ वाल्मीकिनास्वप्रणीतरामायणप्रचारणाय समुचितशिष्यलाभचिन्तने कुशलवाभ्यां शिष्यतयास्वपरिग्रहणाय तत्पादाभिवादनम् ॥ २ ॥ कुशलवाभ्यां कदाचनमुनिमण्डलमध्ये वाल्मीकिनोपदिष्टरामायणस्य गान्धर्वशास्त्रानुसारेण तन्त्रीस्वनसाहित्येनगानम् ॥ ३ ॥ मुनिभिस्ताभ्यांपारितोषिकदानम् ॥ ४ ॥ भरतमुखेनकुशलवौदृष्टवता श्रीरामेण तयोः स्वावासानयनेन सत्कारपूर्वकं रामायणगानचोदना ॥ ५ ॥ ततस्ताभ्यांसपरिवारं श्रोतुकामेरामे रामायणगानोपक्रमः ॥ ६ ॥

प्राप्तराज्यस्य रामस्य वाल्मीकिर्भगवानृषिः ॥ चकार चरितं कृत्स्नं विचित्रपदमात्मवान् ॥ १ ॥

वधोपायदर्शनं ॥ ३६ ॥ अरेःपुरइतिशौर्यातिशयोक्तिः उत्तरत्रचान्वयः ॥३७॥ रामाभिषेकाभ्युदयं रामाभिषेकमहोत्सवं। स्वराष्ट्रंत्यर्धमधिकं । वैदेह्याश्चविसर्जनमित्यन्तं "चकारभगवानृषिः" इतिपूर्वेणसम्बन्धनीयं ॥३८॥ सीताभूप्रवेशप्रभृत्युत्तरकाण्डकथामाह—अनागतंचेति। वाल्मीकिनामाभगवान्ऋषिः रामस्यवसुधातले। अनागतं भावियत्किंचिच्चरितमस्ति ब्राह्मणपुत्रजीवनाश्वमेधादिकं । तत् उत्तरेकाव्ये उत्तरकाण्डे । चकार प्रतिपादितवान्। यत्किंचिदित्यनेन सीताविसर्जनात्पूर्वकालस्यभूयस्त्वं अनन्तरकालस्याल्पत्वंचद्योत्यतइत्याहुः । एतदुत्तरकाण्डे विचारयिष्यते ॥३९॥ ॥ इतिश्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने तृतीयःसर्गः।

पूर्वस्मिन्सर्गेप्रतिपाद्यवैलक्षण्यमुक्तं । संप्रतिप्रबन्धवैलक्षण्यंकथ्यते । प्रबन्धस्यवैलक्षण्यंनाम परमाप्तप्रणीतत्वं । पुण्यश्लोकविषयत्वं महाजनपरिगृहीतत्वं प्रबन्धनायकश्लाघितत्वमित्यादि । परमाप्तप्रणीतत्वं पुण्यश्लोकविषयत्वंचानेनोच्यते ॥ प्राप्तराज्यस्य स्वीकृतराजभावस्य । पुरोहितादित्वाद्यक्प्रत्ययः । लोकरक्षणायरघुकुलेवतीर्णस्येत्यर्थः । रामस्य सकलगुणाभिरामस्य । अनेनप्रतिपाद्यमहिम्ना काव्यस्यआदरणीयतातिशयउक्तः । तदुक्तंवामनेन "उपश्लोक्यस्यमाहात्म्यादुज्ज्वलाःकाव्यसंपदः"इति । विचित्रपदं आश्चर्यपदसंनिवेशं । अनेन काव्यस्यात्मभूतारीतिरुक्ता । तदुक्तंवामनेन "रीतिरात्माकाव्यस्य विशिष्टपदरचनारीतिः । समग्रैरोजःप्रसादप्रभृतिभिर्गुणैरुदिता वैदर्भीनामरीतिः" इत्यादिना । यद्वा। विविधानांविचित्राणां शब्दार्थालंकाराणां पदंस्थानं। कृत्स्नंचरितं प्रतिपादकग्रन्थसंदर्भम् । अनेन विज्ञानाद्यनेकफलसुपुरुषचरित्रत्वमुक्तं ॥ तथोक्तं [प्राकृतं] "परिवड्ढइ विण्णाणं संभाविज्जइ जसो विसप्पन्दि गुणा । सुव्वइसुपुरिसचरिअं किंतज्जेण णहरन्ति कव्वालावा" ॥ [छा०] "परिवर्धतेविज्ञानंसंभाव्यतेयशोविसर्पन्तिगुणाः ॥ श्रूयतेसुपुरुषचरितंकिंतद्येननहरंतिकाव्यालापाः" इति ॥ भगवान् ब्रह्मप्रसादलब्धदिव्यज्ञानवान् । आत्मवान् प्रबन्धरचनानुकूलयत्नवान् । ऋषिः "नानृषिःकुरुतेकाव्यं" इत्युक्तरीत्या काव्यनिर्माणपटुःवाल्मीकिः । चकार परोपकारायकृतवान् । उदारधीरितिपूर्वमुक्तं । प्राप्तराज्य-

---

तिल० अयोध्यायाश्चगमनं तदुद्देश्यकंगमनम् ॥ शिरो० भरतेनसमागमं हनुमद्द्वारासाक्षाच्चभरतसंमेलनम् ॥ ३८ ॥ इतितृतीयःसर्गः ॥ ३ ॥ तीर्था० "तेवयंभवतारक्ष्याभवद्विषयवासिनः" इतिऋभिरेवोक्तत्वात् रामस्यविषयेवसन्वाल्मीकिरित्यर्थाल्लभ्यते । चरितं चरित्रप्रतिपादकंकाव्यं ॥ तिल० अर्थवत् ध्वन्यलंकारादिप्रशस्तार्थं । आत्मवानितिपाठे अवहितान्तःकरणः । प्राशस्त्येमतुप् । आत्मशब्दश्चान्तःकरणवाची ॥ १ ॥

[पा०] १ ङ. झ. ट. अयोध्यायाश्चगमनंभरद्वाजसमागमं. प्रेषणंवायुपुत्रस्यभरतेनसमागमं. २ ङ. पदमर्थवत्.

चतुर्विंशत्सहस्राणि श्लोकानामुक्तवानृषिः ॥ तथा सर्गशतान्पञ्च षट्काण्डानि तथोत्तरम् ॥ २ ॥

स्येत्यनेन रामराज्यकरणकालेरामायणकरणमितिगम्यते । एतज्ज्ञापनायैवपुनरारंभः ॥ १ ॥ अथप्रक्षेपभ्रंशसंभावनापरिहाराय नातिसंकोचविस्तरश्लोकसर्गकाण्डवत्तयाऽत्यन्तादरणीयत्वायचाह—चतुर्विंशदिति । ऋषिः वाल्मीकिः । "तपःस्वाध्याय—" इत्यारभ्य "तद्ब्रह्माप्यन्वमन्यत" इत्यन्तेन चिकीर्षिते रामायणाख्येप्रबन्धे श्लोकानांचतुर्विंशत्सहस्राण्युक्तवान् । इकारलोपश्छान्दसः । "पङ्क्तिविंशति–" इतिसूत्रे विंशतीत्येवनिपातनात् । "आदशतःसङ्ख्याः-सङ्ख्येयेवर्तन्ते । ततःपरं संख्यानेसंख्येयेचवर्तन्ते" इति नियमात्सहस्रशब्दोत्रसंख्यापरः । चतुर्विंशतिसहस्रसङ्ख्याकश्लोकांश्चकारेत्यर्थः। तथेतिसमुच्चये । पञ्चसर्गशतांश्चकृतवान् । "शतायुतप्रयुताःपुंसिच" इतिलिङ्गानुशासनवचनात्पुँल्लिङ्गत्वं । सर्गशतंपञ्चेतिपाठे शतमित्येतत्पङ्क्तिविंशतित्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्यशीतिनवतिशतं" इतिसूत्रेशतमितिवहुत्वेनिपातनात्साधु । षट्काण्डानि उत्तरं च षड्भ्यःउत्तरं । सप्तमकाण्डंचकृतवान् । परत्वमोक्षप्रदत्वादीनांव्यक्ततयाप्रतिपादनेन सर्वोत्तरत्वादुत्तरमितिपृथगुक्तिः । यद्यप्याधुनिकेपाठेश्लोकानांसर्गाणांचविपर्यासोदृश्यते तथापि वहुचतुर्युगान्तरितत्वेनविप्लवोयुक्तः । यद्वा । संकल्पमात्रपरोयंश्लोकः । कृतवान् कर्तुमुद्युक्तइत्यर्थः । ग्रन्थसमाप्तिदशायां कापिवृद्धिरुपजातेतिनकोपिविरोधः । यद्वा । अन्यूनाभिप्रायमिदंवचनं । पञ्चशतसर्गेषुचतुर्विंशतिसहस्रश्लोकेषुचनन्यूनतेत्यर्थः । यद्वा । अल्पीयसीमधिकसंख्यामनादृत्य प्रकृष्टसंख्ययाव्यपदेशोयं । यथा "मन्वन्तरंतुदिव्यानांयुगानामेकसप्ततिः" इत्यमरः । "चतुर्युगसहस्राणिब्रह्मणोदिनमुच्यते" इत्युक्तब्रह्मदिनस्य चतुर्दशमन्वनुसारेणचतुर्दशधाविभागेमन्वन्तरस्य एकसप्तत्याधिक्यात् । वर्तमानसंख्यातु "वालकाण्डेतुसर्गाणांसप्तसप्ततिरीरिता । अयोध्याकाण्डगास्सर्गाश्शतंचैकोनविंशतिः । आरण्य काण्डे सर्गाणांपञ्चसप्ततिरीरिता । किष्किन्धाकाण्डगास्सर्गास्सप्तषष्टिरुदीरिताः । सर्गाणांसुन्दरेकाण्डेत्वष्टषष्टिरुदीरिता । एकत्रिंशच्छतंसर्गादृश्यन्तेयुद्धकाण्डगाः । दशोत्तरशतंसर्गाउत्तरेकाण्डईरिताः [६४७] ॥ अत्रसर्गशतान्पञ्चेत्येतत् षट्काण्डानामेव नतुसोत्तराणां । षट्काण्डानीत्येतत्प्रत्यासत्तेः । चतुर्विंशतिसहस्रश्लोकात्मकतातु सप्तकाण्डापेक्षयेत्यप्याहुः । वालकाण्डगताःश्लोकाश्चमरारिप्रकीर्तिताः [२२५६] । अयोध्याकाण्डगाःश्लोकाश्शुकभावाःप्रभाषिताः [४४१५] आरण्यकाण्डगाःश्लोकाःखगसाराःप्रदर्शिताः [२७–३२] । किष्किन्धाकाण्डगाःश्लोकानीरचाराःप्रकीर्तिताः [२६२०] श्लोकास्तुसुन्दरेकाण्डेताननागाः प्रभाषिताः [३००६] युद्धकाण्डगताःश्लोकानिधिधीशाःप्रवेदिताः [५९९०] । श्लोकाःस्युरुत्तरेकाण्डेवलरागाःप्रभाषिताः [३२३४] । श्लोकाः २४२५३ तत्रैवमवधातव्यं । वालकाण्डेत्रिंशेसर्गे "सतेनपरमास्त्रेणमानवेनसमाहतः" इत्यतःपूर्वमेकंसहस्रं । त्रिषष्टितमे "विश्वामित्रोमहातेजाभूयस्तेपे महत्तपः" इत्यतःपूर्वंद्वेसहस्रे । अयोध्याकाण्डेचतुर्दशे "चतुरश्वोरथःश्रीमान्निस्त्रिंशोधनुरुत्तमं" इत्यतः पूर्वं त्रीणिसहस्राणि । चतुश्चत्वारिंशे "वर्ततेचोत्तमांवृत्तिंलक्ष्मणोस्यसदानघः" इत्यतःपूर्वं चत्वारिसहस्राणि । एकसप्ततितमे "द्वारेणवैजयन्तेनप्राविशच्छ्रान्तवाहनः" इत्यतःपूर्वं पञ्चसहस्राणि । एकोनशततमे "उटजेराममासीनंजटामण्डलधारिणं" इत्यतःपूर्वं षट्सहस्राणि । आरण्यकाण्डेद्वादशे "तेवयंवनमत्युग्रंप्रविष्टाःपितृशासनात्" इत्यतःपूर्वं सप्तसहस्राणि । सप्तचत्वारिंशे "ममभर्तामहातेजावयसा-

तीर्थी० । श्रीमद्वालकाण्डेद्विसहस्रादुपरिद्विशतंचाशीतिर्ग्रन्थाः [२२८०] । श्रीमदयोध्याकाण्डेचतुस्सहस्राणिचतुश्शतानिपञ्चदशग्रन्थाः [४४१५] । श्रीमदारण्यकाण्डेद्विसहस्रादुपरिसप्तशतानिद्वात्रिंशद्ग्रन्थाः [२७३२] । श्रीमत्किष्किन्धाकाण्डेद्विसहस्रादुपरिषट्शतानिविंशतिर्ग्रन्थाः [२६२०] । श्रीमत्सुन्दरकाण्डेत्रिसहस्रादुपरिषड्ग्रन्थाः [३००६] । श्रीमद्युद्धकाण्डेपञ्चसहस्राणिनवशतानिनवतिश्चग्रन्थाः [५९९०] । श्रीमदुत्तरकाण्डेत्रिसहस्राणिद्विशतंसप्तसप्ततिश्चग्रन्थाः [३२७७] । अत्रयदेतदधिकंसप्तसप्तत्युत्तरद्विशतं तत्त्रिष्टुब्जगत्यादिच्छन्दोवृत्तानामक्षराधिक्येनजनितं । उत्तरकाण्डस्यकाण्डैस्सहाकथनमादरातिशयेन । तथाहि । यद्यप्यत्रकाण्डेपुरामस्यपरत्वानुसन्धानं : तथाप्युत्तरकाण्डेप्राचुर्येणपरत्वाभिव्यक्तिः । कोसलानांसर्वेषामपिभगवतासहतल्लोकप्राप्तिश्चापरोतिशयोगम्यते । अतएवसर्वोत्तरत्वात्तस्योत्तरकाण्डत्वसंज्ञा । **कतक०** । उक्तसङ्ख्यापेक्षयाषट्त्रिंशत्सर्गसङ्ख्याधिक्यदर्शनाच्चतुर्विंशत्सहस्रापेक्षयाश्लोकसङ्ख्यायाअप्याधिक्यदर्शनाच्चउत्तरकाण्डीयसर्गसङ्ख्यानुक्तेश्चप्रक्षिप्तोयंश्लोकःनत्वार्षः ॥ २ ॥

कृत्वापि तन्महाप्राज्ञः सभविष्यं सहोत्तरम् ॥ चिन्तयामास को न्वेतत्प्रयुञ्जीयादिति प्रभुः ॥ ३ ॥
तस्य चिन्तयमानस्य महर्षेर्भावितात्मनः ॥ अगृह्णीतां ततः पादौ मुनिवेषौ कुशीलवौ ॥ ४ ॥
कुशीलवौ तु धर्मज्ञौ राजपुत्रौ यशस्विनौ ॥ भ्रातरौ स्वरसंपन्नौ ददर्शाश्रमवासिनौ ॥ ५ ॥
स तु मेधाविनौ दृष्ट्वा वेदेषु परिनिष्ठितौ ॥ वेदोपबृंहणार्थाय तावग्राहयत प्रभुः ॥ ६ ॥

पञ्चविंशकः'' इत्यतःपूर्वं चाष्टौसहस्राणि। किष्किन्धाकाण्डेचतुर्थे ''ततःपरमसंहृष्टोहनूमान्प्लवगर्षभः'' इत्यतः पूर्वं नवसहस्राणि। एकत्रिंशे ''नरेन्द्रसूनुर्नरदेवपुत्रंरामानुजःपूर्वजमित्युवाच'' इत्यतःपूर्वं दशसहस्राणि। किष्किन्धाकाण्डसमाप्तावेकादशसहस्राणि। सुन्दरकाण्डेसप्तविंशे ''ततस्तस्यनगस्याग्रे'' इत्यतः पूर्वं द्वादशसहस्राणि। षट्चत्वारिंशे ''नावमान्योभवद्भिश्चहरिर्धीरपराक्रमः'' इत्यतःपूर्वं त्रयोदशसहस्राणि। सुन्दरकाण्डसमाप्तौचतुर्दशसहस्राणि। युद्धकाण्डेअष्टाविंशे ''रक्षोगणपरिक्षिप्तोराजाह्येषविभीषणः'' इत्यतःप्राक् पञ्चदशसहस्राणि। पञ्चाशे ''प्रदर्शनंचबुद्धिश्चस्मृतिश्चद्विगुणंतयोः'' इत्यतः प्राक् षोडशसहस्राणि। उत्तरभागारंभे ''कुंभकर्णहतंदृष्ट्वाराघवेणमहात्मना'' इत्यतः प्राक् सप्तदशसहस्राणि। अशीत्यन्तेन अष्टादशसहस्राणि। द्वादशशततमे ''मरणान्तानिवैराणि'' इत्यतःप्राक् एकोनविंशतिस्सहस्राणि। युद्धकाण्डसमाप्तौ विंशतिस्सहस्राणि। उत्तरकाण्डेद्वाविंशे ''ततःप्राचोदयत्सूतस्तान्हयाञ्चिरप्रभान्'' इत्यतःपूर्वं एकविंशतिस्सहस्राणि। चत्वारिंशत्समाप्त्या द्वाविंशतिस्सहस्राणि। षट्सप्ततितमे ''ब्राह्मणस्यचधर्मेणत्वयावैरक्षितस्सुतः'' इत्यतःपूर्वं त्रयोविंशतिस्सहस्राणि। ततःप्रबन्धसमाप्त्याचतुर्विंशतिस्सहस्राणीत्याहुः ॥ २ ॥ अथास्यकाव्यस्यमहाजनपरिग्रहंवक्तुं पीठिकामारचयति—कृत्वेति। महाप्राज्ञः प्रकर्षेणजानातीतिप्रज्ञः प्रज्ञएवप्राज्ञः। ''प्रज्ञादिभ्यश्च'' इतिस्वार्थेऽण्प्रत्ययः। यद्वा। प्रज्ञा धीः। ''धीःप्रज्ञाशेमुषीमतिः'' इत्यमरः। साऽस्यास्तीति प्राज्ञः। ''प्रज्ञाश्रद्धार्चाभ्योणः'' इतिमत्वर्थीयोणप्रत्ययः। महांश्चासौप्राज्ञश्चेतिमहाप्राज्ञः। निरतिशयज्ञानसंयुतो वाल्मीकिः। सहोत्तरं रामाभिषेकादुत्तरेणवृत्तान्तेन सहितं विकल्पात्सहशब्दस्यसभावाभावः। सभविष्यं अश्वमेधोत्तरभाविवृत्तान्तसहितं। अश्वमेधपूर्वकालेअस्यकाव्यस्यप्रवृत्तत्वात्। तत् काव्यं कृत्वापि। एतत् काव्यं। प्रभुः समर्थः। ''प्रभुःशक्ताधिपौ'' इतिभास्करः। कः पुरुषः। प्रयुञ्जीयात् वाग्विधेयं कुर्यात् इतिचिन्तयामास। प्रयुञ्जीयादित्यत्रात्मनेपदाभावोऽनित्यत्वात्। सभविष्यमित्यत्र औणादिकेस्यप्रत्यये इण्निमित्तंषत्वं ॥ ३ ॥ ततः वाल्मीकिचिन्तानन्तरं। मुनिवेषौ वस्तुतोराजकुमारौ। कुशीलवौ कुशलवौ। ईकारश्छान्दसः। चिन्तयमानस्य। भावितात्मनः चिन्तितपरमात्मनः। तदनुकूलशिष्यलाभायकृतपरमात्मनमस्कारस्येत्यर्थः। तस्य महर्षेः। पादौ अगृह्णीतां रामायणग्रहणार्थमन्ववर्तेतामित्यर्थः ॥ ४ ॥ धर्मज्ञौ गुरुशुश्रूषाधर्मज्ञौ राजपुत्रौ आसमाप्तेः वीर्यवन्तौ। यशस्विनौ विद्यान्तराभ्यासजकीर्तियुक्तौ भ्रातरौ तुल्यस्वरौ स्वरसंपन्नौ शारीरवन्तौ। आश्रमवासिनौ स्वाश्रमवासित्वेनस्नेहविषयभूतौ। कुशीलवौ कुशलवौ ददर्श उपदेशयोग्यावाकलयांचकारेत्यर्थः। अनेनरामाभिषेकानन्तरकालेरामायणकरणं ''प्राप्तराज्यस्यरामस्य'' इतिसर्गादावुक्तं। अनन्तरंकुशलवोत्पत्तिरितिसूचितं। एतज्ज्ञात्वेववाल्मीक्याश्रमे सीतात्यक्तारामेण ॥ ५ ॥ वेदेषु ऋग्यजुःसामाथर्वणलक्षणेषु चतुर्षुविषये मेधाविनौ मेधाधारणक्षमाबुद्धिः ''मेधाधीर्धारणक्षमा'' इतियादवः। तद्वन्तौ ''अ-

तिल० सहोत्तरमित्यत्र उत्तरपदार्थस्य स भविष्यमितिसविशेषणत्वेपि आर्षःसमासः। भविष्यंचसीताविसर्जनमारभ्यैवलेके। तस्याभूप्रवेशोत्तरकालिकमित्यपरे। प्रयुञ्जीयादितिच्छान्दसं। वि० भविष्येणसहितंयदुत्तरं तेनसहितं ॥ ३ ॥ तिल० अगृह्णीतामितिच्छान्दसं। कुशीलवौ कुशलवौ। कुशशब्दस्यकुशीभावःपृषोदरादित्वात् ॥ ४ ॥ तनि० तुशब्देनइतरवैलक्षण्यमुक्तं। वेदेषुपरिनिष्ठितौ एतेनस्वरानुगुणार्थज्ञानवत्त्वंसामगानवेदित्वं तदादरेणैवगान्धर्वशास्त्राभ्यासश्चावगम्यते। वेदोपबृंहणंवेदार्थव्यक्तीकरणं। तिल० उपबृंहणं वेदस्यतत्तदर्थेतात्पर्यग्रहणं। तद्रूपायार्थायप्रयोजनाय। अनेनश्रुतितात्पर्यविषयीभूतार्थप्रतिपादकतयाप्रामाण्यमस्योपादेयत्वंचसूचितं ॥ शिरो० प्रभुः दुर्बोधवस्तुबोधनसमर्थः ॥ ६ ॥

[पा०] १ घ. ङ. झ. कृत्वातु. २ झ. सभविष्यसहोत्तरं. ३ झ. अगृह्णीतां.

काव्यं रामायणं कृत्स्नं सीतायाश्चरितं महत् ॥ पौलस्त्यवधमित्येवं चकार चरितव्रतः ॥ ७ ॥

स्वायामेधास्रजोविनिः ''इतिमत्वर्थीयोविनिप्रत्ययः । अनेनाक्षरराशिग्रहणफलमध्ययनमुक्तं । परितोनिष्ठा-परिनिष्ठा साङ्गाध्ययनं साऽनयोःसंजातेतिपरिनिष्ठि-तौ । तारकादित्वादितच् । अनेनविशेषणद्वयेनाधीत-साङ्गवेदत्वादापातप्रतिपन्नवेदार्थत्वाच्च तदुपबृंहणापे-क्षित्वमुक्तं । तौ कुशलवौ । प्रभुः स्वतन्त्रोवाल्मीकिः । वेदोपबृंहणार्थाय वेदोपबृंहणरूपप्रयोजनाय वेदोपबृं-हणरूपस्वग्रन्थपठनायेत्यर्थः । उपबृंहणंनाम नानाशा-स्त्रानुसारेणनिर्णीतवेदार्थप्रतिपादकोग्रन्थः । अग्राह-यत अगृह्णात् । स्वार्थेणिच् ॥ ६ ॥ चरितव्रतः चरितव्रतत्वेननिरतिशयज्ञानोवाल्मीकिः । काव्यं क-वेःकर्म । कवयतेवर्णयतीतिकविः । कविवर्णनइत्य-स्माद्धातोरौणादिकइप्रत्ययः । लोकोत्तरवर्णननिपुणइ-त्यर्थः । यद्यपि ''इगन्ताच्चलघुपूर्वात् ''इतिअणाभ-वितव्यं तथापिब्राह्मणादित्वात्ष्यञ्इतिकाशिकाका-रः । यद्वा तस्मादेवधातोः'' ऋहलोर्ण्यत् ''इतिण्य-त्प्रत्ययेआदिवृद्धौचकाव्यमितिरूपं । दोषवर्जितं गुणा-लंकारसहितंशब्दार्थयुगलमित्यर्थः । तदुक्तंकाव्यप्रका-शे '' तददोषौशब्दार्थौसगुणावनलंकृतीपुनःक्वापि '' इति । वेदोपबृंहणत्वेपिकान्तासंमितत्वादस्यकाव्यत्व-व्यपदेशः । तथाहि । त्रिविधःसंदर्भः प्रभुसंमितः सुहृत्संमितः कान्तासंमितश्चेति । शब्दप्रधानोवेदः प्रभुसंमितः । अर्थप्रधानइतिहासादिः सुहृत्संमितः । व्यङ्ग्यप्रधानंकाव्यं कान्तासंमितं । महदितिकाव्यवि-शेषणं । तस्यमहत्त्वमुत्तमकाव्यत्वं । तदप्युक्तंतत्रैव ''इ-दमुत्तममतिशयिनिव्यङ्ग्येवाच्याद्ध्वनिर्बुधैःकथितः '' इति । यद्वा महत्काव्यं महाकाव्यं । तल्लक्षणमुक्तंद-ण्डिना । '' सर्गबन्धोमहाकाव्यमुच्यतेतस्यलक्षणं '' इत्यादिना । ननुकाव्यंनारंभणीयं काव्यालापांश्चवर्जये-दितिनिषेधादित्याशङ्क्याह—रामायणमिति । रमयती-तिरामः । '' रामोरमयतांवरः ''इत्यार्षनिर्वचनात् । यद्वा । रमन्तेस्मिन्सर्वेजना इतिरामः । '' अकर्तरि-चकारकेसंज्ञायां ''इति घञ् । सःअय्यतेप्रतिपाद्यते-ऽनेनेतिरामायणं । अयगतावितिधातोः कर्मणिल्युट् । '' पूर्वपदात्संज्ञायामगः '' इतिणत्वं । समस्तगुणसंप-न्नरामविषयत्वान्नास्यनिषिद्धत्वं किंतूपादेयत्वमेवेत्य-र्थः । तदुक्तंभामहेन । ''उपश्लोक्यस्यमाहात्म्यादुत्तमाः काव्यसंपदः ''इति । प्रतिपादितंचोद्भटेन '' गुणाल-ङ्कारचारुत्वयुक्तमप्यधिकोज्ज्वलं । काव्यमाश्रयसंप-त्त्यामेरुणेवामरद्रुमः ''इति । रुद्रटेनाप्युक्तं '' उदार-चरितनिबन्धनात्प्रबन्धप्रतिष्ठा '' इति । निषेधस्त्व-सत्काव्यविषयइतिभावः । इदंचरामचरितप्रतिपादन-मप्राधान्येन प्राधान्येनतु सीताचरितमेवप्रतिपाद्यत-इत्याह । कृत्स्नंसीतायाश्चरितमिति कृत्स्नंरामायणंसी-ताचरितपरं । अतएवोक्तं श्रीगुणरत्नकोशे '' श्रीमद्रा-मायणमपिपरंप्राणितित्वच्चरित्रे ''इति । आभाणकश्च । '' प्रातर्द्यूतप्रसङ्गेनमध्याह्नेस्त्रीप्रसङ्गतः । रात्रौचोरप्र-सङ्गेनकालोगच्छतिधीमतां'' इति । ''उपायपुरुषका-रयोर्मध्येउपायस्वरूपंभारतेदर्शितं । पुरुषकारस्वरूपं श्रीरामायण '' इतिरहस्यपदवी । अतएव '' कृपावा-नविकत्थनः ''इत्याद्युक्तलक्षणधीरोदात्तरूपोरामः कु-शलवाभ्यांरामायणंश्रुतवान् । रामायणस्यरामैकपर-त्वेस्वेनैवसदसिश्रवणंनसंगच्छते सीतापरत्वेतुसंगच्छ-ते । विरहिणः कामिनीकथाचरितश्रवणस्यस्वाभा-व्यात् । एवंव्यञ्जनावृत्त्यासीतारामयोःप्रतिपादनमु-क्त्वाशब्दवृत्त्यासिद्धमितिवृत्तमाह—पौलस्त्येति । पु-

ति० कृत्स्नंसीतायाश्चरितमितिसीतायाःप्रबन्धनायिकात्वमुक्तं । तस्यैवोपपादकं रामायणमिति । कृत्स्नस्यसीताचरितत्वे-पिरामायणव्यपदेशः रामचरितस्यतदुपयुक्तार्थत्वज्ञापनार्थः । रमायाइदंचरितंरामं तस्यायनमितिवाव्युत्पत्तिः । रामशब्दस्यल-क्ष्मीपत्यादिशब्दवत्स्त्रीपुरस्सरनिर्देशःप्रबन्धस्यलक्ष्मीप्राधान्यज्ञापनार्थः । तेनसीतायाश्चरितमितिसुश्लिष्टं । हारिद्रमाक्षिकादिश-ब्दवदणप्रत्ययोपपत्तिर्द्रष्टव्या । ''हारिद्रभङ्गायवितीर्णभङ्ग'' इतिश्रीहर्षः । महत् नारायणकथापेक्षयामहत् । सापराधेष्वपिरक्षण-प्रवणत्वप्रतिपादनान्महत्त्वं । ''मातर्मैथिलिराक्षसीस्त्वयितदैवार्द्रापराधास्त्वयारक्षन्त्यापवनात्मजाल्लघुतरारामस्यगोष्ठीकृता । काकं तंचविभीषणंशरणमित्युक्तिक्षमौरक्षतःसानःसान्द्रमहागसःसुखयतुक्षान्तिस्तवाकस्मिकी'' इत्यभियुक्तोक्तेः । अनेनशरणागतिम-न्त्रोपबृंहणत्वमस्यप्रबन्धस्यव्यञ्जितम् । अष्टाक्षरोपबृंहकश्रीभागवतादिषुहिभगवत्प्राधान्यं । अतएव ''नारायणकथामिमां'' इति तत्रोक्तं । शिरो० चरितव्रतः चरितं आचरितं व्रतं रघुनाथोपासनं येन स मुनिः । कृत्स्नं कृतां शुकृतिनां स्नः स्नानं सादरावलोक-नादि यस्मिन् सुकृद्भिरादृतमित्यर्थः ॥ ७ ॥

[पा०] १ क. ङ. झ. त्वेवं.

पाठ्ये गेये च मधुरं प्रमाणैस्त्रिभिरन्वितम् ॥ जातिभिः सप्तभिर्[1]बद्धं तन्त्रीलयसमन्वितम् ॥ ८ ॥
रसैः शृङ्गारका[2]रुण्यहास्यवीरभयानकैः ॥ रौद्रादिभिश्च संयुक्तं काव्यमेतदगायताम् ॥ ९ ॥

लस्त्यस्यगोत्रापत्यं पौलस्त्यः । गर्गादित्वाद्यञ् । तस्य वधः । वधस्यफलत्वात्तेनव्यपदेशः । पौलस्त्यवधमधिकृत्यकृतोग्रन्थः पौलस्त्यवधः "अधिकृत्यकृतेग्रन्थे" इत्यण् । "लुबाख्यायिकाभ्यःप्रत्ययस्यबहुलं" इतितस्य लुप् । यद्वा अणिपुनरादिवृद्धौतदेवरूपं । वधप्रधानत्वादितिवृत्तस्यफलेनव्यपदेशः । तथाहि । पञ्चकाव्यप्रतिपाद्यानि । तदुक्तं "बीजबिन्दुपताकाख्याःप्रकरीकार्यमित्यपि । अर्थप्रकृतयःपञ्चपञ्चावस्थासमन्विताः" इति । "आरंभयत्नप्राप्त्याशानियताप्तिःफलागमः" इतिपञ्चावस्थाः । तत्र "स्वल्पोद्दिष्टःकार्यहेतुर्बीजंविस्तार्यतेतथा" । तच्चबालकाण्डोक्तंविष्णववतरणसीतापरिणयादि । "वस्तुनःसतिविच्छेदेबिन्दुरच्छेदकारणं" इति । यथाऽयोध्याकाण्डे अभिषेकवृत्तान्तेन रावणवधरूपकार्यविच्छेदेप्राप्तेवनवासकरणमच्छेदकारणं । "यदन्तरानुवृत्तंस्यात्सापताकेतिकीर्त्यते" । यथासुग्रीववृत्तान्तः । कथान्तरप्रसङ्गेनप्रकरीस्यात्प्रदेशभाक् । यथाविभीषणादिवृत्तान्तः । "समग्रफलसंपत्तिःफलयोगोयथोचितः" । यथारावणवधः । एवंफलत्वात्पौलस्त्यवधमितिनिर्देशः । इत्येवेत्यस्यायमर्थः पौलस्त्यवधव्याजेनाप्रधानरामचरितंप्रधानसीताचरितं कृतवानिति । यच्चकारतद्ग्राहयामासेतियोजना उत्तरश्लोकेऽगायतामित्यनुवादात् ॥ ७ ॥ यथोपदेशमगायतामित्याह—पाठ्ये इत्यादिश्लोकद्वयेन । पाठ्यं पाठः भावेण्यत् । केवलोच्चारणविशेषः । तदुक्तंभरतेन "षडलङ्कारसंयुक्तंकलाकालसमन्वितं । यत्पठ्यतेनाटकादौतत्पाठ्यमभिधीयते" इति । गेयं स्वरविशेषसमन्वितंगानं । भावेयत् । तत्रोभयत्र मधुरं श्राव्यं । लोकेकानिचित्पद्यानिपाठदशायांमधुराणि नगानदशायां अपराणिपुनर्गानदशायामेव नपाठदशायां इदंतूभयत्रापीत्यर्थः । इतःपरंत्रीणिक्रियाविशेषणानि । त्रिभिःप्रमाणैः गानध्वनिपरिच्छेदकैः त्र्यश्रचतुरश्रमिश्रसंज्ञकैः द्रुतमध्यविलंबितैर्वा । अन्वितं विशिष्टं । सप्तभिर्जातिभिर्बद्धं शुद्धविकृतसंकीर्णादिष्वष्टादशसुजातिषुप्रधानभूताभिःसप्तभिर्बद्धं । तदुक्तंशाण्डिल्येन "सर्वंगीतसमाधारोजातिरित्यभिधीयते । षाड्जीचैवाथनैषादीधैवतीपाञ्चमीतथा । माध्यमीचैवगान्धारीसप्तमीत्वार्षभीमता" इति । तन्त्रीलयसमन्वितं । तन्त्रीशब्देनतन्त्रीयुक्तवीणालक्ष्यते । लयशब्देनतालवेणुमृदङ्गादीनामेककालविरामउच्यते । ताभ्यांसमन्वितम् ॥ ८ ॥ पुनःकाव्यविशेषणमाह—रसैरिति । आदिशब्देनबीभत्साद्भुतशान्तागृह्यन्ते । रसोनाम स्थायिभावरूपचित्तवृत्त्यभिव्यक्तिः । स्थायिभावश्चनवविधः । तदुक्तं "रतिर्हासश्चशोकश्चक्रोधोत्साहौभयंतथा । जुगुप्साविस्मयशमाःस्थायिभावाःप्रकीर्तिताः" इति । तदभिव्यक्तिश्चविभावादिभिः । तदुक्तं "विभावैरनुभावैश्च सात्विकैर्व्यभिचारिभिः । आनीयमानःस्वादुत्वंस्थायीभावोरसःस्मृतः" इति । विभावादिस्वरूपंसंग्रहेणोक्तम् । "कारणान्यथकार्याणिसहकारीणियानिच । रत्यादेःस्थायिनोलोकेतानिचेन्नाट्यकाव्ययोः । विभावाअनुभावाश्चकथ्यन्तेव्यभिचारिणः । व्यक्तःशतैर्विभावाद्यैःस्थायीभावोरसःस्मृतः" इति । तत्र शृङ्गारो द्विविधः संभोगोविप्रलंभश्चेति । "संयुक्तयोस्तुसंभोगोविप्रलंभोवियुक्तयोः" इत्युक्तेः । अस्यशृङ्गारादिसर्वरससंयुक्तत्वंप्रदर्श्यते । तत्र "रामस्तुसीतयासार्धं" इत्यारभ्यसीतापहरणवृत्तान्तपर्यन्तेनसंभोगोदर्शितः । ततःपरेणविप्रलंभः । विकृताचारवाक्याङ्गविकारवेषैर्धूर्तप्रलापैश्चहास्यरसोव्यज्यते । सच शूर्पणखादिवृत्तान्तेन सुगमः । इष्टवियोगादनिष्टसंबन्धाद्वाकरुणः । सचदशरथादिवृत्तान्तेन । व्यवसायाऽविषादाऽसंमोहादिभिर्वीरः । यथालक्ष्मणादिवृत्तान्ते । पाटनताडनादिभीरौद्रः । यथारावणादिवृत्तान्ते । विकृतक्रूरदर्शनादिभिर्भयानकः । यथामारीचवृत्तान्ते । कुत्सितदर्शनादिभिर्बीभत्सः । यथाविराधकबन्धादिवृत्तान्ते । विचित्रशिल्पवाक्यादिभिरद्भुतः । यथारामरावणयुद्धादिषु । शान्तरसः श्रमणादिवृत्तान्तादौ । अलंविस्तरेण । अत्रकेचित् "शोकःश्लोकत्वमागतः" इत्युक्त्याऽस्मिन्प्रबन्धेशोकरसएवप्राधान्येनोच्यते अन्ये तदङ्गतयेत्याहुः । अन्येतु वीरएवप्रधानभूतः । पौल-

ती०—पाठ्येगेयेचेत्यारभ्य रामदेहात्तथापराविवन्तंकुलकं ॥ ८ ॥

[पा०] १ घ. ङ. झ. भिर्युक्तं. २ ङ. झ. करुण.

तौ तु गान्धर्वतत्त्वज्ञौ मूर्छनास्थानकोविदौ ॥ भ्रातरौ स्वरसंपन्नौ गन्धर्वाविव रूपिणौ ॥ १० ॥
रूपलक्षणसंपन्नौ मधुरस्वरभाषिणौ ॥ बिंबादिवोत्थितौ बिंबौ रामदेहात्तथाऽपरौ ॥ ११ ॥
तौ राजपुत्रौ कार्त्स्न्येन धर्म्यमाख्यानमुत्तमम् ॥ वाचोविधेयं तत्सर्वं कृत्वा काव्यमनिन्दितौ ॥१२॥
ऋषीणां च द्विजातीनां साधूनां च समागमे ॥ यथोपदेशं तत्त्वज्ञौ जगतुस्तौ समाहितौ ॥
महात्मानौ महाभागौ सर्वलक्षणलक्षितौ ॥ १३ ॥

स्त्यवधइतिकाव्यनामकरणादित्याहुः । वयंतुब्रूमः शृङ्गारएवप्रधानरसः "सीतायाश्चरितंमहत्" इत्युक्तेः । तथोक्तं "एकोरसोभवेदङ्गीवीरश्शृङ्गारयोर्द्वयोः । अङ्गान्यन्येरसाःसर्वेतस्यनिर्वहणोद्यताः" इति ॥ ९ ॥ अथकुशलवयोर्गानसामर्थ्यमाह—तौत्वित्यादिश्लोकद्वयेन । अस्यागायतामितिपूर्वेणसंबन्धः । गान्धर्वं गानशास्त्रम् "गान्धर्वंगानशासनं" इतिवैजयन्ती । तस्यतत्त्वंतात्पर्यार्थः । तत्जानीतइतिगान्धर्वतत्त्वज्ञौ । मूर्छना वीणादिवादनं । "वादनेमूर्छनानना" इति वैजयन्ती । स्थानानि सन्द्रमध्यताररूपस्वरत्रयोत्पत्तिस्थानानि । यथोक्तंशाण्डिल्येन "यदूर्ध्वंहृदयग्रन्थेः कपालफलकादधः । प्राणसंचरणस्थानंस्थानमित्यभिधीयते । उरःकण्ठशिरश्चेतितत्स्वरास्त्रिविधाःस्मृताः । मन्द्रंमध्यंचतारंचनामतेषांयथाक्रमम्" इति । तेषुकोविदौ तद्विषयसमीचीनज्ञानयुक्तौ । एतेन गानशास्त्रज्ञानतदनुगुणवीणादिवादनतदनुगुणोच्चारणनिपुणावितिदर्शितं । भ्रातरावित्यनेन श्राव्यताहेतुसमस्वरत्वमुक्तं । स्वरसंपन्नौ शारीरयुक्तौ । अतएव रूपिणौ मनुष्यवेषधारिणौ । गन्धर्वाविवस्थितौ । रूपलक्षणसंपन्नौ नाटकलक्षणज्ञौ । गत्यर्थाज्ञानार्थाः । "रूपंस्वभावेशुक्लादौसौन्दर्येनाटकेपशौ" इतिभास्करः । गानकालिकाभिनयप्रकारज्ञावित्यर्थः । मधुरस्वरंयथाभवतितथाभाषितुंशीलमनयोरिति मधुरस्वरभाषिणौ । ताच्छील्येणिनिः । केवलभाषणकालेपिमधुरस्वरौ किमुतगानकालइतिभावः । उक्तसकलगुणसंपत्तिमूलंरामपुत्रत्वमाह—बिंबादिति । रामदेहरूपाद्बिंबात् तथा उत्थितौ उद्भूतौ । बिंबौ प्रतिबिंबाविवस्थितौ । यद्वा प्रतिमानिर्माणार्थंचातुर्येणनिर्मिताप्रतिकृतिर्बिंबः रामदेहाख्यात्तस्मात्तथाउत्थितौउत्कीर्णौ । अपरौ बिंबाविवस्थितौ । "प्रतिबिंबेतत्कृतौचप्रतिकृत्यांचमण्डले । लाञ्छनेपिचबिंबोस्त्री"इतिभास्करः । एवंभूतौकुशलवावेतत्काव्यमगायतामितिसंबन्धः ॥ १० ॥ ११ ॥ नकेवलंतस्याध्ययनं धारणंप्रकाशनंचकृतमित्याह—तावित्यादि । सार्धश्लोकद्वयमेकान्वयं । क्रियाभेदात्तच्छब्दावृत्तिः । यद्वा राजपुत्रौसन्तौ । तौ मुनिपुत्रौ मुनिपुत्रवेषधरावित्यर्थः । अनिन्दितौ यथोपदेशंगानेनिन्दानर्हौ । यथोपदेशं गुरूपदेशमनतिक्रम्य तत्त्वज्ञौ पाठशुद्धिज्ञौ । समाहितौ सावधानौ । कुत्राप्यंशेविस्मृतिरहितावित्यर्थः । महात्मानौ महाबुद्धी । महाभागौ एतादृशगुणहेतुभूतमहाभाग्यौ । "भागाभाग्यांशतुल्यांशाः" इतिवैजयन्ती । सर्वलक्षणलक्षितौ लक्षितसर्वलक्षणौ ज्ञातसर्वशब्दलक्षणावित्यर्थः । तौ कुशलवौ । कार्त्स्न्येन धर्म्यं धर्मादनपेतं । उत्तममाख्यानं पुरावृत्तकथनरूपं । तद्रामायणाख्यंसर्वंकाव्यं । वाचोविधेयं आवृत्तिबाहुल्येनवाग्वशवर्ति कृत्वा । ऋषीणांच साधूनां द्विजातीनांच समागमे सदसि ।

तिल० स्थानं च मूर्छनाचतयोस्समाहारः स्थानमूर्छनं तत्रकोविदौ ॥ तीर्था० गान्धर्वतत्त्वज्ञौ गान्धर्वंनाम पदावस्थिततालपरिच्छेदयुक्तावधानेन प्रयुक्तषड्जादिस्वरसमुच्चयः । तदाह दत्तिलः । "पदस्थस्वरसंघातस्तालेनमुमितस्तथा । प्रयुक्तश्चावधानेनगान्धर्वमभिधीयते" इति । मूर्छनास्थानकोविदाविति । मूर्छनाषड्जादिस्वरसंपूर्णता । तदुक्तंशाण्डिल्येन "यत्रैवस्युःस्वराःपूर्णा मूर्च्छनासेत्युदाहृता ।" इति ॥ १० ॥ तिल० बिम्बात्सूर्यादेरुत्थितौबिंबाविवप्रतिबिम्बाविव तथारामदेहादुत्थितौ परौरामदेहाविलक्ष्यैः ॥ ११ ॥ तिल० लक्ष्यलक्षणंतिपाठेसामुद्रिकविद्भिः लक्ष्यंपरीक्ष्यंलक्षणंसुलक्षणं तेन लक्षितौयुतौ । अतएवमहात्मानौ महाभागौ च । ऋषीणांद्विजातीनामितिगोबलीवर्दन्यायेन । साधूनांद्विजेतराणामपि यथोपदेशं जगतुः शिरो० तौ अमृतवदास्वादनीयगानविशिष्टौ । "तश्चोरामृतपुच्छेषु" इति मेदिनी ॥ १३ ॥

[पा०] १ झ. स्थानमूर्छनकोविदौ. २ ञ. न्नावश्विनाविव. ३ क. घ. वोद्धृतौ. ४ क. च. छ. धर्माख्यानमनुत्तमम्. ५ झ. स्सुसमाहितौ.

तौ कदाचित्समेतानामृषीणां भावितात्मनाम् ॥ आसीनानां समीपस्थाविदं काव्यमगायताम् ॥१४॥
तच्छ्रुत्वा मुनयः सर्वे बाष्पपर्याकुलेक्षणाः ॥ साधुसाध्विति तावूचुः परं विस्मयमागताः ॥ १५ ॥
ते प्रीतमनसः सर्वे मुनयो धर्मवत्सलाः ॥ प्रशशंसुः प्रशस्तव्यौ गायमानौ कुशीलवौ ॥ १६ ॥
अहो गीतस्य माधुर्यं श्लोकानां च विशेषतः ॥ चिरनिर्वृत्तमप्येतत्प्रत्यक्षमिव दर्शितम् ॥ १७ ॥
प्रविश्य तावुभौ सुष्ठु तदा भावमगायताम् ॥ सहितौ मधुरं रक्तं संपन्नं स्वरसंपदा ॥ १८ ॥
एवं प्रशस्यमानौ तौ तपश्श्लाघ्यैर्महात्मभिः ॥ संरक्ततरमत्यर्थं मधुरं तावगायताम् ॥ १९ ॥
प्रीतः कश्चिन्मुनिस्ताभ्यां संस्थितः कलशं ददौ ॥ प्रसन्नो वल्कले कश्चिद्ददौ ताभ्यां महायशाः ॥२०॥
[अन्यः कृष्णाजिनं प्रादाद्यज्ञसूत्रमथापरः ॥ कश्चित्कमण्डलुं प्रादान्मौञ्जीमन्यो महामुनिः ॥२१॥
बृसीमन्यस्तदा प्रादात्कौपीनमपरो मुनिः ॥ ताभ्यां ददौ तदा हृष्टः कुठारमपरो मुनिः ॥ २२ ॥
काषायमपरो वस्त्रं चीरमन्यो ददौ मुनिः ॥ जटाबन्धनमन्यस्तु काष्ठरज्जुं मुदाऽन्वितः ॥ २३ ॥
यज्ञभाण्डमृषिः कश्चित्काष्ठभारं तथाऽपरः ॥ औदुंबरीं बृसीमन्ये स्वस्ति केचित्तदाऽवदन् ॥ २४ ॥
आयुष्यमपरे प्राहुर्मुदा तत्र महर्षयः ॥ ददुश्चैव वरान्सर्वे मुनयः सत्यवादिनः ॥ २५ ॥]
आश्चर्यमिदमाख्यानं मुनिना संप्रकीर्तितम् ॥ परं कवीनामाधारं समाप्तं च यथाक्रमम् ॥ २६ ॥

जगतुः ॥ १२ ॥ १३ ॥ अथतस्यकाव्यस्यमहाजनपरिगृहीतत्वंदर्शयितुमाह—तावित्यादि । तौ कुशीलवौ । कदाचित् रामाश्वमेधकाले । भावितात्मनां निश्चितधियां । समेतानां अश्वमेधेसंमिलितानां । आसीनानां क्रियाकलापावसानेसुखमासीनानां । ऋषीणां । समीपस्थौसन्तौ । इदंकाव्यं अगायताम् ॥ १४ ॥ सामान्यतः काव्यप्रशंसामाह—तदिति । तत् काव्यं । श्रुत्वा । परं विस्मयं आगताः बाष्पपर्याकुलेक्षणाः सर्वेमुनयः । तौ साधुसाध्विति । ऊचुः प्रशशंसुरित्यर्थः ॥ १५ ॥ गातृप्रशंसामाह—तइति । धर्मवत्सलाः निर्मत्सराइत्यर्थः । तेसर्वेमुनयः प्रीतमनसःसन्तः । गायमानौ अतएवप्रशस्तव्यौ प्रशंसितुमर्हौ । कुशलवौ प्रशशंसुः ॥१६॥ काव्यप्रशंसाप्रकारमाह—अहोइति । गीतस्य गानस्य । माधुर्यं अहो आश्चर्यं । श्लोकानांतु माधुर्यं विशेषतः अहोआश्चर्यं । गानतोपिश्लोकमाधुर्यं अतिशयितमित्यर्थः । तमेवविशेषमाह—चिरेति । एतत् काव्यप्रतिपाद्यंकथाशरीरं । चिरनिर्वृत्तमपि बहुकालान्निष्पन्नमपि । प्रत्यक्षमिव प्रत्यक्षतयानुभूयमानमिव । दर्शितं अनेनकाव्येनबोधितं । पाकविशेषात्सद्यःसर्वार्थविशदतरंअवगमयतीदंकाव्यमित्यर्थः ॥ १७ ॥ गातृप्रशंसाप्रकारमाह—प्रविश्येति । सहितौ समलयादियुक्तावित्यर्थः । तावुभौ कुशीलवौ । तदा मुनिजनश्रवणकाले । भावं सुष्ठुप्रविश्य रतिहासादिभावोयथाप्रकाशितोभवति तथावगाह्येत्यर्थः । स्वरसंपदा षड्जादिस्वरसंपदा । संपन्नं । अतएवमधुरंरमणीयं । रक्तं रागयुक्तं च यथाभवतितथा । अगायताम् ॥१८॥ प्रशंसाजनितोत्साहौपुनरतिशयेनागायतामित्याह—एवमिति । तपश्श्लाघ्यैः श्लाघ्यतपस्कैः । अनसूयकैरितियावत् । महात्मभिः महाबुद्धिभिः । विशेषज्ञैरितिभावः । तादृशैरेवमुक्तरीत्या । प्रशस्यमानौ । श्लाघ्यमानौ तौ । संरक्ततरं अतिशयेनसमीचीनरागयुक्तं । अत्यर्थं भृशं । मधुरंच यथाभवतितथा तावगायतां । क्रियाभेदात्तच्छब्दावृत्तिः ॥ १९ ॥ अथप्रीतिकारितयथोचितपारितोपिकप्रदानमाह—प्रीतइति । संस्थितः उत्थितः । "संस्थास्थितौव्यवस्थायां" इतिभास्करः । कलशं जलाहरणपात्रं प्रीत्यतिशयेनोत्थाय ददावित्यर्थः । महायशाः गानशास्त्रविषयकीर्तिमान् गीतितारतम्यज्ञइत्यर्थः ॥ २० ॥ ॥२१॥२२॥२३ ॥ २४ ॥ २५ ॥ एवंमुनिजनप्रशंसा-

शिरो० भावितात्मनां परिशीलितपरमात्मनां ॥ १४ ॥ तीर्था० तत् गानम् ॥ १५ ॥ तिल० प्रशस्तव्याविति इडभावनलोपौ छान्दसौ । शिरो० धर्मवत्सलाः धर्माः धर्मस्वरूपाः वत्सलाः वात्सल्यरसवन्तः ॥ १६ ॥ तीर्था० भावंप्रविश्यसुष्ठ्वगायतामितिसंबन्धः । भावपुरस्कारेण काव्यकर्तुरभिप्रायंहृदिनिधायशृङ्गारादिरसाविर्भावोयथाभवतितथा अगायतामित्यर्थः । मधुरं पाठतोगानतश्च ॥ १८ ॥ शिरो० तपश्श्लाघ्यैः ज्ञानजनितप्रशंसाविशिष्टैः ॥ १९ ॥

[पा०] १ ङ. च. छ. मध्येसभंसमीपस्थौ. २ ग. गायन्तौतौ कुशीलवौ. ३ क. ख. ङ. चिरनिर्वृत्त. ४ ङ. झ. तथा. ५ क. ग. ङ. च. छ. ज. झ. अन्यःकृष्णाजिनमित्यादिपञ्चश्लोकाः. ६ ग. ज. औदुंबरींबृसीमन्योजपमालांतथाऽपरः.

अभिगीतमिदं गीतं सर्वगीतेषु कोविदौ ॥ आयुष्यं पुष्टिजनकं सर्वश्रुतिमनोहरम् ॥ २७ ॥
प्रशस्यमानौ सर्वत्र कदाचित्तत्र गायकौ ॥ रथ्यासु राजमार्गेषु ददर्श भरताग्रजः ॥ २८ ॥
स्ववेश्म चानीय ततो भ्रातरौ स कुशीलवौ ॥ पूजयामास पूजार्हौ रामः शत्रुनिबर्हणः ॥ २९ ॥
आसीनः काञ्चने दिव्ये स च सिंहासने प्रभुः ॥ उपोपविष्टः सचिवैर्भ्रातृभिश्च समन्वितः ॥ ३० ॥
दृष्ट्वा तु रूपसंपन्नौ तावुभौ नियतस्तदा ॥ उवाच लक्ष्मणं रामः शत्रुघ्नं भरतं तथा ॥ ३१ ॥
श्रूयतामिदमाख्यानमनयोर्देववर्चसोः ॥ विचित्रार्थपदं सम्यग्गायिनौ तावचोदयत् ॥ ३२ ॥
तौ चापि मधुरं रक्तं स्वञ्चितायतनिःस्वनम् ॥ तन्त्रीलयवदत्यर्थं विश्रुतार्थमगायताम् ॥ ३३ ॥
ह्लादयत्सर्वगात्राणि मनांसि हृदयानि च ॥ श्रोत्राश्रयसुखं गेयं तद्बभौ जनसंसदि ॥ ३४ ॥

मुक्त्वातदितरसकलजनप्रशंसामाह—आश्चर्यमित्यादिना। श्लोकत्रयमेकंवाक्यं । आख्यानं प्रबन्धविशेषः। "कथात्वाख्यायिकाख्यानं" इतियादवः। इतिहासइत्यर्थः । मुनिना वाल्मीकिना । संप्रकीर्तितं सम्यक्लक्षणवत्तयाप्रकर्षेणविस्तरेणकीर्तितं कथितं । कवीनांपरं आधारं। "काव्यंकाव्यस्यलक्षणं" इत्युक्तरीत्याकवीनां काव्यनिर्माणमूलमित्यर्थः । यथाक्रमं क्रममनतिक्रम्य समाप्तं मध्ये अविच्छिन्नमित्यर्थः । यथाकृतमितिपाठे यथाकर्तुमारब्धं तथासमाप्तमित्यर्थः । इदमाश्चर्यं आश्चर्यावहमित्यर्थः ॥ २६ ॥ प्रबन्धंप्रशस्यगातारौ प्रशंसति—अभिगीतमिति। हेसर्वगीतेषुकोविदौ समर्थौ । युवाभ्यां । आयुष्यं आयुर्वर्धकं । पुष्टिजनकं सत्यपिआयुषिकार्श्येतस्याकिंचित्करत्वात्पुष्टिकरं । सर्वाभिःश्रुतिभिः स्वरारंभकावयवैर्मनोहरं । तदुक्तं "प्रथमश्रवणाच्छब्दःश्रूयतेयःस्वमात्रतः । साश्रुतिः संपरिज्ञेयास्वरावयवलक्षणा"इति । इदंगीतं अभिगीतं शोभनंगीतं । अभिःपूजायां । यद्वा इदंगीतं सर्वगीतेषुअभिगीतमित्यन्वयः ॥ २७ ॥ प्रशस्यमानाविति । अस्यादावितिशब्दोऽध्याहार्यः। तत्र यज्ञवाटे । रथ्यासुराजमार्गेषुच सर्वत्रेत्थंप्रशस्यमानौतौ । कदाचित् । भरताग्रजः रामः । ददर्श भरतमुखेनददर्शेत्यर्थः ॥ २८ ॥ ततः दर्शनानन्तरं शत्रुनिबर्हणोरामः । पूजार्हौ स्वप्रबन्धगातृत्वेनश्लाघार्हौ । भ्रातरौकुशीलवौ । तुल्यवयोरूपादिमत्त्वेनाश्चर्यकरौ । स्ववेश्म स्वशालागृहं आनीय । नयतिर्द्विकर्मकः । पूजयामास श्लाघयामास ॥ २९ ॥ अथास्यप्रबन्धस्यप्रबन्धनायकभूतमहापुरुषपरिग्रहमाह—आसीनइत्यादिना । द्वयोरेकान्वयः । प्रभुः स्वामी । तदनुरूपतया काञ्चने सौवर्णे । दिव्ये स्वर्गाद्दशरथेनानीते । सिंहासने आसीनः सचिवैर्मन्त्रिभिर्भ्रातृभिश्च उपोपविष्टः परिवृतइत्यर्थः । "प्रसमुपोदःपादपूरणे" इतिद्विरुक्तिः । परंशत्रुंतापयतीतिपरंतपः । "द्विषत्परयोस्तापेः" इति खच् "खचिह्रस्वः" इत्युपधाह्रस्वः । "अरुर्द्विषदजन्तस्यमुम्" इतिमुमागमः । अनेनव्यासङ्गरहितत्वंसूचितं । नियतः अश्वमेधेदीक्षितः । स रामः । रूपसंपन्नौ भ्रातरौ दृष्ट्वा। लक्ष्मणादीनुवाच ॥ ३० ॥ ३१ ॥ देववर्चसोः देवतुल्यतेजसोः । रूपसंपत्तिरपि गीतिरस्यतासामग्रीतिभावः । अनयोः कुशीलवयोः संबन्धि । विचित्रार्थपदं इदमाख्यानं । श्रूयतां इत्युक्त्वेत्युपस्कार्यं । सम्यग्गायिनौ । अचोदयत् गानायप्रेरयामासेत्यर्थः ॥३२॥ सर्वाणिक्रियाविशेषणानि । मधुरं पाठतोगानतश्चमनोहरं । रक्तं रागवत् । स्वञ्चितः सुतरांपूजितः आयतोदीर्घः निस्वन आलापोयस्मिन् । तन्त्रीलयवत् तन्त्र्यारोपलयाभ्यांयुक्तं । अत्यर्थं भृशं । विश्रुतार्थं विस्पष्टार्थं ॥ ३३ ॥ सर्वगात्राणि सर्वावयवान् । हृदयानि गात्रान्तरवर्तीनिमनोधिष्ठानानि । मनांसिच ह्लादयत् सुखयत् । श्रोत्राश्रयसुखं श्रोत्रंकर्णशष्कुली तदाश्रयं श्रोत्रेन्द्रियं तत्सुखंतत्सुखकरं । तत् कुशलवकृतं । गेयं गानं । भावयत् । जनसंसदि सभायां । जनशब्दोमण्डपव्यावृत्त्यर्थः । बभौ प्रच-

तिल० अविगीतमितिपाठे अनवद्यं यथातथा गीतमित्यर्थः ॥ २७ ॥ तिल० "उपोपविष्टसचिवः" इति पाठे उपसमीपे उपविष्टाःसचिवायस्येत्यर्थः । "उपोपविष्टैः सचिवैः" इति पाठे समीपस्थैः मन्त्रिभिर्भ्रातृभिश्चसमन्वितइत्यर्थः ॥ ३० ॥ तीर्था० आत्मरूपसंपन्नौ आत्मसदृशौ । तिल० दृष्ट्वातुरूपसंपन्नावितिप्रचुरःपाठः ॥ ३१ ॥

[पा०] १ गायनौ. २ ग. ङ. उपोपविष्टैः. क. सुखोपविष्टः. ३ ज. दृष्ट्वात्म-. ४ घ—झ. पन्नौविनीतौभ्रातरावुभौ. ५ ज. ग्गायन्तौ समचोद–. ङ. झ. ग[illegible]यकौ सम–. ६ ज. व्यक्तं. ७ ख. ङ–. झ. स्वचित्तायत. ८ घ. श्रोतुः सुखकरं.

इमौ मुनी पार्थिवलक्षणान्वितौ कुशीलवौ चैव महातपस्विनौ ॥
ममापि तद्भूतिकरं प्रवक्ष्यते महानुभावं चरितं निबोधत ॥ ३५ ॥
ततस्तु तौ रामवचःप्रचोदितावगायतां मार्गविधानसंपदा ॥
स चापि रामः परिषद्गतः शनैर्बुभूषया सक्तमना बभूव ह ॥ ३६ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे चतुर्थः सर्गः ॥ ४ ॥

काशे अजृंभतेत्यर्थः ॥ ३४ ॥ उक्तमेवार्थंवृत्तान्तरेणसर्गान्तेसंगृह्णाति—इमावित्यादिश्लोकद्वयेन । इमौ मुनिवेपावपि पार्थिवलक्षणान्वितौ । कुशीलवावपि गायकावपि महातपस्विनौ महान्तौतपस्विनौ भवतः । तत् तस्मात् । ममापि प्रियाविरहक्लशस्यापि । भूतिकरं श्रेयस्करं धारकमित्यर्थः । महाननुभावोयस्यतत् महानुभावं । चरितं सीताचरित्रमित्यर्थः । प्रवक्ष्यते आभ्यांव्यक्तं पठिष्यते । तन्निबोधत तच्छृणुतेत्यर्थः । अत्रपौराणिकाः । वक्तारौमहात्मानौवक्ष्यमाणंचमच्चरितंमहानुभावं । अतस्तन्निबोधतेत्याहुः । एवंह्यात्मप्रशंसास्यात्साचनयुक्ता अयंहिरामोधीरोदात्तः तस्यचाविकत्थनइतिलक्षणं । तस्यचस्वविषयप्रबन्धश्रवणंमहानुभावत्वोक्तिश्चनकथमप्युपपन्नं । लोकेहिक्षुद्रोपिकश्चित्स्वविषयप्रबन्धश्रवणेलज्जते । अतोऽन्यथायोजयन्त्याचार्याः । नायंप्रबन्धोरामचरित्रपरः किंतुसीताचरित्रपरः "सीतायाश्चरितंमहत्" इतिपूर्वमुक्तत्वात् । "श्रीमद्रामायणमपिपरंप्राणितित्वच्चरित्रे" इत्यभियुक्तवचनात् श्रीप्रसङ्गइत्याभाणकश्च । तद्विषयस्तुप्रबन्धोरामेणश्राव्यएव । विरहिणोहिकान्ताचरित्रगाथाःशृण्वन्तिश्रावयन्तिच । अतएव ममापिभूतिकरमित्युक्तं । विरहिणोपिमेसत्ताप्रदमित्यर्थः । यद्वा "अप्रमेयंहितत्तेजो यस्यसाजनकात्मजा" इत्युक्तरीत्याममाप्यतिशयावहमित्यर्थः । महानुभावमित्यस्यचप्रणयिन्यसन्निधानदशायामपिधारकमित्यर्थः । यद्वा । महानुभावं । "लघुतरारामस्यगोष्ठीकृता" इत्युक्तरीत्यास्वविषयेनिरवधिकापराधकारिराक्षसीरक्षणेन स्वस्मादप्यतिशयितवैभवमित्यर्थः । यद्वा । "दोषोयद्यपितस्यस्यात्सतामेतदगर्हितं" इतिमयोक्तं । अनयातु नकश्चिन्नापराध्यति" इति । अतोमत्तोप्युत्कृष्टचरितमित्यर्थः । यद्वा । स्वचरणेनिगडंबद्ध्वादेवस्त्रीचरणनिगडविच्छेदकारितयामत्तोप्याश्रितरक्षणेऽतिशयितत्वरायुक्तमित्यर्थः । यद्वा पितृत्वप्रयुक्तहितपरतयामयिसापराधविषयेकलुषधियि मातृत्वप्रयुक्तवात्सल्येन मामपिक्षमापयन्त्याश्चरितत्वेन महानुभावमित्यर्थः ॥ ३५ ॥ ततः श्रोतृप्रोत्साहनानन्तरं । रामस्यवचसाप्रचोदितौ नतुचेष्टयेत्यादरातिशयोक्तिः । तौ कुशीलवौ । मार्गविधानसंपदा देशी मार्गश्चेतिद्वौगानप्रकारौ । तत्रमार्गः सार्वत्रिकः । देशीकाचित्कः । तयोर्मध्ये मार्गनिर्वाहसामग्र्या । अगायतां । स रामोपि । शनैः परिषद्गतः झटित्युत्थायगमनेपरिषदोप्युत्थानाद्रसभंगोभविष्यतीति मन्दंमन्दंसिंहासनादवतीर्य परिषदंप्राप्तः । "एकःस्वादुनभुञ्जीत"इतिन्यायादुन्नतसिंहासनावस्थानेनस्वात्मानमेकाकिनंमन्यमानःसभामध्यगतः । बुभूषया अनुबुभूषया श्रोत्रसुखानुभवेच्छयेत्यर्थः । यद्वा । बुभूषया भवितुमिच्छया कान्ताकथाश्रवणेनस्वसत्तालाभेच्छयेत्यर्थः । सक्तमनाः गानश्रवणासक्तचित्तः । बभूवह स्वशिष्योक्तप्रबन्धश्रवणेरामः स्वयमेवसादरंप्रसक्तइति मुनिस्तुष्यति । अत्रश्लोकद्वयेवंशस्थवृत्तं । "जतौतुवंशस्थमुदीरितं जरौ" इति लक्षणात् ॥ ३६ ॥ इति श्रीगोविन्दविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने चतुर्थःसर्गः ॥ ४ ॥

तनि० मुनीमननशीलौ । पृथिव्याःपतिःपार्थिवः । तस्य लक्षणानि असाधारणावयवसंस्थानविशेषाः तैरन्वितौ । कुशीलवौ गायकौ । इमौअतिबालौ । क्वमुनित्वं क्वराज्यार्हता क्वमहातपस्वित्वं क्वगायकत्वं क्वेमेगुणाः क्वातिबालाविमाविति विरोधालंकारध्वनिः । गायमानौ चापि महातपस्विनावित्याश्चर्यालंकारध्वनिश्च । तपस्विनौ कुशीलवावित्यनेन गानस्य वंशपरंपरागतत्वाभावेन तत्प्रयुक्ताहंकाराद्यभावः केवलेश्वरप्रसादसिद्धत्वंचव्यञ्जितम् । ममापिभूतिकरं उभयविभूतिनायकस्यापि भूतिकरं संपत्करं किमुतान्येषां । यद्वा तदभावेममापिसत्तानिर्वहतीत्यर्थः । महानुभावं महामहिमवत् ममापि महानुभावमिति "सोअङ्गवेदयदिवानवेद" इत्युक्तरीत्यादुर्विज्ञेयमहिमयुक्तमित्यर्थः ॥ ३५ ॥ **विषम०** प्राकृतावलंबिगानं देशी संस्कृतावलंबितु मार्गः । स्वयं श्रवणेचोत्तरोत्तरं लोकानामुपादेयत्वबुद्ध्या श्रवणेप्रवृत्तौतस्यस्थिरत्वंभवतीतितदाशयः ॥ ३६ ॥ **इति चतुर्थः सर्गः ॥ ४ ॥**

[पा०] १ ङ. ज. झ. प्रवक्ष्यते.

इदंच तपस्स्वाध्यायेत्यारभ्यसर्गचतुष्टयंमहत्परिग्रहसिद्धयेउक्तवैलक्षण्यत्रयप्रतिपादनपरत्वेनप्रबन्धोपोद्धातत्वात् श्रीरामायणान्तर्गतं कथाशरीरानुप्रविष्टप्रस्तावनाग्रन्थवत् । ननु रामायणनिर्माणानन्तरभाविनः कथाशरीरस्यास्य कथंतत्पूर्वभावइतिचेन्न । अनन्तरभावित्वेपित्रिकालज्ञेनमहर्षिणाप्रथमंतन्निर्माणसंभवात् । नन्वात्मप्रशंसापरमिदंसर्गत्रयंकथमृषिः स्वयमेषवक्तुमर्हतीतिचेन्न । अन्यापरिज्ञातस्यैतस्यवृत्तान्तस्यप्रेक्षावत्प्रवृत्त्यर्थमादाववश्यंवक्तव्यत्वात् । यद्वा । सर्गत्रयमिदंकेनचिद्वाल्मीकिशिष्येणरामायणनिर्वृत्त्यनन्तरंनिर्मायवैभवप्रकटनायसंगमितं । यथायाज्ञवल्क्यस्मृत्यादौ तथैवतत्रविज्ञानेश्वरेणव्याकृतं । नन्वेतस्यसर्गत्रयस्यरामायणादित्वेकुशलवाभ्यांएतद्गानेग्रथमंक्रियमाणेतौरामेणादावेवस्वपुत्रावितिपरिज्ञातौस्यातां । तथाच । तदैवसीतानयनापत्तिः । "बिंबादिवोत्थितौबिंबौरामदेहात्तथापरौ । तौराजपुत्रौ" इत्यादिनाहिरामपुत्रत्वमनयोःसूच्यते तस्मादिदमसंगतमितिचेन्न । सीतापुत्रत्वादेरत्राकथनात् । रामसादृश्यमात्रस्यराजपुत्रान्तरेष्वपिसंभवात् । अयंचप्रबन्धोवेदोपबृंहणरूपोवेदान्तार्थमुपबृंहयति । "प्रायेणपूर्वभागार्थोधर्मशास्त्रेणकथ्यते । इतिहासपुराणाभ्यांवेदान्तार्थःप्रकाश्यते" इति वचनात् । तत्र "यतोवाइमानिभूतानिजायन्तेयेनजातानिजीवन्तियत्प्रयन्त्यभिसंविशन्तितद्विजिज्ञासस्वतद्ब्रह्म" इति श्रुतं । तत्किंजगज्जन्मादिकारणंब्रह्मविष्णुरुतब्रह्मरुद्रादिष्वन्यतमइत्यपेक्षायांरामत्वेनावतीर्णोविष्णुरेववेदान्तवेद्यंपरब्रह्मेत्युच्यते । "उपक्रमोपसंहारावभ्यासोपूर्वताफलं । अर्थवादोपपत्तीचलिङ्गंतात्पर्यनिर्णये" इत्युक्तषड्विधतात्पर्यलिङ्गसंभवात् । तथाहि । उपक्रमेतावत् "कोन्वस्मिन्—"इत्यादिनावेदान्तोदितसकलगुणसंपन्नःकिंविष्णुरुतान्योब्रह्मादिष्वन्यतमइतिवाल्मीकिनापृष्टे "इक्ष्वाकुवंशप्रभवोरामः—" इत्यादिनारामत्वेनावतीर्णोविष्णुरेवेतिनारदेनोक्तं । उपसंहारेचचतुर्मुखःप्राह । "तवाहंपूर्वकेभावेपुत्रःपरपुरंजय । संक्षिप्यचपुरालोकान्माययास्वयमेवहि । महार्णवेशयानोप्सुमांत्वंपूर्वमजीजनः । पद्मेदिव्येर्कसंकाशेनाभ्यामुत्पाद्यमामपि । प्राजापत्यंत्वयाकर्ममयिसर्वंनिवेशितं" इत्यादिनासर्वजगत्कारणप्रजापतिजनकत्वेनसकलंजगत्कारणंब्रह्मविष्णुरेवेत्युक्तं । अभ्यासश्चतस्यैवदृश्यते बालकाण्डे । "एतस्मिन्नन्तरेविष्णुरुपजातोमहाद्युतिः । शङ्खचक्रगदापाणिःपीतवासाजगत्पतिः" इति जगत्कारणत्वमुक्तं । ततउत्तरत्रदेवाः । "त्वंगतिःपरमादेवसर्वेषांनःपरंतप"इत्याहुः । तेनपरत्वासाधारणं सर्वशरण्यत्वमुक्तं । ततउत्तरत्र । "ततोदेवर्षिगन्धर्वाःसरुद्राःसाप्सरोगणाः । स्तुतिभिर्दिव्यरूपाभिस्तुष्टुवुर्मधुसूदनं" इति सर्वस्तुत्यत्वमुक्तं । ततोविश्वामित्रः "अहंवेद्मिमहात्मानंरामंसत्यपराक्रमं । वसिष्ठश्चमहातेजायेचान्येतपसिस्थिताः" इति । "वेदाहमेतंपुरुषंमहान्तं तमेतंवेदानुवचनेनब्राह्मणाविविदिषन्तियज्ञेनदानेनतपसानाशकेन"इतिश्रुत्युक्तरीत्या महापुरुषत्वं तपोबलंविनातस्यदुर्ज्ञेयत्वंचाह । सीताविवाहेवसिष्ठोपि "अव्यक्तप्रभवोब्रह्माशाश्वतोनित्यअव्ययः । तस्मान्मरीचिःसंजज्ञेमरीचेःकाश्यपःसुतः" इति सर्वमूलकारणत्वंप्राचीकशत् । परशुरामोपि "अधिकंमेनिरेविष्णुंदेवाःसर्षिगणास्तदा" इतिसर्वाधिकत्वंनिदर्शितवान् । अयोध्याकाण्डे । "सहिदेवैरुदीर्णस्यरावणस्यवधार्थिभिः । अर्थितोमानुषेलोकेजज्ञेविष्णुःसनातनः" इति सनातनत्वमुक्तं। उत्तरत्र "आकाशप्रभवोब्रह्माशाश्वतोनित्यअव्ययः" इत्याकाशशब्देनस्वयंप्रकाशत्वं व्यापकत्वं चाह । आरण्यकाण्डे मारीचेन "अप्रमेयंहितत्तेजोयस्यसाजनकात्मजा" इतिपरिच्छेदातीतमहिमत्वमुक्तं । किष्किन्धाकाण्डेतारावचनं । "निवासवृक्षःसाधूनामापन्नानांपरागतिः । आर्तानांसंश्रयश्चैवयशसश्चैकभाजनं । ज्ञानविज्ञानसंपन्नोनिदेशेनिरतःपितुः । धातूनामिवशैलेन्द्रोगुणानामाकरोमहान्" इति । "त्वमप्रमेयश्चदुरासदश्चजितेन्द्रियश्चोत्तमधार्मिकश्च । अक्षय्यकीर्तिश्चविचक्षणश्चक्षितिक्षमावान्क्षतजोपमाक्ष" इतिच । अनेनज्ञानानन्दादिसमस्तकल्याणगुणाकरत्वमुक्तं । सुन्दरकाण्डे "ब्रह्मास्वयंभूश्चतुराननोवारुद्रस्त्रिनेत्रस्त्रिपुरान्तकोवा । इन्द्रोमहेन्द्रःसुरनायकोवात्रातुंनशक्तायुधिरामवध्यं" इतिसर्वसंहर्तृत्वंद्योतितं । उत्तरत्र । "किंवैष्णवंवाकपिरूपमेत्यरक्षोविनाशायपरंसुतेजः । अनन्तमव्यक्तमचिन्त्यरूपंस्वमाययासांप्रतमागतंवा । द्वितीयो वाकारोऽवधारणार्थः । अनेनानन्तरूपत्वमुक्तं । युद्धकाण्डे विष्णुरेवकथंजगत्कारणं अन्येषामपि "हिरण्यगर्भस्समवर्तताग्रे" "यदातमस्तन्नदिवानरात्रिर्नसन्नचासच्छिवएवकेवलः" । "इन्द्रोमायाभिःपुरुरूपईयते" इत्यादिनातत्त्वश्रवणादि-

त्याशङ्क्य तेभ्यःसर्वेभ्यःश्रेष्ठत्वप्रतिपादनाद्धिरण्यगर्भशिवेन्द्रादिशब्दाःसद्ब्रह्मात्मशब्दवद्विष्णुपराएवेत्याशयेनोच्यते । "व्यक्तमेषमहायोगीपरमात्मासनातनः । अनादिमध्यनिधनोमहतःपरमोमहान् । तमसःपरमो धाताशङ्खचक्रगदाधरः । श्रीवत्सवक्षानित्यश्रीरजय्यः शाश्वतोध्रुवः" इति । अनेनचपरमात्मत्वश्रीपतित्वादिकमुक्तं । उत्तरत्र "भवान्नारायणोदेवःश्रीमांश्चक्रायुधोविभुः । एकशृङ्गोवराहस्त्वंभूतभव्यसपत्नजित्" इत्यादि । अनेनतस्यनारायणशब्दवाच्यत्वमुक्तं । अपूर्वताचप्रमाणान्तराप्राप्तिः । नहि परतत्त्वस्यविष्णुत्वं प्रमाणान्तरादवगन्तुंशक्यं । फलंच भगवत्सालोक्यादिकमित्यन्तेसुव्यक्तं । अर्थवादोपपत्तीच बालकाण्डेदर्शिते । "इमेद्वेधनुषीश्रेष्ठे" इत्यादिनाऽर्थवादमुक्त्वा जृंभितंतद्धनुर्दृष्ट्वाशैवंविष्णुपराक्रमैः । अधिकंमेनिरेविष्णुंदेवाःसर्षिगणास्तदा" इत्यादिनात्रह्मप्रमुखैस्सर्षिगणैर्देवैर्मीमांसापूर्वकंविष्णुरुद्रयोर्मध्येविष्णोराधिक्यनिर्णयोक्तेरुपपत्तिरुक्ता । नचवाच्यं मेनिरइतिवचनात् "महाशूरतरस्तथा" इतिवरदानकृतमिदमाधिक्यमिति । तथात्वे तस्यरोषानुपपत्तेः । "धनूरुद्रस्यसंक्रुद्धः" इतिह्युक्तं । किंचागस्त्याश्रमे "सतत्रब्रह्मणःस्थानंविष्णोःस्थानंतथैवच । अग्नेःस्थानंमहेन्द्रस्यस्थानंचैवविवस्वतः । सोमस्थानंभगस्थानंस्थानंकौबेरमेवच" इत्यादिनाब्रह्मादीनांअगस्त्योपास्यत्वमुक्त्वा रुद्रस्यतदकथनादपूज्यत्वमुच्यते । नचेमान्यगस्त्यपूजकब्रह्मादिस्थानानीतिवाच्यं । असंभवात् । "अत्रदेवाःसगन्धर्वास्सिद्धाश्चपरमर्षयः । अगस्त्यंनियताहारंसततंपर्युपासते" इतिवचनंब्रह्मादिव्यतिरिक्तकेवलदेवविषयं । किंच । यथा गृहस्थस्यगृहेदेवगृहसत्त्वेगृहस्थस्यैवपूजकत्वंस्वरसतःप्रतीयते । एवमेवात्रापि नापलापावकाशः । किंच । दक्षयज्ञवधे "यस्माद्भागार्थिनोभागःकल्पितो नैवमेसुराः । वराङ्गानिमहार्हाणिधनुषाशातयामिवः" इतिरुद्रस्ययज्ञभागाकल्पनादपूज्यत्वादत्रतस्यस्थानानिर्देशः । ननु यदिविष्णुःपरादेवता कथं तर्हितस्यरामत्वेनजन्मेतिचेन्न । "अजायमानोबहुधाविजायते" इत्युक्तरीत्या लोकानुजिघृक्षाकृतंतदितिचोद्यानवकाशात् । मोक्षप्रदत्वंचपरदेवताऽसाधारणमत्रोच्यते । "यागतिर्यज्ञशीलानामाहिताग्नेश्चयागतिः । अपरावर्तिनांयाचयाचभूमिप्रदायिनां । मयात्वंसमनुज्ञातो गच्छलोकाननुत्तमान्" इति । अत्रापरावर्तित्वंपुनरावृत्तिशून्यत्वं । मुक्तिरितियावत् । "नचपुनरावर्तते" इतिश्रुतेः । नच रणादपलायनमुच्यतइतिवक्तुंशक्यते तस्यस्वतस्सिद्धत्वेनतत्फलस्याननुग्राह्यत्वात् । तथाच यज्ञादिफलावधिभूतांमुक्तिंप्राप्नुहीत्यर्थः । अतएवनृसिंहपुराणे "मत्कृतेनिधनंयस्मात्त्वयाप्राप्तंद्विजोत्तम । तस्मात्त्वंमत्प्रसादेनविष्णुलोकमवाप्स्यसि" इति । एवमुपक्रमादिषड्विधतात्पर्यलिङ्गैर्वेदान्तवेद्यंपरतत्त्वंविष्णुरेवेतिश्रीरामायणेनोपबृंह्यते । एवमेवान्तेब्रह्माप्याह "अस्याःपरिषदोमध्येयद्ब्रवीमिनिबोधतत् । एतदेवहिकाव्यंतेकाव्यानामुत्तमंश्रुतं । सर्वविस्तरतोराजन्व्याख्यास्यतिनसंशयः । आदिकाव्यमिदंरामत्वयिसर्वप्रतिष्ठितं । नह्यन्योऽर्हतिकाव्यानांयशोभाग्राघवाद्दते" इति । एवंस्थितेयत्केनचिन्नवीनेनजल्पितं व्यञ्जनावृत्त्याशिवपरंरामायणमितितदपहास्यमेव । नह्यन्योर्हतीतिप्रतिषिद्धरुद्रस्यप्रतिपाद्यकोट्यन्तर्भाववचनस्यकेवलबालिशप्रलपितत्वात् । यत्तुरामेणादित्योपस्थानादिकंकृतंतत्सर्वंविश्वामित्राद्युपासनवन्मनुष्यभावनानुसारेणेतिविज्ञेयं । विशेषतश्चतत्रतत्रवक्ष्यामः । "श्रीविष्णोःप्रथमेकाण्डेजगज्जननहेतुता । द्वितीयेस्थितिहेतुत्वंतृतीयेमोक्षदायिता । चतुर्थेगुणसंपत्तिःपञ्चमेसर्वहन्तृतः । षष्ठेवेदान्तवेद्यत्वंसप्तमेस्रष्टृहेतुता । एवंविष्णुःपरंतत्त्वंरामास्येतिसुनिश्चितम् । श्रीशैलपूर्णाद्यतिशेखरेणश्रुतान्पुराष्टादशधाप्रभिन्नान् । रामायणार्थान्क्रमशःकरोमिव्यक्तान्छठारातिगुरूपदिष्टान्" । गतएकोर्थः । द्वितीयस्तु एवंभूतंपरतत्त्वंकेनप्राप्यमित्याकाङ्क्षायांतत्प्राप्त्युपायभूताशरणागतिं "योब्रह्माणंविदधातिपूर्वंयोवैवेदांश्चप्रहिणोतितस्मै । तंहदेवमात्मबुद्धिप्रसादंमुमुक्षुर्वैशरणमहंप्रपद्ये" इतिश्रुतिमुपबृंहयन् वाल्मीकिर्ह्यस्मिन्रामायणे उपक्रमप्रभृत्युपसंहारान्तमनेकाधिकारिफलविशेषादिप्रदर्शनमुखेनाखिलफलसाधनतयाप्रतिपादयति । तथाहि । उपक्रमेतावत् "एतस्मिन्नन्तरेविष्णुरुपयातोमहाद्युतिः । शङ्खचक्रगदापाणिःपीतवासाजगत्पतिः" इति सर्वेशेषीसर्वेश्वरोरक्षापेक्षाप्रतीक्षोरक्षणसमयोलब्धइतिसमुद्भूतौज्ज्वल्योरक्षणोपकरणैःसहसन्नद्धोभ्येत्यतस्थौ । तदा । "देवगन्धर्वयक्षाश्चततस्त्वांशरणंगताः" इति रावणवधरूपफलार्थंब्रह्मरुद्रादिदेवगणशरणागतिरुक्ता । ततस्त्रिशंकुशुनःशेफादिवृत्तान्तेषुविश्वामित्रादिव्यापारविशेषानुदीर्य शरणागतरक्षणंपरमोधर्मः सम-

र्थेकारुणिकविषयाशरणागतिः फलाविनाभूतेतिप्रदर्शितं। ततश्च "सभ्रातुश्चरणौगाढंनिपीड्यरघुनन्दनः। सीतामुवाचातियशाराघवंचमहाव्रतं"इति पुरुषकारपुरस्करणपुरस्सराशरणागतिःकार्येत्युदीरितं । ततोभरतः "शेष्येपुरस्ताच्छालायांयावन्मेनप्रसीदति"इतिरामाभिषेकफलायशरणवरणमकरोत् । अत्र रावणवधायकृतदेवगणप्रपत्तिफलदानायनिर्गमनात् तदानींरामस्स्वप्रतिनिधिभूतपादुकाप्रदानेन तत्सफलंकृत्वापश्चाद्देवगणमनोरथपूरणानन्तरमात्मानंअभ्यषिञ्चत्। अतोनशरणागतिवैफल्यंचोद्यं । अथदण्डकारण्यवासिभिर्विरोधिनिरसनायशरणागतिरनुष्ठिता । "तेवयंभवतारक्ष्याभवद्विषयवासिनः । नगरस्थोवनस्थोवात्वंनोराजाजनेश्वर"इति । अत्रकोसलजनपदवासिनामिवभगवद्विषयवासएवशरणागतिः । तदनन्तरं"सपित्राचपरित्यक्तःसुरैश्चसमहर्षिभिः । त्रींल्लोकान्संपरिक्रम्यतमेवशरणंगतः । सतंनिपतितंभूमौशरण्यःशरणागतं । वधार्हमपिकाकुत्स्थःकृपयापर्यपालयत्"इति काकवृत्तान्तेनाग्रतःपतनमेवशरणागतिरित्यदर्शि । तदनुसुग्रीववृत्तान्तेन "कृतापराधस्यहितेनान्यत्पश्याम्यहंक्षमं । अन्तरेणाञ्जलिंबद्ध्वालक्ष्मणस्यप्रसादनात्" इतिशरणागतिरञ्जलिरूपोक्ता । अथसीतावचनेन । "मित्रमौपयिकंकर्तुरामःस्थानंपरीप्सता । वधंचानिच्छताघोरंत्वयासौपुरुषर्षभः । विदितःसहिधर्मज्ञःशरणागतवत्सलः । तेनमैत्रीभवतु तेयदिजीवितुमिच्छसि"इत्यनेनानुकूल्यमेवशरणागतिरित्यबोधि । उपरि "सोहंपरुषितस्तेनदासवच्चावमानितः। त्यक्त्वापुत्रांश्चदारांश्चराघवंशरणंगतः" इति विभीषणशरणागत्याविरोधिपरित्यागपूर्वकत्वमुक्तं । "ततःसागरवेलायांदर्भानास्तीर्यराघवः । अञ्जलिंप्राङ्मुखःकृत्वाप्रतिशिश्येमहोदधेः" इतिरामशरणागत्याधोग्यस्यनायोग्यताऽन्वेष्टव्या । अयोग्यस्यचनयोग्यतेत्युक्तं । अशुचिभूतलङ्कानिर्गतमात्रएवहिविभीषणश्शरणमवृणोत् । रामशरणागतेःफलाभावः समर्थकारुणिकविषयत्वाभावादित्याहुः । उत्तरत्र "अभियाचामवैदेहीमेतद्धिममरोचते । राघवाद्धिभयंघोरं राक्षसानामुपस्थितं" इतित्रिजटावचनानुमतिमात्रेणहनुमद्भयात् सर्वासांरक्षिततत्वकथनादन्यविषयेऽन्येनापिकृताशरणागतिः फलवतीतिनिदर्शितं । विभीषणशरणागतेः तत्सचिवानांरक्षणात् शरणागतसंबन्धिनोपिभगवत्कटाक्षपात्रभूताएवेतिनिरणायि । एवमन्यत्रापिद्रष्टव्यं । एवमुपक्रमप्रभृत्योपसंहारात् प्रतिपादिताशरणागतिरेवसर्वफलप्रदा सैवमुक्तेरपिहेतुरित्युक्तं । विशेषस्तुतत्रप्रकरणेप्रपञ्चयिष्यते ॥ २ ॥
अस्यचोपायस्यप्राप्यंभगवत्प्राप्तिपूर्वकंतत्कैङ्कर्यमेवेतिरामायणेनप्रतिपाद्यते । तथाहि । उपक्रमेदेवजातीयशरणागतेरामकैङ्कर्यंप्रधानफलमित्युच्यते । अप्सरःप्रभृतिष्ववतीर्यतैस्तदनुवर्तनोपदेशात् । रावणवधस्त्वानुषङ्गिकः । लक्ष्मणोपिप्रपद्याह "अहंसर्वंकरिष्यामि जाग्रतःस्वपतश्चते । भवांस्तुसहवैदेह्यागिरिसानुषुरंस्यते"इति । तेनसर्वदेशसर्वकालसर्वावस्थोचितसर्वकैङ्कर्यफलमितिव्यञ्जितं । भरतोपिरामकैङ्कर्यायैवतदभिषेकंप्रार्थ्यपादुकाविषयकैङ्कर्यक्रमेणमनीषितमलभत । दण्डकारण्यवासिनांशरणागतेरपिवाचिकादिरूपमेवकैङ्कर्यफलमित्यवगम्यते । "तेतंसोममिवोद्यन्तंदृष्ट्वावैधर्मचारिणः । मङ्गलानिप्रयुञ्जानाःप्रत्यगृह्णन्दृढव्रताः" इत्युक्तेः । सुग्रीवविभीषणादिप्रपत्तेरपिमुख्यं फलंकैङ्कर्यमन्यदानुषङ्गिकमितिस्पष्टं । "अथहरिवरनाथःप्राप्यसंग्रामकीर्तिंनिशिचरपतिमाजौयोजयित्वाश्रमेण । गगनमतिविशालंलङ्घयित्वाऽर्कसूनुर्हरिवरगणमध्येरामपार्श्वंजगाम । परित्यक्तामयालङ्कामित्राणिचधनानिच । भवद्गतंमेराज्यंचजीवितंचसुखानिच" इत्यादिना । एवंप्राणार्थिनःकाकस्यप्राणप्रदानेनतत्प्रपत्तिःसफला । असत्प्रकृतेरस्यपुनरप्येवंदुरितप्रवृत्तिर्माभूदितिशिक्षणरूपानुग्रहायैकाक्षिनिरसनेनास्त्रंनिवर्तयामास । यथा परशुरामंप्रतिप्रयुक्तमस्त्रं तस्मिन्प्रातिकूल्यान्निवृत्तेतन्मनीषितविरोधिसुकृतेपुप्रायुङ्क्त । यथाच समुद्रंप्रत्युपात्तमस्त्रम् तस्मिन्सानुतापेशरणागते द्विषत्सु आश्रितानांपापकृत्यांप्रवेशनन्यायेनतद्विरोध्यसुरेषुप्रयुयुजे । रामप्रपत्तिस्त्वाकिञ्चन्यानन्यगतित्वरूपाधिकाररहितेनकृतत्वादल्पज्ञाल्पशक्तिकविषयत्वाच्चविफलेतिध्येयम् । "समुद्रंराघवोराजाशरणं गन्तुमर्हति" इतिविभीषणोक्तिस्तुस्वप्रपत्तेःफलदर्शनकृता । तस्मादनेनप्रकारेणशरणागतेर्देशकालाधिकारिफलनियमाभावेपि विषयनियमोस्तीत्युक्तं । इयंचप्रपत्तिरस्मिन्प्रबन्धेप्रधानतयाप्रतिपाद्यते । अतएव "श्रीरामायणमुदीर्घशरणागतिः" इत्याभाणकः । तदुपयुक्ततयेतरेषामर्थानांप्रतिपादनम् । तथाहि । समर्थकारुणिकसुशीलविषयिणीशरणागतिःफलदा-

यिनी । तत्र रौद्रधनुर्भङ्गपरशुरामजयसालभेदनसमुद्रबन्धनादिभिरुक्तपरत्वप्रतिपादनैश्वसामर्थ्यं सर्वज्ञत्वादिकंचोक्तम् । सीतावियोगकालिकवृत्तान्तविशेषैः परमकारुणिकत्वम् । गुहशबरीसुग्रीवादिभिर्नीरन्ध्रसंश्लेषेणसौशील्यम् । विश्वामित्राध्वरत्राणदण्डकारण्यवासिमुनिजनरक्षणरावणबाधितेन्द्रादिसकलदेवगणपरिपालनैः निजजनपदजनानामात्मसौन्दर्यशीलादिभिःप्रीतिमुत्पाद्यस्वपदप्राप्तिरूपसाक्षादवतारप्रयोजनभूतमोक्षप्रदानैश्वसर्वरक्षकत्वम् । अतःसमर्थपरमकारुणिकसुशीलभगवत्प्रपत्तेःसकलफलसाधनत्वेपि अधिकारिविशेषानुष्ठितायास्तस्याभगवत्प्राप्तिपूर्वकतत्कैङ्कर्यरूपमोक्षएवमुख्यंफलम् । आनुषङ्गिकंफलान्तरमितिसुस्पष्टम् । एवंसर्वत्रद्रष्टव्यं ॥ ३ ॥ इयंचप्रपत्तिःपुरुषकारेणविनानफलायभवतीत्यर्थोऽस्मिन्प्रबन्धे प्रधानतयाप्रतिपाद्यते । "सीतायाश्चरितंमहत्" इतिह्युक्तं । तस्याश्चविश्लेषत्रयेणकृपापारतन्त्र्यानन्यार्हत्वरूपपुरुषकारधर्मप्रतिपादनात् । तत्संनिधानेनकाकः शिरोलेभेतदभावान्नरावणः । विभीषणोपि "निवेदयतमांक्षिप्रंविभीषणमुपस्थितं" इतिघटकमुखेनैवरामं शरणमवृणुत । रामोपि । "आनयैनंहरिश्रेष्ठ" इतिघटकमुखेनैवविभीषणंविषयीचकार । एवंसुग्रीवोपि रामभक्तहनुमन्मुखेनरामंशरणंययौइत्येवंज्ञातव्यं॥४॥ एवंभूतोपायाधिकारिस्वरूपंशेषत्वंपारतन्त्र्यंच । तत्रशेषत्वंलक्ष्मणाचारेणप्राचीकशत् । "अहमस्यावरो भ्रातागुणैर्दास्यमुपागतः । कुरुष्वमामनुचरंवैधर्म्यंनेहविद्यते । कृतार्थोऽहंभविष्यामितवचार्थःप्रकल्पते" इत्यादिना ॥ ५ ॥ भरतमुखेनपारतन्त्र्यंप्रकटीकृतं "विललापसभामध्येजगर्हेचपुरोहितं । राज्यंचाहंच रामस्यधर्मंवक्तुमिहार्हसि" इत्यादिना "सर्वात्मनापर्युनुनीयमानोयदानसौमित्रिरुपैतियोगं । नियुज्यमानो भुवियौवराज्येततोभ्यषिञ्चद्भरतंमहात्मा" इत्यन्तेन ॥ ६ ॥ श्रीशत्रुघ्नव्यापारेणभागवतपारतन्त्र्यंप्राचीकशत् । "गच्छतामातुलकुलंभरतेनतदानघः । शत्रुघ्नो नित्यशत्रुघ्नोनीतःप्रीतिपुरस्कृतः" इत्यादिना ॥ ७ ॥ अस्यचाधिकारिणोज्ञातव्यमर्थपञ्चकमत्रोच्यते । तथोक्तं । "प्राप्यस्यब्रह्मणोरूपंप्राप्तुश्चप्रत्यगात्मनः । प्राप्त्युपायंफलंप्राप्तेस्तथाप्राप्तिविरोधिच । वदन्तिसकलावेदाःसेतिहासपुराणकाः । मुनयश्चमहात्मानोवेदवेदाङ्गपारगाः" इति । तत्र रामप्रस्तावेनपरस्वरूपं । लक्ष्मणादिवृत्तान्तेनप्रत्यगात्मस्वरूपं । शरणागतिवर्णनेनोपायस्वरूपं । विभीषणादिकथयाफलस्वरूपं भगवत्कैङ्कर्यरूपम् । रावणादिवृत्तान्तेनविरोधिस्वरूपंचोक्तमितिज्ञेयं ॥ ८ ॥ अस्याधिकारिणआकिंचन्यंअनन्यगतित्वंचापेक्षितमितिवक्तुंब्रह्मरुद्रादिदत्तवरस्यरावणस्यवधेनब्रह्मरुद्रादिदेवतान्तराणां । दशरथचरितेनपितुः । कैकेय्यादिवृत्तान्तेनमात्रादेः । विभीषणमेघनादादिवृत्तान्तेनभ्रातृपुत्रादेश्वारक्षकत्वोक्तिः ॥ ९ ॥ अस्यचभगवज्ज्ञानलाभआचार्यमूलइतिहनुमच्चरितेनदर्शितं । तदेवसुन्दरकाण्डेवक्ष्यामः ॥ १० ॥ अनेनचाधिकारिणा "कृतकृत्याःप्रतीक्षन्तेमृत्युंप्रियमिवातिथिम्" इत्युक्तरीत्याशरीरपातावधिकालःप्रतीक्षणीयइतिसीताध्यवसायेनोच्यते । "शरैस्तुसंकुलांकृत्वालङ्कांपरबलार्दनः । मांनयेद्यदिकाकुत्स्थस्तत्तस्यसदृशंभवेत्" इतिह्युक्तं । लङ्कानामशरीरं । रावणकुंभकर्णावहंकारममकारौ । इन्द्रजिदादयःकामक्रोधादयः । विभीषणोविवेकः । तत्ररुद्धासीताचेतनः । तस्यचभगवज्ज्ञानंहनुमताऽऽचार्येण । तादृशशरीरध्वंसपूर्वकं तदन्तर्निरुद्धचेतनोद्धरणम् भगवतैवेतिविस्तरोभविष्यति ॥ ११ ॥ अस्यचयावच्छरीरंकर्तव्यविषयेरामादिवद्वर्तितव्यं नरावणादिवदित्युपदेशश्चयथायोगंक्रियते ॥ १२ ॥ अस्यचवासयोग्योदेशोभगवत्संनिधिमान्देशएवेतिकोसलजनपदस्थजनवृत्तान्तेनोक्तं ॥ १३ ॥ अस्यचकालक्षेपोपिरामायणेनैव । द्वयविवरणरूपत्वात् । अतएव "रामायणंदीर्घशरणागतिः" इत्यभियुक्तैरुक्तं । "द्वयमर्थानुसंधानेनसहसदैवंवक्ता" इतिचभाष्यकारः । तत्रबालकाण्डेन श्रीमच्छब्दार्थउक्तः । अयोध्याकाण्डेन नारायणशब्दार्थः । कल्याणगुणानामुपवर्णनात् । आरण्यकाण्डेन "तेतंसोममिवोद्यन्तं" इत्यादिनादिव्यमङ्गलविग्रहवर्णनात् । चरणशब्दार्थः । किष्किन्धाकाण्डसुन्दरकाण्डाभ्यां शरणशब्दार्थः । युद्धकाण्डेन प्रपद्यइत्यस्यार्थः । उत्तरकाण्डेन मुक्तिफलकीर्तनादुत्तरखण्डार्थः ॥ १४ ॥ अस्यचाधिकारिणःसदाजप्यंरामायणमेवेतिदर्शयितुं गायत्र्यर्थोत्रप्रतिपाद्यते । तथाहि । बालकाण्डेवेदप्रसिद्धजगत्प्रसूतिहेतुभूतभगवत्स्वरूपवर्णनात् तत्सवितृशब्दार्थः । अयोध्याकाण्डकिष्किन्धाकाण्डयोःगुणगणवर्णनात् वरेण्यशब्दार्थः । आरण्यकाण्डेतेजोमयशरीरवर्णनात् भर्गशब्दार्थः । सुन्दरकाण्डेदिव्यस-

पञ्चमः सर्गः ॥ ५ ॥

अयोध्यावर्णनम् ॥ १ ॥

सर्वापूर्वमियं येषामासीत्कृत्स्ना वसुंधरा ॥ प्रजापतिमुपादाय नृपाणां जयशालिनाम् ॥ १ ॥
येषां स सगरो नाम सागरो येन खानितः ॥ षष्टिः पुत्रसहस्राणि यं यान्तं पर्यवारयन् ॥ २ ॥
इक्ष्वाकूणामिदं तेषां राज्ञां वंशे महात्मनाम् ॥ महदुत्पन्नमाख्यानं रामायणमिति श्रुतम् ॥ ३ ॥

ङ्गलविग्रहलक्षणवर्णनात् देवशब्दार्थः । युद्धकाण्डे धीमहिशब्दार्थः । शरणागत्युक्तेः । उत्तरकाण्डे मुक्तिफलकीर्तनात्तृतीयपादार्थइति ॥ १५ ॥ एतेनचाधिकारिणा चार्वाकबौद्धादिदर्शनाद्यसच्छास्त्रस्पर्शोपि नकार्यइतिजावालिलक्ष्मणवचनतत्प्रत्यादेशादिना निर्णीयते ॥ १६ ॥ महतामपिव्यसनंभवति । अतःसंसारेजिहासाकार्येतिवैराग्यसंपत्तये नागपाशब्रह्मास्त्रबन्धसीतापहरणराज्यभ्रंशादिना व्यक्तमुक्तं । विस्तरस्तुतत्रतत्र प्रदर्शयिष्यते । दिङ्मात्रमत्रप्रदर्शितं ॥ १७ ॥ लोकव्यवहाराय चतुष्षष्टिकलार्थोपि संग्रहेणात्रप्रतिपाद्यते । "यदिहास्तितदन्यत्रयन्नेहास्तिनतत्क्वचित्" इतिन्यायात् । तथाहि । प्रतिपादितयादिशावेदार्थोदर्शितः । हनुमद्वचनश्लाघायां "अनयाचित्रयावाचात्रिस्थानव्यञ्जनस्थया" इत्यादौ शीक्षार्थः । अश्वमेधादिप्रकरणे कल्पसूत्रार्थः । "नूनंव्याकरणंकृत्स्नमनेन बहुधाश्रुतं" इत्यादौव्याकरणार्थः । एवमन्यत्सर्वंअत्र सूक्ष्मबुद्ध्याज्ञातव्यं । एवमेतेष्टादशार्थाआचार्योपदिष्टाः ॥ १८ ॥ तत्र प्रथमंरावणनिबर्हणफलांगीर्वाणगणशरणागतिंदर्शयितुंपीठिकामारचयति । वाजिमेधपर्यन्तवृत्तान्तेन । अग्निपुरुषोत्थानमारभ्यरावणवधपर्यन्तोवृत्तान्तस्तत्फलम् । उत्तरकाण्डेस्वावतारप्रयोजनम् धर्मस्थापनंमुक्तिप्रदानंच । "वक्तव्यमन्यत्तात्पर्यंतत्रतत्राभिधीयते ॥ सन्तोत्युक्तमनुक्तंचसमाधातुमिहार्हथ । नमःशठारिगुरवेनमोवल्मीकजन्मने । नमोनारायणायेदंनमोरामायविष्णवे" ॥

इत्थंसंक्षेपेण "आचार्यवान् पुरुषोवेद । आचार्याद्धैवविद्याविदितासाधिष्ठंप्रापत्" इतिश्रुत्युक्तरीत्याऽऽचार्यादेवविद्याप्राप्तव्येत्यमुमर्थमभिव्यञ्जयन्स्वेननारदाद्विदितमर्थंप्राचीकशत् । अथसर्गत्रयेणाचार्यप्रसादकार्यं सर्ववस्तुसाक्षात्कारस्तद्विषयप्रबन्धनिर्माणचातुर्यंचाभिहितं । अथपरमकारुणिकोभगवान्वाल्मीकिः रामायणाख्यंकाव्यमारभमाणः प्रारिप्सितप्रबन्धस्यनिर्विघ्नपरिसमाप्त्यर्थंप्रचयगमनार्थं च "आशीर्नमस्क्रियावस्तुनिर्देशोवापितन्मुखं" इत्युक्तरीत्याकाव्यमुखत्वेनादौकर्तव्यंवस्तुनिर्देशंकुर्वन् अर्थाद्विषयप्रयोजनेचदर्शयन् कर्तव्यंप्रतिजानानः सत्परिग्रहमर्थयते—सर्वापूर्वमित्यादिश्लोकचतुष्टयेन । कृत्स्ना सप्तद्वीपात्मिका इयंवसुंधरा भूमिः । जयेनशालन्ते भासन्तइति जयशालिनः तेषां येषांनृपाणां प्रजापतिं मनुं "मनुःप्रजापतिःपूर्वमिक्ष्वाकुस्तुमनोःसुतः" इतिवक्ष्यमाणत्वात् । उपादाय आरभ्य सर्वापूर्वं सर्वेषामितरेषांराज्ञांअपूर्वंदुर्लभं यथाभवतितथा आसीत् स्वमासीदित्यर्थः ॥१॥ जयशालित्वंकुत्रचिदुदाहृत्यदर्शयति—येषामिति । येषां नृपाणांमध्ये सः प्रसिद्धः सगरः । प्रसिद्धिमेवाह—सागरः समुद्रः स्वनामाङ्कितः येन सगरेण खानितः षष्ट्यापुत्रसहस्रैरवदारितः । नामप्रसिद्धौ । किंच यान्तं दण्डयात्रयागच्छन्तं यं षष्टिःपुत्रसहस्राणि पर्यवारयन् परितोऽगच्छन् । इक्ष्वाकुप्रभृतिषुविद्यमानेषुसगरस्यान्नकीर्तनं तेनाखिलायाःभूमेः पुनरुद्धृतत्वात् । षष्टिरिति पङ्क्तिसूत्रेनिपातितः । अतएकवचनस्यापिबहुवचनविशेषणत्वं ॥२॥ महात्मनां महाप्रभावानां । इक्ष्वाकूणांइक्ष्वाकुवंश्यानां । "तद्राजस्यबहुषुतेनैवास्त्रियां" इतितद्राज-

तीर्था० अविद्यमानःपूर्वो यस्मादपूर्वंसर्वेषांराज्ञां अपूर्वंप्रथममितियावत् । क्रियाविशेषणमेतत् । **तिल०** सर्वापूर्वंऐहिकामुष्मिकसर्वापूर्वसाधनं यथाभवतितथाआसीत् । सर्वापूर्वशब्दोह्युपादेयपरोनियतनपुंसकलिङ्गइतिकेचित् ॥ १ ॥ **तिल०** येषांवंशे ससगरोनामाभूत् । षष्टिगुणितानिपुत्रसहस्राणिषष्टिपुत्रसहस्राणि । अनेनतदुद्धारार्थं तद्वंश्येनजगत्पवित्रीकरणसमर्थागङ्गायद्वंशेऽवतारितेतिव्यज्यते । तेनचातिशयितंतद्वंशमाहात्म्यंसूचितं । तद्वंशस्यगङ्गापरनामकभगवदवतारयोग्यताचतेनसूचिता ॥ २ ॥ **शिरो०** इक्ष्वाकूणांवंशेरामायणमुत्पन्नमित्यनेन रामरामायणयोस्तादात्म्यंसूचितम् । प्रसिद्धंचप्रतिपाद्यप्रतिपादकयोस्तादात्म्यं "रामेतिद्व्यक्षरंनाम" इत्यादौ ॥ ३ ॥

[पा०] १ च. यशस्विनां. २ ङ. षष्टिपुत्रसहस्राणि.

शदिदं वर्तयि[1]ष्यामि सर्वं निखिलमादितः ॥ धर्मकामार्थसहितं श्रोतव्यमनसू[2]यया ॥ ४ ॥
कोसलो नाम मुदितः स्फीतो जनपदो महान् ॥ निविष्टः सरयूतीरे प्रभूतधनधान्यवान् ॥ ५ ॥
अयोध्या नाम नगरी तत्रासील्लोकविश्रुता ॥ मनुना मानवेन्द्रेण या पुरी निर्मिता स्वयम् ॥ ६ ॥
आयता दश च द्वे च योजनानि महापुरी ॥ श्रीमती त्रीणि विस्तीर्णा सुविभक्तमहापथा ॥ ७ ॥
राजमार्गेण महता सुविभक्तेन शोभिता ॥ मुक्तपुष्पावकीर्णेन जलसिक्तेन नित्यशः ॥ ८ ॥
तां तु राजा दशरथो महाराष्ट्रविवर्धनः ॥ पुरीमावासयामास [3]दिवं देवपतिर्यथा ॥ ९ ॥

प्रत्ययस्यबह्वर्थत्वाल्लुक् । तेषांराज्ञां वंशे वंश्येरामेविषये रामायणमिति श्रुतं प्रसिद्धं महत् पूजनीयं इदमाख्यानं कथाप्रबन्धः । उत्पन्नं ब्रह्मणःप्रसादादितिशेषः । तत्रनिमित्तमात्रमहमितिविनयोक्तिः । अत्रवर्णनीयस्य नायकस्यसर्वापूर्वमित्यनेनमहाभाग्यत्वंनामगुणउक्तः । येषामित्यादिश्लोकद्वयेनमहाकुलीनत्वम ॥३॥ब्रह्मप्रसादादेवोत्पन्नत्वेतवकिंकृत्यं तत्राह—तदिति । तत् ब्रह्मप्रसादोत्पन्नं इदं रामायणं वर्तयिष्यामि प्रवर्तयिष्यामि । धर्मकामार्थसहितं तत्प्रतिपादकं तत्फलकंवा सर्वं रामायणं आदितः तदवतारदेशात्प्रभृति निखिलं अन्यूनंयथाभवतितथा अनसूयया असूयाभिन्नया श्रद्धयेत्यर्थः । श्रोतव्यं नतुस्वयंलिखितपाठेननिरीक्षितव्यं ब्रह्मणएवोत्पन्नमिदं ममतुतत्प्रवर्तनएवाधिकारः । अतः प्रेक्षावद्भिरत्रासूयानकर्तव्या किंतुभक्त्यैवश्रोतव्यमिति भावः । अत्रतेषांवंशइत्यनेन विषयउक्तः । धर्मकामार्थसहितमित्यनेन प्रयोजनमुक्तं । अनसूययेत्यनेन अनसूयवोऽधिकारिणः । कार्यकारणभावः संबन्धइत्यादिबोध्यं । अत्रमोक्षस्यापिप्रयोजनत्वंसिद्धं "सर्वपापैः प्रमुच्यते"इत्युक्तत्वात् ॥ ४ ॥ अथरामचरित्रंप्रतिज्ञातंवक्तुंतदवतरणयोग्यदेशवैभवंदर्शयति—कोसलइति । मुदितः संतुष्टजनः । "मञ्चाःक्रोशन्ति"इतिवल्लक्षणा । स्फीतःसमृद्धः "स्फायःस्फीनिष्ठायां"इतिस्फीभावः । प्रभूतानिबहूनिचतानिधनधान्यानिचतद्वान् । कर्मधारयादपिमत्वर्थीयोदृष्टः । यथा"कोकप्रीतिचकोरपारणपटुज्योतिष्मतीलोचने"इत्यादि । प्रभूतधनश्चासौधान्यवांश्चेतिकर्मधारयोवा । अत्र धनधान्यसमृद्धेरुक्तत्वात्स्फीतइतिजनसमृद्धिरुच्यते । कोसलोनाम कोसलइतिप्रसिद्धः । महान् विस्तीर्णः जनपदो देशः । "नीवृज्जनपदोदेशविषयौ"इत्यमरः । सरयूतीरे सरयूनामकनद्याउभयतीरे । निविष्टः स्थितः ॥५॥ तत्रावतारयोग्यनगरंवर्णयति—अयोध्येति । श्लोकत्रयमेकंवाक्यं । अयोध्येतिनगरी तत्र कोसले आसीत् अस्ति । लकारव्यत्ययः । लोके विश्रुता प्रसिद्धा । यापुरी मानवानां मनुष्याणां इन्द्रेणस्वामिना मनुना स्वयं स्वसंकल्पेन निर्मितानाम ॥ ६ ॥ दशचद्वेचयोजनानि द्वादशयोजनानि । अत्यन्तसंयोगेद्वितीया । आयता दीर्घा । मण्डलप्रमाणमिदं । महापुरी मूलनगरं । उपनगरसाहित्येत्वनेकयोजनाऽस्तीतिभावः । श्रीमती कान्तिमती । त्रीणियोजनानिविस्तीर्णा योजनत्रयवैपुल्यवती । सुष्टुविभक्ताःउभयपार्श्ववृक्षावलीमत्तयाक्लृप्ताः महापथाः नानाजनपदगामिमार्गाःयस्यास्सा ॥ ७ ॥ महता आनगरान्तेन सुविभक्तेन ऋजुतयाक्लृप्तेन मुक्तपुष्पावकीर्णेन । मुक्तैःअसूत्रग्रथितैःपुष्पैरवकीर्णेन नित्यशः सर्वकालेपि । सप्तम्यर्थेशस्प्रत्ययः । जलसिक्तेन वर्षासुस्वतएव अन्यदामनुष्यैः । राजमार्गेण राजगृहद्वारात् प्रवृत्तेनमार्गेण शोभिता ॥ ८ ॥ अथनगर्यामहाराजाधिष्ठितत्वरूपं

तीर्था० धर्मकामार्थसहितं धर्मकामार्थप्रतिपादकं । इदंत्ववान्तरफलाभिप्रायेणोक्तं । वस्तुतोमोक्षएवपरमफलं । सर्वंनिखिलंकाव्यंप्रतिपाद्यार्थेषुएकार्थानुक्तावपिसर्वशब्दप्रयोगसंभवात्निखिलमित्युक्तं । वर्तयिष्यामि । श्रोतव्यमितितव्यप्रत्ययेनरामायणस्यश्रवणविधिः । श्रूयमाणत्वेनाश्रयणेप्रत्यवायसंभवात् । धर्मकामार्थसहितं धर्मकामार्थप्रदमित्यनेनास्यैवसर्वपुरुषार्थसाधनत्वाच्चान्यत्सर्वंपरित्यज्येदमेवात्यादरेणश्रोतव्यमितितात्पर्यम् । **विषम०** तदिदंबुद्धिस्थं । आदितआदिमारभ्यनिखिलं उत्तरकाण्डान्तं । सर्ववर्णपदच्युतिरहितं । धर्मकामार्थाःसहितायस्मात्तत् । संहिताइत्यत्रकेनेत्याकाङ्क्षायां मोक्षेणेतिगम्यते । तेनपुरुषार्थचतुष्टयसाधनं वर्तयिष्यावःगास्यावः । तत् अनसूयता असूयतीत्यसूयन्नअसूयन्अनसूयन्स्वस्यान्यस्यचोपतापमकुर्वन् तेनानसूयता श्रोतव्यमित्यर्थः । असुउपतापेइतिकण्ड्वादियगन्तस्यशतरिरूपम् ॥ ४ ॥ **शिरो०** कोसलस्यमुदितत्वोक्त्यातद्देशस्थचेतनत्वंसूचितं तेनतस्याप्राकृतत्वंध्वनितम् ॥ ५ ॥ **तिल०** पुरी "अयोध्यामथुरा" इत्याद्युक्तसप्तपुर्यन्तर्गता ॥ ६ ॥
विष० स्वर्गेअमरावतीमिन्द्रइव ॥ ९ ॥

[पा०] १ ङ. झ. ञ. वर्तयिष्यावः. २ ङ. झ. ञ. मनसूयता. ३ क. ङ. झ. ञ. दिविदेवपतिः.

कवाटतोरणवतीं सुविभक्तान्तरापणाम् ॥ सर्वयन्त्रायुधवतीमुपेतां सर्वशिल्पिभिः ॥ १० ॥
सूतमागधसंबाधां श्रीमतीमतुलप्रभाम् ॥ उच्चाट्टालध्वजवतीं शतघ्नीशतसंकुलाम् ॥ ११ ॥
वधूनाटकसङ्घैश्च संयुक्तां सर्वतः पुरीम् ॥ उद्यानाम्रवणोपेतां महतीं सालमेखलाम् ॥ १२ ॥
दुर्गगंभीरपरिघां दुर्गामन्यैर्दुरासदाम् ॥ वाजिवारणसंपूर्णां गोभिरुष्ट्रैः खरैस्तथा ॥ १३ ॥
सामन्तराजसङ्घैश्च बलिकर्मभिरावृताम् ॥ नानादेशनिवासैश्च वणिग्भिरुपशोभिताम् ॥ १४ ॥
प्रासादै रत्नविकृतैः पर्वतैरुपशोभिताम् ॥ कूटागारैश्च संपूर्णामिन्द्रस्येवामरावतीम् ॥ १५ ॥
चित्रामष्टापदाकारां वरनारीगणैर्युताम् ॥ सर्वरत्नसमाकीर्णां विमानगृहशोभिताम् ॥ १६ ॥

गुणमाह—तांत्विति। महच्चतद्राष्ट्रंचमहाराष्ट्रं "आन्महतः–"इत्यात्वं। तद्विवर्धयति धर्मेणपालयतीतिमहाराष्ट्रविवर्धनः। कर्तरिल्युट्। महांश्चासौराष्ट्रविवर्धनश्चेतिवा। पूर्वराजेभ्योधिकइत्यर्थः। दशरथाख्योराजा दिवं स्वर्गं अमरावतीं देवपतिर्यथा इन्द्रइव तांपुरीं तु पूर्वनृपवैलक्षण्येन आवासयामास स्थापयामास। "हेतुमतिच" इतिणिच् ॥ ९ ॥ वैलक्षण्यमेवदर्शयन्नयोध्यांवर्णयति सर्गशेषेण। तोरणोबहिर्द्वारालंकारदारुबन्धः। प्रशस्तकवाटतोरणयुक्तां। प्रशंसायांमतुप्। सुविभक्तपरस्परासंश्लिष्टं अन्तरंमध्यप्रदेशोयेषांतादृशाःआपणाःनिषद्याः यस्यांसा तां। "आपणस्तुनिषद्यायां"इत्यमरः। सर्वाणिसर्वविधानि यन्त्राणिशिलाक्षेपणीप्रभृतीनि आयुधानिबाणादयः लोकेयानियानियन्त्रायुधानिसन्तितद्वतीमित्यर्थः। शिल्पिभिश्चित्रकारप्रभृतिभिः उपेतां युक्तां ॥१०॥ सूताःवन्दिनः "सूतोनातक्षिणसारथौ। क्षत्राद्विप्रासुतेव्यासशिष्यपारदवन्दिनोः" इतिभास्करः। मागधाः राजप्रबोधकाः "मागधःस्याद्वागमीराजप्रबोधकः"इतियादवः। तैःसंबाधांनिरन्तरां श्रीमतीं धनधान्यसमृद्धिमतीं। अतुलप्रभां निरुपमकान्तिं अट्टाट्टालशब्दौपर्यायौ। "स्यादट्टःक्षौममस्त्रियां" इत्यमरः। मण्टपोपरिनिर्मितगृहाणीत्यर्थः। उन्नतैरट्टालध्वजैर्युतां। शतघ्नी प्राकारस्थयन्त्रविशेषः "शतघ्नीतुचतुस्तालालोहकण्टकसंचिता" इतियादवः। शतशब्दोऽनन्तवचनः "शतंसहस्रमयुतंसर्वमानन्त्यवाचकं" इत्युक्तेः। अनेकशतघ्नीसंवृताम् ॥ ११ ॥ सर्वतःपुरीमिति "उभसर्वतसोः–" इतिद्वितीया। सर्वत्रपुर्यां वधूनांयेनाटकाःनर्तयितारस्तत्सङ्घैःसंयुक्तां। आम्राणांचूतानांवनमाम्रवणं। "प्रनिरन्तः —" इत्यादिनाणत्वं। आहिताग्न्यादित्वात्परनिपातः। आम्रवणरूपोद्यानोपेतां। सालःप्राकारः मेखला मेखलावदावरणभूतायस्यास्तां। "प्राकारोवरणःसालः" इत्यमरः। महतीमितिसालद्वारानगरविशेषणम् ॥ १२ ॥ अत्र दुर्गशब्देनविशालतोच्यते। विशालागाधपरिघां दुर्गां स्थलदुर्गभूतां अतएव अन्यैः शत्रुभिः दुरासदां दुराक्रमां वाजिभिर्वारणैश्च संपन्नां समृद्धां गोभिरुष्ट्रैः खरैः खरविशेषैश्च तथा संपन्नामित्यर्थः ॥ १३ ॥ समन्ताद्भवाःसामन्ताः "सामन्ताराज्यसन्धिस्थाः" इतिवैजयन्ती। तादृशराजसङ्घैः। कीदृशैः बलिकर्मभिः। बलिःकरः "भागधेयःकरोबलिः"इत्यमरः। बलिशब्देन बलिप्रदानमुच्यते तत्कर्मयेषांतैः नानादेशनिवासैः क्रयविक्रयार्थमागतैः वणिग्भिश्च उपशोभिताम् ॥ १४ ॥ रत्नविकृतैः रत्नैःविकृतैःविशेषेणकृतैः प्रासादैः राजगृहैः पर्वतैः क्रीडापर्वतैः कूटागारैः वलभिभिः "कूटागारंतुवलभिः"इत्यमरः। संपूर्णां अतएव इन्द्रस्येवामरावतीं इन्द्रपालिताममरावतीमिव स्थितामित्यर्थः ॥ १५ ॥ चित्रां नानाराजगृहवतीं। अष्टौपदानिस्थानानियस्यतदष्टापदं। "अष्टनःसंज्ञायां" इतिदीर्घः। "अष्टापदंशारिफलं"इत्यमरः। तदाकारां

तिल०। सर्वयन्त्रायुधवतीं। प्राकारोपरीतिशेषः। उषितां कृतवासां ॥ १० ॥ तीर्था० उद्यानाम्रवणोपेतां क्रीडार्थमसाधारणत्वेननिर्मितान्युद्यानानि। आम्रवणानितुसर्वजनोपभोग्यत्वेनकल्पितानि। तिल० वधूनांनाटकशालासमुदायैः। शिरो० सर्वतश्चतुर्दिक्षुपुर्यः वाराणस्यादयोयस्यास्सासर्वतःपुरी तां। तथाचस्मृतिः "साकेतपश्चिमद्वारिवृन्दावनमदूरतः" इत्यादि। समासान्तविधेरनित्यत्वात्कबभावः ॥ १२ ॥ तिल० कूटाख्यैरगारैर्गृहैःस्त्रीणांक्रीडागृहैरितियावत् ॥ १५ ॥ तिल० वरनारीगणैः आयुतांव्याप्तां। अष्टापदंसुवर्णंतज्जलेनकृतआकारोऽलंकारोयस्यास्सा ॥ १६ ॥

[पा०] १ ङ. झ. वतीमुषितां. २ घ. सर्वतश्चोपशोभितां. ङ. च. छ. ज. झ. पर्वतैरिवशोभितां. ३ घ. नरनारी. ङ. च. छ. झ. ट. गणायुताम्. ५ घ. विमानवरशोभितां.

गृहगाढामविच्छिद्रां समभूमौ निवेशिताम् ॥ शालितण्डुलसंपूर्णामिक्षुकाण्डरसोदकाम् ॥ १७ ॥
दुन्दुभीभिर्मृदङ्गैश्च वीणाभिः पणवैस्तथा ॥ नादितां भृशमत्यर्थं पृथिव्यां तामनुत्तमाम् ॥ १८ ॥
विमानमिव सिद्धानां तपसाऽधिगतं दिवि ॥ सुनिवेशितवेश्मान्तां नरोत्तमसमावृताम् ॥ १९ ॥
ये च बाणैर्न विध्यन्ति विविक्तमपरापरम् ॥ शब्दवेध्यं च विततं लघुहस्ता विशारदाः ॥ २० ॥
सिंहव्याघ्रवराहाणां मत्तानां नर्दतां वने ॥ हन्तारो निशितैः शस्त्रैर्बलाद्बाहुबलैरपि ॥ २१ ॥
तादृशानां सहस्रैस्तामभिपूर्णां महारथैः ॥ पुरीमावासयामास राजा दशरथस्तदा ॥ २२ ॥
तामग्निमद्भिर्गुणवद्भिरावृतां द्विजोत्तमैर्वेदषडङ्गपारगैः ॥
सहस्रदैः सत्यरतैर्महात्मभिर्महर्षिकल्पैर्ऋषिभिश्च केवलैः ॥ २३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे पञ्चमः सर्गः ॥ ५ ॥

तत्सदृशसंस्थानामित्यर्थः । मध्येराजगृहंचतुर्दिक्षुराजवीथयः तन्मध्येष्ववकाशाश्चेत्येवंविधसंस्थानामित्यर्थः । वरनारीगणैः सुन्दरस्त्रीगणैः । युतां युक्तां । सर्वरत्नैःसमाकीर्णां व्याप्तां । तानितु ''गारुत्मतंमरकतमश्मगर्भोहरिन्मणिः । शोणरत्नंरोहितकंपद्मरागोरुणोपलः । विद्रुमोनाप्रवालोस्त्रीवज्रोस्त्रीहीरकःपुमान् । इन्द्रनीलंमहानीलंवैडूर्यंवालवायजं । कुरुविन्दास्तुकल्माषारत्नभेदास्तुमौक्तिकं । माणिक्यंपौष्पकंशङ्खः—''इत्यादिनिघण्टुपर्यायोक्तानि । विमानाख्यगृहैःशोभितां । ''विमानोस्त्रीदेवयानेसार्वभौमिकसद्मनि''इतिभास्करः॥१६॥ गृहैःकुटुंबिगृहैः गाढांनिबिडां । अविच्छिद्रां निर्दूषणां । ''छिद्रंरन्ध्रेदूषणेपि''इतिभास्करः । समभूमौ अनिम्नोन्नतप्रदेशे। निवेशितां निर्मितां ।शालयः श्वेततण्डुलाव्रीहयः । ''शालयःश्वेततण्डुलाः''इतिवैजयन्ती । तेषां तण्डुलैःसंपूर्णां । इक्षुकाण्डस्य इक्षुदण्डस्य योरसःतत्तुल्यमुदकंयस्यांताम् ॥ १७ ॥ दुन्दुभीभिः भेरीभिः । ईकारान्तत्वमार्षं । मृदङ्गैः मृन्अङ्गंयेषांतैः । पणवैः मर्दलैः। तथेतिसमुच्चये । भृशंनादितां । पृथिव्यां अत्यर्थमनुत्तमां श्रेष्ठां । तां प्रसिद्धाम् ॥ १८ ॥ सिद्धानां तपस्सिद्धानां पुरुषाणां । दिवि स्वर्गे । तपसाऽधिगतं लब्धं विमानमिव देवयानसमूहमिवस्थितां । जातावेकवचनं । सुनिवेशिताः सुष्ठुनिर्मिताः वेश्मान्ताःगृहप्रान्तायस्यां सा । सर्वतःसम्यक्निर्मितगृहामित्यर्थः । नरोत्तमैः विद्वद्भिः समावृतां॥ १९ ॥ श्लोकत्रयमेकान्वयं । लघुहस्ताः शिक्षितास्त्राः । ''लघुहस्तःसुहस्तश्चकृतास्त्रःकृतपुङ्खकः''इतिवैजयन्ती । विशारदाः समर्थाः उपायज्ञाइतियावत् । तथाभूताअपि ये राजानः । विविक्तं विजनमसहायमितियावत् । ''विविक्तौपूतविजनौ''इत्यमरः । अपरापरं अविद्यमानपरापरं परे पित्रादयः अपरे पुत्रादयः तैर्हीनं । वंशस्यैकतन्तुमितियावत् । शब्दवेध्यं शब्देनलक्ष्येणवेध्यं । एतेन प्रच्छन्नवेधनमुपलक्ष्यते । विततं पलायितंच बाणैश्च नविध्यन्ति नप्रहरन्ति । किंपुनर्यन्त्रादिभिरितिभावः ॥ २० ॥ मत्तानां वने स्वदेशे नर्दतां गर्वेणगर्जतां । सिंहव्याघ्रवराहाणां बलात् मनोबलेन । बाहुबलैरपिसहकारिभिः । निशितैः तीक्ष्णैः । शस्त्रैः आयुधैः करणैः हन्तारः । ''शस्त्रमायुधलोहयोः''इत्यमरः ॥ २१ ॥ महारथैः ''आत्मानंसारथिंचाश्वान्रक्षन्युद्ध्येतयोनरः । समहारथसंज्ञःस्यात्''इत्युक्तलक्षणैः । तादृशानां तेषां सहस्रैः अभिपूर्णां । तां तथात्वेनप्रसिद्धां पुरीं आवासयामास ॥ २२ ॥ अग्निमद्भिः आहिताग्निभिः । गुणवद्भिः शमदमादिगुणवद्भिः । वेदानांषडङ्गानांच पारमन्तमध्ययनेनगच्छन्तीतितथा । ''अन्तात्यन्त—''इत्यादिना डप्रत्ययः । सहस्रदैः बहुप्रदैः । सत्येसत्यवचने रतैः निरतैः । महात्मभिः महामतिभिः । केवलैःऋषिभिरपि महर्षिकल्पैः वसिष्ठादिमहर्षितुल्यैः । ईषदसमाप्तौ कल्पप्प्रत्ययः । द्विजोत्तमैःआवृतांतामावासयामासेत्यनुषज्यते । अत्रवंशस्थवृत्तेप्रथमचरणेजगणाभावेनोपजा-

शिरो॰ गृहगाढामविच्छिद्रांगृहगाढांकुटुंबिगृहनिबिडां अमां अपरिमितप्रभावां विच्छिद्रांदोषरहितां ज्योतिश्शास्त्रानुकूलामित्यर्थः । त्रयाणांकर्मधारयः ॥ १७ ॥ **तिल॰** शब्दवेध्यंशब्दमात्रानुमितसत्तयावेधयोग्यं । प्रच्छन्नमितियावत् । **शिरो॰** विततं विगतःततः युद्धविस्तारोयस्य । नष्टसामर्थ्यादिनाभ्रष्टयुद्धकमित्यर्थः ॥ २० ॥ **इतिपञ्चमःसर्गः** ॥ ५ ॥

[**पा॰**] १ ग. मवरावरम्. घ. मपरावरम्. २ ख. ङ. छ. झ. नदतां.

षष्ठः सर्गः ॥ ६ ॥

अयोध्यायादशरथेनपरिपालनसमयेस्थितिप्रकारकथनम् ॥ १ ॥

तस्यां पुर्यामयोध्यायां वेदवित्सर्वसंग्रहः ॥ दीर्घदर्शी महातेजाः पौरजानपदप्रियः ॥ १ ॥
इक्ष्वाकूणामतिरथो यज्वा धर्मरतो वशी ॥ महर्षिकल्पो राजर्षिस्त्रिषु लोकेषु विश्रुतः ॥ २ ॥
बलवान्निहतामित्रो मित्रवान्विजितेन्द्रियः ॥ धनैश्च संग्रहैश्चान्यैः शक्रवैश्रवणोपमः ॥ ३ ॥
यथा मनुर्महातेजा लोकस्य परिरक्षिता ॥ तथा दशरथो राजा वसञ्जगदपालयत् ॥ ४ ॥
तेन सत्याभिसन्धेन त्रिवर्गमनुतिष्ठता ॥ पालिता सा पुरी श्रेष्ठा इन्द्रेणेवामरावती ॥ ५ ॥
तस्मिन्पुरवरे हृष्टा धर्मात्मानो बहुश्रुताः ॥ नरास्तुष्टा धनैः स्वैःस्वैरलुब्धाः सत्यवादिनः ॥ ६ ॥

तिवृत्तमितिबोध्यं । आचार्याःप्राहुः "तमेतंवेदानुवचनेनब्राह्मणाविविदिषन्ति यज्ञेनदानेनतपसानाशकेन" इतिश्रुतिरनेनोपबृंह्यते । द्विजोत्तमैः"अष्टवर्षंब्राह्मणमुपनयीत" इत्युक्तरीत्याकृतोपनयनैः । वेदषडङ्गपारगैः अधीतसाङ्गसशिरस्कवेदैः । अग्निमद्भिः अनुष्ठितयज्ञैः । सहस्रदैः यथाशक्तिब्राह्मणसात्कृतद्रव्यैः । महात्मभिः महायत्नैः कृततपस्कैरित्यर्थः । गुणवद्भिः "शमदमाद्युपेतःस्यात् । शान्तोदान्तउपरतस्तितिक्षुस्समाहितो भूत्वा"इत्युक्तशमादिमद्भिः । सत्यरतैः "सत्यस्यसत्यं" इत्युक्तेब्रह्मणिभक्तिरूपापन्नज्ञानवद्भिः । केवलैः " तस्माद्ब्राह्मणःपाण्डित्यंनिर्विद्यबाल्येनतिष्ठासेत् "इत्युक्तरीत्याअनाविष्कृतस्वरूपैः । ऋषिभिः "बाल्यं चपाण्डित्यंचनिर्विद्याथमुनिः"इत्युक्तस्वरूपैः । महर्षिकल्पैः "यत्रर्षयःप्रथमजायेपुराणाः" इत्युक्तरीत्यासूरिसदृशैः । आवृतां अवतरिष्यतिभगवानत्रेतिसमागम्यसंसेवितां । तामावासयामास । यद्वा हेकेवल परिशुद्धचित्त एः त्वमपिवासायगच्छेति कविराह "तदुपगत"इतिवत् ॥२३॥ इति श्रीगोविन्दराजवि० श्रीमद्रामायभू० मणिमञ्जीराख्याने बाल०पञ्चमःसर्गः ५

एवंभगवदवतारयोग्यदेशोदर्शितः अथतद्योग्यंपुरुषंदर्शयति सर्गेषष्ठे । तस्यामित्यादिश्लोकचतुष्टयमेकान्वयं । दशरथःतस्यांवसन्सन्जगत्अपालयत् । सकीदृशः । वेदंवेदार्थं वेत्तीति वेदवित् । संगृह्णातिधनप्रदानादिना स्वीकरोतीतिसंग्रहः पचाद्यच् । सर्वेषांशूरःगांविदुषांच संग्रहः सर्वसंग्रहः । दीर्घदर्शी दीर्घंचिरकालभाविपदार्थंद्रष्टुंशीलमस्यास्तीतितथा । ताच्छील्येणिनिः । महातेजाः महाप्रतापः "तेजःपराक्रमेप्राणेवर्चस्यर्चिषिरेतसि"इति रत्नमाला । पुरेभवाजनाःपौराः । जनपदेभवाजानपदाः । तेप्रियायस्यसतथा ॥ १ ॥ इक्ष्वाकूणां मध्ये अतिरथः बहुभिर्महारथैरेकोयोद्धारथी । यज्वा विधिनेष्टवान् । धर्मेषु तटाकखननारामप्रवर्तनादिषु रतः । वशी स्वाधीनसर्वजनः । "त्रिष्वधीनेवशोवाञ्छाप्रभुत्वाधीनतासुना"इतिभास्करः । महर्षिकल्पः महर्षितुल्यः । राजर्षिः राजरूपऋषिः । त्रिषुलोकेषु भूर्भुवस्स्वर्लोकेषु विश्रुतः प्रसिद्धः ॥ २ ॥ बलवान् चतुरङ्गसेनायुक्तः । अतएव निहतामित्रः निहतशात्रवः । मित्रवान् प्रशस्तमित्रयुक्तः । विजितेन्द्रियः निषिद्धेषुशब्दादिष्वप्रवर्तितेन्द्रियः । धनैः हिरण्यरत्नदिव्यांबराभरणादिभिः । अन्यैः तदपेक्षयान्यैः । संग्रहैः संचयैः । निधिभिरिति यावत् । शक्रवैश्रवणोपमः यथाक्रमं इन्द्रकुबेरोपमः ॥ ३ ॥ यथा मनुः वैवस्वतमनुः लोकस्यपरिरक्षिता तथा दशरथो राजा तस्यांवसन् जगत् भूलोकं अपालयत् ॥ ४ ॥ एवंराजगुणाउक्ताः लोकपालनंचोक्तं संप्रतिपुरपरिपालनमाह—तेनेति । सत्ये अभिसन्धा अभिप्रायोयस्य तेन त्रिवर्गं धर्मार्थकामान् अनुतिष्ठता अनुसरता । पालिता सत्यादिपुरस्सरंत्रिवर्गार्थंपालितेत्यर्थः ॥ ५ ॥ पालनफलंदर्शयति—"तस्मिन्" इत्यादिना "मानवेन्द्रेणधीमता" इत्यन्तेन । हृष्टाः वासस्सौख्येनप्रीताः । धर्मात्मानः । बहु श्रुतंशास्त्रश्रवणं येषांते बहुश्रुताः । स्वैःस्वैः धनैस्तुष्टाः परधनानभिलाषिणइत्यर्थः । वी-

ति० अतिरथःदशसहस्रमहारथैःअसहायेनयोद्धा ॥ २ ॥

[पा०] १ ङ. च. छ. झ. धर्मपरो. २ क.ख. ग. ङ. च. छ. झ. संचयैश्चान्यैः. ३ ङ.च. छ. झ. राजालोकस्यपरिरक्षिता.

नाल्पसन्निचयः कश्चिदासीत्तस्मिन्पुरोत्तमे ॥ कुटुंबी यो ह्यसिद्धार्थोऽगवाश्वधनधान्यवान् ॥ ७ ॥
कामी वा न कदर्यो वा नृशंसः पुरुषः क्वचित् ॥ द्रष्टुं शक्यमयोध्यायां नाविद्वान्न च नास्तिकः ॥८॥
सर्वे नराश्च नार्यश्च धर्मशीलाः सुसंयताः ॥ उदिताः शीलवृत्ताभ्यां महर्षय इवामलाः ॥ ९ ॥
नाकुण्डली नामकुटी नास्रग्वी नाल्पभोगवान् ॥ नामृष्टो नानुलिप्ताङ्गो नासुगन्धश्च विद्यते ॥१०॥
नामृष्टभोजी नादाता नाप्यनङ्गदनिष्कधृक् ॥ नाहस्ताभरणो वाऽपि दृश्यते नाप्यनात्मवान् ॥११॥
नानाहिताग्निर्नायज्वा न क्षुद्रो वा न तस्करः ॥ कश्चिदासीदयोध्यायां न च निर्वृत्तसंकरः ॥१२॥
स्वकर्मनिरता नित्यं ब्राह्मणा विजितेन्द्रियाः ॥ दानाध्ययनशीलाश्च संयताश्च प्रतिग्रहे ॥ १३ ॥
न नास्तिको नानृतको न कश्चिदबहुश्रुतः ॥ नासूयको न वाऽशक्तो नाविद्वान्विद्यते तदा ॥१४॥
नाषडङ्गविदत्रासीन्नाव्रतो नासहस्रदः ॥ न दीनः क्षिप्तचित्तो वा व्यथितो वापि कश्चन ॥ १५ ॥

प्सया स्ववर्णस्वाश्रमोचितधनमात्रपरिग्रहःसूच्यते । अलुब्धाः दानेप्राप्तेलोभरहिताः । सत्यवादिनः सत्यवचनशीलाः । आसन्निति शेषः ॥ ६ ॥ तस्मिन्पुरोत्तमे पुरश्रेष्ठे । अल्पसन्निचयः अल्पकोशवान् । अगवाश्वधनधान्यवान् असिद्धार्थः धनादिभिरप्राप्तधर्मार्थकामरूपपुरुषार्थः । यः कुटुंबी सकश्चिन्नासीत् । "मातापितारस्नुषेपुत्रौपुत्रीपत्न्यतिथिःस्वयं । दशसङ्ख्यःकुटुंबीति विष्णुनोक्तंद्विजोत्तम" ॥ ७ ॥ कामी कामैकपरः । पुरुषः अयोध्यायां कचित् कोणेपि द्रष्टुंनशक्यं । शक्यमितिनिपातः "शक्यमरविन्दसुरभिः" इतिकालिदासेनापिप्रयुक्तः । कदर्योवा द्रष्टुंनशक्यं । "आत्मानंधर्मकृत्यंचपुत्रदारांश्चपीडयेत् । लोभाद्यःपितरौभ्रातॄन्सकदर्यइतिस्मृतः" । नृशंसः क्रूरोपि नद्रष्टुंशक्यं । "नृशंसोघातुकःक्रूरः" इत्यमरः । अविद्वान् विद्यारहितः । परलोकोनास्तीतियोमन्यते सनास्तिकः । "अस्तिनास्तिदिष्टंमतिः" इतिठक् ॥ ८ ॥ अयोध्यायां सर्वे नराः सर्वा नार्यश्च धर्मशीलत्वादिविशिष्टाभवन्ति । सुसंयताः सुष्ठुनियतेन्द्रियाः । शीलवृत्ताभ्यां उदिताः उत्पन्नाः । सहजशीलवृत्ताइत्यर्थः । शीलं सत्स्वभावः । वृत्तं आचारः । "शीलंस्वभावेसद्वृत्ते" "वृत्तंपद्येचरित्रे"इत्युभयत्राप्यमरः । अमलाः निर्मलमनस्काः ॥ ९ ॥ अकुण्डली अयोध्यायां नविद्यते एवमुत्तरत्राप्यन्वयः । अल्पभोगवान् अल्पसुखवान् ।

"भोगःसुखेस्त्र्यादिभृतावहेश्चफणकाययोः" इत्यमरः । मृष्टः अभ्यङ्गस्नानशुद्धः । नानुलिप्ताङ्गइत्यत्रसुप्सुपेति समासः । चन्दनाद्यननुलिप्ताङ्गइत्यर्थः । अत्रापिनञनुषज्यते । सुगन्धशब्देनकुङ्कुमकस्तूर्यादिकमुच्यते॥१०॥ मृष्टंपूर्णं अन्नाभावप्रयुक्ताल्पभोजनवानयोध्यायांनदृश्यते । एवमुत्तरत्रापियोज्यं । दाता प्रकरणादन्नदाता । अङ्गदं बाहुभूषणं । निष्कं उरोभूषणं । "साष्टेशतेसुवर्णानांहेम्न्युरोभूषणेपले । दीनारेपिचनिष्कोऽस्त्री"इत्यमरः । तंधरतीतिअङ्गदनिष्कधृक् । धृगिलेवपाठः । हस्ताभरणं कटकाङ्गुलीयकादि । अनात्मवान् अजितान्तःकरणः ॥ ११ ॥ आहिताग्निः अजस्राग्निहोत्री । यज्वापिहि कश्चिद्विच्छिन्नाग्निर्भवति । अयज्वा सोमयागरहितः । क्षुद्रः अल्पविद्यैश्वर्यवान । तिरस्कारार्हइतियावत् । निर्वृत्तः अनुष्ठितः संकरः परक्षेत्रेबीजावापादिर्येनसः ॥ १२ ॥ अध्ययनं जपरूपाध्ययनं । संयताः संकुचिताः ॥ १३ ॥ अनृतं असत्यं कायति वक्तीत्यनृतकः । कैशब्दइत्यस्मादाले "आतोनुपसर्गेकः"इतिकप्रत्ययः । श्रुतं श्रवणं भावेनिष्ठा । बहुप्रकारशास्त्रश्रवणरहितइत्यर्थः । असूयतीत्यसूयकः । "कण्ड्वादिभ्योयक्"इतियक् । धातुसंज्ञायांवुञ् । अशक्तः ऐहिकामुष्मिककार्यसाधनाशक्तः । तदा दशरथराज्यपालनकाले । अनेनायंश्लोकोजानपदविषयइतिगम्यते । तेनात्रनपौनरुक्त्याशङ्का ॥ १४ ॥ षडङ्गानि शिक्षाक-

तीर्थी० सनासुक्रुष्टधनानां निचयस्सन्निचयः । अल्पस्सन्निचयोयस्मात्तथासनास्ति ॥ ७ ॥ **तीर्थी०** शक्यमितिवस्तुसामान्येननपुंसकलिङ्गनिर्देशः ॥ ८ ॥ नलिप्ताङ्गइतिसुप्सुपेतिसमासः । शोभनोगन्धः स्वाभाविकशरीरामोदोयस्य ॥ १० ॥ **तिल०** अवृत्तः सदाचाररहितः । संकरः कुण्डगोलकादिः ॥ १२ ॥ परिग्रहेस्वभार्यायां संयताःनियताः ॥ १३ ॥

[पा०] १ क–झ. ट. मुदिताः. २ झ. ननलिप्ताङ्गः. ३ ट. नामुगन्धिश्च. ४ घ. ज. विप्रोवाप्यसहस्रदः. ५ झ. ननावृत्तोनसंकरः. ६ च. परिग्रहे. ७ ङ. ज. झ. नाबहुश्रुतः. च. छ. नासहस्रवान्. ८ च. छ. निन्दितः. ९ ज. व्याधितोवापि ख. व्याधितोवानकश्चन.

कश्चिन्नरो वा नारी वा नाश्रीमान्नाप्यरूपवान्॥ द्रष्टुं शक्यमयोध्यायां नापि राजन्यभक्तिमान् ॥१६॥
वर्णेष्वग्र्यचतुर्थेषु देवतातिथिपूजकाः ॥ कृतज्ञाश्च वदान्याश्च शूरा विक्रमसंयुताः ॥ १७ ॥
दीर्घायुषो नराः सर्वे धर्मं सत्यं च संश्रिताः ॥ सहिताः पुत्रपौत्रैश्च नित्यं स्त्रीभिः पुरोत्तमे ॥१८॥
क्षत्रं ब्रह्ममुखं चासीद्वैश्याः क्षत्रमनुव्रताः ॥ शूद्राः स्वधर्मनिरतास्त्रीन्वर्णानुपचारिणः ॥ १९ ॥
सा तेनेक्ष्वाकुनाथेन पुरी सुपरिरक्षिता ॥ यथा पुरस्तान्मनुना मानवेन्द्रेण धीमता ॥ २० ॥
योधानामग्निकल्पानां पेशलानाममर्षिणाम् ॥ संपूर्णा कृतविद्यानां गुहा केसरिणामिव ॥ २१ ॥
कांभोजविषये जातैर्वाह्लीकैश्च हयोत्तमैः ॥ वनायुजैर्नदीजैश्च पूर्णा हरिहयोत्तमैः ॥ २२ ॥
विन्ध्यपर्वतजैर्मत्तैः पूर्णा हैमवतैरपि ॥ मदान्वितैरतिबलैर्मातङ्गैः पर्वतोपमैः ॥ २३ ॥
ऐरावतकुलीनैश्च महापद्मकुलैस्तथा ॥ अञ्जनादपि निष्पन्नैर्वामनादपि च द्विपैः ॥ २४ ॥
भद्रैर्मन्द्रैर्मृगैश्चैव भद्रमन्द्रमृगैस्तथा ॥ भद्रमन्द्रैर्भद्रमृगैर्मृगमन्द्रैश्च सा पुरी ।
नित्यमत्तैः सदा पूर्णा नागैरचलसन्निभैः ॥ २५ ॥

ल्पोव्याकरणंनिरुक्तिश्छन्दोविचितिर्ज्योतिपामयनंच । अव्रतः चान्द्रायणादिव्रतरहितः । असहस्रदः अवहुप्रदः । दानाध्ययनेत्यत्रविद्यादानमुक्तं । अत्रहिरण्यादिदानं । क्षिप्तचित्तः व्याकुलमनस्कः । व्यथितः व्याध्यादिनापीडितः ॥ १५ ॥ अश्रीमान् कान्तिरहितः । अरूपवान् सौन्दर्यरहितः । नारीपक्षे अश्रीमती अरूपवती अभक्तिमती चेत्यूह्यं । राजनि दशरथे अभक्तिमान् भक्तिरहितः । भक्तिः अधिकमान्यविषयस्नेहः ॥ १६ ॥ अग्रेभवोग्र्यः "अग्राद्यत्" । ब्राह्मणः । सचतुर्थोयेषांतेषु वर्णेषु वर्तमानाःनराः । देवतातिथिपूजकाः । शूद्राणांदेवतापूजा तान्त्रिकमन्त्रेण । अतिथिपूजनं हिरण्यादिदानेन । कृतज्ञाः उपकारज्ञाः । वदान्याः दानशौण्डाः । "वदान्योदानशौण्डःस्यात्" इतिविश्वः । शूराः ब्राह्मणेष्वध्ययनशूरत्वं । विक्रमसंयुताः पराक्रमसंयुताः । ब्राह्मणानांपराक्रमोवादकथासु । आसन्निति शेषः ॥ १७ ॥ तस्मिन्पुरोत्तमे सर्वेनराः धर्मं सत्यंच संश्रिताः । अतएवहेतोः दीर्घायुषः । स्त्रीभिः पुत्रपौत्रैश्च संयुताः । आसन् ॥ १८ ॥ क्षत्रं क्षत्रियजातिः । ब्रह्ममुखं ब्राह्मणप्रधानं आसीत् । तदाज्ञानुवर्तीति यावत् । "मुखंनिस्सरणेवक्त्रेद्वार्युपायप्रधानयोः"इतियादवः । वैश्याः क्षत्रमनुव्रताः क्षत्रस्यानुवर्तिनः । शूद्रास्त्रीन्वर्णानुपचारिणः त्रयाणां वर्णानामुपचारशीलाःसन्तः स्वधर्मनिरताआसन् ॥ १९ ॥ एतत्सर्वंदशरथपालनकृतमित्याह—सेति ॥ २० ॥ अग्निकल्पानां शौर्यातिशयादग्नितुल्यानां पेशलानां अकुटिलानां । अमर्षिणां पराभिभवासहिष्णूनां । कृतविद्यानां शिक्षितशस्त्रास्त्रादिविद्यानां । योधानां भटानां । "पूरणगुण—"इत्यादिनाषष्ठी । सा पुरी । योधैःसंपूर्णा । गुहा केसरिभिः सिंहैरिव । तथादुर्धर्षाभूदित्यर्थः ॥ २१ ॥ एवं चतुरङ्गसंपत्तिषु पदातिसंपत्तिमुक्त्वा तुरङ्गसंपत्तिमाह—कांभोजेति । कांभोजविषये कांभोजाख्यदेशे जातैः । वाह्लीकैः वाह्लीकदेशभवैः । "तत्रभवः"इत्यण् । वनायुजैः वनायुदेशजातैः । नदीजैः सिन्धुदेशोद्भवैः । हरेरिन्द्रस्य हयोहरिहयः उच्चैश्श्रवाः तद्वदुत्तमैः हरिहयोत्तमैरश्वश्रेष्ठैः । सा पूर्णाऽभवत् ॥२२॥ गजसंपत्तिमाह—विन्ध्येत्यादिना । श्लोकद्वयमेकान्वयं । मत्तैर्विन्ध्यपर्वतजैर्मातङ्गैः । हैमवतैः हिमवतिजातैः । "तत्रजातः"इतिशैषिकोण् । मदान्वितैः अतिबलैः मातङ्गैः गजैरपि पर्वतोपमैः ॥ २३ ॥ ऐरावतकुलीनैः ऐरावतकुलोद्भवैः । "कुलात्खः" । द्विपैश्च महापद्मः पुण्डरीकाख्योदिग्गजः तस्यकुलंयेषांतैः । द्विपैश्च अञ्जनात् वरुणदिग्गजात् निष्पन्नैर्द्विपैरपि वामनात् यमदिग्गजात् निष्पन्नैःद्विपैरपि सा पूर्णाऽऽसीत् ॥ २४ ॥ भद्रैरित्यादिसार्धश्लोकएकान्वयः । भद्राः मन्द्राः मृगाश्चेतिगजजातित्रयं । "भद्रोमन्द्रो-

मुनिभा० "भद्रोमन्द्रोमृगश्चेतिविज्ञेयास्त्रिविधागजाः" । तल्लक्षणं"पञ्चोन्नतंसप्तमृगस्यदैर्घ्यमष्टौचहस्ताःपरिणाहमानं । एकद्वि-

[पा०] १ घ. छ. झ. स्वकर्म. ख. श्वधर्म. २ ख. ननुयायिनः. ३ ग. च. नांसुवर्चसाम्. ज. नांमनीषिणाम्. ४ ख. ध. संघैः पूर्णा सुशराणां. ५ घ. हयोपमैः. ६ ङ. च. छ. झ. निष्क्रान्तैः.

सा योजने च द्वे भूयः सत्यनामा प्रकाशते ॥ यस्यां दशरथो राजा वसञ्जगदपालयत् ॥ २६ ॥
तां पुरीं स महातेजा राजा दशरथो महान् ॥ शशास शमितामित्रो नक्षत्राणीव चन्द्रमाः ॥ २७ ॥
तां सत्यनामां दृढतोरणार्गलां गृहैर्विचित्रैरुपशोभितां शिवाम् ॥
पुरीमयोध्यां नृसहस्रसंकुलां शशास वै शक्रसमो महीपतिः ॥ २८ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे षष्ठः सर्गः ॥ ६ ॥

सप्तमः सर्गः ॥ ७ ॥

दशरथस्य प्रधानामात्यानां प्रधानर्त्विजोश्चनामधेयनिर्देशः ॥ १ ॥ तथाऽन्येषाममात्यानांसामर्थ्यकथनम् ॥ २ ॥

तस्यामात्या गुणैरासन्निक्ष्वाकोस्तु महात्मनः ॥ मन्त्रज्ञाश्चेङ्गितज्ञाश्च नित्यं प्रियहिते रताः ॥ १ ॥
अष्टौ बभूवुर्वीरस्य तस्यामात्या यशस्विनः ॥ शुचयश्चानुरक्ताश्च राजकृत्येषु नित्यशः ॥ २ ॥
धृष्टिर्जयन्तो विजयः सिद्धार्थो ह्यर्थसाधकः ॥ अशोको मन्त्रपालश्च सुमन्त्रश्चाष्टमोऽभवत् ॥ ३ ॥

मृगश्चेतिविज्ञेयास्त्रिविधागजाः ''इतिहलायुधः । भद्रमन्द्रोभद्रमृगोमृगमन्द्रश्चेतिद्विप्रकृतिकाःसंकीर्णजातयस्तिस्रः । भद्रमन्द्रमृगास्त्रिप्रकृतिकाःसंकीर्णगजाः । तल्लक्षणमुक्तंवैजयन्त्यां "अङ्गप्रत्यङ्गभद्रत्वंसंक्षिप्तंभद्रलक्षणं । पृथुत्वंश्लथतास्थौल्यंसंक्षिप्तंमन्द्रलक्षणं । तनुप्रत्यङ्गदीर्घश्चप्रायोमृगगुणोमतः । भद्रमन्द्रोभद्रमृगो भद्रमन्द्रमृगोपिच । मृगमन्द्रादयोप्येवमितिसंकरजातयः'' इति । एवंभूतैर्नित्यमत्तैरचलसंनिभैः नागैः । सासदापूर्णाऽभवत् ॥२५॥ अतिरथमहारथादिशब्दैः रथसंपत्तिरपिसूचिता । एवं चतुरङ्गबलसंपत्त्या ननगरमात्रमप्रधृष्यं किंतु अभितोद्वेयोजनेदुर्गमेइत्याह—सेति । सा नगरी भूयः नगराद्बहिरपि द्वेयोजने द्वयोर्योजनयोः । अत्यन्तसंयोगेद्वितीया । सत्यनामा यथार्थनामा अयोध्यानामा । "डाबुभाभ्यामन्यतरस्यां'' इतिडाप् । अत्रहेतुमाह—यस्यामिति । योजनत्रयविस्तारवत्यांतस्यां मध्येयोजनद्वयमत्यन्तंयोद्धुमशक्येत्यर्थ इत्यप्याहुः ॥ २६ ॥ पालनंचाह्लादनपूर्वकमित्याशयेनाह— तामिति ॥ २७ ॥ सर्गोक्तमर्थसंक्षेपेण सर्गान्ते पुनर्दर्शयति—तामिति । अर्गलंनाम कवाटनिश्चलत्वायतिर्यङ्निबद्धोदारुविशेषः । "तद्विष्कंभोर्गलंनना ''इत्यमरः । शिवां मङ्गलवतीं । वंशस्थोपजातिवृत्तं ॥ २८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने षष्ठः सर्गः ॥ ६ ॥

अथोक्तगुणसंपन्नस्यदशरथस्यधर्मानुष्ठानसहायसाधिष्ठसचिवसंपत्तिंदर्शयति सप्तमे—तस्येत्यादि । महात्मनः महामतेः । तस्य इक्ष्वाकोः । दशरथस्य तद्वंशजत्वात्तच्छब्दः । मन्त्रज्ञाः कार्यविचारज्ञाः । इङ्गितं पराभिप्रायः तं मुखविकाससंकोचव्यङ्ग्यवचनादिभिर्जानन्तीति इङ्गितज्ञाः । अमात्याः अमा राज्ञःसर्वराज्यव्यापारेषुसहभवन्तीत्यमात्याः । "अव्ययात्त्यप्'' गुणैः वक्ष्यमाणमन्त्रिगुणैः । उपेताआसन् ॥ १ ॥ "मन्त्रिणःसप्तवाष्टौवाप्रकुर्वीतपरीक्षितान् ''इतिमनुनोक्तरीत्याह—अष्टाविति । शुचयः सर्वात्मनास्वामिद्रोहचिन्तारहिताः । नित्यशः राजकृत्येषु तदनुष्ठानेषु । अनुरक्ताः तत्पराः । अष्टावमात्याः बभूवुः '' २ ॥ तेषांनामानिदर्शयति—धृष्टिरिति । धृष्टिः प्रथमोऽभ-

---

वृद्धावथमन्द्रभद्रौसंकीर्णनागोऽनियतप्रमाणः '' । अत्रपूर्वार्धेमृगाख्यगजस्यलक्षणमुक्तं । मृगाख्यगजप्रमाणादेकहस्तमात्रवृद्धौमन्द्राख्यगजइत्युच्यते । मन्द्राख्यगजात् द्विहस्तवृद्धौभद्राख्यगजइत्युच्यते । भद्राख्यगजात् त्रिहस्तवृद्धौभद्रमन्द्रमृगाख्यगजइत्युच्यते । भद्रमन्द्रैःभद्राख्यगजस्यऔन्नत्यदैर्घ्यपरिणाहादिप्रमाणैःमन्द्राख्यगजस्यऔन्नत्यदैर्घ्यपरिणाहादिप्रमाणैश्चयुक्तागजाःभद्रमन्द्रास्तैः । भद्रमृगैःभद्राख्यमृगाख्ययोर्गजयोःप्रमाणयुक्ताभद्रमृगास्तैः । मृगमन्द्रैः मृगाख्यमन्द्राख्ययोर्गजयोःप्रमाणयुक्तागजामृगमन्द्रास्तैः । संकीर्णनागाःइतरगजाअनियतप्रमाणाः ॥ २५ ॥ इतिषष्ठस्सर्गः ॥ ६ ॥

शिरो० तुशब्दइवार्थे । किंचइक्ष्वाकोरेवामात्यास्तस्यदशरथस्यामात्याआसन्नित्यन्वयः । अत्रार्थंतुरेवार्थे ॥ १ ॥

[पा०] १ ङ.झ. इदमर्धंनदृश्यते. २ ट. नृपसिंहसंकुलां. ३ ङ. झ. सुराष्ट्रोराष्ट्रवर्धनः. अकोपोधर्मपालश्चसुमन्त्रश्चाष्टमोऽर्थवित्.

ऋत्विजौ द्वावभिमतौ तस्यास्तामृषिसत्तमौ ॥ वसिष्ठो वामदेवश्च मन्त्रिणश्च तथाऽपरे ॥ ४ ॥
[सुयज्ञोप्यथ जाबालिः काश्यपोप्यथ गौतमः ॥ मार्कण्डेयस्तु दीर्घायुस्तथा कात्यायनो द्विजः ।
एतैर्ब्रह्मर्षिभिर्नित्यमृत्विजस्तस्य पौर्वकाः ॥ ५ ॥]
विद्याविनीता ह्रीमन्तः कुशला नियतेन्द्रियाः ॥ [परस्परानुरक्ताश्च नीतिमन्तो बहुश्रुताः ॥]
श्रीमन्तश्च महात्मानः शास्त्रज्ञा दृढविक्रमाः ॥ ६ ॥
कीर्तिमन्तः प्रणिहिता यथावचनकारिणः ॥ तेजःक्षमायशःप्राप्ताः स्मितपूर्वाभिभाषिणः ॥ ७ ॥
क्रोधात्कामार्थहेतोर्वा न ब्रूयुरनृतं वचः ॥ ८ ॥
तेषामविदितं किंचित्स्वेषु नास्ति परेषु वा ॥ क्रियमाणं कृतं वाऽपि चारेणापि चिकीर्षितम् ॥ ९ ॥
कुशला व्यवहारेषु सौहृदेषु परीक्षिताः ॥ प्राप्तकालं तु ते दण्डं धारयेयुः सुतेष्वपि ॥ १० ॥
कोशसंग्रहणे युक्ता बलस्य च परिग्रहे ॥ अहितं वाऽपि पुरुषं न विहिंस्युरदूषकम् ॥ ११ ॥
वीराश्च नियतोत्साहा राजशास्त्रमनुष्ठिताः ॥ शुचीनां रक्षितारश्च नित्यं विषयवासिनाम् ॥ १२ ॥

वत् । जयन्तोद्वितीयोऽभूत् । इति क्रमेणयोजयित्वा सुमन्त्रोष्टमोऽभवदिति योज्यं ॥ ३ ॥ वसिष्ठः वामदेवश्च द्वौ ऋषिसत्तमौ ऋत्विजौ पुरोहितौ । अभिमतौ प्रधानौआस्तां । तथा अभिमताः अपरेमन्त्रिणः । ऋत्विजः जाबालिप्रभृतयश्चासन् ॥४–५॥ अथमन्त्रिगुणान् प्रपञ्चयति सर्गशेषेण । विद्यासुआन्वीक्षिकीप्रभृतिषु विनीताःशिक्षिताः । ह्रीमन्तः अकृत्यकरणेषु लज्जावन्तः । कुशलाः नीतौसमर्थाः । नियतेन्द्रियाः अविहितविषयेभ्योनिवृत्ताः ।श्रीमन्तः लक्ष्मीसमृद्धाः । महात्मानः महाबुद्धयः । शास्त्रज्ञाः नीतिशास्त्रज्ञाः । दृढविक्रमाः अप्रतिहतपराक्रमाः ॥ ६ ॥ प्रणिहिताः राजकृत्येष्वप्रमत्ताः । यथावचनकारिणः यथोक्तवन्तस्तथैवकुर्वन्ति । नतु "मनस्यन्यद्वचस्यन्यत्कर्मण्यन्यत्" इतिन्यायतइतिभावः । तेजःक्षमायशांसिप्राप्ताः । "द्वितीयाश्रित—"इत्यादिनासमासः । अत्रयशः प्रतापक्षमाजन्याप्रथा । कीर्तिमन्तइत्यत्र कीर्तिस्तु मन्त्रज्ञताकृताप्रथा । स्मितपूर्वाभिभाषिणइत्यनेन निर्मत्सरत्वमुच्यते । आसन्मन्त्रिणइति श्लोकद्वयशेषः ॥ ७ ॥ अर्थमेकान्वयं । क्रोधाद्वा कामहेतोरर्थहेतोर्वा अनृतंअसत्यं वचोनब्रूयुः ॥ ८ ॥ तेषां मन्त्रिणां । स्वेषु स्वराष्ट्रीयवृत्तान्तेषु । परेषु परराष्ट्रीयवृत्तान्तेषुच । कृतं क्रियमाणं चिकीर्षितं कर्तुमिष्टं । करिष्यमाणमितियावत् । यत्किंचिदपिवावृत्तं । चारेण चारमुखेन । अविदितंनास्ति । सर्वोपिस्वराष्ट्रपरराष्ट्रवृत्तान्तभेदस्तैर्ज्ञातइत्यर्थः ॥ ९ ॥ व्यवहारेषु निश्चितार्थप्रतिपादनेषु । कुशलाः समर्थाः । सौहृदेषुविषयेषु । परीक्षिताः राज्ञाबहुधापरीक्षिताः । ते मन्त्रिणः । सुतेष्वपि । प्राप्तकालं प्राप्तस्वापराधत्वलक्षणकालं । दण्डं । धारयेयुः प्रवर्तयेयुः ॥१०॥ कोशस्य अर्थनिचयस्य । संग्रहणे संपादने । बलस्य चतुर्विधसैन्यस्य । परिग्रहे अर्थप्रदानेनसंरक्षणेच । युक्ताः अवहिताः सन्तः । अहितं शत्रुमपि । अदूषकं अनपराधिनं । नविहिंस्युः नपीडयेयुः । शकिलिङ् ॥ ११ ॥ वीराः शत्रुनिवारणक्षमाः । नियतोत्साहाः शत्रुजयेनित्योत्साहाः । राजशास्त्रं नीतिशास्त्रं । अनुष्ठिताः अनुष्ठितवन्तः । अतएव विषयवासिनां स्वराज्यवासिनां । शुचीनां साधूनां । नित्यंरक्षितारः । अशुचीनांतुनिहन्तारइतिचसि-

---

तीर्था॰ प्रधानर्त्विजोर्वसिष्ठवामदेवयोरपिमन्त्रिमध्येपाठान्मन्त्रपर्यालोचनायामप्यन्तर्भावोद्योत्यते । **तिल॰** अमात्याः देशादिकार्यनिर्वाहकाः । मन्त्रिणोव्यवहारद्रष्टारइतिभेदः ॥ ४ ॥ **तिल॰** परानेवाह—सुयज्ञइत्यादि । सुयज्ञःऋषिविशेषः । एतैर्ब्रह्मर्षिभिर्नित्यंसहितास्तस्यऋत्विजइत्यनेनसर्वथाकर्मसाद्गुण्यंदर्शितं । पौर्वकाःपरंपरागताइत्यर्थकममात्यर्त्विजांविशेषणम् ॥ ५ ॥ **तिल॰** शास्त्रज्ञाःशास्त्रप्रतिपादकधनुर्वेदविदः ॥ ६ ॥

[**पा॰**] १ ङ. च. छ. झ. ञ. ट. सार्धश्लोकोधिकोदृश्यते. २ ध. कुलीनाविजितेन्द्रियाः. ३ ग. इदमर्धमधिकं दृश्यते. ४ घ. शास्त्रेष्वकुहबुद्धयः. ङ. झ. शास्त्रज्ञादृढविक्रमाः. ५ छ. पुच. ६ ख. घ. नीतिज्ञाः सत्यवादिनः. ७ क. ख. घ. ज. कालंचयेदण्डं. च. छ. कालेयथादण्डं. ङ. झ. ट. कालंयथादण्डं. ८ ख. साधयेयुः. ९ ख. संरक्षणे. क. ग्रहणसंयुक्ताः. १० ख. सपरिसंग्रहे. ११ ङ–झ. नहिंस्युरविदूषकं. १२ ख. रक्षितारश्चवर्णानां.

ब्रह्मक्षत्रमहिंसन्तस्ते कोशं समपूरयन् ॥ सुतीक्ष्णदण्डाः संप्रेक्ष्य पुरुषस्य बलाबलम् ॥ १३ ॥
शुचीनामेकबुद्धीनां सर्वेषां संप्रजानताम् ॥ नासीत्पुरे वा राष्ट्रे वा मृषावादी नरः क्वचित् ॥१४॥
कश्चिन्न दुष्टस्तत्रासीत्परदाररतो नरः ॥ प्रशान्तं सर्वमेवासीद्राष्ट्रं पुरवरं च तत् ॥ १५ ॥
सुवाससः सुवेषाश्च ते च सर्वे सुशीलिनः ॥ हितार्थं च नरेन्द्रस्य जाग्रतो नयचक्षुषा ॥ १६ ॥
गुरौ गुणगृहीताश्च प्रख्याताश्च पराक्रमे ॥ विदेशेष्वपि विज्ञाताः सर्वतो बुद्धिनिश्चयात् ॥ १७ ॥
[अभितो गुणवन्तश्च न चासन्गुणवर्जिताः ॥]
सन्धिविग्रहतत्त्वज्ञाः प्रकृत्या संपदाऽन्विताः ॥ मन्त्रसंवरणे शक्ताः श्लक्ष्णाः सूक्ष्मासु बुद्धिषु ॥१८॥

द्धं । ते आसन्नित्यनुषज्यते ॥ १२॥ ब्रह्म ब्राह्मणान् । क्षत्रं क्षत्रियांश्च । अहिंसन्तः विनाऽपराधंतत्स्वमनपहरन्तः । सत्यप्यपराधे । पुरुषस्य अपराधिनः । बलाबलं अपराधतारतम्यं शक्तितारतम्यंवा । संप्रेक्ष्य । अपराधगुरुत्वे सुतीक्ष्णदण्डाः । अपराधाल्पत्वे मृदुदण्डाश्च । शक्तत्वे सुतीक्ष्णदण्डाः । अशक्तत्वे मृदुदण्डाश्च । कोशं समपूरयन् ॥१३॥ अथमन्त्रिगुणसंपत्तिफलंदर्शयति—शुचीनामित्यादिश्लोकद्वयेन । शुचीनां एकरूपकरणत्रयवतां । एकबुद्धीनां एककण्ठानां सर्वेषां । मन्त्रिणां । संप्रजानतां राज्यतन्त्रंविचारयतां । भावलक्षणसप्तम्यर्थेषष्ठी । "षष्ठीचानादरे"इत्यत्रयोगविभागेन । सर्वेषुमन्त्रिषुराज्यतन्त्रंविचारयत्स्वित्यर्थः । पुरेवा राष्ट्रेवा । कचित्कोणेपि । मृषावादी असत्यवादी । नरः नासीत् ॥ १४ ॥ किंच तत्र पुरराष्ट्रेषु । कश्चिन्नरः । दुष्टः कुटिलः । परदाररतश्च नासीत् । प्रत्युत यद्राष्ट्रं पुरवरंच तत्सर्वं प्रशान्तमेव आसीत् । नगरजनपदवासिनःसर्वेप्यन्यायाधर्मरहिताएवासन्नित्यर्थः ॥ १५ ॥ पुनस्तान्विशेषयति—सुवाससःइत्यादिनासार्धश्लोकत्रयेण । सुवाससः शुभ्रवाससः । सुवेषाः शोभनालंकाराः । सुशीलिनः सुसद्वृत्ताः । नरेन्द्रस्य स्वामिनः । हितार्थं नयचक्षुषा जाग्रतः जागरूकाः । सर्वदानीतिपुदत्तावधानाइत्यर्थः ॥ १६ ॥ गुरौ गुरुषु । जात्येकवचनं । गुणगृहीताः गृहीतगुणाः । गुणमात्रग्राहिणोदोषमपश्यन्तइत्यर्थः । पराक्रमेविषये प्रख्याताः । विदेशेषु देशान्तरेष्वपि । सर्वतः सर्वत्रातीतानागतविषयेषु । बुद्धिनिश्चयात् निश्चयरूपबुद्धेर्हेतोः । विज्ञाताः विख्याताः ॥ १७ ॥ सन्धिः सामन्तैःसमाधानं विग्रहः तैः कलहः तयोस्तत्त्वं देशकालाद्युचितत्वं । तज्जानन्तीतितथा । उक्तंचमनुना "यदात्वेवाल्पिकापीडातदासन्धिंसमाश्रयेत । अभ्युच्छ्रयोयदात्मानंतदा मन्येतविग्रहं"इति । प्रकृत्या स्वभावेन । संपदा ऐश्वर्येण । अन्विताः । संपदभावे तत्त्वापलेनान्यथाकुर्युरिति भावः । मन्त्रोराष्ट्रकार्यचिन्ता तस्यसंवरणे बहिरप्रकटने शक्ताः । संपत्कार्यमिदं । सूक्ष्मासुबुद्धिषु सूक्ष्मार्थविशेषविचारेषु । श्लक्ष्णाः अपरुषाः । सद्यःप्रतिभावन्तइत्यर्थः । नीतिशास्त्रविशेषज्ञाः नीत्याशासनविशेषज्ञाः । "ग्रन्थशासनयोःशास्त्रं" इतिभास्करः । सततं राज्ञःप्रियवादिनः । हितवचनस्यैवराज्ञःप्रिय-

तिल० । अभिपूरयन्नितिपाठेअडभावआर्षः । शिरो० ब्रह्मक्षत्रं ब्रह्मणोवेदस्यक्षत् अप्रामाण्यप्रतिपादकत्वेनहिंसनंयेषांतेनास्तिकास्तेभ्यस्त्रायतेवेदाप्रामाण्यवादनिवर्तनपूर्वकं वेदप्रामाण्यव्यवस्थापकत्वेनजनान्रक्षतीतिब्रह्मक्षत्रं ब्राह्मणकुलमित्यर्थः ॥ १३ ॥ तिल० हितार्थाः हितप्रयोजनाः ॥ १६ ॥ ती० गुणागुणगृहीताः गृहीतगुणदोषाः । अयंगुणवानयंदोषवानितिज्ञानवन्तः । आहिताग्न्यादित्वात्परनिपातोनिष्ठान्तस्य । ति० गुरोः संबन्धसामान्येषष्ठी । गुरुणा स्वाचार्येणराज्ञाच । अर्शआद्यजन्तगुणशब्देनगुणवत्तयागृहीताइत्यर्थः । तेनगुर्वनुग्रहप्राप्तसर्वैश्वर्यत्वंसूचितं । विदेशेष्वपिसर्वतोविज्ञातत्वेहेतुः बुद्धिनिश्चयाः बुद्धिसंपन्नाः । ॥ १७ ॥ तिल० अभितोगुणवन्तः सर्वदेशेसर्वकालेचगुणवन्तः । प्रकृत्या त्रिगुणयासंपदाऽन्विताः । तत्रसात्विक्यासंपदाशिष्टपालने । तामस्यासंपदादुष्टनिग्रहकाले । भोगकालेराजस्यासंपदाधनधान्यदासीदासशिबिकाश्वगजादिरूपया ॥ १८ ॥

[पा०] १ ग. तेकोशंसमवर्धयन्. घ तेचकोशमपूरयन्. २ ग. ब्रमन्दः. ३ ख. ङ.—झ. रतिर्नः. ४ ङ. च.—झ. शुचिव्रताः. ५ ग. घ. ङ. झ. हितार्थाश्च. ६ घ. चक्षुषः. ७ ङ. च. झ. गुरोर्गुण. ख. छ. ज. गुणागुण. ८ ङ. च. छ. झ. पराक्रमैः. ९ ख. ग. विख्याताः. १० ङ. निश्चिताः. ज. झ. निश्चयाः. घ. निश्चये. ११ ङ. झ. इदमर्धंदृश्यते. १२ ट. संग्रहणे. १३ ग. घ. च. युक्ताः. १४ ग. घ. च. शाक्ताः. ङ. सक्ताः. क. छ. ज. झ. शक्ताः.

नीति¹शास्त्रविशेषज्ञाः सततं प्रियवादिनः ॥ ईदृशैस्तैरमात्यैश्च राजा दशरथोऽनघः ॥
उपप²न्नो गुणोपेतैरन्वशासद्वसुंधराम् ॥ १९ ॥
अवेक्षमाणश्चारेण प्रजा धर्मेण र³ञ्जयन् ॥ प्रजानां पालनं कुर्वन्नधर्मं परिवर्जयन् ॥ २० ॥
विश्रुतस्त्रिषु लोकेषु वदान्यः सत्यसङ्गरः ॥ स तत्र पुरुषव्याघ्रः शशास पृथिवीमिमाम् ॥ २१ ॥
नाध्यगच्छद्विशिष्टं वा तुल्यं वा शत्रुमात्मनः ॥ मित्रवान्नतसामन्तः प्रतापहतकण्टकः ॥ २२ ॥
स शशास जगद्राजा ⁴दिवं देवपतिर्यथा ॥ २३ ॥
तैर्मन्त्रिभिर्मन्त्रहिते नि⁵युक्तैर्वृतोऽनुरक्तैः कुशलैः स⁶मर्थैः ॥
स पार्थिवो दीप्तिमवाप युक्तस्तेजोम⁷यैर्गोभिरिवोदितोऽर्कः ॥ २४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे सप्तमः सर्गः ॥ ७ ॥

अष्टमः सर्गः ॥ ८ ॥

पुत्राभावात्परिखिद्यतादशरथेनतदर्थमश्वमेधयजननिर्धारणेन सुमन्त्रमुखादाहूतेषुवसिष्ठादिषुस्वाभिप्रायनिवेदनम् ॥ १ ॥ तैस्तदनुमोदनेनसरयूत्तरतीरेयज्ञशालानिर्माणविधानपूर्वकं भूसंचारणायाश्वमोचनचोदना ॥ २ ॥ दशरथेनमन्त्रिपुरयज्ञसंभार-संभरणादिनियोजनपूर्वकं पत्नीनांतन्निवेदनेनदीक्षाविधानम् ॥ ३ ॥

तस्य त्वेवंप्रभावस्य धर्मज्ञस्य महात्मनः ॥ सुतार्थं तप्यमानस्य नासीद्वंशकरः सुतः ॥ १ ॥

त्वात् । आसन्निति पूरणीयं ॥ १८ ॥ ईदृशैः उक्तगुण-विशिष्टैः । गुणोपेतैः उक्तगुणातिरिक्तगुणोपेतैः । तैः अमात्यैः । उपपन्नः । अनघः व्यसनरहितः । उक्तं मनुना "दशकामसमुत्थानितथाष्टौक्रोधजानिच । व्यसनानिदुरन्तानिप्रयत्नेनविवर्जयेत्" इति । व्यसन-स्वरूपंचोक्तं "मृगयाक्षोदिवास्वापःपरिवादःस्त्रियोमदः । तौर्यत्रिकंवृथाट्याचकामजोदशकोगुणः । पैशुन्यंसाहसंद्रोहईर्ष्यासूयार्थदूषणे । वाग्दण्डनंचपारुष्यंक्रोधजोपिगुणोष्टकः" इति । दशरथोराजा । वसुंधरां भूमिं । अन्वशासदितिलुङ् । "सर्तिशास्त्यर्तिभ्यश्च" इत्यङ् ॥ १९ ॥ श्लोकद्वयमेकान्वयम् । चारेण चक्षुःस्थानीयेन । अवेक्षमाणः स्वपरराष्ट्रवृत्तान्तान्पश्यन् । जात्येकवचनमिदं । अनेकचारैर्ज्ञेयत्ववचनात् । यथाहमनुः "वनेवनचराःकार्याःश्रमणाटविकादयः ॥ परप्रवृत्तिज्ञानार्थंशीघ्राश्चारपरंपराः" इति । धर्मेण दण्ड्यदण्डनादिना । प्रजाः । रञ्जयन् आह्लादयन् । पालनमनिष्टनिवृत्तिपूर्वकेष्टप्रापणं । अधर्मं अदण्ड्यदण्डनादि । विश्रुतः दानविक्रमादिभिः प्रसिद्धः । वदान्यः दानशीलः । सत्यसंगरः सत्यप्रतिज्ञः । "संगरोनाक्रियाकालेप्रतिज्ञाविपदोर्युधि" इति यादवः । सः । पुरुषव्याघ्रः पुरुषश्रेष्ठः । तत्र अयोध्यायां । वसन्निति शेषः ॥ २० ॥ २१ ॥ विशिष्टं अधिकं । तुल्यंवा । आत्मनः शत्रुं नाध्यगच्छत् नज्ञातवान् । तत्रहेतुमाह । मित्रवान् । नतसामन्तः पादानतसमानसीमाधिपतिकः । प्रतापेनहताः कण्टकाः शत्रवोयस्यसतथा "वेणौद्रुमाङ्गेरोमाञ्चेक्षुद्रशत्रौचकण्टकः" इतियादवः । सइतिशेषः ॥ २२ ॥ उक्तमर्थंसदृष्टान्तमाह—सइति । अर्धमेकं ॥२३॥ सर्गार्थंसंग्रहेणदर्शयति—तैरिति । मन्त्रहिते मन्त्रे हितेच । नियुक्तैः । कुशलैः बुद्धिकुशलैः । समर्थैः कार्यकरणसमर्थैः । मन्त्रिभिः । वृतः नृपः । तेजोमयैः । स्वार्थेमयट् । गोभिः किरणैः । युक्तः । उदितोऽर्कः बालसूर्यइव । दीप्तिमवाप । त्रिष्टुबुपजातिवृत्तम् ॥२४॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने सप्तमः सर्गः ॥७॥

एवंधार्मिकत्वेनदशरथस्यभगवदवतारयोग्यत्वमुक्त्वा अथतदुपयुक्ततदाराधनोपक्रमंदर्शयत्यष्टमे—

ति० प्रजाः धर्मेणयुक्तायथाभवन्तितथा पुरुषैः रक्षयन् । सर्वत्रहेतौ शता ॥ २० ॥ ती० प्रतापाद्धतकण्टकइति पाठे प्रतापेन समन्तान्निहतकण्टकइत्यर्थः ॥ २२ ॥ इतिसप्तमःसर्गः ॥ ७ ॥

ति० एवंसमग्रगुणस्याप्यपुत्रत्वेनाजितपितृलोकत्वात्पुत्रार्थमश्वमेधप्रस्तावः ॥ १ ॥

[पा०] १ ङ. नीतिशास्त्रे. २ च. छ. उपपन्न. ३ ङ. छ. झ. रक्षयन्. ४ ख. ङ. झ. दिवि. ५ क. झ. निविष्टैः. ६ ख. घ. समतैः. ७ च. छ. मयोगोभि.

चिन्तयानस्य तस्यैवं बुद्धिरासीन्महात्मनः ॥ सुतार्थी वाजिमेधेन किमर्थं न यजाम्यहम् ॥ २ ॥
[3]स निश्चितां मतिं कृत्वा यष्टव्यमिति बुद्धिमान् ॥ मन्त्रिभिः सह धर्मात्मा सर्वैरेवं कृतात्मभिः ॥३॥
ततोऽब्रवीदिदं[4] राजा सुमन्त्रं मन्त्रिसत्तमम् ॥ शीघ्रमानय मे सर्वान्गुरूंस्तान्सपुरोहितान् ॥ ४ ॥
ततः सुमन्त्रस्त्वरितं गत्वा त्वरितविक्रमः ॥ समानयत्स तान्सर्वान्समस्तान्वेदपारगान् ॥ ५ ॥
सुयज्ञं वामदेवं च जाबालिमथ काश्यपम् ॥ पुरोहितं वसिष्ठं च ये चान्ये द्विजसत्तमाः ॥ ६ ॥
तान्पूजयित्वा धर्मात्मा राजा दशरथस्तदा ॥ इदं धर्मार्थसहितं वाक्यं श्लक्ष्णमथाऽब्रवीत् ॥ ७ ॥
मम लालप्यमानस्य पुत्रार्थं नास्ति वै सुखम् ॥ तदर्थं हयमेधेन यक्ष्यामीति मतिर्मम ॥ ८ ॥
तदहं यष्टुमिच्छामि शास्त्रदृष्टेन कर्मणा ॥ कथं प्राप्स्याम्यहं कामं बुद्धिरत्र विचार्यताम् ॥ ९ ॥
ततः साध्विति तद्वाक्यं ब्राह्मणाः प्रत्यपूजयन् ॥ वसिष्ठप्रमुखाः सर्वे पार्थिवस्य मुखाच्च्युतम् ॥
ऊचुश्च परमप्रीताः सर्वे दशरथं वचः ॥ १० ॥
संभाराः संभ्रियन्तां ते तुरङ्गश्च विमुच्यताम् ॥ [सरय्वाश्चोत्तरे तीरे यज्ञभूमिर्विधीयताम्] ॥११॥

तस्येति । उत्तरश्लोकवक्ष्यमाणचिन्ता युक्तेतिसूचयितुं राज्ञोविशेषणानि । तप्यमानस्य तपश्चरतः । यद्वा । पुत्रोत्पादनानुगुणदृष्टसामग्रीसत्त्वेपि पुत्राभावात् परितप्यमानस्य ॥ १ ॥ चिन्तयानस्य पुत्रोत्पत्त्युपायंमार्गमाणस्य । मुगभावआर्षः । एवं वक्ष्यमाणरीत्या । नयजामि नायाक्षिपं ॥ २ ॥ सइत्यादिश्लोकद्वयमेकान्वयं । कृतात्मभिः पर्याप्तबुद्धिभिः । "क्लीबेकृतंयुगेपिस्यात्फलपर्याप्तयोरपि"इतिभास्करः ॥ ३ ॥ तान् प्रसिद्धान् ॥ ४ ॥ त्वरितं तत्क्षणएव । त्वरितविक्रमः त्वरितगमनः । समस्तान् संमिलितान् । समानयत् । राजगृहमितिशेषः ॥ ५ ॥ गुरूनेवाह—सुयज्ञमिति । समानयदितिपूर्वेणान्वयः । सुयज्ञादीनांगुरुत्वमार्त्विज्यकरणात् ॥ ६ ॥ अथ गुर्वागमनानन्तरं । श्लक्ष्णं मधुरम् ॥ ७ ॥ लालप्यमानस्य भृशंविलपतः । लापेर्यङन्ताच्छानच् ॥ ८ ॥ तत् पुत्रेच्छुत्वात् । यष्टुं दीक्षितुं । शास्त्रदृष्टेनकर्मणा विधिना । प्रकारेणेतियावत् । कर्मणा क्रियाकलापेनेतिवा । कामं काम्यमानं यज्ञं । कथंप्राप्स्यामि विघ्नभूयस्त्वादितिभावः । अत्र निर्विघ्नयागकरणे । बुद्धिः उपायः । विचार्यताम् ॥९॥ प्रत्यपूजयन् तुष्टुवुः । पार्थिवस्यमुखाच्च्युतं साक्षाद्राज्ञोक्तमित्यर्थः ॥ १० ॥ ऊचुरित्यर्धमेकं । दशरथं वच ऊचुः । "ब्रूशासि"इत्यादिनाद्विकर्मकत्वम् । ते प्रसिद्धाः । संभाराः यज्ञोपकरणानि यूपपात्रादीनि । संभ्रियन्तां संपाद्यन्तां । तुरङ्गः अश्वमेधीयोऽश्वः ॥११॥

शिरो० बुद्धिमान् परमबुद्धिविशिष्टः । धर्मात्मा वेदोक्तकर्मप्रवृत्तिविषयकयत्नवान् । कृतात्मभिः सकलकर्मफलीभूतरघुनाथविषयकबुद्धिभिः ॥ ३ ॥ **शिरो०** पुरोहितशब्दस्यवृत्तिघटकीभूतत्वेपि नित्यसापेक्षत्वात्तत्रमेशब्दान्वयः ॥ ४ ॥ **शि०** तान् राजबोधितान् ॥ ५ ॥ **तिल०** सुयज्ञादयोविद्यागुरवः । वसिष्ठस्यैवपुरोहितत्वेनोपनेतृतयाउपनेतुरेवाध्यापकतयागुरुत्वेपि स्वसमशिष्याणांस्वतपोव्याक्षेपभियातेनाध्यापनेनियोगात्तेषामपिविद्यागुरुत्वमक्षतं । अन्ये अश्वमेधार्त्विज्याद्युपयुक्ताः ॥ ६ ॥ **तिल०** तातप्यमानस्येतिपाठे पुनःपुनर्भृशंचतपःकुर्वतइत्यर्थः ॥ ८ ॥ **शिरो०** बुद्धिरत्र बुद्धिरतः विचाररतान् त्रायतेनिश्चितवस्तूपदेशेनरक्षतीतितत्संबोधनंहेवसिष्ठेत्यर्थः । तत् वाङ्मनसगोचरातीतंवस्तु । यष्टुं प्रत्यक्षतःमेलयितुमिच्छामि । तत् शास्त्रदृष्टेन वेदबोधितेन । कर्मणाअहं कथं किंप्राप्स्यामि वाङ्मनसगोचरातीतं वस्तुप्रत्यक्षतः किंलब्धास्मीत्यर्थः । इतिकामंनितरांविचार्यतां । एतेन "नकर्मणानप्रजयाधनेन" इतिश्रुत्याकर्मणांतत्प्रापकत्वाभावनिश्चयात् वाङ्मनसगोचरातीतवस्तुनःप्रत्यक्षत्वेसर्वप्रमाणविरुद्धत्वाच्च तत्प्राप्तिर्दुर्घटेतिप्रश्नकर्तुराशयोध्वनितः ॥ ९ ॥ **शि०** परमप्रीताः । राजकृतगूढप्रश्नस्यसूत्तरप्रस्फूर्त्यापरमहर्षंप्राप्ताएव सर्वे वसिष्ठप्रमुखाः । दशरथं । वचः सूत्तरवचनमूचुः । एतेन प्राकृतवाङ्मनसगोचरातीतत्वंतस्य । भवन्तस्त्वप्राकृतकरणाइतिभवत्करणविषयत्वंतस्यसिद्धमेव । एतावत्कालंभवत्करणाविषयत्वंतुवात्सल्यरसप्रभूतये "नकर्मणानप्रजयाधनेन—"इत्यादीनिप्राकृतजनपराणि । तत्रापिकाम्यकर्मजनिततल्लाभाभावप्रतिपादकानीतिकाम्यनिषिद्धवर्जितानिकर्माण्यनुष्ठेयान्येवेत्युत्तरंसूचितं ॥ १० ॥

[पा०] १ क. ख. घ.—झ. सुतार्थं. २ क. च. छ. ज. सुनि. ३ ङ. च. झ. सर्वैरपि. ४ ङ. झ. ब्रवीन्महातेजाः. ५ क. घ. छ. सर्वान्गुरूंस्तान्सपुरोहितान्. ६ झ. श्लक्ष्णंवचनमब्रवीत्. ७ क. झ. मुखेरितं. ८ इदमर्धं क.—ट. पुस्तकेष्वधिकंदृश्यते.

सर्वथा प्राप्स्यसे पुत्रानभिप्रेतांश्च पार्थिव ॥ यस्य ते धार्मिकी बुद्धिरियं पुत्रार्थमागता ॥ १२ ॥
ततः [1]प्रीतोऽभवद्राजा श्रुत्वैतद्द्विजभाषितम् ॥ अमात्यांश्चाब्रवीद्राजा हर्ष[2]पर्याकुलेक्षणः ॥ १३ ॥
संभाराः संभ्रियन्तां मे गुरूणां वचनादिह ॥ समर्थाधिष्ठितश्चाश्वः सोपाध्यायो विमुच्यताम् ॥१४॥
सरय्वाश्चोत्तरे तीरे यज्ञभूमिर्विधीयताम् ॥ शान्तयश्चाभिवर्धन्तां यथाकल्पं यथाविधि ॥ १५ ॥
शक्यः प्राप्तुमयं यज्ञः सर्वेणापि महीक्षिता ॥ नापराधो भवेत्कष्टो यद्यस्मिन्क्रतुसत्तमे ॥ १६ ॥
छिद्रं हि मृगयन्तेऽत्र विद्वांसो ब्रह्मराक्षसाः ॥ नि[3]हतस्य च यज्ञस्य सद्यः कर्ता विनश्यति ॥ १७ ॥
तद्यथा विधिपूर्वं मे क्रतुरेप समाप्यते ॥ तथा विधानं क्रियतां समर्थाः क[4]रणेष्वि[5]ह ॥ १८ ॥
तथेति चाब्रुवन्सर्वे मन्त्रिणः [6]प्रत्यपूजयन् ॥ पार्थिवेन्द्रस्य तद्वाक्यं य[7]थाज्ञप्तं निशम्य ते ॥ १९ ॥
तथा द्विजास्ते धर्मज्ञा वर्धयन्तो नृपोत्तमम् ॥ अनुज्ञातास्ततः सर्वे पुनर्जग्मुर्यथागतम् ॥ २० ॥
विसर्जयित्वा ता[8]न्विप्रान्सचिवानिदमब्रवीत् ॥ ऋत्विग्भिरु[9]पदिष्टोऽयं यथावत्क्रतुराप्यताम् ॥२१॥
इत्युक्त्वा नृपशार्दूलः सचिवान्समुपस्थितान् ॥ विसर्जयित्वा स्वं वेश्म प्रविवेश महा[10]द्युतिः ॥२२॥
ततः स गत्वा ताः पत्नीर्नरेन्द्रो हृ[11]दयप्रियाः ॥ उवाच दीक्षां विशत यक्ष्येऽहं सुतकारणात् ॥२३॥

एकपुत्रस्यापुत्रप्रायत्वात् । "एष्टव्याबहवःपुत्राः"इति वचनाच्च पुत्रानितिबहुवचनं । प्राप्स्यसइति कर्मकर्तर्यात्मनेपदं । धार्मिकी "धर्मंचरति"इतिठक् । धर्माचरणविपयिणीत्यर्थः ॥ १२ ॥ हर्षेण हर्षाश्रुणा पर्याकुलेव्याप्तेईक्षणेयस्यसः हर्षेणव्याकुलदृष्टिमान् । क्रियाभेदाद्राजपदद्वयमितिनविरोधः ॥ १३ ॥ मे गुरूणामित्यन्वयः । इह इदानीं । समर्थैः । "चतुःशतारक्षन्ति यज्ञस्याघाताय"इत्युक्तरीत्यारक्षणसमर्थैः अधिष्ठितः रक्षितः । सोपाध्यायः अध्वर्युप्रभृतिऋत्विक्सहितः ॥ १४ ॥ सरय्वाइति । अनेन सरयूदक्षिणतीरे अयोध्येतिगम्यते । शान्तयः विघ्ननिवारकाणिकर्माणि । अभिवर्धन्तां अभिवर्धयन्तां । अन्तर्भावितण्यन्तोयंशब्दः । यथाकल्पं यथाक्रमं । "क्रमस्तुकथ्यतेकल्पे" इतिभागुरिः । यथाविधि यथाशास्त्रं ॥ १५ ॥ अयंयज्ञः अश्वमेधः । सर्वेणापि राजमात्रेणापि । महींक्षयतीतिमहीक्षित् । क्षि निवासगत्योरित्यस्मात्क्विप् । तेन । प्राप्तुंशक्यः । कष्टः क्लेशकरः अनर्थकरोवा । अपराधः अपचारः । यदि नभवेत् प्रमादेसत्यनर्थःसिद्धएवेतिभीत्याक्षुद्राराजानोनकुर्वन्तीत्यर्थः ॥ १६ ॥ विद्वांसः अश्वमेधस्वरूपाभिज्ञाः । ब्रह्मराक्षसाः अकृतप्रायश्चित्ताप्रतिग्राह्यप्रतिग्रहायाज्ययाजनादिपापैःराक्षसत्वंप्राप्ताःब्राह्मणाः । यज्ञस्वरूपतदपराधज्ञत्वात् अत्र अश्वमेधे । छिद्रं अपराधं । मृगयन्ते अन्वेषयन्ते । मृगअन्वेषण इतिधातुः । "छिद्रंरन्ध्रापराधयोः"इतिवैजयन्ती । अपराधदर्शने यज्ञमग्निसात्कृत्यनाशयन्तीतिभावः । किंततइत्यतआह—निहतस्यचेति ॥ १७ ॥ फलितमाह—तदिति । विधिपूर्वं अनपराधंयथाभवतितथा यथासमाप्यते । तथा विधानं यत्नः । क्रियतां । इहकरणेपु यज्ञानुष्ठानेपु । समर्थाः । यूयमितिशेषः । यूयंसमर्थाःखल्वितिस्तुतिः ॥ १८ ॥ ते सर्वे मन्त्रिणः । पार्थिवेन्द्रस्य तद्वाक्यं निशम्य । यथा आज्ञप्तं आज्ञापितं । "वादान्त—"इत्यादिना वैकल्पिकइडभावो निपातितः । तथा कुर्मइत्यब्रुवन् । समीचीनोमहाराजस्याध्यवसायइति प्रत्यपूजयंश्च ॥ १९ ॥ वर्धयन्तः आशीर्भिरितिशेषः । द्विजाः ऋत्विजः । भाविन्यां चैत्रपौर्णमास्यांतथैवकरिष्यामइत्युक्त्वाजग्मुरित्यर्थः ॥ २० ॥ क्रतुः क्रतुसंभारः । आप्यतां संपाद्यतां ॥ २१ ॥ महाद्युतिरितिप्रीत्यतिशयद्योतनं ॥ २२ ॥ ताः प्रसिद्धाःकौसल्याद्याः । पत्नीः यज्ञार्हाः । "पत्युर्नोयज्ञसंयोगे" इतिपतिशब्दस्ययज्ञफलसो[illegible]

शि० सोपाध्यायः मुख्यऋत्विक्सहितः । उपाध्यायप्रयोजनंतु "पदेपदेजुहोति" इतिश्रुतिबोधितकर्मनिर्वहणं ॥ १४ ॥ तीर्था० यज्ञादिपुमन्त्रलोपक्रियालोपादिनाराक्षसत्वंप्राप्ताब्राह्मणा ब्रह्मराक्षसाइत्युच्यन्ते । तिल० उप सं दिष्ट इति त्रिपदं । समित्यस्यआप्यतामित्यनेनान्वयः । व्यवहितप्रयोगआर्षः ॥ २१ ॥ इत्यष्टमस्सर्गः ॥ ८ ॥

[पा०] १ झ. स्तुष्टो. २ झ. व्याकुललोचनः. ३ ङ. छ. झ. विधिहीनस्य. ४ झ. साधनेष्विति. ५ च. छ. ष्विति. ६ ङ. झ. प्रतिपूजिताः. ७ झ. यथापूर्वं. ८ ख. तान्सर्वान्. ९ क. ङ. च. झ. रुपसंदिष्टो. १० ङ.—झ. महामतिः. ११ ङ. च. छ. झ. हृदयंगमाः.

तासां तेनातिक्रान्तेन वचनेन सुवर्चसाम् ॥ मुखपद्मान्यशोभन्त पद्मानीव हिमात्यये ॥ २४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे अष्टमः सर्गः ॥ ८ ॥

नवमः सर्गः ॥ ९ ॥

सुमन्त्रेणदशरथंप्रतितस्य अङ्गराजेनअनावृष्टिनिवारणार्थमानीतस्यऋश्यशृङ्गस्यानुग्रहेणपुत्रोत्पत्तिप्रतिपादकसनत्कुमारवचसो रहसिसंग्रहेणविनिवेदनम् ॥ १ ॥

एतच्छ्रुत्वा रहः सूतो राजानमिदमब्रवीत् ॥ [श्रूयतां तत्पुरावृत्तं पुराणे च मया श्रुतम् ।]
ऋत्विग्भिरुपदिष्टोऽयं पुरावृत्तो मया श्रुतः ॥ १ ॥
सनत्कुमारो भगवान्पूर्वं कथितवान्कथाम् ॥ ऋषीणां संनिधौ राजंस्तव पुत्रागमं प्रति ॥ २ ॥
कश्यपस्य तु पुत्रोस्ति विभण्डक इति श्रुतः ॥ ऋश्यशृङ्ग इति ख्यातस्तस्य पुत्रो भविष्यति ॥ ३ ॥
स वने नित्यसंवृद्धो मुनिर्वनचरः सदा ॥ नान्यं जानाति विप्रेन्द्रो नित्यं पित्रनुवर्तनात् ॥ ४ ॥
द्वैविध्यं ब्रह्मचर्यस्य भविष्यति महात्मनः ॥ लोकेषु प्रथितं राजन्विप्रैश्च कथितं सदा ॥ ५ ॥
तस्यैवं वर्तमानस्य कालः समभिवर्तत ॥ अग्निं शुश्रूषमाणस्य पितरं च यशस्विनम् ॥ ६ ॥
एतस्मिन्नेव काले तु रोमपादः प्रतापवान् ॥ अङ्गेषु प्रथितो राजा भविष्यति महाबलः ॥ ७ ॥
तस्य व्यतिक्रमाद्राज्ञो भविष्यति सुदारुणा ॥ अनावृष्टिः सुघोरा वै सर्वभूतभयावहा ॥ ८ ॥

यज्ञसंयोगे नकारादेशविधानात् । दीक्षां दीक्षाध्यवसायं । विशत गच्छतेत्यर्थः । सुतकारणात् सुतार्थे । “निमित्तकारणहेतुलांप्रयोगेसर्वासामिष्टिः” इतिपञ्चमी ॥ २३ ॥ अतिक्रान्तेन अत्यन्तमिष्टेन । मुखपद्मानि सुन्दराणिमुखानीत्यर्थः ॥ २४ ॥ इति श्रीगोविन्दराजविरचितेश्रीमद्रामायणभूषणेमणिमञ्जीराख्याने बालकाण्डव्याख्यानेअष्टमस्सर्गः ॥ ८ ॥

अथभगवदवतारासाधारणकारणंपुत्रेष्टिमुपक्षिपति-सर्गत्रयेण । सूतः सारथित्वेनमन्त्रित्वेनचस्थितःसुमन्त्रः । रहः एकान्ते । इदमब्रवीत् अन्तःपुरमागत्योक्तवानित्यर्थः । अयं अश्वमेधप्रवृत्तिरूपःपुत्रार्थोपायः । ऋत्विग्भिः वसिष्ठादिभिः । उपदिष्टः । मयातु पुरावृत्तः इतिहासरूपः यः श्रुतः ॥ १ ॥ कथमित्यत्राह— सनत्कुमारइत्यादि । भगवान् भविष्यज्ज्ञानवत्त्वरूपमाहात्म्यवान् । कथां भविष्यद्विषयिणीं ॥ २ ॥ ख्यातोभविष्यतीत्यत्र “धातुसंबन्धेप्रत्ययाः” इतिभूतभविष्यतोःसाधुत्वं ॥ ३ ॥ अन्यं ग्रामग्रामीणादिकं । नजानाति नज्ञास्यति ॥ ४ ॥ द्वैविध्यं द्वैधीभावः । स्त्रीसङ्गकृतोभङ्गइत्यर्थः । लोकेषुप्रथितमित्यत्रब्रह्मचर्यमित्यनुषङ्गः । यद्वा । मेखलाजिनदण्डादिना लोकेषुप्रथितं । विप्रैः स्मर्तृभिः । कथितं ऋतुगमनलक्षणंच । ब्रह्मचर्यस्यद्वैविध्यंभविष्यति । आहयाज्ञवल्क्यः । “षोडशर्तुर्निशःस्त्रीणांतस्मिन्युग्मासुसंविशेत् । ब्रह्मचार्येव पर्वाण्याद्याश्चतस्रश्चवर्जयेत्” इति ॥ ५ ॥ तथाविधस्य द्वितीयब्रह्मचर्यस्य प्रसक्तिंदर्शयति—तस्येत्यादिना । तस्य । अग्निं । यशस्विनंपितरं । चाद्गुरुंच । शुश्रूषमाणस्य । प्रथमेब्रह्मचर्येवर्तमानस्येत्यर्थः । कालः कतिपयकालः । समभिवर्तत । भविष्यदर्थेलङ् । “छन्दसिलुङ्लङ्लिटः” इतिसर्वलकारापवादलेनलङोपिविधानात् । अडभावश्चार्षः ॥ ६ ॥ एतस्मिन्काले तस्यब्रह्मचर्यदशायां । अङ्गेषु अङ्गदेशेषु ॥ ७ ॥ व्यतिक्रमात् धर्मातिक्रमात् । सुदारुणा बहुकालव्यापिनी । सुघोरा तदीयसर्वराष्ट्रव्यापिनी ।

ति० पितुः नक्वापिलयागन्तव्यमित्याज्ञानुवर्तनाद्वनचरत्वं ॥ ४ ॥

[पा०] १ च.–ज. यत्पुरा. ख. ङ.—झ. इदमर्धमधिकं. २ ख. ग. ङ. विभाण्डक. ३ ङ. वचनैः सह. ४ ग. ज. मर्त्ये. ५ ख. समतिवर्तत. ग. समभिवर्तते. ६ ख. घ. ङ. झ. सर्वलोक.

अनावृष्ट्यां तु वृत्तायां राजा दुःखसमन्वितः ॥ ब्राह्मणाञ्[1]श्रुतवृद्धांश्च समानीय प्रवक्ष्यति ॥ ९ ॥
भवन्तः [2]श्रुतधर्माणो लोक[3]चारित्रवेदिनः ॥ समादिशन्तु नियमं प्रायश्चित्तं यथा भवेत् ॥
[[4]इत्युक्तास्ते ततो राज्ञा सर्वे ब्राह्मणसत्तमाः] ॥ १० ॥
वक्ष्यन्ति ते महीपालं ब्राह्मणा वेदपारगाः ॥ विभण्डकसुतं राजन्सर्वोपायैरिहानय ॥ ११ ॥
आना[5]य्य च महीपाल ऋश्यशृङ्गं सुसत्कृतम् ॥ [[6]विभण्डकसुतं राजन्ब्राह्मणं वेदपारगम् ॥]
प्रयच्छ कन्यां शान्तां वै विधिना सुसमाहितः ॥ १२ ॥
तेषां तु वचनं श्रुत्वा राजा चिन्तां प्रपत्स्यते ॥ केनोपायेन वै [7]शक्यमिहानेतुं स वीर्यवान् ॥ १३ ॥
ततो राजा विनिश्चित्य सह मन्त्रिभिरात्मवान् ॥ पुरोहितममात्यांश्च [8]ततः प्रेष्यति सत्कृतान् ॥ १४ ॥
ते तु राज्ञो वचः श्रुत्वा व्यथिता [9]विनताननाः ॥ न गच्छेम ऋषेर्भीता अनुनेष्यन्ति तं नृपम् ॥ १५ ॥
वक्ष्यन्ति चिन्तयित्वा ते तस्योपायांश्च तत्क्षमान् ॥ आनेष्यामो वयं विप्रं न च दोषो भविष्यति ॥ १६ ॥
एवमङ्गाधिपेनैव गणिकाभिर्ऋषेः सुतः ॥ आनीतोऽवर्षयद्देवः शान्ता चास्मै प्रदीयते ॥ १७ ॥
ऋश्यशृङ्गस्तु जामाता पुत्रांस्तव विधास्यति ॥ सनत्कुमारकथितमेतावद्व्याहृतं मया ॥ १८ ॥

अतएवसर्वभूतभयावहा ॥८॥ श्रुतेनवृद्धाःश्रुतवृद्धाः । वहुभ्योवहुधाश्रुतशास्त्राइत्यर्थः । प्रवक्ष्यतिचेत्यन्वयः ॥ ९ ॥ श्रुतधर्माणः । "धर्मादनिच्केवलात्"इत्यनिच् । लोकचारित्रवेदिनः लोकाचारज्ञाः । अतः अनावृष्टिमूलस्यमत्पापस्य प्रायश्चितं यथाभवेत् तादृशं नियमं अनुष्ठेयधर्मं आदिशन्तु ॥ १० ॥ शुद्धब्रह्मचारिणेकन्याप्रदानमेवपरमंप्रायश्चित्तमितिवक्ष्यन्तीत्याह—वक्ष्यन्तीत्यादिना । सर्वोपायैः नानाविधोपायैः ॥ ११ ॥ ऋश्यशृङ्गंइत्यत्र "ऋत्यकः" इतिप्रकृतिभावः । आनाय्येति आङुपसृष्टाण्णीञ्प्रापणइत्यस्माद्धेतुमण्ण्यन्ताह्यप् । प्रयच्छ देहि । ऋश्यशृङ्गायेतिशेषः । सुसत्कृतमित्यानयनक्रियाविशेषणं । सुसमाहितः निर्विचारइतियावत् ॥१२॥ चिन्ताप्रकारमाह—केनेति । वीर्यवान् नियतब्रह्मचर्यः ॥ १३ ॥ विनिश्चित्य ब्राह्मणंब्राह्मणाएवानेष्यन्तीतिनिश्चित्य । ततः तस्माद्देशात् । प्रेष्यति प्रेषयिष्यति । भविष्यदर्थेलट् । "कालसामान्येलड्वक्तव्यः" इतिवचनात् ॥ १४ ॥ व्यथिताः खिन्नाः । अतएव विनताननाः नम्रमुखाः । ऋषेःविभण्डकात् । भीताइत्यनन्तरमितिकरणंबोध्यं । अनुनेष्यन्ति नवयंगन्तुंशक्ताः । किंतु तदानयनउपायंविचिन्त्यवक्ष्यामइति सान्त्वयिष्यन्ति ॥ १५ ॥ तत्क्षमान् ऋश्यशृङ्गानयनोचितान् उपायांश्चिन्तयित्वा । तान् तस्य राज्ञोवक्ष्यन्ति । एतैरुपायैर्वयंविप्रमानेष्यामः । नचदोषोभविष्यति । ऋश्यशृङ्गस्यब्रह्मचर्यवैकल्यदोषश्चनभविष्यति । तत्रभवतानशङ्कनीयं । यथागणिकासंपर्कोनभवेत्तथाऽऽनेष्यामइत्यर्थः । ऋषिशापदोषोनभविष्यतीतिवार्थः । अनावृष्टिदोषोनभविष्यतीतिवा । इतिवक्ष्यन्तीतिपूर्वेणान्वयः ॥ १६ ॥ सनत्कुमारोक्तंसमाप्य स्वयमाह—एवमिति । यथाआनयिष्यामइत्युक्तं एवमानीतः । देवः पर्जन्यश्च अवर्षयत् । शान्ता रोमपादकन्याच । अस्मै ऋश्यशृङ्गाय । प्रदीयते प्रादीयत । कालसामान्येलट् ॥ १७ ॥ जामाता रोमपादस्यदशरथस्यापिवा । दशरथस्यौरसी । शान्ता दत्तारोमपादस्य । सनत्कुमारकथितमेतावत् । एवमङ्गाधिपेनेत्यादितु मयाव्याहृतमित्यर्थः । यद्वा सर्वंसनत्कुमारवचनमेव । अवर्षयत्

ति० श्रुतकर्माणः अनावृष्टिकरश्रुतमत्कर्माणः ॥ १० ॥ ति० वीर्यं जितेन्द्रियत्वं विद्यावृत्ततपोवीर्यंच ॥ १३ ॥ तिल० वनताननाः नम्रमुखाः । अवस्यआदेर्लोपः ॥ १५ ॥

[पा०] १ च. छ. श्रुतसंपन्नान्. ङ. झ. श्रुतसंवृद्धान्. क. श्रुतवृत्तांश्च. २ ङ. झ. श्रुतकर्माणो. ३ क. ख. ग. लोके-चारित्र. ४ ङ. च. छ. झ. ञ. इदमर्धमधिकंदृश्यते. ५ ख. ग. ज. आनीयच. क. च. छ. आनयित्वा. घ. आनाय्यत्वं. ६ ङ. झ. इदमर्धमधिकंदृश्यते. ७ क. ख. ग. ज. शक्यइहा. ८ झ. ञ. त्वांश्चप्रेषयिष्यति. ट. ततःप्रेष्यतिधर्मवित्. ९ क. ङ. च. छ. झ. वनताननाः ।

अथ हृष्टो दशरथः सुमन्त्रं प्रत्यभाषत ॥ यथर्श्यशृङ्गस्त्वानीतो विस्तरेण त्वयोच्यताम् ॥ १९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे नमवः सर्गः ॥ ९ ॥

दशमः सर्गः ॥ १० ॥

सुमन्त्रेणदशरथंप्रतिऋश्यशृङ्गस्यरोमपादेनस्वनगरंप्रत्यानयनप्रकारादेर्विस्तरेणप्रतिपादनम् ॥ १ ॥ तथासनत्कुमारोक्तकथाशेषस्यविस्तरेणकथनपूर्वकं अङ्गदेशादृश्यशृङ्गानयनचोदना ॥ २ ॥

सुमन्त्रश्चोदितो राज्ञा प्रोवाचेदं वचस्तथा ॥ यथर्श्यशृङ्गस्त्वानीतः शृणु मे मन्त्रिभिः सह ॥
[तन्मे निगदितं सर्वं विस्तरेण शृणुष्वह]॥ १ ॥
रोमपादमुवाचेदं सहामात्यपुरोहितः ॥ उपायो निरपायोऽयमस्माभिरभिचिन्तितः ॥ २ ॥
ऋश्यशृङ्गो वनचरस्तपस्स्वाध्यायने रतः ॥ अनभिज्ञः सनारीणां विषयाणां सुखस्य च ॥ ३ ॥
इन्द्रियार्थैरभिमतैर्नरचित्तप्रमाथिभिः ॥ पुरमानाययिष्यामः क्षिप्रं चाध्यवसीयताम् ॥ ४ ॥
गणिकास्तत्र गच्छन्तु रूपवत्यः स्वलंकृताः ॥ प्रलोभ्य विविधोपायैरानयिष्यन्ति सत्कृताः ॥ ५ ॥
श्रुत्वा तथेति राजा च प्रत्युवाच पुरोहितम् ॥ पुरोहितो मन्त्रिणश्च तथा चक्रुश्च ते तदा ॥
वारमुख्यास्तु तच्छ्रुत्वा वनं प्रविविशुर्महत् ॥ ६ ॥

वर्षयिष्यति । प्रदीयते प्रदास्यते ॥ १८ ॥ अथेत्युत्तरशेषः श्लोकः । अत्र सर्गविच्छेदोलेखकदोषकृतइतिप्रतिभाति ॥ १९ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्यानेनवमःसर्गः ॥ ९ ॥

मे मत्तः । सः ऋश्यशृङ्गः । यथामन्त्रिभिरानीतः तथा शृणु । हेतिप्रसिद्धौ ॥ १ ॥ निरपायः अव्यभिचारिफलः ॥ २ ॥ तपस्स्वाध्यायने तपस्स्वाध्याययोः "सर्वोद्वन्द्वोविभाषयैकवद्भवति" इत्येकवद्भावः । "अन्येषामपिदृश्यते" इतिदीर्घः । तेन पुराणेतिहासादिमुखेनापिनस्त्रीस्वरूपंजानातीतिभावः । नारीणामनभिज्ञइतिकर्मणिषष्ठी । विषयाणां शब्दस्पर्शरूपरसगन्धानांसंबन्धिनः सुखस्यचानभिज्ञश्च भवति ॥ ३ ॥ नरचित्तप्रमाथिभिः नरचित्ताकर्षकैः । तमितिशेषः । क्षिप्रं शीघ्रंआनाययिष्यामः । अध्यवसीयतां निश्चीयतां । अस्मदुक्तप्रकारइतिशेषः ॥ ४ ॥ केइन्द्रियार्थाःकथंतैरानयनंतत्राह—गणिकाइति । गणिकाः वेश्याः । प्रलोभ्य वञ्चयित्वा । सत्कृताः अस्माभिः कृतबहुमानाःऋश्यशृङ्गेणवा ॥ ५ ॥ राजापुरोहितंतथेतिप्रत्युवाच । पुरोहितोपि मन्त्रिणस्तथेतिप्रत्युवाच । तेच मन्त्रिणस्तथाचक्रुः । तेषामेवाधिकारात् । वारमुख्याःप्रेषयामासुरित्यर्थः । वारेति अर्धमेकं । वारशब्देन वारस्त्रियउच्यन्ते नामैकदेशे-

---

ति० सोच्यतां सः उच्यतामित्यर्थः । सन्धिरार्षः । यद्वा सा तद्विषयकाकथा उच्यतामित्यर्थः ॥१९॥ इतिनवमःसर्गः ॥९॥

ति० मन्त्रिभिस्सहसंमन्त्र्य रोमपादेन यथा ऋश्यशृङ्गआनीतः येनचोपायेनानीतः तन्मयानिगदितं सर्वप्रकारं मे मत्तः मन्त्रिभिस्सहशृण्वितियोजना ॥ १ ॥ **शिरो०** तपस्स्वाध्यायतत्परः तपस्स्वाध्याययोर्निरतः ॥ ३ ॥ **ति०** अध्यवसीयतां अस्मदुक्तकरणाययत्यतां ॥ ४ ॥ **ति०** राजा पुरोहितं । तथेति । त्वयैवतथाकर्तव्यमित्युवाच । अल्पविषयत्वाद्राज्ञएवंवादः । अथपुरोहितस्यविप्रत्वाद्गणिकाभिस्सहसंवादोऽनुचितइतिसोपिमन्त्रिणःप्रत्युवाच ॥ ६ ॥

[पा०] १ ङ. च. झ. येनोपायेनसोच्यताम्. २ क—झ. स्तदा. ३ ख. ङ. झ. स्त्वानीतोयेनोपायेनमन्त्रिभिः । तन्मेनिगदितंसर्वंशृणुमे. ४ इदमर्धं क. ख. ङ. झ. दृश्यते. ५ क. च. सहामात्यं. ६ ङ. च. झ. स्स्वाध्यायसंयुतः. घ. ट. स्वाध्यायतत्परः. ७ ङ. झ. स्तुनारीणां. ८ च. साध्यवसीयताम्. ९ क—ङ. ज. झ. रानेष्यन्तीहसत्कृताः. १०. च. हसत्कृतम्. ११ ख. श्वतेमतिम्.

आश्रमस्याविदूरेऽस्मिन्यत्नं कुर्वन्ति दर्शने ॥ ऋषिपुत्रस्य धीरस्य नित्यमाश्रमवासिनः ॥ ७ ॥
पितुः स नित्यसंतुष्टो नातिचक्राम चाश्रमात् ॥ ८ ॥
न तेन जन्मप्रभृति दृष्टपूर्वं तपस्विना ॥ स्त्री वा पुमान्वा यच्चान्यत्सर्वं नगरराष्ट्रजम् ॥ ९ ॥
ततः कदाचित्तं देशमाजगाम यदृच्छया ॥ विभण्डकसुतस्तत्र ताश्चापश्यद्वराङ्गनाः ॥ १० ॥
ताश्चित्रवेषाः प्रमदा गायन्त्यो मधुरस्वरैः ॥ ऋषिपुत्रमुपागम्य सर्वा वचनमब्रुवन् ॥ ११ ॥
कस्त्वं किं वर्तसे ब्रह्मञ्ज्ञातुमिच्छामहे वयम् ॥ एकस्त्वं विजने घोरे वने चरसि शंस नः ॥१२॥
अदृष्टरूपास्तास्तेन काम्यरूपा वने स्त्रियः ॥ हार्दात्तस्य मतिर्जाता ह्याख्यातुं पितरं स्वकम् ॥१३॥
पिता विभण्डकोस्माकं तस्याहं सुत औरसः ॥ ऋश्यशृङ्ग इति ख्यातं नाम कर्म च मे भुवि ॥१४॥
इहाश्रमपदोस्माकं समीपे शुभदर्शनाः ॥ करिष्ये वोत्र पूजां वै सर्वेषां विधिपूर्वकम् ॥ १५ ॥
ऋषिपुत्रवचः श्रुत्वा सर्वासां मतिरास वै ॥ तदाश्रमपदं द्रष्टुं जग्मुः सर्वाश्च तेन ताः ॥ १६ ॥
आगतानां ततः पूजामृषिपुत्रश्चकारह ॥ इदमर्घ्यमिदं पाद्यमिदं मूलमिदं फलम् ॥ १७ ॥
प्रतिगृह्य तु तां पूजां सर्वा एव समुत्सुकाः ॥ ऋषेर्भीतास्तु शीघ्रं ता गमनाय मतिं दधुः ॥१८॥

नामग्रहणात् ॥ ६ ॥ अस्मिन् वने आश्रमस्याविदूरे । दर्शने ऋष्यशृङ्गदर्शने । यत्नं अवधानं । कुर्वन्ति अकुर्वन् । ऋषिपुत्रस्येत्यादिविशेषणत्रयं यत्नस्य कर्तव्यत्वेहेतुः ॥ ७ ॥ उक्तहेतुंविवृणोति—पितुरित्यर्धेन । पितुःसकाशात् । नित्यसंतुष्टः पितृशुश्रूषणैकरतइत्यर्थः ॥ ८ ॥ हेत्वन्तरमाह—नतेनेति । जन्मप्रभृति जन्मारभ्य । नगरजं अश्वादि । राष्ट्रजं कुक्कुटादि ॥९॥ यदृच्छया दैववशात् ॥ १० ॥ चित्रवेषाः नानालंकाराः ॥११॥ कस्त्वं किंजातिः कस्यपुत्रइत्यर्थः । किं किमर्थं । वर्तसे । इच्छामहइत्यात्मनेपदमार्षं । भवान् किंजातिः किंनामधेयः कस्यपुत्रः त्वं घोरेस्मिन्वने किमर्थं वर्तसे । किमर्थमेकश्चरसीति योजना ॥ १२॥ यस्मात्कारणात् । काम्यरूपाः काम्यमानरूपाः ताः स्त्रियः । वने तेन अदृष्टरूपाः तस्मात् । हार्दात् दर्शनजस्नेहात् । स्वकंपितरं पित्रादिकं । आख्यातुं मतिर्जाता ॥ १३ ॥ अस्माकमिति मृगाद्यपेक्षयाबहुवचनं । किंतद्द्रौणःपुत्रोसि । नेत्याह—औरसइति । पुराकिल महाभूततटाकाख्येसरसि उपस्पृशतोविभण्डकस्यउर्वशींदृष्ट्वारेतोस्खलत् । तन्मृगी जलेनसहपीत्वागर्भिण्यासीत् । तस्यांजातः ऋश्यमृगतुल्यशृङ्गत्वात् ऋश्यशृङ्गाख्योऽभूदिति पौराणिकीकथा । मे ऋश्यशृङ्गेति नाम ख्यातं । मे तपोरूपं कर्मच । भुवि वनभुवि । ख्यातं ॥ १४ ॥ इह वनसमीपेप्रदेशे । अस्माकं आश्रमपदः । पुंस्त्वमार्षं । अत्र वःपूजां करिष्ये । आगन्तव्यमितिभावः । सर्वेषामितिपुंल्लिङ्गनिर्देशः स्त्रीस्वरूपाऽपरिज्ञानकृतः ॥ १५ ॥ द्रष्टुंमतिः । आस अभूत् । अस्तेर्भूभावाभावआर्षः । तेनसह । तदाश्रमपदं जग्मुश्च ॥ १६ ॥ आगतानां आश्रमपदंआगतानां । अन्तेइतिकरणंद्रष्टव्यं ॥ १७ ॥ समुत्सुकाः तत्संलापसाभिलाषाः । ताःसर्वाः । तां पूजां ऋषिपुत्रदत्तांपूजाम् । प्रतिगृह्य । ऋषेः विभण्डकात् । भीतास्सत्यः । शीघ्रंगमनाय मतिंदधुः

तीर्था० अस्मिन् दर्शने । ऋश्यशृङ्गदर्शनस्यबुद्धिस्थत्वादस्मिन्निति निर्देशः ॥ ७ ॥ **ति०** रूपादिकंजन्मप्रभृतिदृष्टपूर्वंनभवति यथातथाव्यवह्रियते इतिशेषः ॥ ९ ॥ **ति०** कस्त्वं किंजातिः कस्यपुत्रः किंनामाच किंवर्तसे किंकर्मासि । अपि च । एकस्संस्त्वं विजनेदूरे जनवासरूपग्रामादिभ्योदूरे वने किमर्थं चरसीति प्रश्नत्रयं ॥ १२ ॥ **ति०** स्त्रियइत्यस्यदृष्टाइतिशेषः । अनेनहार्दमूलभूता "चलस्यचेतसोयास्यादुदासीनेषुवस्तुषु । अवारणीयावृत्तिस्सादृष्टिशब्देनकथ्यते" इत्युक्तलक्षणादृष्टिरुक्ता । ततस्सर्वांशेऽनुपेक्षात्मकज्ञानरूपःपरिचयोपिमध्येज्ञेयः । अतस्तासु हार्दात् दर्शनजस्नेहात् । "दोषानालोकिनीप्रीत्याख्यचित्तवृत्तिर्हार्दं"इत्युक्तेः ॥१३॥ **ति०** नामेत्यन्तं आद्यप्रश्नोत्तरं । द्वितीयप्रश्नोत्तरमाह । कर्मचमदीयं भुविप्रसिद्धं ॥१४॥ **ति०** तृतीयप्रश्नस्योत्तरमाह । इहेति ॥ १५ ॥ **ति०** नः अस्माकं भक्ष्यमितिशेषः ॥ १७ ॥

[पा०] १ ख. स्याविदूरस्य. २ ङ. च. झ. ऋषेःपुत्रस्य. ३ क—च. झ. तसत्वंनगर. ४ ङ. मधुरस्वरम्. ख. मधुरस्वनम्. ग. स्वनैः. ५ ङ. झ. दूरेवने. ६ घ. तासांप्रीतिरजायत. ७ क. च. सर्वाश्चतेनहि. ङ. ज. झ. सर्वास्ततोङ्गनाः. ८ क. ख. घ. ङ. ज. झ. गतानांतुततः. ९ क. ख. ङ. च. छ. झ. मूलंफलंचनः. १० ङ. झ. ऋषेर्भीताश्चशीघ्रंतु.

अस्माकमपि मुख्यानि फलानीमानि [1]वै द्विज ॥ [2]गृहाण प्रति भद्रं ते भक्षयस्व च माचिरम् ॥१९॥
ततस्तास्तं समालिङ्ग्य सर्वा हर्षसमन्विताः ॥ मोदकान्प्रददुस्तस्मै [3]भक्षांश्च विविधाञ्शुभान् ॥ २० ॥
तानि चास्वाद्य तेजस्वी फलानीति स्म मन्यते ॥ अनास्वादितपूर्वाणि वने नित्य[4]निवासिनाम् ॥२१॥
आपृच्छ्य तु [5]तदा विप्रं व्रतचर्यां निवेद्य च ॥ गच्छन्ति स्मापदेशात्ताः भीतास्तस्य पितुः स्त्रियः ॥२२॥
गतासु तासु सर्वासु काश्यपस्यात्मजो द्विजः ॥ अ[6]स्वस्थहृदयश्चासीद्दुः[7]खं स्म परिवर्तते ॥ २३ ॥
[8]ततो परेद्युस्तं देशमाजगाम स वीर्यवान् ॥ [[9]विभण्डकसुतः श्रीमान्मनसा चिन्तयन्मुहुः ॥]
मनोज्ञा यत्र ता दृष्टा वारमुख्याः स्वलङ्कृताः ॥ २४ ॥
दृष्ट्वैव च [10]तदा विप्रमायान्तं हृष्टमानसाः ॥ उपसृत्य ततः सर्वास्तास्तमूचुरिदं वचः ॥ २५ ॥
एह्याश्रमपदं सौम्य ह्यस्माकमिति चाब्रुवन् ॥ [[11]चित्राण्यत्र बहूनि स्युर्मूलानि च फलानि च ।]
[12]तत्राप्येष विधिः श्रीमान्विशेषेण भविष्यति ॥ २६ ॥
श्रुत्वा तु वचनं तासां सर्वासां हृदयंगमम् ॥ गमनाय मतिं चक्रे तं च निन्युस्तदा स्त्रियः ॥२७॥
तत्र चानीयमाने तु विप्रे तस्मिन्महात्मनि ॥ ववर्ष सहसा देवो जगत्प्रह्लादयंस्तदा ॥ २८ ॥
हर्षेणैवागतं विप्रं [13]विषयं स्वं नराधिपः ॥ प्रत्युद्गम्य मुनिं प्रह्वः शिरसा च महीं गतः ॥ २९ ॥
अर्घ्यं च प्रददौ तस्मै न्यायतः सुसमाहितः ॥ वव्रे प्रसादं विप्रेन्द्रान्मा विप्रं [14]मन्युराविशत् ॥३०॥

॥ १८ ॥ प्रतिगृहाणेत्यन्वयः । "छन्दसिपरेपि"इति प्रतीत्यस्योपसर्गस्यधातोरुपरिष्टात्प्रयोगः । "छन्दोवत्पुराणानिभवन्ति" इतिन्यायात् । माचिरं विलंबंमाकुरु ॥ १९ ॥ अत्र आदावित्युक्त्वेत्युपस्कार्यं । स्नेहिजनवद्वशीकारार्थमालिङ्ग्य ॥ २० ॥ वनेनित्यनिवासिनांअनास्वादितपूर्वाणि । तैःपूर्वमनास्वादितानि फलानीमानीति मन्यतेस्म । अपूर्वरसत्वात् । "पूरणगुण—"इतिसमासप्रतिषेधादेवज्ञापकात्तृतीयार्थेषष्ठी ॥ २१ ॥ व्रतचर्यांनिवेद्य अस्माभिःकिंचिद्व्रतमनुष्ठेयमस्तीति व्रतानुष्ठानंनिवेद्य । तस्मादपदेशात् व्याजात् । तस्यपितुर्भीतास्सत्योगच्छन्तिस्म ॥ २२ ॥ काश्यपस्य कश्यपपुत्रस्यविभण्डकस्य । अस्वस्थहृदयः कर्षितचित्तः । दुःखंयथाभवतितथा परिवर्ततेस्म संचरतिस्म ॥ २३ ॥ ततः अस्वस्थचित्तत्वाद्धेतोः ॥ २४ ॥ अस्माकमाश्रमपदमेहीतिपूर्वेणान्वयः । तत्रापि श्रीमान् समृद्धिमान् । एषविधिः सत्कारः । स्वदेशत्वाद्विशेषेणभविष्यति । इतिचाब्रुवन्नितियोजना ॥ २५ ॥ २६ ॥ हृदयंगमं मनोज्ञं । "खश्प्रकरणेगमेःसुप्युपसंख्यानं"इतिखश् । निन्युः नावमारोप्यगङ्गाप्रवाहेणेतिशेषः । तथैवभारतेप्रतिपादनात् ॥ २७ ॥ तत्र अङ्गदेशइत्यर्थः ॥ २८ ॥ स्वंविषयं स्वदेशं । प्रह्वः [illegible] ॥ २९ ॥ अर्घः पूजा तदर्थमुदकमर्घ्यं । "पादार्घाभ्यांच" इति यत्प्रत्ययः । न्यायतः शास्त्रक्रमेण । विप्रेन्द्रात् ऋश्यशृङ्गात् । प्रसादं गणिकाभिःप्रलोभ्यानयनकृतकोपनिवृत्तिं । वव्रे । कथंवव्रे । विप्रं त्वां मन्युः कोपो मा-

---

ति० माचिरं । ऋषेरागमनात्पूर्वमेवभक्षणीयमित्याशयः ॥ १९ ॥ ति० हर्षसमन्विताः बालब्रह्मचारितोगाढतरालिङ्गनप्राप्त्या । स्वकार्यानुकूलस्पर्शप्राप्त्या च । शिरो० भक्ष्यान् भक्षयितुंयोग्यान्मोदकान् ॥ २० ॥ ति० अस्वस्थहृदयः अप्रसन्नचित्तआसीत् । दुःखात् तादृशचाक्षुषादिविषयसुखविश्लेषजात् । परिवर्तनं एकदेशानवस्थितिः ॥ २३ ॥ ति० ततः अस्वस्थचित्तत्वाद्धेतोः । मनसाचिन्तयन् । तासां दर्शनस्पर्शनगमनादिप्रकारान्स्मरन्नित्यर्थः । तत्रगमनमेतद्धारकनवश्यंभावीति चिन्तयन्नित्यर्थश्च ॥ २४ ॥ ति० यद्यत्रैवचित्राणिमूलानिफलानिचभवेयुः । अतस्तत्रगमनंव्यर्थमितिचेत्तत्रापि । एषविधिः विचित्रफलमूलभक्षणविधिः । विशेषेण इतोप्याधिक्येन भविष्यति ॥ २६ ॥

[पा०] १ ङ. झ. हेद्विज. २ ङ. ज. झ. गृहाणविप्र. ३. ट. भक्ष्यांश्च. ४ क. ख. घ. च. ज. निवासिना. ५ च. तदाक्षिप्रं. ६ ज. अस्वस्थहृदयस्तत्रनलेभेधृतिमात्मनः. ७ ग. ङ. च. छ. झ. दुःखाच्चपरिवर्तते—क. घ. दुःखात्संपरि. ८ ज. ततःप्रभातेतंदेशं. ९ इदमर्धं ख. ङ—झ. दृश्यते. १० ङ. च. छ. झ. ततोविप्रं. ११ इदमर्धं ङ—झ. दृश्यते. १२ ङ. झ. तत्राप्येषविशेषेणविधिर्हिभविताध्रुवं. १३ ङ. झ. तापसंसनराधिपः. क. ग. च. छ. ज. विषयंसनराधिपः. १४ क—घ. च. झ राविशेत्

अन्तःपुरं प्रविश्यास्मै कन्यां दत्त्वा यथाविधि ॥ शान्तां शान्तेन मनसा राजा हर्षमवाप सः ॥३१॥
एवं स न्यवसत्तत्र सर्वकामैः सुपूजितः ॥ [ऋश्यशृङ्गो महातेजाः शान्तया सह भार्यया] ॥३२॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे दशमः सर्गः ॥ १० ॥

एकादशः सर्गः ॥ ११ ॥

दशरथेनाङ्गदेशमेत्य रोमपादमुखादृश्यशृङ्गस्य भार्यया सह शान्तयाऽयोध्यां प्रत्यानयनम् ॥ १ ॥

भूय एव च राजेन्द्र शृणु मे वचनं हितम् ॥ यथा स देवप्रवरः कथायामेवमब्रवीत् ॥ १ ॥
इक्ष्वाकूणां कुले जातो भविष्यति सुधार्मिकः ॥ राजा दशरथो नाम श्रीमान्सत्यप्रतिश्रवः ॥ २ ॥
अङ्गराजेन सख्यं च तस्य राज्ञो भविष्यति ॥ कन्या चास्य महाभागा शान्ता नाम भविष्यति ॥३॥
पुत्रस्त्वङ्गस्य राज्ञस्तु रोमपाद इति श्रुतः ॥ अङ्गराजं दशरथो गमिष्यति महायशाः ॥ ४ ॥
अनपत्योसि धर्मात्मञ्शान्ताभर्ता मम क्रतुम् ॥ आहरेत त्वयाज्ञप्तः संतानार्थं कुलस्य च ॥ ५ ॥

विशेदिति । माविशत्वित्यर्थः । लकारव्यत्ययः । यद्वा विप्रं विभण्डकं । मन्युः पुत्रविश्लेषणकृतःकोपः माविशेदिति । एवंप्रसादनादेवविभण्डको नचुकोप । पुत्रप्रसादवरणादेवपितात्रिलोकज्ञस्तुष्यतीति पूर्वमेवमात्रिभिर्निर्णीतंचेतिबोध्यं । कथमन्यथा उपायंचिन्तयन्तः प्राज्ञाः अपायमपिनचिन्तयेयुः ॥ ३० ॥ प्रविश्यतेनसहेतिसिद्धं । शान्तेन निर्दुःखेन । मनसा उपलक्षितः । प्रसादकार्योपदर्शनात् प्रसन्नत्वंसिद्धम् ॥ ३१ ॥ एवंसर्वकामैः सुपूजितः । तत्र रोमपादान्तःपुरे ॥३२॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने दशमः सर्गः ॥ १० ॥

एवं दशरथप्रश्नस्योत्तरमुक्त्वा कथाशेषंसुमन्त्रः प्रस्तौति—भूयइत्यादि । देवप्रवरः सनत्कुमारः । कथायां कथाप्रसङ्गे । एवं वक्ष्यमाणरीत्या । यथा उक्तवान् । तथा शृणु ॥ १ ॥ धार्मिकोभविष्यतीत्यन्वयः । सत्यप्रतिश्रवः सत्यप्रतिज्ञः ॥ २ ॥ अस्य अङ्गराजस्य ॥ ३ ॥ अङ्गस्य राज्ञः अङ्गराजस्य ॥ ४ ॥ अहमनपत्योस्मि । तस्मात् ममकुलस्य । संतानार्थं

तीर्थी० प्रविश्य प्रवेश्य । **ति०** तदनुज्ञयान्तःपुरंप्रवेश्य । हर्षं वृष्टिजं ऋषिसंबन्धजंच ॥३१॥ **ति०** ननुगणिकास्पर्शतत्स्पृष्टफलभक्षणादिभिरस्यतपोहानौ कथंतद्गमनमात्रेणवृष्टिः । नच स्त्रीत्वाद्यज्ञानान्नतपोहानिः । ईषद्दोपस्तुतपसैवदग्धइतिवाच्यं । निर्मलब्रह्मचर्येण विदितवेदशास्त्रतत्त्वस्य शास्त्रतःस्त्रीस्वरूपज्ञानस्य ब्रह्मचर्येतत्परिहारज्ञानस्यच दुर्निवारत्वात् । वनेवनचरस्त्रीणामनुभवाच्च । सर्वथाऽज्ञत्वेऽनुग्रहशक्त्यभावापत्तेश्चेतिचेन्न । निर्मलब्रह्मचर्येणब्रह्मज्ञतया सर्वत्रब्रह्मदृष्ट्याचदोषलेशस्याप्यस्पर्शात् । प्रारब्धवशात्क्षत्रियस्त्रीसंवन्धंभाविनंतद्द्वारकंजानन्नेवगणिकाभिस्तथाव्यवजहेतासांभयानुत्पत्तये । अतएव नतेनेतिनवमश्लोके तथाव्यवहियतइतिशेषःपूरितोस्माभिःप्राक् । एतत्सर्वंजानन्पितापितमनुयाय नशप्तवान्राजानमित्येवात्रतत्वं । अनेनतत्त्वज्ञस्यसर्वदोषासंवन्धोध्वनितः । ब्रह्मज्ञेदानसंकल्पमात्रेणफलसिद्धिरित्यादिचसूचितं । यत्तु क्वचिद्विभाण्डकस्यपुत्रान्वेषणंक्रोधेन ततोमार्गे-ऋष्यशृङ्गायशान्तादानादिवृत्तान्तलाभेनपुनराश्रमं परावृत्यागमनं तदपितत्त्वज्ञलएवोपपद्यते । अन्यथा स्वपुत्रस्यगणिकाद्वारकब्रह्मचर्यविलोपकृतोरोषोऽज्ञस्यतस्यकेनाप्युपायेनवारयितुमशक्यइत्यलम ॥ ३२ ॥ इतंदशमस्सर्गः ॥ १० ॥

ती० कथायां पूर्वकथायांसमाप्तायांसत्यां । यथेति यदित्यर्थे । **शि०** कथायां नानेतिहासवर्णनावसरे । यथा येनप्रकारेणाब्रवीत् । एवं तेनप्रकारेणैव । मे मत्तः । शृणु ॥ १ ॥ **ति०** अङ्गराजः रोमपादः । तस्य दशरथस्य । अस्य रोमपादस्य ॥ ३ ॥ तं रोमपादं । गमिष्यति ऋश्यशृङ्गानयनार्थमितिशेषः ॥ ४ ॥ चकारेणधर्माद्यर्थंच ॥ ५ ॥

[पा०] १ ङ. ज. झ. प्रवेश्यास्मै. २ इदमर्धं ख. घ. दृश्यते. ३ घ. सहतत्पुरे. ख. सहसत्कृतः. ४ ख. ङ. झ. कथयामासबुद्धिमान्. ५ क. ग. घ. ज. नाम्नादशरथोनाम. ङ. च. छ. झ. नाम्नादशरथोराजा. ६ ख. घ. ङ. छ. प्रतिश्रवाः. ग. प्रतिश्रयः. ७ ख. ग. पुत्रस्त्वङ्गाधिराजस्य. क. सपुत्रस्त्वंगराजस्य. ८ ख. इतिस्मृतः. ९ क.—छ. तंसराजादशरथो. १० ख. घ. झ. महारथः. ११ क. ग. घ. छ. धर्मात्मा. १२ घ. महाक्रतुम्.

श्रुत्वा राज्ञोथ तद्वाक्यं मनसा स विचिन्त्य च ॥ प्रदास्यते पुत्रवन्तं शान्ताभर्तारमात्मवान् ॥ ६ ॥
प्रतिगृह्य च तं विप्रं स राजा विगतज्वरः ॥ आहरिष्यति तं यज्ञं प्रहृष्टेनान्तरात्मना ॥ ७ ॥
तं[1] च राजा दशरथो यष्टुकामः[2] कृताञ्जलिः ॥ ऋश्यशृङ्गं द्विजश्रेष्ठं वरयिष्यति धर्मवित् ॥ ८ ॥
यज्ञार्थं प्रसवार्थं च स्वर्गार्थं च जनेश्वरः[3] ॥ लभते च स तं कामं विप्रमुख्याद्[4]विशांपतिः ॥ ९ ॥
पुत्राश्चास्य भविष्यन्ति चत्वारोऽमितविक्रमाः ॥ वंशप्रतिष्ठानकराः सर्वलोकेषु[5] विश्रुताः ॥ १० ॥
एवं स देवप्रवरः पूर्वं कथितवान्कथाम् ॥ सनत्कुमारो भगवान्पुरा देवयुगे प्रभुः ॥ ११ ॥
स त्वं पुरुषशार्दूल तमानय[6] सुसत्कृतम् ॥ स्वयमेव च राजेन्द्र[7] गत्वा सबलवाहनः ॥ १२ ॥
[सुमन्त्रस्य[8] वचः श्रुत्वा हृष्टो दशरथोऽभवत् ।] ॥ १३ ॥
अनुमान्य वसिष्ठं[9] च सूतवाक्यं निशम्य[10] च ॥ [[11]वसिष्ठेनाभ्यनुज्ञातो राजा संपूर्णमानसः] ॥
सान्तःपुरः सहामात्यः प्रययौ यत्र स द्विजः ॥ १४ ॥
वनानि सरितश्चैव व्यतिक्रम्य शनैः शनैः ॥ अभिचक्राम तं देशं यत्र वै मुनिपुंगवः ॥ १५ ॥
आसाद्य तं द्विजश्रेष्ठं रोमपादसमीपगम्[12] ॥ ऋषिपुत्रं[13] ददर्शादौ[14] दीप्यमानमिवानलम् ॥ १६ ॥
ततो राजा यथान्यायं पूजां चक्रे विशेषतः ॥ सखित्वात्तस्य वै राज्ञः प्रहृष्टेनान्तरात्मना ॥ १७ ॥

अविच्छेदार्थं । शान्ताभर्ता । क्रतुं आहरेत अनुतिष्ठतु । इति वक्ष्यतीतिशेषः ॥ ५ ॥ सः रोमपादः । मनसा विचिन्त्य । नतुमन्त्रिभिः । पुत्रवन्तं पुत्रप्रदानसमर्थं पुत्रयुक्तंवा ॥ ६ ॥ आहरिष्यति करिष्यतीत्यर्थः । अन्तरात्मना मनसा । उपलक्षितः ॥ ७ ॥ तस्मिन्यज्ञेतमेवऋत्विजंकरिष्यतीत्याह—तंचेति श्लोकद्वयमेकंवाक्यं । यष्टुंकामोयस्यसयष्टुकामः । "लुंपेदवश्यमः कृत्येतुंकाममनसोरपि" इतिमकारलोपः । एवंभूतो राजा तंवरयिष्यति । वरोवरणं "तत्करोति" इतिणिच् । अल्लोपस्यस्थानिवत्त्वाद्वृद्ध्यभावः ॥ ८ ॥ किमर्थं यज्ञार्थं पुत्रकामेष्ट्यर्थं तद्द्वारा प्रसवार्थं पुत्रार्थं तद्द्वारा स्वर्गार्थं । "नापुत्रस्य लोकोस्ति" इतिश्रुतेः । कामं काम्यक्रतुं ॥ ९ ॥ अमितविक्रमाः अपरिच्छिन्नपराक्रमाः ॥ १० ॥ पूर्वं पूर्वकाले । विभक्तिप्रतिरूपकमव्ययं । पुरा पुराणः । देवयुगे कृतयुगे । यद्वा देवेव पुरायुगे कृतयुगइत्यर्थः ॥ ११ ॥ स त्वं पुत्रार्थी त्वं । सुसत्कृतं सुसत्कारार्हं स्वयमेव नतुपुरोहितादिद्वारा ॥ १२ ॥ १३ ॥ अनुमान्य कृतानुमतिकं कृत्वा । अन्यथा मयिस्थितेकथमयमन्यमाह्वयतीतिवसिष्ठःकुप्येत् । अतः सुमन्त्रोक्तकथोक्तिपूर्वकमनुमान्येत्यर्थः । "अनुमान्यवसिष्ठंचसूतवाक्यंनिशम्यचेतिवचनभङ्ग्या पुनर्वसिष्ठसन्निधौसाकथाप्रस्ताविता सुमन्त्रमुखेनैवेतिगम्यते । अतोवसिष्ठेनानुमतिःकृतेतिमन्तव्यं । सान्तःपुरतयागमनं जामातृउपलालनरीत्याशान्तयासहानयनार्थं । यत्र रोमपादनगरे ॥ १४ ॥ वनादिविलोकनकुतुकित्वं शनैःशनैरित्यनेनद्योत्यते ॥ १५ ॥ तंदेशमासाद्य तमृषिपुत्रं । आदौ रोमपाददर्शनात्पूर्वं । ददर्श । तस्मिन्भक्त्यतिशयद्योतनार्थं ॥ १६ ॥ राजा रोमपादः । राज्ञः

ति० पुत्रवन्तमित्यनेन । "जातपुत्रःकृष्णकेशोऽग्नीनादधीत" इतिविध्युक्ताग्न्याधानादिकारित्वंसूचितं । तेनाहिताग्नित्वेनार्त्विज्याधिकारस्तस्यसूचितः । शान्ताभर्तारमित्यनेन शान्तासाहित्यमपिसूचितं ॥ ६ ॥ शि० स्वर्गार्थं रावणोपद्रुतस्वर्गादिस्वास्थ्यार्थंच वरयिष्यति ॥ ९ ॥ ति० पुरादेवयुगे एतच्चतुर्युगीप्राक्तनचतुर्युग्याद्ये सत्ययुगइत्यर्थः ॥ ११ ॥ ति० अनुमतौहेतुः सूतवाक्यंनिशम्येति । श्रावयित्वेत्यर्थः ॥ १४ ॥ शि० वैशब्दः यथायोग्यावान्तरदेशनिवाससूचकः ॥ १५ ॥

[पा०] १ ख. राचराजा. २ क. ग—झ. यशस्कामः. ३ क. ख. ग. ङ—झ. नरेश्वरः. ४ क—झ. द्विजमुख्याद्वि. ५ ङ. झ. सर्वभूतेषु. ६ क. ङ. च. छ. झ. समानय. ७ क—छ. झ. महाराज. ८ इदमर्धं ङ. च. छ. झ. ञ. दृश्यते. ९ ङ. वरिष्ठंच. १० झ. निशाम्यच. ११ इदमर्धं ञ. दृश्यते. १२ ख. समन्वितम्. १३ ञ. ऋषेःपुत्रं. १४ ङ. च. छ. झ. ददर्शाथो.

रोमपादेन चाख्यातमृषिपुत्राय धीमते।। सख्यं संबन्धकं चैव [1]तदा तं प्रत्यपूजयत्।।१८।।
एवं सुसत्कृतस्तेन सहोषित्वा नरर्षभः।। सप्ताष्टदिवसान्राजा राजानमिदमब्रवीत्।।१९।।
शान्ता तव सुता राजन्सह भर्त्रा विशां पते।। मदीयं नगरं यातु कार्यं हि महदुद्यतम्।।२०।।
तथेति राजा संश्रुत्य गमनं तस्य धीमतः।। उवाच वचनं विप्रं गच्छ तवं सह भार्यया।।२२।।
तावन्योन्याञ्जलिं कृत्वा स्नेहात्संश्लिष्य चोरसा।। ननन्दतुर्दशरथो रोमपादश्च वीर्यवान्।।२३।।
ततः सुहृदमापृच्छय प्रस्थितो रघुनन्दनः।। [2]पौरेभ्यः प्रेषयामास दूतान्वै शीघ्रगामिनः।।२४।।
क्रियतां नगरं सर्वं क्षिप्रमेव स्वलंकृतम्।। धूपितं सिक्तसंमृष्टं पताकाभिरलंकृतम्।।२५।।
ततः प्रहृष्टाः पौरास्ते श्रुत्वा राजानमागतम्।। तथा [3]प्रचक्रुस्तत्सर्वं राज्ञा [4]यत्प्रेषितं तदा।।२६।।
ततः स्वलंकृतं राजा नगरं प्रविवेश ह।। [5]शङ्खदुन्दुभिनिर्घोषैः पुरस्कृत्य द्विजर्षभम्।।२७।।
ततः प्रमुदिताः सर्वे [6]दृष्ट्वा तं नागरा द्विजम्।। प्रवेश्यमानं सत्कृत्य नरेन्द्रेणेन्द्रकर्मणा।
([7]यथा दिवि सुरेन्द्रेण सहस्राक्षेण काश्यपम्)।।२८।।
अन्तःपुरं प्रवेश्यैनं पूजां [8]कृत्वा विधानतः।। कृतकृत्यं तदाऽऽत्मानं मेने तस्योपवाहनात्।।२९।।
[9]अन्तःपुरस्त्रियः सर्वाः शान्तां दृष्ट्वा तथाऽऽगताम्।। सह भर्त्राविशालाक्षींप्रीत्यानन्दमुपागमन्।। ३०।।
पूज्यमाना च ताभिः सा राज्ञा चैव विशेषतः।। उवास तत्र सुखिता कंचित्कालं [10]सहर्त्विजा।।३१।
इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे एकादशः सर्गः।।११।।

दशरथस्य।।१७।। संबन्धकं शान्तायाजनकपितृत्वरूपंसंबन्धं। प्रत्यपूजयत् ऋश्यशृङ्गइतिशेषः।।१८।। तेन रोमपादेन। सप्ताष्टेति लोकवचनपरिपाटी संख्यानियमोपेक्षाकृता।।१९।। उद्यतं उद्युक्तं।।२०।। तस्य ऋश्यशृङ्गस्य। गमनं संश्रुत्य प्रतिज्ञाय।२१।। प्रतिश्रुत्य आकर्ण्य। नृपं रोमपादं।।२२।। अन्योन्यमञ्जलिमित्यर्थः।।२३।। सुहृदं रोमपादं।।२४।। सिक्तंचसंमृष्टंचसिक्तसंमृष्टं। "पूर्वकाल-" इत्यादि नासमासः। स्वलंकृतं पुष्पकदलीकाण्डादिभिः।।२५।। आगतं आगतप्रायं। राज्ञा यद्यथाप्रेषितं तत्तथा। तदा श्रवणकालएव चक्रुः।।२६।। द्विजर्षभंपुरस्कृत्य शङ्खदुन्दुभिनिर्घोषैःसह प्रविवेश।।२७।। नागरा. नगरवासिनः। नरेन्द्रेण दशरथेन। सत्कृत्य नगरालङ्कारादिभिःसंमान्य। प्रवेश्यमानंतंद्विजंदृष्ट्व। समुदिताः संतुष्टाः। आसन्। इन्द्रस्येव कर्म पराक्रमादिकं यस्यसः इन्द्रकर्मा तेन।।२८।। उपवाहनात् आनयनात्।।२९।। भर्त्रासहागतां। अनेन पूर्वकन्यात्वदशायामपिकदाचिदागमनं व्यज्यते।।३०।। विशेषतः जनकत्वसंबन्धात्। ऋत्विजा ऋश्यश्रृङ्गेण। पितृगृहत्वात् शान्तायाःप्राधान्यं।।३१।। इतिश्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने एकादशःसर्गः।।११।।

शि. संबन्धकं शान्ताजनकत्वेनतच्छ्वशुरत्वं। "अनेनमेऽनपत्यायदत्तेयंवरवर्णिनी। याचतेपुत्रतुल्यैषाशान्ताप्रियतरात्मजा। सोयंतेश्वशुरोब्रह्मन्यथैवाहंतथानृपः" इतिपौराणिकीगाथा।।१८।। ति. सहद्विजा सभर्तृपुत्रकेतियावत्।।३१।। इत्येकादशस्सर्गः।।११।।

[पा.] १ ख. ततस्तं. २ ङ.झ. पौरेषु. ३ ङ.झ. चक्रुश्चतत्सर्वं, ४ख. यत्प्रेरितं ५. ङ.झ. निर्ह्रादैः, ६ङ.झ. दृष्ट्वावै. ७ इदमर्धं ज. दृश्यते. ८ ध-झ. कृत्वाचशास्त्रतः, ९क-झ. अन्तःपुराणिसर्वाणि. १०क-झ. सहद्विजा.

द्वादश सर्गः ।।१२।।

दशरथेनशिरसाप्रसादनपूर्वकमृश्यशृङ्गस्ययज्ञार्थंचरणम्।। १।। तथासुमन्त्रेणसुयज्ञाद्यानयनपूर्वकंतदनुमत्यामन्त्रिणांसंभा-रसंभरणाश्वमोचनादिचोदना।। २।। मन्त्रिभिरश्वमोचनपूर्वकंसंभारसंभरणाद्युद्यमनम्।। ३।।

ततः काले बहुतिथे कस्मिंश्चित्सुमनोहरे।। वसन्ते समनुप्राप्ते राज्ञो यष्टुं [1]मनोऽभवत्।।१।।
ततः [2]प्रसाद्य शिरसा तं विप्रं दैववर्णिनम्।। [3]यज्ञाय वरयामास सन्तानार्थं [4]कुलस्य वै।।२।।
तथेति च स [5]राजानमुवाच [6]च सुसत्कृतः।। संभाराः संभ्रियन्तां ते तुरगश्च विमुच्यताम्।।
[[7]सरय्वाश्चोत्तरे तीरे यज्ञभूमिर्विधीयताम्] ।।३।।
[8]ततो राजाऽब्रवीद्वाक्यं सुमन्त्रं मन्त्रिसत्तमम्।। सुमन्त्रावाहूय क्षिप्रमृत्विजो ब्रह्मवादिनः।।४।।
सुयज्ञं वामदेवं च जाबालिमथ काश्यपम्।। पुरोहितं वसिष्ठं [9]च येचाप्यन्ये द्विजातयः।।५।।
ततः [10]सुमन्त्रस्त्वरितं गत्वा त्वरितविक्रमः।। समानयत्स [11]तान्सर्वान्समर्थान्वेदपारगान्।।६।।
तान्पूजयित्वा धर्मात्मा राजा [12]दशरथस्तदा।। धर्मार्थसहितं युक्तं श्लक्ष्णं वचनमब्रवीत्।।७।।

एवंदशरथः सर्वकामसमृद्धोपिपुत्रालाभस्तन्मूलानिपापानि स्वाधिकारानुरूपेणाश्वमेधेन विनानविनश्यन्तीति मन्वानः ''सर्वंपाप्मानंतरतितरतिब्रह्महत्यां योऽश्वमेधेनयजते'' इति श्रुत्या ''राजासार्वभौमोश्वमेधेनयजेत'' इतिस्मृत्या च विहितमश्वमेधं यष्टुंसंकल्प्य तदानीमुद्बुद्धसंस्कारेणसुमन्त्रेणोदीरितवचनाज्जामात्रुपलालनव्याजेन शान्तयासह ऋश्यश्रृंगमानीय प्राप्तकाले पूर्वंसंकल्पितमश्वमेधंकर्तुमारभतेत्याह- ततः कालइत्यादि। ततः ऋश्यश्रृंगानयनानन्तरं। बहुतिथे अनल्पे। काले। गते। संख्यासंज्ञाद्बहुशब्दात् पूरणार्थेडटि ''बहुपूगगणसंघस्यतिथुक्'' इति तिथुगागमः। कस्मिंश्चित् मलिम्लुचत्वादिदोषरहिततया विलक्षणे। सुमनोहरे पौर्णमास्याः कालत्वनातिमनोज्ञे। वसन्ते। समनुप्राप्ते प्रारब्धे। चैत्र्यांपौर्णमास्यामित्यर्थः। राज्ञः दशरथस्य। यष्टुं सांग्रहणीमिष्टिंकर्तुं। मनः मनोरथः। अभूत्। ''चैत्र्यांपौर्णमास्यांप्रातरश्वमेधेनयक्ष्येइतिसंकल्प्यसांग्रहण्येष्ट्यायजते'' इतिस्मरणात् ।।१।। अथसांग्रहणीमिष्टिंकर्तुमृत्विग्वरणेप्राप्ते प्रथममृश्यश्रृंगब्रह्मत्वेन वृतवानित्याह- ततइति। देववर्णिनं देववर्चसम् ।।२।। सचऋश्यश्रृंगश्च ।।३।। अथ ''अपदातिनृत्विजःसमावहन्त्यासुब्रह्मण्यायाः'' इतिविहितमध्वर्युप्रभृतिवरणमाह- तत इत्यादिना अस्याः श्रुतेरयमर्थः। तस्यतस्यगृहेगत्वासोमप्रवाकवृतानध्वर्युब्रह्महोतॄनाग्नीध्रं च हस्त्यश्वादिकमारोप्य राजागृहमानयन्तिराजपुरूषाः। अनन्तरायाममावास्यायां पूर्वंवृताएवते संज्ञानेष्ट्यर्थं पुनर्व्रियन्ते। अथवैशाख्यांपौर्णमास्यां प्राजापत्यर्षभपशवर्थंपूर्ववत्सोमप्रवाकवृतौमैत्रावरूणप्रतिप्रस्थातारौहस्त्यादिकमारोप्यानयन्ति राजपुरूषाः। अनन्तरायाममावास्यायांतथैववृतमुद्गातारंहस्त्यादिभिरानयन्ति। अथागामिनिवसन्तेपञ्चदश्यांहस्त्यादिभिः प्रस्तोतारमानयन्ति। द्वैधातवीयार्थंयत्रदीक्षारंभस्तद्दिवसादूर्ध्वं तृतीयादिष्वहस्स्वन्हमितरानष्टावृत्विजोहस्त्यादिकमारोप्यानयन्ति। ब्राह्मणाच्छंसिनमच्छावाकनेष्टारंप्रतिहर्तारंग्रावस्तुतंपोतारंउन्नेतारंसुब्रण्यमितिसोमार्थं। एवमासुब्रह्मण्यास्वानादपदातीनृत्विजआवहन्तीति। एवं क्रमेणकर्तव्यानि ऋत्विग्वरणानिकारकरत्वात्संग्रहेणदर्शयति-सुमन्त्रा वाहयेति। आवाहय आनय। ऋतौयजन्तीतिऋत्विजः। ब्रह्मवादिनः वेदपाठकान् ।।४।। ऋत्विजः परिगणयति-सुयज्ञमिति ।।५।। त्वरितविक्रमः त्वरितपदन्यासः।।६।। धर्मार्थसहितं धर्मार्थरूपप्र

वि. युक्तंयथार्थं ।।७।।

(पा.) १ ख,ज, मनोगतम् २ ङ,च,छ,झ, प्रणम्य ३ ज, यज्ञार्थं ४ ख,ङ,झ, कुलस्य च ५ ज, मुवाचेदं ६ ङ,च,छ,झ वसुधाधिपम् ख,ग,ज, चसुसत्कृतम् ७ इदमर्धं क-ट दृश्यते ८ ङ, ततोब्रवीनृपोवाक्यं झ, नृपोवाक्यंब्राह्मणान्वेदपारगान् ख,घ, ततोराजाब्रवीत्सुतंब्राह्मणान्वेदपारगान् ९ ख,ग,ङ,च,झ, येचान्येद्विजसत्तमाः ज, येचान्येच १० घ,ञ, स्त्वरितो ११ क,-झ, समस्तान्वेदः ज, सतान्विप्रान्समस्तान्वै १२ ख, दशरथोबली

मम [1]लालप्यमानस्य [2]पुत्रार्थं नास्ति वै सुखम्।। तदर्थं[3] हयमेधेन यक्ष्यामीति मतिर्मम।।८।।
तदहं यष्टुमिच्छाभि [4]शास्त्रदृष्टेन कर्मणा।। ऋषिपुत्रप्रभावेन कामान्प्राप्स्यामि चाप्यहम्।।९।।
ततः साध्विति तद्वाक्यं ब्राह्मणाः प्रत्यपूजयन्।। वसिष्ठप्रमुखाः सर्वे पार्थिवस्य मुखाच्च्युतम्।।१०।।
ऋश्यशृङ्गपुरोगाश्च प्रत्यूचुर्नृपतिं तदा।। संभाराः संभ्रियन्तां ते तुरगश्च विमुच्यताम्।।
([5]सरय्वाश्चोत्तरे तीरे यज्ञभूमिर्विधीयताम्)।।११।।
सर्वथा प्राप्स्यसे पुत्राश्चतुरोऽमितविक्रमान्।। यस्य ते धार्मिकी बुद्धिरियं पुत्रार्थमागता।।१२।।
ततः प्रीतोऽभवद्राजा श्रुत्वा तु[6] द्विजभाषितम्।। [7]अमात्यांश्चाब्रवीद्राजा हर्षेणेदं शुभाक्षरम्।।१३।।
गुरूणां वचनाच्छीघ्रं संभारास्संभ्रियन्तु मे।। समर्थाधिष्ठितश्चाश्चस्सोपाध्यायो विमुच्यताम्।।१४।।
सरय्याश्चोत्तरे तीरे यज्ञभूमिर्विधीयताम्।। [8]शान्तयश्चाभिवर्धन्तां [9]यथाकल्पं यथाविधि।।१५।।
[10]शक्यः कर्तुमयं यज्ञस्सर्वेणापि[11] महीक्षिता।। नापराधो भवेत्कष्टो यद्यस्मिन्क्रतुसत्तमे।।१६।।
छिद्रं हि [12]मृगयन्तेऽत्र विद्वांसो ब्रह्मराक्षसाः।। [13]विघ्नितस्य हि यज्ञस्य सद्यः कर्ता विनश्यति।।१७।।
तद्यथा [14]विधिपूर्वं मे क्रतुरेष समाप्यते।। तथा विधानं क्रियतां समर्थाः करणेष्विह[15]।।१८।।
तथेति च ततः सर्वे मन्त्रिणः प्रत्यपूजयन्।। पार्थिवेन्द्रस्य तद्वाक्यं यथाज्ञप्तमकुर्वत।।१९।।
ततो [16]द्विजास्ते धर्मज्ञमस्तुवन्पार्थिवर्पभम्।। अनुज्ञातास्ततः सर्वे पुनर्जग्मुर्यथागतम्।।२०।।

योजनयुक्तं। श्लक्ष्णं मधुरं।। ७।।८।। यष्टुमिच्छामि प्रतिवन्धकदुरितशान्त्यर्थं। ऋषिपुत्रप्रभावेन ऋश्यशृङ्गकृतयज्ञप्रभावेन। पश्चात् कामान् पुत्रान् प्राप्स्यामिच।।९।। ऋश्यशृङ्गश्लाघागर्भत्वाद्वसिष्ठप्रमुखाइत्युक्तं।।१०।। ११।। सनत्कुमारवचश्श्रवणाच्चतुरइत्युक्तं।।१२।। क्रियाभेदान्नराजपदपुनरुक्तिः।।१३।। संभ्रियन्तु संभ्रियन्तां। आर्षपरस्मैपदं। अत्रसंभाराः यज्ञीयाश्वमोचनोपकरणानि। "द्वादशारत्नीरशनाभवति" इत्युक्त्या द्वादशारत्निपरिमिता मुञ्जाख्यतृणविशेषनिर्मितारशना "चतुष्टय्यआपोभवन्ति" इत्यनुवाकोक्ताः आतपतिवर्ध्याःकूप्याःस्थावरावहन्त्यश्चेतिचतुर्विधाआपइत्यादीनि। समर्थैः "चतुःशतारक्षन्ति" इति श्रूययमाणैराजपुत्राद्यैः। अधिष्ठितः रक्षितः। सोपाध्यायः उपाध्यायैश्चतुर्भिः ऋत्विग्भिः सहितः। अश्वोविमुच्यतां "चत्वारऋत्विजःसमुक्षन्तीतयारभ्य शतेनराजपुत्रैःसहअर्ध्वयुः शतेनाराजभिरुग्रैः सहब्रह्माशतेनसूतग्रामणीभिः सहहोताशतेनक्षत्रसंग्रहीतृभिः सहोद्गाता" इतिश्रुतेः। संगृहीतंचभट्टभास्करैः। "सन्नाहवन्तःक्षितिपालपुत्राःसन्नद्धसूताः शतमस्यतल्प्याः। वैश्याःशतंप्रान्तचराः पथिस्युर्वरूथिनस्तैः शतमेवशूद्राः" इति।।१४।। अथ "पुण्यनामदेवयजनमध्यवस्यति" इत्युक्तरीत्या यागार्हपुण्यस्थलपरिग्रहंदर्शयति-सरय्वाइति। उत्तरं विविक्तमितितत्परिग्रहः। शान्तयः शान्तिकर्माणि। अभिवर्धन्तां प्रवर्तन्तां। यथाकल्पं यथाक्रमं। यथाविधि यथाशास्त्रं।।१५।। कष्टः क्लेशकरः।।१६।। छिद्रं अपराधमित्यर्थः।।१७।। यथेतिछेदः।।१८।। अकुर्वत साङ्ग्रहणेष्टिप्रभृत्यश्वविमोचनान्तमकुर्वन्नित्यर्थः।।१९।। अनुज्ञाताः तेनेतिशेषः।। २०।।

वि. अनुष्ठानरंभायपुनरुपन्यस्यति। ममलालप्यमानस्येति।।८।। शि. ऋषिपुत्रस्य ऋश्यशृङ्गस्य प्रभावेण। रा. साक्षात्कारजनिततेजसा अहंकामान्प्राप्स्याम्येव। अपिना देवकार्यसिद्धिश्चभविष्यति। चशब्दएवार्थे।।९।। शि. धार्मिकी जा. संरक्षणरूपधर्मप्रयोजना।।१२।।

[पा.] १ ङ.झ. तातप्यमानस्य. २ ज. सुतार्थे. ३ क.ग.ङ.झ. पुत्रार्थंहय. ४ क.ख.घ.ङ-झ. हयमेधेनकर्मणा- ५ इदमर्धं क-ट. दृश्यते. ६ क-घ. तद्विजभाषितम्. ७ङ-झ. त्यानब्रवी. ज. श्चाब्रवीत्तत्र. ८ ग.घ.छ. शान्तयश्चापि. ९ घ. यथाशास्त्रं. १० ग.घ. शक्यंकर्तुमयं. ख. शक्यःप्राप्तु. ११ख. सर्वेणैय. १२ ङ.झ. गृगयन्त्येते. १३ङ. च.छ. विधिहीनस्ययज्ञस्य. ख. निहतस्य. ग. विहतस्य. १४छ. पूर्वे. १५ग. करणेष्वपि. १६ङ. द्विजास्तं.

गतेष्वथ द्विजाग्र्येषु मन्त्रिणस्तान्नराधिपः ॥ विसर्जयित्वा स्वं वेश्म प्रविवेश महाद्युतिः ॥ २१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे द्वादशः सर्गः ॥ १२ ॥

त्रयोदशः सर्गः ॥ १३ ॥

दशरथेनसप्रार्थनंवसिष्ठेयागीयसकलकार्यभारसमारोपणम् ॥१॥ वसिष्ठेनयागीयसकलकार्येषुसमुचितजननियोजनपूर्वकंसुमन्त्रंप्रतिनानादेशीयराजानयनादिनियोजनम् ॥२॥ दशरथेनवसिष्ठऋश्यशृङ्गानुज्ञयासर्वैःसहशुभमुहूर्तेयज्ञशालाप्रवेशः ॥३॥

पुनः प्राप्ते वसन्ते तु पूर्णः संवत्सरोऽभवत् ॥ प्रसवार्थं गतो यष्टुं हयमेधेन वीर्यवान् ॥ १ ॥
अभिवाद्य वसिष्ठं च न्यायतः प्रतिपूज्य च ॥ अब्रवीत्प्रश्रितं वाक्यं प्रसवार्थं द्विजोत्तमम् ॥
यज्ञो मे क्रियतां विप्र यथोक्तं मुनिपुङ्गव ॥ २ ॥
यथा न विघ्नः क्रियते यज्ञाङ्गेषु विधीयताम् ॥ ३ ॥
भवान्स्निग्धः सुहृन्मह्यं गुरुश्च परमो महान् ॥ वोढव्यो भवता चैव भारो यज्ञस्य चोद्यतः ॥ ४ ॥

स्वंवेश्म । अग्निगृहादन्तःपुरमित्यर्थः ॥ २१ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने द्वादशःसर्गः॥१२॥

एवंप्रथमवसन्तेचैत्रपौर्णमास्यांसांग्रहणेष्टिंविधाय द्वितीयेह्निब्रह्मौदनमेध्याश्वबन्धनस्नापनप्रोक्षणविमोचनादिकं "चत्वारऋत्विजःसमुक्षन्ति" इत्युक्तरीत्याकृत्वा "सावित्रमष्टाकपालंप्रातर्निर्वपति"इत्युक्तरीत्याप्रतिदिनंसावित्रादिषुकर्मस्वनुष्ठीयमानेषु संवत्सरेपूर्णे देवयजनंप्रतिप्रस्थानं दर्शयतित्रयोदशे—पुनःप्राप्तइत्यादि । पुनर्वसन्ते द्वितीयवसन्ते । प्राप्ते । संवत्सरः पूर्णोऽभवत् । अमावास्याप्राप्तेत्यर्थः । तत्र भाविन्यां पौर्णमास्यां प्रसवार्थं । हयमेधेनयष्टुं हयमेधाख्यंयज्ञंकर्तुं । गतः देवयजनमितिशेषः । प्रथमसंवत्सरान्तिमावास्यायांउखासंभरणत्रैधातवीयदीक्षणीयादिकं देवयजनएवहिकर्तव्यं । यथोक्तंभास्करैः "संवत्सरस्यास्यतुयाऽन्तिमामावास्याविधेयामिहदीक्षणीयां।त्रैधातवीयांप्रवदन्तिसप्तदिनानिदीक्षाहुतयस्तथाष्टौ " इति ॥ १ ॥ एवमेतत्सर्गप्रतिपाद्यंदेवयजनगमनंसंग्रहेणोक्त्वा पुनस्तद्विस्तरेणवक्तुमुपक्रमते सर्गशेषेण। तत्रब्रह्मौदनमारभ्य यावदश्वमेधसमाप्ति यजमानस्यस्वातन्त्र्यप्रतिषेधेन स्वयंयज्ञोपकरणसंपादनाद्ययोगादध्वर्युणैवतस्यसर्वस्यकर्तव्यत्वादध्वर्युत्वेनवृतंवसिष्ठंप्रतिप्रार्थयते—अभिवाद्येत्यादिना । तदुक्तंभट्टभास्करैः "रशनाञ्जनतःपश्चादध्वर्युःपरिवीयते । राज्यायसचराजास्याद्यावत्सन्तिष्ठतेक्रतुः" इति । येयं "द्वादशारत्नीरशनाभवतिमौञ्जीभवति" इत्यश्वबन्धनरज्जुर्विहिता तस्याः "यदाज्यमुच्छिष्यतेतस्मिन्रशनान्युनक्ति" इतियद्ब्रह्मौदनशिष्टाज्येनाभ्यञ्जनंविहितं ततःपश्चादित्यर्थः । अर्धत्रयमेकान्वयं । वसिष्ठंअभिवाद्यच । न्यायतः शास्त्रतः । प्रतिपूज्यच । प्रश्रितं विनययुक्तं । वाक्यं अब्रवीत् । कथं। प्रसवार्थं पुत्रार्थं । आरब्धोमेयज्ञः । यथोक्तं शास्त्रोक्तमनतिक्रम्य। क्रियताम् ॥२॥ यज्ञाङ्गेषु द्रव्यदेवताकर्मादिरूपेषु । यथाविघ्नोनक्रियते राक्षसैरितिशेषः । तथा क्रियतामित्यर्थः ॥ ३ ॥ भवान् मह्यं स्निग्धः अविच्छिन्नस्नेहः । सुहृत् । परमः

ति० सप्तम्यर्थेषष्ठी । गतेषुद्विजातिष्वित्यर्थः । विसर्जयित्वा संप्रेष्य । संवत्सरान्तेयागार्थमितिशेषः । ल्यबभावआर्षः ॥२१॥ इतिद्वादशस्सर्गः ॥ १२ ॥

ती० प्रसवार्थं प्रसवफलंभावयितुं । गतः गन्तुमुपक्रान्तः । ति० "संवत्सरान्तेदीक्षेत"इतिसूत्रात्पूर्ववसन्तविसृष्टाश्वस्यपुनस्संवत्सरान्तेवसन्तेप्राप्तेदीक्षाप्रवृत्तिरुपदिश्यते । पुनरिति । प्रसवरूपफलंहयमेधेनभावयितुंगतः । वसिष्ठान्तिकमितिशेषः ॥ १ ॥ ति० वसिष्ठंच चादरुन्धतीं ॥ २ ॥ शि० चशब्दएवार्थे । अपरौचकारौहेत्वर्थे । स्निग्धःस्नेहविशिष्टःअतएवसुहृत् मह्यं ममपरमउत्कृष्टःगुरुः । अतएवमहान् सर्वपूज्यःभवानेव । अतोयज्ञस्यभारोभवतैववोढव्यइत्यर्थः ॥ ४ ॥

१ ख. घ. ङ. गतेषुतेषुविप्रेषु. क. ग. च. छ. ज. गतानांतुद्विजातीनां. झ. गतानांतेषुविप्रेषु. २ ङ. च. छ. झ. महामतिः. ३ ख. ग. ङ. च. छ. झ. क्रियतांब्रह्मन. ४ ङ. झ. विघ्नाःक्रियन्ते. ५ क. घ. ङ. भवान्.

तथेति च स राजानमब्रवीद्द्विजसत्तमः ॥ करिष्ये सर्वमेवैतद्भवता यत्समर्थितम् ॥ ५ ॥
ततोऽब्रवीद्द्विजान्वृद्धान्यज्ञकर्मसु निष्ठितान् ॥ स्थापत्ये निष्ठितांश्चैव वृद्धान्परमधार्मिकान् ॥ ६ ॥
कर्मान्तिकाञ्शिल्पकरान्वर्धकीन्खनकानपि ॥ गणकाञ्शिल्पिनश्चैव तथैव नटनर्तकान् ॥
तथा शुचीञ्शास्त्रविदः पुरुषान्[1]सुबहुश्रुतान् ॥ ७ ॥
यज्ञकर्म समीहन्तां भवन्तो राजशासनात् ॥ इष्टका बहुसाहस्री[2] शीघ्रमानीयतामिति ॥ ८ ॥
औपकार्याः[3] क्रियन्तां च राज्ञां[4] बहुगुणान्विताः ॥ ब्राह्मणावसथाश्चैव कर्तव्याः शतशः शुभाः ॥९॥
भक्ष्यान्नपानैर्बहुभिः समुपेताः[5] सुनिष्ठिताः ॥ तथा पौरजनस्यापि कर्तव्या[6] बहुविस्तराः ॥ १० ॥
[आगतानां[8] सुदूराच्च पार्थिवानां पृथक्पृथक् ॥ वाजिवारणशालाश्च तथा शय्यागृहाणि च ॥
भटानां महदावासा वैदेशिकनिवासिनाम्] ॥ ११ ॥
आवासा बहुभक्ष्या वै सर्वकामैरुपस्थिताः ॥ तथा[9] जानपदस्यापि जनस्य बहु शोभनम्[7] ॥ १२ ॥
दातव्यमन्नं विधिवत्सत्कृत्य न तु लीलया ॥ १३ ॥
सर्ववर्णा[10] यथा पूजां प्राप्नुवन्ति सुसत्कृताः ॥ न चावज्ञा प्रयोक्तव्या कामक्रोधवशादपि ॥ १४ ॥
यज्ञकर्मणि[11] ये व्यग्राः पुरुषाः शिल्पिनस्तथा ॥ तेषामपि विशेषेण पूजा कार्या यथाक्रमम् ॥
ते च[12] स्युः संभृताः सर्वे वसुभिर्भोजनेन च ॥ १५ ॥

वामदेवादिभ्यउत्कृष्टः । महान् वस्तुतोनिरुपमः । गुरुः । अतः उद्यतः उपक्रान्तः । यज्ञस्यभारोभवसैवत्रोढव्यः । चकारेणार्त्विज्यंचकर्तव्यंइत्युच्यते ॥४॥ समर्थितं सम्यक्प्रार्थितं ॥ ५ ॥ ततइतिसार्धश्लोकत्रयमेकान्वयं । यज्ञकर्मसु यज्ञप्रयोगेषु । स्थापत्ये तद्द्रव्यानयनस्वाम्ये । निष्ठितान् पूर्वराज्ञानियुक्तान् ॥६॥ कर्मणामन्तःसमाप्तिः सएषामस्तीतिकर्मान्तिकाः । "अतइनिठनौ" इतिठन् भृतकानित्यर्थः । शिल्पकरान् इष्टकादिनिर्मातॄन् । वर्धकीन् तक्ष्णः । स्रुक्स्रुवचमसग्रहयूपादिनिर्मातॄन् । खनकान् वापीकूपादिकृतः । गणकान् लेखकान् । शिल्पिनः चित्रादिकरान् । नटाः रसाभिनयकृतः । नर्तकाः भावाभिनयकृतः । शास्त्रविदः प्रयोगशास्त्रविदः ॥ ७ ॥ अथाज्ञापनप्रकारमाहअष्टभिः—यज्ञकर्मेत्यादि । ऋत्विजःप्रत्याह यज्ञकर्मेति । समीहन्तां व्याप्रियन्तां । शिल्पकरान्प्रत्याह इष्टकेति । जात्येकवचनं । इत्यब्रवीदितिपूर्वेणान्वयः ॥ ८ ॥ औपकार्याः राजसदनानि । स्वार्थेष्यञ् । "राजसदनमुपकार्योपकारिका"इत्यमरः । बहुगुणान्विताः औन्नत्यविशालत्वादिबहुगुणान्विताः । ब्राह्मणावसथाइति आर्षोलिङ्गव्यत्ययः ॥ ९ ॥ कठिनफलादि भक्ष्यं । सुनिष्ठिताः वातवर्षादिभिरप्रकंप्याः ॥ १० ॥ सर्वकामैः स्रक्चन्दनादिभिः । उपस्थिताः संयुक्ताः । बहु अधिकं ॥ ११ ॥ विधिवत् यथाविधि । सत्कृत्य गन्धादिभिरभ्यर्च्य । लीलया अनादरेणेत्यर्थः ॥ १२ ॥ यथा पूजांप्राप्नुवन्ति तथाकर्तव्यमित्यर्थः ॥ १३ ॥ कामक्रोधवशात् स्नेहद्वेषवशात् । अपिशब्देन लीला समुच्चीयते ॥ १४ ॥ विशेषेण अत्यादरेणेत्यर्थः । यथाक्रमं यथावृद्धं । तेचेत्यत्र चश-

---

त्रि० स्थापत्यं स्थपतेःरथकारस्यकर्म । तत्रनिष्ठितान् प्रवीणान् ॥ ६ ॥ ति० गणकान् ज्योतिर्विदः ॥ ७ ॥ ती० बहुसाहस्राः बहुसहस्रसङ्ख्याकाः । आनीयतामितिव्यत्ययेनैकवचनम् ॥ ८ ॥ शि० बहुगुणान्विताः अनेकविधान्नपानादियुक्ताएव ॥९॥ ति० महदावासाइत्यत्रात्वाभावआर्षः । वैदेशिकनिवासिनां वैदेशिकानांस्वदेशनिवासिनांचेत्यर्थः ॥ ११ ॥ ति० जनस्य इतरक्षुद्रजनस्यापि ॥ १२ ॥ शि० तेषामपि । अपिशब्देनातिथ्यभ्यागतादिसंग्रहः ॥ १५ ॥

१ घ. पुरुषांश्च. २ क—घ. बहुसाहस्रा. च. छ. ज. बहुसाहस्राः. ३ झ. उपकार्याः. ४ ङ. ज. झ. राज्ञोबहु. ५ ख. समवेताः. ६ ङ. च. छ. कर्तव्याश्चसुविस्तराः. ७ घ. ङ. बहुशोभनाः. ८ इदमर्धत्रयं च. छ. झ. ञ. दृश्यते. ९ च. छ. झ. ञ. तथापौरजनस्यापि. १० ख. ग. ङ. ज. झ. सर्वेवर्णाः. ११ क—झ. यज्ञकर्मसु. १२ ङ. च. छ. झ. येस्युःसंपूजितास्सर्वे. क. तेस्युः. ग. घ. झ. तेचस्युःसुहृदः.

यथा सर्वं सुविहितं न किंचित्परिहीयते ॥ तथा भवन्तः कुर्वन्तु [1]प्रीतिस्निग्धेन चेतसा ॥ १६ ॥
ततः सर्वे समागम्य वसिष्ठमिदमब्रुवन् ॥ [2]यथोक्तं तत्सुविहितं न किंचित्परिहीयते ॥ १७ ॥
यथोक्तं तत्करिष्यामो न किंचित्परिहास्यते ॥ १८ ॥
ततः [3]सुमन्त्रमानीय वसिष्ठो वाक्यमब्रवीत् ॥ निमन्त्रयस्व नृपतीन्पृथिव्यां ये च धार्मिकाः ॥ १९ ॥
ब्राह्मणान्क्षत्रियान्वैश्याञ्शूद्रांश्चैव सहस्रशः ॥ [4]समानयस्व सत्कृत्य सर्वदेशेषु मानवान् ॥ २० ॥
मिथिलाधिपतिं [5]शूरं जनकं [6]सत्यविक्रमम् ॥ निष्ठितं सर्वशास्त्रेषु तथा वेदेषु निष्ठितम् ॥ २१ ॥
तमानय महाभागं स्वयमेव सुसत्कृतम् ॥ [7]पूर्वसंबन्धिनं ज्ञात्वा ततः पूर्वं ब्रवीमि ते ॥ २२ ॥
तथा काशीपतिं स्निग्धं सततं प्रियवादिनम् ॥ [8]वयस्यं राजसिंहस्य स्वयमेवानयस्व ह ॥ २३ ॥
तथा केकयराजानं वृद्धं परमधार्मिकम् ॥ श्वशुरं राजसिंहस्य सपुत्रं [9]त्वमिहानय ॥ २४ ॥
[10]अङ्गेश्वरं महाभागं रोमपादं सुसत्कृ[11]तम् ॥ वयस्यं राजसिंहस्य [12]समानय [13]यशस्विनम् ॥ २५ ॥
[[14]तथा कोसलराजानं भानुमन्तं सुसत्कृतम् ॥ मगधाधिपतिं शूरं सर्वशास्त्रविशारदम् ॥ २६ ॥
प्राप्तिज्ञं परमोदारं सत्कृतं पुरुषर्षभम् ॥ राज्ञश्शासनमादाय चोदयस्व नृपर्षभान्] ॥ २७ ॥
प्राचीनान्सिन्धुसौवीरान्सौराष्ट्रेयांश्च पार्थिवान् ॥ दाक्षिणात्यान्नरेन्द्रांश्च समस्तानानयस्व ह ॥२८॥
सन्ति स्निग्धाश्च ये चान्ये राजानः पृथिवीतले ॥ तानानय यथाक्षिप्रं सानुगान्सहबान्धवान् ॥
[[16]एतान्दूतैर्महाभागैरानयस्व नृपाज्ञया] ॥ २९ ॥
वसिष्ठवाक्यं तच्छ्रुत्वा सुमन्त्रस्[17]त्वरितस्तदा ॥ व्यादिशत्पुरुषांस्तत्र राज्ञामानयने शुभान् ॥ ३० ॥
स्वयमेव हि धर्मा[19]त्मा प्र[18]ययौ मुनिशासनात् ॥ सुमन्त्रस्त्वरितो भूत्वा समानेतुं महीक्षितः ॥३१॥

द्दोभिन्नक्रमः । ते भोजनेन वसुभिः धनैश्च । संभृताः तृप्ताश्चस्युः ॥ १५ ॥ सर्वमपि यथा सुविहितं सुष्ठुअनुष्ठितंस्यात् । किंचिदपि नपरिहीयते नत्यक्ष्यते । प्रीतिस्निग्धेन स्नेहार्द्रेण ॥ १६ ॥ यथोक्तप्रवृत्तिंदर्शयति—ततइति । तत् पूर्वोक्तकार्यजातं ॥१७॥ १८॥ एवमुपकरणनिष्पत्त्यनन्तरंराजाह्वानमाज्ञापयति—ततइत्यादिना । निमन्त्रयस्व आह्वय ॥ १९ ॥ सर्वदेशेषु स्थितानितिशेषः ॥२०॥ श्लोकद्वयमेकंवाक्यं । तं प्रसिद्धं । स्वयमेव नतुदूतमुखेन । पूर्वसंबन्धिनं चिरंतनसुहृदं । ततः पूर्वोक्तेभ्योनृपतिभ्यः ॥ २१ ॥ ॥ २२ ॥ स्वयमेवगमनेहेतवोविशेषणानि ॥ २३ ॥ केकयराजानमिति । समासान्तविधेरनित्यत्वाट्टजभावः ॥ २४ ॥ समानय त्वमेवेतिशेषः ॥ २५ ॥ २६-॥ २७ ॥ प्राचीनान् प्राग्देशवर्तिनः । सिन्धुदेशेसौवीरदेशेचभवाः सिन्धुसौवीराः । सौराष्ट्रेयान् सुराष्ट्रदेशभवान् । दाक्षिणात्यान् दक्षिणदेशभवान् । आनयस्व दूतमुखेनेतिशेषः ॥ २८ ॥ यथाक्षिप्रं शैघ्र्यमनतिक्रम्य ॥२९॥ शुभान् अन्तरङ्गान ॥३०॥ मही-

शि० सुविहितं वेदबोधितं । अतःकिंचिद्भवदुक्तंनपरिहीयते । **ति०** यत्त्वयोक्तंतद्यथोक्तं त्वदुक्तानतिक्रमेणसुविहितं । नकिंचित्तत्रलुप्यतइतिशेषः ॥१७॥ किंच उक्तं । भावेक्तः । वचनं यथाकथयिष्यसितचनथैवकरिष्यामः । तत्रापिनकिंचिद्धीनंभविष्यति ॥ १८ ॥ **वि०** मानवान् चतुर्वर्णातिरिक्तान्संकरजातीयान् ॥ २० ॥ **ति०** मिथिलाधिपंस्वयमेवानयेतिसंबन्धः । नतुदूतमात्रप्रेषणेन । कुतएवंविशेषः कुतश्चतदानयनस्यप्रथममुपदेशस्तत्राह । पूर्वसंबन्धिनं पूर्वस्मिन्नेवकालेभाविनंसंबन्धिनं । तंयोगबलेनज्ञात्वा । ततोहेतोः भाविसंबन्धित्वाद्धेतोः । सर्वेभ्यः पूर्वं पूर्वकाले । तदानयनंब्रवीमीत्यर्थः ॥ २१ ॥ २२ ॥ **ति०** वसिष्ठेनविशिष्योक्तानितिशेषः ॥ ३१ ॥

[पा०] १ ङ. झ. प्रीतियुक्तेन. २ क. ङ. च. छ. झ. यथेष्टंतत्सुविहितं. ३ ख. ग. ङ. च. छ. झ. सुमन्त्रमाहूय. ४ क. ख. च. छ. समानयसुसत्कृत्य. ५ क. वीरं. ६ ग. ङ—झ. सत्यवादिनं. ७ झ. पूर्वसंबन्धिनं. ८ क—झ. सद्वृत्तंदेवसंकाशं. ९ क. ङ. च. ज. झ. तमिहानय. १० ङ. झ. श्वरंमहेष्वासं. च. छ. ज. श्वरंचराजानं. ११ च. ठ. समीपगम्. घ. सुधार्मिकम्. १२ ङ. झ. सपुत्रंतमिहानय. क—घ. तमानय. १३ घ. सुसत्कृतम्. १४ एतच्छ्लोकद्वयं ङ. च. छ. झ. ञ. दृश्यते. १५ ख. माज्ञाय. १६ इदमर्धं ङ. च. झ. दृश्यते. १७ ङ. च. छ. झ. त्वरितंतदा. १८ ख. ङ. ज. प्रयातो. १९ ङ. झ. महामतिः.

ते च कर्मान्तिकाः सर्वे वसिष्ठाय च[1] धीमते ॥ सर्वे निवेदयन्ति स्म यज्ञे यदुपकल्पितम् ॥ ३२ ॥
ततः प्रीतो द्विजश्रेष्ठस्तान्सर्वान्पुनरब्रवीत्[2] ॥ ३३ ॥
[[3]भवद्भिर्न तथा यज्ञे परिहास्येत कश्चन] ॥ अवज्ञया न दातव्यं कस्य[4]चिल्लीलयापि वा ॥
अवज्ञया कृतं हन्याद्दातारं नात्र संशयः ॥ ३४ ॥
ततः कैश्चिदहोरात्रैरुपयाता महीक्षितः ॥ बहूनि रत्नान्यादाय राज्ञो दशरथस्य हि ॥ ३५ ॥
ततो वसिष्ठः सुप्रीतो राजानमिदमब्रवीत् ॥ उपयाता नरव्याघ्र राजानस्तव शासनात् ॥ ३६ ॥
मया च सत्कृताः सर्वे यथार्हं [5]राजसत्तमाः ॥ [6]यज्ञियं च [7]कृतं राजन्पुरुषैः सुसमाहितैः ॥ ३७ ॥
निर्यातु च भवान्यष्टुं यज्ञायत[8]नमन्तिकात् ॥ सर्वकामैरुपहृतैरुपेतं वै समन्ततः ॥ ३८ ॥
द्रष्टुमर्हसि राजेन्द्र [9]मनसेव विनिर्मितम् ॥ ३९ ॥
[10]तथा वसिष्ठवचनादृश्यशृङ्गस्य चोभयोः ॥ [11]शुभे दिवसनक्षत्रे निर्यातो [12]जगतीपतिः ॥ ४० ॥
ततो वसिष्ठप्रमुखाः सर्वएव द्विजोत्तमाः ॥ ऋश्यशृङ्गं पुरस्कृत्य यज्ञकर्मारभंस्तदा ॥
[13]यज्ञवाटगताः सर्वे यथाशास्त्रं यथाविधि ॥ ४१ ॥
[[14]श्रीमांश्च सह पत्नीभी राजा दीक्षामुपाविशत्] ॥ ४२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे त्रयोदशः सर्गः ॥ १३ ॥

क्षितः वसिष्ठेनविशिष्योक्तान् ॥ ३१ ॥ तेचेति । उपलक्षणमेतच्छिल्पकरादीनां । यज्ञे यज्ञनिमित्तं । यत् उपकल्पितं निर्मितं । तत्सर्वंनिवेदयन्तिस्म ॥३२॥ अवश्यंशिक्षणीयांशंपुनःशिक्षयति—ततःप्रीतइति । अर्धमेकान्वयम् ॥ ३३ ॥ लीलया विनोदेन ॥३४॥ ततः दशरथनिर्गमनानन्तरं । रत्नानि श्रेष्ठवस्तूनि मणिमुक्ताप्रवालवस्त्राभरणचन्दनादीनि ॥ ३५ ॥ ३६ ॥ यज्ञमर्हतिइति यज्ञियम् । "यज्ञर्त्विग्भ्यांघखञौ"इतिघः । यज्ञाययत्संपाद्यं तत्सर्वंसंपादितमित्यर्थः ॥ ३७ ॥ अन्तिकात् समीपे । "दूरान्तिकार्थेभ्योद्वितीयाच"इतिचकारेणपञ्चमी । समीपे उपहृतैः । सर्वकामैः सर्वोपकरणैः । उपेतं ॥ ३८ ॥ द्रष्टुमित्यर्धमेकान्वयम् । मनसेवेतिक्षिप्रसिद्धत्वेदृष्टान्तः ॥ ३९ ॥ वसिष्ठेत्यविभक्तिकोनिर्देशः । वसिष्ठस्य ऋश्यशृङ्गस्यचोभयोरित्यर्थः । ऋश्यशृङ्गस्यब्रह्मत्वेनवृतत्वात् तद्वचनमप्यपेक्षितं । शुभेदिवसे सोमसौम्यवारादौ । शुभेनक्षत्रे रोहिण्यादौ । निर्यातः गृहात् । यज्ञशालांप्रतिइत्यर्थसिद्धं । अत्राहुः "शङ्खदुन्दुभिमृदङ्गवादनैर्मङ्गलैःपटहकाहलादिभिः । स्वस्तिवादमुखरैर्मखक्षितिं ब्राह्मणैश्चसहसंप्रपद्यते"इति ॥ ४० ॥ ततइतिसार्धश्लोकः । आरभन्निितिछान्दसः । यज्ञवाटगताः सर्वे यजमानर्त्विगादयः । यथाविधि यथाक्रमं । यथाशास्त्रं । सर्वेयज्ञकर्मारभन् स्वस्वकर्मारभन्तेत्यर्थः ॥ ४१ ॥ ४२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने त्रयोदशः सर्गः ॥ १३ ॥

ती० अन्तिकं अन्तिकेस्थितं ॥ ३८ ॥ ति० मनसेवेति । क्षिप्रसिद्धत्वोपकरणसौष्ठवज्ञापनायोत्प्रेक्षेयं ॥ ३९ ॥ ती० यथाशास्त्रं वेदोक्तमनतिक्रम्य । यथाविधि कल्पसूत्रानुसारेण ॥ ४१ ॥ इतित्रयोदशस्सर्गः ॥ १३ ॥

[पा०] १ ङ. झ. महर्षये. २ ङ. झ. मुनिरब्रवीत्. ख. ग. घ. निदमत्र. ३ इदमर्धं ज. दृश्यते. ४ ङ. कदाचिल्लीलया. ५ ङ. झ. राजसत्तम. ६ च. छ. यज्ञियश्चकृतोराजन्. क—घ. ज. याज्ञियं च. ७ ङ. ज. झ. कृतंसर्वं. ८ च.छ. ज. मन्तिकम्. ९ ख. ज. मनसैव. १० ज. ततोवसिष्ठ. ११ ङ—झ. दिवसेशुभनक्षत्रे. १२ घ. जगतःप्रभुः. १३ घ—छ. झ. यज्ञवाटंगताः. १४ क. ख. ङ. च. छ. झ. ञ. इदमर्धमधिकंदृश्यते.

चतुर्दशः सर्गः ॥ १४ ॥

ऋश्यशृङ्गपुरस्कारेणवसिष्ठादिभिर्दशरथस्याश्वमेधयाजनम् ॥ १ ॥ विस्तरेणयागवैभववर्णनम् ॥ २ ॥ दशरथेनाश्वमेधान्ते दक्षिणादिभिर्ऋत्विगादिसंमाननपूर्वकं ऋश्यशृङ्गप्रतिपुत्रेष्टियाजनप्रार्थना ॥ ३ ॥

अथ संवत्सरे पूर्णे तस्मिन्प्राप्ते तुरङ्गमे ॥ सरय्वाश्चोत्तरे तीरे राज्ञो[1] यज्ञोऽभ्यवर्तत ॥ १ ॥
ऋश्यशृङ्गं पुरस्कृत्य कर्म चक्रुर्द्विजर्षभाः ॥ अश्वमेधे महायज्ञे राज्ञोऽस्य सुमहात्मनः ॥ २ ॥
कर्म कुर्वन्ति विधिवद्याजका वेदपारगाः ॥ यथाविधि यथान्यायं परिक्रामन्ति शास्त्रतः ॥ ३ ॥
प्रवर्ग्यं शास्त्रतः कृत्वा तथैवोपसदं[2] द्विजाः ॥ चक्रुश्च विधिवत्सर्वमधिकं कर्म शास्त्रतः ॥ ४ ॥
अभिपूज्य ततो[3] हृष्टाः सर्वे चक्रुर्यथाविधि ॥ प्रातस्सवनपूर्वाणि कर्माणि मुनिपुङ्गवाः ॥ ५ ॥
ऐन्द्रश्च विधिवद्दत्तो राजा चाभिष्टुतो[4]ऽनघः ॥ माध्यन्दिनं[5] च सवनं प्रावर्तत यथाक्रमम्[6] ॥ ६ ॥

पूर्वसर्गान्तेशालाप्रवेशानन्तरमश्वमेधारंभस्संग्रहेणदर्शितः । तदनुष्ठानंविस्तरेणदर्शयिष्यन् तस्याश्वागमनपूर्वकत्वात्तदनुवादपूर्वकं यज्ञानुष्ठानंदर्शयतिचतुर्दशे—अथेत्यादि । अथ अश्वविमोचनानन्तरं । तुरङ्गमेप्राप्ते क्रमेणप्राप्ते । तस्मिन्संवत्सरेपूर्णे । राज्ञोयज्ञः । अभ्यवर्तत प्रावर्तत । अश्वागमनक्रमस्तु । विमुक्तमश्वंस्वैरंचरन्तं राजपुत्रराजोग्रसूतग्रामणिक्षत्रसंग्रहितारश्चतुश्शताः परिपालयन्तोनावर्तयन्तोनुचरन्ति । ब्रह्माध्वर्युहोत्रुद्गातारश्चत्वारऋत्विजः तं रथकारगृहेसमानीयबध्वा तस्यचतुर्षुपदेषु "इहधृतिस्स्वाहा" इत्याद्याहुतिचतुष्टयंजुह्वति । तथाहुः । " रथकारगृहेश्वस्यवसतःसायमस्यतु । चतुर्षुपत्सुहोतव्याश्चतस्रोधृतयःक्रमात्" इति । अथैकादशमासादूर्ध्वं तंसदस्याःसमानीयआश्वत्थेव्रजेबध्नन्ति । तथाहआपस्तंबः । "ऊर्ध्वमेकादशान्मासादाश्वत्थेव्रजेश्वंबध्नीयात्" इति। ततोद्वादशेमासे शालानिर्माणादिसकलसंभारान्संभृत्य फाल्गुनामावास्यायामृत्विग्भिःशालांप्रविश्य प्रतिपदमारभ्याश्वमेधंप्रारभन्ते ॥ १ ॥ ऋश्यशृङ्गमिति । अनेनप्रधानार्त्विज्यं ब्रह्मत्वंतस्येतिगम्यते ॥ २ ॥ प्रतिपदमारभ्यसप्तसुदिनेषुकर्तव्यान् " त्रीणित्रीणिवैश्वदेवानिजुहोति" इतिविहितानेकविंशतिहोमान् "पूर्णाहुतिमुत्तमांजुहोति" इतिविहितंकर्मविशेषंच अभिप्रेत्याह—कर्मेति । याजकाः ऋत्विजः । वेदपारं तदर्थाववोधः तद्गच्छन्तीतिवेदपारगाः । कर्म पूर्वोक्तं । विधिवत्कुर्वन्तिस्म । यथाविधि यथावेदोक्तं । यथान्यायं यथामीमांसं । शाश्वतः कल्पसूत्रानुसारेण । परिक्रामन्ति । "नासंस्थितेसोमेध्वर्युःप्रत्यङ्सदोतीयात्" इत्याद्युक्तक्रममतिलङ्घ्यऋत्विजोनविहरन्तीत्यर्थः ॥ ३ ॥ अथसोमक्रयानन्तरंसोमराजाप्यायनकर्मविशेषान्दर्शयति—प्रवर्ग्यमिति । द्विजा ऋत्विजः। प्रवर्ग्यं "देवावैसत्रमासत" इत्यादिप्रवर्ग्यब्राह्मणोक्तकर्मविशेषं । शास्त्रतः विधिमीमांसाकल्पसूत्रानुसारेण। कृत्वा। उपसदं इष्टिविशेषं। तथैव शास्त्रतएव। कृत्वा । शास्त्रतः उपदेशशास्त्रात् । अधिकं अतिदेशतःप्राप्तं। सर्वंकर्मच चक्रुः । "तिस्रएवसाहस्योपसदोद्वादशाहीनस्य" इतिप्राप्ताः द्वादशप्रवर्ग्योपसदश्चक्रुरित्यर्थः ॥ ४ ॥ अथसोमप्रयोगंदर्शयति—अभिपूज्येति । वहिष्पवमानादिभिस्तत्तत्कर्मदेवताः । अभिपूज्य ततः प्रवर्ग्योपसदनावसाने । प्रातस्सवनपूर्वाणि-प्रातस्सवनमाध्यंदिनसवनतृतीयसवनानि । कर्माणि चक्रुः ॥ ५ ॥ ऐन्द्रः इन्द्रग्रहनिष्ठःसोमांशः । सः विधिवत् इन्द्रायदत्तः । अनघः पापनिवर्तकः । राजा सोमराजः । अभिष्टुतः स्तोत्रशस्त्रैस्स्तुतः । यद्वा । ऐन्द्रः इन्द्रदेवताकोहविर्भागः । धानाःकरंभःपरिवापः पुरोडाशःपयस्येति प्रातःसवनहवींषि । इन्द्रायहरिवतेधानाः । इन्द्रायपूषण्वतेकरंभः । सरस्वतेपरिवापः ।

ति० अत्र त्रिंशद्दिनात्मकसावनमासपरिच्छिन्नोवत्सरः ॥ १ ॥ ति० अग्रेपुत्रेष्टौ । "इष्टिंतेऽहंकरिष्यामि" इतिऋश्यशृङ्गोक्तेः "जुहावाग्नौवतेजस्वी" इतिऋष्यशृङ्गंप्रक्रम्यवाल्मीक्युक्तेश्चाऽऽध्वर्यवमस्येतियुक्तं ॥ २ ॥ ती० प्रवर्ग्यं आरादुपकारककर्मविशेषं ॥ ४ ॥

[पा०] १ ख. घ. राज्ञस्तस्य. २ ख. तथैवोपसदो. ३ ङ. झ. तदाहृष्टाः. ४ ग. ङ. झ. चाभिपुतो. ५ ङ. झ. मध्यंदिनंच. ६ घ. यथाविधि.

तृतीयसवनं चैव राज्ञोस्य सुमहात्मनः ॥ चक्रुस्ते शास्त्रतो दृष्ट्वा तथा ब्राह्मणपुङ्गवाः ॥ ७ ॥
[आह्वयाञ्चक्रिरे तत्र शक्रादीन्विबुधोत्तमान् ॥ ऋश्यशृङ्गादयो मन्त्रैः शिक्षाक्षरसमन्वितैः ॥ ८ ॥
गीतिभिर्मधुरैः स्निग्धैर्मन्त्राह्वानैर्यथार्हतः ॥ होतारो ददुरावाह्य हविर्भागान्दिवौकसाम्] ॥ ९ ॥
न चाहुतमभूत्तत्र स्खलितं वाऽपि किंचन ॥ दृश्यते ब्रह्मवत्सर्वं क्षेमयुक्तं हि चक्रिरे ॥ १० ॥
न तेष्वहस्सु श्रान्तो वा क्षुधितो वाऽपि दृश्यते ॥ नाविद्वान्ब्राह्मणस्तत्र नाशतानुचरस्तथा ॥ ११ ॥
ब्राह्मणा भुञ्जते नित्यं नाथवन्तश्च भुञ्जते ॥ तापसा भुञ्जते चापि श्रमणा भुञ्जते तथा ॥ १२ ॥
वृद्धाश्च व्याधिताश्चैव स्त्रियो बालास्तथैव च ॥ अनिशं भुञ्जमानानां न तृप्तिरुपलभ्यते ॥ १३ ॥
दीयतांदीयतामन्नं वासांसि विविधानि च ॥ इति संचोदितास्तत्र तथा चक्रुरनेकशः ॥ १४ ॥
अन्नकूटाश्च बहवो दृश्यन्ते पर्वतोपमाः ॥ दिवसेदिवसे तत्र सिद्धस्य विधिवत्तदा ॥ १५ ॥

इन्द्रायपुरोडाशः । मित्रावरुणाभ्यांपयस्येतिहोतव्यानीन्द्रमुद्दिश्यैव "अथकस्मादेतेषांहविषामिन्द्रमेवयजन्ति" इत्यादिश्रुतेः । माध्यंदिनसायंतनसवनयोःपयस्यावर्जमन्यत्सर्वंसमानं । अभिषुतइतिपाठे चतसृषुदिक्षुचतुर्भिःऋत्विग्भिःपाषाणैरभिहत्यनिःसारितसारा सोमलताऽभूदित्यर्थः । तथाहिसूत्रं "सोमंराजानंदृषदिनिधायदक्षिणतोब्रह्मापश्चादध्वर्युरुत्तरतोहोताप्रागुद्गातास्थित्वादृषद्भिरभिहन्यात्" इति । अनघः अंशुस्कन्दनरहितः ॥ ६ ॥ तथा शास्त्रप्रकारेण । "प्रातस्सवनपूर्वाणि" इत्युक्तस्यैवायंप्रपञ्चः ॥ ७ ॥८॥९ ॥ अहुतं स्खलितं अन्यथाहुतंवा । किंचन नाभूत् । सर्वं होमादिकं । ब्रह्मवत् मन्त्रवत् । दृश्यतेस्म । हि यस्मात् । क्षेमयुक्तं निर्विघ्नम् । चक्रिरे । अत्रान्नहोमादिकमश्वमेधीयंसूचितं । तेषांबहुत्वेनस्खालित्यादिसंभावनयातत्परिहारस्यवक्तव्यत्वात् । तथाहुर्याज्ञिकाः "पत्नीसंयजनान्तेहन्यग्निष्टोमेतुसंस्थिते ॥ प्रजापतिसमेगीतेवीणागणिकिभिर्नृपे ॥ अस्तंगतेसहस्रांशावारुह्याश्वत्थनिर्मिताः ॥ षट्त्रिंशतमथासन्दीस्तावन्तोऽध्वर्यवोवृताः ॥ अप्राकृतैःस्रुवैर्दीर्घदण्डैःखदिरसंभवैः ॥ सर्वांतांरात्रिमन्नानिदशाज्यादीनिजुह्वति ॥ संख्याहुतीस्ताःसकृदेवहुत्वापरार्धपर्यन्तमथक्रमेण ॥ हुत्वाऽश्वनामप्रभृतीनिरात्रेश्शेषोक्थ्यसङ्ख्याहुतिभिःसमाप्यः" इति ॥ १० ॥ अथतत्रान्नदानसमृद्धिंदर्शयत्यष्टभिः—नतेष्वित्यादि । यद्यपिक्रीतेसोमेयज्ञान्नंनभोज्यं तथापि सर्वद्रव्यस्यवसिष्ठसात्कृतत्वेननदोषः। तेष्वहस्सु यज्ञीयदिनेषु । श्रान्तः पिपासितः । क्षुधितः बुभुक्षितः । नदृश्यते नादृश्यत । अशतानुचरः शतशिष्यरहितः ॥ ११ ॥ नाथवन्तः दासाः । शूद्रादयइतियावत् । श्रमणाः दिगंबराः । "श्रमणावातवसनाः" इतिनिघण्टुः । यद्वा " चतुर्थमाश्रमंप्राप्ताःश्रमणानामतेस्मृताः" इतिस्मृतिः ॥ १२ ॥ व्याधिताः संजातव्याधयः । अनिशंभुञ्जमानानां भुञ्जानेष्वपि । यजमानस्य तृप्तिः अलंबुद्धिः । नासीदित्यर्थः । यद्वा रस्यतातिशयाद्भुक्त्यनन्तरमपिभोजनेच्छाजायतइत्यर्थः ॥ १३ ॥ तथा चक्रुः ददुरित्यर्थः ॥ १४ ॥ विधिवत् पाकविध्युक्तक्रमेण । सिद्धस्य पक्वस्य । अन्नेति लुप्तषष्ठीविभ-

---

ति० यथेत्यस्ययथाविधीत्यर्थः ॥ ७ ॥ ती० तत्र यागे । स्खलितं स्कन्नं । पात्रादितिशेषः ॥ १० ॥ ति० श्रान्तः स्वस्वार्लिज्याशक्तः ॥ ११ ॥ ति० ब्राह्मणाइतित्रैवर्णिकोपलक्षणं । द्विजत्वात् । शि० । नाथवन्तः ब्राह्मणस्वामिकाः क्षत्रियादयश्शूद्राश्च । तापसाः ब्रह्मचारिप्रभृतयः । वाशब्देनवर्णाश्रमबहिर्भूतपरिग्रहः । तुशब्देनयथेच्छलाभः ॥ १२ ॥ ति० भोज्यसौष्ठवात्उदरपूर्तावपिरसातिशयलोभेनमानसीतृप्तिर्नोपलभ्यतइत्यर्थः । शि० भुज्यमानानां भोज्यमानानांजनानां तृप्तिर्नोपलभ्यते । एतेनभोज्यानामतिस्वादुत्वंध्वनितं । किंच अमानानां गर्वरहितानांभोजनदातॄणां अनिशं निरन्तरं भुजि भोजनायां । भोजनदानेइत्यर्थः । अन्तर्भावितणिजर्थकभुजेर्भावेक्विप् ॥ १३ ॥

[पा०] १ ङ.—झ. यथाब्राह्मण. २ ङ. च. छ. झ. ञ. ट. इदंश्लोकद्वयमधिकंदृश्यते. ३ ख. चापिकिंचन ङ—झ. वान्तकिंचन. ४ ख. यानकश्चन. ङ. झ. वानदृश्यते. ५ ङ. च. छ. झ. ब्राह्मणःकश्चित्. ६ ग. नावादकुशलस्तथा. घ. नानाचाररतस्तथा. ७ ट. नाथवन्तस्तु. ८ ट. वापि. क. नित्यं. ९ ङ. झ. श्रमणाश्चैवभुञ्जते. १० क. घ—झ. स्त्रीबालाश्चतथैवच. ११ ट. भुञ्जमानानां.

नानादेशादनुप्राप्ताः पुरुषाः स्त्रीगणास्तथा ॥ अन्नपानैः सुविहितास्तस्मिन्यज्ञे महात्मनः ॥ १६ ॥
अन्नं हि विधिवत्स्वादु प्रशंसन्ति द्विजर्षभाः ॥ अहो तृप्ताः स्म भद्रं त इति शुश्राव राघवः ॥१७॥
स्वलंकृताश्च पुरुषा ब्राह्मणान्पर्यवेषयन् ॥ उपासते च तानन्ये सुमृष्टमणिकुण्डलाः ॥ १८ ॥
कर्मान्तरे तदा विप्रा हेतुवादान्बहूनपि ॥ प्राहुः स वाग्मिनो धीराः परस्परजिगीषया ॥ १९ ॥
दिवसेदिवसे तत्र संस्तरे कुशला द्विजाः ॥ सर्वकर्माणि चक्रुस्ते यथाशास्त्रं प्रचोदिताः ॥ २० ॥
नाषडङ्गविदत्रासीन्नाव्रतो नाबहुश्रुतः ॥ सदस्यास्तस्य वै राज्ञो नावादकुशला द्विजाः ॥ २१ ॥
प्राप्ते यूपोच्छ्रये तस्मिन्षड् बैल्वाः खादिरास्तथा ॥ तावन्तो बिल्वसहिताः पर्णिनश्च तथाऽपरे ॥२२॥
श्लेष्मातकमयस्त्वेको देवदारुमयस्तथा ॥ द्वावेव तत्र विहितौ बाहुव्यस्तपरिग्रहौ ॥ २३ ॥

क्तिकंपदं । अन्नस्यखाद्यभक्ष्यलेह्यचोष्यभेदभिन्नस्य । कूटाः राशयः ॥ १५ ॥ सुविहिताः सुतर्पिताः ॥१६॥ अन्नं विधिवत् उपचारवत् । स्वादुच । अनेनतृप्ताः स्म । अहो इदंवर्णयितुंनशक्यं । इति द्विजर्षभाः प्रशंसन्ति प्राशंसन् । तद्राघवःशुश्राव । "नतेष्वहस्सु" इत्यारभ्यप्रशंसाप्रकारोनतुकविवाक्यं । अनेन "ब्राह्मणौ वीणागाथिनौगायतः" इत्यारभ्य "इत्यददाइत्ययजथाइत्यपचइतिब्राह्मणोगायेत् " इत्युक्तस्तुतिश्रवणमुक्तम् ॥ १७ ॥ ब्राह्मणान् ब्राह्मणेभ्यः । पर्यवेषयन् भक्ष्यान्नपानादीनितिशेषः । सुमृष्टमणिकुण्डलाः उत्तेजितरत्नकुण्डलाः । अन्येपुरुषाःसाहाय्यार्थंतानसेवन्तेत्यर्थः ॥ १८ ॥ कर्मान्तरे सवनयोरन्तरालकाले । धीराः धीमन्तः । वाग्मिनः पटुवाचः । विप्राः ऋत्विजः । परस्परजिगीषया बहून्हेतुवादान् प्राहुःस्म । अनेन ब्रह्मोद्यमुक्तं । यथा "किंस्विदासीत्पूर्वचित्तिः" इत्यादि होतृब्रह्मणोःप्रश्नप्रतिवचनानि ॥१९॥ अथ "ऊमोर्व्यकाव्याधिदैवत्यानि द्विनाराशंसनंप्रातःसवनं द्विनाराशंसनंमाध्यंदिनंसवनं सकृन्नाराशंसनं तृतीयसवनं" इतिविहितानित्रिकालकर्माणिदर्शयति— दिवसेदिवसइति । दिवसेदिवसे अश्वमेधाहःसुप्रत्यहं । संस्तरे आस्तीर्णबर्हिषि । "संस्तरौप्रस्तराध्वरौ" इत्यमरः । सर्वकर्माणि ऊमादिदैवत्यकर्माणि । यथाशास्त्रं । वृद्धैः प्रचोदिताःसन्तः । चक्रुः । "ऊमाऊर्व्याश्चकाव्याश्चपितरः सवनत्रये" ॥ नाराशंसनंनाम सकृद्भक्षिताप्यायितासादितचमसं ॥ २० ॥ अत्र यज्ञे । अषडङ्गवित्कश्चिन्नासीत् । अव्रतश्च कश्चिन्नासीत् । अबहुश्रुतश्चकश्चिन्नासीत् । तस्य राज्ञः । सदस्याः सदसिसमवेताः । द्विजाः । अवादकुशलाः नासन् ॥ २१ ॥ अथौपवसथ्यदिनकृत्यंपश्वालंभंवक्तुंयूपोच्छ्रयणप्रकारमाह—प्राप्तइति । श्लोकद्वयमेकान्वयं । यस्मिन् अश्वमेधे । यूपानामुच्छ्रयोयूपोच्छ्रयः । उच्छ्रयः उत्क्षेपणं । उद्धृत्यस्थापनमितियावत् । तत्कालोत्र लक्ष्यते । "यूपायोच्छ्रीयमाणायानुब्रूहि" इतिप्रैषप्राप्तइत्यर्थः । बिल्वस्यविकाराबैल्वाः । "बिल्वादिभ्योऽण्" इत्यण् । बैल्वायूपाष्षट् उच्छ्रिताइतिशेषः । खदिरस्यविकाराःखादिराः । तथेतिसमुच्चये । खादिरायूपाश्च । तावन्तःषडेव । बिल्वसहिताइति खादिराणांबिल्वसमीपवर्तित्वं नतुपर्णिसमीपवर्तित्वमित्युच्यते । षट्खादिरायथाबिल्वसहिताभवन्ति तथोच्छ्रिताइत्यर्थः । अपरे उक्तेभ्योऽन्ये । पर्णिनः पर्णीपलाशः "पलाशे किंशुकःपर्णी " इत्यमरः । तत्प्रकृतिकाः पर्णिन इत्युच्यन्ते । पर्णिनोयूपाः । तथा षडुच्छ्रिताइत्यर्थः ॥ २२ ॥ श्लेष्मातकमयः राज्जुदालविकारः । एकोयूपः उच्छ्रितः । देवदारुमयस्तथा देवदारुविकारश्चयूपउच्छ्रितः । अत्रैकत्वमविवक्षितं । द्वयोः श्रुत्याचोदितत्वात् । " राज्जुदालमग्निष्ठंमिनोतिपौतुद्रवावभितोभवतः" इतिश्रुतिः। राज्जुदालः श्लेष्मातकः। पौतुद्रवौ देवदारू। अयमत्रविन्यासक्रमः। राज्जुदालो-

---

शि० विधिवत् पाकशास्त्रोक्तविधिनिर्मितम् ॥ १७ ॥ ति० स्वलंकृताइति । अनेन राजकृतोयज्ञपरिचारकसत्कारोध्वनितः ॥ १८ ॥ शि० प्रचोदिताः प्रेष्य ब्रूहीत्यादिवैदिकशब्दैःप्रेरिताः । ते प्रसिद्धाः ॥ २० ॥ ति० श्लेष्मातकः रज्जुदालः । तन्मय एकोयूपः । अश्वमेधेदिष्टः उपदिष्टइत्यर्थः । शि० अग्निष्ठः अग्निसंमुखवर्ती ॥ २३ ॥

[पा०] १ ज. उपासतेतथान्येच. २ क—झ. प्राहुःसुवाग्मिनो. क. ख. प्राहुःस्सवेदकुशलाः. ३ क. ग—छ. झ. मयोदिष्टो. ट. मयोऽग्निष्ठो. ज. मयश्चैव.

कारिताः सर्वं एवैते शास्त्रज्ञैर्यज्ञकोविदैः ॥ [1]शोभार्थं तस्य यज्ञस्य काञ्चनालंकृता भवन् ॥ २४ ॥
एकविंशतियूपास्ते एकविंशत्यरत्नयः ॥ वासोभिरेकविंशद्भिरेकैकं समलंकृताः ॥ २५ ॥
विन्यस्ता विधिवत्सर्वे शिल्पिभिः सुकृता दृढाः ॥ अष्टाश्रयः सर्वं एव [2]श्लक्ष्णरूपसमन्विताः ॥२६॥
आच्छादितास्ते वासोभिः पुष्पैर्ग[3]न्धैश्च पूजिताः ॥ सप्तर्षयो दीप्तिमन्तो विराजन्ते यथा दिवि ॥२७॥
इष्टकाश्च यथान्यायं कारिताश्च प्रमाणतः ॥ चितोऽग्निर्ब्राह्मणैस्तत्र [4]कुशलैः शुल्बकर्मणि ॥ २८ ॥

ग्निष्ठः अग्नौतिष्ठतीत्यग्निष्ठः।अग्निशब्देनाग्निस्थानवेदिरुच्यते। "अर्धमन्तर्वेदिमिनुयादर्धंबहिर्वेदि"इतिश्रुतेः। सोग्निष्ठःप्रथमयूपः "तानग्निष्ठप्रथमान्मन्त्रेणछिनत्ति" इतिसूत्रात्।तस्यदक्षिणोत्तरपार्श्वयोर्देवदारुयूपौ तेषांत्रयाणांदक्षिणतस्त्रयोबैल्वाः उत्तरतस्त्रयः। तेषांनवानांदक्षिणतस्त्रयः खादिराउत्तरतस्त्रयः। तेषांपञ्चदशानां दक्षिणतस्त्रयः पालाशाःउत्तरतस्त्रयः। प्रथमंपालाशषट्कमन्तेबिल्वषट्कंवा। सर्वधाखादिराएवबिल्वसहिताः नपुनःपालाशाः। तमिममर्थंग्रन्थकारोबिल्वसहिताइत्यसूचयत्। आपस्तंबश्चासूत्रयत्। "राज्जुदालमेकविंशत्यरत्निसंमिनोति पौतुद्रवावभितस्त्रयोबैल्वादक्षिणतस्त्रयउत्तरतस्त्रयः खादिरादक्षिणतस्त्रयउत्तरतस्त्रयः पालाशादक्षिणतस्त्रयउत्तरतः" इति। एवंयूपानामुच्छ्रयणक्रममुक्त्वातेषामन्तरालप्रदेशविस्तारंदर्शयति—द्वाविति। तत्र यूपेषु। द्वौद्वौबाहुव्यस्तपरिग्रहौ विहितौ कृतौ। व्यस्तौबाहू बाहुव्यस्तौ ताभ्यांपरिग्रहःस्पर्शोययोस्तौ। द्वौद्वौयूपौ व्यस्तबाहुस्पृश्यौविहितौ। व्याममात्रान्तरप्रदेशावित्यर्थः। तथाहधर्मनिर्णयकारः। "षण्णवत्यङ्गुलंबाहुदण्डमष्टोत्तरंतुवा। यूपान्तरालंतन्मात्रमश्वमेधमहाक्रतौ" इति ॥ २३ ॥ यूपनिर्माणमाह—कारिताइति। एतेसर्वेयूपाः शास्त्रज्ञैः यज्ञशास्त्रज्ञैः। यज्ञकोविदैः यज्ञप्रयोगकुशलैः। कारिताः काञ्चनैःकाञ्चनपट्टैश्चालंकृताः। भवन् "बहुलंछन्दस्यमाङ्योगेपि" इत्यडभावः। अलंकारोपिकिंशास्त्रीयःनेत्याह—तस्ययज्ञस्यशोभार्थमिति। यज्ञभूमेः शोभार्थमित्यर्थः ॥२४॥ तेषांसङ्ख्याप्रमाणेदर्शयति—एकविंशतीति। ते यूपाः। एकविंशति "सुपांसुलुक्" इत्यादिनासुलोपः। एकविंशत्यरत्नयश्च एकविंशत्यरत्न्युन्नताइत्यर्थः। "एकविंशत्यरत्निरश्वमेधस्य" इतिश्रुतेः। "चतुर्विंशत्यङ्गुलयोरत्निः" इतिसूत्रं। एकविंशद्भिरितीकारलोपबहुवचनेआर्षे। एकैकमितिसामान्येननपुंसकं। एकोयूपएकेनवाससेतिक्रमेणसर्वेपिवासोभिरलंकृताइत्यर्थः ॥ २५ ॥ यूपस्थापनविशेषमुक्तानुवादपूर्वमाह—विन्यस्ताइति। शिल्पिभिः सुकृताः सुष्ठुकृताः अन्यूनातिरिक्ततयाकृताः। दृढाः सुषिरादिदोषरहिताः। अष्टाश्रयः अष्टकोटयः। "स्त्रियःपाल्यश्रिकोटयः" इत्यमरः। श्लक्ष्णरूपसमन्विताः यूपाभ्यञ्जनेनस्निग्धरूपयुक्ताः। सर्वएव विन्यस्ताः स्थापिताः। यद्वा। "प्राप्तेयूपोच्छ्रये" इत्यादिश्लोकत्रयमेकान्वयं। शास्त्रज्ञैःकारिताबैल्वादयः सर्वेएतेकाञ्चनालंकृताः भवन्नितियूपनिर्माणमुक्तं। एकविंशतीत्यनेन संख्याप्रमाणेदर्शिते। विन्यस्ताइत्यनेन स्थापनमुच्यते ॥ २६ ॥ यूपान्वर्णयति—आच्छादिताइति। दिविसप्तर्षयइव तेयूपाविराजन्तेस्म। दीप्तिमात्रेदृष्टान्तः। सप्तानांसप्तानांवा ॥ २७ ॥ यूपोच्छ्रयपूर्वभाविचयनमाह—इष्टकाइति। शुल्बकर्मणि यज्ञकर्मणि। "शुल्बंताम्रेयज्ञकर्मण्याचारेजलसन्निधौ" इतिवैजयन्ती। प्रकृतेचयनंविवक्षितं। शुल्बमेकसरारज्जुः। शुल्बसाध्यंकर्म शुल्बंचयनं। अतएवाहरुद्रदत्तः। "रज्जूनांविहरणसाधनत्वादेतत्कर्मशुल्बमाचष्टआचार्यः" इति। तत्रकुशलैः ब्राह्मणैः। यथान्यायं यथाशास्त्रं। प्रमाणतः प्रमाणेन। विशिष्टाइष्टकाःकारिताः। अत्रसूत्रं "पादमात्रोर्धमात्रोणुकमात्रऋजुरेखादक्षिणावृतासव्यावृतारुयालिखिताश्च" इति। अग्निः अग्न्याधारवेदिः। चितः ताभिरिष्टकाभिः कृतचयनः।

ति० शास्त्रज्ञैः शास्त्रंशिल्पशास्त्रं शुल्बशास्त्रंच ॥ २४ ॥ ति० महोच्छ्रयपरीणाहोयूपोन्यःसर्वकाञ्चनः। यज्ञेसमभवत्तत्रशोभार्थमुपकल्पितः। इतिक्वचित्पाठः ॥ २५ ॥

[पा०] १ शोभनार्थंचयज्ञ. २ घ. ङ. श्लक्ष्णारूप. ३ ग. घ, ज. गन्धैश्चभूषिताः. ४ क. ङ. झ. कुशलैःशिल्पकर्मणि. च. छ. कुशलैर्यज्ञकर्मणि.

स चित्यो राजसिंहस्य सञ्चितः कुशलैर्द्विजैः ॥ गरुडो रुक्मपक्षो वै त्रिगुणोष्टादशात्मकः ॥२९॥
नियुक्तास्तत्र पशवस्तत्तदुद्दिश्य दैवतम् ॥ उरगाः पक्षिणश्चैव यथाशास्त्रं प्रचोदिताः ॥ ३० ॥
शामित्रे तु हयस्तत्र तथा जलचराश्च ये ॥ ऋत्विग्भिः सर्वमेवैतन्नियुक्तं शास्त्रतस्तदा ॥ ३१ ॥
पशूनां त्रिशतं तत्र यूपेषु नियतं तदा ॥ अश्वरत्नोत्तमं तत्र राज्ञो दशरथस्य च ॥ ३२ ॥
कौसल्या तं हयं तत्र परिचर्य समन्ततः ॥ कृपाणैर्विशशासैनं त्रिभिः परमया मुदा ॥ ३३ ॥

अभूत् ॥ २८ ॥ चयनसंस्थानमाह—सचित्यइति । सः चित्यः चयननिर्वर्त्योग्निः । राजसिंहस्य राजश्रेष्ठस्य । अनेन पूर्वमनेकधानुष्ठितक्रतुत्वंसूच्यते । कुशलैः रीतिभेदंविनाचयननिर्माणसमर्थैः । द्विजैः ब्राह्मणैःऋत्विग्भिः । संचितः सम्यग्यथाशास्त्रंचितः । कथंचितइत्यत्राह—गरुडइति । गरुडः गरुडाकारः । पक्षौपुच्छंचप्रसार्याधोवीक्षमाणःप्राङ्मुखंतिष्ठन्गरुडइवस्थितः । "श्येनचितंचिन्वीत" इतिश्रुतौश्येनशब्दोगरुडपरएव । "सुपर्णोसिगरुत्मान्" इति मन्त्रलिङ्गात् । यद्वा । गरुडः गरुडप्रतिकृतिः । "जीविकार्थेचापण्ये" इतिवासुदेवादिवत्प्रतिकृतौविहितस्यकनोलुप् । रुक्मपक्षः स्वर्णगर्भपक्षः । "सहस्रंहिरण्यशकलैःप्रतिदिशमग्निंप्रोक्षति" इतिसूत्रात् । त्रिगुणः त्रिगुणप्रस्तारः । प्रकृतौषट्प्रस्तारात्मकस्यचित्याग्नेरश्वमेधेत्रैगुण्यविधानात् । "षट्चितयोभवन्ति" इतिश्रुतेः । "त्रिस्तावोग्निर्भवतीत्यश्वमेधेविज्ञायते" इतिसूत्राच्च । अतएवअष्टादशात्मकः अष्टादशप्रस्तारात्मकः । ननु षट्प्रस्तारात्मकस्यचित्यस्यत्रैगुण्यविधानेनैव अष्टादशप्रस्तारात्मकत्वंसिद्धं किं पुनस्तदुपदेशेन । उच्यते । त्रिगुणइत्युक्तेपञ्चदशात्मकत्वंप्रतीयते । तैत्तिरीयके "पञ्चचितयोभवन्ति" इतिविधानात् । तदिदंवाजसनेयकपक्षावलंबनंद्योतयितुमष्टादशात्मकत्वोक्तिः । एवंभूतश्चितइत्यन्वयः ॥ २९ ॥ अथपूर्वोक्तेपुयूपेषुपशुनियोजनमाह—नियुक्ताइति । यथाशास्त्रं शास्त्रमनतिक्रम्य । प्रचोदिताः विहिताः । पशवउरगाःपक्षिणश्च । तत्तद्दैवतंइन्द्रादिदेवतांउद्दिश्यतत्र यूपेषु नियुक्ताबद्धाः । यूपेष्वित्यारोकाणामुपलक्षणं । "यूपेषुग्राम्यान्पशून्नियुञ्जन्ति । आरोकेष्वारण्यान्धारयन्ति" इतिश्रुतेः । अत्राशक्यानामुरगादीनांनियोजनंपञ्जरद्वारा । एतेचपशवस्तत्तद्देवताश्च "इन्द्रायराज्ञेसूकरः" इत्याद्यनुवाकेषुप्रतिपाद्यन्ते ॥ ३० ॥ तत्र "पर्यग्निकृतानारण्यानुत्सृजन्त्यहिंसायै" इतिश्रुतेरारण्यान्पशून्पर्यग्निकृतानुत्सृज्य ग्राम्याणांपशूनां शामित्रेनियोजनमाह—शामित्रेत्विति । तुशब्देनारण्येभ्योवैलक्षण्यमुच्यते । हयःअश्वमेधीयः । येजलचराःकूर्मादयः तेच तदन्यत्सर्वंच ग्राम्यपशुजातं तत्र यज्ञे तदा विशसनकाले । ऋत्विग्भिः शामित्रे विशसनकर्मणि । शास्त्रतोनियुक्तं ॥ ३१ ॥ यूपनियुक्तानांपशूनांसंख्यामाह—पशूनामिति । तत्र यूपेषु । पशूनांत्रिशतं नियतंबद्धं । तदाराज्ञोदशरथस्य अश्वरत्नोत्तमं अश्वश्रेष्ठोत्तमंचनियतं । त्रिशतमितिप्रधानापेक्षया । अधिकानामपिश्रवणात् । तथाह भास्करः "अश्वमेधपशुसङ्ख्यातुपञ्चशतमेकोनविंशतिश्च" इति । अश्वरत्नोत्तरइतिपाठे रत्नोत्तरोरत्नप्रधानोश्वइतिपरनिपातेनयोजना । तथाहभास्करः "सौवर्णान्महिषी मणीन्दशशतानस्यावयत्यावहाद्वावाता वयते मणीन्दशशतान्प्रत्यग्वहाद्राजतान् ॥ प्रत्यक्श्रोणिसहस्रमेवपरिवृत्त्यस्यावयेन्मौक्तिकान्सख्यःशङ्खमणीनथैषुससुपग्रथ्नन्त्यविस्रस्तयः" इति । आवयति उतान्करोति ॥ ३२ ॥ मृताश्वोपचारमाह—कौसल्येति । कौसल्या महिषी । तत्र शामित्रप्रदेशे । तं मृतंहयं । समन्ततः परिचर्य प्रदक्षिणाप्रदक्षिणंसंचार्य । अत्रसूत्रं "दक्षिणान्केशपक्षानुद्ग्रथ्यसव्यान्प्रग्रथ्य दक्षिणानूरूनाघ्नाना इदंमध्विदंमध्वितिजपन्त्यः स्त्रियोमहिष्यश्चाश्वतूवरगोमृगाणांपरिक्रम्य सव्यानुद्ग्रथ्य दक्षिणान्प्रग्रथ्य सव्यानू-

ति० सचित्यः अग्निः । संचितः स्थापितः । कथंसंचितइत्यत्राह । गरुडः गरुडसंस्थानः । रुक्मपक्षः "सहस्रंहिरण्यशल्कैः प्रतिदिशमग्निंप्रोक्षति" इतिसूत्राद्रुक्मपक्षत्वमितिकेचित् । अत्रपक्षे "त्रिगुणोष्टादशात्मकः" इत्यस्यासामञ्जस्यंमत्वा चितदेशविशेषणानीमानि । स्वर्णेष्टकाभिःपक्षनिर्माणाद्रुक्मपक्षत्वमित्यन्ये । शि० रुक्मपक्षः सुवर्णमयपक्षविशिष्टः ॥ २९ ॥ ती० परिचर्यप्रोक्षणादिभिःसंस्कृत्य । एनं कृपाणैर्विशशासेति असिभिर्वधंचकारेत्यर्थः । **मुनिभावप्रकाशिका** कृपाणैः आयुधैः । त्रिभिः मन्त्रैः ॥ ३३ ॥

[पा०] १ घ. ङ. ज. झ. ऋषिभिस्सर्व. २ ज. शास्त्रतस्ततः. ३ ज. यूपेषुविनियोजितम्.

पतत्रिणा तदा सार्धं सुस्थितेन च चेतसा ॥ अवसद्रजनीमेकां कौसल्या धर्मकाम्यया ॥ ३४ ॥
होताऽध्वर्युस्तथोद्गाता हस्तेन समयोजयन् ॥ महिष्या परिवृत्त्या च वावातामपरां तथा ॥ ३५ ॥
पतत्रिणस्तस्य वपामुद्धृत्य नियतेन्द्रियः ॥ ऋत्विक् परमसंपन्नः श्रपयामास शास्त्रतः ॥ ३६ ॥
धूमगन्धं वपायास्तु जिघ्रति स्म नराधिपः ॥ यथाकालं यथान्यायं निर्णुदन्पापमात्मनः ॥ ३७ ॥
हयस्य यानि चाङ्गानि तानि सर्वाणि ब्राह्मणाः ॥ अग्नौ प्रास्यन्ति विधिवत्समन्त्राः षोडशर्त्विजः ॥ ३८ ॥

रूनाम्नाना सक्थीरवधून्वन्त्यस्त्वप्रदक्षिणंपरिक्रम्य प्रदक्षिणमन्नतोयथापुरस्तान्नवकृत्वः संपादयन्ति'' इति । कृपाणैस्त्रिभिस्तिसृभिः सौवर्णीभिःसूचीभिः एनं परमयामुदा निरवधिकश्रद्धया । विशशास असिपथान्कल्पयामास । कौसल्येति इतरासामुपलक्षणं । ''सौवर्णीभिः सूचीभिः पत्न्योश्वस्यासिपथान्कल्पयन्ति प्राक्रोडात्प्रत्यच्छ्रोणीभिः'' इति सूत्रात् । क्रोडं वक्षः ॥ ३३ ॥ महिष्याःकर्तव्यांतरमाह—पतत्रिणेति । तदा विशसनोत्तरकाले । कौसल्या । धर्मकाम्यया धर्मसिद्धीच्छया । काम्यजन्तादकारप्रत्ययेटाप् । सुस्थितेन सुस्थिरेण । चेतसा उपलक्षितासती । शवस्पर्शकुत्सारहितासतीत्यर्थः । पतत्रिणा अश्वेन । सार्धएकांरजनीमवसत् । अत्रसूत्रं ''अंबेअंबाल्यंबिकेइतिजपन्तीमहिषी अश्वमुपसंगम्य गणानांत्वागणपतिंहवामहइत्यभिमन्त्र्य। उत्सक्थ्योर्गृदंधेहीतिप्रजननेप्रजननंसंनिधायोपविशति । सुभगेकांपीलवासिनीतिक्षौमेनवाससाध्वर्युर्महिषीमश्वंचप्रच्छाद्य वृषावांरेतोधा रेतोदधात्वितिजपत्याभीध्रएतांरात्रिमृत्विजोयजमानंजागरयन्ति'' इति॥ ३४ तादात्विकदक्षिणामाह—होतेति । तथेत्यनुक्तसमुच्चयार्थः । ब्रह्माचेत्यर्थः । एतेब्रह्मादयश्चत्वारःप्रधानर्त्विजोमहिषीपरिवृत्तिभ्यांसह वावातामपरां पालाकलीं च । राज्ञोदक्षिणार्थं परिगृह्य । हस्तेनसमयोजयन् । रमणवद्धस्तेनागृह्णन्नित्यर्थः । अत्रश्रुतिः ''अंबेअंबाल्यंबिकेइतिपत्नीमुदानयति'' इत्यादि । उदानयति हस्तेनगृह्णातीत्यर्थइतिभास्करः । सूत्रंच ''महिषींब्रह्मणेददातिवावातांहोत्रेपरिवृत्तिमुद्गात्रेपालाकलीमध्वर्यवे'' इति । पश्चात्प्रतिनिधिद्रव्यदानेन निष्क्रयम् । ''कृताभिषेकामहिषीपरिवृत्तिरुपेक्षिता । वावाताभोगिनीपात्रप्रदापालाकलीमता'' इतिवैजयन्ती ॥ ३५ ॥ तस्यपतत्रिणः अश्वस्य । ''पतत्त्रीपक्षितुरगौ'' इत्यमरः । वपां वपास्थानीयां तेजनीं । ''नाश्वस्यवपाविद्यते'' इतिसूत्रात् । ''नान्येषां पशूनांतेजन्या अवद्यन्त्यवद्यन्त्यश्वस्य'' इतिश्रुतेश्च । उद्धृत्य आदाय । नियतेन्द्रियः एकाग्रः । परमसंपन्नः पर[illegible]प्रयोगचातुर्येणसंपन्नः । ऋत्विक् अध्वर्युः । शास्त्रतः श्रपयामास पपाच । श्रापाके । शास्त्रंचस्वयमेववक्ष्यतिसूत्रेति ॥ ३६ ॥ अथवपाहोमंसूचयन्नाह—धूमेति । नराधिपः दशरथः । यथाकालं होमकालमनतिक्रम्य । यथान्यायं यथाशास्त्रं । आत्मनः पापं निर्णुदन् निवर्तयन्नसन् । वपाया धूमगन्धंजिघ्रतिस्म ॥ ३७ ॥ वपाहोमानुक्त्वा

ति० पतत्रिणेति । पुराअश्वानांपक्षाःसन्तीतिप्रसिद्ध्यैवंवादः ॥ ३४ ॥ ति० अथहोत्रादयः । महिष्या कृताभिषेकया । परिवृत्त्या राज्ञोभोगाद्बहिष्कृतयादास्यान्तसह । वावातां राज्ञोवल्लभांभुजिष्यां । अश्वेनसमयोजयन्नितिसंबन्धइतिकेचित् । अपरे तु वावाताशब्दोराज्ञोमध्यमजातीयद्वितीयभार्यावाची । तदुक्तमैतरेयब्राह्मणभाष्ये तृतीयपञ्चिकाद्वात्रिंशखण्डस्थ[illegible]प्रतीकव्याख्यानावसरे । राज्ञांहित्रिविधाःस्त्रियः । उत्तममध्यमाधमजातीयाः । तासांमध्ये उत्तमजातेःक्षत्रियायामहिषीतिनाम । मध्यमजातेर्वैश्यायाःवावातेति । अधमजातेःशूद्रायाःपरिवृत्तिरिति । अतएवाश्वलायनसूत्रे दशमाध्याये अष्टमखण्डस्थवावातेतिप्रतीकंगृहीत्वा द्वितीयाभार्येतिव्याख्यातं नारायणवृत्तिकृता । शि० रात्रिवासोत्तरकालिकंहोत्रादिकृत्यमाहहोतेति । होत्रादयस्त्रयः । तथाशब्देनब्रह्माच । महिष्या कृताभिषेकया । परिवृत्त्या उपेक्षितयाच सहितांवावातां भोगिनीं । अपरां पालाकलींच । हयेनाश्वेनसमयोजयन् । अश्वाङ्गसंयोजनरूपविधिंकारयामासुरित्यर्थः । तथाशब्दश्चार्थे । एतेन ''महिषींब्रह्मणेददाति वावातांहोत्रे परिवृत्तिमुद्गात्रे पालाकलीमध्वर्यवे'' इतिसूत्राण्युपन्यस्य पत्नीदानपरत्वेनव्याख्यानंप्रत्युक्तं । दानस्यात्रानुक्तेः । अध्याहारे गौरवाच्च । हस्तेनसमयोजयन्नितिपाठेतु हयहस्तेनेत्यर्थः । पशूनामग्रिमपादयोर्हस्तत्वात् । अतएव हयेनसमयोजयन्नितिपाठेन न विरोधः ॥ ३५ ॥ शि० पापं प्रकटपुत्रवियोगहेतुत्वेनप्रतीयमानविघ्नविशेषं ॥ ३७ ॥ शि० समस्ताः मिलिताः ॥ ३८ ॥

[पा०]१ ज. सत्कृतेन च. २ क.—ङ. छ. ज. हयेन. ३ ख. ङ. छ. ज. झ- परिवृत्त्याथ. ४ ख. ग. च. जिघ्रन्तिस्म- नराधिपाः. ५ ख. घ.—झ. ट. विधिवत्समस्ताः.

प्लक्षशाखासु यज्ञानामन्येषां क्रियते हविः ॥ अश्वमेधस्य यज्ञस्य वैतसो भाग इष्यते ॥ ३९ ॥
त्र्यहोऽश्वमेधः संख्यातः कल्पसूत्रेण ब्राह्मणैः ॥ चतुष्टोममहस्तस्य प्रथमं परिकल्पितम् ॥
उक्थ्यं द्वितीयं संख्यातमतिरात्रं तथोत्तरम् ॥ ४० ॥
कारितास्तत्र बहवो विहिताः शास्त्रदर्शनात् ॥ ४१ ॥
ज्योतिष्टोमायुषी चैवमतिरात्रौ विनिर्मितौ ॥ अभिजिद्विश्वजिच्चैवमप्तोर्यामो महाक्रतुः ॥ ४२ ॥
प्राचीं होत्रे ददौ राजा दिशं स्वकुलवर्धनः ॥ अध्वर्यवे प्रतीचीं तु ब्रह्मणे दक्षिणां दिशम् ॥४३॥
उद्गात्रे वै तथोदीचीं दक्षिणैषा विनिर्मिता ॥ हयमेधे महायज्ञे स्वयंभूविहिते पुरा ॥ ४४ ॥

अङ्गहोममाह—हयस्येति । सर्वाणि ब्राह्मणाइत्यत्रगुर्वक्षरमार्षं । सर्वाणीत्यनेन सर्वस्यहुतत्वेनशेषभक्षणं नास्तीत्युक्तं । अङ्गहोमफलंश्रूयते । "अङ्गेअङ्गेवैपुरुषस्यपाप्मोपश्लिष्टः । अङ्गादङ्गादेवैनंपाप्मनस्तेनमुञ्चति" इति । यजमानस्यसर्वपापंनिवर्ततइत्यर्थः ॥३८॥ पूर्वंशास्त्रतःश्रपयामासेत्युक्तं तदवदानमाह—प्लक्षेति । अन्येषांयज्ञानां संबन्धिहविः वपा । प्लक्षशाखासु क्रियते अवदीयते । अश्वमेधस्ययज्ञस्य भागः हविर्भागः । वैतसः वैतसेकटेअवदानंभवति । शैषिकोण् । अत्रयज्ञशब्देनपशवोलक्ष्यन्ते । तथाचश्रुतिः " प्लक्षशाखायामन्येषांपशूनामवद्यन्ति वेतसशाखायामश्वस्य" इति । अत्रवेतसशाखाशब्दोवैतसकटपरः । यद्वा वेतसस्यशाखावैतसी वैतस्यांसंस्कृतोवैतसः । " यस्येतिच" इतीकारलोपः । वैतसकटस्तु पश्वासादनार्थः । "वैतसःकटोभवतिअप्सुयोनिर्वाअश्वः अप्सुजोवेतसः स्वएवैनंयोनौप्रतिष्ठापयति" इतिश्रुतेः । "वैतसकटेऽश्वंप्राञ्चमासादयति" इतिसूत्राच्च । अतोवैतसकटेवपावदानमितिव्याख्यानंचिन्त्यं ॥ ३९ ॥ अत्रसवनीयदिनानिकतीत्याकाङ्क्षायामाह—त्र्यहइति । "अश्वमेधस्यत्रीणिसवनीयान्यहानि" इतिकल्पसूत्रेण ब्राह्मणैः तन्मूलभूतब्राह्मणवाक्यैश्च । अश्वमेधः त्र्यहःसङ्ख्यातः । अश्वमेधस्यानेकाहसाध्यत्वेपिसवनीयाहानांप्राधान्यात्त्र्यहः । त्रीणिअहानियस्यसत्र्यहः । "अच्प्रत्यन्वव" इत्यत्रयोगविभागादच् । इदमर्धमेकंवाक्यं । तान्यहानिपरिगणयति—चतुष्टोममिति । त्रिवृत्पञ्चदशसप्तदशएकविंशइतिस्तोमचतुष्टययुक्तत्वादग्निष्टोमश्चतुष्टोमइत्युच्यते । तदनुष्ठानयुक्तत्वात्तद्व्यपदेशः । एकविंशोक्थ्ययुक्तत्वादुक्थ्यमितिज्योतिष्टोमस्यद्वितीयासंस्था तद्युक्तंद्वितीयमहः । सर्वस्तोमोतिरात्रः तद्युक्तमुत्तरमहः । द्वितीयादुत्तरंतृतीयमहइत्यर्थः ॥४०॥ एवमश्वमेधस्यत्र्यहत्वेनत्रयाणांकर्तव्यत्वेपिप्रकृतेऽश्वमेधेशास्त्रान्तरदर्शनात् विहिताअन्येपिबहवःक्रतवोराज्ञाकारिताइत्याह कारिताइत्यर्धेन ॥४१॥ केतेक्रतवइत्यपेक्षायामाह—ज्योतिष्टोमेति । अतिरात्राविति द्विवचनेनतस्यावृत्तिरुच्यते । विनिर्मितौ अनुष्ठितौ ।अन्यत्रापिविभक्तिविपरिणामेनायंशब्दअनुषज्यताम् । उक्तदिनत्रयादुत्तरेष्वहस्सुज्योतिष्टोमादयःषट्क्रतवःकारिताइत्यर्थः । शास्त्रान्तरेज्योतिष्टोमादीनामपिविहितत्वेनषोडशिग्रहणवत्तेषामप्यनुष्ठानेमहानभ्युदयइतिमन्वानेनराज्ञा तेपिकारिताइत्यर्थः । अत्र चयनयूपोच्छ्रयपशुनियोजनवपाहोमचतुष्टोमसवनानिक्रमेणवक्तव्यानीतितत्क्रमेणश्लोकाःपठितव्याः व्युत्क्रमपाठोलेखकप्रमादकृतः । ऋषिरेववा क्रममविवक्षन्प्रणिनाय ॥ ४२ ॥ अथदक्षिणादानमाह—प्राचीमिति । द्वयमेकं । स्वकुलस्य इक्ष्वाकुकुलस्य वर्धनः । बहुदक्षिणादानं ह्युचितमिक्ष्वाकुकुलस्येतिभावः ॥ ४३ ॥ एतावद्दक्षिणादानेकिंप्रमाणंतत्राह—एषादक्षिणा । विनिर्मिता विहिता । "प्रतिदिशंदक्षिणांददातिप्राचीदिग्घोतुर्दक्षिणाब्रह्मणःप्रतीच्यध्वर्योरुदीच्युद्गातुः" इत्यादिसूत्रेणेतिशेषः । स्वयंभूविहिते ब्रह्मनिर्मिते । "प्रजापतिरश्वमेधमसृज-

---

शि० तानेवगणयन्नाह ज्योतिष्टोमेति । ज्योतिष्टोमायुषी अग्निष्टोमायुष्टोमौप्रथमद्वितीयौ । अतिरात्राविति द्विवचनान्तेनातिरात्रद्वयलाभः । तृतीयचतुर्थौचेत्यर्थः । निर्मितौ विधिनासंपादितौ । पञ्चमोऽभिजिच्च । षष्ठोविश्वजिच्च । आप्तोर्यामौसप्तमःअष्टमौच । महाक्रतुः जातावेकवचनं । एतेमहाक्रतवइत्यर्थः ॥ ४२ ॥

[पा०] १ ख. ग. घ. छ. झ. अश्वमेधस्यैकस्य. २ ख. घ. च. अग्निष्टोम. ३ ज. रात्रंचनिर्मितम्. ४ ग. ज. मप्तोर्यामो. ट. मप्तोर्यामौ. ५ क.–झ. अश्वमेधे. ६ क.–घ. च. छ. ज. स्वयंभुविहिते.

क्रतुं [1]समाप्य तु तथा न्यायतः पुरुषर्षभः ॥ ऋत्विग्भ्यो हि ददौ राजा धरां [2]तां क्रतुवर्धनः ॥४५॥
[[3]एवं दत्त्वा प्रहृष्टोऽभूच्छ्रीमानिक्ष्वाकुनन्दनः ॥] ॥ ४६ ॥
ऋत्विजश्चाब्रुवन्सर्वे राजानं गतकल्मषम् ॥ भवानेव महीं कृत्स्नामेको रक्षितुमर्हति ॥ ४७ ॥
न भूम्या कार्यमस्माकं न हि शक्ताः स्म पालने ॥ रताः स्वाध्यायकरणे वयं नित्यं हि भूमिप ॥
निष्क्रयं किंचिदेवेह प्रयच्छतु भवानिति ॥ ४८ ॥
मणिरत्नं [4]सुवर्णं वा गावो यद्वा समुद्यतम् ॥ तत्प्रयच्छ नरश्रेष्ठ धरण्या न प्रयोजनम् ॥ ४९ ॥
एवमुक्तो नरपतिर्ब्राह्मणैर्वेदपारगैः ॥ गवां शतसहस्राणि दश तेभ्यो ददौ नृपः ॥ ५० ॥
दश कोटीस्सुवर्णस्य रजतस्य चतुर्गुणम् ॥ ५१ ॥
ऋत्विजस्तु ततः सर्वे प्रददुः सहिता वसु ॥ ऋश्यशृङ्गाय मुनये वसिष्ठाय च धीमते ॥ ५२ ॥
ततस्ते न्यायतः कृत्वा [5]प्रविभागं द्विजोत्तमाः ॥ सुप्रीतमनसस्सर्वे प्रत्यूचुर्मुदिता भृशम् ॥ ५३ ॥
ततः प्रसर्पकेभ्यस्तु हिरण्यं सुसमाहितः ॥ जांबूनदं कोटिसङ्ख्यं ब्राह्मणेभ्यो ददौ तदा ॥ ५४ ॥
दरिद्राय द्विजायाथ हस्ताभरणमुत्तमम् ॥ [[6]काञ्चनानां शतोपेतं नवरत्नैः समाहितम् ॥]
कस्मैचिद्याचमानाय ददौ राघवनन्दनः ॥ ५५ ॥
ततः प्रीतेषु[7] नृपतिर्द्विजेषु द्विजवत्सलः ॥ प्रणाममकरोत्तेषां [8]हर्षपर्याकुलेक्षणः ॥ ५६ ॥
तस्याशिषोथ [9]विधिवद्ब्राह्मणैः समुदाहृताः ॥ उदारस्य नृवीरस्य धरण्यां [10]प्रणतस्य च ॥ ५७ ॥
ततः प्रीतमना राजा प्राप्य यज्ञमनुत्तमम् ॥ पापापहं स्वर्नयनं [11]दुष्करं पार्थिवर्षभैः ॥ ५८ ॥

त" इतिश्रुतेः ॥ ४४ ॥ क्रतुमित्यादिश्लोकद्वयमेकान्वयं । न्यायतः शास्त्रतः । हि यस्माद्राजाददौ तस्मादृत्विजोऽब्रुवन्नित्यन्वयः । यद्यपि "महापृथिवीन्देया" इतिइदंनिषिद्धं तथाप्यत्रप्रदेशविशेषएवदत्तइति ज्ञेयं । प्रतिषेधवदत्रविधेरपिदर्शनात् केसरिदानवद्विकल्पोवा ॥ ४५–४७ ॥ नभूम्येतिसार्धश्लोकः । अशक्तौहेतुः—रताइति । स्वाध्यायकरणे स्वाध्यायाध्ययने । कथंदत्तस्यपुनरपहारस्तत्राह—निष्क्रयमिति । निष्क्रयं मूल्यं । कृत्स्नपृथिव्यामूल्यंकुतोलभ्यतेतत्राह—किंचिदिति । यथोपपन्नमित्यर्थः ॥ ४८ ॥ किंचिदित्यस्यप्रपञ्चः—मणीति । मणिरत्नं मणिश्रेष्ठं । समुद्यतं समुपस्थितं ॥४९॥ नरपतिरेवमुक्तःसन् । दश शतसहस्राणि दशलक्षमितियावत् । ददौ ॥ ५० ॥ दशेत्यर्धमेकंवाक्यं । नृपइत्यस्यपूर्वश्लोकस्थस्यात्रान्वयः । चतुर्गुणं चतुर्दशकोटीरित्यर्थः । अत्ररजतानिप्रतिनिधित्वेनदत्तानि नतुदक्षिणात्वेन । अतः "तस्माद्विरजतमदक्षिण्यं" इतिश्रुत्यानविरोधः ॥ ५१ ॥ सर्वे ऋत्विजः सहिताःसन्तः । वसु दक्षिणाप्राप्तंधनं । अंशीकृत्यदानाय ऋश्यशृङ्गाय वसिष्ठायचददुः॥५२॥ न्यायतः शास्त्रतः । "यावदध्वर्यवेददातितदर्धंप्रतिप्रस्थात्रे तृतीयंनेष्ट्रे चतुर्थमुन्नेत्रे एतेनेतरेषांदानमुक्तंभवति" इत्युक्तक्रमेण । ततः ऋष्यशृङ्गवसिष्ठमुखेनप्रविभागंकृत्वा सुप्रीतमनसः प्रत्यूचुः । सुप्रीतमनसइतिविशेषणेन सर्वेवयंप्रीताःस्मइतिप्रतिवचनप्रकारोवगम्यते ॥ ५३ ॥ प्रसर्पकेभ्यः यज्ञदर्शनार्थमागतेभ्यः । "यावन्तोवैसदस्यास्तेसर्वेदक्षिण्याः" इतिश्रुतेः । जांबूनदं जंबूनदीप्रभवमितिहिरण्यविशेषणम् ॥ ५४ ॥ हस्ताभरणंयाचमानायकस्मैचिद्दरिद्राय तदेवददावित्यर्थः ॥ ५५ ॥ ततः । यथेष्टदक्षिणादानेनेत्यर्थः ॥५६॥ तस्य तस्मै ॥ ५७ ॥ पापं पुत्रोत्पत्तिप्रतिबन्धकदुरि-

---

वि० सुवर्णं षोडशमाषकं । चतुर्गुणं चत्वारिंशत्कोटिं ॥ ५१ ॥ ति० अथ सर्वदक्षिणादानानन्तरं । याचमानायदरिद्राय कस्मैचित् दातव्यवस्त्वन्तराभावात् हस्ताभरणमेवददौ ॥ ५५ ॥ ति० दुस्तरं प्राकृतैराजभिःअप्राप्तसमाप्तिकं ॥ ५८ ॥

[पा०]१ ङ. च. ज. झ. समाप्यतुतदा. २ घ–झ. तांकुलवर्धनः. ३ ख. ङ. च. छ. झ. इदमर्धमधिकंदृश्यते. ४ ख. सुवर्णंवायद्वासमुपकल्पितम्. ५ ख. कल्पितभागं. ६ ज. इदमर्धमधिकंदृश्यते. ७ क. ङ. च. छ. झ. प्रीतेषुविधिवद्द्विजेषु. ८ ङ. च. झ. हर्षव्याकुलितेन्द्रियः. छ. हर्षव्याकुलितेक्षणः. ९ क–छ. झ. विविधाब्राह्मणैः. १० ङ. च. झ. पतितस्यच. ११ क. ङ. च. छ. झ. दुस्तरं.

ततोऽब्रवीदृश्यशृङ्गं राजा दशरथस्तदा ॥ कुलस्य वर्धनं त्वं तु कर्तुमर्हसि सुव्रत ॥ ५९ ॥
तथेति च स राजानमुवाच द्विजसत्तमः ॥ भविष्यन्ति सुता राजंश्चत्वारस्ते कुलोद्वहाः ॥ ६० ॥
[स तस्य वाक्यं मधुरं निशम्य प्रणम्य तस्मै प्रयतो नृपेन्द्रः ॥
जगाम हर्षं परमं महात्मा तमृश्यशृङ्गं पुनरप्युवाच] ॥ ६१ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे चतुर्दशः सर्गः ॥ १४ ॥

पञ्चदशः सर्गः ॥ १५ ॥

ऋश्यशृङ्गेणदशरथस्यपुत्रेष्टिप्रारंभः ॥ १ ॥ अत्रान्तरेदेवैर्ब्रह्माणंप्रतिरावणकृतलोकपीडाप्रकारवर्णनपूर्वकंतद्वधोपायकल्पनाप्रार्थना ॥ २ ॥ अत्रान्तरेयदृच्छासमागतं विष्णुंप्रतिब्रह्मादिभिर्दशरथगृहेऽवतारप्रार्थनापूर्वकंरावणवधप्रार्थना ॥ ३ ॥ विष्णुनातान्प्रतिरावणवधप्रतिज्ञानपूर्वकंसमाश्वासनम् ॥ ४ ॥

मेधावी तु ततो ध्यात्वा स किंचिदिदमुत्तरम् ॥ लब्धसंज्ञस्ततस्तं तु वेदज्ञो नृपमब्रवीत् ॥ १ ॥
इष्टिं तेऽहं करिष्यामि पुत्रीयां पुत्रकारणात् ॥ अथर्वशिरसि प्रोक्तैर्मन्त्रैः सिद्धां विधानतः ॥ २ ॥
ततः प्रारब्धवानिष्टिं पुत्रीयां पुत्रकारणात् ॥ जुहाव चाग्नौ तेजस्वी मन्त्रदृष्टेन कर्मणा ॥ ३ ॥
ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः ॥ भागप्रतिग्रहार्थं वै समवेता यथाविधि ॥ ४ ॥

तंअपहन्तीतिपापापहम् । "अपेक्लेशतमसोः" इतिहन्तेर्डप्रत्ययः । तमःपर्यायोत्र पापशब्दः । स्वर्नयनं पुत्रप्रापणद्वारास्वर्गप्रापकं । इतरैः पार्थिवर्षभैः दुष्करं । नविद्यते उत्तममस्मादित्यनुत्तमं सर्वोत्तमं । यज्ञं अश्वमेधं । प्राप्य प्रीतमना: बभूवेतिशेषः ॥ ५८ ॥ एवंपुत्रोत्पत्तिप्रतिबन्धकसकलदुरितनिवारणक्षमेभगवदङ्गभूतब्रह्मादिदेवताराधनरूपेऽश्वमेधेनिर्वृत्ते साक्षाद्भगवदाराधनंपुत्रप्राप्तिकारणं क्रतुंसुमन्त्रोक्तमनसिनिधाय ऋश्यशृङ्गमर्थयते—ततइति । कुलस्यवर्धनं पुत्रोत्पत्तिहेतुभूतंकर्मेत्यर्थः । त्वंतुकर्तुमर्हसीत्यन्तेइतिरध्याहार्यः ॥ ५९ ॥ पुत्रीयंकर्मकरिष्ये सुताश्चभविष्यन्तीत्युवाचेत्यन्वयः ॥ ६० ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने चतुर्दशः सर्गः ॥ १४ ॥

अथदशरथाराधनव्याजेनसाधुलोकरक्षणायभूमाववतितीर्षुर्भगवानानुषङ्गिकदुष्कृद्विनाशायदेवैरभ्यर्थ्यतेपञ्चदशे—मेधावीत्यादि । ततः प्रतिज्ञानन्तरं । मेधावी मेधा धारणक्षमाधीः तद्वान् । "अस्मायामेधास्रजोविनिः" इतिविनिप्रत्ययः । वेदज्ञः अथर्वणवेदज्ञः । सः ऋश्यशृङ्गः । किंचिद्ध्यात्वा किंकर्मकर्तुमत्रोचितमितिक्षणंविचिन्त्य । मेधावितया । ततः तदुत्तरक्षणएव । लब्धसंज्ञः प्राप्तस्मृतिःसन् । तंनृपं । इदमुत्तरमब्रवीत् । द्विकर्मकोब्रुविः ॥ १ ॥ पुत्रीयां पुत्रोत्पत्तिनिमित्तभूतां । "पुत्राच्छच" इतिछप्रत्ययः । इष्टिं यागविशेषं । ते पुत्रकारणात् पुत्रनिमित्तं । "निमित्तकारणहेतुषुसर्वासांप्रायदर्शनं" इतिपञ्चमी । करिष्यामि इत्युक्तवान् ॥ २ ॥ मन्त्रदृष्टेन वेदावगतेन । कर्मणा । अग्नौजुहावच । शास्त्रदृष्टक्रमेणएकामाहुतिमकरोदित्यर्थः ॥ ३ ॥ एतच्छेषं "ततोवैयजमा-

ति० पुनरप्युवाच पुत्रजनककर्मणे पुनरपिप्रेरयामासेत्यर्थः ॥ ६१ ॥ इतिचतुर्दशस्सर्गः ॥ १४ ॥

शि० ततः सकलयागविस्तारकर्ता ॥ १ ॥ शि० प्रोक्तैः पुत्रेष्टिसाधकत्वेननिर्णीतैः ॥ २ ॥ शि० ततः स्वांशभूतसत्यलोकादिस्थब्रह्मादिद्वाराजगत्सृष्ट्यादिविस्तारकर्तारः साकेतस्थब्रह्मविष्णुमहेश्वराः । सगन्धर्वाः गन्धर्वसहितादेवाश्च । सिद्धाः सिद्धगणाश्च । परमर्षयश्च भागप्रतिग्रहार्थंयथाविधिसमवेताः प्रकटीभूययागेस्थिताः । वैशब्दश्चार्थे । सचहीनेप्यन्वेति । इमेसर्वेसाकेतस्थाएवेत्यत्रबीजं "त्वांनियोक्ष्यामहे" इत्यादौवक्ष्यामः । वि० चकारेणब्रह्मापिसमुच्चीयते ॥ ४ ॥

[पा०] १ क. रथोबली. २ ङ. छ. झ. ततु. ३ ख. घ. मब्रवीद्विज. ४ ख. ङ. च. छ. झ. ञ. ट. अयंश्लोकोऽधिको दृश्यते. ५ क. ग. घ. ट. झ. ततःप्राकामदिष्टिं तां. ६ क. च. छ. ज. भागप्रतिग्रहार्थंवैपुत्रेमेवसमागताः.

ताः समेत्य यथान्यायं तस्मिन्सदसि देवताः ॥ अब्रुवँल्लोककर्तारं ब्रह्माणं वचनं महत् ॥ ५ ॥
भगवंस्त्वत्प्रसादेन रावणो नाम राक्षसः ॥ सर्वान्नो बाधते वीर्याच्छासितुं तं न शक्नुमः ॥ ६ ॥
त्वया तस्मै वरो दत्तः प्रीतेन भगवन्पुरा ॥ मानयन्तश्च तं नित्यं सर्वं तस्य क्षमामहे ॥ ७ ॥
उद्वेजयति लोकांस्त्रीनुच्छ्रितान्द्वेष्टि दुर्मतिः ॥ शक्रं त्रिदशराजानं प्रधर्षयितुमिच्छति ॥ ८ ॥
ऋषीन्यक्षान्सगन्धर्वानसुरान्ब्राह्मणांस्तथा ॥ अतिक्रामति दुर्धर्षो वरदानेन मोहितः ॥ ९ ॥
नैनं सूर्यः प्रतपति पार्श्वे वाति न मारुतः ॥ चलोर्मिमाली तं दृष्ट्वा समुद्रोपि न कंपते ॥ १० ॥
तन्महन्नो भयं तस्माद्राक्षसाद्धोरदर्शनात् ॥ वधार्थं तस्य भगवन्नुपायं कर्तुमर्हसि ॥ ११ ॥
एवमुक्तः सुरैः सर्वैश्चिन्तयित्वा ततोऽब्रवीत् ॥ हन्तायं विदितस्तस्य वधोपायो दुरात्मनः ॥ १२ ॥
तेन गन्धर्वयक्षाणां देवदानवरक्षसाम् ॥ अवध्योस्मीति वागुक्ता तथेत्युक्तं च तन्मया ॥ १३ ॥
नाकीर्तयदवज्ञानात्तद्रक्षो मानुषांस्तदा ॥ तस्मात्स मानुषाद्वध्यो मृत्युर्नान्योस्य विद्यते ॥ १४ ॥

नस्य'' इत्यादिनावक्ष्यति । मध्येभगवदवतरणस्यनिमित्तान्तरंदेवताभ्यर्थनंदर्शयति—ततइत्यादिना । ततः तत्राश्वमेधे देवादयः । यथाविधि यथाक्रमं । भागप्रतिग्रहार्थं स्वस्वहविर्भागस्वीकारार्थं । समवेताः संमिलिताः । यज्ञसदसीतिशेषः । अनुक्तसमुच्चयार्थेनचकारेण ब्रह्मापिसमुच्चीयते ॥ ४ ॥ ताः देवताः । तस्मिन प्रकृते । सदसि अश्वमेधसदसि । यथान्यायं यथाक्रमं । समेत्य लोककर्तारं स्वस्वामिनं ब्रह्माणं । महत् फलद्वारागुरुतरं । वचनं ब्रुवन् ॥ ५ ॥ त्वत्प्रसादेन जनिताद्वीर्यादित्यन्वयः ॥ ६ ॥ कोमत्प्रसादः कथंभवतांतत्प्रतीकाराशक्तिस्तत्राहुः—त्वयेति । वरः अस्माभिरवध्यत्वरूपः । तं वरं । मानयन्तः पूजयन्तः । सर्वं पीडनं ॥ ७ ॥ बाधनमेवोपपादयन्ति—उद्वेजयतीत्यादिना । उद्वेजयति भीषयति । उच्छ्रितान् उन्नतान्लोकपालान् । त्रिदशराजानं । समासान्तस्यानित्यत्वाट्टजभावः । प्रधर्षयितुं तिरस्कर्तुं । स्थानात्प्रच्यावयितुमित्यर्थः ॥ ८ ॥ असुरान् राहुप्रभृतीन् । अतिक्रामति पीडयतीतियावत् ॥ ९ ॥ एनं रावणंप्रति नप्रतपति मन्द्रकिरणोभवति । क्रीडापर्वतसञ्चारादिदशायामितिभावः । पार्श्वे अस्येतिशेषः । नवाति पुष्पवाटिकादिषु पुष्पपतनादिभयादितिभावः । चलोर्मिमाली सदाचञ्चलस्वभावतरङ्गपङ्क्तिमान् नकंपते गर्वितोऽयमुल्ललतीतिशोषणभयादितिभावः ॥ १० ॥ तदिति भयादितिभावः । भयं उत्पन्नमितिशेषः । कर्तुं चिन्तयितुं ॥ ११ ॥ उक्तः ब्रह्मेतिशेषः । चिन्तयित्वा उपायमितिशेषः । हन्तेत्युपायस्मरणजहर्षे ॥१२॥ अयंशब्दार्थमाह—तेनेति । तन् तथोक्तमित्यन्वयः ॥ १३ ॥ तदा अवध्यत्ववरणावसरे । अवज्ञा-

वि० समेत्य अन्तर्धानशक्त्याइतरानवलोकमितिशेषः । **शि०** लोकनं लोकः दृष्टिः । तत्कर्तारं यज्ञद्रष्टृत्वेनाहूतम् ॥ ५ ॥ **शि०** हेभगवन् त्वत्प्रसादेन त्वत्कृपया । प्राप्तं यद्वीर्यं साकेताधीशातिरिक्तसर्वावध्यत्वंतस्माद्वीर्यात् नोस्माकं विहारास्पदीभूतायै सर्वलोकास्तान् रावणोनामराक्षसोबाधते । तं रघुनाथेच्छयासाकेतादवतीर्णंराघवं शासितुं स्वांशभूतदेवादिद्वारासाक्षाद्वानशक्नुमः । एतेन साकेतपुरवासिनांयथाकामंसर्वत्रगमनमितिव्यज्यते। यथाच साकेताद्रावणावतारः तथातज्जन्मप्रतिपादकग्रन्थेवक्ष्यामः ॥६॥ **ति०** प्रधर्षयितुमिच्छतीत्युक्तेः एतदुत्तरकालमिन्द्रजित्कृतइन्द्रबन्धइतिज्ञायते ॥ ८ ॥ **शि०** अवात् ईश्वरस्याभिरक्षकात्रामात्प्राप्तंयज्ज्ञानंनियोगःआज्ञा इतःप्रभृतिप्राप्तरक्षश्शरीरेमांनज्ञास्यसीतिसंकुचितबोधोवा इतःप्रभृतिमदतिरिक्तमेवज्ञास्यसीतिवा । तस्मात् । तद्रक्षो रावणः । तदा वरयाचनसमये । मानुषान् '' परमात्मानराकृतिः '' इत्यागमगम्यंसाकेताधीशंनित्यद्विभुजं नाकीर्तयत् । तस्माद्धेतोः सः मानुषात् नराकृतिपरमात्मनोरामात् वध्यः । अन्यः तस्माद्भिन्नः अस्य मृत्युः विघातकोनविद्यते । बहुत्वमादरार्थं । तेनसाकेताधीशरघुनाथस्यविष्ण्वादिवैलक्षण्यंईश्वरेश्वरत्वंचव्यक्तं । एतेन ''.नाकीर्तयदवज्ञानात् '' इत्यस्य-अवज्ञानादनादरात्मानुषान्नाकीर्तयदित्यर्थःप्रत्युक्तः । दशरथनहुषादीनांदेवसाहाय्यकर्तृत्वस्यप्रसिद्धत्वान्मानुषानादरस्यासंभवात् । किंचरावणस्य सुराद्यवध्यत्वे वरदानमेवकारणंवा रावणबलवत्त्वंवा उभयंवा । नप्रथमं । तात्कालिकमानुषैरेवतस्यवध्यत्वेसिद्धे तद्वधार्थंपरमात्मप्रार्थनाव्यर्थास्यात् । नद्वितीयं । वाल्यादिभिःकृततत्पराभवस्यासंभवापत्तेः । अतएवनतृतीयं । किंचविष्णववध्यत्वंस्वस्यरावणेनप्रार्थितंवानवा । नप्रथमं । त्वन्मतेरामस्यापिविष्णवभिन्नत्वेनतेनाप्यवध्यत्वापत्तेः । नान्त्यं । मानुषानादरोक्ते-

[पा०] १ ङ. झ. वचनंततः. २ ङ. झ. भगवंस्तदा. ३ घ. तस्यसहामहे. ४ ख. ग. विहितस्तस्य. ५ घ. मानुषान्प्रति.

एतच्छ्रुत्वा प्रियं वाक्यं ब्रह्मणा समुदाहृतम् ॥ सर्वे महर्षयो देवा प्रहृष्टास्तेऽभवंस्तदा ॥ १५ ॥
एतस्मिन्नन्तरे विष्णुरुपयातो महाद्युतिः ॥ शङ्खचक्रगदापाणिः पीतवासा जगत्पतिः ॥ १६ ॥

नात् अवमानात् । मानुषात् मानुषेण । मृत्युः मारकः ॥ १४ ॥ प्रहृष्टाः यथाकथंचिद्वधोपायसंभावनयेतिभावः ॥ १५ ॥ अथपरमकारुणिकोभगवान् "परित्राणायसाधूनांविनाशायचदुष्कृताम् ॥ धर्मसंस्थापनार्थायसंभवामियुगेयुगे" इत्युक्तरीत्या धर्मसंस्थापनादिप्रयुक्ते स्वाराधकदशरथमनोरथपरिपूरणायचावतितीर्षुराजगामेत्याह—एतस्मिन्निति । एतस्मिन्नन्तरे रक्षापेक्षासमये । अनेनचिरमस्थानसदप्रतीक्षत्वंगम्यते । "सर्वज्ञोपिहिदेवेशस्सदाकारुणिकोपिसन् । संसारतन्त्रवाहित्वाद्रक्षापेक्षांप्रतीक्षते" इतिह्युक्तं । विष्णुः सर्वान्तर्यामितयाव्याप्यवर्तमानः भोगादप्यासेधनमेवनरमितिस्थितइत्यर्थः । "त्वंमेऽहंमे" इत्यादि । महाद्युतिः रक्षणावकाशलाभसमुदितहर्षप्रकर्षकृतकान्तिविशेषयुक्तः । अनेनइतःपूर्वंसंसारिजनदुर्दशावलोकनेनदूयमानमानसत्वमुक्तं । "सएकाकीनरमेत" इतिश्रुतेः । शङ्खचक्रगदापाणिः आश्रितानांरक्षणापेक्षायां रक्षणोपकरणग्रहणायविलंबो माभूदिति सर्वदातैरुपेतः । "पातुप्रणतरक्षायांविलंबमसहन्निव ॥ सदापञ्चायुधीं बिभ्रत्स नः श्रीरङ्गनायकः" इत्यभियुक्तोक्तं । पीतवासाः आश्रितरक्षणत्वरयाबद्धकक्षः । जगत्पतिः उक्तसकलविशेषहेतुभूतस्वस्वामिभावसंबन्धवान् । उपयातः वैकुण्ठाद्दशरथयज्ञवाटमाजगाम ॥ १६ ॥

निष्प्रयोजनत्वापत्तेरित्यतोस्मदुक्तएवार्थोग्रन्थकृदभिमतः । अतएवविष्णुप्रहृतचक्रेणनरावणमृतिः । वक्ष्यतिचक्रव्रणवत्त्वंरावणस्येतीतिदिक् । रघुनाथाज्ञयारावणावतारेप्रमाणं "प्रतापीराघवसखोग्राम्नावैसहरावणः" इत्यादि ॥ १४ ॥ तनि० एतस्मिन्नन्तरे तेषांरक्षापेक्षावसरे । एतस्मिन्नन्तरे क्षणंविलंबितंचेत्तएवागच्छन्ति ततःपूर्वमेवगन्तव्यमिति । एतस्मिन्नन्तरे देवगोष्ठ्यांयदारक्षाप्रसङ्गोजातस्तदैवज्ञातमिति सर्वज्ञस्यास्याश्रितरक्षानुकूल्यमार्जवंचव्यञ्जितं । एतस्मिन्नन्तरे अन्यस्यचेद्रक्षणमनुमतंस्वस्यरक्ष्यलाभोनस्यादिति "अतत्त्रितचमूपतिप्रहितहस्तं" इत्यादिवत् त्वराधिक्यंगम्यते । उपयातः देवानामपित्वरातिशयेननध्येमार्गमेलनंयथानस्यात् तथोपयातः । यस्यफलापेक्षासएवफलप्राप्त्यर्थंस्वयमेवागच्छतीत्युपेक्षामकृत्वाउपयातः । रक्षणप्रसङ्गविच्छेदभयेनयावदासनमपरिज्ञातएवोपयातः "सचापिरामःपरिषद्गतःशनैः" इत्यादिवत् । विष्णुरुपयातः पूर्वमेवतत्र स्थितोपिइदानींविग्रहेणाभिव्यक्तःसनुउपयातः । सर्वेश्वरोप्युपयातइतिसौलभ्यमुक्तं । एतस्मिन्नन्तरेविष्णुरुपयातइति देवाःविधिशिवादिपुरःसरंरावणहननेप्रार्थयेयुः तदातेतद्धननाशक्त्यानोत्तरंब्रूयुः । तदातेषामवमतिःशरणागतारक्षणजन्यमानसखेदश्च स्यातामिति तेषामवमानमानसखेदौमाभूतामिति अविलंबितमुपयातः । महाद्युतिरुपयातइति "दिविसूर्यसहस्रस्यभवेद्युगपदुत्थिता । यदिभाःसदृशीसास्याद्भासस्तस्यमहात्मनः" इत्याद्युक्तदुस्सहाप्रमेयतेजोवत्त्वेपितादृशंतेजसःसर्वजनाह्लादकत्वंव्यज्यते । विष्णुर्महाद्युतिरिति स्वरूपवद्द्युतेरप्यपरिमेयत्वंध्वनितम् । विष्णुरुपयातइति उपगमनसमकालमेवशिवादीनामवमानभयमिन्द्रादीनांरावणभयंचनिवृत्तमितिध्वनितम् । शङ्खचक्रगदापाणिः "नैनंसूर्यःप्रतपति"इत्याद्युक्तरीत्यास्वस्वव्यापारेष्वपिसंकोचवन्तःस्वपदभ्रंशशङ्किनोदेवाःसभायुनिश्शङ्कंकिलरावणवधोपायमालोचयन्ति । तदानीमेवचेद्रावणस्तत्रागच्छतितदासकलदेवशिरश्छेदकःस्यात् । सकललोकशरण्यत्वहानिःस्वस्यभवेदिति ततःपूर्वमेवायुधादिसकलयुद्धपरिकरयुक्तएवागतः नतुभोजनपरिकरयुक्तइति । भागप्रतिग्रहार्थत्वंत्वानुषङ्गिकं । पीतवासाः "तस्यमहारजतंवासः" इत्याद्युक्तपीतांबरयुक्तः । जगत्पतिः जगत्पोषकः । जगतःपोषणंनाम अन्येभ्यःपरिभवनिवारणम् । एवंविधस्योपास्यत्वंशरणागतिमन्त्रोक्तचरणपदोपलक्षितप्रपत्तव्यविग्रहवैशिष्ट्यंचव्यञ्जितम् । शिरो० एतस्मिन्नन्तरे देवब्रह्मसंवादानन्तरकाले । महाद्युतिः समाधिकरहितप्रकाशविशिष्टः । शङ्खचक्रगदापाणिः शङ्खचक्रगदाभिःपातिलोकमितिशङ्खचक्रगदापोविष्णुस्तेनअभ्यतेप्रार्थनावचनमुच्चार्यतेअसौसः । किंच शङ्खचक्रसहितागदायस्यसशङ्खचक्रगदोविष्णुस्तेनआसमन्तात्पाण्यतेस्तूयतइतिपाणिः । किंच शङ्खादयोरेखारूपेणपाणावस्यसः । पीतवासाः । पीतवस्त्रधारी जगत्पतिः सर्वलोकस्वामी अविष्णुः अस्यवासुदेवस्यविष्णुर्व्यापकःविष्णोर्विष्णुरित्यर्थः । किंच विष्णुःब्रह्मविष्णुमहेशव्यापकःरामइत्यर्थः । किंच आसमन्तादेतिसर्वव्याप्नोतीतिएःविष्णुःतस्यविष्णुर्व्यापकः । अन्तर् अन्तःबन्धकः प्रापकइत्यर्थः । रःरकाराक्षरोयस्यसरामइत्यर्थः । किंच अन्तः प्रापकः रः रकाराक्षरोयस्यसः अन्तरः । आसमन्तादेतिसर्वव्याप्नोतीति एर्विष्णुः तस्यविष्णुर्व्यापकः सएवसइतिकर्मधारयः । उपयातः प्राप्तः । अन्तरइत्यादिपक्षद्वये एतस्मिन् देवब्रह्मसंवादानन्तरकालेइत्यर्थोबोध्यः । अस्मिन्प्रकरणे विष्णुशब्दः ब्रह्मादित्रिदेवव्यापकपरएव नतुचतुर्भुजेरूढः । अतएव "ततोनारायणोविष्णुः" इतिवक्ष्यमाणपद्ये न नारायणपदवैयर्थ्यं । अन्यथा द्वयोस्तत्रैवरूढत्वेनान्यतरवैयर्थ्यंदुर्निवारंस्यात् । अतएव "प्रभोःप्रभुः" इतिवक्ष्यमाणंसानुकूलं ॥ १६ ॥

[[1]वैनतेयं समारुह्य भास्करस्तोयदं यथा ॥ तप्तहाटककेयूरो वन्द्यमानस्सुरोत्तमैः ॥] ॥ १७ ॥
ब्रह्मणा च समागम्य तत्र तस्थौ समाहितः ॥ तमब्रुवन्सुराः सर्वे समभिष्टूय संनताः ॥ १८ ॥
त्वां नियोक्ष्यामहे विष्णो लोकानां हितकाम्यया ॥ १९ ॥
राज्ञो दशरथस्य त्वं [2]अयोध्याधिपतेर्विभोः ॥ धर्मज्ञस्य वदान्यस्य महर्षिसमतेजसः ॥ २० ॥
[3]तस्य भार्यासु तिसृषु [4]ह्रीश्रीकीर्त्युपमासु च ॥ विष्णो पुत्रत्वमागच्छ कृत्वाऽऽत्मानं चतुर्विधम् ॥ २१ ॥
तत्र त्वं मानुषो भूत्वा प्रवृद्धं लोककण्टकम् ॥ अवध्यं दैवतैर्विष्णो समरे जहि रावणम् ॥ २२ ॥
स हि देवान्सगन्धर्वान् सिद्धांश्च ऋषिसत्तमान् ॥ राक्षसो रावणो मूर्खो [5]वीर्योत्सेकेन बाधते ॥ २३ ॥
ऋषयस्तु ततस्तेन गन्धर्वाप्सरसस्तथा ॥ क्रीडन्तो [6]नन्दनवने क्रूरेण किल हिंसिताः ॥ २४ ॥
वधार्थं वयमायातास्तस्य वै मुनिभिः सह ॥ सिद्धगन्धर्वयक्षाश्च ततस्त्वां शरणं गताः ॥ २५ ॥
त्वं गतिः परमा देव सर्वेषां नः परन्तप ॥ वधाय देवशत्रूणां नृणां लोके मनः कुरु ॥ २६ ॥
एवमुक्तस्तु देवेशो विष्णुस्त्रिदशपुङ्गवः ॥ पितामहपुरोगांस्तान्सर्वलोकनमस्कृतः ॥
अब्रवीत्त्रिदशान्सर्वान्समेतान्धर्मसंहितान् ॥ २७ ॥

॥१७॥ तत्र सदसि । ब्रह्मणा समागम्य । समाहितः करिष्यमाणरक्षणकृत्येएकाग्रः । तस्थौ । तं आश्रितरक्षणसन्नद्धं । सर्वेसुराः ब्रह्मादयः । पितामहपुरोगमानित्युपसंहारात् । समभिष्टूय सम्यक्स्तुत्वा । संनताः सम्यक्नताः प्रणताःसन्तः । अब्रुवन् ॥ १८ ॥ अर्धमेकंवाक्यं । हेविष्णो लोकानां हितकाम्यया हितेच्छया । त्वां नियोक्ष्यामहे उत्साहयिष्यामहे । "योगः सन्नहनोपायध्यानसंगतियक्तिषु" इत्यमरः । "स्मारयेत्वांनशिक्षये" इतिवत् । केवलंत्वांप्रोत्साहयिष्यामः । स्वयमेवस्वकीयरक्षणेप्रवृत्तत्वादितिभावः । यदिनियोजनमेवार्थःस्यात् तदापूर्वश्लोकोक्तंअभिष्टूयसंनताइत्येतद्विरुध्येत । किंच नियोजनमत्रप्रार्थनमेव । एवमुत्तरत्रभगीरथवचने "हरस्तत्रनियुज्यतां" इतिवक्ष्यति ॥ १९ ॥ किंनियोज्यमित्यत्राहद्वाभ्यां—राज्ञइत्यादि । पितृभावयोग्यत्वपराणिविशेषणानि ॥ २० ॥ तस्येति यजमानोहस्तेननिर्दिश्यते । ह्रीश्रीकीर्तयोदक्षकन्याः ताउपमायासांतास्तथा । चातुर्विध्यविधानं रावणरावणिलवणगन्धर्वविनाशाय ॥ २१ ॥ ममपुत्रभावेनभवतांकिंप्रयोजनंतत्राहुः—तत्रेति । तत्र दशरथभार्यासु । प्रवृद्धं वरबलभुजबलैरभिवृद्धम् । मानुषभावःकिमर्थं भजनीयस्तत्राहुः—अवध्यंदैवतैरिति । "कृत्यानांकर्तरिवा" इतिपक्षेतृतीया ॥ २२ ॥ सकिमर्थंहन्तव्यस्तत्राहुः—सहीति । वीर्योत्सेकेन वीर्यकृतगर्वेण ॥ २३ ॥ ततः वीर्योत्सेकात् । क्रूरेण तेन रावणेन । ऋषयो हिंसिताः । क्रीडन्तः क्रीडन्त्यः । लिङ्गविपर्ययआर्षः । मिथुनतयाचरतांहिंसनात्क्रूरेणेत्युक्तं । किलेत्यैतिह्ये ॥ २४ ॥ तस्य वधार्थं वयं मुनिभिःसहायाताः । त्वत्समीपमितिशेषः । सिद्धादयश्चायाताः । ततः रावणवधार्थं । त्वां शरणं उपायंगताः ॥ २५ ॥ रुद्रादिषुविद्यमानेष्वहमेवकिमर्थमर्थ्यइत्यत्राहुः—त्वमिति । हेदेव त्वं नः परमागतिः उपायः । नान्ये । परान्शत्रून्तापयतीतिपरंतपः । "द्विषत्परयोस्तापेः" इतिखच् । अनेनशत्रुवधसामर्थ्यमुक्तं । मनःकुरु । अवतरितुमितिशेषः । देवशत्रूणामितिबहुवचनेन रावणरावणिलवणगन्धर्वादीनामपिवधोऽर्थितः । अनेनाभिप्रायेणपूर्वं "कृत्वात्मानंचतुर्विधं" इत्युक्तम् ॥ २६ ॥ एवमित्यादिसार्धश्लोकएकान्वयः । पितामहपुरोगान् ब्रह्मप्रधानान् । धर्मसंहितान् शरणागतिरूपधर्मसंयु-

---

तिल० आत्मानं सोपकरणमात्मानं । "अन्येद्युःपाञ्चजन्यात्मांकैकेय्यांभरतोऽभवत् । तदन्येद्युस्सुमित्रायामनन्तात्माच लक्ष्मणः । सुदर्शनात्माशत्रुघ्नोद्वौजातौयुगपत्प्रिये" इतिपाद्मोक्तेः । अत्रात्मानमित्युक्त्या शङ्खचक्रानन्तानामपिभगवद्रूपतासूचिता । हुंकारेणभगवानिव पाञ्चजन्यस्यशब्दमात्रेणसकलभुवनक्षोभकत्वाद्विष्णुतुल्यएवेतिबोध्यं ॥ २१ ॥

[पा०] १ अयंश्लोकः ख. ङ. च. छ. झ. पुस्तकेष्वेवदृश्यते. २ ङ. च. ज. झ. अयोध्याधिपतेर्विभो. ३ ङ. झ. अस्य भार्यासु. ४ घ. ह्रीश्रीकीर्तिसमासुच. ५ ङ. च. छ. झ. वीर्योद्रेकेणबाधते. ६ ङ. च. छ. झ. नन्दनवनेरौद्रेणविनिपातिताः, क. ख. घ. ज, नन्दनवनेरौद्रेणकिल.

भयं त्यजत भद्रं वो हितार्थं युधि रावणम् ॥ सपुत्रपौत्रं सामात्यं समित्रज्ञातिबान्धवम् ॥ २८ ॥
हत्वा क्रूरं दुरात्मानं देवर्षीणां भयावहम् ॥ दशवर्षसहस्राणि दशवर्षशतानि च ॥
वत्स्यामि मानुषे लोके पालयन्पृथिवीमिमाम् ॥ २९ ॥
एवं दत्त्वा वरं देवो देवानां विष्णुरात्मवान् ॥ मानुषे चिन्तयामास जन्मभूमिमथात्मनः ॥ ३० ॥
ततः पद्मपलाशाक्षः कृत्वाऽऽत्मानं चतुर्विधम् ॥ पितरं रोचयामास तदा दशरथं नृपम् ॥ ३१ ॥
[3]ततो देवर्षिगन्धर्वाः सरुद्राः साप्सरोगणाः ॥ स्तुतिभिर्दिव्यरूपाभिस्तुष्टुवुर्मधुसूदनम् ॥ ३२ ॥

त्वमुद्धतं रावणमुग्रतेजसं प्रवृद्धदर्पं त्रिदशेश्वरद्विषम् ॥
विरावणं साधु तपस्विकण्टकं तपस्विनामुद्धर तं भयावहम् ॥ ३३ ॥
तमेव हत्वा सबलं सबान्धवं विरावणं रावणमुग्रपौरुषम् ॥
स्वर्लोकमागच्छ गतज्वरश्चिरं सुरेन्द्रगुप्तं गतदोषकल्मषम् ॥ ३४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे पञ्चदशः सर्गः ॥ १५ ॥

तान् ॥ २७ ॥ भयमित्यादिसार्धश्लोकद्वयमेकान्वयम् । भयंत्यजत । वः युष्माकं । भद्रं अस्तु । यस्मादहं सर्वेषांहितार्थं । रावणंहत्वा धर्मसंस्थापनायदशवर्षसहस्राणिवत्स्यामीतियोजना । शङ्खचक्रगदापाणिरुपयातइतिहिपूर्वमुक्तं ॥ २८ ॥ २९ ॥ आत्मवान् सर्वात्मशेषी । मानुषे मनुष्येषु । जात्येकवचनं । चिन्तयामास यथादेवैराज्ञप्तंतथेतिशेषः । जन्मभूमिं जन्मस्थानं ॥ ३० ॥ ततः चिन्तानन्तरं । पद्मपलाशाक्षः दशरथगुणस्मरणकृतनयनविकासोक्तिः । यद्वा । पद्मपलाशाक्षः सर्वैःस्पृहणीयनयनयुगलः । तथाच सर्वस्पृहणीयःस्वयमन्यंस्पृहयामास । यद्वा । "तस्ययथाकप्यासंपुण्डरीकमेवमक्षिणी" इत्युक्तरीत्यापरत्वचिह्नपुण्डरीकाक्षत्वयुक्तः । एवंच सर्वस्मात्परोपिजन्मरोचयामास । यथाजनिमतोजन्महानिरभिलपिता तथाजनिरहितस्यापिजनिरभिलषितेत्यर्थः । दुर्लभंह्यभिलपितं भवति । कृत्वात्मानंचतुर्विधं जन्माभिलाषेपिदशरथगुणातिरेकेणचतुर्विधशरीरपरिग्रहमभिलपितवान् । आत्मानं स्वशरीरं । चतुर्विधं पाड्गुण्यविभागक्रमेण । पितरं "पितापुत्रेणपितृमान्योनियोनौ" इत्युक्तरीत्या सर्वपिता स्वपुत्रंकंचित् पितरमभिललाष । रोचयामास ऐच्छत् । तदा रक्षणोद्योगसमये । दशरथंनृपं "गुणैर्दशरथोपमं" इत्युक्तरीत्या जनित्वा‌ऽपिलैःस्वाभाविकैश्चगुणैःस्वसदृशंदेवोक्तंदशरथमेवस्वजन्मभूमित्वेन निश्चितवानित्यर्थः ॥ ३१ ॥ ततः भगवदिच्छानन्तरं । सरुद्राइत्यनुवादात् पूर्वंरुद्रोपिशरणागतइतिसिद्धं । दिव्यरूपाभिः दिव्यात्मस्वरूपविषयिणीभिः । स्तुतिभिः स्तुतिरूपप्रबन्धैः । तुष्टुवुः श्लाघयामासुः । मधुसूदनमिति मधुवदयमपिनिरसनीयइत्याशयेनोक्तं ॥ ३२ ॥ उक्तमर्थंसर्गान्तेपुनःसंगृह्णाति—त्वमिति । उद्धतं जन्मतएवोद्धतं । तं प्रसिद्धं । उग्रतेजसं उग्रप्रतापं वरदानेनप्रवृद्धदर्पं । लोकान्विरावयतीतिविरावणं । सर्वलोकानामाक्रन्दयितारं । तपस्विनांकण्टकं शत्रुं । "क्षुद्रेशत्रौचकंटकः" इतिवैजयन्ती । अतएव तपस्विनांभयावहं तं रावणं । साधु निश्शेषं । उद्धर उन्मूलय ॥ ३३ ॥ एवकारेणविभीषणव्यवच्छेदः । स्वर्लोकं वैकुण्ठं । कचित्स्वलोकमितिपाठः । चिरं चिरकालस्थायी । अनेन ब्रह्मलोकादिव्यावृत्तिः । सुरेन्द्रेतिसंबोधनं । गुप्तं अस्मदादिभिःदुरधिगमं । "अत्यर्कानलदीप्तंतत्स्थानंविष्णोर्महात्मनः । स्वयैवप्रभया राजन्दुष्प्रेक्षंदेवदानवैः" इतिमहाभारतोक्तेः । गतदोषकल्मषं दोषाः रागद्वेषादयः । गतानि तद्रूपकल्मषाणियस्मात्तत्तथा । अनेनेन्द्रलोकादिव्यावृत्तिः । गतज्वरः आश्रितसंरक्षणेनगतव्यथः । अनेन पुनःप्राप्तिपर्यन्तं संसारिविषये कदैतेनिस्तरिष्यन्तीति चिन्ताकुलत्वमुक्तं । आगच्छेत्यनेन वैकुण्ठादवतीर्णत्वंगम्यते । अत्रस्वर्लोकपदस्येन्द्रलोकपरत्वे गुप्तत्वगतदोषकल्मष-

---

ति० चिन्तयामास योग्यत्वेनविचारयामास ॥ ३० ॥ इतिपञ्चदशस्सर्गः ॥ १५ ॥

[पा०] १ ख. ङ. च. छ. झ. समन्त्रिज्ञातिबान्धवम्. २ ङ. च. छ. झ. क्रूरंदुराधर्षं. ३ घ. तदादेवर्षिगन्धर्वाः.

षोडशः सर्गः ॥ १६ ॥

देवैर्विष्णुंप्रतिरावणस्यब्रह्मवरान्मनुष्येतरावध्यत्वनिवेदनपूर्वकंमानुषभावेनावतारस्यतदुपायत्वनिवेदनम् ॥ १ ॥ ततोविष्णुनाभुव्यवतारादिप्रतिज्ञानपूर्वकमन्तर्धानम् ॥ २ ॥ तथादशरथस्ययज्ञाग्निमध्यात्प्रादुर्भूतेनदिव्यभूतेनदशरथहस्तेदिव्यपायसपूर्णस्वर्णपात्रसमर्पणम् ॥ ३ ॥ तथातत्पायसस्यपुत्रहेतुत्वकथनेनपत्नीभ्योदानचोदनपूर्वकमन्तर्धानम् ॥ ४ ॥ कौसल्यादिभिर्दशरथदत्तदिव्यपायसप्राशनाद्गर्भधारणम् ॥ ५ ॥

ततो [1]नारायणो विष्णुर्नियुक्तः सुरसत्तमैः ॥ जानन्नपि [2]सुरानेवं श्लक्ष्णं वचनमब्रवीत् ॥ १ ॥
उपायः को वधे तस्य राक्षसाधिपतेः सुराः ॥ यमहं तं समास्थाय निहन्यामृषिकण्टकम् ॥ २ ॥
एवमुक्ताः सुराः सर्वे प्रत्यूचुर्विष्णुमव्ययम् ॥ [3]मानुषीं तनुमास्थाय रावणं जहि संयुगे ॥ ३ ॥
स हि तेपे तपस्तीव्रं [4]दीर्घकालमरिन्दम ॥ येन तुष्टोऽभवद्ब्रह्मा [5]लोककृल्लोकपूर्वजः ॥ ४ ॥
संतुष्टः प्रददौ तस्मै राक्षसाय वरं प्रभुः ॥ नानाविधेभ्यो भूतेभ्यो भयं नान्यत्र मानुषात् ॥ ५ ॥
अवज्ञाताः पुरा तेन [6]वरदाने हि मानवाः ॥ ६ ॥
एवं पितामहात्तस्मा[7]द्वरं प्राप्य स दर्पितः ॥ उत्सादयति लोकांस्त्रीन्स्त्रियश्चा[8]प्यपकर्षति ॥
तस्मात्तस्य वधो दृष्टो मानुषेभ्यः परन्तप ॥ ७ ॥
इत्येतद्वचनं श्रुत्वा सुराणां विष्णुरात्मवान् ॥ पितरं रोचयामास तदा दशरथं नृपम् ॥ ८ ॥
स चाप्यपुत्रो नृपतिस्तस्मिन्काले महाद्युतिः ॥ अयजत्पुत्रियामिष्टिं पुत्रेप्सुररिसूदनः ॥ ९ ॥
स कृत्वा निश्चयं विष्णुरामन्त्र्य च पितामहम् ॥ अन्तर्धानं गतो देवैः पूज्यमानो [9]महर्षिभिः ॥१०॥

स्वादिविरोधः । अन्तरिक्षादुपरितनलोकमात्रस्य स्वर्गपदवाच्यत्वात् । अतएवहि क्वचिद्ब्रह्मलोकादावपिस्वर्गपदप्रयोगः । "ब्रह्मलोकंप्रयास्यति" इत्यत्रापि ब्रह्मणःस्वस्य लोकं अप्राकृतस्थानं परमपदमिति व्याख्यातं । स्वलोकमितिसम्यक्पाठः । सुरेन्द्रः विष्वक्सेनः ॥ ३४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने पञ्चदशःसर्गः ॥ १५ ॥

एवंमनुष्यलोकेदशरथपुत्रत्वेनावतीर्यरावणवधःकर्तव्यइत्युक्तं तत्र किंमयाउपेन्द्रादिवत्स्वस्वरूपेणस्थातव्यं उतप्रकारान्तरेणेति भगवान्बहुमानार्थंपृच्छति—ततइत्यादि । नरिष्यन्ति ननश्यन्तीतिनराः नित्यवस्तूनि "अन्येभ्योपिदृश्यते" इतिडप्रत्ययः । "सुप्सुपा" इतिनगनैकादिवत्समासः । नराणांसमूहोनारं "तस्यसमूहः" इत्यण् । नारं अयनं वासस्थानं यस्यासौनारायणः "पूर्वपदात्संज्ञायामगः" इतिणत्वं । सर्वान्तर्यामीत्यर्थः । यद्वा नाराणामयनंनारायणः इध्मव्रश्चनःपलाशशातनइत्यादिवल्ल्युडन्तस्यापिपुँल्लिङ्गत्वं । एवंसर्वस्मात्परोपि सुरसत्तमैर्नियुक्तइत्याश्रितपारतन्त्र्यमुच्यते । तादृशोविष्णुः । जानन्नपि उत्तरनिश्चयज्ञोपि । सन्मानार्थं श्लक्ष्णं मधुरं । वचनं अब्रवीत् ॥ १ ॥ आस्थाय स्वीकृत्य । यमुपायमास्थाय तंनिहन्यां सउपायः कइत्यन्वयः ॥ २ ॥ मानुषीं नतुदैवीम् ॥ ३ ॥तत्रहेतुमाह—सहीति । लोककृत्त्वेहेतुः लोकपूर्वजइति । लोकशब्दोत्र देवादिजनपरः ॥४॥ मानुषादन्यत्र मानुषंविना । नानाविधेभ्योभूतेभ्योभयंनेतिवरंप्रददावित्यन्वयः ॥ ५ ॥ अभयंकुतोनदत्तंमानुषेभ्यइत्यत्राह—अवज्ञाताइति ॥ ६ ॥ दर्पितः संजातदर्पः । प्रकृतमुपसंहरति—तस्मादिति ॥ ७ ॥ पितरमिति मनुष्यरूपेणावतरितुमितिशेषः ॥ ८ ॥ तस्मिन्काले भगवदवतितीर्षाकाले । पुत्रियामित्यत्रह्रस्वआर्षः ॥ ९ ॥ निश्चयं मनुष्यभूतएवावतरिष्यामीति

ति० लोकपूर्वजः सर्वलोकसमष्टित्वात् "हिरण्यगर्भस्समवर्तताग्रे" इतिश्रुतेश्च ॥ ४ ॥ ती० दृष्टः निश्चितः ॥ ७ ॥

[पा०] १ ख. ग. नारायणोदेवोनियुक्तः. २ घ. सुरांश्चैवं. ३ घ. ङ. च. छ. झ. मानुषंरूपमास्थाय. ४. क. घ. ङ. छ. ज. झ. दीर्घकालमरिंदमः. ५ ख. ग. घ. ज. लोककृल्लोकपूजितः. ६ क. ग. घ. ज. वरदानेनमानवाः. ७ ङ. झ. द्वरदानेनगर्वितः. च. छ. द्वरंप्राप्यसगर्वितः. ८ क.–च. ज. प्यपकर्षति. झ. प्युपकर्षति. ९ ख. घ. ज. महात्मभिः. क. महाद्युतिः.

ततो वै यजमानस्य पावकादतुलप्रभम् ॥ प्रादुर्भूतं महद्भूतं महावीर्यं महाबलम् ॥ ११ ॥
कृष्णरक्तांबरधरं रक्ताक्षं दुन्दुभिस्वनम् ॥ स्निग्धहर्यक्षतनुजश्मश्रुप्रवरमूर्धजम् ॥ १२ ॥
शुभलक्षणसंपन्नं दिव्याभरणभूषितम् ॥ शैलशृङ्गसमुत्सेधं दृप्तशार्दूलविक्रमम् ॥ १३ ॥
दिवाकरसमाकारं दीप्तानलशिखोपमम् ॥ [सिंहस्कन्धं महाबाहुमङ्गदद्वयशोभितम् ॥ १४ ॥
ताराविकृतकल्पेन हारेणोरसि राजितम् ॥ ताराधिपतिकल्पैश्च दन्तैः परमशोभितम् ॥ १५ ॥
ज्वलन्निव च तेजोभिर्दीपयन्निव च श्रिया ॥ तप्तजांबूनदमयैर्भूषणैर्भूषितं च यत्] ॥ १६ ॥
तप्तजांबूनदमयीं राजतान्तपरिच्छदाम् ॥ दिव्यपायससंपूर्णां पात्रीं पत्नीमिव प्रियाम् ॥
प्रगृह्य विपुलां दोर्भ्यां स्वयं मायामयीमिव ॥ १७ ॥
समवेक्ष्याब्रवीद्वाक्यमिदं दशरथं नृपम् ॥ प्राजापत्यं नरं विद्धि मामिहाभ्यागतं नृप ॥ १८ ॥
ततः परं तदा राजा प्रत्युवाच कृताञ्जलिः ॥ भगवन्स्वागतं तेऽस्तु किमहं करवाणि ते ॥ १९ ॥
अथो पुनरिदं वाक्यं प्राजापत्यो नरोऽब्रवीत् ॥ राजन्नर्चयता देवानद्य प्राप्तमिदं त्वया ॥ २० ॥
इदं तु नरशार्दूल पायसं देवनिर्मितम् ॥ प्रजाकरं गृहाण त्वं धन्यमारोग्यवर्धनम् ॥ २१ ॥
भार्याणामनुरूपाणामश्नीतेति प्रयच्छ वै ॥ तासु त्वं लप्स्यसे पुत्रान्यदर्थं यजसे नृप ॥ २२ ॥
तथेति नृपतिः प्रीतः शिरसा प्रतिगृह्य ताम् ॥ पात्रीं देवान्नसंपूर्णां देवदत्तां हिरण्मयीम् ॥ २३ ॥
अभिवाद्य च तद्भूतमद्भुतं प्रियदर्शनम् ॥ मुदा परमया युक्तश्चकाराभिप्रदक्षिणम् ॥ २४ ॥
ततो दशरथः प्राप्य पायसं देवनिर्मितम् ॥ बभूव परमप्रीतः प्राप्य वित्तमिवाधनः ॥ २५ ॥

निश्चयं आमन्त्र्य साधयामीत्युक्त्वा ॥ १० ॥ अथपुत्रकामेष्टिफलं भगवतश्चतुर्धाऽवतारंसूचयन् प्रजापतिप्रेरितपुरुषेणपायसप्रदानंदर्शयति—ततोवाइति । श्लोकपञ्चकमेकान्वयम् । ततः विष्णोरंतर्धानानंतरं । यजमानस्येतिवर्तमाननिर्देशेन द्रव्यत्यागकालएवप्रादुर्भावःसूचितः । पावकात् आहवनीयात् । भूतं पुरुषविशेषः ॥ ११ ॥ स्निग्धाः चिक्कणाः हर्यक्षस्येव तनुजाः लोमानि श्मश्रुप्रवरा मूर्धजाःकेशाश्च यस्यतत्तथा॥१२॥ समुत्सेधः उन्नतिः । दृप्तशार्दूलविक्रमं तद्वद्भयंकरं ॥ १३ ॥ प्रभामण्डलवत्तया दिवाकरसमाकारं । तैक्ष्ण्यातिशयेन दीप्तानलशिखोपमं ॥ १४–१६ ॥ तप्तजांबूनदमयीं द्रुतकनकमयीं । राजतः रजतविकारः अन्ते उपरि परिच्छदः पिधानपात्रं यस्यास्तां । पात्र्यास्त्रीलिङ्गत्वेनपत्नीसाम्यं । मायामयीमिव । असंभावितत्वेनाश्चर्यावहामित्यर्थः । स्वयंप्रगृह्यप्रादुर्भूतमीत्यन्वयः । विपुलतरत्वेन हस्तमात्रेणग्रहीतुमशक्यत्वाद्बाहुभ्यामित्युक्तं ॥ १७ ॥ दशरथंसमवेक्ष्येदमब्रवीत् । कथं इहागतंमां प्राजापत्यं प्रजापतेरागतं । "दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः"इति प्राग्दीव्यतीयोण्यप्रत्ययः । नरंविद्धि ॥१८॥ ततःपरं तदनन्तरमितियावत् । "प्राजापत्यंचमांविद्धि"इत्युक्तयनन्तरमित्यर्थः । तदा तदैव ॥ १९ ॥ अथोअथेतिपर्यायौ । अर्चयता अश्वमेधपुत्रकामेष्टिभ्यामितिशेषः ॥२०॥ इदंशब्दार्थमाह— इदंत्विति । देवनिर्मितं देवेनविष्णुनानिर्मितं । धन्यं धनकरं । स्वर्गादित्वाद्यत् ॥ २१ ॥ अनुरूपाणां सवर्णानामित्यर्थः । चतुर्थ्यर्थेषष्ठी ॥२२॥ देवान्नं देवनिर्मितान्नं । देवदत्तां देवप्रेरिताम् ॥ २३ ॥ अभितःप्रदक्षिणं अभिप्रदक्षिणम् ॥ २४ ॥ प्राप्य

ति० । अन्तर्धायभगवानेवस्वतेजस्संभृतपायसमादायहुताग्नेस्सकाशात्प्रादुर्भवतिस्म । नह्यन्यस्यभगवत्तेजोधारणशक्तिरस्ति । तदेवाह महद्भूतमिति । " एकोविष्णुर्महद्भूतं " इत्युक्तेः । अतुलप्रभं विद्युदादिवत्दृष्टिप्रतिघातकतेजोवत् । भूतं प्राणी ॥ ११ ॥ ति० । मायामयीमिव इवशब्दएवार्थे । भगवतोमायैवेत्यर्थः ॥ १६ ॥ ति० । पूर्वंकृत्यातइवभीतएवतदा नरवचनश्रवणानन्तरकाले । अतः तदुक्तिश्रवणाद्धेतोः । परं तृप्तिकरंवचः । तद्वचनश्रवणोत्तरंनिर्भयउवाचेत्यर्थः ॥ १९ ॥

[पा०] १ च. ज. कृष्णरक्तांबरधरं. २ क.–झ. रक्तास्यं. ३ च. छ. दिशागजसमाकारं. ४ च. छ. सान्तःपुरस्तदाराजा. ट. अतःपरंतदाराजा. ख. ग. तमद्भुतंतदाराजा. ५ ख.–झ. इदंतुनृपशार्दूल. ६ ख. तासुलंप्राप्स्यसे.

ततस्तदद्भुतप्रख्यं भूतं परमभास्वरम् ॥ संवर्तयित्वा तत्कर्म तत्रैवान्तरधीयत ॥ २६ ॥
हर्षरश्मिभिरुद्योतं तस्यान्तःपुरमाबभौ ॥ शारदस्याभिरामस्य चन्द्रस्येव नभोंऽशुभिः ॥ २७ ॥
सोन्तःपुरं प्रविश्यैव कौसल्यामिदमब्रवीत् ॥ पायसं प्रतिगृह्णीष्व पुत्रीयं त्विदमात्मनः ॥ २८ ॥
कौसल्यायै नरपतिः पायसार्धं ददौ तदा ॥ अर्धादर्धं ददौ चापि सुमित्रायै नराधिपः ॥
कैकेय्यै चावशिष्टार्धं ददौ पुत्रार्थकारणात् ॥ २९ ॥
प्रददौ चावशिष्टार्धं पायसस्यामृतोपमम् ॥ अनुचिन्त्य सुमित्रायै पुनरेव महीपतिः ॥ ३० ॥

लब्ध्वा ॥२५॥ अद्भुतप्रख्यं अद्भुताकारं । संवर्तयित्वा समाप्य । तत्कर्म पायसप्रदानरूपंकर्म । तत्र अग्नौ ॥२६॥ हर्षरश्मिभिः हर्षकृतकान्तिभिः । उद्योतं उद्भूतप्रकाशं । अन्तःपुरं अन्तःपुरस्त्रियः । शारदस्य शरदिभवस्य । अभिरामस्य निष्कलङ्कस्य । अयंहर्षः पायसप्रदानकृतः ॥ २७ ॥ पुत्रीयं पुत्रोत्पत्तिनिमित्तम् ॥ २८ ॥ अथराज्ञःपत्नीभ्योविभज्यपायसप्रदानमाहत्रिभिः—कौसल्यायाइत्यादि । पायसस्यार्धं पायसार्धं । अर्धशब्दोत्रसमांशवचनः "अर्धंसमेंशके" इत्यमरः । ददौ ज्येष्ठपत्नीत्वादितिभावः । अर्धात्पृथक्कृत्य अर्धं सुमित्रायै द्वितीयमहिष्यै । ददौ । चतुर्थांशमित्यर्थः । अवशिष्टस्यपायसस्यार्धंअवशिष्टार्धं अष्टमांशमित्यर्थः । कैकेय्यै तृतीयमहिष्यै । ददौ । पुत्रार्थकारणात् पुत्ररूपप्रयोजननिमित्तात् । इदं त्रिष्वपि[illegible]नेष्वन्वेति ॥२९॥ अनुचिन्त्य कैकेय्यपेक्षया सुमित्रायाअधिकांशभाक्त्वं भवेदितिविचार्येत्यर्थः । तस्यापिहिकैकेय्यैदा-

शि० । तस्यराज्ञः हर्षरश्मिभिः हर्षवर्धिताङ्गकान्तिभिः उद्योतं अतिप्रकाशितं अन्तःपुरं अभिरामस्य परमानन्ददातुः पूर्णस्येत्यर्थः । शारदस्यचन्द्रस्यांशुभिरुद्योतं नभइव आबभौ ॥ २७ ॥ ति० । अनुचिन्त्य कैकेय्यपेक्षयाज्येष्ठत्वंकौसल्यापेक्षयाकनिष्ठत्वंचसुमित्रायाविचार्य पादोनांशार्धदानंतस्यै । कनिष्ठत्वाचकैकेय्यै अष्टमांशदानं । एवंचभरतशत्रुघ्नौपादस्यार्धमर्धमित्याहुः । अपरेतु रामभरतौप्रत्येकंत्र्यंशौ । लक्ष्मणशत्रुघ्नौचाष्टमांशौ । तथाहि । कौसल्यायैदत्तार्धस्यार्धादर्धंचतुर्थांशरूपंसुमित्रायैदत्तवान् । कौसल्ययादापितवानित्यर्थः । एवंकैकेय्यैकौसल्यादत्तार्धावशिष्टमर्धंददौ । ततः कौसल्यादत्तावशिष्टस्यकैकेय्यैदत्तस्ययदर्धं तदर्धंविचार्यपुनरपिसुमित्रायैददौ तयादापयामासेत्यर्थः । अत्रार्धपदावृत्तिर्बोध्या । तदुक्तंकालिदासेन " सतेजोवैष्णवंपत्न्योर्विभेजेचरुसंज्ञितम् । द्यावापृथिव्योःप्रत्यग्रमहर्पतिरिवातपम् । अर्चितातस्यकौसल्याप्रियाकेकयवंशजा । अतस्संभावितांताभ्यांसुमित्रामैच्छदीश्वरः । तेबहुज्ञस्यचित्तज्ञेपत्न्यौपत्युर्महीक्षितः । चरोरर्धार्धभागाभ्यांतामयोजयतामुभे । साहिप्रणयवत्यासीत्सपत्न्योरुभयोरपि " इति । अर्धार्धभागाभ्यामित्यस्यस्वस्वलब्धांशसंबंध्यर्धार्धभागाभ्यामित्यर्थः । पृथगिति विभज्येतिशेषः । अतएवलक्ष्मणस्यरामानुवर्तित्वंशत्रुघ्नस्यभरतानुवर्तित्वंच । उक्तंचपाद्मे " युगंवभूवतुस्तत्रसुस्निग्धौरामलक्ष्मणौ । तथाभरतशत्रुघ्नौपायसांशवशात्स्वतः" इतीत्याहुः । कतकस्याप्येवंवरीतिस्संमतेतिदिक् । शि० । तदा पायसप्राप्तिकाले । नरपतिःअमृतोपमंपायसार्धंपायसस्यार्धमंशं । महाभागमितिवक्ष्यमाणरामविशेषणात् ज्येष्ठपत्नीत्वाच्च कंचिदधिकमंशंपुत्रार्थकारणात्कौसल्यायैददौ । ततोनुचिन्त्य अप्रकटितसाकेतेएकस्सुमित्रापुत्रःकौसल्यापुत्रानुयायी द्वितीयस्सुमित्रापुत्रःकैकेयीपुत्रानुयायीति विचार्यैव अर्धात् कौसल्याभागतः अर्धं किंचिन्न्यूनमंशं नराधिपस्सुमित्रायैददौ कौसल्ययादापयामासेत्यर्थः । अन्तर्भावितणिजर्थः । कौसल्याभागादवशिष्टभागंअर्धंकृत्वासुमित्रायैददावित्यर्थस्तुनयुक्तः । अत्रावशिष्टपदाभावात् उत्तरत्रावशिष्टपदस्यविद्यमानत्वाच्चयुक्तितोरामानुयायित्वानुपपत्तेश्च । ततोवशिष्टार्धमवशिष्टमर्धं कौसल्याभागतःकिंचिन्न्यूनांशं कैकेय्यैमहीपतिर्ददौ दापयामासेत्यर्थः । पुनरेव पुनरपि । एवोप्यर्थे । अवशिष्टार्धं अवशिष्टस्यदत्तकैकेयीभागस्यार्धमंशं सुमित्रायैप्रददौ कैकेय्याप्रदापयामासेत्यर्थः । अयंभावः । पायसेऽष्टावंशाः कृताः । तत्रपञ्चांशान्कौसल्यायैदत्तवान् । कौसल्याभागतःसार्धमेकमंशंसुमित्रायैदापयामास । कौसल्याभागतःउर्वरितांस्त्रीनंशान्कैकेय्यैदापयामास । कैकेयीभागात्सार्धमेकमंशंसुमित्रायैदापयामासेति । सार्धत्रीन्स्वांशानेकीकृत्यकौसल्याबुभुजे तदेवरामप्रादुर्भावेनिमित्तीभूतं । सार्धमेकंस्वांशनेकीकृत्यकैकेयाबुभुजे तदेवभरतप्रादुर्भावेनिमित्तीभूतं । कौसल्यादत्तंसार्धमंशमेकीकृत्यसुमित्रापूर्वंबुभुंजे तदेवलक्ष्मणप्रादुर्भावेनित्तीभूतं । ततःकैकेयीदत्तंसार्धमंशंबुभुजे तदेवशत्रुघ्नप्रादुर्भावेनिमित्तीभूतं । भरतलक्ष्मणप्रादुर्भावनिमित्तीभूतपायसयोस्समत्वेपि रामोद्देश्यकभागांशप्रभावाल्लक्ष्मणेऽधिकप्रभावप्रतीतिः । अनुचिन्त्येत्युक्तेर्महाराजाधिराजदशरथस्यसर्वज्ञत्वंसूचितं । तदेवोपसंहरन्नाह । एवमनेनप्रकारेणभार्याणांपायसंपृथक्पृथग्विभज्यराजाददौ कौसल्यायैइत्यारभ्यश्लोकत्रयमेकान्वयि । अपिशब्दएवार्थे । चशब्दावनन्तरार्थकौ ॥ ३० ॥

[पा०] १ ङ. झ. पुनरेवमहामतिः.

एवं तासां ददौ राजा भार्याणां पायसं पृथक् ॥ ३१ ॥
तास्त्वेतत्पायसं प्राप्य नरेन्द्रस्योत्तमाः स्त्रियः ॥ संमानं मेनिरे सर्वाः प्रहर्षोदितचेतसः ॥ ३२ ॥
ततस्तु ताः प्राश्य तदुत्तमस्त्रियो महीपतेरुत्तमपायसं पृथक् ॥
हुताशनादित्यसमानतेजसोचिरेण गर्भान्प्रतिपेदिरे तदा ॥ ३३ ॥
ततस्तु राजा प्रतिवीक्ष्य ताः स्त्रियः प्ररूढगर्भाः प्रतिलब्धमानसः ॥
बभूव हृष्टस्त्रिदिवे यथा हरिस्सुरेन्द्रसिद्धर्षिगणाभिपूजितः ॥ ३४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे षोडशः सर्गः ॥ १६ ॥

सप्तदशः सर्गः ॥ १७ ॥

देवगन्धर्वादिभिर्ब्रह्माज्ञया रामसाहाय्यार्थं ऋक्षवानरादिभावेन भुव्यवतरणम् ॥ १ ॥

पुत्रत्वं तु गते विष्णौ राज्ञस्तस्य महात्मनः ॥ उवाच देवताः सर्वाः स्वयंभूर्भगवानिदम् ॥ १ ॥

नेकैकेयीसुमित्रयोःसमांशतास्यात्तन्नयुक्तं । अन्यथा ज्येष्ठाकनिष्ठावैषम्यंनस्यात् । कैकेयीहिकनिष्ठा । "नतेंबामध्यमातातगर्हितव्याकथंचन" इतीतरपत्न्यपेक्षयामध्यमात्वमुक्तं । वल्लभायामपिकैकेय्यांसंभोगविषयेपक्षपातः नतुधर्म्यसंविभागे । अतोबहुमानायज्यैष्ठ्यक्रमाद्भागतारतम्यंकृतं । अतएव "समानंमेनिरे" इतिवक्ष्यति । ततोनेनभागेनरामोविष्णोरर्धांशः लक्ष्मणःपादांशः भरतशत्रुघ्नौपादस्यार्धांशौ । नन्वेवंसति कथमुत्तरत्र भरतःसाक्षाद्विष्णोश्चतुर्भागः लक्ष्मणशत्रुघ्नौविष्णोरर्धसमन्वितावित्युच्यते । सत्यं "साक्षाद्विष्णोश्चतुर्भागः" इत्यत्रसाक्षाद्विष्णोःविष्णोरर्धस्यरामांशस्यचतुर्थोभागइत्यर्थः । यद्वा चतुर्थस्यभागश्चतुर्भागः अष्टमांशइत्यर्थः । "अर्धसमन्वितौ" इत्यत्राप्यर्धशब्दएकदेशवाची । "भित्तंशकलखण्डेवापुंस्यर्धोर्धसमेंशके" इत्येकदेशेपिपुँल्लिङ्गार्धशब्दस्यानुशासनात् । अत्रप्राशनादिक्रमवशात् भरतस्यलक्ष्मणशत्रुघ्नाभ्यांज्यैष्ठ्यं । ननु लक्ष्मणस्यभरताज्ज्यैष्ठ्यं अंशाधिक्यात्प्रथमप्राशनाच्च । अतएववक्ष्यति "ततोलक्ष्मणमासाद्यवैदेहींचपरंतपः ॥ अभ्यवादयतप्रीतोभरतोनामचाब्रवीत्" इति । मैवं कैकेय्याएवप्रथमप्राशनं । सुमित्रायाद्वितीयांशग्रहणविलंबेनप्राशनविलंबात् । उत्पत्तिक्रमेतथोक्तेः । "नसङ्ख्येभरतानुजः" इत्युक्तत्वात् । अभिवादनंतु सीतायामेवान्वेति । लक्ष्मणमासाद्य आलिङ्ग्येत्यर्थः । रामानुजत्वव्यवहारआसत्त्याधिक्यात् । एवंसति कश्चिद्भरतस्यलक्ष्मणानुजत्वोक्तिः बहुव्रीहिसमासेनसमाधेया । भरतानुजइतिलक्ष्मणस्याभिधानात्सर्वप्राशनानन्तरमेवसुमित्रयाभुक्तमिति । पुराणांतरविरोधःकल्पभेदेनपरिहार्यः । रामादिमूर्तयश्चपायसपरिणामाः नतुशुक्रशोणितपरिणामाः । तत्प्राशनानन्तरंगर्भधारणवचनात् । "नतस्यप्राकृतामूर्तिः" "नभूतसङ्घसंस्थानोदेहोस्यपरमात्मनः" इत्यादिस्मरणात् । पायसंचभगवतःषाड्गुण्यविग्रहएव । तद्वृद्धिश्चनान्नपानादिकृता किंत्विच्छाकृतेत्यादिकंसर्वमवसेयम् ॥ ३० ॥ उपसंहरति—एवमिति ॥ ३१ ॥ संमानंराजकृतपायसप्रदानक्रमरूपंबहुमानं । मेनिरे अनुमेनिरे । प्रहर्षोदितचेतसः उदितप्रहर्षमनसः । तारतम्येनदानंपौर्वापर्यंच ज्यैष्ठ्यानुक्रमकृतत्वेनसर्वासांसंमतमेवासीदितिभावः ॥ ३२ ॥ वक्तव्येपियज्ञवृत्तान्तशेषे प्रसङ्गान्सौकर्यायनगरप्रवेशानन्तरभाविकथाशेषंसंग्रहेणदर्शयति—ततइति । तत्पायसमित्यन्वयः । हुताशनादित्यशब्दौतत्तेजःपरौ ॥ ३३ ॥ प्रतिलब्धमानसः स्वस्थचित्तः ॥ ३४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने षोडशःसर्गः ॥ १६ ॥

विष्णोरन्तर्धानानन्तरंकार्यद्वयंप्रवृत्तं पायसहस्तस्याग्निपुरुषस्योत्थानं देवान्प्रतिब्रह्मनियोगश्च । तत्र

ति० । हुताशनादित्यसमानतेजसइतिगर्भाणांस्त्रीणांचतन्त्रेणविशेषणं ॥ ३३ ॥ इतिषोडशस्सर्गः ॥ १६ ॥

[पा०] १ ङ. च. छ. ताश्चैवंपायसं. घ. ताश्चैतत्पायसं. २ ग. ङ. छ. ज. झ. नरेन्द्रस्योत्तमस्त्रियः. ३ च. छ. संतानंमेनिरे. ४ ख. समानवर्चसो. ५ क. ख. ग. च. छ. ज. प्रसमीक्ष्य.

सत्यसन्धस्य वीरस्य सर्वेषां नो हितैषिणः ॥ विष्णोः सहायान्बलिनः सृजध्वं कामरूपिणः ॥ २ ॥
मायाविदश्च शूरांश्च वायुवेगसमाञ्जवे ॥ नयज्ञान्बुद्धिसंपन्नान्विष्णुतुल्यपराक्रमान् ॥ ३ ॥
असंहार्यानुपायज्ञान्सिंहसंहननान्वितान् ॥ सर्वास्त्रगुणसंपन्नानमृतप्राशनानिव ॥ ४ ॥
अप्सरस्सु च मुख्यासु गन्धर्वीणां तनूषु च ॥ यक्षपन्नगकन्यासु ऋक्षविद्याधरीषु च ॥ ५ ॥
किंनरीणां च गात्रेषु वानरीणां तनूषु च ॥ सृजध्वं हरिरूपेण पुत्रांस्तुल्यपराक्रमान् ॥ ६ ॥
पूर्वमेव मया सृष्टो जाम्बवानृक्षपुङ्गवः ॥ जृंभमाणस्य सहसा मम वक्त्रादजायत ॥ ७ ॥
ते तथोक्ता भगवता तत्प्रतिश्रुत्य शासनम् ॥ जनयामासुरेवं ते पुत्रान्वानररूपिणः ॥ ८ ॥
ऋषयश्च महात्मानः सिद्धविद्याधरोरगाः ॥ चारणाश्च सुतान्वीरान्ससृजुर्वनचारिणः ॥ ९ ॥
वानरेन्द्रं महेन्द्राभमिन्द्रो वालिनमूर्जितम् ॥ सुग्रीवं जनयामास तपनस्तपतां वरः ॥ १० ॥
बृहस्पतिस्त्वजनयत्तारं नाम महाहरिम् ॥ सर्ववानरमुख्यानां बुद्धिमन्तमनुत्तमम् ॥ ११ ॥
धनदस्य सुतः श्रीमान्वानरो गन्धमादनः ॥ विश्वकर्मा त्वजनयन्नलं नाम महाहरिम् ॥ १२ ॥
पावकस्य सुतः श्रीमान्नीलोऽग्निसदृशप्रभः ॥ तेजसा यशसा वीर्यादत्यरिच्यत वानरान् ॥ १३ ॥
रूपद्रविणसंपन्नावश्विनौ रूपसंमतौ ॥ मैन्दं च द्विविदं चैव जनयामासतुः स्वयम् ॥ १४ ॥

वाचःक्रमवर्तित्वेन प्रथमोपस्थितमग्निपुरुषोत्थानं तत्प्रसक्तंचसर्वमुक्त्वा अथब्रह्मनियोगतत्फलेदर्शयतिसप्तदशे—पुत्रत्वमित्यादि। गतेगन्तुंप्रवृत्ते । भगवान् भाविकार्यज्ञः ॥ १ ॥ सह अप्राधान्येन अयन्तइतिसहायाःकिंकराः। तान्। कामरूपिणः कपटराक्षसयुद्धक्षमशरीरिणः ॥२॥ उक्तसहायान्विशेषयतित्रिभिः—मायेत्यादि। माया आश्चर्यशक्तिः। तद्विदः। जवे वेगेविषये । नयज्ञान् नीतिज्ञान् ॥ ३ ॥ असंहार्यान् परैरितिशेषः। उपायज्ञान् अनागतविधानज्ञान्। यद्वा नयज्ञान् युक्तिशालिनः। उपायज्ञान् सामाद्युपायज्ञान्। सिंहसंहननान्वितान् सिंहतुल्यसंस्थानैर्युक्तान्। सर्वास्त्राणांयोगुणःशक्तिस्तेनसंपन्नान्। अमृतंप्राश्नन्तीत्यमृतप्राशनाः कर्तरिल्युट्। पीतामृतानिवमृत्युरहितानित्यर्थः ॥ ४ ॥ ५ ॥ हरिरूपेण वानररूपेणोपलक्षितान् प्रायिकाभिप्रायमिदं तुल्यपराक्रमान् आत्मसदृशपराक्रमान् ॥ ६ ॥ देवत्वाविशेषात्भवतापिपुत्रोत्पादनंकार्यमिति मावोचध्वमित्याह—पूर्वमिति । सृष्टः भाविरामसहायबुद्ध्येतिशेषः । सृष्टिप्रकारमाह—जृंभमाणस्येति। सइतिशेषः। अत्र पार्वतीशापेन स्वक्षेत्रेपुत्रोत्पादनासंभवादप्सरःप्रभृतयःक्षेत्रतयोक्ताः। गुणवत्पुत्रलाभायमुख्यास्वित्युक्तं । अयोनिजत्वेन सद्यःप्रवृद्धत्वसिद्ध्येतनूष्वित्युक्तं। नन्दिकेश्वरशापानुसारेणहरिरूपेणेत्युक्तं । वक्ष्यतिहिदिग्विजयेरावणंप्रतिनन्दी "तस्मान्मद्रूपसंयुक्तामद्वीर्यसमतेजसः ॥ उत्पत्स्यन्तिवधार्थंहिकुलस्यतववानराः" इति ॥ ७ ॥ प्रतिश्रुत्य अङ्गीकृत्य। एवं वक्ष्यमाणरीत्या ॥८॥ वनचारिणः वानरान् ॥ ९ ॥ महेन्द्राभं महेन्द्रपर्वताभं। ननु वालिनःकथंरामसहायार्थत्वं रामवध्यत्वात्। उच्यते। अङ्गदोत्पादनद्वारातस्यसाहाय्यकरणात्। किंच यदिवालीनोत्पद्येत तदा सर्वेषांवानराणांसहायत्वंनस्यात्। सतिचवालिनि सुग्रीवविरोधिनि सुग्रीवमैत्र्यावानरसहायसिद्धिः। वालिमैत्र्यांतु रावणः क्षणादेवसीतांदद्यात् । अतःसुग्रीवसख्यनिमित्तत्वाद्वालिनो रामसहायत्वमिति। तपनः सूर्यः ॥ १० ॥ सर्ववानरमुख्यानामिति निर्धारणेषष्ठी। बृहस्पतिपुत्रत्वादनुत्तमंबुद्धिमन्तं ॥ ११ ॥ कुबेरपुत्रत्वात्श्रीमानित्युक्तं। महाहरिं सर्वकार्यनिर्माणदक्षं ॥ १२ ॥ अत्यरिच्यत अतिशयितोभूत् ॥ १३ ॥ रूपमेवद्रविणंधनं तेनसंप-

---

ती० दिव्यसंहननान्वितान् दिव्यदेहयुक्तान् ॥ ४ ॥ ति० पूर्वमेव पूर्वयुगइत्यर्थः ॥ ७ ॥ ती० पूर्वमेवमयासृष्टइतिश्लोकस्थं पूर्वमितिपदमत्राप्यनुषञ्जनीयं ! यथाश्रुतेभगवदवतारसमयेवालिसुग्रीवयोरनुत्पत्तेरिति ॥ १० ॥

[पा०] १ क. ग. घ. विष्णोस्तुल्य. २ क–छ. झ. ञ. ज्ञान्दिव्यसंहननान्वितान्. ३ इदमर्धं घ–ट. दृश्यते. ४ क. ऋक्षीविद्याधरीषु. ५ इदमर्धं घ–ट. दृश्यते. ६ ग. महाभागं. ७ ङ. च. छ. झ. ञ. ट. वालिनमात्मजं. ८ ङ. च. छ. झ. ञ. ट. महाकपिं. ९ ख. बुद्धिमान्संमतःप्रियः. १० क. ख. च. छ. ञ. पावकं. ङ. झ. ट. वीर्यवान्. ११ च, छ. रूपसंपदा.

वरुणो जनयामास सुषेणं नाम वानरम् ॥ शरभं जनयामास पर्जन्यस्तु [1]महाबलम् ॥ १५ ॥
मारुत[2]स्यात्मजः श्रीमान्हनुमान्नाम वानरः ॥ वज्रसंहननोपेतो वैनतेयसमो जवे ॥
[[3]सर्ववानरमुख्येषु बुद्धिमान्बलवानपि] ॥ १६ ॥
ते सृष्टा बहुसाहस्रा दशग्रीव[4]वधे रताः ॥ अप्रमेयबला वीरा विक्रान्ताः कामरूपिणः ॥ १७ ॥
मेरु[5]मन्दरसंकाशा वपुष्मन्तो महाबलाः ॥ ऋक्षवानरगोपुच्छाः क्षिप्रमेवाभिजज्ञिरे ॥ १८ ॥
यस्य देवस्य यद्रूपं वेषो यश्च पराक्रमः ॥ अजायत [6]समस्तेन तस्यतस्य [7]सुतः पृथक् ॥ १९ ॥
गो[8]लाङ्गूलीषु चोत्पन्नाः [9]केचित्संमतविक्रमाः ॥ [10]ऋक्षीषु च तथा जाता वानराः किं[11]नरीषु च ॥२०॥
देवा महर्षिगन्धर्वा[12]स्तार्क्ष्या यक्षा यशस्विनः ॥ नागाः किंपुरुषाश्चैव सिद्धविद्याधरोरगाः ॥ २१ ॥
बहवो जनयामासुर्हृष्टास्तत्र सहस्रशः ॥ [[13]चारणाश्च सुतान्वीरान्ससृजुर्वनचारिणः ॥]
वानरान्सुमहाकायान्सर्वान्वै वनचारिणः ॥ २२ ॥
अप्सरस्सु च मुख्यासु तथा विद्याधरीषु च ॥ नागकन्यासु च तथा गन्धर्वीणां तनूषु च ॥२३॥
कामरूपबलोपेता [14]यथाकामं विचारिणः ॥ सिंहशार्दूलसदृशा दर्पेण च बलेन च ॥ २४ ॥
शिलाप्रहरणाः सर्वे सर्वे [15]पादपयोधिनः ॥ नखदंष्ट्रायुधाः सर्वे सर्वे सर्वास्त्रकोविदाः ॥ २५ ॥
विचालयेयुः शैलेन्द्रान्भेदयेयुः [16]स्थिरान्द्रुमान् ॥ क्षोभयेयुश्च वेगेन समुद्रं सरितां पतिम् ॥ २६ ॥
दारयेयुः क्षितिं पद्भ्यामाप्लवेयुर्महार्णवम् ॥ नभस्थलं विशेयुश्च गृह्णीयुरपि तोयदान् ॥ २७ ॥

न्नौ अतएवरूपसंमतौ रूपेणप्रख्यातौ । स्वयमित्यनेन मानससृष्टिर्द्योत्यते ॥ १४ ॥ पर्जन्यो वर्षाभिमानिदेवता ॥ १५ ॥ वज्रसंहननोपेतः वज्रवदभेद्यशरीरयुक्तः । रुद्रोब्रह्मणानियुक्तोपि रक्षःपक्षपातित्वान्नकंचनसृष्टवान् ॥ १६ ॥ एवंप्रधानवानरसृष्टिमुक्त्वाक्षुद्रवानरसृष्टिंसंग्रहेणाह—तेइति । रताः आसक्ताः ॥ १७ ॥ एवंवानरसृष्टिमुक्त्वाऋक्षादिसृष्टिंप्राधान्येनाह—मेर्विति । वपुष्मन्तः दृढवपुष्काः । अतएवमेरुमन्दरसंकाशाः । ऋक्षाः भल्लूकाः । गोपुच्छाः गोलाङ्गूलाः । अभिजज्ञिरे जाताः । क्षिप्रनित्यनेनमानससृष्टिरुच्यते ॥ १८ ॥ रूपं सौन्दर्यं । वेषः संस्थानविशेषः । तस्यतस्य देवस्य । तेन रूपादिना समःसुतः । पृथक् अन्योन्यविलक्षणः । अजायत मुखमात्रेवानराकारत्वेपिसंस्थानादौसर्वेपितृतुल्याएवासन्नित्यर्थः ॥ १९ ॥ विजातीयास्वपिवानरोत्पत्तिमाह—गोलाङ्गूलीष्विति । संमतविक्रमाः प्रसिद्धविक्रमाः । केचिद्वानरागोलाङ्गूलीषूत्पन्नाः । केचिद्वानराऋक्षीषूत्पन्नाः । केचिद्वानराः किन्नरीषुचोत्पन्नाइतियोजना ॥ २० ॥ उत्पादकक्षेत्रवैविध्यमाह—देवाइत्यादि । श्लोकत्रयमेकान्वयं । तार्क्ष्याः गरुडादयः । नागाः दिग्गजाः । उरगाः वासुक्यादयः । तत्र विष्णववतारकाले ॥२१॥ ॥ २२ ॥ २३ ॥ तेषांप्रभावमाहपञ्चभिः । सर्वत्र सर्वेइत्यनुषञ्जनीयं । सर्वेकामरूपबलोपेताअभवन्नित्येवंयोजनीयं ॥ २४ ॥ सर्वास्त्रकोविदाः देवांशत्वेनस्वयंप्रतिभातास्त्रप्रहारपरिहारोपायाः नत्वस्त्रप्रयोक्तारः शिलाप्रहरणाइत्युक्तेः ॥ २५ ॥ विचालयेयुरित्यादिषु "शकिलिङ्च"इतिलिङ् । "कंपनेचलिः" इतिमित्त्वेपिह्रस्वाभावश्छान्दसः ॥२६॥ आप्लवेयुः संतरेयुः ॥२७॥

ति० धर्मपुत्रोपरस्सुषेणइतियुद्धकाण्डेवक्ष्यति अत्रतुवरुणपुत्रउक्तः ॥ १५ ॥ ति० किंचिदुन्नतविक्रमाः देवावस्थातोपिकिंचिदधिकपराक्रमाइत्यर्थः ॥ २० ॥ ति० आप्लवेयुः संतरेयुः । ती० आप्लवेयुःशोषयेयुः ॥ २७ ॥ इतिसप्तदशस्सर्गः ॥ १७ ॥

[पा०] १ क. ख. घ. छ. झ. ञ. ट. महाबलः. २ घ–छ. झ. ञ. ट. स्यौरसः. ३ इदमर्धं. क. ङ—ट. दृश्यते. ४ ङ. च. छ. झ. ञ. वधोद्यताः. क—घ. वधेधृताः. ५ क. ग—ञ. तेगजाचलसंकाशाः. ६ क. ख. ङ—ञ. समंतेन. ७ घ—ञ. पृथक्पृथक्. ८ क. घ—ट. गोलाङ्गुलेषु. ९ ङ—झ. किंचिदुन्नत. १० क. ट. ऋक्षेषु. ११ ख. वानरीषु. १२ ख. घ. झ. ट. स्तार्क्ष्ययक्षाः. १३ इदमर्धं च. छ. झ. ञ. ट. दृश्यते. १४ ग. घ. ङ. ज. झ. यथाकामविचारिणः. १५ ङ. छ. झ. पर्वतयोधिनः. १६ क—घ. स्थितान्द्रुमान्.

गृह्णीयुरपि मातङ्गान्मत्तान्प्रव्रजतो वने ॥ नर्दमानाश्च नादेन पातयेयुर्विहङ्गमान् ॥ २८ ॥
ईदृशानां प्रसूतानि हरीणां कामरूपिणाम् ॥ शतं शतसहस्राणि यूथपानां महात्मनाम् ॥ २९ ॥
ते प्रधानेषु यूथेषु हरीणां हरियूथपाः ॥ बभूवुर्यूथपश्रेष्ठा वीरांश्चाजनयन्हरीन् ॥ ३० ॥
अन्ये ऋक्षवतः प्रस्थानुपतस्थुः सहस्रशः ॥ अन्ये नानाविधाञ्शैलान्काननानि च भेजिरे ॥३१॥
सूर्यपुत्रं च सुग्रीवं शक्रपुत्रं च वालिनम् ॥ भ्रातरावुपतस्थुस्ते सर्वे एव हरीश्वराः ॥
नलं नीलं हनूमन्तमन्यांश्च हरियूथपान् ॥ ३२ ॥
ते तार्क्ष्यबलसंपन्नाः सर्वे युद्धविशारदाः ॥ विचरन्तोऽर्दयन्दर्पात्सिंहव्याघ्रमहोरगान् ॥ ३३ ॥
तांश्च सर्वान्महाबाहुर्वाली विपुलविक्रमः ॥ जुगोप भुजवीर्येण ऋक्षगोपुच्छवानरान् ॥ ३४ ॥
तैरियं पृथिवी शूरैः सपर्वतवनार्णवा ॥ कीर्णा विविधसंस्थानैर्नानाव्यञ्जनलक्षणैः ॥ ३५ ॥
तैर्मेघवृन्दाचलकूटकल्पैर्महाबलैर्वानरयूथपालैः ॥
बभूव भूर्भीमशरीररूपैः समावृता रामसहायहेतोः ॥ ३६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे सप्तदशः सर्गः ॥ १७ ॥

प्रव्रजतः वेगेनगच्छतः ॥२८॥ अन्येषामपरिच्छेद्यत्वा-यूथपसंख्यानमाह—ईदृशानामिति । शतंशतसहस्राणि शतलक्षाणीत्यर्थः ॥२९॥ प्रधानप्रधानानाह—तइति । ते प्रागुक्ताःसुग्रीवादिसुषेणान्तायूथपाः । प्रधानेषु हरीणांयूथेषुसमूहेषु यूथपश्रेष्ठावभूवुः । वीरान्हरीनजनयंश्च ॥३०॥ तेषांस्थानमाह—अन्यइति । ऋक्षवतः पर्वतविशेषस्य ।प्रस्थान् सानूनि ॥३१॥ राजयुवराजमन्त्रिणोदर्शयतिसूर्येत्यादिसार्धश्लोकेन। सुग्रीवं युवराजं। वालिनं राजानं । नलादीन्मन्त्रिणः ॥ ३२ ॥ तेषांदुश्शासनत्वमाह—तइति । तार्क्ष्यः गरुडः ॥ ३३ ॥ सर्वेषांशासितारमाह—तांश्चेति ॥ ३४ ॥ साहाय्यसंपत्तिपौष्कल्यंदर्शयति—तैरिति । अर्णवः अर्णववद्द्वीपं । विविधसंस्थानैः स्थूलसूक्ष्महस्वदीर्घादिविविधदेहसंस्थानवद्भिः । नानाव्यञ्जनलक्षणैः नानात्वाभिव्यञ्जकासाधारणधर्मवद्भिः ॥ ३५ ॥ उक्तमेवार्थंपुनःसर्गान्तेसंगृह्यदर्शयति—तैरिति । भीमशरीररूपैः भयंकरशरीरवेषैः । रामसहायहेतोः रामसाहाय्यार्थं । भावप्रधानोनिर्देशः ॥३६॥ नन्वस्मिन्सर्गे "धनदस्यसुतःश्रीमान्वानरोगन्धमादनः॥ वरुणोजनयामाससुषेणंनामवानरं ॥ शरभंजनयामासपर्जन्यस्तुमहाबलं"इत्युच्यते । युद्धकाण्डेतु रावणंप्रतिशार्दूलवाक्ये "सुषेणश्चात्रधर्मात्मापुत्रो धर्मस्यवीर्यवान् ॥ पुत्रावैवस्वतस्याथपञ्चकालान्तकोपमाः। गजोगवाक्षोगवयःशरभोगन्धमादनः" इति । कथमिदंसंगच्छते । उच्यते।अत्रवाल्मीकिनोक्तमेवतथ्यं "नतेवागनृताकाव्येकाचिदत्रभविष्यति" इतिब्रह्मवरप्रसादात् । शार्दूलस्तुभ्रान्त्योक्तवान् "रुधिरासिक्तसर्वाङ्गोविह्वलश्चलितेन्द्रियः"इतितत्रैवोक्तेः । अत्रेदंशङ्क्यते । ऋश्यशृङ्गेणपुत्रेष्ट्युपक्रमानन्तरंदेवादिसंमेलनं ततोविष्णोरवतितीर्षा पुत्रत्वंतुगतेविष्णौवानरोत्पत्तिरित्युक्तं तद्विरुध्यते। वालिसुग्रीवयोरावणदिग्विजयकालिकत्वात् । वक्ष्यत्युत्तरकाण्डे "अर्जुनेनविमुक्तस्तुरावणोराक्षसाधिपः"इत्यारभ्य "ततःकदाचित्किष्किन्धां नगरींवालिपालितां ॥ गत्वाह्वयतियुद्धायवालिनंहेममालिनं"इत्यादिना । तथाचकार्तवीर्यार्जुनकालिको वालीकथंरामसमवयस्कःस्यात् । किंच"भगवन्राक्षसः क्रूरोयदाप्रभृतिमेदिनीं ॥ पर्यटत्किंतदालोकाःशून्या आसन्द्विजोत्तम॥ राजावाराजमात्रोवाकिंतदानात्रकश्चन ॥ धर्षणांयेननप्राप्तोरावणोराक्षसेश्वरः"इतिदिग्विजयवृत्तान्तेरामेणपृष्टेअगस्त्येनार्जुनवालिभ्यांपरिभवउच्यमानोर्ऽजुनवालिनोरेककालत्वमवगमयति । अपिचमयोरावणायमन्दोदरीप्रदानकाले "द्वौसुतौतुसमत्वस्यांभार्यायांसंवभूवतुः ॥ मायावीप्रथमस्तावद्दुन्दु-

---

[पा०] १ क. ख. प्रव्राजितान्वने. ग. घ. प्रव्रजितान्वने. २ ट. वातरंहसाम्. ३ ख. घ. ङ. झ. ट. श्रेष्ठान्वीरांश्च. ४ घ. ङ. च. झ. ञ. ट. सर्वेचहरियूथपाः. ५ ङ. च. छ. झ. ञ. यन्सर्वान्सिंह. ६ ङ. झ. महाबलैर्महा. ७ ज. वृन्दाचलसंनिकाशैः. ८ ध-छ. झ. ञ. कूटसंनिभैः. ९ ङ. झ. यथपाधिपैः.

भिस्तदनन्तरः"इत्युक्तवान् ॥ तत्रदुन्दुभिर्यौवनसदाद्वरदानाच्चमत्तोवालिनाहतइत्युच्यते । अतोवालिनोरावणदिग्विजयकालिकत्वंव्यज्यते । सुग्रीवश्चवालिभयात्परिभ्रमन्दुन्दुभिकलेवरप्रक्षेपकृतमतङ्गशापानन्तरंऋश्यमूकेप्रत्यतिष्ठत् । अतःसुग्रीवस्यापिवालितुल्यकालत्वंगम्यते । एवंमैन्दद्विविदादयोपिचिरकालस्थायिनोऽवगम्यन्ते । वक्ष्यतिरावणंप्रतिशार्दूलः "मैन्दश्चद्विविदश्चोभौताभ्यांनास्तिसमोयुधि ॥ ब्रह्मणासमनुज्ञाताववमृतप्राशनावुभौ" इति । तेनतयोरमृतमथनकालवर्तित्वंप्रतीयते । सारणवाक्येच- "एषगन्धर्वकन्यायामुत्पन्नःकृष्णवर्त्मनः । तदादैवासुरेयुद्धेसाहाय्यार्थंदिवौकसां" इति । क्रोधनस्यदेवासुरयुद्धेव्यापारकथनात् चिरन्तनत्वंतत्प्रायपठितानामन्येषामपिवालिसुग्रीवमन्त्रिप्रभृतीनांसिद्धंचिरकालत्वं । एवमन्यत्रापिवानरयूथपानामतिचिरस्थायित्वंव्यञ्जनावृस्यावगम्यते । अतः कथमेषांरामावतारकालिकत्वमत्रोच्यतइति । अत्रास्मद्गुरुचरणाः । यद्यपिपूर्वसर्गान्ते विष्णोर्गर्भप्रवेशमुक्त्वा"पुत्रत्वंतुगतेविष्णौ" इत्यारभ्यब्रह्मानुशासनंकथितं । तथापि "उवाचदेवताःसर्वाःस्वयंभूर्भगवानिदं" इत्यादिनासामान्येनदेवताउद्दिश्य ब्रह्मासंदिष्टवान् । "तेतथोक्ताभगवतातत्प्रतिश्रुत्यशासनं । जनयामासुरेवंतेपुत्रान्वानररूपिणः" इतिसामान्येनदेवैर्वानरसृष्टिश्चोक्ता । अथब्रह्मणोजांबवत्सृष्टिवत्पूर्वसिद्धामिन्द्रादिभ्योवाल्यादिसृष्टिमनुवदति "वानरेन्द्रंमहेन्द्राभमिन्द्रोवालिनमूर्जितं" इत्यादिना । अतएवहि "वालिनंजनयामास" इत्येवोक्तं । नसुतदाजनयामासेति । अन्यत्रतु "बहवोजनयामासुर्हृष्टास्तत्रसहस्रशः" इति तत्कालवाचीतत्रशब्दः प्रयुक्तः । इन्द्रादयः खल्वेवममन्यन्त ब्रह्मनियोगानन्तरंकिमपूर्वसर्गेण पूर्वमन्यार्थमुत्पन्नाएवसहाय्यंकरिष्यन्तीति । यैस्तुपूर्वंपुत्रानोत्पादितास्तेपुनस्तदाजनयामासुः । अतएव "एषगन्धर्वकन्यायामुत्पन्नःकृष्णवर्त्मनः । तदादैवासुरेयुद्धेसहायार्थंदिवौकसां" इत्यादिनाक्रोधनादीनामन्यार्थसृष्टिरुच्यते । तस्मान्नकोपि विरोधइत्याहुः । यद्वा रामावतारकालएववाल्यादिजन्म । वालिजयश्चनार्जुनजयाव्यवहितोत्तरकालिकः ततश्शब्दस्यानन्तर्यमात्रपरत्वात् । अतएवततःकदाचिदित्युक्तं । अगस्त्येनार्जुनवालिविजययोर्युगपत्कथनंरावणजयत्वेन कृष्णःकंसशिशुपालौजघानेतिवत् । दुन्दुभिश्चवरदानेनसदायुवासत्तश्च । ततश्चतस्यबहुकालानन्तरमपिवालिनायुद्धंसंभवत्येव । एवमन्यदप्यूह्यम् । सर्वथोपक्रमावगतःक्रमोनबाधितव्यः । दैवासुरे युद्धेसाहाय्यार्थमित्यत्रापिसाहाय्यसमर्थइत्यर्थोबोध्यः । अमृतप्राशिनौअमृतप्राशितुल्यावित्यर्थः । यद्वा । अयं ब्रह्मानुशासनप्रकारःप्राचीनएव प्रसङ्गादयकविनोपवर्ण्यते । पुत्रत्वंतुगतेविष्णौ गन्तुंव्यवसितइत्यर्थः । व्यवसायश्च । विष्णोर्ब्रह्मणाविविक्तेप्रार्थनात् । अतएवपूर्वसर्गे "हन्तायंविदितस्तस्यवधोपायोदुरात्मनः" इत्युक्तम् । अतएवामुंवृत्तान्तंसनत्कुमारोविदित्वासुमन्त्रायोवाचेतिबोध्यम् । ब्रह्मप्रार्थनंचरावणस्यमानुषादन्यत्रभयंनास्ति त्वंऋश्यशृङ्गेणयक्ष्यमाणस्यदशरथस्य पुत्रोभवेति । अतएवकृतसंकेततयाविष्णुरुपयातइत्युक्तम् । यद्वा "ततोदेवाःसगन्धर्वा"इत्यादिकात्पूर्वसर्गात्प्रभृतिब्रह्मलोकवृत्तान्तः । तस्मिन्सदसि ब्रह्मसदसीत्यर्थः । अतएवस्वलोकमागच्छेत्युक्तं नतुगच्छेति । तथाचैवंसंगतिः । पुत्रकामेष्टिपर्यन्तमुक्त्वातत्राग्निपुरुषाविर्भावोपोद्घातत्वेनचिरंतनवृत्तान्तमुपक्षिपति । ततोदेवाइत्यादि । ततइतिप्रस्तावान्तरारंभार्थः । अथ "पितरंरोचयामासतदादशरथंनृपं" इत्यन्तेविष्णुवृत्तान्तेभिहिते । पुत्रत्वंतुगते अभ्युपगते इतिपुत्रत्वाङ्गीकारानन्तरंदेवांशवानरोत्पत्तेर्वक्तव्यत्वेपितंवृत्तान्तं तत्रावस्थाप्य "सकृत्वानिश्चयंविष्णुरामन्त्र्यचपितामहं ॥ अन्तर्धानंगतोदेवैःपूज्यमानोमहर्षिभिः" इत्यादिनाविष्णुवृत्तान्तमेवानुक्रम्यगर्भप्रवेशपर्यन्तमुक्त्वा प्रागवस्थापितंदेववृत्तान्तमेवपुत्रत्वंतुगतइत्यादिनापुनःप्रतिपादयति । एतावद्वृत्तान्तकालस्यदेवमानेनाल्पत्वेपिमनुष्यमानेनबहुवर्षागताःरेवतीवरप्रार्थनावत् । अतोभागग्रहार्थंसमवेत्यब्रह्मसदसिगत्वाकार्यंविज्ञाप्यततोश्वमेधभागान्गृहीत्वागतादेवाइतिसर्वंसमञ्जसम् ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणेमणिमञ्जीराख्याने वालकाण्डव्याख्याने सप्तदशस्सर्गः ॥ १७ ॥

अष्टादशः सर्गः ॥ १८ ॥

श्रीरामावतारघट्टः ।

दशरथेनयज्ञसमापनानन्तरंपूर्वमागतानांराज्ञांप्रेषणपूर्वकंपत्नीभिःसहसपरिवारमयोध्यांप्रत्यागमनं ॥ १ ॥ ततोवत्सरान्ते चैत्रशुक्लनवम्यांकर्कटेकौसल्यायांश्रीरामावतारः ॥ २ ॥ परेद्युर्दशम्यांमीनेकैकेय्यांभरतजननम् ॥ ३ ॥ तस्मिन्नेवदिनेकर्कटे सुमित्रायांलक्ष्मणशत्रुघ्नयोर्जननम् ॥ ४ ॥ ततोदशरथेक्रमेणोपनयनादिभाजामात्मजानांदारक्रियांचिन्तयतिदैवाद्विश्वामित्रेणतत्समीपंप्रत्यागमनम् ॥ ५ ॥ दशरथेनतत्पूजनपूर्वकंतदभीप्सितकरणप्रतिज्ञानम् ॥ ६ ॥

निर्वृत्ते तु क्रतौ तस्मिन्हयमेधे महात्मनः ॥ प्रति[1]गृह्य सुरा भागान्प्रतिजग्मुर्यथागतम् ॥ १ ॥
समाप्तदीक्षानियमः पत्नीगणसमन्वितः ॥ प्रविवेश [2]पुरीं राजा [3]सभृत्यबलवाहनः ॥ २ ॥
यथार्हं पूजितास्तेन [4]राज्ञा वै पृथिवीश्वराः ॥ मुदिताः प्रययुर्देशान्प्रणम्य मुनिपुङ्गवम् ॥ ३ ॥
श्रीमतां गच्छतां तेषां [5]स्वपुराणि पुरात्ततः ॥ बलानि राज्ञां शुभ्राणि प्रहृष्टानि चकाशिरे ॥ ४ ॥
गतेषु पृथिवीशेषु राजा [6]दशरथस्तदा ॥ प्रविवेश [7]पुरीं श्रीमान्पुरस्कृत्य [8]द्विजोत्तमान् ॥ ५ ॥
शान्तया प्रययौ सार्धमृश्यशृङ्गः सुपूजितः ॥ [9]अन्वीयमानो [10]राज्ञाऽथ [11]सानुयात्रेण धीमता ॥ ६ ॥
एवं विसृज्य तान्सर्वान्राजा संपूर्णमानसः ॥ उवास सुखितस्तत्र पुत्रोत्पत्तिं विचिन्तयन् ॥ ७ ॥
ततो यज्ञे समाप्ते तु ऋतूनां षट् [12]समत्ययुः ॥ ८ ॥
ततश्च द्वादशे मासे चैत्रे नावमिके तिथौ ॥ नक्षत्रेऽदितिदैवत्ये स्वोच्चसंस्थेषु पञ्चसु ॥ ९ ॥

"कोसलोनाममुदितःस्फीतोजनपदोमहान्" इत्यारभ्यभगवतोवतारनिमित्तान्युक्तानि । अथावतारंदर्शयत्यष्टादशे—निर्वृत्तेत्वित्यादि । अत्रपुत्रोत्पत्तिंविचिन्तयन्नित्येवमन्तोग्रन्थः "हुताशनादित्यसमानतेजसोचिरेणगर्भान्प्रतिपेदिरेतदा" इत्येतच्छेषोनूद्यते । निर्वृत्ते समाप्ते । हयमेधे पुत्रेष्टिसहितइतिशेषः ॥ १ ॥ दीक्षार्थोनियमोदीक्षानियमः । प्रविवेश प्रवेष्टुमुपचक्रमे । आदिकर्मद्योतकःप्रशब्दः ॥ २ ॥ मुनिपुङ्गवं वसिष्ठं ॥ ३ ॥ शुभ्राणि दशरथदत्तवस्त्रादिभिः ॥ ४ ॥ द्विजोत्तमान् वसिष्ठादीन् ॥ ५ ॥ अथ नगरप्रवेशानन्तरं । सानुयात्रेण सभृत्येन । राज्ञा रोमपादेन । अन्वीयमानः अनुगम्यमानः ॥ ६ ॥ एवं ऋश्यशृङ्गवत् । तान् द्विजोत्तमान् । संपूर्णमानसः संपूर्णमनोरथः ॥ ७ ॥ ततइत्यर्धमेकं ॥ ८ ॥ अथ भगवतः प्रादुर्भावंदर्शयतित्रिभिः—ततश्चेत्यादि । ततः अश्वमेधसमाप्त्यपेक्षया पायसोपयोगाद्वा । सच वैशाखादौ भवेत् । द्वादशे "तस्यपूरणे" इतिडट् । चैत्री पौर्णमास्यस्मिन्नितिचैत्रः । "सास्मिन्पौर्णमासीति" इतिसंज्ञायामण् । चकारोवारसमुच्चयार्थः । नावमिके नवम्यां । विनयादित्वात्स्वार्थेठक् । "तिथयोद्वयोः" इति तिथिशब्दस्यपुँल्लिङ्गस्यापिसंभवात्ङीवभावः । अदितिर्देवतायस्य तददितिदैवतं तस्मात् । देवतान्तात्तादर्थ्येयत्क्लान्दसः । नक्षत्रे पुनर्वस्वोरित्यर्थः । "पुनर्वसूनक्षत्रमदितिर्देवता" इतिश्रुतेः । पञ्चसुग्रहेषुस्वोच्चसंस्थेषु सूर्यगुरुशुक्राङ्गारकशनिषु स्वोच्चस्थानस्थितेषुसत्सु । उच्चस्थानलक्षणमुक्तंवराहमिहिरेण "अजवृषभमृगाङ्गनाकुलीराझषवणिजौचदिवाकरादितुङ्गाः" इति । कर्कटे कर्कटाख्ये । लग्ने राश्युदये । "राशीनामुदयोलग्नं" इत्यमरः । वाक्पतौ बृहस्पतौइन्दुनासह । प्रोद्यमाने उदयतिसति । आर्षमात्मनेपदं । अत्रप्रोद्यमानइत्युक्त-

ति० मुनिपुङ्गवं वसिष्ठं ऋश्यशृङ्गंच ॥ ३ ॥ शि० पुनःप्रवेशोक्त्यापूर्वंपुरींप्रविश्यराजप्रस्थापनार्थंबहिर्निर्गतइतिध्वनितम् ॥ ५ ॥ ति० ऋतूनामितिप्रथमार्थेषष्ठी ॥ ८ ॥

[पा०] १ ङ. झ. ञ. गृह्यामरा. २ ख. ग. पुरं. ३ घ. समृद्धबल. ४ झ. राज्ञाच. ५ ङ—झ. स्वगृहाणि. ६ क. घ—झ. ट. दशरथःपुनः. ७ ग. घ. पुरं. ८ क. ग. घ. च. छ. ज. द्विजोत्तमम्. ९ क. घ. ङ—ञ. अनुगम्यमानो. १० क. ख. घ. ङ. च. छ. झ. राज्ञाच. ११ ज. सानुकूल्येन. १२ ख. समाययुः.

ग्रहेषु कर्कटे लग्ने वाक्पताविन्दुना सह ॥ प्रोद्यमाने जगन्नाथं [1]सर्वलोकनमस्कृतम् ॥ १० ॥

स्त्वात्पुनर्वसुनक्षत्रस्यकर्कटराशित्वाच्च तत्रेन्दुःस्थितइत्य-
वगम्यते । कर्कटकस्तुगुरोरुच्चस्थानं इन्दुनावर्तमानो
गुरुस्तत्रवर्ततइतिगुरुरुच्चस्थः । चैत्रमासेसूर्यस्यमेषप्र-
वेशात्सूर्योप्युच्चगतएव । वुधःसदारविसंनिहितोनत-
दोच्चस्थानस्थः । चन्द्रश्चकर्कटगोनोच्चस्थः । तथाच प-
रिशेषात् मन्दाङ्गारकशुक्रास्तुलामकरमीनसंस्थाइति
पञ्चानामुच्चस्थत्वं । नामकीर्तनंविनापञ्चोच्चस्थत्वकी-
र्तनं तत्फलविशेषप्रतिपादनाय । यथाहुः "एकग्रहोच्च-
जातस्यसर्वारिष्टविनाशनम् ॥ द्विग्रहोच्चेतुसामन्तस्त्रि-
ग्रहोच्चेमहीपतिः ॥ चतुर्ग्रहोच्चेसम्राट्स्यात्पञ्चोच्चेलोक-
नायकः" इति । प्रत्येकोच्चफलंचाहुः "सूर्येस्वोच्चगते
जातस्सेनापत्यमवाप्नुयात् ॥ भौमेस्वोच्चगतेजातोवने
राजाभविष्यति ॥ गुरौस्वोच्चगतेजातोधनीराज्याधिपो
भवेत् ॥ शुक्रेस्वोच्चगतेजातोराज्यश्रियमवाप्नुयात् ॥
शनौस्वोच्चगतेजातोराज्याधिपसमोभवेत्" इति । गुरु-
चन्द्रयोगफलमुक्तंमिहिरेण "दृढसौहृदोविनीतःस्वब-
न्धुसंमानकृद्धनेशश्च ॥ शशिगुर्वोर्गुणशीलःसुरद्विजे-
भ्योरतोभवेत्पुरुषः" इति । रविवुधयोगफलंचतेनै-
वोक्तं "वेदान्तवित्स्थिरधनोरविज्ञयोःप्रायशोयशो-
र्थीस्यात् ॥ आर्यःक्षितिपतिदयितःसतांचवलरूपवि-
द्यावान्"। चैत्रमासजन्मफलं "चैत्रेमधुरभाषीस्याद-
हङ्कारसुखान्वितः"॥ नवमीजन्मफलं "दीर्घवैरीभुवि-
ख्यातो वश्यःशूरश्चपण्डितः ॥ निर्भयःसर्वभूतेभ्यो
नवम्यांजायतेनरः"॥ पुनर्वसुनक्षत्रफलं "सहिष्णुर्गू-
ढवृत्तिश्च श्लेष्मलोनाट्यकोविदः ॥ अगृध्नुरल्पसंतुष्टः
शीघ्रगोदितिधिष्ण्यजः"॥चतुर्थपादजन्मफलं "कान्त-
प्रियवपुःश्लक्ष्णःसज्जनःप्रियदर्शनः ॥ लक्ष्मीवान्प्रिय-
वादीचआदित्यान्तेप्रजायते"॥ उच्चस्थेनवृहस्पतिनास-
मं चन्द्रस्यस्थितिः कर्कटकएवेति पुनर्वसुचतुर्थपादत्वं
सिद्धम् । चैत्रपुनर्वसू शुक्लपक्षएवेतिसिद्धं । कर्कटक-
लग्नजन्मफलं "कर्कटेलग्नकेचन्द्रयुक्तेदृष्टेचभोगवान् ॥
गुरुणावीक्षितेयुक्तेधनाढ्योवहुभोगवान् ॥" तानिमा-
न्फलविशेषान्सूचयितुंमासतिथ्यादिकीर्तनं । तथैवा-
हं—जगन्नाथमित्यादिना। जगन्नाथमित्यनेन "पञ्चोच्चे-
लोकनायकः" इत्युक्तंफलंदर्शितं । लग्नस्यगुरुयोगफ-
लमाह—सर्वलोकनमस्कृतमिति । यथाहोराप्रदीपे "क-
विःसुगीतःप्रियदर्शनःसुखीदाताचभोक्तानृपपूजितःशु-
चिः ॥ देवद्विजाराधनतत्परोथभवेन्नरोदेवगुरौतनुस्थि-
ते" रामं पश्चाद्रामाख्यं । यद्वा रामं श्यामवर्णं "अ-
थोरामौसावित्रौ" इत्यत्राथश्यामावितिव्याख्यानात् ।
अनेनकर्कटेकन्यांशेजातइतिव्यज्यते । कन्यायावुधांश-
त्वात् । वुधस्यचश्यामत्वात् । शुक्रांशत्वाद्वा । यथाह
मिहिरः "रक्तश्यामोभास्करोगौरइन्दुर्नात्युच्चाङ्गोरक्त-
गौरश्चवक्रः ॥ दूर्वाश्यामोज्ञोगुरुर्गौरगात्रःश्यामःशु-
क्रोभास्करिःकृष्णदेहः" इति । सर्वलक्षणसंयुतं सर्व-
लक्षणैः सामुद्रिकोक्तैःपूर्णं । इदंलग्नचन्द्रफलं "पूर्णे-
शीतकरेलग्नेतेजस्वीनित्यगर्वितः" इतिहोराशास्त्रात् ।
विष्णोरर्धं विष्णुमयस्यपायसस्यार्धांशपरिणामभूतं ।
पुत्रं पुन्नाम्नोनरकात्त्रायतइतिपुत्रः तं । पुनस्तंविशेषयति
ऐक्ष्वाकवर्धनमिति । ऐक्ष्वाकस्यदशरथस्यवर्धनं । अ-
नेनलग्नस्यसौम्यग्रहयोगफलंदर्शितं । यथा "नरश्चिरा-
युर्नृपपूजितःसुखीलग्नंभवेत्सौम्ययुतंयथातथा ॥ लग्ने-
तथास्वामिनिरीक्षितेधनीकुशाग्रवुद्धिःकुलकीर्तिवर्ध-
नः" ॥ महाभागं महाभाग्ययुक्तं । अनेन लग्नचन्द्र-
कृतोपिदोषोगुरुयोगात्परिह्रियतइतिसूच्यते । यथाहु-
र्होराप्रदीपे "जन्मकालिकलग्नांशेचन्द्रःकेन्द्रगतोयदि॥
जातस्यविनयोवित्तंज्ञानंवुद्धिश्चनैपुणं ॥ हीनंपणफर-
स्थेस्मिन्मध्यान्येतानितस्यच ॥ आपोक्लिमस्थचन्द्रश्चेदु-
त्कृष्टानिभवन्तिहि ॥ स्वांशेधिमित्रस्यनवांशकेवाचन्द्रे-
तुवाचस्पतिनाचदृष्टे॥ एवंविधेशीतकरेचरात्रौशुक्रेणदृ-
ष्टेधनवान्सुखीस्यात् ॥" एवंकेमद्रुमयोगोपिनास्तीत्यु-
च्यते । केमद्रुमोनामचन्द्रलग्नस्योभयपार्श्वेग्रहाभावः ।
नह्यत्रमिथुनेसिंहेवाकश्चिद्ग्रहोस्ति । तथाहगार्ग्यः
"व्ययार्थोभयगश्चन्द्राद्विनाभानुंनचेद्ग्रहः ॥ योगःके-
मद्रुमोनामजातःस्यादत्रगर्हितः ॥ संतानवन्धुजनव-
स्त्रसुहृद्विहीनोदारिद्र्यदैन्यगददुःखमलैरुपेतः ॥ प्रेष्यः
खलःसकललोकविरुद्धवृत्तिःकेमद्रुमेभवतिपार्थिववंश-
जोपि" ॥ एतत्सर्वमासानुभावेनपरिह्रियतइत्युच्यते

ति० । सर्वलोकनमस्कृतं अस्यसर्वलोकरूपश्चासौनमस्कृतश्चतमित्यर्थः । तेनादौप्रादुर्भावसमयेमात्राविराड्रूपस्यदर्शनंततस्तद्रूपद-
र्शनविस्मयात्तयानमस्कृतस्सन्माययावालभावंदधाविनिसूचितम् ॥ १० ॥

[पा०] १ ङ. सर्वदेव·

कौसल्याऽजनयद्रामं सर्वलक्षणसंयुतम् ॥ विष्णोरर्धं महाभागं पुत्रमैक्ष्वाकवर्धनम् ॥
[लोहिताक्षं महाबाहुं रक्तोष्ठं दुन्दुभिस्वनम्] ॥ ११ ॥
कौसल्या शुशुभे तेन पुत्रेणामिततेजसा ॥ यथा वरेण देवानामदितिर्वज्रपाणिना ॥ १२ ॥

महाभागशब्देन । यथाहमणिबन्धः "लग्नात्केन्द्रगते- चन्द्रेग्रहैरेकादिभिर्युते ॥ केमद्रुमफलंनस्यात्केचित्केन्द्र- नवांशके" ॥ एवंदोषान्तरपरिहारोपि । यथा "अष्ट- मेशेकलत्रस्थेसुतेशेवाकलत्रगे ॥ मङ्गलेवाकलत्रस्थेभा- र्यानाशंप्रकुर्वते"इति ॥ ९ ॥ १० ॥ ११॥ रामावता- रोनकेवलंयज्ञकृतः किंतु कौसल्यातपःकृतइत्याह । कौसल्यातेनशुशुभे । कुतः पुत्रेण पुत्रत्वेनावतीर्णेन । पुत्रत्वेनावतीर्यस्वमनोरथपूरणादितिभावः । अमितते- जसा "सउश्रेयान्भवतिजायमानः" इत्युक्तरीत्या ज- न्मलब्धनिरवधिकतेजसा । यथा अदितिः वज्रपाणि- ना परत्वचिह्नभूतरेखामयवज्रयुक्तपाणितलेन । देवा- नांवरेण उपेन्द्रेण शुशुभे तथा यथापूर्वजन्मन्यदितिर- नुष्ठितव्रतविशेषैर्विष्णुंपुत्रंलब्धवती तथेयमपीत्यर्थः । यद्वा अमिततेजसा जगत्प्रकाशकादित्यस्वकुलस्यापिप्र- काशकेन । "सूर्यस्यापिभवेत्सूर्यः" इतिवत् । "ततो- खिलजगत्पद्मबोधायाच्युतभानुना ॥ देवकीपूर्वस- न्ध्यायामाविर्भूतंमहात्मना" इत्युक्ताच्युतभानोरप्य- तिशयिततेजसा । देवानांवरेण इन्द्रेणवज्रपाणिनेत्यु- भयविशेषणं । वज्रहस्तेन वज्ररेखायुक्तहस्तेनच । अनेनैवसाधारणधर्मेणोपमानोपमेयभावः । यद्वा लौ-

ति० विष्णोः शङ्खचक्रानन्तविशिष्टस्यविष्णोरित्यर्थः । अर्धं किंचिन्न्यूनमर्धमित्यर्थः । शङ्खचक्रादेरभावादिति भावः । शि० महाभागं महान्इतरभागापेक्षयाधिकः भागः प्रादुर्भावनिमित्तीभूतपायसरूपांशो यस्यसतं । किंच महान्भागोभाग्यंयस्मात्सतं । किंचमहतीं लोकदर्शनयोग्यां भांदीप्तिंगच्छतिप्राप्नोतीतिसतं । किंच महान्तोब्रह्मादयो भागाः प्राप्तप्रकाशायस्मात्सतं । किंचमहती सर्वपूज्या या आभा तांगच्छतिप्रा[illegible]तीतिसतं । किंचमहतींआभांपरमप्रकाशंआगमयतिआश्रितान्प्रापयतिसतं । किंचमहतीआभा- यस्यसमहाभःसः अगोमणिपर्वतोविहाराधारत्वेनयस्यसतं । किंचमहानांसर्वपूज्यानांब्रह्मादीनांकर्तृभूतानांआभागः अतिशयेनसेवा- यस्मिन्सतं । ऐक्ष्वाककुलवर्धनं ऐक्ष्वाकुः इक्ष्वाकुकुलप्रादुर्भूतोदशरथः तस्यकुलंवर्धयतीतिसतं रामं सर्वाभिरामदातारं । विष्णोरर्ध- मित्यनेन योहिविष्णोर्वर्धकःसतत्तुल्यानामन्येपांचवर्धकइतिकिंवक्तव्यमितिकाव्यार्थापत्तिरलङ्कारोध्वनितः । तेनरघुनाथस्याघटितघ- टनापटीयस्त्वंव्यक्तं । सर्वाभिरामदातारमित्यनेनरामएवसर्वहितत्वमितिपरिसङ्ख्यालंकारोध्वनितः । तेन यस्सर्वहितःसस्वाश्रित- हितइतिकिंवक्तव्यमितिकाव्यार्थापत्त्यलंकारोध्वनितः । तेन रघुनाथस्यपरमदयालुतातिशयःसूचितः । तेनसर्वाधीशत्वंव्यक्तं । एतेनविष्णोरर्धंविष्णुमयस्यपायसस्यार्धंअर्धांशपरिणामभूतमितिभूपणोक्तार्थआपाततोरमणीयः । वाक्यार्थस्यलाक्षणिकत्वापत्तेः । सर्वेश्वरेश्वरस्यलीलार्थस्वयंप्रादुर्भूतस्य ब्रह्मादिप्रार्थितस्यसर्वोत्पत्त्यादिकारणीभूतेच्छावतःउपादानासंभवाच्च । ईश्वरेश्वराणांसोपादान- कत्वेऽनवस्थापत्तेश्चकार्यत्वापत्त्याऽनित्यत्वापत्तेश्च । यत्तुभट्टाः विष्णोःशङ्खचक्रानन्तविशिष्टस्यअर्धंकिंचिन्न्यूनंशङ्खचक्रादेरभावादि- तिभावइति । तदपिनशोभनं । तादृशेऽर्थेविष्णुशब्दस्यसंकेताभावात् । एतदभिप्रायेणैवेममर्थमनूद्यवस्तुतस्त्वित्यादिनापाठकैरर्था- न्तरंवर्णितं । यत्त्वत्रपाठकाः " प्रणवंहीश्वरंविद्यात्सर्वस्यहृदयेस्थितं " इत्यादिश्रुतिभ्यः "गिरामस्म्येकमक्षरं" इत्यादिस्मृतिभ्यश्च वाच्यवाचकयोरभेदाच्चात्रविष्णुशब्देनप्रणवउच्यते । तस्यार्धं अर्धमात्रा तदात्मकंराममित्यर्थः । तथाचाथर्वणश्रुतिः । " अकारा- क्षरसंभूतस्सौमित्रिर्विश्वभावनः । उकाराक्षरसंभूतश्शत्रुघ्नस्तैजसात्मकः । प्राज्ञात्मकस्तुभरतोमकाराक्षरसंभवः । अर्धमात्रात्मको- रामस्सच्चिदानन्दविग्रहः" इति । तदपिनसम्यक् । वाक्यार्थस्यलाक्षणिकत्वापत्तेः । नहिशक्यार्थेनेष्टसिद्धौलक्षणांकश्चिदभ्युपैति । किंचयत्प्रणवावयवभूतस्यमात्रार्धस्यरामपरत्वं नतत्प्रणवस्येश्वरवाचकत्वं । यस्यचाखण्डप्रणवस्येश्वरवाचकत्वं नतदवयवीभूतस्यमा- त्रार्धस्यरामपरत्वमितिलक्षणास्वीकारेपितदभीष्टार्थस्यदुरुपपादत्वात् । एतेनविष्णोश्चतुर्भुजस्यार्धंद्विभुजमित्यर्थंवदन्तोपिप्रत्युक्ताः । लाक्षणिकत्वापत्तेस्तुल्यत्वात् । चतुर्भुजमात्रेविष्णुशब्दस्यसंकेताभावाच्च । अतएवभूमदक्षयज्ञादिप्रादुर्भूतानामष्टभुजादीनांविष्णु- त्वेनव्यवहारस्संगच्छते । तावन्मात्रार्थकत्वेद्विभुजंतंमहाभागमित्यपहायविष्णोरर्धमित्युक्त्यातदभिप्रेतार्थस्यकृत्यभिप्रायविरुद्धत्वाच्च । अर्धशब्दस्यवर्धकपरत्वंनदृष्टमितितुनभ्रमितव्यं । अर्धयतिवर्धयतीत्यर्धइतिव्युत्पत्त्यायौगिकत्वस्वीकारेणवर्धकपरत्वस्यसर्वतन्त्रसि- द्धत्वात् । अतएवबृहदारण्यकेपञ्चमेऽध्याये नवमब्राह्मणेकतमोऽध्यर्धइतिप्रश्नेयोऽयंपवतइत्युत्तरम् कथमध्यर्धइतिप्रश्ने यदस्मि- न्निदंसर्वमध्यार्ध्नोत् इत्यादिश्रुतौअर्धशब्दस्यवर्धकपरत्वमितिदिक् । अत्राधिकव्याख्यानदर्शनकाङ्क्षिभिर्विष्णुनासदृशोवीर्ये इत्यत्र द्रष्टव्यम् ॥ ११ ॥

[पा०] १ क—ट. दिव्यलक्षण. २ ट. भागमैक्ष्वाककुलवर्धनम्. ३ ञ. पुत्रमैक्ष्वाकनन्दनम्. ग. घ. पुत्रमिक्ष्वाकुनन्दनम्. ४ इदमर्धं ङ. ञ. दृश्यते. ५ च. रक्ताक्षं. ख. रक्तास्यं.

भरतो नाम कैकेय्यां जज्ञे सत्यपराक्रमः ॥ साक्षाद्विष्णोश्चतुर्भागः सर्वैः समुदितो गुणैः ॥ १३ ॥
अथ लक्ष्मणशत्रुघ्नौ सुमित्राऽजनयत्सुतौ ॥ सर्वास्त्रकुशलौ वीरौ विष्णोरर्धसमन्वितौ ॥ १४ ॥
पुष्ये जातस्तु भरतो मीनलग्ने प्रसन्नधीः ॥ सार्पे जातौ च सौमित्री कुलीरेऽभ्युदिते रवौ ॥ १५ ॥

किकानामिन्द्रेश्रेष्ठत्वबुद्ध्यातदनुसारेणोपमा "इषुवद्गच्छतिसविता" इतिवत् । यद्वा दृष्टिदोषपरिहारायहीनोपमापिक्रियते । यद्वा अयंश्लोकःपूर्वशेषतयामात्ररिष्टभङ्गेनतदतिशयावहत्वद्योतनाय । तथाहि मातृकारकश्चन्द्रः सच वार्धिष्णुर्गुरुणायुक्तोमातरमभिवर्धयति ॥१२॥ अथ पायसोपयोगक्रमेणकौसल्यानन्तरकैकेयीप्रसवमाह—भरतइति । साक्षाद्विष्णोः प्रत्यक्षविष्णोः । रामस्य चतुर्भागः चतुर्थांशः । रामस्यविष्ण्वर्धत्वात् तस्यचतुर्थांशःविष्णोरष्टमांशइत्यर्थः । यद्वा साक्षाद्विष्णोर्वैकुण्ठवासिनश्चतुर्थांशः । चतुर्थस्यांशः अष्टमभागइत्यर्थः । यद्वा साक्षात्प्रत्यक्षभूतइतिसौलभ्यमुच्यते। यद्वा साक्षात् अव्यवधानेनजज्ञे रामादनन्तरंजज्ञइत्यर्थः । सर्वैः रामसंबन्धितयोक्तैः गुणैः समुदितः युक्तः ॥ १३ ॥ अथ भरतजननानन्तरंद्विवचनेनयमलत्वमुच्यते । अर्धसमन्वितौ समन्विताधौं । परनिपातः । अर्धशब्दोंशमात्रवाची । समन्वितचतुर्थभागाष्टमभागरूपौ । "भित्तंशकलखण्डेवापुंस्यर्धोर्धसमेंशके" इत्यमरः । अन्यथा पायसप्रदानक्रमविरोधः । समन्वितशब्देनयुगपदुपयुक्तत्वमुच्यते ॥ १४ ॥ त्रयाणांजन्मकालमाह—पुष्यइति । पुष्ये पुष्ययुक्तेतिथौ । "नक्षत्रेणयुक्तःकालः" इति विहितस्याणूप्रत्ययस्य "लुबविशेषे" इतिलुप् । मीनस्यगुरुक्षेत्रत्वात्तज्जन्मफल-

शि० सत्यपराक्रमः सत्याअयोध्याराजधानीअस्येतिसत्योरामः तस्यैवपराक्रमोयस्य तस्मादेवपराक्रमोयस्येतिवा सएवंपराक्रमोयस्येतिवा रघुनाथाज्ञाकारीत्यर्थः । किंच सत्यःकापट्यरहितः पराक्रमोयस्यसः । साक्षाद्विष्णोर्वैकुण्ठेशस्यचतुर्भागः चत्वारोभागायस्मिन् सर्वांशइत्यर्थः । अतएवविष्णोस्तदवस्थापन्नस्यसर्वैर्गुणैस्समुदितः । यदिच विष्णोरित्यत्रषष्ठी "राहोश्शिरः" इतिवत् तर्हिसर्वैर्गुणैस्समुदितः चतुर्भागः साक्षाद्विष्णुरेवेत्यर्थः । विष्णोरित्युभयान्वयि । अत्रार्थेप्रमाणं "वैकुण्ठेशस्तुभरतः क्षीराब्धीशश्चलक्ष्मणः । शत्रुघ्नस्तुस्वयंभूमारामसेवार्थमागताः" इतिनारदपञ्चरात्रवचनं ॥ १३ ॥ चि० अथ भरतजन्मानन्तरं विष्णोरोङ्कारस्य अर्धौ अर्धांशौ अकारोकारौविश्वतैजसौविराड्ढिरण्यगर्भौ ताभ्यांसमन्वितौ तदात्मकावितियावत् । सर्वास्त्रकुशलौ लक्ष्मणशत्रुघ्नौसुतौसुमित्राअजनयदित्यन्वयः । उक्तंचाथर्वणवेदेश्रीरामोत्तरतापनीयेप्रणवव्याख्यायां । तथैतेश्लोकाभवन्ति "अकाराक्षरसंभूतस्सौमित्रिर्विश्वभावनः । उकाराक्षरसंभूतश्शत्रुघ्नस्तैजसात्मकः । प्राज्ञात्मकस्तुभरतोमकाराक्षरसंभवः । अर्धमात्रात्मकोरामोब्रह्मानन्दैकविग्रहः" इति । प्रजापतिप्रेषितपायसंतुनित्यसिद्धचिदानन्दविग्रहेनोपादानभावमर्हति । अपितुभगवदाविर्भावसूचनेनदशरथमनुगृह्णाति । अपिच "लोकवत्तुलीलाकैवल्यं" इतिन्यायानुगृहीतश्रुतिपुराणेतिहासादौश्रीरामकथाप्रसिद्धैव । श्रुतौतावात् "पूर्वापरंचरतोमाययैतौशिशूक्रीडन्तौपरियातोअध्वरम् । विश्वान्यन्योभुवनाऽभिचष्टऋतूनन्योविदधज्जायतेपुनः" इति । एतौ श्रीरामलक्ष्मणौ वस्तुतःपुराणपुरुषावेव मायया मायाभिधस्वशक्त्या शिशू दशरथराजकुमारौभूत्वा अध्वरं विश्वामित्रस्ययज्ञं अनेकरक्षोविक्षिप्तं परियातः प्राप्तौ रक्षणायेत्यर्थः । कथंभूतौ । क्रीडन्तौ ताटकासुबाह्वादिवधप्रमुखक्रीडासक्तौ । पुनःकथंभूतौ । पूर्वापरंचरतः अग्रजत्वमनुजत्वंप्राप्ताविल्यर्थः । तयोर्मध्येअन्यः एकः श्रीरामः विश्वानि सर्वाणि भुवना भुवनानि अभिचष्टे प्रकाशयति । स्वाध्यस्तविश्वप्रकाशहेतुरित्यर्थः । अन्यः लक्ष्मणः ऋतून्विदधत्पुनर्जायते । अयमर्थः । लक्ष्मणस्यशेषावतारत्वात्शेषस्यचकालात्मकत्वस्य "योयंकालोमयाख्यातस्सोनन्तः–" इतिपुराणादवगतेः । कालस्य-चाखण्डदण्डायमानस्यवसन्तप्रमुखर्तुकारणत्वात्ऋतून्विदधदित्युक्तं । पुनरिति पुनःपुनरित्यर्थः । यदायदाश्रीरामोजायतेतदा-तदाशेषात्मा लक्ष्मणोपिजायतइति । अथविष्णुरेवकौसल्यायांश्रीरामरूपेणावतीर्णोगुणैरधिकंविरुरुचेइत्याहश्रुतिः । "नवोनवोभवतिजायमानोऽह्नांकेतुरुषसामेत्यग्रं । भागंदेवेभ्योविदधात्यायन्प्रचन्द्रमास्तिरतेदीर्घमायुः" इति । सआदिनारायणः श्रीरामरूपेणजायमानः नवोनवोभवति सुन्दरतयाप्रतिक्षणंनवप्रेक्षणीयोभवतीत्यर्थः । कुतइत्यतआह—चन्द्रमाइति । चन्द्रशब्दाभिलप्यइत्यर्थः । रामेचन्द्रेतिव्यपदेशोहिश्रीरामेप्रेक्षणीयतमत्वमेवाहेतिभावः । कथंभूतः । अह्नां दिनानां केतुः विशेषकः । यानिदिनानिश्रीरघुनाथोपासनयोपयान्तितानिविशिष्टानीतिभावः । यश्चश्रीरामः उपसामग्रं प्रातःकालानामग्रे ब्राह्ममुहूर्तं एति चिन्तनीयत्वेनप्राप्नोतीत्यर्थः । तदाश्रीरामस्मृतेर्बहुशोविहितत्वादितिभावः । यश्चजायमानोदेवेभ्योभागं यज्ञभागं विदधाति रावणादिकृतप्रतिबन्धशून्यंकरोतीत्यर्थः । यश्च आयन् स्मृतिमागच्छन् स्वभक्तानांदीर्घमायुरित्युपलक्षणं । संपदः प्रतिरते ददातीत्यर्थः । एवंपु-
"रामतत्वंविजानातिहनुमानथलक्ष्मणः । तद्विमर्शेतुकाशक्तिरितरस्यचकस्यचित्" इति ॥ १४ ॥
राणादिपुद्रष्टव्यं ।

[पा०] १ घ. सर्वार्थकुशलौ. २ ख. घ. ङ. झ. जातौतु.

राज्ञः पुत्रा महात्मानश्चत्वारो जज्ञिरे पृथक् ॥ गुणवन्तोऽनुरूपाश्च रुच्या प्रोष्ठपदोपमाः ॥ १६ ॥
जगुः कलं च गन्धर्वा ननृतुश्चाप्सरोगणाः ॥ देवदुन्दुभयो नेदुः पुष्पवृष्टिश्च खाच्च्युता ॥ १७ ॥
उत्सवश्च महानासीदयोध्यायां जनाकुलः ॥ १८ ॥
रथ्याश्च जनसंबाधा नटनर्तकसंकुलाः ॥ गायनैश्च विराविण्यो वादनैश्च तथाऽपरैः ॥
[विरेजुर्विपुलास्तत्र सर्वरत्नसमन्विताः] ॥ १९ ॥
प्रदेयांश्च ददौ राजा सूतमागधवन्दिनाम् ॥ ब्राह्मणेभ्यो ददौ वित्तं गोधनानि सहस्रशः ॥ २० ॥
अतीत्यैकादशाहं तु नामकर्म तथाऽकरोत् ॥ २१ ॥
ज्येष्ठं रामं महात्मानं भरतं कैकयीसुतम् ॥ सौमित्रिं लक्ष्मण इति शत्रुघ्नमपरं तथा ॥ २२ ॥

माह—प्रसन्नधीरिति। सार्पे सर्पदेवताकेनक्षत्रे। "आश्लेषानक्षत्रंसर्पादेवता" इतिश्रुतिः । सुमित्रायाःपुत्रौ सौमित्री ।.बाह्वादित्वादिञ् । कुलीरेकर्कटके । रवौ अभ्युदिते । भरतजननस्योदयात्पूर्वत्वज्ञापनायात्रोदितइत्युक्तं । अन्यथा चैत्रकर्कटकस्यमध्याह्नकालिकत्वेनविरोधात्,। यद्वा उदिते प्रवृद्धे मध्याह्नकालइत्यर्थः । "पञ्चोच्चत्वंगुरुचन्द्रयोगः" इत्यादि सर्वत्रसमानं । रामस्यपुनर्वसूनक्षत्रं तिथिर्नवमी । भरतस्यपुष्यनक्षत्रंदशमी । सौमित्र्योश्चदशमीआश्लेषा तारेतिविशेषः ॥ १५ ॥ एकत्वेपिपृथग्वर्तमानाः । एकस्यचतुर्धावस्थानेउपमानमाह—प्रोष्ठेति। प्रोष्ठोगौः तस्येवपादायासांताःप्रोष्ठपदाः "सुप्रात—" इत्यादिसूत्रेअच्प्रत्ययान्तोनिपातितः । रुच्या कान्त्या । प्रोष्ठपदोपमाः । राज्ञोनुरूपाश्चत्वारःपुत्राजज्ञिरे । यज्ञफलंनिर्वृत्तमितिभावः । पृथग्गुणवन्तइतिवा । प्रत्येकमनन्यसाधारणगुणवन्तइत्यर्थः । रामस्यसामान्यधर्मरुचिः लक्ष्मणस्यशेषत्वज्ञानं भरतस्यभगवत्पारतन्त्र्यधीः शत्रुघ्नस्यभागवतपारतन्त्र्यमिति परस्परविलक्षणगुणवन्तइत्यर्थः ॥ १६ ॥ जननकालिकशुभनिमित्तानिदर्शयति—जगुरिति । कलं अव्यक्तमधुरंयथाभवतितथा जगुः । खात् आकाशात् ॥ १७ ॥ अथजातकर्मोत्सवमाह—उत्सवश्चेति । अयोध्यायामित्यनेनप्रतिगृहमुत्सवोभूदित्युच्यते । जनाकुलः आकुलजनः । इदमर्धमेकम् ॥ १८ ॥ गायनैः गायकैः। वादनैः वाद्यशिल्पैः। अपरैः सूतमागधवन्दिभिश्च। विराविण्यः शब्दवत्यः । रथ्याआसन् ॥ १९ ॥ अथदानसमृद्धिमाह—प्रदेयानिति । प्रदेयान् पारितोषिकान् । सूतमागधवन्दिनामितिशेषेपष्ठी । सूताःपौराणिकाः। मागधाः वंशावलिकीर्तकाः। वन्दिनः स्तुतिपाठकाः । सूतादीनांप्रदेयानददावित्यन्वयः । गोधनानि गोरूपधनानि । सहस्रशः सहस्राणि ॥ २० ॥ अर्धमेकं। लक्ष्मणजन्मदिनापेक्षयाएकादशाहत्वं । रामजन्मदिनापेक्षया द्वादशदिनंतत् । तदत्ययेप्रथमसूतकेनैवनिवृत्तेनसर्वसूतकनिवृत्तेर्द्वादशाहेनामकरणवचनमुपपन्नमेव । अन्यथा क्षत्रियस्यद्वादशाहंसूतकमितिस्मृतिः । त्रयोदशेराज्ञांनामकरणमितिस्मृतिश्चविरुध्येत । नामकर्म नामकरणं । तथा जातकर्मवत् । इत्युत्सवातिशयोतिदिश्यते ॥ २१ ॥ कस्यकिंनामाक-

ति० प्रोष्ठपदोपमाः प्रोष्ठपदेतिपूर्वाभाद्रपदोत्तराभाद्रपदयोर्नाम । तयोश्चप्रत्येकंद्वेद्वेतारेइतिज्योतिश्शास्त्रप्रसिद्धं । तैत्तरीयश्रुतिरपि "चत्वारएकमभिकर्मदेवाः प्रोष्ठपदासइतियांवदन्ति" इति । तदुपमाइत्यर्थः । शि० प्रोष्ठपदोपमाः प्रोष्ठोगौः तस्यपदेखुरौ उपमायेषांते द्वौद्वौमिलित्वास्थितावभूवुरित्यर्थः ॥ १६ ॥ ति० पतदित्यत्रअडभावश्छान्दसः ॥ १७ ॥ ति० एकादशाहशब्दः सूतकान्तोपलक्षणं । अन्यथा "क्षत्रियस्यद्वादशाहंसूतकं" इतिस्मृतिविरोधस्स्यात् । तथाचरामजन्मतस्त्रयोदशेदिनेनामकरणमकरोदित्यर्थः । शि० एकादशअहानियस्मिन्दिनसमूहेसतं । किंच एकश्चैकश्चैकौतौचदशचएकादश तेषांसंख्यापूरकमेकादशं । तदेवाहः द्वादशदिनानीत्यर्थः । अतीत्यातिक्रम्यत्रयोदशदिनइत्यर्थः । नामकर्माकरोत् । राजेतिशेषः । किंचवसिष्ठोराज्ञाऽकारयदित्यर्थः । अन्तर्भावितणिजर्थः । एकादशाहमित्यत्र प्रथमपक्षे "अच्प्रत्यन्वव" इत्यत्र अजितियोगविभागादच् । अतएव "क्षत्रियस्यद्वादशाहंसूतकं त्रयोदशेराज्ञोनामकरणं" इत्यादिस्मृतयोनुकूलाः । राजेतिशेषादेव "द्वादशेऽहनि जातस्यपितानामकुर्यात्" इति स्मृत्यानविरोधः । क्षत्रियस्य नामकरणे नाधिकारइत्युक्तौतुमूलंमृग्यं ॥ २१ ॥

[पा०] १ वृष्टिर्दिवच्च्युता. २ ङ. च. छ. झ. ञ. खाद्गतत्. ३ घ. ज. ट. गायकैश्च. ४ घ. वादित्रैश्च. ख. ग. ज. वादकैश्च. क. वाद्यकैश्च. ५ इदमर्धं ङ. च. छ. झ. ञ. ट. दृश्यते. ६ ज. गोदानानि.

वसिष्ठः परमप्रीतो नामानि [१]कृतवांस्तदा ॥ २३ ॥

ब्राह्मणान्भोजयामास पौरजानपदानपि ॥ [२]अददद्ब्राह्मणानां च रत्नौघम[३]मितं बहु ॥ २४ ॥

तेषां जन्मक्रियादीनि सर्व[४]कर्माण्यकारयत् ॥ २५ ॥

तेषां केतुरिव ज्येष्ठो रामो रतिकरः पितुः ॥ बभूव भूयो भूतानां स्वयंभूरिव संमतः ॥ २६ ॥

सर्वे वेदविदः[५] शूराः सर्वे लोक[६]हिते रताः ॥ सर्वे ज्ञा[७]नोपपन्नाश्च सर्वे समुदिता गुणैः ॥ २७ ॥

तेषामपि महातेजा रामः सत्यपराक्रमः ॥ इष्टः सर्वस्य लोकस्य श[८]शाङ्क इव निर्मलः ॥ २८ ॥

गजस्कन्धेऽश्वपृष्ठे च रथचर्यासुसंमतः ॥ धनुर्वेदे च निरतः पि[९]तुः शुश्रूषणे रतः ॥ २९ ॥

बाल्यात्प्रभृति सुस्निग्धो लक्ष्मणो लक्ष्मिवर्धनः ॥ रामस्य लोकरामस्य भ्रातुर्ज्येष्ठस्य नित्यशः ॥३०॥

रोदित्यत्राह—ज्येष्ठमिति । रामं रामनामानं । रमन्ते सर्वेजनाः गुणैरस्मिन्नितिव्युत्पत्त्येतिभावः । महात्मानं महास्वभावं । निरवधिकगुणमितियावत् । अनेन रामपदप्रवृत्तिनिमित्तमुक्तं । राजाज्येष्ठपुत्रंरामनामानमकरोत् । कैकयीसुतंभरतनामानमकरोत् । "भरतइति राज्यस्यभरणात्" इति सहस्रानीकोक्तरीत्या राजनिमृतेरामेचवनंगते अराजकाराज्यभरणादितिभावः । एवंसौमित्रिं सुमित्रापुत्रं । लक्ष्मणइति नामयुक्तमकरोत् । रामकैङ्कर्यलक्षणसंपद्युक्तत्वाल्लक्ष्मणः । "लक्ष्म्याअच्च"इति पामादिपाठादिकारस्याकारः । मत्वर्थीयोनः । अतएव "लक्ष्मणोलक्ष्मिसंपन्नः" इतिवक्ष्यति । अपरंसौमित्रिं शत्रुघ्नं शत्रुघ्ननामानमकरोत् । शत्रून्हन्तीतिशत्रुघ्नः ॥ २२ ॥ ननु क्षत्रियस्यनामकरणेऽनधिकारात् पुरोहितकर्तृकत्वस्मरणात्कथंदशरथस्यनामकर्मकर्तृत्वमित्याशङ्क्य पुरोहितद्वाराकर्तृत्वमित्यभिप्रेत्याह—वसिष्ठइति। तदा द्वादशेऽह्नि । अतएवाकारयदितिवक्ष्यति ॥२३॥ नामादिनान्दीकरणमितिनियमात् नामकर्मणिनान्दीकरणमाह—ब्राह्मणानिति। पौरेत्यादि ब्राह्मणविशेषणं। राज्ञेतिशेषः । ब्राह्मणानामितिसंबन्धसामान्येषष्ठी। अमितंअसङ्ख्येयं। बहु बहुप्रकारम् ॥२४॥ उक्तानुवादपूर्वकमितरसंस्कारकरणंदर्शयति—तेषामिति। अर्धं। आदिशब्देनान्नप्राशनचौलोपनयनादीनिगृह्यन्ते ॥ २५॥ उक्तंरामस्यमहात्मत्वमुपपादयति—तेषामिति । तेषांसुतानांमध्येवयसाज्येष्ठः केतुरिव ध्वजइव निजकुलप्रकाशकः पितुर्भूयो रतिकरः संतोषकरः भूतानांस्वयंभूरिवसंमतः नित्यप्रेमास्पदं बभूव ॥२६॥ उपनीतानांतेषांवेदाध्ययनादिकमाह—सर्वइति । वेदविदः अधीतवेदाः । विद्लृलाभइत्यस्मात्क्विप् । शूराइत्यनेनाधीतधनुर्वेदत्वमुच्यते । लोकहितेरताइत्यनेन धनुर्वेदाभ्यासकार्यपरत्वं। वेदार्थज्ञानसिद्धिमाह—ज्ञानेति। ज्ञानकार्यगुणसंपत्तिमाह—समुदितागुणैरिति। गुणैर्दयादिभिः। आसन्नितिशेषः॥२७॥ अथप्रत्येकमसाधारणान्गुणान्वक्तुमादौरामगुणानाह—तेषामिति । अपिशब्देनान्येषांरघुवंश्यानामपिमध्यइत्यर्थः । महातेजाः महाप्रतापः । सत्यपराक्रमः अमोघवीर्यः । निर्मलश्शशाङ्कइव सर्वलोकस्य इष्टः सर्वदादर्शनीयः अभवदितिशेषः॥२८॥ अत्ररामइत्यनुषज्यते । गजस्कन्धेस्थित्वातत्प्रेरणसंमतःरामइवगजस्कन्धारोहणादौनकोपिसमर्थइतिगजसादिभिःश्लाघितइत्यर्थः । एवमुत्तरत्रापियोज्यम् ॥२९॥ अथलक्ष्मणगुणविशेषानाह—बाल्यादित्यादिभिश्चतुर्भिः। लक्ष्मींवर्धयतीतिलक्ष्मिवर्धनः। ङ्यापोःसंज्ञाछन्दसोर्बहुलं''इतिह्रस्वः। कैङ्कर्यसंपद्वर्धकोलक्ष्मणो रामस्यबाल्यात्प्रभृति बाल्यमारभ्य । प्रभृतियोगेपिपञ्चमीप्रयुज्यते । सुस्निग्धः

ति० नामानिकुरुते नामकरणमकारयदित्यर्थः । वर्तमानसामीप्येलट् । अन्तर्भावितण्यर्थताच्च । यत्तु कतकेन राज्ञोनामकरणादावनधिकारइत्युक्तं अकरोदित्यत्रच पुरोहितद्वारेतिशेषपूरणंकृतं तत्रमानंचिन्त्यम् । शि० वसिष्ठः नामानितथाइतिकुरुते योग्यानीमानि इत्यवदत् ॥ २३ ॥ ति० भोजयामास राजाज्ञयेतिशेषः ॥ २४ ॥ ति० अकारयत् वसिष्ठोराज्ञेतिशेषः ॥ २५ ॥ ति० गुणकथनेपौनरुक्त्यंदार्ढ्याय ॥ २८ ॥

[पा०] १ घ.—छ. झ. ञ. ट. कुरुतेतदा. २ क. ख. घ.—छ. ञ. ट. अददात् ज. सददौ. ग. अदाच्चब्राह्मणानांतु. ३ ङ. झ. ममलं. ४ क. झ. कार्याण्यकारयत्. ५ ख. ब्रह्मविदः. ६ ट. पौरहिते. ७ ग.—छ. झ. ञ. ज्ञानोपसंपन्नाः. ८ ट. सुधांशुरिव. ९. ख. ग. घ. पितृशुश्रूषणे.

सर्वप्रियकरस्तस्य रामस्यापि शरीरतः ॥ लक्ष्मणो लक्ष्मिसंपन्नो बहिःप्राण इवापरः ॥ ३१ ॥
न च तेन विना निद्रां लभते पुरुषोत्तमः ॥ मृष्टमन्नमुपानीतमश्नाति न हि तं विना ॥ ३२ ॥
यदा हि हयमारूढो मृगयां याति राघवः ॥ तदैनं पृष्ठतोऽभ्येति सधनुः परिपालयन् ॥ ३३ ॥
भरतस्यापि शत्रुघ्नो लक्ष्मणावरजो हि सः ॥ प्राणैः प्रियतरो नित्यं तस्य चासीत्तथा प्रियः ॥३४॥
स चतुर्भिर्महाभागैः पुत्रैर्दशरथः प्रियैः ॥ बभूव परमप्रीतो देवैरिव पितामहः ॥ ३५ ॥
ते यदा ज्ञानसंपन्नास्सर्वे समुदिता गुणैः ॥ ह्रीमन्तः कीर्तिमन्तश्च सर्वज्ञा दीर्घदर्शिनः ॥३६॥
तेषामेवंप्रभावानां सर्वेषां दीप्ततेजसाम् ॥ पिता दशरथो हृष्टो ब्रह्मा लोकाधिपो यथा ॥ ३७ ॥
ते चापि मनुजव्याघ्रा वैदिकाध्ययने रताः ॥ पितृशुश्रूषणरता धनुर्वेदे च निष्ठिताः ॥ ३८ ॥
अथ राजा दशरथस्तेषां दारक्रियां प्रति ॥ चिन्तयामास धर्मात्मा सोपाध्यायः सबान्धवः ॥३९॥

सुतरांस्निग्धः। अङ्कुरात्प्रभृतिपरिमलेनैवोत्पन्नस्तुलसीकाण्डइवजन्मनःप्रभृतिनिरवधिकभक्तिसंपन्नः । यद्वा सुस्निग्धः रामपर्यङ्केणस्वपर्यङ्कायोजनेबाल्येपिननिद्रातीत्यर्थः। अनेनस्वरूपप्रयुक्तत्वंदास्यस्योक्तं। अथगुणकृतत्वमाह। लोकरामस्य लोकान्रमयतीतिलोकरामः। ण्यन्तात्कर्मण्यण् "गुणैर्दास्यमुपागतः" इत्यन्यत्रोक्तं। तस्य भ्रातुःज्येष्ठस्येत्यनेनजन्मकृतदास्यमुक्तं। नित्यशः नित्यं। सुस्निग्धइत्यन्वयः ॥३०॥ शरीरतइत्युपलक्षणं त्रिविधकरणैरपि। रामस्यसर्वप्रियकरः। यद्वा स्वशरीरादपिरामस्यप्रियकरः। स्वशरीरमुपेक्ष्यापिप्रियकरइत्यर्थः। यद्वा शरीरतोबहिःस्थितः अपरःप्राणइवस्थितः। यद्वा शरीरतः रामशरीरस्य। सार्वविभक्तिकस्तसिरित्युक्तेः। लक्ष्मणस्यदक्षिणबाहुत्वाद्रामसर्वावयवानांसर्वप्रियकरइत्यर्थः। "रामस्यदक्षिणोबाहुर्नित्यंप्राणोबहिश्चरः" इतिवक्ष्यमाणत्वात्। अस्मिन्पक्षे अपिशब्देनरामस्यस्वविषयप्रियकरत्वंसमुच्चीयते । लक्ष्मिसंपन्नइत्यनेनलक्ष्मणशब्दार्थउक्तः ॥ ३१ ॥ रामस्यलक्ष्मणेऽनुरागंदर्शयति — नचेति। तेनविना। "पृथग्विनानानाभिस्तृतीयान्यतरस्यां" इतितृतीया। निद्रांनलभते प्राणंविनाकथंनिद्रांलभेतेत्यर्थः। किंचकौसल्ययानीतंमृष्टान्नंतंविनानाश्नाति। दक्षिणबाहुंविनाकथमश्नातीतिभावः । पुरुषोत्तमः प्रेमशालिविषयेसर्वात्मनाविश्लेषासहइत्यर्थः । "क्षणेपितयद्विरहोतिदुःसहः" इतिह्युक्तम् ॥ ३२ ॥ राघवोरामःयदाहयमारूढःसन् मृगयां आखेटमुद्दिश्ययाति। तदा तदानीमेव। एनं रामं। सधनुःसन्पालयन् । अस्थानेभयशङ्कितयापृष्ठतः वेगवद्धयसमीपएव । अभ्येति । हिःप्रसिद्धौ ॥ ३३ ॥ अथभरतशत्रुघ्नयोःपरस्परानुरागंदर्शयति— भरतस्यापीति। हि यस्मात् सशत्रुघ्नोलक्ष्मणावरजः। तस्मात्ततुल्यप्रकृतिकत्वात् भरतस्यापि प्राणैः प्राणेभ्योपि। प्रियतरआसीत्। तस्य शत्रुघ्नस्यच । भरतः तथाप्रियआसीत् ॥३४॥ दशरथस्यस्वाराधकस्यमनोरथपरिपूरणमेतदवतारस्यप्रथमप्रयोजनं । तन्निर्वृत्तिमाह—सइतिसदेवैश्चतुर्भिर्दिक्पालैः ॥३५॥ पूर्वलाभकृतप्रीतिरुक्ता अथतेषांज्ञानादिसंपत्तिकृतप्रीतिविशेषमाह—तइति। श्लोकद्वयमेकान्वयम्। यदा यस्मिन्वयसि। ज्ञानं शास्त्रज्ञानं। ह्रीमन्तः प्रमादात्प्राप्ताकृत्यचिन्तासुलज्जावन्तः । कीर्तिमन्तः ज्ञानकृतप्रथावन्तः। सर्वज्ञाः सकललौकिकप्रज्ञावन्तः। दीर्घदर्शिनः नित्यभाविज्ञानवन्तः। आसन्नितिशेषः। तदातेषांपिताहृष्टोबभूव ॥ ३६ ॥ ३७ ॥ पितृप्रीतिंदृष्ट्वापुनरपिविद्यारतास्तेआसन्नित्याह—तेचापीति। तेचापि पितृउपलालिताअपि । वैदिकानां वेदसंबन्धिनांस्मृतीतिहासपुराणन्यायादीनामध्ययनेरताः निरताः ॥३८॥ अथैषांसमावर्तनोचितकालप्राप्तिंदर्शयति—अथेति । दारविषयिणीक्रियादारक्रिया। विवाहइत्यर्थः। चिन्त-

शि० बहिःप्राणइवापरइत्यभूतोपमालंकारेणलक्ष्मणसदृशोरामस्यप्रियोलक्ष्मणएवेत्यनन्वयालंकारोध्वनितः । तेनरामप्रसादाकाङ्क्षिभिर्लक्ष्मणोऽवश्यमाश्रयणीयइतिवस्तुव्यक्तं ॥ ३१ ॥ ति० देवैः चतुर्भिर्दिक्पालैः । यद्वा वसुरुद्रादित्यविश्वेदेवैः ॥ ३५ ॥ ति० दारक्रिया विवाहः "कुमारस्यविशालाक्षंपाण्डुतांमुखमाददे । कपोलतलसंलीनपाणिःपद्मासनस्थितः" इत्यादियोगवासिष्ठो-

[पा०] १ ख. नित्यंप्राणाबहिश्चराः. २ ख. घ. च. ज. अथैनं. ३ ख. णावरजोपि. ४. ३४ तमश्लोकानन्तरं सचतुर्भिरितिश्लोकात्पूर्वं ख. पाठे एकःश्लोकोऽधिकोदृश्यते. सच—शत्रुघ्नोनुगतःश्रीमान्पुरस्ताद्भरतोऽभवत् । नित्यंसर्वेऽनुरक्ताश्चपितरंतोषयन्तिते. ५ ध. ज. श्रीमन्तः.

तस्य चिन्तयमानस्य मन्त्रिमध्ये महात्मनः ॥ [1]अभ्यागच्छन्महातेजा विश्वामित्रो [2]महामुनिः ॥४०॥
स राज्ञो दर्शनाकाङ्क्षी द्वाराध्यक्षानुवाच ह ॥ शीघ्रमाख्यात मां प्राप्तं कौशिकं [3]गाधिनन्दनम् ॥४१॥
तच्छ्रुत्वा वचनं [4]तस्य [5]राज्ञो वेश्म प्रदुद्रुवुः ॥ संभ्रान्तमनसः सर्वे तेन वाक्येन चोदिताः ॥ ४२ ॥
ते गत्वा राजभवनं विश्वामित्रमृषिं [6]तदा ॥ प्राप्तमावेदयामासुर्[7]नृपायैक्ष्वाकवे तदा ॥ ४३ ॥
तेषां तद्वचनं श्रुत्वा सपुरोधाः समाहितः ॥ प्रत्युज्जगाम [8]तं हृष्टो ब्रह्माणमिव वासवः ॥ ४४ ॥
[9]तं दृष्ट्वा ज्वलितं दीप्त्या तापसं संशितव्रतम् ॥ प्रहृष्टवदनो राजा ततोऽर्घ्यमुपहारयत् ॥ ४५ ॥
स राज्ञः प्रतिगृह्यार्घ्यं शास्त्रदृष्टेन कर्मणा ॥ कुशलं चाव्ययं चैव पर्यपृच्छन्नराधिपम् ॥ ४६ ॥
[10]पुरे कोशे जनपदे बान्धवेषु सुहृत्सु च ॥ कुशलं कौशिको राज्ञः पर्यपृच्छत्सुधार्मिकः ॥ ४७ ॥
अपि ते सन्नताः सर्वे [11]सामन्ता रिपवो जिताः ॥ दैवं च मानुषं [12]चापि कर्म ते साध्वनुष्ठितम् ॥ ४८ ॥
वसिष्ठं च समागम्य कुशलं [13]मुनिपुङ्गवः ॥ [14]ऋषींश्चान्यान्यथान्यायं महा[15]भागानुवाच ह ॥ ४९ ॥
ते सर्वे हृष्ट[16]मनसस्तस्य राज्ञो निवेशनम् ॥ विविशुः [17]पूजितास्तत्र निषेदुश्च यथार्हतः ॥ ५० ॥
अथ हृष्टमना राजा विश्वामित्रं महामुनिम् ॥ उवाच परमोदारो [18]हृष्टस्तमभिपूजयन् ॥ ५१ ॥

यामासतुल्यशीलवयोवृत्ताभिजनलक्षणकन्यान्वेषणं कृतवान् । अयमर्थोधर्मात्मेत्यनेनावगम्यते ॥ ३९ ॥ इयताप्रबन्धेनभगवदवतारोदर्शितः । अथभगवदवतारप्रयोजनानिसाधुपरित्राणदुष्कृद्विनाशनधर्मस्थापनानिदर्शयत्याशास्त्रसमाप्तेः । तत्रसाधुपरित्राणंप्रधानं । कर्षकस्यसस्यवृद्धिरिव दुष्कृद्विनाशस्त्वानुषङ्गिकः । सस्यप्रतिबन्धकतृणोन्मूलनवत् । अतोदुष्कृद्विनाशनान्तरीयकंसाधुपरित्राणंवक्तुमुपक्रमतेविश्वामित्रवृत्तान्तेन । अर्थाद्धर्मसंस्थापनमपिसिध्यतीतिबोध्यम् । चिन्तयमानस्य चिन्तयमाने । स्वयंतत्कार्यसमर्थोपिरामवैभवप्रकटनायतदागमनमितिसूचयति—महातेजाइति ॥४०॥ कौशिकं कुशिकगोत्रजं ॥ ४१ ॥ तेनवाक्येनचोदितास्तच्छ्रुत्वावेश्मप्रतिप्रदुद्रुवुः ॥४२॥ ऐक्ष्वाकवे इक्ष्वाकुवंश्याय । क्रियाग्रहणंकर्तव्यमितिसंप्रदानत्वं । अभ्यागतविलंबासहिष्णवइतिभावः ॥ ४३ ॥ सपुरोधाः पुरोहितसहितः । ब्रह्माणं चतुर्मुखं ॥ ४४ ॥ ज्वलितं । अकर्मकत्वात् "गत्यर्थाकर्मक–" इतिकर्तरि क्तः । संशितव्रतं तीक्ष्णनियमं । अर्घ्यं पूजार्थोदकं । उपहारयत् वसिष्ठेनेतिशेषः । अडभावआर्षः ॥४५॥ शास्त्रदृष्टेनकर्मणा समर्पितमितिशेषः । कुशलं अपूर्वार्थप्राप्तिं । अव्ययं तस्याक्षयं ॥ ४६ ॥ कुशलं अनुपद्रवम् ॥ ४७ ॥ दैवं यज्ञादिकं । मानुषं अतिथिसत्कारादिकम् ॥ ४८ ॥ समागम्य समीपंगत्वा । ऋषीन् वामदेवादीन् । यथान्यायं यथाक्रमम् ॥ ४९ ॥ निवेशनं सभां । पूजिताः विश्वामित्रेणेतिशेषः । यथार्हतः यथान्यायं । प्रथमार्थेतसिः ॥ ५० ॥ हृष्टः पुलकरोत्यासंसारासारत्वदर्शनेन जातानांमुखपाण्डुतादीनांकामकृतत्वसंभावनयाविवाहक्रियाचिन्तनमितिबोध्यं ॥ ३९ ॥

ति० विलंबेशापत्रासात् द्वाराध्यक्षाः राजवेश्मत्वरयाप्रविविशुः ॥ ४२ ॥ इक्ष्वाकवे तद्वंशजत्वात्ताच्छब्द्यं ॥ ४३ ॥ **ति०** ब्रह्माणं बृहस्पतिं । "बृहस्पतिर्देवानांब्रह्मा" इतिश्रुतेः ॥ ४४ ॥ **ति०** कुशलपदमनामयोपलक्षणं । "क्षत्रबन्धुमनामयं" इतिस्मृतेः । अव्ययं वृद्धिं ॥ ४६ ॥ **ती०** मानुषंकर्म सामदानभेदादिकंगजबन्धनादिकंच ॥ ४८ ॥ **ति०** राज्ञःप्रेरितार्घ्यदातृत्वेनप्रथमतोराज्ञेऽनामयादिपृष्ट्वाततोवसिष्ठेनसमागम्यालिङ्गनादिकृत्वा । कुशलमित्यस्यपप्रच्छेतिशेषः । अनेन राजपुरोहितत्वकृतः पूर्वस्पर्धयेषदपमानोवसिष्ठस्यविश्वामित्रकृतस्सूचितः । "वसिष्ठश्चसमागम्यप्रहसन्मुनिपुङ्गवः । यथार्हंपूजयित्वैनंपप्रच्छकुशलंतदा" इति क्वचित्पाठः । तत्रपूर्वंमांस्पर्धमानोपिमद्राजसंनिधावागतइतिहासः ॥ ४९ ॥ **वि०** पूजिताइत्यस्यराज्ञेतिशेषः ॥ ५० ॥

[पा०] १ ग. घ. ज. ट. अभ्यगच्छन्महा. २ घ. महामनाः. ज. महाद्युतिः. ३ ख. ग. ङ–ञ. गाधिनःसुतम्. ४ ख. ग. छ. ज. ञ. त्रासाद्राजवेश्म. ५ च. ज. राजवेश्म. ६ ट. तथा. ७ ङ. झ. ञ. ट. नृपायेक्ष्वाकवे. ८ ख. घ. ङ. च. ज. झ. ञ. ट. संहृष्टो. ९ ख. ग. ङ. झ. ञ. सदृष्ट्वा. छ. सदृष्ट्वात्वरितं. १० ज. पुरेजनपदेलोके. ११ झ. सामन्तरिपवो. १२ ङ. च. झ. चैव. १३ ञ. मुनिपुङ्गवम्. १४ ङ.—ट. ऋषींश्चतान्यथा. १५ ङ. झ. भागउवाच. १६ घ. मनसस्ततो. १७ ङ. च. ञ. पूजितास्तेन. १८ घ. हृष्टःसमभि.

यथाऽमृतस्य संप्राप्तिर्यथा वर्षमनूदके ॥ यथा सदृशदारेषु पुत्रजन्माप्रजस्य च ॥ ५२ ॥
प्रनष्टस्य यथा लाभो यथा हर्षो महोदये ॥ तथैवागमनं मन्ये स्वागतं ते महामुने ॥ ५३ ॥
कं च ते परमं कामं करोमि किमु हर्षितः ॥ पात्रभूतोसि मे ब्रह्मन्दिष्ट्या प्राप्तोसि धार्मिक ॥ ५४ ॥
अद्य मे सफलं जन्म जीवितं च सुजीवितम् ॥ ५५ ॥ [यस्माद्विप्रेन्द्रमद्राक्षं सुप्रभाता निशा मम] ॥
पूर्वं राजर्षिशब्देन तपसा द्योतितप्रभः ॥ ब्रह्मर्षित्वमनुप्राप्तः पूज्योसि बहुधा मया ॥ ५६ ॥
तदद्भुतमिदं ब्रह्मन्पवित्रं परमं मम ॥ शुभक्षेत्रगतश्चाहं तव संदर्शनात्प्रभो ॥ ५७ ॥
ब्रूहि यत्प्रार्थितं तुभ्यं कार्यमागमनं प्रति ॥ इच्छाम्यनुगृहीतोऽहं त्वदर्थपरिवृद्धये ॥ ५८ ॥
कार्यस्य न विमर्शं च गन्तुमर्हसि कौशिक ॥ कर्ता चाहमशेषेण दैवतं हि भवान्मम ॥ ५९ ॥
मम चायमनुप्राप्तो महानभ्युदयो द्विज ॥ तवागमनजः कृत्स्नो धर्मश्चानुत्तमो मम ॥ ६० ॥

इति हृदयसुखं निशम्य वाक्यं श्रुतिसुखमात्मवता विनीतमुक्तम् ॥
प्रथितगुणयशा गुणैर्विशिष्टः परमऋषिः परमं जगाम हर्षम् ॥ ६१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे अष्टादशः सर्गः ॥ १८ ॥

कितः । "हृषेर्लोमसु" इतीडभावः । परमोदारः परमदाता । अभिपूजयन् स्तुवन् ॥ ५१ ॥ यथेत्यादिश्लोकद्वयमेकान्वयम् । अमृतस्य सुधायाः । अनूदके अनुदके । "अन्येषामपि दृश्यते" इतिदीर्घः । अप्रजस्य अपुत्रस्य । प्रनष्टस्य निध्यादेः । महः पुत्रविवाहाद्युत्सवः । "मह उद्धव उत्सवः" इत्यमरः । तस्योदये । स्वागतं अचिन्तितोपनतं । ते आगमनंतथामन्ये ॥५२॥ ॥ ५३ ॥ कामं अभीष्टं । किमु केनप्रकारेण । करोमि करवाणि । पात्रभूतः दानयोग्यः । दिष्ट्या शुभादृष्टवशेन । दृष्टयेत्यानन्दद्योतकमव्ययमित्यप्याहुः ॥५४॥ अद्येत्यर्धमेकम् ॥ ५५ ॥ राजर्षिशब्देनोपलक्षितःराजर्षिशब्दवाच्यइत्यर्थः । अनु पश्चात् । तपसाद्योतितप्रभः सन्ब्रह्मर्षित्वंप्राप्तोसि । अतःबहुधा राजर्षित्वेनब्रह्मर्षित्वेनच । पूज्योसि ॥ ५६ ॥ हेब्रह्मन्तदिदमागमनं ममपरमंपवित्रं परममद्भुतंच । हेप्रभो तवसंदर्शनादहं शुभक्षेत्रगतः पुण्यक्षेत्रगतः । त्वद्दर्शनादिदंमत्क्षेत्रंतीर्थभूतंजातमित्यर्थः ॥ ५७ ॥ तुभ्यमितितृतीयार्थेचतुर्थी । आगमनंप्रतित्वयायत्कार्यंयत्फलंप्रार्थितंतद्ब्रूहि । अहंत्वयानुगृहीतःसन्त्वदर्थपरिवृद्धयेइच्छामि । त्वदर्थपरिवृद्धिंकर्तुमिच्छामीत्यर्थः । "रुच्यर्थानांप्रीयमाणः" इतिचतुर्थी ॥ ५८ ॥ कार्यस्यविमर्शं कार्यविपर्यसंशयम् ॥ ५९ ॥ अयं त्वदागमनरूपः ॥ ६० ॥ हृदयसुखं अर्थसौष्ठवाद्धृदयसुखकरं । श्रुतिसुखं शब्दमार्दवाच्छ्रुतिसुखं । आत्मवता बुद्धिमता । विनीतं विनयवद्यथाभवतितथा । उक्तं वाक्यं निशम्य । प्रथितगुणयशाः पृथुतरगुणविषयकीर्तिः । नकेवलंकीर्तिमात्रं गुणैर्विशिष्टः । परमऋषिरित्यत्र "ऋत्यकः" इतिप्रकृतिभावः । पुष्पिताग्रावृत्तम् ॥ ६१ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे माणमञ्जीराख्याने बालकाण्डव्याख्याने अष्टादशःसर्गः १८

ति० । हेप्रभो तवसंदर्शनात् शुभक्षेत्रं सकलपापाभावविशिष्टसकलशुभसाधनपुण्यवद्देहं गतः प्राप्तवान् । तेन सफलजन्मतानिष्पापताचध्वनिता । "इदंशरीरंकौन्तेयक्षेत्रमित्यभिधीयते". इतिभगवद्गीतोक्तेः । शि० शुभक्षेत्रगतः शुभानियानिक्षेत्राणि तानिसर्वाणिगतःप्राप्तः । सर्वशुभक्षेत्रयात्राफलंप्राप्तोहमित्यर्थः । चोहेतौ ॥ ५७ ॥ ति० हर्षातिशयात्द्विजेतिपुनःसंबोधनंदोषाय ॥ ६० ॥ इत्यष्टादशस्सर्गः ॥ १८ ॥

[पा०] १ घ. ङ. ञ. झ. जन्माप्रजस्यवै. ज. ट. पुत्रजन्मप्रजस्यवै. २ ग. ङ. ज. झ. महोदयः. ३ घ. ज. मेविप्रदिष्ट्या. ४ ङ. च. छ. झ. मानद. ५ इदमर्धं ङ. च. छ. झ. ञ. ट. दृश्यते. ६ ज. मम. ७ ग. घ. च. ज. ञ. ट. मिदं विप्रपवित्रं. ङ. झ. मभूद्विप्रपवित्रं. ८ ज. शुभक्षेत्रेगत. ९ ख. घ. ङ. झ. त्वदर्थंपरि. १० ङ. च. छ. झ. ञ. ट. सुव्रत. ११ ङ. च. छ. झ. ञ. ठ. द्विज.

एकोनविंशः सर्गः ॥ १९ ॥

मिश्वामित्रेणदशरथंप्रतिराममाहिमप्रख्यापनपूर्वकंसुबाहुमारीचादिहननेनस्वीययज्ञरक्षणार्थंस्वाश्रमंप्रतितत्प्रेषणप्रार्थना ॥ १ ॥

तच्छ्रुत्वा राजसिंहस्य वाक्यमद्भुतविस्तरम् ॥ हृष्टरोमा महातेजा विश्वामित्रोऽभ्यभाषत ॥ १ ॥
सदृशं राजशार्दूल तवैतद्भुवि नान्यथा ॥ महाकुलप्रसूतस्य वसिष्ठव्यपदेशिनः ॥ २ ॥
यत्तु मे हृद्गतं वाक्यं तस्य कार्यस्य निश्चयम् ॥ कुरुष्व राजशार्दूल भव सत्यप्रतिश्रवः ॥ ३ ॥
अहं नियममातिष्ठे सिध्यर्थं पुरुषर्षभ ॥ तस्य विघ्नकरौ द्वौ तु राक्षसौ कामरूपिणौ ॥ ४ ॥
व्रते मे बहुशश्चीर्णे समाप्त्यां राक्षसाविमौ ॥ मारीचश्च सुबाहुश्च वीर्यवन्तौ सुशिक्षितौ ॥
सौमांसरुधिरौघेण वेदिं तामभ्यवर्षताम् ॥ ५ ॥
अवधूते तथाभूते तस्मिन्नियमनिश्चये ॥ कृतश्रमो निरुत्साहस्तस्माद्देशादपाक्रमे ॥ ६ ॥
न च मे क्रोधमुत्स्रष्टुं बुद्धिर्भवति पार्थिव ॥ तथाभूता हि सा चर्या न शापस्तत्र मुच्यते ॥ ७ ॥
स्वपुत्रं राजशार्दूल रामं सत्यपराक्रमम् ॥ काकपक्षधरं शूरं ज्येष्ठं मे दातुमर्हसि ॥ ८ ॥
शक्तो ह्येष मया गुप्तो दिव्येन स्वेन तेजसा ॥ राक्षसा ये विकर्तारस्तेषामपि विनाशने ॥ ९ ॥
श्रेयश्चास्मै प्रदास्यामि बहुरूपं न संशयः ॥ त्रयाणामपि लोकानां येन ख्यातिं गमिष्यति ॥ १० ॥
न च तौ राममासाद्य शक्तौ स्थातुं कथंचन ॥ न च तौ राघवादन्यो हन्तुमुत्सहते पुमान् ॥ ११ ॥

अथविश्वामित्राभ्यर्थनमेकोनविंशे—तच्छ्रुत्वेत्यादि । अद्भुतस्यविस्तरोयस्मिन्तदद्भुतविस्तरं । हृष्टरोमा पुलकितरोमा ॥ १ ॥ नान्यथा नमिथ्योच्यतइत्यर्थः । वसिष्ठेनव्यपदेशः कीर्तिः उपदेशोवा । तृतीयेतियोगविभागात्समासः । सोस्यास्तीतितथा ॥ २ ॥ मेहृद्गतं यत्कार्यं वाक्यंवक्तव्यंतस्यनिश्चयं करणाध्यवसायं । कुरुष्व । सत्यप्रतिश्रवः सत्यप्रतिज्ञः ॥ ३ ॥ हृद्गतंकार्यमाह—अहमित्यादिना । सिद्ध्यर्थं फलार्थं । नियमं यज्ञदीक्षां । आतिष्ठे आस्थितोस्मि । तस्य नियमस्य । विघ्नकरौकामरूपिणौ द्वौराक्षसौ । स्तइतिशेषः ॥ ४ ॥ व्रते दीक्षारूपे । चीर्णे अनुष्ठिते । विघ्नकरणप्रकारमाह—मारीचइति । समांसरुधिरौघेण मांसयुक्तरक्तप्रवाहेण । तांवेदिं यज्ञवेदिं । अभ्यवर्षतां अभ्यषिञ्चताम् ॥ ५ ॥ तथाभूते बहुशश्चीर्णे । नियमनिश्चये व्रतसंकल्पे । अवधूते विघ्निते । अपाक्रमे आगतोस्मि ॥ ६ ॥ तर्हिकुतोनतौशप्तौतत्राह—नचेति । तत्रहेतुमाह—तथेति । साचर्या यज्ञाचारः । तथाभूताहि शापानर्हकालाहि । अतः तत्र मारीचसुबाह्वोः । शापोनमुच्यते ॥ ७ ॥ तत्रमयाकिंकर्तव्यंतत्राह—स्वपुत्रमिति । काकपक्षः बालस्यशिखा । काकपक्षधरमपीत्यर्थः ॥ ८ ॥ बालोयंकथंतौनाशयिष्यतितत्राह—शक्तइति । मयाकर्त्रा । तेजसाकरणेन । विकर्तारः विघ्नकर्तारः । तेषां । नकेवलंतयोरितिभावः ॥ ९ ॥ बहुरूपं बहुविधं । कीदृक्श्रेयस्तत्राह—त्रयाणामिति । लोकानांमध्येख्यातिं । विश्वामित्राध्वरत्रातृअहल्याशापमोक्षदः हरधनुर्भञ्जकइत्येवंरूपांकीर्तिम् ॥ १० ॥ कथंबालस्तन्निरसनेप्रभविष्यतितत्राह—नचेति । अहमेवतदर्थयास्यामीअत्राह

ति० नान्यतः नान्यस्य ॥ २ ॥ शि० समाप्त्यांतु यागसमाप्तिकालेवा । तौ तस्करप्रायौ । "तश्चोरामृत—" इत्यभिधानम् ॥ ५ ॥ शि० चर्या तपश्चरणं । तथाभूता शापदानार्हा ॥ ७ ॥ ति० श्रेयश्चेति । बहुरूपं अस्त्रदानादिविवाहादिरूपं । किंच सुखपाण्डुत्वादिनिवर्तकं बहुरूपं विपुलतरंपरमार्थरूपंच । श्रेयआत्मस्वरूपंप्रदास्यामि वसिष्ठद्वाराप्रदापयिष्यामि बोधयिष्यामीत्यर्थः । रामस्यशुद्धमुक्तस्वभावत्वेपिलोकानांतत्प्रबोधनमेव रामबोधनस्यफलं ॥ १० ॥

[पा०] १ ख. तवैवभुवि. २ क. घ.—छ. झ. ञ. नान्यतः. ३ क. ग.—ञ. महावंश. ४ क. नरशार्दूल. ५ ग. ङ. च. छ. झ. ञ. ट. व्रतेतु. ६ च. राक्षसावुभौ. ७ क. ग.—ट. तौमांस. ८ ङ. विघ्नते. ९ क. त्वंपुत्रं. १० ङ. च. ए. झ. ञ. धीर. ११ क. येपधर्तार. ज. विघ्नकर्तार.

वीर्योत्सिक्तौ[1] हि तौ पापौ कालपाशवशं गतौ ॥ रामस्य राजशार्दूल न पर्याप्तौ[2] महात्मनः ॥
न च पुत्रकृतस्नेहं कर्तुमर्हसि पार्थिव ॥ १२ ॥
[दशरात्रस्तु[3] यज्ञश्च[4] तस्मिन्रामेण राक्षसौ ॥ हन्तव्यौ विघ्नकर्तारौ मम यज्ञस्य वैरिणौ ॥]
अहं ते प्रतिजानामि हतौ तौ विद्धि राक्षसौ ॥ १३ ॥
अहं वेद्मि महात्मानं रामं सत्यपराक्रमम् ॥ वसिष्ठोपि[5] महातेजा ये चेमे तपसि स्थिताः ॥ १४ ॥

—नचताविति ॥११॥ तथापिमहावीर्यौतौकथंजेतुंशक्यांवित्याशङ्क्यपापवशेनासन्नकालौनरामस्यपर्याप्तावित्याह—वीर्येति । उत्सिक्तौ गर्वितौ । कालः यमः सएवपाशःतद्वशंगतौ । पुत्रकृतं पुत्रत्वकृतं ॥ १२ ॥ हताविविभूतप्रत्ययेनवधस्यसुकरत्वंसूचितम् ॥ १३ ॥ रामस्यपरब्रह्मत्वंसूचयन्नाह—अहमिति । अहं बहुगुरूपासनेनलब्धज्ञानः । यद्वा योगबलसाक्षात्कृतपरावरतत्वयाथात्म्यः । भवांस्तुकेवलकर्मठः । अहं जटावल्कलधारी । त्वंतु क्रोधभराक्रान्तः । अहं सात्विकप्रकृतिः । त्वंतुराजसः । अहं "गर्भभूतास्तपोधनाः" इत्युक्तरीत्या रामस्यगर्भभूतः । त्वंतु रामेगर्भत्वाभिमानी । योगक्रमज्ञानवानहं त्वंतु भोगक्रमज्ञः । अहं मोक्षकामेष्टिकृत् त्वंतु पुत्रकामेष्टिकृत् । अहं धर्ममोक्षपरः त्वंतु अर्थकामपरः । एतत्सर्वंप्रसिद्धपरामर्शिनाऽहमित्यनेन सर्वनामशब्देनोच्यते । ननु "सोअङ्गवेदयदिवानकिलेतिवेदस्संदेग्ध्यनर्घविदमात्मनिरङ्गनाथम्" "विधिशिवसनकाद्यैर्ध्यातुमत्यन्तदूरं" इत्युक्तरीत्याअपरिच्छिन्नंवस्तु कथंत्वयाज्ञातमित्यत्राह । महात्मानं । अपरिच्छिन्नमहिमतयावेद्मीत्यर्थः । तथाचश्रुतिः "वेदाहमेतंपुरुषंमहान्तं" इति । श्रुतौएतमितिसौलभ्यमुच्यते । पुरुषमितिपराक्रमः । तदुभयमप्याह—रामंसत्यपराक्रममिति । परत्वसौलभ्येहि राज्ञश्छत्रचामरवदसाधारणे । यद्वा "तेजसांहिनवयःसमीक्ष्यते" इति बाल्येपिनिरवधिकवैभवं । यद्वा महात्मानं "सत्यस्यसत्यं" इतिवदात्मनो जीवस्याप्यात्मानं । "यआत्मनितिष्ठन्" इत्यादिश्रुतेः । यद्वा आत्मा देहः । "आत्माजीवेधृतौदेहे" इत्यमरः । अप्राकृतदिव्यमङ्गलविग्रहमित्यर्थः । "नतस्यप्राकृतामूर्तिः" इतिस्मृतेः । यद्वा महात्मानं महास्वभावं । "अभयंसर्वभूतेभ्योददाम्येतद्व्रतंमम" इतिवक्ष्यमाणत्वात् । यद्वा रामंमहात्मानं अवतारकृतमहास्वभावयुक्तम् । "सउश्रेयान्भवतिजायमानः" इतिश्रुतेः । सत्यपराक्रमं सदैकरूपपराक्रमं । "नाविजित्यनिवर्तते" इतिवक्ष्यते । यद्वा सत्यपराक्रमं परमार्थपराक्रमं । यद्वा सत्यात्परानाक्रमतीतितथा । गच्छानुजानामीति बहुवारंप्रकृतिसंबन्धकृतप्रातिकूल्यनिवर्तनेयत्नंकृत्वा तथाप्यननुकूलत्वेतान्हन्तीत्यर्थः । यद्वा अयत्नकालेपि शत्रुभयङ्करः । "सुखसुप्तःपरंतपः" इतिवक्ष्यति । संस्थानविशेषौज्वल्यदर्शनेनशत्रुहृदयविदारकइतिभावः । नाहंकार्यवशेनवदामीत्याह—वसिष्ठोपीति । आप्ततमोहिभवतःकुलाचार्योवसिष्ठः । अपिशब्दोविरोधे । अस्मद्विरोध्यपीत्यर्थः । यद्वा समुच्चये । महातेजाः सरस्वतीवल्लभपुत्रःयोगसिद्धज्ञानः । यद्वा यद्वाक्येनाहंब्रह्मर्षिरभवं सोपीत्यर्थः । यद्वा "सत्यंवद धर्मंचर" इतितवउपदिश्य स्वयमनुष्ठाता । ननु "यद्ब्राह्मणश्चाब्राह्मणश्चप्रश्नमेयातांब्राह्मणायाधिब्रूयात्" इति तवममचविवादे अस्यत्वयिपक्षपातःस्यादित्यत्राह—येचेति । राजद्वारसंबन्धरहिततयापक्षपातशून्याः । "तस्यधीराःपरिजानन्तियोनिं" इतिअवताररहस्यवेदिनः । येचेमे "पुलस्त्योगस्त्यः" इतिप्रसिद्धाचार्यपदनिर्वाहकाः । यद्वा गर्भस्थऋषिर्वामदेवःप्रतिपेदे "सप्तकल्पस्थितोमुनिरित्यादिनोत्तरोत्तरंब्रह्मविदग्रेसरा वामदेवमार्कण्डेयादयस्तिष्ठन्त्येतेतवप्रियकराः । केवलपरमैकान्तिनोविजानन्तीत्याह तपसिस्थिताः । कायिकव्या-

शि० रामस्यरणाजिरे रामरणभूमौ ॥ १२ ॥ शि० हिशब्दोप्यर्थे । महात्मानं महानांसर्वपूज्यानांब्रह्मादीनां आत्मानं नियन्तारं । नच "यस्यामतंतस्यमतंमतंयस्यनवेदसः" इत्यादिश्रुत्या परमात्मामम्विज्ञातइतिवदतामज्ञानवत्ताप्रतिपादनात् परमप्रमाणभूतेनज्ञानिनाविश्वामित्रेण राममहंवेद्मीतिकथमुक्तमितिवाच्यं । तच्छ्रुतीनांपरमात्मैश्वर्यादिसाकल्यज्ञानविषयत्वनिषेधतात्पर्यकत्वात् । अतएव "यतोवाचोनिवर्तन्तेअप्राप्यमनसासह । वेदाहमेतंपुरुषंमहान्तं" इत्यादिश्रुतयःसानुकूलाइतिदिक् ॥ १४ ॥

[पा] १ क. तिसक्तौतु. २ ट. पर्याप्तौनरणाजिरे. ३ क. घ.—ज. ञ. अयंश्लोकोदृश्यते. ४ च. ञ. यज्ञस्य. ५ ट. वसिष्ठोहिमहातेजायेचेह.

यदि ते धर्मलाभं च यशश्च परमं भुवि ॥ स्थितमिच्छसि राजेन्द्र रामं मे दातुमर्हसि ॥ १५ ॥
यदि ह्यनुज्ञां काकुत्स्थ ददते तव मन्त्रिणः ॥ वसिष्ठप्रमुखाः सर्वे राघवं मे विसर्जय ॥ १६ ॥
अभिप्रेतमसंसक्तमात्मजं दातुमर्हसि ॥ दशरात्रं हि यज्ञस्य रामं राजीवलोचनम् ॥ १७ ॥
नात्येति कालो यज्ञस्य यथाऽयं मम राघव ॥ तथा कुरुष्व भद्रं ते मा च शोके मनः कृथाः ॥१८॥
इत्येवमुक्त्वा धर्मात्मा धर्मार्थसहितं वचः ॥ विरराम महातेजा विश्वामित्रो महामुनिः ॥ १९ ॥
स तन्निशम्य राजेन्द्रो विश्वामित्रवचः शुभम् ॥ शोकमभ्यगमत्तीव्रं व्यषीदत भयान्वितः ॥ २० ॥

इति हृदयमनोविदारणं मुनिवचनं तदतीव शुश्रुवान् ॥
नरपतिरभवन्महांस्तदा व्यथितमनाः प्रचचाल चासनात् ॥ २१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे एकोनविंशः सर्गः ॥ १९ ॥

विंशः सर्गः ॥ २० ॥

दशरथेनविश्वामित्रंप्रतिहेतूपन्यासपूर्वकंरामेणराक्षसवधस्यदुष्करत्वोपपादनेनरामस्याप्रेषणोक्तिः ॥ १ ॥

तच्छ्रुत्वा राजशार्दूलो विश्वामित्रस्य भाषितम् ॥ मुहूर्तमिव निस्संज्ञः संज्ञावानिदमब्रवीत् ॥ १ ॥
ऊनषोडशवर्षो मे रामो राजीवलोचनः ॥ न युद्धयोग्यतामस्य पश्यामि सह राक्षसैः ॥ २ ॥

पारादीन्विनासदातपस्थिताः । तानेकैकशोरहसिपृष्ट्वातैरनुमतंचेद्राममेदेहीतिभावः । तपसिस्थिताः कायक्लेशसहाः । यद्वा ज्ञानयोगनिष्ठाः । तपआलोचने । "तस्मान्न्यासमेषांतपसामतिरिक्तमाहुः" इत्युक्तन्यासनिष्ठावा ॥ १४ ॥ धर्मलाभं धर्मवृद्धिं । स्थितं स्थिरं ॥ १५ ॥ विसर्जय प्रेषय ॥ १६ ॥ अभिप्रेतं अभीष्टं । आत्मजं । यज्ञस्य यज्ञाय । दशरात्रंदेहि । असंसक्तं अविलंबितमितिक्रियाविशेषणम् ॥ १७ ॥ ममायंयज्ञस्यकालोयथानात्येति तथाकुरुष्वेत्यन्वयः ॥ १८ ॥ धर्मार्थसहितं धर्मार्थपरं ॥ १९ ॥ शोकं दुःखं । व्यषीदत् दुःखितोभूत् । विषण्णमुखोभूदित्यर्थः ॥२०॥ हृदयं मनोधिष्ठानं । अतीव अत्यर्थं । व्यथितमनाः महान् कुलेनमहान् । विचचाल मुमूर्च्छेत्यर्थः । महदितिपाठे महदत्यर्थं व्यथितमनाः अतीवविदारणमितिसंवन्धः । वृत्तमुपजातिभेदः ॥ २१ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने एकोनविंशःसर्गः ॥१९॥

कौशिकवचनश्रवणाद्दशरथविषादोविंशे–तच्छ्रुत्वेत्यादि । निस्संज्ञइव चेतनारहितइव । मूर्च्छितइत्यर्थः ॥ १ ॥ "यज्ञविघ्नकरंहन्यां" इत्युक्तरीत्यानिजयज्ञविघ्ननिवर्तकोऽयंभविष्यतीतिमत्वाआगत्यप्रार्थयमानेविश्वामित्रेवत्सलोदशरथःप्रेमान्धतयाकलुषितहृदयः अहंवेद्मीतितदुक्तमपिमनस्यकुर्वन्रामस्यबाल्यमेवपुर-

---

ति० तइतित्वमित्यर्थे । शि० इदानींरामदाने किंचिच्चेष्टादिनाराज्ञोवैमनस्यमालक्ष्याह यदीति ॥ १५ ॥ ति० ततः तदा ॥ १६ ॥ ति० तवचासंसक्तं अतीतबाल्यत्वान्मातापितृसक्तिरहितं । ईश्वरत्वात्क्वाप्यनासक्तमितिव्यङ्ग्यं ॥ १७ ॥ ति० ततो तथायेतिच्छान्दसं । व्यषीदतेत्यप्येवं । भयान्वितः रक्षोनिमित्तपुत्रवियोगभयान्वितः ॥ २० ॥ शि० सहृदयमनोविदारणं हृदयसहितमनसश्चालकं । महान् सर्वपूज्यः । महात्मा अतिधैर्यविशिष्टः ॥ २१ ॥ इत्येकोनविंशस्सर्गः ॥ १९ ॥

कतकं० किंचिदूनानिषोडशवर्षाणियस्यसः । इदंचयुद्धायोग्यत्वंप्रतिपादितं । षोडशवर्षः क्षत्रियकुमारएवकवचधरोयुद्धार्हः इतिशास्त्रात् । बालोद्वादशवर्षोऽयमकृतास्त्रश्चराघवइतिरावणंप्रतिमारीचवचने बालष्षोडशवर्षोयमित्येवपाठः । रावणस्यभयातिशयः-

[पा०] १ ङ. झ. लाभंतु. २ क. ग. ङ. च. छ. झ. ञ. स्थिरमिच्छसि. ३ क. ग. ङ. ज. झ. ट. यद्यभ्यनुज्ञां. ४ क. राजेन्द्र. ५ क. ख. घ.—ञ. ततोरामंविसर्जय. ६ ख. ङ. च. छ. झ. ञ. महामतिः. ज. महानृपिः. ७ क. विश्वामित्रमुखोद्गतम्. ८ एतदर्धस्थाने तत्प्रतिनिधित्वेन ङ. च. छ. झ. ञ पाठेषु अर्धद्वयंदृश्यते. तच्च. शोकेनमहताविष्टश्चचालचमुमोहच । लब्धसंज्ञस्ततोत्थायव्यषीदतभयान्वितः. ९ ङ.—ज. ञ. इतिराहृदय. १० ङ. छ.—ट. रभवन्महान्महात्माव्यथित. क. ग. च. रगमद्भयंमहात्माव्यथित. ११ ज. वर्षस्तु.

स्कुर्वन्नाह—ऊनेति । ऊनाः असंपूर्णाः षोडशवर्षा यस्य सतथोक्तः । द्वादशवर्षइतियावत् । "बालोद्वादशवर्षोयमकृतास्त्रश्चराघवः" इतिविशिष्यवक्ष्यमाणत्वात् । परिपूर्णषोडशवर्षोहियुद्धक्षमोभवति । द्वादशवर्षोबालः कथंयुद्धायप्रभवतीतिभावः । एवंवयःस्वरूपेविचार्यमाणेनास्ययुद्धयोग्यतेत्युक्ते राक्षसैस्तुसुतरांनेत्याह । राजीवलोचनइति पद्मतुल्यनयनः । पद्मंहिरात्रौमुकुलीभवति तत्तुल्यतोक्तौरात्रौनिद्रालसोरामोरात्रिंचरःकथंयोद्धुंशक्नोतीतिभावः । मेरामः सदामदुत्सङ्गपरिवर्तितयामद्विरहासहिष्णुरित्यर्थः । यद्वा पुत्रालाभेनषष्टिवर्षसहस्राणिलालप्यमानस्यातिक्लेशेनोत्पन्नः । रामः "रामोरतिकरःपितुः"इतिरतिकरः सर्वस्वभूतः । अस्यकाकपक्षधरत्वादिंचपयुतोविद्याभ्यासादपिक्रीडनकस्वीकारकुतूहलीतिहस्तेननिर्दिशति । युद्धयोग्यतांनपश्यामि । किंतु क्रीडनकस्वीकारयोग्यतामेवपश्यामीत्यर्थः । युद्धयोग्यतां राक्षसशब्दश्रवणमात्रेणैवबिभ्यतां कथंयुद्धयोग्यता । सहराक्षसैः मनुष्येणापियुद्धव्यापारमजानतःकथंराक्षसैर्युद्धं । एकेनापिराक्षसेननयोग्यता कुतोबहुभिः । अत्रशङ्क्यते । अत्रदशरथेनपित्राऊनषोडशवर्षइत्युक्तं । ऊनत्वंचमासेनमासत्रयेणषण्मासैर्वास्यात् नत्वेकवर्षद्विवर्षादिभिः । तस्मिन्नेववर्षेसीताविवाहः तदनुद्वादशवर्षाण्ययोध्यावासः "समाद्वादशतत्राहंराघवस्यनिवेशने । भुञ्जानामानुषान्भोगान्सर्वकामसमृद्धिनी"इतिसीतयावक्ष्यमाणत्वात् । तथाचवनप्रवेशकालेरामस्याष्टाविंशतिवर्षाणीतिप्रतिभाति । तदनुपपन्नं "ममभर्तामहातेजावयसापञ्चविंशकः ॥ अष्टादश[illegible]वर्षाणिममजन्मनिगण्यते" इतिसीतावचनात् । कौसल्ययाचवनप्रवेशसमयेप्रोच्यते "दशसप्तचवर्षाणिजातस्यतवपुत्रक ॥ आसितानिप्रकाङ्क्षन्त्यामया दुःखपरिक्षयं"इति । तस्मात् अष्टाविंशतेःपञ्चविंशतेःसप्तदशानांचकथमविरोधइति । अत्रकेचित् । कौसल्यावाक्येजातस्येतिद्वितीयंजन्मोच्यते । क्षत्रियस्यापिद्विजत्वात् । द्वितीयंजन्मचउपनयनं । तच्चवृद्धेनदशरथेनकाम्यपक्षमाश्रित्यगर्भाष्टमएवकृतं । तथाचद्वितीयजन्मापेक्षयासप्तदशत्वं । उपनयनात्पूर्वंसप्तवर्षाणीति वयसापञ्चविंशकइतिसीतावचनमप्युपपन्नं । ऊनषोडशवर्षइत्यत्रपादोनत्वं । द्वादशवर्षइत्यस्यत्रोक्तत्वात् । अतःसर्वथावनप्रवेशकालेपञ्चविंशतिवर्षएवराम इत्याहुः । अन्येबहुक्लेशंसहमानाएवंव्याचख्युः । अष्टाविंशतिवर्षएववनप्रवेशेरामः । ऊनषोडशवर्षइति यत्किंचिन्मासोनषोडशवर्षवयस्कइत्यर्थः । "बालोह्यकृतविद्यश्चनचवेत्तिबलाबलं" इतिदशरथवचनेबाल्ययौवनसन्धौबालइतिव्यवहर्तुंशक्यत्वात् "बालआषोडशाद्वर्षात्पौगण्डश्चेतिकीर्त्यते" इतिवचनात् "बालोद्वादशवर्षोयमकृतास्त्रश्चराघवः । अजातव्यञ्जनःश्रीमान्पद्मपत्रनिभेक्षणः ॥" इतिमारीचवचनंतुयुद्धभीरुतयाभ्रान्तिकृतं रावणविभीषिकयोक्तंवा । अतएवस्वयंवायव्यास्त्रभग्नोप्यकृतास्त्रइत्याह । अजातव्यञ्जनत्वंचनिरुदराकन्येतिवदल्पश्मश्रुत्वं "एकवस्त्रधरोधन्वीशिखीकनकमालया"इत्यपिदृढपरिहितोत्तरीयतयासन्नद्धत्वमाह । वयसापञ्चविंशकइतितुपञ्चविंशतुल्यत्वमाह इवार्थेकनोविधानात् । तेननित्ययौवनत्वंज्ञापयति । देवाहि सदापञ्चविंशतिवार्षिकाइत्युच्यन्ते । कौसल्यावाक्यमपि । "गर्भैकादशेषुराजन्यं"इतिविहितोपनयनापेक्षयैवागारोचक्यात्युक्तिरसा ।

शिरो० अत्रऊनषोडशवर्षोमेइत्युक्त्याविश्वामित्रसहगमनसमयेरामस्यषोडशोवर्षःप्रविष्टइतिफलितं । तस्मिन्नेववर्षेरामसीताविवाहस्यप्रसिद्धत्वेनषोडशवार्षिकस्यरामस्यविवाहइतिसिद्धं । समाद्वादशतत्राहंराघवस्यनिवेशने इतिरावणंप्रतिवक्ष्यमाणसीतावचनाद्विवाहानन्तरंद्वादशवर्षपर्यन्तंराघवनिकेतेसीतानिवासः ततोवनप्रस्थानमितिवनगमनसमयेऽष्टाविंशतिवर्षकोरामइतिनिष्पन्नं । एतदनुरोधेनदशसप्तचवर्षाणिजातस्यतवपुत्रकेतिकौसल्योक्तिपद्यघटकीभूतदशशब्दस्यैकशेषेणविंशतिरर्थः । चशब्दस्यचन्द्रवाचकत्वेनैकत्वलाभः । तथाचदशसप्त चयुक्तान्येव वर्षाणीत्यष्टाविंशतिलाभः । "चश्चण्डेशेपुमान्उक्तःकच्छपेचन्द्रचोरयोः" इतिमेदिनी । ममभर्तामहातेजावयसापञ्चविंशकइत्यपिनविरुद्धं । पञ्चविंशयुक्ताः कात्रयोयस्येतितदर्थात् । कशब्दस्य [illegible]इवाचकत्वेनत्रित्वलाभः । कशब्दस्यवह्निवाचकत्वंतु " कःप्रजापतिरुद्दिष्टः कोर्केवाय्वनलेषु " इतिकोशादवगन्तव्यं । "ऊनद्वादशवर्षोयमकृतास्त्रश्चराघवः" इतिमारीचपद्यघटकद्विशब्देनैकशेषात्षड्लाभः । तेनोनषोडशवार्षिकइत्यर्थस्संपन्नः । अतएवोनषोडशवर्षोयमितिभट्टोक्तपाठान्तरेणनविरोधः । किंच ममभर्तामहातेजावयसापञ्चविंशकइतिश्रुतानुरोधात् ऊनषोडशवर्षोमे[illegible]दृष्टकीभूतोनशब्देनपादोनंगृह्यते । तेनतस्मिन्समयेरामस्यद्वादशवार्षिकत्वंफलितं । ततस्त्रयोदशेवर्षेविवाहः । अतएवमारीचवचनंसानुकूलं । एवंचोक्तदिशावनप्रवेशसमयेऽष्टपञ्चविंशतिवार्षिकत्वंसिद्धं । दशसप्तचेववर्षाणीत्यत्र सप्तशब्दस्यैवैकशेषेणचतुर्दशलाभइतिनविरोधः । उपनयनप्रभृतिवर्षव्यवस्थापनया भूषणादिव्याख्यानंतुचिन्त्यमेव । लोकेऽप्रसिद्धेः क्वचिज्जन्मप्रभृतिवर्षपरिगणनं क्वचितुपनयनात्परिगणनमित्यत्रविनिगमनाविरहाच्चेतिदिक् ॥ २ ॥

इयमक्षौहिणी [1]पूर्णा यस्याहं पतिरीश्वरः ॥ अनया [2]संवृतो गत्वा योद्धाऽहं तैर्निशाचरैः ॥ ३ ॥
इमे शूराश्च विक्रान्ता [3]भृत्या मेऽस्त्रविशारदाः ॥ योग्या रक्षोगणैर्योद्धुं न रामं नेतुमर्हसि ॥ ४ ॥
अहमेव धनुष्पाणिर्गोप्ता समरमूर्धनि ॥ यावत्प्राणान्धरिष्यामि तावद्योत्स्ये निशाचरैः ॥ ५ ॥
निर्विघ्ना व्रतचर्या सा भविष्यति सुरक्षिता ॥ अहं तत्र गमिष्यामि न रामं नेतुमर्हसि ॥ ६ ॥
बालो ह्यकृतविद्यश्च न च वेत्ति बलाबलम् ॥ न चास्त्रबलसंयुक्तो न च युद्धविशारदः ॥ ७ ॥
न चासौ रक्षसां योग्यः कूटयुद्धा हि [4]ते भृशम् ॥ ८ ॥
विप्रयुक्तो हि रामेण मुहूर्तमपि नोत्सहे ॥ जीवितुं मुनिशार्दूल न रामं नेतुमर्हसि ॥ ९ ॥
[5]यदि वा राघवं ब्रह्मन्नेतुमिच्छसि सुव्रत ॥ चतुरङ्गसमायुक्तं [6]मया च सहितं नय ॥ १० ॥
[7]षष्टिवर्षसहस्राणि जातस्य मम कौशिक ॥ [8]दुःखेनोत्पादितश्चायं न रामं नेतुमर्हसि ॥ ११ ॥
चतुर्णामात्मजानां हि प्रीतिः [9]परमिका मम ॥ [10]ज्येष्ठं धर्मप्रधानं च न रामं नेतुमर्हसि ॥ १२ ॥
किंवीर्या राक्षसास्ते च कस्य पुत्राश्च के च ते ॥ कथंप्रमाणाः के चैतान्रक्षन्ति मुनिपुङ्गव ॥ १३ ॥
कथं च प्रतिकर्तव्यं तेषां रामेण रक्षसाम् ॥ मामकैर्वा बलैर्ब्रह्मन्मया वा कूटयोधिनाम् ॥ १४ ॥

या तस्मान्नकिंचिदनुपपन्नमिति । वस्तुतोवयसापञ्चविंशकइतिसीतायाःशापभीतायाःसंन्यासिनंप्रतिवचनमेषयथार्थं । दशसप्तचवर्षाणीतिकौसल्यावाक्येतुचकारेणसप्तवर्षाणिसमुच्चीयन्ते । तेनजन्मापेक्षयैवपञ्चविंशतित्वसिद्धिः । ननुविवाहानन्तरमेवसंभोगःश्रूयते "रामस्तुसीतयासार्धंविजहारबहूनृतून्" इति । सकथंद्वादशवर्षस्यबालस्यसंभवति । संभवत्येवसौकुमार्यातिशयेनप्रौढशरीरतया । अतएवहिदेव्याश्चषड्वर्षएवयौवनारंभः "अष्टादशहिवर्षाणिममजन्मनिगण्यते" इतिवनप्रवेशेऽष्टादशत्वं विवाहकालेसीतायाःषड्वर्षत्वमवगमयतीतिसर्वंसुस्थं ॥ २ ॥ तर्हितवप्रतिज्ञाव्यर्थास्यात्तत्राह—इयमिति । अक्षोरथावयवःतस्यऊहःतद्योगादिनिः । "ऋन्नेभ्योङीप्" इतिङीपि "पूर्वपदात्संज्ञायां—"इतिणत्वं । "अक्षादूहिन्यां—"इतिवृद्धिः । अक्षौहिणीस्वरूपमुक्तमादिपर्वणि "एकोरथोगजश्चैकोनराःपञ्चपदातयः ॥ त्रयश्चतुरगास्तज्ज्ञैःपत्तिरित्यभिधीयते ॥ पत्तिंतुत्रिगुणामेकंविदुःसेनामुखंबुधाः ॥ त्रीणिसेनामुखान्येकोगुल्मइत्यभिधीयते ॥ त्रयोगुल्मागणोनामवाहिनीतुगणास्त्रयः ॥ स्मृतास्तिस्रस्तुवाहिन्यःपृतनेतिविचक्षणैः ॥ चमूस्तुपृतनास्तिस्रस्ताश्चतिस्रस्त्वनीकिनी ॥अनीकिनींदशगुणांप्राहुरक्षौहिणींबुधाः" इति । यस्याहंपतिरितिसंधिरार्षः । पतिः पालयिता । पातेर्डतिः । ईश्वरः नियन्ता । योद्धा । योत्स्ये । लुट् । तैः यज्ञविघ्नकरैः ॥ ३ ॥ विक्रान्ताः अक्षतविक्रमाः ॥ ४ ॥ गोप्ता यज्ञस्येतिशेषः । सेनानांवा ॥५॥ अहंगमिष्यामि तेनसुरक्षिताभविष्यतीतियोजना ॥६॥ बालः ऊनषोडशवर्षः । अतएवअकृतविद्यः अशिक्षितधनुर्विद्यः । बलाबलं शत्रूणामितिशेषः । "येषांचविरोधः शाश्वतिकः" इतिएकवद्भावः ॥७॥ रक्षसां युद्धइतिशेषः । कूटयुद्धाः कपटयुद्धाः । इदमर्धं ॥ ८ ॥ तिष्ठतुरामस्वभावः मत्स्वभावश्चैवमित्याह—विप्रयुक्तइति । विप्रयुक्तः विश्लिष्टः ॥९॥ चत्वारिअङ्गानि चतुरङ्गानि । "दिक्सङ्ख्येसंज्ञायां" इतिसमासः ॥ १० ॥ वर्षसहस्राणि अतीतानीतिशेषः । तदनन्तरं दुःखेन उपवासदीक्षादिक्लेशेन उत्पादितः ॥११॥ चतुर्णांपुत्राणांमध्ये रामे परमिकाप्रीतिः । स्वार्थेकप्रत्ययः । "प्रत्ययस्थात्" इतीत् । तस्माज्ज्येष्ठत्वादेश्चननेतुमर्हसीतियोजना ॥१२॥ अथसर्वथा रामनयनमयुक्तमितिवक्तुं योद्धव्यस्वरूपंपृच्छति—किमिति । केच किंनामधेयाः । कथंप्रमाणाः कीदृशाकाराइत्यर्थः । केरक्षन्ति के तेषांप्रधानाइत्यर्थः ॥१३॥ प्रति-

---

ति० प्रीत्याधिक्येकारणमाह ज्येष्ठइति । अनेन राज्ययोग्यताध्वनिता । धर्मप्रधाने त्रिषुपुरुषार्थेषुधर्माधीनप्रवृत्तिके । राक्षसैर्युद्धेहि पाक्षिकनाशसंभावनयाराज्यविच्छेदएवभवेत् । धर्मेणप्रजापालनंचनान्योनिर्वहेत् । अतोरामोनेतुमयोग्यः ॥ १२ ॥

[पा०] १ ङ. च. छ. झ. ञ. ट. सेना. २ च. छ. झ. ञ. ट. सहितो. ३ क. भृत्याश्शस्त्रास्त्रकोविदाः. ४ ङ. च. छ. झ. ञ. ट. राक्षसाः. क. ग. ज. तेध्रुवं. ५ क. अथवा. ६ ग.—च. मयासहचतं. ७ क. ग. च.—झ. ट. षष्टिर्वर्ष. ८ ङ. झ. कृच्छ्रेणोत्पादित. ९ क. च. पारमिका. १० ङ. च. ज. झ. ज्येष्ठेधर्मप्रधाने.

सर्वं मे शंस भगवन्कथं तेषां मया रणे ॥ स्थातव्यं दुष्टभावानां वीर्योत्सिक्ता हि राक्षसाः ॥१५॥
तस्य तद्वचनं श्रुत्वा विश्वामित्रोऽभ्यभाषत ॥ १६ ॥
पौलस्त्यवंशप्रभवो रावणो नाम राक्षसः ॥ १७ ॥
स ब्रह्मणा दत्तवरस्त्रैलोक्यं बाधते भृशम् ॥ महाबलो महावीर्यो राक्षसैर्बहुभिर्वृतः ॥ १८ ॥
श्रूयते हि महावीर्यो रावणो राक्षसाधिपः ॥ साक्षाद्वैश्रवणभ्राता पुत्रो विश्रवसो मुनेः ॥ १९ ॥
यदा स्वयं न यज्ञस्य विघ्नकर्ता महाबलः ॥ तेन संचोदितौ द्वौ तु राक्षसौ वै महाबलौ ॥
मारीचश्च सुबाहुश्च यज्ञविघ्नं करिष्यतः ॥ २० ॥
इत्युक्तो मुनिना तेन राजोवाच मुनिं तदा ॥ न हि शक्तोस्मि संग्रामे स्थातुं तस्य दुरात्मनः ॥२१॥
स त्वं प्रसादं धर्मज्ञ कुरुष्व मम पुत्रके ॥ मम चैवाल्पभाग्यस्य दैवतं हि भवान्गुरुः ॥ २२ ॥
देवदानवगन्धर्वा यक्षाः पतगपन्नगाः ॥ न शक्ता रावणं सोढुं किं पुनर्मानवा युधि ॥ २३ ॥
स हि वीर्यवतां वीर्यमादत्ते युधि राक्षसः ॥ तेन चाहं न शक्नोमि संयोद्धुं तस्य वा बलैः ॥
सबलो वा मुनिश्रेष्ठ सहितो वा ममात्मजैः ॥ २४ ॥
कथमप्यमरप्रख्यं संग्रामाणामकोविदम् ॥ बालं मे तनयं ब्रह्मन्नैव दास्यामि पुत्रकम् ॥ २५ ॥
अथ कालोपमौ युद्धे सुतौ सुन्दोपसुन्दयोः ॥ यज्ञविघ्नकरौ तौ ते नैव दास्यामि पुत्रकम् ॥ २६ ॥
[तौ हि यक्षस्य कन्यायां जातौ दैत्यकुलोद्वहौ] ॥ मारीचश्च सुबाहुश्च वीर्यवन्तौ सुशिक्षितौ ॥२७॥
तयोरन्यतरेणाहं योद्धा स्यां ससुहृद्गणः ॥ [अन्यथा त्वनुनेष्यामि भवन्तं सहबान्धवः] ॥ २८ ॥

इति नरपतिजल्पनाद्द्विजेन्द्रं कुशिकसुतं सुमहान्विवेश मन्युः ॥
सुहुत इव समिद्भिराज्यसिक्तः समभवदुज्ज्वलितो महर्षिवह्निः ॥ २९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे विंशः सर्गः ॥ २० ॥

कर्तव्यं प्रतिविधेयं ॥ १४ ॥ तेषांरणेकथंमयास्थातव्यमिति व्यूहप्रकारप्रश्नः ॥ १५ ॥ १६ ॥ राक्षसः अस्तीतिशेषः ॥ १७ ॥ किंवीर्याइत्यस्योत्तरमाह—सइति ॥ १८ ॥ प्रसिद्धश्चायमित्याह—श्रूयतइति ॥१९॥ अर्धत्रयमेकान्वयं । यदःयज्ञस्य स्वयंनविघ्नकर्ता अलक्ष्यत्वादिनेतिशेषः ॥ २० ॥ तस्य रावणस्य ॥२१॥ अल्पभाग्यस्येति। त्वन्नियोगाकरणेनेतिशेषः । प्रसादकरणेहेतुः दैवतमिति ॥ २२ ॥ रावणसंग्रामवैमुख्यंनदोषाय । सर्वाशक्यत्वादित्याशयः ॥२३॥ अर्धत्रयं । वीर्यमादत्ते स्वीकरोति । नाशयतीत्यर्थः । तस्यबलैः मारीचादिभिः ॥ २४ ॥ कथमितिप्रश्ने । राक्षसान् प्रतीतिशेषः ॥ २५ ॥ अथ शत्रुस्वरूपज्ञानानन्तरं । सुन्दोपसुन्दयोःसुतौ मारीचसुबाहू । सुन्दपुत्रोमारीचः । उपसुन्दपुत्रःसुबाहुः । पुत्रकं अनुकंपायांकन् । अतोनदास्यामीत्युपस्कार्यं ॥ २६ ॥ ॥२७॥२८॥ उत्तरसर्गार्थमन्तेसंगृह्णाति—इतीति । जल्पनात् असङ्गतोक्तेः । कोपाविष्टत्वेदृष्टान्तमाह—सुहुतइति । आदौसमिद्भिःसुहुतः ततआज्यसिक्तोवह्निरि-

ती० पुन्नाम्नोनरकात्त्रायतइतिपुत्रकं । अनेन पुत्रतनयशब्दयोर्नपौनरुक्त्यं । शि० कथमपीति । अस्यकथमपिनशक्नोमी पूर्वेणान्वयः ॥ २५ ॥ इतिविंशस्सर्गः ॥ २० ॥

[पा०] १ क. ग. च. पुलस्त्य. २ ग. राक्षसाधिपः. ३ ङ. च. छ. झ. ञ. श्रूयतेच. ४ ङ. झ. महाराज. ५ क. राक्षसेश्वरः. ६ क. ङ. छ.—ट. यदानखलु. च. यदामेखलु. घ. सदानखलु. ७ क. ग—ट. तौतु. ८ ङ. च. छ. ञ. राक्षसौच. घ. राक्षसौतु. ग. ज. राक्षसौसु. क. राक्षसौकामरूपिणौ. ९ ग. ङ. ज. छ. झ. ञ. सुतु. १० ङ. च. छ. ञ. रावणः. ११ ग. ङ. च. छ. झ. ञ, ट. शक्तोस्मि. १२ च. तौतु. क. तौहि. १३ क. ग. घ. छ. ज. ञ. ट. नैवदास्याम्यहंसुतम्. १४ इदमर्धं. क. ख. ङ. च. ज. ञ. ट. दृश्यते. १५ क. ङ. च. छ. तौतुराक्षस. १६ ग. ङ. च. छ. झ. ञ. ट. रन्यतरंयोद्धुं यास्यामि. १७ इदमर्धं क. ख. ङ. च. ज. ञ. ट. दृश्यते. १८ ग. ङ—ञ. इवमखेभिराज्य. क. इवमखाभिराज्य.

एकविंशः सर्गः ॥ २१ ॥

दशरथस्य राम प्रेषणवचनेन रुष्टे विश्वामित्रे वसिष्ठेन दशरथं प्रति रामविश्वामित्रमहिमनिवेदनपूर्वकं रामप्रेषणप्रार्थना ॥ १ ॥
ततो राज्ञा तत्प्रेषणाङ्गीकरणम् ॥ २ ॥

तच्छ्रुत्वा वचनं तस्य स्नेहपर्याकुलाक्षरम् ॥ समन्युः कौशिको वाक्यं प्रत्युवाच महीपतिम् ॥ १ ॥
पूर्वमर्थं प्रतिश्रुत्य प्रतिज्ञां हातुमिच्छसि ॥ राघवाणामयुक्तोऽयं कुलस्यास्य विपर्ययः ॥ २ ॥
यदीदं ते क्षमं राजन्गमिष्यामि यथागतम् ॥ मिथ्याप्रतिज्ञः काकुत्स्थ सुखी भव सबान्धवः ॥३॥
तस्य रोषपरीतस्य विश्वामित्रस्य धीमतः ॥ चचाल वसुधा कृत्स्ना विवेश च भयं सुरान् ॥ ४ ॥
त्रस्तरूपं स विज्ञाय जगत्सर्वं महानृषिः ॥ नृपतिं सुव्रतो धीरो वसिष्ठो वाक्यमब्रवीत् ॥ ५ ॥
इक्ष्वाकूणां कुले जातः साक्षाद्धर्म इवापरः ॥ धृतिमान्सुव्रतः श्रीमान्न धर्मं हातुमर्हसि ॥ ६ ॥
त्रिषु लोकेषु विख्यातो धर्मात्मा इति राघवः ॥ स्वधर्मं प्रतिपद्यस्व नाधर्मं वोढुमर्हसि ॥ ७ ॥
संश्रुत्यैवं करिष्यामीत्यकुर्वाणस्य राघव ॥ इष्टापूर्तवधो भूयात्तस्माद्रामं विसर्जय ॥ ८ ॥
कृतास्त्रमकृतास्त्रं वा नैनं शक्ष्यन्ति राक्षसाः ॥ गुप्तं कुशिकपुत्रेण ज्वलनेनामृतं यथा ॥ ९ ॥
एष विग्रहवान्धर्म एष वीर्यवतां वरः ॥ एष बुद्ध्याधिको लोके तपसश्च परायणम् ॥ १० ॥

च। महर्षिवद्भिः महर्षिश्रेष्ठः उज्ज्वलितस्ससमभवत् संजातज्वालोबभूव। मुनिपक्षे क्रोधवृद्धिः। पुष्पिताग्रावृत्तं "अयुजिनयुगरेफतोयकारोयुजि च नजौजरगाश्चपुष्पिताग्रा" इतिलक्षणात् ॥२९॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने विंशस्सर्गः ॥ २० ॥

एवं रामप्रेषणवृत्तान्तव्याकुलंराजानंवसिष्ठःप्रतिबोधयत्येकविंशे । स्नेहेन पुत्रस्नेहेन । पर्याकुलानि स्खलन्ति अक्षराणि यस्मिन् ॥ १ ॥ अर्थं प्रार्थितार्थं । अयंविपर्ययः प्रतिज्ञाहानिः । राघवाणामस्यकुलस्यायुक्तः ॥ २ ॥ इदं प्रतिज्ञातान्यथाकरणं । सुखीभवेतिव्यङ्ग्योक्तिः ॥ ३ ॥ रोषपरीतस्येति षष्ठी सप्तम्यर्थे । भयं पूर्वकोपेनान्यथाकृतजगदयमद्य किंकरिष्यतीतिभयं ॥ ४॥ त्रस्तरूपं अतिशयेनत्रस्तं । प्रशंसायांरूपप् । धीरः धीमान् ॥ ५ ॥ इक्ष्वाकूणामिति त्वमितिशेषः ॥ ६ ॥ धर्मात्माइतीत्यत्र वाक्येसंहिताऽनित्या । स्वधर्मं प्रतिश्रुतनिर्वाहरूपं ॥ ७ ॥ संश्रुत्येति । एवंकरिष्यामीतिसंश्रुत्य तथाऽकुर्वाणस्येत्यर्थः । इष्टंअश्वमेधान्तोयागः पूर्तं वाप्यादिनिर्माणं । तदुक्तं "वापीकूपतटाकादिप्रतिष्ठासेतुबन्धनम् । अन्नप्रदानमारामःपूर्तमित्यभिधीयते" इति । तयोर्वधः निष्फलत्वं ॥ ८ ॥ कृतास्त्रं शिक्षितास्त्रं । नशक्ष्यन्ति धर्षितुमितिशेषः । ज्वलनेन अग्निचक्रेण । अमृतमग्निचक्रेण सुरक्षितमितिभारतेव्यक्तं ॥ ९ ॥ राज्ञोभयनिवृत्तयेविश्वामित्रमाहात्म्यमाह—एषइति। परायणं परमस्थानं।

ति० अयंविपर्ययः प्रतिज्ञाहानिरूपः राघवाणामयुक्तः । यतोऽयमस्यकुलस्यविपर्ययोनाशः । इतिविपर्ययपदावृत्तिर्बोध्या ॥ २ ॥ ति० । मिथ्यावादी त्वं सुहृद्वृतस्सुखीभवेतिविपरीतलक्षणयोक्तिः ॥ ३ ॥ ति० धीमतइत्यत्र रोषंदृष्ट्वेतिशेषः ॥ ४ ॥ शि० अपरः नविद्यतेपरउत्तमोयस्मात् सोपरः सर्वश्रेष्ठः ॥ ६ ॥ ती० नकेवलंविश्वामित्रकृतसंरक्षणेनैवास्यरघुनाथस्यदुष्प्रसहत्वं किंतु स्वरूपपर्यालोचनयापीत्याह एषविग्रहवानिति । एषः रामभद्रः । वीर्यवतांवरइत्यनेन सहजंवीर्यंतस्यनैमित्तिकंभवति । एषबुद्ध्याधिकइत्यनेन सहजज्ञानशक्तिःप्रतिपादिता । परायणं परमप्राप्यं । तपसोः विविदिषासाधनत्वात् । "तमेवंवेदानुवचनेन ब्राह्मणाविविदिषन्तियज्ञेनदानेनतपसानाशकेन" इतिश्रुतेः । यद्वा एवंमहत्प्रभावेवर्णितेपि पुत्रबुद्ध्यातिरोहितरघुनाथप्रभावापरिज्ञानाद्दशरथस्य पक्षयोनोत्पद्यतइतितन्निवार्य राज्ञोभयानुवृत्ति राघवस्यभविष्यच्छ्रेयःप्राप्तिंच हृदिनिधाय गोप्तुर्विश्वामित्रस्यापि रक्षणसामर्थ्यमुपपादयितुमाह एषविग्रहवानित्यादिना । ति० न केवलंविश्वामित्रकृतसंरक्षणेनैवरामस्यदुर्धर्षत्वं किंतु स्वतोऽपीत्याह रामविश्वामित्रयोःसाम्यवर्णनेन एषइति । एषः रामो विश्वामित्रश्च । रामपक्षे विद्याधिकः सहजज्ञानशक्तिः । तपसः मननादेः

[पा०] १ ङ. च. छ. झ. सुहृद्वृतः. २ ङ. झ. देवानाचनयमहत्. ३ क. ग—ञ. रूपं तु ४ घ. आश्रुत्यैवंकरिष्यामीत्यकुर्वाणस्य वाक्यमकुर्वतः. ङ. झ. प्रतिश्रुत्यकरिष्येतिउक्तंवाक्यमकुर्वतः ५ क. ज. इष्टापूर्तवधो. ६ ङ. च. छ. झ. ञ. ट. विद्याधिको.

[1]एषोऽस्त्रान्विविधान्वेत्ति त्रैलोक्ये सचराचरे ॥ नैनमन्यः पुमान्वेत्ति न च वेत्स्यन्ति केचन ॥ ११ ॥
[2]न देवा ऋषयः केचिन्[3]नासुरा न च राक्षसाः ॥ गन्धर्वयक्षप्रवराः सकिंनरमहोरगाः ॥ १२ ॥
सर्वास्त्राणि [4]कृशाश्वस्य पुत्राः [5]परमधार्मिकाः ॥ कौशिकाय पुरा दत्ता यदा राज्यं प्रशासति ॥ १३ ॥
तेऽपि पुत्राः कृशाश्वस्य प्रजापतिसु[6]तासुताः ॥ नैकरूपा महावीर्या दीप्तिमन्तो जयावहाः ॥ १४ ॥
जया च सुप्रभा चैव दक्षकन्ये सुमध्यमे ॥ [7]ते सुवातेऽस्त्रशस्त्राणि शतं परमभास्वरम् ॥ १५ ॥
पञ्चाशतं सुताँल्लेभे [8]जया नाम परान्पुरा ॥ वधायासुरसैन्याना[9]ममेयान्कामरूपिणः ॥ १६ ॥
सुप्रभाऽजनयच्चापि [10]सुतान्पञ्चाशतं पुनः ॥ संहारान्नाम दुर्धर्षान्दुराक्रामान्बलीयसः ॥ १७ ॥
तानि चास्त्राणि वेत्त्येष यथावत्कुशिकात्मजः ॥ अपूर्वाणां च जनने शक्तो [11]भूयस्स धर्मवित् ॥ १८ ॥
[12]तेनास्य मुनिमुख्यस्य स[13]र्वज्ञस्य महात्मनः ॥ न किंचि[14]दस्त्यविदितं भूतं भव्यं च राघव ॥ १९ ॥
एवंवीर्यो महातेजा विश्वामित्रो [15]महायशाः ॥ न रामगमने राजन्संशयं [16]गन्तुमर्हसि ॥ २० ॥
तेषां निग्रहणे शक्तः स्वयं च कुशिकात्मजः ॥ [[17]धनुर्भृतोस्य शक्रस्तु बिभीयात्समरे विभो ॥]
तव पुत्रहितार्थाय त्वामुपेत्याभियाचते ॥ २१ ॥

इति [18]मुनिवचनात्प्रसन्नचित्तो रघुवृषभश्च मुमोद [19]भास्वराङ्गः ॥
गमनमभिरुरोच राघवस्य प्रथितयशाः कुशिकात्मजाय बुद्ध्या ॥ २२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे एकविंशः सर्गः ॥ २१ ॥

एतत्सदृशःकोपितपस्वीनास्तीत्यर्थः ॥१०॥ अस्त्रानिति पुंल्लिङ्गत्वमार्षं। सचराचरइत्यनेन सामस्त्यंगम्यते । एनं एतदवगतमस्त्रसमूहं ॥११॥ केचनेत्युक्तंप्रपञ्चयति—नदेवाइति ॥ १२ ॥ सर्वाविदितंकथमयंवेत्तीत्यत्राह—सर्वेति । कृशाश्वः प्रजापतिष्वेकः । परमधार्मिकाः परमधर्मनिष्ठाः । पापिनमस्पृशन्तइत्यर्थः । दत्ताः कृशाश्वेन । प्रशासति प्रशास्ति । अयमितिशेषः ॥ १३ ॥ पितृप्राशस्त्यमुक्त्वामातृप्राशस्त्यमाह—तेपीति। प्रजापतिः दक्षः । तस्यसुतयोःकन्ययोःसुताः ॥ १४ ॥ केप्रजापतिसुतेतत्राह—जयाचेति । सुवाते असुवातां । शस्त्राणि विशसनकर्तृणि । परमभास्वरमितिशताभिप्रायेणैकवचनं ॥ १५ ॥ काकत्यसूयतेत्यत्राह—पञ्चाशतमिति । अमेयान् अपरिच्छेद्यवैभवान् ॥ १६ ॥ संहारान् अन्वर्थसंहारसंज्ञान् । दुर्धर्षान् परैरभिभवितुमशक्यान् । दुराक्रामान् अमोघानित्यर्थः ॥ १७ ॥ यथावत् कार्त्स्न्येन। अपूर्वाणांअस्त्राणां। सः विदितसकलास्त्रः॥ १८—२१ ॥ भास्वराङ्गः भासनशीलः। प्रसन्नमुखइतियावत्। मुमोद मुमुदे । व्यत्ययात्परस्मैपदं ॥ २२ ॥ इत्येकविंशस्सर्गः ॥ २१ ॥

परायणंप्राप्यः । विश्वामित्रपक्षे तपसआश्रयः ॥ १० ॥ **ती०** एषोस्त्रान्विविधान्वेत्तीत्यनेन सर्वेश्वरस्यभूतलावतारसमये तदीयानिदिव्यायुधान्यपिसहैवागतानीतिगम्यते । तथाचवक्ष्यति " शरानानाविधाकाराधनुरायतविग्रहम् । अनुव्रजन्तिकाकुत्स्थंसर्वे पुरुषविग्रहाः " इति । नैनमन्यःपुमान्वेत्तीत्यत्र "सद्वैतसन्तंनविजानन्तिदेवाः " इतिश्रुतिःप्रमाणं । नचवेत्स्यन्तीत्यनेन नविदुश्चेतिगम्यते । **ति०** रामपक्षे अन्यःपुमान् अविद्यावृतःपुमानित्यर्थः । विश्वामित्रपक्षे एनं अस्त्रगणं ॥ ११ ॥ **ती० ति० शि० वि०** दत्ताः शिवेनेतिशेषः ॥ १३ ॥ **ति०** सूते सुवाते इत्यर्थः ॥ १५ ॥ **ति० वि०** अरूपिणः अदृश्यमानरूपान् ॥ १६ ॥ राघवस्य रामस्य । गमनबुद्ध्या अभिरुरोच स्वीचकार ॥ २२ ॥ इत्येकविंशस्सर्गः ॥ २१ ॥

[पा०] १ ग. एषोस्त्रंविविधं. २ ग. ङ. छ—ञ. नदेवानर्षयः. ३ ङ. च. छ. झ. नामराः. ४ क. ग. घ. च. ञ. भृशाश्वस्य. ५ क. ख. च. छ. ञ. परमदुर्जयाः. ६ क. सुतैस्समाः. ख. समास्सुताः. ७ ख. घ. ङ. झ. ञ. तेसूतेऽस्त्राणिशस्त्राणि. च तेसुवातेततोस्त्राणि. ज. तयोरपत्यान्यस्त्राणिशतं. ट. सुवातेस्त्राणिशस्त्राणि. ८ ङ झ. जयालब्धवरावरान्. च. छ. ञ. जयानामपरावरान्. ज. जयानामसुतान्पुरा. क. जयालब्धवरापुरा. ग. ट. जयानामवरान्पुरा. ९ क. मक्षयान्कामरूपिणः. ङ. च. छ. झ. ञ. मप्रमेयानरूपिणः. ख. मजेयान्कामरूपिणः. १० क. ख. ग. ङ. झ. पुत्रान्पञ्चाशतं. घ. च. ञ. पुत्रान्पञ्चशतं. ११ क. ख. घ—ञ. भूयश्च. १२ अयंश्लोकः क. ङ. ञ. दृश्यते. १३ ङ. च. छ. ञ. धर्मज्ञस्य. १४ ङ. छ. झ. दस्त्यविदितं. क. च. ञ. दस्याविदितं. १५ क. महातपाः. १६ ख. कर्तुमर्हसि. १७ इदमर्धं च. छ. ञ. दृश्यते. १८ ख. इतिमुनिवरवचनात्. १९ ङ. च. छ. झ. ञ. पार्थिवः.

द्वाविंशः सर्गः ॥ २२ ॥

विश्वामित्रेणदशरथप्रेपिताभ्यांरामलक्ष्मणाभ्यांसहस्वाश्रमंप्रतिप्रस्थानम् ॥ १ ॥ तथामध्येमार्गंक्षुत्पिपासापरिहारकत्वादिवहुगुणवत्ताप्रतिपादनपूर्वकंरामलक्ष्मणाभ्यांवलातिवलाख्यविद्याद्वयोपदेशः ॥ २ ॥

तथा वसिष्ठे ब्रुवति राजा [1]दशरथः सुतम् ॥ प्रहृष्टवदनो राममाजुहाव सलक्ष्मणम् ॥ १ ॥
कृतस्वस्त्ययनं [2]मात्रा पित्रा दशरथेन च ॥ पुरोधसा वसिष्ठेन मङ्गलैरभिमन्त्रितम् ॥ २ ॥
[3]स पुत्रं मूर्ध्न्युपाघ्राय राजा [4]दशरथः प्रियम् ॥ ददौ कुशिकपुत्राय सुप्रीतेनान्तरात्मना ॥ ३ ॥
[[5]ततो भूयो वसिष्ठेन मङ्गलैरभिमन्त्रितम् ॥ आदाय विप्रो हृष्टोऽभूत्रिदशा विज्वराऽभवन् ॥ ४ ॥]
ततो वायुः सुखस्पर्शो विरज[6]स्को ववौ तदा ॥ विश्वामित्रगतं रामं दृष्ट्वा राजीवलोचनम् ॥ ५ ॥
पुष्पवृष्टिर्महत्यासीद्देवदुन्दुभिनि[7]स्वनैः ॥ शङ्खदुन्दुभिनिर्घोषः प्रयाते तु महात्मनि ॥ ६ ॥
विश्वामित्रो ययावग्रे ततो रामो [8]महायशाः ॥ काकपक्षधरो धन्वी तं च सौमित्रिरन्वगात् ॥ ७ ॥
कलापिनौ धनुष्पाणी शोभयानौ दिशो दश ॥ विश्वामित्रं महात्मानं त्रि[9]शीर्षाविव पन्नगौ ॥
अनु[10]जग्मतुरक्षुद्रौ पितामहमिवाश्विनौ ॥ ८ ॥
तदा कुशिकपुत्रं तु धनुष्पाणी स्वलंकृतौ ॥ बद्धगोधाङ्गुलित्राणौ खङ्गवन्तौ महाद्युती ॥ ९ ॥

पदं । राघवस्यगमनमभिरुरोच राघवंकुशिकात्मजाय दातुंबुद्ध्याचिन्तयदित्युपस्कार्यं । पूर्ववत्पुष्पिताग्रावृत्तं ॥ २२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूपणे मणिमञ्जीराख्याने वालकाण्डव्याख्याने एकविंशस्सर्गः ॥ २१ ॥

अथप्रसन्नहृदयेनराज्ञारामविसर्जनंद्वाविंशे—तथेत्यादि । सलक्ष्मणंराममिति तयोरविनाभावज्ञानादितिभावः ॥ १ ॥ कृतेत्यादिश्लोकद्वयमेकान्वयं । पित्रा दशरथेन । स्वेनेतिशेपः । कृतस्वस्त्ययनं कृतमङ्गलानुष्ठानं । मङ्गलैर्मङ्गलसूक्तैः “स्वस्तिनोमिमीतां”इत्यादिभिः ॥२॥३॥अथयात्रायांशुभनिमित्तसंपत्तिंदर्शयति—तत इत्यादि । गतं अनुगतं ॥४॥ प्रयाते प्रयातुमुपक्रान्ते । देवदुन्दुभिनिस्वनश्चअवतारप्रयोजनोपक्रमत्वात् शङ्खदुन्दुभिनिर्घोषोदशरथीयः ॥५॥६॥ धन्वी धनुष्मान् । व्रीह्यादित्वादिनिः ॥ ७ ॥ कलापिनावित्यादिसार्धश्लोक एकान्वयः । कलापिनौ तूणीरधारिणौ । “कलापोभूपणेवर्हेतूणीरेसंहतावपि” इत्यमरः । शोभयानौ प्रकाशयन्तौ । आनेमुगभावश्छान्दसः । विश्वस्यमित्रंविश्वामित्रः । “मित्रेचर्पौ” इतिविश्वशब्दस्यदीर्घः । श्रुतिश्च “तस्योंविश्वंमित्रमासीद्यदिदंकिंचतस्माद्विश्वामित्रइत्याचक्षते” इति । प्रत्येकंतूणीरद्वयधारणाच्छिरोभ्यांच त्रिशीर्षाविवेत्युपमानं धनुस्तूणीरशरधरत्वाद्वा । अक्षुद्रौ अनल्परूपवीर्यादिवैभवौ ॥ ८ ॥ तदेत्यादिसार्धश्लोकद्वयमेकान्वयम् । वद्धं गोधाचर्मकृताङ्गुलित्राणंययोस्तौ तथा । गोधाहस्तत्राणमित्येके । द्युतिः सामान्यशोभा । श्रीः विशेपशोभा । शोभयेतां व्यत्ययेनलङर्थेलोट् । विश्वामित्रमनुयातौरामलक्ष्मणौ स्थाणुमनुयातौकुमा-

---

शि० आजुहाव । एतेनगुरुवाक्येराज्ञश्श्रद्धातिशयस्सूचितः ॥ १ ॥ ति० अभिमन्त्रितंवोधितमित्यर्थः । तद्बोधनंचयोगवासिष्ठेप्रसिद्धं ॥ २ ॥ ति० ववावित्यस्यपृष्ठतइतिशेषः ॥ ५ ॥ ती० पञ्चशीर्षाविवोरगावितिपाठे तूणीरद्वयंभुजद्वयंशिरश्चेतिप्रत्येकं पञ्चकस्यविद्यमानत्वात् पञ्चशीर्षावित्युक्तिः । ति० अत्रेदंतूणीरादिवैष्णवं गरुडेनदत्तंरामाय ताटकासुवाहुवधायमारीचस्यसमुद्रे पातनायच । नहिप्राकृतशस्त्रसाध्यमेतत् । तदुक्तंपाद्मे “पक्षीतार्क्ष्यस्समागम्यत्रीणिचास्त्राणिकार्मुकम् ; सर्वभूतैरदृश्यस्सन्दत्वाताभ्यांपुनर्ययौ” इति । अस्त्राणि शस्त्राणि खङ्गचर्मतूणीररूपाणि ॥ ८ ॥

[पा०] १ ङ. च. छ. झ. ञ. दशरथस्स्वयम्. घ. दशरथस्तदा. २ ख. मात्राकैकेय्याचसुमित्रया. * पुरोधसेत्यतःप्राक्.-वादेपुवादिभिर्विप्रैःसमङ्गलकृताशिपम् । आयान्तंसहसौमित्रिंप्रत्युद्गम्यचसस्वजे । अङ्कमारोप्यतौवीरौराजर्पिरमितप्रभः । एतदर्धत्रयं. ख. पाठेदृश्यते. ३ ख. सपुत्रौ. ४ ङ. च. छ. झ. ञ. दशरथस्तदा. ज. दशरथस्स्वयम्. ख. दशरथःप्रियौ. ५ अयंश्लोकः ख. दृश्यते. ६ क. ग—ञ. नीरजस्को. ७ क. ख. घ. निस्वनः. ८ ग. धनुर्धरः. ९ च. छ. ञ. ट. पञ्चशीर्षाविवोरगौ. १० अनुजग्मतुरित्यारभ्य. शोभयेतामनिन्दितौइत्यन्तं. ख. घ—झ. पाठेपु. अर्धानांक्रमेपौर्वापर्यंदृश्यते.

कुमारौ चारुवपुषौ भ्रातरौ रामलक्ष्मणौ ॥ अनुयातौ श्रिया दीप्त्या शोभयेतामनिन्दितौ ॥
स्थाणुं देवमिवाचिन्त्यं कुमाराविव पावकी ॥ १० ॥
अध्यर्धयोजनं गत्वा सरय्वा दक्षिणे तटे ॥ रामेति मधुरां वाणीं विश्वामित्रोऽभ्यभाषत ॥ ११ ॥
गृहाण वत्स सलिलं माभूत्कालविपर्ययः ॥ मन्त्रग्रामं गृहाण त्वं बलामतिबलां तथा ॥ १२ ॥
न श्रमो न ज्वरो वा ते न रूपस्य विपर्ययः ॥ न च सुप्तं प्रमत्तं वा धर्षयिष्यन्ति नैर्ऋताः ॥१३॥
न बाह्वोः सदृशो वीर्ये पृथिव्यामस्ति कश्चन ॥ त्रिषु लोकेषु वा राम न भवेत्सदृशस्तव ॥ १४ ॥
[बलामतिबलां चैव पठतस्तव राघव] ॥ न सौभाग्ये न दाक्षिण्ये न ज्ञाने बुद्धिनिश्चये ॥
नोत्तरे प्रतिवक्तव्ये समो लोके तवानघ ॥ १५ ॥
एतद्विद्याद्वये लब्धे भविता नास्ति ते समः ॥ बला चातिबला चैव सर्वज्ञानस्य मातरौ ॥ १६ ॥
क्षुत्पिपासे न ते राम भविष्येते नरोत्तम ॥ बलामतिबलां चैव पठतः पथि राघव ॥ १७ ॥
[गृहाण सर्वलोकस्य गुप्तये रघुनन्दन] ॥ विद्याद्वयमधीयाने यशश्चाप्यतुलं त्वयि ॥ १८ ॥
पितामहसुते ह्येते विद्ये तेजस्समन्विते ॥ प्रदातुं तव काकुत्स्थ सदृशस्त्वं हि धार्मिक ॥ १९ ॥
कामं बहुगुणाः सर्वे त्वय्येते नात्र संशयः ॥ तपसा संभृते चैते बहुरूपे भविष्यतः ॥ २० ॥

राविवाशोभेतामित्यर्थः । स्थाणुं रुद्रं पावकी पावकात्प्रादुर्भूतौस्कन्दविशाखौ । "ततोभवच्चतुर्मूर्तिःक्षणेनभगवान्प्रभुः ॥ स्कन्दोविशाखःशाकश्चनैगमेपश्चपृष्ठतः" इतिभारतोक्तेः । अचिन्त्यं अचिन्त्यवैभवम् ॥ ९ ॥ १० ॥ अधिकमर्धंयस्मिन्तदध्यर्धं अध्यर्धंच तत्योजनंच अध्यर्धयोजनं । सार्धयोजनमितियावत् । तावद्दूरगमनेनबालयोः क्षुत्तृट्पीडामाभूदितितन्निवर्तकविद्याद्वयोपदेशायाऽऽह्वयते—रामेति । मधुरां भक्तिपूर्वकोच्चारणात्रामनाम्नः श्रवणानन्दकरत्वाच्च ॥११॥ सलिलंगृहाण शुद्धाचमनंकुर्वित्यर्थः । विपर्ययः अतिक्रमः विलंबइतियावत् । मन्त्रग्रामं मन्त्रसमष्टिरूपां । इदंबलातिबलयोःप्रत्येकंविशेषणम् ॥ १२ ॥ तद्ग्रहणफलमाह—नेत्यादि । विपर्ययः अन्यथाभावः । भविष्यतीतिशेषः । सुप्तं त्वामितिशेषः ॥ १३ ॥ बलामतिबलांचपठतस्तवेतिशेषः । अस्ति स्यादि[illegible]र्थः । त्रिष्वित्यत्रसर्वगुणैर्निस्सीमत्वमुच्यते ॥ १[illegible] ॥ सौभाग्ये सौन्दर्ये । दाक्षिण्ये सामर्थ्ये । बुद्धिनिश्चये बुद्ध्याकार्यनिश्चये । समः भवतीतिशेष ॥ १५ ॥ सामान्येनोपसंहरति—एतदिति । तेसमो नास्ति नभविताचेत्यर्थः । मातरौ कारणभूते ॥१६॥ ते । भविष्येते भविष्यतः ॥ १७ ॥ अधीयानेत्वयि । भवेदितिशेषः ॥ १८ ॥ तेजस्समन्विते प्रभावसमन्विते । तवप्रदातुंत्वमेवसदृशोनान्यइतियोजना ॥ १९ ॥ एतदुपपादयति । काममिति । एते पूर्वोक्ताःसौभाग्यादयः कामं प्रकामं त्वयिसन्ति यद्यपि तथापि तपसासंभृते लब्धे एते विद्ये । त्वदुपदेशात् बहुरूपे लोकेबहुधा विस्तृते

ति० कालस्य अन्नभोजनकालस्य । पर्ययोतिक्रमः । गृहाणत्वमित्युपलक्षणं लक्ष्मणस्यापि । क्षुत्पिपासाशान्तिरूपफलस्योभयोरपिदर्शनादपेक्षणाच्च ॥ १२ ॥ ती० प्रमत्तं प्रमादयुक्तं । कार्यान्तरव्यासङ्गादिनाऽसावधानमितियावत् । ति० प्रमत्तंअकृताचमनादिकं ॥ १३ ॥ शि० कश्चनजातोनास्तिनचभविष्यति । अभवदित्यस्याप्युपलक्षणमेतत् । वाशब्दश्चार्थे ॥ १४ ॥ ति० सर्वज्ञानस्यमातराविति । अप्रतिभामूलक्षुधादिनिवृत्तिसामर्थ्यवत्त्वात्सर्वज्ञानजनिके ॥ १६ ॥ ति० अधीयानेत्वयीतिशेषः ॥ १८ ॥ ति० प्रदातुंममबुद्धिरितिशेषः । सदृशः तद्दानयोग्यइत्यर्थः ॥ १९ ॥ ती० बहुरूपे बहुफलप्रदे । ति० तपसा मदीयेनसंभृते पूर्णे । बहुरूपे शास्त्रोक्तफलादधिकफलप्रदे । यद्वा तपसा सर्वतपःप्राप्यत्वेनतपोरूपेणभवता । संभृते धृतेइत्यर्थः ॥२० ॥

[पा०] १ क—छ. झ. ञ. त्कालस्यपर्ययः. २ ट. नश्रमो. ३ क. रूपस्यापिसंक्षयः. ४ ज. नप्रसुप्तं. ५ क. ज. राक्षसाः. ५ क. च. ञ. वैराम ट. वैरामभविष्यतितवानघ. ७ इदमर्धं क. ख. ङ—ट. दृश्यते. ८ ङ. झ. पठतस्तात. ख. ट. पठतःपथि. ९ ङ. झ. नभवेत्सदृशस्तव. १० इदमर्धं. च. छ. ज. ञ. ट. दृश्यते. ११ च. छ. भद्रकाकुत्स्थप्राप्स्यसेरघुनन्दन. १२ ङ. च. छ. झ. श्चाथभवेद्भुवि. १३ क. च. छ. ञ. प्रदास्ये. १४ ङ. च. छ. झ. ञ. पार्थिव. १५ ख. वरगुणास्सर्वे. ज. महागुणास्सन्ति.

ततो रामो जलं स्पृष्ट्वा प्रहृष्टवदनः शुचिः ॥ प्रतिजग्राह ते विद्ये महर्षेर्भावितात्मनः ॥ २१ ॥
विद्यासमुदितो रामः शुशुभे भूरिविक्रमः ॥ सहस्ररश्मिर्भगवाञ्शरदीव दिवाकरः ॥ २२ ॥
गुरुकार्याणि सर्वाणि नियुज्य कुशिकात्मजे ॥ ऊषुस्तां रजनीं तत्र सरय्वां सुसुखं त्रयः ॥ २३ ॥
दशरथनृपसूनुसत्तमाभ्यां तृणशयनेऽनुचिते तदोषिताभ्याम् ॥
कुशिकसुतवचोऽनुलालिताभ्यां सुखमिव सा विबभौ विभावरी च ॥ २४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे द्वाविंशः सर्गः ॥ २२ ॥

त्रयोविंशः सर्गः ॥ २३ ॥

सरयूतीरेविश्वामित्रेणप्रातःप्रबोधनाच्छयनादुत्थितेनसलक्ष्मणेनरामेणस्नानाद्याह्निकनिर्वर्तनपूर्वकंविश्वामित्रसमीपागमनम् ॥ १ ॥ ततोविश्वामित्रेणराघवाभ्यांसहगङ्गासरयूसंगमेकामाश्रमंप्रत्यागमनम् । तथारामंप्रतितदाश्रमस्याङ्गशब्दवाच्यत्वेनिमित्तकथनपूर्वकं तत्रत्यमहर्षिपूजास्वीकरणेनतदहोरात्रंतत्रैवसुखनिवासः ॥ ३ ॥

प्रभातायां तु शर्वर्यां विश्वामित्रो महामुनिः ॥ अभ्यभाषत काकुत्स्थौ शयानौ पर्णसंस्तरे ॥ १ ॥
कौसल्या सुप्रजा राम पूर्वा सन्ध्या प्रवर्तते ॥ उत्तिष्ठ नरशार्दूल कर्तव्यं दैवमाह्निकम् ॥ २ ॥

भविष्यतः ॥ २० ॥ जलंस्पृष्ट्वा आचम्येत्यर्थः । भावितात्मनः ध्यातात्मस्वरूपात् ॥ २१ ॥ विद्यासमुदितः समुदितविद्यः । लब्धविद्यइतियावत् ॥२२॥ गुरुकार्याणि गुरौकर्तव्यानि पादसंवाहनादीनि। कुशिकात्मजे नियुज्य कृत्वा । त्रयः स्वयंतौचेतित्रयः । तत्रसरय्वां सरयूतीरे। सुसुखमूषुः । यद्वा एतदर्धस्यपूर्वेणान्वयः कुशिकात्मजे गुरुकार्याणिनियुज्य विद्यासमुदितोरामःशुशुभइति ॥ २३ ॥ चतुर्थ्यर्थे "बहुलंछन्दसि"इति षष्ठ्यर्थेचतुर्थी । दशरथपुत्रयोर्विभावरी सुखमिवविबभौ प्रभातेत्यर्थः। इवशब्दोवाक्यालङ्कारे। अत्र रामाय विद्यादानंलक्ष्मणस्याप्युपलक्षणं । पश्चाद्रामोवालक्ष्मणायोपदिदिशेतिबोध्यम्। पूर्ववत्पुष्पिताग्रावृत्तं ॥२४॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने द्वाविंशः सर्गः ॥ २२ ॥

अथैषामंगदेशप्राप्तिंपूर्ववृत्तकथनव्याजेनव्यंजयति त्रयोविंशे—प्रभातायामित्यादि। पर्णसंस्तरे पर्णमयास्तरणे। पूर्वसर्गान्तेतृणशयनस्योक्तत्वादत्रतृणमिश्रपर्णशयनेइतिबोध्यम् ॥ १ ॥ उभयप्रबोधनार्थमागतोविश्वामित्रोरामस्य "समयाबोधितःश्रीमान्सुखसुप्तःपरंतपः"इत्युक्तरीत्यानिद्राकालिकश्रियमवलोक्य तदासक्तस्सन्स्वागमनकार्यंविस्मृत्य इमंप्रसूतवतीकौसल्याकिंवातपस्तप्तवतीतिविस्मयते । कौसल्यासुप्रजाः । बोधनकाले विस्मितमुखोमुनिरासीत्। शोभनाप्रजापुत्रोयस्याःसासुप्रजाः "नित्यमसिच्प्रजामेधयोः" इत्यसिच् । त्वज्जननीकौसल्यासुपुत्रा। यद्वा स्वगतवचनं। एतज्जननीकौसल्यासुप्रजाः । "कौसल्याशुशुभेतेनपुत्रेणामिततेजसा"इतिवत् । यद्वा कौसल्यायाःसुप्रजइतिसंबोधनं। कर्मधारयेप्यार्षोसिच् "ढ्लोपेपूर्वस्यदीर्घोणः" इतिदीर्घः "सुपांसुलुक्"इत्यादिनापूर्वसवर्णदीर्घोवा। परशुरामव्यावृत्त्यर्थंविशेषणम् । कौसल्यादशरथयोरुभयोरपितपःफलत्वेनावतीर्णत्वेपिकथंकौसल्यासुप्रजाइत्युक्तिः। उच्यते । "मातापुत्रस्यभूयांसिकर्माण्यारभते"इत्युक्तरीत्या "मातृदेवोभव पितृदेवोभव"इतिवन्मातृप्राधान्योक्तेः"पितुःशतगुणंमाता"इतिस्मृतेश्च। यद्वा कौसल्यादशरथयोर्महदन्तरमस्ति।दशरथोहि "अहंवेद्मिमहात्मानं" इतिपरत्वेननिवेद्यमानेपित्तदकिंचि-

---

ति० कुशिकात्मजोविश्वामित्रः गुरुकार्याणि गुरुविषयाणिकार्याणि पूर्वोत्थायीपश्चात्संनिवेशीत्यादीनि तानिसर्वाणि नियुज्य उपदिश्येत्यर्थः ॥ २३ ॥ इतिद्वाविंशस्सर्गः ॥ २२ ॥

ति० सुप्रजाः शोभनपुत्रवती । अतस्तादृशस्यसुपुत्रस्यतवास्मिन्समयेनिद्राऽनुचिता ॥ २ ॥

[पा०] १ ग. ङ. झ. भीमविक्रमः. २ ङ. झ. कुशिकात्मजः. ३ घ. तीरेसरय्वाः. ४ ख. रचिते. ५ ख. ग. घ. सहोषिताभ्यां. ६ ङ. च. छ. झ. ञ. ट. विभावरी. ७ च. छ. ज. ञ. ट. काकुत्स्थंशयानं. ग. काकुत्स्थंशयने.

तस्यर्षेः परमोदारं वचः श्रुत्वा [1]नरोत्तमौ ॥ स्नात्वा कृतोदकौ वीरौ जेपतुः परमं जपम् ॥ ३ ॥
कृताह्निकौ महावीर्यौ विश्वामित्रं तपोधनम् ॥ अभिवाद्या[2]भिसंहृष्टौ [3]गमनायाभितस्थतुः ॥ ४ ॥
तौ [4]प्रयातौ महावीर्यौ दिव्यां त्रिपथगां नदीम् ॥ ददृशाते ततस्तत्र सरय्वाः सङ्गमे शुभे ॥ ५ ॥
तत्राश्रमपदं पुण्यमृषीणामु[5]ग्रतेजसाम् ॥ बहुवर्षसहस्राणि [6]तप्यतां परमं तपः ॥ ६ ॥
तं दृष्ट्वा परमप्रीतौ राघवौ पुण्यमाश्रमम् ॥ [7]ऊचतुस्तं महात्मानं विश्वामित्रमिदं वचः ॥
[कौतूहलात्तौ धर्मज्ञौ वीर्यवन्तं तपोधनम्] ॥ ७ ॥
कस्यायमाश्रमः पुण्यः को न्वस्मिन्वसते पुमान् ॥ भगवञ्श्रोतुमिच्छावः परं कौतूहलं हि नौ ॥८॥
तयोस्तद्वचनं श्रुत्वा प्रहस्य मुनिपुङ्गवः ॥ अब्रवीच्छ्रूयतां राम यस्यायं पूर्व आश्रमः ॥ ९ ॥
कन्दर्पो मूर्तिमानासीत्काम इत्युच्यते बुधैः ॥ १० ॥
तपस्यन्तमिह स्थाणुं नियमेन समाहितम् ॥ कृतोद्वाहं तु देवेशं गच्छन्तं समरुद्गणम् ॥
धर्षयामास दुर्मेधा हुंकृतश्च महात्मना ॥ ११ ॥

त्कृत्य "दुःखेनोत्पादितश्चायंनरामंनेतुमर्हसि" इतिरामेकेवलंपुत्रत्वंमन्वानोवसिष्ठसन्धुक्षितहृदयःरामंप्रेपितवान्।कौसल्यातुकेवलवात्सल्यपरापिद्रुतंसादरंप्रेपितवती। तदिदंतारतम्यमवलोक्यमुदितहृदयोमुनिराह्—कौसल्यासुप्रजाइति । मातृवाक्यंपितृवाक्यंचपालनीयमित्यमुंधर्मलोकेप्रवर्तयितुंस्वयंतदनुष्ठातृत्वेनसुप्रजाइत्युक्तं। अथक्रमेणगुणान्तरावगाहान्निस्तीर्यप्रबोधयति—रामेत्यादि। रामेत्यनेनस्वापकालिकसौन्दर्यमुच्यते। पूर्वासन्ध्याप्रवर्तते पूर्वासन्ध्यादिवाकरमिवरामदिवाकरंत्वांकौसल्याजनितवतीतिभावः । यद्वा मातृवत्पूर्वसन्ध्यामप्युपलालयेति । यद्वा पूर्वासन्ध्याप्रवर्तते आदित्यस्येवभवतोऽर्यंविरोधिनिरसनारंभसमयइति । यद्वा पूर्वासन्ध्याप्रवर्तते अज्ञानान्धकारोगतः भगवत्साक्षात्कारोमेजातः अद्यमेसुप्रभातमिति। यद्वा जगतः सर्वस्यभगवदवतारात्सत्वोद्रेककालोजातः "अद्यमेसफलंजन्मसुप्रभाताचमेनिशा ॥ यदुन्निद्राब्जपत्राक्षंविष्णोर्द्रक्ष्याम्यहंमुखम्" ॥ उत्तिष्ठ निद्राश्रीरवलोकिता प्रबोधश्रियमप्यवलोकितुमिच्छामि। नरशार्दूल नरश्रेष्ठ। नरश्रेष्ठतयाभवतापिसन्ध्योपास्या "यद्यदाचरतिश्रेष्ठस्तत्तदेवेतरोजनः" इत्युक्तेः। उत्तिष्ठनरशार्दूल आश्रितविरोधिनिरसनशीलस्यकिंनिद्रावकाशोप्यस्ति। नरशार्दूल मद्यज्ञनिर्वाहक। उत्थानप्रयोजनमाह्—कर्तव्यंदैवमाह्निकं । देवेनसर्वेश्वरेणविहितंनित्यकर्मकर्तव्यम् । यद्वा देवशब्दोभवदर्थकः । भवदीयमाह्निकंभवदाज्ञारूपंकर्म मयाकर्तव्यं।तत्स्वीकुर्वित्यर्थः। यद्वा दैवं देवाराधनभूतं। आह्निकं अह्नानिर्वर्त्यमेकसुत्यात्मकंकर्मयज्ञात्मकं । कर्तव्यमित्यर्थः ॥२॥ परमोदारं परमगंभीरमित्यर्थः। कृतोदकौ कृतार्घ्यप्रक्षेपौ । यद्वा कृतदेवार्पितर्पणौ। जप्यतइति जपः सं। गायत्रीमितियावत् । तस्याएवपरमत्वात्। "नसावित्र्याःपरंजप्यं"इतिवचनात् ॥ ३ ॥ अह्निभवमाह्निकं। कालाट्ठञ्। कृतप्रातःकृत्यावित्यर्थः। संध्योपासनब्रह्मयज्ञसमिदाधानानिप्रातःकृत्यानि । अभितस्थतुः अभिमुखंस्थितौ ॥४॥ ततः तस्माद्देशात्। प्रयातौ तत्र प्रसिद्धे। सरय्वाःसङ्गमे त्रिपथगां गङ्गां नदीं ददृशाते ॥ ५ ॥ तत्र गङ्गासरय्वोःसंगमे। ददृशातेइत्यनुषज्यते । तप्यतां तपतां । कर्तरियत्छान्दसः ॥ ६ ॥ ७ ॥ वसते वसति ॥ ८॥ प्रश्नमाधुर्यात्प्रहासः । यद्वा मानुषभावनटनात् । यस्यायमाश्रमः सश्रूयतामितियोजना । रामेतिसंबोधनं प्राधान्यात् ॥९॥ कंदर्पइत्यर्धं । यःकामइत्युच्यते सकन्दर्पः । पुरामूर्तिमानासीत् ॥ १० ॥ सार्धश्लोकः। तपस्यन्तं तपश्चरन्तम्। "कर्मणोरोमन्थतपोभ्यांवर्तिचरोः"इतिक्यङ्। इह आआ-

---

ति० प्रहस्य बालकवचनश्रवणजसंतोषाद्धासः ॥ ९ ॥ **ती०** कंदर्पःकुत्सितदर्पः ॥१०॥ **ती०** कृतोद्वाहंकरिष्यमाणोद्वाहं। यद्वाकृतोद्वाहंगच्छन्तंउद्वाहंकृत्वागमिष्यन्तं । वर्तमानसामीप्येभविष्यतिलट् । **शि०** कृतोद्वाहं कृतः उदि नराकृतिद्विभुजपरमात्मा-

[पा०] १ ख. ग. घ. नृपात्मजौ. २ ङ. झ. द्यातिसंहृष्टौ. क. ज. द्योपसंहृष्टौ. ३ क—घ. च. छ. ज. ञ. ट. गमनायोप. ४ ग. ङ. झ. ञ. प्रयान्तौ. ५ क—घ. मध्यतेजसाम्. ङ. च. छ. झ. ञ. भावितात्मनाम्. ६ च. ञ. तपतां. ७ ख. ज. ऊचतुस्तां. ख. ऊचतुस्तांमहात्मानौ. ८ इदमर्धं ख. दृश्यते.

अवदग्धस्य रौद्रेण चक्षुषा रघुनन्दन ॥ व्यशीर्यन्त शरीरात्स्वात्सर्वगात्राणि दुर्मतेः ॥ १२ ॥
तस्य गात्रं हतं तत्र निर्दग्धस्य महात्मना ॥ अशरीरः कृतः कामः क्रोधाद्देवेश्वरेण हि ॥ १३ ॥
अनङ्ग इति विख्यातस्तदाप्रभृति राघव ॥ स चाङ्गविषयः श्रीमान्यत्राङ्गं प्रमुमोच ह ॥ १४ ॥
तस्यायमाश्रमः पुण्यस्तस्येमे मुनयः पुरा ॥ शिष्या धर्मपरा नित्यं तेषां पापं न विद्यते ॥ १५ ॥
इहाद्य रजनीं राम वसेम शुभदर्शन ॥ पुण्ययोः सरितोर्मध्ये श्वस्तरिष्यामहे वयम् ॥ १६ ॥
अभिगच्छामहे सर्वे शुचयः पुण्यमाश्रमम् ॥ इह वासः परोऽस्माकं सुखं वत्स्यामहे निशाम् ॥
स्नाताश्च कृतजप्याश्च हुतहव्या नरोत्तम ॥ १७ ॥
तेषां संवदतां तत्र तपोदीर्घेण चक्षुषा ॥ विज्ञाय परमप्रीता मुनयो हर्षमागमन् ॥ १८ ॥
अर्घ्यं पाद्यं तथाऽऽतिथ्यं निवेद्य कुशिकात्मजे ॥ रामलक्ष्मणयोः पश्चादकुर्वन्नतिथिक्रियाम् ॥१९॥
सत्कारं समनुप्राप्य कथाभिरभिरञ्जयन् ॥ यथार्हमजपन्सन्ध्यामृषयस्ते समाहिताः ॥ २० ॥
तत्रवासिभिरानीता मुनिभिः सुव्रतैः सह ॥ न्यवसन्सुसुखं तत्र कामाश्रमपदे तदा ॥ २१ ॥

श्रमे तपस्यन्तं । नियमेन अविच्छेदेन । समाहितं समाधिमन्तं । कृतोद्वाहं कृतपार्वतीपरियणं । गच्छन्तं शुश्रूषणार्थपार्वतींप्राप्नुवन्तं । देवेशं स्थाणुंरुद्रं । दुर्मेधाः कामोधर्षयामास । कृतोद्वाहमितिक्रियाविशेषणं । यदाऽयंकृतोद्वाहोभवति तदातं पार्वत्यांसाभिलाषचित्तमकरोदित्यर्थः । समरुद्रणमित्यपिक्रियाविशेषणं । तदनुमतिपूर्वकमित्यर्थः । महात्मनाहुंकृतश्वासीत् ॥ ११ ॥ व्यशीर्यन्तविशीर्णानि । शृहिंसायांकर्तरिश्यन् ॥ १२ ॥ तत्र तदा । महात्मनानिर्दग्धस्यशरीरंहतं । अतःकामोशरीरःकृतः ॥ १३ ॥ कामस्तदाप्रभृतिअनङ्गइतिविख्यातः सोङ्गविषयः अङ्गदेशश्च विख्यातः । तत्रहेतुमाह— यत्रेति । यस्मात्कारणादत्रकामोङ्गंमुमोच तस्मादयंदेशोङ्गइत्युच्यतइत्यर्थः ॥ १४ ॥ तस्य कामस्य स्थाणोर्वा । अयमाश्रमःइमेमुनयः तस्य । पुरा पूर्वकालमारभ्य । सन्तःनपरंपरयाशिष्याः । अतएवधर्मपराः । अतएव चतेषांपापंनविद्यते । पूर्वंरुद्रशिष्यत्वेऽपिसंप्रतितच्छिष्यत्वकृतपापंनविद्यतइत्यर्थः । एतेनप्रश्नद्वयस्याप्युत्तरमुक्तं । हिमवतितपस्यन्तंकामोऽधर्षयदित्युक्तिःपुराणान्तरे कल्पान्तरमपेक्ष्य ॥ १५ ॥ इह अङ्गविषये । तरिष्यामहे । गङ्गामितिशेषः ॥ १६ ॥ स्नाताः । अतएवशुचयोभूत्वापुण्यमाश्रममभिगच्छामहे । व्यत्ययात्तङ् ॥ १७ ॥ तेषांसंवदतां तेषुसंवदत्सु । तपसा दीर्घेण विप्रकृष्टार्थग्रहणसमर्थेन । चक्षुषा ज्ञानेन । विज्ञाय दृष्ट्वा । तेषामागमनंताटकादिनिरासनिमित्तंतपोजन्यज्ञानेनविदित्वेत्यर्थः । हर्षं हर्षपुलकं ॥ १८ ॥ अर्घ्यं पूजार्थमुदकं । पाद्यं पादार्थमुदकं "पादार्घाभ्यां च"इतियत्प्रत्ययः । आतिथ्यं आचमनीयपूर्वकंभोज्यप्रदानं । अतिथिक्रियां अतिथिपूजां ॥ १९ ॥ सत्कारं कुशलप्रश्नादिकं । विश्वामित्रात्समनुप्राप्य अभिरञ्जयन् अभ्यरञ्जयन् । अतिथिभूतानितिशेषः । क्रमेण सायंसन्ध्यागमेसति । ते तद्वासिनोविश्वामित्रादयश्च । छत्रिन्यायेनऋषयइत्युक्तं । समाहिताः अनन्यपराः । सन्ध्यां अहोरात्रयोःसंधिं । अत्यन्तसंयोगे द्वितीया । यथार्हं यथायोग्यं । यथाशक्तीतियावत् । "सहस्रपरमांदेवींशतमध्यांदशावरां"इतिवचनात् । अजपन् गायत्रीमितिशेषः ॥ २० ॥ आनीताः निद्रायैस्वाश्रमंप्रा-

रघुनाथविचारे वाहः प्रयत्नोयेनतं । उच्छब्दस्यपरमात्मवाचकत्वमुपनिषत्सुप्रसिद्धं । तदर्थस्तु उद्यते तात्पर्यवृत्त्यावेदैःप्रतिपाद्यते असाविति । वि० कृतोद्वाहं समाधेःकृतव्युत्थानं कालोचितविलासदेशंगच्छन्तं ॥ ११ ॥ ति० रुद्रेण ज्ञातापराधेन । अवध्यातो दृष्टश्च । शि० अथ हुंकारानन्तरं । कामइतिशेषः ॥ १२ ॥ शि० उपलक्षणविधयारामलक्ष्मणयोरपिसांध्यप्रवृत्तिर्बोध्या ॥२०॥ इतित्रयोविंशस्सर्गः ॥ २३ ॥

[पा०] १ क. ङ—ज. अवध्यातस्य. ग. घ. दग्धस्यतस्यरौद्रेण. ख. ङ. झ. ट. अवदग्धस्तुरुद्रेण. च. छ. झ. अवध्यातश्चरुद्रेण. २ च. छ. ज. तस्याङ्गान्यपतत्राम. ३ झ. महात्मनः. ४ ख. क्रोधाद्देवेनचक्षुषा. ५ क. ख. ग. ङ—ज. समुमोच. ६ ख. ङ. छ—ट. वीर. क. वीराः. च. धीराः. ७ क. इहैवसत्कृता. ८ ट. वत्स्यामः. ९ इदमर्धं च—ट. दृश्यते. १० ज. प्रथमंप्राप्य. ११ ख. घ. ट. न्सन्ध्यांमुनयस्ते. १२ छ. रासीनाः. १३ ज. झ. तथा.

कथाभिरभिरामाभिरभिरामौ नृपात्मजौ ॥ रमयामास धर्मात्मा कौशिको मुनिपुङ्गवः ॥ २२ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे त्रयोविंशः सर्गः ॥ २३ ॥

चतुर्विंशः सर्गः ॥ २४ ॥

प्रातःकृताह्निकैर्विश्वामित्रादिभिस्त्रिभिर्गङ्गातरणायनौकारोहणेनप्रस्थानम् ॥ १ ॥ मध्येगङ्गंतुमुलजलघोषश्राविणारामेण-विश्वामित्रंप्रतितत्कारणप्रश्नः ॥ २ ॥ तंप्रतितेनसरयूत्पत्तिप्रकारकथनपूर्वकंतस्यमहाशब्दस्यतदीयत्वकथनम् ॥ ३ ॥ गङ्गामुत्तीर्यदक्षिणतीरंगतेपुतेषुविश्वामित्रेणरामंप्रतितत्रत्यमहावनप्रदेशस्यपुरामलदकरूशदेशत्वकथनपूर्वकंतयोस्तत्पदप्रवृत्तिनिमित्त-कथनम् ॥ ४ ॥ तथातयोर्जनपदयोस्ताटकयाविध्वंसननिवेदनपूर्वकंतद्ध्वंसनचोदनम् ॥ ५ ॥

ततः प्रभाते विमले कृत्वाऽऽह्निकमरिंदमौ ॥ विश्वामित्रं पुरस्कृत्य नद्यास्तीरमुपागतौ ॥ १ ॥
ते च सर्वे महात्मानो मुनयः संशितव्रताः ॥ उपस्थाप्य शुभां नावं विश्वामित्रमथाब्रुवन् ॥ २ ॥
आरोहतु भवान्नावं राजपुत्रपुरस्कृतः ॥ अरिष्टं गच्छ पन्थानं मा भूत्कालविपर्ययः ॥ ३ ॥
विश्वामित्रस्तथेत्युक्त्वा तानृषीनभिपूज्य च ॥ ततार सहितस्ताभ्यां सरितं सागरंगमाम् ॥ ४ ॥
ततः शुश्राव वै शब्दमतिसंरंभवर्धितम् ॥ मध्यमागम्य तोयस्य सह रामः कनीयसा ॥ ५ ॥
अथ रामः सरिन्मध्ये पप्रच्छ मुनिपुङ्गवम् ॥ वारिणो भिद्यमानस्य किमयं तुमुलो ध्वनिः ॥ ६ ॥
राघवस्य वचः श्रुत्वा कौतूहलसमन्वितः ॥ कथयामास धर्मात्मा तस्य शब्दस्य निश्चयम् ॥ ७ ॥
कैलासपर्वते राम मनसा निर्मितं सरः ॥ ब्रह्मणा नरशार्दूल तेनेदं मानसं सरः ॥ ८ ॥
तस्मात्सुस्राव सरसः साऽयोध्यामुपगूहते ॥ सरःप्रवृत्ता सरयूः पुण्या ब्रह्मसरश्च्युता ॥ ९ ॥

पिताः । कामाश्रमपदे कामदाहात्कामाश्रमनामकस्य पदे स्थाने ॥ २१ ॥ कथाभिः तदाश्रमवैभवपराभिः ॥ २२ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने त्रयोविंशः सर्गः ॥ २३ ॥

एवं कामाश्रमपदं रामचरणनलिनविन्यासेनकृतार्थीकृत्य ताटकावनमपिनिष्कल्मषीकर्तुं रामंप्रापयतिमुनिश्चतुर्विंशे—ततइत्यादि । विमले सूर्योदयेइत्यर्थः । नद्याःगङ्गायाः ॥ १ ॥ उपस्थाप्य आनाय्य ॥ २ ॥ राजपुत्राभ्यांपुरस्कृतः पूजितः । ताटकावधाभिप्रायेणाहुः—अरिष्टमिति । अरिष्टं शुभंयथाभवतितथा । "अरिष्टंपापशुभयोः"इतिहलायुधः । कालविपर्ययः कालविलंब इतियावत् ॥ ३ ॥ ततार तरितुंप्रवृत्तः । सरितं गङ्गां सागरंगच्छतीतिसागरंगमां । खश्प्रकरणे "गमेस्सुप्युपसंख्यानं" इतिखश् ॥४॥ अतिसंरंभेण तरङ्गपरस्परसंघट्टजक्षोभेण । वर्धितं अतिप्रवृद्धं ॥ ५ ॥ भिद्यमानस्य परस्परंमिलितस्य । वारिणः । तुमुलः निबिडोयं ध्वनिः । किंवारिसंभेदकृतउतान्यकृतइतिप्रश्नः ॥ ६ ॥ निश्चयं कारणनिश्चयं ॥ ७ ॥ अस्यध्वनेःकारणंवारिसंभेदएवेतिवक्ष्यन्कस्यावारिणइतिप्रक्ष्यतीतिमत्वासरय्वाइतिवक्तुंसरयूवैभवमाह—कैलासेति । कैलासपर्वते कुबेरभवने । ब्रह्मणामनसानिर्मितंसरोस्ति । तेन मनसानिर्मितत्वेन । इदंसरः मानसमित्युच्यते ॥ ८ ॥ उपगूहते आवृत्यप्रवहते । अयोध्यायाःपश्चिमभागमा-

---

शि० विमले समूलमलनिवर्तकगङ्गाजले ॥ १ ॥ शि० अरिष्टंनिर्विघ्नंयथाभवतितथापन्थानंगच्छ ॥ ३ ॥ ति० सागरंगमां सागरंगच्छति जलपूर्णत्वरूपस्वरूपंप्रापयति तां । अन्तर्भावितण्यर्थः । अगस्त्यशोषितस्यसमुद्रस्यगङ्गयापूरणंकृतमितिप्रसिद्धेः ॥ ४ ॥ ति० वि० पुण्यत्वेहेतुर्ब्रह्मसरश्च्युतत्वं ॥ ९ ॥

[पा०] १ ट. तेतुसर्वे. २ च. छ. ञ. शिवां. ३ ख. ट. शुभांनावं. ४ क—छ. झ. ञ. त्कालस्यपर्ययः. ५ ङ. च. झ. ञ. तानृषीन्प्रति. ६ ड. झ. तत्रशुश्राववैशब्दंतोयसंरंभवर्धितम्. च. छ. ञ. ततश्शुश्रुवतुश्शब्दंतोयसंरंभवर्धितम्. क. ततश्शुश्रावतंशब्दंनद्यास्संरंभवर्धितम्. ज. ततश्शुश्रुवतुश्शब्दंनद्यास्संरंभवर्धितम्. ग. घ. ततश्शुश्रावतंशब्दमतिसंरंभवर्धितम्. ट. ततश्शुश्रावस्तेशब्दंगानिसंरंभवर्धितम्. ७ ङ—ट. तोयस्यतस्यशब्दस्यनिश्चयम् । ज्ञातुकामोमहातेजास्सहरामःकनीयसा ८ रामस्यवचनं. ९ क. ग—छ. झ. ञ. ट. समन्वितम्. १० ङ. झ. वरम्.

तस्यायमतुलः शब्दो जाह्नवीमभिवर्तते ॥ वारिसंक्षोभजो राम प्रणामं नियतः कुरु ॥ १० ॥
ताभ्यां तु तावुभौ कृत्वा प्रणाममतिधार्मिकौ ॥ तीरं दक्षिणमासाद्य जग्मतुर्लघुविक्रमौ ॥ ११ ॥
स वनं घोरसंकाशं दृष्ट्वा [1]नृपवरात्मजः ॥ अविप्रहतमैक्ष्वाकः पप्रच्छ मुनिपुङ्गवम् ॥ १२ ॥
अहो वनमिदं दुर्गं झिल्लिकागण[2]नादितम् ॥ भैरवैः श्वापदैः [3]पूर्णं शकुन्तै[4]र्दारुणारुतैः ॥ १३ ॥
नानाप्रकारैः शकुनैर्वाश्यद्भिर्भैरवैः स्वनैः ॥ सिंहव्याघ्रवराहैश्च वारणै[5]श्चोपशोभितम् ॥ १४ ॥
धवाश्वकर्णककुभै[6]र्मरुतिन्दुकपाटलैः ॥ संकीर्णं बदरीभिश्च [7]किं न्वेतद्दारुणं वनम् ॥ १५ ॥
तमुवाच महातेजा विश्वामित्रो महामुनिः ॥ श्रूयतां वत्स काकुत्स्थ यस्यैतद्दारुणं वनम् ॥ १६ ॥
एतौ जनपदौ स्फीतौ पूर्वमास्तां नरोत्तम ॥ मलदाश्च करूशाश्च देवनिर्माणनिर्मितौ ॥ १७ ॥
पुरा वृत्रवधे राम मलेन समभिप्लुतम् ॥ क्षुधा चैव सहस्राक्षं ब्रह्महत्या समाविशत् ॥ १८ ॥
तमिन्द्रं [8]स्नापयन्देवा ऋषयश्च तपोधनाः ॥ कलशैः स्नापयामासुर्मलं चास्य प्रमोचयन् ॥ १९ ॥
[9]इह भूम्यां मलं दत्वा [10]दत्वा कारूशमेव च ॥ [11]शरीरजं महेन्द्रस्य ततो हर्षं प्रपेदिरे ॥ २० ॥
निर्मलो निष्करूशश्च [12]शुचिरिन्द्रो यदाऽभवत् ॥ [13]ददौ देशस्य सुप्रीतो वरं प्रभुरनुत्तमम् ॥ २१ ॥

रभ्यउत्तरदिग्भागेन पूर्वभागमागत्याङ्गदेशेगङ्गयासह-युज्यतेसरयूः । तयोर्नद्योःसंभेदेस्थाण्वाश्रमः । तस्मात् सरयूयुक्तगङ्गातरणदशायांसरयूजलमुन्नतात्भागीरथ्यांपततीतितस्यध्वनिरितिज्ञेयं।सरयूशब्दंनिर्वक्ति–सरइति। सरसोयौतीतिसरयूः। पाठान्तरंसरसोयातीतिसरयूः।सकारस्य शकन्ध्वादित्वात्पररूपं "ऊङुतः"इति स्त्रीप्रत्ययऊकारः। कस्मात्सरसःप्रवृत्तेत्यतआह—ब्रह्मसरश्च्युतेति ॥९॥ यागङ्गामभिवर्तते गङ्गयासंयुज्यते । अयमतुलःशब्दःतस्याःवारिसंक्षोभजः। सन्धिरार्षः । नियतः नियतमनस्कःसन् । ताभ्यांनदीभ्यां । प्रणामं कुरु । कोयंध्वनिरितिरामेणपृष्टे सरयूवारिसंघट्टजइतिवक्तव्ये तदुत्पत्तिकथनंनन्तव्यत्वाय ॥१०॥ नदीसंभेदेरात्रिमुषित्वाप्रातर्दक्षिणाभिमुखागङ्गांतेरुः । ततोगङ्गादक्षिणतीरेताटकावनमितिज्ञेयं ॥ ११ ॥ संकाशतइति संकाशः। घोरसंकाशं घोररूपमितियावत् । अविप्रहतं अक्षुण्णं जनसंचाररहितमित्यर्थः ॥१२॥ अहोइत्यादिश्लोकत्रयं । झिल्लिका भूतलाद्यन्तरितकीटविशेषः । भैरवैः भयंकरैः । श्वापदैः क्रूरमृगैः । शकुन्तैः भासैः । "शकुन्तौभासपक्षिणौ" इत्यमरः । शकुनैः पक्षिभिः। वाश्यद्भिः कुत्सितंशब्दायमानैः। धवः अश्वकर्णः ककुभः मरुतिन्दुकः पाटलः इदंवनमेतादृशं । अहोइदंवनंदारुणं । किंनु किंनामकमित्यन्वयः ॥ १३ ॥ १४ ॥ ॥ १५ ॥ एतद्दारुणंवनं यस्यप्राणिनः सश्रूयतामिति योजना ॥१६॥ स्फीतौ प्रवृद्धधनधान्यौ । मलदाश्च करूशाश्च मलदकरूशनामधेयौ । अवयवबहुत्वाद्बहुवचनं मत्स्याःपाञ्चालाइतिवत् । देवनिर्माणेन देवनिर्माणतुल्यनिर्माणेन । निर्मितौ देवलोकसमसंस्थानावित्यर्थः ॥ १७ ॥ मलदकरूशसंज्ञानिमित्तमाह—पुरेत्यादि । वृत्रवधेकृतेसति मलेन अशुचित्वेन क्षुधा बुभुक्षयाच समभिप्लुतं व्याप्तं इन्द्रं ब्रह्महत्या समाविशत् । ब्रह्महत्यावशेनमलक्षुधाविन्द्रस्याभूतामित्यर्थः ॥ १८ ॥ स्नापयन् गङ्गादितीर्थेषुस्नापयन् । पुनर्मन्त्रपूतैः कलशैः कलशोदकैः । स्नापयामासुः । तेन स्नापनेन । अस्य इन्द्रस्य । मलं चकारात्कारूशं । प्रमोचयन् प्रामोचयन् ॥ १९ ॥ करूशमेवकारूशं । स्थानप्रमाणात् । क्षुधमित्यर्थः ॥ २० ॥ शुचिः ब्रह्महत्यातःपूतः ॥ २१ ॥

शि० तस्येतिसामान्येनपुंसकं ॥ १० ॥ **शि०** किं किंनामकंकिंस्वामिकंचेत्यर्थः । तुश्चार्थे ॥ १५ ॥ **तीर्था०** मलदाश्चकरूशाश्चेतिबहुवचनंआपोदाराइतिवच्छन्दस्स्वभावकृतं ॥ १७ ॥

[पा०] १ ख. ङ. झ. ट. नरवरात्मजः. २ ङ—ञ. संयुतम्. ३ ख. ग. ङ. च. छ. झ. ञ. कीर्णं. ४ क. च. छ. ञ. दारुणस्वनैः. ङ. झ. दारुणारवैः. ज. ट. दारुणैरुतैः. ५ ङ. च. छ. झ. ञ. श्वापिशोभितम्. क. रुपशोभितम्. ६ क. ख. ग. ङ. च. छ. झ. ञ. बिल्वतिन्दुक. ७ ट. किंत्वेतत्. ग. ङ. झ. किंन्विदं. ८ ङ. झ. मलिनंदेवाः. ९ क. ग. च. छ. ञ. सोस्मिन्देशेमलंत्यक्त्वा. १० ङ. झ. देवाः. ११ क. च. छ. ञ. वृत्रारिर्द्रोहसंभूतंततोहर्षमवाप्तवान्. १२ ङ. झ. शुद्धइन्द्रोयथा. १३ ङ. च. छ. झ. ञ. ततोदेशस्यसुप्रीतोवरंप्रादादनुत्तमम्.

इमौ जनपदौ स्फीतौ ख्यातिं लोके गमिष्यतः ॥ मलदाश्च करूशाश्च ममाङ्गमलधारिणौ ॥ २२ ॥
साधुसाध्विति तं देवाः पाकशासनमब्रुवन् ॥ देशस्य पूजां तां दृष्ट्वा कृतां शक्रेण धीमता ॥२३॥
एतौ जनपदौ स्फीतौ दीर्घकालमरिंदम ॥ मलदाश्च करूशाश्च मुदितौ धनधान्यतः ॥ २४ ॥
कस्यचित्त्वथ कालस्य यक्षी वै कामरूपिणी ॥ बलं नागसहस्रस्य धारयन्ती तदा ह्यभूत् ॥
ताटका नाम भद्रं ते भार्या सुन्दस्य धीमतः ॥ २५ ॥
मारीचो राक्षसः पुत्रो यस्याः शक्रपराक्रमः ॥ २६ ॥
वृत्तबाहुर्महावीर्यो विपुलास्यतनुर्महान् ॥ राक्षसो भैरवाकारो नित्यं त्रासयते प्रजाः ॥ २७ ॥
इमौ जनपदौ नित्यं विनाशयति राघव ॥ मलदांश्च करूशांश्च ताटका दुष्टचारिणी ॥ २८ ॥
सेयं पन्थानमावार्य वसत्यध्यर्धयोजने ॥ अतएव च गन्तव्यं ताटकाया वनं यतः ॥ २९ ॥
स्वबाहुबलमाश्रित्य जहीमां दुष्टचारिणीम् ॥ मन्नियोगादिमं देशं कुरु निष्कण्टकं पुनः ॥ ३० ॥
न हि कश्चिदिमं देशं शक्नोत्यागन्तुमीदृशम् ॥ यक्षिण्या घोरया राम उत्सादितमसह्यया ॥ ३१ ॥
एतत्ते सर्वमाख्यातं यथैतद्दारुणं वनम् ॥ यक्ष्या चोत्सादितं सर्वमद्यापि न निवर्तते ॥ ३२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये वालकाण्डे चतुर्विंशः सर्गः ॥ २४ ॥

पञ्चविंशः सर्गः ॥ २५ ॥

विश्वामित्रेणरामंप्रति उत्पत्तिप्रभृतिताटकावृत्तान्तकथनम् ॥ १ ॥ तथाब्रह्मवरात्तस्याइतरावध्यत्वकथनेनस्त्रीवधस्यकर्तव्यत्वेपुरावृत्तदृष्टान्तीकरणपूर्वकंतद्वधविधानम् ॥ २ ॥

अथ तस्याप्रमेयस्य मुनेर्वचनमुत्तमम् ॥ श्रुत्वा पुरुषशार्दूलः प्रत्युवाच शुभां गिरम् ॥ १ ॥

वरमेवाह—इमाविति । मलंद्यतिखण्डयतीतिमलदः "अन्येभ्योपिदृश्यते"इतिखच् । करूशमस्यास्तीतिकरूशः । अङ्गमलधारिणौ करूशस्याप्युपलक्षणमिदम् । एतौमपाङ्गमलकरूशधारणान्मलदाःकरूशाश्चेतिख्यातिं गमिष्यतइत्यर्थः ॥ २२ ॥ २३ ॥ अतइत्यादावध्याहार्यम् ॥ २४ ॥ एवंपालनीयत्वायदेशस्यपुण्यत्वमुक्त्वातस्यदारुणत्वेहेतुमाह—कस्यचिदिति । अर्धत्रयम् । कस्मिंश्चित्कालेगतेसति । तदा जन्मकालएव । नागसहस्रस्य गजसहस्रस्य । बलंधारयन्तीताटकानामयक्षी अभूत् । ते तुभ्यं । भद्रमस्तु । ताटकातोभयंमाभूदित्यर्थः ॥ २५ ॥ मारीचइत्यर्धम् ॥ २६ ॥ अत्रयइतिशेषः । यःप्रजाःनित्यंत्रासयतेसमारीचोयस्याःपुत्रःसायक्षीअभूदितिपूर्वेणान्वयः ॥ २७ ॥ अस्तुताटका किंततस्तत्राह—इमाविति ॥ २८ ॥ आवार्य आवृत्य । यतःयस्मिन्मार्गे । ताटकायाःवनं । अतएवमार्गेणगन्तव्यं ॥ २९ ॥ निष्कण्टकं निरुपद्रवम् ॥ ३० ॥ ईदृशं अतीवपुण्यं । असह्यया इतरैरजेयया ॥ ३१ ॥ यथा येनप्रकारेण । दारुणं यथाच उत्सादितं निर्जनीकृतं । यथाचोत्सादनान्ननिवर्तते तदेतत्सर्वमाख्यातमितियोजना ॥३२॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने वालकाण्डव्याख्याने चतुर्विंशःसर्गः ॥ २४ ॥

स्त्रियाअपिसर्वलोकविनाशिन्यावधे नदोषइत्याह-

ति० । ताटकानाम तेभद्रं प्रथमशौर्यस्थानत्वेनशौर्यप्रसिद्धिकरत्वरूपंभद्रत्वमस्याइतिबोध्यं ॥२५॥ ती० पन्थानमावृत्य । अतएवन गन्तव्यं । अतस्ताटकानिरसनात्पूर्वंगन्तुमशक्यत्वान्नगन्तव्यमित्युक्तिः । अतएवचगन्तव्यमितिक्वचित्पाठः ॥२९॥ शि० मन्नियोगादित्युक्त्यास्त्रियंनहनिष्यामीतिप्रत्युत्तरंत्वयानवक्तव्यमितिहेतुर्ध्वनितः ॥३०॥ ती० उत्सादितं विजनीकृतं ॥३१॥ इतिचतुर्विंशस्सर्गः २४
शि० अथ मङ्गलमूलंवचनंश्रुत्वा ॥ १ ॥

[पा०] १ च. छ. झ. ञ. ट. मुदिताः. २ ङ. च. छ. झ. ञ. यक्षिणी. ३ क. ङ. च. छ. झ. ञ. ट. महाशीर्षो. ४ ङ—ट. मावृत्य. ५ क. प्रति. च. छ. ततः. ६ क. मासाद्य. ७ ङ. च. छ. झ. ञ. शक्तोत्यागन्तु. ८ ग. ज. ट. यदेतत्. घ. यथैतत्.

अल्पवीर्या यदा यक्षाः[1] श्रूयन्ते मुनिपुङ्गव ॥ कथं नागसहस्रस्य धारयत्यबला बलम् ॥ २ ॥
[इत्यु[2]क्त[3]वचनं श्रुत्वा राघवस्यामितौजसः ॥ हर्षयञ्श्लक्ष्णया वाचा सलक्ष्मणमरिंदमम् ॥ ३ ॥]
विश्वामित्रोऽब्रवीद्वाक्यं शृणु येन बलोत्तरा[4] ॥ वरदानकृतं वीर्यं धारयत्यबला बलम् ॥ ४ ॥
पूर्वमासीन्महायक्षः सुकेतुर्नाम वीर्यवान् ॥ अनपत्यः शुभाचारः[5] स च तेपे महत्तपः ॥ ५ ॥
पितामहस्तु संप्रीत[6]स्तस्य यक्षपतेस्तदा ॥ कन्यारत्नं ददौ राम ताटकां नाम नामतः ॥ ६ ॥
ददौ नागसहस्रस्य बलं चास्याः पितामहः ॥ न त्वेव पुत्रं यक्षाय ददौ ब्रह्मा महायशाः ॥ ७ ॥
तां तु जातां[7] विवर्धन्तीं रूपयौवनशालिनीम् ॥ जंभपुत्राय[8] सुन्दाय ददौ[9] भार्यां यशस्विनीम् ॥८॥
कस्य चित्त्वथ कालस्य यक्षी पुत्र[10]मजायत ॥ मारीचं नाम दुर्धर्षं यः शापाद्राक्षसोऽभवत् ॥ ९ ॥
सुन्दे तु निहते राम सागस्त्यं[11] मुनिपुङ्गवम् ॥ ताटका सह पुत्रेण प्रधर्षयितुमिच्छति ॥ १० ॥
भक्षार्थं जातसंरंभा गर्जन्ती साऽभ्यधावत ॥ ११ ॥
आपतन्तीं[12] तु तां दृष्ट्वा अगस्त्यो भगवानृषिः ॥ राक्षसत्वं भजस्वेति मारीचं व्याजहार सः ॥१२॥
अगस्त्यः परम[13]क्रुद्धस्ताटकामपि शप्तवान् ॥ १३ ॥
पुरुषादी महायक्षी विरूपा[14] विकृतानना ॥ इदं रूपं[15] विहायाथ दारुणं रूपमस्तु ते ॥ १४ ॥
सैषा शापकृतामर्षा ताटका क्रोधमूर्च्छिता ॥ देशमुत्सादयत्येन[16]मगस्त्यचरितं शुभम् ॥ १५ ॥
एनां राघव दुर्वृत्तां[17] यक्षीं परमदारुणाम् ॥ गोब्राह्मणहितार्थाय जहि दुष्टपराक्रमाम् ॥ १६ ॥
न ह्येनां शापसंस्पृष्टां[18] कश्चिदुत्सहते पुमान् ॥ निहन्तुं त्रिषु लोकेषु त्वामृते रघुनन्दन ॥ १७ ॥

पञ्चविंशे—अथेत्यादि । अप्रमेयस्य अप्रमेयप्रभावस्य ॥१॥ यदा यस्मात् । यदायत्रादयोहेतावपि मुनिभिःप्रयुज्यन्ते । यस्माच्छ्रूयन्ते तस्मात् अबला स्त्री । कथं नागसहस्रस्यबलंधारयति ॥ २—३ ॥ येनहेतुनाबलोत्तराभवति तंशृणु । तस्यावरदानकृतंवीर्यबलमस्ति अतोऽबलापिबलंधारयति ॥ ४ ॥ वरदानप्रकारमाह—पूर्वमित्यादि ॥ ५ ॥ नामप्रसिद्धौ ॥ ६ ॥ यक्षाय सुकेतवे ॥ ७ ॥ विवर्धतीं विवर्धमानां । भार्यां ददौ भार्यात्वेनददौ ॥ ८ ॥ कस्मिंश्चित्कालेगतेसति अजायत अजनयत् ॥ ९ ॥ शापप्रकारमाह—सुन्देत्विति । निहते अगस्त्येनेतिशेषः । प्रधर्षयितुंहन्तुं । इच्छति ऐच्छत् ॥ १० ॥ जातसंरंभा स्वभर्तृवधजनितकोपा । अतएवभक्षार्थमभ्यधावत । अर्धं ॥ ११—१२ ॥ अगस्त्यइत्यर्धं ॥ १३ ॥ पुरुषादी मनुष्यभक्षिणी । त्वमिदंरूपंविहायपुरुषादीत्यादिविशेषणयुक्ताभव । अथते दारुणं क्रूरं । रूपं शरीरंअस्तु ॥ १४ ॥ अगस्त्यचरितं तदानीमितिशेषः ॥१५॥ जहि नाशय ॥ १६ ॥ शाप-

ति० यदा यतः । यक्षी यक्षजातिः । श्रूयते पुराणादावितिशेषः । अबलेतिसाभिप्रायं । शि० यदा यतः । यक्षी ताटका । अबलाश्रूयते भवदुक्त्याज्ञायते । अतः अल्पवीर्याभवितुमर्हतीतिशेषः । अतः नागसहस्रस्यबलंकथंधारयति ॥ २ ॥ ती० अत्र बलमात्रेप्युत्तरत्वेनवक्तव्ये वीर्यस्याभिधानं वीर्यशौर्यादयोऽन्येपिगुणाःसन्तीतिज्ञापयितुं ॥ ४ ॥ वि० तदभिसंहितगुणवतापुत्रेणात्यन्तजनपीडाभवेदितिविचार्यपुत्रंनददौ ॥ ७ ॥ शि० जंभपुत्रायेत्यत्रखञ्जुपुत्रायेतिपाठः । अत्रपाठे खञ्जूरितिजंभस्यैवनामान्तरंबोध्यं । असुरयक्षयोर्देवयोनित्वेनउचितःसंबन्धइतिनागोजिभट्टाः ॥ ८ ॥

[पा०] १ क. ङ. च. छ. झ. ञ. यक्षीश्रूयते. २ अयंश्लोकः ङ. छ. झ. ञ. दृश्यते. ३ क. ख. तस्यतद्वचनंश्रुत्वा रामस्यविदितात्मनः. ४ ङ. च. छ. झ. ञ. बलोत्कटा. ५ क. सदाचारः. ६ क. ख. ग. ङ. च. छ. झ. ञ. सुप्रीतः. ७ ङ. च. छ. झ. ञ. बालां. ख. कन्यां. ८ च. कुंभपुत्राय. क–घ. झर्झपुत्राय. छ. गर्गपुत्राय. ९ ङ. झ. ददौचासौ. च. छ. ञ. ददौचास्मै. १० क. ग—छ. झ. ञ. ट. पुत्रंव्यजायत. ११ ङ. झ. अगस्त्यमृषिसत्तमम्. १२ ख. आपतन्तींतुतांदृष्ट्वापुनस्तस्यास्तमात्मजम् । क्रुद्धःकृशानुसंकाशोह्यगस्त्योभगवानभूत् । राक्षसत्वं. १३ ङ. च. छ. झ. ञ. परमामर्षः. १४ क. ख. ङ. च. छ. झ. ञ. विकृता. १५ क. रूपंविसृज्याथ. ख. रूपंपरित्यज्य. ग. घ. रूपमपाहाय. ङ. च. छ. झ. ञ. रूपंविहायाशु. १६ ङ. च. छ. झ. ञ. अगस्त्याचरितं. १७ ट. दुर्धर्षां. १८ ङ. च. छ. झ. ञ. संसृष्टां.

न हि ते स्त्रीवधकृते घृणा कार्या नरोत्तम ॥ चातुर्वर्ण्यहितार्थाय कर्तव्यं राजसूनुना ॥ १८ ॥
नृशंसमनृशंसं वा प्रजारक्षणकारणात् ॥ पातकं वा सदोषं वा कर्तव्यं रक्षता सताम् ॥ १९ ॥
राज्यभारनियुक्तानामेष धर्मः सनातनः ॥ अधर्म्यां जहि काकुत्स्थ धर्मो ह्यस्या न विद्यते ॥ २० ॥
श्रूयते हि पुरा शक्रो विरोचनसुतां नृप ॥ पृथिवीं हन्तुमिच्छन्तीं मन्थरामभ्यसूदयत् ॥ २१ ॥
विष्णुना च पुरा राम भृगुपत्नी दृढव्रता ॥ अनिन्द्रं लोकमिच्छन्ती काव्यमाता निषूदिता ॥२२॥
एतैश्चान्यैश्च बहुभी राजपुत्र महात्मभिः ॥ अधर्मसहिता नार्यो हताः पुरुषसत्तमैः ॥
तस्मादेनां घृणां त्यक्त्वा जहि मच्छासनान्नृप ॥ २३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे पञ्चविंशः सर्गः ॥ २५ ॥

षड्विंशः सर्गः ॥ २६ ॥

रामेणस्वधनुष्टङ्कारश्रवणात्साट्टहासमागतायास्ताटकायामुनिचोदनयाहननम् ॥ १ ॥ ततोविश्वामित्रादिभिस्तस्मिन्वने तद्रात्र्यांसुखनिवासः ॥ २ ॥

मुनेर्वचनमक्लीबं श्रुत्वा नरवरात्मजः ॥ राघवः प्राञ्जलिर्भूत्वा प्रत्युवाच दृढव्रतः ॥ १ ॥
पितुर्वचननिर्देशात्पितुर्वचनगौरवात् ॥ वचनं कौशिकस्येति कर्तव्यमविशङ्कया ॥ २ ॥
अनुशिष्टोस्म्ययोध्यायां गुरुमध्ये महात्मना ॥ पित्रा दशरथेनाहं नावज्ञेयं च तद्वचः ॥ ३ ॥
सोहं पितुर्वचः श्रुत्वा शासनाद्ब्रह्मवादिनः ॥ करिष्यामि न संदेहस्ताटकावधमुत्तमम् ॥ ४ ॥
गोब्राह्मणहितार्थाय देशस्यास्य सुखाय च ॥ तत्र चैवाप्रमेयस्य वचनं कर्तुमुद्यतः ॥ ५ ॥

संस्पृष्टां शापयुक्ताम् ॥ १७ ॥ ते त्वया । घृणा जुगुप्सा । कर्तव्यं कर्मेतिशेषः ॥ १८ ॥ नृशंसं क्रूरकर्म । सदोषं सापवादंकर्म रक्षता राजपुत्रेण प्रजारक्षणकारणात्कर्तव्यं ॥ १९॥ सनातनः नित्यः । अधर्म्यां अधर्मादनपेतां । एतदेवाह—धर्मइति ॥२०॥ स्त्रीवधस्यकर्तव्यत्वे इतिहासद्वयमाह—श्रूयतइत्यादिना । मन्थरां मन्थराभिधानां ॥२१॥ काव्यमाता शुक्रमाता । इयंकथामत्स्यपुराणेदर्शिता । स्वपुत्रेशुक्रेदेवशिक्षार्थंरुद्रसमीपेतपस्यतिसतिदेवपीडिताअसुराःशुक्रमातरंभृगुपत्नींशरणमगच्छन् । साचासुररक्षणार्थंदेवानहन्तुमुद्युक्ता । तांचेन्द्रप्रार्थितोविष्णुरासाद्यतस्याःशिरश्छिच्छेदेति ॥२२॥ एतैः एतादृशैरित्यर्थः ॥२३॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने पञ्चविंशःसर्गः ॥ २५ ॥

अथताटकावधःषड्विंशे—मुनेरित्यादि । अक्लीबं धृष्टं ॥ १ ॥ पितुर्वचननिर्देशात् नियोगात् कौशिकवचनं त्वयाकर्तव्यमित्येवंरूपात् । पितृवचनगौरवात् बहुमानाच्च । इति उक्तप्रकारं कौशिकस्यवचनंकर्तव्यमितिमानसव्यापारः ॥ २ ॥ मुनिंप्रत्याह—अनुशिष्टइति ॥ ३ ॥ श्रुत्वास्थितः । सोहमित्यन्वयः ॥ ४ ॥ उद्यतः

ति० वाशब्दइवार्थे । अनृशंसमिव नृशंसंक्रूरमपिकार्यमित्यर्थः । रक्षतासदेति रक्षाधर्मसमृद्धिशेषत्वेनेतिभावः ॥ १९ ॥ ति० अनिद्रं निद्रासुखरहितं ॥ २२ ॥ ति० एतैः एतादृशैः । यद्वा आर्षंबहुत्वं । एताभ्यां शक्रविष्णुभ्यामित्यर्थः । मच्छासनादिति । यथापरशुरामस्यजमदग्नेर्गुरोराज्ञयामातृवधेपिनदोषः । तथा बलादिदातृत्वेनगुरोर्ममाज्ञयास्त्रीवधेतवनदोषइतिभावः ॥ २३ ॥ इतिपञ्चविंशस्सर्गः ॥ २५ ॥

ती० अक्लीबं महार्थं ॥ १॥ ति० तवचहिताय अस्यहितं स्वाज्ञापरिपालनेनसंतोषरूपं । शि० लोकस्य अस्मद्दृष्टिपथस्यास्य

[पा०] १ ङ. च. झ. ञ. हितार्थंहि. २ ग. ङ. झ. ट. सदा. ख. घ. सता. ३ झ. ञ. ह्यस्यां. ४ ख. मबलामभ्य. ५ ङ. च. छ. झ. ञ. पतिव्रता. ६ झ. अनिद्रं. ७ ख. ग. घ. एतैरन्यैश्च. ८ ङ. च. छ. झ. ञ. राजपुत्रैर्महा. ख. राजभिश्च. ९ क. ग. घ. निरता. १० इदमर्धं झ. दृश्यते. ११ ख. घ. ङ. च. छ. झ. ञ. नावज्ञेयंहि. १२ ङ. च. छ. झ. ञ. देशस्यचहिताय. ट. लोकस्यचहिताय.

एवमुक्त्वा धनुर्मध्ये बद्ध्वा मुष्टिमरिंदमः ॥ [1]ज्याघोषमकरोत्तीव्रं दिशः शब्देन [2]नादयन् ॥ ६ ॥
[[3]तस्य संरंभमालोक्य सभ्रातुर्मुनिपुङ्गवः ॥ स हर्षमतुलं लेभे रामं साध्विति चाब्रवीत् ॥ ७ ॥]
तेन शब्देन वित्रस्तास्ताटकावनवासिनः ॥ ताटका च सुसंक्रुद्धा तेन शब्देन मोहिता ॥ ८ ॥
तं शब्दमभिनिध्याय राक्षसी क्रोधमूर्च्छिता ॥ श्रुत्वा [4]चाभ्यद्रवद्वेगाद्यतः शब्दो विनिःसृतः ॥९॥
तां दृष्ट्वा राघवः [5]क्रुद्धां विकृतां विकृताननाम् ॥ प्रमाणेना[6]तिवृद्धां च लक्ष्मणं सोऽभ्यभाषत ॥१०॥
पश्य लक्ष्मण यक्षिण्या भैरवं दारुणं वपुः ॥ भिद्येरन्दर्शनादस्या भीरूणां हृदयानि च ॥ ११ ॥
[[7]एनां पश्य दुराधर्षां निर्भिन्नहृदयां क्षितौ ॥ शयानां शयने वीर धूतपापां भयावहाम् ॥ १२ ॥]
एनां पश्य दुराधर्षां मायाबलसमन्विताम् ॥ विनिवृत्तां करोम्यद्य हृतकर्णाग्रनासिकाम् ॥ १३ ॥
न ह्येनामुत्सहे हन्तुं स्त्रीस्वभावेन रक्षिताम् ॥ वीर्यं चास्या गतिं [8]चापि [9]हनिष्यामीति मे मतिः ॥१४॥
एवं ब्रुवाणे रामे तु ताटका क्रोधमूर्च्छिता ॥ उद्यम्य [10]बाहू गर्जन्ती राममेवाभ्यधावत ॥ १५ ॥
विश्वामित्रस्तु ब्रह्मर्षिर्हुङ्कारेणाभिभर्त्स्य ताम् ॥ स्वस्ति राघवयोरस्तु जयं चैवाभ्यभाषत ॥ १६ ॥
[11]उद्धून्वाना रजो घोरं ताटका राघवावुभौ ॥ [12]रजोमोहेन महता मुहूर्तं सा [13]व्यमोहयत् ॥ १७ ॥
ततो [14]मायां समास्थाय शिलावर्षेण राघवौ ॥ अवाकिरत्सुमहता ततश्चुक्रोध राघवः ॥ १८ ॥
शिलावर्षं महत्तस्याः शरवर्षेण [15]राघवः ॥ [16]प्रतिहत्योपधावन्त्याः करौ चिच्छेद पत्रिभिः ॥ १९ ॥
ततश्छिन्नभुजां [17]श्रान्तामभ्याशे परिगर्जतीम् ॥ सौमित्रिरकरोत्क्रोधाद्धृतकर्णाग्रनासिकाम् ॥ २० ॥
कामरूपधरा [18]सद्यः कृत्वा रूपाण्यनेकशः ॥ अन्तर्धानं गता यक्षी मोहयन्ती[19]व मायया ॥
अश्मवर्षं विमुञ्चन्ती भैरवं [20]विचचार ह ॥ २१ ॥

अहमितिशेषः ॥ ५—७ ॥ सुसंक्रुद्धा प्रकृत्याअतिकोपना । मोहिता किंकर्तव्यमितिसंभ्रान्ता । आसीत् ॥ ८ ॥ अभिनिध्याय आकर्ण्य । क्रोधमूर्च्छिताआसीत् । श्रुत्वाक्रुद्धासाऽभ्यद्रवच्च ॥ ९ ॥ प्रमाणेन औन्नत्येन ॥ १० ॥ भैरवं भयंकरं । दारुणं विकृतम् ॥ ११ ॥ मायाबलं अन्तर्धानबलं विनिवृत्तां पराङ्मुखीं । एतावतैवगुरुवचनानुष्ठानसिद्धेरितिभावः ॥ १२—१३ ॥ वीर्यगतिहननं हस्तपादभञ्जनेन ॥ १४—१५ ॥ अस्त्वित्यत्रइतिशब्दोऽध्याहार्यः । अतिमानुषशक्तिंजानन्नपिताटकायाःक्रौर्यातिशयंदृष्ट्वातिशङ्कयामहर्षिर्मङ्गलमाशास्ते ॥ १६ ॥ उद्धून्वाना उत्किरन्ती ॥ १७ ॥ मायां अन्तर्धानशक्तिम् ॥ १८ ॥ प्रतिहत्य भङ्क्त्वा । करौचिच्छेद शिलावर्षहेतुत्वात् । पत्रिभिः शरैः ॥ १९ ॥ अभ्याशे समीपे । गर्जतीं गर्जन्तीं । नुमभावआर्षः ॥ २० ॥ कामरूपधरा कामरूपधरणशक्ता । अतएवानेकशोरूपाणिकृत्वामाययाअन्तर्धानंगतासती भैर-

---

देशस्य । चकारेणयशःप्राप्तिरूपत्वद्धिताय । चकारान्तरेणस्वनिष्टभवच्छिष्यत्वप्रकटनाय ॥ ५ ॥ शि० यतः शब्दोविनिस्सृतः तंशब्दंश्रुत्वा क्रोधमूर्च्छिता राक्षसी ताटका । अभिनिध्याय शब्ददेशंनिश्चित्य । क्रुद्धायतः क्रुद्धस्यक्रोधस्यआयतोविस्तारोयस्याः-स्सशब्दोयतोविनिस्सृतः तंदेशमभ्यद्रवत् । अतएवक्रोधमूर्च्छितेत्यनेन क्रुद्धेत्यस्यनपौनरुक्त्यं । चशब्दोयतइत्यर्थे ॥ ९ ॥ ती० वीर्यं पराभिभवनशक्तिं । गतिं आकाशादिगतिं ॥ १४ ॥ ति० राममेव विश्वामित्रस्यदुर्धर्षत्वेनतंविसृज्यमानुषबुद्ध्यारामम-वेत्यर्थः ॥ १५ ॥ ती० रजोमोहेन रजोन्धकारेण । वि० रजोमेघेन रजोन्धकारेण । शि० रजोमेघेन मेघसदृशरजसा ॥ १७ ॥ ती० मायास्त्रं मायानिर्मितास्त्रं । मायाविद्यामितियावत् ॥ १८ ॥

[पा०] १ ख. ग. घ. ज्याशब्दं. २ ट. पूरयन्. ३ अयंश्लोकः ख. दृश्यते. ४ क. ङ. च. छ. झ. ञ. ट. चाभ्यद्रवत्क्रुद्धा. ५ ख. ङ. ट. क्रुद्धो. ६ घ. ट. नातिवृत्तां. ७ अयंश्लोकः क. ख. दृश्यते. ८ क. ङ. च. छ. ञ. चैव. ९ ङ. च. छ. झ. ञ. हन्यामितिहि. १० ङ. झ. बाहुं. ११ ङ. झ. ट. उद्धुन्वाना. १२ क. ख. ङ. ञ. ट. मेघेन. १३ क—घ. छ. ञ. ट. त्वमोहयत्. १४ च. छ. ज. मायास्त्रमास्थाय. १५ क. वीर्यवान्. १६ ङ. च. छ. झ. ञ. १७ ख. श्रान्तां. १८ ख. ङ. च. छ. झ. ञ. सातु. १९ ङ. च. छ. झ. ञ. ट. स्वमायया. क. ख. घ. चमायया. २० क. ख. ग. ङ. झ. विचचारसा.

[[1]ज्योत्स्नं चक्रतुर्वीरौ वज्राशनिसमं तदा ॥ मोहिता तेन शब्देन लब्धसंज्ञा चिरात्तदा ॥ २२ ॥]
ततस्तावश्मवर्षेण कीर्यमाणौ समन्ततः ॥ दृष्ट्वा गाधिसुतः श्रीमानिदं वचनमब्रवीत् ॥ २३ ॥
अलं ते घृणया [2]वीर पापैषा दुष्टचारिणी ॥ यज्ञविघ्नकरी यक्षी पुरा [3]वर्धति मायया ॥ २४ ॥
वध्यतां तावदेवैषा पुरा सन्ध्या प्रवर्तते ॥ रक्षांसि सन्ध्या[4]कालेषु दुर्धर्षाणि [5]भवन्ति वै ॥ २५ ॥
[6]इत्युक्तस्तु तदा यक्षीमश्मवृष्ट्याऽभि[7]वर्षतीम् ॥ दर्शयञ्शब्दवेधित्वं तां रुरोध स सायकैः ॥२६॥
सा रुद्धा [8]शरजालेन मायाबलसमन्विता ॥ अभिदुद्राव काकुत्स्थं लक्ष्मणं च विनेदुषी ॥ २७ ॥
तामापतन्तीं वेगेन विक्रान्तामशनीमिव ॥ शरेणोरसि विव्याध [9]सा पपात ममार च ॥ २८ ॥
तां हतां भीमसंकाशां दृष्ट्वा [10]सुरपतिस्तदा ॥ साधुसाध्विति काकुत्स्थं [11]सुराश्च समपूजयन् ॥ २९ ॥
उवाच परमप्रीतः सहस्राक्षः पुरन्दरः ॥ सुराश्च सर्वे संहृष्टा विश्वामित्रमथाब्रुवन् ॥ ३० ॥
मुने कौशिक भद्रं ते सेन्द्राः सर्वे मरुद्गणाः ॥ तोषिताः कर्मणानेन स्नेहं दर्शय राघवे ॥ ३१ ॥
प्रजापतेः [12]कृशाश्वस्य पुत्रान्सत्यपराक्रमान् ॥ तपोबल[13]भृतो ब्रह्मन्राघवाय निवेदय ॥ ३२ ॥
पात्रभूतश्च ते ब्रह्मंस्तवानुगमने [14]धृतः ॥ कर्तव्यं [15]च महत्कार्यं सुराणां राजसूनुना ॥ ३३ ॥
एवमुक्त्वा सुराः सर्वे जग्मुर्हृष्टा [16]यथागतम् ॥ विश्वामित्रं [17]पुरस्कृत्य ततः सन्ध्या प्रवर्तते ॥ ३४ ॥
ततो मुनिवरः प्रीतस्ताटकावधतोषितः ॥ मूर्ध्नि राममुपाघ्राय इदं वचनमब्रवीत् ॥ ३५ ॥

वमश्मवर्षंविमुञ्चन्तीमोहयन्तीवविचचार । अर्धत्रयम् ॥ २१—२२ ॥ श्रीमान् स्वतएवताटकावधहेतुप्राप्तिकृतहर्षेणकान्तिमान् ॥ २३ ॥ दुष्टचारिणी दुष्टंयथातथाचरणशीला । अन्तर्धानशक्त्याऽश्मवर्षशीलेत्यर्थः । एतेन ऐहिकनाशकत्वमुक्तं । पारलौकिकनाशकत्वमप्याह—यज्ञविघ्नकरीति । पुरावर्धति वर्धिष्यते । "यावत्पुरानिपातयोर्लट्" ॥ २४ ॥ सन्ध्यापुराप्रवर्तते प्रवर्तिष्यते । तावत् पूर्वमेव वध्यतां । सन्ध्याप्रवृत्तौकाहानिस्तत्राह—रक्षांसीति ॥ २५॥ अभिवर्षतीं अभिवर्षन्तीं । शब्दवेधित्वं श्रुतःशब्दोयस्मादुत्पन्नःतद्वेधित्वम् ॥ २६ ॥ अभिदुद्राव अप्रयोजकमन्तर्धानंविहायेत्यर्थः । विनेदुषी नादंकुर्वन्ती ॥२७॥ अशनीं "सर्वतोक्तिन्नर्थादित्येके" इतिङीप् ॥ २८ ॥ भीमसंकाशां भीमरूपां । सुरपतिः सुराश्च समपूजयन् ॥ २९ ॥ ॥ ३० ॥ सर्वे वयमितिशेषः । स्नेहंदर्शय स्नेहकार्यं प्रवर्तय ॥ ३१ ॥ एतदेवाह—प्रजापतेरिति ॥ ३२ ॥ अयमितिशेषः । अनुगमने शुश्रूषणे । धृतः स्थिरधीः ॥ ३३ ॥ पुरस्कृत्य पूजयित्वाजग्मुः । सन्ध्या सायं-

शि० ममार मं शिवसंनिधिं आर जगाम पपातच । तद्देशंप्राप्यशिवसंनिधावपतदित्यर्थः । किंच अपपातमं अपगतःपातः पुनरावृत्तिर्यस्मात्सएव मः शिवस्तंकैलासाद्रिमित्यर्थः । आरप्राप । बाणवेगेनतत्रप्रक्षिप्तेत्यर्थः । एतेनस्त्रीत्वादेवत्वंनहतासि । अतस्तत्रपुनर्नगन्तव्यमितिशिवउपदेक्ष्यतीतिहेतुर्व्यक्तः । अतएव "नह्येनामुत्सहेहन्तुंस्त्रीस्वभावेनरक्षितां" इतिप्रतिज्ञयामविरोधः । अतएव " रामोद्विर्नाभिभाषते " इतिसानुकूलं । अतएव "सुन्दस्त्रीदमनप्रमोदमुदितादास्थायविद्योदयंरामस्सत्यवतीसुतादथगतस्तस्याश्रमंलीलया ॥ कृत्सेकौशिकनन्दनेनचमखेतत्रागतान्राक्षसान्हत्वाऽमूमुचदाशुभाविविदसौमारीचमुग्राकृतिम् " इतिहनुमन्नाटकपद्यघटकीभूतसुन्दस्त्रीदमनप्रमोदमुदितादितिपदघटकदमनप्रयोगस्संगच्छते । अन्यथासुन्दस्त्रीहननप्रमोदमुदितादितिवदेदितिदिक् । " मोयमेसमयेऽपिस्याद्विधेचमधुसूदने । मास्त्रीपद्मालयायांस्यात्पुंलिङ्गश्चन्द्रशेखरे " इतिमेदिनी ॥ अस्मिन्नर्थे च एव ॥ २८ ॥ इतिषड्विंशस्सर्गः ॥ २६ ॥

[पा०] १ इदमर्धं ख. दृश्यते. २ क—छ. झ. ञ. राम. ३ क. ख. ग. ङ. च. छ. झ. ञ. ट. वर्धेत. ४ ङ. झ. ञ. कालेतु. ५ क. ङ. च. छ. झ. ञ. भवन्तिहि. ६ ख. ङ. झ. इत्युक्तस्सतुतांयक्षी. ट. स्तुतथायक्षी. ७ ङ. झ. वर्षिणीम्. ८ ङ. च. छ. झ. ञ. बाणजालेन. ख. शरवर्षेण. ९ ङ. च. छ. झ. ञ. पपातच. १० ख. देवपतिः. ११ ङ. च. छ. झ. ञ. सुराश्चाप्याधि. १२ क—घ. च. ञ. भृशाश्वस्य. १३ क—घ. च. छ. ञ. भृतान्. १४ ङ. झ. रतः. ट. वृतः १५ घ— छ. झ. ञ. सुमहत्कर्म. १६ ङ. झ. विहायसम्. १७ क—घ. पूजयित्वा. ङ. च. छ. झ. ञ. ट. पूजयन्तः.

इहाद्य रजनीं राम वसाम शुभदर्शन ॥ श्वः प्रभाते गमिष्यामस्तदाश्रमपदं मम ॥ ३६ ॥
विश्वामित्रवचः श्रुत्वा हृष्टो दशरथात्मजः ॥ उवास रजनीं तत्र ताटकाया वने सुखम् ॥ ३७ ॥
मुक्तशापं वनं तच्च तस्मिन्नेव तदाऽहनि ॥ [[2]चंपकाशोकपुन्नागमल्लिकाद्यैस्सुशोभितम् ॥ ३८ ॥
चूतैश्च पनसैः पूगैर्नारिकेलैश्च शोभितम् ॥ वापीकूपतटाकैश्च दीर्घिकाभिरलङ्कृतम् ॥ ३९ ॥
मल्लिकाहेमकूटैश्च मण्टपैरुपशोभितम् ॥] रमणीयं विबभ्राज यथा चैत्ररथं वनम् ॥ ४० ॥

निहत्य तां यक्षसुतां स रामः प्रशस्यमानः सुरसिद्धसङ्घैः ॥
उवास तस्मिन्मुनिना सहैव प्रभातवेलां प्रतिबोध्यमानः ॥ ४१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकिये आदिकाव्ये बालकाण्डे षड्विंशस्सर्गः ॥ २६ ॥

सप्तविंशः सर्गः ॥ २७ ॥

विश्वामित्रेण रामलक्ष्मणाभ्यां नानास्त्रमन्त्रप्रदानम् ॥ १ ॥

अथ तां रजनीमुष्य विश्वामित्रो [3]महायशाः ॥ [4]प्रहस्य राघवं वाक्यमुवाच [5]मधुराक्षरम् ॥ १ ॥
परितुष्टोस्मि भद्रं ते राजपुत्र महायशः ॥ प्रीत्या परमया युक्तो ददाम्यस्त्राणि सर्वशः ॥ २ ॥
देवासुरगणान्वाऽपि सगन्धर्वो[6]रगानपि ॥ यैरमित्रान्प्रसह्याजौ वशीकृत्य जयिष्यसि ॥ ३ ॥
तानि दिव्यानि भद्रं ते ददाम्यस्त्राणि सर्वशः ॥ दण्डचक्रं महद्दिव्यं तव दास्यामि राघव ॥ ४ ॥
धर्मचक्रं [7]ततो वीर कालचक्रं तथैव च ॥ विष्णुचक्रं तथाऽत्युग्र[8]मैन्द्रमस्त्रं तथैव च ॥ ५ ॥
वज्रमस्त्रं वरश्रेष्ठ शैवं [9]शूलवरं तथा ॥ अस्त्रं ब्रह्मशिरश्चैव ऐषीकमपि राघव ॥
ददामि ते महाबाहो ब्राह्ममस्त्रमनुत्तमम् ॥ ६ ॥
गदे द्वे चैव काकुत्स्थ मोदकी [10]शिखरी उभे ॥ प्रदीप्ते [11]नरशार्दूल प्रयच्छामि नृपात्मज ॥ ७ ॥
धर्मपाशमहं राम कालपाशं तथैव च ॥ पाशं वारुणमस्त्रं च ददाम्यहमनुत्तमम् ॥ ८ ॥
अशनी द्वे प्रयच्छामि शुष्कार्द्रे रघुनन्दन ॥ [12]ददामि चास्त्रं पैनाकमस्त्रं नारायणं तथा ॥ ९ ॥

सन्ध्या । प्रवर्ततेस्म ॥ ३४-३५ ॥ तत् पूर्वोक्तम् ॥ ३६-३७ ॥ मुक्तशापं मुक्तोपद्रवं । तस्मिन्नहनि । तदैव तत्क्षण एव ॥ ३८—३९ ॥ चैत्ररथं कुबेरोद्यानम् ॥ ४० ॥ प्रतिबोध्यमानः मुनिनेतिशेषः । कौसल्यासुप्रजारामेत्येवंप्रबोधितोऽभूदित्यर्थः । उपजातिवृत्तम् ॥ ४१ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने षड्विंशःसर्गः ॥ २६ ॥

अस्त्रगणलाभःसप्तविंशे—अथेत्यादि । उष्य उषित्वा । प्रहस्य प्रहर्षेणमन्दहासंकृत्वा ॥ १ ॥ महायशइतिसंबुद्धित्वान्नदीर्घः । प्रीत्यापरमयायुक्तइतिपरितुष्टोस्मीत्यस्यानुवादः । सर्वशःसर्वाणि ॥ २ ॥ आजौ युद्धे । जयिष्यसि स्वार्थेणिच् ॥ ३ ॥ दण्डचक्रादयश्चक्रभेदाः ॥ ४ ॥ सार्धश्लोकद्वयमेकान्वयं । शूलवरं शूलश्रेष्ठं । ब्रह्मशिरः ब्रह्मास्त्रादन्यत् ॥ ५—६ ॥ मोदकीशिखरीसंज्ञेयेद्वेगदेस्तः तेऽभेदास्यामीतिसंबन्धः ॥ ७ ॥ वारुणमित्यस्यकाकाक्षिन्यायेनोभयत्रान्वयः ॥ ८ ॥ शुष्काशनिरार्द्राशनिरित्यन्वयः । पिनाकिनइदंपैनाकं

ति० वाशब्दश्चार्थे । गन्धर्वोरगसहितदेवासुरगणरूपशत्रूनपिप्रसह्य बलेन जयिष्यसि जेष्यसि । यद्विधेदश तदावशीकृत्यसंमोहनास्त्रादिनाजेष्यसि । अन्येषांतुकागणनेतिभावः ॥ ३ ॥ वि० दण्डचक्रादयोस्त्रभेदाः ॥ ४ ॥ ति० शूलवतं तन्नामकं ॥ ६ ॥ ति० द्वेगदे गदासंज्ञिकेअस्त्रे ॥ ७ ॥

[पा०] १ ग. घ. वसेम. २ इदमर्धचतुष्टयं ख. च. छ. ञ. दृश्यते. ३ घ. छ. महामुनिः. ४ क.—घ. प्रशस्य. ५ ङ. च. छ. झ. ञ. मधुरस्वरम्. ६ क. ङ. च. छं. झ. ञ. रगान्भुवि. ७ ग. तथा. घ. तदा. ८ क. ख. ङ. च. छ. झ. ञ. मैन्द्रंचक्रं. ९ ङ. झ. शूलवतं. १० क. च. शिखरेउभे. ङ. झ. शिखरेशुभे. ११ ग. नृपशार्दूल. १२ ञ. ददाम्यस्त्रंच.

आग्नेयमस्त्रं दयितं शिखरं नाम नामतः ॥ वायव्यं [1]प्रथनं नाम ददामि [2]च तवानघ ॥ १० ॥
अस्त्रं हयशिरो नाम क्रौञ्चमस्त्रं तथैव च ॥ शक्तिद्वयं च काकुत्स्थ ददामि तव राघव ॥ ११ ॥
कङ्कालं मुसलं घोरं कापालमथ [3]कङ्कणम् ॥ [4]धारयन्त्यसुरा यानि ददाम्येतानि सर्वशः ॥ १२ ॥
वैद्याधरं महास्त्रं च नन्दनं नाम नामतः ॥ असिरत्नं महाबाहो ददामि नृवरात्मज ॥ १३ ॥
गान्धर्वमस्त्रं दयितं [5]मानवं नाम नामतः ॥ [6]प्रस्वापनप्रशमने [7]दद्मि सौरं च राघव ॥ १४ ॥
[8]दर्पणं शोषणं चैव संतापनविलापने ॥ [9]मदनं चैव दुर्धर्षं [10]कन्दर्पदयितं तथा ॥ १५ ॥
पैशाचमस्त्रं दयितं [11]मोहनं नाम नामतः ॥ प्रतीच्छ नरशार्दूल राजपुत्र महायशः ॥ १६ ॥
तामसं नरशार्दूल सौमनं च महाबल ॥ संवर्तं चैव दुर्धर्षं [12]मौसलं नाम नामतः ॥ १७ ॥
सत्यमस्त्रं महाबाहो तथा [13]मायाधरं परम् ॥ [14]घोरं तेजःप्रभं नाम परतेजोपकर्षणम् ॥ १८ ॥
[15]सौम्यास्त्रं [16]शिशिरं नाम त्वाष्ट्रमस्त्रं [17]सुकामदम् ॥ दारुणं च [18]भगस्यापि शीतेषुमथ [19]मानवम् ॥ १९ ॥
एतान्नाम महाबाहो कामरूपान्महाबलान् ॥ गृहाण परमोदारान्क्षिप्रमेव नृपात्मज ॥ २० ॥
[20]स्थितस्तु प्राङ्मुखो भूत्वा शुचिर्मुनिवरस्तदा ॥ ददौ रामाय सुप्रीतो मन्त्रग्राम[21]मनुत्तमम् ॥ २१ ॥
सर्वसंग्रहणं येषां दैवतैरपि दुर्लभम् ॥ तान्यस्त्राणि तदा विप्रो राघवाय न्यवेदयत् ॥ २२ ॥
जपतस्तु मुनेस्तस्य विश्वामित्रस्य धीमतः ॥ उपतस्थु[22]र्महार्हाणि सर्वाण्यस्त्राणि राघवम् ॥ २३ ॥
[23]ऊचुश्च मुदिताः सर्वे रामं प्राञ्जलयस्तदा ॥ [24]इमे स्म परमोदाराः [25]किंकरास्तव राघव ॥ २४ ॥
[[26]यद्यदिच्छसि भद्रं ते तत्सर्वं करवाम वै ॥ ततो रामः प्रसन्नात्मा तैरित्युक्तो महाबलैः] ॥२५॥

॥ ९ ॥ आग्नेयं अग्निदेवताकं । दयितं अग्नेरितिशेषः ॥ १० ॥ शक्तिद्वयं विष्णुशक्तिःरुद्रशक्तिश्चेति ॥ ११ ॥ —१२ ॥ वैद्याधरंनन्दनंनामअसिरत्नं महास्त्रमित्यर्थः । असिर्हिविद्याधरास्त्रम् ॥ १३ ॥ प्रस्वापनप्रशमनेचगान्धर्वे ॥ १४ ॥ विलापयतिपरिदेवयतीतिविलापनं । मदयतीतिमदनं ॥ १५ ॥ प्रतीच्छ गृहाण ॥ १६ ॥ मुसलान्मौसलमन्यत् ॥ १७—१८ ॥ शीतेषुं शीतेषुनामकं ॥ १९ ॥ कामरूपान् ऐच्छिकशरीरान् ॥ २० ॥ मन्त्रग्राममित्यनेन पूर्वोक्तास्त्रप्रदानंनामतत्तन्मन्त्रप्रदानमित्युक्तंभवति । तेषां कृशाश्वजन्यत्वमधिष्ठातृदेवताद्वारा ॥ २१ ॥ सर्वसंग्रहणं कार्त्स्न्येनसंग्रहणम् ॥ २२ ॥ अस्त्रमन्त्रान्दत्वा मन्त्रदेवताअपिरामाज्ञानुवर्तिनीःकारयितुं ताःस्मृत्वा जपतोविश्वामित्रस्याज्ञयाराघवं उपतस्थुः सिषेविरे ॥२३॥ राघवे-

ति० प्रथमं मुख्यं ॥ १० ॥ ति० दद्मीत्यार्षं ॥ १४ ॥ ति० मन्त्रग्रामं अस्त्राणांमन्त्रमूर्तित्वात् । ननुबलातिबलादानप्रसङ्गेपिमन्त्रग्रामंगृहाणेत्युक्तत्वात्पुनरत्रदानंविफलमितिचेन्न । गृहाणेत्येवतत्रोक्तत्वात्नतुददाविति । तेनतत्कालोपयोगिबलातिबलयोरेवतत्रदानं इतरेषांत्वत्रेतिविवेकः । वस्तुतोबलातिबलेमन्त्रसमूहात्मिकेइतितद्रूपमन्त्रग्राममितितत्रार्थइतिनदोषइतिपरे ॥ शि० अनुस्मरन् तत्तदस्त्रनियोजकत्वेनानुस्मारयन्रामायददौ । तुना लक्ष्मणायचददौ । स्मरन्नित्यन्तर्भावितणिजर्थः तेनरामज्ञानविषयीभूताएवतेमन्त्राइतिबोधितम् । तेनमन्त्रग्रहणंमर्यादापालनायैवेतिध्वनितम् ॥ २१ ॥ इतिसप्तविंशस्सर्गः ॥ २७ ॥

[पा०] १ क. च. छ. ञ. मथनंनाम. झ. ट. प्रथमंनाम. ङ. प्रथमंराम. २ ख. तवसुव्रत. ग. घ. ङ. तवराघव. ख. जयतांवर. ३ ङ. झ. ट. ख. किंकिणीम्. ४ क. ङ. च. छ. ज. ञ. वधार्थंरक्षमांयानि. ५ ख—ङ. झ. ट. मोहनंनाम. क. छ. मानवास्त्रंच. ६ क. ङ. झ. प्रस्वापनंप्रशमनं. ७ ख. तथासौम्यंच. ङ. झ. दद्मिसौम्यंच. क. च. छ. दद्मिसौरंच. ८ ङ. च. छ. झ. ञ. वर्षणं. ट. धर्षणं. क. दहनं. ९ ङ. झ. ञ. मादनं. १० क. च. छ. ञ. अस्त्रंकन्दर्पदैवतम्. ११ ख. मानवं. १२ क. ङ. च. छ. झ. ञ. मौसलंचनृपात्मज. १३ ङ. झ. मायामयं १४ क. ङ. च. छ. झ. ञ. सौरंतेजःप्रभं. ट. सौरंतेजःप्रदं. १५ क—च. झ. ञ. सोमास्त्रं. १६ ट. शीतलं. १७ क. घ. ङ. झ. सुदारुणं. ख. च. ञ. ट. सुदामनं. १८ ख. भगस्यास्त्रं. १९ ङ. झ. मानदम्. २० ख. घ. ततस्तु. २१ ट. मनुस्मरन्. २२ ख. घ. महात्मानं. २३ क. ख. ऊचुःप्रमुदिताः. २४ ख. इमेतववयंराम. ङ. झ. इमेचपरमोदाराः. २५ ख. किंकराश्शाधिनःप्रभो. २६ अयंश्लोकः ङ. च. झ. ज. ञ. दृश्यते.

प्रतिगृह्य च काकुत्स्थः समालभ्य च पाणिना ॥ मानसा मे भविष्यध्वमिति [१]तानभ्यचोदयत् ॥२६॥
ततः प्रीतमना रामो विश्वामित्रं महामुनिम् ॥ अभिवाद्य महातेजा गमनायोपचक्रमे ॥ २७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे सप्तविंशः सर्गः ॥ २७ ॥

अष्टाविंशः सर्गः ॥ २८ ॥

विश्वामित्रेणरामायास्त्राणामुपसंहारमन्त्रोपदेशः ॥ १ ॥ ताटकावनान्निर्गत्यसिद्धाश्रमसमीपमुपागतेनरामेणविश्वामित्रंप्रति पुरतोदृश्यमानाश्रमस्यनामधेयादिविशेषप्रश्नः ॥ २ ॥

प्रतिगृह्य ततोस्त्राणि प्रहृष्टवदनः शुचिः ॥ [२]गच्छन्नेव च काकुत्स्थो विश्वामित्रमथाब्रवीत् ॥ १ ॥
गृहीतास्त्रोस्मि भगवन्दुराधर्षः [३]सुरासुरैः ॥ अस्त्राणां त्वहमिच्छामि [४]संहारं मुनिपुङ्गव ॥ २ ॥
एवं ब्रुवति काकुत्स्थे विश्वामित्रो [५]महायशाः ॥ [६]संहारं व्याजहाराथ धृतिमान्सुव्रतः शुचिः ॥ ३ ॥
सत्यवन्तं सत्यकीर्तिं [७]धृष्टं रभसमेव च ॥ प्रतिहारतरं नाम पराङ्मुखमवाङ्मुखम् ॥ ४ ॥
[८]लक्षाक्षविषमौ चैव दृढनाभसुनाभकौ ॥ दशाक्षशतवक्त्रौ च दशशीर्षशतोदरौ ॥ ५ ॥
पद्मनाभमहानाभौ दुन्दुनाभ[९]सुनाभकौ ॥ ज्योतिषं [१०]कृशनं चैव नैराश्यविमलावुभौ ॥ ६ ॥
[११]योगन्धरहरिद्रौ च दैत्यप्रशमनौ तथा ॥ [[१२]शुचिर्बाहुर्महाबाहुर्[१३]निष्कुलिर्विरुचिस्तथा] ॥
[१४]सार्चिर्माली[१५]धृतिर्माली वृत्तिमान्[१६]रुचिरस्तथा ॥ ७ ॥
[१७]पितृसौमनसं चैव [१८]विधूतमकरावुभौ ॥ [१९]करवीरकरं चैव [२०]धनधान्यौ च राघव ॥ ८ ॥
कामरूपं कामरुचिं मोहमावरणं तथा ॥ जृंभकं [२१]सर्वनाभं च [२२]संतानवरणौ तथा ॥ ९ ॥
[२३]कृशाश्वतनयान्नाम भास्वरान्कामरूपिणः ॥ [२४]प्रतीच्छ मम भद्रं ते पात्रभूतोसि राघव ॥ १० ॥

त्यनन्तरमितिकरणंबोध्यम् ॥२४॥२५॥ प्रतिगृह्यअस्त्रसेवामङ्गीकृत्य। समालभ्य संस्पृश्य। "आलंभःस्पर्शहिंसयोः"इत्यमरः। मानसाः मनोनुसारिणः। चिन्तामात्रे उपस्थिताइतियावत् । भविष्यध्वं भवत । मानसास्सन्तोमांप्राप्नुतेतिवार्थः । भूप्राप्ताविितिधातुः ॥२६॥ गमनाय गन्तुं "तुमर्थाच्चभाववचनात्"इतिचतुर्थी ॥२७॥ इति श्रीगोविन्दराजवि० श्रीमद्रामायणभूषणे मणिमञ्जिराख्याने बालकाण्डव्याख्याने सप्तविंशःसर्गः २७

अस्त्रसंहारकप्रतिग्रहोष्टाविंशे—प्रतिगृह्येत्यादि । गच्छन् गमिष्यन् : "वर्तमानसामीप्येवर्तमानवद्वा" इति लट् ॥१॥ संहारंअवगतप्रयोगानामस्त्राणांपुनरुपसंहारं । तत्तदस्त्रमूलमन्त्रवर्तितत्तदस्त्रोपसंहारमन्त्रजातमित्यर्थः । जात्येकवचनम् ॥ २ ॥ धृतिमान् प्रीतिमान् ॥ ३ ॥ सत्यवन्तमित्यादिसप्तश्लोक्येकान्वया । सत्यवदादीनिउपसंहाराणांनामानि ॥ ४—६ ॥ सार्चिर्मालीत्यादिपुप्रथमाद्वितीयार्थे ॥ ७—९ ॥ मम

[पा०] १ ङ. झ. तान्यभ्यचोदयत्. २ ग. गच्छन्नेवाथ. ३ क—छ. झ. ञ. सुरैरपि. ४ क. ग. ङ. च. छ. झ. ञ. संहारान्. ५ ङ. च. छ. झ. ञ. महातपाः. ख. ग. घ. महामुनिः. क. महामनाः. ६ ङ. च. छ. झ. ञ. संहारान्. ७ ट. हृष्टंरभसमेव. झ. हृष्टसंरंभमेव. ८ क. ख. ङ. ग. च. छ. झ. ञ. ट. लक्ष्यालक्ष्याविमौ. ९ झ. स्वनाभकौ. १० ङ. च छ. झ. ञ. ट. शकुनं. घ. कुशनं. ग. कृथनं. ११ घ. ङ. झ. ञ. यौगन्धरहरिद्रौ. च. क. सौगन्धन. क. ङ. च. छ. झ. ञ. ट. विनिद्रौच. ख. हरिद्रौचमदनप्रमथौतथा. क. ग.—छ. झ. ञ. ट. दैत्यप्रमथनौतथा. १२ इदमर्धं क. ङ. च. छ. झ. ञ. ट. दृश्यते. १३ ङ. च. छ. झ. ञ. ट. निष्कलिर्विरुचस्तथा. १४ क. ग. ङ. च. छ. झ. ञ. ट. सार्चिमाली. १५ ख. धृतिज्वाला. १६ घ. न्विरुचिस्तथा. च. विरजस्तथा. ग. विचिरस्तथा. १७ ख. पित्र्यंसौमनसं. क. चन्द्रासौमनसं. च. छ. चन्द्रसौमनसं. ङ. झ. ट. पित्र्यस्सौमनसं. ञ. चन्द्रंसौमनसं. १८ ख. ग. विधूम. १९ ङ. च. ञ. करवीररार्तिं. झ. परवीररार्तिं. ख. करवीरंकर्निं. २० ट. धनधान्ये. २१ ङ. झ. सर्पनाथं. २२ ख. घ. संतानवरुणावुभौ. क. च. छ. ञ. संधानवरुणावुभौ. ङ. झ. पन्थानवरुणौतथा. २३. क. ख. ग. च. भृशाश्व. २४ ग. प्रतीच्छचास्त्रान्भद्रं.

बाढमित्येव काकुत्स्थः प्रहृष्टेनान्तरात्मना ॥ [तत्सर्वमग्रहीद्रामो विश्वामित्रान्महामुनेः] ॥११॥
दिव्यभास्वरदेहाश्च मूर्तिमन्तः सुखप्रदाः ॥ केचिदङ्गारसदृशाः केचिद्धूमोपमास्तथा ॥ १२ ॥
चन्द्रार्कसदृशाः केचित्प्रह्वाञ्जलिपुटास्तथा ॥ रामं प्राञ्जलयो भूत्वाब्रुवन्मधुरभाषिणः ॥ १३ ॥
इमे स्म नरशार्दूल शाधि किं करवाम ते ॥ १४ ॥
मानसाः कार्यकालेषु साहाय्यं मे करिष्यथ ॥ गम्यतामिति तानाह यथेष्टं रघुनन्दनः ॥ १५ ॥
अथ ते राममामन्त्र्य कृत्वा चापि प्रदक्षिणम् ॥ एवमस्त्विवति काकुत्स्थमुक्त्वा जग्मुर्यथागतम् ॥
[प्रणम्य शिरसा रामं सर्वे संमतविक्रमाः] ॥ १६ ॥
[ततस्तु रामः काकुत्स्थः शासनाद्ब्रह्मवादिनः ॥ लक्ष्मणाय च तान्सर्वान्वराग्स्त्रान्रघुनन्दनः ॥
संहारान्स च संहृष्टः श्रीमांस्तस्मै न्यवेदयत्] ॥ १७ ॥
स च तान्राघवो ज्ञात्वा विश्वामित्रं महामुनिम् ॥ गच्छन्नेवाथ मधुरं श्लक्ष्णं वचनमब्रवीत् ॥१८॥
किंन्वेतन्मेघसंकाशं पर्वतस्याविदूरतः ॥ वृक्षषण्डमितो भाति परं कौतूहलं हि मे ॥ १९ ॥
दर्शनीयं मृगाकीर्णं मनोहरमतीव च ॥ नानाप्रकारैः शकुनैर्वल्गुनादैरलंकृतम् ॥ २० ॥
निःसृताः स्म मुनिश्रेष्ठ कान्ताराद्रोमहर्षणात् ॥ २१ ॥
अनया त्ववगच्छामि देशस्य सुखवत्तया ॥ सर्वं मे शंस भगवन्कस्याश्रमपदं त्विदम् ॥ २२ ॥
संप्राप्ता यत्र ते पापा ब्रह्मघ्ना दुष्टचारिणः ॥ तव यज्ञस्य विघ्नाय दुरात्मानो महामते ॥ २३ ॥
भगवंस्तस्य को देशः सा यत्र तव याज्ञिकी ॥ रक्षितव्या क्रिया ब्रह्मन्मया वध्याश्च राक्षसाः ॥ २४ ॥
एतत्सर्वं मुनिश्रेष्ठ श्रोतुमिच्छाम्यहं प्रभो ॥ २५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे अष्टाविंशः सर्गः ॥ २८ ॥

मत्तः ॥ १० ॥ बाढमित्यर्धं । बाढमित्यङ्गीकारे । प्रहृष्टेनान्तरात्मना प्रतिजग्राहेतिशेषः ॥११॥ मन्त्रस्वीकारानन्तरंमन्त्रदेवतासाक्षात्कारंदर्शयति—दिव्येत्यादिश्लोकद्वयेन । दिव्याःश्लाघ्याःभास्वराश्चदेहायेषांते । तथा । मूर्तिमन्तः शरीरकाठिन्यवन्तः । "मूर्तिःकाठिन्यकाययोः"इत्यमरः । सुखप्रदाः आह्लादकाः ॥१२॥ प्रह्वाः नम्राः । अञ्जलिपुटाः अञ्जलिपुटयुक्ताः । अर्शआदित्वादच् । प्राञ्जलयः कृताञ्जलयः । मधुरभाषिणः मधुरभाषणशीलाः । केचित्पुरुषाः राममब्रुवन् ॥ १३ ॥ इमइत्यर्धं । स्मेत्यार्षःसलोपः । शाधि आज्ञापय । "शासु"इति शास्तेःशादेशः ॥ १४ ॥ यथेष्टंगम्यतामित्यन्वयः ॥ १५ ॥ ते पुरुषाः ॥ १६ ॥ तान् उपसंहारमन्त्रान् । श्लक्ष्णं व्यक्तं ॥ १७—१८ ॥ श्लोकद्वयं । इतः अस्मिन्प्रदेशे । कौतूहलं श्रोतुमितिशेषः ॥ १९—२० ॥ कान्तारात् ताटकावनात् । रोमहर्षणात् रोमाञ्चकरात् भयंकरादितियावत् । अर्धमेकं ॥ २१ ॥ अनया देशस्यसुखवत्तया इदमाश्रमपदमित्यवगच्छामि । कस्येति नजानामि तत्सर्वंशंस आदितःप्रभृतिवदेत्यर्थः ॥ २२ ॥ संप्राप्ताइत्यादिश्लोकद्वयं । ते पूर्वोक्ताः । तवयज्ञस्य विघ्नाययत्राश्रमपदे संप्राप्ताः साचतवयाज्ञिकाक्रियायत्र रक्षितव्या राक्षसाश्चवध्याः तस्याश्रमस्यकोदेशः ॥ २३—२४ ॥ एतदित्यर्धं ॥ २५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने अष्टाविंशःसर्गः ॥ २८ ॥

ति० प्रह्वाञ्जलिपुटाः प्रह्वाःनम्राश्चते अञ्जलेःपुटंसंश्लेषोयेषांतादृशाः ॥१३॥ ति० वल्गुभाषैः मधुरभाषैः ॥२०॥ इत्यष्टाविंशस्सर्गः॥२८

[पा०] १ इदमर्धं ख. दृश्यते. २ ख. केचिदुग्रग्रहोपमाः. ३ क. कृत्वाचाभि. ट. तंचकृत्वा. ४ इदमर्धं च. छ. दृश्यते. ५ इदमर्धत्रयं च. छ. दृश्यते. ६ ङ. च. छ. झ. ञ. किमेतन्मेघ. ७ झ. ञ. वृक्षखण्डमितोभाति. ख. च. वृक्षषण्डमिवाभाति. ८ ख. ग. मनोरम. ९ क. ङ. च. छ. झ. ञ. वल्गुभाषैः. १० घ. ट. दुष्टात्मानो. ११ ख—छ. झ. ञ. महामुने. १२ ख. भगवन्कस्यदेशोयं. १३ क—छ. झ. ञ. मया. १४ क. मुने.

एकोनत्रिंशः सर्गः ॥ २९ ॥

विश्वामित्रेणरामंप्रतिसिद्धाश्रमवृत्तान्तकथनारंभः ॥ १ ॥ बलिपराजितेन्द्रादिप्रार्थनयाविष्णुनादित्यांवामनत्वेनावतीर्ययाच्ञाव्याजेनबलिनिग्रहपूर्वकंपुनर्देवानांस्वर्गेस्थापनम् ॥ २ ॥ विश्वामित्रेणरामंप्रतिसिद्धाश्रमपदस्यप्रवृत्तिनिमित्तकथनम् ॥ ३ ॥ तस्यैवस्वाश्रमत्वाभिधानपूर्वकंतत्रैवराक्षसहननस्यकर्तव्यत्वोक्तिः ॥ ४ ॥ ततोविश्वामित्रेणराघवाभ्यांसहसिद्धाश्रमप्रवेशपूर्वकंरामवचनाद्दीक्षाप्रवेशः ॥ ५ ॥

अथ तस्याप्रमेयस्य तद्वचनं परिपृच्छतः ॥ विश्वामित्रो महातेजा व्याख्यातुमुपचक्रमे ॥ १ ॥
इह राम महाबाहो विष्णुर्देववरः प्रभुः ॥ *वर्षाणि सुबहून्येव तथा युगशतानि च ॥
तपश्चरणयोगार्थमुवास सुमहातपाः ॥ २ ॥
एष पूर्वाश्रमो राम वामनस्य महात्मनः ॥ सिद्धाश्रम इति ख्यातः सिद्धो ह्यत्र महातपाः ॥ ३ ॥
एतस्मिन्नेव काले तु राजा वैरोचनिर्बलिः ॥ निर्जित्य दैवतगणान्सेन्द्रांश्च समरुद्गणान् ॥
कारयामास तद्राज्यं त्रिषु लोकेषु विश्रुतः ॥ ४ ॥
[यज्ञं चकार मतिमानसुरेन्द्रो महाबलिः] ॥ बलेस्तु यजमानस्य देवाः साग्निपुरोगमाः ॥
समागम्य स्वयं चैव विष्णुमूचुरिहाश्रमे ॥ ५ ॥
बलिर्वैरोचनिर्विष्णो यजते यज्ञमुत्तमम् ॥ असमाप्ते क्रतौ तस्मिन्स्वकार्यमभिपद्यताम् ॥ ६ ॥

अथसिद्धाश्रमस्यनित्यंभगवत्संनिधिमत्त्वेनदिव्यदेशत्वंतत्संनिधानेपूर्वेषांसिद्धतपस्कत्वंभगवद्देशस्यैववस्तव्यत्वमित्येतत्प्रतिपादनमुखेनस्थाण्वाश्रमाद्वैलक्षण्यं दर्शयत्येकोनत्रिंशे—अथेत्यादि। अप्रमेयस्य अचिन्त्यवैभवस्य मानुषभावनयापूर्ववृत्तमज्ञातमिवपृच्छतइत्यर्थः । चतुर्थ्यर्थेषष्ठी ॥ १ ॥ इहेतिसार्धश्लोकः । तपश्चरणयोगार्थं तपश्चरणफलसिध्यर्थं । यद्वा तपश्चरणंच योगश्चतदुभयार्थं । केचिदिहइहशब्दद्वयंपठन्ति तदाइहवनेतत्रापिइहप्रदेशइत्यर्थः ॥ २ ॥ वामनस्य वामनरूपेणावतरिष्यतः । पूर्वंविष्णुत्वेनरूपेणेहतपश्चचार पश्चाद्वामनरूपेणापीतितस्याश्रमस्यातिशयोदर्शितः । विष्णोरत्रतपश्चरणंलोकेतपसःप्रवर्तनाय । बदरिकाश्रमइव नारायणस्य । सिद्धाश्रमत्वंनिर्वक्ति—सिद्धइति । महातपाः काश्यपः । अत्र । हि यस्मात् । सिद्धः तपःफलंप्राप्तः । तस्मादेषसिद्धाश्रमोनाम ॥ ३ ॥ एतस्मिन्नितिसार्धश्लोकः । एतस्मिन्काले विष्णोस्तपश्चरणकाले । विरोचनः प्रह्लादसुतः तस्यापत्यंवैरोचनिः । समरुद्गणान् सवायुगणान् । कारयामास मन्त्रिभिरितिशेषः । तद्राज्यं इन्द्रराज्यं ॥ ४ ॥ बलेरिति । भावलक्षणेषष्ठी । बलौयजमाने यागंकुर्वाणे । साग्निपुरोगमाः पुरोगमेनाग्निनासहिताः । अग्निमुखत्वाद्देवानां । स्वयमेवसमागम्यइहाश्रमेतपश्चरन्तंविष्णुमूचुः ॥ ५ ॥ यज्ञंयजते यज्ञंकरोतीत्यर्थः । ओदनपाकंपचतीतिवत् । समाप्तश्चेन्नसजेतुंशक्यइत्यर्थः । स्वकार्यं

ति० । वचनं श्रुत्वेतिशेषः ॥ १ ॥ ति० यजतेःकर्त्रभिप्रायत्वादात्मनेपदं । नन्वसुरस्यबलेर्देवद्विषोयागाद्यनुपपत्तिः । यागतर्पणीयदेवताभावात् । इन्द्रादीनांतद्द्वेष्यत्वात् । नचशब्दमात्रंदेवतेतियुक्तं । अर्थवादप्रामाण्येनदेवतायाविग्रहवत्त्वस्योत्तरमीमांसायांसिद्धान्तितत्वादितिचेन्न । कर्मदेवाजानदेवभेदेनदेवानांद्वैविध्यात् । तत्रयेकर्मणादेवत्वंप्राप्तास्तेकर्मदेवाः । आजानदेवास्तुयज्ञमन्त्रार्थभूतामन्त्रेणनित्यसंबद्धाःकर्मदेवेभ्यःप्राचीनाएव । तत्कर्मदेवानांद्वेष्यत्वेप्याजानदेवानांयज्ञेतर्प्यत्वेननदोषः । विघ्नकर्तारोप्यत्रकर्मदेवा एव । यज्ञाद्यधिकाराभावोपिआजानदेवानामेव स्वयष्टव्यदेवतान्तराभावात् । कर्मदेवानांत्वस्त्येव । अतएवेन्द्रादीनांयज्ञादिश्रवणं नानुपपन्नमित्यन्यत्रविस्तरः ॥ ६ ॥

[पा०] १ ङ. च. छ. झ. ञ. वचनं. २ ङ. च. छ. झ. ञ. देवनमस्कृतः * अत्र इह रामेत्यर्धात्परं ख. पुस्तके–प्रदृश्यः सर्वभूतानांसर्वात्मासर्वलोकभृत् । मोहनार्थंतुलोकस्यसर्वेषांजगतांप्रभुः । इत्यर्धद्वयमधिकं दृश्यते. ३ क. ख. ग. ङ. च. छ. झ. ञ. सुबहूनीह. ४ ग. घ. तपसश्चरणार्थंहि. ५ ख. च. छ. समहातपाः. ६ ङ. च. झ. ञ. गणान्सेन्द्रान्सहमरुद्गणान्. ७ इदमर्धं क. ङ. छ. झ. ञ. ट. दृश्यते. ८ ङ. च. छ. झ. ञ. सुमहान्. क. भगवान्. ९ क. ङ. छ. झ. ञ. महाबलः. १० ङ. झ. असमाप्तव्रते.

ये चैनमभिवर्तन्ते याचितार इतस्ततः ॥ यच्च यत्र यथावच्च सर्वं तेभ्यः प्रयच्छति ॥ ७ ॥
स त्वं सुरहितार्थाय मायायोगमुपागतः ॥ वामनत्वं गतो विष्णो कुरु कल्याणमुत्तमम् ॥ ८ ॥
एतस्मिन्नन्तरे राम कश्यपोऽग्निसमप्रभः ॥ अदित्या सहितो राम दीप्यमान इवौजसा ॥ ९ ॥
देवीसहायो भगवान्दिव्यं वर्षसहस्रकम् ॥ व्रतं समाप्य वरदं तुष्टाव मधुसूदनम् ॥ १० ॥
तपोमयं तपोराशिं तपोमूर्तिं तपात्मकम् ॥ तपसा त्वां सुतप्तेन पश्यामि पुरुषोत्तमम् ॥ ११ ॥

देवकार्यं । आश्रितकार्यस्यस्वकार्यत्वात्तथोच्यते । अभिपद्यतां अभितःकात्स्न्र्येनसंपाद्यतां ॥ ६ ॥ ननु कथमसुरस्ययज्ञानुष्ठानं "यस्यैदेवतायैहविर्गृहीतं स्यात्तांध्यायेद्वषट्करिष्यन्साक्षाद्देवतदेवतांप्रीणाति" इतिश्रुतेः । तत्तद्देवध्यानपूर्वकंतत्तन्मन्त्रेणतत्तदुद्देशेनतत्तद्धविःप्रदानस्ययागत्वात्तस्यचदेवशत्रोरयोगात् । नचचतुर्थ्यन्तःशब्दोदेवतेतिवाच्यं । अचेतनप्रीणनासंभवात् । तत्प्रीतिमूलफलासिद्धेश्च । अतएव केवलाक्रियैवफलदेतिप्रत्युक्तं । अतोर्थवादाद्यनुरोधेनशब्दक्रियातिरिक्ता सचेतना वज्रहस्तत्वादिविशिष्टविग्रहवती देवता । नचविग्रहवत्त्वे युगपदनेकयागसंनिधानासंभवः । दिव्यशक्तिमत्त्वेननानाशरीरपरिग्रहसंभवेन तेषांसर्वयागसांनिध्यस्यसुलभत्वात् । तस्मान्नदेवतावैरिणोयागसंभवइति । उच्यते । नायंबलिनाक्रियमाणोयागइन्द्रादिदेवताराध्यकः । येनोक्तदोषःस्यात् । किंतु भगवदाराधनभूतःकश्चिद्यागविशेषः । तस्यविष्णुभक्तत्वेनप्रसिद्धत्वात् । तर्हिभक्तयज्ञविघ्नंविष्णुःकथंकुर्यात् । स्वभक्तस्यापिस्वभक्तविरोधित्वंभगवतोऽसह्यं । ततःपुत्रान्तरविरोधिपुत्रशिक्षणवत् स्वाश्रितदेवविरोधिशिक्षणंयुक्तमेव । अतएवोक्तं "ममसद्भक्तभक्तेषुप्रीतिरभ्यधिकाभवेत्" इति । तर्हितस्यधार्मिकस्यकथंनिग्रहःस्यात्तत्राह–येचेत्यादिश्लोकद्वयेन । ये यत्र वस्त्रवाहनादिपुयद्वस्तु याचितारःयाचिष्यमाणाः सन्तः इतस्ततः देशात् एनमभिवर्तन्ते तत्सर्वंतेभ्यःयथावत् सत्कारपूर्वकंप्रयच्छति ॥ ७ ॥ माया विष्णुत्वाच्छादिकाशक्तिःतस्या योगं संबंधमुपागतः । वामनत्वं वामनरूपत्वं गतः । कल्याणं अस्मत्कार्यंकुरु । तस्मिन्नौदार्याख्योमहागुणोवर्तते । तेनत्वंवामनवेषोभूत्वा याच्ञापदेशेन तद्राज्यमपहृत्यदेहीतिभावः ॥८॥ एतस्मिन्नितिश्लोकद्वयं । एतस्मिन्नन्तरे देवप्रार्थनावसरे । कश्यपोऽदित्यासहितोव्रतंसमाप्य विष्णूद्देशेनकृतंव्रतंसमाप्य । वरदंवरदानायसंनिहितंविष्णुं देवीसहायःसन् तुष्टाव । अत्ररामपदद्वयंरूढ्यायोगेनचनिर्वाह्यं । व्रतानुष्ठानकालेवरकालेचदेवीसाहित्यद्योतनायद्विःप्रयोगोदेव्याः । अयमत्रक्रमः " सोकामयत बहुःस्यांप्रजायेयेति सतपोतप्यत" इत्युक्तरीत्या विष्णुर्जगद्रक्षणचिन्तापरोत्रदेशेचिरमदृश्यउवास । तद्विदित्वातमेवपुत्रंलब्धुकामःकश्यपोदेव्यासहदिव्यवर्षसहस्रनिर्वर्त्यविष्णवाराधनरूपं किंचिद्व्रतमनुष्ठाय तदन्तेवरदानायदृश्यमानंविष्णुंतुष्टाव । तस्मिन्नेवावसरेदेवाश्चागताःप्रार्थितवन्तइति ॥ ९–१० ॥ तपोमयं तपःप्रचुरं । प्राचुर्यंचाराध्यत्वेन । तपसाराध्यमित्यर्थः । तपोराशिं तपोराशिस्वरूपं तपःफलदमितियावत् । तपोमूर्तिं ज्ञानस्वरूपं । तपआलोचनइतिधातोरसुन्प्रत्ययः । तपात्मकं तपस्स्वभावं । ज्ञानगुणकमित्यर्थः । उक्ताद्धातोर्घञर्थेकविधानमितिकः । पुरुषोत्तमं बद्धमुक्तोभयावस्थाज्जीवाद्विलक्षणं । त्वां । सुतप्तेन अनन्यप्रयोजनतयानुष्ठितेन । तपसा आराधनेन । पश्यामि साक्षात्करोमि । सर्वकर्मसमाराध्यंसर्वकर्मफलप्रदं ज्ञानस्वरूपत्वेनसमस्तहेयप्रत्यनीकज्ञानानन्दाद्यपरिमितगुणवत्त्वेनचसर्वस्माद्विलक्षणंत्वांसा-

ति०रामेतिद्विस्संबोधनंस्वाश्रमसंनिधानेनरामपृष्टतन्महत्त्वकथनेनहर्षातिशयाच्चबोध्यं । अदित्यासहितोव्रतंसमाप्य देवीसहायस्तुष्टावेत्यन्वयः । देव्यदितिरेव । यद्वादेवीसरस्वती । शि० रामदीप्यमानः रामनाम्नाप्रकाशमानः । देवीसहायः देवीपार्वती सहायोयस्यसभगवान् शंभुरिव ओजसाइव ओजस्तुल्यया अदित्यासहितः कश्यपः दिव्यवर्षसहस्रकं दिव्यवर्षसहस्रसाध्यंव्रतं समाप्य मधुसूदनंतुष्टावेत्यन्वयः । इवशब्दउभयान्वयी ॥ ९ ॥ १० ॥ शि० तपोमयं तपसा वेदबोधिताभिलाषरहितकृच्छ्रचान्द्रायणादिना मयते अन्तःकरणशुद्धिपूर्वकज्ञानोत्पत्तिद्वाराप्राप्नोतितं । अतएव तपोराशिं तपसांराशिस्समूहःयस्मै । यत्प्राप्तिफलकमेवतपआद्याचरणंतं । अतएवतपोमूर्तिं तपोयुक्तामूर्तिर्विग्रहोयस्यतं । लोकशिक्षणार्थंतपश्चरन्तमित्यर्थः । तपात्मकं तपोज्ञानंआत्मायस्यतं ॥ ११ ॥

[पा०] १ ग—छ. झ. ञ. मुपाश्रितः, २ घ, च. छ. ञ. ट. दिव्यवर्षं. ३ क. च. छ. ञ, तपोधनम्.

शरीरे तव पश्यामि जगत्सर्वमिदं प्रभो ॥ त्वमनादिरनिर्देश्यस्त्वामहं शरणं गतः ॥ १२ ॥
तमुवाच हरिः प्रीतः कश्यपं धूतकल्मषम् ॥ वरं वरय भद्रं ते वरार्होसि मतो मम ॥
[किमिच्छसि वरं श्रेष्ठं वरदोसि महाद्युते ।] ॥ १३ ॥
तच्छ्रुत्वा वचनं तस्य मारीचः कश्यपोऽब्रवीत् ॥ १४ ॥
अदित्या देवतानां च मम चैवानुयाचतः ॥ वरं वरद सुप्रीतो दातुमर्हसि सुव्रत ॥ १५ ॥
पुत्रत्वं गच्छ भगवन्नदित्या मम चानघ ॥ भ्राता भव यवीयांस्त्वं शक्रस्यासुरसूदन ॥
शोकार्तानां तु देवानां साहाय्यं कर्तुमर्हसि ॥ १६ ॥
अयं सिद्धाश्रमो नाम प्रसादात्ते भविष्यति ॥ सिद्धे कर्मणि देवेश उत्तिष्ठ भगवन्नितः ॥ १७ ॥
अथ विष्णुर्महातेजा अदित्यां समजायत ॥ [छत्री भिक्षुकरूपेण कमण्डलुशिखोज्वलः] ॥
वामनं रूपमास्थाय वैरोचनिमुपागमत् ॥ १८ ॥
[तं दृष्ट्वाऽसुरराजेन्द्रो वामनत्वाच्च विस्मितः ॥ माधवोऽयमिति ज्ञात्वा पूजयामास धर्मतः ॥
पूजितस्तेन धर्मात्मा सर्वलोकहिताय वै ॥ १९ ॥]
[*आसाद्य यजमानं तमुवाच भगवान्हरिः ॥ स्वस्ति तेऽस्तु महाराज यज्ञश्चातीव शोभनः ॥२०॥
वयं दानार्थिनो राजञ्छ्रुत्वा यज्ञमनुत्तमम् ॥ त्वां दृष्ट्वा तव योगेषु किंचिल्लब्धुमिहागताः ॥ २१ ॥
वामनेनैवमुक्तस्तु मुदा राजा तदाऽब्रवीत् ॥ अद्य मे सफलो यज्ञः कृतार्थोस्म्यद्य वामन ॥ २२ ॥
त्वदर्थं कल्पितं चैव मम सर्वस्वमेव च ॥ धनौघं रत्नराशिं वा भूषणं धान्यसंचयम् ॥ २३ ॥
ग्रामं वा नगरं वाऽपि राष्ट्रं वा यानमेव वा ॥ हस्त्यश्वरथपत्तीर्वा त्वं लभस्वान्यमेव वा ॥
किमिच्छसि महाबाहो तद्ददामि तवानघ ॥ २४ ॥
एवमुक्तस्तदा राज्ञा भगवान्पुरुषोत्तमः ॥ उवाचेषत्स्मितं कृत्वा यजमानं महाबलिम् ॥ २५ ॥
एतैः किं मम राजेन्द्र तैस्तु नास्ति प्रयोजनम् ॥ असत्पादत्रयाक्रान्तां देहि भूमिं विभो तदा ॥ २६ ॥
श्रुत्वा तद्वामनेनोक्तं स्मितं कृत्वाऽसुरोत्तमः ॥ येनेष्टं पूर्यते ब्रह्मंस्तत्कुर्मेति ततोऽब्रवीत् ॥ २७ ॥
वामनाय महीं दातुं निश्चितेऽसुरसत्तमे ॥ तं निवार्य महाराजं प्राह शुक्रो द्विजोत्तमः ॥ २८ ॥
विरिञ्चभवशक्राद्या योगिनश्च सुरासुराः ॥ यं न जानन्ति वेदाश्च स एषो विष्णुरव्ययः ॥ २९ ॥
दानारक्ते ततः शुक्रे शुक्रं राजपुरोहितम् ॥ गृहीत्वा ताडयामास वैनतेयो महाबलः ॥ ३० ॥

क्षात्करोमि । एतदेवमेपरमप्रयोजनमित्यर्थः ॥ ११ ॥ इदं चेतनाचेतनात्मकं सर्वजगत् । तवशरीरेस्मिन्पश्यामि । एवं नु गीतं "पश्यामिदेवांस्तवदेवदेहेसर्वांस्तथाभूतविशेषसंघान् । ब्रह्माणमीशंकमलासनस्थमृषींश्चसर्वानुरागांश्चदिव्यान्" इति । यद्वा जगत्सर्वंशरीरमित्युक्तत्वात् शरीरतयापश्यामीत्यर्थः । त्वमनादिः उत्पत्तिरहितः । अनिर्देश्यः । एतावानितिपरिच्छेत्तुमशक्यइत्यर्थः । अतस्त्वामहं शरणं रक्षितारं । गतः ॥ १२–१३ ॥ तच्छ्रुत्वेत्यर्धं । मारीचः मरीचिपुत्रः ॥ १४ ॥ अदित्याः याचमानायाः । देवतानां याचमानानामित्यूह्यम् ॥ १५ ॥ पुत्रत्वमित्यादिसार्धश्लोकएकान्वयः ॥ १६ ॥ देशेप्यनुग्रहःक्रियतामित्याह— अयमिति । ते प्रसादात् कर्मणि मत्तपसि । सिद्धेसति । त्वयिमेपुत्रत्वंप्राप्तइत्यर्थः । अयंसिद्धाश्रमोनामभविति० । साहाय्यं बलिच्छलरूपं । शि० इन्द्रस्यभ्राताभवेत्यनेनइन्द्रेप्सितकार्यकारित्वंस्वस्मिन्ननुसंधेयमितिप्रार्थनासूचिता । असुरसूदनेत्यनेनसनातनोसुरद्वेषस्त्वय्यस्तीतिबोधितं । तेनासुरानिरसनीयाभवतेतिद्योतितम् ॥ १६ ॥

[पा०] १ इदमर्धं च. छ. दृश्यते. २ ङ. झ. याचितम्. ३ इदमर्धं च. छ. दृश्यते. ४ इदमर्धत्रयं च. छ. दृश्यते.
* अत्रकुण्डान्तर्गताश्चतुर्दशश्लोकाः क. पुस्तकेऽधिकादृश्यन्ते.

पत्न्या सह विनिश्चित्य यजमानो महाबलिः ॥ मायारूपेण देवेशो मम यज्ञं गतो यदि ॥
तदैतद्यज्ञसाफल्यमेवमस्त्विवति चाब्रवीत् ॥ ३१ ॥
इति मत्वोदकं दत्तं वामनाय महात्मने ॥ तव पादत्रयाक्रान्तां गृहाणाद्य महीं प्रभो ॥ ३२ ॥
उदके स्पृष्टमात्रे तु विश्वरूपधरो हरिः ॥ तत्रस्थ एव ववृधे येन पूर्णं जगत्रयम् ॥
सायुधैर्बाहुभिः पूर्णा दिग्विदिक्सर्वमेव हि] ॥ ३३ ॥
त्रीन्क्रमानथ भिक्षित्वा प्रतिगृह्य च मानदः ॥आक्रम्य लोकाँल्लोकात्मा सर्वलोकहिते रतः ॥३४॥
महेन्द्राय पुनः प्रादान्नियम्य बलिमोजसा ॥ त्रैलोक्यं स महातेजाश्चक्रे शक्रवशं पुनः ॥ ३५ ॥
तेनैष पूर्वमाक्रान्त आश्रमः श्रमनाशनः ॥ मया तु भक्त्या तस्यैष वामनस्योपभुज्यते ॥ ३६ ॥
एतमाश्रममायान्ति राक्षसा विघ्नकारिणः ॥ अत्रैव पुरुषव्याघ्र हन्तव्या दुष्टचारिणः ॥ ३७ ॥
अद्य गच्छामहे राम सिद्धाश्रममनुत्तमम् ॥ तदाश्रमपदं तात तवाप्येतद्यथा मम ॥ ३८ ॥
[इत्युक्त्वा परमप्रीतो गृह्य रामं सलक्ष्मणम्] प्रविशन्नाश्रमपदं व्यरोचत महामुनिः ॥
शशीव गतनीहारः पुनर्वसुसमन्वितः ॥ ३९ ॥
तं दृष्ट्वा मुनयः सर्वे सिद्धाश्रमनिवासिनः ॥ उत्पत्योत्पत्य सहसा विश्वामित्रमपूजयन् ॥ ४० ॥
यथार्हं चक्रिरे पूजां विश्वामित्राय धीमते ॥ तथैव राजपुत्राभ्यामकुर्वन्नतिथिक्रियाम् ॥ ४१ ॥
मुहूर्तमिव विश्रान्तौ राजपुत्रावरिंदमौ ॥ प्राञ्जली मुनिशार्दूलमूचतू रघुनन्दनौ ॥ ४२ ॥
अद्यैव दीक्षां प्रविश भद्रं ते मुनिपुङ्गव ॥ सिद्धाश्रमोऽयं सिद्धः स्यात्सत्यमस्तु वचस्तव ॥ ४३ ॥
एवमुक्तो महातेजा विश्वामित्रो महामुनिः ॥ प्रविवेश ततो दीक्षां नियतो नियतेन्द्रियः ॥ ४४ ॥

ष्यति । तस्मादितआश्रमादुत्तिष्ठ । अवतारायेतिशेषः ॥१७–३३॥ श्लोकद्वयमेकान्वयं । क्रमान् पदविक्षेपान् । भिक्षित्वा याचित्वा । प्रतिगृह्य । मानंद्यतिखण्डयतीतिमानदः । निरभिमानोभिक्षित्वेत्यर्थः । लोकाक्रमणेहेतुर्लोकात्मेति । वामनरूपेणयाचित्वा सर्वलोकव्यापिशरीरेणक्रान्त्वेत्यर्थः । नियम्य वद्ध्वा । त्रैलोक्यस्यापिपदद्वयक्रान्तत्वेन तृतीयपदालाभात्तदर्थंवद्ध्वेत्यर्थः ॥३४–३५॥ प्रकृतमुपसंहरति—तेनेति । तेन वामनेन । श्रमनाशनः संसारश्रमनिवर्तकः । संनिहितंस्थाण्वाश्रमंविहाय भवान्किमर्थमत्रास्थितइत्यत्राह—मयात्विति । मयातु देवतान्तरेपुपरत्वबुद्धिरहितेन । भक्त्या विष्णुभक्त्या । तस्य वामनस्य । एषः आश्रमः । उपभुज्यते आश्रीयते।वामनस्येयंभूमिरितिकेवलंतामेवाजिघ्रन्वर्त इत्यर्थः ॥३६–३७॥ गच्छामहे गच्छामः । तातेत्युपलालने । तदेतदाश्रमपदंयथाममतथातव । स्वमितिशेषः ॥ ३८ ॥ गतनीहारः गतहिमः । पुनर्वसुभ्यांसमन्वितइतिरामलक्ष्मणसाम्यापेक्षया ॥ ३९ ॥ उत्पत्योत्पत्येतिप्रीत्यतिशयोक्तिः । आगत्यागत्येत्यर्थः । अनेननिरन्तरंतदागमनोक्त्यामुनिबहुत्वमुच्यते ॥ ४० ॥ यथार्हं मुनियोग्यतामनतिक्रम्य ॥ ४१ ॥ मुहूर्तं अल्पकालं । विश्रान्ताविवेतिमनुष्यभावेनोच्यते ॥ ४२ ॥ अद्यैव प्रवेशदिनएव । अयंसिद्धाश्रमःसिद्धःस्यात् त्वद्यज्ञसिद्ध्याअन्वर्थसिद्धसंज्ञोस्तु। सत्यमस्तुवचस्तव "अत्रैवपुरुषव्याघ्रहन्तव्यादुष्टचारिणः" इतिवचइत्यर्थः । राक्षसान्सर्वथा हनिष्यइतिभावः ॥ ४३ ॥ नियतः निगृहीतान्तः-

---

ति० लोकार्थी त्रैलोक्याक्रमणार्थी ॥ ३४ ॥ शि० तेन वामनेन । श्रमनाशनोऽयमाश्रमः । भक्त्या त्वद्विषयकप्रीत्या । पूर्वमेवआक्रान्तः सेवितः मयापित्वद्विषयकप्रीत्यैवतस्यवामनस्यायमाश्रमोनिषेव्यते । एतेन रामस्याखेटखेलनवनंतदितिध्वनितं । तेनाप्रकटरूपेण सदैव तत्ररामस्यस्थितिरितिव्यञ्जितम् । तेनरामप्रश्नोविश्वामित्रज्ञानपरीक्षार्थमेवेतिव्यक्तं ॥ ३६ ॥

[पा०] १ च. ट. त्रीन्पदानथ. २ क. च. छ. ञ. वामनः. ङ. झ. मेदिनीम्. ३ ङ. झ. ञ. ट. लोकाँल्लोकार्थी. ४ ग. घ. भूतहिते. ५ ङ. च. छ. झ. ञ. ट. तेनैव. ६ ग.—छ. झ. ञ. मयापि. ७ ङ. च. तस्यैव. ८ क. ख. वामनस्यनिषेव्यते. ९ क.—छ. झ. ञ. ट. अत्रते. १० इदमर्धं च. छ. दृश्यते. ११ ख. रामं लक्ष्मणसंयुम्. १२ ख. चक्रुःपूजांयथार्हते. १३ क. ग—छ. झ. ञ. मुहूर्तमथ. १४ ग. च. झ. ञ. महानृपिः. १५ क—छ. झ. ञ. तदा.

[1]कुमारावपि तां रात्रिमुषित्वा सुसमाहितौ ॥ प्रभातकाले चोत्थाय पूर्वां सन्ध्यामुपास्य च ॥ ४५ ॥
[2]स्पृष्टोदकौ शुची जप्यं समाप्य नियमेन च ॥ [3]हुताग्निहोत्रमासीनं विश्वामित्रमवन्दताम् ॥ ४६ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे एकोनत्रिंशः सर्गः ॥ २९ ॥

त्रिंशः सर्गः ॥ ३० ॥

विश्वामित्रेणादिनषट्कनिर्वर्त्येयज्ञेसमुपक्रान्तेराघवाभ्यांदिनपञ्चकमनिद्रंतद्रक्षणम् ॥ १ ॥ षष्ठेऽहनिसुबाहुमारीचादिभिर्गगनमेत्यपरितोरुधिरवर्षणम् ॥ २ ॥ रामेणमानवास्त्रेणमारीचस्यसागरेप्रक्षेपणम् ॥ ३ ॥ तथासुबाहुवधपूर्वकमितरेषांवायव्येन निरसनम् ॥ ४ ॥ विश्वामित्रेणयज्ञसमापनपूर्वकंरामप्रशंसनम् ॥ ५ ॥

अथ तौ देशकालज्ञौ राजपुत्रावरिंदमौ ॥ देशे काले च वाक्यज्ञावब्रूतां कौशिकं वचः ॥ १ ॥
भगवञ्श्रोतुमिच्छावो यस्मिन्काले निशाचरौ ॥ [4]संरक्षणीयौ तौ ब्रह्मन्नातिवर्तेत तत्क्षणम् ॥ २ ॥
एवं ब्रुवाणौ काकुत्स्थौ त्वरमाणौ युयुत्सया ॥ सर्वे ते मुनयः प्रीताः प्रशशंसुर्नृपात्मजौ ॥ ३ ॥
अद्यप्रभृति षड्रात्रं रक्ष[5]तं राघवौ युवाम् ॥ दीक्षां गतो ह्येष मुनिर्मौनित्वं च गमिष्यति ॥ ४ ॥
तौ[6] च तद्वचनं श्रुत्वा राजपुत्रौ यशस्विनौ ॥ अनिद्रौ षडहोरात्रं तपोवनमरक्षताम् ॥ ५ ॥
उपासांचक्रतुर्वीरौ [7]यत्तौ परमधन्विनौ ॥ ररक्षतुर्मुनिवरं विश्वामित्रम[8]रिंदमौ ॥ ६ ॥
अथ काले गते तस्मिन्षष्ठेऽहनि [9]समागते ॥ सौमित्रिमब्रवीद्रामो यत्तो भव समाहितः ॥ ७ ॥
रामस्यैवं ब्रुवाणस्य त्वरितस्य युयुत्सया ॥ प्रजज्वाल ततो वेदिस्सोपाध्यायपुरोहिता ॥ ८ ॥

करणः ॥ ४४ ॥ कुमाराविितिश्लोकद्वयं । स्पृष्टोदकौ दत्तार्घ्यौ नियमेनजप्यंसमाप्य । अग्नेर्होत्रंहोमः औपासनहोमः । दीक्षामध्ये " नाग्निहोत्रंनदर्शपूर्णमासाभ्यांयजतइति " अग्निहोत्रस्यनिषिद्धत्वात् । मानसमग्निहोत्रमित्येके ॥ ४५-४६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने एकोनत्रिंशःसर्गः ॥ २९ ॥ ॥

सुबाहुमारीचप्रभृतिदुष्टनिग्रहस्त्रिंशे—अथताविल्यादि । देशकालज्ञाविितिहेतुगर्भं । देशकालज्ञत्वादुचितेदेशेउचितेकालेचाब्रूतां ॥ १ ॥ संरक्षणीयौ निवारणीयौ । धातूनामनेकार्थत्वात् । विपरीतलक्षणावा । यद्वा इष्टप्राप्तिरनिष्टनिवृत्तिश्चरक्षणं । अत्र अनिष्टनिवृत्तिः । तत्क्षणं सकालः । नातिवर्तेत अज्ञातोनातिक्रामेन् ॥२॥ युयुत्सया योद्धुमिच्छया । प्रशशंसुः प्रोचुः ॥ ३ ॥ रक्षतमिति लोण्मध्यमपुरुषद्विवचनं । एतद्दिनमारभ्य षड्रात्रपर्यन्तं मुनिर्मौनित्वंगमिष्यति । अतोवयंवदाम इत्यर्थः ॥ ४ ॥ षडहोरात्रं षण्णामहोरात्राणांसमाहारः षडहोरात्रंतत् ॥ ५ ॥ उपासांचक्रतुः ऊषतुः । यत्तौ सन्नद्धौ । परमंधनुर्ययोस्तौ परमधन्विनौ । व्रीह्यादित्वादिनिः ॥ ६ ॥ कालेपञ्चदिनात्मके गते । तस्मिन् प्रधाने । अहनि सुत्यादिने । समाहितः एकाग्रचित्तः । अत्राद्यप्रभृतिषड्रात्रमित्युक्त्या पूर्वसर्गेतत्पूर्वदिने दीक्षाप्रवेशोक्त्याच सप्तरात्रनिर्वर्त्यःसत्रविशेषोऽयमिति गम्यते ॥७॥ वेदिप्रज्वलनमुत्पातोराक्षसागमसूचकः । उपाध्यायः विश्वामित्रः । पुरोहिताः ऋत्विजः ॥ ८ ॥

ति० कुमाराविव स्कन्दविशाखाविव ॥ ४५ ॥ इत्येकोनत्रिंशस्सर्गः ॥ २९ ॥

शि० संरक्षणीयौ । संरक्ष्यतेयागआभ्यामितिअपादानेअनीयर् । किंचसंरक्षणीयौ दुष्टकर्महेतुकनरकपातादितोनिवर्तनीयौ ॥ २ ॥ **वि०** उपाध्यायोब्रह्मा । पुरोहितउपद्रष्टा । इदमृत्विगन्तराणामप्युपलक्षणम् ॥ ८ ॥

[पा०] १ ङ. च. छ. झ. ञ. कुमाराविव. २ च. स्पृष्टोदकं. ख. शुचीकृतब्रह्मजपौसमाप्यनियमानपि. ङ. झ. प्रशुचीपरमंजाप्यं. ३ ख. हुत्वाग्नि. ४ ङ. झ. ञ. संरक्षणीयौतौब्रूहि. च. छ. संशिक्षणीयौतौब्रह्मन्. ख. तावागमिष्यतोब्रह्मन्. ५ ग. ङ. च. छ. झ. ञ. ट. रक्षतां. ६ क. ग. ङ. च. झ. ञ. तौतुतद्वचनं. ख. तेषांतुवचनं. ७ ख. ग. युक्तौपरमधन्विनौ. छ. यत्तौपरमधार्मिकौ. घ. यत्तापरमरिंदमौ. ८ मरिंदमं. ९ ङ. झ. तथागते.

सदर्भचमसस्रुक्का ससमित्कुसुमोच्चया ॥ विश्वामित्रेण सहिता वेदिर्जज्वाल सर्त्विजा ॥ ९ ॥
मन्त्रवच्च यथान्यायं [1]यज्ञोऽसौ संप्रवर्तते ॥ [[2]एवं प्रवर्तिते यज्ञे विश्वामित्रस्य धीमतः ॥]
आकाशे [3]च महाञ्शब्दः प्रादुरासीद्भयानकः ॥ १० ॥
आवार्य गगनं [4]मेघो यथा प्रावृषि निर्गतः ॥ तथा मायां [5]विकुर्वाणौ राक्षसावभ्यधावताम् ॥ ११ ॥
मारीचश्च सुबाहुश्च तयोरनु[6]चराश्च ये ॥ आगम्य [7]भीमसंकाशा रुधिरौघमवासृजन् ॥ १२ ॥
[8]सा तेन रुधिरौघेण वेदिर्जज्वाल मण्डिता ॥ [[9]दृष्ट्वा वेदिं तथाभूतां सानुजः क्रोधसंयुतः] ॥
सहसा[10]ऽभिद्रुतो रामस्तानपश्यत्ततो दिवि ॥ १३ ॥
तावापतन्तौ सहसा दृष्ट्वा राजीवलोचनः ॥ [[11]असंभ्रान्तस्त्वरान्किंचित्सज्यं कृत्वा महद्धनुः] ॥
लक्ष्मणं त्वभिसंप्रेक्ष्य रामो वचनमब्रवीत् ॥ १४ ॥
पश्य लक्ष्मण दुर्वृत्तान्राक्षसान्पिशिताशनान् ॥ *मानवास्त्रसमाधूताननिलेन यथा घनान् ॥ १५ ॥
[[12]करिष्यामि न सन्देहो नोत्सहे हन्तुमीदृशान् ॥ इत्युक्त्वा वचनं रामश्[13]चापे संधाय वेगवान् ॥ १६ ॥
एवं वदन्तं तं दृष्ट्वा धनुःप्रवरपाणिनम् ॥ बालोयमिति विज्ञाय तमनादृत्य दुर्मती ॥
विश्वामित्रस्य तां वेदिं सत्वरावभ्यधावताम् ॥ १७ ॥
तावुदीक्ष्य त्वरन्रामश्चापमायम्य वीर्यवान्] ॥ *मानवं परमोदारमस्त्रं परमभास्वरम् ॥
चिक्षेप परमक्रुद्धो मारीचोरसि राघवः ॥ १८ ॥
स तेन परमास्त्रेण मानवेन [14]समाहतः ॥ संपूर्णं योजनशतं क्षिप्तः सागरसंप्लवे ॥ १९ ॥
विचेतनं विघूर्णन्तं शीतेषुबल[15]ताडितम् ॥ निरस्तं दृश्य मारीचं रामो लक्ष्मणमब्रवीत् ॥ २० ॥

एतद्विवृणोति—सदर्भेति । चमसंनाम पानपात्रं । स्रुक् होमपात्रं । उच्चयः समूहः । कुसुमोच्चयोलङ्कारार्थः ॥ ९ ॥ ननु रक्षोघ्नमन्त्रजपेक्रियमाणे कथंराक्षसागमनप्रसक्तिः । नकथंचित् । किंतु दूरतएवाकाशेमेघवद्रुधिरंववर्षुः । तदिदमाह—आकाशइति । भयानकः भयंकरः ॥१०॥ प्रावृषि वर्षाकाले । निर्गतोमेघोयथा-तथाऽभ्यधावतां ॥ ११ ॥ भीमसंकाशाः भयंकराः ॥ १२ ॥ अभिद्रुतः अभिमुखंधावन् ॥ १३—१४ ॥ पिशिताशनान्मांसभक्षकान् । एतद्विधूननार्थंमानवास्त्रं प्रयोक्ष्यइतिभावः ॥ १५—१७ ॥ अत्रादौइत्युक्त्वेत्युपस्कार्यं । ननुसर्वराक्षसेष्वस्त्रप्रयोगंप्रतिज्ञाय मारीचोरसितत्प्रयोगःकथमितिचेन्न । पूर्वश्लोकेराक्षसशब्दस्यमारीचमात्रपरत्वात् ॥ १८ ॥ सागरसंप्लवे समुद्रपूरे । अत्रगायत्रीद्वितीयाक्षरंसः ॥ १९ ॥ शीतेषुशब्दोवयववृत्त्यामानवास्त्रेवर्तते । दृश्य दृष्ट्वा । मारी-

---

शि० मन्त्रवदिति मन्त्रउद्यतेउच्यतेअस्मिन्निति । किंचमन्त्रेणवन्यतेरच्यतेइतिमन्त्रवत् ॥ १० ॥ ति० समुक्षितां अभ्याशेइतिशेषः ॥ १३ ॥ ति० ईदृशान् स्थितायुश्शेषान् दुर्बलान्वा ॥ १६ ॥

[पा०] १ ट. यज्ञोऽयं. ख. यज्ञोवै. २ इदमर्धं च. छ. दृश्यते. ३ ख. सुमहान्. ४ ख. मेघौयथाप्रावृषिनिर्गतौ. ५ ख. प्रकुर्वाणौ. ६ क. ख. ङ. च. छ. ञ. ट. चरास्तथा. ७ ख. च. भीमसंकाशान्रुधिरौघानवा. ट. मेघसंकाशाः. ८ ङ. झ. ञ. तांतेनरुधिरौघेणवेदिंवीक्ष्यसमुक्षिताम्. ९ इदमर्धं ख. दृश्यते. १० क. च. छ. द्रुतान्रामः. ११ इदमर्धं ख. दृश्यते. १२ इदंसार्धपद्यद्वयं ख. दृश्यते. १३ 'चापेशरंसंधायवेगवानासीदित्यध्याहारेणयोजना. च. ट. चापंसंधाय. * एवंब्रुवाणंमारीचो बालकहेममालिनम् । तस्यानुजंचहेमाभंशूरंतूच्छ्रितधन्विनम् । १ । राघवौश्यामहेमाभौतावपश्यत्तदादिवि । दृष्ट्वातेजस्विनौतौ चअवधूतश्चतेजसा । २ । अवज्ञायसतौविप्रान्प्रधर्षयितुमारभत् । तमापतन्तंरामस्तुप्रहसँल्लीलयाततः । ३ ।' एतच्छ्लोकत्रयं—मानवंपरमोदारमित्यतःपूर्वं कुण्डलनान्तर्गतपाठप्रतिनिधित्वेन च. छ. पाठयोर्दृश्यते. १४ ख. समाहितः. १५ ङ. च. छ. झ. ञ. पीडितं.

[पश्य[1] लक्ष्मण शीतेषुं मानवं धर्म[2]संहितम् ॥ मोहयित्वा नयत्येनं न च प्राणै[3]र्वियुज्यत] ॥२१॥
इमानपि वधिष्यामि निर्घृणान्दुष्टचारिणः ॥ राक्षसान्पापकर्मस्थान्यज्ञघ्नान्रुधिराशनान् ॥ २२ ॥
[इ[4]त्युक्त्वा लक्ष्मणं चाशु लाघवं दर्शयन्निव ॥] [5]संगृह्यास्त्रं ततो रामो दि[6]व्यमाग्नेयमद्भुतम् ॥
सुबाहूरसि चिक्षेप स विद्धः प्रापतद्भुवि ॥ २३ ॥
शेषान्वायव्यमादाय निजघान म[7]हायशाः ॥ राघवः परमोदारो मुनीनां मुदमावहन् ॥ २४ ॥
स हत्वा राक्षसान्सर्वान्यज्ञघ्नान्रघुनन्दनः ॥ ऋषिभिः पूजितस्तत्र यथेन्द्रो विजये पुरा ॥ २५ ॥
अथ यज्ञे समाप्ते तु विश्वामित्रो महामुनिः ॥ निरीतिका दिशो दृष्ट्वा काकुत्स्थमिदमब्रवीत् ॥ २६ ॥
[8]कृतार्थोस्मि महाबाहो कृतं गुरुवचस्त्वया ॥ सिद्धाश्रममिदं सत्यं कृतं रा[9]म महायशः ॥ २७ ॥
[स[10] हि रामं प्रशस्यैवं ताभ्यां सन्ध्यामुपागमत्] ॥ २८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे त्रिंशः सर्गः ॥ ३० ॥

एकत्रिंशः सर्गः ॥ ३१ ॥

विश्वामित्रेणरामंप्रतिमिथिलायांजनकयज्ञप्रस्तावनेनतत्रत्यदिव्यधनुःप्रभावादिनिवेदनपूर्वकंराघवाभ्यांसहमुनिभिश्चमिथिलांप्रतिप्रस्थानम् ॥ १ ॥ विश्वामित्रादिभिःसहसायाह्नेशोणाकूलंगतेनरामेणमुनिंप्रतितस्यदेशस्यपुरावृत्तकथनप्रार्थना ॥ २ ॥

अथ तां रजनीं तत्र कृतार्थौ रामलक्ष्मणौ ॥ ऊषतुर्मुदितौ वीरौ प्रहृष्टेनान्तरात्मना ॥ १ ॥
प्रभातायां तु शर्वर्यां [11]कृतपौर्वाह्णिकक्रियौ ॥ वि[12]श्वामित्रं मुनींश्चान्यान्सहितावभिजग्मतुः ॥ २ ॥
अभिवाद्य मुनिश्रेष्ठं ज्वलन्तमिव पावकम् ॥ [13]ऊचतुर्मधुरोदारं वाक्यं मधुरभाषिणौ ॥ ३ ॥
[14]इमौ स्म मुनिशार्दूल किंकरौ [15]समुपस्थितौ ॥ आज्ञापय [16]यथेष्टं वै शासनं करवाव किम् ॥ ४ ॥

चस्यप्राणरक्षणंभाविकार्यान्तरसाधनाय ॥२०-२१॥ वधप्रयोजकानिनिर्घृणत्वादीनि ॥ २२ ॥ अद्भुतं- यथातथाचिक्षेप ॥ २३ ॥ निजघान हिंसितवान् ॥ २४ ॥ पुराविजये असुरविजये ॥ २५॥ निरीतिकाः निर्बाधाः ॥ २६ ॥ गुरुवचः पितृवचः ॥ २७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने त्रिंशः सर्गः ॥ ३० ॥

एवंकृतार्थोविश्वामित्रोजनकसुतात्वेनावतीर्णयाश्रियारामंयोजयितुंव्याजेनमिथिलाप्रस्थानंप्रस्तौत्येकत्रिंशे—अथेत्यादि । कृतार्थौ कृतविश्वामित्रप्रयोजनौ । प्रहृष्टेन संतुष्टेन । अन्तरात्मना अन्तःकरणेन । उपलक्षितौ ॥ १ ॥ सहितौ अविनाभूतौ ॥२॥ मधुरोदारोक्तौ हेतुःमधुरभाषिणाविति ॥३॥ स्मेतिभूतार्थसूचकमव्ययं । इमौस्म आज्ञापितंसर्वमनुष्ठितवन्तावित्यर्थः । मुनिशार्दूल ब्रह्मध्यायिषुश्रेष्ठ । अनेननिरवधिकभक्तिमत्त्वं सूचितं । किंकरौ "भक्तिक्रीतोजनार्दनः" इत्युक्तरीत्या त्वयाक्रीतौ । समुपस्थितौ भक्तंत्वांविनाक्षणमपिस्थातुमक्षमौ । "शरतल्पगतोभीष्मःशाम्यन्निवहुताशनः ॥ मां ध्यातिपुरुषव्याघ्रस्ततोमेतद्गतंमनः" इतिवत् । आज्ञापययथेष्टं क्षामकालेअल्पद्रव्यायक्रीतोराजपुत्रःपुनर्नि-

---

ति० मनुसंहितं मनुप्रयुक्तं ॥ २१ ॥ इतित्रिंशस्सर्गः ॥ ३० ॥

[पा०] १ इदमर्धद्वयं क. ख. ङ. च. छ. झ. ञ. ट. दृश्यते. २ ङ. च. छ. झ. ञ. मनुसंहितम्. ३ क. ख. घ—छ. झ. ञ ट. विंयुज्यते. ४ इदमर्धं क. ख. ङ. च. छ. झ. दृश्यते. ५ क. ख. च. छ. ञ. ट. संगृह्यसुमहच्चास्त्रं. ङ. झ. विगृह्यसुमहच्चास्त्रं. ६ क. ङ. च. झ. ञ. ट. आग्नेयंरघुनन्दनः. ७ ख. महाबलः. ८ क. कृतार्थोऽहंमहाभाग. ९ ङ. च. छ. झ. ञ. वीर. १० इदमर्धं ङ. च. छ. झ. ञ. दृश्यते. ११ क. घ. च. छ. ञ. शौचंकृत्वामहाबलौ. १२ क. ग. ङ. च. छ. झ. विश्वामित्रमृषींश्चान्यान्सहितावधि. घ. सहितावभिगच्छतः. १३ क. ऊचतुःपरमोदारं. १४ क. उभौस्म. १५ ग—छ. झ. ञ. समुपागतौ. १६ च. छ. झ. ञ. मुनिश्रेष्ठ.

[1]एवमुक्तास्ततस्ताभ्यां सर्व एव महर्षयः ॥ विश्वामित्रं पुरस्कृत्य रामं वचनमब्रुवन् ॥ ५ ॥
मैथिलस्य [2]नरश्रेष्ठ जनकस्य भविष्यति ॥ यज्ञः परमधर्मिष्ठ[3]स्तस्य यास्यामहे वयम् ॥ ६ ॥
त्वं चैव नरशार्दूल सहास्माभिर्गमिष्यसि ॥ [4]अद्भुतं धनुरत्नं च तत्र तद्द्रष्टुमर्हसि ॥ ७ ॥
तद्धि पूर्वं नरश्रेष्ठ दत्तं सदसि दैवतैः ॥ अप्रमेयबलं घोरं मखे परमभास्वरम् ॥ ८ ॥
नास्य देवा न गन्धर्वा नासुरा न च राक्षसाः ॥ कर्तुमारोपणं शक्ता न कथंचन मानुषाः ॥ ९ ॥
धनुषस्तस्य वीर्यं तु जिज्ञासन्तो महीक्षितः ॥ न शेकुरारोपयितुं राजपुत्रा महाबलाः ॥ १० ॥
तद्धनुर्नरशार्दूल मैथिलस्य महात्मनः ॥ तत्र द्रक्ष्यसि काकुत्स्थ [6]यज्ञं चाद्भुतदर्शनम् ॥ ११ ॥
तद्धि यज्ञफलं तेन मैथिलेनोत्तमं धनुः ॥ याचितं नरशार्दूल सुनाभं सर्वदैवतैः ॥ १२ ॥
आयागभूतं नृपतेस्तस्य वेश्मनि राघव ॥ अर्चितं [8]विविधैर्गन्धैर्माल्यैश्चागरुगन्धिभिः ॥ १३ ॥
एवमुक्त्वा मुनिवरः प्रस्थानमकरोत्तदा ॥ सर्षिसङ्घः सकाकुत्स्थ आमन्त्र्य वनदेवताः ॥ १४ ॥
स्वस्ति वोऽस्तु गमिष्यामि सिद्धः सिद्धाश्रमादहम् ॥ उत्तरे जाह्नवीतीरे हिमवन्तं शिलोच्चयम् ॥१५॥

वर्तयितुंनार्हः किल। शासनंकरवावकिं कर्तव्ये नसंकोचःकार्यइत्यर्थः। अनेनस्वभक्तायस्वान्यंनददाति आहूयनददाति स्वयंगत्वैवददाति स्वात्मानमिष्टविनियोगार्हंकरोतीत्युक्तं ॥ ४ ॥ अत्रविश्वामित्रेणप्रतिवक्तव्येऋषिभिर्नियोजनंरामभक्त्यतिरेकेण । पुरस्कृत्य तदनुज्ञांलब्ध्वेत्यर्थः । यद्वा विश्वामित्रप्रमुखामुनयइत्यर्थः ॥ ५ ॥ मिथिलायाईश्वरोमैथिलः "तस्येदं" इत्यण् । परमधार्मिष्ठः अतिशयेनधर्मवान । भगवत्कैङ्कर्यरूपत्वेनकाम्यनित्याभ्यामुत्कृष्टइत्यर्थः । तस्य तस्यकृते ॥ ६ ॥ गमिष्यसि । यदीतिशेषः । धनुरत्नं धनुश्श्रेष्ठं दीर्घाभावआर्षः । चकाराद्यज्ञंचेत्यर्थः। ननु प्रसिद्धं ॥ ७ ॥ तस्यधनूरत्नंकुतःसमायातंतत्राह—तद्धीति। मखे सदसि दैवतैर्दत्तमित्यन्वयः ॥ ८ ॥ आरोपणं ज्यारोपणं ॥ ९ ॥ जिज्ञासन्तः जिज्ञासमानाः ॥ १० ॥ यज्ञंद्रक्ष्यसि तत्रतद्धनुश्चद्रक्ष्यसीत्यन्वयः ॥ ११ ॥ मखेकिमर्थंदत्तंतत्राह—तद्धीति । सुनाभं शोभनमुष्टिबन्धनस्थानं। दैवतैः दैवतेभ्यः। याचितं दत्तंचेत्यर्थः ॥ १२ ॥ आयागभूतं धनुरुत्सवेप्राधान्येनार्चितं धनुरायागउच्यते। अत्रविश्वामित्रेणैवानुक्तिः सर्वसंमतत्वद्योतनाय ॥ १३ ॥ पूर्वंविश्वामित्रंपुरस्कृत्येत्युक्त्याप्राधान्यात् विश्वामित्रउक्तवानित्यनूद्यते ॥ १४ ॥ जाह्नवीतीरेस्थितंहिमवन्तंगमिष्यामीत्यन्वयः । शिलोच्चयं पर्वतं । सिद्धाश्रमाद्धिमवद्गमनंमिथिलामार्गेणेतिज्ञेयं ॥ १५ ॥

वि० तयोरितिताभ्यामित्यर्थं ॥ ५ ॥ **ति०** परमेतिपृथक्पदंवा । परा मा शोभायस्मिन्नित्यर्थंकंरामसंबोधनं ॥ ६ ॥ **ती०** चकारोनुक्तर्ष्यारत्नसमुच्चयपरः । **वि०** पूर्वं पूर्वस्मिन्काले । देवराताख्यप्राचीनजनकस्ययज्ञेसदसिदैवतैर्दक्षयज्ञवधेप्रसादितात् शिवाल्लब्धं । यज्ञप्रसादितंशिवसहितंदेवतैर्देवरातहस्तेतदप्रमेयबलंधनुर्दत्तं । अतस्तत्रतिष्ठतीतिशेषः ॥ ८ ॥ **ति०** नकथंचन नकथमपीत्यर्थः । **शि०** अस्य धनुषः । आरोपणं बाणप्रक्षेपयोग्यज्यासंयोगं कर्तुंदेवाःकथंचननशक्ताः । एवंकथंचनेत्यस्यवाक्यचतुष्टयेप्यपकर्षः । मनुष्येष्वपिनहुषादिषुअधिकपराक्रमश्रुतेर्नपतत्प्रकर्षेदोषाशङ्का ॥ ९ ॥ **ति०** तद्धनुर्मैथिलेननिजयज्ञप्रीतेभ्योयज्ञफलत्वेनयाचितं । युद्धेरिपूणांजयायसर्वैर्देवैर्तद्शिवसहितैर्दत्तंअतस्तत्रतिष्ठतीत्यर्थः । तदुक्तंपाद्मे । "चापंशंभोर्दयादत्तं" इति । कौर्मेपि "प्रीतश्चभगवानीशस्त्रिशूलीनीललोहितः । प्रददौशत्रुनाशार्थंजनकायाद्भुतंधनुः"इति ॥१२॥ **ति०** आयागभूतं । यजनीयदेवताभूतमित्यर्थः ॥ **वि०** अयमत्रधनुरागमनक्रमः । पूर्वंदेवास्त्रिपुरवधायविश्वकर्मणानिर्मितंधनुर्महादेवायददुः । तद्भगवतोर्बलाबलपरीक्षानिमित्तकविश्वरोधेविष्णुपदाक्रमैर्जडीकृतं। देवैःप्रार्थितोमहादेवोधनुरिच्छतोदेवरातस्यहस्तेन्यस्तवान् । ततःप्रभृतिन्यासभावेनवर्तमानंजनकेनस्वयज्ञेस्वत्वेनयाच्यगानंदेवैस्तस्ययज्ञफलत्वेनदत्तमिति ॥ १३ ॥ **ती०** हिमवतस्स्वाश्रमत्वादितिभावः ॥ १५ ॥

[पा०] १ क. ख. घ—छ. झ. ञ. ट. एवमुक्तेतयोर्वाक्ये. २ ख. नरेन्द्रस्य. ३ क. ख. घ—छ. झ. ञ. ट स्तत्र. ४ क. ग—छ. झ. ञ. अद्भुतंचधनूरत्नंतत्रत्नं. ट. तद्धनूरत्नं. ५ क—छ. झ. ट. स्तस्यवीर्यंहि. ञ. स्तत्रवीर्यंहि. ६ ङ. च. छ. झ. ञ. यज्ञंचपरमाद्भुतम्. ७ क. अप्रमेयबलंघोरंतस्य. ङ. नृपतेतस्य. ८ ख. विधिवद्गन्धैः. ९ क—छ. झ. ञ. धूपैश्चा. १० ख. एवमुक्त्वारघुवरं.

[इत्युक्त्वा मुनिशार्दूलः कौशिकः स तपोधनः ॥] प्रदक्षिणं ततः कृत्वा सिद्धाश्रममनुत्तमम् ॥
उत्तरां दिशमुद्दिश्य प्रस्थातुमुपचक्रमे ॥ १६ ॥

तं प्रयान्तं मुनिवरमन्वयादनुसारिणम् ॥ शकटीशतमात्रं च प्रायेण ब्रह्मवादिनाम् ॥ १७ ॥
मृगपक्षिगणाश्चैव सिद्धाश्रमनिवासिनः ॥ अनुजग्मुर्महात्मानं विश्वामित्रं महामुनिम् ॥ १८ ॥
निवर्तयामास ततः पक्षिसङ्घान् मृगानपि ॥ १९ ॥
ते गत्वा दूरमध्वानं लम्बमाने दिवाकरे ॥ वासं चक्रुर्मुनिवराः शोणाकूले समागताः ॥ २० ॥
तेऽस्तं गते दिनकरे स्नात्वा हुतहुताशनाः ॥ विश्वामित्रं पुरस्कृत्य निषेदुरमितौजसः ॥ २१ ॥
रामोपि सहसौमित्रिर्मुनींस्तानभिपूज्य च ॥ अग्रतो निषसादाथ विश्वामित्रस्य धीमतः ॥ २२ ॥
अथ रामो महातेजा विश्वामित्रं महामुनिम् ॥ पप्रच्छ नरशार्दूलः कौतूहलसमन्वितः ॥ २३ ॥
भगवन्कस्य देशोऽयं समृद्धवनशोभितः ॥ श्रोतुमिच्छामि भद्रं ते वक्तुमर्हसि तत्वतः ॥ २४ ॥
चोदितो रामवाक्येन कथयामास सुव्रतः ॥ तस्य देशस्य निखिलमृषिमध्ये महातपाः ॥ २५ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे एकत्रिंशः सर्गः ॥ ३१ ॥

द्वात्रिंशः सर्गः ॥ ३२ ॥

विश्वामित्रेणरामंप्रतिशोणाकूलस्थदेशवृत्तान्तकथनप्रसङ्गेनस्ववंशवृत्तान्तकथनारंभः ॥ १ ॥ तथाशोणातटस्थदेशस्यब्रह्मसूनोःकुशस्यतनयेपुचतुर्पु कुशांबादिपुकनीयसोवसोस्संबन्धित्वकथनम् ॥ २ ॥ कुशात्मजेपुद्वितीयस्यकुशनाभस्यकन्याशते उद्यानमेत्यविहरतिसतिवायुनाताःप्रतिस्वभार्याभवनप्रार्थनम् ॥ ३ ॥ ताभिस्तदनङ्गीकारेतेनतासांशरीरप्रवेशेनकुब्जीकरणम् ॥ ४ ॥ ताभिःपितृसमीपमेत्यपरिशोचनम् ॥ ५ ॥

ब्रह्मयोनिर्महानासीत्कुशो नाम महातपाः ॥ अक्लिष्टव्रतधर्मज्ञः सज्जनप्रतिपूजकः ॥ १ ॥

ततःवनदेवतामन्त्रणानन्तरं॥१६॥ अनुसारिणं उत्तरदिगनुसारिणंतं । प्रायेण बाहुल्येन । ब्रह्मवादिनांशकटीशतमात्रं शकट्यःशकटानि । तेषांशतमात्रं शतप्रमाणं । अन्वयात् अन्वगात् । यद्वा शतमात्रमन्वयात् । इतरत्सर्वंसिद्धाश्रमएवस्थितमित्यर्थः । अत्र शकटीशब्देन शकट्यारोपिताग्निहोत्रसंभारादिकमुच्यते॥१७॥ तद्भक्त्येतिभावः ॥ १८ ॥ निवर्तयामासेत्यर्धं । अत्रपक्ष्यादिनिवर्तनेनमुनीनांगमनंद्योतितं ॥ १९ ॥ शोणः पुंनदः सएवशोणेत्यपिव्यपदिश्यते॥२०॥शोणेस्नात्वा- दिनकरेस्तंगतेसति हुतहुताशनाइत्यन्वयः॥२१॥अभिपूज्य अभिवाद्य॥२२-२३॥ अयं शोणकूलस्थः ॥ २४॥ निखिलंवृत्तांतमित्यर्थः ॥ २५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूपणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने एकत्रिंशः सर्गः ॥ ३१ ॥

एवंशोणकूलदेशवैभवेपृष्टेअयंमद्वंश्यानांदेशइतिविवक्षन्स्वान्वयं प्रदर्शयतिद्वात्रिंशे—ब्रह्मयोनिरित्यादि । ब्रह्मयोनिःकारणंयस्यसःब्रह्मयोनिः अयोनिजोत्रब्रह्मपु-

ति० शोणनदस्यैवशोणेत्यपिनामेत्याहुः । वस्तुतःशोणतिगिरिव्रजसमीपस्थोनदीविशेषइत्येतदुत्तरसर्गेस्पष्टं ॥ २० ॥ ति० अस्तंगते । अस्तंजिगमिपतीत्यर्थः ॥ २१ ॥ ति० । अयंदेशः शोणाकूलस्थः ॥ २४ ॥ इत्येकत्रिंशस्सर्गः ॥ ३१ ॥

[पा०] इदमर्धं १ क. ख. च. छ. झ. दृश्यते. २ क. ख. घ—छ. झ. ञ. ट. व्रजन्तं. ३ क. ख. घ—छ. झ. ञ. मन्वगा. ४ घ. दनुचारिणाम्. ग. ङ. झ. ञ. ट. दनुसारिणाम्. ५ ख. ङ. च. छ. झ. ञ. शतमात्रंतु. ६ क. ख. घ—छ. झ. ञ. ट. प्रयाणे. ७ ङ. झ. महात्मानो. ८ ङ. च. छ. झ. ञ. तपोधनं. ९ क. ङ. छ. झ. ञ. सर्पिसंघस्सपक्षिणः. च. सर्पिसंघसपक्षिणः. १० क. छ. झ. ञ. मुनिगणाः. ११ शोणकूलेसमागताः. क—छ. झ. ञ. शोणाकूलेसमाहिताः. १२ ख. घ. अस्तंगते. १३ ङ. झ. तपोधनं. च. छ. ञ. तपोनिधिम्. घ. महामतिं. १४ क—छ. झ. ञ. मुनिशार्दूलं. १५ ख. ग. झ. समन्वितम्. १६ क—छ. झ. ञ. न्कोन्वयंदेशः. १७ ट. महायशाः. १८ ख. व्रतधर्मश्च.

स महात्मा कुलीनायां [1]युक्तायां सुगुणोल्बणान् ॥ वैदर्भ्यां जनयामास [2]सदृशांश्चतुरः सुतान् ॥
कुशांबं कुशनाभं च [3]आधूर्तरजसं वसुम् ॥ २ ॥
दीप्तियुक्तान्महोत्साहान्क्षत्रधर्मचिकीर्षया ॥ तानुवाच कुशः पुत्रान्धर्मिष्ठान्सत्यवादिनः ॥
क्रियतां पालनं पुत्रा धर्मं प्राप्स्यथ पुष्कलम् ॥ ३ ॥
[4]ऋषेस्तु वचनं श्रुत्वा [5]चत्वारो लोकसंमताः ॥ [6]निवेशं चक्रिरे सर्वे [7]पुराणां नृवरास्तदा ॥ ४ ॥
कुशांबस्तु महातेजाः कौशांबीमकरोत्पुरीम् ॥ कुशनाभस्तु धर्मात्मा पुरं चक्रे महोदयम् ॥ ५ ॥
आधूर्तरजसो [8]राम धर्मारण्यं [9]महीपतिः ॥ चक्रे पुरवरं राजा [10]वसुश्चक्रे गिरिव्रजम् ॥ ६ ॥
एषा वसुमती [11]राम वसोस्तस्य महात्मनः ॥ एते शैलवराः पञ्च प्रकाशन्ते समन्ततः ॥ ७ ॥
सुमागधी नदी [12]रम्या [13]मगधान्विश्रुताऽऽययौ ॥ पञ्चानां शैलमुख्यानां मध्ये मालेव शोभते ॥८॥
सैषा हि मागधी [14]राम वसोस्तस्य महात्मनः ॥ पूर्वाभिचरिता [15]राम सुक्षेत्रा सस्यमालिनी ॥ ९ ॥
कुशनाभस्तु राजर्षिः कन्याशतमनुत्तमम् ॥ जनयामास धर्मात्मा घृताच्यां रघुनन्दन ॥ १० ॥
तास्तु यौवनशालिन्यो रूपवत्यः स्वलंकृताः ॥ उद्यानभूमिमा[16]गम्य प्रावृषीव शतह्रदाः ॥ ११ ॥
गायन्त्यो नृत्यमानाश्च [17]वादयन्त्यश्च सर्वशः ॥ आमोदं परमं [18]जग्मुर्वराभरणभूषिताः ॥ १२ ॥
अथ ताश्चारुसर्वाङ्ग्यो रूपेणाप्रतिमा भुवि ॥ उद्यान[19]भूमिमागम्य तारा इव घनान्तरे ॥ १३ ॥
ताः सर्वगुणसंपन्ना रूपयौव[20]नसंयुताः ॥ दृष्ट्वा सर्वात्मको वायुरिदं वचनमब्रवीत् ॥ १४ ॥
अहं वः कामये सर्वा भार्या मम भविष्यथ ॥ मानुषस्त्यज्यतां भावो दीर्घमायुरवाप्स्यथ ॥ १५ ॥

त्रः । महान् ज्ञानशौर्यादिभिरितरब्रह्मपुत्रविलक्षणः । कौभूमौशेतइतिकुशः । नारदादिवत्ब्रह्मलोकेऽनवस्थायप्रजापालनेदत्तादरतयाभूमाववस्थानात्कुशइत्यस्यनाम । अतएवक्षत्रियव्यापारात्क्षत्रियोयं । अक्लिष्टंनिर्बाधंव्रतंयस्यसोक्लिष्टव्रतः अक्लिष्टव्रतश्चासौधर्मज्ञश्चेतिकर्मधारयः ॥ १ ॥ सार्धश्लोकः । युक्तायां अनुरूपायां ॥२॥ सार्धश्लोकः । क्षत्रधर्मः प्रजापालनं ॥ ३ ॥ पुष्कलं समग्रं । ऋषेः कुशस्य । निवेशं संनिवेशं ॥ ४ ॥ कुशांबइत्यादिश्लोकद्वयं ॥ ५ ॥ ६ ॥ एषा शोणकूलस्था । शैलवराः गिरिव्रजसंज्ञामूलाः ॥ ७ ॥ मगधदेशादागतामागधीतिशोणएवोच्यते । आययाविविच्छेदः ॥ ८ ॥ पूर्वाभिचरिता पूर्वदेशात्प्रत्यङ्मुखवाहिनी । सुक्षेत्रा उभयपार्श्वतइतिशेषः ॥ ९ ॥ घृतवत्पुरुषंदृष्ट्वाद्रवतीसत्यञ्चतीतिघृताची कुशनाभभार्या । घृतवत्पुरुषंकृत्वाञ्चतीतिवा । अप्सरसः ॥ १० ॥ श्लोकद्वयं । उद्यानभूमिमागम्यशतह्रदाइवस्थिताः । शतह्रदाः विद्युतः । नृत्यमानाः नृत्यन्त्यः । वादयन्त्यः वीणाइतिशेषः । आमोदं संतोषं । स्वलंकृताः कुसुमचन्दनतिलकादिभिः ॥ ११ ॥ १२ ॥ ताराइव बभुरितिशेषः ॥ १३ ॥ सर्वगुणसंपन्नाः सर्वालंकारसंपन्नाः । सर्वत्रआत्मास्वरूपंयस्यसःसर्वात्मकः सर्वत्रसंचारीत्यर्थः ॥ १४ ॥ वः भवतीः मानुषेभवोमानुषः ।

ति० युक्तायां अशेषस्त्रीगुणयुक्तायामित्यर्थः । असूर्तरजसं नविद्यतेसूर्तंप्रसूतंरजोयस्यतं । "अच्" इतियोगविभागादच् ॥ २ ॥ ति० पूर्वाभिचरिता पूर्वदिग्गामिनी ॥९॥ ति० मत्कामनापूरणेममदेवस्यमानुष्योपिभार्याभविष्यथेत्यादिर्वशीकरणायार्थवादः । ननुमानुषीणांदेवसंबन्धोनुचितस्तत्राह—मानुषस्त्यज्यतांभावइति । मदंगीकारमात्रेणविलक्षणशक्त्याविर्भावान्मानुषभाव-

[पा०] १ च. छ. ञ. जायायां. २ ङ. च. छ. झ. ञ. ट. सदृशान्सुमहाबलान्. क—छ. झ. ञ. चतुरस्सदृशान्सुतान्. ३ ङ. अमूर्तरजसं. च. झ. ञ. असूर्तरजसं. ट. अमूर्तिरजसम्. ख. आवर्तरजसं. ४ ग. ङ. ञ. कुशस्य. क. ख. झ. ट. पितुस्ते. ५ च. ञ. चत्वारोऽमितविक्रमाः. ङ. झ. चत्वारोलोकसत्तमाः. ६ ख. निवेशांश्चक्रिरे. ७ क. पुराणि. ८ क. ङ. च. झ. ञ. नाम. ९ ङ. झ. महामतिः. १० क. ङ. छ. झ. ञ. वसुर्नामगिरिव्रजम्. च. वसुर्नाममणिव्रजम्. ११ ङ. च. छ. झ. ञ. नाम. १२ ग. पुण्या. १३ झ. मागधान्. १४ ख. घ. च. छ. ञ. ट. नाम. १५ क. ख. ट. वीर. च. छ. ञ. नाम. १६ च. मागत्य. १७ ङ. च. छ. झ. ञ. वादयन्त्यस्तुराघव. क. ख. घ. ट. वादयन्त्यश्चराघव. १८ क. ख. स्सर्वाभरण. १९ ख. मध्येशोभन्ते. २० ङ. संमताः.

चलं हि यौवनं नित्यं मानुषेषु विशेषतः ॥ अक्षयं यौवनं प्राप्ता अमर्यश्च भविष्यथ ॥ १६ ॥
तस्य तद्वचनं श्रुत्वा वायोरक्लिष्टकर्मणः ॥ अपहास्य ततो वाक्यं कन्याशतम[1]थाब्रवीत् ॥ १७ ॥
अन्तश्चरसि भूतानां सर्वेषां [2]त्वं सुरोत्तम ॥ [3]प्रभावज्ञाः स्म ते सर्वाः कि[4]मस्मानवमन्यसे ॥ १८ ॥
कुशनाभसुताः सर्वाः समर्थास्त्वां [5]सुरोत्तम ॥ स्थानाच्च्यावयितुं [6]देवं रक्षामस्तु तपो वयम् ॥१९॥
मा भूत्स कालो दुर्मेधः पितरं सत्यवादिनम् ॥ ना[7]वमन्यस्व धर्मेण स्वयंवरमुपास्महे ॥ २० ॥
पि[8]ता हि प्रभुरस्माकं दैवतं परमं हि [9]नः ॥ यस्य नो दास्यति पिता स नो भर्ता भविष्यति ॥ २१ ॥
ता[10]सां तद्वचनं श्रुत्वा [11]वायुः परमकोपनः ॥ प्रविश्य सर्वगात्राणि बभञ्ज भगवान्प्रभुः ॥ २२ ॥
[अरत्निमात्राकृतयो भग्नदर्पा भयार्दिताः] ॥ ताः कन्या वायुना भग्ना विविशुर्नृपतेर्गृहम् ॥
[12]प्रापतन्भुवि संभ्रान्ताः सलज्जाः [13]साश्रुलोचनाः ॥ २३ ॥
स च ता दयिता [14]दीनाः कन्याः परमशोभनाः ॥ दृष्ट्वा [15]भग्नास्तदा राजा संभ्रान्त इदमब्रवीत् ॥२४॥
किमिदं कथ्यतां पुत्र्यः को धर्ममवमन्यते ॥ कुब्जाः केन [16]कृताः सर्वा वे[17]ष्टन्त्यो नाभिभाषथ ॥
[[18]श्रोतुमिच्छामि तं पुत्र्यो यस्येदं कर्म गर्हितम्] ॥ २५ ॥
एवं राजा विनिश्वस्य समाधिं संदधे ततः ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे द्वात्रिंशः सर्गः ॥ ३२ ॥

भावः अनुरागः । त्यज्यतां । तथासतिदीर्घमायुरवाप्स्यथ ॥ १५ ॥ नित्यं सर्वदा । अक्षयमिति मद्भार्यात्वइतिशेषः ॥१६॥ अक्लिष्टकर्मणः अप्रतिहतकर्मणः । ततः तद्वाक्यश्रवणेन । अपहास्यअथाब्रवीत् ॥ १७ ॥ अन्तश्चरसि प्राणरूपेन । भूतानां प्राणिनां प्रभावज्ञाः एवंविधप्रभावज्ञाः । अस्मान् ज्ञातभवत्प्रभावाः ॥१८॥ स्थानात् अधिकारात् । देवं भवन्तं ॥ १९ ॥ सःनः-पिता ते कालः मृत्युः माभूत् । हेदुर्मेधः दुर्बुद्धे । पितरंनावमन्यस्व । धर्मेण पितृप्रदानरूपेण । वरं स्वयमुपास्महे प्रतीक्षामहे । पितास्वयंयस्मैदास्यति तंप्रतीक्षामहइत्यर्थः ॥२०॥ उक्तंविवृणोति—पितेति ॥ २१ ॥ बभञ्ज कुब्जीचकार ॥ २२ ॥ सलज्जाः शरीरवैरूप्यादितिभावः ॥ २३ ॥ संभ्रान्तः पर्याकुलचित्तः ॥ २४ ॥ कोधर्ममवमन्यते बलात्कारंकरोतित्यर्थः । कुब्जाः वक्रशरीराः ॥ २५ ॥ पृष्टेतिशेषः । विनिश्वस्य व्यथित्वा । समाधिं किंवक्ष्यन्तीतितद्वचनश्रवणावधानं ॥ २६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने द्वात्रिंशःसर्गः ॥ ३२ ॥

त्यागेस्वतएवभवतीनांसामर्थ्यंभविष्यति ॥१५॥ ति० समर्थाइतिशेषः ॥१९॥ ति० यत्रकालेपितरंअवमन्य अपमानविषयंकृत्वा । स्वधर्मेण कामेन । स्वयंवरमुपास्महे आत्मनास्वातन्त्र्येणवयमङ्गीकुर्मः सकालःकदाचिदपिमाभूदित्यन्वयः ॥ शि० अवमन्य अनादृत्य । स्वधर्मेण शोभनोतिशयितोयोऽधर्मःपितरिसतिस्वातन्त्र्याचरणंतेन वरंस्वयमुपास्महेस्वीकुर्मःसकालोमाभूत् ॥ २० ॥ ति० सलज्जाःअन्याग्र्यपतिप्रसङ्गतःसलज्जाः ॥ २३ ॥ इतिद्वात्रिंशस्सर्गः ॥ ३२ ॥

[पा०] १ घ. मभाषत. २ ङ. च. छ. झ. ञ. सुरसत्तम. ३ क. ङ. च. छ. झ. ञ. ट. प्रभावज्ञाश्च. घ. प्रभावज्ञास्तु. ४ ङ. च. छ. झ. ञ. किमर्थमव. ५ ङ. झ. देवसमस्तास्सुरसत्तम. क. ख. देवसमर्थास्स्मसुरोत्तम. च. छ. ञ. देवसमर्थाश्चसुरोत्तम. ट. देवसधर्मास्स्मस्सुरोत्तम. ६ घ. च. देव. ७ ङ. झ. ञ. ट. अवमन्यस्व. ८ च. छ. ञ. पितावै. ९ क. ख. घ. च. छ. ञ. हिसः. ग. ङ. च. चसः. १० घ. ङ. च. झ. ञ. तासांतुवचनं. ११ ङ. च. छ. झ. ञ. ट. हरिः. १२ ङ. च. छ. झ. ञ. प्रविश्यचसुसंभ्रान्ताः. १३ क. ख. ग. झ. सास्रलोचनाः. १४ ङ. झ. भग्नाः. १५ ङ. झ. दीनाः. १६ ख. कृतायूयं. १७ च. छ. झ. ञ. ट. चेष्टन्त्यो. १८ इदमर्धं क. ख. दृश्यते.

त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

कन्याभिर्वायुवृत्तंनिवेदितेनकुशनाभेनतासां क्षमाप्रशंसनपूर्वकंपरिसान्त्वनम् ॥ १ ॥ तथाचूलिसूनवेब्रह्मदत्तायभार्यात्वेनतासांप्रदानम् ॥ २ ॥ तस्यपाणिस्पर्शमात्रेणतासां कुब्जीभावापगमपूर्वकमद्भुतशोभाप्रादुर्भावः ॥ ३ ॥

तस्य तद्वचनं श्रुत्वा कुशनाभस्य धीमतः ॥ शिरोभिश्चरणौ स्पृष्ट्वा कन्याशतमभाषत ॥ १ ॥
वायुः सर्वात्मको राजन्प्रधर्षयितुमिच्छति ॥ अशुभं मार्गमास्थाय न धर्मं प्रत्यवेक्षते ॥ २ ॥
पितृमत्यः स्म भद्रं ते स्वच्छन्दे न वयं स्थिताः ॥ पितरं नो वृणीष्व त्वं यदि नो दास्यते तव ॥३॥
तेन पापानुबन्धेन वचनं नप्रतीच्छता ॥ एवं ब्रुवन्त्यः सर्वाः स्म वायुना निहता भृशम् ॥ ४ ॥
तासां[1] तद्वचनं श्रुत्वा राजा परमधार्मिकः ॥ प्रत्युवाच महातेजाः कन्याशतमनुत्तमम् ॥ ५ ॥
क्षान्तं क्षमावतां पुत्र्यः कर्तव्यं सुमहत्कृतम् ॥ ऐकमत्यमुपागम्य कुलं चावेक्षितं मम ॥ ६ ॥
अलङ्कारो हि नारीणां क्षमा तु पुरुषस्य वा ॥ ७ ॥
दुष्करं तद्धि[2] वः क्षान्तं त्रिदशेषु विशेषतः ॥ यादृशी वः क्षमा पुत्र्यः सर्वासामविशेषतः ॥ ८ ॥
क्षमा दानं क्षमा सत्यं क्षमा यज्ञश्च[3] पुत्रिकाः ॥ क्षमा यशः क्षमा धर्मः क्षमया[4] विष्ठितं जगत् ॥ ९ ॥
विसृज्य कन्याः काकुत्स्थ राजा त्रिदशविक्रमः ॥ मन्त्रज्ञो मन्त्रयामास प्रदानं सह मन्त्रिभिः ॥
देशकालौ[5] प्रदानस्य सदृशे प्रतिपादनम् ॥ १० ॥
एतस्मिन्नेव[6] काले तु चूली नाम महामुनिः[7] ॥ ऊर्ध्वरेताः शुभाचारो ब्राह्मं तप उपागमत् ॥ ११ ॥

अथकुशनाभस्यकन्यावचनंशृण्वतःक्षमाविशेषउच्यतेत्रयस्त्रिंशे—तस्येत्यादि । शिरोभिश्चरणौस्पृष्ट्वा पादयोःप्रणम्येत्यर्थः ॥ १ ॥ प्रधर्षयितुं अभिभवितुं । इच्छति वर्तमानसामीप्याल्लट् । अशुभं वलात्काररूपं ॥ २ ॥ पितृमत्यःस्म अतः स्वच्छन्दे स्वातन्त्र्ये किंचित्पतिस्वीकारविषयेवयंनस्थिताः । अतोनःपितरमेववृणीष्व । सयदि नः अस्मान् तुभ्यं दास्यति तदातवभविष्यामः । तेभद्रमस्तु ॥ ३ ॥ एवंब्रुवन्त्योवयं अस्माकंवचनं नप्रतीच्छता अनंगीकुर्वता । पापानुबन्धेन पापानुसारिणा । तेन वायुना निहताः ॥ ४ ॥ अनुत्तमं क्षमावत्त्वात् ॥ ५ ॥ हेपुत्र्यः क्षमावतां कर्तव्यं कर्तुमर्हं । " कृत्यानांकर्तरि " इतिषष्ठी । क्षान्तं क्षमा भावेनिष्ठा । कृतं इदंसुमहत्कर्म देवेप्रार्थयमानेप्यविकृतचित्तत्वं शरीरंभञ्जयतिसतिनिष्क्रोधत्वंच दुष्करमितिभावः । कुलंचावेक्षितं कुलानुरूपंकृत्यंकृतमित्यर्थः ॥ ६ ॥ उक्तमर्थंविवृणोति—अलङ्कारइति अर्धं । क्षमा अपराधसहिष्णुत्वं ॥ ७ ॥ वः तत्क्षान्तं क्षमा । दुष्करं त्रिदशेषु रूपैश्वर्यसंपन्नेषु । विशेषतोदुष्करं । यादृशीति सर्वासामविशेषतः याक्षमा सापिदुष्करेत्यन्वयः । क्षमैवदुष्करा ततस्त्रिदशेषुदुष्करा ततोपिसर्वासामविशेषेणक्षमा दुष्करैवेत्यर्थः ॥ ८ ॥ क्षमांप्रशंसति क्षमेति । क्षमादानं दानेनयत्फलंप्राप्नोति—तत्क्षमयाप्राप्नोतीत्यर्थः । एवमुत्तरत्रापियोज्यं । धर्मः तटाकारामनिर्माणादिः । क्षमया भूमिसंबन्धिन्या । जगच्चराचरं । विष्ठितं स्थितंभवति ॥ ९ ॥ अर्धत्रयं । प्रदानं कन्याप्रदानं । चिन्ताप्रकारमाह—देशइति। प्रदानस्य कन्याप्रदानस्यउचितौदेशकालौ सदृशे स्वकुलस्यसदृशेपात्रे प्रतिपादनंच मन्त्रयामासेत्यर्थः ॥ १० ॥ एतस्मिन्नेवकाले कुशनाभीयकाले । उत्तरत्रान्वयः । ऊर्ध्वरेताः अस्खलितरेताः । ब्राह्मंतपः वैदिकंतपः ब्रह्मोद्देश्यकंवा

ति० ब्राह्मंतपः ब्रह्मविषयंचित्तैकाग्र्यं । " मनसश्चेन्द्रियाणांचऐकाग्र्यंपरमंतपः " इतिस्मृतिः ॥ ११ ॥

[पा०] १ घ—छ. झ. ञ. तासांतुवचनं. २ क.–घ. च. ञ. तच्चवः. ङ. छ. झ. ट. तच्चवै. क. ग. तच्चयत्. ३ घ. ज्ञाश्च. ४ क. ख. ङ. च. झ. ञ. क्षमायांविष्ठितं. ग. क्षमायांहिस्थितं. ट. क्षमायांनिष्ठितं. ५ ङ. च. छ. झ. ञ. देशेकालेचकर्तव्यं. क. ग. घ. देशेकालेप्रदानस्य. ख. देशेकालेप्रदेयस्य. ६ ख. एतस्मिन्नन्तरेकाले. ७ ङ. च. छ. झ. ञ. महाद्युतिः.

तप्यन्तं[1] तमृषिं तत्र गन्धर्वी पर्युपासते ॥ सोमदा नाम भद्रं ते ऊर्मिलातनया तदा ॥ १२ ॥
सा च तं प्रणता भूत्वा शुश्रूषणपरायणा ॥ उवास काले धर्मिष्ठा[2] तस्यास्तुष्टोऽभवद्गुरुः ॥ १३ ॥
स च तां कालयोगेन प्रोवाच रघुनन्दन ॥ परितुष्टोस्मि भद्रं ते किं करोमि तव प्रियम् ॥ १४ ॥
परितुष्टं मुनिं ज्ञात्वा गन्धर्वी मधुरस्वरा[3] ॥ उवाच परमप्रीता वाक्यज्ञा वाक्यकोविदम् ॥ १५ ॥
लक्ष्म्या समुदितो ब्राह्मया ब्रह्मभूतो महातपाः ॥ ब्राह्मेण तपसा युक्तं पुत्रमिच्छामि धार्मिक[4] ॥१६॥
अपतिश्चास्मि भद्रं ते भार्या चास्मि न कस्यचित् ॥ ब्राह्मेणोपगतायाश्च[5] दातुमर्हसि मे सुतम् ॥१७॥
तस्याः प्रसन्नो ब्रह्मर्षिर्ददौ पुत्रम[6]नुत्तमम् ॥ ब्रह्मदत्त[7] इति ख्यातं मानसं चूलिनः सुतम् ॥ १८ ॥
स राजा सौमदेयस्तु[8] पुरीमध्या[9]वसत्तदा ॥ कांपिल्यां[10] परया लक्ष्म्या देवराजो यथा[11] दिवम् ॥१९॥
स बुद्धिं कृतवान्राजा कुशनाभः[12] सुधार्मिकः ॥ ब्रह्मदत्ताय काकुत्स्थ दातुं कन्याशतं तदा ॥ २० ॥
तमाहूय महातेजा ब्रह्मदत्तं महीपतिः ॥ ददौ कन्याशतं राजा सुप्रीतेनान्तरात्मना ॥ २१ ॥
यथाक्रमं ततः[13] पाणींजग्राह रघुनन्दन ॥ ब्रह्मदत्तो महीपालस्तासां देवपतिर्यथा ॥ २२ ॥
स्पृष्टमात्रे ततः[14] पाणौ विकुब्जा विगतज्वराः ॥ युक्ताः[15] परमया लक्ष्म्या बभुः कन्या शतं तदा ॥२३॥

॥ ११ ॥ तत्र तस्मिन्देशे । तदा तत्काले । तप्यन्तं दाहार्थेपिव्यत्ययाच्छयन् । गन्धर्वी जातिवाचित्वान् । पर्युपासते अशुश्रूषत । मध्येमध्येभद्रमस्त्वितिप्रयोगःशुश्रोत्तरत्वाय ॥ १२ ॥ काले कियतिकाले तुष्टोभवत् । ब्रह्मर्षित्वाद्गुरुरित्युक्तिः ॥ १३ ॥ कालयोगेन शुश्रूषापरिपाककालसंबन्धेन । करोमि कुर्याम् ॥ १४ ॥ वाक्यकोविदं वाक्येवचने कोविदं समर्थं ॥ १५ ॥ ब्राह्म्यालक्ष्म्या ब्रह्मवर्चसेन । समुदितः श्रेष्ठः । अतएवब्रह्मभूतः ब्रह्मतुल्यः । महातपाअसि । तस्मात्त्वत्तःपुत्रमिच्छामि । दीप्यसेपरयालक्ष्म्येतिकोशान्तरे ॥ १६ ॥ विधवाप्यपतिर्भवतितत्राह—भार्येति । उपगतायाः शरणंगतायाः । मे । ब्राह्मेण तपोमहिम्ना ॥ १७ ॥ ब्रह्मणातपोयोगेनदत्तो ब्रह्मदत्तः । चूलिनः स्वस्य । मानसं मनस्संकल्पजं । सुतंददौ ॥ १८ ॥ राजा क्षत्रियः । क्षत्रजत्वान् । लक्ष्म्या संपदा युक्तः । एतस्मिन्नन्तरेपुरीमध्यावसदितिसंबन्धः ॥ १९ ॥ तदा ब्रह्मदत्तस्यकांपिल्याख्यायांपुर्यामावासकाले ॥ २० ॥ राजा रञ्जकः ॥ २१ ॥ तासांपाणीनजग्राह । देवपतिर्यथा देवपतिसदृशः । तत्तुल्यविभवइत्यर्थः ॥ २२ ॥ ततः चूलिसूनुना । पाणावितिजात्येकवचनं । विकुब्जाः विगतकुब्जभावाः । शतंकन्या बभुः । विसर्गलोपआर्षः । बभुःकन्याशतमितिपाठः

ति० पर्युपासतेइतिशवलुगार्षः ॥ १२ ॥ तमितिंप्रतियोगेद्वितीया । प्रतीतिशेषः । उवास तत्समीपेआसेत्यर्थः ॥ १३ ॥ ति० ब्राह्मंतपस्स्वाध्यायः । ति० धार्मिकंपुत्रमिच्छामीत्यनेनतत्संगमस्तयानप्रार्थितइतिव्यक्तं । तेनतस्याःपरमधैर्यंधर्मात्मत्वंचव्यक्तं ॥ ब्रह्मभूतइत्यनेनयथाब्रह्मसकलमभिधातुंसमर्थं तथात्वमपीत्युपमालङ्कारोध्वनितः ॥ १६ ॥ शि० ब्राह्मण हेब्रह्मवेत्तः । उपगतायाः त्वांसेवमानायाः ॥ वि० ननुपुत्रप्रार्थनापत्न्यावुचिताअतआह–अपतिश्चास्मीति । इतःपरमपि अस्मि अहं । अहमर्थे अस्मीत्यव्ययं । नकस्यचिद्भार्याभविष्यामीतिशेषः । अथापिनैष्ठिकब्रह्मचारिण्याःउपगतायाःकिंकरत्वंप्राप्तायामे ब्राह्मेण ब्रह्मसंबन्धिनोपायेन सुतं दातुमर्हसि । सनकादयइवमानसःपुत्रोदेयइतिभावः ॥ १७ ॥ ति० चूलिनः चूली । फलीफलिनइतिवत्चूलीचूलिनइतिरूपेर्नामद्वयंसाधु । शि० तस्याःतस्यैगन्धर्व्यैददौ इतिहेतोःख्यातंब्रह्मदत्तंचूलिनस्सुतंवदंतीतिशेषः ॥ १८ ॥ शि० तस्यब्राह्मणदत्तत्वाद्ब्राह्मणत्वेपिक्षत्रियात्वेनप्रसिद्धायागन्धर्व्यास्सुतत्वात्क्षत्रियत्वमपि ॥ १९ ॥ ति० बभौकन्याशतंतदा । ताःकन्याविकुब्जाः कुब्जत्वरहिताः । आसन्नितिशेषः । ब्राह्मतपोयुक्तत्वादेवंसामर्थ्यंराज्ञः । एवंचसतितत्कन्याशतंपरमयालक्ष्म्यावभाविसन्वयः ॥ २३ ॥ इतित्रयस्त्रिंशस्सर्गः ॥ ३३ ॥

[पा०] १ ङ. च. छ. झ. ञ. ट. तपस्यन्तमृषिं. २ घ. ट. धर्मिष्ठः. ३ क—च. झ. ञ. ट. मधुरस्वरम्. ४ क. ख. ग. ङ. च. छ. झ. ञ. ट. धार्मिकम्. ५ क. च. छ. ञ. ब्राह्मेणोपगतायास्त्वं. च. छ. ट. ब्राह्मणोपगतायाश्च. ६ ङ. झ. ब्राह्ममनुत्तमम्. ग. पुत्रंतथाविधम्. ७ क. ख. ट. ब्रह्मदत्तमिति. ८ ङ. च. छ. झ. ञ. ट. ब्रह्मदत्तस्तु. ९ ङ. झ. ट. मध्यवसत्. १० ट. कापिलीं. ११ ङ. च. छ. झ. ञ. यथादिवि. १२ च. छ. ञ. कुशनाभस्तु. १३ ङ. च. छ. झ. ञ. ट. तदापाणिं. १४ ङ. च. छ. झ. ञ. ट. तदापाणौ. १५ घ. ङ. च. छ. झ. ञ. ट. युक्तंपरमयालक्ष्म्यावभौकन्याशतंतदा.

स दृष्ट्वा वायुना मुक्ताः कुशनाभो महीपतिः ॥ बभूव परमप्रीतो हर्षं लेभे पुनःपुनः ॥ २४ ॥
कृतोद्वाहं तु राजानं ब्रह्मदत्तं महीपतिः ॥ सदारं प्रेषयामास सोपाध्यायगणं तदा ॥ २५ ॥
सोमदाऽपि सुसंहृष्टा पुत्रस्य सदृशीं क्रियाम् ॥ यथान्यायं च गन्धर्वी स्नुषास्ताः प्रत्यनन्दत ॥
स्पृष्ट्वास्पृष्ट्वा च ताः कन्याः कुशनाभं प्रशस्य च ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

चतुस्त्रिंशः सर्गः ॥ ३४ ॥

कुशनाभेनपुत्रेष्ट्यनुष्ठानेगाधिनाम्नोविश्वामित्रपितुः तत्पुत्रत्वेनजननम् ॥ १ ॥ विश्वामित्रभगिन्यासत्यवत्याभर्त्रनुवर्तनेन स्वर्गगमनपूर्वकं अंशान्तरेणकौशिकीनदीत्वेनप्रवर्तनम् ॥ २ ॥ एवंविश्वामित्रेणस्ववंशचरितानुवर्णनपूर्वकमर्धरात्रागमेरामादिभिःसहनिद्रोपसेवनम् ॥ ३ ॥

कृतोद्वाहे गते तस्मिन्ब्रह्मदत्ते च राघव ॥ अपुत्रः पुत्रलाभाय पौत्रीमिष्टिमकल्पयत् ॥ १ ॥
इष्ट्यां च वर्तमानायां कुशनाभं महीपतिम् ॥ उवाच परमोदारः कुशो ब्रह्मसुतस्तदा ॥ २ ॥
पुत्र ते सदृशः पुत्रो भविष्यति सुधार्मिकः ॥ गाधिं प्राप्स्यसि तेन त्वं कीर्तिं लोके च शाश्वतीम् ॥३॥
एवमुक्त्वा कुशो राम कुशनाभं महीपतिम् ॥ जगामाकाशमाविश्य ब्रह्मलोकं सनातनम् ॥ ४ ॥
कस्यचित्त्वथ कालस्य कुशनाभस्य धीमतः ॥ जज्ञे परमधर्मिष्ठो गाधिरित्येव नामतः ॥ ५ ॥
स पिता मम काकुत्स्थ गाधिः परमधार्मिकः ॥ कुशवंशप्रसूतोस्मि कौशिको रघुनन्दन ॥ ६ ॥
पूर्वजा भगिनी चापि मम राघव सुव्रता ॥ नाम्ना सत्यवती नाम ऋचीके प्रतिपादिता ॥ ७ ॥
सशरीरा गता स्वर्गं भर्तारमनुवर्तिनी ॥ कौशिकी परमोदारा प्रवृत्ता च महानदी ॥ ८ ॥

॥ २३ ॥ वायुनामुक्ताः कन्याइतिशेषः । परमप्रीतः अनुकूलवरलाभेनपरमप्रीतः । हर्षं विकुब्जत्वकृतं ॥ २४ ॥ प्रेषयामास कांपिल्यामितिशेषः ॥ २५ ॥ सोमदेतिसार्धश्लोकः । सोमदा चूलिपुत्रमाता । पुत्रसदृशींक्रियां दारक्रियां । दृष्ट्वेतिशेषः । यथान्यायं यथाक्रमं । स्नुषाःकन्याः कुशनाभपुत्रीः ॥ २६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

एवंप्रासङ्गिकंपरिसमाप्यप्रकृतकथाशेषमाहचतुस्त्रिंशे—कृतोद्वाहइत्यादि । अपुत्रः कुशनाभः । पुत्रायेयं पौत्रीतां ॥ १ ॥ कुशः कुशनाभपिता ॥ २ ॥ सदृशः गुणैरितिशेषः।सपुत्रःकिंनामकः तत्राह—गाधिमिति। गाधिनामानंपुत्रंप्राप्स्यसे । तेन गाधिना । शश्वद्भवा शाश्वती । भवार्थेअण् । बहिषष्टिलोपवचनादव्ययानांभमात्रेटिलोपःक्वाचित्कः । अत्रनततोङीप् । तां ॥ ३ ॥ अनेनसदाब्रह्मलोकवासीकुशःपुत्रानुग्रहार्थं भुवमागतइत्यवगम्यते । सनातनंनित्यं ॥ ४ ॥ कस्यचित्कालस्य कस्मिंश्चित्कालेगतेसति । गाधिरित्येव यथापित्रोक्तंतथैवेत्यर्थः । जज्ञे घृताच्यांभार्यायां ॥ ५ ॥ यतःकुशवंशप्रसूतोस्मि अतःकौशिकसंज्ञोस्मि । कुशशब्दात्गोत्रापत्येठक् ॥६॥ पूर्वजा ज्येष्ठा । ऋचीके ऋचीकाख्यमुनयइत्यर्थः ॥ ७ ॥ भर्तारमनुवर्तिनी भर्त्रनुवर्तनधर्मप्रभावादितिभावः । नकेवलंस्वर्गगमनमस्याः महानदीत्वंचजातमित्याह—कौशिकीति ॥८॥

ति० चस्त्वर्थः कन्याशतसमुच्चयार्थोवा ॥ १ ॥ शि० आकाशमाविश्यसनातनंब्रह्मलोकंजगाम । अनेनकुशस्यकामचारगतिमत्त्वंव्यक्तं ॥ ४ ॥

[पा०] १ घ. ङ. झ. महीपतिम्. २ ख. सादरं. ३ ङ. झ. ट. सुतंदृष्ट्वा. छ. स्वयंहृष्टा. ४ क. ग. घ. च. दृष्ट्वास्पृष्ट्वा. ५ क. ख. ग. ङ. च. झ. ञ. इष्ट्यांतु. ६ क. ख. ग. ङ. च. छ. झ. ञ. ट. पुत्रस्तेसदृशःपुत्र. ७ क. च. छ. ञ. येन. ८ च. छ. ञ. कुशोनामा. ९ ख. राम.

दिव्या पुण्योदका रम्या हिमवन्तमुपाश्रिता ॥ लोकस्य हितकामार्थं प्रवृत्ता भगिनी मम ॥ ९ ॥
ततोऽहं हिमवत्पार्श्वे वसामि निरतः सुखम् ॥ भगिन्यां स्नेहसंयुक्तः कौशिक्यां रघुनन्दन ॥ १० ॥
सा तु सत्यवती पुण्या सत्ये धर्मे प्रतिष्ठिता ॥ पतिव्रता महाभागा कौशिकी सरितांवरा ॥ ११ ॥
अहं हि नियमाद्राम हित्वा तां समुपागतः ॥ सिद्धाश्रममनुप्राप्य सिद्धोस्मि तव तेजसा ॥ १२ ॥
एषा राम ममोत्पत्तिः स्वस्य वंशस्य कीर्तिता ॥ देशस्य च महाबाहो यन्मां त्वं परिपृच्छसि ॥ १३ ॥
गतोऽर्धरात्रः काकुत्स्थ कथाः कथयतो मम ॥ निद्रामभ्येहि भद्रं ते मा भूद्विघ्नोऽध्वनीह नः ॥ १४ ॥
निष्पन्दास्तरवः सर्वे निलीना मृगपक्षिणः ॥ नैशेन तमसा व्याप्ता दिशश्च रघुनन्दन ॥ १५ ॥
शनैर्वियुज्यते सन्ध्या नभो नेत्रैरिवावृतम् ॥ नक्षत्रतारागहनं ज्योतिर्भिरवभासते ॥ १६ ॥
उत्तिष्ठति च शीतांशुः शशी लोकतमोनुदः ॥ ह्लादयन्प्राणिनां लोके मनांसि प्रभया विभो ॥ १७ ॥
नैशानि सर्वभूतानि प्रचरन्ति ततस्ततः ॥ यक्षराक्षससङ्घाश्च रौद्राश्च पिशिताशनाः ॥ १८ ॥

दिव्या श्लाघ्या। हितं आमुष्मिकं। कामः ऐहिकं। तदुभयार्थं प्रवृत्ता नदीरूपेणस्वर्गाद्धिमवन्तमुपाश्रितेत्यर्थः॥९॥ यतोहिमवन्तमाश्रिता ततइत्यर्थः॥१०॥ सत्यवतीनामनिमित्तमाह—सात्विति॥११॥एवंभूतस्यसिद्धाश्रमागमननिमित्तमाह—अहंहीति। नियमात् यागनियमाद्धेतोः। समुपागतः सिद्धाश्रममिति शेषः॥१२॥ ममस्वस्यवंशस्यचोत्पत्तिः प्रसङ्गात्कीर्तिता। यत्त्वयापृष्टं तत्। देशस्य गिरिव्रजदेशस्य वैभवंचोक्तं॥१३॥ इतः परंनप्रष्टव्यमित्याशयेनाह—गत इति। अर्धोरात्रेरर्धरात्रः। अनपुंसकत्वेपि "अर्धंनपुंसकं" इत्यार्षःसमासः "अहःसर्व" इत्यादिनासमासान्तोऽच् "रात्राह्न—" इतिपुँल्लिङ्गता। अत्रार्धशब्दोंशवाची। उक्तंहि "भित्तंशकलखण्डेवापुंस्यर्धोऽर्धंसमेंऽशके" इति। यावतिरात्रिभागेनिद्रानिषिद्धातावान्गत इत्यर्थः। जागरणेकोदोषइत्यत्राह—माभूदिति। श्वोगन्तव्याध्वनिनिद्राभावप्रयुक्तालस्यकृतविघ्नोमाभूदित्यर्थः। ममकथाःकथयतः मयिकथांकथयति॥१४॥ अथनिशामुखंवर्णयतिचतुर्भिः—निष्पन्दाइत्यादि। निष्पन्दाः पक्षिसंचाराभावादितिभावः। निलीनाः निद्रांप्राप्ताइत्यर्थः। नैशेन सन्ध्यातिरिक्तकालिकेन॥१५॥ सन्ध्या वियुज्यते वियुक्ता। वर्तमानसामीप्येलट्। नक्षत्रैः अश्विन्यादिभिः ताराभिः केवलनक्षत्रैश्चव गहनं व्याप्तं। नभः ज्योतिर्भिः ज्योतिष्मद्भिर्नेत्रैरावृतमिवावभासते ॥१६॥ उत्तिष्ठतीति "उदोनूर्ध्वकर्मणि" इतिपरस्मैपद। तमोनुदतीतितमोनुदः। इगुपधळक्षणःकः॥१७॥ निशायांप्रभवन्ति नैशानि "प्रभवति" इत्यण्। भूतानि उलूकादयः। ततस्ततः तत्रतत्र। पौर्णमास्यांयज्ञंसमाप्यद्वितीयायायांप्रस्थानमितिचतुर्घटिकानन्तरंचन्द्रोदय-

ति० नियमात् गयापिण्डदानवत्सिद्धाश्रमैकसाध्ययागजन्यसिद्धिहेतोः। आगमनकार्यंचत्वदनुग्रहात्सिद्धमित्याह-सिद्धाश्रममित्यादि॥१२॥ **शि०** अर्धरात्रः रात्र्यर्धं। गतः अतीतः। अतोनिद्रामभ्येहि प्राप्नुहि। "अर्धंनपुंसकं" इतिसमासः। "रात्राह्नाहाः पुंसि" इतिपुंस्त्वं। एतेनतद्धटकीभूतार्धशब्दःखण्डवाचकइतिस्वीकृयार्षस्समासइतिभूषणोक्तिश्चिन्त्या। समांशवाचकत्वेवाधकाभावात्। खण्डवाचकत्वेप्रमाणाभावाच्च। खण्डवाचकत्वस्वीकारेणार्धशब्दस्यप्रदोषवाचकत्वंस्वीकृत्यव्याख्यानमप्ययुक्तं। "उपास्यरात्रिशेषंतु" इतिवक्ष्यमाणेनविरोधात्॥१४॥ **ति०** अर्धरात्रचिह्नान्याह-निष्पन्दाइति। **शि०** अर्धरात्रलक्षणानिवदन्नाहनिष्पन्दाइत्यादिभिः। नैशेन निशासंबन्धिना। तमसा अन्धकारेण। दिशः अव्याप्ताः अल्पव्याप्तिविशिष्टाः। अर्धरात्रेपूर्वरात्रापेक्षयाकिञ्चित्प्रकाशाधिक्यस्यानुभवसिद्धत्वमितितात्पर्यं॥१५॥ **ति०** विसृज्यते व्ययुङ्क्तेत्यर्थः। वर्तमानसामीप्येभूतेलट्। सन्ध्याशब्देनतदुपासनयोग्यगौणकालसाहित्येनसार्धयामरूपः कालोविवक्ष्यते॥ **शि०** अर्धरात्रोपिव्यतीतोभवतीतिबोधयन्नाह-शनैरिति। सन्ध्या सम्यक्एकाग्रतां प्राप्नुवन्तिधियश्चित्तवृत्तयोयस्यांतया पूर्वरात्रोत्तररात्रनध्यभक्तमेत्यर्थः। शनैर्वियुज्यतेव्यतीयते। आवृतं अ न आवृतं आवरणंयस्यंतत्। महदित्यर्थः॥१६॥ **शि०** उत्तिष्ठति उदयते। एतेनतदानींकृष्णनवमीतिव्यक्तम्॥१७॥

[पा०] १ ङ. झ. हितकार्यार्थं. २ ङ. च. छ. झ. ञ. नियतः. ३ क. ख. च. ठ. भगिन्याः. ४ क. ख. च. ट. ट. कौशिक्याः. ५ क. ख. संत्यधर्मप्रतिष्ठिता. ६ झ. मनुप्राप्तः. ७ ङ. च. छ. झ. ञ. देशस्यहि. ८ ट. कथां. ९ ङ. झ. विंसृज्यते. १० च. छ. ञ. रिवभासते. ११ ङ. च. छ. झ. ञ. उत्तिष्ठते. १२ ङ. च. छ. झ. ञ. ट. स्वया.

एवमुक्त्वा महातेजा विरराम महामुनिः ॥ साधुसाध्विति तं सर्वे ऋषयो ह्यभ्यपूजयन् ॥ १९ ॥
कुशिकानामयं वंशो महान्धर्मपरः सदा ॥ ब्रह्मोपमा महात्मानः कुशवंश्या नरोत्तमाः ॥ २० ॥
विशेषेण भवानेव विश्वामित्रो महायशाः ॥ कौशिकी च सरिच्छ्रेष्ठा कुलोद्योतकरी तव ॥ २१ ॥
इति तैर्मुनिशार्दूलैः प्रशस्तः कुशिकात्मजः ॥ निद्रामुपागमच्छ्रीमानस्तं गत इवांशुमान् ॥ २२ ॥
रामोपि सह सौमित्रिः किंचिदागतविस्मयः ॥ प्रशस्य मुनिशार्दूलं निद्रां समुपसेवते ॥ २३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे चतुस्त्रिंशः सर्गः ॥ ३४ ॥

पञ्चत्रिंशः सर्गः ॥ ३५ ॥

प्रातर्विश्वामित्रादिभिःशोणोत्तरणपूर्वकंदूराध्वगमनेनमध्याह्नेजाह्नवीतटेनिवासकल्पनम् ॥ १ ॥ गङ्गावृत्तान्तंपृष्टेनविश्वामित्रेण रामंप्रतिप्रासङ्गिकेनोमावृत्तान्तेनसहसंग्रहेणतत्कथनम् ॥ २ ॥

उपास्य रात्रिशेषं तु शोणाकूले महर्षिभिः ॥ निशायां सुप्रभातायां विश्वामित्रोऽभ्यभाषत ॥ १ ॥
सुप्रभाता निशा राम पूर्वा सन्ध्या प्रवर्तते ॥ उत्तिष्ठोत्तिष्ठ भद्रं ते गमनायाभिरोचय ॥ २ ॥
तच्छ्रुत्वा वचनं तस्य कृत्वा पौर्वाह्णिकीं क्रियाम् ॥ गमनं रोचयामास वाक्यं चेदमुवाच ह ॥ ३ ॥
अयं शोणः शुभजलो गाधः पुलिनमण्डितः ॥ कतरेण पथा ब्रह्मन्संतरिष्यामहे वयम् ॥ ४ ॥
एवमुक्तस्तु रामेण विश्वामित्रोऽब्रवीदिदम् ॥ एष पन्था मयोद्दिष्टो येन यान्ति महर्षयः ॥ ५ ॥
एवमुक्ता महर्षयो विश्वामित्रेण धीमता ॥ पश्यन्तस्ते प्रयाता वै वनानि विविधानि च ॥ ६ ॥

इति सर्वथाअर्धरात्रशब्दःप्रदोषपरएव ॥१८॥ अभ्यपूजयन् अस्तुवन् ॥ १९ ॥ गाधेःकुशिकइतिनामान्तरं । कुशिकानां तद्गोत्रजानां । ब्रह्मोपमाः चतुर्मुखोपमाः ॥ २० ॥ विश्वामित्रः विश्वामित्रसंज्ञः । भवानेवमहात्मेत्यनुषङ्गः । कौशिकीच तवकुलोद्द्योतकरी कुलप्रकाशकरी ॥२१॥ प्रशस्तः स्तुतः । शंसु स्तुतौ । "यस्यविभाषा" इतिनेट् । "अनिदितां—" इतिनलोपः । श्रीमान् । प्रशंसाकृतहर्षजनितश्रीमान् । अस्तंगतोंशुमानिव तद्वत्परप्रबोधाजनकइत्यर्थः ॥ २२ ॥ किंचिदागतविस्मयः निद्रापारवश्यादितिभावः । समुपसेवते अध्वश्रमवशात्सम्यक्प्राप्तः ॥ २३ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने चतुस्त्रिंशःसर्गः ॥ ३४ ॥

अथ स्वपादोद्भवगङ्गावैभवंलोकेप्रवर्तयितुंपृच्छति पञ्चत्रिंशे—उपास्येत्यादि । उपास्य स्थित्वा शयित्वेतियावत् । रात्रिशेषमिति अत्यन्तसंयोगेद्वितीया । सुप्रभातायां निवृत्तायामितियावत् । अत्ररात्रिशेषमित्यनुवादात् पूर्वसर्गेगतोर्धरात्रइत्यत्र निशीथपरत्वंस्वरसात्प्रतिगम्यते । यद्वा रात्रिशेषं ब्राह्ममुहूर्ते । उपास्य परमात्मानमितिशेषः । "ब्राह्ममुहूर्तउत्थायचिन्तयेदात्मनोहितं" इतिस्मृतेः ॥१॥ गमनाय गन्तुं । "क्रियार्थोपपदस्य—" इति चतुर्थी ॥२॥ पूर्वाह्णेभवा पौर्वाह्णिकी तां ॥३॥ गाधः स्वल्पजलः । अतएव पुलिनमण्डितः सैकतालङ्कृतः । तथाच नावंविनागन्तुंशक्यते । कतरेणपथासंतरिष्यामहे ॥४॥ उद्दिष्टः गन्तव्यत्वेननिश्चितः ॥५–६॥

ति० शि० ब्रह्मोपमाः ब्रह्मर्षितुल्याः ॥ २० ॥ इतिचतुस्त्रिंशस्सर्गः ॥ ३४ ॥

ती० ति० प्रश्नबीजंअगाधइति । अतलस्पर्शइत्यर्थः । शि० कतरेणेत्युक्तयातत्रमार्गद्वयेनमनुष्यउत्तरणमितिध्वनितं । एतेन अगाधइतिपदच्छेदोनरमणीयइतिबोध्यं ॥ ४ ॥

[पा०] १ क. ङ. च. छ. झ. ञ. तेसर्वे. २ ग. ङ. च. छ. झ. ञ. मुनयो. ३ ख. छ. ट. महाधर्मपरः. ४ ङ. च. छ. झ. ञ. ट. विश्वामित्र. ५ ङ. च. छ. झ. ञ. सरितांश्रेष्ठा. ६ ग. झ. मुदेतैर्मुनि. ७ ट. कौशिकात्मजः. ८ ट. निद्रामेवोप. ९ ग. रात्रिशेषंच. १० च. ट. शोणकूले. ११ ङ. झ. कृतपूर्वाह्णिकक्रियः. १२ क. चोदयामास. १३ ख. मयोद्दिष्टएते.

ते गत्वा दूरमध्वानं गतेऽर्धदिवसे तदा ॥ जाह्नवीं सरितां श्रेष्ठां ददृशुर्मुनिसेविताम् ॥ ७ ॥
तां दृष्ट्वा पुण्यसलिलां हंससारससेविताम् ॥ बभूवुर्मुनयः सर्वे मुदिताः सहराघवाः ॥ ८ ॥
तस्यास्तीरे ततश्चक्रुस्त आवासपरिग्रहम् ॥ ९ ॥
ततः स्नात्वा यथान्यायं संतर्प्य पितृदेवताः ॥ हुत्वा चैवाग्निहोत्राणि प्राश्य चामृतवद्धविः ॥१०॥
विविशुर्जाह्नवीतीरे शुचौ मुदितमानसाः ॥ विश्वामित्रं महात्मानं परिवार्य समन्ततः ॥
[विष्ठिताश्च यथान्यायं राघवौ च यथार्हतः] ॥ ११ ॥
अथ तत्र तदा रामो विश्वामित्रमथाब्रवीत् ॥ भगवञ्श्रोतुमिच्छामि गङ्गां त्रिपथगां नदीम् ॥ १२ ॥
त्रैलोक्यं कथमाक्रम्य गता नदनदीपतिम् ॥ १३ ॥
चोदितो रामवाक्येन विश्वामित्रो महामुनिः ॥ वृद्धिं जन्म च गङ्गाया वक्तुमेवोपचक्रमे ॥ १४ ॥
शैलेन्द्रो हिमवान्नाम धातूनामाकरो महान् ॥ तस्य कन्याद्वयं राम रूपेणाप्रतिमं भुवि ॥ १५ ॥
या मेरुदुहिता राम तयोर्माता सुमध्यमा ॥ नाम्ना मनोरमा नाम पत्नी हिमवतः प्रिया ॥ १६ ॥
तस्यां गङ्गेयमभवज्ज्येष्ठा हिमवतः सुता ॥ उमा नाम द्वितीयाऽभून्नाम्ना तस्यैव राघव ॥ १७ ॥
अथ ज्येष्ठां सुराः सर्वे देवतार्थचिकीर्षया ॥ शैलेन्द्रं वरयामासुर्गङ्गां त्रिपथगां नदीम् ॥ १८ ॥
ददौ धर्मेण हिमवांस्तनयां लोकपावनीम् ॥ स्वच्छन्दपथगां गङ्गां त्रैलोक्यहितकाम्यया ॥ १९ ॥
प्रतिगृह्य त्रिलोकार्थं त्रिलोकहितकारिणः ॥ गङ्गामादाय ते गच्छन्कृतार्थेनान्तरात्मना ॥ २० ॥

जाह्नवीं गङ्गां ॥७॥ सारसः हंसविशेषः ॥ ८ ॥ तस्याइतिअर्धं । आवासायपरिगृह्यतइत्यावासपरिग्रहः तं । संमार्जनादिना वासस्थानंचक्रुरित्यर्थः ॥९॥ ततइत्यादिश्लोकद्वयं । यथान्यायं यथाशास्त्रं अघमर्पणसूक्तादिजपपूर्वकमित्यर्थः । पितृदेवताइतिऋषीणामप्युपलक्षणं । अग्निहोत्राणि अग्नौहोतव्यानिपञ्चमहायज्ञादीनि । अमृतवत् अमृततुल्यं । हविः यज्ञशिष्टमन्नं । "यज्ञशिष्टामृतभुजोयान्तिब्रह्मसनातनं" इतिस्मृतेः । शुचौ दृष्टदोषरहिते भोजनस्थानादन्यत्र ॥ १०—११ ॥ अथ उपवेशानन्तरं । तत्र देशे । तदा तस्मिन्नेवकाले । द्वितीयोथशब्दःप्रश्ने "मङ्गलानन्तरारंभप्रश्नकार्त्स्न्येष्वथोअथ"इत्यमरः । गङ्गां गङ्गावृत्तान्तं ॥ १२ ॥ त्रैलोक्यमित्यर्धं ॥ १३ ॥ वृद्धिं त्रैलोक्यमित्यनेनोक्तां । जन्म गङ्गांश्रोतुमित्युक्तं ॥ १४ ॥ धातूनां अयस्ताम्रादीनां । अस्तीतिशेषः । कन्याद्वयं. आसीदितिशेषः ॥ १५ ॥ यामेरुदुहिता हिमवतःप्रियापत्नीमनोरमानामप्रसिद्धा सातयोर्मातेत्यन्वयः ॥ १६ ॥ कन्याद्वयस्यनामनीदर्शयति—तस्यामिति ॥१७॥ देवतार्थचिकीर्षया देवतार्थसंपादनेच्छया । प्रयोजनंच स्नानपानादि वक्ष्यमाणसेनापतिजननंवा परदेवतार्चनार्थंवा । अतएवस्वपदेनानुक्तिः ॥ १८ ॥ धर्मेण याचकान्प्रत्याख्येयाइतिधर्मेण । जलप्रवाहरूपायानद्याःकथमाकाशगमनंतत्राह—स्वच्छन्दपथगामिति । स्वच्छन्दः स्वेच्छा तदायत्तःपन्थाःस्वच्छन्दपथः "ऋक्पूरब्धूः" इत्यादिनाअप्रत्ययःसमासान्तः । तंगच्छतीति तथा । मेघजलयन्त्रद्वारगतिविशेषेणाकाशेपिगतिःसंभवतीतिभावः ॥ १९ ॥ त्रिलोकहितकारिणः देवाइतिशेषः । प्रतिगृह्य स्वीकृत्य । आदाय स्वेष्वन्तर्भाव्य ॥ २० ॥

ति० अमृतवत् तत्सदृशंगङ्गाजलंहविश्चप्रागुक्तंप्राश्येत्यर्थः॥१०॥ ति० विष्ठिताः विशेषेणस्थिताः। यथार्हतः यथाऽवस्थानमर्हतः तथास्थितावित्यर्थः॥१२॥ ती० धर्मेणस्वकृतधर्मेण। तनयां तनयात्वंगतां॥१६॥ ति० त्रिळोकार्थं तारकतो भीतत्रिलोकरक्षकपुत्रोत्पत्त्यर्थं॥२०॥ इतिपञ्चत्रिंशस्सर्गः॥३५॥

[पा०] १ ङ. च. छ. झ. ञ. ट. तदासर्वेचक्रुर्वासपरिग्रहम्. २ क. स्नाता. ३ ग. चानुत्तमंहविः. ४. ङ. च. छ. ञ. शुभा. ५ इदमर्धं च. छ. झ. ञ. दृश्यते. ६ क. ग. घ. ङ. झ. ञ. ट. संप्रहृष्टमनारामो. च. छ. ञ. सुप्रहृष्टमनारामो. ७ ङ. च. झ. हिमवान्नाम. ८ क. च. छ. ञ. द्वयंजातं. ९ ङ. झ. ञ. नाम्नामेनामनोज्ञावै. च.नाम्नामेनामनुष्येन्द्र. क. ख. ट. नाम्नाचमेनकाराम. १० क. ख. घ. च. छ. ञ. गङ्गासमभवत्. ११ क. ख. ग. ङ. च. त्कन्यातस्यैवराघव. १२ क. घ —-छ. झ. ञ. देवकार्यचिकीर्षया. १३ ग. प्रतिगृह्यततोदेवाः. १४ ङ. झ. त्रिलोकहितकाङ्क्षिणः. ट. त्रैलोक्यहितकारिणः. १५ क. ग. वैगच्छन्.

या चान्या शैलदुहिता कन्याऽऽसीद्रघुनन्दन ॥ उग्रं सा व्रतमास्थाय तपस्तेपे तपोधना ॥ २१ ॥
उग्रेण तपसा युक्तां ददौ शैलवरः सुताम् ॥ रुद्रायाप्रतिरूपाय उमां लोकनमस्कृताम् ॥ २२ ॥
एते ते शैलराजस्य सुते लोकनमस्कृते ॥ गङ्गा च सरितां श्रेष्ठा उमा देवी च राघव ॥ २३ ॥
एतत्ते सर्वमाख्यातं यथा त्रिपथगा नदी ॥ खं गता प्रथमं तात गतिं गतिमतांवर ॥ २४ ॥
सैषा सुरनदी रम्या शैलेन्द्रस्य सुता तदा ॥ सुरलोकं समारूढा विपापा जलवाहिनी ॥ २५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे पञ्चत्रिंशः सर्गः ॥ ३५ ॥

षट्त्रिंशः सर्गः ॥ ३६ ॥

कदाचनशिवयोःसुरतेचिरायितेअनर्थाशङ्कयासुरैस्तदुपरमप्रार्थनेशिवेनक्षुभितपूर्वस्यस्वतेजसःपृथिव्यामुत्सर्जनम् ॥ १ ॥ रतिविघ्नकरणेनकुपितयादेव्यादेवानामनपत्यत्वशापदानम् ॥ २ ॥ ततःशिवेनशिवयासहहिमवतिगिरौतपश्चरणम् ॥ ३ ॥

उक्तवाक्ये मुनौ तस्मिन्नुभौ राघवलक्ष्मणौ ॥ अभिनन्द्य कथां वीरावूचतुर्मुनिपुङ्गवम् ॥ १ ॥
धर्मयुक्तमिदं ब्रह्मन्कथितं परमं त्वया ॥ दुहितुः शैलराजस्य ज्येष्ठाया वक्तुमर्हसि ॥
विस्तरं विस्तरज्ञोसि दिव्यमानुषसंभवम् ॥ २ ॥
त्रीन्पथो हेतुना केन प्लावयेल्लोकपावनी ॥ ३ ॥
कथं गङ्गा त्रिपथगा विश्रुता सरिदुत्तमा ॥ त्रिषु लोकेषु धर्मज्ञ कर्मभिः कैः समन्विता ॥ ४ ॥
तथा ब्रुवति काकुत्स्थे विश्वामित्रस्तपोधनः ॥ निखिलेन कथां सर्वामृषिमध्ये न्यवेदयत् ॥ ५ ॥
पुरा राम कृतोद्वाहो नीलकण्ठो महातपाः ॥ दृष्ट्वा च स्पृहया देवीं मैथुनायोपचक्रमे ॥ ६ ॥

गङ्गावृत्तान्तप्रसङ्गेनतदनुजावृत्तान्तमप्याह—या चेति । कन्या अलब्धभर्तृका ॥ २१ ॥ अप्रतिरूपाय अनुकूलाय । रुद्रार्थंतपस्यन्तीमुमांप्रसन्नायतस्मैददावित्यर्थः ॥ २२ ॥ उपसंहरति—एतेइति ॥ २३ ॥ एवंगङ्गोत्पत्तिप्रकारंप्रथमप्रश्नोत्तरमुक्त्वा द्वितीयप्रश्नोत्तरंत्रिपथगामित्युच्यतइत्याह—एतदिति । प्रथमंतावत् खं स्वर्गाधिकां गतिं गता । गतिमतां सुन्दरगतिमतां ॥ २४ ॥ अथसुरलोकंचसमारूढेत्याह—सैषेति ॥ २५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने पञ्चत्रिंशः सर्गः ॥ ३५ ॥

"भगवञ्छ्रोतुमिच्छामिगङ्गांत्रिपथगांनदीं" इति गङ्गायास्त्रिपथगा[?]त्वंपृष्टेअन्तरिक्षस्वर्गगमनयोःप्रत्युक्तत्वात्तृतीयपथगमनं कथमित्याशयेनपुनःपृच्छन्तंश्रीरामंप्रत्याहषट्त्रिंशे—उक्तवाक्यइत्यादि । मुनौ उक्तवाक्ये उक्तोत्तरेसति । अत्रोभावित्युक्तेःपूर्वसर्गेरामपदं लक्ष्मणस्याप्युपलक्षणंवेदितव्यं । कथां पूर्वोक्तां ॥ १ ॥ अर्धत्रयं । धर्मयुक्तं धर्मफलकश्रवणमित्यर्थः । इदं वृत्तं ज्येष्ठायादुहितुःवृत्तंत्वयाकथितं । तस्यादिव्यमानुषसंभवं दिव्यलोकेमानुषलोकेच संभवंविस्तरंवक्तुमर्हसि ॥ २ ॥ त्रीन्पथः भूर्भुवस्स्वर्गान् । केनहेतुना प्लावयेत् प्लुता । भावयेदित्यपिपाठः । लकारव्यत्ययः । इतरयोःपूर्वसर्गएवोक्तत्वात्केनहेतुनातृतीयपथंगतेतिद्वितीयप्रश्नार्थः ॥ ३ ॥ तृतीयप्रश्नमाह—कथमिति । त्रिपथगागङ्गा कथंविश्रुता कैःकर्मभिः व्यापारैः । सरिदुत्तमाआसीत् ॥ ४ ॥ प्रथमप्रश्नोत्तरमाहेत्याह—तथेति । काकुत्स्थइतिलक्ष्मणस्याप्युपलक्षणं । निखिलेन विस्तरेण । सर्वां दिव्यसंभवां मानुषसंभवांच ॥ ५ ॥ निखिलेनेत्युक्तंगाङ्गेयसंभव-

---

[पा०] १ ङ. झ. ट. उमंमुमत. २ क. ग. घ. ट. तपोधनाः. ख. हिमालये. ३ ट. उग्रायाप्रतिरूपाय. ४ ङ. झ. यथात्रिपथगामिनी. ट. गङ्गात्रिपथगानदी. ५ ट. प्रथमंगाम. ६ ट. शैलेन्द्रतनयातदा. ख. शैलेन्द्रस्यसुतापुरा. ७ क—च. झ. ञ. ट. प्रतिनन्द्यकथां. ८ क. ख. ङ. च. छ. झ. ञ. ट. कृतोद्वाहदृशितिकण्ठो. ९ क. स्पृष्ट्वाचस्पृहयादेवीं. ङ. झ. दृष्ट्वाच भगवान्देवीं.

*शितिकण्ठस्य देवस्य दिव्यं वर्षशतं गतम् ॥ [*तस्य संक्रीडमानस्य महादेवस्य धीमतः ॥ ७ ॥
एवं मन्मथयुद्धे तु तयोर्नासीत्पराजयः] ॥ न चापि तनयो राम तस्यामासीत्परंतप ॥
[धीमतो देवराजस्य रुद्रस्यापि महात्मनः] ॥ ८ ॥
ततो देवाः समुद्विग्नाः पितामहपुरोगमाः ॥ यदिहोत्पद्यते भूतं कस्तत्प्रतिसहिष्यते ॥ ९ ॥
अभिगम्य सुराः सर्वे प्रणिपत्येदमब्रुवन् ॥ १० ॥
देवदेव महादेव लोकस्यास्य हिते रत ॥ सुराणां प्रणिपातेन प्रसादं कर्तुमर्हसि ॥ ११ ॥
न लोका धारयिष्यन्ति तव तेजः सुरोत्तम ॥ ब्राह्मेण तपसा युक्तो देव्या सह तपश्चर ॥ १२ ॥
त्रैलोक्यहितकामार्थं तेजस्तेजसि धारय ॥ [रक्ष सर्वानिमाँल्लोकान्नालोकं कर्तुमर्हसि] ॥ १३ ॥
देवतानां वचः श्रुत्वा सर्वलोकमहेश्वरः ॥ बाढमित्यब्रवीत्सर्वान्पुनश्चेदमुवाच ह ॥ १४ ॥
धारयिष्याम्यहं तेजस्तेजस्येव सहोमया ॥ त्रिदशाः पृथिवी चैव निर्वाणमधिगच्छतु ॥ १५ ॥
यदिदं क्षुभितं स्थानान्मम तेजो ह्यनुत्तमम् ॥ धारयिष्यति कस्तन्मे ब्रुवन्तु सुरसत्तमाः ॥ १६ ॥
एवमुक्तास्ततो देवाः प्रत्यूचुर्वृषभध्वजम् ॥ यत्तेजः क्षुभितं ह्येतत्तद्धरा धारयिष्यति ॥ १७ ॥
एवमुक्तः सुरपतिः प्रमुमोच महीतले ॥ तेजसा पृथिवी येन व्याप्ता सगिरिकानना ॥ १८ ॥
ततो देवाः पुनरिदमूचुश्चाथ हुताशनम् ॥ प्रविश त्वं महातेजो रौद्रं वायुसमन्वितः ॥ १९ ॥

माह—पुरेति । कृतोद्वाहइतिपरपरिमहव्यावृत्तिः । दृष्ट्वा स्पृहया महातपोनिष्ठत्वेपिकामबाणवशात्तस्याभिलाषेण । मैथुनाय मिथुनकर्मकर्तुं । उपचक्रमे ॥ ६ ॥ दिव्यवर्षशतंगतं मैथुनेनैवेतिशेषः ॥ ७ ॥ तनयः तनयप्रापकरेतोविसर्गः ॥८॥ पितामहपुरोगमाःदेवाः । समुद्विग्नाः भीताः । पाठान्तरे समुद्युक्ताः उद्योगंचक्रुः । किमर्थं । इह पार्वत्यां । यद्भूतं पुत्रः । उत्पद्यते उत्पत्स्यते । व[र्तमा]नसामीप्येवर्तमानवत्प्रयोगः । तत् कः प्रतिसहिष्यते ! इतिविचार्यतन्निवर्तनायसमुद्युक्ताइत्यर्थः ॥ ९ ॥ तमेवोद्योगमाह—अभिगम्येति । महादेवमितिशेषः ॥ १० ॥ देवदेवेत्यनेनमहादेवशब्दार्थउक्तः । प्रणिपातेन पादमूलपतनेन ॥ ११ ॥ तेजः तेजस्समुद्भूत[पु]त्रं । नधारयिष्यन्ति नसहिष्यन्ते । अतो ब्राह्मेण वेदावगतेन । तपसा योगेन । युक्तःसन् तदङ्गतयादेव्यासहतपश्चर । नतेजः पार्वत्यांगोक्तुमर्हसीतिभावः ॥ १२ ॥ त्रैलोक्यहितमेवकामः काम्यमानः पुरुपार्थः तदर्थम् । तेजः रेतः । तेजसि तेजोमयनिजशरीरे । धारय नमुञ्चेत्यर्थः ॥ १३ ॥ सर्वलोकमहेश्वरः सर्वलोकानांपरमनियन्ता । सर्वलोकपितामहइतिपाठान्तरं ॥ १४ ॥ बाढमित्यङ्गीकृतांशमाह—धारयिष्यामीति । तेजः अक्षुभितांशं । उमया उमाप्यक्षुभितंशोणितरूपंतेजोधारयत्वित्यर्थः । पृथिवीशब्देनलोकाउच्यन्ते । निर्वाणं सुखं ॥१५॥ "पुनश्चेदमुवाचह" इत्युक्तमंशंदर्शयति—यदिदमिति । स्थानात् रेतःस्थानहृदयसंपुटात् । अनुत्तमं दुर्भरं । मे मह्यं । ब्रुवन्तु ॥ १६ ॥ धरा सर्वधारणशक्तिमती । अनेन धरा तद्धारणार्थंदेवैःप्रार्थितेतिसिद्धं ॥ १७ ॥ सुरपतिः रुद्रः । प्रमुमोच तेजइतिसिद्धं । येनतेजसापृथिवीव्याप्ता तत्प्रमुमोच॥१८॥ततः पृथिव्यांव्याप्तत्वादेवहेतोः । पृथिवीभस्माभविष्यतीतिहुताशनमूचुः । पुनरूचुरित्यनेनाग्नेःप्रवेशभीतत्वंगम्यते । अग्निचारणहेतुतयावायुसम-

---

शि० यत्तेजः अद्य अस्मिन्काले । क्षुभितंतत्तेजःधराधारयिष्यति । अद्येत्युक्तया इतःप्रभृतिअधिकंवीर्यच्युतंचेत् तद्धारणे न कश्चनसमर्थोभविष्यतीतिध्वनितं ॥ १७ ॥ महातेजः वायुसमन्वितएवत्वं प्रविश आत्मनिप्रवेशय । अन्तर्भावितणिजर्थः । चशब्द

[पा०] * ङ. च. झ. ञ. ट. पाठेषु. तस्यसंक्रीडमानस्य. शितिकण्ठस्यदेवस्य. इत्यर्धयोर्व्युत्क्रमोदृश्यते. १ ञ. शितकण्ठस्यदेव्याश्च. * इदमर्धद्वयं क. ञ. दृश्यते. २ ख. तयासंक्रीडमानस्य. ३ ख. देवदेवस्य. ४ इदमर्धं च. दृश्यते. ५ ङ. झ. सर्वे देवास्समुद्युक्ताः. ६ ङ. च. छ. झ. ञ. ट. सहिष्यति. ७ ट. हितरतः. ८ इदमर्धं क. ग. च. छ. झ. ञ. दृश्यते. ९ ङ. छ. झ. स्तेजसैव. १० क. ख. घ. छ. झ. ञ. क्षुभितंह्येतद्धरा. ट. क्षुभितंदेवतद्धरा. ११ ङ. झ. ट. प्रमुमोचमहाबलः. १२ ङ. च, छ. झ. ञ. ट. चापिहुताशनम्. १३ क. ङ. च. छ. झ. ञ. ट. आविशत्वं.

तदग्निना पुनर्व्याप्तं संजातः श्वेतपर्वतः ॥ दिव्यं शरवणं चैव पावकादित्यसन्निभम् ॥
यत्र जातो महातेजाः कार्तिकेयोऽग्निसंभवः ॥ २० ॥
अथोमां च शिवं चैव देवाः सर्षिगणास्तदा ॥ पूजयामासुरत्यर्थं सुप्रीतमनसस्ततः ॥ २१ ॥
अथ शैलसुता राम त्रिदशानिदमब्रवीत् ॥ [अप्रियस्य कृतस्याद्य फलं प्राप्स्यथ मे सुराः ॥ २२ ॥
इत्युक्त्वा सलिलं गृह्य पार्वती भास्करप्रभा] ॥ समन्युरशपत्सर्वान्क्रोधसंरक्तलोचना ॥ २३ ॥
यस्मान्निवारिता चैवं संगतिः पुत्रकाम्यया ॥ अपत्यं स्वेषु दारेषु तस्मान्नोत्पादयिष्यथ ॥ २४ ॥
अद्यप्रभृति युष्माकमप्रजाः सन्तु पत्नयः ॥ [पत्नयो न जनयिष्यन्ति ह्यद्यप्रभृति चात्मजान्] ॥
एवमुक्त्वा सुरान्सर्वाञ्शशाप पृथिवीमपि ॥ २५ ॥
अवने नैकरूपा त्वं बहुभार्या भविष्यसि ॥ न च पुत्रकृतां प्रीतिं मत्क्रोधकलुषीकृता ॥
प्राप्स्यसि त्वं सुदुर्मेधे मम पुत्रमनिच्छती ॥ २६ ॥
तान्सर्वान्व्रीडितान्दृष्ट्वा सुरान्सुरपतिस्तदा ॥ गमनायोपचक्राम दिशं वरुणपालिताम् ॥ २७ ॥
स गत्वा तप आतिष्ठत्पार्श्वे तस्योत्तरे गिरेः ॥ हिमवत्प्रभवे शृङ्गे सह देव्या महेश्वरः ॥ २८ ॥
एष ते विस्तरो राम शैलपुत्र्या निवेदितः ॥ गङ्गायाः प्रभवं चैव शृणु मे सहलक्ष्मणः ॥ २९ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे षट्त्रिंशः सर्गः ॥ ३६ ॥

न्वितइत्युक्तं॥१६॥ अर्धत्रयं। तत् तेजः। अग्निना व्याप्तंसत् श्वेतपर्वतःसंजातः। ततःकालपरिपाकेनशरवणंचसंजातं। शरणांवनंशरवणं। "प्रनिरन्तश्शर-" इतिणत्वं। शरवणंविशेषयति—यत्रेति। कृत्तिकानामपत्यंपुमान्कार्तिकेयः। "स्त्रीभ्योढक्"। स्तन्यदानात्कृत्तिकापुत्रत्वं। अग्निनाधृत्वामुक्तत्वादग्निसंभवः ॥२०॥ पूजयामासुः मैथुनविघ्नकृतकोपशान्त्यर्थमित्यर्थः॥२१॥ अब्रवीदित्येतद्विशिष्योच्यते अशपदिति॥२३॥ पुत्रकाम्यया मया। संगतिः भर्तृसंयोगो मैथुनरूपः। सायस्मान्निवारिता तस्मात् यूयमपि स्वेषुदारेषु। अपत्यं पुत्रं। नोत्पादयिष्यथ॥२४॥ पूर्वार्धेनपूर्वश्लोकपठितमुच्यते। पत्नयइत्यार्षह्रस्वत्वं॥२५॥ अवनइतिसार्धश्लोकः नैकरूपा ऊषरत्वादिरूपेणनानाविधा। बहुभार्या बहूनांराज्ञांभार्या। ममपुत्रंअनिच्छती अनिच्छन्ती। त्वं मत्क्रोधेन शापरूपेण। कलुषीकृता विपर्यस्तप्रकृतिःसती। पुत्रकृतांप्रीतिं नशाप्स्यसीतिभावः॥२६॥ सुरपतिः रुद्रः। तान्सुरान् स्वकीयशापेनव्रीडितान् लज्जितान्। दृष्ट्वा प्रियाशापस्य दुष्परिहरत्वात्स्वीयशापदुःखस्यद्रष्टुमशक्यत्वाशवरुणपालितांदिशं हिमवतः प्रतीचींप्रति। गमनायोपचक्राम। परस्मैपदमार्षं॥२७॥ हिमवत्प्रभवेतस्यहिमवतोगिरेरुत्तरपार्श्वभूतेशृंङ्गे देव्यासहतपआतिष्ठत् सदातपोव्रतमसंकल्पयदित्यर्थः॥२८॥ ननु "दुहितुःशैलराजस्यज्येष्ठायावक्तुमर्हसि" इति पार्वतीवृत्तान्तमुपेक्ष्यगङ्गावैभवएवमयापृष्टे तद्विहायोपेक्षितमेवपार्वतीवृत्तान्तंकिमर्थंकथितवानसीति रामस्यशङ्कांपरि-

एवार्थकः॥१८॥ **शि०** पावकादित्यसंनिभं पावकस्थितादित्यसदृशं॥२०॥ **शि०** संगतिः सम्यकगतिःपतिसंयोगोयस्याःसा॥२४॥ **शि०** नार्हथ अतएवयुष्माकं पत्न्यःपत्न्यः अप्रजाःसन्तु। शापेनौरसपुत्रोत्पत्तिसंनिवार्यक्षेत्रजपुत्रोत्पत्तिंनिवारयन्तीआह। अद्यप्रभृतियुष्माकंपत्न्यः आत्मजान् पुत्रान्। नैवजनयिष्यन्ति पत्यन्तरादपिनोत्पादयिष्यन्तीत्यर्थः॥२५॥ **ति०** नचपुत्रकृतांप्रीतिंवराहादुत्पन्नस्यापिनरकासुरस्यभौमस्यकृष्णावतारेतेनैवहननात्॥२६॥ **वि०** हिमवत्प्रभवे हिमवत्प्रभवाख्येशृङ्गे॥२८॥ इतिषट्त्रिंशःसर्गः॥३६॥

[पा०] १ सजातः. २ क. ङ. च. छ. झ. ञ. ट. सर्षिगणास्तथा. ३ ख. ङ. च. छ. झ. ञ. मनस्तदा. ४ कुण्डळान्तर्गतंअर्धद्वयं ग. पाठेदृश्यते. ५ क. ग. ङ. च. झ. ञ. चाहंसंगतापुत्रकाम्यया. ट. चाहंसंगतिःपुत्रकाम्यया. ६ क. ग. ङ. च. छ. झ. ञ. ट. दारेषुनोत्पादयितुमर्हथ. ७ इदमर्धं ट. पुस्तकेदृश्यते. ८ ङ. झ. ट. प्राप्यसेत्वं. ९ ट. न्सर्वान्व्यथितान्दृष्ट्वा. ङ. झ. न्सर्वान्पीडितान्दृष्ट्वा. १० ग. च. गिरौ. ११ ग. प्रभवंचापि. १२. क. ग. झ. ञ. सहलक्ष्मण.

सप्तत्रिंशः सर्गः ॥ ३७ ॥

देवैर्ब्रह्माणंप्रतिशिवयोस्तपःप्रवृत्त्याअपत्योत्पादनवैमुख्यनिवेदनपूर्वकंसेनापत्युत्पादनेउपायकल्पनप्रार्थना ॥ १ ॥ ततोब्रह्मवचनाद्देवानांचोदनयाऽग्निनास्कन्नतरुद्रतेजसोगङ्गायामुत्सर्जनम् ॥ २ ॥ तद्धारणाशक्तयागङ्गयाऽग्निवचनेनहिमवत्पादेसमुत्सृष्टात्तेजसःस्कन्दस्यप्रादु· ३ ॥ देवैःसैनापत्येऽभिषिक्तेनतेनकुमारेणदैत्यसेनाविजयः ॥ ४ ॥

तप्यमाने तपो देवे देवाः[1] सर्षिगणाः पुरा ॥ सेनापतिमभीप्सन्तः पितामहमुपागमन् ॥ १ ॥
ततोऽब्रुवन्सुराः सर्वे भगवन्तं पितामहम् ॥ प्रणिपत्य सुराः सर्वे[2] सेन्द्राः साग्निपुरोगमाः ॥ २ ॥
यो[3] नः सेनापतिर्देव दत्तो भगवता पुरा ॥ [स[4] न जातोऽद्य भगवन्नस्मद्वैरिनिबर्हणः ॥ ३ ॥
तत्पिता भगवाञ्शर्वो हिमवच्छिखरेऽद्य[5] वै] ॥ तपः[6] परममास्थाय तप्यते स्म सहोमया ॥ ४ ॥
यदत्रानन्तरं कार्यं लोकानां हितकाम्यया ॥ संविधत्स्व विधानज्ञ त्वं हि नः परमा गतिः ॥ ५ ॥
देवतानां वचः श्रुत्वा सर्वलोकपितामहः ॥ सान्त्वयन्मधुरैर्वाक्यैस्त्रिदशानिदमब्रवीत्[7] ॥ ६ ॥
शैलपुत्र्या यदुक्तं तन्न[8] प्रजाः सन्तु पत्निषु ॥ तस्या वचनमक्लिष्टं सत्यमेतन्न संशयः ॥ ७ ॥
इयमाकाशगा[10] गङ्गा यस्यां पुत्रं हुताशनः ॥ जनयिष्यति देवानां सेनापतिमरिंदमम् ॥ ८ ॥
ज्येष्ठा शैलेन्द्रदुहिता मानयिष्यति तत्सुतम्[11] ॥ उमायास्तद्बहुमतं भविष्यति न संशयः[9] ॥ ९ ॥

हरतिं—एषइति । शैलपुत्र्याः पार्वत्याःसंबन्धी कथाविस्तरो निवेदितः । वक्ष्यमाणगङ्गावैभवकथनोपयोगित्वेनोक्तः । गङ्गायाःप्रभवं प्रभावं । त्वं शृणु । चः प्राधान्ये ॥ २९ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने षट्त्रिंशःसर्गः ॥ ३६ ॥

अथ प्रतिज्ञातं स्कन्दोत्पादकत्वरूपं दिव्यसंभववैभवमाहसप्तत्रिंशे—तप्यमानइत्यादि । तप्यमाने तपःकर्मकत्वादात्मनेपदकर्मवद्भावौ । देवसेनापतित्वंविहाय केवलतपःप्रवणइत्यर्थः ॥ १ ॥ अग्निनापुरोगमेनसहिताः साग्निपुरोगमाः । सुराःसर्वेप्रणिपत्य सुराःसर्वेअब्रुवन्निति क्रियाभेदान्नपुनरुक्तिः ॥ २ ॥ भगवता भवता यःसेनापतिरस्मभ्यमादिकालेदत्तः सइदानीमुमयासहतप्यते । स्मेतिप्रसिद्धौ ॥ ३–४ ॥ अनन्तरं सेनापतावन्यपरेसति अत्र सेनापतिविषये । यत्कार्यं तत्संविधत्स्व आलोचय । तमेवाहूयसैनापत्येनिवेशय अन्यंवोत्पादयेत्यर्थः ॥ ५ ॥ सान्त्वयन् । उग्रेतपसि वर्तमानस्यतस्यरुद्रस्यनिवर्तनमशक्यं तत्रनाभिनिवेशः कार्यइतिसमादधानइत्यर्थः ॥ ६ ॥ अन्यंवोत्पादयेत्यत्रप्रतिवक्ति—शैलेति । शैलपुत्र्या पार्वत्या देवानांपत्निषुप्रजानसन्त्वितियदुक्तं तद् वचनं अक्लिष्टं अमोघं । मयासत्यमेवोच्यते अत्रसंशयोभवद्भिर्नकर्तव्यः ॥ ७ ॥ तर्हिकागतिरित्यत्राह—इयमिति । इयं बुद्धिस्था । अस्तीतिशेषः ॥ ८ ॥ कथमिदंगङ्गासंमन्यतेकुतोवाउमानकुप्येत्तत्राह—ज्येष्ठेति । तत्सुतं अग्नेःसुतं ।

ति० तप्यमानइति । देवाइतिशेषः ॥ १ ॥ ति० अत्रसुराःसर्वेइतिपुनरुक्तं । अतःपाठान्तरमन्वेषणीयं । द्वितीयार्धेसुराराम इतिपाठः । रामसंबोधनंचैतत् । शि० सर्वे सर्वेषांमुनीनांईःईप्सितप्राप्तिर्यस्मात्तत्संबोधनंहेसर्वे । किंचसर्वान्एतिस्वप्रकाशत्रह्मःद्वाराव्याप्नोतितत्संबोधनं । सुराः परमदातःहेराम । रादानइतिधातोः । सर्वेसुराःपितामहमब्रुवन् । एतेनअत्रसुरास्सर्वेइतिपुनरुक्तंअतःपाठान्तरमन्वेषणीयमितिभट्टोक्तिश्चिन्त्या । उक्तरीत्यापौनरुक्त्यस्पर्शाभावात् । यत्तुक्रियाभेदान्नपौनरुक्त्यमितिभूषणकृद्भिरुक्तंतदपिचिन्त्यं । समानकर्तृकेक्त्वोऽनुशासनेनपौनरुक्त्यतादवस्थ्यात् ॥ २ ॥ शि० ज्येष्ठा पूर्वंप्रादुर्भूताशैलेन्द्रदुहितागङ्गा । तंसेनापतिंमानयिष्यति । स्वजलादुत्पन्नत्वादितिभावः । तत् गङ्गामानविषयीभूतं । उमायाबहुमतं शिवसंसर्गजनितस्वरजोहेतुक-

[पा०] १ ङ. च. छ. ञ. ट. सेन्द्रास्साग्निपुरोगमाः. २ च, छ. ञ. सर्वेसेन्द्रास्सर्षिगणास्ततः. ङ. झ. रामसेन्द्रास्साग्निपुरोगमाः. ३ ङ. झ. येनसेनापतिर्देव. ४ इदमर्धद्वयं क. घ. च. छ. ञ. दृश्यते. ५ च. छ. ञ. हिमवच्छिखरालयः क. हिमवच्छिखरेऽवसत्. ६ ग. ङ. च. छ. झ. ञ. ट. सतपःपरमास्थाय. ७ क. ख. सान्त्वयन्विविधैर्वाक्यैः. ८ ट. तदप्रजास्स्थस्वपत्निषु. ग. ञ. तन्नप्रजास्यथपत्निषु. ङ. झ. ट. तन्नप्रजास्स्वासुपत्निषु. घ. तन्नप्रजास्त्वथपत्निषु. ९ क. ख. घ. ङ. च. झ. ञ. ट. मेवनसंशयः. १० ङ. झ. ट. माकाशगङ्गाच. ११ क. ख. घ.—छ. झ. ञ. ट. तंसुतम्.

तच्छ्रुत्वा वचनं तस्य कृतार्था रघुनन्दन ॥ प्रणिपत्य सुराः सर्वे पितामहमपूजयन् ॥ १० ॥
ते गत्वा पर्वतं राम कैलासं धातुमण्डितम् ॥ अग्निं नियोजयामासुः पुत्रार्थं सर्वदेवताः ॥ ११ ॥
देवकार्यमिदं देव संविधत्स्व हुताशन ॥ शैलपुत्र्यां महातेजो गङ्गायां तेज उत्सृज ॥ १२ ॥
देवतानां प्रतिज्ञाय गङ्गामभ्येत्य पावकः ॥ गर्भं धारय वै देवि देवतानामिदं प्रियम् ॥ १३ ॥
तस्य तद्वचनं श्रुत्वा दिव्यं रूपमधारयत् ॥ दृष्ट्वा तन्महिमानं स समन्तादवकीर्यत ॥ १४ ॥
समन्ततस्तदा देवीमभ्यषिञ्चत पावकः ॥ सर्वस्रोतांसि पूर्णानि गङ्गाया रघुनन्दन ॥ १५ ॥
तमुवाच ततो गङ्गा सर्वदेवपुरोहितम् ॥ अशक्ता धारणे देव तव तेजः समुद्धतम् ॥
दह्यमानाऽग्निना तेन संप्रव्यथितचेतना ॥ १६ ॥
अथाब्रवीदिदं गङ्गां सर्वदेवहुताशनः ॥ इह हैमवते पादे गर्भोऽयं संनिवेश्यताम् ॥ १७ ॥
श्रुत्वा त्वग्निवचो गङ्गा तं गर्भमतिभास्वरम् ॥ उत्ससर्ज महातेजः स्रोतोभ्यो हि तदाऽनघ ॥ १८ ॥
यदस्या निर्गतं तप्तजांबूनदप्रभम् ॥ काञ्चनं धरणीं प्राप्तं हिरण्यममलं शुभम् ॥ १९ ॥
ताम्रं कार्ष्णायसं चैव तैक्ष्ण्यादेवाभ्यजायत ॥ मलं तस्याभवत्तत्र त्रपु सीसकमेव च ॥

मानयिष्यति बहुमतिपूर्वं जनयिष्यतीत्यर्थः । तदुमायाबहुमतं त्वज्येष्ठायाः प्रीत्यर्थत्वादितिभावः ॥ ९ ॥ कृतार्थाः कृतार्थप्रायाः ॥ १० ॥ दैवतशब्दः पुल्लिङ्गोप्यस्ति "दैवतानिपुंसिवा" इत्यनुशासनात् । दग्धरुद्रतेजसोग्नेःस्थानंकैलासः । पुत्रार्थं पुत्रोत्पादनार्थं अग्निर्गूर्भन्तरं दग्धरुद्रतेजःस्थं ॥ ११ ॥ संविधत्स्व संपादय । अस्यविवरणमुत्तरार्धं । प्रथमंसामान्येनोक्तिरग्निहृदयज्ञानाय । महातेजइतिसंबोधनं । तेजः रेतः ॥ १२ ॥ देवताभ्यस्तथेतिप्रतिज्ञायाकाशगङ्गांगत्वा हे देवि गर्भंधारय इत्युवाचेतिशेषः । किमर्थमित्यत आह — देवतानामिदंप्रियमिति ॥ १३ ॥ दिव्यंरूपं दिव्यस्त्रीवेषं । सोग्निस्तस्यामहिमानं सौन्दर्यातिशयंदृष्ट्वा समन्तात् सर्वावयवेभ्यः अवकीर्यत अवाकिरत् । आर्षः श्यन्प्रत्ययः । द्रुतवीर्योभूत् "अङ्गारसदृशीनारीघृतकुंभसमःपुमान्" इतिन्यायात् ॥ १४ ॥ समन्ततः सर्वावयवेषु । अभ्यषिञ्चत रेतःसर्वावयवेषुयथाव्याप्तं भवतितथासिक्तवानित्यर्थः । तेनसर्वस्रोतांसि सर्वावयवाः । पूर्णानि व्याप्तानि ॥ १५ ॥ तमित्यर्धत्रयी । तेनाग्निना अग्नितेजसा । दह्यमाना अतएवसंप्रव्यथितचेतना अतिदुःखितचित्तागङ्गा । सर्वदेवानांपुरोहितं "अग्निमीळेपुरोहितं" इतिश्रुतेः । तमग्निमुवाच । कथं हेदेव तवतेजः समुद्धतं अभिवृद्धंभवति । अस्य धारणेअशक्तास्मीति ॥ १६ ॥ सर्वदेवानांयत्हुतंतदश्नातीतिसर्वदेवहुताशनः । पादेपर्यन्तपर्वते अग्निदग्धकृतपर्वतीकृतरुद्रतेजोराशावित्यर्थः ॥ १७ ॥ महातेजइतिसंबोधनं । स्रोतोभ्यः उत्सृज्येतिशेषः ॥ १८ ॥ अस्याः गङ्गातः । निर्गतंयत् शोणितादि धरणींगतं । तस्मात्तप्तजांबूनदप्रभं द्रुतस्वर्णविशेषकान्ति काञ्चनं अमलं शुभंहिरण्यंरजतंच । अभवदितिवक्ष्यमाणमनुषज्यते । अमलमितिनिर्गतविशेषणंवा ॥ १९ ॥ गङ्गातोनिर्ग-

अनिभर्त्स्यनाशन्तप्रेमविपर्यामूतंभविष्यति ॥ ९ ॥ शि० सर्वदेवताः सर्वःशिवोविष्णुर्वादेवतायेषांतेतथा । तेदेवाः । दग्धादिरपिरार्थशब्दःशववाचकोस्तीतिकोशादप्रसिद्धं । विष्णुपरतानुपपत्तिस्त्विखिलमितिव्युत्पत्त्यालब्धा । अतएवसर्वेशशंवेइन्गिहृद्धनानोक्तिःसंगच्छते ॥ ११ ॥ ति० सः ऐश्वरतेजोराशिः । पारदोऽवशीर्यत शीर्णः ॥ १४ ॥ ति० अभ्यषिञ्चत रसेश्वरेणेतिशेषः । स्रोतांसि नाड्यः ॥ १५ ॥ ति० सर्वदेवपुरोगमं पुरोगमः पुरोयायी ॥ १६ ॥ अभिजायत अडभावश्चार्षः ।

[पा०] १ ख. विरधूतम. २ ङ. झ. परमंराम. ३ क. ग—छ. झ. ञ. ट. सर्वदेवताः. ४ क. ग. ङ. ञ. छ. झ. ञ. ट. रागाधत्स्वहुताशन. ५ क. ग. च. छ. महातेजागङ्गायां. ६ च. गर्भंधारय. ७ क. ख. घ.—छ. झ. ञ. ट. तस्येतद्वचनंश्रुत्वा. ग. अग्नेस्तुवचनं. ८ क. घ. च. छ. ञ. ट. सतस्यामहिमांदृष्ट्वासमन्तादवकीर्यत. ङ. झ. सतस्यामहिमांदृष्ट्वासमन्तादवशीर्यत. ९ क. ख. च. छ. ञ. समन्ततस्तुतांदेवीं. १० ख. घ. च. गङ्गायांरघुनन्दन. ११ ख. ग. ङ. च. छ. झ. ञ. सर्वदेवपुरोगमं. १२ ङ. घ. छ. झं. तेजस्तवसमुद्धतम्. १३ क. ख. घ—छ. झ. हैमवतेपार्श्वे. १४ क. ग. ञ. महातेजाःस्रोतोभ्यो. १५ ख. घ—छ. झ. ञ. मतुलप्रभम्. क. ममलप्रभम्. ग. मभवद्धनम्. १६ ङ. झ. ञ. देवाभिजायत क. ख. ध. च. देवाभिजायत.

तदेतद्गगनं प्राप्य नानाधातुरवर्धत ॥ २० ॥
निक्षिप्तमात्रे गर्भे तु तेजोभिरभिरञ्जितम् ॥ सर्वं पर्वतसंनद्धं सौवर्णमभवद्वनम् ॥ २१ ॥
[तं देशं तु ततो ब्रह्मा संप्राप्यैनमभाषत ॥ जातस्य रूपं यत्तस्माज्जातरूपं भविष्यति] ॥ २२ ॥
जातरूपमिति ख्यातं तदाप्रभृति राघव ॥ सुवर्णं पुरुषव्याघ्र हुताशनसमप्रभम् ॥
तृणवृक्षलतागुल्मं सर्वं भवति काञ्चनम् ॥ २३ ॥
तं कुमारं ततो जातं सेन्द्राः सहमरुद्गणाः ॥ क्षीरसंभावनार्थाय कृत्तिकाः समयोजयन् ॥ २४ ॥
ताः क्षीरं जातमात्रस्य कृत्वा समयमुत्तमम् ॥ ददुः पुत्रोऽयमस्माकं सर्वासामिति निश्चिताः ॥ २५ ॥
ततस्तु देवताः सर्वाः कार्तिकेय इति ब्रुवन् ॥ पुत्रस्त्रैलोक्यविख्यातो भविष्यति न संशयः ॥२६॥
तेषां तद्वचनं श्रुत्वा स्कन्नं गर्भपरिस्रवे ॥ स्नापयन्परया लक्ष्म्या दीप्यमानं यथाऽनलम् ॥२७॥
स्कन्द इत्यब्रुवन्देवाः स्कन्नं गर्भपरिस्रवात् ॥ कार्तिकेयं महाभागं काकुत्स्थ ज्वलनोपमम् ॥२८॥
प्रादुर्भूतं ततः क्षीरं कृत्तिकानामनुत्तमम् ॥ षण्णां षडाननो भूत्वा जग्राह स्तनजं पयः ॥ २९ ॥
गृहीत्वा क्षीरमेकाह्ना सुकुमारवपुस्तदा ॥ अजयत्स्वेन वीर्येण दैत्यसैन्यगणान्विभुः ॥ ३० ॥
सुरसेनागणपतिं ततस्तमतुलद्युतिम् ॥ अभ्यषिञ्चन्सुरगणाः समेत्याग्निपुरोगमाः ॥ ३१ ॥
एष ते राम गङ्गाया विस्तरोऽभिहितो मया ॥ कुमारसंभवश्चैव धन्यः पुण्यस्तथैव च ॥ ३२ ॥

तान् तैक्ष्ण्यात्क्षारान् । ताम्रंकार्ष्णायसंचाभ्यजायत । तस्याः गङ्गायाः अभवत् निर्गच्छतिस्म । मलं तत्र भूगौ । त्रपु सीसकंचाभ्यजायत । कृष्णायसमेवकार्ष्णायसं । उपसंहरति—तदेतदिति । तदेतत् गङ्गातोनिर्गतं ॥२०॥ एवंगर्भोत्सर्जनकालेगङ्गातोनिर्गतानांशोणितादीनांसौवर्णादिभावमुक्त्वागर्भतेजोरञ्जनात् केषांचित्स्वर्णभावमाह—निक्षिप्तेति । गर्भे गङ्गयानिक्षिप्तमात्रे तस्यतेजोभिः अभिरञ्जितं व्याप्तं पर्वतसंनद्धं पूर्वोक्तश्वेतपर्वतसहितं । सर्वंतद्वनं शरवणं । सौवर्णं स्वर्णमयंअभवत् ॥ २१-२२ ॥ यदासुवर्णजातं तदाप्रभृति हुताशनसमप्रभंसुवर्णं जातंरूपंयस्येतिव्युत्पत्त्याजातरूपमितिविख्यातमभूत् । उपसंहरति—तृणेति ॥२३॥ एवं गङ्गयोत्सृष्टस्यगर्भस्यपोषणप्रकारमाह—तमिति । ततः गङ्गोत्सर्जनानन्तरं । जातं तंकुमारं । मरुद्गणाः देवगणाः । सह युगपत् । क्षीरसंभावनार्थाय क्षीरेणवर्धनप्रयोजनाय । कृत्तिकाःसमयोजयन् । ण्यन्तत्वाद्विकर्मकत्वं ॥ २४ ॥ कृत्तिकाः अयमस्माकंसर्वासांपुत्रो भवत्वितिदेवैःसह समयं संकेतं । कृत्वा निश्चिताः कृतनिश्चयाःसत्यः । जातमात्रस्यतस्यक्षीरं ददुः दातुमुद्युक्ताः ॥ २५ ॥ उक्तविशेषणःपुत्रः कार्तिकेयः कृत्तिकापुत्रोभविष्यति । इतिब्रुवन् अब्रुवन् ॥ २६ ॥ कृत्तिकाः गर्भपरिस्रवे गर्भोदके । स्कन्नं पतितं । स्नापयन् अस्नापयन् । गर्भस्रवनिवृत्त्यर्थं ॥ २७ ॥ स्कन्नत्वात् स्कन्दइत्यन्वर्थनामचक्रुरित्यर्थः ॥ २८ ॥ ततः स्नापनानन्तरं । षण्णांकृत्तिकानांक्षीरंप्रादुर्भूतं । तच्च स्तनजंपयः षडाननोभूत्वाजग्राह ॥ २९ ॥ एकाह्नेति-टजभावः समासान्तस्यानित्यत्वात् । एकदिनेनस्तन्यं पीत्वाक्रमेणसुकुमारवपुरपिदैत्यगणानजयत् ॥ ३० ॥ सुरसेनागणपतित्वेनाभ्यषिञ्चन्नित्यर्थः । प्रथममभिषेकस्ततोजयइत्यर्थक्रमः ॥३१॥ विस्तरः दिव्यसंभव. ।

ति० अयंभावः । तैक्ष्ण्यमलगन्धयुक्तेनशुद्धेनस्पर्शतोविद्धंस्वर्णं । गन्धयुक्तेनविद्धंरजतं । तैक्ष्ण्ययुक्तेनविद्धंताम्रंलोहंच । मलयुक्तेनविद्धं त्रपुसीसे इतिनानाधातुस्तद्रूपं ॥ २० ॥ वि० जातरूपं रूपेणजातमित्यर्थः ॥ २३ ॥ ति० स्कन्नःपरिस्रुतइत्यर्थेस्कन्दइतिपृषोदरादित्वात्साधु ॥ २५ ॥ इतिसप्तत्रिंशस्सर्गः ॥ ३७ ॥

[पा०] १ घ. तदेवतंगिरिंप्राप्य. २ अयंश्लोकः ग. ङ च. छ. दृश्यते. ३ क. तत्रवृक्षलतागुल्मं. ४ ग. तदाजातं. ५ क—घ. माननिवानलम्. ६ घ. छ. झ. ञ. ट. गर्भपरिस्रवे. ७ क. ख. घ—छ. झ. ञ. महाबाहुं. ८ घ. सेनागणान्प्रभुः. * ङ. झ. गणपतिमभ्यषिञ्चन्महाद्युतिम् । ततस्तममराःसर्वे. ९ क. च. छ. ञ. ततस्तमतुलद्युतिम्. ग. घ. ततस्तमसमद्युतिम्. १० घ. विस्तरोहितवोदितः. ख. विस्तरोपिनिवेदितः.

भक्तश्च यः कार्तिकेये काकुत्स्थ भुवि मानवः ॥ आयुष्मान्पुत्रपौत्रैश्च स्कन्दसालोक्यतां व्रजेत् ॥ २३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे सप्तत्रिंशः सर्गः ॥ ३७ ॥

अष्टात्रिंशः सर्गः ॥ ३८ ॥

अयोध्याधिपतिनासगरेणपत्नीद्वयेनसहसुतार्थंहिमवत्पर्वतेतपश्चरणम् ॥ १ ॥ तत्रतपःप्रसादितभृगुवराज्ज्येष्ठायामसमञ्जनाम्नःपु[illegible]जननम् ॥ २ ॥ कनिष्ठायांषष्टिसहस्रपुत्राणांजननम् ॥ ३ ॥ असमञ्जाद्वंशकरस्यांशुमतोजननम् ॥ ४ ॥ ततोमहतिगतेकाले सगरेणाश्वमेधोपक्रमः ॥ ५ ॥

तां कथां कौशिको रामे निवेद्य कुशिकात्मजः ॥ पुनरेवापरं वाक्यं काकुत्स्थमिदमब्रवीत् ॥ १ ॥
अयोध्याधिपतिः शूरः पूर्वमासीन्नराधिपः ॥ सगरो नाम धर्मात्मा प्रजाकामः स चाप्रजाः ॥ २ ॥
वैदर्भदुहिता राम केशिनी नाम नामतः ॥ ज्येष्ठा सगरपत्नी सा धर्मिष्ठा सत्यवादिनी ॥ ३ ॥
अरिष्टनेमिदुहिता रूपेणाप्रतिमा भुवि ॥ द्वितीया सगरस्यासीत्पत्नी सुमतिसंज्ञिता ॥ ४ ॥
ताभ्यां सह तथा राजा पत्नीभ्यां तप्तवांस्तपः ॥ हिमवन्तं समासाद्य भृगुप्रस्रवणे गिरौ ॥ ५ ॥
अथ वर्षशते पूर्णे तपसाऽऽराधितो मुनिः ॥ सगराय वरं प्रादाद्भृगुः सत्यवतांवरः ॥ ६ ॥
अपत्यलाभः सुमहान्भविष्यति तवानघ ॥ कीर्तिं चाप्रतिमां लोके प्राप्स्यसे पुरुषर्षभ ॥ ७ ॥
एका जनयिता तात पुत्रं वंशकरं तव ॥ षष्टिं पुत्रसहस्राणि अपरा जनयिष्यति ॥ ८ ॥
भाषमाणं महात्मानं राजपुत्र्यौ प्रसाद्य तम् ॥ ऊचतुः परमप्रीते कृताञ्जलिपुटे तदा ॥ ९ ॥
एकः कस्याः सुतो ब्रह्मन्का बहूञ्जनयिष्यति ॥ श्रोतुमिच्छावहे ब्रह्मन्सत्यमस्तु वचस्तव ॥ १० ॥
तयोस्तद्वचनं श्रुत्वा भृगुः परमधार्मिकः ॥ उवाच परमां वाणीं स्वच्छन्दोऽत्र विधीयताम् ॥ ११ ॥
एको वंशकरो वाऽस्तु बहवो वा महाबलाः ॥ कीर्तिमन्तो महोत्साहाः का वा कं वरमिच्छति ॥ १२ ॥

तमेवाह—कुमारेति । एवमेतदाख्यानश्रवणफलमु[illegible]धन्यइत्यादिना ॥ ३२ ॥ अथप्रसङ्गात्तद्भक्तिफलमाह—भक्तश्चेति । सलोकएवसालोक्यं स्वार्थेष्यञ् । तस्यभावःसालोक्यता स्कन्दसमानलोकत्वमित्यर्थः ॥ २३ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने सप्तत्रिंशः सर्गः ॥ ३७ ॥

एवंदिव्यसंभवंविस्तरंप्रतिपाद्यमानुषलोकसंभवविस्तरंवक्तुमुपक्रमतेष्टात्रिंशे—तामित्यादि । रामे रामाय । कौशिकशब्दार्थमाह—कुशिकात्मजइति ॥ १ ॥ अप्रजाः अतएवप्रजाकामः ॥ २ ॥ यावैदर्भदुहिता साज्येष्ठपत्न्यासीत् ॥ ३ ॥ अरिष्टनेमेः कश्यपः ॥ ४ ॥ भृगुणाधिष्ठितंप्रस्रवणंवारिप्रवाहोयस्मिंस्तथा । गिरौपर्यन्तपर्वते ॥ ५ ॥ वर्षशतेपूर्णे तपस्यतइतिशेषः ॥ ६ ॥ सुबह्वपत्यविषयत्वात्सुमहत्त्वं । कीर्तिमिति तेनेतिशेषः ॥ ७ ॥ जनयितेतिलुट् । तातेत्युपलालनं ॥ ८ ॥ राजपुत्र्याविति छत्रिन्यायादुक्तं सुमतेःकश्यपपुत्रीत्वात् ॥ ९ ॥ तववचःसत्यमस्तु यस्याएकमिच्छसितस्याएकः यस्याबहूनिच्छसितस्यांबहवःसन्त्वित्यर्थः ॥ १० ॥ अत्र पुत्रविषये । स्वच्छन्दः स्वेच्छा । विधीयतां ज्ञाप्यतां ॥ ११ ॥ तदेवविवृणोति—एकइति ॥ १२ ॥

ती० भृगुप्रस्रवणे भृगुप्रस्रवणाख्येहिमवतःपादे ॥ ५ ॥ शि० राजपुत्र्यौ क्षत्रियराजवैदर्भद्विजराजकश्यपयोःपुत्र्यौ । राज-

[पा०] १ क. ख. स्कन्दसालोक्यमाप्नुयात्. २ क. ख. ग. ङ. च. छ. ट. निवेद्यमधुराक्षरम्. झ. ञ. निवेद्यमधुराक्षराम्. घ. निवेद्यमधुरांश्रुतेः. ३ ङ. च. छ. झ. ञ. ट. पतिर्वीरः. क. ख. पतिःश्रीमान्. ४ क. ख, घ—छ. झ. ञ. ट. सचाप्रजः. ५ क. ख. च. छ. ञ. विदर्भदुहिता. ६ ङ. झ, ट. अरिष्टनेमेर्दुहितासुपर्णभगिनीतुसा. ७ क. ख. घ. सहतदा. ग. ङ. च. छ. झ. ञ. ट. सहमहाराजः. ८ ग. घ. समाश्रित्य. ९ क. ख. तपसातोषितो. १० घ. सत्यपराक्रमः. ११ च. छ. षष्टिपुत्रसहस्राणि. क. ग. षष्टिःपुत्रसहस्राणि. १२ ङ. च. छ. झ. ञ. तरप्याप्तं. १३ ख. ग. राजपत्न्यौ.

मुनेस्तु वचनं श्रुत्वा केशिनी रघुनन्दन ॥ पुत्रं वंशकरं राम जग्राह नृपसन्निधौ ॥ १३ ॥
षष्टिं पुत्रसहस्राणि सुपर्णभगिनी तदा ॥ महोत्साहान्कीर्तिमतो जग्राह सुमतिः सुतान् ॥ १४ ॥
प्रदक्षिणमृषिं कृत्वा शिरसाऽभिप्रणम्य च ॥ जगाम स्वपुरं राजा सभार्यो रघुनन्दन ॥ १५ ॥
अथ काले गते तस्मिञ्ज्येष्ठा पुत्रं व्यजायत ॥ असमञ्ज इति ख्यातं केशिनी सगरात्मजम् ॥ १६ ॥
सुमतिस्तु नरव्याघ्र गर्भतुंबं व्यजायत ॥ षष्टिः पुत्राः सहस्राणि तुंबभेदाद्विनिस्सृताः ॥ १७ ॥
घृतपूर्णेषु कुंभेषु धात्र्यस्तान्समवर्धयन् ॥ कालेन महता सर्वे यौवनं प्रतिपेदिरे ॥ १८ ॥
अथ दीर्घेण कालेन रूपयौवनशालिनः ॥ षष्टिः पुत्रसहस्राणि सगरस्याभवंस्तदा ॥ १९ ॥
स च ज्येष्ठो नरश्रेष्ठस्सगरस्यात्मसंभवः ॥ बालान्गृहीत्वा तु जले सरय्वा रघुनन्दन ॥
प्रक्षिप्य प्रहसन्नित्यं मज्जतस्तान्समीक्ष्य वै ॥ २० ॥
एवं पापसमाचारः सज्जनप्रतिबाधकः ॥ पौराणामहिते युक्तः पुत्रो निर्वासितः पुरात् ॥ २१ ॥
तस्य पुत्रोंऽशुमान्नाम असमञ्जस्य वीर्यवान् ॥ संमतः सर्वलोकस्य सर्वस्यापि प्रियंवदः ॥ २२ ॥
ततः कालेन महता मतिः समभिजायत ॥ सगरस्य नरश्रेष्ठ यजेयमिति निश्चिता ॥ २३ ॥
स कृत्वा निश्चयं राम सोपाध्यायगणस्तदा ॥ यज्ञकर्मणि वेदज्ञो यष्टुं समुपचक्रमे ॥ २४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे अष्टत्रिंशः सर्गः ॥ ३८ ॥

एकोनचत्वारिंशः सर्गः ॥ ३९ ॥

इन्द्रेणसतिरोधानंसगरयाज्ञीयाश्वापहरणम् ॥ १ ॥ सगरनियोगात्तत्सुतैःषष्टिसहस्रैरश्वान्वेषणायभुवोभेदनम् ॥ २ ॥
ततःप्रजा... क्षुभितहृदयैर्देवादिभिर्ब्रह्माणंप्रतितद्दुश्चेष्टितनिवेदनम् ॥ ३ ॥

विश्वामित्रवचः श्रुत्वा कथान्ते रघुनन्दनः ॥ उवाच परमप्रीतो मुनिं दीप्तमिवानलम् ॥ १ ॥

जग्राह वरयामास ॥ १३ ॥ सुपर्णभगिनी गरुडभगिनी ॥ १४ ॥ ऋषिं भृगुं ॥ १५ ॥ व्यजायत प्रसूतवती ॥१६॥ गर्भतुंबं वृत्ताकारंगर्भपिण्डं । कथंततःपुत्रोदयइत्यतआह—षष्टिरिति। तुंबभेदात् नतुगान्धार्याइवपश्चाद्विभजनीयइत्यर्थः ॥ १७ ॥ धात्र्यः उपमातरः । तान् विभक्ततुंबान् ॥ १८ ॥ दीर्घेण कालेनेतियौवनशालित्वेहेतुत्वात्तृतीया । यौवनशालिनइतिपुंलिङ्गत्वमार्षं ॥ १९ ॥ अर्धत्रयं ज्येष्ठः असमञ्जः । प्रहसन् स्थितइतिशेषः ॥ २० ॥ निर्वासितः विवास्यतेस्म ॥ २१ ॥ अंशुमान्नाम आसीदितिशेषः ॥ २२ ॥ यजेयमिति निश्चिता मतिः समभिजायत समभ्यजायत ॥ २३ ॥ यज्ञकर्मणिनिश्चयंकृत्वा यष्टुंसमुपचक्रमे ॥ २४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने अष्टत्रिंशः सर्गः ॥ ३८ ॥

अथ रामेणस्वपूर्वकवृत्तान्तप्रस्तावेनकुतूहलात्पृष्टेसति विश्वामित्रेण तदुत्तरकथनमेकोनचत्वारिंशे—वि-

---

शब्देनोभयोर्ग्रहणम् विनिगमनाविरहायोग्यत्वाच्च ॥९॥ ति० नृपसंनिधावित्यनेनतस्यापिसाक्षित्वमात्रं नतुवरणनियमकर्तृत्वेति सूचितं ॥१३॥ शि० असमञ्जसइत्यानुपूर्वीकोप्यंतद्वाचकोस्तीतिभागवतात्असमञ्जसवीर्यवानितिवक्ष्यमाणाच्चनविरोधः ॥१६॥ शि० विनिस्सृताः विनिस्सृतानि ॥ १७ ॥ शि० असमञ्जसवीर्यवान् असमञ्जसवीर्यसदृशवीर्यविशिष्टः ॥२२॥ इत्यष्टत्रिंशः सर्गः ॥३८॥
शि० विश्वामित्रवचःश्रुत्वाकथान्तेकथासिद्धान्तंज्ञातुंरघुनन्दनोमुनिमुवाच । अन्तशब्दः प्रतिबन्धिसिद्धान्तइत्यर्थः ।

[पा०] १ ट. मुनेस्तद्वचनं. २ क. च. षष्टिपुत्र. ३ घ. ... भगिनीतथा. ४ क. घ—छ. झ. ञ. प्रणम्यतं. ५ ङ. च. झ. ञ. गतेतस्यज्येष्ठा. ६ ... च. षष्टिपुत्रसहस्राणि. ट. षष्टिःपुत्रसहस्राणि. ७ च. षष्टिपुत्रसहस्राणि. ८ क. सजले. ९ झ. प्राहसन्नित्यं. १० घ. ङ. च. स्तान्निरीक्ष्यवै. ख. स्तानवेक्ष्य. ञ. ट. स्तान्निरीक्षते. ११ क. ख. घ. ङ. च. झ. ञ. पित्रानिर्वासितः. १२ ट. असमञ्जसवीर्यवान्. १३ ख. बुद्धिस्समभिजायत. १४ क. घ—छ. झ. ञ. ट. निश्चयंराजा. ख. निश्चयंतात.

श्रोतुमिच्छामि भद्रं ते विस्तरेण कथामिमाम् ॥ पूर्वजो मे कथं ब्रह्मन्यज्ञं वै समुपाहरत् ॥ २ ॥
[तस्य तद्वचनं श्रुत्वा कौतूहलसमन्वितः] ॥ विश्वामित्रस्तु काकुत्स्थमुवाच प्रहसन्निव ॥
श्रूयतां विस्तरो राम सगरस्य महात्मनः ॥ ३ ॥
शङ्करश्वशुरो नाम हिमवानचलोत्तमः ॥ विन्ध्यपर्वतमासाद्य निरीक्षेते परस्परम् ॥ ४ ॥
तयोर्मध्ये प्रवृत्तोऽभूद्यज्ञः स पुरुषोत्तम ॥ स हि देशो नरव्याघ्र प्रशस्तो यज्ञकर्मणि ॥ ५ ॥
तस्याश्वचर्यां काकुत्स्थ दृढधन्वा महारथः ॥ अंशुमानकरोत्तात सगरस्य मते स्थितः ॥ ६ ॥
तस्य पर्वणि तं यज्ञं यजमानस्य वासवः ॥ राक्षसीं तनुमास्थाय यज्ञीयाश्वमपाहरत् ॥ ७ ॥
ह्रियमाणे तु काकुत्स्थ तस्मिन्नश्वे महात्मनः ॥ उपाध्यायगणाः सर्वे यजमानमथाब्रुवन् ॥ ८ ॥
अयं पर्वणि वेगेन यज्ञीयाश्वोपनीयते ॥ हर्तारं जहि काकुत्स्थ हयश्चैवोपनीयताम् ॥ ९ ॥
यज्ञच्छिद्रं भवत्येतत्सर्वेषामशिवाय नः ॥ तत्तथा क्रियतां राजन्यथाऽच्छिद्रः क्रतुर्भवेत् ॥ १० ॥
उपाध्यायवचः श्रुत्वा तस्मिन्सदसि पार्थिवः ॥ षष्टिं पुत्रसहस्राणि वाक्यमेतदुवाच ह ॥ ११ ॥
गतिं पुत्रा न पश्यामि रक्षसां पुरुषर्षभाः ॥ मन्त्रपूतैर्महाभागैरास्थितो हि महाक्रतुः ॥ १२ ॥
तद्गच्छत विचिन्वध्वं पुत्रका भद्रमस्तु वः ॥ समुद्रमालिनीं सर्वां पृथिवीमनुगच्छत ॥ १३ ॥

श्रोतुमिच्छामीत्यादि । कथान्ते यज्ञोपक्रमकथनानन्तरं ॥ १ ॥ इमां यज्ञकथां । पूर्वकः मद्वंशकूटस्थः । समुपाहरत् कृतवान् ॥ २ ॥ प्रहसन्निव प्रसन्नवदनइत्यर्थः । स्वविवक्षितस्यैवपृष्टत्वात् प्रहासः । अजानन्निवपृष्टवानितिवा । विस्तरइति । यज्ञस्येतिशेषः ॥ ३ ॥ विन्ध्यपर्वतमासाद्य मध्येमहागिरिनिरोधाभावात्प्राप्य तथाविन्ध्योपिहिमवन्तं इत्येवंपरस्परमासाद्य । वीक्षानिरोधाभावान्निरीक्षेतेपरस्परं निरीक्षमाणाविवस्थिताविल्यर्थः ॥ ॥ अस्त्वेवं ततःकिमित्यत्राह—हि यस्मात् सदेशः यज्ञकर्मणिप्रशस्तः । "आर्यावर्तःपुण्यभूमिर्मध्यंविन्ध्यहिमागयोः" इतिवचनात् । अतस्तयोर्मध्येयज्ञःप्रवृत्तोऽभूत् ॥ ५ ॥ अश्वचर्यां अश्वानुचरणं । मते आज्ञायां ॥ ६ ॥ तंयज्ञं यजमानस्यतस्य सगरस्य यज्ञीयाश्वं यज्ञार्हाश्वं । राक्षसीं मायामयीं । तनुमास्थाय पर्वणि उक्थ्याहे । "तिथिभेदेक्षणेपर्व" इतिनिघण्टुः । अपाहरत् अपहृतवान् ॥७॥ उपाध्यायगणाः ऋत्विग्गणाः ॥ ८॥ अपनीयते "वर्तमानसामीप्येवर्तमानवद्वा" इतिलट् ॥९॥ एतद्यज्ञच्छिद्रं यज्ञापराधः "छिद्रंरन्ध्रापराधयोः" इतिवैजयन्ती । सर्वेषांनःअशिवायभवति तस्मात्क्रतुर्यथा अच्छिद्रोभवेत्तथैवक्रियतां ॥ १० ॥ पार्थिवः सगरः ॥ ११ ॥ हेपुत्राः हियस्मान्महाक्रतुः मन्त्रपूतैर्महाभागैः । आस्थितः अनुष्ठितः । तस्माद्रक्षसांगतिं आगमनं । नपश्यामि प्रसक्त्यभावादितिभावः ॥ १२ ॥ अतःकेनप्रकारेणगतोश्वइतिविचिनुध्वमित्याह—तदिति। यद्वा अहंकर्मव्यग्रःस्थितः अश्वापहर्तॄणांरक्षसांगतिंगन्तव्यदेशंनपश्यामि विचिनुध्वमित्याह—तदिति। समुद्रएव मालाआवरणमस्याइतिसमुद्रमालिनी तां अनुगच्छत

यज्ञनार्थकस्यगतिधातोःकर्तरिक्विप् । "क्रियार्थोपपदस्यचकर्मणिस्थानिनः"इतिचतुर्थी । किंच कथान्ते कथावसानकाले । वियन्तं मुनिमित्यन्वयः । श्रुत्वानेनपुनर्शङ्कावारणार्थंप्रयत्नः । अन्यथातुपौनरुक्त्यंदुर्वारं ॥ १ ॥ ति० प्रहसन्निव विकसितवदनः । स्वपूर्वजवृत्तान्ततयाश्रवणकौतुकेनरामभद्रस्यायंप्रश्नः । अतएवमुनेर्हासः । स्ववंश्यइतिरामस्यापिलोकवच्छ्रेद्धस्संपन्नइति ॥ ३ ॥ ति० मन्त्रपूतैर्महाभागैर्यथापिमहाक्रतुरास्थितःअधिष्ठितः । तथापिरक्षसांमाययायदिच्छिद्रंस्यात्तदाआत्मनोगतिंनपश्यामि ॥ १२ ॥

[पाठ०] १ ङ. च. छ. झ. ञ. पूर्वजोमे. २ इदमर्धं ग. ङ. च. छ. झ. ञ. ट. दृश्यते. ३ ङ. च. छ. झ. ञ. [illegible]. क. ख. ग. श्वशुरोराम. ४ ङ. च. छ. झ. ञ. हिमवानितिविश्रुतः. ५ ङ. च. झ. समभवद्यज्ञः, ६ च. नकरोत्तात. ७ [illegible] छ. ञ. तस्मिन्यज्ञे. ८ ख. महात्मना. ९ क. ख. ग. च. ञ. याज्ञीयाश्वो. १० क. ङ. च. छ. झ. ञ. न्यज्ञोऽच्छिद्रःक्रतोर्भवेत्. ११ ङ. च. छ. झ. ञ. ट. सोपाध्यायवचः. १२ च. छ. षष्टिंपुत्रसहस्राणि. १३ ङ. च. छ. झ. ञ. मालिनीमिमां. १४ ख. ङ. च. छ. झ. ञ. मनुगच्छथ.

एकैकं योजनं पुत्रा विस्तारमभिगच्छत ॥ १४ ॥
यावत्तुरगसंदर्शस्तावत्खनत मेदिनीम् ॥ तं चैव हयहर्तारं मार्गमाणा ममाज्ञया ॥ १५ ॥
दीक्षितः पौत्रसहितः सोपाध्यायगणो ह्यहम् ॥ इह स्थास्यामि भद्रं वो यावत्तुरगदर्शनम् ॥ १६ ॥
इत्युक्ता हृष्टमनसो राजपुत्रा महाबलाः ॥ जग्मुर्महीतलं राम पितुर्वचनयन्त्रिताः ॥ १७ ॥
[गत्वा तु पृथिवीं सर्वामदृष्ट्वा तं महाबलाः] ॥ योजनायामविस्तारमेकैको धरणीतलम् ॥
बिभिदुः पुरुषव्याघ्र वज्रस्पर्शसमैर्नखैः ॥ १८ ॥
शूलैरशनिकल्पैश्च हलैश्चापि सुदारुणैः ॥ भिद्यमाना वसुमती ननाद रघुनन्दन ॥ १९ ॥
नागानां वध्यमानानामसुराणां च राघव ॥ राक्षसानां च दुर्धर्षः सत्वानां निनदोऽभवत् ॥ २० ॥
योजनानां सहस्राणि षष्टिं तु रघुनन्दन ॥ बिभिदुर्धरणीं वीरा रसातलमनुत्तमम् ॥ २१ ॥
एवं पर्वतसंबाधं जंबूद्वीपं नृपात्मजाः ॥ खनन्तो नृपशार्दूल सर्वतः परिचक्रमुः ॥ २२ ॥
ततो देवाः सगन्धर्वाः सासुरास्सहपन्नगाः ॥ संभ्रान्तमनसः सर्वे पितामहमुपागमन् ॥ २३ ॥
ते प्रसाद्य महात्मानं विषण्णवदनास्तदा ॥ ऊचुः परमसंत्रस्ताः पितामहमिदं वचः ॥ २४ ॥
भगवन्पृथिवी सर्वा खन्यते सगरात्मजैः ॥ बहवश्च महात्मानो हन्यन्ते तलवासिनः ॥ २५ ॥
अयं यज्ञहरोऽस्माकमनेनाश्वोऽपनीयते ॥ इति ते सर्वभूतानि निघ्नन्ति सगरात्मजाः ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे एकोनचत्वारिंशः सर्गः ॥ ३९ ॥

अन्वेषध्वम् ॥ १३ ॥ अर्धमेकं । प्रथममेकंयोजनंविचित्य पश्चाद्योजनान्तरमितिक्रमेणविचिनुध्वमित्यर्थः । यद्वा । एकएकंयोजनमितिक्रमेणविचिनुध्वमित्यर्थः ॥१४॥ यदिभूतलेनदृश्यतेतदाकर्तव्यमाह—यावदिति ॥ १५ ॥ गमतुगमनंनयुक्तमित्याह—दीक्षितइति ॥ १६ ॥ यन्त्रिताः नियुक्ताः ॥ १७ ॥ आयामः दैर्घ्यं । विस्तारः विशालता । वज्रस्पर्शसमैः वज्रस्पर्शसमस्पर्शैरित्यर्थः ॥ १८ ॥ अशनिकल्पैः वज्रतुल्यैः ॥१९॥ नागानां सर्पाणां । असुरराक्षसाः पातालवासिनः ॥२०॥ रसातलं पातालं यथाभवतितथा धरणीं विभिदुः ॥२१॥ संबाधं निबिडं ॥२२–२३॥ प्रसाद्य स्तुत्वा ॥ २४ ॥ तलवासिनः रसातलवासिनः ॥२५॥ यज्ञहरः यज्ञहन्ता । यज्ञहनइतिपाठे हन्तीति हनः पचाद्यच् ॥ २६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने एकोनचत्वारिंशः सर्गः ॥ ३९ ॥

ति० दीक्षितइत्यादि । तस्यंप्रवासनिषेधात्पौत्रस्यबालकत्वाच्चेतिभावः ॥ १६ ॥ शि० अनुत्तमं प्रसिद्धरसातलान्मध्यगमनुत्तमंवा । रसातलंकर्तुमित्यर्थवीराधरणींविभिदुः । तुशब्दइवार्थे ॥ २१ ॥ इत्येकोनचत्वारिंशःसर्गः ॥ ३९ ॥

[पा०] १ क. ङ. च. छ. ञ. मभिगच्छथ. ख. घ. मधिगच्छथ. २ क. ख. घ—छ. झ. ञ. ट. तमेवहयहर्तारं. ३ ङ. च. छ. झ. ञ. ट. गणस्त्वहम्. ४ क. ख. घ—छ. ञ. ट. देवसैहृष्टमनसो. ५ इदमर्धं क. ख. च. छ. ञ. ट. दृश्यते. ६ क. ख. च. महद्वाऽश्वं. ७ ङ. च. छ. झ. ञ. ट. पुरुषव्याघ्राः. ८ क. ग. घ—छ. झ. ञ. ट. स्पर्शसमैर्भुजैः. ९ ग. विध्यमानानां. ध. बाध्यमानानां. १० ङ. झ. ञ. दुराधर्षः. ११ ङ. च. छ. झ. ञ. धरणींराम. क—घ. धरणींवीर. १२ क—घ. नरशार्दूल. १३ ट. ऊचुःपरमसंभ्रान्ताः. १४ ख. वध्यन्तेतलवासिनः. ग. घ—छ. झ. ञ. ट. वध्यन्तेजलचारिणः. क. हन्यन्तेजलचारिणः. १५ क—च. झ. ट. यज्ञहनोस्माकं. १६ ग—ट. झ. ञ. ट. हिंसन्तिसगरात्मजाः.

चत्वारिंशः सर्गः ॥ ४० ॥

ब्रह्मणादेवान्प्रतिसगरसुतानांकपिलकोपाग्निनाभस्मीभवननिवेदनेनसमाश्वासनम् ॥ १ ॥ सगरपुत्रैःक्रमेणप्राच्यादिदिग्वि-भेदनेऐशान्यांदिशिकपिलपरिसरचारिणोनिजाश्वस्यावलोकनम् ॥ २ ॥ ततस्तैःकपिलेऽश्वचोरत्वबुध्यावद्धधमप्रवृत्तौतेनहुङ्कारमात्रेणतेषांभस्मीकरणम् ॥ ३ ॥

देवतानां वचः श्रुत्वा भगवान्वै पितामहः ॥ प्रत्युवाच सुसंत्रस्तान्कृतान्तबलमोहितान् ॥ १ ॥
यस्येयं वसुधा कृत्स्ना वासुदेवस्य धीमतः ॥ [महिषी माधवस्यैषा स एष भगवान्प्रभुः] ॥ २ ॥
कापिलं रूपमास्थाय धारयत्यनिशं धराम् ॥ तस्य कोपाग्निना दग्धा भविष्यन्ति नृपात्मजाः ॥ ३ ॥
पृथिव्याश्चापि निर्भेदो दृष्ट एव सनातनः ॥ सगरस्य च पुत्राणां विनाशोऽदीर्घजीविनाम् ॥ ४ ॥
पितामहवचः श्रुत्वा त्रयस्त्रिंशदरिंदमः ॥ देवाः परमसंहृष्टाः पुनर्जग्मुर्यथागतम् ॥ ५ ॥
सगरस्य च पुत्राणां प्रादुरासीन्महात्मनाम् ॥ पृथिव्यां भिद्यमानायां निर्घातसमनिःस्वनः ॥ ६ ॥
ततो भित्त्वा महीं सर्वे कृत्वा चापि प्रदक्षिणम् ॥ सहिताः सागराः सर्वे पितरं वाक्यमब्रुवन् ॥ ७ ॥
परिक्रान्ता मही सर्वा सत्ववन्तश्च सूदिताः ॥ देवदानवरक्षांसि पिशाचोरगकिंनराः ॥ ८ ॥
न च पश्यामहेऽश्वं तमश्वहर्तारमेव च ॥ किं करिष्याम भद्रं ते बुद्धिरत्र विचार्यताम् ॥ ९ ॥
तेषां तद्वचनं श्रुत्वा पुत्राणां राजसत्तमः ॥ समन्युरब्रवीद्वाक्यं सगरो रघुनन्दन ॥ १० ॥
भूयः खनत भद्रं वो निर्भिद्य वसुधातलम् ॥ अश्वहर्तारमासाद्य कृतार्थाश्च निवर्तथ ॥ ११ ॥
पितुर्वचनमास्थाय सगरस्य महात्मनः ॥ षष्टिः पुत्रसहस्राणि रसातलमभिद्रवन् ॥ १२ ॥
खन्यमाने ततस्तस्मिन्ददृशुः पर्वतोपमम् ॥ दिशागजं विरूपाक्षं धारयन्तं महीतलम् ॥ १३ ॥
सपर्वतवनां कृत्स्नां पृथिवीं रघुनन्दन ॥ शिरसा धारयामास विरूपाक्षो महागजः ॥ १४ ॥

कृतःअन्तोजननाशोयैस्तेकृतान्ताः सगरपुत्राः ॥ १ ॥ यस्येतिसार्धश्लोकः ॥ २ ॥ आस्थाय यदृतिशेषः ॥ ३ ॥ सनातनः प्रतिकल्पमवश्यंभावी । दृष्टः निश्चितः । अतोनतत्रापिशोकःकार्यइतिभावः । अदीर्घजीविनामितिच्छेदः । विनाशः दृष्टइत्यनुषङ्गः ॥ ४ ॥ त्रयस्त्रिंशद्देवाः अष्टौवसवएकादशरुद्राद्वादशादित्याअश्विनौच । इदमुपलक्षणं गन्धर्वादेर्गमनस्यापि ॥ ५ ॥ निर्घातः उत्पातविशेषः ॥ ६ ॥ सर्वेमहींप्रदक्षिणंकृत्वा पितरंगत्वा सर्वेपितरमब्रुवन् ॥ ७ ॥ श्लोकद्वयं । सत्ववन्तोबलवन्तः । करिष्यामेतिविसर्गलोपश्छान्दसः ॥ ८–९ ॥ समन्युः अश्वालाभकृतक्रोधवान् ॥ १० ॥ भूयोनिर्भिद्य खनतेत्यन्वयः । निवर्तथ निवर्तध्वं ॥ ११ ॥ अभिद्रवन् अभ्यद्रवन् ॥ १२ ॥ दिशागजं "वष्टिभागुरिः" इत्याप् । विरूपाक्षंविरूपाक्षाख्यं ॥ १३ ॥ उक्तंविवृणोति—सेति

ति० धारयति योगबलेनेतिशेषः ॥ ३ ॥ ति० दीर्घदर्शिनां दीर्घदर्शिभिः । सगरपुत्रविनाशोयंदृष्टएव । अतस्तच्छोकोनुचितः । शेषेषष्ठी । यद्वा । अदीर्घदर्शिनामितिच्छेदः ॥ ४ ॥ ति० निर्घातसमनिस्वनः निर्घातनिस्वनसमः । शि० निर्घातसमनिस्वनः निर्घातशब्दसदृशशब्दोमहास्वनः । प्रादुरासीत् । नीलोघटोपटइतिवच्छाब्दबोधः । किंचमहान्स्वनःस्वनत्वंयस्मिन्सः महास्वनः निर्घातसमनिस्वनः प्रादुरासीत् ॥ ६ ॥

[पा०] १ घ. झ. सुमन्त्रस्तान्. २ इदमर्धं ङ. च. झ. ञ. ट. दृश्यते. ३. झ. सएवभगवान्. ४. ख. ग. घ. कोपाग्निनिर्दग्धाः. ५ ख. श्चापिनिर्भेदो. घ. श्चवनिर्भेदो. ६ ङ. झ. ञ. दर्शिनाम्. ७ झ. ट. दरिंदमाः. ८ क. ग. ङ. च. छ. झ. ञ. ट. पुत्राणांप्रादुरासीन्महास्वनः. ख. पुत्रैस्तुप्रादुरासीन्महात्मभिः. ९ क. ग. ततोगत्वा. १० ख—छ. झ. ञ. ट. महींसर्वां. ११ ख. ग. ट. चापिप्रदक्षिणम्. १२ ध. दानवगन्धर्वाः. १३ प—छ. झ. ञ. पन्नगाः. १४ झ. ञ. ट. निवर्तत. १५ क. ग. घ. मास्थाय. ख. माश्रित्य. १६ च. षष्टिपुत्रसहस्राणि. १७ क. ख. खन्यमानेतले. १८ क. ख. घ. ङ. च. छ. ञ. ट. धारयामासशिरसा.

यदा पर्वणि काकुत्स्थ विश्रमार्थं महागजः ॥ खेदाचालयते शीर्षं भूमिकंपस्तदा भवेत् ॥ १५ ॥
तं ते प्रदक्षिणं कृत्वा दिशापालं महागजम् ॥ मानयन्तो हि ते राम जग्मुर्भित्वा रसातलम् ॥ १६ ॥
ततः पूर्वां दिशं भित्वा दक्षिणां बिभिदुः पुनः ॥ दक्षिणस्यामपि दिशि ददृशुस्ते महागजम् ॥ १७ ॥
महापद्मं महात्मानं सुमहत्पर्वतोपमम् ॥ शिरसा धारयन्तं ते विस्मयं जग्मुरुत्तमम् ॥ १८ ॥
ततः प्रदक्षिणं कृत्वा सगरस्य महात्मनः ॥ षष्टिः पुत्रसहस्राणि पश्चिमां बिभिदुर्दिशम् ॥ १९ ॥
पश्चिमायामपि दिशि महान्तमचलोपमम् ॥ दिशागजं सौमनसं ददृशुस्ते महाबलाः ॥ २० ॥
तं ते प्रदक्षिणं कृत्वा पृष्ट्वा चापि निरामयम् ॥ खनन्तः समुपक्रान्ता दिशं हैमवतीं ततः ॥ २१ ॥
उत्तरस्यां रघुश्रेष्ठ ददृशुर्हिमपाण्डुरम् ॥ भद्रं भद्रेण वपुषा धारयन्तं महीमिमाम् ॥ २२ ॥
समालभ्य ततः सर्वे कृत्वा चैनं प्रदक्षिणम् ॥ षष्टिः पुत्रसहस्राणि बिभिदुर्वसुधातलम् ॥ २३ ॥
ततः प्रागुत्तरां गत्वा सागराः प्रथितां दिशम् ॥ रोषादभ्यखनन्सर्वे पृथिवीं सगरात्मजाः ॥ २४ ॥
ते तु सर्वे महात्मानो भीमवेगा महाबलाः ॥ ददृशुः कपिलं तत्र वासुदेवं सनातनम् ॥ २५ ॥
हयं च तस्य देवस्य चरन्तमविदूरतः ॥ प्रहर्षमतुलं प्राप्ताः सर्वे ते रघुनन्दन ॥ २६ ॥
ते तं हयहरं ज्ञात्वा क्रोधपर्याकुलेक्षणाः ॥ खनित्रलाङ्गलधरा नानावृक्षशिलाधराः ॥
अभ्यधावन्त संक्रुद्धास्तिष्ठतिष्ठेति चाब्रुवन् ॥ २७ ॥
अस्माकं त्वं हि तुरगं यज्ञीयं हृतवानसि ॥ दुर्मेधस्त्वं हि संप्राप्तान्विद्धि नः सगरात्मजान् ॥ २८ ॥
श्रुत्वा तु वचनं तेषां कपिलो रघुनन्दन ॥ रोषेण महताऽऽविष्टो हुंकारमकरोत्तदा ॥ २९ ॥
ततस्तेनाप्रमेयेन कपिलेन महात्मना ॥ भस्मराशीकृताः सर्वे काकुत्स्थ सगरात्मजाः ॥ ३० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे चत्वारिंशः सर्गः ॥ ४० ॥

॥ १४ ॥ पर्वणि काले । खेदाद्धेतोः । विश्रमार्थं श्रमशान्त्यर्थं । चालयते चालयति ॥ १५ ॥ मानयन्तः पूजयन्तः ॥ १६ ॥ ततइत्यस्यविवरणं पूर्वां दिशं भित्वेति ॥ १७ ॥ महागजंविशेषयति—महेति । सुमहदित्यार्षं ॥ १८ ॥ दिक्छब्देन देशउच्यते ॥ १९ ॥ सौमनसं सौमनसाख्यं ॥ २० ॥ निरामयं कुशलं । समुपक्रान्ताः गताः । हैमवतीं हिमवत्संबंधिनीं ॥ २१ ॥ भद्रं भद्राख्यं । भद्रेण शोभनेन ॥ २२ ॥ समालभ्य स्पृष्ट्वा "आलंभःस्पर्शहिंसयोः" इत्यमरः ॥ २३ ॥ प्रागुत्तरां ऐशानींदिशं । प्रथितां अश्वगमनयोग्यत्वावर्ती । गमनखननक्रियाभेदात्सागरसगरात्मजपदप्रयोगः ॥ २४ ॥ महात्मानः महाकायाः । कपिलं कपिलावतारं ॥ २५ ॥ चरन्तं तृणानिभक्षयन्तं ॥ २६ ॥ तेतमितिसार्धश्लोकः । तं कपिलं ॥ २७ ॥ दुर्मेधइतिसंबोधनं ॥ २८–२९ ॥ अप्रमेयेन अप्रमेयवैभवेन ॥ ३० ॥ इतिश्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणेमणिमञ्जीराख्याने बालकाण्डव्याख्याने चत्वारिंशः सर्गः ॥ ४० ॥

शि० हिते अश्वप्राप्तये ॥ १६ ॥ इतिचत्वारिंशःसर्गः ॥ ४० ॥

[पा०] १ क. ङ. ज. विश्रामार्थं. २ झ. ञ. तेतंप्रदक्षिणं. ३ च. दिशांपालं. ट. दिशःपालं. ४ ज. ट. दिशंहित्वा. ५ ग. ङ. झ. ञ. ट. सुमहापर्वतोपमम्. ६ ङ. च. छ. झ. ञ. ट. धारयन्तंगां. ७ क. सुमनसं. ८ झ. ङ. तेतंप्रदक्षिणं. ९ ख. खनितुं. १० क. ग. ङ. झ. ञ. समुपाक्रान्ताः. ११ क—छ. झ. ञ. सोमवतींतदा. ट. हैमवतींतथा. १२ ख. उत्तरस्यामपिदिशि. १३ च. प्रास्थितादिशम्. १४ घ. ङ. झ. ट. तेतंयज्ञहनं. च. छ. तेतंयज्ञहर. क. तेतंयज्ञहय. १५ घ. यागीयं. १६ घ. तच्छ्रुत्वावचनं. क. ख. ग. च. छ. झ. ज. ट. श्रुत्वातद्वचनं. १७ क. ख. क्रोधेनमहता.

एकचत्वारिंशः सर्गः ॥ ४१ ॥

सगरेणचिरतरमनागतेषुपुत्रेषुतदन्वेषणायपौत्रस्यांशुमतःप्रेषणम् ॥ १ ॥ अंशुमतापितृखातमार्गगमनेनदिशागजपूजनपूर्वकंभस्मीभूतनिजपितॄणामश्वस्यचविलोकनम् ॥ २ ॥ तथातेषांजलदानार्थंतदन्वेषणायप्रवृत्तोदक्नस्यारणेगरुडस्यदर्शनम् ॥ ३ ॥ गरुडेनतंप्रतिपितृवृत्तान्तनिवेदनपूर्वकंगङ्गावतारणेनतद्भस्मातदस्थमाप्लवनचोदना ॥ ४ ॥ अंशुमताऽश्वानयनपूर्वकंपुत्रवृत्तान्तंज्ञापितेनसगरेणयज्ञसमापनम् ॥ ५ ॥ तथाचिरतरंराज्यरक्षणपूर्वकंगङ्गावतारणोपायानध्यवसायेनैवस्वर्गागमनम् ॥ ६ ॥

पुत्रांश्चिरगताञ्ज्ञात्वा सगरो रघुनन्दन ॥ नप्तारमब्रवीद्राजा दीप्यमानं स्वतेजसा ॥ १ ॥
शूरश्च कृतविद्यश्च पूर्वैस्तुल्योसि तेजसा ॥ पितृणां गतिमन्विच्छ येन चाश्वोपवाहितः ॥ २ ॥
अन्तर्भौमानि सत्वानि वीर्यवन्ति महान्ति च ॥ तेषां त्वं प्रतिघातार्थं सासिं गृह्णीष्व कार्मुकम् ॥ ३ ॥
अभिवाद्याभिवाद्यांस्त्वं हत्वा विघ्नकरानपि ॥ सिद्धार्थस्सन्निवर्तस्व मम यज्ञस्य पारगः ॥ ४ ॥
एवमुक्तोऽशुमान्सम्यक्सगरेण महात्मना ॥ धनुरादाय खड्गं च जगाम लघुविक्रमः ॥ ५ ॥
स खातं पितृभिर्मार्गमन्तर्भौमं महात्मभिः ॥ प्रापद्यत नरश्रेष्ठस्तेन राज्ञाऽभिचोदितः ॥ ६ ॥
दैत्यदानवरक्षोभिः पिशाचपतगोरगैः ॥ पूज्यमानं महातेजा दिशागजमपश्यद ॥ ७ ॥
स तं प्रदक्षिणं कृत्वा पृष्ट्वा चैव निरामयम् ॥ पितॄन्स परिपप्रच्छ वाजिहर्तारमेव च ॥ ८ ॥
दिशागजस्तु तच्छ्रुत्वा प्रत्याहांशुमतो वचः ॥ आसमञ्ज कृतार्थस्त्वं सहाश्वः शीघ्रमेष्यसि ॥ ९ ॥
तस्य तद्वचनं श्रुत्वा सर्वानेव दिशागजान् ॥ यथाक्रमं यथान्यायं प्रष्टुं समुपचक्रमे ॥ १० ॥
तैश्च सर्वैर्दिशापालैर्वाक्यज्ञैर्वाक्यकोविदैः ॥ पूजितः सहयश्चैव गन्तासीत्यभिचोदितः ॥ ११ ॥
तेषां तद्वचनं श्रुत्वा जगाम लघुविक्रमः ॥ भस्मराशीकृता यत्र पितरस्तस्य सागराः ॥ १२ ॥
स दुःखवशमापन्नस्त्वसमञ्जसुतस्तदा ॥ चुक्रोश परमार्तस्तु वधात्तेषां सुदुःखितः ॥ १३ ॥
यज्ञीयं च हयं तत्र चरन्तमविदूरतः ॥ ददर्श पुरुषव्याघ्रो दुःखशोकसमन्वितः ॥ १४ ॥

नप्तारं पौत्रं ॥ १ ॥ पूर्वैः पितृभिः । पितृणां कनिष्ठपितृणां । गतिं मार्गं । अन्विच्छ अन्वेषय । अश्वोयेनापवाहितस्तस्यचगतिमन्विच्छ ॥ २ ॥ अन्तर्भौमानि भूमेरन्तर्जातानि भूबिलमाश्रितानीत्यर्थः । यानीतिशेषः ॥ ३ ॥ पारगः समाप्तिकरः ॥ ४ ॥ लघुविक्रमः शीघ्रगमनः ॥ ५ ॥ खातं कृतमित्यर्थः ॥ ६ ॥ अपद्यत अपश्यत् ॥ ७ ॥ परिपप्रच्छ कास्तइतिशेषः ॥ ८ ॥ आसमञ्ज असमञ्जपुत्र । इञभावआर्षः ॥ ९ ॥ समुपचक्रमइतिसविनयत्वप्रकटनं ॥ १० ॥ वक्तुमर्हंवाक्यं । "ऋहलोर्ण्यत्" "चजोःकुघिण्ण्यतोः" इतिकुत्वं । वाक्यकोविदैः कालदेशोचितवक्तव्यार्थज्ञैः यद्वा परवाक्याशयज्ञैः स्वयंवाक्यप्रयोगकुशलैश्चेत्यर्थः । सहयःपितामहसमीपंगन्तासीत्यभिचोदितोऽभूत् ॥ ११ ॥ तस्य अंशुमतः । पितरोयत्रभस्मराशीकृतास्तंदेशंजगाम ॥ १२ ॥ पूर्वमदर्शनाद्दुःखवशमापन्नः तेषां वधात् वधदर्शनात् सुदुःखितः परमार्तः भृशतप्तः । चुक्रोश रुरोद ॥ १३ ॥ शोकः विलापः ॥ १४ ॥

शि० महात्मभिः अतिप्रयत्नैः ॥ ६ ॥ शि० हेस अरिनिवर्तकत्वाद्युक्तगुणविशिष्टराम । सोऽशुमान् ॥ ८ ॥ शि० एवेन गजानांपरमाभिज्ञत्वंसूचितं । विशेषवृत्तानुक्त्यादयालुत्वंचसूचितं । आसमञ्जशब्दःशिवाद्यणन्तः ॥ ९ ॥ शि० सुदुःखितः अत्यन्तदुःखंप्राप्तः । अतएव परमार्तः पृथिव्यांलुण्ठितः ॥ १३ ॥ ति० लोकसंमतः लोकहितः । एतन्मूलकतयासर्वलोकहितगङ्गाया

[पा०] १ च. छ. ज. ल. ट. चाश्वोपहारितः. २ ङ. झ. तेषांतुप्रतिघातार्थं. ३ क. ट. नरश्रेष्ठतेन. ४ झ. राज्ञानियोजितः. ५ ङ. च. छ. झ. ञ. देवदानव. ६ क. च. छ. ञ. पूज्यमानो. ७ ङ. च. छ. झ. ञ. प्रत्युवाचमहामतिः, घ. प्रीत्याहांशुमतोवचः. ८ क. ख. ग. घ. च—ञ. वाक्यकोविदः. ९ क. ख. घ. पितरस्तत्रसागराः. १० क. ख. घ. च. छ. यज्ञीयं.

स तेषां राजपुत्राणां कर्तुकामो जलक्रियाम् ॥ [1]सलिलार्थी [2]महातेजा न चापश्यज्जलाशयम् ॥१५॥
विसार्य निपुणां दृष्टिं [2]ततोपश्यत्खगाधिपम् ॥ पितॄणां मातुलं राम सुपर्णम[3]निलोपमम् ॥ १६ ॥
[4]स चैवमब्रवीद्वाक्यं वैनतेयो महाबलः ॥ मा शुचः पुरुषव्याघ्र वधोऽयं लोकसंमतः ॥ १७ ॥
कपिलेनाप्रमेयेन [5]दग्धा हीमे महाबलाः ॥ सलिलं [6]नार्हसि प्राज्ञ दातुमेषां हि लौकिकम् ॥ १८ ॥
गङ्गा हिमवतो ज्येष्ठा दुहिता पुरुषर्षभ ॥ तस्यां कुरु महाबाहो [7]पितॄणां तु जलक्रियाम् ॥ १९ ॥
भस्मराशीकृतानेतान्प्लावयेल्लोकपावनी ॥ तया क्लिन्नमिदं भस्म गङ्गया लोककान्तया ॥
[8]षष्टिं पुत्रसहस्राणि [9]स्वर्गलोकं [10]नयिष्यति ॥ २० ॥
[[11]गङ्गामानय भद्रं ते देवलोकान्महीतलम् ॥ क्रियतां [12]यदि शक्तोसि गङ्गायास्तव तारणम्] ॥ २१ ॥
[13]गच्छ चाश्वं महाभाग संगृह्य पुरुषर्षभ ॥ यज्ञं पैतामहं वीर [14]संवर्तयितुमर्हसि ॥ २२ ॥
सुपर्णवचनं श्रुत्वा सोंशुमानतिवीर्यवान् ॥ त्वरितं हयमादाय पुनरायान्[15]महायशाः ॥ २३ ॥
ततो राजानमासाद्य दीक्षितं रघुनन्दन ॥ न्यवेदयद्यथावृत्तं सुपर्ण[16]वचनं तथा ॥ २४ ॥
तच्छ्रुत्वा घोरसंकाशं वाक्यमंशुमतो नृपः ॥ यज्ञं [17]निर्वर्तयामास [18]यथाकल्पं यथाविधि ॥ २५ ॥
स्वपुरं [19]चागमच्छ्रीमानिष्टयज्ञो महीपतिः ॥ गङ्गायाश्चागमे राजा निश्चयं [20]नाध्यगच्छत ॥ २६ ॥
[21]अकृत्वा निश्चयं राजा कालेन महता महान् ॥ त्रिंशद्वर्षसहस्राणि राज्यं कृत्वा दिवं गतः ॥२७॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे एकचत्वारिंशः सर्गः ॥ ४१ ॥

जलक्रिया तर्पणं ॥ १५ ॥ विसार्य समन्तात्प्रसार्य । निपुणां दूरवीक्षणक्षमां । अनिलोपमं वेगेनेतिशेषः । लोकसंमतः लोकहितः ॥१७॥ हि यस्मात् कपिलेन हताः । लौकिकं लोकतःप्राप्तं । सलिलंदातुंनार्हसि । "चण्डालादुदकात्सर्पाद्वैद्युताद्ब्राह्मणादपि ॥ दंष्ट्रिभ्यश्चपशुभ्यश्चमरणंपापकर्मणां ॥ उदकंपिण्डदानंचएतेभ्योयद्विधीयते ॥ नोपतिष्ठतितत्सर्वमन्तरिक्षेविनश्यति" इतिस्मृतेः । कपिलोत्रब्राह्मणः ॥ १८ ॥ गङ्गा अस्तीतिशेषः ॥ १९ ॥ नकेवलंतत्रजलक्रिया तयासेचनीयंचेत्याह—भस्मेति । सार्धश्लोकः । यदिप्लावयेत् सेचयेत् तदा तया क्लिन्नं सिक्तं । भस्म नयिष्यति नेष्यति ॥ २०—२१ ॥ संवर्तयितुं समापयितुं ॥ २२ ॥ आयात् आगच्छत् ॥ २३ ॥ वृत्तं पितृवृत्तान्तं । सुपर्णवचनंचयथातथान्यवेदयदित्यन्वयः ॥ २४ ॥ यथाकल्पं यथाक्रमं ॥ २५ ॥ निश्चयं उपायं ॥ २६ ॥ महताकालेन दिवंगतइत्यन्वयः॥२७॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने एकचत्वारिंशःसर्गः ॥ ४१ ॥

भूलोकेऽवतारणात् ॥ १७ ॥ ति० यतश्च महाबलाः महाबलवत्त्वेनप्रायश्चित्तमर्यादातिक्रान्तपापवन्तः अतोलौकिकसलिलंदातुंनार्हसि ॥ १८ ॥ ति० गमिष्यति प्रापयिष्यतीत्यर्थः । अनेन अकृतप्रायश्चित्तानामपिमहापातकिनांऔर्ध्वदेहिकायोग्यानां गङ्गाजलस्पृष्टपुद्गलानांविनापिप्रायश्चित्तान्तरंतत्कालएवसकलौर्ध्वदेहिकक्रियायोग्यत्वंचसूचितं ॥ २० ॥ इत्येकचत्वारिंशःसर्गः ॥ ४१ ॥

[पा०] १ घ—छ. झ. ञ. सजलार्थी. २ क. सचापश्यत्खगाधिपम्. ट. तत्रापश्यत्. ३ क. च. छ. ज. ञ. मचलोपमम्. घ. मनलोपमम्. ४ क—ट. सचैनमब्रवीत्. ५ क. ख. निर्दग्धाहि. ट. हताहीमे. ६ ङ. च. छ. झ. ञ. नार्हसेप्राज्ञ. ७ ङ—ट. पितॄणांसलिलक्रियाम्. ८ च. षष्टिपुत्रसहस्राणि. ९ ख. ब्रह्मलोकं. १० ङ. झ. गमिष्यति. ११ अयंश्लोकः क. च. छ. ञ. दृश्यते. १२ क. च. छ. यदिशक्नोषि. १३ ङ. झ. निर्गच्छाश्वं. १४ ङ. ज. झ. निर्वर्तयितुमर्हसि. १५ क. घ—छ. झ. ञ. न्महातपाः. १६ क. ख. ग. ज. ञ. वचनंयथा. १७ च. छ. ज. ट. निवर्तयामास. १८ क. ग. घ. यथातत्त्वंयथाविधि. १९ ङ. छ. झ. ञ. ट. त्वगमच्छ्रीमान्. २० क. नाभ्यगच्छत. २१ क—ट. अगत्वानिश्चयं.

द्विचत्वारिंशः सर्गः ॥ ४२ ॥

सगरपौत्रेणांशुमतास्वपुत्रेदिलीपेराज्यनिधानपूर्वकंगङ्गावतारणायहिमवच्छिखरेतपश्चरणम् ॥ १ ॥ तस्मिंस्तपःफलालाभेनैवस्वर्गतेतदुपायंचिन्तयतापिदिलीपेनतदप्राप्त्यैवस्वर्गगमनम् ॥ २ ॥ तत्सूनुनाभगीरथेनमन्त्रिपुराज्याधानपूर्वकंगङ्गावतारणायगोकर्णेतपश्चरणम् ॥ ३ ॥ तथातपःप्रसन्नंब्रह्माणंप्रतिगङ्गावतरणवरणपूर्वकंस्वकुलानुच्छित्त्यैसंततिवरणम् ॥४॥ ब्रह्मणातंप्रतिगङ्गायाधरणीतलावतरणनियोजनपूर्वकंतद्धारणायहरप्रसादनचोदना ॥ ५ ॥

कालधर्मं गते राम सगरे प्रकृतीजनाः ॥ राजानं रोचयामासुरंशुमन्तं सुधार्मिकम् ॥ १ ॥
स राजा सुमहानासीदंशुमान्रघुनन्दन ॥ तस्य पुत्रो महानासीद्दिलीप इति विश्रुतः ॥ २ ॥
तस्मिन्राज्यं समावेश्य दिलीपे रघुनन्दन ॥ हिमवच्छिखरे पुण्ये तपस्तेपे सुदारुणम् ॥ ३ ॥
द्वात्रिंशच्च सहस्राणि वर्षाणि सुमहायशाः ॥ तपोवनं गतो राम स्वर्गं लेभे तपोधनः ॥ ४ ॥
दिलीपस्तु महातेजाः श्रुत्वा पैतामहं वधम् ॥ दुःखोपहतया बुद्ध्या निश्चयं नाध्यगच्छत ॥ ५ ॥
कथं गङ्गावतरणं कथं तेषां जलक्रिया ॥ तारयेयं कथं चैनानिति चिन्तापरोऽभवत् ॥ ६ ॥
तस्य चिन्तयतो नित्यं धर्मेण विदितात्मनः ॥ पुत्रो भगीरथो नाम जज्ञे परमधार्मिकः ॥ ७ ॥
दिलीपस्तु महातेजा यज्ञैर्बहुभिरिष्टवान् ॥ त्रिंशद्वर्षसहस्राणि राजा राज्यमकारयत् ॥ ८ ॥
अगत्वा निश्चयं राजा तेषामुद्धरणं प्रति ॥ व्याधिना नरशार्दूल कालधर्ममुपेयिवान् ॥ ९ ॥
इन्द्रलोकं गतो राजा स्वार्जितेनैव कर्मणा ॥ राज्ये भगीरथं पुत्रमभिषिच्य नरर्षभः ॥ १० ॥
भगीरथस्तु राजर्षिर्धार्मिको रघुनन्दन ॥ अनपत्यो महातेजाः प्रजाकामः स चाप्रजः ॥ ११ ॥
मन्त्रिष्वाधाय तद्राज्यं गङ्गावतरणे रतः ॥ १२ ॥
स तपो दीर्घमातिष्ठद्गोकर्णे रघुनन्दन ॥ ऊर्ध्वबाहुः पञ्चतपा मासाहारो जितेन्द्रियः ॥ १३ ॥
तस्य वर्षसहस्राणि घोरे तपसि तिष्ठतः ॥ अतीतानि महाबाहो तस्य राज्ञो महात्मनः ॥ १४ ॥

अथ गङ्गायास्त्रिपथगमनहेतुप्रश्नस्यपूर्वप्रकृतस्यसाक्षादुत्तरमाह—कालधर्ममित्यादि । जातमात्रस्यकालेनावश्यंप्राप्तव्योधर्मः कालधर्मः । मरणमितियावत् । प्रकृतीजनाइत्यत्रदीर्घश्छान्दसः । अमात्यवर्गाः । "प्रकृतिःसहजेयोनावमात्येपरमात्मनि" इतिवैजयन्ती । रोचयामासुः न्यायप्राप्तत्वादैच्छन् ॥ १ ॥ सः सुमहान्राजाऽऽसीदित्यन्वयः ॥ २ ॥ तेपे गङ्गावतरणायेतिशेषः ॥ ३ ॥ स्वर्गंलेभे नतुगङ्गां ॥ ४ ॥ वधं अपमृत्युं । दुःखोपहतया पित्रादुश्चरेतपसिकृतेपि तेषांगतिर्नाभूदित्येवंरूपया । नाध्यगच्छत नाध्यगच्छत्॥५॥ निश्चयानधिगममेवाह—कथमित्यादिना ॥६॥ धर्मेण प्रयोजकेन । चिन्तयतः ॥ ७ ॥ अकारयत् अकरोत् ॥ ८ ॥ उपेयिवान् ययौ ॥ ९ ॥ अभिषिच्य इन्द्रलोकंगतः ॥ १० ॥ अनपत्यः अतएवप्रजाकामोऽभूत् । सचाप्रजइत्युत्तरशेषः ॥ ११ ॥ गोकर्णे हिमवत्पादविशेषे । पञ्चाग्नयः चतुर्षुपार्श्वेष्वग्नयउपरिसूर्यश्च तेषांमध्येतपोयस्यसः पञ्चतपाः । मासस्यसकृदाहारो यस्यसः मासाहारः । उभयत्रमध्यमपदलोपीसमासः । पृषोदरादित्वात्साधुत्वं ॥ १३ ॥ तस्यराज्ञोमहात्मनइ-

---

ति० तद्दिलीपवंशजरघुपुत्रकोदिलीपः कालिदासोक्तोन्यएवेतिबोध्यं ॥ ८ ॥ ति० सचप्रजाइत्यस्यमन्त्रिष्वाधायेत्युत्तरेणान्वयः ॥ ११ ॥ ति० गोकर्णः दक्षिणदिक्स्थतीर्थविशेषोवा ॥ १३ ॥ ति० यद्यस्तीत्यादि असंदिग्धे संदिग्धवचनं " वेदाश्चेत्प्रमाणं-

[पा०] १ ङ. च. छ. झ. ञ. तस्मैराज्यं. २ क. घ—ट. च्छिखरेरम्ये. ३ ङ. च. छ. झ. ञ. द्वात्रिंशच्छतसाहस्रं. ४ ख. ग. सुमहातपाः. ५ क. ख. घ—ट. तपोवनगतोराजा. ६ क. ख. लेभेस्वकर्मभिः. ग. लेभेमहायशाः. ७ क. ग. घ. ज. नाधिगच्छति. ८ क. घ—झ. ट. चैतानितिचिन्ता. ९ क. विजितात्मनः. १० ग. स्वार्जितैरेवकर्मभिः. ११ क. च. ञ. ट. नरर्षभम्. १२ ङ. झ. ट. अनपत्योमहाराजः. १३ ख. समाहितः. झ. सचप्रजाः. १४ ङ. च. झ. ञ. ट. तपोदीर्घसमातिष्ठद्

सुप्रीतो भगवान्ब्रह्मा प्रजानां पतिरीश्वरः ॥ १५ ॥

ततः सुरगणैः सार्धमुपागम्य पितामहः ॥ भगीरथं महात्मानं तप्यमानमथाब्रवीत् ॥ १६ ॥

भगीरथ महाभाग प्रीतस्तेऽहं जनेश्वर ॥ तपसा च सुतप्तेन वरं वरय सुव्रत ॥ १७ ॥

तमुवाच महातेजाः सर्वलोकपितामहम् ॥ भगीरथो महाभागः कृताञ्जलिरुपस्थितः ॥ १८ ॥

यदि मे भगवन्प्रीतो यद्यस्ति तपसः फलम् ॥ सगरस्यात्मजाः सर्वे मत्तस्सलिलमाप्नुयुः ॥ १९ ॥

गङ्गायाः सलिलक्लिन्ने भस्मन्येषां महात्मनाम् ॥ स्वर्गं गच्छेयुरत्यन्तं सर्वे मे प्रपितामहाः ॥२०॥

देया च संततिर्देव नावसीदेत्कुलं च नः ॥ इक्ष्वाकूणां कुले देव एष मेऽस्तु वरः परः ॥ २१ ॥

उक्तवाक्यं तु राजानं सर्वलोकपितामहः ॥ प्रत्युवाच शुभां वाणीं मधुरां मधुराक्षराम् ॥ २२ ॥

मनोरथो महानेष भगीरथ महारथ ॥ एवं भवतु भद्रं ते इक्ष्वाकुकुलवर्धन ॥ २३ ॥

इयं हैमवती गङ्गा ज्येष्ठा हिमवतः सुता ॥ तां वै धारयितुं शक्तो हरस्तत्र नियुज्यताम् ॥ २४ ॥

गङ्गायाः पतनं राजन्पृथिवी न सहिष्यति ॥ तां वै धारयितुं वीर नान्यं पश्यामि शूलिनः ॥ २५ ॥

तमेवमुक्त्वा राजानं गङ्गां चाभाष्य लोककृत् ॥ जगाम त्रिदिवं देवैस्सह देवैर्मरुद्गणैः ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे द्विचत्वारिंशः सर्गः ॥ ४२ ॥

त्युत्तरशेषः ॥ १४ ॥ सुप्रीतइत्यर्धम् ॥ १५ ॥ अथउपगमनानन्तरं ॥ १६ ॥ तेतपसाप्रीतः ॥ १७ ॥ महातेजाः तपःकृतनिरवधिकतेजाः ॥ १८ ॥ मेतपसइत्यन्वयः ॥ १९ ॥ नकेवलंसलिलाप्तिरन्यच्चेत्याह—गङ्गायाइति । अत्यन्तं अक्षय्यं ॥ २० ॥ इक्ष्वाकूणां कुलेजातस्यमेसंततिर्देया ययानः कुलंनावसीदेत्एषवरः परः द्वितीयोवरोस्त्वित्यन्वयः । तपसेनिर्गमदशायामपिहिप्रजाकामइत्युक्तं ॥ २१ ॥ शुभां शुभहेतुं । मधुरां अर्थतोमनोज्ञां ॥ २२ ॥ मनोरथः तावकइतिशेषः ॥२३॥ इयं संनिहिता । हैमवती हिमवत्संनिहिता । धारयितुंशक्तः हरः । तत्र धारणे । नियुज्यतां प्रार्थ्यतां ॥ २४ ॥ धारयितुं शक्तमितिशेषः ॥२५॥ आभाष्य वत्सेराजानंयथाकालमनुगृहाणेत्युक्त्वेतियावत् । मरुद्गणैः वायुगणैः ॥२६॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने द्विचत्वारिंशः सर्गः ॥ ४२ ॥

स्युः" इतिवत् । सलिलं स्पर्शमात्रेणस्वर्गतिसाधनंसलिलं ॥ १९ ॥ ति० इक्ष्वाकूणांकुलेजातस्यममसंततिर्देया । यथानःकुलंनावसीदेत् । संतत्यैइतिचतुर्थीप्रथमार्थे । एषपरोवरः द्वितीयवरइत्यर्थः । परेतु संतत्यैतदर्थंनःकुलंनावसीदेदितिचयाचे । मत्कुलेअसंततिःकोपिमाभूदित्यर्थः । उपसंहरति—इक्ष्वाकूणामिति । तत्कुलेजातस्यएषएवपरोवरोस्तु । नातोऽधिकंतृतीयंवरान्तरंयाचेइत्यर्थः । एतेनपूर्वापरोपकारिताभगीरथस्यदर्शितेत्याहुः ॥ २१ ॥ ति० तांगङ्गां । तत्रगङ्गागमनसमये धारयितुंहरएवनियुज्यतां । वैशब्दएवार्थे ॥ २४ ॥ ति० देवैःआजानजैः । मरुद्गणैःकर्मदेवैः । शि० पुनर्मरुद्गणोपादानंब्राह्मणवसिष्ठन्यायेनेतिबोध्यं ॥ २६ ॥ इतिद्विचत्वारिंशस्सर्गः ॥ ४२ ॥

[पा०] १ क. घ—छ. झ. ञ. प्रभुरीश्वरः. २ घ. ङ. च. झ. ञ. महाराज. ज. ट. महातेजः. ३ ङ—ट. जनाधिप. क. ख. नरेश्वर. ४ ट. तेसुतप्तेन. ५ ङ. च. छ. झ. ञ. महाबाहुः. ६ ङ. च. छ. झ. ञ. कृताञ्जलिपुटस्स्थितः. क. ग. कृताञ्जलिरवस्थितः. ७ झ. भगवान्प्रीतो. ८ ग. छ. ञ. सर्वंते. ङ. झ. सर्वेच. ९ ङ. झ. देयायाचेहसंतत्यै. १० घ. तपोधनमहातेजः. ११ घ. कुलनन्दन. क. ञ. कुलमव्ययम्. १२ ङ—ञ. ज्येष्ठागङ्गा. १३ क—ट. धारयितुंराजन्. १४ ग. ङ. झ. ञ. ट. सहिष्यते. १५ क. ङ. च. झ. ञ. ट. धारयितुंराजन्. १६ क. च. ज. ञ. गङ्गामाभाष्य. १७ ग. ङ. च. छ. झ. ञ. देवैस्सर्वैस्सहमरुद्गणैः. ख. देवोब्रह्मासमरुद्गणैः.

त्रिचत्वारिंशः सर्गः ॥ ४३ ॥

भगीरथतपस्तुष्टेहरेधारणायसमुद्युक्तेगङ्गयासवेगमाकाशाच्छिवशिरसिनिपतनम् ॥ १ ॥ हरेणगङ्गागर्वखण्डनायजटामण्डलेतन्निरोधनम् ॥ २ ॥ भगीरथेनपुनस्तपःप्रसादितेनगङ्गायाबिन्दुसरसिविसर्जनम् ॥३॥ ततोनिर्गत्यभगीरथरथानुयायिन्यागङ्गयाजन्हुकन्यात्वप्राप्तिपूर्वकंस्वजलैःसगरसुतशरीरभस्मनामाप्लावनम् ॥ ४ ॥ तेनधूतकल्मषैस्तैःस्वर्गगमनम् ॥ ५ ॥

देवदेवे गते तस्मिन्सोऽङ्गुष्ठाग्रनिपीडिताम् ॥ कृत्वा वसुमतीं राम संवत्सरमुपासत ॥ १ ॥
[1]ऊर्ध्वबाहुर्निरालंबो वायुभक्षो निराश्रयः ॥ अचलस्[2]स्थाणुवत्स्थित्वा [3]रात्रिंदिवमरिंदम ॥ २ ॥
अथ संवत्सरे पूर्णे सर्वलोकनमस्कृतः ॥ उमापतिः पशुपती राजानमिदमब्रवीत् ॥ ३ ॥
प्रीतस्तेऽहं नरश्रेष्ठ करिष्यामि तव प्रियम् ॥ [[4]तमब्रवीन्नृपवरो गङ्गां धारय वै हर ॥ ४ ॥
इत्युक्तो वचनं भर्गः करिष्यामि प्रियं तव] ॥ शिरसा धारयिष्यामि शैलराजसुतामहम् ॥ ५ ॥
ततो हैमवती ज्येष्ठा सर्वलोकनमस्कृता ॥ [[5]उमापतेर्वचश्श्रुत्वा गङ्गा क्रोधसमन्विता] ॥ ६ ॥
तदा [6]साऽतिमहद्रूपं कृत्वा वेगं च दुस्सहम् ॥ आकाशाद[7]पतद्राम शिवे शिवशिरस्युत ॥ ७ ॥
अचिन्तयच्च सा देवी गङ्गा परमदुर्धरा ॥ [8]विशाम्यहं हि पातालं स्रोतसा गृह्य शंकरम् ॥ ८ ॥
[9]तस्यावलेपनं ज्ञात्वा क्रुद्धस्तु भगवान्हरः ॥ तिरोभावयितुं बुद्धिं चक्रे त्रिणयनस्तदा ॥ ९ ॥
[10]सा तस्मिन्पतिता पुण्या पुण्ये रुद्रस्य मूर्धनि ॥ [11]हिमवत्प्रतिमे राम जटामण्डलगह्वरे ॥ १० ॥
सा कथंचिन्महीं गन्तुं नाशक्नोद्यत्नमास्थिता ॥ [12]नैव निर्गमनं लेभे [13]जटामण्डलमोहिता ॥ ११ ॥
[14]तत्रैवाबंभ्रमद्देवी संवत्सरगणान्बहून् ॥ तामपश्यन्पुनस्तत्र तपः परममास्थितः ॥ १२ ॥
[15]अनेन तोषितश्चाभू[16]दत्यर्थं रघुनन्दन ॥ विससर्ज ततो गङ्गां हरो बिन्दुसरः प्रति ॥ १३ ॥
तस्यां विसृज्यमानायां सप्त स्रोतांसि जज्ञिरे ॥ १४ ॥

अथगङ्गाप्लवनेनसागराणांस्वर्गगतिस्त्रिचत्वारिंशे—देवदेवइत्यादि । उपासत उपास्त । शिवमितिशेषः ॥ १—२ ॥ उमापतिरित्यनेनोमयासहागतइत्युच्यते ॥ ३—४ ॥ प्रियंकरिष्यामीत्येतद्विवृणोति—शिरसेति ॥ ५—६ ॥ अर्धत्रयमेकान्वयं । हैमवती हिमवत्कन्या । शिवे शुद्धे । उतेतिप्रसिद्धौ ॥ ७ ॥ महारूपदुःसहवेगकरणेनिमित्तमाह—अचिन्तयदिति । दुर्धरा धर्तुमशक्या । गृह्य गृहीत्वा ॥ ८ ॥ वलेपनं गर्वं । "वष्टिभागुरिः"इत्यल्लोपः । तिरोभावयितुं तिरोहितां कर्तुं ॥ ९ ॥ जटामण्डलमेवगह्वरंगुहायस्मिंस्तत्तथा ॥ १० ॥ निर्गमनंजटामण्डलान्निस्सरणमात्रमपि जटामण्डलेमोहितासंजातमोहा ॥ ११ ॥ अबंभ्रमत् पुनःपुनरभ्रमत् । यङ्लुगन्ताल्लङ् । आस्थितः राजेतिशेषः ॥ १२ ॥ अनेन तपसा । तोषितश्चासीत् विससर्जच । बिन्दुसरोनाम हिमवतिब्रह्मनिर्मितस्सरोविशेषः ॥ १३ ॥ तस्यामित्यर्धं । स्रोतांसि प्रवाहाः

ति० देवदेवे आजानजानामपिदेवानांदेवेपूज्ये ॥ १ ॥ ति० तस्यावलेपनमितिसन्धिरार्षः । शि० तदा तु गङ्गाविचारसमयएव । तस्याः गङ्गायाः । लेपनं खेलनेच्छावृद्धिंज्ञात्वा क्रुद्धोव क्रुद्धइवहरः तिरोभावयितुं स्वशिरसिगङ्गांगोपयितुं बुद्धिं निश्चयं चक्रे । एतेनशिवस्यापिखेलनेच्छासूचिता । तुशब्दएवार्थे । वशब्दइवार्थे अतएवसन्धौनार्षत्वकल्पना ॥९॥ ति० जटामण्डलेनगह्वरे गंभीरे । हिमवत् हिमबिंदुवत्पतिता ॥ १० ॥ ति० जटामण्डलंभ्रान्त्वाप्रान्तमागतापिअन्ततःतत्प्रान्तभागतोपिनिर्गमं नलेभे । प्रान्तभागेपितन्मध्यत्वभ्रमस्यमाययाभगवतोत्पादनात् ॥ ११ ॥ ति० अवभ्रमत् आर्षत्वात्सन्वदित्वं न । शि० अवभ्र-

[पा०] १ अयंश्लोकः क—छ. ञ. दृश्यते. अचलस्स्थाणुवत्. ऊर्ध्वबाहुरिति ज. पाठेक्रमोदृश्यते. २ ङ. च. छ. ञ. स्थाणुवन्नित्यं. ३ क. घ. च. छ. ञ. रात्रिंदिवमतन्द्रितः. ङ. रात्रिंदिवमुपागतः. ४ इदमर्धद्वयं च. छ. दृश्यते. ५ इदमर्धं च. छ. दृश्यते. ६ क. च. छ. ञ. सासुमहद्रूपं. क. घ. सातुमहद्रूपं. ७ क. ख. घ. च. छ. ञ. ट. दपतद्गङ्गा. ८ घ. एतंनयामिपातालं. ९ ख. ज्ञात्वाऽवलेपनंतस्याः. १० क. सातस्यपतितापुण्या. घ. एतस्मिन्पतिता. ११ च. छ. ज. हिमवत्पतितारामः. १२ क—ट. नैवसानिर्गमंलेभे. १३ ङ. झ. जटामण्डलमन्ततः. १४ क.—ङ. झ. ञ. तत्रैवाबभ्रमद्देवी. ट. तत्रैवावभ्रमत. च. छ- ज. तत्रैवविभ्रमद्देवी. १५ ङ. झ. ञ. सतेनतोषितश्चासी. १६ घ. ङ. झ. ञ. दत्यन्तंरघुनन्दन.

ह्लादिनी पावनी चैव [1]नलिनी च तथाऽपरा ॥ [2]तिस्रः प्राचीं दिशं [3]जग्मुर्गङ्गाश्शिवजलाश्शुभाः ॥१५॥
सुचक्षुश्चैव सीता च सिन्धुश्चैव महानदी ॥ तिस्रस्त्वेता दिशं जग्मुः प्रतीचीं तु शुभोदकाः ॥१६॥
[[4]तथैव चालिकानाम विश्रुता लोकपावनी] ॥ सप्तमी चान्वगात्तासां [5]भगीरथमथो नृपम् ॥१७॥
भगीरथोपि राजर्षिर्दिव्यं स्यन्दनमास्थितः ॥ प्रायादग्रे महातेजा [6]गङ्गां तं चाप्यनुव्रजत् ॥ १८ ॥
गगनाच्छङ्करशिरस्ततो [7]धरणिमाश्रिता ॥ [8]व्यसर्पत जलं तत्र [9]तीव्रशब्दपुरस्कृतम् ॥ १९ ॥
मत्स्यकच्छपसङ्घैश्च शिंशुमारगणैस्तदा ॥ पतद्भिः [10]पतितैश्चान्यैर्व्यरोचत वसुंधरा ॥ २० ॥
ततो देवर्षिगन्धर्वा [11]यक्षाः सिद्धगणास्तदा ॥ व्यलोकयन्त ते तत्र गगनाद्गां [12]गतां तथा ॥ २१ ॥
[13]विमानैर्नगराकारैर्हयैर्गज[14]वरैस्तदा ॥ [15]पारिप्लवगतैश्चापि देवता[16]स्तत्र विष्ठिताः ॥ २२ ॥
[17]तदद्भुततमं लोके [18]गङ्गापतनमुत्तमम् ॥ दिदृक्षवो देवगणाः [19]समीयुरमितौजसः ॥ २३ ॥
संपतद्भिः सुरगणैस्तेषां चाभरणौजसा ॥ शतादित्यमिवाभाति गगनं गततोयदम् ॥ २४ ॥
शिंशुमारोरगगणैर्मीनैरपि च चञ्चलैः ॥ विद्युद्भिरिव [20]विक्षिप्तमाकाशमभवत्तदा ॥ २५ ॥
पाण्डुरैः सलिलोत्पीडैः कीर्यमाणैः [21]सहस्रधा ॥ शारदाभ्रैरिवाकीर्णं गगनं हंससंप्लवैः ॥ २६ ॥
क्वचिद्द्रुततरं याति कुटिलं क्वचिदायतम् ॥ [22]विनतं [23]क्वचिदुद्धूतं क्वचिद्याति शनैःशनैः ॥ २७ ॥
सलिलेनैव सलिलं क्वचिदभ्याहतं पुनः ॥ [24]मुहुरूर्ध्वमुखं गत्वा [25]पपात वसुधातलम् ॥ २८ ॥

॥ १४ ॥ स्रोतसांनामनिर्देशपूर्वकंगतिभेदमाह—ह्लादिनीति । शुभाः शोभमानाः ॥ १४ ॥ महानदीति सर्वविशेषणं॥१६॥ सप्तमीत्यर्धं । तासांमध्ये ॥१७॥ स्यन्दनं रथं अनुव्रजन् अन्वव्रजत् । अत्रस्वर्गाकाशभूमिगमनात् त्रिपथगात्वमित्येके दिक्त्रयगमनादित्यपरे॥१८॥ एवं त्रीन्पथःकेनहेतुनेत्यस्योत्तरमभिधाय कर्मभिःकैः समन्वितेत्यस्यचरितभेदप्रश्नस्योत्तरमाह–गगनादिति । तीव्रशब्देहेतुरयं ॥ १९ ॥ शिंशुमारः अंबुकरी " शिंशुमारस्त्वंबुकरी " इतिवैजयन्ती । अन्यैः जलजन्तुविशेषैः ॥ २० ॥ गगनात् रुद्रजटागगनात् । गां भूमिं ॥ २१ ॥ नगराकारैः नगरवद्विपुलैः । पारिप्लवगतैः पारिप्लवंसंभ्रमं गतैरिति विमानादिविशेषणं।तत्र गङ्गापतनप्रदेशे । विष्ठिताः विशेषेणस्थिताः ॥ २२ ॥ लोके भूलोके । अमितौजसइत्यनेन प्रधानदेवाउच्यन्ते ॥ २३ ॥ सुरगणैः अमिततेजोभिरितिसिद्धं । आभाति अभात् ॥ २४ ॥ आकाशं चञ्चलैः शिंशुमारादिभिः विद्युद्भिरिव विक्षिप्तं व्याप्तं अभवत् ॥ २५ ॥ वेगवशेनसहस्रधाकीर्यमाणैः सलिलोत्पीडैः फेनैः हंससंप्लवैः हंससंकुलैः शारदाभ्रैरिव गगनमाकीर्णमित्यन्वयः ॥ २६ ॥ अत्रगङ्गेत्यनुषज्यते । द्रुततरमित्यादिक्रियाविशेषणं । आयतं ऋजु । विनतं निम्नेनसंकुचितं । उद्धूतं पाषाणस्खलनादिनाऊर्ध्वमुखं । सर्वत्रव्यत्ययेनभूतेलट् ॥२७॥ अभ्याहतं वातव्यावर्तितं

मत् अवाभ्रमत् । आगमशास्त्रस्यानित्यत्वादड्विरहः ॥ १२ ॥ ति० शिंशुमारो नक्रः ॥ २० ॥ ति० पारिप्लवः यानभेदः

[पा०] १ क. ख. घ—ट. नलिनीचतथैवच. २ ख. ङ. च. झ. ञ. ट. तिस्रश्चैतादिशं. ३ ङ. झ. जग्मुःप्रतीचीं तुदिशंशुभाः. ४ इदमर्धं ख. दृश्यते. ५ ङ. झ. भगीरथरथंतदा. ६ ख. गङ्गातंचान्वगाच्छनैः. ७ क—ट. धरणिमागता. ८ ङ. झ. असर्पतजलं. ९ क. ख. तीव्रवेगपुरस्कृतम्. १० ख. ङ. च. छ. झ. ञ. पतितैश्चैव. ११ घ—ट. यक्षसिद्धगणास्तदा. ख. यक्षास्सुरगणास्तदा. क—ट. सिद्धगणास्तथा. १२ क. ट. गतांतदा. १३ ख. ग. छ. ज. ञ. ट. विमानैर्गगनाकारैः. १४ क—घ. च. छ. ज. ञ. ट. वरैस्तदा. १५ क—ञ. पारिप्लवगताश्चापि. १६ क. ख. च. छ. स्तत्रविस्मिताः. घ. स्तत्रशोभिताः. १७ ङ. च. छ. झ. ञ. तदद्भुतमिमं. १८ ङ. च. छ. झ. गङ्गावतरमुत्तमम्. ञ. गंगावतरणंशुभम्. १९ ख. ग. घ. ज. समेयुरमितौजसः. २० क. ञ. विक्षिप्तैः. २१ ख. सहस्रशः. २२ क. ख. घ. विततं. ट. विनीतं. २३ क—घ. झ. क्वचिदुद्धूतं. २४ क—ञ. मुहुरूर्ध्वपथं. ट. मुहुरूर्ध्वगतिं. २५ ख. ग. ङ. च. छ. झ. ञ. वसुधांपुनः.

तच्छङ्करशिरोभ्रष्टं भ्रष्टं भूमितले पुनः ॥ व्यरोचत तदा तोयं निर्मलं गतकल्मषम् ॥ २९ ॥
तत्र देवर्षिगन्धर्वा वसुधातलवासिनः ॥ भवाङ्गपतितं तोयं पवित्रमिति पस्पृशुः ॥ ३० ॥
शापात्प्रपतिता ये च गगनाद्वसुधातलम् ॥ कृत्वा तत्राभिषेकं ते बभूवुर्गतकल्मषाः ॥ ३१ ॥

तरङ्गसलिलेनाभिमुखमाहतमित्यर्थः ॥ २८ ॥ शंकरशिरसिभ्रष्टं पतितमपि । ततःभूमितले पतितमपि । निर्मलं गतकल्मषंयेन तद्गतकल्मषं पापापहमित्यर्थः ॥ २९ ॥ पवित्रं पावनं । तत्रज्ञापकहेतुमाह—भवाङ्गपतितमिति । भवेन रुद्रेण शिरसाधृतत्वात्पवित्रमितिज्ञात्वापस्पृशुरित्यर्थः । पवित्रमिति सामान्योक्त्याभवस्यान्येषांचपवित्रमित्युक्तं । अतएव "हरस्य गात्रसंस्पर्शात्पवित्रत्वमुपागता" इत्यत्रापिहरस्यशुद्धिप्रदत्वमुपागतेत्यर्थः । अन्येप्यृषयऊचुः श्रीमद्भागवते । "यच्छौचनिस्सृतसरित्प्रवरोदकेनतीर्थेनमूर्ध्निविधृतेनशिवःशिवोभूत्" इति । भारते "तदम्बुपतितंदृष्ट्वाद्धारशिरसाहरः। पावनार्थंजटामध्येयोग्योस्मीत्यवधारणात्" इति । अत्राप्ययोध्याकाण्डेवक्ष्यति "विष्णुपादोद्भवांदिव्यां" इति । गङ्गायाविष्णुपादोद्भवत्वेन पवित्रत्वरूपंदिव्यत्वं । भवाङ्गात्पतितमितिवार्थः ।"द्वितीयाश्रितातीतपतित—"इतिद्वितीयासमासविधानात् पञ्चमीसमासानुपपत्तेश्च भवेनधृतत्वादस्माभिरपिधार्यमितिपस्पृशुरित्येवार्थः । यद्वा भवाङ्गपतितत्वात्पवित्रंनतुपूर्ववदतिपवित्रं । अतएवपस्पृशुः नतुसस्नुः । यद्वा यद्यपिभवाङ्गात्पतितं तथापि विष्णुपादोद्भूतत्वात्पवित्रमितिवा । "नदीवेगेनशुध्यति" इतिन्यायाद्भवसंपर्कविगमेपवित्रमितिवापस्पृशुः ॥ ३० ॥ शापाद्धेतोः

शिविकादिरूपःशिविकादियानस्थाइत्यर्थइत्यन्ये ॥ २२ ॥ **ति०** हंससंछवैः हंससंचारैश्च आकीर्णं व्याप्तं ॥ २६ ॥ **शि०** निर्मलं शिलासुपातेनपङ्कादिरूपमलरहितं । किंच निर्गतोयोमःपरिमाणं । "घञर्थेकविधानं" इतिमाधातोःकः । तंलातिगृह्णातीतिनिर्मलं इयत्तारहितप्रभाववदित्यर्थः । गतकल्मषं गतानिनिवृत्तानिकल्मषाणि आश्रितानांपापानियस्मात्तत् । क्तप्रत्ययोपस्थितकालस्यात्राविवक्षा "कर्तुरीप्सिततमं" इतिसूत्रघटकीभूतक्तप्रत्ययोपात्तवर्तमानत्वस्येव । आश्रिताचाविवक्षा "गन्ताविदेशंपथिकःप्रियोमेत्वद्वाक्यमात्रावधिरेवयात्रा । अतोतिमौनंकुरुताम्रचूडत्वांस्वर्णचूडाख्यमहंवदिष्ये" इत्यादौ । तेनयदैवगङ्गादर्शनादितदैवतत्कर्तृणांपापक्षयइतिफलितं । शंकरशिरोभ्रष्टं शंकरशिरश्च्युतं पुनरनन्तरंभूमितलंभ्रष्टं ॥ २९ ॥ **ति०** पस्पृशुः सस्नुरित्यर्थः । **शि०** तत्रेति । तत्र गङ्गापतनकाले । ऋषिगणगन्धर्वाः वसुधातलवासिनश्च । भवाङ्गपतितं भवाङ्गात्पतितमित्यतःपवित्रं अतिशुद्धंतोयंपस्पृशुरेव । "सर्ववाक्यंसावधारणंभवति" इतिन्यायेनैवकारलाभः । अत्रपस्पृशुरेवेत्युक्त्यानसस्नुरितिफलित । तेनावगाहानर्हवेगवत्त्वं तज्जलस्यसूचितं । पञ्चमीतियोगविभागेन संवन्धसामान्यषष्ठ्यावासमासः पूर्वविधावनत्विधावित्यादाविव । अतिपवित्रमित्यनेनस्वतःपवित्रत्वेसिद्धेपि भवाङ्गस्पर्शद्वारालोकानपिपावयिष्यतीतिहेतुर्ध्वनितः । एतेन अनुशासनविरहात्पञ्चमीसमासानुपपत्तिरितिप्रत्युक्तं । यत्तुसामान्योक्त्याशिवस्यापिपवित्रत्वकारकमितिभूषणकृद्भिरुक्तं तच्चिन्त्यं । हरस्येश्वरत्वेनतत्रमलसंवन्धस्यासंभवेनतत्पवित्रत्वकारकत्वस्यदुर्वचत्वात् । यदीश्वरेपिमलसंवन्धस्स्वीक्रियते तर्हि हर्यनुक्तेर्न्यूनतातेपांस्यात् । किंच हरिहरभक्तानांतीर्थपावनसामर्थ्यमस्तीतिस्मृत्यादिसिद्धम् । अतएव"साधवोन्यासिनश्शान्तावलिष्ठालोकपावनाः । हरन्त्यघंतेऽङ्गसङ्गात्तेष्वास्तेह्यघभिद्धरिः"इति । गङ्गागमनसमयेगङ्गांप्रतिभगीरथवचनं । "भवद्विधाभागवतास्तीर्थभूतास्स्वयंप्रभो । तीर्थीकुर्वन्तितीर्थानिस्वान्तस्थेनगदाभृता"इत्यादिविदुरंप्रतियुधिष्ठिरवचनंचसंगच्छते । एतेनगङ्गाजलसंवन्धाद्धरश्शुद्धः हराङ्गसंवन्धाच्चगङ्गामतिपवित्रतातत्याजेतिवचनंश्रेयस्कामैर्दूरतःपरिवर्जनीयं । आदरणीयंचेदंहरगात्रस्पर्शादतिपवित्रत्वंप्राप्तागङ्गेति । अतएव"हरस्यगात्रसंस्पर्शात्पवित्रत्वमुपागता"इत्यादीनिसंगच्छन्ते । संगच्छतेच "विष्णुपादोद्भवांदिव्यां"इत्यादि । पवित्रत्वमुपागतेत्यत्रपवित्रशब्दोतिपवित्रपरः ।"यच्छौचनिस्सृतसरित्प्रवरोदकेनतीर्थेनमूर्ध्न्यधिधृतेनशिवश्शिवोभूत्"इतिभागवतस्यत्वयमर्थः।शिवःस्वतस्सिद्धकल्याणस्वरूपः शिवः लोकानांकल्याणप्रदोऽभूदिति । अयंभावः । यदिशिवोगङ्गांनधारयेत् । तर्हिगङ्गापृथिव्यांनोपलभ्येत । तथाचलोककल्याणंनस्यात् धारणेतुसर्वंसिद्धमिति । अतएव"तदंबुपतितंस्पृष्ट्वादधारशिरसाहरः । पावनार्थंजटामध्येगतोस्मीत्यवधारणात्" इतिभारतपद्ये पूप्रकृतिकणिजन्तप्रकृतिकल्युडन्तप्रयोगः लोकानांपावनार्थमित्यर्थः । अन्यथा "तदंबुपतितंस्पृष्ट्वादधारशिरसाहरः । पूतोभूत्सजटामध्येगतोस्मीत्यवधारणात्"इत्येववदेत् । हरस्येश्वरत्वेप्रमाणंतु "सत्वंरजस्तमइतिप्रकृतेर्गुणास्तैः"इत्यादि । "धारयिष्यतितेवेगंरुद्रस्त्वात्माशरीरिणाम् । यस्मिन्नोतमिदंप्रोतंविश्वशाटीवतन्तुषु । अहंब्रह्माचशर्वश्चजगतःकारणंपरम्"इत्यादिभागवतादिवचनमितिदिक् ॥ ३० ॥

[पा०] १ ट. भूमितलंपुनः. २ क. ख. घ—ट. तत्रर्षिगणगन्धर्वाः.

[1]धूतपापाः पुन[2]स्तेन तोयेनाथ सुभास्वता ॥ पुनराकाशमाविश्य [3]स्वाँल्लोकान्प्रतिपेदिरे ॥ ३२ ॥
मुमुदे मुदितो लोकस्तेन तोयेन भास्वता ॥ कृताभिषेको गङ्गायां [4]बभूव विगतक्लमः ॥ ३३ ॥
[5]भगीरथोपि राजर्षिर्दिव्यं स्यन्दन[6]मास्थितः ॥ प्राया[7]दग्रे महातेजास्तं गङ्गा पृष्ठतोऽन्वगात् ॥ ३४ ॥
देवाः सर्षिगणाः सर्वे दैत्यदानवराक्षसाः ॥ गन्धर्वयक्षप्रवराः सकिंनरमहोरगाः ॥ ३५ ॥
[8]सर्वाश्चाप्सरसो राम भगीरथ[9]रथानुगाम् ॥ गङ्गामन्वगमन्प्रीताः सर्वे जलचराश्च ये ॥ ३६ ॥
यतो भगीरथो राजा ततो गङ्गा यशस्विनी ॥ जगाम सरितांश्रेष्ठा [10]सर्वपापविनाशिनी ॥ ३७ ॥
ततो हि यजमानस्य [11]जह्नोरद्भुतकर्मणः ॥ गङ्गा संप्लावयामास यज्ञवाटं महात्मनः ॥ ३८ ॥
तस्यावलेपनं ज्ञात्वा [12]क्रुद्धो जह्नुश्च राघव ॥ [13]अपिबच्च जलं सर्वं गङ्गायाः परमाद्भुतम् ॥ ३९ ॥
[14]ततो देवाः सगन्धर्वा ऋषयश्च [15]सुविस्मिताः ॥ पूजयन्ति महात्मानं जह्नुं पुरुषसत्तमम् ॥
गङ्गां चापि नयन्तिस्म दुहितृत्वे महात्मनः ॥ ४० ॥
[16]ततस्तुष्टो महातेजाः श्रोत्राभ्या[17]मसृजत्पुनः ॥ ४१ ॥
[[18]विसृज्य गङ्गां राजेन्द्रो ज्ञात्वा प्राप्तं भगीरथम् ॥ पूजयित्वा यथान्यायं यज्ञवाटमुपागमत्] ॥
तस्माज्जह्नुसुता गङ्गा प्रोच्यते जाह्नवीति च ॥ ४२ ॥
जगाम च पुनर्गङ्गा भगीरथरथानुगा ॥ सागरं चापि संप्राप्ता सा सरित्प्रवरा तदा ॥
रसातलमुपागच्छत्सिद्ध्यर्थं तस्य कर्मणः ॥ ४३ ॥
भगीरथोपि राजर्षिर्गङ्गामादाय यत्नतः ॥ पितामहान्भस्मकृता[19]नपश्यद्दीनचेतनः ॥ ४४ ॥
अथ तद्भस्मनां राशिं गङ्गासलिलमुत्तमम् ॥ [20]प्लावयद्धूतपाप्मानः स्वर्गं प्राप्ता रघूत्तम ॥ ४५ ॥

॥ ३१ ॥ आकाशमाविश्य आकाशमार्गेणेत्यर्थः ॥३२॥ मुदितो मुमुदे पुनःपुनर्जहर्षेत्यर्थः ॥३३–३४॥ देवाइतिश्लोकद्वयं । भगीरथरथानुगांगङ्गामन्वगमन् ॥ ३५–३६ ॥ यतः यत्र । ततः तत्र ॥ ३७ ॥ अद्भुतकर्मणइतिवक्ष्यमाणगङ्गापानाभिप्रायं । यज्ञवाटं यज्ञक्षेत्रं ॥ ३८ ॥ वलेपनं गर्वं । परमाद्भुतमितिक्रियाविशेषणं ॥ ३९ ॥ ततइतिसार्धश्लोकः । दुहितृत्वे नयतिस्म दुहितरमकुर्वन्नित्यर्थः ॥ ४० ॥ ततः दुहितृत्वप्रापणात् । श्रोत्राभ्यां नरावयवेषुश्रोत्रस्यातिपावनत्वादितिभावः ॥ ४१–४२ ॥ जगामेत्यर्धत्रयं । तस्यकर्मणः भगीरथयत्नस्य ॥ ४३ ॥ भस्मकृतान् भस्मत्वेनकृतान् ॥ ४४ ॥ तत्सलिलं प्लावयत् । अप्ला-

---

ति० मुदितः दर्शनमात्रेण । मुमुदे स्नानपानादिना ॥ ३३ ॥ शि० अत्र प्रार्थनांविनैवगङ्गायज्ञशालांप्रापेत्यनेनजह्नोर्गङ्गोपासकत्वंसूचितं ॥ ३८ ॥ शि० हेराघव तस्यागङ्गायाः वले यागशालायाआच्छादने। प्लावनेइत्यर्थः। एनं अहोभाग्यमेतन्ममयस्ययज्ञशालांगङ्गाप्राप्तेतिस्वकीयांस्तुतिमेव ज्ञात्वा। अतएव अक्रुद्धः क्रोधरहितएव जह्नुः । परमाद्भुतं लौकिकविलक्षणं सर्वंगङ्गायाजलं अपिबत् । तेनजह्नोःगङ्गाविषयकप्रीत्यतिशयस्सूचितः । तुशब्दावेवार्थे । यत्तुक्रुद्धइतिच्छित्वागङ्गासंप्रदानककोपंवर्णयन्ति तच्चिन्त्यं । गङ्गायाभगीरथानुगमनशीलत्वेनकोपाविषयत्वात् । भगीरथसंप्रदानककोपावर्णनाच्च ॥ ३९ ॥ इतित्रिचत्वारिंशस्सर्गः ॥ ४३ ॥

[पा०] १ च. छ. ञ. धूतशापाः. २ ङ. झ. तोयेनाथशुभान्विताः. क. ख. च. छ. ञ. तोयेनानेनभास्वता. ट. तोयेनचसुभास्वता. ३ क. च. छ. ञ. स्वर्गलोकंप्रपेदिरे. ४ ख. ङ. च. छ. झ. ञ. बभूवगतकल्मषः. ५ ङ. च. छ. झ. ञ. भगीरथोहि. ६ ख. झ. माश्रितः. ७ ङ. झ. दग्रेमहाराजः. ८ घ. ङ. झ. सर्वाश्चाप्सरसो. ९ क. ट. रथानुगाः. १० ख. ङ. च. छ. झ. ञ. सर्वपापप्रणाशिनी. ११ घ. जह्नोरमिततेजसः. १२ क—ट. क्रुद्धोजह्नुस्तु. ग. क्रुद्धोयज्वाच. घ. ज. क्रुद्धोराजाच. १३ क. ख. घ—ट. अपिबत्तुजलं. १४ क. ख. ततोदेवाश्च. १५ घ. तपोधनाः. १६ घ. ततस्तुष्टोमहाराजः. १७ ङ. झ. मसृजत्प्रभुः. १८ इदमर्धद्वयं ख. च. छ. ञ. दृश्यते. १९ ङ. च. छ. झ. ञ. नपश्यद्गतचेतनः. २० ख. घ. ज. झ. प्लावयत्पूतपाप्मानः.

[ततस्तु गङ्गां प्रतिलभ्य राजा दिलीपमन्वनुर्गगना···· ।
हृष्टोऽवतार्याशु नृपाच्च जह्नोः संभावयामास पितामहान्सः] ॥ ४६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे त्रिचत्वारिंशः सर्गः ॥ ४३ ॥

चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥

ब्रह्मणाभगीरथंप्रतिसश्लाघंपितामहानांसलिलदानचोदनपूर्वकंस्वलोकगमनम् ॥ १ ॥ भगीरथेनतदनुष्ठानपूर्वकंस्वपुरमेत्यप्रजापालनेनसुखनिवासः ॥ २ ॥

स गत्वा सागरं राजा गङ्गयाऽनुगतस्तदा ॥ प्रविवेश तलं भूमेर्यत्र ते भस्मसात्कृताः ॥ १ ॥
भस्मन्यथाप्लुते राम गङ्गायाः सलिलेन वै ॥ सर्वलोकप्रभुर्ब्रह्मा राजानमिदमब्रवीत् ॥ २ ॥
तारिता नरशार्दूल दिवं याताश्च देववत् ॥ षष्टिः पुत्रसहस्राणि सगरस्य महात्मनः ॥ ३ ॥
सागरस्य जलं लोके यावत्स्थास्यति पार्थिव ॥ सगरस्यात्मजास्तावत्स्वर्गे स्थास्यन्ति देववत् ॥ ४ ॥
इयं हि दुहिता ज्येष्ठा तव गङ्गा भविष्यति ॥ त्वत्कृतेन च नाम्नाऽथ लोके स्थास्यति विश्रुता ॥५॥
गङ्गा त्रिपथगा राजन्दिव्या भागीरथीति च ॥ त्रीन्पथो भावयन्तीति ततस्त्रिपथगा स्मृता ॥ ६ ॥
पितामहानां सर्वेषां त्वमत्र मनुजाधिप ॥ कुरुष्व सलिलं राजन्प्रतिज्ञामपवर्जय ॥ ७ ॥
पूर्वकेण हि ते राजंस्तेनातियशसा तदा ॥ धर्मिणां प्रवरेणापि नैष प्राप्तो मनोरथः ॥ ८ ॥
तथैवांशुमता तात लोकेऽप्रतिमतेजसा ॥ गङ्गां प्रार्थयता नेतुं प्रतिज्ञा नापवर्जिता ॥ ९ ॥
राजर्षिणा गुणवता महर्षिसमतेजसा ॥ मत्तुल्यतपसा चैव क्षत्रधर्मस्थितेन च ॥ १० ॥
दिलीपेन महाभाग तव पित्रातितेजसा ॥ पुनर्न शङ्किता नेतुं गङ्गां प्रार्थयताऽनघ ॥ ११ ॥
सा त्वया समतिक्रान्ता प्रतिज्ञा पुरुषर्षभ ॥ प्राप्तोसि परमं लोके यशः परमसंमतम् ॥ १२ ॥

वयत् । प्राप्ताः सगरपुत्राइतिशेषः ॥ ४५–४६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने त्रिचत्वारिंशःसर्गः ॥ ४३ ॥

पूर्वसर्गान्तेसंग्रहेणोक्तंविस्तृणीते चतुश्चत्वारिंशे—सगत्वेत्यादि । भूमेस्तलं पातालं । भस्मसात्कृताः सर्वात्मनाभस्मस्वभावापत्तयेसंपादिताः । "विभाषासातिकार्त्स्न्ये" इतिसातिः ॥ १–२ ॥ तारिताः प्रेतभावान्मोचिताः ॥३॥ स्वर्गप्राप्तेर्विशेषंचाह—सागरस्येति ॥ ४ ॥ त्वत्कृतेननाम्ना लोकेविश्रुता ॥ ५ ॥ तदेवनामद्वयंदर्शयन् त्रिपथगाशब्दंव्युत्पादयति—गङ्गेति ॥ ६ ॥ प्रतिज्ञां गङ्गासलिलप्रदानेनसागरांस्तारयिष्यामीतिप्रतिज्ञां। अपवर्जय समापय॥ ७ ॥ पूर्वकेण सगरेण ॥ ८ ॥ नापवर्जिता नसमापिता ॥९॥ राजर्षिणेतिश्लोकद्वयं । गङ्गांप्रार्थयतापि सापुनर्नेतुंनशङ्किता नविचारितेत्यर्थः ॥ १०–११ ॥ समतिक्रा-

---

ति० भस्मसात्कृताःकार्त्स्न्येनभस्मकृताः ॥ १ ॥ ति० पूर्वकेण सगरेण। एषः गङ्गालाभरूपः। पूर्वकेणेतिकप्रत्ययेन एषैवकुत्सा. द्योत्यते ॥ ७ ॥ ति० गङ्गांनेतुंप्रार्थयता सा गङ्गा नेतुंनशकितेत्यर्थः। यत्तुमहेश्वरतीर्थीये गङ्गामानेतुं नशङ्किता नविचारिता प्रतिज्ञेतिशेषः । चिन्ताविषयमपिनप्रापितेत्यर्थइति । तत् प्रार्थयतेतिपदस्वरसविरोधाच्चिन्त्यं ॥ ११ ॥

[पा०] १ इदंपद्यं ख. दृश्यते. २ च. छ. ज. षष्टिपुत्रसहस्राणि. ३ च. छ. झ. ञ. स्सर्वेदिविस्थास्यन्ति. ४ क. ख. इयंचदुहिता. ५ ख. ग. घ. ज. ट. नाम्नावै. ६ क.—ट. त्रिपथगानाम. ७ क. गमयन्तीति. ८ ङ. झ. तस्मात्त्रिपथगा. ९ क. मपवर्तय. घ. ज. मनुवर्जय १० क. ख. घ. च. ञ. पूर्वकेणापिते. ११ ज. ट. यशसातथा. १२ क. ख. घ.—ट. प्रवरेणापि. १३ क. ख. घ.—ट. मतावत्स. १४ घ. महाराज. १५ ङ. झ. नैशकितानेतुं.

यच्च गङ्गावतरणं त्वया कृतमरिंदम ॥ अनेन च भवान्प्राप्तो धर्मस्यायतनं महत् ॥ १३ ॥
प्लावयस्व त्वमात्मानं नरोत्तम सदोचिते ॥ सलिले पुरुषव्याघ्र शुचिः पुण्यफलो भव ॥ १४ ॥
पितामहानां सर्वेषां कुरुष्व सलिलक्रियाम् ॥ स्वस्ति तेऽस्तु गमिष्यामि स्वं लोकं गम्यतां नृप ॥१५॥
इत्येवमुक्त्वा देवेशः सर्वलोकपितामहः ॥ यथाऽऽगतं तथा गच्छद्देवलोकं महायशाः ॥ १६ ॥
भगीरथोपि राजर्षिः कृत्वा सलिलमुत्तमम् ॥ यथाक्रमं यथान्यायं सागराणां महायशाः ॥ १७ ॥
कृतोदकः शुची राजा स्वपुरं प्रविवेश ह ॥ समृद्धार्थो नरश्रेष्ठ स्वराज्यं प्रशशास ह ॥ १८ ॥
प्रमुमोद च लोकस्तं नृपमासाद्य राघव ॥ नष्टशोकः समृद्धार्थो बभूव विगतज्वरः ॥ १९ ॥
एष ते राम गङ्गाया विस्तरोऽभिहितो मया ॥ स्वस्ति प्राप्नुहि भद्रं ते सन्ध्याकालोतिवर्तते ॥ २० ॥
धन्यं यशस्यमायुष्यं पुत्र्यं स्वर्ग्यमतीव च ॥ यः श्रावयति विप्रेषु क्षत्रियेष्वितरेषु च ॥
प्रीयन्ते पितरस्तस्य प्रीयन्ते दैवतानि च ॥ २१ ॥
इदमाख्यानमव्यग्रो गङ्गावतरणं शुभम् ॥ यः शृणोति च काकुत्स्थ सर्वान्कामानवाप्नुयात् ॥
सर्वे पापाः प्रणश्यन्ति आयुः कीर्तिश्च वर्धते ॥ २२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥

पञ्चचत्वारिंशः सर्गः ॥ ४५ ॥

प्रातःकृताह्निकैर्विश्वामित्रादिभिर्नौकयागङ्गामुत्तीर्यउत्तरतटेविशालाख्यनगरीदर्शनम् ॥ १ ॥ विशालावृत्तान्तंपृष्टेनविश्वामित्रेणरामंप्रतितदुपोद्घाततयाक्षीरोदमथनकथाकथनम् ॥ २ ॥

विश्वामित्रवचः श्रुत्वा राघवः सहलक्ष्मणः ॥ विस्मयं परमं गत्वा विश्वामित्रमथाब्रवीत् ॥ १ ॥
अत्यद्भुतमिदं ब्रह्मन्कथितं परमं त्वया ॥ गङ्गावतरणं पुण्यं सागरस्यापि पूरणम् ॥ २ ॥

न्तानिस्तीर्णा ॥ १२ ॥ आयतनं प्रतिष्ठां ॥१३॥ प्लावयस्व स्नानंकुर्वित्यर्थः । सदोचिते सदास्नानयोग्ये । अन्यासामेवहिनदीनांरजोदोषइतिभावः ॥ १४ ॥ गम्यतां त्वयापीतिशेषः ॥१५॥ यथाऽऽगतं तथाऽगच्छत् । एकएवेत्यर्थः ॥ १६ ॥ भगीरथइतिश्लोकद्वयं । यथाक्रमं कृतोदकः अन्येषामपीतिशेषः । प्रशशासह प्रशशासचेत्यर्थः ॥ १७ ॥ १८ ॥ विगतज्वरः निरामयइत्यर्थः ॥ १९ ॥ उपसंहरति—एषइति । भद्रंतेस्त्वितिवचनपरिपाटी । सन्ध्याकालोतिवर्तते । इतःपरंनप्रष्टव्यमितिभावः ॥ २० ॥ अथगङ्गावतारश्रावणफलमाह—धन्यमिति । धनादिप्रदमित्यर्थः । सर्वत्रसाधुत्वार्थेयत्प्रत्ययः । इदमाख्यानमित्यनुषज्यते । अर्धत्रयम् ॥ २१ ॥ श्रावयितुःफलमुक्तं संप्रतिश्रोतुःफलमुच्यते । गङ्गावतरणं गङ्गावतरणाख्यं । अर्धत्रयम् ॥२२॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने चतुश्चत्वारिंशःसर्गः ॥ ४४ ॥

एवंदशभिःसर्गैर्गङ्गागाङ्गेयसंभववर्णनव्याजेनधातुमोक्षणगङ्गापूतत्वनिमित्तकं देवतान्तरावरत्वं दर्शितं । अथत्रिभिस्सर्गैःमहेन्द्रस्यावरत्वमुपपाद्यते—विश्वामित्रेत्यादि ॥ १ ॥ पूरणं खननेनाभिवर्धनं ॥ २ ॥

ति० धर्मस्यायतनं । धर्मप्राप्यस्थानं महद्ब्रह्मलोकरूपं ॥ १३ ॥ ति० पुण्यफलइति मत्वर्थीयाजन्तोबहुव्रीहिर्वा ॥ १४ ॥ ति० गम्यतां स्वपुरमितिशेषः ॥ १५ ॥ ति० उत्तमं उत्तमलोकप्रापकं ॥ १७ ॥ इतिचतुश्चत्वारिंशस्सर्गः ॥ ४४ ॥

ति० पूरणं गङ्गयेतिशेषः ॥ २ ॥

[पा०] १ ङ. च. छ. झ. ञ. तच्चगङ्गावतरणं. २ क. ख. ङ.—ट. पुरुषश्रेष्ठ. ३ ख. स्वलोकं. ञ. स्वलोकं. ४ क. घ. ट. नरश्रेष्ठः. ५ घ. सराज्यं. ६ ख. घ. पौत्र्यं. ७ क. ङ.—ट. स्वर्ग्यमथापिच. ८ ङ. च. छ. झ. ञ. मायुष्यं. ९ क. सर्वेशापाः. ट. सर्वपापानिनश्यन्ति.

क्षणभूतेव [1]नौ रात्रिः संवृत्तेयं [2]महातपः ॥ इमां चिन्तयतस्सर्वां निखिलेन कथां तव ॥ ३ ॥
[[3]संतुष्टं मे मनो ब्रह्मन्नित्युक्त्वा विरराम ह] ॥ तस्य सा शर्वरी सर्वा [4]सह सौमित्रिणा तदा ॥
जगाम चिन्तयानस्य विश्वामित्र कथांशुभाम् ॥ ४ ॥
ततः प्रभाते विमले विश्वामित्रं [5]महामुनिम् ॥ उवाच राघवो वाक्यं कृताह्निकमरिंदमः ॥ ५ ॥
गता भगवती रात्रिः श्रोतव्यं [6]परमं श्रुतम् ॥ ६ ॥
तराम सारितां श्रेष्ठां [7]पुण्यां त्रिपथगां नदीम् ॥ नौरेषा हि सुखास्तीर्णा ऋषीणां पुण्यकर्मणाम् ॥
भगवन्तमिह प्राप्तं ज्ञात्वा त्वरितमागता ॥ ७ ॥
तस्य तद्वचनं श्रुत्वा राघवस्य महात्मनः ॥ संतारं कारयामास [8]सर्षिसङ्घः सराघवः ॥ ८ ॥
उत्तरं तीरमासाद्य संपूज्यर्[9]षिगणं तदा ॥ गङ्गाकूले निविष्टास्ते विशालां ददृशुः पुरीम् ॥ ९ ॥
ततो [10]मुनिवरस्तूर्णं जगाम सहराघवः ॥ विशालां नगरीं [11]रम्यां दिव्यां स्वर्गोपमां तदा ॥ १० ॥
अथ रामो [12]महाप्राज्ञो विश्वामित्रं महामुनिम् ॥ पप्रच्छ प्राञ्जलिर्भूत्वा विशालामुत्तमां पुरीम् ॥११॥
[13]कतरो राजवंशोऽयं विशालायां महामुने ॥ श्रोतुमिच्छामि भद्रं ते परं कौतूहलं हि मे ॥ १२ ॥
तस्य तद्वचनं श्रुत्वा रामस्य मुनिपुङ्गवः ॥ आख्यातुं तत्समारेभे [14]विशालस्य पुरातनम् ॥ १३ ॥
श्रूयतां राम शक्रस्य कथां [15]कथयतः शुभाम् ॥ [16]अस्मिन्देशे तु यद्वृत्तं तदपि शृणु राघव ॥ १४ ॥
पूर्वं कृतयुगे राम दितेः पुत्रा महाबलाः ॥ अदितेश्च महाभाग वीर्यवन्तः सुधार्मिकाः ॥ १५ ॥
ततस्तेषां [17]नरश्रेष्ठ बुद्धिरासीन्महात्मनाम् ॥ [18]अमरा अजराश्चैव कथं स्याम निरामयाः ॥ १६ ॥
तेषां [19]चिन्तयतां राम बुद्धि[20]रासीन्महात्मनाम् ॥ क्षीरोदमथनं कृत्वा रसं प्राप्स्याम तत्र वै ॥ १७ ॥

क्षणभूतेवनौरात्रिरितिश्लोको गताभगवतीत्यर्धात्परमनुसन्धेयः ॥३॥ क्षणभूतेव जगामेत्यर्थः ॥ ४ ॥ विमले प्रभाते सम्यक्प्रभातइत्यर्थः ॥ ५ ॥ गतेत्यर्धत्रयं । भगवती सत्कथायुक्तत्वात्पूज्या ॥ ६ ॥ तरामेत्यर्धत्रयं । ऋषीणांनौः ऋषितरणार्हा नौः ॥ ७ ॥ सराघवःसर्षिसङ्घः। कारयामास अकरोत्। स्वार्थेणिच् ॥ ८ ॥ ऋषिगणं नौतारणार्थआगतं । संपूज्य पूजापूर्वकंनिवर्त्य । निविष्टाः क्षणंस्थिताः ॥ ९ ॥ विशालां प्रतीतिशेषः ॥ १० ॥ विशालां विशालामाहात्म्यं ॥ ११ ॥ विशालायांवर्तमानो राजवंशःकतरइति द्वितीयःप्रश्नः ॥ १२ ॥ विशालस्य विशालाख्यनगरस्य । पुरातनं कर्म प्रथमपृष्टंवैभवं । आख्यातुंसमारेभे ॥ १३ ॥ अस्मिन्देशेयद्वृत्तंतच्छृणु । तच्छेषतयाशक्रस्यकथांकथयतोमत्तःसाश्रूयतां ॥ १४ ॥ पूर्वं कृतयुगे दितेःपुत्रामहाबलाआसन् । अदितेःपुत्रावीर्यवन्तोधार्मिकाश्चासन् ॥ १५ ॥ म्रियन्तइतिमराः पचाद्यच्। अमराः मरणरहिताः। अजराः जरारहिताः। तेषां देवासुराणां ॥ १६ ॥ रसं अमृतं । तत्र क्षीरोदे

ति० विश्वामित्रेतिसंबोधनं । उक्तस्यैवादरातिशयबोधनायपुनरुपादानम् ॥७॥ ति० कारयामास नाविकैरितिशेषः ॥ ८ ॥ ति० विशालस्येतिपाठेतन्नगरीनिर्माताराजाविशालोनाम ॥ १३ ॥ ति० शक्रस्यकथां विशालावैभवप्रतिपादिकांकथांकथयतस्सकाशान्मयाश्रुताम् ॥ १४ ॥ वि० रसं अमृतरूपंरसायनम् ॥ १७ ॥

[पा०] १ ङ. सारात्रिः. २ ङ. झ. परंतप. ३ इदमर्धं ज. ट. दृश्यते. ४ झ. ममसौमित्रिणासह. ५ ङ. च. छ. झ. तपोधनम्. ६ झ. परमाद्भुतम्. ७ ख. गंगांत्रिपथगां. ८ ङ. झ. ञ. सर्षिसंघस्यकौशिकः. ९ क. ख. घ.—ट. गणंततः. १० क. मुनिवरश्रेष्ठः. ११ ग. घ. सौम्यां. १२ क. ट. महाप्राज्ञं. १३ ङ. झ. कतमो. १४ ख. ज. झ. विशालायाःपुरातनम्. १५ झ. कथयतश्श्रुताम्. १६ क. च. ट. तांमेनिगदतोवत्सश्शृणुतत्वेनराघव. ङ. च. छ. झ. ञ. अस्मिन्देशेहि. क. ग. घ. ज. अस्मिन्हिदेशे. १७ क. ग. ङ—ट. नरव्याघ्र. घ. महाभाग. १८ ख. अमरानिर्जराश्चैव. क. घ—ज. ञ. विज्वराश्चैव. झ. ट. विजराश्चैव. १९ ङ. झ. चिन्तयतांतत्र. २० क. ख. ङ—ट. रासीद्विपश्चिताम्.

ततो निश्चित्य मथनं योक्त्रं कृत्वा च वासुकिम् ॥ मन्थानं मन्दरं कृत्वा ममन्थुरमितौजसः ॥१८॥
[*अ[2]थ वर्षसहस्रेण योक्त्रसर्पशिरांसि च ॥ वै[3]मन्त्यतिविषं तत्र ददंशुर्दशनैः शिलाः ॥ १९ ॥
उत्पपाताग्निसंकाशं हालाहलमहाविषम् ॥ तेन दग्धं जगत्सर्वं सदेवासुरमानुषम् ॥ २० ॥
अथ देवा महादेवं शंकरं शरणार्थिनः ॥ जग्मुः पशुपतिं रुद्रं त्राहित्राहीति तुष्टुवुः ॥
एवमुक्तस्ततो देवैर्देवदेवेश्वरः प्रभुः ॥ २१ ॥
प्रादुरासीत्ततोऽत्रैव शङ्खचक्रधरो हरिः ॥ उवाचैनं स्मितं कृत्वा रुद्रं शू[4]लभृतं हरिः ॥ २२ ॥
दैवतैर्मथ्यमाने तु यत्पूर्वं समुपस्थितम् ॥ तत्त्वदीयं सुरश्रेष्ठ सुराणामग्रजोसि यत् ॥ २३ ॥
अ[6]ग्रपूजामिमां मत्वा गृहाणेदं [7]विषं प्रभो ॥ इत्युक्त्वा च सुरश्रेष्ठस्तत्रैवान्तरधीयत ॥ २४ ॥
देवतानां भयं दृष्ट्वा श्रुत्वा वाक्यं तु शार्ङ्गिणः ॥ हाला[8]हलविषं घोरं स जग्रा[9]हामृतोपमम् ॥२५॥
देवान्विसृज्य देवेशो जगाम भगवान्हरः ॥ ततो देवासुराः सर्वे ममन्थू रघुनन्दन ॥ २६ ॥
प्रविवेशाथ पातालं मन्थानः पर्व[10]तोऽनघ ॥ ततो देवाः सगन्धर्वास्तुष्टुवुर्मधुसूदनम् ॥ २७ ॥
त्वं गतिः सर्वभूतानां विशेषेण दिवौकसाम् ॥ पालयास्मान्महाबाहो गिरिमुद्धर्तुमर्हसि ॥ २८ ॥
इति श्रुत्वा हृषीकेशः कामठं रूपमास्थितः ॥ पर्वतं पृष्ठतः कृत्वा शिश्ये तत्रोदधौ हरिः ॥ २९ ॥
[11]पर्वताग्रं तु लोकात्मा हस्तेनाक्रम्य केशवः ॥ देवानां मध्यतः स्थित्वा ममन्थ पुरुषोत्तम ॥ ३० ॥
उदतिष्ठत्स धर्मात्मा आयुर्वेदमयः पुमान्] ॥ ३१ ॥
अथ वर्षसहस्रेण सदण्डः सकमण्डलुः ॥ [12]पूर्वं धन्वन्तरिर्नाम अप्सराश्च सुवर्चसः ॥ ३२ ॥
अप्सु निर्मथनादेव र[13]सस्तस्माद्वरस्त्रियः ॥ उत्पेतुर्मनुजश्रेष्ठ तस्मा[14]दप्सरसोऽभवन् ॥ ३३ ॥

॥ १७ ॥ योक्त्रं मथनरज्जुं । मन्थानं मथनदण्डं ॥ १८—३१ ॥ धन्वन्तरिरुत्पपात अप्सराश्च उत्पेतुरितिशेषः । आकारान्तत्वमार्षं ॥ ३२ ॥ अप्सरश्शब्दंनिर्वक्ति । अत्राप्शब्देनतद्विकारभूतंक्षीरमुपलक्ष्य-

ति० योक्त्रसर्पोमन्थानरज्जुभूतस्सर्पः । वमन्तइतिपुंस्त्वमार्षं । अतिअतिशयितंविषं ॥ १९ ॥

[पा०] १ क. कृत्वायोक्त्रंच. * कुण्डलान्तर्गतपाठस्थाने. क. ख. पुस्तकयोरयंपाठोदृश्यते—

अथ दीर्घेण कालेन कालाग्निसदृशं विषम् । उदतिष्ठन्नरश्रेष्ठ हालाहलमिति श्रुतम् ॥ १ ॥
सुरासुराश्च वित्रस्ता दग्धास्तेन विषाग्निना । शरण्यं शरणं जग्मुर्भगवन्तं महेश्वरम् ॥ २ ॥
कृत्वाऽल्पपिण्डं पाणिस्थं तद्विषं भगवान्हरः । सर्वलोकहितार्थाय भगवान्परमेश्वरः ॥ ३ ॥
कण्ठस्थमकरोत्प्राश्य लीलया लोकपूजितः । प्रणम्य विज्वरा जग्मुर्देवदेवं वृषध्वजम् ॥ ४ ॥
मन्दरं पूर्ववत्कृत्वा ममन्थुरमितौजसः । ततः पर्वतमूलं तु पातालं तु प्रवेशितम् ॥ ५ ॥
सुरासुराश्च निश्चेष्टा बभूवुः क्लेशविक्लवाः । देवदुःखनिवृत्त्यर्थमागतः पुरुषोत्तमः ॥ ६ ॥
भयं त्यजत भद्रं व उद्धरिष्याम्यहं गिरिम् । इत्युक्त्वा कूर्मरूपेण विवेश क्षीरवारिधौ ॥ ७ ॥
मन्दरं पृष्ठतः कृत्वा ववृधे कूर्मरूपधृत् । सुरासुरैरनाक्रान्तमुद्धृतोऽथ नरोत्तम ॥ ८ ॥
नगाग्रं पीडयामास वामहस्तेन माधवः । ममन्थ देवतानां च मध्ये नारायणो हरिः ॥ ९ ॥
अथ वर्षसहस्रेण ज्येष्ठा नाम वराङ्गना । उत्पपात वरारोहा सागरैरेव कल्पिता ॥ १० ॥
अभवत्पारिजाताख्यो वृक्ष इन्द्राय कल्पितः ॥ ११ ॥

२ एतदादयःकुण्डलान्तर्गतास्त्रयोदशश्लोकाः. ङ—ट. पाठेषुदृश्यन्ते. ३ ङ—ट. वमन्तोतिविषं. ४ ङ. च. छ. झ. ञ. शूलधरं हरिः. ५ ङ. ज. झ. ट. अग्रतोह्यियत्. ६ ङ—ट. अग्रपूजामिहस्थिता. ७ ट. विषंविभो. ८ ङ. छ. ज. झ. ञ. हालाहलंविषं. ९ ङ—ट. संजग्राहामृतोपमम्. १० ङ. झ. ञ. ट. मन्थानःपर्वतोत्तमः. ११ च. छ. ज. पर्वताग्रेतु. १२ ङ. च. छ. झ. ञ. ट. अथधन्वन्तरिर्नाम. ज. धन्वन्तरीराम. घ. धन्वन्तरिस्समुत्तस्थावप्सराश्च. १३ ख.—ट. रसात्तस्माद्वरस्त्रियः. क. ततस्तस्माद्वरस्त्रियः. १४ ख. दप्सरसस्स्मृताः.

षष्टिः कोट्योऽभवंस्तासामप्सरसां सुवर्चसाम् ॥ असंख्येयास्तु काकुत्स्थ यास्तासां परिचारिकाः ॥३४॥
न ताः स्म प्रतिगृह्णन्ति सर्वे ते देवदानवाः ॥ अप्रतिग्रहणादेव तेन साधारणाः स्मृताः ॥ ३५ ॥
वरुणस्य ततः कन्या वारुणी रघुनन्दन ॥ उत्पपात महाभागा मार्गमाणा परिग्रहम् ॥ ३६ ॥
दितेः पुत्रा न तां राम जगृहुर्वरुणात्मजाम् ॥ अदितेस्तु सुता वीर जगृहुस्तामनिन्दिताम् ॥३७॥
असुरास्तेन दैतेयाः सुरास्तेनादितेः सुताः ॥ हृष्टाः प्रमुदिताश्चासन्वारुणीग्रहणात्सुराः ॥ ३८ ॥
उच्चैःश्रवा हयश्रेष्ठो मणिरत्नं च कौस्तुभम् ॥ [उदतिष्ठन्नरश्रेष्ठ सोमदेवस्तथैव च ॥ ३९ ॥
तुरगं देवराजाय कौस्तुभं केशवाय च ॥ धन्वन्तरिर्महातेजा लोकरक्षणतत्परः ॥ ४० ॥
आयुर्वेदमयो राम तथा साधारणः स्मृतः ॥ सुरासुराश्च गन्धर्वाः क्षोभयामासुरंबुधिम् ॥ ४१ ॥
ततो दीर्घेण कालेन चोत्पन्ना कमलालया ॥ अतीव रूपसंपन्ना प्रथमे वयसि स्थिता ॥ ४२ ॥
सर्वाभरणपूर्णाङ्गी सर्वलक्षणलक्षिता ॥ मकुटाङ्गदचित्राङ्गी नीलकुञ्चितमूर्धजा ॥ ४३ ॥
तप्तहाटकसंकाशा मुक्ताभरणभूषिता ॥ चतुर्भुजा महादेवी पद्महस्ता वरानना ॥ ४४ ॥
सा च देवी तथोत्पन्ना पद्मा श्रीर्लोकपूजिता ॥ सा पद्मा पद्मनाभस्य ययौ वक्षस्स्थलं हरेः] ॥४५॥
उदतिष्ठन्नरश्रेष्ठ तथैवामृतमुत्तमम् ॥ ४६ ॥
अथ तस्य कृते राम महानासीत्कुलक्षयः ॥ अदितेस्तु ततः पुत्रा दितेः पुत्रानसूदयन् ॥ ४७ ॥
एकतोऽभ्यागमन्सर्वे ह्यसुरा राक्षसैस्सह ॥ युद्धमासीन्महाघोरं वीर त्रैलोक्यमोहनम् ॥ ४८ ॥
यदा क्षयं गतं सर्वं तदा विष्णुर्महाबलः ॥ अमृतं सोहरत्तूर्णं मायामास्थाय मोहिनीम् ॥ ४९ ॥
ये गताऽभिमुखं विष्णुमक्षयं पुरुषोत्तमम् ॥ संपिष्टास्ते तदा युद्धे विष्णुना प्रभविष्णुना ॥ ५० ॥

ते । अप्सुयन्निर्मथनंतस्माद्योरसस्तस्माद्रसाद्यतउत्पेतुस्तस्मादप्सरसोऽभवन् । पृषोदरादित्वात्साधुः ॥३३॥ तासां प्रधानभूतानां ॥३४॥ नताःस्मप्रतिगृह्णन्ति नासाधारण्येनप्रतिगृह्णन्तिस्मेत्यर्थः । कुतः अप्रतिग्रहणात् कोवाममपतिरितिमार्गणाकरणादित्यर्थः । तेन असाधारण्येनपरिग्रहाकरणेन ॥३५॥ वरुणस्य समुद्राधिदेवतायाः । वारुणी सुराधिदेवता । परिग्रहं ममेयमितिपरिग्रहस्यकर्तारं ॥३६—३७॥ प्रसङ्गात्सुरासुरशब्दौनिर्वक्ति—असुराइति । तेन सुरायाः परिग्रहणेन । सुराः अर्शआदित्वादजन्तः । पिष्टादिविकृतिरेवसुरानिन्द्या । हृष्टाः पुलकिताः ॥३८—४५॥ उत्तमं पूर्वोत्पन्नेभ्यःश्रेष्ठं ॥४६॥ तस्यकृते अमृतस्यग्रहणार्थमित्यर्थः । कुलक्षयः उभयपक्षेपिसञ्जातविनाशः । तदेवोपपादयति—अदितेरित्यादिना ॥ ४७ ॥ अनन्तरमसुराः । एकतः एकतां । अभ्यागमन् । बलवृद्ध्यइतिभावः ॥ ४८ ॥ मोहिनीं काममोहजननीं । मायां आश्चर्यशक्तिं । आस्थाय अवलंब्य स्वमायया अद्भुतयोषिदाकृतिंपरिगृह्य । तद्रूपेणतानवंच्चयित्वातेभ्योमृतमहरदित्यर्थः । यद्वा सर्वमोहकरीमन्तर्धानशक्तिमास्थायामृतमाहरदित्यर्थः । पुराणान्तरवृत्तान्तःकल्पभेदेनेतिबोध्यम् ॥ ४९ ॥ अत्रसन्धिरार्षः । येअसुराः अक्षयं अस्तिजायतेपरिणमतेविवर्धतेअपक्षीयतेविनश्यतीत्युक्तषड्भाववि-

---

शि० तेन देवासुरसमूहेन तासामप्रतिग्रहणादेव तास्साधारणास्स्मृताः । ताइत्युभयान्वयि ॥ ३५ ॥ ति० अदितिसुतांगीकारेहेतुः—अनिन्दितामिति । निषेधशास्त्रंतुमानुषविषयं ॥ ३७ ॥ शि० तत्रासुरशब्देबहुव्रीहिः । सुरशब्दोर्शआद्यजन्तः । एतदनुरोधेन "अथासीद्वारुणीदेवीकन्याकमललोचना । असुराजगृहुस्तांवैहरेरनुमतेनते" इतिभागवतस्थलस्ययमर्थः । हरेरनुगतेस्थिताअसुराःतांवारुणींकन्यांनजगृहुः सुराएवजगृहुरित्यर्थः । किंचअसुराःजगृहुःसुरंग्राहयामासुरिति ॥ ३८ ॥ ति० अत्रममन्थुरमितौजसइतिश्लोकानन्तरं "अथवर्ष—"इत्यादि "आयुर्वेदमयःपुमान्" इत्यन्तत्रयोदशश्लोकाःप्रक्षिप्ताइतिबहवः ।

[पा०] १ ङ. झ. ग्रहणादेवतावै. ग. घ. ग्रहणाचैव. क. ग्रहणाचेति. २ क. ज. ट. सुराराम. ३ क. उच्चैश्श्रवास्तुतुरगः. ज. ट. उच्चैश्श्रवाहरिश्रेष्ठो. ४ एतत्कुण्डलान्तर्गतंसार्धश्लोकपट्कं क. ख. च. छ. पुस्तकेषुदृश्यते. ५ ख. ममन्थुःक्षीरवारिधिम्. ६ ख. लोकविश्रुता. ७ ङ. च. छ. झ. ञ. दितिपुत्रानयोधयन्. ८ ङ. झ. ञ. एकतामगमन्सर्वे. क. घ. ज. ट. एकतोभ्यगमन्. ९ ज. ह्यमराराक्षसैस्सह. १० क. ख. च. छ. येतदाभिमुखं. ११ ङ. झ. मक्षरंपुरुषोत्तमम्.

अदितेरात्मजा वीरा दितेः पुत्रान्निजघ्निरे ॥ तस्मिन्युद्धे महाघोरे दैतेयादित्ययोर्भृशम् ॥ ५१ ॥
निहत्य दितिपुत्रांश्च राज्यं प्राप्य पुरंदरः ॥ शशास मुदितो लोकान्सर्षिसङ्घान्सचारणान् ॥ ५२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे पञ्चचत्वारिंशः सर्गः ॥ ४५ ॥

षट्चत्वारिंशः सर्गः ॥ ४६ ॥

सुरनिहतपुत्रयादित्याभर्तारंकश्यपंप्रतिइन्द्रहन्तृपुत्रप्रदानप्रार्थना ॥ १ ॥ इन्द्रेणभर्तृचोदनयापुत्रार्थंतपश्चरन्त्यादितेःशुश्रूषणम् ॥ २ ॥ कदाचनदिवास्वपन्त्यास्तस्याउदरंप्रविष्टेनेन्द्रेणसप्तधातद्गर्भविभेदनम् ॥ ३ ॥ ततःप्रतिबुद्धांतांप्रतिइन्द्रेणस्वापराधक्षमापनम् ॥ ४ ॥

हतेषु तेषु पुत्रेषु दितिः परमदुःखिता ॥ मारीचं कश्यपं राम भर्तारमिदमब्रवीत् ॥ १ ॥
हतपुत्राऽस्मि भगवंस्तव पुत्रैर्महाबलैः ॥ शक्रहन्तारमिच्छामि पुत्रं दीर्घतपोर्जितम् ॥ २ ॥
साऽहं तपश्चरिष्यामि गर्भं मे दातुमर्हसि ॥ [बलवन्तं महेष्वासं क्षितिज्ञं समदर्शिनं] ॥
ईश्वरं शक्रहन्तारं त्वमनुज्ञातुमर्हसि ॥ ३ ॥
तस्यास्तद्वचनं श्रुत्वा मारीचः काश्यपस्तदा ॥ प्रत्युवाच महातेजा दितिं परमदुःखिताम् ॥ ४ ॥
एवं भवतु भद्रं ते शुचिर्भव तपोधने ॥ जनयिष्यसि पुत्रं त्वं शक्रहन्तारमाहवे ॥ ५ ॥
पूर्णे वर्षसहस्रे तु शुचिर्यदि भविष्यसि ॥ पुत्रं त्रैलोक्यभर्तारं मत्तस्त्वं जनयिष्यसि ॥ ६ ॥

कारैःशून्यं। पुरुषोत्तमं सर्वपुरुषेषूत्तमं। विष्णुंअभिमुखंगताः अभिमुखतयाप्रातिकूल्येनगताः। ते विष्णुना संपिष्टाः चूर्णिताः। संविष्टाइतिपाठेयेअमुमभिमुखंगताः शरणागताःदेवाः तेयुद्धे संविष्टाःआविष्टाःआप्यायितवलाआसन्नित्यर्थः ॥५०॥ दितेःपुत्रान् अवशिष्टानितिशेषः। यद्वा अदितेरात्मजाआप्यायितबलाःसन्तःतस्मिन्दैतेयादित्ययोर्देवासुरयोर्युद्धेअसुरान्निजघ्निरे ॥ ५१ ॥ चकारादमृतमपीत्यर्थः। अस्मिन्सर्गेद्वात्रिंशच्छ्लोकाः अन्येकल्पिताः। यद्यप्यत्रकालकूटाद्युत्पत्तिरपेक्षिता तथाप्युत्तरकथाशेषत्वेनसर्वासुरक्षयएवप्रधानतयोपात्तइतिबोध्यम् ॥ ५२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने पञ्चचत्वारिंशः सर्गः ॥ ४५ ॥

विष्णुपक्षविरोधेमहानपियत्नोविफलःस्यादित्याहषट्चत्वारिंशे—हतेष्वित्यादि। मारीचं मरीचिपुत्रं ॥१॥ तपोर्जितं तपसाऊर्जितं दृढं। आर्षःसन्धिः ॥ २ ॥ गर्भं पुत्रं। ईश्वरं त्रैलोक्यनियन्तारं। ईदृशमितिपाठेप्ययमर्थोविवक्षितः। अनुज्ञातुं तपइतिशेषः। भर्त्रनुज्ञांविनातपसिक्रियाअस्वातन्त्र्यादितिभावः ॥ ३–४ ॥ शुचिर्भव यावत्पुत्रोत्पत्तीतिशेषः ॥ ५ ॥ मत्तः मदनु-

---

अमृतदानराहुशिरश्छेदाद्यवर्णनवत् हालाहलोत्पत्त्याद्यवर्णनमितितदाशयः ॥ ५० ॥ शि० अत्रास्मिन्सर्गेद्वात्रिंशच्छ्लोकाः अन्येकल्पिताइतिभूषणकृद्भिरुक्तं तत्रान्येषांकल्पितत्वमूलयुक्तेरभावात् श्लोकार्थानामबाधकत्वाच भारतादिप्रसिद्धविषयबोधकत्वाच सर्वपुस्तकेषूपलंभाच्चतदप्रमाणमितिप्रामाणिकाः। अतएवमसमन्थुरमितौजसइतिश्लोकानन्तरंअथवैत्यादिआयुर्वेदमयःपुमानित्यन्तं त्रयोदशश्लोकाःप्रक्षिप्ताइत्यादिनात्रयोदशानामेवप्रक्षिप्तत्वंभट्टैरुक्तं। तन्मतेऽप्येकोनविंशतेःश्लोकानांकल्पितत्वाभाववत्त्वंसिद्धमेव। उक्तत्रयोदशश्लोकानांकल्पितत्वेपिप्रमाणमलब्ध्वावहयइत्युक्तं तेनतन्मतेपिसर्वेषांकल्पितत्वाभाववत्त्वमर्थतःफलितं। अतएवतीर्थादिव्याख्यासुकल्पितत्वप्रसङ्गानुत्थानमितिदिक् ॥ ५२ ॥ इतिपञ्चचत्वारिंशस्सर्गः ॥ ४५ ॥

शि० दीर्घतपोर्जितं दीर्घतपेनराज्यविषयकात्यन्तज्ञानेन ऊर्जितं प्रवृद्धं। आलोचनार्थकतपधातोः अच् ॥ २ ॥ ति० त्रैलो-

[पा०] १ ङ. च. छ. झ. ञ. अस्मिन्घोरेमयायुद्धे. क. घ. ट. तस्मिन्घोरेमहायुद्धे. २ क. ग—झ. ट. दितिपुत्रांस्तु—ख. दितिपुत्रांस्तान्. ३ क. तदाराज्यं. ४ ङ. च. छ. झ. ञ. महात्मभिः. घ. महारथैः. ५ ग. पुत्रंमेदातु. ६ इदमर्धं ग. ज. दृश्यते. ७ क. ग. घ—ञ. ईदृशंशक्र. ८ ग. तपोधना. ९ ङ. ज. झ—ट. त्रैलोक्यहन्तारं. घ. छ. त्रैलोक्यहर्तारं.

एवमुक्त्वा महातेजाः पाणिना सं[1] ममार्ज ताम् ॥ [2]समालभ्य ततः स्वस्तीत्युक्त्वा स तपसे ययौ ॥७॥
गते तस्मिन्नरश्रेष्ठ दितिः परमहर्षिता ॥ [3]कुशप्लवनमासाद्य तपस्तेपे सुदारुणम् ॥ ८ ॥
तपस्तस्यां हि कुर्वन्त्यां परिचर्यां चकार ह ॥ सहस्राक्षो नरश्रेष्ठ परया गुणसम्पदा ॥ ९ ॥
अग्निं कुशान्काष्ठमपः फलं मूलं तथैव च ॥ न्यवेदयत्सहस्राक्षो यच्चान्यदपि काङ्क्षितम् ॥ १० ॥
गा[4]त्रसंवहनैश्चैव श्रमापनयनैस्तथा ॥ शक्रः सर्वेषु कालेषु दितिं परिचचार ह ॥ ११ ॥
[5]अथ वर्षसहस्रे तु दशोने रघुनन्दन ॥ [6]दितिः परमसंप्रीता सहस्राक्षमथाब्रवीत् ॥ १२ ॥
*याचितेन सुरश्रेष्ठ पि[7]त्रा तव महात्मना ॥ वरो वर्षसहस्रान्ते [8]मम दत्तः सुतं प्रति ॥ १३ ॥
तपश्चरन्त्या वर्षाणि दश वीर्यवतां वर ॥ अवशिष्टानि भद्रं ते भ्रातरं द्रक्ष्यसे ततः ॥ १४ ॥
त[9]महं त्वत्कृते [10]पुत्रं [11]समाधास्ये जयोत्सुकम् ॥ त्रैलोक्यविं[12]जयं पुत्रं सह भोक्ष्यसि विज्वरः ॥ १५ ॥
एवमुक्त्वा [13]दितिः शक्रं प्राप्ते मध्यं दि[14]वाकरे ॥ निद्रयाऽपहृता देवी पादौ कृत्वाऽथ शीर्षतः ॥१६॥
दृष्ट्वा तामशुचिं शक्रः [15]पादतः कृतमूर्धजाम् ॥ [16]शिरःस्थाने कृतौ पादौ जहास च मुमोद च ॥१७॥

भ्रहादित्यर्थः ॥ ६ ॥ समार्जेत्याश्वासनप्रकारः । ततः मार्जनानन्तरं । उदरं समालभ्य स्वस्ति पुत्रोत्पत्तिरूपंशुभं भवत्वित्युक्त्वानुगृह्य । सः काश्यपस्तपसेययौ ॥७॥ कुशप्लवनं विशालायाः पूर्वस्थानं ॥८॥ गुणसम्पदा विनयादिसमृद्ध्या ॥९॥ अग्निमिति परिचर्याप्रकारः ॥ १० ॥ मातृत्वात् गात्रसंवहनानि । श्रमापनयनैः व्यजनवीजनादिभिरितिशेषः ॥ ११ ॥ दशोने दशवर्षोने ॥ १२ ॥ शुश्रूषाकृतप्रीत्यतिशयाद्वैरंविस्मृतवतीतिभावः ॥ १३ ॥ ततः दशवर्षान्ते ॥ १४ ॥ समाधास्ये विगतवैरंभ्रातृस्नेहवंतमेवकरिष्यामीत्यर्थः । त्रैलोक्यविजयं त्वद्भ्रातृकृतमितिशेषः । अमोघभर्त्रनुग्रहेणाप्रतिबन्धसुतोत्पत्तिंमन्वाना ऋजुतयाशुश्रूषाफलमुक्तवती ॥ १५ ॥ मध्यं गगनमध्यं । शीर्षतः शिरसि । पादौकृत्वा स्थितेतिशेषः । मध्याह्नशयनपरिग्रहप्रसङ्गाभावेनासनएवोपविशन्त्यास्तस्यानिद्रापारवश्येननम्रंशिरःपादयोःसंसक्तमभवदित्यर्थः ॥ १६ ॥ पादतःकृतमूर्धजां पादौकृत्वाथशीर्षतइत्यस्यविवरणं । अतएव अशुचिं तां दृष्ट्वा शिरस्स्थानेकृतौपादौ शिरस्स्पृष्टौपादाविति । मुमोद तेन जहासच । यद्वा प्राप्तेमध्यंदिवाकर इत्यनेन दिवास्वापरूपाशौचंदर्शितं ।

क्यहन्तारं तदधिपशक्रहन्तारं । शि० त्रैलोक्यहन्तारं त्रिलोकीहननसमर्थं पुत्रंमत्तस्त्वंजनयिष्यसि । त्रैलोक्यहन्तारमित्यनेनयदित्रिलोकहननयोग्यस्सः तर्हीन्द्रहननयोग्यइतिकिंवक्तव्यमितिकाव्यार्थापत्तिरलङ्कारोध्वनितः । किंच त्रैलोक्यंनियम्यत्वेनास्यास्तीतित्रैलोक्यइन्द्रः । किंचत्रिलोक्याअयंस्वामीत्रैलोक्यः । "तस्येदं"इत्यण् । "यस्येतिच" इतिलोपाभावस्तु संज्ञापूर्वकविधेरनित्यत्वात् ॥ ६ ॥ ति० संममार्जतादृशपुत्रोत्पत्तिप्रतिबन्धकीभूतदुरितध्वंसार्थंमार्जनंचकारेत्यर्थः । अथतामालभ्यस्पृष्ट्वा ॥ ७ ॥ शि० अथइदंअब्रवीत् । अथशब्दइत्यर्थे ॥ १२ ॥ ति० तमाधास्ये हेपुत्र यंपुत्रमहंत्वत्कृतेत्वन्नाशार्थंयाचितवती । तं तवजयोत्सुकमाधास्ये विगतवैरंभ्रातृस्नेहवन्तमेवकरिष्यइत्यन्वयः ॥ १५ ॥ शि० पादौशीर्षतः शिरस्स्थापनोचितदेशेदक्षिणेपूर्वेवाकृत्वा निद्रयाअपहृता अपहृतबुद्धिरासीदितिशेषः । अथशब्देनपादयोर्मूर्धजांश्चकृत्वेत्यर्थः ॥ १६ ॥ शि० ययाशिरस्स्थानेपादौकृतौतांपादयोःकृतमूर्धजांअतएवाशुचिंतांदितिं शक्रोदृष्ट्वाजहासमुमोदच । जहासेत्यनेन एतावन्तंश्रमंकृत्वापि "सहभोक्ष्यसिविज्वरः" इत्याशीर्वादोमात्रादत्तइतिस्मृतिर्व्यञ्जिता । पादयोर्मूर्धजस्पर्शस्यपूर्वदक्षिणयोःपादस्थापनस्यचाशुचित्वकारणत्वंधर्मशास्त्रादौप्रसिद्धम् ॥ १७ ॥ इतिषट्चत्वारिंशस्सर्गः ॥ ४६ ॥

[पा०] १ ङ—ट. संममार्जताम्. २ ङ. झ. तामालभ्यततः. ज. ट. समालंब्य. क. च. ञ. समालभ्यस्वभवनंजगामसमहानृषिः. ख. समालभ्यस्वभवनंजगामसहसाकृषिः. ग. स्वस्तीत्युक्त्वाच. ३ ख. ङ—ञ. कुशप्लवंसमासाद्य. ४ क. ग. घ. ङ. छ. झ. ञ. ट. गात्रसंवाहनै. ५ ङ. झ. ट. पूर्णेवर्षसहस्रेसा. च. छ. ञ. पूर्णवर्षसहस्रेसा. घ. ज. अथवर्षसहस्रेसा. ६ ङ—ट. दितिःपरमसंहृष्टा. घ. परमसुप्रीता. * अयंश्लोकः ङ. च. छ. झ. ञ. पुस्तकेषुतमहमितिश्लोकात्परतोदृश्यते. ७ ग. घ. ज. तवपित्रा. ८ क—घ. दत्तोममसुतं. ९ ङ. झ. ट. यमहंत्वत्कृते. १० क. ख. ग. ङ. ज. झ. पुत्र. ११ ङ. झ. तमाधास्ये. क. च. छ. समाधत्स्ये. १२ क. ख. घ. च. छ. झ. ञ. ट. विजयंपुत्र. १३ ख. घ. च. छ. ञ. ट. दितिस्तत्र. १४ ङ. झ. ञ. ट. दिनेश्वरे. १५ ङ. च. छ. झ. ञ. ट. पादयोःकृतमूर्धजाम्. १६ क. शीर्षोपधानेपादौच.

तस्याः शरीरविवरं विवेश[1] च पुरंदरः ॥ गर्भं च सप्तधा राम बिभेदे[2] परमात्मवान् ॥ १८ ॥
भिद्यमानस्ततो गर्भो वज्रेण शतपर्वणा ॥ रुरोद सुस्वरं[3] राम ततो दितिरबुध्यत ॥ १९ ॥
मारुदो मारुदश्चेति गर्भं शक्रोऽभ्यभाषत ॥ बिभेद च महातेजा रुदन्तमपि वासवः ॥ २० ॥
न[4] हन्तव्यो न हन्तव्य इत्येवं दितिरब्रवीत् ॥ निष्पपात ततः शक्रो मातुर्वचनगौरवात् ॥ २१ ॥
प्राञ्जलिर्वज्रसहितो दितिं शक्रोऽभ्यभाषत ॥ अशुचिर्देवि सुप्तासि पादयोः कृतमूर्धजा ॥ २२ ॥
तदन्तरमहं लब्ध्वा शक्रहन्तारमाहवे ॥ अभिदं[5] सप्तधा देवि तन्मे त्वं क्षन्तुमर्हसि ॥ २३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे षट्चत्वारिंशः सर्गः ॥ ४६ ॥

सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

इन्द्रेणसप्तानांगर्भच्छेदानांदितिवचनाद्वायुस्कन्धसप्तकस्थानपालकत्वकल्पनम् ॥ १ ॥ विश्वामित्रेणैवमुपोद्घातकथनेनतस्मिन्नेवदितितपश्चरणदेशेइक्ष्वाकुसूनुनाविशालेनविशालाख्यपुरनिर्माणकथनपूर्वकमद्यतनस्यसुमतिनाम्नोराज्ञोविशालवंश्यत्वकथनम् ॥ २ ॥ सुमतिनाराज्ञाविश्वामित्रमुपगम्यसादरपूजनम् ॥ ३ ॥

सप्तधा तु कृते गर्भे दितिः परमदुःखिता ॥ सहस्राक्षं दुराधर्षं वाक्यं सानुनयाऽब्रवीत् ॥ १ ॥
ममापराधाद्गर्भोऽयं सप्तधा विफलीकृतः[6] ॥ नापराधोऽस्ति[7] देवेश तवात्र बलसूदन ॥ २ ॥
प्रियं[8] तु कर्तुमिच्छामि मम गर्भविपर्यये ॥ मरुतां सप्त[9] सप्तानां स्थानपाला भवन्त्विमे[10] ॥ ३ ॥
वातस्कन्धा इमे[11] सप्त चरन्तु दिवि पुत्रक[12] ॥ मारुता इति विख्याता दिव्यरूपा ममात्मजाः ॥४॥
ब्रह्मलोकं चरत्वेक इन्द्रलोकं तथाऽपरः ॥ दिवि[13] वायुरिति ख्यातस्तृतीयोपि महायशाः ॥ ५ ॥

शीर्षतः शिरस्स्थाने शिरस्स्थानइत्यनुवादात्। पादतः पादस्थाने। शयनपरिग्रहाभावेपिकृष्णाजिनाद्यास्तरणेपादस्थानेशिरः शिरस्स्थानेचपादौ कृत्वा सुप्तवतीत्यर्थः । पादोपधानेशीर्षं शीर्षोपधानेपादौचकृत्वेत्यर्थः । रन्ध्रान्वेषणफलंजातमितिमोदः । वृथागर्वितेयमितिहासः ॥१७॥ शरीरविवरं योनिविवरं । आत्मवान् धैर्यवान् ॥ १८ ॥ शतपर्वणा शतकोटिना ॥ १९ ॥ मारुद इति। रुदिर्अश्रुविमोचनइत्यस्माल्लुङ् । माङ्योगादडभावः ॥ २० ॥ नहन्तव्यः भेदनेकृतेपिप्राणवियोजनंमाकुर्वित्यर्थः ॥ २१—२२ ॥ अन्तरं अवकाशं। क्षन्तुमर्हसि स्वहिंसापरांगामपिहिंस्यादितिन्यायेनयुक्तत्वादितिभावः ॥२३॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने षट्चत्वारिंशः सर्गः ॥ ४६ ॥

दुराधर्षं दुर्जयं ॥१॥ अपराधात् प्रमादात् । विफलीकृतः शकलीकृतः ॥ २ ॥ गर्भविपर्यये उपहतगर्भविषये । प्रियं श्रेयः ।कर्तुमिच्छामि । तदेवश्रेयआह— मरुतामिति । सप्तानांमरुतां वातस्कन्धानां । इमे सप्तभागाः स्थानपालाः लोकपालाः । भवन्तु । सप्तमरुतश्चोक्ताः । "गगनःस्पर्शनोवायुरनिलश्चतथापरः ॥ प्राणःप्राणेश्वरोजीवइत्येतेसप्तमारुताः" इति । विष्णुपुराणेतु "आवहप्रवहसंवहोद्वहविवहपरिवहपरावहाः सप्तमारुताः"इत्युक्तं ॥३॥ वातस्कन्धाः वातस्कन्धाभिमानिदेवताः । मरुदभिमानिदेवतात्वान्मारुताइतिविख्याताः । त्वत्कृतेन मारुदइत्युच्चारणेन मारुताइतिविख्याताः । पृषोदरादित्वाद्वर्णव्यत्ययइत्याहुः ॥४॥ सप्तमरुतःकुत्रवर्तंतेतेषांस्थानपालनंचकथमित्यत्राह— ब्रह्मेति । दिवि अन्तरिक्षे विष्णुपदाख्ये विष्णुलोके ।

शि० वातस्कन्धाः वातभेदाः । सप्त सप्तावयवकसप्तगणाः ॥ ४ ॥ ति० एकइति एकः गणइत्यर्थः । प्रथमंसप्तधाविभज्य

[पा०] १ ङ—ट. प्रविवेशपुरन्दरः. २ ङ—छ. झ. ञ. चिच्छेदपरमात्मवान्. ३ ग. घ. सस्वरं. ४ ग. झ. नहन्तव्यं नहन्तव्यमित्येव. ५ क. ख. ग. ङ. ज. झ. अभिन्दं. ६ ङ. च. ज. झ. ञ. शकलीकृतः. ७ ङ. च. झ. ञ. नापराधोहि. ८ ख. झ. ञ. प्रियंत्वत्कृतमिच्छामि. क. तत्कर्तुमिच्छामि. ९ ख. शक्रसप्तानां. १० ग. छ. झ. ञ. भवन्तुते. घ. च. भवन्तुमे. ११ ग. इमेपुत्र. १२ क—घ. च. छ. ज. ञ. ट. पुत्रकाः. १३ झ. ञ. ट. दिव्यवायुरितिख्यातः. घ. दिविवातइति.

चत्वारस्तु सुरश्रेष्ठ दिशो वै तव शासनात् ॥ संचरिष्यन्तु भद्रं ते देवभूता ममात्मजाः ॥
त्वत्कृतेनैव नाम्ना च मारुता इति विश्रुताः ॥ ६ ॥
तस्यास्तद्वचनं श्रुत्वा सहस्राक्षः पुरन्दरः ॥ उवाच प्राञ्जलिर्वाक्यं दितिं बलनिषूदनः ॥ ७ ॥
सर्वमेतद्यथोक्तं ते भविष्यति न संशयः ॥ विचरिष्यन्ति भद्रं ते देवरूपास्तवात्मजाः ॥ ८ ॥
एवं तौ निश्चयं कृत्वा मातापुत्रौ तपोवने ॥ जग्मतुस्त्रिदिवं राम कृतार्थाविति नः श्रुतम् ॥ ९ ॥
एष देशस्स काकुत्स्थ महेन्द्राध्युषितः पुरा ॥ दितिं यत्र तपस्सिद्धामेवं परिचचार सः ॥ १० ॥
इक्ष्वाकोस्तु नरव्याघ्र पुत्रः परमधार्मिकः ॥ अलम्बुसायामुत्पन्नो विशाल इति विश्रुतः ॥ ११ ॥
तेन चासीदिह स्थाने विशालेति पुरी कृता ॥ विशालस्य सुतो राम हेमचन्द्रो महाबलः ॥ १२ ॥
सुचन्द्र इति विख्यातो हेमचन्द्रादनन्तरः ॥ सुचन्द्रतनयो राम धूम्राश्व इति विश्रुतः ॥ १३ ॥
धूम्राश्वतनयश्चापि सृञ्जयः समपद्यत ॥ सृञ्जयस्य सुतः श्रीमान्सहदेवः प्रतापवान् ॥ १४ ॥
कुशाश्वः सहदेवस्य पुत्रः परमधार्मिकः ॥ कुशाश्वस्य महातेजाः सोमदत्तः प्रतापवान् ॥ १५ ॥
सोमदत्तस्य पुत्रस्तु काकुत्स्थ इति विश्रुतः ॥ १६ ॥
तस्य पुत्रो महातेजाः संप्रत्येष पुरीमिमाम् ॥ आवसत्यमरप्रख्यः सुमतिर्नाम दुर्जयः ॥ १७ ॥
इक्ष्वाकोस्तु प्रसादेन सर्वे वैशालिका नृपाः ॥ दीर्घायुषो महात्मानो वीर्यवन्तः सुधार्मिकाः ॥१८॥
इहाद्य रजनीं राम सुखं वत्स्यामहे वयम् ॥ श्वःप्रभाते नरश्रेष्ठ जनकं द्रष्टुमर्हसि ॥ १९ ॥
सुमतिस्तु महातेजा विश्वामित्रमुपागतम् ॥ श्रुत्वा नरवरश्रेष्ठः प्रत्युद्गच्छन्महायशाः ॥ २० ॥
पूजां च परमां कृत्वा सोपाध्यायः सबान्धवः ॥ प्राञ्जलिः कुशलं पृष्ट्वा विश्वामित्रमथाब्रवीत् ॥२१॥
धन्योस्म्यनुगृहीतोस्मि यस्य मे विषयं मुनिः ॥ संप्राप्तो दर्शनं चैव नास्ति धन्यतरो मया ॥२२॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

चरत्वित्यनुषङ्गः ॥ ५ ॥ चत्वारइतिसार्धश्लोकः ॥६॥ दितिगर्भखण्डनेन सहस्राक्षत्वादीनिसिद्धानीतिभावः ॥ ७ ॥ यथोक्तमित्यस्यविवरणंविचरिष्यन्तीति ॥८॥ नः अस्माभिरित्यर्थः । "क्तस्यचवर्तमाने" इतिषष्ठी ॥९॥ प्रकृतमुपसंहरति—एषइति । सएषइत्यन्वयः । सः इन्द्रः ॥ १० ॥ अथकतरोराजवंशइतिद्वितीयप्रश्नस्योत्तरमाह—इक्ष्वाकोरित्यादिना ॥ ११–१३ ॥ सृञ्जयःसमपद्यत सृञ्जयनामाऽऽसीन ॥ १४—१५ ॥ सोमदत्तस्येत्यर्धमेकं ॥ १६ ॥ "उपान्वध्याङ्वसः" इत्याधारस्यकर्मत्वं ॥ १७ ॥ कथंकतिपयैरेवपुरुषैःपरिदानीमिक्ष्वाकुवंशइत्यत्राह—इक्ष्वाकोरिति । विशालानिवासएषांतेवैशालिकाः । कुमुदादित्वात्ठक् । विशालप्रार्थनमिक्ष्वाकुप्रसादनिमित्तं ॥१८॥ वत्स्यामहे आत्मनेपदं ॥१९॥ प्रात्युद्गच्छत् प्रत्युदगच्छत ॥२०–२१ ॥ विषयं स्थानं । दर्शनंचप्राप्तइत्यनुषङ्गः । मया सदृश इतिशेषः ॥ २२ ॥ इति गोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

पुनरेकशस्सप्तधाकरणमित्यस्यार्थस्यपुराणान्तरेस्पष्टमुक्तत्वात् इहापि "बिभेदचमहातेजाहदन्तमपि"—इत्यादिनाध्वनितत्वाच्चेतिबोध्यं । एवमपरइत्याद्यपिव्याख्येयं । इन्द्रलोकमिति रुद्रलोकमितिप्रचुरः पाठः । दिव्यवायुः दिविअन्तरिक्षभवइत्यर्थः ॥ ५ ॥ इतिसप्तचत्वारिंशस्सर्गः ॥ ४७ ॥

[पा०] १ क. झ. ञ. ट. संचरिष्यन्तिभद्रंते. २ झ. कालेनहिममात्मजाः. ३ झ. ञ. ट. नाम्नावै. ख. नाम्नाते. क. नाम्नातु. ४ झ. मितीदेवबलसूदनः. च. छ. ञ. दितिंचबलसूदनः. ५ क—घ. देवभूतास्तवात्मजाः. ६ क. ख. ज. ञ. हेमचन्द्रादनन्तरम्. ७ क. सुतश्श्रीमान्. ८ क. च. छ. ञ. पुत्रोऽभूत्. ९ क. निवसत्यमरप्रख्यः. १० ग. सुमतिर्नामविश्रुतः. ११ च. छ. झ. ञ. रजनीमेकां. १२ च. छ. स्थास्यामहेवयम्. झ. ञ. ट. स्वप्स्यामहे. १३ ख. च. छ. झ. ञ. ट. प्रत्याग-च्छन्महायशाः. १४ छ. झ. ञ. विषयंमुने. ज. ट. विषयंगतः. १५ ञ. दर्शनाच्चैव. १६ च. छ. ञ. ट. धन्यतरोमम.

अष्टचत्वारिंशः सर्गः ॥ ४८ ॥

विश्वामित्रेणसुमतयेरामलक्ष्मणवृत्तान्तनिवेदनपूर्वकंतदातिथ्यस्वीकारेणरात्रौतत्रनिवासः ॥ १ ॥ परेद्युःसहरामादिभिर्गौतमाश्रमागमनम् ॥ २ ॥ तथारामंप्रतिइन्द्राहल्यावृत्तान्तकथनपूर्वकंगौतमात्तयोःशापप्राप्तिकथनम् ॥ ३ ॥

पृष्ट्वा तु कुशलं तत्र परस्परसमागमे ॥ कथान्ते सुमतिर्वाक्यं व्याजहार महामुनिम् ॥ १ ॥
इमौ कुमारौ भद्रं ते देवतुल्यपराक्रमौ ॥ गजसिंहगती वीरौ शार्दूलवृषभोपमौ ॥ २ ॥
पद्मपत्रविशालाक्षौ खड्गतूणीधनुर्धरौ ॥ अश्विनाविव रूपेण समुपस्थितयौवनौ ॥ ३ ॥
यदृच्छयैव गां प्राप्तौ देवलोकादिवामरौ ॥ कथं पद्भ्यामिह प्राप्तौ किमर्थं कस्य वा मुने ॥ ४ ॥
भूषयन्ताविमं देशं चन्द्रसूर्याविवांबरम् ॥ परस्परस्य सदृशौ प्रमाणेङ्गितचेष्टितैः ॥ ५ ॥
किमर्थं च नरश्रेष्ठौ संप्राप्तौ दुर्गमे पथि ॥ वरायुधधरौ वीरौ श्रोतुमिच्छामि तत्वतः ॥ ६ ॥
तस्य तद्वचनं श्रुत्वा यथावृत्तं न्यवेदयत् ॥ [अयोध्याधिपतेः पुत्रो राज्ञो दशरथस्य हि ॥
मम यज्ञसमाप्त्यर्थमागतौ रामलक्ष्मणौ ॥ ७ ॥
सिद्धाश्रममनुप्राप्य राक्षसानभिहत्य च ॥ इमं देशमनुप्राप्तौ वीरौ दशरथात्मजौ] ॥
सिद्धाश्रमनिवासं च राक्षसानां वधं तथा ॥ ८ ॥

अथरामस्यपरमपावनत्वंदर्शयत्यष्टचत्वारिंशे—पृष्ट्वात्वित्यादि । परस्परेत्यविभक्तिकनिर्देशः । परस्परंकुशलंपृष्ट्वा कथान्ते तदुत्तरान्तेइतियोजना ॥ १ ॥ इमावित्यादिपञ्चश्लोकी । इमौकुमारौ कोयंकुमारभावइतिविस्मयते । दृष्टिदोषोमाभूदित्याह—भद्रंतइति । देवतुल्यपराक्रमौ संस्थानविशेषदर्शनेननूनमेतौविष्णुतुल्यपराक्रमावितिमन्यामहे । गजसिंहगतीवीरौशार्दूलवृषभोपमौ ॥ चतुर्गतित्वमुच्यते । गांभीर्यगमनेगजतुल्यौ पराभिभवनार्हगमनेसिंहतुल्यौ भयंकरगमने शार्दूलतुल्यौ सगर्वगमनेवृषभसदृशावित्यर्थः । विशेषणरावयतः शत्रूनितिवीरौ अनुभवितॄणांविरोधिनिवर्तकावित्यर्थः । पद्मपत्रविशालाक्षौ द्रष्टॄणामाकर्षकावयवविशेषौ । नयनसौन्दर्यंहि लावण्यपरमकाष्ठा । खड्गतूणीधनुर्धराविति आभरणकोटौ आयुधकोटौच एषामन्तर्भावः । अश्विनाविवरूपेण । रूपवत्सु अश्विनौ प्रसिद्धौ । रूपेणासाधारणधर्मेण ताविवस्थितौ । समुपस्थितयौवनौ रूपानुरूपंप्रादुर्भवद्यौवनौ । यदृच्छयैव भाग्यवशादेव । देवलोकाद्गां भुवं । प्राप्तौ अमरौ कौचिद्देवशेषाविवस्थितौ । तेजसादेवकुमारतुल्यावित्यर्थः । एतत्तेजोविशेषविलोकनेनैतौमर्त्यावपिअमर्त्याविविप्रतिभातीतिभावः । कथंपद्भ्यांइहप्राप्तौ अतीवकोमलाभ्यांपद्भ्यामिहदुर्गमेपथिकथंप्राप्तावित्युदरंपरिस्पृशति । किमर्थं एतद्रूपदर्शनेनैवावाप्तसमस्तकामाविति निश्चितुमः । कस्यवापुत्रावित्यर्थः । यद्वा कस्यपुरुषस्यकतमप्रयोजनायइहप्राप्तावित्यर्थः । मुने सर्वज्ञोभवानिममर्थंजानात्येवेत्यर्थः । चन्द्रसूर्याविवम्बरमिव इमंदेशंभूषयन्तौ शैत्यप्रतापाभ्यामुभावपिचन्द्रसूर्यतुल्यौ । अयंलोकोविष्णुपदमासीदितिभावः । भूषयन्तौ निजतेजसेतिभावः । प्रमाणं शरीरौन्नत्यादि । इङ्गितं अन्तर्गतभावसूचकस्मितादिचेष्टितं गमनभाषणविलोकनादि । एतैः परस्परसदृशौतुल्यपुरुषान्तराभावात् । नरश्रेष्ठावपिदुर्गमेपथिकिमर्थंसंप्राप्तौ । पूर्वंपद्भ्यांकथं प्राप्तावित्युक्तं संप्रतिदुर्गमंवनंकिमर्थंप्राप्तावित्युच्यते । वरायुधधरौ आयुधश्रेष्ठधनुरादिधरौ । पूर्वमाभरणान्वयेनखड्गादिकमुक्तं इदानींतान्येवायुधतयोच्यन्ते । यद्वा पूर्वोक्तानांवरायुधत्वमुच्यते । वरायुधधरौ आयुधश्रेष्ठधनुरादिधरौ । पूर्वमाभरणान्वयेनखड्गादिकमुक्तं इदानींतान्येवायुधतयोच्यन्ते । यद्वा पूर्वोक्तानांवरायुधत्वमुच्यते । वीरौ वीर्ययुक्तौ । पूर्ववीरशब्दोऽन्यथा व्याख्यातः । श्रोतुमिच्छामितत्वतः यद्यपि राजपुत्रौकस्यचिद्विघ्नस्यशान्तयेआगताविति सामान्यतोजानामि तथापि विशेषतोज्ञातुमिच्छामीत्यर्थः ॥२–७॥ स्वस्य-

ती० देवतुल्यपराक्रमौ इन्द्रतुल्यपराक्रमौ । शार्दूलवृषभोपमौ अधृष्यत्वेशार्दूलोपमौ सविलासगमनेवृषभोपमौ । पद्मपत्रविशा-

[पा०] १ घ. पृष्ट्वाच. २ झ. तूणधनुर्धरौ. ३ झ. ञ. परस्परेणसदृशौ. ४ ख. ग. मुनिश्रेष्ठ. ५ च. छ. ञ. कस्यपुत्रौ महामुने. ६ ख. यथान्यायंन्यवेदयत्. ७ एतच्छ्लोकद्वयं घ. च. छ. दृश्यते. ८ ख. ग. ट. राक्षसानांचतद्वधम्.

विश्वामित्रवचः श्रुत्वा राजा परमहर्षितः[1] ।। अतिथी परमौ[2] प्राप्तौ पुत्रौ दशरथस्य तौ ।।
पूजयामास विधिवत्सत्काराहौं महाबलौ ।। ९ ।।
ततः परमसत्कारं सुमतेः प्राप्य राघवौ ।। उष्य तत्र निशामेकां जग्मतुर्मिथिलां ततः ।। १० ।।
तान्[3]दृष्ट्वा मुनयः सर्वे जनकस्य पुरीं शुभाम् ।। साधुसाध्विति शंसन्तो मिथिलां समपूजयन् ।।११।।
मिथिलोपवने तत्र आश्रमं दृश्य राघवः ।। पुराणं निर्जनं[4] रम्यं पप्रच्छ मुनिपुङ्गवम् ।। १२ ।।
श्रीमदाश्रम[5]संकाशं किंन्विदं[6] मुनिवर्जितम् ।। श्रोतुमिच्छामि भगवन्कस्यायं पूर्व आश्रमः ।। १३ ।।
तच्छ्रुत्वा राघवेणोक्तं वाक्यं वाक्यविशारदः ।। प्रत्युवाच महातेजा विश्वामित्रो महामुनिः ।।१४।।
हन्त ते कथयिष्यामि शृणु तत्त्वेन राघव ।। यस्यैतदाश्रमपदं शप्तं[7] कोपान्महात्मना ।। १५ ।।
गौतमस्य नरश्रेष्ठ पूर्वमासीन्महात्मनः ।। आश्रमो दिव्यसंकाशः सुरैरपि सुपूजितः ।। १६ ।।
स[8] चेह तप आतिष्ठदहल्यासहितः पुरा ।। वर्षपूगान[9]नेकांश्च राजपुत्र महायशः[10] ।। १७ ।।
[कदाचि[11]द्दिवसे राम ततो दूरं गते[12] मुनौ] ।। तस्यान्तरं विदित्वा[13] तु सहस्राक्षः शचीपतिः ।।
मुनिवेषधरो[14]ऽहल्यामिदं वचनमब्रवीत् ।। १८ ।।
ऋतुकालं प्रतीक्षन्ते नार्थिनः सुसमाहिते ।। संगमं त्वहमिच्छामि त्वया सह सुमध्यमे ।। १९ ।।
मुनिवेषं सहस्राक्षं विज्ञाय रघुनन्दन ।। मतिं[15] चकार दुर्मेधा देवराजकुतूहलात् ।। २० ।।
अथाब्रवीत्सुरश्रेष्ठं कृतार्थेनान्तरात्मना ।। कृतार्थो[16]ऽस्मि सुरश्रेष्ठ गच्छ शीघ्रमितः[17] प्रभो ।। २१ ।।

सिद्धाश्रमनिवासं तत्र स्वयज्ञविघ्नकरराक्षसानामेताभ्यांवधं चकारादिमौदशरथकुमारौहरधनुर्दर्शनायमिथिलांगच्छतइत्येतत्समुच्चीयते । एतत्सर्वंयथावृत्तमत्रवीदितियोजना ।।८।। विश्वामित्रेतिसार्धश्लोकः ।। ९ ।। उष्य उषित्वा । ततः प्रातःकाले । मिथिलांप्रतीतिशेषः ।। १० ।। तान् मिथिलांप्रतिप्रस्थितान्रामादीन् । पूजाप्रकारः—साधुसाध्विति ।। ११ ।। मिथिलाया उपसमीपेवर्तमानंवनं मिथिलोपवनं तस्मिन् । शून्यं उटजसंस्थानरहितं । दृश्य दृष्ट्वा ।। १२ ।। आश्रमसंकाशं आश्रमवद्भासमानं । किंन्विदमित्यस्यविवरणंकस्यायमिति ।। १३—१४ ।। अहल्यानुग्रहहेतुकालस्मृतिजसंतोपे हन्तेति । महात्मना कोपाच्छप्तं प्राप्तशापं । इदमाश्रमपदंयस्यभवति तंकथयिष्यामितत्त्वेन शृणु ।। १५ ।। दिव्यसंकाशः दिव्यत्वेनभासमानः ।। १६ ।। वर्षपूगान् वर्षसमूहान् ।। १७ ।। अन्तरं मुनिरहितकालं । मुनिवेषधरः गौतमवेषधरः ।। १८ ।। ऋतुकालं ''षोडशर्तुर्निशास्त्रीणां'' इत्युक्तकालं । अर्थिनः कामाद्भोगार्थिनः । अनृतुकालत्वान्नायमवसरइत्यहल्यर्थाप्रतिषिद्धमित्यवगम्यते । सुसमाहिते सम्यक्ब्रह्मणानिर्मिते । अतिसुन्दरीत्यर्थः ।। १९ ।। सहस्राक्षंविज्ञाय कदाचिदपिमुनिनैवमर्थनाभावादन्यस्यात्रप्रवेष्टुमशक्तेरिन्द्रस्यैवासनिबहुकालमभिलापश्रवणाच्चेतिभावः ।। २० ।। कृतार्थेन संतुष्टेनेत्यर्थः । अन्तरात्मना मनसाउपलक्षिता ।। २१ ।।

लाक्षाविल्यनेन भाग्यसंपत्तिस्सूचिता । ति० प्रभुत्वाद्गजगतीरामः । अन्यगतिर्लक्ष्मणः । तथाशार्दूलाकृतीरामः वृषभाकृतिर्लक्ष्मणः । शि० किंच देवौ क्रीडाशीलौ । तुल्यपराक्रमौ परस्परंसदृशपराक्रमौ ।। २ ।। ति० तस्यआश्रमस्य । अन्तरं मुनिसंनिधानरहितंकालं । शचीपतिरित्यनेनशचीतोपिसौन्दर्यमहल्यायाध्वनितं । मुनिवेषधरः गौतमवेषधरः । ममरूपंसमास्थायेतिवक्ष्यमाणत्वात् ।। १८ ।। ति० सहस्राक्षंविज्ञाय ऋतुकालंप्रतीक्षन्तेनार्थिनः इतिवचनात्तपसाच आश्रमवर्तिसर्वप्राणिजातस्यशङ्काभावायगौतम-

[पा०] १ च. छ. झ. ञ. परमविस्मितः. २ झ. परमंप्राप्तौ. ३ झ. ट. तांदृष्ट्वा. ञ. तेदृष्ट्वा. ४ ख. निर्जनंरामः. ५ झ. ञ. इदमाश्रमसंकाशं. ६ च. छ. ञ. किंत्विदंमुनिवर्जितम्. ७ झ. ट. कोपान्महात्मनः. ख. कोपान्महर्षिणा. क. ञ. महामुनेः. ८ ङ. च. छ. झ. ञ. सचात्रतपआतिष्ठत्. ९ ख. ग. च—ट. वर्षपूगान्यनेकानि. १० ख. ज. महायशाः. ११ इदमर्धं क. ख. ङ. च. छ. ञ. दृश्यते. १२ ङ. च. छ. दूरगतेमुनौ. १३ ज. ट. त्वाथ. ङ. च. छ. ञ. विदित्वाच. १४ ङ. च. छ. झ. ञ. धरोभूत्वाअहल्यामिदमब्रवीत्. १५ क. ख. च. झ. ञ. रतिंचकार. १६ ग. कृतार्थोसि. १७ घ. शीघ्रमलक्षितः.

आत्मानं मां च देवेश [1]सर्वदा रक्ष मानद ॥ इन्द्रस्तु प्रहसन्वाक्यमहल्यामिदमब्रवीत् ॥ २२ ॥
[2]सुश्रोणि परितुष्टोस्मि गमिष्यामि यथागतम् ॥ २३ ॥
एवं [3]संगम्य तु तया निश्चक्रामो[4]टजात्ततः ॥ [5]ससंभ्रमात्त्वरन्राम शङ्कितो गौतमं प्रति ॥ २४ ॥
गौतमं [6]स ददर्शाथ प्रविशन्तं महामुनिम् ॥ देवदानवदुर्धर्षं तपोबलसमन्वितम् ॥ २५ ॥
तीर्थोदकपरिक्लिन्नं दीप्यमानमिवानलम् ॥ गृहीत[7]समिधं तत्र सकुशं मुनिपुङ्गवम् ॥ २६ ॥
दृष्ट्वा सुरपतिस्त्रस्तो वि[8]वर्णवदनोऽभवत् ॥ २७ ॥
अथ दृष्ट्वा सहस्राक्षं मुनिवेषधरं मुनिः ॥ दुर्वृत्तं वृत्तसंपन्नो रोषाद्वचनमब्रवीत् ॥ २८ ॥
मम रूपं समास्थाय कृतवानसि दुर्मते ॥ अ[9]कर्तव्यमिदं तस्माद्विफलस्त्वं भविष्यसि ॥ २९ ॥
[10]गौतमेनैवमुक्तस्य [11]संरोषेण महात्मना ॥ पेततुर्वृषणौ भूमौ सहस्राक्षस्य तत्क्षणात् ॥ ३० ॥
[[12]व्यथितस्सहसा चासीद्धतौजा विफलीकृतः ॥ धर्षितस्तपसोग्रेण कश्मलं चैवमाविशत्] ॥३१॥
[13]तथा शप्त्वा [14]स वै शक्रमहल्यामपि शप्तवान् ॥ इह वर्षसहस्राणि [15]बहूनि त्वं निवत्स्यसि ॥ ३२ ॥
[16]वायुभक्षा निराहारा [17]तप्यन्ती भस्मशायिनी ॥ अदृश्या सर्वभूताना[18]माश्रमेस्मिन्निवत्स्यसि ॥ ३३ ॥
[19]यदा चैतद्वनं घोरं रामो दशरथात्मजः ॥ आगमिष्यति दुर्धर्षस्तदा पूता भविष्यसि ॥ ३४ ॥

रक्ष अप्रकाशगमनादितिभावः ॥ २२ ॥ सुश्रोणीत्यर्धं ॥ २३ ॥ सः । संभ्रमात् भयात् । "संभ्रमोह्यादरे भये" इतिनिघण्टुः । शङ्कितः शङ्कावान् ॥ २४ ॥ गौतममितिश्लोकद्वयं । अथ उटजान्निष्क्रमणकालएव । परिक्लिन्नं स्नात्वाऽऽगतमित्यर्थः । तत्र आश्रमे ॥२५—२६ ॥ दृष्ट्वेत्यर्धं । विवर्णवदनः शुष्कमुखः ॥ २७ ॥ मुनिवेषधरं स्ववेषधरं ॥ २८ ॥ स्वभार्यासंगमस्यदुःशीलत्वेनावाच्यत्वादिदमित्याह । विफलः विगतवृषणः । "लाभनिष्पत्तिभोगेषुवीजेफालेधनेफलं" इतिनिघण्टुः ॥ २९—३२ ॥ कथंनिवासमात्रस्यशापत्वमितितद्विवृणोति—वायुभक्षेति । निराहारा अन्नपानादिरहिता । तप्यन्ती तप्यमाना । भस्मशायिनी भस्मशयना । अत्रबुद्धिपूर्वकव्यभिचारस्यविधीयमानंप्रायश्चित्तंशापापदेशेनोच्यते । एवंव्यक्ततयावाल्मीकिवचनेस्थिते शैलीभवेतिशापः रामपादस्पर्शात्शिलात्वमुक्तिरितिपुराणकथा कल्पान्तरवृत्तमनुसृत्येतिबोध्यं ॥ ३३ ॥ पूता भविष्यसि तत्पादपरागस्पर्शादितिभावः । एतेनबहुवर्षप्रायश्चित्तकरणमपिभगवत्पादरेणुस्पर्शस्यकलांनार्ह-

---

वेषोऽयमिन्द्रइतिज्ञात्वेत्यर्थः । देवराजकुतूहलात् समामभिलषतीतिकौतुकात् दिव्यरतिकौतुकाच्चेत्यर्थः ॥ २० ॥ ति० शीघ्रगमनेहेतुःशापतोरक्षणं । विशिष्टस्त्रीचरितेनप्रहासः रक्षणस्यदुर्लभत्वाद्वा गौतमतपोभङ्गस्यस्वेष्टस्यकरणेनाग्रिमशापादिभयमल्पमितिवा ॥२२॥ ति० तप्यन्ती स्वकृताकार्यस्मरणेनपीडिता । पुराणादिप्रसिद्धशिलारूपप्राप्तिशापस्तुकल्पान्तरीणइतिनविरोधः । अत्रशिलारूपत्वेतात्पर्यकल्पने वातभक्षेत्यनेनविरोधःस्पष्टएवेतिकेचित् । वस्तुतस्तुअदृश्येत्यस्यस्वरूपेणादृश्या शिलाप्रतिमारूपेणसर्वदृश्येत्यर्थः । नचतावताचैतन्यहानिरितिक्षुधापीडास्यादेवेत्यतोवातभक्षा । तदतिरिक्ताहाराभावाच्चनिराहारा । तप्यन्तीस्वकर्मणेतिशेषः । तादृश्यपिभस्मशायिनीनतुस्थिता इतिनकश्चिद्विरोधः ॥ अयंशापउपलक्षणमत्रानन्तभगवत्त्वशापस्य । तदुक्तंपाद्मे । "शापदग्धापुराभर्त्रारामशक्रापराधतः । अहल्याख्याशिलाजज्ञेशतलिङ्गःकृतस्स्वराट्"इति । शिला तत्प्रतिमाकारा । शतशब्दोऽनन्तवाची । लिङ्गशब्देनभगाकारंचिह्नं । स्वराडिन्द्रः ॥ ३३ ॥

[पा०] १ ग. ङ. च. छ. झ. ञ. ट. सर्वथारक्ष. ङ. च. छ. झ. ञ. रक्षगौतमात्. २ क. ख. ग. च. परितुष्टोस्मिसुश्रोणि. ३ ङ. झ. संगम्यतुतदा. च. छ. संगम्यतुतथा. ४ ख. टजात्तदा. ५ ख. घ. ससंभ्रमस्त्वरन्. ज. ससंभ्रमात्परिक्रामन्. ६ क—ज. ञ. ट. संददर्शाथ. ७ ख. समिधंशक्रः. ८ ख. ग. च—ट. विषण्णवदनोऽभवत्. ९ ङ—ट. अकर्तव्यमिदंयस्मात्. १० ग. गौतमेनैवमुक्तेतु. ११ झ. सुरोषेण. घ. गौतमेनैवमुक्तस्यसहस्राक्षस्यतत्क्षणात्. पेततुर्वृषणौभूमौसरोषेणमहात्मना. १२ अयंश्लोकः ख. दृश्यते. १३ घ. अथशप्त्वाचवैशक्रंभार्यामपिचशप्तवान्. ङ. च. छ. झ. ञ. ट. तथाशप्त्वाचवैशक्रं भार्यामपिच. क. तथाशप्त्वासहस्राक्षं. १४ ख. थदेवेशं. १५ ङ. च. छ. झ. ञ. बहूनिनिवसिष्यसि. घ. बहून्यत्रनिवत्स्यसि. १६ ङ. च. छ. झ. ञ. वातभक्षा. क. वायुभक्षाशिलाभूत्वा. १७ ख. मलिनाभस्मशायिनी. १८ ङ—ट. माश्रमेऽस्मिन्वसिष्यसि. क. ख. घ. माश्रमेस्मिन्भविष्यसि. १९ ख. ङ—ट. यदात्वेतद्वनं.

तस्या[1]तिथ्येन दुर्वृत्ते लोभमोहविवर्जिता ॥ [2]मत्सकाशे मुदा युक्ता स्वं वपुर्धारयिष्यसि ॥ ३५ ॥
एवमुक्त्वा महातेजा गौतमो दुष्टचारिणीम् ॥ इममाश्रममुत्सृज्य सिद्धचारणसेविते ॥
हिमवच्छिखरे रम्ये तपस्तेपे महातपाः ॥ ३६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे अष्टचत्वारिंशः सर्गः ॥ ४८ ॥

एकोनपञ्चाशः सर्गः ॥ ४९ ॥

देवैः गौतमशापेनवृषणरहितस्यदेवेन्द्रस्यपितृदेवप्रसादनेनमेषवृषणसंयोजनम् ॥ १ ॥ विश्वामित्रनिदेशेनगौतमाश्रमप्रवेशिनोरामस्यदर्शनमात्रेणप्रादुर्भूतदिव्यरूपयाऽहल्ययातदानींसंनिहितेनगौतमेनसहश्रीरामाराधनम् ॥ २ ॥

अफलस्तु ततः शक्रो [3]देवानग्निपुरोधसः ॥ अब्रवीत्त्रस्त[4]वदनः [5]सर्षिसङ्घान्सचारणान् ॥ १ ॥
कुर्वता तपसो विघ्नं गौतमस्य महात्मनः ॥ [6]क्रोधमुत्पाद्य हि मया सुरकार्यमिदं कृतम् ॥ २ ॥
अफलोस्मि कृतस्तेन क्रोधात्सा च निराकृता ॥ शापमोक्षेण महता तपोस्यापहृतं मया ॥ ३ ॥
त[7]स्मात्सुरवराः सर्वे सर्षिसङ्घाः सचारणाः ॥ [8]सुरसाह्यकरं [9]सर्वे सफलं कर्तुमर्हथ ॥ ४ ॥
शतक्रतोर्वचः श्रुत्वा देवाः साग्निपुरोगमाः ॥ पितृदेवानुपेत्याहुः [10]सर्वे सह मरुद्गणैः ॥ ५ ॥
[[11]पुराऽविचार्य मोहेन ऋषिपत्नीं शतक्रतुः ॥ धर्षयित्वा मुनेश्शापात्तत्रैव विफलः कृतः ॥
इदानीं कुप्यते देवान्देवराजः पुरन्दरः] ॥ ६ ॥
अयं मेषः सवृषणः शक्रो ह्यवृषणः कृतः ॥ मेषस्य वृषणौ गृह्य शक्रायाशु [12]प्रयच्छथ ॥ ७ ॥

तीत्युक्तं ॥ ३४ ॥ पूतत्वेपिपूर्वरूपप्राप्तिस्तत्पादपूजांविनानसंभवतीत्याह—तस्येति । मत्सकाशे मत्समीपे । स्थितेतिशेषः । स्वंवपुः दृश्यंवपुः । केचिदिदंश्लोकद्वयंप्रक्षिप्तमित्याहुः । तन्न । "स्मरन्तीगौतमवचः" इत्याद्युत्तरसर्गवचनविरोधात् ॥ ३५ ॥ एवमितिसार्धश्लोकः । तपस्तेपे तच्छापकृतपापप्रायश्चित्तार्थं ॥३६॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने अष्टचत्वारिंशः सर्गः ॥ ४८ ॥

अनयोर्द्वयोःशापयोरेकःपूर्वमेवमुक्तः अपरस्त्वयामोचनीयइत्याशयेनाह एकोनपञ्चाशे—अफलइत्यादि । अग्निपुरोधसः अग्निपुरोगमान् । त्रस्तवदनः त्रस्तशब्देनतत्कार्यदैन्यमुच्यते ॥१॥ महात्मनःगौतमस्य तपसः अस्मत्पदच्यवनकारणस्य विघ्नं। क्रोधमुत्पाद्य तस्यक्रोधजननमुखेन कुर्वतामयाइदं गौतमतपोभङ्गरूपं । सुरकार्यकृतं सर्वदेवपदच्यवनार्हतपोगौतमेनकृतं । तस्यतपोनाशकमहाक्रोधोत्पादनायतद्भार्ययातुमयाव्यभिचारःकृतइत्यर्थः ॥२॥ तेन गौतमेन । सा अहल्या । निराकृता शापमोक्षपूर्वकंत्यक्ता । शापमोक्षेण मयिअहल्यायांचशापदानेन ॥ ३ ॥ हेसर्वेसुरवरा इतिसंबोधनं । द्वितीयसर्वशब्दस्य सर्वेयूयमितिसंबन्धः । साह्यं साहाय्यं । सफलं मामितिशेषः ॥ ४ ॥ पितृदेवान् अग्निकव्यवाहनादीन् ॥ ५—६ ॥ अयं इदानीं

शि० मत्सकाशंममसकाशःसामीप्यंयस्मात् मत्समीपगमनयोग्यमित्यर्थः । स्वंवपुः । अत्रप्रार्थनामन्तरेणानुग्रहवचनोक्त्यामुनेर्दयालुत्वंव्यक्तं । **ती०** स्वंवपुर्धारयिष्यसीत्यनेन पद्मपुराणोक्तपाषाणावस्थासूच्यते । तथाचपाद्मे "साततस्तस्यरामस्यपादस्पर्शान्महात्मनः । अभूत्सुरूपावनितासमाक्रान्तामहाशिला" इति ॥ ३५ ॥ इत्यष्टचत्वारिंशस्सर्गः ॥ ४८ ॥

[पा०] १ ख. तस्यातिथ्यंसुदुर्वृत्तेकृत्वापापविवर्जिता. २ ङ—ट. मत्सकाशं. ३ ङ—ञ. देवानग्निपुरोगमान्. ख. घ. देवान्साग्निपुरोधसः. ४ ङ. च. छ. झ. ञ. त्रस्तनयनः. ख. दार्तवदनः. ५ ङ. च. छ. झ. ञ. सिद्धगन्धर्वचारणान्. ६ ख. कोपमुत्पाद्य. ७ क. ङ. ज. झ. ञ. तन्मांसुरवराः. ख. तन्मांसुरगणाः. ८ ग. सुरसाह्यकृतं. क. ख. ङ. झ. ञ. सुरकार्यकरं. ९ ङ. झ. यूयंसफलं. ख. नित्यंसफलं. १० ख. ग. सहसर्वैर्मरुद्गणैः. ज. सर्वैस्सहमरुद्गणैः. ११ इदमर्धत्रयं ख. घ. छ. दृश्यते. १२ ग. ङ. झ. प्रयच्छत. च. छ. ञ. प्रदीयताम्.

अफलस्तु कृतो मेषः [1]परां तुष्टिं प्रदास्यति ॥ ८ ॥
भवतां [2]हर्षणार्थे च ये च दास्यन्ति मानवाः ॥ [[3]अक्षयं हि फलं तेषां यूयं दास्यथ पुष्कलम्] ॥९॥
[4]अग्नेस्तु वचनं श्रुत्वा पितृदेवाः समागताः ॥ उत्पाट्य मेषवृषणौ सहस्राक्षे न्यवेशयन् ॥ १० ॥
तदाप्रभृति काकुत्स्थ पितृदेवाः समागताः ॥ अफलान्भुञ्जते मेषान्फलैस्तेषामयोजयन् ॥ ११ ॥
इन्द्रस्तु मेषवृषणस्तदाप्रभृति राघव ॥ गौतमस्य प्रभावेन [5]तपसश्च महात्मनः ॥ १२ ॥
तदागच्छ [6]महातेज आश्रमं पुण्यकर्मणः ॥ तारयैनां महाभागामहल्यां देवरूपिणीम् ॥ १३ ॥
विश्वामित्रवचः श्रुत्वा राघवः सहलक्ष्मणः ॥ विश्वामित्रं पुरस्कृत्य [7]तमाश्रममथाविशत् ॥ १४ ॥
ददर्श च महाभागां तपसा द्योतितप्रभाम् ॥ लोकैरपि समागम्य दुर्निरीक्ष्यां सुरासुरैः ॥ १५ ॥
प्रयत्नान्निर्मितां धात्रा दिव्यां मायामयीमिव ॥ [8]सतुषारावृतां साभ्रां पूर्णचन्द्रप्रभामिव ॥ १६ ॥
[[9]धूमेनापि [10]परीताङ्गीं दीप्तामग्निशिखामिव] ॥ मध्येऽम्भसो दुराधर्षां दीप्तां सूर्यप्रभामिव ॥ १७ ॥
[11]सा हि गौतमवाक्येन दुर्निरीक्ष्या बभूव ह ॥ त्रयाणामपि लोकानां यावद्रामस्य [12]दर्शनम् ॥
शापस्यान्तमुपागम्य तेषां दर्शनमागता ॥ १८ ॥
[13]राघवौ त्वतिथी तस्याः पादौ जगृहतु[14]स्तदा ॥ स्मरन्ती गौतमवचः प्रतिजग्राह [15]सा च तौ ॥ १९ ॥
पाद्यमर्घ्यं [16]तथाऽऽतिथ्यं चकार सुसमाहिता ॥ प्रतिजग्राह काकुत्स्थो विधिदृष्टेन कर्मणा ॥ २० ॥

यज्ञेयुष्मभ्यंनियुज्यमानोमेषः । गृह्य गृहीत्वा ॥ ७ ॥ तद्दानेऽस्मत्तुष्टिवैकल्यंस्यादित्यत्राह—अफलइत्यर्धं । प्रदास्यतीत्यनुगृह्णन्ति ॥ ८ ॥ दातृणामपिफलन्यूनतानभवत्वित्यनुगृह्णन्ति । भवतामिति । दास्यन्ति अवृपणमितिशेषः ॥ ९ ॥ अग्निपुरःसराणामित्यर्थः । मेषस्य तदायूपेनियुक्तस्यमेषस्यवृषणौ ॥ १० ॥ तदाप्रभृति वृषणदानात्प्रभृति । दत्तसजातीयत्वाद्वृषणौविनामेषान्भुञ्जते । तेषां सवृषणानां । फलैः सवृषणमेषदानफलैरित्यर्थः । अयोजयन् दातॄनितिशेषः ॥ ११ ॥ गौतमस्यतपसःप्रभावेनवृषणहान्या मेषवृषणोभूदित्यर्थः ॥१२॥ तत् त्वदागमनावधित्वादहल्याशापस्येत्यर्थः ॥ १३–१४ ॥ रामसंनिधानमात्रेणाहल्यामुक्तशापास्वरूपंप्राप्तेत्याह—ददर्शचेति सार्धश्लोकद्वयं । तपसा वाग्व्याहारत्वादितपसा । द्योतितप्रभां अतिशयितप्रभां । अतएव लोकैः मानुषैः । सुरासुरैरपि । समागम्य समीपमागत्य । दुर्निरीक्ष्यां । दिव्यां अतिमानुषरूपां । मायामयीमिव मायानिर्मितामिवस्थितां । वृक्षलताकुसुमान्तर्वर्तित्वेनसतुषारावरणां । साभ्रांचन्द्रप्रभामिवस्थितां । आवृतशब्दआवरणार्थकः । भावेनिष्ठा सइतिभिन्नंपदंवा । अक्रौर्यदुर्निरीक्ष्यत्वाभ्यांप्रतिबिंबसूर्यप्रभातुल्यां ॥ १५–१७ ॥ अदृश्यासाकथमिदानींदृश्याऽऽसीदित्यत्राहसार्धेन—साहीत्यादि ॥ १८॥ तस्याः वृद्धमुनिपत्न्याः । गौतमवचः "तस्यातिथ्येन दुर्वृत्ते" इत्यादिकं । प्रतिजग्राह पूजनीयत्वेनेतिशेषः ॥ १९ ॥ विधिदृष्टेन शास्त्रदृष्टेन । कर्मणा प्रकारेण ।

ति० अंभसः लक्षणयातद्युक्तमेघस्य मध्यस्थांरविप्रभामिवददर्श ॥ १७ ॥ ति० तौरामपादौप्रतिजग्राह स्पृष्ट्वाप्रणनाम । वस्तुतौ रामलक्ष्मणौ प्रतिजग्राह पूज्यत्वबुद्धिमकरोदिति । तन्न । अग्रेकाकुत्स्थइत्येकवचनप्रयोगात् ॥ शि० तौरामलक्ष्मणौ ॥ १९ ॥ शि० काकुत्स्थः लक्ष्मणसहितोरामः । ति० काकुत्स्थोरामः । तस्यैवमुख्यतयापूजमात् ॥ २० ॥ इत्येकोनपञ्चाशस्सर्गः ॥ ४९ ॥

[पा०] १ ज. सर्वांतुष्टिं. २ ङ. च. छ. झ. ञ. ट. हर्षणार्थंच. क. ख. ग. ज. हर्षणार्थाय. ३ इदमर्धं ग. ङ. च. छ. झ. ञ. ट. दृश्यते. ४ ख. इत्यग्नेर्वचनंश्रुत्वा. ५ ङ––ञ. तपसाचमहात्मनः. ट. तापसस्य. ६ ख. ग. महातेजाः. ७ ग. तदाश्रममथाविशत्. क. ख. घ––ट. आश्रमंप्रविवेशह. ८ क. तुषारेणावृतांसाभ्रां. ९ इदमर्धं क. घ––ट. दृश्यते. क. ख. ङ. च. छ. झ. ञ. ट. पुस्तकेषुसतुषारावृतां––धूमेनापिपरीताङ्गीं–इत्यर्धयोर्व्युत्क्रमोदृश्यते. ग. पुस्तकेसूर्यप्रभामिवेत्यनन्तरं–धूमेनापीत्यर्धंदृश्यते. १० ङ. झ. ट. भिपरीतांगीं. ११ च. छ. ज. ट. सापिगौतम. १२ घ. ट. दर्शनात्. १३ ङ. च. छ. झ. ञ. राघवौतुतदातस्याः. क––घ. राघवौतुततस्तस्याः. ज. तथातस्याः. १४ ङ. च. छ. झ. ञ. मुदा. १५ क. घ––छ. झ. ञ. ट. सापितौ. १६ ग. तदातिथ्यं. मथातिथ्यं.

पुष्पवृष्टिर्महत्यासीद्देवदुन्दुभिनिस्वनैः ॥ गन्धर्वाप्सरसां चापि महानासीत्समागमः ॥ २१ ॥
साधुसाध्विति देवास्तामहल्यां समपूजयन् ॥ तपोबलविशुद्धाङ्गीं गौतमस्य वशानुगाम् ॥ २२ ॥
गौतमो हि महातेजा अहल्यासहितः सुखी ॥ रामं संपूज्य विधिवत्तपस्तेपे महातपाः ॥ २३ ॥
रामोपि परमां पूजां गौतमस्य महामुनेः ॥ सकाशाद्विधिवत्प्राप्य जगाम मिथिलां ततः ॥ २४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे एकोनपञ्चाशः सर्गः ॥ ४९ ॥

पञ्चाशः सर्गः ॥ ५० ॥

जनकेनरामलक्ष्मणाभ्यांसहविश्वामित्रस्यस्वपुरपरिसरागमनश्रवणाच्छतानन्देनसहप्रत्युद्गमनेनपरिपूजनम् ॥ १ ॥ विश्वामित्रेणजनकंप्रतिसाकल्येनरामवृत्तान्तनिवेदनपूर्वकंधनुर्दिदृक्षाकथनम् ॥ २ ॥

ततः प्रागुत्तरां गत्वा रामः सौमित्रिणा सह ॥ विश्वामित्रं पुरस्कृत्य यज्ञवाटमुपागमत् ॥ १ ॥
रामस्तु मुनिशार्दूलमुवाच सह[illegible] ॥ साध्वी यज्ञसमृद्धिर्हि जनकस्य महात्मनः ॥ २ ॥
बहूनीह सहस्राणि नानादे[illegible] ॥ ब्राह्मणानां महाभाग वेदाध्ययनशालिनाम् ॥ ३ ॥
ऋषिवाटाश्च दृश्यन्ते शकटीशतसंकुलाः ॥ देशो विधीयतां ब्रह्मन्यत्र वत्स्यामहे वयम् ॥ ४ ॥
रामस्य वचनं श्रुत्वा विश्वामित्रो महामुनिः ॥ निवेशमकरोद्देशे विविक्ते सलिलायुते ॥ ५ ॥
विश्वामित्रमनुप्राप्तं श्रुत्वा स नृपतिस्तदा ॥ शतानन्दं पुरस्कृत्य पुरोहितमनिन्दितम् ॥
प्रत्युज्जगाम[11] सहसा विनयेन[12] समन्वितः ॥ ६ ॥
ऋत्विजोपि महात्मानस्त्वर्घ्यमादाय सत्वरम्[13] ॥ विश्वामित्राय धर्मेण ददुर्[14]मन्त्रपुरस्कृतम् ॥ ७ ॥

पाद्यादिकंचकारेत्यन्वयः ॥ २० ॥ रामस्येतिशेषः । सम्यगागमःसमागमः नृत्तगीतादिकमितियावत् ॥ २१ ॥ गौतमस्यवशानुगामित्यनेन गौतमस्तदा रामागमनंविदित्वासमागतइत्यवगम्यते ॥ २२ ॥ तेपे तत्रैवाश्रमइतिशेषः ॥ २३ ॥ ततः तस्माद्देशात् ॥ २४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने एकोनपञ्चाशःसर्गः ॥ ४९ ॥

एवंरामस्यपरमपावनत्वमुक्तं अथतस्यसीताविवाहवृत्तान्तंप्रस्तौतिश्रियःपतित्वंप्रतिपादयितुंपञ्चाशे—ततः प्रागित्यादि। प्राच्याउत्तरस्याश्चदिशोन्तरालंयत्साप्रागुत्तरातां ऐशानींदिशमित्यर्थः । ततः तस्मादाश्रमात् । यज्ञवाटं जनकस्येतिशेषः ॥ १ ॥ यज्ञसमृद्धिः यज्ञसंभारसामग्री ॥२॥ तामेवाह—बहूनीति । ब्राह्मणानांसहस्राणीत्यन्वयः । दृश्यन्तइतिवक्ष्यमाणमनुषज्यते ॥ ३ ॥ ऋषिवाटाः ऋषिनिवासाः । विधीयतां कल्प्यतां । बहुसंकुलत्वेनैवमुक्तं ॥४॥ विविक्ते विजने पूतेवा । "विविक्तौपूतविजनौ" इत्यमरः। आयुते युक्ते । यौतेर्मिश्रणार्थात्क्तः ॥ ५ ॥ विश्वामित्रमितिसार्धश्लोकः । प्रत्युज्जगाम दीक्षितविमितप्रदेशसीमानमनतिलङ्घ्यन्नित्यर्थः ॥ ६ ॥ अर्घ्यमित्यातिथ्यस्योपल-

शि० इयंयज्ञसमृद्धिःसाध्वी । हिशब्दइयमित्यर्थे ॥२ ॥ वि० विश्वामित्रमित्यादिसार्धश्लोकद्वयमेकान्वयं । ऋत्विजोपीत्यत्रपुरस्कृत्येत्यनु[illegible]ः । महात्मानइतिद्वितीयार्थेप्रथमा । धर्मेण धर्मशास्त्रमार्गेण ददौ । अर्घ्यमितिशेषः । धर्मपुरस्कृतमित्यर्घ्यविशेषणं । "महाजंवामहोक्षंवाश्रोत्रियायोपकल्पयेत्" इतिशास्त्रोक्तेनधर्मसाधनेनपुरस्कृतं तत्सहितमितियावत् ॥ शि० सत्वराः त्वरायुक्ताः महात्मानऋत्विजः धर्मेण धर्मोत्पादकविधिना मन्त्रपुरस्कृतंअर्घ्यमादाय ग्राहयित्वा ददुः जनकेनदापयामासुः ॥ ७ ॥

[पा०] १ क—घ. च. दुंदुभिनिस्वनः. २ ख. गन्धर्वाप्सरसानांच. क. ङ. च. छ. झ. ञ. अप्सरसांचैव. ३ क. ख. ङ. च. छ. झ. ञ. तसमुत्सवः. ४ ट. महायशाः. ५ ख. घ. ज. ट. महात्मनः. ६ क. ङ. च. छ. झ. ञ. ट. निवासमकरोद्देशे. ७ क. ङ. ञ. झ. ट. सलिलान्विते. ८ क—घ. विश्वामित्रंमुनिश्रेष्ठं. ९ ङ. च. छ. झ. ञ. नृपवरस्तदा. १० ङ. च. छ. झ. ञ. मनिन्दितः. ११ ङ. च. छ. झ. ञ. पुस्तकेषु प्रत्युज्जगामसहसा—ऋत्विजोपिमहात्मानः इत्यर्धयोःपौर्वापर्यं. १२ ज. विस्मयेनसमन्वितः. १३ क. ख. ग. ज. ट. सत्वराः. १४ ङ. छ. झ. ञ. ददौधर्मपुरस्कृतम्.

प्रतिगृह्य तु तां पूजां जनकस्य महात्मनः ॥ पप्रच्छ कुशलं राज्ञो यज्ञस्य च निरामयम् ॥ ८ ॥
स तांश्चापि मुनीन्पृष्ट्वा सोपाध्यायपुरोधसः ॥ यथान्यायं ततः सर्वैः समागच्छत्प्रहृष्टवत् ॥ ९ ॥
अथ राजा मुनिश्रेष्ठं कृताञ्जलिरभाषत ॥ आसने भगवन्नास्तां सहैभिर्मुनिसत्तमैः ॥ १० ॥
जनकस्य वचः श्रुत्वा निषसाद महामुनिः ॥ पुरोधा ऋत्विजश्चैव राजा च सह मन्त्रिभिः ॥ ११ ॥
आसनेषु यथान्यायमुपविष्टान्समन्ततः ॥ दृष्ट्वा स नृपतिस्तत्र विश्वामित्रमथाब्रवीत् ॥ १२ ॥
अद्य यज्ञसमृद्धिर्मे सफला दैवतैः कृता ॥ अद्य यज्ञफलं प्राप्तं भगवद्दर्शनान्मया ॥ १३ ॥
धन्योस्म्यनुगृहीतोस्मि यस्य मे मुनिपुङ्गव ॥ यज्ञोपसदनं ब्रह्मन्प्राप्तोसि मुनिभिः सह ॥ १४ ॥
द्वादशाहं तु ब्रह्मर्षे शेषमाहुर्मनीषिणः ॥ ततो भागार्थिनो देवान्द्रष्टुमर्हसि कौशिक ॥ १५ ॥
इत्युक्त्वा मुनिशार्दूलं प्रहृष्टवदनस्तदा ॥ पुनस्तं परिपप्रच्छ प्राञ्जलिः प्रणतो नृपः ॥ १६ ॥
इमौ कुमारौ भद्रं ते देवतुल्यपराक्रमौ ॥ गजसिंहगती वीरौ शार्दूलवृषभोपमौ ॥ १७ ॥
पद्मपत्रविशालाक्षौ खड्गतूणीधनुर्धरौ ॥ अश्विनाविव रूपेण समुपस्थितयौवनौ ॥ १८ ॥
यदृच्छयैव गां प्राप्तौ देवलोकादिवामरौ ॥ [पुण्डरीकविशालाक्षौ वरायुधधरावुभौ ॥ १९ ॥
बद्धगोधाङ्गुलित्राणौ खड्गवन्तौ महाद्युती ॥ काकपक्षधरौ वीरौ कुमाराविव पावकी ॥
रूपौदार्यगुणैः पुंसां दृष्टिचित्तापहारिणौ ॥ २० ॥
प्राकाश्यं कुलमस्माकं मामुद्धर्तुमिहागतौ] ॥ कथं पद्भ्यामिह प्राप्तौ किमर्थं कस्य वा मुने ॥ २१ ॥
वरायुधधरौ वीरौ कस्य पुत्रौ महामुने ॥ भूषयन्ताविमं देशं चन्द्रसूर्याविवांबरम् ॥ २२ ॥
परस्परस्य सदृशौ प्रमाणेङ्गितचेष्टितैः ॥ काकपक्षधरौ वीरौ श्रोतुमिच्छामि तत्वतः ॥ २३ ॥
तस्य तद्वचनं श्रुत्वा जनकस्य महात्मनः ॥ न्यवेदयन्महात्मानौ पुत्रौ दशरथस्य तौ ॥ २४ ॥

क्षणं । मन्त्रपुरस्कृतमित्यनेनमधुपर्ककरणमुच्यते ॥७॥ निरामयं निरुपप्लववत्वं ॥ ८ ॥ तान् अर्घ्यदातॄन् । सोपाध्यायपुरोधसः उपाध्यायाः ऋत्विजः । पुरोधाः शतानन्दः तत्सहितांस्तान् । कुशलंपृष्ट्वेत्यर्थः । सर्वैः जनैः शतानन्दऋत्विगादिभिः । प्रहृष्टवत् सहर्षमित्यर्थः । भावेनिष्ठा । यथान्यायं यथाक्रमं । पृष्ट्वेत्यन्वयः ॥ ९—१० ॥ राजाचेति विश्वामित्रवचनादित्यर्थसिद्धम् ॥ ११ ॥ उपविष्टान् तानितिशेषः ॥ १२ ॥ यज्ञसमृद्धिः समग्रता जातेतिशेषः । सादैवतैःसफलाकृताच । तिष्ठतुयज्ञः भवद्दर्शनमेवयज्ञफलमित्याह—अद्ययज्ञफलमिति ॥ १३—१४ ॥ द्वादशअहानिसमाहृतानिद्वादशाहं "राजाहस्सखिभ्यष्टच्" इतिटच् । "नसङ्ख्यादेः—" इत्यह्नादेशाभावः । द्वादशदिनान्यवशिष्टानियज्ञस्येतिमनीषिणऋत्विजआहुः । ततःभागार्थिनोदेवानिति द्वादशदिनान्तेसुत्याहोमोभविष्यतीत्यर्थः ॥ १५ ॥ प्रहृष्टेतिकुतूहलविशेषःसूच्यते ॥१६॥ इमावित्यादिश्लोकपञ्चकंव्याख्यातं ॥ १७—२३ ॥ तौ दशरथस्यपुत्राविति न्यवेदयदित्यर्थः ॥ २४ ॥

ति० यज्ञसमृद्धिः अङ्गवैकल्यराहित्यंसाद्गुण्यंच । अतएवसफलाकृता । इष्टिरितिशेषः ॥ १३ ॥ ति० दीक्षांकर्तव्यत्वेनाहुः । दीक्षायास्तावन्तिदिनान्यवशिष्टानिऋत्विजआहुः ॥ १५ ॥ इतिपञ्चाशस्सर्गः ॥ ५० ॥

[पा०] १ क. ग. प्रतिगृह्यच. २ ङ. च. छ. झ. ञ. ट. सतांश्चाथ. ज. सतानितिमुनिःपृष्ट्वा. क. ग. सतांश्चापिमुनिर्दृष्ट्वा. घ. सतांश्चायमुनिश्रेष्ठान्. ख. मुनीन्दृष्ट्वा. ३ क. ख. सोपाध्यायपुरोहितः. ४ ङ. च. छ. झ. ञ. ट. यथार्हमृषिभिस्सर्वैः. ख. यथान्यायंमुनिवरैः. घ. ज. यथान्यायमृषिस्सर्वैः. क. यथान्यायंमुनिवरान्. ५ घ. समागम्यप्रहृष्टवत्. ६ क. ग. ङ. च. छ. झ. ञ. ट. भगवानास्तां. ७ ख. ग. ङ. च. छ. झ. ञ. र्मुनिपुंगवैः. ८ क—छ. झ. ञ. ट. मुपविष्टास्समन्ततः. ९ ङ. झ. दीक्षामाहुर्मनीषिणः. ङ. च. छ. ञ. शेषमाहुर्मनस्विनः. १० क. घ. प्रहृष्टवदनंतदा. ख. प्रहृष्टवदनस्तथा. झ. प्रहृष्टवचनस्तदा. ११ क. ततःपुनस्तंपप्रच्छ. १२ क.—ट. प्रयतोनृपः. १३ ङ. झ. ञ. गजतुल्यगती. १४ ङ—ञ. यदृच्छयेव. १५ घ. ज. ट. संप्राप्तौ. १६ एतदर्धपंचकं क. ख. ज. दृश्यते. च. छ. पुस्तकयोःप्रमाणेङ्गितचेष्टितैरित्यतःपरंदृश्यते. १७ ख. महाबलौ. १८ ख. घ. ज. ट. रूपेणेङ्गितचेष्टितैः. १९ ख. सर्वलक्षणसंपन्नौ. क. कस्यपुत्रौमुनिश्रेष्ठ. २० क. ङ. च. छ. झ. ञ. दमेयात्मा.

सिद्धाश्रमनिवासं च [1]राक्षसानां वधं तथा ॥ त[2]च्चागमनमव्यग्रं विशालायाश्च दर्शनम् ॥ २५ ॥
अहल्यादर्शनं चैव गौतमेन समागमम् ॥ महाधनुषि जिज्ञासां [3]कर्तुमागमनं तथा ॥ २६ ॥
एतत्सर्वं महातेजा जनकाय महात्मने ॥ निवेद्य विररामाथ विश्वामित्रो महामुनिः ॥ २७ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे पञ्चाशः सर्गः ॥ ५० ॥

एकपञ्चाशः सर्गः ॥ ५१ ॥

विश्वामित्रेणशतानन्दंप्रतितन्मातुरहल्यायाःपत्यागौतमेनसौमनस्येनपरिपूजनकथनम् ॥ १ ॥ शतानन्देनरामंप्रतिविस्तरेणविश्वामित्रचरित्रकथनारंभः ॥ २ ॥ ब्रह्मपौत्रपौत्रेणविश्वामित्रेणराज्ञाकदाचनसहसेनयाभूसंचरणानुसारेणवसिष्ठाश्रमाभिगमनम् ॥ ३ ॥

तस्य तद्वचनं श्रुत्वा विश्वामित्रस्य धीमतः ॥ हृष्टरोमा महातेजाः शतानन्दो महातपाः ॥ १ ॥
गौतमस्य सुतो ज्येष्ठस्तपसा द्योतितप्रभः ॥ रामसंदर्शनादेव परं विस्मयमागतः ॥ २ ॥
[4]स तौ निषण्णौ संप्रेक्ष्य [5]सुखासीनौ नृपात्मजौ ॥ शतानन्दो मुनिश्रेष्ठं विश्वामित्रमथाब्रवीत् ॥ ३ ॥
[6]अपि ते मुनिशार्दूल मम माता यशस्विनी ॥ दर्शिता राजपुत्राय तपोदीर्घमुपागता ॥ ४ ॥
अपि रामे [7]महातेजा मम माता यशस्विनी ॥ वन्यैरुपाहरत्पूजां पूजार्हे सर्वदेहिनाम् ॥ ५ ॥
अपि रामाय कथितं [8]यथावृत्तं पुरातनम् ॥ मम मातुर्महातेजो दैवेन[9] दुरनुष्ठितम् ॥ ६ ॥
अपि कौशिक भद्रं ते गुरुणा मम संगता ॥ [10]माता मम मुनिश्रेष्ठ रामसंदर्शनादितः ॥ ७ ॥

सिद्धेत्यादित्रयः । अव्यग्रं रक्षस्सहस्रावृतेमार्गेनिर्भयागमनं ॥२५॥ जिज्ञासांसारासारपरीक्षां ॥२६—२७॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने पञ्चाशः सर्गः ॥ ५० ॥

अथाचार्यवैभवस्यज्ञेयत्वाभिप्रायेणविश्वामित्रचरित्रंप्रस्तौति—तस्यतद्वचनंइत्यादिभिःपञ्चदशभिःसर्गैः । तस्येत्यादिद्वौ । हृष्टरोमा संजातरोमाञ्चः । विस्मयमागतः अहोमहिमारामस्य यन्मेमाताकृतार्थीकृतेतिविस्मयंप्राप्तोभूदित्यर्थः ॥ १—२ ॥ निषण्णावित्यस्यविवरणं—सुखासीनाविति ॥३॥ स्वमातरिरामकृतानुग्रहस्यश्रुतस्यविस्मयावहतयापुनःपृच्छति—अपीत्यादि । अपिःप्रश्ने । ते त्वया । दीर्घतपउपागता पूर्वोक्तभस्मशायित्वादिलक्षणंतपःप्राप्ता । अनेनपाषाणीभूयस्थितेति पक्षोनवाल्मीकेः ॥ ४ ॥ रामे रामविषये । वन्यैः कन्दमूलफलादिभिः । अनेनपूर्वमपिवन्यैरेतस्यजीवनमितिगम्यते । सर्वदेहिनांपूजार्हइत्यनेन परत्वंव्यञ्जितं ॥ ५ ॥ हेमहातेजः विश्वामित्र । ममसातुर्विषये दैवेन इन्द्रेण विधिनावा । दुरनुष्ठितं दुरनुष्ठानरूपं । पुरातनंवृत्तं चरितं । यथा यथावत् । कथितंचापि कथितंकिं ॥ ६ ॥ गुरुणा पित्रा । इतः अस्मादुपस्थिताद्रामसंदर्शनात् । यद्वा रामसंदर्शनादितः रामसंदर्शनादिना । तृतीयार्थेतसिः । पूजा अपिशब्दार्थः ॥ ७ ॥

शि० विस्मयमागतः प्राप्तः । आसीदितिशेषः । एतेन रघुनाथशरीरशोभादेर्लौकिकविलक्षणत्वंध्वनितम् ॥२॥ शि० यशस्विनीत्यनेनपतिवेषोपिनानादरणीयइतिबुद्ध्येवेन्द्रस्वीकारःकृतइतिध्वनितम् । तेनतस्याःपतिव्रताग्रणीत्वंव्यक्तं ॥४॥ ति० । ममगुरुणा ममसातेत्यन्वयः । अत्रवारद्वयंममेतिप्रयोगःहर्षातिशयात् । रामसंदर्शनादितइत्यस्यगतशापेतिशेषः । आदिनापूजापादस्पर्शौ ॥७॥

[पा०] १ ख. राक्षसानांचतद्वधम्. २ ङ. झ. ट. तत्रागमन. ३ च. कर्तुमारोपणंतदा. क. ख. मारोपणंतथा. छ. ज. मागमनंतदा. ४ ङ. च. छ. झ. ञ. एतौनिषण्णौ. ५ ङ. च. छ. पुस्तकेषु. शतानन्दोनृपात्मजौ. सुखासीनौमुनिश्रेष्ठंइतिपाठक्रमो दृश्यते. ६ ख. घ. अपिसामुनिशार्दूल. ७ च. छ. ञ. महाभाग. ग. ट. महातेजो. ८ ङ. च. छ. झ. ञ. यद्वृत्तंतत्पुरातनम्. ९ ङ—ञ. देवेनदुरनुष्ठितम्. ट. देवेनयदनुष्ठितम्. ख. घ. दैवेनयदनुष्ठितम्. १० ग. ङ. च. छ. ञ. ममभाता.

अपि मे गुरुणा रामः पूजितः कुशिकात्मज ॥ इहागतो महातेजाः [1]पूजां प्राप्तो महात्मनः ॥ ८ ॥
अपि शान्तेन मनसा गुरुर्मे कुशिकात्मज ॥ इहागतेन रामेण [2]प्रयतेनाभिवादितः ॥ ९ ॥
तच्छ्रुत्वा वचनं तस्य विश्वामित्रो महामुनिः ॥ प्रत्युवाच शतानन्दं [3]वाक्यज्ञो वाक्यकोविदम् ॥ १० ॥
नातिक्रान्तं मुनिश्रेष्ठ यत्कर्तव्यं कृतं मया ॥ संगता मुनिना पत्नी भार्गवेणेव रेणुका ॥ ११ ॥
तच्छ्रुत्वा वचनं तस्य [4]विश्वामित्रस्य धीमतः ॥ शतानन्दो महातेजा रामं वचनमब्रवीत् ॥ १२ ॥
स्वागतं ते नरश्रेष्ठ दिष्ट्या प्राप्तोसि राघव ॥ विश्वामित्रं पुरस्कृत्य [5]महर्षिमपराजितम् ॥ १३ ॥
[6]अचिन्त्यकर्मा तपसा [7]ब्रह्मर्षिरतुलप्रभः ॥ विश्वामित्रो [8]महातेजा [9]वेत्स्येनं परमां गतिम् ॥ १४ ॥
नास्ति धन्यतरो राम त्वत्तोऽन्यो भुवि कश्चन ॥ गोप्ता कुशिकपुत्रस्ते येन तप्तं महत्तपः ॥ १५ ॥
[10]श्रूयतामभिधास्यामि कौशिकस्य महात्मनः ॥ यथाबलं [11]यथावृत्तं तन्मे निगदतः शृणु ॥ १६ ॥
[12]राजाऽभूदेष धर्मात्मा दीर्घकाल[13]मरिन्दमः ॥ [14]धर्मज्ञः कृतविद्यश्च प्रजानां च हिते रतः ॥ १७ ॥
प्रजापतिसुतस्त्वासीत्कुशो नाम महीपतिः ॥ कुशस्य पुत्रो बलवान्कुशनाभः सुधार्मिकः ॥ १८ ॥
कुशनाभसुतस्त्वासीद्गाधिरित्येव विश्रुतः ॥ गाधेः पुत्रो महातेजा विश्वामित्रो महामुनिः ॥ १९ ॥
विश्वामित्रो महातेजाः पालयामास मेदिनीम् ॥ बहुवर्षसहस्राणि राजा राज्यमकारयत् ॥ २० ॥
[15]कदाचित्तु महातेजा योजयित्वा [16]वरूथिनीम् ॥ अक्षौहिणीपरिवृतः परिचक्राम मेदिनीम् ॥ २१ ॥
नगराणि [17]च राष्ट्राणि सरितश्च [18]तथा गिरीन् ॥ आश्रमान्क्रमशो [19]रामं विचरन्नाजगाम ह ॥ २२ ॥
वसिष्ठस्याश्रमपदं [20]नानावृक्षसमाकुलम् ॥ नानामृगगणाकीर्णं सिद्धचारणसेवितम् ॥ २३ ॥
देवदानवगन्धर्वैः किंनरै[21]रुपशोभितम् ॥ [22]प्रशान्तहरिणाकीर्णं द्विजसङ्घनिषेवितम् ॥ २४ ॥

इह अस्मदाश्रमे । आगतः महातेजाः गुरुः । महात्मनः रामात् । पूजां अहल्यालाभरूपां । अपिप्राप्तः ॥ ८ ॥ शान्तेन कोपरहितेन । मनसा उपलक्षितोगुरुः । इह अस्मदाश्रमे । आगतेन । प्रयतेन मनस्सक्तिरूपयत्नवता । रामेण अभिवादितःकिं ॥ ९—१० ॥ नातिक्रान्तं मयासमयातिक्रमोनकृतः । समयेयत्कर्तव्यं तत्कृतं । तदेवाह—संगतेति । नातिक्रान्तमित्यस्यविवरणं—यत्कर्तव्यमिति । तस्यविवरणं—संगतेति । भार्गवेण जमदग्निना । रेणुका परशुराममातेवेतिभावः ॥ ११—१२ ॥ दिष्ट्या दैवयोगेन ॥ १३ ॥ विश्वामित्रंस्तौति—अचिन्त्येत्यादि । तपसाब्रह्मर्षिः तपसाप्राप्तब्रह्मर्षिभावः । परमांगतिं तवपरमहितप्रदं । वेत्सीत्यत्रकाकुरनुसन्धेया ॥ १४ ॥ एतदेवाह—नास्तीति । धन्यत्वेहेतुः—गोप्तेति । येन कुशिकपुत्रेण ॥ १५ ॥ बलं तपोबलं । यथा यादृशं । वृत्तं चरित्रंच । यथा यादृशं । तथा तत्सर्वं । मे मत्तः । शृणु ॥ १६—१७ ॥ कस्यराज्ञःपुत्रइत्यत्राह—प्रजापतीत्यादिश्लोकत्रयं ॥ १८—१९ ॥ पालयामासेत्यस्यविवरणं—बह्विति ॥ २० ॥ कदाचिदित्याद्यष्टौश्लोकाः । वरूथिनी चतुरङ्गबलं । योजयित्वा उपस्थाप्य ॥ २१—२३ ॥ प्रशान्तत्ववि-

ति० महातेजारामः मद्गुरोस्सकाशात्पूजांप्राप्य इहयज्ञभूमावागतइतिपृष्टस्यैवार्थस्सभङ्ग्यन्तरेणप्रश्नः ॥ ८ ॥ ति० शान्तेनमनसोपलक्षितोमेगुरुः । इहागतेन गौतमाश्रमेआगतेन । गौतमपूजितेनरामेणाभिवादितः । ननुमन्मातृदोषात्तिरस्कृतःइति प्रश्नान्तरं । पूजाङ्गीकारवन्दनेअतिरस्कारचिह्नमितिभावः ॥ ९ ॥ ति० गोप्ता अन्नदानादिना ॥ १५ ॥ ती० बलं क्षत्रबलं । यथा

[पा०] १ क—ट. पूजांप्राप्य. २ ङ. च. छ. झ. ञ. पूजितेनाभिवादितः. घ. प्रयत्नेनाभि. ३ घ. वाक्यज्ञंवाक्यकोविदः. ४ क—घ. ज. विश्वामित्रस्यभाषितं. ५ क. च. ञ. मभिपूजितम्. ६ च. अचिन्त्यतपसायुक्तो. ७ ग. ङ. च. छ. झ. ञ. रमितप्रभ. ८ ख. महाभाग. क. च. छ. ञ. महाबाहो. ९ ङ. झ. ट. वेदयेनं. १० ख—छ. झ. ञ. श्रूयतांचापि. ११ ख. ङ. च. छ. झ. ञ. यथातत्वं. १२ ङ. च. छ. झ. ञ. राजासीदेष. १३ क. ख. घ. च. मरिंदम. १४ क. ख. सर्वज्ञः. १५ घ. कदाचित्समहातेजाः. १६ ग. षडङ्गिनीम्. १७ ख. घ. सराष्ट्राणि. १८ क. ख. च. छ. झ. ञ. महागिरीन्. १९ क. ख. घ—छ. झ. ञ. ट. राजा. २० ङ. ज. झ. ट. नानापुष्पलताद्रुमम्. क. ख. घ. नानापुष्पफलद्रुमम्. च. नानापक्षिलताद्रुतम्. छ. ञ. नानापक्षिलताद्रुमम्. २१ घ. रपिसेवितम्. २२ क. ख. प्रकीर्णद्विजसंघातैर्हरिणौघनिषेवितम्.

ब्रह्मर्षिगणसंकीर्णं देवर्षिगणसेवितम् ॥ तपश्चरणसंसिद्धैरग्निकल्पैर्महात्मभिः ॥ २५ ॥
[[1]संततं संकुलं श्रीमद्ब्रह्मकल्पैर्महात्मभिः] ॥ [2]अब्भक्षैर्वायुभक्षैश्च शीर्णपर्णाशनैस्तथा ॥
फलमूलाशनैर्दान्तैर्जित[3]रोषैर्जितेन्द्रियैः ॥ २६ ॥
ऋषिभिर्वालखिल्यैश्च जपहोमपरायणैः ॥ अन्यैर्वैखानसैश्चैव समन्तादुपशोभितम् ॥ २७ ॥
वसिष्ठस्याश्रमपदं ब्रह्मलोकमिवापरम् ॥ ददर्श जयतां श्रेष्ठो विश्वामित्रो महाबलः ॥ २८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे एकपञ्चाशस्सर्गः ॥ ५१ ॥

द्विपञ्चाशः सर्गः ॥ ५२ ॥

वसिष्ठेनससैन्यस्यविश्वामित्रस्यातिथ्यायनिजहोमधेनुं शबलांप्रतिसोपस्कराम्नसर्जननियोजनम् ॥ १ ॥

[4]स दृष्ट्वा परमप्रीतो विश्वामित्रो महाबलः ॥ [5]प्रणतो विनयाद्वीरो वसिष्ठं जपतांवरम् ॥ १ ॥
स्वागतं तव चेत्युक्तो वसिष्ठेन महात्मना ॥ आसनं चास्य भगवान्वसिष्ठो व्यादिदेश ह ॥ २ ॥
उपविष्टाय च तदा विश्वामित्राय धीमते ॥ यथान्यायं [6]मुनिवरः [7]फलमूलमुपाहरत् ॥ ३ ॥
[8]प्रतिगृह्य च तां पूजां वसिष्ठाद्राजसत्तमः ॥ तपोग्निहोत्रशिष्येषु कुशलं पर्यपृच्छत ॥ ४ ॥
विश्वामित्रो महातेजा वनस्पतिगणे [9]तथा ॥ सर्वत्र कुशलं [10]चाह वसिष्ठो राजसत्तमम् ॥ ५ ॥
सुखोपविष्टं राजानं विश्वामित्रं महातपाः ॥ पप्रच्छ जपतां श्रेष्ठो वसिष्ठो ब्रह्मणः सुतः ॥ ६ ॥
कच्चित्ते कुशलं राजन्कच्चिद्धर्मेण रञ्जयन् ॥ प्रजाः [11]पालयसे वीर राजवृत्तेन धार्मिक ॥ ७ ॥
कच्चित्ते [12]संभृता भृत्याः कच्चित्तिष्ठन्ति शासने ॥ कच्चित्ते विजिताः सर्वे रिपवो रिपुसूदन ॥ ८ ॥
कच्चि[13]द्बलेषु कोशेषु मित्रेषु च परंतप ॥ कुशलं ते नरव्याघ्र [14]पुत्रपौत्रे [15]तवानघ ॥ ९ ॥

शेषणाय पुनर्हरिणोपादानं ॥ २४—२५ ॥ अब्भक्षैः अम्मात्रभक्षैः । दान्तैर्नियतमनस्कैः ॥ २६ ॥ वालखिल्याः ब्रह्मणोवालजाऋषयः । वैखानसाः तन्नखजाः "येनखास्तेवैखानसाः । येवालास्तेवालखिल्याः" इतिश्रुतेः । वसिष्ठाश्रमवैभववर्णनं एवंभूतेनापिसंमानितोविश्वामित्रइतितस्यवैभवकथनार्थं ॥ २७—२८ ॥ इति गोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने एकपञ्चाशः सर्गः ॥ ५१ ॥

विश्वामित्रसंमानंद्विपञ्चाशे—सदृष्ट्वेत्यादि । वसिष्ठंदृष्ट्वा प्रणतः प्रणनाम ॥ १ ॥ उक्तः ऊचे । व्यादिदेश दापयामासेत्यर्थः ॥ २ ॥ उपविष्टायेत्यादिचत्वारः । फलमूलमिति "जातिरप्राणिनां" इत्येकवत्त्वं ॥ ३—४ ॥ राजसत्तमं प्रतीतिशेषः ॥ ५—६ ॥ कच्चिदित्यादित्रयः कच्चिदितिकामप्रवेदनेऽव्ययं । "कच्चित्कामप्रवेदने" इत्यमरः । तवकुशलंममेप्सितमित्यमुमर्थंद्योतयति । राजवृत्तेन चतुर्विधेन । उपलक्षितः । यथाहुः "न्यायेनार्जनमर्थस्यवर्धनंपालनंतथा । सत्पात्रेप्रतिपत्तिश्चराजवृत्तंचतुर्विधं" इति ॥ ७ ॥ संभृताः पोषिताः । तिष्ठन्तीतिशेषः ॥ ८ ॥ बलेषु-चतुरङ्गबलेषु । कोशेषु अर्थसमूहेषु पुत्रपौत्रइति गवा-

---

यादृशं । वृत्तं तपोरूपं । ति० तलं ब्रह्मर्षिलंच ॥१६॥ ति० ज्ञानमात्राधिकृतानारदाद्यादेवलोकसंचारिणोदेवर्षयः । ज्ञानकर्मोभयाधिकृताब्रह्मर्षयोभूप्रतिष्ठाः । शि० अग्निकल्पैः अग्निंकल्पयन्तिप्रतिदिनंविधिनास्थापयन्तितेअग्निहोत्रिणइतियावत् । तैः ॥२५॥ शि० श्रीमद्ब्रह्मकल्पैः श्रीमन्तोयेब्रह्म वेदंकल्पयन्ति वेदशाखाविभागकर्तारइतियावत् । तैः ॥ २६ ॥ इत्येकपञ्चाशस्सर्गः ॥५१॥

[पा०] १ इदमर्धं ख—ट. दृश्यते. २ घ. अग्निभक्षैः. ३ ङ. झ. जितदोषैः. ४ ङ—ट. तंदृष्ट्वा. ५ क. ख. प्रणम्य. ६ क. ख. मुनिश्रेष्ठः. घ. ऋषिवरः. ७ क. ख. घ. फलमूलान्युपाहरत्. ८ घ—छ. झ. ञ. प्रतिगृह्यतु. ९ ग—ञ. तदा. १० ङ. च. छ. झ. ञ. प्राह. ११ घ—ञ. पालयसेराजन्. १२ ग. ट. सुभृताः. १३ क. ख. घ. द्बलेचकोशेच. ज. द्बलेवाकोशेवा. १४ घ. ज. पुत्रेपौत्रे. १५ ङ—ट. तथानघ.

सर्वत्र कुशलं राजा वसिष्ठं प्रत्युदाहरत् ॥ विश्वामित्रो महातेजा वसिष्ठं विनयान्वितः ॥ १० ॥
कृत्वोभौ सुचिरं कालं धर्मिष्ठौ ताः कथाश्शुभाः ॥ मुदा परमया युक्तौ प्रीयेतां तौ परस्परम् ॥ ११ ॥
ततो वसिष्ठो भगवान्कथान्ते रघुनन्दन ॥ विश्वामित्रमिदं वाक्यमुवाच प्रहसन्निव ॥ १२ ॥
आतिथ्यं कर्तुमिच्छामि बलस्यास्य महाबल ॥ तव चैवाप्रमेयस्य यथार्हं संप्रतीच्छ मे ॥ १३ ॥
सत्क्रियां हि भवानेतां प्रतीच्छतु मयोद्यताम् ॥ राजा त्वमतिथिश्रेष्ठः पूजनीयः प्रयत्नतः ॥ १४ ॥
एवमुक्तो वसिष्ठेन विश्वामित्रो महामतिः ॥ कृतमित्यब्रवीद्राजा प्रियवाक्येन मे त्वया ॥ १५ ॥
फलमूलेन भगवन्विद्यते यत्तवाश्रमे ॥ पाद्येनाचमनीयेन भगवद्दर्शनेन च ॥ १६ ॥
सर्वथा च महाप्राज्ञ पूजार्हेण सुपूजितः ॥ गमिष्यामि नमस्तेस्तु मैत्रेणेक्षस्व चक्षुषा ॥ १७ ॥
एवं ब्रुवन्तं राजानं वसिष्ठः पुनरेव हि ॥ न्यमन्त्रयत धर्मात्मा पुनः पुनरुदारधीः ॥ १८ ॥
बाढमित्येव गाधेयो वसिष्ठं प्रत्युवाच ह ॥ यथा प्रियं भगवतस्तथाऽस्तु मुनिसत्तम ॥ १९ ॥
एवमुक्तो महातेजा वसिष्ठो जपतां वरः ॥ आजुहाव ततः प्रीतः कल्माषीं धूतकल्मषः ॥ २० ॥
एह्येहि शबले क्षिप्रं शृणु चापि वचो मम ॥ सबलस्यास्य राजर्षेः कर्तुं व्यवसितोऽस्म्यहम् ॥
भोजनेन महार्हेण सत्कारं संविधत्स्व मे ॥ २१ ॥
यस्य यस्य यथाकामं षड्रसेष्वभिपूजितम् ॥ तत्सर्वं कामधुक् क्षिप्रमभिवर्ष कृते मम ॥ २२ ॥
रसेनान्नेन पानेन लेह्यचोष्येण संयुतम् ॥ अन्नानां निचयं सर्वं सृजस्व शबले त्वर ॥ २३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे द्विपञ्चाशः सर्गः ॥ ५२ ॥

श्वप्रभृतित्वादेकवत्त्वं ॥ ९ ॥ सर्वत्र वसिष्ठपृष्टसर्वविषयइत्यर्थः । वसिष्ठं धनिकं ॥१०॥ ताःकथाः अन्योन्यकुशलप्रश्नोत्तररूपाः । प्रीयेतां अप्रीणयतां ॥११॥ ततइत्यादित्रयः। प्रहसन्निव प्रसन्नमुखइत्यर्थः ॥१२॥ संप्रतीच्छ प्रतिगृहाण ॥ १३ ॥ उद्यतांचिकीर्षितां ॥ १४ ॥ एवमितित्रयः । प्रियवाक्येन आतिथ्यंकरिष्यामीत्यनेनवचनेन । आतिथ्यंकृतं ॥ १५ ॥ तवाश्रमेयद्विद्यते तेनफलमूलेनसुपूजितइत्यन्वयः । पूजार्हेण त्वयेतिशेषः । मैत्रेण स्नेहयुक्तेन । मत्वर्थीयाजन्तः ॥ १६—१७ ॥ एवंब्रुवन्तमितिद्वौ । पुनःन्यमन्त्रयत भोजनार्थंप्रार्थनमकरोत् । पुनःपुनरित्यत्र न्यमन्त्रयतेत्यनुषज्यते । बहुशःप्रत्युक्तेरपि पुनःपुनर्न्यमन्त्रयतेत्यर्थः ॥ १८ ॥ गाधेयः गाधिपुत्रः । बाढमित्यस्यैवविवरणं यथेति ॥ १९ ॥ कल्माषीं चित्रवर्णां । शबलामितियावत् । "चित्रंकिर्मीरकल्माष—"इत्यमरः ॥२०॥ एहीतिसार्धश्लोकः । सबलस्यास्यराजर्षेःसत्कारंकर्तुं व्यवसितोस्मि । संविधत्स्व तदुपयोगिवस्तुजातंसंपाद्य ॥ २१ ॥ षड्रसेषु यद्यस्ययस्य अभिपूजितं अभिमतं । तत्सर्वं यथाकामं ममकृते अभिवर्षेत्यन्वयः । " अर्थेकृतेचतादर्थ्येनिपातद्वयमव्ययं " इतिनिघण्टुः ॥२२॥ रसेन रसायनभेदेन । अन्नेन भक्ष्येण शष्कुलीलाजादिना । पानेन पेयेन पानकरसादिना । लेह्य-

---

ति० एकोवसिष्ठशब्दोवरिष्ठवाची । शि० आवशिष्टं अतिकान्तिमन्तं । विनयान्वितं विनयो विश्वामित्रकर्तृकविनम्रता । अन्वितःप्राप्तःयस्यैतं । आवशिष्टशब्दःआङ्पूर्वककान्त्यर्थकवशधातुप्रकृतिकः औणादिकथन्प्रत्ययान्तः ॥ १० ॥ मुनिभा० कृतमित्येतत्पदंराजपदादुपरि वाक्यादौनिवेश्यं । वसिष्ठेनैवमुक्तोमहामतिर्विश्वामित्रो राजा कृतं वाक्येनमेपूजात्वयाकृतैवेत्यब्रवीत् ॥ १५ ॥ इतिद्विपञ्चाशस्सर्गः ॥ ५२ ॥

[पा०] १ ट. वशिष्ठं. २ ङ. च. ज. झ. ट. विनयान्वितम्. ३ ङ. च. छ. झ. ञ. कृत्वातौ. ४ ख. घ. ज. धर्मिष्ठौतौ. ५ क. ङ. च. छ. झ. ञ. ट. कथास्तदा. ६ क. घ. सत्क्रियांतु. ७ क. महर्तीत्वेतां. ख. घ. ज. ट. हिभवांस्त्वेतां. ८ क. प्रतीच्छत्वं. ९ ङ. झ. ञ. ट. मयाकृताम्. १० क. ख. घ—ट. राजंस्त्वमतिथि. ११ च. घ.—छ. झ. महामुनिः. १२ ख.—ञ. पूजावाक्येन. १३ ज. सर्वदा. १४ ख. सुमहाप्राज्ञ. १५ झ. नमस्तेऽस्तुगमिष्यामि. १६ ग. ङ. च. छ. झ. ञ. मुनिपुङ्गव. १७ ङ. च. छ. झ. ञ. एवमुक्तस्तथातेन. १८ ङ. च. छ. झ. ञ. ट. धूतकल्मषाम्. १९ ख—ट. कामधुग्दिव्ये. २० ग. ज. प्रवर्षस्वकृतेमम. २१ ग. ज. ट. अन्नाद्यनिचयं. २२ ज. ट. शबलेत्विह.

त्रिपञ्चाशः सर्गः ॥ ५३ ॥

शबलाकल्पितविविधान्नभोजनेनपरिजनैःसहपरितोषमुपगतवताविश्वामित्रेणवसिष्ठंप्रतिप्रतिनिधितयाबहुगोधनधानादि-स्वीकारेण शबलादानप्रार्थनेपिवसिष्ठेनतदनङ्गीकरणम् ॥ १ ॥

एवमुक्ता वसिष्ठेन शबला शत्रुसूदन ॥ विदधे कामधुक्कामान्यस्ययस्य यथेप्सितम् ॥ १ ॥
इक्षून्मधूंस्तथा लाजान्मैरेयांश्च वरासवान् ॥ पानानि च महार्हाणि भक्ष्यांश्चोच्चावचांस्तथा ॥ २ ॥
उष्णाढ्यस्यौदनस्यात्र राशयः पर्वतोपमाः ॥ मृष्टान्नानि च सूपाश्च दधिकुल्यास्तथैव च ॥ ३ ॥
नानास्वादुरसानां च षाडवानां तथैव च ॥ भाजनानि सुपूर्णानि गौडानि च सहस्रशः ॥ ४ ॥
सर्वमासीत्सुसंतुष्टं हृष्टपुष्टजनायुतम् ॥ विश्वामित्रबलं राम वसिष्ठेनाभितर्पितम् ॥ ५ ॥
विश्वामित्रोऽपि राजर्षिर्हृष्टः पुष्टस्तदाऽभवत् ॥ सान्तःपुरवरो राजा सब्राह्मणपुरोहितः ॥ ६ ॥
सामात्यो मन्त्रिसहितः सभृत्यः पूजितस्तदा ॥ युक्तः परमहर्षेण वसिष्ठमिदमब्रवीत् ॥ ७ ॥
पूजितोऽहं त्वया ब्रह्मन्पूजार्हेण सुसत्कृतः ॥ श्रूयतामभिधास्यामि वाक्यं वाक्यविशारद ॥ ८ ॥
गवां शतसहस्रेण दीयतां शबला मम ॥ ९ ॥
रत्नं हि भगवन्नेतद्रत्नहारी च पार्थिवः ॥ तस्मान्मे शबलां देहि ममैषा धर्मतो द्विज ॥ १० ॥

चोष्येण लेह्येन जिह्वास्वाद्येनक्षौद्रादिना । चोष्येण अधरपुटग्राह्येणदध्यादिनाच । समन्वितं "सर्वोद्वन्द्वो विभाषयैकवद्भवति" इत्येकवद्भावः । अन्नानां शाल्यन्नादीनां । निचयं राशिं । अनेनभक्ष्यभोज्यलेह्यचोष्यपेयखाद्यरूपषड्विधाभ्यवहारादर्शिताः ॥ २३ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने द्विपञ्चाशः सर्गः ॥ ५२ ॥

कामधेनुप्रार्थनंत्रिपञ्चाशे—एवमुक्तेत्यादि । यस्ययस्ययथेप्सितं तथा कामान् काङ्क्षितान् । विदधे ॥ १ ॥ उक्तमेवप्रपञ्चयति—इक्षूनित्यादि । मधूनितिपुंल्लिङ्गत्वमार्षं । मैरेयाः मद्यविशेषाः मैरेयाख्यानित्यर्थः । "मैरेयमासवोधात्रीधातकीगुडवारिभिः" इतिवैजयन्ती । पानानि पानकादीनि । भक्ष्यान् अपूपविशेषान् । उच्चावचान् नानाप्रकारान् । "उच्चावचंनैकभेदं" इत्यमरः । विदधइत्यनुषज्यते ॥२॥ आसन्निति शेषः । मृष्टान्नानि इष्टान्नानि पायसभेदाइतियावत् ॥ ३ ॥ नानाविधाःस्वादवोरुच्याःरसाःमाधुर्यादयोयेषांतेषां । षाडवाः षड्रसविकृताःभक्ष्यविशेषाः । शैषिकोण् । तेषांपूर्णानि तैःपूर्णानीत्यर्थः । "पूरणगुण—" इत्यादिना तृतीयार्थेषष्ठी । गौडानि गुडविकाराः । अत्राप्यासन्निति शेषः ॥ ४ ॥ पूर्वमेवहृष्टपुष्टजनायुतंविश्वामित्रबलंसर्वं सुसंतुष्टमासीदित्यन्वयः ॥ ५ ॥ हृष्टः आदरेण । पुष्टः भोजनादिना ॥ ६ ॥ अमात्याः कर्मणिसहायाः । मन्त्रिणः मन्त्रसहायाः ॥ ७ ॥ पूजार्हेण अस्मदादिभिरिति शेषः । पूजितः बहूकृतः । सुसत्कृतः आतिथ्येनसत्कृतः ॥ ८ ॥ शतसहस्रेण निष्क्रयभूतेन । अर्धम् ॥९॥ हि यस्मात् । एतत्रत्नं स्वजातिश्रेष्ठं । "रत्नंस्वजातिश्रेष्ठेपि" इत्यमरः । यतःपार्थिवोर-

---

ति० दधिकुल्याइत्युपलक्षणंदुग्धादेरपि ॥ ३ ॥ कत० खाण्डवानां भक्ष्यविशेषाणां । शेषेषष्ठी । तैःपूर्णानि । भोजनानि भोजनपात्राणि । गौडानि राजतानि । आसन्निति शेषः । "रजतेगुडः" इत्यभिधानं ॥ ४ ॥ शि० सर्वनाम्नामुद्देश्यविधेयान्यतर-

[पा०] १ क. ग. ङ. छ. झ. ञ. ट. यस्येप्सितंयथा. ख. यस्ययथेप्सितान्. च. यस्येप्सितान्यथा. घ. यस्येप्सितंतथा. २ ग. मधुरांल्लाजान्. ३ क. महार्हाणिचपानानि. ४ ङ. च. छ. झ. ञ. वचानपि. घ. वचांस्तदा. ५ क. ख. दनस्यापि घ. दनस्यास्य. ६ क. ख. ग. च. छ. ञ. मृष्टान्नानिचसूपांश्च. ध. मृष्टान्यन्नानिपूपांश्च. ७ ख. ग. घ. च. ज. षड्रसानांतथैवच. ङ. छ. झ. ञ. ट. खाण्डवानां. ८ ङ. च. झ. ञ. ट. भोजनानि. ९ घ. च. सुवर्णानि. १० क—घ. जनाकुलम्. ११ क. ख. बलंसर्वं. १२ ख. ग. घ. नाभितर्पितम्. ङ—ट. नसुतर्पितम्. १३ ङ. च. छ. झ. ञ. विश्वामित्रोहि. १४ ख. ग. ज. सुष्टःपुष्ट. १५ क. घ. सान्तःपुरचरो. १६ ख. ग. पुरोगमः. १७ क. घ—छ. ञ. परेणहर्षेण. १८ घ. चाभिधास्यामि. १९ घ. रत्नंचभगवन्.

एवमुक्तस्तु भगवान्वसिष्ठो मुनिसत्तमः ॥ विश्वामित्रेण धर्मात्मा प्रत्युवाच महीपतिम् ॥ ११ ॥
नाहं शतसहस्रेण नापि कोटिशतैर्गवाम् ॥ राजन्दास्यामि शबलां राशिभी रजतस्य वा ॥ १२ ॥
न परित्यागमर्हेयं मत्सकाशादरिन्दम ॥ शाश्वती शबला मह्यं कीर्तिरात्मवतो यथा ॥ १३ ॥
अस्यां हव्यं च कव्यं च प्राणयात्रा तथैव च ॥ आयत्तमग्निहोत्रं च बलिर्होमस्तथैव च ॥ १४ ॥
स्वाहाकारवषट्कारौ विद्याश्च विविधास्तथा ॥ आयत्तमत्र राजर्षे सर्वमेतन्न संशयः ॥ १५ ॥
सर्वस्वमेतत्सत्येन मम तुष्टिकरी सदा ॥ कारणैर्बहुभी राजन्न दास्ये शबलां तव ॥ १६ ॥
वसिष्ठेनैवमुक्तस्तु विश्वामित्रोऽब्रवीत्ततः ॥ संरब्धतरमत्यर्थं वाक्यं वाक्यविशारदः ॥ १७ ॥
हैरण्यकक्ष्याग्रैवेयान्सुवर्णाङ्कुशभूषितान् ॥ ददामि कुञ्जराणां ते सहस्राणि चतुर्दश ॥ १८ ॥
हैरण्यानां रथानां ते श्वेताश्वानां चतुर्युजाम् ॥ ददामि ते शतान्यष्टौ किंकिणीकविभूषितान् ॥१९॥
हयानां देशजातानां कुलजानां महौजसाम् ॥ सहस्रमेकं दश च ददामि तव सुव्रत ॥ २० ॥
नानावर्णविभक्तानां वयस्स्थानां तथैव च ॥ ददाम्येकां गवां कोटिं शबला दीयतां मम ॥२१॥
यावदिच्छसि रत्नं वा हिरण्यं वा द्विजोत्तम ॥ तावद्ददामि तत्सर्वं शबला दीयतां मम ॥ २२ ॥
एवमुक्तस्तु भगवान्विश्वामित्रेण धीमता ॥ न दास्यामीति शबलां प्राह राजन्कथंचन ॥ २३ ॥
एतदेव हि मे रत्नमेतदेव हि मे धनम् ॥ एतदेव हि सर्वस्वमेतदेव हि जीवितम् ॥ २४ ॥
दर्शश्च पूर्णमासश्च यज्ञाश्चैवाप्तदक्षिणाः ॥ एतदेव हि मे राजन्विविधाश्च क्रियास्तथा ॥ २५ ॥

त्वहारी तस्माद्धर्मतः न्यायतः । ममैषा मेदेहीत्यन्वयः ॥ १० ॥ एवमित्यादिषट् ॥ ११—१२ ॥ परित्यागं विश्लेषं । प्राप्तुंनार्हा । आत्मवतः मनस्विनः । कीर्तिरिव । मह्यं मम । शबला शाश्वती नित्यसंबन्धा ॥१३॥ हव्यं देवार्थं । कव्यं पित्रर्थं । प्राणयात्रा प्राणाग्निहोत्रं । अग्निहोत्रं सायंप्रातःकर्तव्योहोमविशेषः । बलिः भूतबलिः । होमः दर्शपूर्णमासादिः । एतत्सर्वं अस्यांआयत्तं एतदधीनं ॥१४॥ स्वाहाकारः स्वाहेतिमन्त्रः । वषट्कारो वषडितिमन्त्रः । विविधाविद्याः वेदाद्याश्च । अस्यामायत्ताः एतत्पयआदिप्राशनेनचित्तशुद्धेःप्राणतृप्तेर्देहबलादेश्चसाध्यत्वात्तदेकमूलत्वं । अत्रार्थे नसंशयः ॥१५॥ सत्येनवदामीत्यर्थः । कारणैः उक्तैरनुक्तैश्च ॥ १६ ॥ संरब्धतरं अत्यन्ताभिनिवेशयुक्तं ॥ १७ ॥ हैरण्यानि हिरण्मयानि कक्ष्याग्रैवेयाणियेषांते । कक्ष्या मध्यबन्धनार्थारज्जुः । "कक्ष्याप्रकोष्ठेहर्म्यादेःकाञ्च्यांमध्येभयन्धने "इत्यमरः । ग्रैवेयाणि ग्रीवाबन्धनरज्जवः । "ग्रीवाभ्योण्च" इतिचाडञ् । सहस्राणीत्यस्यपुंलिङ्गविशेषणमार्षं ॥ १८ ॥ चतुर्युजां चतुर्भिरश्वैर्युक्तानां । गमकत्वात्समासः । सङ्ख्यानियमपरत्वान्नपुनरुक्तिः । किङ्किणीकैर्विभूषितान् ॥ १९ ॥ देशाःकांभोजबाह्लीकादयः । कुलजानां गन्धर्वकुलजातानां । "गन्धर्वकुलजातस्त्वं " इतिपुराणवचनात् ॥ २० ॥ नानावर्णैःविभक्तानां अन्योन्यविलक्षणानां ॥ २१ ॥ यावत्प्रमाणमिच्छसि तावत्प्रमाणंसर्वंददामि ॥ २२ ॥ हेराजन् शबलांनदास्यामीत्यन्वयः ॥ २३ ॥ एतदित्या-

लिङ्गतेतिसिद्धान्तात्एतदित्येतच्छब्दस्यनपुंसकत्वं ॥ १० ॥ ति० होमो वैश्वदेवादिः । स्वाहाकारवषट्कारौ तत्साध्ययज्ञौ ॥ १४ ॥ ति० किङ्किणीकविभूषितानिति षष्ठ्यर्थेद्वितीया । रथानांविशेषणमेतत् ॥ १९ ॥ इतित्रिपञ्चाशस्सर्गः ॥ ५३ ॥

[पा०] १ ङ. च. छ. झ. ञ. मुनिपुङ्गवः. २ घ. इमांदास्यामि. ग. नाहंदास्यामि. ३ ख. शबलाशाश्वती. ४ क. ख. ग. बलिहोम. ५ घ. आयत्तंमम. ६ ख. ङ. झ. करीतथा. ७ क. ख. ब्रवीद्वचः. ङ. च. झ. ट. ब्रवीत्तदा. ८ झ. कक्षाग्रैवेयान्. ९ ग. ङ. च. झ. ट. रथानांच. १० ज. दास्यामिते. ११ झ. किङ्किणीशत. १२ ज. ट. दास्यामितव. १३ क. ख. सवत्सानां. १४ ङ. च. छ. झ. ञ. रत्नानि. १५ क. ख. तावद्दास्यामि. १६ ङ. च. झ. ञ. दीयतांशबलामम. १७ क. ङ. ज. एतदेवहिमेसर्वं. १८ एतदेवहिसर्वस्वं. दर्शश्चपूर्णमासश्च. इत्यर्धयोः ज. पुस्तकेव्युत्क्रमोदृश्यते. १९ ज. मेरत्नं. २० च. यज्ञश्चैवसदक्षिणः.

[1]अदोमूलाः क्रियाः सर्वा मम राजन्न संशयः ॥ बहुना किं प्रलापेन न दास्ये कामदोहिनीम् ॥२६॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे त्रिपञ्चाशः सर्गः ॥ ५३ ॥

चतुष्पञ्चाशः सर्गः ॥ ५४ ॥

विश्वामित्रभटैर्बलात्काल्यमानयाशबलया वसिष्ठनिकटमेत्यसरोदनंशोचनम् ॥ १ ॥ वसिष्ठचोदनयाशबलोत्सृष्टभटैर्विश्वामित्रसेनानिरसनेरुष्टेनतेनास्त्रतेजसा तत्सेनायादूरोत्सारणम् ॥ २ ॥

कामधेनुं वसिष्ठोपि यदा न त्यजते मुनिः ॥ तदास्य शबलां राम विश्वामित्रोन्वकर्षत ॥ १ ॥
नीयमाना तु शबला राम राज्ञा महात्मना ॥ दुःखिता चिन्तयामास [2]रुदन्ती शोककर्शिता ॥२॥
परित्यक्ता वसिष्ठेन किमहं सुमहात्मना ॥ याऽहं [3]राजभटैर्दीना ह्रियेयं भृशदुःखिता ॥ ३ ॥
किं मयाऽपकृतं तस्य महर्षेर्भावितात्मनः ॥ यन्मा[4]मनागसं [5]भक्तामिष्टां त्यजति धार्मिकः ॥ ४ ॥
[[6][7]इति सा चिन्तयित्वा तु [8]विनिश्वस्य [9]पुनःपुनः ॥ जगाम वेगेन तदा वसिष्ठं [10]परमौजसम्] ॥ ५ ॥
निर्धूय तांस्तदा भृत्याञ्शतशः शत्रुसूदन ॥ जगामानिलवेगेन पादमूलं महात्मनः ॥ ६ ॥
शबला सा रुदन्ती च क्रोशन्ती चेदमब्रवीत् ॥ [11]वसिष्ठस्याग्रतः स्थित्वा [12]मेघदुन्दुभिराविणी ॥ ७ ॥
भगवन्किं परित्यक्ता त्वयाऽहं ब्रह्मणः सुत ॥ यस्मा[13]द्राजभृता मां हि [14]नयन्ते त्वत्सकाशतः ॥ ८ ॥
एवमुक्तस्तु ब्रह्मर्षिरिदं वचनमब्रवीत् ॥ शोकसंतप्तहृदयां स्वसारमिव दुःखिताम् ॥ ९ ॥
न त्वां त्यजामि शबले नापि मेऽपकृतं त्वया ॥ एष त्वां नयते राजा [15]बलान्मत्तो महाबलः ॥१०॥
न हि [16]तुल्यं बलं मह्यं [17]राजा त्वद्य विशेषतः ॥ [18]बली राजा क्षत्रियश्च पृथिव्याः [19]पतिरेव च ॥ ११ ॥
इयमक्षौहिणी [20]पूर्णा [21]सवाजिरथसंकुला ॥ हस्तिध्वजसमाकीर्णा तेनासौ [22]बलवत्तरः ॥ १२ ॥

दित्रयं ॥ २४—२५ ॥ अदोमूलाः एतन्मूलाः । प्रलापेन भवतइतिशेषः । कामान्दोग्धुंशीलमस्त्यस्या इतिकामदोहिनीं "सुप्यजातौ" इतिणिनिः ॥ २६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने त्रिपञ्चाशः सर्गः ॥ ५३ ॥

अथबलात्कारकुपितवसिष्ठप्रहितकामधेनोर्बलसृष्टिश्चतुःपञ्चाशे—कामधेनुमित्यादिदशकं ॥१—२॥ ह्रियेयं कर्मणिसंप्रश्नेलिङ् । कथमपिह्रियेयमित्यर्थः । भृशदुःखिता भृशंदुःखिता । वृत्तिविषयेमकारलोपो-भृशमादिमान्ताव्ययस्येष्यते ॥ ३—६ ॥ क्रोशन्ती आर्तस्वरंकुर्वन्ती ॥७॥ राजभृताः राजभटाः । त्वत्सकाशतः त्वत्समीपतः ॥८—९ ॥ मत्तः मत्सकाशात् ॥ १० ॥ मह्यं मम । तर्हितपोबलेनकिमितिनदण्ड्यते तत्राह—राजात्वद्यविशेषतइति । राजातपोबलेन नदण्ड्यइत्यर्थः ॥ ११ ॥ इयमित्यादिपञ्च । सवाजि-

---

ति० राजभृतैः राजसेवकैः ॥ ३ ॥ ति० दृष्टा ज्ञातापि ॥ ४ ॥ ति० रोदनमश्रुपातः । क्रोशनमार्तशब्दः । रुदन्त्यैव ऋषिसमीपगमनं रुदन्त्यैवच कथनमित्येतदर्थद्विःरुदन्तीति । शि० क्रोशन्ती हेऋषेइत्याह्वानंकुर्वती । रुदन्ती स्वरोदनहेतुककरुणोत्पादनेनान्यानपिरोदयन्तीच ॥७॥ ति० मत्तः अविवेकी ॥१०॥ ती० हस्तिध्वजाः हस्तिपुस्थिताध्वजाः तैस्समाकीर्णा ॥ १२ ॥

[पा०] १ क. ख. ग. घ—छ. झ. ञ. अतोमूलाः. ज. ततोमूलाः. २ च. झ. रुदती. ३ झ. ञ. ट. राजभृतैर्दीना ह्रियेय. क. घ. ङ. च. ज. राजभृतैर्दीनाह्रियेयं. ख. दीनाबद्धापाशसुपीडिता. ४ ख. घ. मनागसीं. ५ क. ङ. च. झ. ञ. दृष्टाभक्तांत्यजति. ६ अयंश्लोकः क—ट. दृश्यते. ७ ख. घ. ङ. झ. संचिन्तयित्वातु. ८ ख. ट. निश्वस्यच. ९ क. ख. मुहुर्मुहुः. १० घ. मुनिमब्रवीत्. ११ ख. ग. ज. वसिष्ठस्याभितः. १२ ङ. च. छ. झ. ञ. ट. रुदन्तीमेघनिस्वना. १३ ख. ङ. च. झ. ञ. द्राजभटाः. १४ ग. ट. नयन्ति. १५ घ. बलोन्मत्तो. १६ क. ज. ट. तुल्यबलं. ग. तुल्यबलंकामं. १७ ख. राज्ञानेनविशेषतः. १८ क. ख. सबलीक्षत्रियोराजा. १९ क. पतिरीश्वरः. २० ञ. सेना. २१ ख. घ—ञ. गजवाजिरथाकुला. ट. रथकुञ्जरा. २२ ङ. च. छ. झ. ञ. बलवत्तमः.

एवमुक्ता वसिष्ठेन प्रत्युवाच विनीतवत् ॥ वचनं [1]वचनज्ञा सा ब्रह्मर्षि[2]ममतुलप्रभम् ॥ १३ ॥
न बलं क्षत्रियस्याहु[3]र्ब्राह्मणो बलवत्तरः ॥ ब्रह्मन्ब्रह्मबलं दिव्यं [4]क्षत्रात्तु बलवत्तरम् ॥ १४ ॥
[5]अप्रमेयबलं तुभ्यं [6]न त्वया बलवत्तरः ॥ विश्वामित्रो महावीर्यस्तेजस्तव दुरासदम् ॥ १५ ॥
नियुङ्क्ष्व मां [7]महातेजस्[8]त्वद्ब्रह्मबलसंभृताम् ॥ तस्य [9]दर्पबलं [10]यत्तन्नाशयामि दुरात्मनः ॥ १६ ॥
इत्युक्तस्तु [11]तया राम वसिष्ठ[12]स्तु महायशाः ॥ सृजस्वेति तदोवाच बलं परब[13]लारुजम् ॥ १७ ॥
तस्य तद्वचनं श्रुत्वा सुरभिः साऽसृजत्तदा ॥ १८ ॥
तस्या [14]हुंभारवोत्सृष्टाः [15]पप्लवाः शतशो नृप ॥ नाशयन्ति बलं सर्वं विश्वामित्रस्य [16]पश्यतः ॥ १९ ॥
बलं भग्नं ततो दृष्ट्वा रथेनाक्रम्य कौशिकः ॥ स राजा परमक्रुद्धः [17]क्रोधविस्फारितेक्षणः ॥
पप्लवान्नाशयामास शस्त्रैरुच्चावचैरपि ॥ २० ॥
विश्वामित्रार्दितान्दृष्ट्वा पप्लवाञ्शतशस्तदा ॥ [18]भूय एवासृजत्कोपाच्छकान्यवनमिश्रितान् ॥ २१ ॥
तैरासीत्संवृता भूमिः शकैर्यवनमिश्रितैः ॥ प्रभावद्भिर्महावीर्यैर्हेमकिञ्जल्कसन्निभैः ॥ २२ ॥
दीर्घा[19]सिपट्टसधरैर्हेमवर्णाम्बरावृतैः ॥ निर्दग्धं तद्बलं सर्वं प्रदीप्तैरिव पावकैः ॥ २३ ॥
ततोऽस्त्राणि महातेजा विश्वामित्रो मुमोच ह ॥ [20]तैस्तैर्यवनकांभोजाः [21]पप्लवाश्चाकुलीकृताः ॥ २४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे चतुष्पञ्चाशः सर्गः ॥ ५४ ॥

पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

पुनर्वसिष्ठचोदनयाशबलया निजावयवोत्सृष्टैर्म्लेच्छादिभिर्विश्वामित्रसेनानिश्शेषीकरणम् ॥ १ ॥ ततोवसिष्ठेनजिघांसया समभ्यापततस्तत्सुतशतस्यहुङ्कारेणभस्मीकरणम् ॥ २॥ विश्वामित्रेणहतावशिष्टनिजात्मजस्य राज्यनियोजनपूर्वकं तपसेहिमवद्गमनम् ॥ ३ ॥ तथामहादेवात्सकलास्त्रलाभदर्पेणवसिष्ठाश्रममेत्यमहास्त्रतेजसामुनिजनविक्षोभणम् ॥ ४ ॥ वसिष्ठेनदण्डोद्यमनेनतदग्रेसमवस्थानम् ॥ ५ ॥

ततस्तानाकुलान्दृष्ट्वा विश्वामित्रास्त्रमोहितान् ॥ वसिष्ठश्चोदयामास कामधुक्सृज योगतः ॥ १ ॥

रथसंकुला वाजिसहितरथैस्संकुला ॥ १२—१४ ॥ तुभ्यं तव । त्वया त्वत्तः ॥ १५ ॥ त्वद्ब्रह्मबलेन त्वन्मन्त्रबलेन । संभृतां संवर्धितप्रभावां ॥ १६ ॥ इत्युक्तइत्याद्यष्टौ । आरुजति हिनस्तीत्यारुजं । बलं सैन्यं ॥ १७—१८॥ हुंभारवः पशूनां हुंभाशब्दः । उत्सृष्टाः निर्मिताः । पप्लवशकयवनादिशब्दाः म्लेच्छजातिविशेषवचनाः । पश्यतइत्यनादरेषष्ठी ॥ १९॥ विस्फारितं विवृतं ॥ २० ॥ अर्दितान् हिंसितान् ॥ २१ ॥ हेमकिञ्जल्कसन्निभैः हेमशब्दश्चंपकपरः तस्यकनकाह्वयत्वात् । तत्केसरतुल्यैरित्यर्थः ॥ २२ ॥ पट्टसः असिविशेषः ॥ २३—२४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने चतुष्पञ्चाशःसर्गः ॥ ५४ ॥

अथपुनर्दिव्यास्त्रलाभपूर्वविश्वामित्रेणवसिष्ठाश्रमसंरोधःपञ्चपञ्चाशे—ततस्तानित्यादि । हेकामधुक् ।

ति० क्षत्रात् क्षत्रियबलादपि । बलवत्तरमधिकं ॥ १४ ॥ ति० नियुङ्क्ष्वेति । कामधेनुत्वान्नियोगापेक्षा । परकाम्यार्थस्रष्टावेवतस्याःसामर्थ्यात् । ब्रह्मबलसंभृतां तादृशकार्यसमर्थत्वेनमांध्यायस्वेत्यर्थः ॥ १६ ॥ इतिचतुष्पञ्चाशस्सर्गः ॥ ५४ ॥

[पा०] १ ज. वचनज्ञासा. २ क—घ. ममितप्रभम्. ३ ङ. च. छ. झ. ञ. ट. ब्राह्मणाबलवत्तराः. ४ च. क्षत्रंचाबलवत्तरं. ङ. छ. झ. ञ. क्षत्राच्चबलवत्तरम्. ५ ख. ग. ङ—ञ. अप्रमेयं. ६ ख. नत्वत्तोबल. घ. नत्वसौबल. ७ ग. महाभाग. ८ क. ङ. च. छ. झ. ञ. त्वंब्रह्मबल. घ. त्वद्ब्रह्मद्बल. ९ क. ख. ग. ङ—झ. ट. दर्पबलं. १० झ. यत्नंनाश. ११ क. तथा. १२ ख. ग. सुमहायशाः. १३ क. घ. ङ. च. छ. झ. ञ. ट. बलार्दनम्. ख. बलदुद्दम्. ज. बलार्दन. १४ घ. हुंकारतोत्सृष्टाः. ख. हुंकारवोत्सृष्टाः. ङ. च. ज. हंभारवोत्सृष्टाः. १५ क. पह्लवाश्शतशो. ख. पह्लवाश्शस्त्रपाणयः. १६ घ. धीमतः. १७ ग. रोषविष्फारिते. १८ ख. मायथैवासृजद्घोरान्. क. घ—छ. झ. ञ. ट. भूयएवासृजद्घोरान्. १९ ख. ङ. च. छ. ञ. तीक्ष्णासिपट्टिश. २० घ. च. झ. तैस्तेयवन. २१ ङ. च. छ. झ. ञ. बर्बराश्च.

तस्या [1]हुंभारवाज्जाताः कांभोजा रविसन्निभाः ॥ [2]ऊधसस्त्वथ [3]संजाताः [4]पह्लवाः शस्त्रपाणयः ॥ २ ॥
योनिदेशाच्च यवनाः शकृद्देशा[5]च्छकास्तथा ॥ रोमकूपेषु [6]च म्लेच्छा [7]हारीतास्सकिरातकाः ॥ ३ ॥
[8]तैस्तैर्निषूदितं [9]सर्वं विश्वामित्रस्य तत्क्षणात् ॥ [10]संपदातिगजं साश्वं [11]सरथं रघुनन्दन ॥ ४ ॥
दृष्ट्वा निषूदितं सैन्यं वसिष्ठेन महात्मना ॥ विश्वामित्रसुतानां तु शतं नानाविधायुधम् ॥
अभ्यधावत्सुसंक्रुद्धं वसिष्ठं जपतांवरम् ॥ ५ ॥
हुंकारेणैव तान्सर्वान्[12]ददाह भगवानृषिः ॥ ६ ॥
ते [13]साश्वरथपादाता वसिष्ठेन महात्मना ॥ भस्मीकृता मुहूर्तेन विश्वामित्रसुता[14]स्तदा ॥ ७ ॥
दृष्ट्वा [15]विनाशितान्पुत्रान्बलं च सुमहायशाः ॥ [16]सव्रीडश्चिन्तयाविष्टो विश्वामित्रोऽभवत्तदा ॥ ८ ॥
समुद्र इव निर्वेगो [17]भग्नदंष्ट्र इवोरगः ॥ उपरक्त इवादित्यः सद्यो निष्प्रभतां गतः ॥ ९ ॥
हतपुत्रबलो दीनो लूनपक्ष इव द्विजः ॥ [18]हतदर्पो हतोत्साहो निर्वेदं समपद्यत ॥ १० ॥
स पुत्रमेकं राज्याय पालयेति नियुज्य च ॥ पृथिवीं क्षत्रधर्मेण [19]वनमेवान्वपद्यत ॥ ११ ॥
स गत्वा हिमवत्[20]पार्श्वं [21]किंनरोरगसेवितम् ॥ महादेवप्रसादार्थं तपस्तेपे [22]महातपाः ॥ १२ ॥
केनचित्त्वथ कालेन देवेशो वृषभध्वजः ॥ दर्शयामास वरदो विश्वामित्रं [23]महाबलम् ॥ १३ ॥
किमर्थं तप्यसे राजन्ब्रूहि यत्ते विवक्षितम् ॥ वरदोस्मि [24]वरो यस्ते काङ्क्षितः सोभिधीयताम् ॥ १४ ॥
एवमुक्तस्तु देवेन विश्वामित्रो [25]महातपाः ॥ प्रणिपत्य [26]महादेवमिदं वचनमब्रवीत् ॥ १५ ॥
यदि तुष्टो महादेव धनुर्वेदो ममानघ ॥ साङ्गोपाङ्गोपनिषदः [27]सरहस्यः प्रदीयताम् ॥ १६ ॥

योगतः योगमहिम्ना । तिरश्चोपि ब्रह्मप्रसादाद्योगशक्तिरस्तीतिज्ञेयं ॥ १ ॥ तस्याइत्यादिश्चत्वारः । ऊधसः स्तनात् ॥२॥ हारीताः किरातजातिविशेषाः ॥३—४॥ दृष्ट्वेत्यादिषट् । वसिष्ठमभ्यधावत् तस्यसर्वविनाशमूलत्वादितिभावः । जपतांवरंइति हुंकारेणनिरासेहेतुः ॥ ५—६ ॥ मुहूर्तेनेति मासेनानुवाकोऽधीतइतिवदुपसर्गेतृतीया ॥७—८॥ निर्वेगः युद्धप्रवृत्तिरहितः । उरगाइव निश्शक्तिरितिशेषः । उपरक्तः राहुग्रस्तः॥९॥ निर्वेदं दुःखं ॥ १० ॥ सइत्यादिचत्वारः । एकं अव शिष्टमितिशेषः । राज्याय राज्यंकर्तुं । पृथिवींक्षत्रधर्मेणपालयेत्यन्वयः ॥ ११—१२ ॥ दर्शयामास आत्मानमितिशेषः ॥१३—१४॥ एवमित्यादिचत्वारः ॥१५॥ साङ्गोपाङ्गोपनिषदइत्यकारान्तत्वमार्षं । अङ्गंसन्निपत्योपकारकं उपाङ्गंआरादुपकारकं उपनिषत्रहस्यमन्त्रः ।

ति० सव्रीडमितिक्रियाविशेषणं । विष० सर्वान् पुत्रान् ॥ ८ ॥ ती० निर्वेदं चतुरङ्गबलेनिष्फलत्वबुद्धिं । ति० हतसर्वबलोत्साहः सर्वाणिबलानिशारीरबौद्धास्त्रादीनि तज्जन्योत्साहहीनः ॥ १० ॥ ती० क्षत्रधर्मेणपृथिवींपालयेति । अन्यथाऽहमिवभविष्यतीत्याशयः ॥ ११ ॥ ति० साङ्गोपाङ्गोपनिषदः । समाहारद्वन्द्वे "द्वन्द्वाच्चुद–" इतिटच् । तेनसहितः ॥ १६ ॥

[पा०] १ ङ. च. छ. झ. ञ. हुंकारतोजाताः. ज. हंभारवाज्जाताः. क. हुंफारतोजाताः. २ ङ. च. छ. झ. ञ. ऊधसश्चाथ. ३ ग. ङ—ट. संभूताः. ४ ङ. च. छ. झ. ञ. बर्बराः. ५ ङ. च. छ. झ. ञ. च्छकास्स्मृताः. ६ क. ङ. च. छ. झ. ञ. म्लेच्छाश्च. ज. ट. म्लेच्छास्तु. ७ ग. ट. हारीताः. ८ क. ङ—झ. ट. तैस्तन्निषूदितं. ९ क. सैन्यं. १० ग. सपदातिरथं. ११ ग. सगजं. १२ क—छ. झ. ञ. ट. निर्ददाहमहानृषिः. घ. महामुनिः. १३ घ. साश्वरथसंबाधा. १४ ख. ङ. च. छ. झ. ञ. स्तथा. १५ ङ. झ. ञ. विनाशितान्सर्वान्. १६ झ. सव्रीलंचिन्तया. क. व्रीडितश्चिन्तया. १७ ग. भिन्नदंष्ट्रइवोरगः. १८ च. छ. ञ. गतसर्वबलोत्साहो. ङ. झ. हतसर्वबलोत्साहो. १९ ङ. च. छ. झ. ञ. ट. वनमेवाभ्यपद्यत. घ. वनमेकोन्वपद्यत. २० ङ. झ. त्पार्श्वे. २१ क. ख. किंनरैरुपशोभितम्. ङ. झ. किंनरोरगसेविते. २२ क. सुदारुणम्. २३ क. ख. ङ. च. छ. झ. ञ. महामुनिम्. २४ क. ख. वरोमत्तः. २५ क. ख. महामुनिः. २६ ध—ट. महादेवंविश्वामित्रोऽब्रवीदिदम्. २७ ख. ज. ञ. सरहस्यं.

१ अनेनव्याख्यानेनश्लोकचतुष्टयसद्भावःप्रतीयतेउपलभ्यन्तेतुत्रयएवश्लोकाःअन्योपिगवेषणीयः ।

यानि देवेषु चास्त्राणि दानवेषु महर्षिषु ॥ गन्धर्वयक्षरक्षस्सु प्रतिभान्तु ममानघ ॥
तव प्रसादाद्भवतु देवदेव ममेप्सितम् ॥ १७ ॥
एवमस्त्विति देवेशो वाक्यमुक्त्वा गतस्तदा ॥ १८ ॥
प्राप्य चास्त्राणि राजर्षिर्विश्वामित्रो महाबलः ॥ दर्पेण महता युक्तो दर्पपूर्णोऽभवत्तदा ॥ १९ ॥
विवर्धमानो वीर्येण समुद्र इव पर्वणि ॥ हतमेव तदा मेने वसिष्ठमृषिसत्तमम् ॥ २० ॥
ततो गत्वाऽऽश्रमपदं मुमोचास्त्राणि पार्थिवः ॥ यैस्तत्तपोवनं सर्वं निर्दग्धं चास्त्रतेजसा ॥ २१ ॥
उदीर्यमाणमस्त्रं तद्विश्वामित्रस्य धीमतः ॥ दृष्ट्वा विप्रद्रुता भीता मुनयः शतशो दिशः ॥ २२ ॥
वसिष्ठस्य च ये शिष्यास्तथैव मृगपक्षिणः ॥ विद्रवन्ति भयाद्भीता नानादिग्भ्यः सहस्रशः ॥२३॥
वसिष्ठस्याश्रमपदं शून्यमासीन्महात्मनः ॥ मुहूर्तमिव निश्शब्दमासीदिरिणसंनिभम् ॥ २४ ॥
वदतो वै वसिष्ठस्य मा भैरिति मुहुर्मुहुः ॥ नाशयाम्यद्य गाधेयं नीहारमिव भास्करः ॥ २५ ॥
एवमुक्त्वा महातेजा वसिष्ठो जपतांवरः ॥ विश्वामित्रं तदा वाक्यं सरोषमिदमब्रवीत् ॥ २६ ॥
आश्रमं चिरसंवृद्धं यद्विनाशितवानसि ॥ दुराचारोसि तन्मूढ तस्मात्त्वं नभविष्यसि ॥ २७ ॥
इत्युक्त्वा परमक्रुद्धो दण्डमुद्यम्य सत्वरः ॥ विधूममिव कालाग्निं यमदण्डमिवापरम् ॥ २८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

सरहस्यः उपदेशगम्यार्थसहितः ॥ १६ ॥ प्रतिभान्तु तानीतिशेषः । ममेप्सितं अन्यदपीतिशेषः ॥ १७—१८ ॥ प्राप्येत्यादिसार्ध । दर्पपूर्णइति क्षत्रियत्वादिदर्पयुक्तः । विशेषास्त्रलाभादिदानींदर्पपूर्णोभूदित्यर्थः ॥ १९—२० ॥ यैरस्त्रैः । अस्त्रतेजसा स्वतेजसा ॥२१॥ उदीर्यमाणं प्रयुज्यमानं ॥ २२ ॥ भयात् भयदादस्त्रात् । नानादिग्भ्यइति व्यत्ययेनद्वितीयार्थेचतुर्थी । नानादिग्भ्यः स्वस्वस्थानेभ्यइतिवा ॥ २३ ॥ आश्रमपदं वनं । शून्यं निस्तरुगुल्मं । इरिणं ऊषरं ॥ २४ ॥ वसिष्ठेरक्षकेविद्यमानेकुतोविद्रवन्तीत्यत्राह—वदतइति। भावलक्षणेषष्ठी अनादरेवा । गाधेयंनाशयामिमाभैरितिवदतोवसिष्ठस्यवचनमनादृत्यविद्रवन्तीतिपूर्वेणान्वयः ॥ २५ ॥ एवमित्यादित्रयः । उक्त्वा स्वानितिशेषः ॥ २६ ॥ नभविष्यसि नशिष्यसीतियावत् ॥ २७ ॥ उद्यम्य तस्थावितिशेषः ॥ २८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

वि० तवप्रसादात् नतूपदेशापेक्षेतिभावः ॥ १७ ॥ शि० अस्त्रतेजसायुक्तः पार्थिवः विश्वामित्रः । आश्रमपदं श्रमनिवर्तकवसिष्ठस्थानं ॥ २१ ॥ शि० दुराचारः परवस्त्वपहरणरूपनिषिद्धाचरणमनाश्वासि । यन्मूढ यतःक्रोधादिनिवृत्तेः मूःबंधनं प्रतिबन्धकत्वमितियावत् वहतिप्राप्नोतितत्संबोधनं निवृत्तिप्रतिबन्धकेत्यर्थः ॥ २७ ॥ इतिपञ्चपञ्चाशस्सर्गः ॥ ५५ ॥

[पा०] १ घ. मानवेषु. २ क. ख. दिवंगतः. ३ ख. ज. प्राप्यशस्त्राणि. क. ख. ङ. च. छ. झ. ञ. ट. प्राप्यचास्त्राणिदेवेशाद्विश्वामित्रो. ४ ख. महातपाः. ५ हर्षेणमहता. ६ क. पर्वसु. ७ क. ङ. च. छ. झ. ञ. हतंमेनेतदाराम. ८ क. च. यत्तत्तपोवनं. घ. ङ. च. झ. यैस्तत्तपोवनंनाम. ९ ज. विप्रकृता. ग. विप्रद्रुतास्सर्वे. १० घ. शतशोमुनयोदिशः. ११ ङ. च. छ. झ. ञ. येचवैमृग. १२ क. ग. ज. माभैष्टेति. १३ घ. नाशयिष्यामि. क. नाशयामिच. १४ ज. संसिद्धं. क. संवृत्तं. १५ क. ख. तद्विनाशित. १६ ङ. च. झ. ञ. ट. दुराचारोहि. १७ क. ख. च. छ. ट. यन्मूढ. ङ. ग. झ. यन्मूढस्तस्मा. १८ क. ख. घ—छ. झ. ञ. ट. विधूमइवकालाग्निः. १९ क. ख. च, छ. झ. ञ. यमदण्डइवापरः.

षट्पञ्चाशः सर्गः ॥ ५६ ॥

वसिष्ठब्रह्मदण्डेनविश्वामित्रास्त्राणांनिगिरणेतेनक्षत्रबलगर्हणपूर्वकं ब्राह्मण्याधिगमायतपश्चरणनिर्धारणम् ॥ १ ॥

एवमुक्तो वसिष्ठेन विश्वामित्रो महाबलः ॥ आग्नेयमस्त्रमुत्क्षिप्य तिष्ठतिष्ठेति चाब्रवीत् ॥ १ ॥
ब्रह्मदण्ड समुत्क्षिप्य कालदण्डमिवापरम् ॥ [प्राहिणोत्तद्वसिष्ठाय विश्वामित्रो महाबलः] ॥
वसिष्ठो भगवान्क्रोधादिदं वचनमब्रवीत् ॥ २ ॥
क्षत्रबन्धो स्थितोस्म्येष यद्बलं तद्विदर्शय ॥ नाशयाम्यद्य ते दर्पं शस्त्रस्य तव गाधिज ॥ ३ ॥
क्व च ते क्षत्रियबलं क्व च ब्रह्मबलं महत् ॥ पश्य ब्रह्मबलं दिव्यं मम क्षत्रियपांसन ॥ ४ ॥
तस्यास्त्रं गाधिपुत्रस्य घोरमाग्नेयमुद्यतम् ॥ ब्रह्मदण्डेन तच्छान्तमग्नेर्वेग इवांभसा ॥ ५ ॥
वारुणं चैव रौद्रं च ऐन्द्रं पाशुपतं तथा ॥ ऐषीकं चापि चिक्षेप कुपितो गाधिनन्दनः ॥ ६ ॥
मानवं मोहनं चैव गान्धर्वं स्वापनं तथा ॥ जृंभणं मादनं चैव संतापनविलापने ॥ ७ ॥
शोषणं दारणं चैव वज्रमस्त्रं सुदुर्जयम् ॥ ब्रह्मपाशं कालपाशं वारुणं पाशमेव च ॥ ८ ॥
पैनाकास्त्रं च दयितं शुष्कार्द्रे अशनी उभे ॥ दण्डास्त्रमथ पैशाचं क्रौञ्चमस्त्रं तथैव च ॥ ९ ॥
धर्मचक्रं कालचक्रं विष्णुचक्रं तथैव च ॥ वायव्यं मथनं चैव अस्त्रं हयशिरस्तथा ॥ १० ॥
शक्तिद्वयं च चिक्षेप कङ्कालं मुसलं तथा ॥ वैद्याधरं महास्त्रं च कालास्त्रमथ दारुणम् ॥
त्रिशूलमस्त्रं घोरं च कापालमथ कङ्कणम् ॥ ११ ॥
एतान्यस्त्राणि चिक्षेप सर्वाणि रघुनन्दन ॥ वसिष्ठे जपतांश्रेष्ठे तदद्भुतमिवाभवत् ॥ १२ ॥
तानि सर्वाणि दण्डेन ग्रसते ब्रह्मणः सुतः ॥ तेषु शान्तेषु ब्रह्मास्त्रं क्षिप्तवान्गाधिनन्दनः ॥ १३ ॥
तदस्त्रमुद्यतं दृष्ट्वा देवाः साग्निपुरोगमाः ॥ देवर्षयश्च संभ्रान्ता गन्धर्वाः समहोरगाः ॥ १४ ॥
त्रैलोक्यमासीत्संत्रस्तं ब्रह्मास्त्रे समुदीरिते ॥ १५ ॥
तदप्यस्त्रं महाघोरं ब्राह्मं ब्राह्मेण तेजसा ॥ वसिष्ठो ग्रसते सर्वं ब्रह्मदण्डेन राघव ॥ १६ ॥

अथसर्वास्त्रबलसंपूर्णक्षत्रवीर्यादपिब्रह्मबलंबलीयइत्याहषट्पञ्चाशे—एवमुक्तइत्यादि । तिष्ठतिष्ठेति भयजननार्थोक्तिः ॥ १ ॥ ब्रह्मदण्डमित्यादित्रयोविंशतिः । ब्रह्मदण्डं ब्राह्मणासाधारणंदण्डं ॥ २ ॥ क्षत्रबन्धो क्षत्रियाधम । तेदर्पंतवशस्त्रस्यदर्पंच नाशयामीत्यन्वयः ॥ ३ ॥ क्षत्रियपांसनेत्यनन्तरंवसिष्ठोऽब्रवीदिति अनुकृष्यते ॥ ४—११ ॥ वसिष्ठेजपतांश्रेष्ठइत्यनेनजपवैभवमिदंग्रसनमितिद्योतितं । तत् अस्त्रक्षेपणं । अद्भुतमिवाभवत् कार्यलेशस्याप्यदर्शनादितिभावः ॥ १२ ॥ अद्भुतमेवाह—तानीति । ग्रसते अग्रसत ॥ १३ ॥ संभ्रान्ताः आसन्नितिशेषः ॥ १४ ॥ समुदीरिते प्रयुक्ते ॥ १५ ॥ ब्राह्मेणतेजसा ब्रह्मविद्याभ्यासजनिततेजसा । उपबृंहितेनब्रह्मदण्डेनेत्यर्थः । अत्र ग्रासक्रियायांनदण्डस्यान्वयः पुत्रैर्गर्दभीभारंवहतीतिवत् ॥ ति० अग्निपुरोगमोवायुःतत्सहिताः अग्निसहितोवायुःपुरोगमोयेषांयुद्धेइतिवा ॥ १४ ॥

[पा०] १ ख. घ. मुद्यम्य. ङ. च. छ. झ. ञ. मुद्दिश्य. ग. ज. मुत्सृज्य. २ ग. ज. सचोत्क्षिप्य. ङ. च. झ. ञ. ट. समुद्यम्य. ३ इदमर्धं ज. दृश्यते. ४ ज. तदस्त्रंप्रहितंवीक्ष्यवसिष्ठःप्रत्युवाचह. ५ च. छ. ह्येषः. ६ घ. तन्निदर्शय. ७ ख. घ. ज. म्येषते. क. म्येपवै. ८ ग. च. छ. ञ. क्षत्रस्यतव. ९ क. ङ—ट. माग्नेयमुत्तमम्. १० क. तदा. ११ क—घ. च. ट. रुषितो. १२ क. ग. ज. झ. ञ. मोहनंचैव. ङ. च. छ. ट. मानदंरौद्रं. ख. चैवब्रायव्यं. १३ ख. विलेपने. १४ क. ङ—ज. ञ. ट. दारुणं. १५ क. ग. वज्रमस्त्रंच. क. जृंभमस्त्रं. १६ क—घ. ज. पिनाकास्त्रंच. १७ घ. शुष्कास्त्रमशनिंतथा. ङ. च. झ. ञ. अशनीतथा. ख. नाशनीतथा. क. अशनीतदा. १८ घ. मस्त्रंसुदर्शनम्. १९ घ. आग्नेयमस्त्रंवायव्यं. ख. ब्राह्मंचमथनं. २० ट. कपालमथकिङ्किणीम्. ज. कापालिमथकिङ्किणीम्. २१ ङ. च. ज. जयतांश्रेष्ठे, २२ ख. शान्तेषुतेपुब्रह्मास्त्रं.

ब्रह्मास्त्रं ग्रसमानस्य वसिष्ठस्य महात्मनः ॥ त्रैलोक्यमोहनं रौद्रं रूपमासीत्सुदारुणम् ॥ १७ ॥
रोमकूपेषु सर्वेषु वसिष्ठस्य महात्मनः ॥ मरीच्य इव निष्पेतुरग्नेर्धूमाकुलार्चिषः ॥ १८ ॥
प्राज्वलद्ब्रह्मदण्डश्च वसिष्ठस्य करोद्यतः ॥ विधूम इव कालाग्निर्यमदण्ड इवापरः ॥ १९ ॥
ततोऽस्तुवन्मुनिगणा वसिष्ठं जपतांवरम् ॥ अमोघं ते बलं ब्रह्मंस्तेजो धारय तेजसा ॥ २० ॥
निगृहीतस्त्वया ब्रह्मन्विश्वामित्रो महातपः ॥ प्रसीद जपतांश्रेष्ठ लोकाः सन्तु गतव्यथाः ॥ २१ ॥
एवमुक्तो महातेजाः शमं चक्रे महातपाः ॥ विश्वामित्रोऽपि निकृतो विनिश्वस्येदमब्रवीत् ॥ २२ ॥
धिग्बलं क्षत्रियबलं ब्रह्मतेजो बलं बलम् ॥ एकेन ब्रह्मदण्डेन सर्वास्त्राणि हतानि मे ॥ २३ ॥
तदेतत्समवेक्ष्याहं प्रसन्नेंद्रियमानसः ॥ तपो महत्समास्थास्ये यद्वै ब्रह्मत्वकारणम् ॥ २४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे षट्पञ्चाशः सर्गः ॥ ५६ ॥

सप्तपञ्चाशः सर्गः ॥ ५७ ॥

ब्राह्मण्याधिगमाय भार्यया सह दक्षिणस्यां दिशि तपश्चरति विश्वामित्रे ब्रह्मणा तदाश्रममेत्य तस्मै राजर्षित्वदानेन स्वलोकगमनम् ॥ १ ॥ विश्वामित्रेण स्वाभीप्सितानवाप्तेः पुनस्तपश्चरणम् ॥ २ ॥ अत्रावसरे त्रिशङ्कुना राज्ञा सशरीरं स्वर्गजिगमिषया वसिष्ठं प्रति तथा याजनप्रार्थना ॥ ३ ॥ तेन तदधिक्षेपे तत्पुत्रान्प्रति तन्निवेदनपूर्वकं तथा याजनप्रार्थनम् ॥ ४ ॥

ततः संतप्तहृदयः स्मरन्निग्रहमात्मनः ॥ विनिश्श्वस्य विनिश्श्वस्य कृतवैरो महात्मना ॥ १ ॥
स दक्षिणां दिशं गत्वा महिष्या सह राघव ॥ ततापं परमं घोरं विश्वामित्रो महत्तपः ॥ २ ॥
[फलमूलाशनो दान्तश्चचार परमं तपः] ॥ अथास्य जज्ञिरे पुत्राः सत्यधर्मपरायणाः ॥
हविष्पन्दो मधुष्पन्दो दृढनेत्रो महारथः ॥ ३ ॥

वन् । अतो नवक्ष्यमाणेनविरोधः ॥ १६ ॥ त्रैलोक्यस्यमोहनं भयान्मूर्छाजनकं । रौद्रं स्मरणेपि भयंकरं । सुदारुणं दुर्दर्शं ॥ १७ ॥ एतदेवाह—रोमेति । अग्नेरिवमरीच्यो विस्फुलिङ्गानिष्पेतुरितियोजना ॥ १८ ॥ दण्डश्चप्राज्वलत् पूर्वास्त्रग्रासेनेतिशेषः ॥ १९ ॥ तेजः ब्रह्मास्त्रतेजः । तेजसा महिम्ना । धारय उपशमय ॥ २०—२१ ॥ शमं कोपशान्तिं निकृतः अपकृतः तिरस्कृतइतियावत् ॥ २२ ॥ क्षत्रियबलं बलंधिक् निन्द्यंबलमित्यर्थः । "धिगुपर्यादिषु" इतिद्वितीया । ब्रह्मतेजसः ब्राह्मण्यरूपतेजसः बलं बलं । तदेवप्रशस्तमितियावत् । सर्वास्त्राणि ब्रह्मास्त्रभिन्नानि ॥ २३ ॥ ब्रह्मत्वकारणं ब्राह्मण्यापादकं । प्रसन्नेन्द्रियमानसः परित्यक्तक्षत्ररोपइत्यर्थः २४ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने षट्पञ्चाशःसर्गः॥ ५६ ॥

एवंपशुपतिवितीर्णसरहस्यसर्वास्त्रवैयर्थ्यदर्शनेनरुद्रस्यापरत्वमुपपादितं । अथपूर्वप्रस्तुतब्राह्मण्यस्यात्यन्तदुर्लभत्वंदर्शयतिनवभिः सर्गैः । तत्रत्रिशङ्कुशरणागत्यनुगुणशक्तिमत्त्वंदर्शयतिसप्तपञ्चाशे—ततःसंतप्तहृदयइत्यादि । श्लोकद्वयमेकान्वयं । महात्मना वसिष्ठेन । कृतवैरः अनेनास्यतपोनाशमूलंदर्शितं । ब्रह्मविदपचारोहिसर्वश्रेयोविनाशकः । दक्षिणां शरावत्यपेक्षया । महिष्येत्यनेन भावियाजकत्वानुगुणगार्हस्थ्यंदर्शितं । महत्तपः परमंयथातथाततापेत्यन्वयः ॥ १ ॥ २ ॥ कामक्रोधाद्यनुवृत्तिंदर्शयति—अथेति

ति० हेब्रह्मन् तेबलंअमोघमस्तु अरातावविसर्जनेनाक्षीणमस्तु प्रतिब्रह्मास्त्रंमाप्रयुङ्क्ष्वेतियावत्॥ २० ॥इतिषट्पञ्चाशस्सर्गः ॥ ५६ ॥

[पा०] १ च. छ. ञ. मोहनंघोरं. २ ग. ञ. प्रोज्ज्वलन्ब्रह्मदण्डश्च. ख. प्रज्वलद्ब्रह्म. ३ क. घ. च. छ. ञ. सधूमइव. ४ घ. न्मुनिगणो. ५ छ. जयतां. ६ घ. धारयतेजसि. ७ क. ख. ङ. च. छ. झ. ञ. महाबलः. ८ ङ. च. छ. झ. ञ. अमोघंतेबलंश्रेष्ठ. ९ क. ख. ग. ङ. च. छ. झ. ञ. विनिकृतो. १० तदद्भुतमवेक्ष्याहं. ग. ङ. च. झ. ञ. तदेतत्प्रसमीक्ष्याहं. ११ क. ख. घ. त्समाधास्ये. १२ ग. कारकम्. १३ क. घ—छ. झ. ञ. ट. महातपाः. ख. महामुनिः. १४ इदमर्धं ग—छ. झ. ञ. दृश्यते. १५ ग—छ. झ. ञ. श्चचार. १६ ग. सुमहत्तपः. १७ ञ. हविष्पन्दोमधुष्पन्दः.

पूर्णे वर्षसहस्रे तु ब्रह्मा[1] लोकपितामहः ॥ अब्रवीन्मधुरं वाक्यं विश्वामित्रं तपोधनम् ॥ ४ ॥
जिता राजर्षिलोकास्ते तपसा कुशिकात्मज ॥ अनेन तपसा त्वां[2] तु राजर्षिरिति विद्महे ॥ ५ ॥
एवमुक्त्वा महातेजा जगाम सह दैवतैः ॥ त्रिविष्टपं ब्रह्मलोकं लोकानां परमेश्वरः ॥ ६ ॥
विश्वामित्रोपि तच्छ्रुत्वा ह्रिया किंचिदवाङ्मुखः ॥ दुःखेन महताऽऽविष्टः समन्युरिदमब्रवीत् ॥ ७ ॥
तपश्च सुमहत्तप्तं राजर्षिरिति मां विदुः ॥ देवाः स[3]र्षिगणाः सर्वे नास्ति मन्ये तपःफलम् ॥ ८ ॥
एवं निश्चित्य मनसा भूय एव महातपाः ॥ [[4]कोपेन महताऽऽविष्टस्त्रैलोक्यं व्यथयन्निव] ॥
त[5]पश्चकार [6]काकुत्स्थ परमं परमात्मवान् ॥ ९ ॥
एतस्मिन्नेव काले तु सत्यवादी जितेन्द्रियः ॥ त्रिशङ्कुरिति विख्यात इक्ष्वाकुकु[7]लवर्धनः ॥ १० ॥
तस्य बुद्धिः समुत्पन्ना यजेयमिति राघव ॥ गच्छेयं [8]सशरीरेण [9]देवानां परमां गतिम् ॥ ११ ॥
स[10] वसिष्ठं समाहूय कथयामास चिन्तितम् ॥ अशक्यमिति चाप्युक्तो वसिष्ठेन महात्मना ॥ १२ ॥
प्रत्याख्यातो वसिष्ठेन स[11] ययौ दक्षिणां दिशम् ॥ ततस्तत्कर्मसिद्ध्यर्थं पुत्रांस्तस्य गतो नृपः ॥१३॥
वासिष्ठा दीर्घतपसस्तपो यत्र हि तेपिरे ॥ त्रिशङ्कुः [12]सुमहातेजाः शतं परमभास्वरम् ॥
वसि[13]ष्ठपुत्रान्ददृशे तप्यमाना[14]न्यशस्विनः ॥ १४ ॥
सोभिगम्य म[15]हात्मानः सर्वानेव गुरोः सुतान् ॥ अभिवाद्यानुपूर्व्येण ह्रिया किंचिदवाङ्मुखः ॥
अब्रवीत्सुम[16]हात्मानस्सर्वानेव कृताञ्जलिः ॥ १५ ॥
शरणं वः प्र[17]पद्येऽहं शरण्याञ्शर[18]णागतः ॥ प्रत्याख्यातोस्मि भद्रं वो वसिष्ठेन महात्मना ॥ १६ ॥

॥ ३ ॥ अतएवतपसोमन्दफलत्वंदर्शयति—पूर्णइति ॥ ४ ॥ विद्महे आर्षमात्मनेपदं ॥ ५ ॥ एवमित्यादिचत्वारः । ब्रह्माब्रह्मलोकंजगाम । त्रिविष्टपं देवाजग्मुरित्यर्थः ॥ ६ ॥ समन्युः सदैन्यः । "मन्युर्दैन्येक्रतौक्रुधि" इत्यमरः ॥ ७ ॥ नास्तिमन्येतपःफलं एतन्मात्रंमत्तपःफलंनभवति । ब्राह्मण्यस्यैवमदभिमतत्वादितिभावः ॥ ८ ॥ परमंतपः पूर्वकृततपसोप्यतिशयितंतपः । परमात्मवान् अतिशयितयत्नवान् ॥ ९ ॥ विख्यातः अभूदितिशेषः ॥ १० ॥ सशरीरेण आत्मनेतिशेषः । परमांगतिं स्वर्गमितियावत् ॥ ११ ॥ चिन्तितं सशरीरस्वर्गसाधनयज्ञमित्यर्थः । अशक्यं सशरीरस्वर्गसाधनयज्ञकरणमितिशेषः । अशक्यत्वंचनऋषेरसामर्थ्यात् नापिताद्दशकर्मविधानाभावात् "सशरीरएवस्वर्गलोकमेति" इतिश्रुतेः । किंतु । त्रिशङ्कोस्ताद्दशस्वर्गप्राप्तिर्नास्तीतिपूर्वकल्पवृत्ततज्ज्ञानादितिमन्तव्यं । उक्तः अभूदितिशेषः ॥ १२ ॥ तत्कर्मसिद्ध्यर्थं सशरीरस्वर्गसाधनकर्मसिद्ध्यर्थं ॥ १३ ॥ वासिष्ठाइतिसार्धः । यत्रतेपिरे । तत्रगत्वेतिशेषः । शतंवासिष्ठानिति । बह्वर्थेशतमितिनिपातनात्सामानाधिकरण्यं ॥ १४ ॥ सइतिसार्धः । ह्रिया वसिष्ठप्रत्याख्यानकृतया । महात्मानस्सुमहात्मानइति व्यत्ययेनप्रथमा ॥ १५ ॥ शरणं

वि० परमात्मवान् परमात्मध्यानवान् परमधीरश्च ॥ ९ ॥ ति० शरणंगतोऽन्येषांरक्ष्याणांशरणंगतोपि शरणत्वंप्राप्तोपीत्यर्थः । शि० वः युष्माकं । शरणं रक्षकत्वं । गतः ज्ञातवानहं शरणं रक्षायथास्यात्तथा । शरण्यान् शरणहितान् । वोयुष्मान् । प्रपद्ये प्राप्तोस्मि । एकश्शरणशब्दोभावप्रधानः । गत्यर्थानांज्ञानार्थकत्वं "गमिरवबोधने" इत्यादिव्याख्यानेस्पष्टमेव । बह्वित्युभ-

[पा०] १ घ. ब्रह्मलोकान्पितामहः. २ क. घ. ङ. च. ज—ट. त्वांहि. ३ ऋषिगणास्सर्वे. ४ इदमर्धं ग. ज. दृश्यते. ५ क. ख. ग. ङ. छ. झ. ञ. तपश्चचार. ६ क. ख. ङ. च. छ. झ. ञ. धर्मात्माकाकुत्स्थपरमात्मवान्. ७ क. घ. कुलनन्दनः. ८ क. ख. ग. ङ. छ—ट. स्वशरीरेण. ९ ङ. छ. झ. ञ. देवतानांपरागतिम्. १० ङ. च. ज—ट. वसिष्ठंससमाहूय. क. छ. वसिष्ठं च. ११ क. घ. प्रययौ. १२ क. ख. ग. समहातेजाः. ङ. व. छ. झ. ञ. सुमहातेजाः. १३ घ. वसिष्ठस्यचतान्पुत्रांस्तप्य. ज. ट. वासिष्ठान्संददर्शाथतप्य. १४ ङ. च. ज. झ. ञ. न्मनस्विनः. १५ घ. महातेजाः. १६ ग. तसुमहाभागान्. घ. सुमहातेजाः. १७ ङ. च. ज—ट. प्रपन्नोऽहं. १८ क. ख. ङ. च. छ. झ. ञ. ट. शरणंगतः.

यष्टुकामो महायज्ञं तदनुज्ञातुमर्हथ ॥ गुरुपुत्रानहं सर्वान्नमस्कृत्य प्रसादये ॥ १७ ॥
शिरसा प्रणतो याचे ब्राह्मणांस्तपसि स्थितान् ॥ ते मां भवन्तः सिद्ध्यर्थं याजयन्तु समाहिताः ॥
सशरीरो यथाऽहं हि देवलोकमवाप्नुयाम् ॥ १८ ॥
प्रत्याख्यातो वसिष्ठेन गतिमन्यां तपोधनाः ॥ गुरुपुत्रानृते सर्वान्नाहं पश्यामि कांचन ॥ १९ ॥
इक्ष्वाकूणां हि सर्वेषां पुरोधाः परमा गतिः ॥ पुरोधसस्तु विद्वांसस्तारयन्ति सदा नृपान् ॥ २० ॥
तस्मादनन्तरं सर्वे भवन्तो दैवतं मम ॥ २१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे सप्तपञ्चाशः सर्गः ॥ ५७ ॥

अष्टपञ्चाशः सर्गः ॥ ५८ ॥

वासिष्ठैःपित्रतिक्रमेणयाजनानङ्गीकारे त्रिशङ्कुनातान्प्रतिस्वस्ययाजकान्तरानुसरणवचनम् ॥ १ ॥ वासिष्ठैश्चण्डालतांप्रापितेनत्रिशङ्कुनाविश्वामित्रमेत्यस्ववृत्तान्तनिवेदनपूर्वकंयाजनप्रार्थना ॥ २ ॥

ततस्त्रिशङ्कोर्वचनं श्रुत्वा क्रोधसमन्वितम् ॥ ऋषिपुत्रशतं राम राजानमिदमब्रवीत् ॥ १ ॥
प्रत्याख्यातो हि दुर्बुद्धे गुरुणा सत्यवादिना ॥ तं कथं समतिक्रम्य शाखान्तरमुपेयिवान् ॥ २ ॥
इक्ष्वाकूणां हि सर्वेषां पुरोधाः परमो गुरुः ॥ न चातिक्रमितुं शक्यं वचनं सत्यवादिनः ॥ ३ ॥
अशक्यमिति चोवाच वसिष्ठो भगवानृषिः ॥ तं वयं वै समाहर्तुं क्रतुं शक्ताः कथं तव ॥ ४ ॥
बालिशस्त्वं नरश्रेष्ठ गम्यतां स्वपुरं पुनः ॥ याजने भगवाञ्शक्तस्त्रैलोक्यस्यापि पार्थिव ॥ ५ ॥
अवमानं च तत्कर्तुं तस्य शक्ष्यामहे कथम् ॥ ६ ॥

रक्षितारं आगतः "शरणंगृहरक्षित्रोः" इतिवचनात् । रक्षित्रपेक्षयाआगतोहं । शरण्याम् शरणसमर्थान् । शरणंप्रपद्ये रक्षितृत्वन्प्राप्नोमीत्यर्थः । यद्वा शरणागतःप्रत्याख्यातइत्युत्तरेणान्वयः । तर्ह्याचार्यएवगन्तव्यइत्यत्राह—प्रत्याख्यातइति ॥ १६ ॥ किमर्थंशरणागतिस्तत्राह—यष्टुकामइति । तत् यज्ञानुष्ठानं ॥ १७ ॥ शिरसेतिसार्धः । ब्राह्मणान् ब्रह्मविदः । समाहिताः अवहिताः ॥ १८ ॥ गुरुपुत्रानृते अन्यांकांचनगतिं यजनोपायंनपश्यामीत्यन्वयः ॥ १९ ॥ पुरोधाः पुरोहितः वसिष्ठः ॥ २० ॥ तस्मादित्यर्धं । तस्मात् वसिष्ठात् । अनन्तरं पश्चात् । तस्यारक्षकत्वेभवन्तएवरक्षकाइतिभावः ॥ २१ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने सप्तपञ्चाशःसर्गः ॥ ५७ ॥

गुरुत्यागिनांफलंदर्शयत्यष्टपञ्चाशे—ततस्त्रिशङ्कोरित्यादि । क्रोधसमन्वितमितिशतविशेषणं ॥ १ ॥ शाखान्तरं आश्रयान्तरं ॥ २ ॥ नशक्यं त्वयैक्ष्वाकेणेतिशेषः । सत्यवादिनः तस्येतिशेषः ॥ ३ ॥ अशक्यं यंक्रतुमितिशेषः ॥४॥ बालिशः मूर्खः । "मूर्खवैधेयबालिशाः" इत्यमरः ॥ ५ ॥ अवमानमित्यर्धं । तत्

यान्वयि शब्दाधिकारश्च । यद्वा शरणं स्वेप्सितप्रध्वंसेनवधप्रायं गतः प्राप्तोहं शरणं जीवनालंबोयथास्यात्तथावोयुष्मान्प्रपद्ये । 'शरणंगृहरक्षित्रोर्वधरक्षणयोरपि' इतिमेदिनी ॥ १६ ॥ ति० ब्राह्मणान् अन्वर्थब्राह्मणान् ॥ १८ ॥ इतिसप्तपञ्चाशस्सर्गः ॥५७॥

ति० सोवाचेति "सोचिलोपेचेत्—" इतिसाधु ॥४॥ **ति०** त्रैलोक्यस्यापि सिद्ध्यर्थयाजनेइत्यर्थः । भगवान् वसिष्ठः ॥६॥

[पा०] १ ख. नभिवाद्यप्रसादये. २ घ. च. सिद्धार्थं. ३ ङ. च. छ. झ. ञ. यथाहंवै. ४ क. ग. घ. च. छ. ञ. कंचन. ख. किंचन. ५ क. घ. च. इक्ष्वाकूणांतु. ६ क. घ. च. नृपान्सदा. ७ ज. अस्मादनन्तरं. ८ च. झ. ञ. प्रत्याख्यातोसि. ९ ङ. झ. ञ. दुर्मेधाः. १० घ. इक्ष्वाकूणांतु. ११ क. ख. ङ. च. छ. झ. ञ. परमागतिः. १२ ग. मितिहोवाच. झ. ञ. मितिसोवाच. १३ ग. कथंशक्ताःक्रतुंतव. ख. घ. ड. झ. क्रतुंशक्ताःकथंचन. च. ञ. क्रतुंशक्ताःकथंचतत्. १४ घ. स्वपुरंततः. १५ ख. ङ—ट. अवमानंकथंकर्तुं. क. घ. अवमानंवयंकर्तुं. १६ ख. ग. ङ. छ—ट. तस्यशक्ष्यामहेवयम्.

तेषां तद्वचनं श्रुत्वा क्रोधपर्याकुलाक्षरम् ॥ स राजा पुनरेवैतानिदं वचनमब्रवीत् ॥ ७ ॥
प्रत्याख्यातोस्मि गुरुणा गुरुपुत्रैस्तथैव च ॥ अन्यां गतिं गमिष्यामि स्वस्ति वोऽस्तु तपोधनाः ॥८॥
ऋषिपुत्रास्तु तच्छ्रुत्वा वाक्यं घोराभिसंहितम् ॥ शेपुः परमसंक्रुद्धाश्चण्डालत्वं गमिष्यसि ॥९॥
एवमुक्त्वा महात्मानो विविशुस्ते स्वमाश्रमम् ॥ १० ॥
[तच्छ्रुत्वा घोरसंकाशमृषिपुत्रैश्च भाषितम् ॥ प्राविशत्स्वपुरं राजा चिन्तयामास दुःखितः] ॥११॥
अथ रात्र्यां व्यतीतायां राजा चण्डालतां गतः ॥ नीलवस्त्रधरो नीलः परुषो ध्वस्तमूर्धजः ॥
चित्यमाल्यानुलेपश्च आयसाभरणोऽभवत् ॥ १२ ॥
तं दृष्ट्वा मन्त्रिणः सर्वे त्यज्य चण्डालरूपिणम् ॥ प्राद्रवन्सहिता राम पौरा येऽस्यानुगामिनः ॥१३॥
एको हि राजा काकुत्स्थ जगाम परमात्मवान् ॥ दह्यमानो दिवारात्रं विश्वामित्रं तपोधनम् ॥१४॥
विश्वामित्रस्तु तं दृष्ट्वा राजानं विफलीकृतम् ॥ चण्डालरूपिणं राम मुनिः कारुण्यमागतः ॥ १५ ॥
कारुण्यात्स महातेजा वाक्यं परमधार्मिकः ॥ इदं जगाद भद्रं ते राजानं घोररूपिणम् ॥ १६ ॥
किमागमनकार्यं ते राजपुत्र महाबल ॥ अयोध्याधिपते वीर शापाच्चण्डालतां गतः ॥ १७ ॥
अथ तद्वाक्यमाज्ञाय राजा चण्डालतां गतः ॥ अब्रवीत्प्राञ्जलिर्वाक्यं वाक्यज्ञो वाक्यकोविदम् ॥१८॥
प्रत्याख्यातोस्मि गुरुणा गुरुपुत्रैस्तथैव च ॥ अनवाप्यैव तं कामं मया प्राप्तो विपर्ययः ॥ १९ ॥
सशरीरो दिवं यायामिति मे सौम्यदर्शनम् ॥ मया चेष्टं क्रतुशतं तच्च नावाप्यते फलम् ॥२०॥

असाध्यार्थसाधनरूपं ॥ ६ ॥ तेषामितिद्वौ । अन्यां गतिं याजकान्तरं ॥ ७॥ ८॥ घोराभिसंहितं साक्षात्कुलगुरुंब्रह्मपुत्रंवसिष्ठमतिक्रम्यपुरोहितान्तराश्रयणरूपघोराभिप्राययुक्तमित्यर्थः । गमिष्यसीत्यनन्तरमितिकरणंद्रष्टव्यं ॥ ९ ॥ एवमित्यर्धं ॥ १०—११ ॥ अत्रचण्डालत्वंनतत्सादृश्यमात्रं । किंतुक्षत्रियत्वप्रहाणेनचण्डालत्वजातिप्राप्तिः । ब्राह्मणत्वादिजातेःकर्ममूलत्वेनतदपायेतदपायादित्याह—अथेत्यादि सार्धः । चण्डालतांगतः वक्षस्स्थंयज्ञोपवीतमेववध्र्यासीदित्यर्थः। नीलवस्त्रधरः कटिस्थर्पःतांवरमेवचण्डालार्हंनीलवस्त्रंजातमित्यर्थः । नीलः पूर्वंस्थितराजतेजएवनीलवर्णोभवदित्यर्थः । एवमुत्तरत्रापियोज्यं । परुषः रूक्षाङ्गः । ध्वस्तमूर्धजः ह्रस्वकेशः । चित्यमाल्यानुलेपः चिता श्मशानं तत्रभवंचित्यं तादृशंमाल्यं अनुलेपः चिताभस्मरूपोऽङ्गरागश्चयस्यसतथा। आयसाभरणः अयोविकाराभरणः॥१२—१३॥ परमात्मवान् परमधृतिमान् भूत्वा । दह्यमानः दुःखेनेतिशेषः । विश्वामित्रं वसिष्ठवैरिणं जगाम ॥१४॥ विफलीकृतं वासिष्ठविनाशितैहिकामुष्मिकसाधनमित्यर्थः ॥१५॥ स्ववंशावमानप्रकटनेनरामस्यकोपोभविष्यतीतिसान्त्वयति—भद्रंतइति ॥ १६ ॥ चण्डालतांगतः केनहेतुनेतिशेषः ॥ १७ ॥ आज्ञाय श्रुत्वेत्यर्थः ॥ १८॥ तंकामं यमुद्दिश्यगुर्वाद्युपासनंकृतमित्यर्थः । विपर्ययः विपरीतप्रयोजनोहेतुविशेषः ॥ १९ ॥ कस्तेकामइत्यत्राह—सशरीरइति । सौम्येतिसंबुद्धिः । दर्शनंबुद्धिः । तच्चफलं क्रतुशतफ-

---

शि० हेवीरयस्त्वंचण्डालतांगतः तस्यतेइहागमनेकिंप्रयोजनंतद्वदेतिभावः । एतेनत्रिशङ्कुशापः पूर्वमेवविश्वामित्रेणश्रुतइतिध्वनितं । ति० सौम्यदर्शनेतिसंबोधनम् ॥ २० ॥

[पा०] १ घ. पर्याकुलेक्षणः. २ क. ख. ङ—ट. ख्यातोभगवता. घ. ख्यातोवसिष्ठेन. ३ ङ. च. छ. झ. स्तथैवहि. घ. विशेषतः. ४ ङ. च. छ. झ. ञ. ट. इत्युक्त्वाते. ५ ङ. च. छ. झ. ञ. ट. स्वंस्वमाश्रमम्. ६ अयंश्लोकः क. ङ. च. छ. ञ. दृश्यते. ७ क. संकाशंगुरुपुत्रैश्च. ८ ग. रक्तमाल्यानुलेपश्च. क. चित्रमाल्यांगरागश्च. ख. ङ—ञ. चित्यमाल्यांगरागश्च. घ. भ्रष्टमाल्यांगरागश्च. ९ घ. ट. त्यक्त्वाचण्डाल. क. छ. त्याज्यंचण्डाल. १० ख. घ—ट. घोरदर्शनम्. ११ घ. किमागमनकृत्यं ते. १२ क. ख. घ. महायशः. १३ ङ. च. छ. झ. ञ. ट. माकर्ण्य. क. मादाय. ज. मास्थाय. १४ ख. चण्डालएवस. १५ क. अनवाप्यचतत्कर्म. १६ क—छ. झ. ञ. ट. सौम्यदर्शन.

अनृतं नोक्तपूर्वं मे न च वक्ष्ये कदाचन ॥ कृच्छ्रेष्वपि गतः सौम्य क्षत्रधर्मेण ते शपे ॥ २१ ॥
यज्ञैर्बहुविधैरिष्टं प्रजा धर्मेण पालिताः ॥ गुरवश्च महात्मानः शीलवृत्तेन तोषिताः ॥ २२ ॥
धर्मे प्रयतमानस्य यज्ञं चाहर्तुमिच्छतः ॥ परितोषं न गच्छन्ति गुरवो मुनिपुङ्गव ॥ २३ ॥
दैवमेव परं मन्ये पौरुषं तु निरर्थकम् ॥ दैवेनाक्रम्यते सर्वं दैवं हि परमा गतिः ॥ २४ ॥
तस्य मे परमार्तस्य प्रसादमभिकाङ्क्षतः ॥ कर्तुमर्हसि भद्रं ते दैवोपहतकर्मणः ॥ २५ ॥
नान्यां गतिं गमिष्यामि नान्यः शरणमस्ति मे ॥ दैवं पुरुषकारेण निवर्तयितुमर्हसि ॥ २६ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे अष्टपञ्चाशः सर्गः ॥ ५८ ॥

एकोनषष्टितमः सर्गः ॥ ५९ ॥

विश्वामित्रेणत्रिशङ्कुंप्रतिशरीरसाहित्येनैवस्वर्गप्रापणप्रतिज्ञानपूर्वकंशिष्याणांनानाश्रमेभ्योमुनिगणानयनायप्रेषणम् ॥ १ ॥ शिष्यैर्विश्वामित्रंप्रतिमुनिजनागमननिवेदनपूर्वकंवासिष्ठानामपहासवचनानुवादः ॥ २ ॥ विश्वामित्रेणतेषांनीचयोनिजननरूपशापदानम् ॥ ३ ॥

उक्तवाक्यं तु राजानं कृपया कुशिकात्मजः ॥ अब्रवीन्मधुरं वाक्यं साक्षाच्चण्डालरूपिणम् ॥ १ ॥
ऐक्ष्वाक स्वागतं वत्स जानामि त्वां सुधार्मिकम् ॥ शरणं ते भविष्यामि मा भैषीर्नृपपुङ्गव ॥ २ ॥
अहमामन्त्रये सर्वान्महर्षीन्पुण्यकर्मणः ॥ यज्ञसाह्यकरान्राजंस्ततो यक्ष्यसि निर्वृतः ॥ ३ ॥
गुरुशापकृतं रूपं यदिदं त्वयि वर्तते ॥ अनेन सह रूपेण सशरीरो गमिष्यसि ॥ ४ ॥

लं सशरीरस्वर्गः ॥२०॥ वसिष्ठप्रत्याख्यानमूलंपापंमयिनास्तीत्याशयेनाह—अनृतमिति । यद्वा "यज्ञोनृतेनक्षरति" इतिवचनात् क्रतुनाशकत्वेनावगतमनृतमपिमयिनास्तीत्याह । मे मया । क्षत्रधर्मेण तत्साक्षितयेत्यर्थः । कृच्छ्रेष्वपिगतः आपद्गतोपि । ते पुरतइतिशेषः ॥ २१ ॥ यज्ञैरिति पूर्वसशरीरत्वसाधनक्रतुशतमुक्तं अत्रनित्यकर्मेतिभिदा । यद्वा पूर्वंक्रतुशतं इष्टं यष्टुमुपक्रान्तमित्यर्थः । तन्नावाप्यते तादृशक्रत्वनुष्ठानमनोरथोनावाप्यतइत्यर्थः । शीलवृत्तेन शीलयुक्तवृत्तेन । शीलं सद्गुणः । वृत्तमाचारः ॥ २२ ॥ प्रयतमानस्येतिसन्नम्यर्थेषष्ठी । ममेतिशेषः ॥२३॥ अतइत्युपस्कार्यं । दैवमत्रप्रारब्धफलमदृष्टं । परं श्रेष्ठं । पुरुषहिताहितप्रापकमित्यर्थः । पौरुषं इदानींतनधर्मानुष्ठानं । निरर्थकं प्रारब्धकर्मतिरस्कारानर्हमित्यर्थः । आक्रम्यते अभिभूयते । परमागतिः इतरतिरस्कारेणैहिकसुखदुःखादिप्रापकमित्यर्थः ॥ २४ ॥ प्रसादं दैवानुकूल्यं ॥ २५ ॥ गतिं शरणं । वसिष्ठेनस्वयमाहूतश्चेत्किंकरिष्यसीत्यत्राह—नान्यःशरणमस्तीति । पुरुषकारेण त्वत्प्रसादरूपानुकूल्यकरणेन ॥ २६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्यानेऽष्टपञ्चाशःसर्गः ॥५८॥

जातिचण्डालस्यकदाचित्तद्भावनिवृत्तिरस्ति नतुकर्मचण्डालस्येत्याहएकोनषष्टितमे—उक्तवाक्यमित्यादि । साक्षाच्चण्डालरूपिणं चण्डालचिह्नधारित्वाच्छास्त्रगम्यचण्डालभावइत्यर्थः ॥ १ ॥ ऐक्ष्वाकेत्यादिचत्वारः ॥ २ ॥ यज्ञसाह्यकरान् यज्ञसहायकरान् ॥ ३ ॥ गमिष्यसि स्वर्गमितिशेषः । अनेनेत्यनेन

शि० सर्वकालंसद्वृत्तत्वात्पापान्तरस्यापिमयिसंभावनानकर्तव्येतिबोधयितुमाह–यज्ञैरिति ॥२२॥ इत्यष्टपञ्चाशः सर्गः ॥५८॥

शि० साक्षाद्देवाब्रवीत् । तुशब्द एवार्थे । साक्षादब्रवीदित्यनेनचण्डालस्साक्षादभिभाषणानर्हइतिनिषेधस्यानर्हःसइतिध्वनितं । तेनकर्मणाजात्याचसनचण्डालइतिव्यञ्जितं । अतएव चण्डालरूपिणमितिविशेषणम् ॥ १ ॥

[पा०] १ ख. दैवतंपरमंमन्ये. २ ख. नान्यांगतिंप्रपद्यामि. ३ क. घ. ङ. च. झ. ञ. नान्यच्छरणमस्तिमे. ४ ख. उक्तवाक्यंतुराजानंसाक्षाच्चण्डालरूपिणम् । अब्रवीन्मधुरंवाक्यंकृपयाकुशिकात्मजः. ५ घ. शापाच्चण्डालरूपिणम्. ङ. च. छ. झ. ञ. साक्षाच्चण्डालतांगतम्. ६ ख. ङ—ट. इक्ष्वाको. क. घ. ऐक्ष्वाको. ७ क. ख. स्वागतंतेस्तु. ८ क. ख. ङ. च. छ. झ. ञ. तेप्रदास्यामि. ९ घ. माभैषीर्मनुजाधिप. १० घ. यज्ञसाहायिकान्. ११ क. ख. अनेनैवहिरूपेण. १२ घ. स्वर्गलोकंगमिष्यसि.

हस्तप्राप्तम[1]हं मन्ये स्वर्गं तव न[2]राधिप ॥ यस्त्वं कौशिकमागम्य शरण्यं श[3]रणागतः ॥ ५ ॥
एवमुक्त्वा महातेजाः पुत्रान्परमधार्मिकान् ॥ व्यादिदेश महाप्राज्ञान्यज्ञसंभारकारणात् ॥
सर्वाञ्शिष्यान्समाहूय वाक्यमेतदुवाच ह ॥ ६ ॥
स[4]र्वानृषिगणान्वत्सा आनयध्वं ममाज्ञया ॥ सशि[5]ष्यसुहृदश्चैव सर्त्विजः स[6]बहुश्रुतान् ॥ ७ ॥
यदन्[7]यो वचनं ब्रूयान्मद्वाक्यबलचोदितः ॥ त[8]त्सर्वमखिलेनोक्तं म[9]माख्येयमनादृतम् ॥ ८ ॥
तस्य तद्वचनं श्रुत्वा दिशो जग्मुस्तदाज्ञया ॥ आजग्मुरथ देशेभ्यः सर्वेभ्यो ब्रह्मवादिनः ॥ ९ ॥
ते[10] च शिष्याः समागम्य मुनिं ज्[11]वलिततेजसम् ॥ ऊचुश्च व[12]चनं सर्वे सर्वेषां ब्रह्मवादिनाम् ॥१०॥
श्रुत्वा ते व[13]चनं सर्वे समायान्ति द्वि[14]जातयः ॥ सर्वदेशेषु चागच्छन्वर्जयित्वा महोदयम् ॥ ११ ॥
वा[15]सिष्ठं तच्छतं सर्वं क्रोध[16]पर्याकुलाक्षरम् ॥ य[17]दाह वचनं सर्वं शृणु त्वं मुनिपुङ्गव ॥ १२ ॥
क्षत्रियो याजको यस्य चण्डालस्य विशेषतः ॥ कथं सदसि भोक्तारो हविस्तस्य सुरर्षयः ॥ १३ ॥
ब्राह्मणा वा महात्मानो भक्त्वा च[18]ण्डालभोजनम् ॥ कथं स्वर्गं गमिष्यन्ति विश्वामित्रेण पालिताः॥१४॥
एतद्वचननैष्ठुर्यमूचुः संरक्तलोचनाः ॥ वासिष्ठा मुनिशार्दूल स[19]र्वे ते समहोदयाः ॥ १५ ॥
तेषां तद्वचनं श्रुत्वा सर्वेषां मुनिपुङ्गवः ॥ [20]क्रोधसंरक्तनयनः स[21]रोषमिदमब्रवीत् ॥ १६ ॥
ये[22] दूषयन्त्यदुष्टं मां तप उग्रं समास्थितम् ॥ भस्मीभूता दुरात्मानो भविष्यन्ति न संशयः ॥१७॥
अद्य ते कालपाशेन नीता वैवस्वतक्षयम् ॥ सप्तजातिशतान्येव मृ[23]तपाः सन्तु सर्वशः ॥ १८ ॥

ऋषिशापकृतरूपस्य ब्रह्मणाप्यवार्यत्वेन जातिचण्डालताऽभावेन मत्तपोमहिमोपबृंहितयज्ञेन सशरीरःस्वर्गंगमिष्यसीतिभावः ॥ ४ ॥ हस्तप्राप्तं अनायासेन सद्योलब्धं । तत्रहेतुः—यस्त्वमिति ॥ ५ ॥ एवमितिसार्धः । शिष्यान् भृत्यान् ॥ ६ ॥ सुहृदः मत्सुहृदः । शोभनहृदयान्वा ॥ ७ ॥ मद्वाक्यबलेनचोदितः आहूतः यःकश्चनान्यः अनादृतं उपेक्षारूपं चण्डालंयाजयतीतिनिन्दारूपंवा यद्वाक्यंब्रूयात् तेनोक्तंतत्सर्वमखिलेनममाख्येयं ॥ ८ ॥ तस्येतिद्वौ । ब्रह्मवादिनः शिष्याः ॥ ९ ॥ ब्रह्मवादिनांवचनमित्यन्वयः ॥ १० ॥ यदनादरवचनंमुनीनांतदपिवक्तव्यमित्युक्तत्वात्तदपिवदन्ति श्रुत्वेत्यादिषट् । सर्वदेशेषु स्थिताइतिशेषः । महोदयमिति । तदाख्यमृषिमित्यर्थः । वासिष्ठशतंचवर्जयित्वेतिद्रष्टव्यं ॥ ११ ॥ वासिष्ठंयदाहेत्यत्रमहोदयश्चेत्यपिबोध्यं उपसंहारेतथादर्शनात् ॥ १२ ॥ विप्रस्यैवयाजनाधिकारात् चण्डालस्ययाज्यत्वानधिकारात् तस्यसदसिदेवताःकथंहविर्भोक्तारः । लुट् ऋषयश्चकथमिष्टशिष्टभोक्तारइतिभावः ॥ १३ ॥ पालिताइतिक्षेपोक्तिः । अयाज्ययाजयितारः ऋषयः कथंस्वर्गंगमिष्यन्तीतिभावः ॥ १४—१६ ॥ "तेषांतेजोविशेषेणप्रत्यवायोनविद्यते" इतिन्यायेनचण्डालयाजनमपिजीर्यतीत्यविज्ञाययेदूषन्ति तेभस्मीभूताभविष्यन्तीत्यर्थः ॥ १७ ॥ अद्येत्यादिपञ्च । क्षयं गृहं । सप्तजातिशतानि सप्तजन्मशतानि । मृत-

---

शि० महोदयंवर्जयित्वेत्यनेन तस्यवसिष्ठपुत्रानुयायित्वंध्वनितं ॥११॥ ति० वासिष्ठंयच्छतंतदपिवर्जयित्वेतियोजना ॥१२॥ शि० सुर्षयः सुराश्चऋषयश्च हविर्भोक्तारःकथं नभोक्तारइत्यर्थः ॥ १३ ॥ शि० पूर्वमनधिकारियाजकप्रयुक्ताशुद्धिंहविषउक्त्वा इदानींअनधिकारियाज्यप्रयुक्ताशुद्धिंहविषोबोधयन्नाह—ब्राह्मणाइति ॥ १४ ॥ ति० यत् यस्मात् ॥ १७ ॥ ति० मृतपाः

[पा०] १ घ. मिमंमन्येस्वर्गलोकं. २ क. ख. घ. नरेश्वरम्. ३ घ. ज. ट. शरणंगतः. ४ ख. ङ. च. छ. झ. ञ. ट. सर्वानृषीन्सवासिष्ठान्. घ. ज. सर्वानृषिवरान्साधून्. ५ ख. घ—ट. सशिष्यान्सुहृदश्चैव. ६ ङ. च. छ. झ. ञ. ट. सुबहुश्रुतान्. ७ ज. यद्यन्यो. ८ घ. तत्सर्वमखिलोक्तंहि. ९ घ. समाख्येयमनावृतम्. १० ख. तेतुशिष्याः. ११ ख. ज्वलिततेजसः. १२ क. ख. ङ. च. झ. ञ. वचनंसर्वे. १३ घ. वचनंसर्वे. १४ ख. द्विजोत्तमाः १५ ङ. च. छ. झ. ञ. वासिष्ठंयच्छतं. क, वासिष्ठंतुशतं. १६ ज. क्रोधपर्याकुलेक्षणम. घ. कोपपर्याकुलाक्षरम्. १७ क. ङ—ञ. यथाहवचनं. १८ ङ. छ. झ. ट. चाण्डालभोजनम्. १९ क. ख. घ—ट. सर्वेसहमहोदयाः. २० ख. कोपसंरक्तनयनः. २१ क. इदंवचनमब्रवीत्. २२ क. ग. घ. झ. ञ. ट. यद्दूषयन्ति. २३ ङ. च. छ. झ. ञ. मृतपास्संभवन्तुते.

श्वमांसनियताहारा मुष्टिका नाम निर्घृणाः ॥ विकृताश्च विरूपाश्च लोकाननुचरन्त्विमान् ॥ १९ ॥
महोदयश्च दुर्बुद्धिर्मामदूष्यं ह्यदूषयत् ॥ दूषितः सर्वलोकेषु निषादत्वं गमिष्यति ॥ २० ॥
प्राणातिपातनिरतो निरनुक्रोशतां गतः ॥ दीर्घकालं मम क्रोधाद्दुर्गतिं वर्तयिष्यति ॥ २१ ॥
एतावदुक्त्वा वचनं विश्वामित्रो महातपाः ॥ विरराम महातेजा ऋषिमध्ये महामुनिः ॥ २२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे एकोनषष्टितमः सर्गः ॥ ५९ ॥

षष्टितमः सर्गः ॥ ६० ॥

विश्वामित्रेणमुनिगणमध्येस्वाभिप्रायनिवेदनेनतैःसहयज्ञोपक्रमः ॥ १ ॥ तथाभागार्थमाह्वानेप्यनागतेषुदेवेषुतपोबलेन त्रिशङ्कोःस्वर्गप्रापणम् ॥ २ ॥ इन्द्रादिभिःप्रतिरोधे अवाक्छिरस्त्वेनपतताऽतेनमुनिंप्रत्याक्रोशनम् ॥ ३ ॥ विश्वामित्रेणत्रिशङ्कुस्तंभनपूर्वकंस्वर्गान्तरसर्जनप्रतिज्ञानेनकतिपयनक्षत्रसर्जनेदेवैस्तत्परिसान्त्वनम् ॥ ४ ॥ देवैस्त्रिशङ्कोर्मुनिसृष्टनक्षत्राणांचतत्रैवावस्थानानुमतिपूर्वकंपुनःस्वलोकगमनम् ॥ ५ ॥

तपोबलहतान्कृत्वा वासिष्ठान्समहोदयान् ॥ ऋषिमध्ये महातेजा विश्वामित्रोऽभ्यभाषत ॥ १ ॥
अयमिक्ष्वाकुदायादस्त्रिशङ्कुरिति विश्रुतः ॥ धर्मिष्ठश्च वदान्यश्च मां चैव शरणं गतः ॥
तेनानेन शरीरेण देवलोकजिगीषया ॥ २ ॥
यथाऽयं स्वशरीरेण स्वर्गलोकं गमिष्यति ॥ तथा प्रवर्त्यतां यज्ञो भवद्भिश्च मया सह ॥ ३ ॥
विश्वामित्रवचः श्रुत्वा सर्व एव महर्षयः ॥ ऊचुः समेत्य सहिता धर्मज्ञा धर्मसंहितम् ॥ ४ ॥
अयं कुशिकदायादो मुनिः परमकोपनः ॥ यदाह वचनं सम्यगेतत्कार्यं न संशयः ॥ ५ ॥
अग्निकल्पो हि भगवाञ्शापं दास्यति रोषितः ॥ तस्मात्प्रवर्त्यतां यज्ञः सशरीरो यथा दिवम् ॥६॥
गच्छेदिक्ष्वाकुदायादो विश्वामित्रस्य तेजसा ॥ तथा प्रवर्त्यतां यज्ञः सर्वे समधितिष्ठत ॥ ७ ॥

पाः शवभक्षकाः ॥ १८ ॥ मुष्टिकाः हीनजातिविशेषाः । विकृताः विकृतवचनव्यापारादयः । विरूपाः विकृतवेषाः ॥ १९ ॥ अदूष्यं उक्तन्यायेनेतिभावः । महोदयश्चेत्यनेन पूर्वशप्तावसिष्ठपुत्राएवेतिगम्यते ॥ २० ॥ प्राणातिपातः बलात्प्राणनाशनं । निरनुक्रोशतां निर्घृणतां । वर्तयिष्यति प्राप्स्यति । ननूग्रतपस्वित्वेपिक्षत्रियस्यचण्डालयाजनं सर्वथाअन्याय्यमेवेति कथंयथार्थवादिपुशापप्रवृत्तिरितिचेदत्रोत्तरं । वसिष्ठवैरनिर्यातनकामस्यविश्वामित्रस्य तपःफलमिदमिति ॥ २१—२२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने एकोनषष्टितमःसर्गः ॥ ५९ ॥

अथसशरीरस्यत्रिशङ्कोस्स्वर्गप्रापणंषष्टितमे—तप इत्यादि ॥ १ ॥ अयमितिसार्धः । दायमत्तीतिदायादः पुत्रपौत्रादिः । पचाद्यच् । वंशइतियावत् । तेन पूर्वं क्षत्रियरूपेण । अनेन इदानींचण्डालरूपेण । शरीरेण देवलोकजिगीषया स्वर्गंस्ववशीकर्तुमिच्छया । मांशरणंगतः ॥ २ ॥ यथेतिपञ्च ॥ ३ ॥ ऊचुः अन्योन्यमितिशेषः ॥ ४ ॥ सम्यक्कार्यमित्यन्वयः ॥ ५ ॥ स-

---

शववस्त्रादिहारिणः ॥ १८ ॥ ति० मुष्टिकानाम तन्नामानः । इदानींडोंबाइतिप्रसिद्धाः ॥ १९ ॥ इत्येकोनषष्टितमस्सर्गः ॥५९॥

ति० ज्ञात्वा योगबलेन ॥ १ ॥

[पा०] १ ख. घ. महोदयस्तु. २ क. च. ट. मदूषयत्. घ. ञ. हिदूषयन्. ३ ङ. झ. ञ. ट. हताञ्ज्ञात्वा. ४ क. ख. ग. ङ. च. छ. झ. ञ. ट. स्वेनानेन. घ. स्वकेनैव. ५ ग. ङ. च. छ. झ. ञ. देवलोकं. ६ ङ. च. छ. झ. ञ. ट. ऊचुस्समेतास्सहसा. ७ ङ. झ. ञ. ट. रोषतः. ८ क. ग. च. छ. ज. प्रवर्ततां. ९ ङ. च. छ. झ. ञ. यथादिवि. १० क. ख. च. छ. ज. ततःप्रवर्ततां. घ. ङ. झ. ञ. ट. ततःप्रवर्त्यतां.

एवमुक्त्वा महर्षयः चक्रुस्तास्ताः क्रियास्तदा ॥ याजकश्च महातेजा विश्वामित्रोऽभवत्क्रतौ ॥ ८ ॥
ऋत्विजश्चानुपूर्व्येण मन्त्रवन्मन्त्रकोविदाः ॥ चक्रुः सर्वाणि कर्माणि यथाकल्पं यथाविधि ॥ ९ ॥
ततः कालेन महता विश्वामित्रो महातपाः ॥ चकारावाहनं तत्र भागार्थं सर्वदेवताः ॥ १० ॥
नाभ्यागमंस्तदाऽऽहूता भागार्थं सर्वदेवताः ॥ ११ ॥
ततः क्रोधसमाविष्टो विश्वामित्रो महामुनिः ॥ स्रुवमुद्यम्य सक्रोधस्त्रिशङ्कुमिदमब्रवीत् ॥ १२ ॥
पश्य मे तपसो वीर्यं स्वार्जितस्य नरेश्वर ॥ एष त्वां सशरीरेण नयामि स्वर्गमोजसा ॥
दुष्प्रापं स्वशरीरेण दिवं गच्छ नराधिप ॥ १३ ॥
स्वार्जितं किंचिदप्यस्ति मया हि तपसः फलम् ॥ राजन्स्वतेजसा तस्य सशरीरो दिवं व्रज ॥ १४ ॥
उक्तवाक्ये मुनौ तस्मिन्सशरीरो नरेश्वरः ॥ दिवं जगाम काकुत्स्थ मुनीनां पश्यतां तदा ॥ १५ ॥
देवलोकगतं दृष्ट्वा त्रिशङ्कुं पाकशासनः ॥ सह सर्वैः सुरगणैरिदं वचनमब्रवीत् ॥ १६ ॥
त्रिशङ्को गच्छ भूयस्त्वं नासि स्वर्गकृतालयः ॥ गुरुशापहतो मूढ पत भूमिमवाक्छिराः ॥ १७ ॥
एवमुक्तो महेन्द्रेण त्रिशङ्कुरपतत्पुनः ॥ विक्रोशमानस्त्राहीति विश्वामित्रं तपोधनम् ॥ १८ ॥
तच्छ्रुत्वा वचनं तस्य क्रोशमानस्य कौशिकः ॥ रोषमाहारयत्तीव्रं तिष्ठतिष्ठेति चाब्रवीत् ॥ १९ ॥
ऋषिमध्ये स तेजस्वी प्रजापतिरिवापरः ॥ सृजन्दक्षिणमार्गस्थान्सप्तर्षीनपरान्पुनः ॥ २० ॥
नक्षत्रमालामपरामसृजत्क्रोधमूर्च्छितः ॥ दक्षिणां दिशमास्थाय मुनिमध्ये महायशाः ॥ २१ ॥

मधितिष्ठत स्वस्वार्त्विज्यमितिशेषः ॥ ६—७ ॥ तास्ताःक्रियाः स्वस्वार्त्विज्यकर्माणि । याजकः अध्वर्युः । स्रुवमुद्यम्येतिवक्ष्यमाणत्वात् ॥ ८ ॥ मन्त्रवदितिक्रियाविशेषणं । यथाकल्पं कल्पसूत्रमनतिक्रम्य । यथाविधि यथाशास्त्रं ॥ ९ ॥ महताकालेन द्वित्रिर्मन्त्रावृत्त्या । सर्वदेवताः प्रतीतिशेषः ॥ १० ॥ नेत्यर्धं । नाभ्यागमन् अनधिकारिणा अन्यायेनच कृतमकृतमितिन्यायादितिभावः ॥ ११ ॥ स्रुवोद्यमनं कोपजचेष्टाविशेषः ॥ १२ ॥ पश्येतिसार्धः । त्वदभिमतयागस्त्वास्तामितिभावः । एषइत्यव्यवधाने । ओजसा तपोवीर्येण । दुष्प्रापं अन्यैरितिशेषः ॥ १३ ॥ स्वार्जितं सुष्ठ्वार्जितं । स्वतेजसा स्वासाधारणप्रभावेन ॥ १४ ॥ मुनीनांपश्यतां मुनिपुपश्यत्सुसत्सु ॥ १५ ॥—देवेतिचत्वारः ॥ १६ ॥ स्वर्गकृतालयः स्वर्गालयार्हः ॥ १७—१८ ॥ आहारयत् अकरोत् ॥ १९ ॥ सृजन् अभूदितिशेषः । असृजदित्यर्थः ॥ २० ॥ मुनिमध्येस्थितएव दक्षिणांदिशमास्थाय तामधिकरणंकृत्वा । नक्षत्रमालां सप्तविंशतिनक्षत्रमालां । यथोत्तरतोध्रुवोचलस्तिष्ठति एवंत्रिशङ्कुस्तिष्ठतु । तंपरितोयथासप्तर्षिमण्डलं तद्वदत्रापिभवतु । तत्रयथानक्षत्राणि तद्वदत्रापीत्यर्थः

शि० मन्त्रकोविदाः मन्त्रोपलक्षितयागनिपुणाः ॥ ९ ॥ शि० सक्रः अतिक्रियासहितः । अधः कोपान्तर्धारणासमर्थः । क्रइत्यत्रकृधातोः "घञर्थेकविधानं" इतिकः । नञ्पूर्वकधारणार्थकधाधातुप्रकृतिककप्रत्ययान्तोऽधइति । अतएव क्रोधसमाविष्ट इत्यनेननपौनरुक्त्यं । ति० सक्रोधः कोपस्यैवाधिकावस्थाक्रोधः ॥ १२ ॥ ति० हेराजंस्त्वं तस्यतेजसा वैभवेन दिवंव्रज । क्रुद्धत्वात्पुनरुक्तिर्नदोषः ॥ १४ ॥

[पा०] १ ट. एवमुक्ताः. २ क. ख. घ. च. छ. झ. ञ. संजहुस्ताःक्रियास्तदा. ज. ट. संचक्रुस्ताःक्रियास्तदा. च. छ. ञ. चक्रुस्तास्ताःक्रियास्तथा. क. ख. क्रियास्ततः. ३ घ. महाक्रतोः. ४ घ. यथावन्मन्त्रकोविदाः. ५ ङ. च. छ. झ. ञ. स्तदातत्र. ख. घ. ज. ट. स्ततस्तत्र. क. स्तत्रतत्र. ६ ङ. च. छ. झ. ञ. कोपसमाविष्टो. ७ ग. ङ. च. छ. झ. ञ. ट. स्वशरीरेण. ८ ङ. च. छ. झ. ञ. ट. स्वर्गंगच्छनरेश्वर. ९ ज. किंचिदद्यास्ति. घ. किंचिदत्रास्ति. १० घ. मयाद्यतपसः. ११ क. ग. ङ. च. छ. झ. ञ. ट. राजंस्त्वं. १२ क. ख. ग. नराधिपः. १३ ट. देवलोकंगतं. ङ. च. छ. झ. ञ. स्वर्गलोकंगतं. १४ घ. सहस्राक्षस्सुरगणैः. १५ च. छ. स्वर्गेकृतालयः. १६ ख. अपतद्भुवि. १७ ज. ट. क्रोधमाहारयत्तीव्रं. ग. रोषमाहारयंस्तीव्रं. १८ ङ. च, झ. नक्षत्रवंशमवरं. १९ ग. ङ. च. छ. झ. ञ, ऋषिमध्ये. २० क. ग. घ. महातपाः.

[1]सृष्ट्वा नक्षत्रवंशं च क्रोधेन कलुषीकृतः ॥ अन्यमिन्द्रं करिष्यामि लोको वा स्यादनिन्द्रकः ॥
दैवतान्यपि [2]स क्रोधात्स्रष्टुं समुपचक्रमे ॥ २२ ॥
ततः परमसंभ्रान्ताः सर्षिसङ्घाः [3]सुरासुराः ॥ [[4]सकिंनरमहायक्षाः सहसिद्धाः [5]सचारणाः]
विश्वामित्रं महात्मानमूचुः सानुनयं वचः ॥ २३ ॥
अयं राजा महाभाग गुरुशापपरिक्षतः ॥ सशरीरो दिवं यातुं [6]नार्हत्येव तपोधन ॥ २४ ॥
[7]तेषां तद्वचनं श्रुत्वा देवानां मुनिपुङ्गवः ॥ अब्रवीत्सुमहद्वाक्यं कौशिकः सर्वदेवताः ॥ २५ ॥
सशरीरस्य भद्रं वस्त्रिशङ्कोरस्य भूपतेः ॥ [8]आरोहणं प्रतिज्ञाय नानृतं कर्तुमुत्सहे ॥ २६ ॥
स्वर्गोस्तु सशरीरस्य त्रिशङ्कोर[9]स्य शाश्वतः ॥ नक्षत्राणि च सर्वाणि मामकानि [10]ध्रुवाण्यथ ॥ २७ ॥
यावल्लोका धरिष्यन्ति तिष्ठन्त्वेतानि सर्वशः ॥ [11]मत्कृतानि सुराः सर्वे तदनुज्ञातुमर्हथ ॥ २८ ॥
एवमुक्ताः सुराः सर्वे प्रत्यूचुर्मुनिपुङ्गवम् ॥ २९ ॥
एवं भवतु भद्रं ते तिष्ठन्त्वेतानि सर्वशः ॥ गगने [12]तान्यनेकानि वैश्वानरपथाद्बहिः ॥ ३० ॥
नक्षत्राणि मुनिश्रेष्ठ तेषु [13]ज्योतिष्षु जाज्वलन् ॥ अवाक्छिरास्त्रिशङ्कुश्च तिष्ठत्वमरसंनिभः ॥ ३१ ॥
अनुयास्यन्ति चैतानि ज्योतींषि नृपसत्तमम् ॥ कृतार्थं कीर्तिमन्तं च [14]स्वर्गलोकगतं तथा ॥ ३२ ॥
विश्वामित्रस्तु धर्मात्मा सर्वदेवैरभिष्टुतः ॥ [15]ऋषिभिश्च महातेजा बाढमित्या[16]ह देवताः ॥ ३३ ॥

॥ २१ ॥ सृष्ट्वेतिसार्धः । नक्षत्रवंशं क्षुद्रनक्षत्रगणं । द्वितीयार्धान्तेइतिसंकल्प्येत्युपस्कार्यं । अन्यमिन्द्रंकरिष्यामि विद्यमानलोकस्यान्येन्द्रंकरिष्यामि । अनिन्द्रकोलोकोवास्यात् । इन्द्ररहितंलोकान्तरंवाकरिष्यामीत्यर्थः । अतएवाहुराचार्याः "अन्येन्द्रकंभुवनमन्यदनिन्द्रकंवाकर्तुंक्षमेकविरभूदयमन्ववाये" इति । अस्मिन्नर्थेइन्द्रंनाशयिष्यामीत्यर्थःस्यात् । सोनुचितः । सृष्ट्यन्तरोपक्रमविरोधात् । "दैवतान्यपिसक्रोधात्स्रष्टुं समुपचक्रमे" इत्यनन्तरविरोधाच्च । अतएवायमर्थो भवितुमर्हति मयासृज्यमानस्यस्वर्गस्यान्यमिन्द्रंकरिष्यामि अथवामयासृज्यस्स्वर्गलोकोऽनिन्द्रकोवास्तु तत्रत्रिशङ्कुरेवेन्द्रोभवतु तत्परिवारान्सृजेयमितिताहृशदेवान्स्रष्टुमुपचक्रमइत्यर्थः ॥ २२ ॥ परमसंभ्रान्ताः स्वप्रतिसृष्टेरतिदुस्सहत्वादितिभावः । सानुनयं ससान्त्वं ॥ २३ ॥ अनुनयमेवाह—अयमित्यादि । नार्हति अदुष्टत्रैवर्णिकसभ्यत्वात्स्वर्गस्येतिभावः ॥ २४ ॥ तेषामितिचत्वारः ॥ २५ ॥ भद्रंवइतिप्रतिसान्त्वं ॥ २६ ॥ स्वर्गोस्तु अयंत्रिशङ्कुस्थितिदेशएवेतिशेषः । मत्कृतानि मत्सृष्टानि । अतएवमामकानि । लोकाः भूरादयः । यावद्धरिष्यन्ति स्थास्यन्ति । सर्वशः सर्वप्रकारेण । ध्रुवाणि भवन्तु । प्रार्थनायांलोट् । तत् पूर्वोक्तं । अनुज्ञातुं अङ्गीकर्तुं ॥ २७—२८ ॥ एवमुक्ताइत्यादिसार्धाःपञ्च ॥ २९ ॥ सर्वशः सर्वाणि । वैश्वानरपथात् वैश्वानरः ज्योतिः तत्पथात्प्रसिद्धानादिज्योतिश्चक्रमार्गात् ॥ ३० ॥ तेषु त्वत्सृष्टेषु । जाज्वलन् अतिशयेनप्रकाशमानः । अवाक्छिराः गुर्वपचारफलप्रकटनायाधोमुखः । अमरसंनिभः तेजसाअमरतुल्यः । तिष्ठतु ध्रुवइवेतिभावः ॥ ३१ ॥ अनुयास्यन्ति स्वर्गनक्षत्राणिध्रुवमिवेतिभावः । स्वर्गलोकगतंयथा स्वर्गलोकगतमिव । कृतार्थमित्यन्वयः ॥ ३२ ॥ बाढमित्यङ्गीकारद्योतकंवचनं ॥ ३३ ॥

तनि० लोकोवास्यात् सेन्द्रं लोकान्तरंवास्यादित्यर्थः । अनिन्द्रकस्स्यात् विद्यमानंभुवनमिन्द्ररहितमनायकंवास्यादित्यर्थः॥२२॥ **ति०** स्वर्गोस्तु स्वर्गपदवाच्यसुखविशेषानुभवोस्तु ॥ २७ ॥ **ति०** बाढमित्येव आहेतिशेषः । दुराग्रहस्यानर्थहेतुतांप्रतिसंधाय

[पा०] १ क. कृत्वानक्षत्र. २ ज. चक्रोधात्. क. ख. ग. संक्रोधात्. ट. सक्रोधस्स्रष्टुं. ३ ज. सचारणाः. ख. सुरर्षभाः. क. सुरर्षयः. ४ इदमर्धं ग. ज. दृश्यते. ५ ज. सुरासुराः. ६ ग. नार्हत्येष. ज. नार्हतीति. घ. नचार्हति. ७ क. ख. घ. ज. तेषांतुव. ८ ङ. च. छ. झ. ञ. ट. आरोहणंप्रतिज्ञातं. ज. आरोहणे. ९ क घ. ज. रेवशाश्वतम्. ट. रेष. १० क. ध्रुवाणिच. ११ झ. यत्कृतानि. १२ ग. तानिसर्वाणि. १३ ग. घ. च. ज. ज्योतिष्षुजज्वलुः. १४ क. ट. स्वर्गलोकंगतं. घ. ब्रह्मलोकगतं. क—ट. गतंयथा. १५ ङ. च. छ. झ. ञ. ऋषिमध्ये. १६ क. ङ—ट. मित्येवदेवताः.

ततो देवा महात्मानो मुनयश्च[1] तपोधनाः ॥ जग्मुर्यथागतं सर्वे यज्ञस्यान्ते नरोत्तम ॥ ३४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे षष्टितमः सर्गः ॥ ६० ॥

एकषष्टितमः सर्गः ॥ ६१ ॥

अंबरीषेणयजनारंभेइन्द्रेणगूढंयज्ञपशोरपहारेपुरोहितेनानुकल्पतयाराजानंप्रतिनरपशोरानयनचोदना ॥१॥ पशुक्रयणाय पर्यटताराज्ञाभृगुतुन्देऋचीकमृषिंप्रतिगोशतसहस्रस्वीकारेणपशुभावेन सुतविक्रयणप्रार्थना ॥ २ ॥ मातापितृभ्यांज्येष्ठकनिष्ठयोर्विक्रयणानङ्गीकरणे अंबरीषेणपरिशेषादात्मविक्रयनिश्चयात्स्वयमुपागतेनशुनश्शेपनाम्नामध्यमेनसहनिर्गमनम् ॥ ३ ॥

विश्वामित्रो महात्मा[2]ऽथ प्रस्थितान्प्रेक्ष्य[3] तानृषीन् ॥ अब्रवीन्नरशार्दूलः सर्वांस्तान्[4]वनवासिनः ॥ १ ॥
महान्[5]विघ्नः प्रवृत्तोऽयं दक्षिणामास्थितो[6] दिशम् ॥ दिशमन्यां प्रपत्स्यामस्[7]तत्र तप्स्यामहे[8] तपः[9] ॥ २ ॥
पश्चिमायां[10] विशालायां पुष्करेषु महात्मनः[11] ॥ सुखं तपश्चरिष्यामो[12] वरं[13] तद्धि तपोवनम् ॥ ३ ॥
एवमुक्त्वा महातेजाः[14] पुष्करेषु महामुनिः ॥ तप उग्रं दुराधर्षं[15] तेपे मूलफलाशनः ॥ ४ ॥
एतस्मिन्नेव काले तु अयोध्याधिपतिर्[16]नृपः ॥ अंबरीष इति ख्यातो यष्टुं समुपचक्रमे ॥ ५ ॥
तस्य[17] वै यजमानस्य पशुमिन्द्रो जहार[18] ह ॥ प्रनष्टे तु पशौ[19] विप्रो राजानमिदम्[20]अब्रवीत् ॥ ६ ॥
पशुर्[21]अद्य हृतो राजन्प्रनष्टस्तव दुर्नयात् ॥ अरक्षितारं राजानं घ्नन्ति दोषा नरेश्वर ॥ ७ ॥
प्रायश्चित्तं महद्[22]ध्येतन्नरं वा पुरुषर्षभ ॥ आनयस्व पशुं शीघ्रं यावत्कर्म प्रवर्तते[23] ॥ ८ ॥

यज्ञस्यान्तइत्यनेनविश्वामित्रेणयजमानप्रतिनिधिंकृत्वा यज्ञःसमापितः । देवैर्भागश्चगृहीतइतिगम्यते ॥३४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने षष्टितमः सर्गः ॥ ६० ॥

अथ शरणागतशुनःशेपरक्षणोचितशक्तिवक्तुं तपोन्तरमाहैकषष्टितमे— विश्वामित्रइत्यादि । तान् स्वाज्ञयासमागतान् । वनवासिनः स्वतपोवनवासिनः । ॥ १ ॥ योहंदक्षिणांदिशमास्थितः तस्यमेमहान्विघ्नः प्रवृत्तइत्यर्थः ॥ २ ॥ विशालायां विशालतपोवनवत्यां पश्चिमायांदिशिवर्तमानेषु । पुष्करेषु पुष्करतीर्थेषु । तत्तीरेष्वित्यर्थः । महात्मनः हेमहात्मानः ॥ ३—५॥ विप्रः पुरोहितइतियावत् ॥६॥ दुर्नयात् अनवधानादित्यर्थः । हृतः केनापीतिशेषः । प्रनष्टः अदृष्टः । णशअदर्शनइतिधातोर्निष्ठा । दोषाः पशुनाशादयः ॥७॥ प्रायश्चित्तं एतत् पशुनाशनिमित्तकं । नरंवा आनयस्व गोभिःक्रीत्वा पशुप्रतिनिधित्वेनेतिशेषः । यावत्प्रवर्त-

---

देवतावचनमङ्गीचकार ॥ ३३ ॥ वि० इतिकुशलवयोराख्यानेतृतीयेह्निवर्तमानकथासमाप्ता ॥ ३४ ॥ इतिषष्टितमस्सर्गः ॥ ६० ॥

ति० सर्वांस्तान्विनयान्वितानितिपाठान्तरं ॥ १ ॥ ति० दक्षिणांदिशं आ समन्ताद्व्याप्य स्थितः अयं त्रिशङ्कुरूपः महाविघ्नः । अस्माकंतपोनाशकत्वात् तच्छायाक्रान्तत्वाचायंदेशोतःपरंतपोऽयोग्यइतिभावः ॥ २ ॥ शि० पुष्करेषु तीर्थविशेषे । बहुवचनमादरार्थं । महात्मनः अतिप्रयत्नशीलमुनीनां । एकवचनंजात्यभिप्रायेण ॥ ३ ॥ ति० अभ्याहृतः इदानींअस्माभिरानीतः पशुः तवदुर्नयात् त्वत्पापवशात् तावकरक्षिणांप्रमादाचप्रनष्टः ॥ ७ ॥ ति० एतत् पशुनाशरूपं महत्प्रायश्चित्तं महतःप्रायश्चित्तस्यकारणं । प्रक्रान्तंकर्मयावत्प्रवर्तते प्रवर्तिष्यते । तावत् ततःप्रागेव । नष्टंपशुमन्विष्यानय । तत्प्रतिनिधित्वेनक्रीत्वानरंवापशु-

[पा०] १ घ. ङ. च. छ. झ. ञ. ऋषयश्च. २ ङ. च. छ. झ. ञ. महातेजाः. ३ ङ. च. छ. झ. ञ. ट. न्वीक्ष्यतानृषीन्. ४ ग. स्तान्सर्वान्वनवासिनः. ५ क—घ. झ. ञ. महाविघ्नः. ६ घ. दक्षिणामाश्रितोदिशं. ख. दक्षिणांदिशमास्थितः. ७ क. प्रवेक्ष्यामः. ग. ट. प्रवत्स्यामः. च. प्रयास्यामः. ८ घ. ज. तप्यामहे. ९ घ. ज. वयम्. १० क. घ. च. ज. पश्चिमस्यां. ११ ख. महामुनिः. ख. घ. च. महामनाः. १२ क. ख. तपश्चरिष्यामि. १३ क—घ. ज. परंतद्धि. ङ. च. छ. झ. ञ. सुखंतद्धि. १४ क. महाबाहो. १५ ख. दुराधर्षः. १६ क. घ—ट. पतिर्महान्. १७ ख. तस्यैवयजमानस्य. १८ घ. जहारच. १९ ख. पशौविप्राः. २० ख. मब्रुवन्. २१ ङ. झ. पशुरभ्याहृतो. ख. घ. ञ. पशुरद्याहृतो. २२ ज. मखस्यैतत्. ट. मघस्यैतत. २३ ज. समाप्यते.

उपाध्यायवचः श्रुत्वा स राजा पुरुषर्षभ ॥ अन्वियेष महाबुद्धिः पशुं गोभिः सहस्रशः ॥ ९ ॥
देशाञ्जनपदांस्तांस्तान्नगराणि वनानि च ॥ आश्रमाणि च पुण्यानि मार्गमाणो महीपतिः ॥ १० ॥
स पुत्रसहितं तात सभार्यं रघुनन्दन ॥ भृगुतुन्दे समासीनमृचीकं संददर्श ह ॥ ११ ॥
तमुवाच महातेजाः प्रणम्याभिप्रसाद्य च ॥ ब्रह्मर्षिं तपसा दीप्तं राजर्षिरमितप्रभः ॥
पृष्ट्वा सर्वत्र कुशलमृचीकं तमिदं वचः ॥ १२ ॥
गवां शतसहस्रेण विक्रीणीषे सुतं यदि ॥ पशोरर्थे महाभाग कृतकृत्योसि भार्गव ॥ १३ ॥
सर्वे परिसृता देशा याज्ञीयं न लभे पशुम् ॥ दातुमर्हसि मूल्येन सुतमेकमितो मम ॥ १४ ॥
एवमुक्तो महातेजा ऋचीकस्त्वब्रवीद्वचः ॥ नाहं ज्येष्ठं नरश्रेष्ठ विक्रीणीयां कथंचन ॥ १५ ॥
ऋचीकस्य वचः श्रुत्वा तेषां माता महात्मनाम् ॥ उवाच नरशार्दूलमम्बरीषं तपस्विनी ॥ १६ ॥
अविक्रेयं सुतं ज्येष्ठं भगवानाह भार्गवः ॥ ममापि दयितं विद्धि कनिष्ठं शुनकं नृप ॥
तस्मात्कनीयसं पुत्रं न दास्ये तव पार्थिव ॥ १७ ॥
प्रायेण हि नरश्रेष्ठ ज्येष्ठाः पितृषु वल्लभाः ॥ मातृणां च कनीयांसस्तस्माद्रक्षे कनीयसम् ॥ १८ ॥
उक्तवाक्ये मुनौ तस्मिन्मुनिपत्न्यां तथैव च ॥ शुनश्शेपः स्वयं राम मध्यमो वाक्यमब्रवीत् ॥ १९ ॥
पिता ज्येष्ठमविक्रेयं माता चाह कनीयसम् ॥ विक्रीतं मध्यमं मन्ये राजन्पुत्रं नयस्व माम् ॥ २० ॥
[अथ राजा महाबाहो वाक्यान्ते ब्रह्मवादिनः ॥ हिरण्यस्य सुवर्णस्य कोटिभी रत्नराशिभिः] ॥ २१ ॥
गवां शतसहस्रेण शुनःशेपं नरेश्वरः ॥ गृहीत्वा परमप्रीतो जगाम रघुनन्दन ॥ २२ ॥

ते प्रवर्तिष्यते "यावत्पुरानिपातयोः—"इतिलट् । तावत् ततःपूर्वमेव । अश्वमेधेपशुविसर्जनानन्तरंकर्मकालस्याव्यवहितत्वादितिभावः । वाकारेणपशुंवान्विष्यानयस्वेतिलभ्यते ॥ ८ ॥ सहस्रशः सहस्रसङ्ख्याभिः । मूल्यभूताभिरितिशेषः ॥ ९ ॥ देशानितिजनपदादिसर्वविशेषणं ॥ १० ॥ सइतिच्छेदः । भृगुतुन्दे भृगोर्गिरितटस्यतुन्दे अभ्यन्तरे । भृग्वाख्यऋषिवासस्थानप्रदेशेवा ॥ ११ ॥ सार्धएकान्वयः । तं मुनिं । इदं वक्ष्यमाणं । वचउवाच । ब्रवीतिर्द्विकर्मकः ॥ १२ ॥ पशोः अर्थे प्रयोजनाय । पशुप्रतिनिध्यर्थमित्यर्थः । यदिविक्रीणीषे विक्रीणीथाः । तदाकृतकृत्योस्मि कृतार्थःस्यां ॥ १३ ॥ परिसृताः संचरिताः । याज्ञीयं यज्ञायहितं । "तस्मैहितं" इतिछः । वृद्धिरार्षी । इतः एतेषुसुतेषु । सार्वविभक्तिकस्तसिः ॥ १४ ॥ कथंचन बहुमूल्येनापि । इतरयोरप्रतिषेधादनुमतिर्गम्यते । "अप्रतिषिद्धमनुमतंभवति" इतिन्यायात् शास्त्रेणापत्यदानविक्रययोर्निषेधेपि मूलावसादेधर्मायापत्यदानवद्यज्ञायापत्यविक्रयोनदोषायेतिभावः ॥ १५—१६ ॥ कनीयमानयेत्यर्थः ।

शि० यावत्कर्मप्रवर्तते तावदेवनरंपशुंशीघ्रमानयस्व । एतदेव अघस्य अघविशिष्टपुरुषस्य । प्रायश्चित्तं अनवधानताजनितपापशोधनं । "प्रायःपापमितिप्रोक्तंचित्तंतच्छोधनंस्मृतं" इत्यनुशासनम् । एतेनोपायान्तरंनास्तीतिसूचितं । हिवाशब्दौ एवार्थे ॥८॥ **शि०** कापथ्यभ्रमवारणायतादृशानुरागेसदाचारंप्रमाणयन्नाह—**प्रायेणेति** । पितृषुवल्लभाः पितृनिष्ठानुरागविषयीभूताः । भवन्तीतिशेषः । **ति०** पितृषु पितॄणां । रक्षिष्यामीत्यर्थेरक्षइत्यार्षं ॥ १८ ॥ **ति०** विक्रेयं मातापित्रोर्विक्रेयत्वेनसंमतं । मन्ये अर्थादितिशेषः ॥ २० ॥ इत्येकषष्टितमस्सर्गः ॥ ६१ ॥

[पा०] १ झ. पुरुषर्षभः. २ ग. रम्याणि. ३ ख. तंपुत्रसहितं. ४ क. ख. समहीपतिः. ५ ङ—ट. भृगुतुंगे. ख. भृगुपुत्रं. ६ क. ख. उवाचचमहातेजाः. ७ ग. झ. महर्षिं. ८ ग. सइदंवचः. क. घ. तदिदंवचः. ९ ङ. च. छ. झ. ञ. परिगतादेशाः. ट. परिसृतादेशाः. ख. ज. परिष्कृतादेशाः. १० ग. ङ. ज. झ. ट. यज्ञीयं. ११ ख. क्रमतोमम. घ. कंततोमम. १२ ख. स्त्विदमब्रवीत्. १३ क. ङ. च. छ. झ. ञ. ट. मंबरीषमिदंवचः. ख. घ. मंबरीषंमहातपाः. १४ ङ. च. छ. झ. ञ. ट. शुनकंप्रभो. १५ क. प्रायेणतु. १६ झ. ज्येष्ठाःपितृषुवल्लभः. ञ. ज्येष्ठाहिपितृवल्लभाः. १७ ख. स्मान्मोक्ष्येकथंसुतम्. १८ घ. राजानंवाक्यमब्रवीत्. १९ ङ. झ. ञ. विक्रेयंमध्यमंमन्येराजन्पुत्रं. क. घ—ट. राजपुत्र. २० अयंश्लोकः ङ. च. छ. झ. ञ. दृश्यते. २१ क. नरेश्वर.

[1]अम्बरीषस्तु राजर्षी रथमारोप्य [2]सत्वरः ॥ [3]शुनःशेपं महातेजा जगामाशु [4]महायशाः ॥ २३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे एकषष्टितमः सर्गः ॥ ६१ ॥

द्विषष्टितमः सर्गः ॥ ६२ ॥

अंबरीषेपुष्करक्षेत्रमेत्यमध्याह्नेविश्रममाणेशुनश्शेपेनतत्रतपस्यन्तंविश्वामित्रमेत्य निजवृत्तान्तनिवेदनपूर्वकंराजकार्याविरोधेनस्वरक्षणप्रार्थना ॥ १ ॥ विश्वामित्रान्मन्त्रद्वयमुपलब्धवताशुनश्शेपेनसहनगरमागतेनांबरीषेणयागोपक्रमः ॥ २ ॥ तत्रपशूकृतेनशुनश्शेपेनविश्वामित्रोपदिष्टगाथाभ्यामिन्द्रोपेन्द्रस्तवनेतुष्टेनेन्द्रेणतन्मोचनपूर्वकंराज्ञोयज्ञफलदानम् ॥ ३ ॥

शुनश्शेपं [5]नरश्रेष्ठ [6]गृहीत्वा तु [7]महायशाः ॥ [8]व्यश्राम्यत्[9]पुष्करे राजा मध्याह्ने रघुनन्दन ॥ १ ॥
तस्य विश्रममाणस्य शुनःशेपो महायशाः ॥ [10]पुष्करक्षेत्रमागम्य विश्वामित्रं ददर्श ह ॥
तप्यन्तमृषिभिः सार्धं मातुलं [11]परमातुरः ॥ २ ॥
[12]विवर्णवदनो दीनस्तृष्णया च श्रमेण च ॥ [13]पपाताङ्के [14]मुनेराशु वाक्यं चेदमुवाच ह ॥ ३ ॥
न मेस्ति माता न पिता ज्ञातयो [15]बान्धवाः कुतः ॥ त्रातुमर्हसि मां सौम्य धर्मेण मुनिपुङ्गव ॥ ४ ॥
त्राता त्वं हि [16]मुनिश्रेष्ठ [17]सर्वेषां त्वं हि भावनः ॥ ५ ॥
राजा च कृतकार्यः स्यादहं दीर्घायुरव्ययः ॥ स्वर्गलोकमुपाश्नीयां तपस्तप्त्वा [18]ह्यनुत्तमम् ॥ ६ ॥
त्वं[19] मे नाथो ह्यनाथस्य भव भव्येन [20]चेतसा ॥ पितेव पुत्रं [21]धर्मात्मंस्त्रातुमर्हसि किल्बिषात् ॥ ७ ॥
तस्य तद्वचनं श्रुत्वा विश्वामित्रो महातपाः ॥ [22]सान्त्वयित्वा बहुविधं पुत्रानिदमुवाच ह ॥ ८ ॥
यत्कृते पितरः पुत्राञ्जनयन्ति शुभार्थिनः ॥ परलोकहितार्थाय तस्य कालोयमागतः ॥ ९ ॥

समित्यकारान्तत्वमार्षं ॥ १७—२३ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने एकषष्टितमः सर्गः ॥ ६१ ॥

अथ शुनःशेपस्य शरणागतिरुच्यते द्विषष्टितमे—शुनःशेपमित्यादि ॥ १ ॥ तस्यविश्रममाणस्य तस्मिन्विश्राम्यतिसति । आगम्येत्यत्र "वा ल्यपि "इत्यनुनासिकलोपाभावःपक्षे । मातुलं "ऋचीकायकौशिकीप्रतिपादिता" इत्युक्तत्वात् ॥ २ ॥ तृष्णयापिपासया । प्राणपरित्राणलोभेनवा । श्रमेण अध्वश्रमेण मातुलत्वादङ्कपतनं ॥ ३ ॥ नास्ति अरक्षकत्वादसत्प्रायाइत्यर्थः । धर्मेण धर्मरूपप्रयोजनोद्देशेन ॥ ४ ॥ त्रातेत्यर्धं । भावनः हितप्रापकः ॥ ५ ॥ यथाचराजाकृतकार्यःस्यात् अहंच अव्ययः अविनाशः दीर्घायुः अनुत्तमं तपस्तप्त्वा स्वर्गलोकमुपाश्नीयां तथाकुरुष्वेतिशेषः ॥ ६ ॥ भव्येन शुभेन । किल्बिषात् तन्मूलकविपत्तेरित्यर्थः ॥ ७—८ ॥ यस्यप्रयोजनस्यकृते यत्प्रयोजनाय । तादर्थ्येऽव्ययं । पुत्रान्जनयन्ति । मम युष्माकंच परलोकहितार्थाय धर्माय । तस्य वाक्यकरणस्य अयंकालआगतः "जीवतोर्वाक्यकरणात्" इतिस्मृतेः

ती० अङ्के समीपे ॥ ३ ॥ ति० अव्ययः धर्मलोपाभाववान् । अश्नीयां प्राप्नुयां । शि० राजकार्यसिद्धिमन्तरास्वरक्षामहंनवाञ्छामीतिबोधयितुंस्वेप्सितंप्रार्थयन्नाह—राजेति ॥ ६ ॥ वि० भव्येन प्रसन्नेन ॥ ७ ॥

[पा०] १ ख. अंबरीषोमहातेजाः. २ ख. घ. त्वरम्. ३ ख. शुनश्शेपंतुराजर्षिः. घ. शुनश्शेपंमहाराज. ४ क. घ. महातपाः. ५ ङ. नरश्रेष्ठं. ६ ख. गृहीत्वाथ. ७ क. महाबलम्. ख. महाबलः. घ. महातपाः. ज. सुमहायशाः. ८ ङ. छ. ज. झ. ञ. व्यश्रमत्. क. ग. विश्राम्यत्. घ. विश्राम्य. ९ ज. ट. पुष्करेतीर्थे. १० क—घ. च. ज. ट. पुष्करंश्रेष्ठमागम्य. ङ. छ. झ. ञ. पुष्करंज्येष्ठमागम्य. ११ परमात्मनः. १२ क—च. ज—ट. विषण्णवदनो. १३ क. पपाताग्रे. १४ ज. मुनिंराम. क. ख. घ—छ. झ. ञ. ट. मुनेराम. १५ क. ख. नचबान्धवाः. १६ क. ङ—ट. नरश्रेष्ठ. १७ घ. सर्वेषामपिकौशिक. क. ख. भावन. १८ घ. सुदुर्लभम्. १९ क. ख. ङ. च. ज. झ. ञ. समेनाथो. ग. ममनाथोह्यनाथस्य. २० ज. ट. तेजसा. २१ क. धर्मज्ञ. घ. धर्मात्मा. २२ ज. ट. शान्तयित्वा.

अयं मुनिसुतो बालो मत्तश्शरणमिच्छति ॥ अस्य जीवितमात्रेण प्रियं कुरुत पुत्रकाः ॥ १० ॥
सर्वे सुकृतकर्माणः सर्वे धर्मपरायणाः ॥ पशुभूता नरेन्द्रस्य तृप्तिमग्नेः प्रयच्छत ॥ ११ ॥
नाथवांश्च शुनश्शेपो यज्ञश्चाविघ्नितो भवेत् ॥ देवतास्तर्पिताश्च स्युर्मम चापि कृतं वचः ॥ १२ ॥
मुनेस्तु वचनं श्रुत्वा मधुष्यंदादयः सुताः ॥ साभिमानं नरश्रेष्ठ सलीलमिदमब्रुवन् ॥ १३ ॥
कथमात्मसुतान्हित्वा त्रायसेऽन्यसुतं विभो ॥ अकार्यमिव पश्यामः श्वमांसमिव भोजने ॥ १४ ॥
तेषां तद्वचनं श्रुत्वा पुत्राणां मुनिपुङ्गवः ॥ क्रोधसंरक्तनयनो व्याहर्तुमुपचक्रमे ॥ १५ ॥
निस्साध्वसमिदं प्रोक्तं धर्मादपि विगर्हितम् ॥ अतिक्रम्य तु मद्वाक्यं दारुणं रोमहर्षणम् ॥ १६ ॥
श्वमांसभोजिनः सर्वे वासिष्ठा इव जातिषु ॥ पूर्णं वर्षसहस्रं तु पृथिव्यामनुवत्स्यथ ॥ १७ ॥
कृत्वा शापसमायुक्तान्पुत्रान्मुनिवरस्तथा ॥ शुनश्शेपमुवाचार्तं कृत्वा रक्षां निरामयम् ॥ १८ ॥
[इदमाह मुनिश्रेष्ठो विश्वामित्रो महातपाः] ॥
पवित्रपाशैरासक्तो रक्तमाल्यानुलेपनः ॥ वैष्णवं यूपमासाद्य वाग्भिरग्निमुदाहर ॥ १९ ॥
[* इन्द्राविष्णू सुरश्रेष्ठौ स्तुहि त्वं मुनिपुत्रक] ॥ इमे तु गाथे द्वे दिव्ये गायेथा मुनिपुत्रक ॥
अंबरीषस्य यज्ञेऽस्मिंस्ततः सिद्धिमवाप्स्यसि ॥ २० ॥
शुनश्शेपो गृहीत्वा ते द्वे गाथे सुसमाहितः ॥ त्वरया राजसिंहं तमंबरीषमुवाच ह ॥ २१ ॥

॥९॥ शरणं रक्षणं। जीवितमात्रेण जीवनप्रदानमात्रेण ॥१०॥ स्वनियोगकरणार्थमुपश्लोकयति—सर्वइति । प्रयच्छतेतिबहुवचनेन युष्मासु यःकश्चन भवत्विति सूच्यते ॥११॥ मयारक्षितोनाथवान्भवतु। कृतं स्यादिति शेषः ॥१२॥ साभिमानं सगर्वं । सलीलं सपरिहासं ॥१३॥ भोजने भोज्ये। प्राप्ते तत्परित्यागेन श्वमांसभक्षणमिवाकार्यमित्यर्थः । द्वितीयइवशब्दोवाक्यालंकारे ॥१४-–१५॥ निस्साध्वसं पितृप्रतिवचनभयरहितं । धर्मात् जीवतोर्वाक्यकरणरूपधर्मात् । विगर्हितं भ्रष्टं । इदमुभयंक्रियाविशेषणं । दारुणं पितृभक्तिरहिततया-परुषं। अतएव रोमहर्षणं रोमाञ्चविकारकरं ॥१६॥ अत्रादौ तस्मादित्युपस्कार्यं । जातिषु मुष्टिकजातिषु ॥ १७ ॥ निरामयं निर्भयं यथाभवतितथा । रक्षां मन्त्रितभस्मधूल्यादिप्रक्षेपरूपाम् ॥ १८ ॥ पाशैः दर्भरशनादिभिः । आसक्तः बद्धः । वैष्णवं विष्णुदेवताकं । "वैष्णवोवैदेवतयायूपः" इतिश्रुतेः । वाग्भिः वक्ष्यमाणगाथाद्वयरूपाभिः । अग्निंप्रत्युदाहर स्तुहि । अग्न्यभिमुखोभूत्वा इन्द्रमिन्द्रानुजंचस्तुहीत्यर्थः ॥१९॥ गाथेदर्शयति—इमेइति। गाथे इन्द्रोपेन्द्रविषये। एका इन्द्रविषया । अन्या उपेन्द्रविषया । ततः गाथाभ्यां । सिद्धिं जीवितासिद्धिं ॥ २० ॥—शुनश्शेपइत्यादि

शि० भोजने प्राप्तपायसादिभोज्ये । पतितंश्वमांसमिव अकार्यंकार्यध्वंसकमेव । पश्यामः । यथाऽग्निहोत्रिणांभोज्येपायसादौ पतितंश्वमांसंभोजनरूपकार्यमात्रध्वंसकं तथा रक्षणीयस्वसुतरक्षासमयेप्राप्तैषाऽन्यसुतरक्षाअवश्यकार्यस्वसुतरक्षामात्रविघातिकेत्यर्थः । एकइवशब्दएवार्थे । इतिवयं पश्यामः निश्चिनुमः । एकइवशब्दइत्यर्थकः ॥ १४ ॥ शि० जातिषु श्वपचजातिविशेषेषु ॥ १७ ॥ ति० निरामयां सर्वदुःखनाशिकां ॥ १८ ॥

[पा०] १ घ. तस्यजीवित. २ क. ख. सर्वेचकृतकर्माणः. ३ क. ख. ग. ङ. च. छ. ज. ञ. प्रयच्छथ. ४ क. ख. घ. ङ. च. झ. ञ. ट. श्चाविघ्नतोभवेत्. ५ ख. छ. ट. ममापिचकृतंवचः. ६ ङ. च. झ. मुनेस्तद्वचनं. त. ज. कृपेत्तु. ७ ङ. च. छ. झ. ञ. मधुच्छन्दादयः. ट. मधुस्यन्दादयः. ८ ङ. सुतान्हत्वा. ९ घ. कोपसंरक्त. १० क. ख. च. ज. श्वमांसभोजनाः. पूर्णंवर्षसहस्रंतु. श्वमांसभोजिनस्सर्वेइत्यनयोरर्धयोः ट. पुस्तके व्युत्क्रमोदृश्यते. ११ ग. मनुवर्तथ. १२ ख. ग. घ. ङ. छ. झ. ञ. ट. न्मुनिवरस्तदा. १३ ख. मुवाचेदं. १४ क—छ. झ. ञ. ट. निरामयाम्. १५ इदमर्धं च. छ. ञ. दृश्यते. १६ ङ. छ. झ. ट. रावद्धो. * इदमर्धं क. ख. ङ. च. छ. ञ. ट. दृश्यते. १७ ख. छ. इन्द्रविष्णू. १८ ङ. मुनिपुङ्गव. १९ क. ख. ङ. च. छ. झ. ञ. इमेचगाथे.

राजसिंह महासत्त्व शीघ्रं गच्छावहे सदः ॥ निर्वर्तयस्व राजेन्द्र दीक्षां च समुपाविश ॥ २२ ॥
तद्वाक्यमृषिपुत्रस्य श्रुत्वा हर्षसमुत्सुकः ॥ जगाम नृपतिः शीघ्रं यज्ञवाटमतन्द्रितः ॥ २३ ॥
सदस्यानुमते राजा पवित्रंकृतलक्षणम् ॥ पशुं रक्तांबरं कृत्वा यूपे तं समबन्धयत् ॥ २४ ॥
स बद्धो वाग्भिरग्र्याभिरभितुष्टाव वै सुरौ ॥ इन्द्रमिन्द्रानुजं चैव यथावन्मुनिपुत्रकः ॥ २५ ॥
ततः प्रीतः सहस्राक्षो रहस्यस्तुतितर्पितः ॥ दीर्घमायुस्तदा प्रादाच्छुनश्शेपाय राघव ॥ २६ ॥
स च राजा नरश्रेष्ठ यज्ञस्य च समाप्तवान् ॥ फलं बहुगुणं राम सहस्राक्षप्रसादजम् ॥ २७ ॥
विश्वामित्रोपि धर्मात्मा भूयस्तेपे महातपाः ॥ पुष्करेषु नरश्रेष्ठ दशवर्षशतानि च ॥ २८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे द्विषष्टितमः सर्गः ॥ ६२ ॥

त्रिषष्टितमः सर्गः ॥ ६३ ॥

ब्रह्मणापुष्करक्षेत्रमेत्यविश्वामित्रायऋषिपददानम् ॥ १ ॥ पुष्करेमेनकादर्शनक्षुभितमनसाविश्वामित्रेणतयासहवत्सर-दशकंसुखंविहरणम् ॥ २ ॥ ततःपश्चात्तप्तेनतेनतद्विसर्जनपूर्वकंहिमवद्गिरौतपश्चरणम् ॥ ३ ॥ ब्रह्मणातस्मैमहर्षिशब्ददानम् ॥ ४ ॥ तथापितेनापरितोषात्पुनस्तपश्चरणम् ॥ ५ ॥

पूर्णे वर्षसहस्रे तु व्रतस्नातं महामुनिम् ॥ अभ्यागच्छन्सुराः सर्वे तपःफलचिकीर्षवः ॥ १ ॥
अब्रवीत्सुमहातेजा ब्रह्मा सुरुचिरं वचः ॥ ऋषिस्त्वमसि भद्रं ते स्वार्जितैः कर्मभिः शुभैः ॥ २ ॥

॥ २१ ॥ सदः यज्ञवाटमित्यर्थः ॥२२—२३॥ सदस्यानुमते सदस्यानां उपद्रष्टृप्रभृतीनां अनुमते अनुमतौ स्थितइतिशेषः । पवित्रैर्दर्भरज्जुभिः । कृतलक्षणं कृतलाञ्छनंकृतपशुलक्षणापनमित्यर्थः । पशुंकृत्वा उपाकरणादिसंस्कारसंस्कृतंकृत्वा ॥ २४ ॥ इन्द्रं पशुभोक्तारं । इन्द्रानुजं यूपदेवं । तुष्टाव इन्द्रानुजंपुरुपकारीकृत्य फलप्रदमिन्द्रंस्तुतवानित्यर्थः ॥ २५ ॥ ततइन्द्रस्यैव फलप्रदत्वमाह—ततइति । प्रीतः स्वस्तुत्यातुष्टः । रहस्यस्तुतितर्पितः स्वस्वामिभूतविष्णुरहस्यस्तुत्यातोषितः ॥ २६ ॥ समाप्तवान् प्राप्तवान् । ननुहरिश्चन्द्रोहवैधसऐक्ष्वाकोराजापुत्रआसेत्यादिबह्वृचब्राह्मणोक्तेतिहासविरुद्धोयंकथमुपपद्यतइतिचेन्न । अंबरीषस्यैवहरिश्चन्द्र इतिसंज्ञान्तरमित्यविरोधस्यनेयत्वात् ॥ २७—२८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने द्विषष्टितमः सर्गः ॥ ६२ ॥

पुत्रविषयक्रूरशापदानेनक्रोधनिर्जयाभावान्नब्रह्मर्षित्वसिद्धिरित्याहत्रिषष्टितमे—पूर्णइत्यादि । व्रतस्नातं व्रतान्तेस्नातं । समाप्तपुनश्चरणमितियावत् । तपःफल चिकीर्षवः तपःफलंदातुमिच्छवः ॥ १ ॥ ऋषिस्त्वमसि । पूर्वतपसाराजर्षिरसि इदानीमृषिरेवासि । अनेन

ती० अभितुष्टाववैसुराविति उपदेशसमये अग्निंवाग्भिरुदाहर इमेद्वेगाथेगायेथाइतिमुनिनोक्तत्वात् वाग्भिरग्निमभिष्टूयतदनन्तरंगाथाद्वयगानेनइन्द्रोपेन्द्रावभितुष्टावेतिवेदितव्यं । वैशब्दोऽग्निस्तवनसमुच्चायकः ॥ २५ ॥ शि० ततः तस्मै । चतुर्थ्यन्तात्ततिः ॥ २६ ॥ शि० दशवर्षशतानि सहस्रत्रयवर्षपर्यन्तं ॥ २८ ॥ इतिद्विषष्टितमस्सर्गः ॥ ६२ ॥

शि० वर्षसहस्रे वर्षाणिसहस्राणियस्मिंस्तस्मिन् त्रिसहस्रात्मकेसमये ॥ १ ॥

[पा०] १ क. अंबरीषमहाभागशीघ्रंगच्छामहेपुरम्. २ ङ. च. छ. झ. ञ. ट. महाबुद्धे. ३ ङ. च. छ. झ. ञ. गच्छामहेवयम्. ४ घ. निवर्तस्वमहाभाग. ५ क. ख. ग. ङ. च. ज—ट. समुपाहर. घ. समुदाहर. ६ ऋषिपुत्रस्य तद्वाक्यं. ७ ङ. च. छ. झ. ञ. ट. हर्षसमन्वितः. ख. हर्षेणसोत्सुकः. ८ क. ख. ग. छ. सतस्यानुमते. ९ क. ख. ग. पवित्रीकृतलक्षणम्. १० क. पशुंरक्तांवरधरं. ११ घ. समयोजयत्. १२ च. ज. सुरान्. १३ च. यथाह्मुनि. १४ ख. ग. छ. मुनिपुङ्गवः. १५ ङ—ट. स्तुतितोषितः. १६ ख. घ. ज. ट. दीर्घमायुस्ततः. १७ क. ख. घ—छ. झ. ञ. ट. वासवः. १८ ज. ट. बहुविधं. १९ ञ. विश्वामित्रोऽथ. २० घ. ज. तपस्तेपे. २१ ज. शतानिसः. २२ ज. विश्वामित्रं. २३ क. ख. ङ—ट. अभ्यगच्छन्. २४ ज. चिकीर्षया. २५ घ. सानुनयंवचः.

तमेवमुक्त्वा देवेशस्त्रिदिवं पुनरभ्यगात् ॥ विश्वामित्रो महातेजा भूयस्तेपे महत्तपः ॥ ३ ॥
ततः कालेन महता मेनका परमाप्सराः ॥ पुष्करेषु नरश्रेष्ठ स्नातुं समुपचक्रमे ॥ ४ ॥
तां ददर्श महातेजा मेनकां कुशिकात्मजः ॥ रूपेणाप्रतिमां तत्र विद्युतं जलदे यथा ॥ ५ ॥
दृष्ट्वा कंदर्पवशगो मुनिस्तामिदमब्रवीत् ॥ ६ ॥
अप्सरः स्वागतं तेऽस्तु वस चेह ममाश्रमे ॥ अनुगृह्णीष्व भद्रं ते मदनेन सुमोहितम् ॥ ७ ॥
इत्युक्ता सा वरारोहा तत्र वासमथाकरोत् ॥ तपसो हि महाविघ्नो विश्वामित्रमुपागतः ॥ ८ ॥
तस्यां वसन्त्यां वर्षाणि पञ्चपञ्च च राघव ॥ विश्वामित्राश्रमे राम सुखेन व्यतिचक्रमुः ॥ ९ ॥
अथ काले गते तस्मिन्विश्वामित्रो महामुनिः ॥ सव्रीड इव संवृत्तश्चिन्ताशोकपरायणः ॥ १० ॥
बुद्धिर्मुनेः समुत्पन्ना सामर्षा रघुनन्दन ॥ सर्वं सुराणां कर्मैतत्तपोपहरणं महत् ॥ ११ ॥
अहोरात्रापदेशेन गताः संवत्सरा दश ॥ काममोहाभिभूतस्य विघ्नोऽयं प्रत्युपस्थितः ॥ १२ ॥
विनिश्वसन्मुनिवरः पश्चात्तापेन दुःखितः ॥ भीतामप्सरसं दृष्ट्वा वेपन्तीं प्राञ्जलिं स्थिताम् ॥१३॥
मेनकां मधुरैर्वाक्यैर्विसृज्य कुशिकात्मजः ॥ उत्तरं पर्वतं राम विश्वामित्रो जगाम ह ॥ १४ ॥
स कृत्वा नैष्ठिकीं बुद्धिं जेतुकामो महायशाः ॥ कौशिकीतीरमासाद्य तपस्तेपे सुदारुणम् ॥ १५ ॥
तस्य वर्षसहस्रं तु घोरं तप उपासतः ॥ उत्तरे पर्वते राम देवतानामभूद्भयम् ॥ १६ ॥
आमन्त्रयन्समागम्य सर्वे सर्षिगणाः सुराः ॥ महर्षिशब्दं लभतां साध्वयं कुशिकात्मजः ॥ १७ ॥
देवतानां वचः श्रुत्वा सर्वलोकपितामहः ॥ अब्रवीन्मधुरं वाक्यं विश्वामित्रं तपोधनम् ॥ १८ ॥
महर्षे स्वागतं वत्स तपसोग्रेण तोषितः ॥ महत्त्वमृषिमुख्यत्वं ददामि तव कौशिक ॥ १९ ॥

राजपदाप्रयोगेणक्षत्रियत्वविश्लेषःकियान्कृतइतिगम्यते ॥ २ ॥ विश्वामित्रोमहातेजाभूयस्तेपेमहत्तपइति । अत्रगायत्रीतृतीयाक्षरम् ॥ ३ ॥ अथास्यजितेन्द्रियत्वाभावख्यापनायकथान्तरंप्रस्तौति—ततःकालेनेत्यादि । अप्सरश्शब्दएकवचनान्तोप्यस्ति । देवप्रेषितेतिसिद्धं ॥ ४ ॥ तत्र सरसि । स्नान्तीमेनका जलदमण्डलमध्यवर्तिनी विद्युदिव स्थितेतिभावः ॥ ५—६ ॥ अनुगृह्णीष्व मत्कामतापंशमयेत्यर्थः ॥ ७—८ ॥ पञ्चपञ्चचेति दशेत्यर्थः । सुखेनवसन्त्यामित्यन्वयः ॥ ९ ॥ सव्रीडइवेत्यत्र इवशब्दोवाक्यालङ्कारे ॥ १० ॥ बुद्धिरित्यादिद्विकं । अहोरात्रापदेशेन अहोरात्रतुल्यतया । अन्तेइतिकरणमध्याहार्यं । इतिबुद्धिरुत्पन्नेत्यन्वयः ॥ ११—१२ ॥ विनिश्वसन्नित्यादिद्विकं । वेपन्तीं वेपमानां । मधुरैः त्वयाकिंकृतं कामपरतन्त्रस्यममैवापराधोयमित्येवंरूपैरित्यर्थः । उत्तरंपर्वतं हिमवन्तं ॥ १३—१४ ॥ नैष्ठिकीं व्रतसमापनपर्यन्तां । जेतुकामः इन्द्रियाणीतिशेषः ॥ १५—१८ ॥ महत्त्वमि-

---

ति० कन्दर्पकृतोदर्पोमदः ॥ ६ ॥ शि० सुखेनव्यतिचक्रमुरित्यन्वयः ॥ ९ ॥ शि० तस्मिन् दशवर्षात्मके कालेगतेसत्येव । संवृत्तः सम्यक्वृत्तंवर्तनंयस्यसः । महामुनिर्विश्वामित्रः । सव्रीडः अप्सरस्सङ्गहेतुकव्रीडासहितः । अतएवचिन्ताशोकपरायणः । आसेतिशेषः । इवशब्दएवार्थे ॥ १० ॥ ति० मधुरैःमत्प्रार्थनयास्थितासीतितवनकश्चनदोषइत्यादिवाक्यैः ॥ १४ ॥ ति० नैष्ठिकीं कामस्याप्यकरणंसंकल्प्यात्युत्कटब्रह्मचर्यविषयां । बुद्धिं दृढनिश्चयं ॥ १५ ॥ शि० अयं महर्षिशब्दं लभतां । एतेनमहर्षिपदलाभमन्तराएतत्तपोनिवृत्तिर्नभविष्यतीतिदेवतानांनिश्चयोध्वनितः ॥ १७ ॥ वि० देवप्रार्थनयामहर्षिशब्देनैवसंबोधयति–

[पा०] १ ज. ट. महर्षिस्तु. ङ. पिधर्मात्मा. २ क. घ. ङ. महातपाः. ३ च. ज. झ. ञ. परमाप्सरा. ४ क. घ—ट. कन्दर्पदर्पवशगो. ५ ङ. च. झ. ञ. ट. मदनेनविमोहितम्. ज. मदनेनानुमोहितम्. ६ ङ. च. झ. ञ. तत्रावासमथा. ७ घ—छ. झ. ञ. ट. मुपागमत्. ८ ग. ङ—ञ. सौम्ये. क. ख. तस्मिन्. घ. रम्ये. ९ ज. सत्यं. १० ख. घ. विघ्नोऽयंसमुपस्थितः. ११ ङ. च. छ. झ. ञ. ट. सनिश्वसन्. १२ क. ग. घ. प्राञ्जलिस्थिताम्. १३ ङ. च. छ. झ. ञ. ट. दुरासदम्. १४ क. ङ—ट. तस्यवर्षसहस्राणि. क. घ. तस्यवर्षसहस्रेण. १५ घ. घोरेतपसितिष्ठतः. १६ ख. ग. ङ. च. ज. झ. अमन्त्रयन्. १७ ज. सर्वेऋषिगणाः. १८ ख. स्वागतंतेऽस्तु.

[1]ब्रह्मणस्स वचः श्रुत्वा सर्वलोकेश्वरस्य ह ॥ [2]नविषण्णो न संतुष्टो विश्वामित्रस्तपोधनः ॥ २० ॥
प्राञ्जलिः [4]प्रणतो भूत्वा सर्वलोकपितामहम् ॥ [5]प्रत्युवाच ततो वाचं विश्वामित्रो [7]महामुनिः ॥ २१ ॥
[8]महर्षिशब्दमतुलं स्वार्जितैः कर्मभिः शुभैः ॥ [9]यदि मे [10]भगवानाह [11]ततोऽहं विजितेन्द्रियः ॥ २२ ॥
[12]तमुवाच ततो ब्रह्मा न [13]तावत्त्वं जितेन्द्रियः ॥ [14]यतस्व मुनिशार्दूल इत्युक्त्वा त्रिदिवं गतः ॥ २३ ॥
[15]विप्रस्थितेषु देवेषु विश्वामित्रो महामुनिः ॥ ऊर्ध्वबाहुर्निरालंबो [16]वायुभक्षस्तपश्चरन् ॥ २४ ॥
घर्मे पञ्चतपा भूत्वा वर्षास्वाकाशसंश्रयः ॥ शिशिरे [17]सलिलस्थायी रात्र्यहानि तपोधनः ॥ २५ ॥
एवं वर्ष[18]सहस्रं हि [19]तपोघोरमुपागमत् ॥ २६ ॥
[20]तस्मिन्संतप्यमाने तु विश्वामित्रे महामुनौ ॥ [21]संभ्रमः सुमहानासीत्सुराणां वासवस्य च ॥ २७ ॥
रंभामप्सरसं [22]शक्रस्सह सर्वैर्मरुद्गणैः ॥ उवाचात्महितं वाक्यमहितं कौशिकस्य च ॥ २८ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे त्रिषष्टितमः सर्गः ॥ ६३ ॥

चतुष्षष्टितमः सर्गः ॥ ६४ ॥

विश्वामित्रेणस्वतपोभङ्गायइन्द्रप्रेषितायारंभायाःपाषाणीकरणपूर्वकंक्रोधजयेनतपश्चरणप्रतिज्ञानम् ॥ १ ॥

सुरकार्यमिदं रंभे कर्तव्यं सुमहत्त्वया ॥ लोभनं कौशिकस्येह काममोहसमन्वितम् ॥ १ ॥
तथोक्ता साऽप्सरा राम सहस्राक्षेण धीमता ॥ व्रीडिता [23]प्राञ्जलिर्भूत्वा प्रत्युवाच सुरेश्वरम् ॥ २ ॥
अयं सुरपते घोरो विश्वामित्रो महामुनिः ॥ क्रोध[24]मुत्स्रजते घोरं मयि देव न संशयः ॥

त्यस्यविवरणं ऋषिमुख्यत्वमिति ॥ १९—२१ ॥ ततोहंविजितेन्द्रियः यदिमहर्षित्वंभवतादत्तं ततोहंविजितेन्द्रियश्चास्मीत्यर्थः ॥ २२ ॥ नतावत्त्वंजितेन्द्रियः विकारहेतुसंनिधानेपियावन्नविकरोषि तावन्तंकालंतवजितेन्द्रियत्वंनास्तीत्यर्थः ॥ २३—२४ ॥ आकाशसंश्रयः वर्षावरणरहितदेशस्थः ॥ २५–२६ ॥ संभ्रमः किमस्मत्पदंकाङ्क्षतइति अस्थानेभयशङ्का ॥ २७ ॥ अहितंकौशिकस्यचेत्यनेन तद्विषयवैरनिर्यातनार्थंच रंभाप्रेरणमित्यपिगम्यते ॥ २८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने त्रिषष्टितमःसर्गः ॥ ६३ ॥

अथरंभयातपोविघ्नश्चतुष्षष्टितमे—सुरकार्यमित्यादि । लोभनं प्रलोभनं । काममोहेन कामकृतवैचित्त्येन । समन्वितं युक्तं । इह अस्मिन्काले । कौशिकप्रलोभनरूपं सुमहत् सुरकार्यं कर्तव्यमित्यन्वयः ॥ १ ॥ व्रीडिता अशक्यार्थवचननिमित्तलज्जावती ॥ २ ॥ उत्स्रजते उत्स्रक्ष्यति । ततः तस्मात् क्रोधोत्सर्जनात् । मे

महर्षेइति ॥ १९ ॥ **ति०** ब्रह्मर्षिशब्दं मदभीष्टं स्वार्जितैःकर्मभिः प्राप्ययदि यतः भगवान्नाह नवदति ततोमन्येहंविजितेन्द्रियः । अत्रकाकुः नविजितेन्द्रियइत्यर्थः ॥ २२ ॥ **शि०** निरालंबः गृहाद्यालंबरहितः ॥ २४ ॥ **शि०** वर्षसहस्राणि त्रिसहस्रवर्षपर्यन्तंघोरंतपः । उपागमत् अकरोत् ॥ २६ ॥ इतित्रिषष्टितमस्सर्गः ॥ ६३ ॥

[पा०] १ ङ. च. छ. झ. ञ. ब्रह्मणस्तुवचः. घ. ब्रह्मणोवचनं. २ क. ख. घ—ट. विश्वामित्रस्तपोधनः. ३ इदमर्धं ग. पुस्तकवर्जंअन्यपुस्तकेषुनदृश्यते. ४ क. घ. ज. ट. प्रयतोभूत्वा. ५ घ. ट. प्रत्युवाचमहायशाः. ६ इदमर्धं घ. ट. पुस्तकयोर्नदृश्यते. ७ ज. महायशाः. ८ क. ख. घ. ङ. छ. ज. झ. ञ. ब्रह्मर्षिशब्दमतुलं. ९ ख. यतोमे. १० क. ख. घ. ङ. छ—ञ. भगवन्नाह. ११ ख. तदाहं. १२ ज. ट. तमुवाचमहातेजाः. १३ क. ख. तावद्विजितेन्द्रियः. १४ ख. ज. जयस्व. १५ घ. संप्रस्थितेषु. १६ ग. वायुभक्षोचरत्तपः. १७ ङ. च. छ. झ. ञ. सलिलेशायी. १८ ग. ज. ट. वर्षसहस्राणि. क. वर्षसहस्रंतु. १९ ख. तपउग्रंसमागमत्. क. उग्रंतपउपागमत्. २० ग. तस्मिन्हितप्यमानेतु. ख. एवंसुतप्यमानेतु. २१ ङ—ट. संतापस्सुमहानासीत्. २२ ख. सर्वैश्शक्रस्सहमरुद्गणैः. ङ—ट. शक्रस्सर्वैस्सहमरुद्गणैः. २३ क. ग. ङ. च. छ. झ. ञ. प्राञ्जलिर्वाक्यं. २४ झ. ट. क्रोधमुत्स्रक्ष्यते. ख. घोरमुत्सृजतिक्रोधं. च. ज. ञ. क्रोधमुत्सृजतेक्रूरं. क. ग. घोरमुत्सृज्यतेक्रोधं.

ततो हि मे भयं देव प्रसादं कर्तुमर्हसि ॥ ३ ॥
एवमुक्तस्तया राम रं[1]भया भीतया तदा ॥ तामुवाच सहस्राक्षो वेपमानां कृताञ्जलिम् ॥ ४ ॥
मा [2]भैपि रंभे भद्रं ते कुरुष्व मम शासनम् ॥ ५ ॥
कोकिलो हृदयग्राही [3]माधवे रुचिरद्रुमे ॥ अहं कन्दर्पसहितः स्थास्यामि [4]तव पार्श्वतः ॥ ६ ॥
त्वं हि रूपं बहुगुणं कृत्वा परमभास्वरम् ॥ तमृषिं कौशिकं [5]रंभे भेदयस्व त[6]पस्विनम् ॥ ७ ॥
सा श्रुत्वा वचनं तस्य कृत्वा रूपमनुत्तमम् ॥ लोभयामास ललिता विश्वामित्रं शुचिस्मिता ॥ ८ ॥
को[7]किलस्य तु शुश्राव वल्गु व्याहरतः स्वनम् ॥ संप्रहृष्टेन मनसा [8]तत एनामुदैक्षत ॥ ९ ॥
अथ तस्य च शब्देन गीतेनाप्रतिमेन च ॥ दर्शनेन च रंभाया मुनिः सन्देहमागतः ॥ १० ॥
[[9]ध्यात्वा मुहूर्तं तेजस्वी दण्डाहत इवोरगः । त्रसन्क्रोधसमाविष्टो विपर्वे इव भानुमान्] ॥ ११ ॥
सहस्राक्षस्य [10]तत्कर्म विज्ञाय मुनिपुङ्गवः ॥ रंभां क्रो[11]धसमाविष्टः शशाप कुशिकात्मजः ॥ १२ ॥
यन्मां लो[12]भयसे रंभे कामक्रोधजयैपिणम् ॥ दश वर्पसहस्राणि शैली स्थास्यसि दुर्भगे ॥ १३ ॥
ब्राह्मणः सुमहा[13]तेजास्तपोवलसमन्वितः ॥ उद्धरिष्यति रंभे त्वां मत्क्रोधकलुपीकृताम् ॥ १४ ॥
एवमुक्त्वा महातेजा विश्वामित्रो [15]महामुनिः ॥ अशक्नुवन्धारयितुं [14]क्रोधं संतापमागतः ॥ १५ ॥
तस्य शापेन महता रंभा [16]शैली तदाऽभवत् ॥ वचः श्रुत्वा च कन्दर्पो महर्पेः स च निर्गतः[17] ॥ १६ ॥
कोपेन [18]सुमहातेजास्तपोपहरणे कृते ॥ इन्द्रि[19]यैरजितै राम न लेभे शान्तिमात्मनः ॥ १७ ॥
बभूवास्य मनश्चि[20]न्ता तपोपहरणे कृते ॥ १८ ॥
नैव [21]क्रोधं गमिष्यामि न च वक्ष्ये कथंचन ॥ अथवा नोच्छ्वसिष्यामि संवत्सरशतान्यपि ॥ १९ ॥

मम । भयं भीतिः । प्रसादं नियोगनिवृत्तिरूपं ॥३–४॥ माभैपिरंभेइत्यत्र आर्पोह्रस्वः ॥ ५ ॥ अहंकोकिलोभूत्वा माधवे वसन्तेसति । स्थास्यामि ॥ ६ ॥ रूपं सौन्दर्यं । बहुगुणं बह्वः शृङ्गारचेष्टारूपा गुणा यस्य तथोक्तं । भेदयस्व चलचित्तंकारय ॥ ७ ॥ ललिता सुन्दरी ॥८॥ वल्गु मनोहरं । संप्रहृष्टेन कोकिलरवश्रवणजसंतोपवता ॥ ९ ॥ तस्य कोकिलस्य गीतेन रंभायाइत्यनुपज्यते । सन्देहं सहस्राक्षप्रेरिता स्वयमागतावेति ॥ १०—११ ॥ तत् रंभाप्रलोभनं । सहस्राक्षस्यकर्मेति विज्ञाय संगीतादिप्रलोभनेनहेतुनानिश्चित्य ॥ १२ ॥ शैली शिलाप्रतिमा । दुर्भगे दुष्टप्रयत्ने । "भगःश्रीकाममाहात्म्यवीर्ययत्नार्ककीर्तिपु" इत्यमरः ॥ १३ ॥ स्वामिपरतन्त्रायाःकिमस्याःशापेनेतिपश्चात्तापेनानुगृह्णाति—ब्राह्मणइति । ब्राह्मणः ब्रह्मपुत्रो वसिष्ठइत्याहुः ॥ १४ ॥ संतापं शापनिमित्तपश्चात्तापं ॥१५॥ वचः रंभाशापरूपं । सच इन्द्रश्च ॥१६॥ इन्द्रियैरजितैरिति उक्तरीत्याकामक्रोधाहतत्वादितिभावः । इन्द्रियैःहेतुभिः । आत्मनः मनसः । शान्तिं दुःखोपशमं ॥ १७ ॥ मनश्चिन्ता संकल्पः ॥ १८ ॥ नचवक्ष्येकथंचन मौनमेवकरिष्यामीत्यर्थः । नोच्छ्वसिति० कोपेन चात्कामेनच ॥ १९ ॥ इतिचतुष्पष्टितमस्सर्गः ॥ ६४ ॥

[पा०] १ ग. ङ. च. छ. झ. ञ. ट. सभयंभीतया. २ ङ. च. छ. झ. ञ. ट. माभैपीरंभे. ३ क. माधवोरुचिरद्रुमः. ४ ग. मुनिपार्श्वतः. ५ ख. ङ. झ. कौशिकंभद्रे. ६ ख. तपोधनम्. ७ ख. कोकिलस्यच. क. ट. कोकिलस्यस. ८ ङ. च. छ. झ. ञ. सचैनामन्ववैक्षत. ९ अयंश्लोकः क. च. छ. दृश्यते. १० ङ. च. छ. झ. ञ. तत्सर्वं. ११ घ. कोपसमाविष्टः. १२ ख. क्रोधयसे. १३ ज. ट. महातपाः. १४ घ. ङ. ज. झ. ञ. कोपंसंताप. क. ख. ग. च. छ. कोपसंताप. १५ क. ख. ङ—ञ. मात्मनः. १६ क. शैलीरंभातदाभवत्. ग. ज. शैलीरंभाऽभवत्तदा. १७ घ. निस्सृतः. १८ क—घ. ज. समहातेजाः. ङ. च. छ. झ. ञ. ट. चमहातेजाः. १९ ज. इन्द्रियैक्षुभितोराम. २० घ. ज. पुनश्चिन्ता. २१ ज. झ. ट. नैवंक्रोधं. क. नवंक्रोधं.

अहं विशोषयिष्यामि ह्यात्मानं विजितेन्द्रियः ॥ तावद्यावद्धि मे प्राप्तं ब्राह्मण्यं तपसार्जितम् ॥
अनुच्छ्वसन्नभुञ्जानस्तिष्ठेयं शाश्वतीः समाः ॥ २० ॥
न हि मे तप्यमानस्य क्षयं यास्यन्ति मूर्तयः ॥ २१ ॥
एवं वर्षसहस्रस्य दीक्षां स मुनिपुङ्गवः ॥ चकाराप्रतिमां लोके प्रतिज्ञां रघुनन्दन ॥ २२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे चतुष्षष्टितमः सर्गः ॥ ६४ ॥

पञ्चषष्टितमः सर्गः ॥ ६५ ॥

पूर्वस्यांदिशिदुश्चरंतपश्चरता विश्वामित्रेण ब्रह्मादिभिर्ब्रह्मर्षित्ववरदानेपितपसोऽनुपरमे देवगणवचसावसिष्टेनपरमेष्ठिवशानुमोदनेनतन्निवर्तनम् ॥ १ ॥ एवंशतानन्देनविश्वामित्रंबोधितेनजनकेन तत्पूजनपूर्वकंतदनुमत्यास्वभवनगमनम् ॥ २ ॥

अथ हैमवतीं राम दिशं त्यक्त्वा महामुनिः ॥ पूर्वां दिशमनुप्राप्य तपस्तेपे सुदारुणम् ॥ १ ॥
मौनं वर्षसहस्रस्य कृत्वा व्रतमनुत्तमम् ॥ चकाराप्रतिमं राम तपः परमदुष्करम् ॥ २ ॥
पूर्णे वर्षसहस्रे तु काष्ठभूतं महामुनिम् ॥ विघ्नैर्बहुभिराधूतं क्रोधो नान्तरमाविशत् ॥ ३ ॥
स कृत्वा निश्चयं राम तप आतिष्ठदव्ययम् ॥ ४ ॥
तस्य वर्षसहस्रस्य व्रते पूर्णे महाव्रतः ॥ भोक्तुमारब्धवानन्नं तस्मिन्काले रघूत्तम ॥
इन्द्रो द्विजातिर्भूत्वा तं सिद्धमन्नमयाचत ॥ ५ ॥
तस्मै दत्वा तदा सिद्धं सर्वं विप्राय निश्चितः ॥ निश्शेषितेऽन्ने भगवानभुक्त्वैव महातपाः ॥
न किंचिदवदद्विप्रं मौनव्रतमुपस्थितः ॥ ६ ॥
[तथैवासीत्पुनर्मौनमनुच्छ्वासं चकार ह] ॥ अथ वर्षसहस्रं वै नोच्छ्वसन्मुनिपुङ्गवः ॥ ७ ॥

ष्यामिकेवलंकुंभकंकरिष्यामीत्यर्थः । उच्छ्वासेनखलुक्रोधादयोभविष्यन्तीतिभावः ॥ १९ ॥ यावत्पर्यन्तं ब्राह्मण्यंप्राप्तंभविष्यतितावत्पर्यन्तं आत्मानं शरीरंशोषयिष्यामि ॥ २० ॥ मूर्तयः शरीरावयवाः । क्षयंनयास्यन्ति । तपःप्रभावादितिभावः ॥ २१ ॥ वर्षसहस्रस्य वर्षसहस्रसंबन्धिनीं । वर्षसहस्रानुयायिनीं । दीक्षां अनुच्छ्वासाभोजनसंकल्पं । उद्दिश्येतिशेषः । अप्रतिमां निस्तुलां । प्रतिज्ञां एवमेवसर्वदाकरिष्यामीत्यध्यवसायं चकार ॥ २२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने चतुष्षष्टितमःसर्गः ॥ ६४ ॥

अथविश्वामित्रस्यब्रह्मर्षित्वप्राप्तिः पञ्चषष्टितमे— अथहैमवतीमित्यादि ॥ १ ॥ वर्षसहस्रस्य वर्षसहस्रसंबन्धि तत्साध्यमित्यर्थः । मौनंव्रतं मौनरूपंव्रतं । कृत्वा संकल्प्येत्यर्थः ॥ २ ॥ काष्ठभूतं काष्ठवदवस्थितं । आधूतं आकुलीकृतमपि । आन्तरं अन्तरवन्तं । दृढान्तःकरणवन्तमितियावत् । यद्वा तंप्रति क्रोधः अन्तरं अवकाशं । नाविशत् ॥ ३—४ ॥ तस्य पूर्वसंकल्पितस्य । वर्षसहस्रस्य संबन्धिनि । व्रतेपूर्णे । तस्मिन्काले पारणकाले । सिद्धं पक्वं । याचिर्द्विकर्मकः ॥ ५ ॥ निश्चितः तपस्सिद्ध्येसर्वथैवान्नंदातव्यमितिनिश्चयवानित्यर्थः । निश्चितः अशङ्कितइतिवा । निश्शेषितइत्यनेनसर्वमन्नमिन्द्रेणयाचितमितिगम्यते । अभुक्त्वे-

---

ति० मौनंचात्रवाङ्मौनं ॥ २ ॥ शि० निश्चितः निर्गतंचितंसंचयोयस्य अन्नान्तरसंचयरहितइत्यर्थः । किंच निश्चितः याचकोजप्रत्याख्येयइतिनिश्चयंप्राप्तः ॥ ६ ॥ शि० मुनिपुङ्गवः विश्वामित्रः । अनुच्छ्वासं उच्छ्वासरहितं । मौनं पुनश्चकार आरेभे । अथ तादृशमौनव्रतप्रारंभानन्तरं । वर्षसहस्रं नोच्छ्वसन् उच्छ्वासरहितस्सन्नेव । तथैववक्रोच्चारादिरहितएवआसीत् । इप्रसिद्धं ।

[पा०] १ ङ—ट. अहंहिशोष. २ क. ख. ग. ङ—ट. यिष्यामिआत्मानं. ३ च. तपसोर्जितम्. क—घ. ज. ट. स्वतपोर्जितम्. ४ घ. तीक्ष्णां. ५ क. घ. ङ. च. झ. ञ. ट. आतिष्ठताव्ययम्. ६ ख. सिद्धमन्नं. ७ घ. नभुक्त्वाच. ८ ट. मौनंव्रत. ९ क. ङ. छ. झ. ञ. ट. मुपाश्रितः. ग. घ. ज. समास्थितः. १० इदमर्धं क—ट. दृश्यते. ११ ङ. च. छ. झ. ञ. सहस्रंच.

तस्यानुरुद्धसमानस्य मूर्ध्नि धूमो व्यजायत ॥ त्रैलोक्यं येन संभ्रान्तमादीपितमिवाभवत् ॥ ८ ॥
ततो देवास्सगन्धर्वाः पन्नगासुरराक्षसाः ॥ मोहितास्तेजसा तस्य तपसा मन्दरश्मयः ॥
कश्मलोपहताः सर्वे पितामहमथाब्रुवन् ॥ ९ ॥
बहुभिः कारणैर्देव विश्वामित्रो महामुनिः ॥ लोभितः क्रोधितश्चैव तपसा चाभिवर्धते ॥
न ह्यस्य वृजिनं किंचिद्दृश्यते सूक्ष्ममप्यथ ॥ १० ॥
न दीयते यदि त्वस्य मनसा यदभीप्सितम् ॥ विनाशयति त्रैलोक्यं तपसा सचराचरम् ॥ ११ ॥
व्याकुलाश्च दिशः सर्वा न च किंचित्प्रकाशते ॥ सागराः क्षुभिताः सर्वे विशीर्यन्ते च पर्वताः ॥१२॥
प्रकंपते च पृथिवी वायुर्वाति भृशाकुलः ॥ ब्रह्मन्न प्रतिजानीमो नास्तिको जायते जनः ॥ १३ ॥
संमूढमिव त्रैलोक्यं संप्रक्षुभितमानसम् ॥ भास्करो निष्प्रभश्चैव महर्षेस्तस्य तेजसा ॥ १४ ॥
बुद्धिं न कुरुते यावन्नाशे देव महामुनिः ॥ तावत्प्रसाद्यो भगवानग्निरूपो महाद्युतिः ॥ १५ ॥
कालाग्निना यथा पूर्वं त्रैलोक्यं दह्यतेऽखिलम् ॥ देवराज्यं चिकीर्षेत दीयतामस्य यन्मतम् ॥१६॥
ततः सुरगणाः सर्वे पितामहपुरोगमाः ॥ विश्वामित्रं महात्मानं वाक्यं मधुरमब्रुवन् ॥
ब्रह्मर्षे स्वागतं तेऽस्तु तपसा स्म सुतोषिताः ॥ १७ ॥
ब्राह्मण्यं तपसोग्रेण प्राप्तवानसि कौशिक ॥ दीर्घमायुश्च ते ब्रह्मन्ददामि समरुद्गणः ॥
स्वस्ति प्राप्नुहि भद्रं ते गच्छ सौम्य यथासुखम् ॥ १८ ॥
पितामहवचः श्रुत्वा सर्वेषां च दिवौकसाम् ॥ कृत्वा प्रणामं मुदितो व्याजहार महामुनिः ॥१९॥
ब्राह्मण्यं यदि मे प्राप्तं दीर्घमायुस्तथैव च ॥ ओंकारश्च वषट्कारो वेदाश्च वरयन्तु माम् ॥ २० ॥

ति पुनःपाकार्हतण्डुलासंपादनादितिभावः ॥६—७॥ आदीपितं तापितं ॥८॥ तपसातेजसातपोरूपाग्निना। मोहिताः मूर्च्छिताः । कश्मलोपहताः दुःखोपहताः ॥ ९ ॥ लोभितः लोभकारणैरंभादर्शनादिभिःप्रलोभितः । क्रोधितःक्रोधकारणैर्वर्षसहस्रान्तसिद्धकृतस्नान्नयाचनादिभिःक्रोधितः । वृजिनं पापंरागद्वेषादिलक्षणं । सूक्ष्मं स्वल्पं ॥ १० ॥ विनाशयति विनाशयेत् असावितिशेषः॥११—१२॥ नप्रतिजानीमः प्रतिक्रियामितिशेषः । नास्तिकोजायतइति उक्तसंक्षोभवशान्नास्तिकइवकर्मानुष्ठानशून्योजायतइत्यर्थः ॥ १३ ॥ उक्तार्थानुवादपूर्वकमनुष्ठेयांशउच्यते—संमूढमिवेत्यादि ॥१४॥हेदेव ब्रह्मन् अतःपरंविश्वामित्रः नाशे जगत्क्षये। यावत्बुद्धिंनकुरुते तावत्प्रसाद्यः अनुग्राह्यः ॥ १५ ॥ पूर्वं प्रलयकाले । कालाग्निना त्रैलोक्यं यथा अदह्यत । तथैव त्रैलोक्यं अनेन दह्यते धक्ष्यते । अयंदेवराज्यंचिकीर्षेतापि। अतः अस्ययत्ब्रह्मर्षित्वंमतं । तद्दीयतामित्यर्थः ॥ १६ ॥ ततः देवविज्ञापनानन्तरं ॥१७॥ ब्रह्मवचनंप्राधान्येन ॥ १८—१९ ॥ वरयन्तु अध्या-

---

वेशब्दएवार्थे ॥ ७ ॥ ति० धूमइति धूमकेतुरित्यर्थः । अग्निरितियावत् । अतएवाग्रे "आतापितमिव" इतिवक्ष्यति । अयं शुद्धसत्वगुणप्रभवोऽग्निः इतरेषांरजस्तमःप्रधानानांतन्मिश्रसत्वप्रधानानांचदेवादीनांतापजनकइतिबोध्यं ॥ ८ ॥ शि० वृजिनं अस्मत्कृतविघ्नजनितदुःखं ॥ १० ॥ ती० नास्तिकः नास्तिपरलोकइतिमन्यमानः । शि० नास्तिकः नास्ति कं सुखंयस्यसः अत्यन्तव्याकुलत्वेनसुखरहितइत्यर्थः ॥१३॥ ति० यद्यसौदेवराज्यमपिचिकीर्षेत तदा तदप्यस्यदीयतामित्यर्थइतिकेचित् । यद्यस्याभीष्टंनदीयते तदाऽसौदेवराज्यंचिकीर्षेत । अतोस्ययन्मनः तत्स्थंब्रह्मर्षित्वं तद्दीयतामित्यर्थइत्यन्ये ॥ १६ ॥ शि० अप्रार्थितमपि ददामीत्याह—दीर्घमायुश्चेति । समरुद्गणइत्युक्त्यायावद्वायुसंचारमीदृक्तख्यातिर्भविष्यतीतिसूचितं ॥ १८ ॥ ति० ओमिति

[पा०] १ ङ. झ. ञ. मातापितमिवा. ज. सुदीपितमिवा. २ घ—ट. देवर्षिगन्धर्वाः. ३ क—ट. पन्नगोरगराक्षसाः. ४ ङ. च. छ. ञ. ञ. स्तपमानस्यतेजसा. ट. देवतास्तस्य. क. स्तेजसातस्यतपसो. ५ ङ. दैवंविश्वामित्रो. ६ क. ख. दृश्यते. ७ ङ. झ. मप्युत. ८ ख. विनाशयति. ९ ध. तपसाच. १० आदित्योनप्रकाशते. ११ झ. वसुधा. १२ ङ. च. छ. झ. ञ. वातीहसंकुलः. ज. वात्यशुभाकुलः. १३ ख. देवयावन्नाशे. ज. देवयावदेपजगत्क्षये. १४ ङ—ट. भगवन्नग्नि. १५ क. घ. भृशम्. १६ ङ. झ. ञ. ट. यन्मनः. १७ घ. मिदंवचनमब्रुवन्. १८ ज. सौम्ययथागतम्. १९ ङ—ट. त्रिदिवौकसाम्. २० क. घ—ट. ओंकारोथ.

क्षत्रवेदविदांश्रेष्ठो ब्रह्मवेदविदामपि ॥ ब्रह्मपुत्रो वसिष्ठो मामेवं वदतु देवताः ॥
यद्ययं परमः कामः कृतो यान्तु सुरर्षभाः ॥ २१ ॥
ततः प्रसादितो देवैर्वसिष्ठो जपतांवरः ॥ सख्यं चकार ब्रह्मर्षिरेवमस्त्विति चाब्रवीत् ॥ २२ ॥
ब्रह्मर्षिस्त्वं न संदेहः सर्वं संपत्स्यते तव ॥ इत्युक्त्वा देवताश्चापि सर्वा जग्मुर्यथागतम् ॥ २३ ॥
[विश्वामित्रोपि धर्मात्मा लब्ध्वा ब्राह्मण्यमुत्तमम् ॥ पूजयामास ब्रह्मर्षिं वसिष्ठं जपतांवरम् ॥
कृतकामो महीं सर्वां चचार तपसि स्थितः] ॥ २४ ॥
एवं त्वनेन ब्राह्मण्यं प्राप्तं राम महात्मना ॥ एष राम मुनिश्रेष्ठ एष विग्रहवांस्तपः ॥
एष धर्मपरो नित्यं वीर्यस्यैष परायणम् ॥ २५ ॥
एवमुक्त्वा महातेजा विरराम द्विजोत्तमः ॥ २६ ॥
शतानन्दवचः श्रुत्वा रामलक्ष्मणसन्निधौ ॥ जनकः प्राञ्जलिर्वाक्यमुवाच कुशिकात्मजम् ॥ २७ ॥
धन्योस्म्यनुगृहीतोसि यस्य मे मुनिपुङ्गव ॥ यज्ञं काकुत्स्थसहितः प्राप्तवानसि धार्मिक ॥ २८ ॥
पावितोऽहं त्वया ब्रह्मन्दर्शनेन महामुने ॥ [विश्वामित्र महाभाग ब्रह्मर्षीणां वरोत्तम] ॥
गुणा बहुविधाः प्राप्तास्तव संदर्शनान्मया ॥ २९ ॥
विस्तरेण च ते ब्रह्मन्कीर्त्यमानं महत्तपः ॥ श्रुतं मया महातेजो रामेण च महात्मना ॥ ३० ॥
सदस्यैः प्राप्य च सदः श्रुतास्ते बहवो गुणाः ॥ ३१ ॥
अप्रमेयं तपस्तुभ्यमप्रमेयं च ते बलम् ॥ अप्रमेया गुणाश्चैव नित्यं ते कुशिकात्मज ॥
[पितामहस्य च यथा यथा चैव ह्युमापतेः] ॥ ३२ ॥
तृप्तिराश्चर्यभूतानां कथानां नास्ति मे विभो ॥ कर्मकालो मुनिश्रेष्ठ लंबते रविमण्डलम् ॥ ३३ ॥

पनयाजनार्हाभवन्त्वित्यर्थः ॥ २० ॥ ब्रह्मानुग्रहेपिस-जातीयपरिग्रहार्थमाह—क्षत्रेति । क्षत्रवेदाः क्षत्रिया-णांशान्तिपुष्ट्यादिप्रयोजनाआथर्वणवेदाः तद्विदांश्रेष्ठः। सूर्यवंशानादिपुरोहितत्वादितिभावः। ब्रह्मवेदाःब्रह्मप्र-तिपादकावेदाः। वेदान्ताइत्यर्थः। यद्वा ब्राह्मणमात्र-प्रवचनार्हावेदास्त्रयीरूपाः। एवंवदतु ब्रह्मर्षिरितिवद-तु। अयंकामः वसिष्ठमुखेनब्रह्मर्षित्ववादरूपःकामः। यदिकृतः। तदैव मद्विषयेकृतकृत्या यान्तु नान्यथेत्यर्थः ॥२१—२२॥ एवमस्त्वित्यस्यविवरणंब्रह्मर्षिस्त्वमिति। सर्वं ब्राह्मण्यं। त्वद्भूतयाजनाध्यापनादिकंच ॥ २३ ॥ अथशतानन्दवचनं—एवमित्यादि। तपइति अकारा-न्तपुँल्लिङ्गत्वमार्षं ॥ २५—३० ॥ सदःप्राप्यस्थितैः स-दस्यैः ॥ ३१ ॥ अप्रमेयाः इयत्तयाज्ञातुमशक्याः॥३२॥ कथानामिति "पूरणगुण—" इतितृतीयार्थेपष्ठी। तृप्तिः

ब्रह्मज्ञानसाधनं। वषडिति यज्ञसाधनं। वेदाश्च तदपेक्षिताङ्गोपाङ्गादिप्रतिपादकाः। वरयन्तु यथावसिष्ठादीन्सहजब्राह्मणान्वरय-न्तितथा । वरणंच अध्यापनयाजनयोरनुमतिः। शि० ओं प्रणवं कारयतिप्रकटयतिस्वनियम्यब्रह्मद्वारेति ओंकारोरघुनाथः। वषट्कारः वषडुपलक्षितस्वाहादिःकारः करणं उच्चारणमितियावत् । यस्मिन् स रामोद्दिश्यकराज्ञसकलयागःवरयन्तु वसिष्ठांःस्वि-वमयिसाक्षात्काराःभवन्त्वित्यर्थः । अथशब्दश्चार्थे ॥ २० ॥ वि० ब्रह्माद्यनुग्रहेपिजातिब्राह्मण्याभावाद्वसिष्ठेनानङ्गीकारेःथंगे-वसर्वमतआह—क्षत्रेत्यादि ॥ २१ ॥ ति० सर्वं ब्राह्मण्यप्रयोजकंब्राह्मणाज्जन्मतत्संस्कारादि संपद्यतेसंपन्नं। अनेनत्रिशुःप-र्यन्तंविश्वामित्रस्यब्राह्मण्यलाभस्सूचितः। एतच्च "अनृष्यानन्तर्ये—"इतिसूत्रेमहाभाष्येस्पष्टं। इतिवसिष्ठोक्तंदेवताअप्युक्त्वा जग्मु-रित्यन्वयः ॥ २३ ॥ ति० गुणाः कर्मश्रैष्ठ्यजातिश्रैष्ठ्यलक्षणाः ॥ २९ ॥ इतिपञ्चषष्टितमस्सर्गः ॥ ६५ ॥

[पा०] १ ङ. च. छ झ. ञ. यद्येवंपरमः. २ क. ख. ङ. च. छ. झ. ञ. संपद्यतेतव. ३ अयंश्लोकः क—ट. दृश्यते. ४ ख. ब्रह्मर्षिपूजयामास. ५ ख. घ. ट. विग्रहवत्तपः. ६ ग. ध. ट. मुनिपुङ्गवः. ७ ख. घ. धार्मिकः. क. ङ. च. छ. झ. ञ. कौशिक. ध. कौशिकः. ८ इदमर्धं ग. च. ज. दृश्यते. ९ ङ. च. छ. झ. ञ. विस्तरेणचवैब्रह्मन्. घ. सुविस्तरेणतेब्रह्मन्. १० क. ख. ग. च. सदा. ११ ख. तवतपअप्रमेयं च. १२ क. ग. घ. अप्रमेयगुणाश्चैव. १३ इदमर्धं ग. ज. दृश्यते.

श्वः प्रभाते महातेजो द्रष्टुमर्हसि मां पुनः ॥ [रामेण रमणीयेन लक्ष्मणेन च संगतः]॥
स्वागतं तपतां श्रेष्ठ मामनुज्ञातुमर्हसि ॥ ३४ ॥
एवमुक्तो मुनिवरः प्रशस्य पुरुषर्षभम् ॥ विससर्जाशु जनकं प्रीतं प्रीतमनास्तदा ॥ ३५ ॥
एवमुक्त्वा मुनिश्रेष्ठं वैदेहो मिथिलाधिपः ॥ प्रदक्षिणं चकाराशु सोपाध्यायः सबान्धवः ॥ ३६ ॥
विश्वामित्रोऽपि धर्मात्मा सरामः सहलक्ष्मणः ॥ स्ववाटमभिचक्राम पूज्यमानो महर्षिभिः ॥ ३७ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे पञ्चषष्टितमः सर्गः ॥ ६५ ॥

षट्षष्टितमः सर्गः ॥ ६६ ॥

परेद्युर्विश्वामित्रेणजनकंप्रतिराघवयोर्धनुर्दर्शनचोदना ॥ १ ॥ जनकेनतंप्रतिधनुष्प्रभाववर्णनपूर्वकंस्वस्यतल्लाभप्रकारकथनम् ॥ २ ॥ तथास्वस्यसीतालाभप्रकारादिनिवेदनपूर्वकंरामेणधनुरारोपणेतद्दानप्रतिज्ञानम् ॥ ३ ॥

ततः प्रभाते विमले कृतकर्मा नराधिपः ॥ विश्वामित्रं महात्मानमाजुहाव सराघवम् ॥ १ ॥
तमर्चयित्वा धर्मात्मा शास्त्रदृष्टेन कर्मणा ॥ राघवौ च महात्मानौ तदा वाक्यमुवाच ह ॥ २ ॥
भगवन्स्वागतं तेऽस्तु किं करोमि तवानघ ॥ भवानाज्ञापयतु मामाज्ञाप्यो भवता ह्यहम् ॥ ३ ॥
एवमुक्तस्तु धर्मात्मा जनकेन महात्मना ॥ प्रत्युवाच मुनिर्वीरं वाक्यं वाक्यविशारदः ॥ ४ ॥
पुत्रौ दशरथस्येमौ क्षत्रियौ लोकविश्रुतौ ॥ द्रष्टुकामौ धनुःश्रेष्ठं यदेतत्त्वयि तिष्ठति ॥ ५ ॥
एतद्दर्शय भद्रं ते कृतकामौ नृपात्मजौ ॥ दर्शनादस्य धनुषो यथेष्टं प्रति यास्यतः ॥ ६ ॥
एवमुक्तस्तु जनकः प्रत्युवाच महामुनिम् ॥ श्रूयतामस्य धनुषो यदर्थमिह तिष्ठति ॥ ७ ॥

अलंबुद्धिः । स्वागतमिति त्वदागमनंशुभकृज्जातमित्यर्थः ॥ ३३—३६ ॥ स्ववाटं स्वनिवेशं ॥ ३७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने पञ्चषष्टितमः सर्गः ॥ ६५ ॥

एवं स्वभातृशापमोचनघटकत्वकृतोपकारस्मृत्या शतानन्दप्रतिपादितेनप्रासङ्गिकेनविश्वामित्रचरित्रेण उपकारकगुरुवैभवोज्ञेयः कामक्रोधौसर्वदादुर्निरोधौ जितकामक्रोधएवब्राह्मणोत्तमः ब्राह्मण्यंच नसुलभं ब्रह्मविदपचारःसर्वारंभनिरोधकः इत्यादिव्यञ्जितमिति प्रबन्धगतवस्तुना वस्तुध्वनिः । अथ स्वयमेवसमस्तजनरक्षणावसरप्रतीक्षोभगवान् देवशरणागतिव्याजीकृतरावणवधायावतीर्णः तदवान्तरोपायभूतां वेदवत्यवतारस्ततःकृतसङ्कल्पां लक्ष्मीं तुल्यशीलवयोवृत्ताभिजनैव कन्यावरणीयेत्यमुमर्थविशेषंप्रवर्तयिष्यन् जनककुलेऽवतार्य तत्परिणयनायप्रवृत्तः तत्प्रीणनायताटकाताटकेयादिदुष्टवधं कौशिकाध्वरत्राणाहल्याशापमोक्षादिरूपंशिष्टपरिपालनंच विधाय साक्षात्सीतालाभोपायाय यततइत्याह—ततःप्रभातइत्यादिनासर्गद्वयेन ॥ १ ॥ राघवौचार्चयित्वेत्यन्वयः । कर्मणा अर्घ्यप्रदानादिना ॥ २—४ ॥ द्रष्टुकामौ भवतइतिशेषः ॥ ५ ॥ अस्यदर्शनादेवकृतकामौभूत्वा प्रतियास्यतइत्यन्वयः ॥ ६ ॥ धनुः यदर्थं यत्प्रयोजनाय । इह अस्म-

---

शि० कृतकामौ प्रकटितधनुर्दर्शनविषयकेच्छावन्तौ नृपात्मजौ । एतत् भवत्स्थापितं । धनुर्दर्शय । इशेश्वेतिकर्मेदं । अस्यधनुषोदर्शनात् इष्टप्राप्तितं । यथा यथावत् । प्रतियास्यतः प्राप्स्यतः ॥ ६ ॥

[पा०] १ ग. च. छ. ज. महातेजाः. २ इदमर्धं ख. दृश्यते. ३ क—च. ज—ट. स्वागतंजपतां. ४ क. ख. चकाराथ. ५ क—ञ. सहरामस्सलक्ष्मणः. ६ क. ख. ग. ट. स्वंवाट. ङ. झ. स्ववास. ७ ङ. च. छ. झ. ञ. महात्मभिः. ८ च. ग. राघवौतु. छ. राघवौतौ. ९ ङ. किंकरोमि. १० क. ख. ग. ङ. ज. भवताप्यहम्. ११ ख—ञ. स्सधर्मात्मा. १२ ङ—ट. मुनिश्रेष्ठो. १३ क. वाक्यविदांवरः. १४ ज. स्सुतौ.

देवरात इति ख्यातो निमेर्ज्येष्ठो महीपतिः ॥ न्यासोऽयं तस्य भगवन्हस्ते दत्तो महात्मना ॥ ८ ॥
दक्षयज्ञवधे पूर्वं धनुरायम्य वीर्यवान् ॥ रुद्रस्तु त्रिदशान्रोषात्सलीलमिदमब्रवीत् ॥ ९ ॥
यस्माद्भागार्थिनो भागान्नाकल्पयत मे सुराः ॥ वराङ्गाणि महार्हाणि धनुषा शातयामि वः ॥ १० ॥
ततो विमनसः सर्वे देवा वै मुनिपुङ्गव ॥ प्रसादयन्ति देवेशं तेषां प्रीतोऽभवद्भवः ॥ ११ ॥
प्रीतियुक्तः स सर्वेषां ददौ तेषां महात्मनाम् ॥ १२ ॥
तदेतद्देवदेवस्य धनूरत्नं महात्मनः ॥ न्यासभूतं तदा न्यस्तमस्माकं पूर्वके विभो ॥ १३ ॥
अथ मे कृषतः क्षेत्रं लाङ्गलादुत्थिता मया ॥ क्षेत्रं शोधयता लब्धा नाम्ना सीतेति विश्रुता ॥ १४ ॥
भूतलादुत्थिता सा तु व्यवर्धत ममात्मजा ॥ वीर्यशुल्केति मे कन्या स्थापितेयमयोनिजा ॥ १५ ॥
भूतलादुत्थितां तां तु वर्धमानां ममात्मजाम् ॥ वरयामासुरागम्य राजानो मुनिपुङ्गव ॥ १६ ॥
तेषां वरयतां कन्यां सर्वेषां पृथिवीक्षिताम् ॥ वीर्यशुल्केति भगवन्न ददामि सुतामहम् ॥ १७ ॥
ततः सर्वे नृपतयः समेत्य मुनिपुङ्गव ॥ मिथिलामभ्युपागम्य वीर्यजिज्ञासवस्तदा ॥ १८ ॥
तेषां जिज्ञासमानानां वीर्यं धनुरुपाहृतम् ॥ न शेकुर्ग्रहणे तस्य धनुषस्तोलनेपि वा ॥ १९ ॥
तेषां वीर्यवतां वीर्यमल्पं ज्ञात्वा महामुने ॥ प्रत्याख्याता नृपतयस्तन्निबोध तपोधन ॥ २० ॥

द्गृहे । तिष्ठति । अस्यधनुषः तत्प्रयोजनं श्रूयतामित्यर्थः ॥ ७ ॥ निमेः जनककूटस्थस्य । न्यासः निक्षेपरूपं ॥८॥ उक्तमर्थंविवृणोति—दक्षेत्यादिना । आयम्य आकृष्य ॥ ९ ॥ भागार्थिनः स्विष्टकृदादिभागार्थिनः । मेममेत्यन्वयः । वराङ्गाणि शिरांसि । अत्रतस्मादित्युपस्कार्यं । शातयामि छिनद्मि ॥ १० ॥ विमनसः दीनाः । भवः रुद्रः ॥११ ॥ ददौ धनुरितिशेषः ॥१२॥ धनूरत्नं धनुश्श्रेष्ठं । पूर्वके देवराते । न्यासभूतंन्यस्तं देवैरितिशेषः ॥ १३ ॥ अथेतिवृत्तान्तान्तरारंभे । क्षेत्रं यागभूमिं । मेकृषतः मयिकर्षतीत्यर्थः । चयनार्थमितिशेषः "लाङ्गलंपवीरवमितिद्वाभ्यामृषभेणकृषति" इत्यादिशास्त्रात् । लाङ्गलात् लाङ्गलपद्धतेरित्यर्थः । उत्थितेति कन्येतिशेषः । साचक्षेत्रंशोधयतामः ।लब्धेतिहेतोर्नाम्नासीतेतिविश्रुताआसीत् सीता ः ।ङ्गलपद्धतिः । सीतायांजातत्वात्सीतेत्युच्यते ॥ १' ॥ व्यवर्धत मत्कृतपोषणादितिशेषः । अतोममात्म ।। वीर्यं धनुरारोपणं तदेवशुल्कं मूल्यं यस्याः सावीर्यशुल्का इति हेतौ । वीर्यशुल्कत्वात्स्थापिता नकस्मैचिद्दत्तेतिभावः ॥ १५—१७ ॥ वीर्यजिज्ञासवः धनुस्सारजिज्ञासवः । अभवन्नितिशेषः ॥ १८ ॥ वीर्यजिज्ञासमानानांतेषांकृते धनुः उपाहृतं आनीतं । ग्रहणे धारणे । तोलने भारपरीक्षार्थहस्तेनचालने ॥ १९ ॥ तन्निबोधेति । तदित्यव्ययं । तस्मात्कारणात् । अ॰ान्तरंयद्वृत्तं

ति ० न्यासोनिक्षेपः । अयं धनूरूपः । अपरेतु नितरामास्तेदेवतायत्रेतिव्युत्पत्त्यान्यासोदेवपूजास्थानं । तत्पू॰ार्थंशत्रुवधार्थं चदत्तइत्यर्थः । निक्षेपपरतयाव्याख्यानेतु निक्षेपस्यशुल्कीकरणमनुचितं । भगवतातद्भङ्गेचनिक्षेपारक्षणप्रयुक्तदोषभा॰ ता जनकस्य स्यादितिप्राहुः । शि० निमेः निमिवंशोद्भवस्य सुकेतोरित्यर्थः । ज्येष्ठः ज्येष्ठपुत्रः । किंच निमिपुत्रस्यमिथेरेवदेवरातइ॰ ।नामान्तरं । निमेष्षष्ठइतिपाठेतु निमिंपरित्यज्यषष्ठइत्यर्थः । अतएव देवरातस्यसप्तमत्वेपिनक्षतिः । न्यासो निक्षेपभूतः । यद्वा ॰ ।सः नितरां आ समन्ताद्भावेन अत्यन्तंरिपवोयेनसः शत्रुनाशकइत्यर्थः । युक्तश्चायमर्थः । अन्यस्वामिकेवस्तुनिस्वातन्त्र्यानुपपत्तेः ॥ ८ ॥ शि० दक्षयज्ञवधइति निमित्तसप्तमी । शि० वधेइति हिंसार्थकवधधातुप्रकृतिकघञन्तप्रकृतिकचतुर्थ्यन्तं । साच "॰ ॰्यार्थोपपद" इतिविहिता ॥ ९ ॥ शि० प्रसादयन्त प्रासादयन्त ॥ ११ ॥ ति० शिवसहितैर्देवैः । न्यासभूतं देवपूजास्थानभूतं । न्यस्तं दत्तं । शि० न्यासभूतं नितरांआसः शत्रुविध्वंसनानुकूलोव्यापारस्तंभूतं प्राप्तं शत्रुसंहारकमित्यर्थः । आन्यस्तं अपुनर्ग्रहणायस्थापितं । शिवाज्ञयादेवैर्दत्तमित्यर्थः ॥ १३ ॥

[पा०] १ ङ. झ. निमेर्ज्येष्ठो. २ ख. ग. छ. ञ. महासनः. ३ क. धनुरादाय. ख. धनुरानम्य. ४ क. ख. घ—अभिध्वस्यत्रिदशान्. ५ ग. ज. ट. भागंनकल्पयथ. ख. भागंनाकल्पयत. ६ ख. पातयामिवः. ७ क. च. छ. ज. प्रसादयन्तो. ज. ट. प्रसादयन्त. ८ ङ. च. छ. झ. ञ. प्रीतियुक्तस्तु. ९ घ. तदादत्तं. १० ङ. झ. पूर्वजेविभौ. ११ ङ. च. छ. झ. अ. दुत्थिताततः. ख. दुत्थिताशुभा. १२ घ—ङ. रागत्य. १३ क. स्तथा. १४ ख. ङ. च. छ. झ. ञ. शैवंधनुरुपाहृतम्. क. ऐशंधनु.

ततः परमकोपेन राजानो नृपपुङ्गव ॥ न्यरुन्धन्मिथिलां सर्वे वीर्यसन्देहमागताः ॥ २१ ॥
आत्मानमवधूतं ते विज्ञाय नृपपुङ्गवाः ॥ रोषेण महताऽऽविष्टाः पीडयन्मिथिलां पुरीम् ॥ २२ ॥
ततः संवत्सरे पूर्णे क्षयं यातानि सर्वशः ॥ साधनानि मुनिश्रेष्ठ ततोऽहं भृशदुःखितः ॥ २३ ॥
ततो देवगणान्सर्वांस्तपसाहं प्रसादयम् ॥ ददुश्च परमप्रीताश्चतुरङ्गबलं सुराः ॥ २४ ॥
ततो भग्ना नृपतयो हन्यमाना दिशो ययुः ॥ अवीर्या वीर्यसन्दिग्धाः सामात्याः पापकर्मणः ॥ २५ ॥
तदेतन्मुनिशार्दूल धनुः परमभास्वरम् ॥ रामलक्ष्मणयोश्चापि दर्शयिष्यामि सुव्रत ॥ २६ ॥
यद्यस्य धनुषो रामः कुर्यादारोपणं मुने ॥ सुतामयोनिजां सीतां दद्यां दाशरथेरहम् ॥ २७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे षट्षष्टितमः सर्गः ॥ ६६ ॥

सप्तषष्टितमः सर्गः ॥ ६७ ॥

जनकेनविश्वामित्रचोदनयाभटैर्मुनिनिकटंप्रतिधनुरानयनम् ॥ १ ॥ रामेणमुनिजनकयोरनुमत्याधनुषःसमारोपणेनमध्ये-भञ्जनम् ॥ २ ॥ जनकेनसहर्षरामप्रशंसनपूर्वकंविश्वामित्रानुमत्यादशरथानयनायायोध्यांप्रतिदूतप्रेषणम् ॥ ३ ॥

जनकस्य वचः श्रुत्वा विश्वामित्रो महामुनिः ॥ धनुर्दर्शय रामाय इति होवाच पार्थिवम् ॥ १ ॥
ततः स राजा जनकः सामन्तान्व्यादिदेश ह ॥ धनुरानीयतां दिव्यं गन्धमाल्यविभूषितम् ॥ २ ॥
जनकेन समादिष्टाः सचिवाः प्राविशन्पुरीम् ॥ तद्धनुः पुरतः कृत्वा निर्जग्मुः पार्थिवाज्ञया ॥ ३ ॥
नृणां शतानि पञ्चाशद्व्यायतानां महात्मनाम् ॥ मञ्जूषामष्टचक्रां तां समूहुस्ते कथंचन ॥ ४ ॥
तामादाय तु मञ्जूषामायसीं यत्र तद्धनुः ॥ सुरोपमं ते जनकमूचुर्नृपतिमन्त्रिणः ॥ ५ ॥
इदं धनुर्वरं राजन्पूजितं सर्वराजभिः ॥ मिथिलाधिप राजेन्द्र दर्शनीयं यदिच्छसि ॥ ६ ॥

तन्निरोधेत्यर्थः ॥ २० ॥ वीर्यसंदेहं वीर्यशैथिल्यं ॥ २१ ॥ *मिथिलावरोधेनिमित्तान्तरमाह—आत्मानमिति । ते नृपाः । आत्मानं स्वात्मानं । मया अवधूतं वीर्यशुल्ककरणेनतिरस्कृतं विज्ञाय । पीडयन् अपीडयन् ॥ २२ ॥ साधनानि दुर्गरक्षणसाधनानि ॥ २३ ॥ प्रसादयं प्रासादयं ॥ २४ ॥ वीर्यसन्दिग्धाः सन्दिग्धवीर्याः । पापकर्मणः पापकर्माणः ॥ २५—२७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने षट्षष्टितमःसर्गः ॥ ६६ ॥

अथ धनुर्भङ्गादिवृत्तान्तःसप्तषष्टितमे—जनकस्येत्यादि ॥ १ ॥ सामंतान् कर्मसचिवान् ॥ २—३ ॥ व्यायतानां दीर्घदेहानां । नृणां । पञ्चाशत्शतानि पञ्चसहस्राणि । अष्टचक्रां अष्टचक्रवच्छकटारोपितामित्यर्थः । मञ्जूषां धनुष्पेटिकां । समूहुः आचकर्षुः । तेचपञ्चसहस्रसंख्याविशिष्टाअपि कथंचन महताप्रयत्नेन । समूहुरितियोजना । अन्येतु अष्टचक्रां अष्टाधश्चक्ररक्षावन्धवतीं । ऊहुः हस्तैरितिशेषइत्याहुः ॥ ४ ॥ यत्र मञ्जूषायां ॥ ५ ॥ यद्धनुर्दर्शनीयमिच्छसि । तदिदं

ति० मे मया ॥ २२ ॥ शि० दाशरथेरेवयोग्यांसीतांसुतामहंदद्यां । दाशरथयएवेतिप्रत्यासत्त्यालब्धं । षष्ठीमहिम्नायोग्यामित्यध्याहृतं । संप्रदानत्वाविवक्षयाषष्ठीवा ॥ २७ ॥ इतिषट्षष्टितमस्सर्गः ॥ ६६ ॥

शि० ते पुण्यस्थाने । "तथ्योरामृतपुच्छेपुक्रोडेम्लेच्छेचकुत्रचित् । अपुमांस्तरणेपुण्येकथितःशब्दवेदिभिः" इत्यभिधानं ॥ ४ ॥

[पा०] १ क—च. ज. ट. अरुन्धन्. २ ङ. झ. मवधूतंमे. ३ ख. ग. घ. ज. ट. मुनिपुङ्गव. ४ क. ख. न्मिथिलामिनाम्. ५ क. घ. ङ. च. छ. ञ. ट. पापकारिणः. ६ क. ख. ङ—ट. सचिवान्व्यादिदेशह. घ. समेतान्व्या. ग. संमतान्व्या. ७ ख. छ. रादीयतां. ८ ङ. झ. माल्यानुलेपितम्. च. छ. ञ. माल्यानुलेपनम्. ९ क. ख. घ. ङ. छ. ञ. ट. न्पुरम्. १० ङ. च. छ. झ. ञ. ट. निर्जग्मुरमितौजसः. ११ ङ. च. छ. झ. ञ. सुमञ्जूषां. १२ ज. ट. दर्शयैनंयदिच्छसि. क. यथेच्छसि. झ. ञ. ट. यदीच्छसि.

तेषां नृपो वचः श्रुत्वा कृताञ्जलिरभाषत ॥ विश्वामित्रं महात्मानं तौ चोभौ रामलक्ष्मणौ ॥ ७ ॥
इदं धनुर्वरं ब्रह्मञ्जनकैरभिपूजितम् ॥ राजभिश्च महावीर्यैरशक्तैः पूरितुं पुरा ॥ ८ ॥
नैतत्सुरगणाः सर्वे नासुरा न च राक्षसाः ॥ गन्धर्वयक्षप्रवराः सकिन्नरमहोरगाः ॥ ९ ॥
क्व गतिर्मानुषाणां च धनुषोस्य प्रपूरणे ॥ आरोपणे समायोगे वेपने तोलनेऽपि वा ॥ १० ॥
तदेतद्धनुषां श्रेष्ठमानीतं मुनिपुङ्गव ॥ दर्शयैतन्महाभाग अनयो राजपुत्रयोः ॥ ११ ॥
विश्वामित्रः स धर्मात्मा श्रुत्वा जनकभाषितम् ॥ वत्स राम धनुः पश्य इति राघवमब्रवीत् ॥ १२ ॥
महर्षेर्वचनाद्रामो यत्र तिष्ठति तद्धनुः ॥ मञ्जूषां तामपावृत्य दृष्ट्वा धनुरथाब्रवीत् ॥ १३ ॥
इदं धनुर्वरं ब्रह्मन्संस्पृशामीह पाणिना ॥ यत्नवांश्च भविष्यामि तोलने पूरणेपि वा ॥ १४ ॥
बाढमित्यब्रवीद्राजा मुनिश्च समभाषत ॥ १५ ॥
लीलया स धनुर्मध्ये जग्राह वचनान्मुनेः ॥ पश्यतां नृसहस्राणां बहूनां रघुनन्दनः ॥ १६ ॥
[आरोपयत्स धर्मात्मा सलीलमिव तद्धनुः] ॥ आरोपयित्वा धर्मात्मा पूरयामास तद्धनुः ॥
तद्बभञ्ज धनुर्मध्ये नरश्रेष्ठो महायशाः ॥ १७ ॥
तस्य शब्दो महानासीन्निर्घातसमनिःस्वनः ॥ भूमिकंपश्च सुमहान्पर्वतस्येव दीर्यतः ॥ १८ ॥
निपेतुश्च नराः सर्वे तेन शब्देन मोहिताः ॥ वर्जयित्वा मुनिवरं राजानं तौ च राघवौ ॥ १९ ॥
प्रत्याश्वस्ते जने तस्मिन्राजा विगतसाध्वसः ॥ उवाच प्राञ्जलिर्वाक्यं वाक्यज्ञो मुनिपुङ्गवम् ॥ २० ॥
भगवन्दृष्टवीर्यो मे रामो दशरथात्मजः ॥ अत्यद्भुतमचिन्त्यं च न तर्कितमिदं मया ॥ २१ ॥
जनकानां कुले कीर्तिमाहरिष्यति मे सुता ॥ सीता भर्तारमासाद्य रामं दशरथात्मजम् ॥ २२ ॥

धनुः । आनीतमितिशेषः ॥ ६ ॥ तौचोभाविति उद्दि-
श्येतिशेषः ॥ ७ ॥ राजभिः पूर्वंसीतार्थिभिः । पूजितं
अहोमहासारमैश्वरंधनुरितिश्लाघितमित्यर्थः ॥ ८ ॥ ए-
तत् धनुः । सुरगणादयः प्रपूरणादिकंकर्तुंनशक्ताइत्य-
र्थसिद्धं ॥ ९ ॥ प्रपूरणे नम्रीकरणे । आरोपणे मौर्व्या-
संयोजने । समायोगे शरेणयोजने । वेपने मौर्व्याकर्ष-
णे । तोलने भारपरीक्षार्थंकंपनेच मानुषाणांमध्येकपुरु-
षे गतिःशक्तिः ॥ १० ॥ तथाप्यनयोर्दर्शयेत्याह—त-
देतदिति ॥ ११—१२ ॥ अपावृत्य अपगतावरणंकृ-
त्वा ॥ १३—१५ ॥ लीलया अप्रयत्नेन ॥ १६ ॥ पूरया-
मास आकर्णमाकृष्टवान् । ननु उक्तरीत्यामहोन्नतस्यध-
नुषःकथंबालेनारोपणंसंभवति अग्रस्पर्शाभाव दितिचे
त् उच्यते । आश्चर्यशक्तिकस्यरामस्यकरस्पर्शा ःवावन
तंधनुः ॥ १७ ॥ निर्घातेति । तल्लक्षणमुक्तंज्योतिषे "वायु
नाभिहतोवायुर्गगनात्पततिक्षितौ ॥ यदादीप्तःखगरु
तःसनिर्घातोतिदोपकृत्" इति । पर्वतस्येवदीर्यतः पर्व
दीर्यति भिद्यति यथाभूमिकंपः तथाभूमिकंपश्चासीदि
त्यर्थः ॥ १८—१९ ॥ विगतसाध्वसइत्यनेन रामजाम
तृकताप्रापकंधनुरारोपणमपिनभवेदिति पूर्वंभीतोऽभ
दितिगम्यते ॥ २० ॥ अचिन्त्यं अन्यत्रादर्शनात् । नतावे
तं मनुष्येष्वसंभावितत्वात् । अत्यद्भुतं बालेनकृतत्व
त् । इदं ईशधनुरारोपणं ॥ २१ ॥ जनकानां "अनन

ति० जनकैः देवरातातिरिक्तैः । पूजितं ऐश्वरत्वादीश्वरवदेवकेवलंपूजितमित्यर्थः ॥ ८ ॥ शि० अथाब्रवीत् मङ्गलवच मकथयत् ॥ १३ ॥ ति० जग्राह पादाङ्गुलेनोन्नतंकृत्वाकरेणजग्राह । तदुक्तंपाद्मे । "रामोपितद्धनुष्कोटिंस्पृष्ट्वापादाङ्गुलात्ततः उन्नतंचापमारोप्यबभञ्जमोहिताजनाः "इति । अतिभारवद्वस्तुनःपादाङ्गुल्यामध्यभागपर्यन्तमुन्नमनं मध्येगृहीत्वोद्धारश्च महाबल ध्यइतिमहाबलवत्त्वमनेनसूचितं ॥ १६ ॥ इतिसप्तषष्टितमस्सर्गः ॥ ६७ ॥

[पा०] १ ङ. च. छ. झ. ञ. तावुभौ. २ क. ख. रशक्यंपूरितुंतदा. ङ. ञ. रशक्तैःपूरितुंतदा. झ. रशक्तैःपूरितंतथा. च. अशक्यंपूरितंतदा. ३ क. गणाश्शक्ताः. ४ ङ. च. छ. झ. ञ. तोलनेतदा. ५ क. घ. सुधर्मात्मा. ङ. झ. स्सरामस्तु. ६ च. छ. झ. ञ. दिव्यं. ७ घ. समाकृष्यामिपाणिना. ८ ग. वेपनेपूरणेपिवा. ९ क—घ. मित्येवतंराजा. १० ग. यत्सधर्मात्म क. ङ. च. छ. झ. ञ. ट. यिलामौर्विच. ११ ग. वीर्यवान्. १२ ख. ङ—ट. मचिन्त्यंवअतर्कित. क. मचिन्त्यंवाप्यतर्कित

मम सत्या प्रतिज्ञा च वीर्यशुल्केति कौशिक ॥ सीता प्राणैर्बहुमता देया रामाय मे सुता ॥ २३ ॥
भवतोऽनुमते ब्रह्मञ्शीघ्रं गच्छन्तु मन्त्रिणः ॥ मम कौशिक भद्रं ते अयोध्यां त्वरिता रथैः ॥ २४ ॥
राजानं प्रश्रितैर्वाक्यैरानयन्तु पुरं मम ॥ प्रदानं वीर्यशुल्कायाः कथयन्तु च सर्वशः ॥ २५ ॥
मुनिगुप्तौ च काकुत्स्थौ कथयन्तु नृपाय वै ॥ प्रीयमाणं तु राजानमानयन्तु सुशीघ्रगाः ॥ २६ ॥
कौशिकश्च तथेत्याह राजा चाभाष्य मन्त्रिणः ॥ अयोध्यां प्रेषयामास धर्मात्मा कृतशासनान् ॥
यथावृत्तं समाख्यातुमानेतुं च नृपं तदा ॥ २७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे सप्तषष्टितमः सर्गः ॥ ६७ ॥

अष्टषष्टितमः सर्गः ॥ ६८ ॥

जनकदूतैरयोध्यामेत्यदशरथंप्रतिधनुर्भङ्गनादिरामवृत्तान्तनिवेदनपूर्वकंसीतारांमविवाहमहोत्सवप्रवर्तनार्थंजनकप्रार्थनानिवेदनम् ॥ १ ॥ दशरथेनसहपंवसिष्ठादिभिःसहपरेद्युर्मिथिलांप्रतिप्रस्थाननिर्धारणम् ॥ २ ॥

जनकेन समादिष्टा दूतास्ते क्लान्तवाहनाः ॥ त्रिरात्रमुषिता मार्गे तेयोध्यां प्राविशन्पुरीम् ॥ १ ॥
[राज्ञो भवनमासाद्य द्वारस्थानिदमब्रुवन् ॥ शीघ्रं निवेद्यतां राज्ञे दूतान्नो जनकस्य च ॥
इत्युक्ता द्वारपालास्ते राघवाय न्यवेदयन्] ॥ २ ॥
ते राजवचनाद्दूता राजवेश्मप्रवेशिताः ॥ ददृशुर्देवसंकाशं वृद्धं दशरथं नृपम् ॥ ३ ॥
बद्धाञ्जलिपुटाः सर्वे दूता विगतसाध्वसाः ॥ राजानं प्रयता वाक्यमब्रुवन्मधुराक्षरम् ॥ ४ ॥

वतभेवित्तंयस्यमेनास्तिकिंचन ॥ मिथिलायांप्रदीप्तायां नमेकिंचित्प्रदह्यते" इतिप्रोक्तनिरतिशयकीर्तिमतामपि । कुले "कुलंतारयतेतातसप्तसप्तचसप्तच" इतिवत् । कीर्तिमित्येकवचनेनैकरूपत्वंव्यज्यते । आहरिष्यति सद्यःप्रापयिष्यति । सिद्धस्यादानंह्याहरणं । सुता सुतश्चेत्स्वार्जितामेवकीर्तिंप्रापयिष्यति । मेसुता स्वसंबन्धप्रयुक्तातिशयः । सीता जन्मप्रयुक्तातिशयः । भर्तारमासाद्य भर्तृसंबन्धकृतातिशयः । भर्तारं भरणदक्षं । "वित्तमिच्छन्तिमातरः" इत्युक्तधनवन्तमित्यर्थः । रामं "रूपमिच्छतिकन्यका" इत्युक्तरूपवन्तं । दशरथात्मजं "बान्धवाःकुलमिच्छन्ति" इत्युक्तरीत्याबन्धुकाङ्क्षितं । एवं सर्वसंमतवरप्राप्त्या कीर्तिमाहरिष्यतीतिभावः ॥ २२ ॥ सत्या जातेतिशेषः । सीता वीर्यशुल्केतिप्रतिज्ञा सत्याजाता । प्राणैः प्राणेभ्यः । बहुमता । सीतादेयेतिसीतापदमुभयत्रान्वेति ॥ २३ ॥ भवतोनुमते भवदनुमत्या । गच्छन्त्वित्यर्थः ॥ २४ ॥ प्रश्रितैः विनयान्वितैः । सर्वशः सर्वमत्रत्यवृत्तान्तमित्यर्थः ॥ २५—२६ ॥ आभाष्य आहूय । कृतशासनान् दत्तकल्याणसंदेशपत्रिकानित्यर्थः । नृपं दशरथं ॥ २७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने सप्तषष्टितमःसर्गः ॥ ६७ ॥

अथजानकीविवाहायदशरथाह्वानमष्टषष्टितमे—जनकेनेत्यादि । त्रिरात्रमिति । तिस्रोरात्रयस्त्रिरात्रं । सङ्ख्यादित्वात्राऽन्त्यन्तादच्समासान्तः । अत्यन्तसंयोगे द्वितीया ॥१॥ राजवचनात् जनकोस्मानिहप्रेषितवानितिस्वराजसंकीर्तनात् ॥३॥ विगतसाध्वसाः दशर-

---

शि० अते निरन्तरगमनविशिष्टाधिकरणीभूतेमार्गे । अतइत्यत्रनिरन्तरगमनार्थकाद्धातोरधिकरणेकः । अतएवतेइत्यनेननपौनरुक्त्यं ॥ १ ॥

[पा०] १ ङ. झ. प्रतिज्ञासा. २ ख. नुमताद्ब्रह्मन्. ३ ङ. च. झ. ञ. ट. प्रीतियुक्तंतु. ४ ग—छ. झ. ञ. ट. कौशिकस्तु. ५. ङ.—ट. नृपंतथा. ६. ग. दूतास्तु. ७ इदमर्धत्रयं ग. वर्तते. ८ ङ. च. छ. झ. ञ. राजवचनाद्दूता. ९ ख. प्रदुद्रुवुः. १० ख. प्रणतावाक्यं. ख. ङ—ट. प्रश्रितंवाक्यं.

मैथिलो जनको राजा साग्निहोत्रपुरस्कृतम् ॥ कुशलं चाव्ययं चैव सोपाध्यायपुरोहितम् ॥ ५ ॥
मुहुर्मुहुर्मधुरया स्नेहसंयुक्तया गिरा ॥ [कुशलं चाव्ययं चैव सोपाध्यायपुरोहितम्] ॥
जनकस्त्वां महाराजाऽऽपृच्छते सपुरस्सरम् ॥ ६ ॥
पृष्ट्वा कुशलमव्यग्रं वैदेहो मिथिलाधिपः ॥ कौशिकानुमते वाक्यं भवन्तमिदमब्रवीत् ॥ ७ ॥
पूर्वं प्रतिज्ञा विदिता वीर्यशुल्का ममात्मजा ॥ राजानश्च कृतामर्षा निर्वीर्या विमुखीकृताः ॥ ८ ॥
सेयं मम सुता राजन्विश्वामित्रपुरस्सरैः ॥ यदृच्छयाऽऽगतैर्वीरैर्निर्जिता तव पुत्रकैः ॥ ९ ॥
तच्च राजन्धनुर्दिव्यं मध्ये भग्नं महात्मना ॥ रामेण हि महाराज महत्यां जनसंसदि ॥ १० ॥
अस्मै देया मया सीता वीर्यशुल्का महात्मने ॥ प्रतिज्ञां कर्तुमिच्छामि तदनुज्ञातुमर्हसि ॥ ११ ॥
सोपाध्यायो महाराज पुरोहितपुरस्सरः ॥ शीघ्रमागच्छ भद्रं ते द्रष्टुमर्हसि राघवौ ॥ १२ ॥
प्रीतिं च मम राजेन्द्र निर्वर्तयितुमर्हसि ॥ पुत्रयोरुभयोरेव प्रीतिं त्वमपि लप्स्यसे ॥ १३ ॥
एवं विदेहाधिपतिर्मधुरं वाक्यमब्रवीत् ॥ विश्वामित्राभ्यनुज्ञातः शतानन्दमते स्थितः ॥
[इत्युक्त्वा विरता दूता राजगौरवशङ्किताः] ॥ १४ ॥
दूतवाक्यं तु तच्छ्रुत्वा राजा परमहर्षितः ॥ वसिष्ठं वामदेवं च मन्त्रिणोन्यांश्च सोऽब्रवीत् ॥ १५ ॥
गुप्तः कुशिकपुत्रेण कौसल्यानन्दवर्धनः ॥ लक्ष्मणेन सह भ्रात्रा विदेहेषु वसत्यसौ ॥ १६ ॥
दृष्टवीर्यस्तु काकुत्स्थो जनकेन महात्मना ॥ संप्रदानं सुतायास्तु राघवे कर्तुमिच्छति ॥ १७ ॥

थसौजन्येनविज्ञापनैर्निर्भयाः ॥ ४ ॥ मैथिलइत्यादिश्लोकद्वयमेकान्वयं । मैथिलः मिथिलेश्वरः । पुरस्कृताग्निहोत्रसहितः साग्निहोत्रपुरस्कृतः । आहिताग्न्यादित्वान्निष्ठायाःपरनिपातः । पुरःसरन्तीतिपुरस्सराः भृत्याः । तत्सहितं । एवंभूतंत्वां । कुशलं क्षेमं । अव्ययं अनपायं । योगमितियावत् । आपृच्छते मद्वचनादितिशेषः । "आङिनुपृच्छ्योरुपसङ्ख्यानं" इतिआत्मनेपदं । अत्रद्वितीयजनकशब्दोविप्रकृष्टजनकशब्दाविस्मरणार्थः ॥ ५—६ ॥ कौशिकानुमते कौशिकानुमत्या ॥ ७ ॥ वीर्यशुल्केति ममप्रतिज्ञा भवद्भिर्विदिता । राजानश्चनिर्वीर्याः धनुरारोपणासमर्थाः । विमुखीकृताइत्यपि विदितमित्यन्वयः ॥ ८ ॥ सेयं उक्तरीत्या सर्वैःप्रार्थनीया । ममसुता त्वयासहसंबन्धार्हस्यमेपुत्री । स्वपुरेतदागमनप्रसक्तिंदर्शयति—विश्वामित्रपुरस्सरैरिति । यदृच्छया मद्भागधेयात् । पुत्रकैः पूजायांबहुवचनं । जामातृत्वाध्यवसायात् महाराजकुमारत्वाच्चपूजा । अल्पार्थेनकप्रत्ययेनबाल्यंद्योतितं ॥९॥ कथंनिर्जितेत्यत्राह—तच्चेति । तच्च ऐश्वरमपिनेदमैन्द्रजालिकमित्याह—महात्मनेति । नेयं पक्षपातोक्तिरित्याह—महत्यामिति ॥ १० ॥ प्रतिज्ञां प्रतिज्ञातंसीताप्रदानं ॥ ११—१२ ॥ प्रीतिं त्वद्दर्शनप्रीतिं सीताप्रदानप्रीतिंवा । पुत्रयोः पुत्रीचपुत्रश्चतयोः । एकशेषः । प्रीतिं तद्विषयप्रीतिं । तदुभयकल्याणदर्शनप्रीतिमितियावत् । मत्पुत्र्यांत्वत्पुत्रेचेत्यर्थः । यद्वा स्नुषाचपुत्रीत्येवगृह्यते । यद्वा लक्ष्मणायोर्मिलाप्रदानंसिद्धंकृत्वोच्यते—उभयोरिति ॥ १३—१५ ॥ गुप्तइत्यादि । विदेहेषु विदेहानांनिवासभूतेदेशे । "जनपदेलुप्" इतिलुप् । असाविति बुद्धिसंनिकर्षेणोच्यते ॥१६–१७॥

शि० जनकः जनानांकंसुखंयस्मात्सः प्रजासुखदातेत्यर्थः । चि० पुरस्क्रियन्तइतिपुरस्कृताःमन्त्र्यादयः अग्निहोत्रपदेनतत्साधनऋत्विजः तैस्सहितइत्यर्थः ॥ ५ ॥ ति० जामातृत्वबुद्ध्यामहाबलत्वेनेश्वरत्वबुद्ध्याचपूज्यत्वेनपुत्रकैरितिबहुवचनप्रयोगः ॥ ९ ॥ ति० तर्तुं पूरयितुं ॥ ११ ॥ शि० पुरोहितपुरस्कृतः पुरस्कृतपुरोहितः ॥ १२ ॥

[पा०] १ ज. अग्निहोत्रपुरस्कृतम्. ङ. झ. ञ. ट. साग्निहोत्रपुरस्कृतः. २ ङ. च. छ. झ. ञ. संरक्तया. ट. संसक्तया. ३ इदमर्धं ङ. च. छ. झ. ञ. दृश्यते. ४ ज. महातेजाः. घ. महाराजः. ५ ट. मव्यग्रो. ६ क. नुमतो. ७ ख. ज. माहच. ८ ख. विहिता. ९ ङ. च. छ. झ. ञ. पुरस्कृतैः. १० क. ख. घ—ट. गतैराजन्. ११ क. ख. घ—ट. तच्चरत्नंधनुर्दिव्यं. १२ ख. ग. ङ—ट. महाबाहो. ख. घ. महातेजो. १३ ज. ममात्मजा. १४ क—ट. तर्तुमिच्छामि. १५ ख. मामनुज्ञातुमर्हसि. १६ क. ख. घ—ट. पुरस्कृतः. १७ क. घ—छ. झ. ञ. ट. प्रतिज्ञांममराजेन्द्र. १८ क. ख. प्रीतिंलप्स्यसेवीर्यनिर्जिताम्. घ. रेवप्रीतिंचमयिलप्स्यसे. ङ—ट. रेवप्रीतिंत्वमुपलप्स्यसे. १९ इदमर्धं ग. ज. दृश्यते. २० ङ. च. छ. झ. ञ. मन्त्रिणश्चैवमब्रवीत्.

यदि वो रोचते[1] वृत्तं जनकस्य महात्मनः ॥ पुरीं गच्छामहे शीघ्रं माभूत्कालस्य पर्ययः ॥ १८ ॥
मन्त्रिणो बाढमित्याहुः सह सर्वैर्महर्षिभिः ॥ सुग्रीतश्चाब्रवीद्राजा श्वो यात्रेति[2] स मन्त्रिणः ॥१९॥
मन्त्रिणस्तां[3] नरेन्द्रस्य[4] रात्रिं परमसत्कृताः ॥ ऊषुस्ते[5] मुदिताः सर्वे गुणैः सर्वैस्समन्विताः ॥ २० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे अष्टषष्टितमः सर्गः ॥ ६८ ॥

एकोनसप्ततितमः सर्गः ॥ ६९ ॥

सपरिजनेनदशरथेनसेनयावसिष्ठादिभिश्चसहमिथिलांप्रत्यागमनम् ॥ १ ॥ जनकेनप्रत्युद्गमनादिपूर्वकंतत्पूजनम् ॥ २ ॥ जनकदशरथाभ्यांमिथःसंभाषणम् ॥ ३ ॥ ततःसर्वैःस्वस्वावासेषुसुखेनरात्रियापनम् ॥ ४ ॥

ततो रात्र्यां व्यतीतायां सोपाध्यायः सबान्धवः ॥ राजा दशरथो हृष्टः सुमन्त्रमिदमब्रवीत् ॥ १ ॥
अद्य सर्वे धनाध्यक्षा धनमादाय पुष्कलम् ॥ व्रजन्त्वग्रे सुविहिता नानारत्नसमन्विताः ॥ २ ॥
चतुरङ्गं[6] बलं चापि शीघ्रं निर्यातु सर्वशः ॥ ममाज्ञासमकालं[7] च यानयुग्यमनुत्तमम् ॥ ३ ॥
वसिष्ठो वामदेवश्च जाबालिरथ काश्यपः ॥ मार्कण्डेयः[8] सुदीर्घायुर्ऋषिः कात्यायनस्तथा ॥ ४ ॥
एते द्विजाः प्रयान्त्वग्रे[9] स्यन्दनं योजयस्व मे ॥ यथा कालात्ययो न स्याद्दूता हि त्वरयन्ति माम् ॥५॥
[इत्युक्त्वा[10] स महातेजा राजा दशरथो रथम् ॥ आरुरोह यथा भानुर्भगवान्रघुनन्दनः] ॥ ६ ॥
वचनात्तु[11] नरेन्द्रस्य सा[12] सेना चतुरङ्गिणी ॥ राजानमृषिभिः सार्धं व्रजन्तं पृष्ठतोऽन्वगात् ॥ ७ ॥
गत्वा चतुरहं मार्गं[13] विदेहानभ्युपेयिवान् ॥ राजा[14] तु जनकः श्रीमाञ्श्रुत्वा पूजामकल्पयत् ॥ ८ ॥
ततो राजानमासाद्य वृद्धं दशरथं नृपम् ॥ जनको[15] मुदितो राजा हर्षं[16] च परमं ययौ ॥
उवाच[17] च नरश्रेष्ठो नरश्रेष्ठं मुदाऽन्वितः[18] ॥ ९ ॥

यौनसंबन्धयोग्यमितिशेषः । पर्ययः अतिक्रमः ॥ १८ ॥ श्वोयात्रेत्यब्रवीदिति तदर्थमुद्युङ्ध्वमितिभावः ॥ १९ ॥ मन्त्रिणः जनकमन्त्रिणः । गुणैः सत्कारातिशयैः । तां रात्रिं तस्यांरात्र्यामित्यर्थः ॥ २० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने अष्टषष्टितमःसर्गः ॥ ६८ ॥

अथदशरथस्यमिथिलागमनमेकोनसप्ततितमे—ततोरात्र्यामित्यादि ॥ १ ॥ धनाध्यक्षाः कोशरक्षाधिकृताः । पुष्कलं श्रेष्ठं । "श्रेयान्श्रेष्ठःपुष्कलःस्यात्" इत्यमरः । सुविहिताः सुसंपादितकल्याणोचितकर्माणः ॥२॥ यानयुग्यमिति । यानं शिविकान्दोलिकादि । युग्यं रथादि । सेनाङ्गत्वादेकवद्भावः ॥३—४॥ यथाकालात्ययः कालातिक्रमः नस्यात्तथाप्रयान्त्वितियोजना ॥५—७॥ चतुरहं चतुर्ष्वहस्सु । श्रुत्वा दशरथमागतंश्रुत्वा । पूजां उपधां ॥ ८ ॥ राजानमासाद्यमुदितः । विवाहःशीघ्र-

ति० एकश्चशब्दोहेतौद्वितीयएवार्थे ॥१९॥ ति० नरेन्द्रश्चेतिपाठे सचमुदितउवासेतिविपरिणामः ॥२०॥ इत्यष्टषष्टितमस्सर्गः ६८
ति० अनुत्तमानि श्रेष्ठानि । यानानि युग्यानिच यान्तु । वसिष्ठाद्यर्थमितिशेषः ॥ ३ ॥ ति० अग्रेद्विजप्रयाणं प्रयाणेकल्याणाय ॥५॥ शि० पूजां सत्कृतिसामग्रीं । अकल्पयत् समपादयत् । ति० दूतानांत्रिदिनगम्यत्वेपिमार्गस्यचतुरङ्गबलोपेतप्रयाणस्याचतुर्दिनंवासोमध्ये ॥८॥ ति० राजानमासाद्यमुदितोहर्षंययौ । मोदस्यैवाधिकावस्थाहर्षइतिभेदः । शि० वृद्धं विलक्षणैश्वर्यवत्त्वादिनावृद्धिप्राप्तं । राजानं परमानुरागविशिष्टं ॥ ९ ॥

[पा०] १ ख. रोचतेवृत्तिः. २ क. ङ. च. छ. झ. ञ. ट. यात्रेतिच. ३ क—ञ. मन्त्रिणस्तु. ४ क. ख. नरेन्द्रेण. ५ क. ख. घ—ट. ऊषुःप्रमुदिताः. ६ ख—च. झ. ञ. ट. चतुरङ्गबलंचापि. कं. बलंसर्वं. ७ घ. समकालंत्वं. ८ ङ. झ. मार्कण्डेयस्तु. क. ख. च. छ. मार्कण्डेयश्च. ज. ट. मार्कण्डेयोपि. ९ घ. व्रजन्त्वग्रे. १० अयंश्लोकः क. ख. दृश्यते. ११ क—छ. झ. ञ. ट. वचनाच्चनरेशस्य. १२ ङ—ट. सेनाचचतुरङ्गिणी. १३ ङ. च. छ. झ. मार्गे. १४ क—ट. राजाच. १५ ङ—ट. मुदितोजनको. १६ ङ. च. छ. झ. ञ. ट. प्रहर्षंपरमं. १७ ख. ङ. च. छ. झ. ञ. वचनंश्रेष्ठो. १८ क. ख. ग. ङ—ट. मुदान्वितम्.

स्वागतं ते महाराज दिष्ट्या प्राप्तोसि राघव ॥ पुत्रयोरुभयोः प्रीतिं लप्स्यसे वीर्यनिर्जिताम् ॥१०॥
दिष्ट्या प्राप्तो महातेजा वसिष्ठो भगवानृषिः ॥ सह सर्वैर्द्विजश्रेष्ठैर्देवैरिव शतक्रतुः ॥ ११ ॥
दिष्ट्या मे निर्जिता विघ्ना दिष्ट्या मे पूजितं कुलम् ॥ राघवैः सहसंबन्धो वीर्यश्रेष्ठैर्महात्मभिः ॥१२॥
श्वः प्रभाते नरेन्द्रेन्द्र निर्वर्तयितुमर्हसि ॥ यज्ञस्यान्ते नरश्रेष्ठ विवाहमृषिसंमतम् ॥ १३ ॥
तस्य तद्वचनं श्रुत्वा ऋषिमध्ये नराधिपः ॥ वाक्यं वाक्यविदां श्रेष्ठः प्रत्युवाच महीपतिम् ॥ १४ ॥
प्रतिग्रहो दातृवशः श्रुतमेतन्मया पुरा ॥ यथा वक्ष्यसि धर्मज्ञ तत्करिष्यामहे वयम् ॥ १५ ॥
धर्मिष्ठं च यशस्यं च वचनं सत्यवादिनः ॥ श्रुत्वा विदेहाधिपतिः परं विस्मयमागतः ॥ १६ ॥
ततः सर्वे मुनिगणाः परस्परसमागमे ॥ हर्षेण महता युक्तास्तां निशामवसन्सुखम् ॥ १७ ॥
[अथ रामो महातेजा लक्ष्मणेन समं ययौ ॥ विश्वामित्रं पुरस्कृत्य पितुः पादावुपस्पृशन्] ॥१८॥
राजा च राघवौ पुत्रौ निशाम्य परिहर्षितः ॥ उवास परमप्रीतो जनकेनाभिपूजितः ॥ १९ ॥
जनकोपि महातेजाः क्रियां धर्मेण तत्त्ववित् ॥ यज्ञस्य च सुताभ्यां च कृत्वा रात्रिमुवास ह ॥२०॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे एकोनसप्ततितमः सर्गः ॥ ६९ ॥

सप्ततितमः सर्गः ॥ ७० ॥

परेद्युर्जनकेनस्वानुजन्मनःकुशध्वजस्यपरिजनैःसहदूतैरानयनम् ॥ १ ॥ जनकेनमन्त्रिमुखादाहूतेनदशरथेनविश्वामित्रादिभिःसहसभांप्रत्यागमनम् ॥ २ ॥ ततोवसिष्ठेनराजप्रार्थनयारामावधिदशरथवंशानुवर्णनम् ॥ ३ ॥

ततः प्रभाते जनकः कृतकर्मा महर्षिभिः ॥ उवाच वाक्यं वाक्यज्ञः शतानन्दं पुरोहितम् ॥ १ ॥

भावीतिहर्षययौ ॥ ९ ॥ वीर्यनिर्जितां पुत्रयोर्वीर्येणधनुर्भङ्गादिनासंभूतामित्यर्थः ॥ १० ॥ वसिष्ठस्यशतक्रतुसाम्यंपूर्णधर्मत्वेन ॥ ११ ॥ विघ्नाः कन्याप्रदानप्रतिबन्धकाः । पूजितत्वेहेतुमाह—राघवैरिति । यतइत्युपस्कार्यं ॥ १२ ॥ इक्ष्वाकुप्रथमवंशत्वेन नरेन्द्राणामिन्द्रत्वं । यज्ञस्यान्तइति । त्रिचतुरदिनानन्तरभाविनीतिशेषः । ऋषिसंमतं ब्राह्मंविवाहमित्यर्थः ॥१३॥ महीपतिं जनकं ॥ १४ ॥ कन्यागवादीनांप्रतिग्रहोदातृवशएव । यदादातादादाति तदाप्रतिगृह्यतेप्रतिग्रहीत्रेतिवस्तुस्थितिः । एतत् युष्मदीयंवीर्यशुल्ककन्याप्रदानमपि । पूर्वमेवश्रुतं अतःपरं कन्याप्रदस्त्वंयथावक्ष्यसि तथावयंकरिष्यामः ॥ १५ ॥ विस्मयमिति । प्रतिग्रहोदातृवशइत्यादिविनयोक्तिरितिभावः ॥ १६ ॥ परस्परसमागमे संभूतेसतीतिशेषः ॥ १७—१८ ॥ निशाम्य दृष्ट्वा । "शमोदर्शने" इतिमित्वनिषेधान्नह्रस्वः ॥ १९ ॥ यज्ञस्यक्रियां अवशिष्टक्रियां । सुताभ्यां पुत्र्योः । क्रियां अङ्कुरार्पणादिकं ॥२०॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने एकोनसप्ततितमः सर्गः ॥ ६९ ॥

अथजनकेनसंबन्धार्हत्वायेक्ष्वाकुसन्तानकीर्तनं-

शि० राघवैर्भवद्भिस्सहसंबन्धात् मेकुलंपूजितं भविष्यतीतिशेषः ॥ १२ ॥ ति० संवर्तयितुंनिर्वर्तयितुं ॥ १३ ॥ ति० एतत् वाक्यं । मयाश्रुतं । क्षत्रियतयाप्रतिग्रहधर्मस्याप्यज्ञानमेव । सांप्रतमेवानुभवोभविष्यतीतिश्रुतमित्युक्तं ॥ १५ ॥ ति० विस्मयं कन्यायावीर्यणशुल्केनजितत्वान्मदनुमत्यनपेक्षायामपिराज्ञोविनयेनतादृशवचनमितिविस्मयः ॥ १६ ॥ इत्येकोनसप्ततितमस्सर्गः ॥ ६९ ॥

ति० अथब्राह्मसंबन्धसदृशयोर्यौनसंबन्धे वध्वपेक्षितःपरस्परकुलाचारस्सर्गाभ्यां—ततइति ॥ १ ॥

[पा०] १ ज. स्वागतंहि. ङ. च. छ. झ. ञ. स्वागतंतेनरश्रेष्ठ. २ ख. महाराज. ३ ट. संबन्धाद्वीर्यश्रेष्ठैः. क. ख. संबन्धाद्वीर्यश्लाघ्यैः. ४ घ—ञ. महाबलैः. ५ क. च. ञ. नरेन्द्रस्त्वं. ङ. च. छ. झ. नरेन्द्रत्वं. ख. घ. नरश्रेष्ठ. ६ ख. ग. च. छ. निवर्तयितु. ङ. झ. ञ. संवर्तयितु. ७ क. ख. ङ. च. छ. झ. ञ. मृषिसत्तमैः. घ. मृषिभिस्सह. ८ घ. ट. श्रेष्ठं. ९ क. ख. ङ—ट. तद्धर्मिष्ठयशस्यंच. १० घ. परंविस्मयमाययुः. ११ ङ. च. छ. झ. ञ. तांरात्रिं. १२ अयंश्लोकः ट. दृश्यते. १३ घ. ट. उवाचपरम. १४ क—ञ. क्रियाधर्मेण. १५ ख. धर्मवित्. १६ ख. नराधिपः.

भ्राता मम महातेजा यवीयानतिधार्मिकः ॥ कुशध्वज इति ख्यातः पुरीमध्यवसच्छुभाम् ॥ २ ॥
वार्याफलकपर्यन्तां पिबन्निक्षुमतीं नदीम् ॥ सांकाश्यां पुण्यसंकाशां विमानमिव पुष्पकम् ॥ ३ ॥
तमहं द्रष्टुमिच्छामि यज्ञगोप्ता स मे मतः ॥ प्रीतिं सोपि महातेजा इमां भोक्ता मया सह ॥ ४ ॥
[एवमुक्ते तु वचने शतानन्दस्य सन्निधौ ॥ आगताः केचिदव्यग्रा जनकस्तान्समादिशत्] ॥ ५ ॥
शासनात्तु नरेन्द्रस्य प्रययुः शीघ्रवाजिभिः ॥ समानेतुं नरव्याघ्रं विष्णुमिन्द्राज्ञया यथा ॥ ६ ॥
[सांकाश्यान्ते समागत्य ददृशुश्च कुशध्वजम् ॥ न्यवेदयन्यथावृत्तं जनकस्य च चिन्तितम् ॥
तद्वृत्तं नृपतिः श्रुत्वा दूतश्रेष्ठैर्महाबलैः] ॥ ७ ॥
आज्ञयाऽथ नरेन्द्रस्य आजगाम कुशध्वजः ॥ स ददर्श महात्मानं जनकं धर्मवत्सलम् ॥ ८ ॥
सोभिवाद्य शतानन्दं राजानं चापि धार्मिकम् ॥ राजार्हं परमं दिव्यमासनं चाध्यरोहत ॥ ९ ॥
उपविष्टावुभौ तौ तु भ्रातरावतितेजसौ ॥ प्रेषयामासतुर्वीरौ मन्त्रिश्रेष्ठं सुदामनम् ॥ १० ॥
गच्छ मन्त्रिपते शीघ्रमैक्ष्वाकममितप्रभम् ॥ आत्मजैः सह दुर्धर्षमानयस्व समन्त्रिणम् ॥ ११ ॥
औपकार्यां स गत्वा तु रघूणां कुलवर्धनम् ॥ ददर्श शिरसा चैनमभिवाद्येदमब्रवीत् ॥ १२ ॥
अयोध्याधिपते वीर वैदेहो मिथिलाधिपः ॥ स त्वां द्रष्टुं व्यवसितः सोपाध्यायपुरोहितम् ॥ १३ ॥
मन्त्रिश्रेष्ठवचः श्रुत्वा राजा सर्षिगणस्तदा ॥ सबन्धुरगमत्तत्र जनको यत्र वर्तते ॥ १४ ॥
स राजा मन्त्रिसहितः सोपाध्यायः सबान्धवः ॥ वाक्यं वाक्यविदां श्रेष्ठो वैदेहमिदमब्रवीत् ॥१५॥
विदितं ते महाराज इक्ष्वाकुकुलदैवतम् ॥ वक्ता सर्वेषु कृत्येषु वसिष्ठो भगवानृषिः ॥ १६ ॥
विश्वामित्राभ्यनुज्ञातः सह सर्वैर्महर्षिभिः ॥ एष वक्ष्यति धर्मात्मा वसिष्ठो मे यथाक्रमम् ॥ १७ ॥

सप्ततितमे—ततःप्रभातइत्यादि । कृतकर्मा समाप्तयज्ञादिक्रियः ॥ १ ॥ अत्रत्यविशेषणानांशतानन्दपरिज्ञातानामप्युपदेशः परंपरयादशरथादिश्रोत्रंप्रापयितुं । वार्याफलकपर्यन्तां दुर्गसंरक्षणार्थपरिखारूपेणावस्थितायां इक्षुमत्यां वारिणिआकीर्णाः निखाताः फलकाश्शूलानि येषुते वार्याफलकाः तादृशाःपर्यन्तप्रदेशायस्यास्तां । वार्यामलकपर्यन्तामितिपाठे वार्यामलकाआमलकविशेषाः तत्पर्यन्तां पुण्यसंकाशां पुण्यतुल्यां पुण्यवत्स्ववासिनांस्वतएवाभीष्टप्रदामित्यर्थः । पुष्पकंविमानमिवस्थितां सांकाश्यांपुरीं । इक्षुमतींनदीं पिबन् तज्जलंपिबन्नित्यर्थः । अध्यवसत् अधिवसति । "उपान्वध्याङ्वसः" इत्याधारस्यकर्मत्वं ॥ २ ॥ ३ ॥ यज्ञगोप्ता सांकाश्येस्थित्वायज्ञसामग्रीप्रेषणादिनेतिभावः । इमां विवाहकल्याणजां । भोक्तेतिलुट् ॥ ४—५ ॥ नरेन्द्रस्यशासनात् शतानन्दवचनद्वारकादित्यर्थः । विष्णुं उपेन्द्रं ॥ ६—८ ॥ अध्यरोहत पुरोहितराजानुज्ञयेत्यर्थः ॥९-११॥ औपकार्यांदशरथशिबिरनिवेशं । उपकार्याशब्दात्स्वार्थेष्यञ् ॥ १२—१५ ॥ विदितमिति "मतिबुद्धि—" इत्यादिनावर्तमानेक्तः । "क्तस्यचवर्तमाने" इतिषष्ठी । त्वयाविदितमित्यर्थः । दैवतं परमगुरुरित्यर्थः ॥ १६ ॥ मेवक्ष्यति कुलमितिशेषः । विश्वामित्रस्यकोपपरिहारायविश्वामित्राभ्यनुज्ञा-

---

[पा०] १ क. ख. घ—ट. वीर्यवानतिधार्मिकः. २ क. ख. च. मध्यावसच्छुभाम्. ३ क. ख. ग. वार्यामलकपर्यन्तां. ध. राद्दामलकपर्यन्तां. ४ च. छ. झ. ञ. समेततः. ५ अयंश्लोकः ग. ङ—ट. दृश्यते. ६ ध. शासनाच्च. ७ घ. शीघ्रवाजिनः. ८ क. समानेतुं. ९ इदमर्धत्रयं ग. ङ—ट. दृश्यते. १० ग. ङ. च. छ. झ. ञ. ट. समागम्य. ११ ङ—ञ. महाजवैः. १२ क. ख. ङ—ट. आज्ञयातु. १३ क. ख. महातेजाः. १४ ङ. च. छ. झ. ञ. जनकंचातिधार्मिकम्. ख. ट. राजानमपिधार्मिकम्. १५ घ. आसनंपरमंदिव्यंराजार्हं. १६ ख. ङ—ञ. सोभ्यरोहत. १७ क. ख. घ. ज. ट. वमितौजसौ. ङ. च. छ. झ. ञ. वमितद्युती. १८ क. ख. मिक्ष्वाकुममितौजसम्. १९ घ. ङ. औपकार्यं. २० ज. ट. गत्वाथ. २१ ङ. च. छ. झ. ट. गणस्तथा. २२ ङ. च. छ. झ. ञ. राजाचमन्त्रिसहितः. २३ च. विदितंतु. ग. विदितंतेमहातेजाः. २४ ख. घ. छ. ज. ञ. यथाधर्मंयथाक्रमम्.

[एवमुक्त्वा नरश्रेष्ठे राज्ञां मध्ये महात्मनाम्] ॥
तूष्णींभूते दशरथे वसिष्ठो भगवानृषिः ॥ उवाच वाक्यं वाक्यज्ञो वैदेहं सपुरोधसम् ॥ १८ ॥
अव्यक्तप्रभवो ब्रह्मा शाश्वतो नित्य अव्ययः ॥ तस्मान्मरीचिः संजज्ञे मरीचेः काश्यपः सुतः ॥१९॥
विवस्वान्कश्यपाज्जज्ञे मनुर्वैवस्वतः स्मृतः ॥ मनुः प्रजापतिः पूर्वमिक्ष्वाकुस्तु मनोः सुतः ॥ २० ॥
तमिक्ष्वाकुमयोध्यायां राजानं विद्धि पूर्वकम् ॥ ईक्ष्वाकोस्तु सुतः श्रीमान्कुक्षिरित्येव विश्रुतः ॥२१॥
कुक्षेरथात्मजः श्रीमान्विकुक्षिरुदपद्यत ॥ विकुक्षेस्तु महातेजा बाणः पुत्रः प्रतापवान् ॥ २२ ॥
बाणस्य तु महातेजा अनरण्यः प्रतापवान् ॥ अनरण्यात्पृथुर्जज्ञे त्रिशङ्कुस्तु पृथोस्सुतः ॥ २३ ॥
त्रिशङ्कोरभवत्पुत्रो धुन्धुमारो महायशाः ॥ [धुन्धुमारान्महातेजा युवनाश्वो महारथः] ॥
युवनाश्वसुतस्त्वासीन्मान्धाता पृथिवीपतिः ॥ २४ ॥
मान्धातुस्तु सुतः श्रीमान्सुसन्धिरुदपद्यत ॥ सुसन्धेरपि पुत्रौ द्वौ ध्रुवसन्धिः प्रसेनजित् ॥ २५ ॥
यशस्वी ध्रुवसन्धेस्तु भरतो नाम नामतः ॥ भरतात्तु महातेजा असितो नाम जातवान् ॥ २६ ॥
यस्यैते प्रतिराजान उदपद्यन्त शत्रवः ॥ हैहयास्तालजङ्घाश्च शूराश्च शशिबिन्दवः ॥ २७ ॥
तांस्तु स प्रतियुध्यन्वै युद्धे राजा प्रवासितः ॥ २८ ॥
हिमवन्तमुपागम्य भृगुप्रस्रवणेऽवसत् ॥ असितोऽल्पबलो राजा मन्त्रिभिः सहितस्तदा ॥ २९ ॥
द्वे चास्य भार्ये गर्भिण्यौ बभूवतुरिति श्रुतम् ॥ एका गर्भविनाशाय सपत्न्यै सगरं ददौ ॥ ३० ॥

तइत्युक्तं । "दशपुरुषविख्यातात्" इतिशास्त्रेण यौनसंबन्धापेक्षितांवंशशुद्धिंवक्ष्यतीत्यर्थः ॥ १७—१८ ॥ अव्यक्तं प्रत्यक्षाद्यगोचरं वस्तु प्रभवः कारणं यस्य सोऽव्यक्तप्रभवः । अव्यक्तंकिंनाम वक्ष्यत्ययोध्याकाण्डे "आकाशप्रभवोब्रह्म" इति । अथ को ऽ्याकाशोपि तमपिवक्ष्यत्युत्तरकाण्डे "संक्षिप्यहिपुरालोकान्माययास्वयमेवहि । महार्णवेशयानोप्सुमांत्वंपूर्वमजीजनः । पद्मेदिव्येर्कसङ्काशेनाभ्यामुत्पाद्यमामपि । प्राजापत्यंलयाकर्ममयिसर्वंनिवेशितं" इत्यादिना । शाश्वतः बहुकालस्थायी । नित्यः द्विपरार्धकालंविनाशरहितः । अव्ययः प्रवाहरूपेणप्रतिकल्पमवस्थायी अस्तीतिशेषः ॥ १९ ॥ वैवस्वतः विवस्वत्पुत्रः प्रजापतिः राजा । आसीदितिशेषः ॥ २०—२३ ॥ धुन्धुमारः युवनाश्वापरनामधेयः ॥ २४–२६ ॥ मध्येअसितवृत्तान्तकथनंसगरवैभवातिशयप्रकटनाय । प्रतिराजानः प्रतिपक्षाः । शत्रवः शातयितारः । प्रतिराजानेवतान्विशेषयति—हैहयाइत्यादि ॥२७॥ प्रतियुध्यन् अभिमुखतयायुद्धंकुर्वन् । प्रवासितः राज्याद्भ्रंशितः ॥ २८ ॥ भृगुप्रस्रवणे भृगुमहामुनिसांनिध्यवन्निर्झरोपान्तप्रदेशे । इदमेवपूर्वंभृगुतुन्दइत्युक्तं ॥ २९ ॥ सगरं गरं विषं

शि० अव्यक्तप्रभवः नव्यक्तःकैश्चिज्ज्ञातः प्रभवोजन्मकारणीभूतमात्रादिर्यस्यसस्वयंभूरित्यर्थः । किंच आत् वासुदेवात् व्यक्तंप्राकट्यंयस्यतदव्यक्तंकमलं तस्मात्प्रभवःप्राकट्यंयस्य अयोनिजइत्यर्थः । किंच अव्यक्तंप्रधानंप्रभवतिप्रकटितगुणवत्त्वेनप्रकटयतिसः प्रधानगुणक्षोभहेतुरित्यर्थः । "अव्यक्तंशंकरेविष्णावव्यक्तंमहदादिषु । आत्मन्यपिस्यादव्यक्तमस्फुटेत्वभिधेयवत्" इतिकोशः ॥ १९ ॥ शि० जायत अजायत । आगमशास्त्रस्यानित्यत्वादड्विरहः ॥ २६ ॥ ती० हैहयादयःसोमवंश्याः । शत्रवः हिंसकाः

[पा०] * इदमर्धंकादिपुनक्कापिदृश्यते. १ क. वाक्यज्ञं. २ ग. घ. ट. सपुरोहितम्. ३ ज. ट. स्वतस्सुतः. ४ घ—ञ. इक्ष्वाकुश्च. ५ क. ख. ज. कुक्षिरेवेति. ६ रितिविश्रुतः. ७ क. ख. घ. ङ—ट. पृथोरपि. ८ इदमर्धं क—ट. दृश्यते. ९ महाबलः. १० ङ. च. छ. झ. ञ. सुतश्चासीत्. ज. सुतश्चापि. ग. सुतश्श्रीमान्. ११ ख. मान्धातोस्तु. ज. मान्धातस्य. १२ क. ख. घ—ञ. जायत. १३ क—घ. हेहयास्ताल. १४ ङ. च. छ. झ. ञ. तांश्चसप्रतियुध्यन्वै. ख. तैस्तुसंप्रतियुध्यद्भिर्युद्धे. ज. तांस्तुसंप्रेक्ष्ययुध्यन्सयुधिराजा. ट. युध्यन्हियुधि. १५ क. ख. ङ. च. ज—ट. भार्याभ्यांसहितोऽवसत्. १६ क. ङ. च. छ. झ. ञ. ट. कालधर्ममुपेयिवान्. घ. मन्त्रिभिश्चसुसन्धिभिः. घ. मन्त्रिभिस्सहितःपुरा. क. ख. ङ. ज. झ. ञ. सहितस्तदा. ट. सहितस्तथा. ग. च. राक्षितस्ततः. १७ ङ. झ. रितिश्रुतिः. १८ क. ङ—ञ. विनाशार्थं. १९ क. ग. घ. सागरंददौ. ख. तुगरं.

ततः शैलवरं रम्यं बभूवाभिरतो मुनिः ॥ भार्गवश्च्यवनो नाम हिमवन्तमुपाश्रितः ॥ ३१ ॥
तत्रैका तु महाभागा भार्गवं देववर्चसम् ॥ ववन्दे पद्मपत्राक्षी काङ्क्षन्ती सुतमात्मनः ॥ ३२ ॥
तमृषिं साऽभ्युपागम्य कालिन्दी चाभ्यवादयत् ॥ स तामभ्यवदद्विप्रः पुत्रेप्सुं पुत्रजन्मनि ॥ ३३ ॥
तव कुक्षौ महाभागे सुपुत्रः सुमहाबलः ॥ महावीर्यो महातेजा अचिरात्संजनिष्यति ॥
गरेण सहितः श्रीमान्मा शुचः कमलेक्षणे ॥ ३४ ॥
[एवमुक्ता महाभागा असिते स्वर्गते सति ॥ निधाय चेतो नृपतौ विद्युल्लेखेव सुप्रभा] ॥ ३५ ॥
च्यवनं तु नमस्कृत्य राजपुत्री पतिव्रता ॥ पतिशोकातुरा तस्मात्पुत्रं देवी व्यजायत ॥ ३६ ॥
सपत्न्या तु गरस्तस्यै दत्तो गर्भजिघांसया ॥ सह तेन गरेणैव जातः स सगरोऽभवत् ॥ ३७ ॥
सगरस्यासमञ्जस्तु असमञ्जात्तथांऽशुमान् ॥ दिलीपोंऽशुमतः पुत्रो दिलीपस्य भगीरथः ॥ ३८ ॥
भगीरथात्ककुत्स्थश्च ककुत्स्थस्य रघुस्सुतः ॥ ३९ ॥
रघोस्तु पुत्रस्तेजस्वी प्रवृद्धः पुरुषादकः ॥ कल्माषपादो ह्यभवत्तस्माज्जातश्च शङ्खणः ॥ ४० ॥
सुदर्शनः शङ्खणस्य अग्निवर्णः सुदर्शनात् ॥ शीघ्रगस्त्वग्निवर्णस्य शीघ्रगस्य मरुः सुतः ॥
मरोः प्रशुश्रुकस्त्वासीदंबरीषः प्रशुश्रुकात् ॥ ४१ ॥
अंबरीषस्य पुत्रोऽभून्नहुषः पृथिवीपतिः ॥ नहुषस्य ययातिश्च नाभागस्तु ययातिजः ॥ ४२ ॥
नाभागस्य बभूवाज अजाद्दशरथोऽभवत् ॥ अस्माद्दशरथाज्जातौ भ्रातरौ रामलक्ष्मणौ ॥ ४३ ॥
आदिवंशविशुद्धानां राज्ञां परमधर्मिणाम् ॥ इक्ष्वाकुकुलजातानां वीराणां सत्यवादिनाम् ॥ ४४ ॥

सत्सहितंभक्ष्यमित्यर्थः ॥ ३० ॥ अभिरतः प्रीतःसन् हिमवन्तमुपाश्रितोभूत् स्वदेशवासाभिमानेनप्रीतःसन्तद्वरप्रदानायसन्निहितोभूदित्यर्थः ॥ ३१—३२ ॥ कालिन्दीति सगरमुपयुक्तवत्यानाम । उपागम्य शरणंगत्वा। अभ्यवादयत् शुश्रूषतेस्म। सः पुत्रेप्सुं अप्रतिवन्धपुत्रेप्सुं । पुत्रजन्मनि पुत्रोत्पत्तिविषये ॥ ३३ ॥ गरेण सपत्नीप्रयुक्तेन । माशुचः गरप्रयोगनिमित्तंशोकंमाकुर्वित्यर्थः ॥ ३४—३५ ॥ पतिशोकेत्यनेन तदनन्तरमेवदैवात्पतिर्मृतइतिगम्यते । तस्मात् च्यवनानुग्रहात् ॥ ३६ ॥ अत्रयइत्यनुसन्धेयं। जातइत्यनन्तरंतेनेत्यनुसन्धेयं ॥३७—३९॥ पूर्वंप्रवृद्धाख्यः । ततो वसिष्ठशापात् पुरुषादकः राक्षसभूतः । ततःवसिष्ठप्रतिशापायोद्धृतजलस्यस्वभार्यानुनयात् स्वपदप्रक्षेपेणकल्माषपादाख्यः ॥ ४०—४१ ॥ नहुषययातीचन्द्रवंश्याभ्यामन्यौ । अत्रपुराणेक्रमवैषम्यंकल्पभेदादितिज्ञेयं ॥४२–४३॥ आदिवंशविशुद्धानां आदितआरभ्यवंशेनविशुद्धानां । राज्ञामितिसंबन्धेषष्ठी । वरयइति वरणस्यपुरोहितकृत्यत्वादितिभावः । सदृशेइतिङी-

---

॥ २७ ॥ शि० आदीति आदयः सोमवंश्यापेक्षयाज्येष्ठाः वंशविशुद्धाः वंशोविशुद्धोयेषां तेएवतेइतिकर्मधारयः ॥ ४४ ॥ इतिसप्ततितमस्सर्गः ॥ ७० ॥

[पा०] १ क. ख. ङ. च. झ. ञ. ट. शैलवरेरम्ये. २ क—ट. तत्रचैका महाभागा. ३ क. ख. घ—ञ. सुतमुत्तमम्. ४ क. ग. तत्रर्षिसाभ्युपागम्य. ५ क. समहाबलः. ६ अयंश्लोकः ग. ज. दृश्यते. ७ ङ. च. छ. झ. ञ. च्यवनंचनमस्कृत्य. ८ झ. पत्याविरहितातस्मात्. ङ. ज. पतिनारहितातस्मात्. घ. पत्युश्शोकातुरा. ९ ख. गर्भंजिघांसया. १० ङ. च. छ. झ. संजातःसगरोऽभवत्. क. सजातस्सगरो. ११ क—ट. असमञ्जादथांशुमान्. १२ क. ङ. ककुत्स्थस्तु. १३ ङ—ट. ककुत्स्थाच्चरघुस्तथा. क. ककुत्स्थात्तुरघुस्तदा. घ. ककुत्स्थस्यरघुस्तदा. ख. रघुस्तस्मादजायत. १४ क. ख. ङ. च. छ. झ. ञ. ह्यभवत्. १५ क—छ. झ. ञ. ट. ज्ञातस्तु. १६ घ. ज. प्रशुश्रुकश्चासीत्. १७ ङ. च. छ. झ. ञ, नहुषश्चमहीपतिः. १८ ग—छ. झ. ञ. ययातिस्तु. १९ क. ख. ग. नाभागश्च. २० ज. ट. नाभागात्तु. २१ ख, घ, ज. तस्माद्दशरथात्. २२ ख. वंशजातानां.

रामलक्ष्मणयोरर्थे त्वत्सुते वरये नृप ॥ सदृशाभ्यां नरश्रेष्ठ संदृशे दातुमर्हसि ॥ ४५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे सप्ततितमस्सर्गः ॥ ७० ॥

एकसप्ततितमः सर्गः ॥ ७१ ॥

जनकेननिजवंशानुकीर्तनपूर्वकंरामलक्ष्मणाभ्यांसीतोर्मिलयोर्दानप्रतिज्ञानम् ॥ १ ॥

एवं ब्रुवाणं जनकः प्रत्युवाच कृताञ्जलिः ॥ श्रोतुमर्हसि भद्रं ते कुलं नः परिकीर्तितम् ॥ १ ॥
प्रदाने हि मुनिश्रेष्ठ कुलं निरवशेषतः ॥ वक्तव्यं कुलजातेन तन्निबोध महामुने ॥ २ ॥
राजाऽभूत्त्रिषु लोकेषु विश्रुतः स्वेन कर्मणा ॥ निमिः परमधर्मात्मा सर्वसत्त्ववतांवरः ॥ ३ ॥
तस्य पुत्रो मिथिर्नाम मिथिला येन निर्मिता ॥ प्रथमो जनको नाम जनकादप्युदावसुः ॥ ४ ॥
उदावसोस्तु धर्मात्मा जातो वै नन्दिवर्धनः ॥ नन्दिवर्धनपुत्रस्तु सुकेतुर्नाम नामतः ॥ ५ ॥
सुकेतोरपि धर्मात्मा देवरातो महाबलः ॥ देवरातस्य राजर्षेर्बृहद्रथ इति स्मृतः ॥ ६ ॥
बृहद्रथस्य शूरोऽभून्महावीरः प्रतापवान् ॥ महावीरस्य धृतिमान्सुधृतिः सत्यविक्रमः ॥ ७ ॥
सुधृतेरपि धर्मात्मा धृष्टकेतुः सुधार्मिकः ॥ धृष्टकेतोस्तु राजर्षेर्हर्यश्व इति विश्रुतः ॥ ८ ॥
हर्यश्वस्य मरुः पुत्रो मरोः पुत्रः प्रतिन्धकः ॥ प्रन्तिधकस्य धर्मात्मा राजा कीर्तिरथः सुतः ॥ ९ ॥
पुत्रः कीर्तिरथस्यापि देवमीढ इति स्मृतः ॥ देवमीढस्य विबुधो विबुधस्य महीध्रकः ॥ १० ॥
महीध्रकसुतो राजा कीर्तिरातो महाबलः ॥ कीर्तिरातस्य राजर्षेर्महारोमा व्यजायत ॥ ११ ॥
महारोम्णस्तु धर्मात्मा स्वर्णरोमा व्यजायत ॥ स्वर्णरोम्णस्तु राजर्षेर्ह्रस्वरोमा व्यजायत ॥ १२ ॥
तस्य पुत्रद्वयं जज्ञे धर्मज्ञस्य महात्मनः ॥ ज्येष्ठोऽहमनुजो भ्राता मम वीरः कुशध्वजः ॥ १३ ॥
मां तु ज्येष्ठं पिता राज्ये सोऽभिषिच्य नराधिपः ॥ कुशध्वजं समावेश्य भारं मयि वनं गतः ॥१४॥
वृद्धे पितरि स्वर्याते धर्मेण धुरमावहम् ॥ भ्रातरं देवसंकाशं स्नेहात्पश्यन्कुशध्वजम् ॥ १५ ॥
कस्य चित्त्वथ कालस्य सांकाश्यादगमत्पुरात् ॥ सुधन्वा वीर्यवान्राजा मिथिलामवरोधकः ॥ १६ ॥
स च मे प्रेषयामास शैवं धनुरनुत्तमम् ॥ सीता कन्या च पद्माक्षी मह्यं वै दीयतामिति ॥ १७ ॥

वभावआर्षः ॥ ४४—४५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने सप्ततितमःसर्गः ॥ ७० ॥

एवंवसिष्ठेनवरवंशकीर्तनपूर्वकंवधूवरणेकृतेजनकःस्ववंशविशुद्धताज्ञापनपूर्वककन्याप्रदानंप्रतिजानीतेएकसप्ततितमे—एवंब्रुवाणमित्यादि ॥ १—२ ॥ सत्त्ववतां बलवतां ॥३॥ प्रथमइति। मिथिमारभ्यास्माकंजनकसंज्ञेतिभावः ॥४—६॥ सुधृतिरित्यन्वर्थसंज्ञाज्ञापनार्थं विशेषणद्वयं ॥७—१३॥ भारं भरणीयं। पोषणीयमितियावत् ॥ १४ ॥ धुरं राज्यभारं ॥ १५ ॥ कस्यचित्कालस्य कस्मिंश्चित्कालेगते। अवरोधकः अवरोद्धुमित्यर्थः । तुमुण्ण्वुलौक्रियायांक्रियार्थायामिति ण्वुल्

ति० अथ जनकः कन्यापितृत्वात् जामातृवर्गप्रभुतायाअनौचित्येन स्ववंशस्वयमेवाह—एवमिति ॥१॥ शि० प्रेषयामास

[पां०] १ सदृशोदातु. २ घ. कुलंनःकीर्तितंपरम्. ३ ङ. च. छ. झ. ञ. ट. महामते. ४ ट. राजासीत्रिषु. ५ : . ख. घ—छ. झ. ञ. ट. जनकोमिथिपुत्रकः. ज. निर्मितामिथिलायतः. मिथेस्तुजनकोनाम. ६ क. ख. ङ. च. छ. झ. ञ. प्रथमोजनकोराजा. घ. मिथिलोजनकोराजाजनकादप्युपावसुः. ७ घ. उपावसोस्तु. ८ ख. राजावैनन्दिवर्धनः. ९ क. ख. घ—ट. नन्दिवर्धसुतश्शूरः. १० क. ख. घ. ज. इतिश्रुतः. ११ ज. महावीर्यःप्रतापवान्. १२ ज. महावीर्यस्य. १३ क—ट. धृष्टकेतुः. १४ धृष्टकेतोस्तु. १५ क—छ. झ. ञ. ट. प्रतीन्धकः. ज. प्रतीन्धनः. १६ घ. कीर्तिरथस्याथ. ज. कीर्तिरथस्यासीत्. १७ ज. स्रविधस्सुविधस्य. १८ क. ख. घ—ट. ह्रस्वरोमा. १९ ङ. च. झ. ञ. दागतःपुरात्. २० ज. शैवंचधनुरुत्तमम्.

तस्या[1]ऽप्रदानाद्ब्रह्मर्षे युद्धमासीन्मया सह ।। स हतोऽभि[2]मुखो राजा सुधन्वा तु मया रणे ।। १८ ।।
नि[3]हत्य तं मुनिश्रेष्ठ सुधन्वानं नराधिपम् ।। सांकाश्ये[4] भ्रातरं वीरमभ्यषिञ्चं[5] कुशध्वजम् ।। १९ ।।
कनीयानेष मे भ्राता अहं ज्येष्ठो महामुने ।। ददामि परमप्रीतो वध्वौ ते मुनिपुङ्गव ।। २० ।।
सीतां रामाय भद्रं ते ऊर्मिलां लक्ष्मणाय च ।। २१ ।।
वीर्यशुल्कां मम सुतां सीतां सुरसुतोपमाम् ।। द्वितीयामूर्मिलां चैव त्रिर्ददामि न संशयः ।।२२।।
[ददामि परमप्रीतो वध्वौ ते रघुनन्दन] ।। रामलक्ष्मणयो राजन्गोदानं कारयस्व ह ।।
पितृकार्यं च भद्रं ते ततो वैवाहिकं कुरु ।। २३ ।।
मघा ह्यद्य महाबाहो तृतीये दिवसे[14] विभो ।। फल्गुन्यामुत्तरे राजंस्तस्मिन्वैवाहिकं कुरु ।।
रामलक्ष्मणयो राजन्दानं कार्यं सुखोदयम् ।। २४ ।।

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे एकसप्ततितमः सर्गः ।। ७१ ।।

।। १६—१७ ।। तस्य सुधन्वनः । अप्रदानात् सीताधनुषोरप्रदानात् ।। १८—१९ ।। तेवध्वौददामि स्नुषात्वेनददामि । वसिष्ठेनवरणात्तेददामीत्युक्तं ।। २० ।। वध्वावित्युक्तंव्यवस्थयादर्शयति—सीतामित्यर्धेन ।।२१।। उक्तमर्थसनिमित्तमुपपादयति—वीर्येति । वीर्यशुल्कामित्येतदूर्मिलायाअपिविशेषणं । यद्यपिरामेणैवधनुर्भङ्गःकृतः तथापितादृशशक्तेर्लक्ष्मणेपिदर्शनात्तद्वीर्यमेव ऊर्मिलायाअपिशुल्कमित्यर्थः । ऊर्मिला जनकस्यौरसपुत्री । त्रिः त्रिवारं । त्रिभिःकरणैर्वा ।। २२ ।। गोदानंनाम विवाहपूर्वसमयनियतंकिंचित्कर्म । गावःकेशाः दोःपादमूलरोमाणिच यत्रखण्ड्यन्ते तदेतद्गोदानंनाम समावर्तनाख्यंकर्मेत्याहुः । वैवाहिकंपितृकार्यं नान्दीश्राद्धं ।। २३ ।। तृतीये भाविनि । फल्गुन्यां फल्गुन्याख्याके । उत्तरे उत्तरनक्षत्रे । वैवाहिकं विवाहप्रयोजनं । "तदस्यप्रयोजनं" इतिठक् । दानं गोभूतिलहिरण्यादिदानं । सुखोदयं सुखोदर्कं । वधूवरयोरतिशयावहमित्यर्थः । कार्यमिति सामान्योक्त्या मयापि कन्यार्थंक्रियतइतिसूचितं । कन्यादानेउत्तरफल्गुन्याः प्रशस्तत्वमुक्तंज्योतिषे "त्रीण्युत्तराण्यपितथार्कमघानुराधामूलान्त्यसोमकमलोद्भवभान्युडूनि" इति ।।२४।। इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने एकसप्ततितमः सर्गः ।। ७१ ।।

दूतद्वाराकथयामासेत्यर्थः ।। १७ ।। ती० तस्याप्रदानात् तस्य उभयस्य अप्रदानात् । ति० विमुखः युद्धमुखः ।। १८ ।। ति० त्रिर्ददामि उक्तमपिदार्ढ्यायेत्याशयः ।। २२ ।। ति० अद्यतृतीयदिवसे तवमिथिलाप्रवेशात्तृतीयदिवसे । यज्ञसमाप्तेस्तृतीयदिवसे वा । अद्य मघानक्षत्रं । फल्गुन्यां पूर्वफल्गुनीनक्षत्रे । उत्तरे श्रेष्ठे । अतएव "भगोयत्रप्रजापतिः" इत्यनेनाविरोधः । उत्तरफल्गुन्यास्त्वर्यमेतिबोध्यम् । वैवाहिकं विवाहं । विनयादित्वाट्ठक् । "मघानक्षत्रंपितरोदेवताः फल्गुनीनक्षत्रमर्यमादेवता फल्गुनीनक्षत्रंभगोदेवता" इतितैत्तिरीयसंहितायाम् । "अर्यम्णःपूर्वेफल्गुनीभगस्योत्तरे" इतितद्ब्राह्मणेचोक्तत्वेनयथाश्रुतमेवसम्यगितितत्त्वम् । उत्तरेइतिपुंस्त्वमार्षं । यद्यप्युत्तराफल्गुनीसीतायाजन्मर्क्षं तथापितदृक्षेप्रथमचरणंविहायतज्जन्मसत्त्वेनतस्याःकन्याराशित्वात्तृतीयैकादशरूपभकूटशुद्धेस्तस्यनदोषः । भकूटशुद्धौतन्नदुष्टमितिज्योतिश्शास्त्रेप्रसिद्धम् । किंच पूर्वासुतस्याद्वादशश्चन्द्रइतितत्रविवाहोऽनुचितएव । एकनाडीदोषेणचरामसीतयोर्वियोगइतिध्येयम् । रामलक्ष्मणयोरर्थं तदभ्युदयाय । सुखोदयं सुखोदर्कं ।। २४ ।। इत्येकसप्ततितमस्सर्गः ।। ७१ ।।

[पा०] १ ज. ट. तस्याप्रदानाद्भगवन्युद्ध. २ ङ. च. झ. ञ. विमुखो. ३ घ. निहत्यतुनरश्रेष्ठ. ४ च. ञ. सांकाश्यात्भ्रातरं. ५ क. घ—ट. शूरमभ्यषिञ्चं. ६ क. नराधिपम्. ७ ख. घ. ज. रघुनन्दन. ८ ङ. च. छ. झ. ञ. ट. लक्ष्मणायैव. ९ क. घ. ङ. च. झ. ञ. त्रिर्वदामि. १० इदमर्धं क. छ. झ. ञ. ट. दृश्यते. ११ ङ. च. छ. झ. ञ. ट. मुनिपुङ्गव. क. रघुपुङ्गव. १२ ख. रर्थं. १३ ज. मघाप्यद्य. १४ क, ग—छ. झ. प्रभो. ख. तथा. १५ झ—ञ. लक्ष्मणयोरर्थे. १६ ग. गोदानंचसुखोदयम्.

द्विसप्ततितमः सर्गः ॥ ७२ ॥

वसिष्ठविश्वामित्राभ्यांजनकंप्रतिकुशध्वजकन्ययोर्भरतशत्रुघ्नार्थवरणम् ॥ १ ॥ जनकेनसहर्षप्रशंसनमभ्यनुज्ञानेदशरथेन विवाहाङ्गभूतगोदानादिक्रियानिर्वर्तनम् ॥ २ ॥

तमुक्तवन्तं वैदेहं विश्वामित्रो महामुनिः ॥ उवाच वचनं वीरं वसिष्ठसहितो नृपम् ॥ १ ॥
अचिन्त्यान्यप्रमेयानि कुलानि नरपुङ्गव ॥ इक्ष्वाकूणां विदेहानां नैषां तुल्योस्ति कश्चन ॥ २ ॥
सदृशो धर्मसंबन्धः सदृशो रूपसंपदा ॥ रामलक्ष्मणयो राजन्सीता चोर्मिलया सह ॥ ३ ॥
वक्तव्यं च नरश्रेष्ठ श्रूयतां वचनं मम ॥ ४ ॥
भ्राता यवीयान्धर्मज्ञ एष राजा कुशध्वजः ॥ अस्य धर्मात्मनो राजन्रूपेणाप्रतिमं भुवि ॥
सुताद्वयं नरश्रेष्ठ पत्न्यर्थं वरयामहे ॥ ५ ॥
भरतस्य कुमारस्य शत्रुघ्नस्य च धीमतः ॥ वरयामः सुते राजंस्तयोरर्थे महात्मनोः ॥ ६ ॥
पुत्रा दशरथस्येमे रूपयौवनशालिनः ॥ लोकपालोपमाः सर्वे देवतुल्यपराक्रमाः ॥ ७ ॥
उभयोरपि राजेन्द्र संबन्धेनानुबध्यताम् ॥ इक्ष्वाकोः कुलमव्यग्रं भवतः पुण्यकर्मणः ॥ ८ ॥
विश्वामित्रवचः श्रुत्वा वसिष्ठस्य मते तदा ॥ जनकः प्राञ्जलिर्वाक्यमुवाच मुनिपुङ्गवौ ॥ ९ ॥
कुलं धन्यमिदं मन्ये येषां नो मुनिपुङ्गवौ ॥ सदृशं कुलसंबन्धं यदाज्ञापयथस्स्वयम् ॥ १० ॥
एवं भवतु भद्रं वः कुशध्वजसुते इमे ॥ पत्न्यौ भजेतां सहितौ शत्रुघ्नभरतावुभौ ॥ ११ ॥

अथविश्वामित्रेणभरतशत्रुघ्नार्थंकुशध्वजसुतावरणंगोदानकरणंचद्विसप्ततितमे—तमुक्तवन्तमित्यादि । नृपं जनकं ॥१॥ अचिन्त्यानि आश्चर्यभूतानि । अप्रमेयानि अपरिच्छेद्यमहिमानि । एषां इक्ष्वाकुविदेहानां । तुल्यः कश्चन नास्ति यतः अतःकारणादचिन्त्यत्वमप्रमेयत्वंचेतिभावः ॥२॥ सीता ऊर्मिलयासह रामलक्ष्मणयोर्दीयतेइतियत् अयंधर्मसंबन्धः धर्मेणसंबन्धः । यौनसंबन्धइतियावत् । सदृशः रूपसंपदाचसदृशः । यद्वा अयंकरिष्यमाणोधर्मसंबन्धः सदृशः उभयकुलसदृशः । रूपसंपदाचसदृशः तुल्यरूपयोर्विवाहइत्यर्थः । अत्रहेतुमाह—रामेति । सीताऊर्मिलयासहरामलक्ष्मणयोः यतःसदृशीत्यनुषङ्गः । यद्वा सीता ऊर्मिलयासहरामलक्ष्मणयोः चकाराद्रामलक्ष्मणौचसीतोर्मिलयोः रूपसंपदा सदृशः । शकारान्तेबहुवचनं । अतःसदृशोधर्मसंबन्धइत्यर्थः ॥ ३ ॥ अन्यद्वक्तव्यंकिंचिदस्ति तदपिश्रूयतामित्यर्थः ॥ ४—५ ॥ पत्न्यर्थमित्युक्तं कयोरित्याकाङ्क्षायां तदुपपादयन्नाह—भरतस्येति । भरतस्य शत्रुघ्नस्यचतयोरुभयोरर्थइत्यन्वयः ॥ ६–७ ॥ उभयोर्युवयोः संबन्धेनकुलद्वयमप्यनुबध्यतामित्यर्थः । भवतःकुलमित्यनुकर्षः । अव्यग्रं निर्दोषम् । अन्योन्यसंबन्धेनान्योन्यमुत्कर्षंप्राप्नुयादित्यर्थः ॥ ८ ॥ वसिष्ठस्य मते वसिष्ठानुमतइत्यर्थः ॥ ९ ॥ यद्यस्मात् । मुनिपुङ्गवौयुवां येषांनःकुलसंबन्धं इक्ष्वाकुवंशेनयौनसंबन्धं । स्वयं शिष्यमुखं विना । आज्ञापयथः तस्मात्तेषां नः इदंकुलंधन्यं भाग्यशालीति मन्ये ॥ १० ॥ पत्न्यौ भजेतांपत्नीत्वेनभजेतां । सहितौ सदासहचरौ ॥११॥

शि० अचिन्त्यानि अतिशुद्धत्वेनविवाहार्थसंदेहानर्हाणि ॥ २ ॥ ति० उभयोर्भ्रात्रोस्संबन्धेनेक्ष्वाकुकुलंसंबध्यतां तत्रचसंबन्धे पुण्यकर्मणोभवतोऽव्यग्रंचित्तंभवत्विति शेषः । कथमीदृशेनमहाराजेनयुगपन्मयासंबन्धचतुष्टयंकार्यमितिव्यग्रतामास्त्वित्यर्थः ॥ ८ ॥ वि० मुनिपुङ्गवौभवन्तौयद्यस्मादाज्ञापयतः ॥ १० ॥

[पा०] १ क. घ. ज. रघुपुङ्गव. ख. च. छ. ञ. रघुनन्दन. २ क. ख. एषराजन्. ३ ख. ग. घ. ज. वरयेमसुते. क. वरयामसुते. च. छ. झ. ञ. ट. वरयेतेसुते. ४ ङ—ट. लोकपालसमाः. ५ ज. उभयोरेव. ६ क. संबन्धेनतु. ज. संबन्धेनानुबुध्यताम्. ७ क. ख. घ—ट. इक्ष्वाकुकुलमव्यग्रं. ग. इक्ष्वाकूणांकुलंचाग्र्यं. ८ क. ग. ङ. झ. येषांतौ. ९ ख. यथाऽऽज्ञापयथः. ञ. यदाज्ञापयतः. १० ख. भद्रंवां. ज. ट. भद्रंते. क. भद्रंनः.

एकाह्ना राजपुत्रीणां चतसृणां महामुने ॥ पाणीन्गृह्णन्तु चत्वारो राजपुत्रा महाबलाः ॥ १२ ॥
उत्तरे दिवसे ब्रह्मन्फल्गुनीभ्यां मनीषिणः ॥ वैवाहिकं प्रशंसन्ति भगो यत्र प्रजापतिः ॥ १३ ॥
एवमुक्त्वा वचः सौम्यं प्रत्युत्थाय कृताञ्जलिः ॥ उभौ मुनिवरौ राजा जनको वाक्यमब्रवीत् ॥१४॥
परो धर्मः कृतो मह्यं शिष्योस्मि भवतोः सदा ॥ १५ ॥

इमान्यासनमुख्यानि आसातां मुनिपुङ्गवौ ॥ यथा दशरथस्येयं तथाऽयोध्यापुरी मम ॥
प्रभुत्वे नास्ति सन्देहो यथार्हं कर्तुमर्हथ ॥ १६ ॥

तथा ब्रुवति वैदेहे जनके रघुनन्दनः ॥ राजा दशरथो हृष्टः प्रत्युवाच महीपतिम् ॥ १७ ॥
युवामसङ्ख्येयगुणौ भ्रातरौ मिथिलेश्वरौ ॥ ऋषयो राजसङ्घाश्च भवद्भ्यामभिपूजिताः ॥ १८ ॥
स्वस्ति प्राप्नुहि भद्रं ते गमिष्यामि स्वमालयम् ॥ श्राद्धकर्माणि सर्वाणि विधास्यामीति चाब्रवीत् ॥१९॥
तमापृष्ट्वा नरपतिं राजा दशरथस्तदा ॥ मुनीन्द्रौ तौ पुरस्कृत्य जगामाशु महायशाः ॥ २० ॥
स गत्वा निलयं राजा श्राद्धं कृत्वा विधानतः ॥ प्रभाते काल्यमुत्थाय चक्रे गोदानमुत्तमम् ॥२१॥
गवां शतसहस्राणि ब्राह्मणेभ्यो नराधिपः ॥ एकैकशो ददौ राजा पुत्रानुद्दिश्य धर्मतः ॥ २२ ॥

एकाह्नेत्यजभावआर्षः । सप्तम्यर्थेतृतीया । चतसृणामिति "छन्दस्युभयथा" इतिपक्षेदीर्घः ॥ १२ ॥ उत्तरे फल्गुनीभ्यांउपलक्षितयोर्दिवसयोःउत्तरस्मिन्दिवसे । उत्तरफल्गुन्यामित्यर्थः । यद्वाफल्गुनीभ्यामितिसप्तम्यर्थेचतुर्थी । फल्गुन्यामुत्तरे । फल्गुन्याख्येउत्तरनक्षत्रइत्यर्थः । प्रशस्ततायांहेतुः—भगइति । भगः प्रजापतिः । प्रजोत्पत्तिस्थानयोनिलिङ्गाधिष्ठाता देवता। ननु "एकस्मिंस्तुगृहेकुर्यादेकामेवशुभक्रियां । अनेकांयस्तुकुरुतेसनाशमधिगच्छति" इतिज्योतिश्शास्त्रे एकगृहेअनेकोत्सवनिषेधोदृश्यतइतिचेत् मतान्तरेएकगृहेभ्रातृणामेकदोत्सवस्यविहितत्वात् । उक्तंहि दैवज्ञविलासे "भिन्नोदरोदयवतामुद्वाहेकल्पयेत्पृथग्वेदिं। एकगृहेजगुरार्या मण्टपमेकंपराशरेणोक्तं" इति। नन्वेवमपिलक्ष्मणशत्रुघ्नयोः कथमेकदाविवाहः "एकमातृप्रसूतानामेकस्मिन्नेववत्सरे । विवाहंमौञ्जिबन्धं चचूडाकर्मनकारयेत्" इतिनिषेधादितिचेत् सत्यं। एकस्मिन्दिनेतुकर्तव्यएव । उक्तंहिदैवज्ञविलासे "भ्रातृद्वयेस्वसृयुगेभ्रातृस्वसृयुगेतथा ॥ समानाश्चक्रियाः कुर्युर्मातृभेदेतथैवच । एकस्मिन्दिवसेत्वेकलग्नेभिन्नांशकेतयोः ॥ एकगर्भोदयवतोर्विवाहःशुभकृद्भवेत्" इति एकोदरयोरप्येकगृहेविवाहकरणवचनंद्रष्टव्यं ॥ १३ ॥ प्रत्युत्थाय आदरातिशयेनेतिभावः ॥ १४ ॥ परोधर्मः कन्याप्रदानरूपः ॥ १५ ॥ इमानीतिसार्धश्लोकएकान्वयः । मद्भ्रातुर्मम दशरथस्यच यान्यासनमुख्यानि सिंहासनानि तानि युवामासातां पुरुषव्यत्ययआर्षः ॥ विनयायप्रथमपुरुषोवा।राज्यत्रयमपियुष्मदीयमित्यर्थः। ननु दशरथसिंहासनं कथंत्वयाशक्यंदातुं तत्राह—यथेति।इयं मिथिला यथादशरथस्येष्टविनियोगार्हा तथा अयोध्याच मम। तथाच युवयोःप्रभुत्वेसन्देहोनास्ति । अतो यथार्हं यथोचितं। प्रभुत्वंकर्तुमर्हथ । पूजायांबहुवचनं।वयंसर्वेभवदधीनाः। यूयमेवास्माकंत्रयाणांहितमुपदिश्य यथोचितंप्रकृतकार्यंकर्तुमर्हथेत्यर्थः ॥ १६ ॥ हृष्टइति । एवमेकवाक्यवादेनेतिशेषः ॥ १७—२० ॥ काल्यं कालेकर्तव्यं । गोदानं समावर्तनं ॥२१॥ तद-

---

ति० आसनमुख्यानि त्रयाणांत्रीणिसिंहासनानि । आस्यतामित्यार्षेपरिपालयेतामित्यर्थकं । आसनशब्देन दशरथजनककुशध्वजानांराज्यानिलक्ष्यन्ते ॥ १६ ॥ ति० क्षत्रियत्वेपिप्रतिग्रहीतृत्वाद्दातरिजनकेआशीःस्वस्तीत्यादि । शि० त्वंस्वस्तिप्राप्नुहिस्वसुतादानेन मङ्गलंप्राप्य । अन्तर्भावितणिजर्थः ॥ १९ ॥ ति० एकैकशइत्यार्षं । शि० एकैकशइत्यत्र "उक्तार्थानां—" इतिन्यायाप्रवृत्तिस्तुद्वौद्वौब्राह्मणावित्यादाविव "द्विर्बद्धंसुबद्धंभवति" इतिस्वीकारात् आर्षइत्युक्तिस्तु तदविचारमूलिका ॥ २२ ॥

[पा] १ ङ. झ. भवतोस्तथा. २ ङ. च. छ. झ. ञ. आस्यतां. ट. आस्येतां. ख. ग. घ. ज. आसेतां. ३ ख. यथेष्टंकर्तुं. ४ ख. ङ. च. छ. झ. ञ. गमिष्यामः. ५ ङ. च. छ. झ. ञ. ट. विधिवत्. ६ क—ट. विधास्यइति. ७ घ. तौमुनीन्द्रौ. ८ ख. काल्यउत्थाय. ९ ङ. च. छ. झ. ञ. शतसहस्रंच. क. सहस्रंतु.

सुवर्णशृङ्गाः संपन्नाः सवत्साः कांस्यदोहनाः ॥ गवां शतसहस्राणि चत्वारि पुरुषर्षभः ॥ २३ ॥
वित्तमन्यच्च सुबहु द्विजेभ्यो रघुनन्दनः ॥ ददौ गोदानमुद्दिश्य पुत्राणां पुत्रवत्सलः ॥ २४ ॥
स सुतैः कृतगोदानैर्वृतैस्तु नृपतिस्तदा ॥ लोकपालैरिवाभाति वृतः सौम्यः प्रजापतिः ॥ २५ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे द्विसप्ततितमः सर्गः ॥ ७२ ॥

त्रिसप्ततितमः सर्गः ॥ ७३ ॥

जनकेनवैवाहिकवेषभूषितैरामादिभिःसहदशरथादीनांकल्याणमण्टपप्रवेशनम् ॥ १ ॥ वसिष्ठेनजनकप्रार्थनयाविश्वामित्रशतानन्दपुरस्कारेणवैवाहिकक्रियोपक्रमः ॥ २ ॥ श्रीरामादिभिरग्निसंनिधौजनककुशध्वजाभ्यांमन्त्रोदकदानपुरस्सरचोदनेनसीतादिपाणिग्रहणम् ॥ ३ ॥ तदाविवाहोत्सवेदेवगन्धर्वाप्सरोभिःसहर्षपुष्पवर्षणगाननर्तनाद्याचरणम् ॥ ४ ॥

यस्मिंस्तु दिवसे राजा चक्रे गोदानमुत्तमम् ॥ तस्मिंस्तु दिवसे शूरो युधाजित्समुपेयिवान् ॥ १ ॥
पुत्रः केकयराजस्य साक्षाद्भरतमातुलः ॥ दृष्ट्वा पृष्ट्वा च कुशलं राजानमिदमब्रवीत् ॥ २ ॥
केकयाधिपती राजा स्नेहात्कुशलमब्रवीत् ॥ येषां कुशलकामोसि तेषां संप्रत्यनामयम् ॥ ३ ॥
स्वस्रीयं मम राजेन्द्र द्रष्टुकामो महीपतिः ॥ तदर्थमुपयातोऽहमयोध्यां रघुनन्दन ॥ ४ ॥
श्रुत्वा त्वहमयोध्यायां विवाहार्थं तवात्मजान् ॥ मिथिलामुपयातांस्तु त्वया सह महीपते ॥ ५ ॥
त्वरयाऽभ्युपयातोऽहं द्रष्टुकामः स्वसुः सुतम् ॥ [तस्य त्वं राजशार्दूल प्रीतिं कर्तुमिहार्हसि ॥ ६ ॥
तस्य तद्वचनं श्रुत्वा मधुरं मधुराक्षरम्] ॥ अथ राजा दशरथः प्रियातिथिमुपस्थितम् ॥
दृष्ट्वा परमसत्कारैः पूजनार्हमपूजयत् ॥ ७ ॥
ततस्तामुषितो रात्रिं सह पुत्रैर्महात्मभिः ॥ प्रभाते पुनरुत्थाय कृत्वा कर्माणि कर्मवित् ॥
ऋषींस्तदा पुरस्कृत्य यज्ञवाटमुपागमत् ॥ ८ ॥

ददा-तान्याह—गवामित्यादि ॥२२॥ संपन्नाः क्षीरसंपन्नाः । कांस्यदोहनाः कांस्यमयदोहनपात्राः ॥ २३ ॥ सुबहु अन्यद्वित्तंच ॥ २४ ॥ सौम्यः सुप्रसन्नचित्तः ॥ २५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने द्विसप्ततितमःसर्गः ॥ ७२ ॥

अथसीताविवाहस्त्रिसप्ततितमे—यस्मिन्नित्यादि॥१॥ साक्षात्पदेनभिन्नोदरमातुलोप्यस्तीतिगम्यते ॥ २ ॥ केकयाधिपतिः स्वपिता । अनामयं कुशलं विद्यतइतिशेषः ॥ ३ ॥ स्वसुरपत्यंस्वस्रीयः ॥ ४—७ ॥ यज्ञवाटं यज्ञवाटसमीपं । अत्रयज्ञवाटशब्देनोत्सवशालोच्यते । पूर्वयज्ञस्यान्तइत्युक्तत्वेन यज्ञस्यसमाप्तत्वात् ।

ति० इंद्दश्योयागावः तासांगवांचत्वारिलक्षाणिददावित्युत्तरेणान्वयः ॥ २३ ॥ ति० गोदानं तदाख्यंकर्मविशेषं । "गोदानं चौलवत्कार्यंषोडशेऽब्देतदुच्यते । अक्षोपवेशनंनास्तिश्मश्रूणांमुण्डनंभवेत् । स्नात्वाचवाग्यतस्तिष्ठन्नहश्शेषंनयेदथ । आदित्येऽस्तमितेवाचंविसृजेतान्तिकेगुरोः । अहंवरंददामीतिदद्याद्गोमिथुनंततः ।" इत्याश्वलायनकारिकायां । इदंसमावर्तनपूर्वाङ्गम् । "वेदव्रतानिवापारंनीत्वाह्युभयमेववा । गुरवेतुवरंदत्त्वास्नायीततदनुज्ञया" इतियाज्ञवल्क्यात् ॥ २४ ॥ द्विसप्ततितमस्सर्गः ॥ ७२ ॥

शि० अहं नजहातिचित्तं तत्रैवसर्वदातिष्ठतीत्यर्थः । तंस्वसुस्सुतं । नञ्पूर्वकजहातेःकर्तरिक्तः । नहीयतेचित्तेननत्यज्यतेऽ-

[पा] १ ख. सुवर्णशृङ्गसंपन्नाः. झ. ञ. ट. सुवर्णशृङ्गयस्संपन्नाः. २ ख. घ. सुमहद्धि. ३ घ. तैस्सुतैःकृत. ४ ख. घ. ङ. च. झ. ञ. ट. वृतस्सनृपति. क. वृतश्चनृपति. ५ ग. ङ. च. छ. झ. ञ. ट. वीरो. ६ क—घ. ज. स्त्वभ्युपेयिवान्. ७ छ. ज. कैकयराजस्य. ८ ङ. च. ज. विवाहार्थे. ९ ख. मुपयातान्स. १० इदमर्धद्वयं ख. दृश्यते. ११ ग. मुपागतम्. १२ ख. ग. पूजार्हतमपूजयत. ग. पूजार्हसमपूजयत्. १३ ख. काल्यउत्थाय. १४ ख. कृतकर्मानराधिपः. ग. ङ. च. छ. झ. ञ. ट. कृत्वाकर्माणितत्त्ववित्.

युक्ते मुहूर्ते विजये सर्वाभरणभूषितैः ॥ भ्रातृभिः सहितो रामः कृतकौतुकमङ्गलः ॥ ९ ॥
वसिष्ठं पुरतः कृत्वा महर्षीनपरानपि ॥ [पितुः समीपमाश्रित्य तस्थौ भ्रातृभिरावृतः] ॥ १० ॥
वसिष्ठो भगवानेत्य वैदेहमिदमब्रवीत् ॥ ११ ॥
राजा दशरथो राजन्कृतकौतुकमङ्गलैः ॥ पुत्रैर्नरवरश्रेष्ठ दातारमभिकाङ्क्षते ॥ १२ ॥
दातृप्रतिग्रहीतृभ्यां सर्वार्थाः प्रभवन्ति हि ॥ स्वधर्मं प्रतिपद्यस्व कृत्वा वैवाह्यमुत्तमम् ॥ १३ ॥
इत्युक्तः परमोदारो वसिष्ठेन महात्मना ॥ प्रत्युवाच महातेजा वाक्यं परमधर्मवित् ॥ १४ ॥
कः स्थितः प्रतिहारो मे कस्याज्ञा संप्रतीक्ष्यते ॥ स्वगृहे कोविचारोस्ति यथा राज्यमिदं तव ॥१५॥
कृतकौतुकसर्वस्वा वेदिमूलमुपागताः ॥ मम कन्या मुनिश्रेष्ठ दीप्ता वह्नेरिवार्चिषः ॥ १६ ॥
सज्जोऽहं त्वत्प्रतीक्षोस्मि वेद्यामस्यां प्रतिष्ठितः ॥ अविघ्नं कुरुतां राजा किमर्थमवलंबते ॥ १७ ॥
तद्वाक्यं जनकेनोक्तं श्रुत्वा दशरथस्तदा ॥ प्रवेशयामास सुतान्सर्वानृषिगणानपि ॥ १८ ॥
[विश्वामित्रो महातेजा विदेहाधिपतेः करम् ॥ कुशध्वजस्य हस्तं च वसिष्ठो भगवानृषिः ॥
गृहीत्वा प्राविशच्छिष्यैः सहितौ द्विजपुङ्गवौ ॥ १९ ॥
अथ राजा दशरथः पुत्रैः स्त्रीभिश्च संवृतः ॥ सर्वानृषीन्पुरस्कृत्य प्रविवेश महाद्युतिः ॥ २० ॥
प्रवेश्यमानं राजानं वसिष्ठं गाधिनः सुतम् ॥ सर्वानृषवरान्विप्राञ्जनको धर्मवत्सलः ॥ २१ ॥
वस्त्रैराभरणैश्चैव गन्धपुष्पैश्च साक्षतैः ॥ पूजयामास विधिवद्यथायोग्यं यथाक्रमम्] ॥ २२ ॥
ततो राजा विदेहानां वसिष्ठमिदमब्रवीत् ॥ कारयस्व ऋषे सर्वामृषिभिः सह धार्मिक ॥
रामस्य लोकरामस्य क्रियां वैवाहिकीं प्रभो ॥ २३ ॥
[त्वया न विदितं किंचिन्नास्ति ब्रह्मविदांवर ॥ तस्मात्त्वमेव ब्रह्मर्षे अशेषं कर्तुमर्हसि] ॥ २४ ॥
तथेत्युक्त्वा तु जनकं वसिष्ठो भगवानृषिः ॥ विश्वामित्रं पुरस्कृत्य शतानन्दं च धार्मिकम् ॥२५॥

उत्तरसर्गेदशरथानुयानोक्तेश्च ॥ ८ ॥ युक्ते विवाहानुरूपे । विजये विजयावहे । नतुविजयाख्ये । तस्यापराह्णिकत्वात् । मुहूर्तशब्दस्यघटिकाद्वयपरत्वे विजयःपूर्वाह्णएवभवति पुरतःकृत्वा उपागमदितिशेषः । कृतकौतुकमङ्गलः । कृतविवाहसूत्रबन्धनरूपमङ्गलाचारः "कौतुकंविषयाभोगेहस्तसूत्रे" इत्यमरः ॥ ९ ॥ —॥ ११ ॥ दातारमिति । त्वामितिशेषः ॥ १२ ॥ दातृप्रतिग्रहीतृभ्यामिति । योगइतिशेषः । सर्वार्थाः । दानप्रतिग्रहादयः । विवाहएववैवाह्यं श्रुत्वा । स्वधर्मं प्रतिज्ञारूपं ॥ १३—१४ ॥ प्रतिहारः द्वारपालः । किमर्थंद्रुतमागमनंपरिह्रियतइतिभावः । यथेति । त्वदीयंराज्यमिव मदीयमपिराज्यंतवैव । तथाच मद्गृहमात्रस्यस्वीयत्वेकोविचारइत्यर्थः ॥ १५ ॥ श्रुतकौतुकसर्वस्वाः अनुष्ठितविवाहोपयोगिसर्वमङ्गलाचाराः॥१६॥ अविघ्नं अविलंबं । अवलंबते विलंबते ॥१७॥ श्रुत्वेति । वसिष्ठप्रेरितपुरुषमुखादित्यर्थः ॥ १८—२२ ॥ लोका रमन्तेऽस्मिन्नितिलोकरामः तस्य ॥ २३—२४ ॥ प्रपा पानीयशालिका । अभिनवनारिकेलादिपत्र-

---

सावित्ल्यर्थंतु कर्मणि को वोध्यः । अतएवपूर्वेणाह्नमित्यनेननपौनरुक्त्यम् ॥६॥ ति० स्वधर्मं प्रवेशाज्ञादानरूपं । प्रतिपद्यस्व । तावत् द्वार्य्येवतिष्ठामइतिभावः ॥१३॥ ति० सद्यः अस्मिन्काले ॥ १७ ॥ ति० अच्छिद्रकुंभैरितिपाठेस्फुटनादिदोषरहितैःस्वर्णकुंभैरिति-

[पा] १ घ. भूषितः. २ छ. वसिष्ठंतुपुरस्कृत्य. ङ. च. झ. ञ. पुरःकृत्वा. ३ इदमर्धं क. ख. ग. ज. दृश्यते. ४ क. मागम्य. ५ घ—ट. श्रेष्ठो. क. श्रेष्ठैः. ६ झ. ञ. ट. संभवन्तिहि. ७ क. वैवाहमुत्तमम्. ८ ङ. ज. झ. ञ. ट. कस्याज्ञां संप्रतीक्षते. ९ ज. दीप्तवह्नेरिवार्चिषः. ख. ङ. ट. दीप्तावह्नेरिवार्चिषा. क. दीप्तावह्नेर्यथार्चिषः. १० झ. ञ. ट. सद्योऽहं. ११ ज. मद्यः १२ ङ. च. झ. ञ. अविघ्नंक्रियतांसर्वं. छ. ज. अविघ्नंक्रियतांराजा. क. अविघ्नःक्रियतांराजा. घ. अविघ्नं क्रियतांब्रह्मन्. ख. अविघ्नंक्रियतांराजन्. १३ ङ. झ. ञ. ट. किमर्थंहिविलंबते. घ. किमर्थमवलंबसे. १४ एतच्छ्लोकचतुष्टयं ख. दृश्यते. १५ छ. सहधार्मिकः. क. सहधार्मिकैः. १६ अयंश्लोकः ख. दृश्यते. १७ क. नृपतिं.

प्रपामध्ये तु विधिवद्वेदिं कृत्वा महातपाः ॥ अलंचकार तां वेदिं गंधपुष्पैः समन्ततः ॥ २६ ॥
सुवर्णपालिकाभिश्च छिद्रकुंभैश्च साङ्कुरैः ॥ अङ्कुराढ्यैः शरावैश्च धूपपात्रैः सधूपकैः ॥ २७ ॥
शङ्खपात्रैः स्रुवैः स्रुग्भिः पात्रैरर्घ्याभिपूरितैः ॥ लाजपूर्णैश्च पात्रीभिरक्षतैरभिसंस्कृतैः ॥ २८ ॥
दर्भैः समैः समास्तीर्य विधिवन्मन्त्रपूर्वकम् ॥ अग्निमाधाय वेद्यां तु विधिमन्त्रपुरस्कृतम् ॥
जुहावाग्नौ महातेजा वसिष्ठो भगवानृषिः ॥ २९ ॥
ततः सीतां समानीय सर्वाभरणभूषिताम् ॥ [पद्मां पद्मवियुक्तां वै केशवाङ्कच्युतामिव ॥
विद्युत्प्रभां विशालाक्षीं स्निग्धकुञ्चितमूर्धजाम् ॥ ३० ॥
हंसाङ्कितेन क्षौमेण किंचित्पीतेन संवृताम् ॥ वासितेनोत्तरीयेण सुरक्तेन सुसंवृताम्]॥ ३१ ॥
समक्षमग्नेः संस्थाप्य राघवाभिमुखे तदा ॥ अब्रवीज्जनको राजा कौसल्यानन्दवर्धनम् ॥ ३२ ॥
इयं सीता मम सुता सहधर्मचरी तव ॥ प्रतीच्छ चैनां भद्रं ते पाणिं गृह्णीष्व पाणिना ॥ ३३ ॥

रचितमण्टपइत्यर्थः । सुवर्णपालिकाभिः साङ्कुराभिरितिलिङ्गविपरिणामेनानुकृष्यते। छिद्रकुंभैः करकैः । शङ्खपात्रैःशङ्खरूपपात्रैः । स्रुक्स्रुवौ आज्यहोमसाधनपात्रविशेषौ । अर्घ्याभिपूरितैः अर्घ्यार्थजलपूरितैः । लाजपूर्णैः पात्रैरित्यनुपज्यते। पात्रीभिः कार्यान्तरोपयुक्तपात्रान्तरैः । अभिसंस्कृतैः हरिद्रालेपनादिसंस्कारवद्भिः । अलञ्चकारेति पूर्वेणान्वयः ॥ २६—२८ ॥ समैः समपरिमाणैः । अत्र पाणिग्रहणात्पूर्वंहोमआभ्युदयिकः ॥ २९–३२ ॥ अथसौन्दर्याभिजात्यादिना सीतायाःप्रतिग्रहार्हतांवदन्प्रतिग्रहमनुजानाति—इयमिति । इयं अपरिच्छेद्यसौन्दर्यसौकुमार्यलावण्यादिकंप्रत्यक्षेणनिर्दिशति । नकेवलंप्रत्यक्षंसौन्दर्यादिकं प्र-

---

कतकः । करकैरितितीर्थः ॥२७॥ तनि० इयं निरतिशयरूपवती। सीतेति जन्मपरिशुद्धिरुच्यते। ममसुतेत्यावासपरिशुद्धिः । तव सौन्दर्यवागुरयासर्वहृदयाकर्षकस्य । सहधर्मचरी नित्यंसहधर्मचारिणी । भविष्यतीतिकालविशेषविधानाभावात् । नित्यंसहधर्मचारिण्याःकिमिदंदानमितिनकोपःकार्यइतिप्रसादंयाचते—भद्रंतइति । मासोत्सवादिष्वर्चाविग्रहविवाहवदवतारानुगुणविवाहादिकंनविरुध्यतइतिहृदयम् । यद्वा मत्तोपिप्रेमातिशयस्तवापीतिदृष्टिदोषपरिहारार्थंरक्षांकरोति—भद्रंतइति । पाणिंगृह्णीष्वपाणिनेति तादृशावस्थानुभवेननयनसाफल्यंभजामइतिभावः।आचार्यास्तुप्रकारान्तरेणव्याचक्षते । इयं रूपौदार्यगुणैरहगेवगरीयानितिनतूष्णींस्थातव्यं । एनामपिपश्य । "तुल्यशीलवयोवृत्ता" इत्याद्युक्तलक्षणवत्त्वात्तवेयमर्हति । अतिशयान्तरमाह—सीतेति । आभिजात्यायोनिजत्वंअतिशयितं। इयंसीता। सुवर्णलताभूमावेवखलूत्पद्यते । हिरण्यवर्णाखल्वियं ममसुता "जनकानांकुलेकीर्तिमाहरिष्यतिमेसुता" इतिप्रसिद्धिविषया सहधर्मचरी त्वदाचरितधर्माणांप्रवर्तयित्री । प्रतीच्छ अत्यादरेणगृहाण । "नचसीतात्वयाहीना" इत्यादिवत् "नजीवेयंक्षणमपि" इत्येवंप्रकारेणच स्थातव्यं । एनामागतामपरिहारेणस्वीकुरु। पाणिंगृह्णीष्वपाणिना पाणिग्रहणेन,शिथिलकङ्कणांकुरु । भद्रंतइति गृहीतपाण्योरुभयोरपिमङ्गलाशासनंकरोति । पाणिना प्रणयापराधेपाणिनापादग्रहणंभविष्यति इदानींपाणिंगृह्णीष्व । केचिदेवंवर्णयन्ति । इयं त्वद्विश्लेषव्यतिरिक्तकालमात्रसत्तावती । पतिव्रतायाःस्त्रियाभर्तृविरहेप्राणानाश एवेतिप्रसिद्धंखलु । इयं "आर्तार्तेमुदितेहृष्टाप्रोषितेमलिनाकृशा। मृतेम्रियेतयानारीसास्त्रीज्ञेयापतिव्रता" इतिशास्त्रविषयभूतपतिव्रतास्त्रीभ्यउत्तमाखलु तद्विलक्षणाच । इयं त्वदात्मभूतात्वच्छरीरभूताच । सीतानिमित्तन्यूनतातवैवखलु स्वच्छायादोषइछाय. तएवखलु । सुता "मातरमङ्गनाः" इतिमातृगुणानुवृत्त्यापृथिवीगन्धसारभूतक्षमादिगुणवतीच । ममसुतेति नेकवलंराजकुमारीत्वं न भोगदानं किंतु हेमारविन्दन्यायेनाश्रितवैलक्षण्यानुगुण्येनविशेषतोभोगदानमिति । एनां एवंव्रतनियमैरुत्पन्नां । भद्रंते "भुङ्क्ष्वशेषमखिलंतव "इतिवत् व्रतनियमादिजन्यतायास्सफलत्वंतवैव । भोग्यवस्तुगुणपौष्कल्यंभोक्तुरेवातिशयितभोगाय । पाणिंगृह्णी ।पाणिना सीता हस्तंप्रसार्यग्रहीतुंनजानाति त्वमेवगृह्णीष्व । पाणिंगृह्णीष्वपाणिनेति "बाहुच्छायामवष्टब्धोयस्यलोकामहात्मनः" इत्यादि-

[पा०] १ घ. सभामध्येतु. ज. प्रपामध्येच. २ ग. जलकुंभैश्च. घ. झ. ञ. चित्रकुंभैश्च. ३ घ. पाद्यैरर्घ्यादिपूरितैः, ङ—ञ. रर्घ्यादिपूजितैः. क. ज. ट. रर्घ्याभिपूजितैः. ख. ग. घ. पात्रैरर्घ्यादिपूरितैः. ४ ग. स्तथापात्रैः. क. श्चपात्रौघः. ख. श्चपात्रैश्च. ५ क. ख. घ. छ—ट. रपिसंस्कृतैः. ६ झ. अग्निमाधायतंवेद्यां. क. ङ. च. ज. ञ. मादायवेद्यांतु. ७ क. ग. घ. ज. ट. वसिष्ठऋषिसत्तमः. ख. ङ. च. ञ. वसिष्ठोमुनिसत्तमः. झ. मुनिपुङ्गवः. ८ एतत्पद्यद्वयं ख. दृश्यते. ९ छ. ज. ञ. राघवाभिमुखंतदा. च. राघवाभिमुखींतदा. १० घ. वाक्यं. ११ ख. घ. नन्दिवर्धनम्.

पतिव्रता महाभागा छायेवानुगता सदा ॥ इत्युक्त्वा प्राक्षिपद्राजा मन्त्रपूतं जलं तदा ॥ ३४ ॥
[प्रक्षिप्ते सलिले भूमौ गगने चोत्थितास्स्वनाः] ॥ साधुसाध्विति देवानामृषीणां वदतां तदा ॥
देवदुन्दुभिनिर्घोषः पुष्पवर्षो महानभूत् ॥ ३५ ॥
एवं दत्वा तदा सीतां मन्त्रोदकपुरस्कृताम् ॥ अब्रवीज्जनको राजा हर्षेणाभिपरिप्लुतः ॥ ३६ ॥
लक्ष्मणागच्छ भद्रं ते ऊर्मिलामुद्यतां मया ॥ प्रतीच्छ पाणिं गृह्णीष्व मा भूत्कालस्य पर्ययः ॥३७॥
तमेवमुक्त्वा जनको भरतं चाभ्यभाषत ॥ गृहाण पाणिं माण्डव्याः पाणिना रघुनन्दन ॥ ३८ ॥
शत्रुघ्नं चापि धर्मात्मा अब्रवीज्जनकेश्वरः ॥ श्रुतकीर्त्या महाबाहो पाणिं गृह्णीष्व पाणिना ॥ ३९ ॥

त्यक्षदृष्टमप्यनुमानेनबुभुत्समानस्यायोनिजत्वेनानुमेयंचेत्याह सीता । सीता लाङ्गलपद्धतिः । तज्जन्यतया तथाव्यपदेशः । इयंसीता यासिद्धाश्रमात्प्रभृति धनुर्भङ्गादिना कुतूहलगोचरतामासादिता सेयंसीता । यद्वा सीतादर्शनदशायां विद्युत्स्फुरणसमयइव क्वचिदप्यवयवविप्रतिपत्त्यभावेन ससंभ्रमंरामंप्रत्याह—इयंसीतेति । यद्वा "प्रासादेसापथिपथिचसापृष्ठतःसापुरःसा" इत्युक्तरीत्या अनवरतभावनाप्रकर्षेण सर्वत्र सीतायाःप्रतीयमानत्वादाह—इयंसीतेति । यद्वा यथारामआत्मानंमानुषंमन्यते एवंसीतापि । अतोराघवत्वेभवत्सीतेत्याह—इयंसीतेति । नकेवलंसौन्दर्यमस्मदपेक्षितं किंत्वाभिजात्यंचेत्यत्राह—ममसुतेति । आचारप्रधानजनककुलजातायाः किंवक्तव्यमाभिजात्यमिति भावः । यद्वा ममसुता "महतातपसारामं" इतिवत् तुभ्यंदातुंविरचितविविधव्रतोपवासादिकस्यममकन्येत्यर्थः । अस्त्वियंसुन्दरीभोगार्था धर्माचरणार्थमन्ययाभवितव्यमितिमन्येतेत्यत्राह—सहधर्मचरीतवेति । भोगार्थेयमेव धर्माचरणार्थापीतिभावः । समानोधर्मः सहधर्मः तंचरतीतिसहधर्मचरी । "दोषोयद्यपितस्यस्यात्सतामेतदगर्हितं" इतिवक्तुस्तवानुरूपेयं "नकश्चिन्नापराध्यति" इतिवक्त्रीतिभावः । एवंसौन्दर्याभिजात्यधर्माचरणशीलत्वादिमत्त्वेपि त्वदनुमत्यभावान्नैनांप्रतिगृह्णामीत्यत्राह—प्रतीच्छचैनामिति । प्रतीच्छ गृहाण । सीतायाः रामाविनाभूततया तस्याः प्रदानानर्हत्वात् ददामीत्यनुक्तिः । भद्रंते स्वतस्सिद्धायाः कस्त्वंदातुमिति रामः कुप्येदितिसान्त्वयति । यद्वा निरतिशयकन्यालक्षणशालिन्याअस्याःप्रतिग्रहे भवतःसर्वाणिमङ्गलानिभविष्यन्तीत्यर्थः । यद्वा अनुरूपवधूवरयोःसंयोगे दृष्टिदोषोभविष्यतीति मङ्गलमाशास्ते—भद्रंतइति । एवंमयानुज्ञाते गान्धर्वराक्षसाभ्यामुद्वहेदितिभीतः प्राह—पाणिंगृह्णीष्वेति । "यदिकामयेतस्त्रीरेवजनयेयमित्यङ्गुलीरेवगृह्णीयात्" इत्याद्युक्तकामव्यावृत्तये पाणिमित्युक्तं । प्रणयधारायांपादग्रहणमस्तु संप्रतिपाणिंगृह्णीष्वपाणिनेति साहित्यकृतशोभाविशेषदर्शनाभिलाषेणोक्तं । ब्राह्मणस्यैवपाणिग्रहणं क्षत्रियादेःशरादिग्रहणंविहितं अतः कथमिदंसंगच्छतइति नशङ्कनीयं । तस्यासवर्णविषयत्वात् । आहमनुः "पाणिग्रहणसंस्कारःसवर्णासुप्रदृश्यते ॥ असवर्णास्वयंज्ञेयोविधिरुद्वाहकर्मणि ॥ शरःक्षत्रिययाग्राह्यःप्रतोदोवैश्यकन्यया ॥ वासोदशाशूद्रयातुवर्णोत्कृष्टस्यवेदने" इति । अतःसर्ववर्णानामपिसवर्णासुपाणिग्रहोस्त्येव ॥ २३ ॥ पतिव्रतेत्यादि भविष्यतीतिशेषः । प्राक्षिपत् रामहस्तइतिशेषः ॥३४॥ शुभनिमित्तमाह—साध्विति । वदतां वदत्सु । पुष्पवर्षः पुष्पवर्षश्च ॥३५—३६॥ पर्ययः विलंबइत्यर्थः । भिन्नमातृकत्वाद्भरतात्पूर्वंलक्ष्मणविवाहोनदुष्यति । "पितृव्यपुत्रेसापत्नेपरनारीसुतेषुवा ॥ निवाहदानयज्ञादौपरिवेदोनदूषणं" इति-

प्रसिद्धपराक्रमशालिहस्तेनहस्तंगृह्णीष्व । ती० तवभुजवीर्यनिर्जितातवाभिमुखंस्थिताइयंसीता ममसुतेत्याभिजात्यकथनं । सहधर्मचरीति यस्त्वयानुष्ठेयोधर्मस्सोनयासहकर्तव्यइत्यर्थः । एनांप्रतीच्छ अङ्गीकुरु । पाणिंगृह्णीष्वपाणिनेति "गृभ्णामितेसौभगत्वायहस्तं" इतिमन्त्रपूर्वकंपाणिंगृहाणेत्यर्थः ॥ २३ ॥ छायेवानुगता नित्यसंबद्धा । भवत्विति शेषः ॥ ३४ ॥ ति० मन्त्रोदकपुरस्कृतां

[पा०] १ ख. गतातव. २ क. ख. च. मन्त्रपूर्वंजलं. ३ इदमर्धं ख. दृश्यते. ४ ङ. तथा. ५ ज. ट. निर्घोषैः. ६ ख. वृष्टिश्चखाच्युता. क. वृष्टिर्महत्यभूत्. ७ क. ख. घ—ट. सुतांसीतां. ८ क. घ. ङ. ज. पिपरिप्लुतः. ९ क. ऊर्मिलाचममात्मजा. १० घ. त्कालविपर्ययः. ११ क. ख. पाणिंगृह्णीष्वमाण्डव्याः. १२ क. ङ. च. झ. ञ. ट. अब्रवीन्मिथिलेश्वरः. घ. ह्यब्रवीज्जनकेश्वरः. १३ ङ. च. झ. कीर्तेर्महाबाहो. ख, महाभाग.

सर्वे भवन्तः सौम्याश्च सर्वे सुचरितव्रताः ॥ पत्नीभिः सन्तु काकुत्स्था मा भूत्[1]कालस्य पर्ययः ॥४०॥
जनकस्य वचः श्रुत्वा पाणीन्पाणिभिरस्पृशन् ॥ चत्वारस्ते चतसृणां वसिष्ठस्य मते स्थिताः ॥ ४१ ॥
अग्निं [2]प्रदक्षिणीकृत्य वेदिं राजानमेव च ॥ [3]ऋषींश्चैव महात्मानः [4]सभार्या रघुसत्तमाः ॥
[5]यथोक्तेन तदा चक्रुर्विवाहं विधिपूर्वकम् ॥ ४२ ॥
[[6]काकुत्स्थैश्च गृहीतेषु ललितेषु च पाणिषु] ॥ पुष्पवृष्टिर्महत्यासीदन्तरिक्षात्सुभास्वरा ॥
दिव्यदुन्दुभिनिर्घोषैर्गीतवादित्रनिःस्वनैः ॥ ४३ ॥
ननृतुश्चाप्सरस्सङ्घा गन्धर्वाश्च जगुः कलम् ॥ विवाहे रघुमुख्यानां [7]तदद्भुतमदृश्यत ॥ ४४ ॥
ईदृशे वर्तमाने तु तूर्योद्धुष्टनिनादिते ॥ त्रिरग्निं ते परिक्रम्य ऊहुर्भार्या महौजसः ॥ ४५ ॥
[8]अथोपकार्यां जग्मुस्ते [9]सभार्या रघुनन्दनाः ॥ [[10]प्रीयमाणो दशरथः पुत्रान्पुत्रवतां वरः] ॥
राजाप्यनुययौ पश्यन्सर्षिसङ्घः सबान्धवः ॥ ४६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे त्रिसप्ततितमः सर्गः ॥ ७३ ॥

स्मरणात् ॥ ३७—३९ ॥ पत्नीभिः सहिताइतिशेषः। अत्रोदकंप्रदानमर्थसिद्धं । जनकेनानुज्ञामात्रंकृतं ज्येष्ठत्वात् उदकप्रक्षेपणंतु माण्डवीश्रुतकीर्त्योः कुशध्वजेनैव । तदाहयाज्ञवल्क्यः " पितापितामहोभ्रातासकुल्योजननीतथा ॥ कन्याप्रदःपूर्वनाशेप्रकृतिस्थःपरःपरः " इति ॥ ४०—४१ ॥ अत्रैकस्यांवेदिकायांएकस्मिन्नेवाग्नौवसिष्ठोजुहाव तेनैवमेकमग्निंसर्वेस्वस्वभार्यापाणीन् गृहीत्वा प्रदक्षिणीकृत्यचक्रुरित्युत्तरत्रान्वयः। राजानं जनकं । यथोक्तेन शास्त्रोक्तप्रकारेण । विधिपूर्वकं कल्पसूत्रपूर्वकं । विवाहं विवाहकर्म । तदा तस्मिन्काले । चक्रुः स्वसूत्रानुरोधेनप्रत्येकंपाणिग्रहणहोमंचक्रुरित्यर्थः । पूर्ववसिष्ठेनहोमवचनमाभ्युदयिककर्मपरं । अग्निप्रतिष्ठापनपूर्वकंविवाहहोमोत्रोच्यते । पाणिग्रहणानन्तरमाग्निंब्राह्मणान् दातारंजनकंच प्रदक्षिणीकृत्य स्वकल्पोक्तविधानेन प्रत्येकमग्निंप्रतिष्ठाप्य विवाहहोमांश्चक्रुरित्यर्थः ॥ ४२ ॥ सीताप्रदानकालिकंशुभंनिमित्तमुक्तं। अथसर्वसाधारण्येनविवाहकर्मकालिकशुभनिमित्तानिदर्शयति—पुष्पवृष्टिरिति ॥ ४३ ॥ तत् पुष्पवृष्ट्यादिकं ॥ ४४ ॥ अथ लाजहोमपूर्वकंस्वस्वाग्निप्रदक्षिणत्रयंदर्शयति—ईदृशइति । ईदृशे पूर्वोक्तरूपे । तूर्याणां नृत्यगीतवाद्यानां । उद्घुष्टेन उद्घोषणेन । निनादिते नादेप्रतिध्वनिरूपेवर्तमाने । अग्निं स्वस्वाग्निं । त्रिःपरिक्रम्य ऊहुः विवाहंनिर्वर्तयामासुः ॥ ४५ ॥ राजा दशरथः । पश्यन् सभार्यान्पुत्रानित्यर्थः ॥ ४६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने त्रिसप्ततितमः सर्गः ॥ ७३ ॥

दानीयमन्त्रोदकाभ्यांपुरस्कृताम् ॥ ३६ ॥ ति० तूर्योद्घुष्टनिनादिते तूर्याणांयदुद्घुष्टंघोषस्तन्निनादितेकाले । त्रिरग्निमित्युपसंहारेण पुनर्वादः ॥ ४५ ॥ इतित्रिसप्ततितमस्सर्गः ॥ ७३ ॥

[पा०] १ घ. कालविपर्ययः. २ क—ट. प्रदक्षिणंकृत्वा. ३ ङ. च. ज. झ. ट. ऋषींश्चापिमहात्मानः. ग. घ. महाभागान्. ४ ङ. झ. ञ. सहभार्यारघूद्वहाः. क—घ. ज. ट, रघूत्तमाः. ५ ज. ट. यथोक्तेनचतच्चक्रुः. ६ इदमर्धं ख. ज. दृश्यते. ७ ट. तदद्भुतमिवाभवत्. ८ ङ. ज. झ. ञ. अथोपकार्यं. ९ क. ख. छ. ज. सदारारघुनन्दनाः. १० इदमर्धं ख. दृश्यते.

चतुस्सप्ततितमः सर्गः ॥ ७४ ॥

विश्वामित्रेणरामादीनामाशीर्वचनपूर्वकंजनकदशरथयोरापृच्छनेनस्वाश्रमगमनम् ॥ १ ॥ दशरथेनरामादिभिःसहजनकदत्तपारिबर्हपरिग्रहपूर्वकंतदापृच्छनेनायोध्यांप्रतिनिर्गमनम् ॥ २ ॥ मध्येमार्गमपशकुनदर्शनेनविषीदतोदशरथस्यप्रश्नेवसिष्ठेनतंप्रतिभयप्रसञ्जननिवेदनपूर्वकंतदुपशमनिवेदनम् ॥ ३ ॥ अत्रान्तरेवनान्तरात्प्रादुर्भवतिभगवतिभार्गवेदशरथेचानर्थाशङ्किनिवसिष्ठादिभिस्तदाश्वासनपूर्वकंसरभसमर्घ्यादिनारामाराधनम् ॥ ४ ॥

अथ रात्र्यां व्यतीतायां विश्वामित्रो महामुनिः ॥ आपृष्ट्वा तौ च राजानौ जगामोत्तरपर्वतम् ॥
[आशीर्भिः पूरयित्वा च कुमारांश्च सराघवान्] ॥ १ ॥
विश्वामित्रे गते राजा वैदेहं मिथिलाधिपम् ॥ आपृष्ट्वाथ जगामाशु राजा दशरथः पुरीम् ॥ २ ॥
[गच्छन्तं तं तु राजानमन्वगच्छन्नराधिपः] ॥ ३ ॥
अथ राजा विदेहानां ददौ कन्याधनं बहु ॥ ४ ॥
गवां शतसहस्राणि बहूनि मिथिलेश्वरः ॥ कंबलानां च मुख्यानां क्षौमकोट्यंबराणि च ॥ ५ ॥
हस्त्यश्वरथपादातं दिव्यरूपं स्वलङ्कृतम् ॥ ददौ कन्यापिता तासां दासीदासमनुत्तमम् ॥ ६ ॥
हिरण्यस्य सुवर्णस्य मुक्तानां विद्रुमस्य च ॥ ददौ परमसंहृष्टः कन्याधनमनुत्तमम् ॥ ७ ॥
दत्वा बहुधनं राजा समनुज्ञाप्य पार्थिवम् ॥ प्रविवेश स्वनिलयं मिथिलां मिथिलेश्वरः ॥ ८ ॥
राजाप्ययोध्याधिपतिस्सहपुत्रैर्महात्मभिः ॥ ऋषीन्सर्वान्पुरस्कृत्य जगाम सबलानुगः ॥
[वाहिनीं महतीं कर्षन्कीर्तिमांश्च ययौ तदा] ॥ ९ ॥
गच्छन्तं तं नरव्याघ्रं सर्षिसङ्घं सराघवम् ॥ घोराः स्म पक्षिणो वाचो व्याहरन्ति ततस्ततः ॥
भौमाश्चैव मृगाः सर्वे गच्छन्ति स्म प्रदक्षिणम् ॥ १० ॥
तान्दृष्ट्वा राजशार्दूलो वसिष्ठं पर्यपृच्छत ॥ ११ ॥

अथायोध्याप्रस्थाने मध्येमार्गंजामदग्न्यागमनं चतुस्सप्ततितमे—अथरात्र्यामित्यादि। आपृष्ट्वा आपृच्छ्य। उत्तरपर्वतं स्वावासंहिमवन्तं ॥ १॥ आपृष्ट्वा जगामेति क्रियावृत्त्याराजपदावृत्तिः ॥२–४॥ कन्याधनमेवविवृणोति–गवामित्यादि । कंबलानामित्यत्रापि शतसहस्राणीत्यनुपज्यते । क्षौमकोट्यंबराणि क्षौमाश्चकोट्यंबराणिचेतिद्वन्द्वः । क्षौमानामपिबहुत्वमर्थसिद्धं । क्षौमरूपकोट्यंबराणि उत्कृष्टवस्त्राणीतिवा । हस्तीत्यादि सेनाङ्गत्वादेकवद्भावः । कन्यापिता जनकः । गवाश्वादित्वाद्दासीदासमित्येकवद्भावः ॥ ५—६ ॥ हिरण्यस्य रजतस्य शतमितिशेषः ॥ ७—८ ॥ सबलानुगः बलैश्चतुरङ्गैः अनुगैः किङ्करैश्चसहितः ॥ ९ ॥ नरव्याघ्रं प्रतीतिशेषः । घोराइत्यनेनाशुभसूचकत्वमुक्तं । पक्षिणः वायसादयः । प्रदक्षिणमितिशुभसूचनं ।

शि० राजा अतिदीप्त्या उपलक्षितः । राजा दशरथः । अथजगाममंगलगमनंचकार ॥ २ ॥ ती० क्षौमान् पट्टवस्त्राणि । कोटीतिभिन्नंपदंसङ्ख्यावाचि । नपुंसकत्वमार्षं । कोटिक्षौमान् कोट्यंबराणीति कोटिशब्दस्योभयत्रान्वयः ॥ ५ ॥ ती० सुवर्णस्य शोभनवर्णस्य । अत्रपष्ठ्यन्तानांपूर्वपठितकोटिशब्देनान्वयः ॥ ७ ॥

[पा०] १ ट. तौहि. २ इदमर्धं ख. ग. च. दृश्यते. ३ ग. च. पूजयित्वा. ४ ख. कुमारांश्चैवराघवे. ५ ख. गते तस्मिन्वैदेहं. ६ ग. घ. ज. ट. आपृच्छ्याथ. क. ङ. च. छ. झ. ञ. आपृष्ट्वैव. ७ इदमर्धं ख. ज. दृश्यते. ८ क. ख. मिथिलाधिपः. ट. पृथिवीपतिः. ९ क. ङ. ज. झ. क्षौमान्कोट्यंबराणिच. च. छ. ञ. ददौकोट्यंबराणिच. १० ङ. ज. झ. ञ. कन्याशतं. ११ ज. दासीदाससमन्वितम्. १२ ङ. च. छ. झ. ञ. राजासुसंहृष्टः. ग. परमसंतुष्टः. १३ ज. रत्नराशिमनुत्तमम्. १४ क. ङ—ट. बहुविधंराजा. १५ क. ख. राघवम्. १६ ज. मिथिलाधिपः. १७ ग. राजालयोध्याधिपतिः. १८ ङ. झ. सबलान्वितः. १९ इदमर्धं ख. दृश्यते. २० ङ. च. झ. ञ. गच्छन्तंतु. २१ ङ—ट. घोरास्तु. क. ख. घोराश्च. २२ ङ. च. छ. झ. ञ. समन्ततः. २३ क. ख. नरशार्दूलो. २४ घ. वसिष्ठंप्रत्यभाषत.

असौम्याः पक्षिणो घोरा मृगाश्चापि प्रदक्षिणाः ॥ किमिदं हृदयोत्कंपि मनो मम विषीदति ॥१२॥
राज्ञो दशरथस्यैतच्छ्रुत्वा वाक्यं महानृषिः ॥ उवाच मधुरां वाणीं श्रूयतामस्य यत्फलम् ॥ १३ ॥
उपस्थितं भयं घोरं दिव्यं पक्षिमुखाच्च्युतम् ॥ मृगाः प्रशमयन्त्येते संतापस्त्यज्यतामयम् ॥ १४ ॥
तेषां संवदतां तत्र वायुः प्रादुर्बभूव ह ॥ कंपयन्पृथिवीं सर्वां पातयंश्च द्रुमाञ्शुभान् ॥ १५ ॥
तमसा संवृतः सूर्यः सर्वा न प्रबभुर्दिशः ॥ भस्मना चावृतं सर्वं संमूढमिव तद्बलम् ॥ १६ ॥
वसिष्ठश्चर्षयश्चान्ये राजा च ससुतस्तदा ॥ ससंज्ञा इव तत्रासन्सर्वमन्यद्विचेतनम् ॥ १७ ॥
तस्मिंस्तमसि घोरे तु भस्मच्छन्नेव सा चमूः ॥ ददर्श भीमसंकाशं जटामण्डलधारिणम् ॥ १८ ॥
भार्गवं जामदग्न्यं तं राजराजविमर्दिनम् ॥ कैलासमिव दुर्धर्षं कालाग्निमिव दुस्सहम् ॥ १९ ॥
ज्वलन्तमिव तेजोभिर्दुर्निरीक्षं पृथग्जनैः ॥ स्कन्धे चासाद्य परशुं धनुर्विद्युद्गणोपमम् ॥
प्रगृह्य शरमुख्यं च त्रिपुरघ्नं यथा शिवम् ॥ २० ॥
तं दृष्ट्वा भीमसंकाशं ज्वलन्तमिव पावकम् ॥ [यथा कृष्णगतिं घोरं युगान्ते प्रोद्यतं तथा] ॥
वसिष्ठप्रमुखा विप्रा जपहोमपरायणाः ॥ २१ ॥
संगता मुनयः सर्वे संजजल्पुरथो मिथः ॥ कच्चित्पितृवधामर्षी क्षत्रं नोत्सादयिष्यति ॥ २२ ॥
पूर्वं क्षत्रवधं कृत्वा गतमन्युर्गतज्वरः ॥ क्षत्रस्योत्सादनं भूयो न खल्वस्य चिकीर्षितम् ॥ २३ ॥
एवमुक्त्वाऽर्घ्यमादाय भार्गवं भीमदर्शनम् ॥ ऋषयो रामरामेति वचो मधुरमब्रुवन् ॥ २४ ॥
प्रतिगृह्य तु तां पूजामृषिदत्तां प्रतापवान् ॥ रामं दाशरथिं रामो जामदग्न्योऽभ्यभाषत ॥ २५ ॥
[तस्मिंस्तु घोरे जमदग्निसूनुना त्वासादिते राममभिप्रकोपे ॥

अन्तरिक्षेऽशुभसूचनं । भूमौशुभसूचनमित्यर्थस्यद्योतनार्थंभौमाइतिपदं ॥ १०—११ ॥ हृदयमुत्कंपयितुंशीलमस्येतिहृदयोत्कंपि । इदंकिंसुखोदर्कंदुःखोदर्कंवेतिमनोविषीदति । शुभाशुभसूचनदर्शनेनोभयत्रनिर्णयकारणाभावादितिभावः ॥ १२—१३ ॥ पक्षिमुखाच्च्युतं पक्षिमुखेनसूचितमित्यर्थः । प्रशमयन्ति प्रशमंसूचयन्तीत्यर्थः ॥ १४ ॥ संवदतां संवदत्सु ॥१५॥ भस्मनाचावृतंअभूदितिशेषः ॥ १६—१८ ॥ जामदग्न्यमिति अनन्तरापत्येपियञ् । गोत्रत्वारोपात् । जामदग्न्येयमितिपाठे "इतश्चानिञः" इति बह्वचूर्व्येप्यार्षत्वाड्ढक् ॥ १९ ॥ पृथग्जनैः पामरैः । विद्युद्गणोपममितितेजस्वितायांदृष्टान्तः । त्रिपुरघ्नमितितृन् । "अमनुष्यकर्तृकेच" इतिहन्तेष्टक् ॥२०॥ होमोमानसः ॥ २१ ॥ कच्चिदिति मनसोविमर्शः ॥ २२ ॥ नोत्साद-

---

ति० दिवि खे भवंदिव्यं ।पक्षिमुखाच्च्युतं वचनं । शि० दिव्यं स्वाप्नतुल्यं । पक्षिमुखाच्च्युतंवचनं । दिव्यमितिस्वप्नार्थकदिवुधातुप्रकृतिक ण्यत्प्रत्ययान्तं । संज्ञापूर्वकविधेरनित्यत्वाद्गुणाभावः ॥ १४ ॥ शि० भीमसंकाशं भयंकरप्रकाशविशिष्टं ॥ १८ ॥ ति० जपहोमपरायणाः आसन्नितिशेषः । यद्यपिहोमोऽस्त्यधिकरणस्तदापथिचलनसमयेबाधितः तथापि "अपानेजुह्वतिप्राणं—" इत्यादिर्बोध्यइतिकेचित् ॥ २१ ॥ शि० अथोसंजजल्पुः मङ्गलहेतुकजल्पनंचक्रुः । यद्यपिपितृवधामर्षी क्षत्रियकृतपितृवधहेतुकामर्षविशिष्टः आसीदितिशेषः । तथापिक्षत्रं क्षत्रियवंशंनोत्सादयिष्यति । कच्चिच्छब्दोयद्यपीत्यर्थः ॥ २२ ॥ इतिचतुःसप्ततितमस्सर्गः ॥ ७४ ॥

[पा०] १ घ. ममचसीदति. २ क. दशरथस्यैव. ३ क. दिव्यपक्षि. ४ क.—घ—ज. मुखाच्छ्रुतम्. ५ क. ख. ग. ङ—ञ. न्मेदिनींसर्वां. ६ क. ङ. च. छ. झ. ञ. ट. महाद्रुमान्. ७ ङ. छ. झ. ञ. ट. सर्वेनावेदिषुर्दिशः. ८ क—छ. झ. ञ. ट. ऋषयश्चान्ये. ९ क. ख. घ. च. छ. विसंज्ञाइव. ट. सशङ्काइव. १० ज. हिमसंकाशं. ११ क—ट. जामदग्नेयं. १२ ङ—ट. राजाराजविमर्दनम्. घ. राजवंशविमर्दनम्. ख. राजराजविमर्दनम् १३ क—ञ. चासज्य. १४ ङ. झ. ञ. शरमुग्रंच. च. छ. शस्त्रमुग्रंच. १५ घ. त्रिपुरघ्नोयथाशिवः. ग. त्रिपुरघ्नोयथाहरः. १६ इदमर्धं ख. दृश्यते. १७ ग. घ. प्रमुखास्सर्वे. १८ घ. ङ. च. छ. झ. ञ. मधुरंवाक्यमब्रुवन्. क. ख. मधुरांवाचमब्रुवन्. ग. अब्रुवन्मधुरांगिरम्. १९ ङ. प्रतिगृह्यच. २० अयंश्लोकः ख. दृश्यते.

दृढं नरेन्द्रस्य बलं महाबलं भयं प्रविष्टं च विपादितं च] ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे चतुस्सप्ततितमः सर्गः ॥ ७४ ॥

पञ्चसप्ततितमः सर्गः ॥ ७५ ॥

परशुरामेणदशरथप्रार्थनानादरणेनैव तदात्मजंरामंप्रतिशैववैष्णवधनुर्द्वयपुरावृत्तादिनिवेदनपूर्वकंवीर्यपरीक्षणायस्वीय-वैष्णवधनुःप्रदानेन तदारोपणचोदना ॥ १ ॥

राम दाशरथे राम वीर्यं ते श्रूयतेऽद्भुतम् ॥ धनुषो भेदनं चैव निखिलेन मया श्रुतम् ॥ १ ॥
तदद्भुतमचिन्त्यं च भेदनं धनुषस्त्वया ॥ तच्छ्रुत्वाऽहमनुप्राप्तो धनुर्गृह्य परं शुभम् ॥ २ ॥
तदिदं घोरसङ्काशं जामदग्न्यं महद्धनुः ॥ पूरयस्व शरेणैव स्वबलं दर्शयस्व च ॥ ३ ॥
तदहं ते बलं दृष्ट्वा धनुषोऽस्य प्रपूरणे ॥ द्वन्द्वयुद्धं प्रदास्यामि वीर्यश्लाघ्यस्य राघव ॥ ४ ॥
[भीतो यदि धनुस्त्यक्त्वा निर्जितोस्मीति वा वद] ॥ तस्य तद्वचनं श्रुत्वा राजा दशरथस्तदा ॥
विषण्णवदनो दीनः प्राञ्जलिर्वाक्यमब्रवीत् ॥ ५ ॥
क्षत्ररोषात्प्रशान्तस्त्वं ब्राह्मणश्च महायशाः ॥ बालानां मम पुत्राणामभयं दातुमर्हसि ॥ ६ ॥
भार्गवाणां कुले जातः स्वाध्यायव्रतशालिनाम् ॥ सहस्राक्षे प्रतिज्ञाय शस्त्रं निक्षिप्तवानसि ॥ ७ ॥
स त्वं धर्मपरो भूत्वा कश्यपाय वसुंधराम् ॥ दत्वा वनमुपागम्य महेन्द्रकृतकेतनः ॥ ८ ॥
मम सर्वविनाशाय संप्राप्तस्त्वं महामुने ॥ न चैकस्मिन्हते रामे सर्वे जीवामहे वयम् ॥ ९ ॥
ब्रुवत्येवं दशरथे जामदग्न्यः प्रतापवान् ॥ अनादृत्यैव तद्वाक्यं राममेवाभ्यभाषत ॥
[रोषात्प्रस्फुरमाणोष्ठो रामं परमधन्विनम्] ॥ १० ॥

थिष्यतीत्यत्रहेतुमाह—पूर्वमिति ॥ २३—२६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने चतुस्सप्ततितमः सर्गः ॥ ७४ ॥

पूर्वमवतारप्रस्तावे जगत्पतित्वेनविष्णोःपरत्वमुक्तं "अहंवेद्मिमहात्मानं" इतिविश्वामित्रवचनेनपुरुषसूक्तं तत्र मानत्वेनसूचितं । कश्यपस्तुतौच "शरीरंतवपश्यामिजगत्सर्वमिदंप्रभो । त्वमनादिरनिर्देश्यस्त्वामहं शरणंगतः" इतिसर्वजगत्कारणत्वादिकमुक्तं। रुद्रस्य च गङ्गाधारणधातुमोक्षणादिवृत्तान्तेन कर्मवश्यत्वेन प्राकृतशरीरवर्तित्वेनचापरत्वंसूचितं । संप्रत्यल्पशक्तिकत्वेन तस्यापरत्वमाहपञ्चसप्ततितमे—रामेत्यादि । रोषातिरेकेण रामेतिद्विःसंबोधनं । भेदनंचेतिचकारेण ताटकावधादि समुच्चीयते ॥ १ ॥ अचिन्त्यंच भवतीतिशेषः । तच्छ्रुत्वेत्यतःपूर्वमतइत्युपस्कार्यं ॥२॥ जमदग्नेरागतं जामदग्न्यं । आगतार्थयञार्षः ॥ ३ ॥ तन् तदा ॥ ४—५ ॥ संप्रत्यस्थानेभयशङ्कितया दशरथो रामेप्रेमभराक्रान्तोरामवैभवं ताटकाताटकेयनिरसनादिनाजानन्नपि मङ्गलाशासनमारचयति—क्षत्रेति ॥ ६ ॥ सहस्राक्षे तत्संनिधावित्यर्थः । निक्षिप्तवान् त्यक्तवानित्यर्थः ॥ ७ ॥ महेन्द्रकृतकेतनः महेन्द्रपर्वतेकृतनिवासः ॥ ८ ॥ सर्वविनाशाय संप्राप्तइत्येतदुपपादयति—नचेति ॥ ९—१० ॥

[पा०] १ क—ट. दाशरथेर्वीर. २ ज. मयाकृतम्. ३ ज. भेदनधनुषश्चयत्. छ. ञ. भेदनंधनुषस्तदा. ङ च. झ. भेदनंधनुषस्तथा. ४ क. ङ—ञ. गृह्यापरंशुभम्. घ. गृह्यापरंशिवम्. ५ ञ. स्वंबलंदर्शयस्वच. ध. स्वबलंदर्शयस्वमे. ६ ङ. च. छ. झ. ञ. ष्यस्यपूरणे. ७ क. ख. ङ—ट. वीर्यश्लाघ्यमहंतव. ग. घ. वीरश्लाघ्यमिदंतव. ८ इदमर्धं ख. दृश्यते. ९ क. ख. तथा. १० ज. क्षत्रकोपात्प्रशान्तश्च. ११ ट. त्वंमहातपाः. ङ—ञ. श्चमहातपाः. १२ ङ. च. छ. झ. ञ. शस्त्रंप्रक्षिप्तवानसि. १३ क. ч. छ. नचैतस्मिन्हते. १४ च. छ. झ. ञ. अनादृत्यतु. १५ इदमर्धं ख. दृश्यते.

इमे द्वे धनुषी [1]श्रेष्ठे दिव्ये लोका[2]भिविश्रुते ॥ [3]दृढे बलवती मुख्ये सुकृते विश्वकर्मणा ॥ ११ ॥
[[4]करवीरसमे गन्धे विशाले विमले शुभे] ॥ [5]अतिसृष्टं सुरैरेकं त्र्यंबकाय [6]युयुत्सवे ॥ १२ ॥
त्रिपुरघ्नं [7]नरश्रेष्ठ भग्नं काकुत्स्थ यत्त्वया ॥ [[8]इदं द्वितीयं दुर्धर्षं विष्णोर्दत्तं सुरोत्तमैः] ॥ १३ ॥
तदिदं वैष्णवं राम धनुः परमभास्वरम् ॥ समानसारं काकुत्स्थ रौद्रेण धनुषा त्विदम् ॥ १४ ॥
[9]तदा तु देवताः सर्वाः पृच्छन्ति स्म पितामहम् ॥ शितिकण्ठस्य विष्णोश्च बलाबलनिरीक्षया ॥१५॥
अभिप्रायं तु विज्ञाय देवतानां पितामहः ॥ विरोधं जनयामास [10][11]तयोः सत्यवतांवरः ॥ १६ ॥
विरोधे[12] च महद्युद्धमभवद्रोमहर्षणम् ॥ शितिकण्ठस्य विष्णोश्च [13]परस्परजिगीषिणोः ॥ १७ ॥
[14]तदा तु जृंभितं शैवं धनुर्भीमपराक्रमम् ॥ हुंकारेण महादेवः स्तंभितोथ त्रिलोचनः ॥ १८ ॥
देवैस्तदा समागम्य सर्षिसङ्घैः सचारणैः ॥ याचितौ प्रशमं तत्र जग्मतु[15]स्तौ सुरोत्तमौ ॥ १९ ॥
जृंभितं तद्धनुर्दृष्ट्वा शैवं विष्णुपराक्रमैः ॥ अधिकं मेनिरे विष्णुं देवाः सर्षि[16]गणास्तदा ॥ २० ॥

लोकाभिविश्रुते लोकेसर्वतःप्रसिद्धे । बलवती इतिनपुंसकद्विवचनं।सुकृते प्रयत्नेननिर्मिते ॥११॥ अतिसृष्टं दत्तं । युयुत्सवे त्रिपुरवासिभिर्योद्धुमिच्छवे ॥ १२ ॥ यत्त्वयाभग्नं तत्र्यंबकायदत्तमितिपूर्वेणान्वयः ॥१३॥ समानसारं समानबलं ॥ १४ ॥ समानसारत्वेकिमिदानींपरीक्ष्यमित्याशङ्क्य रौद्रस्यधनुषोवैकल्यादितिवक्तुं प्रस्तावान्तरमुपक्षिपति—तदेत्यादि । तदा दुष्करत्रिपुरहननानन्तरकाले । बलाबलनिरीक्षया बलाबलनिरीक्षणेच्छया । कोऽनयोर्बलवानित्यपृच्छन्नित्यर्थः ॥१५॥ पूर्ववराहादिरूपेणभूम्युद्धरणादिकरणेन विष्णुरधिकइतिस्तुवतस्त्वत्तःश्रुतं अधुनाविष्णुमुपसर्जनीकृत्यत्रिपुरहननाद्रुद्रस्याधिकबलत्वंप्रतीयतइत्यभिप्रायमित्यर्थः । सत्यवतांवरइत्यनेनबहुशउपदेशेपिनैषांचित्तंसमाधत्ते अतःक्रिययैवबलतारतम्यंदर्शयिष्यामीत्यभिप्रेत्य विरोधंजनयामासेतिगम्यते । अहंधन्वीप्रधानः विष्णुस्तुममोपसर्जनइत्युक्तंरुद्रेणेतिविष्णुंप्रत्युक्त्वा शराग्रतयामयावस्थानान्मयैवत्रिपुरहननंकृतमितिविष्णुनोक्तमितिरुद्रंप्रत्युक्त्वाच विरोधजननमित्यवगम्यते ॥ १६—१७ ॥ जृंभितमित्यत्रापिहुंकारेणेत्यनुषज्यते । जृंभितं भग्नमितियावत् । हुंकारेण नत्वभिसंधितबाणेन । महादेवः । महादेवशब्दोमहावृक्षसमाख्यायितइतिभावः । त्रिलोचनइत्यनेन तृतीयंलोचनमपिनिरर्थकंकृतमितिभावः ॥ १८ ॥ याचितौप्रशमं जग्मतुः । विष्णुःकिमनेनबालेन अनुकंप्यतामितियाचितस्तन्निग्रहान्निवृत्तः रुद्रस्तुस्वामितःपराजयोनास्मात्कदोषायेतिसान्त्वितस्तत्तुल्यत्वाभिमानान्निवर्तितइत्यर्थः॥१९॥ अथ स्वाभिमतसिद्धिमाह—जृंभितमिति । तत् विष्णवधिष्ठानेनपूर्वंत्रिपुरघ्नं । जृंभितं विष्णवधिष्ठानाभावेनजृंभितं । दृष्ट्वा नत्वाप्तवाक्याच्छ्रुत्वा । शैवं शिवाभिमानमात्रविषयभूतं । विष्णुपराक्रमैः पूजायांबहुवचनं । हुंकारेणेतिपूर्वमुक्तेः । आधिक्यावबोधनंनपक्षपातमूलमित्याह—सर्षिगणाइति । अतीन्द्रियार्थद्रष्टा-

ति॰ नकेवलंधनुषोजृंभणं किंतुतदाश्रयस्यापीत्याह—हुङ्कारेणेति । महादेवइतिविडंबनगर्भं । घृतकोशातकीशब्दवदनर्थकोमहादेवशब्दइत्यर्थः । शि॰ महादेवः स्तंभितः व्यापाररहितः आसीदितिशेषः । एतेनसत्त्वगुणस्यतदानींप्राबल्यंसूचितं । वैद्यनाथी॰ "रजस्सत्त्वंतमश्चैवकदाचिदभिभूयान्यतमद्भवति" इतिन्यायेनतयोर्युद्धकालेसत्त्वगुणप्राधान्याद्विष्णुनात्रिलोचनश्चस्तंभितः स्तंभितप्रायोऽभूत् ॥ १८ ॥ ति॰ विष्णुं अधिकं श्रेष्ठं । सेव्यत्वेनमेनिरे ज्ञातवन्तः । वस्तुतस्तु प्रकृतयुद्धेविष्णोराधिक्यदर्शनात्त्रिपुरवधेशिवस्याधिक्यदर्शनात्तयोस्साम्यग्रहणमितितात्पर्यं । शि॰ देवाःविष्णुमधिकंमेनिरे स्वीकृततत्त्सत्वगुणस्यतत्काले आधिक्यंस्वीचक्रुरित्यर्थः । वैद्यनाथीयं परमार्थविद्भिः रुद्रोधिकोविष्णुर्न्यूनः विष्णुरधिकोरुद्रोन्यूनः इतिदुर्मतिर्दूरेत्याज्या । एकस्यैवपरमात्मनोगुणभेदमात्रनिबन्धनौरुद्रविष्णुशब्दौ भेदाभावात् । एवंचयोविष्णुस्सएवरुद्रःकदाचिल्लीलयान्यूनत्वेनाधिकत्वेन चभाति इति बोध्यम् ॥ २० ॥

[पा॰] १ ट. दिव्येश्रेष्ठे. २ ख. ग. ङ—ट. भिपूजिते. ३ ट. दृढेबहुबले. ४ इदमर्धं ख. दृश्यते. ५ ङ. च. छ. झ. अनुसृष्टंसुरैरेकं. ६ क. ग. युयुत्सते. ७ घ. धनुश्श्रेष्ठं. ८ इदमर्धं क—ट. दृश्यते. ९ क. ख. घ—ढ. परपुरञ्जयम्. १० घ. कदाचिद्देवताः. ११ च. छ. तयोस्सत्वपरीक्षया. १२ ङ—ट. विरोधेतु. १३ क—ङ. ज—ट. परस्परजयैषिणोः. १४ क. ख. ग. ट. तदातज्जृंभितं. १५ क. ख. स्तौसुरेश्वरौ. १६ ङ. झ. ञ. गणास्तथा.

[[1]पूजयित्वा ततो विष्णुमामन्त्र्य च पिनाकिनम् ॥ ब्रह्मेन्द्रादीन्पुरस्कृत्य नाकपृष्ठं ययुस्तदा] ॥२१॥
धनू रुद्रस्तु संक्रुद्धो विदेहेषु महायशाः ॥ देवरातस्य राजर्षेर्ददौ हस्ते ससायकम् ॥ २२ ॥
[[2]तद्धनुर्देवरातोपि शिरसा गृह्य पूजयत् ॥ भग्नं तन्मनुजश्रेष्ठ त्वया पैनाकमुत्तमम्] ॥ २३ ॥
इदं च वैष्णवं राम [3]धनुः परपुरंजयम् ॥ ऋचीके भार्गवे प्रादाद्विष्णुः संन्यासमुत्तमम् ॥ २४ ॥
ऋचीकस्तु महातेजाः पुत्रस्याप्रतिकर्मणः ॥ पितुर्मम ददौ दिव्यं जमदग्नेर्महात्मनः ॥ २५ ॥
न्यस्त[4]शस्त्रे पितरि मे तपोबलसमन्विते ॥ अर्जुनो वि[5]दधे मृत्युं प्राकृतां बुद्धिमास्थितः ॥ २६ ॥
वधमप्रतिरूपं तु पितुः श्रुत्वा सुदारुणम् ॥ [[6]अमर्षो मे महानासीत्सर्वलोकभयप्रदः ॥
शाश्वतोऽग्निर्हुतो विप्रैर्यथा हुतमुखे प्रभुः ॥ २७ ॥
अशक्नुवान्स तं क्रोधं धनुर्गृह्य परं शुभम्] ॥ [7]क्षत्रमुत्सादयन्रोपाज्जातंजातमनेकशः ॥ २८ ॥
पृथिवीं [8]चाखिलां प्राप्य कश्यपाय महात्मने ॥ [9]यज्ञस्यान्ते तदा राम दक्षिणां [10]पुण्यकर्मणे ॥ २९ ॥
दत्वा महेन्द्रनिलयस्तपोबलसमन्वितः ॥ [[11]स्थितोसि तस्मिंस्तप्यन्वै सुसुखं सुरसेविते ॥ ३० ॥
अद्य तूत्तमवीर्येण त्वया राम महाबल] ॥ [12]श्रुतवान्धनुषो भेदं ततोऽहं द्रुतमागतः ॥ ३१ ॥
[13]तदिदं वैष्णवं राम पितृपैतामहं महत् ॥ क्षत्रधर्मं पुरस्कृत्य गृह्णीष्व धनुरुत्तमम् ॥ ३२ ॥

रऋपयः तेषांगणाः वैखानसवालखिल्यादयः । "भूयसांस्याद्बलीयस्त्वं" इतिन्यायेन तज्ज्ञानंनपक्षपातमूलं नवाभ्रान्तिमूलमितिभावः । एतेन "एकएवरुद्रो नद्वितीयायतस्थे". इत्यादिश्रुतिः "नकिरिन्द्रत्वदुत्तरः" इत्यादिवदितरापेक्षयाश्रेष्ठत्वाभिप्राया । "एकोहवैनारायणआसीत्" इत्यादिश्रुत्युक्तोनारायणापरपर्यायो विष्णुरेवपरंतत्वमित्यभिहितं । एतेन तमउद्रेकेणकदाचिद्रुद्रस्यपराजयोनदोषायेतिकेनचिदुक्तंप्रत्युक्तं । तमोऽभिभवस्यैवापरत्वनियामकत्वात् । इन्द्रजिता रामपराजयस्तु अदृश्यो न शब्दवेधेनवध्यइतिधर्मप्रवर्तनाय । धर्मसंस्थापनायहि तदवतारइत्युक्तं । अत्र तु स्वरूपतएवरुद्रस्यपराजयः । किंच रुद्रपराजयस्य तमःकृतत्वे देवानामधिकत्वबुद्धिर्नस्यादेव । अयंचधनुर्भङ्गो दक्षयज्ञान्तइतिबोध्यं । अन्यथा "दक्षयज्ञवधेपूर्वंधनुरायम्यवीर्यवान्" इत्यादिना दक्षयज्ञान्ते रुद्रोदेवानांधनुर्ददावित्युक्तंविरुध्येत । अत्रेदमेवधनुस्त्रिपुरघ्नमित्युक्तत्वादेतद्विरुद्धं मेरुधनुष्ट्वं पुराणान्तरोक्तमनादरणीयं । ननु पूर्वंदक्षयज्ञान्तेरुद्रोदेवेभ्योधनुर्दत्तवानित्युक्तं पुनश्चदेवरातायरुद्रोदत्तवानित्युक्तं विश्वामित्राश्रमे मुनिभिर्यज्ञेजनकायदेवाददुरित्युक्तं अनसूयासमीपेसीतया जनकाय वरुणेनदत्तमित्युक्तं । कथमिदंसंगच्छते । श्रूयतां । पूर्वंदेवास्त्रिपुरवधायविश्वकर्मणानिर्मितं धनूरुद्रायददुः । तद्दक्षयज्ञान्ते विरोधेविष्णुहुंकारेणजृंभितं देवैः प्रार्थितोरुद्रोदेवरातस्य हस्तेदत्तवान् । ततःप्रभृति न्यासभावेनमैथिलेषुवर्तमानं तत्स्वत्वेनदेवावरुणेनजनकायादापयन्निति क्रमः । तेनदक्षयज्ञान्तेधनुर्दानवचनं देवैर्जनकस्ययज्ञफलत्वेनदानवचनं वरुणेनदत्तत्ववचनंच समञ्जसंभवति ॥ २०—२५ ॥ अर्जुनः कार्तवीर्यार्जुनः ॥ २६—२७ ॥ अनेकशः त्रिस्सप्तकृत्वः ॥ २८—३१ ॥ उत्तमं अशिथिलमित्यर्थः । पितृपैतामहं पितृपितामहक्रमायातं । उत्तरपदवृद्धिरार्षी । क्षत्रधर्ममिति ब्राह्मणवन्नश-

ती० प्राकृतां तामसीं । देहात्मबुद्धिमित्यर्थः ॥ २६ ॥ ति० उत्सादयं उत्सादितवान् । अडभावआर्षः ॥ २८ ॥ इति पञ्चसप्ततितमस्सर्गः ॥ ७५ ॥

[पा०] १ अयंश्लोकः ख. च. छ. दृश्यते. २ अयंश्लोकः ख. दृश्यते. ३ क. ख. च. धनुस्तेनसमप्रभम्. ज. धनुः परमभास्वरम्. ४ ग. न्यस्तशस्त्रेचपितरि. क. ख. न्यस्तशस्त्रेतु. ५ च. छ. विदधेतत्र. ६ इदमर्धत्रयं ख. दृश्यते. ७ क. ङ. ज. झ. ञ. क्षत्रमुत्सादयम्. ट. क्षत्रमुत्पाटयन्रोषात्. ८ ट. त्वखिलांप्राप्य. ख. चाखिलांप्रादां. ९ ङ. झ. यज्ञस्यान्तेऽददंराम. ख. स्यान्तेऽददां. ज. ददांराम. १० ज. पुण्यकर्मणाम्. ११ अयंश्लोकः ख. दृश्यते. १२ क—छ. झ. ञ. श्रुत्वातुधनुषोभेदं. ख. ग. श्रुत्वातुधनुषोभेदंविस्मितानांनभस्तले । भाषतांदेवसङ्घानांततोऽहंद्रुतमागतः. १३ च. छ. झ. ञ. तदेववैष्णवं.

योजयस्व धनुःश्रेष्ठे शरं परपुरंजयम् ॥ यदि शक्तोपि काकुत्स्थ द्वन्द्वं दास्यामि ते ततः ॥ ३३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे पञ्चसप्ततितमः सर्गः ॥ ७५ ॥

षट्सप्ततितमः सर्गः ॥ ७६ ॥

रामेणपरशुरामंप्रतिस्वशरस्यलक्ष्यभेदननियमाभिधानेनलक्ष्यविकल्पपूर्वकंतत्प्रदर्शनचोदना ॥ १ ॥ रामेणभार्गवरामवचनात्तदीयलोकेपुशरविमोचनम् ॥ २ ॥ जामदग्न्येनसुरादिसमक्षंरामस्यसाक्षान्नारायणत्वावधारणोक्तिपूर्वकंमहेन्द्रमहीधरंप्रतिगमनम् ॥ ३ ॥

श्रुत्वा तज्जामदग्न्यस्य वाक्यं दाशरथिस्तदा ॥ गौरवाद्यन्त्रितकथः पितू राममथाब्रवीत् ॥ १ ॥
श्रुतवानस्मि यत्कर्म कृतवानसि भार्गव ॥ अनुरुध्यामहे ब्रह्मन्पितुरानृण्यमास्थितः ॥ २ ॥
वीर्यहीनमिवाशक्तं क्षत्रधर्मेण भार्गव ॥ अवजानासि मे तेजः पश्य मेऽद्य पराक्रमम् ॥ ३ ॥
इत्युक्त्वा राघवः क्रुद्धो भार्गवस्य शरासनम् ॥ शरं च प्रतिजग्राह हस्ताल्लघुपराक्रमः ॥ ४ ॥
आरोप्य संधनू रामः शरं सज्यं चकार ह ॥ जामदग्न्यं ततो रामं रामः क्रुद्धोऽब्रवीद्वचः ॥ ५ ॥
ब्राह्मणोसीति पूज्यो मे विश्वामित्रकृतेन च ॥ तस्माच्छक्तो न ते राम मोक्तुं प्राणहरं शरम् ॥ ६ ॥
इमां पादगतिं राम तपोबलसमार्जिताम् ॥ लोकानप्रतिमान्वा ते हनिष्यामि यदिच्छसि ॥ ७ ॥

क्तइतिमाब्रूहीत्यर्थः ॥ ३२ ॥ यदिशक्तोपि तावतापि नत्वांमुञ्चामि अपितु ततः अनन्तरं द्वन्द्वयुद्धंदास्यामि । वीर्यपरीक्षणार्थमिदमितिभावः ॥ ३३ ॥ इतिश्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणेमणिमञ्जीराख्यानेबालकाण्डव्याख्याने पञ्चसप्ततितमः सर्गः ॥ ७५ ॥

अथ जामदग्न्यगर्वनिर्वापणंषट्सप्ततितमे—श्रुत्वेत्यादि । पितुर्गौरवादिति पितुःसन्निधिगौरवादित्यर्थः । यन्त्रिता नियमिता कथा उच्चैःकथनं येन सतथा ॥१॥ पितुरानृण्यं पितृघातिक्षत्रवधेनपितृवैरशुद्धिंआस्थितः सन् यत्कर्म त्रिस्सप्तकृत्वःक्षत्रवधरूपं कृतवानसि तच्छ्रुतवानस्मि । तदनुरुन्ध्यामहे अनुरुन्ध्मः । अवश्यंशूरेणवैरशुद्धेःकर्तव्यत्वात् । कर्तरियगार्षः ॥२॥ वीर्यहीनं अतएवक्षत्रधर्मेणप्राप्तधनुर्ग्रहणयुद्धादावशक्तमि[illegible] मन्यमानो यन्मां अवजानासि क्षत्रधर्मपुरस्कृत्ये[illegible]दिनाऽवमानंकृतवानसि तन्नानुरुंध्यामहे । "अस्मदो [illegible]श्च" इतिचकारादेकस्मिन्बहुवचनं । अतः तेजः प[illegible]रिभवासहनं । पराक्रमम् स्वशक्त्यापराभिभवनं[illegible] पश्य ॥ ३—५ ॥ विश्वामित्रकृतेन विश्वामित्रकृत[illegible]हेन । विश्वामित्रभगिन्यांसत्यवत्यामृचीकाज्जातोजम[illegible]ग्निः तस्यपुत्रःपरशुरामइतिविश्वामित्रसंबन्धेनेत्यर्थः ॥ ६ ॥ ते तुभ्यं पादयोर्गतिं गमनं । लोकान् लोकप्राप्तिं । यदिच्छसि अनयोर्मध्येयदिच्छसितद्वदेत्यर्थः । यदी-

---

ती० अनुरुध्यामहे पितुरानृण्यंपुत्राणांकर्तव्यमिति भवत्कृतंक्षत्रविशसनंसहामहइत्यर्थः । क्षत्रियसाधारण्येनमदवज्ञांनसहामह इतिभावः ॥ २ ॥ शि० अशक्तं ब्राह्मणोद्देश्यकातिभापणसंबन्धिसामर्थ्यरहितं ॥ ३ ॥ ति० धनुः चात्भार्गवनिष्ठांवैष्णवींशक्तिं । जग्राह । तदुक्तंपाद्मे "इत्युक्त्वादेविवैष्णव्याशक्त्यातद्गतयासह । जग्राहवैष्णवंचापंविनयेनचलीलया" इति । अत्राप्यग्रेवक्ष्यति 'निर्वीर्योजामदग्न्योसौ" इति । लघुश्शीघ्रःपराक्रमोयस्यसः । शि० क्रुद्धः क्रुधंस्वाश्रितकोपंजहातिहापयतीतितथा । वरायुधं चापं । शरंचप्रतिसंगृह्य गृहीत्वा । धनुरारोप्यशरं सज्यं ज्यासंयुक्तं चकार ॥ ४ ॥

[पा०] १ ग. घ. झ. यदिशक्तोसि. २ ख. तेतदा. ३ ग. तच्छ्रुत्वाजामदग्न्यस्य. च. छ. झ. ञ. श्रुत्वातुजामदग्न्यस्य. ४ घ. कथोजामदग्न्यमथाब्रवीत्. ५ ज. ट. कृतवानसियत्कर्मश्रुतवानस्मिभार्गव. ६ क. ग. घ. च. छ. ज. रानृण्यमास्थितम्. ७ क. मांराम. ८ क—घ. च—ट. वरायुधम्. ९ झ. धनुश्चप्रतिजग्राह. क—घ. च. छ. ज. ञ. ट. शरंचप्रतिसंगृह्य. १० ज. तद्धनूरामः. ११ क. ख. च. छ. झ. ञ. क्रुद्धोऽब्रवीदिदम्. १२ क. ग. घ. मेपूज्यः. १३ घ. नमेराम. १४ ख. घ. मोक्ष्येप्राणहरं शरम्. १५ क—घ. च. छ. झ. ञ. ट. बालद्गतिंराम. १६ घ. च. ज. ञ. समार्जिताम्. झ. ट. सर्मार्जितान्. १७ घ. नप्रतिमेयान्वा. क. ख. ग. च—ट. नप्रतिमान्वापि. १८ क. च. छ. झ. ञ. हनिष्यामीतिमेमतिः. ख. हरिष्यामियदिच्छसि.

न ह्ययं वैष्णवो दिव्यः शरः परपुरञ्जयः ॥ मोघः पतति वीर्येण बलदर्पविनाशनः ॥ ८ ॥
[इति ब्रुवति काकुत्स्थे भार्गवं प्रति रोपिते ॥ शतक्रतुमुखा देवाः पुरस्कृत्य शतक्रतुम्] ॥ ९ ॥
वरायुधधरं रामं द्रष्टुं सर्षिगणाः सुराः ॥ पितामहं पुरस्कृत्य समेतास्तत्र सङ्घशः ॥ १० ॥
गन्धर्वाप्सरसश्चैव सिद्धचारणकिंनराः ॥ यक्षराक्षसनागाश्च तद्द्रष्टुं महदद्भुतम् ॥ ११ ॥
जडीकृते तदा लोके रामे वरधनुर्धरे ॥ निर्वीर्यो जामदग्न्योसौ रामो राममुदैक्षत ॥ १२ ॥
तेजोभिर्हतवीर्यत्वाज्जामदग्न्यो जडीकृतः ॥ रामं कमलपत्राक्षं मन्दंमन्दमुवाच ह ॥ १३ ॥
[रामराम महाबाहो शृणु राम मयेरितम् ॥ राजसूये कृते पूर्वं यज्ञे दशरथात्मज] ॥ १४ ॥
कश्यपाय मया दत्ता यदा पूर्वं वसुन्धरा ॥ विषये मे न वस्तव्यमिति मां कश्यपोऽब्रवीत् ॥ १५ ॥
सोहं गुरुवचः कुर्वन्पृथिव्यां न वसे निशाम् ॥ कृता प्रतिज्ञा काकुत्स्थ कृता भूः कश्यपस्य हि ॥१६॥
तदिमां त्वं गतिं वीर हन्तुं नार्हसि राघव ॥ मनोजवं गमिष्यामि महेन्द्रं पर्वतोत्तमम् ॥ १७ ॥
लोकास्त्वप्रतिमा राम निर्जितास्तपसा मया ॥ जहि ताञ्शरमुख्येन मा भूत्कालस्य पर्ययः ॥१८॥
अक्षय्यं मधुहन्तारं जानामि त्वां सुरोत्तमम् ॥ धनुषोस्य परामर्शात्स्वस्ति तेऽस्तु परंतप ॥ १९ ॥
एते सुरगणाः सर्वे निरीक्षन्ते समागताः ॥ त्वामप्रतिमकर्माणमप्रतिद्वन्द्वमाहवे ॥ २० ॥
न चेयं मम काकुत्स्थ व्रीडा भवितुमर्हति ॥ त्वया त्रैलोक्यनाथेन यदहं विमुखीकृतः ॥ २१ ॥

च्छसीतिपाठोयुक्तः । उभयथाप्रतिबद्धःकचित्तिष्ठेन्न-लोकंपीडयेदितिरामस्यहृदयं ॥ ७ ॥ वीर्येण स्वशक्त्या । मोघोनपतति लक्ष्यमभित्वानतूर्णींपततीत्यर्थः ॥ ८—९ ॥ वरायुधेत्यादि । रामं तन्महदद्भुतंकर्मच द्रष्टुं समेताइत्यन्वयः ॥ १०—११ ॥ लोके जने । जडीकृते स्तब्धे । निर्वीर्यः निर्गतवैष्णवतेजाः । तथाचपुराणान्तरं "ततःपरशुरामस्यदेहान्निर्गत्यवैष्णवम् । पश्यतांसर्वदेवानांतेजोराममुपाविशत्" इति । उदैक्षत विस्मितइतिशेषः ॥ १२ ॥ उवाच प्रश्नोत्तरमितिशेषः ॥१३—१४॥ कश्यपायेत्यादि । यदाब्रवीत्तदाप्रभृति नवसइत्यन्वयः । गुरुवचः कश्यपवचः । कुर्वन् परिपालयन् । कुतइत्यत्राह—कृतेति । हिशब्दः प्रसिद्धौ । यतः सर्वप्रसिद्धतया भूः काश्यपस्य स्वलेनकृता त्वद्विषये न वत्स्यामीतिप्रतिज्ञाचकृता तस्मादित्यर्थः ॥१५—१६॥ गतिं गमनं ॥१७॥ लोकहननंनामलोकदानप्रतिबन्धः । मूर्तस्यवाअमूर्तस्यवाकार्यस्यप्रतिहननमेव रामशरस्यापेक्षितमितिभावः॥१८॥अक्षय्यं निर्विकारं मधुहन्तारं विरोधिनिरसनशीलं । अनेन "नब्रह्मानेशानः" इतिमहोपनिषदुपबृंहिता । परामर्शात् ग्रहणात् ॥१९—२०॥ इयं त्वयाविमुखीकृतिः।

ति० तद्द्रष्टुंआगताइतिशेषः ॥ ११ ॥ ति० तपसा यज्ञादिरूपेण । निर्जिताः अर्जिताः । अत्रपुण्यार्जितलोकहननाभ्यनुज्ञयाऽस्यतत्वज्ञलंत्र्यक्षयम् । रामस्यलोकदानप्रतिबन्धयोस्त्वात्मत्र्यदर्शनेनपरेशत्वबोधनंच । पाद्मेपि । "शतयज्ञकृतंपुण्यंतदस्मायंन्यवेदयत्" इति ॥ १८ ॥ ति० यतः "उतामृतत्वस्येशानः" इतिश्रुतिप्रसिद्धंब्रह्मैवत्वमित्याह—अक्षय्यमिति । अक्षय्यं अनाद्यन्तं केनापिपराजयंनेतुमशक्यंच ॥१९॥ ति० इयं त्वद्विषयेअशक्तिः । विमुखीकृतस्वशक्तेःस्वस्मिन्योजनेनाशक्तःकृतः । एतेन स्वस्य भगवदंशत्वं रामस्यचपूर्णभगवदवतारत्वं सूचितं । स्वातिरिक्तेनविमुखीकरणेहिव्रीडा नतुस्वात्मनामाययातथाकरणे इतिभावः ।

[पा०] १ घ. अमोघोप्रतिवीर्येण. २ ग. परदर्पविनाशनः. ३ इदमर्धं क. ख. दृश्यते. ४ इदमर्धं क. दृश्यते. ५ ज. धरंवीर. ६ क. ख. च. छ. झ. ञ. ट. स्तत्रसर्वशः. ७ घ. चारणगुह्यकाः. ज. ट. किंनरचारणाः. ८ क. ख. जामदग्न्योथ. ९ च. छ. झ. ञ. तेजोभिर्गतवीर्यत्वात्. क. ख. ग. ट. तेजोभिर्हतवीर्यत्वात्. घ. ततोभिहतवीर्यश्च. १० ख. च. झ. मन्दमन्दमुवाचह. ११ अयंश्लोकः क. दृश्यते. १२ ज. ट. यथापूर्ववसुंधरा. घ. महतीयंवसुंधरा. १३ क. ख. च. छ. झ. ञ. ट. तदाप्रभृतिकाकुत्स्थ. ग. इतिप्रतिज्ञाकाकुत्स्थ. ङ. ज. तथाप्रतिज्ञाकाकुत्स्थ. १४ क. च. छ. झ. ञ. ट. कृतामेकश्यपस्य. ख. ग. घ. कृतावैकश्यपस्यह. १५ च. छ. तदिमांमद्गतिंवीर. घ. यदिमांतांगतिंवीर. ञ. तामिमांमद्गतिंराम. झ. तामिमांमद्गतिंवीर. १६ क. वीर. १७ ट. तपसानिर्जितामया. १८ घ. ज. माभूत्कालविपर्ययः. १९ च. झ. ञ. अक्षय्यं. २० च. छ. झ. ञ. सुरेश्वरम्. २१ ज. मेऽस्तु. २२ ट. रामकाकुत्स्थ. २३ ज. यथाहं.

शरमप्रतिमं राम मोक्तुमर्हसि सुव्रत ॥ शरमोक्षे गमिष्यामि महेन्द्रं पर्वतोत्तमम् ॥ २२ ॥
तथा ब्रुवति रामे तु जामदग्न्ये प्रतापवान् ॥ रामो दाशरथिः श्रीमांश्चिक्षेप शरमुत्तमम् ॥ २३ ॥
स हतान्दृश्य रामेण स्वाँल्लोकांस्तपसाऽऽर्जितान् ॥ जामदग्न्यो जगामाशु महेन्द्रं पर्वतोत्तमम् ॥२४॥
ततो वितिमिराः सर्वा दिशश्चोपदिशस्तथा ॥ सुराः सर्षिगणा रामं प्रशशंसुरुदायुधम् ॥ २५ ॥
रामं दाशरथिं रामो जामदग्न्यः प्रशस्य च ॥ ततः प्रदक्षिणं कृत्वा जगामात्मगतिं प्रभुः ॥ २६ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे षट्सप्ततितमः सर्गः ॥ ७६ ॥

सप्तसप्ततितमः सर्गः ॥ ७७ ॥

गतेजामदग्न्येरामेणतद्दत्तवैष्णवधनुषोवरुणहस्तेप्रदानम् ॥ १ ॥ भार्गवनिर्गमनश्रवणहृष्टेनदशरथेनसेनादीनामयोध्यांप्रति गमनचोदना ॥ २ ॥ पौरैर्वादित्रघोषपुरस्सरंप्रत्युद्गम्यमानेनदशरथेनरामादिभिःसहायोध्याप्रवेशः ॥ ३ ॥ रामादिभिश्चतुर्भिःस्वस्वजायाभिःसहस्वस्वभवनेषुसुखविहरणम् ॥ ४ ॥ ततःकतिपयकालानन्तरंभरतमातुलेनयुधाजितादशरथानुज्ञयाभरतशत्रुघ्नयोःस्वपुरंप्रत्यानयनम् ॥ ५ ॥ श्रीरामेणपित्राज्ञयाप्रजापालनपूर्वकंश्रीसीतयासहस्वनगरेसुखविहरणम् ॥ ६ ॥

गते रामे प्रशान्तात्मा रामो दाशरथिर्धनुः ॥ वरुणायाप्रमेयाय ददौ हस्ते ससायकम् ॥ १ ॥
अभिवाद्य ततो रामो वसिष्ठप्रमुखानृषीन् ॥ पितरं विह्वलं दृष्ट्वा प्रोवाच रघुनन्दनः ॥ २ ॥
जामदग्न्यो गतो रामः प्रयातु चतुरङ्गिणी ॥ अयोध्याभिमुखी सेना त्वया नाथेन पालिता ॥ ३ ॥
[संदिशस्व महाराज सेनां त्वच्छासने स्थिताम् ॥ शासनं काङ्क्षते सेना चातकालिर्जलं यथा] ॥४॥
रामस्य वचनं श्रुत्वा राजा दशरथः सुतम् ॥ बाहुभ्यां संपरिष्वज्य मूर्ध्नि चाघ्राय राघवम् ॥ ५ ॥
गतो राम इति श्रुत्वा हृष्टः प्रमुदितो नृपः ॥ पुनर्जातं तदा मेने पुत्रमात्मानमेव च ॥ ६ ॥
चोदयामास तां सेनां जगामाशु ततः पुरीम् ॥ ७ ॥

व्रीडा लज्जा ॥ २१ ॥ शरमोक्षे सति । अहं दृष्टशरलक्ष्यस्वार्जितलोकगतिः ॥ २२—२३ ॥ दृश्य दृष्ट्वा। लोकान् हतान् लोकप्राप्तिहेतुकर्माणि विफलीकृतानीत्यर्थः ॥२४—२५॥ आत्मगतिं स्वस्थानं ॥२६॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने षट्सप्ततितमः सर्गः ॥ ७६ ॥

अथस्वपुरंप्राप्यसीतयारामःसुखमुवासेत्याहसप्तसप्ततितमे—गतइत्यादि। रामे परशुरामे। वरुणाय न्यासत्वेनेतिशेषः । अप्रमेयाय अदृश्यायेत्यर्थः ॥ १ ॥ विह्वलं परवशं । अनेन परशुरामेणकृतांपरत्वसूचिकांस्तुतिं वरुणायधनुर्दानंच दशरथोनज्ञातवानिति गम्यते ॥ २ ॥ चतुरङ्गिणीति "प्रातिपदिकान्तनुम्" इत्यादिना णत्वं ॥ ३—४ ॥ रामस्येत्यादिश्लोकद्वयमेकान्वयं । रामस्यवचनंश्रुत्वा विह्वलतयाअस्पष्टंवचनंश्रुत्वा । गतोरामइतिश्रुत्वा क्रमेणपुनःस्पष्टंश्रुत्वेत्यर्थः ।

एतद्व्यवहारप्रयोजनंच दययादशरथादीन्प्रतिस्वरूपबोधनं रामस्यपूर्णतेजोवत्त्वसंपादनंचेतिभाति । वैष्णवतेजसोंशेनान्यत्रसत्त्वेरावणवधस्यदुष्करत्वात् । एतदर्थमेवरावणवधेच्छुदेवगन्धर्वादीनांद्रष्टुमागमनंपूर्वमुक्तं ॥ २१ ॥ ति० दाशरथिंप्रदक्षिणीकृत्य अन्तर्यामित्वेनज्ञानात्प्रदक्षिणकरणंच क्षत्रियत्वाचतस्यप्रणत्यकरणंकायेनेतिबोध्यं ॥ २६ ॥ इतिषट्सप्ततितमस्सर्गः ॥ ७६ ॥
ति० वरुणस्याप्रमेयत्वंभृगवेसाक्षाद्ब्रह्मविद्याप्रदत्वात् । इदंचतैत्तिरीयोपनिषदिस्पष्टं ॥ १ ॥ शि० पितरंचाभिवाद्य विकलं वीनांपक्षिणांकलंस्वस्वनीडगमनंयस्मिन्तं सायंकालं । दृष्ट्वाप्रोवाच ॥ २ ॥

[पा०] १ ख. ज. ञ. गमिष्येऽहं. २ ज. निहतान्दृश्य. ३ ज. ताँल्लोकांस्तपसा, ४. ख. श्चविदिश. ५ घ. देवास्सर्षिगणाः. ६ ज. ट. मुदान्विताः. झ. प्रपूजितः. ७ घ. च. छ. ञ. प्रशस्यह. ८ क—घच. झ. प्रदक्षिणीकृत्य. ९ क—छ. झ. ञ. ट. महायशाः. १० ङ. झ. ट. विकलंदृष्ट्वा. ११ अयंश्लोकः ख. ग. ज. दृश्यते. १२ ग. घ. ट. तद्वचश्श्रुत्वा. क. चवचश्श्रुत्वा. ख. तुवचः. १३ घ—छ. झ. ञ. मूर्ध्न्युपाघ्राय. १४ क. सुतानात्मान. ख. पुत्रांश्चात्मान.

पताकाध्वजिनीं रम्यां तूर्योद्घुष्टनिनादिताम् ॥ सिक्तराजपथां रम्यां प्रकीर्णकुसुमोत्कराम् ॥ ८ ॥
राजप्रवेशसुमुखैः पौरैर्[1]मङ्गलवादिभिः ॥ संपूर्णां प्राविशद्राजा जनौघैः समलङ्कृताम् ॥ ९ ॥
पौरैः[3] प्रत्युद्गतो दूरं द्विजैश्च पुरवासिभिः[2] ॥ पुत्रैरनुगतः श्रीमाञ्श्रीमद्भिश्च महायशाः ॥ १० ॥
प्रविवेश गृहं राजा हिमवत्संदृशं[4] पुनः ॥ ननन्द सजनो[5] राजा गृहे कामैः सुपूजितः ॥ ११ ॥
कौसल्या च सुमित्रा च कैकयी च सुमध्यमा ॥ वधूप्रतिग्रहे युक्ता याश्चान्या राजयोषितः[7] ॥१२॥
[[6]रामं च लक्ष्मणं चैव शत्रुघ्नं भरतं तथा ॥ आर्चयन्मङ्गलाशीर्भिर्मङ्गलैरभ्यपूजयन् ॥
उपाहारैश्च संहृष्टाः कुमारानभिपूज्य च] ॥ १३ ॥
ततः सीतां महाभागामूर्मिलां च यशस्विनीम् ॥ कुशध्वजसुते चोभे जगृहुर्नृपपत्नयः ॥ १४ ॥
मङ्गला[8]लापनैश्चैव शोभिताः क्षौमवाससः ॥ देवतायतनान्याशु सर्वास्ताः[9] प्रत्यपूजयन् ॥ १५ ॥
अभिवाद्याभिवाद्यांश्च[10] सर्वा राजसुतास्तदा[11] ॥ [[12]स्वं स्वं गृहम[13]थासाद्य कुबेरभवनोपमम् ॥ १६ ॥
गोभिर्धनैश्च धान्यैश्च तर्पयित्वा द्विजोत्तमान्] ॥ रेमिरे मुदिताः[14] सर्वा भर्तृभिः सहिता रहः ॥१७॥
कुमाराश्च महात्मानो वीर्येणाप्रतिमा भुवि ॥ कृतदाराः कृतास्त्राश्च सधनाः ससुहृज्जनाः ॥ १८ ॥
शुश्रूषमाणाः पितरं वर्तयन्ति नरर्षभाः ॥ [[15]कालेकाले तु नीतिज्ञास्तोषयन्तो गुरुं गुणैः] ॥१९॥
कस्यचित्त्वथ कालस्य राजा दशरथः सुतम् ॥ [[16]अभिवादयितुं प्राप्तं श्यामं कमललोचनम्] ॥
अक्लिष्टकारिणं शूरं परसैन्यविमर्दनम् ॥ २० ॥
विनयं देहयोगेन संप्राप्तमिव संस्थितम् ॥ भरतं कैकयीपुत्रमब्रवीद्रघुनन्दनः[17] ॥ २१ ॥
अयं केकयराजस्य पुत्रो वसति पुत्रक ॥ त्वां नेतुमागतो वीर[18] युधाजिन्मातुलस्तव ॥ २२ ॥
[*[19]प्रार्थितस्तेन धर्मज्ञ मिथिलायामहं तदा ॥ ऋषिमध्ये तु तस्य त्वं प्रीतिं कर्तुमिहार्हसि *] ॥२३॥

हृष्टः पुलकितः ॥ ५—७ ॥ रम्यामितिपुनरुक्तिस्तत्तद्विशेषणकृतरमणीयत्वाभिप्रायेण पताका। ध्वजपटः। ध्वजःदण्डः । पताकान्विताध्वजाअस्यांसन्तीति पताकाध्वजिनीं । ह्रस्वदीर्घध्वजभेदइत्यप्याहुः । उद्घुष्टमितिभावेनिष्ठा । तूर्योद्घोषेणसंजातनिनादामित्यर्थः ॥ ८ ॥ राजप्रवेशेन सुमुखैः विकसन्मुखैः । मङ्गलं आशीर्वचनं वक्तुंशीलमेषामस्तीतिमङ्गलवादिभिः ॥ ९—१० ॥ जनःसम्बन्धिजनः। गृहेस्थितैरितिशेषः । काम्यन्तइतिकामाः विषयभोगपरिकराःतैः ॥ ११ ॥ वधूनां स्नुषाणां प्रतिग्रहे उपचारे स्वस्वान्तःपुरानयनेवा। "वधूर्जायास्नुषा" इत्यमरः । युक्ता आसक्ताः । आसन्नितिशेषः ॥ १२—१३ ॥ जगृहुः अन्तःपुरं प्रावेशयन् ॥ १४ ॥ मङ्गलालापनैः स्वस्तिवाचनैः । शोभिताः । मङ्गलालंभनैरितिपाठे आलंभनं चन्दनचर्चा । देवतायतनानि गृहदेवतानामर्चागृहाणि । प्रत्यपूजयन् गन्धपुष्पादिभिरपूजयन् । आयतनपूजामात्रे स्त्रीणामधिकारादितिभावः ॥ १५ ॥ सर्वाअभिवाद्य सर्वारेमिरइत्यन्वयः ॥ १६—१८ ॥ वर्तयन्ति अनुवर्तयन्तिस्म ॥ १९ ॥ कस्यचित्त्वथकालस्य कस्मिंश्चित्कालेगतेसति ॥ २०—२१ ॥ मातुलस्तवेति अतोगच्छेतिव्यंजनावृत्त्योक्तिः पुत्रविरहका-

ति० होमैः गृहप्रवेशनीयहोमैः ॥ १५ ॥

[पा०] १ च. छ. ज. ञ. ट. मङ्गलपाणिभिः. २ ख. स्वपुरवासिभिः. ३ क. ख. शूरैः. ४ क. ख. घ—ट. तत्सदृशंप्रियम्. ५ च. छ. झ. ञ. ट. स्वजनैराजा. ६ इदमर्धत्रयं क. ख. दृश्यते. ७ ङ. च. छ. झ. ञ. ट. नृपयोषितः. ८ क. मङ्गलाभरणाश्चैव. ख. मङ्गलाभरणैश्चैव घ. मङ्गलालेपनैश्चैव. ञ. मंगलालंभनैश्चैव. ज. मङ्गलारंभकैश्चैव. ङ. च. छ. झ. मङ्गलालापनैर्होमैः. ९ ख. यथार्हंप्रत्यपूजयन्. १० ख. भिवाद्यास्ताः. ११ घ. ट. स्तथा. १२ अयंश्लोकः ख. ग. ज. दृश्यते. १३ ख. गृहंसमासाद्य. १४ ख. मुग्धाः. १५ इदमर्धं ख. ग. दृश्यते. १६ इदमर्धत्रयं ख. दृश्यते. १७ ग. घ. ज. ट. रघुसत्तमः. ख. रघुनन्दनम्. १८ ङ. च. छ. झ. ञ. वीरो. १९ अयंश्लोकः ख. ग. ज. दृश्यते.

श्रुत्वा दशरथस्यैतद्भरतः कैकयीसुतः ॥ [अभिवाद्य गुरुं रामं परिष्वज्य च लक्ष्मणम्] ॥
गमनायाभिचक्राम शत्रुघ्नसहितस्तदा ॥ २४ ॥
आपृच्छ्य पितरं शूरो रामं चाक्लिष्टकारिणम् ॥ मातृश्चापि नरश्रेष्ठः शत्रुघ्नसहितो ययौ ॥ २५ ॥
[युधाजित्प्राप्य भरतं सशत्रुघ्नं प्रहर्षितः ॥ स्वपुरं प्राविशद्वीरः पिता तस्य तुतोष ह] ॥ २६ ॥
गते च भरते रामो लक्ष्मणश्च महाबलः ॥ पितरं देवसंकाशं पूजयामासतुस्तदा ॥ २७ ॥
पितुराज्ञां पुरस्कृत्य पौरकार्याणि सर्वशः ॥ चकार रामो धर्मात्मा प्रियाणि च हितानि च ॥ २८ ॥
मातृभ्यो मातृकार्याणि कृत्वा परमयन्त्रितः ॥ गुरूणां गुरुकार्याणि कालेकालेऽन्ववैक्षत ॥ २९ ॥
एवं दशरथः प्रीतो ब्राह्मणा नैगमास्तदा ॥ रामस्य शीलवृत्तेन सर्वे विषयवासिनः ॥ ३० ॥
तेषामतियशा लोके रामः सत्यपराक्रमः ॥ स्वयंभूरिव भूतानां बभूव गुणवत्तरः ॥ ३१ ॥
रामस्तु सीतया सार्धं विजहार बहूनृतून् ॥ मनस्वी तद्गतस्तस्या नित्यं हृदि समर्पितः ॥ ३२ ॥
प्रिया तु सीता रामस्य दाराः पितृकृता इति ॥ गुणाद्रूपगुणाच्चापि प्रीतिर्भूयोऽभ्यवर्धत ॥
[हृदयं चैव जानाति प्रीतियोगि परस्परम्] ॥ ३३ ॥

तर्यात् ॥ २२—२४ ॥ अक्लिष्टं कस्यापिदुःखरहितं यथाभवतितथा कर्तुं शीलमस्यस्येतितं ॥ २५—२८ ॥ परमयन्त्रितः परमं अत्यन्तं यन्त्रितः श्रुतिस्मृतिमर्यादानतिलङ्घी। गुरुकार्याणि गुरूचितशुश्रूपादिकार्याणि। अन्ववैक्षत परिपालयतिस्मेत्यर्थः ॥ २९ ॥ एवं एतादृशेन शीलवृत्तेन । नैगमाः वणिजः ॥ ३० ॥ नकेवलंशीलवृत्तेन किंतुसर्वैरपिगुणैरित्याशयेनाह—तेषामिति । तेषां ब्राह्मणादीनांमध्ये ॥ ३१ ॥ एवं धर्मपरतांरामस्योक्त्वा धर्माविरुद्धकामाभिरतिंदर्शयति—रामस्त्वित्यादिनाश्लोकचतुष्टयेन । रामस्तु । तुशब्देनपूर्वस्माद्वैलक्षण्यमुच्यते । पितृशुश्रूषणधर्मप्रवर्तनदेवताराधनादिकंहिपूर्वमुक्तं । सएवंकर्तासंप्रतिवात्स्यायनमभ्यस्यकामतन्त्रपरोभूत्। सीतया अयोनिजया। "सहयुक्तेऽप्रधाने" इतितृतीया । स्वाभाविकसौन्दर्यसमृद्ध्यैवावतीर्णापि भोगस्रोतस्यप्रधानाभूदिति रामस्यप्रावण्यातिशयःप्रदर्शितः । विजहार। परस्मैपदेनफलापर्यवसायितोच्यते । "स्वरितञितः कर्त्रभिप्रायेक्रियाफले" इतिविहाररूपक्रियाफलस्यकर्तृगामित्वेह्यात्मनेपदमेवभवेत् । तथाच चिरतरविहारोपिभोगोपोद्धातकेलितांनातिशेतइतिभावः । बहूनृतून् । अत्यन्तसंयोगेद्वितीया । तया भोगनैरन्तर्यंसूच्यते । बहूनृतूनित्युक्तं नतुवत्सरानिति । तेनतत्तदृतूचितभोगोपकरणैर्भोगान्सबुभुजइत्युक्तं । मनोस्यास्तीतिमनस्वी । भूमार्थेमत्वर्थीयः । तथाच संश्लेषदशायांसीतासंकल्पमप्यतिशय्य भोगस्रोतःप्रवर्तयितेत्यर्थः । नित्यंतद्गतः तस्यांगतः । "सप्तमी—" इतियोगविभागात्समासः । जातिगुणवदपृथक्सिद्धतयातदेकरसोभूदित्यर्थः। सर्वदातदासक्तचित्तोऽभूदितिभावः । तस्याहृदिनित्यंसमर्पितः सीतापिरामकृततत्तद्व्यापारेणवशीकृता तदायत्तचित्ताऽऽसीत् । नित्यं सुचिरंभोगेपि सद्यस्संगतेवनिरवधिकप्रेमभारभरिताऽभूदित्यर्थः ॥ ३२ ॥ नित्यंतद्गतइत्यत्रहेतुमाह—प्रियात्विति । तुरवधारणे । पितृकृतादाराइतिहेतोरेवरामस्यसीताप्रियासीत् । तर्हिसीतावैलक्षण्यमकिंचित्करं नेत्याह । गुणात् भर्तृशुश्रूषणादिगुणात्। रूपस्य देहस्य । गुणात् सौन्दर्यात् । अपिशब्दोऽनुक्तसमुच्चयार्थः । आभिजात्यादिभिश्च । प्री-

तेषांचतुर्णांपुत्राणांमध्येसत्यपराक्रमोरामएवातियशाः । भूतानांमध्येस्वयंभूरिवगुणवत्तरोबभूवेत्यन्वयः । शि० स्वयंभवति प्रादुर्भूततांप्राप्नोतीतिस्वयंभूः रामः । लोकेभूतानां प्रादुर्भावंप्राप्तानांमध्ये अतियशाः गुणवत्तरश्च बभूव । इत्यर्धार्थं ॥ ३१ ॥

[पा०] १ इदमर्धं क. ख. ग. दृश्यते. २ क. ज. ट. वीरो. ३ अयंश्लोकः क. ख. ङ. च. छ. झ. ञ. ट. दृ. यत. ४ क. घ. महारथः. ५ ङ. च. छ. झ. ञ. रामस्सर्वाणि. ६ ख. राज्ञापरमयन्त्रितः. क. रामःपरमयन्त्रितः ७ क. च. रह. ८ ख. राजादशरथः. ९ क. ग. घ. ङ. झ. ञ. ट. स्तथा. १० ग. ज. शीलवृत्ताभ्यां. ११ ङ. च. छ. झ. ञ. ट. रामश्च. १२ घ. ङ. झ. ञ. ट. तद्गतमनास्तस्याहृदि. क. च. छ. तद्गतमनानित्यंहृदि. ज. तद्गतस्त्वया. १३ घ. रूपकृताच्चापि. १४ क. च. म. भूयोविवर्धते. ख. ग. ज. भूयोभ्यवर्धत. झ. ट. भूयोऽभिवर्धते. ख. भूयोऽन्ववर्धत. १५ इदमर्धं क. दृश्यते.

तस्याश्च भर्ता द्विगुणं हृदये परिवर्तते ॥ अन्तर्जातमपि व्यक्तमाख्याति हृदयं हृदा ॥ ३४ ॥
तस्य भूयो विशेषेण मैथिली जनकात्मजा ॥ देवताभिः समा रूपे सीता श्रीरिव रूपिणी ॥ ३५ ॥
तया स राजर्षिसुतोभिरामया समेयिवानुत्तमराजकन्यया ॥
अतीव रामः शुशुभेऽतिकामया विभुः श्रिया विष्णुरिवामरेश्वरः ॥ ३६ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये चतुर्विंशतिसहस्रिकायां संहितायां बालकाण्डे
सप्तसप्ततितमः सर्गः ॥ ७७ ॥ इति बालकाण्डः संपूर्णः ॥ १ ॥

तिर्भूयोऽभ्यवर्धत । रामस्यसीतायामित्यर्थसिद्धं । अतोवहूनृतून्विजहारेत्यन्वयः ॥ ३३ ॥ अथरामस्यैवसीताया अपि रामेनिरन्तरानुरागं दर्शयन् तस्याहृदिनित्यंसमर्पितइत्युक्तंविवृणोति—तस्याश्चेति । तस्याभर्ता रामश्च । हृदये सीतायाहृदये । द्विगुणंयथाभवतितथापरिवर्तते । रामप्रद्विगुणाप्रीतिःसीतायारामेभूदित्यर्थः । यथारामस्यसीतायांप्रीतिः पितृकृतदारत्वकृता सौन्दर्यकृताच एवंरामेपिसीतायाः प्रीतिर्निर्भयकृता किंतु भर्तृत्वमात्रकृता । वक्ष्यत्यनसूयांप्रतिसीता "यद्यप्येपभवेद्भर्ता ममार्यवृत्तवर्जितः । अद्वैधमुपचर्तव्यस्तथाप्येपमयाभवेत्" इत्यादि । अनेन गुणादित्युक्तरामविषयानुरागोविवृतः । एतादृशानुरागोरामेणकथंविज्ञायतइत्यत्राह—अन्तरिति । अन्तर्जातं सीताहृद्गतमपिहृदयगूढभावं । अनुरागमितियावत् । हृदा तर्केण अनुभावैरितियावत् । व्यक्तमाख्याति जानाति । चक्षिङःख्याञादेशःसार्वधातुकेप्यार्षः । तस्यदर्शनार्थत्वं चख्युरित्यादौसिद्धं । परकीयहृदयंकथंव्यक्तीभवतीत्यपेक्षायां तत्रैवसर्वदापरिवर्तमानत्वादित्युक्तं पूर्वार्धे ॥ ३४॥ रामवत्सीतापि रामहृदयंविशेषेणव्यक्तंवेत्तीत्याह—तस्येति । तस्य रामस्य हृदयं सीता भूयो विशेषेण । रामादतिरिक्तंजानातीत्यर्थः । रामो यादृशभोगमभिलषति तदिङ्गितेनज्ञात्वा स्वयंतदनुरूपा भवति । नतुतदतिरिक्तभोगमभिलषते । एवंरामोपीतिभावः । रामादप्यतिशयेनसीतायाःकान्तेङ्गितपरिज्ञानेहेतुचतुष्टयमाह—मैथिलीत्यादि । देशस्वभावाद्वंशस्वभावाच्च सूक्ष्मज्ञा । देवताभिःसमेति प्रागल्भ्यमुच्यते । रूपे विषये रूपिणी संवेद्यमानरूपवती श्रीरिवस्थिता । अनेन सहजबुद्धिविशेषोदर्शितः ॥३५॥ एवमनवधिकमन्योन्यानुरागमुपपाद्य तदनुरूपंभोगंदर्शयति—तयेति । राजर्षिसुतः महाराजसुतत्वेननिरवधिकभोगोपकरणवान् । उत्तमराजकन्यया ततोप्यधिकतदुपकरणवत्या । रामः रमयिता अभिरामया ततोप्यतिशयेनरमयित्र्या । सः अतिशयितकामः । अतिकामया रामादप्यधिककामयेत्यर्थः । तया सीतया । समेयिवान् सम्यगेयिवान् एकीभावेन संश्लिष्टः । स्वयंग्रहाश्लेषविषयीभूतःसन् । "लीनेव प्रतिबिंबितेवलिखितेवोत्कीर्णरूपेवच प्रत्युप्तेवचवज्रलेपघटितेवान्तर्निखातेवच । सा नश्चेतसि कीलितेव विशिखैश्चेतोभुवः पञ्चभिश्चिन्तासन्ततितन्तुजालनिविडस्यूतेव लग्ना प्रिया" इतिवत् । विभुः प्रत्यालिङ्गनादिसमर्थः । अमरेश्वरोविष्णुः आदिविष्णुः । श्रियेव मूर्तिभेदेनोपमानत्वं । अतीव अतिशयेन शुशुभेरेजे । तुल्यानुरागस्यातिशयितस्त्रीकामस्यभोगसमृद्धिहेतुत्वादितिभावः ॥ ३६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने सप्तसप्ततितमःसर्गः ॥ ७७ ॥

वेदे शास्त्रेषु वादेप्यनितरसुलभां कीर्तिमाटीकमानः काव्यालङ्कारनाट्यप्रभृतिषु पटुधीः कोपि टीकाविधाने ॥ शुद्धान्तःपद्मशुद्धान्तितमधुमथनः शुद्धसत्वैकमूर्तिर्गोविन्दार्यो विचार्यव्यतनुत विमलां बालकाण्डस्य टीकाम् ॥ इतिबालकाण्डव्याख्यानं संपूर्णं ॥

ती॰ राजर्षिसुतइति उत्तमराजकन्ययेतिचाभिजनवृत्तादितौल्यमुक्तं । अभिरामया सौन्दर्येणातिरमणीयया अतिकामया- अतिस्नेहया समेयिवान् अतिसंश्लेषेणाभेदंप्राप्तः । यद्वा अतिकामया अतिक्रान्तमन्मथया । तेनाप्राकृतविग्रहवत्तयादिव्यदंपतिभोगएवात्राभिव्यज्यते ॥ ३६ ॥ इतिसप्तसप्ततितमस्सर्गः ॥ ७७ ॥ ॥ बालकाण्डस्संपूर्णः ॥

[पा०] १ ङ. च. झ. ञ. ट. अन्तर्गतमपि. २ ख. सदा. ३ क. तस्मिन्भूयो. ४ घ. ङ. च. झ. ञ. ट. सुतोभिकामया. क. सुतोनिकामया. ५ ङ. च. छ. ञ. ट. शुशुभेमुदान्वितो. ज. शुशुभेऽतिकान्तया.

श्रीः

श्रीमद्वाल्मीकिरामायणम् ।

श्रीमद्गोविन्दराजीयव्याख्यासमलंकृतम् ।

अयोध्याकाण्डम् २

—॥ श्रीः ॥—

श्रीमद्वाल्मीकिरामायणम् ।

श्रीमद्गोविन्दराजीयव्याख्यासमलंकृतम् ।

अयोध्याकाण्डम् २

श्रीरामचन्द्राय नमः ॥

प्रथमः सर्गः ॥ १ ॥

सशत्रुघ्नेभरतेमातुलकुलंगतेदशरथेनरामेगुणबाहुल्यदर्शनेनतस्ययौवराज्याभिषेकचिकीर्षयातन्निश्चयार्थंनानादेशेभ्योराज्ञामानयनम् ॥ १ ॥ तैराजभिःसहदशरथस्यसभाप्रवेशः ॥ २ ॥

गच्छता मातुलकुलं भरतेन तदाऽनघः ॥ शत्रुघ्नो नित्यशत्रुघ्नो नीतः प्रीतिपुरस्कृतः ॥ १ ॥

श्रीरामचन्द्रायनमः ॥ श्रावंश्रावंशठारेः शमदमवपुषः फुल्लवक्त्रारविन्दादालोच्यालोच्य वाचा प्रकृतिमधुरया प्रोच्य विद्वज्जनेभ्यः ॥ गोविन्दार्यः सुधीशः कुशिककुलमणिर्गूढगाढाशयाढ्यं सम्यक्साकेतकाण्डं सरसजनमुदे सादरं व्याकरोति ॥ प्रथमेकाण्डे "एतस्मिन्नन्तरेविष्णुः" इत्यादिना "यतोवाइमानि" इत्यादिश्रुतिप्रतिपादितंजगत्कारणत्वं "अहंवेद्मिमहात्मानं" इत्यादिनापुरुषसूक्तोक्तमहापुरुषत्वं "त्वमनादिरनिर्देश्यः" इत्यादिना अचिन्त्यवैभवत्वं इत्येवंसर्वस्मात्परत्वमुक्तं "अधिकंमेनिरेविष्णुं" इत्यादिनातदितरेषामपरत्वंच। संप्रतितस्यहेयप्रत्यनीककल्याणैकतानताप्रतिपाद्यतेद्वितीयकाण्डेन। अथवा पूर्वं वक्ष्यमाणधर्मानुष्ठानोपयोगितया रामायणपुरुषाणांमहाकुलप्रसूतत्वमहागुरुकृपालब्धधनुर्वेदरहस्यत्वतत्संवादभूतताटकाताटकेयादिनिरासहरधनुर्भङ्गवैष्णवचापपरिग्रहप्रभृतिगुणाः सहधर्मचारिणीयोगश्चसप्रपञ्चंदर्शिताः। अथ तदनुष्ठिताः पितृवचनपरिपालनादिसामान्यधर्माः भगवच्छेषत्वपारतन्त्र्यभागवताभिमाननिष्ठारूपविशेषधर्माश्च प्रतिपाद्यन्ते। पूर्वकाण्डेलक्ष्मीयोगोदर्शितः अत्रभूमियोगःप्रदर्शितइत्यपिब्रुवते । पूर्वंपरत्वमुक्तं अत्रसौलभ्यमित्यप्याहुः । पूर्वंलक्ष्मीविशिष्टंप्राप्यस्वरूपमुक्तं प्राप्तृरूपजीवस्वरूपमत्रनिरूप्यते । तत्रप्रथममतिरहस्यतयाऽवश्यविज्ञातव्यां लघूपपादनां भागवताभिमाननिष्ठां शत्रुघ्नानुष्ठानमुखेनदर्शयति—गच्छतेति। गच्छता वर्तमाननिर्देशेनशत्रुघ्नगमनस्यभरतगमनेनैककालत्वावगमादसिवसनादिवत्तस्यतदेकपारतन्त्र्यंगम्यते । मातुलकुलं मातुलगृहं । द्वितीययाभरतोद्देश्यस्यैवशत्रुघ्नोद्देश्यत्वावबोधनाच्छेष्युद्देश्योद्देश्यकत्वरूपंपारतन्त्र्यमुच्यते। भगवत्पारतन्त्र्यरूपंभागवतत्वमाह—भरतेनेति। भरतइतिराज्यस्यभरणात्" इतिसहस्रानीकनिर्वहणा-

---

श्रीरामायनमः । **तनि॰** भरतस्यमातुलकुलमुद्देश्यं शत्रुघ्नस्यतुभरतः युधाजित्खलुभरतमेवानेतुमागतः । गच्छतेतिवर्तमाननिर्देशेनभरतगमनकालेगन्तव्यमितिमनसिनस्थितं । नचदशरथेनरामेणवानुज्ञातइतिव्यज्यते । भरतेन रामेवनंगते लक्ष्मणेतदनुवर्तिनिदशरथेस्वर्गतेअनेनैवरामराज्यंभर्तव्यमितिभाविज्ञानवतोवसिष्ठाल्लब्धभरतनामधेयेन । तदा स्वस्यापिराजपुत्रत्वेननक्षत्रानुगुणमुहूर्तादिकंविचारणीयेपितन्मुहूर्तएवस्वस्यापिसुमुहूर्तंइतिगतः । अनघः कामादिहेतुकव्यसनरहितः । शत्रुघ्नः अस्यामनुष्यत्वात् "अमनुष्यकर्तृकेच" इतिटक् । नीतः छायावत्स्वयंद्रव्यत्वेपिजातिगुणवत्पारतन्त्र्यंप्राप्तः । प्रीतिपुरस्कृतः ज्येष्ठानुवर्तित्वं नविधिप्रेरितत्वेन भवति । अपितु अयोध्यायांभरतकैङ्कर्यंबहुभिर्विभज्यगृह्यते तत्रचेदेकेनैवमयाभोक्तुंशक्यमितिभक्तिप्रेरितः ॥ **ती॰** नीतः मातुलगृहवासजनितसौख्यादिकंगनेनविनाऽसत्कल्पमितिधियानीतइतिभावः । **ति॰** अनघः सोदरस्यलक्ष्मणस्यबलवद्रामाश्रयप्रयुक्तेर्ष्या-

स तत्र न्यवसद्भ्रात्रा सह सत्कारसत्कृतः ॥ मातुलेनाश्वपतिना पुत्रस्नेहेन लालितः[1] ॥ २ ॥
तत्रापि निवसन्तौ तौ तर्प्यमाणौ च कामतः ॥ भ्रातरौ स्मरतां वीरौ[2] वृद्धं दशरथं नृपम् ॥ ३ ॥
राजाऽपि तौ महातेजाः सस्मार प्रोषितौ[3] सुतौ ॥ उभौ भरतशत्रुघ्नौ महेन्द्रवरुणोपमौ ॥ ४ ॥
सर्व एव तु तस्येष्टाश्चत्वारः पुरुषर्षभाः[4] ॥ स्वशरीराद्विनिर्वृत्ताश्चत्वार इव बाहवः ॥ ५ ॥

त् । रामेवनंगतेतदनुसारिणिचलक्ष्मणेराजनिचत्रिदशसदनमुपसेदुषि केवलरामाज्ञयाप्राज्यराज्यभारनिर्वाहकरणेनेत्यर्थः । तदा तद्गमनकालएव । अनेनस्वानुकूलचन्द्रतारावलाद्यनपेक्षणोक्त्यापारतन्त्र्यमेवविशेषितं । अनघः अस्मिन्प्रकरणेअघशब्देनकेवलरामभक्तिरुच्यते । स्वशेपिभूतभरतोद्देश्यताकारेणहिशत्रुघ्नस्यरामभक्तिरुद्देश्या । अतएववक्ष्यति "नाहंस्वपिमिजागर्मितमेवार्यविचिन्तयन्" इति । "जग्राहभरतोरश्मीन्शत्रुघ्नश्छत्रमाददे" इतिच । अनिष्टावहस्यपापशब्दवाच्यत्वात् । स्वशेपिभरतोद्देश्यत्वाकारंविनारामभक्तेरनिष्टावहत्वात्तस्याअघत्वं "नसुकृतंनदुष्कृतंसर्वेपाप्मानोतोनिवर्तन्ते" इतिश्रुतौ सुकृतस्य मुमुक्षोरनिष्टावहत्वेनपाप्मत्वव्यपदेशात् । शत्रुघ्नः शत्रून्लवणासुरादीन्हनिष्यत्ययमितिभाविप्रतिसन्धानेनशत्रुघ्न इतिवसिष्ठेनकृतनामधेयः । नित्यशत्रुघ्नः नित्यशत्रवोज्ञानेन्द्रियाणि । शरीरेनित्यंसंनिधायविपयान्तरप्रावण्यरूपविपरीतकार्यकारित्वात् । तान्हन्तीतिनित्यशत्रुघ्नः । इन्द्रियनिग्रहवानित्यर्थः । पुंसांदृष्टिचित्तापहारिण्यपिनमग्नेन्द्रियः । रामविषयभक्तिःस्वाधिकारविरुद्धेतितन्निवर्तनमस्यकार्यमेव । नीतइत्युक्तं नतुययावितिं । तेनाचिद्वत्पारतन्त्र्यमुक्तं । प्रीतिपुरस्कृतः किंकरोमिज्येष्ठानुवर्तनंकनिष्ठेनकार्यमितिविधिपरतन्त्रोनगतः अपितुप्रीतिप्रेरितोऽगच्छदित्युक्तं । तेनचितोव्यावृत्तिरुक्ता । प्रीतिरेवह्यचेतनापेक्षयाचेतनस्यविशेपः । भगवत्पारतन्त्र्यंतुचेतनाचेतनसाधारणमेव । यद्यत्यन्तसारग्राहीपुरुपःस्यात्तदाशत्रुघ्नवद्भागवतपरतन्त्रतयावर्तितव्यमितिव्यञ्जितं । व्यञ्जनावृत्त्याभिमतार्थप्रदर्शनंह्युत्तमकाव्यकृत्यं ॥ १ ॥ रामभक्तोभरतःकथंतंविहायमातुलकुलेन्यवसदित्यपेक्षायां रामाभिमानविपयभूतशत्रुघ्नसहवासादित्याह—सइति । सः भरतः । तत्र मातुलगृहे । अश्वपतिना मातुलेन युधाजिता । सत्कारसत्कृतः जात्यश्वप्रदानादिना पूजितोपि । पुत्रस्नेहेन पुत्रविषयस्नेहतुल्यस्नेहेन । लालितः विशिष्टभोजनाच्छादनाभरणप्रदानादिभिरुपलालितोपिसन् । भ्रात्रा शत्रुघ्नेन । सह । न्यवसत् । भ्रातृस्नेहेनैवतत्रस्थितः । नतुमातुलोपलालनमात्रादितिभावः । यद्वा सः शत्रुघ्नः । भ्रात्रासहलालितइत्यन्वयः । " सहयुक्तेप्रधाने" इतितृतीया । अश्वपतिः स्वस्त्रीयादपिशत्रुघ्नमतिशयेनलालितवानित्यर्थः । अथवा भ्रात्रासहन्यवसत् रामेणसहन्यवसत् । सदारामचिन्तयातेनसहवर्तमानइवस्थितइत्यर्थः ॥ २ ॥ तत्र सर्वोपलालनभूयिष्ठेमातुलगृहे । निवसन्तावपि । कामतः काम्यमानसर्वाभिमतवस्तुभिः । तृतीयार्थेतसिः । तर्प्यमाणौच संतोष्यमाणावपि । वीरौ महोत्साहौ । तौ भ्रातरौ भरतशत्रुघ्नौ । वृद्धंनृपं जीर्णमहीपतिंदशरथं । स्मरतां अस्मरतां । अनित्यमागमशासनमित्यडभावः । दशरथो वृद्धोभून्नराज्यभरणेसम्यक्क्षमते अपीदानींरामंयुवराजंकारयेदिति अचिन्तयतामितिभावः ॥ ३ ॥ महातेजाः सत्पुत्रलाभकृतनिरवधिकतेजस्कः । राजा दशरथः । महेन्द्रवरुणोपमौ तद्वन्निरपायमैत्रीसंपन्नौ । प्रोपितौ देशान्तरगतौ । निरवधिकप्रीतिविषयभूतौ उभौ भरतशत्रुघ्नौ सुतौ सस्मार । सर्वसंपत्समृद्धस्यापिमेपुत्रद्वयासन्निधानमेवन्यूनतेत्यस्मरदितिभावः । उभावितिस्मृतिविपयेतारतम्याभावोक्तिः ॥ ४ ॥ रामलक्ष्मणसन्निधानेकथमितरपुत्रस्मरणमित्यत्राह—सर्वइति । तुशब्दउक्तशङ्काव्यावृत्त्यर्थः । चत्वारः चतुर्धावस्थिताः । पुरुपर्षभाः पुरुषोत्तमाः । सर्वे अविशेपेण । तस्य दशरथस्य । शरीराद्विनिर्वृत्ताः निष्पन्नाः । चत्वारोबाहवइव इष्टाः प्रियाएवासन् । अभूतोपमा । अयोगव्यवच्छेदार्थेएवकारः । लोकेकस्यचिच्चतुर्भुजबाहुरहितः । वि० अनघः अहमपिदाशरथिःममभ्रात्रनुवर्तनंकिमित्येवंअघंनविद्यतेयस्यसः । शि० तदा पित्राज्ञाकाले ॥ १ ॥ ति० पुत्रस्नेहेन पुत्रादप्यधिकस्नेहेनेत्यर्थः ॥ २ ॥ ती० तत्रापीतिअपिनास्थलसौख्यंद्योत्यते । वृद्धंस्मरतामित्यत्रशुश्रूषाकालोतीतइतिधर्मलोपभियापितरंस्मृतवन्तावितितात्पर्यं ॥ ३ ॥ विनिर्वृत्ताः विनिर्गताः । अनेनराज्ञोविष्णुरूपकध्वनिः ॥ ५ ॥

[पा०] १ च. ज. पालितः. २ क. च. महावीरौ. ३ ग. घ. ज. प्रेषितौ. ४ घ. पुरुषोत्तमाः.

तेषामपि महातेजा रामो रतिकरः पितुः ॥ स्वयंभूरिव भूतानां बभूव गुणवत्तरः ॥ ६ ॥
स हि देवैरुदीर्णस्य रावणस्य वधार्थिभिः ॥ अर्थितो मानुषे लोके जज्ञे विष्णुः सनातनः ॥ ७ ॥
कौसल्या शुशुभे तेन पुत्रेणामिततेजसा ॥ [1]यथा वरेण देवानामदितिर्वज्रपाणिना ॥ ८ ॥
[2]स हि रूपोपपन्नश्च वीर्यवाननसूयकः ॥ भूमावनुपमः सूनुर्गुणैर्दशरथोपमः ॥ ९ ॥
[3]स तु नित्यं प्रशान्तात्मा मृदुपूर्वं [4]च भाषते ॥ उच्यमानोऽपि परुषं नोत्तरं प्रतिपद्यते ॥ १० ॥

षुसत्सुयथातस्यैकोपिनाप्रियोभवति एवंतेषुपुत्रेष्वेकोपिनानिष्टोभूदित्यर्थः । उपमानेस्वशरीरविनिर्वृत्तत्वोक्त्या एतेषुराज्ञःस्वशरीरविनिर्वृत्तत्वाभिमानमात्रमित्युक्तं ॥ ५ ॥ एवंचतुर्णांप्रियत्वाविशेषेपि रामेगुणातिरेककृतप्रीतिविशेषोस्तीत्याह—तेषामिति । तेषामितिनिर्धारणेषष्ठी । भूतानांप्राणिनांमध्ये स्वयंभूः ब्रह्मेव । तेषांपुत्राणांमध्ये गुणवत्तरः अतिशयेनगुणवान् । महातेजाः तादृग्गुणप्रकाशकनिरवधिकतेजस्कः । रामः पितूरतिकरोवभूव । निरतिशयप्रीतिः रतिः ॥६॥ कथमितरापेक्षयागुणवत्तरत्वमित्यपेक्षायांविष्णोः प्रधानावतारत्वादित्याह—सहीति । हीति "अजायमानो बहुधाविजायते" इतिश्रुतिप्रसिद्धिंद्योतयति । देवैः नह्यनन्यप्रयोजनैरर्थितः किंतुप्रयोजनान्तरपरैः । न केवलं प्रयोजनान्तरपरैः अपितु "ईश्वरोहमहंभोगी" इत्येवंदुरभिमानिभिः । मदोपिदीव्यतिधातोरर्थएव । नरकासुरवधेस्वकार्यनिष्पत्त्यनन्तरंपारिजातनिमित्तंकृष्णेनैवयोद्धुमुपक्रान्तैरित्यर्थः । उदीर्णस्य उद्भटस्य । "उदीर्णउद्भटः" इत्याद्यमरः । नैसर्गिकगर्वेणसर्वजगद्विनाशयतइत्यर्थः । वधस्यार्थत्वे हेतुरयं । रावणस्य यैर्वरोदत्तस्तानेवनिलयान्निष्कासयतइत्यर्थः । वधार्थिभिः एकस्यसंहारेणराज्यमखिलंसुखेन वर्तिष्यतइतिप्रपन्नैः । अर्थितः प्रार्थितः । नोपासितः । मानुषेलोके यत्रदेवाअपिमनुष्यगन्धमसहमानाश्छर्दनपूर्वकंकुत्सयन्तोयोजनादुपरिस्थित्वाहविराददते तेपियस्यमनुष्यस्थानीयाः सोस्मिन्मानुषेलोकेजातः हन्तकिमिदंसौलभ्यमितिभावः । जज्ञे ननृसिंहादिवदाविर्भूतः । सजज्ञे रामोजज्ञे । लोकोहिदशमासान्गर्भेऽवस्थायजायते अयं तु "ततश्चद्वादशेमासे" इत्युक्तरीत्याततोप्यधिककालंगर्भेस्थित्वाजज्ञे । विष्णुःव्यापकंवस्तु । व्याप्यैकदेशस्थमत्पुत्रोयमित्यभिमान्यमभूत् । सनातनः नित्यवस्त्वेवमात्मानमन्यथाचकार ॥ ७ ॥ नकेवलंपितुरेवानन्दकरः मातुरपीत्याह—कौसल्येति । अमिततेजसा अपरिमितपराक्रमेण । तेन रामेण । पुत्रेण । कौसल्या देवानांवरेण वज्रपाणिना इन्द्रेण । अदितिर्यथा अदितिरिव । शुशुभे बभौ । तेन सन्तुष्टासीदित्यर्थः ॥ ८ ॥ गुणवत्तरइत्युक्तंप्रपञ्चयति—सहीत्यादीना । सः रामः । रूपोपपन्नः सौन्दर्ययुक्तः । चकारेण "रूपौदार्यगुणैः" इत्युक्तौदार्यादिकंसमुच्चीयते । वीर्यवान् मृगनाभिगन्धवत्स्वयमविकृतएव परेषांविकारकारी । अनसूयकः गुणेषुदोषाविष्करणमसूया अविद्यमानाऽसूयायस्यासावनसूयकः । भूमावनुपमःसूनुः भूमावेवतत्तुल्यःपुत्रः कौसल्यातिरिक्तायाः कस्याश्चिदपिनास्तीत्यर्थः । दिवित्वदितेर्वज्रपाणिरस्त्येवेतिभावः । गुणैराकारेङ्गितचेष्टाभिःदशरथोपमः । दीपादुत्पन्नप्रदीपवत् ॥ ९ ॥ अथदशरथादाधिक्यमाह—सइति । तुशब्देनदशरथाद्वैलक्षण्यमुच्यते । सः रामः । परुषं परुषवचनं । केनचिदुच्यमानोपि उत्तरं उत्तरवचनं । नप्रतिपद्यते नवदतीत्यर्थः । अपिशब्देन तद्वक्तृत्वप्रसक्तिरेवनास्तीतिगम्यते । उत्तराप्रतिपत्तौहेतुः—नित्यंप्रशान्तात्मेति । अक्रोधनस्वभावइत्यर्थः । नकेवलमुत्तराप्रतिपत्तिः किंतुतंपरुषवक्तारंप्रति मृदुपू-

मुनिभाव० भूतानां इन्द्रादीनां । स्वयंभूः ब्रह्मा । पितुःस्वपितुर्विष्णोः । ज्येष्ठपुत्रत्वाद्यथाप्रीतिकरः तथैवरतिकरः प्रियकरोबभूव । यद्वा रामःपितुःतेषांभ्रातृणांचप्रीतिकरः स्वयंभूःपितुर्विष्णोश्चभूतानांचयथाप्रीतिकरस्तथैवेत्यर्थः । विष्णोर्ब्रह्मादिभूतजनकत्वं "यतोवाइमानिभूतानि—" इतिश्रुत्या "आत्मनःप्रथमंपुत्रंब्रह्माणमसृजद्विभुः । ततश्चराचरंविश्वंविष्णुर्विश्वजगन्मयः" इत्यानुशासनिकोक्तप्रक्रिययाच सिद्धेः ॥ **ति०** वज्रपाणिनाप्रार्थितेनदेवानांवरेणवामनेनादितिरिवेत्यर्थइत्यन्ये । **शि०** वज्रपाणिना इन्द्रेण अदितिर्यथा अदितिरिव शुशुभे । इषुवत्सवितागच्छतीतिवदुपमानोपमेयभावः ॥ ८ ॥ **स०** दशः पक्षीविहंगमइतिहलायुधोक्तेःदशःपक्षीगरुडः सरथोयस्यसदशरथोनारायणःतस्यतुल्यः । "मत्स्यकूर्मवराहाद्यास्समाविष्णोरभेदतः ।

[पा०] १ ख. ग. यथात्वदेवीदेवानां. ख. यथादेवेनदेवानां. ज. यथाचदिविदेवानां. २ ख. छ. सहिवीर्योपपन्नश्चरूपवान्. ३ घ. ङ. झ. ट. सचनित्यं. ख. सहिनित्यं. ४ घ. प्रभाषते.

कथंचिदुपकारेण कृतेनैकेन तुष्यति ॥ न स्मरत्यपकाराणां शतमप्यात्मवत्तया ॥ ११ ॥
शीलवृद्धैर्ज्ञानवृद्धैर्वयोवृद्धैश्च सज्जनैः ॥ कथयन्नास्त वै नित्यमस्त्रयोग्यान्तरेष्वपि ॥ १२ ॥
बुद्धिमान्मधुराभाषी पूर्वभाषी प्रियंवदः ॥ वीर्यवान्न च वीर्येण महता स्वेन विस्मितः ॥ १३ ॥
न चानृतकथो विद्वान्वृद्धानां प्रतिपूजकः ॥ अनुरक्तः प्रजाभिश्च प्रजाश्चाप्यनुरज्जते ॥ १४ ॥

र्वसान्त्वपूर्वंचभाषते ॥ १० ॥ अथास्यकृतज्ञत्वमाह— कथंचिदिति । कथंचित्कृतेन यथातथावापीत्युक्तरीत्याकृतेन । यद्वा यादृच्छिकप्रासङ्गिकतयाकृतेन । यद्वा प्रयोजनान्तरपरतयाकृतेन कथंचित्कृतेन अहृदयत-कृतेन । कथंचित्कृतेन पत्रपुष्पाद्यन्यतमेनकृतेन यद्वा स्वस्मात्किंचित्फललाभायकृतेन । यद्वा "साङ्केत्यंपारिहास्यंवास्तोभंहेलनमेववा" इत्येवंकृतेन । उपकारेण अण्वपिमहत्त्वेनाभिमन्यमानस्यभगवतोभिप्रायेणोपकारेणेत्युक्तं । कृतेन कर्तुमीप्सितेन । "आशंसायांभूतवच्च" इतिक्तः । एकेन सकृत्कृतेन । तुष्यति सदाप्रीतिंप्राप्नोति । तोपफलस्यकदाचिदपिनक्षयइतिभावः । एवमुपकारेणतुष्यन्नपकारेणापिकिंकुप्यति नेत्याह—नस्मरतीति । अपकाराणां सम्यक्कृतापराधानां । शतमपि असङ्ख्येयमपि । "शतंसहस्रमयुतंसर्वमानन्त्यवाचकं" इत्युक्तेः । नस्मरति नचिन्तयति । कःपुनःकोपस्यावकाशइतिभावः । उभयत्रहेतुमाह—आत्मवत्तयेति । वशीकृतमनस्कतयेत्यर्थः । यद्वा आत्मवत्तया ज्ञानवत्तया । "उदाराःसर्वएवैते । नकश्चिन्नापराध्यति" इत्येवमध्यवसायवत्तयेत्यर्थः ॥ ११ ॥ अथास्य गुणवर्धकंसत्सङ्गमाह—शीलवृद्धैरिति । शीलं सदाचारः । सज्जनैरितित्रिष्वप्यनुपज्यते । शीलवृद्धैः सदाचारसंपन्नैःसज्जनैः कथयन्नास्त । तैःसहसूक्ष्मतराचारविशेषान्प्रतिपादयन्नास्तेत्यर्थः । ज्ञानवृद्धैः परिपक्वमोक्षविषयिभिः "मोक्षेधीर्ज्ञानं" इत्यमरः । तादृशैः सज्जनैः । कथयन्नास्त । तैर्वेदान्तरहस्यमुद्घाटयन्नास्तेत्यर्थः । वयोवृद्धैःसज्जनैःकथयन्नास्त क्रमागतसंप्रदायविशेषान्कथयन्नास्तेत्यर्थः । सज्जनैरितिसामान्योक्त्याग्रामकुलादितारतम्यंनतेनादृतमित्युच्यते । तृतीययातेपामप्रधानत्वावगमात्स्वयमेवतेपामर्थविशेषंदर्शयतीतिसूचितं । नित्यमित्यनेननेदंकादाचित्कमित्युच्यते । विशेषणत्रयान्तचकारेण ज्ञानशीलवयोवृद्धैः शीलज्ञानवृद्धैः ज्ञानवयोवृद्धैः शीलवयोवृद्धैश्चेतिसमुच्चीयते । नेदंनित्याग्निहोत्रवत्कचित्समयइत्याह—अस्त्रेति । अस्त्राणां योग्यः अभ्यासः "योग्योगुणनिकाभ्यासः"इतिवैजयन्ती । तस्यान्तरेपु अवकाशेष्वपि । अपिशब्देनसमयान्तरेतत्कथनं किंपुनर्न्यायसिद्धमित्युक्तं । सत्संगतिंविनाक्षणमपिनतिष्ठतीत्यर्थः ॥ १२ ॥ परायत्तसकलव्यापारत्वमाह—बुद्धिमानिति । बुद्धिमान् प्रशस्तबुद्धिः । कथंसर्वेजनाः सुखंवसेयुरित्येवंसर्वदालोकसंरक्षणचिन्तापरइत्यर्थः । मधुराभाषी मधुरभाषणशीलः । यद्यदुक्तिनन्मधुरमेववदतीत्यर्थः । पूर्वभाषी अतिनीचंप्रत्यपिस्वयमेवपूर्वंभाषमाणइत्यर्थः । प्रियंवदःप्रियवाग्वचनशीलः "प्रियवशेवदःखच्" इतिताच्छील्ये खच् । "खित्यनव्ययस्य" इतिह्रस्वः "अरुर्द्विषदजन्तस्यमुम्" इतिमुमागमः । शत्रुविषयेपिप्रियवचनशीलः । वीर्यवान् आश्रितविरोधिनिरसनक्षमः । पूर्ववीर्यवान्नित्यविकृतत्वमुक्तमितिनपुनरुक्तिः । महतास्वेनवीर्येणनविस्मितः आश्रितसकलविरोधिनिरसनेकृतेपि "नातिस्वस्थमनाययौ" इत्युक्तरीत्याकिंकृतं मयेत्यपर्याप्तएवस्थितः । "गर्वः स्याद्विस्मयोमदः" इत्यमरः । वर्ततइतिशेपः ॥१३॥ सइतिशेपः । सः रामः । अनृतकथोनभवति । कथा प्रबन्धकल्पना । अनृता असत्या कथा यस्य सतथा । कल्पितेतिवृत्तकासत्काव्यालापवर्जितइत्यर्थः । वेत्तीतिविद्वान् । "विदेःशतुर्वसुः" अनृतकथाभावश्चनतदज्ञानात् । किंतु तद्वर्ज्यत्वज्ञानादित्यर्थः । वृद्धानां पूर्वोक्तत्रिविधवृद्धानां प्रतिपूजकः प्रत्युद्गम्यपूजकः । ब्राह्मणप्रतिपूजकइतिपाठे बालवृद्धसाधारण्येनब्राह्मणमात्रपूजापरः । "दशवर्पश्चब्राह्मणः शतवर्पश्चक्षत्रियः पितापुत्रौस्मृतौविद्धि" इत्यापस्तंबः । प्रजाभिः पण्डितपामराविशेपेणसर्वाभिः प्रजाभिः । अनुरक्तः अनुरागविपयीकृतः । तत्रहेतुमाह प्रजाश्चाप्यनुरञ्जते अनुरञ्जयतीत्यर्थः । अन्तर्भा-

ब्रह्माद्यास्त्वसमाःप्रोक्ताःप्रकृतिश्चसमाऽसमा" इतिवाराहे ॥ ९ ॥ ति० अनुरक्तः अनुरंजितः । अन्तर्भावितण्यर्थः । अनुरज्यते

[पा०] १ ङ. झ. कदाचिदुपकारेण. २ ज. शीलवृद्धैस्तपोवृद्धैर्ज्ञानवृद्धैश्च. क. ज्ञानवृद्धैर्वयोवृद्धैःशीलवृद्धैश्च. ख. ग. च. ज. शीलवृद्धैर्वयोवृद्धैर्ज्ञानवृद्धैश्च. ३ ग. ऋतुवीर्येण. ४ घ. ङ. झ. ट. प्यनुरज्यते.

सानुक्रोशो जितक्रोधो ब्राह्मणप्रतिपूजकः ॥ दीनानुकंपी धर्मज्ञो नित्यं प्रग्रहवाञ्शुचिः ॥ १५ ॥
कुलोचितमतिः क्षात्रं धर्मं स्वं बहुमन्यते ॥ मन्यते परया कीर्त्या महत्स्वर्गफलं ततः ॥ १६ ॥
नाश्रेयसि रतो विद्वान्न विरुद्धकथारुचिः ॥ उत्तरोत्तरयुक्तौ च वक्ता वाचस्पतिर्यथा ॥ १७ ॥
अरोगस्तरुणो वाग्मी वपुष्मान्देशकालवित् ॥ लोके पुरुषसारज्ञः साधुरेको विनिर्मितः ॥ १८ ॥
स तु श्रेष्ठैर्गुणैर्युक्तः प्रजानां पार्थिवात्मजः ॥ बहिश्चर इव प्राणो बभूव गुणतः प्रियः ॥ १९ ॥
सम्यग्विद्याव्रतस्नातो यथावत्साङ्गवेदवित् ॥ इष्वस्त्रे च पितुः श्रेष्ठो बभूव भरताग्रजः ॥ २० ॥

वितण्यन्तोयं । स्वयंपूर्वंप्रजारञ्जयित्वा ततस्ताभिरनुरक्तोभवतीत्यर्थः । चापयःसर्वत्रोक्तगुणसमुच्चयार्थाः ॥ १४ ॥ सानुक्रोशः सदयः । "कृपादयानुकम्पास्यादनुक्रोशः" इत्यमरः । दयाहिनामा परदुःखासहिष्णुत्वं । जितक्रोधः वशीकृतकोपः । नत्ववशेनक्रोधउत्पद्यतइत्यर्थः । ब्रह्म वेदः तद्विदन्तीतिब्राह्मणाः "तदधीतेतद्वेद" इत्यण् । प्रत्युद्गम्यपूजकः प्रतिपूजकः । ब्राह्मणानांप्रतिपूजकइति याजकादित्वात्षष्ठीसमासः । दीनानुकम्पी दीनेषुविशेषतोनुकम्पावान् । विशेषोनाम यत्रदीनोदृष्टः तत्रैवस्थित्वा दानमानादिकरणं । धर्मज्ञसामान्यविशेषधर्मज्ञः । प्रग्रहवान्नियमवान् । "अभयंसर्वभूतेभ्योददाम्येतद्व्रतंमम" इतिवक्ष्यति । शुचिः परस्वानाकाङ्क्षी । "योर्थेशुचिःसहिशुचिर्नमृद्वारिशुचिःशुचिः" इतिमनुस्मरणात् ॥ १५ ॥ कुलोचितमतिः इक्ष्वाकुवंशोचितदयादाक्षिण्यशरणागतसंरक्षणादिधर्मैकप्रवणबुद्धिः । स्वं क्षात्रंधर्मं । दुष्टनिग्रहपूर्वकंप्रजापरिपालनरूपं । बहुमन्यते गौरवेणजानाति । "श्रेयान्स्वधर्मः" इतिश्रवणात्परत्वापादकधर्मेभ्योपि जनित्वार्जितंक्षत्रधर्मंगौरवेणपश्यतीत्यर्थः । बहुमानेहेतुमाह—मन्यतइति । ततः क्षत्रधर्मात् । परयाकीर्त्या महत्स्वर्गफलंभवतीति मन्यते जानाति । स्ववर्णस्याश्रमोचितधर्मःकीर्तिद्वारास्वर्गसाधनमितिज्ञात्वाक्षत्रधर्मं विशिष्यानुतिष्ठतीत्यर्थः ॥ १६ ॥ अश्रेयसि निष्फलेकर्मणि । नरतः नसक्तः । कादाचित्कलीलाकर्मनदुष्यतीतिभावः । द्यूतादिपुनसक्तइत्यर्थः । तत्रहेतुः विद्वानिति । नविरुद्धकथारुचिः धर्मविरुद्धग्राम्यालापादिषुरुचिरहितः । उत्तरोत्तरयुक्तौ लौकिकवैदिकविषयोत्तरोत्तरयुक्तिकक्ष्यायां । वाचस्पतिर्यथा बृहस्पतिरिव । वक्ता अप्रतिहतवाग्व्यवहारः ॥ १७ ॥ "युवास्यात्साधुयुवाध्यायकः आशिष्टोदृढिष्टोबलिष्ठः" इत्यादिश्रुत्यर्थोनेनप्रतिपाद्यते । अरोगः आधिव्याधिरहितः । अनेनआशिष्टइत्युक्तमशनसामर्थ्यमाशीर्वादविषयत्वं चोक्तं । तरुणः युवा । वाग्मी प्रशस्तवाक् । अनेनथुवाध्यायकइत्युक्तमुक्तं । वपुष्मान् प्रशस्तशरीरः । अनेनबलिष्ठइत्युक्तंकायबलमुक्तं । देशकालवित् अध्ययनेदेशकालज्ञः । अनेनसाधुशब्दार्थोविवृतः । पुरुषसारज्ञः सकृद्दर्शनमात्रेणपुरुषहृदयसर्वस्वज्ञः । "सारोबलेस्थिरांशेच" इत्यमरः । लोके एकः अद्वितीयः साधुरितिविनिर्मितः निश्चितः । "अपकारिषु यःसाधुःससाधुरितिकीर्तितः" इत्युक्तसाधुविशेषत्वज्ञापनं ॥ १८ ॥ श्रेष्ठैः उत्कैरन्यैश्च । गुणैर्युक्तः पार्थिवात्मजः बहिश्चरःप्राणइव प्रजानां गुणतः गुणैः । प्रियएवबभूव ॥ १९ ॥ केचिद्विद्यामात्रेणस्नाताः केचिद्व्रतमात्रेणस्नाताः रामस्तुविद्याव्रताभ्यांस्नातः "अधीत्यस्नायात्" इतिस्मृत्युक्तरीत्यासम्यग्वेदानधीत्यव्रतानिचकृत्वा कृतसमावर्तनइत्यर्थः । यथावत् तत्वतः । साङ्गवेदवित् साङ्गवेदार्थज्ञः । अनयापृथग्युक्त्याअध्ययनमक्षरराशिग्रहणफलमित्यवगम्यते । इषवः अमन्त्रकाःशराः । अस्त्राणिसमन्त्रकाः । सेनाङ्गत्वादेकवद्भावः । इष्वस्त्रविषये । पितुः दशरथात् । श्रेष्ठः दशरथादवराः खल्वितरेधन्विनइतिभावः । भरताग्रजः । अस्मिन्नर्थेभरतेननिरूपणीयोरामः "महेष्वासेमहाप्राज्ञेभरते

अनुरञ्जयति । तेनपरस्परानुरागः ॥ १४ ॥ ति० प्रग्रहः दुष्टनिग्रहः इन्द्रियनिग्रहश्च । शि० सानुक्रः अनुक्रेण स्वीयपालनविषयकनिरन्तरयत्नेन सहितः । अशः स्वतनुप्रकाशद्वारासर्वत्रपूर्णः ॥ १५ ॥ अश्रेयसि अश्रेयस्करे निषिद्धकर्मणीत्यर्थः ॥ १७ ॥ शि० पुरुषसारात्महात्मनः जानातीतिपुरुषसारज्ञः ॥ १९ ॥ ती० प्राणत्वेननिरूपणात् प्रजानांरामभद्रादधिकमभिमतवस्तु-

[पा०] १ घ. कुलोचितमिदंक्षात्रंधर्मंस्वमितिमन्यते. २ ङ. च. झ. ञ. ट. स्वधर्मंबहुमन्यते. ३ ट. परयाप्रीत्या. ४ ख. ग. ङ. छ. ज. झ. ट. नाश्रेयसिरतोयश्च. च. नाश्रेयसपरोनित्यं. क. नाश्रेयसिपरोनित्यं. घ. ज. नाश्रेयसिरतोनित्यं. ५ ङ. च. झ. उत्तरोत्तरयुक्तीनां. ६ ग. ज. गुणवत्तरः. ७ ङ. छ. झ. ञ. ट. सर्वविद्याव्रतस्नातो. ८ क. इष्वस्त्रेष्वपितुःश्रेष्ठो.

कल्याणाभिजनः साधुरदीनः सत्यवागृजुः ॥ वृद्धैरभिविनीतश्च द्विजैर्धर्मार्थदर्शिभिः ॥ २१ ॥
धर्मकामार्थतत्वज्ञः स्मृतिमान्प्रतिभानवान् ॥ लौकिके समयाचारे कृतकल्पो विशारदः ॥ २२ ॥
निभृतः संवृताकारो गुप्तमन्त्रः सहायवान् ॥ अमोघक्रोधहर्षश्च त्यागसंयमकालवित् ॥ २३ ॥
दृढभक्तिः स्थिरप्रज्ञो नासद्ग्राही न दुर्वचाः ॥ निस्तन्द्रिरप्रमत्तश्च स्वदोषपरदोषवित् ॥ २४ ॥
शास्त्रज्ञश्च कृतज्ञश्च पुरुषान्तरकोविदः ॥ यः प्रग्रहानुग्रहयोर्यथान्यायं विचक्षणः ॥ २५ ॥
[1]सत्संग्रहप्रग्रहणे स्थानविन्निग्रहस्य च ॥ आयकर्मण्युपायज्ञः सं[2]दृष्टव्ययकर्मवित् ॥ २६ ॥
श्रैष्ठ्यं शास्त्रसमूहेषु प्राप्तो व्यामिश्रकेषु च ॥ अर्थधर्मौ च संगृह्य सुखतन्त्रो न चालसः ॥ २७ ॥

स्वयमागते" इतिरामस्यवचनात् ॥ २० ॥ अभिजनः मातृपितृवंशः । कल्याणः शोभनः अभिजनो येन सतथा । तत्रहेतुः—साधुरिति । निर्दोषइत्यर्थः । अदीनः क्षोभहेतुषुसत्स्वप्यक्षोभ्यान्तःकरणः । सत्यवाक् अतिकृच्छ्रेपिसत्यवचननिरतः । ऋजुः स्वाराध्यः । अभिविनीतः सुशिक्षितः ॥ २१ ॥ धर्मकामार्थतत्वज्ञः "नपूर्वाह्णमध्याह्नापराह्णानफलान्कुर्या" दिति स्मृत्युक्तरीत्या पूर्वाह्णादिषुकालेषुकर्तव्यधर्मार्थकामज्ञइत्यर्थः । स्मृतिमान् ज्ञातार्थविषयेविस्मरणरहितः । प्रतिभानवान् "प्रज्ञां नवनवोन्मेषशालिनीं प्रतिभां विदुः" इतिप्रोक्तलक्षणप्रतिभानयुक्तः । लौकिके लोकैकप्रमाणके । समयाचारे साङ्केतिकाचारे । " संकेतस्तुसमयः" इत्यमरः । कृतकल्पः कृतसंस्थापनः । विशारदः तदाचरणसमर्थः ॥ २२ ॥ निभृतः विनीतः । "वश्यःप्रणेयोनिभृतविनीतप्रश्रिताःसमाः" इत्यमरः । संवृताकारः हृदिस्थितकर्तव्यार्थव्यञ्जकेङ्गिताकारगोपनचतुरः । संवृतत्वं गूढत्वं । गुप्तमन्त्रः फलपर्यन्तमन्यैरविदितमन्त्रइत्यर्थः । सहायवान् प्रशस्तमन्त्रयुक्तः । अमोघक्रोधहर्षः फलपर्यवसायिकोपसन्तोषः । त्यागसंयमकालवित् । वस्तुत्यागतत्संग्रहणकालवित् ॥२३॥ दृढभक्तिः देवगुर्वादिषुनिश्चलभक्तिः । स्थिरप्रज्ञः भक्तिजन्याप्रकंप्यतत्वज्ञानः । अतएवनासद्ग्राही नासदर्थग्राही । असज्जनसंग्रहणरहितोवा । नदुर्वचाः नपरुषभाषी । निस्तन्द्रिः आलस्यरहितः । सर्वदाशास्त्रपरिशीलनपरइत्यर्थः । अतएवाप्रमत्तः शास्त्रार्थेष्वनवधानरहितः । स्वदोषपरदोषवित् । लोकेकश्चित्पश्यतिपरदोषं आत्मदोषंनपश्यति । अयंतुनतथा । परदोषवत्स्वदोषंचपश्यत्येव । वक्ष्यतिभरतंप्रति । " शिरसायाचतस्तस्यवचनंनकृतंमया " इति ॥२४॥ शास्त्रज्ञः साङ्गवेदातिरिक्तविद्यास्थानज्ञः । कृतं कृतान्तं सिद्धान्तं जानातीतिकृतज्ञः । अतः "कथंचिदुपकारेण कृतेनैकेनतुष्यति " इत्यनेननपुनरुक्तिः । पुरुषाणामन्तरं तारतम्यं तत्रकोविदःपण्डितः । पुरुषदर्शनमात्रेणायंसाधुरयमसाधुरिति तत्तत्स्वरूपविशेषज्ञइत्यर्थः । यः प्रसिद्धः । प्रग्रहः मित्रादिस्वीकारः । अनुग्रहः स्वीकृतपरिपालनं । तयोः यथान्यायं यथाशास्त्रं । विचक्षणः समर्थः । शास्त्रमर्यादामनतिक्रम्यमित्रस्वीकारादिकृदित्यर्थः । "सुप्सुपा" इतिसमासः ॥ २५ ॥ सतां संग्रहे स्वीकारे । प्रग्रहणे परिपालनेच । विचक्षणइतिशेषः । निग्रहस्य असन्निग्रहस्यच । स्थानवित् अवकाशवित् । " अवकाशेस्थितौस्थानं " इत्यमरः । आयकर्मणि न्यायप्राप्तधनार्जनकर्मणि । उपायज्ञः । पुष्पेभ्योमधुमधुकरइव अपीडनेनप्रजाभ्योधनमादातुं चतुरइत्यर्थः । संदृष्टव्ययकर्मवित् "कश्चिदायस्यचार्धेनचतुर्भागेनवापुनः । पादभागैस्त्रिभिर्वापिव्ययःसंचोद्यतेबुधैः" इत्यादिशास्त्रावगतव्ययकर्मज्ञः ॥२६॥ शास्त्रसमूहेषु वेदवेदाङ्गेषु । श्रैष्ठ्यंमहातात्पर्यज्ञत्वं । प्राप्तः । व्यामिश्रकेषु संस्कृतप्राकृतभाषात्मककाव्यनाटकालंकारादिषुच । श्रैष्ठ्यंप्राप्तइत्यनुषङ्गः । अर्थधर्मौसंगृह्य सुखतन्त्रः सुखपरतन्त्रः । अर्थधर्मसंग्रहणपूर्वकमेवसुखसेवी नतुकेवलकामपरतन्त्रइत्यर्थः । नचालसः । नास्तीतिद्योत्यते ।

ति० एवंश्रेष्ठगुणैर्युक्तत्वोपदेशेपिदार्ढ्यायसत्यत्वप्रत्यापनायचपुनरुपदिशति—**सत्विति** ॥२०॥ **ती०** कल्याणाभिजनः कल्याणानांजन्मभूमिः । **शि०** कल्याणाभिजनः कल्याणानिआश्रितानांमङ्गलानिअभिजनयत्युत्पादयतिसः ॥ २१ ॥ **ति०** गुप्तैर्मित्रैस्सहायवानितिपाठःप्रचुरः ॥ २३ ॥ **मुनिभाव०** प्रग्रहानुग्रहयोः प्रग्रहः शरणागतस्यप्रथमस्वीकारः । अनुग्रहोनामस्वीकृतस्यपरिपालनं । यद्वा प्रग्रहः करादीनांप्रग्रहणं । अनुग्रहः तस्मिन्सावशेषग्रहणम् ॥ २५ ॥ **ती०** सत्संग्रहस्सदाचारः

[पा०] १ ङ. झ. ट. सत्संग्रहानुग्रहणे. २ क. ख. घ. सदृष्टव्यय.

वैहारिकाणां शिल्पानां विज्ञातार्थविभागवित् ॥ आरोहे विनये चैव युक्तो वारणवाजिनाम् ॥२८॥
धनुर्वेदविदांश्रेष्ठो लोकेऽतिरथसंमतः ॥ अभियाता प्रहर्ता च सेनानयविशारदः ॥
अप्रधृष्यश्च संग्रामे क्रुद्धैरपि सुरासुरैः ॥ २९ ॥
अनसूयो जितक्रोधो न दृप्तो न च मत्सरी ॥ न चावमन्ता भूतानां न च कालवशानुगः ॥ ३० ॥
एवं श्रेष्ठैर्गुणैर्युक्तः प्रजानां पार्थिवात्मजः ॥ संमतस्त्रिषु लोकेषु वसुधायाः क्षमागुणैः ॥
बुद्ध्या बृहस्पतेस्तुल्यो वीर्येणापि शचीपतेः ॥ ३१ ॥
तथा सर्वप्रजाकान्तैः प्रीतिसंजननैः पितुः ॥ गुणैर्विरुरुचे रामो दीप्तः सूर्य इवांशुभिः ॥ ३२ ॥
तमेवं व्रतसंपन्नमप्रधृष्यपराक्रमम् ॥ लोकपालोपमं नाथमकामयत मेदिनी ॥ ३३ ॥

अर्थधर्मसंग्रहेनिरालस्यः ॥ २७ ॥ वैहारिकाणां विहारप्रयोजनानां । "तदस्यप्रयोजनं" इतिठक् । शिल्पानां गीतवादित्राणां चित्रकर्मादीनांच । विज्ञाता विशेषज्ञः । अर्थविभागवित् "धर्माययशसेऽर्थाय आत्मनेस्वजनायच ॥ पञ्चधाविभजन्वित्तमिहामुत्रच-शोभते" इत्युक्तविभागवित् । वारणवाजिनां गजानामश्वानांच । आरोहे आरोहणे । विनये आरूढ्यशिक्षणेच । युक्तः समर्थः ॥ २८ ॥ धनुरित्यर्धाधिकः । धनुरादिस्वरूपप्रतिपादकोवेदोधनुर्वेदः । उपवेदत्वाद्धनुर्वेदस्यवेदत्वं । तद्विदांमध्येश्रेष्ठः । समर्मधनुर्वेदविदित्यर्थः । लोके सर्वत्र । अतिरथानां अप्रतिहतरथगतीनां । संमतः पूजितः । "मतिबुद्धि" इत्यादिनाक्तः । "क्तेनचपूजायां" इतिसमासप्रतिषेधाभाव आर्षः । अभियाता शत्रुसमागमानन्तरंनप्रहर्तुमिच्छति किंतुस्वयमेवयत्रशत्रवस्तत्रगच्छति । तत्रापिनदुर्गप्रदेशावलंबनेनयाति किंत्वभियाता अभिमुखंयाता । प्रहर्ताचअभिगम्यनयोधैर्योधयति किंतुस्वयमेव नासीरेस्थित्वा प्रथमंप्रहरति । सेनानयविशारदः स्वयंप्रहरन्नपिनस्वसेनांछेदयति किंतुपरदुरवगाहचक्रव्यूहादिविभागेनसेनाप्रापणसमर्थः । अप्रधृष्यश्च प्रधर्षयितुमशक्यः सर्वथाविजयीत्यर्थः । संग्रामे । प्रणत्यातुजेतुंशक्यइत्यर्थः । नकेवलंमनुष्यैः सुरासुरैः परस्परविरोधंविहायमिलितैरपि । नचोपशान्तैः । क्रुद्धैः क्रोधपरवशैः ॥ २९ ॥ एवंकल्याणगुणपरिपूर्णत्वमुक्तं । अथहेयप्रत्यनीकत्वमाह—अनसूयइति । अनसूयः असूयारहितः । जितक्रोधः क्रोधपारवश्यरहितः । नदृप्तः नगर्विष्ठः । नचमत्सरी परसंपद्विषयद्वेषरहितः । "मत्सरोन्यशुभद्वेषे"इत्यमरः । नच कालवशानुगः सत्वरजस्तमःप्रधानकालानुगुणसत्वरजस्तमोगुणोनभवति । केवलसत्वमूर्तिरित्यर्थः ॥३०॥ उक्तगुणोपसंहारपूर्वकंगुणान्तराण्याह—एवमिति।एवं उक्तप्रकारेण । पार्थिवात्मजः रामः । प्रजानांमध्ये श्रेष्ठैर्लोकोत्तरैर्गुणैर्युक्तः । त्रिषुलोकेषु संमतः पूजितः। क्षमागुणैः क्षमारूपगुणैः । बहुवचनंप्रकारभेदाभिप्रायेण । वसुधायाः भूमेः तुल्यइतिवक्ष्यमाणमनुषज्यते ॥३१॥ उपसंहरति—तथेति । तथा पूर्वोक्तरीत्या । सर्वप्रजाकान्तैः स्त्रीबालयुववृद्धानांप्रियैः प्रीतिसंजननैः। दृष्टान्तार्थमिदं। पितुरिवसर्वेषांप्रियैरित्यर्थः । एवंभूतैर्गुणैः रामः स्वतःसुन्दरः । स्वतोदीप्तः सूर्योंऽशुभिरिव । विरुरुचे बभौ ॥३२॥ एवंरामगुणान्प्रदर्श्य तत्कृतंभूम्युपलक्षितसकललोकप्रावण्यंदर्शयति—तमेवमिति । एवं गुणसंपन्नत्ववत् । व्रतसंपन्नं

तत्प्रग्रहणेअनुष्ठानइत्यर्थः। शि० सतां महात्मनां संग्रहः स्वीकारः अनुग्रहणं तत्सेवनं तयोस्समाहारः ॥ २६ ॥ ति० सिद्धानामितिपाठेसिद्धाःदेवभेदाःइतिकतककृत् । शि० अजितकः अजितः पराभवितुमशक्यः कः कृतिर्यस्यसः । तत्रहेतुः अधः नधो धाता यस्यसः स्वसत्ताश्रितइत्यर्थः ॥ ३० ॥ ती० क्षमागुणैः क्षान्तिप्रधानैर्गुणैरितिमध्यमपदलोपिसमासः । शि० बृहस्पतेःशचीपतेश्चबुद्ध्या अतुल्यः तोलयितुमशक्यः । कर्मणियत् । संज्ञापूर्वकविधेरनित्यत्वाद्गुणाभावः । नञर्थलाभस्तुवीर्यशब्दात्पूर्वमकारं छित्वा ॥ ३१ ॥ तनि० एवंव्रतसंपन्नं सदाचारसंपन्नं । लोकपालउपेन्द्रः । तस्यस्थितिकर्तृत्वेनावतारात्सउपमायस्यतं । नाथत्वेनाकामयत । मेदिनीशब्देनमेदिनीस्थायिनोजनालक्ष्यन्ते "मञ्चाःक्रोशन्ति" इतिवदितिकेचित् । मेदिनी तदधिष्ठानदेवता अका-

[पा०] १ घ. विज्ञाताक्षविभागवित्. २ ख. रथसत्तमः. ३ ङ. झ. ट. नावज्ञेयश्चभूतानां. ४ क. घ. श्रेष्ठगुणैः. ५ ङ. च. छ. झ. ञ. ट. धैर्येचापि. ६ क. दीप्तस्सूर्य. ७ क—ट. तमेवंवृत्तसंपन्नं. ८ क. ञ. अप्रमेयपराक्रमम्. ९ च. छ. ञ. लोकनाथोपमं. घ. लोकपालोपमंरामं.

एतैस्तु बहुभिर्युक्तं गुणैरनुपमैः सुतम् ॥ दृष्ट्वा दशरथो राजा चक्रे चिन्तां परंतपः ॥ ३४ ॥
अथ राज्ञो बभूवैवं वृद्धस्य चिरजीविनः ॥ प्रीतिरेषा कथं रामो राजा स्यान्मयि जीवति ॥ ३५ ॥
एषा ह्यस्य परा प्रीतिर्हृदि संपरिवर्तते ॥ कदा नाम सुतं द्रक्ष्याम्यभिषिक्तमहं प्रियम् ॥ ३६ ॥
वृद्धिकामो हि लोकस्य सर्वभूतानुकंपनः ॥ मत्तः प्रियतरो लोके पर्जन्य इव वृष्टिमान् ॥ ३७ ॥
यमशक्रसमो वीर्ये बृहस्पतिसमो मतौ ॥ महीधरसमो धृत्यां मत्तश्च गुणवत्तरः ॥ ३८ ॥
महीमहमिमां कृत्स्नामधितिष्ठन्तमात्मजम् ॥ अनेन वयसा दृष्ट्वा यथा स्वर्गमवाप्नुयाम् ॥ ३९ ॥
इत्येतैर्विविधैस्तैस्तैरन्यपार्थिवदुर्लभैः ॥ शिष्टैरपरिमेयैश्च लोके लोकोत्तरैर्गुणैः ॥ ४० ॥
तं समीक्ष्य महाराजो युक्तं समुदितैः शुभैः ॥ निश्चित्य सचिवैः सार्धं युवराजममन्यत ॥ ४१ ॥
दिव्यन्तरिक्षे भूमौ च घोरमुत्पातजं भयम् ॥ संचचक्षे च मेधावी शरीरे चात्मनो जराम् ॥ ४२ ॥

आश्रितसंरक्षणरूपव्रतसंपन्नं । अप्रधृष्यपराक्रमं अकुण्ठपराक्रमं । सर्वेलोकपालाउपमायस्यतं रामं । मेदिनीनाथं अकामयत भूमेर्नाथत्वोचितोऽभूदित्यर्थः । अथवा एवं बालकाण्डोक्तरीत्या व्रतसंपन्नं । " रामस्तुसीतयासार्धं " इत्युक्तरीत्याक्रीडारससंपन्नं । अप्रधृष्यपराक्रमं विरोधिवर्गनिवर्त्यसात्म्यभोगप्रदं । लोकान्पालयतीतिलोकपालः । समस्तोपभोगसाधनसंपन्नइत्यर्थः । उप समीपे मा लक्ष्मीः सीतारूपा यस्यसः उपमः लोकपालश्चासावुपमश्चेति समासः । तं लक्ष्म्याभोगाननुभवन्तंरामं । मेदिन्यपिनाथमकामयत । स्वयंवरेणकण्ठेमालिकांदातुमैच्छदित्यर्थः ॥ ३३ ॥ नकेवलंलोकस्तंनाथमकामयत राजापीत्याह—एतैरिति । एतैः पूर्वोक्तैः । बहुभिः असङ्ख्येयैः । अनुपमैः लोकेकुत्राप्येतादृशगुणादर्शनादसदृशैः । गुणैर्युक्तंसुतंदृष्ट्वा राजा राज्यभरणश्रान्तः । परंतपः शत्रुसंहारव्यग्रः दशरथः । चिन्तां मनोरथं चक्रे ॥ ३४ ॥ तामेवचिन्तांस्पष्टयति—अथेत्यादिनास्वर्गमवाप्नुयामित्यन्तेन । अथ रामगुणदर्शनानन्तरं । चिरजीविनः वृद्धस्य । वयोवृद्धस्येतिज्ञानवृद्धव्यावृत्तिः । वृद्धत्वात्प्रीतिरित्युच्यते । एवं एवंप्रकारेणेत्यर्थः । मयिजीवतिरामः कथंराजास्यादित्येषाप्रीतिर्बभूव । अत्रकथमित्युक्तिः कैकेयीवरदानकृतविघ्नशङ्काप्रतिसंधानेन ॥ ३५ ॥ प्रीतेरौत्कट्यमाह—एषेति । अत्रान्तेइतिकरणंद्रष्टव्यं । द्रक्ष्यामि इत्येषा । परा निरतिशया । प्रीतिः । अस्य दशरथस्य । हृदिसंपरिवर्तते सम्यक् अविच्छिन्नंअनुवर्तते ॥ ३६ ॥ अथरामस्यराजत्वयोग्यतानुसन्धानं दशरथस्यदर्शयतिश्लोकत्रयेण—वृद्धिकामइत्यनेनापूर्वैश्वर्यप्रदत्वमुक्तं । सर्वभूतान्यनुकंपयतीतिसर्वभूतानुकंपनः । कर्तरिल्युट् । अनेनभ्रष्टैश्वर्यसाधकत्वमुक्तं । ममात्मजइतिशेषः । दानेसंतापहारित्वेचदृष्टान्तमाह—वृष्टिमान्पर्जन्यइवेति । लोकेविषये । मत्तःप्रियतरः अतिशयेनप्रीतिमान् । प्रीणातीतिप्रियः पचाद्यच् ॥ ३७ ॥ पूर्वंप्रियतरत्वमुक्तं अत्रतद्धेतुगुणवत्तरत्वमुच्यते—यमशक्रसमइति । प्रत्येकंसाम्यानर्हत्वाद्यमशक्रेत्युक्तं ॥ ३८ ॥ यथास्वर्गं स्वसदृशं स्वसुकृतानुरूपंस्वर्गमित्यर्थः । यद्वा यथास्वर्गं यथाभूतस्वर्गं । "यस्त्वयासहसस्वर्गः " इत्युक्तरामसौन्दर्यानुभवस्वर्गमित्यर्थः ॥ ३९ ॥ श्लोकद्वयमेकान्वयं । इति पूर्वोक्तरीत्या । विविधैस्तैस्तैः तत्तत्कार्यभेदेनप्रसिद्धैः । अन्यपार्थिवदुर्लभैः सामान्यराजदुर्लभैः । शिष्टैः उक्तव्यतिरिक्तसौशील्यादिभिः । अपरिमेयैः असङ्ख्येयैः । कतिपयगुणाःप्रदर्शिताः शिष्टास्त्वपरिमेयाइतिभावः । लोके लोकोत्तरैःलोकेकुत्राप्येवंलोकोत्तरगुणानसन्तीत्यर्थः । समुदितैः स्वाभाविकैः । शुभैः कल्याणतमैः । एतैर्गुणैर्युक्तं तं रामं समीक्ष्य । महाराजः दशरथः । सचिवैःसार्धंनिश्चित्य युवराजममन्यत अयंयुवराजोभवेदितिनिश्चितवानित्यर्थः ॥ ४०–४१ ॥ अथसद्योरामाभिषेककर्तव्यताहेतुं स्वविपत्तिसूचकं दुर्निमित्तमा-

मयत शिष्टपरिपालनदुष्टनिग्रहयोर्मेदिन्याएवहर्षहेतुत्वात् । तथोक्तं "भूमिर्दृप्तनृपव्याजदैत्यानीकशतायुतैः । आक्रान्ताभूरिभारेण ब्रह्माणंशरणंययौ" इति ॥ ३३ ॥ ति० यौवराज्यं तस्येतिशेषः ॥ ४१ ॥

[पा०] १ घ. संप्रतिवर्तते. २ ङ. झ. ट. भूतानुकंपकः. ३ क. च. छ. झ. ञ. ट. इत्येवंविविधैः. ४ घ—झ. ट. लोकेलोकोत्तमैर्गुणैः. क. लोकपालोपमैर्गुणैः. ५ ङ. छ. झ. ञ. ट. तंसमीक्ष्यतदाराजा. क. तंसमीक्ष्यमहातेजाः. ६ क—ट. गणैः. ७ छ. झ—ठ. यौवराज्यममन्यत. ८ ङ. च. छ. झ. ञ. ट. संचचक्षेऽथ.

पूर्णचन्द्राननस्याथ शोकापनुदमात्मनः ॥ लोके रामस्य बुबुधे संप्रियत्वं महात्मनः ॥ ४३ ॥
आत्मनश्च प्रजानां च श्रेयसे[1] च प्रियेण च ॥ [2]प्राप्तकालेन धर्मात्मा भक्त्या त्वरितवान्नृपः ॥ ४४ ॥
नानानगरवास्तव्यान्पृथग्जानपदानपि ॥ समानिनाय मेदिन्याः[3] प्रधानान्पृथिवीपतीन्[4] ॥ ४५ ॥
न[5] तु केकयराजानं जनकं वा नराधिपः[6] ॥ त्वरया चानयामास पश्चात्तौ श्रोष्यतः प्रियम् ॥ ४६ ॥
तान्वेश्मनानाभरणैर्यथार्हं प्रतिपूजितान् ॥ ददर्शालंकृतो राजा प्रजापतिरिव प्रजाः ॥ ४७ ॥
अथोपविष्टे नृपतौ तस्मिन्परबलार्दने[7] ॥ ततः प्रविविशुः शेषा राजानो लोकसंमताः ॥ ४८ ॥
अथ राजवितीर्णेषु[8] विविधेष्वासनेषु च ॥ राजानमेवाभिमुखा निषेदुर्नियता[9] नृपाः ॥ ४९ ॥
स लब्धमानैर्विनयान्वितैर्नृपैः पुरालयैर्जानपदैश्च मानवैः ॥
उपोपविष्टैर्नृपतिर्वृतो बभौ सहस्रचक्षुर्भगवानिवामरैः ॥ ५० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे प्रथमः सर्गः ॥ १ ॥

त्मनोजरांचालोचितवानित्याह्–दिवीति । दिव्यन्तरिक्षे भूमौचयान्युत्पातानितज्जंभयमित्यर्थः । तानिचोक्तानि ज्योतिःशास्त्रे । “ स्वर्भानुकेतुनक्षत्रग्रहताराकचन्द्रजं । दिविचोत्पद्यतेयच्चतद्दिव्यमितिकीर्तितं ।वाग्वभ्रसंध्यादिग्दाहपरिवेषतमांसिच । खपुरंचेन्द्रचापंचतद्विद्याद्न्तरिक्षजं । भूमावुत्पद्यतेयच्चस्थावरंवाथजङ्गमं।तदेकदेशिकंभौममुत्पातंपरिचक्षते” इति । भयावहानिघोराणिदिव्याद्युत्पातानीतिफलितार्थः । मेधावी सूक्ष्मदर्शी राजा । संचचक्षे दृष्टवान् । सचिवायोक्तवानितिवा । आत्मनः शरीरेजरांचसंचचक्षे । ख्यात्रभावआर्षः ॥ ४२ ॥ एवंरामाभिषेकेहेतुद्वयमुक्तं । सर्वलोकप्रियत्वंचहेतुमाह्–पूर्णचन्द्राननस्येति । अथ उत्पातदर्शनानन्तरं । पूर्णचन्द्राननस्य तद्वत्सर्वसंतापहरस्य । महात्मनः महामतेः । रामस्य । लोकेविषये संप्रियत्वं । कीदृशं । आत्मनः स्वस्यशोकापनुदं उत्पातादिभयनिवर्तकं । सम्यक्प्रियत्वं । बुबुधे अनुसंदधावित्यर्थः ॥४३॥एवमनुसंधानप्रयोजनमाह्–आत्मनइति । आत्मनःप्रजानांच श्रेयसे हितार्थाय । प्रियेणच प्रियायच । चतुर्थ्यर्थेतृतीया । धर्मात्मा धर्मशीलः । धर्मेणप्राणिसंरक्षकः । नृपः । प्राप्तकालेनोपलक्षितःसन् । भक्त्या प्रीत्या । त्वरितवान् प्राप्तकालत्वं स्वस्यवृद्धत्वं रामयौवनं वसन्तकालोवा ॥४४॥ नानानगरेषुवसन्तीतिनानानगरवास्तव्याः तान् । “वसेस्तव्यत्कर्तरिणिच्च”इति कर्तरितव्यत्प्रत्ययः । पृथग्जानपदान् जनपदान्तरस्थान् । मेदिन्याः भुवः । प्रधानान् नकेवलानवान्तरनृपतीनित्यर्थः । पृथक्समानिनायेतिवा ॥ ४५ ॥ श्रोष्यतइत्यनन्तरमितिकरणंद्रष्टव्यं । अनानयनेहेतुमाह्—त्वरयेति । दूरवर्तित्वादितिभावः । केकयराजानमित्यत्र समासान्तविधेरनित्यत्वाट्टजभावः ॥४६॥ प्रथमंवेश्मनानाभरणैःप्रतिपूज्यपश्चात्तान्ददर्शेत्यर्थः ॥४७॥ दर्शनप्रकारमेवाह्–अथेति । प्रविविशुः सभामितिशेषः। शेषाः केकयराजजनकभिन्नाः ॥ ४८॥ राजवितीर्णेषु राजदत्तेषु। नियताः नियतदेशाधिपत्याः अन्तरङ्गावा । पादाप्रसारणादिनियमयुक्तावा ॥४९॥ लब्धमानैःप्राप्तबहुमानैः । पुरालयैः नानानगरवासिभिः । उपोपविष्टैः राजवचनश्रवणादरेणमन्दंमन्दंसमीपंप्राप्तैः । नृपैः मानवैश्चवृतोनृपतिः । भगवान् माहात्म्यवान् । सहस्रचक्षुः इन्द्रइव बभौ ॥ ५० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीतांबराख्याने अयोध्याकाण्डव्याख्याने प्रथमः सर्गः ॥ १ ॥

ति० पुरालयैः राजसेवार्थंसदाऽयोध्यास्थितैः ॥ ५० ॥ इतिप्रथमस्सर्गः ॥ १ ॥

[पा०] १ ख. घ. च. श्रेयसाच. २ च. ञ. प्राप्तकालेसधर्मात्मा. ङ. छ. झ. ट. प्राप्तेकालेस. ३ क. ङ. च. झ. ट. मेदिन्यां. ४ ख. ङ. छ. झ. ञ. ट. पृथिवीपतिः. ५ अयंश्लोकः क. ख. घ—छ. झ. ञ. ट. पुस्तकेषु तान्वेश्मेत्युत्तरश्लोकादनन्तरंदृश्यते. ६ क. घ. नराधिपं. ७ क. ख. घ—छ. ञ. ट. परपुरार्दने. ८ च. ञ. राज्ञावितीर्णेषु. ९ क. संयतान्नृपाः.

द्वितीयः सर्गः ॥ २ ॥

दशरथेनसदस्यान्प्रतिस्वस्यजरासंभवाद्रामेराज्यभारस्थापनेनविश्रमेच्छानिवेदनेतैस्तदङ्गीकरणम् ॥ १ ॥ पुनस्तेनतदभिप्रायजिज्ञासयारामस्ययौवराज्याभिषेकाङ्गीकारकारणप्रश्नेतैस्तद्गुणानुवादपूर्वकमभिषेककरणप्रार्थना ॥ २ ॥

ततः परिषदं सर्वामामन्त्र्य वसुधाधिपः ॥ हितमुद्धर्षणं चैवमुवाच प्रथितं वचः ॥ १ ॥
दुन्दुभिस्वनकल्पेन गंभीरेणानुनादिना ॥ स्वरेण महता राजा जीमूत इव नादयन् ॥ २ ॥
राजलक्षणयुक्तेन कान्तेनानुपमेन च ॥ उवाच रसयुक्तेन स्वरेण नृपतिर्नृपान् ॥ ३ ॥
विदितं भवतामेतद्यथा मे राज्यमुत्तमम् ॥ पूर्वकैर्मम राजेन्द्रैः सुतवत्परिपालितम् ॥ ४ ॥
सोहमिक्ष्वाकुभिः सर्वैर्नरेन्द्रैः परिपालितम् ॥ श्रेयसा योक्तुकामोस्मि सुखार्हमखिलं जगत् ॥ ५ ॥
मयाप्याचरितं पूर्वैः पन्थानमनुगच्छता ॥ प्रजा नित्यमनिद्रेण यथाशक्त्यभिरक्षिताः ॥ ६ ॥
इदं शरीरं कृत्स्नस्य लोकस्य चरता हितम् ॥ पाण्डुरस्यातपत्रस्य च्छायायां जरितं मया ॥ ७ ॥
प्राप्य वर्षसहस्राणि बहून्यायूंषि जीवतः ॥ जीर्णस्यास्य शरीरस्य विश्रान्तिमभिरोचये ॥ ८ ॥
राजप्रभावजुष्टां हि दुर्वहामजितेन्द्रियैः ॥ परिश्रान्तोस्मि लोकस्य गुर्वीं धर्मधुरं वहन् ॥ ९ ॥

अथरामाभिषेकस्यसर्वसंमतत्वंदर्शयतिद्वितीये—ततइत्यादि । ततःराजादिनिवेशानन्तरं । परिषदं पौरजानपदसमूहं । आमन्त्र्य अभिमुखीकृत्य । हितं श्रेयस्करं । उद्धर्षणं उत्कूलहर्षजनकं । प्रथितं प्रकटार्थं । एवं वक्ष्यमाणरीत्या ॥ १ ॥ प्रथितमुवाचेत्युक्तंविशदयति—दुन्दुभिस्वनकल्पेनेति । दुन्दुभिस्वनकल्पेन भेरीस्वनसदृशेन । ईषदसमाप्तौकल्पप्प्रत्ययः । गंभीरेण गंभीरार्थेन । अनुनादिना दिशःप्रतिध्वनयता । स्वरेण महतास्वरेण नादयन् । जीमूतइव मेघइवस्थितः । राजा उवाच । पुनःस्वरःकीदृशः । राजलक्षणयुक्तेन प्रभावानुरूपेण । कान्तेन मृदुना । रसयुक्तेन माधुर्यवता ॥ २—३ ॥ स्वकृतराज्यपरिपालनस्यपूर्वकृतपालनादविशेषंसूचयन्नाह—विदितमिति । अन्तेइतिकरणंद्रष्टव्यं । उत्तमं विपुलं । मे एतद्राज्यं । ममपूर्वकैः पूर्वैः । राजेन्द्रैः रघुप्रभृतिभिः । सुतवत्परिपालितं अतिप्रेम्णासुरक्षितं । इत्येतद्भवतांविदितं । "क्तस्यचवर्तमाने" इतिषष्ठी । भवद्भिर्विदितमित्यर्थः ॥ ४ ॥ अस्तुततःकिमित्यत्राह—सोहमिति । सः तद्वंश्यः । अहं । इक्ष्वाकुभिः इक्ष्वाकुवंश्यैः । सर्वैर्नरेन्द्रैः परिपालितं अतएवसुखार्हं अखिलं जगत् राज्यं । श्रेयसा सुखेन । अधुनापि योक्तुंकामयइति योक्तुकामः । अस्मि "तुंकाममनसोरपि" इतिमकारलोपः । योक्तुमिच्छामीत्यर्थः ॥ ५ ॥ ननुभवत्कृतंपालनमेवास्माकंश्रेयइत्यत्राह—मयापीति । पूर्वैः राजभिः । आचरितं क्षुण्णं । पन्थानं मर्यादां । अनुगच्छता अनुसरता । नित्यं अनिद्रेण जागरूकेण । मयापि प्रजाः यथाशक्त्यभिरक्षिताः । यथाशक्तीतिविनयोक्तिः ॥ ६ ॥ तर्हीदानीमपितथैवरक्ष्यतामित्यत्राह—इदमिति । कृत्स्नस्यलोकस्य जनस्य । हितं चरता कुर्वता । मया । इदं शरीरं । भवतांप्रत्यक्षंहीतिभावः । पाण्डुरस्यातपत्रस्य श्वेतस्यछत्रस्य । छायायांजरितं संजातजरंकृतं । जरापर्यन्तमेकच्छत्रतयापराक्रमनिधिर्भूत्वा मयानियमेन लोकहितमाचरितमित्यर्थः ॥ ७ ॥ तर्हिसंप्रतिकिंकर्तव्यमित्यत्राह—प्राप्येति । बहूनि वर्षसहस्राणि षष्टिवर्षसहस्रपरिमितानि । आयूंषि । प्राप्य जीवतः क्रमेण जीर्णस्यास्यशरीरस्य । विश्रान्तिं राज्यभाराद्विरतिं । अभिरोचये इच्छामि । एतेनययातिवद्विषयचापलेननराज्याद्विरम्यतइतिदर्शितं ॥ ८ ॥ इतःपरंराज्यवहनाशक्तौनिमित्तमाह—राजेति । राजप्रभावैः शौर्यादिभिः । जुष्टां सेवितुमर्हां । अजितेन्द्रियैः विषयपरैः ।

शि० हितं सर्वोपकारकं ॥ १ ॥ ति० अनिद्रेण स्वसुखनिरपेक्षेण ॥ ६ ॥

[पा०] १ घ. प्रश्रितंवचः. २ घ. ङ. झ. ट. दुन्दुभिस्वर. ३ घ. च. छ. झ. ञ. ट. त्प्रतिपालितम्. ४ घ. च. छ. झ. ञ. ट. प्रतिपालितम्. ५ घ—छ. झ. ञ. ट. योक्तुमिच्छामि. ६ क. मयाचाचरितं. ७ ग, ज मतन्द्रेण. ८ क, लोकस्यकृत्स्नस्य. ९ घ. विश्राममभिरोचये. १० च. छ, झ. ञ, ट. जुष्टांच.

सोहं वि[1]श्रममिच्छामि पु[2]त्रं कृत्वा प्रजाहिते ॥ सन्निकृष्टानिमान्सर्वाननुमान्य द्विजर्षभान् ॥ १० ॥
अनुजातो हि मां सर्वैर्गुणै[3]र्ज्येष्ठो ममात्मजः ॥ पुरंदरसमो वीर्ये रामः परपुरंजयः ॥ ११ ॥
तं चन्द्रमिव पुष्येण युक्तं धर्मभृतांवरम् ॥ यौवरा[4]ज्ये नियोक्तास्मि प्री[5]तः पुरुषपुङ्गवम् ॥ १२ ॥
अनुरूपः स[6] वै नाथो लक्ष्मीवांल्लक्ष्मणाग्रजः ॥ त्रैलोक्यमपि नाथेन येन स्यान्नाथवत्तरम् ॥ १३ ॥

दुर्वहां तादृशप्रभावरहितैर्वोढुमशक्यां । गुर्वीं बहुसाधननिर्वाह्यां । लोकस्य धर्मधुरं धर्मस्थापनरूपभारं । वहन्नहं परिश्रान्तोस्मि ॥ ९ ॥ विवक्षितमर्थंदर्शयति—सइति । सः एवंश्रान्तोऽहं । प्रजाहिते प्रजारक्षणविषये । पुत्रं कृत्वा नियम्य । सन्निकृष्टान् अन्तरङ्गभूतान् । इमान् सर्वान् द्विजर्षभान् ब्राह्मणश्रेष्ठान् । अनुमान्य कृतानुमतिकान्कृत्वा । मानयतेर्ण्यन्ताल्ल्यप् । विश्रमं श्रान्तिनिवृत्तिमिच्छामि ॥ १० ॥ कस्तेपुत्रो यौवराज्येनियोज्योऽभिमतस्तत्राह—अनुजातइति । वीर्येविषये पुरन्दरसमः इन्द्रतुल्यः । तौल्यमेवाह—परेषां शत्रूणां पुराणि जयति स्वाधीनीकरोतीति परपुरंजयः । असंज्ञायामपिजेःखजार्षः । रामः रामनामकः । ममज्येष्ठआत्मजः । सर्वैर्गुणैः शौर्यादिभिः । मामनुजातः । "अनुर्लक्षणे" इत्यनुःकर्मप्रवचनीयः । तद्योगान्मामितिद्वितीया । मद्गुणान्सर्वाननुप्राप्यजातइत्यर्थः । ननु "मत्तश्चगुणवत्तरः । अपरिमेयैश्चलोकेलोकोत्तरैर्गुणैः" इतिपूर्वमुक्तं कथमिदानीमनुजातोहिमांसर्वैर्गुणैरित्युच्यते पुरन्दरसमइतिच उच्यते "अन्यामध्यस्थचिन्ताहिविमर्दाभ्यधिकोदया" इतिन्यायेनपौरमुखेनरामस्य सर्वाभ्यधिकगुणतांवाचयितुमेवमुक्तमितिध्येयं । अतएववक्ष्यति– "बहवोनृपकल्याणगुणाःपुत्रस्यसन्तिते" इति ॥११॥ तं स्वगुणतुल्यगुणं । धर्मभृतां धार्मिकाणां । वरं पुरुषपुङ्गवं पुष्येणनक्षत्रेणयुक्तं चन्द्रमिवस्थितं तद्वदत्युज्ज्वलं । यद्वा पुष्यनक्षत्रेभिषेककरणात्पुष्येणचन्द्रमिवेत्युक्तं।यौवराज्येनियोक्तास्मि । यद्वा चन्द्रमिवस्थितं तं श्वःपुष्येण यौवराज्येनियोक्तास्मीत्यर्थः ॥१२॥ दशरथवचनंवाल्मीकिस्तत्वज्ञतयाश्लाघते—अनुरूपइति । सः रामः । अनुरूपः अनुगुणः । नाथः लोकस्येतिशेषः । अनुरूपत्वेहेतुः—लक्ष्मीवानिति । अपरिच्छिन्नतेजस्कइत्यर्थः । तत्रापिहेतुः—लक्ष्मणाग्रजइति । लक्ष्मणोलक्ष्मिवर्धनः" इत्युक्तं । यद्वा अनुरूपत्वेहेतुः—लक्ष्मणाग्रजइति । लक्ष्मणइवसर्वत्रस्वाश्रितेप्रेमशालीत्यर्थः । अथवा अनुरूपइत्यादि नित्यानपायिन्यालक्ष्म्याविशिष्टः परिजनपर्यन्तोरामः सर्वस्यनिरुपाधिकःशेषी । दशरथस्तुराज्यपालनोपाधिकशेषी । वैइतिश्रुत्यादिप्रसिद्धिंद्योतयति । "दासभूताःस्वतःसर्वेह्यात्मानःपरमात्मनः" इत्याद्युक्तेः । तस्यनिरुपाधिकशेषित्वेनिमित्तमाह—त्रैलोक्यमिति । त्रयोलोकाएवत्रैलोक्यं । चतुर्वर्णादित्वात्स्वार्थेष्यञ् । त्रैलोक्यमपि येननाथेन नाथवत्तरं अतिशयेननाथवत् । रामस्यरक्षकत्वावलोकने कियन्मात्रंत्रैलोक्यमितिभातीत्यर्थः । अथवा अनेनश्लोकेनरामस्यपरत्वमुच्यते । सः रामः । अनुरूपोनाथः सहजशेषीजगतः । अन्येतुकर्मानुगुणतयौपाधिकाः । अनुकूलंरूपंयस्यसोनुरूपः । "समःसमविभक्ताङ्गः, चन्द्रकान्ताननं" इत्याद्युक्तनिरुपमसौन्दर्यशालिदिव्यमङ्गलविग्रहइत्यर्थः । अनुकूलंस्वरूपंयस्यासावनुरूपः । शतगुणितोत्तरक्रमेणनिरतिशयदशाशिरस्कतयाऽभ्यस्यमानानन्दरूपइत्यर्थः । "आनन्दोब्रह्मे" तिह्युक्तं । अनुगतंरूपंयस्यासावनुरूपः सर्वव्यापीत्यर्थः । अनुरूपः अनुप्रविष्टचराचरादिकशरीरः । सर्वशरीरीत्यर्थः । अनुरूपः अनुस्यूतरूपः । परव्यूहविभवान्तर्याम्यर्चावताररूपेणनानावतारशालीत्यर्थः । अनुरूपः ओः रुद्रस्य रूपं शरीरं तद्विलक्षणशरीरः । "वपुर्विरूपाक्षमलक्ष्यजन्मतादिगंबरत्वेननिवेदितंवसु" इत्याद्युक्तरूपविलक्षणरूपः । पुण्डरीकाक्षत्वादियुक्तः । उस्वरूपभिन्नइतित्रिमूर्तिसाम्यंचनिरस्यते । वीनां पक्षिणां नाथो विनाथः हंसः । तत्संबन्धीवैनाथः । अण्यादिवृद्धिः । हंसवाहनःचतुर्मुखः । तत्सहितः सवैनाथः । नाभिपद्मस्थलस्थितचतुर्मुखइत्यर्थः । वैनाथो गरुडवाहनो वा । नाथत्वेहेतुः—लक्ष्मीवानिति । नित्ययोगेमतुप् ।

ती० अनुज्ञाप्येतिपाठेअनुज्ञांकारयित्वेत्यर्थः ॥ १० ॥

[पा०] १ क. ङ. झ. ञ. ट. विश्राममिच्छामि. २ क. रामंकृत्वा. ३ क. ङ. च. छ. झ. ञ. ट. र्गुणैश्श्रेष्ठो. ४ ध. ज. राज्येनयोक्तास्मि. ५ ङ. छ. झ. प्रातःपुरुषपुङ्गवम्. ६ क. ख. ग. ङ—ट. सर्वोनाथो. ध. सर्वोराजा.

अनेन श्रेयसा सद्यः संयो[1]ज्यैवमिमां महीम् ॥ गतक्लेशो भविष्यामि सुते तस्मिन्निवेश्य वै ॥ १४ ॥
[2]यदीदं मेऽनुरूपार्थं मया साधु सुमन्त्रितम् ॥ [3]भवन्तो मेऽनुमन्यन्तां कथं वा करवाण्यहम् ॥१५॥
[4]यद्यप्येषा मम प्रीतिर्हितमन्यद्विचिन्त्यताम् ॥ अन्या मध्यस्थ[5]चिन्ता हि विमर्दाभ्यधिकोदया ॥१६॥
इति ब्रुवन्तं मुदिताः प्रत्यनन्द[6]न्नृपा नृपम् ॥ वृष्टिमन्तं [7]महामेघं [8]नर्दन्त इव बर्हिणः ॥ १७ ॥
[9]स्निग्धोऽनुनादी संजज्ञे [10]तत्र हर्षसमीरितः ॥ जनौघोद्धुष्टसंनादो [11]विमानं कंपयन्निव ॥ १८ ॥
तस्य धर्मार्थविदुषो भाव[12]माज्ञाय सर्वशः ॥ ब्राह्मणा [13]जनमुख्याश्च पौरजानपदैः सह ॥ १९ ॥
[14]समेत्य मन्त्रयित्वा तु समतांगतबुद्धयः ॥ ऊचुश्च मनसा [15]ज्ञात्वा वृद्धं [16]दशरथं नृपम् ॥ २० ॥

"ह्रीश्चतेलक्ष्मीश्चपत्न्यौ। अप्रमेयंहितत्तेजोयस्यसाजनकात्मजा । वेदान्तास्तत्वचिन्तांमुरभिदुरसियत्पादचिह्नैस्तरन्ति" । पत्नीविशिष्टत्ववत् परिजनविशिष्टत्वमाह—लक्ष्मणाग्रजइति । लक्ष्मणशब्दः कैङ्कर्यपरमात्रोपलक्षणार्थः । अग्रजइतितन्निरूप्यत्वोक्त्या आश्रितपारतन्त्र्यमुक्तं। ननुकथमयमनुरूपोनाथः ब्रह्मरुद्रादयोपिहिसन्तिनाथा इत्यत्राह—त्रैलोक्यमपीति । कृतकमकृतकंकृतकाकृतकमित्युक्तंसमस्तंजगदित्यर्थः । येननाथेननाथवदित्यनेनेन्द्रादिव्यावृत्तिः । तरपाब्रह्मरुद्रादिव्यावृत्तिः । तन्नाथत्वस्यैतन्मूलत्वात् । "युगकोटिसहस्राणिविष्णुमाराध्यपद्मभूः । पुनस्त्रैलोक्यधातृत्वंप्राप्तवानितिशुश्रुम । महादेवःसर्वमेधेमहात्माहुत्वात्मानंदेवदेवोबभूव" इत्यादिस्मृतयस्तत्रमानं । त्रैलोक्यंनाथवत्तरंरक्ष्यापेक्षयारक्षकत्वराधिकेत्यर्थः ॥ १३ ॥ इमां मयाचिरकालधृतां महीं । तस्मिन् ज्येष्ठे । सुते निवेश्य महीपालभारंनिक्षिप्येत्यर्थः । अनेन तन्निवेशरूपेण । श्रेयसाच महीमेवंसद्यःसंयोज्य । गतक्लेशः गतराज्यभरणक्लेशः । भविष्यामि । रामाभिषेकस्यद्वेफले मह्याःश्रेयो ममविश्रान्तिश्चेतिभावः ॥ १४ ॥ इदं रामाभिषेकरूपंकार्यं । मे राज्यभरणश्रान्तस्यवृद्धस्यमम यद्यनुरूपार्थं उचितप्रयोजनकंचेत् । मयावासाधुसुमन्त्रितंयदि । सम्यक्विचार्यारब्धंचेदित्यर्थः । तदाभवन्तः मे मह्यं । अनुमन्यन्तां अनुमतिंकुर्वन्तु । इदंमेअनुकूलार्थंचेत्कथंवान्यत्करवाणि ॥ १५॥ यत्तेप्रियंतत्क्रियतामित्यत्राह—यद्यपीति । एषारामाभिषेकविषया प्रीतिर्यद्यप्यस्ति तथाप्यन्यद्धितमस्तिचेच्चिन्त्यतां । ननुकस्त्वत्तोधिकदर्शीत्यत्राह—अन्येति । मध्यस्थानां रागद्वेषरहितानां । चिन्ता विचारः । अन्या अन्यादृशी । स्वमात्रचिन्तातोविलक्षणा । तदेव वैलक्षण्यमाह—विमर्दाभ्यधिकोदयेति । विमर्देन पूर्वापरपक्षसंघर्षणेनहेतुना । अभ्यधिकोदया अधिकार्थप्रादुर्भावाहि ॥१६॥ इति पूर्वोक्तप्रकारेण । ब्रुवन्तं नृपं दशरथं । नृपाः परिषद्गताराजानः । वृष्टिमन्तं वर्षुकं । महामेघं नर्दन्तः केकांकुर्वन्तः । बर्हिणइव मयूराइव । मुदिताः सन्तः प्रत्यनन्दन् प्राशंसन् ॥ १७ ॥ तत्र सभायां । स्निग्धः स्नेहाभिव्यञ्जकः । अनुनादी प्रतिध्वनिकारी । जनौघोद्धुष्टः जनसमूहोत्पादितः । सन्नादः समीचीनशब्दः । विमानं तदास्थानमण्टपविमानं । कंपयन्निव संजज्ञे । नकेवलंराजानएव सर्वेपिजनास्तच्छ्रुत्वासंतुष्टाइत्यर्थः ॥ १८ ॥ तस्येत्यादिश्लोकद्वयमेकान्वयं । ब्राह्मणाः वसिष्ठाद्याः । जनमुख्याः राजानश्च । पौरैर्नागरिकैः जानपदैश्च । समेत्य संयुज्य । मन्त्रयित्वा युक्तायुक्तंविचार्य । धर्मार्थविदुषः स्वस्य वार्धकेयुवराजस्थापनंधर्मः प्रजानामर्थसाधनंचेति जानतः । तस्य दशरथस्य । भावं वचनमूलतात्पर्यं । सर्वशः सर्वप्रकारेण । देशकालेङ्गितादिभिः । आज्ञाय आसमन्ताज्ज्ञात्वा । समताः साम्यं गताः बुद्धयो येषां ते तथोक्ताः । ऐकमत्यंप्राप्ताःसन्तःमनसाच ज्ञात्वा

ति० मेदिनींकंपयन्निव । अनुनादः सामन्तकृतहर्षजवाक्यप्रतिध्वनिः संजज्ञे । सभायामितिशेषः । जनौघानामुद्घुष्टेनशब्देनसन्संभवन्नादःप्रतिध्वनिः । पृथिवींकंपयन्निवसंजज्ञे । बहिरितिशेषः ॥ १८ ॥

[पा०] १ ङ. च. छ. झ. ट. संयोक्ष्येऽहमिमां. क. ञ. संयोज्यचमहीमिमाम्. ख. संयोज्याहमिमांमहीम्. ग. घ. ज. संयोज्यैवंमहीमिमाम्. २ क—ट. यदिदं. ३ घ. भवन्तोप्यनुमन्यन्तां. ४ ख. यद्येषाममच. ५ क—छ. झ. ट. चिन्तातु. ६ घ. नृपात्मजम्. ७ घ. च. यथामेघं. ८ ख. ग. नृत्यन्तइव. ९ क. घ—छ. झ. ञ. ट. स्निग्धोऽनुनादः. ग. स्निग्धोविनादः. १० ङ. च. छ. झ. ञ. ट. ततोहर्ष. ११ ङ. झ. मेदिनींकंपयन्निव. १२ ख. माज्ञायतत्वतः. १३ क—ञ. बलमुख्याश्च. १४ छ. ट. समेत्यतेमन्त्रयित्वा. ङ. झ. तेमन्त्रयितुं. १५ क. ग. ज्ञात्वा. १६ ख. दशरथंवचः.

अनेकवर्षसाहस्रो वृद्धस्त्वमसि पार्थिव ॥ स रामं युवराजानमभिषिञ्चस्व [1]पार्थिवम् ॥ २१ ॥
इच्छामो हि महाबाहुं रघुवीरं महाबलम् ॥ गजेन महताऽऽयान्तं रामं [2]छत्रावृताननम् ॥ २२ ॥

प्रत्येकंस्वस्वहृदयेननिश्चित्य । वृद्धंनृपं वक्ष्यमाणवचनार्हं दशरथं ऊचुः ॥ १९–२० ॥ वृद्धंनृपमितिकविना सूचितमर्थंदर्शयन्ति–अनेकेति । हेपार्थिव त्वं अनेकवर्षसाहस्रः सहस्राण्येवसाहस्राणि । स्वार्थेअण् । अनेकानिवर्षसाहस्राणियस्य सतथा । वृद्धोसीतिविशेषणमहिम्नाअतिवृद्धोसीतिगम्यते । सः तादृशवृद्धत्वं । पार्थिवं पृथिवीशासनार्हं । युवराजानं युवराजं । समासान्तस्यानित्यत्वान्न " राजाहस्सखिभ्यः " इतिटच् । अभिषिञ्चस्वायथारामोयुवराजोभवतितथाऽभिषिञ्चेत्यर्थः ॥ २१ ॥ ननुरक्षकेमयिविद्यमाने किमर्थंरामाभिषेकोऽपेक्ष्यतइत्याशङ्कायां नहिवयं रक्षणार्थंतमपेक्षामहे किंतुसौन्दर्यविशेषानुभवार्थमित्याहुः–इच्छामइति । इच्छामइति बहुवचनेन सर्वेषामिच्छावैषम्याभावउक्तः । महाबाहुमिति"आयताश्चसुवृत्ताश्च"इत्युक्तरीत्या सहजबाहुसौन्दर्यं तत्कालाङ्कुशाकर्षणादिव्यापारविशेषश्चोच्यते । इच्छामः अभिषेकपट्टबन्धादियुक्ततयास्थितं द्रष्टुमिच्छामः । इच्छामात्रमस्माकं कार्यनिर्वहणं भवदधीनं । इच्छामः अस्माकमिच्छावर्तते " श्रेयांसि बहुविघ्नानि " इति एवंविधश्रेयोस्माभिर्लभ्यतेकिं । इच्छामः अभिषेकःसिध्यतुवानवा इच्छा निष्प्रतिबन्धा । सुन्दरवस्तुदर्शनेइच्छाप्रवर्ततेखलु । इच्छामः सर्वप्रकारेणरक्षकत्वाद्वाचाप्रार्थयितुमशक्तामनसाइच्छामः । भवदभिप्रायज्ञानेनइदानीमिच्छामइतिवदामः । केषांचिदस्तिनकेषांचिदितिन किंतुसर्वेइच्छामः । हि सर्वलोकप्रसिद्धंखलु । " जनौघोद्घुष्टसंनादोविमानंकंपयन्निव " इतिसर्वजनकोलाहलेनतवगृहंविश्लिष्टबन्धंखलु । अकामयतमेदिनी त्वयिनिर्वाहकेसत्येवभूमिःस्वयंवरंकृतवतीखलु । त्वयिकरग्रहं कुर्वतिरामकामनानयुक्तेतिध्वन्यते । कामुकीनांनमर्यादाखलु । लोकपालोपमं विष्णुसदृशं । अतएववृतवतीभूमिः । मेदिनी मधुकैटभवसाविस्रगन्धेनोपहता " सर्वगन्धः " इति । रामसौगन्ध्येनवासयितुमकामयत । कर्पूरचन्दनादिकमिवस्वशेषकोटीकृतवती । नाथं सौगन्ध्यासौगन्ध्ययोः स्वस्यैवशेषिणोभोग्यतयातद्विप्रवासनानिवर्तनेनस्वशेषरक्षकं । महाबाहुं बाहुचलस्यालक्ष्याखल्वियं । " शक्तस्त्रैलोक्यमप्येकः " इति । नकेवलंकोसलराज्यं लङ्काराज्यमपिरक्षितुंशक्तिरस्ति । महाबाहुं आयताश्चइति " आजानुबाहुश्च " इतिचमहापुरुषलक्षणदर्शनेननज्ञायतेकिं । विभूतिद्वयनिर्वाहकबाहुःखलु । महाबाहुं "बाहुच्छायामवष्टभ्य"इति छायास्मद्रक्षणे नपर्याप्ताकिं । " ररक्षधर्मेणबलेनचैव" इतिधर्मबलमप्यस्तीत्याहुः–रघुवीरं "दीनान्दानेनराघवः " इतिप्रसिद्धःखलु । " आनृशंस्यंपरोधर्मः " इतिपरेषामप्युपदेशपर्यन्तंखलुरक्षणं । रघुवीरं रघ्वपेक्षयास्यैवधर्मिष्ठताज्ञायतेखलु । रघुंप्रतिक्षुधार्तस्यमरणेतपापंनभवतीत्युक्तेतूष्णींस्थितवान् । अयंतु " अप्यहंजीवितंजह्यां " इतिखलूक्तवान् । महाबलं मनोबलयुक्तं । " नहिप्रतिज्ञांसंश्रुत्य, नत्यजेयं, एतद्व्रतंमम " इतिवक्ष्यति । गजेन महतायान्तं गजेनत्वयादत्तकिरीटपट्टबन्धादियुक्तःशत्रुंजयेनागच्छतिचेत्तदाज्ञायते । गजेननरथादिना " मत्तमातङ्गगामिनं " इतितद्गमनोपमानगतिमता । महता अत्युन्नतेन । सर्वशक्तिमता । आयान्तं महावीथीमध्येप्रतिगृहाङ्गणमायान्तं । "एकः स्वादुनभुञ्जीत" इतिपुत्रकलत्रादिभिः सहानुभवरसमास्वादयामः । रामं सौन्दर्यगुणैः सकलमनोरञ्जकं । छत्रावृताननं दृष्टिदोषपरिहारायान्तरङ्गेणछत्रेणावृतमुखं दृश्यादृश्यैकदेशतयासाकल्येनमुखदर्शनाभिलाषमुत्पादयन्तं । अन्तरङ्गसुहृद्भिर्वातातपपरिम्लानताशङ्कयाभूचक्रच्छत्रेणाच्छादितमुखपङ्कजं । छत्रावृताननं । " एकच्छत्रांमहींभुङ्क्ते " इतिलक्षणशास्त्रकथितसमवृत्तविशालोत्तमाङ्गत्वव्यञ्जकेन निरङ्कुशप्रशासनवशीकृतनिखिलभूपालवलयतानिरूपकेणछत्रेणपाण्डुरेण परभागभावमापन्नेन नितरांप्रकाशितेन्दीवरसदृशमुखं । विशदीकृतमुक्तं । रघुवीरमितिगजस्कन्धावस्थानसूचितोवीर्यविशेषउच्यते । महाबलं मत्तमातङ्गमपितृणीकृत्यगमनसमर्थं । महागजेनशत्रुंजयेनाया-

शि० रामंयुवराजानं अभिषिञ्चस्व युवराजत्वेनाभिषेकंकारयेत्यर्थः । संज्ञापूर्वकविधेरनित्यत्वात्परस्मैपदाभावः । स्वेतिभिन्नपदं । आत्मीयेत्यर्थः । स्वश्चासौपार्थिवश्चेतिकर्मधारयोवा ॥ २१ ॥

[पा०] १ ग. घ. ज. धार्मिकम्. क. ख. च. छ. झ. ञ. पार्थिव. २ क. छत्रवृताननम्.

इति तद्वचनं श्रुत्वा राजा तेषां मनःप्रियम् ॥ अजानन्निव जिज्ञासुरिदं वचनमब्रवीत् ॥ २३ ॥
श्रुत्वैव वचनं यन्मे राघवं पतिमिच्छथ ॥ राजानः संशयोऽयं मे किमिदं ब्रूत तत्त्वतः ॥ २४ ॥
कथं नु मयि धर्मेण पृथिवीमनुशासति ॥ भवन्तो द्रष्टुमिच्छन्ति युवराजं ममात्मजम् ॥ २५ ॥
ते तमूचुर्महात्मानं पौरजानपदैः सह ॥ बहवो नृप कल्याणा गुणाः पुत्रस्य सन्ति ते ॥ २६ ॥
गुणान्गुणवतो देव देवकल्पस्य धीमतः ॥ प्रियानानन्दनान्कृत्स्नान्प्रवक्ष्यामोद्य ताञ्शृणु ॥ २७ ॥
दिव्यैर्गुणैः शक्रसमो रामः सत्यपराक्रमः ॥ इक्ष्वाकुभ्योपि सर्वेभ्यो ह्यतिरिक्तो विशांपते ॥ २८ ॥

न्तंगच्छन्तमित्यनुभयसाक्षिकःसुपमाविशेषःसूच्यते । रामं स्वसौन्दर्येणगजमलंकुर्वाणमिवस्थितं । छत्रावृताननं वदनप्रभामण्डलेनैवछत्रावरणेनजनितसौन्दर्यं । एतैरभिषेकानन्तरभाविभिर्विशेषणैरभिषेकःकर्तव्यइति व्यञ्जनावृत्त्याप्रार्थ्यते ॥ २२ ॥ इति पूर्वोक्तप्रकारेण । तद्वचनं तेषांपौरादीनांवचनं । श्रुत्वा । तद्वचनभङ्ग्यैव तेषांमनःप्रियं मनस्संतोषं । जानन्नप्यजानन्निवजिज्ञासुः तन्मुखेनैवज्ञातुमिच्छुः । इदं वक्ष्यमाणं । वचनमब्रवीत् ॥ २३ ॥ हेराजानः मेवचनंश्रुत्वैव नतुपूर्वापरंपर्यालोच्य । राघवं रामं । पतिं राजानं । इच्छथेतियत् । अयं मेसंशयः संशयहेतुः । विधेयापेक्षयापुँल्लिङ्गता । संशयप्रकारमाह—किमिदमिति । इदं राघवाभिषेकप्रार्थनं । किं किंनिमित्तकं । इति तत्वतोब्रूत अत्रनिमित्तंयाथातथ्येन कथयतेत्यर्थः ॥ २४ ॥ पुनःसंशयं विशिनष्टि—कथमिति । मयिधर्मेणपृथिवीमनुशासति भवन्तोममात्मजं अतिमुग्धंयुवराजं द्रष्टुंकथमिच्छन्ति । मयिचिरंस्वसुखनिरभिलापतयाराज्यपरिपालनजागरूके तिष्ठतिममापत्यं पतिमभिलपथ कोवामेपराधइतिभावः ॥ २५ ॥ नतेकश्चिदपराधः किंतुतवपुत्रस्यगुणानामपराधइत्याहुः—तइति । ते राजानः । पौरजानपदैःसह पण्डितपामराविशेषेणसर्वैरेकमत्यंप्राप्येत्यर्थः । महात्मानं महाबुद्धिं तं गुणग्राहिणंदशरथं ऊचुः । हेनृपेतिसंबोधनेनतारतम्यज्ञतोक्ता । तेपुत्रस्य बहवःकल्याणागुणास्सन्ति तवतुनृपरिपालनमेकोगुणइतिभावः । रामप्रशंसयातस्यासूयासाभूदिति तेपुत्रस्येत्युक्तं । तदतिशयस्सर्वोपित्वत्संबन्धकृतइतिभावः । गुणाइतिबहुवचनेनैवबहुत्वेसिद्धेऽपिबहवइत्युक्त्याअसङ्ख्येयगुणत्वमुक्तं । पुत्रस्यगुणाइत्यनेन जन्मसिद्धत्वोक्त्यागुणानांस्वाभाविकत्वमुक्तं । कल्याणाः अखिलहेयप्रत्यनीकाः । आश्रयसंबन्धेनशुभीभूतावा "गुणाःसत्यज्ञानप्रभृतयउतत्वद्गततयाशुभीभूयंयाताः" इत्यभियुक्तोक्तेः । अत्र " स्वाभाविकानवधिकातिशयासङ्ख्येयकल्याणगुणगणः " इतियामुनाचार्यवचनमनुसन्धेयं ॥ २६ ॥ केतेगुणाइत्याकाङ्क्षायांतान्वक्तुंप्रतिजानीते—गुणानिति । हेदेव हेराजन् । गुणवतः प्रशस्तबहुगुणकस्य । देवकल्पस्य देवतुल्यस्य । धीमतः रामस्य । प्रियान् इष्टान् । आनन्दनान् प्रीतिजनकान् । तान् प्रसिद्धान् । कृत्स्नान् गुणान् । अद्य प्राप्तकाले । शृणु प्रवक्ष्यामः । गुणवतोगुणानित्यनेनगुणानामनारोपितत्वेनस्वाभाविकत्वमुक्तं । देवकल्पस्येत्यनेनगुणानांसंभावितत्वं । धीमतइत्यनेनगुणानांमध्येज्ञानस्यप्राधान्यमुक्तं । ब्राह्मणाआगतावसिष्ठोप्यागतइत्यत्रवसिष्ठस्येव । प्रियानित्यनेनकल्याणत्वं आनन्दनानित्यनेननिरतिशयत्वं कृत्स्नानित्यनेनासंख्येयत्वंच विवक्षितं । एतावत्पर्यन्तंकिमर्थंनोक्तमित्यपेक्षायांभवत्प्रश्नकालएवास्मदुक्तेरवसरइत्यद्येत्यनेनसूचयन्ति । प्रवक्ष्यामइतिप्रवचनोक्त्या भगवद्गुणोपदेशेधिकारितारतम्यंनास्ति अजानताजानद्भ्यः श्रोतव्यमेवेतिसूचितं । शृण्वित्यनेनरामगुणश्रवणेनिरतिशयानन्दमग्नोभविष्यसि । कथंचिन्मनःसंस्तभ्यश्रोतव्यमित्युक्तं ॥ २७ ॥ दिव्यैः अमानुषैः । गुणैः शौर्यवीर्यादिभिः । शक्रसमः इन्द्रसमः । सत्यपराक्रमः अमोघविक्रमः । इक्ष्वाकुभ्यः इक्ष्वाकुवंश्येभ्यः । सर्वेभ्योतिरिक्तः समधिकः । "अतिरिक्तःसमधिकः" इत्यमरः । शौर्यादिभिरितिशेषः । राज्ञोमनःप्रीणनायसंबोधयन्ति—

ति० उपक्रान्तकार्यसम्यग्जातं राजलोकएवत्वरतइत्यतिहृष्टः तंहर्षंगोपयन् तैरेववाचयितव्यमितिमनसिकृत्वाह—कथमिति ॥ २५ ॥

[पा०] १ क. ज. तेषांराजा. २ ङ. च. छ. झ. ट. तदिदंब्रूत. ३ ङ. छ. झ. ट. महाबलम्. ४ ङ. छ. झ. ट. महात्मानः. ५ च. छ. झ. ञ. ट. कल्याणगुणाः. ६ ङ. झ. ट. सन्तिसुतस्यते. ७ ज. नानन्ददान्. ख. नानन्दजननान्.

रामः सत्पुरुषो लोके सत्यधर्मपरायणः ॥ साक्षाद्रामाद्विनिर्वृत्तो धर्मश्चापि श्रिया सह ॥ २९ ॥
प्रजासुखत्वे चन्द्रस्य वसुधायाः क्षमागुणैः ॥ बुद्ध्या बृहस्पतेस्तुल्यो वीर्ये साक्षाच्छचीपतेः ॥३०॥
धर्मज्ञः सत्यसन्धश्च शीलवाननसूयकः ॥ क्षान्तः सान्त्वयिता श्लक्ष्णः कृतज्ञो विजितेन्द्रियः ॥३१॥
मृदुश्च स्थिरचित्तश्च सदा भव्योऽनसूयकः ॥ ३२ ॥
प्रियवादी च भूतानां सत्यवादी च राघवः ॥ बहुश्रुतानां वृद्धानां ब्राह्मणानामुपासिता ॥ ३३ ॥

विशांपतइति । विशां प्रजानां पते ॥२८॥ लोकेराम-एवसत्पुरुषः रिपूणामपिवत्सलइत्यर्थः । सत्यधर्मा-वेवपरायणं परमागतिर्यस्यसः सत्यधर्मपरायणः । सत्यधर्मैकनिरतइत्यर्थः । किंच धर्मः श्रिया तत्फल-भूतयासंपदासह । रामात् साक्षात् अव्यवधानेन विनिर्वृत्तः निष्पन्नः । धर्मार्थयोरितरनिरपेक्षतया-निर्वाहकइत्यर्थः ॥ २९ ॥ रामनिष्ठगुणसमुदायस्यै-कत्रासंभवादेकैकगुणयोगेनचन्द्रादीन्दृष्टान्तयन्ति— प्रजेति । प्रजासुखत्वे प्रजानांसुखकरत्वे । चन्द्रस्य तुल्यः । क्षमागुणविषये वसुधायाः भूमेः तुल्यः । बुद्ध्या बुद्ध्यसाधारणधर्मेण बृहस्पतेस्तुल्यः । वीर्ये-विषये शचीपतेः साक्षात् तुल्यः । "साक्षात्प्रत्यक्ष-तुल्ययोः" इत्यमरः ॥ ३० ॥ धर्मं सामान्यविशेष-रूपमशेषं जानातीतिधर्मज्ञः । सत्याअमोघा सन्धा-प्रतिज्ञा यस्यासौसत्यसन्धः । "सन्धाप्रतिज्ञामर्यादा" इत्यमरः । शीलवान् शीलंहिनाम महतोमन्दैः सहनै-रन्ध्र्येणसंश्लेषः तद्वान् । अनसूयकः गुणेषुदोषा-विष्करणमसूया तद्रहितः । बहुव्रीहौकप् । क्षान्तः क्षमावान् । क्षमाऽत्राश्रितापराधसहिष्णुत्वं । क्षमेरु-दित्त्वात्पक्षेनेट् । नकेवलंसहिष्णुरपराधिषु सान्त्व-यिता कुपितान्दुःखितांश्चप्रतिसान्त्ववादी । श्लक्ष्णः प्रियंवदः । "समौश्लक्ष्णप्रियंवदौ" इत्यमरः । कृतज्ञः स्वल्पमपिसकृत्कृतमुपकारंबहुतयाजानन्निल्यर्थः । वि-जितेन्द्रियः विषयचापलरहितः ॥ ३१ ॥ मृदुत्वं समाश्रितजनविश्लेषभीरुत्वं । चित्तस्थैर्यंनाम अति-सङ्कटेप्यङ्गीकृतविषयपरित्यागराहित्यं । सदा भव्यः कुशलः आश्रिताधीनोवा ॥ ३२ ॥ प्रियवादी "सत्यं ब्रूयात्प्रियंब्रूयान्नब्रूयात्सत्यमप्रियं" इत्युक्तरीत्याप्रिय-वादित्वेपिसत्यवादीत्यर्थः । प्रियवादीच चकारोऽव-धारणार्थः । प्रियवाद्येव नतुसत्यमप्यप्रियंवदतीत्यर्थः । "नब्रूयात्सत्यमप्रियं" इतिस्मरणात् । भूतानां भवन-मात्रोपाधिकानांसर्वेषांजनानां । सत्यवादी "सत्यंब्रू-यात्" इतिविहितसत्यवचनः । चकारेणप्रियमप्य-सत्यंनवदतीत्यवधार्यते । यद्वा सत्यमितिपरलोकहि-तमुच्यते "सत्येनलोकाञ्जयति" इतिप्रयोगानुसा-रात् । प्रियवचनस्यनिषिद्धसाधारणत्वाद्दृष्टविरोधि-प्रियंनवदतीत्यर्थः । राघवः रघुराक्षससंवादादिषु प्रियसत्यवचनंप्रसिद्धमितिकुलागतोधर्मइत्यर्थः । एता-दृशज्ञानवत्त्वंपुस्तकनिरीक्षणादिना पण्डितंमन्यतया-वा नभवतीत्याह—बहुश्रुतानामिति । बहुभ्यआचा-र्येभ्योबहुभिःशास्त्रैर्बहुधाबहुप्रकारेण श्रुतं येषामस्ती-तितेषां । वृद्धानां शीलवयोवृद्धानां । ब्राह्मणानां उ-त्कलक्षणेपुक्षत्रियेपुसत्स्वपिब्राह्मणानेवज्ञानार्थमुपास्त-इत्यर्थः । प्रियवादी ग्रीष्मघर्मसंतप्तस्थलेप्रवर्षीबलाहक-इवसुशीतलंवचनंवक्तीत्यर्थः । किमीदृशवचनंदिव्या-न्तःपुरस्य मातापित्रादीनां वसिष्ठादीनांवा नेत्याह— भूतानां सत्तायोगिसकलपदार्थानांच प्रियवादी । किंसर्वत्रप्रियमेववदति नेत्याह—सत्यवादी भूतहिता-दृष्टार्थवचनइत्यर्थः । प्रियहितवादीतिभावः । किमिदं विरुद्धद्वयमघटितघटनासामर्थ्यादित्यपेक्षायां नतथा किंतु कुलप्रभावादित्याह—राघवइति । एवंविधगुणः किंसगर्वोवर्तते नेत्याह—बह्विति । संभावितगुणैरल्प-स्सन्पुनरप्यतिशयायज्ञानिनांप्राङ्गणंगत्वातिष्ठतीत्यर्थः । यत्किंचि छ्रवणमात्रेणतृप्तानांज्ञानादिवृद्धानां "सर्व-तःसारमादद्यात्पुष्पेभ्यइवषट्पदः" इत्युक्तरीत्या बहु-भ्यःसारग्रहणंकृतवानित्यर्थः । ब्राह्मणानां "सावि-द्यायाविमुक्तये" इत्युक्तब्रह्मविद्यानिष्ठानां । नतु "वि-द्यान्याशिल्पनैपुणम्" इत्युक्तान्यविद्यानिष्ठानाम् । उपासिता तद्गृहंगत्वाऽनुवर्तयिता । नतुस्वगृहेतानानी-

ती० अनसूयकः नविद्यतेअसूयाअन्यविषयिणीयस्यसः । उत्तरत्र नविद्यतेअसूयास्वविषयिणी अन्यकृता[illegible] नपुनरुक्तिः ॥ ३१ ॥ शि० बहुश्रुतादित्रयाणां उपासिता सत्कारकारी ॥ ३३ ॥

[पा०] १ क. सत्यधर्मपरायणः. ङ. छ. झ. ट. सत्यस्सत्यपरायणः.

तेनास्येहातुला कीर्तिर्यशस्तेजश्च वर्धते ॥ देवासुरमनुष्याणां सर्वास्त्रेषु विशारदः ॥ ३४ ॥
सम्यग्विद्याव्रतस्नातो यथावत्साङ्गवेदवित् ॥ गान्धर्वे च भुवि श्रेष्ठो बभूव भरताग्रजः ॥ ३५ ॥
कल्याणाभिजनः साधुरदीनात्मा महामतिः ॥ द्विजैरभिविनीतश्च श्रेष्ठैर्धर्मार्थनैपुणैः ॥ ३६ ॥
यदा व्रजति संग्रामं ग्रामार्थे नगरस्य वा ॥ गत्वा सौमित्रिसहितो नाविजित्य निवर्तते ॥ ३७ ॥
संग्रामात्पुनरागम्य कुञ्जरेण रथेन वा ॥ पौरान्स्वजनवन्नित्यं कुशलं परिपृच्छति ॥ ३८ ॥
पुत्रेष्वग्निषु दारेषु प्रेष्यशिष्यगणेषु च ॥ निखिलेनानुपूर्व्याच्च पिता पुत्रानिवौरसान् ॥ ३९ ॥
शुश्रूषन्ते च वः शिष्याः कच्चित्कर्मसु दंशिताः ॥ इति नः पुरुषव्याघ्रः सदा रामोऽभिभाषते ॥४०॥
व्यसनेषु मनुष्याणां भृशं भवति दुःखितः ॥ उत्सवेषु च सर्वेषु पितेव परितुष्यति ॥ ४१ ॥
सत्यवादी महेष्वासो वृद्धसेवी जितेन्द्रियः ॥ स्मितपूर्वाभिभाषी च धर्मं सर्वात्मना श्रितः ॥ ४२ ॥
सम्यग्योक्ता श्रेयसां च न विगृह्यकथारुचिः ॥ उत्तरोत्तरयुक्तौ च वक्ता वाचस्पतिर्यथा ॥ ४३ ॥

यश्रोता ॥३३॥ वृद्धोपासनसिद्धान्गुणानाह—तेनेति। तेन समृद्धोपासनेन । कीर्तिः औदार्यादिगुणनिमित्ताप्रथा । यशः पराक्रमादिनिबन्धनाप्रथा । यद्वा कीर्तिः प्रथा । यशः तत्कारणबलादानादिकं । तेजः पराभिभवनसामर्थ्यं ॥ ३४ ॥ विद्याव्रतस्नातः "वेदमधीत्यस्नायात्" इतिस्मृतिप्रक्रिययानिखिलवेदाध्ययनव्रताचरणानन्तरभाविस्नानकर्मयुक्तः । सम्यक् गुरुकुलवासाद्यङ्गसहिततयासाङ्गवेदवित् । "शिक्षाव्याकरणंछन्दोनिरुक्तंज्यौतिषंतथा । कल्पश्चेतिव्याहृतानिवेदाङ्गानिमनीषिभिः" इत्युक्ताङ्गसहितवेदार्थज्ञः । यथावत् यथासंप्रदायं । गान्धर्वेच संगीतशास्त्रेपि । सामगानोपयुक्तत्वादितिभावः ॥ ३५ ॥ कल्याणाभिजनः परिशुद्धोभयवंशः । साधुः स्वयंपरिशुद्धः ।अदीनात्मा क्षोभहेतुष्वप्यक्षोभ्यान्तःकरणः। धर्मार्थनैपुणैः धर्मार्थप्रतिपादनकुशलैः । स्वार्थेऽण्प्रत्ययः । श्रेष्ठैः अभिजनविद्यावृत्तयुक्तैः । अभिविनीतः सर्वतः सुशिक्षितः ॥ ३६ ॥ ग्रामार्थइत्यत्र ग्रामेत्यविभक्तिकनिर्देशः । ग्रामस्यनगरस्यवार्थे प्रयोजनेनिमित्ते । नाविजित्य निवर्ततइत्यभिधानान् रामस्यसुबाहुमारीचविषयेजेतृत्ववदन्यत्रापिशत्रुविषयेजेतृत्वमभूदित्यवगम्यते ॥३७—३८॥ कुशलप्रश्नप्रकारमाह—पुत्रेष्विति । प्रेष्यः भृत्यः । निखिलेन कात्स्न्र्येन । आनुपूर्व्यात् प्रधानक्रमेण । पृच्छतीत्यनुषज्यते ॥३९॥ दंशिताः सन्नद्धाः "सन्नद्धोवर्मितःसज्जोदंशितः" इत्यमरः ॥ ४० ॥ सत्पुरुषसंभावितगुणानभिधायरामस्यसाधारणगुणानाह—व्यसनेष्विति । मनुष्याणां दिव्यान्तःपुरस्थितमातृप्रभृतीनांनभवति किंतुमनुष्याणां आढ्यदरिद्रद्विजादितारतम्यानादरेणमनुष्यजात्याक्रान्तानां । व्यसनेषु अल्पानल्पविचारमन्तरेणव्यसनपदार्थेषु । भृशं व्यसनवतोयादृशंतादृशंन किंतुपङ्कमग्नगजइवस्वमाहात्म्यानुगुणंयावत्सत्ताकंच दुःखितोभवति । नतुदिनक्रमेणविस्मरति । इदंदुःखंमत्परिपालनवैगुण्येनखल्वागतमितिनितरांदुःखितोभवति । "ह्रीरेषातुममातुला" इतिवक्ष्यति । उत्सवेषु पुत्रजननादिषु । सर्वेषु पुत्रीजननाद्यनादरविरहेणद्वारिचूतकिसलयमालाबन्धनमुपधीकृत्यप्रवृत्तेष्वित्यर्थः । पितेव पुत्रादीनांपुत्राद्युत्सवेषुयःपितुःपरितोषोजायते सद्विविधः । पामराणामर्थलाभलौकिकसहायनिमित्तः पण्डितानांस्वोत्तारकत्वनिमित्तश्च । एवमुभयविधपरितोषोरामस्याप्यस्ति "प्रनृत्यन्तिपितामहाः । यद्येकोपिगयांव्रजेत्" इतिवत् । "मनुष्याणांसहस्रेषुकश्चिद्यततिसिद्धये । बहुजन्मसहस्रान्तेदिष्ट्यायस्तुप्रपद्यते" इतिप्रत्याशासंभवात् । अत्रपरिशब्दोवीप्सायांवर्तते । अत्रापिभृशमित्यनुवर्तते ॥ ४१ ॥ सत्यवादी अतिसङ्कटावस्थायामपिसत्यवचनशीलः । सर्वात्मनाधर्मश्रितः अतिदुर्घटदशायामपिधर्मंनत्यजतीत्यर्थः ॥४२॥ श्रेयसांसम्यग्योक्ता संपादकः । नविगृह्यकथारुचिः "नविगृह्यकथांकुर्यात्" इतिनिषिद्धयोर्जल्पवितण्डयो-

ति० देवासुरमनुष्याणामितिनिर्धारणेषष्ठी ॥ ३४ ॥ ति० नविगृह्यकथारुचिः विग्रहोद्दृथाकलहस्तत्कुत्र जल्पवितण्डादिकथा·

[पा०] १ क. महाद्युतिः. २ घ. यदाभजति. ३ ख. नोऽविजित्य. ४ ङ. झ. ञ. ट. नुपूर्व्याच. ५ क. ङ. च. ञ. ट. कच्चिद्धर्मेषुदंशिताः. झ. ठ. कच्चिद्धर्मसु. ज. कच्चित्कर्मसु. ६ ख. नविरुद्धकथारुचिः. झ. नविगह्यकथा. ख. युक्तीनां.

सुभ्रूरायतताम्राक्षः साक्षाद्विष्णुरिव स्वयम् ॥ रामो लोकाभिरामोऽयं शौर्यवीर्यपराक्रमैः ॥ ४४ ॥
प्रजापालनतत्त्वज्ञो नरागोपहतेन्द्रियः ॥ शक्तस्त्रैलोक्यमप्येको भोक्तुं किंनु महीमिमाम् ॥ ४५ ॥
नास्य क्रोधः प्रसादश्च निरर्थोऽस्ति कदाचन ॥ हन्त्येव नियमाद्वध्यानवध्ये न च कुप्यति ॥ ४६ ॥
युनक्त्यर्थैः प्रहृष्टश्च तमसौ यत्र तुष्यति ॥ ४७ ॥
शान्तैः सर्वप्रजाकान्तैः प्रीतिसंजननैर्नृणाम् ॥ गुणैर्विरुरुचे रामो दीप्तः सूर्य इवांशुभिः ॥ ४८ ॥
तमेवंगुणसंपन्नं रामं सत्यपराक्रमम् ॥ लोकपालोपमं नाथमकामयत मेदिनी ॥ ४९ ॥
वत्सः श्रेयसि जातस्ते दिष्ट्याऽसौ तव राघव ॥ दिष्ट्या पुत्रगुणैर्युक्तो मारीच इव काश्यपः ॥५०॥
बलमारोग्यमायुश्च रामस्य विदितात्मनः ॥ देवासुरमनुष्येषु सगन्धर्वोरगेषु च ॥ ५१ ॥
आशंसते जनः सर्वो राष्ट्रे पुरवरे तथा ॥ आभ्यन्तरश्च बाह्यश्च पौरजानपदो जनः ॥५२॥
स्त्रियो वृद्धास्तरुण्यश्च सायं प्रातः समाहिताः ॥ सर्वान्देवान्नमस्यन्ति रामस्यार्थे यशस्विनः ॥ ५३ ॥

निवृत्तरागः । निवृत्तरागत्वंकिमवक्तृत्वान्नेत्याह—उत्तरेति ॥ ४३ ॥ उक्तकल्याणगुणानुरूपाकारसौभाग्यमाह—सुभ्रूरिति । शूरस्यभावःशौर्यं । तच्चमरणनिर्भयत्वं । "शूरोमरणनिर्भयात्" इतिवचनात् । वीर्यं स्वयमविकृतःसन्परान्विविधमीरयतिविद्रावयतीतिवीरः तस्यभावोवीर्यं । दुष्प्रवेशचक्रव्यूहादिविशिष्टसैन्ययुक्तान्देवासुरानपियेनोत्साहेनाक्रमति सपराक्रमः ॥ ४४ ॥ "रामोराज्यमुपासित्वा" इत्युक्तरीत्याप्रजापालनतत्वज्ञः । नरागोपहतेन्द्रियः । इन्द्रियचापलरहितइति नसमासः । भोक्तुं पालयितुं ॥४५॥ नियमात् नियमेन । वध्यान् शास्त्रतोवध्यान् । हन्त्येव । अवध्ये शास्त्रतोऽवध्येविषये ॥ ४६ ॥ यत्र यस्मिन्पुरुषे । तुष्यति । तं तुष्टोसौ । अर्थैः अभिलषितपदार्थैः । युनक्ति योजयति ॥ ४७ ॥ शान्तैः शमप्रधानैः । सर्वप्रजानां कान्तैः काम्यमानैः । सर्वजनभोग्यैरित्यर्थः । अतएव प्रीतिसंजननैः । दान्तइतिपाठे यमनियमादिरूपतपःक्लेशसहः । "तपःक्लेशसहोदान्तः" इत्यमरः । दीप्तः ग्रीष्मादिकालिकः ॥ ४८ ॥ मेदिनी मेदिनीस्थजनता ॥ ४९ ॥ तव दिष्ट्या भाग्येन । श्रेयसि श्रेयोनिमित्तं । वत्सः पुत्रोजातः । पुत्रगुणैर्युक्तः पुन्नाम्नोनरकात्त्रायतइतिव्युत्पत्तिसिद्धपितृतारकगुणैर्युक्तः । मारीचः मरीचेःपुत्रः । काश्यपः कश्यपगोत्रः ॥ ५० ॥ श्लोकद्वयमेकान्वयं । देवासुरमनुष्येषुसर्वोजनः राष्ट्रे इतरराष्ट्रे । पुरवरे इतरपुरवरेच । वर्तमानोजनः । आभ्यन्तरः अन्तःपुरचारीजनः । पौरजानपदः स्वपुरस्वजनपदस्थोजनश्च । विदितात्मनः प्रसिद्धशीलस्य । रामस्य बलादिकमाशंसते प्रार्थयते । मनुष्यशब्दोत्रदेवादिसाहचर्यादपिवचनः ॥५१–५२॥ स्त्रियः अतिगंभीरतयास्वहृदयंव्यक्तमनाविष्कुर्वन्त्यः । वृद्धाः करणपाटवरहिताः । अत्यलसतयासर्वत्रानादरंकुर्वन्त्यः । तरुण्यः यौवनमदान्धतया विवेकशून्याः । सायंप्रातरित्युपलक्षणं । त्रिसन्ध्यमित्यर्थः । तेनमङ्गलाशासनकालनियमोक्तिः । समाहिताः सावधानाः । अनेनरामगुणगृहीततयास्वारसिकप्रेमकत्वेनसमनस्कत्वमुक्तं । सर्वान्देवानिति प्रेमकलुषिततयान्यूनाधिकविभागमन्तरेणलौकिकवैदिकविभागमन्तरेणच नमस्यन्तीति रामरक्ष्यानेवदेवात्रामरक्षकान्मन्यन्तइतिप्रेमान्ध्यकाष्ठादर्शिता । रामस्यार्थे रामस्यबलारोग्यादिप्रयोजनसिद्ध्यैवस्वप्रयोजनंनान्तरीयकमितितस्यैवप्रयोजनमुद्दिश्य । यशस्विनः देवतान्तरनमस्कारस्यरामप्रयोजनपर्यवसितत्वात् रामप्रेमपारवश्येनकृतत्वाच्च स्वरूपविरुद्धदेवतान्तरभजन-

---

रुचिर्यथाप्राकृतस्तथानेत्यर्थः ॥ ४३ ॥ ति० असौतेवत्सःदिष्ट्या अस्मद्भाग्येन । श्रेयसि प्रजारक्षणरूपेसमर्थोजातः । किंच असौ राघवः । तवदिष्ट्या भाग्येन मरीचिप्रजापतेःपुत्रःकश्यपइवपुत्रगुणैर्युक्तोजातइत्यर्थः ॥ ५० ॥ इतिद्वितीयस्सर्गः ॥ २ ॥

[पा०] १ क—ट. पालनसंयुक्तो. २ क. ख. झ. ट. पहितेन्द्रियः. ३ क—ट. मप्येषः. ४ क. घ—छ. झ. ञ. ट. हन्त्येष. ५ ख. द्वध्यमवध्ये. ङ. च. छ. झ. ञ. ट. द्वध्यानवध्येषुनकुप्यति. ग. द्वध्यंयदेषखलुकुप्यति. ख. यस्यैषखलुकुप्यति. क. मवध्येचनकुप्यति. ६ ख. मनसायत्रतुष्यति. ७ ङ. च. छ. ट. दान्तैः. ८ ख. गुणैर्विराजते. ९ झ. तवराघवः. १० क. गन्धर्वपुरगेषुच. ११ क. ख. आशंसन्तेजनास्सर्वे. १२ क—घ. च. छ. ज. अभ्यन्तरश्च. १३ च. झ. ञ. ट. मनस्विनः.

ते[1]षामायाचितं देव त्वत्प्रसादात्समृध्यताम् ॥ ५४ ॥
राममिन्दीवरश्यामं सर्वशत्रुनिबर्हणम् ॥ पश्यामो यौवराज्यस्थं तव राजोत्तमात्मजम् ॥ ५५ ॥
तं देवदेवोपममात्मजं ते सर्वस्य लोकस्य हिते निविष्टम् ॥
हिताय नः क्षिप्रमुदारजुष्टं मुदाऽभिषेक्तुं वरद त्वमर्हसि ॥ ५६ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे द्वितीयः सर्गः ॥ २ ॥

तृतीयः सर्गः ॥ ३ ॥

दशरथेनवसिष्ठंप्रतिरामस्ययौवराज्याभिषेकसंभारसंभरणनिवेदनेतेनसुमन्त्रादीन्प्रतितन्निदेशकरणम् ॥ १ ॥ ततोदशरथेन स्वाज्ञयासुमन्त्रानीतंरामंप्रतियौवराज्याभिषेकनिश्चयनिवेदनपूर्वकंहितोपदेशः ॥ २ ॥ रामसुहृद्भिःकौसल्यांप्रतिपुत्रस्ययौवराज्यप्राप्तिरूपप्रियवृत्तान्तनिवेदनम् ॥ ३ ॥ रामेणहितोपदेशग्रहणानन्तरं दशरथाभिवादनपूर्वकं स्वगृहगमनम् ॥ ४ ॥

तेषामञ्जलिपद्मानि प्रगृहीतानि सर्वशः ॥ प्रतिगृह्याब्रवीद्राजा तेभ्यः प्रि[2]यहितं वचः ॥ १ ॥
अहोस्मि परमप्रीतः प्रभावश्चा[3]तुलो मम ॥ यन्मे ज्येष्ठं प्रियं पुत्रं यौवराज्यस्थमिच्छथ ॥ २ ॥
इति प्र[4]त्यर्च्य तान्राजा ब्राह्मणानिदमब्रवीत् ॥ वसिष्ठं वामदेवं च तेषामेवोपशृण्वताम् ॥ ३ ॥
चैत्रः श्रीमानयं मासः पुण्यः पुष्पितकाननः ॥ यौवराज्याय रामस्य सर्वमेवोपकल्प्यताम् ॥ ४ ॥
राज्ञस्तूपरते वाक्ये जनघोषो महानभूत् ॥ शनैस्तस्मिन्प्रशा[5]न्ते च जनघोषे ज[6]नाधिपः ॥
वसिष्ठं मुनिशार्दूलं राजा वचनमब्रवीत् ॥ ५ ॥

रूपमयंशोनास्तीत्यर्थः ॥ ५३ ॥ आयाचितं रामाभिषेकरूपाभिमतार्थप्रार्थनं । समृध्यतां सफलंभवतु ॥ ५४ ॥ इन्दीवरश्याममिति समुदायशोभोक्ता । सर्वशत्रुनिबर्हणमिति स्वसौन्दर्यातिशयदर्शनमग्नचित्तत्वरूपकामादिशत्रुनिबर्हणमित्यर्थः । पश्यामः द्रक्ष्यामः । "वर्तमानसामीप्येवर्तमानवद्वा" इतिभविष्यदर्थेलट् ॥ ५५ ॥ देवेतिसंबुद्धिः । देवदेवः विष्णुः तत्सदृशमितिवा । निविष्टं दत्तावधानमित्यर्थः । उदारजुष्टं औदार्ययुक्तं । भावप्रधानोनिर्देशः । उदारैर्जुष्टंसेवितमितिवा ॥ ५६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीतांबराख्याने अयोध्याकाण्डव्याख्याने द्वितीयःसर्गः ॥ २ ॥

एवं निश्चिताभिषेकस्यसंभारसंभरणप्रवृत्तिस्तृतीये । प्रगृहीतानि प्रकर्षेणगृहीतानि । शिरसिबद्धानीत्यर्थः । अञ्जलिरूपाणिपद्मानि अञ्जलिपद्मानि । अञ्जलीनांपद्ममुकुलाकारत्वादत्रत्यपद्मशब्दःपद्ममुकुलपरः । प्रतिगृह्य वीक्षणवचनप्रत्यञ्जलिभिर्यथायोगमञ्जलीनांप्रतिग्रहः ॥ १ ॥ अहोस्मीतिसन्धिरार्षः ॥ २ ॥ राजा दशरथः । इति पूर्वोक्तरीत्या । तान् प्रार्थनापरान् । ब्राह्मणान् । अभ्यर्च्य मधुरवचनैःसंमान्य । तेषामेवोपशृण्वतां तेषुउपशृण्वत्सुसत्स्वेव । वसिष्ठंवामदेवंचेदमब्रवीत् ॥ ३ ॥ अभिषेकविषयनिरतिशयादरेणतदुचितकालंप्रशंसति—चैत्रइति । चैत्रः यथेतरेभ्यःप्रधानभूतोरामःतथामासान्तरेभ्योयंमासः । श्रीमान् यथासर्वसुखावहत्वाद्रामःसर्वेषांराजा तथासर्वसुखकरत्वादसौसर्वमासानांराजा । अयंमासः अभिषेकमनोरथसमयएवसन्निहितः । अयंमासः अवतारहेतुरेवाभिषेकहेतुः । पुण्यः रमणीयः पुण्यवर्धनोवा । पुष्पितकाननः अस्मत्प्रयत्नालंकृतनगरवैलक्षण्येनस्वयमेवालंकृतवनः । यद्वा रामस्यकनककिरीटधारणसमये स्वयंकुसुममुकुटधारीवनप्रदेशोजातः॥४॥ वसिष्ठशब्दोवामदेवस्याप्युपलक्षणपरः । वसिष्ठंवामदेवमितिद्वयोःप्रस्तुतत्वात् । एवंव्यादिश्यविप्रौतावित्युपरिवक्ष्यमाणत्वाच्च । प्राधान्याद्वसिष्ठस्योपादानं । जनघोषः चिरप्रार्थितरामाभिषेकविषयोस्मन्मनोरथः

[पा०] १ ङ. छ. झ. तेषांतथाचितं. २ ख. प्रियमिदं. ३ ख. श्चातुलोमहान्. ४ झ. इतिप्रत्यर्चितान्. ५ ख. ग. प्रशान्तेतु. ६ क. च. ञ. नराधिपः.

अभिषेकाय रामस्य यत्कर्म सपरिच्छदम् ॥ तदद्य [1]भगवन्सर्वमाज्ञापयितुमर्हसि ॥ ६ ॥
तच्छ्रुत्वा भूमिपालस्य वसिष्ठो [2]द्विजसत्तमः ॥ आदिदेशाग्रतो राज्ञः स्थितान्युक्तान्कृताञ्जलीन् ॥७॥
सुवर्णादीनि रत्नानि बलीन्सर्वौषधीरपि ॥ [3]शुक्लमाल्यांश्च लाजांश्च पृथक्च मधुसर्पिषी ॥ ८ ॥
अहतानि च वासांसि रथं सर्वायुधान्यपि ॥ [4]चतुरङ्गबलं चैव गजं च शुभलक्षणम् ॥ ९ ॥
चामरव्यज[5]ने श्वेते ध्वजं छत्रं च पाण्डुरम् ॥ शतं च शातकुम्भानां कुम्भानामग्निवर्चसाम् ॥ १० ॥
हिरण्य[6]शृङ्गमृषभं समग्रं व्याघ्रचर्म च ॥ उपस्थापयत प्रातर[7]ग्न्यगारं महीपतेः ॥ ११ ॥
य[8]च्चान्यत्किंचिदेष्टव्यं तत्सर्वमुपकल्प्यताम् ॥ १२ ॥
अन्तःपुरस्य द्वाराणि सर्वस्य नगरस्य च ॥ चन्दनस्रग्भिरर्च्यन्तां धूपैश्च घ्राणहारिभिः ॥ १३ ॥
प्रशस्त[9]मन्नं गुणवद्दधि क्षीरोपसेचनम् ॥ द्विजानां [10]शतसाहस्रे यत्प्रकाममलं भवेत् ॥ १४ ॥
सत्कृत्य द्विजमुख्यानां श्वः प्रभाते प्रदीयताम् ॥ घृतं दधि च लाजाश्च दक्षिणाश्चापि पुष्कलाः ॥१५॥
सूर्येऽभ्युदितमात्रे श्वो भविता स्वस्तिवाचनम् ॥ ब्राह्मणाश्च निमन्त्र्यन्तां कल्प्यन्तामासनानि च ॥
आ[11]वर्ध्यन्तां पताकाश्च राजमार्गश्च सिच्यताम् ॥ १६ ॥
सर्वे च ता[12]लावचरा गणिकाश्च स्वलंकृताः ॥ कक्ष्यां द्वितीयामासाद्य तिष्ठन्तु नृपवेश्मनः ॥ १७ ॥
देवायतनचैत्येषु [13]सान्नभक्षाः सदक्षिणाः ॥ उपस्थापयितव्याः स्युर्माल्ययोग्याः पृथक्पृथक् ॥ १८ ॥

फलितइत्येवंरूपः ॥ ५ ॥ सपरिच्छदं सोपकरणं ॥ ६ ॥ युक्तान् राजकार्यनियुक्तान् सुमन्त्रादीनधिकारिणइतियावत् ॥ ७ ॥ बलीन् उपहारान् । "करोपहारयोःपुंसिबलिः" इत्यमरः । ओषधयः व्रीहियुद्गादयः । शुक्लमाल्यांश्चेतिलिङ्गव्यत्ययआर्षः । पृथक् पृथक्पात्रगृहीते । मधुसर्पिषी क्षौद्रघृते ॥८॥ अहतानि "ईषद्धौतंनवंश्वेतंसदशंयन्नधारितं । अहतंतद्विजानीयाद्दैवेपित्र्येचकर्मणि" इत्युक्तजलप्रक्षालनादिगुणयुक्तानि ॥९॥ चामरव्यजने चामररूपव्यजने । शातकुम्भानां सौवर्णानां ॥ १० ॥ हिरण्यशृङ्गं हिरण्यालंकृतशृङ्गं । समग्रं संपूर्णावयवं । उपस्थापयत प्रापयत । अग्न्यगारं अग्निहोत्रगृहं ॥११॥ अन्यत् गन्धपुष्पादिकं । एष्टव्यं अपेक्षणीयं ॥ १२ ॥ अन्तःपुरस्य राजगृहस्य । सर्वस्यनगरस्यद्वाराणि सर्वाणिनगरद्वाराणीत्यर्थः । घ्राणहारिभिः घ्राणद्वारापुरुषाकर्षकैः ॥१३॥ सहस्रमेवसाहस्रं । शतसाहस्रशब्दोपरिमितवचनः । विषयसप्तमी । अलं पर्याप्तं । "अलंभूषणपर्याप्तिशक्तिवारणवाचकं" इत्यमरः । शतसाहस्रविषयेप्रकामं अत्यर्थं । पर्याप्तं प्राशस्त्यादिगुणविशिष्टं । यदन्नंभवेत्तत्संपाद्यतामित्यर्थः ॥ १४ ॥ द्विजमुख्यानां द्विजमुख्येभ्यः । सत्कृत्यदीयतां तदन्नमितिशेषः । पुष्कलाः संपूर्णाः ॥ १५ ॥ सूर्येअभ्युदितमात्रे सूर्योदयानन्तरमेव । श्वः परेद्युः । स्वस्तिवाचनंभविता । तदर्थंब्राह्मणाश्चनिमन्त्र्यन्तां आहूयन्तां । आसनानि तेषामितिशेषः । आवध्यन्तां प्रतिगृहमितिशेषः ॥१६॥ तालैरवचरन्तिजीवन्तीतितालावचराः नर्तकादयः । कक्ष्यांद्वितीयामिति । अन्तःकक्ष्यायामभिषेकप्रवृत्तेस्तत्रचब्राह्मणैर्वस्तव्यत्वादितिभावः ॥ १७ ॥ देवायतनचैत्येषु देवगृहेषु चतुष्पथेषुचेत्यर्थः । अन्नभक्षैःसह्वर्तन्तइतिसान्नभक्षाः । अन्नमोदकहस्ताइतियावत् । माल्यप्रदानयोग्याः माल्ययोग्याः । मध्यमपदलोपिसमासः माल्यार्थसाधनानि । पृथक्पृथगिति । देवा-

---

ति० अहतानि सदशानि तदानीमेवतन्तुवाययन्त्रादुद्धृतानि ॥ ९ ॥ ति० शतसाहस्रं शतसाहस्रंप्रति ॥ १४ ॥ ती० चैत्येषु रथ्यावृक्षेषुच । ति० माल्ययोग्याः मालामर्हतीतिमाल्यमर्चनंतद्योग्याःगन्धपुष्पादयः । देवायतनचैत्ययोःपृथक्पृथगुपस्थापयि-

[पा०] १ ख. ग. ज. भगवान्सर्वं. २ ङ. छ. झ. ट. मुनिसत्तमः. ३ क. ख. ङ—ट. शुक्लमाल्यानि. ४ क. ग. ञ. चतुरङ्गबलंचैव. ५ ङ. छ. झ. ट. व्यजनेचोभे. घ. व्यजनेचैव. ६ क. च. छ. ज. ञ. शृङ्गवृषभं. ७ ङ. च. छ. झ. रम्यागारे. ट. रम्यागारे. क. घ. ज. ञ. रम्यागारं. ८ इदमर्धं ङ. छ. झ. पुस्तकेषु उपस्थापयतेत्यर्धात्पूर्वंदृश्यते. ९ क. मन्नंघृतवत्. घ. ज. विधिवत्. १० क. ख. ङ. च. छ. झ. ञ. ट. शतसाहस्रं. ११ घ. आविध्यन्तां. १२ ख. तालवचनाः. घ. तालचतुराः. ङ. च. छ. झ. ञ. तालापचराः. १३ घ. ङ. झ. ञ. सान्नभक्ष्याः.

[1]दीर्घासिवद्धा योधाश्च संनद्धा मृष्टवाससः ॥ [2]महाराजाङ्कणं सर्वे प्रविशन्तु महोदयम् ॥ १९ ॥
एवं व्यादिश्य [3]विप्रौ तौ क्रियास्तत्र [4]सुनिष्ठितौ ॥ चक्रतुश्चैव यच्छेषं पार्थिवाय निवेद्य च ॥ २० ॥
कृतमित्येव चाब्रूतामभिगम्य जगत्पतिम् ॥ [5]यथोक्तवचनं प्रीतौ [6]हर्षयुक्तौ [7]द्विजर्षभौ ॥ २१ ॥
ततः सुमन्त्रं द्युतिमान्राजा वचनमब्रवीत् ॥ रामः कृतात्मा भवता शीघ्रमानीयतामिति ॥ २२ ॥
स तथेति प्रतिज्ञाय सुमन्त्रो राजशासनात् ॥ [8]रामं तत्रानयांचक्रे रथेन रथिनां वरम् ॥ २३ ॥
अथ तत्र [9]समासीनास्तदा दशरथं नृप ॥ प्राच्योदीच्याः प्रतीच्याश्च दाक्षिणात्याश्च भूमिपाः ॥२४॥
[10]म्लेच्छाचार्याश्च ये चान्ये वनशैलान्तवासिनः ॥ उपासांचक्रिरे सर्वे तं [11]देवा इव वासवम् ॥२५॥
तेषां मध्ये स राजर्षिर्मरुतामिव वासवः ॥ प्रासादस्थो [12]रथगतं ददर्शायान्तमात्मजम् ॥ २६ ॥
गन्धर्वराजप्रतिमं लोके विख्यातपौरुषम् ॥ दीर्घबाहुं महासत्वं मत्तमातङ्गगामिनम् ॥ २७ ॥
चन्द्रकान्ताननं राममतीव प्रियदर्शनम् ॥ रूपौदार्यगुणैः पुंसां दृष्टिचित्तापहारिणम् ॥ २८ ॥

यतनचैत्ययोरितिशेषः । ब्राह्मणैर्देवताःपूजनीयाइत्यर्थः ॥ १८ ॥ दीर्घासिवद्धाः बद्धदीर्घासयः । "प्रहरणार्थेभ्यःपरेनिष्ठासप्तम्यौभवतः" इतिनिष्ठायाःपरनिपातः । महानुदयोरामाभिषेकरूपाभ्युदयोयस्मिन्तं महोदयं ॥ १९ ॥ विप्रौ वसिष्ठवामदेवौ । क्रियाः पुरोहितकर्तव्याः । तत्र राजगृहे । व्यादिश्य आज्ञाप्य । यच्छेषं दासीपरिजनाद्यानयनं तदपि पार्थिवाय राज्ञे । निवेद्य चक्रतुः ॥ २० ॥ अथ जगत्पतिं राजानं । अभिगम्य यथोक्तवचनं उक्तवचनमनतिक्रम्य । कृतमिति प्रीतौ हर्षयुक्तौ । प्रीतिर्मनोगतोहर्षः । मानसप्रीतिजन्यरोमाञ्चादिशरीरविकारोहर्षः । तद्युक्तौ । पूर्वश्लोकेनिवेद्येत्यनेनशेषसंपादनविषयनिवेदनमुक्तं अब्रूतामितिपूर्वोक्तसकलसिद्धिविषयमितिनपुनरुक्तिः ॥ २१ ॥ कृतात्मा सुशिक्षितबुद्धिः । शीघ्रागमनहेतुरयं । "आत्माजीवेधृतौबुद्धौ" इत्यमरः ॥ २२—२३ ॥ अथ सुमन्त्रनिर्गमनानन्तरं । तत्र प्रासादे । समासीनाः सम्यगुपविष्टाः । प्राच्याइत्यादौ "द्युप्राक्" इत्यादिनायदादयःशैषिकाभवार्थाः । म्लेच्छाचार्याः म्लेच्छप्रभवः । अन्तशब्दःप्रदेशवाची । प्राच्येत्यादिनाशैलान्तवासिनइत्यन्तेन मूलभृत्यश्रेणिसुहृद्द्विषदाटविकमितिषड्विधबलोपास्यत्वं सार्वभौमचिह्नमुक्तं ॥ २४—२६ ॥ गन्धर्वराजप्रतिमं भोगस्रोतःप्रावण्यवेषसौन्दर्येषु गन्धर्वराजौपम्यं । न केवलंभोगधारारसिकत्वेन वीररसानभिज्ञत्वमित्याह—लोकेविख्यातपौरुषं । पौरुषोपयुक्तसंहननवत्त्वमाह—दीर्घबाहुमिति : नकेवलंशिरीषपुष्पसुकुमारबाहुत्वेनान्तस्साररराहित्यमित्याह—महासत्वमिति । तदनुगुणगतिविशेषमाह—मत्तमातङ्गगामिनमिति । सगर्वसलीलगमनंमदालसगमनंवाविवक्षितं ॥ २७ ॥ चन्द्रकान्ताननं चन्द्राननमित्युक्तेप्याह्लादकत्वादिसिद्धेर्निरतिशयाह्लादकत्वंद्योतयितुंकान्तशब्दः । चन्द्रात्कान्ताननमितिविग्रहः । अनेनावयवशोभावत्त्वमुक्तं । रामं विग्रहगुणैःस्वरूपगुणैश्चरमयन्तं । समुदायशोभावत्त्वमाह—अतीवप्रियदर्शनमिति । निरन्तरदर्शनेपि प्रतिक्षणंनवनवीभूतदर्शनं । रूपौदार्यगुणैः रूपं विग्रहः । औदार्यं अनुभवितृभ्योनुभवदानं । "यआत्मदाबलदा" इतिश्रुतेः । गुण्यतेसदानुसन्धीयतइति गुणः । "गुणस्त्वावृत्तिशब्दादिज्येन्द्रियामुख्यतन्तुषु" इतिनिघण्टुः । तेनसदानुसन्धीयमानंसौशील्यमुच्यते । अहोमहानयमस्मादृशेषुक्षुद्रेष्वप्यतिसंश्लेषेणवर्ततइतिसर्वदानुसन्धीयमानत्वात् । पुंसामिति कठिनचित्तानामपि किमुतस्त्रीणामितिभावः । यद्वा पुंशब्देनस्त्रीपुंससाधारणमात्ममात्रमुच्यते । "पुमानेकोव्यवस्थितः" इति श्रीविष्णुपुराणेप्रयोगात् । तेनसुरनर-

तव्याः ॥ १८ ॥ ति० दीर्घाअसयोयेषांतेबद्धगोधाचर्माणश्चेतिद्वन्द्वः ॥ १९ ॥ ति० कृतात्मा धर्मैयुक्तबुद्धिः ॥ २२ ॥ ति० गन्धर्वराजप्रतिमत्वं सौन्दर्यवत्त्वेनसुस्वरत्वेनच ॥ २७ ॥

[पा०] १ झ. दीर्घासिवद्धगोधाश्च. २ ङ. झ. राजाङ्कणंशूराः. ३ ङ. झ. विप्रौतु. ४ क. ख. ङ. च. छ. झ. अ. विनिष्ठितौ. ५ ख. यथोक्तवचनं. ६ ख. ग. हर्षयुक्तं. ७ झ. ट. द्विजोत्तमौ. ८ क. च. राममामन्त्रयाचक्रे. ९ ङ. झ. सहासीनाः. १० क—छ. झ. ज. म्लेच्छाश्चार्याश्च. ११ ङ. छ. झ. ट. देवावासवंयथा. १२ ङ. छ. झ. ट. दशरथो. क. च. ज. रथस्थंतं.

घर्माभितप्ताः पर्जन्यं ह्लादयन्तमिव प्रजाः ॥ न[1] ततर्प समायान्तं पश्यमानो नराधिपः ॥ २९ ॥
अवतार्य सुमन्त्रस्तं[2] राघवं स्यन्दनोत्तमात्[3] ॥ पितुः समीपं गच्छन्तं प्राञ्जलिः पृष्ठतोऽन्वगात् ॥३०॥
स तं कैलासशृङ्गाभं प्रासादं नरपुङ्गवः[4] ॥ आरुरोह नृपं द्रष्टुं सह सूतेन राघवः[5] ॥ ३१ ॥
स प्राञ्जलिरभिप्रेत्य प्रणतः पितुरन्तिके ॥ नाम स्वं श्रावयन्रामो ववन्दे चरणौ पितुः ॥ ३२ ॥
तं दृष्ट्वा प्रणतं पार्श्वे कृताञ्जलिपुटं नृपः ॥ गृह्याञ्जलौ समाकृष्य सस्वजे प्रियमात्मजम् ॥ ३३ ॥
तस्मै चाभ्युदितं[6] सम्यङ्मणिकाञ्चनभूषितम् ॥ दिदेश राजा रुचिरं रामाय परमासनम् ॥ ३४ ॥
तदासनवरं[7] प्राप्य व्यदीपयत राघवः ॥ स्वयैव[8] प्रभया मेरुमुदये विमलो रविः ॥ ३५ ॥
तेन विभ्राजता तत्र सा सभा[9]ऽभिव्यरोचत ॥ विमलग्रहनक्षत्रा शारदी द्यौरिवेन्दुना ॥ ३६ ॥
तं पश्यमानो नृपतिस्तुतोष प्रियमात्मजम् ॥ अलंकृतमिवात्मानमादर्शतलसंस्थितम् ॥ ३७ ॥
स तं सस्मितं[10]माभाष्य पुत्रं पुत्रवतां वरः ॥ उवाचेदं वचो राजा देवेन्द्रमिव कश्यपः ॥ ३८ ॥
जेष्ठायामसि मे पत्न्यां सदृश्यां सदृशः सुतः ॥ उत्पन्नस्त्वं गुणैश्रेष्ठो[11] मम रामात्मजः प्रियः ॥३९॥
यतस्त्वया[12] प्रजाश्चेमाः स्वगुणै[13]रनुरञ्जिताः ॥ तस्मात्त्वं पुष्ययोगेन यौवराज्यमवाप्नुहि ॥ ४० ॥

तिर्यगादिभेदभिन्नानांस्त्रीपुंनपुंसकभेदभिन्नानांसर्वेषां दृष्टिचित्तापहारउक्तः । वक्ष्यतिरामविरहेस्थावरजङ्गमवस्तुमात्रंपरिम्लानमिति । यद्वा पुंसामपिरामंपश्यतांस्त्रीभूत्वाऽहममुमनुभवेयमित्यभिलाषोभवति । यथाहुः "पाञ्चाल्याःपद्मपत्राक्ष्याःस्नायन्त्याजघनंघनं । याःस्त्रियोदृष्टवत्यस्ताःपुंभावंमनसाययुः" इति ॥ २८ ॥ पश्यमानइतिनिर्निमेषदर्शनमुक्तं । नततर्पेति प्रतिक्षणमनुभवेपिनवनवप्रेमास्पदतयानतृप्तिरभूदित्यर्थः ॥ २९ ॥ अवतार्येति अवतारणंहस्तप्रदानादिना ॥ ३०—३१ ॥ अभिप्रेत्य प्राप्य । प्रणतः "दण्डवत्प्रणमेद्भूमावुपेत्यगुरुमन्वहं" इत्युक्तप्रक्रिययादण्डवत्प्रणतइत्यर्थः । स्वंनामश्रावयन् । "शर्मेतिब्राह्मणस्योक्तं वर्मेतिक्षत्रियस्यच" इतिवचनाद्रामवर्माहमस्मिभोइति श्रावयन्नित्यर्थः ॥ ३२ ॥ अञ्जलौगृह्य अञ्जलिंप्रगृह्य । "सक्थिनिकर्णेवागृहीत्वा" इतिमहाभाष्यकारवचनात् अञ्जलावितिकर्मणिसप्तमी ॥ ३३ ॥ अभ्युदितं उन्नतं ॥ ३४ ॥ आसनवरंप्राप्य तदासनंस्वयैवप्रभया व्यदीपयत् । विमलोरविरुदयमेरुंप्राप्येव । सूर्यस्यप्रधानमेरुप्राप्तेःसाक्षादभावादत्रमेरुशब्देनास्ताद्रिसमीपवर्तीसावर्णिमेरुरुच्यते । उदयश्चोत्तरवर्षस्थितसिद्धपुरवासिजनापेक्षया इयमुदयास्तमयव्यवस्थासूर्यसिद्धान्तेआर्यभट्टेचप्रसिद्धा । "भूवृत्तपादेपूर्वस्यांयवकोटीतिविश्रुता । भद्राश्ववर्षेनगरीस्वर्णप्राकारतोरणा ॥ याम्यायांभारतेवर्षेलङ्कातद्वन्महापुरी । पश्चिमेकेतुमालाख्येरोमकेतिचकीर्तिता ॥ उदक्सिद्धपुरीनामकुरुवर्षेप्रतिष्ठिता।उदयोयोलङ्कायांसोस्तमयःसवितुरेवसिद्धपुरे। मध्याह्नेयवकोट्यांरोमकविषयेऽर्धरात्रंस्यात् ॥ भारतादिपुवर्षेषुतद्वद्देवपरिभ्रमन् । मध्योदयार्धरात्रांस्तुकालान्कुर्यात्प्रदक्षिणं" इति ॥ ३५ ॥ विभ्राजता प्रकाशमानेन । विमलग्रहनक्षत्रेतिदृष्टान्तबलेनदशरथवसिष्ठादिभिरीषत्प्रकाशितत्वमवगम्यते ॥ ३६ ॥ पश्यमानः पश्यन् । आदर्शतलसंस्थितमित्यनेनरामस्यमुखनासिकाचरणादिसर्वावयवेनपितृसरूपत्वमावेदितं ॥ ३७ ॥ सस्मितमितिक्रियाविशेषणं । आभाष्य रामेतिसंबोध्य ॥ ३८ ॥ रामस्यैवराज्याभिषेकार्हतामभिव्यञ्जयन्नाह—ज्येष्ठायामिति । आत्मजस्सुतः औरसस्सुतः ॥ ३९ ॥ पुष्ययोगेनेति "प्रकृत्यादिभ्यउपसङ्ख्यानं" इतितृतीया । पुष्येणचन्द्रमसोयोगःपुष्य-

---

ति० तेन सहेतिशेषः ॥ ३१ ॥ स० मेरुमेवं मेरुमिव । "ववायथातथैवैवंसाम्ये" इत्यमरः ॥ ३५ ॥ ति० सभापि नकेव-

[पा०] १ घ. नततर्ष. २ ङ. छ. झ. ञ. ट. सुमन्त्रस्तु. ३ क. च. स्यन्दनात्तदा. ४ ङ. छ. झ. रघुनन्दनः. ख. रघुपुङ्गवः. ५ ङ. छ. झ. ट. सहसातेनराघवः. ६ च—ट. चाभ्युद्यतं. क. च. चाभ्युदितंसौम्यं. ख. चाभ्युदितंरम्यं. ग. घ. चाभ्युदितंदिव्यं. ७ ङ. छ. झ. तथासनवरं. ८ ट. स्वयैवंप्रभया. ९ झ. सभापि. १० ङ. छ. झ. ट. सुस्थितमाभाष्य. ११ ख. ङ. छ. झ. ट. गुणज्येष्ठो. घ. ज. गुणैश्श्रेष्ठः. १२ ख—ङ. छ—ट. त्वयायतःप्रजा. क. च. त्वयायथा. १३ क. च. ञ. स्वगुणेनाभिरञ्जिताः. ख. स्वगुणैरभिरञ्जिताः.

कामतस्त्वं प्रकृत्यैव [1]विनीतो गुणवानसि ॥ गुणवत्यपि तु स्नेहात्पुत्र वक्ष्यामि ते हितम् ॥ ४१ ॥
भूयो विनयमास्थाय भव नित्यं जितेन्द्रियः ॥ [2]कामक्रोधसमुत्थानि [3]त्यजेथा व्यसनानि च ॥४२॥
परोक्षया वर्तमानो वृत्त्या प्रत्यक्षया तथा ॥ अमात्यप्रभृतीः सर्वाः [4]प्रकृतीश्चानुरञ्जय ॥ ४३ ॥
कोष्ठागारायुधागारैः कृत्वा सन्निचयान्बहून् ॥ [5]तुष्टानुरक्तप्रकृतिर्यः पालयति मेदिनीम् ॥ ४४ ॥
तस्य नन्दन्ति मित्राणि लब्ध्वाऽमृतमिवामराः ॥ [6]तस्मात्त्वमपि चात्मानं नियम्यैवं समाचर ॥४५॥
तच्छ्रुत्वा सुहृदस्तस्य रामस्य [7]प्रियकारिणः ॥ त्वरिताः [8]शीघ्रमभ्येत्य कौसल्यायै न्यवेदयन् ॥ ४६ ॥
[9]सा हिरण्यं च गाश्चैव रत्नानि विविधानि च ॥ व्यादिदेश प्रियाख्येभ्यः कौसल्या प्रमदोत्तमा ॥ ४७ ॥
अथाभिवाद्य राजानं रथमारुह्य राघवः ॥ ययौ स्वं [10]द्युतिमद्वेश्म जनौघैः [11]प्रतिपूजितः ॥ ४८ ॥

ते चापि पौरा नृपतेर्वचस्तच्छ्रुत्वा तदा लाभमि[12]वेष्टमाशु ॥
नरेन्द्रमामन्त्र्य गृहाणि गत्वा देवान्समा[13]नर्चुरभिप्रहृष्टाः ॥ ४९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे तृतीयः सर्गः ॥ ३ ॥

योगः । तदुपलक्षितकालइत्यर्थः । पुष्यनक्षत्रयुक्तेदिवसइत्यर्थः ॥ ४० ॥ कामतः प्रकामं । गुणवति त्वयीतिशेषः । यद्यपिभवान्सर्वगुणसंपन्नः तथापिपुत्रस्नेहाद्भवतेकिंचिदुपदिशामीत्यर्थः ॥ ४१ ॥ भूयोविनयं सातिशयविनयं । कामक्रोधसमुत्थानिव्यसनानि "स्त्रीद्यूतमृगयामद्यवाक्पारुष्योग्रदण्डताः । अर्थसंदूषणंचेतिराज्ञांव्यसनसप्तकं" इत्युक्तानिव्यसनानि । अर्थसंदूषणं पित्रादिसञ्चितार्थस्यनाशनं । यद्वा "मृगयाऽक्षोदिवास्वापःपरिवादःस्त्रियोमदः । तौर्यत्रिकंवृथाध्वाचकामजोदशकोगुणः" इत्येतानिकामजानि । "पैशुन्यंसाहसंद्रोहईर्ष्यासूयार्थदूषणं । वाग्दण्डयोश्चपारुष्यंक्रोधजोपिगुणोष्टकः"इत्युक्तानिक्रोधजानिचव्यसनानि ॥ ४२ ॥ अप्रत्यक्षयावृत्त्या तक्षप्रभृतिकर्मान्तिकानां परोक्षोभूत्वाऽधिकृतमुखेनयत्कार्याणिसंविधत्तेसापरोक्षवृत्तिः । अव्यवधानेनामात्यादीन्ययावृत्त्यानुगृह्णातिसाप्रत्यक्षवृत्तिः । ताभ्यांवर्तमानस्सन् अमात्यप्रभृतीःसर्वाःप्रकृतीश्चानुरञ्जयेतिसंबन्धः । यद्वा परोक्षया चारमुखतःपरोक्षानुभवसिद्धया । वृत्त्या स्वपरराष्ट्रवृत्तान्तविचारेण । सहवर्तमानोभव । तथा प्रत्यक्षया नित्यंयथाकालमास्थानमास्थाय स्वानुभवसिद्धयथोक्तवृत्तान्तविचारोभव । अमात्यप्रभृतीःसर्वाःप्रकृतीः अमात्यसेनानीपुररक्षिणः पौरजानपदाःसर्वप्रजाश्च अनुरञ्जय ॥ ४३ ॥ श्लोकद्वयमेकान्वयं । कोष्ठागाराणि अयुतनियुतादिसङ्ख्यधान्यराशिग्राहीणिकोष्ठरूपतयानिर्मितान्यगाराणि । आयुधागाराणि समग्रनिजबलापेक्षिताष्टादशविधायुधप्रतिष्ठागाराणि । तैःसह सन्निचयान् निचीयन्तेएष्वितिनिचयाः नवरत्नहेमरजतवस्त्राभरणादिसंपूर्णास्तत्तत्कोशाः । तान् तुष्टानुरक्तप्रकृतिरिति उक्तनिचयबलादितिशेषः । मित्राणि सामन्ताः । आत्मानं मनः ॥ ४४—४५ ॥ तत् रामाभिषेकप्रस्तावनं ॥ ४६ ॥ प्रियाख्येभ्यः प्रियं रामाभिषेकमाचक्षतइतिप्रियाख्याः । "चक्षिङःख्याञ्" इति ख्याञादेशः ॥ ४७—४८ ॥ आनर्चुः रामाभिषेकविघ्नवारणाय ॥ ४९ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीतांबराख्याने अयोध्याकाण्डे तृतीयःसर्गः ॥ ३ ॥

लमासनमेव ॥ ३६ ॥ ति० इष्टाः स्वस्य अनुरक्ताः स्वस्मिन् प्रकृतयःप्रजाः यस्य । तस्यमित्राण्यमृतंलब्ध्वाअमराइवतंलब्ध्वा नन्दन्ति ॥ ४४ ॥ इतितृतीयस्सर्गः ॥ ३ ॥

[पा०] १ ङ. झ. निर्णीतोगुणवानिति. २ घ. कामक्रोधसमृद्धानि. ३ ङ. झ. त्यजस्वव्यसनानिच. ४ ङ. छ. झ. ट. प्रजाश्चैवानुरञ्जय. ५ क. ङ. च. छ. झ. ञ. ट. इष्टानुरक्त. घ. तुष्टोनुरक्त. ६ क. ङ. च. छ. झ. ञ. ट. त्पुत्रत्वमात्मानं. ७ छ. प्रियकांक्षिणः. ८ ङ. छ. झ. ट. शीघ्रमागत्य. ९ क. च. ञ. साहिरण्यानि. १० घ. द्युतिमान्वेश्म. ११ घ. छ. परिपूजितः. १२ च. ञ. मिवेष्टमात्मनः. १३ क—घ. च. ञ. रतिप्रहृष्टाः.

चतुर्थः सर्गः ॥ ४ ॥

दशरथेनरात्रौदुस्स्वप्नदर्शनादभिषेकविघ्नशङ्कयापुनाराममानाय्य तंप्रतिभरतागमनात्पूर्वमेवाभिषेककालनिवेदनपूर्वकंसी तयासहरात्रावुपवासादिव्रताचरणचोदना ॥ १ ॥ दशरथाभ्यनुज्ञातेनरामेणकौसल्यान्तःपुरंप्रविश्यतदाशीर्वादस्वीकरणपूर्वकं तत्रपूर्वमागतयासीतयासहस्वावासगमनम् ॥ २ ॥

गतेष्वथ नृपो भूयः पौरेषु सह मन्त्रिभिः ॥ मन्त्रयित्वा ततश्चक्रे निश्चयज्ञः [1]संनिश्चयम् ॥ १ ॥
श्व एव पुण्यो भविता [2]श्वोऽभिषेच्यस्तु मे सुतः ॥ रामो [3]राजीवताम्राक्षो [4]यौवराज्य इति प्रभुः ॥२॥
अथान्तर्गृहमाविश्य राजा दशरथस्तदा ॥ सूतमामन्त्रयामास रामं पुनरिहानय ॥ ३ ॥
[5]प्रतिगृह्य स तद्वाक्यं सूतः पुनरुपाययौ ॥ रामस्य भवनं शीघ्रं राममानयितुं पुनः ॥ ४ ॥
द्वास्स्थैरावेदितं तस्य रामायागमनं पुनः ॥ श्रुत्वैव चापि रामस्तं प्राप्तं शङ्कान्वितोऽभवत् ॥ ५ ॥
प्रवेश्य चैनं [6]त्वरितं रामो वचनमब्रवीत् ॥ यदाग[7]मनकृत्यं ते भूयस्तद्ब्रूह्यशेषतः ॥ ६ ॥
तमुवाच ततः सूतो राजा त्वां द्रष्टुमिच्छति ॥ श्रुत्वा [8]प्रमाणमत्र त्वं गमनाये[9]तराय वा ॥ ७ ॥
इति सूतवचः श्रुत्वा [10]रामोऽथ त्वरयाऽन्वितः ॥ प्रययौ राजभवनं पुनर्द्रष्टुं नरेश्वरम् ॥ ८ ॥
तं[11] श्रुत्वा समनुप्राप्तं रामं दशरथो नृपः ॥ प्रवेशयामास गृहं विवक्षुः प्रियमुत्तमम् ॥ ९ ॥
प्रविशन्नेव च श्रीमान्राघवो भवनं पितुः ॥ ददर्श पितरं दूरात्प्रणिपत्य कृताञ्जलिः ॥ १० ॥
[12]प्रणमन्तं स[13]मुत्थाप्य [14]तं परिष्वज्य भूमिपः ॥ प्रदि[15]श्य चास्मै रुचिरमा[16]सनं पुनरब्रवीत् ॥ ११ ॥
राम वृद्धोऽसि दीर्घायुर्भुक्ता भोगा [17]मयेप्सिताः ॥ अन्नवद्भिः क्रतुशतै[18]स्तथेष्टं भूरिदक्षिणैः ॥ १२ ॥

एवंपूर्वविचारितमपिराममाहूयोक्तमपिरामाभिषेकं पुनर्मन्त्रिभिःकालविशेषनिर्णयपूर्वकंराममाहूयसविशेषमुपदिशतिचतुर्थे—गतेष्वित्यादिना । श्लोकद्वयमेकान्वयं । अभिषेच्यइतिनिश्चयंचक्रइतिसंबन्धः ॥१–२॥ अन्तर्गृहमाविश्येत्यनेनमन्त्रिणामपिविसर्जनंसिद्धं । आमन्त्रयामास नियोजयामासेत्यर्थः । आनयेत्यत्रइतिकरणंद्रष्टव्यं ॥ ३ ॥ आनयितुं आनेतुमित्यर्थः । इडार्षः ॥ ४ ॥ तस्य सुमन्त्रस्य । पुनरागमनं रामाय द्वास्स्थैरावेदितं । रामश्चापि प्राप्तंआगतं । सुमन्त्रंश्रुत्वैवशङ्कान्वितोभवत् । किमभिषेकविघ्नःकश्चिदासीत्उतान्यः कश्चिदुपप्लवोऽभूदितिशङ्का ॥ ५ ॥ भूयः पुनः । तेयदागमनकृत्यंतद्ब्रूहीतिसंबन्धः ॥ ६ ॥ सूतः श्रुत्वा रामवाक्यमितिशेषः । ततः रामवाक्यश्रवणानन्तरं । राममुवाच । कथमिति । हेराम राजात्वांद्रष्टुमिच्छति । अत्र दशरथसमीपे । गमनाय इतराय अगमनायच । त्वंप्रमाणं कर्ताशीघ्रं गच्छेत्यर्थः । इतरशब्दस्यसर्वनामकार्याभावआर्षः ॥ ७—९ ॥ राघवः पितुर्भवनंप्रविशन्नेवदूरात्प्रणिपत्यकृताञ्जलिःसन् । पितरंददर्श । दूरात्प्रणिपातोविनयातिशयात् ॥ १० ॥ समीपेपुनःप्रणमन्तमित्यर्थः ॥ ११ ॥ वृद्धोसीत्यनन्त-

ति० पूर्वागमनापेक्षया पूर्वानयनापेक्षयाचपुनस्त्वम् ॥ ४ ॥ ति० शङ्कान्वितः राज्ञआपच्छङ्कान्वितः ॥ ५ ॥ वि० इतराय अगमनायच । शि० इतराय इतायप्राप्तायजनाय रो दानंतस्मैच प्रमाणं निश्चयं कुर्वितिशेषः ॥ ७ ॥ वि० प्रियं स्वप्रियं ॥ ९ ॥ ति० दूरात्प्रणिपातः किंवदिष्यतीतिभीत्या ॥ १० ॥ ति० प्रदिश्य हस्तेनदर्शयित्वा । चाद्वचसाप्युक्त्वा । अस्मै रामाय चात्मन्त्राय । रामंच रामंतु ॥ ११ ॥

[पा०] १ ख. ङ. सुनिश्चयं. घ. सुनिश्चितम्. २ क. ग. ञ. श्वोऽभिषिच्येत. ख. घ. श्वोऽभिषिञ्चन्तुमेसुतम्. ३ ङ. छ. झ. ट. राजीवपत्राक्षो. ४ ङ. छ. झ. ट. युवराजइतिप्रभुः. ५ क. ग—छ. झ. ञ. ट. प्रतिगृह्यतु. ६ ङ. छ. झ. ट. त्वरितो. ७ क. च. ञ. गमनकार्यंते. ८ क. ङ. च. छ. झ. ञ. ट. प्रमाणंतत्रत्वं. ९ ङ. ञ. ट. येतरायच. ख. येतरायवै. १० ङ. छ. झ. ट. रामोपि. ११ घ. च. तच्छ्रुत्वा. १२ क. ग. प्रणमन्तंपरिष्वज्यसमनुज्ञाप्यभूमिपः. १३ ङ. झ. ट. तमुत्थाप्य. १४ ख. ग. ङ. छ. झ. ञ. ट. संपरिष्वज्य. १५ ङ. झ. ट. प्रदिश्यचासनंचास्मै. १६ ङ. छ. झ. ट. रामंच पुनरब्रवीत्. १७ क. ङ. च. छ. झ. ञ. ट. यथेप्सिताः. १८ क. ख. घ—छ. झ. ञ. ट. यथेष्टंभूरिदक्षिणैः.

जातमिष्टमपत्यं मे त्वमद्यानुपमं भुवि ॥ दत्तमिष्टमधीतं च मया पुरुषसत्तम ॥ १३ ॥
अनुभूतानि चेष्टानि मया वीरसुखान्यपि ॥ देवर्षिपितृविप्राणामनृणोस्मि तथाऽऽत्मनः ॥ १४ ॥
न किंचिन्मम कर्तव्यं तवान्यत्राभिषेचनात् ॥ अतो यत्त्वामहं ब्रूयां तन्मे त्वं कर्तुमर्हसि ॥ १५ ॥
अद्य प्रकृतयः सर्वास्त्वामिच्छन्ति नराधिपम् ॥ अतस्त्वां युवराजानमभिषेक्ष्यामि पुत्रक ॥ १६ ॥
अपि चाद्याशुभान्राम स्वप्ने पश्यामि दारुणान् ॥ सनिर्घाता दिवोल्का च पततीह महास्वना ॥ १७ ॥
अवष्टब्धं च मे राम नक्षत्रं दारुणैर्ग्रहैः ॥ आवेदयन्ति दैवज्ञाः सूर्याङ्गारकराहुभिः ॥ १८ ॥
प्रायेण हि निमित्तानामीदृशानां समुद्भवे ॥ राजा हि मृत्युमाप्नोति घोरां वाऽऽपदमृच्छति ॥ १९ ॥
तद्यावदेव मे चेतो न विमुञ्चति राघव ॥ तावदेवाभिषिञ्चस्व चला हि प्राणिनां मतिः ॥ २० ॥
अद्य चन्द्रोऽभ्युपगतः पुष्यात्पूर्वं पुनर्वसू ॥ श्वः पुष्ययोगं नियतं वक्ष्यन्ते दैवचिन्तकाः ॥ २१ ॥
ततः पुष्येऽभिषिञ्चस्व मनस्त्वरयतीव माम् ॥ श्वस्त्वाऽहमभिषेक्ष्यामि यौवराज्ये परंतप ॥ २२ ॥

रंदीर्घायुरितिवृद्धत्वविवरणं । यद्वा ज्ञानवृद्धत्वव्यावृत्तये—दीर्घायुरिति । "विधिहीनमसृष्टान्नंमन्त्रहीनमदक्षिणं ॥ श्रद्धाविरहितंयज्ञंतामसंपरिचक्षते" इत्यन्नादिहीनस्ययज्ञस्यनिन्दनादन्नवद्भिरित्यादिविशेषणं । क्रतुशतैः ज्योतिष्टोमाद्यश्वमेधपर्यन्तयागभेदैः । इष्टं यजनंकृतं ॥ १२ ॥ इष्टमपत्यं अभिमतमपत्यं । इष्टंदत्तं अभिमतंवस्तुदत्तं ॥ १३ ॥ देवर्षीति देवानामनृणःक्रतुशतैः । ऋषीणामनृणोऽध्ययनेन । पितृणामनृणोऽपत्योत्पादनेन । विप्राणामनृणोदत्तेन । आत्मनोनृणःसुखानुभवेन । यद्यपिब्रह्मचर्यादिऋणत्रयंश्रुतिसिद्धं "जायमानोवैब्राह्मणस्त्रिभिर्ऋणवाजायते । ब्रह्मचर्येणऋषिभ्योयज्ञेनदेवेभ्यःप्रजयापितृभ्यः" इति । तथापिऋणपञ्चकमितिमतान्तरं । यद्वा ऋणत्रयव्यपदेशः प्राधान्यादितरयोरुपलक्षणत्वाद्वा । ननुदेवादीनांपञ्चानांकथमुत्तमर्णत्वं । अत्राहुः देवानामिन्द्रियाधिष्ठातॄणां जितेन्द्रियताकारकत्वेनोपकारकत्वात् ऋषीणांवागुपकारकत्वात् पितॄणांतनूपकारकत्वात् विप्राणांकर्माधीनसर्वसंस्कारसाधनेनाघनाशकत्वात् आत्मनःशरीरेन्द्रियसंघातरूपस्यज्ञानप्रकाशहेतुत्वेनोपकारकत्वाच्च तदप्रत्युपकारःपुरुषस्यऋणमेव । अन्यत्रचोक्तं "अनिष्विद्धसुखत्यागीपशुरेवनसंशयः" इति ॥ १४—१६ ॥ अशुभान् अशुभसूचकान् । दारुणान् भयंकरान् । नीलवर्णस्त्रीपरिष्वङ्गादीन् । उल्का निर्गतज्वाला । निर्घातः अमेघाशनिः ॥ १७ ॥ नक्षत्रं जन्मनक्षत्रं । अवष्टब्धं आक्रान्तं । अत्रेतिकरणंद्रष्टव्यं । दैवज्ञाः ज्यौतिषिकाः । "सांवत्सरोज्यौतिषिकोदैवज्ञगणकावपि" इत्यमरः । सूर्याङ्गारकराहुभिर्ग्रहैरवष्टब्धमित्यावेदयन्तीतिसंबन्धः ॥ १८ ॥ दुर्निमित्तफलमाह—प्रायेणेति । ऋच्छति ऋच्छतिगच्छतीत्यर्थः ॥ १९ ॥ चेतः त्वामभिषेक्ष्यामीतिबुद्धिः । नविमुञ्चति मामितिशेषः । कुतोबुद्धिविमोचनप्रसक्तिरित्यत्राह—चलाहीति । मात्रन्तरादिप्रार्थनादिभिरितिभावः ॥ २० ॥ पुष्ययोगं पुष्येणचन्द्रस्ययोगं । नियतं अभिषेकनियतं । प्रशस्तमित्यर्थः । दैवचिन्तकाः ग्रहचारज्ञाः । वक्ष्यन्ते वदन्ति ॥ २१ ॥ अभिषिञ्चस्व अभिषिक्तोभव । त्वरयतीत्रे-

ति० ऋष्यृणेविप्रर्णस्य देवर्णेर्जावर्णस्यान्तर्भावंकृत्वा "ऋणानित्रीण्यपाकृत्य—"इतिस्मृतिवादः ॥ १४ ॥ ति० यद्ब्रूयांतन्मे वचःकर्तुमर्हसि । अविलंबेनेतिशेषः ॥ १५ ॥ ति० दिवोल्काः दिवःउल्काः । सन्धिरार्षः । दिवादित्रसेइत्यन्ये । उल्काःज्वालाः पतन्ति ॥१७॥ ति० नियतं शुद्धगणितनिश्चितं ॥२१॥ शि० अभिषिञ्चस्व राममितिशेषः । इतिमनोममामानसंत्वरयति ॥२२॥

[पा०] १ क. च. ञ. नुपमोभुवि. २ क. ख. च. ञ. सुखानिच. छ. सुखानितु. ३ घ. ततोयत्त्वामहं. ४ क. च. ञ. न्स्वप्नात्राम पश्यामि. ङ. छ. झ. ट. स्वप्नान्पश्यामिराघव. ५ क. घ. च. महोल्काश्च. ख. ग. महोल्काच. ङ. छ. झ. ञ. ट. दिवोल्काश्च. ६ घ. ङ. छ. झ. ञ. ट. पतन्तिहि. च. पतिताश्चमहास्वनाः. क. पतिताहिमहास्वनाः. ख. पतितेहमहास्वना. ७ ङ. छ. झ. ट. दारुणग्रहैः. ८ ख. ग. ङ. छ. झ. ञ. ट. प्रायेणच. ९ क. च. ञ. राजानृत्युमवाप्नोति. १० ङ. च. छ. झ. ट. चापदमृच्छति. ११ ङ. च. छ. झ. ञ. ट. नविमुह्यतिराघव. १२ ङ. छ. झ. ट. अद्यचन्द्रोभ्युपगतन्. १३ घ. ङ. च. झ. ञ. पुनर्वसुम्. १४ क. वक्ष्यतेदैवचिन्तकः. १५ ख. ङ. छ. झ. ट. तत्रपुष्ये.

तस्मात्त्वयाऽद्यप्रभृति निशेयं नियतात्मना ॥ सह वध्वोपवस्तव्या दर्भप्रस्तरशायिना ॥ २३ ॥
सुहृदश्चाप्रमत्तास्त्वां रक्षन्त्वद्य समन्ततः ॥ भवन्ति बहुविघ्नानि कार्याण्येवंविधानि हि ॥ २४ ॥
विप्रोषितश्च भरतो यावदेव पुरादितः ॥ तावदेवाभिषेकस्ते प्राप्तकालो मतो मम ॥ २५ ॥
कामं खलु सतां वृत्ते भ्राता ते भरतः स्थितः ॥ ज्येष्ठानुवर्ती धर्मात्मा सानुक्रोशो जितेन्द्रियः ॥ २६ ॥
किंतु चित्तं मनुष्याणामनित्यमिति मे मतिः ॥ सतां तु धर्मनित्यानां कृतशोभि च राघव ॥ २७ ॥
इत्युक्तः सोऽभ्यनुज्ञातः श्वो भाविन्यभिषेचने ॥ व्रजेति रामः पितरमभिवाद्याभ्ययाद्गृहम् ॥ २८ ॥
प्रविश्य चात्मनो वेश्म राज्ञोद्दिष्टेऽभिषेचने ॥ तत्क्षणेन च निर्गम्य मातुरन्तःपुरं ययौ ॥ २९ ॥
तत्र तां प्रवणामेव मातरं क्षौमवासिनीम् ॥ वाग्यतां देवतागारे ददर्शायाचतीं श्रियम् ॥ ३० ॥
प्रागेव चागता तत्र सुमित्रा लक्ष्मणस्तदा ॥ सीता चानायिता श्रुत्वा प्रियं रामाभिषेचनम् ॥ ३१ ॥
तस्मिन्काले हि कौसल्या तस्थावामीलितेक्षणा ॥ सुमित्रयाऽन्वास्यमाना सीतया लक्ष्मणेन च ॥ ३२ ॥
श्रुत्वा पुष्येण पुत्रस्य यौवराज्याभिषेचनम् ॥ प्राणायामेन पुरुषं ध्यायमाना जनार्दनम् ॥ ३३ ॥

तीव्रशब्दएवकारार्थः ॥ २२ ॥ अद्यप्रभृति एतदहरारभ्य । निशा उपवस्तव्या । "वसेरश्यर्थस्यप्रतिषेधो वक्तव्यः" इतिभोजननिवृत्त्यर्थस्यवसेरकर्मकत्वादत्रसकर्मकत्वमार्षं । निशायामुपवस्तव्यमित्यर्थः । दर्भप्रस्तरोदर्भास्तरणं॥२३॥एवंविधानि अभिषेकादिमहाश्रेयोरूपाणि॥२४॥ केकयराजायराज्यशुल्कंदत्वाकैकेयीविवाहंकृतवान् तंवृत्तान्तंहृदिकृत्वाह—विप्रोषितइति । अयंवृत्तान्तःसप्तोत्तरशततमेसर्गे । "पुराभ्रातःपितानः समातरंतेसमुद्वहन् । मातामहेसमाश्रौषीद्राज्यशुल्कमनुत्तमं" इतिस्पष्टीभविष्यति । प्राप्तकालइत्यत्रेतिकरणं द्रष्टव्यं ॥ २५ ॥ वृत्ते आचारे ॥ २६ ॥ अत्यन्तधर्मिष्ठानामपिचेतश्चञ्चलत्वात् मित्रभेदादिनाऽन्यथाभवतीत्याह—किंत्विति । किंतु तथापीत्यर्थः । यद्यपि "कामंखलुसतांवृत्ते" इत्याद्युक्तगुणविशिष्टतयासनशङ्कास्पदीभूतः तथापि मनुष्याणां मनुष्यत्वसाधारण्येनशङ्कितं चित्तं अनित्यं चञ्चलमितिमेमतिः ममनिश्चयइत्यर्थः । सामान्यप्रयुक्तदोषोविशेषेनसंक्रमतइत्याह—सतांत्विति । तुशब्दःपक्षव्यावृत्त्यर्थः । धर्मनित्यानां धर्मैकनिरतानां । कृतशोभि कृतेनपरस्परोपकारेणशोभते नतुभेदंप्राप्नोति । राघव रघुवंशोत्पन्नस्त्वंस्ववंशप्रभावंनजानासिकिं । अन्येत्वेवंव्याचक्षते । धर्मनित्यानां धर्मनिरतानां । चित्तं कृतशोभि कृतेनपरकृतमित्रभेदादिनाशोभितुंशीलमस्यास्तीतिकृतशोभीति । अपरेत्वाहुः । सतांचित्तं कृतेनकार्येणशोभते नतुकरिष्यमाणेन । कृतं कार्यमनुमोदतेनतुकरिष्यमाणमितिभावइति ॥ २७ ॥ अभिषेचनेविषये इत्युक्तः सरामः व्रजेत्यनुज्ञातइतिसंबन्धः ॥ २८ ॥ राज्ञोद्दिष्टेऽभिषेचनइतिनिमित्तसप्तमी । राज्ञोद्दिष्टमभिषेकंकथयितुमित्यर्थः ॥ २९ ॥ प्रवणां स्वासाधारणदेवतासक्तचित्तां । क्षौमवासिनीं व्रतोपयुक्तक्षौमवस्त्रधरां । वाग्यतां यतवाचं । मौनवतीमित्यर्थः । श्रियं संपदं । आयाचतीं प्रार्थयन्तीं । रामायेतिशेषः ॥ ३० ॥ प्राक् रामागमनात्पूर्वमेव । सुमित्रा प्रियंरामाभिषेचनंश्रुत्वा आगता। लक्ष्मणश्च तदा सुमित्रागमनकाले आगतः । सीतातुपरतन्त्रत्वात्स्वयंनागता । किंतुदासीभिरानायिता ॥ ३१ ॥ तस्मिन् रामागमनकाले । पुत्रस्यपुष्ये-

ति॰ राज्ञाआदिष्टे आज्ञप्तेअभिषेचने । सीतायैतदपेक्षितराजोपदिष्टसभार्योपवासानुष्ठाननिवेदनायस्वगृहंप्रविश्य तत्रसीतामदृष्ट्वा तत्क्षणादेवमातुरन्तःपुरंययौ ॥ २९ ॥ स॰ पुरुषं पूर्णषड्गुणं । जनार्दनं जनंजननमर्दयतीतिवा नजायतेजनःअर्दयतिसंसारमित्यर्दनः जनश्चासावर्दनश्चेतिवा तं ॥ ३३ ॥

[पा॰] १ ख. ग. ज. त्वयाद्यव्रतिना. २ घ. ण्येवंविधानिच. ३ ख—छ. झ. ञ. ट. किंनुचित्तं. ४ झ. ट. मेमनः ५ क—छ. झ. ञ. ट. सतांच. ६ क. च. ञ. कृतशोभिहि. ७ ङ. च. छ. झ. ट. मभिभाष्याभ्यया. ८ ख. ङ. छ. झ. ट. राज्ञादिष्टे. ९ ङ. छ. झ. ट. तत्क्षणादेव. ख. तस्मिन्क्षणेस. क. च. ञ. तत्क्षणेनस. १० क. ङ. च. छ. झ. ञ. ट. निष्क्रम्य. ११ ग. घ. ङ. छ. ज. झ. ट. लक्ष्मणस्तथा. १२ क. च. ञ. न्कालेतु. ङ. च. झ. ट. न्कालेऽपि. ख. न्कालेव. १३ ङ. छ. झ. ट. पुष्येच. ख. पुण्येन. १४ ख. घ. ङ. ज. झ. ट. राज्येऽभिषेचनम्.

[1]तथा सन्नियमामे[2]वं सोभिगम्याभिवाद्य च ॥ उवाच वचनं रामो हर्षयं[3]स्तामिदं तदा ॥ ३४ ॥
अम्ब पित्रा नियुक्तोस्मि प्रजापालनकर्मणि ॥ भविता [4]श्वोऽभिषेको मे यथा मे शासनं पितुः॥३५॥
सीतयाऽप्युपवस्तव्या [5]रजनीयं मया सह ॥ [6]एवमृत्विगुपाध्यायैः [7]सह मामुक्तवान्पिता ॥ ३६ ॥
यानियान्यत्र [8]योग्यानि श्वो भाविन्यभिषेचने ॥ तानि मे [9]मङ्गलान्यद्य [10]वैदेह्याश्चैव कारय॥ ३७ ॥
एतच्छ्रुत्वा तु कौसल्या चिरकालाभिकाङ्क्षितम् ॥ हर्ष[11]बाष्पकलं वाक्यमिदं राममभाषत ॥ ३८ ॥
वत्स राम चिरं जीव हतास्ते परिपन्थिनः॥ ज्ञातीन्मे त्वं श्रिया युक्तः सुमित्रायाश्च नन्दय॥ ३९ ॥
कल्याणे [12]वत नक्षत्रे [13]मयि जातोसि पुत्रक ॥ येन त्वया दशरथो गुणैराराधितः पिता ॥ ४० ॥
अमोघं वत मे क्षान्तं पुरुषे पुष्करेक्षणे ॥ येयमिक्ष्वाकुराज्यश्रीः पुत्र त्वां संश्रयिष्यति ॥ ४१ ॥
इत्येवमुक्तो [14]मात्रेदं रामो भ्रातरमब्रवीत् ॥ प्राञ्जलिं [15]प्रह्वमासीनमभिवीक्ष्य स्मयन्निव ॥ ४२ ॥
लक्ष्मणेमां मया सार्धं प्रशाधि त्वं वसुंधराम् ॥ द्वितीयं मेन्तरात्मानं त्वामियं श्रीरुपस्थिता ॥४३॥
सौमित्रे भुंक्ष्व भोगां[16]स्त्वमिष्टान्राज्यफलानि च॥ [17]जीवितं च हि राज्यं च त्वदर्थमभिकामये॥४४॥
इत्युक्त्वा लक्ष्मणं रामो मातरावभिवाद्य च ॥ अभ्यनुज्ञाप्य सीतां च [18]जगाम स्वं निवेशनम् ॥४५॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे चतुर्थः सर्गः ॥ ४ ॥

णयौवराज्याभिषेचनंश्रुत्वा सुमित्रादिभिरन्वास्यमाना प्राणायामेन प्राणायामपूर्वकं । पुरुषं पुरुषसूक्तप्रतिपाद्यपुरुषशब्दवाच्यं । जनार्दनं नारायणं । ध्यायमाना ध्यायन्ती । आमीलितेक्षणा तस्थौ ॥३२—३३॥ तथा पूर्वोक्तरीत्या। सन्नियमां समीचीननियमां ॥३४॥ मेपितुःशासनंयथातथाऽभिषेकःश्वोभवितेतिसंवन्धः ॥ ३५ ॥ सीतयामयापि सह तुल्यतया । इयंरजनी एतद्दिनरात्रिः । उपवस्तव्या । अस्यांरजन्यामुपवस्तव्यमित्यर्थः। किंत्वयैवोच्यतेनेत्याह—एवमिति ॥३६॥ मङ्गलानि मङ्गलकर्माणि ॥३७॥ हर्षबाष्पकलं हर्षबाष्पेणकलमव्यक्तमधुरं । वाक्यं ईषद्वाक्यं ॥ ३८ ॥ हताः भवन्त्वितिशेषः । ज्ञातीन् बन्धून् ॥ ३९ ॥ कल्याणे अतिशोभने । नक्षत्रे मयिजातोसि । वतेतिसंतोषे । "खेदानुकंपासंतोषविस्मयामन्त्रणेवत" इत्यमरः । मयेतिपाठे मयाहेतुनेत्यर्थः । येन येनकारणेन ॥ ४० ॥ पुष्करेक्षणे पुण्डरीकाक्षे । पुरुषे नारायणविषये । मेक्षान्तं व्रतोपवासादिक्लेशसहनं । अमोघं सफलं । साफल्येहेतुमाह—येयमिति । सासंश्रयिष्यतीतिशेषः ॥ ४१ ॥ स्मयन्निव समन्दस्मितइत्यर्थः । सतोषातिशयेनाब्रवीदितिभावः ॥ ४२ ॥ द्वितीयमन्तरात्मानं द्वितीयंप्राणं ॥ ४३ ॥ भोगान् भोग्यपदार्थान् । इष्टान् अभिमतान् । राज्यफलानि अनर्घ्यरत्नवस्त्राभरणादीनि ॥ ४४ ॥ सीतांचाभ्यनुज्ञाप्य मातृभ्यामितिशेषः ॥ ४५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीतांबराख्याने अयोध्याकाण्डव्याख्याने चतुर्थःसर्गः ॥ ४ ॥

शि० एवमुपाध्यायैरुक्तंवचःसपितामामुक्तवान् ॥ ३६ ॥ **ति०** कल्याणेनक्षत्रे शुभयुक्तेकाले । मयाजातः जनितः ॥ ४० ॥
ति० यद्वाराज्यफलानि धर्मार्थौ । तौचप्राप्नुहि ॥ ४४ ॥ इतिचतुर्थस्सर्गः ॥ ४ ॥

[पा०] १ ज. तदासनियमां. क—छ. झ. तथासनियमां. २ ख. ग. ज. मेवंसोभिगम्य. ३ ङ. झ. ट. स्तामिदंवरं. ग. घ. ज. स्तामनिन्दिताम्. ४ क. च. ज. श्वोऽभिषेकोऽयं. ५ ख. रजनीचमया. ६ ङ. झ. ट. एवमुक्तमुपाध्यायैः. ७ ङ. छ. झ. ट. सहिमामुक्तवान्. ८ घ. योज्यानि. ९ ख. मङ्गलान्यत्र. १० ख. ग. घ. ज. वैदेह्याश्चापि. ११ ङ. छ. झ. ञ. ट. बाष्पाकुलं. १२ घ. कल्याणेऽदितिनक्षत्रे. १३ ख—च. झ. ट. मयाजातोसि. १४ ङ. छ. झ. ट. मात्रातु. १५ ङ. ट. प्राक्समासीनं. १६ घ. भोग्यांस्त्वं. १७ ङ. झ. ट. जीवितंचापि. १८ ङ. छ. झ. ट. ययौस्वंचनिवेशनम्.

पञ्चमः सर्गः ॥ ५ ॥

वसिष्ठेनदशरथचोदनयारामनिवेशनंप्राप्यसीतयासहमन्त्रवद्व्रताचरणनिवेदनपूर्वकं पुनर्दशरथसमीपगमनम् ॥ १ ॥ वसिष्ठाभ्यनुज्ञातेनृपेणसभाजनविसर्जनपूर्वकंस्वान्तःपुरप्रवेशः ॥ २ ॥

संदिश्य रामं नृपतिः श्वो भाविन्यभिषेचने ॥ पुरोहितं समाहूय वसिष्ठं चेदम्[1]ब्रवीत् ॥ १ ॥
गच्छोपवासं काकुत्स्थं कारयाद्य तपोधन ॥ श्रीयशोराज्य[2]लाभाय वध्वा सह यतव्रतम्[3] ॥ २ ॥
तथेति च स राजानमुक्त्वा वेदविदां वरः ॥ स्वयं वसिष्ठो भगवान्ययौ रामनिवेशनम् ॥ ३ ॥
उपवासयितुं[4] रामं मन्त्रवन्मन्त्रकोविदः[5] ॥ ब्राह्मं रथवरं युक्तमास्थाय सुदृढव्रतः[6] ॥ ४ ॥
स रामभवनं[7] प्राप्य पाण्डुराभ्रघनप्रभम् ॥ तिस्रः कक्ष्या रथेनैव विवेश मुनिसत्तमः ॥ ५ ॥
तमागतमृषिं[8] रामस्त्वरन्निव ससंभ्रमः[9] ॥ मानयिष्यन्स मानार्हं निश्चक्राम निवेशनात् ॥ ६ ॥
अभ्येत्य त्वरमाणश्च[10] रथाभ्याशं मनीषिणः ॥ ततोऽवतारयामास परिगृह्य रथात्स्वयम् ॥ ७ ॥
स चैनं प्रश्रितं दृष्ट्वा संभाष्याभिप्रसाद्य च ॥ प्रियार्हं[11] हर्षयन्राममित्युवाच पुरोहितः ॥ ८ ॥
प्रसन्नस्ते पिता राम यौवराज्य[12]मवाप्स्यसि ॥ उपवासं भवानद्य करोतु सह सीतया ॥ ९ ॥
प्रातस्त्वामभिषेक्ता हि यौवराज्ये नराधिपः ॥ पिता दशरथः प्रीत्या ययातिं नहुषो यथा ॥१०॥
इत्युक्त्वा स तदा राममुपवासं यतव्रतम्[13] ॥ मन्त्रवत्[14]कारयामास वैदेह्या सहितं[15] मुनिः ॥ ११ ॥
ततो यथावद्रामेण स राज्ञो गुरुरर्चितः ॥ अभ्यनुज्ञाप्य काकुत्स्थं ययौ रामनिवेशनात् ॥ १२ ॥
सुहृद्भिस्तत्र रामोपि सहासीनः[16] प्रियंवदैः ॥ सभाजितो विवेशाथताननुज्ञाप्य सर्वशः ॥ १३ ॥
हृष्टनारीनरयुतं[17] रामवेश्म तदा[18] बभौ ॥ यथा मत्तद्विजगणं प्रफुल्लनलिनं सरः ॥ १४ ॥
स राजभवनप्रख्यात्तस्माद्रामनिवेशनात् ॥ निर्गत्य[19] ददृशे मार्गं वसिष्ठो जनसंवृतम् ॥ १५ ॥

अथोपवासस्यपुरोहितसंकल्पमन्त्रादिसाध्यत्वात्पुरोहितंसंदिशतिपञ्चमे। संदिश्य व्रतोपवासादिकंकुर्वित्यनुज्ञाप्य ॥१॥ काकुत्स्थमुपवासंकारय "हृक्रोरन्यतरस्यां" इतिविकल्पेनकाकुत्स्थशब्दस्यकर्मसंज्ञा ॥२–३॥ ब्राह्मं ब्राह्मणवहनयोग्यं। युक्तं वाजिभिर्युक्तं। आस्थाय ययावितिपूर्वेणसंबन्धः ॥ ४ ॥ पाण्डुराभ्रघनप्रभं पाण्डुराभ्रमूर्तसदृशप्रभं । "घनोमेघेमूर्तिगुणेत्रिपुमूर्तेनिरन्तरे" इत्यमरः ॥ ५॥ त्वरन्निव इवशब्दोवाक्यालंकारे। मानयिष्यन् माननाद्धेतोः । "लक्षणहेत्वोःक्रियायाः" इतिहेत्वर्थेशतृप्रत्ययः ॥ ६ ॥ रथाभ्याशं रथसमीपं ॥ ७ ॥ प्रश्रितं विनीतं । "विनीतप्रश्रितौसमौ" इत्यमरः । संभाष्य कुशलप्रश्नंकृत्वा । सभाज्येतिपाठेकुशलप्रश्नाधीनप्रीतिंजनयित्वेत्यर्थः। सभाजप्रीतिसेवनयोरित्यस्माद्धातोरार्षोल्यप्। प्रियार्हं प्रियकथनार्हं ॥८—११॥ काकुत्स्थमभ्यनुज्ञाप्य अनुयान्तंरामंनिवर्तस्वेत्युक्त्वा । ययौ निर्ययौ ॥ १२—१५ ॥

ती० पाण्डुराभ्रघनप्रभं पाण्डुराभ्रस्येवघनासान्द्राप्रभायस्यतत् ॥ ५ ॥ ति० त्वरन्निव त्वरन्नेव ॥ ६ ॥ ति० राजभवनं मूलराजभवनं । प्रख्यं सदृशं ॥ १५ ॥

[पा०] १ क. मिदमब्रवीत्. २ ङ. छ. झ. ञ. ट. श्रेयसेराज्य. ३ ङ. छ. झ. यतव्रत. ४ ङ. छ. झ. ट. यितुंवीरं. ५ ङ. छ. झ. ट. मन्त्रविन्मन्त्रकोविदम्. ज. मन्त्रयन्मन्त्रपारगः. ख. ग. घ. मन्त्रवन्मन्त्रपारगः. क. च. ञ. काकुत्स्थंमन्त्रकोविदम्. ६ ङ. छ. ग. ज. झ. ट. ठ. सुधृतव्रतः. ७ क. च. ञ. भवनंगत्वा. ८ ख. समागतमृषिं. ९ ङ. छ. झ. ञ. ट. ससंभ्रमम्. १० ख. ग. ङ. छ. झ. ट. त्वरमाणोथ. ११ क. प्रियार्हो. १२ ङ. छ. झ. ट. यत्त्वंराज्य. १३ ख. घ. छ. झ. यतव्रतः. १४ क. ङ. च. ञ. मन्त्रवित्कारयामास. १५ ङ. छ. झ. सहितंशुचिः. १६ क. च. सुखासीनः. १७ क. च. ञ. प्रहृष्टनरनारीकं. १८ क. बभौतदा. १९ क. ग. घ. च. ज. ञ. निस्सृत्य ददृशे.

वृन्दवृन्दैरयोध्यायां राजमार्गाः समन्ततः ॥ बभूवुरभिसंबाधाः कुतूहलजनैर्वृताः ॥ १६ ॥
जनवृन्दोर्मिसंघर्षहर्षस्वनवतस्तदा ॥ बभूव राजमार्गस्य सागरस्येव निस्वनः ॥ १७ ॥
सिक्तसंमृष्टरथ्या हि तदहर्वनमालिनी ॥ आसीदयोध्या नगरी समुच्छ्रितगृहध्वजा ॥ १८ ॥
तदा ह्ययोध्यानिलयः सस्त्रीबालाबलो जनः ॥ रामाभिषेकमाकाङ्क्षन्नाकाङ्क्षदुदयं रवेः ॥ १९ ॥
प्रजालङ्कारभूतं च जनस्यानन्दवर्धनम् ॥ उत्सुकोऽभूज्जनो द्रष्टुं तमयोध्यामहोत्सवम् ॥ २० ॥
एवं तं जनसंबाधं राजमार्गं पुरोहितः ॥ व्यूहन्निव जनौघं तं शनै राजकुलं ययौ ॥ २१ ॥
शुभ्राभ्रशिखरप्रख्यं प्रासादमधिरुह्य सः ॥ समीयाय नरेन्द्रेण शक्रेणेव बृहस्पतिः ॥ २२ ॥
तमागतमभिप्रेक्ष्य हित्वा राजासनं नृपः ॥ पप्रच्छ स च तस्मै तत्कृतमित्यभ्यवेदयत् ॥ २३ ॥
तेन चैव तदा तुल्यं सहासीनाः सभासदः ॥ आसनेभ्यः समुत्तस्थुः पूजयन्तः पुरोहितम् ॥२४॥
गुरुणा त्वभ्यनुज्ञातो मनुजौघं विसृज्य तम् ॥ विवेशान्तःपुरं राजा सिंहो गिरिगुहामिव ॥ २५ ॥

तदग्र्यरूपं प्रमदागणाकुलं महेन्द्रवेश्मप्रतिमं निवेशनम् ॥
विदीपयंश्चारु विवेश पार्थिवः शशीव तारागणसंकुलं नभः ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे पञ्चमः सर्गः ॥ ५ ॥

वृन्दानुवद्धानिवृन्दानियेषांतेवृन्दवृन्दाः । तैः । कुतूहलजनैर्वृताराजमार्गा अभिसंबाधाः निविडाः । बभूवुरितियोजना । वृन्दवृन्दमितिपाठे वृन्दंवृन्दंयथा-भवतितथास्थितैरितिशेषः ॥ १६ ॥ जनवृन्दान्येवऊर्मयः तेषां संघर्षः अन्योन्यघटनं । हर्षः आनन्दोद्रेकः ताभ्यांजनितःस्वनोस्यास्तीतिस्वनवान् तस्य।एतेन सागरोपमासमर्थिता ॥१७॥ तदहः तस्मिन्नहनि। वनमालिनी अलङ्कारार्थंविरचितक्रमुककदल्यादिवनपङ्क्तियुक्तेतियावत्॥१८॥ सस्त्रीबालाबलः अबलाःबलरहिताः वृद्धाइतियावत् । रामाभिषेकमाकाङ्क्षन्नाकाङ्क्षदुदयंरवेरिति रामाभिषेकार्थंउदयमाकाङ्क्षदित्यर्थः । श्वोरामाभिषेकइतिवार्ता यदासमजनि तदाप्रभृति रामाभिषेकादरातिशयेन आहारनिद्रादिव्यापारान्विहाय परदिवससूर्योदयमाकाङ्क्षदितिभावः ॥ १९ ॥ प्रजालङ्कारभूतं प्रजालङ्करणहेतुभूतं प्रजालङ्कारप्रचुरमितिवा ॥ २० ॥ राजमार्गं पश्यन्नितिशेषः। तंजनौघंव्यूहन्निव रामाभिषेकजनितानन्दनिर्भरंजनौघं तत्रतत्रसमूहीकुर्वन्निव । शनैः राजकुलं राजगृहं ययौ ॥२१—२२॥ नृपोदशरथः । राजासनं स्वाधिष्ठितंसिंहासनं। हित्वा प्रत्युत्थायेत्यर्थः । पप्रच्छ किंरामस्योपवासःकारितइतीतिशेषः । सः वसिष्ठः। तस्मै दशरथाय । तत् उपवासकरणं ॥ २३ ॥ तदा दशरथसमुत्थानकाले । तुल्यं युगपत् ॥ २४—२५ ॥ विदीपयन् तेजोविशेषेणद्योतयन् ॥ २६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीतांबराख्याने अयोध्याकाण्डे पञ्चमःसर्गः ॥ ५ ॥

ति० सस्त्रीबालाकुलः स्त्रीबालैस्सहितश्चासावाकुलःसंतोषात्संभ्रान्तचित्तः । आकाङ्क्षन् अभूदितिशेषः ॥ १९ ॥ इतिपञ्चमस्सर्गः ॥ ५ ॥

[पा०] १ ख. ग. वृन्दंवृन्दमयोध्यायां. २ ट. रतिसंबाधाः. ३ क. कुतूहलिजनैर्वृताः. ४ ख. जनसंघोर्मि. ५ क. ग. स्वनवतस्स्वनः. झ. स्वनवृतस्तदा. ६ क. च. ञ. रथ्याच. ७ ङ. छ. झ. ट. तथाचवनमालिनी. ८ ङ. छ. झ. ट. दयोध्यातदहः. ९ क. वृहद्ध्वजा. १० छ. तदाह्ययोध्या. ११ ङ. च. छ. झ. ट. बालाकुलोजनः. १२ क. ग. घ. ङ. छ. झ. ञ ट. न्नाकाङ्क्षनुदयं. १३ ख. जनस्यानन्दिवर्धनम्. १४ ञ. मयोध्यायां. १५ झ. एवंतज्जनसंबाधं. १६ क. घ—छ. झ. ञ. ट. सिताभ्रशिखरप्रख्यं. ख. श्वेताद्रिशिखरप्रख्यं. १७ ङ. छ. झ. ट. मधिरुह्यच. १८ ख. समागतंमुनिंप्रेक्ष्य. १९ ङ. छ. झ. ञ. ट. पप्रच्छक्षमतंतस्मै. २० क. च. ञ. त्सभ्यचोदयत्. २१ ख. ग. तेनचैवसहासीनास्तदातुल्यं. २२ क. ग—ञ. तदभ्यवेषप्रमदाजनाकुलं.

षष्ठः सर्गः ॥ ६ ॥

श्रीरामेणवसिष्ठनियोगात्स्नानादिनियमेनसीतयासहश्रीनारायणोपासनादिपूर्वकं नियमेनकुशसंस्तरेशयनम् ॥ १ ॥ तथा॰ निशावसानेप्रबोधितेनसन्ध्योपासनादिपूर्वकं ब्राह्मणैःपुण्याहवाचनम् ॥ २ ॥ पौरैःपुरालङ्करणादिपूर्वकं दशरथप्रशंसनम् ॥ ३ ॥ रामाभिषेकदिदृक्षयासमागतैर्नानाजानपदजनैर्नगरपरिपूरणम् ॥ ४ ॥

गते पुरोहिते रामः स्नातो नियतमानसः ॥ सह पत्न्या विशालाक्ष्या नारायणमुपागमत् ॥ १ ॥
प्रगृह्य शिरसा पा[1]त्रीं हविषो विधिं[2]वत्तदा ॥ महते दैवतायाज्यं जुहाव [3]ज्वलितेऽनले ॥ २ ॥
शेषं च हविषस्तस्य प्राश्याशास्यात्मनः प्रियम् ॥ ध्यायन्नारायणं देवं स्वास्तीर्णे कुशसंस्तरे ॥ ३ ॥
वाग्यतः सह वैदेह्या भूत्वा नियतमानसः ॥ श्रीमत्यायतने विष्णोः शिश्ये नरवरात्मजः ॥ ४ ॥
एकयामावशिष्टायां [4]रात्र्यां प्रतिविबुध्य सः ॥ अलङ्कारं[5]विधिं कृत्स्नं कारयामास वेश्मनः ॥ ५ ॥
[6]तत्र शृण्वन्सुखा वाचः सूतमागधवन्दिनाम् ॥ पूर्वां [7]सन्ध्यामुपासीनो जजाप [8]यतमानसः ॥ ६ ॥

अथरामस्याभिषेकसन्नाहंदर्शयतिषष्ठे—पुरोहिते गतइत्यसन्निधानकृतराजसगुणनिमित्तकनास्तिक्यव्यावृत्तिः । स्नातइतिकायशुद्धिः । नियतमानसइति मनश्शुद्धिः । सहपत्न्येतिश्रीरङ्गविग्रहानुभवसागरतरणस्यसहायोक्तिः "पत्युर्नोयज्ञसंयोगे" इतिदीक्षानियमस्यपत्नीसहायत्वोक्तिश्च । तृतीययाआराधनकाले सीतायाउपकरणसमर्पणपरताव्यज्यते । विशालाक्ष्येतिरामविग्रहानुभवादपिश्रीरङ्गविग्रहस्यनिरतिशयप्रियास्पदत्वेननिर्निमेषानुभवउक्तः । विशालाक्ष्या नारायणमिति सीतानेत्रवागुरानाकृष्टतयासीतायाअप्राधान्यं । नारायणस्यस्वाभीप्सिततमत्वेनप्राधान्यंचोक्तं । अत्र नारायणइतिश्रीरङ्गनायकउच्यते । उत्तरत्रतस्यैवविभीषणायदानोक्तेः ॥ १ ॥ शिरसापात्रींप्रगृह्येति "उपरिहिदेवेभ्योधारयति" इतिश्रुतिरुपबृंहिता । महतेदैवताय निरतिशयमहिमवतेदैवताय । "तंदेवतानांपरमंचदैवतं" इतिश्रुतेर्नारायणायेत्यर्थः । नारायणमुपागमदित्युपक्रमात् । ध्यायन्नारायणंदेवमित्युत्तरत्रोक्तेश्च । तेनमहतेदैवतायेतिमहादेववाचित्वभ्रान्तिर्निरस्ता । नचव्यस्तस्याविभिन्नविभक्त्यन्तस्यैकपदत्वमेकावाशक्तिरस्ति । महादेवशब्दस्याखण्डस्यशिवेशक्तावपिखण्डपदद्वयस्य प्रस्तुतपरदेवतावरुद्धस्याप्रस्तुतान्यदेवतावाचकत्वकल्पनमन्धतामिस्रनिपातकदुरितादृष्टंविनानशक्यते ॥ २ ॥ आत्मनः प्रियमाशास्य श्रीरङ्गार्पितहविश्शेषं स्वस्यात्यन्तप्रियत्वेनानुसन्धाय नारायणंश्रीरङ्गनायकंध्यायन् कुशसंस्तरे कुशमयेशयनीये ।"शयनीयेसप्ततन्तौसंस्तरःपरिकीर्तितः" इतिनिघण्टुः ॥ ३ ॥ वैदेह्यासहेतिउभयोरप्येकशय्यायांजितेन्द्रियत्वंध्वनितं। श्रीमति "विमानंप्रणवाकारं" इत्याद्युक्तवेदत्रयसारभूतप्रणवाकारे । "ऋचःसामानियजूंषि । साहिश्रीरमृतासतां" इतिश्रुतेः। विष्णोरायतने श्रीरङ्गधाम्नि। शिश्ये शयनंकृतवान् । नरवरात्मजः । स्वस्यसाक्षाद्भगवदवतारत्वेपि श्रीरङ्गविग्रहार्चोपसर्जनभावःस्वावतारानुमतक्षत्रियधर्मानुगुणः॥ ४॥ अलङ्कारविधिं अलङ्कारविधानं। "विधिर्विधानेदैवेपि" इत्यमरः ॥ ५ ॥ सूताः सूतकुलोत्पन्नाः पुण्यश्लोकदेवताकीर्तकाः । मागधाः मगधदेशोत्पन्नाःवंशावलिकीर्तकाः । वन्दिनः स्तुतिपाठकाः । सन्ध्यां सन्ध्याधिदेवतां सूर्यं । उपासीनः ध्यायन् । नियतमानसः

तनि॰ अत्रविशेष्यानुपादानाद्विशालाक्षीशब्दस्यलक्ष्म्यांरूढिप्रायत्वंव्यज्यते । अतएव "कृतेमायांविशालाक्षींतवपूर्वपरिग्रहं" इत्यत्रविशालाक्षीशब्देनलक्ष्मीरूपविशेष्यंव्यज्यते । अत्रनारायणइतिश्रीरङ्गनायकउच्यते । उपागमदित्यत्र अगमदित्यनेनभगवन्मन्दिरप्राप्तिकथनादुपशब्देननिवेदनपर्यन्तभगवदाराधनंव्यज्यते । शेषंगोविन्दराजीयवत् ॥ १ ॥ **शि॰** शिरसा तदुपलक्षितनमस्कारेण । नमस्कारपूर्वकंहविःपात्रंगृहीत्वेत्यर्थः ॥ २ ॥ **ति॰** आत्मनःप्रियं राज्याभिषेकाविघ्नरूपं वस्तुतोरावणवधफलक-

[पा॰] १ क. पात्रं. २ ख. ङ. छ. झ. विधिवत्ततः. ३ छ. झ. ज्वलितानले. ४ क. च. ट. रात्र्यांप्रतिबोध्यसः. घ. रात्र्यांप्रतिविबोध्य. च. ञ. प्रतिविबुध्यवै. ५ ङ. छ. झ. ट. विधिंसम्यक्. ६ च. ञ. ट. ततश्शृण्वन्. ७ घ. संध्यांसमासीनो. ८ झ. ञ. सुसमाहितः.

तुष्टाव प्रणतश्चैव शिरसा मधुसूदनम् ॥ विमलक्षौमसंवीतो वाचयामास च द्विजान् ॥ ७ ॥
तेषां पुण्याहघोषोथ गंभीरमधुरस्तदा ॥ अयोध्यां पूरयामास तूर्यघोषानुनादितः ॥ ८ ॥
कृतोपवासं तु तदा वैदेह्या सह राघवम् ॥ अयोध्यानिलयः श्रुत्वा सर्वः प्रमुदितो जनः ॥ ९ ॥
ततः पौरजनः सर्वः श्रुत्वा रामाभिषेचनम् ॥ प्रभातां रजनीं दृष्ट्वा चक्रे शोभयितुं पुरीम् ॥ १० ॥
सिताभ्रशिखराभेषु देवतायतनेषु च ॥ चतुष्पथेषु रथ्यासु चैत्येष्वट्टालकेषु च ॥ ११ ॥
नानापण्यसमृद्धेषु वणिजामापणेषु च ॥ कुटुंबिनां समृद्धेषु श्रीमत्सु भवनेषु च ॥ १२ ॥
सभासु चैव सर्वासु वृक्षेष्वालक्षितेषु च ॥ ध्वजाः समुच्छ्रिताश्चित्राः पताकाश्चाभवंस्तदा ॥ १३ ॥
नटनर्तकसङ्घानां गायकानां च गायताम् ॥ मनःकर्णसुखा वाचः शुश्रुवुश्च ततस्ततः ॥ १४ ॥
रामाभिषेकयुक्ताश्च कथाश्चक्रुर्मिथो जनाः ॥ रामाभिषेके संप्राप्ते चत्वरेषु गृहेषु च ॥ १५ ॥
बाला अपि क्रीडमाना गृहद्वारेषु संघशः ॥ रामाभिषेकसंयुक्ताश्चक्रुरेवं मिथः कथाः ॥ १६ ॥
कृतपुष्पोपहारश्च धूपगन्धाधिवासितः ॥ राजमार्गः कृतः श्रीमान्पौरै रामाभिषेचने ॥ १७ ॥

नियतमनस्कः अनन्यचित्तइतियावत् । जजाप गायत्रीमितिशेषः ॥ ६ ॥ सन्ध्योपासनानन्तरं मधुसूदनं सूर्यान्तर्वर्तिनंनारायणं तुष्टाव मित्रस्येत्यादिनेतिशेषः। शिरसाप्रणतः दण्डवत्प्रणतः । विमलक्षौमसंवीतइत्यनेन नूतनवस्त्रपरिवृत्त्या प्रातर्गौणस्नानमुक्तं। वाचयामास स्वस्तिवाचनंकारयामासेत्यर्थः ॥ ७ ॥ तूर्यघोषानुनादितः तूर्यघोषानुबन्धिनादयुक्तः ॥ ८ ॥ प्रमुदितः संतुष्टः अभूत् ॥ ९ ॥ पुरींशोभयितुंचक्रे पुरशोभोत्पादनार्थं संमार्जनालेपनवितानमालिकाबन्धनकर्मादिकमकरोदित्यर्थः ॥१०॥ चैत्येषु बौद्धालयेषु। अट्टालकेषु प्राकारोपरियुद्धार्थपरिकल्पितचतुस्स्तंभमण्डपेष्वितियावत् ॥ ११—१२॥ आलक्षितेषु आसमन्ताल्लक्षितेषु। समुन्नतत्वाद्दूरादप्यक्षिगोचरेष्वित्यर्थः। ध्वजाः सचिह्नाः । पताकाः चिह्नरहिताः । समुच्छ्रिताः बद्धाः ॥ १३॥ नटाः नाटकाः अभिनयकर्तारः। नर्तकाः केवलाङ्गहारकृतः । मनःकर्णसुखाः "संश्रवे-मधुरंवाक्यं" इत्युक्तरीत्याश्रवणमात्रेणसुखकराः पश्चान्मनसश्चाह्लादकाइत्यर्थः । शुश्रुवुः जनाइतिशेषः ॥ १४ ॥ मिथः अन्योन्यं। "मिथोन्योन्यं" इत्यमरः। चत्वरेषु अङ्गणेषु । गृहेषुस्त्रीभिः बहिरङ्गणेषुजनैश्चकथाश्चक्रुरितिरामभक्तावकृत्रिमत्वमुक्तं॥१५–१६॥ कृत-

वनगमनरूपं आशास्य संकल्प्येत्यर्थः ॥ ३ ॥ शि० सूताः पौराणिकाः ॥६॥ शि० सरामःद्विजानतुष्टाव । मधुसूदनं मधुसूदनशब्दं । वाचयामासच द्विजैरुच्चारयामासेत्यर्थः । मधुसूदनशब्दार्थस्तु मधौचैत्रे सूःप्रादुर्भावोयस्यसः । उद्यतेस्वस्वकल्याणार्थंसर्वैरुच्यतइतिउत् । अनितिब्रह्मादीनपिपालयतीतिअनः । त्रयाणांकर्मधारयः । एतेनस्वनामोच्चारणविषयकप्रीत्यतिशयोरघुनाथस्यसूचितः । दूरान्वयीदमितितुनभ्रमितव्यम् । पाठक्रमादर्थक्रमस्यबलीयस्त्वादाकाङ्क्षितत्वाच्चेतिदिक् ॥ ७ ॥ शि० तदा मधुसूदनशब्दोच्चारणकाले । तेषां द्विजानां । तूर्यघोषानुनादितः तूर्यघोषानुनादविशिष्टः । पुण्याहघोषोत्थगंभीरमधुरः पुण्यंपवित्रत्वंनजहातीतिपुण्याहः । सार्वकालिकपवित्रतासंपादकधर्मविशिष्टइत्यर्थः । सएवघोषः मधुसूदनशब्दशब्दःतेनोत्थःसंजातःगंभीरमधुरःगंभीरेणगांभीर्येणसहितः मधुरोमाधुर्यं गांभीर्यमाधुर्येइत्यर्थः । अयोध्यांपूरयामास । गंभीरमधुरशब्दौभावप्रधानौ ॥ ८ ॥ शि० चक्रे प्रयत्नमितिशेषः । शोभायुतामित्याचार्यपाठः ॥ १० ॥ शि० चैत्येषु चैत्यंचैतन्यंअस्तियेषु । अर्शआद्यजन्तः । इदंदेवतायतनादिविशेषणम् । एतेनरामधाम्नश्चैतन्यंव्यक्तं । तत्रप्रमाणं "यत्रगुल्मलतावृक्षानित्यशोभान्तिचिन्मयाः" इत्यादि । चैत्येषुबौद्धालयेष्वितिगोविन्दाचार्यव्याख्यानंतु "ननास्तिकोनानृतकः—"इत्यादिनाबालकाण्डोक्तेनविरोधात्त्यक्तमितिदिक् ॥ ११ ॥ ति० ततः तत्रायोध्यायां ॥ १४ ॥ ति० रामाभिषवः रामाभिषेकः ॥ १६ ॥

[पा०] १ क. ङ. च. छ. झ. ञ. ट. सद्विजान्. २ ञ. ट. घोषोत्थ. ३ झ. गर्भारमधुरस्तदा. ङ. छ. झ. ट. मधुरस्तथा. ४ क. च. ञ. पुरम्. ५ च. ञ. शुभ्राभ्रशिखराभेषु. ६ क. ख. ङ. च. छ. झ. ञ. ट. समुच्छ्रितास्साधु. ७ ङ. छ. झ. श्चाभवंस्तथा. ८ घ. नर्तकीनटसङ्घानां. ९ ङ. छ. झ. ट. शुश्रावजनताततः. १० क. ख. ग. ङ. ञ. रामाभिषवयुक्ताश्च. च. छ. ज. ठ. रामाभिषवसंयुक्ताः. ११ क. ख. ञ. ट. सर्वशः. १२ क. ख. ङ. च. झ. रामाभिषवसंयुक्ताः. १३ क—ङ. झ. ञ. चक्रुरेवंकथामिथः. छ. कथाश्चक्रुर्मिथोजनाः.

प्रकाशंकरणार्थं च निशागमनशङ्कया ॥ दीपवृक्षांस्तथा चक्रुरनुरथ्यासु सर्वशः ॥ १८ ॥
अलंकारं पुरस्यैवं कृत्वा तत्पुरवासिनः ॥ आकाङ्क्षमाणा रामस्य यौवराज्याभिषेचनम् ॥ १९ ॥
समेत्य सङ्घशः सर्वे चत्वरेषु सभासु च ॥ कथयन्तो मिथस्तत्र प्रशशंसुर्जनाधिपम् ॥ २० ॥
अहो महात्मा राजाऽयमिक्ष्वाकुकुलनन्दनः ॥ ज्ञात्वा यो वृद्धमात्मानं रामं राज्येऽभिषेक्ष्यति ॥ २१ ॥
सर्वे ह्यनुगृहीताः स्म यन्नो रामो महीपतिः ॥ चिराय भविता गोप्ता दृष्टलोकपरावरः ॥ २२ ॥
अनुद्धतमना विद्वान्धर्मात्मा भ्रातृवत्सलः ॥ यथा च भ्रातृषु स्निग्धस्तथाऽस्मास्वपि राघवः ॥ २३ ॥
चिरं जीवतु धर्मात्मा राजा दशरथोऽनघः ॥ यत्प्रसादेनाभिषिक्तं रामं द्रक्ष्यामहे वयम् ॥ २४ ॥
एवंविधं कथयतां पौराणां शुश्रुवुस्तदा ॥ दिग्भ्योपि श्रुतवृत्तान्ताः प्राप्ता जानपदा जनाः ॥ २५ ॥
ते तु दिग्भ्यः पुरीं प्राप्ता द्रष्टुं रामाभिषेचनम् ॥ रामस्य पूरयामासुः पुरीं जानपदा जनाः ॥ २६ ॥
जनौघैस्तैर्विसर्पद्भिः शुश्रुवे तत्र निस्वनः ॥ पर्वसूदीर्णवेगस्य सागरस्येव निस्वनः ॥ २७ ॥

ततस्तदिन्द्रक्षयसन्निभं पुरं दिदृक्षुभिर्जानपदैरुपागतैः ॥
समन्ततः सस्वनमाकुलं बभौ समुद्रयादोभिरिवार्णवोदकम् ॥ २८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे षष्ठः सर्गः ॥ ६ ॥

पुष्पोपहारः कृतपुष्पबलिः ॥ १७ ॥ प्रकाशकरणार्थं वितानक्रमुककदल्यादिसमग्रताजनिततिमिरतिरोहितवस्तुप्रकाशनार्थं । यद्वा निशागमनशङ्कयाप्रकाशकरणार्थं । दीपवृक्षान् वृक्षाकारदीपस्तंभान् । अभिषेकानन्तरंगजस्कन्धाधिरूढतयाभिषेकालंकारप्रदर्शनार्थंनिर्गमनात्पूर्वंयदिकार्यवशान्निशास्यात्तदारामालंकारप्रदर्शनार्थंदीपवृक्षान् । अनुरथ्यासु रथ्यासुरथ्यासु । विभक्तेर्लुगभावआर्षः । निशागमनशङ्कयारामस्यप्रकाशकरणार्थंअनुरथ्यासुसर्वशः सर्वप्रकारान् । दीपवृक्षान्चक्रुश्च । तथाशब्दश्चार्थः ॥१८॥ अलङ्कारमित्यादिश्लोकद्वयम् ॥ १९—२० ॥ प्रशंसामेवाह—अहोइत्यादि ॥ २१ ॥ सर्वेप्यनुगृहीताःस्म देवेनेतिशेषः । नः अस्मान् । गोप्ता भवितेतिसंबन्धः । दृष्टलोकपरावरः दृष्टेयेलोकेपरावरेउत्कृष्टापकृष्टवस्तुनीयेनसतथोक्तः ॥ २२—२४ ॥ श्रुतवृत्तान्ताः श्रुतरामाभिषेकवार्ताः अतएवदिग्भ्यःप्राप्ताः जानपदाजनाः एवंविधं कथयतांपौराणांशुश्रुवुः । एवंविधंवाक्यजातमित्यर्थसिद्धं ॥ २५ ॥ पूर्वदिनेसकलजनसन्निधौ रामाभिषेकस्यप्रतिश्रुतत्वाद्रामस्यपुरीमितिनिर्दिष्टवान्नृपिः ॥२६॥ विसर्पद्भिः नानादेशेभ्यआगच्छद्भिः । उत्पादितइतिशेषः । उदीर्णवेगस्य उज्जृंभितवेगस्य ॥ २७ ॥ इन्द्रक्षयः इन्द्रगृहं । "निवेशःशरणंक्षयः" इत्यमरः । अयोध्यापुरस्यामरावतीसादृश्येवक्तव्ये तत्सारभूतेन्द्रभवनदृष्टान्तीकरणादयोध्यायाअतिरमणीयताद्योत्यते । जानपदैःसमन्ततः आकुलमितिसंबन्धः । समुद्रयादोभिः समुद्रान्तर्वर्तितिमितिमिङ्गिलादिजन्तुभिः । "यादांसिजलजन्तवः" इत्यमरः । कर्णावतंसादिपदवदविश्लेषप्रदर्शनायसमुद्रशब्दः । यद्वा समुद्रयादोभिः स-

ति० अनुरथ्यासु रथ्यापार्श्वयोः ॥ १८ ॥ स० आकाङ्क्षमाणाः इच्छन्तः । काङ्क्षिधातोश्शानश् । तेनकाङ्क्षिधातोःपरस्मैपदित्वेनकथमात्मनेपदित्वमितिशङ्कानवकाशः ॥ १९ ॥ ति० दृष्टलोकपरावरः भावप्रधानोनिर्देशः । यथावदवगततज्जनप्राशस्त्याप्राशस्त्यः । शि० दृष्टाःलोकाभुवनानिपरावराःउत्तमाधमाःयेनसः । स० दृष्टोज्ञातोलोकोयेनसदृष्टलोकः पराःलोकोत्तमत्वेनप्रसिद्धाब्रह्मादयःअवरायस्मादितिपरावरः । दृष्टलोकश्चासौपरावरश्चेतिवा । परोऽवरश्चलोकोदृष्टो नेतिवा । "कडाराःकर्मधारये" इति परनिपातः ॥ २२ ॥ ति० उपाहितैः उपागतैरित्यर्थः । हिगतौइत्यस्यरूपं । स० "भूमिविद्युत्सरिल्लतावनिताभिधानानि" इति लिङ्गानुशासनसूत्रे सरिद्वाचिनांशब्दानांस्त्रीत्वमभिधाय "यादोनपुंसकं यादश्शब्दस्सरिद्वाचकोपिक्लीबस्स्यात्" इति यादश्शब्दस्यनदीवाचकत्वोक्तेः समुद्रयादोभिः समुद्रसंगतनदीभिरिवेतिवा ॥ २८ ॥ इतिषष्ठस्सर्गः ॥ ६ ॥

[पा०] १ क—झ. प्रकाशीकरणार्थंच. २ घ. स्तत्रआशशंसुर्जनाधिपम्. ३ क. ज. ज. कुलवर्धनः. ४ ङ. छ. झ. ट. वृद्धंस्वमात्मानं. ५ ङ. झ. शुश्रुवुःपुरे. छ. पुरे. ६ क. ग. ङ. च. झ. ञ. ट. दिग्भ्योविश्रुत. ७ ङ. छ. भ. रुपाहितैः.

सप्तमः सर्गः ॥ ७ ॥

अपराह्णेप्रासादोपरिसंचरन्त्याकुब्जयामन्थराभिधयाकैकेयीप्रियदास्याऽयोध्यामहोत्सवस्यकौसल्ययाब्राह्मणेभ्योहर्षेणधनादिवितरणस्यचदर्शनेनरामस्यधात्रींप्रतितत्कारणप्रश्नः ॥ १ ॥ धात्र्यारामाभिषेकस्यतत्कारणत्वंबोधितयातयासरभसंकैकेयीमेत्यतांप्रतिदशरथगर्हणपूर्वकं रामाभिषेकनिवेदनेनतद्विघातनचोदना ॥ २ ॥ कैकेय्यातांप्रतिरामाभिषेकस्यस्वाभीष्टत्वनिवेदनेनपारितोषिकतयाकिंचिदाभरणवितरणम् ॥ ३ ॥

ज्ञातिदासी यतो जाता कैकेय्यास्तु सहोषिता ॥ प्रासादं चन्द्रसंकाशमारुरोह यदृच्छया ॥ १ ॥
सिक्तराजपथां रम्यां प्रकीर्णकुसुमोत्कराम् ॥ अयोध्यां मन्थरा तस्मात्प्रासादादन्ववैक्षत ॥ २ ॥
पताकाभिर्वरार्हाभिर्ध्वजैश्च समलंकृताम् ॥ वृतां छन्दपथैश्चापि शिरःस्नातजनैर्वृताम् ॥ ३ ॥

मुद्रगामिनीभिर्नदीभिः "यादोनपुंसकं" इति यादश्शब्दस्यनदीवाचकत्वेपिनपुंसकत्वंपाणिनीयलिङ्गानुशासनोक्तं । उदकशब्देनसत्त्वनत्वमुक्तं ॥ २८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीतांबराख्याने अयोध्याकाण्डव्याख्याने षष्ठःसर्गः ॥ ६ ॥

———

अथरावणवधकाङ्क्षिभिर्देवैराविष्टमन्थरावाक्याद्रामाभिषेकविघ्नःप्रतिपाद्यते । पूर्वसर्गे गतेपुरोहितइत्यादिना तूर्यघोषानुनादितइत्यन्तेन पूर्वदिवसेअभिषेकाङ्गभूतत्रतोपवासादिकमाचरतोरामस्यवृत्तान्तमभिधाय कृतोपवासंतुतदेत्यारभ्य सर्गपर्यन्तेन रामाभिषेकश्रवणजनितानन्दनिर्भराणांपौराणांजानपदानांच जनानां रामाभिषेकदिवसप्राक्तनवृत्तान्तमभिधाय वाचःक्रमवर्तित्वाद्दृषिः पूर्वदिवसप्रवृत्तकैकेयीवृत्तान्तंवक्तुमुपक्रमते—ज्ञातिदासीत्यादिना। कैकेय्याःज्ञातिदासी कैकेयीबन्धुदासी । "सगोत्रबान्धवज्ञातिबन्धुस्वस्वजनाःसमाः" इत्यमरः । यतोजाता यत्रकुत्रचिज्जाता । अविज्ञातदेशमातापितृकेत्यर्थः । अतःकैकेय्याज्ञातिदासीत्वमपि स्वोदरप्रपूरणार्थंकृतमित्यवगन्तव्यं । सहोषिता सहावस्थिता । मन्थरायाःकैकेय्यासहावस्थानमपिहास्यहेतुभूतकुब्जात्वनिबन्धनं । यदृच्छया स्वैरितया । "यदृच्छास्वैरिता" इत्यमरः । यद्वा यतोजाता यतःकुतश्चिज्जाता । तादृशीनामयोध्यायां जननासंभवात् । यद्वा तन्नामजातिनिरूपणायोग्यतयातथानिर्देशः । आचार्यास्तुदेवैरेवंस्वकार्यार्थंकैकेयीं भेदयितुंप्रेषितेतिदिव्यरहस्यस्यगोप्यतयातथानिर्देशइत्याहुः ॥ १ ॥ प्रासादादन्ववैक्षत पूर्वश्लोकेआरोहणस्योक्तत्वात्प्रासादादित्यस्यान्ववैक्षतेत्यनेनसंबन्धः । "अधिकरणेचोपसङ्ख्यानं" इत्यधिकरणेल्यब्लोपेपञ्चमी । प्रासादेस्थित्वाप्रैक्षतेत्यर्थः ॥ २ ॥ वरार्हाभिः श्रेष्ठाभिरित्यर्थः । छन्दपथैर्वृतां स्वच्छन्दगमनयोग्योपवीथीभिरावृतां । शिरस्स्नातैःशिरसास्ना-

ति० ज्ञातिदासीयतोनित्यमितिपाठे यतःकैकेय्याज्ञातेर्मातृकुलस्यदासी यतश्चकैकेय्यानित्यंसहोषिता अतोजनकोलाहलंश्रुत्वाकैकेय्यैतदर्थंनिवेदयितुं यदृच्छया स्वयमेव नत्वन्यप्रेरणया प्रासादमारुरोहेत्यन्वयः । इदंतुयुक्तं । "मन्थरानामकार्यार्थमप्सराप्रेपितासुरैः । दासीकाचनकैकेय्यैदत्ताकेकयभूभृता" इतिपाद्मोक्तेः। कार्यार्थं रावणवधरूपकार्यार्थं । दासीस्वयमागत्यकैकयराजस्यजातेतिशेषः । शि० अजाता आय विष्णवे तेनसहोद्वाहार्थमित्यर्थः । जायतेकुशध्वजभार्यायांप्रादुर्भवतीत्यजा । प्रतिज्ञातरावणवधवेदवत्यपरावस्थाकमाण्डवीत्यर्थः । तयासहअततिसततंगच्छतीत्यजातामन्थरेत्यर्थः । यतः कैकेय्याज्ञातिदासी ज्ञातिर्ज्ञानंतद्युक्तादासी अतिज्ञानवत्यनुचरी । अजातेत्यनेनवेदवत्यभिप्रायाभिज्ञत्वंतद्धिताचरणकर्तृत्वंचमन्थरायाव्यक्तम् ॥ १ ॥ ती० पताकाभिः सूक्ष्मध्वजैः । ध्वजैः स्थूलध्वजैः । छन्नपथैः पूरितनिम्नोन्नतप्रदेशैः । कृतां अलंकृतां । ति० वरार्हाभिः श्रेष्ठयोग्याभिः राजयोग्याभिरितियावत् । एतदुत्तरं "कृतांछन्नपथैश्चापिस्वच्छन्दकपथैर्वृताम्" इत्यर्धंपठन्ति । स्वच्छन्दकपथैः उत्सवादिषुजनभूयस्त्वेनप्रवेशनिर्गमार्थंप्राकारादिभङ्गेनकृतैर्मार्गैः । शिरस्स्नातैः कृताभ्यङ्गस्नानैः । शि० वरार्हाभिः वराःसर्वश्रेष्ठाःअतएवअर्हाः अयोध्यायोग्याः । कर्मधारयः। किंचवरोऽर्हःपूजायासां । किंच वरैस्सर्वश्रेष्ठैर्ब्रह्मादिभिरर्हाःप्रशंसिताइत्यर्थः। एतेन तत्पताकानांप्राकृतविलक्षणत्वंसूचितं । शिरस्स्नातजनैः मूर्धाभिषिक्तराजभिरित्यर्थः । किंच शिरसिस्नातंविधिनाऽभिषेकोयेषां । किंच छन्दःस्वाधीनःपथो-

[पा०] १ ङ. छ. झ. कैकेय्यातु. २ क. ख. ग. च. झ. ञ. पथांकृत्स्नां. ३ क. ख. ङ. छ. झ. ञ. कमलोत्पलाम्. च. कमलोत्कराम्. ४ ग. वृत्तांस्वच्छन्दपथगैः. ख. वृतांजानपदैश्चापि. घ. कृतांछन्नपथैश्चापि. ङ. च. छ. ञ. कृतांछन्नपथैश्चापि स्वच्छन्दकपथैर्वृताम् । सिक्तांचन्दनतोयैश्चशिरस्स्नातजनैर्युताम्. । झ. रमलंकृतां । सिक्तांचन्दनतोयैश्चशिरस्स्नातजनैर्युताम्.

माल्यमोदकहस्तैश्च द्विजेन्द्रैरभिनादिताम् ॥ शुक्लदेवगृहद्वारां सर्व[1]वादित्रनिस्वनाम् ॥ ४ ॥
संप्रहृष्टजनाकीर्णां ब्रह्मघोषो[2]भिनादिताम् ॥ प्रहृष्टवरहस्त्यश्वां सं[3]प्रणर्दितगोवृषाम् ॥ ५ ॥
[4]प्रहृष्टमुदितैः पौरैरुच्छ्रितध्वजमालिनीम् ॥ अयोध्यां मन्थरा दृष्ट्वा [5]परं विस्मयमागता ॥ ६ ॥
[6]प्रहर्षोत्फुल्लनयनां पाण्डुरक्षौमवासिनीम् ॥ अविदूरे स्थितां दृष्ट्वा धात्रीं पप्रच्छ मन्थरा ॥ ७ ॥
उत्तमेनाभिसंयुक्ता हर्षेणार्थपरा सती ॥ राममाता धनं किं नु जनेभ्यः संप्रयच्छति ॥ ८ ॥
[7]अतिमात्रप्रहर्षोऽयं किं [8]जनस्य च शंस मे ॥ कारयिष्यति किं[9]वापि संप्रहृष्टो महीपतिः ॥ ९ ॥
विदीर्य[10]माणा हर्षेण [11]धात्री तु परया मुदा ॥ आचचक्षेथ कुब्जायै भूयसीं राघवश्रियम् ॥ १० ॥
श्वः पुष्येण जितक्रोधं यौव[12]राज्येन राघवम् ॥ राजा दशरथो राम[13]मभिषेचयिताऽनघम् ॥ ११ ॥
धात्र्यास्[14]तु वचनं श्रुत्वा कुब्जा क्षिप्रममर्षिता ॥ कैलासशि[15]खराकारात्प्रासादादवरोहत ॥ १२ ॥
सा दह्यमाना [16]कोपेन मन्थरा पापदर्शिनी ॥ [17]शयानामेत्य कैकेयीमिदं वचनमब्रवीत् ॥ १३ ॥
उत्तिष्ठ मूढे किं शेषे भयं त्वामभिवर्तते ॥ उपप्लुतमघौघेन कि[18]मात्मानं न बुध्यसे ॥ १४ ॥
अनिष्टे सुभगाकारे सौभाग्येन विकत्थसे ॥ चलं हि तव सौभाग्यं नद्याः स्रोत इवोष्णगे ॥ १५ ॥

तैः ॥ ३ ॥ रामोपायनार्थंमाल्यमोदकहस्तैः । शुक्लदेवगृहद्वारामिति । शुक्लानिसुधाधवलितानिदेवगृहद्वाराणियस्यां ॥४॥ ब्रह्मघोषाभिनादितां ब्रह्मघोषैः वेदपारायणघोषैः अभिनादितां । "वेदस्तत्त्वंतपोब्रह्म" इत्यमरः । रामाभिषेकस्यातिरश्चामप्यानन्दावहत्वात् "प्रहृष्टवरहस्त्यश्वांसंप्रणर्दितगोवृषां" इत्युक्तं । गोवृषाः गोपुङ्गवाः ॥ ५ ॥ प्रहृष्टमुदितैः प्रहृष्टाः सञ्जातरोमाञ्चादिगात्रविकाराः । मुदिताः मानससंतोषयुक्ताः । तैः । उच्छ्रितेत्यत्रप्रकृतोत्सवकृतध्वजसंबन्धउच्यते । ध्वजैश्चसमलंकृतामित्यत्रनित्यवद्धध्वजत्वमुक्तं ॥ ६ ॥ धात्रीं उपमातरं । " धात्री स्यादुपमाता " इत्यमरः । प्रहर्षोत्फुल्लनयनामित्यादिविशेषणादियंरामोपमाता ॥ ७ ॥ अर्थपरासती अर्थपरासत्यपि । उत्तमेनहर्षेणाभिसंयुक्ताधनंप्रयच्छति किं । यद्वा अर्थपरा उत्तरोत्तरार्थाभिवृद्ध्यैधनंप्रयच्छति । नामग्रहणस्यासह्यत्वाद्राममातेत्युक्तिः ॥ ८ ॥ जनस्यायमत्यन्तप्रहर्षश्च किं किमर्थं । किंनिमित्तंवामहीपतिः किंकर्म कारयिष्यति ॥ ९ ॥ हर्षेणविदीर्यमाणा अन्तर्गतहर्षौत्कट्याद्देहपोषमुखविकासादिनाबहिःप्रसरणाद्विदीर्यमाणेवोपलक्षिता । परयामुदाआचचक्षे स्वनिर्भरानन्दसन्दोहपरिवाहस्यपात्रभूताकाचिल्लब्धेतिपरमानन्दयुक्तासती प्रतिकूलायैतस्यै अकथनीयमप्यकथयदितिभावः । राघवेश्रियं राघवेन्यस्यमानांराज्यलक्ष्मीं ॥१०॥ पुष्येणयुक्ते श्वः उत्तरदिने । जितक्रोधमनघमित्यभिषेकोपयुक्तगुणजातोपलक्षणं । यौवराज्येनाभिषेचयिता यौवराज्यार्थमभिषेचयितेत्यर्थः॥११॥ अवरोहत अवारुहत् ॥ १२—१३ ॥ उपप्लुतं उपहतं । अघौघेन अघं दुःखं । " अंहोदुःखव्यसनेष्वघं " इति । " ओघोवृन्देंभसांरये " इतिचामरः ॥ १४ ॥ वस्तुतःराज्ञोनिष्टे सुभगाकारे आपाततःसौभाग्यवतीवभासमाने । असुभगाकारइतिवाछेदः । सौभाग्येनहेतुना विकत्थसे ममैवसौभाग्यमस्तीत्यात्मानंश्लाघसे । इयमुक्तिः पूर्वं-

गमनंयेषांतेपरमहंसास्तैरित्यर्थः ॥ ३ ॥ **ति०** धात्रींरामस्येतिशेषः ॥ ७ ॥ **शि०** राघवे राघवनिमित्तं । भूयसीं अत्यधिकां । श्रियं राज्याभिषेकसामग्रीमित्यर्थः ॥ १० ॥ **ती०** अनघं भ्रातृपुवैषम्यरूपदोषरहितं । **शि०** अनघं स्वाश्रिताघनिवर्तकं ॥ ११ ॥ **शि०** पापदर्शिनी पापंराक्षसकृतोपद्रवंपश्यतितच्छीला ॥ १३ ॥

[पा०] १ क. ख. ङ. झ. ञ. वादित्रनादिताम्. २ ङ. छ. झ. ट. घोषोपनादिताम्. क. घोषविनादिताम्. घ. ज. घोषानुनादिताम्. ३ ख. ग. प्रणादितगोवृषाम्. ४ ङ. झ. ट. हृष्टप्रमुदितैः. ख. हृष्टैःप्रमुदितैः. ५ घ. परमंविस्मयंगता. ६ क. ग—ट. साहर्षोत्फुल्ल. ख. सहर्षोत्फुल्ल. ७ क—घ. ज. ञ. अतिमात्रंप्रहर्षोयं. ङ. छ. ट. अतिमात्रप्रहर्षःकिं. झ. अतिमात्रंप्रहर्षःकिं. ८ ङ. छ. ट. झ. जनस्यास्यच. ९ घ. किंचापि. १० क. घ. छ. ञ. उदीर्यमाणा. ११ क—ग. च. ञ. धात्रीपरमया. १२ ङ. छ. झ. राज्येनचानघं. १३ ङ. झ. मभिषेक्ताहिराघवम्. घ. अभिषेचयतेऽनघम्. १४ क. च. ञ. स्तद्वचनं. १५ च. शिखरोत्तुङ्गात्. १६ ङ. छ. झ. ट. क्रोधेन. १७ झ. ट. शयानामेव. १८ ङ. छ. झ. ट. नात्मानमवबुध्यसे.

एवमुक्ता तु कैकेयी [1]रुष्टया परुषं वचः ॥ कुब्जया पापदर्शिन्या विषादमगमत्परम् ॥ १६ ॥
कैकेयी त्वब्रवीत्कुब्जां [2]कच्चित्क्षेमं न मन्थरे ॥ विषण्णवदनां हि त्वां लक्षये भृशदुःखिताम् ॥
[[3]मन्थरे तद्ब्रवीह्यद्य कुतस्ते भयमागतम्] ॥ १७ ॥
मन्थरा तु वचः श्रुत्वा कैकेय्या मधुराक्षरम् ॥ उवाच [4]क्रोधसंयुक्ता वाक्यं वाक्यविशारदा ॥१८॥
सा विषण्णतरा भूत्वा कुब्जा [5]तस्या हितैषिणी ॥ विषादयन्ती प्रोवाच भेदयन्ती च राघवम् ॥१९॥
[6]अक्षय्यं सुमहद्देवि प्रवृत्तं त्वद्विनाशनम् ॥ रामं दशरथो राजा यौवराज्येऽभि[7]षेक्ष्यति ॥ २० ॥
[8]साऽस्म्यगाधे भये मग्ना दुःखशोकसमन्विता ॥ दह्यमा[9]नाऽनलेनेव त्वद्धितार्थमिहागता ॥ २१ ॥
तव दुःखेन कैकेयि मम [10]दुःखं महद्भवेत् ॥ त्वद्वृद्धौ मम वृद्धिश्च भवे[11]दत्र न संशयः ॥ २२ ॥
नराधिपकुले जाता महिषी त्वं महीपतेः ॥ उग्रत्वं राजधर्माणां कथं देवि न बुध्यसे ॥ २३ ॥
धर्मवादी शठो भर्ता श्लक्ष्णवादी च दारुणः ॥ शुद्धभावेन जानीषे तेनै[12]वमतिसन्धिता ॥ २४ ॥
[13]उपस्थितं प्रयुञ्जानस्त्वयि सान्त्वमनर्थकम् ॥ अर्थेनैवाद्य ते भर्ता कौसल्यां योजयिष्यति ॥ २५ ॥
[14]अपवाह्य स दुष्टात्मा भरतं तव बन्धुषु ॥ [15]काल्ये स्थापयिता रामं राज्ये निहतकण्टके ॥ २६ ॥
शत्रुः पतिप्रवादेन मात्रेव हितकाम्यया ॥ आशीविष [16]इवाङ्केन बाले परि[17]हृतस्त्वया ॥ २७ ॥

कालिकास्लश्लाघापरेत्यवगन्तव्या । इदानींमत्सौभाग्यस्यकाहानिरित्यत्राह—चलंहीति । उष्णंगच्छतीत्युष्णगः ग्रीष्मकालः । तस्मिन् । नद्याःस्रोतइव चलं क्षीणमित्यर्थः ॥ १५ ॥ परुषंवचउक्ता । " अप्रधानेदुहादीनां " इत्यप्रधानेकर्मकारकेनिष्ठा ॥ १६ ॥ कच्चित्क्षेमं मह्यमितिशेषः ॥ १७ ॥ क्रोधसंयुक्ता रामाभिषेकाविचारणादितिभावः ॥ १८ ॥ विषादयन्तीभेदयन्तीतिशतृद्वयंहेत्वर्थे । राज्यश्रियोज्ञातिगामित्वानिष्टप्रकाशनेनविषादहेतवे सामान्यतःपुत्रत्वप्रयुक्तरामविषयस्नेहभेदनहेतवेचेत्यर्थः ॥ १९ ॥ अक्षय्यं अशक्यप्रतीकारं । त्वद्विनाशनं त्वद्विनाशः । भावेल्युट् ॥ २० ॥ दुःखशोकसमन्विता अनभिमतरामाभिषेकश्रवणजनितव्यसनजंदुःखं । अभिमतभरताभिषेकराहित्यजःशोकः । ताभ्यांसमन्विता ॥ २१ ॥ ननु ममदुःखादिहेतौसतिकुतस्तेदुःखप्रसक्तिरित्यत्राह—तवेति ॥ २२ ॥ ननुरामाभिषेकमात्रंकथंमेदुःखहेतुरित्यत्राह—नराधिपेति । उग्रत्वं क्रौर्यं ॥ २३ ॥ ननुमत्प्रियःकथमनिष्टंकरिष्यतीत्यत्राह—धर्मवादीति । धर्मवादीवभासमानः । वस्तुतःशठः गूढविप्रियकृत् । श्लक्ष्णवादी कण्ठादुपरिप्रियवचनशीलः । दारुणः क्रूरकर्मकारी । एवंभूतमेनंशुद्धस्वभावेनोपलक्षितंजानीषे । तथानमन्तव्यं । यतस्तेनैवं अतिसन्धिता वञ्चिता ॥ २४ ॥ शठत्वमेवाह—उपस्थितमिति । उपस्थितं तत्कालोचिततयाभाषितं । अनर्थकं त्वदर्थनाशनं । त्वयिसान्त्वं अनुसरणं । प्रयुञ्जानः कौसल्यामर्थेन योजयिष्यति ॥ २५ ॥ अतिसन्धानप्रकारमाह—अपवाह्येति । अपवाह्य उद्वास्य । कालमर्हतीतिकाल्यं अर्हार्थेयत् । श्वःप्रातरित्यर्थः ॥२६॥ हेबाले मुग्धे

ति० विषण्णतराभूत्वा तदाकारेवभूत्वा अप्सरस्त्वेनसर्वज्ञत्वाद्वास्तवविषादाभावात् ॥ १९ ॥ **ति०** ननुदास्यास्तवकुतोभयमित्यतआह—**तवेति** ॥ २२ ॥ **ती०** धर्मवादीवाङ्मात्रेणधार्मिकः । शुद्धभावेइतिसंबोधनं । हेशुद्धहृदये ॥ २४ ॥ **ती०** उपस्थितः त्वत्समीपेस्थितः ॥ २५ ॥ **ति०** काल्ये अन्यत्रोपसंक्रमणकालार्हे । कौल्येइतिपाठः । कुलक्रमागतइत्यर्थेआर्षः ॥ २६ ॥ **ती०** परिहृतइतिपाठे बालेअपरिहृतइतिच्छेदः । वस्तुतस्तुत्याज्यएवेतिभावः ॥ २७ ॥ इतिसप्तमस्सर्गः ॥ ७ ॥

[पा०] १ घ. दुष्टयां. २ क. ख. ज. ट. त्क्षेमंनुमन्थरे. ३ इदमर्धं ख. दृश्यते. ४ क. च. ञ. क्रोधसंरब्धा. ५ झ. तस्यांहितैषिणी. ६ ञ. अक्षयंहिमहद्देवि. ख. ग. ङ. छ. झ. ट. अक्षयंसुमहद्देवि. घ. ज. अक्षेमंसुमहद्देवि. क. अक्षेमंहिमहेवि. ७ क. अभिषेक्ष्यते. ८ घ. सास्म्यभागेभये. ९ ख. नानलेनैव. १० क. च. ञ. दुःखंभवेन्महत्. ११ क. ञ. भवेदेवनसंशयः. ङ. ट. भवेदिहनसंशयः. छ. ज. भवेदत्रनसंशयः. १२ ज. मभिवञ्चिता. १३ क. ख. ङ. च. छ. झ. ञ. ट. उपस्थितःप्रयुञ्जानः. १४ ग. घ. ङ. छ. झ. ट. अपवाह्यतु. ख. अपवाह्यसु. १५ क. ख. ञ. काल्यं. छ. कौल्ये. १६ घ. ङ. झ. इवांगेन. १७ ङ. च. छ. ज. झ. ञ. परिधृतस्त्वया.

यथा हि कुर्या[1]त्सर्पो वा शत्रुर्वा प्रत्युपेक्षितः ॥ राज्ञा दशरथेनाद्य सपुत्रा त्वं तथा कृता ॥ २८ ॥
पापेनानृतसान्त्वेन बाले नि[2]त्यसुखोचिते ॥ रामं [3]स्थापयता राज्ये सानुबन्धा हता ह्यसि ॥ २९ ॥
[4]सा प्राप्तकालं कैकेयि क्षिप्रं कुरु हितं तव ॥ त्रायस्व पुत्रमात्मानं मां च विस्मयदर्शने ॥ ३० ॥
मन्थराया वचः श्रुत्वा [5]शयाना सा शुभानना ॥ उत्तस्थौ हर्षसंपूर्णा चन्द्रलेखेव शारदी ॥ ३१ ॥
अतीव [6]सा तु संहृष्टा कैकेयी विस्मयान्विता ॥ [7]एकमाभरणं तस्यै कुब्जायै प्रददौ शुभम् ॥ ३२ ॥
दत्वा [8]स्वाभरणं तस्यै कुब्जायै प्रमदोत्तमा ॥ कैकेयी [9]मन्थरां दृष्ट्वा पुनरेवाब्रवीदिदम् ॥ ३३ ॥
[10]इदं तु मन्थरे मह्य[11]माख्यासि परमं प्रियम् ॥ एतन्मे प्रि[12]यमाख्यातुः किं[13] वा भूयः करोमि ते ॥३४॥
रामे वा भरते वाऽहं विशेषं नोपलक्षये ॥ तस्मात्तुष्टाऽस्मि यद्राजा रामं राज्येऽभिषेक्ष्यति ॥ ३५ ॥
न मे परं किंचिदि[14]तस्त्वया पुनः प्रियं प्रियार्हे सुवचं व[15]चः परम् ॥
[16]तथा ह्यवोचस्त्वमतः प्रियोत्तरं [17]परं वरं ते [18]प्रददामि तं [19]वृणु ॥ ३६ ॥
[[20]इति ब्रुवन्त्याः कैकेय्याः श्रुत्वा सानन्दमुत्तरम् ॥ वाण्या तु प्रेरिता सा तु कैकेयीमिदमब्रवीत् ॥३७॥]
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे सप्तमः सर्गः ॥ ७ ॥

आगाम्यनर्थानभिज्ञेइतियावत् । पतिप्रवादेन पतिव्यपदेशेन । शत्रुः छन्नहृदयःशात्रवःपतिः । त्वया ऋजुप्रकृतिकया । मात्रेव सर्पशिशुंपोषयित्र्येव । हितकाम्यया हितप्रापणेच्छया । आशीविषइव छन्नविषःसर्पइव । अङ्केन उत्सङ्गेन परिहृतः परिधृतइत्यर्थः । यद्वा अङ्केनपरिहृतः अङ्कान्नपरिहृतः । किंत्वङ्कएवधृत्वोपलालितः । यथासर्पपोषयित्रीबाला सर्पस्यान्तर्विषमज्ञात्वा केवलंहितकाम्ययाङ्केसर्पमुपलालयति तथा त्वमपि बाला भर्तुःकुटिलहृदयमजानती विश्वस्य तमङ्के उपलालयसीत्यर्थः । यथाङ्कोपलालितआशीविषः कदाचिद्धितपरामपिपोषयित्रींदशेत् एवं तेभर्तापि विश्वस्तांत्वामर्थहीनांकारयेत् । अतस्स आशीविषइव नानुसरणीयस्त्वयेतिभावः ॥ २७ ॥ एवंगम्यमर्थंविशदयति—यथेति ॥ २८ ॥ सानुबन्धा पुत्रमित्रादिपरिकरसहिता ॥ २९ ॥ विस्मयदर्शने आश्चर्यावहज्ञानयुक्ते तत्तत्कालोचितकर्तव्यनिरूपणचतुरइत्यर्थः । यद्वा अनेन हितकरणहेतुदशरथवशीकरणसाधनसौन्दर्यं सूच्यते ॥ ३० ॥ एवं देवावेशवशाद्विपरीतवाक्ययामन्थरयोक्तापिकैकेयी महाकुलप्रसूततया सत्प्रकृतिस्सती रामाभिषेकंस्वहितंमन्यमानाह—मन्थरायाइति ॥ ३१—३३ ॥ एतत्प्रियमाख्यातुः आख्यात्र्याः । तेकिंवाकरोमीतिसंबन्धः । एतन्मेप्रियमाख्यातमितिपाठे आख्यातंएतत्प्रियमुद्दिश्य तेभूयः किंवाकरोमीतिसंबन्धः ॥ ३४ ॥ ननुसपत्नीपुत्रेकथं तवैतादृशीप्रीतिरित्यत्राह—रामइति ॥३५॥ हेप्रियार्हे प्रियदानार्हे । मे इतःपरं रामाभिषेककथनादन्यत्किंचित् । प्रियं अभिमतं । परंवचस्त्वयापुनर्नसुवचं वक्तुंनशक्यं । हि यस्मात्कारणात् । त्वंतथा सर्वप्रियेभ्योधिकं । प्रियं रामाभिषेकरूपं । अवोचः उक्तवती । अतः प्रियोत्तरं प्रीतिविषयेषु श्रेष्ठं "पर्युदीच्यश्रेष्ठेष्वप्युत्तरः" इत्यमरः । परं अन्यं । वरं वरणीयं वस्तुविशेषं । ते तुभ्यं । प्रददामि । तंवृणु वृणीष्वेतियोजना ॥३६—३७॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीतांबराख्याने अयोध्याकाण्डव्याख्याने सप्तमःसर्गः ॥ ७ ॥

[पा०] १ ङ. छ. झ. च्छत्रुर्वासर्पोवा. ज. त्सर्पोहि. २ ङ. च. ज. झ. ञ. नित्यंसुखोचिते. ङ. छ. झ. सुखोचिता. ३ क—घ. च. ज. ञ. स्थापयिताराज्ये. ४ ट. साप्राप्तकाला. क. ख. संप्राप्तकालं. ५ क. ङ. च. छ. झ. ञ. ट. शयनात्सा शुभानना. ६ घ. ङ. छ. ज. झ. सातुसंतुष्टा. ७ ङ. छ. झ. दिव्यमाभरणं. ८ ग. दत्वाचाभरणं. ९ क. ख. ग. ङ. ज. झ. मन्थरांहृष्टा. १० क. घ. च. ज. ञ. इदंहिमन्थरे. ११ ङ. छ. झ. ट. माख्यानंपरमंप्रियम्. १२ ङ. छ. ज. झ. प्रियमाख्यातं. च. ञ. प्रियमाख्यातुं. ख. प्रियमाख्यात्र्याः. १३ क. च. ञ. भूयःकिंवा. १४ ङ. छ. झ. ञ. दितोवरंपुनः. १५ ङ. छ. झ. ट. वचोऽमृतम्. १६ घ. कथाह्यवोचः. १७ झ. ट. वरंपरंते. १८ क. ख. ग. ज. प्रददानि. १९ ख. संवृणु. २० अयंश्लोकः ज. दृश्यते.

अष्टमः सर्गः ॥ ८ ॥

रामाभिषेकस्य भरतानर्थहेतुत्वमावेदयन्तींमन्थरांप्रतिकैकेय्यारामगुणप्रशंसनपूर्वकं तदभिषेकस्य स्वाभीष्टत्वप्रतिपादनम् ॥ १ ॥ पुनर्मन्थरयाकैकेयींप्रति बहुधाहेतूपन्यासपूर्वकं रामाभिषेकस्यानर्थहेतुत्वसमर्थनेनतद्विघातचोदना ॥ २ ॥

मन्थरा त्वभ्यसूयैनामुत्सृज्याभरणं च तत् ॥ उवाचेदं ततो वाक्यं कोपदुःखसमन्विता ॥ १ ॥
हर्षं किमिदमस्थाने कृतवत्यसि बालिशे ॥ शोकसागरमध्यस्थमात्मानं नावबुध्यसे ॥ २ ॥
मनसा प्रहसामि त्वां देवि दुःखार्दिता सती॥ यच्छोचितव्ये हृष्टाऽसि प्राप्येदं व्यसनं महत्॥ ३ ॥
शोचामि दुर्मतित्वं ते का हि प्राज्ञा प्रहर्षयेत् ॥ अरेः सपत्नीपुत्रस्य वृद्धिं मृत्योरिवागताम् ॥ ४ ॥
भरतादेव रामस्य राज्यसाधारणाद्भयम् ॥ तद्विचिन्त्य विषण्णास्मि भयं भीताद्धि जायते ॥ ५ ॥
लक्ष्मणो हि महेष्वासो रामं सर्वात्मना गतः ॥ शत्रुघ्नश्चापि भरतं काकुत्स्थं लक्ष्मणो यथा ॥ ६ ॥
प्रत्यासन्नक्रमेणापि भरतस्यैव भामिनि ॥ राज्यक्रमो विप्रकृष्टस्तयोस्तावत्कनीयसोः ॥ ७ ॥
विदुषः क्षत्रचारित्रे प्राज्ञस्य प्राप्तकारिणः ॥ भयात्प्रवेपे रामस्य चिन्तयन्ती तवात्मजम् ॥ ८ ॥

अथकुमतिजनसंसर्गवशेन महतामपिकदाचिच्चित्तचलनंस्यादित्यमुमर्थंद्योतयन्नाह—मन्थरेत्यादि । अभ्यसूय असूयांकृत्वा । एनांप्रतीतिशेषः । कोपदुःखसमन्विता हितंनशृणोतीतिकोपः । आगमिष्यत्स्वनर्थइतिदुःखं ॥ १ ॥ हेबालिशे अज्ञे । अस्थाने अनुचितकाले । हर्षंकृतवत्यसि । किमिदं । अत्रकारणंनजानामि । अस्थानकृतत्वमाह—शोकेति ॥ २ ॥ इदं रामाभिषेकरूपं । महद्व्यसनं । प्राप्य तेनैवहेतुनाशोचितव्येविषयेहृष्टासीतियत् अतोहंदुःखार्दितासती त्वांमनसा प्रहसामि । यथोन्मत्तप्रभुदर्शने ॥३॥ एवं बालिशत्वमन्वयमुखेनदर्शयित्वा व्यतिरेकमुखेनापि दर्शयति—शोचामीति । ते दुर्मतित्वं दुष्टबुद्धित्वं शोचामि । मतेर्दुष्टत्वमनर्थविषयप्रीतिजनकत्वं । मृत्योरिव सपत्नीपुत्रस्यारेरागतांवृद्धिं काहिप्राज्ञा कावाप्रशस्तबुद्धिः । प्रहर्षयेत् प्रहर्षसाधनंकुर्यात् । “तत्करोति” इति णिच् । हर्षइतिकरणेघञ्प्रत्ययः । लालयेदितिवार्थः ॥ ४ ॥ उक्तांव्यसनमहत्तांदर्शयति—भरतादिति । राज्यंसाधारणंयस्य तस्माद्भरतादेव रामस्ययद्भयं तद्विचिन्त्य विषण्णास्मि । रामस्यभयमस्तु भरतस्यकिमित्यतआह—भयमिति । योयस्माद्भीतः सतस्यभयमवश्यमुत्पादयति व्याघ्रसर्पादिविषये तथादर्शनादिति भावः ॥ ५ ॥ यद्यपि लक्ष्मणशत्रुघ्नयोरपिराज्यंसाधारणं तथापि तयोःपरतन्त्रत्वान्नभयप्रसक्तिरित्याह—लक्ष्मणइति । सर्वात्मना सर्वप्रकारेण मनोवाक्कायैरित्यर्थः । अतोरामस्य नलक्ष्मणाद्भयमितिभावः । शत्रुघ्नस्यभरतपरतन्त्रत्वेन नततःपृथग्भयमित्यर्थः ॥ ६ ॥ भरतादेवेत्यत्र हेत्वन्तरमाह—प्रत्यासन्नेति । प्रत्यासन्नेन सन्निकृष्टेन क्रमेण पुनर्वसुपुष्यनक्षत्रजननक्रमेण । भरतस्यैव राज्यंप्राप्तमितिशेषः । कनीयसोः कनिष्ठयोः । राज्यक्रमः राज्यप्राप्तिक्रमस्तु । विप्रकृष्टः व्यवहितः । सत्यपिपारतन्त्र्ये राज्यविषयेसर्वेषामभिलाषस्तुल्यः । यथाभरतस्येतिशङ्कायां प्रथमंरामस्यराज्यंप्राप्तं ततोभरतस्य ततोलक्ष्मणशत्रुघ्नयोः । तथाच प्रथमोद्वितीयंजिघांसति । अतोरामाद्भयंभरतस्यैवेति भावः ॥ ७ ॥ एवं राज्यक्रमोभरतस्यसन्निहितोस्तु तथापि रामेप्रथमप्राप्तिमतिविद्यमाने का भरतस्यराज्यशङ्केत्यत्राह—विदुषइति । विदुषः स्वतएवविवेकशालिनः । विशिष्यक्षत्रचारित्रे राजनीतौ प्राज्ञस्य प्राप्तकारिणः अविलंबेनकालोचितकर्तव्यार्थकारिणः । रामस्य भयात् भाव्यनर्थकरणभयात् । तवात्मजं उक्त-

[पा०] १ घ. ङ. छ. झ. ट. भरणंहितत्. २ ङ. छ. झ. ट. किमर्थमस्थाने. ३ घ. भामिनि. ४ ख. ग. च. ज. मध्यस्थानात्मानमव. ङ. छ. ट. मध्यस्थंनात्मानमव. ५ घ. झ. प्रसहामित्वां. ६ ङ. छ. झ. ट. प्राप्यतंव्यसनं. घ. प्राप्तेदं व्यसनं. ७ ङ. प्रज्ञा. ८ ङ. छ. झ. ट. महावाद्रूरामं. ९ घ. श्रितः. १० छ. क. भरतस्येद. ११ ङ. छ. झ. ट. विप्रकृष्टस्तुतयो. ख. ज. विकृष्टस्तु. १२ क—ट. स्तावद्यवीयसोः, १३ ट. क्षत्रचारित्रं.

[1]सुभगा खलु कौसल्या यस्याः पुत्रोऽभिषेक्ष्यते ॥ यौवराज्येन महता श्वः पुष्येण द्विजोत्तमैः ॥ ९ ॥
प्राप्तां [2]सुमहतीं प्रीतिं [3]प्रतीतां तां हतद्विषम् ॥ उपस्थास्यसि कौसल्यां दासीवत्त्वं कृताञ्जलिः ॥ १० ॥
[4]एवंचेत्त्वं सहास्माभिस्तस्याः प्रेष्या भविष्यसि ॥ पुत्रश्च तव रामस्य [5]प्रेष्यभावं गमिष्यति ॥ ११ ॥
हृष्टाः खलु भविष्यन्ति रामस्य परमाः स्त्रियः ॥ अप्रहृष्टा भविष्यन्ति स्नुषास्ते भरतक्षये ॥ १२ ॥
तां दृष्ट्वा परमप्रीतां ब्रुवन्तीं मन्थरां ततः ॥ रामस्यैव गुणान्देवी कैकेयी [6]प्रशशंस ह ॥ १३ ॥

वैदुष्यादिरहितं चिन्तयन्तीप्रवेपे । षष्ठीचात्र संबन्धसामान्ये ॥ ८ ॥ कैकेय्याईर्ष्योत्पादनार्थं कौसल्यासौभाग्यंदर्शयति—सुभगेत्यादिना । सुभगा भाग्यशीला । यौवराज्येनेतिहेतौतृतीया ॥ ९ ॥ रामतोभरतस्येवकौसल्यातोस्याअनर्थंदर्शयति—प्राप्तामिति । रामाभिषेकेण सुमहतींश्रियंप्राप्तां । प्रतीतां ख्यातां । "प्रतीतेप्रथितख्यातवित्तविज्ञातविश्रुताः"इत्यमरः । हतद्विषं अधरीकृतसपत्नीकां । तां कौसल्यां । उपस्थास्यसि सेविष्यसे ॥ १० ॥ नकेवलंतवैकस्यादास्यं किंतुत्वदनुबन्धिजनस्यापीत्याह—एवमिति । तवदास्यंप्राप्तंचेदित्यर्थः ॥ ११ ॥ राममहिष्याएकत्वेपि रामस्यपरमाःस्त्रियइतिबहुवचननिर्देशःपरिचारिकाभिप्रायेण । भरतक्षये भरतस्यदारिद्र्यरूपक्षयेसति । नन्वत्रस्त्रीशब्दोभार्यापरएव । स्नुषास्तेभरतक्षयेइतिस्नुषाशब्दसाहचर्यात् । अतएव सुन्दरकाण्डेसीतयोच्यते "पितुर्निदेशंनियमेनकृत्वावनान्निवृत्तश्चरितव्रतश्च । स्त्रीभिश्चमन्येविपुलेक्षणाभिस्त्वंरंस्यसवीतभयःकृतार्थः" इति । युद्धकाण्डेचदर्भशयनवर्णने "भुजैःपरमनारीणामभिमृष्टमनेकधा" इत्युक्तं । नहिभुजभुजाभिमर्शोभार्याभ्योऽन्यत्रसंभवति । उत्तरकाण्डेचाश्वमेधोपक्रमे "मातरश्चैवसर्वामेकुमाराःस्त्रीगणानिच । अग्रतोभरतंकृत्वागच्छन्त्वग्रेसमाधिना" इतिदर्शितं । अत्रस्त्रीगणकुमारव्यपदेशो विनासीतातिरिक्तभार्यासद्भावंनसंभवति । किंचश्रुतार्थापत्तिरपिरामस्यसीतातिरिक्तधर्मदारसद्भावेप्रमाणं । नह्यपत्नीकस्ययज्ञानुष्ठानंसंभवति भोगदारान्तरासंभवेनरामस्यैकदारव्रतत्वंभृगुशापपालनंच । सीताप्रतिकृतिकरणंतुसीतास्नेहबहुमानार्थं । अत्रोच्यते । रामस्यैकदारव्रतत्वंसर्वसिद्धं । तच्चपत्न्यन्तरसंभवे नसंगच्छते । नचयज्ञकरणानुपपत्तिः । सीताप्रतिकृतिकरणेनतदुपपत्तेः । अतएवोत्तरकाण्डेवक्ष्यति "काञ्चनींममपत्नींचदीक्षार्हांयज्ञकर्मणि । अग्रतोभरतःकृत्वागच्छत्वग्रेमहामतिः" इतिसीताप्रतिकृतेर्दीक्षार्हत्वं पत्नीत्वंच । पुनश्चोत्तरत्र "नसीतायाःपरांभार्यांवव्रेसरघुनन्दनः । यज्ञेयज्ञेचपत्न्यर्थंकाञ्चनीजानकीभवत्" इति । नहिवचनविरोधेन्यायःप्रवर्तते । अनेनवचनेनप्रत्यक्षश्रुत्यविरुद्धेनविदूरभार्योऽननुकूलभार्यश्चभार्याप्रतिकृतिंकृत्वाश्रौतस्मार्तकर्माणिकुर्यादितिविधिरुन्नीयते । स्मृतिश्चतथाविधापठ्यते । यथाहेमाद्रौ "दूरभार्योननुकूलभार्यश्चदर्भपिञ्जूलैर्भार्याप्रतिनिधिंविधायपार्वणंकुर्यात्" इति । पत्नीकर्तव्यानिकर्माण्यध्वर्युर्यजमानोवाकुर्यात् । यथातस्यामसमर्थायां पत्नीविनाशाभावान्नाग्नेर्विनाशः । यत्तुयेनकेनचिदुक्तं सीताप्रतिकृतिकरणंसीतास्नेहबहुमानार्थमिति तत्तुच्छं । संत्यक्तभार्यायांस्नेहबहुमानकरणस्यावद्यावहत्वात् । "मातरश्चैवसर्वामेकुमाराःस्त्रीगणानिच" इत्यत्र मेमातरः भरतादीनांकुमाराःस्त्रियश्चेत्यर्थः । दारान्तरसंभवेपि तेषांधर्मार्थत्वेनप्रजार्थत्वाभावेन रामस्यकुमाराभावात्तत्सहचरितस्त्रीगणाश्च भरतादीनामेवेतिसुव्यक्तं । एवंच रामस्यपरमाःस्त्रियःपरमनारीणां स्त्रीभिश्चमन्ये इत्यादिषु भोगप्रसंजनेनधर्मदारपरत्वासंभवात् साधारणादिपरिग्रहशङ्कानवकाशाच्चान्यपरत्वमवसेयं । परमाःस्त्रियइतिपरिचारिकान्तर्भावेन । स्त्रीभिश्चमन्यइति स्वविनाशेरुयन्तरसंभावनया । परमनारीणामित्यस्य कविवचनत्वेन श्रीभूम्याद्यभिमर्शविषयत्वाच्चेतिदिक् ॥ १२ ॥ रामस्यैवंविधगुणत्वेहित्वदुक्तादोषाःस्युस्तदेवनास्तीतिमूलेकुठारंनिदधातीत्याह—तामिति । अप्रीतामितिपदच्छेदः । क्षोभहेतौनितरांविद्यमानेप्यक्षोभ्यमनस्कत्वाद्देवीतिता-

ती० भरतक्षये भरतगृहे । ति० भरतक्षये भरतप्रभावनाशे । शि० स्त्रियइतिबहुलमादरार्थं । किंचस्त्रीशब्दस्त्रीत्वजातिवि-

[पा०] १ क. ङ. झ. ट. सुभगाकिल. २ क. छ. झ. ञ. वसुमतींप्रीतिं. च. वसुमतींप्रीतां. ट. वसुमतीप्रीतिं. ३ ङ. छ. झ. ट. प्रतीतांहतविद्विषम्. ४ क—ट, एवंचत्वं. ५ घ. ङ, छ. झ. ट. प्रेष्यत्वंहि. ६ घ. प्रशशंससा.

धर्मज्ञो [1]गुरुभिर्दान्तः कृतज्ञः [2]सत्यवाक्छुचिः ॥ रामो [3]राज्ञः सुतो ज्येष्ठो यौवरा[4]ज्यमतोऽर्हति ॥१४॥
भ्रातॄ[5]न्भृत्यांश्च दीर्घायुः पि[6]तृवत्पालयिष्यति ॥ सं[7]तप्यसे कथं कुब्जे श्रुत्वा रामाभिषेचनम् ॥१५॥
भरतश्चापि रामस्य ध्रुवं वर्षशतात्परम् ॥ पितृपैतामहं राज्यम[8]वाप्ता पुरुषर्षभः ॥ १६ ॥
सा त्वमभ्युदये प्राप्ते [9]वर्तमाने च मन्थरे ॥ भविष्यति च कल्याणे [10]किमर्थं परितप्यसे ॥ १७ ॥
[11]यथा मे भरतो मान्यस्तथा भूयोपि राघवः ॥ कौसल्यातोतिरिक्तं च सो[12]नुशुश्रूषते हि माम् ॥१८॥
[13]राज्यं यदि हि रामस्य भरतस्यापि [14]तत्तथा ॥ मन्यते हि यथात्मानं तथा [15]भ्रातॄंस्तु राघवः ॥ १९ ॥
कैके[16]य्या वचनं श्रुत्वा मन्थरा भृशदुःखिता ॥ दीर्घ[17]मुष्णं विनिश्वस्य कैकेयीमिदमब्रवीत् ॥ २० ॥
अनर्थदर्शिनी मौ[18]र्ख्यान्नात्मानमवबुध्यसे ॥ शोकव्यसनविस्तीर्णे [19]मज्जन्ती दुःखसागरे ॥ २१ ॥
भविता राघवो राजा [20]राघवस्यानु यः सुतः ॥ राजवंशात्तु कैकेयि[21] भरतः परिहास्यते ॥ २२ ॥

मृषिः श्लाघते ॥ १३ ॥ मन्थरोक्तराज्यसाधारण्यंनिवर्तयति—धर्मज्ञइति । दान्तः दमितः । "दान्तस्तुदमिते" इत्यमरः । शिक्षितइत्यर्थः । कृतज्ञः सत्पुत्रसमाचारज्ञइत्यर्थः ॥ १४ ॥ अथ भरतानर्थशङ्कांपरिहरति—भ्रातॄनिति ॥१५॥ राज्यंचभरतस्यक्रमाद्भविष्यतीत्याह—भरतइति । वर्षशतात्परं रामराज्यात्परमित्यर्थः । दशवर्षसहस्राणिरामोराज्यंपालयिष्यतीति कैकेयीनजनाति । अतोलोकरीत्यावदतीतिज्ञेयं । अवाप्तेतिलुट् । स्वानन्तरं भरतस्यराज्यलाभायसंप्रति तस्मैयौवराज्यंदास्यतीत्यर्थः ॥ १६ ॥ प्राप्ते उचिते । अभ्युदये रामाभिषेकरूपे । शोभने वर्तमाने प्रत्यासन्नेसति । कल्याणे भरताभिषेकरूपे भविष्यतिच किमर्थंपरितप्यसइतिसंबन्धः ॥ १७ ॥ एवं पुत्रानर्थशङ्कांपरिहृत्य स्वानर्थशङ्कांपरिहरति—यथेति । मान्यः बहुमान्यः । भूयः भृशं । अत्रहेतुमाह—कौसल्यातइति । अतिरिक्तं अभ्यधिकंयथाभवतितथा ॥ १८ ॥ माभूद्वर्षशतात्परंभरतस्यराज्यलाभः तथापि राज्यलाभसौख्यमस्तीत्याह—राज्यमित्यादिना ॥१९—२०॥ अनर्थदर्शिनी अनर्थस्यैवार्थत्वेनदर्शनशीलेत्यर्थः । यद्वा अर्थादर्शिनी प्रयोजनानभिज्ञेत्यर्थः । मौर्ख्यात् अविमृश्यकारित्वात् । शोकव्यसनविस्तीर्णे विलापहेतुःशोकः । व्यसनंविपत् । "व्यसनंविपदिभ्रंशे" इत्यमरः । यद्वा शोकः इष्टवियोगजंदुःखं । भरतस्य राज्यभ्रंशेनवनप्रापणजंदुःखमितियावत् । विपत् स्वस्यसुखाद्भ्रंशः । दुःखसागरे सपत्नीसेवारूपे । मज्जन्तीतथाभूतमात्मानंनावबुध्यसे ॥ २१ ॥ वर्षशता-

शिष्टपरः । नतुपाणिगृहीतीपरः । तेनबहुलंयुक्तमेव ॥ १२ ॥ **ति०** पितृवद्भ्रातॄनविभागेनपालयतोरामस्य वर्षशतात्परमपि यदा राज्यविभागेच्छा तदा भरतोराज्यमवाप्स्यति । ध्रुवापिशब्दाभ्यां लक्ष्मणशत्रुघ्नयोरपि राज्यप्राप्तिर्ध्रुवेतिसूचितम् । **शि०** ननुभरतस्यराज्यानधिकारित्वेपिभ्रातृत्वात्किंचित्तेनापिप्राप्तव्यमतस्तदागमनेसतिरामाभिषेकेणभवितव्यं अन्यथाकिंचिदपिनप्राप्स्यतीत्यतआह—**भरतइति**। वर्षशतात् बहुखण्डैर्व्याप्तं । पितृपैतामहंराज्यं । नरर्षभोरामोऽवाप्स्यति । भरतस्तु ध्रुवं अचलं । रामस्यपरं तृप्तिं । अवाप्स्यति । एतेनरामप्रीतेर्दुर्लभत्वंव्यञ्जितम् । किंच रामस्यराज्यंभरतएवप्राप्स्यति रामाभिषेकानन्तरंपालनाधिकारंरामोभरतायैवदातेत्यर्थः । एतेनभरतोरामस्यातिप्रीतिविषयइतिध्वनितम् । यद्वा अप्राप्यवस्तुप्राप्त्यर्थंयत्नोनकर्तव्यइतिभरतराज्यप्राप्त्यर्थंनयतितव्यमितिबोधयन्तीआह—**भरतइति** । रामस्ययोग्यंपितृपैतामहंराज्यंनरर्षभोभरतःवर्षशतात्परमपि । अवाप्स्यति अनवाप्स्यति । भागुरिमतेनवाकारलोपः । वर्षशतात्परं अग्रे । भरतः प्राप्स्यतीत्यर्थस्तुनयुक्तः सर्वप्रमाणाविषयत्वेनासंभवादितिदिक् ॥ १६ ॥

[पा०] १ ङ. छ. झ. ट. गुणवान्दान्तः. २ घ. ङ. छ. झ. ट. सत्यवाञ्छुचिः. ३ क. ङ. छ. झ. ट. राजसुतो. ४ क. च. ञ. राज्यंततोर्हति. ५ क. च. ञ. नमात्यान्दीर्घायुः. छ. न्पुत्रांश्च. ६ ख. पुत्रवत्पालयिष्यति. ७ ख. संतप्यसि. ८ ङ. छ. झ. ट. मवाप्स्यतिनरर्षभः. ९ ङ. छ. झ. दह्यमानेवमन्थरे. १० ङ. छ. झ. ट. किमिदंपरि. ११ ङ. छ. झ. ट. यथावैभरतो. १२ ग. घ. ज. सतुशुश्रूषते. ङ. छ. झ. ममशुश्रूषतेबहु. १३ क. राज्यंचयदि. ग. च. छ. ञ. राज्यंयदिह. १४ ङ. छ. झ. ट. तत्तदा. १५ क. ख. ग. ज. ञ. भ्रातॄंश्च. १६ ख. ग. घ. ज. कैकेयीवचनं. १७ च. ञ. दीर्घमुष्णंच. १८ क. च. ञ. मौर्ख्यादात्मानंनाव. १९ च. ञ. ट. मज्जन्तं. २० क.—च. ज. झ. ञ. राघवस्यच. २१ क. ङ. ज. झ. ञ. भरतःकैकेयि.

न हि राज्ञः सुताः सर्वे राज्ये तिष्ठन्ति भामिनि ॥ स्थाप्यमानेषु सर्वेषु सुमहाननयो भवेत् ॥२३॥
तस्माज्ज्येष्ठे हि कैकेयि राज्यतन्त्राणि पार्थिवाः ॥ स्थापयन्त्यनवद्याङ्गि गुणवत्स्वितरेष्वपि ॥ २४ ॥
असावत्यन्तनिर्भग्नस्तव पुत्रो भविष्यति ॥ अनाथवत्सुखेभ्यश्च राजवंशाच्च वत्सले ॥ २५ ॥
साऽहं त्वदर्थे संप्राप्ता त्वं तु मां नावबुध्यसे ॥ सपत्निवृद्धौ या मे त्वं प्रदेयं दातुमिच्छसि ॥२६॥
ध्रुवं तु भरतं रामः प्राप्य राज्यमकण्टकम् ॥ देशान्तरं वा नयिता लोकान्तरमथापि वा ॥ २७ ॥
बाल एव हि मातुल्यं भरतो नायितस्त्वया ॥ सन्निकर्षाच्च सौहार्दं जायते स्थावरेष्वपि ॥ २८ ॥
भरतस्याप्यनुवशः शत्रुघ्नोपि समागतः ॥ लक्ष्मणो हि यथा रामं तथासौ भरतं गतः ॥ २९ ॥
श्रूयते हि द्रुमः कश्चिच्छेत्तव्यो वनजीविभिः ॥ सन्निकर्षादिषीकाभिर्मोचितः परमाद्भयात् ॥ ३० ॥
गोप्ता हि रामं सौमित्रिर्लक्ष्मणं चापि राघवः ॥ अश्विनोरिव सौभ्रात्रं तयोर्लोकेषु विश्रुतम् ॥३१॥

त्परमित्युक्तभरतराज्यप्राप्तिंनिराकरोति—भवितेति । राघवस्यानु राघवानन्तरं । तस्यत्यःसुतःसराजाभविष्यति । परिहास्यते निर्वास्यते । गत्यर्थाद्धसेर्णिजन्तात्कर्मणिलट् ॥ २२ ॥ उक्तेर्थेहेतुमाह—नहीति । भामिनि कोपने । "कोपनासैवभामिनी" इत्यमरः । अनयःनीतिविरोधः ॥ २३ ॥ राज्यतन्त्राणि राज्यपरिपालनादिव्यापारान् । "तन्त्रंस्वराष्ट्रव्यापारे" इति वैजयन्ती ॥ २४ ॥ एवंराज्यभ्रंशमुक्त्वाराज्यालाभेपिराज्यसुखंभरतस्यास्तीतिकैकेय्योक्तंपरिहरति—असाविति । अत्यन्तनिर्भग्नः सुतरांप्रच्यावितः । वत्सले पुत्रवत्सले ॥ २५ ॥ ज्येष्ठेवर्तमानेभरतस्यराज्ययोग्यताभावात्किंकुर्मइत्यत्राह—सेति । त्वदर्थे त्वत्पुत्रराज्यभ्रंशपरिहारकथनार्थमित्यर्थः । सपत्निवृद्धाविति "ङ्यापोः—" इतिह्रस्वः । यात्वंसपत्निवृद्धौ प्रदेयं पारितोषिकं । दातुमिच्छसि सात्वं नावबुध्यसइत्यन्वयः ॥२६॥ असावत्यन्तनिर्भग्नइत्युक्तंविवृणोति—ध्रुवमित्यादिना ॥ २७ ॥ रामकर्तृकंभाव्यनिष्टंप्रदर्श्य कैकेयीकृतमप्यनर्थंदर्शयति—बालइति । मातुल्यं मातुलसंबन्धिगृहमित्यर्थः । नायितोहि प्रापितःखलु । अनेनकाहानिरित्याशङ्क्यहानिमेवदर्शयति—सन्निकर्षादिति । स्थावरेष्वपि वृक्षगुल्मादिस्थावरेष्वपि । सन्निकर्षाच्च अत्यन्तसमीपावस्थानाच्च सौहार्दंजायते अन्योन्यसंश्लेषरूपःसुहृद्भावोजायते । राज्ञोरामभरतादिषुकिमुत तादृशसन्निकर्षस्त्वयाविघटितइतिभावः ॥ २८ ॥ भरतस्यासन्निधानेपि शत्रुघ्नसन्निधानेभरतेप्रीतिःस्यात्तदपिनास्तीत्याह—भरतस्यापीति । अनुवशः विधेयः । समं भरतेनसह । अनुवशत्वमुपपादयति—लक्ष्मणोहीति । हि यस्मात् रामंलक्ष्मणइवासौ शत्रुघ्नः भरतंगतः आश्रितः ॥ २९ ॥ स्थावरेष्वपीत्युक्तमुपपादयति—श्रूयतेहीति । वनजीविभिः वनोद्भूतकाष्ठजीविभिः । छेत्तव्यः प्राप्तच्छेदनकालः । कश्चिद्द्रुमः तस्माच्छेदनरूपात् परमाद्भयात् । इषीकाभिः इषीकाकण्टकबहुलगुल्मैः । सन्निकर्षात् परितःपरिवारणरूपात् । मोचितइतिश्रूयतेहि जनपरंपरयेतिशेषः । स्वस्यनित्यान्तःपुरवर्तित्वेन तत्साक्षात्काराभा-

ती० अनयः राज्यशैथिल्यरूपः । शि० रामराज्यकालेभरतोपिकस्यचिद्देशस्यराजाभवितेत्याशानकर्तव्येतिसूचयितुमाह—नहीति । स० भामिनि तेजस्विनि ॥ २३ ॥ ती० राज्यतन्त्राणि राज्याङ्गानिहस्त्यश्वादीनि ॥ २४ ॥ वि० वत्सले सर्वत्र दयाशीले ॥ २५ ॥ वि० अर्हसि अर्हंवाचरसि । इच्छसीत्यर्थः ॥ २६ ॥ ति० नाययिता लुट् । लोकान्तरमिति हनिष्यतीतियावत् ॥ २७ ॥ शि० शत्रुघ्नस्यापिदुःखमेवभवितेतिबोधयन्तीआह—भरतानुगतइति । सःशत्रुघ्नोपि भरतानुगतः भरतानुसारीसन् तत्समं रामकर्तृकद्रोहविषयत्वेनभरतसाम्यं गतःप्राप्तः । समशब्दोभावप्रधानः ॥ २९ ॥ लक्ष्मणसाहाय्यात् भरतकर्तृकापकृतिप्रसक्तिः रागेनभवितेतिबोधयितुमन्यसंनिकर्षादन्यस्यानर्थनिवृत्तिर्लोकेदृष्टेत्याह—श्रूयतइति ॥ ३० ॥

[पा०] १ क. च. ञ. ष्वितरेषुच. २ ख.-घ. ज. वत्यन्तनिर्भिन्नः. ३ ख. घ. त्वदर्थे. ४ घ. सपत्निवृद्धिकाभेर्ले. ५ ग.—छ. ञ. ट. दातुमर्हसि. ६ क. ख. ग. ङ. च. छ. झ. ट. देशान्तरंनाययिता. ञ. लोकान्तरंनाययिता. ७ ङ. झ. बालएवतु. ८ झ. स्थावरेष्विव. ९ ख. भरतस्याप्यनुगतः. क. च. ञ. भरतस्याप्यनुवशात्. झ. भरतानुवशःसोपिशत्रुघ्नस्तत्संगतः. ट. भरतानुमतस्सोपि. १० ग. समाहितः. ११ ग. घ. ज. लक्ष्मणस्तु. १२ ङ. झ. तथायंभरतंगतः. १३ ङ. छ. झ. वनजीवनैः.

तस्मान्न लक्ष्मणे रामः पापं किंचित्करिष्यति ॥ रामस्तु भरते पापं कुर्यादिति न संशयः ॥ ३२ ॥
तस्माद्[2]राजगृहादेव वनं [3]गच्छतु ते सुतः ॥ [4]एतद्धि रोचते मह्यं भृशं चापि हितं तव ॥ ३३ ॥
एवं ते ज्ञातिपक्षस्य श्रेयश्चैव भविष्यति ॥ यदि चेद्भरतो धर्मात्पित्र्यं राज्यमवाप्स्यति ॥ ३४ ॥
स ते सुखोचितो बालो रामस्य सहजो रिपुः ॥ समृद्धार्थस्य नष्टार्थो जीविष्यति कथं वशे ॥ ३५ ॥
अभिद्रुतमिवारण्ये सिंहेन गजयूथपम् ॥ प्रच्छाद्यमानं रामेण भरतं त्रातुमर्हसि ॥ ३६ ॥
दर्पान्निराकृता पूर्वं त्वया सौभाग्यवत्तया ॥ राममाता सपत्नी ते कथं वैरं न यातयेत् ॥ ३७ ॥

यदा हि रामः पृथिवीमवाप्स्यति प्रभूतरत्नाकरशैलपत्तनाम् ॥
तदा गमिष्यस्यशुभं पराभवं सहैव दीना भरतेन भामिनि ॥ ३८ ॥
यदा हि रामः पृथिवीमवाप्स्यति ध्रुवं प्रनष्टो भरतो भविष्यति ॥
अतो हि संचिन्तय राज्यमात्मजे परस्य चैवाद्य विवासकारणम् ॥ ३९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे अष्टमः सर्गः ॥ ८ ॥

नवमः सर्गः ॥ ९ ॥

मन्थरादुर्बोधनदुर्विकृतहृदयया कैकेय्या तां प्रति रामप्रवासनभरताभिषेचनप्रतिज्ञानपूर्वकं तदुपायकथनचोदना ॥ १ ॥ मन्थरया कैकेयीं प्रति देवासुरसमरवृत्तवृत्तान्तनिवेदनेन दशरथकृतवरद्वयदानप्रतिज्ञानस्मारणपूर्वकं तं प्रति रामविवासनभरताभिषेकयोर्वरत्वेन वरणचोदना ॥ २ ॥ कैकेय्या मन्थराप्रशंसनपूर्वकमाभरणाद्यवमोचनेन क्रोधागारे क्षितौ शयनम् ॥ ३ ॥

एवमुक्ता तु कैकेयी कोपेनैव ज्वलितानना ॥ दीर्घम[11]ुष्णं विनिश्वस्य मन्थरामिदमब्रवीत् ॥ १ ॥
अद्य राममितः क्षिप्रं वनं प्रस्थापयाम्यहम् ॥ यौ[12]वराज्ये च भरतं क्षिप्र[13]मेवाभिषेचये ॥ २ ॥

वात् श्रूयत इत्युक्तिः ॥ ३०—३१ ॥ पापं वधं ॥ ३२ ॥ तस्मात् पापकरणाद्धेतोः । राजगृहात् केकयराजगृहात् । नत्विहागत्यमर्तव्यमितिभावः ॥ ३३ ॥ धर्मात् पित्रनुमतिरूपात् । भरतोराज्यंयद्यवाप्स्यति एवंचेत्तेज्ञातिपक्षस्य बन्धुवर्गस्य श्रेयश्चापिभविष्यति ॥ ३४ ॥ राज्यानवाप्तावनिष्टमाह—सइति । सहजो रिपुः सपत्नीपुत्रत्वात्सहजःशत्रुः । तेसबालः भरतः रामस्यवशेकथंजीविष्यति ॥ ३५ ॥ एवमनर्थप्राप्स्येतत्परिहारायकर्तव्यमाह—अभिद्रुतमिति । प्रच्छाद्यमानं अभिभूयमानं ॥ ३६ ॥ कथंवैरंनयातयेत् । वैरयातनंवैरशुद्धिः तांत्वयिदास्यापादनेनसंपादयेदित्यर्थः ॥ ३७ ॥ उपसंहरति—यदेत्यादिना ॥ ३८ ॥ कैकेय्यनर्थमुक्त्वाभरतानर्थमाह—यदाहीति । राज्यं राज्यकारणं । परस्य रामस्य ॥ ३९ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीतांबराख्याने अयोध्याकाण्डव्याख्याने अष्टमःसर्गः ॥ ८ ॥

अथरामगुणज्ञापिकैकेयी कार्यपरैर्देवैःक्षुब्धहृदया-

सत्य० राजगृहात् तन्नामकान्मातुलपुरात् । यद्वा ल्यब्लोपनिमित्तापञ्चमी । अस्मद्गृहाशांपरित्यज्येत्यर्थः ॥ ३३ ॥ **ति०** नयापयेत् नकुर्यादित्यर्थः । नपातयेदितिपाठेप्ययमेवार्थः ॥ ३७ ॥ **ति०** परस्य रामस्य चात्लक्ष्मणसीतयोर्विवासकारणंच- चिन्तय ॥ ३९ ॥ इत्यष्टमस्सर्गः ॥ ८ ॥

शि० उष्णंयथास्यात्तथादीर्घंविनिश्वस्य मन्थरयाकोपेनैवएवमुक्ता ज्वलितानना प्रकाशितवदना प्रसन्नवदनेत्यर्थः । कैकेयीमन्थरामिदमब्रवीत् । प्रसन्नवदनेत्यनेन रामोऽवश्यंदेवकार्यार्थंप्रवत्स्यतीतितदनुकूलमेवेयंप्रार्थयतइतिहेतुःसूचितः । तेनब्रह्मादि-

[पा०] १ ञ. छ. ट. कुर्यादेव. २ क. ख. च. ञ. द्राजगृहाद्दृवि. ३ क. ख. ङ. च. छ. ञ. गच्छतुराघवः. ४ ज. एतद्विरोचते. ख. एतच्चरोचते. ५ ङ. झ. ट. यापयेत्. क. ख. कारयेत्. ६ ङ. यदान. ७ छ. झ. मवाप्स्यते. ८ ङ. छ. झ. शैलसंयुताम्. ९ ख. ग. घ. च. ज. ञ. ट. चाद्यैवविवास. छ. ज. चैवास्यविवास. १० क—ञ. कोपेन. ११ क. च. ञ. मुष्णंचनिश्वस्य. १२ क. ख. ङ. च. छ. झ. ञ. राज्येनभरतं. १३ ङ. छ. झ. क्षिप्रमद्याभिषेचये. ख. मद्याभिषेचयेत्.

इदं त्विदानीं संपश्य [1]केनोपायेन मन्थरे ॥ भरतः प्राप्नुयाद्राज्यं न तु रामः कथंचन ॥ ३ ॥
एवमु[2]क्ता तया देव्या मन्थरा पापदर्शिनी ॥ रामार्थ[3]मुपहिंसन्ती कैकेयीमिदमब्रवीत् ॥ ४ ॥
हन्तेदानीं [4]प्रवक्ष्यामि कैकेयि [5]श्रूयतां च मे ॥ [6]यथा ते भरतो राज्यं पुत्रः प्राप्स्यति केवलम् ॥५॥
किं न स्मरसि कैकेयि स्मरन्ती वा निगूहसे ॥ यदुच्यमानमात्मार्थं [7]मत्तस्त्वं श्रोतुमिच्छसि ॥ ६ ॥
मयोच्यमानं यदि ते [8]श्रोतुं छन्दो विलासिनि॥ श्रूयतामभिधास्यामि [9]श्रुत्वा चापि विमृश्यताम्॥७॥
[10]श्रुत्वेदं वचनं तस्या मन्थरायास्तु कैकयी ॥ किंचिदुत्थाय शयनात्स्वास्तीर्णादिदमब्रवीत् ॥ ८ ॥
[11]कथय त्वं ममोपायं केनोपायेन मन्थरे ॥ भरतः प्राप्नुयाद्राज्यं न तु रामः कथंचन ॥ ९ ॥
एवमुक्ता [12]तया देव्या मन्थरा पापदर्शिनी ॥ रामार्थमुपहिंसन्ती [13]कुब्जा वचनमब्रवीत् ॥ १० ॥
[14]तव दैवासुरे युद्धे सह राजर्षिभिः पतिः ॥ [15]अगच्छत्त्वामुपादाय देवराजस्य साह्यकृत् ॥ ११ ॥
[16]दिशमास्थाय वै देवि दक्षिणां दण्डकान्प्रति ॥ वैजयन्तमिति ख्यातं पुरं यत्र तिमिध्वजः ॥१२॥
स शंबर इति ख्यातः शतमायो महासुरः ॥ ददौ शक्रस्य संग्रामं देवसङ्घैरनि[17]र्जितः ॥ १३ ॥
तस्मिन्महति संग्रामे पुरुषान्क्षतविक्षतान् ॥ रात्रौ प्रसुप्तान्घ्नन्तिस्म [18]तरसाऽसाद्य राक्षसाः ॥ १४ ॥

सतीमन्थरावचनमनुमोदितवतीत्याह—एवमित्यादि । कोपेन दास्यप्राप्तिश्रवणजकोपेन ॥ १–२॥ मन्थराया अतिकुशलबुद्धियोगंदृष्ट्वा तामेवोपायंपृच्छति—इदमिति। इदं प्रस्तुतकार्योपयोगिसाधनं। संपश्य संचिन्तय ॥ ३ ॥ रामार्थं रामाभिषेकरूपप्रयोजनं ॥ ४ ॥ हन्तशब्दोहर्षेवर्तते । स्वाभिमतरामविवासनपूर्वकभरताभिषेकोपायप्रश्ननिबन्धनोत्रहर्षः । वरस्मरणहेतुकोवा ।मे मत्तः।केवलंराज्यं कृत्स्नंराज्यं । "निर्णीतेकेवलमितित्रिलिङ्गंत्वेककृत्स्नयोः" इत्यमरः ॥ ५ ॥ हेकैकेयि त्वं उच्यमानं त्वयाबहुशःकथ्यमानं। आत्मार्थं आत्मप्रयोजनं । मत्तः श्रोतुमिच्छसीतियत् अतस्तन्नस्मरसिकिं। स्मरन्तीवानिगूहसेकिमितियोजना॥६॥ छन्दः अभिलाषः । "छन्दःपद्येभिलाषेच" इत्यमरः ॥ ७ ॥ किंचिदुत्थानमादरातिशयात् । उत्थानहेतुर्नशय्यादोषइत्याशयेनाह—स्वास्तीर्णादिति ॥ ८॥ कथयत्वंममोपायमित्यस्यविवरणं—केनेत्यादि ॥ ९–१०॥ वरंस्मारयितुंपूर्वकथामाह । तवेत्यादिश्लोकद्वयमेकान्वयं । हेकैकेयि दैवासुरे देवासुरसंबन्धिनियुद्धे तवपतिः देवराजस्य साह्यकृत् साहाय्यकृत्सन् राजर्षिभिः स्वाश्रितैःसह त्वांचोपादाय दण्डकान्प्रति दक्षिणांदिशं आस्थाय प्राप्य । यत्र तिमिध्वजोवर्तते तद्वैजयन्ताख्यं पुरमगच्छदितिसंबन्धः ॥ ११—१२ ॥ कस्तिमिध्वजः सकीदृशः सकमपराधंकृतवानित्यत्राह—सइति । देवसङ्घैःअनिर्जितः देवसङ्घान्पराभूय शक्राययुद्धंददावित्यर्थः ॥ १३ ॥ क्षताः बाणशूलादिभिः संजातव्रणाः । विक्षताः खड्गपरशुपट्टसादिभिर्विविधंप्रहृताः । तान् रात्रौप्रसुप्तान् घ्नन्तिस्मेत्यभिधानात् पुरुषाणांक्षतविक्षतत्वं दिवायुद्धकृतमित्यवगम्यते । राक्षसाः अ-

प्रार्थनयादेवकार्यार्थंरामप्रादुर्भूतिरितिकैकेय्यास्मृतमितिध्वनितम् । तुशब्दएवार्थे ॥ १ ॥ **वि॰** त्वंप्रपश्य आलोचयेत्यर्थः । तदुपायापरिज्ञानेपि मे मत्तः श्रूयतां ॥ ५ ॥ **ती॰** महोपायं अमोघोपायं ॥ ८ ॥ **ति॰** अपास्य आस्तरणादाकृष्य । **शि॰** राक्षसाः राक्षसकर्मवत्त्वेनतत्त्वंप्राप्ताः । असुरसाहाय्यार्थमागताराक्षसजातयोवा ॥ १४ ॥

[पा॰] १ ङ. छ. झ. पायेनसाधये. २ क. ख. ङ. च. छ. झ. ञ. ट. मुक्तातुसादेव्या. ३ ख. छ. हिंसन्तीं. ४ ग. ङ. छ. झ. ञ. प्रपश्यत्वं. ५ झ. ट. श्रूयतांवचः. ६ ग. यथामे. ख. यथाहि. ७ ज. र्थंमतस्त्वंश्रोतु. ८ क. श्रोतुंज्ञात्वाविलासिनि. ९ ङ. छ. झ. ञ. ट. श्रुत्वाचैतद्विधीयताम्. १० ङ. छ. झ. ञ. श्रुत्वैवंवचनं. ११ ङ.—झ. ट. कथयस्वममोपायं. छ. कथयत्वंमहोपायं. १२ क. ख. ङ. च. छ. झ. ञ. ट. तदादेव्या. १३ च. ञ. कुब्जावाक्यमथाब्रवीत्. ङ. छ. झ. ट. कैकेयीमिदमब्रवीत्. १४ ङ. झ. ञ. पुरादेवासुरेयुद्धे. क. ख. घ. ज. तवदेवासुरे. १५ छ. झ. आगच्छत्त्वा. १६ ख. ङ. छ. झ. ट. मास्थायकैकेयि. १७ ङ. च. झ. ञ. रनिन्दितः. १८ ङ. छ. झ. ञ. ट. तरसापास्य. च. तरसातेऽत्र.

तत्राकरोन्महद्युद्धं राजा दशरथस्तदा ॥ असुरैश्च महाबाहुः शस्त्रैश्च शकलीकृतः ॥ १५ ॥
अपवाह्य त्वया देवि संग्रामान्नष्टचेतनः ॥ तत्रापि विक्षतः शस्त्रैः पतिस्ते रक्षितस्त्वया ॥ १६ ॥
तुष्टेन तेन [1]दत्तौ ते द्वौ वरौ शुभदर्शने ॥ १७ ॥
स त्वयोक्तः पतिर्देवि [2]यदेच्छेयं [3]तदा वरौ ॥ [4]गृह्णीयामिति तत्तेन तथेत्युक्तं महात्मना ॥ १८ ॥
[5]अनभिज्ञा ह्यहं देवि त्वयैव [6]कथिता पुरा ॥ कथैषा तव तु स्नेहान्मन[7]सा धार्यते मया ॥ १९ ॥
रामाभिषेकसंभारान्निगृह्य [8]च निवर्तय ॥ [9]तौ वरौ याच भर्तारं भरतस्याभिषेचनम् ॥
[10]प्रव्राजनं तु रामस्य [11]त्वं वर्षाणि चतुर्दश ॥ २० ॥
चतुर्दश हि वर्षाणि रामे प्रव्राजिते वनम् ॥ प्रजाभावगतस्नेहः स्थिरः पुत्रो भविष्यति ॥ २१ ॥
क्रोधागारं प्रविश्याद्य क्रुद्धेवाश्वपतेः सुते ॥ शेष्वानन्तर्हि[12]तायां त्वं भूमौ मलिनवासिनी ॥ २२ ॥
मा स्मैनं प्रत्युदीक्षेथा मा चैनमभिभाषथाः ॥ [13]रुदन्ती चापि तं दृष्ट्वा जगत्यां शोकलालसा ॥२३॥
दयिता त्वं सदा भर्तुरत्र मे नास्ति संशयः ॥ [14]त्वत्कृते स महाराजो विशेदपि हुताशनम् ॥ २४ ॥
न त्वां क्रोधयितुं शक्तो न क्रुद्धां प्रत्युदीक्षितुम् ॥ तव प्रियार्थं [15]राजा हि प्राणानपि परित्यजेत् ॥२५॥
[16]न ह्यतिक्रमितुं शक्तस्तव वाक्यं महीपतिः ॥ मन्दस्वभावे बुध्यस्व सौभाग्यबलमात्मनः ॥ २६ ॥
[17]मणिमुक्तं सुवर्णानि रत्नानि विविधानि च ॥ दद्याद्दशरथो राजा मा स्म तेषु मनः कृथाः ॥२७॥
[18]यौ तौ दैवासुरे युद्धे वरौ [19]दशरथोऽददात् ॥ तौ स्मारय महाभागे सोर्थो [20]मां त्वामतिक्रमेत् ॥२८॥

सुराः ॥१४॥ तत्र प्रसुप्तप्रदेशे । तदा रात्रौ ॥ १५ ॥ हेदेवि नष्टचेतनः मूर्च्छितः तेपतिः त्वया सारथ्यंकुर्वाणयासंग्रामात् अपवाह्य अन्यत्रनीत्वा रक्षितः शीतोपचारैराप्यायितः । तत्र यत्रापवाहितस्तस्मिन्स्थले । शस्त्रैर्विक्षतः पुनर्युद्धेशस्त्रैःविक्षतःसन् त्वयारक्षितः। ततोपवाह्यरक्षितइतियोजना ॥ १६ ॥ तुष्टेनेत्यर्धमेकंवाक्यं । द्विधारक्षणात् द्वौवरौदत्तावितिभावः ॥ १७ ॥ इच्छेयमित्यर्थेलिङ् । तेन दशरथेन । तत् वरं तथा इच्छयाददानीत्युक्तं ॥ १८ ॥ कथमिदंत्वयाज्ञातमित्यत्राह—अनभिज्ञेति ॥ १९॥ रामाभिषेकेइत्यादिसार्धश्लोकएकान्वयः । निगृह्य बलात्कृत्य । भर्तारमितिशेषः । रामप्रव्राजनभरताभिषेचनरूपौ तौवरौ याचस्व ॥ २० ॥ चतुर्दशसङ्ख्याकिमर्थेत्यत्राह—चतुर्दशेति । प्रजाभावगतस्नेहः प्रजानां भावंअभिप्रायं गतःप्राप्तः स्नेहोयस्यसतथोक्तः । स्थिरः अप्रकंप्यः ॥ २१ ॥ एवमुपायमुपदिश्यउपायप्रवर्तनप्रकारमाह—क्रोधेति । प्रणयकलहादिनाक्रुद्धाःस्त्रियोयत्रवसन्तितत्क्रोधागारं। अनन्तर्हितायां अनास्तृतायां ॥२२॥ तंदृष्ट्वा रुदन्ती शोकलालसाचसती एनंमाप्रत्युदीक्षेथाः माचैनमभिभाषथाइत्यन्वयः । जगत्यां भूमौ । शयानेतिशेषः ॥ २३ ॥ एवंकरणेझटितिकार्यसिद्धिर्भविष्यतीत्याह—दयितेति । अत्र दयितत्वविषये । त्वत्कृते त्वत्प्रीतिनिमित्तं ॥ २४—२५ ॥ मन्दस्वभावे अलसस्वभावे । सौभाग्यबलं सौन्दर्यबलं ॥ २६ ॥ वरदानव्यतिरिक्तंमण्यादिकंचनस्वीकुर्वित्याह—मणीति । मणयःरत्नानिमुक्ताश्चेत्येकवद्भावः । मणिमुक्तं । रत्नानि श्रेष्ठवस्तूनि। "रत्नंस्वजातिश्रेष्ठेपि" इत्यमरः ॥ २७ ॥ यौताविवितियत्तच्छब्दप्रयोगःप्रसिद्ध्यतिशयद्योतनार्थः। तौस्मारय दातव्यत्वेनेतिशेषः । सोर्थः रामविवासनभरताभिषेकरूपार्थः। मातिक्रमेत् सर्वथासिध्यत्येवे-

---

[पा०] १ क. ख. च. ञ. दत्तौतु. २ ङ. छ. झ. ट. यदिच्छेयं. ३ क. ख. ङ. ज. झ. ट. तदावरम्. ४ ङ. छ. झ. ट. गृह्णीयांतुतदाभर्तस्तथेत्युक्तं. क. ग. गृह्णीयामितितत्वेन. घ. गृहीष्यामीतितत्वेन. ५ ख. अनभिज्ञास्म्यहं. ६ ग. छ. ज. झ. कथितं-पुरा. ७ ट. मनसैवावधार्यते. ८ क. ख. घ—ट. विनिवर्तय. ९ छ. झ. तौचयाचस्व. ङ. वरौयाचस्व. १० क—ङ. ज. झ. ट. प्रव्राजनंच. ११ ङ. छ. झ. वर्षाणिचचतुर्दश. १२ ट. तायांवै. १३ ङ. छ. झ. ट. रुदन्तीपार्थिवं. ग. रुदन्तीचाथतं. १४ ग. ङ—ट. त्वत्कृतेच. १५ ङ. च. छ. झ. ञ. ट. राजातु. १६ ज. नव्यतिक्रमितुं. १७ ङ. च. छ. ञ. ट. मणिरत्नंसुवर्णंच. क. मणिमुक्तंसुवर्णंच. ग. घ. ज. झ. मणिमुक्तासुवर्णानि. ख. मणिमुक्तासुवर्णंच. १८ ग. ज. ट. यौतेदेवासुरे. १९ ङ. छ. झ. ञ. रथोददौ. च. रथोऽददत्. २० झ. नत्वाक्रमेदिति. ङ. मातिक्रमेदिति. घ. मात्वामभिक्रमेत्.

यदा तु ते वरं दद्यात्स्वयमुत्थाप्य राघवः ॥ व्यवस्थाप्य महाराजं त्वमिमं वृणुया वरम् ॥ २९ ॥
रामं प्रव्राजयारण्ये नव वर्षाणि पञ्च च ॥ भरतः क्रियतां [2]राजा पृथि[3]व्याः पार्थिवर्षभः ॥ ३० ॥
चतुर्दश हि वर्षाणि रामे प्रव्राजिते वनम् ॥ रूढश्च कृतमूलश्च शेषं स्थास्यति ते सुतः ॥ ३१ ॥
रामप्रव्राजनं चैव देवि याचस्व [4]तं वरम् ॥ [5]एवं सिध्यन्ति पुत्रस्य सर्वार्थास्तव [6]भामिनि ॥ ३२ ॥
एवं प्रव्राजितश्चैव रामोऽरामो भविष्यति ॥ भरतश्च हतामित्रस्तव राजा भविष्यति ॥ ३३ ॥
येन कालेन रामश्च वनात्प्रत्यागमिष्यति ॥ तेन[7] कालेन पुत्रस्ते कृतमूलो भविष्यति ॥
संगृहीतमनुष्यश्च सुहृद्भिः [8]सार्धमात्मवान् ॥ ३४ ॥
[9]प्राप्तकालं तु ते मन्ये राजानं वीतसाध्वसा ॥ रामाभिषेकसं[10]भारान्निगृह्य विनिवर्तय ॥ ३५ ॥
अनर्थमर्थरूपेण ग्राहिता सा ततस्तया ॥ हृष्टा प्रतीता कैकेयी मन्थरामिदमब्रवीत् ॥ ३६ ॥
सा हि वाक्येन कुब्जायाः किशोरीवोत्पथं गता ॥ कैकेयी विस्मयं [11]प्राप्ता परं परमदर्शना ॥ ३७ ॥
[12]कुब्जे त्वां नाभिजानामि श्रेष्ठां श्रेष्ठाभिधायिनीम् ॥ पृथिव्यामसि कुब्जानामुत्तमा बुद्धिनिश्चये ॥ ३८ ॥
त्वमेव तु ममार्थेषु नित्ययुक्ता हितैषिणी ॥ नाहं समवबुध्येयं कुब्जे राज्ञश्चिकीर्षितम् ॥ ३९ ॥
सन्ति [13]दुस्संस्थिताः कुब्जा वक्राः [14]परमपापिकाः ॥ त्वं पद्ममिव वातेन संनता प्रियदर्शना ॥ ४० ॥

त्यर्थः । राज्ञःसत्यप्रतिज्ञत्वादितिभावः ॥२८॥ राघवः दशरथः । व्यवस्थाप्य सत्येस्थापयित्वा ॥२९—३०॥ रूढः प्रसिद्धः अभिवृद्धोवा । कृतमूलः स्ववशीकृतमूलबलइत्यर्थः । शेषं चतुर्दशवर्षव्यतिरिक्तंपुरुषायुषशेषं ॥ ३१ ॥ रामप्रव्राजनंचेतिचकारेण भरताभिषेकः समुच्चीयते ॥ ३२ ॥ रामोरामइत्यत्र अरामइतिपदच्छेदः । अरामोभविष्यति इदानीमेवप्रकृतिस्नेहपात्रंनभविष्यतीत्यर्थः । यद्वा रामोभविष्यति एकएवभविष्यतीत्यर्थः ॥ ३३ ॥ कृतमूलः रूढमूलः । कृतमूलइत्यस्यैवविवरणं संगृहीतेत्यर्धंसंगृहीतमनुष्यश्चेत्यत्र भविष्यतीत्यनुषज्यते । संगृहीताः अनुरञ्जिताः मनुष्याः पौरजानपदाः येन सतथोक्तः । तत्रहेतुः—आत्मवानिति ॥ ३४ ॥ प्राप्तकालं अभिमतप्रार्थनोचितकालं । वीतसाध्वसा विगतभया । अमुंकालं प्राप्तकालंमन्ये । तेनविनिवर्तयेतिसंबन्धः ॥ ३५ ॥ अनर्थं विरुद्धार्थं । अर्थरूपेण अनुकूलार्थरूपेण ग्राहिता बोधिता । तथैवप्रतीता ज्ञातवती । अतएवहृष्टा ॥ ३६ ॥ सेति । प्रतीतेत्यस्योपपादनमेतत् । किशोरी बडवा । उत्पथं अमार्गं । परमदर्शना पुरेतिशेषः ॥ ३७ ॥ नाभिजानामीति । एतावत्कालमितिशेषः । पृथिव्यांयावत्यःकुब्जाःसन्ति तासांसर्वासांमध्ये त्वमुत्तमा बुद्धिनिश्चये विषये । अनेन कुब्जानांप्रायेण बुद्धितैक्ष्ण्यमस्तीतिद्योतितम् ॥ ३८ ॥ समवबुध्येयमिति शकिलिङ् ॥ ३९ ॥ दुस्संस्थिताः दुस्सन्निवे-

---

ती० रमयत्यानन्दयतीतिरामः । मुनीनामितिशेषः ॥ ३३ ॥ **ति०** नसमवबुद्ध्येयं त्वत्कृतबोधनाभावेइतिशेषः । चिकीर्षितं रामाभिषेकायभरतस्यविवासनादि । कैकेय्याएवंमतिकारणंक्वचित्पठ्यते । "नहितद्बुबुधेपापंशापदोषेणमोहिता । केकयेषुहिसाबाल्येब्राह्मणंरूक्षरूपिणम् । असूयितवतीबालातेनशप्तामहात्मना । यस्मादसूयसेविप्रंत्वंरूपमददर्पिता । तस्मादसूयांत्वमपिलोकेप्राप्स्यसिकुत्सिताम् । इतिशापसमाच्छन्नामन्थरावशमागता" इति । असूयां असूयाविषयताम् ॥ ३९ ॥ **ति०** अथकुब्जांकुब्जान्तरवैलक्षण्येनस्तौति—**सन्तीत्यादि** । त्वद्व्यतिरिक्ताइतिशेषः । दुस्संस्थिताः दुस्संस्थावयवसंनिवेशाः । अतएवपरमपापिकाः परमपापदर्शनाः । **शि०** अवक्राः कौटिल्यरहिताः । किंच । अवे प्रजापालने क्रः कृतिर्येषां । अतएवपरं केवलं । अपापिकाः नपापि कर्मयेषांतेऽपि । मन्त्रिणइति शेषः । दुस्संस्थिताः अविज्ञाताभिप्रायाः सन्ति । एतेनराज्ञो-

[पा०] १ ङ. रामप्रव्राजनंदूरं. छ. झ. रामप्रव्रजनंदूरं. २ च. ञ. राज्यं. ३ क. ङ. च. छ. झ. पृथिव्यां. ४ ख. तेवरम्. ५ क—छ. झ. ञ. ट. एवंसेत्स्यन्तिपुत्रस्य. ज. एवंलप्स्यन्तिपुत्रस्य. ६ ङ. च. छ. झ. ञ. ट. कामिनि. ७ छ. झ. अन्तर्बहिश्चपुत्रस्ते. ८ ङ. छ. झ. ट. साकमात्मवान्. ९ झ. प्राप्तकालंनुमन्येऽहं. ङ. ट. प्राप्तकालंतुमन्ये. घ. प्राप्तकालं तुतंमन्ये. १० क—छ. झ. ञ. ट. संकल्पान्निगृह्य. ११ ङ. छ. झ. ट. प्राप्य. १२ ख. ज. कुब्जेत्वांनावजानामि. ङ. छ. झ. प्रज्ञांतेनावजानामिश्रेष्ठेश्रेष्ठाभिधायिनि. १३ ङ. छ. झ. ट. दुस्संस्थिताःकुब्जे. १४ ग. घ. ज. परमदारुणाः.

उरस्तेऽभिनिविष्टं वै यावत्स्कन्धात्समुन्नतम् ॥ अधस्ताच्चोदरं शातं सुनाभमिव लज्जितम् ॥४१॥
परिपूर्णं तु जघनं सुपीनौ च पयोधरौ ॥ विमलेन्दुसमं वक्त्रमहो राजसि मन्थरे ॥ ४२ ॥
जघनं तव निर्घुष्टं रशनादामशोभितम् ॥ जङ्घे भृशमुपन्यस्ते पादौ चाप्यायतावुभौ ॥ ४३ ॥
त्वमायताभ्यां सक्थिभ्यां मन्थरे क्षौमवासिनी ॥ अग्रतो मम गच्छन्ती राजहंसीव राजसे ॥ ४४ ॥
आसन्याश्शंबरे मायाः सहस्रमसुराधिपे ॥ सर्वास्त्वयि निविष्टास्ता भूयश्चान्याः सहस्रशः ॥ ४५ ॥
तवेदं स्थगु यद्दीर्घं रथघोणमिवायतम् ॥ मतयः क्षत्रविद्याश्च मायाश्चात्र वसन्ति ते ॥ ४६ ॥
अत्र ते प्रतिमोक्ष्यामि मालां कुब्जे हिरण्मयीम् ॥ अभिषिक्ते च भरते राघवे च वनं गते ॥ ४७ ॥
जात्येन च सुवर्णेन सुनिष्टप्तेन मन्थरे ॥ लब्धार्था च प्रतीता च लेपयिष्यामि ते स्थगु ॥ ४८ ॥
मुखे च तिलकं चित्रं जातरूपमयं शुभम् ॥ कारयिष्यामि ते कुब्जे शुभान्याभरणानि च ॥ ४९ ॥
परिधाय शुभे वस्त्रे देवतेव चरिष्यसि ॥ ५० ॥
चन्द्रमाह्वयमानेन मुखेनाप्रतिमानना ॥ गमिष्यसि गतिं मुख्यां गर्वयन्ती द्विषज्जनम् ॥ ५१ ॥
तवापि कुब्जाः कुब्जायाः सर्वाभरणभूषिताः ॥ पादौ परिचरिष्यन्ति यथैव त्वं सदा मम ॥५२॥
इति प्रशस्यमाना सा कैकेयीमिदमब्रवीत् ॥ शयानां शयने शुभ्रे वेद्यामग्निशिखामिव ॥ ५३ ॥

शाः ॥ ४० ॥ तेउरः अभिनिविष्टं अभिनिवेशवत्सत् स्कन्धाभ्यांस्पर्धमानंसत् । यावत्स्कन्धात् स्कन्धपर्यन्तं । समुन्नतमित्युत्प्रेक्षा । अधस्तात् उरसोधस्तात् । स्थितं सुनाभं शोभननाभि । योगविभागादच् । उदरं उरसः सजातीयस्यउन्नतिंदृष्ट्वालज्जितमिव शातं कृशं ॥४१॥ परिपूर्णं प्रथुलं ॥ ४२ ॥ उपन्यस्ते संश्लिष्टे । सुसन्निवेशेवा । आयतौ दीर्घौ ॥ ४३ ॥ सक्थिभ्यां ऊरुभ्यां । "सक्थिक्लीबेपुमानूरुः" इत्यमरः । उपलक्षणेतृतीया ॥ ४४ ॥ अन्याः लौकिक्योमायाः ॥ ४५ ॥ स्थगु उरोनिस्सृतोन्नतविकृतावयवविशेषः । रथघोणं नासिकाकाररथावयवविशेषः । "स्मृतिर्व्यतीतविषयामतिरागामिगोचरा । बुद्धिस्तात्कालिकीज्ञेयाप्रज्ञात्रैकालिकीमता" इत्युक्तविषयविभागेन मतेर्बाहुल्यं । क्षत्रविद्याः राजनीतयः । मायाः विचित्रकुत्सितशक्तयः । अत्र स्थगुनि ॥ ४६—४७ ॥ उत्तमस्वर्णजातौभवंजात्यं । दिगादित्वाद्यत् । सुनिष्टप्तेन सुद्युतेन । सुवर्णेनलेपयिष्यामि सुवर्णकञ्चुकेनालंकरिष्यामीत्यर्थः । यद्वा चन्दनसंघृष्टसुवर्णेनसहलेपयिष्यामीत्यर्थः । प्रतीता संतुष्टा ॥ ४८ ॥ जातरूपमयं सुवर्णमयं । चित्रं नानारत्नखचिततयानानावर्णं । तिलकं तिलकाकारंभूषणं ॥ ४९—५० ॥ आह्वयमानेन स्पर्धमानेन । "स्पर्धायामाङः" इत्यात्मनेपदं । मुखेनहेतुना अप्रतिमानना अप्रतिद्वन्द्वमुखी । द्विषज्जनं मत्सपत्नीजनंप्रति । गर्वयन्ती गर्वंकुर्वन्ती । गर्वशब्दात् "तत्करोति" इतिण्यन्ताच्छत्रादि । स्वार्थेणिजित्येके । मुख्यां तृणीकृतसर्वजनां । गतिं पादन्यासविशेषं । गमि-

मन्त्र्यधीनत्वंव्यक्तं । तेनास्मिन्विषयेराज्ञोनापराधइतिसूचितम् : तेनत्वद्बोधनमन्तराइदंमज्ज्ञानविषयीभूतंनस्यादितिव्यञ्जितं । तेनत्वत्सदृशीमत्प्रियाऽन्यानास्तीतिबोधितम् ॥ ४० ॥ ति० अधस्ताच्चैवसंशातमितिपाठे सुनाभशब्देनोदरमुच्यते । ति० यावत्संस्थानमुन्नतमितिपाठे स्तनावधिसमस्थानरूपसर्वसाधारणसंस्थानंयावत्समुन्नतं । एतेनस्थगुमत्कुब्जत्वंप्रतिपादितम् ॥ ४१ ॥ ति० निर्मृष्टं रोमादिकश्मलहीनं । निर्घुष्टमितिपाठे रशनास्थक्षुद्रघण्टाभिश्शब्दायमानं ॥ ४३ ॥ कत० सक्थिनी पृष्ठफलके ॥ ४४ ॥

[पा०] १ क. त्स्कन्धंसमुन्नतं. २ घ. ङ. ज—ट. दरंशान्तं. ३ क—घ. च. ञ. परिपूर्णंच. घ. ङ. छ. ज. ट. प्रतिपूर्णंच. ४ क—ङ. छ. ज. झ. ट. निर्मृष्टं. ५ ङ. च. छ. झ. ञ. ट. दामभूषितम्. ६ ङ. छ. झ. ञ. ट. चप्यायतावुभौ. ७ घ. पादाभ्यां. ८ ङ. छ. झ. ट. राजसेऽतीवशोभने. ९ ङ. छ. झ. ट. हृदयेतेनिविष्टास्ताः. १० क. भूयस्यस्ताः. ११ इदमर्धं क. च. पुस्तकयोः मतयःक्षत्रविद्याश्चेत्यर्धात्परंदृश्यते. १२ छ. वसन्तिहि. १३ ख. ङ. च. छ. झ. ञ. ट. तेऽहंप्रमोक्ष्यामि. १४ क—ट. सुनिष्टप्तेनसुन्दरि. १५ ख. ङ. छ. झ. ट. गर्हयन्तीद्विषज्जने. च. ञ. गर्हयन्तीद्विषज्जने. क. घ. गर्हयन्तीद्विषज्जनम्. १६ क. च. ञ. प्रशस्यमानासाकुब्जा.

गतोदके सेतुबन्धो न कल्याणि विधीयते ॥ उत्तिष्ठ कुरु कल्याणि राजानमनुदर्शय ॥ ५४ ॥
तथा प्रोत्साहिता देवी गत्वा मन्थरया सह ॥ क्रोधागारं विशालाक्षी सौभाग्यमदगर्विता ॥ ५५॥
अनेकशतसाहस्रं मुक्ताहारं वराङ्गना ॥ अवमुच्य वरार्हाणि शुभान्याभरणानि च ॥ ५६ ॥
ततो हेमोपमा तत्र कुब्जावाक्यवशं गता ॥ संविश्य भूमौ कैकेयी मन्थरामिदमब्रवीत् ॥ ५७ ॥
इह वा मां मृतां कुब्जे नृपायावेदयिष्यसि ॥ वनं तु राघवे प्राप्ते भरतः प्राप्स्यति क्षितिम् ॥५८॥
न सुवर्णेन मे ह्यर्थो न रत्नैर्न च भूषणैः ॥ एष मे जीवितस्यान्तो रामो यद्यभिषिच्यते ॥ ५९ ॥

अथो पुनस्तां महिषीं महीक्षितो वचोभिरत्यर्थमहापराक्रमैः ॥
उवाच कुब्जा भरतस्य मातरं हितं वचो राममुपेत्य चाहितम् ॥ ६० ॥
प्रपत्स्यते राज्यमिदं हि राघवो यदि ध्रुवं त्वं ससुता च तप्स्यसे ॥
अतो हि कल्याणि यतस्व तत्तथा यथा सुतस्ते भरतोऽभिषेक्ष्यते ॥ ६१ ॥
तथाऽतिविद्धा महिषी तु कुब्जया समाहता वागिषुभिर्मुहुर्मुहुः ॥
निधाय हस्तौ हृदयेऽतिविस्मिता शशंस कुब्जां कुपिता पुनःपुनः ॥ ६२ ॥
यमस्य वा मां विषयं गतामितो निशाम्य कुब्जे प्रतिवेदयिष्यसि ॥
वनं गते वा सुचिराय राघवे समृद्धकामो भरतो भविष्यति ॥ ६३ ॥
अहं हि नैवास्तरणानि न स्रजो न चन्दनं नाञ्जनपानभोजनम् ॥
न किंचिदिच्छामि न चेह जीवितं न चेदितो गच्छति राघवो वनम् ॥ ६४ ॥
अथैतदुक्त्वा वचनं सुदारुणं निधाय सर्वाभरणानि भामिनी ॥
असंवृतामास्तरणेन मेदिनीं तदाऽधिशिश्ये पतितेव किन्नरी ॥ ६५ ॥

ष्यसि करिष्यसि । ओदनपाकंपचतीतिवन्निर्देशः ॥ ५१—५३ ॥ हेकल्याणि कुरु मदुक्तप्रकारमिति शेषः । राजानमनुदर्शय क्रोधागारमितिशेषः । यद्वा अनुदर्शय प्रतीक्षस्वेत्यर्थः ॥ ५४ ॥ तथाप्रोत्साहितेत्यादिश्लोकत्रयमेकान्वयं । अनेकशतसाहस्रं बहुमूल्यमितियावत् । "शतमानविंशतिक" इत्यादिना-क्रीतार्थेऽण् ॥ ५५—५७ ॥ नृपाय मदुपेक्षकाय ॥ ५८—५९ ॥ कैकेयीनिश्चयंद्रढयति—अथोइति । राममुपेत्य राममुद्दिश्य ॥ ६०—६१ ॥ अतिविद्धा अतिदुःखिता । निधायहस्तौहृदयइतिविस्मयाभिनयः । अतिविस्मिता अतिस्निग्धः कथंमदनिष्टंकरिष्यतीति । कुपिता रामाभिषेकप्रवर्तकंभर्तारमुद्दिश्यकुपितेत्यर्थः ॥ ६२—६३ ॥ इतोगच्छतीतिवर्तमानसामीप्येलट् ॥ ६४ ॥ मेदिनीमधिशिश्ये । " अधिशीङ्स्थासांक-

---

शि० कल्याणं । सज्जनानामित्यर्थः ॥ ५४ ॥ शि० सौभाग्यमदगर्विता । सौभाग्यस्य अहोभाग्यमस्माकंयस्यादेवसंतापहारकाःरामादयःपुत्राइतिस्वातिशयभाग्यवत्तायाः मदेनगर्विता । किंच । सौभाग्यैः शोभनभाग्यवद्भिर्मन्यतेऽतिश्रेष्ठत्वेनज्ञायतेऽसावितिसौभाग्यमत् सैवागर्वितेतिकर्मधारयः ॥ ५५ ॥ ति० निशाम्य दृष्ट्वा । प्रतिवेदयिष्यसि दशरथायेतिशेषः ॥ ६३ ॥ ति० पुण्यक्षयाद्भूमौपतिताकिन्नरीव ॥ ६५ ॥ इतिनवमस्सर्गः ॥ ९ ॥

[पा०] १ ग. ङ. छ. झ. ञ. ट. कुरुकल्याणं. २ ख. घ. महार्हाणि. ३ ङ. च. झ. ञ. ट. तदाहेमोपमा. ४ घ. इहमांचमृतांकुब्जे. ५ ख. ग. घ. वनंवाराघवे. ६ ङ. झ. ट. प्राप्स्यतेक्षितिम्. ७ क. नचरत्नैर्नभोजनैः. ख. ग. घ. च. छ. झ. ञ. ट. नरत्नैर्नचभोजनैः. ८ ग. ङ. छ. झ. ञ. ट. ततोहिकल्याणि. ९ घ. तदातिवृद्धा. ज. यथातिविद्धा. १० ङ. छ. झ. ञ. महिषीतिकुब्जया. ११ ग. घ. ङ. ज. समाहिता. १२ क. रुषिता. ख. कुपितां. १३ ख. घ—छ. झ. ञ. ट. निशम्यकुब्जे. १४ घ. विलेपनंनाञ्जनपान. १५ झ. ठ. असंस्कृतामास्तरणेन.

उदीर्णसंरंभतमोवृताननां तथाऽवमुक्तोत्तममाल्यभूषणा ॥
नरेन्द्रपत्नी विमला बभूव सा तमोवृता द्यौरिव मग्नतारका ॥ ६६ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे नवमः सर्गः ॥ ९ ॥

दशमः सर्गः ॥ १० ॥

सुमन्त्रादीन्प्रतिरामाभिषेकसामग्रीसज्जीकरणनियोजनपूर्वकं प्रियाख्यानाय कैकेयीगृहमुपगतवता दशरथेनतत्रतदद्दर्शन-जविषादात्प्रतिहारींप्रतिप्रश्नः ॥ १ ॥ तयाकैकेय्याःक्रोधागारेशयनंनिवेदितेनतेन तांप्रत्युपलालनपूर्वकंप्रियवचनैःसमाश्वासनम् ॥ २ ॥

विदर्शिता यदा देवी कुब्जया पापया भृशम् ॥ तदा शेते स्म सा भूमौ दिग्धविद्धेव किन्नरी ॥१॥
निश्चित्य मनसा कृत्यं सा सम्यगिति भामिनी ॥ मन्थरायै शनैः सर्वमाचचक्षे विचक्षणा ॥ २ ॥
सा दीना निश्चयं कृत्वा मन्थरावाक्यमोहिता ॥ नागकन्येव निश्वस्य दीर्घमुष्णं च भामिनी ॥
मुहूर्तं चिन्तयामास मार्गमात्मसुखावहम् ॥ ३ ॥
सा सुहृच्चार्थकामा च तं निशम्य सुनिश्चयम् ॥ बभूव परमप्रीता सिद्धिं प्राप्येव मन्थरा ॥ ४ ॥
अथ साऽमर्षिता देवी सम्यक्कृत्वा विनिश्चयम् ॥ संविवेशाबला भूमौ निवेश्य भ्रुकुटीं मुखे ॥ ५ ॥
ततश्चित्राणि माल्यानि दिव्यान्याभरणानि च ॥ अपविद्धानि कैकेय्या तानि भूमिं प्रपेदिरे ॥ ६ ॥
तथा तान्यपविद्धानि माल्यान्याभरणानि च ॥ अशोभयन्त वसुधां नक्षत्राणि यथा नभः ॥ ७ ॥
क्रोधागारे निपतिता सा बभौ मलिनांबरा ॥ एकवेणीं दृढं बध्वा गतसत्त्वेव किन्नरी ॥ ८ ॥

मे" इतिसप्तम्यर्थेद्वितीया ॥६५॥ उदीर्णःउत्कटःसंरंभः कोपःसएवतमः तेनवृताननना । विमला पूर्वंविमला । तमोवृता नीलाभ्रयुक्ततमोवृता । मग्नतारका अस्तमितातारका ॥ ६६ ॥ इति श्रीगोविन्दराजविरचितेश्रीमद्रामायणभूषणे पीतांबराख्याने अयोध्याकाण्डे नवमः सर्गः ॥ ९ ॥

अथपूर्वोक्तकैकेयीक्रोधमविचाल्यत्वसूचनायानुवदन्राज्ञः कैकेयीदर्शनानुनयौदर्शयति—विदर्शितेति । विदर्शिता विपरीतंबोधिता । दिग्धविद्धा विषलिप्तबाणेनप्रहृता "विषाक्तेदिग्धलिप्तकौ" इत्यमरः ॥ १ ॥ सा कैकेयी । कृत्यं कर्तव्यं । पूर्वोक्तरीत्यामनसानिश्चित्य । सर्वंत्वदुक्तंसम्यगितिमन्थरायैआचचक्षे इतिसंबन्धः ॥ २ ॥ सादीनेत्यर्धत्रयमेकंवाक्यं । दीना अत्रस्वोद्योगःफलिष्यतिनवेतिशङ्कयादीना । मार्गं उपायं । एतदर्धत्रयंनिश्चित्येतिपूर्वश्लोकात्पूर्वमेवनिवेशनीयं । अर्थसङ्गतिस्वारस्यात् ॥ ३ ॥ तंनिश्चयं "इहवामांमृतां" इत्यादिनापूर्वसर्गान्तोक्तनिश्चयं । निशम्य श्रुत्वा । सिद्धिं निश्चयफलं । प्राप्येवप्रीता ॥४॥ पुनःसंवेशनाभिधानंरोपसूचकभ्रुकुटीकरणमाल्यभूषणापवेधादिविशेषप्रदर्शनार्थं । भ्रुकुटीं क्रोधजनिताकारविशेषं ॥ ५ ॥ पूर्वत्यक्तभूषणादीनामौदासीन्येनभूमौविक्षेपंदर्शयति—ततइति । यान्यपविद्धानि तानिभूमिंप्रपेदिरे नतुमञ्जूषिकां । क्रोधातिशयसूचनायभूमावुत्सर्जनं ॥ ६ ॥ व्याकीर्णत्वद्योतनायतानिवर्णयति—तयेत्यादिना ॥ ७ ॥ गतसत्वा क्षीणबला । विगतासुरितिवार्थः । "द्रव्यासुव्यवसायेषुसत्वमस्त्रीतुजन्तुषु" इत्यमरः ॥ ८ ॥

वि० किन्नरी कामरूपप्रधानोजातिविशेषः । स० यद्वा पापया निकृतिनाम्न्याअसुर्या । "अनर्हायास्त्वनाऽऽज्ञप्ताकैकेय्याअपिसद्गतिः । सूलातुभरतंनैषागच्छेतनिरयानिति । तथापिसायदावेशाच्चकारलग्यशोभनम् । निकृतिर्नामसाक्षिप्तामयातमसिशाश्वते" इतितात्पर्यनिर्णये नवमेआचार्योक्तेः ॥ १ ॥ ति० निधिमितिपाठे धनंप्राप्येवपरमप्रीताबभूव । वस्तुतोयंद्वव-

[पा०] १ ज. विमनाबभूवसा. २ क—ट. सामर्षिता. ३ घ. सुनिश्चयम्. ४ ग. घ. ज. तत्रसर्वाणिमाल्यानि. ५ ग. घ. च—ट. चपतिता. ६ ख. ङ—ट. एकवेणींदृढां.

आज्ञाप्य तु महाराजो राघवस्याभिषेचनम् ॥ उपस्थानमनुज्ञाप्य प्रविवेश निवेशनम् ॥ ९ ॥
अद्य रामाभिषेको वै प्रसिद्ध इति जज्ञिवान् ॥ [1]प्रियार्हां प्रियमाख्यातुं विवेशान्तःपुरं वशी ॥१०॥
स कैकेय्या गृहं श्रेष्ठं प्रविवेश महायशाः ॥ पाण्डुरा[2]भ्रमिवाकाशं राहुयुक्तं निशाकरः ॥ ११ ॥
[3]शुकबर्हिणसंघुष्टं क्रौञ्चहंसरुतायुतम् ॥ वादित्ररवसंघुष्टं [4]कुब्जावामनिकायुतम् ॥ १२ ॥
लतागृहैश्चित्रगृहैश्चंपकाशोकशोभितैः ॥ दान्तराजतसौवर्णवेदिकाभिः [5]समायुतम् ॥ १३ ॥
नित्यपुष्पफलैर्वृक्षैर्वापीभि[6]श्चोपशोभितम् ॥ दान्तराजतसौवर्णैः संवृतं परमासनैः ॥ १४ ॥
विविधैरन्नपानैश्च भक्ष्यैश्च विविधैरपि ॥ उपपन्नं महार्हैश्च [7]भूषितैस्त्रिदिवोपमम् ॥ १५ ॥
[विवेशा[8]न्तःपुरं राजा सिंहो गिरिगुहामिव ॥]
[9]तत्प्रविश्य महाराजः स्वमन्तःपुरमृद्धिमत् ॥ न ददर्श [10]प्रियां राजा कैकेयीं शयनोत्तमे ॥ १६ ॥
स कामबलसंयुक्तो [11]रत्यर्थं मनुजाधिपः ॥ अपश्यन्दयितां भार्यां पप्रच्छ विषसाद च ॥ १७ ॥
न हि तस्य पुरा देवी तां वेलामत्यवर्तत ॥ न च राजा गृहं शून्यं प्रविवेश कदाचन ॥ १८ ॥
ततो गृहगतो राजा कैकेयीं पर्यपृच्छत ॥ [12]यथापुरमविज्ञाय स्वार्थलिप्सुमपण्डिताम् ॥ १९ ॥
प्रतिहारी त्वथोवाच सं[13]त्रस्ता सुकृताञ्जलिः ॥ देव देवी भृशं क्रुद्धा क्रोधागारमभिद्रुता ॥ २० ॥
प्रतिहार्या वचः श्रुत्वा राजा परमदुर्मनाः ॥ विषसाद पुनर्भूयो लुलितव्याकुलेन्द्रियः ॥ २१ ॥

आज्ञाप्य सुमन्त्रादीन्नियम्य । अभिषेचनं अभिषेचनसाधनंप्रति । उपस्थानं आस्थानं । सदइत्यर्थः । अनुज्ञाप्य अनुज्ञांकारयित्वा । यद्वा पञ्चमसर्गे “गुरुणात्वभ्यनुज्ञातः” तइत्युक्तत्वाद्वसिष्ठएवोपस्थानशब्देनोच्यते ॥ ९ ॥ रामाभिषेकः अद्यवै इदानीमेव । प्रसिद्धइतिजज्ञिवान् । इतःपूर्वंकैकेय्याःश्रोतुमवकाशोनास्तीतिज्ञातवानित्यर्थः । सर्वमस्यवशेवर्ततइतिवशी स्वतन्त्रः । अतःस्वयमेवप्रियार्हांकैकेयींप्रतिप्रियमाख्यातुमन्तःपुरंविवेश ॥ १० ॥ स्वबाधककैकेयीयुक्तत्वाद्राहुयुक्तमित्युक्तं ॥ ११ ॥ अथदशरथस्यकैकेयीवचनकर्तव्यत्वाय रामाभिषेकविघ्नमियंकरिष्यतीतिबुद्ध्यनुत्पादायच रतिभावोद्दीपनान्यन्तःपुरेदर्शयति—शुकेत्यादि । वादित्ररवसंघुष्टं वीणादिचतुर्विधवाद्यरवानुनादितं । “ततंवीणादिकंवाद्यमानद्धंमुरजादिकं । वंशादिकंतुसुषिरंकांस्यतालादिकंघनं ॥ चतुर्विधमिदंवाद्यंवादित्रातोद्यनामकं” इत्यमरः । कुब्जादीनांप्रियानुकूल्यहेतुत्वाद्रतिवृद्धिहेतुत्वं ॥ १२ ॥ लतागृहैः चित्रगृहैश्चोपलक्षितं । दान्ताः दन्तनिर्मिताः ॥ १३ ॥ नित्यपुष्पफलैरिति । दोहदविशेषादितिज्ञेयं ॥१४॥ भक्ष्यैः अपूपादिभिः । भूषितैः स्त्रीजनैरितिशेषः । अतएवत्रिदिवोपमं ॥ १५—१६ ॥ कामबलसंयुक्तः उद्दीपनदर्शनादुचितकालत्वाच्चेतिभावः । अतएवरत्यर्थंपप्रच्छ क्वगतासीत्येवं । प्रत्युत्तराभावाद्विषसादच॥१७॥ विषादहेतुमाह—नहीति । तांवेलां रतिवेलां ॥ १८ ॥ कैकेयीं स्वार्थलिप्सुं स्वप्रयोजनपरां । अविज्ञाय यथापुरं यथापूर्वं । पर्यपृच्छत प्रतिहारीमितिशेषः । पूर्वसदर्शनकालेयथापृच्छति तथाऽपृच्छदित्यर्थः॥१९–२०॥ भूयःअतिशयेन । अदर्शनविषादादपिक्रोधागारप्रवेशश्रवणादतिशयेनविषसाद । लुलितव्याकुलेन्द्रियः लुलितानिघूर्णितानिव्याकुलानिस्वस्वविषयग्रहणासमर्था-

---

कार्यार्थंस्वयंभूलोकमागतादासीचजाताततद्विपर्यांसिद्धिप्राप्येत्यर्थः । रामगमनस्यसंभावनामात्रविषयत्वादिदेति ॥ ४ ॥ ति० वशी स्वस्त्रीव्यतिरिक्तविषये ॥ १० ॥ ति० कुब्जाः वामनिकाः । कुब्जाभिर्वामनिकाभिश्चयुतं । सुरूपदासीनांसापत्न्यसंभावनयाअन्तःपुरेऽवासात् ॥ १२ ॥ शि० कामबलसंयुक्तः कामबलं तदुद्रेकस्तत्संयुक्तः । अतएवरत्यर्थी । ति० कामबलेन अभिषेक-

[पा०] १ घ. प्रियार्थंप्रियमाख्यातुं. क. प्रियमाख्यातुः. २ ख. घ. ज. मिवाकाशे. ३ ङ. च. छ. झ. ञ. शुकबर्हिसमायुक्तं. क. ख. पक्षिगणसंयुक्तं. ४ च. कुब्जवामनिकायुतम्. ५ घ. समावृतम्. ६ ङ. च. छ. झ. ञ. रुपशोभितम्. ७ क. ग. च—ञ. सुवर्णैस्त्रिदिवोपमम्. ८ इदमर्धं ज. दृश्यते. ९ ङ. ट. झ. सप्रविश्य. १० ङ. छ. झ. प्रियंराजा. ११ ङ. च. झ. ञ. रत्यर्थीमनुजाधिपः. १२ च, ज. यथापूर्वमविज्ञाय. १३ ङ. छ. झ. संत्रस्तातु.

तत्र तां पतितां भूमौ शयानामतथोचिताम् ॥ प्रतप्त इव दुःखेन सोपश्यज्जगतीपतिः ॥ २२ ॥
स वृद्धस्तरुणीं भार्यां प्राणेभ्योपि गरीयसीम् ॥ अपापः पापसंकल्पां ददर्श धरणीतले ॥ २३ ॥
लतामिव विनिष्कृत्तां पतितां देवतामिव ॥ किन्नरीमिव निर्धूतां च्युतामप्सरसं यथा ॥ २४ ॥
मायामिव परिभ्रष्टां हरिणीमिव संयताम् ॥ करेणुमिव दिग्धेन विद्धां मृगयुना वने ॥ २५ ॥
महागज इवारण्ये स्नेहात्परिममर्श ताम् ॥ २६ ॥
परिमृश्य च पाणिभ्यामभिसंत्रस्तचेतनः ॥ कामी कमलपत्राक्षीमुवाच वनितामिदम् ॥ २७ ॥
न तेऽहमभिजानामि क्रोधमात्मनि संश्रितम् ॥ देवि केनाभिशप्ताऽसि केन वाऽसि विमानिता ॥२८॥
यदिदं मम दुःखाय शेषे कल्याणि पांसुषु ॥ २९ ॥
भूमौ शेषे किमर्थं त्वं मयि कल्याणचेतसि ॥ भूतोपहतचित्तेव मम चित्तप्रमाथिनी ॥ ३० ॥
सन्ति मे कुशला वैद्यास्त्वभितुष्टाश्च सर्वशः ॥ सुखितां त्वां करिष्यन्ति व्याधिमाचक्ष्व भामिनि ॥३१॥
कस्य वा ते प्रियं कार्यं केन वा विप्रियं कृतम् ॥ कः प्रियं लभतामद्य को वा सुमहदप्रियम् ॥३२॥
मा रोदीर्मा च कार्षीस्त्वं देवि संपरिशोषणम् ॥ अवध्यो वध्यतां को वा को वा वध्यो विमुच्यताम् ३३
दरिद्रः को भवत्वाढ्यो द्रव्यवान्वाऽप्यकिंचनः ॥ अहं चैव मदीयाश्च सर्वे तव वशानुगाः ॥ ३४ ॥
न ते किंचिदभिप्रायं व्याहन्तुमहमुत्सहे ॥ आत्मनो जीवितेनापि ब्रूहि यन्मनसेच्छसि ॥ ३५ ॥

न्द्रिइन्द्रियाणियस्यसतथोक्तः ॥ २१ ॥ अतथोचितां भूमिशयनानर्हां ॥ २२ ॥ रामाभिषेकसंरंभेसपत्नीमातुःक्रोधस्तन्निमित्तइतिकुतोराजानज्ञातवानित्यत्राह—सइति । अकुटिलत्वान्व्यामोहाच्चनज्ञातवानितिभावः ॥ २३ ॥ तद्दर्शनस्यदुस्सहत्वमाह—लतामिवेति । पतितां भूगतां । निर्धूतां । धूञ्कंपने । व्याकुलितामितियावत् । च्युतां दिवइतिशेषः ॥ २४ ॥ वामीमिवपरिभ्रष्टामित्यपिपाठः । वामीं वडवां "वाम्यश्वावडवा" इत्यमरः । संयतां वागुरयाबद्धां । दिग्धेन विषलिप्तबाणेन । "विषाक्तेदिग्धलिप्तकौ" इत्यमरः । मृगयुना व्याधेन । सम्यग्भूगतत्वाश्चर्यावहत्वदयनीयत्वदर्शनीयत्वविलुलितवर्णत्वनिश्चेष्टत्वसंतापावहत्वानि क्रमाल्लताद्यौपम्येनलभ्यन्ते ॥ २५ ॥ अभिसंत्रस्तचेतनः अभितःसम्यक् त्रस्ताचेतना बुद्धिर्यस्य । किमर्थंच्छुः उतरोगग्रस्ता उतक्रुद्धेतित्रासः । कमलपत्राक्षीमितिकामित्वद्योतनं ॥ २६—२७ ॥ आत्मनि त्वयि । मयिवा । अभिशप्ता परुषिता ॥ २८ ॥ पांसुषुशेषइतियत्इदंममदुःखायेतिसंबन्धः ॥ २९ ॥ भूतोपहतचित्तेव पिशाचग्रस्तचित्तेव ॥ ३० ॥ रोगपक्षंपरिहरति—सन्तीत्यादि । अभितुष्टाः दानमानादिभिः ॥ ३१ ॥ क्रोधपक्षेपरिहारमाह—कस्यवेति । कस्येति तृतीयार्थेषष्ठी । केनवातेप्रियंकृतमित्यर्थः । प्रियाप्रियकारिणोःफलमाह—कःप्रियमिति ॥ ३२ ॥ मारोदीः रोदनंमाकार्षीः । संपरिशोषणं कायक्लेशं ॥ ३३ ॥ अर्थेच्छापक्षंपरिहरति—अहमिति ॥ ३४ ॥ ममजीवनेनापिहेतुना त्वत्प्रियं व्याहन्तुंनोत्सहे त्वत्प्रियार्थं

विषयकालीच्छया संयुक्तः । अतएवरत्यर्थी राज्ञीप्रीतिप्रयोजनः ॥ १७ ॥ शि० पापसंकल्पां पापानां राक्षसविनाशाय संकल्पोयस्यास्तां ॥ २३ ॥ स० महागजइति करेणुमित्यनुषज्यते ॥ २६ ॥ ति० मारोत्सीः । आत्मनोऽभिप्रायंहन्तुंनेतुमाकाङ्क्षीरित्यर्थः ॥ ३३ ॥

[पा०] १ ख. मालामिवपरिभ्रष्टां. २ ग. ङ. छ. झ. तामदुःखितां. ३ ङ. झ. परिमृज्यच. ४ क. ग. ङ—झ. केनाभियुक्तासि. ५ ञ. केनवाऽसिवमानिता. ६ छ. यदीदं. क. यदीह. ७ ग. ज. मयिकल्याणिजीवति. ८ छ. झ. कस्यवाऽपिप्रियंकार्यं. ख. कस्यवाविप्रियंकार्यं. ९ क. ङ. च. छ. झ. मारोत्सीर्माचकर्षीस्त्वं. १० ख. देविमेपरिशोषणं. ११ ख. ग. ङ. च. छ. झ. ञ. ट. वध्यःकोवाविमुच्यतां. क. वध्यःकोत्रविमुच्यताम्. १२ क. ग. ङ. च. छ. झ. ञ. ट. कोभवेदाढ्यः. १३ क. ञ. न्कोप्यकिंचनः. १४ ङ. छ. झ. ट. यन्मनसिस्थितम्. च. ञ. यन्मनसीच्छसि.

बलमात्मनि जानन्ती न मां शङ्कितुमर्हसि ॥ करिष्यामि तव प्रीतिं सुकृतेनापि ते शपे ॥ ३६ ॥
यावदावर्तते चक्रं तावती मे वसुंधरा ॥ ३७ ॥
प्राचीनाः सिंधुसौवीराः सौराष्ट्रा दक्षिणापथाः ॥ वङ्गाङ्गमगधा मत्स्याः समृद्धाः काशिकोसलाः ॥३८॥
तत्र जातं बहुद्रव्यं धनधान्यमजाविकम् ॥ ततो वृणीष्व कैकेयि यद्यत्त्वं मनसेच्छसि ॥ ३९ ॥
किमायासेन ते भीरु उत्तिष्ठोत्तिष्ठ शोभने ॥ तत्त्वं मे ब्रूहि कैकेयि यतस्ते भयमागतम् ॥
तत्ते व्यपनयिष्यामि नीहारमिव रश्मिवान् ॥ ४० ॥
तथोक्ता सा समाश्वस्ता वक्तुकामा तदप्रियम् ॥ परिपीडयितुं भूयो भर्तारमुपचक्रमे ॥ ४१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे दशमः सर्गः ॥ १० ॥

एकादशः सर्गः ॥ ११ ॥

कैकेय्या स्वाभीष्टकरणप्रतिज्ञाने तन्निवेदनंनिवेदितेनदशरथेनतांप्रति तत्करणप्रतिज्ञानम् ॥१॥ कैकेय्यादशरथप्रतिज्ञाने देवादीनांसाक्षीकरणपूर्वकंतंप्रति देवासुरयुद्धेस्वस्मैवरदानप्रतिज्ञानुस्मारणेनरामप्रवासनभरताभिषेचनयोर्वरत्वेनवरणम् ॥२॥

तं मन्मथशरैर्विद्धं कामवेगवशानुगम् ॥ उवाच पृथिवीपालं कैकेयी दारुणं वचः ॥ १ ॥
नास्मि विप्रकृता देव केनचिन्नावमानिता ॥ अभिप्रायस्तु मे कश्चित्तमिच्छामि त्वया कृतम् ॥ २ ॥
प्रतिज्ञां प्रतिजानीष्व यदि त्वं कर्तुमिच्छसि ॥ अथ तद्व्याहरिष्यामि यदभिप्रार्थितं मया ॥ ३ ॥
तामुवाच महातेजाः कैकेयीमीषदुत्स्मितः ॥ कामी हस्तेन संगृह्य मूर्धजेषु शुचिस्मिताम् ॥ ४ ॥

जीवितमपिपरित्यजामीत्यर्थः ॥३५॥ आत्मनिबलं त्वयि विद्यमानंवाह्यभ्यंबलं ॥ ३६ ॥ चक्रं सूर्यस्यरथचक्रं आज्ञावा ॥ ३७ ॥ प्राचीनाइत्यादि प्राचीनादिदेशाः । येसन्तीतिशेषः ॥ ३८ ॥ तत्र तेषुदेशेषु । धनधान्यं यदस्तीतिशेषः । ततः तत्र ॥३९॥ आयासेन भूशयनायासेन । तत् भयनिमित्तं । रश्मिवान् सूर्यः ॥४०॥ परिपीडयितुं प्रतिज्ञाकरणेननिर्वन्धयितुं ॥ ४१ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणेपीतांबराख्याने अयोध्याकाण्डव्याख्याने दशमःसर्गः१०

अथ "व्यवस्थाप्यमहाराजंत्वमिमंवृणुयावरं" इति मन्थरयोपदिष्टमनुतिष्ठतीत्याह—तमित्यादिना ॥ १ ॥ विप्रकृता रोगग्रस्ता । नार्थकामास्मीत्यपिद्रष्टव्यं । निग्रहानुग्रहपक्षंमनसिकृत्वाह—अभिप्रायस्त्विति । अभिप्रायः अभिप्रेतोर्थः । अस्तीतिशेषः । त्वयाकृतं त्वयाप्रतिश्रुतं । तमिच्छामीतिसंवन्धः ॥ २ ॥ प्रतिज्ञांप्रतिजानीष्व शपथंकुर्वित्यर्थः ॥ ३ ॥ ईषदुत्स्मितः भवदाज्ञाकारिणिमयिकिंशपथेनेतिकिंचिदुद्गतस्मितः । यद्वा अभिप्रेतकरणमीषत्करमित्युत्स्मितः । यद्वा शङ्कितरोगाद्यभावात् । हस्तेनमूर्धजेषुसंगृह्येति शिरोऽङ्के

शि० आत्मनि तवात्मभूतेमयि ॥ ३६ ॥ **ती०** चक्रं भूचक्रं ॥ ३७ ॥ **शि०** भूयोत्यन्तं । तथोक्ता अतएवसमाश्वस्ता अतएववक्तुकामा साकैकेयी तदप्रियं देवद्विषंराक्षसमित्यर्थः । परिपीडयितुं हिंसयितुं । भर्तारं वक्तुमितिशेषः । उपचक्रमे ॥ ४१ ॥ इतिदशमस्सर्गः ॥ १० ॥

शि० मन्मथशरैः मदं संसारदैन्यं मथन्ति निवर्तयन्तीति मन्मथाः वसिष्ठादयः तेषांशरैः शत्रुनिवर्तकशरसदृशाविद्यानिवर्तकवचनैः । विद्धं व्याप्तं । अतएवकामवेगवशानुगं कामवेगोवशोयेषां तेअनुगाअनुचरायस्यतं । पृथिवीपालं दशरथम् । दारुणं दारुणवस्तुस्वीकारकं । वचउवाच । श्लेषनार्थकमदधातुप्रकृतिकभावक्विवन्तंमदिति । शरशब्दआचारक्विवन्तप्रकृतिककर्तृक्विवन्तः ॥ १ ॥

[पा०] १ छ. तावच्चैववसुंधरा. २ ङ. छ. झ. ट. द्राविडास्सिंधुसौवीराः. ३ क. मागधाः. ४ ञ. मात्स्याः. ५ च. छ. धनंधान्य. ६ क. च. ञ. तत्तद्वृणीष्व. ७ क. यतस्त्वांभय. ८ ग. ज. तत्तद्व्यपनयिष्यामि. ९ ज. भास्करः. १० ख. ङ. केनचिन्नविमानिता. ११ ङ. झ. ट. तेव्याहरिष्यामि. १२ ख. यदभिप्रार्थितंमम. ङ. छ. झ. ट. यथाभिप्रार्थितं. १३ ख. ग. ङ—ट. महाराजः. १४ छ. झ. ट. मीषदुत्स्मयः. १५ ङ. छ. झ. शुचिस्मिताम्.

अवलिप्ते न जानासि त्वत्तः [1]प्रियतमा मम ॥ मनुजो मनुज[2]व्याघ्राद्रामादन्यो न विद्यते ॥ ५ ॥
तेनाजय्येन मुख्येन राघवेण महात्मना ॥ शपे ते जीव[3]नार्हेण ब्रूहि [4]यन्मनसेच्छसि ॥ ६ ॥
यं मुहूर्तमपश्यंस्तु न जीवे[5]यमहं ध्रुवम् ॥ तेन रामेण [6]कैकेयि शपे ते वचनक्रियाम् ॥ ७ ॥
आत्मना वा[7]ऽऽत्मजैश्चान्यैर्वृणे यं मनुजर्षभम् ॥ तेन रामेण [8]कैकेयि शपे ते वचनक्रियाम् ॥ ८ ॥
भद्रे हृदयमप्येतदनुमृश्योद्ध[9]रस्व मे ॥ एतत्समीक्ष्य कैकेयि ब्रूहि यत्साधु मन्यसे ॥ ९ ॥
बलमात्मनि प[10]श्यन्ती न मां[11] शङ्कितुमर्हसि ॥ करिष्यामि तव प्रीतिं सुकृतेनापि ते शपे ॥ १० ॥
सा तदर्थमना देवी तमभिप्रायमागतम् ॥ निर्मा[12]ध्यस्थ्याच्च हर्षाच्च बभाषे [13]दुस्सहं वचः ॥ ११ ॥
तेन वाक्येन संहृष्टा [14]तमभिप्रायमागतम् ॥ व्याजहार महाघोरमभ्यागतमिवान्तकम् ॥ १२ ॥
यथा क्रमेण श[15]पसि वरं मम ददासि च ॥ तच्छृण्वन्तु त्रयस्त्रिंशद्देवाः सा[16]ग्निपुरोगमाः ॥ १३ ॥

कृत्वेतिभावः । स्वाभिमुखीकरणायवेणीमवलंब्येतिवार्थः ॥ ४ ॥ अवलिप्ते सौभाग्यगर्विते । मम त्वत्तः प्रियतमा स्त्रीणांमध्येत्वत्तःप्रियतमानास्ति । रामादन्यो मनुजःप्रियतमोनविद्यतेइतिजानासीतिसंबन्धः ॥५॥ जीवनार्हेण जीवनादपिपूज्येन ॥ ६ ॥ अस्यैवविवरणं —यमिति । तेवचनक्रियां तववचनकरणंप्रतीतिशेषः ॥ ७ ॥ आत्मना स्वदेहेन । आत्मजैः भरतादिभिः । अन्यैश्च प्रियबन्धुभिश्च । मूल्यभूतैरेतैर्यरामंवृणे सर्वान्परित्यज्यापिराममेवपरिगृह्णामीतिभावः ॥ ८ ॥ हेभद्रे मेहृदयं एतत् एतादृशं । अनुमृश्य शपथवचनानुसारित्वेननिर्धार्य । उद्धरस्व उज्जीवय । एतत् वाङ्मनसयोरैकरूप्यं । समीक्ष्य सम्यगालोच्य । यत्साधु इष्टं । मन्यसे । तद्ब्रूहि । त्वदभीष्टकरणमेवमज्जीवनं अन्यथा नजीवामीत्यर्थः ॥ ९ ॥ आत्मनिबलं त्वयिविद्यमानं दृष्टिचित्तापहारिसौभाग्यबलं॥१०॥ तदर्थमनाः मन्थरोपदिष्टरामविवासनपूर्वकभरताभिषेकरूपार्थमनाः । अभिप्रायमागतं स्वाभिमतशपथंप्राप्तं । निर्माध्यस्थ्यात् निर्गतमध्यस्थभावात् । पक्षपातादित्यर्थः ॥ ११ ॥ उक्तमर्थंसविशेषमाह—तेनेति । तेनवाक्येन शपथपूर्वकंत्वदभिमतंकरिष्यामीत्युक्तदशरथवचनेन ॥ १२ ॥ दशरथवाक्यंदृढीकर्तुंनरस्यधर्माधर्मसाक्षिभूतादेवताः श्रावयति—यथाक्रमेणेति । क्रमेण प्रियपुत्रसुकृतक्रमेण ।

ति० प्रियतरोमम स्त्रीणांमध्येत्वत्तः पुंसांमध्येरामादन्यइतियोज्यम् । यद्वारामादन्यस्त्वत्तोधिकः प्रियतरोनेत्यर्थः । रामेऽस्याद्वेषमजानतएवमुक्तिः । रामएवत्वत्तोऽधिकःप्रियइत्याशयः । **शि०** त्वत्तःप्रियतमाऽन्यास्त्रीन रामादन्योमनुजः पुरुषः प्रियतमोन । इतिप्रियतमाशब्दोलिङ्गविपरिणामेनोत्तरत्रापिसंबध्यते । अन्यशब्दश्चतद्विपरिणामेनपूर्वत्रसंबध्यते ॥ ५ ॥ **ति०** तेनेति । त्वत्तोपिप्रियतरेणेत्यर्थः । अतएवमुख्येन ॥ ६ ॥ **ती०** बभाषे भाषितुमालोचनंकृतवती । **शि०** तदर्थमनाः तेषांदेवानामर्थे मनोयस्यास्सा । तं रामस्त्वयासेव्यइत्याकारकं । अभिप्रायं आगतं निवेदितवन्तंराजानं । निर्माध्यस्थ्यात् नितरांमाध्यस्थ्यस्यमध्यस्थधर्मस्य अत्प्राप्तिर्यस्मिन् तत् । दुर्वचं अन्यैर्वक्तुमशक्यं । वचोबभाषे । आगतमित्यत्रान्तर्भावितणिजर्थः । कर्तरि निष्ठा ॥ ११ ॥ **ती०** व्याजहार व्याहर्तुंनिश्चितवती । **शि०** तद्वचनप्रभाववर्णयन्नाह—**तेनेति** । आत्मनः स्त्रीस्वभावस्य । व्या आच्छादकेन अतिचातुर्यविशिष्टेनेत्यर्थः । तेनवाक्येन अभ्यागतं स्वप्रतापेनसर्वत्रपूर्णं । अभिप्रायं गूढाभिप्रायविशिष्टं । अन्तकं देवानांबन्धकं । तं रावणं । जहार जघानेव । कैकेयीवचनश्रवणमात्रेणरक्षसांसंतापोजातइतितात्पर्यं । अतएव बभाषेइत्यनेननपौनरुक्त्यं । संवरणार्थकवेञ्धातुप्रकृतिककर्तृक्विबन्तप्रकृतिकतृतीयान्तं—व्येति ॥ १२ ॥

[पा०] १ ख. ङ. छ. झ. ञ. प्रियतरोमम. च. प्रियतमोमम. २ छ. द्रामादन्यन्नविद्यते. ३ ख. जीवितार्हेण. ४ ङ. छ. झ. यन्मनसेप्सितम्. ५ झ. जीवेतमहं. ६ ट. वैदेवि. ७ क. च. छ. झ. ञ. ट. चात्मजैश्चान्यैः. ८ ञ. ट. वैदेवि. ९ ट. द्धरस्वमाम्. १० क. ग. ज. जानन्ती. ११ ङ. च. छ. झ. ञ. नविशङ्कितुमर्हसि. ट. नमांशङ्कितुमर्हसि. १२ क. निर्मध्यस्थात्प्रहर्षाच्च. च. ज. ञ. निर्माध्यस्थ्यात्प्रहर्षाच्च. ग. निर्मध्यस्थाच्चहर्षाच्च. १३ क. ख. ग. ङ.—ट. दुर्वचं वचः. १४ क. ख. ग. ङ—ञ. तमभिप्रायमात्मनः. १५ ङ. छ. झ. ट. शपसे. १६ क. ख. ङ. च. छ. झ. ञ. द. स्सेन्द्रपुरोगमाः,

चन्द्रादित्यौ नभश्चैव ग्रहा रात्र्यहनी दिशः ॥ जगच्च [1]पृथिवी चैव [2]सगन्धर्वा सराक्षसा ॥ १४ ॥
निशाचराणि भूतानि गृहेषु गृहदेवताः ॥ यानि चान्यानि भूतानि जानीयु[3]र्भाषितं तव ॥ १५ ॥
सत्यसन्धो महातेजा धर्मज्ञः [4]सुसमाहितः ॥ वरं मम ददात्येष [5]तन्मे शृण्वन्तु दे[6]वताः ॥ १६ ॥
इति देवी महेष्वासं परिगृह्याभिशस्य च ॥ ततः परमुवाचेदं वरदं काममोहितम् ॥ १७ ॥
स्मर राजन्पुरावृत्तं तस्मिन्दै[7]वासुरे रणे ॥ [8]तत्र चाच्यावयच्छत्रुस्तव जीवितमन्तरा ॥ १८ ॥
तत्र चापि मया देव यत्त्वं समभिरक्षितः ॥ जाग्रत्या यतमानायास्ततो मे [9]प्राददा वरौ ॥ १९ ॥
[10]तौ तु दत्तौ वरौ देव [11]निक्षेपौ मृगयाम्यहम् ॥ [12]तत्रैव पृथिवीपाल सकाशे [13]सत्यसङ्गर ॥ २० ॥
तत्प्रतिश्रुत्य धर्मेण न चेद्दास्यसि मे वरम् ॥ [14]अद्यैव हि प्रहास्यामि जीवितं त्वद्विमानिता ॥ २१ ॥
वाङ्मात्रेण तदा राजा कैके[15]य्या स्ववशे कृतः ॥ [16]प्रचस्कन्द विनाशाय पाशं मृग इवात्मनः ॥ २२ ॥
ततः परमुवाचेदं वरदं काममोहितम् ॥ [17]वरौ यौ मे त्वया देव तदा दत्तौ महीपते ॥ २३ ॥
तौ तावदहमद्यैव वक्ष्यामि शृणु मे वचः ॥ २४ ॥
[18]अभिषेकसमारंभो राघवस्योपकल्पितः ॥ अनेनैवाभिषेकेण भरतो मेऽभिषे[19]च्यताम् ॥ २५ ॥
यो द्वितीयो वरो देव दत्तः प्रीतेन मे त्वया ॥ तदा दै[20]वासुरे युद्धे तस्य कालोऽयमागतः ॥ २६ ॥
नव पञ्च च वर्षाणि दण्डकारण्यमाश्रितः ॥ ची[21]राजिनजटाधारी रामो भवतु तापसः ॥ २७ ॥

यथाशपसि वरंददासिच तथातच्छृण्वन्त्वितिसंवन्धः ॥ १३ ॥ ग्रहाः नवग्रहाः । जगत् लोकः । " लोको विष्टपंभुवनंजगत् " इत्यमरः । लोकश्चात्रस्वर्गएव ॥ १४—१६ ॥ परिगृह्य धर्मपाशेनसंयम्य । अभिशस्य सर्वादेवताःसाक्षित्वेनशृण्वन्त्वित्युद्घुष्य ॥ १७ ॥ पूर्ववृत्तमेवाह—तत्रेति । तत्र रात्रियुद्धे । अन्तरा मध्ये । तवजीवितं अच्यावयत् अचालयत् । शस्त्रप्रहारादिनामूर्च्छांप्रापितवानित्यर्थः ॥ १८ ॥ यतमानायाः सारथ्येयत्नंकुर्वाणायाः ॥ १९ ॥ हेपृथिवीपाल तवसकाशेएव निक्षेपौ निक्षेपत्वेनस्थापितौ । तौतुवरौ तावेववरौ । मृगयामि अन्वेषयामि । इच्छामीत्यर्थः ॥ २० ॥ वरमितिजात्येकवचनं ॥ २१ ॥ वाङ्मात्रेण पूर्वदत्तवरस्मारकवचनमात्रेण । कैकेय्या स्ववशे कृतः राजा वाङ्मात्रेण मृगशब्दानुकारिणालुब्धककथितेन । आत्मनोविनाशाय पाशंमृगइव वागुरांमृगइवधर्मपाशं प्रचस्कन्द गतवान् । स्कन्दिर्गतिशोषणयोरितिधातुः । वरप्रदानमङ्गीचकारेत्यर्थः । यद्वा वागुरांप्राप्तोमृगइवप्रचस्कन्द । शोषणंप्राप्तइत्यर्थः ॥ २२—२३ ॥ तौवरौवक्ष्यामि तौवरौविभज्यप्रदातुंप्रकारंवक्ष्यामीत्यर्थः ॥ २४ ॥ अभिषेकसमारंभः अभिषेकसामग्री । यइतिशेषः । अभिषेकेण अभिषेकसामग्र्या ॥ २५—२६ ॥ चीरं वल्कलं ॥ २७ ॥

शि० सर्वेदेवताः देवतानामिमेनियन्तारोदैवताः ब्रह्मादयः । शृण्वन्तु । अतएवनपौनरुक्त्यम् ॥ १६ ॥ ति० अच्यावयत्प्रच्युतवीर्यमकरोत् । अडभावआर्षः ॥ १७ ॥ जाग्रत्या मयायत्यतस्त्वंरक्षितः ततःस्वजीवनाययातमानायाःमभवान्वरौ प्रददौ ॥ १९ ॥ इत्येकादशस्सर्गः ॥ ११ ॥

[पा०] १ ख. ग. ङ—ट. पृथिवीचेयं. २ क. ख. छ.—ट. सगन्धर्वास्सराक्षसाः. ३ च. भाषितंमत. ४ ङ. छ झ. ट. सत्यवाक्छुचिः. ५ क. तंचशृण्वन्तु. ६ ङ. झ. ञ. ट. दैवताः. ७ क. ख. ग. ङ. छ—ट. देवासुरेरणे ८ ङ. झ. ञ. ट. तत्रत्वांच्यावयच्छत्रु. ९ क. ग—ङ. छ—ट. प्रददौवरौ. १० ङ. च. छ. झ. ञ. ट. तौदत्तौच वरौदेव. ख. ज. तौतुदत्तवरौ. ११ क. ख. ग. निक्षेपं. ज. निक्षिप्तौ. १२ ज. तदेव. १३ ङ.—छ. झ. ट. रघुनन्दन १४ क. अद्यैवतु. १५ ख. कैकेय्याश्च. छ. झ. कैकेय्यास्स्ववशेकृतः. ट. स्ववशीकृतः. १६ ग. ज. प्रविवेशविनाशाय. १७ ङ. छ. झ. ट. वरौदेयौत्वयादेव. क. ख. च. ज. ञ. वरौमेयौ. १८ क. ग. ज. योऽभिषेकसमारंभो. १९ क. ख. ग. ङ. छ—ट. मेऽभिषिच्यताम्. २० क. ख. ङ. झ. ञ. ट. देवासुरे. २१ ङ. च. छ. झ. ञ. ट. चीराजिनधरोधीरो.

भरतो भजतामद्य यौवराज्यमकण्टकम् ॥ एष मे परमः कामो द[1]त्तमेव वरं वृणे ॥ २८ ॥
अद्य चैव हि पश्येयं प्रयान्तं राघवं[2] वनम् ॥ २९ ॥

स राजराजो भव सत्यसङ्गरः कुलं च शीलं च हि रक्ष जन्म च ॥
परत्रवासे हि वदन्त्यनुत्तमं तपोधनाः सत्यवचो हितं नृणाम् ॥ ३० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे एकादशः सर्गः ॥ ११ ॥

द्वादशः सर्गः ॥ १२ ॥

दशरथेनकैकयींप्रतिरामगुणप्रशंसनेन तस्यवनप्रवासनकारणदोषाभावप्रतिपादनपूर्वकंसानुनयंवरयाञ्चापरित्यागप्रार्थना ॥ १ ॥ कैकेय्याशैब्यादिदृष्टान्तप्रदर्शनपूर्वकंहठाद्वरद्वयनिर्वर्तननिर्बन्धेदशरथेनपरुषोक्तिभिस्तद्गर्हणपूर्वकंपुनःप्रसादनायपादप्रणिपातप्रयतनम् ॥ २ ॥

ततः श्रुत्वा महाराजः कैकेय्या दारुणं वचः ॥ चिन्ताम[3]भिसमापेदे मुहूर्तं प्रतताप च ॥ १ ॥
किंनु [4]मे यदि वा स्वप्नश्चित्तमोहोऽपि वा मम ॥ अनुभूतोपसर्गो वा म[5]नसो वाऽप्युपद्रवः ॥
इति संचिन्त्य तद्राजा ना[6]भ्यगच्छत्तदा सुखम् ॥ २ ॥
प्रतिलभ्य चि[7]रात्संज्ञां कैकेयीवा[8]क्यताडितः ॥ व्यथितो विक्लवश्चैव व्याघ्रीं दृष्ट्वा यथा मृगः ॥ ३ ॥
असंवृतायामासीनो जगत्यां दीर्घमुच्छ्वसन् ॥ मण्डले पन्नगो रुद्धो मन्त्रैरिव महाविषः ॥ ४ ॥
अहो धिगिति सामर्षो वाचमुक्त्वा नराधिपः ॥ मोहमापेदिवान्भूयः शोकोपहतचेतनः ॥ ५ ॥
चिरेण तु नृपः संज्ञां प्रतिलभ्य सुदुःखितः ॥ कैकेयीमब्रवीत्क्रुद्धः प्र[9]दहन्निव चक्षुषा ॥ ६ ॥
नृशंसे दुष्टचारित्रे कुलस्यास्य विनाशिनि ॥ किं कृतं तव रामेण पापे पापं मयाऽपि वा ॥ ७ ॥

विलंबव्यावृत्त्यर्थमाह—भरतइत्यादिना । दत्तमेव न तुनूतनंकिंचिदर्थये ॥ २८—२९ ॥ सत्यस्यावश्यकर्तव्यत्वमाह—सइति । राजराजः सत्वं सत्यसङ्गरः सत्यप्रतिज्ञः। भव । तेन सत्यसङ्गरत्वेनकुलादित्रयंरक्ष। सत्यस्यरक्षकत्वमुपपादयति—परत्रेति । नृणांहितंसत्यवचः। परत्रवासे स्वर्गलोकादिवासे । अनुत्तमं अत्यन्तोत्तमसाधनं । वदन्ति ॥ ३० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीतांबराख्याने अयोध्याकाण्डव्याख्याने एकादशस्सर्गः ॥ ११ ॥

अथसत्यपाशबद्धस्यराज्ञःशोकंवर्णयति—ततइति । प्रततापमुहूर्तमितियावत् ॥ १ ॥ चिन्तांविवृणोति—किंन्विति । किंन्वितिसामान्याकारेणचिन्ता । स्वदुःखावहस्यरामाभिषेकविघ्नस्यसत्स्वभावयाकैकेय्याकथनासंभवादिदंपारमार्थिकंनभवति स्वप्नोयदिवा । अथवेदानींनिद्राया असंभवाच्चित्तमोहः भ्रमोवा । इदानीं भ्रमकारणाभावादनुभूतोपसर्गोवा । जन्मान्तरानुभूतानामर्थानांउपसर्गःभावनावा । स्मरणमितियावत् । जन्मान्तरेप्येवंविधावस्थायाअसंभावितत्वादाह । मनसउपद्रवोवा । रोगजविकारोवा । उन्मादइतियावत् । प्रततापचेत्येतदनुवदति—इतीति ॥ २ ॥ प्रतिलभ्येत्यादिश्लोकत्रयमेकान्वयं । व्यथितः दुःखितः । विक्लवः विह्वलः " विक्लवोविह्वलः " इत्यमरः ॥ ३ ॥ मण्डले अहितुण्डिकयन्त्रमण्डले ॥ ४—६ ॥ किंपापं

शि० दारुणं रामवियोगप्रारब्धमङ्गलकार्याभावोभयबोधकत्वेनश्रवणानर्हं । कैकेय्यावचश्श्रुत्वा चिन्तां अभिसमापेदे प्राप । अतएवप्रतताप । संतापकवचनश्रावकत्वेनकैकेय्याःपातित्यमप्यतितुनभ्रमितव्यम् । रावणादिवधद्वाराएतद्यशःप्रख्यापनहेतुभूतत्वेनाप्रसिंबाधाधकत्वेनादोषात् ॥ १ ॥

[पा०] १ क. ग. च. ट. दत्तमेवंवरं. २ ङ. छ. झ. ञ. ट. राघवंवने. ३ क. ख. मपिसमापेदे. ४ ङ. छ. झ. ञ. ट. मेऽयंदिवास्वप्नः. ५ क. च. ञ. मानसोवा. ६ क. ख. ग. ङ—ट. नाध्यगच्छत्तदा. ७ क. ख. ङ. च. छ. झ. ञ. ठ. ततस्संज्ञां. ८ ङ. छ. झ. ट. वाक्यतापितः. ख. वाक्यपीडितः. ९ ङ. छ. झ. ट. निर्दहन्निवतेजसा.

[1]यदा ते जननीतुल्यां वृत्तिं वहति राघवः ॥ त[2]स्यैव त्वमनर्थाय किंनिमित्तमिहोद्यता ॥ ८ ॥
त्वं मयात्मवि[3]नाशार्थं भवनं [4]स्वं प्रवेशिता ॥ अविज्ञानान्नृपसुता व्याली तीक्ष्णवि[5]षा यथा ॥ ९ ॥
जीव[6]लोको यथा सर्वो रामस्याह गुणस्तवम् ॥ अपराधं कमुद्दिश्य त्यक्ष्यामीष्टमहं सुतम् ॥ १० ॥
कौ[7]सल्यां वा सुमित्रां वा त्यजेयमपि वा श्रियम् ॥ जीवितं [8]वाऽऽत्मनो रामं न त्वेव पितृवत्सलम् ॥ ११ ॥
परा भवति मे प्रीतिर्दृष्ट्वा तनयमग्रजम् ॥ अपश्यतस्तु मे रामं [9]नष्टा भवति चेतना ॥ १२ ॥
तिष्ठेल्लोको विना सूर्यं सस्यं वा सलिलं विना ॥ न तु रामं विना देहे तिष्ठेत्तु मम जीवितम् ॥ १३ ॥
तदलं त्यज्यतामेष निश्चयः पापनिश्चये ॥ अपि ते चरणौ मूर्ध्ना स्पृशाम्येष प्रसीद मे ॥ १४ ॥
[10]किमिदं चिन्तितं पापे त्वया परमदारुणम् ॥ १५ ॥
अथ जिज्ञाससे मां त्वं भरतस्य प्रियाप्रिये ॥ अस्तु यत्तत्त्वया पूर्वं व्याहृतं राघवं प्रति ॥ १६ ॥
स मे ज्येष्ठः[11] सुतः श्रीमान्धर्मज्येष्ठ इतीव मे ॥ तत्त्वया प्रियवादिन्या सेवार्थं कथितं भवेत् ॥ १७ ॥
तच्छ्रुत्वा शोकसंतप्ता संतापयसि मां भृशम् ॥ आविष्टाऽसि [12]गृहं शून्यं सा त्वं परवशं गता ॥ १८ ॥
इक्ष्वाकूणां कुले देवि संप्राप्तस्सुमहानयम् ॥ अनयो नयसंपन्ने यत्र ते विकृता मतिः ॥ १९ ॥
न हि किंचिदयुक्तं वा विप्रियं वा पुरा मम ॥ अकरोस्त्वं विशालाक्षि तेन न श्रद्[13]धाम्यहम् ॥ २० ॥

कृतमित्यन्वयः । पापं अपराधः ॥ ७ ॥ वृत्तिं शुश्रूषां । तस्यैव तदैवेत्यपिबोध्यं । तस्यैव नतुतत्पुत्रादेः । तदैव नतुकालान्तरे शुश्रूषाभावदशायां ॥ ८ ॥ नृपसुतेत्यत्रेतिकरणंद्रष्टव्यं ॥ ९—१३ ॥ एषनिश्चयः रामविवासननिश्चयः। अपितेचरणाविति । अपिःप्रश्नार्थकः ॥ १४—१५ ॥ अथेत्यादिश्लोकत्रयमेकान्वयं । अथेतिप्रश्ने । त्वंभरतस्यप्रियाप्रियेविषयेमांजिज्ञाससे ज्ञातुमिच्छसि । तदिदानीमपिभरतोभिषिच्यतामिति यत्तदस्तु तद्वक्तुमुचितं । त्वयापूर्वंराघवंप्रति समेज्येष्ठः सुतइत्यादियद्व्याहृतं तत् प्रियवादिन्यात्वया सेवार्थं ममनोरञ्जनार्थं रामकृतशुश्रूषार्थंवा कथितंभवेत् । रामविवासनोक्तिस्तेनविरुद्धेत्यर्थः । परीक्षार्थमपिभरतोऽभिषिच्यतामित्येववक्तुमुचितं । नतुरामोविवास्यतामित्येतत् । पूर्वापरविरोधादितिभावः । रामविवासनोक्तिश्चभरतेप्रीतिपरीक्षार्थमेवास्त्वित्यतआह—तदिति । तत् रामाभिषेचनं । श्रुत्वा शोकसंतप्तासती मां भृशं अतिनिर्बन्धेन । संतापयसि । किंचपरवशं परबोधनवशंगतासती । शून्यंगृहं क्रोधागारं । आविष्टासि प्रविष्टासि । इदंसर्वंपरीक्षार्थत्वे न संगच्छतइतिभावः । शून्यैर्ग्रहैरितिपाठे शून्यैर्ग्रहैराविष्टा पिशाचादिभिराविष्टेत्यर्थः ॥ १६—१८ ॥ कुलानर्थकरंचेदंवचनमित्याह—इक्ष्वाकूणामिति । नयसंपन्ने एतावत्कालंनीतिशालिनि । यत्र इक्ष्वाकुकुलमध्ये । तेमतिरेवमिदानींविकृता विपरीताजाता । तत्रकुले । अयं संनिहितः । सुमहाननयः अनर्थः । संप्राप्तः । सत्प्रकृतेर्विपरीतबुद्धिःकुलस्यानर्थहेतुरितिभावः ॥ १९ ॥ पूर्वापरपर्यालोचनयात्वद्वचनंनश्रद्धेयंचेत्याह—नहीति । अयुक्तं अहितमितियावत् । नश्रद्दधासि इदमहितंवि-

---

ति० चेतनं चैतन्यं । स० चेतनं स्मृतिः ॥ १२ ॥ ति० तेचरणाविति । धर्मशास्त्रतोत्यनुचितमपिकामशास्त्रमर्यादयात्वत्प्रीत्यर्थमितिशेषः ॥ १४ ॥ ति० एवंविधचिन्तापिमहाकुलजायांत्वयिअसंभावितेव । किंतर्हीदंतत्राह । शून्येगृहे भूतादिभिराविष्टासि । तत्तुल्येनवाक्येन स्विदावेशितदुष्टमतिरसि । अतःपरवशंगताएवंवदसीत्यर्थः । ती० शून्यं अगोचरं । ग्रहं भूतपिशाचादिकं । आविष्टा प्राप्तासि । शून्येइतिपाठे शून्ये विवेकशून्ये ॥ १९ ॥

[पा०] १ क. ख. ग. च. ज. झ. ञ. सदाते. २ ङ. छ—ट. तस्यैवं. ३ ङ. छ. ज. झ. ट. विनाशाय. ४ ङ. च. छ. झ. ट. स्वंनिवेशिता. क. ख. संप्रवेशिता. ञ. संनिदेशिता. ५ ख. विषाइव. ६ ङ. छ. झ. ञ. ट. जीवलोकोयदासर्वो. क. जीवलोकोसदासर्वो. ख. जीवलोकायदासर्वेरामस्याहुर्गुणस्तवम्. ७ झ. ञ. ट. कौसल्यांचसुमित्रांच. ८ ङ. छ. झ. ञ. जीवितंचात्मना. च. ट. जीवितंचात्मनो. ९ क. ख. ग. ङ. च. छ. झ. ञ. ट. नष्टंभवतिचेतनम्. १० ङ. छ. झ. किमर्थंचिन्तितं. ट. किमर्थंचिन्त्यते. ११ छ. झ. ञ. ट. ज्येष्ठसुतः. १२ ख. ग. ङ. छ. झ. ञ. ट. गृहेशून्ये. छ. ग्रहंशून्यं. १३ ङ. छ. झ. ट. श्रद्धामिते.

ननु[1] ते राघवस्तुल्यो भरतेन महात्मना ॥ बहुशो[2] हि सुबाले त्वं कथाः कथयसे मम ॥ २१ ॥
तस्य धर्मात्मनो देवि वने[3] वासं यशस्विनः ॥ कथं रोचयसे भीरु नव वर्षाणि पञ्च च ॥ २२ ॥
अत्यन्त[4]सुकुमारस्य तस्य धर्मे धृतात्मनः[5] ॥ कथं रोचयसे वासमरण्ये भृशदारुणे ॥ २३ ॥
रोचयस्यभिरामस्य रामस्य शुभलोचने[6] ॥ तव शुश्रूषमाणस्य किमर्थं विप्रवासनम् ॥ २४ ॥
रामो[7] हि भरताद्भूयस्तव शुश्रूषते सदा ॥ विशेषं त्वयि तस्मात्तु भरतस्य न[8] लक्षये ॥ २५ ॥
शुश्रूषां गौरवं चैव प्रमाणं वचनक्रियाम् ॥ कस्ते[9] भूयस्तरं कुर्यादन्यत्र मनुजर्षभात्[10] ॥ २६ ॥
बहूनां स्त्रीसहस्राणां बहूनां चोपजीविनाम् ॥ परिवादोपवादो वा राघवे नोपपद्यते ॥ २७ ॥
सान्त्वयन्सर्वभूतानि रामः शुद्धेन चेतसा ॥ गृह्णाति मनुजव्याघ्रः प्रियैर्विषय[11]वासिनः ॥ २८ ॥
सत्येन[12] लोकाञ्जयति दीनान्दानेन[13] राघवः ॥ गुरूञ्शुश्रूषया वीरो धनुषा युधि शात्रवान् ॥ २९ ॥
सत्यं दानं तपस्त्यागो मित्रता शौचमार्जवम् ॥ विद्या च गुरुशुश्रूषा ध्रुवाण्येतानि राघवे ॥ ३० ॥
तस्मिन्नार्जवसंपन्ने देवि देवोपमे कथम् ॥ पापमाशंससे रामे महर्षिसमतेजसि ॥ ३१ ॥

प्रियकरणमितिशेषः ॥२०॥ त्वत्प्रीतिविरुद्धंचेदंवचनमित्याह—नन्वित्यादि। ते राघवः भरतेन तुल्योननुतुल्यः खलु। अत्रत्वद्वचनमेवप्रमाणमित्याह—बहुशइति। बहुशइत्यनेनाहृद्यत्वव्यावृत्तिः। सुबालेइत्यकुटिलत्वव्यावृत्तिः ॥ २१ ॥ धर्मात्मनइत्यनेनवनवासहेतुभूताकृत्यराहित्यमुक्तं। भीरुइति। तवचधर्मभीरुत्वंकगर्हितमितिभावः ॥ २२ ॥ रामसौकुमार्यानुचितंचेदमित्याह—अत्यन्तेति ॥ २३ ॥ शुश्रूषादर्शनेनापिरामोनविवासनार्हइत्याह—रोचयसीति। तवशुश्रूषमाणस्येत्यत्र "नलोकाव्यय—" इत्यादिनानिषिद्धाऽपिषष्ठ्यार्षात्बोध्या ॥ २४ ॥ शुश्रूषमाणस्येत्येतदुपपादयति—रामोहीति ॥ २५ ॥ नकेवलं शुश्रूषैवैवंवचनकारणं अपितु प्रमाणादिकमपीत्याह—शुश्रूषामिति। गौरवं प्रतिपत्तिः। प्रमाणं पूजा। वचनक्रिया उक्तकरणं ॥ २६ ॥ परिवादादिकमपिरामविवासकारणं नास्तीत्याह—बहूनामिति। स्त्रीसहस्राणामुपजीविनां चसंबन्धीपरिवादोनोपपद्यते। बहूनामितिविशेषणेन तन्मध्येएकयाएकेनवास्त्रीपुरुषाविशेषेणपरिवादस्तत्संबन्धीपरिभवविषयवादः अपवादःनिन्दावा राघवेनोपपद्यते नदृश्यते ॥ २७ ॥ अविवासननिमित्तभूतान्भूयोगुणान्दर्शयति—सान्त्वयन्नित्यादि। अनेनवाङ्मनःकायैर्जनरञ्जकत्वमुक्तं। प्रियैः अभीष्टप्रदानैः। गृह्णाति संगृह्णाति ॥२८॥ सत्येन भूतहितेन। लोकान् स्वर्गादिवैकुंठपर्यन्तान्। जयति स्वाधीनान्करोति। दीनान् दरिद्रान्। दानेन धनप्रदानेन। जयति वशीकरोति। गुरून्शुश्रूषयाजयति स्वहितोपदेशप्रवणान्करोति। शात्रवान् शत्रून् धनुषा धनुःप्रदर्शनमात्रेण। नतु बाणप्रयोगेण। युधि युद्धे। नतुकपटवृत्त्या। जयति निरस्यतीत्यर्थः। वीरइतिसर्वत्रसंबध्यते। दयावीरस्त्यागवीरोविद्यावीरःपराक्रमवीरइत्येवं। चोलमहीपतिःकदाचित्सन्निहितंमध्यमवीथिभट्टारकंप्रति " आत्मानंमानुषंमन्ये " इतिवदन्रामः कथंजटायुषोमोक्षंदत्तवानितिपप्रच्छ। सोपि " सत्येनलोकाञ्जयति " इत्युक्त्या महतींबहुमतिमवाप्तवानित्यैतिह्यमत्रज्ञेयं ॥२९॥ सत्यादीनिचनकादाचित्कानीत्याह—सत्यमिति। तपःप्रभृतिगुणषट्कंपूर्वश्लोकेऽर्थसिद्धमनूद्यते। दानं परलोकप्रयोजनं। तपः शास्त्रविहितभोजनानिवृत्त्यादिरूपः। त्यागः ऐहिकप्रयोजनःप्रीत्यर्थः। मित्रता सर्वसुहृत्त्वं। शौचं स्नानजन्यशुद्धिः। आर्जवं परचित्तानुवर्तित्वं। विद्या तत्त्वज्ञानं। गुरुशुश्रूषा गुरोःशुश्रूषा पादसंवाहनादिपरिचर्या ॥ ३० ॥ आर्जवसंपन्नइति दानादिसंपत्तेरप्युपलक्षणं। पापं विवासनरूपं। आ-

---

ति० कृतात्मनः शिक्षितमनस्कस्य ॥ २३ ॥ शि० समूलिकाकीर्तिःपरिवादः। निर्मूलिकाकीर्तिरपवादः ॥ २७ ॥

[पा०] १ ग. ज. ननुमेराघव. २ क. ग. ङ. छ—ट. बहुशोहिस. क. ज. बहुशोहिस्वबाल्येत्वं. ३ क. वनवासं. ४ क. ज. अत्यन्तंसुकुमारस्य. ५ ङ. छ. झ. ट. कृतात्मनः. ख. रतात्मनः. ६ ख. शुभदर्शने. ज. प्रियदर्शने. ७ क. ख. रामोपि. ८ छ. नलक्ष्यते. ९ ङ. छ. झ. ट. कस्तुभूयस्तरं. क. ख. ग. च. ज. भूयस्तरां. १० ङ. छ. झ. ट. पुरुषर्षभात्. ११ ख. प्रियैर्विषयवासिनः. १२ ङ. छ. झ. सत्येन. १३ ङ. छ. झ. ट. द्विजान्दानेन.

न स्मराम्यप्रियं वाक्यं लोकस्य प्रियवादिनः ॥ स कथं त्वत्कृते रामं वक्ष्यामि प्रियमप्रियम् ॥३२॥
क्षमा यस्मिन्दमस्त्यागः सत्यं धर्मः कृतज्ञता ॥ अप्यहिंसा च भूतानां तमृते का गतिर्मम ॥३३॥
मम वृद्धस्य कैकेयि गतान्तस्य तपस्विनः ॥ दीनं लालप्यमानस्य कारुण्यं कर्तुमर्हसि ॥ ३४ ॥
पृथिव्यां सागरान्तायां यत्किंचिदधिगम्यते ॥ तत्सर्वं तव दास्यामि मा च त्वां मन्युराविशेत् ॥३५॥
अञ्जलिं कुर्मि कैकेयि पादौ चापि स्पृशामि ते ॥ शरणं भव रामस्य माऽधर्मो मामिह स्पृशेत् ॥३६॥
इति दुःखाभिसंतप्तं विलपन्तमचेतनम् ॥ घूर्णमानं महाराजं शोकेन समभिप्लुतम् ॥ ३७ ॥
पारं शोकार्णवस्याशु प्रार्थयन्तं पुनःपुनः ॥ प्रत्युवाचाथ कैकेयी रौद्रा रौद्रतरं वचः ॥ ३८ ॥
यदि दत्वा वरौ राजन्पुनः प्रत्यनुतप्यसे ॥ धार्मिकत्वं कथं वीर पृथिव्यां कथयिष्यसि ॥ ३९ ॥
यदा समेता बहवस्त्वया राजर्षयः सह ॥ कथयिष्यन्ति धर्मज्ञास्तत्र किं प्रतिवक्ष्यसि ॥ ४० ॥
यस्याः प्रसादे जीवामि या च मामभ्यपालयत् ॥ तस्याः कृतं मया मिथ्या कैकेय्या इति वक्ष्यसि ॥४१॥
किल्बिषत्वं नरेन्द्राणां करिष्यसि नराधिप ॥ यो दत्वा वरमद्यैव पुनरन्यानि भाषसे ॥ ४२ ॥

शंससे प्रार्थयसि ॥ ३१ ॥ लोकस्य जनमात्रस्य । प्रियवादिनः प्रियवदनशीलस्य । किमुतास्माकमिति भावः । रामस्यसंबन्धि अप्रियं विवासनविषयंवाक्यं । नस्मरामि स्मर्तुमपिनशक्नोमीत्यर्थः । सः तदस्मर्ता अहं । त्वत्कृते परुषोक्तिमत्स्त्रीकृते । रामं सर्वस्यरमयितारं । प्रियं रमयितृत्वाभावेपिपुत्रत्वेनप्रियंप्रति । कथमप्रियंवक्ष्यामि ॥ ३२ ॥ यस्मिन्क्षमादयोवर्तन्ते तमृतेममकागतिः कोवारक्षकः । तादृशंरक्षकंकथंत्यक्ष्यामीतिभावः ॥ ३३ ॥ गतान्तस्य गतः प्राप्तः अन्तश्चरमकालोयेन तस्य । वृद्धत्वेपिप्राप्तचरमकालस्येत्यर्थः । तपस्विनः शोचनीयावस्थस्य । लालप्यमानस्य पुनःपुनः कथनशीलस्य । मम मयीत्यर्थः । संबन्धसामान्येषष्ठी ॥ ३४ ॥ सागरान्तायामित्यनेनकृत्स्नायामितिलभ्यते । यत्किंचिद्धनं अधिगम्यते लभ्यते । तत्सर्वं तव तुभ्यं । दास्यामि । मन्युः रामविषयक्रोधः ॥ ३५ ॥ कुर्मि करोमि । अञ्जलिपूर्वकंपादवन्दनंकरोमीत्यर्थः । शरणं रक्षितृ । अधर्मः प्रतिज्ञाभङ्गरूपः । रामाभिषेकमनुजानीहीत्यर्थः ॥ ३६ ॥ इतीत्यादिश्लोकद्वयमेकान्वयं । अचेतनं मूर्च्छितं । घूर्णमानं इतस्ततोविवर्तमानं । शोकेन भाविरामविरहस्मरणदुःखेन । समभिप्लुतं सम्यगभिव्याप्तं ॥ ३७ ॥ पारं अन्तं । रामाभिषेकमितियावत् । अथ कृत्स्नं । इतिवचोविशेषणं "आरंभप्रश्नकार्त्स्न्येष्वथोअथ" इत्यमरः । रौद्रा भयंकरविकारा । रामाभिषेकनिवर्तनविषयेयद्वक्तव्यंतत्सर्वमुवाचेत्यर्थः ॥ ३८ ॥ धार्मिकत्वं स्वीयमितिशेषः ॥ ३९ ॥ कथयिष्यन्ति उपकारिण्याः कैकेय्याः किंप्रत्युपकृतमितिकदाचिद्धर्मप्रसङ्गेवक्ष्यन्ति । तत्र तदा । किंप्रतिवक्ष्यसि कीदृशंप्रत्युत्तरंदास्यसि ॥ ४० ॥ प्रसादेसतिजीवामि । प्रसादेनजीवामीत्यर्थः । प्रसादमेवाह—याचेति । याचमांमूर्च्छितत्वदशायांरणादन्यत्रापनीयाभ्यपालयत् शिशिरोपचारादिनाररक्षेत्यर्थः । तस्याः मया मिथ्या असत्यं । कृतमितिवक्ष्यसि किमितिकाकुः । तस्मादद्यप्रतिज्ञां निर्वहेतिभावः ॥ ४१ ॥ किल्बिषत्वं अपयशोरूपमालिन्यं । नरेन्द्राणामित्यनेनसजातीयेष्वेकेन कृतमपयशः सर्वानपिस्पृशति सर्वेराजानएवंविधाइति ।

ति० मृत्युं मन्मृत्युसंपादकानिग्राभिनिवेशं ॥ ३५ ॥ ति० प्रलपन्तं प्रार्थयन्तं ॥ ३७ ॥ ति० नरेन्द्राणां स्ववंश्यानां किल्बिषं अयशोरूपंमालिन्यंकरिष्यसि ॥ ४२ ॥

[पा०] १ ङ. छ. झ. ट. यस्मिंस्तपस्त्यागः. २ क. ञ. ग. छ. ज. ञ. अविहिंसाच. ३ ङ.—ट. माचत्वंमृत्युमाविश. ग. त्वांमृत्युराविशेत्. ख. त्वंमृत्युमाविशेः. ४ ज. विलपन्तंपुनःपुनः. ग. ज. विलपन्तमचेतसम्. ग. ङ. झ. ट. प्रलपन्तं पुनःपुनः. ५ ख. राजर्षयस्तदा. ६ क. कथयिष्यसिधर्मज्ञ. ग. ङ. च. छ. झ. ञ. ट. कथयिष्यन्तिधर्मज्ञ. ७ ङ. छ. ग. ञ. ज़. ञ. ट. प्रयत्नेजीवामि. छ. प्रसादाज्जीवामि. ८ क. ख. ग. च. झ. ञ. ट. तस्याःकृता. ९ छ. वक्ष्यते.

शैब्यः श्येनकपोतीये स्वमांसं पक्षिणे ददौ ॥ अलर्कश्चक्षुषी दत्वा जगाम गतिमुत्तमाम् ॥ ४३ ॥
सागरः समयं कृत्वा न वेलामतिवर्तते ॥ समयं माऽनृतं कार्षीः पूर्वं वृत्तमनुस्मरन् ॥ ४४ ॥
स त्वं धर्मं परित्यज्य रामं राज्येऽभिषिच्य च ॥ सह कौसल्यया नित्यं रन्तुमिच्छसि दुर्मते ॥ ४५ ॥
भवत्वधर्मो धर्मो वा सत्यं वा यदि वाऽनृतम् ॥ यत्त्वया संश्रुतं मह्यं तस्य नास्ति व्यतिक्रमः ॥४६॥
अहं हि विषमद्यैव पीत्वा बहु तवाग्रतः ॥ पश्यतस्ते मरिष्यामि रामो यद्यभिषिच्यते ॥ ४७ ॥
एकाहमपि पश्येयं यद्यहं राममातरम् ॥ अञ्जलिं प्रतिगृह्णन्तीं श्रेयो ननु मृतिर्मम ॥ ४८ ॥
भरतेनात्मना चाहं शपे ते मनुजाधिप ॥ यथा नान्येन तुष्येयमृते रामविवासनात् ॥ ४९ ॥
एतावदुक्त्वा वचनं कैकेयी विरराम ह ॥ विलपन्तं च राजानं न प्रतिव्याजहार सा ॥ ५० ॥
श्रुत्वा च राजा कैकेय्या वृतं परमशोभनम् ॥ रामस्य च वने वासमैश्वर्यं भरतस्य च ॥ ५१ ॥
नाभ्यभाषत कैकेयीं मुहूर्तं व्याकुलेन्द्रियः ॥ प्रैक्षतानिमिषो देवीं प्रियामप्रियवादिनीम् ॥ ५२ ॥
तां हि वज्रसमां वाचमाकर्ण्य हृदयाप्रियाम् ॥ दुःखशोकमयीं घोरां राजा न सुखितोऽभवत् ॥ ५३ ॥
स देव्या व्यवसायं च घोरं च शपथं कृतम् ॥ ध्यात्वा रामेति निश्वस्य च्छिन्नस्तरुरिवापतत् ॥५४॥
नष्टचित्तो यथोन्मत्तो विपरीतो यथाऽऽतुरः ॥ हृततेजा यथा सर्पो बभूव जगतीपतिः ॥ ५५ ॥

अन्यानि वरदानविरुद्धानि ॥ ४२ ॥ दुष्करस्यापि प्रतिज्ञातस्यकर्तव्यत्वंपूर्वचक्रवर्त्यनुष्ठानेनदर्शयति— शैब्यइति । शैब्योराजा । श्येनकपोतीये श्येनकपोतयोर्विरोधेप्राप्ते । पक्षिणे श्येनाय । स्वमांसं कपोतमांसप्रतिनिधित्वेनददौ । इत्थंकिलपौराणिकीगाथा । इन्द्राग्नीश्येनकपोतौभूत्वाशैब्यौदार्यपरीक्षितुंभक्ष्यकभक्ष्यभावमापन्नौशैब्यसमीपमागतौ । तत्रकपोतोऽभयार्थी शैब्याङ्कमाविवेश । तस्मैचसोऽभयंददौ । ततःश्येनेन मद्भक्षणंदैवविहितंत्यजेत्युक्ते नाहंत्यजेयं अपितुतत्प्रतिनिधिमांसमेवददामीत्युक्ते तर्हित्वन्मांसमेवमेप्रयच्छ नान्यदित्युक्ते स्वमांसमपिसर्वंदत्तवानिति । अलर्कश्च राजर्षिर्ब्राह्मणायान्धायवरंप्रतिश्रुत्यतेनराजचक्षुषास्वचक्षुःप्रतिसंधानेअर्थिते स्वचक्षुषीदत्वाउत्तमांगतिंजगाम ॥ ४३ ॥ किंच सागरः समुद्रो देवैःप्रार्थितोवेलानतिलङ्घनाय तत्तेभ्यःप्रतिश्रुत्याद्यापिवेलांनातिवर्तते । तस्मात्त्वमपिपूर्वंशैब्यादिवृत्तान्तमनुस्मरन्समयं प्रतिज्ञां । अनृतं मिथ्याभूतं । माकार्षीः ॥४४ ॥ एवं न्यायमुक्त्वातदनुमोदमानंप्रत्याह—सत्वमिति ॥४५॥ स्वसिद्धान्तमाह—भवत्विति । मदुक्तोरामविवासनपूर्वकोभरताभिषेको धर्मोवाऽधर्मोवाभवतु "रामंप्रव्राजयारण्यं" इत्यादिमदुक्तंवचनं सत्यं समीचीनंवा । अनृतं असमीचीनंवाभवतु । त्वयायन्मह्यंसंश्रुतं शपथपूर्वकंदास्यामीतिप्रतिज्ञातं । तस्य व्यतिक्रमः अन्यथाभावः । नास्तीतियोजना ॥ ४६ ॥ व्यतिक्रमेकिं करिष्यसीत्यत्राह—अहमिति ॥ ४७ ॥ कौसल्यातोप्यधिकंभोगंतवदास्यामीत्यत्रतत्प्राधान्यंनसहइत्याह— एकाहमिति । अञ्जलिंप्रतिगृह्णंतीं राजमातृत्वेनसर्वेषामितिशेषः। श्रेयः तदातदपेक्षयेतिशेषः ॥४८–५०॥ वनवासैश्वर्यरूपंवृतंवरमितिसंबन्धः ॥ ५१ ॥ प्रैक्षतानिमिषइतिनिरन्तरचिन्तावशात्क्रोधाद्वानिर्निमेषप्रेक्षणम् ॥५२॥ दुःखशोकमयीमिति । अनुचितभरताभिषेकाद्दुःखं । रामविवासनाच्छोकः॥५३॥ शपथंकृतं स्वेनेतिशेषः। निश्वस्येति अशक्यप्रतीकारत्वादितिभावः ॥५४॥ नष्टचित्तः कलुषितहृदयः। उन्मत्तः उन्मादी ।

ति० अशोभनंपरंरामवनवासभरतैश्वर्यविषयंवाक्यंश्रुत्वेत्यन्वयः । शि० वनेवासं वनवासबोधकमित्यर्थः । भरतस्यैश्वर्यं ऐश्वर्यसंबन्धीत्यर्थः । अशोभनं अभिषेकनिवृत्तिहेतुत्वेनशोभारहितंकैकेय्यावाक्यंश्रुत्वा परमन्यत्किंचिन्नाभ्यभाषत । भाषणरहितत्वेपिकिमकरोदित्यतआह । अनिमिषस्सन्प्रैक्षत अपश्यत् । श्लोकद्वयमेकान्वयि ॥ ५१—५२॥

[पा०] १ क. ख. ग. ज. सत्यंधर्मं. २ छ. नक्रियांसमुपाददे. ३ क. त्मनावाऽहं. ४ ग. ज. शपेयंमनुजाधिप. ५ ट. रामविवासनम. ६ ख. ङ. च. छ. झ. श्रुत्वातुराजा. ७ क. ङ. छ. झ. ञ. ट. वाक्यंपरमशोभनम्. ख. वृत्तंपरमदारुणम्. ८ क. ङ. च. छ. झ. ञ. ट. मयीश्रुत्वा. ९ ग. ह्यपनीतोयथाऽऽतुरः.

दीनया तु गिरा राजा इति होवाच कैकयीम् ॥ ५६ ॥
अनर्थमिममर्थाभं केन त्वमुपदर्शिता ॥ भूतोपहतचित्तेव ब्रुवन्ती मां न लज्जसे ॥ ५७ ॥
शीलव्यसनमेतत्ते नाभिजानाम्यहं पुरा ॥ बालायास्तत्त्विदानीं ते लक्षये विपरीतवत् ॥ ५८ ॥
कुतो वा ते भयं जातं या त्वमेवंविधं वरम् ॥ राष्ट्रे भरतमासीनं वृणीषे राघवं वने ॥ ५९ ॥
विरमैतेन भावेन त्वमेतेनानृतेन वा ॥ यदि भर्तुः प्रियं कार्यं लोकस्य भरतस्य च ॥ ६० ॥
नृशंसे पापसंकल्पे क्षुद्रे दुष्कृतकारिणि ॥ किंनु दुःखमलीकं वा मयि रामे च पश्यसि ॥ ६१ ॥
न कथंचिदृते रामाद्भरतो राज्यमावसेत् ॥ रामादपि हि तं मन्ये धर्मतो बलवत्तरम् ॥ ६२ ॥
कथं द्रक्ष्यामि रामस्य वनं गच्छेति भाषिते ॥ मुखवर्णं विवर्णं तं यथैवेन्दुमुपप्लुतम् ॥ ६३ ॥
तां हि मे सुकृतां बुद्धिं सुहृद्भिः सह निश्चिताम् ॥ कथं द्रक्ष्याम्यपावृत्तां परैरिव हतां चमूम् ॥ ६४ ॥
किं मां वक्ष्यन्ति राजानो नानादिग्भ्यः समागताः ॥ बालो बतायमैक्ष्वाकश्चिरं राज्यमकारयत् ६५
यदा तु बहवो वृद्धा गुणवन्तो बहुश्रुताः ॥ परिप्रक्ष्यन्ति काकुत्स्थं वक्ष्यामि किमहं तदा ॥ ६६ ॥
कैकेय्या क्लिश्यमानेन पुत्रः प्रव्राजितो मया ॥ यदि सत्यं ब्रवीम्येतत्तदसत्यं भविष्यति ॥ ६७ ॥

विपरीतः सन्निपातादिनाविपरीतप्रकृतिः । आतुरः व्याधितः। "व्याधितोपटुरातुरः" इत्यमरः। हृततेजाः मन्त्रापहृतवीर्यः ॥ ५५—५६ ॥ उपदर्शिता बोधिता ॥ ५७ ॥ शीलव्यसनं सद्वृत्तभ्रंशं । "व्यसनं विपदि भ्रंशे" इत्यमरः। नाभिजानामि किंतुशीलमेवाभिजानामि। तत्रहेतुमाह—बालायाइति । इदानीं प्रौढतायां । तत् शीलं। विपरीतवत् विपरीतत्ववत्। भावप्रधानोनिर्देशः । स्वार्थेवतिर्वा ॥ ५८ ॥ कुतइति कुतोनिमित्तात्। एवंविधमित्यस्यैवविवरणं राष्ट्रइति। वनेराघवमिति आसीनमित्यनुषङ्गः ॥५९॥ एतेनभावेन भरताभिषेकरूपेण । विरम माप्रवर्तिष्ठाः । अनृतेन अनृतपदवाच्येन । एतेनवा रामविवासनरूपेणभावेनवा । विरमेतिसंबन्धः ॥ ६० ॥ नृशंसे निर्दये । तत्रहेतुः—पापसंकल्पइति । रामविवासनरूपपापसंकल्पे । तत्रापिहेतुः क्षुद्रइति । अल्पमतिके । तत्रापिहेतुः—दुष्कृतकारिणीति । जन्मान्तरेपापकारिणीत्यर्थः । दुःखं दुःखनिमित्तं । अलीकं अप्रियं । "अलीकंत्वप्रियेऽनृते" इत्यमरः ॥ ६१—६२ ॥ वनंगच्छेतिमया भाषितेसति । विवर्णं विपरीतवर्णत्वमापादितं । रामस्यमुखवर्णं उपप्लुतं राहुग्रस्तमिव कथंद्रक्ष्यामीतिसंबन्धः ॥ ६३ ॥ तां बुद्धिस्थां । सुकृतां मन्त्रिभिः सहसुष्ठुनिश्चितां । अथसुहृद्भिस्सहनिश्चितांबुद्धिं अपावृत्तां अधरोत्तरीकृतां । कथंद्रक्ष्यामि अनुभविष्यामि ॥ ६४ ॥ बतेतिखेदे । ऐक्ष्वाकः रामः । राज्यमकारयत् किमकरोत् । इतिमांकिंवक्ष्यन्तीतिसंबन्धः । यद्वा बालः अज्ञः । दशरथः । घुणक्षतलिपिन्यायेनदैवाच्चिरंराज्यमकरोदितिमांवक्ष्यन्ति—किमिति ॥ ६५ ॥ यदा श्वः प्रातः वृद्धाः काकुत्स्थंप्रक्ष्यन्ति कगतोरामःकुतोनाभिषिक्तइतिप्रक्ष्यन्ति । तदाहं किं वक्ष्यामिप्रत्युत्तरं ॥ ६६ ॥ कैकेयीवरप्रदाननिमित्तं

ति० एतेननिर्धूतपातिव्रत्यलक्षणेनभावेनोपलक्षिता । किंच एतेन अशक्यवरद्वारकेण । अनृतेन ममानृततासंपादकेनकर्मणा । उपलक्षितात्वमेवंवराद्विरम । स० अनृतेन कृतनामहरिविरुद्धेन । भावेन अभिप्रायेण ॥ ६० ॥ ती० रामादृते रामंविना । भरतःकथंचिदपिराज्यंनाचरेत् नाकाङ्क्षेत् । अनेनयथाभागशश्चतुर्णामेवराज्यमनुमन्यस्वेत्युक्तं ॥ ६२ ॥ स० वनंगच्छेतिमयाभाषितेउक्तेसत्यपि । त्वंकथंवक्ष्यसि। तस्यत्वदतिप्रियत्वादितिभावः । उपप्लुतमिन्दुंयथा तमिव विवर्णमुखवर्णं आदर्शादौकथंद्रक्ष्यामीतिसंबन्धः । ति० रामस्य रामं । कथंवक्ष्यसि । कर्मणःसंबन्धसामान्यत्वेनविवक्षणाद्रामस्येतिषष्ठी ॥ ६३ ॥

[पा०] १ ङ. छ. झ. ञ. दीनयाऽऽतुरयावाचा. २ ज. मिदमर्थाभं. ३ ङ. छ—ट. मुपदेशिता. ४ क. ब्रुवन्तीत्वं. ५ ङ. त्वदिदानींते. ६ ङ. च. छ. झ. ट. नानृतेनच. ७ ङ. छ. झ. ट. कथंवक्ष्यसि. ८ क. ग. मुखंवर्णं. ९ ङ. छ. झ. ट. विवर्णंतु. १० ङ. झ. यदाहिबहवो. ११ ब. ङ. परिपृच्छन्ति. १२ ङ. छ. झ. वक्ष्यामीदृकथंतदा. ब. वक्ष्यामिकिमिदंतदा. १३ क—ङ. ञ. रामःप्रव्राजितो.

किं मां वक्ष्यति कौसल्या राघवे वनमास्थिते ॥ किं चैनां प्रतिवक्ष्यामि कृत्वा विप्रियमीदृशम् ॥६८॥
यदा[1] यदा हि कौसल्या दासीवच्च[2] सखीव च ॥ भार्यावद्भगिनीवच्च मातृवच्चोपतिष्ठति ॥ ६९ ॥
सततं प्रियकामा मे प्रियपुत्रा प्रियंवदा ॥ न मया सत्कृता देवी सत्कारार्हा कृते तव ॥ ७० ॥
इदानीं तत्तपति मां यन्मया सुकृतं त्वयि ॥ अपथ्यव्यञ्जनोपेतं भुक्तमन्नमिवातुरम् ॥ ७१ ॥
विप्रकारं च रामस्य संप्रयाणं वनस्य च ॥ सुमित्रा प्रेक्ष्य वै भीता कथं मे विश्वसिष्यति ॥ ७२ ॥
कृपणं बत वैदेही श्रोष्यति द्वयमप्रियम् ॥ मां च पञ्चत्वमापन्नं रामं च वनमाश्रितम् ॥ ७३ ॥
वैदेही वत[3] मे प्राणाञ्शोचन्ती क्षपयिष्यति ॥ हीना हिमवतः पार्श्वे किंनरेणेव किंनरी ॥ ७४ ॥
न हि राममहं दृष्ट्वा प्रविशन्तं[4] महावने ॥ चिरं जीवितुमाशंसे रुदन्तीं चापि मैथिलीम् ॥ ७५ ॥
सा नूनं विधवा राज्यं सपुत्रा कारयिष्यसि ॥ न[5] हि प्रव्राजिते रामे देवि जीवितुमुत्सहे ॥ ७६ ॥
सतीं त्वामहमत्यन्तं व्यवस्याम्यसतीं सतीम् ॥ रूपिणीं विषसंयुक्तां पीत्वेव मदिरां नरः ॥ ७७ ॥
अनृतैर्बहु[6] मां सान्त्वैः सान्त्वयन्ती[7] स्म भाषसे ॥ गीतशब्देन संरुध्य लुब्धो मृगमिवावधीः ॥७८॥
अनार्य इति मामार्याः पुत्र विक्रायिकं ध्रुवम् ॥ धिक्करिष्यन्ति[8] रथ्यासु सुरापं ब्राह्मणं यथा ॥७९॥
अहो दुःखमहो कृच्छ्रं[9] यत्र वाचः क्षमे तव ॥ दुःखमेवंविधं प्राप्तं पुराकृतमिवाशुभम् ॥ ८० ॥

प्रव्राजितइत्युच्यतामित्यत्राह—कैकेय्येति । कैकेय्या क्लिश्यमानेन पूर्वदत्तौवरौभरताभिषेकरामविवासनरूपेणदातव्यावित्युक्तवत्याकैकेय्यापीड्यमानेन । मया प्रव्राजितइत्येतत्सत्यंयदिब्रवीमि तदा तन् राममभिषेक्ष्यामीतिवचनं । असत्यंभविष्यति । तद्बाधोनसंभवति । पूर्वप्रवृत्तत्वादितिभावः ॥ ६७ ॥ किंमांवक्ष्यति मत्पुत्रेणतेकिमपराद्धमित्येवंवक्ष्यतीतिभावः । किंप्रतिवक्ष्यामि नकिमपीत्यर्थः ॥ ६८ ॥ यदेत्यादिश्लोकद्वयमेकान्वयं । यदायदाउपतिष्ठति तत्तदुचितकृत्येनोपास्ते । तदातदासत्कारार्हा तवकृते नसत्कृता तवविप्रियंभविष्यतीतिसानसत्कृतेत्यर्थः । परिचर्याकाले दासीवत्परिचरति । नमहिषीत्वंपुरस्करोति । द्यूतक्रीडादिसमये सखीवव्यवहरति । धर्मानुष्ठानसमयेभार्यावत् भार्यायायथावर्तितव्यं तथावर्तते । नतुमहिषीत्वाभिमानेन जोषमास्तइत्यर्थः । भार्यान्तरविवाहसमये भगिनीवत् सोदरीव । उपलालयति । शरीरपोषणादिदशायांमातृवद्धितपरातिष्ठतीतिभावः ॥ ६९—७० ॥ इदानीं त्वद्दौर्जन्यदर्शनकाले । त्वयि विषये । मयायत्सुकृतं सुष्ठूपचरितं । तत् अपथ्यव्यञ्जनोपेतं दध्याद्युपस्कृतमन्नं आतुरं व्याधितमिव । मांतपति तापयति । अन्तर्भावितण्यर्थोयं । त्वय्युपचाराकरणेसंप्रतिममताप एवनभवेत् । एतादृशवाङ्मभ्याभावादितिभावः ॥७१॥ विप्रकारं विपरीतप्रकारं । अभिषेकतिरस्कारमित्यर्थः । वनस्येतिकर्मणिषष्ठी । भीता मत्पुत्रस्यविप्रकारःकिमुतेतिभीता । मे मां ॥ ७२ ॥ श्रोष्यतीतियत् तत्कृपणं कष्टं । वतेतियोजना ॥७३—७६॥ पूर्वंसतीत्वेनज्ञातांत्वामिदानीमनेनव्यापारेण असतींसतीं असतीत्वेन स्थितां । व्यवस्यामि । कथमिव रूपिणीं दृष्टिप्रियां । विषसंयुक्तांमदिरां मद्यविशेषं । पीत्वा नरः पानानन्तरंतामसतीं दुष्टामध्यवस्यति । तथा कार्यकालेत्वामसतीमध्यवस्यामीत्यर्थः ॥ ७७ ॥ अनृतैःसान्त्वैरिष्टवचनैर्मांसान्त्वयन्तीसतीभाषसेस्म । अतःगीतशब्देन मृगवशीकरणहेतुगानशब्देन । संरुध्य मृगं लुब्धः व्याधइव मामवधीः ॥ ७८ ॥ पुत्रविक्रायिकंपुत्रमूल्येनस्त्रीसुखक्रेतारं । मां आर्याः सन्तः । अयमनार्यः पुत्रविक्रयपापकृत् । इतिधिक्करिष्यन्ति ॥ ७९ ॥ एता-

ती० मे मदर्थं । उपलक्षणमेतत् । रामार्थंशोचन्तीप्राणान्क्षपयिष्यतीत्यर्थः । वतेतिखेदे । शि० क्षपयिष्यति क्षीणाभविष्यति । तत्रदृष्टान्तः किंनरेणस्वश्वशुरेणहीनाकिंनरीव । यदिचतत्रपत्युर्वियोगःप्रसिद्धस्तदावियोगांशेक्षीणत्वांशेचदृष्टान्तोबोध्यः ॥ ७४ ॥ ति० विकरिष्यन्ति निन्दयिष्यन्ति ॥ ७९ ॥ ति० दुःखंकष्टं । कृच्छ्रं कष्टं । अहोकष्टमहोकष्टमितियावत् ॥ ८० ॥

[पा०] १ ङ. च. झ. ञ. ट. यदायदाच. २ ङ. झ. दासीवच. ख. ञ. दासीवच्चोपतिष्ठते. ३ क. वतमत्प्राणान्. ४ क—ञ. प्रवसन्तं. ५ क. च. ञ. रामेप्रव्राजितेदेविनाहंजीवितु. ६ क—झ. ट. वंतमां. ७ क. च. ज. ञ. सान्त्वयन्तीव. ८ क. ङ. च—झ. ट. विकरिष्यन्ति. घ. कथयिष्यन्ति. ९ क. च. ममसहत्कृच्छ्रं. ख. कृच्छ्रमिदंदुःखं.

चिरं खलु मया पापे त्वं पापेनाभिरक्षिता ॥ अज्ञानादुपसंपन्ना रज्जुरुद्बन्धिनी यथा ॥ ८१ ॥
रममाणस्त्वया सार्धं मृत्युं त्वां नाभिलक्षये ॥ बालो रहसि हस्तेन कृष्णसर्पमिवास्पृशम् ॥ ८२ ॥
मया ह्यपितृकः पुत्रः स महात्मा दुरात्मना ॥ तं तु मां जीवलोकोयं नूनमाक्रोष्टुमर्हति ॥ ८३ ॥
बालिशो बत कामात्मा राजा दशरथो भृशम् ॥ स्त्रीकृते यः प्रियं पुत्रं वनं प्रस्थापयिष्यति ॥८४॥
व्रतैश्च ब्रह्मचर्यैश्च गुरुभिश्चोपकर्शितः ॥ भोगकाले महत्कृच्छ्रं पुनरेव प्रपत्स्यते ॥ ८५ ॥
नालं द्वितीयं वचनं पुत्रो मां प्रति भाषितुम् ॥ स वनं प्रव्रजेत्युक्तो बाढमित्येव वक्ष्यति ॥ ८६ ॥
यदि मे राघवः कुर्याद्वनं गच्छेति चोदितः ॥ प्रतिकूलं प्रियं मे स्यान्न तु वत्सः करिष्यति ॥८७॥
शुद्धभावो हि भावं मे न तु ज्ञास्यति राघवः ॥ स वनं प्रव्रजेत्युक्तो बाढमित्येव वक्ष्यति ॥ ८८ ॥
राघवे हि वनं प्राप्ते सर्वलोकस्य धिक्कृतम् ॥ मृत्युरक्षमणीयं मां नयिष्यति यमक्षयम् ॥ ८९ ॥
मृते मयि गते रामे वनं मनुजपुङ्गवे ॥ इष्टे मम जने शेषे किं पापं प्रतिपत्स्यसे ॥ ९० ॥
कौसल्यां मां च रामं च पुत्रौ च यदि हास्यति ॥ दुःखान्यसहती देवी मामेवानु मरिष्यति ॥९१॥
कौसल्यां च सुमित्रां च मां च पुत्रैस्त्रिभिः सह ॥ प्रक्षिप्य नरके सा त्वं कैकेयि सुखिता भव ॥९२॥

दृशदुःखस्यानतुभूतत्वाद्विपादातिशयेनविस्मयते—अहोइति । कृच्छ्रं कष्टं । "स्यात्कष्टंकृच्छ्रं" इत्यमरः । एतादृशदुःखकृच्छ्रंकदाचिदपिमयानप्राप्तमित्यर्थः । किंचयस्मिनवरप्रदानविपर्ययतववाचःक्षमे एवंविधंदुःखं पुराकृतंअशुभमिवाशुभफलमिवप्राप्तं ॥ ८० ॥ सौख्यार्थंकृतंत्वद्रक्षणंस्वनाशायपरिणतमितिखिद्यति—चिरमित्यादिना ॥ ८१ ॥ नाभिलक्षये किंत्वस्पृशमितियोजना ॥ ८२ ॥ अपितृकः पितृकृतरक्षणादिरहित इत्यर्थः । आसीदितिशेषः । तं तथाविधं मां आक्रोष्टुं आक्रोशंकर्तुं ॥ ८३ ॥ आक्रोशप्रकारमाह—बालिश इति । बालिशः मूर्खः । " मूर्खवैधेयबालिशाः " इत्यमरः ॥ ८४ ॥ व्रतैः काण्डव्रतैः । ब्रह्मचर्यैः मधुमांसवर्जनादिब्रह्मचारिधर्मैः । गुरुभिः गुरुकृतशिक्षादिभिः । भोगकाले गार्हस्थ्यावस्थायां ॥ ८५ ॥ सःपुत्रः वनंप्रव्रजेत्युक्तःसन् द्वितीयंवचनं परिहारवचनं । मांप्रतिभाषितुंनालं । किंतुबाढमित्येववक्ष्यति । बाढमित्यङ्गीकारोक्तिः ॥ ८६ ॥ मे मया । वनंगच्छेतिचोदितोरामः प्रतिकूलं वनंप्रत्यगमनं । यदिकुर्यात्तदामेप्रियंस्यात् । वत्सस्तुतन्नकरिष्यति ॥ ८७ ॥ शुद्धभावः शुद्धहृदयः । मेभावं हृदयं । नज्ञास्यति । मांशुद्धतया जानन्ममवचनहृदयं नज्ञास्यतीतिभावः । अतो बाढमित्येववक्ष्यतीतिसंबन्धः ॥ ८८ ॥ सर्वलोकस्य सर्वजनस्य । " लोकस्तुभुवनेजने " इत्यमरः । धिक्कृतं धिक्करणं । अक्षमणीयं क्षन्तुमशक्यं । किंतुमृत्युर्मां यमक्षयं यमगृहं । नयिष्यति ॥ ८९ ॥ शेषे कौसल्यादौ । किंपापं कमन्यायं । प्रतिपत्स्यसे चिन्तयिष्यसि ॥ ९० ॥ पुत्रौ लक्ष्मणशत्रुघ्नौ । देवी सुमित्रा ॥९१॥ अत्रनरकशब्दे-

शि० गुरुभिः बहुभिः । ब्रह्मचर्यैः ब्रह्मणोवेदस्यचर्याबोधनंयैपुतैःवेदबोधितैरेवेत्यर्थः । व्रतैः नियमितभोजनादिभिःचकारद्वयमेवार्थकं ॥ ८५ ॥ शि० मां मृत्युः मृतेःउःकालःपरमात्मा यमक्षयं यमस्यकालस्यक्षयःअभावोयस्मिंस्तंसाकेतलोकं नयिष्यति नेष्यति प्रापयिष्यति । "उगौरीपतिरुःकालस्सेतुरब्धिःपरायणम्" इतिमात्रिकाः । अतएववनचकालवशानुगइत्यनेननविरोधः । स्मृतौकालशब्दःप्राकृतकालपरः । ति० अक्षमणीयं दुस्सहवृत्तं अतएवसर्वलोकस्यधिक्कृतं ॥ ८९ ॥ कौसल्यामांरामंचहास्यति ताभ्यांहीनाभविष्यति । चात्सुमित्रा । यदिपुत्रौच । चाद्राममांच । एतैर्यदिहीनाभविष्यति तदादुःखान्यसहती देवी कौसल्या सुमित्राच मामेवानुमरिष्यति । लक्ष्मणस्यरामेणसहनियतंगमनात् शत्रुघ्नस्यभरतानुयायित्वेपि अतीवत्वदनुरञ्जनं कुर्वतोरामस्यैवतस्यापिलयाकूरतयानिराकरणात्पुत्रौहास्यतीत्युक्तं । तेनतस्याःक्रौर्यातिशयोव्यङ्ग्यः । राज्ञःशोकातिशयवत्त्वाद्विसंष्ठुलवाक्यप्रयोगोनदोषाय ॥ ९१ ॥

[पा०] १ क. च. महापापे. २ अस्मिन्श्लोके पूर्वोत्तरार्धयोः ख. ङ. च. छ. झ. ञ. ट. पाठेषु व्युत्क्रमोदृश्यते. ३ ङ. छ. झ. देवैश्चबद्ध. ४ क. तथैवराघवः. ५ अयंश्लोकः ग. ङ. छ. झ. ट. पुस्तकेपुनदृश्यते. घ. शुद्धस्वभावोभावंमे. ६ क. इष्टोममजनः शेषःकिंपापंप्रतिपत्स्यते. ७ ङ.—ट. कौसल्यामांच, ख. सुमित्रामांच, ८ ङ. छ. झ. ट. वानुगमिष्यति. घ. वानुकरिष्यति.

मया रामेण च त्यक्तं शाश्वतं सत्कृतं गुणैः ॥ इक्ष्वाकुकुलमक्षोभ्यमाकुलं पालयिष्यसि ॥ ९३ ॥
प्रिय चेद्भरतस्यैतद्रामप्रव्राजनं भवेत् ॥ मा स्म मे भरतः कार्षीत्प्रेतकृत्यं गतायुषः ॥ ९४ ॥
[1]हन्तानार्ये ममामित्रे सकामा भव कैकयि ॥ मृते मयि गते रामे वनं [2]पुरुषपुङ्गवे ॥ ९५ ॥
सेदानीं विधवा राज्यं सपुत्रा कारयिष्यसि ॥ ९६ ॥
त्वं राज[3]पुत्रीवादेन [4]न्यवसो मम वेश्मनि ॥ अकीर्तिश्चातुला लोके ध्रुवः परिभवश्च मे ॥
सर्वभूतेषु चावज्ञा यथा पापकृतस्तथा ॥ ९७ ॥
कथं रथैर्विभुर्यात्वा गजाश्वैश्च मुहुर्मुहुः ॥ पद्भ्यां रामो महारण्ये वत्सो मे विचरिष्यति ॥ ९८ ॥
यस्य [5]त्वाहारसमये सूदाः कुण्डलधारिणः ॥ [6]अहंपूर्वाः पचन्ति स्म [7]प्रशस्तं पानभोजनम् ॥ ९९ ॥
[8]स कथं नु कषायाणि तिक्तानि कटुकानि च ॥ भक्षयन्वन्यमाहारं सुतो मे वर्तयिष्यति ॥१००॥
महार्ह[9]वस्त्रसंवीतो भूत्वा चिर[10]सुखोषितः ॥ [11]काषायपरिधानस्तु कथं [12]भूमौ निवत्स्यति ॥ १०१ ॥
[13]कस्यैतद्दारुणं [14]वाक्यमेवंविधमचिन्तितम् ॥ रामस्यारण्यगमनं भरतस्याभिषेचनम् ॥ १०२ ॥
धिगस्तु योषितो नाम शठाः [15]स्वार्थपरास्सदा ॥ न ब्रवीमि स्त्रियः सर्वा भरतस्यैव मातरम् ॥१०३॥

अनर्थभावेऽर्थपरे नृशंसे [16]ममानुतापाय निविष्टभावे ॥
किमप्रियं पश्यसि मन्निमित्तं हितानुकारिण्यथवापि रामे ॥ १०४ ॥
परित्यजेयुः [17]पितरो हि पुत्रान्भार्याः पतींश्चापि [18]कृतानुरागाः ॥
कृत्स्नं हि सर्वं कुपितं जगत्स्याद्दृष्ट्वैव रामं व्यसने निमग्नम् ॥ १०५ ॥
अहं पुनर्देव कुमाररूपमलंकृतं [19]तं सुतमाव्रजन्तम् ॥
नन्दामि [20]पश्यन्नपि दर्शनेन भवामि [21]दृष्ट्वा च पुनर्युवेव ॥ १०६ ॥

नदुःखंलक्ष्यते ॥ ९२ ॥ आकुलं क्षुभितं । पालयिष्यसि ॥ ९३—९६ ॥ त्वमित्याद्यर्धत्रयमेकान्वयं । अकीर्त्यादित्रयरूपा त्वं राजपुत्रीवादेन राजपुत्रीव्यपदेशेन । ममवेश्मनिन्यवसः । परिभवः महाजनसमक्षंधिक्कारः । अवज्ञा क्षुद्रत्वेनप्रतिपत्तिः ॥ ९७—९८ ॥ सूदाः पाचकाः । अहंपूर्वाः अहमहमिकावन्तः । प्रशस्तं "आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्धनाः । रस्याःस्निग्धाःस्थिराहृद्याआहाराःसात्विकप्रियाः" इत्युक्तप्रकारेणश्रेष्ठं ॥ ९९ ॥ कषायादित्रयरूपं वन्यमाहारंभक्षयन् कथंनुवर्तयिष्यति केनप्रकारेणजीविष्यति ॥१००॥ महार्हेण अतिश्लाघ्येन वस्त्रेण संवीतः संवृतः । चिरसुखोषितः चिरकालंसुखास्तरणोषितः । काषायपरिधानः कषायेण रक्तं काषायं । काषायं परिधानं वस्त्रं यस्य सतथोक्तः ॥१०१॥ रामस्यारण्यगमनं भरतस्याभिषेचनमित्येवंविधमेतद्वाक्यं कस्य । केनोपदिष्टमित्यर्थः । यद्वाकस्य सह्यमितिशेषः ॥१०२॥ शठाः गूढविप्रियकारिण्यः । कौसल्यादिपुतदसंभवादाह—नब्रवीमीति ॥ १०३ ॥ मन्निमित्तं मत्कारणकं । रामे रामनिमित्तकंवा ॥ १०४ ॥ कृत्स्नंजगत् । गच्छतीतिव्युत्पत्त्याजगच्छब्देनजीववर्गउच्यते । सर्वशब्देनस्थावरजातमुच्यते । कुपितं त्वांप्रतीतिशेषः ॥१०५॥ अहंपुनः अहंतु । मत्स्वभावोलौकिकेभ्योभिन्नः देव-

---

ति० राजपुत्रि दैवेन दुरदृष्टेन ॥ ९७ ॥ शि० चिरसुखोचितः सार्वकालिकानन्दयोग्यः ॥ १०१ ॥ ति० स्वस्यरामंविनाजी-

[पा०] १ इदमर्धं छ. झ. ट. पाठेपुनदृश्यते. हन्तानार्ये. मृतेमयिगते. इत्यर्धयोः ङ. पुस्तकेपौर्वापर्यंदृश्यते. २ ख. मनुजपुङ्गवे. ३ ङ. झ. ट. पुत्रीदैवेन. घ. पुत्रीव्याजेन. ४ घ. न्यवसीर्मम. ज. न्यवसेर्मम. ५ क. ङ. च. छ. झ. ञ. ट. चाहारसमये. ६ ग. घ. अहंपूर्वं. ७ ङ. छ. ज. झ. ट. प्रसन्नाःपानभोजनम्. ८ क. च. सकथंतु. ९ ङ. छ. झ. दत्तसंवृतो. ट. वस्त्रैस्संवीतो. १० क. ख. घ—छ. झ. ञ. सुखोचितः. ११ ग. ङ. छ. कषाय. १२ ङ. छ. झ. ट. रामोभविष्यति. १३ क. छ. झ. ट. कस्येदंदारुणं. १४ ङ. छ. झ. ट. मेवंविधमपीरितम्. १५ ङ. च. छ. झ. ञ. ट. स्वार्थपरायणाः. १६ ङ. छ. झ. ट. तापायनिवेशितासि. १७ ङ. छ. झ. ञ. ट. पितरोपि. १८ क. कृतानुरागान्. १९ ख. तत्सुतमाव्रजन्तम्. २० ङ. च. छ. झ. ञ. ट. पश्यन्निवदर्शनेन. २१ ख. ङ. च. छ. ञ. ट. दृष्ट्वैवपुनः. क. दृष्ट्वापि.

विना[1]पि सूर्येण भवेत्प्रवृत्तिरवर्षता वज्रधरेण वाऽपि ॥
रामं तु गच्छन्तमितः समीक्ष्य जीवेन्न कश्चिन्त्विति चेतना मे ॥ १०७ ॥
विनाशकामामहितामभित्रामावासयं मृत्युमिवात्मनस्त्वाम् ॥
चिरं बताङ्केन धृ[2]तासि सर्पी महाविषा तेन हतोस्मि मोहात् ॥ १०८ ॥
मया च रामेण च[3] लक्ष्मणेन प्रशास्तु हीनो भ[4]रतस्त्वया सह ॥
पुरं च राष्ट्रं च निहत्य बान्धवान्ममाहितानां च भ[5]वाभिहर्षिणी ॥ १०९ ॥
नृशंसवृत्ते व्यसनप्रहारिणि प्रसह्य वाक्यं यदिहाद्य भाषसे ॥
न नाम ते[6] केन मुखात्पतं[7]न्त्यधो विशीर्यमाणा दशनाः सहस्रधा ॥ ११० ॥
न किंचिदाहाहितमप्रियं वचो न वेत्ति रामः परुषाणि भाषितुम् ॥
कथं नु रा[8]मे ह्यभिरामवादिनि ब्रवीषि दोषान्गुणनित्यसंमते ॥ १११ ॥
प्रताम्य[9] वा प्रज्वल वा प्रणश्य वा स[10]हस्रशो वा स्फुटिता महीं व्रज ॥
न ते करिष्यामि वचः सुदारुणं स[11]माहितं के[12]कयराजपांसनि ॥ ११२ ॥
क्षुरोपमां नित्यमसत्प्रियंवदां प्रदुष्टभावां स्वकुलोपघातिनीम् ॥

कुमाररूपं निसर्गसुन्दरं । अलंकृतं अलंकारैरतिशयितशोभं । चन्द्रकान्ताननमित्यस्यहृदिविपरिवर्तमानत्वात्तमित्युक्तं । सुतंसौन्दर्याद्यभावेपिसुतत्वप्रयुक्तप्रेमास्पदं । आव्रजन्तं मत्तमातङ्गगामिनमित्युक्तरीत्यागमनकालिकसंभ्रमविशेषशालिनं । दर्शनेन मानसज्ञानेन । पश्यन्नपिनन्दामि । दृष्ट्वापुनःसाक्षात्कृत्यतु । युवेवभवामि युववद्धृष्टपुष्टाङ्गोभवामि ॥ १०६ ॥ प्रवृत्तिः संचारः । चेतना बुद्धिः । वज्रधरपक्षेप्रवृत्तिशब्देन जीवनविषयप्रवृत्तिरुच्यते ॥ १०७ ॥ मोहात् आवासयं गृहइतिशेषः । सर्पी सर्पजातिः । जातिलक्षणो ङीप् । त्वंमोहादङ्केनधृतासि । तेनाङ्कधारणेन ॥१०८॥ सलक्ष्मणेनरामेणमयाचहीनोभरतस्त्वयासहपुरंराष्ट्रं बान्धवांश्चनिहत्य प्रशास्तु पुरादिहननरूपंप्रशासनंकरोतु । ममाहितानां शत्रूणांच । अभिहर्षिणीभवेतिसंबन्धः ॥ १०९ ॥ नृशंसवृत्ते क्रूरव्यापारे । व्यसनप्रहारिणि क्षतेप्रहारन्यायेनविपदिप्रहरणशीले । रामविरहासहनं विपत् तत्रप्रहारः पुनःपुनश्चोदनं । त्वंइहदेशे । अद्य अस्मिन्काले । प्रसह्य पतिस्वातन्त्र्यंतिरस्कृत्य । यद्वाक्यं भाषसे तत्रतेमुखात् दशनाःसहस्रधाविशीर्णाःसन्तः केननामहेतुना नपतन्तीतिसंबन्धः ॥ ११० ॥ रामः अहितमप्रियंच किंचिद्वचोनाह । परुषाणिभाषितुंनवेत्ति । ज्ञानपूर्वकत्वाद्भाषणस्यकुतस्तत्प्रसक्तिरितिभावः । नकेवलंपरुषावेदनं प्रत्युताभिरामवादिनि सर्वप्रियभाषिणि । गुणैर्नित्यं संमतेरामे । कथंनु दोषान् प्रव्राजनहेतून् ब्रवीषि ॥१११॥ प्रताम्य ग्लानिंभज । ताम्यतेर्लोण्मध्यमपुरुषैकवचनं । प्रज्वल कुपिताभव । प्रणश्य नष्टाभव । सहस्रशः स्फुटितासतीमहींव्रजवा । भृगोः पतवेत्यर्थः । केकयराजानांपांसनि दूषणि ॥ ११२ ॥ क्षुरोपमां तद्वत्क्रूरां । असत्प्रियंवदां मिथ्याप्रियवादिनीं । प्रदुष्टभावां प्रकर्षेणदुष्टहृदयां । अमनोरमामिति

वनव्यतिरेकं दर्शयिष्यंस्तदन्वयेस्वजीवनान्वयंदर्शयति—अहमिति । आव्रजन्तं मत्समीपेआगच्छन्तं । श्रुत्वेतिशेषः । दर्शनेनचक्षुषापश्यन्निवनन्दामि । स० देवकुमाररूपं देवस्यहरेः कुमारोमारस्तस्यरूपमिवरूपंयस्यासौतथोक्तः ॥ १०६ ॥ ति० रामंतुविनानकस्यापिजीवनमितिमेमतिः । अन्तर्यामिणं विनाकस्यापिव्यवहारस्यासिद्धेः । एवंचस्वाजीवनं कैमुतिकन्यायसिद्धमितिभावः ॥ १०७ ॥ वि० मम अहितानां शत्रूणां । अभिभाषणशीलाभव । वार्ताकरणयोग्यबान्धवाभावादितिभावः ॥ १०९ ॥ शि० प्रसह्य अनादृत्ययत्इहास्मिन्समयेभाषसे तेनभाषणेन ॥ ११० ॥

[पा०] १ क. ङ. च. छ. झ. ञ. ट. विनाहि. २ क. च. ञ. धृताहिसर्पी. ख. ज. धृतासि. ३ क. ङ. च. छ. झ. ञ. ट. सलक्ष्मणेन. ४ क. ख. भरतस्सहत्वया. ५ च. छ. झ. ञ. भवाभिभाषिणी. ६ छ. झ. ट. तेतेन. ७ ग. ज. त्पतत्यधोविशीर्यमाणारसना. ८ छ. रामेत्वभिराम. ख. रामेप्यभिराम. घ. रामेऽभ्यभिराम. ९ ङ. प्रतप्यवा. ख. छ. प्रताप्य. १० क. सहस्रधावा. ११ ङ. छ. झ. समाहितं. १२ ङ. छ. झ. पांसने. ख. ज. ट. पांसिनि.

न[1] जीवितुं त्वां विषहेऽमनोरमां दिधक्षमाणां हृदयं सबन्धनम् ॥ ११३ ॥
न जीवितं मेऽस्ति कुतः पुनः सुखं विनाऽऽत्मजेनात्मवतः[2] कुतो रतिः ॥
ममाहितं देवि न कर्तुमर्हसि स्पृशामि पादावपि ते प्रसीद मे ॥ ११४ ॥
स भूमिपालो विलपन्ननाथवत्स्त्रिया गृहीतो हृदयेऽतिमात्रया ॥
पपात देव्याश्चरणौ प्रसारितावुभावसंस्पृश्य[3] यथाऽऽतुरस्तथा ॥ ११५ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे द्वादशः सर्गः ॥ १२ ॥

त्रयोदशः सर्गः ॥ १३ ॥

कैकेय्यापुनर्वरदाननिर्बन्धे दशरथेनसकरुणमात्मपरिशोचनपूर्वकंबहुधातद्गर्हणम् ॥ १ ॥ तथासूर्येऽस्तंगते आप्रभातं दुःखेनविलापपूर्वकं कैकेयींप्रतिसानुनयं रामायराज्यदानयाचनम् ॥ २ ॥ कैकेय्याहठाद्दशरथप्रार्थनानङ्गीकारे तेनपुनर्मूर्च्छयाक्षितौनिपतनम् ॥ ३ ॥ ततःप्रबुद्धेनतेनप्रभातेवैतालिकैःक्रियमाणमङ्गलवाद्यवादनपूर्वकस्वप्रबोधननिवारणम् ॥ ४ ॥

अतदर्हं महाराजं शयानमतथोचितम् ॥ ययातिमिव पुण्यान्ते देवलोकात्परिच्युतम् ॥ १ ॥
अनर्थरूपाऽसिद्धार्था ह्यभीता भयदर्शिनी[4] ॥ पुनराकारयामास तमेव वरमङ्गना ॥ २ ॥
त्वं कत्थसे[5] महाराज सत्यवादी दृढव्रतः ॥ मम चेमं[6] वरं कस्माद्विधारयितुमिच्छसि ॥ ३ ॥
एवमुक्तस्तु कैकेय्या राजा दशरथस्तदा ॥ प्रत्युवाच ततः क्रुद्धो मुहूर्तं विह्वलन्निव[7] ॥ ४ ॥

पदच्छेदः । सबन्धनं समूलं । प्राणरूपमूलसहितं "प्राणबन्धनंहिसौम्यमनः" इतिश्रुतेः । सदिन्धनमिति पाठेहृदयमेवसदिन्धनं । दिधक्षमाणां दग्धुमिच्छन्तीं । त्वांजीवितुं जीवयितुं । नविषहे नोत्सहे ॥ ११३ ॥ रतिः त्वद्विषयेतिशेषः । यदेवमतआह—ममाहितमिति । आत्मवतः जीवतइत्यर्थः ॥ ११४ ॥ अतिमात्रया अमर्यादया । स्त्रियाहृदयेगृहीतः तदधीनहृदयइत्यर्थः । भूमिपालोपितांनिग्रहीतुमसमर्थइत्यर्थः । अनाथवद्विलपन् त्वांजीवयितुंनोत्सहेतेपादौस्पृशामिप्रसीदेत्यनवस्थितवचनानिभाषमाणः । प्रसारिताविस्यनेनानादरउक्तः । असंस्पृश्येत्यनेनपिस्पृक्षायामेवमूर्च्छांजातेतिगम्यते ॥ ११५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीतांबराख्याने अयोध्याकाण्डव्याख्याने द्वादशःसर्गः ॥ १२ ॥

"नतेकरिष्यामिवचः" इत्युक्त्वाऽपिधर्मपाशबद्धतयापश्चात्तप्तः पुनस्तांसान्त्वयति त्रयोदशे—अतदर्हमित्यादि । श्लोकद्वयमेकान्वयं । अतदर्हं तादृशदुःखानर्हं । अतथोचितं अधश्शयनानुचितं । अनर्थरूपा पापरूपा । असिद्धार्था अनिष्पन्नप्रयोजना । अभीता लोकापवादभीतिरहिता । भयदर्शिनी दशरथस्येतिशेषः। यद्वा अभयदर्शिनी दशरथस्यभयमपश्यतीत्यर्थः। तमेववरं पूर्वदत्तमेववरमुदिश्य। महाराजं आकारयामास संबोधयामास । यद्वा दातव्यत्वेनग्राहयामासेत्यर्थः । वस्तुतस्त्वेकवचनस्वारस्यात् वरं श्रेष्ठं दशरथं । स्वाभिमतकथनायाह्वयामासेत्यर्थः ॥ १—२ ॥ विधारयितुं ऋणत्वेनधारयितुं । च्यावयितुंवा । विशेषेणधारयितुमादातुमितिवार्थः ॥ ३ ॥ विह्वलनमूर्च्छन

स० प्रसारितौ प्रणामंकुर्यादित्यन्यत्रप्रसारितौ ॥ ११५ ॥ इतिद्वादशस्सर्गः ॥ १२ ॥

ति० अतदर्हं स्त्रीप्रणामानर्हं ॥ १ ॥ ती० भयदर्शिनीतिच्छेदे रामाद्भरतस्यभयदर्शिनी । शि० सिद्धार्था साधितदेवप्रयोजना । अभीता वास्तवयशोरूपपत्यर्थसाधकत्वरूपधर्मविशिष्टत्वेनधर्मच्युतिभीतिरहिता । किंच अभीता वास्तवयशोरूपपत्यर्थप्रापिका । इणोरूपं ॥ २ ॥ शि० कथ्यसे जनैरितिशेषः ॥ ३ ॥

[पा०] १ घ. नजीवतींत्वां. २ ङ. छ. झ. नात्मवतां. क—घ. च. ज. ञ. नात्मवता. ३ ख. ङ. छ. झ. ट. वसंप्राप्य. ४ ख, पापदर्शिनी. ५ क—घ. च, ट, कथ्यसे. ६ ख. ङ. च. छ. झ. ट. चेदं. ज. चैवं. ७ क. छ. विलपन्निव.

मृते मयि गते रामे वनं मनुजपुङ्गवे ॥ हन्तानार्ये ममामित्रे सकामा सुखिनी भव ॥ ५ ॥
स्वर्गेऽपि खलु रामस्य कुशलं दैवतैरहम् ॥ प्रत्यादेशादभिहितं धारयिष्ये कथं बत ॥ ६ ॥
कैकेय्याः प्रियकामेन रामः प्रव्राजितो मया ॥ यदि सत्यं ब्रवीम्येतत्तदसत्यं भविष्यति ॥ ७ ॥
अपुत्रेण मया पुत्रः श्रमेण महता महान् ॥ रामो लब्धो महाबाहुः स कथं त्यज्यते मया ॥ ८ ॥
शूरश्च कृतविद्यश्च जितक्रोधः क्षमापरः ॥ कथं कमलपत्राक्षो मया रामो विवास्यते ॥ ९ ॥
कथमिन्दीवरश्यामं दीर्घबाहुं महाबलम् ॥ अभिराममहं रामं प्रेषयिष्यामि दण्डकान् ॥ १० ॥
सुखानामुचितस्यैव दुःखैरनुचितस्य च ॥ दुःखं नामानुपश्येयं कथं रामस्य धीमतः ॥ ११ ॥
यदि दुःखमकृत्वाऽद्य मम संक्रमणं भवेत् ॥ अदुःखार्हस्य रामस्य ततः सुखमवाप्नुयाम् ॥ १२ ॥
नृशंसे पापसंकल्पे रामं सत्यपराक्रमम् ॥ किं विप्रियेण कैकेयि प्रियं योजयसे मम ॥ १३ ॥
अकीर्तिरतुला लोके ध्रुवः परिभवश्च मे ॥ १४ ॥
तथा विलपतस्तस्य परिभ्रमितचेतसः ॥ अस्तमभ्यागमत्सूर्यो रजनी चाभ्यवर्तत ॥ १५ ॥
साऽत्रियामा तथाऽऽर्तस्य चन्द्रमण्डलमण्डिता ॥ राज्ञो विलपमानस्य न व्यभासत शर्वरी ॥ १६ ॥
तथैवोष्णं विनिश्वस्य वृद्धो दशरथो नृपः ॥ विललापार्तवद्दुःखं गगनासक्तलोचनः ॥ १७ ॥
न प्रभातं त्वयेच्छामि निशे नक्षत्रभूषणे ॥ क्रियतां मे दया भद्रे मयाऽयं रचितोऽञ्जलिः ॥ १८ ॥
अथवा गम्यतां शीघ्रं नाहमिच्छामि निर्घृणाम् ॥ नृशंसां कैकयीं द्रष्टुं यत्कृते व्यसनं महत् ॥१९॥
एवमुक्त्वा ततो राजा कैकेयीं संयताञ्जलिः ॥ प्रसादयामास पुनः कैकेयीं चेदमब्रवीत् ॥ २० ॥

॥ ४—५ ॥ रामस्यकुशलंप्रति दैवतैःप्रत्यादेशादभिहितं धिक्कारपूर्वमभिहितंवाक्यं । कथंधारयिष्ये सहिष्ये । मूढस्त्रीहेतोःकथंगुणवत्पुत्रंत्यक्तवानसीत्यभिहितंश्रुत्वाकथमात्मानंधारयिष्ये । तथाचंरामप्रवासनेइह परत्रचममसौख्यंनास्तीत्यर्थः ॥ ६ ॥ ननुसत्यप्रतिज्ञत्वनिर्वाहार्थंरामःप्रव्राजितइतिवक्तव्यमित्यत्राह—कैकेय्याइति । मयेत्यनन्तरमितिकरणंद्रष्टव्यं । तदसत्यं भविष्यति । "श्वस्त्वाहमभिषेक्ष्यामियौवराज्येपरंतप" इतिरामोद्देशेनोक्तंवाक्यमसत्यंभविष्यतीत्यर्थः ॥ ७ ॥ अपरित्यागेहेत्वन्तराणिदर्शयति—अपुत्रेणेत्यादि ॥ ८—१० ॥ दुःखैरिति षष्ठ्यर्थेतृतीया ॥ ११ ॥ अदुःखार्हस्यरामस्यदुःखमकृत्वाममसंक्रमणंयदिभवेत् । ततः तदा । सुखमवाप्नुयां । संक्रमणं तृणजलूकान्यायेनदेहाद्देहान्तरप्राप्तिः । पञ्चत्वमिति यावत् ॥ १२ ॥ ममप्रियंरामं विप्रियेण अनभिमतदण्डकारण्यगमनेन । किं किमर्थं योजयसे ॥ १३ ॥ अकीर्तिरित्यर्धं । भविष्यतीतिशेषः ॥ १४ ॥ तस्य विलपतः तस्मिन्विलपतिसतीत्यर्थः ॥ १५ ॥ अत्रियामा यामत्रयवत्त्वंविहायातिदीर्घेत्यर्थः ॥ १६ ॥ आर्तवत् महारोगादिनापीडितइव । दुःखंविललाप । शृण्वतांयथादुःखंभवतितथाविललापेत्यर्थः ॥ १७ ॥ प्रभातं प्रभातत्वं । भावनिष्ठा । अत्रप्रकरणेभर्त्सनप्रसादनाभ्यांपुनःपुनःक्रियमाणाभ्यांधर्ममपित्यक्तुंनशक्नोमिनपुत्रमपीतिगम्यते ॥ १८ ॥ निर्घृणां निर्दयां ।

ति० स्थापयिष्यामि प्रस्थापयिष्यामि ॥ १० ॥ ति० मरणंवराप्रदानजन्यदोषोपिन । जीवतोहिंसाप्रतिज्ञेतिभावः ॥ १२ ॥ अकीर्तिः । स्त्रीजितइत्यकीर्तिः । जन्मसंपादितांकीर्तिं परिभविष्यतीत्यर्थः ॥ १४ ॥ स० त्रयोयामायस्यास्सात्रियामा । आद्यन्तयोरर्धयामयोश्चेष्टाकालत्वेनदिनप्रायत्वात् । यद्वात्रीन्धर्मादीन्यापयतिनिरवकाशीकरोतिकामप्रधानत्वात् । अन्तर्भावितण्यर्थाद्यातेः "अर्तिस्तुसुहुसृधृक्षिक्षुभायावापदियक्षिनीभ्योमन्" इतिमन् ॥१६॥ ति० तवेतिपाठेत्वत्संबन्धिप्रातःकालं ॥ १८ ॥ ति० राज-

[पा०] १ ख. च. ञ. सुखिता. २ च. कथंचन. ङ. कथंचनु. ३ क—ट. वनम्. ४ क. इति. ५ ङ. छ. झ. ट. महातेजाः. ६ ङ. छ. झ. ट. स्थापयिष्यामि. ७ ङ.—ट. मकुलानु. ८ ङ. छ. झ. ट. ध्रुवंपरिभविष्यति. ९ क. च. मभ्यागतस्सूर्यो. १० ग. ङ. छ. झ. ट. तदार्तस्य. घ. तदातस्य. ११ ङ. छ. झ. सदैवोष्णं. ख. अथैवोष्णं. १२ क. च. ञ. ट. तवेच्छामि. १३ ङ. च. छ. झ. ञ. ट. भूषिते. १४ क. ख. रचितोऽयंमयाञ्जलिः. क. ङ. छ. झ. ट. मम. १५ ङ. च. छ. झ. ट. राजधर्मवित्.

साधुवृत्तस्य दीनस्य त्वद्गतस्य गतायुषः ॥ प्रसादः क्रियतां देवि भद्रे राज्ञो विशेषतः ॥ २१ ॥
शून्ये न खलु सुश्रोणि मयेदं समुदाहृतम् ॥ कुरु साधु प्रसादं मे बाले सहृदया ह्यसि ॥ २२ ॥
प्रसीद देवि रामो मे त्वद्दत्तं राज्यमव्ययम् ॥ लभतामसितापाङ्गे यशः परमवाप्नुहि ॥ २३ ॥
मम रामस्य लोकस्य गुरूणां भरतस्य च ॥ प्रियमेतद्गुरुश्रोणि कुरु चारुमुखेक्षणे ॥ २४ ॥

विशुद्धभावस्य हि दुष्टभावा ताम्रेक्षणस्याश्रुकलस्य राज्ञः ॥
श्रुत्वा विचित्रं करुणं विलापं भर्तुर्नृशंसा न चकार वाक्यम् ॥ २५ ॥
ततः स राजा पुनरेव मूर्च्छितः प्रियामदुष्टां प्रतिकूलभाषिणीम् ॥
समीक्ष्य पुत्रस्य विवासनं प्रति क्षितौ विसंज्ञो निपपात दुःखितः ॥ २६ ॥
इतीव राज्ञो व्यथितस्य सा निशा जगाम घोरं श्वसतो मनस्विनः ॥
विबोध्यमानः प्रतिबोधनं तदा निवारयामास स राजसत्तमः ॥ २७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे त्रयोदशः सर्गः ॥ १३ ॥

चतुर्दशः सर्गः ॥ १४ ॥

प्रभातेकैकेय्यादशरथंप्रति सदृष्टान्तप्रदर्शनंसत्यवचनप्रशंसनेनस्वाभिमताकरणेस्वप्राणविमोक्षणप्रतिज्ञानपूर्वकंसद्योराम-प्रवासनचोदना ॥ १ ॥ ततोदशरथेनकैकेयींप्रतिसगर्हणंवरदानसूचनपूर्वकंस्वस्यरामदिदृक्षानिवेदनम् ॥ २ ॥ वसिष्ठेनस्ना-नाद्याह्निकनिर्वर्तनपूर्वकंदशरथदिदृक्षयाकैकेय्यन्तःपुरंप्रत्यागमनम् ॥ ३ ॥ पूर्वमेवान्तःपुरद्वारमुपगतवतासुमन्त्रेणवसिष्ठवच-नाद्दशरथसमीपमेत्यतदभिष्टवनपूर्वकंरामाभिषेचनप्रार्थना ॥ ४ ॥ तथास्वकृतस्तवनसंदीपितशोकस्यराज्ञःकरुणवचनश्रवणा-त्किंचित्पश्चादपाक्रमणम् ॥ ५ ॥ तथाकैकेयीचोदनयारामानयनायान्तःपुराद्बहिर्निर्गमनम् ॥ ६ ॥

पुत्रशोकार्दितं पापा विसंज्ञं पतितं भुवि ॥ विवेष्टमानमुद्वीक्ष्य सैक्ष्वाकमिदमब्रवीत् ॥ १ ॥
पापं कृत्वैव किमिदं मम संश्रुत्य संश्रवम् ॥ शेषे क्षितितले सन्नः स्थित्यां स्थातुं त्वमर्हसि ॥ २ ॥

प्रत्युत नृशंसां क्रूरां ॥ १९—२० ॥ त्वद्गतस्य त्वदेकशरणस्येत्यर्थः । गतायुषः अल्पावशेषमतीतायुषइत्यर्थः॥ २१ ॥ शून्ये निर्जनेप्रदेशे । इदं रामाभिषेचनं । नसमुदाहृतंखलु किंतुसर्वजनसन्निधौसमुदाहृतमित्यर्थः । यद्वा शून्येन दीनेनमयेत्यर्थः ॥ २२—२४ ॥ ताम्रेक्षणस्य दुःखातिशयेनेतिशेषः।अश्रुकलस्य अश्रुपूर्णस्य । कलिःकामधेनुः । विचित्रं प्रसादनभर्त्सनसहितत्वात् ॥ २५—२६ ॥ प्रतिबोधनं शङ्खपटहवीणादिकंप्रतिबोधनसाधनं । यद्वा वैतालिकैःक्रियमाणंप्रतिबोधनं ॥२७॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीतांबराख्याने अयोध्याकाण्डव्याख्याने त्रयोदशःसर्गः ॥ १३ ॥

अथरामविवासननिर्धारणंदर्शयतिचतुर्दशे—पुत्रेत्यादि ॥ १ ॥ संश्रवं दास्यामीतिप्रतिज्ञां। संश्रुत्य कृत्वेत्यर्थः । पाकंपचतीतिवन्निर्देशः । पापं प्रतिज्ञाताकरणरूपंपापं कृत्वैव क्षितितले सन्नः अवसन्नःसन् । शेषे किमिदं । स्थित्यां मर्यादायां सत्यपरिपालनरूपा-

धर्मवित् सामादिविज्ञाता ॥२०॥ **ती०** प्राकृनिर्लांप्रियां । अदुष्टां पतिव्रतां । तत्कालदैवात्प्रतिकूलभाषिणींतांसमीक्ष्य पुत्रस्यविवासनंप्रतिक्रियमाणंतद्वरंचसमीक्ष्य पर्यालोच्य कर्तव्यमूढोमूर्च्छितःक्षितौविसंज्ञःपपातेत्यर्थः ॥ २६ ॥ इतित्रयोदशःसर्गः ॥ १३ ॥

स० मदर्थं राजाम्रियतेचन्म्रियतांप्रवयाः आरब्धकार्यंतुनत्याज्यमितिनिर्णायाह—**पुत्रेत्यादि** । विचेष्टमानं विशब्दोत्र विप्रियमित्यादावितगतार्थं । अचेष्टमानम् ॥१॥ **शि०** संश्रवंदास्यामीतिपूर्वंप्रतिज्ञाविषयीभूतंवरद्वयमित्यर्थः । संश्रुत्यतद्दास्यामीतीदानीं-

[पा०] १ घ. साधुवृद्धस्य. २ ङ. च. छ. झ. ट. भद्रेदेवि. ग. घ. देविममराज्ञो. ख. भद्रराज्ञे. ३ ङ. छ. झ. समुपाहृतम. ४ क. च. छ. ञ. रामोपि. ५ ङ. च छ. ञ. ट. मवाप्स्यसि. ६ ग. घ. मेतदुरुश्रोणि. ख. मेतत्तुसुश्रोणि. ७ घ. सुदुष्ट. ८ ङ. छ. झ. ट. दीनस्यताम्राश्रुकलस्य. ध. ताम्राश्रुमुखस्य. ९ ख. भयमोहमूर्च्छितः. १० क. ग—छ. झ. ञ. ट. मतुष्टां. ११ झ—ठ. विचेष्टमान. १२ ङ. च. छ. झ. ञ. ट. मुत्प्रेक्ष्य. १३ घ. ङ. छ. झ. ञ. ट. ऐक्ष्वाकं. १४ क. ख. ग. ङ—ट. कृत्वैव.

आहुः सत्यं हि परमं धर्मं धर्मविदो जनाः ॥ सत्यमा[1]श्रित्य हि मया [2]त्वं च धर्मप्रचोदितः ॥ ३ ॥
संश्रुत्य शैब्यः श्येनाय स्वां तनुं जगतीपतिः ॥ प्रदाय पक्षिणे [3]राजञ्जगाम गतिमुत्तमाम् ॥ ४ ॥
तथा ह्यलर्कस्तेजस्वी ब्राह्मणे वेदपारगे ॥ [4]याचमाने स्वके नेत्रे [5]उद्धृत्याविमना ददौ ॥ ५ ॥
सरितां तु पतिः स्वल्पां मर्यादां [6]सत्यमन्वितः ॥ सत्यानुरोधात्समये [7]वेलां स्वां नातिवर्तते ॥ ६ ॥
सत्यमेकपदं ब्रह्म सत्ये धर्मः प्रतिष्ठितः ॥ सत्यमेवाक्षया वेदाः [8]सत्येनैवाप्यते परम् ॥ ७ ॥
सत्यं समनुवर्तस्व यदि धर्मे धृता मतिः ॥ स वरः सफलो मेऽस्तु वरदो ह्यसि सत्तम ॥ ८ ॥
धर्म[9]स्येहाभिकामार्थं मम चैवाभिचोदनात् ॥ प्रव्राजय सुतं रामं त्रिः खलु त्वां ब्रवीम्यहम् ॥ ९ ॥
समयं च [10]ममाद्येमं [11]यदि त्वं न करिष्यसि ॥ अग्रतस्ते परित्यक्ता परित्यक्ष्यामि जीवितम् ॥ १० ॥
एवं प्रचोदितो राजा कैकेय्या निर्विशङ्कया ॥ नाशकत्पाशमुन्मोक्तुं बलिरिन्द्रकृतं यथा ॥ ११ ॥
उद्भ्रान्तहृदयश्चापि विवर्णवदनोऽभवत् ॥ स धुर्यो वै परिस्पन्दन्[12]युगचक्रान्तरं यथा ॥ १२ ॥
[13]विह्वलाभ्यां च नेत्राभ्यामपश्यन्निव भूमिपः ॥ कृच्छ्राद्धैर्येण संस्तभ्य कैकेयीमिदमब्रवीत् ॥ १३ ॥
यस्ते मन्त्रकृतः पाणिरग्नौ पापे मया धृतः ॥ [14]तं त्यजामि स्वजं चैवं[15] तव पुत्रं सह त्वया ॥ १४ ॥
प्रयाता रजनी देवि सूर्यस्योदयनं प्रति ॥ [16]अभिषेकं गुरुजनस्त्वरयिष्यति मां ध्रुवम् ॥ १५ ॥

यां । " मर्यादाधारणास्थितिः " इत्यमर. । स्थातुमर्हसि ॥ २ ॥ इदमेवयुक्तमितिदर्शयति—आहुरित्यादिना । सत्यरूपंधर्ममाश्रित्यहिमयाप्रचोदितः ॥ ३ ॥ प्राणसङ्कटेकथंसत्यंपालनीयमित्यत्राह—संश्रुत्येत्यादिना ॥ ४ ॥ याचमानेब्राह्मणे अविमनाः सुप्रसन्नमनाः सन् । नेत्रेददौ तस्माइतिशेषः ॥ ५ ॥ सरितांपतिः समुद्रः । मर्यादांसत्यमन्वितः वेलांनातिवर्ततइतिमर्यादारूपंसत्यंप्राप्तःसन् । सत्यानुरोधात् स्वकृतसत्यानुवर्तनात् । समये संकल्पितकाले । स्वांवेलां स्वल्पामपि नातिवर्ततइतिसंबन्धः ॥६॥ सत्यमेवएकपदंब्रह्म एकं मुख्यं । "एके मुख्यान्यकेवलाः" इत्यमरः । पद्यतइतिपदं परमप्राप्यं ब्रह्मेत्यर्थः । यद्वा एकंपदंप्रणवरूपंवाचकंयस्य तत्तथा " ओमित्येकाक्षरंब्रह्म " इतिस्मृतेः । सत्येधर्मःप्रतिष्ठितः सत्यमेवधर्मस्यपराकाष्ठेत्यर्थः । अक्षयावेदाश्चसत्यमेव प्राधान्येनप्रतिपादयन्तीत्यर्थः । परं प्रयोजनं । सत्येनैवाप्यते ॥ ७ ॥ अत्रादौतस्मादित्युपस्कार्यं । धृता स्थिरा । वरदः सर्वेषांसर्ववरप्रदः ॥ ८ ॥ अभिकामार्थं प्रीत्यर्थं । धर्माभिवृद्ध्यर्थमितियावत् । मम प्रियायाइतिशेषः । समनस्कत्वज्ञापनायत्रिरित्युक्तं ॥ ९ ॥ समयं रामविवासनं । परित्यक्ता उपेक्षिता ॥ १० ॥ एवं त्रिर्ब्रवीमीत्येवं । पाशं सत्यपाशं । उन्मोक्तुं मोचयितुं । बलिः महाबलिः । इन्द्रकृतं इन्द्रद्वारोपेन्द्रकृतं । पाशं पदत्रयदानप्रतिज्ञारूपं पदत्रयादानान्निगलंवा ॥ ११ ॥ सः राजा । युगचक्रयोरन्तरंपरिस्पन्दन् गच्छन् । धुर्योयथा अनड्वानिव । उद्भ्रान्तहृदयोविवर्णवदनश्चाभवत् ॥ १२ ॥ विह्वलाभ्यांक्षुब्धाभ्यां । अपश्यन्निव अन्धइव स्थितः भूमिपः । कृच्छ्रात् लब्धेन धैर्येण संस्तभ्य दुःखातिशयजनितक्षोभंनिरुद्ध्येत्यर्थः ॥ १३ ॥ हेपापे अग्नौ अग्निसमीपे । सामीप्येसप्तमी । मन्त्रकृतः मन्त्रसंस्कृतः । यः पाणिर्मयाधृतःतंत्यजामि तत्प्रयुक्तव्यवहारंत्यजामीत्यर्थः । अतएव स्वजं स्वस्माज्जातमपि । तवपुत्रं त्वयासहत्यजामि ॥ १४ ॥ उदयनंप्रति उदयंप्रतिलभ्य त्वरयि-

---

प्रतिज्ञायइदंदानंपापंअनिष्टमिवकृत्वामत्वेत्यर्थः ॥ २ ॥ शि० विकलाभ्यां दर्शनकलारहिताभ्यां ॥ १३ ॥

[पा०] १ ङ. छ. झ. माश्रित्यच. २ ङ. छ. झ. ट. त्वंधर्मप्रतिचोदितः. क. ख. ग. च. ज. ञ. त्वंचधर्मप्रचोदितः. ३ क. ख. ग. ङ. च. छ. झ. ञ. ट. राजा. ४ क. घ. ञ. याच्यमानः. ५ क. ग. घ. ज. उद्धृत्यसुमना. ६ ख. सत्यसंमितः. ७ ग. घ. छ. स्वांवेलां. ८ क. ख. ग. ञ—ट. सत्येनावाप्यते. ९ ख. ङ. च. छ. झ. ञ. ट. धर्मस्यैवाभि. ग. घ. ज. धर्मस्यहित. क. सधर्मस्याभि. १० क. ख. ङ—झ. ट. ममार्येमं. ११ घ. ज. यदिनत्वं. १२ क. ग. घ. ज. चक्रान्तरंगतः. ङ. चक्रान्तरेयथा. १३ ङ. झ. ट. विकलाभ्यां. छ. विकृताभ्यां. १४ ख. घ. ङ. छ. झ. ट. संत्यजामि. १५ घ. ज. वापि. १६ ङ. छ. झ. ट. अभिषेकायहिजनः.

रामाभिषेकसंभारैस्तदर्थमुपकल्पितैः ॥ रामः कारयितव्यो मे मृतस्य सलिलक्रियाम् ॥ १६ ॥
[1]त्वया सपुत्रया नैव कर्तव्या सलिलक्रिया ॥ व्याहन्तास्यशुभाचारे यदि रामाभिषेचनम् ॥ १७ ॥
[2]न च शक्नोम्यहं द्रष्टुं दृष्ट्वा पूर्वं तथा[3]सुखम् ॥ हतहर्षं [4]निरानन्दं [5]पुनर्जनमवाङ्मुखम् ॥ १८ ॥
तां [6]तथा ब्रुवतस्तस्य भूमिपस्य महात्मनः ॥ प्रभाता शर्वरी पुण्या चन्द्र[7]नक्षत्रशालिनी ॥ १९ ॥
ततः पापसमाचारा कैकेयी पार्थिवं पुनः ॥ उवाच परुषं वाक्यं वाक्यज्ञा रो[8]षमूर्च्छिता ॥ २० ॥
किमिदं भाषसे [9]राजन्वाक्यं गररुजोपमम् ॥ आनाययितुमक्लिष्टं [10]पुत्रं राममिहार्हसि ॥ २१ ॥
स्थाप्य राज्ये मम सुतं कृत्वा रामं वनेचरम् ॥ निस्सपत्नां च मां कृत्वा कृतकृत्यो भविष्यसि ॥ २२ ॥
स [11]तुन्न इव तीक्ष्णेन प्रतोदेन हयोत्तमः ॥ राजा प्रचोदितोऽभीक्ष्णं [12]कैकेयीमिदमब्रवीत् ॥ २३ ॥
धर्मबन्धेन बद्धोस्मि नष्टा च मम चेतना ॥ [13]ज्येष्ठं पुत्रं प्रियं रामं द्रष्टुमिच्छामि धार्मिकम् ॥ २४ ॥
ततः प्रभातां रजनीमुदिते च दिवाकरे ॥ पुण्ये नक्षत्रयोगे च मुहूर्ते च [14]समाहिते ॥ २५ ॥
वसिष्ठो गुणसंपन्नः शिष्यैः परिवृत[15]स्तदा ॥ उपगृह्याशु संभारान्प्रविवेश पुरोत्तमम् ॥ २६ ॥
सिक्तसंमार्जितपथां पताकोत्तमभूषिताम् ॥ वि[16]चित्रकुसुमाकीर्णां नानास्रग्भि[17]र्विराजिताम् ॥ २७ ॥
संहृष्टमनुजोपेतां समृद्धविपणापणाम् ॥ महो[18]त्सवसमाकीर्णां राघवार्थे समुत्सुकाम् ॥ २८ ॥
चन्दनागरुधूपैश्च सर्वतः परिधूपिताम् ॥ तां पुरीं समतिक्रम्य पुरंदरपुरोपमाम् ॥ २९ ॥
ददर्शान्तःपुरं[19] श्रेष्ठं नानाद्विजगणायुतम् ॥ पौरजानपदाकीर्णं ब्राह्मणैरुपशोभितम् ॥
[20]यज्ञविद्भिः सुसंपूर्णं [21]सदस्यैः परमद्विजैः ॥ ३० ॥

ष्यतीतिसंबन्धः ॥ १५ ॥ तदर्थं रामाभिषेकार्थं। उपकल्पितैः रामाभिषेकसंभारैः रामाभिषेकसामग्रीभिः सहगुरुजनस्त्वरयिष्यतीतिपूर्वेणसंबन्धः। यद्वा अभिषेकसामग्र्येवसलिलक्रियासामग्रीभवत्वित्यर्थः ॥१६॥ व्याहन्तासीति लुण्मध्यमपुरुषैकवचनं ॥१७॥ तथासुखं तादृशसुखयुक्तं। जनंदृष्ट्वा पुनः हतहर्षं हतहर्षविकारं । निरानन्दं अतएवावाङ्मुखं जनंद्रष्टुंनशक्नोमि ॥१८॥ तस्यब्रुवतः तस्मिनब्रुवतीत्यर्थः । पुण्येत्युक्तिः अनन्तरं रामदर्शनसंभवात् ॥१९॥ रोषमूर्च्छिता क्रोधेनव्याप्ता ॥ २० ॥ गररुजोपमं विषजनितव्याधिसदृशं । अङ्गरुजोपममितिपाठेसर्वाङ्गव्याप्तमहाव्याधिसदृशमित्यर्थः! अङ्गेतिसंबोधनंवा। अक्लिष्टं अक्लेशंयथाभवतितथा। आनाययितुमितिसंबन्धः ॥ २१—२२ ॥ तुन्नः व्यथितः । प्रतोदेन तोत्रेण । अभीक्ष्णं पुनःपुनः। "पुनःपुनश्शश्वदभीक्ष्णमसकृत्समाः" इत्यमरः ॥ २३ ॥ धर्मबन्धेन धर्मपाशेन बद्धोस्मीत्यनेनरामविवासनंमनागनुज्ञातं । द्रष्टुमिच्छामि गमनात्पूर्वमितिशेषः ॥ २४ ॥ ततइत्यादिपरमद्विजैरित्यन्तमेकंवाक्यं । प्रभातांरजनीं प्रभातायांरजन्यां । समाहिते सन्निहितेसति ॥ २५ ॥ प्रविवेशपुरोत्तममित्यनेनवसिष्ठोनगरबाह्यसरय्वांस्नानाद्यनुष्ठानंकृत्वा पुरींप्रविष्टवानित्यवगम्यते ॥२६—२७॥ समृद्धविप-

---

क्रोधातिशयेनोक्तमेवार्थंपुनराह—**सपुत्रयेति** ॥ १७ ॥ ति० तथासुखं तादृशसुखवन्तं । ऊर्ध्वविकसितमुखं ॥ १८ ॥ ति० कृतकृत्यः कृतशौचादिकृत्यः । "कृत्ये" इत्यावश्यकेकृत्यप्रत्ययः ॥ २२ ॥ ति० यष्टिमद्भिरितिब्राह्मणविशेषणम् । "धारयेद्वैणवींयष्टिं" इतिस्नातकधर्मप्रकरणोक्तेः । यद्वा यष्टिमद्भिरित्यस्य तद्धरैराजसेवकैरित्यर्थः ॥ ३० ॥

[पा०] १ क. ख. ग. ङ. च. छ. झ. ञ. ट. सपुत्रयात्वया. २ च. ज. नचशक्तोस्म्यहं. क. छ. झ. ञ. ट. नशक्तोद्यास्म्यहं. ख. अशक्तोस्म्यशुभं. ३ घ. झ. मुखम्. ४ झ. तथानन्दं. ५ ख. पुनर्दीन. ६ ज. कथां. ७ घ. ङ. च. छ. झ. ञ. ट. मालिनी. ८ ग. घ. ज. क्रोध. ९ ख. ग. घ. वाक्यमङ्गरुजोपमम्. क. मेऽङ्गरुजोपमम्. १० क. रामंपुत्र. ११ ख. ङ. च. छ. झ. ञ. ट. तुन्नइव. १२ ङ. छ. झ. ट. कैकेय्यावाक्यं. १३ ख. ज्येष्ठपुत्रं. १४ क.—ट. समागते. १५ ङ. छ. झ. ट. स्तथा. १६ च. कुसुमोत्कीर्णां. क. कुसुमास्तीर्णां. १७ क. ख. च. छ. भूषिताम्. १८ ङ. छ. झ. ट. समायुक्तां. १९ ख. पुरश्रेष्ठं. ङ. च. छ. ट. पुरंश्रीमन्नाना. झ. ञ. पुरंश्रीनानानाध्वज. २० ङ. छ. झ. ट. यष्टिमद्भिः. २१ ङ. झ. ट. सदश्वैः परमार्चितैः. च. ञ. सदस्यैःपरमार्चितैः

तदन्तःपुरमासाद्य व्यतिचक्राम तं जनम् ॥ वसिष्ठः परमप्रीतः [1]परमर्षिर्विवेश च ॥ ३१ ॥
स त्वपश्यद्विनिष्क्रान्तं सुमन्त्रं नाम सारथिम् ॥ द्वारे तु [2]राजसिंहस्य सचिवं प्रियदर्शनम् ॥ ३२ ॥
तमुवाच महातेजाः सूतपुत्रं विशारदम् ॥ वसिष्ठः क्षिप्रमाचक्ष्व नृपतेर्मामिहागतम् ॥ ३३ ॥
इमे गङ्गोदकघटाः [3]सागरेभ्यश्च काञ्चनाः ॥ औदुंवरं भद्रपीठमभिषेकार्थ[4]माहृतम् ॥ ३४ ॥
सर्ववीजानि गन्धाश्च रत्नानि विविधानि च ॥ क्षौद्रं दधि घृतं लाजा दर्भाः सुमनसः पयः ॥३५॥
अष्टौ च [5]कन्या रुचिरा मत्तश्च वरवारणः ॥ चतुरश्वो रथः श्रीमान्निस्त्रिंशो धनुरुत्तमम् ॥ ३६ ॥
वाहनं नरसंयुक्तं छत्रं च शशिसन्निभम् ॥ [6]श्वेते च वालव्यजने भृङ्गारश्च हिरण्मयः ॥ ३७ ॥
हेमदामपिनद्धश्च ककुद्मान्पाण्डुरो वृषः ॥ केसरी च चतुर्दंष्ट्रो हरिश्रेष्ठो महावलः ॥ ३८ ॥
सिंहासनं व्याघ्रतनुः [8]समिद्धश्च हुताशनः ॥ [9]सर्ववादित्रसङ्घाश्च [10]वेश्याश्चालङ्कृताः स्त्रियः ॥ ३९ ॥
आचार्या ब्राह्मणा गावः पुण्याश्च मृगपक्षिणः ॥ पौरजानपदश्रेष्ठा नैगमाश्च गणैः सह ॥ ४० ॥
एते चान्ये च वहवः प्रीयमाणाः प्रियंवदाः ॥ अभिषेकाय रामस्य सह तिष्ठन्ति पार्थिवैः ॥ ४१ ॥
त्वरयस्व महाराजं यथा समुदितेऽहनि ॥ [11]पुण्ये नक्षत्रयोगे च रामो राज्यमवाप्नुयात् ॥ ४२ ॥
इति तस्य वचः श्रुत्वा सूतपुत्रो [12]महात्मनः ॥ स्तुवन्नृपतिशार्दूलं प्रविवेश निवेशनम् ॥ ४३ ॥
तं तु पूर्वोदितं वृद्धं द्वारस्था [13]राजसंमतम् ॥ न शेकुरभिसंरोद्धुं राज्ञः प्रियचिकीर्षवः ॥ ४४ ॥
स समीपस्थितो राज्ञस्तामवस्थामजज्ञिवान् ॥ वाग्भिः परमतुष्टा[14]भिरभिष्टोतुं प्रचक्रमे ॥ ४५ ॥
ततः सूतो [15]यथाकालं पार्थिवस्य निवेशने ॥ सुमन्त्रः प्राञ्जलिर्भूत्वा तुष्टाव जगतीपतिम् ॥ ४६ ॥
यथा नन्दति तेजस्वी सागरो भास्करोदये ॥ प्रीतः प्रीतेन मनसा तथाऽऽ[16]नन्दघनः स्वतः ॥४७॥

णापणां समृद्धाःविपणाःविक्रय्याःयेषांतेसमृद्धविपणाः आपणाःनिषद्याःयस्यांतां। समुत्सुकां समुत्सुकजनां ॥ २८—३० ॥ तंजनं पौरादिजनं । व्यतिचक्रामेत्यनेनान्तःपुरद्वारवेदिकांप्राप्तइतिगम्यते। विवेश वेदिकायामितिशेषः ॥ ३१ ॥ विनिष्क्रान्तं स्वगृहादिति शेषः । द्वारे अन्तःपुरद्वारे । प्रियदर्शनमित्यनेनाभिषेकार्थमात्मानमलङ्कृत्यागतइत्युक्तं ॥ ३२ ॥ क्षिप्रमाचक्ष्वेति वसिष्ठःप्रोवाचेतिसंवन्धः॥ ३३ ॥ काञ्चनाः काञ्चनमयाः। गङ्गोदकघटाः गङ्गोदकपूर्णघटाः। अत्र आहृतमित्येतद्वचनव्यत्ययेनसंवध्यते। इमेइतिच्छेदमपि। सागरेभ्यआहृताइमेउदकघटाइत्यध्याहारेणयोज्यं ॥ ३४ ॥ क्षौद्रं मधु ॥ ३५ ॥ चतुरश्वोरथःश्रीमान्निस्त्रिंशोधनुरुत्तममित्यत्र तु इतिगायत्र्याश्चतुर्थाक्षरं । निस्त्रिंशः खड्गः ॥३६॥ भृङ्गारः कनकालुका ॥३७॥ केसरी प्रशस्तकेसरः। हरिश्रेष्ठः अश्वोत्तमः॥३८–३९॥ व्याघ्रतनुः व्याघ्रचर्मेत्यर्थः । नैगमाः वणिजः । "नैगमोवाणिजोवणिक्" इत्यमरः ॥४०—४१॥ समुदिते सम्यग्व्यक्ते ॥ ४२—४३ ॥ पूर्वोदितं अयंसर्वदा अनिवार्यइति राज्ञापूर्वमुक्तं ॥ ४४ ॥ अजज्ञिवान् अज्ञातवान् ॥ ४५ ॥ यथाकालं प्रातःकालार्हं ॥४६॥ भास्करोदयेपिसमुद्रवृद्धिरस्त्येव । यद्वा भासःकरोती-

---

ति० भृङ्गारः कनकालुका । दत्तूरकुसुमसदृशहिरण्मयपात्रं ॥ ३७ ॥ ती० नैगमाः श्रेणीमुख्याः अध्यापकाश्च ॥ ४० ॥ ती० भास्करोदये भासःकरोतीतिव्युत्पत्त्याभास्करः पूर्णचन्द्रः तस्योदये । प्रीतेन प्रतिफलितचन्द्रतेजसाप्रीतेन ।

[पा०] १ ङ. च. झ. ञ. परमर्षिभिरावृतः. क. ङ. ज. परमर्षिर्विवेशह. २ क—छ. झ. ञ. ट. मनुजसिंहस्य. ३ घ. समुद्रेभ्यश्च. ४ ख. छ. मागतम्. ५ ख. रुचिराःकन्याः. ६ छ. श्वेतंचवालव्यजनं. ७ ङ. च. छ. झ. ञ. भृङ्गारंचहिरण्मयम्. ट. भृङ्गारंचहिरण्मयम्. ८ ङ. च. छ. झ. ञ. ट. समिधश्च. ९ ङ. च. छ. झ. ञ. ट. सर्वे. १० क. ख. वैश्याश्च. ११ ङ. च. छ. झ. ञ. ट. पुष्ये. १२ झ. ट. महावलः. १३ ख. ङ—ट. राजसंमताः. १४ ख. ग. घ. ज. सान्त्वाभिः. घ. हृद्याभिः. १५ ङ. छ. झ. ट. यथापूर्वं. १६ क—ट. नन्दयनरस्ततः ग. घ. ज. नन्दयनस्सदा. ख. ङ. छ. झ. ञ. ट. नन्दयनस्ततः. क. च. नन्दयनस्तथा.

इन्द्रमस्यां तु वेलायामभितुष्टाव मातलिः ॥ सो[1]ऽजयद्दानवान्सर्वांस्तथा त्वां बोधयाम्यहम् ॥ ४८ ॥
वेदाः [2]सहाङ्गविद्याश्च यथा [3]ह्यात्मभुवं विभुम् ॥ ब्रह्माणं बोधयन्त्यद्य तथा त्वां बोधयाम्यहम् ॥४९॥
आदि[4]त्यः सह चन्द्रेण यथा भूतधरां शुभाम् ॥ [5]बोधयत्यद्य पृथिवीं तथा त्वां बोधयाम्यहम् ॥५०॥
[6]उत्तिष्ठाशु महाराज कृतकौतुकमङ्गलः ॥ विराजमानो वपुषा मेरोरिव दिवाकरः ॥ ५१ ॥
सोमसूर्यौ च काकुत्स्थ शिववैश्रवणावपि ॥ वरुणश्चाग्निरिन्द्रश्च विजयं प्रदिशन्तु ते ॥ ५२ ॥
गता भगवती [7]रात्रिः कृतं कृत्यमिदं तव ॥ [8]बुध्यस्व नृपशार्दूल [9]कुरु कार्यमनन्तरम् ॥ ५३ ॥
[10]उदतिष्ठत रामस्य समग्रमभिषेचनम् ॥ [11]पौरजानपदैश्चापि नैगमैश्च [12]कृताञ्जलिः ॥ ५४ ॥
[13]स्वयं वसिष्ठो भगवान्ब्राह्मणैः सह तिष्ठति ॥ क्षिप्रमाज्ञाप्यतां राजन्राघवस्याभिषेचनम् ॥ ५५ ॥
यथा [14]ह्यपालाः पशवो यथा सेना [15]ह्यनायका ॥ यथा चन्द्रं विना रात्रिर्यथा गावो विना वृषम् ॥५६॥
एवं हि [16]भवता राष्ट्रं यत्र राजा न [17]दृश्यते ॥ ५७ ॥
इति[18] तस्य वचः श्रुत्वा सान्त्वपूर्वमि[19]वार्थवत् ॥ [20]अभ्यकीर्यत शोकेन भूय एव महीपतिः ॥ ५८ ॥
[21]ततः स राजा तं सूतं सन्नहर्षः सुतं प्रति ॥ शोकरक्तेक्षणः श्रीमानुद्वीक्ष्योवाच धार्मिकः ॥
वाक्यैस्तु खलु मर्माणि [22]मम भूयो निकृन्तसि ॥ ५९ ॥

तिव्युत्पत्त्याभास्करश्चन्द्रः ॥ ४७—४८ ॥ सहाङ्गविद्याः अङ्गभूतशिक्षादिविद्यासहिताः । ब्रह्माणंबोधयन्ति सृष्ट्युपयोगितत्तदर्थबोधंजनयन्ति । तथाहमनुः "नामरूपंचभूतानांकृत्यानांचप्रपञ्चनं । वेदशब्देभ्यएवादौदेवादीनांचकारसः" इति ॥ ४९ ॥ भूतधरां सर्वप्राणिधरां । पृथिवींबोधयति । विशेषणद्वारापृथ्वीबोधनं । अद्यबोधयामीत्यन्वयः ॥ ५० ॥ कृतकौतुकमङ्गलः कृतंकौतुकहेतुभूतंमङ्गलाचरणंयेनसतथोक्तः । सर्वानन्दोत्पादनायकृतदेहालङ्कारइत्यर्थः । यद्वा कौतुकं उत्सवः कृतोत्सवार्थमङ्गलानुष्ठानइत्यर्थः । मेरोर्दिवाकरइव दिवाकरस्यप्रधानमेरोरुत्थानं मेरुसंबद्धरथाक्षद्वारेतिज्ञेयं ॥ ५१—५२ ॥ सर्वानन्दकररामाभिषेकमहोत्सवोपयुक्तत्वाद्रात्रिर्भगवतीति स्तूयते ॥ ५३॥ उदतिष्ठतेति । "उदोनूर्ध्वकर्मणि" इत्यात्मनेपदं । उपस्थितमित्यर्थः । अभिषेचनं अभिषेकसाधनं । उपतिष्ठतीतिपाठान्तरम् ॥ ५४—५७ ॥ सान्त्वपूर्वं सामपूर्वं । "सामसान्त्वं" इत्यमरः । अर्थवदितिनिर्देशः प्रातःकालप्रबोधस्यसर्वविजयहेतुत्वान् ॥ ५८ ॥ सुतंप्रतिसन्नहर्षः नष्टहर्षः । भूयोनिकृन्तसि कैकेयीवाक्यकृत्तानिमर्माणिभूयोप्यनुचितकालस्तुतिभिर्निकृन्तसीत्यर्थः । अत्रइतिशब्दोध्याहार्यः

मनसा प्रीतःसागरोयथानन्दतितथाआनन्दघनः आनन्दपूर्णस्सन्त्वतोनन्द नन्दय । प्रजाइतिशेषः । तथानन्दघनइत्यत्र नन्दआनन्दघनइतितन्त्रेणपदच्छेदः । ति० भास्करोदये तत्काले प्रत्यूर्मिप्रतिफलितरवितेजसातेजस्वीसागरोयथात्मातुकामानानन्दतिनन्दयतितथानोस्मान्प्रीतेनतुष्टेनमनसाप्रीतः अस्मद्विषयकप्रीत्याश्रयस्सन् नन्दय । यत्तु भास्करश्चन्द्रइति तत्प्रसिद्धिविरुद्धम् । शि० अभास्करइतिच्छेदः । भास्करसदृशइत्यर्थः । सचन्द्रएवेतिकेचित् ॥ ४७ ॥ ति० यथाचन्द्रसहितोरविःउदयास्तमयाभ्यां पृथिवीं तत्स्थंजनंबोधयतितद्वच्च ॥ ५० ॥ ति० नैगमोवणिग्वर्गः ॥ ५४ ॥

[पा०] १ ख. योऽजयत्. २ क. ख. घ—ट. सहाङ्गाः. ग. साङ्गाश्च. ३ च. चात्मभुवं. ङ. स्वात्मभुवं. ख. ह्यात्मभवं. क. ख. ग. ङ. च. छ. झ. ञ. ट. भुवंप्रभुम्. ४ क. च. आदित्याः. ५ च. बोधयन्त्यत्र. क. बोधयन्त्यद्य. ६ च. उत्तिष्ठत्वं. ङ. छ. झ. ञ. उत्तिष्ठसुमहा. ७ ख. ग. घ. च. ज. ञ. रात्रिरहश्शिवमुपस्थितम्. ८ ख. ग. घ—च. ज. ञ. ट. प्रतिबुध्यस्वराजर्षे. ९ च. ञ. कृत्यंमहदुपस्थितम्. ज. कृत्यंकृतमिदंतव. ख. ग. घ. ट. कृतंकृत्यमिदंतव. १० क. ख. घ. च. ज. उपतिष्ठति. ११ ङ. छ. झ. जानपदाश्चापिनैगमाश्च. ट. जानपदश्चापिनैगमश्च. घ. जानपदैश्चैव. १२ क. च. ञ. कृतात्मभिः. १३ क. ख. ङ. च. छ. झ. ञ. ट. अयं. १४ ख. ह्यगोपाः. १५ क. ग. च. छ. ट. ह्यनायकाः. घ. ह्यपालकाः. १६ घ. भवता. १७ ख. विद्यते. १८ ङ. छ. झ. ट. एवं. १९ च. मिहार्थवत्. २० ग. अभ्युदीर्यत. २१ ङ. छ. झ. ञ. ट. ततस्तु. २२ घ. ममभूयोनिकृन्तसे. क. ख. भूयएवनिकृन्तसि.

सुमन्त्रः करुणं श्रुत्वा दृष्ट्वा दीनं च पार्थिवम् ॥ प्रगृहीताञ्जलिः किंचित्तस्माद्देशादपाक्रमत् ॥ ६० ॥
यदा वक्तुं स्वयं दैन्यान्न शशाक महीपतिः ॥ तदा सुमन्त्रं मन्त्रज्ञा कैकेयी प्रत्युवाच ह ॥ ६१ ॥
सुमन्त्र राजा रजनीं [1]रामहर्षसमुत्सुकः ॥ प्रजागरपरिश्रान्तो [2]निद्राया वशमेयिवान् ॥ ६२ ॥
तद्गच्छ त्वरितं सूत राजपुत्रं यशस्विनम् ॥ राममानय भद्रं ते नात्र कार्या विचारणा ॥ ६३ ॥
[[3]अश्रुत्वा राजवचनं कथं गच्छामि भामिनि ॥ तच्छ्रुत्वा मन्त्रिणो वाक्यं राजा मन्त्रिणमब्रवीत् ॥
सुमन्त्र रामं द्रक्ष्यामि शीघ्रमानय सुन्दरम्] ॥ ६४ ॥
स मन्यमानः कल्याणं हृदयेन ननन्द च ॥ निर्जगाम च [4]संप्रीत्या [5]त्वरितो राजशासनात् ॥ ६५ ॥
सुमन्त्रश्चिन्तयामास [5]त्वरितं चोदितस्तया ॥ व्यक्तं [6]रामाभिषेकार्थमि[7]हायास्यति [8]धर्मवित् ॥ ६६ ॥
इति सूतो मतिं कृत्वा हर्षेण महता [9]वृतः ॥ निर्जगाम [10]महाबाहू राघवस्य दिदृक्षया ॥ ६७ ॥
सागरह्रदसङ्काशात्सुमन्त्रोऽन्तःपुराच्छुभात् ॥ निष्क्रम्य [11]जनसंबाधं ददर्श द्वारमग्रतः ॥ ६८ ॥
ततः पुरस्तात्सहसा [12]विनिर्गतो [13]महीपतीन्द्वारगतो विलोकयन् ॥
ददर्श पौरान्विविधान्महाधनानुपस्थितान्द्वार[14]मुपेत्य वि[15]ष्ठितान् ॥ ६९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे चतुर्दशः सर्गः ॥ १४ ॥

॥ ५९ ॥ करुणं दीनवाक्यं ॥ ६० ॥ मन्त्रज्ञा राजनीत्यनुसारेणस्वकार्योचितविचारज्ञेत्यर्थः ॥ ६१ ॥ रजनीमितिअत्यन्तसंयोगेद्वितीया । प्रजागरो निद्राक्षयः ॥ ६२ ॥ विचारणेत्यनन्तरमितिशब्दोऽध्याहर्तव्यः । इतिप्रत्युवाचेत्यन्वयः ॥ ६३—६४ ॥ राजशासनादित्युक्तिः राजसंमतमितिबुद्ध्या ॥ ६५— ६७ ॥ सागरह्रदः समुद्रान्तर्गतह्रदः । पुरान्तर्वर्त्यन्तःपुरत्वात्समुद्रस्थह्रदौपम्यं । जनसंबाधं जनैर्निबिडं ॥ ६८ ॥ पुरस्तात् अग्रे । महीपतीन्विलोकयन् पश्चात्पौरान्ददर्श ॥ महाधनान् उपहारपाणीन् । उपस्थितान् उपस्थानं सद्यः कुर्वतः ॥ ६९ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीतांबराख्याने अयोध्याकाण्डव्याख्याने चतुर्दशःसर्गः ॥ १४ ॥

ति० कल्याणंमन्यमानःकदाचिद्रामंदृष्ट्वातस्मिन्प्रीतिंकरिष्यतीतिमन्यमानः । यद्वाअस्मिन्नवसरेरामदर्शनमेवकल्याणंमन्यमानः । मृतिसमयत्वात् । यद्वादेवानामृषीणांचकल्याणंमन्यमानः । अतएवहृदयेनननन्दनतुबहिस्तच्चिह्नमितिभावः ॥ ६५ ॥ ति० निर्गमनकालेपुनस्त्वरितमानयेतितयाकैकेय्याप्रेरितश्चिन्तयामास । किमिलंषाभूयस्त्वरयतीतिचिन्ता । व्यक्तंरामाभिषेकार्थमेवैपालरयति । इहधर्मराट् दशरथः । आयस्यति आयासवान्भवति । प्रयासबाहुल्यंनप्रायोबहिर्नागमिष्यतीतिमतिंकृत्वेत्यन्वयः । शि० धर्मराट् दशरथः । इह अभिषेकशालायां । व्यक्तंयथास्यात्तथाआयास्यति इतिमतिंकृत्वा ॥६६॥ ति० महीपतेर्द्वारगतान् अधिकारिणः । विलोकयन् ॥ ६९ ॥ इतिचतुर्दशस्सर्गः ॥ १४ ॥

[पा०] १ घ. कामहर्ष. २ ङ. छ. झ. ट. निद्रावशमुपागतः. क—घ. च. ज. ञ. निद्रायावशमागतः. ३ इदमर्धत्रयं ङ. च. छ. झ. ञ. ट. दृश्यते. ४ क. ङ. छ. झ. ञ. ट. सप्रीत्या. ५ क. ख. ग. घ. त्वरितश्चोदितः. ६ ङ. छ. झ. ट. रामाभिषेकार्थे. क. ख. घ. ज. रामोभिषेकार्थं. ७ ट. मिहायस्यति. ८ ङ. छ. झ. ट. धर्मराट्. क. ख. च. ञ. धर्मभाक्. ९ ङ. छ. झ. ट. पुनः. १० ङ. छ. झ. ञ. ट. महातेजाः. ज. महावेगात्. ११ क. ज. संबाधां. १२ क. ख. ङ. च. छ. झ. ञ. ट. विनिःसृतो. १३ क. महीभृतो. क. घ. ङ. छ. झ. ञ. ट. महीपतेर्द्वारगतान्. ख. महीपतिद्वारगतान्. १४ क. घ. च. ज. ञ. महाजनान्. १५ ख. झ. निष्ठितान्.

पञ्चदशः सर्गः ॥ १५ ॥

रामानयनायान्तःपुरान्निर्गच्छतासुमन्त्रेणाभिषेचनिकसामग्रीसज्जीकरणपूर्वकंराजागमनप्रतीक्षणेनद्वारितिष्ठतांब्राह्मणादीनामुपायनपाणीनांमहीपतीनांचावलोकनेनपुनरन्तःपुरप्रवेशेनस्तुतिपूर्वकंराज्ञितन्निवेदनम् ॥ १ ॥ तथापुनर्दशरथचोदनयारामानयनायतदन्तःपुरप्रवेशनम् ॥ २ ॥

ते तु तां रजनीमुष्य ब्राह्मणा वेदपारगाः ॥ उपतस्थुरुपस्थानं सहराजपुरोहिताः ॥ १ ॥
अमात्या बलमुख्याश्च मुख्या ये निगमस्य च ॥ राघवस्याभिषेकार्थे प्रीयमाणास्तु सङ्गताः ॥ २ ॥
उदिते विमले सूर्ये पुष्ये चाभ्यागतेऽहनि ॥ लग्ने कर्कटके प्राप्ते जन्म रामस्य च स्थिते ॥
अभिषेकाय रामस्य द्विजेन्द्रैरुपकल्पितम् ॥ ३ ॥
काञ्चना जलकुंभाश्च भद्रपीठं स्वलंकृतम् ॥ रथश्च सम्यगास्तीर्णो भास्वता व्याघ्रचर्मणा ॥ ४ ॥
गङ्गायमुनयोः पुण्यात्सङ्गमादाहृतं जलम् ॥ याश्चान्याः सरितः पुण्या ह्रदाः कूपाः सरांसि च ॥५॥
प्राग्वाहाश्चोर्ध्ववाहाश्च तिर्यग्वाहास्समाहिताः ॥ ताभ्यश्चैवाहृतं तोयं समुद्रेभ्यश्च सर्वशः ॥ ६ ॥
[अष्टौ च कन्या रुचिरा मत्तश्च वरवारणः] ॥ सलाजाः क्षीरिभिश्छन्ना घटाः काञ्चनराजताः ॥
पद्मोत्पलयुता भान्ति पूर्णाः परमवारिणा ॥ ७ ॥
क्षौद्रं दधि घृतं लाजा दर्भाः सुमनसः पयः ॥ वेश्याश्चैव शुभाचाराः सर्वाभरणभूषिताः ॥
[लीलावत्यः सुभ्रुवश्च लोलनेत्राश्च सर्वशः] ॥ ८ ॥
चन्द्रांशुविकचप्रख्यं काञ्चनं रत्नभूषितम् ॥ सज्जं तिष्ठति रामस्य वालव्यजनमुत्तमम् ॥ ९ ॥
चन्द्रमण्डलसंकाशमातपत्रं च पाण्डुरम् ॥ सज्जं द्युतिकरं श्रीमदभिषेकपुरस्कृतम् ॥ १० ॥
पाण्डुरश्च वृषः सज्जः पाण्डुरोऽश्वश्च संस्थितः ॥ प्रसृतश्च गजः श्रीमानौपवाह्यः प्रतीक्षते ॥ ११ ॥

अथरामाभिषेकसामग्रीसन्निधानमाहपञ्चदशे । उष्य उषित्वा । उपस्थानं सदः ॥ १ ॥ निगमस्य पुरस्य । "निगमोनिश्चयेवेदेपुरेपथिवणिक्पथे" इतिवैजयन्ती ॥ २ ॥ उपकल्पितं अभिषेकार्थद्रव्यजातमितिशेषः ॥३॥ उपकल्पितमेवप्रपञ्चयति—काञ्चनाइत्यादि । अत्रभान्तीत्यनुषज्यते ॥ ४ ॥ आहृतं वर्ततइतिशेषः । याश्चान्यास्सरितइत्यत्रताभ्यश्चेत्यनुकृष्याहृतमितिपूर्वेणसंबन्धः । येचह्रदाःकूपाः यानिसरांसि अत्रतुतेभ्यइत्यध्याहारः । आहृतंजलमितिपूर्वेणसंबन्धः ॥ ५ ॥ प्राग्वाहाः पूर्वाभिमुखप्रवाहाः । गोदावरीकावेर्यादयः । ऊर्ध्ववाहाः ऊर्ध्वोद्गतप्रवाहाः । नैमिषारण्यस्थब्रह्मावर्तरुद्रावर्तादिसरोविशेषाः । ऊर्ध्ववाहाः प्रत्यग्वाहाः इत्यप्याहुः । ऊर्ध्वाद्वहन्तीत्यूर्ध्ववाहाःनिर्झराइतिकेचित् । तिर्यग्वाहाः दक्षिणोत्तराभिमुखप्रवाहाः । गण्डकीशोणभद्रादयः ॥ ६ ॥ क्षीरिभिः अश्वत्थोदुंबरादिभिः । पूर्वंजलकुंभमात्रमुक्तं अत्रतद्विशेषइतिनपुनरुक्तिः ॥ ७ ॥ क्षौद्रं मधु । सुमनसः कुसुमानि । शुभाचाराः अञ्जनस्रगलङ्करणादिमङ्गलवेषयुक्ताः ॥ ८ ॥ चन्द्रांशुविकचप्रख्यं विकचचन्द्रांशुसदृशं । विकचत्वंविस्तृतत्वं। यद्वा चन्द्रांशवइवविकचाविस्तृताप्रख्याकान्तिर्यस्यतत्तथा । काञ्चनं काञ्चनदण्डं । सज्जं गन्धपुष्पादिभिरलङ्कृतं ॥ ९ ॥ अभिषेकपुरस्कृतं अभिषेकायपुरस्कृतं ॥१०॥ प्रसृतः प्रकर्षेणस्रवन्मदः । औपवाह्यः राजवाह्यः ।

ति०उपस्थानं राजद्वारं । अधिकरणेल्युट् ॥ १ ॥ ति० निगमः वणिक्समूहः ॥ २ ॥ ति० रामस्यजन्म जन्मनिस्थितेजन्मकालस्थेकर्कटलग्नेचप्राप्ते ॥ ३ ॥ अभिषेकाय अभिषेकार्थं । उपकरणं उपकल्पितं सिद्धमित्यर्थः । जलकुंभाःआनीताः । अलङ्कृतंभद्रपीठंस्थापितं ॥४॥ ति० क्षीरिणः।क्षीरपूर्णाः। क्षीरमत्रजलं । ङीबभावआर्षः । स० नदाइत्यध्याहृत्यलिङ्गानुपपत्तिंकेचित्प रि-

[पा०] १ घ.च.छ. येचान्ये. २ घ. अभिषेकार्थं. ३ क.ङ.छ.झ.ञ.ट. स्सुसंगताः. ४ क. द्विजश्चपरि. ५ ङ.छ.झ. ञ. ट. तिर्यग्वाहाश्चक्षीरिणः. ६ इदमर्धं झ. दृश्यते. ७ ङ. छ. ज. झ. ञ. ट. सजलाः. ८ इदमर्धं ग. घ. च. ज. दृश्यते. ९ ङ. च. छ. झ. ट. पाण्डुरं. १० ङ.च.छ.झ. ञ. ट. पुरस्सरम्. ११ च.छ.झ.ञ.ट. पाण्डुराश्वश्च. १२ क.ग. घ. ज. सुस्थितः.

अष्टौ च कन्या माङ्गल्याः सर्वाभरणभूषिताः ॥ वादित्राणि च सर्वाणि वन्दिनश्च तथाऽपरे ॥ १२ ॥
इक्ष्वाकूणां यथा राज्ये संभ्रियेताभिषेचनम् ॥ तथाजातीयमादाय राजपुत्राभिषेचनम् ॥ १३ ॥
ते राजवचनात्तत्र समवेता महीपतिम् ॥ अपश्यन्तोऽब्रुवन्को नु राज्ञो नः प्रतिवेदयेत् ॥ १४ ॥
न पश्यामश्च राजानमुदितश्च दिवाकरः ॥ यौवराज्याभिषेकश्च सज्जो रामस्य धीमतः ॥ १५ ॥
इति तेषु ब्रुवाणेषु सार्वभौमान्महीपतीन् ॥ अब्रवीत्तानिदं सर्वान्सुमन्त्रो राजसत्कृतः ॥ १६ ॥
रामं राज्ञो नियोगेन त्वरया प्रस्थितोऽस्म्यहम् ॥ पूज्या राज्ञो भवन्तस्तु रामस्य च विशेषतः ॥१७॥
अयं पृच्छामि वचनात्सुखमायुष्मतामहम् ॥ राज्ञः संप्रतिबुद्धस्य यच्चागमनकारणम् ॥ १८ ॥
इत्युक्त्वाऽन्तःपुरद्वारमाजगाम पुराणवित् ॥ सदाऽसक्तं च तद्वेश्म सुमन्त्रः प्रविवेश ह ॥ १९ ॥
तुष्टावास्य तदा वंशं प्रविश्य स विशांपतेः ॥ शयनीयं नरेन्द्रस्य तदासाद्य व्यतिष्ठत ॥ २० ॥
सोत्यासाद्य तु तद्वेश्म तिरस्करणिमन्तरा ॥ आशीर्भिर्गुणयुक्ताभिरभितुष्टाव राघवम् ॥ २१ ॥
सोमसूर्यौ च काकुत्स्थ शिववैश्रवणावपि ॥ वरुणश्चाग्निरिन्द्रश्च विजयं प्रदिशन्तु ते ॥ २२ ॥
[यथा साङ्गाश्च वेदा वै ब्रह्माणं बोधयन्ति ते ॥ तथा त्वां धीर बोध्यामि ह्युत्तिष्ठ पुरुषर्षभ]॥२३॥
गता भगवती रात्रिः कृतं कृत्यमिदं तव ॥ बुध्यस्व नृपशार्दूल कुरु कार्यमनन्तरम् ॥ २४ ॥
ब्राह्मणा बलमुख्याश्च नैगमाश्चागता नृप ॥ दर्शनं प्रतिकाङ्क्षन्ते प्रतिबुध्यस्व राघव ॥ २५ ॥
स्तुवन्तं तं तदा सूतं सुमन्त्रं मन्त्रकोविदम् ॥ प्रतिबुध्य ततो राजा इदं वचनमब्रवीत् ॥ २६ ॥

"राजवाह्यस्त्वौपवाह्यः" इत्यमरः ॥११॥ माङ्गल्याः मङ्गलार्हाः । वादित्राणि वीणादिचतुर्विधवाद्यानि ॥ १२ ॥ इक्ष्वाकूणांराज्येअभिषेचनमुद्दिश्य यथासंभ्रियेत वस्तुजातमितिशेषः । तथाजातीयं अनर्घरत्नादिवस्तुजातं । आदाय । ते महीपतयः । राजवचनात् राजपुत्राभिषेचनमुद्दिश्य । तत्र राजभवनद्वारे । समवेताः महीपतिसपश्यन्तः राज्ञः कोनु नः प्रतिवेदयेदित्यब्रुवन्निति योजना ॥ १३—१४ ॥ सज्जः संपन्नसाधनइत्यर्थः ॥ १५—१६ ॥ रामंप्रस्थितः आनेतुमितिशेषः । यस्मात्पूज्यास्तस्मात् । आयुष्मतांयुष्माकंवचनात् राज्ञःसुखंपृच्छामि । यच्चागमनकारणं दर्शनायानागमनेहेतुः तं च । अयमविलंबेनपृच्छामि ॥ १७—१८ ॥ पुराणवित् सामन्तराजानुवर्तनरूपपुरातनवृत्तान्तज्ञः । सदाऽसक्तं सर्वदाअनिवारितं ॥ १९ ॥ शयनीयं शयनयोग्यंगृहम् ॥ २० ॥ अत्यासाद्य अतिशयेनप्राप्य । अतिसमीपंप्राप्येत्यर्थः । तिरस्करणिमन्तरा यवनिकामात्रंव्यवधानंकृत्वेत्यर्थः । राघवं दशरथं । पुनःस्तोत्रकरणंसूतस्यविज्ञापनात् पूर्वस्तुतेःकुलधर्मत्वात् ॥ २१—२५ ॥ प्रतिबुध्य

हरन्ति । ति० अभिषेकपुरस्सरं अभिषेकसामग्रीमुख्यं । ती० अभिषेकपुरस्कृतं प्रक्षालितं ॥१०॥ ति० यद्यपिप्रस्थितःतथापि भवन्तोराज्ञोरामस्यचपूज्याइतिकृत्वाऽऽयुष्मतांयुष्माकंवचनात् सर्वेराजानोब्राह्मणादयश्चमहाराजं सुखं सुखशयनंपृच्छन्तीतिविज्ञापयामि । जाग्रतोपिवहिरनागमनकारणंकिमितिचपृच्छन्तीतिविज्ञापयामि ॥ १७–१८ ॥ स० विशां प्रजानां । पतेः पत्युः । ननु कथं पतेरिति । "पतिस्समासएव" इतिसमासेघिसंज्ञाविधानादितिचेन्न । पतिरित्याख्यातःपतिः । णौटिलोपे "अचइः" इत्यौणादिकइः । अयंपतिशब्दः " पतिस्समासएव " इत्यत्रनगृह्यते । लाक्षणिकत्वात् ॥ २० ॥ ति० तिरस्करणिंअन्तरा कृत्वेतिशेषः ॥ २१ ॥ ति० निगमोवाणिज्यंतत्संबन्धिनोनैगमाः ॥ २५ ॥ ति० प्रतिबुध्य जवनिकान्तर्हितमपिसुमन्त्रंध्वनिनाज्ञात्वा ॥२६॥

[पा०] १ क. ख. ग. राज्ञे. २ ङ. छ. झ. ट. सर्वांस्तांश्च. ३ क. ख. ग. ङ. छ. झ. ञ. ट. वाक्यं. ४ घ. राज्ञोतु. ५ च. छ. ज. झ. ञ. ट. ह्यहम्. ६ छ. राज्ञा. घ. भवन्तोराज्ञस्तु. च. झ. ञ. ट. भवन्तश्च. ७ ख. घ. ङ. झ. ट. रामस्यतु. ८ घ. राज्ञस्सुसंप्रबुद्धस्य. ९ ङ. छ. झ. चानागमन. १० ज. तद्वारं. ११ क. ख. च. ञ. सुमन्त्रस्स. १२ क. कृतंवेश्म. १३ अयंश्लोकः क. च. ञ. दृश्यते. १४ क. ख. ग. ङ—ट. रात्रिरहश्शिवमुपस्थितम्. घ. रहश्शिवमुपागतम्. १५ क. ग. च. छ. ञ. नरशार्दूल. ङ. झ. ट. राजशार्दूल. १६ ङ. छ. झ. ट. श्चागतास्त्विह. ख. च. ञ. श्चागतानृपाः. १७ क. ख. ग. ङ. च. छ. झ. ञ. ट. तेऽभिकाङ्क्षन्ते. १८ क. तंस्तुवन्तं. छ. स्तुवन्तंच. घ. संस्तुवन्तं. १९ क. ख. तदा.

राममानय सूतेति यदस्यभिहितोऽनया ॥ किमिदं कारणं येन ममाज्ञा प्रतिहन्यते ॥ २७ ॥
न चैव संप्रसुप्तोऽहमानयेहाशु राघवम् ॥ इति राजा दशरथः सूतं तत्रान्वशात्पुनः ॥ २८ ॥
स राजवचनं श्रुत्वा शिरसा प्रतिपूज्य तम् ॥ निर्जगाम नृपावासान्मन्यमानः प्रियं महत् ॥ २९ ॥
प्रपन्नो राजमार्गं च पताकाध्वजशोभितम् ॥ हृष्टः प्रमुदितः सूतो जगामाशु विलोकयन् ॥ ३० ॥
स सूतस्तत्र शुश्राव रामाधिकरणाः कथाः ॥ अभिषेचनसंयुक्ताः सर्वलोकस्य हृष्टवत् ॥ ३१ ॥
ततो ददर्श रुचिरं कैलासशिखरप्रभम् ॥ रामवेश्म सुमन्त्रस्तु शक्रवेश्मसमप्रभम् ॥ ३२ ॥
महाकवाटविहितं वितर्दिशतशोभितम् ॥ काञ्चनप्रतिमैकाग्रं मणिविद्रुमतोरणम् ॥ ३३ ॥
शारदाभ्रघनप्रख्यं दीप्तमेरुगुहोपमम् ॥ मणिभिर्वरमाल्यानां सुमहद्भिरलंकृतम् ॥ ३४ ॥
मुक्तामणिभिराकीर्णं चन्दनागरुधूपितम् ॥ गन्धान्मनोज्ञान्विसृजद्दार्दुरं शिखरं यथा ॥ ३५ ॥
सारसैश्च मयूरैश्च विनदद्भिर्विराजितम् ॥ सुकृतेहामृगाकीर्णं सुकीर्णं भक्तिभिस्तथा ॥ ३६ ॥
मनश्चक्षुश्च भूतानामाददत्तिग्मतेजसा ॥ चन्द्रभास्करसंकाशं कुबेरभवनोपमम् ॥ ३७ ॥
महेन्द्रधामप्रतिमं नानापक्षिसमाकुलम् ॥ मेरुशृङ्गसमं सूतो रामवेश्म ददर्श ह ॥ ३८ ॥
उपस्थितैः समाकीर्णं जनैरञ्जलिकारिभिः ॥ उपादाय समाक्रान्तैस्तथा जानपदैर्जनैः ॥ ३९ ॥

ज्ञात्वेत्यर्थः ॥ २६—२७ ॥ कैकेय्युक्तं निद्रापरवशस्य राज्ञोनुमतंनवेतिनसंशयितव्यमित्याह—नचेत्यादिना ॥ २८—२९ ॥ हृष्टः रोमाञ्चाञ्चितगात्रः । प्रमुदितः संजातमानसानन्दः ॥ ३० ॥ रामाधिकरणाः राममधिकृत्यप्रवृत्ताः । हृष्टवत् स्वार्थेवतिः ॥ ३१—३२ ॥ महाकवाटविहितं निर्मितमहाकवाटं । वितर्दिशतशोभितं वेदिकाशतशोभितं । "स्याद्वितर्दिस्तु वेदिका" इत्यमरः । काञ्चनप्रतिमैकाग्रं काञ्चनप्रतिमाभिःएकाग्रंनिरन्तरं । यद्वा काञ्चनप्रतिमाभिःएकानिमुख्यानिअग्राणिशिखराग्राणि यस्मिन् तत्तथोक्तं । मणिविद्रुमतोरणं मणिविद्रुमप्रचुरबहिर्द्वारयुक्तं । "तोरणोस्त्रीबहिर्द्वारं" इत्यमरः ॥ ३३ ॥ शारदाभ्रघनप्रख्यं शारदाभ्रमूर्तिसदृशं । "घनोमेघेमूर्तिगुणेत्रिषुमूर्तेनिरन्तरे" इत्यमरः ॥ ३४ ॥ दार्दुरं मलयसंनिकृष्टश्चन्दनोत्पत्तिस्थानभूतोगिरिर्दर्दुरः तत्संबन्धिदार्दुरं ॥ ३५ ॥ सुकृतेहामृगाकीर्णं द्वारभित्तिस्तंभादिषुसुष्ठुरचितैःईहामृगैः वृकैः आकीर्णं । "कोकस्त्वीहामृगो वृकः" इत्यमरः । भक्तिभिःसुकीर्णं सुष्ठुरचितं॥३६॥ तिग्मतेजसा तीव्रतेजसा । "तिग्मंतीव्रंखरं" इत्यमरः । अतिशयिततेजसेत्यर्थः ॥ ३७ ॥ रामवेश्मददर्शहेतिपुनर्वचनस्यसामान्योक्तस्यविशेषणविशेषकथनार्थत्वान्नपुनरुक्तिः । भगवतोवाल्मीकेरियंहिशैली ॥ ३८ ॥ उपादाय उपायनानीतिशेषः । समाक्रान्तैः

ति० अनयेतिपाठे अनयेत्युपलक्षणं । मयाचेत्यर्थः । अतएवममाज्ञेतिसंगच्छते । पूर्वराज्ञास्वयमप्युक्तेः । कतकादयस्तु कैकेय्याज्ञैव "अप्रतिषिद्धमनुमतं" इतिन्यायेनममाज्ञा । ननुनिद्रापरवशत्वेनराज्ञोऽनुमतंनवेतिमेसंदेहस्तत्राह—नचेति । इतिव्याचक्षते। तेषां इतिराजेतिश्लोकेपुनःपदासंगतिस्स्पष्टैव। पूर्वसर्गान्तेअश्रुत्वाराजवचनमित्यादिनन्दचेत्यन्तश्लोकद्वयस्यसर्वपुस्तकेष्वनुपलंभाच्चतद्व्याख्यानमसंगतमितिध्येयं । शि० अनया मद्वाण्या । अभिहितः आज्ञापितोसि । येनकारणेनप्रतिवाध्यते निवर्त्यते । तदिदं किंकारणं । वि० "अप्रतिषिद्धमनुमितं" इतिन्यायेनतदाज्ञायाएवमदाज्ञात्वात्सेयंममाज्ञाप्रतिहन्यते नानुष्ठीयते । तत्र कैकेयीनियमितकार्ये । पुनरितिवाक्यालंकारे ॥ २८ ॥ लि० शारदाभ्रघनप्रख्यं शारदाभ्रवत्घनप्रख्यंनिविडप्रभं ॥ ३४ ॥ ती० भक्तिभिः वर्धकीनांसूक्ष्मचित्रशिल्पैः । सूत्कीर्णं सुष्ठुउत्निखितंकीर्णव्याप्तं ॥ ३६ ॥

[पा०] १ क—घ. च. ज. झ. ञ. स्यभिहितोनया. २ छ. झ. ट. प्रतिवाध्यते. ३ घ. नृपागारात्. ४ च. प्रसन्नो. ५ क. च. ङ. छ. झ. ञ. ट. सदृशप्रभम्. ख. शिखरोपमम्. ६ ख. राजवेश्म. ७ ख—छ. झ. ञ. ट. पिहितं. क. सहितं. ८ ख. विद्रुमभूपितम्. ९ क. ख. ग. ङ—ट. दीप्तमेरु. १० ङ. च. छ. झ. ञ. ट. गुहासमम्. ११ घ. माल्यैश्च. १२ ङ. च. छ. झ. ञ. ट. भूपितम्. १३ च. ञ. न्विदधद्दार्दुरं. १४ ग. ङ. च. छ. झ. ञ. ट. सूत्कीर्णं. घ. संश्लेषैर्भक्तिभिर्यथा. ख. ग. भित्तिभिस्तथा. १५ ख. आददन्निजयाश्रिया. १६ ख. नरैः.

रामाभिषेकसुमुखैरुन्मुखैः समलंकृतम् ॥ महामेघसमप्रख्यमुदग्रं सुविभूषितम् ॥ ४० ॥
नानारत्नसमाकीर्णं कुब्जकैरातकावृतम् ॥ ४१ ॥

स वाजियुक्तेन रथेन सारथिर्नराकुलं राजकुलं विलोकयन् ॥
वरूथिना रामगृहाभिपातिना पुरस्य सर्वस्य मनांसि रञ्जयत् ॥ ४२ ॥
ततः समासाद्य महाधनं महत्प्रहृष्टरोमा स बभूव सारथिः ॥
मृगैर्मयूरैश्च समाकुलोल्बणं गृहं वरार्हस्य शचीपतेरिव ॥ ४३ ॥
स तत्र कैलासनिभाः स्वलंकृताः प्रविश्य कक्ष्यास्त्रिदशालयोपमाः ॥
प्रियान्नरान्रामतमते स्थितान्बहूनपोह्य शुद्धान्तमुपस्थितो रथी ॥ ४४ ॥
स तत्र शुश्राव च हर्षयुक्ता रामाभिषेकार्थकृता जनानाम् ॥
नरेन्द्रसूनोरभिमङ्गलार्थाः सर्वस्य लोकस्य गिरः प्रहृष्टः ॥ ४५ ॥
महेन्द्रसद्मप्रतिमं तु वेश्म रामस्य रम्यं मृगपक्षिजुष्टम् ॥
ददर्श मेरोरिव शृङ्गमुच्चं विभ्राजमानं प्रभया सुमन्त्रः ॥ ४६ ॥
उपस्थितैरञ्जलिकारकैश्च सोपायनैर्जानपदैश्च मर्त्यैः ॥
कोट्या परार्धैश्च विमुक्तयानैः समाकुलं द्वारपथं ददर्श ॥ ४७ ॥
ततो महामेघमहीधराभं प्रभिन्नमत्यङ्कुशमप्रसह्यम् ॥
रामौपवाह्यं रुचिरं ददर्श शत्रुंजयं नागमुदग्रकायम् ॥ ४८ ॥
स्वलंकृतान्साश्वरथान्सकुञ्जरानमात्यमुख्याञ्शतशश्च वल्लभान् ॥

समागतैः ॥ ३९ ॥ उन्मुखैः उत्सुकैः । उदग्रं उन्नतं ॥४०॥ कुब्जकैरातकावृतं किरातानांस्वल्पशरीरकाणां समूहःकैरातकं । "पृश्निरल्पशरीरःस्यात्किरातःसच कथ्यते" इतिहलायुधः । उपस्थितैःसमाकीर्णमित्यादिकमपिरामवेश्मेत्यनेनसंबध्यते ॥४१॥ वरूथिना रथगुप्तिमता । "रथगुप्तिर्वरूथोना" इत्यमरः । पुरस्य पुरस्थजनस्य । रञ्जयत् अरञ्जयत् ॥ ४२ ॥ समाकुलोल्बणं इतस्ततःसमाकुलैर्जनैरुल्बणं अतिशयेनोल्बणंवा । वरार्हस्य श्रेष्ठवस्त्वर्हस्य । रामस्येतिशेषः ॥ ४३ ॥ अपोह्य अतिक्रम्य । शुद्धान्तं अन्तःपुरं ॥४४॥ रामाभिषेकार्थकृताः रामाभिषेकार्थप्रयुक्ताइत्यर्थः । अभिमङ्गलार्थाः अभितोमङ्गलप्रतिपादनप्रयोजनाः ॥ ४५ ॥ वेश्म रामावासभूतंगृहराजं ॥ ४६ ॥ कोट्या कोटिसङ्ख्यया । परार्धैः परार्धसङ्ख्ययाच । सङ्ख्येयैः । सर्वान्तसङ्ख्यापरार्धः ॥ ४७ ॥ प्रभिन्नं मत्तं । "प्रभिन्नोगर्जितोमत्तः" इत्यमरः ॥ ४८ ॥ वल्लभान् राज-

ती० रञ्जयन् समासददित्यध्याहार्यं । ततःसमासाद्येत्युत्तरश्लोकेऽनुवादात् । ति० राजकुलं राजमार्गं । विराजयन् शोभयन् ॥ ४२ ॥ शि० वरार्हस्य वराणांसर्वश्रेष्ठानांब्रह्मादीनामित्यर्थः । अर्हस्तत्कर्तृकपूजायस्मिंस्तस्यरामस्य ॥ ४३ ॥ ती० रामाभिषेकार्थकृतां रामाभिषेकप्रयोजनंकर्मकुर्वन्तीतिरामाभिषेकार्थकृतः तेषांगिरःशुश्रावेतियोजना ॥ ४५ ॥ ति० शत्रुंजयं तद्गुणकं तन्नामानंच ॥ ४८ ॥ इतिपञ्चदशस्सर्गः ॥ १५ ॥

[पा०] १ ङ. च. छ. झ. ञ. ट. सुविराजितम्. २ ङ. च. छ. झ. ञ. ट. कुब्जकैरपिचावृतम्. क. ख. कुब्जवामनिकावृतम्. ३ ङ. छ. झ. ट. समाकुलम्. ४ ग. घ. ज. राजपथं. क. ख. ङ. च. छ. झ. ञ. ट. राजकुलंविराजयन्. ५ ङ. छ. झ. ट. राजगृहाभि. ६ घ. जनस्य. ७ छ. रञ्जयन्. क—ट. हर्षयन्. ८ ख. महान्प्रहृष्ट. ९ ङ. छ. झ. ञ. ट. न्वराम्राग. १० च. छ. झ. ञ. ट. न्व्यपोह्य. घ. ज. नुपेत्य. ११ ग. च. ञ. ट. युक्तो. १२ ग. ङ. छ. झ. ञ. ट. कृतां. १३ क. रपिमङ्गलार्थाः. घ. रभिमन्त्रितार्थाः. छ. रधिमङ्गलार्थाः. १४ घ. ससर्वलोकस्यगिरःप्रहृष्टाः. १५ क. वेश्म. १६ क. च. ञ. मुखैर्विभ्राज. ख. मुच्छ्रितं. १७ ङ. च. छ. झ. ञ. ट. कारिभिश्च. १८ क. ङ. च. छ. झ. ञ. ट. पदैर्जनैश्च. ख. पदैश्चमानवैः. १९ ङ. छ. झ. कुलंद्वारपदं. क. ग. ज. कुलद्वारपथं. ख. द्वारपथंददर्शह. २० ङ. च. छ. झ. ञ. ट. मुख्यांश्चददर्श.

व्यपोह्य सूतः सहितान्समन्ततः समृद्धमन्तःपुरमाविवेश ॥ ४९ ॥
तदद्रिकूटाचलमेघसन्निभं महाविमानोत्तमवेश्मसङ्घवत् ॥
अवार्यमाणः प्रविवेश सारथिः प्रभूतरत्नं मकरो यथाऽर्णवम् ॥ ५० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे पञ्चदशः सर्गः ॥ १५ ॥

षोडशः सर्गः ॥ १६ ॥

सुमन्त्रेणरामसमीपमेत्यतदानयनायस्वस्यदशरथनियोगनिवेदनम् ॥ १ ॥ श्रीरामेणकनकरथाधिरोहिणाछत्रचामरपाणिलक्ष्मणसंसेव्यमानेनकरितुरगादिभिःपरिवार्यमाणेनपौरनारीनरनिकरकृतस्वस्तुतिवचनश्राविणाचसतादशरथावलोकनायराजमार्गेनिर्गमनम् ॥ २ ॥

स तदन्तःपुरद्वारं समतीत्य जनाकुलम् ॥ प्रविविक्तां ततः कक्ष्यामाससाद पुराणवित् ॥ १ ॥
प्रासकार्मुकबिभ्रद्भिर्युवभिर्मृष्टकुण्डलैः ॥ अप्रमादिभिरेकाग्रैः स्वनुरक्तैरधिष्ठिताम् ॥ २ ॥
तत्र काषायिणो वृद्धान्वेत्रपाणीन्स्वलंकृतान् ॥ ददर्श विष्ठितान्द्वारि स्त्र्यध्यक्षान्सुसमाहितान् ॥ ३ ॥
ते समीक्ष्य समायान्तं रामप्रियचिकीर्षवः ॥ सहसोत्पतिताः सर्वे स्वासनेभ्यः ससंभ्रमाः ॥ ४ ॥
तानुवाच विनीतात्मा सूतपुत्रः प्रदक्षिणः ॥ क्षिप्रमाख्यात रामाय सुमन्त्रो द्वारि तिष्ठति ॥ ५ ॥
ते राममुपसंगम्य भर्तुः प्रियचिकीर्षवः ॥ सहभार्याय रामाय क्षिप्रमेवाचचक्षिरे ॥ ६ ॥
प्रतिवेदितमाज्ञाय सूतमभ्यन्तरं पितुः ॥ तत्रैवानाययामास राघवप्रियकाम्यया ॥ ७ ॥

प्रियान् ॥ ४९ ॥ अद्रिकूटाचलमेघसन्निभं अद्रिशिखरेणनिश्चलमेघेनचसदृशं । महाविमानोत्तमवेश्मसङ्घवत् महाविमानसहितोत्तमवेश्मसमूहयुक्तं । "विमानोस्त्रीदेवयानेसप्तभूमौचसद्मनि" इतिनिघण्टुः ॥ ५० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीतांबराख्याने अयोध्याकाण्डव्याख्याने पञ्चदशस्सर्गः ॥ १५ ॥

एवंसुमन्त्रस्यरामोपस्थानमुक्त्वारामस्यदशरथोपस्थानमाहषोडशे—सतदित्यादि ॥ १–२ ॥ काषायिणः काषायवस्त्रधारिणः । रामप्रीत्यर्थमलङ्कारकञ्चुकालङ्कृतानित्यर्थः । वृद्धान् पञ्चनवतिवयस्कान् । तेखल्वन्तःपुरेस्थाप्याभवन्ति । वेत्रपाणीन् यथारामोधनुर्धृत्वालोकंरक्षयतितथातेपिवेत्राणिधृत्वारामंरक्षन्तीतिभावः । स्वलङ्कृतान् रामश्चक्रवर्तिगृहेकृतमज्जनोभुक्त्वायदापुनर्दिव्यान्तःपुरमुपयातितदाचक्रवर्तिवदन्तरङ्गतयाच तमुत्सङ्गेनिवेश्यपरिष्वज्यमूर्ध्न्याघ्रायविसर्जयन्ति तेन कुङ्कुमपङ्कैः कस्तूरिकादिदिव्याङ्गरागैश्चालङ्कृतान्स्वलङ्कृतान्रामसीतालङ्कारेभ्योप्ययमलङ्कारोतिशयितइति भावः ॥ ३—४ ॥ प्रकर्षेणदक्षिणः प्रदक्षिणः । सेवानिपुणइत्यर्थः । "दक्षिणेसरलोदारौ" इत्यमरः । तिष्ठतीत्यत्रइतिकरणंद्रष्टव्यं । तिष्ठतीत्याख्यातेत्यन्वयः ॥ ५—६ ॥ प्रतिवेदितं द्वास्स्थैर्निवेदितं । पितुःअभ्यन्तरं अन्तरङ्गं । तत्रैव यत्रसीतयासहस्थितःतत्रैवे-

---

तनि० । जनाकुलं अभिषेकंद्रष्टुमागतपौरजानपदादिजनसंकुलं । अन्तःपुरद्वारंसमतीत्य । द्वारस्यातिभोग्यतयाक्लेशेनविश्लेषोव्यज्यते । सत्य० पुराणवित् पुराणांअणःगतिः गत्यर्थादणतेःभावेअकारप्रत्ययः । तंवेत्तीतिपुराणवित् । अनेनराजभवनकौशलंसूच्यते ॥ १ ॥ ती० प्रासकार्मुकबिभ्रद्भिरिति प्रासकार्मुकेत्यत्र "सुपांसुलुक्—"इतिद्वितीयायालुक् । यद्वा प्रासकार्मुकंबिभ्रतीतिप्रासकार्मुकबिभ्रतःतैः । द्विर्वचनमार्षं । शि० प्रासानिप्रकटीभूतानिकार्मुकाणिधनूंषिबिभ्रतिधारयन्तितैः । कर्मणस्संबन्धसामान्यत्वेनविवक्षणात्षष्ठी । ततः "षष्ठी"इतिविधिनासमासः ॥ २ ॥ शि० प्रदक्षिणः मन्त्रादिकर्मस्वतिनिपुणः ॥ ५ ॥ स० समार्थाय भार्यासहितायसभासुआर्यायवा सभानांसकान्तीनांअर्यायस्वामिनेवा ॥ ६ ॥ ति० प्रियकाम्यया पितुरितिशेषः ॥ ७ ॥

[पा०] १ ग. घ. च. झ. ञ. ट. माविवेशह. २ ङ. छ. झ. ट. ततोद्रि. क. घ. तदात्रिकूटाचल. ३ ग. ङ. छ. झ. ट. विमानोपम. ४ ख. प्रविभक्तां. ५ ख. माजगाम. ६ च. छ. ट. प्रासकार्मुक. ७ झ. ट. स्वानुरक्तै. ८ ङ. झ. ञ. ट. स्वासनेभ्यः. ९ घ. ज. सुसंभ्रमाः. १० क. च. ञ. ट. सभार्यायच. ११ घ. ज. मभ्यागतं. १२ क—ट. राघवःप्रिय.

तं वैश्रवणसंकाशमुपविष्टं स्वलंकृतम् ॥ ददर्श सूतः पर्यङ्के सौवर्णे सोत्तरच्छदे ॥ ८ ॥
वराहरुधिराभेण शुचिना च सुगन्धिना ॥ अनुलिप्तं परार्ध्येन चन्दनेन परंतपम् ॥ ९ ॥
स्थितया[1] पार्श्वतश्चापि वालव्यजनहस्तया ॥ उपेतं सीतया[2] भूयश्चित्रया शशिनं यथा ॥ १० ॥
तं तपन्तमिवादित्यमुपपन्नं स्वतेजसा ॥ ववन्दे वरदं वन्दी विनयज्ञो विनीतवत् ॥ ११ ॥
प्राञ्जलिस्तु[3] सुखं पृष्ट्वा विहारशयनासने ॥ राजपुत्रमुवाचेदं सुमन्त्रो राजसत्कृतः ॥ १२ ॥

त्यर्थः । राघवप्रियकाम्यया राघवस्यदशरथस्यप्रियेच्छया । रामइत्यध्याहारः ॥७॥ वैश्रवणसंकाशं तद्वदनवदधिकैश्वर्यसंपन्नं । यथावैश्रवणोदाता "कामेश्वरोवैश्रवणोददातु " इतिश्रुतेः । तथापरिसरवर्तिनांस्वसौन्दर्यानुभवसर्वस्वंददातीत्यर्थः । उपविष्टं " सहपत्न्या विशालाक्ष्यानारायणमुपागमत् " इत्युक्तरीत्याभगवद्ध्यानपरतयाऽवस्थितं । स्वलङ्कृतं ध्यानानुकूलाञ्जलियुक्तं । दिव्यमालालङ्कृतंवा । तंसूतोददर्श । उत्कर्षकाष्ठाभूमिभूतंरामंनिकर्षसीमाभूमिभूतोददर्श कोयं भाग्यातिशयइतिभावः । पर्यङ्के तादृशैश्वर्यसामग्र्यनुरूपापूर्वसंस्थानप्रतिमाविशेषविशिष्टपर्यङ्के । अतएव ह्युत्तरत्र " पर्यङ्कमग्र्यास्तरणंनानारत्नविभूषितं । तमपीच्छतिवैदेहीप्रतिष्ठापयितुंत्वयि" इतिसुयज्ञेतत् स्थापयिष्यति । सौवर्णेउपर्युपविष्टसदृशे । काञ्चनगिरिःकालमेघमिवरामंभासयतीत्यर्थः । सोत्तरच्छदे पुष्पहासमुकुमाररामदेहानुगुणमृदुतरास्तरणयुक्ते । पर्यङ्कविद्योक्तरीत्यामुक्तानुभाव्यदिव्यवेषमहोसूतोन्वभूदितिसौशील्यातिशयोक्तिः ॥ ८ ॥ "स्रक्चन्दनवनिताः" इत्युक्तभोग्यवस्तुष्वादौदिव्यमाल्ययोगमुक्त्वा दिव्यचन्दनयोगंदर्शयति—वराहरुधिराभेणेति। वराहरुधिरमतिरक्तवर्णमिति प्रसिद्धं तत्सदृशेन कुङ्कुममिश्रतयेतिभावः । सीताकरकमलानुलिप्ततयातत्कान्तिमिश्रत्वमुच्यते। शुचिनासीताकरस्पर्शपूतेन । तत्करस्पर्शकृतशैत्यविशेषंसमुच्चिनोतिचशब्दः । सुगन्धिना "सर्वगन्धः" इत्यस्यश्रियोप्यविशेषात्तत्करस्पर्शजनितनिरवधिकगन्धेन परार्ध्येन कान्तानुलिप्ततयाश्रेष्ठेन । चन्दनेन अनुलिप्तं पश्चाल्लिप्तं । अनेनसीताङ्गरागकरणानन्तरत्वंगम्यते । परंतपं एतादृशसौन्दर्यानुभवविरोधिनिवर्तकं ॥ ९ ॥ अथाप्राकृतवनितायोगंदर्शयति—स्थितयेति । चापीतिनिपातौ पूर्वोक्तसमुच्चये । पार्श्वतःस्थितया चन्दनानुलिप्तगात्रंकान्तंकृत्वा वालव्यजनं हस्तेकृत्वा पार्श्वेस्थितया । सीतया भूयः उपेतं विनयेनपार्श्वतश्चामरमुपवीज्य पुनस्तात्कालिकसुपमाविशेषबलात्कारेणगाढमाश्लिष्टं । भूयइत्यत्रविराजमानमितिशेषइत्यप्याहुः । तदानीन्तनातिशयंदृष्टान्तमुखेनस्पष्टीकरोति—चित्रयेति । चैत्रपौर्णमास्यांचित्राख्यतारकयोपेतंउदितंशशिनमिवस्थितं । चित्रयेतानेनतत्कृतातिशयउक्तः । उपेतमित्यनेनरक्तवर्णत्वं शशिनमित्यनेनसीतालिङ्गनोन्मृष्टचन्दनवक्षस्कत्वमुक्तं । एवंभूतंददर्शेतिदृष्टिसाफल्यमुक्तं ॥ १० ॥ शिरसोवाचश्चसाफल्यमाह—तमिति । ववन्दइतिशिरसःसाफल्यमुक्तं । वन्दीतिवाक्साफल्यं । वरदं स्वानुभवरूपवरप्रदं । विनीतवत् विनीतो यथासाष्टाङ्गंवन्दते तथेत्यर्थः ॥११ ॥ विहारशयनासनइतिद्वन्द्वैकवद्भावः ।

शि० वराहरुधिराभेण वरमतिश्रेष्ठं नजहातिप्रयत्नमन्तराअनुलेपनकर्तृन्नत्यजतीत्यहम् रुधिराअरुणाआभायस्यतत् त्रयाणां कर्मधारयः । तेन ॥ ९ ॥ ती० स्थितयेत्यत्रभूयश्शब्दप्रयोक्तुरयमभिप्रायः । यःकेवलएवसकललोकहृदयानिहरति सः सीतयासहितःकिंपुनरिति । ति० भूयः वारंवारंददर्शेत्यन्वयः । तथाभूतस्यदर्शनेतृप्त्यभावात् ॥ १० ॥ तनि० । आदित्यमित्येकत्वमविवक्षितं । दिविसूर्यसहस्रेतिवाक्यान्तरानुरोधात् । यद्वा आदित्यमिवेत्युक्तेविवक्षितसिद्धावपितपन्तमादित्यमिवेत्युक्त्यायुगपदुदितरविसहस्रसमुदिततेजःपुञ्जमिवतपन्तमितिलभ्यते । तेनाभूतोपमाव्यज्यते । स्वतेजसेति स्वाभाविकासाधारणतेजसा नत्वन्यकृतेनान्यसाधारणेनचेत्यर्थः । तपन्तमादित्यमिवतेजसोपपन्नमितिसंबन्धः । इन्दीवरश्याममितिस्वभावतश्श्यामवर्णस्यादित्यवर्णत्वोक्त्याप्रदीपवर्त्यन्तरस्थितनीलव्यक्तिवत्परितःप्रसृतशुक्लभास्वरतेजःपुञ्जवच्चविग्रहकान्त्योर्व्यवस्थितिर्द्योत्यते । तंवैश्रवणेत्यारभ्य स्वतेजसेत्यन्तेन ध्येयशुभाश्रयाकारविशेषोव्यज्यते । शि० स्वतेजसा स्वनित्यप्रकाशेन उपपन्नं युक्तं । अतएवादित्यमपितपन्तं प्रकाशयन्तं तं रामं विनीतवत् विनीतंविनयवचनं वनति रचयतिउच्चारयतीत्यर्थः । सवन्दीसुमन्त्रोववन्दे ॥ ११ ॥ शि० विहारशयनासने विहारशयनायआसनंतस्मिन् । स्थितमितिशेषः।राज्ञएकान्तविहारशयनासनेपुराजसत्कृतःसुमन्त्रःराज्ञएकान्तविहारादिष्व-

[पा०] १ घ. सीतया. २ घ. स्थितया. ३ ङ. च. छ. झ. ञ. ट. सुमुखंदृष्ट्वा.

कौसल्या सुप्रजा राम पिता त्वां द्रष्टुमिच्छति ॥ महिष्या सह कैकेय्या गम्यतां तत्र मा चिरम् ॥ १३ ॥
एवमुक्तस्तु संहृष्टो नरसिंहो महाद्युतिः ॥ ततः संमानयामास सीतामिदमुवाच ह ॥ १४ ॥
देवि देवश्च देवी च समागम्य मदन्तरे ॥ मन्त्रयेते ध्रुवं किंचिदभिषेचनसंहितम् ॥ १५ ॥
लक्षयित्वा ह्यभिप्रायं प्रियकामा सुदक्षिणा ॥ संचोदयति राजानं मदर्थं मदिरेक्षणे ॥ १६ ॥
सा प्रहृष्टा महाराजं हितकामाऽनुवर्तिनी ॥ जननी चार्थकामा मे केकयाधिपतेः सुता ॥ १७ ॥
दिष्ट्या खलु महाराजो महिष्या प्रियया सह ॥ सुमन्त्रं प्राहिणोद्दूतमर्थकामकरं मम ॥ १८ ॥
यादृशी परिषत्तत्र तादृशो दूत आगतः ॥ ध्रुवमद्यैव मां राजा यौवराज्येऽभिषेक्ष्यति ॥ १९ ॥
हन्त शीघ्रमितो गत्वा द्रक्ष्यामि च महीपतिम् ॥ सह त्वं परिवारेण सुखमास्स्व रमस्व च ॥ २० ॥
पतिसंमानिता सीता भर्तारमसितेक्षणा ॥ आद्वारमनुवव्राज मङ्गलान्यभिदध्युषी ॥ २१ ॥

विहारः गतिः ॥ १२ ॥ सुप्रजाः त्वयेतिशेषः । यद्वा कौसल्यायाः सुप्रजः सुपुत्र । असिच्प्रत्ययान्तः ॥ १३ ॥ संमानयामास सूतमितिशेषः ॥ १४ ॥ मदन्तरे मदर्थे । "अन्तरमवकाशावधिपरिधानान्तर्धिभेदतादर्थ्ये" इत्यमरः । अभिषेचनसंहितंअभिषेचनसंबन्धि । मदर्थे किंचिन्मन्त्रयेते विचारयतः ॥ १५ ॥ महिष्यासहेत्युक्त्योन्नेयमर्थंदर्शयति—लक्षयित्वेति । सुदक्षिणा सुकुशला । अतएवराज्ञोभिप्रायंलक्षयित्वा वृद्धत्वाद्भरतागमनपर्यन्तंनविलंबःकार्यइतिराजाशयंज्ञात्वा । मत्प्रियकामासती राजानंप्रति । मदर्थं मदभिषेकं । संचोदयति । एतदानुकूल्यंत्वत्सौभाग्यफलमित्याह—मदिरेक्षणइति ॥ १६ ॥ संदिग्धोक्तिजनितांसीताशङ्कांवारयति—सेति । प्रहृष्टा मयीतिशेषः । हितकामा लोकस्येतिशेषः । महाराजं भर्तारं । अनुवर्तिनी मे अर्थकामा भवतीतिशेषः ॥ १७—१८ ॥ तत्र अन्तःपुरे । यादृशीपरिषत् परिसरवर्तीजनः । तादृशः तत्तुल्यःदूतः ॥१९॥ हन्तेतिहर्षे । परिवारेण परिचारिकासङ्घेन । रमस्व वृत्तकीर्तनेनरताभव ॥२०॥ अथसीता रामस्यसौन्दर्यालंकृतिविशेषानालोक्यकिंवाभविष्यतीतिकलुषितहृदया तस्मैमङ्गलमाशासानाऽनुव्रजति—पतिसंमानितेति । पतिसंमानिता पत्यास्वकण्ठादुन्मुच्यआमुक्तमुक्तामालिकेत्यर्थः। पादपल्लवस्पर्शपूर्वकंसान्त्वितेतिभट्टारकाः। तदर्हत्वज्ञापनायतद्वैलक्षण्यंदर्शयति—सीतेति । सीता लाङ्गलपद्धतिः। तज्जत्वात्सीता । अयोनिजाभावेनस्वस्माद्विलक्षणायांतस्यांतादृशीप्रीतिरुचितैवेतिभावः । असितेक्षणा रामेणमालायांदत्तायामियमपिलोचनाभ्यांकुवलयमालांदत्तवती । भर्तारमाद्वारमनुवव्राज ।

पिसमीपवर्तीत्यर्थः ॥ १२ ॥ शि० येनभवताकौसल्यासुप्रजाः शोभनपुत्रा तंत्वां । येनभवतेतिशेषः ॥ १३ ॥ शि० ततः तं द्वितीयान्तात्तसिः । सूतं । संमानयामास त्वदुक्तमयास्वीकृतमितिकथयामासेत्यर्थः । सीतांचेदमुवाच । हश्चार्थे ॥ १४ ॥ ति० अत्रअभिषेचनसंहितं तत्संबद्धं अभिषेकद्वारकमितियावत् । किंचित् वनगमनरूपंतद्विरुद्धं । संप्रत्येवास्माभिश्चिन्त्यमानंमन्त्रयेतेइत्यप्यर्थोगर्भितोज्ञेयः ॥ १५ ॥ ति० लक्षयित्वेत्यादिभिरष्टभिश्श्लोकैरर्थान्तरमपिगर्भितम् । तथाहि । [अर्थान्तरं] अभिप्रायं ममरावणवधरूपं । अन्तर्यामिप्रेरणयालक्षयित्वा । अनेनमत्प्रेरणयैवतस्याएवंप्रवृत्तिरितिसूचितं । ममदेवानांजगतश्चप्रियकामा राज्ञश्चान्तकालेनिरन्तरमज्ज्ञानसंपादनेनप्रियकामा। अतएवसुदक्षिणा समर्था। राज्ञआपाततोविपरीतत्वेपिजगतःप्रियत्वेनराज्ञोपिपर्यन्तसुखदत्वेनतद्वाक्यकथनेसमर्था । अतएवप्रहृष्टा ममहितकामा । तदर्थंमवतारग्रहणाद्धितंकाम्यंच तदनुवर्तनशीला । अतएवमेऽर्थकामामदवतारप्रयोजनसिद्धिकामा । महाराजं राजानं । मदर्थं मदवतारप्रयोजनरावणवधफलकवनगमनार्थं । त्वरयतीत्यर्थः ॥ १६ ॥ शि० किंच साप्रहृष्टा आप्रहृष्टाभिःअतिहर्षविशिष्टाभिःसखीभिःसहिता । सत्य० प्रयोजनकामेतिप्रयोक्तव्ये यदर्थकामेतिपुनःपुनराह । तेनमन्निवृत्तिकामेत्यर्थोरामस्यसंमतः साप्रहृष्टेत्यत्रअप्रहृष्टेतिपदभङ्गश्चसंमतइतिज्ञायते ॥ १७ ॥ ति० [अर्थान्तरं] अर्थकामकरं मत्कामविषयार्थकरंयथाभवतितथाप्राहिणोत् ॥ १८ ॥ ती० तत्र अन्तःपुरे । यादृशी मदर्थैकप्रयोजनापरिषत् । तादृशःमदर्थैकप्रयोजनः । अभिषेक्ष्यति मत्कर्मकाभिषेकानुकूलव्यापारंकरोतीत्यर्थः । अभिषेक्ष्यतीत्यत्रलृट्पात्तभविष्यत्कालस्याविवक्षा । ति० [अर्थान्तरं] तादृशः हृष्टोद्विग्नचित्तः । एतदीयेनैवहृष्टोद्विग्नचित्तत्वेनतत्परिषदस्तत्त्वानुमानं । यौवराज्ये देवर्षिपरिपालनफलके ॥ १९ ॥ ति० [अर्थान्तरं] मङ्गलान्यभिदध्युषी प्रस्थानमङ्गलान्यभिध्यायन्ती । सत्य०

[पा०] १ क. ख. ग. घ. ज. देव. २ ङ. छ. झ. महिष्यापिहि. ३ ख. ञ. ततस्तं. ४ ख. ग. ज. संयुतम्. ५ ङ. च. छ. झ. मदर्थमसितेक्षणा. ६ ग. च. कामपरं. ७ क. ज. मङ्गल्यान्यभि.

राज्यं द्विजातिभिर्जुष्टं राजसूयाभिषेचनम् ॥ कर्तुमर्हति ते राजा वासवस्येव लोककृत् ॥ २२ ॥
दीक्षितं व्रतसंपन्नं वराजिनधरं शुचिम् ॥ कुरङ्गशृङ्गपाणिं च पश्यन्ती त्वां भजाम्यहम् ॥ २३ ॥
पूर्वां दिशं वज्रधरो दक्षिणां पातु ते यमः ॥ वरुणः पश्चिमामाशां धनेशस्तूत्तरां दिशम् ॥ २४ ॥
अथ सीतामनुज्ञाप्य कृतकौतुकमङ्गलः ॥ निश्चक्राम सुमन्त्रेण सह रामो निवेशनात् ॥ २५ ॥
पर्वतादिव निष्क्रम्य सिंहो गिरिगुहाशयः ॥ लक्ष्मणं द्वारि सोपश्यत्प्रह्वाञ्जलिपुटं स्थितम् ॥ २६ ॥
अथ मध्यमकक्ष्यायां समागम्य सुहृज्जनैः ॥ स सर्वानर्थिनो दृष्ट्वा समेत्य प्रतिनन्द्य च ॥ २७ ॥
ततः पावकसंकाशमारुरोह रथोत्तमम् ॥ वैयाघ्रं पुरुषव्याघ्रो राजतं राजनन्दनः ॥ २८ ॥
मेघनादमसंबाधं मणिहेमविभूषितम् ॥ मुष्णन्तमिव चक्षूंषि प्रभया सूर्यवर्चसम् ॥ २९ ॥
करेणुशिशुकल्पैश्च युक्तं परमवाजिभिः ॥ हरियुक्तं सहस्राक्षो रथमिन्द्र इवाशुगम् ॥

आत्मानमनवरतंहृदयेबिभ्रतोरामस्यविरहासहतयास्वगमनयोग्यदेशपर्यन्तमनुजगाम । मङ्गलान्यभिदध्युषी अभिध्यायन्ती । किमस्यसौन्दर्यस्यहानिर्भविष्यतीति कलुषितहृदयामङ्गलाशासनपूर्वकमनुवव्राज ॥ २१ ॥ मङ्गलाभिध्यानमेवदर्शयति—राज्यमिति । द्विजातिभिः ब्राह्मणैः । जुष्टं सेवितं । राजसूयाभिषेचनं राजसूययागेयोभिषेकः "अथाभिषिच्यसे" इत्युच्यमानः तदर्हं । अनेनमहाराज्यवत्त्वंगम्यते । कर्तुं दातुं । लोककृत् ब्रह्मा ॥ २२ ॥ दीक्षितं सकृष्णाजिनं । नवनीताभ्यक्तंयजमानवेषंद्रष्टुमिच्छामीत्याह व्रतसंपन्नम् । ऋषिणोपवस्तव्यमित्युक्तेममसौकुमार्यानुगुणमेवमुक्तमितिमत्वाचतुर्गुणमुपवासंकरोतिश्रद्धया । तदाह संपन्नमिति । वराजिनधरं वस्त्रधारणादप्यजिनधारणस्योत्कर्षउच्यते । शुचिं कामपिस्त्रियंमास्पृश धर्मपत्नीत्वेनसीतास्पर्शे न दोषः इतिमुनिनोक्तेऽपिशङ्कया सीतावस्त्रदशास्पर्शेपिस्नानंकरोति । कुरङ्गशृङ्गपाणिंच एकवस्त्रधरोधन्वीत्येतदपेक्षयाकण्डूयनार्थं कृष्णविषाणकृतशोभातिशयउच्यते। पश्यन्तीत्वांभजाम्यहं भाविफलापेक्षायांकृतायामन्तरालिकफलमर्थसिद्धमेव । अतोभिषेकान्तरायविरहोनप्रार्थितः । यथासावित्री भर्तारं दर्शयित्वाऽनेनाहमनेकपुत्रास्यामित्यर्थितवती तेनसिद्धंभर्तुःपूर्णायुःप्रार्थनं तद्वत् । पश्यन्तीति हेतौशतृप्रत्ययः । दर्शनार्थमित्यर्थः । दर्शनार्थंहिभगवन्तंभजन्ते । अतइयमपितथैवाह ॥ २३ ॥ उत्तरांदिशमित्यनन्तरं इतिमङ्गलान्यभिदध्युषीतियोज्यं । भर्तृविषयत्वेननवाचोक्तवतीतिभावः ॥ २४ ॥ कृतकौतुकमङ्गलः अनुष्ठिताभिषेकार्थमङ्गलः ॥ २५ ॥ द्वारि प्रथमद्वारि । प्रह्वाञ्जलिपुटं अञ्जलिपुटोस्यास्तीत्यञ्जलिपुटः । मत्वर्थीयोच्प्रत्ययः । प्रह्वश्चासावञ्जलिपुटश्चेतिकर्मधारयः । तं ॥ २६ ॥ अथेत्यादिश्लोकद्वयं । अर्थिनः रामदर्शनार्थिनः । अभिषेकार्थिनोवा । वैयाघ्रं व्याघ्रचर्मपरिवृतं । "द्वैपवैयाघ्रादञ्" इत्यञ् । राजतं रजतविकारं । राजन्तमितिचपाठः ॥२७–२८॥ मेघस्येवनादोयस्यसमेघनादस्तं । असंबाधं संबाधरहितं । उचितविस्तारमित्यर्थः ॥ २९ ॥ करेणुशि-

अभिदध्युषीत्यार्षं ॥ २१ ॥ ति० [अर्थान्तरं] तदेवाह—राज्यमिति । द्विजातिभिः आश्रमस्थैर्ऋषिभिः जुष्टं । राज्यं वनेराज्यं । तथाराजसूयाभिषेचनं सर्वतोबलवान्सर्वपीडकोराजासूयतेकण्ड्यतेयत्रतादृशकर्मण्यभिषेकंकर्तुमर्हति ॥ २२ ॥ ति० [अर्थान्तरं] तदेवमनसाभिलषति—दीक्षितमित्यादि । तत्रराजसूयेदीक्षितत्वादिधर्मकंत्वांपश्यन्तीअहंत्वांभजिष्येइत्यर्थः । अनेनाहमपित्वयासहवनंयास्यामीतिसूचितं । अत्रराजसूयाभिषेचनंकर्तुमर्हतीत्यनेनसंकल्पेनदीक्षितमित्यादिसंकल्पेनमदुक्तार्थगर्भितत्वमेषांश्लोकानांसूचितं । अन्यथासत्यसंकल्पायाभगवत्याअप्येकदापिरामेणराजसूयाननुष्ठानादीदृशसंकल्पविषयार्थासिद्ध्यातत्त्वं भज्येत । वक्तृश्रोत्रोस्सीतारामयोर्वैशिष्ट्याच्चेदृशार्थावगतिर्बोध्या ॥ २३ ॥ ति० प्रह्वाञ्जलिपुटं प्रह्वत्वसूचकाञ्जलिपुटवन्तं ॥ २६ ॥ ति० राजितं शोभावन्तं ॥ २८ ॥ ति० मेरुवर्चसमित्यनेनरथस्यसौवर्णत्वंध्वन्यते ॥ २९ ॥ ति० करेणुशिशवःकलभाः । अनेनहृष्टपुष्टोन्नतमहाबलवत्त्वंसूचितं । इन्द्रः परमैश्वर्यवान् सहस्राक्षइव । नानाविधदेहवर्त्याभरणस्थरत्नसमूहैःरामस्यसहस्राक्षत्वं

[पा०] १ घ. श्चोत्तरां. २ छ. ट. पुटस्थितम्. ३ च. समागच्छन्तु. क—ङ. छ—ट. समागच्छतसु. ४ ख. सर्वार्थिजनान्दृष्ट्वा. ५ क—घ. राजन्तं. ङ. छ. झ. राजितं. घ. राजन्तंराजसत्तमः. ६ ट. मणिस्तोम. ७ ङ. छ. झ. ठ. मेरुवर्चसम्. ख. ग. घ. ज. हेमवर्चसम्.

प्रययौ तूर्णमास्थाय राघवो ज्वलितः श्रिया ॥ ३० ॥
स पर्जन्य इवाकाशे स्वनवानभिनादयन् ॥ निकेतान्निर्ययौ श्रीमान्महेन्द्रादिव चन्द्रमाः ॥ ३१ ॥
छत्रचामरपाणिस्तु लक्ष्मणो राघवानुजः ॥ जुगोप भ्रातरं भ्राता रथमास्थाय पृष्ठतः ॥ ३२ ॥
ततो हलहलाशब्दस्तुमुलः समजायत ॥ तस्य निष्क्रममाणस्य जनौघस्य समन्ततः ॥ ३३ ॥
ततो हयवरा मुख्या नागाश्च गिरिसन्निभाः ॥ अनुजग्मुस्तदा रामं शतशोथ सहस्रशः ॥ ३४ ॥
अग्रतश्चास्य सन्नद्धाश्चन्दनागरुरूषिताः ॥ खड्गचापधराः शूरा जग्मुराशंसवो जनाः ॥ ३५ ॥
ततो वादित्रशब्दास्तु स्तुतिशब्दास्तु वन्दिनाम् ॥ सिंहनादाश्च शूराणां तदा शुश्रुविरे पथि ॥३६॥
हर्म्यवातायनस्थाभिर्भूषिताभिस्समन्ततः ॥ कीर्यमाणः सुपुष्पौघैर्ययौ स्त्रीभिररिंदमः ॥ ३७ ॥
रामं सर्वानवद्याङ्ग्यो रामपिप्रीषया ततः ॥ वचोभिरग्र्यैर्हर्म्यस्थाः क्षितिस्थाश्च ववन्दिरे ॥ ३८ ॥
नूनं नन्दति ते माता कौसल्या मातृनन्दन ॥ पश्यन्ती सिद्धयात्रं त्वां पित्र्यं राज्यमवस्थितम् ॥३९॥
सर्वसीमन्तिनीभ्यश्च सीतां सीमन्तिनीं वराम् ॥ अमन्यन्त हि ता नार्यो रामस्य हृदयप्रियाम् ॥४०॥
तया सुचरितं देव्या पुरा नूनं महत्तपः ॥ रोहिणीव शशाङ्केन रामसंयोगमाप या ॥ ४१ ॥
इति प्रासादशृङ्गेषु प्रमदाभिर्नरोत्तमः ॥ शुश्राव राजमार्गस्थः प्रिया वाच उदाहृताः ॥ ४२ ॥

स राघवस्तत्र कथाप्रपञ्चाञ्शुश्राव लोकस्य समागतस्य ॥
आत्माधिकारा विविधाश्च वाचः प्रहृष्टरूपस्य पुरो जनस्य ॥ ४३ ॥

शुक्लैः कलभमात्रैः ॥ ३० ॥ आकाशेस्वनवान् नादवान् । पर्जन्यइव मेघइव । "पर्जन्यौरसदब्देन्द्रौ" इत्यमरः । अभिनादयन् रथेनदिशइतिशेषः । महेन्द्रशब्दउदयाद्रिपरः ॥ ३१ ॥ छत्रचामरपाणिरिति । एकहस्तेनछत्रंअपरहस्तेनचामरंचधारयन्नित्यर्थः । जुगोपआतपादिभ्यइतिभावः ॥ ३२ ॥ हलहलाशब्दः कलकलाशब्दः । तस्यनिष्क्रममाणस्य तस्मिन्निष्क्रममाणेसति । जनौघस्यहलहलाशब्दइत्यन्वयः ॥ ३३ ॥ हयनागशब्दौतदारूढपरौ ॥ ३४ ॥ रूषिताः लिप्ताः । आशंसवः रामश्रेयआशंसमानाः ॥ ३५ ॥ ततः तत्रवीथ्यां । तदा निर्गमनकाले ॥ ३६ ॥ हर्म्यवातायनस्थाभिः प्रासादगवाक्षस्थाभिः ॥ ३७ ॥ रामपिप्रीषया रामप्रीणनेच्छया । ववन्दिरे तुष्टुवुः । वदिअभिवादनस्तुत्योरितिधातुः ॥ ३८ ॥ स्तुतिप्रकारमेवाह—नूनमित्यादि । नन्दतीत्यत्रेतिकरणंद्रष्टव्यं । तस्यववन्दिरइतिपूर्वेणसंबन्धः । सिद्धयात्रं सफलगमनं । अतएवपित्र्यंराज्यं अवस्थितं अधिष्ठितं ॥ ३९ ॥ उत्तरश्लोकार्थहेतुत्वेनाह—सर्वेति । हि यस्मात्कारणात् । एवं तस्मात् तयासुचरितमित्युक्तरीत्याप्रमदाभिरुदीरिताइतियोजना ॥ ४०—४२ ॥ कथाप्रपञ्चान् लौकिककथाविस्तारान् । आत्माधिकाराः आत्मानमधिकृत्यप्रवृत्ताः ।

बोध्यं ॥ ३० ॥ ति० चित्रचामरेति चित्रदण्डयुक्तचामरेत्यर्थः । चन्द्रचामरेतिपाठेचन्द्रवच्छुभ्रतचामरेत्यर्थः ॥ ३१ ॥ शि० निष्क्रममाणस्यजनौघस्यहलहलाशब्दःसमजायत ॥ ३३ ॥ शि० आशंसवःवंशादिप्रशंसकाः । ति० आशंसवः भद्रमितिशेषः ॥ ३५ ॥ शि० शुश्रुविरे जनैरितिशेषः ॥ ३६ ॥ ति० उपस्थितं प्राप्तवन्तं ॥ ३९ ॥ ति० सीता सीमन्तिनीषु वरा श्रेष्ठाइत्यमन्यन्तेत्यन्वयः । शि० हिताः तत्रप्राप्ताः । नार्यः रामस्यहृदयप्रियांसीमन्तिनींसीतां सर्वसीमन्तिनीभ्योवरांअमन्यन्त अकथयन्तेत्यर्थः ॥ ४० ॥ शि० प्रासादशृङ्गशब्दःक्षितेरप्युपलक्षकः । अतएवोपक्रमेणनवैरूप्यं ॥ ४२ ॥

[पा०] १ क. नन्दयन्. २ क—ञ. ट. महाभ्रादिव. ३ ख. ङ. च. झ. ञ. ट. चित्र. छ. चन्द्र. ४ झ. ट. जग्मुस्तथा. ५ च—झ. ट. भूषिताः. ६ क. ग—छ. झ. ञ. ट. शब्दाश्च. ७ क. ख. ग—छ. झ. ञ. ट. शब्दाश्च. ८ ङ. च. छ. झ. ञ. ट. ततः. ज. तथा. ९ क. सपुष्पौघैः. १० ख. स्त्रीभिस्समन्ततः. ११ ख. प्रियचिकीर्षया. १२ ङ. च. छ. झ. ञ. ट. सुपस्थितम्. १३ झ. सीतासीमन्तिनीवरा. १४ क. च. ञ. ट. मानसा. १५ छ. झ. ट. तदाप्रलापान्. क—घ. च. ज. ञ.

एष श्रियं गच्छति राघवोद्य राजप्रसादाद्विपुलां गमिष्यन् ॥
एते वयं सर्वसमृद्धकामा येषामयं नो भविता प्रशास्ता ॥ ४४ ॥
लाभो जनस्यास्य यदेष सर्वं प्रपत्स्यते राष्ट्रमिदं चिराय ॥
न ह्यप्रियं किंचन जातु कश्चित्पश्येन्न दुःखं मनुजाधिपेऽस्मिन् ॥ ४५ ॥
स घोषवद्भिश्च हयैर्मतङ्गजैः पुरस्सरैः स्वस्तिकसूतमागधैः ॥
महीयमानः प्रवरैश्च वादकैरभिष्टुतो वैश्रवणो यथा ययौ ॥ ४६ ॥
करेणुमातङ्गरथाश्वसंकुलं महाजनौघप्रतिपूर्णचत्वरम् ॥
प्रभूतरत्नं बहुपण्यसंचयं ददर्श रामो रुचिरं महापथम् ॥ ४७ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे षोडशः सर्गः ॥ १६ ॥

सप्तदशः सर्गः ॥ १७ ॥

रथमास्थितेनरामेणनगररामणीयकतामवलोकयतासुहृदामाशिषस्तुतीश्चसमुपशृण्वतासकलजनमनोनयनापकर्षिणाचसता दशरथसदनमेत्यपरिजननिवर्तनपूर्वकंनृपसमीपगमनम् ॥ १ ॥

स रामो रथमास्थाय संप्रहृष्टसुहृज्जनः ॥ पताकाध्वजसंपन्नं महार्हागरुधूपितम् ॥
अपश्यन्नगरं श्रीमान्नानाजनसमाकुलम् ॥ १ ॥
स गृहैरभ्रसंकाशैः पाण्डुरैरुपशोभितम् ॥ राजमार्गं ययौ रामो मध्येनागरुधूपितम् ॥ २ ॥

पुरः पुरस्य । संबन्धिनोजनस्य ॥ ४३ ॥ श्रियंगमिष्यन्गच्छति श्रियंप्राप्तुंगच्छति ॥ ४४ ॥ अस्यजनस्यायमेवलाभः यदेषसर्वंराष्ट्रंप्रपत्स्यते । अस्मिन्मनुजाधिपेसति कश्चित् जातु कदाचित् । किंचनाप्यप्रियं प्रियाभावं । दुःखं अनिष्टंच । नपश्येत् ॥ ४५ ॥ स्वस्तिकसूतमागधैः स्वस्तिकाः जयजयेतिमङ्गलंप्रयुञ्जानाः । बन्दिनइत्यर्थः । सूताः ब्राह्मण्यांक्षत्रियाज्जाताः । सारथ्येस्तुतिकर्मणिचनियुक्ताः । "ब्राह्मण्यांक्षत्रियात्सूतः" इत्यमरः । मागधाः क्षत्रियायां वैश्याज्जाताः । राज्ञांप्रबोधनकर्मणिनियुक्ताः "मागधःक्षत्रियाविशोः" इत्यमरः ॥ ४६ ॥ रामोमहापथंददर्शेत्यन्वयः ॥ ४७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीतांबराख्याने अयोध्याकाण्डव्याख्याने षोडशःसर्गः ॥ १६ ॥

अथरामस्यराजसमीपगमनंसप्तदशे—सरामइत्यादि। पताकाध्वजसंपन्नं पताकाः अनामाङ्किताः । तदङ्कितानि ध्वजानि ॥ १ ॥ मध्येन वीथीमध्येन । प्रकृ-

---

शि० सूताः पौराणिकाः । मागधाः वंशप्रशंसकाः ॥ ४६ ॥ इतिषोडशस्सर्गः ॥ १६ ॥

ती० पताकाध्वजसंपन्नं । पताकाभिः नामाङ्किताभिः । ध्वजैः गरुडादिचिह्नितैः । **सत्य०** संप्रहृष्टसुहृज्जनः संप्रहृष्टाः सम्यक्प्रहर्षिताः । अन्तर्णीतण्यर्थोयंप्रहृष्टशब्दः । सुहृदःशोभनमनस्काःजनायेनेतिवा । रामस्सइत्यनुक्त्वाउक्त्वाचसरामइतिसदासदारएवरघूदारइतिभावमाविश्चकारकविरितिज्ञेयम् । पताकाध्वजसंपन्नं पताकासौभाग्यंतस्याःध्वजाःतत्सूचकाःकेतवः । "पताकावैजयन्त्यांस्यात्सौभाग्येनाटकाङ्कयोः" इतिमेदिनी । "ध्वजःपताकाकेतुश्च" इतिधनञ्जयः । पताकाःअनामाङ्किताः तदङ्कितानिध्वजानि तैर्गरुडादिचिह्नैः इत्युभयव्याकरणेनिर्मूलभावादालोचनीये । श्रीमान् रामः । नानाजनसमाकुलं नाना नानाविधाः अजनाः जनं जन्म नविद्यतेजननंयेषांतेअजनाः तदुपलक्षितजरामरणादिरहिताःमुक्तास्तैस्समाकुलंनगरंयथेत्युत्तरादाकृष्यते । प्रादुर्भावार्थाज्जनेः "हलश्च" इति घञि "जनिवध्योश्च" इतिवृद्धिनिषेधेजनेतिरूपं । जनंजननंअर्दयतीतिजनार्दनइतिगीताभाष्योक्तेः । तथाचमुक्तस्थानंस्वधामेवरामोनगरमिदंददर्शेतिदृष्टान्तदार्ष्टान्तिकतयावायोजनाद्रष्टव्या । सम-

[पा०] १ क. भविताद्य. २ ख. ङ. च. छ. झ. ञ. ट. हयैःसनागैः. क. ग. घ. ज. हयैश्चनागैः. ३ ख. ङ. च. झ. ट. वादिकैः. ४ ङ—झ. ट. जनौघैःपरिपूर्ण. ५ क. ङ. ज. पुण्य. ६ ङ. च. छ. झ. ञ. ट. विमलम्. ७ ग. घ. ज. संप्रहृष्टः. ८ ख. संपूर्ण. ९ ङ. छ. झ. ट. समन्वितम्.

चन्दनानां च मुख्यानामगरूणां च संचयैः ॥ उत्तमानां च गन्धानां क्षौमकौशांबरस्य च ॥ ३ ॥
अविद्धाभिश्च मुक्ताभि[२]रुत्तमैः स्फाटिकैरपि ॥ शो[३]भमानमसंबाधैस्तं राजपथमुत्तमम् ॥ ४ ॥
संवृतं विवि[४]धैः पण्यै[५]र्भक्ष्यैरुच्चावचैरपि ॥ ददर्श तं राजपथं दिवि दे[६]वपथं यथा ॥ ५ ॥
दध्यक्षतहविर्लाजैर्धूपैरगरुचन्दनैः ॥ नानामाल्योपगन्धैश्च स[६]दाऽभ्यर्चितचत्वरम् ॥ ६ ॥
आशीर्वादान्ब[७]हूञ्शृण्वन्सुहृद्भिः समुदीरितान् ॥ यथार्हं चापि संपूज्य सर्वानेव नरान्ययौ ॥ ७ ॥
पितामहैराचरितं तथैव प्रपितामहैः ॥ अद्योपादाय तं मार्गमभिषिक्तोऽनुपालय ॥ ८ ॥
यथा स्म ला[८]लिताः पित्रा यथा पूर्वैः[९] पितामहैः ॥ ततः सुखतरं रा[१०]मे वत्स्यामस्सति राजनि ॥ ९ ॥
अलमद्य हि भु[११]क्तेन परमार्थैरलं च नः ॥ य[१२]था पश्याम नि[१३]र्यान्तं रामं राज्ये प्रतिष्ठितम् ॥ १० ॥
त[१४]तो हि नः प्रियतरं नान्यत्किंचिद्भविष्यति ॥ य[१५]थाऽभिषेको रामस्य राज्येनामिततेजसः ॥ ११ ॥

त्यादित्वात्तृतीया ॥२॥ कीदृशंराजमार्गंययावित्याकाङ्क्षायामाह—चन्दनानामित्यादिना । क्षौमकौशांबरस्य क्षौमं दुकूलं । "क्षौमंदुकूलं" इत्यमरः । कौशांबरं कौशेयं ॥३ ॥ अविद्धाभिः अकृतरन्ध्राभिः । नूतनाभिरितियावत् । स्फाटिकैः स्फटिकैः स्वार्थेअण्प्रत्ययः ॥४॥ तंराजपथं सकलभाग्ययुक्तं राजमार्गमित्यर्थः । यद्वा प्रथमस्यराजपथपदस्यददर्शेत्यनेनसंबन्धः । द्वितीयस्यवक्ष्यमाणेनययावित्यनेनसंबन्धः ॥ ५ ॥ अभ्यर्चितचत्वरं प्रतिपूजिताङ्गणं । "अङ्गणंचत्वराजिरे" इत्यमरः ॥ ६ ॥ यथार्हं । वीक्षणभ्रूक्षेपवचनाञ्जलिप्रणामादिभिरित्यर्थः ॥७॥ अद्याभिषिक्तस्त्वं पितामहाद्यैराचरितं तं प्रसिद्धं । मार्गं मर्यादांअनुपालय ॥ ८ ॥ रामेराजनिसति सर्वेवयं । ततः पूर्वस्मात् । सुखतरंयथाभवतितथावत्स्यामः ॥ ९ ॥ भुक्तेन भोजनेन । परमार्थैः परमपुरुषार्थसाधनभूतैः । जपहोमध्यानादिभिरित्यर्थः । राज्येप्रतिष्ठितं अभिषिक्तं । पुनःस्वगृहायनिर्यान्तं । यथा यथावत् । पश्याम । प्रार्थनायांलोट् ॥ १० ॥ राज्येनाभिषेकः राज्यायाभि-

न्वितमितिपाठेतुसष्टोर्थः । नानाजनाश्चतेसमनवोमन्त्रजपपराःतैरितंप्राप्तं । विशेषणविशेष्यत्वस्यकामचारित्वान्नपौर्वापर्यप्रयुक्तानुपपत्तिः ॥ १ ॥ ति० क्षौमं अतसीजं । कौशंपट्टवस्त्रं ॥ ३ ॥ ति० आविद्धाभिः कृतच्छिद्राभिः ॥ ४ ॥ सत्य० समुदीरितानित्यत्रसमुदित्यपिपदविभागः । एतेननित्यमुदोरामस्यसुहृदीरिताशीर्वादश्रवणंतदनुजिघृक्षयेत्युक्तंभवति । स० पितृपितृभिः पितामहैः । तत्पितृभिः प्रपितामहैः । पिता महैरितिच्छेदोवा । पितेतिप्रथमातृतीयार्थे । यःपितातेनेतिशेषोवा । पित्रादशरथेन । महैरुत्सवैरित्यस्यययावितिपूर्वेणान्वयः । एतेनोत्तरत्रपित्रेत्यनुवादायोगइतिनिरस्तं ॥ ८ ॥ सत्य० पितामहैः पितामहादिभिः । "फणांचसप्तानां" इत्यत्रेवबहुवचनमाद्यर्थे । यथापित्रालालिताःयथाचपितामहादिभिः तथात्वयालालितास्सन्तोवत्स्यामइतिलालनंत्रितयसाधारणं । ततस्सुखतरमितिविशेषोक्तेः "शैलाइवोन्नतास्सन्तःकिंतुप्रकृतिकोमलाः" इतिवद्व्यतिरेकालंकारः ॥ ९ ॥ विष० रामं प्रतिष्ठितं अभिषिक्तं राजमार्गेनिर्यान्तं । सत्य० भुक्तेन भावेक्तः भोजनेन अलं । परमाअर्थायेभ्यस्तैःपरमार्थैः इतरविषयैरलं । "अलंभूषणपर्याप्तिवारणेचनिरर्थके" इतिविश्वः । भोजनादिनिरर्थकमितिभावः । एतेन "नमस्स्वस्ति—"इत्यनेनचतुर्थ्याभाव्यत्वात्कथंतृतीयेतिशङ्कानवकाशः । तत्रपर्याप्त्यर्थालंशब्दयोगएवचतुर्थ्याःकाशिकादावुक्तेरितिभावः । तत्प्राप्यफलस्यतादृशरामदर्शनेनसिद्धेःपरमार्थैःपरमाःप्रमाणानिवेदान्ताइतियावत् । विचारितैस्तदर्थैरलमितिवार्थः । ति० यद्यन्तर्भावेणविपरीतसंभावनासूचनम् । ती० पश्यामयथा साक्षात्कुर्मोयदि एतत्सुखलाभोयदि तदा भुक्तेन ऐहिकविषयेणतज्जन्यसुखेनच । तथापरमार्थैः परमैःश्रेष्ठैःअर्थैःस्वर्गादिभिः तज्जन्यसुखैश्च नः अस्माकं अलंमास्तां ॥ १० ॥ ती० राज्येन राज्यप्राप्तिहेतुना । अभिषेकोयथा अभिषेकइतियत् । ततः अभिषेकजन्यभूमानन्दब्रह्मसाक्षात्कारजन्यसुखात् । सत्य० प्रियतरमित्येतल्लिङ्गव्यत्यासेनाभिषेकपदेनाप्यन्वेति । यथाभिषेकःप्रियतरः तथान्यत्प्रियतरंनास्तीत्यर्थः । प्रियतरमितिनपुंसकनिर्देशस्तुअभिषेकेतरसामान्यस्यप्रियतरत्वनिषेधार्थः। राज्येनेतितृतीयाहेतौ । राज्ये नामिततेजसइतिच्छेदोवा । नामितानिप्रह्वीकृतानि

[पा०] १ क. घ. ङ. झ. ञ. ट. आविद्धाभिश्च. २ ख. स्फाटिकैरुत्तमैरपि. ३ क. ख. ग. ङ—ट. मसंबाधं. ४ ङ. छ. झ. ञ. ट. पुष्पैः. क. पुण्यैः. ५ ङ. च. छ. झ. ट. देवपतिर्यथा. ६ ख. तदभ्यर्चितु. ख. छ. ट. तदाभ्यर्चित. घ. समभ्यर्चित. ७ ङ. छ. झ. ट. बहुभिः. ८ ङ. छ. झ. ट. पोषिताः. ९ क. ख. ङ. च. छ. झ. ञ. ट. सर्वैः. १० क—ट. सर्वेरामेवत्स्यामराजनि. ११ क. ख. च. भुक्तैर्नः. १२ ग. ज. यथापश्येम. घ. यदापश्येम. ङ. छ. झ. ट. यदिपश्याम. १३ ग. घ. ज. राजानं. १४ क. ख. ग. घ. ज. अतो. १५ घ. यदाभिषेको.

एताश्चान्याश्च सुहृदामुदासीनः कथाः शुभाः ॥ आत्मसंपूजनीः शृण्वन्ययौ रामो महापथम् ॥१२॥
न हि तस्मान्मनः कश्चिच्चक्षुषी वा नरोत्तमात् ॥ नरः शक्नोत्यपाक्रष्टुमतिक्रान्तेऽपि राघवे ॥१३॥
यश्च रामं न पश्येत्तु यं च रामो न पश्यति ॥ निन्दितः स वसेल्लोके स्वात्माऽप्येनं विगर्हते ॥१४॥

षेकः । सयथाप्रियतरस्तथाततोऽन्यत्प्रियतरंकिंचिन्नास्ति ॥ ११ ॥ उदासीनः स्तुतिश्रवणेननिर्विकारः । आत्मसंपूजनीः आत्मसंपूजाजननीः । मनोहर्षजननीर्वा । महापथं राजमार्गं ॥ १२ ॥ कश्चिदपिनरः मनश्चक्षुषीवा तस्मात् अपाक्रष्टुं निवर्तयितुं । नशक्नोति । किमुतनारीजनइतिभावः । अतिक्रान्ते दूरगतेपि किमुतसन्निहितइत्याशयः ॥ १३ ॥ चकारोभिन्नक्रमः । रामंच दर्शनकालएवपरिपूर्णामृतसरसिमज्जयन्तमपि । यस्तु अतिशयितवैलक्षण्यसंपन्नोपि । नपश्येत् स्तुतिसल्लापसत्काराद्यभावेप्यचेतनविलक्षणाकारेणचक्षुर्विषयंनकरोति । अतएव यंरामोपिनपश्यति नरस्याभिमुख्येहि भगवान्कटाक्षयति । सः राममदृष्ट्वा तत्कटाक्षाविषयः । निन्दितोवसेत् यावत्कालंनिन्दितःस्यात् । लोकेनिन्दितःस्यात्तंनिन्दितुमनर्हःकोपि जनोनास्तीतिभावः । लोकेविषयप्रवणःकश्चित्सत्यामपिलोकगर्हायांस्वयंसंतुष्टोभवति नतथेत्याह—स्वात्माप्येनंविगर्हतइति । स्वान्तःकरणमप्येनंविशेषेणगर्हते

तेजांसिपराक्रमायस्यसः नामिततेजाः । नान्यत्किंचिदित्यस्मान्नेत्यनुवर्तते । सनभवतीतिननामिततेजाः अमिततेजास्तस्य । राज्यइतिसप्तमीनिमित्तार्थे । "निमित्तात्कर्मयोगे" इतिस्मरणात् । यद्वा आमितंसम्यक्परिमितंतेजोयस्यसतथा सनभवतीतिनामिततेजाः तस्य । नसमासोसावितिननुद्व । "तेजोधाम्निपराक्रमे" इत्यमरः ॥११॥ **सत्य०** उदासीनइत्यनेनसाक्षाल्लक्ष्मीस्तुत्यस्येदंकियदितिसूचितंभवति । पूर्वमाशीर्वादानित्युक्त्या इतरेषामाशीर्वादरूपाअपिवाचोभगवतिसेवारूपाइतिध्वनयति आत्मसंपूजनीरित्यनेन । यद्वा नात्मपदेनरामग्रहः किंतुस्तावकग्रहः । आत्मनःसुहृदःसंपूजयन्तीत्यात्मसंपूजिन्यस्ताः । ततश्चभगवत्स्तवनमात्मनांस्वेषांसंपूजनरूपमेवभवतीत्युक्तंभवति । यथोक्तंभागवते । "यद्यज्जनोभगवतेविदधीतमानंतच्चात्मनेप्रतिमुखस्ययथामुखश्रीः" इति ॥ १२ ॥ **ती०** राघवेअतिक्रान्तेपि दृष्टिपथमतीतेपि । सकलजनमनोनयनसंमोहनाकारानुभवजनितेनवासनाबलेनपुरतःपरिदृश्यमानादिवस्थितात् तस्मान्नरोत्तमात् ॥ १३ ॥ **ती०** यश्च रामं स्वदेशस्थं नपश्येत् यंच स्वदेशस्थं अतएवरामोपिनपश्यति । सोसावपरोक्षरामब्रह्मानुभवादृष्टहीनः इहामुत्रचलोकेसर्वैर्निन्दितोवसेत् । अप्रयासतोभगवदपरोक्षकृतिमात्रेणमुक्तिसंपादनादृष्टाभावान्नास्यकदापिसंसारोत्तारइत्यर्थः । अतएवास्यात्मा अन्तर्यामीभगवानपि एनंविगर्हते । पापिष्ठोयंमुक्तिमपिसाक्षात्कृत्यनजन्मोद्धृतवानितिवार्थः । **शि०** योजनः राममेवनपश्येत् स्वस्वामित्वेननजानाति रामोवा यंनपश्यति अयंमामेवस्वस्वामित्वेनजानातीति नजानाति ससर्वलोकेषुनिन्दितः । अतः एनं रामानुरागरहितं । **सत्य०** जनमनोनयनरञ्जनेरामेइत्थंभावआवश्यकइतितदृष्टजननिन्दामुखेनदृढयति—**यइति** । योजनः रामंनपश्येत् नावलोकयेत् । सनोनयनस्यप्रसक्तत्वान्नध्यायेद्वा । "पश्यार्थैश्चानालोचने" इतिज्ञानसामान्येपिदृशेःप्रयोगात् । रामोपियंजनंनपश्यति एतमुद्धरिष्यइतिनध्यायति । सजनस्सर्वलोकेषुनिन्दितोभवति । नकेवलमेतावत् । अपितुस्वमनोपिएनंधिगितिविगर्हते । लोकनिन्दालक्षणकिंचित्कार्यंविधातुमुपात्तस्यजनस्यपुनस्स्वात्मकर्तृकगर्हणरूपवैवक्षिककार्यान्तरंविधातुमुपादानरूपान्वादेशे "द्वितीयाटौस्वेनः" इत्येनादेशः । दृशिरत्रभक्तिपूर्वकदर्शनार्थकः । रामोनपश्यतीत्यत्रापि दृशिःप्रसादपूर्वकदर्शनार्थइतिबोध्यम् । अन्यथासर्वदासर्वज्ञस्यरामस्ययंचरामोनपश्यतीत्युक्तिरयुक्तास्यात् । कुतोरामदर्शनस्यलोकोत्तरत्वंलोकेइत्यतश्श्टङ्गग्राहिकयादर्शयति—**यइति** । ई अं न पश्यतीतिच्छेदः । योरामः । चोहेत्वर्थे । यस्मान्नपश्यति । पश्यतीतिपश्योजीवः तद्वदाचरतीतिपश्यति । सनेतिनपश्यति । तं अं भगवदात्मकंरामं । ई लक्ष्मीः नपश्येत् साकल्येननजानीयात् । एनं एतादृशंरामं । यश्चात्माजनः विगर्हते निन्दति । ससर्वेषुलोकेषु सु सुष्ठु । निन्दितः । यमित्यत्रईअमितिस्थितेयणादेशेयमितिभवति । "लक्ष्मीरीकारउच्यते" । "अकारोवासुदेवस्स्यात्" इत्युभयत्रानेकार्थध्वनिमञ्जरी । "यदापश्यःपश्यतेरुक्मवर्णं" इतिश्रुतिव्याख्यानावसरेपश्यतीतिपश्योजीवइतिटीकोक्तेः । "पाघ्रा—"इतिशः । यस्माद्दाशरथिर्ज्ञानादिदाननिदानंमानवादीनांतस्मात्तस्मिन्मनोनयनसमासञ्जनंसज्जनानांयुक्तमितिवावक्ति—**यइति** । चरामं चराणांचेतनानांरमा तामरसभवभवादीनांआसम्यक् मासंपत्प्रतिपत्तिर्वायेन सचरामोरामः तंनपश्येद्यः सकिमपिनपश्यति । अतिमूढइतियावत् । तत्स्वरूपमावर्तितेनतेनैवनिरूपयति **चरामइति** । चरेषुअमः दरिद्रःअज्ञानीच । अतएवसर्वलोकविनिन्दितः । तत्संबन्धिनोवातंस्तुवन्तीत्यतउक्तं **स्वात्मेति** । स्वकीयआत्मा देही । स्वकीयस्सर्वोपिजनइतियावत् । अपि स्तवेस्तवननिमित्तेसत्यपि । इदमकार्यं अयमनार्यः स्तेनइति

[पा०] १ ङ. च. छ. झ. ञ. ट. शुभाःकथाः. २ घ. सम्भवेल्लोके. ङ. च. छ. झ. ञ. ट. ठ. सर्वलोकेषु.

सर्वेषां हि स धर्मात्मा वर्णानां कुरुते दयाम् ॥ चतुर्णां हि वयस्थानां तेन ते तमनुव्रताः ॥ १५ ॥
चतुष्पथान्देवपथांश्चैत्यान्यायतनानि च ॥ प्रदक्षिणं परिहरञ्जगाम नृपतेः सुतः ॥ १६ ॥
स राजकुलमासाद्य मेघसङ्घोपमैः शुभैः ॥ प्रासादशृङ्गैर्विविधैः कैलासशिखरोपमैः ॥ १७ ॥
आवारयद्भिर्गगनं विमानैरिव पाण्डुरैः ॥ वर्धमानगृहैश्चापि रत्नजालपरिष्कृतैः ॥ १८ ॥

स्मादर्शनाल्लोकगर्हयाचेतिभावः ॥ १४ ॥ सः रामः चतुर्णांवर्णानां सर्वेषामपिजनानां । सम्बन्ध्यर्थेषष्ठी । वयःस्थानंप्रमाणंयस्यास्तां वयोनुरूपां दयां । हि यस्मात्कारणात् । कुरुते तेनकारणेन ते तमनुव्रताइत्यन्वयः । वयस्थानांवृद्धानामितिवा । सर्वविशेषणं ॥ १५ ॥ चतुष्पथान् शृङ्गाटकानि । देवपथान् देवालयान् । चैत्यानि चैत्यवृक्षस्थानानि । आयतनानि सभादीनिच । परिहरन् अप्रदक्षिणंपरिहरन् । प्रदक्षिणंयथाभवतितथाजगामेतिसंबन्धः ॥ १६ ॥ राजकुलं राजगृहं । "कुलंगृहेपि" इत्यमरः ॥ १७ ॥ वर्धमानगृहैः वर्धमानलक्षणाधिष्ठानसमेतगृहैः ॥१८॥

मतिपूर्वकंगर्हयतीतिभावः । तुः सर्वत्रार्थेप्रमाणप्रसिद्धिद्योतकः ॥ १४ ॥ **तीर्थी०** वयस्स्थानां बाल्यादिवयस्स्थानां । अज्ञानामपिदयांमुक्तिपर्यन्तानुग्रहंकुरुतइतिवार्थः । **ति०** चतुर्णांहि चतुर्णामपि । **शि०** चतुर्णांवर्णानां । सर्वेषां वर्णातिरिक्तानांच । **सत्य०** श्रीरामदयोदयस्यतत्तदानुरूप्यंनिरूपयति—**सर्वेषुसहीति** । सर्वेषु देवदानवादिषु । हि यस्मात् । स रामः । धर्मात्मा धर्मबुद्धिः । धारकत्वादादानादिकर्तृत्वाद्वा धर्मात्मा । तेनतेजनास्तमनुव्रताः । "धारकत्वाद्धर्मोभगवान् । पृथिवीधर्ममूर्धनि । आततत्वाचमातृत्वात्" इत्यादेः । परबुद्धेरप्रत्यक्षत्वात्कथमेतज्ज्ञायतइत्यतश्शृङ्गग्राहिकयाऽनुग्राह्यानग्राहयति—**वर्णानामित्यादिना** । चतुर्णांवर्णानां ब्राह्मणादीनां । तत्रापिवयस्स्थानां । उपरीतिशेषः । सम्बन्ध्यर्थेषष्ठीवा । यथासंभवंदयांकुरुते । हीत्येतदर्थस्यसर्वानुभवसिद्धतामाह—**वयस्स्थानामिति** । दयाविशेषणंवा । वयसा गरुडेन । उपलक्षणयाशेषग्रहः । ताभ्यांस्थानंययासावयस्स्थानातां । मार्गभूतगरुडशेषाभ्यांप्राप्यमुक्तिस्थानप्रापिकादयेतिभावः । यद्वा वयस्स्थोतिवृद्धत्वाद्ब्रह्मा । अनोवायुः । द्विनोतिवयस्स्थानावितिहिवयस्स्थाना दया । हिगतौवृद्धौचेतिधातुव्याख्यानात् । सर्वेषामितिपाठेनकेवलंचतुर्णांवर्णानां अपितुसर्वेषामित्यर्थः । कुरुतइत्यावर्तितंसप्तम्यन्तं । कुत्सितशब्दकर्तृकव्यादावित्यर्थः । उक्तंचभागवतेपञ्चमस्कन्धे । "नजन्मनूनंमहतोनसौभगंनवाङ्नबुद्धिर्नाकृतिस्तोषहेतुः । तैर्यद्विसृष्टानपिनोवनौकसश्चकारसख्येवतलक्ष्मणाग्रजः । सुरोसुरोवाथनरोथवानरस्सर्वात्मनायस्सुकृतज्ञमुत्तमम् । भजेतरामंमनुजाकृतिंहरिंयउत्तराननयत्कोसलान्दिवम्" इति । केवलंधर्मात्माचेत्नक्षत्रधर्मारामइत्यतोनेत्यप्यनेनाह—**सर्वेषुसहिधर्मात्मेति** । सर्वेषामरीणामिषवश्शरास्तान्सोढुंशीलमस्यास्तीतिसर्वेषुसही सचासौधर्मात्माचेत्यर्थः । "सुप्यजातौ—" इतिणिनिप्रत्ययेसाहीतिभवितव्यं कथंसहीतिचेत्संज्ञापूर्वकविधेरनित्यत्वाद्वृद्ध्यभावः । यद्वा "घञर्थेकविधानं"इतिकेसहमस्यास्तीतीनिनवृद्धेःप्रसक्तिरितिबोध्यम् । नन्वेवंतूष्णीमसहिष्णोःशरसहनंनमहत्त्वावहमित्यतोवाह—**सर्वेषुसहिधर्मात्मेति** । सर्वेस्यशर्वस्यइषवःक्षेप्तुंयस्मिन्तत्सर्वेषु धनुः तस्य सं वारणं निवारणं ह्रापयतीतिसर्वेषुसाहीततःकर्मधारयः । हिंसार्थाद्गत्यर्थाद्वापर्वेः "धात्वादेष्पस्सः" इतिसत्वेषस्यवत्वेसर्वइतिभवति । "सर्वोह्येषरुद्रः । सर्वस्तुशर्वोभगवाञ्शंभुःकालञ्जनदिशवः" इतिश्रुतिभानुदीक्षितोदाहृतनामनिधाने । "सःकोपेवारणे" इतिविश्वः । धनुर्मनस्कोवा ॥ १५ ॥ **ती०** प्रदक्षिणंयथातथापरिहरन् अतिक्रामन् । **सत्य०** देवपथान् देवालयमार्गान् । चैत्यानि यज्ञस्थानानि । अश्वत्थादिमूलवद्धवेदिकावा । आयतनानि देवालयान् । चिञ्चयनेइत्यस्मात् "चित्याग्निचित्येच" इतिनिपातनात्क्यचि "हस्वस्य—"इतितुक्पूर्वसूत्रादग्नावित्यनुवर्तनादग्निवाचकचित्यशब्दनिष्पत्तिः । तस्माच्च "तस्येदं" इत्यणिचैत्यमितिभवति । तेननपुनरुक्तिः । यद्वा चैत्यानिवसिष्ठादिगुर्वन्तर्गतभगवद्रूपाणि । यथोक्तंसप्तमाध्यायगीताभाष्योदाहृतस्य "आचार्यचैत्यवपुषास्वगतिंव्यनक्षीत्"इत्येकादशस्कन्धश्लोकस्यव्याख्यायां "चैत्यंचित्तस्थं" इतिप्रमेयदीपिकायाम् । प्रदक्षिणंपरिहरन् पूर्वोक्तचतुष्पथादीन्प्रदक्षिणंयथाभवतितथादक्षिणभागेसंत्यजन् । नृपतेस्सुतइत्येकंवापदं । "षष्ठ्याआक्रोशे" इत्यलुक् । अनेनजगत्पितूरामस्यदशरथसुतत्वायात्वक्रोशकविरिरितियोत्यते ॥ १६ ॥ **सत्य०** विविधान्वीन्पक्षिणःदधतइतिविविधानितैः । "विःपक्षिपरमात्मनोः"इतिविश्वः ॥ १७ ॥ **ति०** वर्धमानगृहैः क्रीडागृहैः । **सत्य०** यद्वा वर्धमानगृहैः दक्षिणद्वाररहितैः । उक्तंचैतन्मत्स्यपुराणेवास्तुप्रस्तावेषडुत्तरद्विशततमाध्याये "पश्चिमद्वारहीनंतुनन्द्यावर्तंप्रचक्षते । दक्षिणद्वारहीनंतुवर्धमानमुदाहृतं" इति । रत्नजालपरिष्कृतैः रत्नानांजालंसमूहस्तेन । यद्वा रत्नात्मकानिजालानिगवाक्षास्तैःपरिष्कृतैः । "जालंगवाक्षआनाये" इति विश्वः ॥ १८ ॥

[**पा०**] १ च. ञ. ट. सर्वेषांसहि. ङ. छ. झ. सर्वेषुसहि. २ ख. ङ. च. छ. झ. ञ. श्चैत्यांश्चायतनानि. ख. चैत्यानायतनानि.

तत्पृथिव्यां गृहवरं महेन्द्रभवनोपमम् ॥ राजपुत्रः पितुर्वेश्म प्रविवेश श्रिया ज्वलन् ॥ १९ ॥
स कक्ष्या धन्विभिर्गुप्तास्तिस्रोतिक्रम्य वाजिभिः ॥ पदातिरपरे कक्ष्ये द्वे जगाम नरोत्तमः ॥ २० ॥
स सर्वाः समतिक्रम्य कक्ष्या दशरथात्मजः ॥ संनिवर्त्य जनं सर्वं शुद्धान्तं पुनरभ्यगात् ॥ २१ ॥

ततः प्रविष्टे पितुरन्तिकं तदा जनः स सर्वो मुदितो नृपात्मजे ॥
प्रतीक्षते तस्य पुनर्विनिर्गमं यथोदयं चन्द्रमसः सरित्पतिः ॥ २२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे सप्तदशः सर्गः ॥ १७ ॥

अष्टादशः सर्गः ॥ १८ ॥

रामेणकैकेयीदशरथयोश्चरणप्रणामसमनन्तरंकरुणवचनादिनासामान्याकारेणपितुःशोकमनुमायविशेषरूपेणतज्जिज्ञासया कैकेयींप्रतिसंभावनार्हहेतुविकल्पपूर्वकंप्रश्नः ॥ १ ॥ कैकेय्यारामंप्रतितेनपित्रभिमतार्थकरणप्रतिज्ञापनपूर्वकंतद्विवासनभरताभिषेचनविषयकवरदाननिवेदनेनतद्वियोगस्यशोकहेतुत्वकथनम् ॥ २ ॥

स ददर्शासने रामो निषण्णं पितरं शुभे ॥ कैकेयीसहितं दीनं मुखेन परिशुष्यता ॥ १ ॥
स पितुश्चरणौ पूर्वमभिवाद्य विनीतवत् ॥ ततो ववन्दे चरणौ कैकेय्याः सुसमाहितः ॥ २ ॥
रामेत्युक्त्वा च वचनं वाष्पपर्याकुलेक्षणः ॥ शशाक नृपतिर्दीनो नेक्षितुं नाभिभाषितुम् ॥ ३ ॥
तदपूर्वं नरपतेर्दृष्ट्वा रूपं भयावहम् ॥ रामोपि भयमापन्नः पदा स्पृष्ट्वेव पन्नगम् ॥ ४ ॥
इन्द्रियैरप्रहृष्टैस्तं शोकसंतापकर्शितम् ॥ निश्वसन्तं महाराजं व्यथिताकुलचेतसम् ॥ ५ ॥
ऊर्मिमालिनमक्षोभ्यं क्षुभ्यन्तमिव सागरम् ॥ उपप्लुतमिवादित्यमुक्तानृतमृषिं यथा ॥ ६ ॥

पृथिव्यांगृहवरं पृथिव्यामद्वितीयमित्यर्थः । पितुर्वेश्म पितृवासस्थानं ॥१९॥ वाजिभिः रथयुक्तैर्वाजिभिः । पदातिः पादचारी ॥ २० ॥ शुद्धान्तं अन्तःपुरं ॥ २१—२२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीतांबराख्याने अयोध्याकाण्डव्याख्याने सप्तदशस्सर्गः ॥ १७ ॥

आसने पर्यङ्के । " मूर्छितोन्यपतत्तस्मिन्पर्यङ्के हेमभूषिते " इत्युत्तरत्रवक्ष्यमाणत्वात् । मुखेनेत्युपलक्षणेतृतीया ॥ १—२ ॥ नाभिभाषितुं रामेत्यस्मादधिकमित्यर्थः ॥ ३ ॥ अपूर्वम् अदृष्टपूर्वं । रामोपीत्यपिशब्देनदुःखसहस्रसद्भावेप्यक्षुभितोरामोदशरथविषादस्यस्वहेतुकत्वमाशङ्क्यभयमापन्नइत्यवगन्तव्यम् ॥ ४ ॥ इन्द्रियैरित्यादिश्लोकद्वयेदृष्ट्वाभयमापन्नइत्येतदनुकृष्य

सत्य० महेन्द्रसदनस्योपमायेनतन्महेन्द्रसदनोपमं । अनेनगृहवरमित्युचितार्थमित्युक्तंभवति ॥ १९ ॥ सत्य० पदातिः पदगस्सन् । अतिक्रम्येत्यन्वेति ॥ २० ॥ इतिसप्तदशस्सर्गः ॥ १७ ॥

शि० विषण्णं संभावितपुत्रवियोगजनितदुःखाक्रान्तं । अतएवदीनंआसनेददर्श । सत्य० यद्वासहितमित्येततमुखेनेत्यनेनाप्यन्वेति ॥ १ ॥ ति० सुसमाहितः तस्याअतिस्वेष्टकरत्वेनजगद्धितकरत्वेनचतस्यांप्रसन्नचित्तः । सत्य० वस्तुतस्सर्वोत्तमस्यलोकशिक्षार्थंविनयप्रदर्शनमितिवतिनाध्वनयाञ्चकारकविरितिज्ञेयम् ॥ २ ॥ सत्य० पूर्वश्लोकात्नाइत्यनुवर्तते । नापुरुषःपन्नगंपदास्पृष्ट्वायथाभयंप्राप्नोतितथारामोपिदुःखितत्वेनादृष्टपूर्वंनरपतिरूपंदृष्ट्वाभयमापन्नइत्यर्थः । "भीषास्मात्" इत्यादेस्सर्वभीषकस्यरामस्यभयं अपिनागर्हयामासकविरितिज्ञेयं । अपूर्वमित्येतद्भयपदेनाप्यन्वेति । अपूर्वभयंअभयमित्यर्थः । सदाअभयमापन्नइतियतः

[पा०] १ क. ख. ग. ङ. च. छ. ज. ञ. ट. सदनोपमम्. २ ट. सर्वास्स. ३ क. च. ञ. नरवरात्मजः. ४ क. संनियम्य. ५ क. ख. ग. ङ. च. छ. झ. ञ. ट. शुद्धान्तःपुरमभ्यगात्. च. झ. ञ. मत्यगात्. ङ. ट. मन्वगात्. छ. माविशत्. ६ च. छ. झ. ञ. ट. तस्मिन्. ७ क. पितुरन्तिके. ८ ङ. च. छ. झ. ञ. ट. पुनस्स. क. पुनश्च. ९ क. ख. ङ. च. विषण्णं. १० ङ. च. छ. झ. ञ. ट. कैकेय्या. ११ क. च. ञ. त्युवाच. ङ. छ. झ. ट. त्युक्तवातु. १२ क. क्लेश.

अचिन्त्यकल्पं हि[१] पितुस्तं शोकमुपधारयन् ॥ बभूव संरब्धतरः समुद्र इव पर्वणि ॥ ७ ॥
चिन्तयामास च[२] तदा रामः पितृहिते रतः ॥ किंस्विद[३]द्यैव नृपतिर्न मां प्रत्यभिनन्दति ॥ ८ ॥
अन्यदा मां पिता दृष्ट्वा कुपितोपि प्रसीदति ॥ तस्य मामद्य संप्रेक्ष्य किमा[४]यासः प्रवर्तते ॥ ९ ॥
स दीन इव शोकार्तो विषण्णवदनद्युतिः ॥ कैकेयीमभिवाद्यैव रामो वचनमब्रवीत् ॥ १० ॥
कच्चिन्मया नापराद्धमज्ञानाद्येन मे पिता ॥ कुपितस्तन्ममाचक्ष्व त्वं[५] चैवैनं प्रसादय ॥ ११ ॥
अप्रसन्नमनाः किंनु सदा मां प्रति वत्सलः ॥ वि[६]वर्णवदनो दीनो न हि मा[७]मभिभाषते ॥ १२ ॥
शारीरो मानसो वाऽपि कच्चिदेनं न बाधते ॥ संतापो वाऽभितापो वा दुर्लभं हि सदा सुखम् ॥१३॥
कच्चिन्न किंचि[८]द्भरते कुमारे प्रिय[९]दर्शने ॥ शत्रुघ्ने वा महासत्त्वे मातॄणां वा ममाशुभम् ॥ १४ ॥
अतोषयन्महाराजमकुर्वन्वापितुर्वचः ॥ मुहूर्तमपि नेच्छेयं [१०]जीवितुं कुपिते नृपे ॥ १५ ॥
यतोमूलं नरः पश्येत्प्रादुर्भावमिहात्मनः ॥ कथं तस्मिन्न वर्तेत प्रत्यक्षे स[११]ति दैवते ॥ १६ ॥

संबध्यते । उपप्लुतं राहुग्रस्तम् । उत्क्रान्तमृषिंयथा ऋषिमिवस्थितं । निस्तेजस्कमित्यर्थः ॥ ५—६ ॥ अचिन्त्यकल्पम् असंभावितमित्यर्थः । उपधारयन् विचारयन् । संरब्धतरः संभ्रान्ततरः ॥ ७ ॥ किंस्वित् किंवा ॥ ८ ॥ अद्यैवेत्येवकारव्यवच्छेद्यमाह—अन्यदेति । आयासः चित्तक्लेशः । इतिचिन्तयामासेत्यन्वयः ॥ ९—१० ॥ नापराद्धं अपराधोनकृतः । अज्ञानात् प्रमादात् ॥ ११—१२ ॥ शारीरःसंतापोव्याधिः । मानसोभितापआधिः । दुर्लभंहीति पुण्यपापारब्धत्वान्मानुषशरीरस्येतिभावः ॥ १३ ॥ मातॄणामितिनिर्धारणेषष्ठी । कच्चिदितिप्रश्ने । किंचिदशुभंनकच्चिदितिसंबन्धः ॥ १४—१५ ॥ इह जगति । नरः आत्मनः देहस्य । प्रादुर्भावम् उत्पत्तिम् । यतोमूलं यत्कारणकं । पश्येत् प्रत्यक्षेदैवते सति सिद्धे । तस्मि-

अतःभयमापन्नइत्यपिगर्हितमित्यर्थः ॥ ४ ॥ **ती०** अवधारयन् चिन्तयन् । आत्मीयत्वेनस्वीकुर्वन्नितिवा । **शि०** उपधारयन् निश्चिन्वन् । **सत्य०** शोचयतीतिशोकश्शोकहेतुः । तज्जनितसंतापेनकर्शितं । निश्वसन्तमित्यत्रविशेषणत्वेनप्रसक्तनिश्वासाः बुद्ध्याविवेकेनाभेदसंबन्धेनोर्मिपदार्थेनान्वीयन्ते । ऊर्मिमालिनं शिखादित्वादिनिप्रत्ययान्तंपदं । तथाचश्वासोल्लोलकल्लोलैस्सहितं । अतएवक्षुभ्यन्तं चलन्तं । उत्क्रमनृतंयेनसउत्क्रान्तृतःतमिवविद्यमानं । ऋषिमित्यनेनअनृतोक्तेर्महापापकरत्वमितिमत्वन्तस्यध्वनयति । अचिन्त्यःकल्पः राज्ञःकदाचिदप्येतादृशशोकादिकंभवतिवेत्यादिकोयस्यसोचिन्त्यकल्पस्तं ॥ ७ ॥ **ती०** अन्यदा पूर्वकाले । परोक्षेमांप्रतिकुपितोपिदृष्ट्वाप्रसीदति । **सत्य०** कुपितः अन्यस्मादितिशेषः। परोक्षमद्यंकुपितोपीतिव्याख्यातु परोक्षापरोक्षप्रीतिमात्रपात्रत्वाद्रामस्येत्युपेक्ष्या । मांसंप्रेक्ष्यस्थितस्य ॥ ९ ॥ **वि०** दीनइव विषण्णवदनद्युतिरिवसरामः । शोकार्तइववचनमब्रवीदितिसंबन्धः । **सत्य०** विषण्णवदनानांद्युतिर्यस्मात्सविषण्णवदनद्युतिः । तेषांद्युतिरिवद्युतिरितिवार्थः । इवेनदैन्यादिकंदेवदेवेसर्वथानास्तीतिद्योतयतिकविः । अभिवाद्यैवेत्यनेनराजमर्यादाद्योत्यते ॥ १० ॥ **वि०** नापराद्धं काकुः । अज्ञानात्प्रमादात् । प्रसादय मत्कृतापराधशान्त्यैइतिशेषः ॥ ११ ॥ **शि०** दुर्लभंप्राकृतैर्दुष्प्रापं । सदासुखंनित्यसुखविशिष्टं । एनंपितरंकच्चिन्नबाधते ॥ १३ ॥ **सत्य०** कुमारेप्रियदर्शनेमहासत्वेइतिपूर्वोत्तरार्धोक्तविशेषणान्युभयत्रान्वीयन्ते । मातॄणां विषयसप्तमीयं । भवदादीनांममभातॄणांविषयेअशुभंनकिंचित्पश्यतिकच्चिदित्यन्वयः । मम मत्कर्तृकमशुभंनपश्यतिकच्चिदित्यन्वयोवा । मातॄणामितिनिर्धारणेषष्ठीति व्याख्यातुपृथक्करणकारणीभूतजातिगुणक्रियासंज्ञानांपृथक्करणीयवाचकस्यचाभावादत्युपेक्ष्या ॥ १४ ॥ **ती०** नृपेकुपितेसतिकिमुवक्तव्यमित्यर्थः । **शि०** अतोषयन् तुष्टमकुर्वन् ॥१५॥ **शि०** मूलंप्रवृत्तिहेतुभूतं । आत्मनःस्वस्यप्रादुर्भावंप्राकट्यं । यतःयस्मात् पश्येत्जानातितस्मिन्प्रत्यक्षेदैवतेसतिकथंनवर्तेत । तदानुकूल्येनेतिशेषः । एतेनयतोमूलंयन्मूलमित्यर्थेआर्षमेतदितिभट्टाद्युक्तिश्चिन्त्या । **सत्य०** एकयोक्त्याजगत्सदितुस्तत्पितुश्चस्वभावमावेदयतिकविः—**यतोमूलमित्यादिना** । नरः पुमान् । आत्मनः स्वस्य । प्रादुर्भावं जन्म । “जन्मप्राकाश्ययोःप्रादुः” इति “प्रादुर्भूतस्सुतस्तस्य” इतिचलिङ्गभट्टीये । यतःपितुस्सकाशात्पश्येत् । तयामूलंचस्वप्रादुर्भावापादकंतपआदिअन्यत्रजन्मापादकंकर्मादिपश्येत् । पूर्वश्लोकाद्वाशब्दश्चार्थस्सन्ननुवर्तते । हेसतिकैकेयि तस्मिन्पित्र्यप्रत्यक्षदैवतेकथंनवर्तेत नप्रवर्तेत । कुशलप्रश्नादिकंकथंनकुर्यादितियावत् । योनरोदशरथादिः । यतोमूलमित्यत्रमयूरव्यंसकादि-

[पा०] १ ङ. छ. झ. नृपतेस्तंशोकमवधारयन्. २ क. ख. च. ञ. चततो. ङ. छ. झ. ट. चतुरो. ३ ख. दिलेव. ग. घ. ज. दद्यैष. ४ ख. माश्वासः. ५ ङ. छ. झ. त्वमेवैनं. ६ क. ख. ङ. च. छ. झ. ञ. ट. विषण्ण. ७ ख. ङ. च. छ. ञ. ट. मांप्रति. ८ घ. भरतेकिंचित्. ९ घ. शुभदर्शने. १० घ. ट. जीवितं. ११ घ. ज. दैवतेसति.

कच्चित्ते परुषं किंचिदभिमानात्पिता मम ॥ उक्तो भवत्या कोपेन यत्रास्य लुलितं मनः ॥ १७॥
एतदाचक्ष्व मे देवि तत्वेन परिपृच्छतः ॥ किंनिमित्तमपूर्वोऽयं विकारो मनुजाधिपे ॥ १८ ॥
एवमुक्ता तु कैकेयी राघवेण महात्मना ॥ उवाचेदं सुनिर्लज्जा धृष्टमात्महितं वचः ॥ १९ ॥
न राजा कुपितो राम व्यसनं नास्य किंचन ॥ किंचिन्मनोगतं त्वस्य त्वद्भयान्नाभिभाषते ॥२०॥
प्रियं त्वामप्रियं वक्तुं वाणी नास्योपवर्तते ॥ तदवश्यं त्वया कार्यं यदनेनाश्रुतं मम ॥ २१ ॥
एष मह्यं वरं दत्त्वा पुरा मामभिपूज्य च ॥ स पश्चात्तप्यते राजा यथाऽन्यः प्राकृतस्तथा ॥ २२ ॥
अतिसृज्य ददानीति वरं मम विशांपतिः ॥ स निरर्थं गतजले सेतुं बन्धितुमिच्छति ॥ २३ ॥
धर्ममूलमिदं राम विदितं च सतामपि ॥ तत्सत्यं न त्यजेद्राजा कुपितस्त्वत्कृते यथा ॥ २४ ॥
यदि तद्वक्ष्यते राजा शुभं वा यदि वाऽशुभम् ॥ करिष्यसि ततः सर्वमाख्यास्यामि पुनस्त्वहम् ॥२५॥

न् पितरि । कथंनवर्तेत तद्वशेएववर्तेतेत्यर्थः ॥ १६ ॥ तेअभिमानात् तववाह्यभ्यात् । कोपेनवा ममपिता भवत्याकिंचित्परुषमुक्तःकच्चित् । यत्र येन । अस्यमनः लुलितं कलुषितम् ॥ १७॥ किंनिमित्तमित्याद्याचक्ष्वेतिपूर्वोक्तस्यसर्वस्यसंग्रहः ॥ १८ ॥ एवं इति । धृष्टं प्रत्यक्षतोरामानिष्टवचनविषयवैक्लव्यरहितम् ॥ १९—२० ॥ त्वद्भयादित्यस्यविवरणं—प्रियमिति । आश्रुतं प्रतिज्ञातम् ॥ २१ ॥ तत्किमित्यपेक्षायांसामान्यतोदर्शयति—एषइत्यादिना ॥ २२ ॥ अतिसृज्य प्रतिज्ञाय । गतजलेसेतुंबन्धितुमिच्छतीति । दानस्यपूर्वमेवकृतत्वादिदानींतत्परिहारव्यापारोव्यर्थइतिभावः ॥ २३ ॥ इदं जगत् । धर्ममूलं । इदंच सतांविदितं सद्भिर्विदितं "क्तस्यचवर्तमाने" इतिषष्ठी । तत् तस्मात् । सत्यं सत्यरूपधर्मं । राजा त्वत्कृते त्वत्प्रयोजनाय । मयिकुपितःसन्यथानत्यजेत् तथाकुर्वित्यर्थः ॥ २४ ॥ तर्हितद्विशेषतोवक्तव्यमित्यत्राह—यदीति । शुभमशुभंवातत्प्रतिज्ञातं राजायद्वक्ष्यतितत्त्वंकरिष्यसियदि तदाराज्ञोविवक्षितमहमेवाख्यास्यामीत्यर्थः ॥ २५ ॥

स्समासः अकुतोभयइत्यादिवत् । ततश्च योऽहंमूलंयस्यसयन्मूलस्तंप्रादुर्भावंआत्मनस्स्वस्यजानीयात् । तस्मिन्दशरथविषयेतस्मिन्सतिप्रत्यक्षेमयिदैवतेकुशलप्रश्नादिःकथंनानुवर्तेत ॥१६॥ **सत्य०** ते त्वद्विषये । ममपिता परुषं निष्ठुरं । कोपेन किंचिदुक्तवानितिशेषः । भवत्यावाअभिमानात् कनीयसीजायेत्यभिमानात् । किंचित्परुषंयथाभवतितथाउक्तः । येनास्यराज्ञोमनोलुलितं । अवक्तव्यंमयोक्तमितिमाननीयंमांप्रतिमानिन्येवमुक्तवतीत्युभयथाचलितमित्यर्थः । ते त्वया । येन त्वद्दुरुक्त्याकारणेन । भवत्याइतिषष्ठी । उपरीतिशेषः । तइतिषष्ठ्येव । भवत्याउक्तःतेउपरिरोषेणेतिवान्वयः । यद्वा विनाशेपंषष्ठ्यर्थसंबन्धत्वेनोपरीत्यर्थलाभः । एवमन्वयकरणेनदुःखितत्वादधिकपदोक्तिरितिकेनचिदुक्तंनिरस्तंज्ञातव्यं ॥ १७ ॥ **सत्य०** किंनिमित्तमितिप्रथमान्तं । केननिमित्तेनेत्यर्थः । "निमित्तकारणहेतुषु—"इतिकात्यायनस्मृतेः । किंनिमित्तंविकारोभूत्तन्ममाचक्ष्वेत्यन्वयः । सदैवंविधस्यकुतोयंप्रश्नइत्यंतोनेत्यप्यनेनाह—**अपूर्वोयमिति** । अकारःपूर्वोयस्यसतथा । तादृशोविकारोयस्मिन्मनुजाधिपेतस्मिन्नित्यन्वयः ॥ १८ ॥ **शि०** सुनिर्लज्जा यशःप्रख्यापनरूपपरयुपकारार्थंत्यक्तव्रीडा । कैकयी । आत्महितं जीवानामुपकारकं । अधृष्टं प्रागल्भ्यरहितं । इदंवचउवाच ॥ १९ ॥ **सत्य०** त्वद्भयात् त्वदितिभिन्नंपदं । "भीत्रार्थाना" मित्यपादानपञ्चमी ॥ २० ॥ **ति०** श्रुतं प्रतिज्ञातं ॥ २१ ॥ **सत्य०** मह्यमितिद्वितीयान्तंचतुर्थ्यन्तंच । तत्रद्वितीयान्तंनरशब्देनान्वेति । पूज्यमितितदर्थः । चतुर्थ्यन्तंदानक्रियान्वेति । प्राकृतः अज्ञः । लोकेयथातथेत्यर्थः । दृष्टान्ततयाप्रकृतःप्राकृतोननियामकेष्वन्यतमइत्याह—**अन्यइति** । अनतेर्यत् । चेष्ट्यइत्यर्थः । नच "ऋहलोर्ण्यत्" इतिण्यतिमात्यमितिभवेदितिच्यम् । णित्वप्रयुक्तवृद्ध्यभावः संज्ञापूर्वकविधेरनित्यत्वस्य "शतचक्रं योह्यः"इत्येतद्व्याख्यावसरेतत्त्वसुबोधिन्यामुक्तेर्नानुपपन्नः । तप्यते "कण्ड्वादिभ्योयक्" इतिकर्तरियक् । संतप्तइत्यर्थः । यद्वा भावेयक् । राजेति राजतेःक्विपितृतीयान्तं । सइत्यस्यप्राकृतइत्यनेनान्वयः ॥ २२ ॥ **शि०** यदि यदा । अशुभं निर्वापधादिवत्प्रातिभासिकाशुभत्वविशिष्टं । **सत्य०** वक्ष्यते वक्ष्यति । "ब्रुवोवचिः" इतिवच्यादेशस्यस्थानिवद्भावेनञित्वात् "स्वरितञितः—" इत्युभयपदित्वाद्वक्ष्यतेवक्ष्यतीतिचयुक्तं । यद्वा राजेतितृतीयान्तं । यद्राजावक्ष्यतेशुभमशुभंवाभवतुतत्करिष्यसिपुनः करिष्यस्येवचे-

[पा०] १ घ. कच्चित्तु. २ ङ. छ. झ. रोषेण. ३ ङ. च. छ. झ. ञ. येनास्य. क. यत्रासीत्. ४ क. घ. ट. च. ञ. त्व. ५ ह्यनुभाषते. ङ. छ. झ. ट. न्नानुभाषते. ६ ङ. झ. नास्यप्रवर्तते. ७ घ—छ.झ. ञ. नश्रुतं. ८ घ. ङ. ञ. ददामीति. ९ क. स्त्वत्कृतेऽनघ. च. स्त्वत्कृतेनच. १० ङ. छ. पुनस्सर्वं. घ. ततःपूर्वं. ट. तदासर्वं.

यदि त्वभिहितं राज्ञा त्वयि तन्न विपत्स्यते ॥ ततोऽहमभिधास्यामि न ह्येप त्वयि वक्ष्यति ॥ २६॥
एतत्तु वचनं श्रुत्वा कैकेय्या समुदाहृतम् ॥ उवाच व्यथितो रामस्तां देवीं नृपसन्निधौ ॥ २७ ॥
अहो धिङ्नार्हसे देवि वक्तुं मामीदृशं वचः ॥ अहं हि वचनाद्राज्ञः पतेयमपि पावके ॥
भक्षयेयं विषं तीक्ष्णं मज्जेयमपि चार्णवे ॥ २८ ॥
नियुक्तो गुरुणा पित्रा नृपेण च हितेन च ॥ २९ ॥
तद्ब्रूहि वचनं देवि राज्ञो यदभिकाङ्क्षितम् ॥ करिष्ये प्रतिजाने च रामो द्विर्नाभिभाषते ॥ ३० ॥
तमार्जवसमायुक्तमनार्या सत्यवादिनम् ॥ उवाच रामं कैकेयी वचनं भृशदारुणम् ॥ ३१ ॥
पुरा दैवासुरे युद्धे पित्रा ते मम राघव ॥ रक्षितेन वरौ दत्तौ सशल्येन महारणे ॥ ३२ ॥
तत्र मे याचितो राजा भरतस्याभिषेचनम् ॥ गमनं दण्डकारण्ये तव चाद्यैव राघव ॥ ३३ ॥
यदि सत्यप्रतिज्ञं त्वं पितरं कर्तुमिच्छसि ॥ आत्मानं च नरश्रेष्ठ मम वाक्यमिदं शृणु ॥ ३४ ॥

राजैवकुतोनवदतीत्यत्राह—यदीति । नविपत्स्यतेयदि विफलंनभविष्यतिचेदित्यर्थः ॥ २६ ॥ व्यथितः गुरुवचनंकरिष्यतिनवेतिसंदेहस्यांविपयोस्मीतिसंतप्त- इत्यर्थः ॥ २७ ॥ व्यथामेवाह—अहोइत्यादिना ॥ २८ ॥ गुरुत्वपितृत्वनृपत्वहितपरत्वानिवचनकरणहेतवः । करिष्येतदित्यनुकर्पः ॥ २९ ॥ यत्कार्यमभिकाङ्क्षितंतद्वचनं तद्विपयवचनंब्रूहि । तत्कार्यंकरिष्ये । प्रतिंजानेच प्रतिज्ञांकरोमिच । रामोद्विर्नाभि भापते विनाप्रतिज्ञयारामोद्विरुक्तिंनकरोतीत्यर्थः ॥ ३०—३२ ॥ तत्र वरप्रदाननिमित्तं ॥ ३३—३४॥

तर्हीदंसर्वमाख्यास्यामीत्यन्वयः । "पुनरप्रथमेप्रश्नेत्व्याग्रत्तावबधारणे" इत्यभिधानात् ॥ २५ ॥ ती० राज्ञा राजानुमत्या ॥२६॥ सत्य० देवींदेवीमिव । "देवीकृताभिपेकायां" इत्यमरः । भरतसंपत्संपादनेच्छयादशरथदाशरथ्युभयजिगीपावतीमितिवा ॥२७॥ सत्य० ईदृशं.याः रमाया दृक्र्यस्मिन्मयितंमांईदृशंपूर्वोक्तंवचःवक्तुंनार्हसे अतस्त्वयैवमुक्तंमांधिक् । साक्षान्मङ्गलदेवतापिरमानित्यंमांकामयतेतादृशस्यममकिमल्पराज्येनेतिरामभावमाविश्चकारकविरितिज्ञेयम् । नार्हसे नार्हसि । "चन्द्रादयस्तुमन्यन्तेसर्वस्मादुभयंपदं" इत्युक्तेरात्मनेपदत्वं ॥ २८ ॥ शि० गुरुणा वसिष्ठेन । सत्य० नपितृत्वंहिरण्यकशिप्वादिवदित्याह—**हितेनेति** । तदपिनोग्रसेनादिवदित्याह—**नृपेणेति** । तदपिनधृतराष्ट्रवदित्याह—**गुरुणेति** ॥२९॥ ति० रामोद्विरिति। यदुक्तंतदुक्तमेव । तद्विरुद्धंनपुनर्वदतीत्यर्थः । तत्तदभावविपयतयाद्विरावृत्तंभापणंनकरोतीतियावत् । सत्य० रामइतिपरोक्षोक्त्यात्वस्ययथार्थवादित्वंसार्वजनीनमितिसूचयति ॥ ३० ॥ शि० अनार्या सर्वश्रेष्ठा ॥ ३१ ॥ सत्य० देवासुरे मत्वर्थीयाच्प्रत्ययान्तोयं । कर्तृत्वसंबन्धेनदेवासुरविशिष्टेयुद्धइत्यर्थः । महारणेदेवासुरयुद्धान्तर्गतदेवसहायार्थगतस्वकर्तृकेमहारणेइत्यर्थः । तेननपौनरुक्त्यम् । मम । संबन्धसामान्येपष्ठी । सचप्रकृतेकर्तृत्वरूपः । मयारक्षितेन । सशल्येन शङ्कुसहितेन । नतावन्मात्रेण सशल्येन बाणसहितेनेत्यर्थः । क्षत्रियाणांशरादिधारणेनोदीरणंशपथज्ञापकमितिभावः । "शल्यश्शङ्कौशरेवंशकुञ्जिकायांचतोमरे" इतिविश्वः ॥ ३२ ॥ ती० तत्र द्वयोर्वरयोर्मध्ये । एकेनभरतस्याभिपेचनम् अन्येनतवदण्डकारण्यगमनम् । शि० तत्र देवासुरसंग्रामसमये । प्राप्तौवरौराजाअद्यैवमयायाचितः । सत्य० मयाभरतस्याभिपेचनंतवाद्यैवदण्डकारण्येगमनंचाद्यैवराजायाचितः । गौर्दुह्यतेपयइतिवत्प्रधानकर्मत्वाद्राज्ञस्तद्वाचकात्प्रथमा । "गौणेकर्मणिदुह्यादेः" इतिवचनात् । कैकेय्यास्सतत्स्वभावमप्यनयोक्त्यानिरूपयति—**दण्डकारण्य इति** । हेआद्य । हेदण्डक अखिलशिक्षक । त्वं अरेणराहितोण्यः अरण्यस्तस्मिन्सुधासमुद्रद्वये याचितः या रमया आचितः सम्यक्संबद्धः । नित्यावियोगीतियावत् । अततेर्डप्रत्ययेअइतिभवति । अस्य विष्णोस्स्त्री ई । "पुंयोगादाख्यायां" मितिङीप् । "अकारो वासुदेवस्स्याल्लक्ष्मीरीकारउच्यते" इत्यभिधानात् । ईआचितइतिस्थितेयणादेशेयाचितइतिभवति । तस्यतवेतिपूर्ववत्सर्वम् ॥३३॥ शि० शृणु श्रवणपूर्वकाचरणंकुरु । सत्य० सत्यप्रतिज्ञंकर्तुमिच्छसीत्यनेनतस्यसामर्थ्याभावान्मत्कार्यंतवहस्तेविन्यस्तमितिध्वनयति । पितरंसत्यप्रतिज्ञंकर्तुमर्हसीत्यनेनैवरामप्रतिज्ञायास्सत्यत्वलाभेपि "द्विर्बद्धंसुबद्धं" इतिमहाभाष्योक्तेःपुनर्वचनंदार्ढ्यायेत्युक्तं भवति । स्वपुत्रस्याभिलषितंनरश्रेष्ठत्वंपारवश्येनरामेप्रयुक्तं । यथोक्तंकर्णामृते "सौमित्रेक्वधनुर्धनुर्धनुरितिव्यग्रागिरःपातुवः" इति । श्रीभागवतेपञ्चमेद्वितीयेपूर्वचित्तिंप्रतिआग्नीध्रवचनं "कात्वंचिकीर्पसिचकिंमुनिवर्यशैले" इत्यादि । तत्तात्पर्यंच "परिहासप्रलापादि-

[पा०] १ ङ. छ. झ. चार्णवे. २ ख. ग. राज्ञा. ३ क. सातमार्जवसंयुक्तं. ख. तमार्जवे. ४ क—घ. च. छ. झ. ञ. ट. देवासुरे. ५ ट. मयारणे. ६ क. ख. मर्हसि.

सन्निदेशे पितुस्तिष्ठ [1]यथाऽनेन प्रतिश्रुतम् ॥ [2]त्वयाऽरण्यं प्रवेष्टव्यं नव वर्षाणि पञ्च च ॥ ३५ ॥
भरत[3]स्त्वभिषिच्येत यदेतदभिषेचनम् ॥ [4]त्वदर्थे विहितं राज्ञा तेन सर्वेण राघव ॥ ३६ ॥
सप्त सप्त च वर्षाणि दण्डकारण्यमाश्रितः ॥ अभिषे[5]कमिमं त्यक्त्वा [6]जटाजिनधरो वस ॥ ३७ ॥
भरतः को[7]सलपुरे प्रशास्तु वसुधामिमाम् ॥ नानारत्नसमाकीर्णां सवाजिरथकुञ्जराम् ॥ ३८ ॥
[9]एतेन त्वां नरेन्द्रोऽयं कारुण्येन समाप्लुतः ॥ शो[10]कसंक्लिष्टवदनो न शक्नोति निरीक्षितुम् ॥ ३९ ॥
एतत्कुरु नरेन्द्रस्य वचनं रघुनन्दन ॥ सत्येन महता राम तारयस्व नरेश्वरम् ॥ ४० ॥

इतीव [11]तस्यां परुषं वदन्त्यां न चैव रामः प्रविवेश शो[12]कम् ॥
प्रविव्यथे चापि महानुभावो [13]राजा तु पुत्रव्यसनाभितप्तः ॥ ४१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे अष्टादशः सर्गः ॥ १८ ॥

सन्निदेशे नियमने ॥ ३५ ॥ यदेतदभिषेचनम् अभिषेकसाधनं। त्वदर्थेविहितं तेनसर्वेणराज्ञाभरतोभिषिच्येतेतियोजना ॥ ३६—३८ ॥ एतेन वरद्वयप्रदाननिमित्तेन ॥ ३९—४० ॥ इवशब्देनअन्यान्यपिपरुषाणिवहून्युक्तानीतिगम्यते। शोकं मुखवैवर्ण्यादिवाह्यविकारम् । प्रविव्यथेचापि रामविकारादर्शनेनाप्यधिकंविव्यथइत्यर्थः ॥ ४१ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीतांवराख्याने अयोध्याकाण्डव्याख्याने अष्टादशः सर्गः ॥ १८ ॥

ष्वनर्थावागभवेत्किंचित्’’इत्यादि। पूर्ववत्स्वभावानुगुण्यंचज्ञेयम् ॥ ३४॥ **सत्य०** सन्निदेशेआज्ञायां। कैकेय्याराजमर्यादयाद्वादशचतुर्विंशत्यादिवर्षपर्यन्तमरण्यंप्रवेष्टव्यमितिवक्तव्येनववर्षाणिपञ्चचेतिचतुर्दशवर्षोक्तिस्तुरावणस्यायुषांचतुर्दशवर्षाणामेवावशिष्टत्वात् । द्वादशेत्युक्तौतद्धननादिकमकृत्वैवागन्तव्यमितिभवति । अधिकोक्तौतुजोषंवस्तव्यमितिभवति । अतश्चतुर्दशेतिदेवोवादयामासेतिज्ञातव्यम्॥३५॥ **सत्य०** अभिषेकशव्दस्यघञन्तत्वेपितद्विशेषणस्येदंशव्दस्यनपुंसकत्वमुपपद्यते । तद्विशेष्यपदार्थस्याभिषेचनस्यनपुंसकत्वात् । यथोक्तं “संवन्धमनुवर्तिष्यते” इतिमहाभाष्यव्याख्यानावसरेकैयटेन “संवध्यतइतिसंवन्धं । कर्मणिघञ् । नपुंसकस्याभिधेयत्वान्नपुंसकनिर्देशइति । उपपादितंचैतन्निपुणतरं “यथार्थज्ञानजनकायथार्थायुक्तयः” इत्यनुव्याख्यानसुधाव्याकरणावसरे “उच्यतेअनियतलिङ्गानांविशेषणपदानांविशेष्यपदलिङ्गत्वमेवेतिनसर्वत्रनियमः। “अहमेवेदंसर्वोस्मि” । “अजानतामहिमानंतवेद” मित्यादौव्यभिचारात् । सर्वमहिमशव्दयोःपुंलिङ्गत्वेपितद्विशेपणयोरिदंशव्दयोर्नपुंसकत्वात् । किंतुक्वचिल्लिङ्गानामर्थधर्मत्वमितिपक्षे विशेष्यपदप्रतिपाद्यार्थलिङ्गत्वमस्ति’’इत्यादिना । “नन्वेवंचेत्सर्वत्रातिप्रसङ्गइतिचेन्न । अभियुक्तप्रयोगेसतिनिमित्तानुसरणंनतुनिमित्तमस्तीतिप्रयोगः’’इत्यादिनातत्रैवयादुपत्येस्पष्टमुक्तेः । अभियुक्ताग्रेसरश्चभगवान्वाल्मीकिरिति । निरूपितवन्तश्चैवमेव “देवममीवचातनं” इत्येतद्व्याख्यानभूतायाः “अमीवाद्दुःखतश्चयात्रयति” इतिटीकायाःव्याख्यानावसरेव्याख्यातारः । यद्वाइदमित्यस्यारण्यमित्यनेनान्वयः । इममितिपाठेतुनानुपपत्तिः ॥ ३७ ॥ **शि०** एतेन संभावितत्वद्वियोगजनितेन ॥ ३९ ॥ **सत्य०** तारयस्व “णिचश्च” इत्यात्मनेपदं । स्वनरोत्तममितिपदच्छेदे यदिसत्यप्रतिज्ञंत्वंपितरमात्मानंचेत्युभाभ्यांप्रतिज्ञातत्वावगमात् अत्रापिनिगमनकाले स्वेनआत्मनासहितश्चासौनरेश्वरश्चेत्युत्तरपदलोपिसमासेस्वनरोत्तममितिवादोनुगुणोभवति । ततश्चस्वंनरोत्तमंचतारयेत्यर्थः । उत्तरश्लोकादिवेत्याकृष्यते । लोकःयेनसंक्लिष्टवदनःनिरीक्षितुंनशक्नोति सयमात्माधर्मराजःकुरुनरेन्द्रस्यधृतराष्ट्रस्यवचनमिव ॥४०॥ **शि०** परुषंपरुषत्वेनप्रतीयमानं । आचारक्विवन्तप्रकृतिककर्तृक्विवन्तम् । **ति०** राजाच राजातु । **सत्य०** चशव्दइवार्थे । यथाराजापुत्रव्यसनाभितप्तः तथारामोनेतिव्यतिरेकदृष्टान्तः । अभितप्तइत्यनेनरामस्यपुत्रत्वं पुन्नामनरकत्रायकत्वंलोकसाधारणंनभवति अपितुसंसारतारकत्वमस्येतिलोकोत्तरसंतापंसूचयति ॥ ४१ ॥ इत्यष्टादशस्सर्गः ॥ १८ ॥

[पा०] १ ट. यदनेन. क—घ. च. ज. ञ. यथातेन. २ ख. त्वयारण्ये. ३ क. ग. घ. ङ. च. छ. झ. ञ. ट. भरतश्चाभि. ४ ख. त्वदर्थंपिहितं. ५ ङ. झ. मिदं. ६ ङ. च. छ. झ. ञ. जटाचीरधरोभव. ज. जटाजिनधरोभव. ख. जटाजिनधरोवसेः. ७ ङ. छ. झ. ट. कोसलपतेः. च. ञ. कौसलपुरे. ८ ङ. छ. झ. संकुलाम्. ९ घ. तेनत्वांहि. १० ङ. छ. झ. ञ. शोकैः. ११ ङ. छ. तस्याःपरुषंवदन्त्याः. १२ ख. कोपम्. १३ ङ. च. छ. झ. ञ. ट. राजाच. ख. ग. घ. ज. राजास.

एकोनविंशः सर्गः ॥ १९ ॥

रामेणकैकेयींप्रतिसीताकौसल्यासमाश्वासनावधिविलंबक्षमापनेनवनगमनप्रतिज्ञानपूर्वकंबाष्पाक्षेणलक्ष्मणेनसहकौसल्यागृहंप्रतिगमनम् ॥ १ ॥

तदप्रियममित्रघ्नो वचनं मरणोपमम् ॥ श्रुत्वा न विव्यथे रामः [1]कैकेयीं चेदमब्रवीत् ॥ १ ॥
[2]एवमस्तु गमिष्यामि वनं वस्तुमहं त्वितः ॥ [3]जटाजिनधरो राज्ञः प्रतिज्ञामनुपालयन् ॥ २ ॥
इदं तु ज्ञातुमिच्छामि किमर्थं मां महीपतिः ॥ नाभिनन्दति दुर्धर्षो [4]यथापुरमरिंदमः ॥ ३ ॥
मन्युर्न च त्वया कार्यो देवि ब्रूमि तवाग्रतः ॥ यास्यामि भव [5]सुप्रीता वनं चीरजटाधरः ॥ ४ ॥
हितेन गुरुणा पित्रा कृतज्ञेन नृपेण च ॥ नियुज्यमानो विस्रब्धः किं [6]न कुर्यामहं प्रियम् ॥ ५ ॥
अलीकं [7]मानसं [8]त्वेकं हृदयं दहतीव मे ॥ स्वयं [9]यन्नाह मां राजा भरतस्याभिषेचनम् ॥ ६ ॥
अहं हि सीतां राज्यं च प्राणानिष्टान्धनानि च ॥ हृष्टो भ्रात्रे स्वयं दद्यां [10]भरतायाप्रचोदितः ॥७॥
किं पुनर्मनुजेन्द्रेण स्वयं पित्रा प्रचोदितः ॥ तव च प्रियकामार्थं प्रति[11]ज्ञामनुपालयन् ॥ ८ ॥
[12]तदाश्वासय [13]ह्रीमं त्वं [14]किंचिदं यन्महीपतिः ॥ वसुधासक्तनयनो मन्दमश्रूणि मुञ्चति ॥ ९ ॥

मरणोपममितिलोकदृष्ट्या ॥ १ ॥ इतः अस्मान्नगरात् ॥ २ ॥ यद्यप्येतेनकारुण्येनसमाप्लुतइत्यनभिनंदनेहेतुरुक्तः तथापिमत्स्वभावंजानन्किमर्थंनाभिनन्दतीत्याहेतिबोध्यम् । यथापुरं यथापूर्वं ॥ ३ ॥ मन्युः दैन्यम् । " मन्युर्दैन्येक्रतौक्रुधि " इत्यमरः । ब्रूमि ब्रवीमि ॥ ४ ॥ हितेन हितपरेण । गुरुणेत्यनेनरामस्यतस्मान्मन्त्रविशेषस्वीकारोस्तीतिगम्यते । कृतज्ञेन स्वकृतवरप्रदानाभिज्ञेन ॥ ५ ॥ अलीकम् अप्रियं । मानसं मनसिवर्तमानं ॥ ६ ॥ तवाप्रीतिर्भविष्यतीति नोक्तवानित्याशङ्क्याह—अहंहीति । सीतां धनुर्भङ्गकालइतिभावः ॥ ७ ॥ पित्राप्रचोदितस्तवप्रियकामार्थं प्रतिज्ञामनुपालयंश्चदद्यामितिकिंपुनः ॥८॥ इमं राजा॰

ति॰ अथाभिषेकवनवासयोःसमचित्ततयाधीरोदात्तमहापुरुषत्वंरामस्याह—तदिति । शि॰ अप्रियं पितुरितिशेषः । अत एवमरणोपमम् । सत्य॰ अमित्रघ्नइत्यनेनस्वस्यमध्यायातान्तरायनिवारकत्वेपिस्वसंकल्पानुसार्येतत्कैकेयीवचनमितिमानयामासैमातरमितिसूचयति ॥ १ ॥ शि॰ इतः भवत्याअभिप्रेतत्वात् ॥ २ ॥ शि॰ अभिनन्दति अभिनन्दयति वचनाद्यैरितिशेषः । अन्तर्भावितणिजर्थः । सत्य॰ दुर्धर्षः । आर्षःखलु । अतो "भाषायांशासियुधिदृशिधृषि—"इत्यादिनावार्तिकेनखयुच् ॥ ३ ॥ सत्य॰ मन्युर्नचत्वयाकार्योमह्यमितिशेषः । ब्रूमीतीडभावादिरार्षः ॥ ४ ॥ ति॰ कृतज्ञेन त्वत्कृतस्वापत्त्राणज्ञेन ॥ ५ ॥ ति॰ अलीकं दुःखम् । सत्य॰ राजा भरतस्याभिषेचनंमांप्रतिस्वयंनाहेत्येतत् मानसं मनस्संबन्धि यदलीकमप्रियं तन्मेहृदयंमनोदहतीवेत्यन्वयः । यद्वा हेवमे अवमे यद्यपिअवद्यावमाधमार्वरेफाःकुत्सितइतिधातोरवतेरमप्रत्ययेऽवमइतिभवति । तथाप्यपूर्वकान्माधातोरौणादिकेप्रत्ययेअपगतावगतिकत्वेनप्रयोजकेनप्रयोज्यंनीचत्वंलक्ष्यतइतिनानुपपत्तिः । "वष्टिभागुरिरल्लोपं" इतिस्मरणात् । नीचेकैकेयि राजा स्वयंयस्मादेतन्नाह तस्मात्तव मानसं मनसिविद्यमानं जनानामलीकमप्रियंभरतस्याभिषेचनंत्वद्धृदयंदहति । इ विस्मये । आश्चर्यमित्यर्थः ॥६॥ ति॰ प्रचोदितः त्वयापीतिशेषः । सत्य॰ इष्टानित्येतद्यथायोग्यंविपरिणतंसत्सीतामित्यादिनान्वेति । हृष्टस्सन्स्वयमेवदद्यात् । तत्रापिमनुजेन्द्रेणस्वयंसाक्षात्पित्राप्रचोदितस्सन्दद्यामितितुकिंपुनर्वाच्यमित्यन्वयः । एतेन त्वदपत्यंमदपत्यंपुरेतित्वदर्थितसमर्थनंममापिसंमतमितिध्वन्यते । द्वितीयंप्रचोदितइत्येतत्तृतीयार्थकेनतवेत्यनेनान्वेति । तेनप्रचोदितशब्दयोर्न पौनरुक्त्यं । तवचप्रियकामार्थमित्यनेन तवप्रियोयःकामःकामावतारोयोभरतस्तदर्थमित्यप्यर्थस्सूचितोभवति । शुभरतोभरतइति मतिमतश्श्रीमतोरामस्यसीतांदद्यामित्युक्तिर्नलौकिकरीतिविरुद्धाभवतीतिहृष्टइतिकवयताकविनाऽसूचीतिनानौचिती आलोचनीया भगवतीतिमन्तव्यम् ॥ ७—८ ॥ सत्य॰ ह्रीमन्तं अवाच्यमिदंकिमितिवच्मीतिलज्जायुक्तं । वसुधासक्तनयनइत्यनेनत्वमेवमत्पुत्रसज्जोन्मूलनस्यमूलमितिक्षमामीक्षतेक्षमानाथइतिध्वनयांचकार ॥ ९ ॥

[पा॰] १ ग. घ. झ. कैकेयीमिद. २ घ. एवमुक्तो. ३ क. ख. ङ. च. छ. झ. ञ. ट. चीरधरो. ४ घ—ट. पूर्वमरिंदमः. ५ घ. संप्रीता. ६ ग. ज. किंतु. ७ ख. मानसेप्येकं. ८ ङ. छ. झ. ट. दहतेमम. ९ ख. नाहमहाराजः. १० ङ. च. छ. झ. ञ. भरतायप्रचोदितः. ११ क. पालय.. १२ ङ. झ. ट. तथा. १३ क, भीतं, क. ग. घ. ज. कामं. ङ. च. छ. झ. ञ. ट. ह्रीमन्तं. १४ घ—छ. झ. ञ. किंत्विदं.

गच्छन्तु चैवानयितुं दूताः शीघ्रजवैर्हयैः ॥ भरतं मातुलकुलादद्यैव नृपशासनात् ॥ १० ॥
दण्डकारण्यमेषोऽहमितो गच्छामि सत्वरः ॥ अविचार्य पितुर्वाक्यं समा वस्तुं चतुर्दश ॥ ११ ॥
सा हृष्टा तस्य तद्वाक्यं श्रुत्वा रामस्य कैकयी ॥ प्रस्थानं श्रद्दधाना हि त्वरयामास राघवम् ॥ १२ ॥
एवं भवतु यास्यन्ति दूताः शीघ्रजवैर्हयैः ॥ भरतं मातुलकुलादुपावर्तयितुं नराः ॥ १३ ॥
तव त्वहं क्षमं मन्ये नोत्सुकस्य विलंबनम् ॥ राम तस्मादितः शीघ्रं वनं त्वं गन्तुमर्हसि ॥ १४ ॥
व्रीडान्वितः स्वयं यच्च नृपस्त्वां नाभिभाषते ॥ नैतत्किंचिन्नरश्रेष्ठ मन्युरेषोपनीयताम् ॥ १५ ॥
यावत्त्वं न वनं यातः पुरादस्मादभित्वरन् ॥ पिता तावन्न ते राम स्नास्यते भोक्ष्यतेऽपि वा ॥ १६ ॥
धिक्कष्टमिति निश्वस्य राजा शोकपरिप्लुतः ॥ मूर्च्छितो न्यपतत्तस्मिन्पर्यङ्के हेमभूषिते ॥ १७ ॥
रामोप्युत्थाप्य राजानं कैकेय्याऽभिप्रचोदितः ॥ कशयेवाहतो वाजी वनं गन्तुं कृतत्वरः ॥ १८ ॥
तदप्रियमनार्याया वचनं दारुणोदयम् ॥ श्रुत्वा गतव्यथो रामः कैकेयीं वाक्यमब्रवीत् ॥ १९ ॥
नाहमर्थपरो देवि लोकमावस्तुमुत्सहे ॥ विद्धि मामृषिभिस्तुल्यं केवलं धर्ममास्थितम् ॥ २० ॥
यदत्रभवतः किंचिच्छक्यं कर्तुं प्रियं मया ॥ प्राणानपि परित्यज्य सर्वथा कृतमेव तत् ॥ २१ ॥

नं । त्वमाश्वासय । अश्रूणि मुञ्चतीतियत् इदंकिंनु निर्हेतुकमित्यर्थः ॥ ९—१० ॥ पितुर्वाक्यमविचार्य वनंगच्छेतिपित्रानोक्तमितिविचारमकृत्वेत्यर्थः । समाः संवत्सरान् ॥ ११—१३ ॥ अयं यावद्भरतागमनंविलंबिष्यतेचेन्महाननयःस्याद्भरतस्यज्येष्ठभ्रातृभक्तत्वादितिमत्वाह—तवत्विति । उत्सुकस्य भरताभिषेकदर्शनोत्सुकस्य । गमनोत्सुकस्यवा ॥ १४ ॥ नृपोव्रीडान्वितःसन्स्वयंनाभिभाषतइतियत् एतत् नकिंचित्विचारानर्हंव्रीडांविनाकारणान्तराभावात् । मन्युः स्वयंनाभिभाषतइत्याग्रहः दैन्यंवा ॥ १५—१६ ॥ धिगिति उक्तासत्यवचनंश्रुत्वेतिभावः ॥ १७ ॥ कृतत्वरः अभूदितिशेषः ॥ १८—१९ ॥ लोकमावस्तुम् लोकेवस्तुम् । "उपान्वध्याङ्वसः" इतिकर्मत्वं । धर्मं आस्थितं आश्रितं । अनेनराज्यायभरतागमनंप्रतीक्षतेरामइतिकैकेयीशङ्कावारिता ॥ २० ॥ अत्रभवतः पूज्यस्यपितुः । कृतमेवेति विद्धीतिशेषः ॥ २१ ॥

सत्य० कुलात् गृहात् । मातुलकुलात् नविद्यतेतुलायस्यतन्मातुलं अतुलंतचतत्कुलंचेतितस्मादित्यनेनासदृशकुलवासीभरतो नतवानुकूलोभवतीत्यर्थस्सूचितोभवति ॥१०॥ विष० स्वयंनाभिभाषतइतियत् एतत् अनभिभाषणं । नकिंचित् नान्यकारणकं । त्वदविलंबगमनाभावएवास्यकारणं । अतएषमन्युः राज्ञोदैन्यं । त्वदविलंबगमनेनापनीयतां त्वयेतिशेषः ॥ १५ ॥ ति० इतोपि युक्तोविलंबइत्याह—यावदिति । मयादरिद्राधमर्णत्वेनतथाशपथैःप्रतिबन्धादितिभावः ॥१६॥ शि० कशया कस्यस्वर्गवासिनः शंमङ्गलंययातयाकैकेय्या । अभिप्रचोदितः प्रेरितः । हतः स्वाश्रितारिहननकर्ता । रामः राजानमुत्थाप्य अवाजी वाज्युपलक्षितयानरहितस्सन्नेव । वनंगन्तुंकृतत्वरः आसीदितिशेषः । हतइत्यत्रकर्माविवक्षयाऽकर्मकत्वेनकर्तरिनिष्ठा । इवएवार्थे ॥१८॥ शि० दारुणोदयं दारुणानांराक्षसानां उत्उत्कर्षेण अयःप्रक्षेपःयस्मिंस्तत् । राक्षसप्रक्षेपणबोधकमित्यर्थः । अतएवतदप्रियं तेषांराक्षसानां नप्रियंयस्मिंस्तत् । अनार्यायास्सर्वश्रेष्ठायाःकनिष्ठायावाकैकेय्याः । उदयमित्यत्रासनार्थकाद्वीत्यत्रप्रश्लिष्टाद्वीधातोरच् । सत्य० अप्रियं इतरेषां ॥ १९ ॥ ति० विमलंधर्ममास्थितं तत्वज्ञानरूपंधर्ममाश्रितं । सत्य० ऋषिभिर्ब्रह्मादिभिस्तुल्यं बिंबत्वेनसदृशमित्यर्थः । गत्यर्थस्यऋषधातोर्ज्ञानार्थत्वात्ज्ञानितमत्वाद्ब्रह्मादीनां । विमलं निर्दुष्टं आस्थितं सम्यक्स्थितं धर्मं धर्मराजमिव । एतेन "एतत्कुरुनरेन्द्रस्य" इतिकैकेय्युक्तस्यधृतराष्ट्रवचनाद्वनंगन्तुमुद्यतंधर्मराजमिवमामपिविद्धीत्यनेनोत्तरयामासरामइतिसूचयति । यद्वा नाहमर्थपरः । हि यस्मात् वित् सर्वज्ञः । मद्वचनंनमृषेत्याह—मामृषिभिस्तुल्यमिति । मानविद्यतेमृषामिथ्यात्वंयेषुतानिमामृषाणि भाषणानि तानिसंतियेषांतेतथातैर्मामृषिभिर्बलिमान्धात्रादिभिः । "सुप्सुपा" इतिमामृषापदयोस्समासः । नपुंसकत्वेनह्रस्वत्वेअतइन् । तैस्तुल्यंमांविद्धीत्यावर्तितेनान्वयः । अहन्तादिसंगतश्चेत्तथाकुर्यांनाहंत्वथेत्याह—नेति । अहमर्थपरः अहंकारी । यद्वा अर्थपरः अर्थैषणावानित्यर्थः । नापुमान् । अहमर्थपरः अहमर्थः अहंकारनिवृत्तिस्तत्परइतिवा । "अर्थोभिधेयरैवस्तुप्रयोजननिवृत्तिषु" इत्यभिधानात् ॥ २० ॥ सत्य० अत्रभवतः पूज्यस्यपितुः । यद्वा भवतो भवत्याः । सोत्सेकप्रवृत्ति-

[पा०] १ घ. मेवाहं. ङ. छ. झ. ट. मेषोहंगच्छाम्येवहिसत्वरः. २ ङ. छ. झ. श्रद्दधानासा. ३ ङ. छ. झ. ट. दिहावर्तयितुं. ४ ङ. च. छ. झ. ञ. ट. तस्मादतित्वरन्. घ. तस्मादभित्वरन्. ५ ज. भोक्ष्यतेऽपिहि. ६ ग. ङ. छ. झ. ञ. ट. कशयेवहतो. ७ ख. चेद. ८ ङ. छ. झ. ट. विमलं. ९ ङ. च. छ. झ. ञ. ट. यत्तत्र.

न ह्यतो धर्मचरणं किंचिदस्ति महत्तरम् ॥ यथा पितरि शुश्रूषा तस्य वा वचनक्रिया ॥ २२ ॥
अनुक्तोप्यत्रभवता भवत्या वचनादहम् ॥ वने वत्स्यामि विजने वर्षाणीह चतुर्दश ॥ २३ ॥
न नूनं मयि कैकेयि किंचिदाशंससे गुणम् ॥ यद्राजानमवोचस्त्वं ममेश्वरतरा सती ॥ २४ ॥
यावन्मातरमापृच्छे सीतां चानुनयाम्यहम् ॥ ततोऽद्यैव गमिष्यामि दण्डकानां महद्वनम् ॥ २५ ॥
भरतः पालयेद्राज्यं शुश्रूषेच्च पितुर्यथा ॥ तथा भवत्या कर्तव्यं स हि धर्मस्सनातनः ॥ २६ ॥

शुश्रूषा पादसंवाहनादिः । वचनक्रिया वचनकरणम् ॥ २२—२३ ॥ गुणं आर्जवौदार्यादिगुणं । नाशंससे नजानीषइत्यर्थः । ईश्वरतरा अत्यन्तनियन्त्री ॥ २४ ॥ अद्यैवगन्तव्यमित्युक्तं तत्रयत्किंचिद्विलंबंयाचते—यावदिति । मातरंयावदापृच्छेसीतांचानुनयामि तावदनुज्ञांकुर्वितिशेषः । ततः तदनन्तरम् । अद्यैवदिने दण्डकानांमहद्वनं दण्डोनामेक्ष्वाकुसुतस्तस्यराष्ट्रंशुक्रशापात्पांसुवर्षेणविनाशितंसदरण्यमभूत् । तद्राष्ट्रंतन्नाम्नादण्डकमित्युच्यते । "संज्ञायांकन्" इतिकन्प्रत्ययः । प्रदेशभेदाद्बहुवचनम् ॥ २५ ॥ धर्मःसना-

मत्त्वेन "पुँल्लिङ्गेनोच्यतेस्त्रीचपुंवच्छक्तिमतीक्वचित्" इत्युक्तेश्चस्त्रियाअपिपुँल्लिङ्गशब्दवाच्यता ॥ २१ ॥ **सत्य०** यथापितरि विषयसप्तमी । शुश्रूषा सेवा । "वरिवस्यातुशुश्रूषा" इत्यमरः । केवलरूढोयंसेवायां । "शुश्रूषाशूद्रस्य" इत्यापस्तंबसूत्रव्याख्यानावसरेहरदत्तेनतथोक्तेः । यथाचतस्यपितुर्वचनक्रियातदुक्तानुष्ठानं । यद्वा तस्यभवतः पूर्वोक्तरीत्याकैकेय्याः । एवमर्थाङ्गीकारेपूर्वोत्तरानुगुण्यंभवति । व्यतिरेकमुखेनापीममेवार्थस्पष्टमाचष्टे—**नहीति** । अधर्मचरणमितिपदच्छेदः । पितरि पितृविषये । नहिशुश्रूषा असेवा । तस्यावचनक्रिया । अतः आभ्यामन्यन्महत्तरंअधर्मचरणं "नकचिद्विष्णुवैभवं" इतिवत्किंचिदितिनिपातसमुदायआक्षेपार्थः । तथाचकिंचित् नकिमपीत्यर्थः । सर्वोत्तमस्यजगत्प्रसवितुर्ममनधर्मादिनाकृत्यं । तथापिलोकमनुकुर्वतइदमुचितमित्यप्याह—**नह्यतइति** । महत्तरं ब्रह्माद्युत्तमाधिकारिवर्गे । किंचित् यवसावसानंचजगत् । नह्यतः । णिजर्थोयं । बन्धयतः । तस्यमेपितृशुश्रूषातस्यवचनक्रियेतिधर्मचरणंवा लोकधर्मचरणमिवेत्यर्थः । "वाविकल्पोपमानयोः" इत्यभिधानात् । पितरियावचनक्रियासापिममसकाशादेव ॥ २२ ॥ **सत्य०** अत्रभवतापूज्येनपित्रानुक्तोपिभवत्यावचनाद्वनेवत्स्यामीत्यन्वयः । पत्तनजनानुगमनेवनमपि भवनतुल्यंइत्यतआह—**विजनइति** । त्वदभिलषितमद्वनवासोपिरक्षोविक्षोभपूर्वकंसज्जनावनहेतुरित्याह—**विजनइति** । विविरुद्धं जनंजन्मययोस्तेविजनेरक्षसीरावणकुंभकर्णरूपे तेवत्स्यामि हनिष्ये । वधहिंसायामित्यस्माल्लृटिस्यप्रत्यये "खरिचे"तिचर्त्वे "अतो दीर्घोयञी"तिदीर्घवत्स्यामीतिरूपं । "वत्सावत्स्यामिवोरिपुं" इतिसंग्रहरामायणप्रयोगात् । इडभावआर्षः । वधधातुस्तुकौमुद्यां भावकर्मप्रक्रियायां "वधहिंसायांहलन्तः" इति "वधिःप्रकृत्यन्तरः" इतिकाशिकाप्रतीकंप्रकाश्य "वधहिंसायामितिभ्वादौपाठात्" इतिसप्तमाध्यायतृतीयपादीय "जनिवध्योश्च" इतिसूत्रव्याख्यापदमञ्जर्युक्तेःप्रसिद्धोस्तीतिनतदन्वेषणप्रयासः ॥ २३ ॥ **ती०** यत् ममेश्वरतरासतीत्वद्वचनकारिणंमांभरतोऽभिषेक्तव्यइत्यनियुज्य राजानं अवोचः अयाचिष्ठाः । अतोमयिगुणं आर्जवलक्षणं । किंचिदपिनाशंससे नविचारयसीत्यर्थः । **सत्य०** हेकैकेयि अगुणं गुणेतरत् दोषादिकं । नूनं निश्चयेन । मयिआशंससे । धातूनामनेकार्थत्वाज्जानासीत्यर्थः । किंचिद्गुणादिकंनाशंससे । कथमेतज्ज्ञायतइत्यतआह—**यदिति** । यद्यस्माद्राजानं "सन्निदेशेपितुस्तिष्ठ" इत्यादिना विपिनयापनाज्ञापकंनृपमवोचः उक्तवत्यसि । त्वंतदधीनएवेतितथोक्तवत्यहमित्यतआह—**ममेति** । इतरराजतरुण्यईश्वर्यः । त्वंतु ममेश्वरतरा । ईशधातोर्वरच्टिाप् । "तसिलादिष्वाकृत्वसुचः" इतिसूत्रव्याख्यानावसरेपरिगणनंकर्तव्यमित्युक्त्वा दर्शनीयतरेतिपुंवद्भावोदर्शितः । यदाकिंचिद्गुणंनाशंससे । क्वचिद्गुणशब्दोनपुंसकोप्यस्ति । "नगुणानिनियुञ्जते" इतिप्रयोगात् । किंचिदित्यव्ययत्वपक्षेनायव्ययाविति भावः । कथमेतज्ज्ञायतइत्यतआह—**यदिति** । यद्राजानमवोचः वरंदेहीत्यवदः ॥२४॥ **सत्य०** यावन्मातरंकौसल्यांआपृच्छे । "आङिनुप्रच्छयोरुपसंख्यानं" इतिवार्तिकादात्मनेपदत्वं । ईषत्पृच्छामि । सीतांचानुनयामि सान्त्वयामि । चोनुक्तसमुच्चायकः । प्रष्टव्यान्सर्वान्पृच्छामीत्यर्थः । तावत् इयन्मात्रंमदपराधंक्षमस्वेतिशेषः । यद्वा यासती ततस्तांकौसल्यांतां अनुनयामि सान्त्वयामि । तथा सीतांचानुनयामि काननंनेष्यामि । तावन्मातरंत्वां आपृच्छे अवकाशमितिशेषः । एवमर्थएवदेवाङ्गत्वशङ्कानवकाशः । अथवा हेमातः सीतांअमासहअनुनयामि । शिष्टंपूर्ववत् । सरय्वादिनद्युत्तरणार्थंकिंचित्पाथेयंननाथतेनाथइति कथयति—**मातरमिति** । आङ्पूर्वात्तॄप्लवनतरणयोरित्यस्मात् "पुंसिसंज्ञायां—" इतिघप्रत्ययेरपरेगुणे आतरन्त्यनेनेत्यातरस्तरपण्यं । उत्तरणार्थंदीयमानंद्रव्यं मापृच्छे नपृच्छामीत्यर्थः । माशब्दोऽयं ॥ २५ ॥ **सत्य०** पितुरितिकर्मणिषष्ठी । शुश्रूषेत् सेवेत । शुश्रूषेदित्येतदन्तर्गतायाशुश्रूषासहिसनातनोधर्मइतिविधेयापेक्षयापुँल्लिङ्गता । सनातनः चिरंतनैरनुष्ठितःपुरातनोधर्मः । सहिनां सहनवतां धर्मइतिवा । अयंधर्मश्श्रुतिसिद्धइत्यप्याह—**सनातनइति** । नादेनशब्देनश्रुतिरूपेणसहवर्ततइतिसनादः । सनादएवसना-

[पा०] १ क. ह्यत्र. २ क. घ. मम. ३ ङ. ट. मुख्यानाशंससेगुणान्.

स रामस्य वचः श्रुत्वा भृशं दुःखहतः पिता ॥ शोकादशक्नुवन्बाष्पं प्ररुरोद महास्वनम् ॥ २७ ॥
वन्दित्वा चरणौ रामो विसंज्ञस्य पितुस्तदा ॥ कैकेय्याश्चाप्यनार्याया निष्पपात महाद्युतिः ॥ २८ ॥
स रामः पितरं कृत्वा कैकेयीं च प्रदक्षिणम् ॥ निष्क्रम्यान्तःपुरात्तस्मात्स्वं ददर्श सुहृज्जनम् ॥ २९ ॥
तं बाष्पपरिपूर्णाक्षः पृष्ठतोऽनुजगाम ह ॥ लक्ष्मणः परमक्रुद्धः सुमित्रानन्दवर्धनः ॥ ३० ॥
आभिषेचनिकं भाण्डं कृत्वा रामः प्रदक्षिणम् ॥ शनैर्जगाम सापेक्षो दृष्टिं तत्राविचालयन् ॥ ३१ ॥
न चास्य महतीं लक्ष्मीं राज्यनाशोपकर्षति ॥ लोककान्तस्य कान्तत्वाच्छीतरश्मेरिव क्षपा ॥ ३२ ॥
न वनं गन्तुकामस्य त्यजतश्च वसुन्धराम् ॥ सर्वलोकातिगस्येव लक्ष्यते चित्तविक्रिया ॥ ३३ ॥
प्रतिषिध्य शुभं छत्रं व्यजने च स्वलङ्कृते ॥ विसर्जयित्वा स्वजनं रथं पौरांस्तथा जनान् ॥ ३४ ॥
धारयन्मनसा दुःखमिन्द्रियाणि निगृह्य च ॥ प्रविवेशात्मवान्वेश्म मातुरप्रियशंसिवान् ॥ ३५ ॥

तनइत्यत्रधर्मापेक्षयापुँल्लिङ्गत्वम् ॥ २६ ॥ बाष्पमशक्नुवन् निरोद्धुमितिशेषः ॥ २७ ॥ निष्पपात निर्जगाम ॥ २८—३० ॥ आभिषेचनिकं अभिषेकप्रयोजनकं । भाण्डं उपकरणजातं । प्रदक्षिणकरणं "प्रशस्तमाङ्गल्यदेवतायतनचतुष्पथादीन्प्रदक्षिणमावर्तयेत्" इत्यादिधर्मशास्त्रोल्लङ्घनभयात् । नतुतदासक्त्या । दृष्टिंतत्राविचालयन् स्वयंतत्रनिरपेक्षइत्यर्थः । सापेक्षः भरतस्यानेनाभिषेकोस्त्वितिप्रार्थनासहितः । शनैर्जगाम तत्रदेवतासान्निध्यसंभवादितिभावः ॥ ३१ ॥ लक्ष्मीं मुखविकासं । राज्यनाशः राज्यभ्रंशः ॥ ३२ ॥ रामस्यमुखवैवर्ण्यादिशरीरविकाराभावमभिधायमानसविकाराभावमप्याह—नवनमिति । सर्वलोकातिगस्य तुल्यमानावमानस्य । परमयोगीश्वरस्येत्यर्थः ॥ ३३ ॥ व्यजने वालव्यजने ॥ ३४ ॥ रामस्यपरदुःखासहिष्णुत्वादुःख-

---

तनः । निर्वचनत्वाद्दकारस्यतनादेशः ॥ २६ ॥ **शि०** अनार्यायाः कनिष्ठायाः । **सत्य०** निष्पपात चरणयोरितिशेषः ॥ २८ ॥ **ति०** कैकेयीप्रदक्षिणं सम्यगाचरितंमदिष्टंलयेत्यत्यन्तसंतोषाच्छिष्टाचाराच्चेतिबोध्यं । **सत्य०** अन्तःपुरादितिप्रथमान्तं । "राजापौत्रायणश्शोकात्" "कामाच्चनानुमान—" इत्यादिवत् । अततेःकर्तरिक्विप् । तस्मादन्तःपुरात्निष्क्रम्य ॥ २९ ॥ **ति०** बाष्पपरिपूर्णाक्षः समीपस्थित्वाऽवगतवृत्तान्तत्वात् । **शि०** अक्रुद्धः रामाभिप्रायज्ञत्वेनक्रोधरहितः । लक्ष्मणः । परं सर्वरक्षकं । तंराममनुजगाम । **सत्य०** सुमित्रायाःसुमित्राणांचआनन्दंवर्धयतीतिसुमित्रानन्दवर्धनः । भ्रातरमनातुरोराममनुजगामेतिमित्राणिजहर्षिरइतिभावः ॥ ३० ॥ **ती०** सापेक्षः अपगताईक्षाअपेक्षातयासहितःसापेक्षः निरपेक्षइत्यर्थः । अतएवतत्रआभिषेचनिकभाण्डेदृष्टिमविचालयन् अप्रवर्तयन् । जगामेतिसंबन्धः । यद्वा सापेक्षः अपेक्षाअधोवीक्षणं तद्युक्तस्सापेक्षः । **सत्य०** सापेक्षः रक्षोविक्षोभार्थंपूर्वमेववनगमनापेक्षावानित्यर्थः । दृष्टिंतत्राविचालयन् अनन्यथाकुर्वन् । अवक्रीकुर्वन्नितियावत् । अतएव कंपनेचलिरितिमित्वे णौ "मितांह्रस्वः" इतिह्रस्वेचचलयन्नितिभवेदितिशङ्कानवकाशः । अथवा "वाचित्तविरागे"इतिवाग्रहणानुवृत्तेःमित्संज्ञायामपिह्रस्वविकल्पः । अतः "चालयन्पृथिवींसर्वां" इत्यादिप्रयोगास्साधवः" इतिशरदेवोक्तेःकंपनार्थस्यचलेरपिदीर्घस्संभवति । यद्वा सापेक्षः नविद्यतेपः पालकोयेषांतेअपाःतेपुईक्षा तदवनेच्छेतियावत् । तयासहितस्सापेक्षः । नीरक्षकसद्रक्षणापेक्षोरामः ॥ ३१ ॥ **सत्य०** कविःपारवश्येनश्रीरामस्वरूपंनिरूपयति—**नचास्येति** । महतींलक्ष्मीं शोभांसंपदंवा नापकर्षति । कुतः तत्राप्याह—**अपकर्षतीति** । यस्माद्रामःअपकर्षःअनुत्कृष्टजनःअस्वतन्त्रःसइवाचरतिनत्वस्वतन्त्रः । स्वतन्त्रइतियावत् । एतेन चन्द्रपक्षेकान्तत्वादितिहेतूक्तिःरामचन्द्रपक्षेतदनुक्तिरितिन्यूनतेतिदोषोनावकाशंलभतइतिभावः । यद्वा यःमहतींलक्ष्मींस्वभार्यांसंपदंवाअपकर्षति यत्रगच्छतितत्रनेष्यति तस्यराज्यनाशोनेत्यर्थः । यथोक्तंसंग्रहरामायणे "यत्रयातिरघुसंततिकेतुस्तत्रसंपदतुलानविपत्तिः" इत्यादि । यस्मादयं राज्यनाशः नविद्यतेआशायस्यस नाशः । निष्कामइतियावत् । राज्येनाशःराज्यनाशः । नञोवुद्ध्याविवेकेनान्वयः । अथवाव्यधिकरणोबहुव्रीहिः । लोककान्तस्यलोकमनोहरस्यकान्तत्वान्मनोहरत्वात्शीतरश्मेश्चन्द्रमसःक्षयइवयथाक्षयोलक्ष्मींनापकर्षति । यद्वालोककान्तस्यजनमनोहरस्यरामस्यकान्तत्वाद्धेतोः राज्यनाशःलक्ष्मींनापकर्षति यथाशीतरश्मेःक्षयः नतथेतिव्यतिरेकदृष्टान्तः ॥ ३२ ॥ **सत्य०** सर्वलोकातिगस्य मुक्तस्य । चित्तविक्रिया मनोविकारः । यथानलक्ष्यतेतथेतियोजना । नवनंगंतुकामस्य नवनंदेवैर्नृदेवैश्चक्रियमाणंस्तवनं । वसुरिववसुः । "वसुर्धनाधिपे" इतिविश्वाद्युक्तेः । धनाधिपमिवविद्यमानंदशरथं । वसुंधनमुद्दिश्यरावणादिहननेनपुष्पकमपहर्तुंधरांचत्यजतःसर्वलोकातिगस्येवचित्तविक्रियालक्ष्यते ॥ ३३ ॥ **ति०** दुःखमित्यस्यकैकेय्यालोकापवाद-

[पा०] १ ङ. छ. झ. ट. रामस्यतु. २ ङ. छ. च. झ. भृशंदुःखगतः. क. ख. ङ. ञ. ट. भृशुदुःखगतः. ग. ज. भृशदुःखहतः. ३ ङ. च. छ. झ. ट. वन्वक्तुं. ४ ग. घ. ज. निश्चक्राम. ५ क—घ. कान्तत्वंशीत. ६ ङ. छ—ट. क्षयः.

सर्वो [1]ह्यभिजनः श्रीमाञ्श्री[2]मतः सत्यवादिनः ॥ नालक्षयत रामस्य कि[3]ञ्चिदाकारमानने ॥ ३६ ॥
उचितं च महाबाहुर्न जहौ हर्ष[4]मात्मनः ॥ शारदः समुदीर्णांशुश्चन्द्रस्तेज इवात्मजम् ॥ ३७ ॥
वाचा मधुरया रामः सर्वं संमानयञ्जनम् ॥ मातुः समीपं धीरा[5]त्मा प्रविवेश महायशाः ॥ ३८ ॥
तं गुणैः समतां प्राप्तो भ्राता विपुलविक्रमः ॥ सौमित्रिरनुवव्राज धारयन्दुःखमात्मजम् ॥ ३९ ॥
प्रविश्य वेश्मातिभृशं [6]मुदाऽन्वितं समीक्ष्य तां चार्थविपत्तिमागताम् ॥
न चैव रामोत्र जगाम विक्रियां सुहृज्जनस्यात्मविपत्तिशङ्कया ॥ ४० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे एकोनविंशः सर्गः ॥ १९ ॥

शव्देनसुहृज्जनदुःखदर्शनजंदुःखमुच्यते। अप्रियशंसिवान् अप्रियमभिधातुकामः । कसुः समासाभ्यासलोपआर्षः ॥ ३५ ॥ आकारं विकृताकारं । श्रीमान् रामाभिषेकार्थकृतालङ्कारः ॥ ३६ ॥ उचितं योग्यं । सहजमित्यर्थः ॥ ३७ ॥ एतादृशदुर्दशायामपिरमयितृत्वरूपंरामशव्दार्थंप्रकटयति—वाचेति ॥ ३८ ॥ गुणैः सुखदुःखादिभिः । समतांप्राप्तः समानसुखदुःखइत्यर्थः ॥ ३९ ॥ अर्थविपत्तिं अर्थनाशं । सुहृज्जनस्य आत्मविपत्तिशङ्कया प्राणनाशशङ्कया विक्रियांनजगाम स्वविक्रियास्फुरणेसुहृज्जनोनश्येदितिशङ्कयास्वविक्रियांराज्यनाशजांनादर्शयदित्यर्थः ॥ ४० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीतांवराख्याने अयोध्याकाण्डव्याख्याने एकोनविंशः सर्गः ॥ १९ ॥

जमित्यर्थइतिकश्चित् । **सत्य०** अदुःखमितिच्छेदः । अन्यथा "नचैवरामःप्रविवेशशोकं" इतिपूर्वग्रन्थस्य "नजहौहर्षमात्मवान्" इत्युत्तरग्रन्थस्यचास्वारस्यापत्तेः । इन्द्रियाणिनिगृह्येत्यस्यस्थितायाइत्यध्याहृतेनतस्यचमातुरित्यनेनान्वयः । यथोक्तंसंग्रहरामायणे "वैष्णवव्रतनिष्ठांतां—"इत्यादि । अनेनसदासर्वस्वतन्त्रस्यरामस्याधुनिकेन्द्रियनिग्रहस्योदाहरणममनोहरंस्यात् । आत्मवान् मनस्वी । धैर्यवान्प्रयत्नवान्वा । कौसल्यासान्त्वनयत्नवान् ॥ ३५ ॥ **ती०** अभिजनः अभितोवर्तमानजनः । **सत्य०** अभिजनः स्वकुलजनः । "कुलेप्यभिजनःख्याते" इतिविश्वः । कार्यतोप्यनार्यासंतर्जनेनार्जयामासराज्यमित्यतोवाह—**सत्यवादिनइति** । नवादीअवादी । सतीत्यवादीसत्यवादी । सतीमवादीवा । तस्य । किंचिदाकारमितिनपुंसकत्वंतुअभिषेकमित्यादिवज्ज्ञेयम् ॥३६॥ **सत्य०** समीपमितिक्रियाविशेषणं । वेश्मेत्यस्यानुकर्षआकर्षोवा । यद्वा मातुस्समीपंमानयन् गन्तुंलक्षयन् । प्रविवेशमहायशाइत्येकंपदं । प्रकृष्टश्वासौविश्वतस्मिन्वेशउपवेशोयस्यसतथा- । सचासौमहायशाश्च । अनेनस्यन्दनादिनिन्दनमुचितमच्युतस्येति ज्ञाप्यते ॥ ३८ ॥ **सत्य०** समतांप्राप्तः सुखदुःखादिभिस्समत्वंगतः । सौमित्रिः गुणैः शुभधर्मैः । तं रामंअनुवव्राज । तदेव विशदयति—**धारयन्निति** । यः गुणैः सत्वादिभिः । आत्मजं ब्रह्माणंउप । लक्षणयासर्वेसुपर्वग्रहः । दुःखं दुःखंसुखंचेत्यर्थः । "दुर्दुःखमितिसंप्रोक्तंसुखंखमितिचोच्यते" इतिगीतातात्पर्योदाहृताभिधानात् । "दुरशोभनदुःखयोः" इतिविश्वः । धारयन्समतांप्राप्तः तं सौमित्रिःगुणैरप्रधानैःसमतांप्राप्तइतितमनुवव्राजेत्यर्थः । "गुणोमौर्व्यामप्रधाने" इत्यारभ्य "सत्वाद्यावृत्तिरज्जुषु" इत्यभिधानात् । यथाविपुलविक्रमोवृषभःगुणैःवहुवयवकरज्ज्वावक्रगतिंविहायसमतांप्राप्तोभवतितथेत्यर्थः ॥ ३९ ॥ **ति०** लोकदृष्ट्याअर्थविपत्तिं अर्थभ्रंशं वीक्ष्यापिरामोविक्रियांनजगाम । किंतुसुहृज्जनस्य कौसल्यादशरथादिरूपस्य आत्मनांप्राणानां विपत्तिशङ्कया चिन्तांजगामेतिशेषः । **शि०** मुदाहर्षेणोपलक्षितोरामः । युतं सकलसंपत्तिविशिष्टं । वेश्म कौसल्यागृहं प्रविश्य । अर्थविपत्तिं अर्थस्यपरमपुरुषार्थस्य रामसंयोगस्येत्यर्थः । विपत्तिं अभावं । आगतां प्राप्तामिव तां कौसल्यां । अतिभृशं अत्यन्तं । समीक्ष्यच अत्र अस्मिन्दर्शनेपि । विक्रियां चित्तविकाराभासं नजगाम । तत्रहेतुः आत्मविपत्तिशङ्कया आत्मनांशरीरसदृशानां मात्रादीनामित्यर्थः । विपत्तिशङ्कयादुःखसंभावनया । एवशव्दइवार्थे चोप्यर्थे । **सत्य०** अतिभृशंमुत्यस्यास्सातथातयासहितं । अर्थविपत्तिं राज्याद्यर्थस्यविपत्तिं । विशरणंविनाशनमितियावत् । सुहृज्जनस्य लक्ष्मणादेः । आत्मविपत्तिशङ्कया स्वप्रयुक्तापत्तिशङ्कया । नचविक्रियांचिन्तांजगामेत्यर्थः । जनस्य दण्डकारण्यवासिजनस्य आत्मनास्वतएवअपराधंविनैवआगतायाविपत्तिः विरुद्धभूताखरादिसेनातच्छङ्कया सुहृत् शोभनमनस्कस्सन् । जगामेत्येष्यन्न्यायेनोक्तिः । यद्वा सुहृज्जनस्य ऋष्यादेरिति ॥ ४० ॥ इत्येकोनविंशस्सर्गः ॥ १९ ॥

[पा०] १ ङ. छ. झ. ट. प्यभिजनः. क. ग. ह्यपिजनः. २ घ. धीमतः. ३ ङ. च. छ. झ. ञ. ट. कंचिदाकार. ४ क. ख. ङ. च. छ. झ. ञ. ट. मात्मवान्. ५ क. ख. ङ—ट. धर्मात्मा. ६ ख. ङ. च. छ. झ. ञ. ट. मुदायुतं. क. मुदान्वितः.

विंशः सर्गः ॥ २० ॥

रामेकैकेयीगृहान्निर्गच्छतिअन्तःपुरस्त्रीभीरामगुणानुवर्णनपूर्वकंकरुणंपरिदेवनम् ॥ १ ॥ कौसल्ययारामचरणप्रणामिनेरामा-यपरिष्वङ्गादिपूर्वकमाशीर्वचनम् ॥ २ ॥ तथारामेणस्वस्यवनगमनंनिवेदितयातयाशोकान्मूर्छांनिपतनम् ॥ ३ ॥ तथारामाग्रे-बहुधास्वदुःखोद्घाटनपूर्वकंचिरंसकरुणंपरिदेवनम् ॥ ४ ॥

तस्मिंस्तु पुरुषव्याघ्रे निष्क्रामति कृताञ्जलौ ॥ आर्तशब्दो महाञ्जज्ञे स्त्रीणामन्तःपुरे तदा ॥ १ ॥
कृत्येष्वचोदितः पित्रा सर्वस्यान्तःपुरस्य च ॥ [1]गतिर्यः शरणं चापि स [2]रामोऽद्य प्रवत्स्यति ॥ २ ॥
कौसल्यायां यथा युक्तो जनन्यां वर्तते सदा ॥ तथैव वर्ततेऽस्मासु जन्मप्रभृति राघवः ॥ ३ ॥
न क्रुध्यत्यभिशप्तोपि क्रोधनीयानि वर्जयन् ॥ क्रुद्धान्प्रसादयन्सर्वान्स इतोऽद्य प्रवत्स्यति ॥ ४ ॥
अबुद्धिर्बत नो राजा जीवलोकं चरत्ययम् ॥ यो गतिं सर्व[3]लोकानां परित्यजति राघवम् ॥ ५ ॥

आर्तशब्दः आर्तानांयादृशःशब्दस्तादृशइत्यर्थः ॥ १ ॥ अन्तःपुरस्यकृत्येषु कर्तव्येषुविषये । गतिः कर्तृत्वेनप्राप्यः । शरणं रक्षिता । "शरणंगृहरक्षित्रोः" इत्यमरः ॥ २ ॥ युक्तः सावधानः । वर्तते शुश्रूषते ॥ ३ ॥ यःअभिशप्तोपि परुषमुक्तोपि । नक्रुध्यति । क्रोधनीयानि क्रोधहेतुकर्माणि वर्जयन् । क्रुद्धान् केवलमाग्रहेणकुपितान् । प्रसादयंश्चवर्तते सः इतःअस्माद्देशात्प्रवत्स्यति । हन्तेतिशेषः ॥ ४ ॥ यः सर्वभूतानांगतिंराघवंपरित्यजति सनोराजा अबुद्धिःसन् लोकान् चरति भक्षयति । नाशयतीत्यर्थः ।

शि० अनिष्क्रामति प्रविशतिसति ॥ १ ॥ स० सरामइत्यनेन सतीसीतापिपतिमनुगमिष्यतीतिभावमाविश्चकारकविरितिज्ञेयम् । यद्वा नायंमानवोरामःअपितुदानवसूदनइत्यप्याह—कृत्येष्विति । पित्रा चतुर्मुखेन । ब्रह्मणापियःकृत्येष्वचोदितः । पितामहस्यापिब्रह्मणःपितृत्वमप्यविरुद्धं । "पितरमस्यमूर्धन्" इत्यादिप्रयोगात् । "तथापितामहाद्याश्चपितरोनामकीर्तिताः" इत्येतस्यभाष्योक्तेश्च । कृत्येष्वचोदितः सर्वस्वतन्त्रइतियावत् । पित्राब्रह्मणासह । अन्तःपुरस्य देहान्तर्गततत्ताभिमानिवर्गस्य । गतिश्शरणंच । सोप्यद्यप्रवत्स्यतीतितदिच्छैवनियामिकेतिभावः । कृत्येषुविद्वेषिषुइघ्नन्अच्चयतीतिकृत्येष्वकृतेनकृत्येष्वचापित्राद-शरथेनअन्तःपुरजनस्यगतिश्शरणमितियस्तनएवउदितउक्तःरामःअद्यप्रवत्स्यतीत्यर्थः । "कृत्यंविद्वेषिकार्ययोः" इतिविश्वः । "कृत्यंविद्विषिकार्येच" इतिरभसः ॥ २ ॥ सत्य० युक्तश्शोभनः । "युक्तंशोभनं" इतिकर्मनिर्णयटीकोक्तेः । उपायसंपन्नोवा । यतोयस्माद्रामात् जन्मप्रभृति सृष्ट्याद्यष्टकं । अस्मासु अस्मदुपलक्षितसर्वप्रजासु । यथावर्ततेतथाकौसल्यायांजनन्यामपिवर्ततेइतिसापि नजननी । तथापितांजननीत्वेनव्यतनोद्रामइतितत्तपोवैपुल्यं रामस्यकरुणाकरताचध्वन्यते ॥ ३ ॥ सत्य० कैकेय्यैक्रुद्धान्प्रसादयन्प्रवत्स्यतीत्यनध्याहारेणवायोजना ॥ ४ ॥ सत्य० अयंराजादशरथःअकुशलइतिनरपवितरुण्यइतरास्समीरयन्ति । अबुद्धिरिति ॥ नः अस्माकं । योराजादशरथःसर्वभूतानांगतिंराघवंपरित्यजतिततोऽबुद्धिस्सन्जीवलोकंचरति । जीवोस्यास्तीतिजीवःसचासौलोकश्चेतिजीवलोकःतंजनंचेतनमात्रंमूर्खमितियावत् । चरतिगच्छतिअनुसरतीतियावत् । यद्वा योराघवंपरित्यजति । रलयोरभेदात्राघवं लाघवं मनोहरत्वंसंपरित्यजतीत्यर्थः । "लघुरगुरौचमनोज्ञेनिस्सारेवाच्यवत्" इतिमेदिनी । सदृष्टं चेदिष्टसिद्धिस्स्यादित्यतोवाह—यइति । योराघवंपरित्यजतिसःअयंशुभावहंपरित्यजति । अतोनायमित्यधिकं ॥ अथवायोगतिमित्येकंपदं । योगेनस्वभावसिद्धयोगेनतिःआनन्दोयस्यसयोगतिः । "आनन्दंतीतिवैवदेत्" इतिभागवततात्पर्योक्तेः । प्रसादयन्नित्यनुवर्तते । रत्ययं रतेःअयोदैवंरत्ययोमन्मथः । रतिंअयतइतिवारत्ययस्तं । योगेनैवकैकेय्यास्संबन्धेनैव तिरानन्दोयेनतंरत्ययंमन्मथंप्रसादयन्नेवराघवंपरित्यजति अतोऽबुद्धिर्बत । फलितमप्यभिलपति—राजेति । राजाचरत्ययं चरतिअयोयस्मिन्कर्मणितद्यथाभवतितथा चरत्ययंगतदैवं । "एहीडादयोऽन्यपदार्थे" इत्यनेनचरत्ययमित्यत्रतिङ्सुपांसमासः । अजीवलोकंनविद्यतेजीवोयस्मिन्सोजीवः सचासौलोकश्चतंस्वशरीरंचरतिआचरति । यद्वायोरामःईवलः वबयोरभेदात् । रलयोरभेदात् याःलक्ष्म्याःवरःईवरः । याःवलंयस्मादितिवा आजिर्गन्तासचासौईवलश्चआजीवलः । यद्वाआज्यांयुद्धेवलंयस्यासौआजीवलःयःतंपरित्यजतिसोकंदुःखमेवचरतीत्यर्थः । यद्वाराजाजीवलःराज्ञे राजनिवाचन्द्रायचन्द्रेवा । "राजाशशाङ्कक्षत्रियेनृपे" इत्यमरः । आजीवलंआज्यांवलंयस्यसःराजाजीवलोराहुः । सःअंकंशिरोरहितंयथाभवतितथाचरतियेनतंरामंपरित्यजतिसोबुद्धिर्बत । "अज्यतिभ्यांच" इतीणिआजिः । "कृदिकारात्—"इतिङीष् । "आजिर्भवेत्तथाजीच" इतिद्विरूपकोशः । "अयश्शुभावहोविधिः" इत्यमरश्च । आजीवत्यनेनेतिआजीवः

[पा०] १ ङ. च. झ. ञ. ट. गतिश्चशरणंचासीत्. २ ञ. सुतोऽद्य. ३ क—ट. भूतानां.

इति सर्वा महिष्यस्ता विवत्सा इव धेनवः ॥ पति[1]माचुक्रुशुश्चैव [2]सस्वरं चापि चुक्रुशुः ॥ ६ ॥
स हि चान्तःपुरे घोरमार्तशब्दं महीपतिः ॥ पुत्रशोकाभिसंतप्तः श्रुत्वा व्यालीयतासने ॥ ७ ॥
रामस्तु भृश[3]मायस्तो निश्वसन्निव कुञ्जरः ॥ जगाम सहितो भ्रात्रा मातुरन्तःपुरं वशी ॥ ८ ॥
सोपश्यत्पुरुषं तत्र वृद्धं परमपूजितम् ॥ उपविष्टं गृहद्वारि तिष्ठतश्चापरान्बहून् ॥ ९ ॥
दृष्ट्वैव तु तदा रामं ते सर्वे [4]सहसोत्थिताः ॥ [5]जयेन जयतां श्रेष्ठं वर्धयन्ति स्म राघवम् ॥ १० ॥
प्रविश्य प्रथमां कक्ष्यां द्वितीयायां ददर्श सः ॥ ब्राह्मणान्वेदसंपन्नान्वृद्धान्राज्ञाऽभिसत्कृतान् ॥ ११ ॥
प्रणम्य रामस्तान्वृद्धांस्तृतीयायां ददर्श सः ॥ स्त्रियो [7]वृद्धाश्च बालाश्च द्वाररक्षणतत्पराः ॥ १२ ॥
वर्धयित्वा प्रहृष्टास्ताः प्रविश्य च [8]गृहं स्त्रियः ॥ न्यवेदयन्त [9]त्वरिता राममातुः प्रियं तदा ॥ १३ ॥
कौसल्याऽपि तदा देवी रात्रिं स्थित्वा समाहिता ॥ प्रभाते [10]त्वकरोत्पूजां विष्णोः पुत्रहितैषिणी ॥ १४ ॥
सा क्षौमवसना हृष्टा नित्यं व्रतपरायणा ॥ अग्निं जुहोति स्म तदा मन्त्रवत्कृतमङ्गला ॥ १५ ॥
प्रवि[11]श्य च तदा रामो मातुरन्तःपुरं शुभम् ॥ ददर्श मातरं तत्र हावयन्तीं हुताशनम् ॥ १६ ॥
देवकार्यनिमित्तं च तत्रापश्यत्समुद्यतम् ॥ १७ ॥

चरगतिभक्षणयोरितिधातुः ॥ ५ ॥ आचुक्रुशुः निन्दन्तिस्म । चुक्रुशुः रुरुदुः ॥ ६ ॥ व्यालीयत लज्जादुःखभरेणशय्यायांविलीनोभूदित्यर्थः ॥७॥ भृशमायस्तः "व्यसनेषुमनुष्याणांभृशंभवतिदुःखितः" इत्युक्तगुणवत्तयाऽन्तःपुरार्तस्वनश्रवणेनातिशयेनसंजातदुःखः । निश्वसन्निवकुञ्जरः परदुःखस्यापरिहार्यतांमत्वागुप्तदुःखःसन्कुञ्जरइवनिश्वसन्नित्यर्थः । वशी स्वायत्तीकृतेन्द्रियः ॥८॥ पुरुषं द्वारपालाध्यक्षम् ॥९॥ जयेन विजयस्वेतिजयाशिषा ॥ १०—१२ ॥ वर्धयित्वा जयाशिषेतिशेषः ॥ १३ ॥ रात्रिं रात्रौ । "कालाध्वनोरत्यन्तसंयोगे" इति द्वितीया । समाहिता नियमयुक्ता ॥ १४ ॥ जुहोति हावयति । अतएवहावयन्तीमितिवक्ष्यति । ब्राह्मणैरितिशेषः ॥ १५—१६ ॥ देवकार्यनिमित्तमिति द्रव्यजातमि-

---

वृत्तिःतस्मिन्लंभयंयस्यासावाजीवलःसोकंयथाभवतितथा । पूर्ववदुर्वरितं । अजीवःशवःतद्वल्लाकान्तिर्यस्यसोजीवलः । शवकान्तिमानित्यर्थः । "आजीवोजीविकावार्ता" इत्यमरः । "कंशिरःकंमुखं" इतिरत्नमाला । "दीप्तौ ला लं भयेचप्रकीर्तितं" इतिविश्वः ॥ ५ ॥ **सत्य०** महिष्यइवमहिष्यः । अतः "कृताभिषेकामहिषी" इत्यमरोक्तिर्नविरुणद्धि । यद्वा महिष्यः सर्वाअपिनृपनार्यः "महिषीनृपयोषिति" इतिहेमचन्द्रः । यद्वा महिषी कैकेयी अस्तानिरस्तायाभिस्तामहिष्यस्ताः । आहिताग्न्यादित्वात्परनिपातः । यद्वा महिष्याकैकेय्याअस्ताःमहिष्यस्ताः । विवत्साः विवासिततर्णकाः ॥ ६ ॥ **ति०** आयत्तइतिपाठे आयत्तःपराधीनोयःकुञ्जरःसयथानिश्वसितितद्वदित्यर्थः । **सत्य०** सर्वदाहितेनसहितःवशीस्वतन्त्रःरामः । यइत्यध्याहारः । यःभृशमायस्तःनिश्वसन्कुञ्जरइव तेनभ्रात्रासहितः । एवमन्वयकरणएव "नचैवरामोत्रजगामविक्रियां" इतिपूर्वोक्तंवशीत्याद्यनुमानंचसंगच्छते ॥ ८ ॥ **सत्य०** उपवेशनेवृद्धत्वंशस्त्रपाणिभिःपरमपूजितत्वंचहेतुः ॥ ९ ॥ **सत्य०** जयेनजयशब्देन । अथवाहेइनजयेतितिङन्तंवा । **शि०** पुत्रहितैषिणीकौसल्या विष्णोः सूर्यस्य पूजामकरोत् । रामस्यसूर्यमण्डलमध्यस्थत्वेनस्वकुलमूलपुरुषत्वेनचातिस्नेहात्तत्पूजायांप्रवृत्तिरितिसूचितम् ॥ १४ ॥ **सत्य०** जुहोतिस्मस्वयमेवाजुहोत् । ननुस्त्रीणांवेदाधिकाराभावात्कथंजुहोतीत्युक्तमितिचेन्न । दशरथस्य वैवस्वतमनुत्वेनतत्पत्न्याःकौसल्यायामानवीत्वेनोत्तमस्त्रीत्वाद्वेदाधिकारसंभवात् । "आहुरप्युत्तमस्त्रीणामधिकारंतु वैदिके" इत्यादिस्मृतेः । तदुक्तंवामने । "भविष्यदन्तरेभूत्वामनुर्वैवस्वतोभवान् । तववंशेभवाम्यङ्गरामोदाशरथिस्स्वयम् । पुनर्दशरथोभूत्वात्वमेवासिपितामम । मद्दत्तपिण्डदानेनमुक्तिस्तेभविताध्रुवं" इति ॥ १५ ॥ **शिरो०** हावयन्तीं ब्राह्मणैरितिशेषः । एतदनुरोधेनपूर्वत्रजुहोतीत्यस्यहावयतीत्यर्थः । अत्रैवस्वार्थेणिज्वा । **सत्य०** नकेवलंस्वयंजुहोति अपितुब्राह्मणैरपीत्याह—

[पा०] १ क. ङ. च. छ. झ. ञ. ट. माचुक्रुशुश्चापि. २ क. ङ. च. छ. झ. ञ. सस्वनं. घ. ज. सुस्वरं. ३ घ. च. मायत्तो. ४ ङ. च. छ. झ. ञ. ट. समुपस्थिताः. ५ ग. घ. च. ञ. जयेति. ६ ग. घ. स्वान्विप्रान्. ७ क. घ. ङ. च. छ. झ. ञ. ट. बालांश्चवृद्धांश्च. ८ क. गृहंततः. घ. गृहांस्त्रियः. ९ ङ. छ. झ. ट. त्वरितं. १० ङ. छ. झ. ट. चाकरोत्. ११ ङ. च. छ. झ. ञ. ट. प्रविश्यतु.

दध्यक्षतं घृतं चैव मोदकान्हविषस्तथा ॥ लाजान्माल्यानि शुक्लानि पायसं कृसरं तथा ॥
समिधः पूर्णकुंभांश्च ददर्श रघुनन्दनः ॥ १८ ॥
तां शुक्लक्षौमसंवीतां व्रतयोगेन कर्शिताम् ॥ तर्पयन्तीं ददर्शाद्भिर्देवतां देववर्णिनीम् ॥ १९ ॥
सा चिरस्यात्मजं दृष्ट्वा मातृनन्दनमागतम् ॥ अभिचक्राम संहृष्टा किशोरं वडवा यथा ॥ २० ॥
स मातरमभिक्रान्तामुपसंगृह्य राघवः ॥ [पर्यष्वजत धर्मात्मा मात्रा चैव परंतपः ॥]
परिष्वक्तश्च बाहुभ्यामुपाघ्रातश्च मूर्धनि ॥ २१ ॥
तमुवाच दुराधर्षं राघवं सुतमात्मनः ॥ कौसल्या पुत्रवात्सल्यादिदं प्रियहितं वचः ॥ २२ ॥
वृद्धानां धर्मशीलानां राजर्षीणां महात्मनाम् ॥ प्राप्नुह्यायुश्च कीर्तिं च धर्मं चोपहितं कुले ॥ २३ ॥
सत्यप्रतिज्ञं पितरं राजानं पश्य राघव ॥ अद्यैव हि त्वां धर्मात्मा यौवराज्येऽभिषेक्ष्यति ॥ २४ ॥
दत्तमासनमालभ्य भोजनेन निमन्त्रितः ॥ मातरं राघवः किंचिद्व्रीडात्प्राञ्जलिरब्रवीत् ॥ २५ ॥

तिशेषः ॥१७॥ हविषः हवींषि । कृसरं तिलौदनं । दध्यक्षतमित्यारभ्यवाक्यान्तरम् । अतोनक्रियाद्वयविरोधः । पूर्वंदेवकार्यनिमित्तमितिद्रव्याणिसामान्येनोक्तानि अथविशेषेणेतिविवेकः ॥ १८ ॥ तर्पयन्तीं प्रीणयन्तीम् ॥ १९ ॥ अभिचक्राम अभिमुखंजगाम । किशोरं अश्ववालकं । वडवा अश्वस्त्री ॥२०॥ उपसंगृह्य अभिवाद्य । स्थितइतिशेषः ॥२१—२३॥ सत्यप्रतिज्ञमिति अभिषेक्ष्यतीत्यत्रहेतुः । इदानीमप्यभिषेकोनारब्धइति नाशङ्कनीयमितिभावः । पश्यजानीहि ॥२४॥ दत्तमित्यादिश्लोकद्वयमेकान्वयं । सराघवो भोजनेननिमन्त्रितःसन् दत्तमासनं आलभ्य स्पृष्ट्वा । दण्डकारण्यंप्रस्थितोऽहम् । आप्रष्टुं गमनंनिमन्त्रयितुम् । उपचक्रमे उद्योगमकार्षमितिमातरमब्रवीदितिसंबन्धः । यद्वा भोजनेननिमन्त्रितः भोजनार्थंनिमन्त्रितः । भोजनार्थंदत्तमासनमालभ्यतिष्ठन् । दत्तासनेउपवेशनाभावेपिस्पर्शमात्रंकार्यमित्यागमात् । किञ्चिद्व्रीडान् एवंत्रुवन्त्यैमात्रेकथंमयाप्रस्थानंकथनीयमितिलज्जया अब्रवीत् । किमर्थमासनमुपलभ्यनोपविष्टवानित्यत्राह—सइति ।

हावयन्तीति । जुहोतीतिपूर्वमुक्तस्स्वार्थेवाणिच् ॥ १६ ॥ **सत्य०** हविषइतिषष्ठीद्वितीयार्थे । लिङ्गव्यत्ययोवा । "सुप्तिङुपग्रहलिङ्गनराणां" इत्युक्तेः । अथवा हविषो मोदकान् हविस्संबन्धिमोदकानित्यर्थः । संबन्धश्च "राहोश्शिरः" इत्यादिवत्तादात्म्यरूपः ॥ १८ ॥ **शि०** वरवर्णिनीं उत्तमवर्णविशिष्टां । गौराङ्गीमित्यर्थः ॥ १९ ॥ **सत्य०** दुराधर्षमित्यनेनअनिवर्त्यवनवासमनस्कत्वंद्योतयति । आत्मनस्सुतं स्वपुत्रं । पुत्रवात्सल्यात् पुन्नामनरकात्त्राणकर्तेतिवात्सल्यात् । इदंप्रियहितं अयंप्रियोयेषांतेइदंप्रियाःतेभ्यो हितं । प्रियायदशरथायहितंयस्मात्सप्रियहितः । तं राघवंप्रति इदं वक्ष्यमाणं । वस्तुतस्तु आत्मनस्सुतं जगदादानादिकर्तुःपद्मनाभस्यप्रादुर्भूतंरूपं । पुत्रवात्सल्यंपुत्रइतिवात्सल्यंतस्मादित्यर्थः । एतेनात्मनस्सुतमित्यनेनैवस्वस्तनंधयतायांवात्सल्यस्य सिद्धायांपुनरत्रपुत्रेत्यधिकमितिशङ्कानवकाशः ॥ २२ ॥ **वि०** कुलेउचितं कुलस्योचितमितियावत् । **शि०** आयुःआयुस्तुल्यमायुः । आयुश्शब्दस्स्वसदृशेलाक्षणिकः । मुख्यस्येहासंभवात् । कीर्तिधर्मयोरप्येषैवगतिः । एकचकारस्यइवार्थकत्वेतुमुख्यत्वेपिन क्षतिः । **सत्य०** वृद्धानांधर्मशीलानामित्यनेनमार्कण्डेयादीनांसंग्रहः । राजर्षीणां बल्यादीनां । उचितंचउचिताचउचितश्चउचितमितिनपुंसकशेषः । "नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्यां" इत्युक्तेः । कुलेइतिसप्तमीपञ्चम्यर्थे । यद्वा कुले अस्मत्कुलेवावृद्धानांराजर्षीणांआयुरादिकंप्राप्नुहीत्यन्वयः ॥ २३ ॥ **ति०** राजानंपश्य गत्वेतिशेषः । कौसल्यायाराजगृहगमनादिव्यापारापरिज्ञानादेवमुक्तिः । **सत्य०** यःअद्यत्वामभिषेक्ष्यतितंसत्यप्रतिज्ञंपश्य । ऋतयथार्थादिपदमगृह्णानोगृह्णानश्चसत्येतिइममर्थमसूचयत्सूचितचेताः । प्रतिज्ञायतइतिप्रतिज्ञःप्रतिज्ञातोर्थः यौवराज्येतवाभिषेकरूपः । सनविद्यतेयस्यसतथा । सत्यभार्यया अप्रतिज्ञः जायाप्रयोज्यप्रतिज्ञातार्थांच्छित्तिमानिति । यौवराज्येअभिषेक्ष्यतित्वामवज्ञायसंकंकरिष्यति । अन्यामभिषेक्ष्यतीतितात्पर्यं । निपातानामनेकार्थत्वादभिरवज्ञानेवर्तते । यथोक्तंकाठके "अभिप्रेयसः" इत्येतद्व्याख्यानावसरे । धात्वर्थेसेकेअभ्यर्थावज्ञानस्यान्वितत्वान्नपत्वानुपपत्तिशङ्का ॥ २४ ॥ **ति०** प्रसाद्याञ्जलिरितिपाठेप्रकर्षेणसन्नाञ्जलिर्विशीर्णाञ्जलिरित्यर्थइतिकश्चित् । मातुःप्रसादनयोग्याञ-

[पा०] १ क. ख. घ—ट. दध्यक्षतघृतं. २ ख. ग. स्तदा. ३ क. ङ. च. छ. झ. ञ. ट. वरवर्णिनीम्. ४ घ. सुचिरस्य. ५ ङ. झ. ट. मुपक्रान्तां. ६ इदमर्धं क. ख. च. दृश्यते. ७ क. परिष्वक्तस्स. ख. परिष्वक्तःस्व. ८ ङ. च. छ. झ. ञ. ट. मवघ्रातश्च. ९ क. ख. च. छ. झ. ञ. ट. चाप्युचितं. १० ङ. च. छ. झ. ञ. ट. त्वांसधर्मात्मा. क. ख. त्वांहिधर्मात्मा. ११ छ. झ. ञ. ट. त्प्रसार्याञ्जलिमब्रवीत्. ङ. प्रसाद्याञ्जलिमब्रवीत्.

स स्वभावविनीतश्च गौरवाच्च तदा नतः ॥ प्रस्थितो दण्डकारण्यमाप्रष्टुमुपचक्रमे ॥ २६ ॥
देवि नूनं न जानीषे महद्भयमुपस्थितम् ॥ इदं तव च दुःखाय वैदेह्या लक्ष्मणस्य च ॥ २७ ॥
गमिष्ये दण्डकारण्यं किमनेनासनेन मे ॥ विष्टरासनयोग्यो हि कालोऽयं मामुपस्थितः ॥ २८ ॥
चतुर्दश हि वर्षाणि वत्स्यामि विजने वने ॥ मधुमूलफलैर्जीवन्हित्वा मुनिवदामिषम् ॥ २९ ॥
भरताय महाराजो यौवराज्यं प्रयच्छति ॥ मां पुनर्दण्डकारण्ये विवासयति तापसम् ॥ ३० ॥
स षट् चाष्टौ च वर्षाणि वत्स्यामि विजने वने ॥ आसेवमानो वन्यानि फलमूलैश्च वर्तयन् ॥३१॥
सा निकृत्तेव सालस्य यष्टिः परशुना वने ॥ पपात सहसा देवी देवतेव दिवश्च्युता ॥ ३२ ॥
तामदुःखोचितां दृष्ट्वा पतितां कदलीमिव ॥ रामस्तूत्थापयामास मातरं गतचेतसम् ॥ ३३ ॥
उपावृत्योत्थितां दीनां वडवामिव वाहिताम् ॥ पांसुकुण्ठितसर्वाङ्गीं विममर्श च पाणिना ॥ ३४ ॥
सा राघवमुपासीनमसुखार्ता सुखोचिता ॥ उवाच पुरुषव्याघ्रमुपशृण्वति लक्ष्मणे ॥ ३५ ॥
यदि पुत्र न जायेथा मम शोकाय राघव ॥ न स्म दुःखमतो भूयः पश्येयमहमप्रजाः ॥ ३६ ॥

गौरवात् मातरिबहुमानात् । प्रस्थितः प्रस्थातुमुद्यतः । आप्रष्टुम् अनुज्ञांकारयितुं । उपचक्रमे उपक्रान्तवान् ॥ २५—२६ ॥ अब्रवीदित्युक्तमाह—देवीत्यादि । भयं तवेतिशेषः । इदं वक्ष्यमाणवचनं । दुःखाय तथापिवक्ष्यामीत्यर्थः ॥ २७ ॥ इदंशब्दार्थमाह—गमिष्यइति । अनेन रत्नमयेन । विष्टरेत्यादि । विष्टरोनाम पञ्चविंशतिदर्भनिर्मितस्तापसासनविशेषः । "पञ्चाशद्भिर्भवेद्ब्रह्मातदर्धेनतुविष्टरः" इतिस्मृतेः ॥ २८ ॥ मुनिवत् वत्स्यामीतिसंबन्धः । अत्रामिषशब्देनसूदैः संस्कृतंमांसमुच्यते । केवलमांसस्वीकारस्योत्तरत्रवक्ष्यमाणत्वात् ".इदंमेध्यमिदंस्वादुनिष्टप्तमिदमग्निना" इति ॥ २९ ॥ कुतएवमित्यत्राह—भरतायेति ॥३०॥

सइति । सोहमित्यर्थः । लघुत्वप्रदर्शनाय षट् चाष्टौचेत्युक्तं । चतुर्दशेत्युक्तेहिगौरवंगम्यते । वन्यानि वनसंबन्धीनि । वानप्रस्थयोग्यकर्माणीतियावत् । आसेवमानः आचरन् । वर्तयन् जीवनंकुर्वन् ॥ ३१ ॥ सा पुत्रोक्तंश्रुतवती । सालस्य वृक्षस्य । "अनोकहः कुटःसालः" इत्यमरः । परशुनेतिहठाच्छेदनज्ञापनाय । नगरेतथाछेदनाभावाद्वनइत्युक्तम् ॥ ३२ ॥ गतचेतसं मूर्च्छिताम् ॥३३॥ उपावृत्योत्थितां श्रमनिवृत्त्यर्थंभुविवेष्टनंकृत्वोत्थितां । वाहितां भारवहनंप्रापिताम् ॥ ३४ ॥ असुखार्ता दुःखार्ता ॥ ३५ ॥ हेपुत्र त्वं यदिनजायेथा अतः अजननात् । भूयः अतिशयितं । दुःखं इष्टपुत्रविश्लेषजं । नपश्येयं । अप्रजाः वन्ध्या

लिरित्यर्थउचितः । **सत्य०** भो जनेन जनानांपतेइतिमात्रानिमन्त्रितः भोजनार्थमाज्ञप्तः । अनेन निमन्त्रणशब्दस्यैवावश्यकभोजननियोगे "विधिनिमन्त्रण–" इतिसूत्रीयकौमुद्यादिनाशक्तत्वावगमात्पुनर्भोजनेनेतिपदमधिकमितिशङ्कानवकाशः ॥ २५ ॥ **सत्य०** महत् भयंइतिव्यस्तंपदं । यद्वामहतांभयमितितत्पुरुषः । महतामित्येतद्विशदयति—तवचेत्यादि । **शि०** हेदेवि उपस्थितं प्राप्तं । महद्भयं राक्षसहेतुकदण्डकारण्यस्थापिमहाभीतिं । त्वंजानीषे । अतोदण्डकारण्यमहंगमिष्ये । अतः इदं मत्कर्तृकदण्डकारण्यगमनं । तव वैदेह्याः लक्ष्मणस्यचदुःखायनभवत्वितिशेषः । श्लोकद्वयमेकान्वयं ॥ २७ ॥ **सत्य०** नकेवलंमांप्रत्युपस्थितः किंतु मां रमारूपांसीतांप्रत्यप्युत्थितः । अहंविष्टरासनयोग्यः । नकेवलमहंअपितुयःमामुपस्थितःअयं अहिकालः अहीनांकंसुखं आसमन्ताल्लातिददातीत्यहिकालः । लाआदानइतिपठितस्यापिदानार्थकतासंभवति । द्वावपिदानेइतिचन्द्रइतिकौमुद्युक्तेः । अयमहिकालोलक्ष्मणोपिविष्टरासनयोग्यः ॥ २८ ॥ **शि०** विजने विशिष्टजनरहिते । आमिषंराजभोग्यंवस्तु । "आमिषंपुंनपुंसकम् । भोग्यवस्तुनिसंभोगे" इतिमेदिनी । **सत्य०** आमिषं संभोगंराज्यलोभंवासुन्दररूपंवा । "आमिषंपललेलोभेसंभोगोत्कोचयोरपि" इतिविश्वः ॥ २९ ॥ **सत्य०** यद्वा वन्यानि वनभवानि कृष्यादिकुलानि । फलैरासेवमानःस्वयंचैतवर्तयन् । **शि०** वन्यानि वल्कलानिद्धानः ॥ ३१ ॥ **सत्य०** नक्षत्ररूपिणीदिवश्च्युतादेवतेवेत्यर्थः । पूर्वंकीदृशीत्यतआह । हसेनहासेनसहितासहसा । "स्वनहसोर्वा" इत्यप्प्रत्ययः ॥ ३२ ॥ **सत्य०** ममशोकायनजायेथाइत्यत्रचतुर्थ्यर्थोद्देश्यत्वस्यनजायेथाइत्यत्रधात्वर्थेजन्मन्यन्वयः । तथाचमच्छोकोद्देश्यकंयज्जन्मतच्छून्यश्चेदभवइत्यर्थः । यद्वा हेशोकाय शोकस्यअयःअपगमःयस्मात्सतथातस्यसंबुद्धिः ॥ ३६ ॥

[पा०] १ ङ. छ. ज. झ. ट. तथाऽऽनतः. २ ख. महाभय. ३ ख. इतस्तवच. छ. इदंतवतु. ४ ङ. छ. ज. झ. ट. कन्दमूल. ५ क. ङ. च. छ. झ. ञ. ट. दण्डकारण्यं. ६ च. षडष्टौ. ७ घ. मद्दुःखार्हा.

एक एव हि वन्ध्यायाः शोको भवति मानसः ॥ अप्रजाऽस्मीति संतापो न ह्यन्यः पुत्र विद्यते ॥३७॥
न[1] दृष्टपूर्वं कल्याणं सुखं वा पतिपौरुषे ॥ अपि पुत्रे[2] तु[3] पश्येयमिति राम स्थितं मया ॥ ३८ ॥
सा[4] बहून्यमनोज्ञानि वाक्यानि हृदयच्छिदाम् ॥ अहं श्रोष्ये सपत्नीनामवराणां वरा[5] सती ॥ ३९ ॥
अतो दुःखतरं किं नु प्रमदानां भविष्यति ॥ मम शोको विलापश्च यादृशोऽयमनन्तकः ॥ ४० ॥
त्वयि संनिहितेऽप्येवमहमासं निराकृता ॥ किं पुनः प्रोषिते तात ध्रुवं मरणमेव[6] मे ॥ ४१ ॥
अत्यन्तं निगृहीताऽस्मि भर्तुर्नित्यमतन्त्रिता[7] ॥ परिवारेण कैकेय्याः समा वाऽप्यथवाऽवरा ॥ ४२ ॥
यो हि मां सेवते कश्चिद[8]थवाऽप्यनुवर्तते ॥ कैकेय्याः पुत्रमन्वीक्ष्य स[9] जनो नाभिभाषते ॥ ४३ ॥
नित्यक्रोधतया तस्याः कथं नु खरवादि[10] तत् ॥ कैकेय्या वदनं द्रष्टुं पुत्र शक्ष्यामि दुर्गता ॥४४॥
दश सप्त च वर्षाणि तव[11] जातस्य राघव ॥ आसितानि[12] प्रकाङ्क्षन्त्या मया[13] दुःखपरिक्षयम् ॥ ४५ ॥

॥ ३६ ॥ इदमेवोपपादयति—एकइति । अन्यः विश्लेषजः । भूलुण्ठनादिःकायिकश्च । अप्रजास्मीत्यसिजभावआर्षः ॥ ३७ ॥ पतिपौरुषेसत्यपि कल्याणं ज्येष्ठपत्नीत्वोचितग्रामाभरणाद्यैश्वर्यरूपं शुभं । सुखं वा भर्तृसंमाननादिजनितसौख्यंवा । अपिपुत्रइति अपिःसंभावनायां । पुत्रेसतितद्बलात्पश्येयमिति मयास्थितमित्यर्थः ॥ ३८ ॥ भूतदुःखमुक्त्वाभविष्यद्दुःखमाह—सेति । साएवंसुखमलभमाना । बहूनीत्युक्तेः पूर्वमपिस्वल्पानिसन्तीतिगम्यते । अमनोज्ञानि परुषाणि । परुषाणीत्युक्तेमनोज्ञमिश्रत्वमपिप्रतीयेत । वाक्यानि नतुसूचकपदानि । हृदयच्छिदां भर्तृहृदयवैकल्यकारिणीनां । अवराणां स्वेनैवतथावक्तुमुचितानां सपत्नीनां नतुस्वाधीनानां । वरासती स्वस्याप्यवरत्वे नकिंचिद्दुःखमितिभावः । क्रोधेनसपत्नीनामितिबहुवचनोक्तिः । तत्रहठात्स्वगृहंमागच्छेत्युक्तिः, कोपेन भर्तृसकाशान्निर्याहीत्युक्तिः, अपुत्रायाःकिमुत्सवेनेत्युक्तिः इत्येवमादीनिसपत्नीवाक्यानिबोध्यानि ॥ ३९ ॥ अतः सपत्नीवाक्यश्रवणजाद्दुःखात् । प्रमदानांकिंनुदुःखतरं । तस्मान्ममशोकोविलापश्चयादृशः इयत्तयावक्तुमशक्यः । अनन्तकः दुष्पारः ॥ ४० ॥ उक्तंदुःखंनिदर्शयति—त्वयीति । बलवतित्वयिसंनिहितेपि एवं भवदनुभूतप्रकारेण । निराकृता । त्वयिप्रोषितेकिंपुनः । अतोमे मरणंध्रुवमितियोजना ॥ ४१ ॥ भर्तुः भर्त्रा । निगृहीताअहं अतन्त्रिता अप्रधानीकृतास्मि । "तन्त्रंप्रधानेसिद्धान्ते" इतिनिघण्टुः । अतःकैकेय्याःपरिवारेण दासीजनेन । समाकृतास्मि । अथवाविचार्यमाणे अवरा न्यूना कृतास्मि ॥ ४२ ॥ दुःखान्तरमाह—यइति । त्वयिप्रोषितेयःस्वजनोमां सेवते परिचरति । अनुवर्तते प्रियोक्तिंकरोति । सोपिकैकेय्याःपुत्रं भरतमन्वीक्ष्य तद्भयादित्यर्थः । नाभिभाषते नाभिभाषेत ॥ ४३ ॥ खरवादि परुषवचनशीलं । तत् पूर्वानुभूतं । दुर्गता अगतिका ॥ ४४ ॥ तवजातस्य त्वयिजातेसति । दशसप्तचवर्षाणि दुःखपरिक्षयंप्रकाङ्क्षन्त्या तव यौवराज्येनेतिभावः । मयासुखमासितानि आस्थिता-

ती० पुत्रेपिपश्येयं । रामास्थितं । अथापि पुत्रेपिचोत्पन्ने पुत्रनिबन्धनंतदुभयंपतिकर्तृकंपश्येयमिति मयाआस्थितमित्यर्थः । **शि०** त्वच्चिकीर्षितस्यसिद्धिर्भवितेवेत्याह—**नेति** । हेराम पतिपौरुषे पतिकर्तृकदिग्विजयादावित्यर्थः । यत्कल्याणं श्रोतॄणांकल्याणसंपादकं । सुखंनदृष्टपूर्वं नानुभूतमित्यर्थः । तदपिकल्याणंसुखंपुत्रेत्वयि वनस्थेसत्यपीतिशेषः । विपश्येयं अनुभवितास्मीत्यर्थः । इतिमया स्थितं निश्चितं । एतेन त्वत्कर्तृकविजयेअस्माकंसंशयोनास्तीतिसूचितम् ॥ ३८ ॥ **सत्य०** ममयादृशःशोकःअनन्तकस्तथाविलापश्चानन्तकः दुष्पारः । अथवा प्रमदानां प्रकृष्टमदवतां । यादृशःशोकोनन्तकःतादृशोऽयं । अतः एतस्मान्निमित्तात् । दुःखतरं दुःखतारकं । किंनुभविष्यति नकिमपीत्यर्थः । तरतेः "ऋदोरप्" इत्यप्प्रत्ययः ॥ ४० ॥ **ति०** "समावाप्यधरावरा" इतिपाठे वरा श्रेष्ठाप्यधरा निकृष्टा कृतास्मीत्यर्थः ॥ ४२ ॥ **ति०** खरवादिनं लुगभावआर्षः । खरवादि परुषवदनशीलं । **सत्य०** कैकेय्यावदनं खरवादिनं निष्ठुरभाषिणंभरतंच । यद्वा खरवादि नं इतिच्छेदः । तत्रखरवादीत्येतद्वदनविशेषणं ।

[पा०] १ क. अदृष्टपूर्वं. २ ङ. छ. ज. झ. ट. विपश्येयं. ३ घ—ञ. रामास्थितं. क. ख. ग. रामासितं. ४ ख. सुबहू. ५ ङ. च. छ. झ. ञ. ट. परा. ६ ङ. छ. झ. ट. मेवहि. ग. मेवच. ७ क—ट. मसंमता. ८ ङ. छ. झ. ट. दथिवा. ९ ख. स्वजनो. १० क. ङ. छ. झ. ञ. ट. खरवादिनं. च. स्वैरवादिनम्. ११ ङ. च. छ. झ. ञ. ट. जातस्यतव. १२ ङ. छ. झ. ञ. ट. अतीतानि. १३ ख. मम.

तदक्षयं महद्दुःखं नोत्सहे सहितुं चिरम्[1] ॥ विप्रकारं सपत्नीनामेवं जीर्णापि राघव ॥ ४६ ॥
अपश्यन्ती तव मुखं परिपूर्णशशिप्रभम् ॥ कृपणा वर्तयिष्यामि कथं कृपणजीविकाम्[2] ॥ ४७ ॥
उपवासैश्च योगैश्च बहुभिश्च परिश्रमैः ॥ दुःखसंवर्धितो[3] मोघं त्वं हि दुर्गतया मया ॥ ४८ ॥
स्थिरं तु हृदयं मन्ये ममेदं[4] यन्न दीर्यते ॥ प्रावृषीव महानद्याः स्पृष्टं कूलं नवांभसा ॥ ४९ ॥

ममैव नूनं मरणं न विद्यते न चावकाशोस्ति यमक्षये[5] मम ॥
यदन्तकोऽद्यैव न मां जिहीर्षति प्रसह्य सिंहो रुदतीं मृगीमिव ॥ ५० ॥
स्थिरं हि नूनं हृदयं ममायसं न भिद्यते यद्भुवि नावदीर्यते[6] ॥
अनेन दुःखेन च देहमर्पितं ध्रुवं ह्यकाले मरणं न विद्यते ॥ ५१ ॥
इदं[7] तु दुःखं यदनर्थकानि मे व्रतानि दानानि च संयमाश्च[8] हि ॥
तपश्च तप्तं यदपत्यकारणात्[9]सुनिष्फलं बीजमिवोप्तमूषरे ॥ ५२ ॥
यदि ह्यकाले मरणं स्वयेच्छया[10] लभेत कश्चिद्गुरुदुःखकर्शितः ॥
गताऽहमद्यैव परेतसंसदं विना त्वया धेनुरिवात्मजेन वै ॥ ५३ ॥
अथापि[11] किं जीवितमद्य मे वृथा त्वया विना चन्द्रनिभाननप्रभ ॥
अनुव्रजिष्यामि वनं त्वयैव गौः सुदुर्बला वत्समिवानुकांक्षया[12] ॥ ५४ ॥

नि । ननु " ऊनषोडशवर्षोमेरामोराजीवलोचनः " इतिविश्वामित्रंप्रतिदशरथवचनात् विवाहानन्तरम् " उषित्वाद्वादशसमाइक्ष्वाकूणांनिवेशने " इत्युपरि सीतयावक्ष्यमाणत्वाच्चरामस्याष्टाविंशतिवर्षाणिवर्तन्ते तत्कथंदशसप्तचवर्षाणीत्युच्यतेइतिचेत् नैषदोषः । अत्रजातस्येत्युक्तिःद्वितीयजन्मापेक्षया " गर्भैकादशेषु राजन्यं " इतिबहुवचनेगर्भनवममारभ्यक्षत्रियस्योपनयनकालत्वोक्तेः । वयसापञ्चविंशकइतिसीतावचनाद्वचनान्तरविरोधपरिहारादिकंबालकाण्डएवकृतम् " ऊनषोडशवर्षोमे " इत्यत्र ॥ ४५ ॥ सहितुं सोढुं । चिरंनोत्सहे । जीर्णापि सपत्नीदुर्वाक्यश्रवणदुःखेनजीर्णापि । विप्रकारं अपकाररूपं । दुःखमित्यन्वयः ॥ ४६ ॥ कृपणजीविकां दीनजीवनं । वर्तयिष्यामि करिष्यामीत्यर्थः । "आजीवोजीविकावार्तावृत्तिर्वर्तनजीवने " इत्यमरः ॥ ४७ ॥ योगैः देवताध्यानैः । परिश्रमैः व्रतैः । मोघं निष्फलंयथाभवतितथा दुर्गतया भाग्यरहितयेतियावत् ॥ ४८—५० ॥ अनेनदुःखेनअर्पितं आहतं । ममहृदयंनभिद्यतेइतियत् अतः स्थिरंहि नाशरहितमेव । देहंचनावदीर्यतइतियत् अतः आयसं अयोनिर्मितं । नूनं । तथाहि अकाले अविहितकाले । मरणं न विद्यते । ध्रुवं ॥ ५१ ॥ इदं वक्ष्यमाणं दुःखं तु पूर्वदुःखेभ्योविलक्षणं । तदेवाह—यदिति । यस्मान्मेअपत्यकारणात्कृतानिव्रतानि दानानि संयमाः ध्यानानि च । अनर्थकानिजातानि । "सामान्येनपुंसकं" इतिनपुंसकत्वम् । तप्तंतपश्चऊषरेउप्तंबीजमिवसुनिष्फलमासीत् । इदंतुदुःखमित्यन्वयः ॥ ५२ ॥ "ध्रुवंह्यकालेमरणं नविद्यते" इत्येतत्सकार्यं दर्शयति—यदिहीति । यदिलभेत तदाहं परेतसंसदं यमसभां । गतास्यामित्यन्वयः ॥ ५३ ॥ अथापि अकालमरणाभावेपि । किंजीवितं कुत्सितजीवितं । वृथा सुदुर्बला अधीरेतियावत् ।

नं नियामकं राजानमितियावत् । "नेतानश्चनियमाकः" इत्यनेकार्थध्वनिपदमञ्जरी ॥ ४४ ॥ **ती०** जीर्णापि सापत्न्यकथायोग्यवयोबलक्षयंप्राप्तापि । सपत्नीनांविप्रकारं निराकरणंच ॥ ४६ ॥ **शि०** दुःखंसंवर्धितः दुःखंयथातथा ॥ ४८ ॥ **ती०** नभिद्यते नद्विधाभवति । नावदीर्यते नशकलीभवति ॥ ५१ ॥ **सत्य०** चन्द्रनिभाननप्रभा नितरांभा निभा चन्द्रस्यनिभेवआननप्रभायस्यसतथोक्तः ॥ ५४ ॥ इतिविंशस्सर्गः ॥ २० ॥

[पा०] १ ङ. छ. झ. ट. चिरात्. २ ङ. छ. झ. ट. जीविका. ३ घ. दुःखंप्रवर्तते. ट. दुःखंसंवर्धितो. ४ ख. शतधा. ५ ख. ग. घ. ज. क्षयेऽपिवा. ६ छ. ज. झ. ट. नोविदीर्यते. ङ. दीर्यतेद्विधा. ७ ग. घ. ज. इदंहि. ८ क. च. ङ. संयमाश्च. ९ ङ. च. छ. झ. ञ. ट. काम्यया. १० ङ. च. छ. झ. ञ. ट. यदृच्छया. ११ घ. च. तथापि. १२ क. ख. ङ. च. छ. झ. ञ. ट. मिवाभिकाङ्क्षया.

भृशमसुखममर्षिता तदा बहु विललाप समीक्ष्य राघवम् ॥
व्यसनमुपनिशाम्य सा महत्सुतमिव बद्धमवेक्ष्य किंनरी ॥ ५५ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे विंशः सर्गः ॥ २० ॥

एकविंशः सर्गः ॥ २१ ॥

लक्ष्मणेनरामविवासनश्रवणदुःखितांकौसल्यांप्रतिदशरथगर्हणेनकैकेयीवचनाद्वनगमनस्यस्वानभिमतत्वनिवेदनपूर्वकंरामस्यवनगमनेस्वस्यापितदनुगमननिवेदनम् ॥ १ ॥ कौसल्ययाकैकेयीवचनस्याधर्म्यत्वकथनेनस्वेनवनगमनानङ्गीकारंनिवेदितेनरामेणसदृष्टान्तंपितृवचनपरिपालनस्यधर्म्यत्वनिरूपणेनकौसल्यालक्ष्मणयोःसमाश्वासनपूर्वकंमातरंप्रतिवनगमनाङ्गीकारप्रार्थना ॥ २ ॥

तथा तु विलपन्तीं तां कौसल्यां राममातरम् ॥ उवाच लक्ष्मणो दीनस्तत्कालसदृशं वचः ॥ १ ॥
न रोचते ममाप्येतदार्ये यद्राघवो वनम् ॥ त्यक्त्वा राज्यश्रियं गच्छेत्स्त्रिया वाक्यवशं गतः ॥ २ ॥
विपरीतश्च वृद्धश्च विषयैश्च प्रधर्षितः ॥ नृपः किमिव न ब्रूयाच्चोद्यमानः समन्मथः ॥ ३ ॥
नास्यापराधं पश्यामि नापि दोषं तथाविधम् ॥ येन निर्वास्यते राष्ट्राद्वनवासाय राघवः ॥ ४ ॥
[अहं हनिष्ये पितरं वृद्धं कामवशं गतम् ॥ स्त्रिया युक्तं च निर्लज्जं धर्मायुक्तं नृपं यथा] ॥ ५ ॥
न तं पश्याम्यहं लोके परोक्षमपि यो नरः ॥ स्वमित्रोपि निरस्तोपि योस्य दोषमुदाहरेत् ॥ ६ ॥
देवकल्पमृजुं दान्तं रिपूणामपि वत्सलम् ॥ अवेक्षमाणः को धर्मं त्यजेत्पुत्रमकारणात् ॥ ७ ॥

अनुकाङ्क्षया वात्सल्येन ॥५४॥ असुखं दुःखम् । अमर्षिता सोढुमशक्ता । व्यसनं रामविश्लेषभवंव्यसनम् । उपनिशाम्य आलोच्य ॥ ५५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीतांबराख्याने अयोध्याकाण्डव्याख्यानेविंशः सर्गः ॥ २० ॥

एवमुपक्रान्तस्यपितृवचनपरिपालनस्यस्थैर्यमस्मिन्सर्गेप्रतिपाद्यते—तथेति । तत्कालसदृशं कौसल्यादुःखकालोचितम् । एतेनवक्ष्यमाणलक्ष्मणवचनंकेवलं कौसल्याशोकशान्त्यर्थं नतुसहृदयमितिगम्यते ॥ १ ॥ ममापि मह्यमपि । स्त्रियाः कैकेय्याः ॥ २ ॥ ननुनाहंकैकेयीवचनाद्गच्छामि किंतुराजवचनादित्याशङ्क्याह—विपरीतइति । विपरीतः विपरीतवयोधर्मा । तत्र हेतुर्वृद्धत्वंविषयप्रधर्षितत्वंच । विषयाः शब्दादयः । ननुपरिशुद्धंप्रतिशब्दादिविषयाःकिंकुर्युरित्यत्राह—समन्मथइति । चोद्यमानः कैकेय्येतिशेषः । इवशब्दोवाक्यालङ्कारे ॥ ३ ॥ ननुरामदोषादेवास्तुविवासनंतत्राह—नास्येति । अपराधं राजद्रोहं । दोषं महापातकादिकं । तथाविधं निर्वासनयोग्यम् ॥४—५॥ दोषाभावेकिंप्रमाणमित्याशङ्क्यनतावच्छब्ददइत्याह—नेति । स्वमित्रोपि सुतरांशत्रुरपि । निरस्तोपि केनचिदपराधेनतिरस्कृतोपि । नरःअसुरश्चेद्वदेत् । परोक्षमपि प्रत्यक्षेकाकथेतिभावः । दोषं यंकंचिदपि । उदाहरेत् वदेत् । तंलोकेकुत्रापिनपश्यामि ॥ ६ ॥ नाप्यनुमानंप्रत्यक्षंचेत्याह—देवकल्पमिति । देवकल्पं । "ईषदसमाप्तौ" इत्यादिनाकल्पप्प्रत्ययः । देवसमानं नित्यशुद्धमितियावत् । ऋजुं करणत्रयार्जवयुक्तं प्रजाछन्दानुवर्तिनंवा । दान्तं दमितं । गुरुभिःशिक्षितमित्यर्थः । निगृहीतेन्द्रियंवा । रिपूणां कैकेय्यादीनामपि वत्सलं । धर्मं धर्मस्वरूपं । पुत्रं कारणेसत्यपित्यागानर्हसंबन्धम् । अवेक्षमाणः पश्यन् । यद्वा धर्ममवेक्षमाणः धार्मिकः । अकारणात् दोषंविनापि त्यजेत् ॥ ७ ॥

सत्य० अदीनमितिच्छेदः ॥ १ ॥ **रामानुजीयं** । नास्येति । एतच्छ्लोकानन्तरंनतमितिश्लोकः ॥४॥ **ती०** मातॄणां कैके.

[पा०] १ च. छ. झ. ञ. ट. यदा. २ ञ. तदा. ३ ठ. लक्ष्मणोऽदीनं. ४ ख. ग. राजश्रियं. ५ च. किमिति. ६ ख. निर्यास्यते. ७ अयंश्लोकः क. दृश्यते. क. अयवृद्धंहनिष्यामिदुर्गंकामवशंगतम्. स्त्रियायुक्तंसुनिर्लज्जंडंभयुक्तंनृपंतथा. ८ ज. देवकल्पंसमं. ९ च. छं. ज. मातृणामपि. १० क. ख. त्पुत्रमकारणम्.

तदिदं वचनं राज्ञः पुनर्बाल्यमुपेयुषः ।। पुत्रः को हृदये कुर्याद्राजवृत्तमनुसरन् ।। ८ ।।
यावदेव न जानाति कश्चिदर्थमिमं नरः ।। तावदेव मया सार्धमात्मस्थं कुरु शासनम् ।। ९ ।।
मया पार्श्वे सधनुषा तव गुप्तस्य राघव ।। कः [1]समर्थोऽधिकं कर्तुं कृतान्तस्येव तिष्ठतः ।। १० ।।
नि[2]र्मनुष्यामिमां [3]सर्वामयोध्यां [4]मनुजर्षभ ।। करिष्यामि शरैस्तीक्ष्णैर्यदि स्थास्यति विप्रिये ।। ११ ।।
भरतस्याथ पक्ष्यो वा यो वाऽस्य हितमिच्छति ।। सर्वा[5]नेतान्वधिष्यामि मृदुर्हि परिभूयते ।। १२ ।।
प्रोत्साहितोऽयं कैकेय्या [6]स दुष्टो यदि नः पिता ।। अमित्रभूतो निस्सङ्गं [7]वध्यतां वध्यतामपि ।।१३।।
गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः ।। उत्पथं प्रतिपन्नस्य कार्यं भवति शासनम् ।। १४ ।।
बलमेष किमाश्रित्य हेतुं वा [8]पुरुषर्षभ ।। दातुमिच्छति कैकेय्यै राज्यं [9]स्थितमिदं तव ।। १५ ।।
त्वया चैव मया चैव कृत्वा वैरमनुत्तमम् ।। [10]कोऽस्य शक्तिः श्रियं दातुं भरताया[11]रिशासन ।। १६ ।।
अनुरक्तोस्मि भावेन भ्रातरं देवि तत्वतः ।। सत्येन धनुषा चैव दत्तेनेष्टेन ते शपे ।। १७ ।।
दीप्तमग्निमरण्यं वा यदि रामः प्रवेक्ष्यति ।। प्रविष्टं तत्र मां देवि त्वं पूर्व[12]मेवधारय ।। १८ ।।
हरामि वीर्याद्दुःखं ते तमः सूर्य इवोदितः ।। [13]देवी पश्यतु मे वीर्यं राघवश्चैव पश्यतु ।। १९ ।।
[[14]हनिष्ये पितरं वृद्धं [15]कैकेय्यासक्तमानसम् ।। कृपणं [16]च स्थितं बाल्ये वृद्धभावेन गर्हि[17]तम्] ।। २० ।।
एतत्तु वचनं श्रुत्वा लक्ष्मणस्य महात्मनः ।। उवाच रामं कौसल्या [18]रुदन्ती शोकलालसा ।। २१ ।।
भ्रातुस्ते वदतः पुत्र लक्ष्मणस्य श्रुतं त्वया ।। यदत्रानन्तरं [19]कार्यं कुरुष्व यदि रोचते ।। २२ ।।
[20]न चाधर्म्यं वचः श्रुत्वा सपत्न्या मम भाषितम् ।। विहाय शोकसंतप्तां गन्तुमर्हसि मामितः ।।२३।।

बाल्यं बालभावं । कामपारवश्यमित्यर्थः । राजवृत्तं राजनीतिम् ।। ८ ।। शास्यतइतिशासनं राज्यं । आत्मस्थंकुरु स्वाधीनंकुर्वित्यर्थः ।। ९ ।। तवाधिकंकर्तुं तवपौरुषादधिकंपौरुषंकर्तुमित्यर्थः ।। १० ।। विप्रिये प्रातिकूल्ये ।। ११ ।। पक्ष्यः सहायभूतोवर्गः ।।१२।। अमित्रभूतोयदि शत्रुपक्षसहायभूतश्चेदित्यर्थः ।। १३ ।। स्वोक्तार्थेधर्मशास्त्रंप्रमाणयति—गुरोरिति । अवलिप्तस्य गर्वितस्य । उत्पथम् अमर्यादाम् ।। १४ ।। बलं राजत्वप्रयुक्तबलं हेतुं वरदानरूपहेतुंवा ।।१५—१६।। अनुरक्तइति । दत्तेन दानेन । इष्टेन देवार्चनादिना ।। १७—२१ ।। श्रुतं वाक्यजातमितिशेषः । परमधार्मिकराममातृत्वाच्चापलंविहाययदिरोचतेइत्युक्तवती ।। २२ ।। पितृवचनपरिपालकस्यरामस्यलक्ष्मणवचनमसह्यमितिज्ञात्वाह—नचेत्यादिना ।। २३ ।।

ष्यादीनामपिविषये ।। ७ ।। शि० बाल्यं स्वदत्तकैकेयीवराच्छादनं । बाल्यमितिसंवरणार्थकवलंधातुप्रकृतिकष्यदन्तं ।। ८ ।। ति० कुरुशोभनमितिपाठे राज्यफलकमभिषेकं ।। ९ ।। वि० अधिकं त्वदाज्ञोल्लङ्घनपूर्वकमभिषेकविघ्नं ।। १० ।। ति० संतुष्टः तस्यांसंतुष्टः । सत्य० निस्सङ्गं निस्स्नेहंयथाभवतितथा ।। १३ ।। सत्य० एषराजा कैकेय्यैतवोपस्थितंकृत्स्नंराज्यंदातुमिच्छति किल । तत् किंबलमाश्रित्य कैकेय्याःस्वस्यवा । अथवा अतीतानागतज्ञत्वंलक्ष्मणस्यकविरवगमयति—**बलमित्यादिना**। हेपुरुषोत्तम एषराजाकैकेय्यैयद्दातुमिच्छतितत्तवैवोपस्थितम् ।। १५ ।। शि० अनुत्तमं निषिद्धं ।। १६ ।। सत्य० देवि भवतीपश्यतु । राघवश्चपश्यतु । देवीतिदीर्घे देवीकैकेयी । राघवो दशरथः ।। १९ ।। सत्य० वृद्धमपिबाल्ये मौर्ख्ये स्थितं । अतएवगर्हितं । वृद्धभावेन त्वय्युद्रिक्तयाभक्त्या । भावोभक्तिरितिप्रोक्तइतितात्पर्योक्तेः । हनिष्यामि । पदव्यत्ययेननममत्वद्भक्त्येकशरणस्यजनकहननहेतुकोव्यत्ययइतिकविर्भावमाविष्करोति । कृपणः कदर्यः ।।२०।। शि० तत्वंयाथार्थ्यविशिष्टं । अनन्तरंकापथ्यरहितं ।।२२।। ति० गुरुवचनंकथंवानकार्यमित्याशङ्क्य नैतद्गुरुवचनं किंतुसपत्न्यैवोक्तमित्याह—**नचेति** ।। २३ ।।

[पा०] १ ख. ग. घ. ज. समर्थोप्रियं. २ घ. निर्मानुष्यां. ३ ग. घ. ज. कृत्स्नां. ४ क. पुरुषर्षभ. ५ ङ. च. छ. झ. ञ. ट. सर्वांस्तांश्चवधि. ६ घ. ङ. छ—ट. संतुष्टो. ७ झ. वध्यतांवध्यतामपि. ८ क. ख. घ—ट. पुरुषोत्तम. ९ झ. ठ. उपस्थितं. १० ट. कास्यशक्तिःप्रियं. ज. कस्यशक्तिःश्रियं. ११ क. कर्शन. १२ क. ग. घ. ज. मुपधारय. १३ ठ. देवि. १४ इदंपद्यं झ. ठ. दृश्यते. १५ घ. कैकेय्यां. १६ क. घ. च. ज. चास्थितं. १७ च. मोहितम्. १८ ख—छ. झ. ञ. रुदती. १९ ङ—ट. तत्वं. २० ग. एतत्तुवचनं.

धर्मज्ञ यदि[1] धर्मिष्ठो[2] धर्मं चरितुमिच्छसि ॥ शुश्रूष मामिहस्थस्त्वं चर धर्ममनुत्तमम्[3] ॥ २४ ॥
शुश्रूषुर्जननीं पुत्रः[4] स्वगृहे नियतो वसन् ॥ परेण तपसा युक्तः काश्यपस्त्रिदिवं गतः ॥ २५ ॥
यथैव[5] राजा पूज्यस्ते गौरवेण तथा ह्यहम्[6] ॥ त्वां नाहमनुजानामि[7] न गन्तव्यमितो[8] वनम् ॥ २६ ॥
त्वद्वियोगान्न मे कार्यं जीवितेन सुखेन[9] वा ॥ त्वया सह मम श्रेयस्तृणानामपि भक्षणम् ॥ २७ ॥
यदि त्वं यास्यसि वनं त्यक्त्वा मां शोकलालसाम् ॥ अहं प्रायमिहासिष्ये न[10] हि शक्ष्यामि जीवितुम् ॥ २८ ॥
ततस्त्वं प्राप्स्यसे पुत्र निरयं लोकविश्रुतम् ॥ ब्रह्महत्यामिवाधर्मात्समुद्रः सरितांपतिः ॥ २९ ॥
विलपन्तीं तदा[11] दीनां कौसल्यां जननीं ततः ॥ उवाच रामो धर्मात्मा वचनं धर्मसंहितम् ॥ ३० ॥
नास्ति शक्तिः पितुर्वाक्यं समतिक्रमितुं मम ॥ प्रसादये त्वां शिरसा गन्तुमिच्छाम्यहं वनम् ॥ ३१ ॥
ऋषिणा च[12] पितुर्वाक्यं कुर्वता व्रत[13]चारिणा ॥ गौर्हता जानता धर्मं कण्डुना[14]ऽपि विपश्चिता ॥ ३२ ॥

एभ्योमातागरीयसीतिवचनंहृदिनिधायाह—शुश्रूषमामिति॥२४॥ कश्यपपुत्रेष्वेकः स्वगृहेमातृशुश्रूषारूपमहातपसात्रिदिवंप्राप्तवानितिगम्यते ॥२५॥ नानुजानामि अनुज्ञांनकरोमि ॥ २६—२७ ॥ प्रायं प्रायोपवेशनम् । अनशनदीक्षामितियावत् ॥२८॥ निरयशब्देनदुःखंलक्ष्यते । अधर्मात् पिप्पलादविषयेकृतादपकारात् । ब्रह्महत्यामिव ब्राह्मणनिमित्तकाहिंसाब्रह्महत्येतिव्युत्पत्त्यापिप्पलादोत्पादितकृत्ययासमुद्रस्यप्राप्तंदुःखंब्रह्महत्येत्युच्यते । पिप्पलादेनकृत्योत्पादनंच “ पिप्पलादसमुत्पन्नेकृत्येलोकभयंकरि । पापाणंतेमयादत्तमाहारार्थंप्रकल्पितं ” इतिप्रसिद्धम् ॥ साक्षात्समुद्रकर्तृकब्रह्महत्यायाअश्रवणादेवंव्याख्यातम् । यद्वा शुश्रूपुरित्यत्रकाश्यपःपूर्वजन्मनिमातृशुश्रूषांकृत्वा तत्फलत्वेनदिवंगत्वाप्रजापतित्वंचगतवानितिपुराणकथा । उत्तरत्रसमुद्रः किलमातृदुःखजननरूपाधर्माद्ब्रह्महत्यां ब्रह्महत्याप्राप्यनरकविशेषान्प्राप्तवानितिपौराणिकीकथा ॥ २९—३० ॥ शक्तिः उत्साहः । पितृवचनस्य त्वद्वचनापेक्षयाप्राथमिकत्वादितिभावः ॥ ३१ ॥ मद्विपत्तिकरंकथंकरिष्यसीत्यत्राह—ऋषिणेत्यादिना

सत्य० काश्यपोगरुडः । मातुरमृतदानेनत्रिदिवंगतः । कर्मविशेषात्प्रतिवद्धंस्वर्गंसाधयामासतपसेतिकथा भारतोक्तानुसंधेया । **शि०** प्रव्राजननिवर्तनंमयानोचितमित्याह—**यथेति** । गौरवेण गुरुत्वेन । यथाअहंपूज्येत्यर्थः तथा राजापूज्यः । अतः इतोवनंत्वयानगन्तव्यमितिनानुजानामि । आज्ञापयामीत्यर्थः । एतेन पत्यनुकूलाचरणशीलात्वं तस्यास्सूचितं । **सत्य०** यथाराजापूज्यो राज्ञो गौरवेण सहस्रगुणाधिक्येनतथाऽहमपिपूज्या । “पितुस्सहस्रंमातातुगौरवेणातिरिच्यते” इतिस्मृतेः । एवमर्थकरणेनयथैवेत्युभयोःपूज्यत्वाविशेषात्किंराजाज्ञांविहायत्वदाज्ञाकरणेविनिगमकमितिशङ्कानवकाशः ॥ २६ ॥ **सत्य०** त्वद्वियोगान्निमित्तात्जीवितेनकिंकार्यं नकिमपीत्यर्थः । इन्द्रियापाटवंचेत्किंजीवितेनेत्यतस्सुखेनेति । शोभनेन्द्रियवतेत्यर्थः । तृणानांभक्षणं श्रेयइत्यनेनत्वदवियोगेनपशुत्वमपिममेष्टमितिध्वन्यते । हेराम मातरिमयिएवंवदन्त्यांभवनंविहायवनंगच्छामीत्येतत्तववचनंनयुक्तमितिसंवोधयति—**असहममेति** । ममसहितःसहममः सनभवतीत्यसहममः । वेत्युक्तेर्न सहस्य सभावः । अकार्यंजीवितेन नित्यजीवनेन । अकार्यंसुखेन नित्यसुखेन । त्वद्वियोगात् तवविशिष्टयोगस्त्वद्वियोगः तस्माद्धेतोः त्वयासहममश्रेयः । मेत्वयाअसहनेत्यर्थः । मातुर्ममैतच्छ्रेयोभवतीतिनचित्रमितिदृष्टान्तमुखेनाचष्टे—**तृणानामपीति** । तृणानांतृणजीवानां । भक्षणं भस्यस्वयोग्यमुक्तिस्थानस्य क्षणउत्सवोयस्मिंस्तच्छ्रेयोभवति किमु ममेत्यर्थः । “ भस्स्वभूमिश्च ” इतिमेदिनी । “ कालविशेषोत्सवयोःक्षणः ” इत्यमरः ॥ २७ ॥ **ति०** चोहेतौ ॥ २८ ॥ **स०** कदाचिज्जनन्यैदुद्रोहसमुद्रः । तज्जनिताधर्मात्पिप्पलादनिर्मिताभिचारिकक्रियायाःप्रतिमन्त्रणेननिवारणलक्षणहननाद्ब्रह्महत्यासमुद्रेणसंपादिता । तयाचानुवभूवदुःखमितिपौराणिककथा । “ कर्मणामनसावाचा सर्वावस्थासुसर्वदा । अक्लेशजननंप्रोक्तमहिंसात्विहयोगिभिः ” इतिचतुर्थस्कन्धतात्पर्योक्तिः । अत्रप्रतिमन्त्रणेनपिप्पलादक्लेशजननाद्ब्रह्महत्यासमुद्रंप्राप्ता ॥ २९ ॥ **शि०** पितुर्वाक्यमित्यनेनकैकेय्युक्तंराजसंमतमेवेतिरामनिश्चयोव्यक्तः ॥ ३१ ॥ **ति०** किंचपितुर्वाक्येनगोमातृवधोपिपूर्वैर्महात्मभिःकृतः मयातुदुःखमात्रंमातुःसंपाद्यतइतिनकिंचिदेतदित्याह—**ऋषिणेति** । अधर्मंजानतापि.

[पा०] १ झ. ट. इति. २ क. ङ. च. झ. ञ. धर्मिष्ठ. ३ ख. मनुस्मरन्. ४ ङ. छ. ज. झ. ट. पुत्र. ५ ङ. तथैव. ६ ग. घ. ज. स्म्यहम्. ७ ङ. छ. झ. ट. साहंनानुजानामि. ८ ख. मतो. ९ ङ. झ. ट. सुखेनच. १० ङ. च. झ. ञ. ट. नच. ११ क—ङ. छ—ट. तथा. १२ क. ऋषिणापि. १३ ङ. छ. झ. ट. वनचारिणा. १४ ख. ङ. च. छ. ञ. ट. कण्डुनाच.

अस्माकं च कुले पूर्वं सगरस्याज्ञया पितुः ॥ खनद्भिः सागरैर्भूमिमवाप्तः सुमहान्वधः ॥ ३३ ॥
जामदग्न्येन रामेण रेणुका जननी स्वयम् ॥ कृत्ता परशुनाऽरण्ये पितुर्वचनकारिणा ॥ ३४ ॥
एतैरन्यैश्च बहुभिर्देवि देवसमैः कृतम् ॥ पितुर्वचनमक्लीबं करिष्यामि पितुर्हितम् ॥ ३५ ॥
न खल्वेतन्मयैकेन क्रियते पितृशासनम् ॥ एतैरपि कृतं देवि ये मया तव कीर्तिताः ॥ ३६ ॥
नाहं धर्ममपूर्वं ते प्रतिकूलं प्रवर्तये ॥ पूर्वैरयमभिप्रेतो गतो मार्गोऽनुगम्यते ॥ ३७ ॥
तदेतत्तु मया कार्यं क्रियते भुवि नान्यथा ॥ पितुर्हि वचनं कुर्वन्न कश्चिन्नाम हीयते ॥ ३८ ॥
तामेवमुक्त्वा जननीं लक्ष्मणं पुनरब्रवीत् ॥ वाक्यं वाक्यविदां श्रेष्ठः श्रेष्ठः सर्वधनुष्मताम् ॥३९॥
तव लक्ष्मण जानामि मयि स्नेहमनुत्तमम् ॥ विक्रमं चैव सत्वं च तेजश्च सुदुरासदम् ॥ ४० ॥
मम मातुर्महद्दुःखमतुलं शुभलक्षण ॥ अभिप्रायमविज्ञाय सत्यस्य च शमस्य च ॥ ४१ ॥
धर्मो हि परमो लोके धर्मे सत्यं प्रतिष्ठितम् ॥ धर्मसंश्रितमेतच्च पितुर्वचनमुत्तमम् ॥ ४२ ॥
संश्रुत्य च पितुर्वाक्यं मातुर्वा ब्राह्मणस्य वा ॥ न कर्तव्यं वृथा वीर धर्ममाश्रित्य तिष्ठता ॥ ४३ ॥
सोहं न शक्ष्यामि पितुर्नियोगमतिवर्तितुम् ॥ पितुर्हि वचनाद्वीर कैकेय्याऽहं प्रचोदितः ॥ ४४ ॥
तदेनां विसृजानार्यां क्षत्रधर्माश्रितां मतिम् ॥ धर्ममाश्रय मा तैक्ष्ण्यं मद्बुद्धिरनुगम्यताम् ॥ ४५ ॥

॥ ३२—३४ ॥ अक्लीबम् अकातरम् । अक्लिष्टमिति यावत् ॥ ३५—३६ ॥ अपूर्वं अभिनवं । अभिप्रेतः अङ्गीकृतइत्यर्थः । सर्वसंमतइतिवार्थः । तेनचन्द्रकृततारागमनादिव्यावृत्तिः । ननु " दृष्टोधर्मव्यतिक्रमः साहसंचपूर्वेषां " इतिमातृवधादिकंसाहसत्वेननिन्दितमितिचेन्न । साहसस्यपितृनियुक्तव्यतिरिक्तविषयत्वात् । व्याख्यातृभिस्तदुदाहरणमज्ञानविजृंभितं । "पितुःशतगुणंमातागौरवेणातिरिच्यते"इतितुशुश्रूषामात्रे नतुवचनकरणे । पितुरेवनियन्तृत्वात् । अतएव " माताभस्त्रापितुःपुत्रोयस्माज्जातःसएवसः " इतिवचनेनाप्यविरोधः ॥ ३७ ॥ तत्तस्मात्कारणात् । भुवि कार्यं कर्तव्यम् । एतत् पितृवचनं मयात्वन्यथा नक्रियतइतिसंबन्धः । हियस्मात् पितृवचनंकुर्वन्कश्चिन्नहीयतेनाम । नामेतिप्रसिद्धौ ॥ ३८ ॥ पुनः अनन्तरमित्यर्थः ॥ ३९—४० ॥ सत्यस्य धर्मस्य । अभिप्रायं रहस्यं । अविज्ञायममातुः अतुलंमहद्दुःखं जायतइतिशेषः । धर्मरहस्यंजानन्नपित्वंकिमर्थमेवंवदसीतिभावः ॥४१॥ धर्मतत्वमाह—धर्मोहीति । लोके पुरुषार्थेषु धर्मः परमः प्राथमिकः प्रधानभूतः । ततः किमित्यत्राह—धर्मेसत्यंप्रतिष्ठितमिति । धर्मैकपर्यवसायि सत्यमित्यर्थः । उत्तमं मातृवचनापेक्षयाउत्कृष्टं । एतत् पितृवचनंच । धर्मसंश्रितं धर्मैकफलकं ॥ ४२ ॥ एवंसत्यवचनंपितृवचनकरणंचद्वयमपिधर्मनिमित्तमित्युक्तं तत्रसत्यस्यकर्तव्यत्वमाह—संश्रुत्येति । धर्ममाश्रित्यतिष्ठता धर्मरूपफलमिच्छता ॥४३॥ पितृवचनकरणस्यकर्तव्यत्वमाह—सोहमिति । प्रतिज्ञातवानहमित्यर्थः । नियोगं आज्ञां । पितृवचनत्वाभावेपरिहरति—पितुर्हीति । पितृवचनकरणं सत्यंचएकैकमेवधर्ममूलंकार्यं किंपुनर्मिलितमितिभावः ॥ ४४ ॥ एवंसत्यरहस्यमुक्त्वाशमस्यतत्वमाह—तदिति । अनार्यां दुष्टां पितरमपिहत्वाराज्यंकुर्यामित्येवंरूपां । क्षत्रधर्माश्रितां केवलशूरधर्माश्रितां । रौद्रशाठ्यसहितक्षत्रधर्माश्रिता-

---

ऋषिणापिमन्त्रद्रष्ट्रापिपितृवाक्यतोगौर्हता । तस्मात्पितृवाक्याकरणेमहानधर्मइतिसूचितं । स० पितुर्वाक्यंधर्मंजानता । अथवा गोहननंअधर्मंजानता ॥ ३२ ॥ ती० अवाप्तःसुमहान्वधइत्यनेनप्राणानपिपरित्यज्यपितृवाक्यंपरिपालनीयंकिमुतकियत्कालवनवासमात्रेणेत्याशयःसूचितः । स० यद्वातुरिवार्थः । सगरस्यगरपायिनोवधइव । तेनसगरस्येत्यधिकमितिशङ्कानवकाशः ॥३३॥ स० कश्चित् ना पुरुषः । अमहीयते नपूज्यतइतिन अपितुमहीयतएवेत्यर्थोवा ॥ ३८ ॥ शि० अपिनासत्यसंश्रितं । ति० अत्रो-

[पा०] १ ङ. च. छ. झ. ञ. ट. अस्माकंतु. २ च. ञ. भूमिंसंप्राप्तः. ३ ख. ङ. छ. झ. ट. वचनकारणात्. ४ घ. बहुविधैः. ५ क. देव. ६ ङ—ट. परिकीर्तिताः. क. कीर्तितास्तव. ७ च. मभिप्रेत्य. ८ ख. चेदमब्रवीत्. ९ क. ञ. श्रेष्ठं. १० क. च. ञ. तेजश्चैव. ११ ज. दुःखंत्वदुःखं. क. दुःखमशुभं. १२ ङ. छ. झ. ट. प्रायंनविज्ञाय. १३ ङ. छ. झ. ञ. ट. मप्येतत्पितु. १४ घ. ज. सुसंश्रित्य. १५ ङ. च. ज—ट. पुनः. १६ ट. तुवचनाद्वीर. १७ क—ञ. तदेतां.

तमेवमुक्त्वा सौहार्दाद्भ्रातरं लक्ष्मणाग्रजः ॥ उवाच भूयः कौसल्यां प्राञ्जलिः शिरसा नतः ॥४६॥
अनुमन्यस्व मां देवि गमिष्यन्तमितो वनम् ॥ शापितासि मम प्राणैः कुरु स्वस्त्ययनानि मे ॥४७॥
तीर्णप्रतिज्ञश्च वनात्पुनरेष्याम्यहं पुरीम् ॥ ययातिरिव राजर्षिः पुरा हित्वा पुनर्दिवम् ॥ ४८ ॥
शोकः संधार्यतां मातर्हृदये साधु मा शुचः ॥ वनवासादिहैष्यामि पुनः कृत्वा पितुर्वचः ॥ ४९ ॥
त्वया मया च वैदेह्या लक्ष्मणेन सुमित्रया ॥ पितुर्नियोगे स्थातव्यमेष धर्मः सनातनः ॥ ५० ॥
अम्ब संहृत्य सम्भारान्दुःखं हृदि निगृह्य च ॥ वनवासकृता बुद्धिर्मम धर्म्याऽनुवर्त्यताम् ॥ ५१ ॥

एतद्वचस्तस्य निशम्य माता सुधर्म्यमव्यग्रमविक्लवं च ॥
मृतेव संज्ञां प्रतिलभ्य देवी समीक्ष्य रामं पुनरित्युवाच ॥ ५२ ॥
यथैव ते पुत्र पिता तथाऽहं गुरुः स्वधर्मेण सुहृत्तया च ॥
न त्वाऽनुजानामि न मां विहाय सुदुःखितामर्हसि गन्तुमेवम् ॥ ५३ ॥
किं जीवितेनेह विना त्वया मे लोकेन वा किं स्वधयाऽमृतेन ॥
श्रेयो मुहूर्तं तव संनिधानं ममेह कृत्स्नादपि जीवलोकात् ॥ ५४ ॥
नरैरिवोल्काभिरपोह्यमानो महागजोऽध्वानमनुप्रविष्टः ॥
भूयः प्रजज्वाल विलापमेनं निशम्य रामः करुणं जनन्याः ॥ ५५ ॥

मितिवार्थः । क्षत्रधर्मस्यतथात्वंप्रतिपादितंमहाभारते राजधर्मे "क्षत्रधर्मोमहारौद्रःशठकृत्यइतिस्मृतः" इति । तादृशींमतिंविसृज किन्तुधर्ममप्याश्रय । मातैक्ष्ण्यं इतःपरमपिक्रौर्यमाश्रय । मद्बुद्धिः ममबुद्धिः । अनुगम्यतां अनुवर्त्यतां । लोकायतवत्केवलनीतिर्नाश्रयणीया किंतुधर्ममाश्रितानीतिरित्यर्थः । अस्मिन्हि शास्त्रेधर्मस्थापनमुच्यते स्थापनंचधर्ममन्तरेणकेवलनीतिरेवार्थसाधनमितिलोकायतमतनिरासेनप्रवर्तनं तेन तत्रतत्रलक्ष्मणमुखेनलोकायतेप्रवर्तिते उपन्यस्ते तन्निरासेनरामेणधर्मःस्थाप्यतइतिरहस्यम् ॥ ४५—४७ ॥ किंतेमद्वचनंनकर्तव्यमित्याशङ्क्यप्रथमप्रवृत्तपितृवचनकरणानन्तरंक्रियतइत्याह—तीर्णप्रतिज्ञइति । ययातिः स्वर्गाद्भ्रष्टःपुनःस्वर्गंगतइतिमहाभारतेप्रसिद्धम् ॥४८—४९ ॥ नकेवलंममैवायंभारःकिंतुयुष्माकमपीत्याह—त्वयेत्यादिश्लोकेन ॥ ५० ॥ संभारान् पूजाद्रव्याणि ॥ ५१ ॥ अव्यग्रंअनाकुलं । "व्यग्रोव्यासक्तआकुलः" इत्यमरः । अविक्लवं अविह्वलं । दृढनिश्चयप्रतिपादकमित्यर्थः । मृतेव मूर्च्छितेतियावत् ॥ ५२ ॥ सुहृत्तया स्नेहेन । एवंसुदुःखितामितिसंबन्धः ॥ ५३ ॥ ननूक्तं राजनियोगस्त्वयाप्यनुवर्तनीयइतितत्राह—किमिति । लोकेन परलोकेन । स्वधया पितृलोकप्राप्तिसिद्धया । किंप्रयोजनमित्यर्थः । अमृतेन स्वर्गलोकप्राप्तिसिद्धेनामृतेन । किंप्रयोजनं । कृत्स्नादपि जीवलोकात् आनन्दहेतुभूतमहर्लोकाद्युपरितनलोकान्तर्वर्तिजीववर्गात् । संनिहितादितिशेषः ॥ ५४ ॥ एवंमातृकारुण्येपिधर्मएवस्थिरोभूदित्याह—नरैरिति । नरैर्गजग्राहिभिः । उल्काभिः साधनैः । अपोह्यमानः निवार्यमाणोपि । अध्वानं मार्गं । अनुप्रविष्टोमहागजइव मात्रादिवाक्यैर्नवार्यमाणोपिधर्ममनुप्रविष्टोरामः भूयःप्रजज्वालसंरब्धोऽभूत् । स्वमार्गएवस्थितोभूदित्यर्थः ।

त्तममित्यस्यत्रैलोक्यसुखदत्वेनोत्तममितिव्यङ्ग्यम् ॥ ४२ ॥ शि० हेमातः शोकः शोकविशिष्टः । पितेतिशेषः । संधार्यतां बोध्यतामित्यर्थः । ननुशोकाक्रान्तयामया कथंतस्यप्रबोधइत्यतआह । माशुचः शोकंत्यजेत्यर्थः । तत्रहेतुः एष्यामि आगन्तास्मि । अतएवमाशुचइत्यनेनेनपौनरुक्त्यम् ॥ ४९ ॥ स० अथवा संहृतेर्मरणस्यअसंभारान् राज्ञस्त्वचमरणाभावप्रयोजकान्संगृह्येत्यर्थः ॥५१॥ ति० स्वधर्मेण पालनादिरूपमातृधर्मेण । स० मत्तोकंत्वत्सकाशेसंस्थाप्यगच्छामीतिनवदेतिवदति अपुत्रअधुनाऽजातपोतेति। अतोनपुत्रपदातिरेकः ॥ ५३ ॥ ती० सुधयेतिपाठे देवभोग्येनवस्तुनाच । अमृतेन अपुनर्भवेनेनच । ति० अमृतेन अमृतत्व-

[पा०] १ ग. घ. ज. गमिष्येऽहमितो. २ ख. पुरम्. ३ क. यथादिवम्. ४ ट. अवसंहृत्य. ५ ख. दुःखमागु. ६ ञ. गम्यताम्. ७ ङ. छ. झ. ट. पुत्रगन्तुं. ८ ख. ग. सुधया. ९ ङ. छ. झ. ञ. ट. ममैव. १० घ—ट. ध्वान्तमभि. ११ ङ. छ. झ. ट. मेवं. क—घ. च. ज. ञ. मेतं.

स मातरं चैव विसंज्ञकल्पामार्तं च सौमित्रिमभिप्रतप्तम् ॥
धर्मे स्थितो धर्म्यमुवाच वाक्यं यथा स एवार्हति तत्र वक्तुम् ॥ ५६ ॥
अहं हि ते लक्ष्मण नित्यमेव जानामि भक्तिं च पराक्रमं च ॥
मम त्वभिप्रायमसंनिरीक्ष्य मात्रा सहाभ्यर्दसि मां सुदुःखम् ॥ ५७ ॥
धर्मार्थकामाः किल तात लोके समीक्षिता धर्मफलोदयेषु ॥
ते तत्र सर्वे स्युरसंशयं मे भार्येव वश्याऽभिमता सुपुत्रा ॥ ५८ ॥
यस्मिंस्तु सर्वे स्युरसंनिविष्टा धर्मो यतः स्यात्तदुपक्रमेत ॥
द्वेष्यो भवत्यर्थपरो हि लोके कामात्मता खल्वपि न प्रशस्ता ॥ ५९ ॥
गुरुश्च राजा च पिता च वृद्धः क्रोधात्प्रहर्षाद्यदिवाऽपि कामात् ॥
यद्व्यादिशेत्कार्यमवेक्ष्य धर्मं कस्तं न कुर्यादनृशंसवृत्तिः ॥ ६० ॥
स वै न शक्नोमि पितुः प्रतिज्ञामिमामकर्तुं सकलां यथावत् ॥

अत्रनरैरित्युपमानगतबहुवचनेनपुनःसौमित्रिणापितथैवोक्तमितिगम्यते । अतएवमातरंसौमित्रिंचेतिवक्ष्यते ॥५५॥ तत्र तस्मिन्धर्मसङ्कटे । अतिकृच्छ्रावस्थायां एतादृशधर्मैकनिष्णातपुरुषान्तरस्याभावात् सएवार्हतीति वाल्मीकिस्स्तौति ॥५६॥ अभ्यर्दसि व्यथयसि ॥५७॥ " धर्मोहिपरमोलोके " इत्यादिनापूर्वसंग्रहेणोक्तंप्रपञ्चयति—धर्मेति । तातेतिसान्त्वसंबोधने । किलेति प्रसिद्धौ । लोकइतिमोक्षव्यावृत्तिः । धर्मफलोदयेषु धर्मस्यफलभूतानांसौख्यानामुदयेषुप्राप्तिषु । समीक्षिताः उपायत्वेननिश्चिताः । येधर्मार्थकामाः ते सर्वे तत्र धर्मेस्युः । धर्मएवानुष्ठितेसौख्यातिशयप्रदानस्वभावाः सर्वेपुरुषार्थाः सिध्यन्तीतिभावः । अत्रार्थे मे असंशयं संशयोनास्ति । अर्थाभावेऽव्ययीभावः । उक्तार्थे दृष्टान्तमाह—भार्येत्यादि । यथाभार्या वश्या अनुकूलासतीधर्मंजनयति, अभिमता प्रिया कामं, सुपुत्रासती अर्थं । सुलक्षणसुलग्नप्रभवपुत्रेजातेहिपितुरर्थाः सिध्यन्तीति तथासर्वपुरुषार्थानांधर्मएवनिदानं । तथाहि । धर्मोहिधर्महेतुरर्थहेतुःकाम्यमानस्रक्चन्दनवनितादिहेतुश्च । अतोधर्मएवसमाश्रयणीयइतिभावः । यद्वा लोकेधर्मादयःफलसाधनत्वेनसमीक्षिताः शास्त्रादिभिरवगताः तेसर्वे तत्र फलोदयेषु स्युः समर्थाः स्युः । मेअसंशयं मयानिश्चितमित्यर्थः । यथाउक्तगुणविशिष्टाभार्याफलसाधनंतथेति । अस्मिन्पक्षेअध्याहारादिक्लेशोनास्ति । उत्तरश्लोकानुरूप्यंच ॥ ५८ ॥ एवंधर्मादीनांफलसाधनत्वंनिर्णीतं तेष्वविशेषादन्यतमस्याश्रयणीयत्वेप्राप्तेआह—यस्मिन्निति । यस्मिन्कर्मणि आश्रीयमाणे सर्वे अर्थादयस्त्रयः । असंनिविष्टाः नप्रविशन्ति । नसंभवन्तीतियावत् । किंतुयतोधर्मः यस्माद्धर्मएवस्यात्तदारभेत । अथवायस्मिन्कर्मणिसर्वे धर्मार्थकामाः असंनिविष्टाःस्युःअविद्यमानाभवेयुः । तत्कर्मनोपक्रमेत । यतः यस्मात्कर्मणः । धर्मःस्यात् तदुपक्रमेत । प्रथमयोजनायामर्थकामयोःसंनिवेशेको दोषइत्यत्राह—द्वेष्यइति । तस्मादर्थकामौपरित्यज्यकेवलधर्मपरोभवेदित्यर्थः ॥ ५९ ॥ यतोधर्मएवकर्तव्योऽतआह—गुरुरिति । गुरुः धनुर्वेदनीतिशास्त्राद्युपदेशात् । यदिवेत्येकनिपातो वार्थे । अपिचेतिवत् । धर्मं सत्यप्रतिज्ञत्वरूपमवेक्ष्य तत्परिपालनायेत्यर्थः । यत्कार्यंव्यादिशेत् नियुञ्जीत । तत्कर्मअनृशंसवृत्तिः कोनकुर्यात् । योनकरोतिसकेवलंनृशंसइतिभावः ॥ ६० ॥ सोहं अनृशंसोहं । पितुःप्रतिज्ञां वरदान-

साधनेनतलज्ञानेनापि । शि० स्वधया स्वधादिशब्दवत्वानिखिलक्रिययेत्यर्थः ॥ ५४ ॥ शि० विसंज्ञकल्पां विसंज्ञंसंज्ञाराहित्यं कल्पयतिकरोतिसातां । तच्चेष्टादर्शनमात्रेणान्याअपिविसंज्ञाभवन्तीत्यर्थः ॥ ५६ ॥ ति० एवंसुतरांदुःखं मा मार्कुर्वित्यर्थः ॥५७॥ ति० इमांसकलांसंपूर्णांनकर्तुंनशक्नोमि ॥ ६१ ॥

[पा०] १ क. सहह्यर्दसि. घ. स्त्वमभ्यर्दसि. २ क. छ. झ. ञ. ट. मासुदुःखम्. ज. मांसुदुःखितं. ३ क—ट. खलु. ४ ङ. छ. झ. ट. जीवलोके. ५ क. ख. ङ. च. छ. झ. ञ. ट. येतत्र. ६ ख. घ—ट. सपुत्रा. ७ ङ. छ. झ. ट. खल्वति. ८ छ. झ. ट. दथवापि. ९ घ. मोहात्. १० ङ. छ. झ. ट. नते. ११ ङ. च. छ. झ. ञ. ट. मिमांनकर्तुं.

स ह्यावयोस्तात गुरुर्नियोगे देव्याश्च भर्ता स गतिः स धर्मः ॥ ६१ ॥
तस्मिन्पुनर्जीवति धर्मराजे विशेषतः स्वे पथि वर्तमाने ॥
देवी मया सार्धमितोपगच्छेत्कथंस्विदन्या विधवेव नारी ॥ ६२ ॥
सा माऽनुमन्यस्व वनं व्रजन्तं कुरुष्व नः स्वस्त्ययनानि देवि ॥
यथा समाप्ते पुनराव्रजेयं यथा हि सत्येन पुनर्ययातिः ॥ ६३ ॥
यशो ह्यहं केवलराज्यकारणान्न पृष्ठतः कर्तुमलं महोदयम् ॥
अदीर्घकाले न तु देवि जीविते वृणेऽवरामद्य महीमधर्मतः ॥ ६४ ॥
प्रसादयन्नरवृषभः स्वमातरं पराक्रमाज्जिगमिषुरेव दण्डकान् ॥
अथानुजं भृशमनुशास्य दर्शनं चकार तां हृदि जननीं प्रदक्षिणम् ॥ ६५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे एकविंशः सर्गः ॥ २१ ॥

हेतुकभरताभिषेकमद्विवासनरूपांप्रतिज्ञां । अकर्तुंनशक्नोमि । अवश्यंकुर्यामित्यर्थः। तत्रहेतुमाह—सहीति । आवयोः ममभरतस्यचेत्यर्थः । नियोगे गुरुः प्रभुरित्यर्थः । देव्याः कौसल्यायाः । तथाचदेव्यापितद्वचनंनातिक्रमणीयमितिभावः । धर्मः अलौकिकश्रेयस्साधनम् ॥ ६१ ॥ देव्याश्चेत्यस्याशयमुद्घाटयति—तस्मिन्निति । धर्मराजे धर्मप्रवर्तके । विशेषतः पूर्वराजापेक्षयाविशिष्य । स्वेपथि स्वासाधारणेपथि । धर्ममार्गे । वर्तमाने स्वमर्यादानतिलङ्घिनीत्यर्थः । तस्मिन् गतिभूतेभर्तरिजीवति देवी कृताभिषेकामहिषी । सहधर्मचारिणीतियावत् । मया पुत्रेणसह । अन्येव याकाचित्स्त्रीव । कथंस्वित् कथंवा । वनमपगच्छेत् अभर्तृकायाएवपुत्रेणसहवनगमनमुचितमितिभावः ॥६२॥ सा जीवद्भर्तृकात्वं । मा मां । अनुमन्यस्व अनुजानीहि । इतःपूर्ववनगमनंप्रतिसीताभिप्रायस्यापरिज्ञातत्वान् "दीप्तमग्निमरण्यंवायदिरामःप्रवेक्ष्यति । प्रविष्टं तत्रमांदेवित्वंपूर्वमुपधारय" इत्युक्तयालक्ष्मणाभिप्रायस्यज्ञातत्वाच्च नइत्येतदावयोरित्यस्मिन्नर्थेवर्तते । "अस्मदोद्वयोश्च" इतिद्विवचनेबहुवचनादेशादेवंव्याख्यातम् । एवंचसति "अनुज्ञातश्चभवतापूर्वमेवयदस्म्यहं" इतिवक्ष्यमाणलक्ष्मणवचनंचोपपद्यते । स्वस्त्ययनानि शोभनप्राप्तिप्रार्थनानि । समाप्ते चतुर्दशवर्षाचरणीयेव्रतेसमाप्ते । यथापुनरागच्छेयंतथास्वस्त्ययनानिकुरुष्व । पुनरागमनेनिदर्शनमाह—यथेति । स्वर्गाच्च्युतोययातिः यथासत्येन सत्यवचनेन । अष्टकादिदौहित्रोक्तसत्यवचनेन। पुनःस्वर्गमगच्छत्तथेत्यर्थः । तथोक्तंमहाभारते "आतिष्ठस्वरथंराजन्विक्रमस्वविहायसम् । वयमप्यत्रयास्यामोयत्रलोकोभविष्यति" इत्यादिना ॥ ६३ ॥ केवलराज्यकारणात् धर्मविरहितराज्यहेतोः । महोदयं महाफलं । यशः पृष्ठतःकर्तुं उपेक्षितुं । अहंनालं नसमर्थोस्मि । किंच अदीर्घकाले चञ्चले । जीविते प्राणधारणे । निमित्तसप्तमीयं । तद्विद्वच्चञ्चलजीवितनिमित्तम् । अवरां तुच्छप्रयोजनभूतां । महींअधर्मतोनवृणे नस्वीकरोमि ॥ ६४ ॥ पराक्रमात् "रामतस्मादितःशीघ्रंवनंगन्तुंत्वमर्हसि" इत्युक्तकैकेयीप्रेरणात् । अनुजं । दर्शनं स्वमतं । अनुशास्य प्रदर्श्येत्यर्थः । शासिर्द्विकर्मकः । हृदिप्रदक्षिणं चकार प्रदक्षिणंकर्तुंसंकल्पितवानित्यर्थः । लोकप्रसिद्धास्त्रयःपुरुषार्थाः । तेषुसर्वमूलत्वादितरयोःसापायत्वाच्चधर्मएवाश्रयणीयइतिस्थापितंभवति ॥ ६५॥ इति

सत्य० नः त्रयाणां ॥ ६३ ॥ शि० पराक्रमात् परेषांमुनिशत्रूणां आक्रमःविध्वंसनं तस्माद्धेतोः । दण्डकान्जिगमिषुःसरामः मातरं अनुजंच दर्शनं धर्मविषयकज्ञानं । अनुशास्य जननींप्रदक्षिणं हृदि हृदये। चकार । प्रत्यक्षप्रदक्षिणस्यवियोगज्ञापकत्वात्तन्नकृतमितितात्पर्यं । सत्य० पराक्रमात् ल्यब्लोपनिमित्तापञ्चमी। शौर्यमाश्रित्य । दर्शनं धर्मरहस्यं । हृदि ध्यायन्प्रदक्षिणंचकार । यद्वा पराक्रमात् परस्याःशत्रुभूतायाःसपत्न्याः अक्रमात् ज्येष्ठेसत्यपिकनिष्ठस्यराज्यदापनप्रयत्नरूपात् ॥ ६५॥ इत्येकविंशःसर्गः ॥ २१ ॥

[पा०] १ ङ. झ. ट. गतिश्च. २ ङ. छ. झ. ट. मितोभिगच्छेत्. क. ख. च. ञ. मितोनुगच्छेत्. ३ घ. ज. कुरुष्वमे. ख. कुरुष्वच. ४ ख. कालस्यनजीवितस्य. ५ क. ग—ञ. समातरं. ख. स्वमाहितः.

द्वाविंशः सर्गः ॥ २२ ॥

श्रीरामेणकैकेय्यांक्रुद्धंलक्ष्मणंप्रतिस्वप्रव्राजनेदैवस्यैवकारणत्वनिरूपणेनतस्याहेतुत्वनिरसनपूर्वकंतस्यकोपोपशमनम् ॥ १ ॥

अथ तं व्यथया दीनं सविशेषममर्षितम् ॥ [1]श्वसन्तमिव नागेन्द्रं [2]रोषविस्फारितेक्षणम् ॥ १ ॥
आसाद्य रामः सौमित्रिं सुहृदं भ्रातरं प्रियम् ॥ उवाचेदं स धैर्येण धारयन्सत्वमात्मवान् ॥ २ ॥
निगृह्य रोषं शोकं च [3]धैर्यमाश्रित्य केवलम् ॥ अवमानं [4]निरस्येमं गृहीत्वा हर्षमुत्तमम् ॥ ३ ॥
उपक्लृप्तं [5]हि यत्किञ्चिदभिषेकार्थम[6]द्य मे ॥ सर्वं [7]विसर्जय क्षिप्रं कुरु कार्यं [8]निरत्ययम् ॥ ४ ॥
[9]सौमित्रे [10]योऽभिषेकार्थे मम संभारसंभ्रमः ॥ अभिषेकनिवृत्त्यर्थे सोस्तु संभारसंभ्रमः ॥ ५ ॥
यस्या [11]मदभिषेकार्थे मानसं [12]परितप्यते ॥ माता मे [13]सा यथा न स्यात्सविशङ्का तथा कुरु ॥ ६ ॥
तस्याः शङ्कामयं दुःखं मुहूर्तमपि नोत्सहे ॥ मनसि प्रतिसंजातं सौमित्रेऽह[14]मुपेक्षितुम् ॥ ७ ॥
[15]न बुद्धिपूर्वं नाबुद्धं स्मरामीह कदाचन ॥ मातॄणां वा पितुर्वाऽहं कृतमल्पं च विप्रियम् ॥ ८ ॥
सत्यस्सत्याभिसन्धश्च नित्यं सत्यपराक्रमः ॥ परलोकभयाद्भीतो निर्भयोस्तु पिता मम ॥ ९ ॥

श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने एकविंशः सर्गः ॥ २१ ॥

अथरामःसौमित्रेःकैकेयीविषयंरोषमुपशमयति । अथेत्यादिश्लोकद्वयमेकंवाक्यम्। सविशेषं अन्तरङ्गजनापेक्षयासातिशयम्। अमर्षितं प्राप्तासहनं । रोषविस्फारितेक्षणं क्रोधविस्तारितनयनम् । आसाद्य अभिमुखीकृत्य। सुहृत्त्वादिविशेषणंकोपेप्यनुपेक्षणीयत्वाय। सत्वं सर्वविषयकंस्वंबलं। धैर्येण धारयन् अप्रकटयन्। आत्मवान् प्रशस्तमनाः । वश्यमनस्कइत्यर्थः ॥ १—२ ॥ निगृह्येत्युपक्लृप्तमितिचश्लोकद्वयमेकान्वयम् । रोषं पित्रादिविषयं । शोकं मद्विषयं । रोषशोकयोर्निग्रहेहेतुमाह—धैर्यमाश्रित्येति । केवलमितिधैर्यनैरन्तर्यमुच्यते । अवमानम् आरब्धाभिषेकत्यागपूर्वकवनगमनं। निरस्य निजदौर्बल्यकृतत्वाभावान्निवार्य। उत्तमंहर्षं सत्यपरिपालनेनपितरंतारयिष्याम इतिबुद्धिजन्यं। मेऽभिषेकार्थमुपक्लृप्तं सम्पादितं । यत्किञ्चिदलङ्कारादिकं तत्सर्वंविसर्जय । निरत्ययं निरपायं । सत्यपरिपालनोपयुक्तं । कार्यं वल्कलधारणादिकं । कुरु ॥३—४॥ संभारसंभ्रमः संभारसंपादनविषयउत्साहः। अभिषेकनिवृत्त्यर्थे अभिषेकनिवृत्तिरूपवनवासार्थे । ससंभारसंभ्रमोस्तु वनवासोचितसाधनसंपादनविषयोभवत्वित्यर्थः ॥५॥ मदभिषेकार्थे मदभिषेकप्रयोजनविषये। माता कैकेयी । सविशङ्कालक्ष्मणेनसंमत्यराज्यंपुनःकिंरामोग्रहीष्यतीतिशङ्कावती ॥ ६॥ तस्याः कैकेय्याः। शङ्कामयं शङ्कारूपं। स्वार्थेमयट्। प्राचुर्येवा ॥७॥ मातॄणांपितुर्वाविषये कदाचनकृतं बुद्धिपूर्वमपिविप्रियंनस्मरामि । अबुद्धं अबुद्धिपूर्वकमपि । विप्रियंनस्मरामि ॥ ८ ॥ सत्यः सत्यवचनः । सत्या-

---

ती० सत्वं चित्ताविकृतिं ॥ २ ॥ **सत्य०** निरव्ययं नितरामव्ययं ॥ ४ ॥ **ती०** मदभिषेकार्थे मदभिषेकनिवृत्तिनिमित्तं । मानसंपरितप्यते सामेमाताकौसल्यायथासविशङ्कानस्यात्तथाकुरु । पितृवाक्यपरिपालनस्यरामकर्तव्यस्यअल्पकालसाध्यत्वात्तद्विषयेत्वयानविषत्तव्यमित्युपदेशेनेत्यर्थः ॥ ६ ॥ **स०** तस्याःकौसल्यायाः । मनसिप्रतिसंजातंशङ्कामयं जीवन्पुनरागमिष्यतिनवेतिशङ्कात्मकं । दुःखं उदीक्षितुं उपेक्षितुं ॥ ७॥ **ति०** समारब्धंचविप्रियमितिपाठे नारब्धवानस्मीत्यर्थः ॥ ८ ॥ **सत्य०** परलोकभयाद्भीतः परलोकभयंआतयतिप्रापयतीतिपरलोकभयात् पापं तस्माद्भीतः ॥ ९ ॥

[पा०] १ छ. झ. ञ. ट. सरोषमिव. २ क. क्रोध. ३ ङ. छ. झ. ट. धैर्यमाक्रम्य. क. धर्ममाश्रित्य. ४ छ. झ. ट. निरस्यैनं. ङ. निरस्यैवं. ख. निरस्यैव. ५ ङ. च. छ. झ. ञ. ट. यदेतन्मेअभि. क. तुयत्किंचित्. ६ ङ. छ. झ. ञ. ट. नुत्तनम्. ७ ङ. च. छ. झ. ञ. ट. निवर्तय. ८ ङ. छ. झ. ट. निरव्ययम्. ९ सौमित्रे. उपक्लृप्तंहि इति ५ ४ श्लोकयोःपौर्वापर्यं ख. ङ. पुस्तकयोर्दृश्यते. १० ख. ङ. योभिषेकार्थः. ११ क. ख. मदभिषेकार्थे. १२ झ. तप्यति. १३ क—ट. नस्सा. १४ ङ. च. ञ. मुदीक्षितुम्. १५ ज. सबुद्धिपूर्वंनाबुद्धि.

तस्यापि हि भवेदस्मिन्कर्मण्यप्रतिसंहृते ॥ सत्यं नेति मनस्तापस्तस्य तापस्तपेच्च माम् ॥ १० ॥
अभिषेकवि[1]धानं तु तस्मात्संहृत्य लक्ष्मण ॥ अन्वगेवाहमिच्छामि वनं गन्तुमितः [2]पुनः ॥ ११ ॥
[3]मम प्रव्राजनादद्य कृतकृत्या नृपात्मजा ॥ सुतं भरतमव्यग्र[4]मभिषेचयिता ततः ॥ १२ ॥
मयि चीराजिनधरे जटामण्डलधारिणि ॥ गतेऽरण्यं च कैकेय्या भविष्यति मनस्सुखम् ॥ १३ ॥
बुद्धिः [5]प्रणीता येनेयं [6]मनश्च सुसमाहितम् ॥ तं तु नार्हामि संक्लेष्टुं प्रव्रजिष्यामि माचिरम् ॥ १४ ॥
कृतान्त[7]स्त्वेव सौमित्रे द्रष्टव्यो [8]मत्प्रवासने ॥ राज्यस्य च वितीर्णस्य पुनरेव [9]निवर्तने ॥ १५ ॥
कैकेय्याः प्रतिपत्तिर्हि कथं स्यान्मम पी[10]डने ॥ [11]यदि भावो न दैवोऽयं कृतान्तविहितो भवेत् ॥१६॥
जानासि हि यथा सौम्य न मातृषु ममान्तरम् ॥ भूतपूर्वं विशेषो वा तस्या मयि सुतेऽपि वा ॥१७॥

भिसन्धः सत्यप्रतिज्ञः । सत्यपराक्रमः अमोघपराक्रमः । परलोकभयात् परलोकसंबन्धिभयहेतोः । परलोकहानेरितियावत् । निर्भयोस्तु प्रतिष्ठितसत्यत्वादितिभावः ॥९॥ तस्य दशरथस्यापि । अस्मिन्नभिषेककर्मणि अप्रतिसंहृते अनिवर्तितेसति । सत्यंनेति ममवरदानविषयसत्यंनेति । मनस्तापोभवेत् । तस्यतापः मांतपेत् तापयेदित्यर्थः ॥ १० ॥ अन्वक् अनुपदमेव । "अन्वगन्वक्षमनुगेनुपदं" इत्यमरः । इतः अस्मान्नगरात् ॥ ११ ॥ अभिषेचयिता लुट् ॥१२–१३॥ येनमया इयंबुद्धिः वनवासबुद्धिः । प्रणीता शिक्षिता । मनश्चसुसमाहितं स्थिरीकृतं । तंमां संक्लेष्टुं क्लेशयितुं । नार्हामि । अतःप्रव्रजिष्यामि । माचिरं मास्तुविलम्बः ॥ १४ ॥ पूर्वसर्गेधर्मोस्तीत्युक्तं अधुनाप्रसङ्गाद्धर्मातिरिक्तंदैवंकिञ्चिदस्तिफलप्रदमितिदर्शयन् अस्मत्प्रवासे नकैकेयीनिमित्तं अतः साननिन्दितव्येत्याह—कृतान्त इत्यादिना । कृतान्तः दैवं । "कृतान्तोयमसिद्धान्तदैवाकुशलकर्मसु" इतिनिघण्टुः । दैवंचप्राक्तनादृष्टमित्येके । ईश्वरएवेत्याचार्याः । द्रष्टव्यः कारणत्वेनेतिशेषः । वितीर्णस्य दत्तस्य ॥ १५ ॥ कृतान्तएवेत्येवकारव्यवच्छेद्यमाह—कैकेय्याइति । दैवः दैवीसंबन्धी कैकेयीसंबन्धी । अयंभावः अयमभिप्रायः । कृतान्तविहितोयदिनभवेत् तदाममपीडनेकैकेय्याः प्रतिपत्तिः बुद्धिः । कथंस्यात् । पीडनमितिलक्ष्मणबुद्ध्या ॥१६॥ हेसौम्य मातृषु मे अन्तरं भेदः । "अन्तरमवकाशावधिपरिधानान्तर्धिभेदतादर्थ्ये" इतिनिघण्टुः । यथा-नभूतपूर्वंतथाजानासि । तस्याअपि कैकेय्याअपि ।

ती० येनमन्थरादिजनेनइयंबुद्धिः अभिषेकत्यागाध्यवसायः । प्रणीता प्रवर्तिता । तस्मिन्मनश्चसुसमाहितं स्थिरीकृतं । तंजनमपिसंक्लेष्टुं क्लेशयितुं । नार्हामि नशक्नोमि । किंपुनः पितरौ । अतः प्रव्रजिष्यामीत्यर्थः । यद्वा येनपित्राइयंबुद्धिःप्रणीता अयं-अभिषेकत्यागाध्यवसायःप्रवृत्तः । पितुरनुग्रहादेवतदीयसत्यपरिपालनार्थमभिषेकत्यागलक्षणाध्यवसायःप्रवृत्तइतिभावः । मनश्चसुसमाहितं यस्यशिक्षोपदेशाभ्यांमनसःसौगुण्यंसंजातमित्यर्थः । तंतथाविधंपितरं । संक्लेष्टुं सत्यपाशेनसंक्लेशयितुं । नार्हामिशीघ्रंप्रव्रजिष्यामि । **ति०** कैकेय्याअत्रनापराधः अन्यप्रेरितत्वात् । तर्हिसएवदण्ड्यस्तत्राह—**बुद्धिरिति** । येनेश्वरेणविधात्राइयंबुद्धिः कैकेय्याःप्रणीता मन्थराद्वारादत्ता । मनश्चतद्बुद्धिविषयेऽर्थेसुसमाहितं स्थिरीकृतं । तंसंक्लेष्टुं मत्कृतमन्यथाजातमितिक्लेशयितुं नार्हामि । तस्यमदधिकारित्वान्मद्रूपत्वाद्वेतिगूढआशयः । मत्संकल्पकृतमेवतदितिगूढंव्यङ्ग्यं । अशक्यत्वादित्यापाततोर्थः । अतोवनंप्रव्रजिष्यामि । चिरं विलंबोमा मास्त्वित्यर्थः । **शि०**-येनमद्विजयकालेन । बुद्धिः विजयविषयकनिश्चयः । प्रणिहिता संपादिता । अनु पश्चात् । मनः कैकेयीसंकल्पः । समाहितं प्रापितं । कारितमित्यर्थः । तंकालंसंक्लेष्टुं अतिवर्तितुमित्यर्थः ॥ १४ ॥ **ति०** तत्प्रेरयितारमाह—**कृतान्तइत्यादि** । मद्विवासने मद्विवासनप्रेरणायां । एवमभिषेकनिवर्तनप्रेरणायांकृतान्तः दैवमेव । इन्द्रादीनांदुःखनिवर्तकादृष्टमेवेतिगूढं । मत्प्रजानांमत्कृतपरिपालनलाभाभावजनकमदृष्टमितिस्फुटं । यत्तुरामस्यप्राकृतं दुरदृष्टंदैवमितितन्न । भगवतस्तस्याभावात् । **स०** इवशब्दश्चावधारणे ॥ १५ ॥ **रामानु०** कृतान्तविहितः कृतःअन्तोयेनेति व्युत्पत्त्याकृतान्तशब्देनकालउच्यते । तेनविहितः कालचोदितइत्यर्थः । दैवः देवसंबन्धी । **सत्य०** नान्यद्दैवात्समर्थयेइत्युपसंहारादत्रापिकृतान्तशब्दस्तदर्थः ॥ १६ ॥

[पा०] १ ख. निधानंतत्. २ च. छ. झ. ञ. ट. पुरः. ३ ख. वन. ४ ख. ङ. च. छ. झ. ञ. ट. मभिषेचयतां. ५ ङ. ट. प्रणिहितायेन. ६ ङ. छ. ट. मनश्चानु. ७ ङ. झ. एव. ज. श्चैव. ८ च. झ. ञ. मद्विवासने. ९ घ. विवर्तने. १० ङ. छ. झ. ट. वेदने. ११ ङ. छ. झ. ट. यदितस्यानभावोऽयं. घ. यदिभावोनचैवायं.

सोभिषेकनिवृत्त्यर्थैः प्रवासार्थैश्च दुर्वचैः ॥ उग्रैर्वाक्यैरहं तस्या नान्यद्दैवात्समर्थये ॥ १८ ॥
कथं प्रकृतिसंपन्ना राजपुत्री तथागुणा ॥ ब्रूयात्सा प्राकृतेव स्त्री मत्पीडां भर्तृसंनिधौ ॥ १९ ॥
यदचिन्त्यं तु तद्दैवं भूतेष्वपि न हन्यते ॥ व्यक्तं मयि च तस्यां च पतितो हि विपर्ययः ॥ २० ॥
कश्च दैवेन सौमित्रे योद्धुमुत्सहते पुमान् ॥ यस्य न ग्रहणं किञ्चित्कर्मणोऽन्यत्र दृश्यते ॥ २१ ॥
सुखदुःखे भयक्रोधौ लाभालाभौ भवाभवौ ॥ यच्च किञ्चित्तथाभूतं ननु दैवस्य कर्म तत् ॥ २२ ॥
ऋषयोप्युग्रतपसो दैवेनाभिप्रपीडिताः ॥ उत्सृज्य नियमांस्तीव्रान्भ्रश्यन्ते काममन्युभिः ॥ २३ ॥
असंकल्पितमेवेह यदकस्मात्प्रवर्तते ॥ निवर्त्यारंभमारब्धं ननु दैवस्य कर्म तत् ॥ २४ ॥
एतया तत्वया बुद्ध्या संस्तभ्यात्मानमात्मना ॥ व्याहतेऽप्यभिषेके मे परितापो न विद्यते ॥ २५ ॥
तस्मादपरितापः संस्त्वमप्यनुविधाय माम् ॥ प्रतिसंहारय क्षिप्रमाभिषेचनिकीं क्रियाम् ॥ २६ ॥

मयिवा सुते भरतेवा। विशेषोयथानभूतपूर्वः तथाजा-नासिहि ॥ १७ ॥ सोहं एवमनुभूततद्वात्सल्योहं। वाक्यैरितिहेतौतृतीया । दैवादन्यत् बुद्धिभेदकारणं नसमर्थये ननिश्चिनोमि ॥ १८ ॥ प्रकृतिः साधुस्व-भावः । "प्रकृतिःपञ्चभूतेपुस्वभावेमूलकारणे" इ-तिनिघण्टुः । प्रकृतिसंपन्ना साधुस्वभावसंपन्ना । रा-जपुत्री महाकुलप्रसूता । तथागुणा पूर्वानुभूतदयादि-सद्गुणा । सा कैकेयी । प्राकृतेवस्त्री दुष्प्रकृतिकादुष्कु-लागुणलेशशून्याक्षुद्रास्त्रीव । भर्तृसन्निधौ नतुयस्यक-स्यचित्संनिधौ । नतुदूत्यादिमुखेन। मत्पीडां ममनिरव-धिकस्नेहपात्रस्यपीडां। नत्वप्रियमात्रं। कथंब्रूयात् व्यक्तं वदेत्। नतुसूचयेत्। तस्माद्दैवमेवात्रकारणमिति ॥१९॥ यदचिन्त्यं अचिन्त्यप्रभावंदैवं । तदेवसर्वेष्वपि भूतेषु नहन्यते सर्वत्राप्यप्रतिहतफलप्रदानस्वभावंव-र्तते । व्यक्तं अत्रसंशयोनास्ति । अतएवहिमयित-स्यांच विपर्ययः वैपरीत्यं । मयिहस्तगतराज्यभ्रंशरूपः तस्यांपूर्वस्थितवात्सल्यापगमरूपः । पतितः प्राप्तः ॥ २० ॥ एवंप्रबलमपिदैवंपौरुषेणनिवर्त्यतामित्यत्राह —कइति । क्रियतइतिकर्म कार्यं । फलरूपकार्यतोन्य-त्र यस्य ग्रहणं ज्ञानसाधनं । नदृश्यते कार्यैकानुमेयं यस्यस्वरूपमित्यर्थः । तेनफलात्पूर्वमज्ञायमानेनदैवेन कःपुमान्योद्धुमुत्सहते कस्तंनिवारयितुंसमर्थइत्यर्थः ॥ २१ ॥ ननुकर्मणोन्यत्रेत्युक्तंकिंतत्कर्मतत्राह—सु-खदुःखेइति । अत्रभयशब्देनशान्तिरुच्यते । भवाभ-वौ उत्पत्तिविनाशौ । यच्चकिञ्चित्तथाभूतं अचिन्त्य-कारणकंलोकेदृश्यते । तत्सर्वंदैवस्यकर्मकार्यंननुहीत्य-र्थः ॥ २२ ॥ दैवप्राबल्यमेवद्रढयति—ऋषयइति । ऋषयः विश्वामित्रादयः । नियमान् व्रतोपवासादीन् । काममन्युभिरिति व्यक्तिबहुत्वाद्बहुवचनं । भ्रश्यन्ते ऋषित्वादितिशेषः ॥ २३ ॥ यच्चकिञ्चित्तथाभूतमि-त्येतद्विशदयति—असंकल्पितमिति । इह अस्मिँल्लोके । आरब्धं उपक्रान्तं। आरंभं कार्यं । निवर्त्य असंकल्पितं अचिन्तितमेव । यत् कार्यं । अकस्मात् झटिति । प्रवर्तते तद्दैवस्यकर्म ॥२४॥ उपदेशफलमाह—एतयेत्यादिश्लो-कद्वयेन। तत्वया अबाधितया। एतया बुद्ध्यां। आत्मानं अन्तःकरणं । आत्मना स्वयमेव । उपदेशंविनेत्यर्थः । संस्तभ्य निश्चलीकृत्य । स्थितस्यमे अभिषेके व्याहतेपि परितापोनविद्यते ॥२५॥ तस्मात् तत्वस्यैवंरूपत्वात् ।

सत्य० मत्पीड्यं अहंपीड्योयेनतन्मत्पीड्यं । वचइतिशेषः ॥ १९॥ **शि०** यस्य दैवस्य ग्रहणं बोधकं । कर्मणः फलभोगात् । अन्यत्नदृश्यते । तेनदैवेनसहयोद्धुंकश्चित्पुमान्नोत्सहते । नञआवृत्त्याउभयत्रान्वयः ॥ २१ ॥ **ति०** भवाभवौ बन्धमोक्षौ । एषांमध्येयस्ययत्तथाभूतं अचिन्त्यकारणकंकिंचित्कार्यं । तत्ननु निश्चयेन । दैवस्यकर्मफलं । **सत्य०** भवाभवौ मङ्गलामङ्गले ॥ २२ ॥ **ति०** आरंभैः यत्नैः । आरब्धं उपक्रान्तंकार्यं ॥ २४ ॥ **ति०** तत्वया यथार्थया । बुद्ध्या बुद्धियोगेन । आत्मना अन्तःकरणस्थेन । आत्मानं अन्तःकरणं । संस्तभ्य यदितिष्ठसीतिशेषः । तदामेअभिषेकेव्याहतेपितव । परितापोनविद्यते नभवति । **सत्य०** तत्वया स्वरूपभूतया । "तत्वंवाद्यप्रभेदेस्यात्स्वरूपे" इतिविश्वः । स्त्रीलिङ्गतार्षी ॥ २५ ॥ **ति०** तस्मा-दिति । अनेनगूढंलक्ष्मणस्यापिवनगमनंसूचितं ॥ २६ ॥

[पा०] १ क—घ. च. ज. ञ. तुप्राकृतेव. २ झ. ट. ठ. मत्पीड्यं. ३ ट. कश्चिद्दैवेन. ४ झ. ञ. तुग्रहणं. ५ झ. ञ. ट. त्कर्मणोन्यत्र. ६ घ. ङ. छ. झ. ट. यस्य. ७ ङ. छ. झ. ट. नाभिप्रचोदिताः. च. नाधिप्रपीडिताः. ८ ख. ग. ङ. ज. ट. गृह्यन्ते. ९ ङ. छं. ज. झ. ट. रब्धमारंभैः. ख. रब्धमारंभं. १० क. ज. दपरितप्यस्व.

एभिरेव घटैः सर्वैरभिषेचनसंभृतैः ॥ मम लक्ष्मण तापस्ये व्रतस्नानं भविष्यति ॥ २७ ॥
अथवा किं मम[1]ैतेन राजद्रव्यमतेन तु ॥ उद्धृतं मे स्वयं तोयं [2]व्रतादेशं करिष्यति ॥ २८ ॥
मा च लक्ष्मण संतापं कार्षीर्लक्ष्म्या विपर्यये ॥ राज्यं वा वनवासो वा वनवासो महोदयः ॥२९॥
न लक्ष्मणास्मिन्खलु [3]कर्मविघ्ने माता यवीयस्य[4]तिशङ्कनीया ॥
दैवाभिपन्ना हि[5] वदत्यनिष्टं जानासि [6]दैवं च तथाप्रभावम् ॥ ३० ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे द्वाविंशः सर्गः ॥ २२ ॥

त्रयोविंशः सर्गः ॥ २३ ॥

श्रीरामवचनश्रवणादत्यन्तंकुपितेनलक्ष्मणेनपितृवचनस्याधर्म्यत्वनिरूपणेनतस्योपेक्षणीयत्वकथनपूर्वकंदैवपौरुषयोर्मध्ये पौरुषस्यैवप्राबल्यप्रतिपादनम् ॥ १ ॥ तथाश्रीरामंप्रतिस्वपौरुषख्यापनेनाभिषेकविघ्नकारिणांनिवारणेननिर्विघ्नंयौवराज्याभिषेकनिर्वर्तननिवेदनम् ॥ २ ॥ श्रीरामेणलक्ष्मणंप्रतिपरिसान्त्वनपूर्वकंपितृवचनस्यावश्यकर्तव्यत्वबोधनम् ॥ ३ ॥

इति ब्रुवति रामे तु लक्ष्मणो[7]ऽधःशिरा मुहुः ॥ [8]श्रुत्वा मध्यं [9]जगामेव [10]मनसा दुःखहर्षयोः ॥ १ ॥

अनुविधाय अनुसृत्य । आभिषेचनिकीं अभिषेकप्रयोजनिकांक्रियां अलङ्करणादि । प्रतिसंहारय निवर्तय ॥२६॥ तापस्ये तापसयोग्येकर्मणीत्यर्थः । अभिषेचनसंभृतैः अभिषेचनायसंपादितैः ॥ २७ ॥ घटस्थजलैः तापस्यव्रतस्नानेक्रियमाणेपिराज्यलिप्सयास्नानंकृतवानितिकैकेय्याःशङ्कामाभूदितिस्नानंनिषेधति—अथवेति । राजद्रव्यमतेन राजद्रव्यत्वेनसंमतेन । राज्यद्रव्यमयेनेतिपाठेराज्यार्थमङ्गलद्रव्यप्रचुरेणेत्यर्थः । व्रतादेशं व्रतनियमं ॥२८॥ राज्यंवावनवासोवा उभावपितुल्यौ । विचार्यमाणेवनवासएवमहोदयः महाफलः । राज्यव्यापारक्लेशाभावादपूर्वदर्शनसौख्याच्चेतिभावः ॥ २९ ॥ महताप्रबन्धेनोक्तंसंग्रहेणदर्शयति—नेति । यवीयसी कनिष्ठा । कानिष्ठ्यंमहिषीत्रयापेक्षया । नतेस्वामध्यमेत्यत्रमध्यमात्वंसर्वराजपत्न्यपेक्षया । दैवाभिपन्ना दैवाविष्टा । तथाप्रभावं तादृशप्रभावयुक्तं । अप्रतिहतप्रभावमित्यर्थः ॥ ३० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीतांबराख्याने अयोध्याकाण्डव्याख्याने द्वाविंशःसर्गः ॥ २२ ॥

पूर्वंदैवस्यप्रबलत्वेनराज्यविपर्यये नसंतापःकार्यः धर्मस्यसर्वश्रेयःसाधनत्वात्तन्मूलभूतेपितृवचनकरणसत्येअवश्यंकर्तव्ये मातृवचनंचपश्चात्तनत्वात्पश्चात्पालनीयमित्येतावत्सयुक्तिकमुपपादितं।तत्रपौरुषमेवबलवलीयः दैवबलंतुदुर्बलानुसरणीयं धर्मश्चार्थकामविरोधेनकर्तव्यइतिपूर्वपक्षंपूर्वसंग्रहेणलक्ष्मणवाक्येनोक्तं पुनस्तन्मुखेनप्रपञ्चयन्संग्रहेणसिद्धान्तंचदर्शयति—इतीत्यादिना । रामेमुहुर्ब्रुवतिसति लक्ष्मणःस्वानभ्युपगमसूचनायाधःशिराःसन् श्रुत्वा दुःखहर्षयोर्मध्यं धर्मे-

---

ती० वनवासोमहोदयः । प्रजानांकृत्याकृत्यचिन्तायाक्षेपराहित्येनसततंतपःप्रवृत्तिसाधनत्वात् विशिष्यपितृवाक्यपरिपालनप्रयोजनवत्वाच्चमहाभ्युदयसाधनं ॥ २९ ॥ **ति०** हेलक्ष्मण अस्मिन्राज्यविघ्ने । दैवाभिपन्ना दैवविजयादृष्टप्रेरिता । यवीयसी कनिष्ठा । ममाता कैकेयी नाभिशङ्कितव्या किमाचरितमनयेतिशङ्कितुमनर्हा । पितापिनशङ्कितव्यः । शङ्कितव्येतिलिङ्गविपरिणामेनेहाप्यन्वेति । त्वत्कर्तृकशङ्कितव्यत्वाभावेहेतुः तथाप्रभावंमदुक्तप्रभावविशिष्टंदैवंत्वंजानासि ॥ ३० ॥ इतिद्वाविंशःसर्गः ॥ २२ ॥

शि० अवाक्छिराः अधोमुखः । लक्ष्मणः । आशु शीघ्रं । ध्यात्वा रामोक्तितात्पर्यंविचार्य । दैन्यहर्षयोः पितृकृताभिषेकप्रतिज्ञाभङ्गेनदैन्यंरामेप्सितराक्षसवधादिसांनिध्येनहर्षः । तयोर्मध्यमिवसहसाजगाम । इवेनतटस्थजनबोधनायैवमाचरणमितिध्वन्यते । तेनतस्यलोकापवादभीरुत्वंव्यक्तं । एतेनास्यापिरामेप्सितमेवेप्सितमितिसूचितं । **ति०** लक्ष्मणस्यशेषावतारत्वेनतमोगुणप्रधानता ज्येष्ठस्यविवेकवाक्यश्रवणेनसत्वोदयश्चेतिभावः । अधश्शिरस्त्वेनोक्तार्थस्यार्धाङ्गीकारध्वननम् । इवेनतमसःस्वाभाविकत्वात्तस्य-

[पा०] १ क. ग. च—ट. मयेनतु. २ ग. छ. व्रतोद्देशं. ३ ङ. च. छ. झ. ञ. राज्यविघ्ने. ४ ङ. झ. ट. स्यभिशङ्कितव्या. क. च. ज. ञ. स्यतिशंकितव्या. ख. स्यविशङ्कितव्या. ५ ङ. छ. झ. ट. नपिताकथंचिज्जानासि. ६ च. छ. झ. ञ. ट. दैवंहि. ७ ङ. छ. झ. ट. णोऽवाक्छिराइव. च. ञ. ऽधश्शिरास्तदा. ८ च—ट. ध्यात्वा. ९ ङ. छ. झ. ट. जगामाशु. १० ङ. छ. झ. ट. सहसा.

तदा तु बद्ध्वा भ्रुकुटीं भ्रुवोर्मध्ये नरर्षभः ॥ निशश्वास महासर्पो बिलस्थ इव रोषितः ॥ २ ॥
तस्य दुष्प्रतिवीक्षं तद्भ्रुकुटीसहितं तदा ॥ बभौ क्रुद्धस्य सिंहस्य मुखस्य सदृशं मुखम् ॥ ३ ॥
अग्रहस्तं विधुन्वंस्तु हस्तिहस्तमिवात्मनः ॥ तिर्यगूर्ध्वं शरीरे च पातयित्वा शिरोधराम् ॥
अग्राक्ष्णा वीक्षमाणस्तु तिर्यग्भ्रातरमब्रवीत् ॥ ४ ॥
अस्थाने संभ्रमो यस्य जातो वै सुमहानयम् ॥ धर्मदोषप्रसङ्गेन लोकस्यानतिशङ्कया ॥ ५ ॥
कथं ह्येतदसंभ्रान्तस्त्वद्विधो वक्तुमर्हति ॥ यथा दैवमशौण्डीरं शौण्डीर क्षत्रियर्षभ ॥ ६ ॥
किंनाम कृपणं दैवमशक्तमभिशंससि ॥ पापयोस्ते कथं नाम तयोः शङ्का न विद्यते ॥ ७ ॥

स्थिरोभूदितिहर्षं राज्यंत्यक्ष्यतीतिदुःखंच । मनसाजगाम नतुवाचाप्रतिपादितवान् । इवशब्देनास्थिरत्वमुच्यते । उत्तरक्षणेमाध्यस्थ्यत्यागस्यवक्ष्यमाणत्वात् ॥१॥ तुशब्देनपूर्वावस्थातोविलक्षणावस्थासूच्यते । भ्रुवोर्मध्ये ललाटे । ललाटे भ्रुकुटींकृत्वेत्यर्थः । विलस्थः पेटिकाविलस्थः । नतुवल्मीकस्थः तदानींरोषासंभवात् ॥२॥ दुष्प्रतिवीक्षं अभिमुखतयादुर्निरीक्ष्यं । तस्य मुखं ॥ ३ ॥ क्रोधविकारंदर्शयति—अग्रहस्तमित्यादि । सार्धश्लोकः । अग्रंहस्तस्यअग्रहस्तः । एकदेशसमासः पूर्वापरादिव्यतिरिक्तस्थलेपिकचिदस्ति । अग्रंचासौहस्तश्चअग्रहस्तः । हस्तशब्दोहस्तावयवेऽपचर्यतइतिवामनः । शरीरे उरसि । अधस्त्यर्थः । यद्वा शिरोधरां शरीरेतिर्यगूर्ध्वं । चकारादधश्चपातयित्वा क्रोधातिशयेनविविधंशिरोविधूननंकृत्वेत्यर्थः । अग्राक्ष्णा कटाक्षेण । तिर्यग्वीक्षमाणःसन्नब्रवीत् ॥४॥ धर्मदोषप्रसङ्गेन पितृवचनपरिपालनरूपधर्महानिप्रसक्त्या । लोकस्य अनतिशङ्कया अतिशङ्कापरिहाराय । मयाऽननुष्ठितेलोकोधर्मंत्यजतीतिशङ्कापरिहारायचेत्यर्थः । एवंविधकार्यद्वयार्थंयस्यप्रसिद्धस्य ते जातोयंसुमहान् संभ्रमः वनगमनत्वरा । अस्थाने अनवकाशे अयुक्तइत्यर्थः । "अवकाशेस्थितौस्थानं"इत्यमरः ॥५॥ तथात्वमेवोपपादयति—कथमित्यादिना । हेशौण्डीर समर्थ । दैवमपिनिराकर्तुंक्षमेत्यर्थः । क्षत्रियर्षभ क्षत्रियश्रेष्ठ । त्वंअशौण्डीरं अशूरं तत् दैवं । यथासमर्थंवदसि एवमसंभ्रान्तस्त्वद्विधःकथंवक्तुमर्हति नकथमपि । अशूरःसंभ्रान्तःक्षत्रबन्धुरेवासमर्थंदैवमनुसर्तुमर्हतीत्यर्थः । अस्थानइत्यादिश्लोकद्वयस्यैववंवार्थः । धर्महानिप्रसक्त्या लोकस्यानतिशङ्कया आनतिः पूजा तद्विषयेशङ्कया लोकोमामधर्मिष्ठइतिनपूजयेदितिशङ्केत्यर्थः । यस्यतेअयुक्तःसुमहान्संभ्रमोभ्रान्तिःजातः । धर्महानिर्लोकानत्यभावोवा सर्वातिशायिनस्तेकिंकरिष्यतीतिभावः । भ्रमसद्भावंव्यतिरेकमुखेनद्रढयति—कथमिति ॥ ६ ॥ दैवालम्बनस्यभ्रमत्वमुपपादयति—किमिति । कृपणं "बुद्धिपौरुषहीनानांजीविकेतिबृहस्पतिः" इत्युक्तरीत्यादुर्बलैकपरिग्राह्यतयाशोच्यं । अशक्तं शक्तिहीनं । पौरुषंतिरस्कृत्यकार्यकरणाक्षमं दैवंकिंनामअभिशंससि अभिष्टौषि । अशक्तत्वादेवन कार्यानुमेयोदैवसद्भावः । असद्भावादेवतदवलंबनंते भ्रमइत्यर्थः । एवंदैवकृतस्यानतिलङ्घनीयत्वंपरिहृत्य पितृवाक्यपरिपालनरूपधर्मदोषप्रसङ्गंपरिहरति—पापयोरिति । पापयोः कैकेयीदशरथयोर्विषये । तेशङ्का पापित्वशङ्का । कथंनामनविद्यते पापिनौतौत्वयिपापं कर्तुमिच्छतः अतस्तद्वचनाकरणे नधर्महानिरितिभावः

स्थिरताध्वन्यते ॥१॥ शि० भ्रुकुटी भ्रुवौ । बध्वा भ्रुवोर्मध्येनिशश्वास भ्रूमध्याच्छ्वासोऽगच्छदित्यर्थः । तत्रदृष्टान्तः बिलस्थः बिलेनिरुद्धइत्यर्थः । रोषितःसर्पइव । स० रोषितः अन्येनकोपंप्रापितः । सर्पनिदर्शनेनशेषात्मकताविशेषंकविरवगमयामासेत्यवसेयं । ॥ २ ॥ शि० हस्तीहस्तं शुण्डादण्डमिव । अग्रहस्तं दक्षिणकरमित्यर्थः । शिरः धरां पृथिवीं । पातयित्वा अत्यधोमुखीभूयेत्यर्थः । ति० अग्रहस्तं हस्ताग्रं । राजेष्वक्षभापणीयगृहीतमित्यर्थः ॥ ४ ॥ स० लोकस्यानतिशङ्कया रामःपितृवचनंनाकरोदितिलोकशङ्कामाभूदितिबुद्ध्या । अस्थाने अविषये वनवासादौ । यस्संभ्रमोजातः अयंधर्मदोषप्रसंगेन तद्विरोधप्रसक्त्या । अस्थाने अयुक्तइत्याहृत्तेनान्वयः ॥ ५ ॥ ती० कृपणं दीनं । स्वापेक्षितार्थकरणेपुरुषान्तरंप्रार्थयमानमित्यर्थः । अशक्तं स्वयंपुरतस्थित्वायत्किंचित्कर्तुमसमर्थं ॥ शि० शौण्डीरः प्रारब्धादिनिरसनसमर्थः । क्षत्रियर्षभस्त्वं अशौण्डीरं तद्विरुद्धसामर्थ्यहीनं । अतएवकृपणंदैवं अशक्तं सामर्थ्यहीनंयथाभवतितथा किंयथावदभिशंससि । एतेनदैवादृष्टवशात्त्वानिपेक्ष-

[पा०] १ ङ. छ. झ. ट. तथा. २ ग. कृत्वा. ३ क. ख. ङ. च. छ. झ. ञ. ट. हस्ती. ४ घ. वीक्षमाणस्तं. ५ ज. भ्रान्तस्त्व. ६ ङ. छ. झ. ञ. ट. ह्येव. ७ ग—ट. शौण्डीरःक्षत्रियर्षभः. क. शौण्डीरंक्षत्रियर्षभः.

सन्ति [1]धर्मोपधाः श्लक्ष्णा धर्मात्मन्किं न बुध्यसे ॥ तयोः सुचरितं स्वार्थं शाठ्यात्परिजिहीर्षतोः ॥ ८ ॥
यदि नैवं व्यवसितं स्याद्धि प्रागेव राघव ॥ तयोः प्रागेव दत्तश्च स्याद्वरः प्रकृतश्च सः ॥ ९ ॥
लोकविद्विष्टमारब्धं त्वदन्यस्याभिषेचनम् ॥ नोत्सहे सहितुं वीर तत्र मे क्षन्तुमर्हसि ॥ १० ॥
[2]येनेयमागता [3]द्वैधं तव बुद्धिर्महामते ॥ [4]सं हि धर्मो मम द्वेष्यः [5]प्रसङ्गाद्यस्य मुह्यसि ॥ ११ ॥
कथं त्वं कर्मणा शक्तः कैकेयीवशवर्तिनः ॥ करिष्यसि पितुर्वाक्यमधर्मिष्ठं विगर्हितम् ॥ १२ ॥
[6]यद्ययं किल्बिषाद्भेदः कृतोऽप्येवं न गृह्यते ॥ जायते तत्र मे दुःखं धर्मसङ्गश्च गर्हितः ॥
[[7]तवायं धर्मसंयोगो लोकस्यास्य विगर्हितः] ॥ १३ ॥
मनसाऽपि कथं कामं [8]कुर्यास्त्वं कामवृत्तयोः ॥ तयोस्त्वहितयोर्नित्यं शत्र्वोः पित्रभिधानयोः ॥ १४ ॥
यद्यपि प्रतिपत्तिस्ते दैवी चापि तयोर्[9]मतम् ॥ तथाप्युपेक्षणीयं ते न मे तदपि रोचते ॥ १५ ॥

॥ ७ ॥ ननुधर्मिष्ठयोस्तयोःकथंपापित्वशङ्केत्यत्राह—सन्तीति । धर्मःउपधाव्याजोयेषांते धर्मोपधाः।श्लक्ष्णाः धर्माचरणकञ्चुकेनस्वदोषपिधानचतुराः । सन्ति लोकइतिशेषः । हेधर्मात्मन् धर्मैकप्रवणस्वभाव । शाठ्यात् गूढविप्रियकारित्वात् । स्वार्थं अभिषेकरूपमस्मत्प्रयोजनं । परिजीहीर्षतोः परिहर्तुमिच्छतोः । तयोः कैकेयीदशरथयोः ।। सुचरितं सुष्टुमन्त्रितं । किंनबुध्यसे ॥ ८ ॥ विपर्ययेऽनिष्टंप्रसञ्जयति—यदीति । हेराघव । प्रागेव अभिषेकात्पूर्वमेव । एवं उक्तप्रकारेण । तयोः कैकेयीदशरथयोः । व्यवसितं निश्चयः । यदि नस्यात् तदा प्रकृतः पूर्वमेवप्रसक्तः । सवरश्च प्रागेव दत्तःस्यात् । किंचेतिचार्थः अयंभावः । भरतायावश्यंराज्यंदेयं रामस्यज्येष्ठत्वेनतद्विषयोभिषेकआरभ्यते तदानींत्वयाघरद्वयंप्रष्टव्यं सव्याजेनरामोविवास्यते भरतोभिषिच्यतइतिकैकेयीदशरथाभ्यांसङ्केतितम् । अन्यथासाव्नरद्वयंकिमेतावत्पर्यन्तंनयाचेत अयाचितमपितत् नीतिज्ञोराजावाकुतोनपूर्वमेवपरिहरेदिति ॥ ९ ॥ अस्तुतथाततःकिमित्यत्राह—लोकेति । लोकविद्विष्टं ज्येष्ठंपरित्यज्यकनिष्ठस्याभिषेचनात् । लोकविद्वेषविषयमित्यारम्भक्रियाविशेषणं । मे तत्र असहनविषये । क्षन्तुमर्हसि ॥ १० ॥ यथाकथञ्चित्पितृवचनंकर्तव्यमेवेतिमन्वानंरामंप्रत्याह—येनेति । इयंते बुद्धिः येन पितृवचनपरिपालनरूपधर्मेण । द्वैधं भेदं । आगता प्राप्ता । नाभिषिच्येवनंप्रवेक्ष्यामीति। यस्य प्रसङ्गात् प्रस्तावात् । मुह्यसि अकरणेप्रत्यवायःस्यादितिमोहंप्राप्नोषि । सधर्मोममद्वेष्यः ॥ ११ ॥ मोहंविशदयति—कथमिति। कर्मणा पौरुषकर्मणा। शक्तः प्रतीकारसमर्थइत्यर्थः । त्वं कैकेयीवशवर्तित्वादेवाधर्मिष्ठंविगर्हितंतद्वाक्यं कथं केनप्रकारेण । मोहंविनाकरिष्यसि ॥ १२ ॥ त्वन्मोहादेवमेदुःखमित्याह—यदीति । अयंभेदः अभिषेकविघातात्माविपर्यासः । किल्बिषात् मृषावरकल्पनात् । कृतोपि एवं किल्बिषकल्पितइति। यदिनगृह्यते तत्र अग्रहणनिमित्ते । मेदुःखंजायते । धर्मसङ्गश्च एतादृशधर्मसङ्गश्च । विगर्हितः ॥ १३ ॥ तस्मान्मनसापितन्नकर्तव्यमित्याह—मनसेत्यादिना ॥ १४ ॥ ममविवासनंदैवकृतं नतुकैकेयीकृतमिति पूर्वंरामोक्तमनूद्यपरिहरति—यद्यपीत्यादिना । तयोः पित्रोः । प्रतिपत्तिः अभिषेकविघटनविषयाबुद्धिः । दैवीचापि दैवकृतैवेति । तेमतंयद्यपि तथापि ते त्वया । तत् उपेक्षणीयं । तदपि दैवमपि । ममनरोचते ॥ १५ ॥

निवृत्तिर्नयुक्तेतिसूचितम् ॥ ७ ॥ ति० धर्मःउपधाछलंतत्रासक्ताः प्रतारणार्थंधर्मानुष्ठातारइतियावत् । स्वार्थं स्वकार्यसिद्ध्यर्थं । सुचरितंत्वां शाठ्यात् मृषाकल्पितधर्मव्यवहारात् । परिजिहीर्षतोः त्यक्तुमिच्छतोस्तयोःकृत्यंकिंनावबुध्यसइत्यन्वयः ॥ ८ ॥ ति० मे अपराधमितिशेषः । त्वद्विप्रयेप्रतिवचनदानरूपंममापराधंक्षन्तुमर्हसि ॥ १० ॥ ति० त्वां त्वाविना । तत्कृतेकर्मणिदैवकृतत्वबुद्धिं त्वांविनाऽन्यःकामवृत्तयोःअहितयोर्नित्यंपितृनामकशत्र्वोः कामं मनोरथं । मनसापिकथंकुर्यात् । अनुष्ठानंतुदूरतइतिभावः ॥ १४ ॥

[पा०] १ ङ. छ. झ. ट. धर्मोपधासक्ताः. २ ङ. ञ. छ. झ. ञ. ट. येनैव. ३ ग. घ. ज. द्वैतं. ४ ङ. ल. छ. झ. ञ. ट. सोपि. ५ ङ. च. छ. झ. ञ. ट. यत्प्रसङ्गाद्धि. ६ ङ. छ. झ. ञ. ट. यदयं. ७ इदमर्धं क. ङ—ट. दृश्यते. ८ ङ. छ. झ. ञ. ट. कुर्यांत्त्वां. ९ ख. ग. ज. मता.

विक्लवो वीर्यहीनो यः स दैवमनुवर्तते ॥ वीराः संभावितात्मानो न दैवं पर्युपासते ॥ १६ ॥
दैवं पुरुषकारेण यः समर्थः प्रबाधितुम् ॥ न दैवेन विपन्नार्थः पुरुषः सोवसीदति ॥ १७ ॥
द्रक्ष्यन्ति त्वद्य दैवस्य पौरुषं पुरुषस्य च ॥ दैवमानुषयोरद्य व्यक्ता व्यक्तिर्भविष्यति ॥ १८ ॥
अद्य मत्पौरुषहतं दैवं द्रक्ष्यन्ति वै जनाः ॥ यद्दैवादाहतं तेऽद्य दृष्टं राज्याभिषेचनम् ॥ १९ ॥
अत्यङ्कुशमिवोद्दामं गजं मदबलोद्धतम् ॥ प्रधावितमहं दैवं पौरुषेण निवर्तये ॥ २० ॥
लोकपालास्समस्तास्ते नाद्य रामाभिषेचनम् ॥ न च कृत्स्नास्त्रयो लोका विहन्युः किं पुनः पिता ॥ २१ ॥
यैर्विवासस्तवारण्ये मिथो राजन्समर्थितः ॥ अरण्ये ते विवत्स्यन्ति चतुर्दशसमास्तथा ॥ २२ ॥
अहं तदाशां छेत्स्यामि पितुस्तस्याश्च या तव ॥ अभिषेकविघातेन पुत्रराज्याय वर्तते ॥ २३ ॥
मद्बलेन विरुद्धाय न स्याद्दैवबलं तथा ॥ प्रभविष्यति दुःखाय यथोग्रं पौरुषं मम ॥ २४ ॥
ऊर्ध्वं वर्षसहस्रान्ते प्रजापाल्यमनन्तरम् ॥ आर्यपुत्राः करिष्यन्ति वनवासं गते त्वयि ॥ २५ ॥
पूर्वराजर्षिवृत्त्या हि वनवासो विधीयते ॥ प्रजा निक्षिप्य पुत्रेषु पुत्रवत्परिपालने ॥ २६ ॥
स चेद्राजन्यनेकाग्रे राज्यविभ्रमशङ्कया ॥ नैवमिच्छसि धर्मात्मन्राज्यं राम त्वमात्मनि ॥ २७ ॥
प्रतिजाने च ते वीर माभूवं वीरलोकभाक् ॥ राज्यं च तव रक्षेयमहं वेलेव सागरम् ॥ २८ ॥

उपेक्षणीयतायांहेतुमाह—विक्लवइति । विक्लवः कातरः । वीर्यहीनइत्यस्यप्रतियोगितयोक्तं वीराइति । विक्लवइत्यस्यप्रतियोगितयोक्तं संभावितात्मानइति । संभावितः सम्यक्प्रापितः दृढइतियावत् । आत्मामनो येषांतेतथा । धीराइत्यर्थः । नोपासते नाश्रयन्ति ॥ १६ ॥ कुतोनाश्रयन्तीत्यपेक्षायांपौरुषवतोदैवेनप्रयोजनहान्यभावादित्याह—दैवमिति । पुरुषकारेण पुरुषबलेन । दैवंबाधितुं अतिक्रम्यवर्तितुं । यःसमर्थः स दैवेनविपन्नार्थः विहतप्रयोजनःसन् नावसीदति नक्लिश्यति ॥ १७ ॥ पुरुषकारापेक्षयादैवस्यदुर्बलत्वे प्रत्यक्षंप्रमाणयति—द्रक्ष्यन्तीति । पौरुषं सामर्थ्यं । व्यक्तिः प्रबलदुर्बलविवेकः । व्यक्ता स्फुटा । भविष्यति ॥ १८ ॥ तदेवस्पष्टमाह—अद्येति । यद्दैवात् यस्माद्दैवात् । आहतं विघ्नितं । तेराज्याभिषेचनंदृष्टं तद्दैवं मत्पौरुषहतंद्रक्ष्यन्ति ॥ १९ ॥ अत्यङ्कुशं अतिक्रान्ताङ्कुशव्यापारं । उद्दामं छिन्ननिगलं । मदबलोद्धतं मदबलाभ्यांगर्विष्ठं । प्रधावितं दुर्निवारं । स्वच्छन्दगमनं । गजमिव दुर्निवारत्वेनत्वदभिमतंदैवंपौरुषेण निवर्तये ॥ २० ॥ ते प्रसिद्धाः । हेरामतेतवाभिषेचनमितिवा । नविहन्युः नविहन्तुंशक्ताः । कृत्स्नाः अन्यूनाः ॥ २१ ॥ राजत्वंसिद्धवत्कृत्याह—राजन्निति । मिथः रहसि । "मिथोऽन्योन्यरहस्ययोः" इतिवैजयन्ती । तथा त्वांप्रत्युक्तप्रकारेण ॥ २२ ॥ तत् तस्मात् । यातवाभिषेकविघातेनद्वारेणपुत्रराज्यायवर्तते प्रवर्तते । तस्याः पितुश्च आशां अतितृष्णाम् । "आशादिगतितृष्णयोः" इतिवैजयन्ती ॥ २३ ॥ मद्बलेनविरुद्धायजनाय ममोग्रंपौरुषं दुःखाययथाप्रभविष्यति तथादैवबलंनस्यात् सुखायनभवेत् ॥ २४ ॥ नकदाचिदपि भरतस्यराज्यप्राप्तिरस्तीत्याह—ऊर्ध्वमिति । ऊर्ध्वमित्यस्यविवरणं वर्षसहस्रान्तइति । प्रजापाल्यं प्रजापालनं । स्वार्थेयत्प्रत्ययः । ऊर्ध्ववर्षसहस्रान्ते त्वयि वनंगतेसति वानप्रस्थाश्रमस्थेसति । अनन्तरंप्रजापाल्यं आर्यस्यतेपुत्राःकरिष्यन्ति ॥ २५ ॥ मदुक्तएवबनवासःपूर्वसंमतइत्याह—पूर्वेति । पुत्रेषु प्रजाः पुत्रवत्परिपालने परिपालननिमित्तं । निक्षिप्य पूर्वराजर्षिवृत्त्या तदाचारेण । वनवासोविधीयते ॥ २६ ॥ सचेदित्यादिश्लोकद्वयमेकान्वयं । हेराम स त्वं राजनि दशरथे । एवं अनेकाग्रे चलचित्ते अव्यवस्थितचित्तेसति । राज्यविभ्रमशङ्कया राज्यस्यविविधचलनशङ्कया । आत्मनिराज्यंनेच्छसिचेदहंतवराज्यंचरक्षेयं । कथ-

ति० तदाशां तामाशाम् ॥ २३ ॥ सत्य० राज्यविभ्रमशङ्कया राजानुवृत्त्याराज्यग्रहणेतद्भ्रंशोभूयादितिशङ्कया ॥ २७ ॥

[पा०] १ ख. व्यक्तं. २ झ. मेपौरुष. ३ ङ—छ. झ. ञ. ट. यद्दैवा. ४ ङ. च. छ. झ. ञ. जलोद्धतम्. ५ ख. ग. घ. ज. तथासमाः. ६ ङ. च. छ. झ. ञ. ट. धक्ष्यामि. ७ ङ. छ. झ. ट. ऽभिधीयते. ८ घ. नचेद्राज. ९ ख. राज्यकामत्व. १० क. घ. प्रतिजानामि.

मङ्गलैरभिषिञ्चस्व तत्र त्वं व्यापृतो भव ॥ अहमेको महीपालानलं वारयितुं[1] बलात् ॥ २९ ॥
न शोभार्थाविमौ बाहू न धनुर्भूषणाय मे ॥ नासिराबन्धनार्थाय[2] न शराः स्तंभहेतवः ॥
अमित्रदमनार्थं[3] मे सर्वमेतच्चतुष्टयम् ॥ ३० ॥
न चाहं कामयेऽत्यर्थं[4] यः स्याच्छत्रुर्मतो मम ॥ असिना तीक्ष्णधारेण विद्युच्चलितवर्चसा ॥
प्रगृहीतेन वै[5] शत्रुं वज्रिणं वा न कल्पये ॥ ३१ ॥
खड्गनिष्पेषनिष्पिष्टैर्गहना दुश्चरा च मे ॥ हस्त्यश्वनर[6]हस्तोरुशिरोभिर्भविता मही ॥ ३२ ॥
खड्गधाराहता मेऽद्य दीप्यमाना इवाद्रयः[7] ॥ पतिष्यन्ति द्विपा[8] भूमौ मेघा इव सविद्युतः ॥ ३३ ॥
बद्धगोधाङ्गुलित्राणे प्रगृहीतशरासने ॥ कथं पुरुषमानी स्यात्पुरुषाणां मयि स्थिते ॥ ३४ ॥
बहुभिश्चैकमत्यस्यन्नेकेन च बहूञ्जनान् ॥ विनियोक्ष्याम्यहं बाणान्नृवाजि[9]गजमर्मसु ॥ ३५ ॥
अद्य मेऽस्त्रप्रभावस्य[10] प्रभावः प्रभविष्यति[11] ॥ राज्ञश्चाप्रभुतां कर्तुं प्रभुत्वं च[12] तव प्रभो ॥ ३६ ॥
अद्य चन्दनसारस्य केयूरामोक्षणस्य च ॥ वसूनां च विमोक्षस्य सुहृदां पालनस्य च ॥ ३७ ॥
अनुरूपाविमौ बाहू राम कर्म करिष्यतः ॥ अभिषेचनविघ्नस्य कर्तॄणां ते निवारणे[13] ॥ ३८ ॥

मिव । वेलासागरमिव । नोचेद्वीरलोकभाक् माभूवम् । ते तुभ्यं । प्रतिजानेच ॥ २७—२८ ॥ मङ्गलैः मङ्गलद्रव्ययुक्तैर्जलैः । अभिषिञ्चस्व आलानंवसिष्ठादिभिरितिशेषः । तत्र अभिषेककर्मणि । व्यापृतोभव व्यासक्तचित्तोभवेत्यर्थः । अलं पर्याप्तः । वारयितुं निवारयितुम् ॥ २९ ॥ नशोभार्थावित्यादिसार्धश्लोकमेकंवाक्यं—नेति । आबन्धनार्थाय आपाततोवीरभूषणतयाकट्यांबन्धनरूपप्रयोजनायेत्यर्थः । स्तंभहेतवः केवलंलक्ष्यभूतस्तंभहेतवः । तूण्यांस्थापनहेतवइतिवा ॥ ३० ॥ नचाहमित्यादिसार्धश्लोकः । यः मम अत्यर्थंशत्रुः शातयिता । मतः स्यात् परीक्षकैरितिशेषः । तमहंनकामये तस्यस्थितिं न सहइत्यर्थः । किंत्वसिनावज्रिणमपिशत्रुंनकल्पये न स्थापयामि । हन्मीत्यर्थः । तीक्ष्णधारेण तीक्ष्णाग्रेण । विद्युच्चलितवर्चसा विद्युदिवचलितंनिर्गतंवर्चःस्फुलिङ्गरूपंयस्यतेन ॥ ३१ ॥ खड्गकृतमर्दनेनचूर्णीकृतैर्गहना काननमिवनिरन्तरा । अतएवदुश्चरा संचारायोग्याच । भविता भविष्यति ॥ ३२ ॥ मेखड्गधारयाखड्गकोट्याहताः अतएवसविस्फुलिङ्गत्वात् दीप्यमानाः ज्वलिताः । अद्रयइव सविद्युतोमेघाइवच स्थिताः । द्विपाः शत्रुगजाः । भूमौपतिष्यन्ति ॥ ३३ ॥ गोधा ज्याघातवारणं । "गोधातलेज्याघातवारणे" इत्यमरः । गोधारूपाङ्गुलिरक्षककवचवतिमयिस्थितेसति पुरुषाणांमध्येकश्चित् कथं पुरुषमानी शूरमानी । स्यात् । सर्वेस्त्रीप्रायाभविष्यन्तीत्यर्थः ॥ ३४ ॥ अहंबहुभिर्बाणैरेकंशूरंअत्यस्यन् प्रकर्षेणाक्षिपन् । "प्रकर्षेलङ्घनेप्यति" इत्यमरः । एकेनबाणेनबहून्क्षुद्रान् अत्यस्यन् अनेनप्रकारेणनृवाजिगजानां मर्मसु मर्मस्थलेषु । बाणान्विनियोक्ष्यामि विसर्जयिष्यामि । अतःकथमेकोबहून्हनिष्यतीतिनचिन्तनीयमितिभावः ॥ ३५ ॥ अस्त्रप्रभावस्य अस्त्रमाहात्म्यस्य । प्रभावः प्रतापः । "प्रतापमाहात्म्ययोःप्रभावःस्यात्" इतिवैजयन्ती ॥ ३६ ॥ अद्येत्यादिश्लोकद्वयमेकंवाक्यं । चन्दनसारस्य चन्दनपङ्कस्य । केयूरामोक्षणस्य अङ्गदधारणस्य । "केयूरमङ्गदं" इत्यमरः । वसूनां धनानां । विमोक्षस्य त्यागस्य । सुहृदांपालनस्य शत्रुभ्योरक्षणस्यच । अनुरू-

ति० आबन्धनार्थाय काष्ठानांपरस्परंबन्धनहेतुच्छिद्रादिकरणाय । शि० शराः बाणाः । स्तंभहेतवः समूहीभूयस्तंभनिर्मापकान ॥ ३० ॥ सत्य० हस्त्यश्वरथिहस्तोरुशिरोभिः प्राण्यङ्गत्वेप्येकवद्भावाभावआर्षः । यद्वा हस्त्यश्वरथिनांहस्तोरवइतिद्वन्द्वैकवद्भावः । तेनसहितानिचतानिशिरांसिचेत्युत्तरपदलोपीसमासः ॥ ३२ ॥ ति० हताः विच्छिन्नाः । अग्नयइवदीप्यमानाः । रक्तधारया । अतएवसविद्युतोमेघाइव ॥ ३३ ॥ शि० हेराम अभिषेचनविघ्नस्यकर्तॄणांनिवारणे कर्म व्यापारं । करिष्यतोमेबाहूचन्दनसारस्य

[पा०] १ ख. ग. धारयितुं. २ घ. नासिर्वा. ३ क. च. ञ. मथनार्थंमे. ङ. छ. झ. ट. मथनार्थाय. ४ घ. ज. कामयेत्यन्तं. ५ ट. कंशत्रुं. ६ छ. झ. ट. रथिहस्तोरु. ७ ङ. ज. झ. ट. इवाग्नयः. ८ ङ—ट. द्विपो. ९ ख. त्वश्ववाजीभ. १० घ. प्रतापस्य. ११ ख. प्रतरिष्यति. १२ क. ख. ग. ज. तवच. १३ ख. विमोक्षणे.

ब्रवीहि कोऽद्यैव मया वियुज्यतां तवासुहृत्प्राणयशःसुहृज्जनैः ॥
यथा तवेयं वसुधा वशे भवेत्तथैव मां शाधि तवास्मि किङ्करः ॥ ३९ ॥
विमृज्य बाष्पं परिसान्त्व्य चासकृत्स लक्ष्मणं राघववंशवर्धनः ॥
उवाच पित्र्ये वचने व्यवस्थितं निबोध मामेवं हि सौम्य सत्पथे ॥ ४० ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे त्रयोविंशः सर्गः ॥ २३ ॥

चतुर्विंशः सर्गः ॥ २४ ॥

कौसल्यया पितृवाक्यपरिपालनेदृढमनस्कंरामंप्रतितद्विरहस्यदुस्सहत्वप्रतिपादनेनस्वस्याप्यनुगमननिवेदनम् ॥ १ ॥ तथा रामेणभर्तृशुश्रूषणप्रशंसनेनतस्यस्त्रीभिरवश्यकर्तव्यत्वंबोधितयातयास्वदुःखंरामप्रव्राजनाङ्गीकारः ॥ २ ॥

तं समीक्ष्य त्ववहितं पितुर्निर्देशपालने ॥ कौसल्या बाष्पसंरुद्धा वचो धर्मिष्ठमब्रवीत् ॥ १ ॥
अदृष्टदुःखो धर्मात्मा सर्वभूतप्रियंवदः ॥ मयि जातो दशरथात्कथमुञ्छेन वर्तयेत् ॥ २ ॥
यस्य भृत्याश्च दासाश्च मृष्टान्यन्नानि भुञ्जते ॥ कथं स भोक्ष्यते नाथो वने मूलफलान्ययम् ॥ ३ ॥
क एतच्छ्रद्दधेच्छ्रुत्वा कस्य वा न भवेद्भयम् ॥ गुणवान्दयितो राज्ञो राघवो यद्विवास्यते ॥ ४ ॥
नूनं तु बलवाँल्लोके कृतान्तः सर्वमादिशन् ॥ लोके रामाभिरामस्त्वं वनं यत्र गमिष्यसि ॥ ५ ॥

पौ राजपुत्रत्वेनयोग्यावपिइमौबाहू हेराम तत्सर्वंविहाय तेअभिषेचनविघ्नस्यकर्तॄणांनिवारणेविषये कर्मकरिष्यतः ॥ ३७—३८ ॥ त्वदाज्ञात्वेकाऽवश्यंभाविनीत्याह—ब्रवीहीति । ब्रवीहि ब्रूहि । वियुज्यतां मयाक्षियोज्यतां ॥ ३९ ॥ एवंविस्तरेणपूर्वपक्षमुपन्यस्तवन्तंलक्ष्मणंमतिपूर्वविस्तृतंसिद्धान्तंसंग्रहेणाह—विमृज्येति । बाष्पं रामासंमतिजं । राघववंशवर्धनः रघोःसंबन्धीराघवःराघवश्चासौवंशश्चेतिविशेषणसमासः । सत्पथे पित्र्ये वचने व्यवस्थितं निश्चलं । मां निबोध जानीहि । सर्वथाहंपितृवचनंनत्यजामीत्यर्थः । "जीवतोर्वाक्यकरणात्प्रत्यब्दंभूरिभोजनात् । गयायांपिण्डदानाच्चत्रिभिःपुत्रस्यपुत्रता" इतिस्मरणादितिभावः ॥ ४० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीतांबराख्याने अयोध्याकाण्डव्याख्याने त्रयोविंशः सर्गः ॥ २३ ॥

अथधर्म्यस्यरामनिश्चयस्यानुमोदनं कौसल्याकरोति—तंसमीक्ष्येत्यादिना । तं रामं । समीक्ष्य निश्चित्य । अवहितं सावधानं । निर्देशो नियोगः ॥ १ ॥ उञ्छो नाम दैवात्प्रकीर्णानांव्रीह्यादिधान्यानामङ्गुल्याएकैकशोग्रहणं । कणिशग्रहणंतुशिलमेव । इदंफलमूलाद्याहरणंलक्षयति । वर्तयेत् जीवेत् ॥ २ ॥ भृत्याः भटाः । दासाः दास्यकराः । मृष्टानि श्लाघ्यानि ॥ ३ ॥ विवास्यतइतियत् एतत् कःश्रद्दधेत् । गुणवत्पुत्रविवासनस्यासंभावितत्वात् । श्रद्धेयत्वेवाकस्यभयंनभवेत् ममाप्येवंविवासनंभविष्यतीति ॥ ४ ॥ सर्वं सुखदुःखादिकं

केयूरामोक्षणस्य वसूनांविमोक्षस्य सुहृदांपालनस्यच । अनुरूपौ योग्यौ । भविष्यतइतिशेषः । एतेन रामसेवाकरणमन्तरा सर्वंकर्मनिरर्थकमितिसूचितम् ॥ ३७—३८ ॥ कत० विमृज्येतिपाठेअन्तर्भावितण्यर्थतयाविसर्जयित्वा । चक्षुषीपरिमृज्येति यावत् ॥ ४० ॥ इतित्रयोविंशस्सर्गः ॥ २३ ॥

ति० धर्मिष्ठं रामं । ती० मङ्गलभङ्गभीत्यासंरुद्धबाष्पा ॥ १ ॥ ति० वर्तयेत् भवानितिशेषः ॥ २ ॥ ती० एतच्छ्रुत्वाराजानंकःश्रद्दधेत् श्रद्दध्यात् । ति० सत्यमितिवाबालात्कस्यस्वपित्रादिभ्योभयंनभवेत् ॥ शि० कः श्रद्दधेत् समीचीनंमन्येत ।

[पा०] १ ख. ङ. च. झ. य. ट. वशा. २ ख—ङ. विसृज्य. ३ क. परिमृज्यचक्षुषी. ४ क. वर्धनम्. ५ ङ. छ. ज. झ. ञ. पित्रोः. ६ ङ. छ—ट. मेषहिसौम्यसत्पथः. ख. ग. मेवहिसौम्यसत्पथम्. ७ ङ. छ. झ. ट. व्यवसितं. ८ क. पितृनिर्देश. ९ ङ. छ. दासाश्च. १० ङ. च. छ. झ. ञ. ट. रामो. ११ क. ख. घ. य—ञ. राज्ञो. १२ ङ. झ. ट. काकुत्स्थो. १३ क. च. मादिशेत्.

अयं तु मामात्मभवस्तवादर्शनमारुतः ॥ विलापदुःखसमिधो रुदिताश्रुहुताहुतिः ॥ ६ ॥
चिन्ताबाष्पमहाधूमस्तवादर्शनचित्तजः ॥ कर्शयित्वा भृशं पुत्र निश्वासायाससंभवः ॥ ७ ॥
त्वया विहीनामिह मां शोकाग्निरतुलो महान् ॥ प्रधक्ष्यति यथा कक्षं चित्रभानुर्हिमात्यये ॥ ८ ॥
कथं हि धेनुः स्वं वत्सं गच्छन्तं नानुगच्छति ॥ अहं त्वाऽनुगमिष्यामि पुत्र यत्र गमिष्यसि ॥ ९ ॥
तथा निगदितं मात्रा तद्वाक्यं पुरुषर्षभः ॥ श्रुत्वा रामोऽब्रवीद्वाक्यं मातरं भृशदुःखिताम् ॥ १० ॥
कैकेय्या वञ्चितो राजा मयि चारण्यमाश्रिते ॥ भवत्या च परित्यक्तो न नूनं वर्तयिष्यति ॥ ११ ॥
भर्तुः किल परित्यागो नृशंसः केवलं स्त्रियाः ॥ स भवत्या न कर्तव्यो मनसाऽपि विगर्हितः ॥ १२ ॥
यावज्जीवति काकुत्स्थः पिता मे जगतीपतिः ॥ शुश्रूषा क्रियतां तावत्स हि धर्मः सनातनः ॥ १३ ॥
एवमुक्ता तु रा[11]मेण कौसल्या शुभदर्शना ॥ तथेत्युवाच सुप्रीता राममक्लिष्टकारिणम् ॥ १४ ॥
एवमुक्तस्तु वचनं रामो धर्मभृतांवरः ॥ भूयस्तामब्रवीद्वाक्यं मातरं भृशदुःखिताम् ॥ १५ ॥
मया चैव भवत्या च कर्तव्यं वचनं पितुः ॥ राजा भर्ता गुरुः श्रेष्ठः सर्वेषामीश्वरः प्रभुः ॥ १६ ॥
इ[12]मानि तु महारण्ये विहृत्य नव पञ्च च ॥ वर्षाणि परम[13]प्रीतः स्थास्यामि वचने तव ॥ १७ ॥
एवमुक्ता प्रियं पुत्रं बाष्पपूर्णानना तदा ॥ उ[14]वाच परमार्ता तु कौसल्या पु[15]त्रवत्सला ॥ १८ ॥

आदिशन् प्रदिशन् । कृतान्तः दैवं । यत्र दैवेनिमित्ते ॥ ५ ॥ अयंत्वित्यादिश्लोकत्रयमेकंवाक्यम् । अत्रविश्लेषजनितशोकस्याग्निसमाधिरुच्यते । आत्मभवः देहजः । अदर्शनमारुतः शोकाग्नेरदर्शनजत्वात्तस्यमारुतत्वनिरूपणं । विलापदुःखंप्रलापजंदुःखं तदेवसमिधायस्य । तस्यतद्वर्धकत्वात् । "आपंचैवहलन्तानां" इतिसमिच्छब्दाट्टाप् । रुदिताश्रूणि रोदनजाश्रूणितान्येवहुताक्षिप्ताआहुतिर्यस्य । चिन्तावाष्पः चिन्तोष्मा सएवमहाधूमोयस्य । तवादर्शनेनहेतुनाचित्तजइतिहेतुमात्रोक्तिः । आगमनचित्तजइतिपाठान्तरं । निश्वास एवायासः पुरुषप्रयत्नः । समिदादिजन्याग्नेःपुरुषप्रयत्नजत्वात्तथानिरूपणं । त्वया जलस्थानीयेन । विहीनां मां शोकएवाग्निः शोकाग्निः वैतानिकाग्निः । कर्शयित्वा शुष्कीकृत्य । हिमात्यये शिशिरर्तौ । कक्षं गुल्मं । चित्रभानुः वन्योग्निरिव । मां प्रधक्ष्यति भस्मीकरिष्यति ॥ ६—८ ॥ उत्तरार्धादौतथेत्युपस्कार्यं ॥ ९ ॥ तथानिगदितमितिस्ववाचोप्यविषयत्वंदर्शयतिमुनिः ॥ १० ॥ नवर्तयिष्यति नजीविष्यतीत्यर्थः ॥ ११ ॥ नृशंसः नृशंसत्वं । सिध्यतीतिशेषः । मनसापिनकर्तव्यः नचिन्तनीयइत्यर्थः ॥ १२ ॥ सः शुश्रूषा । धर्मापेक्षयापुँल्लिङ्गत्वम् ॥ १३ ॥ शुभदर्शना धर्म्यबुद्धिरित्यर्थः ॥ १४ ॥ दार्ढ्यार्थंपुनराहेत्याह—एवमित्यादिना ॥ १५ ॥ मयेति । उत्तरार्धादौसइत्युपस्कार्यं ॥ १६ ॥ प्राथमिकपितृवचनपरिपालनानन्तरंतबव-

भयं रामगमनेकथमत्रत्यानांजीवनमितिकस्यायोध्याजनस्यभीतिर्नभवेत् ॥ ४ ॥ **सत्य०** मामात्मभवस्तवेत्येकंपदं । मा रमा माया आत्मभवोब्रह्माताभ्यांस्तवोयस्यासौतथोक्तः ॥ ६ ॥ **शि०** आगमनचिन्तजः कथमयमागमिष्यतीतिचिन्तनजनितः । त्वयाविहीनां मां मां राज्यलक्ष्मींच । प्रधक्ष्यति । अतएवमांमामित्यनयोर्नपौनरुक्त्यम् । चिन्तजइतिवाहुलकाद्ध्रस्वइतिभट्टाः । अदर्शनचिन्तज इतिपाठेपिअदर्शनजातचिन्ताजनितइत्यर्थः । परेतु अदर्शनस्यमारुतत्वेननिरूपणात्सचिन्त्यइत्याहुरितिभट्टाः । वस्तुतस्त्वेवंपाठे आदर्शनेतिच्छेदः । आदर्शनंनित्यदर्शनंकदास्यादितिचिन्ताजनितइत्यर्थः । **सत्य०** तवागमनेचिन्तायस्यतत्आगमनचिन्तंमनः तस्माज्जायतइतितथा । निश्वासायासयोस्संभवोयस्मात्सतथा ॥ ७—८ ॥ **शि०** कथंशब्दोयथार्थकः । क्वचित्तथैवपाठइतिभट्टाः । त्वा त्वां । नानुगच्छतीतिपाठेतुकथमोनयथार्थकत्वं । तत्रोत्तरार्धादौतस्मादितिपूरणीयम् ॥ ९ ॥ **ती०** यथानिगदितं येनप्रकारेणनिगदितं ॥ १० ॥ **शि०** अक्लिष्टकारिणं क्लेशकारिप्रतियोगिकभेदविशिष्टम् ॥ १४ ॥

[पा०] १ ग. घ. ज. विवास. २ ङ. छ. झ. ञ. ट. गमनचिन्तजः. ३ ख. ङ. छ. झ. ट. ऽधिकं. ४ ङ. छ. झ. ञ. ट. यथाहि. ५ ङ. छ. झ. ञ. ट. गच्छन्तमनु. ६ ङ. च. छ. झ. ञ. ट. यत्रवत्स. क. ख. ग. घ. ज. यत्रपुत्र. ७ क. च. छ. झ. ञ. ट. यथा. ८ च. मास्थिते. ९ क. ग. घ. ङ. छ. ज. झ. ट. पुनः. १० च. सच. ११ क. कौसल्यारामेण. १२ क. इदानीं. १३ ङ. छ. झ. ञ. ट. प्रीत्यां. १४ ग. घ. ज. दुःखान्यसहमानासाकौसल्यारामममब्रवीत्. १५ ङ. च. छ. झ. ञ. ट. सुतवत्सला. ख. पुत्रलालसा.

आसां राम सपत्नीनां वस्तुं[1] मध्ये न मे क्षमम् ॥ नय मामपि काकुत्स्थ वनं वन्यां मृगीमिव[2] ॥
यदि ते गमने बुद्धिः कृता पितुरपेक्षया ॥ १९ ॥
तां तथा रुदतीं रामो रुदन्वचनमब्रवीत् ॥ २० ॥
जीवन्त्या हि स्त्रिया भर्ता दैवतं प्रभुरेव च ॥ भवत्या मम चैवाद्य राजा प्रभवति प्रभुः ॥ २१ ॥
न ह्यनाथा वयं राज्ञा लोकनाथेन धीमता ॥ भरतश्चापि धर्मात्मा सर्वभूतप्रियंवदः ॥
भवतीमनुवर्तेत स हि धर्मरतः सदा ॥ २२ ॥
यथा मयि[3] तु निष्क्रान्ते पुत्रशोकेन पार्थिवः ॥ श्रमं नावाप्नुयात्किञ्चिदप्रमत्ता तथा कुरु ॥ २३ ॥
दारुणश्चाप्ययं[4] शोको यथैनं न विनाशयेत् ॥ राज्ञो वृद्धस्य सततं हितं चर समाहिता ॥ २४ ॥
व्रतोपवासनिरता या नारी परमोत्तमा ॥ भर्तारं नानुवर्तेत सा[5] तु पापगतिर्भवेत् ॥ २५ ॥
भर्तुः[6] शुश्रूषया नारी लभते स्वर्गमुत्तमम्[7] ॥ अपि या निर्नमस्कारा निवृत्ता देवपूजनात् ॥ २६ ॥
शुश्रूषामेव कुर्वीत[8] भर्तुः प्रियहिते रता ॥ एष धर्मः[9] पुरा दृष्टो लोके[10] वेदे श्रुतः स्मृतः ॥ २७ ॥
अग्निकार्येषु च सदा सुमनोभिश्च[11] देवताः ॥ पूज्यास्ते मत्कृते देवि ब्राह्मणाश्चैव सुव्रताः[12] ॥ २८ ॥

चनंकरिष्यामीत्याह—इमानीति । इमानीत्यल्पत्वज्ञापनाय । विह्वलेत्यनेनक्लेशराहित्यमुक्तं ॥ १७—१८ ॥ एवमनुमतरामवनगमनस्वनगरवर्तनापिपुनःसपत्नीस्मरणादनुगमनमर्थयते—आसामिति ।वन्यांमृगीमिव यथावन्यामृगीवनेसंतुष्टावर्तते तथाहमपिवर्ते नभवन्तंक्लेशयिष्यामीतिभावः । पितुरपेक्षया पितुरिच्छया ॥ १९ ॥ रुदन् " व्यसनेपुमनुष्याणांभृशंभवति दुःखितः " इत्युक्तगुणविशिष्टोपिरामोमातृव्यसनंदृष्ट्वापितृवचनपरिपालनरूपधर्मविघ्नभयाद्धैर्येणस्थितवान् । इदानींवनगमनानुमतिंलब्ध्वास्वस्नेहप्रदर्शनेनमातृव्यसनंनिवर्तयितुंरुदितवानित्यवगम्यते ॥२०—२१॥ राज्ञा सनाथाइतिशेषः । राज्ञासनाथावयंनह्यनाथाइत्यर्थः । सपत्नीमध्यवासदोषंपरिहरति—भरतश्चापीति ॥ २२—२३ ॥ हितंचरेत्यत्रतथेतिशेषः ॥ २४ ॥ पतिशुश्रूषणमेव पत्न्याःपरमोधर्मइत्यन्वयव्यतिरेकाभ्यांश्लोकद्वयेनदर्शयति—व्रतेति । पापस्यगतिःफलमिवफलंयस्याःसातथा ॥ २५ ॥ निर्नमस्कारापि भर्तृभिन्नद्विजादिविषयनमस्काररहितापि ॥ २६ ॥ उपसंहरति—शुश्रूषामिति । लोके पुरादृष्टः पुरातनलोकाचारसिद्धइत्यर्थः । वेदेश्रुतः वेदावगतइत्यर्थः । स्मृतः स्मृत्यवगतश्चेत्यर्थः ॥ २७ ॥ तूष्णीमवस्थानेएनांदुःखमाक्रमिष्यतीतिधियादुःखविच्छेदनार्थंकालक्षेपसाधनंविधत्ते—अग्नीति । अग्निकार्येषु शान्तिकपौष्टिकहोमेषु । सुमनोभिश्चेत्यत्रचकारेणचन्दनतांबू-

---

स० नयमां नविद्यतेयमःअन्तकोयस्यास्तां । मृत्युरद्यायातश्चेदुत्तमंनायातइत्यावृत्त्यावान्वयः ॥ १९ ॥ **ति०** स्वयमरुदन्वचोऽब्रवीत् । रोदनेकातर्यप्रकटनेनमातुःपुनरप्यनुगमनप्रत्याशाप्रसंगात् ॥ **शि०** अरुदन् रोदननिवृत्तिंकुर्वन्सन्नित्यर्थः ॥२०॥ **सत्य०** जीवन्त्याहिस्त्रियाभर्ताप्रभुरितिलौकिकसामान्यन्यायोक्तिः । प्रकृतेनिगमयति—**भवत्याइति** । राजाभवत्याःप्रभुः । भगवन्सर्वेश्वरस्यतवराजाकथंप्रभुरित्यतआह—**प्रभवतीति** । प्रभुवदाचरतीत्यर्थः । अतोनराजप्रभुप्रभवतिपदानांपौनरुक्त्यमिति ध्येयम् ॥ २१ ॥ **शि०** लोकनाथेन सकलजननियन्त्रा । राज्ञावयंभरतश्च । अपिनाभवत्यादयः अनाथान । एतेनराजकर्तृकगमननियोगाभावाद्दुष्करापिस्थितिःकर्तव्यैवेतिध्वनितम् ॥ २२ ॥ **ति०** तत्रमानमाह । एषभर्तृसेवारूपोधर्मस्त्रियानित्यइति । **शि०** एषधर्मोवेदेलोकेचनित्यःश्रुतः । अतएवस्मृतः समयेस्मृतिविषयीभूतोजातः । **सत्य०** वेदेश्रुतःप्रसिद्धः लोकेजनविषयेस्मृतःस्मृतिसिद्धः । यद्वावेदईइतिच्छेदः । एषधर्मइतिलोकेअद्वेद ई लक्ष्मीर्वेद । नकेवलमावां अपितु श्रुतः श्रुतिसिद्धः । स्मृतश्चेत्यर्थः ॥ २७ ॥

[पा०] १ क. च. ञ. मध्येवस्तुं. २ ग. ज. मृगींयथा ३ क. ख. तुमयि. ४ ज. श्चाव्ययः. ५ क. ङ. च. छ. झ. ञ. ट. साच. ६ क. ख. भर्तृशुश्रूषया. ७ क. च. ञ. गतिमुत्तमाम्. ८ क. कुर्वन्ती. ९ ङ. छ. ज. झ. ट. स्त्रियानित्यो. १० ङ. च. छ. झ. ञ. ट. वेदेलोके. ११ घ. सुमनोभिस्तु. १२ ज. ङ. घ. झ. ट. सत्कृताः.

एवं कालं प्रतीक्षस्व ममागमनकाङ्क्षिणी ॥ नियता नियताहारा भर्तृशुश्रूषणे रता ॥ २९ ॥
प्राप्स्यसे परमं कामं मयि प्रत्यागते सति ॥ यदि धर्मभृतां श्रेष्ठो धारयिष्यति जीवितम् ॥ ३० ॥
एवमुक्ता तु रामेण बाष्पपर्याकुलेक्षणा ॥ कौसल्या पुत्रशोकार्ता रामं वचनमब्रवीत् ॥ ३१ ॥
गमने सुकृतां बुद्धिं न ते शक्नोमि पुत्रक ॥ विनिवर्तयितुं वीर नूनं कालो दुरत्ययः ॥ ३२ ॥
गच्छ पुत्र त्वमेकाग्रो भद्रं तेऽस्तु सदा विभो ॥ पुनस्त्वयि निवृत्ते तु भविष्यामि गतक्लमा ॥३३॥
प्रत्यागते महाभागे कृतार्थे चरितव्रते ॥ पितुरानृण्यतां प्राप्ते त्वयि लप्स्ये परं सुखम् ॥ ३४ ॥
कृतान्तस्य गतिः पुत्र दुर्विभाव्या सदा भुवि ॥ यस्त्वां संचोदयति मे वच आच्छिद्य राघव ॥ ३५ ॥
गच्छेदानीं महाबाहो क्षेमेण पुनरागतः ॥ नन्दयिष्यसि मां पुत्र साम्ना वाक्येन चारुणा ॥ ३६ ॥
अपीदानीं स कालः स्याद्वनात्प्रत्यागतं पुनः ॥ यत्त्वां पुत्रक पश्येयं जटावल्कलधारिणम् ॥ ३७ ॥

तथा हि रामं वनवासनिश्चितं समीक्ष्य देवी परमेण चेतसा ॥
उवाच रामं शुभलक्षणं वचो बभूव च स्वस्त्ययनाभिकाङ्क्षिणी ॥ ३८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे चतुर्विंशः सर्गः ॥ २४ ॥

पञ्चविंशः सर्गः ॥ २५ ॥

कौसल्ययासविस्तरंकृतमङ्गलाशासनेनरामेणमातुश्चरणाभिवादनपूर्वकंसीतावलोकनायस्वावासंप्रतिगमनम् ॥ १ ॥

साऽपनीय तमायासमुपस्पृश्य जलं शुचिः ॥ चकार माता रामस्य मङ्गलानि मनस्विनी ॥ १ ॥

लादीनिसमुच्चीयन्ते । अग्निकार्येपुक्रियमाणेपुसुमनः-प्रभृतिभिर्देवताब्राह्मणाश्चपूज्याइत्यर्थः ॥ २८ ॥ नियता स्नानादिनियमयुक्ता । नियताहारा मधुमांसादिवर्जनेनशुद्धाहारा ॥ २९ ॥ प्राप्स्यसइति भर्तृजीवनपुत्रागमनयोःसतोरेवहिपरमकामप्राप्तिसंभवइतिभावः ॥ ३०—३१ ॥ सुकृतां सुदृढामित्यर्थः ॥ ३२ ॥ गतक्लमा गतक्लेशा ॥ ३३ ॥ महाभागे महाभागधेये । आनृण्यतां अनृणतां । स्वार्थेष्यञ् ॥ ३४ ॥ आच्छिद्य छित्त्वा । अन्यथाकृत्वेत्यर्थः ॥ ३५ ॥ साम्ना सान्त्वरूपेण ॥ ३६ ॥ क्षणमात्रमप्यदर्शनासहिष्णुत्वात्प्रत्यागमनकालइदानीमेवसंभवेदितिप्रार्थयते—अपीति । यत् येनचतुर्दशवर्षान्तेनकालेन । वनात्प्रत्यागतंलांपुनःपश्येयं सकालइदानीमेवापिस्यात् । अपिशब्दःसंभावनायां । "अपिःसंभावनाप्रश्नगर्हाशङ्कासमुच्चये" इतिवैजयन्ती । यत् यत्रेतिवार्थः ॥ ३७ ॥ वनवासनिश्चितं निश्चितवनवासं । परमेणचेतसा आदरेणेति यावत् । स्वस्त्ययनं मङ्गलंअभिकाङ्क्षितुंशीलमस्याअस्तीतितथा ॥ ३८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीतांबराख्याने अयोध्याकाण्डव्याख्याने चतुर्विंशः सर्गः ॥ २४ ॥

तान्येवस्वस्त्ययनानिदर्शयति—सेत्यादि । आयासं क्लेशं । अपनीय त्यक्त्वा । जलमुपस्पृश्य आचम्येत्यर्थः । "उपस्पर्शस्त्वाचमनं" इत्यमरः । रोदनस्याशुचिता-

---

ति० यदीति । अनेनदशरथमरणस्यसंनिहितत्वंसूचितम् ॥ ३० ॥ शि० महाभागे महाभां राज्यलक्ष्मीं आगच्छतिप्राप्नोति तस्मिंस्त्वयि ॥ ३४ ॥ ति० आविध्य आच्छिद्य । त्वांसंचोदयति वनायेतिशेषः । इतियत्‌अतः ॥ ३५ ॥ ति० साम्राश्लक्ष्णेने-तिपाठान्तरम् ॥ ३६ ॥ शि० परमेण सूक्ष्मेण । चेतसा विचारेण । ददर्श ॥ ३८ ॥ इतिचतुर्विंशस्सर्गः ॥ २४ ॥
सत्य० या मा रमा सा मनस्विन्यपि यस्यमङ्गलानि मङ्ग्यतेगम्यतेआभ्यामितिमङ्गौपादौतौलान्तिस्वीकुर्वन्तिविषयीकुर्वन्ती-

[पा०] १ ङ. छ. झ. ट. पर्यागतेक्षणा. २ क. ख. च. छ. ञ. पूर्णायतेक्षणा. ३ झ. ट. ठ. स्वपिष्येपरमं. ४ ङ. च. छं. झ. ञ. यस्त्वां. ५ ङ. छ. झ. आविध्य. ६ ज. महाभाग. ७ ख—ट. श्लक्ष्णेन. क. श्लक्ष्णेनचेतसा. ८ क. ख. घ. च. ञ. येनत्वांपुत्र. ९ क. ङ. छ. ट. तदाहि. १० ङ. छ. झ. ट. ददर्श. ११ घ. नातिकाङ्क्षिणी. १२ झ. ञ. ट. सापिनीय. १३ ग. ङ. च. ज. झ. ञ. ट. शुचि.

न [1]शक्यसे वारयितुं गच्छेदानीं रघूत्तम ॥ शीघ्रं च विनिवर्तस्व वर्तस्व च सतां [2]क्रमे ॥ २ ॥
यं पालयसि धर्मं त्वं [3]धृत्या च नियमेन च ॥ [4]स वै राघवशार्दूल धर्मस्त्वामभिरक्षतु ॥ ३ ॥
[5]येभ्यः प्रणमसे पुत्र चैत्येष्वायतनेषु च ॥ ते च त्वामभिरक्षन्तु वने सह महर्षिभिः ॥ ४ ॥
यानि दत्तानि तेऽस्त्राणि विश्वामित्रेण धीमता ॥ तानि त्वामभिरक्षन्तु गुणैः समुदितं सदा ॥५॥
पितृशुश्रूषया पुत्र मातृशुश्रूषया तथा ॥ सत्येन च महाबाहो चिरं जीवाभिरक्षितः ॥ ६ ॥
समित्कुशपवित्राणि वेद्यश्चायतनानि च ॥ स्थण्डिलानि [6]विचित्राणि शैला वृक्षाः [7]क्षुपा ह्रदाः ॥
[8]पतङ्गाः पन्नगाः सिंहास्त्वां रक्षन्तु नरोत्तम ॥ ७ ॥
स्वस्ति साध्याश्च विश्वे च मरुतश्च [9]महर्षयः ॥ स्वस्ति धाता विधाता च स्वस्ति पूषा भगोऽर्यमा ॥८॥
लोकपालाश्च ते सर्वे वासवप्रमुखास्तथा ॥ [10]ऋतवश्चैव पक्षाश्च मासास्संवत्सराः क्षपाः ॥ ९ ॥
दिनानि च मुहूर्ताश्च स्वस्ति कुर्वन्तु ते सदा ॥ [11]स्मृतिर्धृतिश्च धर्मश्च [12]पान्तु त्वां पुत्र सर्वतः ॥ १० ॥

हेतुत्वाद्देवताप्रार्थनस्य शुचिनाकर्तव्यत्वादुपस्पर्शनमुक्तं।अतएवशुचिरित्युच्यते। मङ्गलानि मङ्गलाशासनानि ॥ १ ॥ शीघ्रं विनिवर्तस्व चतुर्दशवर्षान्तइतिशेषः । सतांक्रमे अभिषेचने ॥ २ ॥ पालयसि अप्रच्युतमनुतिष्ठसि । धृत्या प्रीत्या । नियमेन समग्रतया । स वै प्रसिद्धोधर्मः । राघवशार्दूल रघुकुलश्रेष्ठ । अभिरक्षतु अभितोरक्षतु । पुनर्धर्मपदप्रयोगात्सएवरक्षत्विन्त्युच्यते ॥ ३ ॥ चैत्येषु चतुष्पथेषु । आयतनेषु देवतागृहेषु । ते देवाइतिसिद्धम् ॥ ४ ॥ समुदितं श्रेष्ठं ॥ ५—६ ॥ समिदित्यादिसार्धश्लोकएकान्वयः । वन्याःसमित्कुशादयः । प्रमादकृतप्रत्यवायसहिष्णवःसन्तोवनेचरन्तंभवन्तंरक्षन्त्वितिवाक्यार्थः । पवित्राणि दर्भग्रन्थयः । वेद्यः अग्निधिष्ण्यानि । स्थण्डिलानि देवपूजास्थलानि । तेषामलङ्कारभेदात्संस्थानभेदाद्वावैचित्र्यं । वृक्षग्रहणंलतादेरप्युपलक्षणं । क्षुपाः ह्रस्वशाखाशिफायुक्तावृक्षविशेषाः । “ह्रस्वशाखाशिफःक्षुपः” इत्यमरः । वृक्षविशेषणंवा । ह्रस्वशाखावृक्षेष्वेव प्रायशोदेवतास्संनिदधतइत्यैतिह्यात् । पतङ्गाः पक्षिणः ॥ ७ ॥ स्वस्तीत्यादि कुर्वन्त्वित्यनुषङ्गः । स्वस्तिधातेत्यादौकरोत्वित्यध्याहारः । साध्याः देवताविशेषाः । विश्वे विश्वेदेवाः। मरुतः वायवः। धातृविधातृशब्दौदेवताविशेषवाचकौ । पूषादिशब्दाः द्वादशसङ्ख्याकादित्यावान्तरभेदवाचकाः ॥ ८—९ ॥ मुहूर्तः दिनस्य त्रिंशोभागः । स्मृतिः ध्यानं । धृतिः ऐकाग्र्यं । निष्पन्नयोगइतियावत् । धर्मः श्रुतिस्मृत्युदितः । यंपालयसीत्यत्रपितृवाक्यपरिपालनजएवोक्तइतिनपुनरुक्तिः

तितानि पादसंवाहनादीनि । चकार करिष्यतिच । शुचिजलंभूत्वाप्रलयेतस्य अतारामस्य अतःप्राप्तःआरामोवनंयेनासौतथोक्तस्तस्य । अनिवर्त्यवनवासबुद्धित्वेनरामस्यप्राप्तेत्युक्तिः । इयंमनस्विनीकौसल्यामङ्गलानिस्वस्त्ययनानिचकारेतितु जलं जडं अज्ञं । उपस्पृश्यविषयीकृत्येत्यर्थः । “श्रीर्यत्ररूपिण्युरुगायपादयोः” इत्यादेः ॥ १ ॥ **शि०** वारयितुं गमनमितिशेषः । सतां महात्मनां । क्रमे मार्गे । प्रतिज्ञापालने ॥ २ ॥ **ति०** देवेष्वायतनेषु देवालयेषु । **शि०** देवेषु कान्तिमत्सु । आयतनेषु गृहेषु येभ्यःप्रणमसे ते देवाः । महर्षिभिःसह सहितं त्वांवनेऽभिरक्षन्तु । महर्षिभिस्सहदेवाअभिरक्षन्त्वित्यन्वयोवा ॥ ४ ॥ **सत्य०** गुणैःसमुदितं महोदयंप्राप्तं ॥ ५ ॥ **ति०** मातृशुश्रूषयेति । मातात्रकैकेयी । **सत्य०** पितृशुश्रूषया “पितामात्रा” इत्येकशेषेणमातृपितृशुश्रूषया । मातृशुश्रूषया ज्ञानिशुश्रूषया ॥ ६ ॥ **वि०** समिदादिपदेनतदधिष्ठात्र्योदेवताउपलक्ष्यन्ते ॥ ७ ॥ **ती०** धाता आधारकर्मप्रधानोभगवान्विराड्विष्णुः । विधाता स्रष्टा । सएवसर्गविधायकः प्रजापत्यात्मा । पूषाभगोर्यमेतिरेवत्यादिनक्षत्राधिदेवताः । **सत्य०** विधाता सृष्टिकर्ता । धाता अब्जयोनिः । पूषा सूर्यः । भगः ऐश्वर्यादिः । अर्य सर्वस्वामिन् राम । मा प्रमाणं ॥ ८ ॥ **सत्य०** मेत्युक्तंविवृणोति—**श्रुतिश्चेति** ॥ १० ॥

[**पा०**] १ ङ. छ—ट. शक्यते. २ घ. पथि. ३ ङ. छ. झ. ट. प्रीत्या. ४ ख. सुव्रताचरितःसाधुः. ५ देवेभ्या. ६ ङ. च. छ. झ. ञ. ट. चविप्राणां. ग. घ. ज. चचित्राणि. ७ च. ञ. ह्रदाःक्षुपाः. ८ घ. पतगाः. ९ ग—ट. महर्षिभिः. १० ङ. च. छ. झ. ञ. ट. ऋतवःषट्चतेसर्वे. ११ ङ. च. छ. झ. ञ. ट. श्रुतिःस्मृतिश्च. १२ ख. घ. ङ. पान्तुतां.

स्कन्दश्च भगवान्देवः सो[1]मश्च सबृहस्पतिः ॥ सप्तर्षयो नारदश्च ते त्वां रक्षन्तु सर्वतः ॥ ११ ॥
[2]यैश्चापि सर्वतः सिद्धाः दिशश्च सदिगीश्वराः ॥ स्तुता मया वने तस्मिन्पान्तु त्वां पुत्र नि[3]त्यशः ॥१२॥
शैलाः सर्वे समुद्राश्च राजा वरुण एव च ॥ द्यौरन्तरिक्षं पृथिवी न[4]द्यः सर्वास्तथैव च ॥ १३ ॥
[5]नक्षत्राणि च सर्वाणि ग्रहाश्च [6]सहदेवताः ॥ [7]अहोरात्रे तथा सन्ध्ये पान्तु त्वां वनमाश्रितम् ॥१४॥
ऋतवश्चै[8]व षट् पुण्या मासाः संवत्सरास्तथा ॥ कलाश्च[9] काष्ठाश्च तथा त[10]व शर्म दिशन्तु ते ॥ १५॥
[11]महावने विचरतो मुनिवेषस्य धीमतः ॥ [12]तवादित्याश्च दैत्याश्च भवन्तु सुखदास्सदा ॥ १६ ॥
राक्षसानां पिशाचानां रौ[13]द्राणां क्रूरकर्मणाम् ॥ क्रव्यादानां च सर्वेषां मा भूत्पुत्रक ते भयम् ॥१७॥
प्लवगा वृश्चिका दंशा मशकाश्चैव कानने ॥ सरीसृपाश्च कीटाश्च मा भूवन्गहने त[14]व ॥ १८ ॥
महाद्विपाश्च सिंहाश्च व्याघ्रा ऋक्षाश्च दंष्ट्रिणः ॥ महिषाः शृङ्गिणो रौद्रा न ते द्रु[15]ह्यन्तु पुत्रक॥१९॥
नृमांसभोजना रौद्रा ये चान्ये [16]सत्त्वजातयः ॥ मा च त्वां हिंसिषुः पुत्र मया संपूजितास्त्विह॥२०
आगमास्ते शिवाः सन्तु सिध्यन्तु च पराक्रमाः ॥ सर्वसंप[17]त्तये राम स्वस्तिमान्गच्छ पुत्रक ॥ २१॥
स्वस्ति तेऽस्त्वान्तरिक्षेभ्यः पार्थिवेभ्यः पुनःपुनः ॥ सर्वेभ्यश्चैव देवेभ्यो [18]ये च ते परिपन्थिनः ॥२२॥
[19]गुरुः सोमश्च सूर्यश्च धनदोथ यमस्तथा ॥ पान्तु त्वामर्चिता राम दण्डकारण्यवा[20]सिनम् ॥ २३ ॥

॥१०॥ स्कन्दः सनत्कुमारः । "तंस्कन्दइत्याचक्षते" इतिदहरविद्यायांतथाभिधानात् । कुमारोवा ॥ ११ ॥ सर्वतःसिद्धाः प्रसिद्धाः ॥ १२ ॥ शैलाः कुलपर्वताः । समुद्रसन्निधानात् । राजा कुबेरः ॥ १३ ॥ ग्रहाः कुजादयः । सहदेवताः तदभिमानिदेवतासहिताः । अहोरात्रे तदभिमानिदेवते । अतोनपुनरुक्तिः ॥१४॥ ऋतुमासादिशब्दास्तदधिदेवतापराः । केचिदाहुः । अस्मिन्प्रकरणेप्रायशःपुनरुक्तयःपुत्ररक्षणविषयप्रेमपारवश्यकृताइति । शर्म सुखं । "शर्मशातसुखानिच" इत्यमरः ॥ १५ ॥ आदित्याः देवाः ॥ १६ ॥ राक्षसानामिति राक्षसादिसंबन्धिभयं । संबन्धसामान्येषष्ठी । तेभ्योभयमित्यर्थः ॥ १७ ॥ प्लवगाः वानराः । दंशाः वनमक्षिकाः । "दंशस्तुवनमक्षिका" इत्यमरः । सरीसृपाः गिरिसर्पाः । गहने वने । माभूवन् हिंसकामाभूवन्नित्यर्थः ॥ १८ ॥ ऋक्षाः भल्लूकाः । नतेद्रुह्यन्तु । "क्रुधद्रुह–" इत्यादिनाचतुर्थी ॥ १९ ॥ सत्वजातयः सत्वस्यजातिर्जन्मयेषुतेसत्वजातयः । क्रूरजन्तवइत्यर्थः ॥ २० ॥ आगम्यन्तइत्यागमाः मार्गाः । सर्वसंपत्तये वन्यफलमूलादिसंपत्तये ॥ २१ ॥ आन्तरिक्षेभ्यः अन्तरिक्षचारिभ्यः । पार्थिवेभ्यः पृथिवीवर्तिभ्यः सकाशात् । परिपन्थिनः शत्रवः ॥ २२ ॥ गुरुरित्यादि पृथक्पृथक्मिलिताश्चरक्षन्त्वित्यर्थइति

शि० सोमः उमासहितः । देवो महादेवः ॥ ११ ॥ **सत्य०** तस्मिन्वने कानने । अकारप्रश्लेषेण अवने रक्षणविषये । मयास्तुताइत्यनेनान्वयः । नित्यशः सदामोदः यः तंत्वांपान्तु ॥ १२ ॥ **सत्य०** षड्ऋतवश्चान्यइत्यनेनविध्वादिमानसंबन्धिभ्योन्येग्राह्याः । देवादिमानेनयेऋतवोमासास्संवत्सराःकलाःकाष्ठाश्चेत्यन्वयः । एवंचेन्नपुनरुक्तिः अन्यपदस्वारस्यंचेतिज्ञेयम् ॥ १५ ॥ **सत्य०** क्रव्यादानां कृतविकृतपक्वमांसभुजां । यथोक्तंकाशिकायां "कृतविकृतपक्वशब्दस्यक्रव्यादेशः" इति । शब्दार्णवेपि "क्रव्यादः कृतपक्वमांसभुगुच्यते" इति ॥ १७ ॥ **ति०** सर्वजातियाः सर्वजातीयाः ॥ २० ॥ **शि०** आगमाः आगमनानुकूलव्यापाराः । शिवाः मङ्गलविशिष्टाः । विजयपूर्वकाइत्यर्थः । सन्तु । पराक्रमाः सिध्यन्तु सफलाभवन्तु ॥ २१ ॥ **सत्य०** आन्तरिक्षेभ्यः अशन्यादिभ्यः । पार्थिवेभ्यः भूकंपादिभ्यः । मयाअर्चिताइतिहेतोःतेपरिपन्थिनः । शुक्रायास्ते त्वांपान्तु इतिवा ॥ २२ ॥

[पा०] १ ञ. सोमश्चेन्द्रो. क. च. सोमश्चन्द्रो. २ क. ख. ङ—ट. तेचापि. ग. घ. येचापि. ३ घ. सर्वशः. ४ ङ. च. छ. झ. ञ. ट. वायुश्चसचराचरः. ५ इदमर्धं दशमश्लोके तेसदा. इत्यतःपरं च. ञ. पुस्तकयोर्दृश्यते. ६ ग. घ. ङ. ज—ट. सहदैवतैः. क. च. छ. ग्रहदेवताः. ७ ख. अहोरात्रं. ८ छ. झ. ट. श्चापिषट्चान्ये. ९ ख. श्चैवतथाकाष्ठाः. १० घ. सदा. ११ क—घ. ज. महावनानि. ङ. छ. झ. महावनेपि. १२ ङ. च. छ. ञ. तथादित्याश्च. झ. तथादेयाश्च. १३ क. च. ञ. दैत्यानां. १४ ग. वने. १५ ख. दुष्यन्तु. १६ झ. सर्वजातियाः. १७ क. घ. ङ. छ—ट. संपत्तयो. १८ घ. ज. येचैव. १९ क. ख. घ. ङ. च. छ. झ. ञ. ट. शुक्रः. ग. ज. शक्रः. २० ग. घ. ज. माश्रितम्.

अग्निर्वायुस्तथा धूमो मन्त्राश्चर्षिमुखाच्च्युताः ॥ उपस्पर्शनकाले तु पान्तु त्वां रघुनन्दन ॥ २४ ॥
सर्वलोकप्रभुर्ब्रह्मा भूतभर्ता तथर्षयः ॥ ये च शेषाः सुरास्ते त्वां रक्षन्तु वनवासिनम् ॥ २५ ॥
इति माल्यैः सुरगणान्गन्धैश्चापि यशस्विनी ॥ स्तुतिभिश्चानुकूलाभिरानर्चायतलोचना ॥ २६ ॥
ज्वलनं समुपादाय ब्राह्मणेन महात्मना ॥ हावयामास विधिना राममङ्गलकारणात् ॥ २७ ॥
घृतं श्वेतानि माल्यानि समिधः श्वेतसर्षपान् ॥ उपसंपादयामास कौसल्या परमाङ्गना ॥ २८ ॥
उपाध्यायः स विधिना हुत्वा शान्तिमनामयम् ॥ हुतहव्यावशेषेण बाह्यं बलिमकल्पयत् ॥ २९ ॥
मधुदध्यक्षतघृतैः स्वस्ति वाच्य द्विजांस्ततः ॥ वाचयामास रामस्य वने स्वस्त्ययनक्रियाः ॥ ३० ॥
ततस्तस्मै द्विजेन्द्राय राममाता यशस्विनी ॥ दक्षिणां प्रददौ काम्यां राघवं चेदमब्रवीत् ॥ ३१ ॥
यन्मङ्गलं सहस्राक्षे सर्वदेवनमस्कृते ॥ वृत्रनाशे समभवत्तत्ते भवतु मङ्गलम् ॥ ३२ ॥
यन्मङ्गलं सुपर्णस्य विनताऽकल्पयत्पुरा ॥ अमृतं प्रार्थयानस्य तत्ते भवतु मङ्गलम् ॥ ३३ ॥
अमृतोत्पादने दैत्यान्घ्नतो वज्रधरस्य यत् ॥ अदितिर्मङ्गलं प्रादात्तत्ते भवतु मङ्गलम् ॥ ३४ ॥
त्रीन्विक्रमान्प्रक्रमतो विष्णोरमिततेजसः ॥ यदासीन्मङ्गलं राम तत्ते भवतु मङ्गलम् ॥ ३५ ॥
ऋतवः सागरा द्वीपा वेदा लोका दिशश्च ते ॥ मङ्गलानि महाबाहो दिशन्तु शुभमङ्गलाः ॥ ३६ ॥
इति पुत्रस्य शेषांश्च कृत्वा शिरसि भामिनी ॥ गन्धैश्चापि समालभ्य राममायतलोचना ॥ ३७ ॥
ओषधीं चापि सिद्धार्थां विशल्यकरणीं शुभाम् ॥ चकार रक्षां कौसल्या मन्त्रैरभिजजाप च ॥ ३८ ॥

नपुनरुक्तिः ॥ २३ ॥ ऋषिमुखाच्च्युताः निर्गताः । त्वयागृहीताश्चेतिशेषः ॥ २४ ॥ भूतभर्ता नारायणः ॥ २५ ॥ इतीत्यत्रमत्वेतिशेषः ॥ २६—२७ ॥ उपसंपादयामास होमायेतिशेषः ॥ २८ ॥ शान्तिं सर्वोपद्रवशान्तिं अनामयं आरोग्यं च । उद्दिश्येतिशेषः । हुतहव्यावशेषेण हुतहविःशेषेण । बाह्यं होमस्थानाद्बहिर्भवं ॥ २९ ॥ मध्वादिद्रव्यदक्षिणाभिर्दत्ताभिर्द्विजान् स्वस्तिवाच्य पुण्याहं वाचयित्वेत्यर्थः । स्वस्त्ययनक्रियाः स्वस्त्ययनक्रियाप्रतिपादकमन्त्रानित्यर्थः ॥ ३० ॥ काम्यां अभीष्टां ॥ ३१ ॥ वृत्रनाशे वृत्रनाशनिमित्ते ॥ ३२—३४ ॥ विक्रमान् पादविक्षेपान् ॥ ३५ ॥ शुभमङ्गलाः मङ्गलानामपिमङ्गलाः । मङ्गलद्रव्याणामप्यतिशयदायकाइत्यर्थः ॥ ३६ ॥ शेषान् अक्षतानि । गन्धैश्च समालभ्य विलिप्य । "समालंभोविलेपनं" इत्यमरः । सिद्धार्थां दृष्टफलां। विशल्यकरणींच अन्तर्गतशल्यनिर्गमनकारिणींच । ओषधीं मूलिकां । मन्त्रैरभिमन्त्र्य रक्षांचकार । रक्षाहेतुत्वेनहस्तेवबन्धेत्यर्थः । पुनर्जजापच ॥ ३७—३८ ॥

शि० उपस्पर्शनकाले अस्पृश्यस्पर्शनसमये । अग्न्यादयः ऋषिमुखच्युताः महात्मोपदिष्टाः मन्त्राश्चत्वांपान्तु ॥ २४ ॥ **ति०** भूतकर्तृ ब्रह्म जगत्कारणं ब्रह्मेत्यर्थः ॥ २५ ॥ **सत्य०** सर्षपान् श्वेतसर्षपान् ॥ २८ ॥ **ति०** बाह्यंबलिं होमस्थानाद्बहिर्भूतंलोकपालादिबलिं ॥ २९ ॥ **ति०** स्वस्तिवाच्यं स्वस्तिवाचनमुद्दिश्य । मध्वादिभिरुपलक्षितान्द्विजान्कृत्वा ॥ ३० ॥ **शि०** यत् यादृशं मङ्गलंविजयइत्यर्थः । वृत्रनाशे वृत्रासुरवधसमये । सर्वदेवनमस्कृते सहस्राक्षे इन्द्रे । समभवत् । तादृशंमङ्गलंतेभवतु ॥ ३२ ॥ **सत्य०** शेषाः निजनिर्माल्यानि । "प्रसादनिजनिर्माल्यवनेशेषाचकीर्तिता" इतिविश्वः ॥ ३७ ॥ **शि०** सुसिद्धार्थां सुसिद्धःपरीक्षितः अर्थोयस्यास्तां । रिपुबाणभेदनकर्त्रीत्यन्वर्थसंज्ञावतीमित्यर्थः । विशल्यकरणीं ओषधिं ॥ ३८ ॥

[पा०] १ ङ. छ. झ. ट. मुख्यच्युताः. २ ङ. छ. झ. भूतकर्तृ. ञ. ट. भूतकर्ता. ३ ख. ङ. च. छ. झ. ञ. ट. स्तेतु. ४ घ. माश्रितम्. ५ क. ख. ग. घ—ट. श्चानुरूपाभिः. ६ क—घ. ज. समुपाधाय. ७ ज. विधिवत्. ८ छ. झ. ट. ठ. समिधश्चैव. ९ च. झ. ञ. वाच्यं. १० क—घ. च—ट. क्रियाम्. ११ ग. घ. ज. रम्यां. १२ क—घ. च—ट. त्रिविक्रमान्. १३ च. छ. झ. ञ. ट. रतुल. १४ झ. ट. ऋषयः. १५ ज. झ. श्रुताः. १६ क. ख. च. छ. झ. ञ. ट. शुभमङ्गलम्. ग. ज. तवकानने. १७ छ. झ. शेषाश्च. १८ च. झ. ञ. ट. औषधींचसुसिद्धार्थां. क. ओषधीश्चापिसिद्धार्थाः. ग. औषधं चापिसिद्धार्थं.

[1]उवाचातिप्रहृष्टेव सा दुःखवशवर्तिनी ॥ वाङ्मात्रेण न भावेन वाचाऽसंसज्जमानया ॥ ३९ ॥
आनम्य मूर्ध्नि चाघ्राय परिष्वज्य यशस्विनी ॥ अवदत्पुत्र सिद्धार्थो[2] गच्छ राम यथासुखम् ॥४०॥
अरोगं सर्वसिद्धार्थमयोध्यां पुनरागतम् ॥ पश्यामि त्वां[3] सुखं वत्स सुस्थितं[4] राजवर्त्मनि[5] ॥ ४१ ॥
*प्रनष्टदुःखसङ्कल्पा हर्षविद्योतितानना ॥ द्रक्ष्यामि त्वां वनात्प्राप्तं पूर्णचन्द्रमिवोदितम् ॥ ४२ ॥
[6]भद्रासनगतं राम वनवासादिहागतम् ॥ द्रक्ष्यामि च[7] पुनस्त्वां तु तीर्णवन्तं पितुर्वचः ॥ ४३ ॥
मङ्गलैरुपसंपन्नो[8] वनवासादिहागतः ॥ वध्वा[9] मम च नित्यं त्वं कामान्संवर्ध याहि भो[10] ॥ ४४ ॥

मयाऽर्चिता देवगणाः[11] शिवादयो महर्षयो भूतमहासुरोरगाः ॥
अभिप्रयातस्य वनं चिराय ते हितानि[12] काङ्क्षन्तु दिशश्च राघव ॥ ४५ ॥
[13]इतीव चाश्रुप्रतिपूर्णलोचना समाप्य च स्वस्त्ययनं यथाविधि ॥
प्रदक्षिणं [14]चैव चकार राघवं पुनः पुनश्चापि निपीड्य[15] सस्वजे ॥ ४६ ॥
[16]तथा तु देव्या[17] स कृतप्रदक्षिणो निपीड्य मातुश्चरणौ पुनः पुनः ॥
जगाम सीतानिलयं महायशास्स राघवः प्रज्वलितः स्वया[18] श्रिया ॥ ४७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे पञ्चविंशः सर्गः ॥ २५ ॥

अतिप्रहृष्टेव दुःखवशवर्तिन्यपिपुत्रमुखोल्लासार्थमतिसंतुष्टेवभावयन्तीत्यर्थः ।असंसज्जमानया स्खलन्त्येत्यर्थः ॥३९॥ केनप्रकारेणोवाचेत्यत्राह—आनम्येति । आनम्य आनमय्य । सिद्धार्थः सिद्धप्रयोजनः । गच्छेत्यत्रेतिकरणंद्रष्टव्यम् ॥ ४० ॥ सर्वसिद्धार्थं सिद्धसर्वप्रयोजनं । पश्यामि द्रक्ष्यामि ॥ ४१ ॥ प्रनष्टदुःखसङ्कल्पा सङ्कल्पःमानसंकर्म । वनेरामस्यकिंभविष्यतीतिचिन्तात्मकइत्यर्थः ॥ ४२—४३ ॥ वध्वाः स्नुषायाःसीतायाः । कामान् काम्यमानवस्त्राभरणादीनि ॥४४–४५॥ तदाकौसल्योक्तस्यवाचामगोचरत्वादाह—इतीवेत्यादि । इतीव एवंविधमित्यर्थः । प्रदक्षिणं अनुकूलं । रक्षामितियावत् ॥ ४६ ॥ निपीड्य निपीडनपूर्वकमभिवाद्येत्यर्थः । स्वया स्वतःसिद्धया ॥ ४७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीतांबराख्याने अयोध्याकाण्डव्याख्याने पञ्चविंशः सर्गः ॥ २५ ॥

ति० उवाचापि मन्त्रानितिशेषः । जपोत्तरंस्पष्टमपिमन्त्रानुच्चारयामासेत्यर्थः । एतच्चतन्मन्त्रार्थानुसंधानेनरामस्यहृत्प्रसादार्थं । संसज्जमानया आन्तरखेदगद्गदया ॥ ३९ ॥ ती० मङ्गलैः राजोचितवस्त्राभरणादिभिः । संवर्ध संवर्धय । शि० संवर्ध अनुदात्तेत्वप्रयुक्तात्मनेपदस्यानित्यत्वात्परस्मैपदम् ॥ ४४ ॥ ती० रक्षार्थमेवपुत्रस्यप्रदक्षिणम् ॥ ४६ ॥ ति० तयाश्रिय। मातृकृतमङ्गलजशोभया ॥ ४७ ॥ इतिपञ्चविंशस्सर्गः ॥ २५ ॥

[पा०] १ क—घ. ज. उवाचाभि. च. छ. झ. ञ. ट. उवाचापि. २ छ. झ. ट. सिद्धार्थां. ३ ख. त्वांकदा. क. त्वामहं. ४ छ. झ. ट. संश्रितं. ५ ञ. च. वर्त्मसु. * ४२ ४३ एतच्छ्लोकद्वयं झ. ट. ठ. पुस्तकेपुनदृश्यते. ६ क. ख. च. ञ. भद्रंभद्रासनगतं. ७ घ. च. त्वांसुहृत्पुत्र. क. त्वामहंवत्स. ख. ग. ज. त्वामहंपुत्र. ८ ख. रभिसंपन्नो. ९ घ. च. झ. ञ. ट. वध्वाश्चमम. च. तथाचमम. ग. बध्वाचमम. १० क. च. यप्रभो. ग. घ. यामिभो. ख. यस्वभो. झ. ट. याहिभोः. ११ ग. झ. ञ. ट. भूतगणाःसुरोरगाः. १२ ग. घ. हितानिकुर्वन्तु. ज. हितायकुर्वन्तु. क. च. हितायकाङ्क्षन्तु. १३ च. छ. झ. ञ. ट. अतीव. १४ च. छ. झ. ञ. चापि. १५ छ. झ. ञ. ट. निरीक्ष्य. १६ च. छ. ञ. ट. तथाहि. ज. तथास. घ. यथाच. क. ग. तथाच. झ. तयाहि. १७ क. ख. ग. च—ट. देव्याच. घ. देव्यासु. १८ च. स्तथाश्रिया. छ. झ. ञ. ट. स्तयाश्रिया. क. ख. श्रियास्वया.

षड्विंशः सर्गः ॥ २६ ॥

श्रीरामस्ययौवराज्याभिषेकविघ्नमजानन्त्यासीतयाहर्षेणदेवताराधनपूर्वकंतदागमनप्रतीक्षणम् ॥१॥ तथाऽभिषेकविघ्नसंजातलज्जयासुखावनमनेनगृहंप्रविष्टस्यरामस्यमुखवैवर्ण्यंपश्यन्त्यातयारामंप्रतिसविलापंतत्कारणप्रश्नः ॥२॥ श्रीरामेणजानकींप्रतिस्वमुखवैवर्ण्यस्यकारणनिवेदनेनस्ववनवासस्यावधिनिवेदनपूर्वकंतावत्कालंदशरथादिसेवाया भरतानुवर्तनस्यचविधानम् ॥३॥

अभिवाद्य[1] च कौसल्यां रामः संप्रस्थितो वनम् ॥ कृतस्वस्त्ययनो मात्रा धर्मिष्ठे वर्त्मनि स्थितः ॥ १ ॥
विराजयन्राजसुतो राजमार्गं नरैर्वृतम् ॥ हृदयान्याममन्थेव जनस्य गुणवत्तया ॥ २ ॥
वैदेही चापि तत्सर्वं न शुश्राव तपस्विनी ॥ तदेव हृदि तस्याश्च यौवराज्या[2]भिषेचनम् ॥ ३ ॥
देवकार्यं स्वयं[3] कृत्वा कृतज्ञा हृष्टचेतना ॥ अभिज्ञा राजधर्माणां राजपुत्रं[4] प्रतीक्षते ॥ ४ ॥
प्रविवेशाथ रामस्तु [5]स्वं वेश्म सुविभूषितम् ॥ प्रहृष्टजनसंपूर्णं ह्रिया किञ्चिदवाङ्मुखः ॥ ५ ॥
अथ सीता समुत्पत्य वेपमाना च तं पतिम् ॥ अपश्यच्छोकसंतप्तं चिन्ताव्याकुलितेन्द्रियम् ॥ ६ ॥
तां दृष्ट्वा स हि धर्मात्मा न शशाक मनोगतम् ॥ तं शोकं राघवः सोढुं ततो विवृततां गतः ॥७॥
विवर्णवदनं दृष्ट्वा तं प्रस्विन्नममर्षणम् ॥ आह दुःखाभिसंतप्ता किमिदानीमिदं प्रभो ॥ ८ ॥
अद्य बार्हस्पतः[6] श्रीमान्युक्तः[7] पुष्यो नु राघव ॥ प्रोच्यते ब्राह्मणैः प्राज्ञैः केन त्वमसि दुर्मनाः ॥ ९॥

एवंमातरमनुमान्यसीतामनुमानयितुंनिर्गच्छति । अभिवाद्येत्यादिश्लोकद्वयमेकंवाक्यम् । वनंसंप्रस्थितः वनंगन्तुंप्रवृत्तः । धर्मिष्ठे अतिशयितधर्मे ॥ १ ॥ आममन्थेव विलोडयामासेत्यर्थः । गुणवत्तया पूर्वभाषीप्रियवादीचेत्याद्युक्तगुणविशिष्टतया ॥ २ ॥ तत्सर्वं अभिषेकविघातादिकं । तपस्विनी रामाभिषेकार्थव्रतोपवासादिनियमविशिष्टा । यौवराज्याभिषेचनं वर्ततइतिशेषः ॥ ३ ॥ देवकार्यं देवपूजां । कृतज्ञा अभिषिक्तभर्तृविषयेपट्टमहिषीभिःगन्धपुष्पादिनाकृतपादार्चनादिसमाचारज्ञेत्यर्थः । हृष्टचेतना हृष्टमनस्का । राजधर्माणामभिज्ञा अभिषिक्तराजासाधारणलक्षणानिश्वेतच्छत्रचामरपुरस्कृतभद्रासनादीन्निज्ञातवती । प्रतीक्षतेस्म उक्तलक्षणविशिष्टोभर्ताकदासमागमिष्यतीत्यपेक्षयास्थितवतीत्यर्थः ॥ ४ ॥ ह्रिया गृहालङ्कारजनहर्षजया ॥ ५ ॥ समुत्पत्य स्वासनादुत्थाय । वेपमाना भर्तुर्विगतहर्षत्वाद्वाङ्मुखत्वादिदर्शनात्कंपमानेत्यर्थः ॥ ६ ॥ ततः सोढुमशक्तत्वादेव । विवृततां व्यक्तदुःखतां । एतावत्पर्यन्तंशोकलेशहीनस्यरामस्येदानींशोकाविर्भावः सीतायाभाविदुःखस्मरणेनेतिबोध्यम् ॥ ७ ॥ प्रस्विन्नं हस्तगतराज्यस्यान्यगामित्वं स्ववनप्रव्राजनंचकथमस्यैनिवेदयिष्यामीतिशोकेनप्रस्वेदः । अमर्षणं संजातदुःखंनियन्तुमशक्तं । इदानीं हर्षकाले । इदं दौस्थ्यम् ॥८॥ बार्हस्पतः बृहस्पतिदैवत्यः । उक्तःअभिषेकार्हत्वेनविहितः । युक्तइतिपाठेअभिषेकार्हः । श्रीमान् कर्मारब्धवतांश्रीकरः । पुष्यः पुष्यनक्षत्रं । अद्येति ब्राह्मणैः प्रोच्यतेनु प्रोच्यतेख-

सत्य० धर्मिष्ठे पितृवचनपरिपालनरूपे ॥ १ ॥ शि० तपस्विनी सर्वविषयकनित्यज्ञानविशिष्टा । वैदेही तत्सर्वं सवृत्तगमनं शुश्राव । तत् वनगमनमेव । तस्याहृदि आसीदितिशेषः । अतएवराज्याभिषेचनंहृदिनासीत् ॥ ३ ॥ शि० कृतज्ञा देवादिप्रार्थनावेदित्री ॥ ४ ॥ ति० ह्रिया सीतायैकथमिदमन्याय्यंस्वमातापितृकृतंकथयामीतिलज्जया । सत्य० ह्रिया अभिषेकार्थंसन्नद्धस्यारण्यंप्रत्युद्युक्तत्वाल्लज्जयेत्यर्थः । शि० ह्रिया पित्राद्याज्ञापनमन्तराइमांकथंसहनेष्यामीतिलज्जया । अवाङ्मुखः नवाक् वचनंयस्मिंस्तत्मुखंयस्यसरामः ॥५॥ ती० विवृततां व्यक्तदुःखतां । गतः प्राप्तइत्यर्थः । मयिवनंगतेसति अदुःखार्हासीतादुःखेनकथंकालंनयिष्यतीतिधिया संजातदुःखोऽभूदित्यर्थः । "व्यसनेषुमनुष्याणांभृशंभवतिदुःखितः" इत्युक्तेः । ति० यद्वा सरामोविवृतताभिप्रायंगतः । शुद्धमुक्तस्वभावोपिमायाख्यप्रकृत्यवतारसीतासांनिध्यादुद्बुद्धविक्षेपशक्तिरिवजातइत्यर्थः । अनेनहिनाट्येन प्रियायाअग्रेनकिंचित्पुंसोगोप्यमितिलोकव्यवहारोदर्शितः । सत्य० सःशोकः विवृततांव्यक्ततांगतः ॥ ७ ॥ ती० युक्तः चन्द्रेणेतिशेषः । सत्य०

[पा०] १ क—घ. च. ज. वाद्यतु. २ घ. राज्येऽभि. ३ क—घ. च—ट. स्वसा. ४ झ. पुत्रीप्रतीक्षती. क. पुत्रं प्रतीक्षती. ५ क. ग. घ. च—ट. स्ववेश्म. ६ क. घ. ज. बार्हस्पत्यः. ७ क. छ. झ. ञ. न्युक्तःपुष्येण.

न ते शतशलाकेन जलफेननिभेन च ॥ आवृतं वदनं वल्गु [1]छत्रेणापि विराजते ॥ १० ॥
व्यजनाभ्यां च मुख्याभ्यां शतपत्र[2]निभेक्षणम् ॥ चन्द्रहंसप्रकाशाभ्यां वीज्यते न तवाननम् ॥ ११ ॥
वाग्मिनो बन्दिनश्चापि प्रहृष्टास्त्वां नरर्षभ ॥ स्तुवन्तो [3]नात्र दृश्यन्ते मङ्गलैः सूतमागधाः ॥ १२ ॥
न ते क्षौद्रं च दधि च ब्राह्मणा वेदपारगाः ॥ मूर्ध्नि [4]मूर्धाभिषिक्तस्य [5]दधति स्म विधानतः ॥ १३ ॥
न [6]त्वां प्रकृतयः सर्वाः श्रेणीमुख्याश्च [7]भूषिताः ॥ अनुव्रजितुमिच्छन्ति पौरजानपदास्तथा ॥ १४ ॥
चतुर्भिर्वेगसंपन्नैर्हयैः काञ्चन[8]भूषितैः ॥ मुख्यः [9]पुष्यरथो युक्तः किं न गच्छति तेऽग्रतः ॥ १५ ॥
न हस्ती चाग्रतः [10]श्रीमांस्तव लक्षणपूजितः ॥ प्रयाणे लक्ष्यते वीर कृष्णमेघगिरिप्रभः ॥ १६ ॥
न च काञ्चनचित्रं ते पश्यामि [11]प्रियदर्शन ॥ भद्रासनं पुरस्कृत्य [12]यान्तं वीर[13]पुरस्कृतम् ॥ १७ ॥
अभिषेको [14]यथा सज्जः किमि[15]दानीमिदं तव ॥ अपूर्वो मुखवर्णश्च न प्रहर्षश्च लक्ष्यते ॥ १८ ॥
इतीव विलपन्तीं तां प्रोवाच रघुनन्दनः ॥ सीते तत्रभवांस्तातः प्रव्राजयति मां वनम् ॥ १९ ॥
कुले महति संभूते धर्मज्ञे धर्मचारिणि ॥ शृणु जानकि येनेदं क्रमे[16]णाभ्यागतं मम ॥ २० ॥
राज्ञा सत्यप्रतिज्ञेन पित्रा दशरथेन [17]च ॥ कैकेय्यै [18]मम मात्रे तु पुरा दत्तौ महावरौ ॥ २१ ॥
तयाऽद्य मम सज्जेऽस्मिन्नभिषेके नृपोद्यते ॥ [20]प्रचोदितः ससमयो धर्मेण प्रतिनिर्जितः ॥ २२ ॥

ल्वित्यर्थः । अन्वितिच्छित्त्वाअनुप्रोच्यतइतिवासंवन्धः ॥ ९ ॥ शतंशलाकायस्यतेन । स्थलस्थत्वेनमालिन्यं व्यावर्तयितुंजलपदं । वल्गु सुन्दरं । आवृतंसन्नविराजतइतिसंवन्धः ॥ १० ॥ व्यजनाभ्यां वालव्यजनाभ्यां । शतपत्रं पद्मम् ॥११॥ वन्दिनः स्तुतिपाठकाः । " वन्दिनःस्तुतिपाठकाः " इत्यमरः । मङ्गलैः मङ्गलवचनैः । सूताः पुरावृत्तकथाशंसिनः । मागधाः वंशशंसकाः ॥ १२ ॥ क्षौद्रं मधु । मूर्ध्निनदधतिस्म नाभिषिञ्चन्तिस्मेत्यर्थः ॥ १३ ॥ प्रकृतयः अमात्यादयः । श्रेणीमुख्याः वीथीप्रधानाः ॥ १४ ॥ पुष्यरथः उत्सवायकल्पितोरथइत्यर्थः । "असौपुष्यरथश्चक्रयानंनसमरराययत् " इत्यमरः । सहिराज्ञामग्रतो नीयतेकेवलंसंभ्रमाय ॥ १५ ॥ कृष्णमेघगिरिप्रभः कृष्णमेघयुक्तगिरिप्रभः । उभयोरुपमानत्वेवैषम्यापत्तिः ॥ १६ ॥ वीरपुरस्कृतंभद्रासनंपुरस्कृत्य तेयातं गमनं । नपश्यामीत्यन्वयः ॥ १७ ॥ यथाअभिषेकः सज्जः सन्नद्धः । इदानींतथैवेत्यर्थः । तवापूर्वोमुखवर्णोदृश्यते । प्रहर्षश्चनलक्ष्यते । किमिदमितिसंबन्धः ॥१८॥ विलपन्तीं विविधंलपन्तीं । तत्रभवान्पूज्यः । "तत्रभवानत्रभवानितिशब्दोवैप्रयुज्यतेपूज्ये" इतिहलायुधः । प्रव्राजयतीत्यनन्तरमितीतिशेषः ॥१९॥ महतोप्रियस्यश्रवणेसीतायाःकिंभविष्यतीतिभयात्चित्तदार्ढ्यार्थंविविधगुणकीर्तनेनसंबोधयति—कुलइत्यादि। इदं प्रव्राजनं । येनक्रमेण येनमार्गेण ॥ २०—२१ ॥ अद्यनृपोद्यतेममाभिषेकेसज्जेसति प्रचोदितः पूर्वदत्तं वरद्वयंदेहीतिप्रकर्षेणप्रेरितः। ससमयः त्वदपेक्षितंकरि-

युक्तः शोभनइत्यनुप्रोच्यते ॥ ९ ॥ शि० मुख्याभ्यां चक्रवर्त्यसाधारणाभ्यां ॥ ११ ॥ स० मूर्धाभिषिक्तस्य शिरस्स्नातस्य । राज्याभिषेकस्याद्याप्यभावादितिवोध्यम् ॥ १३ ॥ ति० श्रेणीमुख्याः परिषन्मुख्याः । सर्वत्रतत्कुतइतिशेषः ॥ १४ ॥ ति० पुष्परथः प्रचुरपुष्पभूषितरथविशेषः ॥ १५ ॥ ती० कृष्णमेघप्रभोगिरिप्रभश्च ॥ १६ ॥ ति० भद्रासनंपुरस्कृत्ययान्तं ते पुरस्सरं अग्रगंसेवकं । नपश्यामि ॥ १७ ॥ ती० यदा यस्मात् ॥ १८ ॥ शि० विलपन्तीं विविधंपृच्छन्तीं ॥ १९ ॥ शि० वरेमहत्त्वंलनिवार्यत्वेन ॥ २१ ॥ ति० ससमयः प्राचीनोवरसंकेतः । प्रचोदितः प्रवर्तितः ॥ २२ ॥

[पा०] १ क. ख. घ. छ. झ. ञ. च्छत्रेणाभि. २ ग. च. ज. निभेक्षण. ३ क. ग. च. ट. नाद्य. ४ क. ख. घ. मूर्धावसिक्तस्य. ५ क. ख. ग. च. छ. झ. ञ. ट. ददति. ६ ख. ग. घ. त्वा. ७ ख. भूषितम्. ८ क—घ. च. छ. झ. ञ. ट. भूषणैः. ९ झ. ट. ठ. पुष्यरथः. १० च. छ. झ. ञ. ट. श्रीमान्सर्वे. ११ च. छ. प्रियदर्शनम्. १२ क. ख. च. ज—ट. यान्तं. १३ ख. घ. च—झ. ट. पुरस्सरम्. १४ क. ग. घ. च—ट. यदा. १५ ख. मिदानीमयं. क. मिदानीं तवानघ. १६ ट. क्रमेणाद्य. च. झ. ञ. क्रमेणाद्या. १७ ठ. स्वयं. १८ च. छ. झ. ञ. ट. वै. घ. ज. मे. १९ ट. ममपित्राद्य. ख. ग. घ. ज. प्रीतमनसा. २० घ. प्रबोधितः.

चतुर्दश हि वर्षाणि वस्तव्यं दण्डके मया ॥ पित्रा मे भरतश्चापि यौवराज्ये नियोजितः ॥ २३ ॥
सोहं त्वामागतो द्रष्टुं प्रस्थितो विजनं वनम् ॥ भरतस्य समीपे [1]तु नाहं कथ्यः कदाचन ॥ २४॥
[2]ऋद्धियुक्ता हि पुरुषा न सहन्ते परस्तवम् ॥ तस्मान्न ते गुणाः [3]कथ्या भरतस्याग्रतो मम ॥ २५ ॥
[4]नापि त्वं तेन भर्तव्या विशेषेण कदाचन ॥ अनुकूलतया शक्यं समीपे [5]त्वस्य वर्तितुम् ॥ २६ ॥
तस्मै दत्तं नृपतिना यौवराज्यं सनातनम् ॥ स प्रसाद्यस्त्वया सीते नृपतिश्च विशेषतः ॥ २७ ॥
अहं चापि [6]प्रतिज्ञां तां गुरोः समनुपालयन् ॥ वनमद्यैव यास्यामि [7]स्थिरा भव मनस्विनी ॥ २८ ॥
याते च मयि कल्याणि वनं मुनिनिषेवितम् ॥ व्रतोपवासपरया भवितव्यं त्वयाऽनघे ॥ २९ ॥
[9]काल्यमुत्थाय देवानां कृत्वा पूजां यथाविधि ॥ वन्दितव्यो दशरथः पिता मम [10]नरेश्वरः ॥ ३० ॥
[11]माता च मम कौसल्या वृद्धा संतापकर्शिता ॥ धर्ममेवाग्रतः कृत्वा त्वत्तः संमानमर्हति ॥ ३१ ॥
वन्दितव्या[12]श्च ते नित्यं [13]याः शेषा मम मातरः ॥ स्नेहप्रणयसंभोगैः समा हि मम मातरः ॥ ३२ ॥
भ्रातृपुत्रसमौ चापि द्रष्टव्यौ च विशेषतः ॥ [14]त्वया भरतशत्रुघ्नौ प्राणैः प्रियतरौ मम ॥ ३३ ॥

ष्यामीतिकृतशपथइत्यर्थः । " समयाःशपथाचारकालसिद्धान्तसंविदः " इत्यमरः । धर्मेणप्रतिनिर्जितः कर्तृभूतधर्मेणस्वायत्तीकृतइत्यर्थः ॥ २२ ॥ ततःकिमित्यत्राह—चतुर्दशेति । मया पितृचोदितेनेत्यर्थः ॥२३॥ सीताहृदयंज्ञातुंबुद्ध्युपदेशेनप्रणयरोषमुत्पादयन्नाह—भरतस्येति । त्वयानकथ्यः नश्लाघनीयः । त्वत्प्रणामागमनदशायामितिशेषः ॥ २४—२५ ॥ तेन भरतेन । विशेषेणनभर्तव्या वन्धुसाधारण्येनभरणीयेत्यर्थः । अशनादिभरणंलक्ष्मणशत्रुघ्नभार्याभ्यांविशेषेणनकाङ्क्षणीयमितिभावः । अनुकूलतया स्वजनसाधारणतया । शक्यं योग्यम् ॥ २६ ॥ तदनुकूलाचरणंकिमर्थमित्यत आह—तस्माइति । नृपतिना दशरथेन ॥ २७ ॥ गुरोः दशरथस्य । स्थिराभव मयिस्थिरानुरागाभवेत्यर्थः । तत्रहेतुर्मनस्विनीति । दृढमनस्केत्यर्थः ॥ २८—२९ ॥ काल्यं अहर्मुखे । "प्रत्यूषोहर्मुखं काल्यं" इत्यमरः ॥ ३० ॥ धर्ममेवाग्रतःकृत्वा स्थितायाइतिशेषः ॥ ३१ ॥ स्नेहः प्रीतिः । प्रणयः सौहृदं । "प्रणयःस्यात्परिचयेयाच्ञायांसौहृदेपिच" इतिवैजयन्ती । भोगः पालनं । "भोगोराज्येधने सौख्येपालनाभ्यवहारयोः" इतिवैजयन्ती । मयि स्नेहादित्रयमविशेषेणकुर्वन्ति । अतस्तास्तुल्यतयावन्द्याइतिभावः ॥ ३२ ॥ भ्रातृपुत्रसमौ भ्रात्रापुत्रेण

ति० यौवराज्येनियोजितः । मयेतिशेषः । ज्येष्ठानुज्ञांविनातस्यतल्लाभासंभवात् । **शि०** यौवराज्ये यौवराज्यसदृशेपालने इत्यर्थः ॥ २३ ॥ **शि०** तेन मत्प्रव्रजनेनहेतुना । भरतस्यसमीपेकदाचनसमयेअहंकथ्यः श्लाघनीयः । मद्गुणवर्णनंकर्तव्यमित्यर्थः । तेनमद्वियोगजनितातिदुःखं भरतस्यनभविष्यतीतिसूचितम् । तेनरामगुणानांसर्वतापशामकत्वंव्याञ्जितम् ॥ २४ ॥ **शि०** ननुप्राप्ताधिकारत्वाद्भरतोपिप्रशंसनीयइत्यतआह—**ऋद्धीति** । ममऋद्धियुक्ताः मत्प्रसादप्राप्तैश्वर्याःपुरुषाः । परस्तवं स्वकीयातिस्तुतिं । नसहन्ते । तस्माद्धेतोर्भरतस्यगुणाअग्रतः भरतसमीपे । नकथ्याः नश्लाघनीयाः ॥ २५ ॥ **ति०** "अहंतेनानुवक्तव्योविशेषेणकदाचन" इतिप्राचीनःपाठःकतकेनदर्शितः । अहं अस्मत्स्वरूपं । ते त्वया । विशेषेण विशिष्य । कदाचन कदापि । नानुवक्तव्यः सखीभिर्वार्ताप्रसङ्गेइतिशेषः । भरतस्याग्रतइत्यनुकर्षः । तत्रहेतुः—**अनुकूलयतेति** । मत्स्वरूपवर्णनंचतस्यप्रतिकूलमितिभावः । नापित्वंतेनभर्तव्याविशेषेणकदाचन इत्याधुनिकपाठस्तुनतथाचमत्कारी । विशेषेणनभर्तव्या । किंतुवन्धुसाधारण्येनेत्यर्थेनुकूलतयेत्युत्तरार्धस्यतथोपयोगाभावात् ॥ २६ ॥ **ती०** काल्यं सर्वस्मिन्नप्युषसि ॥ ३० ॥ **वि०** माताचेति । वन्दितव्येतिशेषः । यतोगुरुजनवन्दनंकुलवधूनांधर्मएवेतिपुरस्कृत्यत्वत्तस्संमानमर्हतीतिसंबन्धः ॥ ३१ ॥ **सत्य०** मात्रेतिशेषः । वाक्यभेदान्नपुनरुक्तिः ॥ ३२ ॥

[पा०] १ क. ग. घ. ज. झ. ञ. ट. ते. २ घ. वुद्धियुक्तापि. ज. बुद्धियुक्ताहि. ३ क. श्लाघ्याः. ४ छ. झ. ट. अहंतेनानुवक्तव्यो. ५ ख. ग. घ. च—ञ. तस्य. ६ छ. प्रतिज्ञांच. ७ क. ख. च. ञ. झ. ञ. स्थिरीभवमनस्विनि. ८ क—घ. ज. रतया. ९ छ—ट. कल्यं. १० च. छ. झ. ञ. जनेश्वरः. ११ मममाताच. १२ क. च. ञ. स्त्वयानित्यं. ख. श्चयेनित्यं. ट. श्चतानित्यं. १३ ख. शेषाश्च. १४ क. ग. घ. च. ज. ञ. उभौभरत. ख. प्रियेभरत.

विप्रियं न[1] च कर्तव्यं भरतस्य कदाचन ॥ स हि राजा [2]प्रभुश्चैव देशस्य च कुलस्य च ॥ ३४ ॥
आराधिता हि शीलेन प्रयत्नैश्चो[3]पसेविताः ॥ राजानः संप्रसीदन्ति [4]कुप्यन्ति विपर्यये ॥ ३५ ॥
[[5]स्पृशन्निव गजो हन्ति जिघ्रन्निव भुजंगमः ॥ स्मयन्निव नृपो हन्ति मानयन्निव दुर्जनः] ॥३६ ॥
औ[6]रसानपि पुत्रान्हि त्यजन्त्यहितकारिणः ॥ स्वनर्थान्[7]संप्रगृह्णन्ति जनानपि [8]नराधिपाः ॥ ३७ ॥
सा त्वं वसेह कल्याणि राज्ञः समनुवर्तिनी ॥ भरतस्य रता धर्मे सत्यव्रतपरायणा ॥ ३८ ॥
अहं गमिष्यामि महावनं प्रिये त्वया हि वस्तव्यमिहैव भामिनि ॥
यथा व्यलीकं कुरुषे न कस्य चित्तथा त्वया कार्यमिदं वचो मम ॥ ३९ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे षड्विंशः सर्गः ॥ २६ ॥

सप्तविंशः सर्गः ॥ २७ ॥

श्रीरामेणायोध्यायामेववासंबोधितयासीतयातंप्रतिप्रणयकोपेनतद्वचनस्यजनापहास्यत्वकथनम् ॥ १ ॥ तथादशरथेन-रामस्यवनवासनिदेशेनैवस्वस्यापिनिदेशंनिरूपयन्त्यातयारामंप्रतितद्विरहस्यदुस्सहत्वप्रतिपादनेनवनंप्रतिस्वस्यापिसहनयन-प्रार्थना ॥ २ ॥

एवमुक्ता तु वैदेही प्रियार्हा प्रियवादिनी ॥ प्रणयादेव संक्रुद्धा भर्तारमिदमब्रवीत् ॥ १ ॥
किमिदं [9]भाषसे राम वाक्यं लघुतया ध्रुवम् ॥ त्वया यदपहास्यं मे श्रुत्वा नर[10]वरात्मज ॥ २ ॥
[[11]वीराणां राजपुत्राणां शस्त्रास्त्रविदुषां नृप ॥ अनर्हमयशस्यं च न श्रोतव्यं [12]त्वयेरितम्] ॥ ३ ॥
आर्यपुत्र पिता माता भ्राता पुत्रस्तथा स्नुषा ॥ स्वानि पुण्यानि भुञ्जानाः स्वंस्वं भाग्यमुपासते ॥४॥

चसमौ । प्राणैः प्राणेभ्यः ॥३३॥ राजत्वेप्यप्रभुत्वम-नियन्तृत्वंकस्यचित्संभवतीतितद्व्यावृत्त्यर्थंप्रभुरित्युक्तं । देशपतेरकुलपतित्वदर्शनादाह—देशस्यचकुलस्यचेति ॥ ३४ ॥ शीलेन अकुटिलवृत्त्या । प्रयत्नैः आलस्य-त्यागादिभिः । विपर्यये शीलाद्यभावे ॥ ३५—३६ ॥ जनान् अबन्धून् ॥ ३७॥ सत्यव्रतं अमोघव्रतं ॥३८॥ व्यलीकं अप्रियं । कस्यचिदपिजनस्ययथाव्यलीकं नकुरुषे तथात्वयावर्तितव्यम् । इदंममवचश्चकार्यम् । अत्रैवस्थातव्यमितिममवचश्चकार्यमिति । यद्वा यथाक-स्यचिदपिव्यलीकंनकुरुषे तथाइदमपिममवचस्त्वया कार्यमित्यर्थः ॥ ३९ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीतांबराख्याने अयोध्याकाण्ड-व्याख्याने षड्विंशः सर्गः ॥ २६ ॥

एवंरामायणपुरुषेपुरामकर्तव्यंसामान्यधर्मानुष्ठा-नंदर्शितम् । अथसीतानुष्ठेयंपातिव्रत्यधर्मंसंक्षेपेणोपक्षि-पति—एवमुक्तेत्यादि । अप्रियवादिन्यपिप्रियार्हा प्रिय-भाषणार्हा । तदुपरिप्रियवादिनी । तथाप्येवमुक्ता अ-प्रियमुक्ता । प्रणयादेव सौहृदादेव । नतुवैरात् । सं-क्रुद्धा ॥ १ ॥ हेराम त्वया लघुतया ध्रुवं निश्चितम् । अत्यन्तनिःसारमित्यर्थः । "ध्रुवोभभेदेक्लीबंतुनिश्चि-तेशाश्वतेत्रिषु" इत्यमरः । लघुत्वमेवाह—यदिति । यद्वाक्यंश्रुत्वा मे स्त्रियाअपि । अपहास्यंभवति तद्वा-क्यंभाषसे । किमिदं अयमपूर्वप्रकारः इतःपूर्वंनदृष्ट-चरः । नरवरात्मजेत्यनेनास्यासंभावितत्वमुच्यते । त्वामिहस्थाप्यवनंगमिष्यामीत्येतद्वचनमेतावत्पर्यन्तम-नुसृतायाःप्रणयधारायाःपन्थानंनारोहतीतिभावः ॥२—३॥ कथंममवाक्यस्यपरिहासास्पदत्वमित्यत्राह—

ति० यथाकस्यचिन्मद्वचसोव्यलीकं व्यलीकत्वं । अनृतत्वंनकुरुषेतथेदमपिमेवचःकार्यं अनुष्ठेयमित्यर्थः । वचसोऽनृतत्वकरणं चानुष्ठानेभवति । शि० वनेमहत्त्वंलद्गमनायोग्यत्वेन ॥ ३९ ॥ इतिषड्विंशस्सर्गः ॥ २६ ॥

शि० अध्रुवं अनिश्चितं । स० हेराम इदंकिंभाषसे । तन्मयिलघुतया लाघवनिमित्तेन । नलद्वौरवेण । ध्रुवं निश्चयः । कुतः

[पा०] १ च. छ. झ. ञ. ट. चन. २ च. छ. झ. ञ. ट. चवैदेहि. ३ ख. घ. श्चापि. ४ ग. घ. ज. कुप्यन्तिच. ५ अयं श्लोकः च. ज. ञ. दृश्यते. ६ छ. झ. औरस्यानपि. ७ च. ञ. न्प्रति. ८ क. ख. ग. जनाधिपाः. ९ ग. ज. भाष्यते. १० क. ग. च. छ. ट. वरोत्तम. ११ अयंश्लोकः च—ट. दृश्यते. १२ ज. त्वयोदितम्.

भर्तुर्भाग्यं तु भार्यैका[1] प्राप्नोति पुरुषर्षभ ॥ अतश्चैवाहमादिष्टा[2] वने वस्तव्यमित्यपि ॥ ५ ॥
न पिता नात्मजो नात्मा[3] न माता न सखीजनः ॥ इह प्रेत्य च नारीणां पतिरेको गतिः सदा ॥६॥
यदि त्वं प्रस्थितो दुर्गं वनमद्यैव राघव ॥ अग्रतस्ते गमिष्यामि मृद्नन्ती कुशकण्टकान् ॥ ७ ॥
ईर्ष्यारोषौ[4] बहिष्कृत्य[5] भुक्तशेषमिवोदकम्[6] ॥ नय मां वीर विस्रब्धः पापं मयि न विद्यते ॥ ८ ॥
प्रासादाग्रैर्[7]विमानैर्वा वैहायसगतेन वा ॥ सर्वावस्थागता भर्तुः पादच्छाया विशिष्यते ॥ ९ ॥

आर्यपुत्रेति । भर्तारंप्रतिभार्यायाःसंबोधनं आर्यपुत्रेति । भर्तृसंबन्धिपित्रादयः स्वानिपुण्यानि स्वकृतपुण्यफलानि । एतत् पापफलस्याप्युपलक्षणं । भुञ्जानाः अनुभवन्तः । स्वंस्वं स्वस्यैव फलप्रदं । भाग्यं शुभाशुभं कर्म । उपासते आचरन्ति । "भाग्यंकर्मशुभाशुभं " इत्यमरः ॥४॥ पूर्वोक्ताःसर्वेस्वकीयकर्मफलान्यनुभवन्ति भर्तुरर्धशरीरभूताभार्याभर्तृकृतभाग्यफलमेवानुभवतीत्याह—भर्तुरिति । भार्यैका भार्यैव तु । भर्तुर्भाग्यंप्राप्नोति । सहाधिकृतत्वात् । यस्मादेवंतस्मादेवाहमपिवनेवस्तव्यमित्यादिष्टैवत्वदादेष्टृभिः । आवयोःसहधर्मचारित्वात्त्वदादेशेनैवममाप्यादेशःसिद्धइतिभावः ॥ ५ ॥ एवंभर्तृसमानभाग्यत्वंस्वगमनहेतुरुक्तः तदेकगतिकत्वमपिगमनहेतुरित्याह—नेति । प्रेत्य परलोकइत्यर्थः ॥ ६ ॥ फलितार्थमाह—यदीति । अग्रतोगमनेहेतुमाह मृद्नन्ती मर्दयन्ती । मृदूकुर्वन्तीत्यर्थः । कुशरूपकण्टकान् ॥ ७ ॥ परातिशयाक्षमाईर्ष्या त्वदनुवर्तनेनचरितार्थेयंभविष्यतीत्येवंरूपा । अत्रैवसुखमास्स्वेतिमयोक्तापिस्वयमनुगमिष्यामीतिब्रूतइतिरोपः । तौभुक्तशेषं शास्त्रनिषिद्धतयोक्तमुदकमिव बहिष्कृत्य ।नःशेपंनिरस्य । विस्रब्धः निःशङ्कःसन् । मांनय । वीरेत्यनेनस्त्रियमेकाकीकान्तारंकथंनयेयमितिशङ्कानकर्तव्येत्युक्तं । पापंमयिनविद्यते भवद्वियोगेजीवनहेतुपापंनविद्यतइत्यर्थः । पापान्तरस्यात्रप्रसक्त्यभावात् ॥ ८ ॥ प्रासादवासंविहाय किमर्थंवनवासंगच्छसीत्यत्राह—प्रासादाग्रैरिति । पञ्चम्यर्थेतृतीया । प्रासादाग्रैः सार्वभौमवासप्रासादाग्रेभ्यः । विमानैर्वा स्वर्लोकादिस्थितविमानाग्रेभ्यो वा । वैहायसगतेन अणिमाद्यष्टैश्वर्यसिद्धिसंपन्नोचि-

हेनरवरोत्तम यद्वाक्यंत्वयैवशुत्वाऽपहास्यंकिमन्यैरित्यन्वयः ॥ २ ॥ **ती०** अहमपिवनेवस्तव्यमित्यादिष्टैव तववनगमनादेशादेव "अर्धोवाएषआत्मनोयत्पत्नी" इत्युक्तप्रक्रियया त्वदर्धशरीरभूतायाममाप्यादेशइत्यर्थः ॥ ५ ॥ **स०** यद्वा इह लोके । नारीणां नविद्यन्तेअरयोयेषांतेनारयः तेषांसाधूनां त्वंनकेवलंपिता अपितुआत्मजः । नकेवलमात्मजः किंतुआत्मा स्वामीचेत्यन्वयः । यथोक्तं "मातारामः" इत्यादि ॥६॥ **स०** "पीतशेषंनचपिबेत्" इत्यादेर्यथापीतोच्छिष्टंजलादिबहिष्कार्यं तथेर्ष्यारोषौबहिष्कृत्यमांनयेत्यर्थः । यत्तुभुक्तभोगयात्वयाकिंप्रयोजनमित्यवतार्य यथादुष्प्रापपानीयकान्तारयायिनापीतशेषंकमण्डलुनिष्ठमुदकमवश्यंनेयमेवतथाऽहमप्यवश्यंनेयैवेतितीर्थादिप्रलपनं तत्त्वस्मदुदाहृतप्रमाणपर्यालोचनया पीतशेषकमण्डलूदकस्येवदार्ष्टान्तिकीभूतसीतायाअपि दोषित्वप्राप्त्याऽस्यार्थस्य पापंमयिनविद्यतइतिचरमचरणोक्तार्थविरुद्धत्वात् दुष्प्रापपानीयकान्तारयायिनउच्छिष्टोदकानयनेदुर्घटजीवनत्ववत् स्वरमणस्यरामस्यापिरामामन्तराऽऽरामगमनेतथात्वप्राप्तेश्चाल्पमतिजल्पनमितिकल्पयामः ॥ ८ ॥ **ती०** नित्यसंबन्धित्वादपिनाहंपरित्याज्येत्याह—**प्रासादाग्रैरिति** । प्रासादाग्रेस्थितिमताविमानैर्यानवतायोगबलात्केवलंवैहायसगतेन मत्वर्थीयाजन्तः । वैहायसगतिमता । तथासर्वावस्थांगतेनापिभर्त्राभर्तृपादच्छायेवभर्त्रासहस्त्रीसर्वावस्थागताभवतीतिविशिष्यतेविधीयते । **ति०** अतोपिमेवनगमनमेवोचितमित्याह । प्रासादाग्रे स्थितापेक्षयेतिशेषः । विमानैर्वावैहायसगतेनवा आकाशगमनेनोपलक्षिताणिमाद्यष्टसिद्ध्यपेक्षयेतिशेषः । सर्वावस्थागताभर्तुः । अपीतिशेषः । "विष्णोरभक्तिकावस्थासर्वावस्थेतिगीयते" इत्यभिधानात् । तांगतस्यअतएवआईषद्भर्तुः । भर्तुरित्यन्तमेकंपदं । अथवापृथक्पदेश्रुत्युक्तधर्माननुष्ठानरूपांतांगतापीतियोजना । सकलभर्तृधर्मरहितस्यापिपत्युःपादच्छायापादसेवनमेवेतरधर्मापेक्षयास्त्रियाविशिष्यतेऽधिकंभवति । श्रुतिस्मृत्योस्सर्वंपरित्यागेनभर्तृसेवायाएव स्त्रीणांनित्यत्वबोधनादितिभावः । **सत्य०** प्रासादाग्रैरित्याद्यासहयोगेतृतीया । वृद्धोयूनेतिनिर्देशात् । तथाचतैस्सहितस्यभर्तुर्या पादच्छायासर्वावस्थागता तस्यास्सकाशाद्विशिष्यते भार्येतिशेषः । अगृह्णानस्सर्वाङ्गच्छायांगृह्णानश्चपादच्छायांभार्यायाःपतिपादैकसेवारतत्वंद्योतयति । वैहायसगतेनेतिभावेक्तः । यद्वाछायेत्यस्याऽऽवृत्तिः । तथाचभर्तुःपादच्छायाअविशिष्यतेभार्या । पादच्छायायथाइदानींनेतव्याइदानींननेतव्येतिनविशिष्यतेतथाभार्यापिच्छायाप्रतिबिंबभूतेतिअविशिष्यते । "छायाप्रतिबिंबार्कयोषितोः ।

[**पा०**] १ क. ख. घ. च. झ. ञ. ट. नार्यैका. छ. नारीवै. २ छ. मादिष्टा. ३ झ. ट. वात्मा. ४ छ. झ. ट. ईर्ष्यारोषं. ५ क. ग. घ. ज. परित्यज्य. ६ च. ञ. पीत. ७ झ. प्रासादाग्रे.

अनुशिष्टाऽस्मि मात्रा च पित्रा च विविधाश्रयम् ॥ नास्मि संप्रति वक्तव्या वर्तितव्यं यथा मया ॥१०॥
अहं दुर्गं गमिष्यामि वनं पुरुषवर्जितम् ॥ नानामृगगणाकीर्णं शार्दूलवृकसेवितम् ॥ ११ ॥
सुखं वने निवत्स्यामि यथैव भवने पितुः ॥ अचिन्तयन्ती त्रींल्लोकांश्चिन्तयन्ती पतिव्रतम् ॥ १२ ॥
शुश्रूषमाणा ते नित्यं नियता ब्रह्मचारिणी ॥ सह रंस्ये त्वया वीर वनेषु मधुगन्धिषु ॥ १३ ॥
त्वं हि कर्तुं वने शक्तो राम संपरिपालनम् ॥ अन्यस्यापि जनस्येह किं पुनर्मम मानद ॥ १४ ॥
सह त्वया गमिष्यामि वनमद्य न संशयः ॥ नाहं शक्या महाभाग निवर्तयितुमुद्यता ॥ १५ ॥
फलमूलाशना नित्यं भविष्यामि न संशयः ॥ न ते दुःखं करिष्यामि निवसन्ती सह त्वया ॥ १६ ॥
[अग्रतस्ते गमिष्यामि भोक्ष्ये भुक्तवति त्वयि] ॥ इच्छामि सरितः शैलान्पल्वलानि वनानि च ॥
द्रष्टुं सर्वत्र निर्भीता त्वया नाथेन धीमता ॥ १७ ॥
हंसकारण्डवाकीर्णाः पद्मिनीः साधुपुष्पिताः ॥ इच्छेयं सुखिनी द्रष्टुं त्वया वीरेण सङ्गता ॥ १८ ॥
अभिषेकं करिष्यामि तासु नित्यं यतव्रता ॥ सह त्वया विशालाक्ष रंस्ये परमनन्दिनी ॥ १९ ॥
एवं वर्षसहस्राणां शतं वाऽहं त्वया सह ॥ व्यतिक्रमं न वेत्स्यामि स्वर्गोऽपि न हि मे मतः ॥ २० ॥

तद्विहायस्संबन्धिगमनाद्वा । सर्वावस्थागता दुरवस्थापन्नापीत्यर्थः । यद्वा सर्वावस्थासुगता अनुगतास्थायिनी । स्वरूपप्राप्तेतियावत् । पादच्छाया पादसेवा । विशिष्यते अतिरिच्यते ॥ ९ ॥ उपदेशानुसारादपि मयानुगन्तव्यमित्याह—अनुशिष्टेति । यथामयाभर्तृविषयेवर्तितव्यं तथामात्रापित्राच विविधाश्रयं विविधप्रकारं । अनुशिष्टास्मि । संप्रति इदानीं । नवक्तव्यास्मि नशिक्षणीयास्मीतियावत् ॥ १० ॥ उपदेशफलमाह—अहमित्यादि । दुर्गत्वादिविशेषणविशिष्टमपीत्यर्थः ॥ ११ ॥ दुःखावहेयंप्रवृत्तिरित्यत्राह—सुखमिति । त्रीन्लोकान्अचिन्तयन्ती त्रैलोक्यैश्वर्यमप्यगणयन्तीत्यर्थः । पतिव्रतं पतिविषयंव्रतं । पतिशुश्रूषणमित्यर्थः ॥ १२ ॥ नियता नियमयुक्ता ब्रह्मचारिणी नियतेन्द्रियेत्यर्थः । कामभोगवर्जितावा । रंस्ये अपूर्वदर्शनेनसन्तुष्टाभविष्यामीत्यर्थः । मधुगन्धिषु पुष्परसगन्धिषु । "मद्येपुष्परसेमधु" इतिवैजयन्ती ॥ १३—१४ ॥ उद्यता वनगमनोद्युक्ता ॥ १५ ॥ दुःखं अशनपानाभ्यर्थनरूपम् ॥ १६—१७ ॥ कारण्डवाः जलकुक्कुटाः । "मद्गुःकारण्डवःप्लवः" इत्यमरः ॥ १८—१९ ॥ व्यतिक्रमं व्यतिक्रान्तं ।

वाविकल्पोपमानयोः" इतिचविश्वः ॥ ९ ॥ **रामानु०** मात्रापित्राच विविधाश्रयं विविधैर्वर्णैराश्रमिभिश्चआश्रीयतइतिविविधाश्रयं । श्रेयस्साधनत्वेनसर्वैरनुष्ठेयं । आचारमितियावत् । अनुशिष्टास्मि सुशिक्षितास्मि । तस्माद्यथामयावर्तितव्यं आचरितव्यं । तथासंप्रतिनवक्तव्यास्मि पूर्वमेवसर्वंविदितवत्यस्मीत्यर्थः । **सत्य०** मया रमया यथावर्तितव्यंतथामात्रापित्राभ्यनुशिष्टास्मि । संप्रति इदानीं विविधाश्रयं भरतादिनानाश्रयमुद्दिश्य नवक्तव्या त्वयेतिशेषः ॥ १० ॥ **सत्य०** दुर्गंदुःखेनगन्तुंयोग्यं । गन्तुमशक्यंवा । "दुस्स्यात्कष्टनिषेधयोः" इत्यभिधानात् । नानामृगगणाकीर्णं शार्दूलादिविविधमृगमण्डितं । शार्दूलगणसेवितं तन्नामकराक्षससंबन्धिगणसेवितं । "शार्दूलोराक्षसान्तरे" इतिविश्वः । **शि०** पुरुषवर्जितं भृत्यादिरहितंयथास्यात्तथा । गमिष्यामि ॥११॥ **स०** वनेषु जलेषुकाननेषुच । मध्वीःपुष्परसस्यअम्लानपुष्पस्येतियावत् । गन्धएषामस्तीतिमधुगन्धीनिपद्मानितेषु । एतेन "गन्धस्येदुत्पूतिसुसुरभिभ्यः । अल्पाख्यायां" इतिसूत्राविषयत्वात्कथमिकारइतिशङ्कानवकाशः ॥ १३ ॥ **शि०** अन्यस्य स्वनिरूपितभीत्वाविधर्मरहितस्य ॥ **सत्य०** हेराम त्वमन्यस्यापिपरिपालनंकर्तुंवनेशक्तः।हेमानदराम ममपरिपालनेशक्तइतिकिमुवक्तव्यं । अतोत्रैववस्तव्यमिति मा नद ब्रूहिइत्यावृत्तेनान्वयः । माऽयं ॥ १४ ॥ **ति०** ननिवर्तयितुंशक्या न्यायप्राप्तानुगमनत्वात् । त्वच्छक्तिरूपत्वादितिगूढोभिप्रायः ॥१५॥ **स०** सर्वत्रेत्येतदव्ययम् । संबुद्ध्यन्तपक्षेसर्वेत्रायतइतिवासर्वस्माञ्जायतइतिवाव्युत्पत्तिः । तथाचेत्रायतेः "आतोनुपसर्गेकः" इतिकः । द्वितीयेतु "सुपिस्थः" इत्यत्रयोगविभागात्कः ॥ १७ ॥ **स०** पादादित्वेपि

[पा०] १ क. च. छ. झ. ञ. ट, गण. २ घ. अनस्यैव. ३ छ. झ. ञ. ट. साहं. क. ख. साहि. ४ झ. ट. त्वयासदा. घ. च. ज, ञ. त्वयासह. ५ इदमर्धं च. छ. झ. ञ. ट. दृश्यते. ६ झ. परतः. ७ घ. च. छ. झ. ञ, ट. सरांसि च, ८ छ. ठ. त्वाहंनित्यमनुव्रता. च. झ. तासुनित्यमनुव्रता. ९ घ—झ. ट. सहस्राणि. १० ग. च. छ. झ. ञ. ट, वापि. ११ ख. स्वर्गेपिनहिमेमतिः. ग. घ. च. ट स्वर्गोपिहिनमे.

स्वर्गेऽपि च विना वासो भविता यदि राघव ॥ त्वया [1]मम नरव्याघ्र नाहं [2]तमपि रोचये ॥ २१ ॥
अहं गमिष्यामि वनं सुदुर्गमं मृगायुतं वानर[3]वारणैर्युतम् ॥
[4]वने निवत्स्यामि यथा पितुर्गृहे तवैव पादावुपगृह्य सं[5]यता ॥ २२ ॥
अनन्यभावामनुरक्तचेतसं त्वया वियुक्तां मरणाय निश्चिताम् ॥
नयस्व मां साधु कुरुष्व याचनां [6]न ते मयाऽतो गुरुता भविष्यति ॥ २३ ॥
तथा ब्रुवाणामपि धर्म[7]वत्सलो न च स्म सीतां नृवरो निनीषति ॥
उवाच [8]चैनां बहु संनिवर्तने वने निवासस्य च दुः[9]खितां प्रति ॥ २४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे सप्तविंशः सर्गः ॥ २७ ॥

अष्टाविंशः सर्गः ॥ २८ ॥

श्रीरामेणसीतांप्रतिवनस्यबहुदोषयुक्तत्वात्तद्वासस्यदुष्करत्वप्रतिपादनेनतदनुगमनानङ्गीकरणम् ॥ १ ॥

[10]स एवं ब्रुवतीं सीतां [11]धर्मज्ञो धर्मवत्सलः ॥ न नेतुं कुरुते बुद्धिं वने दुःखानि चिन्तयन् ॥ १ ॥
सान्त्वयित्वा [12]पुनस्तां तु बाष्पदूषितलोचनाम् ॥ [13]निवर्तनार्थे धर्मात्मा वाक्यमेतदुवाच ह ॥ २ ॥
सीते महाकुलीनाऽसि धर्मे च निरता सदा ॥ इहाचर स्वधर्मं त्वं [14]मां यथा मनसः सुखम् ॥ ३ ॥

वर्षसहस्राणांशतमपिनवेत्स्यामिक्षणमिवनेष्यामि । किंपुनश्चतुर्दशसमाइतिभावः । स्वर्गोपिनहिमेमतः त्वयाविनेतिशेषः ॥ २० ॥ एतदेवविवृणोति—स्वर्गेपिचेति ॥ २१ ॥ मृगैःआयुतम् आसमन्तात्युक्तम् । मृगैःअयुतं नामिश्रितं । मिश्रितमित्यर्थः । "युमिश्रणामिश्रणयोः" इतिधातुः । अत्रेदमवधेयं । वने मारीचोमृगोभविष्यति तत्प्रसङ्गेनावयोर्वियोगःस्यात् तत्रकोवापुनर्घटकः कथंत्वंतुमयाविनास्थातुंशक्तासीतिचिन्तयन्तंरामंप्रतिसीतासूचयति—वानरवारणैरित्यादि । तथाहि मृगोमारीचः । वानरवारणैःवानरश्रेष्ठैः सुग्रीवादिभिः । पुनर्वनग्रहणात्वनेपि अशोकवनेपि वत्स्यामि । पुनस्तवैवपादावुपसंगृह्य संयता नियताभविष्यामीति ॥ २२ ॥ अन्वयव्यतिरेकाभ्यां स्वानुरक्तेत्युच्यते । अतएव त्वयावियुक्तां मरणायनिश्चितां त्वयावियुक्तत्वेमरणायनिश्चितामित्यर्थः । मांनयस्व। परमार्थस्तुरावणगृहीतामपित्वय्येवासक्तचित्ताम् । अथवेण्युद्ग्रथनेनमरणायनिश्चितां । हनुमत्प्रेषणादिकमुखेननयस्व । याचनां देवकृतरावणवधाभ्यर्थनम् । साधुकुरुष्व । मयाकृतात् अतः अनुगमनात् । ते गुरुता भारः । नभविष्यति क्लेशोनभविष्यतीत्यर्थः ॥ २३ ॥ धर्मवत्सलः कान्ताक्लेशासहिष्णुः । निनीषति नेतुमिच्छति । बह्विति क्रियाविशेषणम् । संनिवर्तने संनिवर्तननिमित्तम् ॥ २४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीतांबराख्याने अयोध्याकाण्डव्याख्याने सप्तविंशःसर्गः ॥ २७ ॥

वनेनिवासस्यचदुःखितामित्युक्तंविवृणोति—सएवमित्यादिना ॥ १—२ ॥ मायथामनसःसुखं मनसो-

त्वेतिनैरङ्कुश्यादुक्तिः ॥ १९ ॥ शि० अविना सर्वरक्षकेण । त्वयाविना । स० विना परमात्मरूपिणा । नाहंरोचये । अव्ययं चैतत् । तेनरोचयइत्युपपन्नम् ॥ २१ ॥ शि० प्रथमार्धेअन्त्यपादेवर्णैकन्यूनताऽपूर्वच्छन्दोद्योतनाय । यद्यपिवारणैर्युतमितिभूषणटीकाङ्कितपुस्तकेषुदृश्यतेतथापितत्पाठस्यटीकाऽस्पृष्टत्वादेवमुक्तम् ॥ २२ ॥ ति० निवर्तने निवर्तनरूपप्रयोजननिमित्तं । वनवासस्यदुःखतां दुखजनकतांप्रति । सत् संभवत् । बहुहेतुजातमुवाचेत्यर्थः ॥ २४ ॥ इतिसप्तविंशस्सर्गः ॥ २७ ॥

स० बाष्पदूषितलोचनां बाष्पक्लिन्नकज्जलादियुक्तलोचनं ॥ २ ॥ ती० स्वधर्मं स्ववाक्यपरिग्रहप्रयोजनंस्वकुलधर्मं । इहैव

[पा०] १ च—झ. ट. विनानर. २ क. च—ट. तदपि. ३ च—ट. वारणैश्च. ४ ख. घ. ज. वनेपि. ५ ग. च. झ. ञ. ट. संमता. क. सर्वदा. ६ छ. झ. ट. नातोमयाते. ७ छ. झ. ट. वत्सलां. ८ घ. सीतां. ९ ख. छ. दुःखतां. १० क. एवंब्रुवन्तींसीतांतु. ११ छ. झ. ट. ठ. धर्मज्ञां. १२ क. ख. च. छ. झ. ञ. ट. ततस्तां. १३ क. च. ञ. निवर्तनार्थं. १४ छ. झ. ट. यथामे. ग. घ. च. ज. माकृथामनसोसुखम्.

सीते यथा त्वां वक्ष्यामि तथा कार्यं त्वयाऽबले ॥ वने दोषा हि बहवो वदतस्तान्निबोध मे ॥ ४ ॥
सीते विमुच्यतामेषा वनवासकृता मतिः ॥ बहुदोषं हि कान्तारं वनमित्यभिधीयते ॥ ५ ॥
हितबुद्ध्या खलु वचो मयैतदभिधीयते ॥ सदा सुखं न जानामि दुःखमेव सदा वनम् ॥ ६ ॥
गिरिनिर्झरसंभूता गिरिकन्दरवासिनाम् ॥ सिंहानां निनदा दुःखाः श्रोतुं दुःखमतो वनम् ॥ ७ ॥
क्रीडमानाश्च विस्रब्धा मत्ताः शून्ये महामृगाः ॥ दृष्ट्वा समभिवर्तन्ते सीते दुःखमतो वनम् ॥ ८ ॥
सग्राहाः सरितश्चैव पङ्कवत्यश्च दुस्तराः ॥ मत्तैरपि गजैर्नित्यमतो दुःखतरं वनम् ॥ ९ ॥
लताकण्टकसंकीर्णाः कृकवाकूपनादिताः ॥ निरपाश्च सुदुर्गाश्च मार्गा दुःखमतो वनम् ॥ १० ॥
सुप्यते पर्णशय्यासु स्वयं भग्नासु भूतले ॥ रात्रिषु श्रमखिन्नेन तस्माद्दुःखतरं वनम् ॥ ११ ॥
अहोरात्रं च संतोषः कर्तव्यो नियतात्मना ॥ फलैर्वृक्षावपतितैः सीते दुःखमतो वनम् ॥ १२ ॥
उपवासश्च कर्तव्यो यथाप्राणेन मैथिलि ॥ जटाभारश्च कर्तव्यो वल्कलांबरधारिणा ॥ १३ ॥
देवतानां पितॄणां च कर्तव्यं विधिपूर्वकम् ॥ प्राप्तानामतिथीनां च नित्यशः प्रतिपूजनम् ॥ १४ ॥

यथासुखं भवतितथामाचरेत्यर्थः ॥ ३—४ ॥ बहुदोषं अहिकण्टकादियुक्तत्वात् कान्तारं महारण्यं । "महारण्येदुर्गपथेकान्तारंपुंनपुंसकं" इत्यमरः ॥ ५ ॥ हितबुद्ध्या नतुत्वद्भरणक्लेशेन ॥ ६ ॥ महावनेविद्यमानान्दोषानाह—गिरिनिर्झरेत्यादि । गिरिनिर्झरसंभूताः गिरिनिर्झरेषुप्रवृद्धाः । श्रोतुं दुःखाः दुःखकराः । अतोवनंदुःखं दुःखकरम् ॥ ७॥ शून्ये निर्मानुषप्रदेशे । विस्रब्धाः निःशङ्काः सन्तः । क्रीडमानाः क्रीडन्तः । अतएवमत्ताः महामृगाः सिंहशार्दूलादयः । अस्मान्दृष्ट्वाअपूर्वदर्शनात्समभिवर्तन्ते हन्तुमभिमुखमागच्छेयुः ॥ ८ ॥ सग्राहाः सनक्राः पङ्कवत्यः बहुपङ्काः । मत्तैर्गजैरुपलक्षिताश्च । अतएवदुस्तराःसरितःसन्ति । अतोदुःखतरं पूर्वोक्तदुःखसंमेलनादतिशयेनदुःखवत् ॥ ९ ॥ यत्र ननिर्झरादयस्तेनैवमार्गेणगमिष्यामइत्यत्राह—लताइति । लताःपदाकर्षिण्यः । कण्टकाः पादवेधकाः । कृकवाकवो वनकुक्कटाः । तैरुपनादिताः । तन्नादयुक्ता इत्यर्थः । तन्नादाअप्यश्रुतपूर्वत्वाद्भयावहाएव । निरपाः निर्गतजलाः। "ऋक्पूरब्धूः" इत्यादिनासमासान्तोप्रत्ययः ॥ १० ॥ भूतले नतुपर्यङ्के । तत्रापिपर्णशय्यासु नतुमृदुतूलास्तरणेषु । तत्रापिस्वयंभग्नासु जीर्णतयास्वयमेवपतितासु । रात्रिषु नत्वहस्सु । श्रमखिन्नेन फलमूलाद्याहरणश्रमदुःखितेन । वनवासिनासुप्यते । अतोस्माभिरपितथास्वपितव्यमितिभावः ॥ ११ ॥ अहोरात्रं सायंप्रातश्च । वृक्षावपतितैः वृक्षात्स्वयंपतितैः फलैः । नियतात्मना नियतमनस्केन । इतरानभिलाषिणेत्यर्थः । वनवासिना संतोषः भोजनतृप्तिः । कर्तव्यः ॥ १२ ॥ यथाप्राणेन यथा-

---

स्थितायथामनसस्सुखंभवति । स्वशक्त्यनुसारेणेत्यर्थः । मा मामुद्दिश्यआचर ॥ ३ ॥ **सत्य०** वसतइतिपुंल्लिङ्गनिर्देशेनपुरुषस्यैव यदादुःखबाहुल्यंतदाकिमुस्त्रियाइतिसूचयति ॥ ४ ॥ **ति०** सीतेइतिकलत्रनामग्रहणमपिदुःखाकुलचित्तत्वनाटनेननदोषाय । **स०** कान्तायाअरंअरमणं असुखमितियावत् । यस्मिंस्तत्कान्तारमितिवनमभिधीयते । कुतः हियस्मात्बहुदोषं बहुव्रीहिः । कान्तारंदुस्साध्यमार्गमित्यर्थः । " कान्तारंवर्त्मदुर्गमम् " इत्यमरः ॥ ५ ॥ **शि०** गिरिनिर्दरिवासिनां गिरिदरीनिवसनशीलानांसिंहानां निनदाः दुःखाः दुःखप्रदाः । अतोवनंश्रोतुं प्रवृत्तजनस्येति दुःखं भवतीतिचशेषः ॥ ७ ॥ **ती०** गजैरपिदुस्तरास्सरितइतियोजना । **ति०** गजैरित्यस्ययुक्तामितिशेषः ॥ ९ ॥ **ति०** कृकवाकुर्वनकुक्कुटः । सरटइत्यन्ये । **सत्य०** कृकवाकुर्नीलकण्ठः । "कृकवाकुर्मयूरेच " इतिविश्वः ॥ १० ॥ **शि०** वनं अतः वनपर्यटनशीलस्य । दुःखम् ॥ ११ ॥ **सत्य०** यथाप्राणेन यथावलम् ।

[पा०] १ झ. ट. ठ. वसतः. २ ख. दोषंतु. ३ क. मयावैदेहिकथ्यते. ४ ख. च. निर्झर. क. झ. ञ. ट. निर्दर. ५ ख. घोराः. ६ क. ख. ग. घ. च. ञ. तथा. ७ घ. धृष्टाः. ८ क—घ. च. ज. ञ. ट. पङ्कवत्यःसु. छ. झ. पङ्कवत्यस्तु. ९ क. ग. नित्यंसीतेदुःखमतो. ज. नित्यमतोदुःखतरंनुकिम्. १० क. ख. विनादिताः. ज. पवादिताः. ११ छ—ट. सुदुःखाश्च. १२ ज. दुर्ग. १३ घ. दुःखेन. १४ क. ग. छ. झ. ट. तस्माद्दुःखमतो. घ. सीतेदुःखमतो. १५ घ. वृक्षात्प्र. ज. वृक्षप्र. १६ ग. ज. दुःखतरं. १७ छ. झ. ट. धारणम्. १८ ग. घ. परिपूजनम्.

कार्यस्त्रिरभिषेकश्च कालेकाले च नित्यशः ॥ चरता नियमेनैव तस्माद्दुःखतरं वनम् ॥ १५ ॥
उपहारश्च कर्तव्यः कुसुमैः स्वयमाहृतैः ॥ आर्षेण विधिना वेद्यां बाले दुःखमतो वनम् ॥ १६ ॥
यथालब्धेन संतोषः कर्तव्यस्तेन मैथिलि ॥ यताहारैर्वनचरैर्नित्यं दुःखमतो वनम् ॥ १७ ॥
अतीव वातास्तिमिरं बुभुक्षा चात्र नित्यशः ॥ भयानि च महान्त्यत्र ततो दुःखतरं वनम् ॥ १८ ॥
सरीसृपाश्च बहवो बहुरूपाश्च भामिनि ॥ चरन्ति पृथिवीं दर्पात्ततो दुःखतरं वनम् ॥ १९ ॥
नदीनिलयनाः सर्पा नदीकुटिलगामिनः ॥ तिष्ठन्त्यावृत्य पन्थानं ततो दुःखतरं वनम् ॥ २० ॥
पतङ्गा वृश्चिकाः कीटा दंशाश्च मशकैः सह ॥ बाधन्ते नित्यमबले सर्वं दुःखमतो वनम् ॥ २१ ॥
द्रुमाः कण्टकिनश्चैव कुशकाशाश्च भामिनि ॥ वने व्याकुलशाखाग्रास्तेन दुःखतरं वनम् ॥ २२ ॥
कायक्लेशाश्च बहवो भयानि विविधानि च ॥ अरण्यवासे वसतो दुःखमेव ततो वनम् ॥ २३ ॥
क्रोधलोभौ विमोक्तव्यौ कर्तव्या तपसे मतिः ॥ न भेतव्यं च भेतव्ये नित्यं दुःखमतो वनम् ॥ २४ ॥
तदलं ते वनं गत्वा क्षेमं न हि वनं तव ॥ विमृशन्निह पश्यामि बहुदोषतरं वनम् ॥ २५ ॥

वनं तु नेतुं न कृता मतिस्तदा बभूव रामेण यदा महात्मना ॥
न तस्य सीता वचनं चकार तत्ततोऽब्रवीद्राममिदं सुदुःखिता ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे अष्टाविंशः सर्गः ॥ २८ ॥

शक्त्या ॥ १३—१४ ॥ त्रिरभिषेकश्चनैककालइत्याह—कालेकालइति । प्रातर्मध्याह्नसायाह्नेष्वित्यर्थः । एतच्चनकतिपयदिनेषु किंतुप्रतिदिनमित्याह—नित्यश इति ॥ १५ ॥ उपहारोबलिः । "उपहारोबलिर्मतः" इतिहलायुधः । आर्षेण ऋषिप्रोक्तेन । विधिना कल्पेन ॥१६॥ यथालब्धेन यावल्लब्धेन । तेन फलादिनाआहारेण । संतोषः तृप्तिः।यताहारैः नियताहारैः ॥१७॥ अत्र वने । वाताश्चातीव बहुलाः । तिमिरंच रात्रिष्वतीवास्ति । बुभुक्षाचातीवभवति । भयानि पूर्वोक्तानि ॥ १८ ॥ सरीसृपाः गिरिसर्पाः । बहुरूपाः पृथुशरीराः ॥ १९ ॥ नदीकुटिलगामिनः नदीवत्कुटिलगामिनः ॥ २० ॥ पतङ्गाः शलभाः । दंशाः वनमक्षिकाः । "दंशस्तुवनमक्षिका" इत्यमरः ॥ २१ ॥ कुशकाशयोःशाखाःकुशकाशपर्णान्येव ॥ २२ ॥ कायक्लेशाः व्रतोपवासादयः । अरण्यवासे अरण्यरूपवासस्थाने ॥ २३ ॥ भेतव्ये भयहेतुविषये प्रागुक्तसर्पादौ । नभेतव्यं भयंनकार्यम् ॥ २४ ॥ वनंगत्वाऽलमिति "अलंखल्वोः" इतिनिषेधार्थालमुपपदेक्त्वा । नगन्तव्यमित्यर्थः ॥ २५ ॥ रामेणवनंनेतुंमतिर्यदानकृताबभूव तदा सीता तस्यवचनं नचकार नाङ्गीचकार । इदंउत्तरसर्गेवक्ष्यमाणम् ॥ २६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीतांबराख्याने अयोध्याकाण्डव्याख्यानेऽष्टाविंशः सर्गः ॥ २८ ॥

" तृतीयासप्तम्योर्बहुलं " इत्युक्तेर्नाम्भावः ॥ १३ ॥ ति० चरतां कालक्षेपंकुर्वतां ॥ १५ ॥ ती० आर्षेणविधिना वानप्रस्थोचितविधानेन । आर्षोविधिरुञ्छादिवृत्तिः । वेद्यामित्यनेनतत्करणदुःखंध्वनितम् ॥१६॥ ति० यथाहारैः यथालब्धाहारैः ॥१७॥
ति० अवलेइत्यनेनतन्निवारणासामर्थ्यंध्वनितम् ॥ २१ ॥ ती० व्याकुलशाखाः व्याकुलाग्राश्चेतिक्रमात्द्रुमकुशविशेषणम् ॥२२ ॥
ति० तान्दोषानिहस्थोपिपश्यामीव । अतोबहुदोषकरंवनं इतिब्रवीमीतिशेषः ॥ २५ ॥ इत्यष्टाविंशःसर्गः ॥ २८ ॥

[पा०] ·१ क. च. छ. झ. ञ. ट. चरतां. २ च. छ. झ. ञ. ट. सीते. ३ ख. ग. च—ट. कर्तव्यःसंतोष. ग. घ. ज. कर्तव्यःसंतोषस्त्वत्र. ४ छ. ज. झ. यथाहारै. घ यदाहारै. ५ च—झ. ट. सीते. ६ छ. झ. ञ. ट. वातः. ७ छ. झ. ट. चास्ति. ८ छ. झ. अतो. ९ छ. झ. ट. पथिते. १० च. सर्पास्ततो. क. ख. दर्पादतो. ११ घ. सर्वे. १२ ख—ट. पंथानमतो. १३ घ. पतङ्गवृश्चिकाः. १४ घ. पतगैः. १५ घ. च—झ. ट. कुशाः. १६ च. शाखायाः. १७ च. छ. झ. ञ. ट. मतो. १८ क—घ. च—ट. सदा. १९ ग. घ. क्रोधमोहौ. २० च. छ. झ. ञ. ट. दुःखंनित्य. ख. घ. नित्यंदुःखतरं. २१ च. छ. झ. क्षेमं. २२ ज. झ. ट. विमृशन्निव. २३ घ. ज. दोषमतो. च. झ. ञ. ट. दोषकरं. २४ छ. झ. ट. यदा. ग. यथा. ज. स्तथा. २५ छ. झ. ट. तदा. च. ज. यथा. क. महात्मनायदा. २६ क. च. ज. अ. चकारसा. झ. चकारतं.

एकोनत्रिंशः सर्गः ॥ २९ ॥

ईषदश्रुमुख्यासीतयारामंप्रतितदुक्तवनदोषाणांगुणत्वनिरूपणपूर्वकंस्वस्यपितृगृहवासकालेसामुद्रिकलक्षणविद्योद्विजेभ्यः कस्याश्चिद्भिक्षिण्याश्चसकाशाद्भाविवनवासश्रवणस्य तेनसहस्वस्यवनवासोत्कण्ठायाश्चनिवेदनम् ॥ १ ॥ तथाश्रीरामविरहम-सहमानयातयावनवासंप्रतिबहुविधंप्रार्थितेनापितेनतदनङ्गीकारेणैवतस्याःपरिसान्त्वनम् ॥ २ ॥

एतत्तु वचनं श्रुत्वा सीता रामस्य दुःखिता ॥ प्रसक्ताश्रुमुखी मन्दमिदं वचनमब्रवीत् ॥ १ ॥
ये त्वया कीर्तिता दोषा वने वस्तव्यतां प्रति ॥ गुणानित्येव तान्[1]विद्धि तव स्नेहपुर[2]स्कृतान् ॥ २ ॥
मृगाः सिंहा गजाश्चैव शार्दूलाः शरभास्तथा ॥ पक्षिणः सृ[3]मराश्चैव ये चान्ये वनचारिणः ॥ ३ ॥
अदृष्टपूर्वरूपत्वात्सर्वे ते तव राघव ॥ रूपं दृष्ट्वाऽ[4]पसर्पेयुर्[5]भये सर्वे हि बिभ्यति ॥ ४ ॥
त्वया च सह गन्तव्यं मया गुरुजनाज्ञया ॥ त्वद्वियोगेन मे राम त्यक्तव्यमिह जीवितम् ॥ ५ ॥
[6]न च मां त्वत्समी[7]पस्थामपि शक्नोति राघव ॥ सुराणामीश्वरः [8]शक्रः प्रधर्षयितुमोजसा ॥ ६ ॥
पति[9]हीना तु या नारी [10]नं सा शक्ष्यति जीवितुम् ॥ काममेवंविधं राम त्वया मम विदर्शि[11]तम् ॥७॥

पूर्वसर्गान्तेइदमित्युक्तावपिपुनरिदमित्युक्तिर्विशेषणविशेषाभिधानार्था। प्रसक्ताश्रुमुखी ईषदश्रुमुखीत्यर्थः ॥१॥ वस्तव्यतां वासित्वं। तान् दोषान् तवस्नेहपुरस्कृतान्गुणानित्येवविद्धि प्रेयसात्वयासहवर्तमानायाःमम कोकिलालापचन्दनमलयमारुतवत्सुखकरान्जानीहीत्यर्थः। अमुमर्थमुपरितनसर्गेकुशकाशेत्यादिश्लोकैर्विवरिष्यति ॥२॥ शरभाः अष्टपादमृगाः। सृमराः गवयाः। भये भयहेतौ। अस्मान्दृष्ट्वा अभिमुखमायास्यन्तीत्युक्तवान्रामः। इयंत्वपसर्पेयुरितितत्परिजहार ॥ ३—४ ॥ गुरुजनाज्ञया पित्रोराज्ञया। त्वयाचसहमयागन्तव्यम् " अर्धोवाएषआत्मनोयत्पत्नी " इतिश्रुत्युक्तप्रक्रियाजायापत्योरेकात्मत्वात्त्वद्विषयादेशएवमद्विषयादेशइत्यर्थः। त्वद्वियोगेनहेतुना। मे मया ॥ ५ ॥ अपिशब्दोभिन्नक्रमः। सुराणामीश्वरोपीत्यर्थः ॥ ६ ॥ यानारीपतिहीना पतिवियुक्ता। साजीवितुंनशक्ष्यतीत्येवंविधंत्वयाममकामं अत्यर्थं। विदर्शितं उपदिष्टं।

शि० प्रसक्ता पतिविषयकात्यनुरागविशिष्टा ॥ १ ॥ **शि०** येदोषास्त्वयाकीर्तिताः तान्गुणानेवविद्धि। इति यतः। तवस्नेहपुरस्कृत्वा त्वद्विषयकस्नेहमात्रदर्शनशीला। अहमस्मीतिशेषः। **स०** येदोषाइतीतिशब्दान्वयः। यथाश्रुतान्वयेतु इतिनानिपातेन कर्मणोनभिहितत्वरूपनिमित्ताभावाद्द्वितीयानस्यात् स्याच्चप्रथमा। तथाचमाघः "क्रमाद्दमुंनारदइत्यबोधिसः" इति। अवस्तव्यतामितिच्छेदः। वस्तव्यंवासः भावेतव्यप्रत्ययः। नविद्यतेवस्तव्यंयेषांतेअवस्तव्याः तेषांभावस्तत्तातांप्रति अवनवासमुद्दिश्येत्यर्थः। एतेन नतलआधिक्यशङ्कानवकाशः। गुणान्विद्धि मांप्रतीतिशेषः। यतोऽहंतवस्नेहपुरस्कृता ॥ २ ॥ **स०** शरभादीनांपूर्वमभाषितत्वेपि भयजनकमात्रस्यकथनीयतयारामाभिप्रेतत्वेन कण्ठतोनुक्तानुवादोनदोषाय ॥ ३ ॥ **स०** अपसर्पेयुः पलायनपराभवेयुः। कुतः भस्मात् तव त्वत्तः। सर्वेबिभ्यति। " भीषास्मात् " इत्यादेः ॥ ४ ॥ **ती०** गुरुजनाज्ञया " इयंसीताममसुतासहधर्मचरीतव। छायेवानुगतासदा " इत्येवंरूपयागुरुजनस्याज्ञया ॥ ५ ॥ **स०** अयीतिसंबोधनं ॥ ६ ॥ **शि०** पतिहीना पतिवियोगविशिष्टानारी जीवितुंनशक्ष्यति। अतःहेराम एवंविधं त्वद्वियोगेपिस्थितिकारकं। ममकामं इच्छाविषयीभूतं वस्तु ननिदर्शितं। नकारउभयान्वयी। किंच एवंविधं सहगमननिवारकवचनं मम कामं कस्यसुखस्यअमोगमनंयस्मात्दुःखदमित्यर्थः। निदर्शितं कथितम्। किंच एवंविधं उक्तप्रकारकं। ममकामं मदिच्छाविषयीभूतंवस्तु। त्वयैवनिदार्शितं कौसल्याप्रार्थनासमयेउक्तम्। **ति०** केचित्तु एवंविधंवनवासदुःखंकामंत्वयाममदर्शितंयद्यपि तथापितादृशवने पतिहीना प्रबलभर्तृहीना। नजीवितुंशक्ष्यति नतुमादृशी प्रबलभर्तृकेतिअहंवनंयास्याम्येवेतिभावइत्याहुः। **स०** हेराम एवंविधंत्वयानिदर्शितं भरतमाश्रित्यवर्तस्वेत्यादि तत् कामं स्वेच्छानुसारेणैवोक्तं। कुतः पतिहीनायानारीसाजीवितुंनहिशक्ष्यतीति। यद्वा काममेवंविधंजातंभरतत्वेनजातंआश्रयेतियदुक्तं तत् अम-

[पा०] १ ख. तान्मन्ये. २ छ. झ. ट. पुरस्कृता. ३ क. च. छ. झ. ञ. ट. चमराः. ४ क. ख. घ. च. ञ. प्रसर्पेयुः. ५ छ. ट. तवसर्वेहि. क. भयात्सर्वे. ६ ग. घ. छ—ट. नहि. ७ क. ग. घ. च. ट. मपिशक्नोपि. ठ. मयिशक्रोपि. ख. मपिसक्रोहि. ८ क—घ. च—ञ. शक्तः. ९ क. ख. हीनाच. १० क. च. ज. ञ. सान. ११ झ. ट. निदर्शितम्.

अथ चापि महाप्राज्ञ ब्राह्मणानां मया श्रुतम् ॥ पुरा पितृगृहे सत्यं वस्तव्यं किल मे वने ॥ ८ ॥
लक्षणिभ्यो द्विजातिभ्यः श्रुत्वाऽहं वचनं पुरा ॥ वनवासकृतोत्साहा नित्यमेव महाबल ॥ ९ ॥
आदेशो वनवासस्य प्राप्तव्यस्स मया किल ॥ सा त्वया सह तत्राहं यास्यामि प्रिय नान्यथा ॥१०॥
कृतादेशा भविष्यामि गमिष्यामि सह त्वया ॥ कालश्चायं समुत्पन्नः सत्यवाग्भवतु द्विजः ॥ ११ ॥
वनवासे हि जानामि दुःखानि बहुधा किल ॥ प्राप्यन्ते नियतं वीर पुरुषैरकृतात्मभिः ॥ १२ ॥
कन्यया च पितुर्गेहे वनवासः श्रुतो मया ॥ भिक्षिण्याः साधुवृत्ताया मम मातुरिहाग्रतः ॥ १३ ॥
प्रसादितश्च वै पूर्वं त्वं वै बहुविधं प्रभो ॥ गमनं वनवासस्य काङ्क्षितं हि सह त्वया ॥ १४ ॥
कृतक्षणाऽहं भद्रं ते गमनं प्रति राघव ॥ वनवासस्य शूरस्य चर्या हि मम रोचते ॥ १५ ॥
शुद्धात्मन्प्रेमभावाद्धि भविष्यामि विकल्मषा ॥ भर्तारमनुगच्छन्ती भर्ता हि मम दैवतम् ॥ १६ ॥
प्रेत्यभावेऽपि कल्याणः संगमो मे सह त्वया ॥ १७ ॥
[पिता रक्षति कौमारे भर्ता रक्षति यौवने ॥ पुत्रा रक्षन्ति वार्धक्ये न स्त्री स्वातन्त्र्यमर्हति] ॥ १८ ॥

॥ ७ ॥ अथचापि अपिचेत्यर्थः । हेमहाप्राज्ञ पुरापितृगृहेवसन्त्यामया ब्राह्मणानां ब्राह्मणेभ्यः । ज्योतिर्विद्भ्यः । मे मया। वनेवस्तव्यं किलेतिसत्यंवचनंमया श्रुतं ॥ ८ ॥ लक्षणिभ्यः सामुद्रिकलक्षणज्ञेभ्यः । लक्षणज्ञानमस्त्येषामितिइनिः ॥ ९ ॥ सः ब्राह्मणोक्तः । वनवासस्यादेशः आदिष्टोवनवासइत्यर्थः । मयाप्राप्तव्यःकिल । ललाटलिखितस्यापरित्याज्यत्वादितिभावः। सा एवमादिष्टा । अहंत्वयासहयास्यामि । नान्यथा केवलंस्वेच्छयानयास्यामीत्यर्थः ॥१०॥ फलितमाह— कृतादेशेत्यादि । अयंकालःवनवासकालः । द्विजः लक्षणवादी । जातावेकवचनम् ॥ ११ ॥ वनवासेदुःखानिजानामि । तानि अकृतात्मभिः अशिक्षितमनस्कैः । प्राप्यन्ते नतुमादृशैर्जनैरितिभावः ॥ १२ ॥

कन्ययेत्यादिश्लोकद्वयमेकान्वयम् । भिक्षिण्याः तापस्याः । व्रीह्यादित्वादिनिः । वनवासःश्रुतः भावीतिश्रुतः । इहगृहेत्वयासहवनवासस्यगमनं लीलार्थं जाह्नवीतीरतपोवनादिगमनं काङ्क्षितंहि । त्वंच बहुविधं प्रसादितोवै प्रसादितएवेतिसंबन्धः ॥ १३—१४ ॥ कृतक्षणा कृतोत्सवा । "निर्व्यापारस्थितौकालविशेषोत्सवयोःक्षणः" इत्यमरः । वनवासस्य वनेवासो यस्यइतिवनवासःतस्य । शूरस्यतवचर्या परिचर्या । मम मह्यं रोचते ॥ १५ ॥ शुद्धात्मन् ईर्ष्याविरहित । प्रेमभावात् प्रेमस्वभावात् । हिःप्रसिद्धौ । भर्तारंत्वामनुगच्छन्ती विकल्मषा विगतकल्मषा । भविष्यामि । नन्वत्रैवस्थित्वाकुलदेवतामाराध्यविशुद्धाभवेत्यत्राह— भर्ताहिममदैवतमिति ॥ १६ ॥ प्रेत्यभावेपि परलोके-

मनिदर्शितं ममतारहितेननिदर्शितं ॥ ७ ॥ स० ब्राह्मणानामितिकर्तरिषष्ठी । हेमे रमे अवने निमित्तसप्तमी रक्षणार्थं । पुरा विवाहात्पूर्वं । पितृगृहेवस्तव्यं अनन्तरंपतिनिकटेवनेवस्तव्यमिति सत्यंविप्रेभ्यश्श्रुतम् ॥ ८ ॥ स० तवरमारमणत्वान्ममचरमालात्र त्वत्कुंयोग्याऽहमित्यप्याह । वनवासेषु क्रमलेषु कृतोत्साहेति ॥९॥ ति० अत्रद्विजपदेनरावणोपि । तेन यच्छ्वेतद्वीपेतेनोक्तंलक्ष्मीनिमित्तंत्वत्तोमेवधोस्त्विति तत्सत्यंभवत्वित्यपिगूढंसूचितम् । स० द्विजेत्येकवचनेन पूर्वप्रकृतब्राह्मणानामैकमत्यंद्योतयति ॥११॥ ति० अत्रत्यमिहेत्युत्तरश्लोकान्वयि । स० भिक्षिणी अपभ्रष्टभाषयाकोरवञ्जी । साधुवृत्तायाइत्यनेन नप्रतारणार्थंतदुक्तिरिति सूचयति । इहमातुः एतज्जन्मनिजनन्याः । इहेत्यस्यास्मिन्गृहइति तथा अत्रत्यमिहेतिउत्तरश्लोकान्वयीतिचव्याकरणंचिन्त्यं । अस्मिन्गृहइतीदंशब्दबोध्यग्रामगृहस्यतदानींतदीयत्वाभावात् । उत्तरश्लोकान्वयित्वस्यचागतिकगतित्वादिति ॥ १३ ॥ ति० मे मया । बहुतिथं बहुवारं ॥ १४ ॥ ती० कृतक्षणा प्राप्तावसरा । प्रतीक्षितकालेत्यर्थः ॥ १५ ॥ स० प्रेष्यभावात् दूत्यात् । ति० प्रेमभावात् भर्तारमनुगच्छन्ती विकल्मषाभविष्यामीत्यन्वयः । त्वयाविनाऽत्रस्थितौहिलोकःकल्मषंसंभावयिष्यतीतिभावः ॥ १६ ॥

[पा०] १ च. छ. झ. ञ. ट. अथापिच. ख. अथवापि. ३ क. नित्यं. २ ख. ग. घ. लाक्षणिभ्यः. च. ञ. लाक्षण्येभ्यो. ४ क. घ. च—ट. गृहे. ५ क. वासे. ६ छ. झ. ट. भर्त्राहं. ७ घ. झ. ट. त्वयासह. ८ घ. त्रिविधानिच. ९ छ. झ. ट. शमवृत्तायाः, १० छ. झ. ट. त्वंमेबहुतिथं. ११ घ. वीराद्य. १२ च. छ. झ. ञ. ट. ममचर्याहि. १३ ख. प्रेष्यभावाद्धि. घ. प्रेमभावाद्वै. १४ ग. विकिल्बिषा. १५ छ. झ. पर. १६ छ. झ. ट. सदा. १७ इदंपद्यं क. दृश्यते.

श्रुतिर्हि श्रूयते पुण्या ब्राह्मणानां यशस्विनाम् ॥ इह लोके च पितृभिर्या स्त्री यस्य महामते ॥
अद्भिर्दत्ता स्वधर्मेण प्रेत्यभावेऽपि तस्य सा ॥ १९ ॥
एवमस्मात्स्वकां नारीं सुवृत्तां हि पतिव्रताम् ॥ नाभिरोचयसे नेतुं त्वं मां केनेह हेतुना ॥ २० ॥
भक्तां पतिव्रतां दीनां मां समां सुखदुःखयोः ॥ नेतुमर्हसि काकुत्स्थ समानसुखदुःखिनीम् ॥ २१ ॥
यदि मां दुःखितामेवं वनं नेतुं न चेच्छसि ॥ विषमग्निं जलं वाहमास्थास्ये मृत्युकारणात् ॥ २२ ॥
एवं बहुविधं तं सा याचते गमनं प्रति ॥ नानुमेने महाबाहुस्तां नेतुं विजनं वनम् ॥ २३ ॥
एवमुक्ता तु सा चिन्तां मैथिली समुपागता ॥ स्नापयन्तीव गामुष्णैरश्रुभिर्नयनच्युतैः ॥ २४ ॥
चिन्तयन्तीं तथा तां तु निवर्तयितुमात्मवान् ॥ ताम्रोष्ठीं स तदा सीतां काकुत्स्थो बहसान्त्वयत् ॥ २५ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे एकोनत्रिंशः सर्गः ॥ २९ ॥

त्रिंशः सर्गः ॥ ३० ॥

श्रीरामेणपरिसान्त्व्यमानयासीतयातंप्रतिप्रणयकोपात्तस्यवनेस्वरक्षणसामर्थ्याभावसूचकगर्हणोक्तिः ॥ १ ॥ तथास्वस्यवनवासाचरणेनदुःखाभावंप्रतिपाद्यस्वपरित्यागेनवनगमनेविषपानादिनाप्राणवियोजननिवेदनपूर्वकंविलपन्तींतांप्रतिश्रीरामेणदुःखात्तदनुगमनाङ्गीकारेणब्राह्मणादिभ्योरत्नाभरणादिवितरणचोदना ॥ २ ॥

सान्त्व्यमाना तु रामेण मैथिली जनकात्मजा ॥ वनवासनिमित्ताय भर्तारमिदमब्रवीत् ॥ १ ॥
सा तमुत्तमसंविग्ना सीता विपुलवक्षसम् ॥ प्रणयाच्चाभिमानाच्च परिचिक्षेप राघवम् ॥ २ ॥

पि । त्वयासहसंगमःकल्याणः शोभनः ॥१७—१८॥ अत्रप्रमाणमाह—श्रुतिर्हीत्यादिसार्धश्लोकेन । पितृभिरितिबहुवचनंपितामहाद्यपेक्षया । श्रुतिमेवाह—इहेति । महामतइत्यनेनतत्त्वांबोधयामीतिसूच्यते । स्वधर्मेण स्वस्ववर्णोक्तब्राह्मादिविवाहविधिना ॥ १९ ॥ एवं पूर्वोक्तश्रुतिरूपप्रबलप्रमाणसद्भावेपीत्यर्थः । अस्मात् नगरात् । नेतुमित्यनेनान्वयः । यद्वा अस्मात् अद्भिर्दानाद्धेतोः ॥ २० ॥ सुखदुःखयोःसमां प्राप्तयोः सुखदुःखयोरेकरूपां । समानसुखदुःखिनीं त्वत्समानसुखदुःखां ॥ २१ ॥ आस्थास्ये स्वीकरिष्ये ॥ २२ ॥ याचते अयाचत । विज[illegible]नुजनरहितं ॥ २३ ॥

गां भुवं ॥ २४ ॥ ताम्रोष्ठीमित्यनेनसान्त्वादिनास्थातुमशक्यत्वमुच्यते ॥ २५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीतांबराख्याने अयोध्याकाण्डव्याख्याने एकोनत्रिंशःसर्गः ॥ २९ ॥

जनकात्मजेतिविशेषणंस्वकुलोचिताचारदार्ढ्याय । वनवासनिमित्ताय वनवासएवनिमित्तंप्रयोजनंतस्मै ॥ १ ॥ उत्तमसंविग्ना उत्तममत्यन्तंकंपमाना । विपुलवक्षसं शूरमितियावत् । शूरमपिकथंचिक्षेपेत्यत्राह—प्रणयादित्यादि । प्रणयात् स्नेहात् । अभिमानात् मदीयोयमित्यभिमानात् । कोपाद्वा । प्रणयकोपादि-

---

ती० स्वधर्मेण पतिव्रताधर्मेणवर्तमाना । शि० प्राकृतस्त्रीणामपिपातिव्रत्यधर्मस्वीकारेनित्यःपतिसंगमोभवतीत्याह—इहेति । प्रेत्यभावे नित्यलोके । स० सा जन्मान्तरेतस्यपत्नीभवतीतिशेषः । नियतपत्नीविषयमेतदितिज्ञेयम् । स्वस्वत्वापरित्यागाथस्येतिषष्ठी ॥ १९ ॥ शि० नानुमेने अनुमतिंनचकार । तेन प्रणयकोपसूचकवचश्शुश्रूषाव्यक्ता । स० सा अयाचत ई इतिच्छेदः । ई लक्ष्मीः सीता ॥ २३ ॥ ति० स्नापयन्तीवेत्युक्त्या तस्याअपिवास्तवदुःखाभावोध्वनितः । रामवाक्यस्यनाट्यतयाज्ञानात् ॥ २४ ॥ इत्येकोनत्रिंशस्सर्गः ॥ २९ ॥

स० वनवासनिमित्तार्थं वनवासएवनिमित्तंयस्यरावणहननादेस्सवनवासनिमित्तःसएवार्थोयस्यतंरामं ॥ १ ॥ ति० अभिमानः अत्यन्तमिष्टत्वेनरहसिकोपप्रीत्यादिप्रयुक्तसकलवचनार्हइत्येवंरूपः । परिचिक्षेप सोपहासवचनमुक्तवती । शि० प्रणयात् प्रकर्ष-

[पा०] १ छ. झ. ट. महाबल. २ क. च. केनैव. ३ च. चाहमास्थास्ये. घ. चाहंप्रवेक्ष्ये. ४ च. सातं. ५ घ. ययाचे. ६ क. ग. घ. च. ज. ञ. कुचावुष्णै. ७ झ. ञ. ट. तदा. ८ क. ग. घ. छ—ट. क्रोधाविष्टांतुवैदेहीं. ख. क्रोधाविष्टांतुताम्रोष्ठीं. ९ घ. छ. झ. ट. बहुसान्त्व. १० छ. झ—ठ. निमित्तार्थं. ११ घ. सामुहूर्तमसंविग्ना.

किं त्वाऽमन्यत वैदेहः पिता मे मिथिलाधिपः ॥ राम जामातरं प्राप्य स्त्रियं पुरुषविग्रहम् ॥ ३ ॥
अनृतं बत लोकोऽयमज्ञानाद्यद्धि वक्ष्यति ॥ तेजो नास्ति परं रामे तपतीव दिवाकरे ॥ ४ ॥

तिसंपिण्डितोर्थः । परिचिक्षेप निनिन्द ॥ २ ॥ मां त्यक्त्वावनंगतंत्वांयदिमेपिताशृणुयात्तदात्वांरूयेवकाचित्पुरुषवेषंधृत्वामत्कन्यामुपयेमे इतिमन्येतेत्यर्थः । हेराम सौन्दर्यमात्रेणपरभ्रामक । वैदेहः विदेहवंश्यः । " कर्मणैवहिसंसिद्धिमास्थिताजनकादयः " इतिकर्मप्रधानतयाकदाचिदपिपत्नीविरहमसहमानइत्यर्थः । मिथिलाधिपः जनपदस्थसस्यग्रक्षकः । मेपिता त्वा मामेकांरक्षितुमशक्त्यामांपत्नींत्यक्त्वागतंत्वां । प्राप्य ज्ञात्वा । गत्यर्थोज्ञानार्थः । स्त्रियं अन्तःस्त्रीस्वभावं । पुरुषविग्रहं बहिःपुरुषवेषं । जामातरंअमन्यतकिं मन्यतेकिं । अवश्यमित्थंमन्येतेत्यर्थः । स्त्रियं पुरुषविग्रहमितिपुरुषत्वेपिमोहिनीरूपभ्रमकृत्त्वं पूर्वकृतं सूचयतीतिप्राहुः ॥ ३ ॥ बतेतिखेदे । अयं लोकः तपतिदिवाकरइवरामेपरंतेजोस्तीतिअज्ञानात् यद्वक्ष्यति वदति । तदनृतं । कुतः । नास्ति अनुपलभ्यमाणत्वात्तादृशंतेजोनास्त्येवेत्यर्थः । यद्वा अयंलोको यद्वक्ष्यति यद्वदति । रामेपरंतेजोस्तीत्यर्थसिद्धं । तत् अज्ञानात् । अतोनृतंबत । तपतिदिवाकरइवरामेपरं तेजोनास्ति । व्यतिरेकदृष्टान्तः । यद्यस्तिदिवाकरइवउपलभ्येतइतिभावः । यद्वा अज्ञानात् रामस्वरूपाज्ञानात् । लोकोयंयद्वदतितदनृतं । किंवदतीत्यत्राह —तेजइति । रामइवतपतिदिवाकरेपरंतेजोनास्तीति

णनयःरामकर्तृकस्वकर्मकनयनंतस्माद्धेतोः । परिचिक्षेप विलक्षणवचनमुच्चारयन्नास ॥ २ ॥ ती० हेराम त्वा त्वां । पुरुषविग्रहं आकारमात्रेणपुरुषं । स्त्रियमेवसंतंजामातरंप्राप्य किममन्यत तत्वंनज्ञातवानित्यर्थः । यदिजानाति तर्हिमांतुभ्यंनप्रयच्छेदित्याक्षेपशेषः । यद्वा "सएववासुदेवोऽयंसाक्षात्पुरुषउच्यते । स्त्रीप्रायमेतत्तत्सर्वंजगद्ब्रह्मपुरस्सरम्" इतिविष्णुपुराणोक्तेःवैदेहोमेपितात्वां जामातरंप्राप्य लोकेत्वद्व्यतिरिक्तंपुरुषविग्रहं पुरुषाकृतिसर्वमपि । स्त्रियममन्यतःकिं किमर्थममन्यत । एतादृशकातरंत्वांतथानन्वानो भ्रान्तइत्यर्थः । यद्वा किंत्विति रामज अमातरं प्राप्यस्त्रियंपुरुषविग्रहं इतिपदच्छेदः । हेरामज रमयितुंजात अवतीर्णेति । हेपुरुष क्रीडार्थमवतीर्णपरमपुरुषेत्यर्थः । अमातरंस्त्रियं मातृव्यतिरिक्तांसपत्नीमातरंकैकेयीं । प्राप्य उद्दिश्य । वैदेहोमेपिता । विग्रहं कलहं । अमन्यतकिं नामन्यतैव । कैकेय्यासहैतादृशकलहआयास्यतीतिनज्ञातवानित्यर्थः । तथापिनमांविहायत्वयावनंगन्तव्यमितिभावः । यद्वा रामजःमातरमित्येकंपदं । पुरुषविग्रहं पुरुषान्भक्तान्विशेषेणगृह्णाति स्ववशीकरोतीतितथा रामजामातरं । "रमन्तेयोगिनोनन्ते" इतिश्रुतेःआनन्दरूपजामातरं । त्वांप्राप्यवैदेहोमेपिता स्त्रियं स्वस्त्रियं [illegible]मित्युपलक्षणं । पुत्रमित्रकलत्रादिकमामुष्मिकंच । सत्यममन्यतकिं किंतुसर्वंतुच्छमितिज्ञात्वापरमानन्दपूर्णोऽभूत् । एतादृशसर्वानन्दकरस्त्वंमांकथंव्यथयसीतिभावः । शि० पुरुषविग्रहं पुरुषाकृतिं । स्त्रियं स्त्र्यन्तराकाङ्क्षारहितत्वेनस्त्रीसदृशं । त्वां वैदेहः विदेहकुलोद्भवोमेपिता जामातरंकिममन्यत जामातृत्वेनत्वयिनिश्चयमकरोत् । एवंज्ञानेतुभवन्तंदद्यादितितात्पर्यम् । यद्वा यस्त्वयाप्रापिसवैदेहः विदेहकुलोत्पन्नोमेपिता । पुरुषविग्रहं पुरुषत्वस्यविशेषेणग्रहोज्ञानंयस्मिन्परमपुरुषमित्यर्थः । तंजामातरंत्वां अस्त्रियं स्त्रीरहितं । किं कथं अमन्यत । एतेनतवस्त्र्यन्तरमस्तीत्यनुमीयते । तेनतदर्थमेवतेवनगमनमितिव्यञ्जितम् । किंच अस्त्रियं अस्त्रिणानिखिलास्त्रज्ञेनविश्वामित्रेणसहयातिगच्छतितं विश्वामित्रसहचारिणमित्यर्थः । जामातरंत्वां पुरुषविग्रहं विशेषपुरुषं । किंकथंअमन्यत तवेदृग्वचनश्रवणेनविशेषपुरुषत्वंनप्रतीयतइति तात्पर्यम् । तेनपितुर्भ्रमस्सूचितः । स० वैदेहो जनकः । त्वांजामातरंप्राप्य कीदृशंस्त्रियं क्रिययापुरुषाकारंएतादृशंत्वांकिममन्यत तवस्वरूपंनज्ञातवान् । यदिजानीयात्तर्हिनतुभ्यंप्रयच्छेदित्यर्थः । अथवा जगतोमातेतिस्त्रियं पितेतिपुरुषविग्रहं "एषस्त्रीएषपुरुष" इतिश्रुतिमनेनकटाक्षयत्यन्तरङ्गतस्सीस्येतिज्ञेयम् । तादृशंत्वांप्राप्यत्वत्स्वरूपं इत्थमितिनामन्यतकिं नज्ञातवान् ॥ ३ ॥ ति० यदि मांविहायभवान्वनगमनभारं वक्ष्यति प्राप्स्यति । वहप्रापणेऽस्यरूपं । तदा यदिदंलोकोवदतिरामेयत्तेजस्तत्तपतिदिवाकरेनास्तीवेति तदज्ञानादिववदितमनृतंभविष्यतीतिशेषः । बतेतिखेदे । खेदातिशयव्यञ्जकतयाचन्यूनपदत्वादिनदोषः । शि० नकेवलंमत्पितुरेवभ्रमः एवंत्वद्वचनश्रवणेसर्वेषांभ्रान्तिःप्रकटीभविष्यतीतिबोधयन्त्याह—अनृतमिति । यदिमांननेष्यसीतिशेषः । तदादिवाकरेसूर्यइवतपतित्वयि अज्ञानात्त्वन्निश्चितमननयनाभावहेतुविषयकज्ञानाभावाद्धेतोः रामेपरंतेजोनास्तीति अनृतं मिथ्या । अयंलोकोजनः वक्ष्यति वदिता । तेनतद्वचनश्रवणेममखेदोभवितेतिसूचितं । अद्यतनत्वस्याविवक्षा । स० तपति तापयितरि । दिवाकरे सूर्यइव । रामेतेजइतिनास्ति लोकोऽज्ञानाद्यद्यस्तीतिवक्ष्यति तदनृतंबतेत्यन्वयः । यद्वा त्वमपिनजनकमनोरञ्जनीति "यादृशोयक्षस्तादृशोबलिः" इतिन्यायेनदानंमद्यमितिनवदेत्यप्याह । दिवाकरे तद्धिष्ण्ये । तपती तत्पुत्रींवाऽहंतत्प्रीतिमतीति । तपतिदिवाकरेकियत्तेजः अन्याधीनंचतावत्तथारामेऽस्तीतिन । किंतुततःपरमधिकंस्वतन्त्रंच । शिष्टंस्पष्टं । "[illegible]मेवभान्तमनुभातिसर्वं" इत्यादेः ॥ ४ ॥

[पा०] १ क. रामं. २ छ. झ—ठ. यदि. च. दमि.

किं हि कृत्वा विषण्णस्त्वं कुतो वा भयमस्ति ते ॥ यत्परित्यक्तुकामस्त्वं मामनन्यपरायणाम् ॥ ५ ॥
द्युमत्सेनसुतं [1]वीरं सत्यवन्तमनुव्रताम् ॥ सावित्रीमिव मां विद्धि त्वमात्मवशवर्तिनीम् ॥ ६ ॥
न त्वहं मनसाऽ[2]प्यन्यं द्रष्टास्मि त्वदृतेऽनघ ॥ त्वया राघव गच्छेयं यथाऽन्या कुलपांसनी ॥ ७ ॥
स्वयं तु भार्यां कौमारीं चिरमध्युषितां सतीम् ॥ शैलूष इव मां राम परेभ्यो दातुमिच्छसि ॥ ८ ॥
यस्य पथ्यं च रामात्थ यस्य चार्थेऽवरुध्यसे ॥ त्वं तस्य भव वश्यश्च [3]विधेयश्च सदाऽनघ ॥ ९ ॥
स मामनादाय वनं न त्वं [4]प्रस्थातुमर्हसि ॥ तपो वा यदि वाऽ[5]रण्यं स्वर्गो वा [6]मे सह त्वया ॥ १० ॥
न च मे भविता तत्र कश्चित्पथि परिश्रमः ॥ पृष्ठतस्तव गच्छन्त्या [7]विहारशयनेष्विव ॥ ११ ॥
कुशकाशशरेषीका ये च कण्टकिनो द्रुमाः ॥ तूलाजिनसमस्पर्शा मार्गे [8]मम सह त्वया ॥ १२ ॥

यद्वदतितदनृतमितिपूर्वेणान्वयः ॥ ४ ॥ किंहिकृत्वा किमकार्यंकृत्वा । विषण्णः "अप्यकार्यशतंकृत्वाभर्तव्यामनुरब्रवीत्" इत्युक्तावश्यभरणीयविषयेविषादप्राप्तिर्नयुक्तेतिभावः । ते कालाग्निसदृशक्रोधस्यतव । यत् यस्मात्कारणात् । मांपरित्यक्तुकामोसि तादृशंकारणंनास्तीत्यर्थः । यद्वा किंहिकृत्वा किंमनसिकृत्वा । किंविचार्येत्यर्थः । यद्यस्मात् विषादात्भयाच्चमांपरित्यक्तुकामोसि ॥ ५—६ ॥ हेराघव अन्याकुलपांसनीयथा कुलपांसनीव । अहंत्वदृतेअन्यंमनसापिनद्रष्टास्मि नद्रक्ष्याम्येव । अतस्त्वयागच्छेयमितियोजना ॥ ७ ॥ दृढपातिव्रत्यप्रदर्शनेपिवनगमनासंमतिंज्ञात्वा क्रुध्यति—स्वयमिति । कौमारीं कुमारावस्थायामेवपरिणतां । शैलूषइव जायाजीवइव । "शैलालिनस्तु शैलूषाजायाजीवाःकृशाश्विनः" इत्यमरः । परेभ्यः स्वयंदातुमिच्छसि ॥ ८ ॥ मातरंशुश्रूषस्वेतियदुक्तं तत्रपरिहारमाह—यस्येति । यस्यमातृजनस्य पथ्यं हितं आत्थ । यस्यचार्थेअवरुध्यसे मांनिवारयसे । तस्य जनस्य त्वमेववश्यः अनुकूलः । विधेयः प्रेष्यश्च । भव । अहंतुत्वामनुयास्यामीत्यर्थः । यद्वा यस्यमद्रूपजनस्य पथ्यंचात्थ एतावत्पर्यन्तंयस्यचार्थेअवरुध्यसे क्लिश्यसि । तस्यजनस्यत्वंवश्योविधेयश्चभव । त्वमेवमद्वचनंशृण्वित्यर्थः । अथवा यस्यभरतस्य पथ्यमात्थ यस्यचार्थे यस्याभिषेकरूपप्रयोजननिमित्ते । अवरुध्यसे निगृहीतोसि । तस्यवश्यः इच्छानुसारी । विधेयश्च प्रेष्यश्च । भवेतिसंबन्धः ॥९॥ वश्योविधेयश्चत्वं तपोवा तपश्चरणंवा । अरण्यं अरण्यवासोवा । स्वर्गोवा स्वर्गगमनंवा । त्वयासहभवत्वितिशेषः ॥१०॥ पथितवपृष्ठतोगच्छन्त्यामे विहारशयनेष्विव विहारः परिक्रमः उद्यानसंचारइतियावत् । "विहारस्तुपरिक्रमः" इत्यमरः ॥ ११ ॥ त्वयासहगच्छन्त्याभम तूलाजिनसमस्पर्शाः तूलं तूलपिण्डः । अजिनं कन्दल्याद्यजिनं "कदलीकन्दलीचीनचमूरुप्रियकाअपि । समूरुश्चेतिहरिणाअमीअजिनयोनयः" इत्यभिधाना-

---

स० सत्यवन्नामानंपतिंसावित्रीनामिकाविवाहात्प्राक्नारदेनअल्पायुस्सइतिबोधितापियतोमनसातंसंकल्पितवतीअतोनाहंतंत्यक्ष्यामीत्युक्त्वातमेवसत्यवन्तमुद्वाह्य एकवत्सरानन्तरंवनेमृतंयमेननीयमानंपतिमनुगम्ययमात्तंमोचयित्वाजीवितंतं[illegible]हुभ्यांगृहीत्वास्वाश्रममागतवतीतिभारतवनपर्वोक्ताकथाज्ञेया ॥६॥ **ती०** यद्वा भरतायरामकर्तृकराज्यदानमसहमानाह । हेराम भार्यां भर्तुर्योग्यां । कुतःसतीं अनश्वरां । कुतः चिरमध्युषितां पितृपितामहाद्यागतां । कौमारीं कुमारावस्थेनत्वयाप्राप्यां यौवराज्यरूपामित्यर्थः । मां राज्यलक्ष्मीं । शैलूषइववेषधारीसन् परेभ्योभरतादिभ्योदातुमिच्छसि । इदंतवनोचितमितिभावः ॥ ८ ॥ **स०** यस्यभरतस्य पथ्यंचरां तदनुवर्तिनीं । आत्थ संप्रत्येवकथितवानसि । यस्यचार्थे प्रयोजनविषये । अवरुध्यसे निगृहीतोसि । तस्यभरतस्य भवोरुद्धः वश्यःअधीनोयस्यसःभववश्यस्त्वं विधेयोनियोज्योभव । पथ्यंचरामित्यत्रमुमागमइवङीवभावश्चार्षः । एतेन वश्यविधेयशब्दयोःपौन[illegible]त्त्यंपरिहृतंभवति ॥९॥ **स०** अनादाय आङाल्प्रत्ययान्तेनसमासेल्यपिअनन्तरंनञासमासः । तेन "समासेऽनञ्पूर्वेक्त्वोल्यप्" इतिनिषेधस्यनावकाशः ॥ १० ॥ **ति०** विहारशयनेषुसुप्तायाइवारण्येगच्छन्त्यानमेपरिश्रमइतियोजना । **स०** पूर्वमग्रतस्तेग-मिष्यामीत्युक्तेरत्रपुनःपृष्ठतस्तवगच्छन्त्याइत्युक्तेश्चकदाचित्पुरतःकदाचित्पृष्ठतश्चगमनमनुचरस्वभावइतिज्ञायते । तत्राग्रतइत्युक्ति-

[पा०] १ छ. झ. ट. ठ. वीरं. २ च. छ. झ. ञ. ट. त्वन्यं. ३ च. नियोज्यश्च. ४ छ. झ. ट. प्रस्थितुं. ५ च. राज्यं. ६ च--ट. स्यात्त्वयासह. क. ख. घ. स्यात्सहत्वया. ७ ख. शयनेष्वपि. ८ क. सहमम.

महावातस[1]मुद्धूतं यन्मा[2]मपकरिष्यति ॥ रजो रमण त[3]न्मन्ये परार्ध्यमिव चन्दनम् ॥ १३ ॥
शाद्वलेषु य[4]था शिश्ये वनान्ते वनगोचर ॥ कु[5]थास्तरणतल्पेषु किं स्यात्सुखतरं त[6]तः ॥ १४ ॥
प[7]त्रं मूलं फलं य[8]त्त्वमल्पं वा यदि वा बहु ॥ दा[9]स्यसि स्वयमाहृत्य तन्मेऽमृतरसोपमम् ॥ १५ ॥
न मातुर्न पितुस्तत्र स्मरिष्यामि न वेश्मनः ॥ आर्तवान्युपभुञ्जाना पुष्पाणि च फलानि च ॥ १६ ॥
न च तत्र ग[10]तः किञ्चिद्द्रष्टुमर्हसि विप्रियम् ॥ म[11]त्कृते न च ते शोको न भविष्यामि दु[12]र्भरा ॥ १७ ॥
यस्त्वया सह स स्वर्गो निरयो यस्त्वया विना ॥ इति जानन्परां प्रीतिं गच्छ राम मया सह ॥ १८ ॥
अथ मामेवमव्यग्रां वनं नैव नयि[13]ष्यसि ॥ विषमद्यैव पास्यामि मा[14]विशं द्विषतां वशम् ॥ १९ ॥
पश्चादपि हि दुःखेन मम नैवास्ति जीवितम् ॥ उज्झितायास्त्वया नाथ [15]तदैव मरणं व[16]रम् ॥ २० ॥
[17]इमं हि सहितुं शोकं मुहूर्तमपि नोत्सहे ॥ किंपुनर्दश वर्षाणि त्रीणि चैकं च दुःखिता ॥ २१ ॥

त् । भवन्तीतिशेषः ॥ १२ ॥ परार्ध्यं श्रेष्ठं । चन्दनं वासितं । चन्दनचूर्णमित्यर्थः ॥ १३ ॥ शाद्वलेषु बालतृणवत्प्रदेशेषु । शिश्ये त्वयासहेतिशेषः । कुथाश्चित्रकंबलाः । आस्तरणानि कौसुंभोत्तरच्छदाः । तैर्युक्तेषुतल्पेषु ॥ १४—१५ ॥ मातुरित्यादौ "अधीगर्थदयेशां" इतिषष्ठी । आर्तवानि तत्तदृतुसमुत्पन्नानि ॥ १६ ॥ तत्र वने । गतस्त्वंमत्कृते मन्निमित्तं । किञ्चिद्विप्रियं दुःखं । द्रष्टुंनार्हसि । तेशोकंश्चनभवेत् । अतोदुर्भरा दुःखेनभर्तव्या । नभविष्यामि ॥ १७ ॥ किंबहुनोक्तेननिश्चितमेकंसङ्क्षेपतःशृण्वित्याह—यइति। त्वयासहयोवासः सःस्वर्गः मेस्वर्गसमः । त्वयाविना योवासः सःनिरयः नरकोपमः । त्वत्संश्लेषविश्लेषादन्येनमेसुखदुःखेस्तइतिभावः । इति एवं । परां विश्लेषासहां । प्रीतिं जानन् पूर्वमपिबहुशोऽनुभवन् । मयासहगच्छ ॥ १८ ॥ अथेति प्रश्ने । एवं उक्तप्रकारेण । अव्यग्रां वनगमनविषयभीतिरहितां । अद्यैव त्वत्सन्निधावेव । द्विषतां भरतादीनां । वशं माविशं नप्राप्नुयां । विरहोवाद्विषन्तः ॥ १९ ॥ पश्चादपि त्वद्गमनानन्तरमपि । उज्झितायाः त्यक्तायाः । तदैव त्वत्सन्निधानकालएव ॥ २० ॥ विपक्षकृतदुर्मरणाद्दुः-

र्गमनलौल्यात् अत्रपृष्ठतइत्युक्तिर्विहितत्वादितिवाबोध्यम् । अपरिचितेपथियोषितोऽग्रगमनायोग्यत्वात् ॥ ११ ॥ **स०** अवकिरिष्यति कृविक्षेपइत्यतोलृट् विक्षेप्स्यति । प्राप्नोतीतियावत् ॥१३॥ **स०** शिश्येउत्तमपुरुषैकवचनमेतत् । वनगोचरा वनानिप्रलयजलानिचगावःवेदरूपशब्दाश्चवनगावःतासुचरश्चरणंअभिमानितयागमनंयस्यास्सावनगोचराअहं यदा वनान्ते वनमध्ये शाद्वलेषुशिश्यइत्यन्वयः । वनान्तर्वणगोचरेतिपाठे "प्रनिरन्तश्शर—" इत्यादिनाणत्वं । वनं महावनं । अन्तर्वणं तन्मध्यवर्ति । ततः शाद्वलशयनात् ॥ १४ ॥ **ति०** स्वयमाहृत्यदास्यसइत्यनेन स्वस्यतदाहरणप्रयुक्तश्रमाभावस्सूचितः । **स०** स्वयं साक्षात् दास्यसि किंकरीअसि । इति पत्राद्याहृत्ययदिदास्यसि मे मह्यं । तन्मेऽमृतरसोपममित्यावृत्तेनान्वयः ॥ १५ ॥ **स०** आर्तवानि "समयस्तदस्यप्राप्तं" इत्यधिकारे "ऋतोरण्" इत्यण् । प्राप्तवसन्ताद्यृतुकानि ॥ १६ ॥ **ति०** ततः उक्तहेतोः ॥ १७ ॥ **स०** यस्त्वयेत्यत्रत्ययुष्मच्छब्दस्यतत्कालीनसंबोध्यरामत्वविशिष्टेशक्तिः । रामत्वस्यैवशक्यतावच्छेदकत्वं । तत्कालीनसंबोध्यत्वस्यचशक्यतावच्छेदकतावच्छेदकत्वं । विशेषणत्वंचतत्पदजन्यबोधविषयत्वं । उपलक्षणत्वंचतत्पदजन्यबोधविषयत्वेनशक्त्यविषयत्वं । एवंमयेत्यस्मच्छब्दस्यतत्कालीनस्वतन्त्रोच्चारयितृसीतात्वविशिष्टेवस्तुनिशक्तिः । उक्तरीत्यासीतात्वादेरेवविशेषणादित्वाच्छक्यतावच्छेदकत्वादिबोध्यम् । तथाच इदानींसीतासंबोध्यरामेणसहवासइतियत् सस्वर्गः । विनातुयोवासः सनिरयइतिजानन् राम इदानींस्वतन्त्रोच्चारयित्र्यासीतयासहप्रीतिंहर्षंगच्छप्राप्नुहीत्युपलक्षणार्थघटितश्लोकार्थः । स्वतन्त्रेतिविशेषणान्नमयेत्यस्माद्वाल्मीकेर्बोधः । अनयैव दिशा "मादृशोनपरःपापी" "दासोहमितिमांमत्वा" इत्यादयस्समाधातव्याः ॥ १८ ॥ **शि०** द्विषतां त्वद्वियोगहेतुकसर्ववस्तुविषयकप्रीत्यभावविशिष्टानांभवन्मात्रादीनां । अवशं अप्रीतिहेतुककान्त्यभावं । मागमं नप्राप्स्यामि द्रष्टुंनशक्ष्यामीत्यर्थः । एतेन दुःखादर्शित्वंगुणःसीतायाव्यक्तः ॥ १९ ॥ **ती०** तदैव त्वद्विप्रयोगकालएव ॥ २० ॥ **ति०** विगृह्यकथनेन वनवासकालसंख्या-

[पा०] १ च. छ. झ. ञ. रामुद्धूतं. २ ख. घ. छ—ठ. मवकरिष्यसि. ३ क. तन्मंस्ये. ४ च. छ. झ—ठ. यदा. क. ख. यदासिष्ये. ५ च. ञ. कुशास्तरण. छ. कुशास्तरणयुक्तेषु. झ. ट. कुथास्तरणयुक्तेषु. ६ ख. मम. ७ ञ. पत्रमूलफलं. ८ छ. पुष्पमल्पं. झ. ट. यत्तुअल्पं. ज. यद्यदल्पं. ९ ख. च. छ. झ. ञ. ट. दास्यसे. १० च. छ. झ—ठ. ततः. ११ ज. त्वत्कृतेनचमे. १२ ज. दुर्धरा. छ. दुर्मनाः. १३ क. ख. च. छ. झ. ञ. ट. नयिष्यसे. १४ ख. मागमंद्विषतां. छ. ज. झ. ट. मावशंद्विषतांगमम्. १५ क. च. ज. तथैव. १६ ख. ध्रुवम्. १७ क. ख. इमंतु.

इति सा शोकसंतप्ता विलप्य करुणं बहु ॥ चुक्रोश पतिमायस्ता भृशमालिङ्ग्य सस्वरम् ॥ २२ ॥
सा विद्धा बहुभिर्वाक्यैर्दिग्धैरिव गजाङ्गना ॥ चिरसंनियतं बाष्पं मुमोचाग्निमिवारणिः ॥ २३ ॥
तस्याः स्फटिकसङ्काशं वारि संतापसंभवम् ॥ नेत्राभ्यां परिसुस्राव पङ्कजाभ्यामिवोदकम् ॥ २४ ॥
तच्चैवामलचन्द्राभं मुखमायतलोचनम् ॥ पर्यशुष्यत बाष्पेण जलोद्धृतमिवाम्बुजम् ॥ २५ ॥
तां परिष्वज्य बाहुभ्यां विसंज्ञामिव दुःखिताम् ॥ उवाच वचनं रामः परिविश्वासयंस्तदा ॥ २६ ॥
न देवि तव दुःखेन स्वर्गमप्यभिरोचये ॥ न हि मेऽस्ति भयं किंचित्स्वयंभोरिव सर्वतः ॥ २७ ॥
तव सर्वमभिप्रायमविज्ञाय शुभानने ॥ वासं न रोचयेऽरण्ये शक्तिमानपि रक्षणे ॥ २८ ॥
यत्सृष्टाऽसि मया सार्धं वनवासाय मैथिलि ॥ न विहातुं मया शक्या कीर्तिरात्मवता यथा ॥२९॥
धर्मस्तु गजनासोरु सद्भिराचरितः पुरा ॥ तं चाहमनुवर्तेऽद्य यथा सूर्यं सुवर्चला ॥ ३० ॥
न खल्वहं न गच्छेयं वनं जनकनन्दिनि ॥ वचनं तन्नयति मां पितुः सत्योपबृंहितम् ॥ ३१ ॥

खेनमरणंज्यायइत्याशङ्क्याह—इममिति । आदौ दशवर्णानि मध्येत्रीणिवर्णानि अन्तेएकवर्णश्च तुल्यलयाभातिविरहिण्याइत्यावेदयितुंविभज्योक्तिः ॥ २१ ॥ आयस्ता आयासंप्राप्ता । प्रशिथिलगात्रीत्यर्थः । सस्वरं सतारध्वमीत्यर्थः ॥ २२ ॥ विद्धा ताडिता । वाक्यैः पूर्वरामोक्तैः । दिग्धैः विषलिप्तैर्बाणैः । चिरसंनियतं वार्ताप्रसङ्गेनचिरात्संनिरुद्धं । अरणिरित्यत्रापिविद्धेत्यनुषञ्जनीयं ॥ २३ ॥ स्फटिकसङ्काशमित्यनेनविकलतावगमाच्चिरविगलितधारत्वमवगम्यते । उदकं मकरन्दरूपं । तद्धुष्णं निर्मलंच ॥२४॥ अमलसङ्काशमितिपाठे अमलतयाप्रकाशमानं । बाष्पेण संतापसंभवेनोष्णेन । अंबुजपक्षेऽूष्मणेत्यर्थः । "बाष्पऊष्मा" इत्यमरः ॥ २५ ॥ विसंज्ञामित्यनेन मूर्छाभावःसूच्यते । परिविश्वासयन् सम्यग्विश्वासयन् ॥ २६ ॥ तवदुःखेनहेतुनाप्राप्यंस्वर्गमपिनरोचये । त्वयिदुःखितायांस्वर्गमपिनेच्छामीत्यर्थः । स्वयंभोः नारायणस्य । नतुचतुर्मुखस्य । तस्यमधुकैटभादिभ्योभयसंभवात् । आर्षोडुप्रत्ययः । सर्वतः सर्वजन्तुभ्यः ॥ २७ ॥ तवविरहदुःखासहिष्णुरपि निर्भयोपि शक्तिमानपि तवान्तराभिप्रायानभिज्ञानादेतावत्पर्यन्तं त्वांवनंनेतुंनेच्छामीतिभावः ॥ २८ ॥ सृष्टा दैवेनेतिशेषः । आत्मवता शीलवता । अतिकृच्छ्रावस्थायामप्यक्षुभितमनस्केनवा । यच्छब्दयोगात्तदितिपूरणीयम् ॥ २९ ॥ इदंपत्न्यासहवनगमनंरागप्राप्तंनभवति अपितुशिष्टाचारसिद्धमित्याह—धर्मइति । धर्मः वानप्रस्थधर्मः । सद्भिः सपत्नीकैराजर्षिभिः । यथासूर्यंसुवर्चलेतिभिन्नलिङ्गयोरप्यौपम्यमार्षं । यथासूर्यंसुवर्चलादेवी तद्वन्मामनुवर्तस्वेतिवार्थः ॥ ३० ॥ सत्योपबृंहितंपितुर्वचनं मांवनंनयतिखलु तत् तस्मात्कारणात् । अहंनगच्छेयमितिन अद्यैवगच्छेयमेवेत्यर्थः ॥३१॥

याभतिदुस्तरत्वंध्वनयति ॥ २१ ॥ स० पङ्कजाभ्यां सुप्रसरसउत्कृत्ताभ्यां ॥ २४ ॥ ति० सितादर्शमासीत्तत्संबन्धीअमलो राहाद्युपरक्तःपक्षन्दस्तत्सदृशं । जलोद्धृतं जलमुद्धृतंयस्मात् । आहिताग्न्यादिः । शि० सितेशुक्लपक्षे अमलःअन्धकारनिवर्तकः यश्चन्द्रःपूर्णिमाचन्द्रइत्यर्थः । तत्सदृशं । पर्यशुष्यदिति । इत्युभयान्वयी । स० सिता श्वेतशर्करा । "सितास्याच्छ्वेतशर्करा" इत्यभिधानात् ॥ २५ ॥ ती० स्वयंभोरिवसर्वतः सर्वेषांआयुर्भाग्यंचलिखितुंपरिमार्ष्टुंचकर्तुंर्ब्रह्मणोयथाकुतश्चिदपिभयंनास्तितद्वदित्यर्थः । स० स्वयंभोः ब्रह्मणः । आर्षोयंडुः । सर्वतः सर्वशब्दोरुद्रवाचकः । उपलक्षणमाराजनुपर्वग्रहः । रुद्रादिभ्योब्रह्मणोयथाभयंनास्तितथा ममसर्वतोपिभयंनास्तीत्यर्थः ॥ २७ ॥ ति० आत्मवता आत्मज्ञेन । यथा प्रीतिः दया । हातुमशक्या ॥२९॥ स० तत् । वचनं । मां नयति । नखलु नैर्घृण्येःस्वसुखंवाञ्छिन्द्रियप्रियविवाहुमातिच्छिन्दीतितत्तथावनं । नगच्छेदंस्वयं । किंतु । यद्वा खलु निषेधे । तथाचवनं नगच्छेयंतन्नखलु नगच्छेदमेवेत्यर्थः । "नञ्कारस्त्वागतेवन्धोमुत्तौ‌रक्षेच" इति "खलुनिषेधने" "खमिन्द्रियेऽङ्गे"

[पा०] १ क. घ. ञ. भृशमासस्त्रापति. २ घ. ज. संनिहितं. ३ छ. झ—ठ. तत्सितामल. ४ ख. परिष्वज्य. ५ ञ. मसंज्ञामिव. ६ क. वीरः. ७ ज. त्वया. ८ ज. मा विहातुं. ९ क. ध. च. छ. झ—ट. प्रीतिरात्म. १० ख. चरितोहि सः. ११ छ. वाहमनु. च. झ—ठ. चाऽहमनुवर्तिष्ये. १२ च, खल्वहं तु.

एष धर्मस्तु सुश्रोणि पितुर्मातुश्च वश्यता ॥ अतश्च तं व्यतिक्रम्य नाहं जीवितुमुत्सहे ॥ ३२ ॥
अस्वाधीनं कथं दैवं प्रकारैरभिराध्यते ॥ स्वाधीनं समतिक्रम्य मातरं पितरं गुरुम् ॥ ३३ ॥
यत्रत्रयं त्रयो लोकाः पवित्रं तत्समं भुवि ॥ नान्यदस्ति शुभापाङ्गे तेनेदमभिराध्यते ॥ ३४ ॥
न सत्यं दानमानौ वा न यज्ञाश्चाप्तदक्षिणाः ॥ तथा बलकराः सीते यथा सेवा पितुर्हिता ॥ ३५ ॥
स्वर्गो धनं वा धान्यं वा विद्याः पुत्राः सुखानि च ॥ गुरुवृत्त्यनुरोधेन न किञ्चिदपि दुर्लभम् ॥३६॥
देवगन्धर्वगोलोकान्ब्रह्मलोकांस्तथा नराः ॥ प्राप्नुवन्ति महात्मानो मातापितृपरायणाः ॥ ३७ ॥
स मां पिता यथा शास्ति सत्यधर्मपथे स्थितः ॥ तथा वर्तितुमिच्छामि स हि धर्मस्सनातनः ॥३८॥
मम सन्ना मतिस्सीते त्वां नेतुं दण्डकावनम् ॥ वसिष्यामीति सा त्वं मामनुयातुं सुनिश्चिता ॥३९
सा हि सृष्टाऽनवद्याङ्गि वनाय मदिरेक्षणे ॥ अनुगच्छस्व मां भीरु सहधर्मचरी भव ॥ ४० ॥

पितुर्मातुश्चवश्यतेत्येषएवधर्मः । वश्यता विधेयता । अहं पितृवचनपरिपालनोद्युक्तोहं । तंव्यतिक्रम्य मातापितृविधेयत्वरूपधर्मंव्यतिक्रम्य जीवितुंनोत्सहइतिसंबन्धः ॥ ३२ ॥ माभूत्पितृवचनकरणं दैवमाराध्यास्माभिरत्रैवस्थातव्यमित्यत्राह—अस्वाधीनमिति । अस्वाधीनं आराधकानधीनं । स्वतन्त्रमितियावत् । यद्वा अस्वाधीनंप्रत्यक्षतयाअनाज्ञापयत् । स्वाधीनं प्रत्यक्षतयानियोजयन्तं । गुरुं गुरुंचेत्यर्थः । प्रकारैःआराधनप्रकारैः ॥ ३३ ॥ यत् गुर्वादित्रयं तत् त्रयोलोकाः । लोकत्रयमपितदाराधनसाध्यमित्यर्थः । भुवि तत्समंपवित्रमन्यन्नास्ति "गगनंगगनाकारं" इतिवत्स्वस्यस्वेनौपम्यसंभवात्तद्व्यावृत्त्यर्थमन्यपदं । तेनकारणेन । इदं गुर्वादित्रयं । अभिराध्यते ॥ ३४ ॥ पितृवाक्यस्यसत्यादिवैलक्षण्यमाह—नसत्यमिति । हिता हितकरी । पितुःसेवायथाबलकरी तथासत्यादयो नबलकराः नपरलोकबलकराः । नपारत्रिकाभ्युदयसाधकाइत्यर्थः ॥ ३५ ॥ स्वर्गादीनि गुरुवृत्त्यनुरोधेन सिध्यन्तीतिशेषः । गुरूणां मात्रादीनां । वृत्तिः शुश्रूषणं । तदनुरोधेन तदनुवर्तनेन । "अनुरोधोनुवर्तनं" इत्यमरः । व्यतिरेकेणाप्याह—नकिञ्चिदिति ॥३६॥ क्रमेणब्रह्मलोकंप्राप्नुवन्तीतिभावः । नराइतिसर्ववर्णसाधारण्योक्तिः । महात्मानः दृढमनस्काः । मातेति । तच्छुश्रूषणैकरताइत्यर्थः ॥ ३७ ॥ स मां सः स्वतन्त्रः । वर्तितुं अनुष्ठातुं । सः वर्तनम् । धर्मापेक्षयापुंस्त्वम् ॥ ३८ ॥ सन्ना त्वद्भावापरिज्ञानात्क्षीणा । सात्वं मयासहवसिष्यामीतिमामनुयातुंसुनिश्चिता । तेनइदा-

इतिचविश्वः । एवमर्थकरणेवचनं "तन्नयतिमांपितुः" इत्यादुचिताथेभवतीतिज्ञेयम् ॥३१॥ स० एकत्राहमव्ययं । अहङ्कारेणेत्यर्थः ॥३२॥ शि० यत्र मात्राद्याराधने त्रयं धर्मार्थकामाः । अस्तीतिशेषः । अतएवत्रयःऊर्ध्वाधोमध्यवर्तिनःलोकाःजनाःयत्रवर्तन्तइतिशेषः । अतस्तत्समंपवित्रंअन्यन्नास्ति । तेनहेतुना इदं पितृवचनं । अभिराध्यते परिपाल्यते । अर्थशब्देनपरमपुरुषार्थभूतमोक्षस्यापिग्रहणान्नव्याख्यानेन्यूनता । अतएवत्रयमित्युक्तिस्स्यानुकूला । स० यत्रत्रयं पित्रादित्रयं । तत्र त्रयोलोकाः भूर्भुवस्स्वराख्याः वैकुण्ठादयोवा सन्ति । तस्मात् पवित्रं पवेर्महाभयात्त्रायतइतित्रापवित्रं । शुभःअपाङ्गःमन्मथः यस्याःपुत्रत्वेनतथा । तस्यास्संबुद्धिःहेशुभापाङ्गे । "पविर्दम्भमहाभयं" इत्यभिधानम् ॥ ३४ ॥ स० पूर्वत्रयाणांग्रहणेपिअत्रपितुरेवग्रहणं तद्वचनस्यमुख्यकार्यहेतुत्वेनतस्यप्राधान्याभिप्रायेण ॥ ३५ ॥ स० देवगन्धर्वाः साक्षाद्देवप्रेष्याः । गोलोकश्चन्द्रलोकः । नाकलोकोवा मातृलोकोवा । "स्वर्गेमातरिगौः" इतिरत्नमाला । "गौर्नाकेवृषभेचन्द्रे" इतिविश्वः । "सयदिपितृलोककामोभवति" इतिश्रुतेः ॥ ३७ ॥ स० सत्याकैकेय्याअधर्मपथेस्थितस्थिवा ॥ ३८ ॥ गो० त्वद्भावापरिज्ञानात्त्वांवनंनेतुंपूर्वममममतिः सन्ना क्षीणा । यतोवनेवसिष्यामीतिमामनुयातुंनतिः सन्मतिस्सुनिश्चिता । अतः पूर्वंत्वामेममतिरिदानींत्वांवनंनेतुमुद्युक्तेतिशेषः । ति० सन्ना प्राप्ता । स० सत्त्वंअनुयातुंसुनिश्चिता अतस्त्वांनेतुंनमया अमतिः सा सन्ना विशीर्णा ॥ ३९ ॥ ति० मत्वं हि यतोऽधुना वनाय [illegible] ।

[पा०] १ ख. घ. ङ—ट. धर्मश्च. २ छ—ट. आज्ञांचाहं. ङ. ज. आज्ञामहं. क. ग. च. अतश्चाहं. ३ [illegible]केपूर्वोत्तरार्धयोः क—घ. ज. पुस्तकेषुपौर्वापर्यंदृश्यते. ४ छ. झ. ञ. ट. यत्रत्रयंत्रयो. क—घ. यत्रत्रयंतत्र. ज. यत्रतत्रत्रयो. ५ छ. झ—ठ. यज्ञोवाप्याप्तदक्षिणः. ङ. ञ. यज्ञावाप्यातदक्षिणाः. ख. घ. यज्ञावाप्तदक्षिणाः. ६ च. छ. झ. ञ. ट. सेवा. ७ ङ. पुत्रादिद्याः. ८ ख. ग. ङ. सुखानिवा. ९ क. च. लोकांश्च. १० ङ. ञ. ट. परान्. ११ क. ग. ङ. ञ. ट. मांपिता. १२ च. छ. झ. ञ. ट. नेतुंत्वां. १३ ङ. गमिष्यामीति. १४ घ. छ. झ—ठ. दिष्टा. च. हृष्टा.

सर्वथा सदृशं सीते मम स्वस्य कुलस्य च ॥ व्यवसायमतिक्रान्ता कान्ते त्वमतिशोभनम् ॥ ४१ ॥
आरभस्व शुभश्रोणि वनवासक्षमाः क्रियाः ॥ नेदानीं त्वदृते सीते स्वर्गोऽपि मम रोचते ॥ ४२ ॥
ब्राह्मणेभ्यश्च रत्नानि भिक्षुकेभ्यश्च भोजनम् ॥ देहि चाशंसमानेभ्यः संत्वरस्व च मा चिरम् ॥४३॥
भूषणानि महार्हाणि वरवस्त्राणि यानि च ॥ रमणीयाश्च ये केचित्क्रीडार्थाश्चाप्युपस्कराः ॥ ४४ ॥
शयनीयानि यानानि मम चान्यानि यानि च ॥ देहि स्वभृत्यवर्गस्य ब्राह्मणानामनन्तरम् ॥ ४५ ॥
अनुकूलं तु सा भर्तुर्ज्ञात्वा गमनमात्मनः ॥ क्षिप्रं प्रमुदिता देवी दातुमेवोपचक्रमे ॥ ४६ ॥
ततः प्रहृष्टा प्रतिपूर्णमानसा यशस्विनी भर्तुरवेक्ष्य भाषितम् ॥
धनानि रत्नानि च दातुमङ्गना प्रचक्रमे धर्मभृतां मनस्विनी ॥ ४७ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे त्रिंशस्सर्गः ॥ ३० ॥

एकत्रिंशः सर्गः ॥ ३१ ॥

लक्ष्मणेनश्रीरामंप्रतिवनवासार्थंस्वस्यापिसहनयनप्रार्थना ॥ १ ॥ श्रीरामेणलक्ष्मणंप्रतिकौसल्यादिपालनविधानपूर्वकंस्वानुगमननिषेधः ॥ २ ॥ पुनर्लक्ष्मणेनरामंप्रतिकौसल्यासुमित्रयोःकैमुत्येनात्मभरणसामर्थ्यप्रतिपादनेनवनेफलाहरणादिनातत्सेवननिवेदनम् ॥ ३ ॥ लक्ष्मणवचनश्रवणतुष्टेनरामेणतस्यस्वानुगमनाङ्गीकारेणतंप्रत्यायुधाहरणचोदनपूर्वकंधनादिवितरणेच्छयासुयज्ञानयनचोदना ॥ ४ ॥

एवं श्रुत्वा तु संवादं लक्ष्मणः पूर्वमागतः ॥ बाष्पपर्याकुलमुखः शोकं सोढुमशक्नुवन् ॥ १ ॥
स भ्रातुश्चरणौ गाढं निपीड्य रघुनन्दनः ॥ सीतामुवाचातियशा राघवं च महाव्रतम् ॥ २ ॥

नीज्ञातासीतिभावः ॥३९॥ सृष्टा दैवेनेतिशेषः ॥४०॥ व्यवसायं भर्त्रनुसरणाध्यवसायं । अतिक्रान्ता प्रकर्षेणप्राप्ता । "प्रकर्षेलङ्घनेप्यति" इत्यमरः ॥ ४१ ॥ वनवासक्षमाः वनवासहिताः । "क्षमंशक्तेहितेत्रिषु" इत्यमरः । क्रियाः दानादिक्रियाः ॥ ४२ ॥ आशंसमानेभ्यः अर्थयमानेभ्यः ॥ ४३ ॥ क्रीडार्थाश्चाप्युपस्कराः । जातरूपमयकृत्रिमपुत्रिकालीलापाकभाजनादिविचित्रोपकरणानि ॥ ४४ ॥ ब्राह्मणानामनन्तरंस्वभृत्यवर्गस्यदेहीतिसंबन्धः ॥ ४५ ॥ अनुकूलं संमतं ॥ ४६ ॥ प्रतिपूर्णमानसा निश्चिन्तेत्यर्थः । अवेक्ष्य आलोच्य । धर्मभृतां धर्मभृद्भ्यः । मनस्विनी निश्चितमनस्का ॥४७॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणेपीतांबराख्यानेअयोध्याकाण्डव्याख्यानेत्रिंशःसर्गः ॥ ३० ॥

एवंरामेणसीतागमनेऽङ्गीकृतेलक्ष्मणस्यानुगमनप्रार्थनमुपक्षिपति—एवमित्यादिना । श्लोकद्वयमेकंवाक्यं । एवंसंवादं पूर्वोक्तंसीतारामयोःसंवादं । पूर्वमागतः कौसल्यागृहाद्रामेणसहपूर्वमेवागतः । शोकं अर्धशरीरभूतायाःसीतायाअपिवनानुगमनं कृच्छ्रादप्यङ्गीकृतं म-

दिष्टा मयाऽनुज्ञाता । अतोमामनुगच्छस्व । सहधर्मचरीभवेत्यनेन वनवाससाध्यस्यस्वधर्मस्यरक्षोवधजस्यत्वयाविनाऽसंभवइतिसूचितम् । **स०** मदिरेक्षणा चञ्चलेक्षणा । "मदिरामधभेदेस्याचञ्चलेत्रिषुचस्मृता" इतिचन्द्रालोकव्याख्योदाहृताभिधानात् ॥४०॥ **ति०** प्रीत्यतिशयात्संबोधनद्वयम् । **स०** व्यवसायं निश्चयं । अनुक्रान्ता प्राप्तेतियत् तदतिशोभनम् ॥ ४१ ॥ **ति०** रत्नानि उत्तमवस्तूनि ॥ ४३ ॥ **शि०** ब्राह्मणानां ब्राह्मणसंप्रदानकदानानां । अनन्तरम् ॥ ४५ ॥ इतित्रिंशस्सर्गः ॥ ३० ॥

शि० अशक्नुवन्सन् आसेतिशेषः ॥ १ ॥ **ति०** अतियशां उत्कृष्टकीर्तिमतींसीतां । **स०** अतियशां अतिशयितज्ञानसुखरूपि-

[पा०] १ क. च. छ. झ—ठ. मनुक्रान्ता. ख. मनुप्राप्ता. २ ज. त्वमनु. ख. घ. त्वमभि. ३ ख. चसुश्रोणि. क. च. ञ. गुरुश्रोणि. ४ ख. त्क्रियार्थाश्चा. ५ क. च. चान्यानि. ६ घ. च. ञ. तानि. ७ क. बन्धुवर्गस्य. घ. बन्धुवर्गेभ्यो. ख. ट. भृत्यवर्गेभ्यो. ८ ख. अनुकूलहि. ९ ख. क्षिप्रप्रमुदिता. १० छ. झ. ट. मेवप्रचक्रमे. * अयंश्लोकः तिलकादिटीकाङ्कितकोशेपुनदृश्यते. ११ ख. घ. परिपूर्ण. १२ ख. झ. ट. ससंवादं. ज. सुसंवादं. १३ क. अशक्नुवान्. १४ ज. गन्तुं. १५ ट. निष्पीड्य. १६ छ. झ. ञ. चातियशां.

यदि गन्तुं कृता बुद्धिर्वनं मृगगजायुतम् ॥ अहं त्वाऽनुगमिष्यामि वनमग्रे धनुर्धरः ॥ ३ ॥
मया समेतोऽरण्यानि [1]बहूनि विचरिष्यसि ॥ पक्षिभिर्मृगयूथैश्च संघुष्टानि समन्ततः ॥ ४ ॥
न देवलोकाक्रमणं नामरत्वमहं वृणे ॥ ऐश्वर्यं [2]वाऽपि लोकानां कामये न त्वया विना ॥ ५ ॥
एवं ब्रुवाणः सौमित्रिर्वनवासाय निश्चितः ॥ रामेण बहुभिस्सान्त्वैर्निषिद्धः पुनरब्रवीत् ॥ ६ ॥
[3]अनुज्ञातश्च भवता पूर्वमेव [4]यदस्म्यहम् ॥ किमिदानीं [5]पुनरिदं क्रियते मे निवारणम् ॥ ७ ॥
यदर्थं प्रतिषेधो मे क्रियते गन्तुमिच्छतः ॥ एतदिच्छामि विज्ञातुं संशयो हि ममानघ ॥ ८ ॥
ततोऽब्रवीन्महातेजा रामो लक्ष्मणमग्रतः ॥ स्थितं प्राग्गामिनं [6]वीरं याचमानं कृताञ्जलिम् ॥ ९ ॥

मकथंतत्संभविष्यतीतिविचारजंशोकं । स्वानुवृत्तिरूपप्रयोजनायसीतापुरुषकारेणरामेशरणागतिंविधत्ते—सभ्रातुरिति । सः रामानुवृत्तिरूपप्रयोजनायउपायान्तरशून्यः । भ्रातुरित्यवर्जनीयसंबन्धकथनाच्छरण्यत्वमुक्तं । चरणौनिपीड्येतिशरणागत्युक्तिः । गाढमित्यश्लथत्वोक्त्यामहाविश्वासउक्तः । रघुनन्दनः लक्ष्मणः । अतियशाः आनुकूल्यसङ्कल्पप्रातिकूल्यवर्जनवान् । आदौसीतांपुरुषकारत्वेनपरिगृह्योवाच । पश्चात्तत्पुरुषकारेण महाव्रतं “ नत्यजेयंकथंचन । एतद्व्रतंमम” इत्युक्तगुरुतरव्रतयुक्तं । राघवं रघुराक्षससंवादादिप्रसिद्धकुलधर्मशरणागतरक्षणंच । उवाच शरणागतेःसर्वफलप्रदत्वेनस्वाभिमतफलंविज्ञापयामास । निपीड्येत्यन्तेनद्वयस्यपूर्वखण्डोक्तशरणागतिरनूदिता। राघवमुवाचेत्यनेनोत्तरखण्डोक्तफलप्रार्थनोक्ता । सीतामुवाचेत्युभयत्रपुरुपकारपरिग्रहोक्तिः ॥ १—२ ॥ कैङ्कर्यप्रार्थनमेवाह—यदीति । यदीत्यनेनरामस्यवनगमनंस्वानभिमतमित्युक्तम् । कैङ्कर्यसाधनमाह—धनुर्धरइति । धनुर्धरत्वेहेतुमाह—मृगेति । अहंत्वा अनु पश्चात्।अग्रेचवनंगमिष्यामि तवाग्रेपश्चाद्वा यत्रदुष्टमृगशङ्कातत्रसावधानोगमिष्यामीत्यर्थः । अतएवमयासमेतइतिवक्ष्यति ॥ ३ ॥ मया धनुर्धरेणमया । त्वदीयंधनुर्वहतेतिवार्थः । बहूनीत्यनेनसर्वदेशसर्वकालसर्वावस्थोचितसर्वविधकैङ्कर्यप्रार्थनंकृतं ॥ ४ ॥ अनन्योपायत्ववदनन्यप्रयोजनत्वमाह—नेति । देवलोकाक्रमणं“देवानांपूरयोध्या”इत्युक्तपरमपदप्राप्तिंत्वयाविनानवृणे त्वत्कैङ्कर्यविनाकृतंमोक्षमपिनवाञ्छामीत्यर्थः । अमरत्वं “जरामरणमोक्षाय” इत्युक्तंकैवल्याख्यंमोक्षमपिनवृणे । लोकानामैश्वर्यं त्रिलोकाधिपतित्वं । ब्रह्मत्वमितियावत् । मोक्षमप्यकामयमानोऽहंकथंकैवल्यादिकंकामयेयेतिभावः । यद्वा अवरोहक्रमेणत्रैलोक्यैश्वर्यादिकमपिनकामयइति । अतोनतत्प्रकर्षदोषः । देवलोकगमनंदेवत्वमिन्द्रत्वंवानकामयइतिवाक्यार्थस्तुच्छः ॥ ५—६ ॥ अनुज्ञातश्च अनुज्ञातएव । “उपकृप्तंचयत्किञ्चिदभिषेकार्थमद्यमे । सर्वविसर्जयक्षिप्रं कुरुकार्यंनिरत्ययं ” इतिवचनात् । अन्यत्रच “ तस्मादपरितापःसंस्त्वमप्यनुविधायमाम् । प्रतिसंहारयक्षिप्रमाभिषेचनिकीःक्रियाः”इति । अपरत्रच “भ्रातृपुत्रसमौचापिद्रष्टव्यौचविशेषतः । त्वयाभरतशत्रुघ्नौ प्राणैःप्रियतरौमम” इतिभरतशत्रुघ्नयोरेवानुसरणीयत्वोक्तेश्चानुज्ञासिद्धा ॥ ७ ॥ यदर्थमिति अनुज्ञातत्वेपिप्रतिषेधात्किमद्यमयाऽपराद्धमितिसंशयः ॥ ८ ॥ अग्रतः स्थितं । प्राग्गामिनं प्रागेवगन्तुमुद्युक्तं । वीरं प्राग्गमनोचितवीर्यवन्तं । याचमानं गमनाज्ञांयाचमानं । कृताञ्जलिं याच्ञाव्यञ्जकाञ्जलियुक्तं ॥ ९ ॥

णीं । “यंज्ञानंसमुदाहृतं” “शंसुखानिच” इतिनानार्थध्वनिपदमञ्जर्यमरौ । अतियशाइतिपाठे लक्ष्मणविशेषणं । सीतामुवाचेत्यनेन वासुदेवप्रसाधनंमुख्यतोरमेति तांप्रति पूर्ववचनंयुक्तमितिसूचयति ॥ २ ॥ **स०** अनुगमिष्यामि सहगमिष्यामि नतुपश्चादागमिष्यामीत्यर्थः । अग्रेधनुर्धरइत्यग्रेतनग्रन्थविरोधात् ॥ ३ ॥ **स०** संघुष्टानि संघृष्टानि निबिडानीतियावत् । “घुषिरविशब्दने” इतिनेट् । यद्वा शब्दितानीत्यर्थः । इडभावआर्षः ॥ ४ ॥ पूर्वं अवतरणसमयेइत्यप्यर्थः । **शि०** अनुज्ञातः आनुमानिकगमनकर्मकाज्ञाविषयीभूतः । अनुमानप्रकारस्तु “त्वयाभरतशत्रुघ्नौप्राणैःप्रियतरौमम” इतिसीतांप्रतिभवदुक्तेः अहं सहगमनविषयक-

[पा०] १ च. छ. झ. ञ. ट. रम्याणि. २ ख. च. छ. झ. ञ. ट. चापि. ३ च. ज्ञातोस्मि. छ. झ. ट. ज्ञातस्तु. ४ ख. यदास्म्यहम्. ५ च. छ. झ. ञ. ट. पुनरपि. ६ ग. छ. झ. ट. धीरं.

स्निग्धो धर्मरतो वीरः[1] सततं सत्पथे स्थितः ॥ प्रियः प्राणसमो वश्यो[2] भ्राता चासि सखा च मे ॥१०॥
मयाऽद्य[3] सह सौमित्रे त्वयि गच्छति तद्वनम् ॥ को भरिष्यति[4] कौसल्यां सुमित्रां वा यशस्विनीम् ॥ ११॥
अभिवर्षति कामैर्यः पर्जन्यः पृथिवीमिव ॥ स कामपाश[5]पर्यस्तो महातेजा महीपतिः ॥ १२ ॥
सा हि राज्यमिदं प्राप्य नृपस्याश्वपतेः सुता ॥ दुःखितानां सपत्नीनां न करिष्यति शोभनम् ॥ १३॥
न भरिष्यति कौसल्यां सुमित्रां च सुदुःखिताम् ॥ भरतो राज्यमासाद्य कैकेय्यां[6] पर्यवस्थितः ॥१४॥
तामार्यां स्वयमेवेह राजानुग्रहणेन वा ॥ सौमित्रे भर कौसल्यामुक्त[7]मर्थमिमं चर ॥ १५ ॥
एवं मम[8] च ते भक्तिर्भविष्यति सुदर्शिता ॥ धर्मज्ञ गुरुपूजायां धर्मश्चाप्यतुलो महान् ॥ १६ ॥
एवं कुरुष्व सौमित्रे मत्कृते रघुनन्दन ॥ अस्माभिर्विप्रहीणाया मातुर्नो न भवेत्सुखम् ॥[9] १७ ॥
एवमुक्तस्तु रामेण लक्ष्मणः श्लक्ष्णया गिरा ॥ प्रत्युवाच तदा रामं वाक्यज्ञो वाक्यकोविदम् ॥१८॥
तवैव तेजसा वीर भरतः पूजयिष्यति ॥ कौसल्यां च सुमित्रां च प्रयतो नात्र संशयः ॥ १९ ॥
[[10]यदि [11]दुष्टो न रक्षेत भरतो राज्यमुत्तमम् ॥ प्राप्य दुर्मनसा वीर [12]गर्वेण च विशेषतः ॥ २० ॥
तमहं दुर्मतिं क्रूरं वधिष्यामि न संशयः ॥ तत्पक्ष्यानपि तान्सर्वांस्त्रैलोक्यमपि [13]किंनु सा] ॥ २१॥
कौसल्या बिभृयादार्या [14]सहस्रमपि मद्विधान् ॥ यस्याः सहस्रं ग्रामाणां संप्राप्त[15]मुपजीवनम् ॥ २२ ॥
तदात्म[16]भरणे चैव मम मातुस्तथैव च ॥ पर्याप्ता मद्विधानां च भरणाय [17]यशस्विनी ॥ २३ ॥
कुरुष्व मामनुचरं वैधर्म्यं नेह विद्यते ॥ कृतार्थोऽहं भविष्यामि तव चार्थः [18]प्रकल्पते ॥ २४ ॥

स्निग्धइत्यादिविशेषणानिस्वकार्यकरणार्हतानुगुणानि ॥ १० ॥ प्रतिषेधनिमित्तमाह—मयेति । कौसल्यादिभरणार्थमेवत्वंवारितोसि । पूर्वानुज्ञातुतात्कालिकपरिहारायेतिभावः ॥ ११॥ राजैवभरिष्यतीत्यत्राह—अभिवर्षतीति । कामपाशपर्यस्तः पराभिलाषरूपपाशेनसंयतइत्यर्थः ॥ १२ ॥ तर्हिभरतोभरिष्यतीत्यपेक्षायांसोपिकैकेयीपरवशोनभरिष्यतीत्याशयेनाह—साहीत्यादि ॥१३—१४॥ मयावाकथंभर्तुंशक्यमित्यतआह—तामिति । राजानुग्रहणेनराजानुमत्या॥-भावेस्वयमेववाभरेत्यर्थः । अस्योत्तरंमावदेत्याह—उक्तमर्थमिमंचरेति ॥ १५ ॥ त्वत्कैङ्कर्यपरस्यमेकिमनेनेत्यतआह—एवमिति । एवं एवंचसतीत्यर्थः । मम मयीत्यर्थः । गुरुपूजा मातृशुश्रूषणं ॥ १६ ॥ अस्माभिः आवाभ्यांसीतयाचेत्यर्थः । नः नौ "अस्मदोद्वयोश्च" इतिद्विवचनस्यबहुवचनम् ॥ १७ ॥ वाक्यज्ञोवाक्यकोविदमिति । "उत्तरोत्तरयुक्तौचवक्ता वाचस्पतिर्यथा" इत्युक्तवक्तृत्वविशिष्टंराममपिप्रतिवचनरचनाचातुर्येणतोषयितुंसमर्थइत्यर्थः ॥ १८ ॥ पूर्वरामोक्तानुपपत्तिपरिहरति—तवैवेत्यादिना ॥१९-२३ ॥ एवंरामोक्तंपरिहृत्यप्रस्तुतंस्वाभिमतंकैंकर्यंप्रप-

---

रामाज्ञाविषयः मद्विषयकानुशासनान्तराभावात् नित्यसहचारिराजवर्गवदिति ॥ ७ ॥ स० इतरेषामवश्यः ममतुनिधेयःकिङ्करः । स्निग्धः स्नेहयुक्तः ॥ १० ॥ शि० भजिष्यति सेविष्यते । भरिष्यतीतिपाठान्तरमितिभट्टाः ॥११॥ शि० कामपाशपर्यस्तः कामेनस्वेच्छयायःपःपालनंतस्यपःअशोभ्यामिस्तस्मात्पर्यस्तोनिवृत्तः । आस्तइतिशेषः ॥ १२ ॥ शि० उक्तं मयावर्णितं । अमुमर्थं इहस्थितौप्रयोजनं । चर जानीहि । गत्यर्थानांज्ञानार्थकत्वप्रसिद्धेःप्रकृतेचरोज्ञानमर्थः ॥ १५ ॥ ति० नः अस्माकं ॥ १७ ॥ ती० तवैवतेजसाअप्रमेयबलवैभवरामजनन्यरक्षणेममहाननर्थोभवेदितिमत्वाभरतःसम्यक्पूजयिष्यतीति ॥ १९ ॥ ति० दुस्स्थोदुर्मार्गस्थः ॥ २० ॥ ति० किंतुसेत्युत्तरश्लोकान्वयि । वि० किंनुसेत्युत्तरश्लोकान्वयि ॥ २१ ॥ चि० कौसल्यासहस्रंमद्विधानपिबिभृयात् सास्वात्मानंबिभृयादितिकिमुवक्तव्यम् । ति० किंचस्वात्मभरणेकौसल्यायाःकस्याप्यपेक्षानेत्याह—किंतुसा कौसल्ये-

[पा०] १ झ. ट. धीरः. २ छ. झ. ट. विधेयश्च. ख. घ. च. ज. ञ. भ्राताचापि. ३ ख. मयात्र. ४ छ. झ. ट. भजिष्यति. क. ख. हिरक्षति. ५ ञ. कामवश. ६ क. कैकेय्या. ७ छ. झ. ट. ममुं. ८ क. घ. च. छ. झ. ञ. ट. मयिच. ख. चमयि. ९ छ. झ. ट. नास्ति. १० इदंश्लोकद्वयं क. च—ट. दृश्यते. ११ छ. झ. ञ. ट. दुस्स्थो. १२ ज. हर्षेण. १३ छ. झ. ट. किंतु. १४ च. छ. झ. ञ. ट. सहस्रंमद्विधानपि. १५ च. छ. झ. ञ. ट. मुपजीविनाम्. १६ ज. भरणेनैव. ख. चैवं. १७ क. च. छ. झ. ञ. ट. मनस्विनी. १८ क. घ. च. ञ. प्रकल्प्यते.

धनुरादाय सशरं खनित्रपिटकाधरः ॥ अग्रतस्ते गमिष्यामि पन्थानमनुदर्शयन् ॥ २५ ॥
आहरिष्यामि ते नित्यं मूलानि च फलानि च ॥ वन्यानि यानि चान्यानि स्वाहार्हाणि तपस्विनाम् ॥२६
भवांस्तु सह वैदेह्या गिरिसानुषु रंस्यते ॥ अहं सर्वं करिष्यामि जाग्रतः स्वपतश्च ते ॥ २७ ॥
रामस्त्वनेन वाक्येन सुप्रीतः प्रत्युवाच तम् ॥ व्रजापृच्छस्व सौमित्रे सर्वमेव सुहृज्जनम् ॥ २८ ॥
ये च राज्ञो ददौ दिव्ये महात्मा वरुणस्स्वयम् ॥ जनकस्य महायज्ञे धनुषी रौद्रदर्शने ॥ २९ ॥
अभेद्ये कवचे दिव्ये तूणी चाक्षयसायकौ ॥ आदित्यविमलौ चोभौ खड्गौ हेमपरिष्कृतौ ॥ ३० ॥

श्चयति—कुरुष्वेत्यादि । मां शेषभूतं । अनुचरं शेषत्वानुगुणकैङ्कर्ययुक्तं । कुरुष्व । तत्करणमपितवैवप्रयोजनमित्यात्मनेपदाल्लभ्यते । इह अनुचरत्वकरणे । वैधर्म्यं सेव्यसेवकधर्मराहित्यं । नास्ति । तवसेव्यधर्मः पर्याप्तःस्वामित्वात् । ममसेवकधर्मश्चपूर्णःस्वाभाविकशेषत्वात् । यद्वा वैधर्म्यं वैपरीत्यसाधकं । नविद्यते । त्वदुक्तहेतोरन्यथासिद्धेरुक्तत्वादित्याशयः । अनुचरकरणस्यकिंप्रयोजनमित्यपेक्षायामाह—तवेति । तवार्थः स्वायासंविनाफलमूलाद्याहरणं । प्रकल्पते सिध्यति । अहंचकृतार्थः लब्धत्वत्कैङ्कर्यफलोभविष्यामि । यद्वा मां स्वाभाविकशेषभूतंमां । अनुचरं स्वरूपानुरूपशेषवृत्तियुक्तंकुरुष्व । इह अस्मिञ्जनेमयि । वैधर्म्यं शेषत्वविपर्यासः । नास्ति । अनेनशेषत्वस्यस्वाभाविकत्वंतज्ज्ञानवतःफलंकैङ्कर्यंचेत्युक्तं । कैङ्कर्याकरणेतवकाहानिरित्यत्राह—कृतार्थोहंभविष्यामीति । अकिञ्चित्कुर्वतःशेषत्वानुपपत्तेरितिभावः । तच्चप्राप्यंकैङ्कर्यंनिष्कृष्यदर्शयति—तवचेति । चोवधारणे । तवैवार्थः । नतुमम । परार्थकैङ्कर्यस्यैवपुरुषार्थत्वादितिभावः । शेषत्वाध्यवसाय उपायः अस्वार्थशेषिकैङ्कर्यमेव फलमित्युपायोपेयनिष्कर्षोनेनकृतइतिरहस्यं । वैधर्म्यं नेहविद्यतइत्युक्तिर्ज्येष्ठभ्रातुःपितृसमत्वात् । आवयोः श्रेयश्चास्तीत्याह—कृतार्थइतीतिकेचिद्व्याचक्षते॥२४॥ स्वकृतार्थत्वंप्रपञ्चयति—धनुरिति । धनुराद्यादानं हिंस्रनिवारणाय । खनित्रं मूलकन्दखननसाधनं कुद्दालादि । पिटका अल्पार्थेकप्रत्ययः । फलमूलाद्याहरणयोग्याल्पकण्डोलः । "कण्डोलपिटकौ" इत्यमरः ॥ २५ ॥ एवंमार्गेसंभावितंकैङ्कर्यमुक्त्वास्थानेसंभावितमाह—आहरिष्यामीति । अन्यानि शाकप्रियालबीजक्षौद्रादीनि । स्वाहाराणि सुखेनाहर्तुंभोक्तुंयोग्यानि ॥ २६ ॥ एवंसर्वदेशकर्तव्यकैङ्कर्याण्युक्तानि कैङ्कर्यस्यविशिष्टविषयस्यैवरस्यत्वाद्विशिष्टविषयत्वमाह—भवांस्त्विति । जाग्रतःस्वपतश्चतइत्यनेनसर्वकालसर्वावस्थोचितकैङ्कर्यमुक्तं । सर्वंकरिष्यामीत्यनेनसर्वविधकैङ्कर्यमुक्तं । तथाचदेवीविशिष्टस्यशेषिणःसर्वदेशसर्वकालसर्वावस्थासुसर्वविधमपिकैङ्कर्यंशेषभूतेनकर्तव्यमितिदर्शितम् ॥ २७ ॥ अनेनानुगमनाज्ञाव्यञ्जिता ॥ २८ ॥ जनकस्यराज्ञोयज्ञेमहात्मावरुणः स्वयमेवमह्यंयद्धनुरादिकंददौ आचार्यसद्मनि आचार्यस्यगृहे । पूजार्थंनिहितंतदेतत्सर्वमायुधमादाय सः आपृष्टसुहृज्जनः त्वं क्षिप्रमात्रजेत्यन्वयः । अत्रधनुरादिषु सर्वत्रद्विवचनादावयोर्ददावितिसिद्धं । बालकाण्डेऽनुक्तोप्ययंवृत्तान्तोनुवादात्सिद्धः । यथासुन्दरकाण्डेऽभिहितंमणिबन्धनं "मणिरत्नमिदंदत्तंवैदेह्याःश्वशुरेणमे । वधूकालेतथाबद्धमधिकंमूर्ध्निशोभते " इति । यथाचायोध्याकाण्डेऽनभिहितोपिवायसवृत्तान्तःसुन्दरकाण्डेऽनूद्यते "सपित्राचपरित्यक्तःसुरैश्चसमहर्षिभिः । त्रींल्लोकान्संपरिक्रम्यतमेवशरणंगतः" इति । आचार्योवसिष्ठः । इक्ष्वाकुगुरुमागम्येत्युत्तरत्रानुवादात् ।

त्यादि । उपजीविनां उपजीविभिः । सहस्रंग्रामाणांप्राप्तंवर्तते ॥ २२ ॥ स० सुमित्रात्राणार्थमपिनस्थातव्यंमयेत्याह—ममेति । मद्विधानाञ्चभरणाय मथ्नन्तिपरानितिमथःअसन्तः ते नभवन्तीत्यमथः तेचतेविधानेत्राःपूज्याश्चतेषांभरणाय पोषणाय । पर्याप्ता । सर्वभूतदयापरपूज्यसज्जनपालयित्रीयंनसौवमात्ररक्षणपरेतिभावः । एतेनसहस्रंमद्विधानित्यनेननपुनरुक्तिः ॥ २३ ॥ ति० पिटका फलमूलाद्याहरणयोग्यावंशपेटी ॥ २५ ॥ ति० स्वाहार्हाणि होमयोग्यानिहविर्भूतानि ॥ २६ ॥ शि० जाग्रतस्स्वपतश्चेत्यनेन स्वस्यनिद्रावशीकरणसामर्थ्यंसूचितम् । स० चोप्यर्थे । स्वपतोपिजाग्रतइत्यर्थः । एतेन कथमस्वप्नपतेस्स्वापइति शङ्कानिरस्ता ॥ २७ ॥ ति० व्रज अनुव्रज । आपृच्छस्व सुहृज्जनानामाज्ञांगृहाण ॥ २८ ॥

[पा०] १ क. ख. च. छ. झ. ञ. ट. सगुणं. २ छ. झ. ट. पन्थानंतव. ३ छ. झ. ट. चतथान्यानि. ४ छ. झ. स्वाहार्हाणि. ५ ख. घ. राज्ञोऽददाद्दिव्ये. ६ क. ख. च. ज. ञ. अभेद्यकवचे. ७ छ. झ. ट. विमलाभौद्वौ.

सत्कृत्य निहितं सर्वमेतदाचार्यसद्मनि ॥ [3]स त्वमायुधमादाय क्षिप्रमाव्रज लक्ष्मण ॥ ३१ ॥
स सुहृज्जनमामन्त्र्य वनवासाय निश्चितः ॥ इक्ष्वाकुगुरुमागम्य जग्राहायुधमुत्तमम् ॥ ३२ ॥
तद्दिव्यं राजशार्दूलसत्कृतं माल्यभूषितम् ॥ रामाय दर्शयामास सौमित्रिस्सर्वमायुधम् ॥ ३३ ॥
तमुवाचात्मवान्रामः प्रीत्या लक्ष्मणमागतम् ॥ काले त्वमागतः सौम्य काङ्क्षिते मम लक्ष्मण ॥३४॥
अहं प्रदातुमिच्छामि यदिदं मामकं धनम् ॥ ब्राह्मणेभ्यस्तपस्विभ्यस्त्वया सह परंतप ॥ ३५ ॥
वसन्तीह दृढं भक्त्या गुरुषु द्विजसत्तमाः ॥ तेषामपि च मे भूयः सर्वेषां चोपजीविनाम् ॥ ३६ ॥
वसिष्ठपुत्रं तु सुयज्ञमार्यं त्वमानयाशु प्रवरं द्विजानाम् ॥
अभिप्रयास्यामि वनं समस्तानभ्यर्च्य शिष्टानपरान्द्विजातीन् ॥ ३७ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे एकत्रिंशः सर्गः ॥ ३१ ॥

द्वात्रिंशः सर्गः ॥ ३२ ॥

लक्ष्मणानीतेनसुयज्ञेनसीतारामाभ्यांवितीर्णरत्नाभरणादिप्रतिग्रहपूर्वकंताभ्यांलक्ष्मणायचमङ्गलाशंसनम् ॥ १ ॥ लक्ष्मणेनश्रीरामचोदनयाःतन्निर्दिष्टेभ्योऽगस्त्यपुत्रादिभ्यःकौशेयाभरणगवादीनांवितरणम् ॥ २ ॥ त्रिजटाभिधेनद्विजेनस्वभार्याचोदनयारामसमीपमेत्यधनयाचनम् ॥ ३ ॥ श्रीरामेणत्रिजटंप्रतितद्धस्तदण्डप्रक्षेपावधिविद्यमानानांगवांवितरणप्रतिज्ञानेतेन दण्डप्रक्षेपेणगोधनप्रतिग्रहपूर्वकंस्वाश्रमगमनम् ॥ ४ ॥

ततः शासनमाज्ञाय भ्रातुः शुभतरं प्रियम् ॥ गत्वा स प्रविवेशाशु सुयज्ञस्य निवेशनम् ॥ १ ॥
तं विप्रमग्न्यगारस्थं वन्दित्वा लक्ष्मणोऽब्रवीत् ॥ सखेऽभ्यागच्छ पश्य त्वं वेश्म दुष्करकारिणः ॥२॥
ततः सन्ध्यामुपास्याशु गत्वा सौमित्रिणा सह ॥ जुष्टं तत्प्राविशल्लक्ष्म्या रम्यं रामनिवेशनम् ॥३॥
तमागतं वेदविदं प्राञ्जलिः सीतया सह ॥ सुयज्ञमभिचक्राम राघवोऽग्निमिवार्चितम् ॥ ४ ॥

नहीक्ष्वाकुकुलगुरुर्वसिष्ठादन्योस्ति ॥ २९—३३ ॥ प्रीत्योवाचेत्यन्वयः ॥ ३४ ॥ काङ्क्षितत्वमेवाह—अहमित्यादिना ॥ ३५ ॥ यच्छब्दोर्थसिद्धः । इह नगरे । गुरुषुभक्त्यायेदृढंवसन्ति नित्यंगुरुशुश्रूषणंकुर्वन्तीत्यर्थः । तेषामपिमेसर्वेषांउपजीविनांच । भूयः अतिशयेन । नित्यदेयादधिकतया । दातुमिच्छामि । तानानयेतिशेषः ॥ ३६ ॥ वसिष्ठपुत्रं आर्यं द्विजानां प्रवरं सुयज्ञं अन्यानपिशिष्टानानय । सुयज्ञं तांश्चाभ्यर्च्याभिप्रयास्यामीत्यर्थः ॥ ३७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीतांबराख्याने अयोध्याकाण्डव्याख्यानेएकत्रिंशःसर्गः ॥ ३१ ॥

एवंनिश्चितसीतालक्ष्मणानुयात्रस्यरामस्ययात्रादानं प्रस्तूयतेद्वात्रिंशे—ततइत्यादि । आज्ञाय अङ्गीकृत्य । शुभतरं ब्राह्मणोपकारत्वात् । प्रियं आत्मनोनुगमनाङ्गीकारफलत्वात् ॥ १ ॥ अग्न्यगारस्थं अग्निहोत्रशालास्थं । दुष्करकारिणः दुष्करकर्मकारिणः । वेश्माभ्यागच्छकृत्यंचपश्येत्यर्थः ॥ २ ॥ सन्ध्योपासनं माध्याह्निकं । अथवा सन्ध्यानियताग्निहोत्रं । अग्न्यगारस्थमित्यु-

स० आगम्य गत्वा ॥ ३२ ॥ ति० राजशार्दूलः क्षत्रियश्रेष्ठः ॥ ३३ ॥ ती० वसिष्ठपुत्रंसुयज्ञमानयेत्यनेन मूलप्रभोर्दशरथस्ववसिष्ठपौरोहित्यं तत्पुत्रस्यतत्पुत्रइतिन्यायेन स्वाचार्यस्यसुयज्ञस्यविशिष्यानयननियोगः ॥ ३७ ॥ एकत्रिंशस्सर्गः ॥ ३१ ॥

ती० दुष्करकारिणः प्राप्तराज्यत्यागपूर्वकवनगमनरूपदुष्करकारिणः ॥ २ ॥ ति० अङ्गदं बाहुमूलधार्यभूषणं । केयूरं तद-

[पा०] १ ख. एतदार्यस्य. २ घ. वेश्मनि. ३ छ. झ. ट. सर्वमायुध. ४ घ. ज. मामन्त्र्य. ५ क. घ. ज. ञ. रघुशार्दूलः. छ. झ. ट. राजशार्दूलः. ६ ख. सर्वेषामुप. ७ छ. झ. अपि. ८ ज. मास्थाय. ख. मादाय. ९ ख. घ. ज. शुभकरं. च. छ. झ. ञ. ट. प्रियकरंहितम्. क. प्रियतरंशुभम्. १० क. ट. मग्न्यागारस्थं. ११ क. ज. ह्यागच्छ. १२ झ. ट. सुपास्थाय. ख. च. छ. ञ. मुपासाथ. १३ छ. झ. ऋद्धंसंप्रा. ट. जुष्टंसप्रा.

जातरूपमयैर्मुख्यैरङ्गदैः कुण्डलैः शुभैः ॥ सहेमसूत्रैर्मणिभिः केयूरैर्वलयैरपि ॥ ५ ॥
अन्यैश्च रत्नैर्बहुभिः काकुत्स्थः प्रत्यपूजयत् ॥ सुयज्ञं स तदोवाच रामः सीताप्रचोदितः ॥ ६ ॥
हारं च हेमसूत्रं च भार्यायै सौम्य हारय ॥ रशनां चाधुना सीता दातुमिच्छति ते सखे ॥ ७ ॥
अङ्गदानि विचित्राणि केयूराणि शुभानि च ॥ प्रयच्छति सखे तुभ्यं भार्यायै गच्छती वनम् ॥८॥
पर्यङ्कमग्र्यास्तरणं नानारत्नविभूषितम् ॥ तमपीच्छति वैदेही प्रतिष्ठापयितुं त्वयि ॥ ९ ॥
नागः शत्रुञ्जयो नाम मातुलो यं ददौ मम ॥ तं ते गजसहस्रेण ददामि द्विजपुङ्गव ॥ १० ॥
इत्युक्तः स हि रामेण सुयज्ञः प्रतिगृह्य तत् ॥ रामलक्ष्मणसीतानां प्रयुयोजाशिषः शुभाः ॥ ११ ॥
अथ भ्रातरमव्यग्रं प्रियं रामः प्रियंवदः ॥ सौमित्रिं तमुवाचेदं ब्रह्मेव त्रिदशेश्वरम् ॥ १२ ॥
आगस्त्यं कौशिकं चैव तावुभौ ब्राह्मणोत्तमौ ॥ अर्चयाहूय सौमित्रे रत्नैः सस्यमिवाम्बुभिः ॥ १३ ॥
तर्पयस्व महाबाहो गोसहस्रैश्च मानद ॥ सुवर्णै रजतैश्चैव मणिभिश्च महाधनैः ॥ १४ ॥
कौसल्यां च य आशीर्भिर्भक्तः पर्युपतिष्ठति ॥ आचार्यस्तैत्तिरीयाणामभिरूपश्च वेदवित् ॥ १५ ॥
तस्य यानं च दासीश्च सौमित्रे संप्रदापय ॥ कौशेयानि च वस्त्राणि यावत्तुष्यति स द्विजः ॥ १६ ॥
सूतश्चित्ररथश्चार्यः सचिवः सुचिरोषितः ॥ तोषयैनं महार्हैश्च रत्नैर्वस्त्रैर्धनैस्तथा ॥
पशुकाभिश्च सर्वाभिर्गवां दशशतेन च ॥ १७ ॥

क्तेः ॥ ३ ॥ आर्चितं हुतं ॥ ४ ॥ जातरूपमयैः स्वर्णमयैः । अङ्गदैः कूर्परोपरिधार्यैर्बाहुभूषणैः । सहेमसूत्रैर्मणिभिः हेमसूत्रप्रोतैर्वैडूर्यपद्मरागमुक्तादिमणिभिः । "रत्नंमणिर्द्वयोरश्मजातौमुक्तादिकेपिच" इत्यमरः । केयूरैः भुजशिरोव्यापिफणाकारशिखरयुक्तबाहुभूषणैः । अथवा अङ्गदकेयूरयोःस्थूलत्वसूक्ष्मत्वाभ्यांभेदः । वलयैः कटकैः । " कटकंवलयोस्त्रियां " इत्यमरः । रत्नैः भूषणप्रकरणाद्भूषणश्रेष्ठैरित्यर्थः । " रत्नंस्वजातिश्रेष्ठेपि " इत्यमरः ॥ ५—६ ॥ हेमसूत्रं हेममयंकण्ठसूत्रं । रशनांचते भार्यायैसीतादातुमिच्छति तत्सर्वंहारय दापयेत्यर्थः ॥ ७ ॥ भार्यायै भार्याधारणार्थं । तुभ्यं प्रतिग्रहीत्रे । प्रयच्छति । गच्छती अत्रनुमभावआर्षः ॥ ८ ॥ त्वयि प्रतिष्ठापयितुं तुभ्यंदातुमित्यर्थः ॥ ९ ॥ मातुलोददावितिदशरथीनशत्रुञ्जयव्यावृत्तिः ॥ १० ॥ प्रतिगृह्येत्यनेनन्यासभूतत्वंव्यावर्त्यते ॥ ११ ॥ त्रिदशेश्वरं इन्द्रं ॥ १२ ॥ आगस्त्यं अगस्त्यपुत्रं । कौशिकं विश्वामित्रपुत्रं । रत्नैः श्रेष्ठवस्तुभिः ॥ १३ ॥ रत्नैरर्चनंविवृणोति—तर्पयस्वेति ॥ १४ ॥ कौसल्यामित्यादिश्लोकद्वयमेकान्वयम् । तैत्तिरीयाणां तित्तिरिसंबन्धिशाखाध्येतृणां । आचार्यः अध्यापयिता । अभिरूपः बुधः । " प्राप्तरूपसुरूपाभिरूपाबुधमनोज्ञयोः" इतिविश्वः । कौशेयानि कृमिकोशोत्थानि । "कौशेयंकृमिकोशोत्थं" इत्यमरः । यावत् यावत्पर्यन्तं । तुष्यति । तावत्संप्रदापयेतिसंबन्धः ॥ १५—१६ ॥ सूतइत्यादिसार्धश्लोकएकान्वयः । सूतः सुमन्त्रतुल्यःकश्चिच्चित्ररथना-

---

धोभागस्थं ॥४॥ **स०** अङ्गगतिंइतस्ततश्चलनमितियावत् । ददतिकर्णयोरित्यङ्गदानीतिकुण्डलविशेषणम् ॥५॥ **स०** यतः वनंगच्छति ई रमात्मिकासीता अतःप्रयच्छतीतिवा ॥८॥ **वि०** निष्कसहस्रेण निष्कसहस्रदक्षिणया ॥ १० ॥ **स०** रामलक्ष्मणसीतानामित्यत्रलक्ष्मणव्यवधानेनमहर्ष्याशिषाविलंबफलकलंद्योतयति ॥ ११ ॥ **ति०** ब्रह्मात्रिदशेश्वरमिव । नियोक्तृनियोज्ययोः परापरप्रभुत्वेदृष्टान्तः ॥ १२ ॥ **ति०** कौशिकोविश्वामित्रः । **स०** अंबुदइतिशेषः ॥ १३ ॥ **स०** यावदित्यव्ययं । यावता ॥ १६ ॥ **शि०** यदिचचित्रोरथोयस्यसइतियौगिकार्थमात्रविवक्षा तदा सूतशब्देनसुमन्त्रएवग्राह्यः । पशुकाभिः प्रशस्ताःपशवः पशुकास्ताभिः यज्ञयोग्याभिरित्यर्थः । सर्वाभिः अजादिव्यक्तिभिः ॥ १७ ॥

[पा०] १ च. झ. ञ. ट. चाथसा. २ छ. झ. ञ. सखी. ३ च. छ. झ. ञ. ट. अङ्गदानिच. ४ छ. झ. सखी. ५ क. च—ट. निष्क. ६ घ. च. सत्तम. ७ च. छ. झ. ञ. ट. सतु. क. घ. सह. ८ क. ध. च—ट. शिवाः. ९ ख. मप्रस्थं. १० झ. प्रियरामः. ११ च. छ. ञ. ट. प्रियंवदम्. १२ क. त्रिदशेश्वरः. १३ छ. ज. झ. ञ. अगस्त्यं. १४ गोसहस्रेणराघव. घ, ज. गोभिर्वस्त्रैश्च. १५ क. ख. च—ट. सुवर्णरजतैश्चैव. १६ क, रथाचार्यः.

ये [1]चेमे कठकालापा बहवो दण्डमाणवाः ॥ [2]नित्यस्वाध्यायशीलत्वान्नान्यत्कुर्वन्ति किंचन ॥१८॥
अलसाः स्वादु[3]कामाश्च महतां चापि संमताः ॥ तेषामशीतियानानि रत्नपूर्णानि दापय ॥ १९ ॥
शालिवाहसहस्रं च द्वे [4]शते भद्रकांस्तथा ॥ व्यञ्जनार्थं च सौमित्रे गोसहस्रमुपाकुरु ॥ २० ॥
[5]मेखलीनां महासङ्घः कौसल्यां समुपस्थितः ॥ तेषां सहस्रं सौमित्रे प्रत्येकं संप्रदापय ॥ २१ ॥
अंबा [6]यथा च सा नन्देत्कौसल्या मम दक्षिणाम् ॥ [7]तथा द्विजातींस्तान्सर्वांल्लक्ष्मणार्चय सर्वशः ॥ २२ ॥
ततः [8]स पुरुषव्याघ्रस्तद्धनं लक्ष्मणः स्वयम् ॥ यथोक्तं ब्राह्मणेन्द्राणामददाद्धनदो यथा ॥ २३ ॥
अथाब्रवीद्[9]बाष्पकलांस्तिष्ठतश्चोपजीविनः ॥ [10]संप्रदाय बहु द्रव्यमेकैकस्यो[11]पजीवनम् ॥ २४ ॥
लक्ष्मणस्य च यद्वेश्म गृहं च यदिदं मम ॥ अशून्यं कार्यमेकैकं यावदागमनं मम ॥ २५ ॥
इत्युक्त्वा दुःखितं सर्वं जनं [12]तमुपजीविनम् ॥ उवाचेदं धनाध्यक्षं धनमानी[13]यतामिति ॥ २६ ॥
ततोस्य धनमाजह्रुः [14]सर्वमेवोपजीविनः ॥ स राशिः सुमहांस्तत्र दर्शनीयो ह्यदृश्यत ॥ २७ ॥
ततः स पुरुषव्याघ्रस्तद्धनं सहलक्ष्मणः ॥ द्विजेभ्यो बालवृद्धेभ्यः [15]कृपणेभ्यो ह्यदापयत् ॥ २८ ॥

मा । सुचिरोषितः चिरकालमस्मद्गृहेस्थितः । पशुकाभिः अल्पार्थेकन्प्रत्ययः । अजादिभिरित्यर्थः ॥ १७ ॥ येचेत्याद्युपाकुर्वित्यन्तमेकंवाक्यं । कठेनप्रोक्तमधीयते कठाः । कठशब्दात्प्रोक्तार्थेवैशंपायनान्तेवासित्वाण्णिनिः । तस्य " कठचरकात् " इतिलुक् । ततः " तदधीतेतद्वेद " इत्यण् । तस्य "प्रोक्ताल्लुक्" इतिलुक् । कलापिनाप्रोक्तमधीयतेकालापाः । कलापिशब्दात्प्रोक्तार्थे " कलापिनोण् " इत्यण् । " सब्रह्मचारिपीठसर्पि " इत्यादिनाटिलोपः । ततः " तदधीते " इत्याद्यण् । तस्यप्रोक्ताल्लुक् । कठप्रोक्तशाखाध्यायिनःकलापिप्रोक्तशाखाध्यायिनश्चेत्यर्थः । कठाश्चकालापाश्चकठकालापाः । " दण्डप्रधानामाणवाःदण्डमाणवाः " इतिकाशिकायां । सदापलाशदण्डधारिणोब्रह्मचारिण इत्यर्थः । किञ्चन आहारार्थयत्नादिकं । नकेवलंनित्यस्वाध्यायशीलत्वान्किञ्चिन्नकुर्वन्ति किंत्वालस्याच्चेत्याशयेनाह—अलसाइति । गोसहस्रप्रदानहेतुत्वेनाह—स्वादुकामाश्चेति । रसवत्पदार्थकाङ्क्षिणइत्यर्थः । महतां चापिसंमताः अतीवसाध्वाचाराइत्यर्थः । रत्नपूर्णानि रत्नालङ्कारपूर्णानि । अशीतियानानीत्युक्त्यादण्डमाणवाश्चाशीतिसङ्ख्याकाइतिगम्यते । रत्नवाहानुष्ट्रानिति वा । शालिवाहसहस्रं शालिधान्यवाहकबलीवर्दसहस्रं । भद्रकान् अल्पार्थेकन्प्रत्ययः । कर्षणयोग्याननडुहइत्यर्थः । धान्यविशेषानित्यपरे । व्यञ्जनार्थं क्षीरदधिघृतार्थं । उपाकुरु ददस्वेत्यर्थः ॥ १८—२० ॥ मेखलीनामिति मेखला मौञ्जी । तद्वतांब्रह्मचारिणामित्यर्थः । आर्षोदीर्घः । सहस्रं गोसहस्रं । प्रकृतत्वात्तासां ॥ २१ ॥ ममांबेत्यन्वयः । दक्षिणां पूर्वोक्तदानाङ्गभूतां । सर्वशः वस्त्रधान्यादिसर्वप्रकारैः ॥ २२ ॥ यथोक्तं रामोक्तमनतिक्रम्य । अददाद्धनदोयथेति । धनदस्यदातृत्वं " धनदेनसमस्त्यागे " इतिबालरामायणएवोक्तं । ब्राह्मणेन्द्राणामितिचतुर्थ्यर्थेषष्ठी ॥२३॥ बाष्पंकलन्तिमुञ्चन्तीतिबाष्पकलाः तान् । उपजीवनं प्रतिएकैकस्योपजीविनोबहुद्रव्यंसंप्रदायाब्रवीत् ॥ २४ ॥ अशून्यंकार्यम् । यथापूर्वंभवद्भिरुपविश्यरक्षणीयमित्यर्थः । एकैकं पृथक्पृथक् ॥ २५ ॥ धनाध्यक्षं कोशगृहाधिकृतं ॥ २६ ॥ अस्य रामस्य ॥ २७ ॥ बालवृद्धेभ्यः बालेभ्योवृद्धेभ्यश्चेत्यर्थः ॥ २८ ॥

ती० मेखलाः मेखलिनः ब्रह्मचर्यव्रतिनः । अर्शआदित्वादच् ॥ २१ ॥ ती० प्रथमान्तपाठे दक्षिणा समर्था ॥ २२ ॥ ती० बाष्पगलान् बाष्पगद्गदान् ॥ २४ ॥ शि० एकैकं संस्थाप्येतिशेषः । अशून्यं शून्यंनकार्यं । असूर्यंपश्याराजदाराइतिवत्समासः । स० एकैकं पर्यायेणनियोज्येतिशेषः ॥ २५ ॥ शि० ममधनाध्यक्षं कोशाधीशात् धनमानीयताम् । "अकथितंच"

[पा०] १ च. छ. झ. चमे. क. ख. ज. चेमेकाठ. २ ख. घ. नित्यं. ३ घ. शीलाश्च. ४ क. च. ञ. भद्रकान्संप्रदापय. ५ च. छ. ज. मेखलानां. ६ ख. च. छ. झ. ञ. ट. यथानोनन्देच्च. क. यदानौनन्देच्च. ७ च. यथा. क. ख. ग. घ. ज. यथाद्विजातीन्सर्वांस्तान्. ८ च. छ. झ. ञ. पुरुषशार्दूलः. ९ क. ख. छ. झ. ञ. द्वाष्पगलान्. १० झ. ट. सप्रदाय. ११ ख. ग. घ. जीविनः. क. जीविनाम्. १२ क. मनुजीविनम्. १३ छ. झ. ट. तांमम. १४ च. झ. ञ. ट, सर्वएवोप. १५ ख. दरिद्रेभ्यो.

तत्रासीत्पिङ्गलो गार्ग्यस्त्रिजटो नाम वै द्विजः ॥ उ[1]ञ्छवृत्तिर्वने नित्यं फालकुद्दाललाङ्गली ॥ २९ ॥
तं वृद्धं तरुणी भार्या बालानादाय दारकान् ॥ अब्रवीद्ब्राह्मणं वाक्यं दा[2]रिद्र्येणाभिपीडिता ॥३०॥
अपास्य फालं कुद्दालं कुरुष्व वचनं मम ॥ रामं दर्शय धर्मज्ञं यदि किञ्चिदवा[3]प्स्यसि ॥ ३१ ॥
स[4] भार्यावचनं श्रुत्वा शाटीमाच्छाद्य दुश्छदाम् ॥ स प्रातिष्ठत पन्थानं यत्र रामनिवेशनम् ॥३२॥
भृ[5]ग्वङ्गिरसमं दीप्त्या त्रिजटं जनसंसदि ॥ आ पञ्चमायाः कक्ष्यायाः [6]नैनं कश्चिदवारयत् ॥ ३३ ॥
स रा[7]जपुत्रमासाद्य त्रिजटो वाक्यमब्रवीत् ॥ निर्धनो बहुपुत्रोस्मि राजपुत्र [8]महायशः ॥
उ[9]ञ्छवृत्तिर्वने नित्यं प्रत्यवेक्षस्व मामिति ॥ ३४ ॥
तमुवाच ततो रामः परिहास[10]समन्वितम् ॥ ३५ ॥
गवां सहस्र[11]मप्येकं न[12] तु विश्राणितं मया ॥ परिक्षिपसि दण्डेन यावत्ताव[13]दवाप्स्यसि ॥ ३६ ॥
स शाटीं त्व[14]रितः कट्यां संभ्रान्तः परिवेष्ट्य ताम् ॥ आविध्य दण्डं चिक्षेप सर्वप्राणेन वेगितः[15] ॥३७॥

तत्र तस्मिन्कालेदेशेवा । पिङ्गलः पिङ्गलवर्णइतिदारिद्र्यलक्षणोक्तिः । पिङ्गलकेशोवा । गार्ग्यः गर्गमुनिवंश्यः । उञ्छवृत्तिः उञ्छेनएकैकशोधान्यग्रहणेनवृत्तिर्जीवनंयस्यतथा । क्षतवृत्तिरितिपाठेक्षतेनखननेनजीवनंयस्येत्यर्थः । खननलब्धकन्दमूलादिजीवनइत्यर्थः । फालकुद्दाललाङ्गली फल्यतेअनेनेति फालोद्वैधीकरणसाधनंकुठारशङ्कुलादिकं । कुद्दालः खननसाधनं । खनित्रमितियावत् । लाङ्गलं हलाकारः फलाकर्षणसाधनभूतोदण्डविशेषः । तद्वान् । एवं वनवासीकश्चिद्दरिद्रोगृहस्थोदैवात्तत्रनगरेतदानींसङ्गतोऽभूदितिभावः ॥ २९ ॥ दारकान् पुत्रकान् ॥ ३० ॥ कुद्दालमितिलाङ्गलस्याप्युपलक्षणं । दर्शयेति । भार्यापुत्रसहितमात्मानमित्यर्थः । "गतिबुद्धि"इत्यादिनाद्विकर्मकत्वम् । यदिदर्शयसितदाकिञ्चिदवाप्स्यसीत्यर्थः । किञ्चिदितिस्वभाग्यहान्यपेक्षयोक्तम् ॥ ३१ ॥ दुश्छदां अतिजीर्णत्वादाच्छादयितुमशक्यां । रामदर्शनार्थमाच्छादनयत्नः । यत्र यन्मार्गाश्रितवीथ्यां ॥ ३२ ॥ अङ्गिरेत्यत्रअकारान्तत्वमार्षम् ॥ ३३ ॥ प्रत्यवेक्षस्व कटाक्षयेत्यर्थः ॥ ३४ ॥ परिहाससमन्वितं लीलास्मितसमन्वितं । बहुकुटुम्बिनोदरिद्रस्यास्य कियतीधनाशेतिजिज्ञासयासस्मितइत्यर्थः ॥३५॥ अनेकगोसहस्राणांमध्येएकमपिसहस्रंनविश्राणितमित्यर्थः । यद्वा असङ्ख्यातानांगवांमध्ये एकमपिसहस्रं मयानविश्राणितं नदत्तं । तुभ्यमितिशेषः । अपितुदण्डेनयावत्परिक्षिपसि गवाकीर्णयावन्तंदेशंपरिक्षिपसि । तावदवाप्स्यसि तावद्देशस्थंगोजातमवाप्स्यसीत्यर्थः । एकंगोसहस्रमात्रंनदत्तं अन्यत्सर्वंदत्तमितिनार्थः । " बहुसाहस्रे " इत्यादिवक्ष्यमाणेनविरोधात् । अपिशब्दास्वारस्याच्च ॥ ३६ ॥ कट्यांपरिवेष्टनंबलोत्तम्भनाय । आविध्य भ्रामयित्वा । सर्वप्राणेन सर्वशक्त्या । "शइतिकर्मत्वं ॥ ३६ ॥

ति० क्षतेन पिपीलिकारहितदेशेखननेनवृत्तिर्जीविकायस्य । किंच क्षता त्यक्ता वृत्तिः प्रतिग्रहादिर्जीविकायेन । उञ्छवृत्तिरितियावत् । पिङ्गलः व्रतोपवासादिनापीतवर्णः । नित्यमित्यनेनग्रामगमनव्युदासः । स० क्षतवृत्तिः भूखननेनजीवनवान् । उञ्छवृत्तिरितिपाठोनस्वरसः । फालकुद्दालेत्यादेरवक्तव्यत्वात् ॥ २९ ॥ ति० स्त्रीणांभर्ताहिदेवता इतिपाठे यद्यपिदेवतात्वादाज्ञानर्हस्तथापिप्रीत्यामद्वचनंकुरुष्वेत्यर्थः ॥ ३० ॥ स० ममयदिरामंदर्शयसि तर्हिकिंचिदवाप्स्यसेइत्यन्वयः । अनेन त्रिजटस्यभार्यासाहित्येनरामंप्रतिगमनंद्योत्यते । अतएव "ततस्सभार्यस्त्रिजटः" इत्युक्तिस्संगच्छते । यद्वा दर्शय स्वात्मानमितिशेषः । आगामिबाधकंतुतत्रैवपरिहियते ॥ ३१ ॥ स० दुश्छदां दुःखेनच्छादयितुंयोग्यां ॥ ३२ ॥ स० आपञ्चमायाः आसमन्तात्पञ्चमाश्चतुराःपरिचितापरिचितविवेकिनःयस्यांकक्ष्यायांसातथातस्याः । एतेन चतुरपुरुषवत्त्वंकक्ष्यायाद्योत्यते । यद्वा डीबभावआर्षः । "पञ्चमश्चतुरेहृद्ये" इतिविश्वः । कश्चिद्द्वारपः ॥ ३३ ॥ ति० अस्त्येकंइतिपाठे तावदेवशिष्टमस्तीत्यर्थः ॥ ३५ ॥

[पा०] १ क. ख. ग. च—ट. क्षतवृत्तिः. २ छ. झ. ट. स्त्रीणांभर्ताहिदेवता. ३ क. ख. च. छ. झ. ञ. ट. दवाप्स्यसे. ४ क—घ. च. ज. ञ. भार्यायावचनं. छ. झ. ट. सभार्यायावचः. ५ झ. ञ. ट. ठ. भृग्वङ्गिरस्समं. ६ घ. झ. नैतं. छ. ट. नच. ७ छ. झ. ट. राममासाद्यतदा. ८ झ. ट. महाबल. ९ क. च. छ. झ. ञ. ट. क्षतवृत्तिः. १० ग. ज. समन्वितः. ११ ग. मयैकं. १२ छ. झ. ट. नच. १३ च. छ. झ. ञ ट. दवाप्स्यसे. १४ छ. झ. ट. परितः. १५ छ. झ. ञ. ट. वेगतः

स तीर्त्वा सरयूपारं दण्डस्तस्य कराच्युतः ॥ गोव्रजे बहुसाहस्रे पपातोक्षणसन्निधौ ॥ ३८ ॥
तं परिष्वज्य धर्मात्मा आ तस्मात्सरयूतटात् ॥ आनयामास तां गोपैस्त्रिजटायाश्रमं प्रति ॥ ३९ ॥
उवाच च ततो रामस्तं गार्ग्यमभिसान्त्वयन् ॥ मन्युर्न खलु कर्तव्यः परिहासो ह्ययं मम ॥ ४० ॥
इदं हि तेजस्तव यद्दुरत्ययं तदेव जिज्ञासितुमिच्छता मया ॥
इमं भवानर्थमभिप्रचोदितो वृणीष्व किं चेदपरं व्यवस्यति ॥ ४१ ॥
ब्रवीमि सत्येन न तेऽस्ति यन्त्रणा धनं हि यद्यन्मम विप्रकारणात् ॥
भवत्सु सम्यक्प्रतिपादनेन तन्मयाऽऽर्जितं प्रीतियशस्करं भवेत् ॥ ४२ ॥
ततः सभार्यस्त्रिजटो महामुनिर्गवामनीकं प्रतिगृह्य मोदितः ॥
यशोबलप्रीतिसुखोपबृंहणीस्तदाऽऽशिषः प्रत्यवदन्महात्मनः ॥ ४३ ॥
स चापि रामः प्रतिपूर्णमानसो महद्धनं धर्मबलैरुपार्जितम् ॥
नियोजयामास सुहृज्जने चिराद्यथार्हसंमानवचःप्रचोदितः ॥ ४४ ॥
द्विजः सुहृद्भृत्यजनोथवा तदा दरिद्रभिक्षाचरणश्च योऽभवत् ॥

क्तिःपराक्रमःप्राणः " इत्यमरः ॥ ३७ ॥ उक्षणसन्निधौ उक्षसन्निधौ " वष्टिभागुरिः " इत्यादिरीत्या अकारान्तत्वं ॥ ३८ ॥ आतस्मादित्यत्राभिविधिवाच्यकस्याङःसरयूतटादित्यनेनसंबन्धः । आनयामास नाययामासेत्यर्थः ॥ ३९ ॥ अयं दण्डक्षेपणप्रचोदना । परिहासः विनोदार्थइत्यर्थः ॥ ४० ॥ परिहासमेवविवृणोति—इदमिति । तेजः बलं । दुरत्ययं निरतिशयमित्यर्थः । जिज्ञासितुं ज्ञातुमित्यर्थः । यद्वा जिज्ञासितुं मीमांसितुं । " मानेर्जिज्ञासायां " इति मीमांसार्थेजिज्ञासाशब्दप्रयोगात् । इममर्थं दण्डप्रक्षेपणरूपं । अपरंकिंचिद्व्यवस्यति अभिलषतिचेत् तद्वृणीष्व ॥ ४१ ॥ इदंचपूर्ववन्नपरिहासरूपमित्याह—ब्रवीमीति । यन्त्रणा निरोधइत्यर्थः । ममयद्यद्धनमस्तितत्सर्वं विप्रकारणात् विप्रार्थमेवार्जितं । भवत्सु भवादृशेषुविप्रेषु । सम्यक् करणत्रयपूर्वकं । प्रदानेनममप्रीतियशस्करंभवेत् ॥ ४२ ॥ मोदितइत्यनेनगोभ्योन्यन्नापेक्षितवानित्यवगम्यते । उपबृंहणीः वर्धनीः । तदा गमनकाले । महात्मनः रामस्य ॥ ४३ ॥ धर्मबलैः धर्मप्रयुक्तपराक्रमैः । नियोजयामास प्रतिपादयामास । सुहृज्जनेविषये यथार्हसंमानवचःप्रचोदितः आहिताग्न्यादित्वान्निष्ठायाःपरनिपातः । तत्तदौचित्येनाभिहितसंमानवाक्यइत्यर्थः ॥ ४४ ॥ द्विजः ब्राह्मणः । सुहृत् द्विजत्वाभावेपिसुहृत् । द्विजत्वसुहृत्त्वाभावेपि भृत्यजनः । तथात्वाभावेपिदरिद्रभिक्षाचरणः भिक्षां चरतीतिभिक्षाचरणः " कृत्यल्युटोबहुलं " इतिकर्तरिल्युट् । कर्मधारयसमासः । सत्र तेषुमध्ये । कश्चि-

शि० उक्षाणेत्यार्षम् । किंच उक्ष्णांवृषाणांअणाःशब्दाःतैस्संनिधीयतेस्वसमीपंप्राप्यतेअसौ तादृशेगोव्रजेपपातेत्यर्थः । भागुरिमतेनेदमितिभूषणोक्तिस्तुदुर्ग्रहा । एतादृशनिपातनस्याजादिगणेअदृष्टत्वात् । स्वार्थिकाद्यणादिकल्पनाप्येतन्मार्गिकैव । स० उक्षाणसंनिधौ । आर्षोऽयमानङ् । उक्ष्णांचेत्यपिपाठः ॥ ३८ ॥ ती० त्रिजटाय त्रिजटस्य । ति० आतस्मात्सरयूतटात् सरय्वाःपरपारमभिव्याप्य यागावःस्थिताः ताआनयामास । त्रिजटस्याश्रमंप्रतिनाययामासचेतिशेषः । शि० तंब्राह्मणं आवाप्य प्राप्य परिष्वज्य । स० आतस्मात्सरयूतटात् तदभिव्याप्येत्यर्थः । "वाक्येतुसाविवक्षामपेक्षते" इत्युक्तेस्समासाभावः । आनयामास प्रापयामास । ताः दण्डसंगृहीतावृषभपर्यन्तंस्थिताः ॥ ३९ ॥ स० यन्त्रणा संकोचः ॥ ४२ ॥ स० सभार्यः भार्यासहितः । यद्वा आशिषःप्रत्यवदत् । ततःगेहगमनानन्तरं सभार्योमोदितः हृष्टोभूदित्यन्वयः । अतस्सभार्यइतिनानुपपन्नम् ॥ ४३ ॥ शि० प्रतिपूर्णपौरुषः प्रतिपूर्णःनित्यसंभृतःपौरुषःपुरुषार्थोयस्मिन्सः ॥ ४४ ॥ इतिद्वात्रिंशस्सर्गः ॥ ३२ ॥

[पा०] १ क—घ. छ. ज. झ. ट. पपातोक्षाण. च. ञ. पपातोक्ष्णांच. २ छ. आव्याप्य. झ. ट. आवाप्य. ३ ख. च. छ. झ. ञ. ट. तागावः. ४ क. घ. च—ट. त्रिजटस्याश्रमं. ५ च. छ. झ. ञ. ट. तदा. ६ क. हर्षयन्. ७ च. हासस्त्वयं. ८ क. छ. ज. झ. ट. व्यवस्यसि. ९ क. यदन्यन्मम. १० पादनेनमयार्जितं. च. पादनेनमयोर्जितंधनंप्रीति. ११ ख. च—झ. वृंहिणीः. १२ क. ख. च. ञ. परिपूर्णपौरुषो. ग. घ. छ. ज. झ. ट. प्रतिपूर्णपौरुषो. १३ च. छ. झ. ञ. ट. महाधनं. १४ छ. यदा. १५ क. ख. च. छ. झ. ञ. ट. योभवेत्.

न तत्र कश्चिन्न बभूव तर्पितो यथार्हसंमाननदानसंभ्रमैः ॥ ४५ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे द्वात्रिंशः सर्गः ॥ ३२ ॥

त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

श्रीरामेणब्राह्मणेभ्योधनादिवितरणानन्तरंसीतालक्ष्मणाभ्यांसहदशरथदिदृक्षयातद्गृहंप्रतिगमनम् ॥ १ ॥ तथापथिस्वेषां दर्शनेनशोकाकुलितमानसानांजनानांबहुविधसंभाषणश्रवणेनाप्यविकृतमनसातेनदशरथगृहंप्रविश्यतत्रस्थंसुमन्त्रंप्रतिपित्रे स्वागमननिवेदनचोदना ॥ २ ॥

दत्त्वा तु सह वैदेह्या ब्राह्मणेभ्यो धनं बहु ॥ जग्मतुः पितरं द्रष्टुं सीतया सह राघवौ ॥ १ ॥
ततो गृहीते दुष्प्रेक्षे त्वशोभेतां तदायुधे ॥ मालादामभिरावद्धे सीतया समलङ्कृते ॥ २ ॥
ततः प्रासादहर्म्याणि विमानशिखराणि च ॥ अधिरुह्य जनः श्रीमानुदासीनो व्यलोकयत् ॥ ३ ॥
न हि रथ्याः स्म शक्यन्ते गन्तुं बहुजनाकुलाः ॥ आरुह्य तस्मात्प्रासादान्दीनाः पश्यन्ति राघवम् ॥ ४ ॥
पदातिं वर्जितच्छत्रं रामं दृष्ट्वा तदा जनाः ॥ ऊचुर्बहुविधा वाचः शोकोपहतचेतसः ॥ ५ ॥
यं यान्तमनुयाति स्म चतुरङ्गबलं महत् ॥ तमेकं सीतया सार्धमनुयाति स्म लक्ष्मणः ॥ ६ ॥
ऐश्वर्यस्य रसज्ञः सन्कामिनां चैव कामदः ॥ नेच्छत्येवानृतं कर्तुं पितरं धर्मगौरवात् ॥ ७ ॥
या न शक्या पुरा द्रष्टुं भूतैराकाशगैरपि ॥ तामद्य सीतां पश्यन्ति राजमार्गगता जनाः ॥ ८ ॥

दपि यथार्हसंमाननदानसंभ्रमैः संभ्रमस्त्वरा । "आरम्भःसंभ्रमस्त्वरा" इत्यमरः । नतार्पितोनबभूव त्वरयाक्रियमाणैरपिसंमानदानैःसर्वेपितर्पितावभूवुरित्यर्थः ॥ ४५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीतांबराख्याने अयोध्याकाण्डव्याख्याने द्वात्रिंशःसर्गः ॥ ३२ ॥

पूर्वंपित्रानुज्ञातोपिसीतालक्ष्मणयोरनुज्ञापनायपुना रामोदशरथसमीपंगच्छति—दत्त्वेत्यादि ॥ १ ॥ तदायुधे तयोरायुधे । धनुषीइतियावत् । खड्गादीनामप्युपलक्षणमेतत् । मालादामभिः मालानिचयैरित्यर्थः । अलङ्कृते चन्दनादिभिरलङ्कृते ॥ २ ॥ प्रासादहर्म्याणि प्रासादोदेवतानांभूभुजांचावासः । हर्म्याणिधनिनांमन्दिराणि । "हर्म्यादिर्धनिनांवासःप्रासादोदेवभूभुजां" इत्यमरः । विमानशिखराणि विमानंसप्तभूमिसहितं सद्म । "विमानोस्त्रीदेवयानेसप्तभूमौचसद्मनि" इति वैजयन्ती । उदासीनः निरुत्सुकः । निर्विण्णइतियावत् ॥ ३ ॥ तस्मात् रथ्यागमनस्याशक्यत्वात् । प्रासादानितिपाठः । प्रासादादितिपाठेल्यब्लोपेपञ्चमीक्लिष्टा ॥ ४ ॥ दीनत्वेहेतुमाह—पदातिमित्यादिना ॥ ५ ॥ एकं मुख्यं ॥ ६ ॥ रसज्ञः सद्वहसुखज्ञः । कामिनां अर्थकाङ्क्षिणां । कामदः अभीष्टधनप्रदः । अनृतं अनृतवचनं । कर्तुं । धर्मगौरवात् पितृशुश्रूषणवचनकरणविधेयत्वादिरूपधर्मविषयकबहुमानात्

शि० वैदेह्या विदेहतनयया सीतयासहराघवौपितरंद्रष्टुंजग्मतुः । स० क्रियाद्वयेसीतासाहित्यंकथयितुमुभयत्रोक्तिः ॥ १ ॥ ति० प्रेष्याभ्यां रामलक्ष्मणभृत्याभ्यां । स० मुख्यत्वादायुधेइतिद्विवचनम् । सीतयेत्युभयत्रान्वेति ॥ २ ॥ ति० उदासीनः अरक्षितृत्वेननिरुत्सुकः । प्रासादः त्रिभूमिकंसद्म । स० श्रीमानप्युदासीनइत्यनेनरामस्यप्रेयस्त्वंद्योत्यते ॥ ३ ॥ ति० यतःसुखेनगन्तुंनशक्यन्ते तस्मात्प्रासादमारुह्य प्रासादात् तत्रप्रासादेसंस्थाय । स० प्रासादादितिपञ्चमीद्वितीयार्थे । प्रासादमारुह्य तस्मात् आरूढप्रासादात् । प्रासादान्तरमारुह्यपश्यन्तीत्यावृत्तेनान्वयः । अनेनात्यादरोद्योत्यते ॥ ४ ॥ ति० कामानां प्रजेप्सितपदार्थानां । महान् व्ययेप्यूनताराहितः । आकरः सर्वदादातेत्यर्थः ॥ ७ ॥ शि० आकाशगैर्भूतैः वाय्वादिभिः । स० आकाशगैर्भूतैः

[पा०] १ क—ट. प्रेष्याभ्यामशो. २ क. ग. घ. च—ट. रासक्ते. ३ ख. ज. शृङ्गाणि. ४ ख. प्यलोकयत्. ५ छ. झ. ट. रथ्याःसु. ख. रथ्यासु. च. ज. रथ्यासु. ६ झ. ञ. ट. ठ. त्प्रासादात्. ७ छ. झ. ट. ठ. पदातिंसानुजंदृष्ट्वाससीतंचजनास्तदा. ८ घ. ङ. दृष्ट्वारामंजनास्तथा. क. ख. ग. रामंदृष्ट्वाजनास्तदा. ९ झ. बहुजनाः. १० ख. तमेतं. ग. घ. तमेकः. ११ क. ऐश्वरस्यरसज्ञः. ख. ऐश्वर्यस्यबलज्ञः. १२ छ. झ. ट. ठ. कामानांचाकरोमहान्. च. ञ. कामानांचैव. १३ ख. ग. वक्तुं. १४ च—झ. ट. वचनं.

अङ्गरागोचितां सीतां रक्तचन्दन[1]सेविनीम् ॥ वर्षमुष्णं च शीतं च ने[2]ष्यन्त्याशु वि[3]वर्णताम् ॥ ९ ॥
अद्य नूनं दशरथः सत्वमाविश्य भाषते ॥ न हि राजा प्रियं पुत्रं विवासयितुमि[4]च्छति ॥ १० ॥
निर्गुणस्यापि पुत्रस्य कथं स्याद्वि[5]प्रवासनम् ॥ किंपुनर्यस्य लोकोऽयं जितो वृत्तेन केवलम् ॥ ११ ॥
आनृशंस्यमनुक्रोशः[6] श्रुतं शीलं दमः शमः ॥ राघवं शोभयन्त्येते षड्गुणाः पु[7]रुषर्षभम् ॥ १२ ॥
तस्मात्तस्योपघातेन प्रजाः परमपीडिताः ॥ औदकानीव सत्वानि ग्रीष्मे सलिलसंक्षयात् ॥ १३ ॥
पीडया पीडितं सर्वं जगदस्य ज[8]गत्पतेः ॥ मूलस्येवोपघातेन वृ[9]क्षः पुष्पफलोपगः ॥ १४ ॥
मूलं ह्येष मनुष्याणां धर्मसारो महाद्युतिः ॥ पुष्पं फलं च पत्रं च शाखा[10]श्चास्येतरे जनाः ॥ १५ ॥
ते ल[11]क्ष्मण इव क्षिप्रं स[12]पत्न्यः सहबान्धवाः ॥ गच्छन्तमनुगच्छामो येन गच्छति राघवः ॥ १६ ॥
उद्यानानि परित्यज्य क्षेत्राणि च गृहाणि च ॥ ए[13]कदुःखसुखा राममनुगच्छाम धार्मिकम् ॥ १७ ॥
स[14]मुद्धृतनिधानानि परिध्वस्ताजिराणि च ॥ उपात्तधनधान्यानि हृ[15]तसाराणि सर्वशः ॥ १८ ॥
रजसाऽ[16]भ्यवकीर्णानि परित्यक्तानि दैवतैः ॥ मू[17]षकैः परिधावद्भिरुद्बिलैरावृतानि च ॥ १९ ॥
अपेतोदकधूमानि हीनसंमार्जनानि च ॥ प्रनष्टबलिकर्मेज्यामन्त्रहोमजपानि च ॥ २० ॥

॥ ७—९॥ सत्वं जन्तुं । "सत्वमस्त्रीतुजन्तुषु"इत्यमरः । पिशाचमितियावत् । आविश्य प्राप्य ॥ १० ॥ वृत्तेनकेवलं चरित्रमात्रेण "वृत्तंपद्येचरित्रे" इत्यमरः । वृत्तेनकेवलमित्युक्तिर्दानमानादौविद्यमानेपि चरित्रप्राधान्यात् ॥ ११ ॥ आनृशंस्यं अहिंसकत्वं । अनुक्रोशोदया "कृपादयानुकंपास्यादनुक्रोशः" इत्यमरः । दमः इन्द्रियनिग्रहः । शमः चित्तप्रशान्तिः । "शमश्चित्तप्रशान्तिःस्याद्दमइन्द्रियनिग्रहः"इतिनिर्वचनात् ॥ १२ ॥ तस्मात् षाड्गुण्ययुक्तत्वात् । तस्य रामस्य । उपघातेन हिंसनेन । औदकानि उदकजीवनानि । शैषिकोण् ॥ १३ ॥ अस्यजगत्पतेःरामस्यपीडया विवासनरूपया । पुष्पफलैरुपगमोयस्यसपुष्पफलोपगोवृक्षइव "अन्येष्वपिदृश्यते" इतिडप्रत्ययः ॥ १४ ॥ मनुष्याणां प्राणिनामुपलक्षणमेतत् । धर्मएवसारोयस्यसःधर्मसारः ॥ १५ ॥ तेवयं सपत्न्यः सपत्नीकाः । समासान्तविधेरनित्यत्वेन "नद्यृतश्च" इतिकबभावः । येनमार्गेणगच्छतितेनेतिशेषः ॥१६॥ उद्यानानि राजार्होद्यानसदृशक्रीडावनानि । एकदुःखसुखाः समानसुखदुःखाः ॥ १७ ॥ समुद्धृतनिधानानि सम्यगुद्धृतनिक्षेपाणि । परिध्वस्ताजिराणि भग्नाङ्गणानि । "अङ्गणंचत्वराजिरे" इत्यमरः । उपात्तधनधान्यानि ।अत्रधनशब्देनगवादिकंनिक्षिप्तभूषणनिष्कादिकंचोच्यते । साराणि शय्यासनादीनि ॥१८॥ दैवतैः गृहदैवतैः । उद्बिलैः उद्भिन्नबिलैः ॥ १९ ॥ उदकं उदकसेचनं । हीनसंमार्जनानि संमार्जनहीनानि

सूर्यादिसत्वैः ॥ ८ ॥ शि० वर्षादित्रयं विवर्णतां वर्णान्तराक्रान्ततां । नेष्यति प्रापयिष्यति । स० उचितोङ्गरागोदेहरक्तिमायस्यास्तातथा । आहितादित्वात्परनिपातः । नेष्यति प्रापयति ॥ ९ ॥ शि० सत्वं महात्मनांधर्मं सत्यप्रतिज्ञत्वमित्यर्थः । आविश्य आश्रित्य । भाषते वनगमनंवक्ति । अन्यथा विवासयितुंनार्हति । हिरन्यथार्थे । एतेन सत्वंपिशाचमित्यर्थंवर्णयन्तोभट्टादयश्चिन्त्याः । तदर्थेसंकेताभावादसंभवाच्च । स० सत्वं साधुगुणं । आविश्य आलंब्य । भाषते नवनंगच्छेतिरामंप्रतीतिशेषः । कुतइत्यतंआह—नहीति । यद्वा सत्वं कैकेय्यादिरूपपिशाचं । आविश्यालंब्य भाषते वनंगच्छेति नप्रकृतितः । कुतइत्यतआह—नहीति । "सत्वंगुणेपिशाचादौ" इतिविश्वः ॥ १० ॥ ती० श्रुतं अनुष्ठानपर्यवसायिशास्त्राध्ययनं । शि० श्रुतं विज्ञापनाश्रवणं । दमः यथाऽपराधंदण्डः । स० अनुक्रोशः अनिमित्तकपरदुःखप्रहाणेच्छा । एतेषड्गुणाः । एतेगुणाःतथाऐश्वर्यादिषड्गुणाश्चेतिवा ॥ १२ ॥ शि० पुष्पफलोपगः पुष्पफलानिप्राप्तः ॥ १४ ॥

[पा०] १ ख. सेवितां. २ क. ख. घ. छ—ठ. नेष्यत्याशु. ३ ग. घ. विवर्णिताम्. ४ क. ख. ग. छ. झ—ठ. मर्हति. ५ छ. झ. ट. द्विनिवासनम्. ६ क. दमःशीलंश्रुतंशमः. ७ क—घ. ज. पुरुषोत्तमम्. ८ घ. ज. महीपतेः. ९ क. च. वृक्षाः पुष्पफलोपगाः. घ. वृक्षःपुष्पफलागमः. १० घ. स्तस्येतरे. क. ख. स्त्वस्येतरे. ११ ख. तं. १२ ठ. सपत्नीकाःसबान्धवाः. १३ क. समदुःख. १४ ख. समुद्धत. १५ छ. दत्तसाराणि. क. हृतभाराणि. १६ क. व्यवकीर्णानि. १७ क. ख. घ. मूषिकैः.

[1]दुष्कालेनेव भग्नानि भिन्नभाजनवन्ति च ॥ अस्मत्त्यक्तानि वेश्मानि कैकेयी प्रतिपद्यताम् ॥ २१ ॥
वनं नगरमेवास्तु येन[2] गच्छति राघवः ॥ अस्माभिश्च परित्यक्तं पुरं संपद्यतां वनम् ॥ २२ ॥
बिलानि दंष्ट्रिणः सर्वे सानूनि मृगपक्षिणः ॥ [3]त्यजन्त्यस्मद्भयाद्भीता गजाः सिंहा वनान्यपि ॥२३॥
[4]अस्मत्त्यक्तं [5]प्रपद्यन्तां सेव्यमानं त्यजन्तु च ॥ २४ ॥
तृणमांसफल[6]दानां [7]देशं व्यालमृगद्विजम् ॥ प्रपद्यतां हि कैकेयी [8]सपुत्रा सहबान्धवैः ॥
राघवेण [9]वने सर्वे सहवत्स्याम निर्वृताः ॥ २५ ॥
इत्येवं विविधा वाचो नानाजनसमीरिताः ॥ शुश्राव [10]रामः श्रुत्वा च न विचक्रेऽ[11]स्य मानसम् ॥२६॥
स तु वेश्म [12]पितुर्दूरात्कैलास[13]शिखरप्रभम् ॥ अभिचक्राम धर्मात्मा मत्तमातङ्गविक्रमः ॥ २७ ॥
विनीत[14]वीरपुरुषं प्रविश्य तु नृपालयम् ॥ ददर्शावस्थितं दीनं सुमन्त्रमविदूरतः ॥ २८ ॥

प्रतीक्षमाणोपि[15] जनं तदाऽऽर्तमनार्तरूपः प्रहसन्निवाथ ॥
जगाम रामः पितरं दिदृक्षुः [16]पितुर्निदेशं विधिवच्चिकीर्षुः ॥ २९ ॥
तत्पूर्वमैक्ष्वाकसुतो महात्मा रामो [17]गमिष्यन्वनमार्तरूपम् ॥
व्यतिष्ठत प्रेक्ष्य तदा सुमन्त्रं पितुर्महात्मा प्रतिहारणार्थम् ॥ ३० ॥

॥ २० ॥ दुष्कालेन क्षामक्षोभयुक्तकालेन । भाजनं भाण्डादि ॥ २१ ॥ येन वनेनहेतुना ॥ २२ ॥ दंष्ट्रिणः सर्पाद्याः । अस्मद्भयात् अस्मत्प्रयुक्तभयहेतोः ॥ २३ ॥ अस्माभिस्त्यक्तं पुरं । सेव्यमानं वनमित्यर्थसिद्धम् । अत्रकर्तारःपूर्वोक्तदंष्ट्र्याद्यः ॥ २४ ॥ तृणमांसफलादानां तृणादाः हरिणादयः । मांसादाः व्याघ्रादयः । फलादाः वायसादयः । व्यालमृगद्विजं व्यालाः क्रूराः मृगद्विजाःयस्मिंस्तादृशंदेशं । इदमेवनगरंतादृशं भविष्यतीतिभावः । निर्वृताः सुखिताः ॥२५॥ श्रुत्वा अवस्थितस्येतिशेषः । नविचक्रे नविकारंप्राप ॥२६—२८ ॥ निदेशं नियोगं ॥ २९ ॥ तत्पूर्वं तत्प्रथमं । महात्मा महाधैर्यः । प्रतिहारणार्थं स्वागमननिवेदना-

---

स० वनमपिनगरमस्तु भवतु । कुतः येनकारणेनराघवोगच्छतीत्यन्वयः ॥ २२ ॥ स० अस्मत्भयंयस्यमृगस्य तस्माद्भीताः । अस्मान्दृष्ट्वाकस्मिंश्चिन्मृगेधावतिसतितंदृष्ट्वासर्वेविभ्यतीतिभावः ॥ २३ ॥ ती० अस्मद्युक्तं पुरमितिशेषः । सेव्यमानं अस्माभिराश्रियमाणं । वनमितिशेषः ॥ २४ ॥ ति० तृणमांसफलानामादानंयस्मात्तं । व्यालमृगद्विजं तद्वन्तं । अर्शआद्यच् । ती० तृणमांसफलादानान्पशुव्यालमृगद्विजान्इतिपाठे तृणमांसफलानामादानं येभ्योवनदेशेभ्यः तेतथा । पशुव्यालमृगद्विजान् पश्वादयश्च येपुतेतथोक्ताः ॥ २५ ॥ शि० मातुः कैकेय्याः । वेश्म गृहं । अभिचक्राम जगाम । पितुस्तत्रैवस्थितत्वादितिभावः ॥ २७ ॥ ति० आर्तं खिन्नं । अभिजनं देशंतत्स्थजनमितियावत् ॥ २९॥ वि० तत्पूर्वं सः स्वाकारणार्थागमनकालः पूर्वोयस्यार्तरूपत्ववतः तादृशंतदारभ्यार्तरूपंसुमन्त्रंप्रेक्ष्य । व्यतिष्ठत द्वार्यैवेतिशेषः । स० इक्ष्वाकोर्गोत्रापत्यमैक्ष्वाकोदशरथः । "दाण्डिनायन" इत्यादिनानिपातनादकारान्तत्वं । तत्सुतोरामः । व्यतिष्ठत "समवप्रविभ्यःस्थः" इत्यात्मनेपदत्वं । प्रतिहारणार्थं स्वागमवृत्तान्तप्रापणार्थं । हृञ् हरणे हरणंप्रापणमितिकौमुद्युक्तेः ॥ ३० ॥

[पा०] १ ख. ग. दुष्कालेनैव. २ क. वनंगच्छतिराघवे. ग. वनं. ३ क. ख. ग. च. छ. झ. ञ. ट. त्यजन्त्यस्मत्. ४ छ. अस्मद्युक्तं. ५ क. ख. च. छ. झ. ञ. ट. प्रपद्यन्तु. ६ च. छ. झ. ञ. फलादानं. ७ क. देशान्व्यालमृगद्विजान्. ख. देशान्व्यालमृगद्विपान्. ८ ट. सपुत्राःसह. ९ च. छ. झ. ञ. ट. वयंसर्वेवनेवत्स्याम. ख. घ. ज. वनेसर्वेवयंवत्स्याम. १० च. छ. झ. ञ. ट. राघवःश्रुत्वा. ११ घ. स्वमाननम्. ख. चमानसम्. ठ. स्वमानसम्. १२ छ. ज. झ. ट. ठ. पुनर्मातुः. ख. घ. पुनर्दूरात्. १३ ख. शिखरोपमम्. क. सदृशप्रभम्. १४ ख. ग. घ. धीर. १५ ख. ऽथजनं. ग. घ. ज. हिजनं. क. च. छ. झ—ठ. ऽभिजनं. १६ च. निवेशं. घ. नियोगं. १७ च—ठ. गमिष्यन्नृप.

पितुर्निदेशेन तु धर्मवत्सलो वनप्रवेशे कृतबुद्धिनिश्चयः ॥
स राघवः प्रेक्ष्य सुमन्त्रमब्रवीन्निवेदय स्वागमनं नृपाय मे ॥ ३१ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे त्रयस्त्रिंशः सर्गः ॥३३॥

चतुस्त्रिंशः सर्गः ॥ ३४ ॥

सुमन्त्रेणश्रीरामागमनंनिवेदितेनदशरथेनतंप्रतिस्वदारानयनपूर्वकंरामाद्यानयनचोदना ॥ १ ॥ दशरथेरामदर्शनमात्रेणमूर्च्छयाभुविनिपततितत्रत्यानांस्त्रीणांविलापः ॥२॥श्री रामेदशरथंप्रतिसीतालक्ष्मणयोःस्वानुगमनाभ्यनुज्ञांप्रार्थयमानेतेनतंप्रतिस्वनिग्रहपूर्वकंराज्यस्वीकारचोदना ॥ ३ ॥ रामेणदशरथंप्रतिराज्यादिपुस्वस्याभिलाषाभावनिवेदनपूर्वकंपितृवचनस्यावश्यकर्तव्यत्वबोधनेनपरिसान्त्वनं ॥४॥ दशरथेनपुनःपुत्रशोकेनमूर्च्छामुपागतेकैकेयीवर्जंसर्वाभिःस्त्रीभिःसुमन्त्रेणचमूर्च्छाधिगमः॥५॥

ततः कमलपत्राक्षः श्यामो निरुदरो महान् ॥ उवाच रामस्तं सूतं पितुराख्याहि मामिति ॥ १ ॥
स रामप्रेषितः क्षिप्रं सन्तापकलुषेन्द्रियः ॥ प्रविश्य नृपतिं सूतो निश्वसन्तं ददर्श ह ॥ २ ॥
उपरक्तमिवादित्यं भस्मच्छन्नमिवानलम् ॥ तटाकमिव निस्तोयमपश्यज्जगतीपतिम् ॥ ३ ॥
आलोक्य तु महाप्राज्ञः परमाकुलचेतसम् ॥ राममेवानुशोचन्तं सूतः प्राञ्जलिरासदत् ॥ ४ ॥
तं वर्धयित्वा राजानं सूतः पूर्वं जयाशिषा ॥ भयविक्लवया वाचा मन्दया श्लक्ष्णमब्रवीत् ॥ ५ ॥
अयं स पुरुषव्याघ्रो द्वारि तिष्ठति ते सुतः ॥ ब्राह्मणेभ्यो धनं दत्त्वा सर्वं चैवोपजीविनाम् ॥ ६ ॥
स त्वा पश्यतु भद्रं ते रामः सत्यपराक्रमः ॥ सर्वान्सुहृद आपृच्छ्य त्वामिदानीं दिदृक्षते ॥ ७ ॥
गमिष्यति महारण्यं तं पश्य जगतीपते ॥ वृतं राजगुणैः सर्वैरादित्यमिव रश्मिभिः ॥ ८ ॥
स सत्यवादी धर्मात्मा गांभीर्यात्सागरोपमः ॥ आकाश इव निष्पङ्को नरेन्द्रः प्रत्युवाच तम् ॥९॥
सुमन्त्रानय मे दारान्ये केचिदिह मामकाः ॥ दारैः परिवृतः सर्वैर्द्रष्टुमिच्छामि धार्मिकम् ॥ १० ॥

र्थं ॥ ३० ॥ अस्यान्तेइतिकरणंद्रष्टव्यम् ॥ ३१ ॥ इति श्रीगोविन्दराजविरचितेश्रीमद्रामायणभूषणे पीतांवराख्याने अयोध्याकाण्डव्याख्याने त्रयस्त्रिंशःसर्गः॥३३॥

पूर्वसर्गान्तोक्तमर्थंवक्ष्यमाणसंघटनार्थंसङ्ग्रहेणदर्शयति—ततइति । विशेषणैर्निर्विकारत्वंसूच्यते । निरुदरः तनुमध्यइत्यर्थः ॥ १—२ ॥ उपरक्तं राहुग्रस्तं । विशेषणान्तरकथनार्थंपुनरपश्यदित्युक्तिः ॥ ३—४॥ भयविक्लवया भयेनकातरया । दुःखितोयंकिंवदेदिति भयम् । अतएवमन्दया ॥ ५ ॥ सर्वं गृहोपकरणादिकं ॥ ६—८ ॥ निष्पङ्कः निर्लेपः ॥ ९—१० ॥

स० कृतबुद्धेःशिक्षितबुद्धेःनिश्चयइवनिश्चयोयस्यसतथा ॥ ३१ ॥ इतित्रयस्त्रिंशस्सर्गः ॥ ३३ ॥

स० निरुदरः अल्पोदरः "तनुत्वेप्यखिलंभरं" इत्युक्तेः । निस्सन्देहइतिवा । "उदरंसंशयःप्रोक्तःपरिनिष्ठातुनिश्चयः" इत्यभिधानात् । पूर्वमागमनमामन्त्रयस्वेत्युक्तम् । इदानींतुमामाख्याहीत्युक्तेर्भेदः । यद्वा मां सीतामागतामाख्याहीत्यर्थः । उपलक्षणया लक्ष्मणंच ॥ १ ॥ शि० निस्तोयं शैवालाद्याच्छादनहेतुनातोयरहितत्वेनप्रतीयमानं । तटाकमिवापश्यत् । अतएवपूर्वोपमानाभ्यांनवैरूप्यम् । एतदुपमालङ्कारेणराज्ञोवास्तवदुःखाभावस्सूचितः । तेनाप्रकटसाकेतेरामसंयोगोभवितेतिराजनिश्चयस्सूचितः ॥ ३ ॥ ती० भयविक्लवया रामोवनप्रयाणोद्युक्तइतिराज्ञेकथंनिवेदयिष्यामीतिभयेनविक्लवाकातरतायस्यास्सातथोक्तातया । अश्लक्ष्णमितिच्छेदः ॥ ५ ॥ ति० सर्वंधनंदत्त्वेत्यनेनसर्वथातिष्ठासाऽभावोध्वन्यते । स० उपजीविनामितिषष्ठ्यातेषामदानपात्रतांद्योतयति ॥ ६ ॥ ति० निष्पङ्कः निष्पापः ॥ ९ ॥ स० हेसुमन्त्र सु शोभनोमन्त्रोगुप्तभाषणंयस्यसतथातत्संबुद्धिः । अनेनाप्तत्वंद्यो-

[पा०] १ ङ. छ. झ. ट. निरुपमो. २ ङ. च. छ. झ. ञ. ट. कलुषेन्द्रियं. ३ क. ङ. छ. झ. ट. आवोध्यच. ग. ज. आवोध्यतं. च. ञ. आलोक्यतं. ४ घ. ङ. छ. झ. ट. चेतनं. ५ घ. ङ. छ. झ. ट. रब्रवीत्. ६ क—च. ज—ट. पूर्वसूतो. ७ ङ. छ. झ. ट. श्लक्ष्णयात्र. ८ ङ. च. छ. झ. ञ. ट. त्वां. ९ च. छ. झ. ञ. ट. त्वांही. १० ख. ग. गमिष्यन्तं. ११ ङ. छ. झ. ट. सत्यवाक्यो. १२ क. ख. ध—ट. राघवं.

सोऽन्तःपुरम[1]तीत्यैव स्त्रियस्ता वाक्यमब्रवीत् ॥ [2]आर्या ह्वयति वो राजाऽगम्यतां तत्र मा चिरम् ॥ ११ ॥
एवमुक्ताः स्त्रियः सर्वाः सुमन्त्रेण नृपाज्ञया ॥ प्रचक्रमुस्तद्भवनं भर्तुराज्ञाय शासनम् ॥ १२ ॥
अर्ध[3]सप्तशतास्तास्तु प्रमदास्ताम्रलोचनाः ॥ कौसल्यां परिवार्याथ शनैर्जग्मुर्धृतव्रताः ॥ १३ ॥
आगतेषु च दारेषु समवेक्ष्य महीपतिः ॥ उवाच राजा तं सूतं सुमन्त्रानय मे सुतम् ॥ १४ ॥
[4]स सूतो राममादाय लक्ष्मणं [5]मैथिलीं तदा ॥ जगामाभिमुखस्तूर्णं सकाशं जगतीपतेः ॥ १५ ॥
स राजा पुत्रमायान्तं [6]दृष्ट्वा दूरात्कृताञ्जलिम् ॥ उत्पपातासनात्तूर्णमार्तः स्त्रीजनसंवृतः ॥ १६ ॥
[7]सोऽभिदुद्राव वेगेन रामं दृष्ट्वा विशांपतिः ॥ तमसंप्राप्य दुःखार्तः पपात भुवि मूर्च्छितः ॥ १७ ॥
तं रामोऽभ्यपतत्क्षिप्रं लक्ष्मणश्च [8]महारथः ॥ विसंज्ञमिव दुःखेन सशोकं नृपतिं [9]तदा ॥ १८ ॥
स्त्रीसहस्रनिनादश्च संजज्ञे राजवेश्मनि ॥ हाहा रामेति सहसा भूषणध्वनि[10]र्मूर्च्छितः ॥ १९ ॥
तं परिष्वज्य बाहुभ्यां तावुभौ रामलक्ष्मणौ ॥ [11]पर्यङ्के सीतया सार्धं [12]रुदन्तः समवेशयन् ॥ २० ॥
अथ रामो [13]मुहूर्तेन लब्धसंज्ञं महीपतिम् ॥ उवाच प्राञ्जलिर्भू[14]त्वा शोकार्णवपरिप्लुतम् ॥ २१ ॥
आपृच्छे त्वां महाराज सर्वेषामीश्वरोसि नः ॥ प्रस्थितं दण्डकारण्यं पश्य त्वं कुशलेन माम् ॥ २२ ॥
लक्ष्मणं चानुजानीहि सीता [15]चान्वेति मां वनम् ॥ कारणैर्बहुभिस्तथ्यैर्वार्यमाणौ न चेच्छतः ॥ २३ ॥
अनुजानीहि सर्वान्नः शोकमुत्सृज्य मानद ॥ लक्ष्मणं मां च सीतां च प्रजापतिरि[16]व प्रजाः ॥ २४ ॥
प्रतीक्षमाणमव्यग्रमनुज्ञां जगतीपतेः ॥ उवाच राजा संप्रेक्ष्य वनवासाय राघवम् ॥ २५ ॥

ह्वयति आह्वयति ॥ ११—१२॥ अर्धसप्तशताः अर्धं सप्तशतस्येतिविग्रहः "अर्धंनपुंसकं"इतिसमासः । ताम्रलोचनाः सदारामविवासननिमित्तरोदनादितिभावः ॥१३—१५॥ उत्पपात उदतिष्ठत् ॥१६॥ अभिदुद्राव अभिमुखमाजगाम ॥ १७॥ अभ्यपतत् उत्थापनार्थमितिभावः । इवशब्दएवकारार्थः ॥१८॥ भूषणध्वनिभिः मूर्च्छितः व्याप्तः ॥ १९ ॥ रामलक्ष्मणौ सीतयासार्धं तंबाहुभ्यांपरिष्वज्य पर्यङ्केसमवेशयन्नित्यर्थः ॥ २० ॥ मुहूर्तस्येतिपाठेमुहूर्तेनेत्यर्थः ॥ २१ ॥ कुशलेन चक्षुषेतिशेषः । हेतौतृतीयावा ॥ २२ ॥ सीता चेति । तामप्यनुजानीहीतिभावः । तौनिवर्तयेत्याशङ्क्याह—कारणैरिति । कारणैः दुःखादिकारणैः । तथ्यैः परमार्थैः । नचेच्छतः अननुगमनमितिशेषः ॥ २३ ॥ लक्ष्मणंसीतांमांचसर्वान्नः अनुजानीहीत्यन्वयः । " त्यदादीनिसर्वैर्नित्यं " इत्येकशेषः ॥ २४ ॥ वनवासायजगतीपतेःस्वस्यानुज्ञांप्रतीक्षमाणमित्यन्वयः

तयति । मेदारान् कौसल्यां । राममातृत्वेनमुख्यत्वात्संघतउत्कृष्योक्तिः । येचमामकादाराःतदतिरिक्ताःतानानयेतियोजना । पक्षद्वयेपिन मेइत्यधिकं । द्वितीयेपक्षेकौसल्यांपरिवार्येत्युत्तरगन्थानुकूल्यंचेतिज्ञेयम् ॥ १० ॥ **ति०** वोयुष्माकंराजा अवैधव्यदत्वात् । नतुप्रजानां तासांदुःखदत्वात् ॥ ११ ॥ **शि०** अर्धशतशब्दएकदेशसमासप्रकृतिकःअर्शआद्यजन्तः । **स०** अर्धसप्तशतानांयासुताः ॥ १३ ॥ **ति०** आरात् दूरतः । उत्पपात आलिङ्गनार्थं । **स०** आचारात् ल्यब्लोपनिमित्तापञ्चमी । शिष्टाचारमाश्रित्य । कृताञ्जलिं उत्पपात पुप्लुवे ॥ १६ ॥ **ति०** त आलिलिङ्गिषितं ॥ १७ ॥ **ति०** भूषणध्वनिमिश्रितः उरश्शिरस्ताडनादिनाचञ्चलतरभ्रश्यद्भूषणध्वनिमिलितः । **स०** स्त्रीसहस्रनिनादः स्त्रीणांदाराणांतथाइतरासांदासीनांच । पूर्वंसार्धशतत्रोक्तेरत्रसहस्रेत्युक्तौतद्विरोधइत्यनेननिरस्तंवेदितव्यम् ॥ १९ ॥ **ती०** तावुभौरामलक्ष्मणौसीतयासार्धंतंपरिष्वज्यउत्थापितवन्तौ । तेत्रयस्समवेशयन्नित्यध्याहारेणयोजना ॥ २० ॥ **वि०** मुहूर्तात् मुहूर्तेन । **ति०** मुहूर्तस्य संबन्धसामान्येषष्ठी । मुहूर्तेन । **स०** मुहूर्तस्य उपरीतिशेषः ॥ २१ ॥ **शि०** कुशलेनपश्य कुशलफलकावलोकनंकुरु । फलस्यहेतुत्वेन विवक्षणात्तृतीया ॥ २२ ॥ **ति०** अव्यग्रं क्लेशतो-

[**पा०**] १ ग. घ. ज. अतीत्याशु. २ क. ख. ग. ङ—ट. आर्या. ३ ख. ङ. छ. झ. ट. शतास्तत्र. ४ घ. ज. सुमन्त्रो. छ. सततो. ५ ख. चापिमैथिलीं. ग. ङ. छ—ट. मैथिलींतथा. ६ ङ. झ. ट. दृष्ट्वाचारात्. ७ क. च. अभि. ८ छ. महायशाः. ९ ङ. छ. ज. झ. ट. तथा. १० ङ. छ. झ. ट. मिश्रितः. ११ घ. ज. सीतयासहपर्यङ्के. १२ क. ङ. छ. ञ. रुदन्तं. १३ ख. ङ. छ. ज. झ. ट. ठ. मुहूर्तस्य. क. ञ. मुहूर्तात्तं. १४ ट. वाक्यं. ङ. छ. झ. वाष्प. १५ क. घ—ञ. चान्वेतु १६ ख—ङ. छ—ट. रिवात्मजान्.

अहं राघव कैकेय्या वरदानेन मोहितः ॥ अयोध्यायास्त्वमेवाद्य भव राजा निगृह्य माम् ॥ २६ ॥
एवमुक्तो नृपतिना रामो धर्मभृतां वरः ॥ प्रत्युवाचाञ्जलिं कृत्वा पितरं वाक्यकोविदः ॥ २७ ॥
भवान्वर्षसहस्राय पृथिव्या नृपते पतिः ॥ अहं त्वरण्ये वत्स्यामि न मे कार्यं त्वयाऽनृतम् ॥ २८ ॥
नव पञ्च च वर्षाणि वनवासे विहृत्य ते ॥ पुनः पादौ ग्रहीष्यामि प्रतिज्ञान्ते नराधिप ॥ २९ ॥
रुदन्नार्तः प्रियं पुत्रं सत्यपाशेन संयतः ॥ कैकेय्या चोद्यमानस्तु मिथो राजा तमब्रवीत् ॥ ३० ॥
श्रेयसे वृद्धये तात पुनरागमनाय च ॥ गच्छस्वारिष्टमव्यग्रः पन्थानमकुतोभयम् ॥ ३१ ॥
न हि सत्यात्मनस्तात धर्माभिमनसस्तव ॥ विनिवर्तयितुं बुद्धिः शक्यते रघुनन्दन ॥ ३२ ॥
अद्य त्विदानीं रजनीं पुत्र मा गच्छ सर्वथा ॥ एकाहदर्शनेनापि साधु तावच्चराम्यहम् ॥ ३३ ॥
मातरं मां च संपश्यन्वसेमामद्य शर्वरीम् ॥ तर्पितः सर्वकामैस्त्वं श्वः काले साधयिष्यसि ॥ ३४ ॥
दुष्करं क्रियते पुत्र सर्वथा राघव त्वया ॥ मत्प्रियार्थं प्रियांस्त्यक्त्वा यद्यासि विजनं वनम् ॥ ३५ ॥

॥ २५ ॥ मोहितः वञ्चितइत्यर्थः ॥ २६—२७ ॥ वर्षसहस्राय अनेकवर्षाणीत्यर्थः । मे मह्यं । अनृतं अनृतवचनं ॥ २८ ॥ प्रतिज्ञान्ते प्रतिज्ञावसाने ॥ २९ ॥ मिथः रहसि । कैकेय्या चोद्यमानः अद्यैवप्रस्थापयेतिप्रेर्यमाणः ॥ ३० ॥ श्रेयसे पारलौकिकफलाय । वृद्धये ऐहिकफलाय । गच्छस्व गच्छ । अरिष्टं शुभं । "अरिष्टे तु शुभाशुभे" इत्यमरः । अकुतोभयं कुतश्चिदपिजन्तोर्भयरहितं ॥ ३१ ॥ सत्यात्मनः सत्यस्वभावस्य । "आत्मादेहेधृतौजीवेस्वभावे" इतिवैजयन्ती । धर्माभिमनसः धर्माभिनिविष्टमनसः ॥ ३२ ॥ अद्य अस्मिन्दिने । इदानीं आसन्नामित्यर्थः । साधुः सुखं । चरामि वसामि ॥ ३३ ॥ साधयिष्यसि गमिष्यसि । काले प्रातःकाले ॥ ३४ ॥ मत्प्रियार्थं ममपरलोकप्रियार्थमित्यर्थः । अन्यथाउत्तरश्लोकविरोधात् ।

पिविषादरहितं ॥ २५ ॥ **ती०** मे मया । त्वं आनृतः ईषदनृतयुक्तोपिनकार्यः । **वि०** भवान् वर्षसहस्रायुःपृथिव्याःपतिर्भवतु । अतःपरमप्यनेककालंराजाभवेत्यर्थः । **स०** हेनृपते पृथिव्याःपतिर्भवान् वर्षसहस्रायुः बहुसहस्रवर्षपर्यन्तंजीवितवान् । एतेन बहुकालंराज्यकर्तारंत्वांनिगृह्यराज्यकरणंनमह्यंरोचतइति भवान्वर्षसहस्रायुःपृथिव्याःपतिर्भवत्वितिव्याख्यानं रामस्यकदाप्यनृतभाषित्वाभावादुत्तरश्लोकव्याख्यानवदुपेक्ष्यमित्यपिसूचितम् । **शि०** हेनृपते वर्षसहस्रायपृथिव्याः वर्षसहस्राणां बहुखण्डानां अयः प्राप्तिर्यस्यांसाचसापृथिवीतिकर्मधारयः । तस्याः । यतोभवानेवपतिः अतःराज्यस्यकाङ्क्षिता आकाङ्क्षामेनास्ति ॥ २८ ॥ **शि०** प्रतिज्ञान्ते अवध्यवसाने तेपादौपुनर्ग्रहीष्यामि । पुनरित्यनेन प्रतिज्ञामध्यएवतवपादावेकवारंग्रहीष्यामीतिसूचितम् । नचावध्यन्ते राज्ञःप्रकटस्थित्यभावेनतत्पादग्रहणासंभवाद्रामस्यमृषासंसर्गित्वापत्तिरितिवाच्यम् । मातापित्रोरभेदाध्यवसायान्मातृपादग्रहणस्यसंभवात्तस्यचपितृपादग्रहणानतिरेकान्मृषासंसर्गित्वस्यासंभवात् । किंच पदयोश्चरणयोरिमौ पादौ पादुकापदार्थौ ग्रहीष्यामि नमस्करिष्यामीत्यर्थः । पादमितिपाठेतु पदमेवपादं त्वद्दत्तंराजोचितस्थानंत्राणंचेत्यर्थः । ग्रहीष्यामि स्वीकरिष्यामि । तथाचमेदिनी "पदंशब्देचवाक्येच—स्थानत्राणयोः" इति । **स०** प्रतिज्ञान्ते चतुर्दशवर्षानन्तरं । स्वर्गादागत्यस्थितस्यतेपादौग्रहीष्यामीत्यभिप्रायः । यथोक्तमत्रैवोत्तरत्रयुद्धकाण्डे "महादेववचःश्रुत्वाराघवःसहलक्ष्मणः । विमानशिखरस्थस्यप्रणाममकरोत्पितुः" इति । विहृत्येत्यनेन राक्षसहननादिकंममविहारइतिसूचयति ॥ २९ ॥ **शि०** सत्यपाशेन सत्यस्ययः पः पालनंतस्यथःअशोव्याप्तिःपरिपूर्णता तेनसंयुतः । चोद्यमानः वनायाज्ञापयेतिरामेणप्रार्थ्यमानः । कैकेय्यासहराजातंराममब्रवीत् । मिथएवार्थकम् ॥ ३० ॥ **शि०** तात हेप्रिय । हेस्व ममआत्मप्रभृते । श्रेयसे अवलोकनकर्तृणांकल्याणाय । वृद्धये केषांचिद्राज्यादिप्राप्तये । अकुतोभयं सर्वहेतुकभयाभावविशिष्टं । अरिष्टं अतिशयेनशत्रूणांनिवर्तकं । पन्थानं गच्छ । **स०** श्रेयसे सतां । वृद्धये वैरिच्छेदाय । स्वारिष्टं स्वानामरिष्टं क्षेमंयथाभवतितथा गच्छ ॥ ३१ ॥ **शि०** एकाहं एकदिनं । इदानीं रजनीं एकरात्रिं । दर्शनेन तवावलोकनेनापि । सर्वथा सर्वप्रकारेण । साधु अतिशोभनं । चरामि प्राप्नोमि ॥ ३३ ॥ **शि०** मत्प्रियार्थमित्युक्त्याप्रतिभासितंवियोगप्रियत्वंस्वस्मिन्निवारयन्नाह—नचेति

[पा०] १ क. ख. ङ—ट. अयोध्यायां. २ ख. ट. कोविदं. ३ च. ञ. ठ. सहस्रायुः. ४ ङ. छ. ज. झ. ट. राज्यस्य काङ्क्षिता. ग. च. कार्यस्त्वयानृतः. ५ ख. ग. ङ—झ. ट. संयुतः. ६ ग. च. ज. श्रेयसो. ७ ख. च. मव्यग्रं. ८ ङ. च. छ. झ. ट. संनिवर्तयितुं. ९ ङ. च. छ. झ. ट. एकाहं. १० ग—ट. काल्ये. ११ ङ. छ. झ. प्रिय. १२ ङ. छ. झ. त्वयाहि मत्प्रियार्थंतुवनमेवमुपाश्रितं. १३ घ. यातोसि.

न चैतन्मे प्रियं पुत्र शपे सत्येन राघव ॥ छन्नया चलितस्त्वसि स्त्रिया छन्नाग्निकल्पया ॥ ३६ ॥
वञ्चना या तु लब्धा मे तां त्वं निस्तर्तुमिच्छसि ॥ अनया वृत्तसादिन्या कैकेय्याऽभिप्रचोदितः ॥३७॥
न चैतदाश्चर्यतमं यस्त्वं ज्येष्ठः सुतो मम ॥ अपानृतकथं पुत्र पितरं कर्तुमिच्छसि ॥ ३८ ॥
अथ रामस्तथा श्रुत्वा पितुरार्तस्य भाषितम् ॥ लक्ष्मणेन सह भ्रात्रा दीनो वचनमब्रवीत् ॥ ३९ ॥
प्राप्स्यामि यानद्य गुणान्को मे श्वस्तान्प्रदास्यति ॥ अपक्रमणमेवातः सर्वकामैरहं वृणे ॥ ४० ॥
इयं सराष्ट्रा सजना धनधान्यसमाकुला ॥ मया विसृष्टा वसुधा भरताय प्रदीयताम् ॥ ४१ ॥
वनवासकृता बुद्धिर्न च मेऽद्य चलिष्यति ॥ ४२ ॥
यस्तुष्टेन वरो दत्तः कैकेय्यै वरद त्वया ॥ दीयतां निखिलेनैव सत्यस्त्वं भव पार्थिव ॥ ४३ ॥
अहं निदेशं भवतो यथोक्तमनुपालयन् ॥ चतुर्दश समा वत्स्ये वने वनचरैः सह ॥ ४४ ॥
मा विमर्शो वसुमती भरताय प्रदीयताम् ॥ न हि मे काङ्क्षितं राज्यं सुखमात्मनि वा प्रियम् ॥
यथा निदेशं कर्तुं वै तवैव रघुनन्दन ॥ ४५ ॥
अपगच्छतु ते दुःखं मा भूर्बाष्पपरिप्लुतः ॥ न हि क्षुभ्यति दुर्धर्षः समुद्रः सरितां पतिः ॥ ४६ ॥
नैवाहं राज्यमिच्छामि न सुखं नच मैथिलीम् ॥ नैव सर्वानिमान्कामान्न स्वर्गं नैवं जीवितम् ॥४७॥
त्वामहं सत्यमिच्छामि नानृतं पुरुषर्षभ ॥ प्रत्यक्षं तव सत्येन सुकृतेन च ते शपे ॥ ४८ ॥

प्रियान् अभिमतवर्गान् ॥ ३५ ॥ छन्नया गूढाभिप्रायया । चलितः स्वाधीनत्वाच्चलनंप्राप्तः । पाठान्तरे तुवञ्चितइत्यर्थः । छन्नाग्निकल्पया भस्मच्छन्नाङ्गारतुल्यया ॥ ३६ ॥ यावञ्चना सामान्येनप्रतिश्रुतयोर्वरयोर्भरताभिषेचनत्वद्विवासनरूपविशेषपर्यवसायित्वरूपा । मे मया । लब्धा । तामपिवञ्चनां वृत्तसादिन्या कुलोचिताचारनाशिन्या । अनयाप्रचोदितस्त्वं निस्तर्तुमिच्छसि समापयितुमिच्छसि । अहोतेगुणइतिभावः ॥ ३७ ॥ अपानृतकथं अपगतासत्यवचनं ॥ ३८ ॥ भाषितं एकाहदर्शनेनापीत्याद्युक्तं । दीनः एकाहमपिपितृदर्शनसौख्यंनलब्धमितिदीनः ॥ ३९ ॥ तर्पितःसर्वकामैरित्यस्योत्तरमाह—प्राप्स्यामीति । गुणान् गुणविशिष्टाभिमतपदार्थान् । सर्वकामैरपक्रमणमेववृणे । सर्वकामप्रतिनिधित्वेनापक्रमणमेववरयइत्यर्थः ॥४०॥ विसृष्टा त्यक्ता ॥४१॥ वनवासेत्यर्धमेकंवाक्यं ॥४२॥ अत्रसइत्यध्याहार्यं । निखिलेन सर्वात्मना । अतस्त्वंसत्यः सत्यवचनः भव ॥४३॥ निदेशं शासनं । "निदेशःशासनं"इत्यमरः । वनचरैः तपस्विभिः ॥ ४४ ॥ भवराजानिगृह्यसामित्यस्योत्तरमाह—मेति । माविमर्शः विचारोमाभूत् । आत्मनि मनसि । सुखं प्रियंवाउद्दिश्यराज्यंनकाङ्क्षितं । अपितु तवनिदेशं तवाज्ञां । यथाकर्तुमेव यथावत्कर्तुमेवेत्यर्थः ॥४५–४७॥ अहं त्वां सत्यं सत्ययुक्तमिच्छामि । अनृतं अनृतयुक्तं नेच्छामि । तवप्रत्यक्षं प्रत्यक्षदैवभूतस्यतवसन्नि-

---

॥ ३४ ॥ शि० अदीनः सर्वकालंदीनत्वाभावविशिष्टः ॥ ३९ ॥ ति० यद्वा अद्यप्रयाणेसतियान्गुणान् प्रतिज्ञापालनजधर्मरूपान्प्राप्स्यामि श्वोगमनेकस्तान्दास्यतिप्रत्युताधर्मएव ॥ ४० ॥ शि० क्षुभ्यति मर्यादांत्यजति ॥ ४६ ॥ स० अहंराज्यं अहङ्कारतत्ताभिमानिरुद्रराज्यं । कैलासाधिपत्यमितियावत् । "महतश्चतुर्मुखात्" इतिवदभिमान्यभिमन्यमानयोरैक्यव्यपदेशः । सुखं वरुणलोकं । "सुखंपुर्याप्रचेतसः" इतिविश्वः । मेदिनीं भूलोकं । कामान् काम्यान्धनादीन् ॥ ४७ ॥ स० सत्यं सत्यभाषिणं । त्वां

[पा०] १ क. कर्म. २ ख. चलितस्त्वद्य. घ. छुरितस्त्वासि. ज. चलितश्चासि. ३ ङ. छ—ट. भस्माग्नि. ४ घ. वध्वामे. ५ ख. तांच. ६ क. मर्हसि. ७ ख. अनयाऽप्रियवादिन्या. ज. जनन्यावृत्तसादिन्या. ८ घ. तर्तुं. ९ ङ. च. छ. झ. ञ. ट. स्तदा. १० क—घ. ज. निसृष्टा. ११ ङ. छ. झ. ट. यत्तुष्टे. १२ ज. हितं. १३ ङ. छ. झ. ट. मेदिनीं. १४ ङ. झ. नचजीवितुं. च. छ. ज. ञ. ट. नचजीवितं.

न च शक्यं मया तात स्थातुं क्षणमपि प्रभो ॥ न[1] शोकं धारयस्वैनं[2] न[3] हि मेऽस्ति विपर्ययः ॥४९॥
अर्थितो ह्यसि कैकेय्या वनं गच्छेति राघव ॥ मया चोक्तं व्रजामीति तत्सत्यमनुपालये ॥ ५० ॥
मा चोत्कण्ठां[4] कृथा देव वने रंस्यामहे वयम् ॥ प्रशान्तहरिणाकीर्णे नानाशकुन[5]नादिते ॥ ५१ ॥
पिता हि दैवतं तात देवतानामपि स्मृतम् ॥ तस्माद्दैवतमित्येव करिष्यामि पितुर्वचः ॥ ५२ ॥
चतुर्दशसु वर्षेषु गतेषु नरसत्तम[6] ॥ पुनर्द्रक्ष्यसि मां प्राप्तं संतापोऽयं विमुच्यताम् ॥ ५३ ॥
येन[7] संस्तंभनीयोऽयं सर्वो बाष्पगलो जनः ॥ स त्वं पुरुषशार्दूल किमर्थं विक्रियां गतः ॥ ५४ ॥

पुरं च राष्ट्रं च मही च[8] केवला मया विसृष्टा[9] भरताय दीयताम् ॥
अहं निदेशं भवतोऽनुपालयन्वनं गमिष्यामि चिराय सेवितुम् ॥ ५५ ॥
मया निसृष्टां[10] भरतो महीमिमां सशैलषण्डां[11] सपुरां[12] सकाननाम् ॥
शिवां[13] सुसीमामनुशास्तु[14] केवलं त्वया यदुक्तं नृपते तथाऽस्तु तत् ॥ ५६ ॥
न मे तथा पार्थिव [15]धीयते मनो महत्सु कामेषु न चात्मनः प्रिये ॥
यथा निदेशे तव शिष्टसंमते व्यपैतु दुःखं तव मत्कृतेऽनघ ॥ ५७ ॥
तदद्य नैवानघ राज्यमव्ययं न सर्वकामान्[16] सुखं न मैथिलीम् ॥
न [17]जीवितं त्वामनृतेन योजयन्वृणीय सत्यं व्रतमस्तु ते तथा ॥ ५८ ॥

धौ । सत्येनसुकृतेनच ते तुभ्यं । शपइत्यन्वयः । "श्लाघह्नुङ्स्था—" इत्यादिनाचतुर्थी ॥ ४८ ॥ स्थातुं इहनगरइतिशेषः । विपर्ययः संकल्पितवनगमनोद्योगनिवृत्तिः ॥ ४९ ॥ नकेवलंत्वदाज्ञापरिपालनार्थमेवगच्छामि किंतुमत्प्रतिज्ञापरिपालनार्थमपीत्याह—अर्थितइति ॥ ५० ॥ उत्कण्ठां उत्कलिकां । "उत्कण्ठोत्कलिकेसमे" इत्यमरः । शोकातुरतया स्मरणमितियावत् ॥ ५१ ॥ देवतानामपिदैवतमितिस्मृतं किमुतमनुष्याणामितिभावः । दैवतमित्येव पितापरमदैवतमिति मत्वेत्यर्थः ॥ ५२—५३ ॥ संस्तम्भनीयः निवृत्तबाष्पःकरणीयः ॥ ५४ ॥ सद्यःशोकनिवृत्तयेपुनःपुनराह—पुरंचेत्यादि । मयानिसृष्टंपुरंचदीयतां मयानिसृष्टं राज्यंचदीयतामिति प्रत्येकमन्वयः । सेवितुं नपुनरद्यैवागन्तुं ॥ ५५ ॥ शिवामित्यनेनराज्यस्यदुर्भरत्वान्नत्यजामीतिगम्यते । इदंचस्वेच्छयानकरोमि किंतु त्वदनुज्ञयैवेत्याह—त्वयायदिति ॥ ५६ ॥ धीयते स्थाप्यते ॥ ५७ ॥ त्वामनृतेनयोजयन्सन् राज्यादिकं नवृणीय तवव्रतंयथासत्यंतथास्त्वित्यन्वयः ॥ ५८ ॥

नानृतं अननृतभाषिणं । कर्तुमिच्छामि ॥ ४८ ॥ शि० शोकंधारयस्व निवर्तय । अनवस्थानात्मकधृङोरूपम् । वि० धारयस्व सहस्व ॥ ४९ ॥ शि० दैवतं देवता । तस्माद्धेतोःदैवतं देवतादेवतासंबन्ध्येवेति इदं पितुर्वचः । स० तववचइतिवक्तव्येपितृवचइत्युक्तिस्तुजगत्सवितुर्ममत्वंपितेत्युपहासएवेतिसूचयितुम् ॥ ५२ ॥ स० प्राप्तं लङ्कायां । शि० प्राप्तं अयोध्यावासिभिस्संगतं । मांत्वंद्रक्ष्यसि । एतेन तस्यसर्वलोकेषुकामचारत्वंसूचितम् ॥ ५३ ॥ ति० सीमासु स्थितइतिशेषः । मयाविनातेनात्रपुरेस्थातुमशक्यत्वादितिभावः । केवलमनुशास्तु रक्षणमात्रंकरोतु । नतुराजत्वाभिमानोराज्यसुखंवातस्येतिध्वनितम् । अनेनराज्ञोऽजीवनं भरतस्यनन्दिग्रामवासश्चध्वनितः । शिवासुसीमासुरममाणइत्यापाततोर्थः ॥ ५६ ॥ स० महत्सु महात्मसुविषये । यथामनोदीयते तथा कामेषुविषयेषु राज्यादिषु । नदीयते । यथाच आत्मनः तवममच प्रियेनिदेशेआज्ञायां । मनोदीयते नतथाकामेष्वित्यन्वयः । व्यपैतु गच्छतु ॥ ५७ ॥ स० वृणीय वृङोलिङुत्तमपुरुषः । ति० त्वामनृतेनयोजयन् राज्यादिकं चिन्तितं मद्विषयकचिन्तावन्तं । त्वामपि नवृणीय नवरिष्यामीतिमेसत्यंव्रतं । अत्रचिन्तितंत्वामित्यनेन चिन्तयातवमरणेपिमयानस्थेयम् । मरणादपिपरलोकनाश-

[पा०] १ क—च. झ. ञ. सशोकं. २ क. ख. घ. ङ. च. झ. ञ. ट. स्वेमं. ३ क. नच. ४ ङ. ज. झ. ट. चोत्कण्ठाकृता. ५ क—ङ. ज. झ. शकुनि. ६ झ. नृपसत्तम. घ. भरतर्षभ. ७ ङ. च. ज. झ. ट. एवं. ८ ख. ग. घ. ज. सकानना. ९ क. ख. ग. ज. निसृष्टा. १० क. घ—छ. झ. ञ. ट. विसृष्टां. ११ ङ. च. छ. झ. ञ. ट. खण्डां. १२ ङ. च. झ. ट. पुरोपकाननां. १३ ङ. छ. झ. ट. शिवासुसीमास्त्वनु. १४ ख. मभिशास्तु. १५ ग. ङ. च. छ. झ. ञ. दीयते. १६ क. ख. घ. ङ. च. ज—ट. कामान्वसुधां. १७ ङ. झ. ट. चिन्तितं.

फलानि मूलानि च भक्षयन्वने गिरींश्च पश्यन्सरितः सरांसि च ॥
वनं प्रविश्यैव विचित्रपादपं सुखी भविष्यामि तवास्तु निर्वृतिः ॥ ५९ ॥
एवं स राजा व्यसनाभिपन्नः [1]शोकेन दुःखेन च [2]ताम्यमानः ॥
आलिङ्ग्य पुत्रं सुविनष्टसंज्ञो [3]मोहं गतो नैव [4]चिचेष्ट किंचित् ॥ ६० ॥
दे[5]व्यस्ततः संरुरुदुः समेतास्तां वर्जयित्वा नरदेवपत्नीम् ॥
रुदन्सुमन्त्रोपि जगाम मूर्च्छां हाहाकृतं तत्र बभूव सर्वम् ॥ ६१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे चतुस्त्रिंशः सर्गः ॥ ३४ ॥

पञ्चत्रिंशः सर्गः ॥ ३५ ॥

सुमन्त्रेणसकोपाटोपंकैकेयीमनःक्षोभायतन्मातृदुर्वृत्तकथनपूर्वकमुपालंभेनपुनःसानुनयंपरिसान्त्वनेनचप्रयतनेपितन्मनसि-क्षोभाद्यनुदयः ॥ १ ॥

ततो निर्धूय सहसा शिरो निश्वस्य चासकृत् ॥ [6]पाणिं पाणौ विनिष्पिष्य दन्तान्[7]कटकटाप्य च ॥१॥
लोचने कोपसंरक्ते वर्णं पूर्वोचितं जहत् ॥ कोपाभिभूतः सहसा संतापमशुभं गतः ॥ २ ॥
मनः समीक्षमाणश्च सूतो दशर[8]थस्य सः ॥ कंपयन्निव कैकेय्या हृदयं वाक्छरैः शितैः ॥ ३ ॥
वाक्यवज्रैरनुपमैर्निर्भिन्दन्निव [9]चाशुगैः ॥ कैकेय्याः सर्व[10]मर्माणि सुमन्त्रः प्रत्यभाषत ॥ ४ ॥
यस्यास्तव पतिस्त्यक्तो राजा दशरथः स्वयम् ॥ भर्ता सर्वस्य जगतः स्थावरस्य चरस्य च ॥
न [11]ह्यकार्यतमं किंचित्तव देवीह विद्यते ॥ ५ ॥

ममदुःखंभविष्यतीतित्वयानक्लेष्टव्यमित्याह—फलानीति । निर्वृतिः सुखं ॥५९॥ एवं उक्तवन्तमितिशेषः । त्वग्दाहोत्पादकः शोकः । दुःखं अन्तर्व्यथोत्पादकं । नचिचेष्ट नचेष्टतेस्म ॥ ६० ॥ तां " रामतस्मादितः शीघ्रंवनंगन्तुंत्वमर्हसि " इत्याद्युक्तक्रौर्ययुक्तांकैकेयीं । हाहाकृतं हाहाशब्दस्यकृतंकरणंयस्मिंस्तत्तथा । सर्वं परिचारकादिजनजातं ॥ ६१ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीतांबराख्याने अयोध्याकाण्डव्याख्याने चतुस्त्रिंशःसर्गः ॥ ३४ ॥

सुमन्त्रस्यकैकेयीविषयकोपानुभावंदर्शयति—ततइत्यादि । कटकटाप्य कटकटाशब्दयुक्तान्कृत्वा । कटकटाशब्दात् "तत्करोति—"इतिण्यन्ताल्ल्यप् ॥ १ ॥ कोपसंरक्ते कृत्वेतिशेषः । वर्णं देहकांतिं । पूर्वोचितं पूर्वाभ्यस्तं । स्वाभाविकमित्यर्थः । जहत् त्यजन् । कोपरक्ताङ्गइत्यर्थः । अशुभं तीव्रमित्यर्थः ॥ २ ॥ मनःसमीक्षमाणः कैकेयीविषयस्नेहरहितंजानन्नित्यर्थः । सूतः सारथिः ॥ ३ ॥ आशुगैरिव बाणैरिव स्थितैः । वाक्यवज्रैः वाक्सारैः । मर्माणि मर्मतुल्यान्दोषान् । निर्भिन्दन् प्रकाशयन् ॥ ४ ॥ यस्यास्तव ।

कानृतत्वस्यातिकष्टत्वंसूचितम् । तेनतवमरणे नमेदुःखंनापिपापं यथातवानृतत्वकरणेइतिसूचितम् ॥ ५८ ॥ शि० व्यसनाभिपन्नः व्यसनं रामकर्मकाभिषेकत्यागः अभिपन्नंप्रापितंयेनसः । किंच व्यसनं राजवृत्तान्तत्यागं अभिपन्नःप्राप्तः । शोकेनदुःखेनतत्कार्येणचपीड्यमानः । अतएव विनष्टसंज्ञः कार्याकार्यविवेकरहितः । स० व्यसनाभिपन्नः वेः परमात्मनः असनं निरसनं अभिपन्नः प्राप्तः । रामंवनेप्रेषितवानितियावत् । दुःखेन आन्तरेण । तापेन बहिष्ठेनज्वरादिना । विनष्टसंज्ञः अव्यक्तापत्यभगवद्बुद्धिः । भूमिंगतःलौकिकंकिंचिन्नविवेद ॥ ६० ॥ शि० तां मुख्यां । नरदेवपत्नीं कौसल्यां वर्जयित्वारुरुदुः । अनेन तस्यास्तात्कालिकशोकाभावस्सूचितः । तेन रामोपदेशस्याघटितघटनापटीयस्त्वंव्यक्तम् । स० रुदञ्जगामेत्यत्र लड्भूतार्थे । "धातुसंबन्धेप्रत्ययाः" इतिस्मरणात् । वसन्ददर्शेतिवत् । सर्वं चेतनजातं । हाहाकृतं भावेक्तः । हाहेतिकृतंकरणंयस्मिंस्तत्तथा ॥ ६१ ॥ इतिचतुस्त्रिंशस्सर्गः ॥३४॥
शि० कैकेय्याः हृदयं । हृत् हृदयं अयते अन्यविषयंप्रापयतितत् । मन्थरामित्यर्थः । सामान्येनपुंसकं । कंपयन्निव ॥ ३ ॥

[पा०] १ ङ. च. झ. ञ. ट. तापेन. २ ख. ताड्यमानः. ङ. च. झ. ञ. ट. पीड्यमानः. ३ च. छ. ञ. भूमिं. ४ क. ख. च. छ. ञ. ट. विवेद. ५ ङ. च. छ. झ. ञ. ट. देव्यःसमस्ताः. ६ ज. घ. पाणौपाणिं. ७ ङ. छ. ञ. ट. कटकटाप्य. ८ ङ. झ. ट. रथस्यच. ९ ङ. छ. ज. झ. ट. चाशुभैः. १० च. ज. कर्माणि. ११ ख. ह्यकार्यमतः.

पतिघ्नीं त्वामहं मन्ये कुलघ्नीमपि चान्ततः ॥ ६ ॥
यन्महेन्द्रमिवाजय्यं दुष्प्रकंप्यमिवाचलम् ॥ महोदधिमिवाक्षोभ्यं संतापयसि कर्मभिः ॥ ७ ॥
माऽवमंस्था दशरथं भर्तारं वरदं पतिम् ॥ भर्तुरिच्छा हि नारीणां पुत्रकोट्या विशिष्यते ॥ ८ ॥
यथावयो हि राज्यानि प्राप्नुवन्ति नृपक्षये ॥ इक्ष्वाकुकुलनाथेऽस्मिंस्तल्लोपयितुमिच्छसि ॥ ९ ॥
राजा भवतु ते पुत्रो भरतः शास्तु मेदिनीम् ॥ वयं तत्र गमिष्यामो यत्र रामो गमिष्यति ॥१०॥
न हि ते विषये कश्चिद्ब्राह्मणो वस्तुमर्हति ॥ तादृशं त्वममर्यादमद्य कर्म चिकीर्षसि ॥ ११ ॥
[अयोध्यावासिनः पौरा ये च जानपदा जनाः ॥ नूनं सर्वे गमिष्यामो मार्गं रामनिषेवितम् ॥ १२ ॥
त्यक्ताया बान्धवैस्सर्वैर्ब्राह्मणैस्साधुभिस्सदा ॥ का प्रीती राज्यलाभेन तव देवि भविष्यति ॥
तादृशं त्वममर्यादं कर्म कर्तुं चिकीर्षसि ॥ १३ ॥]
आश्चर्यमिव पश्यामि यस्यास्ते वृत्तमीदृशम् ॥ आचरन्त्या न विवृता सद्यो भवति मेदिनी ॥१४॥
महाब्रह्मर्षिजुष्टा वा ज्वलन्तो भीमदर्शनाः ॥ धिग्वाग्दण्डा न हिंसन्ति रामप्रव्राजने स्थिताम् ॥१५
आम्रं छित्त्वा कुठारेण निंबं परिचरेत्तु यः ॥ यश्चैनं पयसा सिञ्चेन्नैवास्य मधुरो भवेत् ॥ १६ ॥

ययात्वयेत्यर्थः । तवेत्यत्रतस्याइत्युपस्कार्यम् ॥ ५ ॥ अन्ततः पर्यवसानगत्या । पतिहननद्वारासर्वेषांविनाशनादितिभावः ॥ ६ ॥ तत्रैवयुक्त्यन्तरमाह—यदिति ॥७॥ भर्तुरिच्छाहि भर्तुरिच्छानुसरणमेव । पुत्रकोट्या इतिपञ्चमी । पुत्रानुसरणंत्यक्त्वापिभर्तुरिच्छाऽनुसर्तव्येतिभावः ॥ ८ ॥ यथावयः वयःक्रममनतिक्रम्य । ज्येष्ठानुक्रमेणेत्यर्थः । प्राप्नुवन्ति पुत्राइतिशेषः । इक्ष्वाकुकुलनाथे वर्तमानइतिशेषः । तत् पूर्वोक्तराजधर्मद्वयम् ॥ ९ ॥ शास्तु शास्तुर्च ॥ १० ॥ विषये देशे । "नीवृज्जनपदोदेशविषयौ" इत्यमरः । ब्राह्मणइति सत्पुरुषमात्रोपलक्षणं । तत्रहेतुमाह—तादृशमिति । तादृशं ब्राह्मणनिर्गमनार्हम् । अमर्यादं ज्येष्ठाभिषेकादिमर्यादाशून्यम् ॥ ११—१३ ॥ ईदृशं अमर्यादं । वृत्तं आचारम् । आचरन्त्यायस्यास्ते मेदिनीनविवृता नविदीर्णा । तस्यास्ते इदमविदारणं आश्चर्यमिवपश्यामि ॥ १४ ॥ महाब्रह्मर्षिभिः वसिष्ठादिभिः । जुष्टाः प्रयुक्ताः । ज्वलन्तः तीव्राः । धिग्वाग्दण्डाः धिगित्येवंरूपाःवाग्दण्डाः । रामप्रव्राजने स्थितां स्थिरबुद्धिं । त्वांनाहिंसन्ति । वाशब्दएवकारार्थः । "वास्याद्विकल्पोपमयोरेवार्थेचसमुच्चये" इतिविश्वः ॥ १५ ॥ अथ कैकेयीदशरथावन्यापदेशेननिन्दति—आम्रमिति । आम्रंमधुरफलदं कुठारेणसद्यःबुद्धिपूर्वकंछित्त्वा निंबं कटुफलकं यःपरिचरेत् आलवालादिकरणेनसंरक्षेत् । यश्चेत्यपिसएवोच्यते । एनं निंबं । पयसा क्षीरेण ।

स० हे देवि मदवति । ति० पतिघ्नीमिति रामगमनेराजमरणस्यावश्यकत्वादितिभावः ॥ ६ ॥ शि० ननुभर्तूराज्ये स्थितत्वात्किमर्थंपुत्राभिषेकयत्नइत्यतआह—यथेति । नृपक्षये यथावयः वृद्धावस्थातिरिक्तावस्थामनतिक्रम्यैव राज्यासनेस्थितः । इक्ष्वाकुकुलराजाइतिशेषः । राज्यानिप्राप्नुवन्तिपालयन्तीत्यर्थः । एतेन वृद्धावस्थायांतपःकुर्वन्तीतिसूचितम् । अस्मिन् दशरथे । तं तपश्चरणधर्मं । लोपयितुं ध्वंसितुमिच्छसि । एतेनेदंनयुक्तमितिव्यञ्जितम् । स० इक्ष्वाकुकुलनाथे अस्मिन्दशरथे जीवतिसति तं संप्रदायं । लोपयितुमिच्छसीत्यन्वयः । यद्वा इक्ष्वाकुकुलस्यनाथनमुपतापनंययासातथातस्यास्संबुद्धिः । अस्मिन् पुत्रचतुष्टये । यथावयः प्राप्नुवन्ति ॥९॥ शि० अन्येपिगन्तारइतिबोधयन्नाह—नेति । तादृशं प्रारब्धाभिषेकत्याजनपूर्वकप्रव्राजनं । कर्मकरिष्यसिचेत्तर्हिते विषये देशे । कश्चिद्ब्राह्मणः विज्ञाता वस्तुं नार्हति नार्हिष्यति । "वर्तमानसामीप्ये—" इतिभविष्यतिलट् । चश्चेदर्थे । ति० करिष्यसीत्यनेनाद्यापि रामंनिवर्तयेतिसूचयति ॥ ११ ॥ ति० यस्यास्तेईदृशंघोरंवृत्तमस्ति तयात्वयातदाचरन्त्याहेतुभूतया पृथिवीयन्नविदृता नविदीर्णा । तदाश्चर्यमिवपश्यामि । शि० ईदृशंते वृत्तं वृत्तान्तं । आचरन्त्याः आचरयन्त्याः । यस्यामन्थरायाः मेदिनी पृथ्वी । सद्यो नविदृता नविदीर्णा । तस्यास्तेजः आश्चर्यमिवपश्यामि । तेजइत्यध्याहृतम् ॥ १४ ॥ शि० रामप्रव्राजनेस्थितां परमहेतुभूतांमन्थरामित्यर्थः । यतोनहिंसन्ति अतोधिक् । प्रत्यासत्तिन्यायेनवाग्दण्डानेवेत्यर्थः ॥ १५ ॥

[पा०] १ ग. ज. परमं. ख. भरतंप्रति. २ घ. ङ. छ. ज. झ. ट. नच. ३ कुण्डलान्तर्गतंश्लोकद्वयं क. ख. ङ. च. झ. पाठेपुदृश्यते. ४ ख. गमिष्यन्ति. ५ ख. स्तथा. ६ ङ. झ. ञ. ट. विदृता. ७ ख. ङ. च. झ. ञ. ट. सृष्टावा. ८ ङ. झ. ट. कः. ९ च. ञ. यएनं.

अभिजातं[1] हि ते मन्ये यथा मातुस्तथैव[2] च ॥ न[3] हि निंबात्स्रवेत्क्षौद्रं लोके निगदितं वचः ॥१७॥
तव मातुरसद्ग्राहं विद्मः पूर्वं यथा श्रुतम् ॥ १८ ॥
पितुस्ते वरदः कश्चिद्ददौ वरमनुत्तमम् ॥ सर्वभूतरुतं तस्मात्संजज्ञे वसुधाधिपः ॥
तेन तिर्यग्गतानां च भूतानां विदितं वचः ॥ १९ ॥
ततो जृंभस्य शयने विरुताद्भूरिवर्चसः ॥ पितुस्ते विदितो भावः स तत्र बहुधाऽहसत् ॥ २० ॥
तत्र[4] ते जननी क्रुद्धा मृत्युपाशमभीप्सती ॥ हासं ते नृपते सौम्य जिज्ञासामीति चाब्रवीत् ॥२१॥
नृपश्चोवाच तां देवीं [6]देवि शंसामि ते यदि ॥ ततो मे मरणं सद्यो[7] भविष्यति न संशयः ॥ २२ ॥
माता ते पितरं देवि ततः केकयमब्रवीत् ॥ शंस मे जीव वा मा वा न मामपहसिष्यसि[8] ॥ २३ ॥
प्रियया च तथोक्तः सन्केकयः[9] पृथिवीपतिः ॥ तस्मै तं वरदायार्थं कथयामास तत्वतः ॥ २४ ॥
ततः स वरदः साधू राजानं प्रत्यभाषत ॥ [यदि[10] त्वं शंससे राजन्मरणं ते ध्रुवं भवेत् ॥]
म्रियतां ध्वंसतां [11]वेयं मा कथास्त्वं[12] महीपते ॥ २५ ॥
स[13] तच्छ्रुत्वा वचस्तस्य प्रसन्नमनसो नृपः ॥ मातरं ते निरस्याशु विजहार कुबेरवत् ॥ २६ ॥
तथा त्वमपि राजानं दुर्जनाचरिते पथि ॥ असद्ग्राहमिमं[14] मोहात्कुरुपे पापदर्शिनि ॥ २७ ॥

सिञ्चेत् । अस्य आम्रंछित्त्वानिंवंपयसासिञ्चतः । सइतिशेषः । सः निम्बः । मधुरः मधुरफलदः । नैवभवेत् । अनेन सुगुणंरामंवरव्याजेनविवास्यकैकेयीचित्तानुसरणंनयुक्तमित्युक्तं । तेनच सर्वथाकैकेयीकटुरेवेत्युक्तं ॥ १६ ॥ अभिजातं अभिजननं । स्वभावइतियावत् । तेमातुर्यादृशीतादृशी तवापिप्रकृतिरित्यर्थः । कारणानुसारिकार्यसंभवेलौकिकवाक्यंनिदर्शयति—नहीति । क्षौद्रं मधु । स्रवेदित्यत्रेतिकरणंवोध्यं ॥ १७ ॥ कैकेय्याःपतिघ्नीत्वस्वभावोमातृसंवन्धप्रयुक्तइतिप्रस्तावंकृत्वातन्मातुर्वृत्तान्तंवक्तुमुपक्रमते—तवेत्यादिना । असद्ग्राहं असदर्थाभिनिवेशं । पूर्वंयथा येनप्रकारेण । श्रुतंतथाविद्मः ॥ १८ ॥ कश्चित् योगीगन्धर्वइतिश्रुतम् । तस्मात् वरदानात् । रुतं शब्दं । "तिरश्चांवाशितंरुतं" इत्यमरः । संजज्ञे सम्यक्ज्ञातवान् । तेन सर्वभूतरुतज्ञेनराज्ञा । तिर्यग्गतानां तिर्यग्गमनानाम् ॥ १९ ॥ जृंभस्य पिपीलिकाविशेपस्य । शयने शयनसमीपे । पर्यङ्काधःप्रदेशइत्यर्थः । भूरिवर्चसइतिपितुर्विशेपणम् । वरलाभेनाधिकतेजसइत्यर्थः । जृंभविशेषणंवा तदा सुवर्णवर्चसइत्यर्थः । "स्वर्णेपिभूरि—" इत्यमरः । सः पिता । तत्र रुतेविपये । वहुधा द्विस्त्रिः । अहसत् ॥ २० ॥ तत्र हासविपये । क्रुद्धा मांपरिहसतीतिक्रुद्धा । हेनृपते तेहासं हासनिमित्तं । जिज्ञासामि ज्ञातुमिच्छामि ॥ २१—२२ ॥ जीववामावेत्यनेनकैकेयीमातुःपतिघ्नीत्वमुक्तम् ॥ २३ ॥ वरदाय तत्वतः कथयामास । अत्यन्तसंकटेपिविमृश्यकारीसन्वरदायकथयामासेत्यर्थः ॥ २४ ॥ ध्वंसतां स्वाधिकारात्प्रच्युतास्यात् ॥ २५—२६ ॥ उक्तमर्थंप्रकृतेनिगमयति—तथेति । दुर्जनाचरितेपथि स्थितेतिशेषः । असद्ग्रा-

---

वि० तेमातुराभिजात्यं प्रशस्तपितृमातृजन्मोचितव्यवहारवत्त्वंयथा तथैव ते तव । आभिजात्यमपिहिमन्येइतिव्यङ्ग्योक्तिः ॥ १७ ॥ **स०** वचः विदितं विदितार्थं । अभूत् ॥ १९ ॥ **शि०** जृंभस्य पक्षिविशेषस्य । अहसत् । एतेन तदभिप्रायस्यहास्यरसोत्पादकत्वंव्यक्तम् ॥ २० ॥ **शि०** मृत्युपाशं मृत्युकारणीभूतगलवन्धनयोग्यरज्जुविशेपं । **स०** मृत्युपाशमभीप्सती । पत्युरितिशेषः ॥ २१ ॥ **ति०** हासं तत्कारणं ॥ २२ ॥ **स०** म्रियतां विषपानादिना । ध्वंसतां शस्त्रादिना । माकृथाः एतदुक्तमितिशेषः ॥ २५ ॥ इतिपञ्चत्रिंशस्सर्गः ॥ ३५ ॥

[**पा०**] १ ख. घ. ङ. झ. ञ. ट. आभिजात्यं. २ ञ. स्तथैवते. ३ क. ननिंबात्स्रवते. ४ ख. घ. ततस्ते. ५ ख. ङ. छ. झ. हासं. ६ ख. देवि. ७ ङ. छ. झ. पुनः. ८ ङ. झ. मांत्वंप्रहसिष्यसि. ९ क—ञ. सकेकयः. १० इदमर्धं ख. दृश्यते. ११ ग. च. छ. ञ. चेयं. १२ ग. घ. ङ. छ. ज. झ. शंसीस्त्वं. १३ ङ. च. एतच्छ्रुत्वा. ग. तच्छ्रुत्वावचनंतस्य. १४ क. असद्ग्राह्यं.

सत्यश्[1]चाद्य प्रवादोऽयं लौकिकः प्रतिभाति मा[2] ॥ पितॄन्समनु[3]जायन्ते नरा मातरमङ्गनाः ॥ २८ ॥
[4]नैवं भव गृहाणेदं यदाह वसुधाधिपः ॥ भर्तुरिच्छामुपास्स्वेह जनस्यास्य गतिर्भव ॥ २९ ॥
मा त्वं प्रोत्[5]साहिता पापैर्देवराजसमप्रभम् ॥ भर्तारं लोक[6]भर्तारमसद्धर्ममुपादधाः ॥ ३० ॥
न हि मिथ्या प्रतिज्ञातं करिष्यति तवानघः ॥ श्रीमान्दशरथो राजा देवि राजीवलोचनः ॥ ३१ ॥
ज्येष्ठो वदान्यः कर्मण्यः [7]स्वधर्मपरिरक्षिता ॥ रक्षिता जीवलोकस्य [8]बली रामोऽभिषिच्यताम् ॥ ३२ ॥
परिवादो हि ते देवि महाँल्लोके चरिष्यति ॥ यदि रामो वनं याति विहाय पितरं नृपम् ॥ ३३ ॥
[9]स राज्यं राघवः पातु भव त्वं विगतज्वरा ॥ न हि ते राघवादन्यः क्षमः पुरवरे [10]वसेत् ॥ ३४ ॥
रामे हि यौवराज्यस्थे राजा दशरथो वनम् ॥ प्रवेक्ष्यति महेष्वासः पूर्ववृत्तमनुस्मरन् ॥ ३५ ॥
इति [11]सान्त्वैश्च तीक्ष्णैश्च [12]कैकेयीं राजसंसदि ॥ [13]सुमन्त्रः क्षोभयामास भूय एव कृताञ्जलिः ॥ ३६ ॥
[14]नैवं सा क्षुभ्यते देवी न च स परिदूयते ॥ न चास्या मुखवर्णस्य [15]विक्रिया लक्ष्यते तदा ॥ ३७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे पञ्चत्रिंशः सर्गः ॥ ३५ ॥

हं असदर्थाभिनिवेशम् ॥ २७ ॥ सत्यइति मा मां । प्रतिभातीत्यन्वयः । "अभितःपरितः—" इत्यादिना प्रतियोगेद्वितीया । पितॄन्समनुजायन्ते अत्रेतिकरणं द्रष्टव्यं । पितृसमानलक्षणाजायन्तइत्यर्थः । अङ्गनाः पुत्र्यः ॥ २८ ॥ नैवंभवेतिपाठः । नेयाभवेतिपाठे नेया नेतुंयोग्या विधेयाभवेत्यर्थः । वसुधाधिपोयदाह "श्वएवपुष्योभविताश्वोऽभिषिच्येतमेसुतः" इतियद्वचनमाह । इदंगृहाण । अस्यजनस्य पौरजानपदस्य । गतिः शरणं । इतिसान्त्वोक्तिः ॥ २९ ॥ असद्धर्मं कनिष्ठाभिषेकपूर्वकज्येष्ठविवासनरूपं । मोपादधाः माग्राहय ॥३०॥ एवंक्रियमाणेममवरस्यकागतिरित्याशङ्क्य प्रकारान्तरेणगतिर्भविष्यतीत्याह—नहीति । प्रतिज्ञातं प्रतिश्रुतं । वरद्वयं । तन्मिथ्यानकरिष्यति राज्यादप्यधिकमूल्यरत्नभूषणसंमानादिभिस्सफलंकरिष्यतीत्यर्थः ॥ ३१ ॥ रामस्यराज्याभिषेकार्हतासाधनगुणानाह—ज्येष्ठइति । कर्मण्यः कर्मणिसाधुः । सदाचारपरइत्यर्थः । वदान्यः उदारः । स्वधर्मपरिरक्षिता स्वधर्मस्य दुष्टनिग्रहपूर्वकशिष्टपरिपालनरूपक्षत्रियधर्मस्य परिरक्षिता । बलीरामोभिषिच्यतां त्वयेतिशेषः । अभिषेकानुमतिःक्रियतामित्यर्थः ॥ ३२ ॥ परिवादः अपवादः । दोषवादइत्यर्थः ॥ ३३ ॥ तेपुरवरे हि यस्मात्कारणात् क्षमोराघवादन्योनवसेत् अतःसराघवोराज्यंपात्वितिसंबन्धः । यद्वा राघवादन्यःपुरवरेराजतयावसन्भरतः ते नक्षमः नयुक्तः । कनिष्ठस्त्वयाराज्येस्थापयितुंनयुक्तइत्यर्थः । हिते हितकरणे । नक्षम इतिवा ॥ ३४ ॥ पूर्ववृत्तं इक्ष्वाकुकुलक्रमागतवृत्तं ॥ ३५—३६ ॥ मुखवर्णस्य उग्रमुखवर्णस्य ॥ ३७ ॥
इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीतांबराख्याने अयोध्याकाण्डव्याख्याने पञ्चत्रिंशः सर्गः ॥ ३५ ॥

[पा०] १ ङ. च. छ. झ. ञ. श्चात्र. २ ङ—ज. मां. ३ ख. वर्तन्ते. ४ क. ख. च. ञ. नेया. ५ ख. प्रोत्सादितापापे. ६ घ. च. ञ. कर्तारं. ७ ख. घ. ङ. च. झ. ञ. स्वधर्मस्यापि. क. ग. ज. स्वधर्मस्याभि. छ. स्वधर्मस्यास्य. ८ च. देवि. ९ ङ. च. छ. झ. ञ. ट. स्वराज्यं. १० ङ. छ. झ. ट. वसन्. ११ ख. तीक्ष्णैश्चसान्त्वैश्च. १२ ख. केकर्यांजनसंसदि. १३ ङ. च. छ. झ. ञ. ट. भूयःसंक्षोभयामाससुमन्त्रस्तु. १४ ख. नव. १५ क. ख. ग. ट—ञ. लक्ष्यतेविक्रिया.

षट्त्रिंशः सर्गः ॥ ३६ ॥

दशरथेनसुमन्त्रंप्रतिसेनाधनधान्यकोशादिसंपदांराममंप्रत्यनुयापनचोदनेकैकेय्याअसमञ्जदृष्टान्तीकरणेनसंपद्राहित्येनैव ज्येष्ठस्यापिरामस्यवनंप्रतियापनोक्तिः ॥ १ ॥ सिद्धार्थनाम्नासचिवप्रधानेनासमञ्जदुश्चरितोपन्यासेनरामेतद्वैपम्योपपादनपूर्वकं कैकेयींप्रतिरामाभिषेकविघातनोपरमप्रार्थना ॥ २ ॥ राज्ञाकैकेयींप्रतिसिद्धार्थोक्ताकरणेस्वस्यापिरामानुगमनोक्तिः ॥ ३ ॥

ततस्सुमन्त्रमैक्ष्वाकः पीडितोत्र प्रतिज्ञया ॥ सबाष्पमतिनिश्वस्य जगादेदं पुनःपुनः ॥ १ ॥
सूत रत्नसुसंपूर्णा चतुर्विधबला चमूः ॥ राघवस्यानुयात्रार्थं क्षिप्रं प्रतिविधीयताम् ॥ २ ॥
रूपाजीवाश्च वादिन्यो वणिजश्च महाधनाः ॥ शोभयन्तु कुमारस्य वाहिनीं सुप्रसारिताः ॥ ३ ॥
ये चैनमुपजीवन्ति रमते यैश्च वीर्यतः ॥ तेषां बहुविधं दत्त्वा तानप्यत्र नियोजय ॥ ४ ॥
आयुधानि च मुख्यानि नागराः शकटानि च ॥ अनुगच्छन्तु काकुत्स्थं व्याधाश्चारण्यगोचराः ॥५॥
निघ्नन्मृगान्कुञ्जरांश्च पिबंश्चारण्यकं मधु ॥ नदीश्च विविधाः पश्यन्न राज्यस्य स्मरिष्यति ॥ ६ ॥
धान्यकोशश्च यः कश्चिद्धनकोशश्च मामकः ॥ तौ राममनुगच्छेतां वसन्तं निर्जने वने ॥ ७ ॥
यजन्पुण्येषु देशेषु विसृजंश्चाप्तदक्षिणाः ॥ ऋषिभिश्च समागम्य प्रवत्स्यति सुखं वने ॥ ८ ॥
भरतश्च महाबाहुरयोध्यां पालयिष्यति ॥ सर्वकामैः सह श्रीमान्रामः संसाध्यतामिति ॥ ९ ॥
एवं ब्रुवति काकुत्स्थे कैकेय्या भयमागतम् ॥ मुखं चाप्यगमच्छोषं स्वरश्चापि न्यरुध्यत ॥१०॥
सा विषण्णा च संत्रस्ता मुखेन परिशुष्यता ॥ राजानमेवाभिमुखी कैकेयी वाक्यमब्रवीत् ॥ ११ ॥
राज्यं गतजनं साधो पीतमण्डां सुरामिव ॥ निरास्वाद्यतमं शून्यं भरतो नाभिपत्स्यते ॥ १२ ॥

ततः कैकेयीसंमत्यभावानन्तरं । अत्र वरदानविषये ॥ १ ॥ अनुयात्रार्थं प्रतिविधीयतां प्रेष्यताम् ॥ २ ॥ रूपाजीवाः वेश्याः । "वारस्त्रीगणिकावेश्यारूपाजीवा" इत्यमरः । वादिन्यः परचित्ताकर्षणचतुरवचनाः । सुप्रसारिताः शिबिरदेशेपण्यपदार्थप्रसारणंकुर्वन्तः ॥ ३ ॥ एनं रामं । बहुविधं सुवर्णरत्नवस्त्रादिकं । अत्र वाहिन्यां ॥ ४ ॥ आयुधानि आयुधधराः । नागराः नगरजाःश्रेष्ठिनः । शकटानि तैलघृतादिप्रापकाणि । व्याधाः वनेमार्गदर्शिनः ॥ ५ ॥ राज्यस्येति "अधीगर्थदयेशांकर्मणि" इतिषष्ठी ॥ ६॥ कोशोवासस्थानम् । अनुगच्छेतां गोण्युष्ट्रादिमुखेनेति शेषः ॥ ७ ॥ विसृजत् ददिदितियावत् । दक्षिणाः यज्ञदक्षिणाः ॥ ८ ॥ अयोध्यांपालयिष्यतीतिसोपालम्भोक्तिः । सर्वकामैःसह संसाध्यतां प्रस्थाप्यतां । इतिशब्दोनियोगसमाप्तिवाचकः ॥९—१०॥ मुखेनेत्युपलक्षणेतृतीया ॥ ११ ॥ पीतमण्डां "मण्डंदधिभवंमस्तु" इतिमण्डशब्दोयथादधिसारवाचकस्तद्वदत्रापि मण्डशब्देनसुरासारउच्यते । साधोइतिसहासोक्तिः ।

शि० चतुर्विधबला चतुर्विधानि रथादिचतुष्टयप्रकाराणि बलानि वीर्याणि यस्यांसा चमूः ॥२॥ **स०** नादिन्यः सुस्वराः ॥३॥ **ति०** अरण्येकोविदाः अरण्यमर्मज्ञाः ॥ ५ ॥ **शि०** हननयोग्यानपिमृगादीन् निघ्नन् निवर्तयन् । प्रसिद्धश्चनिपूर्वकहनोनिवर्तनार्थकत्वं "शिष्टंनिघ्नन्तिकंपितं" इत्यादिनावेदभाष्ये। तत्रवधोनार्थः शब्दानामनित्यत्वापत्तेः। मतान्तरेपिशब्दानांप्राणसंबन्धाभावेनप्राणवियोगानुकूलव्यापारार्थस्यात्रासंभवात् ॥ ६ ॥ **स०** रामः संसाध्यतां प्रस्थाप्यतामितिजगादेतिसर्गादिश्लोकेनान्वयः ॥९॥ **शि०** भयं क्षुद्रराक्षसवधफलकनिखिलपरिवारगमनहेतुकलोकापवादभीतिं ॥ १० ॥ **शि०** हेसाधो प्रव्राजनसाधक । गतजनं गताः जनाः पित्रादयोयस्मात्तत् । निरास्वाद्यतमं आस्वाद्यतमपित्रासंमाननादिसुखरहितं राज्यं नाभिपत्स्यते । तत्रदृष्टान्तः पीतमण्डां पीतसारांसुरां । जनाइव । किंच पीतःमण्डोदधिसारोयस्यास्तां। सुरां सुदत्तांदधिव्यक्तिमिव । एतेनभरतोपिसंहवगन्ते-

[पा०] १ क. जगादैनं. च. जगादवं. २ ग. घ. छ. झ. ञ. पुनर्वचः. ३ घ. चतुरङ्गबला. ४ क. ख. घ. ज. शालिन्यः. ठ. नादिन्यः..५ ख. ङ. छ. झ. वाहिनीः. ६ क. ख. च. बहुधनं. ७ ख. घ. शाकटानि. ८ क. ख. ङ. च. छ. झ. ञ. ट. कोविदाः. ९ ङ. च. छ. झ. ञ. ट. राज्यंसंस्मरिष्यति. १० ख. घ. विजने. ११ च. ञ. श्चाभिसंगम्य. ङ. छ. झ. ट. श्चापिसंगम्यं. १२ ख. घ—छ. झ. ञ. ट. कामैःपुनः. ज. कामफलः. १३ ङ. च. ञ. इति. १४ च. ञ. कैकेय्यांभयमागतां. १५ ख. घ. च. छ. ञ. चास्यागमच्छोषं. १६ क. ङ. च. छ. झ. ञ. ट. व्यरुध्यत. १७ क. विवर्णा. १८ ङ. छ. झ. गतध-

कैकेय्यां मुक्तलज्जायां वदन्त्यामतिदारुणम् ॥ राजा दशरथो वाक्यमुवाचायतलोचनाम् ॥ १३ ॥
वहन्तं किं तुदसि मां नियुज्य[1] धुरि माहिते[2] ॥ अनार्ये कृत्यमारब्धं किं न पूर्वमुपारुधः ॥ १४ ॥
तस्यैतत्क्रोधसंयुक्तमुक्तं श्रुत्वा वराङ्गना ॥ कैकेयी द्विगुणं क्रुद्धा राजानमिदमब्रवीत् ॥ १५ ॥
तवैव वंशे सगरो ज्येष्ठपुत्रम्[3]उपारुधत् ॥ असमञ्ज इति ख्यातं तथाऽयं गन्तुमर्हति ॥ १६ ॥
एवमुक्तो धिगित्येव राजा दशरथोऽब्रवीत् ॥ व्रीडितश्च जनस्सर्वः सा च तं नावबुध्यत[4] ॥ १७ ॥
तत्र वृद्धो महामात्रः[5] सिद्धार्थो नाम नामतः ॥ शुचिर्बहुमतो राज्ञः कैकेयीमिदमब्रवीत् ॥ १८ ॥
असमञ्जो गृहीत्वा तु क्रीडितः[6] पथि दारकान् ॥ सरय्वाः प्रक्षिपन्नप्सु रमते तेन दुर्मतिः ॥ १९ ॥
तं दृष्ट्वा नागरास्सर्वे क्रुद्धा राजानमब्रुवन् ॥ असमञ्जं वृणीष्वैकमस्मान्वा राष्ट्रवर्धन ॥ २० ॥
तानुवाच ततो राजा किंनिमित्तमिदं भयम् ॥ ताश्चापि राज्ञा संपृष्टा वाक्यं प्रकृतयोऽब्रुवन् ॥२१॥
क्रीडतस्त्वेष नः पुत्रान्बालानुद्भ्रान्तचेतनः[7] ॥ सरय्वां प्रक्षिपन्[8]मौर्ख्यादतुलां प्रीतिमश्नुते ॥ २२ ॥
स तासां वचनं श्रुत्वा प्रकृतीनां नराधिपः ॥ तं तत्याजाहितं पुत्रं तासां[9] प्रियचिकीर्षया ॥ २३ ॥
तं यानं शीघ्रमारोप्य सभार्यं सपरिच्छदम् ॥ यावज्जीवं विवास्योऽयमिति स्वान्[10]अन्वशात्पिता ॥२४॥
सफालपिटकं गृह्य गिरिदुर्गाण्यलोलयत्[11] ॥ दिशस्सर्वास्त्वनुचरन्स यथा पापकर्मकृत् ॥ २५ ॥

निरास्वाद्यतमं निर्गतभोग्यवस्तुयुक्तं ॥ १२ ॥ आयतलोचनामितिदैन्योक्तिमूलसौन्दर्योक्तिः ॥ १३ ॥ हे अहिते अहितकारिणि । धुरि वरदानहेतुकभरताभिषेचनरामविवासनरूपदुर्वहभारे । नियुज्य तथावहन्तंमांवत्सतरमिव किं तुदसि व्यथयसि । त्वदाज्ञप्तरामविवासनकारिणंकिमर्थंपुनरपिपीडयसीत्यर्थः । किमधुनापीड्यते पूर्वमेवभवतादत्तंखल्वित्यत्राह—अनार्यइति । हेअनार्ये आरब्धंकृत्यं सेनाप्रेपणादिकं । पूर्वं वरप्रार्थनाकाले । किमर्थं नोपारुधः नोपरुद्धवती । नप्रार्थितवतीतियावत् । वरयाचनाकालेऽनुद्घाटितत्वात्सेनाप्रेपणादिकंननिर्वर्तितव्यमितिभावः ॥ १४ ॥ द्विगुणंक्रुद्धा प्रकारान्तरेणमदभिमतंविघटयतीतिबहुतरंक्रुद्धेत्यर्थः ॥१५॥ यद्यपिपूर्वमिदंनवृत्तं तथाप्यर्थसिद्धमित्याशयेनाह—तवैवेति । उपारुधदितिनिष्कासनमेवोच्यते। गन्तुमर्हतीतिनिर्देशात् । तथायमिति निर्धनएवेत्यर्थः ॥ १६ ॥ प्रतिज्ञातातिरिक्तेपिचापलवतींनिन्दति—धिगिति । सा कैकेयी। तं व्रीडितंजनं । नावबुध्यत नाजीगणत् ॥ १७ ॥ महामात्रः प्रधानः। शुचिः अकुटिलः ॥ १८ ॥ दारकान् बालकान् । तेन प्रक्षेपेण । सशब्दबुद्बुदजननेनहसन्रमतइत्यर्थः ॥ १९ ॥ वृणीष्व अत्रनगरेस्थापय ॥ २० ॥ भयमित्यनन्तरमितिकरणंद्रष्टव्यं । प्रकृतयः प्रजाः ॥ २१ ॥ उद्भ्रान्तचेतनः भ्रान्तबुद्धिः ॥ २२—२३ ॥ अन्वशात् अनुशिष्टवान् ॥ २४ ॥ फालं कन्दमूलादिखन-

तिसूचितं । तेनभवदादिरहितेनैवरामेणगन्तव्यमितिव्यञ्जितम् । **स०** पीतंमण्डंयस्यास्सापीतमण्डा । सुरा चषकं । पानसाधनपात्रस्थंमण्डंपीतंचेत् यथारिक्तंतत्पात्रंनगृह्णन्तिएवमितिभावः । 'चषकेऽपिसुराक्वचित्' इतिविश्वः ॥ १२ ॥ **ती०** आरब्धंकिंकृत्यंनोपारुधः सर्वमुपरुद्धवत्येव । पूर्वमभिषेककृत्यं इदानीमानुयात्रिकप्रदानमारब्धंतदप्युपारुधइत्यर्थः । **स०** हेमाहिते नहितंयस्यास्सा तथातस्यास्संबुद्धिःमाहिते कैकेयि। इदानींयत्कृत्यमारब्धं सर्वसंपद्युक्ततयारामप्रस्थापननिरोधनरूपं तत्पूर्वमेव किं कुतः। नोपारुधः धातूनामनेकार्थत्वान्नयाचितवत्यसि । कृत्यं सर्वंभवरामप्रवासनरूपं यदिदानीमारब्धं तत्पूर्वंकिंनोपारुधः नप्रतिबद्धंकृतवतीतिभावः ॥ १४ ॥ **ति०** जनः कैकेयीसेवकजनः । सर्वस्वामिन्याअसंबद्धप्रलापात् । नावबुध्यत क्रोधवशादितिभावः । **स०** व्रीडितः एतद्बुद्धिनिवर्तनेसामर्थ्याभावाल्लज्जायुक्तः । जनः प्रकृतिजनः । सा कैकेयी। तं धिक्कारं। राज्यलोभान्नावबुध्यत ॥ १७ ॥ **शि०** तत्र राज्ञस्तूष्णींभावेनस्थितौसत्यां ॥ १८ ॥ **ति०** सरय्वामप्सुप्रक्षिपन्रमतेतेनकारणेनदुर्मतिस्सः । नतादृशोयमितिभावः ॥ १९ ॥ **स०** असमञ्जसमेकंवृणीष्व अस्मांस्त्यजेतियावत्। अस्मान्वावृणीष्व तमेकंत्यजेत्यब्रुवन् ॥२०॥ **शि०** क्रीडतः अतएवोद्भ्रान्तचेतसः अनवस्थितचित्तान् ॥ २२ ॥ **शि०** यथापापकर्मकृदित्युपमालंकारेणासमञ्जस्यपापकर्मकर्तृत्वाभावस्सूचितः । तेन स्वविषयक-

[पा०] १ क. नियोज्य. २ ख. वाहिते. ३ ख. ङ. च. ज. ञ. ज्येष्ठंपुत्रं. ४ ग. नावबुध्यति. क. ख. नावबुध्यते. ५ घ. महामात्यः. ६ क. ख. क्रीडतोदारकान्पथि. ७ क—ट. चेतसः. ८ क. ख. पातयन्. ९ घ. ज. तेषां. १० ङ. झ. ट. तान्. ११ ग. घ. ज. दुर्गाणिलोलयन्. ख. च. छ. झ. ञ. ट. दुर्गाण्यलोकयत्. ङ. दुर्गाणिलोकयन्.

इत्येनमत्यजद्राजा सगरो वै सुधार्मिकः ॥ रामः किमकरोत्पापं येनैवमुपरुध्यते ॥ २६ ॥
न हि कंचन पश्यामो राघवस्यागुणं वयम् ॥ दुर्लभो ह्यस्य निरयः शशाङ्कस्येव कल्मषम् ॥ २७ ॥
अथवा देवि दोषं त्वं कंचित्पश्यसि राघवे ॥ तमद्य ब्रूहि तत्वेन ततो रामो विवास्यताम् ॥ २८
अदुष्टस्य हि संत्यागः सत्पथे निरतस्य च ॥ निर्दहेदपि शक्रस्य द्युतिं धर्मनिरोधनात् ॥ २९ ॥
तदलं देवि रामस्य श्रिया विहतया त्वया ॥ लोकतोपि हि ते रक्ष्यः परिवादः शुभानने ॥ ३० ॥
श्रुत्वा तु सिद्धार्थवचो राजा श्रान्ततरस्वनः ॥ शोकोपहतया वाचा कैकेयीमिदमब्रवीत् ॥ ३१ ॥

एतद्वचो नेच्छसि पापवृत्ते हितं न जानासि ममात्मनो वा ॥
आस्थाय मार्गं कृपणं कुचेष्टा चेष्टा हि ते साधुपथादपेता ॥ ३२ ॥
अनुव्रजिष्याम्यहमद्य रामं राज्यं परित्यज्य सुखं धनं च ॥
सहैव राज्ञा भरतेन च त्वं यथासुखं भुङ्क्ष्व चिराय राज्यम् ॥ ३३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे षड्त्रिंशः सर्गः ॥ ३६ ॥

नसाधनं । पिटका तद्धारणपात्रं । एकवद्भावः । गृह्य गृहीत्वा । अलोलयत् कन्दमूलाद्यर्थमखनदित्यर्थः । यथापापकृत्तथाचरन्नलोलयदित्यन्वयः ॥ २५ ॥ उपरुध्यते विवास्यते ॥२६॥ निरयः निरयहेतुभूतोदोषः ॥२७—२९॥ विहतयाश्रियाअलं अभिषेकविघातंमा कुर्वित्यर्थः । रक्ष्यः परिहरणीयः । परिवादः निन्दा ॥३०॥ श्रान्ततरः हीनतरः ॥ ३१ ॥ एतद्वचः सिद्धार्थवचः । कृपणं कुत्सितमित्यर्थः । "कदर्यकृपणक्षुद्र" इत्यमरः । कुचेष्टेत्येतदुपपादयति—चेष्टाहीति ॥ ३२—३३ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीतांबराख्याने अयोध्याकाण्डव्याख्याने षड्त्रिंशः सर्गः ॥ ३६ ॥

पित्रतिप्रीतिनिरसनार्थंजलेबालप्रक्षेपइतिसूचितम् । तेनतस्यविज्ञानिश्रेष्ठत्वंव्यक्तम् । ति० यथापापकर्मंकृत् यथोक्तपापकर्मकृत् । फालसहितंपिटकंफालपिटकं । "सर्वांदिशस्त्वनुचरन्नतिष्ठत्पापकर्मकृत्" इतिपाठान्तरं । स० ननुनवमभागवते "एवंवृत्तः परित्यक्तःपित्रास्नेहमपोह्यवै । योगैश्वर्येणतान्बालान्दर्शयित्वाततोययौ । अयोध्यावासिनस्सर्वेबालकान्पुनरागतान् । दृष्ट्वाविसिस्मिरेराजन्राजाचाप्यन्वतप्यत" इत्यसमञ्जस्यनिर्दुष्टत्वोक्तेःकथमत्रपापकर्मकृदित्युच्यतइतिचेन्न । पुत्रप्रदर्शनात्प्राक्तस्यदुष्टत्वप्रतीतेस्तावन्मात्रेणेहपापकृदित्युक्तेः । उत्तरकथानुक्तिर्नदोपाय ॥ २५ ॥ शि० पापं पापाभासं ॥ २६ ॥ स० शशाङ्कस्येतिव्यतिरेकदृष्टान्तः । शि० अगुणं गुणविरोधिदोषकर्मेत्यर्थः । शशाङ्कस्य द्वितीयाचन्द्रस्य ॥ २७ ॥ शि० तत्वेनत्वंपश्यसिचेद्ब्रूहि ॥ २८ ॥ स० शक्रश्चेद्यद्येतादृशंत्यजेत्तर्हितादृशादुष्टसंत्यागस्तद्द्युतिमपिदहेदितिभावः ॥२९॥ स० ते त्वया । परिवादोपवादः । अरक्ष्यः परिहरणीयः । रलयोरभेदाल्लक्ष्यइतिवा ॥३०॥ स० यतस्त्वंकुचेष्टा कृपणंमार्गमास्थायहितंनजानासि अतस्साधुपथादपेता इयंचेष्टा तवाहितेभवति । शि० पापरूपे राक्षसे । कृपणं दुःखदं । मार्गमास्थाय निश्चित्य । एतद्वचः सिद्धार्थवचनं । मम आत्मनः रामस्यहितंनैवजानासि अतएवनेच्छसि । अतस्ते कुचेष्टा कुत्सितव्यापारत्वेनप्रतीयमाना । चेष्टा व्यापारः । असाधुपथात् अपेता त्यक्ता । शिष्टसंमतएवायंपन्थाइत्यर्थः । कुचेष्टाशब्दआचारक्विबन्तप्रकृतिककर्तृक्विबन्तः ॥ ३२ ॥ ति० सर्वे अयोध्यावासिनो जनाः । राज्ञा भरतेनच । चस्त्वर्थे । शि० इदानींस्वस्यरामवियोगासहिष्णुत्वंबोधयन्नाह—अन्विति । राज्यादिकंपरित्यज्य अद्य अस्मिन्दिने । राममनुव्रजिष्यामि । सर्वे मन्त्रिणः । त्वंच चिराय बहुकालंप्रभूतंराज्यं सुखंयथास्यात्तथा भुङ्क्ष्व पालय । "भुजोऽनवने" इत्यस्याप्रवृत्तिस्तु संज्ञापूर्वकविधेरनित्यत्वात् । एतेन भरतंक्षिप्रमानयेतिसूचितम् ॥ ३३ ॥ इतिषड्त्रिंशस्सर्गः ॥ ३६ ॥

[पा०] १ घ. ज. इत्येवं. २ ङ. झ. ट. त्वंकंचिद्दोषंपश्यसि. क. ख. घ. च. त्वंकिंचिद्दोषं. ३ ङ. च. छ. झ. ञ. ट. तदा. ४ ङ. च. छ. झ. ञ. ट. विवास्यते. ५ निर्दहेदपीत्यर्धात्पूर्वं क. च. पुस्तकयोः "अप्राप्तस्यविवासोयंवनेपुत्रयशस्विनः" इत्यर्धमधिकंदृश्यते. ६ च. विरोधनात्. ङ. छ. झ. ञ. ट. विरोधवान्. ७ क—च. ज—ट. स्वरः. ८ ङ. च. छ. झ. ञ. ट. पापरूपे. ९ क. जानामि. १० झ. ञ. ममात्मनोऽथवा. ११ ग. घ. ज. धनंसुखं. १२ ङ. च. झ. ट. सर्वेंच.

सप्तत्रिंशः सर्गः ॥ ३७ ॥

रामेणदशरथंप्रतिस्वस्यनिस्सङ्गत्वोत्कीर्तनेनानुयात्रिकादिप्रतिषेधनपूर्वकंपरिचारकान्प्रतिचीराद्यानयनचोदना ॥ १ ॥ रामलक्ष्मणाभ्यांपूर्ववस्त्रविसर्जनपूर्वकंकैकेयीदत्तचीरपरिधानम् ॥ २ ॥ सीतायांचीरपरिधानाकौशलेनखिद्यमानायांरामेण स्वयंतस्याःकौशेयोपरिपरिबन्धनम् ॥ ३ ॥ वसिष्ठेनसहेतूपन्यासंसीतायाश्चीरधारणप्रतिषेधनेपितयाभर्तृसाधर्म्यकामयाततो भावादनिवर्तनम् ॥ ४ ॥

महामात्रवचः श्रुत्वा रामो दशरथं तदा ॥ अभ्यभाषत वाक्यं तु विनयज्ञो विनीतवत् ॥ १ ॥
त्यक्तभोगस्य मे राजन्वने वन्येन जीवतः ॥ किं कार्यमनुयात्रेण त्यक्तसङ्गस्य सर्वतः ॥ २ ॥
यो हि दत्त्वा द्विपश्रेष्ठं कक्ष्यायां कुरुते मनः ॥ रज्जुस्नेहेन किं तस्य त्यजतः कुञ्जरोत्तमम् ॥ ३ ॥
तथा मम सतां श्रेष्ठ किं ध्वजिन्या जगत्पते ॥ सर्वाण्येवानुजानामि चीराण्येवानयन्तु मे ॥ ४ ॥
खनित्रपिटके चोभे समानयत गच्छत ॥ चतुर्दश वने वासं वर्षाणि वसतो मम ॥ ५ ॥
अथ चीराणि कैकेयी स्वयमाहृत्य राघवम् ॥ उवाच परिधत्स्वेति जनौघे निरपत्रपा ॥ ६ ॥
स चीरे पुरुषव्याघ्रः कैकेय्याः प्रतिगृह्य ते ॥ सूक्ष्मवस्त्रमवक्षिप्य मुनिवस्त्राण्यवस्त ह ॥ ७ ॥
लक्ष्मणश्चापि तत्रैव विहाय वसने शुभे ॥ तापसाच्छादने चैव जग्राह पितुरग्रतः ॥ ८ ॥
अथात्मपरिधानार्थं सीता कौशेयवासिनी ॥ समीक्ष्य चीरं संत्रस्ता पृषती वागुरामिव ॥ ९ ॥
सा व्यपत्रपमाणेव प्रगृह्य च सुदुर्मनाः ॥ कैकेयीकुशचीरे ते जानकी शुभलक्षणा ॥ १० ॥
अश्रुसंपूर्णनेत्रा च धर्मज्ञा धर्मदर्शिनी ॥ गन्धर्वराजप्रतिमं भर्तारमिदमब्रवीत् ॥ ११ ॥

महामात्रवचः सिद्धार्थवचः । विनीतवत् विनीत इव । अभ्यभाषत सविनयमाहेत्यर्थः ॥ १ ॥ अनुयात्रेण अनुगतबलेन । भोगत्यागेपिसङ्गोवर्ततेलौकिकानांसोपिनास्तीत्याह—त्यक्तसङ्गस्यसर्वतइति ॥ २॥ कक्ष्यायां इभबन्धनरज्जौ । "कक्ष्याप्रकोष्ठेहर्म्यादेः काञ्च्यांमध्येभबन्धने" इत्यमरः ॥ ३ ॥ ध्वजिन्या सेनया । सर्वाणि त्वयामह्यंदातुमुद्युक्तानि । अनुजानामि प्रददामि । भरतायेतिशेषः । सर्वाणि कार्याणि सम्यग्जानामीतिवार्थः । चीराणि वल्कलवस्त्राणि । आनयन्तु परिचारकाइतिशेषः ॥ ४ ॥ खनित्रपिटके खनित्रं अवदारणं । पिटकं अल्पार्थेकन्प्रत्ययः । फलमूलाद्याहरणयोग्याल्पकण्डोलः । "कण्डोलपिटौ" इत्यमरः । वासं वसतः । वासंकुर्वतइत्यर्थः ॥५—६॥ सः रामः । कैकेय्याः सकाशात् । मुनिवस्त्राणिपरिगृह्य तेषुद्वेचीरे उत्तरीयान्तरीयरूपे । सूक्ष्मवस्त्रमवक्षिप्य । अवस्तह आदीधरदित्यर्थः ॥ ७—८ ॥ संत्रस्ता अभवदितिशेषः । पृषती मृगी । वागुरां मृगबन्धनीं । "वागुरामृगबन्धनी" इत्यमरः ॥ ९ ॥ व्यपत्रपमाणा विशेषेणलज्जमाना । कैकेयीकुशचीरे कैकेयीसंबन्धिनीकुशचीरे ॥ १० ॥ धर्मज्ञा पातिव्रत्यधर्मज्ञा । धर्मदर्शिनी स्वानुष्ठानेनपातिव्रत्यधर्मप्रदर्शिनी बभ्रन्तीतीदमब्रवीदितिसंबन्धः ॥ ११ ॥

शि० अमात्यराज्ञोर्वचनश्रवणानन्तरकालिकंरामवृत्तमाह—महेति । महामात्रवचः महान्अमात्रःअमात्योयस्यसतस्यवचोवचनं । किंच महामात्रस्यवचोयास्मिंस्तत् उभयवचनमित्यर्थः । श्रुत्वा विनयज्ञोरामः विनीतवत् विशेषनीतिविशिष्टंवाक्यमभाषत । स० विनीतवदित्यनेन सर्वोत्तमस्येदंविनयप्रदर्शनंलोकशिक्षार्थमितिसूचयति ॥ १ ॥ स० अनुयात्रेण यापनोपायेन । "यात्रातुयापनोपाये" इतिविश्वः । त्यक्तसङ्गस्य त्यक्तःदत्तःसङ्गोयेनसतथा । सर्वतइति चतुर्थ्यन्तात्तसिः ॥ २ ॥ ति० एतत्पर्यन्तं मन्थराप्रेरितंसिद्धंकृत्वाब्राह्मणशापप्राप्तलोकासूयाविषयत्वसंपादकंकर्मकैकेय्यारभते—अथेति । सचशापोऽध्यात्मरामायणेस्पष्टः । शि० निरपत्रपा निर्निरन्तरंअपः पालनाभावोयेपुतान्त्रपतेधिक्कारादिनालज्जयतिसा । किंच निर्गतःअपःपालनाभावोयेषांते निरन्तरंपालनकर्तारइत्यर्थः । तांस्त्रपतेलज्जयतिसा विलक्षणपालनकर्त्रीत्यर्थः । कैकेयी जनौघे जनसमूहे । पश्यतिसति ॥ ६ ॥ स० रामदत्तयोश्चीरयोर्द्वित्वाच्चीरेइतिद्विवचनं । अतोनपूर्वोत्तरंबहुवचनानुपपत्तिः ॥ ७ ॥ स० तापसैनवसाच्छादनेइतिवा ॥ ८ ॥

[पा०] १ घ. महामात्यवचः. २ क—घ. ज. ञ. अन्वभाषत. ३ क. च. ममानयतु. ख. ममानयत. ४ क. ख. ग. गच्छतः. ५ ख. वस्त्रंपरिक्षिप्य. ६ क—ट. संप्रेक्ष्य. ७ क. ख. घ—ट. कैकेय्याः. ८ ख. सुशुभेक्षणा. घ. चशुभेक्षणा.

कथं नु चीरं बध्नन्ति मुनयो वनवासिनः ॥ इति ह्यकुशला सीता सा मुमोह मुहुर्मुहुः ॥ १२ ॥
कृत्वा कण्ठे[1] च सा चीरमेकमादाय पाणिना ॥ तस्थौ ह्यकुशला तत्र[2] व्रीडिता जनकात्मजा ॥ १३॥
तस्यास्तत्क्षिप्रमागम्य[3] रामो धर्मभृतां वरः ॥ चीरं बबन्ध सीतायाः कौशेयस्योपरि स्वयम् ॥ १४ ॥
रामं प्रेक्ष्य तु सीताया बध्नन्तं चीरमुत्तमम् ॥ अन्तःपुरगता[4] नार्यो मुमुचुर्वारि नेत्रजम् ॥ १५ ॥
ऊचुश्च परमायस्ता[5] रामं ज्वलिततेजसम् ॥ वत्स [6]नैवं नियुक्तेयं वनवासे मनस्विनी ॥ १६ ॥
पितुर्वाक्यानुरोधेन गतस्य विजनं वनम् ॥ तावद्दर्शनमस्यां[7] नः सफलं भवतु प्रभो ॥ १७ ॥
लक्ष्मणेन सहायेन वनं गच्छस्व पुत्रक ॥ नेयमर्हति कल्याणी वस्तुं तापसवद्वने ॥ १८ ॥
कुरु नो याचनां पुत्र[8] सीता तिष्ठतु भामिनी ॥ धर्मनित्यस्स्वयं स्थातुं न हीदानीं त्वमिच्छसि ॥१९॥
तासामेवंविधा वाचः शृण्वन्दशरथात्मजः ॥ बबन्धैव तदा[9] चीरं सीतया तुल्यशीलया ॥ २० ॥
चीरे गृहीते तु तया संमीक्ष्य[10] नृपतेर्गुरुः ॥ निवार्य सीतां कैकेयीं वसिष्ठो वाक्यमब्रवीत् ॥ २१ ॥
[11]अतिप्रवृत्ते दुर्मेधे कैकेयि कुलपांसनि ॥ वञ्चयित्वा च राजानं[12] न[13] प्रमाणेऽवतिष्ठसे ॥ २२ ॥
न गन्तव्यं वनं[14] देव्या सीतया शीलवर्जिते ॥ [15]अनुष्ठास्यति रामस्य सीता प्रकृतमासनम् ॥ २३ ॥
आत्मा हि दाराः सर्वेषां दारसंग्रहवर्तिनाम् ॥ आत्मेयमिति रामस्य पालयिष्यति मेदिनीम् ॥ २४॥
अथ यास्यति वैदेही वनं रामेण संगता ॥ [16]वयमप्यनुयास्यामः पुरं चेदं गमिष्यति ॥ २५ ॥
[17]अन्तपालाश्च यास्यन्ति सदारो[18] यत्र राघवः ॥ सहोपजीव्यं राष्ट्रं च पुरं च सपरिच्छदम् ॥ २६ ॥

मुमोह स्तब्धाबभूवेत्यर्थः ॥ १२॥ तदेवविवृणोति—कृत्वेति ॥१३—१५॥ एवं त्वमिव । इयं सीता । वनवासे न नियुक्तेति पित्रेतियावत् ॥ १६ ॥ तावत् तवागमनपर्यन्तं । पितुर्वाक्यानुरोधेनविजनंवनंगतस्य तवदर्शनं अस्यांसफलंभवतु त्वामिवैनांद्रक्ष्यामइतिभावः ॥ १७—१८ ॥ सीतयेति षष्ठ्यर्थेतृतीया । बबन्धैवेति कैकेय्यनुज्ञाभावादितिभावः ॥ २०—२१ ॥ अतिप्रवृत्ते अतिक्रम्यप्रवर्तमाने । प्रमाणे मर्यादायां "प्रमाणंहेतुमर्यादाशास्त्रेयत्ताप्रमातृषु" इत्यमरः॥२२॥ प्रकृतं प्रस्तुतं । आसनं सिंहासनं । अनुष्ठास्यति अधिष्ठास्यति ॥ २३ ॥ दारसंग्रहवर्तिनां गृहस्थानां । आत्मेयमिति । "अर्धोवाएषआत्मनोयत्पत्नी" इति श्रुतेरितिभावः ॥२४—२५॥ अन्तपालाः राष्ट्रान्तपरिपालकाः । दण्डनायकाः सहोपजीव्यं जीवाजीवरू-

शि० एकं कण्ठे कण्ठप्रदेशे स्कन्धइत्यर्थः । एकंपाणिनाऽऽदायतस्थौ । एकमित्युभयान्वयि ॥ १३ ॥ ति० कौशेयस्योपरीति । तस्याःकौशेयत्यागप्रसक्त्यभावात् ॥ १४ ॥ स० अन्तःपुरचराः पुमांसः नार्यश्च ॥ १५ ॥ स० आयस्ताः क्लेशिताः । "आयस्तःक्लेशित"इतिविश्वः । नियुक्ता कैकेय्या । ति० परमायत्ताः परमखिन्नाः । "यत्तःखेदोपस्करयोः" इत्यभिधानं । ॥ १६ ॥ वि० विजनंवनंगतस्ययावदागमनं तावदस्यादर्शनंनोस्तु । तेनच नोर्जीवनंसफलंभवतु ॥ १७ ॥ स० सहायेन सहायभूतेनलक्ष्मणेन सह अथंन शुभावहादृष्टेन। गच्छेतिवा । स्वपुत्रक पुत्रोनभवतीत्यपुत्रः सुष्ठुअपुत्रःस्वपुत्रः तत्त्वेनाज्ञातःस्वपुत्रकः। "अज्ञातेक" इत्युक्तेः। स्वपुत्रश्चासौकश्चेतिवा । कोविष्णुः । गमनानुमतिसूचकपदव्यत्यासोपेतंगच्छस्वेत्येकंवापदम् ॥ १८ ॥ वि० तुल्यशीलयाअनङ्गीकृतनगरस्थित्यासीतयाप्रेरितस्सन्चीरंबबन्धेत्यन्वयः ॥ २० ॥ ती० सप्रमाणेव सद्वृत्तेव । ति० अतिप्रवृत्ते मर्यादातिक्रमेणप्रवृत्ते । यावद्वरस्तावत्प्रमाणे नावतिष्ठसि । कुतः अस्यावनगमनस्यत्वयाऽवृतत्वादितिभावः । सप्रमाणेवेतिपाठस्तद्व्याख्यानंचनप्रकृतोपयोगीतिचिन्त्यम् ॥ २२ ॥ ति० ननुस्त्रियाःकथंराज्याधिष्ठानमतआह—आत्माहीति । अनेन स्त्रीपुरुषोपाध्योःपरस्परावयवमेलनंसूचितं । अतएवलोकेपिसर्वतस्तयोःपरस्परप्रियत्वंदृश्यते ॥ २४ ॥ ति० अन्तपालाः शुद्धान्त-

[पा०] १ क. ख. घ. ङ. छ. झ. ञ. ट. कण्ठेस्स. ग. ज. स्कन्धेस्स. २ क. ख. सीता. ३ ङ. छ. झ. मागत्य. ४ क. च. छ. झ—ठ. चरानार्यो. ५ ङ. झ. ञ. ट. परमायत्ताः. ६ क. ङ. छ. झ. ञ. मैवं. ७ क. तवदर्शनमस्यानः. ग—ट. तावद्दर्शनमस्यानः. ८ च. ञ. राम. ९ ङ. छ. झ. ट. तथा. १० झ. सबाष्पो. ११ ख. अतिवृत्तेसुनिर्मेधे. १२ क. ख. घ—ट. तुराजानं. १३ घ. सप्रमाणेवतिष्ठसि. ङ. छ. झ. ट. नप्रमाणेवतिष्ठसि. १४ ख. ङ. वने. १५ ख. अधिष्ठास्यति. १६ क. ङ. च. छ. झ. ञ. वयमत्रानु. १७ घ. ङ. अन्तःपालाश्च. १८ घ. ज. सदाराः.

भरतश्च सशत्रुघ्नश्चीरवासा वनेचरः ॥ वने वसन्तं काकुत्स्थमनुवत्स्यति पूर्वजम् ॥ २७ ॥
ततः शून्यां गतजनां वसुधां पादपैः सह ॥ त्वमेका शाधि दुर्वृत्ता प्रजानामहिते स्थिता ॥ २८ ॥
न हि तद्भविता राष्ट्रं यत्र रामो न भूपतिः ॥ तद्वनं भविता राष्ट्रं यत्र रामो निवत्स्यति ॥ २९ ॥
न ह्यदत्तां महीं पित्रा भरतः शास्तुमर्हति ॥ त्वयि वा पुत्रवद्वस्तुं यदि जातो महीपतेः ॥ ३० ॥
यद्यपि त्वं क्षितितलाद्गगनं चोत्पतिष्यसि ॥ पितृवंशचरित्रज्ञः सोन्यथा न करिष्यति ॥ ३१ ॥
तत्त्वया पुत्रगर्धिन्या पुत्रस्य कृतमप्रियम् ॥ लोके हि न स विद्येत यो न राममनुव्रतः ॥ ३२ ॥
द्रक्ष्यस्यद्यैव कैकेयि पशुव्यालमृगद्विजान् ॥ गच्छतः सह रामेण पादपांश्च तदुन्मुखान् ॥ ३३ ॥

अथोत्तमान्याभरणानि देवि देहि स्नुषायै व्यपनीय चीरम् ॥
न चीरमस्याः प्रविधीयतेति न्यवारयत्तद्वसनं वसिष्ठः ॥ ३४ ॥

एकस्य रामस्य वने निवासस्त्वया वृतः केकयराजपुत्रि ॥
विभूषितेयं प्रतिकर्मनित्या वसत्वरण्ये सह राघवेण ॥ ३५ ॥

यानैश्च मुख्यैः परिचारकैश्च सुसंवृता गच्छतु राजपुत्री ॥
वस्त्रैश्च सर्वैः सहितैर्विधानैर्नेयं वृता ते वरसंप्रदाने ॥ ३६ ॥

तस्मिंस्तथा जल्पति विप्रमुख्ये गुरौ नृपस्याप्रतिमप्रभावे ॥
नैव स्म सीता विनिवृत्तभावा प्रियस्य भर्तुः प्रतिकारकामा ॥ ३७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे सप्तत्रिंशः सर्गः ॥ ३७ ॥

पधनसहितं । सपरिच्छदं दासदासीशकटादिपरिकरयुक्तम् ॥ २६—२९ ॥ अदत्तां प्रीतिपूर्वकमदत्तां ॥ ३०—३१ ॥ पुत्रगर्धिन्या पुत्रविषयस्नेहयुक्तया ॥ ३२ ॥ पादपांश्चतदुन्मुखानिति वृक्षाणांतदुन्मुखत्वं नाम रामविषयस्नेहासक्तत्वं । तथोपरिष्टात्स्पष्टीभविष्यति । "अपिवृक्षाःपरिम्लानाःसपुष्पाङ्कुरकोरकाः" इति ॥ ३३ ॥ एवंवसिष्ठोभाव्यर्थमुक्त्वाप्रकृतमाह—अथेत्यादि । व्यपनीय निरस्य । प्रविधीयत इतीतिवक्तव्ये प्रविधीयतेतिसन्धिरार्षः ॥ ३४ ॥ न प्रविधीयतइत्येतदुपपादयति—एकस्येति । प्रतिकर्मनित्या अलंकारनियता नित्यमलंकरणयोग्येत्यर्थः ॥३५॥ विधानैः भृङ्गाराद्युपकरणैः ॥ ३६ ॥ प्रतिकारकामा प्रतिकारंसदृशकरणंकामयमाना भर्तृसदृशतयावनवासकरणमिच्छन्तीत्यर्थः।विनिवृत्तभावा चीरपरिधानाद्विनिवृत्तभावा । नबभूवेति ॥ ३७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने सप्तत्रिंशःसर्गः ॥ ३७ ॥

रक्षकाः ॥ २६ ॥ ति० भरतश्चपूर्वजमनुवत्स्यति । दशरथजातस्यतत्स्वभावतायाऔचित्यादितिभावः ॥ २७ ॥ ति० पादपैस्सहेत्यनेन अटवीभूतामितिद्योत्यते ॥ २८ ॥ ति० यदीति "पितॄन्समनुजायन्तेनराः" इतिन्यायादित्याशयः । यदीत्यसन्देहेसंदिग्धवचनं । "वेदाश्चेत्प्रमाणं" इतिवत् ॥ ३० ॥ ति० पितृवंशचरित्रं ज्येष्ठेविद्यमानेकनिष्ठस्यराज्यानर्हत्वरूपं तज्ज्ञः ॥ ३१ ॥ शि० प्रतिकर्मरामसंवन्धिनीसर्वक्रिया तत्रनित्यानित्यसंबन्धवती । रामक्रियानिर्वाहिकेत्यर्थः । स० रामंविनाइयंनस्थास्यतीत्यप्याह—**विभूषितेति** । विभौपरमात्मनिउषितातद्वक्षस्स्थलाश्रिता ॥ ३५ ॥ स० कारः आकारः । नपरिच्छेदकार्येवेत्यनुव्याख्या व्याख्यासुधायांतथाव्याख्यानात् । कारस्य रामाकारस्य प्रति प्रतिकारं । चीरधारणादिनारामाकारसादृश्यंकारयतीतितथा ॥ ३७ ॥ इतिसप्तत्रिंशःसर्गः ॥ ३७ ॥

[पा०] १ क. घ. छ. मनुयास्यति. २ क. निर्वृत्ता. ३ च. ञ. रता. ४ ङ. च. झ. ट. मिच्छति. ५ ख. अथवा. ६ ङ. छ. झ. ञ. ट. लोकेनहिस. ग. घ. च. ज. लोकेहिसन. ७ छ. योरामंनानुवर्तते. ८ ङ. छ. द्रक्ष्यसेद्यैव. ९ क. ट. देहिदेहि. १० घ. च. ट. एतस्य. ११ घ. पुरो. १२ ख. प्रियकारकामा.

अष्टत्रिंशः सर्गः ॥ ३८ ॥

सीतयाचीरधारणेसर्वैर्दुःखादाक्रोशनम् ॥ १ ॥ तदुद्दीपितदुःखेनराज्ञाकैकेय्युपालंभः ॥ २ ॥ गमनोद्यतेनरामेणदशरथं प्रतिसादरंकौसल्यारंक्षणप्रार्थना ॥ ३ ॥

तस्यां चीरं वसानायां नाथवत्यामनाथवत् ॥ प्रचुक्रोश जनः सर्वो धिक्त्वां दशरथं त्विति ॥ १॥
तेन तत्र प्रणादेन दुःखितः स महीपतिः ॥ चिच्छेद जीविते श्रद्धां धर्मे यशसि चात्मनः ॥ २ ॥
स निःश्वस्योष्णमैक्ष्वाकस्तां भार्यामिदमब्रवीत् ॥ कैकेयि कुशचीरेण न सीता गन्तुमर्हति ॥ ३ ॥
सुकुमारी च बाला च सततं च सुखोचिता ॥ नेयं वनस्य योग्येति सत्यमाह गुरुर्मम ॥ ४ ॥

इयं हि कस्या[1]पकरोति किंचित्तपस्विनी राजवरस्य कन्या[2] ॥
या चीरमासाद्य जनस्य मध्ये स्थिता[3] विसंज्ञा श्रमणीव काचित् ॥ ५ ॥
चीराण्यपास्याज्जनकस्य कन्या नेयं प्रतिज्ञा मम दत्तपूर्वा ॥
यथासुखं गच्छतु राजपुत्री वनं समग्रा सह सर्वरत्नैः ॥ ६ ॥
अजीवनार्हेण मया नृशंसा[4] कृता प्रतिज्ञा नियमेन तावत् ॥
त्वया हि बाल्यात्प्रतिपन्नमेतत्तन्मां[5] दहेद्वेणुमिवात्मपुष्पम् ॥ ७ ॥

रामेण यदि ते पापे किंचित्कृतमशोभनम् ॥ अपकारः क इह ते वैदेह्या दर्शितो[6]थ मे ॥ ८ ॥
मृगीवोत्फुल्लनयना मृदुशीला तपस्विनी[7] ॥ अपकारं कमिह[8] ते करोति जनकात्मजा ॥ ९ ॥
ननु पर्याप्तमेतत्ते पापे रामविवासनम् ॥ किमेभिः कृपणैर्भूयः[9] पातकैरपि ते कृतैः ॥ १० ॥
प्रतिज्ञातं मया तावत्त्वयोक्तं देवि शृण्वता ॥ रामं यदभिषेकाय त्वमिहागतमब्रवीः ॥ ११ ॥

त्वांधिगिति दशरथंचुक्रोशेत्यर्थः ॥१॥ श्रद्धां आदरं ॥ २— ४ ॥ तपस्विनी पातिव्रत्यतपोयुक्ता । विसंज्ञा मुग्धा । श्रमणीव तपस्विनीव । श्रमु तपसिखेदे चेतिधातुः ॥ ५ ॥ अपास्यात् त्यजतु । इयंप्रतिज्ञा सीतायाश्चीरधारणपूर्वकवनगमनरूपप्रतिज्ञा । मम मया । तृतीयार्थेषष्ठी । समग्रा वस्त्रालङ्कारसंपूर्णा । सर्वरत्नैः सर्वश्रेष्ठवस्तुभिः ॥ ६ ॥ अजीवनार्हेण जीवनानर्हेण आसन्नमरणेनेतियावत् । मया नृशंसा क्रूरा । प्रतिज्ञा त्वत्प्रार्थितंकरिष्यामीतिशपथपूर्विकाप्रतिज्ञा । तावत् प्रथमं । कृता । त्वयाहिदत्तवरद्वयया बाल्यात् बालिशत्वात् । एतत् प्रतिज्ञानं । नियमेन भरताभिषेकरामविवासनरूपविषयव्यवस्थया । प्रतिपन्नं निश्चितं । तत् मत्कृतप्रतिज्ञानं । आत्मपुष्पंवेणुमिव मांदहेदितियोजना ॥ ७ ॥ कोपेरामापराधमभ्युपेत्याह— रामेणेति । अशोभनं अपराधः । इह विवासे । दर्शितः संपादितइतियावत् ॥ ८ ॥ मृगीवोत्फुल्लनयनेत्यनेन मौग्ध्यमुक्तं। मृदुशीलेत्यनेन अपराधभीरुत्वमुक्तम् ॥ ९ ॥ पर्याप्तं यावदात्मभाविनरकानुभवायालम् ॥ १०॥ अभिषेकाय इहागतंरामंत्वंयदब्रवीः "सप्तसप्तचवर्षाणिदण्डकारण्यमाश्रितः । अभिषेकमिमं

ति० तद्दूरानन्तर्गतायामीदृशमनिष्टव्यवहारमनिवारयंस्तूष्णींतिष्ठतीतिजनाक्रोशः । शि० त्वां सर्वसंमतिविलक्षणसंमतिदातृत्वेनसर्वतोभिन्नांमन्थरां । धिक् इतिसर्वोजनः दशरथं अनाथवत्प्रचुक्रोश कथयामास । अयमन्यपर्यायोऽदन्तस्त्वशब्दः ॥ १ ॥ दि० वनस्य वनगमनयोग्यचीरस्य ॥ ४ ॥ शि० किंचित् अनिष्टमितिशेषः । ति० कस्यापिकिंचित्करोति काकुः । अपितुनेत्यर्थः ॥ ५ ॥ स० समग्रा रामार्धाङ्गत्वाद्रामेणसहवनगमनेसमग्रत्वंसेत्स्यति ॥६॥ ति० नृशंसा अतिक्रूरा । प्रतिज्ञा रामवनवासविषया । नियमेन शपथपूर्वं । सातावत्कृता । यदेतद्धियतोधिकं सीताचीरग्रहणंत्वया प्रतिपन्नं आरब्धं । तत् बाल्यात् अज्ञानादेव । नात्रते सामर्थ्यं । तस्माद्वेणुमात्मपुष्पमिव त्वत्कृतातिप्रवृत्तिस्त्वां मादहेत् मानाशयतु । यद्वा एषा तवप्रवृत्तिः तववैधव्यप्राप्तये मा मां दहेत् नाशयेत् ॥ ७ ॥ ती० भूयोप्यधिकं ते त्वया । कृतैः अनुष्ठीयमानैः । कृपणैः अनिर्वाच्यदुःखप्रदैः । एभिः सीताप्रव्राजना-

[पा०] १ ङ. छ. ज. झ. ट. कस्यापि. २ ङ—ट. पुत्री. ३ ङ. छ. झ. ट. जाता. ४ क. नृशंसे. ५ झ. ञ. तन्मा. ६ ग. ङ—ट. दर्शितोऽधमे. ७ क. ग. ङ—ट. मनस्विनी. घ. यशस्विनी. ८ ख. ङ. छ—ञ. कमिव. ग. घ. न. किमिव. ९ ङ. छ. झ. ट. मेवंते. ख. ग. घ. ज. मेकंते.

तत्त्वेतत्समतिक्रम्य निरयं गन्तुमिच्छसि ॥ मैथिलीमपि या हि त्वमीक्षसे चीरवासिनीम् ॥ १२ ॥
इतीव राजा विलपन्महात्मा शोकस्य नान्तं स ददर्श किंचित् ॥
भृशातुरत्वाच्च पपात भूमौ तेनैव पुत्रव्यसने निमग्नः ॥ १३ ॥
एवं ब्रुवन्तं पितरं रामः संप्रस्थितो वनम् ॥ अवाक्छिरसमासीनमिदं वचनमब्रवीत् ॥ १४ ॥
इयं धार्मिक कौसल्या मम माता यशस्विनी ॥ वृद्धा चाक्षुद्रशीला च न च त्वां देव गर्हते ॥१५॥
मया विहीनां वरद प्रपन्नां शोकसागरम् ॥ अदृष्टपूर्वव्यसनां भूयः संमन्तुमर्हसि ॥ १६ ॥
पुत्रशोकं यथा नर्च्छेत्त्वया पूज्येन पूजिता ॥ मां हि संचिन्तयन्तीयमपि जीवेत्तपस्विनी ॥ १७॥
इमां महेन्द्रोपम जातगर्धिनीं तथा विधातुं जननीं ममार्हसि ॥
यथा वनस्थे मयि शोककर्शिता न जीवितं न्यस्य यमक्षयं व्रजेत् ॥ १८ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डेऽष्टत्रिंशः सर्गः ॥ ३८ ॥

एकोनचत्वारिंशः सर्गः ॥ ३९ ॥

दशरथाज्ञयासुमन्त्रेणरामस्यवनयापनायरथानयनम् ॥ १ ॥ सीतयाराजाज्ञयाधनाध्यक्षोपनीताभरणैःस्वगात्रालंकरणम् ॥ २ ॥ कौसल्ययासीतांप्रतिसत्यसतीलक्षणनिरूपणपूर्वकंश्रीरामेराज्यप्रच्युतिनिमित्तकावमानाकरणोपदेशेतयातांप्रतिस्वस्य पातिव्रत्यधर्मज्ञानप्रकाशनपूर्वकंतदुक्तानुष्ठानोक्तिः ॥ ३ ॥ रामेणकौसल्यासमाश्वासनपूर्वकमितरमातृःप्रतिपाक्षिकापराधक्षमापनेताभिर्दुःखादुच्चैरुत्क्रोशनम् ॥ ४ ॥

रामस्य तु वचः श्रुत्वा मुनिवेषधरं च तम् ॥ समीक्ष्य सह भार्याभी राजा विगतचेतनः ॥ १ ॥
नैनं दुःखेन संतप्तः प्रत्यवैक्षत राघवम् ॥ न चैनमभिसंप्रेक्ष्य प्रत्यभाषत दुर्मनाः ॥ २ ॥
स मुहूर्तमिवासंज्ञो दुःखितश्च महीपतिः ॥ विललाप महाबाहू राममेवानुचिन्तयन् ॥ ३ ॥

त्यक्त्वाजटाचीरधरोवस" इतियदब्रवीः । त्वयोक्तंतच्छृण्वतामया तावत् रामविवासनमात्रमेवप्रतिज्ञातं नतुसीताप्रव्राजनमितिभावः ॥ ११ ॥ मयाप्रतिज्ञातमतिक्रम्य निरयं नरकं । गन्तुमिच्छसि । कुतः हि यस्मात् । यात्वं मैथिलीमपिचीरवासिनीमीक्षसे वाञ्छसि ॥ १२—१३ ॥ संप्रस्थितः गन्तुमुद्यतः ॥१४—१५ ॥ प्रपन्नां प्राप्तां । भूयः अतिशयेन । संमन्तुं संमानयितुं । ज्येष्ठपत्नीत्वेनपूर्वमेवसंमानिता अद्यविशेषेणमद्याच्ञयेतिभावः ॥ १६ ॥ पुत्रशोकंयथानर्च्छेत्तथासंमन्तुमर्हसीतिपूर्वेणसंवन्धः । यद्वा उत्तरेणैवान्वयः । मांसंचिन्तयन्तीयंतपस्विनी अपिजीवेत् यदिजीवेत्तदात्वयापूजितासती पुत्रशोकंयथानर्च्छेन्नगच्छेत्तथाकुर्वित्यर्थः । नमच्छोकाद्यथानश्येत्त्वयापूज्येनपूजिता । मांहिसंचिन्तयन्तीयंत्वयिजीवेत्तपस्विनीत्यपिपाठः । पूर्वार्धस्यपूर्वेणान्वयः । त्वयिविषयेजीवेत् मांचिन्तयन्त्यपित्वदुपलालनेनजीवेदित्यर्थः । यद्वा मांसंचिन्तयन्ती मच्छोकाद्यथानश्येत्तथात्वयापूजिता त्वयिजीवेदित्येकंवाक्यम् ॥ १७ ॥ जातगर्धिनीं पुत्रदर्शनकाङ्क्षिणीमित्यर्थः । न्यस्य त्यक्त्वा ॥ १८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने अष्टत्रिंशः सर्गः ॥ ३८ ॥

विगतचेतनः अभूदितिशेषः ॥ १—३ ॥

दिरूपैःपातकैः किंकिमनुभविष्यसिवा नजानामीतिशेषः ॥ १० ॥ ति० ईक्षसे वाञ्छसि । "सऐक्षतवहुस्यांप्रजायेय" इत्यादाविच्छार्थस्येक्षतेर्दर्शनात् ॥ १२ ॥ ति० संप्रस्थितः एवंवादात्तयासहगमनेकृतानुमतिकत्वात्तयागन्तुंप्रवृत्तः ॥ १४ ॥ ति० नच गर्हते त्वदाज्ञयामयिवनंगच्छत्यपीतिशेषः । सत्यरक्षणंधर्मइतिज्ञात्वेतिभावः ॥ १५ ॥ स० संमन्तुं समाधानंकर्तुं ॥ १६ ॥ ति० जातगर्धिनींजातःमद्दर्शनविपयोगर्धःअभिलाषःयस्यास्तां । स० जातगर्धिनीं पुत्रभूतंमांसंनिधानेवस्तुमाकाङ्क्षन्तीं ॥ १८ ॥ इत्यष्टत्रिंशस्सर्गः ॥ ३८ ॥

[पा०] १ ख. मर्हसि. २ ग. ञ. व्यसनेनमग्नः. ३ ख. सप्रस्थितो. ४ क. च. नत्वांदेवविगर्हते. ङ. नतुत्वां. ५ क. संचिन्तयन्तीया. ६. ख. सरामस्य. ७ च. सुतं. घ. यतः. ८ ख. तेन. घ. नैव. ९ क. दुःखितस्तु.

मन्ये खलु मया पूर्वं विवत्सा बहवः कृताः ॥ प्राणिनो हिंसिता वाऽपि [1]तस्मादिदमुपस्थितम् ॥४॥
न त्वेवानागते काले देहाच्च्यवति जीवितम् ॥ कैकेय्या क्लिश्यमानस्य मृत्युर्मम न विद्यते ॥ ५ ॥
[2]योऽहं पावकसंकाशं पश्यामि पुरतः स्थितम् ॥ विहाय वसने सूक्ष्मे तापसा[3]च्छादमात्मजम् ॥ ६॥
[4]एकस्याः खलु कैकेय्याः कृतेऽयं क्लिश्यते जनः ॥ स्वार्थे प्रयतमानायाः संश्रित्य निकृतिं त्विमाम् ॥७
एवमुक्त्वा तु वचनं बाष्पेण [6]पिहितेन्द्रियः ॥ रामेति सकृदेवोक्त्वा व्याहर्तुं न शशाक ह[7] ॥८॥
संज्ञां तु प्रतिलभ्यैव मुहूर्तात्स महीपतिः ॥ नेत्राभ्यामश्रुपूर्णाभ्यां सुमन्त्रमिदमब्रवीत् ॥ ९ ॥
औपवाह्यं रथं [8]युक्त्वा त्वमायाहि हयोत्तमैः ॥ प्रापयैनं महाभागमितो [9]जनपदात्परम् ॥ १० ॥
[10]एवं मन्ये गुणवतां गुणानां फलमुच्यते ॥ [11]पित्रा मात्रा च यत्साधुर्वीरो निर्वास्यते वनम् ॥ ११ ॥
राज्ञो वचनमाज्ञाय सुमन्त्रः शीघ्रविक्रमः ॥ योजयित्वाऽऽययौ तत्र रथमश्वैरलंकृतम् ॥ १२ ॥
[12]तं रथं राजपुत्राय सूतः कनकभूषितम् ॥ आचचक्षेऽञ्जलिं कृत्वा युक्तं परमवाजिभिः ॥ १३ ॥
राजा सत्वरमाहूय व्यापृतं वित्तसंचये ॥ उवाच [13]देशकालज्ञं [14]निश्चितं सर्वतः [15]शुचिम् ॥ १४ ॥
वासांसि च [16]महार्हाणि भूषणानि [17]वराणि च ॥ [18]वर्षाण्येतानि संख्याय वैदेह्याः क्षिप्रमानय ॥ १५॥
नरेन्द्रेणैवमुक्तस्तु गत्वा कोशगृहं ततः ॥ प्रायच्छत्सर्वमाहृत्य सीतायै [19]सममेव तत् ॥ १६ ॥
सा सुजाता सुजातानि वैदेही प्रस्थिता वनम् ॥ भूषयामास गात्राणि तैर्विचित्रैर्विभूषणैः ॥ १७॥
[20]व्यराजयत वैदेही वेश्म तत्सुविभूषिता ॥ उद्यतोंशुमतः काले खं प्रभेव विवस्वतः ॥ १८ ॥
तां भुजाभ्यां परिष्वज्य श्वश्रूर्वचनमब्रवीत् ॥ अनाचरन्तीं कृपणं मूर्ध्न्युपाघ्राय मैथिलीम् ॥ १९ ॥
असत्यः सर्वलोकेऽस्मिन्सततं सत्कृताः प्रियैः ॥ भर्तारं नानुमन्यन्ते विनिपात[21]गतं स्त्रियः ॥ २० ॥

विवत्साः धेनवइतिशेषः । उपस्थितमित्यत्रेतिकरणंद्रष्टव्यं । इतिमन्यइत्यन्वयः ॥४॥ काले देहारम्भककर्मविनाशकाले ॥ ५—६ ॥ निकृतिः शाठ्यं । "कुसृतिर्निकृतिःशाठ्यं" इत्यमरः । निकृतिंसंश्रित्यस्वार्थेप्रयतमानायाइत्यन्वयः ॥ ७—८ ॥ नेत्राभ्यामित्युपलक्षणे तृतीया ॥ ९ ॥ औपवाह्यं उपवहनमात्रयोग्यं । युद्धानर्हमित्यर्थः । राजयोग्यमितिवार्थः । युक्त्वा योजयित्वा ॥१०॥ गुणवतां पुंसांसंबन्धिगुणानां फलंयदुच्यते तत् एवं एवंविधं । मन्ये अननुरूपंमन्ये । एवंशब्दार्थमाह—पित्रेति । यस्मात्साधुर्वीरः पित्रामात्राच वनंप्रतिनिर्वास्यते । अतो गुणा नार्जनीयाएवेतिभावः ॥ ११ ॥ शीघ्रविक्रमः शीघ्रपदविक्षेपः । योजयित्वाययावित्यत्र आययावितिपदच्छेदः ॥१२—१३ । वित्तसंचये कोशगृहे । व्यापृतं अध्यक्षत्वेनव्यापृतं धनाध्यक्षमित्यर्थः । निश्चितं यावदवस्थिततत्तद्वस्तुविषयनिश्चितज्ञानवन्तं । शुचिं बाह्यान्तरशुद्धियुक्तं ॥ १४ । वर्षाण्येतानि संख्याय गणयित्वा । चतुर्दशवर्षपर्याप्तान्यानयेत्यर्थः ॥१५॥ प्रायच्छत् कोशाध्यक्षइतिशेषः समं युगपत् । तत्सर्वमित्यन्वयः ॥ १६ ॥ सुजात सुजन्मा । अयोनिजेतियावत् । "समःसमविभक्ताङ्गः" इतिवत्सामुद्रिकोक्तलक्षणवत्तयाउत्पन्नानि ॥ १७ । अंशुमतः प्रशस्तकिरणस्य ॥ १८ ॥ श्वश्रूः कौसल्या कृपणं क्षुद्रं । अनाचरन्तीं अकुर्वतीं ॥ १९ ॥ असत्य कुलटाः । विनिपातगतं स्वस्थानात्प्रच्युतिं प्राप्तमित्यर्थः

स० विवत्साः विगतपुत्राः ॥ ४ ॥ **ति०** आच्छाद्यतेअनेनेत्याच्छादः । तापसानामाच्छादोयस्यतं ॥ ६ ॥ **ति०** साधुर्वीरे रामःपित्रामात्राचवनंनिर्वास्यतेयत् अतोगुणवतांपुंसांगुणानांफलं एवंनिर्वासनरूपमुच्यते । शास्त्रेणेतिमन्येइतिदुःखातिशयादुक्तिः उत्प्रेक्षालङ्कारः ॥११॥ **ति०** आचचक्षे रथउपस्थितइत्युक्तवान् ॥१३॥ **ति०** सर्वतश्शुचिः इहामुत्रानृणः ॥१४॥ **ति०** एतानि

[पा०] १ ङ. छ. झ. ट. तन्मामिदं. २ घ. सोहं. ज. योयं. ३ ङ. च. ञ. आच्छादनात्मजं. ४ ख. एतस्याः. ५ ङ. छ. ट. खिद्यते. ६ झ. विहतेन्द्रियः. ग. ज. पिहितेक्षणः. ७ छ. झ. ट. सः. ८ च. ञ. योज्य. ९ घ. जनपदाद्बहिः. १० घ. पापं. ११ ज. मात्रापित्रा. १२ तंरथमितिश्लोकेपूर्वोत्तरार्धयोःपौर्वापर्यं छ. पुस्तकेदृश्यते. १३ क—ङ. छ. ज. झ. ट. देशकालज्ञो. १४ घ. निष्ठितं. १५ ङ. च. छ. झ. शुचिः. १६ ग. ङ. च. छ. झ. ञ. ट. वरार्हाणि. १७ छ. झ. महान्तिच. १८ ख. वर्षाणितानि. १९ क. ङ. छ. ज. झ. ट. क्षिप्रमेव. क. सर्वमेव. २० घ. व्यराजयच. २१ घ. गताः.

एष स्वभावो नारीणामनुभूय पुरा सुखम् ॥ अल्पामप्यापदं प्राप्य दुष्यन्ति प्रजहत्यपि ॥ २१ ॥
असत्यशीला विकृता दुर्ग्राह्यहृदयाः सदा ॥ युवत्यः पापसंकल्पाः क्षणमात्राद्विरागिणः ॥ २२ ॥
न कुलं न कृतं विद्यां न दत्तं नापि संग्रहम् ॥ स्त्रीणां गृह्णाति हृदयमनित्यहृदया हि ताः ॥२३॥
साध्वीनां हि स्थितानां तु शीले सत्ये श्रुते शमे ॥ स्त्रीणां पवित्रं परमं पतिरेको विशिष्यते ॥२४॥
स त्वया नावमन्तव्यः पुत्रः प्रव्राजितो मम ॥ तव दैवतमस्त्वेष निर्धनः सधनोपि वा ॥ २५ ॥
विज्ञाय वचनं सीता तस्या धर्मार्थसंहितम् ॥ कृताञ्जलिरुवाचेदं श्वश्रूमभिमुखे स्थिताम् ॥ २६ ॥
करिष्ये सर्वमेवाहमार्या यदनुशास्ति माम् ॥ अभिज्ञाऽस्मि यथा भर्तुर्वर्तितव्यं श्रुतं च मे ॥ २७ ॥
न मामसज्जनेनार्या समानयितुमर्हति ॥ धर्माद्विचलितुं नाहमलं चन्द्रादिव प्रभा ॥ २८ ॥
नातन्त्री वाद्यते वीणा नाचक्रो वर्तते रथः ॥ नापतिः सुखमेधेत या स्यादपि शतात्मजा ॥२९॥
मितं ददाति हि पिता मितं माता मितं सुतः ॥ अमितस्य हि दातारं भर्तारं का न पूजयेत् ॥३०॥

नानुमन्यन्ते नगणयन्ति ॥ २० ॥ दुष्यन्ति विकृता भवन्तीत्यर्थः । प्रजहति "अदभ्यस्तात्" इत्यदादेशः ॥ २१ ॥ विरागिणः विरागिण्यः । क्लीबभावआर्षः ॥ २२ ॥ कुलं आभिजात्यं । कृतं उपकारं । दत्तं संमानपूर्वकवस्त्राभरणादिदानं । संग्रहं अग्निसाक्षिकपाणिग्रहणं । अनित्यहृदयाः चञ्चलहृदयाः । असतीनां भर्तुःकुलादिकंनसंतोषाय किंतुधनमेवेतिभावः । एवं कैकेयी व्याजेननिन्दिता ॥२३ ॥ स्थूणानिखननन्यायेनपातिव्रत्यदृढीकरणार्थमसतीनां स्वभावमुक्त्वा सतीनांस्वभावमाह—साध्वीनामिति । शीले कुलोचितचरित्रे । श्रुते गुरुजनकृतोपदेशे । शमे शान्तौच। स्थितानांसाध्वीनां पतिव्रतानांस्त्रीणां । परमंपवित्रं परमंपावनं। पतिरेकः पतिरेव। विशिष्यते उत्कृष्टोभवति ॥२४—२५॥ धर्मार्थसंहितं धर्मरूपप्रयोजनसहितं । अभिमुखे अग्रइत्यर्थः ॥ २६ ॥ भर्तुः भर्तरिविषये । वर्तितव्यं शुश्रूषितव्यं । मे मया । श्रुतंच । मातापि[illegible]मितिशेषः ॥ २७ ॥ समानयितुं समानांकर्तुं नालं अक्षमेत्यर्थः ॥ २८ ॥ तन्त्री वीणासिरा । शतात्मजा पुत्रशतवती ॥२९॥ मितं अल्पं ऐहिकमात्रमित्यर्थः ।

वर्षाणि चतुर्दशवर्षाणि । एतेन एतावानेववनवासोनाधिकइतिपुनर्दार्ढ्यायध्वनितम् ॥ १५॥ ति० असत्यशीलाः असत्यवचनशीलाः । विकृताः विकृतोपेताक्ष्यादिव्यापाराः । दुर्गाः दुष्टाभिसरणादिगतिशीलाः । अहृदयाः स्वभर्तरिविरसाः । असत्यः कुलटाः । पापेपरपुरुषप्रसङ्गादौसंकल्पःमनोव्यापारःयासां । क्षणमात्रविरागिणः क्षणमात्रविरागिण्यः । अल्पनिमित्ततः क्षणमात्रेणत्यक्तानुरागाः । अविश्वसनीयस्नेहाइतियावत् । ताः असत्यइतिविधेयं । शि० विकृताः दर्शनमात्रेणविकारोत्पादिकाः । दुर्गाः दुरवगाह्याभिप्रायाः । पापसंकल्पाः पापेपुरपुरुषप्रसङ्गादिपुसंकल्पोयासांताः । अतएवक्षणमात्रविरागिणः पुरुषान्तरलावण्यमवलोक्यततोपितूर्णंविरक्तचित्ताः । असत्यः स्त्रियोभवन्तीतिशेषः । स० विकृताः भ्रूविक्षेपादिविकारवत्यः । क्षणमात्रविरागिणः क्षणमात्रे स्नेहरहितपुरुषस्यंदुर्ग्राह्यहृदयाः । यद्वा क्षणमात्रविरागिणः तद्वद्विद्यमानाः । अन्तरेणापिवर्तिंतदर्थोऽवगम्यते । यथोक्तं "बहुगणवतुडतिसंख्या" इतिसूत्रव्याख्यानावसरेमहाभाष्ये "सतर्हिवतिनिर्देशःकर्तव्यः नकर्तव्यः । नह्यन्तरेणवतिमतिदेशोगम्यते । अन्तरेणवतिमतिदेशोगम्यते । तद्यथा । एषब्रह्मदत्तःअब्रह्मदत्तंब्रह्मदत्तइत्याह । तेनमन्यामहेब्रह्मदत्तवदयंभवति" इति ॥ २२ ॥ स० स्त्रीणांहृदयं कर्तृ । तथाचस्त्रीणांमनः कुलादिकंनगृह्णाति । इष्टसाधनत्वेनेतिशेषः । संग्रहइतिपाठेपूर्वार्धोक्तानिपदानिप्रथमान्तानि । हृदयंकर्म । तथाचकुलंस्त्रीणांहृदयंनगृह्णातीत्यादिपृथगन्वयः । पूर्वोत्तरसाहचर्याद्विद्ययापिनजन्वेति ॥ २३ ॥ स० सः रामः । पुत्रः मम ॥ २५ ॥ ति० विद्यते वादनसमर्थेति गमनसमर्थइतिचशेषः ॥ २९ ॥

[पा०] * झ. दुर्गाअहृदयाः. १ छ. झ. ञ. ट. असत्यः. २ ख. ङ. छ. झ. ट. मात्रविरागिणः. ३ ख. ङ. च. झ. ञ. विद्यानदत्तंनापिसंग्रहः. ४ क. ख. ङ. झ. ञ. ट. साध्वीनांतु. च. साध्वीनांसु. ५ घ. स्थितानांहि. ६ ज. सत्येशीले. ७ ङ. छ. झ. ञ. ट. स्थिते. क. ग. ज. दमे. ८ ङ. च. छ. झ. ञ. देवसमस्त्वेष. ग. ज. दैवतमेवैष. घ. दैवतमित्येष. ९ घ. सधनोनिर्धनोपि. १० घ. श्रुत्वा. ११ छ. झ. कृत्वाञ्जलिमुवाचेदं. १२ क. ग. घ. झ. स्थिता. १३ क. च. जनेनार्ये. १४ क., ज. मर्हसि. १५ क. घ. नालमहं. १६ ङ. छ. झ. ञ. ट. विद्यते. १७ ङ. च. छ. झ. ञ. ट. विद्यते. १८ ङ. ञ. छ. झ. ञ. भ्राता.

साऽहमेवंगता श्रेष्ठा श्रुतधर्मपरावरा ॥ आर्ये किमवमन्येऽहं स्त्रीणां भर्ता हि दैवतम् ॥ ३१ ॥
सीताया वचनं श्रुत्वा कौसल्या हृदयंगमम् ॥ शुद्धसत्त्वा मुमोचाश्रु सहसा दुःखहर्षजम् ॥ ३२ ॥
तां प्राञ्जलिरभिक्रम्य मातृमध्येऽतिसत्कृताम् ॥ रामः परमधर्मात्मा मातरं वाक्यमब्रवीत् ॥ ३३ ॥
अम्ब मा दुःखिता भूस्त्वं पश्य त्वं पितरं मम ॥ क्षयो हि वनवासस्य क्षिप्रमेव भविष्यति ॥ ३४ ॥
सुप्तायास्ते गमिष्यन्ति नव वर्षाणि पञ्च च ॥ सा समग्रमिह प्राप्तं मां द्रक्ष्यसि सुहृद्वृतम् ॥ ३५ ॥
एतावदभिनीतार्थमुक्त्वा स जननीं वचः ॥ त्रयश्शतशतार्धाश्च ददर्शावेक्ष्य मातरः ॥ ३६ ॥
ताश्चापि स तथैवार्ता मातृर्दशरथात्मजः ॥ धर्मयुक्तमिदं वाक्यं निजगाद कृताञ्जलिः ॥ ३७ ॥
संवासात्परुषं किंचिदज्ञानाद्वाऽपि यत्कृतम् ॥ तन्मे समनुजानीत सर्वाश्चामन्त्रयामि वः ॥ ३८ ॥
वचनं राघवस्यैतद्धर्मयुक्तं समाहितम् ॥ शुश्रुवुस्ताः स्त्रियः सर्वाः शोकोपहतचेतसः ॥ ३९ ॥
जज्ञेऽथ तासां संनादः क्रौञ्चीनामिव निस्वनः ॥ मानवेन्द्रस्य भार्याणामेवं वदति राघवे ॥ ४० ॥

मुरजपणवमेघघोषवद्दशरथवेश्म बभूव यत्पुरा ॥
विलपितपरिदेवनाकुलं व्यसनगतं तदभूत्सुदुःखितम् ॥ ४१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे एकोनचत्वारिंशः सर्गः ॥ ३९ ॥

अमितस्य ऐहिकामुष्मिकफलस्य ॥ ३० ॥ एवंगता एवंविधपातिव्रत्यधर्मप्राप्ता । श्रेष्ठाश्रुतधर्मपरावरा श्रेष्ठाभ्योमात्रादिपतिव्रताभ्यःसम्यक्छ्रुतसामान्यविशेषरूपधर्मोत्कर्षा । किमवमन्ये भर्तारमितिसिद्धं ॥ ३१ ॥ शुद्धसत्त्वा सत्त्वगुणाढ्या । दुःखहर्षजं रामारण्यगमनप्रयुक्तंदुःखं । दृढपातिव्रत्ययुक्तसीतावचःश्रवणजो हर्षः ॥ ३२ ॥ अभिक्रम्य प्रदक्षिणीकृत्य ॥ ३३ ॥ वनवासस्य वनवासकालस्य ॥ ३४ ॥ सुप्तायाः एकस्यांरात्रौसंप्राप्तस्वापायाइवेत्यर्थः । समग्रं निर्वर्तितपितृवचनं संपूर्णमनोरथंवा ॥ ३५॥ अभिनीतार्थं क्रोडीकृतसर्वार्थमित्यर्थः । त्रयश्शतशतार्धाश्च त्रयश्शतं त्रिशतं त्रेस्त्रयसादेशः । शतार्धं पञ्चाशत् त्रयश्शतशतार्धप्रमाणंयासांतास्तथोक्ताः । मातरः मातृः । द्वितीयार्थेप्रथमा । अवेक्ष्य वक्तव्यमालोच्य । ददर्शेति संबन्धः ॥ ३६ ॥ तथैवार्ताः कौसल्येवदुःखिताः ॥ ३७ ॥ संवासात् एकत्रसहवासाच्चिरपरिचयादित्यर्थः । समनुजानीत क्षान्तमित्यनुज्ञांकुरुतेत्यर्थः । आमन्त्रयामि आपृच्छामि ॥ ३८ ॥ समाहितं समीचीनार्थयुक्तमित्यर्थः ॥ ३९—४० ॥ मुरजपणवाएवमेघास्तेषांघोषास्तद्वत् । यद्वा मुरजादिसहपाठात् मेघोपिवाद्यविशेषः । मुरजश्चपणवश्चमेघश्चमुरजपणवमेघं "द्वन्द्वश्चप्राणितूर्यसेनाङ्गानां" इत्येकवद्भावः । त-

---

स० एवंगता इत्थंज्ञानवती भर्तैवदैवतमितिज्ञानवतीतियावत् । भावेक्तः । गत्यर्थानांज्ञानार्थत्वात् एवंगतंज्ञानंयस्यास्सातथा । श्रेष्ठा सत्कुलप्रसूता । श्रुतौधर्माणांपरावरौययासा । श्रेष्ठेइतिक्वचित्पाठः । तदाकौसल्यासंबोधनं ॥ ३१ ॥ मातृमध्ये सार्धत्रिशतमातृमध्ये ॥ ३३॥ **स०** अंब इतःपरं दुःखिताभूत्वा राजानंमापश्येः । कुतः वनवासस्यसकाशात् तस्यक्षयोपिक्षिप्रंभविष्यतियतो तइत्यप्यर्थः ॥ ३४ ॥ **स०** समग्रंसीतासहितं । **शि०** समग्रं समीचीनःअग्रःअग्रगन्तासंदेशहरइत्यर्थः । यस्यतं ॥ ३५ ॥ **स०** त्रयश्शतानिशतार्धंचसंख्यापरिमाणंयासांतास्तथा । त्रेस्त्रयसादेशआर्षः । तथाऽर्धशब्दस्यपरनिपातश्च । अवेन कान्त्या ईक्ष्याः ताश्चतामातरश्चेतिकर्मधारयः । **ति०** एवंभूताः या मातरस्सन्ति ताः अवेक्ष्य विविच्य । ददर्शेत्यर्थः ॥ ३६ ॥ **स०** दशरथवेश्मसुदुःखितमभूत् । ग्रामोगतआगतइतिवदुपचारः । **शि०** विलपितपरिदेवनाकुलं विलपितैःक्रोस्मात्रक्षितेत्यादिवाक्यैः यत्परिदेवनंतेनाकुलंव्याप्तं । बभूव । अतएव व्यसनगतं विविधकर्मकचित्तचालनप्रापकं । अतएवसुदुःखितं अतिदुःखप्रदं । भूत् । श्रोतॄणामितिशेषः ॥ ४१ ॥ इत्येकोनचत्वारिंशस्सर्गः ॥ ३९ ॥

[पा०] १ क. ह्येषा. २ घ. परायणा. ३ ख. घ. ङ. ज—ट. मन्येयं. ४ ख. ग. ङ. छ. झ. ट. स्त्रियाभर्ता. ५ ख. दुःखहर्षयोः. ६ क. ख. रभिप्रेत्य. ङ. छ. झ. ट. रभिप्रेक्ष्य. ७ क—घ. ज. धर्मज्ञे. ८ क. ख. घ. ङ. च. ञ. भूलापश्यत्वं. छ. झ. ट. भूलापश्येस्त्वं. ९ ख. घ—छ. झ. ञ. ट. क्षयोपि. १० क. सासमक्षमिह. ङ. झ. ञ. ट. समग्रमिहसंप्राप्तं. ११ क. ग. ङ—ञ. शतार्धाहि. १२ घ. ताश्चैव. १३ ङ. च. झ. ञ. ट. दज्ञानादपि. १४ घ. राघवस्यैवतत्वयुक्तं.

चत्वारिंशः सर्गः ॥ ४० ॥

रामलक्ष्मणाभ्यांसीतयाचदशरथायप्रणामप्रदक्षिणकरणम् ॥ १ ॥ रामेणसीतयासहकौसल्यापादाभिवादनम् ॥ २ ॥ लक्ष्मणेनकौसल्याभिवादनपूर्वकंसुमित्राचरणप्रणामः ॥ ३ ॥ सुमित्रयालक्ष्मणायहितोपदेशः ॥ ४ ॥ सीतारामलक्ष्मणेपुरथमधिरूढेपुसुमन्त्रेणरथाश्वचोदना ॥ ५ ॥ पौरैःसर्वैःकृच्छ्राद्रामरथमनुधावद्भिरपिरथस्यवेगवत्तयानैराश्यात्ततोनिवर्तनम् ॥ ६ ॥ कौसल्यादिभिःसहरामपथमनुधावतादशरथेनद्रुततरंधावद्रथानुधावनाशक्त्यासयुक्तिकसचिवोक्त्याचमध्येपथमवस्थानम् ॥ ७ ॥

अथ रामश्च सीता च लक्ष्मणश्च कृताञ्जलिः ॥ उपसंगृह्य राजानं चक्रुर्दीना: प्रदक्षिणम् ॥ १ ॥
तं चापि समनुज्ञाप्य धर्मज्ञः सीतया सह ॥ राघवः शोकसंमूढो जननीमभ्यवादयत् ॥ २ ॥
अन्वक्षं लक्ष्मणो भ्रातुः कौसल्यामभ्यवादयत् ॥ अथ मातुः सुमित्राया जग्राह चरणौ पुनः ॥३॥
तं वन्दमानं रुदती माता सौमित्रिमब्रवीत् ॥ हितकामा महाबाहुं मूर्ध्न्युपाघ्राय लक्ष्मणम् ॥ ४ ॥
सृष्टस्त्वं वनवासाय स्वनुरक्तः सुहृज्जने ॥ रामे प्रमादं मा कार्षीः पुत्र भ्रातरि गच्छति ॥ ५ ॥
व्यसनी वा समृद्धो वा गतिरेप तवानघ ॥ एप लोके सतां धर्मो यज्ज्येष्ठवशगो भवेत् ॥ ६ ॥
इदं हि वृत्तमुचितं कुलस्यास्य सनातनम् ॥ दानं दीक्षा च यज्ञेषु तनुत्यागो मृधेषु च ॥
[ज्येष्ठस्याप्यनुवृत्तिश्च राजवंशस्य लक्षणम् ॥ ७ ॥]

द्वीपवत् । विलपितपरिदेवनाकुलं विविधानिलपितानिरामगुणकैकेयीदुर्गुणप्रतिपादकवाक्यानियस्मिंस्तद्विलपितं परिदेवनं रोदनशब्दः तेनाकुलं । व्यसनगतं आपद्गतं । अतएवदुःखितमभूत् ॥ ४१ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने एकोनचत्वारिंशः सर्गः ॥ ३९ ॥

उपसंगृह्य पादग्रहणपूर्वकंप्रणम्य । दीनाः वृद्धयोर्मातापित्रोःशुश्रूषानलब्धेतिदीनाः ॥ १—२ ॥ अन्वक्षं अनुपदं । "अन्वगन्वक्षमनुगेनुपदं" इत्यमरः ॥ ३ ॥—४॥ सृष्टस्त्वं दैवेनेतिशेषः । भ्रातरिगच्छति देव्यासहपुष्पितवनदर्शनपारवश्येनगच्छतिसतीत्यर्थः । प्रमादं अनवधानं । माकार्षीः सावधानोभवेत्यर्थः । सृष्टइति यथाकौसल्यालोकरक्षणार्थंपुत्रंप्रासूत एवंमयासुहृज्जनेरामे स्वनुरक्तस्त्वंवनवासायसृष्टः वनेरामानुवर्तनायोत्पादितः । अतोरामेगच्छतिप्रमादंमाकार्षीः रामगमनसौन्दर्याकृष्टमनस्कतयारक्षणकर्मण्यनवहितोमाभूरित्यर्थः । यद्वा रामेवनंगच्छति त्वमत्रैवमातिष्ठेतिभावः ॥ ५ ॥ रामगमनेगन्तव्यतायांनिमित्तमाह—व्यसनीति । गतिस्त्वेधर्मशास्त्रानुमतिंदर्शयति—एषइति ॥ ६ ॥ ज्येष्ठानुवर्तनादपिपरमधर्मंकुलोचितंदर्शे-

---

ति० दीनाःमातापित्रोर्शोकदर्शनाद्दीनाइव । शि० दीनाःराक्षसक्षयकारकाः । अन्तर्भावितणिजर्थोदीङ् । कर्माविवक्षयाकर्तरि निष्ठा । ति० समनुज्ञाप्य कृतानुमतिकंकृत्वा । शोकसंमूढः मातृदुःखदर्शनात्सइव । शि० शोकसंमूढः शोकःसंमूढोयेनसःशोकापहर्तेत्यर्थः । स० शोकसंमूढः शोकेनसंमोहयतिवैचित्यंप्रापयतिजनानितिवा । शोकयतीतिशोकः । संमूढइत्यत्राप्येवं । ततः कर्मधारयइतिवा ॥ २ ॥ स० भ्रातुः रामस्य । अन्वक्षंप्रत्यक्षं अनुपदंवा ॥३॥ तनि० सृष्टस्त्वं नैरपेक्ष्येणरामचरणासक्तःखलुभवान् । मयावक्तव्यंकिं । दास्यकरणेचक्षुश्श्रवास्त्वं वनवासायरामेणसहत्वयावनंगम्यतेचेत् मत्त उत्पत्तिप्रयोजनंलब्धं तत्सहायार्थं खलुमयोत्पादितः । स्वनुरक्तःसुहृज्जने सुहृज्जनमात्रेस्वनुरक्तस्त्वं ततस्सर्वोपजीव्येरामेअनुरक्तोभव । यद्वा सुहृज्जने रामे भवतस्तस्मिन्नतीवप्रीतिरस्तिखलु । इदानींगन्तव्यमितिमयावक्तव्यंकिं । तथापिनियमनीयंकिंचिदस्ति । रामेप्रमादंमाकर्षीः । कोयंप्रमादइत्यतआह । पुत्रभ्रातरिगच्छतीति । श्रीरामगमनविशेषेदृष्टिंदत्वारक्ष्यवस्तुभ्रंशंमाकुरु । ती० सुहृज्जनेअत्रत्यसुहृज्जनेस्वनुरक्तोपित्वं मयावनवासाय सृष्टःअनुमतः सत्वंगच्छेति । शि० सुहृज्जने सुहृदंसौहार्दंजनयत्युत्पादयतिसः तस्मिन् भ्रातरिरामे ॥ ५॥ शि०

[पा] १ क. ङ. च. छ. झ. ञ. ट. सहसीतया. २ ख. ग. ज. संतप्तो. ३ ङ. छ. झ. ञ. ट. अपि. ४ ख. समर्थोवा. ५ ङ. च. झ. ञ. ट. मृधेपुहि. ६ ज्येष्ठस्येत्यर्धं क. च. ञ. पुस्तकेष्वेवदृश्यते.

लक्ष्मणं त्वेवमुक्त्वा सा संसिद्धं प्रियराघवम् ॥ सुमित्रा गच्छगच्छेति पुनः पुनरुवाच तम् ॥ ८ ॥
[गम्यतामर्थलाभाय क्षेमाय विजयाय च ॥ शत्रुपक्षविनाशाय पुनः संदर्शनाय च ॥ ९ ॥]
रामं दशरथं विद्धि मां विद्धि जनकात्मजाम् ॥ अयोध्यामटवीं विद्धि गच्छ तात यथासुखम् ॥ १० ॥

यति—इदमिति । मृधेषु युद्धेषु । तनुत्यागेनापिरामो रक्षणीयइतिभावः ॥ ७ ॥ संसिद्धं पिधुगत्यामित्यस्माद्धातोर्निष्ठायांरूपं । गमनोद्युक्तमित्यर्थः । गच्छगच्छेतिवीप्सयासुमित्रायाअपिरामानुवर्तनेमहानादरोद्योत्यते ॥ ८—९ ॥ वनवासेपितृमातृनगरस्मरणे मनश्चाञ्चल्यंभविष्यतीतिधियातत्रैवप्रतिनिधिंकल्पयति—राममिति । यथासुखंगच्छेत्यस्यइत्युवाचेतिपूर्वेणसंबन्धः । रामंदशरथंविद्धि पितरमवगच्छेत्यर्थः । जनकात्मजांमांविद्धि मातरंविद्धीत्यर्थः । अटवीमयोध्यां तद्वद्भोगस्थानंविद्धि । गच्छताततयथासुखं तदनुवर्तनमेवउचितंसुखमित्यर्थः । यद्वा रामंदशरथंविद्धि दशति मत्स्यकच्छपो रगादीन्दंष्ट्राव्यापारविषयान्करोतीतिदशः पक्षी दंशदशनइतिधातुः । दशनंदंष्ट्राव्यापारः पचाद्यच् । पृषोदरादित्वादनुनासिकलोपः । सगरुडः रथोयस्यतं विष्णुंवेद्धीत्यर्थः । जनकात्मजां मां लक्ष्मीं विद्धि । अटवीमयोध्यां अपराजिताख्यांवैकुण्ठनगरीं

तनुत्यागः शत्रुतनुत्याजनं ॥ ७ ॥ **ति०** असावेवंस्वपुत्रंलक्ष्मणमुक्त्वा संसिद्धं वनंगन्तुंनिश्चितमनस्कं प्रियराघवंप्रियरूपं राघवं गच्छगच्छेतिपुनःपुनरुवाच । शकुनसंपत्तयइतिभावः । **स०** सुमित्रागच्छगच्छेत्यत्र सुमित्रा आगच्छगच्छेतिच्छेदः । तथाच प्रियराघवंआगच्छगच्छेतिपुनःपुनरुवाच । लोकेलोकाःस्वान्प्रतिगत्वाऽऽयास्यामीति गत्वाऽऽयाहीतिवावक्तारो नतु गच्छेत्येतन्मात्रवादिनइतिएवमुक्तिः । तत्रापि अननुमतंगमनमिति प्रस्तुतस्यापिगमनस्यपश्चादुक्तिः सकलकामितस्यआगमनस्यप्रथमतआगच्छेत्यनेनोक्तिरितिज्ञेयम् । **शि०** एवमनेनप्रकारेण उक्त्वा उपदिश्य संसिद्धं गमनानुकूलव्यापारवन्तं प्रियराघवं सर्वप्रीतिविषयीभूतरामं त्वंगच्छगच्छेति असौसुमित्रा तंलक्ष्मणं पुनःपुनरुवाच । संसिद्धमित्यत्रगत्यर्थकपिधोनिष्ठा ॥ ८ ॥ **ति०** तंलक्ष्मणंपुनरुवाचेत्यनुकर्षः । तद्वचनमाह—**राममिति** । **तनि०** रामंदशरथंविद्धि सोपाधिकपितरिदशरथे अतिस्नेहंविहाय निरुपाधिकपितरिरामेप्रीतिंकुर्वित्यर्थः । मांविद्धिजनकात्मजां सोपाधिकमातरंमांविहाय निरुपाधिकमातरिसीतायांभक्तिंकुर्वित्यर्थः । अयोध्यामटवींविद्धि सोपाधिकांमयोध्यांविहाय रामनिवासत्वेननिरुपाधिकप्राप्यदेशेवनेप्रीतिंकुर्वित्यर्थः । यद्वा रामंदशरथसमंविद्धि ज्येष्ठभ्रातापितृसमइतिस्मरणात् । जनकात्मजांमातृसमांविद्धि । अटवींअयोध्यांतद्वद्भोग्यतमांविद्धि । अथवा रामं दशरथसदृशगुणंविद्धि "गुणैर्दशरथोपमः" इत्युक्तेः । मांविद्धिजनकात्मजां गुणवतींसीतां मामिवसेव्यांविद्धि । रमणीयवस्तुसंपन्नतया अटवीमयोध्यावद्भोग्यतमांविद्धि । रामं दशरथंविद्धि दश मिव स्त्रीपरवशंविद्धि । तच्च मृगानुसारित्वादिषु वक्ष्यते । मांविद्धिजनकात्मजां अहंयथाराममनुगच्छेतिवदामि एवमेववदिष्यति । तच्चतत्रैवस्पष्टं । अटवीमयोध्यांविद्धि अटवीमपिविहायान्यत्रगच्छेत् सर्वत्रसावधानोभवेतितात्पर्यम् । यद्वा रामंदशरथमिवातिशूरंविद्धि । देवासुरयुद्धेदशरथस्यशौर्यंप्रसिद्धं । अहं यथाभर्तृविजये अभिनन्दामि जनकात्मजाप्येवमभिनन्दिष्यति । तच्च "तंदृष्ट्वाशत्रुहन्तारं" इत्यत्रस्पष्टीभविष्यति । अयोध्यामटवींविद्धि व्याघ्रावासंगुल्ममिवाटवीमयोध्यामिवविद्धि । रामंदशरथंविद्धि दशरथोयथारामविश्लेषंनसहते तथारामोयुष्मद्विश्लेषंनसहते । मांविद्धिजनकात्मजां अहंयथाभवद्विश्लेषंनसहे तथासीताचभवद्विश्लेषंनसहते । अयोध्यामटवींविद्धि रामविश्लेषेणायोध्यायथा "अपभ्रष्टमनुष्याचे"त्याद्यवस्थांप्राप्ता तथाअटव्यपि "अपिवृक्षाःपरिम्लाना" इत्याद्यवस्थांप्राप्नोति । रामंदशरथंविद्धि दशरथोयथासम्राड्बभूव तथारामोपिसम्राड्भविष्यति । मांविद्धिजनकात्मजां अहंयथासम्राण्महिषी तथासीतापिभविष्यति । अयोध्यामटवींविद्धि अटवी अयोध्यावत्समृद्धपुष्पफलाभविष्यति । यद्वा रामं पदातिरितिमावमंस्थाः दशरथं पुष्पकादिबहुरथसंचारिणं विद्धि । दशरथाः दशसुदिशास्वप्रतिहतोरथोयस्येतिचविग्रहः । मांविद्धिजनकात्मजां देवासुरादियुद्धेषुदशरथेनसहयथाऽहंसंचरामि तथासीतारामेणसंचरिष्यति । अयोध्यामटवींविद्धि इदानीमटव्यांयथानित्यसंचारस्तथाऽयोध्यायांनित्यसंचारोभविष्यति । यद्वा दशरथंरामंविद्धि रामेयथापितृत्वबुद्धिपूर्तिस्तथादशरथेपिकुरु । "अहंतावन्महाराजेपितृत्वंनोपलक्षये । भ्राताभर्ताचबन्धुश्चपिताचममराघवः" इत्युक्तरीत्यादशरथेऽवज्ञामकृत्वा रामस्यदशरथेपितृत्वबुद्धिपूर्तिमनुसृत्य त्वयापितादृशबुद्धिःकार्या । मांविद्धिजनकात्मजांदशरथपाणिग्रहणकृतदोषंमनस्यकृत्वा रामसपत्नीमातृत्वप्रयुक्तबहुमानंवानुसृत्य मयिसीतायामिव मातृत्वबुद्धिपूर्तिःकार्या । अयोध्यामटवींविद्धि "वनंनगरमेवास्तुयेनगच्छतिराघवः" इत्युक्तरीत्या अयोध्याऽवमतिर्नकार्या । रामपादुकासनाथत्वेनायोध्याप्युद्देश्यत्वेनानुसंधेया । यद्वा रामंदशरथंपक्षिरथं गरुडरथमितियावत् । "दशःपक्षीविहङ्गमः" इतिनिघण्टुः । जनकात्मजां मां लक्ष्मींविद्धि सीतालक्ष्मीर्भगवान्विष्णुरितिवक्ष्यति । अटवीमयोध्यांविद्धि देवानांपुरं परमपदाख्यांविद्धि । "देवानांपूरयो-

[**पा०**] १ ङ. झ. ट. मुक्त्वासौ. २ ख. प्रति. ३ ध. रुवाचह. ४ अयंश्लोकः क. च. पुस्तकयोरेवदृश्यते. ५ रामंदशरथमितिश्लोकानन्तरंलक्ष्मणंत्वेवमितिश्लोकः क. च. ज. ञ. पुस्तकेषुदृश्यते.

ततः सुमन्त्रः काकुत्स्थं प्राञ्जलिर्वाक्यमब्रवीत् ॥ विनीतो विनयज्ञश्च मातलिर्वासवं यथा ॥ ११ ॥
रथमारोह भद्रं ते राजपुत्र महायशः ॥ क्षिप्रं त्वां प्रापयिष्यामि यत्र मां राम वेक्ष्यसि ॥ १२ ॥
चतुर्दश हि वर्षाणि वस्तव्यानि वने त्वया ॥ तान्युपक्रमितव्यानि यानि देव्याऽसि चोदितः ॥१३॥
तं रथं सूर्यसंकाशं सीता हृष्टेन चेतसा ॥ आरुरोह वरारोहा कृत्वाऽलंकारमात्मनः ॥ १४ ॥
वनवासं हि संख्याय वासांस्याभरणानि च ॥ भर्तारमनुगच्छन्त्यै सीतायै श्वशुरो ददौ ॥ १५ ॥
तथैवायुधजालानि भ्रातृभ्यां कवचानि च ॥ रथोपस्थे प्रतिन्यस्य सचर्म कठिनं च तत् ॥ १६ ॥
अथो ज्वलनसंकाशं चामीकरविभूषितम् ॥ तमारुरुहतुस्तूर्णं भ्रातरौ रामलक्ष्मणौ ॥ १७ ॥

विद्धि । तद्वासस्थानमितिभावः । यद्वा रामंदशरथंच विद्धि उभयोस्तारतम्यंपद्यैत्यर्थः । मांजनकात्मजांच विद्धि गुणतःआलोचय । मदपेक्षयासीतैवतवहितपरेतिभावः । अयोध्यां अटवींचविद्धि एतन्नगरापेक्षया वनमेवतवकैङ्कर्यैकान्तस्थानतयोत्कृष्टमित्यर्थः । यद्वा दशरथं रामं उपरतंविद्धि । मां जनकस्यापितुरात्मजांविद्धि । कैकेयीविवासिततयापितृगृहवर्तिनींविद्धीत्यर्थः । अयोध्यामटवींविद्धि निर्जनेयंभविष्यतीत्यर्थः । एवं तात्पर्यान्तराण्यूह्यानि ॥ १०—११ ॥ यत्र यस्मिन्प्रदेशविषये ॥ १२ ॥ चतुर्दशवर्षेष्वेकदिवसापनयनमपिमहाँल्लाभइतिधियात्वरयति—तान्युपक्रमितव्यानीति । देव्यासिचोदितः अद्यैवगच्छेतिकैकेय्याचोदितत्वादिर्थः ॥ १३ ॥ अलंकारंकृत्वा श्वशुरदत्तवस्त्राभरणादिभिरितिशेषः ॥ १४ ॥ एतच्छ्लोकानन्तरमथोज्वलनेतिश्लोकःपठितव्यः—अथोइति । ज्वलनसंकाशं आयुधपूर्णत्वादितिभावः ॥ १५ ॥ वनवासंहीतिश्लोकस्तथैवेतिश्लोकस्सीतातृतीयानितिश्लोकश्चैकंवाक्यं । श्वशुरोदशरथः । सीतायैयानिददौ तानिचरथोपस्थेप्रतिन्यस्य तथाभ्रातृभ्यांदत्तान्यायुधजालानि कवचानि सचर्म चर्मपिनद्धं अल्पकण्डोलं । कठिनंतत् खनित्रं च । रथमध्येप्रतिन्यस्य सीतातृतीयानारूढान्दृष्ट्वा अश्वानचोदयदितियोजना । धृष्टं सधैर्यं । संमतान् श्रेष्ठानित्यर्थः । यथान्यासमेववास्तु । तदा तंरथमितिश्लोको वनवासमितिश्लोकः तथैवेतिश्लोकश्चैकंवाक्यं ।

ध्या" इतिश्रुतेः । यद्वा रामंविद्धि दशरथंविद्धि सावकाशनिरवकाशयोःकोवानुवर्तनीयइतिसम्यग्बुध्यस्वेत्यर्थः । मांविद्धि जनकात्मजांविद्धि दासीपरिजनसहितातद्रहितयोःकावानुवर्तनीयेतिविचारय । अयोध्यांविद्धि अटवींविद्धि दृष्टफलादृष्टफलयोर्बुद्धिमताकिंवाऽपेक्षणीयम् । एवं बहुगुणलाभात्तात्कालिकदुःखानुसंधानंनकर्तव्यमित्याह । गच्छेति । रामोयेनयेनपथागच्छति तेनतेनपथा "कामरूप्यनुसंचरन्" इत्याद्युक्तरीत्याकैङ्कर्यंकर्तुंगच्छ । "एतत्सामगायन्नास्ते" इत्युक्तरीत्या परमपदइवैकत्रस्थितिंमाकुरु । राममनुसृत्यानुसृत्यकैङ्कर्यंकुरु । तात भगवत्कैङ्कर्यान्वयबहुमानद्योतिकातातेत्युक्तिः । तवमाताऽहंकैकेयीवापकीर्तिर्यथा नगच्छामि तथामांतारय । "यथासुखमहंसर्वंकरिष्यामि" इत्युक्तरीत्या कैङ्कर्यसुखंकरलब्धम् । यद्वा रामस्ययथासुखंभवति तथा । वक्ष्यति "भावज्ञेनकृतज्ञेनधर्मज्ञेनचलक्ष्मण" इति । यद्वा अयोध्यायांयथासुखंतथावनेच "कामयेनत्वयाविना" इत्युक्तरामसंश्लेषसुखंखलुत्वयापेक्षितं । यथासुखंगच्छेत्यस्यइत्युवाचेतिपूर्वेणसंबन्धः । स० यद्वा दशसुइन्द्रियेषुरथोगमनंयस्यतं । दशभ्यइन्द्रियेभ्योरथोगतिर्विषयप्राप्तिरितियावत् । येनतं । रथगतौइतिधातोः । रामंदशरथंविद्धि दशरथस्यावस्थानाभावात्तत्स्थानेरामं जानीहीत्यभिप्रायः । मांजनकात्मजां तामिवारण्यवर्तिनींविद्धि । पत्युपत्नीवियुक्तायाममभवनवासोपिवनवासतुल्यइतिभावः । दशरथं दशसुदिक्ष्वप्रतिहतगतिमद्वायुरूपंहनुमन्तं रामं तमिवरक्षकंविद्धि । हेजनक तात लक्ष्मण मां रमारूपिणींसीतां आत्मजां तामिवविद्धि फलजलाहरणादिनातांरक्षेतिभावः । आत्मजांस्वयंजातांसीतां एकान्तप्रदेशेपिमामिवविद्धीत्यप्यर्थः । गच्छतारामेण सह अत गच्छेतिवा । अतसातत्यगमनेइतिधातोः ॥ १० ॥ ति० क्षिप्रंप्रापयिष्यामि । नेहरजन्यांवस्तव्यमितिशेषः ॥ १२ ॥ ती० हृष्टेनइदानींपतिसेवालब्धेत्यानन्दयुक्तेनचेतसोपलक्षिता । ति० हृष्टेनचेतसेत्यनेन "अभिरामनउत्साहं" इत्युक्तोमुख्यश्शकुनोध्वनितः । स० हृष्टेनचेतसा रक्षोविक्षोभोभविष्यतीतिसंतोषः । शि० वरारोहः वरः अयोनिजत्वेनसर्वोत्कृष्टः आरोहःप्रादुर्भावोयस्यास्सा ॥ १४ ॥ स० ननु वसनं सासनं ययाऽकारि वितीर्यचीरंवीरस्य तस्याःकथंरथनयनंसंमतमितिचेन्न । तेवनेनवनगमनेमन्थरंगतिस्स्यात्स्याचान्तरायइतितदमन्थरतायैसमसमीरजवतुरगरथगतिमनुमेनेसेतिमन्तव्यम् । अतएव "नोत्सुकस्यविलं-

[पा०] १ ज. सूतः. २ ङ. च. छ. झ. ञ. ट. वक्ष्यसे. ३ ञ. देव्यालमसि. ४ ङ. छ. ज. झ. ट. प्रचोदितः. ५ ज. तथाचायुधजातानि. ग. ङ. झ. ट. तथैवायुधजातानि. ६ ग. ङ च. ज—ठ. प्रविन्यस्य. ७ घ. ङ. ञ. ञ. ट. ठ. अत्. ८ ज. ट. अथ. अथोज्वलनेत्ययंश्लोकः क—ङ. ज. झ. ट. ठ. पुस्तकेष्वपि तथैवायुधेतिश्लोकात्परं सीतातृतीयानितिश्लोकात्पूर्वं दृश्यते. ९ क. च. तावारुरुहतुः.

सीतातृतीयानारूढान्दृष्ट्वा धृष्टमचोदयत्[1] ॥ सुमन्त्रः संमतानश्वान्[2]वायुवेगसमाञ्जवे ॥ १८ ॥
प्रतियाते[3] महारण्यं चिररात्राय राघवे ॥ बभूव नगरे मूर्च्छा बलमूर्च्छा जनस्य च ॥ १९ ॥
तत्समाकुलसंभ्रान्तं मत्तसंकुपितद्विपम्[4] ॥ हयशिञ्जितनिर्घोषं पुरमासीन्महास्वनम् ॥ २० ॥
ततः सबालवृद्धा सा पुरी परमपीडिता ॥ राममेवाभिदुद्राव घर्मार्ता[5] सलिलं यथा ॥ २१ ॥
पार्श्वतः पृष्ठतश्चापि लम्बमानास्तदुन्मुखाः ॥ बाष्पपूर्णमुखाः सर्वे तमूचुर्भृशनिस्वनाः[6] ॥ २२ ॥
संयच्छ[7] वाजिनां रश्मीन्सूत याहि शनैःशनैः ॥ मुखं द्रक्ष्याम रामस्य दुर्दर्शं नो भविष्यति ॥२३॥
आयसं हृदयं नूनं राममातुरसंशयम् ॥ यद्देवगर्भप्रतिमे वनं याति न भिद्यते ॥ २४ ॥
कृतकृत्या हि वैदेही छायेवानुगता पतिम् ॥ न जहाति रता धर्मे मेरुमर्कप्रभा यथा ॥ २५ ॥
अहो लक्ष्मण सिद्धार्थः सततं प्रियवादिनम् ॥ भ्रातरं देवसंकाशं[8] यस्त्वं परिचरिष्यसि ॥ २६ ॥
महत्येषा हि ते [9]सिद्धिरेष चाभ्युदयो महान् ॥ एष स्वर्गस्य मार्गश्च यदेनमनुगच्छसि ॥ २७ ॥
एवं वदन्तस्ते सोढुं न शेकुर्बाष्पमागतम्[10] ॥ नरास्तमनुगच्छन्तः प्रियमिक्ष्वाकुनन्दनम् ॥ २८ ॥
अथ राजा वृतः स्त्रीभिर्दीनाभिर्दीनचेतनः ॥ निर्जगाम प्रियं पुत्रं द्रक्ष्यामीति ब्रुवन्गृहात् ॥ २९ ॥
शुश्रुवे चाग्रतः स्त्रीणां रुदन्तीनां[11] महास्वनः ॥ यथा नादः करेणूनां बद्धे महति कुञ्जरे ॥ ३० ॥
पिता[12] हि राजा काकुत्स्थः श्रीमान्सन्नस्तदाऽभवत्[13] ॥ परिपूर्णः शशी काले ग्रहेणोपप्लुतो यथा ॥ ३१ ॥
स च श्रीमानचिन्त्यात्मा रामो दशरथात्मजः ॥ सूतं संचोदयामास त्वरितं वाह्यतामिति ॥ ३२ ॥
रामो याहीति सूतं तं[14] [15]तिष्ठेति स जनस्तदा ॥ उभयं नाशकत्सूतः कर्तुमध्वनि चोदितः ॥ ३३ ॥
निर्गच्छति महाबाहौ रामे पौरजनाश्रुभिः ॥ पतितैरभ्यवहितं[16] प्रशशाम[17] महीरजः ॥ ३४ ॥

सीताऽऽत्मनोलंकारंकृत्वा यानिश्वशुरोददौ यानिभ्रातृभ्यामानीतानिआयुधजालानिकवचानि सचर्मकठिनंच तत्सर्वंरथोपस्थेप्रतिन्यस्यारुरोहेत्यन्वयः ॥ १६—१८ ॥ चिररात्राय चिरकालं । नगरेमूर्च्छाबभूव नगरस्थस्त्रीबालादिपुदुःखातिशयेनविसंज्ञताबभूवेत्यर्थः । बलमूर्च्छा अश्वगजादिमोहः । जनस्य उत्सवार्थमागतजनपदजनस्य ॥ १९ ॥ समाकुलं अन्तःकरणक्षोभयुक्तं । संभ्रान्तं बाह्येन्द्रियक्षोभयुक्तं । सर्वेन्द्रियक्षोभवत्पौरजनयुक्तमित्यर्थः । मत्तसंकुपितद्विपं व्यसनातिशयेनसंकुपितमत्तद्विपमित्यर्थः । हयशिञ्जितनिर्घोषं परितापातिशयेनततइतश्चलतांहयानांभूषणरवेणसंजातघोषमित्यर्थः । “भूषणानांतुशिञ्जितं” इत्यमरः । अतएवमहास्वनमासीत् ॥ २० ॥ परमपीडिता रामविरहदुःखेनेतिशेषः ॥ २१ ॥ लम्बमानाः रथैकदेशमाश्रित्येतिशेषः ॥२२—२३॥ देवगर्भप्रतिमे देवकुमारसदृशे ॥ २४ ॥ मेरुमर्कप्रभायथेति सूर्यस्यप्रादक्षिण्येनमेरुगमनमितिसर्वदातस्यमेरुसंबन्धोस्त्येव ॥ २५—३० ॥ सन्नः अवसन्नतेजाइत्यर्थः ॥ ३१ ॥ अचिन्त्यात्मा इयत्तयापरिच्छेत्तुमशक्यधैर्यइत्यर्थः ॥ ३२ ॥ याहितिष्ठेति उभयत्राचोदयदितिशेषः । उभयं यानंस्थानंच । अध्वनिरामजनाभ्यां चोदितःसन् कर्तुनाशकत् ॥ ३३ ॥ अभ्यवहितं सिक्तं

वनं” इतितदुक्तिः ॥ १५ ॥ **ति०** संमतान् संमतसर्वलक्षणान् । **स०** संमतान् सम्यग्ज्ञातगुणकान् ॥ १८ ॥ **ति०** चिररात्रायेत्यव्ययम् । चिरकालावस्थित्यर्थमित्यर्थः । **स०** बलेनमूर्च्छा समुच्छ्रयोयस्यजनस्यसतथा । ततःकर्मधारयः । “मूर्च्छा मोहनसमुच्छ्राययोः” इतिधातुव्याख्यानात् ॥ १९ ॥ **स०** घर्मार्तःआतपार्तः । “घर्मस्स्यादातपे” इतिविश्वः ॥ २१ ॥ **ति०** देवगर्भप्रतिमे स्कन्दतुल्ये । यद्वा देवगर्भो देवनिधिर्हिरण्यगर्भस्तत्प्रतिमे । **स०** वेदगर्भप्रतिमइतिपाठे हिरण्यगर्भसदृशइत्यर्थः ॥ २४ ॥ **ति०** करेणूनां तत्पालकवृद्धकरिणीनां ॥ ३० ॥ **ति०** अभ्यवहितं रथनेम्युद्धतम् ॥ ३४ ॥

[पा०] १ ङ. च. झ—ठ. रथमचोदयत्. २ च. व. संयतान् ३ क—च. ज. झ. ञ. ठ. प्रयातेतु. ४ घ. संकुलित. ५ घ. झ. ट. ठ. घर्मार्तः. ६ घ. ज. भृशदुःखिताः. ७ क. ख. संयम्य. ८ ञ. दैवसंकाशं. ९ ङ. झ—ठ. बुद्धिः. १० च. बाष्पमूर्च्छितं. ११ ङ. झ. रुदतीनां. १२ क—घ. ज. पिताच. १३ क—ट. स्तदावभौ. १४ घ—छ. झ. ञ. ट. तंसूतं. १५ घ. झ. ट. ट. तिष्ठतिच. १६ घ. रभ्युपहितं. १७ ङ. छ. झ. ट. ठ. प्रणनाश.

रुदिताश्रुपरिद्यूनं हाहाकृतमचेतनम् ॥ प्रयाणे राघवस्यासीत्पुरं परमपीडितम् ॥ ३५ ॥
सुस्राव नयनैः स्त्रीणामास्रमायाससंभवम् ॥ मीनसंक्षोभचलितैः सलिलं पङ्कजैरिव ॥ ३६ ॥
दृष्ट्वा तु नृपतिः श्रीमानेकचित्तगतं पुरम् ॥ निपपातैव दुःखेन हतमूल इव द्रुमः ॥ ३७ ॥
ततो हलहलाशब्दो जज्ञे रामस्य पृष्ठतः ॥ नराणां प्रेक्ष्य राजानं सीदन्तं भृशदुःखितम् ॥ ३८ ॥
हा रामेति जनाः केचिद्राममातेति चापरे ॥ अन्तःपुरं समृद्धं च क्रोशन्तः पर्यदेवयन् ॥ ३९ ॥
अन्वीक्षमाणो रामस्तु विषण्णं भ्रान्तचेतसम् ॥ राजानं मातरं चैव ददर्शानुगतौ पथि ॥ ४० ॥
स बद्ध इव पाशेन किशोरो मातरं यथा ॥ धर्मपाशेन संक्षिप्तः प्रकाशं नाभ्युदैक्षत ॥ ४१ ॥
पदातिनौ च यानार्हावदुःखार्हौ सुखोचितौ ॥ दृष्ट्वा संचोदयामास शीघ्रं याहीति सारथिम् ॥४२॥
न हि तत्पुरुषव्याघ्रो दुःखजं दर्शनं पितुः ॥ मातुश्च सहितुं शक्तस्तोत्रार्दित इव द्विपः ॥ ४३ ॥
प्रत्यगारमिवायान्ती वत्सला वत्सकारणात् ॥ बद्धवत्सा यथा धेनू राममाताऽभ्यधावत ॥ ४४ ॥
तथा रुदन्तीं कौसल्यां रथं तमनुधावतीम् ॥ क्रोशन्तीं रामरामेति हा सीते लक्ष्मणेति च ॥४५॥
रामलक्ष्मणसीतार्थं स्रवन्तीं वारि नेत्रजम् ॥ असकृत्प्रैक्षत स तां नृत्यन्तीमिव मातरम् ॥ ४६ ॥
तिष्ठेति राजा चुक्रोश याहियाहीति राघवः ॥ सुमन्त्रस्य बभूवात्मा चक्रयोरिव चान्तरा ॥ ४७ ॥
नाश्रौषमिति राजानमुपालब्धोपि वक्ष्यसि ॥ चिरं दुःखस्य पापिष्ठमिति रामस्तमब्रवीत् ॥ ४८ ॥

॥ ३४ ॥ हाहाकृतं हाहाकारवत् । मत्वर्थीयलोपः । अचेतनं मूढं । राघवस्य दशरथस्य । पुरं पुरस्थजनाः ॥३५॥ नयनैः नयनेभ्यः । आयाससम्भवं खेदजनितं संक्षोभः उच्छलनं । सलिलं मकरन्दरूपं ॥ ३६ ॥ एकचित्तगतं एकचित्ततांगतं ॥ ३७ ॥ प्रेक्ष्य स्थितानामितिशेषः ॥ ३८ ॥ हारामेतिपरिदेवनप्रकारः । राममातेत्यत्रापिहेत्यनुषञ्जनीयं । सन्धिरार्षः । राममातरित्यर्थः । जनाः क्रोशन्तःसन्तः पर्यदेवयन् अरुदन् । समृद्धं अन्तःपुरं अन्तःपुरजनश्च । पर्यदेवयदिति विपरिणामेनानुषङ्गः ॥ ३९ ॥ अन्वीक्षमाणः आक्रोशानुसारेण पश्चात्सामान्यतईक्षमाणः ॥ ४० ॥ किशोरोश्वबालः । संक्षिप्तः बद्धइतियावत् । प्रकाशं नाभ्युदैक्षत अपाङ्गेनाभ्युदैक्षतेत्यर्थः ॥ ४१—४२ ॥ सहितुं सोढुं । तोत्रार्दितः वैणुकेनपीडितः । "तोत्रंवैणुकं" इत्यमरः ॥ ४३ ॥ बद्धवत्सा वत्सकारणात् आगारंप्रत्यायान्तीधेनुरिव वत्सलाराममाता अभ्यधावत । रथमितिशेषः ॥ ४४—४५ ॥ नृत्यन्तीमिवेति तद्वदितस्ततःपरिभ्रमन्तीमित्यर्थः ॥ ४६ ॥ सुमन्त्रस्य आत्मा मनः । चक्रयोरन्तरेव रथपूर्वपश्चाद्भागस्थितयोश्चक्रयोर्मध्यगतःपुरुषइव । बभूव । दशरथरामवचनाभ्यामतिसंकटंप्राप्तइत्यर्थः ॥ ४७ ॥ राजवचनातिक्रमणेमहान्दोषोभविष्यतीत्याशङ्कायामाह—नाश्रौषमिति । पुनरागमनानन्तरंराज्ञा किमर्थमद्वाक्ये नस्थितोसीतिनिन्दितोपि नाश्रौषंत्वद्वचनमितिवक्ष्यसि । किमर्थमेवमसत्यवचनंतत्राह—चिरमिति । दुःखस्य इदानीमनुभूयमानदुःखस्य । चिरं विलम्बः ।

स० राममातेत्यत्र हेराममा अत मागच्छ । माऽयं नमाङ् । **ति०** अन्तःपुरसमृद्धं अन्तःपुरसहितं । क्रोशन्तं उच्चैश्शब्देनरुदन्तंराजानंदृष्ट्वा केचिन्नरा हारामेति केचिद्धाराममातेतिपर्यदेवयन्शुश्रुवुः । उपलक्षणमेतत् । केचित्हाराजन्नित्यपि ॥ ३९ ॥ **स०** मातरंराजानंचेत्यन्वयः । तेनानुगताविन्त्युपपन्नं ॥४०॥ **स०** किशोरः अश्वःशावः बालकसामान्यंवा । इवशब्दस्यधर्मपाशेन संयुक्तइवेत्यन्वयः ॥ ४१ ॥ **ति०** वत्सकारणात्प्रत्यगारंवत्सावस्थितिमद्गृहमुद्दिश्यागच्छन्ती सवत्सा बद्धवत्साधेनुर्यथाधावति एवंराममाताऽधावत । सवत्सेत्याद्यधिककथनं कवेरपिशोकाविष्टत्वान्नदोषाय ॥ ४४ ॥

[पा०] १ च. परिक्लिन्नं. २ झ—ठ. कृत्तमूलः. ग. छिन्नमूलः. ३ ख. हालाहलाशब्दः. ४ ङ. च. झ—ठ. अन्तःपुरसमृद्धंचक्रोशन्तं. ५ ङ. झ. ट. ठ. संयुक्तः. ६ ग. ज. दुःखदं. ७ ङ. झ. ट. ठ. तोत्रैर्नुन्नः ८ ङ. छ. झ. ट. ठ. सवत्सा. ९ क—घ. च. ज. ञ. तदा. १० च. ञ. चात्मानं.

रामस्य स वचः कुर्वन्ननुज्ञाप्य च तं जनम् ॥ व्रजतोपि हयाञ्शीघ्रं चोदयामास सारथिः ॥ ४९॥
न्यवर्तत जनो राज्ञो रामं कृत्वा प्रदक्षिणम् ॥ मनसाऽप्यश्रुवेगैश्च न न्यवर्तत मानुषम् ॥ ५० ॥
यमिच्छेत्पुनरायान्तं नैनं दूरमनुव्रजेत् ॥ इत्यमात्या महाराजमूचुर्दशरथं वचः ॥ ५१ ॥
तेषां वचः सर्वगुणोपपन्नं प्रस्विन्नगात्रः प्रविषण्णरूपः ॥
निशम्य राजा कृपणः सभार्यो व्यवस्थितस्तं सुतमीक्षमाणः ॥ ५२ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे चत्वारिंशः सर्गः ॥ ४० ॥

एकचत्वारिंशः सर्गः ॥ ४१ ॥

सिंहावलोकनन्यायेनायोध्यातद्वासिनांरामप्रवासकालिकदुर्दशावर्णनम् ॥ १ ॥

तस्मिंस्तु पुरुषव्याघ्रे विनिर्याते कृताञ्जलौ ॥ आर्तशब्दोथ संजज्ञे स्त्रीणामन्तःपुरे महान् ॥ १ ॥
अनाथस्य जनस्यास्य दुर्बलस्य तपस्विनः ॥ यो गतिः शरणं चासीत्स नाथः क्व नु गच्छति ॥ २ ॥
न क्रुध्यत्यभिशस्तोपि क्रोधनीयानि वर्जयन् ॥ क्रुद्धान्प्रसादयन्सर्वान्समदुःखः क्वचिद्गतः ॥ ३ ॥
कौसल्यायां महातेजा यथा मातरि वर्तते ॥ तथा यो वर्ततेऽस्मासु महात्मा क्व नु गच्छति ॥ ४ ॥
कैकेय्या क्लिश्यमानेन राज्ञा संचोदितो वनम् ॥ परित्राता जनस्यास्य जगतः क्व नु गच्छति ॥ ५॥

पापिष्ठं अतिदुःसहं ॥ ४८ ॥ तंजनं कौसल्यांपरिवेष्ट्यागतमवरोधजनं। अनुज्ञाप्य रामेणानुज्ञांप्रापय्येत्यर्थः ॥ ४९ ॥ राज्ञोजनः राजसंबन्ध्यवरोधजनः । मानुषं मानुषाणांसमूहः । समूहार्थेणप्रत्ययः । मनसाअश्रुवेगैश्च निवृत्तावरोधजनस्य मनसाअश्रुवेगैश्चसहनन्यवर्ततेतिसंबन्धः ॥ ५० ॥ कालोचितकर्तव्यज्ञाःसचिवाःशास्त्रार्थकथनेनराजानंनिवर्तयन्ति—यमिच्छेदिति ॥ ५१ ॥ व्यवस्थितः स्थितवान् ॥ ५२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने चत्वारिंशःसर्गः ॥ ४० ॥

कृताञ्जलौ मातृपरिवेष्टितंपितरमुद्दिश्यकृताञ्जलौ। अन्तःपुरेस्त्रीणां दशरथेनसमागतानामन्तःपुरवासिनीनांस्त्रीणां ॥ १ ॥ तपस्विनः शोच्यस्य । गम्यतइति गतिः प्राप्यइतियावत् । शरणं रक्षिता । “ शरणंगृहरक्षित्रोः ” इत्यमरः ॥ २ ॥ अभिशस्तः मिथ्याभिशंसनंप्रापितः । क्वचिदित्यस्यनक्रुध्यतीत्यनेनसंबन्धः

स० व्रजतः स्वतइतिशेषः ॥ ४९ ॥ ति० राज्ञोजनः राजसंबन्धीजनः अवरोधजनउपजीविजनश्च रामंमनसाप्रदक्षिणंकृत्वान्यवर्तत । देहमात्रेणेतिशेषः । रथस्य शीघ्रगत्वादितिभावः । आशुवेगेनमनसातुनन्यवर्तत । मानुषं इतरमनुष्यसमूहः । आशुवेगेनमनसापिनन्यवर्तत । अपिनादेहेन चनन्यवर्तत । मनसाप्यश्रुवेगैश्चेतिपाठे मनसोऽनिवृत्तेरश्रुवेगोज्ञापकः ॥ ५० ॥ इति चत्वारिंशस्सर्गः ॥ ४० ॥

शि० सिंहावलोकनन्यायेनरामनिष्क्रमणकालेजातंवृत्तंवर्णयन्नाह—तस्मिन्निति । ति० इदानींतत्प्रयाणनिमित्तस्सर्वप्रजाशोकउच्यते—तस्मिन्निति । निष्क्रामतिनगरान्निर्गच्छतिसति । स० निष्क्रामति अन्तःपुरादितिशेषः ॥ १ ॥ स० अभिशस्तः अवज्ञापूर्वकंशंसनंप्राप्तः । निपातानामनेकार्थत्वात् । यथोक्तंकाठकखण्डार्थे । “निपातानामनेकार्थत्वादभिरवज्ञायेत्यर्थकः” इति । क्रोधनीयानि जनेषुक्रोधप्रयोजकानि ॥ ३ ॥ ति० वनं गन्तुमितिशेषः । अस्यजनस्येत्युक्त्वा कैंकिशिष्यकथनेन । सर्वस्यजगतःपरित्रातेतिभगवत्स्वरूपज्ञायाःकस्याश्चिद्वचः । स० अजनस्य मुक्तसमूहस्य । जगतः अमुक्तवर्गस्य

[पा०] १ झ. ठ. सरामस्यवचः. ग. ज. रामस्यवचनं. २ ख. श्रुत्वाअनु. ३ ङ. झ. ट. प्याशुवेगेन. ४ ङ. च. झ. ट. रायातं. ५ घ. ङ. झ. ट. गुणोपपन्नः. ६ ङ. च. छ. झ. ट. निष्क्रामति. घ. निर्यातेच. ७ क. ख. ग. ङ. च. ज. झ. ट. शब्दोहि. घ. शब्दोमहानासीत्. ८ क. घ. तदा. ९ घ. सइतोथप्रवत्स्यति. ग. ङ—झ. ट. रामदुःखःक्वगच्छति. ख. समदुःखसुखश्रयः. १० ख. भृशं. ११ ख. ज. सद्गतः.

अहो निश्चेतनो राजा जीवलोकस्य [1]संप्रियम् ॥ धर्म्यं सत्यव्रतं रामं वनवासे प्रवत्स्यति ॥ ६ ॥
इति सर्वा महिष्यस्ता विवत्सा इव धेनवः ॥ रुरुदुश्चैव दुःखार्ताः [2]सस्वरं च विचुक्रुशुः ॥ ७ ॥
स तमन्तःपुरे घोरमार्तशब्दं महीपतिः ॥ पुत्रशोकाभिसंतप्तः श्रुत्वा चासीत्सुदुःखितः ॥ ८ ॥
[3]नाग्निहोत्राण्यहूयन्त नापचन्गृहमेधिनः ॥ अकुर्वन्न प्रजाः कार्यं सूर्यश्चान्तरधीयत ॥ ९ ॥
व्यसृजन्[4]कवलान्नागा गावो वत्सान्नपाययन् ॥ [5]पुत्रं प्रथमजं [6]लब्ध्वा जननी नाभ्यनन्दत ॥ १० ॥
त्रिशङ्कुर्लोहिताङ्गश्च बृहस्पतिबुधावपि ॥ दारुणाः सोममभ्येत्य ग्रहाः सर्वे व्यवस्थिताः ॥ ११ ॥
नक्षत्राणि गतार्चींषि ग्रहाश्च गततेजसः ॥ [7]विशाखास्तु [8]सधूमाश्च नभसि प्रचकाशिरे ॥ १२ ॥
कालिकानिलवेगेन महोदधि[9]रिवोत्थितः ॥ रामे वनं प्रव्रजिते नगरं [10]प्रचचाल तत् ॥ १३ ॥
दिशः पर्याकुलाः सर्वास्[11]तिमिरेणेव संवृताः ॥ न ग्रहो नापि नक्षत्रं प्रचकाशे न किंचन ॥ १४ ॥
अकस्मान्नागरः सर्वो जनो दैन्यमुपागमत् ॥ आहारे वा विहारे वा न कश्चिदकरोन्मनः ॥ १५ ॥

॥ ३—५ ॥ निश्चेतनः बुद्धिहीनः । प्रवत्स्यति प्रवासयति ॥ ६—८ ॥ नाहूयन्त अग्नीनामन्तर्धानाद्धोतॄणांव्यसनाच्चेतिभावः । अन्तरधीयत निस्तेजस्कोभूदित्यर्थः ॥ ९ ॥ पाययन् अपाययन् । आगमशासनस्यानित्यत्वाददभावः ॥ १० ॥ त्रिशङ्कुः इक्ष्वाकुकुलकूटस्थः । लोहिताङ्गोङ्गारकः । बृहस्पतिबुधयोर्दारुणत्वं दारुणाङ्गारकसंयोगात् क्रूरस्थानगतत्वाद्वा । त्रिशङ्कोर्ग्रहत्वाभावेपिच्छत्रिणोगच्छन्तीतिवद्व्यपदेशः । त्रिशङ्कोः सोमप्राप्तिः ऋजुदेशत्वेनज्ञेया । ननु “ पूर्णेचतुर्दशेवर्षेपञ्चम्यांभरताग्रजः ” इतिवक्ष्यमाणरीत्या तत्रैवकदाचित्पुष्ययोगसम्भावनयाचपञ्चम्यामभिषेकइतिसिद्धं । तस्मिन्नेवचनिर्गतः । तथाचकर्कटकस्थेचन्द्रेकथंबुधसमागमः तस्यसूर्यसमीपवर्तित्वात् । उच्यते । प्राप्तिरत्र नैकराशिस्थितिः । किंतुक्कचित्प्राप्तिः क्कचिद्दृष्टिरितिनदोषः । वक्रगत्यासमागम इत्यप्याहुः ॥ ११ ॥ विशाखाः इक्ष्वाकुदेशनक्षत्रं । सधूमाइत्यनेन भाविराजविपत्सूच्यते ॥ १२ ॥ कालिकानिलवेगेन मेघजालयुक्तप्रभञ्जनवेगेन । “ मेघजालेचकालिका ” इत्यमरः । प्रचचाल व्यसनातिशयात्प्रकम्पितमभूत् ॥ १३ ॥ ग्रहः जात्येकवचनं । नवग्रहाइत्यर्थः । नक्षत्रं अश्विन्यादि । नकिंचित्प्रचकाशे सप्तर्षिध्रुवादिकंनप्रचकाशइत्यर्थः ॥१४॥ अकस्मात् रामप्रव्राजनव्यतिरिक्तबन्धुविश्लेषणादिका-

॥ ५ ॥ **ति०** संक्षयं आधारत्वेनगृहभूतं ॥ ६ ॥ **ति०** नाहूयन्त रामदुःखादितिशेषः । अन्तरधीयत रामव्यसनात्तद्द्रंष्टयतयादिवसशेषेसत्यप्यन्तर्हितोऽभूत् । अकालेदुर्दिनमभूदितिभावः । नागाः गजाः । दुर्दिनाद्युत्पाताःराज्ञोरावणस्यचनाशसूचकाइतिबोध्यम् । **रामानु०** अत्रचकारोऽग्नीनामन्तर्धानंसमुच्चिनोति ॥ ९ ॥ **शि०** कंवलान् स्वपृष्ठाच्छादनविशेषान् ॥ ९ ॥ **तनि०** जननीनाभ्यनन्दतेति । “उत्सवेषुचसर्वेषुपितेवपरितुष्यति” इत्याद्युक्तरीत्या जननमारभ्यपितृवदङ्कमारोप्यलालयितरिवनंगच्छति किमनेनेतिव्यज्यते । प्रथमजमिति । गुणवान्ज्येष्ठोरामःकिलप्रव्राजितः अस्यकागतिरिति । लब्ध्वेति । षष्टिवर्षसहस्रपर्यन्तमपुत्रेणराज्ञाऽतिक्लेशेनसंपादितोप्येवंनिर्वासितः व्रतोपवासादिनियमेनबहुकालाल्लब्धोमत्पुत्रःकीदृशोभविष्यतीति ॥ १० ॥ **स०** त्रिपुद्वादशाष्टमजन्मस्थानेषु शङ्कुरिवशङ्कुः शनैश्चरः । “द्वादशाष्टमजन्मस्थाःशन्यर्काङ्गारकागुरुः” इत्यत्रप्रथमोद्दिष्टत्वादत्रापितथाशनेर्ग्रहणं । एतेन त्रिशङ्कोरग्रगत्वात्कथंसोमप्राप्तिरितिशङ्कानवकाशः ॥ ११ ॥ **ति०** विशाखाः विमार्गस्थाः । **ती०** विशाखाःइक्ष्वाकुकुलनक्षत्रं विशाखानक्षत्रादुत्पन्नसूर्यवंशजत्वादिक्ष्वाकोरित्याशयः । **स०** विशाखाः शान्त्यर्थंबलियाचकाः । “विशाखोयाचके स्कन्दे”इति हैमः : प्रचकाशिरे ददृशिरे ॥ १२ ॥ **शि०** अत्रसत्वगुणवतांशोकः सार्वकालिकस्वसहायभूतदशरथादिशोकदर्शनजनितः । तमोगुणवतांतु निश्चितरावणादिविध्वंसजनितइतिविवेकः ॥१३॥ **स०** इदमुत्पातान्तरं । अतोनपौनरुक्त्यम् ॥ १४ ॥

[पा०] १ ङ. झ. ट. संक्षयं. २ क. ङ. ट. सुस्वरंचैव. ग. सस्वनंच. ३ झ. ट. ठ. नाग्निहोत्राण्यहूयन्तसूर्यश्चान्तरधीयत. ४ ट. कंवलान्नागाः. ५ पुत्रमित्यर्धं झ. ट. ठ. पुस्तकेपुनदृश्यते. ६ च. दृष्ट्वा. ७ क. ख. घ—छ. झ. ट. ठ. विशाखाश्च. ८ ख. ग. घ. विधूमाश्च. ९ क—घ. ज. रिवोद्धतः. १० च. प्रचचार. ११ क. तिमिरेणसमावृताः.

शोकपर्यायसंतप्तः सततं दीर्घमुच्छ्वसन् ॥ अयोध्यायां जनः सर्वः [1]शुशोच जगतीपतिम् ॥ १६ ॥
वाष्पपर्याकुलमुखो राजमार्गगतो जनः ॥ न हृष्टो लक्ष्यते कश्चित्सर्वः शोकपरायणः ॥ १७ ॥
न वाति पवनः शीतो न शशी सौम्यदर्शनः ॥ न सूर्यस्तपते [2]लोकं सर्वं पर्याकुलं जगत् ॥ १८ ॥
अनर्थिनः सुताः स्त्रीणां भर्तारो भ्रातरस्तथा ॥ सर्वे सर्वं परित्यज्य राममेवान्वचिन्तयन् ॥ १९ ॥
ये तु रामस्य सुहृदः सर्वे ते मूढ[3]चेतसः ॥ शोकभारेण चाक्रान्ताः शयनं [4]न जहुस्तदा ॥ २० ॥
ततस्त्वयोध्या रहिता महात्मना पुरन्दरेणेव मही सपर्वता ॥
चचाल घोरं भय[5]शोकपीडिता सनागयोधाश्वगणा ननाद च ॥ २१ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे एकचत्वारिंशः सर्गः ॥ ४१ ॥

द्विचत्वारिंशः सर्गः ॥ ४२ ॥

रामरथमार्गानुगतेनदशरथेनरथरजसोप्यदर्शनेखेदाद्भूमौनिपतनम् ॥ १ ॥ तदुत्थापनायकैकेयीकौसल्याभ्यांपार्श्वोपसर्पणेराज्ञाकैकेय्यांप्रतिसोपालंभंस्वस्पर्शनप्रतिषेधनम् ॥ २ ॥ कौसल्ययाराजानमुत्थाप्यतेनसहप्रतिनिवर्तनम् ॥ ३ ॥ राजाज्ञया भृत्यैस्तस्यकौसल्यागृहप्रवेशनम् ॥ ४ ॥ रामाद्यनुशोचनेनशयानस्यराज्ञःसमीपोपवेशिन्याकौसल्ययादुःखाद्विलापः ॥ ५ ॥

यावत्तु निर्यतस्तस्य रजोरूपमदृश्यत ॥ नैवेक्ष्वाकुवरस्तावत्संजहारात्मचक्षुषी ॥ १ ॥

रणंविनेत्यर्थः ॥ १५ ॥ शोकपर्यायसंतप्तः शोकपरम्परासंतप्तः ॥ १६—१८ ॥ सुताः स्त्रीणामनर्थिनः मातॄणांस्तन्यंनापेक्षन्तइत्यर्थः । भर्तारः स्त्रीणामनर्थिनः । भ्रातरःअनर्थिनः अन्योन्यमितिशेषः । सर्वे अनुरक्ताः सर्वे ॥ १९ ॥ शयनं मूर्च्छाशयनमित्यर्थः । येत्वित्यनेन पूर्वेभ्योवैलक्षण्यमुच्यते । चक्रवर्तीगतिमनुमेने श्रीकौसल्यामङ्गलाशासनमकरोत् तथानभवन्ति सुहृदः तेषामेकोपिनकिंचिदकार्षीत् । रामस्यसुहृदः पित्रोरपिगोप्यंरामोयेभ्यः प्रकाशयति तादृशाःसुशोभनहृदयाः सुहृदः आत्मानंत्यक्त्वाराममेवरक्षन्तइत्यर्थः । सर्वेत्रइति तेषुकश्चिदप्यन्यादृशोनास्तीतिभावः । यदिसुहृदस्तर्हिपादौसंगृह्यरामोनिवर्त्यतामित्यत्राह—मूढचेतसः प्रसन्नबुद्धिभिःकर्तव्यंकथंबुद्धिहीनाःकुर्वन्तीतिभावः । ज्ञानभ्रंशस्यहेतुमाह—शोकेति । पर्वतेनेवशोकभारेणाक्रान्ताःशयनंनजहुः पर्वताक्रान्ताः कथमुत्तिष्ठेयुरितिभावः । तदा पारवश्यकाले । ननु स्वयंस्वबुद्ध्याशयानाह्युत्तिष्ठन्ति ॥ २० ॥ पुरन्दरेणेवमहीतित्रैलोक्याधिपतित्वादुक्तं । यद्वा पुरन्दरेण गोत्रभिदाहेतुना पर्वतसहितामहीयथाचलति तद्रक्षकरामविश्लेषेणगजाश्वसहितायोध्या भयेनचचालेत्यर्थः ॥ २१ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने एकचत्वारिंशः सर्गः ॥ ४१ ॥

निर्यतः निर्गच्छतः । तस्यरामस्यसंबन्धिरजोरूपं रजःस्वरूपं यावददृश्यत तावन्नसंजहार ननिवर्तित-

---

स० जगतीपतिमुद्दिश्यचुकोपेतिपाठे साक्षाद्दशरथस्यकोपाविषयत्वान्नचतुर्थी ॥ १६ ॥ **ती०** सुताः अनर्थिनः अनपेक्षिणोऽभवन् । मातापित्रोरितिशेषः । तथा स्त्रीणांभर्तारोऽनर्थिनोऽभवन् भ्रातरश्चानर्थिनोभवन् । भ्रातॄणामितिशेषः । अयमर्थः । वनंगच्छन्तंरामंदृष्ट्वा कौसल्या ननिवारितवतीतिकृत्वा मातरोनिष्प्रयोजनाइति सुता जननीरत्यजन् । रामोपिमातरंत्यक्त्वावनं गतइतिकृत्वा पुत्रेणनार्थइति मातरस्सुतानत्यजन् । भर्तारः पत्युपद्रवकारिणींकैकेयीमवेक्ष्य स्वभार्याअत्यजन् । भार्याअपि कौसल्यामुपेक्ष्य तत्पुत्रंवनंगमयन्तंराजानमवेक्ष्य स्वभर्तृनत्यजन् । भ्रातरोपि भरतंरामराज्यापहारहेतुंमत्वा भ्रातृनत्यजन् । एवं कनीयांसोपि ज्येष्ठानत्यजन्निति । ततस्सर्वेसर्वंपरित्यज्य रामएवसर्वेषांनोबन्धुःकिमन्यैरिति तमेवान्वचिन्तयन्अचिन्तयन् ॥ १९ ॥ **स०** शयनं अधश्शयनं नजहुः नत्यक्तवन्तः ॥ २० ॥ इत्येकचत्वारिंशस्सर्गः ॥ ४१ ॥

[पा०] १ च. ट. ठ. तुकोप. ङ. झ. चुक्रोश. २ च. लोके. ३ घ. चेतनाः. ४ ङ. च. छ. झ. ट. नैवभेजिरे. ५ क. ग. घ. भारपीडिता. ङ. च. झ. ट. शोकदीपिता.

यावद्राजा प्रियं पुत्रं पश्यत्यत्यन्तधार्मिकम् ॥ [1]तावद्व्यवर्धतेवाऽस्य धरण्यां पुत्रदर्शने ॥ २ ॥
न पश्यति रजोऽप्यस्य यदा रामस्य भूमिपः ॥ तदाऽऽर्तश्च विषण्णश्च पपात धरणीतले ॥ ३ ॥
तस्य [2]दक्षिणमन्वागात्कौसल्या बाहुमङ्गना ॥ [3]वामं चास्यान्वगात्पार्श्वं कैकेयी [4]भरतप्रिया ॥ ४ ॥
तां नयेन च संपन्नो धर्मेण विनयेन च ॥ उवाच राजा कैकेयीं समीक्ष्य व्यथितेन्द्रियः ॥ ५ ॥
कैकेयि [5]मा ममाङ्गानि स्प्राक्षीस्त्वं दुष्टचारिणी ॥ न हि त्वां द्रष्टुमिच्छामि न भार्या न च बान्धवी ॥ ६ ॥
ये च त्वामनुजीवन्ति नाहं तेषां न ते मम ॥ केवलार्थपरां हि त्वां त्यक्तधर्मां त्यजाम्यहम् ॥ ७ ॥
अगृह्णां यच्च ते पाणिमग्निं पर्यणयं च यत् ॥ अनुजानामि तत्सर्वमस्मिँल्लोके परत्र च ॥ ८ ॥
भरतश्चेत्प्रतीतः स्याद्राज्यं प्राप्येदमव्ययम् ॥ [6]यन्मे [7]स दद्यात्प्रीत्यर्थं मां मा तद्दत्तमागमत् ॥ ९ ॥
अथ रेणुसमुध्वस्तं [8]तमुत्थाप्य नराधिपम् ॥ न्यवर्तत तदा देवी कौसल्या शोककर्शिता ॥ १० ॥
हत्वेव ब्राह्मणं कामात्स्पृष्ट्वाऽग्निमिव पाणिना ॥ अन्वतप्यत धर्मात्मा पुत्रं संचिन्त्य [9]तापसम् ॥ ११ ॥
निवृत्त्यैव निवृत्त्यैव सीदतो रथवर्त्मसु ॥ राज्ञो नाति बभौ रूपं ग्रस्तस्यांशुमतो यथा ॥ १२ ॥

वान् ॥ १ ॥ पश्यति रजोद्वारेणेतिशेषः । पुत्रदर्शने पुत्रदर्शननिमित्तं । धरण्यांरजोव्यवर्धत मन्त्रिसिक्तकेनपुत्रदर्शनेनराजाकंचित्कालमाप्यायितोभवेदितिमत्वेवरजोव्यवर्धतेत्यर्थः । अथवा अस्यदेहोव्यवर्धत पुत्रदर्शनायोत्थायस्थितइत्यर्थः ॥ २ ॥ आर्तः पीडितशरीरः । विषण्णः दुःखितः ॥३॥ बाहुमन्वागात् उद्धरणार्थमितिभावः । भरतप्रिया प्रियभरता । पार्श्वमित्यनेन कौसल्यावद्बाहुंनालम्बितवतीतिगम्यते ॥ ४ ॥ नयेन नीत्या । विनयेन सदाचारेण ॥ ५ ॥ नभार्या नचबान्धवी त्वमितिशेषः । नचबान्धवी पत्नीत्वसंबन्धोपिनास्तीत्यर्थः । अणन्तत्वान्ङीप् ॥ ६ ॥ नकेवलंत्वयिसंबन्धाभावः त्वत्संबन्धिष्वपिममसंबन्धोनास्तीत्याह—येचेति । नाहंतेषामिति प्रभुरितिशेषः । नतेमम शेषभूताइत्यर्थः ॥ ७ ॥ अग्निसाक्षिकमूढा कथंनभार्यास्यामित्यत्राह—अगृह्णामिति । पर्यणयं प्रदक्षिणमनयं । अनुजानामि परित्यजामीत्यर्थः । इह लोकेपरत्रच ऐहिकमामुष्मिकंचसर्वं त्वत्संबन्धेनागतं त्यजेयमित्यर्थः ॥ ८ ॥ प्रतीतः प्रमुदितइत्यर्थः । पित्रर्थंयदुदकादिकंदद्यात् तद्दत्तं मांमागमत् नोपतिष्ठेदित्यर्थः ॥ ९ ॥ न्यवर्तत तेनसहेतिशेषः ॥ १० ॥ तापसं तापसवेषधारिणं ॥ ११ ॥ ग्रस्तस्य राहुग्रस्त-

---

ती० दक्षिणंबाहुंउद्धृत्य गृहीत्वा कौसल्याअन्वगात् ॥ ४ ॥ **स०** केवलार्थपरां केवलस्वार्थपरां । यद्वा केवलोरामः जडदेहामिश्रितत्वात् । तस्यार्थोनिवृत्तिःतत्परां ॥ ७ ॥ **ती०** इहलोकेतत्सर्वमनुजानामित्यजामि । इतःपरंत्वयासहक्रीडादिव्यवहारंत्यजामीत्यर्थः । परलोकेत्यजामीति इतःपरंपरलोकार्थमग्निहोत्रादिकर्मत्यजामीत्यर्थः ॥ ८ ॥ **ति०** ननुममत्यागेपिमत्पुत्रादेःकथंत्यागः "येचत्वामनुजीवंति" इत्यादिनोक्तस्तत्राह—**भरतइति** । यदित्वयाप्रापितंराज्यंप्राप्य भरतःप्रतीतःतुष्टस्स्यात् तर्हि मेमरणानंतरं सभरतः पित्रर्थं पितृत्वप्रयुक्तश्राद्धार्थंयद्दद्यात् तत् तद्दत्तं मां मागमत् माप्राप्नोत्वित्यर्थः । अन्यथातुतंनत्यजामीत्यर्थः । **कतक०** अनुजानामीत्यादिसार्धश्लोकएकंवाक्यं । तत्पूर्वार्धेत्यजामीत्यस्यानुकर्षः । तत्तृतीयार्धे 'यन्मेसदद्यात्पित्रर्थंमामतद्दत्तमागमत्' इतिपाठः । सदद्यादितिचावर्तते । भरतस्त्वयाप्रापितंराज्यंप्राप्य प्रतीतः विवेकवान्सन्यत्प्राप्तंराज्यं तत्सपित्रर्थं पितुर्मम्प्रीतिसंपादनाययदिदद्यात् त्यजेत्' मांच अतद्दत्तं नकृतंतस्मैदत्तंदानंराज्यस्ययेनतादृशंमां प्रीत्या पूर्ववदागमत्प्राप्नुयाच्चेत् तदा यत्समेदद्यात् अस्मिँल्लोकेविहारशय्याभोजनादि परत्रचपरलोकेपिण्डदानादि तत्सर्वमनुजानामि अंगीकरोमि अन्यथा तंत्यजाम्येवेत्यर्थः । **स०** प्रतीतः अहमितिशेषः । अहंयदिप्रतीतः मृतस्स्यां तदाभरतःप्रतीतःहृष्टःसादरोवा । एतदव्ययंराज्यंप्राप्यपित्रर्थं यद्दद्यात् तन्मा मां मागतं नप्राप्नोतु । "प्रतीतःसादरेहृष्टे" इति "वाच्यवत्स्यात्प्रतीतंप्रोक्षितेपिच" इतिचविश्वः ॥९॥ **स०** न्यव-

[पा०] १ क. तावद्विवर्धतेपांसुः. २ च. छ. मुद्धृत्य. ज. मन्वायात्. ३ ङ. छ. ट. परं. ४ झ. ट. ट. सासुमध्यमा. ५ ङ. च. छ. झ. ट. ठ. मामकाङ्गानिमास्प्राक्षीःपापनिश्चये. ६ यन्मेसदद्यादित्यर्धानन्तरं "राज्यस्थोभरतोयन्मांतन्मांनाभ्युपगच्छतु" इत्यर्धमधिकंदृश्यते घ. पुस्तके. ७ ग. च—झ. ठ. सदद्यात्पित्रर्थं. घ. दद्यात्सपित्रर्थं. ८ ङ—झ. ट. समुत्थाप्य. ९ ङ. झ. ट. राघवं.

विललाप [1]च दुःखार्तः प्रियं पुत्रमनुस्मरन् ॥ नगरान्तमनुप्राप्तं बुद्ध्वा पुत्रमथाब्रवीत् ॥ १३ ॥
वाहनानां च मुख्यानां वहतां तं ममात्मजम् ॥ पदानि पथि दृश्यन्ते स महात्मा न दृश्यते ॥१४॥
यः [2]सुखेषूपधानेषु शेते चन्दनरूषितः ॥ वीज्यमानो [3]महार्हाभिः स्त्रीभिर्मम [4]सुतोत्तमः ॥ १५ ॥
स नूनं क्वचिदेवाद्य वृक्षमूलमुपाश्रितः ॥ काष्ठं वा यदि वाऽश्मानमुपधाय शयिष्यते ॥ १६ ॥
उत्थास्यति च मेदिन्याः कृपणः पांसुकुण्ठितः ॥ विनिश्वसन्प्रस्रवणात्करेणूनामिवर्षभः ॥ १७ ॥
द्रक्ष्यन्ति नूनं पुरुषा दीर्घबाहुं वनेचराः ॥ राममुत्थाय गच्छन्तं लोकनाथमनाथवत् ॥ १८ ॥
सा नूनं जनकस्येष्टा सुता सुखसदोचिता ॥ कण्टका[5]क्रमणाक्रान्ता वनमद्य गमिष्यति ॥ १९ ॥
अनभिज्ञा वनानां सा नूनं भयमुपैष्यति ॥ श्वापदानर्दितं श्रुत्वा गम्भीरं रोमहर्षणम् ॥ २० ॥
सकामा भव कैकेयि विधवा राज्यमावस ॥ न हि तं पुरुषव्याघ्रं विना जीवितुमुत्सहे ॥ २१ ॥
इत्येवं विलपन्राजा जनौघेनाभिसंवृतः ॥ अपस्नात इवारिष्टं प्रविवेश [6]पुरोत्तमम् ॥ २२ ॥
शून्यचत्वरवेश्मान्तां संवृतापण[7]देवताम् ॥ क्लान्तदुर्बलदुःखार्तां नात्याकीर्णमहापथाम् ॥ २३ ॥
तामवेक्ष्य पुरीं सर्वां राममेवानुचिन्तयन् ॥ विलपन्प्राविशद्राजा गृहं सूर्य इवाम्बुदम् ॥ २४ ॥

स्य ॥ १२—१४ ॥ वीज्यमानः चामरव्यजनादिभिरितिशेषः । स्त्रीभिः परिचारिकाभिः ॥ १५—१६ ॥ प्रस्रवणात् निर्झरात् । तत्समीपादित्यर्थः । "उत्सःप्रस्रवणंवारिप्रवाहोनिर्झरोझरः" इत्यमरः ॥१७॥ अनाथवत् गच्छन्तमित्यन्वयः॥१८॥ सुखसदोचिता सुखस्यसदोचिता । कण्टकेष्वाक्रमणं पदविक्षेपः ॥१९॥ श्वापदानर्दितं श्वापदाः व्याघ्रादिहिंस्रपशवः तेषां आनर्दितं शब्दं ॥ २०—२१ ॥ अपस्नातः मृतस्नातः । " अपस्नातो मृतस्नातः" इत्यमरः । अरिष्टं अशुभं । " अरिष्टे तुशुभाशुभे " इत्यमरः । ननु राममनुगम्यपुनःपुरप्रवेशसमये अपस्नातोरिष्टमितिकथमश्लीलमुक्तं । सत्यं दशरथोहितदानीं नूनंभयमुपैष्यतीत्यादिनासीताविपत्तिशङ्कमानस्तद्द्वारारामविपत्तिंतन्मुखेनस्वस्यापिविनाशशङ्कितवान् । अतएवसीताद्वारा रामविपत्तिशङ्कया सकामाभवकैकेयीत्युक्तवान् । स्वविनाशाभिप्रायेण विधवाराज्यमावसेत्युपदर्शितवांश्च । तेनापस्नातइवेत्युक्तिः राजबुद्ध्यनुसाराद्‌उचितैव ॥ २२ ॥ शून्यचत्वरवेश्मान्तां निर्जनचतुष्पथगृहद्वारां । संवृतापणदेवतां पिहितापणदेवतागृहद्वारां । क्लान्तदुर्बलदुःखार्ता चिन्तातिरेकेणक्लान्ता रामविरहेणनिःसत्वाः दुःखार्ताश्च जनाः यस्यां तथा । अनेनसंचारक्षमाः सर्वेराममनुगताइतिद्योत्यते । नात्याकीर्णमहापथां क्वचित्क्वचिद्दृश्यमानजनयुक्तमहापथामित्यर्थः । अवान्तरमार्गा-

---

तंत अन्तर्णीतण्यर्थः ॥ १० ॥ **ति०** आत्मानंनगरान्तं नगरसमीपंप्राप्तंबुद्ध्वा पुत्रंचाप्राप्तंबुद्ध्वा अब्रवीदितितकः । यद्वा पुत्रंनगरान्तं नगरबाह्यदेशंप्राप्तंमत्वेत्यर्थः । **स०** बुद्ध्वा तथाज्ञात्वा । तच्चिन्तनैकनिरतत्वात्तथाभ्रमोजातइतिभावः ॥ १३ ॥ **स०** राममागतंबुद्ध्वानदृश्यतइत्युक्त्या तद्विरहहेतुकोमोहइतिध्वन्यते ॥ १४ ॥ **ती०** अरिष्टंसूतिकागृहं तद्वत्कश्मलं । **शि०** उपसंहरन्नाह—**इतीति** । तपस्नातः अपगतंस्नातं स्नानंयस्य अकृतस्नानइत्यर्थः । किंच अपस्नातं अपस्नाः स्नानाभाव इत्यर्थः । भावेक्विप् । आंअततिप्राप्नोतीत्यपस्नानः । पचाद्यच् । किंच पानं पः । पानार्थकपाधातोर्घञर्थेकः । जलपानादिरित्यर्थः । तस्याभावोऽपः । अपेस्नातो निरतः अपस्नातः । स्नाधातोर्निरतार्थत्वंतु मन्त्रस्नातइत्यादौप्रसिद्धम् । तथाचाकृतभोजनादिरित्यर्थस्संपन्नः । किंच पानंपः । रक्षणार्थकपाधातोःकः । तस्याभावःअपः तत्रस्नातोनिरतःअपस्नातः । इतःप्रभृतिपृथिवीराज्यंनकरिष्यामीतिप्रतिज्ञातवानितिभावः । किंच नपीयेतेइत्यपौ अश्रुप्रस्वेदौ ताभ्यांस्नातः प्रस्वेदाश्रुक्लिन्नशरीरकइत्यर्थः । राजा अरिष्टं रामवियोगिनामतिहिंसकमिव पुरोत्तमयोध्यांप्रविवेश । "अपस्नातोमृतस्नातः" इतिकोशघटकीभूतापस्नातशब्दस्तु अपोपसर्गपूर्वकस्नातप्रकृतिकनिष्ठान्तइति नात्रतद्विषयता । एतेन अपस्नातोमृतस्नातइतिभट्टभूषणाद्युक्तिश्चिन्त्या । अमाङ्गलिकत्वेनतस्येहासंभवात् ॥ २२ ॥ **ती०** शून्याः संमार्जनरहिताः चत्वरंचतुष्पथंवेश्मनामन्ताःमध्यप्रदेशाश्चयस्यांतां । **ति०** संवृतापणवेदिकां

[पा०] १ च. झ. सदुःखार्तः. क. छ. सुदुःखार्तः. २ ङ. छ. ज. झ. ठ. सुखेनोपधानेषु. ३ च. महाबाहुः. ४ च. नरोत्तमः. ५ क. ग—झ. ठ. क्रमणक्लान्ता. ६ ङ. छ. झ. ठ. गृहोत्तमं. ७ ङ. छ. झ. ठ. वेदिकां.

महाह्रदमिवाक्षोभ्यं सुपर्णेन हृतोरगम् ॥ रामेण रहितं वेश्म वैदेह्या लक्ष्मणेन च ॥ २५ ॥
अथ गद्गदशब्दस्तु विलपन्[1]मनुजाधिपः ॥ उवाच मृदु मन्दार्थं वचनं दीनमस्वरम् ॥ २६ ॥
कौसल्याया गृहं शीघ्रं राममातुर्नयन्तु माम् ॥ न ह्यन्यत्र ममाश्वासो हृदयस्य भविष्यति ॥ २७ ॥
इति ब्रुवन्तं राजानमनयन्द्वारदर्शिनः ॥ कौसल्याया गृहं तत्र न्यवेश्यत विनीतवत् ॥ २८ ॥
ततस्तस्य प्रविष्टस्य कौसल्याया निवे[2]शनम् ॥ अधिरुह्यापि शयनं बभूव लुलितं मनः ॥ २९ ॥
पुत्रद्वय[3]विहीनं च स्नु[4]षयाऽपि विवर्जितम् ॥ अपश्यद्भवनं राजा नष्टचन्द्रमिवाम्बरम् ॥ ३० ॥
तच्च दृष्ट्वा महाराजो भुजमुद्यम्य वीर्यवान् ॥ उच्चैःस्वरेण [5]चुक्रोश [6]हाराघव जहासि [7]माम् ॥ ३१ ॥
[8]सुखिता बत तं कालं जीविष्यन्ति नरोत्तमाः ॥ परिष्वजन्तो ये रामं द्रक्ष्यन्ति पुनरागतम् ॥३२॥
अथ रात्र्यां [9]प्रपन्नायां कालरात्र्यामिवात्मनः ॥ अर्धरात्रे दशरथः कौसल्यामिदमब्रवीत् ॥ ३३ ॥
[10]रामं मेऽनुगता दृष्टिरद्यापि न निवर्तते ॥ न [11]त्वां पश्यामि कौसल्ये साधु[12]मां पाणिना स्पृश ॥३४॥

स्तुकेवलंनिर्जनाइतिभावः ॥ २३—२४ ॥ कीदृशं प्राविशदित्यपेक्षायामाह—महाह्रदमिति । अक्षोभ्यं सोरगतया । प्राविशदित्यनुषङ्गः ॥२५॥ गद्गदःशब्दो यस्यसतथोक्तः। मृदु उपांशु । मन्दार्थं अल्पार्थं । शब्दप्रपञ्चवदित्यर्थः । अस्वरं कण्ठस्वररहितं॥२६॥ नयन्तु द्वारदर्शिनइतिशेषः।अन्यत्र तद्व्यतिरिक्तस्त्रीगृहे॥२७॥ द्वारदर्शिनः मार्गप्रदर्शकाः द्वारपालकाः । न्यवेश्यत निवेशितः । विनीतवत् विनीतार्हं ॥ २८ ॥ लुलितं कलुषितमितियावत् ॥२९॥ नष्टचन्द्रं उपलक्षणमेतत् । चन्द्रनक्षत्रताराहीनमित्यर्थः ॥३०—३१॥ तंकालं तस्मिन्काले तावत्कालमितिवा ॥ ३२ ॥ कालरात्र्यां संहाररात्र्यां । प्रपन्नायां प्राप्तायां ॥ ३३ ॥

राममनुगतादृष्टिः समुद्रगृहीतंपुनः किंनिवर्तते । मे दृष्टिः षष्टिवर्षसहस्रंकृतोपवासादिकंनिवर्तते अद्यापि ननिवर्तते तद्दर्शनाभावेपितन्मातृत्वदर्शनंकर्तुमुचिते कालेपिननिवर्तते । नत्वापश्यामिकौसल्ये रामदर्शनं विनाकैकेयीमुखदर्शनपापनिवृत्तयेत्वन्मुखंद्रष्टुमुत्सुकोस्मि तदपिनलब्धं । साधुमांपाणिनास्पृश नित्यानुमेयानीन्द्रियाणिकार्यकल्प्यानि । रूपग्रहणाभावाच्चक्षुरिन्द्रियंगतमित्यवगतं । त्वगिन्द्रियमस्तिनवेतिसंप्रति जानीहि साधु कैकेय्याकृतसंकेतोरामंनिर्यापितवान् अद्यकिंचिदभिनयंकरोतीतिनमन्येथाः अयमज्ञानादेवंकृतवानितिसमनस्कतयास्पृश । यद्वा मांपाणिनास्पृश राममातृत्वात्तवपाणिस्पर्शनंरामस्पर्शनमितिभावः

संवृताआवृताःपण्यस्थापनवेदिकाःयस्यांतां ॥ २३ ॥ **ती०** सुपर्णेनहृतोरगमिति रिपूणांनिर्भयप्रवेशमात्रेदृष्टान्तः ॥ २५ ॥ **ती०** मृदु मन्दोच्चरितं । मन्दार्थं अबुद्धार्थं । **स०** अस्वरं श्राव्यस्वररहितं ॥ २६ ॥ **ति०** तत्र गृहे । तंविनीतवत्पर्यङ्केन्यवेश्यत । राजेतिशेषः । यद्वा तन्निवेशनोत्तरं राजाविनीतवदधोमुखआसेतिशेषः ॥ २८ ॥ **ती०** हेकौसल्ये त्वांनपश्यामि अतस्त्वंमांपाणिनासाधुसम्यक्स्पृश । कुतः मेदृष्टिरद्यापिननिवर्तते । तत्कुतः राममनुगता । "रमन्तेयोगिनोऽनन्तेसत्यानन्दे चिदात्मनि । इतिरामपदेनासौपरंब्रह्माभिधीयते" इतिश्रुतेः । अतोऽद्यापिननिवर्ततइतिसंबन्धः । अयंभावः । चक्षुषोरामैकप्रवणत्वभाग्यलाभवत्सर्वेन्द्रियाणांतादृग्भाग्यंयदिलभ्येत तदानीं मदन्योधन्योनकोपीतिमनसिनिधाय सर्वेन्द्रियाणांतत्प्रार्थयन्नादौताव-त्त्वचस्तदस्तिनास्तिवेतिनिश्चेतुं मांस्पृशेति कौसल्यांनियोजयतीति । **शि०** हेकौसल्ये त्वामहंनपश्यामि नद्रष्टुमिच्छामि । अतोमां पाणिना अस्पृश स्पर्शमाकुरु । दर्शनेच्छाऽभावेहेतुः अनुगता प्राप्ता । अइतिनिषेधार्थकमव्ययंप्रश्लिष्यते । **स०** त्वांनपश्यामि । तत्रहेतुमाह—**राममिति** । ननिवर्ततेअतोनपदार्थान्तरंदृश्यते । **तनि०** पञ्चेन्द्रियाणांप्रत्येकमनन्यार्हशेषत्वमुच्यते—**राममिति** । रामं गुणसागरं । ननिवर्तते समुद्रगृहीतंपुनरायातिकिम् । "समुद्रइवगांभीर्ये" "गुणानामाकरोमहान्"इतिसमुद्रस्थानत्वमुक्तं । यद्वा रामंमेऽनुगतादृष्टिः रामंरमयतांवरमितिचेतनाचेतनविभागानादरेण रमयितृत्वगुणस्सखलु । सर्वत्रचक्षुःखलुरूपग्राहकं अत्रतुरामेरूपंचक्षुर्ग्राहकं । अनुगतपदार्थदर्शनसमर्थंचक्षुरधुना संचारक्षमंजातं । "कामरूप्यनुसंचरन्" इत्या-

[पा०] १ च. झ. न्वसुधाधिपः. २ घ. ङ. निवेशने. ३ क. च. विहीनंतत्. ४ ख. ग. ङ—झ. ट. स्नुषयाच. ५ ङ. च. छ. झ. ट. प्राक्रोशद्धा. ६ क. हाहारामजहासि. ङ. च. झ. हारामविजहासि. ७ ङ. झ. नौ. ८ क. सुखिनःसततं. ख. सुखिताःसततं. ९ ग. ज. प्रवृत्तायां. १० रामंमेऽनुगतेतिश्लोकेपूर्वोत्तरार्धयोःपौर्वापर्यं क—झ. ट. पुस्तकेषुदृश्यते. ११ ख. ङ—झ. त्वां. १२ क. ख. ङ. झ. मा.

तं राममेवानुविचिन्तयन्तं समीक्ष्य देवी शयने नरेन्द्रम् ॥
उपोपविश्याधिकमार्तरूपा विनिश्वसन्ती विललाप कृच्छ्रम् ॥ ३५ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे द्विचत्वारिंशः सर्गः ॥ ४२ ॥

त्रिचत्वारिंशः सर्गः ॥ ४३ ॥

रात्रौकौसल्ययादशरथसमीपेरामादीन्प्रत्यनुशोचनम् ॥ १ ॥

ततः समीक्ष्य शयने सन्नं शोकेन पार्थिवम् ॥ कौसल्या पुत्रशोकार्ता तमुवाच महीपतिम् ॥ १ ॥
राघवे नरशार्दूले विषमुप्त्वा विजिह्मताम् ॥ विचरिष्यति कैकेयी निर्मुक्तेव हि पन्नगी ॥ २ ॥
विवास्य रामं सुभगा लब्धकामा समाहिता ॥ त्रासयिष्यति मां भूयो दुष्टाहिरिव वेश्मनि ॥ ३ ॥

॥३४॥ उपोपविश्य शयनसमीपेउपविश्येत्यर्थः ॥३५॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने द्विचत्वारिंशः-सर्गः ॥ ४२ ॥

॥ १ ॥ विजिह्मतांविषं कौटिल्यरूपंविषं । राघवे उप्त्वा निक्षिप्य। निर्मुक्त्वा मुक्तकञ्चुकी । "निर्मुक्तोमुक्तकञ्चुकः" इत्यमरः। अनेनक्रौर्यातिशयउक्तः॥२—

द्युक्तचेतनकृत्यमचेतंनकरोति । देशविशेषेपरमपदेक्रियमाणमनुसंचरणं संसारचक्रेरामंप्रतिक्रियते । यद्वा दृष्टिः राममनुगता "चक्षुर्देवानामुतमर्त्यानां" इतिदेवमनुष्यादिदृष्टिभूतोरामः पुरतोगच्छति अहंतिष्ठामिवेत्यनुगता । दृष्टिः दृशिर्प्रेक्षणेइतिनिष्पन्ना । सारासारविवेकशालिनीविशेषग्रहणशक्तारामममनुगता । ममहितकारिणी स्वहितंनकरोतिकिं । अस्वतन्त्रामेदृष्टिः कथमेवंस्वातन्त्र्यं कृतवती । शेष्यतिशयाधानंखलूचितंशेषवस्तुनः । यद्वा मेदृष्टीराममनुगता ममचिरपरिचिता मांविहाय राममनुगतेत्यभिसारिकासमाधिः । यद्वा मेदृष्टिः कैकेयीमन्थरादिदृष्टिश्चेदेवंनकरोत्येव "नन्दामिपश्यन्नपिदर्शनेन" इत्येवंचिरपरिचयंसंपादितवानहं खलु । यद्वा मेदृष्टिः सर्वत्रविषयेषु चपलस्यमेदृष्टिः कथंचापलंनगच्छति । विहायगतामपिमेदृष्टिरित्यहमनुरक्तिंकरोमि मातरंविहायपतिमनुसृतायांकन्यायांममेयमित्यभिमानवत् । ममेन्द्रियंचेन्मामनुसृत्यतिष्ठेत् कथमन्थमनुसरेत् । स्वविषयानुसरणंनदोषइतिचेत्तत्राह। अद्यापिननिवर्तते अतिक्रान्तेपिराघवे इति स्वगोचरातिक्रमेपिननिवर्तते । कैकेयीमुखनिरीक्षणव्रीडयाकिम् । यद्वा "नचपुनरावर्तते" इत्युक्तापुनरावृत्तिंप्राप्ताकिं । अनिवर्तनेयुक्तिमाह—**नत्वापश्यामीति** । पुनरागताचेत्तवदर्शनं समकथंनस्यात् । त्वांनपश्यामि स्वरेणपुरोऽवस्थितांनिर्दिशामि । "नचक्षुपापश्यति" इतिश्रुत्या तन्मुखदर्शनालाभेपि तन्मातुस्तवमुखं वापश्यमीत्यभिलपित तच्चनलब्धं । राममनुगतादृष्टिः नत्वांपश्यामि रामेनिमग्नादृष्टिरन्यंस्पृशतिकिं । चक्षुरिन्द्रियनाशेपि वागिन्द्रियेणप्राणिमीत्याशयेनाह—**कौसल्येति** । "एषमेजीवितस्यान्तोरामोयद्यभिषिच्यते" इतिव्यतिरेककाष्ठाभूतायाःकैकेय्याः "किंपुनःप्रोषितेतातध्रुवंमरणमेवमे" इत्यन्वयकाष्ठाभूताखलुत्वं । कौसल्ये "कौसल्यालोकभर्तारंसुषुवेयंमनस्विनी" इतिचिरकालप्रार्थनयालोकरक्षणार्थंसंपादनंकृतं तदिदानींतवदुःखायजातंखलु । यद्वा कौसल्येत्वांनपश्यामि अनर्थकरकैकेयींपश्यचक्षुस्तद्दुःखनिवारणायत्वांनपश्यतिकिं । रामविश्लेषासहनेनसीदन्त्याः दशरथविश्लेषोपिभविष्यतिवेतिभीत्यानिकटमागतामाह—**साध्विति** । ममकृत्स्नक्लेशनिवारणाय पाणिनामांसंमृज्याश्वासय । तवादर्शनेनचक्षुरिन्द्रियंगतमितिनिश्चिनोमि । तववाक्यश्रवणेनश्रोत्रेन्द्रियंतिष्ठतीतिजानामि । कौसल्येइत्युक्त्या वागिन्द्रियमपितिष्ठतीतिनिश्चिनोमि । गन्धग्रहणाभावेन राममूर्धोपाघ्राणायघ्राणेन्द्रियं गतमितिनिश्चिनोमि । महाविषयलाभेन तदितरविषयस्यातितुच्छत्वात्स्पर्शेन्द्रियं गतंवातिष्ठतिवेतिनिश्चेतव्यं । चोरस्यगृहंप्रविश्य कानिचिद्वस्तूनिगृहीत्वा गमनानन्तरं गृहपतिरंधकारे किंकिंगतमितितत्तद्वस्तुस्पृशन्पत्न्यादीन्पृच्छति तत्समाधिरत्रद्योत्यते । साधुस्पृश प्रकृतिसंबन्धकृतंकालुष्यमिदंस्थिरंनभवति । अतःअजुगुप्सनेनस्पृश । पाणिनास्पृश अग्निसाक्षिकंप्रीतिपूर्वकंयथास्पृष्टंतथास्पृश । रामसंस्पर्शान्वयव्यतिरेकाधीनान्वयव्यतिरेकजीवनंमां तत्प्रतिनिधितयातन्मातात्वंस्पृश । भगवत्स्पर्शालाभेतत्संबन्धिस्पर्शेनापिजीवितुंशक्यं "वाहिवातयतःकान्ता" इतिवत् । जन्मान्तरसुकृतवशेन श्रीरामे अतीव परत्वज्ञानमस्तुवा दशरथस्य कौसल्यायाश्च । कथमुभयोरामपरत्वानुसन्धानपूर्वकसंभाषणमित्युक्तौ ऋपिरेवदशरथादिवचनरीत्या पुनःपुनःपरत्वानुसंधानंकरोतीतिसंप्रदायः ॥ ३४ ॥ इतिद्विचत्वारिंशस्सर्गः ॥ ४२ ॥

ति० सन्नंखिन्नं । **स०** सन्नंशीर्णावयवं ॥ १ ॥ **ति०** अहिजिह्मगा संर्पवत्कुटिलगतिःकुटिलचरित्रा ॥ २ ॥

[पा०] १ ङ. छ. झ. विनिश्वसन्तं. २ च. झ. ट. विपंमुक्त्वाहिजिह्मगा. ट. विपंमुक्त्वाहिजिह्तां. क. विपंमुक्त्वातु. च. ञ. विपंक्षिप्त्वाहि. ३ ग. ज. भूयोमां. ४ ग. वेश्मसु.

अथ स नगरे रामश्चरन्भैक्षं गृहे वसेत् ॥ कामकारो वरं दातुमपि दासं ममात्मजम् ॥ ४ ॥
पातयित्वा तु कैकेय्या रामं स्थानाद्यथेष्टतः ॥ प्रदिष्टो रक्षसां भागः पर्वणीवाहिताग्निना ॥ ५ ॥
गजराजगतिर्वीरो महाबाहुर्धनुर्धरः ॥ वनमाविशते नूनं सभार्यः सहलक्ष्मणः ॥ ६ ॥
वने त्वदृष्टदुःखानां कैकेय्यानुमते त्वया ॥ त्यक्तानां वनवासाय कान्ववस्था भविष्यति ॥ ७ ॥
ते रत्नहीनास्तरुणाः फलकाले विवासिताः ॥ कथं वत्स्यन्ति कृपणाः फलमूलैः कृताशनाः ॥ ८ ॥
अपीदानीं स कालः स्यान्मम शोकक्षयः शिवः ॥ सभार्यं यत्सह भ्रात्रा पश्येयमिह राघवम् ॥ ९ ॥
श्रुत्वेवोपस्थितौ वीरौ कदाऽयोध्यां गमिष्यतः ॥ यशस्विनी हृष्टजना सूच्छ्रितध्वजमालिनी ॥१०॥
कदा प्रेक्ष्य नरव्याघ्रावरण्यात्पुनरागतौ ॥ नन्दिष्यति पुरी हृष्टा समुद्र इव पर्वणि ॥ ११ ॥
कदाऽयोध्यां महाबाहुः पुरीं वीरः प्रवेक्ष्यति ॥ पुरस्कृत्य रथे सीतां वृषभो गोवधूमिव ॥ १२ ॥
कदा प्राणिसहस्राणि राजमार्गे ममात्मजौ ॥ लाजैरवकिरिष्यन्ति प्रविशन्तावरिन्दमौ ॥ १३ ॥
प्रविशन्तौ कदाऽयोध्यां द्रक्ष्यामि शुभकुण्डलौ ॥ उदग्रायुधनिस्त्रिंशौ सशृङ्गाविव पर्वतौ ॥ १४ ॥
कदा सुमनसः कन्या द्विजातीनां फलानि च ॥ प्रदिशन्त्यः पुरीं हृष्टाः करिष्यन्ति प्रदक्षिणम् ॥१५॥
कदा परिणतो बुद्ध्या वयसा चामरप्रभः ॥ अभ्युपैष्यति धर्मज्ञस्त्रिवर्ष इव लालयन् ॥ १६ ॥

३॥अथापि भरतेराज्यदानस्यावश्यकत्वेपि। रामोनगरेभैक्षंचरन्सन्गृहेवसेत् वनेविवासनंकिमर्थं।राज्याभावेपिममात्सजं भरतस्यदासंदातुं कामकारः इच्छा। वरं वनवासाच्छ्रेष्ठतमः ॥ ४ ॥ रामंस्वस्थानात् यथेष्टतः स्वेच्छया अमर्यादया पातयित्वात्वया रामायप्रदेयोराज्यभागःकैकेय्याःप्रदिष्टः । कथमिव आहिताग्निनापर्वणिदेवेभ्योदेयः हविर्भागः पुरोडाशैकदेशः । रक्षसामिव सर्वथानुचितंत्वयाकृतमितिभावः ॥५–६॥ वनेअदृष्टदुःखानांअदृष्टवनदुःखानामित्यर्थः । कैकेय्यानुमते । कैकेय्याअनुमते । स्थितेनेतिशेषः । सवर्णदीर्घआर्षः । त्यक्तानां सीतारामलक्ष्मणानाम् ॥ ७ ॥ रत्नहीनाः श्रेष्ठवस्तुहीनाः । “ रत्नंस्वजातिश्रेष्ठेपि ” इत्यमरः । प्रवरशय्यासनादिहीनाइत्यर्थः । तरुणीच तरुणौचतरुणाः । “ पुमान्स्त्रिया ” इत्येकशेषः । फलकाले फलभोगकाले ॥ ८ ॥ सकालः वनात्प्रत्यागमनकालः । अपिः संभावनायां । इदानीं अद्यदिने । स्यात् स्यात्किमित्यर्थः । शोकक्षयः शोकक्षयकरः । यत् यस्मिन्काले ॥९॥ उपस्थितौ नगरसमीपमागतौ पुरी पौरजनः ॥ १०—१३ ॥ उदग्रायुधनिस्त्रिंशौ । आयुधशब्देनात्रधनुरुच्यते । निस्त्रिंशःखड्गः । “खड्गे तुनिस्त्रिंशः” इत्यमरः ॥१४॥ द्विजातीनां ब्राह्मणानां। कन्याः सुमनसः पुष्पाणिफलानिच । प्रदिशन्त्यःसत्यः पुरींकदाप्रदक्षिणंकरिष्यन्ति । अयमौत्तराणांमङ्गलाचारः ॥१५॥ बुद्ध्यापरिणतः ज्ञानवृद्धइत्यर्थः । वयसा

स० भिक्षाणां समूहोभैक्षं । भिक्षादिभ्योऽण् । चरन्अटन्यदिगृहेवसेत्तर्हिवरंउत्तमं । ममात्मजमपिदासंदातुं ममकामकारः अपेक्षिताचरणं । दासस्सन्नपियदिपुरेवसेद्रामस्तर्हितदेवममेष्टं । तद्वियोगशोकाभावादितिभावः । ति० एवंच एवंवरयाचनंममातित्रासनार्थमेवेतिव्यङ्ग्यं ॥ ४ ॥ ती० यद्वा पातयित्वेति । कैकेय्याकर्त्र्या रामःस्वस्थानात्राज्यात्पातयित्वाभ्रंशयित्वा रक्षसांभागस्सन् यथेष्टतः यथेच्छं प्रदिष्टः विनियुक्तः । प्रविद्धइतिपाठेक्षिप्तइत्यर्थः। अत्रदृष्टान्तमाह—**पर्वणीति** । पर्वणि दर्शपूर्णमासरूपपर्वणि । आहिताग्निना व्रीहिगततुषजालमितिशेषः । रक्षसांभागइवेति । पर्वण्याहिताग्निनाव्रीहिगततुषजालंयथारक्षोभागत्वेनप्रदिष्टं तथा कैकेय्यापि रामोराक्षसभागत्वेनविनियुक्तइतिभावः । अतएव दर्शपूर्णमासानुक्रमणिकायां रक्षोभ्यस्स्वाहा रक्षोभ्यइदंनममेत्युद्देश्यत्यागः ॥ ५ ॥ ती० कन्याद्विजातीनां कन्याश्चद्विजातयश्चेतिद्वन्द्वः । अत्रकन्यानांसुमनसःपुष्पाणि द्विजातीनांफलानीतिर्विवेकः । प्रदिशन्तःप्रगृह्णन्तः हृष्टाभूत्वा रामादयःपुरींप्रदक्षिणंकरिष्यन्ति । पौरजनोत्सवायेतिशेषः ॥ १५ ॥ ति० सुवर्षइवकालिकः

[पा०] १ ङ. झ—ठ. अथास्मिन्नगरे. २ ख. राज्यात्. ३ च. छ. झ—ठ. प्रविद्धो. ४ ङ. च. छ. झ—ठ. नागराज. ५ च. छ. झ. ञ. ट. कैकेय्यनुमते. ६ छ. झ. ट. ठ. कान्यावस्था ७ ख. भविष्यते. ८ ङ. छ. झ. ट. सहभार्यंसहभ्रात्रा. ख. भार्ययासहितंभ्रात्रा. ९ क—ट. श्रुत्वैव. १०क—ट. कदाऽयोध्याभविष्यति. ११ ङ. छ. झ. ट. ठ. भविष्यति. १२ ङ. च. झ. ञ. ट. प्रदिशन्तः. १३ घ. करिष्यन्त्यः. १४ ङ. च. छ. ञ. ट. धर्मात्मात्रिवर्षः. क. झ. धर्मात्मात्रिवर्षः. १५ ख. लालितः. क. च. ज. ञ. मांललन्.

निस्संशयं मया मन्ये पुरा वीर कदर्यया ॥ पातुकामेषु वत्सेषु मातॄणां शातिताः स्तनाः ॥ १७ ॥
साहं गौरिव सिंहेन विवत्सा वत्सला कृता ॥ कैकेय्या पुरुषव्याघ्र बालवत्सेव गौर्बलात् ॥ १८ ॥
न हि तावद्गुणैर्जुष्टं सर्वशास्त्रविशारदम् ॥ एकपुत्रा विना पुत्रमहं जीवितुमुत्सहे ॥ १९ ॥
न हि मे जीविते किंचित्सामर्थ्यमिह कल्प्यते ॥ अपश्यन्त्याः प्रियं पुत्रं महाबाहुं महाबलम् ॥ २० ॥
अयं हि मां दीपयते समुत्थितस्तनूजशोकप्रभवो हुताशनः ॥
महीमिमां रश्मिभिरुद्धतप्रभो यथा निदाघे भगवान्दिवाकरः ॥ २१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे त्रिचत्वारिंशः सर्गः ॥ ४३ ॥

चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥

सुमित्रयाश्रीराममहिमप्रतिपादनपूर्वकंसमाश्वासनेनकौसल्यायाःशोकापनोदनम् ॥ १ ॥

विलपन्तीं तथा तां तु कौसल्यां प्रमदोत्तमाम् ॥ इदं धर्म्ये स्थिता धर्म्यं सुमित्रा वाक्यमब्रवीत् ॥ १ ॥
तवार्ये सद्गुणैर्युक्तः स पुत्रः पुरुषोत्तमः ॥ किं ते विलपितेनैवं कृपणं रुदितेन वा ॥ २ ॥

चामरप्रभः पञ्चविंशतिवर्षइत्यर्थः । अमराहिसदापञ्चविंशतिवर्षाः । लालयन् लालनांजनयम् ॥ १६ ॥ कदर्यया क्षुद्रया । पातुकामेषु स्तन्यपानकामेषु । शातिताः वियोजिताइतियावत् ॥ १७ ॥ बालवत्सागौरिव वत्सलासाहं सिंहेनगौरिव कैकेय्याबलाद्विवत्सा कृतेतिसंबन्धः ॥ १८ ॥ तावद्गुणैर्जुष्टं यावन्तःकल्याणगुणाः सन्ति तावद्भिर्गुणैर्युक्तमित्यर्थः ॥ १९ ॥ कल्प्यते दैवेनेतिशेषः । कल्पतइतिपाठे विद्यतइत्यर्थः ॥ २० ॥ दीपयते संतापयति । उद्धतप्रभः उत्कटकिरणः ॥ २१ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने त्रिचत्वारिंशःसर्गः ॥ ४३ ॥

इदं वक्ष्यमाणं ॥ १ ॥ सत्पुरुषाचरितं धर्ममाचर-

कालिकसुवृष्टिरिवजनानूलालयन् । त्रिवर्षइवलालयन्नितिपाठे मामितिशेषः । त्रिवर्षइवमाललन्नितिपाठे मा मांप्रति ललन् क्रीडांकुर्वन्नित्यर्थः । स० सुवर्षः शोभनोवर्षोयस्मिन्ससुवर्षःप्रावृट्कालः सइव । त्रिवर्षइतिपाठे त्रिषुकालेषुवर्षोवर्षणंयस्यसःमेघइत्यर्थः । शि० बुद्ध्यावयसाचअपरिणतःपरिणामरहितः सर्वकालमपरिणतज्ञानवयोविशिष्टइत्यर्थः । अतएवामरप्रभः अमरान्देवानपि प्रभातिप्रकाशयति सधर्मात्मारामः त्रिवर्षः त्रैवर्षिकइव लालयन् अस्माकंलालनाबुद्धिमुत्पादयन् कदाऽभ्युपैष्यति । अन्तर्भावितणिजर्थोभातिः ॥ १६ ॥ ति० वत्सला पुत्रवत्सला सिंहेनगौरिवत्वयाविवत्साकृता । उक्तपातकेनेतिशेषः । एवं कैकेय्या सिंह्याबालवत्सागौरिव बलाद्विवत्साकृता । शि० वत्सला पुत्रविषयकातिवात्सल्यविशिष्टाबालवत्सागौरिव याऽहं सा सिंहेनेव कैकेय्याकैकेयीदास्यामन्थरया बलात्हठात् विवत्सागौरिवकृता । स० साहंसिंहेन बलात् गौरिव कैकेय्याविवत्साकृतेति । गौरीव अप्रसूतस्त्रीव वन्ध्येवकृता । गौरिवेतिपाठे कैकेयीदशरथयोस्त्यागप्रयोजकत्वाद्दृष्टान्तद्वयं । "गौरीस्यादप्रसूतास्त्री" इतिनानार्थध्वनिमञ्जर्यां ॥ १८ ॥ इतित्रिचत्वारिंशस्सर्गः ॥ ४३ ॥

तनि० सुमित्रामुखेनश्रीरामस्यपरत्वमभिव्यनक्ति—**विलपन्तीमित्यादि**। इदं वक्ष्यमाणं। जन्मान्तरसुकृतवशेन तारामन्दोदर्योरिव सुमित्रायाःपरत्वज्ञानमस्तीतिसंप्रदायः । वक्तृवैलक्षण्याच्चध्वनिभेदः । सचालङ्कारिकैरङ्गीकृतः । धर्मेस्थिता सिद्धधर्मेरामे लग्नचित्ता । यद्वा धर्मे जन्मान्तरसुकृते । धर्म्यं विशिष्टधर्मादनपेतं ॥ १ ॥ **तनि०** आर्ये महाभागे तवपुत्रः सः वेदान्तवेद्यः पुरुषोत्तमोनारायणः । तत्रहेतुमाह । सद्गुणैर्युक्तः अनितरसाधारणानवधिकातिशयासङ्ख्येयकल्याणगुणैर्युक्तः । "श्रीपतिःपुरुषोत्तमः" इतिनिघण्टुः । तच्छब्दस्यसंनिहितपुरुषोत्तमविशेषणत्वेनवेदान्तप्रसिद्धिद्योतकत्वात् । अतः पुत्रबुद्ध्यानशोच्यइत्याह—**किंतइति** । **ती०** कृपणंयथातथा रुदितेनवाकिं । अयुक्तमेवेत्यर्थः । अत्रहेतुः सद्गुणैर्युक्तः अतएवपुरुषोत्तमः । पुरुषोत्तमस्य नकुत्राप्यपायइतिभावः । **ति०** पुरुषोत्तमइत्यनेन तस्येश्वरत्वंव्यङ्ग्यं । एवंच सर्वव्यापकत्वेनात्रापिसंनिधानाद्विलापादि व्यर्थमिति

[पा०] १ ख. ज. छादिताः. २ ठ. गौरीव. ३ ख. ग. घ. च. छ. ज. कल्पते. ४ झ. ञ. लक्ष्मणंचमहा. ५ क. छ. झ. ट. दीपयतेयवह्निः. घ. दीपयतेसमुत्सुकः. ६ क. छ. झ. ट. महाहितः. ७ क. ख. घ. छ. ज. झ. रुत्तमप्रभो.

यस्त्वं[1]वार्ये गतः पुत्रस्त्यक्त्वा राज्यं महाबलः ॥ साधु कुर्वन्महात्मानं पितरं सत्यवादिनम् ॥ ३ ॥
शिष्टैराचरिते सम्यक्छश्वत्प्रेत्य फलोदये ॥ रामो धर्मे स्थितः श्रेष्ठो न स शोच्यः कदाचन ॥ ४ ॥
वर्तते चोत्तमां वृत्तिं लक्ष्मणोऽस्मिन्सदाऽनघः ॥ दयावान्सर्वभूतेषु लाभस्तस्य महात्मनः ॥ ५ ॥
अरण्यवासे यद्दुःखं जानती[2] वै सुखोचिता ॥ अनुगच्छति वैदेही धर्मात्मानं तवात्मजम् ॥ ६ ॥
कीर्तिभूतां पताकां[3] यो लोके भ्रमयति प्रभुः ॥ धर्मसत्यव्रतधनः[4] किं न प्राप्तस्तवात्मजः ॥ ७ ॥
व्यक्तं रामस्य विज्ञाय शौचं[5] माहात्म्यमुत्तमम् ॥ न गात्रमंशुभिः सूर्यः संतापयितुमर्हति ॥ ८ ॥
शिवः सर्वेषु कालेषु[6] काननेभ्यो विनिस्सृतः ॥ राघवं युक्तशीतोष्णः सेविष्यति सुखोऽनिलः ॥ ९ ॥
शयानमनघं रात्रौ पितेवा[7]भिपरिष्वजन् ॥ रश्मिभिः[8] संस्पृशञ्शीतैश्चन्द्रमा[9] ह्लादयिष्यति ॥ १० ॥

न्तरामंप्रतिसन्तोषेकर्तव्ये किमर्थोविषादःकृतइति कौसल्यांसमाश्वासयति—तवेत्यादिना ॥ २॥ यइत्यादिश्लोकद्वयमेकंवाक्यं । प्रेत्यफलोदये आमुष्मिकफलकारणे । ननु पुरुषोत्तमश्चेत्कथंकर्मप्रावण्यंतत्राह—शिष्टैराचरितइति । अनेनलोकानुग्रहार्थत्वमुक्तं । प्रेत्यफलोदये दशरथस्यपरलोकहिते । लोकानुग्रहार्थत्वंप्रदर्शयति—श्रेष्ठइति । श्रेष्ठाचरणमितरानुग्राहकमितिभावः । "यद्यदाचरतिश्रेष्ठस्तत्तदेवेतरोजनः" इतिगीतावचनात् । वक्ष्यतिच "कामवृत्तस्त्वयंलोकःकृत्स्नःसमुपवर्तते । यद्वृत्ताःसन्तिराजानस्तद्वृत्ताःसन्तिहिप्रजाः" इति॥३—४॥ पितृवचनपरिपालकेरामेशोकोनकार्यइत्युक्त्वालक्ष्मणसीतयोरपिस्वस्वधर्मनिष्ठत्वात्तद्विषयेपि शोकोनकार्यः अपितुप्राप्तलाभत्वात्संतोषएवकार्यइत्याह—वर्ततइत्यादिना । अत्रवइतिगायत्र्याःपञ्चमाक्षरं । वर्तते करोति । वृत्तिं शुश्रूषां । अस्मिन् रामे । तस्य लक्ष्मणस्य ॥५॥ अरण्यवासेयद्दुःखं तद्दुःखं जानतीवै जानन्त्येव । तवात्मजमनुगच्छति । "स्त्रीणांभर्ताहि दैवतं" इत्युक्तरीत्याऽनुगच्छतीत्यर्थः ॥ ६ ॥ कीर्तिभूतांपताकां कीर्तिरूपंध्वजं । भ्रामयति संचारयति । सर्वभूतविदितप्रख्यातिकइत्यर्थः । तवात्मजः । किंश्रेयः नप्राप्तः सर्वस्यापिश्रेयसोयोग्यइत्यर्थः । अतोनशोच्य इतिभावः ॥ ७ ॥ तदेतद्विशिनष्टि—व्यक्तमित्यादि । शौचं त्रिविधकरणशुचित्वं । माहात्म्यं सर्वोत्तमत्वं ॥ ८ ॥ सर्वेषुकालेषु वसन्तादिकालेषु । युक्तशीतोष्णः तत्तत्कालोचितद्रव्यसंस्पर्शनेनसम्पादितशीतोष्ण-

चव्यक्ष्यं ॥ २ ॥ **तनि०** ननु पुरुषोत्तमश्चेत्कथंकर्मप्रावण्यं तत्राह—**शिष्टैराचरितइति** । अनेन लोकानुग्रहार्थत्वमुक्तं प्रेत्यफलोदये दशरथस्यपरलोकहिते लोकानुग्रहार्थत्वंप्रदर्शयति—**श्रेष्ठइति** । श्रेष्ठाचरणमितरानुग्राहकमिति भावः "यद्यदाचरति श्रेष्ठस्तत्तदेवेतरोजनः" इतिगीतावचनात् । वक्ष्यतिच "कामवृत्तस्त्वयंलोकःकृत्स्नस्समुपवर्तते । यद्वृत्तास्सन्तिराजानस्तद्वृत्तास्संति हिप्रजा" इति ॥ **शि०** प्रेत्यफलोदये प्रेत्यानांलोकान्तरगतानामपि फलोदयःशुभफलप्राप्तिर्यस्मात्तस्मिन्धर्मेस्थितः ॥ ४ ॥ **तनि०** शेषस्वरूपानुगुणकैङ्कर्यनिष्ठतया लक्ष्मणोपिनशोच्यइत्याह । उत्तमां निरतिशयपुरुषार्थरूपां वृत्तिंकैङ्कर्यकाष्ठां वर्ततेअनुतिष्ठति । अनघः प्रमादरहितः । सर्वभूतेषुदयावान् समत्वबुद्ध्यासर्वत्रकृपामैत्र्यादियुक्तः । तस्यमहात्मनःमहानुभावस्यलाभःकैङ्कर्यमेवपुरुषार्थः ॥ ५ ॥ **तनि०** सहधर्मचारिणीचनशोच्येत्याह । वैदेही विदेहवंशोत्पन्ना । अनेनायोनिजत्वंव्यज्यते । "वैदेहत्सुविदेहतः" इतिपौराणिकोक्तिः ॥ ६ ॥ **तनि०** "तस्यनाममहद्यशः" इतिश्रुत्यर्थंव्यञ्जयति—**कीर्तीति** । दमः जितहृषीकत्वं । व्रतं आश्रितापरित्यागः ॥ ७ ॥ **तनि०** सर्वदेवानांतदाज्ञाकारित्वेनानुकूल्यमाह । रामस्यउत्तमंमाहात्म्यं निस्सीमाभ्यधिकमाहात्म्यं विज्ञायसंतापयितुंनार्हति । तत्संभावनैवनास्तीत्यर्थः । अनेन "भीषोदेतिसूर्यः" इतिश्रुत्यर्थउक्तः ॥ ८ ॥ **तनि०** "भीषास्माद्वातः पवते" इतिश्रुत्यर्थमभिव्यनक्ति । शिवइत्यनुद्वेगकारित्वेन मान्द्यमुक्तं । काननेभ्यइति सौरभ्यमुक्तं । विनिस्सृतइति शैत्यमुक्तं ॥ ९ ॥ **तनि०** परिष्वजन्पितेव चन्द्रमाःरश्मिभिस्संस्पृशन्ह्लादयिष्यतीत्यन्वयः । एतेन "एतस्यवाअक्षरस्यप्रशासनेसूर्याचन्द्रमसौविधृतौतिष्ठतः" इतिश्रुत्यर्थोव्यञ्जितः । **ती०** जगदाह्लादकरस्यापिभगवतःश्रीरामस्यस्वशक्त्यनुसारेणचन्द्रोप्याह्लादंकरिष्यतीत्या-

[पा०] १ ष. तवार्यां. २ झ. ट. ठ. जानन्त्येव. ङ. जानात्येव. च. ञ. जानन्तीवै. ३ क. पताकांवै. ४ ङ. छ. ज. झ. ट. धर्मःसत्यव्रतपरः. क. ख. ग. च. ञ. दमसत्यव्रतपरः. ग. तपस्सत्यव्रतधनः. ५ ग. ज. शौर्यमाहात्म्यं. ६ ख. लोकेषु. ७ ख. पितेवहि. क. ज. पितेवापि. ८ छ. झ. ठ. घर्मघ्नःसंस्पृशञ्शीतः. ङ. संस्पृशञ्शीतरश्मिश्च. ९ च. चन्द्रःप्रह्लादयिष्यति.

ददौ [1]चास्त्राणि दिव्यानि यस्मै ब्रह्मा महौजसे ॥ दानवेन्द्रं हतं दृष्ट्वा तिमिध्वजसुतं रणे ॥ ११ ॥
स शूरः पुरुषव्याघ्रः स्वबाहुबलमाश्रितः ॥ असंत्रस्तो[2]प्यरण्यस्थो वेश्मनीव नि[3]वत्स्यति ॥ १२ ॥
यस्येषुपथमासाद्य विनाशं यान्ति शत्रवः ॥ कथं न पृथिवी तस्य शासने स्थातुमर्हति ॥ १३ ॥
या श्रीः शौर्यं च रामस्य या च कल्याणस[4]त्त्वता ॥ निवृत्तारण्यवासः स[5] क्षिप्रं राज्यमवाप्स्यति ॥१४
सूर्यस्यापि भवेत्सूर्यो ह्यग्नेरग्निः प्रभोः प्रभुः ॥ श्रि[6]यः श्रीश्च भवेदग्र्या [7]कीर्तिः कीर्त्याः क्षमाक्षमा॥ १५

स्पर्शइत्यर्थः ॥ ९—१० ॥ तिमिध्वजः शम्बरः । " वैजयन्तमितिख्यातंपुरंयत्रतिमिध्वजः । सशंबरइतिख्यातःशतमायोमहासुरः " इत्युक्तत्वात् । तत्सुतंदानवेन्द्रं हतंदृष्ट्वा यस्मै रामाय । दिव्यास्त्राणिददौ । "यदाव्रजतिसंग्रामंग्रामार्थेनगरस्यवा । गत्वासौमित्रिसहितोनाविजित्यनिवर्तते" इत्यभिधानात् । कदाचिद्रामोदण्डकारण्यंगत्वावैजयन्तपुरंनिरुध्यदशरथविरोधिभूतंशंबरसुतंहतवान् । तेनप्रीतोब्रह्मारामायदिव्यास्त्राणिददावित्यवगम्यते ॥११॥ अरण्यस्थोपीत्यन्वयः ॥ १२ ॥ वनेरामस्यसौख्यंभवतु भरतस्यरूढमूलत्वाद्रामस्यराज्यंनसिध्यतीत्याशङ्क्याह—यस्येति ॥ १३ ॥ रामस्य याश्रीः सर्वलक्षणसंपन्नागात्रशोभा । यच्च शौर्यं शूरोजेतातस्यभावःशौर्यं । "शूरोवीरश्चविक्रान्तोजेता" इत्यमरः । याचकल्याणसत्त्वता प्रशस्तबलयुक्तता । एतैरसाधारणहेतुभिः सः रामः । क्षिप्रंराज्यमवाप्स्यतीतिसंबन्धः ॥ १४ ॥ सूर्यस्यापिसूर्योभवेत् सकलजगत्प्रकाशकस्यसूर्यस्यापिप्रकाशकोभवेत् । अग्नेरग्निः दाहकस्याप्यग्नेर्दाहकः । प्रभोःप्रभुः सर्वनियन्तुरपिनियन्ता । श्रियःश्रीः संपदोपिसंपत् । यद्वा कान्तेरपि कान्तिः कान्तेरप्यतिशयावहइत्यर्थः । क्षमाक्षमा क्ष-

शयेनाह—**शयानमिति** । **स०** पितेवमूलपुरुषसूर्यसमत्वात् ॥ १० ॥ **तनि०** चतुर्मुखकिंचित्कारमाह—**ददाविति** । **ति०** ब्रह्मा ब्राह्मणोविश्वामित्रः ब्रह्मैव सृष्टिकर्तावा । तिमिध्वजश्शंबरस्तत्सुतस्सुबाहुरित्यर्थः इतिकतकक्रतः । तीर्थस्तु कदाचिद्रामोवैजयन्तंनगरंनिरुध्य तत्रत्यतिमिध्वजाख्यशंबरपुत्रस्यदानवस्यपुत्रंहतवान् । तेनप्रीतोब्रह्मा रामायदिव्यास्त्राणिददावित्येतत् बलात्कल्पयति । कतकोक्तंतुनयुक्तं । ताटकावधोत्तरंसुबाहुवधात्प्रागेव विश्वामित्रेणास्त्रोपदेशस्यप्रागुक्तत्वात् सुबाहोर्मारीचभ्रातृत्वस्यपूर्वमुक्तत्वेनशंबरपुत्रत्वानौचित्याच्च । **स०** तिमिर्ध्वजोययोस्तौतिमिध्वजौ सुन्दोपसुन्दौ । तयोस्सुतं दानवेन्द्रंसुबाहुं हतंहतप्रायं । निश्चितेऽर्थेतथाप्रयोगदर्शनात् । यथोक्तं गीतायामेकादशाध्याये "मयैवैतेनिहताःपूर्वमेव मयाहतांस्त्वंजहिमाव्यथिष्ठाः" इति । दृष्ट्वा योगप्रभावेननिश्चित्य । यथोक्तंबालकाण्डे "अहंवेद्मिमहात्मानंरामंसत्यपराक्रमं" इति । यस्मैमहौजसेरामाय ब्रह्मा ब्राह्मणोविश्वामित्रः । अल्पायासेनब्राह्मण्यंप्राप्तमिति तत्त्वेनकीर्तनं । दिव्यान्यस्त्राणिददौ सशूरइत्युत्तरेणान्वयः । महौजसइत्यनेनानुग्रहार्थंसक्रपेरस्त्राण्यवापेदिसूचयति । दानवेन्द्रमित्यनेन सुबाहोर्दैत्यकुलोद्भवत्वंज्ञापयति । यथोक्तंबालकाण्डे । "अथकालोपमौयुद्धेसुतौसुन्दोपसुन्दयोः । यज्ञविघ्नकरौतौतेनैवदास्यामिपुत्रकं । तौतुराक्षसकन्यायांजातौदैत्यकुलोद्भवौ । मारीचश्चसुबाहुश्चवीर्यवन्तौसुशिक्षितौ" इति । कतकस्तु तिमिध्वजःशंबरासुरस्तत्सुतंहतंदृष्ट्वेतिव्याख्यातवान् । तीर्थपीतांबरौतु कदाचिद्रामोदण्डकारण्यंगत्वा वैजयन्तंपुरंनिरुध्य दशरथविरोधिभूतशंबरसुतंहतवान् तेनप्रीतोब्रह्मा रामायदिव्यान्यस्त्राणिददावितिकथांकल्पयतः । नागोजिभट्टस्तु ब्रह्मा ब्राह्मणः ब्रह्मैवसृष्टिकर्तावेत्येकपदंव्याचष्टे । तत्र प्रथमव्याख्याने उदाहृतरामायणवचनैरस्त्रदानानन्तरंसुबाहुहननप्रतीतेरत्रपुनर्दृष्ट्वेतिक्त्वाप्रत्ययेन पूर्वकालीनत्वोक्तिविरोधः । अस्मद्रीत्या कथंचित्तदभिप्रायेपि सुन्दोपसुन्दसुतस्यसुबाहोःशंबरपुत्रत्वकल्पने उदाहृतवचनविरोधः । द्वितीयेत्वश्रुतकल्पनादोषः । तृतीये कतकादीन्दूषयित्वा ब्रह्मपदंव्याख्यायविशिष्टानुपपत्त्यपरिहरणंदोषइतिभाति । **शि०** तिमिध्वजसुतं तिमिध्वजश्शंबरः तस्यसुतस्सुबाहुस्तं । हतमित्यत्र ह तं इतिच्छेदः । तं रणेदृष्ट्वाज्ञात्वा ब्रह्माविश्वामित्रः यस्मैरामाय दिव्यान्यस्त्राणि ह हर्षेणददौ सशूरइतिसंबन्धः । एतेन हतंदृष्ट्वेत्यर्थेऽसमञ्जसमुपलभ्य तीर्थकल्पितंक्लिष्टं । तादृशकल्पनायांप्रमाणाभावात् सुबाहोश्शंबरपुत्रत्वानौचित्यादितिभट्टोक्त्यानभ्रमितव्यं । मारीचपितुरेव शंबरेतिनामान्तरेबाधकाभावात् ॥ ११ ॥ **तनि०** यस्यरामस्य इषुपथंप्राप्य शत्रवोनाशंयान्ति तस्यशासने इयंपृथिवीस्थातुंकथंनार्हति अर्हत्येव । **ति०** तस्यशासने पृथिवी तत्स्थाःप्राणिनः कथंनशासने स्थास्यन्ति । अतस्तस्यकुतोपिनभयमितिभावः ॥ १३ ॥ **ति०** यादृशीच कल्याणसत्वतादृश्यते तयाज्ञायते निवृत्तवनवासःक्षिप्रमेवस्वंराज्यंप्राप्स्यतीति ॥ १४॥ **ति०** इदानींसाक्षादेवसर्वान्तर्यामित्वंरामस्यदर्शयति—**सूर्यस्यापीति** । सर्वस्यापिस्वस्वकार्यजनकत्वमेतदधीनमेवेतिभावः । **स०** सूर्यस्यसूर्यः प्रकाशकशक्तिदः । अग्नेरग्निः नेता प्रभोःप्रभुस्स्वामी । श्रियस्संपत्करः । कीर्त्याः

[पा०] १ ख. दिव्यानिचास्त्राणि. २ ङ. च. छ. झ. ञ. ट. ह्यरण्येऽसौ. ३ ङ. च. छ. झ. ञ. ट. निवत्स्यते. ४ क. सारता. ५ झ. ट. ठ. स्वंक्षिप्रं. घ. ज. सन्क्षिप्रं. ६ ङ. छ. झ. ट. श्रियाः. ७ ख. ग. ङ. च. छ. झ—ट. कीर्त्याःकीर्तेः.

दैवतं दे[1]वतानां च भूतानां भूतसत्तमः ॥ तस्य के ह्यगुणा देवि रा[2]ष्ट्रे वाऽप्यथवा पु[3]रे ॥ १६ ॥
पृथिव्या सह वैदेह्या श्रिया च पुरुषर्षभः ॥ क्षिप्रं तिसृभिरेताभिः सह रामोऽभि[4]षेक्ष्यते ॥ १७ ॥
दुःखजं वि[5]सृजन्त्यास्रं निष्क्रामन्तमुदीक्ष्य यम् ॥ अयोध्यायां ज[6]नाः सर्वे शोकवेगसमाहताः ॥१८॥
कुशचीरधरं [7]देवं गच्छन्तमपराजितम् ॥ सीतेवानुगता लक्ष्मीस्तस्य किंनाम दुर्लभम् ॥ १९ ॥
ध[8]नुर्ग्रहवरो यस्य बाणखड्गास्त्रभृत्स्वयम् ॥ लक्ष्मणो व्रजति ह्यग्रे तस्य किंनाम दुर्लभम् ॥ २० ॥

मया अप्यतिशयोनेनेतिभावः ॥ १५ ॥ दैवतंदैवतानांच दैवतानामपिसकलकार्यनिर्वहणक्षमइत्यर्थः । भूतानांभूतसत्तमः उत्तमभूतमित्यर्थः । भूतत्वंसत्ता सर्वेषांसत्ता तत्सत्ताधीनेतिभावः । तस्यैवंभूतस्यसर्वगुणसंपन्नस्यदेशेवनेवापुरेवाकेअगुणाःनकोपीत्यर्थः । अगुणः प्रतिबन्धकीभूतइतियावत् ॥ १६ ॥ सहेत्यत्रसइतिपदच्छेदः । सरामः पृथिव्यावैदेह्याश्रियाविजयलक्ष्म्याच एताभिः तिसृभिःसहक्षिप्रमभिषेक्ष्यते हेतिसंबन्धः ॥ १७ ॥ अस्यश्लोकस्यपृथिव्यासहेतिपूर्वश्लोकस्थेन सरामोभिषेक्ष्यतइत्यनेनसंबन्धः ॥ १८ ॥ लक्ष्मीरिवस्थितासीताऽनुगतेत्यन्वयः । अनेन राज्यश्रीरन्यन्नपरिगृह्णातीतिद्योत्यते ॥ १९ ॥ धनुर्ग्रहवरः धनु-

कीर्तिःकीर्तित्वप्रदः । क्षमायाःक्षमा क्षमात्वप्रदः । देवतानांदैवतं उपास्यः । तनि० "तमेवभान्तमनुभातिसर्वं" इतिश्रुत्यर्थमुपपादयति । सूर्यस्य सकललोकप्रकाशकस्यापिप्रकाशकः सवितृमण्डलान्तर्वर्तीसन्स्फटिकमुकुरान्तस्स्थितदीपन्यायेनप्रकाशयतीतिपरमार्थः । अग्नेरग्निः अग्नेर्वस्तुपरिपाकदाहकत्वादिकं तत्संकल्पाधीनमित्यर्थः । "अहंवैश्वानरोभूत्वा" इत्यादिश्रवणात् प्रभोः प्रभुः ब्रह्मरुद्रादेःसृष्ट्यादिसामर्थ्यप्रदानेननिर्वाहकः । श्रियःश्रीः ब्रह्मादीनांयत्कटाक्षलेशायत्तमीश्वरत्वं नारायणस्यापियदपाङ्गभूयस्त्वनिबन्धनंपरब्रह्मत्वं तस्याअपि यदाश्रयणाच्छ्रीत्वंसिध्यतीति स्वस्मिन्नीश्वरत्वपूर्तिनिमित्तायालक्ष्म्याअपि स्वरूपनिर्वाहकइत्यर्थः । कीर्त्याःकीर्तिः "तस्यनाममहद्यश" इति यत्संबन्धान्महत्त्वमनितरसाधारणमितिकृत्वा कीर्त्याअपिकीर्त्यावहः । क्षमाक्षमा सर्वाधारभूतायाभूमेराधारइत्यर्थः । "यस्मिन्द्यौःपृथिवीचान्तरिक्षं" इत्यादिश्रुतेः । दैवतानांदैवतमित्यनेन "तंदैवतानांपरमंचदैवतं" इतिश्रुत्यर्थउक्तः । भूतानांभूतसत्तमः सत्तामात्रवतांसत्तानिर्वाहकः । एवं कल्याणगुणाकरत्वमभिव्यज्य हेयगुणविरोधित्वंव्यञ्जयति । "तस्यके" इति "राष्ट्रेवाप्यथवापुरे" इतिविभूतिद्वयसंबन्धेप्यजहत्स्वरूपत्वंव्यञ्जितं । दोषविरोधित्वं अपहतपाप्मेत्यादिश्रुतिप्रसिद्धमिति द्योतयितुं हिशब्दप्रयोगः । **शि०** रामस्यसर्वनियन्तृत्वंबोधयन्नाह—**सूर्यस्येति** । सूर्यस्य सर्वावभासकादित्यस्यापि सूर्यः अवभासकइत्यर्थः । ननु "तमेवभान्तमनुभातिसर्वं" इत्यादिश्रुत्या सूर्यावभासकत्वंब्रह्मणःप्रसिद्धमिति ब्रह्मकिमित्यत आह । अग्नेः सर्वाग्र्यस्यप्रकाशब्रह्मणोप्यग्निः प्रकाशकइत्यर्थः । अतएव प्रभोः सर्वनियन्तुर्ब्रह्मादित्रयस्यापि प्रभुर्नियन्ता । अग्निशब्दस्यब्रह्मपरत्वं "अग्र्यत्वादग्निनामासौ" इत्यादिना मध्वाचार्यैर्व्याख्यातं । अभिमतश्चायंसिद्धान्तोभूषणकृतामपि । अतएव प्रभोःसर्वनियन्तुरपिनियन्तेतितैर्व्याख्यातं । सर्वनियन्तृत्वंचविष्ण्वादीनामेवेतिभावः । किंच सूर्यस्य प्रकाशकारणस्यापि सूर्यः कारणमित्यर्थः । ननु सूर्यकारणत्वेनवह्निःप्रसिद्धइतिकिंसइत्यतआह । अग्नेरप्यग्निः कारणमित्यर्थः । ननु सर्वकारणत्वेनब्रह्मणः प्रसिद्धत्वादिति किंतदित्यतआह । प्रभोःसकलनियन्तुरपि प्रभुर्नियन्तेत्यर्थः । अग्र्या रामाग्रेगमनशीला क्षमाक्षमा क्षमायाःपृथिव्याइव क्षमाक्षान्तिर्यस्यास्सा । किंच क्षमायाःशान्तेरपि क्षमा शान्तिः अतिशान्तिविशिष्टेत्यर्थः । किंच क्षमयापृथिव्या क्षम्यते सह्यतेपाल्यतइत्यर्थः । सासीतातु श्रियःलक्ष्म्याः श्रीः स्वामिनीत्यर्थः । अतएव कीर्त्याः रामयशसःकीर्तिः कारणभूतेत्यर्थः । सूर्यस्य सर्वजगदवभासकस्यापि सूर्योऽवभासकः अग्नेः सर्वदाहकस्याप्यग्निर्दाहकइतिभूषणोक्तार्थस्तुनयुक्तः । दाहकत्वेनप्रकाशकत्वेनच द्वयोःप्रसिद्ध्याऽन्यतरोपादानस्यनिरर्थकत्वापत्तिः । नापि सूर्यस्यापिप्रकाशकोदाहकश्च अग्नेरपि प्रकाशकोदाहकश्चेत्यर्थोयुज्यते । पतत्प्रकर्षदोषवत्तापत्तेरितिदिक् । हि पूर्वोक्तहेतोः भूतसत्तमः भूतान्प्राणिनःसत्तमयतिसत्तममिच्छतियस्सीतारामः भूतानांपृथिव्याद्यधोदेशवासिनांदेवतानां ऊर्ध्वदेशवासिनांच दैवतं देवता पूज्यइत्यर्थः । तस्यसीतारामस्य अगुणाः नित्यगुणविरोधिनः अन्यथाकर्तारइत्यर्थः । देशेदण्डकादौ पुरेलङ्कादौवा केसन्ति नकेपीत्यर्थः ॥ १५—१६ ॥ **ति०** अभिषेक्ष्यते वसिष्ठादिभिरितिशेषः ॥१७॥ **स०** एवं जनानुरागविषयोरामः शीघ्रमभिषेक्ष्यतइतिपूर्वेणान्वयः । "जनानुरागप्रभवाश्चसंपद" इत्युक्तेः ॥१८॥ **ती०** तथापि तस्यवनेविषयसुखंनास्तीतिशोचन्तींप्रत्याह—**कुशचीरेति** । कुशचीरादिधरमपि देवं दीप्यमानं लक्ष्मीः राज्यलक्ष्मीःसीतेव सीतात्मना ॥ १९ ॥ **स०** लक्ष्मणस्य शय्यारूपत्वाद्राजश्रेष्ठरामपुरतोगमनमुचितमितिध्वन्यते ॥ २० ॥

[पा०] १ ङ. छ—ट. देवतानां. २ ङ. छ. ट. देशेवा. क. ख. झ. वनेवा. ३ ङ. छ. ट. वने. ४ ज. अभिषिच्यते. ५ क—छ. झ. ञ. ट. विसृजत्यश्रु. ६ क—छ. झ. ञ. ट. जनःसर्वःशोकवेगसमाहतः. ७ ख. ग. ङ. छ. ज. झ. ट. वीरं. घ. रामं. ८ ङ. ज. ञ. धनुर्धरवरो.

निवृत्तवनवासं तं द्रष्टासि पुनरागतम् ॥ जहि शोकं च मोहं च देवि सत्यं ब्रवीमि ते ॥ २१ ॥
शिरसा चरणावेतौ [1]वन्दमानमनिन्दिते ॥ पुनर्द्रक्ष्यसि कल्याणि पुत्रं चन्द्रमिवोदितम् ॥ २२ ॥
पुनः प्रविष्टं दृष्ट्वा तमभिषिक्तं महाश्रियम् ॥ समुत्स्रक्ष्यसि नेत्राभ्यां [2]क्षिप्रमानन्दजं [3]पयः ॥ २३ ॥
मा शोको देवि दुःखं वा न रामे दृश्यते[4]ऽशिवम् ॥ क्षिप्रं द्रक्ष्यसि पुत्रं [5]तं ससीतं सहलक्ष्मणम् ॥ २४ ॥
त्वयाऽशेषो [6]जनश्चैव समाश्वास्यो यदाऽनघे ॥ किमिदानीमि[7]मं देवि करोषि हृदि विक्लवम् ॥ २५ ॥
नार्हा त्वं शोचितुं देवि यस्यास्ते राघवः सुतः ॥ न हि [8]रामात्परो लोके विद्यते सत्पथे स्थितः ॥ २६ ॥
अभिवादयमानं तं दृष्ट्वा ससुहृदं सुतम् ॥ मुदाऽश्रु मोक्ष्यसे क्षिप्रं मेघले[9]खेव वार्षिकी ॥ २७ ॥
पुत्रस्ते वरदः क्षिप्रमयोध्यां पुनरागतः ॥ [10]पाणिभ्यां मृदुपीनाभ्यां चरणौ पीडयिष्यति ॥ २८ ॥
अभिवाद्य नमस्यन्तं शूरं ससुहृदं सुतम् ॥ मुदाऽऽस्रैः [11]प्रोक्ष्ससि पुनर्मेघ[12]राजिरिवाचलम् ॥ २९ ॥

आश्वासयन्ती विविधैश्च वाक्यैर्वाक्योपचारे कुशलाऽनवद्या ॥
रामस्य तां मातरमेवमुक्त्वा देवी सुमित्रा विरराम रामा ॥ ३० ॥
निशम्य तल्लक्ष्मणमातृवाक्यं रामस्य मातुर्नरदेवपत्न्याः ॥
सद्यः शरीरे विननाश शोकः शरद्गतो मेघ इवाल्पतोयः ॥ ३१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥

पञ्चचत्वारिंशः सर्गः ॥ ४५ ॥

श्रीरामेणस्वानुगन्तृषुपौरेषुनगरंप्रतिनिवर्तनप्रार्थनेपिस्वविरहासहिष्णुतयापुनरनुव्रजत्सुसीतालक्ष्मणाभ्यांसहरथादवरुह्य पद्भ्यामेवगमनम् ॥ १ ॥ ब्राह्मणादिभिःपौरैःपुनर्नगरंप्रतिनिवर्तनायबहुधाप्रार्थनेपिपितृवचनपालनायवनंप्रत्येवगच्छतारामेणसायाह्नेसानुचरेणतमसातीरगमनम् ॥ २ ॥

[13]अनुरक्ता महात्मानं रामं सत्यपराक्रमम् ॥ अनुजग्मुः [14]प्रयान्तं तं वनवासाय मानवाः ॥ १ ॥
[15]निवर्तितेपि च बलात्[16]सुहृद्वर्गे च राजनि ॥ नैव ते संन्यवर्तन्त रामस्यानुगता रथम् ॥ २ ॥

धरश्रेष्ठः ॥ २०—२१ ॥ एतौ परिदृश्यमानसर्वलक्षणसम्पन्नौ । उदितंचन्द्रं प्रतिपच्चन्द्रम् ॥ २२—२३ ॥ हेदेवि रामे अशिवंअशुभं नदृश्यते । अतः शोकः प्रलापादिः । दुःखं मनोव्यथावा । मा नकार्यमित्यर्थः ॥ २४ ॥ विक्लबम् भावप्रधानोनिर्देशः ॥ २५—२६ ॥ मेघलेखा मेघपङ्क्तिः ॥ २७—२८ ॥ अभिवाद्यनमस्यन्तं अभिवादनपूर्वकंप्रणमन्तं ॥२९॥ वाक्योपचारे वाक्यैरुपचारविषये ॥३०—३१॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीतांबराख्याने अयोध्याकाण्डव्याख्याने चतुश्चत्वारिंशः सर्गः॥४४॥

एवं सुमित्रयाकौसल्याश्वासनपर्यन्तंकथासंघटनं परिसमाप्य संप्रतिरामगमनवृत्तान्तंप्रस्तौति—अनुरक्ताइत्यादि ॥ १ ॥ सुहृद्वर्गे राजसुहृद्भूतावरोधवर्गे ।

ति० हेअनघे यस्मात्त्वयांशेषोऽयंजनस्त्वत्परिवाररूपत्वात्त्वयासमाश्वास्यः अतोदेवि त्वं हृदिविक्लवंदुःखं किंकरोषि । शि० यत् विक्लबं शोकंहृदिकरोपि तत्किं कुत्सितं नयुक्तमित्यर्थः ॥२५॥ शि० अभिवाद्य सुहृद्भिरभिवादनंकारयित्वा । ति० प्रोक्षसे उक्षसेचने वर्तमानसामीप्येलट् ॥२९॥ ति० वाक्योपचारे वाक्यरचनायां । रामा रमणीया । शि० रामा रामविषयकस्मृतिमती । रामाशब्दः अर्शआद्यजन्तः ॥ ३०॥ शि० निशम्यश्रुत्वा विद्यमानाया रामस्यमातुः ॥ ३१ ॥ इतिचतुश्चत्वारिंशस्सर्गः ॥ ४४ ॥
ति० वनवासायप्रयान्तमित्यन्वयः ॥ १ ॥ शि० सुहृद्धर्मेण अनुव्रजनेसुहृद्भिराचरणीयोधर्मस्तेन "यमिच्छेत्पुनरायान्तंनैव

[पा०] १ क. वन्दमानंदिनेदिने. २ क. ख. ङ. च. छ. झ. ञ. ट. शीघ्रं. ३ घ. जलं. ४ ज. ऽशुभं. ५ क. ख. ग. ङ—ठ. त्वं. ६ क—छ. झ—ठ. जनश्चायं. ७ क—ठ. मिदं. ८ घ. रामाद्वरो. ९ ङ. च. झ. ठ. रेखेव. १० क. ख. घ—छ. झ. ट. ठ. कराभ्यां. ११ झ. प्रोक्षसेपुत्रं. १२ ख. राशि. १३ ग. अनुरक्तं. १४ ङ. छ. प्रयातं. १५ छ. झ. ट. ठ. निवर्तितेऽतीव. १६ ङ. छ. झ. ट. ठ. सुहृद्धर्मेण. क. घ. सुहृद्वर्गेपि.

अयोध्यानिलयानां हि पुरुषाणां महायशाः ॥ बभूव गुणसंपन्नः पूर्णचन्द्र इव प्रियः ॥ ३ ॥
स याच्यमानः काकुत्स्थः स्वाभिः प्रकृतिभिस्तदा ॥ कुर्वाणः पितरं सत्यं वनमेवान्वपद्यत ॥ ४ ॥
अवेक्षमाणः सस्नेहं चक्षुषा प्रपिबन्निव ॥ उवाच रामः स्नेहेन ताः प्रजाः स्वाः प्रजा इव ॥ ५ ॥
या प्रीतिर्बहुमानश्च मय्ययोध्यानिवासिनाम् ॥ मत्प्रियार्थं विशेषेण भरते सा निवेश्यताम् ॥ ६ ॥
स हि कल्याणचारित्रः कैकेय्यानन्दवर्धनः ॥ करिष्यति यथावद्वः प्रियाणि च हितानि च ॥७॥
ज्ञानवृद्धो वयोबालो मृदुर्वीर्यगुणान्वितः ॥ अनुरूपः स वो भर्ता भविष्यति भयापहः ॥ ८ ॥
स हि राजगुणैर्युक्तो युवराजः समीक्षितः ॥ अपि चापि मया शिष्टैः कार्यं वो भर्तृशासनम् ॥९॥
न च तप्येद्यथा चासौ वनवासं गते मयि ॥ महाराजस्तथा कार्यो मम प्रियचिकीर्षया ॥ १० ॥
यथायथा दाशरथिर्धर्म एव स्थितोऽभवत् ॥ तथातथा प्रकृतयो रामं पतिमकामयन् ॥ ११ ॥
बाष्पेण पिहितं दीनं रामः सौमित्रिणा सह ॥ चकर्षेव गुणैर्बद्ध्वा जनं पुरनिवासिनम् ॥ १२ ॥
ते द्विजास्त्रिविधं वृद्धा ज्ञानेन वयसौजसा ॥ वयःप्रकंपशिरसो दूरादूचुरिदं वचः ॥ १३ ॥
वहन्तो जवना रामं भोभो जात्यास्तुरङ्गमाः ॥ निवर्तध्वं न गन्तव्यं हिता भवत भर्तरि ॥ १४ ॥
कर्णवन्ति हि भूतानि विशेषेण तुरङ्गमाः ॥ यूयं तस्मान्निवर्तध्वं याचनां प्रतिवेदिताः ॥ १५ ॥
धर्मतः स विशुद्धात्मा वीरः शुभदृढव्रतः ॥ उपवाह्यस्तु वो भर्ता नापवाह्यः पुराद्वनम् ॥ १६ ॥
एवमार्तप्रलापांस्तान्वृद्धान्प्रलपतो द्विजान् ॥ अवेक्ष्य सहसा रामो रथादवततार हं ॥ १७ ॥

राजनिच सचिवसहितेराजनिच । ते पौरजनाः ॥ २—३ ॥ याच्यमानः निवर्तस्वनिवर्तस्वेतिप्रार्थ्यमानः । सत्यं सत्यप्रतिज्ञं ॥ ४ ॥ स्वाःप्रजाइव स्वान्यपत्यानीव ॥ ५ ॥ स्वेनपितृवचनपरिपालनस्यावश्यकर्तव्यत्वात्प्रजानुरागेणताभ्योहितमुपदिशति—याप्रीतिरित्यादिना ॥ ६—८ ॥ हि यस्मात्कारणात्। भरतो वः युष्माकं। युवराजः समीक्षितः राज्ञेतिशेषः। अतोमया शिष्टैः अवशिष्टैः लक्ष्मणशत्रुघ्नादिभिः सर्वैरपि। भर्तृशासनंकार्यं। अपिचेतिवक्तव्यान्तरसमुच्चये ॥ ९ ॥ मयिवनंगतेसति असौमहाराजः यथा नसन्तप्येत् ममप्रियचिकीर्षया तथाकार्यः ॥ १० ॥ धर्मे पितृवचनपरिपालनरूपेधर्मे । तथातथाप्रकृतयो रामंपतिमकामयन् आदौराजाज्येष्ठंभवन्तमेव अस्मद्रक्षणार्थंयुवराजत्वेनकल्पितवान् । अयमर्थोभवतास्माभिश्चकर्तव्यइतिराममेवपुनःपुनःपतिमकामयन्तेत्यर्थः ॥ ११ ॥ सौमित्रिणासहेत्यनेन रामस्येवलक्ष्मणस्यापिगुणपौष्कल्यमस्तीतिद्योत्यते । गुणैरेव गुणैः पाशैरितिश्लिष्टरूपकं ॥ १२ ॥ त्रिविधमितिक्रियाविशेषणं । ओजसा तपोबलेन । वयसा प्रकम्पंचश्चलं शिरोयेषांतेतथा ॥ १३—१४ ॥ याचनांप्रतिवेदिताः प्रार्थनांज्ञापिताः । अस्माभिरितिशेषः ॥ १५ ॥ उपवाह्यः पुरसमीपेवाह्यः ॥ १६ ॥ आर्तप्रलापान्प्रलपतः

दूरमनुव्रजेत्'' इत्याद्युक्तिरूपेणेत्यर्थः । राजनिनिवर्तितेसति ॥ २ ॥ शि० अयोध्यानिवासिनांभवतामपि या यादृशीप्रीतिः स्नेहः योबहुमानःअतिसत्कारश्च सासच मत्प्रियार्थं मन्निष्ठप्रीतिवृद्ध्यर्थं भरतेविधीयतांक्रियताम् ॥ ६ ॥ ती० प्रियाणि इहलोके सुखकराणि हितानि परलोकार्थमनुष्ठेयानि वर्णाश्रमाचारादीनि ॥ ७ ॥ ती० वयोबालोपि ज्ञानादिनावृद्धः । मृदुरपि वीर्यगुणान्वितः । ति० वीर्यगुणान्वितोपि मृदुः ॥८॥ ती० धर्ममेवास्थितोभवत् धर्ममेवपरिगृह्णाति ॥११॥ ती० रामस्यपरमकरुणामुत्पादयितुं तुरङ्गमान्प्रत्याहुः—वहन्तइति । वहन्तः रथेनप्रापयन्तः । हिताभवत भर्तारंवनं ननयतेतियावत् । ब्राह्मणयाच्नामतिक्रम्य युष्मद्गमनं भर्तुरहितमितिभावः । ति० जात्याः उत्तमजातीयाः ॥ १४ ॥ ती० एवं प्रार्थितानांतेषांवेगगमनदुःखादाहुः । कर्णवन्तीति । विशेषेण यूयंकर्णवन्तइत्यनुकर्षः । तस्माद्भवद्भिर्वनं नगन्तव्यं । अपितु याचनामस्मदीयां प्रतिवेदिताः ज्ञातवन्तःनिवर्तध्वं ॥ १५ ॥

[पा०] १ ङ. छ. झ. ठ. ताभिः. २ ङ. च. छ. झ—ठ. सस्नेहं. ३ ङ. च. छ. झ. ञ. ठ. विश्रीयतां. ४ ख. नन्दिवर्धनः. ५ क. ङ. च. छ. झ—ट. संतप्येत्. ख. सतप्येत्. ६ क. ख. ङ. च. ज. ञ. धर्ममेवास्थितो. क. ग. धर्मएवास्थितो. छ. झ. ट. ठ. धर्ममेवाश्रितो. ७ ख. ग. मकाङ्क्षयन्. ८ क—ठ. वेद्धं. ९ क. भर्तानो. १० क. च. सः.

पद्ध्यामेव जगामाथ ससीतः सहलक्ष्मणः ॥ संनिकृष्टपदन्यासो रामो वनपरायणः ॥ १८ ॥
द्विजातींस्तु पदातींस्तान्रामश्चारित्रवत्सलः ॥ न शशाक घृणाचक्षुः परिमोक्तुं रथेन सः ॥ १९ ॥
गच्छन्तमेव तं दृष्ट्वा रामं संभ्रान्तचेतसः ॥ ऊचुः परमसंतप्ता रामं वाक्यमिदं द्विजाः ॥ २० ॥
ब्राह्मण्यं कृत्स्नमेतत्त्वां ब्रह्मण्यमनुगच्छति ॥ द्विजस्कन्धाधिरूढास्त्वामग्नयोप्यनुयान्त्यमी ॥ २१ ॥
वाजपेयसमुत्थानि छत्राण्येतानि पश्य नः ॥ पृष्ठतोनुप्रयातानि मेघानिव जलात्यये ॥ २२ ॥
अनवाप्तातपत्रस्य रश्मिसंतापितस्य ते ॥ एभिश्छायां करिष्यामः स्वैश्छत्रैर्वाजपेयिकैः ॥ २३ ॥
या हि नः सततं बुद्धिर्वेदमन्त्रानुसारिणी ॥ त्वत्कृते सा कृता वत्स वनवासानुसारिणी ॥ २४ ॥
हृदयेष्वेव तिष्ठन्ति वेदा ये नः परं धनम् ॥ वत्स्यन्त्यपि गृहेष्वेव दाराश्चारित्ररक्षिताः ॥ २५ ॥
न पुनर्निश्चयः कार्यस्त्वद्गतौ सुकृता मतिः ॥ त्वयि धर्मव्यपेक्षे तु किं स्याद्धर्ममपेक्षितुम् ॥ २६ ॥
याचितो नो निवर्तस्व हंसशुक्लशिरोरुहैः ॥ शिरोभिर्निभृताचार महीपतनपांसुलैः ॥ २७ ॥

आर्तवाक्यानिप्रयुञ्जानानित्यर्थः ॥ १७ ॥ सन्निकृष्टपदन्यासःपद्ध्यांजगामेति । ब्राह्मणवाक्यश्रवणानन्तरं रथगमनेदोषोभवतीति प्रतिनिवृत्त्यब्राह्मणाश्वासनेव्रतभङ्गोभवतीतिधियारथादवतीर्यतदागमनपर्यन्तंमन्दंमन्दंजगामेत्यर्थः ॥१८॥ रथादवतीर्यकिमर्थंपादगमनं कृतवानित्याशङ्क्याह—द्विजातीनिति । रथेनद्विजातीन्परिमोक्तुंनशशाक रथेनोपलक्षितःसन्सावरोधंदृशरथमिवाञ्जल्यादिनाद्विजातीन्निवर्तयितुंनशशाकेत्यर्थः । घृणाचक्षुः दयार्द्रचक्षुरित्यर्थः ॥ १९ ॥ गच्छन्तमेव बहुशोनिवृत्तिहेतुप्रदर्शनेपिपितृवचनचिकीर्षयागच्छन्तमेवेत्यर्थः ॥ २० ॥ दुःखप्रलापादिनाप्यनिवृत्तंरामेसहवनगमनलक्षणं महाभारमारोप्यनिवर्तयितुमुद्युञ्जते—ब्राह्मण्यमित्यादिना । ब्राह्मण्यं ब्राह्मणसमूहः । "ब्राह्मणमाणववाडवाद्यत्" इतियत्प्रत्ययः । ब्रह्मसु ब्राह्मणेषु साधुःब्रह्मण्यः तं अग्नयः अरण्यारोपिताः । केवलानांद्विजस्कन्धाधिरूढत्वासंभवात् ॥ २१ ॥ वाजपेयसमुत्थानि वाजपेयानुष्ठानसंभृतानि । जलात्यये शरदि ॥ २२॥ वाजपेयिकैः वाजपेयप्राप्तैः । "यावज्जीवं नकश्चनप्रत्यवरोहेत् बृहस्पतिसवेनवा प्रत्यवरोहणीयेनयजेतश्वेतच्छत्रीभवतीतिविज्ञायते" इतिवाजपेययाजिनांश्वेतच्छत्रधारणविधानादितिभावः ॥२३॥ अस्माकंबुद्धिरेतावन्तंकालंनिश्चिन्ततयामन्त्रविषयाभूत् इदानींत्वत्कृतवनवासविषयाऽभूदितिरामेमहान्तं भारमारोपयन्ति—याहीत्यादिना ॥ २४ ॥ ब्राह्मणानां धनभूतंवेदंपरित्यज्यसहधर्मचारिदारसंरक्षणमप्यकृत्वाकथमस्माभिः सहगम्यतइत्याकाङ्क्षायामाह—हृदयेष्विति । नःपरंधनंउत्कृष्टधनभूतायेवेदास्तेहृदयेष्वेव तिष्ठन्ति । अनुच्चारणेतेषांनकापिहानिरितिभावः । चारित्रेणपातिव्रत्येनरक्षितादाराश्चगृहेष्वेवतिष्ठन्ति । चारित्राणामेवतद्रक्षकत्वान्नास्मद्रक्ष्यास्तइतिभावः ॥ २५ ॥ अद्यमत्प्रार्थनयानिवर्तध्वमित्यत्राह—नेति । त्वद्गतौ त्वन्निवर्तनरूपगतौ । मतिः सुकृता सुष्ठुकृता । निश्चयः वनगमननिश्चयः । पुनर्नकार्यः त्वयेतिशेषः । त्वयि धर्मव्यपेक्षे पितृवचनपरिपालनरूपधर्मसापेक्षेसति । अस्माभिः धर्ममपेक्षितुं पालयितुं किंनिमित्तं स्यात् । त्वयिवनंगतेस्माभिर्धर्मएवत्यक्तव्यइतिभावः । यद्वा त्वयितुधर्मपरायणे त्वयितुधर्मव्यपेक्षेसति ब्राह्मणप्रार्थनाकरणरूपधर्मनिरपेक्षेसति । किंभूतंधर्ममपेक्षितुंस्यात् नकिमपीत्यर्थः ॥ २६ ॥ ज्ञानवयस्तपोवृद्धाअपिद्विजाः विश्लेषासहिष्णुतयाप्रणामेनापिरामं निवर्तयितुमुद्युञ्जते—याचितइति । हेनिभृताचार निश्चलधर्मानुष्ठान । हंसशुक्लशिरोरुहैः पलितकेशैः । महीपतनपांसुलैः कृतसाष्टाङ्गप्रणामैः । नः अस्माकं । शिरोभिर्याचितोनिवर्तस्व । वृद्धब्राह्मणानांक्षत्रियकृति० यद्वा राज्ञोविष्णवंशत्वेन नतौ नदोषइत्याहुः ॥ २७ ॥

[पा०] १ ङ. छ. जनान्सर्वाननुपातिष्ठत्सलक्ष्मणः. २ क. ख. घ. ङ. च. झ. ञ. ट. द्विजातीन्हि. ३ ख. मेवं. ४ घ—छ. झ. ञ. ट. मानसाः. ५ ग. ज. सर्वे. ६ क. समृद्धानि. ७ क—घ. ज. प्रयातान्हिहंसानिव. ८ ख. स्वच्छत्रैः. ९ क—घ. छ. ज—ट. ष्ववतिष्ठन्ते. १० क. ख. घ. वसन्त्यपि. ११ क. रक्षकाः. १२ ङ. छ. झ. ञ. ट. पुनर्नैनिश्चयः. १३ ख. सुकृतात्मभिः. १४ ङ. च. झ. ट. धर्मपयेक्षितं. १५ ख. याचितःसन्निवर्तस्व.

बहूनां वितता यज्ञा द्विजानां य इहागताः ॥ तेषां समाप्तिरायत्ता तव वत्स निवर्तने ॥ २८ ॥
भक्तिमन्ति हि भूतानि जङ्गमाऽजङ्गमानि च ॥ याचमानेषु राम त्वं भक्तिं भक्तेषु दर्शय ॥ २९ ॥
अनुगन्तुमशक्तास्त्वां मूलैरुद्धृतवेगिनः ॥ उन्नता वायुवेगेन विक्रोशन्तीव पादपाः ॥ ३० ॥
निश्चेष्टाहारसंचारा वृक्षैकस्थानविष्ठिताः ॥ पक्षिणोपि प्रयाचन्ते सर्वभूतानुकम्पिनम् ॥ ३१ ॥
एवं विक्रोशतां तेषां द्विजातीनां निवर्तने ॥ ददृशे तमसा तत्र वारयन्तीव राघवम् ॥ ३२ ॥
ततः सुमन्त्रोपि रथाद्विमुच्य श्रान्तान्हयान्संपरिवर्त्य शीघ्रम् ॥
पीतोदकांस्तोयपरिप्लुताङ्गानचारयद्वै तमसाविदूरे ॥ ३३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे पञ्चचत्वारिंशः सर्गः ॥४५॥

षट्चत्वारिंशः सर्गः ॥ ४६ ॥

रामेणलक्ष्मणंप्रत्ययोध्यास्थजनावस्थोत्प्रेक्षणपूर्वकंपितरौप्रत्यनुशोचनं ॥ १ ॥ लक्ष्मणसुमन्त्रपरिकल्पितपल्लवतल्पेप्रसुप्तेन रामेणनिशीथेप्रबुध्यनिद्रायमाणानुगतपौरजनवञ्चनायसुमन्त्रंप्रतिरथस्यायोध्याभिमुख्येननोदनपूर्वकंपुनःप्रतिनिवर्तनचोदना ॥ २ ॥ तथा यथोक्तकारिणासुमन्त्रेणप्रत्यानीतरथाधिरोहणेनसीतालक्ष्मणाभ्यांसहवनंप्रतिनिर्गमनम् ॥ ३ ॥

ततस्तु तमसातीरं रम्यमाश्रित्य राघवः ॥ सीतामुद्वीक्ष्य सौमित्रिमिदं वचनमब्रवीत् ॥ १ ॥
इयमद्य निशा पूर्वा सौमित्रे प्रहिता वनम् ॥ वनवासस्य भद्रं ते स नोत्कण्ठितुमर्हसि ॥ २ ॥

मारप्रणामःपरत्वबुद्ध्या ॥ २७ ॥ येद्विजाइहागतास्तेषां येयज्ञाः विततः विस्तृताः संभृतसंभाराइतिथावत् । तेषांयज्ञानां समाप्तिस्तवनिवर्तने आयत्ता त्वन्निवर्तनाधीनेत्यर्थः । एवं नकृतंचेत्सर्वेयज्ञास्त्वयैवविघ्निताःस्युरितिभावः ॥ २८ ॥ नकेवलंवयमेव तिर्यक्स्थावराण्यपित्वन्निवृत्तिमपेक्षन्तइत्याह—भक्तिमन्तीति । भक्तिं स्नेहं । दर्शय सफलयेत्यर्थः ॥ २९ ॥ मूलैः पादस्थानीयैः । त्वामनुगन्तुमशक्ताः । उद्धतवेगिनः प्रतिहतवेगिनः । वायुवेगेनउन्नताः ऊर्ध्वबाहवइवस्थिताइतिभावः । पादपाःविक्रोशन्तीव क्रन्दन्तीव । वायुवेगोत्थशब्दैरितिभावः । उद्धतवेगिभिरित्यपिपाठः ॥ ३० ॥ चेष्टा चलनादिकं आहारः संचाराश्रयेभ्योनिर्गतास्तेतथोक्ताः । प्रयाचन्ते प्रार्थयन्ते । निवृत्तिमितिशेषः । एवंतिर्यक्स्थावराणामपिखेदो रामस्यसर्वशरीरित्वात् शरीरिणोवैपरीत्येहिशरीरव्यथादृष्टा ॥ ३१ ॥ निवर्तनेविषये । यद्वा द्विजातीनामितिसंबन्धसामान्येषष्ठी । द्विजातिभिः प्रार्थ्यमानरामनिवर्तनइत्यर्थः ॥ ३२ ॥ संपरिवर्त्य अध्वश्रमनिवृत्त्यर्थंपरिवेष्टनंकारयित्वा अचारयन्भक्षितयवसानकरोत् ॥ ३३ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने पञ्चचत्वारिंशः सर्गः ॥ ४५ ॥

सीतामुद्वीक्ष्यलक्ष्मणंप्रतिकथनं वक्ष्यमाणस्यानुत्कण्ठाकारणस्यसीताविषयेपितुल्यत्वज्ञापनाय ॥ १ ॥ वनवासस्यपूर्वा प्रथमा । अद्येयंनिशा इदानीमुपस्थि-

---

पादपाः वायुवेगेन वायुवेगाजशाखाचलनशब्दैर्विक्रोशन्तीव । त्वन्निवर्तनायेतिशेषः ॥ ३० ॥ इतिपञ्चचत्वारिंशस्सर्गः ॥ ४५ ॥
ती० वनवासस्य वनवाससंबन्धिनीनांनिशानांमध्यइत्यर्थः । पूर्वा प्रथमा अद्ययंनिशाइदानीमुपस्थितारात्रिः वनंप्रहिता वनेप्राप्ता । वनवासदिनेष्वेकोदिवसोगतप्रायइत्यर्थः । अतस्सत्वंउत्कण्ठितुंगृहसौख्यादिवाञ्छांकर्तुंनार्हसि । शि० अवनंवनवासविरोधिवस्तु उत्कण्ठितुंस्मर्तुंनार्हसि । तेभद्रंकल्याणमेवसर्वत्रेतिशेषः । ति० हेसौमित्रे वनवासस्य वनवाससंबन्धिनिशानांमध्ये अद्यप्रवृत्तेदं निशा वनं वनवासंप्रति पूर्वाप्रहिताप्राप्ता । वनवासकालस्यैतन्निशामारभ्यगणनीयत्वात् । स० वनवासस्यपूर्वानिशा प्राथमिकी रात्रिरियंप्रहिताप्राप्ता अतइयंसीता अवनंरक्षणंअर्हतीतिशेषः । उत्कण्ठितुं गृहादिचिन्तांकर्तुं । यद्वा अद्येयंपूर्वानिशा अद्य च

[पा०] १ ङ. छ. झ. ञ. ट. भक्तिमन्तीह. २ ख. घ—छ. झ. ञ. ट. तेषुत्वं. क. ज. भूतेषु. ३ क. ख. ग. उद्धतवेदिभिः. ४ छ. झ. ञ. ट. निश्चिताः. क. घ, विष्ठिताः. ग. रक्षिताः. ५ ख. घ. ङ. झ. ट. कंपनं. ६ क. अस्थिता. ७ ङ. ज. झ. ट. नचोत्कण्ठितुं.

पश्य शून्यान्यरण्यानि रुदन्तीव समन्ततः ॥ यथानिलयमायद्भिर्निलीनानि मृगद्विजैः ॥ ३ ॥
अद्यायोध्या तु नगरी राजधानी पितुर्मम ॥ सस्त्रीपुंसागतानस्मान्शोचिष्यति न संशयः ॥ ४ ॥
अनुरक्ता हि मनुजा राजानं बहुभिर्गुणैः ॥ त्वां च मां च नरव्याघ्र शत्रुघ्नभरतौ तथा ॥ ५ ॥
पितरं चानुशोचामि मातरं च यशस्विनीम् ॥ अपि वाऽन्धौ भवेतां तु रुदन्तौ तावभीक्ष्णशः ॥६॥
भरतः खलु धर्मात्मा पितरं मातरं च मे ॥ धर्मार्थकामसहितैर्वाक्यैराश्वासयिष्यति ॥ ७ ॥
भरतस्यानृशंसत्वं विचिन्त्याहं पुनः पुनः ॥ नानुशोचामि पितरं मातरं चापि लक्ष्मण ॥ ८ ॥
त्वया कार्यं नरव्याघ्र मामनुव्रजता कृतम् ॥ अन्वेष्टव्या हि वैदेह्या रक्षणार्थे सहायता ॥ ९ ॥
अद्भिरेव तु सौमित्रे वत्स्याम्यद्य निशामिमाम् ॥ एतद्धि रोचते मह्यं वन्येऽपि विविधे सति ॥१०॥
एवमुक्त्वा तु सौमित्रिं सुमन्त्रमपि राघवः ॥ अप्रमत्तस्त्वमश्वेषु भव सौम्येत्युवाच ह ॥ ११ ॥
सोऽश्वान्सुमन्त्रः संयम्य सूर्येऽस्तं समुपागते ॥ प्रभूतयवसान्कृत्वा बभूव प्रत्यनन्तरः ॥ १२ ॥
उपास्य तु शिवां संध्यां दृष्ट्वा रात्रिमुपस्थिताम् ॥ रामस्य शयनं चक्रे सूतः सौमित्रिणा सह ॥१३॥
तां शय्यां तमसातीरे वीक्ष्य वृक्षदलैः कृताम् ॥ रामः सौमित्रिणा सार्धं सभार्यः संविवेश ह ॥१४॥
सभार्यं संप्रसुप्तं तं भ्रातरं वीक्ष्य लक्ष्मणः ॥ कथयामास सूताय रामस्य विविधान्गुणान् ॥ १५ ॥
जाग्रतो ह्येव तां रात्रिं सौमित्रेरुदितो रविः ॥ सूतस्य तमसातीरे रामस्य ब्रुवतो गुणान् ॥ १६ ॥

तांरात्रिः । प्रहिता गतप्राया । अतःस त्वंउत्कण्ठितुं नार्हसि । सीतामुद्वीक्ष्यसौमित्रिमब्रवीदित्यस्यैवंवाभिप्रायः । अतिसुकुमारीसीताकथंपद्भ्यामेववनंगच्छेदितिनोत्कण्ठितुमर्हसीति ॥ २ ॥ शून्यानि निष्प्रभाणि। यथानिलयं यथास्थानंआयद्भिरागच्छद्भिः । मृगद्विजैर्निलीनानि व्याप्तानि तात्कालिकतच्छब्दैःरुदन्तीव । निष्प्रभत्वेनरोदनोत्प्रेक्षा ॥ ३ ॥ वनरोदनोत्प्रेक्षयाउद्बुद्धसंस्कारोनगरवृत्तान्तंस्मरति—अद्येति । स्त्रीपुंसेति। "अचतुरविचतुरसुचतुरस्त्रीपुंस" इत्यादिनानिपातनादकारान्तत्वं ॥ ४ ॥ शोचनहेतुमाह—अनुरक्ता इति । गुणैर्हेतुभिः राजानंप्रत्यनुरक्ताहि राजानमित्युपादानमौद्धत्यपरिहाराय ॥ ५ ॥ रुदन्तावितिं सन्ततरोदनवशेनान्धौस्यातामित्यर्थः ॥ ६ ॥ एवमपिकाचित्प्रत्याशास्तीत्याह—भरतइति ॥ ७—८ ॥ त्वया चोदितमेवकृतमित्याह—त्वयेति । कार्यं अवश्यकर्तव्यं । तत्रहेतुः—अन्वेष्टव्येति ॥९॥ अद्भिरेववत्स्यामि अपएवाहारीकृत्यवत्स्यामि । वनवासोपक्रमदिवसत्वादस्यपुण्यक्षेत्रत्वाच्चोपवासः । एतद्धिरोचते नान्यत् । अनुरक्तजनदुःखस्मरणादितिभावः ॥ १०—११ ॥ प्रभूतयवसान् पर्याप्ततृणान् । " यवसंतृणमर्जुनं " इत्यमरः । प्रत्यनन्तरः प्रतिगतमनन्तरकृत्यंयेनसतथोक्तः अवगतानन्तरकार्यइत्यर्थः । संनिहितइत्यर्थइत्येके ॥ १२ ॥ उपासनं नमस्कारः । सूतजातेरपिनमस्कारमात्रंसंभवति ॥ १३ ॥ वृक्षदलैः सौमित्रिणासार्धं सूतेनकृतांवीक्ष्येत्यन्वयः ॥१४—१५॥ तांरात्रिमिति अत्यन्तसंयोगेद्वितीया । सर्वांरात्रिंजाग्रतःसूतस्य सूताय रामस्यगुणान् कालक्षेपार्थं[illegible]तःसौमित्रेः सौमित्रौब्रुवतिसति । रविरुदितः उदितुमारब्धः ।

प्रहितायाःप्राप्तायाःसीतायाअवनंभद्रंयतः तेम इह रक्षणांपश्यं उत्कण्ठितुं उत्साहंकर्तुं ॥ २ ॥ ति० यथायोगंस्वस्वनिलयमायद्भिः मृगद्विजैः निलीनानि सशब्दमन्तर्लीनतयाव्याप्तानि अतएव शून्यान्यरण्यानि रुदन्तीव अस्मान्दृष्ट्वाखिन्नानीववर्तन्ते पश्य ॥३॥ ति० नौं अस्मदर्थं अस्मन्निमित्तं । अन्धौनभवेतां अपितुभवेतामेव । अतःशोचामितौ ॥ ६ ॥ स० अद्भिरेवेति । अनेन स्वपितुरल्पजीवित्वात्तदुद्देशेनतीर्थोपवासःकृतइतिध्वन्यते॥१०॥ति० शयनं शयनस्थलं शर्करापांसूत्क्षेपणादिनाचक्रइत्यन्वयः ॥ १३ ॥

[पा०] १ घ. भरतावपि. २ ख. चान्धौ. ग—ट. नान्धौ. ३ ङ. च. झ. ञ. ट. नौं. ४ क. धर्मकामार्थं. ५ क—ङ. छ—ञ. संचिन्त्याहं. ६ च. छ. झ. चमहाभुज. ७ च. छ. झ. ञ. ट. रक्षणार्थं. ८ क. ख. घ. ङ. ञ. झ. ञ. ट. रेवहि. ९ क. च. घ. ञ. वत्स्याम्यत्र. छ. वत्स्याम्यथ. १० ख. ङ. छ. झ. ट. मुपागतां. ११ ज. शय्यांतां. १२ ङ. छ. झ. ट. दलैर्वृतां. १३ च. तंसंप्रसुप्तं. ङ. च. छ. झ. ञ. ट. संप्रसुप्तंतु. १४ ग. घ. च. भ्रातरंप्रेक्ष्य. ङ. छ. झ. ट. श्रान्तंसंप्रेक्ष्य. १५ छ. झ. ट. जाग्रतोरेव. क. ख. च. ञ. जाग्रतोरेवसारात्रिस्तयोःसौमित्रिसूतयोः । जगामतमसातीरेरामस्यब्रुवतोर्गुणान्.

गोकुलाकुलतीरायास्तमसाया विदूरतः ॥ अवसत्तत्र तां रात्रिं रामः प्रकृतिभिः सह ॥ १७ ॥
उत्थाय तु महातेजाः प्रकृतीस्ता निशाम्य च ॥ अब्रवीद्भ्रातरं रामो लक्ष्मणं पुण्यलक्षणम् ॥ १८ ॥
अस्मद्व्यपेक्षान्सौमित्रे निरपेक्षान्गृहेष्वपि ॥ वृक्षमूलेषु संसुप्तान्पश्य लक्ष्मण सांप्रतम् ॥ १९ ॥
यथैते नियमं पौराः कुर्वन्त्यस्मन्निवर्तने ॥ अपि प्राणानसिष्यन्ति न तु त्यक्ष्यन्ति निश्चयम् ॥२०॥
यावदेव तु संसुप्तास्तावदेव वयं लघु ॥ रथमारुह्य गच्छाम पन्थानमकुतोभयम् ॥ २१ ॥
अतो भूयोपि नेदानीमिक्ष्वाकुपुरवासिनः ॥ स्वपेयुरनुरक्ता मां वृक्षमूलानि संश्रिताः ॥ २२ ॥
पौरा ह्यात्मकृताद्दुःखाद्विप्रमोक्ष्या नृपात्मजैः ॥ न ते खल्वात्मना योज्या दुःखेन पुरवासिनः॥२३॥
अब्रवील्लक्ष्मणो रामं साक्षाद्धर्ममिव स्थितम् ॥ रोचते मे तथा प्राज्ञ क्षिप्रमारुह्यतामिति ॥ २४ ॥
अथ रामोऽब्रवीच्छ्रीमान्सुमन्त्रं युज्यतां रथः ॥गमिष्यामि ततोऽरण्यं गच्छ शीघ्रमितः प्रभो ॥२५॥
सूतस्ततः संत्वरितः स्यन्दनं तैर्हयोत्तमैः ॥ योजयित्वाऽथ रामाय प्राञ्जलिः प्रत्यवेदयत् ॥ २६ ॥
अयं युक्तो महाबाहो रथस्ते रथिनांवर ॥ तमारोह सुभद्रं ते ससीतः सहलक्ष्मणः ॥ २७ ॥
तं स्यन्दनमधिष्ठाय राघवः सपरिच्छदः ॥ शीघ्रगामाकुलावर्तां तमसामतरन्नदीम् ॥ २८ ॥
स संतीर्य महाबाहुः श्रीमाञ्शिवमकण्टकम् ॥ प्रापद्यत महामार्गमभयं भयदर्शिनाम् ॥ २९ ॥
मोहनार्थं तु पौराणां सूतं रामोऽब्रवीद्वचः ॥ उदङ्मुखः प्रयाहि त्वं रथमास्थाय सारथे ॥ ३० ॥
मुहूर्तं त्वरितं गत्वा निवर्तय रथं पुनः ॥ यथा न विद्युः पौरा मां तथा कुरु समाहितः ॥ ३१ ॥

उषःकालोभूदित्यर्थः । यद्वा उदयपर्यन्तंगमनकालेपिगुणानब्रवीदितिभावः ॥ १६ ॥ पूर्वकथाशेषंप्रस्तौति—गोकुलेति । विदूरतः अदूरतः । प्रकृतिभिः पौरश्रेणिभिः । "राज्याङ्गानिप्रकृतयःपौराणांश्रेणयोपिच" इत्यमरः ॥ १७ ॥ निशाम्य दृष्ट्वा ॥ १८ ॥ अस्मद्व्यपेक्षान् अस्मास्वेवविशेषेणापेक्षावतः ॥ १९ ॥ पौराः अस्मन्निवर्तने यथा येनप्रकारेण नियमंकुर्वन्ति । तेनप्रकारेणप्राणानपि असिष्यन्ति त्यक्ष्यन्ति । निश्चयंतु निवर्तननिश्चयंतु नत्यक्ष्यन्तीतिसंबन्धः ॥ २० ॥ यावदेव यावत्येवकाले । तावदेव तावत्येवकाले । लघु क्षिप्रं । रथमारुह्यगच्छाम । "लघुक्षिप्रमरंद्रुतं" इत्यमरः ॥२१॥ इक्ष्वाकुपुरवासिनः मामनुरक्ताः इदानीमिव भूयः पुनः वृक्षमूलानि संश्रिताः नस्वपेयुः । अतोरथमारुह्य गच्छामेतिपूर्वेणसंबन्धः ॥ २२ ॥ आत्मकृतात् स्वकृतात् । आत्मना स्वेन ॥ २३—२६ ॥ युक्तः सज्जः ॥ २७ ॥ सपरिच्छदः धनुःकवचादिसहितः । आकुलावर्तां आवर्ताकुलां ॥ २८ ॥ महामार्गंप्रापद्यत जलस्थितरथादवतीर्य पद्भ्यामेवमहामार्गंप्रापदित्यर्थः । भयदर्शिनां श्वापदादीनां । अभयं तत्संबन्धिभयरहितमित्यर्थः ॥ २९ ॥ मोहनं वञ्चनं । ननुसदयस्यरामस्यस्वविरहासहिष्णूनांस्वस्मिन्निरतिशयप्रेमभाजांवञ्चनमनुचितं । उच्यते । नेदंवञ्चनं व्रणचिकित्सान्यायेननागरिकाणामुन्मत्तकानन्वेनसत्तानभवेदितिसुसात्म्यानुभवप्रदानार्थं वनवासव्याजेनविश्लेषस्यसंक-

---

शि० तात्कालिकस्वकर्तव्यमाह—यावदिति । यावत् यावत्कालं वयं लघुसंसुप्तास्तावत्कालं द्वित्रघटिकयेत्यर्थः । रथमारुह्य अकुतोभयं सर्वतोभयरहितंपन्थानंगच्छाम । एतेन तमसादक्षिणतटादारभ्य किंचिद्दूरंप्रशस्तोमार्गोनास्तीतिव्यक्तं ॥ २१ ॥ शि० ननु पुरवासिनांकागतिरित्यतआह—अतइति । स्वप हेस्वकीयरक्षक लक्ष्मण अतःमध्येसुमार्गाभावाद्धेतोः भूयः अधिकं मामनुरक्ताअपि इक्ष्वाकुपुरवासिनः इदानींमांन ईयुःनागच्छेयुः । इदानीमित्यनेन भरतेनसहागन्तारइतिसूचितम् ॥ २२ ॥ ति० प्रभो समर्थ ॥ २५ ॥ इतिषट्चत्वारिंशस्सर्गः ॥ ४६ ॥

[पा०] १ ङ. ज. झ. ट. उत्थायच. २ ख—ङ. छ. झ. ट. निर्व्यपेक्षान्. ३ क. ख. च. ष्विमान्. ४ छ. झ. संसक्तान्. ५ ग. नियतिं. ज. नियतं. ६ ख. ङ. छ. झ. ट. प्राणाभ्यसिष्यन्ति. घ. प्राणान्नरक्षन्ति. ७ ख. तद्यावदेव. ८ क—ट. गच्छामः. ९ क. ग—छ. झ. ट. मूलेषु. १० क. ख. ग. ङ. च. छ. झ. ञ. ट. ननु. ११ क. घ. महाप्राज्ञ. १२ ङ. च. छ. झ. ञ. ट. त्सूतंशीघ्रंसंयुज्यतां. क. ख. द्धीमान्. १३ छ. मतः. १४ क. ख. घ—छ. झ. ञ. ट. नुरामस्य. १५ ङ. च. छ. झ. ञ. ट. त्वरयारोहभद्रं. क—घ. ज. त्वमारोहस्वभद्रं. १६ ङ. छ. झ. ट. माह्य.

रामस्य वचनं श्रुत्वा तथा चक्रे स सारथिः ॥ प्रत्यागम्य च रामस्य स्यन्दनं प्रत्यवेदयत् ॥ ३२ ॥
तौ संप्रयुक्तं तु रथं समास्थितौ तदा ससीतौ रघुवंशवर्धनौ ॥
प्रचोदयामास ततस्तुरङ्गमान्स सारथिर्येन पथा तपोवनम् ॥ ३३ ॥
ततः समास्थाय रथं महारथः ससारथिर्दाशरथिर्वनं ययौ ॥
उदङ्मुखं तं तु रथं चकार स प्रयाणमाङ्गल्यनिमित्तदर्शनात् ॥ ३४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे षट्चत्वारिंशः सर्गः ॥४६॥

सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

प्रभातेप्रबुद्धैःपौरैरामादर्शनेनात्मोपालंभनपूर्वकंपरिशोचनम् ॥ १ ॥ ततोरथपथानुयायिभिस्तैर्मार्गविच्छेदेसशोकमयोध्याप्रवेशः ॥ २ ॥

प्रभातायां तु शर्वर्यां पौरास्ते राघवं विना ॥ शोकोपहतनिश्चेष्टा बभूवुर्हतचेतसः ॥ १ ॥
शोकजाश्रुपरिद्यूना वीक्षमाणास्ततस्ततः ॥ आलोकमपि रामस्य न पश्यन्ति स्म दुःखिताः ॥ २ ॥
ते विषादार्तवदना रहितास्तेन धीमता ॥ कृपणाः करुणा वाचो वदन्ति स्म मनस्विनः ॥ ३ ॥
धिगस्तु खलु निद्रां तां ययाऽपहृतचेतसः ॥ नाद्य पश्यामहे रामं पृथुरस्कं महाभुजम् ॥ ४ ॥
कथं नाम महाबाहुः स तथाऽवितथक्रियः ॥ भक्तं जनं परित्यज्य प्रवासं राघवो गतः ॥ ५ ॥

लिप्ततयाहितव्यापारत्वेनवञ्चनत्वासंभवात् । यदि रामस्यतथासंकल्पोनभवेत्तर्हिकथंनिःशेषसर्वजननिद्राकरणं सुमन्त्रलक्ष्मणवृत्तेष्वेकस्यापिनिर्निद्रत्वापत्तेः । मोहनमेवाह—उदङ्मुखइत्यादि । पौराणांमोहनार्थंमुदङ्मुखः प्रयाहि अयोध्यांप्रतिरामोनिवृत्तइतिपौराणांभ्रान्तिमुत्पादयितुमुदङ्मुखोयाहीत्यर्थः । स्वस्यरथेनोदङ्मुखंगत्वामार्गान्तरेणवनगमनस्यकर्तुंशक्यत्वेपि अयोध्याभिमुखगमनेव्रतभङ्गःस्यादितिधियाग्रमग्रममभिमुखोयाहीत्युक्तवान् । तथाकुर्वितिपौराणांमोहनार्थंसूतमब्रवीदितिसंबन्धः ॥ ३०—३१ ॥ प्रत्यागम्येति मार्गान्तरेणप्रत्यागम्येत्यर्थः ॥ ३२ ॥ संप्रयुक्तं सम्यगानीतंरथंसमास्थितौ अभूतामिति शेषः । येनपथातपोवनंप्राप्यते तेनप्रचोदयामास ॥ ३३ ॥ सः सुमन्त्रः । प्रयाणमाङ्गल्यनिमित्तदर्शनात् प्रयाणानुकूलमङ्गलसूचकनिमित्तदर्शनाद्धेतोः । रथमुदङ्मुखंचकार निमित्तस्वीकारार्थमुदङ्मुखंचकारेत्यर्थः । ततः निमित्तस्वीकारानन्तरं । रथमास्थायवनंययाविति संबन्धः । प्रयाणेदक्षिणपादोद्धारवत् उदङ्मुखगमनंमङ्गलायेतिभावः ॥ ३४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने षट्चत्वारिंशः सर्गः ॥ ४६ ॥

अथपौरवृत्तान्तंदर्शयति—प्रभातायामित्यादि । शोकोपहतनिश्चेष्टाः शोकोपहतत्वान्निश्चेष्टाः । हतचेतसः मूढाः ॥ १ ॥ शोकजाश्रुभिः परिद्यूनाःपरिक्लान्ताः । आलोकमपिरामस्य रामसंबन्ध्यालोकमपि आलोक्यतइत्यालोकःतमालोकसाधनंरथरेण्वादिकमपीत्यर्थः ॥ २ ॥ विषादार्तवदनाः दुःखेनम्लानमुखाः । कृपणाः दीनवेषाः । करुणावाचः दीनवचांसि । वदन्तिस्म अन्योन्यमितिशेषः ॥३—४॥ अवितथक्रियःअमोघा-

---

शि० कृपणाः कर्तव्यविवेकरहिताः ॥ ३ ॥ ति० ययानिद्रया "निद्रांभगवतींविष्णोः" इत्यादिना मार्कण्डेयेन तस्याभगवन्मायारूपत्वाभिधानात्तदावरणादेवच विषयाविष्टानांभगवददर्शनंप्रसिद्धं श्रुतिसिरस्सु । पश्यामहइतितङार्षः । हेइतिसंबोधनं.

[पा०] १ क. ख. घ—छ. झ. ञ. ट. रामस्यतुवचः. २ क. ङ. च. छ. ञ. ट. चक्रेच. ३ क. ततः. ख. ज. तथा. ४ ग. घ. ज. गतचेतसः. ५ क. सुदुःखिताः. ६ क. ख. विषण्णार्त. ७ ङ. च. छ. झ. ञ. ट. मनीषिणः. ८ ङ. च. हृतचेतनाः. ञ. हतचेतनाः. झ. ट. हतचेतसः. ९ ङ—ठ. रामो. १० क. ख. ङ. च. छ. झ. ञ. ट. जनमभि. ११ ङ. घ. झ. ट. तापसो.

यो नः सदा पालयति पिता पुत्रानिवौरसान् ॥ कथं रघूणां स श्रेष्ठस्त्यक्त्वा नो विपिनं गतः ॥६॥
इहैव निधनं यामो महाप्रस्थानमेव वा ॥ रामेण रहितानां हि किमर्थं जीवितं हि नः ॥ ७ ॥
सन्ति शुष्काणि काष्ठानि प्रभूतानि महान्ति च ॥ तैः प्रज्वाल्य चितां सर्वे प्रविशामोथ पावकम् ॥८॥
किं वक्ष्यामो महाबाहुरनसूयः प्रियंवदः ॥ नीतः स राघवोस्माभिरिति वक्तुं कथं क्षमम् ॥ ९ ॥
सा नूनं नगरी दीना दृष्ट्वाऽस्मान्राघवं विना ॥ भविष्यति निरानन्दा सस्त्रीबालवयोधिका ॥१०॥
निर्यातास्तेन वीरेण सह नित्यं जितात्मना ॥ विहीनास्तेन च पुनः कथं पश्याम तां पुरीम् ॥११॥
इतीव बहुधा वाचो बाहुमुद्यम्य ते जनाः ॥ विलपन्ति स्म दुःखार्ता विवत्सा इव धेनवः ॥ १२ ॥
ततो मार्गानुसारेण गत्वा किञ्चित्क्षणं पुनः ॥ मार्गनाशाद्विषादेन महता समभिप्लुताः ॥ १३ ॥
रथस्य मार्गनाशेन न्यवर्तन्त मनस्विनः ॥ किमिदं किं करिष्यामो दैवेनोपहता इति ॥ १४ ॥
ततो यथागतेनैव मार्गेण क्लान्तचेतसः ॥ अयोध्यामगमन्सर्वे पुरीं व्यथितसज्जनाम् ॥ १५ ॥
आलोक्य नगरीं तां च क्षयव्याकुलमानसाः ॥ अवर्तयन्त तेऽश्रूणि नयनैः शोकपीडितैः ॥१६॥
एषा रामेण नगरी रहिता नातिशोभते ॥ आपगा गरुडेनेव ह्रदादुद्धृतपन्नगा ॥ १७ ॥
चन्द्रहीनमिवाकाशं तोयहीनमिवार्णवम् ॥ अपश्यन्निहतानन्दं नगरं ते विचेतसः ॥ १८ ॥

ते तानि वेश्मानि महाधनानि दुःखेन दुःखोपहता विशन्तः ॥
नैव प्रजज्ञुः स्वजनं जनं वा निरीक्षमाणाः प्रविनष्टहर्षाः ॥ १९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

नुवृत्तिः ॥५—६॥ इहैवनिधनं प्रायोपवेशनेनमरणं । महाप्रस्थानं मरणदीक्षापूर्वकमुत्तराभिमुखगमनं । हिःप्रसिद्धौ ॥ ७ ॥ प्रविशामोथेति अथवेत्यर्थः ॥८॥ किंवक्ष्यामइति । नकिमपिवक्तुंशक्यमित्यर्थः । तदेव विवृणोति—महाबाहुरित्यादिना । नीतः वनमिति शेषः ॥ ९—१२ ॥ मार्गानुसारेण किंचित् किंचिद्दूरं । मार्गनाशात् रथमार्गादर्शनात् । तत्रवीरुत्तृणपटलपिहितप्रदेशेरथचारणादितिज्ञेयम । समभिप्लुताः व्याप्ताइत्यर्थः ॥ १३ ॥ दैवेनोपहताइति प्रलपन्तइतिशेषः ॥ १४—१५ ॥ आलोक्येत्यादिश्लोकद्वयमेकंवाक्यं । अन्तइतिकरणंबोध्यम् । क्षयव्याकुलमानसाः संमार्जनलेपनादिक्षयेणव्यथितमनस्काः । अवर्तयन्त अमुञ्चन् ॥ १६—१८ ॥ दुःखेन सहितं स्वजनं जनंवा पौरजनंवा । नप्रजज्ञुः नाज्ञासिषुः

चापरस्परं ॥ ४ ॥ ती० नीतः प्रापितः वनमितिशेषः । अस्यायमर्थः । रामवृत्तान्तंपृच्छन्तंजनंप्रति अस्माभिःराघवोवनंनीतइति वक्तुंकथंक्षमं । अन्यद्वा किंवक्ष्यामइति ॥ ९ ॥ ति० अग्रेभवाअग्र्याः पुरोगामिन्यः ताश्चतागाश्चेत्यर्थः । यद्वा अग्र्यामुख्याः पुष्टत्वदुग्धवत्त्वादिगुणाःगावइवेत्यर्थः । गाइत्यार्षं । स० अग्रगाः पुरागन्त्र्यः ॥ १२ ॥ वि० व्यथिताःसज्जनायस्यांतो । सत्पदेनकैकेय्याव्यावृत्तिः ॥ १५ ॥ ति० क्षयो हर्षक्षयस्तेनव्याकुलमानसाः । यद्वा क्षयंगृहंप्रति व्याकुलं गन्तव्यंनवेत्येवंरूपं मानसंयेषांतादृशाः । स० क्षयेगृहे व्याकुलमानसाः । क्षयोव्याकुलोयस्मिन्रामे तस्मिन्मनोयेषांतइतिवा । शि० क्षयेण रामप्रतियोगिकसंयोगाभावेन व्याकुलमानसाः ॥ १६ ॥ स० गरुडेनह्रदादुद्धृतपन्नगा आपगा नदी यथानशोभतेतद्वत् । तस्यतद्भूषणत्वात् । यद्वा व्यतिरेकदृष्टान्तः । यमुनादौतथादृष्टेः ॥ १७ ॥ स० चन्द्रहीनमित्याद्यभूतोपमालङ्कारः ॥ १८ ॥ इतिसप्तचत्वारिंशस्सर्गः ॥ ४७ ॥

[पा०] १ ग. घ. च. ज. ज्येष्ठः. २ ख. ग. घ. ज. विजनंगतः. ३ ङ. छ. झ. ट. रहितानांनो. ४ घ. जीवितेननः. ङ. छ. झ. ञ. ट. जीवितंहितं. ५ ङ. छ. झ. ट. वावयं. ६ ज. क्षमंकथं. ७ ङ. च. छ. झ. ञ. ट. महात्मना. ८ क. ग. ङ—ट. द्रक्ष्याम. ९ ज. ञ. बाहूनुद्यम्य. १० ङ. छ. झ. ट. इवाग्र्यगाः. ११ ङ. च. छ. झ. ञ. ट. किंचित्ततःक्षणं. १२ ङ. छ. झ. ञ. ट. रथमार्गानुसारेण. १३ ख. किमिदानीं. १४ ग. घ. ङ. छ. झ. ट. तदा. १५ ज. चेतनाः. १६ घ. अवर्तन्तततोऽश्रूणि. ख. छ. झ. ञ. ट. आवर्वयन्तते. १७ क. ख. ज. पीडिताः. १८ ख. घ. ज. रहितानगरी. १९ ङ. ग्रहहीनं. २० घ. न्विगतानन्दं. २१ ख. ङ. झ. परंवा. ट. पुरंवा.

अष्टचत्वारिंशः सर्गः ॥ ४८ ॥

राममार्गोपरिज्ञानात्प्रत्यावृत्तैर्भर्त्रादिभीरामवृत्तान्तंनिवेदिताभिःपौरस्त्रीभिःरामगुणानुवर्णनकैकेय्युपालंभपूर्वकंबहुधापरिदेवनम् ॥ १ ॥

तेषामेवं विषण्णानां पीडितानामतीव च ॥ बाष्पविप्लुतनेत्राणां सशोकानां मुमूर्षया ॥ १ ॥
अनुगम्य निवृत्तानां रामं नगरवासिनाम् ॥ उद्गतानीव सत्वानि बभूवुरमनस्विनाम् ॥ २ ॥
स्वंस्वं निलयमागम्य पुत्रदारैः समावृताः ॥ अश्रूणि मुमुचुः सर्वे बाष्पेण पिहिताननाः ॥ ३ ॥
न चाहृष्यन्न चामोदन्वणिजो न प्रसारयन् ॥ न चाशोभन्त पुण्यानि नापचन्गृहमेधिनः ॥ ४ ॥
नष्टं दृष्ट्वा नाभ्यनन्दन्विपुलं वा धनागमम् ॥ पुत्रं प्रथमजं लब्ध्वा जननी नाभ्यनन्दत ॥ ५ ॥
गृहेगृहे रुदन्त्यश्च भर्तारं गृहमागतम् ॥ व्यगर्हयन्त दुःखार्ता वाग्भिस्तोत्रैरिव द्विपान् ॥ ६ ॥
किंनु तेषां गृहैः कार्यं किं दारैः किं धनेन वा ॥ पुत्रैर्वा किं सुखैर्वाऽपि ये न पश्यन्ति राघवम् ॥७॥
एकः सत्पुरुषो लोके लक्ष्मणः सह सीतया ॥ योऽनुगच्छति काकुत्स्थं रामं परिचरन्वने ॥ ८ ॥
आपगाः कृतपुण्यास्ताः पद्मिन्यश्च सरांसि च ॥ येषु स्नास्यति काकुत्स्थो विगाह्य सलिलं शुचि ॥९॥
शोभयिष्यन्ति काकुत्स्थमटव्यो रम्यकाननाः ॥ आपगाश्च महानूपाः सानुमन्तश्च पर्वताः ॥ १०॥
काननं वाऽपि शैलं वा यं रामोऽभिगमिष्यति ॥ प्रियातिथिमिव प्राप्तं नैनं शक्ष्यन्त्यनर्चितुम् ॥११
विचित्रकुसुमापीडा बहुमञ्जरिधारिणः ॥ राघवं दर्शयिष्यन्ति नगा भ्रमरशालिनः ॥ १२ ॥
अकाले चापि मुख्यानि पुष्पाणि च फलानि च ॥ दर्शयिष्यन्त्यनुक्रोशाद्गिरयो राममागतम् ॥१३॥

॥ १९ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने सप्तचत्वारिंशःसर्गः ॥ ४७ ॥

मुमूर्षया मर्तुमिच्छयोपलक्षितानां ॥ १ ॥ सत्वानि प्राणाः । "द्रव्यासुव्यवसायेपुसत्वं" इत्यमरः । उद्गतानीवबभूवुः मुमूर्छुरित्यर्थः । अमनस्विनां धैर्यहीनानां ॥ २—३ ॥ नचाहृष्यन् सुहृद्दर्शनेनापिहर्षनप्रापुः । नचामोदन् । अपूर्ववस्तुलाभेपिमोदंनप्रापुः । प्रसारयन् प्रासारयन् । पण्यानीतिशेषः । पुण्यानि पुण्यफलभूतपुत्रकलत्रादीनि । नापचन्निति । गृहमेधिनः गृहस्थाः । तेषांपचिक्रियासंबन्धस्त्वर्धशरीरभूतपत्नीद्वारा ॥ ४ ॥ नष्टं चिरकालनष्टं रत्नादिकं । धनागमं निध्यादिलाभं ॥ ५ ॥ रुदन्त्यःसर्वाःस्त्रियः भर्तारं स्वस्वभर्तारं । व्यगर्हयन्त । किमर्थंभवद्भिरागतमित्येवंनिन्दन्तिस्म । तोत्रैः अङ्कुशैः । गर्हांविशदयति—किंन्वित्यादिश्लोकेन । इतिव्यगर्हयन्तेत्यन्वयः ॥ ६—७ ॥ सीतया सहरामं सीतासहितंराममित्यर्थः ॥ ८—९ ॥ रम्यकाननाः तत्रतत्ररम्यवृक्षराजियुक्ताः । महानूपाः रम्यकच्छप्रदेशाः । "जलप्रायमनूपंस्यात्पुंसिकच्छः" इत्यमरः ॥ १० ॥ नैनंशक्ष्यन्त्यनर्चितुं अर्चितुंशक्ष्यन्त्येवेत्यर्थः ॥ ११ ॥ विचित्रकुसुमापीडाः विचित्रपुष्पशेखराः । नञ्जरीत्यत्रछान्दसोह्रस्वः । दर्शयिष्यन्ति आत्मानमितिशेषः । नगाः वृक्षाः ॥ १२ ॥ दर्शयिष्यन्ति वृक्षलतादिद्वारेतिभावः ।

स० आमोदन्निितिपदव्यत्यासेन रामपदव्यत्यासेनायंखेदइतिद्योतयति ॥ ४ ॥ स० गृहमागतंरामंविहायेतिशेषः । ति० व्यगर्हयन्त राघवमप्रतिनिवर्त्यंकिमर्थंयूयमागताइत्येवंवाग्भिःतोत्रैरङ्कुशैः ॥ ६ ॥ स० आपगाःनद्यः । कीदृश्यः पद्मिन्यःसर्पवत्यः ।

[पा०] १ ङ. छ. झ. ञ. ट. अभिगम्य. २ ख. मागत्य. ३ क. समागताः. ४ क. ख. ङ—ट. पण्यानि. ५ ग. ङ. छ. झ. ट. नाभ्यनन्दत. ६ ङ. छ. झ. ट. वांपि. ७ ङ. च. झ. ञ. ट. यास्यति. क. ख. घ. पास्यति. ८ क. लोभयिष्यन्ति. ९ अ, ङ, च, छ, झ, ट, रामोनु. १० क. ऽपिच. ञ वापि. ११ ख. तरवःपुष्पाणि. ज. पुष्पाणिमुख्यानि.

प्रस्रविष्यन्ति तोयानि विमलानि महीधराः ॥ विदर्शयन्तो विविधान्भूयश्चित्रांश्च निर्झरान् ॥
पादपाः पर्वताग्रेषु रमयिष्यन्ति राघवम् ॥ १४ ॥
यत्र रामो भयं नात्र नास्ति तत्र पराभवः ॥ स हि शूरो महाबाहुः पुत्रो दशरथस्य च ॥ १५ ॥
पुरा भवति नो दूरादनुगच्छाम राघवम् ॥ १६ ॥
पादच्छाया सुखा भर्तुस्तादृशस्य महात्मनः ॥ स हि नाथो जनस्यास्य स गतिः स परायणम् ॥१७॥
वयं परिचरिष्यामः सीतां यूयं तु राघवम् ॥ इति पौरस्त्रियो भर्तॄन्दुःखार्तास्तत्तदब्रुवन् ॥ १८ ॥
युष्माकं राघवोऽरण्ये योगक्षेमं विधास्यति ॥ सीता नारीजनस्यास्य योगक्षेमं करिष्यति ॥ १९ ॥
को न्वनेनाप्रतीतेन सोत्कण्ठितजनेन च ॥ संप्रीयेतामनोज्ञेन वासेन हृतचेतसा ॥ २० ॥
कैकेय्या यदि चेद्राज्यं स्यादधर्म्यमनाथवत् ॥ न हि नो जीवितेनार्थः कुतः पुत्रैः कुतो धनैः ॥२१॥
यया पुत्रश्च भर्ता च त्यक्तावैश्वर्यकारणात् ॥ कं सा परिहरेदन्यं कैकेयी कुलपांसनी ॥ २२ ॥
कैकेय्या न वयं राज्ये भृतका निवसेमहि ॥ जीवन्त्या जातु जीवन्त्यः पुत्रैरपि शपामहे ॥ २३ ॥
या पुत्रं पार्थिवेन्द्रस्य प्रवासयति निर्घृणा ॥ कस्तां प्राप्य सुखं जीवेदधर्म्यां दुष्टचारिणीम् ॥ २४ ॥
उपद्रुतमिदं सर्वमनालम्बमनायकम् ॥ कैकेय्या हि कृते सर्वं विनाशमुपयास्यति ॥ २५ ॥
न हि प्रव्रजिते रामे जीविष्यति महीपतिः ॥ मृते दशरथे व्यक्तं विलापस्तदनन्तरम् ॥ २६ ॥

अनुक्रोशात् आदरादित्यर्थः ॥ १३—१४ ॥ यत्रदेशे रामोवर्तते तत्रभयं नास्ति । तत्र पराभवोपिनास्ति ॥ १५ ॥ दूरात् पुराभवति भविष्यति । ततःपूर्वमेवानुगच्छामइत्यर्थः । "यावत्पुरानिपातयोर्लट्" इतिलट् ॥ १६ ॥ पादच्छायेति पादसेवालक्ष्यते । सुखा सुखसाधनभूता । गम्यतइतिगतिः प्राप्यः । परायणं परमयनं सर्वप्रकारेणाधारभूतइत्यर्थः ॥ १७—१९ ॥ अप्रतीतेन अप्रशस्तेन सतामयोग्येनेति यावत् । उत्कण्ठयाशोकस्मरणेनसहितः सोत्कण्ठः कृतःसोत्कण्ठःसोत्कण्ठितः तादृशो जनोयस्यतेन । अमनोज्ञेन उद्वेगकारिणा । हृतचेतसा चित्तनाशकेन । अनेनवासेन नगरेणेत्यर्थः । कोनुजनःसंप्रीयेत नकोपीत्यर्थः । तस्मादयंवासस्त्याज्यइतिभावः ॥ २० ॥ अधर्म्यं धर्मादपेतमित्यर्थः । अनाथवत् नाथशून्यं भाविप्रतिसन्धानेनेदमुक्तं । कुतइति पुत्रधनकृतपुरुषार्थस्यजीवितमूलत्वादित्यर्थः ॥ २१ ॥ पुत्रोरामः । परिहरेत् विपद्ध्यइतिशेषः । रक्षेदितियावत् ॥ २२ ॥ जीवन्त्याःकैकेय्याःराज्ये भृतकाः भृतिभुजः । "भृतकोभृतिभुक्" इत्यमरः । कैकेयीजीवनपर्यन्तंनतस्याराज्येनिवसेमहीतिजीवन्तीशब्दस्यभावः ॥ २३—॥ २४ ॥ कैकेय्याःकृते कैकेयीनिमित्तं ॥ २५ ॥ विनाशप्रकारमुपपादयन्ति—नहीति । विलापो विनाशः

"पद्मंस्यात्पन्नगे" इतिविश्वः ॥ ९ ॥ **ती०** योगक्षेमं अप्राप्तप्राप्तिर्योगः प्राप्तस्यरक्षणंक्षेमं ॥ १९ ॥ **ती०** कंपरिहरेत् त्यागात्परिहरेत् । सर्वानपिपरित्यजेदित्यर्थः । भर्तृपुत्रत्यागकारिण्यास्तस्याइतरत्यागःकियानितिभावः । **शि०** ययाहेतुभूतयामन्थरया ऐश्वर्यकारणात् अहमतीवराज्ञोप्रियेति स्वप्रभूतिहेतोः पुत्रोरामः भर्तादशरथश्च त्यक्तौ त्याजितौ सा कैकेयी कुलस्य पांसनी मलभूतामन्थरा अन्यं कं परिहरेत् त्यजेत् नत्याजयेदित्यर्थः । **स०** कंअपरिहरेत् सर्वंपरिहरेदेव । अमानोनाइत्यादिना निषेधार्थकोकारः ॥ २२ ॥ **स०** भृतकाः भ्रियन्तइतिभृतकाः भृत्याइतियावत् । तथासन्तःननिवसेम । हीति अस्यार्थस्यातिदृढत्वंसूचयति । तेन नपदव्यत्यासदोषः ॥२३॥ **शि०** उपद्रुतं नानोपद्रवसहितं । अतएव अनालंभं पश्चालंभोपलक्षितयागरहितं ॥२५॥ **ति०** विलो-

[पा०] १ ग. तत्रनास्ति. २ ग. दशरथस्यहि. ३ ङ. छ. झ. ट. सुखंभर्तुः. क. ख. च. ञ. सुखोदर्कांताद. ४ ङ. च. छ. झ. ञ. ट. यूयंच. ५ ख. घ. स्तास्तदाब्रुवन्. ६ ङ. छ. ट. त्यक्तौचैश्वर्य. ७ झ. घ—छ. झ. ञ. ट. भृतकाहि. ख. भृतकामा. ८ ङ. छ. झ. ञ. ट. मनालंभं. ९ ख. ङ. च. छ. झ. ञ. ट. कैकेय्यास्तु. १० क. ग. ज. कृत्स्नं. ११ ख. घ. प्रव्राजिते. १२ क. छ. ङ. छ—ट. विलोपः.

ते विषं पिबतालोड्य क्षीणपुण्याः सुदुर्गताः ॥ राघवं वाऽनुगच्छध्वमश्रुतिं वाऽपि गच्छत ॥२७॥
मिथ्या प्रव्राजितो रामः सभार्यः सहलक्ष्मणः ॥ भरते संन्निसृष्टाः स्मः सौनिके पशवो यथा ॥२८॥
पूर्णचन्द्राननः श्यामो गूढजत्रुररिन्दमः ॥ आजानुबाहुः पद्माक्षो रामो लक्ष्मणपूर्वजः ॥ २९ ॥
पूर्वाभिभाषी मधुरः सत्यवादी महाबलः ॥ सौम्यश्च सर्वलोकस्य चन्द्रवत्प्रियदर्शनः ॥ ३० ॥
नूनं पुरुषशार्दूलो मत्तमातङ्गविक्रमः ॥ शोभयिष्यत्यरण्यानि विचरन्स महारथः ॥ ३१ ॥
तास्तथा विलपन्त्यस्तु नगरे नागरस्त्रियः ॥ चुक्रुशुर्दुःखसंतप्ता मृत्योरिव भयागमे ॥ ३२ ॥
इत्येवं विलपन्तीनां स्त्रीणां वेश्मसु राघवम् ॥ जगामास्तं दिनकरो रजनी चाभ्यवर्तत ॥ ३३ ॥
नष्टज्वलनसंपाता प्रशान्ताध्यायसत्कथा ॥ तिमिरेणाभिलिप्तेव सा तदा नगरी बभौ ॥ ३४ ॥
उपशान्तवणिक्पण्या नष्टहर्षा निराश्रया ॥ अयोध्या नगरी चासीन्नष्टतारमिवांबरम् ॥ ३५ ॥

तथा स्त्रियो रामनिमित्तमातुरा यथा सुते भ्रातरि वा विवासिते ॥
विलप्य दीना रुरुदुर्विचेतसः सुतैर्हि तासामधिको हि सोभवत् ॥ ३६ ॥
प्रशान्तगीतोत्सवनृत्तवादना व्यपास्तहर्षा पिहितापणोदया ॥

॥ २६ ॥ ते यूयं आलोड्य अमुमर्थमालोच्य । सुदुर्गताः सुदरिद्राः रामरूपधनहीनाइत्यर्थः । अश्रुतिं यत्रगतेनामापिनश्रूयते तं देशमित्यर्थः ॥२७॥ पितृवचननिर्देशेनकैकेयीप्रियचिकीर्षयाचक्रियमाणेप्रव्रजनेकोदोष इत्यत्राह—मिथ्याप्रव्राजितइति । मिथ्याप्रव्राजितः कपटेनप्रव्राजितः । सन्निसृष्टाः निक्षिप्ताःराज्ञेतिशेषः । सौनिके पशुमारके ॥ २८ ॥ विश्लेषासहिष्णुतयारामस्तत्कार्यंकृतवानित्यभिधायतद्गुणकीर्तनेनाप्यायनंकुर्वन्ति—पूर्णेत्यादिना । गूढजत्रुः गूढे निमग्नेजत्रुणीअंससंधी यस्यसतथोक्तः । “ स्कन्धोभुजशिरोंसोस्त्रीसंधीतस्यैवजत्रुणी ” इत्यमरः ॥ २९ ॥ पूर्वाभिभाषी स्वसौहार्दभव्यत्वप्रदर्शनायसर्वत्रपूर्वभाषणशीलः ॥ ३०—३१ ॥ मृत्योर्भयागमे मरणसमये ॥ ३२ ॥ विलपन्तीनां विलपन्तीपु सतीष्वित्यर्थः । राघवमुदिश्येतिशेपः ॥ ३३ ॥ नष्टज्वलनसंपाता नष्टाग्निप्रणयना । प्रशान्ताध्यायसत्कथा अध्यायोवेदः सत्कथापुराणादिः निवृत्तवेदाध्ययनपुराणपाठेत्यर्थः ॥ ३४ ॥ उपशान्तवणिक्पण्या उपशान्तानिवणिजां पण्यानियस्यांसा पण्यकल्पनाशून्येत्यर्थः ॥ ३५ ॥ सुतैः सुतेभ्यः । पञ्चम्यर्थेतृतीया । भ्रातृभ्यश्चेत्यपि द्रष्टव्यं ॥ ३६ ॥ पिहितापणोदया पिहितः आपणोदयः आपणस्थवस्तुसमृद्धिर्यस्याःसातथोक्ता । आपणो-

---

पःनाशः ॥ २६ ॥ **ति०** तेयूयंपुरुषाः । सस्त्रीकाइतिशेषः । आलोड्य पेषयित्वा । अश्रुतिंवापि यस्मिन्देशेकैकेय्या नामश्रवणमपिनभवति तादृशंदूरदेशंवा गच्छतेत्यर्थः ॥ २७ ॥ **ति०** सौनिके सूना पशुवधस्थानं तत्रभवे हिंसके तत्समीपे । **शि०** रामः मिथ्या वृथा प्रव्राजितः । ननु राजनियोगे भवदुक्त्याकिमित्यतआहुः । भरते कैकेय्यतिप्रियत्वेनभरतसदृशेमन्थरायां तदाज्ञायामित्यर्थः । वयंसंनिवद्धास्स्मः । भरतशब्दः आचारक्विबन्तप्रकृतिककर्तृक्विबन्तः । सामान्ये नपुंसकम् ॥ २८ ॥ **ती०** विलपन्तीनां प्रलपन्तीपुसतीषु दिनकरोस्तंजगाम । सूर्यास्तमयानन्तरं रजनीचाभ्यवर्ततेति । अनेन पौरस्त्रीदुःखासहिष्णुतयाऽस्तमयानन्तरमस्तमयात्पूर्वंच भानोःपूर्वगत्यपेक्षयाऽतिवेगेनगमनंद्योत्यते ॥ ३३ ॥ **ति०** नष्टज्वलनसंतापा नष्टः होमाद्यर्थोपि ज्वलनसंतापो ज्वलनसंगमोयस्यां ॥ ३४ ॥ **स०** सुतैः बहुवचनमाद्यर्थं ॥ ३६ ॥ **ति०** संक्षपितोदकः क्षीणोदकः । संक्षुभितोदकइतिपाठे क्षैण्यात्संक्षुभितोदकइत्यर्थः । **स०** संक्षुभितोदकः प्रलये ॥ ३७ ॥ इत्यष्टचत्वारिंशस्सर्गः ॥ ४८ ॥

[पा०] १ क. पुण्याःस्थदुःखिताः. घ. पुण्याश्चदुःखिताः. च. ज. झ. ञ. पुण्याःसुदुःखिताः. ख. पुण्याश्चदुर्गताः. ङ. छ. ट. पुण्याःस्मदुःखिताः. २ च. राघवंचानु. ३ ङ. ज. चापि. ४ ख. सहभार्यःसलक्ष्मणः. ग. ज. ससीतः. ५ क. ख. ग. ज. ञ. संनिविष्टाः. ङ. छ. झ. ट. संनिवद्धाः. च. संनिविष्टास्ते. घ. संनिकृष्टाः. ६ क. पूर्वभाषीच. ७ ख. मधुरं. ८ घ. सौम्यःसर्वस्य लोकस्य. ९ क. ख. महाबलः. १० क. ख. च. ज. नागराः. ११ क—घ. ज. भृशसंतप्ताः. १२ क. ख. समागमे. १३ ज—ट. संतापा. १४ ग. घ. च. ज. शान्ताध्ययनसत्कथा. ख. प्रशान्तायतसत्कथा. १५ क. ख. ग. च. ज—ट. तिमिरेणानु. घ. तिमिरौघविलिप्तेव. १६ च. ज. झ. ञ. तदासा. १७ ङ. छ. झ. तदा. १८ ख. सुताद्धि. १९ ङ. छ. झ. ट. मधिकोपि २० ख. घ. वादिता. क. च. वादिनी. ग. वाद्यका. ज. वाद्या. २१ ङ. च. झ. ञ. ट. विभ्रष्ट. ख. व्यपेत.

तदा ह्ययोध्या नगरी बभूव सा महार्णवः संक्षपितोदको यथा ॥ ३७ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे अष्टचत्वारिंशः सर्गः ॥४८॥

एकोनपञ्चाशः सर्गः ॥ ४९ ॥

रात्रिशेषेणबहुदूरंगतवतारामेणप्रभातेसंध्योपासनम् ॥ १ ॥ तथाप्रतिपथंस्वविषयकतत्तद्ग्रामजनवचनश्रवणेनगोमत्यादिनदीतरणपूर्वकं सुमन्त्रंप्रत्यभिमतार्थमुदीरयतासतापुरतोगमनं ॥ २ ॥

रामोपि रात्रिशेषेण तेनैव महदन्तरम् ॥ जगाम पुरुषव्याघ्रः पितुराज्ञामनुस्मरन् ॥ १ ॥
तथैव गच्छतस्तस्य व्यपायाद्रजनी शिवा ॥ उपास्य स शिवां सन्ध्यां विषयान्तं व्यगाहत ॥ २ ॥
ग्रामान्विकृष्टसीमान्तान्पुष्पितानि वनानि च ॥ पश्यन्नतिययौ शीघ्रं शनैरिव हयोत्तमैः ॥
शृण्वन्वाचो मनुष्याणां ग्रामसंवासवासिनाम् ॥ ३ ॥
[विगर्हितां हि कैकेयीं क्रूरां क्रूरेण कर्मणा ॥] राजानं धिग्दशरथं कामस्य वशमास्थितम् ॥ ४ ॥
हा नृशंसाऽद्य कैकेयी पापा पापानुबन्धिनी ॥ तीक्ष्णा संभिन्नमर्यादा तीक्ष्णकर्मणि वर्तते ॥ ५ ॥
या पुत्रमीदृशं राज्ञः प्रवासयति धार्मिकम् ॥ वनवासे महाप्राज्ञं सानुक्रोशं जितेन्द्रियम् ॥ ६ ॥
कथं नाम महाभागा सीता जनकनन्दिनी ॥ सदा सुखेष्वभिरता दुःखान्यनुभविष्यति ॥ ७ ॥
अहो दशरथो राजा निस्स्नेहः स्वसुतं प्रियम् ॥ प्रजानामनघं रामं परित्यक्तुमिहेच्छति ॥ ८ ॥
एता वाचो मनुष्याणां ग्रामसंवासवासिनाम् ॥ शृण्वन्नतिययौ वीरः कोसलान्कोसलेश्वरः ॥ ९ ॥
ततो वेदश्रुतिं नाम शिववारिवहां नदीम् ॥ उत्तीर्याभिमुखः प्रायादगस्त्याध्युषितां दिशम् ॥ १० ॥
गत्वा तु सुचिरं कालं ततः शिवजलां नदीम् ॥ गोमतीं गोयुतानूपामतरत्सागरंगमाम् ॥ ११ ॥

दयस्यपिहितत्वमापणाविधानात् । संक्षपितोदकः संशोषितोदकइत्यर्थः ॥ ३७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्यानेऽष्टचत्वारिंशःसर्गः ॥ ४८ ॥

अथरामवृत्तान्तंप्रस्तौति—रामोपीति । तेनैवरात्रिशेषेण तेन रात्रिशेषेणपौरान्विहायगतस्तेनैव । महदन्तरं महावकाशं महद्दूरमितियावत् ॥ १ ॥ गच्छतः गच्छतिसति । व्यपायात् निरगात् । विषयान्तं उत्तरकोसलदक्षिणावधिं ॥ २ ॥ विकृष्टसीमान्तान् विशेषेणकृष्टसीमान्तान् वीजावापार्थसज्जीकृतक्षेत्रानित्यर्थः । शनैरिवययौ उत्तमाश्वानांगतिचातुर्यात्पुष्पितवनरामणीयकदर्शनपारवश्याच्चातिशीघ्रमपिगमनंशनैरिवजानन् ययावित्यर्थः । ग्रामसंवासवासिनां ग्रामाःमहाग्रामाः संवासाअल्पग्रामाः तेषुवासिनांश्रृण्वन्नतिययाविति पूर्वेणसंबन्धः ॥ ३ ॥ वाचएवप्रपञ्चयति—राजानमित्यादि ॥ ४ ॥ पापा पापस्वभावा । पापानुबन्धिनी नैरन्तर्येणपापकारिणीत्यर्थः । तीक्ष्णा क्रूरा ॥ ५ ॥ वनवासे वनवासनिमित्तं प्रवासयतीत्यन्वयः ॥ ६—८ ॥ अतिययौ अतिक्रम्यययौ ॥ ९ ॥ अगस्त्याध्युषितांदिशं दक्षिणां दिशं ॥ १० ॥ गोयुतानूपां गोयुक्तकच्छप्रदेशां ।

कतकः शरैरिवेतिपाठः । शरसदृशवेगवद्भिरश्वोत्तमैरित्यर्थः ॥ ३ ॥ ति० पापा पापकर्मारब्धशरीरा ॥ ५ ॥ शि० प्रजानामनघं अघनिवर्तकंरामं ॥ ८ ॥

[पा०] १ क. ख. ग. च. ज. ञ. तथा. २ क—घ. च. ज. संक्षुभितो. ३ घ. शुभा. ४ क. ङ—ट. उपास्यतु. ५ छ. झ. ट. विषयानत्यगाहत. ६ घ. पश्यन्निव. ज. पश्यन्नपि. ख. पश्यन्नभि. ७ ङ. छ. ज. ट. शरैरिव. ८ इदमर्धं क. च. ञ. पुस्तकेपुदृश्यते. ९ क—घ. ज. मागतं. १० घ. ज. तीक्ष्णे. क. क्षुद्रकर्मणि. ११ क. प्रस्थापयति. १२ क. ग. ज. क्रोशमतन्द्रितं. १३ ङ. च. छ. झ. ञ. ट. प्रति. १४ क. घ. शीततोय. १५ क. सगत्वा. १६ ङ. छ. झ. ञ. ट. शीतवहां. क. घ. ज. शीतजलां. १७ घ. युतांरामोह्यतरत्.

गोमतीं चाप्यतिक्रम्य राघवः शीघ्रगैर्हयैः ॥ मयूरहंसाभिरुतां ततार स्यन्दिकां नदीम् ॥ १२ ॥
स महीं मनुना राज्ञा दत्तामिक्ष्वाकवे पुरा ॥ स्फीतां राष्ट्रावृतां रामो वैदेहीमन्वदर्शयत् ॥ १३ ॥
सूत इत्येव चाभाष्य सारथिं तमभीक्ष्णशः ॥ हंसमत्तस्वरः श्रीमानुवाच पुरुषर्षभः ॥ १४ ॥
कदाऽहं पुनरागम्य सरय्वाः पुष्पिते वने ॥ मृगयां पर्यटिष्यामि मात्रा पित्रा च संगतः ॥ १५ ॥
राजर्षीणां हि लोकेऽस्मिन्नत्यर्थं मृगया वने ॥ काले वृतां तां मनुजैर्धन्विनामभिकाङ्क्षिताम् ॥ १६ ॥
नात्यर्थमभिकाङ्क्षामि मृगयां सरयूवने ॥ रतिर्ह्येषाऽतुला लोके राजर्षिगणसंमता ॥ १७ ॥
स तमध्वानमैक्ष्वाकः सूतं मधुरया गिरा ॥ तंतमर्थमभिप्रेत्य ययौ वाक्यमुदीरयन् ॥ १८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे एकोनपञ्चाशः सर्गः ॥ ४९ ॥

पञ्चाशः सर्गः ॥ ५० ॥

रामेणायोध्याभिमुखीभूयतत्समापृच्छनम् ॥ १ ॥ तथामध्येमार्गंस्वावलोककजानपदजनानांसमाश्वासनेनप्रतिनिवर्तनपूर्वकंकोसलानतिक्रान्तवतागङ्गादर्शनम् ॥ २ ॥ वाल्मीकिनागङ्गावर्णनम् ॥ ३ ॥ रामेणलक्ष्मणसुमन्त्रानुमत्या गङ्गासमीपगतेङ्गुदीतरुमूलमेत्यरथादवतरणम् ॥ ४ ॥ तथातत्रस्वागमनश्रवणेनस्वावलोकनार्थमागच्छन्तंगुहनामानंनिषादराजंप्रतिलक्ष्मणेनसहाभिगमनम् ॥ ५ ॥ पश्चिमसन्ध्योपासनपूर्वकंजलमात्राभ्यवहारेणरात्रौभुविशयानेरामेगुहसुमन्त्रलक्ष्मणैःपरस्परसंभाषणेनजागरणम् ॥ ६ ॥

विशालान्कोसलान्रम्यान्यात्वा लक्ष्मणपूर्वजः ॥ अयोध्याभिमुखो धीमान्प्राञ्जलिर्वाक्यमब्रवीत् ॥ १ ॥

सागरंगमामिति । " गमेःसुप्युपसंख्यानं " इतिखचिमुम् ॥ ११—१२ ॥ महीं कोसलदेशं । राष्ट्रावृतां अवान्तरजनपदावृतां । यद्यपि " इक्ष्वाकूणामियंभूमिःसशैलवनकानना " इति भूमिमात्रमिक्ष्वाकोरेव तथापितस्यजन्मभूरियं इतरजनपदस्थाः करदाइतिबोध्यम् ॥ १३ ॥ सूतइतीत्यत्रगुणाभावोवाक्यसन्धेरनित्यत्वात् । हंसमत्तस्वरः हंसस्येवमत्तःकलःस्वरोयस्यसतथा ॥ १४ ॥ भाविपितृवियोगसूचकमौत्कण्ठ्यमाह—कदेति । पर्यटिष्यामि चरिष्यामि ॥ १५ ॥ ननु " स्त्रीद्यूतमृगयामद्यवाक्पारुष्योग्रदण्डताः । अर्थस्यदूषणंचेतिराज्ञांव्यसनसप्तकं " इतिनिन्दितामृगयाकथंकाङ्क्ष्यतइत्याशङ्क्य हिंस्रमृगनिवृत्त्यर्थाकादाचित्का नगर्हिता किंतु निरन्तरैव । यथाराजसूये " तस्याःसभायामध्येअधिदेवनमुद्धत्यावोक्ष्याक्षान्तंनिर्वपेत् " इतिविहितंद्यूतमित्याह— राजर्षीणामिति । हि यस्मात्कारणात् । राजर्षीणांवनेमृगयारत्यर्थमस्तीतिशेषः । काले श्राद्धादिकाले । मनुजैः सदाचारपरैः । वृतां स्वीकृतां । धन्विनामभिकाङ्क्षितां चललक्ष्यवेधनार्थंधन्विभिरभिकाङ्क्षितां । तांमृगयां नात्यर्थमभिकाङ्क्षामि किंचित्काङ्क्षामीत्यर्थः । रतिः क्रीडा ॥ १६—१७ ॥ ऐक्ष्वाकः । दाण्डिनायनेत्यादिनानिपातनात्साधुः । सरामः सूतंप्रति तंतमर्थं राजगुणादिरूपं । अभिप्रेत्य हृदयेकृत्वा । मधुरयागिरा वाक्यमुदीरयन्सन् । अध्वानंययौ । अमुमर्थमुत्तरत्रदशरथंप्रतिसूतोव्यक्तीकरिष्यति ॥ १८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने एकोनपञ्चाशः सर्गः ॥ ४९ ॥

कोसलान्यात्वा अन्तपर्यन्तदक्षिणकोसलान्यात्वे-

ति० राजर्षीणांहीतिश्लोकःपुनरुक्तार्थकइव कतकासंमतश्चेतिबोध्यं ॥ १६ ॥ इत्येकोनपञ्चाशस्सर्गः ॥ ४९ ॥

[पा०] १ क. ख. च. ञ. स्तामतरत्स्यन्दिकां. २ छ. झ. राष्ट्रवृतां. ३ क. ख. च. ञ. माभाष्य. ४ घ. सारथिं. ५ घ. मत्तहंस. ६ ङ. च. छ. झ. ञ. ट. पुरुषोत्तमः. ७ घ. छ—ट. कृतां. ८ अयंश्लोकः ङ. छ. झ. ट. पुस्तकेषुराजर्षीणांहीति श्लोकात्पूर्वंदृश्यते. ९ ङ. न्गला. १० ङ. च. छ. झ. ट. मुन्मुखो.

आपृच्छे त्वां पुरि श्रेष्ठे काकुत्स्थपरिपालिते ॥ दैवतानि च यानि त्वां पालयन्त्यावसन्ति च ॥२॥
निवृत्तवनवासस्त्वामनृणो जगतीपतेः ॥ पुनर्द्रक्ष्यामि मात्रा च पित्रा च सह संगतः ॥ ३ ॥
ततो [१]रुधिरताम्राक्षो भुजमुद्यम्य दक्षिणम् ॥ अश्रुपूर्णमुखो दीनोऽब्रवीज्जानपदं जनम् ॥ ४ ॥
अनुक्रोशो दया चैव यथार्हं मयि वः कृतः ॥ [२]चिरं दुःखस्य पापीयो गम्यतामर्थसिद्धये ॥ ५ ॥
तेऽभिवाद्य महात्मानं कृत्वा चापि प्रदक्षिणम् ॥ विलपन्तो नरा घोरं [३]व्यतिष्ठन्त क्वचित्क्वचित् ॥६॥
तथा विलपतां तेषामतृप्तानां च राघवः ॥ अचक्षुर्विषयं [४]प्रायाद्यथाऽर्कः क्षणदामुखे ॥ ७ ॥
ततो धान्यधनोपेतान्दानशीलज[५]नाञ्शिवान् ॥ अकुतश्चिद्भयान्रम्यांश्चैत्ययूपसमावृतान् ॥ ८ ॥
उद्यानाम्रवणोपेतान्संपन्नसलिलाशयान् ॥ तुष्टपुष्टजनाकीर्णान्गो[६]कुलाकुलसेवितान् ॥ ९ ॥
[७]लक्षणीयान्नरेन्द्राणां ब्रह्म[८]घोषाभिनादितान् ॥ रथेन पुरुषव्याघ्रः कोसलानत्यवर्तत ॥ १० ॥
मध्येन मुदितं स्फीतं रम्योद्यानसमाकुलम् ॥ राज्यं [९]भोग्यं नरेन्द्राणां ययौ धृतिमतांवरः ॥ ११ ॥

त्यर्थः ॥ १ ॥ निर्गमनावसरे शिष्टाचारप्राप्तस्यपुरदेवतानमस्कारस्य कार्यसंकटेनाकृतत्वादिदानीमयोध्याराज्यसीमान्तेस्थित्वा आरब्धस्य चतुर्दशवर्षावधिकव्रतस्य निर्विघ्नपरिसमाप्त्यर्थं पुरदेवतानमस्कारपूर्वकमभ्यनुज्ञांप्रार्थयते—आपृच्छइत्यादिना । यानीति तान्यप्यापृच्छइत्यर्थसिद्धं ॥ २—३ ॥ भुजोद्यमनं रथवेगेनदूरगमनात् । अश्रुपूर्णमुखत्वं तदश्रुदर्शनात् । जनं दर्शनार्थमागतं ॥ ४ ॥ अनुक्रोशः आदरः । दया अनुकम्पा । यथार्हं स्वामित्वानुगुणं । वः युष्माभिः । कृतः कृताचेत्यपिद्रष्टव्यं । दुःखस्य अनुभूयमानस्यदुःखस्य । चिरं चिरकालविशिष्टत्वं । पापीयः अशोभनं । मद्दर्शनेभवतांदुःखमभिवर्धते अतोगम्यतां । अर्थसिद्धये गृहकृत्यादिकरणाय ॥५॥ व्यतिष्ठन्त रामदर्शनाशयाशीघ्रंनजग्मुरित्यर्थः ॥ ६ ॥ विलपतामित्यनादरेषष्ठी । अचक्षुर्विषयं चक्षुर्विषयत्वाभावं । क्षणदामुखे निशामुखे ॥ ७ ॥ दुस्त्यजामपिराज्यश्रियंतृणीकृत्यगतवान्रामइतिद्योतयितुमृषिःकोसलानभिवर्णयति—ततइत्यादिना । धनधान्ययोःप्रयोजनमाह—दानेति । चैत्ययूपसमावृतान् चैत्यानि देवतायतनानि । यूपाःसर्वतोमुखादियागप्रख्यापकाः यूपाकारत्वेनस्थापिताःस्तम्भाः ॥ ८ ॥ उद्यानानि पुष्पवाटिकाः । संपन्नाः संपूर्णाः । गोकुलैराकुलंनिविडंयथाभवतितथासेवितान् ॥ ९ ॥ नरेन्द्राणांलक्षणीयान् एकैकशोनगरसदृशत्वेनलक्षयितुंयोग्यान् कोसलान् कोसलदेशस्थग्रामान् ॥ १० ॥ मध्येन मार्गेण भोग्यस्यापिराज्यस्यत्यागमृषिर्विस्मयते—धृतिमतांवर

शि० आपृच्छे कथयामि ॥ २ ॥ तद्वचनमेवाह—**निवृत्तेति** । त्वांपुनर्द्रक्ष्यामि । एतेन भवत्यापिपित्रादिसमीपेगन्तव्यमितिसूचितं । तेन केनचिद्रूपेण सापि सहैवागतेतिव्यक्तं । तेन तस्याःकामचारगमनंव्यञ्जितं ॥ ३ ॥ **ती०** अश्रुपूर्णमुखोदीनइत्यस्यायंभावः "व्यसनेषुमनुष्याणांभृशंभवतिदुःखितः" इत्युक्तेः दुःखितजनान्दृष्ट्वातेषांदुःखनिवारणाय स्वयमप्यश्रुपूर्णमुखोऽभूदिति । **शि०** ततः अयोध्याऽऽज्ञापनानन्तरं । रुचिरताम्रे स्वाभाविकस्वच्छारुणे अक्षिणीनेत्रेयस्यसः । अश्रुपूर्णं आनन्दजलव्याप्तं मुखंयस्यसः । अदीनः नित्यंदीनत्वाभावविशिष्टः । रामः जानपदंजनमब्रवीत् ॥४॥ **ती०** यद्वा अनुक्रोशोजुगुप्सा । जुगुप्सनीयान्कैकेयीप्रभृतीन्प्रति जुगुप्सा । मयिदयाच यथार्हंवोयुष्माभिःकृतः । अनुक्रोशआदरोऽनुतापोवा । कृतः कृताच । दुःखस्यचिरमनुभवइतिशेषः । पापीयः अशोभनं । अतोयुष्माभिर्गम्यतां । वयमप्यर्थसिद्धये पित्रनुज्ञातार्थसिद्धये अवतारप्रयोजनार्थसिद्धयेइहविहृत्स्थं । गच्छामइतिशेषः । व्याख्यानान्तरंत्वप्रयोजकत्वान्नोक्तं । **शि०** अतः अर्थसिद्धये स्वस्वकार्यनिर्वर्तनायगम्यतां । ननु सहगमनेकाक्षतिरित्यतआह । दुःखस्य चिरं विलंवः पापीयः नयुक्तमित्यर्थः । एतेन सहगमनेभवतांमद्गमनादिजनितःखेदातिशयो भविष्यतीतिसूचितं । **स०** तत् मदनुग्रहकरणं चिरं दुःखस्यहेतुरिति पापीयः । लोके बहुदिनसहवासिजनविरहेदुःखस्यदर्शनात् । अतोभवद्भिरर्थसिद्धये स्वप्रयोजनार्थंगम्यतां ॥ ५ ॥ **शि०** क्वचित्क्वचिद्व्यतिष्ठन्त स्थितियोग्यस्थलाविचारेणैवातिष्ठन्नित्यर्थः ॥ ६ ॥ **ती०** अतृप्तानां दर्शनतृप्तिरहितानां ॥ ७ ॥ **ति०** चैत्यैः देवताधिष्ठानवृक्षैर्यूपैश्चसमावृतान् ॥ ८ ॥ **स०** गोकुलैराकुल-

[पा०] १ क—छ. झ. ञ. ट. रुचिर. २ चिरंदुःखस्येत्यर्धात्परं निवर्तध्वंमहाभागागम्यतामर्थनिश्चयेइत्यर्धं च. पाठेअधिकंदृश्यते. ३ ङ. च. छ. झ. ञ. ट. व्यतिष्ठंश्च. ४ ख. प्रापद्यथा. ५ क. द्विजान्. ख. नरान्. ६ घ. सदागोकुलसेवितान्. च. गोकुलाकुलमण्डितान्. ज. गोपगोकुलसेवितान्. ७ क. ङ. छ. झ. ट. रक्षणीयान्. ८ घ. ज. घोषानु. ९ क. ख. ङ—ट. भोज्यं.

तत्र त्रिपथगां दिव्यां शिवतोयामशैवलाम् ॥ ददर्श राघवो गङ्गां पुण्यामृषिनिषेविताम् ॥ १२ ॥
आश्रमैरविदूरस्थैः श्रीमद्भिः समलङ्कृताम् ॥ कालेऽप्सरोभिर्हृष्टाभिः सेविताम्भोह्रदां शिवाम् ॥ १३ ॥
देवदानवगन्धर्वैः किंनरैरुपशोभिताम् ॥ नानागन्धर्वपत्नीभिः सेवितां सततं शिवाम् ॥ १४ ॥
देवाक्रीडाशताकीर्णां देवोद्यानशतायुताम् ॥ देवार्थमाकाशगमां विख्यातां देवपद्मिनीम् ॥ १५ ॥
जलाघाताट्टहासोग्रां फेननिर्मलहासिनीम् ॥ क्वचिद्वेणीकृतजलां क्वचिदावर्तशोभिताम् ॥ १६ ॥
क्वचित्स्तिमितगम्भीरां क्वचिद्वेगजलाकुलाम् ॥ क्वचिद्गम्भीरनिर्घोषां क्वचिद्भैरवनिस्वनाम् ॥ १७ ॥
देवसंघाप्लुतजलां निर्मलोत्पलशोभिताम् ॥ क्वचिदाभोगपुलिनां क्वचिन्निर्मलवालुकाम् ॥ १८ ॥
हंससारससंघुष्टां चक्रवाकोपकूजिताम् ॥ सदा मत्तैश्च विहगैरभिसंनादितान्तराम् ॥
क्वचित्तीररुहैर्वृक्षैर्मालाभिरुपशोभिताम् ॥ १९ ॥
क्वचित्फुल्लोत्पलच्छन्नां क्वचित्पद्मवनाकुलाम् ॥ क्वचित्कुमुदषण्डैश्च कुड्मलैरुपशोभिताम् ॥ २० ॥
नानापुष्परजोध्वस्तां समदामिव च क्वचित् ॥ व्यपेतमलसंघातां मणिनिर्मलदर्शनाम् ॥ २१ ॥
दिशागजैर्वनगजैर्मत्तैश्च वरवारणैः ॥ देवोपवाह्यैश्च मुहुः सन्नादितवनान्तराम् ॥ २२ ॥

इति ॥ ११ ॥ तत्र कोसलाद्दक्षिणदेशे । त्रिभिःपथिभिर्गच्छतीतित्रिपथगा तां स्वर्गमर्त्यपाताललोकगामिनीमित्यर्थः । शिवतोयां अच्छतोयां ॥ १२ ॥ श्रीमद्भिः धर्मसमृद्धिमद्भिः । काले क्रीडाकाले उचितकाले वा । सेवितानिप्राप्तानिअम्भांसियेषांताद्दशाह्रदाःयस्यांसातां । शिवां क्रीडार्थसेवनेपिपावनां ॥ १३ ॥ नानागन्धर्वपत्नीभिः गन्धर्वाणांनानात्वं देवगन्धर्वमनुष्यगन्धर्वभेदात् । सेवितां । शिवामिति पूर्ववत् । सेवितृभेदेप्येकरूपपावनत्वकथनान्नानर्थक्यं ॥ १४ ॥ देवाक्रीडाः देवार्हक्रीडापर्वताः । देवोद्यानानि देवार्होद्यानानि । देवार्थमाकाशगमां देवपूजनार्थमाकाशंप्राप्तां । देवपद्मिनीं देवार्हाम्भोजयुक्तामित्यर्थः ॥ १५ ॥ गङ्गांस्त्रीत्वेनरूपयति—जलाघातेत्यादिना । जलाघातः शिलासुजलपतनं तेनतच्छब्दोलक्ष्यते । सएवाट्टहासः सघोषहासः । तेनोग्रां । फेनमेवनिर्मलहासःतद्वतीं । वेणीकृतजलां निम्नोन्नतशिलापतनेनवेण्याकारतयाकृतजलां ॥ १६ ॥ क्वचिदगाधस्थले स्तिमितगम्भीरां निश्चलगम्भीरं गम्भीरनिर्घोषोमृदङ्गादेरिव । भैरवोनिस्वनोऽशन्यादेरिव ॥ १७ ॥ आभोगपुलिनां परिपूर्णतायुक्तपुलिनां विशालसैकतामित्यर्थः । "आभोगःपरिपूर्णता" इत्यमरः । निर्मलवालुकां निर्मलसिकतां ॥ १८ ॥ सारसोहंसविशेषः । विहगैः हंसादिभिन्नैःपक्षिविशेषैः ॥ १९ ॥ क्वचित् फुल्लोत्पलच्छन्नामितिपूर्वमुत्पलशोभोक्ता अत्र तच्छन्नत्वमितिविशेषः । कुड्मलैः कह्लारादिकुड्मलैः ॥ २० ॥ नानापुष्परजोभिः ध्वस्तां वर्णान्तरंप्राप्तामित्यर्थः । एवंरक्तवर्णत्वात् समदामिवस्थितां । व्यपेतमलसंघातां अतएवमणिनिर्मलदर्शनां वैडूर्यमणिवन्निर्मलदर्शनां ॥ २१ ॥ वरवारणैः राजगजैः । देवो-

तयासेवितान् । शि० गवांकुलैः गवादिभिः । गवामकुलैः गवयमहिष्यादिभिः । सेवितान् ॥ ९ ॥ शि० शिवां शिवसंबन्धिनीं ॥ १३ ॥ नागपत्नीभिर्गन्धर्वपत्नीभिश्चसेवितां । सततंशिवामित्यनेन महानिशायामपितस्यांस्नानाद्यधिकारस्सूचितः । तदुक्तंभारते "भुक्त्वावायदिवाऽभुक्त्वारात्रौवायदिवादिवा । नकालनियमःकश्चिद्गङ्गांप्राप्यसरिद्वराम्" इति । शि० शिवां शिवप्रापिकां ॥ १४ ॥ शि० नदीं सर्वनदीमनोरथपूरिकां सर्वनदीस्वामिनीमित्यर्थः । देवार्थं क्रीडार्थं आकाशगमां शिलासंघट्टोत्थितजलकणिकाद्वारा आकाशगमनकर्त्रीं ॥ १५ ॥ शि० अनिन्दितां स्वजननिन्दानिवर्तिकां ॥ १९ ॥ शि० क्वचित् प्रयागादौ समदां

[पा०] १ ग. घ. ज. ततः. २ घ—छ. झ. ञ. ट. शीत. ३ ग. ङ. च. छ. झ. ञ. ट. रम्यां. ४ घ. महद्भिः. ५ क. ख. घ—ट. नागगन्धर्व. ६ घ. शुभां. ७ क. ख. घ—छ. झ. ञ. ट. युतांनदीं. ८ घ. झ. गतां. ९ क. ख. जलघात. १० ग. घ. च. छ. झ. ञ. ट. समाकुलां. ११ क. ग—ट. संकुलां. १२ ङ. च. छ. झ. ञ. ट. शोभितां. क. सेवितां. १३ क. ग. घ. मदैश्च. १४ ङ. च. झ. ट. रभिपन्नामनिन्दितां. १५ ग. ङ. च. झ. ञ. ट. मालाभिरिव. ज. लताभिरुप. १६ ख. कुड्मलैश्चोप. १७ ङ. च. झ. ट. देवराजोपवाह्यैश्च.

प्रमदामिव यत्नेन भूषितां भूषणोत्तमैः ॥ [1]फलैः पुष्पैः किसलयैर्वृतां गुल्मैर्द्विजैस्तथा ॥ २३ ॥
[2]शिंशुमारैश्च नक्रैश्च भुजङ्गैश्च निषेवि[3]ताम् ॥ विष्णुपादच्युतां दिव्यामपापां पापनाशिनीम् ॥ २४ ॥
[4]तां शङ्करजटाजूटाद्भ्रष्टां सागरतेजसा ॥ समुद्रमहिषीं गङ्गां सारसक्रौञ्चनादिताम् ॥
आससाद महाबाहुः शृङ्गबेरपुरं प्रति ॥ २५ ॥
तामूर्मिकलिलावर्तामन्ववेक्ष्य महारथः ॥ सुमन्त्रमब्रवीत्सूतमिहैवाद्य वसामहे ॥ २६ ॥
अविदूरादयं नद्या बहुपुष्पप्रवालवान् ॥ सुमहानिङ्गुदीवृक्षो वसामोऽत्रैव सारथे ॥ २७ ॥
[5]द्रक्ष्यामः सरितां श्रेष्ठां संमान्यसलिलां शि[6]वाम् ॥ देवदानवगन्धर्वमृग[7]मानुष[8]पक्षिणाम् ॥ २८ ॥
लक्ष्मणश्च सुमन्त्रश्च बाढमित्येव राघवम् ॥ उक्त्वा तमिङ्गुदीवृक्षं [9]तदोपययतुर्हयैः ॥ २९ ॥
रामोऽभियाय तं [10]रम्यं वृक्षमिक्ष्वाकुनन्दनः ॥ [11]रथादवातरत्तस्मात्सभार्यः सहलक्ष्मणः ॥ ३० ॥
सुमन्त्रो[12]ऽप्यवतीर्यास्मान्मोचयित्वा हयोत्तमान् ॥ वृक्षमूलगतं राममुपतस्थे कृताञ्जलिः ॥ ३१ ॥
तत्र राजा गुहो नाम रामस्यात्मसमः सखा ॥ निषादजात्यो बलवान्स्थपतिश्चेति विश्रुतः ॥ ३२ ॥

पवाह्यैः देवानांवाहनभूतैः ॥ २२ ॥ फलैःपुष्पैःकिसलयैरेवभूषणोत्तमैरितिव्यस्तरूपकं यद्वा । फलपुष्पादिभिर्वृतां अतएव भूषितांप्रमदामिवस्थितामितिवार्थः । द्विजैः पक्षिभिः ॥ २३ ॥ शिंशुमारैः नक्रविशेषैः । यद्वा शिंशुमारैः जलकपिभिः । " शिंशुमारस्त्वम्बुकपिः " इतिवैजयन्ती । अत्रविष्णुपादच्युतामित्युक्त्या बालकाण्डेहिमवत्प्रभवत्वंतत्रप्रादुर्भावमात्रेणेति ज्ञेयं ॥ २४ ॥ सारसक्रौञ्चनादितां सरोनिवासोयेषांते सारसाःपक्षिविशेषाः । " सोऽस्यनिवासः " इत्यण् । अतोहंससारससंघुष्टामित्यनेननपौनरुक्त्यं।शृङ्गबेरपुरं प्रति गङ्गामाससाद शृङ्गबेरपुरंप्रतिगच्छन्गङ्गामाससादेत्यर्थः । यद्वा शृङ्गबेरपुरंप्रति शृङ्गबेरपुरसमीपे गङ्गामाससादेत्यर्थः ॥ २५ ॥ ऊर्मिकलिलावर्तां ऊर्मिमिश्रावर्तां ॥ २६ ॥ अविदूरात् समीपे । इङ्गुदीवृक्षः तापसतरुः ॥ २७ ॥ संमान्येत्यस्यदेवेत्यादिनासंबन्धः ॥ २८ ॥ बाढमित्यङ्गीकारे ॥ २९ ॥ अभियाय प्राप्य ॥ ३०—३१ ॥ तत्र देशे राजा तद्देशाधिपतिः । आत्मसमः प्राणसमः । निषादजात्यः निषादजातौभवः । दिगादित्वाद्यत् । बलवान् चतुरङ्गबलवान् । स्थपतिः निषादाधिपतिः । " स्थपतिः पुनः । स्थापत्येधिपतौतक्ष्णि" इतिवैजयन्ती । ननु "हीनप्रेष्यंहीनसख्यंहीनगेहनिवेषणं " इत्युपपातकपरिगणितंहीनजातिसख्यं महाकुलप्रसूतस्यरामस्यकथमुपपद्यतइतिचेत् सत्यं " निषादस्थपतिंयाजयेत् " इतिनिषादाधिपतेर्यज्ञसंबन्धश्रवणादत्यन्तानुचितंनभवतीत्यनुमन्तव्यं । वस्तुतस्तु " नशूद्राभगवद्भक्ताविप्राभागवताःस्मृताः । सर्ववर्णेषुतेशूद्रायेह्यभक्ताजनार्दने " इत्युक्तरीत्यारामभक्तोयमत्युत्तमएव । गुहस्यभगवत्प्रियत्वं " गुहे-

---

स्वेच्छयोत्पथगत्यादिभिर्मदसहितामिव । ति० व्यपेतजलसंघातामितिपाठे तीरे क्रूरप्रवाहरहितामित्यर्थः ॥ २१ ॥ ति० विष्णुपादस्पर्शेन ब्रह्मलोकाद्ब्रह्माण्डबाह्यजलदेशाच्च च्युतां। अपापां कर्मनाशादिवत्केनापिप्रकारेणपापजनकत्वाभाववतीमितिकतकः । तन्न । पापजनकत्वसंभावनायाएवाभावात् । वस्तुतोपापां पापवज्जन्तुरहितां । तत्रहेतुः पापनाशिनीं दर्शनमात्रेणतादृशीं ॥ २४ ॥ वि० सागरतेजसा भगीरथतपसा ॥ २५ ॥ वि० देवादीनांसंमान्यंसलिलंयस्यास्तां । अनेन गङ्गाजलंप्रवाहादन्यत्रानीतमपि सकलपापक्षयसमर्थमितिध्वनितं ॥२८॥ शि० अवतरत् अवातरत्। आगमशास्त्रस्यानित्यत्वादड्विरहः ॥३०॥ ति० यद्यपीदृशसख्यं "हीनप्रेष्यंहीनसख्यं" इत्यादिनोपपातकेषुगणितं तथापि तद्विप्रविषयं। राज्ञामाटविकबलेनप्रयोजनवत्त्वात् षड्विधबलसंग्रहस्यराजधर्मत्वाच्च तत्सख्यमेवेतिदिक्। अत्रेदंबोध्यं। निषादगुहविषये "रामस्यात्मसमस्सखा"इत्येवंवदतावाल्मीकिना रामसमत्वरामसमानख्यातित्वोक्त्या भगवद्भक्तत्वेन निषादत्वेपिपूर्वकृतश्रवणादिमत्त्वेन तस्यतत्त्वज्ञत्वंसूचितं । शि० ननु परमधर्मज्ञोरामः हीनजातिनिषादेनसहसख्यंकथंकृतवानितितु नभ्रमितव्यं । निषादानां भगवदवतारभूतपृथुराजजनकब्राह्मणमथितवेनशरीरोद्भवत्वेन

[पा०] १ क—छ. झ. ञ. ट. फलपुष्पैः. २ शिंशुमारैश्चेतिश्लोकेपूर्वोत्तरार्धयोःपौर्वापर्यं ङ. च. छ. झ. ञ. ट. पुस्तकेषुदृश्यते. ३ ङ. च. छ. झ. ट. समन्वितां. ४ क. ङ. च. छ. झ. ञ. ट. शंकरस्यजटा. ख. तांशंकरशिरोभ्रष्टांहृष्टां. ५ ङ. च. झ. ट. प्रेक्षामि. ख. ग. घ. ज. द्रक्ष्यामि. ६ घ. शुभां. ७ ङ. च. छ. झ. ट. पन्नग. ८ क. राक्षसैः. ९ क. च. छ. ञ. तथोपाययतुः. १० क. वृक्षंरम्यं. ११ क. घ—छ. झ. ञ. ट. दवतरत्. १२ ङ. च. छ. झ. ञ. ट. प्यवतीर्याथ.

स श्रुत्वा पुरुषव्याघ्रं रामं विषयमागतम् ॥ वृद्धैः परिवृतोऽमात्यैर्ज्ञातिभि[1]श्चाप्युपागतः ॥ ३३ ॥
ततो निषादाधिपतिं दृष्ट्वा दूरादुपस्थितम्[2] ॥ सह सौमित्रिणा रामः समागच्छद्गुहेन सः ॥ ३४ ॥
तमार्तः संपरिष्वज्य गुहो राघवमब्रवीत् ॥ यथाऽयोध्या त[3]थेयं ते राम किं करवाणि ते ॥ ३५ ॥
ईदृशं हि महाबाहो कः प्राप्स्यत्यतिथिं प्रियम् ॥ ३६ ॥

ततो गुणवदन्नाद्यमुपादाय पृथग्विधम् ॥ अर्घ्यं चो[4]पानयत्क्षिप्रं वाक्यं चेद[5]मुवाच ह ॥ ३७ ॥
स्वागतं ते महाबाहो तवेयमखिला मही ॥ वयं प्रेष्या भ[6]वान्भर्ता साधु राज्यं प्रशाधि नः ॥३८॥
भक्ष्यं भोज्यं च [7]पेयं च लेह्यं चेद[8]मुपस्थितम् ॥ [9]शयनानि च मुख्यानि वाजिनां खादनं च ते ॥३९॥
गुहमेवं [10]ब्रुवाणं तु राघवः प्रत्युवाच ह ॥ [11]अर्चिताश्चैव हृष्टाश्च भवता [12]सर्वथा वयम् ॥
पद्भ्यामभिगमाच्चैव स्नेहसंदर्शनेन च ॥ ४० ॥
भुजाभ्यां साधु पीना[13]भ्यां पीडयन्वाक्यमब्रवीत् ॥ ४१ ॥
दिष्ट्या त्वां गुह पश्यामि ह्यरोगं सह बान्धवैः ॥ [14]अपि ते कुशलं [15]राष्ट्रे मित्रेषु च [16]धनेषु च ॥४२॥
[17]यत्त्विदं भवता किंचित्प्रीत्या समुपकल्पितम् ॥ सर्वं तदनुजानामि नहि वर्ते प्रतिग्रहे ॥ ४३ ॥
कुशचीराजिनधरं फलमूलाशिनं च माम् ॥ विद्धि प्रणिहितं धर्मे तापसं वनगोचरम् ॥ ४४ ॥
अश्वानां खादनेनाहमर्थी नान्येन केनचित् ॥ एतावताऽत्र भवता भविष्यामि सुपूजितः ॥ ४५ ॥

नसहितोरामोलक्ष्मणेनचसीतया " इतिदर्शितम् ॥ ३२—३३ ॥ दूरादुपस्थितंदृष्ट्वा समागच्छदित्यनेन प्रत्युत्थानाभिगमनोक्तिः । लक्ष्मणेनसहसमागच्छत् लक्ष्मणवत्तस्मिन्भ्रातृत्वबुद्धिमकरोदित्यर्थः । समित्येकीभावे ॥ ३४ ॥ आर्तःधृतवल्कलदर्शनेनसंतप्तः । अनेनरामस्यपूर्वमेवमृगयाव्यापारादिनासख्यमस्तीति गम्यं । इयं अस्मत्पुरी ॥ ३५—३६ ॥ आद्यशब्देन पेयादिकमुच्यते । पृथग्विधं मांसादिभेदेनबहुविधं ॥ ३७ ॥ इयंमही अटवीराज्यं ॥ ३८ ॥ भक्ष्यं खाद्यंव्यञ्जनादि । भोज्यं अन्नं । पेयं पानकादि । लेह्यं रसायनादि । खादनं घासः ॥ ३९ ॥ अर्चितत्वेपिकेचिन्नतन्मात्रेणतुष्यन्ति नतथावयमित्याह— हृष्टाश्चेति । स्नेहसंदर्शनेन राज्यंप्रशाधीतिवाक्यकृतेनस्नेहप्रदर्शनेन ॥ ४० ॥ साधुपीडयन् सम्यगालिङ्गन् पीनाभ्यामित्यनेन सुखहेतुत्वमुच्यते॥४१—४२॥ अनुजानामि ममसर्वंसम्यक्कृतमित्यनुजानामि । प्रतिग्रहेनवर्ते प्रतिग्रहधर्मंनाश्रितवानस्मीतिभावः ॥४३॥ राज्यान्नाद्यपरिग्रहेहेतुंदर्शयति—कुशचीराजिनधरमिति । कुशं पवित्रमेखलादिरूपं । चीरं वल्कलं । अजिनं कृष्णाजिनं । धर्मेप्रणिहितं पितृवाक्यपरिपालनादिधर्मेसावधानं । वनंगोचरःसञ्चारविषयोयस्यतं ॥ ४४ ॥ अश्वानांखादनेन ग्रासेन । अर्थी प्रयोजनवान् अश्वघासएवप्रयोजनमित्यर्थः । अत्र अस्मि-

क्षत्रियत्वात् । अतएव निषादस्थपत्यधिकरणे "निषादस्थपतिंयाजयेत्" इतिश्रुत्या निषादस्थपतीनांयाजनाधिकारस्संगच्छते । प्रपञ्चितंचैतन्निषादस्थपत्यधिकरणे मीमांसकैः । अतएव रामभोजनार्थंनिषादकर्तृकौदनानयनं नविरुध्यते । धर्मशास्त्रे हीनप्रकरणेनिषादपरिगणनंतु निषादविलोमजातानामिति नविरोधः । तत्रनिषादत्वव्यवहारस्तु भाक्तइतिदिक् ॥ ३२ ॥ ति० इदं अस्मत्पुरं ॥ ३५ ॥ ति० वनेषुचेति तस्याटविकत्वाद्वनकुशलप्रश्नः ॥ ४२ ॥ ति० धर्मेप्रणिहितं पित्राज्ञापालनलक्षणेधर्मेसावधानं । अत्र तद्दत्तस्याग्रहेअप्रतिग्रहीतृत्वरूपक्षत्रधर्मोपन्यासेन अन्नभोजनायोग्यत्वे व्रतस्थत्वरूपहेतूपन्यासेनच तदन्नस्यभोजनयोग्यत्वंसूचयता तस्यतत्त्वज्ञत्वंसूचितं । अन्यथा निषादत्वेनाभोज्यान्नतया तमेवहेतुमुपन्यसेत् सवा कथंपक्वान्नमाहरेत् । एतेन तत्त्वज्ञस्सर्वोपिभो-

[पा०] १ ख. ग. श्चाभ्युपागतः. घ. श्चाप्युपाश्रितः. २ ङ. दूरमुपस्थितं. क. ख. घ. ज. दूरादवस्थितं. ३ ख—च. ज—ट. तथेदं. ४ ङ. च. छ. झ. ञ. ट. चोपानयच्छीघ्रं. क. चोपाहरत्क्षिप्रं. ५ ख. चैनं. ६ घ. भवान्कर्ता. ७ क. ख. लेह्यंचपेयं. ८ क. ख. ङ. च. झ. ञ. ट. चैतदुपस्थितं. घ. चोष्यमुपस्थितं. ९ घ. खादनानि. १० क. ख. ब्रुवाणंतं. ११ क. अर्चिताःसुप्रहृष्टाश्च. ख. अर्चिताश्चप्रहृष्टाश्च. १२ ङ. च. छ. झ. ञ. ट. सर्वदा. १३ ख. घ. ङ. झ. ञ. ट. वृत्ताभ्यां. १४ ग. ज. अथ. १५ घ. राज्ये. १६ झ. ट. वनेषु. १७ ज. यद्विधं. घ. यदेतद्भवता.

एते हि दयिता राज्ञः पितुर्दशरथस्य मे ॥ एतैः सुविहितैरश्वैर्भविष्याम्यहमार्चितः ॥ ४६ ॥
अश्वानां प्रतिपानं च खादनं चैव सोन्वशात् ॥ गुहस्तत्रैव पुरुषांस्त्वरितं दीयतामिति ॥ ४७ ॥
ततश्चीरोत्तरासङ्गः संध्यामन्वास्य पश्चिमाम् ॥ जलमेवाददे भोज्यं लक्ष्मणेनाहृतं स्वयम् ॥ ४८ ॥
तस्य भूमौ शयानस्य पादौ प्रक्षाल्य लक्ष्मणः ॥ सभार्यस्य ततोऽभ्येत्य तस्थौ वृक्षमुपाश्रितः ॥४९॥
गुहोपि सह सूतेन सौमित्रिमनुभाषयन् ॥ अन्वजाग्रत्ततो राममप्रमत्तो धनुर्धरः ॥ ५० ॥
तथा शयानस्य ततोस्य धीमतो यशस्विनो दाशरथेर्महात्मनः ॥
अदृष्टदुःखस्य सुखोचितस्य सा तदा व्यतीयाय चिरेण शर्वरी ॥ ५१ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे पञ्चाशः सर्गः ॥ ५० ॥

एकपञ्चाशः सर्गः ॥ ५१ ॥

गुहेनलक्ष्मणंप्रतिरघुवरपरिरक्षणायस्वस्यसज्जीभवननिवेदनपूर्वकंशय्यायांशयनप्रार्थना ॥ १ ॥ लक्ष्मणेनतंप्रतिश्रीरामानुभावप्रशंसनादिपूर्वकंतदनर्हावस्थादर्शनेनस्वस्यसुखानभिलापनिवेदनम् ॥ २ ॥ तथापित्राद्विदुरवस्थासंभावनापूर्वकं तान्प्रतिपरिशोचनेनगुहेनसहदुःखाज्जागरेणैवरात्रियापनम् ॥ ३ ॥

तं जाग्रतमदम्भेन भ्रातुरर्थाय लक्ष्मणम् ॥ गुहः संतापसंतप्तो राघवं वाक्यमब्रवीत् ॥ १ ॥
इयं तात सुखा शय्या त्वदर्थमुपकल्पिता ॥ प्रत्याश्वसिहि साध्वस्यां राजपुत्र यथासुखम् ॥ २ ॥
उचितोऽयं जनः सर्वः क्लेशानां त्वं सुखोचितः ॥ गुप्त्यर्थं जागरिष्यामः काकुत्स्थस्य वयं निशाम् ॥३॥
न हि रामात्प्रियतरो ममास्ति भुवि कश्चन ॥ ब्रवीम्येतदहं सत्यं सत्येनैव च ते शपे ॥ ४ ॥

न्समये ॥४५॥ सुविहितैः पोषितैः ॥४६॥ स गुहः । तत्रैव तदानीमेव । पुरुषान् स्वभृत्यान्प्रति । अश्वानां खादनं प्रतिपानं क्षीरादिकंच त्वरितंदीयतामित्यन्वशात् ॥४७॥ उत्तरासङ्गः उत्तरीयं । अन्वास्य उपास्य । अनेनस्नानमाक्षिप्यते । भोज्यं आहारं ॥ ४८ ॥ शय्याकालेपादप्रक्षालनं राजोपचाराद्वा स्वशेषवृत्त्यनुरूपत्वाद्वा यद्वा । प्रक्षालनं रामकर्तृकतदाचमनस्याप्युपलक्षणं । प्रक्ष्याल्याचम्य शयानस्य शयानेसतीत्यर्थः । भावलक्षणेषष्ठी । ततः तस्माच्छयनप्रदेशात् । अभ्येत्य गुहाभिमुखमेत्य । वृक्षमेवोपाश्रितस्तस्थौ । ॥ ४९ ॥ सौमित्रिमनुभाषयन् रामगुणान्प्रस्तुत्यसौमित्रिंवाचयन्नित्यर्थः । अन्वजाग्रत् जाग्रतंसौमित्रिमन्वजाग्रत् । किमर्थंराममुद्दिश्य रामंसंरक्षितुमित्यर्थः । धनुर्धरइत्यनेन लक्ष्मणेप्यतिशङ्कागुहस्यद्योत्यते ॥ ५०—५१ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने पञ्चाशःसर्गः ॥ ५० ॥

अदम्भेन अकृत्रिमेण । अर्थाय रक्षणाय । संतापसंतप्तः रामदुर्दशादर्शनसंतापेनसंतप्तः । राघवं लक्ष्मणं ॥ १ ॥ प्रत्याश्वसिहि विश्रान्तोभवेतियावत् ॥ २ ॥ अयंजनः वनचारित्वेनक्लेशसहोजनः ॥ ३—

ज्यान्नएवेतिध्वनितं ॥ ४४ ॥ ति० जात्याश्वानां राजौपवाह्यानां घासदानानन्तरं यत्पाय्यतेक्षीरादि तत्प्रतिपानं । यच्च घृतशर्करादियुतयवचूर्णादि खाद्यते तत्खादनं ॥ ४७ ॥ स० जलमेवेत्यनेन तीर्थनिमित्तोपवासोयमितिसूचयति । साक्षाद्गङ्गासांनिध्यलाभे जीवत्पितृकाणामपिपुराणादावुपवासस्योक्तेः । यद्वा रामस्यसार्वज्ञत्वेन सत्वरविनश्यत्पितृज्ञानादुपवासइतिसूचयति ॥ ४८ ॥ स० शयानस्य शेतुकामस्येतिफलितोर्थः ॥ ४९ ॥ ति० सुचिरेणशर्वरीति निद्रागमनाचिरत्वप्रतिभासस्तस्यां ॥ ५१ ॥ इतिपञ्चाशस्सर्गः ॥ ५० ॥

ति० एवंरामेशयानेतद्रक्षार्थंजाग्रल्लक्ष्मणगुहसंवादः तस्मिन्नित्यादि । अदंभेन अकृत्रिमानुरागेण । स० अदंभेनअतस्मस्थित्या ।

[पा०] १ क. सुसुखितैः. २ घ. ङ. तत्रचीरो. ३ ङ. छ. ज. झ. ट. ततोयशस्विनोमनस्विनो. ४ ङ. छ. झ. ट. व्यतीतासुचिरेण. ५ च. ञ. सुखेन. ६ ग. ज. संयुक्तो. ७ क. [illegible]भा. ८ क. ख. ग. ङ—ट. त्प्रियतमो. ९ ङ. छ. झ. ञ. ममास्ते. १० ङ. च. छ. झ. ञ. ट. ब्रवीम्येवचते.

अस्य प्रसादादाशंसे लोकेऽस्मिन्सुमहद्यशः ॥ धर्मावाप्तिं च विपुलामर्थावाप्तिं च केवलाम् ॥ ५ ॥
सोहं प्रियतमं रामं शयानं सह सीतया ॥ रक्षिष्यामि धनुष्पाणिः सर्वतो ज्ञातिभिः सह ॥ ६ ॥
न हि मेऽविदितं किंचिद्वनेऽस्मिंश्चरतः सदा ॥ चतुरङ्गं ह्यपि बलं सुमहत्प्रसहेमहि ॥ ७ ॥
लक्ष्मणस्तं तदोवाच रक्ष्यमाणास्त्वयाऽनघ ॥ नात्र भीता वयं सर्वे धर्ममेवानुपश्यता ॥ ८ ॥
कथं दाशरथौ भूमौ शयाने सह सीतया ॥ शक्या निद्रा मया लब्धुं जीवितं वा सुखानि वा ॥९॥
यो न देवासुरैः सर्वैः शक्यः प्रसहितुं युधि ॥ तं पश्य सुखसंविष्टं तृणेषु सह सीतया ॥ १० ॥
यो मन्त्रतपसा लब्धो विविधैश्च परिश्रमैः ॥ एको दशरथस्येष्टः पुत्रः सदृशलक्षणः ॥ ११ ॥
अस्मिन्प्रव्राजिते राजा न चिरं वर्तयिष्यति ॥ विधवा मेदिनी नूनं क्षिप्रमेव भविष्यति ॥ १२ ॥
विनद्य सुमहानादं श्रमेणोपरताः स्त्रियः ॥ निर्घोषोपरतं तातो मन्ये राजनिवेशनम् ॥ १३ ॥
कौसल्या चैव राजा च तथैव जननी मम ॥ नाशंसे यदि जीवन्ति सर्वे ते शर्वरीमिमाम् ॥ १४॥
जीवेदपि हि मे माता शत्रुघ्नस्यान्ववेक्षया ॥ तद्दुःखं यत्तु कौसल्या वीरसूर्विनशिष्यति ॥ १५ ॥
अनुरक्तजनाकीर्णा सुखालोकप्रियावहा ॥ राजव्यसनसंसृष्टा सा पुरी विनशिष्यति ॥ १६ ॥
कथं पुत्रं महात्मानं ज्येष्ठं प्रियमपश्यतः ॥ शरीरं धारयिष्यन्ति प्राणा राज्ञो महात्मनः ॥ १७ ॥
विनष्टे नृपतौ पश्चात्कौसल्या विनशिष्यति ॥ अनन्तरं च माताऽपि मम नाशमुपैष्यति ॥ १८ ॥

॥ ४ ॥ आशंसे प्रार्थये । केवलामर्थावाप्तिं अर्थावाप्तिमेवेत्यर्थः । केचित्तुकेवलमितिपठित्वा केवलंप्रसादादितियोजयन्ति ॥ ५ ॥ सर्वतः सर्वदिक्षु ॥ ६ ॥ अविदितमितिपदच्छेदः । किंचित्विरोध्यागमनस्थानं । बलं परकीयं । प्रसहेमहीत्येतदात्मनिबहुवचनंजात्यपेक्षया ॥ ७—८ ॥ भीत्यभावेकिमर्थंजागरणमित्याह—कथमिति । निद्रानलभ्यतइतिभावः । जीवितं आश्वासनं । निद्रैवनलभ्यते जीवितसुखानांकाकथेति भावः ॥ ९ ॥ प्रसहितुमिति । "तीषसह—" इत्यादिनापाक्षिकइट् । संविष्टं शयानं ॥ १० ॥ मन्त्रतपसा मन्त्रयुक्ततपसा मन्त्रतपोभ्यामित्यर्थः । परिश्रमैः यज्ञादिभिः । एकः मुख्यः । " एकेमुख्यान्यकेवलाः " इत्यमरः । सदृशलक्षणः स्वसदृशलक्षणः ॥ ११ ॥ वर्तयिष्यति जीविष्यति । विधवा पतिरहिता ॥१२॥ उपरताः भविष्यन्तीतिशेषः । अतएवनिर्घोषोपरतं उपरतनिर्घोषंभविष्यतीतिमन्ये ॥ १३ ॥ सर्वेजीवन्ति जीविष्यन्तीतिनाशंसे । यदिजीवन्ति इमांशर्वरीमेव ॥ १४ ॥ शत्रुघ्नस्यान्ववेक्षया शत्रुघ्नस्नेहेनेत्यर्थः । पुनःपुनर्दर्शनेनवा । वीरंपुत्रंसूतइतितथा कौसल्या विनशिष्यतीतियद्दुःखंतद्दुःसहमित्यर्थः ॥ १५ ॥ राजव्यसनसंसृष्टा राजमरणनिमित्तव्यसनसंयुक्तेत्यर्थः

"दंभखुकैतवेतल्पे" इतिविश्वः । **शि०** सन्तापसंतप्तः लक्ष्मणदुःखदर्शनजनितसंतापवान् गुहः ॥ १ ॥ **ति०** संतरेमहि युद्धेनजयेम ॥ ७ ॥ **स०** श्लोकद्वयमेकवाक्यं । हेतत आज्ञयाव्याप्तगुह अत्रारण्येभीतास्संतः वयंत्वयानरक्ष्यमाणाइतिन किंतु धर्ममेवानुपश्यतामयानिद्रालब्धुंकथंशक्या । यद्वा त्वयानरक्ष्यमाणाः यतोरामेणरक्ष्यमाणाः तस्मान्नात्रभीताः । **ति०** ततोवाच ततउवाचेतिच्छेदः । आर्षस्सन्धिः ॥ ८ ॥ **ती०** मन्त्रोगायत्र्यादिः । तपःकृच्छ्रादि । पराक्रमैः परेषांमहतां आक्रमैःआगमैः आशीर्भिरित्यर्थः ॥ ११ ॥ **स०** उपरताः यदेतिशेषः ॥ १३ ॥ **शि०** कौसल्यादयः इमांशर्वरींरात्रिं यदिजीवन्ति अतिमूर्छांनप्राप्नुवन्तीत्यर्थः । तदाऽहं आशंसे तद्धैर्यप्रशंसांकरिष्यामीत्यर्थः ॥ १४ ॥ **ति०** यदि यत् ॥ १५ ॥ **स०** पुत्रं पुन्नामनरकात्त्रातारं ज्येष्ठपुत्रं प्रथमापत्यं । यद्वा पुत्रं सुतं ज्येष्ठपुत्रं पुत्रेषुज्येष्ठोज्येष्ठपुत्रःतं ॥ १७ ॥ **शि०** नृपतौविनष्टे लोकान्तरगमन-

[पा०] १ ग. च—ट. मर्थकामौचपुष्कलौ. ख. मर्थकामौचकेवलौ. २ पुष्कलां. ३ क—ट. प्रियसखं. ४ ङ. छ. झ. ञ. ट. सर्वथा. ५ ख. ग. ङ—ट. नमेस्त्यविदितं. ६ ङ. छ. ज. झ. ट. त्संतरेमहि. ७ ङ. छ. झ—ठ. लक्ष्मणस्तुततोवाच. ८ ठ. स्त्वयानघ. ९ ङ. छ. झ. ञ. ट. सुखसंसुप्तं. ज. गुहसंविष्टं. १० ग. ङ—ट. पराक्रमैः. ११ ङ.—ट. दशरथस्यैव. १२ ख. ग. ङ—झ. ट. न्प्रव्रजिते. १३ घ. क्षिप्रमेषा. १४ क. ख. घ—ट. तात. १५ ख. ग. ङ. छ. ट. रामनिवेशनं. १६ ट. आशंसे. १७ क. रजनीमिमां. १८ क. ङ—ट. यदि. १९ ज. सुखलोक. २० ख. संतप्ता. २१ क. पुरीसा. २२ क. ङ. छ. झ—ठ. ज्येष्ठपुत्रं. ग. च. ज. ज्येष्ठंसन्तं.

अतिक्रान्तमतिक्रान्तमनवाप्य मनोरथम् ॥ राज्ये राममनिक्षिप्य पिता मे विनशिष्यति ॥ १९ ॥
सिद्धार्थाः पितरं वृत्तं तस्मिन्काले[1]ऽप्युपस्थिते ॥ प्रेतकार्येषु सर्वेषु संस्करिष्यन्ति [2]भूमिपम् ॥ २० ॥
रम्यचत्वरसंस्थानां सुविभक्तमहापथाम् ॥ [3]हर्म्यप्रासादसंपन्नां गणिकावरशोभिताम् ॥ २१ ॥
रथाश्वगजसंबाधां तूर्यनादविनादिताम् ॥ सर्वकल्याणसंपूर्णां हृष्टपुष्टजनाकुलाम् ॥ २२ ॥
आरामोद्यानसंपन्नां समाजोत्सवशालिनीम् ॥ सुखिता विचरिष्यन्ति राजधानीं पितुर्मम ॥ २३ ॥
अपि जीवेद्दशरथो वनवासात्पुनर्वयम् ॥ प्रत्यागम्य महात्मानमपि पश्येम[4] सुव्रतम् ॥ २४ ॥
[5]अपि सत्यप्रतिज्ञेन सार्धं[6]कुशलिना वयम् ॥ नि[7]वृत्तवनवासेऽस्मिन्नयोध्यां प्रविशेमहि ॥ २५ ॥
परिदेवयमानस्य दुःखार्तस्य महात्मनः ॥ तिष्ठतो राजपुत्रस्य शर्वरी साऽत्यवर्तत ॥ २६ ॥

[8]तथाहि सत्यं ब्रुवति प्रजाहिते नरेन्द्रपुत्रे[9] गुरुसौहृदाद्गुहः ॥
मुमोच बाष्पं व्यसनाभिपीडितो ज्वरातुरो नाग इव[10] व्यथातुरः ॥ २७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे एकपञ्चाशः सर्गः ॥ ५१ ॥

॥ १६—१८ ॥ मेपिताराज्येराममनिक्षिप्य अतएवमनोरथमनवाप्यविनशिष्यतीतियत् तस्मात् अतिक्रान्तमतिक्रान्तं सर्वप्रयोजनमतीत्यगतमित्यर्थः । अथवा अतिक्रान्तमतिक्रान्तंमनोरथमनवाप्य पुनःपुनर्वर्धमानंमनोरथमनवाप्य रामोजातःवर्धिष्यते उद्वाहं करिष्यतिराज्यंप्राप्स्यतीत्येवमभिवृद्धंमनोरथमित्यर्थः । मनोरथातिक्रान्तिमेवाह—राज्येराममनिक्षिप्येति ॥ १९ ॥ तस्मिन्काले मरणकाले उपस्थिते प्रेतकार्येष्वप्युपस्थितेषु । वृत्तं अतीतं मृतमितियावत् । "वृत्तं पद्येचरित्रेत्रिष्वतीतेदृढनिस्तले" इत्यमरः । भूमिपं पितरं । सिद्धार्थाः कृतार्थाः संस्करिष्यन्ति। वयंत्वकृतार्थाइतिभावः ॥ २० ॥ रम्यचत्वरसंस्थानां रमणीयाङ्गणसंस्थानां । सुविभक्तमहापथां गृहपङ्क्तिभिः सम्यग्विभक्तराजमार्गां । हर्म्यप्रासादसंपन्नां हर्म्यैर्धनिनांवासैः प्रासादैर्देवभूभुजांवासैश्चसंपूर्णां । "हर्म्यादिर्धनिनांवासःप्रासादोदेवभूभुजाम्" इत्यमरः । रथाश्वगजसंबाधां संबाधां निबिडां । नादितां संजातनादां । सर्वकल्याणसंपूर्णां सर्वैःपुत्रजन्मोत्सवप्रभृतिभिःसंपन्नां । आरामोद्यानसंपन्नां आरामाःउद्यानानिच उपवनानिराज्ञःक्रीडार्हवनानिच । समाजोत्सवशालिनीं समाजैः संघैःक्रियमाणउत्सवः समाजोत्सवः देवोत्सवइत्यर्थः ॥ २१—२३ ॥ अपिःसंभावनायां ॥ २४ ॥ सत्यप्रतिज्ञेन पित्रेतिशेषः । अस्मिन् रामे । प्रविशेमहीत्याशंसायांलिङ् ॥ २५ ॥ परिदेवयमानस्येत्यादौसंबन्धसामान्येषष्ठी । एवमितिशेषः ॥ २६॥ सत्यं वास्तवं । नरेन्द्रपुत्रे लक्ष्मणे । गुरुसौ-

---

प्रयुक्ताद्दयत्वंप्राप्तेसति ॥ १८ ॥ **शि०** ननुयथाविश्वामित्रसहगमनसमयेरामदर्शनाभावप्रयुक्तराजकर्तृकलोकान्तरगमनाभावस्तथाद्यापिभविष्यतीत्यतआह—**अतिक्रान्तमिति** । राज्येरामं अनिक्षिप्य अप्रापय्य प्रारंभविषयीभूताभिषेकमदृष्ट्वेत्यर्थः । अतएवातिक्रान्तं सर्वतउत्कृष्टमित्यर्थः । मनोरथं अनवाप्य मेपिता विनशिष्यति विनङ्क्ष्यति लोकान्तरंगमिष्यतीत्यर्थः । एतेन इदानींगमनेह्रीर्हेतुर्भविष्यतीतिध्वनितम् । **स०** अतिक्रान्तमतिक्रान्तमिति विलपन्निितिशेषः । पुनरागतंरामंराज्ये अनिक्षिप्यविनशिष्यति ॥ १९ ॥ **ति०** तस्मिन्काले मरणकालेउपस्थिते । येवृत्तंपितरं सर्वप्रेतकार्येषुसंस्करिष्यन्ति तेसिद्धार्थाः भाग्यवन्तः प्राप्तराज्याश्च । भरतादयइतिशेषः । क्रोधात्तन्नामाग्रहणं । **स०** ये भरतशत्रुघ्नौइतरपत्नीपुत्राः । राघवं दशरथंसंस्करिष्यन्ति तएवसिद्धार्थाः । **शि०** तस्मिन् लोकान्तरप्रयाणयोग्ये । कालेउपस्थितेसति । सर्वेषुप्रेतकार्येषु प्रयाणसमयोचितकर्तव्येषु राघवं दशरथं । येसंस्करिष्यन्ति मङ्गलपाठादिंककरिष्यन्ति तेसिद्धार्थाः । एतेन भरतोपितस्मिन्कालेतंप्राप्स्यतिनवेतिसंशयस्सूचितः ॥ २२ ॥ **स०** सत्यप्रतिज्ञेन रामेण । वयं भरतादिभिस्साहित्यविवक्षणाद्बहुवचनं ॥ २५ ॥ **ति०** गुरौरामेसौहृदादित्युभयान्वयि ॥ २७ ॥ इत्येकपञ्चाशस्सर्गः ॥ ५१ ॥

[पा०] १ ज. कालेभ्युपस्थिते. ग. ङ. च. छ. झ. ञ. ट. कालेह्युपस्थिते. २ ख. ङ. च. छ. झ. ञ. ट. राघवं. ३ घ. रम्यप्रासादसंपूर्णां. ४ क. ख. घ—छ. झ. ञ. ट. पश्याम. ५ क. अथ. ६ ङ. छ—ट. कुशलिनो. ७ ख. ङ—ट. निवृत्ते. ८ ग. तथातु. ९ ङ. च. छ. झ. ञ. ट. सूनौ. १० घ. इवातुरस्तदा. ज. इवव्यथान्वितः.

द्विपञ्चाशः सर्गः ॥ ५२ ॥

ससीतालक्ष्मणेरामेस्वाज्ञयागुहसमानायितनौकारोहणायसज्जीभूतेतंप्रतिगुहेनस्वकर्तव्यचोदनाप्रार्थना ॥ १ ॥ रामेणसुमन्त्रंप्रत्ययोध्यायांराजानुवर्तनादिचोदना ॥ २ ॥ सुमन्त्रेणरामंप्रतिबहुधास्वस्यापिवनेसहवासाभ्यनुज्ञानप्रार्थना ॥ ३ ॥ रामेणसुमन्त्रंप्रतिराजादिपुनिवेदनपूर्वकंसहेतूपन्यासमयोध्यांप्रतिगमनचोदना ॥ ४ ॥ तथास्वाज्ञयागुहोपहृतवटक्षीरेणसलक्ष्मणस्यात्मनोजटानिर्माणपूर्वकंसीतालक्ष्मणाभ्यांसहनावारोहणम् ॥ ५ ॥ नौकास्थयासीतयामध्येगङ्गंगङ्गाप्रार्थना ॥ ६ ॥ रामेणसीतालक्ष्मणाभ्यांसहनौकातोऽवतीर्यगङ्गादक्षिणतीरेसायाह्नेकस्यचित्तरोर्मूलदेशगमनम् ॥ ७ ॥

प्रभातायां तु शर्वर्यां पृथुवक्षा महायशाः ॥ उवाच रामः सौमित्रिं लक्ष्मणं शुभलक्षणम् ॥ १ ॥
भास्करोदयकालोऽयं गता भगवती निशा ॥ असौ सुकृष्णो विहगः कोकिलस्तात कूजति ॥ २ ॥
बर्हिणानां च निर्घोषः श्रूयते नदतां वने ॥ तराम जाह्नवीं सौम्य शीघ्रगां सागरङ्गमाम् ॥
[गच्छामः सन्ध्युपासार्थं त्वरयस्व महारथ] ॥ ३ ॥
विज्ञाय रामस्य वचः सौमित्रिर्मित्रनन्दनः ॥ गुहमामन्त्र्य सूतं च सोतिष्ठद्भ्रातुरग्रतः ॥ ४ ॥
स तु रामस्य वचनं निशम्य प्रतिगृह्य च ॥ स्थपतिस्तूर्णमाहूय सचिवानिदमब्रवीत् ॥ ५ ॥
अस्य वाहनसंयुक्तां कर्णग्राहवतीं शुभाम् ॥ सुप्रतारां दृढां तीर्थे शीघ्रं नावमुपाहर ॥ ६ ॥
तं निशम्य गुहादेशं गुहामात्यगणो महान् ॥ उपोह्य रुचिरां नावं गुहाय प्रत्यवेदयत् ॥ ७ ॥
ततः स प्राञ्जलिर्भूत्वा गुहो राघवमब्रवीत् ॥ उपस्थितेयं नौर्देव भूयः किं करवाणि ते ॥ ८ ॥

हृदात् गुरुपु पित्रादिपु सौहृदात् स्नेहात् । ज्वरातुरो नागोगजइव व्यथातुरोगुहइत्यन्वयः ॥ २७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूपणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने एकपञ्चाशः सर्गः ॥ ५१ ॥

पृथुवक्षाइत्युत्साहातिरेकोक्तिः। महायशाइति धर्मव्यतिक्रमाभावःसूचितः । सौमित्रिमिति "रामंदशरथंविद्धि" इत्यादिनोक्तार्थानुष्ठायित्वंसूचितं । शुभलक्षणमित्यनेनस्वभक्तिरुक्ता ॥ १ ॥ भास्करशब्दोयं तत्संबन्ध्यरुणवाची । गता गतप्राया । भगवतीकामवर्धिनी । "भगःश्रीकाममाहात्म्यवीर्ययत्नार्ककीर्तिपु" इत्यमरः । सुकृष्णोविहगः भरद्वाजः । कोकिलः । कोकिलश्चेत्यर्थः ॥ २ ॥ वनेनदतामिति नगरस्थक्रीडामयूरव्यावृत्तगम्भीरध्वनिरुक्ता । शीघ्रगामिति नावंविनादुस्तरत्वोक्तिः। सागरङ्गमामिति महत्त्वोक्तिः ॥ ३ ॥ वचोविज्ञाय नदीतरणसाधनंशीघ्रमानेतव्यमित्येवंरूपंवचनतात्पर्यंज्ञात्वा । गुहंसूतंचामन्त्र्य युवाभ्यामपिरामवचनतात्पर्यंज्ञातंकिमितिसंबोध्य भ्रातुरग्रतोतिष्ठत् ॥ ४ ॥ प्रतिगृह्य शिरोनतिपूर्वकंतथैवकरिष्यामीत्यङ्गीकृत्य ॥ ५ ॥ अस्य रामस्य । वाहनसंयुक्तां वाह्यतेनीयतेनेनेतिवाहनमरित्रादि तेनसंयुक्तां । कर्णग्राहवतीं कर्णमरित्रंगृह्णातीतिकर्णग्राहःकर्णधारः तद्वतीं । "कर्णश्रोत्रमरित्रंच" इतिनिघण्टुः । सुप्रतारां सुष्टुतारयितुंसमर्थां । दृढां सुश्लिष्टसन्धिबन्धां । तीर्थे अवतारमार्गे । उपाहरेत्येकवचनं सचिवगणाभि-

---

स० भगवती पूज्या भैर्नक्षत्रैर्गच्छतीतिभगश्चन्द्रस्तद्वतीवा । सुकृष्णः अत्यन्तंनीलः । विहगः काकः । कोकिलस्तत्पालितः ! प्रातःकालेकाकशब्दस्यैवप्रसिद्धत्वात् । प्रातर्निन्द्यत्वान्नतन्नामजग्राह । पुरतस्संपाद्यापराधत्वेनवा तदग्रहणम् ॥ २ ॥ **शि०** विज्ञाय विशेषेणज्ञात्वा तरणार्थेनावमाकांक्षतइतिबुद्ध्वेत्यर्थः । गुहंसूतंच आमन्त्र्य शीघ्रंनौरानेया शीघ्रंतरणकामोरामइत्युक्त्वेत्यर्थः ॥ ४ ॥ **ति०** सचिवानाहूय तन्मध्येकंचित्प्रत्यब्रवीत् । **स०** अनेककर्मसुकौशलविवक्षयासचिवानितिबहुवचनं । अतोनावमुपाहरेत्येकवचनं गुहामात्योमहानितिच नविरुध्यते ॥ ५ ॥ **ति०** अस्यवाहनसंयुक्ता अस्यजलं[illegible]स्यनावंतीरंप्रापयतीत्यस्यवाहनं अरित्रं । मयूरव्यंसकादित्वात्समासः ॥ ६ ॥ **ती०** उपोह्य समीपंप्रापय्येत्यर्थः ॥ ७ ॥

[पा०] १ ङ. च. छ. झ. ञ. ट. कालोसौ. २ ग. घ. ज. असौतु. ३ ङ. बर्हिणांतात. क. ख. बर्हिणांचापि. ४ इदमर्धं क. ख. दृश्यते. ५ क. ग. घ. ज. समादेशं. ६ छ. झ. ट. गुहामात्योगतो.

तवामरसुतप्रख्य तर्तुं सागरगां नदीम् ॥ नौरियं पुरुषव्याघ्र तां त्वमारोह सुव्रत ॥ ९ ॥
अथोवाच महातेजा रामो गुहमिदं वचः ॥ कृतकामोसि भवता शीघ्रमारोप्यतामिति ॥ १० ॥
ततः कलापान्संनह्य खड्गौ बद्ध्वा च धन्विनौ ॥ जग्मतुर्येन तौ गङ्गां सीतया सह राघवौ ॥ ११ ॥
राममेवं तु धर्मज्ञमुपगम्य विनीतवत् ॥ किमहं करवाणीति सूतः प्राञ्जलिरब्रवीत् ॥ १२ ॥
ततोऽब्रवीद्दाशरथिः सुमन्त्रं स्पृशन्करेणोत्तम दक्षिणेन ॥
सुमन्त्र शीघ्रं पुनरेव याहि राज्ञः सकाशे भव चाप्रमत्तः ॥ १३ ॥
निवर्तस्वेत्युवाचैनमेतावद्धि कृतं मम ॥ रथं विहाय पद्भ्यां तु गमिष्यामो महावनम् ॥ १४ ॥
आत्मानं त्वभ्यनुज्ञातमवेक्ष्यार्तः स सारथिः ॥ सुमन्त्रः पुरुषव्याघ्रमैक्ष्वाकमिदमब्रवीत् ॥ १५ ॥
नातिक्रान्तमिदं लोके पुरुषेणेह केन चित् ॥ तव सभ्रातृभार्यस्य वासः प्राकृतवद्वने ॥ १६ ॥
न मन्ये ब्रह्मचर्येऽस्ति स्वधीते वा फलोदयः ॥ मार्दवार्जवयोर्वाऽपि त्वां चेद्व्यसनमागतम् ॥ १७ ॥
सह राघव वैदेह्या भ्रात्रा चैवं वने वसन् ॥ त्वं गतिं प्राप्स्यसे वीर त्रींल्लोकांस्तु जयन्निव ॥ १८ ॥
वयं खलु हता राम[11] ये[12] त्वयाऽप्युपवञ्चिताः ॥ कैकेय्या वशमेष्यामः पापाया दुःखभागिनः ॥ १९ ॥

प्रायेण ॥ ६—८ ॥ नौरियमिति उपस्थितेतिशेषः ॥ ९ ॥ आरोप्यतामिति खनित्रपिटकवैदेहीवस्त्राभरणादिकमितिशेषः ॥ १० ॥ तौराघवौ संनह्य कवचौधृत्वा । कलापान् तूणीरान् खड्गौचबद्ध्वा धन्विनौ जनाःयेनमार्गेणगङ्गांप्राप्नुवन्ति तेनमार्गेणजग्मतुः ॥ ११ ॥ धर्मज्ञं भृत्यधर्मज्ञं । विनीतवत् सविनयमितिक्रियाविशेषणं ॥ १२ ॥ उत्तमेतिसंबोधनं ॥ १३ ॥ याहीतिसामान्येनोक्तं सोपपत्तिकमाह—निवर्तस्वेति । मम एतावत्कृतंहि गङ्गातीरपर्यन्तंरथेनप्रापणंकृतंहि । हीतिराजाज्ञाद्योतनं । अतःपरंयानंविहायपद्भ्यामेवमहावनंगमिष्यामः । अतस्त्वंनिवर्तस्वेत्येवमुवाच ॥ १४ ॥ अवेक्ष्य बुद्ध्वा । आर्तः अनुगमनेऽभ्यनुज्ञा नकृतेति दुःखितः ॥ १५ ॥ तवसभ्रातृभार्यस्य वने प्राकृतवत् क्षुद्रस्येव योयंवासः तदिदंलोकेकेनचिदपिपुरुषेणनातिक्रान्तं नाङ्गीकृतं । सर्वासंमतोयंतववनेवासइत्यर्थः । किंपुनर्ममेतिभावः ॥ १६ ॥ त्वां ब्रह्मचर्यस्वाध्यायमार्दवार्जवयुक्तंत्वां व्यसनमागतंचेत् ब्रह्मचर्ये अधःशयनादिलक्षणे अध्ययनकालकृते । स्वधीते स्वाध्यायाध्ययने । मार्दवे दयालुत्वइतियावत् । आर्जवे अकौटिल्ये च । फलोदयः फलसिद्धिर्नास्तीतिमन्ये । यदि ब्रह्मचर्यादिकंफलदंस्यात् तत्त्वयिदृश्येत । नदृश्यते प्रत्युत वनवासएवदृष्टः । अतोनतत्फलदमितिमन्येइति भावः । खेदातिशयादेवमुक्तं ॥ १७ ॥ त्रींल्लोकाञ्जयन्निव विष्णुरिवेत्यर्थः । गम्यतइतिगतिः कीर्तिः तांप्राप्स्यसे अतुलांकीर्तिंप्राप्स्यसइत्यर्थः । सुमन्त्रःपुरवासिष्वात्मानमन्तर्भाव्यवदति—वयमिति । वयं त्वामनुगतावयं । त्वयाप्युपवञ्चिताःखलु रात्रौनिद्रासमये अविदितगमनेनउपवञ्चिताएव । अपिशब्दादभिषेकविघटनेनकैकेय्यापिवञ्चिताइतिद्योत्यते । उपवञ्चिताः समीपेवञ्चिताः । वनंप्रापय्यमानाइवत्यक्ताइतिवार्थः ।

ती० ततःकलापानित्यादिश्लोकद्वयमेकंवाक्यं । तौराघवौसंनह्य कवचौधृत्वा । कलापान तूणीरान् । खड्गौचबध्वा येन यस्मात्कारणात् । रथनिरपेक्षौगङ्गांजग्मतुः । तस्माद्राममुपगम्य सूतःप्राञ्जलिरब्रवीदितियोजना ॥ ११-१२ ॥ ति० उत्तमश्चासौदक्षिणश्चतेन स्पर्शादिव्यापारेउत्तमेन स्पर्शमात्रेणसकलदुःखहारकत्वाद्दक्षिणेन ईदृशेनकरेण दक्षिणकरेण ॥ १३ ॥ ति० तदादौलोकदृष्ट्याशोकापनुदंवचनमाह—**नातीति** । सभ्रातृभार्यस्यतव प्राकृतवत्क्षुद्रवत् । वनेवासोयेनदैवेनकृतस्तदिदंदैवं इहलोकेकेनापिअतिक्रान्तं लङ्घितंन लंघितुमशक्यमित्यर्थः । अतोहृदयेमाशुचइत्यर्थः । यद्वा ते वनवासोजातइतियदिदं इहलोके अयोध्यास्थलोकमध्ये केनापिपुरुषेण न ह्यत्यन्तंकान्तंस्वीकृतं सर्वासंमतमेव । अतोस्मदादीन्दोषेणमागृह्णीयाइतितात्पर्यम् ॥ १६ ॥ ती० रात्रौकेचननिद्रासमयेअविदितगमनेन अहंतुबलान्निवर्तनेन । एवंसर्वेवयंवञ्चिताः त्यक्ताः । शि० हेराम त्वयासहवयं कैकेय्या कैकेयीदास्या

[पा०] १ ङ. छ. झ. ट. सागरगामिनीं. २ ङ. छ. झ. ञ. ट. शीघ्रगारोह. ३ घ. कार्यांत्सि. ४ ख. ग. घ. च. ज. राममेवतु. ५ ङ. छ. झ. ट. मुपागत्य. ख. च. ञ. मुपागम्य. ६ क—घ. ज. मानं. ७ ख. ङ. च. छ. झ. ञ. ट. ब्रह्मचर्येवा. ८ ख. त्वांचव्यागतं. ९ घ. ङ. छ. ट. सदा. १० ज. चापि. ११ ग. ज. नाथ. १२ घ. ङ. च. झ. ञ. ट. वयंवा.

इति ब्रुवन्नात्मसमं सुमन्त्रः सारथिस्तदा ॥ दृष्ट्वा [1]दूरगतं रामं दुःखार्तो रुरुदे चिरम् ॥ २० ॥
[2]ततस्तु विगते बाष्पे सूतं स्पृष्टोदकं शुचिम् ॥ रामस्तु मधुरं वाक्यं पुनःपुनरुवाच तम् ॥ २१ ॥
इक्ष्वाकूणां त्वया तुल्यं सुहृदं नोपलक्षये ॥ यथा दशरथो राजा मां न शोचेत्तथा कुरु ॥ २२ ॥
शोकोपहतचे[3]ताश्च वृद्धश्च जगतीपतिः ॥ कामभारावसन्नश्च तस्मादेतद्ब्रवीमि ते ॥ २३ ॥
[4]यद्यदाज्ञापयेत्किञ्चित्स महात्मा महीपतिः ॥ कैकेय्याः प्रिय[5]कामार्थं कार्यं तदविकाङ्क्षया ॥ २४ ॥
एतदर्थं हि राज्यानि प्रशासति [6]नरेश्वराः ॥ यदेषां सर्वकृत्येषु मनो न प्रतिहन्यते ॥ २५ ॥
[7]यद्यथा [8]स महाराजो नालीकमधिगच्छति ॥ न च ताम्यति [9]दुःखेन सुमन्त्र कुरु तत्तथा ॥ २६ ॥
अदृष्टदुःखं [10]राजानं वृद्धमार्यं जितेन्द्रियम् ॥ ब्रूयास्त्वमभिवाद्यैव मम हेतोरिदं वचः ॥ २७ ॥
[11]नैवाहमनुशोचामि लक्ष्मणो न च [12]मैथिली ॥ अयोध्यायाश्च्युताश्चेति वने [13]वत्स्यामहेति च ॥ २८ ॥
चतुर्दशसु वर्षेषु निवृत्तेषु पुनःपुनः ॥ लक्ष्मणं मां च सीतां च [14]द्रक्ष्यसि क्षिप्रमागतान् ॥ २९ ॥
एवमुक्त्वा तु राजानं मातरं च सुमन्त्र मे ॥ अन्याश्च देवीः सहिताः कैकेयीं च पुनःपुनः ॥ ३० ॥
आरोग्यं ब्रूहि कौसल्यामथ पादाभिवन्दनम् ॥ सीताया मम [15]चार्यस्य वचनाल्लक्ष्मणस्य च ॥ ३१ ॥
[16]ब्रूयाश्च हि महाराजं भरतं क्षिप्रमानय ॥ आगतश्चापि भरतः स्थाप्यो [17]नृपमते पदे ॥ ३२ ॥

अतएवपापायाःकैकेय्यावशंदुःखभागिनःसन्तः एष्यामः अतोवयंहताइत्यन्वयः ॥ १८—२० ॥ रोदनस्याशुचिताहेतुत्वात् स्पृष्टोदकं आचान्तं अतएवशुचिं ॥ २१—२३ ॥ गुरवःस्वामिनश्चननियम्याः अपितु सर्वप्रकारेणानुवर्तनीयाइत्याशयेनाह—यद्यदिति । विकाङ्क्षाअनादरःतदभावेन आदरेणेत्यर्थः ॥ २४ ॥ एतच्छब्दार्थमाह—यदेषामिति । प्रशासतीति अभ्यस्तत्वाददादेशः । सर्वकृत्येषु कामात्क्रोधाद्वा प्रवृत्तेष्वित्यर्थः ॥ २५ ॥ अलीकं अप्रियं । "अलीकंत्वप्रियेऽनृते" इत्यमरः ॥ २६ ॥ ममहेतोः मदर्थं ममप्रतिनिधित्वेनेत्यर्थः ॥ २७ ॥ स्वविश्लेषजनितदुःखेन राजा ननिर्वहेदितिभिया तदाश्वासकानिवाक्यन्याह—नैवाहमिति । लक्ष्मणोनचमैथिलीत्यत्र शोचतीतिविपरिणामः कर्तव्यः । वत्स्यामहेत्यत्र आर्षःसन्धिः ॥ २८ ॥ पुनःपुनर्द्रक्ष्यसि । "नित्यवीप्सयोः" इतिद्विर्वचनं । आदरातिशयेनसदाद्रक्ष्यसीत्यर्थः ॥ २९ ॥ राजानं मेमातरं अन्याःदेवीः सहिताः कौसल्ययासहवर्तमानाः । कैकेयींचपुनःपुनरेवमुक्त्वा अथकौसल्यामारोग्यंपादाभिवन्दनंच ब्रूहीत्यन्वयः । आर्यस्य शास्त्रोदितज्येष्ठानुवर्तनरूपपरमधर्मवेदित्वाल्लक्ष्मणस्यार्यत्वोक्तिः । कौसल्यांप्रत्येवपादाभिवन्दनकथनमन्यत्रनिषेधात् । " आचार्यवदाचार्यदारेवृत्तिःपादसंवाहनवर्जं " इतिनिषेधस्यसपत्नीमातृष्वपितुल्यत्वात् ॥ ३०—३१ ॥ नृपमतें राज्ञामभिमते । पदे यौवराज्यइत्यर्थः । अभिषिच्य स्थितमितिशेषः । नाभिभविष्यतीत्यत्रेतिकरणंद्रष्टव्यं । अस्यब्रूयाइत्यने-

मन्थरया वञ्चिताः । अकालिकवरयाचनप्रेरणयाप्रलंभिताः । अतएव दुःखभागिनोवयं पापायामन्थरायाःवशमेष्यामः ॥ १९ ॥ **ती०** आत्मसमं भृत्यस्यस्वस्योचितमितिक्रियाविशेषणं । आत्मसमंप्राणसममितिरामपरंवा । दृष्ट्वा निश्चित्येत्यर्थः । **ति०** आत्मसमं अतिबुद्धिमन्मन्त्रियोग्यं ॥ २० ॥ **ति०** सुहृदं व्यसनापनोदकं ॥ २२ ॥ **ती०** कामभारावसन्नः कामवेगेनपीडितः । यस्मात्तस्मात् एतद्वक्ष्यमाणंब्रवीमीतियोजना ॥ २३ ॥ **ती०** पुनःपुनः पुनरागतानस्मान् पुनस्त्वंद्रक्ष्यसीतिद्वयोःपुनश्शब्दयोस्संबन्धः ॥ २९ ॥ **शि०** सहिताः हितत्वयुक्ताः । अन्याश्चदेवीःराज्ञीः ॥ ३० ॥ **ती०** आर्यस्य विदुषोलक्ष्मणस्य । **ति०** सर्वान्प्रत्यार्यस्य ज्येष्ठस्यमम ॥ ३१ ॥ **ती०** स्वविश्लेषजदुःखनिवृत्तयेसुमन्त्रेस्वातन्त्र्यमारोप्याह—**महाराजमित्यादिश्लोकद्वयेन ।**

[पा०] १ क. ख. छ. वनगतं. क. च. दूरंगतं. २ क. ततस्त्वपगते. ३ घ. चेतास्तु. ४ ङ. छ. झ. ञ. ट. यद्यथा ज्ञापयेत्. ५ ग. ज. कामार्थे. ६ ङ. छ. झ. ञ. ट. नराधिपाः. ७ क. ख. घ. तद्यथा. ८ ञ. सुमहाराजो. ९ ङ. छ. झ. ञ. ट. शोकेन. १० ग. ज. राजानमार्यंवृद्धं. ११ ङ. च. छ. झ. ञ. ट. नचाहं. १२ ङ. छ. झ. ञ. ट. शोचति. १३ क—ङ. छ—ट. वत्स्यामहेतिवा. १४ ङ. छ. झ. ट. द्रक्ष्यसेशीघ्रमागतान्. १५ च. भार्याया. घ. चाप्यस्य. १६ ङ. ञ. छ. झ. ञ. ट. ब्रूयाश्चापि. १७ ख. नरपतेःपदे.

भरतं च परिष्वज्य यौवराज्येऽभिषिच्य च ॥ अस्मत्संतापजं दुःखं न त्वामभिभविष्यति ॥ ३३ ॥
भरतश्चापि वक्तव्यो यथा राजनि वर्तसे ॥ तथा मातृषु वर्तेथाः सर्वास्वेवाविशेषतः ॥ ३४ ॥
यथा च तव कैकेयी सुमित्रा च विशेषतः ॥ तथैव देवी कौसल्या मम माता विशेषतः ॥ ३५ ॥
तातस्य प्रियकामेन यौवराज्यमवेक्षता ॥ लोकयोरुभयोः शक्यं नित्यदा सुखमेधितुम् ॥ ३६ ॥
निवर्त्यमानो रामेण सुमन्त्रः शोककर्शितः ॥ तत्सर्वं वचनं श्रुत्वा स्नेहात्काकुत्स्थमब्रवीत् ॥ ३७ ॥
यदहं नोपचारेण ब्रूयां स्नेहादविक्लवः ॥ भक्तिमानिति तत्तावद्वाक्यं त्वं क्षन्तुमर्हसि ॥ ३८ ॥
कथं हि त्वद्विहीनोऽहं प्रतियास्यामि तां पुरीम् ॥ तव तावद्वियोगेन पुत्रशोकाकुलामिव ॥ ३९ ॥
सराममपि तावन्मे रथं दृष्ट्वा तदा जनः ॥ विना रामं रथं दृष्ट्वा विदीर्येतापि सा पुरी ॥ ४० ॥
दैन्यं हि नगरी गच्छेद्दृष्ट्वा शून्यमिमं रथम् ॥ सूतावशेषं स्वं सैन्यं हतवीरमिवाहवे ॥ ४१ ॥
दूरेऽपि निवसन्तं त्वां मानसेनाग्रतः स्थितम् ॥ चिन्तयन्त्योऽद्य नूनं त्वां निराहाराः कृताः प्रजाः ॥ ४२ ॥
दृष्टं तद्धि त्वया राम यादृशं त्वत्प्रवासने ॥ प्रजानां संकुलं वृत्तं त्वच्छोकक्लान्तचेतसाम् ॥ ४३ ॥
आर्तनादो हि यः पौरैर्मुक्तस्त्वद्विप्रवासने ॥ सरथं मां निशाम्यैव कुर्युः शतगुणं ततः ॥ ४४ ॥

नसंबन्धः ॥ ३२—३४ ॥ भरतइत्यादिश्लोकेनोक्तमर्थंविवृणोति—यथेति । सुमित्रोक्तिःशत्रुघ्नपक्षपातात् ॥ ३५ ॥ अवेक्षता अङ्गीकुर्वता । त्वयेतिशेषः । नित्यदा सर्वदा । छान्दसो दाप्रत्ययः । इतिभरतश्चापिवक्तव्यइतिपूर्वेणान्वयः ॥ ३६—३७ ॥ अहमविक्लवः धृष्टःसन् यद्वाक्यंब्रूयां तन्नोपचारेण किंतुस्नेहात् । तद्वाक्यंत्वं तावत् साकल्येन क्षन्तुमर्हसीतिसंबन्धः । [तवस्नेहादविक्लवोनिर्भयः यद्वचःउपचारेणनब्रूयां । सेवाधर्मंविहायब्रूयां तद्वाक्यंभक्तिमानितिहेतोःक्षन्तुमर्हसि] ॥ ३८॥ तवतावद्वियोगेनेतिपाठः । तवतातेतिपाठे तात । स्वामिन्नित्यर्थः । वृद्धत्वाद्वत्सेतिसंबोधनंवा । पुत्रवियोगजः शोकः पुत्रशोकः तेनाकुलामिवस्थितांपुरीमित्यन्वयः ॥ ३९ ॥ पूर्वंसरामंरथंदृष्ट्वा इदानींरामंविनास्थितंरथंदृष्ट्वा जनः सापुर्यपि विदीर्येत दुःखेनभिद्येत । पुरीशब्दोत्रजनव्यतिरिक्तपश्वादिपरः ॥ ४० ॥ आहवे हतवीरं हतवीरंदृष्ट्वा स्वसैन्यमिव सूतावशेषं शून्यं रामरहितंरथंदृष्ट्वा नगरी दैन्यंगच्छेत् ॥ ४१ ॥ प्रजाः अयोध्यावासिन्यः । दूरेनिवसन्तमपित्वां मानसेनाग्रतःस्थितंत्वांचिन्तयन्त्यः भावनाप्रकर्षेणपुरतःस्थितमिवपश्यन्त्यः निराहाराःकृताः आहारेप्यादरंनकुर्वन्तीत्यर्थः ॥ ४२ ॥ अत्रार्थेपूर्वानुभवंप्रमाणयति—दृष्टमिति । त्वत्प्रवासने प्रजानां यादृशंसंकुलंवृत्तं संक्षोभोजातः तादृशंत्वयादृष्टंहि ॥ ४३ ॥ ततः प्रवासकालिकनादादित्यर्थः

महाराजं । त्वत्पूज्यं नृपमते दशरथानुमते । भरतमभिषिच्य अभिषेचयसिचेत् । तर्हीदंदुःखंत्वांनाभिभविष्यतीतिसंबन्धः ॥३२॥ **ति०** अविशेषतः शत्रुघ्नसंबन्धात्कैकेय्यविशेषतः कैकेय्यविशेषेत्यर्थः । एवंममातापिकैकेय्यविशेषाद्द्रष्टव्येत्यर्थः ॥ ३५ ॥ **ती०** तातस्यप्रियकामेन यौवराज्यमवेक्षता अङ्गीकुर्वता । उभयोरिहपरयोःसुखमेधितुंशक्यं जनानामितिशेषः । यद्वा यौवराज्यमवेक्षतात्वया उभयोर्लोकयोः तातस्य दशरथस्य । सुखमेधितुं संवर्धयितुंशक्यमितिसंबन्धः ॥३६॥ **ति०** उपचारः स्वामिभृत्योचितःसत्कारः । तेननब्रूयाः ब्रूयां । छान्दसमेतत् । अपितुस्नेहादविक्लवंवाक्यंब्रवीमि तद्वाक्यंभक्तिमानितिज्ञात्वाक्षन्तुमर्हसीतिसंबन्धः ॥३८॥ **शि०** दूरेनिवसन्तंत्वां दूरेनिवसन्तीं त्वां सर्वतोविलक्षणांसीतांच । मानसेन मनोव्यापारेण । अग्रतःस्थितं स्थितांच चिन्तयन्त्यःप्रजाः अद्य त्वद्रहितरथगमनसमये। निराहाराःकृताः त्वदागमनाभावंश्रुत्वाआहारादिकंनकरिष्यन्तीत्यर्थः। निवसन्त-

[पा०] १ ख. सुमित्रावाविशेषतः. क. ङ. छ. झ. ट. सुमित्राचाविशेषतः. २ ग. ज. तवमान्या. ३ क. घ. ञ. मपेक्षता. ४ ङ. च. छ. झ. ञ. ट. प्रतिबोधितः. ५ ङ. च. छ. झ. ञ. ट. ब्रूयाः. ६ ङ. झ. ट. दविक्लवं. ७ क—ट. तातवियोगेन. ८ ङ. च. छ. झ. ञ. ट. शोकातुरामिव. ९ क. घ. ङ. ञ. नगरं. १० घ. दूरेविनिवसन्तं. ११ ङ. चिन्तयन्त्योथ. १२ क. ख. च. ञ. नूनंहि. ग. नूनंतु. १३ ङ. तद्वै. १४ ग. ज. त्वच्छोकाक्रान्त. १५ ङ. छ. ज. नादोपि. १६ ङ. च. छ. झ. ञ. ट. र्मुक्तस्त्वत्प्रवासने. १७ क. ग. घ. ञ. ज. रथस्थं. १८ ख. घ—ज. ञ. ट. निशम्य. १९ घ. जनाः.

अहं किंचापि वक्ष्यामि देवीं तव सुतो मया ॥ नीतोसौ मातुलकुलं संतापं मा कृथा इति ॥ ४५ ॥
असत्यमपि नैवाहं ब्रूयां वचनमीदृशम् ॥ कथमप्रियमेवाहं ब्रूयां सत्यमिदं वचः ॥ ४६ ॥
मम तावन्नियोगस्थास्त्वद्बन्धुजनवाहिनः ॥ कथं रथं त्वया हीनं प्रवक्ष्यन्ति हयोत्तमाः ॥ ४७ ॥
तन्न शक्ष्याम्यहं गन्तुमयोध्यां त्वदृतेऽनघ ॥ वनवासानुयानाय मामनुज्ञातुमर्हसि ॥ ४८ ॥
यदि मे याचमानस्य त्यागमेव करिष्यसि ॥ सरथोऽग्निं प्रवेक्ष्यामि त्यक्तमात्र इह त्वया ॥ ४९ ॥
भविष्यन्ति वने यानि तपोविघ्नकराणि ते ॥ रथेन प्रतिबाधिष्ये तानि सत्वानि राघव ॥ ५० ॥
त्वत्कृते न मयाऽवाप्तं रथचर्याकृतं सुखम् ॥ आशंसे त्वत्कृतेनाहं वनवासकृतं सुखम् ॥ ५१ ॥
प्रसीदेच्छामि तेऽरण्ये भवितुं प्रत्यनन्तरः ॥ प्रीत्याऽभिहितमिच्छामि भव मे प्रत्यनन्तरः ॥ ५२ ॥
इमे चापि हया वीर यदि ते वनवासिनः ॥ परिचर्यां करिष्यन्ति प्राप्स्यन्ति परमां गतिम् ॥ ५३ ॥
तव शुश्रूषणं मूर्ध्ना करिष्यामि वने वसन् ॥ अयोध्यां देवलोकं वा सर्वथा प्रजहाम्यहम् ॥ ५४ ॥
न हि शक्या प्रवेष्टुं सा मयाऽयोध्या त्वया विना ॥ राजधानी महेन्द्रस्य यथा दुष्कृतकर्मणा ॥ ५५ ॥
वनवासे क्षयं प्राप्ते ममैष हि मनोरथः ॥ यदनेन रथेनैव त्वां वहेयं पुरीं पुनः ॥ ५६ ॥

। ४४ ॥ यदिप्रियंब्रूयांतदसत्यंभवति यदिचसत्यंब्रूयां तदप्रियंभवति अतःकौसल्यांप्रतिकिमपिवक्तुंनशक्यमित्यभिप्रायेणाह—अहमित्यादिना । देवीमहंकिंवावक्ष्यामि नकिमपिवक्तुंशक्नोमीत्यर्थः । तदेवोपपादयति—तवेत्यादिना । तवासौसुतोमयामातुलकुलंनीतः तस्मात्संतापंमाकृथाइतीदृशमसत्यवचनमप्यहंनैवब्रूयां असत्यवचनप्रतिषेधादितिभावः । सत्यमेववदेत्यत्राह—कथमिति । अप्रियमिदं वनप्रापणरूपंसत्यंवचनंकथं ब्रूयां देव्याहानिप्रसङ्गादितिभावः ॥ ४५—४६ ॥ त्वद्बन्धुजनाः त्वद्वंश्याः । यद्वा त्वं त्वद्बन्धुभूतसीतालक्ष्मणरूपजनौचत्वद्बन्धुजनाः तद्वाहिनः प्रवक्ष्यन्ति वोढारोभविष्यन्ति । वहेर्लृटिरूपं ॥ ४७—४८ ॥ त्यक्तमात्रः तत्क्षणएवत्यक्तः ॥ ४९ ॥ रथेनसाधनेन प्रतिबाधिष्ये अहमेवरथीभूत्वानिवर्तयिष्यामीत्यर्थः । तानिसत्त्वानीतिपाठः । सर्वाणीतिपाठे सत्त्वानीति शेषः ॥ ५० ॥ त्वत्कृते त्वन्निमित्तं । रथचर्याकृतंसुखंमयानावाप्तं राज्याभिषिक्तत्वद्रथचर्याकृतसुखंमया भाग्यहीनेननलब्धं । तथापि त्वत्कृतेन त्वत्साहाय्यकरणेन। वनवासकृतमपिसुखं आशंसे इच्छामि । राज्ये रथचर्याकृतसुखाभावेपि वनेसारथित्वेनपरिचर्याकरणकृतंवापिसुखंममभवत्वितिभावः । यद्वा त्वत्कृतेन त्वयाकृतेनानुग्रहेणेत्यर्थः । रथचर्याकृतं रथप्रेरणकृतं सुखंमयाअवाप्तं । एवंत्वत्कृतेनानुग्रहेणवनवासकृतंसुखमप्यहमाशंसइति ॥ ५१ ॥ प्रत्यनन्तरः समीपवर्ती । मेप्रत्यनन्तरोभवेतिप्रीत्याअभिहितमिच्छामि । त्वत्कर्तृकमभिधानमिच्छामीत्यर्थः । क्रियतामितिमांवदेतिवत् ॥ ५२ ॥ परमांगतिं स्वामिशुश्रूषणादितिभावः ॥ ५३ ॥ मूर्ध्नेत्यस्यसोपचारमितिफलितार्थः । सर्वथा सर्वप्रकारेण ॥ ५४ ॥ महेन्द्रस्यराजधानी स्वर्गः ॥ ५५ ॥ वनवासेक्षयंप्राप्ते वनवासेसमाप्तेसतीत्यर्थः ।

ग्रस्थितमित्यस्यचलिङ्गविपरिणामेनान्यत्राप्यन्वयः । एकस्त्वाशब्दःसर्वादिपठितादन्तप्रकृतिकटावन्तः ॥ ४२ ॥ ति० कथंप्रवक्ष्यन्ति नकथमपिवहन्ति । अतोरथनयनंदुश्शकमितिभावः ॥ ४७ ॥ ती० त्वयाकृतानुग्रहेण रथचर्याकृतं रथप्रेरणकृतंसुखमवाप्तं । वनवासकृतंसुखमाशंसे । अस्यायंभावः । त्वमस्मिन्कुलेऽवतरिष्यसीतिज्ञात्वैवमन्त्रिप्रधानोप्यहंत्वद्रथचर्यासेवाभाग्यंममभविष्यतीतिनिन्द्यमपिसूतकृत्यंमयाङ्गीकृतं । तेनभाग्यवशात्त्वत्सेवासुखंप्राप्तमेव । इतःपरं वनवासकृतंसुखं वनवासेपित्वत्सेवाकृतंसुखं आशंसे प्रार्थयइति ॥ ५१ ॥ ति० देवलोकंवेत्यनेन लब्धक्तानांभक्त्यन्तरायभूतदेवलोकप्राप्तिरपिहेयैवेतिसूचितं । शि० देवलोकं

[पा०] १ क. ख. किंचाद. २ क. संतापस्त्यज्यतामिति. ३ ङ. झ. ञ. ट. प्रवाह्यन्ति. ४ क. ख. त्वामृते. ५ ज. प्रतिबाधिष्ये. ६ क. ख. घ—छ. झ. ञ. ट. सर्वाणि. ७ ख. त्वत्कृतेहि. च. त्वत्कृतेतु. ८ ग. घ. ङ. छ—ट. मयाप्राप्तं. ९ ख. ङ. च. छ. झ. ञ. ठ. इमेपिच. १० घ. नव्रजाम्यहं. ११ ग. प्रवेष्टुंशक्या. १२ ग. ज. कारिणा. १३ क. ममैवहि. १४ क—घ. वहेयंत्वां.

चतुर्दश हि वर्षाणि सहितस्य त्वया वने ॥ [1]क्षणभूतानि यास्यन्ति [2]शतसंख्यान्यतोऽन्यथा ॥ ५७ ॥
[3]भृत्यवत्सल तिष्ठन्तं भर्तृपुत्रगते पथि ॥ भक्तं भृत्यं स्थितं स्थित्यां [4]त्वं न मां हातुमर्हसि ॥ ५८ ॥
एवं बहुविधं दीनं याचमानं पुनःपुनः ॥ रामो भृत्यानुकम्पी तु सुमन्त्रमिदमब्रवीत् ॥ ५९ ॥
जानामि परमां [5]भक्तिं मयि ते भर्तृवत्सल ॥ शृणु [6]चापि यदर्थं त्वां प्रेषयामि पुरीमितः ॥ ६० ॥
[7]नगरीं त्वां गतं दृष्ट्वा जननी मे यवीयसी ॥ [8]कैकेयी प्रत्ययं गच्छेदिति रामो वनं गतः ॥ ६१ ॥
[9]परितुष्टा हि सा देवी वनवासं गते मयि ॥ राजानं नातिशङ्केत मिथ्यावादीति धार्मिकम् ॥ ६२ ॥
एष मे प्रथमः [10]कल्पो यदम्बा मे यवीयसी ॥ भरतारक्षितं [11]स्फीतं पुत्रराज्यम[11]वाप्नुयात् ॥ ६३ ॥
मम प्रियार्थं राज्ञश्च [12]सरथस्त्वं पुरीं व्रज ॥ [13]संदिष्टश्चासि यानर्थांस्तांस्तान्ब्रूयास्तथातथा ॥ ६४ ॥
इत्युक्त्वा वचनं सूतं सान्त्वयित्वा पुनःपुनः ॥ गुहं वचनम[14]क्लीबो रामो हेतुमदब्रवीत् ॥ ६५ ॥
नेदानीं गुह [15]योग्योऽयं वासो मे सजने वने ॥ [16]अवश्यं ह्याश्रमे वासः कर्तव्यस्तद्गतो विधिः ॥ ६६ ॥
सोहं गृहीत्वा नियमं तपस्विजनभूषणम् ॥ हितकामः पितुर्भूयः सीताया लक्ष्मणस्य च ॥
[17]जटाः कृत्वा गमिष्यामि न्यग्रोधक्षीरमानय ॥ ६७ ॥

वहेयमितियत् अयंमेमनोरथइतिसंबन्धः ॥ ५६ ॥ त्वयासहितस्येति ममेतिशेषः । क्षणभूतानि क्षणतुल्यानि । अतोन्यथा त्वद्विरहइत्यर्थः । शतसंख्यानि भवेयुरितिशेषः । शतगुणितानिभविष्यन्तीतिभावः ॥ ५७ ॥ हेभृत्यवत्सल भक्तं भृत्यं अतएवस्थित्यांमर्यादायांस्थितं अस्खलितमर्यादं । अतएव भर्तृपुत्रगते स्वामिपुत्रेणत्वयागते पथि वनगमने । तिष्ठन्तं निश्चितत्वदनुगमनंमां त्वंहातुंनार्हसि ॥ ५८—६० ॥ नगरीमित्यादिश्लोकत्रयमेकान्वयं । रामोवनंगतइति कैकेयी प्रत्ययं विश्वासंगच्छेत् धार्मिकंराजानंमिथ्यावादीतिनातिशङ्केत । भरतारक्षितं भरतेनआसमन्तात् रक्षितंपुत्रराज्यं अवाप्नुयादितिचयत् एषः मेप्रथमः कल्पः कर्तव्येषुप्रयोजनेषुमुख्यः । "मुख्यःस्यात्प्रथमःकल्पः" इत्यमरः ॥ ६१—६३ ॥ यानर्थान् संदिष्टोसि तानर्थान्दशरथादीनुद्दिश्य तथातथाब्रूयाइतिसंबन्धः ॥ ६४ ॥ हेतुमत् युक्तिमत् ॥ ६५ ॥ नेदानीमित्यनेनइहवस्तव्यमितिगुहप्रार्थनंद्योतितं । मेसजने सजनप्रदेशे । अयंवासोनयोग्यः । तद्गतोविधिः आश्रमवासगतः तद्विषयइत्यर्थः । विधिः पितृनियमनं ॥ ६६ ॥ सोहं । "सप्तसप्तचवर्षाणिदण्ड-

---

देवलोकगमनंच । प्रजहामि त्यजामि । एतेन यथेच्छंदेवलोकमप्ययंगच्छतीतिव्यञ्जितं ॥ ५४ ॥ **स०** दीनमिति क्रियाविशेषणं । अनुकंपशब्दोकारान्तोप्यस्ति । "भक्तानुकंपादतिशुद्धसंविदात्रे" इत्यत्रतथोक्तेः । एवंच "अतइनिठनौ" इत्यनेनभृत्यानुकंपीति साधुः । शिखादेराकृतिगणत्वेन तत्स्थत्वाद्वाऽऽर्षत्वाद्वासाधुरित्यप्याहुः । भृत्यानुकंपस्त्विवतिपाठेतुनकश्चिद्दोषः ॥ ५९ ॥ **ति०** अतिशङ्का अन्यथाशङ्का तांनकुर्यात् । **स०** विपरीते त्वद्गमनाभावेमयिवनवासंगतेपि । नेति नगतइतितुष्टिहीनासाकैकेयी धार्मिकंराजानंमिथ्यावादीति अतिशङ्केत । अतस्त्वयागन्तव्यमितिभावः । यद्वा विपरीते सुमन्त्रस्यतत्रस्थित्यपेक्षयाविपरीते अयोध्यांप्रतिगमने । तुष्टिहीनेति वस्तुस्थितिकथनं । मयिवनवासंगतेसतिधार्मिकंराजानंमिथ्यावादीतिनातिशङ्केतेतियथास्थानमेवनञोऽन्वयः ॥ ६२ ॥ **शि०** वृत्तं प्रशस्तवृत्तिसत् । **स०** एषः राजविषयेशङ्काभावरूपः । प्रथमःकल्पः त्वद्गमनेप्रथमंप्रयोजनं । प्रयोजनान्तरंचाह—**यदिति** । मेयवीयसीअंबा भरतेनआरक्षितं सम्यग्रक्षितं पुत्रराज्यं अवाप्स्यते प्राप्नोति । भरतागमनस्यापित्वद्गमनाधीनत्वादितिभावः ॥ ६३ ॥ **शि०** अक्लीबं क्लीबतानिवर्तकं ॥ ६५ ॥ **शि०** सजने स्वकीयजनसहिते । आश्रमे स्वकीयजनागम्यवनपर्णशालादौ । **स०** तद्गतः आश्रमवासायोग्यः । विधिः जटाजूटबन्धादिश्चकर्तव्यः ॥ ६६ ॥ **ती०** सीताया लक्ष्मणस्यचहितकामोऽहं पितुर्भूयः अतिशयेनहितकामस्सन् । वन्याहाराधश्शयनादिनियमंगृहीत्वा [illegible]कृत्वागमिष्यामि । **ति०**

[**पा०**] १ घ. यास्यन्तिक्षणभूतानि. २ क. ख. ग. च. ज. ञ. शतशस्तुततो. ३ ग. घ. ज. भक्तवत्सल. ४ च. छ. झ. ञ. ट. नमांत्वं. ङ. नमांहातुंत्वं. ५ ङ. छ. झ. ट. भक्तिमर्हते. ६ ङ. वापि. ७ क. नगरं. ८ ङ. छ. झ. ठ. विपरीते तुष्टिहीना. ख. परितुष्टातु. ञ. यदितुष्टाहि. ९ क. घ. कामो. १० ङ. छ. झ. ट. वृत्तं. ११ ङ. छ. झ. ट. मवाप्स्यते. १२ ङ. छ. झ. ञ. ट. सुमन्त्रत्वं. १३ क. ग—छ. झ. ञ. ट. संदिष्टश्चापि. १४ घ. छ. ट. मक्लीबं. १५ क. योग्योमेवासोयं. १६ ङ. छ. झ. अवश्यमाश्रमे. १७ ख. ग. घ. च. ञ. [illegible]कृत्वा.

तत्क्षीरं राजपुत्राय गुहः क्षिप्रमुपाहरत् ॥ लक्ष्मणस्यात्मनश्चैव रामस्तेनाकरोज्जटाः ॥ ६८ ॥
दीर्घबाहुर्नरव्याघ्रो जटिलत्वमधारयत् ॥ ६९ ॥
तौ तदा चीर[1]वसनौ जटामण्डलधारिणौ ॥ अशोभेतामृषिसमौ भ्रातरौ रामलक्ष्मणौ ॥ ७० ॥
ततो वैखानसं मार्ग[2]मास्थितः सहलक्ष्मणः ॥ व्रतमादिष्टवान्रामः स[3]हायं गुहमब्रवीत् ॥ ७१ ॥
अप्रमत्तो बले कोशे दुर्गे जनपदे तथा ॥ भवेथा गुह रा[4]ज्यं हि दुरारक्षतमं मतम् ॥ ७२ ॥
त[5]तस्तं स[6]मनुज्ञाय गुहमिक्ष्वाकुनन्दनः ॥ जगाम तूर्णमव्यग्रः स[7]भार्यः सहलक्ष्मणः ॥ ७३ ॥
स तु दृष्ट्वा नदीतीरे नावमिक्ष्वाकुनन्दनः ॥ तितीर्षुः शीघ्रगां गङ्गामिदं ल[8]क्ष्मणमब्रवीत् ॥ ७४ ॥
आरोह त्वं नरव्याघ्र स्थितां नावमिमां शनैः ॥ सीतां चारोपयान्वक्षं परिगृह्य मनस्विनीम् ॥७५॥

कारण्यमाश्रितः । अभिषेकमिमंत्यक्त्वाजटाजिनधरो- वस " इतिकैकेय्यानियुक्तोहं । तपस्विजनभूषणं तपस्विजनातिशयावहं । नियमं अधःशयनादिकं । गृहीत्वा अङ्गीकृत्य । पितुःसीतायालक्ष्मणस्यच भूयो हितकामः अतिशयेनपरलोकसाधनपुण्यकामःसन् जटाः कृत्वागमिष्यामि तदर्थंन्यग्रोधक्षीरमानय । जटाकरणस्यसीतालक्ष्मणयोःप्रियत्वाभावेपिहितत्वम- स्त्येव तयोरपितेनधर्मातिशयात् । रामजटाकरणे हिसहधर्मचारिण्याःसीतायाअपिधर्मःसिद्धः । लक्ष्म- णस्यचतदनुरोधेनजटाकरणाद्धर्मः । यद्वा हितकामः नतुप्रियकामइत्यर्थः ॥ ६७ ॥ लक्ष्मणस्यचेति । तेना- पिभ्रातृवदवस्थानस्यसंकल्पितत्वादितिभावः । अकरो- दितिलक्ष्मणेप्रयोज्यकर्तृत्वंबोध्यं ॥६८॥ ऋषिःखिद्य- ति—दीर्घबाहुरिति । जटिलत्वं जटावत्त्वं। तुन्दादि- त्वादिलच् ॥ ६९ ॥ तस्यामप्यवस्थायांदर्शनीयतमत्व- माह—तावित्यादिश्लोकेन ॥ ७० ॥ विखननामा ब्रह्मनखोत्पन्नःकश्चिन्मुनिः । "येनखास्तेवैखानसाः । येवालास्तेवालखिल्याः" इत्युक्तेः । सिंहादिशब्दव- द्वर्णविपर्ययः । तेनप्रोक्तंवैखानसं प्रोक्तार्थेअण् । मार्ग धर्ममित्यर्थः । वानप्रस्थधर्ममितियावत् । आस्थितः आश्रितः । व्रतं ब्रह्मचर्यादिनियमं । आदिष्टवान् अ- ङ्गीकृतवान् । नन्वत्र सर्वोवानप्रस्थधर्मोऽङ्गीकृतः उत यःकश्चित् । नाद्यः । तस्यपुनर्गार्हस्थ्यग्रहणायोगात् । आरूढपतितोहिसइत्युत्तराश्रमप्राप्तस्यपुनःपूर्वाश्रमाव- रोहोहिनिन्दितः । नद्वितीयः । गृहस्थस्यवनस्थासाधा- रणजटाधारणादिकरणेशाखारण्डवदाश्रमरण्डताप- त्तेः । मैवं । पितृनियोगकृतसांकल्पिकनियमविशेषस्य युधिष्ठिरादिसंन्यासधर्मवदविरुद्धत्वात् । उक्तंहिमनुना "सम्यक्संकल्पजःकामोधर्ममूलमिदंस्मृतं" इति । स- हायं गङ्गावतरणसहायं । सखायमितिचपाठः ॥७१॥ बले चतुरङ्गबले । कोशे अर्थौघे । "कोशोस्त्रीकुड्मले खड्गपिधानेर्थौघदिव्ययोः" इत्यमरः । दुरारक्षं दुःखे- नआसमन्तात्रक्षितुंशक्यं [दुःखेनआरक्षारक्षणंयस्य तद्दुरारक्षं । अतिशयेनदुरारक्षंदुरारक्षतमं । भवेथा इत्यार्षमात्मनेपदम्] ॥७२ ॥ अव्यग्रः अव्यासक्तः । "व्यग्रोव्यासक्तआकुलः " इत्यमरः ॥ ७३—७४ ॥ स्थितामिमांनावंपरिगृह्यसीतां शनैरारोपय । अन्वक्षं अनुपदं । त्वंचारोहेतिसंबन्धः । यद्वा त्वंप्रथममारोह अन्वक्षंमनस्विनींसीतांपरिगृह्य कराग्रयोर्गृहीत्वा आरोपयेत्युपचारोक्तिः । मनस्विनीमितिनिन्दायांम-

सोहंनियमंगृहीत्वा सीतायालक्ष्मणस्यचानुमत्या जटाःकृत्वागमिष्यामि । यत्तु सीतायाहितकामइति तन्न । जटाधारणेनसीताहिता- प्रसिद्धेः । अनुमतिस्त्वपेक्षितैव । अन्यथासंन्यासबुद्ध्यापरमदुःखापत्तेः । स० सीतायालक्ष्मणस्यपितुश्चहितकामः । यद्यपिपितुरि- त्यादौचमुख्याभवितव्यं । तथाप्यभिहितहितस्यहितत्वेनाभिप्रेणनाभावात् पष्ठ्युपपत्तिः । अतएव यत्तुसीतायाहितकामइतिन जटाधारणेनसीताहिताप्रसिद्धेरितिव्याख्यानान्तरंदूषयतानागोजिभट्टेन सीतायाअनुमत्येतियदध्याहृत्यव्याख्यातंतत्परास्तं । अस्त- दुष्करीत्यासीताहिताप्रसिद्धेर्भूषणत्वात् । जटाधारणंदशरथहितमितिमत्वा सीताहिताप्रसिद्धेरितिवक्तुर्लोकोत्तरप्रज्ञत्वात् ॥ ६७ ॥ ति० वैखानसंमार्गं वानप्रस्थाश्रमधर्मं । आस्थितः प्राप्तुंकृतबुद्धिःसन् व्रतं वानप्रस्थव्रतं । आदिष्टवान् । अत्रगङ्गा[illegible]तीर्थप्राप्तौ अग्रेप्रयागरूपतीर्थप्राप्तौ तदग्रेपितृमरणश्रवणेपियन्मुण्डनाकरणंरामलक्ष्मणयोः तेनानेनपरकृतिरूपार्थवादेनक्षत्रियाणांतीर्थादिषु-

[पा०] १ ङ. छ. झ. ट. चीरसंपन्नौ. २ च. ञ. मास्थाय. ३ क. ख. ग. ज. सखायं. ४ ङ. च. ज. राज्यंते. ५ ग. ततस्तु. ६ ङ. च. छ. झ. ञ. ट. समनुज्ञाप्य. ७ ग. घ. च. ज. झ. सहभार्यःसलक्ष्मणः. ८ ङ. च. छ. झ. ट. वचनं.

स भ्रातुः शासनं श्रुत्वा सर्वमप्रतिकूलयन् ॥ आरोप्य मैथिलीं पूर्वमारुरोहात्मवांस्ततः ॥ ७६ ॥
अथारुरोह तेजस्वी स्वयं लक्ष्मणपूर्वजः ॥ ततो निषादाधिपतिर्गुहो ज्ञातीनचोदयत् ॥ ७७ ॥
राघवोपि महातेजा नावमारुह्य तां ततः ॥ ब्रह्मवत्क्षत्रवच्चैव जजाप हितमात्मनः ॥ ७८ ॥
आचम्य च यथाशास्त्रं नदीं तां सह सीतया ॥ प्रणमत्प्रीतिसंहृष्टो लक्ष्मणश्चामितप्रभः ॥ ७९ ॥
अनुज्ञाय सुमन्त्रं च सबलं चैव तं गुहम् ॥ आस्थाय नावं रामस्तु चोदयामास नाविकान् ॥ ८० ॥
ततस्तैश्चोदिता सा नौः कर्णधारसमाहिता ॥ शुभस्फ्यवेगाभिहता शीघ्रं सलिलमत्यगात् ॥ ८१ ॥
मध्यं तु समनुप्राप्य भागीरथ्यास्त्वनिन्दिता ॥ वैदेही प्राञ्जलिर्भूत्वा तां नदीमिदमब्रवीत् ॥ ८२ ॥
पुत्रो दशरथस्यायं महाराजस्य धीमतः ॥ निदेशं पारयित्वेमं गङ्गे त्वदभिरक्षितः ॥ ८३ ॥
चतुर्दश हि वर्षाणि समग्राण्युष्य कानने ॥ भ्रात्रा सह मया चैव पुनः प्रत्यागमिष्यति ॥ ८४ ॥
ततस्त्वां देवि सुभगे क्षेमेण पुनरागता ॥ यक्ष्ये प्रमुदिता गङ्गे सर्वकामसमृद्धिनी ॥ ८५ ॥
त्वं हि त्रिपथगा देवि ब्रह्मलोकं समीक्षसे ॥ भार्या चोदधिराजस्य लोकेऽस्मिन्संप्रदृश्यसे ॥ ८६ ॥
सा त्वां देवि नमस्यामि प्रशंसामि च शोभने ॥ प्राप्तराज्ये नरव्याघ्रे शिवेन पुनरागते ॥ ८७ ॥

तुप् । भीरुमितियावत् । पूर्वारोहणेऽसौ विभीयादिति भावः ॥ ७५ ॥ लक्ष्मणस्तुनिपुणतयाप्रथमंसीतामारोप्यपश्चात्स्वयमारूढइत्याह—स भ्रातुरिति । अप्रतिकूलयन् यथातथावाप्यारोहणशासनमनुतिष्ठन् । आत्मवान् रामाशयज्ञइत्यर्थः । पूर्वमनस्विनीमित्युक्तं इदानीमात्मवानित्युक्तं उभाभ्यामारोपणेदोपशङ्काराहित्यंचोक्तम् ॥ ७६ ॥ ज्ञातीन् बन्धून् । अचोदयत् नौःपारंनीयतामित्यचोदयत् ॥ ७७ ॥ ब्रह्मवत्क्षत्रवदित्यर्हार्थेवतिप्रत्ययः । ब्राह्मणार्हक्षत्रियार्हं आत्मनोहितं जजाप दैवींनावमित्यादिब्रह्मक्षत्रसाधारणमन्त्रंजजापेत्यर्थः । यद्वा ब्रह्मक्षत्रशब्दयुक्तंमन्त्रंजजापेत्यर्थः । सचमन्त्रः सुत्रामाणमित्यादिः । तत्रह्यरिष्टनेमिः पृतनाजिदितिब्रह्मक्षत्रशब्दौश्रुतौ ॥ ७८ ॥ पूर्वोक्तंनावारोहणंविवृण्वन्नाह—आचम्येत्यादिना ॥७९—८०॥ कर्णधारसमाहिता समाहितकर्णधारा । शुभस्फ्यवेगाभिहता शुभानांस्फ्यानामरित्राणां वेगेनाभिहताप्रणुन्ना ॥८१—८२॥ निदेशं चतुर्दशवर्षावधिकवनवासविषयनियोगं । पारयित्वा निर्विघ्नं परिसमाप्य । उष्यउषित्वा । प्रत्यागमिष्यति यदेतिशेषः । ततः तदा । सुभगे सुकीर्ते । "भगःश्रीकाममाहात्म्यवीर्ययत्नार्ककीर्तिषु" इत्यमरः । क्षेमेण कुशलेनसह । यक्ष्ये पूजयिष्यामि । सर्वकामसमृद्धिनीति व्रीह्यादित्वादिनिः ॥८३—८५॥ ब्रह्मलोकंसमीक्षसे ब्रह्मकमण्डल्वांद्रवीभूतधर्मरूपतयास्थित्वाब्रह्मप्रक्षालितविष्णुपादोद्भवत्वादितिभावः । अतएव विष्णुपादोद्भवामितिपूर्वमुक्तं ॥ ८६ ॥ प्रशंसामि स्तौमि । शिवेन क्षेमेण । पेशलं रम्यं । तवप्रि-

मुण्डननिषेधंप्रतीमइत्यलम् ॥ ७१ ॥ **ती०** जजाप "सुत्रामाणमृचानावमारुहेदपउत्तरेत्" इतिक्षत्रियाधिकारेणस्मरणात् "दैवीं नावं" इत्यादिब्रह्मक्षत्रसाधारणंमन्त्रंजजापेत्यर्थः । **शि०** ब्रह्मवत् वेदप्रवर्तकः महातेजाराघवः क्षत्रवत् क्षत्रियकुलविहितंयथा भवतितथा । आत्मनोहितं स्वप्रापकंमन्त्रविशेषंजजाप । एतेन तन्मन्त्रोच्चारणेरामस्यप्रीत्यतिशयोध्वनितः ॥ ७८ ॥ **ति०** गङ्गाया महद्देवतात्वात्स्त्रीदेवतात्वाच्चसीताप्रार्थितवतीत्याह—**मध्यमिति** । **शि०** अनिन्दिता आश्रितानांनिन्दितत्वनिवर्तिका ॥ ८२ ॥ **ति०** पालयतु पारयतु समापयत्वितियावत् । रलयोःसमानश्रुतित्वात् ॥ ८३ ॥ **ति०** सर्वकामसमृद्धिनी सर्वकामसमृद्धं सर्वकामपूरणमस्याअस्ति दातव्यत्वेनेत्यर्थः ॥८५॥ **ति०** समक्षसे व्याप्नोषि । अक्षूव्याप्तौसंघातेच । **स०** त्रिपथगेत्रीन्पथान्गच्छतीतित्रिपथगा । "वाटःपथश्चमार्गश्च" इतित्रिकाण्डशेषामरः । यद्वा त्रयाणां पथांसमाहारस्त्रिपथं भूर्भुवस्स्वराख्यं तेनगच्छतीतितथा तस्यास्संबुद्धिः । ब्रह्मलोकं सत्यलोकं ॥ ८६ ॥

[पा०] १ ज. तदा. २ घ. तक्षत्रवच्चापि. ३ क. ख. च. ज. ञ. प्रणमत्प्रीतिसंहृष्टो. ङ. झ. ट. प्रणमत्प्रीतिसंतुष्टो. घ. प्रणमत्प्रीतिसंयुक्तो. ४ ख. ङ. छ. झ. ट. लक्ष्मणश्चमहारथः. ५ ङ. छ. झ. ट. श्चालितानौका. च. ज. ञ. श्चोदितानौका. ६ च. ञ. गंगासलिलं. ७ क. अत्ययात्. ८ च. पालयित्वैव. ङ. छ. झ. ञ. ट. पालयत्वेनं. ज. पारयित्वेनं. क. ख. पारयत्वेव. ग. पारयत्वेनं. ९ च. प्रमुदिते. १० च. ज. कामप्रदायिनि. क—घ. कामप्रमाथिनि. ११ ङ. च. छ. झ. ञ. ट. त्रिपथगे १२ झ. समक्षसे. १३ क. तस्त्वां.

गवां [1]शतसहस्रं च वस्त्राण्यन्नं च [2]पेशलम् ॥ ब्राह्मणेभ्यः प्रदास्यामि तव प्रियचिकीर्षया ॥ ८८ ॥
सुरा[3]घटसहस्रेण मांसभूतौदनेन च ॥ यक्ष्ये त्वां [4]प्रीयता देवि पुरीं पुन[5]रुपागता ॥ ८९ ॥
यानि त्वत्तीरवासीनि [6]दैवतानि [7]वसन्ति च ॥ तानि सर्वाणि यक्ष्यामि तीर्थान्यायतनानि च ॥ ९० ॥
पुनरेव महाबाहुर्मया भ्रात्रा च सङ्गतः ॥ अयोध्यां वनवासात्तु प्रविशत्वनघोऽनघे ॥ ९१ ॥
तथा संभाषमाणा सा सीता गङ्गामनिन्दिता ॥ दक्षिणा दक्षिणं तीरं क्षिप्रमेवाभ्युपागमत् ॥ ९२ ॥
[8]तीरं तु समनुप्राप्य नावं हित्वा नरर्षभः ॥ प्रातिष्ठत सह भ्रात्रा वैदेह्या च परंतपः ॥ ९३ ॥
[9]अथाब्रवीन्महाबाहुः सुमित्रा[10]नन्दवर्धनम् ॥ भव संरक्षणार्थाय [11]सजने विजनेऽपि वा ॥ ९४ ॥
अवश्यं रक्षणं [12]कार्यमदृष्टे विजने वने ॥ अग्रतो गच्छ सौमित्रे सीता त्वामनुगच्छतु ॥ ९५ ॥
[13]पृष्ठतोऽहं गमिष्यामि [14]त्वां च सीतां च पालयन् ॥ [15]अन्योन्यस्येह नो रक्षा कर्तव्या पुरुषर्षभ ॥ ९६ ॥
न हि [16]तावदतिक्रान्ता सुकरा काचन क्रिया ॥ अद्य दुःखं तु वैदेही वनवासस्य वेत्स्यति ॥ ९७ ॥
प्रनष्टजनसंबाधं [17]क्षेत्रारामविवर्जितम् ॥ विषमं च प्रपातं च [18]वनं ह्यद्य प्रवेक्ष्यति ॥ ९८ ॥
श्रुत्वा रामस्य वचनं प्रतस्थे लक्ष्मणोऽग्रतः ॥ अनन्तरं च सीताया राघवो रघुनन्दनः ॥ ९९ ॥

गतं तु गङ्गापरपारमाशु रामं सुमन्त्रः [19]प्रततं निरीक्ष्य ॥
अध्वप्रकर्षाद्विनिवृत्तदृष्टिर्मुमोच बाष्पं व्यथितस्तपस्वी ॥ १०० ॥

यचिकीर्षया ब्राह्मणमुखेनहिदेवतानांग्रहणमितिभावः ॥ ८७—८८ ॥ मांसभूतौदनेन मांसरूपान्नेनेतियावत् ॥८९॥ तीर्थानि मणिकर्णिकादीनि । आयतनानि काश्यादीनि ॥ ९०—९३ ॥ भवेति सावधानइति शेषः । अदृष्टे अदृष्टपूर्वे । नः आवयोः । "अस्मदोद्वयोश्च" इतिबहुवचनं । तावच्छब्दःसाकल्यार्थकः । अन्योन्यस्यसाकल्येनरक्षाकर्तव्येतिसंबन्धः । यत्नस्यावश्यकर्तव्यत्वेयुक्तिमाह—नहीति । अतिक्रान्ता अतिक्रान्तकाला । काचनक्रिया नसुकराहि पुनःसंधातुंन शक्याहीत्यर्थः । तस्मात्काले सावधानतयास्माभिः स्थातव्यमितिभावः । संबाधः संमर्दः । क्षेत्रं शाल्यादिवृद्धिस्थलं । विषमं निम्नोन्नतप्रदेशयुक्तं । प्रपतन्त्यस्मिन्निितिप्रपातः गर्तः । हियस्मादद्यप्रवेक्ष्यति तस्माद्दुःखंवेत्स्यतीतिसंबन्धः । इतिसुमित्रानन्दवर्धनमब्रवीदित्यन्वयः ॥ ९४—९९ ॥ गतं गङ्गापरपारं गङ्गाया अपरंपारं प्रततंनिरीक्ष्य अविच्छिन्नंनिरीक्ष्येत्यर्थः । तपस्वी संतापयुक्तः । तपसंतापइतिधातुः । प्रतपन्निति पाठे तापवानित्यर्थः । तपस्वी शोचनीयः । अध्व-

शि० ब्राह्मणेभ्यः त्वत्तीरवर्तिविप्रेभ्यः ॥८८॥ शि० सुराघटसहस्रेण सुरेषुदेवेषुनघटन्तेनसन्तीत्यर्थः । तेषां सहस्रेण सहस्रसंख्याकसुरदुर्लभपदार्थे त्यर्थः । मांसभूतौदनेन मानास्तिअंसोराजभागोयस्यां साचसाभूःपृथ्वीच उतंवस्त्रंचओदनंचएतेषांसमाहारः तेनचत्वांयक्ष्ये । अ ःप्रीयतां । दन्त्योपधोप्यंसशब्दोभागवाचीकोशेप्रसिद्धः ॥८९॥ ति० दक्षिणाभर्तुरनुकूला ॥ ९२ ॥ स० संरक्षणार्थाय तद्रूपप्रयोजनाय । शि० सजने परजनसहिते ॥ ९४ ॥ ति० अग्रतइति एवंचकार्यवशाल्लघोरप्यग्रतोगमनमदोषायेतिध्वनितं । मार्गएव ्धोरग्रतोगमनमदोषायेत्यन्ये । एवंरूपविश्वसनीयेतिध्वनितं ॥ ९५ ॥ ति० नोस्माकं । सीतयापि पातिव्रत्यमहिम्नाइतररक्षणं । स० सीतयापि सेवयारक्षाकर्तव्या ॥ ९६ ॥ ति० कुतएवमतियत्नोतआह—**नहीति** । असुकरा दुष्करा । काचन क्रिया अतिक्रान्तान । किंत्वितःप्रभृतिदुष्करक्रियारंभइतिभावः । यद्वा काचनक्रिया अपायलक्षणाअतिक्रान्ता अस्मानतिक्रम्यप्राप्ताचेत्ततोरक्षा सुकरानहि । प्रहृतंप्रहृतमेवेतिन्यायादित्यर्थः । शि० ययावैदेह्या असुकरा अतिप्रयत्नसाध्या । काचनक्रियां नातिक्रान्ता नकृतेत्यर्थः । सावैदेही अद्य गमनसमये वनवासस्यवनवारासंबन्धिदुःखं वनगमनजनितखेदं वेत्स्यति अयंखेदोनिवार्यइतितात्पर्यम् ॥ ९७ ॥

[पा०] १ क. ख. ग. ज. शतसहस्राणि. २ क. च. शोभनं. ३ घ. भाण्डसहस्रेण. ४ क. ङ. छ. झ. ञ. ट. प्रीयतां. ५ ख. घ. रिहागता. ६ ङ. झ. ट. दैवतानिचरन्तिहि. ७ क. ग. घ. ञ. वसन्तिहि. ख. महान्तिच. ८ घ. तीरेहि. ९ घ. ततो. १० क. ख. नन्दिवर्धनं. ११ क. सीतायाविजनेवने. १२ ङ. छ. झ. ट. कार्यमद्भिर्विजने. १३ ङ. च. छ. झ. ञ. ट. पृष्ठतोनु. १४ ङ. च. छ. झ. ञ. ट. सीतांत्वांचानु. १५ क. ख. घ. ङ. छ. झ. ञ. ट. अन्योन्यस्यहि. ग. अन्योन्यस्यचनौ. १६ घ. च. चिरंति. १७ ख. क्षेत्रग्राम. १८ ङ. च. ज. झ. ञ. वनमद्य. ट. वनमद्यगमिष्यति. १९ ङ. च. छ. झ. ञ. ट. सततं.

स लोकपालप्रतिमप्रभाववांस्तीर्त्वा महात्मा वरदो महानदीम् ॥
ततः समृद्धाञ्शुभसस्यमालिनः क्रमेण वत्सान्मुदितानुपागमत् ॥ १०१ ॥
तौ तत्र हत्वा चतुरो महामृगान्वराहमृश्यं पृषतं महारुरुम् ॥
आदाय मेध्यं त्वरितं बुभुक्षितौ वासाय काले ययतुर्वनस्पतिम् ॥ १०२ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे द्विपञ्चाशः सर्गः ॥ ५२ ॥

त्रिपञ्चाशः सर्गः ॥ ५३ ॥

रामेणरात्रौतरुमूलेलक्ष्मणंप्रतिदशरथाद्युपालंभगर्भितबहुविधवचनोक्तिपूर्वकंकैकेयीतःकौसल्याद्युपद्रवनिरसनायपुनरयोध्यांप्रतिनिवर्तनोक्तिः ॥ १ ॥ लक्ष्मणेनरामंप्रतिस्वस्यपरित्यागेसीताद्दृष्टान्तेनस्वजीवनाभावनिर्धारणोक्तौरामेणतस्यस्वेनसह संततवनवासाङ्गीकरणम् ॥ २ ॥

स तं वृक्षं समासाद्य संध्यामन्वास्य पश्चिमाम् ॥ रामो रमयतांश्रेष्ठ इति होवाच लक्ष्मणम् ॥ १ ॥
अद्येयं प्रथमा रात्रिर्याता जनपदाद्बहिः ॥ या सुमन्त्रेण रहिता तां नोत्कण्ठितुमर्हसि ॥ २ ॥
जागर्तव्यमतन्द्रिभ्यामद्यप्रभृति रात्रिषु ॥ योगक्षेमं हि सीताया वर्तते लक्ष्मणावयोः ॥ ३ ॥
रात्रिं कथंचिदेवेमां सौमित्रे वर्तयामहे ॥ उपावर्तामहे भूमावास्तीर्य स्वयमार्जितैः ॥ ४ ॥
स तु संविश्य मेदिन्यां महार्हशयनोचितः ॥ इमाः सौमित्रये रामो व्याजहार कथाः शुभाः ॥५॥

प्रकर्षात् मार्गविप्रकर्षात् । विनिवृत्तदृष्टिः विनिवृत्तदृष्टिव्यापारः ॥ १०० ॥ वत्सान् वत्सदेशान् । मत्स्यानितिपाठोलेखकप्रमादकृतः । इत्थंहिदेशव्यवस्थादृश्यते । गङ्गायमुनयोर्मध्येप्रयागप्रदेशोवत्सदेशः । ततः पश्चिमभागेपाञ्चालः । यमुनादक्षिणतीरेशूरसेनदेशः । तस्मात्पश्चिमतोमत्स्यदेशइति । सलोकपालप्रतिमप्रभाववानितिपाठः । अन्यथावृत्तभङ्गःस्यात् ॥ १०१ ॥ चातुर्विध्यमेवाह—वराहमित्यादि । ऋश्यादयोहरिणभेदाः । ऋश्यंपृषतंमहारुरुंच आदाय स्वीकृत्येत्यर्थः । मेध्यमितिऋश्यादिसर्वविशेषणं । काले सायंकाले । त्वरितत्वोक्तिः सायंकालत्वात् बुभुक्षितत्वाच्च । द्विवचनेनसीतांकुत्रचिद्वनस्पतिमूलेनिक्षिप्यमृगग्रहणार्थंगत्वापुनरागतावितिगम्यते ॥१०२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने द्विपञ्चाशः सर्गः ॥ ५२ ॥

अत्रमृगमांसादनमस्त्रमयात्प्रागर्थसिद्धं । अन्वास्य उपास्य ॥१॥ याता प्राप्ता । अद्येत्यस्यनोत्कण्ठितुमर्हसीत्यनेनान्वयः । उत्कण्ठा दुःखस्मरणं । तांप्रतीति शेषः ॥ २ ॥ योगक्षेमं पालनमितियावत् । आवयोर्वर्तते अस्मदधीनमित्यर्थः ॥ ३ ॥ कथंचिदेवेमामिति प्राथमिकत्वादितिभावः । इमां शय्यासंपादनात्पूर्वमेवप्राप्तां । स्वयमार्जितैः तृणपर्णैरितिशेषः । उपावर्तामहे शयिष्यामहे । वर्तमानसामीप्येवर्तमानवद्भावः ॥ ४ ॥ संविश्य शयनंसंकल्प्योषित्वा । शयनस्य

शि० तत्र वत्सदेशे वराहादींश्चतुरोमहामृगान्हत्वा खेलनार्थंसंताडय । बुभुक्षितौतौरामलक्ष्मणौ मेध्यं व्रतिभिर्भोक्तव्यंफलादिकमित्यर्थः । आदाय गृहीत्वा । वनस्पतिं वृक्षसमीपंययतुः ॥ १०२ ॥ इतिद्विपञ्चाशस्सर्गः ॥ ५२ ॥

ति० आजनपदादितिच्छेदः । आइतियातेत्यनेनसंबध्यते । रात्रिः आयाता प्राप्ता । **स०** याता आयाता । उपसर्गाणांधातुलीनार्थबोधकत्वस्य "गम्यतेअवगम्यते चरणाभिधानात् विचरणाभिधानात्" इत्यादौदर्शनात् । तांरात्रिं । "कालाध्वनोरत्यन्तसंयोगेद्वितीया" इतिद्वितीया । उत्कण्ठितुं गृहदारादिस्मरणेनचित्तंव्याकुलीकर्तुंनार्हसि ॥ २ ॥ **ति०** नवियतेतन्द्रीययोस्ताभ्यां ।

[पा०] १ क. ख. घ—ट. प्रभावस्तीर्त्वा. २ क. समृद्धांजलसस्यमालिनीं. ग. समृद्धांशुभसस्यमालिनीं. ३ क. ख. ङ. च. छ. झ. ञ. ट. क्षणेन. ४ झ. मर्हति. ५ च. मतन्द्राभ्यां. ६ ग. ङ. छ. ज. झ. ट. योगक्षेमौहि. ङ. च. ञ. योगक्षेमौहि. ७ ख. च. ज. झ. ट. वर्तेते. ८ ङ. छ. झ. ट. अपवर्तामहे. घ. उपवर्तामहे. ९ ङ. च. छ. झ. ञ. ट. स्वयमर्जितैः.

ध्रुवमद्य महाराजो दुःखं स्वपिति लक्ष्मण ॥ कृत[1]कामा तु कैकेयी तुष्टा भवितुमर्हति ॥ ६ ॥
सा[2] हि देवी महाराजं कैकेयी राज्यकारणात् ॥ अपि न च्यावयेत्प्राणान्दृष्ट्वा भरतमागतम् ॥ ७ ॥
[3]अनाथश्च हि वृद्धश्च मया चैव विनाकृतः ॥ किं करिष्यति कामात्मा [4]कैकेयीवशमागतः ॥ ८ ॥
इदं व्यसनमालोक्य राज्ञश्च मतिविभ्रमम् ॥ काम एवार्थधर्माभ्यां गरीयानिति मे मतिः ॥ ९ ॥
को ह्यविद्वानपि पुमान्प्रमदायाः कृते त्यजेत् ॥ छन्दानुवर्तिनं पुत्रं [5]ततो मामिव लक्ष्मण ॥ १० ॥
सुखी बत सभार्यश्च भरतः केकयीसुतः ॥ मुदितान्कोसलानेको यो भोक्ष्यत्यधिराजवत् ॥ ११ ॥
स हि [6]सर्वस्य राज्यस्य [7]सुखमेकं भविष्यति ॥ [8]ताते च वयसाऽतीते मयि चारण्यमा[9]स्थिते ॥ १२ ॥
अर्थधर्मौ परित्यज्य यः काममनुवर्तते ॥ एवमापद्यते [10]क्षिप्रं राजा दशरथो यथा ॥ १३ ॥
मन्ये दशरथान्ताय मम [11]प्रव्राजनाय च ॥ कैकेयी सौम्य [12]संप्राप्ता राज्याय [13]भरतस्य च ॥ १४ ॥

सर्गान्तेवक्ष्यमाणत्वात् । कथाः वार्ताः ॥ ५ ॥ कृतकामा फलितेच्छा ॥ ६ ॥ राज्यकारणात् राज्यस्थैर्यकारणात् । ननु "नतेम्वामध्यगतातातगर्हितव्याकथंचन । तामेवेक्ष्वाकुनाथस्यभरतस्यकथांकुरु" इतिवदतोरामस्यसर्वपुरुषार्थनिस्पृहस्य कथमेवंविधाःकैकेयीनिन्दाप्रधानाः स्वालाभगर्भा उक्तयोयुज्यन्ते । उच्यते । "अयोध्यामितएवत्वंकाल्येप्रविशलक्ष्मण" इतिवक्ष्यति अतस्तन्मतमनुवर्तितुमेवमुक्तमितिज्ञेयम् ॥ ७—८ ॥ व्यसनं मदीयं । मतिविभ्रमं अर्थधर्मौ विहाय कामैकसेवित्वं । [व्यसनं मदीयं । अनेन धर्मस्याप्राधान्यमुक्तं । मतिविभ्रमं अतिनिस्पृहत्वं । अनेनार्थाप्राधान्यमुक्तं] ॥ ९ ॥ कामस्यगरीयस्त्वमुपपादयति—कइति । छन्दानुवर्तिनं स्वेच्छानुवर्तिनं ॥ १०—११ ॥ मुखमेकं अद्वितीयं प्रधानभूतइत्यर्थः ॥ १२ ॥ प्रसङ्गात्केवलंकामंनिन्दति—अर्थधर्माविति । दशरथोयथा व्यसनीतिशेषः ॥ १३ ॥ संप्रा-

ङभावोहस्वत्वंचार्षं । क्वचित्तुअतन्द्राभ्यामित्येवपाठः । **शि०** अतन्द्रिभ्यां तन्द्रारहिताभ्यां । योगक्षेमौआवयोरधीनावितिशेषः वर्तेते । तत्रयोगः अलभ्यस्यवन्यफलादेर्लाभः । क्षेमःलब्धस्यस्वमर्यादारूपवस्तुनःपरिपालनम् ॥ ३ ॥ **शि०** कृतकामा प्राप्तस्वाभीष्टवरापिकैकेयी किंतुष्टाभवितुमर्हति नेत्यर्थः । तुःकिमर्थे ॥ ६ ॥ **शि०** प्राणान् प्राणसदृशास्मद्रक्षक हेलक्ष्मण आगतंभरतंनदृष्ट्वा भरतकर्तृकागमनमदृष्ट्वेत्यर्थः । किंच अनआगतमागमनंयस्यतं भरतंदृष्ट्वा ज्ञात्वा भरतोनागतइतिविचार्येत्यर्थः । आगतमित्यत्र नेषेधार्थकमकारंप्रश्लिष्येमावर्थौ । राज्यकारणात् राज्यकरणहेतुकभरतानयनार्थं महाराजंतुनच्यावयेत्नप्रेषयेत् । अस्मद्वियोगदुःखितत्वादितितात्पर्यं । तेनसुमन्त्रमेवप्रेषयितेतिव्यञ्जितम् । **ती०** नच्यावयेदपि नच्यावयेत्किमितिसंबन्धः । **ति०** नच्यावयेत् अपितुच्यावयेदित्यर्थः ॥ ७ ॥ **शि०** अनाथः सर्वनियन्तृत्वेननाथान्तररहितः । चक्रवर्तीत्यर्थः । वृद्धः ज्ञानवयोभ्यामधिकः अतएव वशं अतिकान्तिं । आगतः नित्यंप्राप्तोपिमहाराजः कैकेय्या मन्थरया मयाविनाकृतः । अतएवकामात्मा कामःअभिषेकविषयिणीच्छाआत्मनिमनस्येवयस्यसः । दुःखीसन्नित्यर्थः । किंकरिष्यति । एतेनतत्कृत्यंविचारणीयमितिध्वनितम् ॥ ८ ॥ **शि०** कामे अभिषेकविषयकोत्कटेच्छायांसत्यां मतिविभ्रमं मतिविभ्रमकारकं इदं वियोगजं व्यसनं दुःखं । आलोक्य अनुभूय विमानस्यापिराज्ञः अर्थधर्माभ्यां गरीयान् गरीयस्त्वंअस्ति । अर्थधर्मयोर्नैवत्यागइत्यर्थः । इतिमेमतिर्निश्चयः । तेन तस्यधैर्यातिशयवत्त्वंमर्यादापालकत्वंचध्वनितं ॥ ९ ॥ **शि०** तस्यधैर्यातिशयवत्त्वंप्रकाशयन्नाह—**कइति** । तातोदशरथोमामिव अविद्वान् परसज्ञोपिकःपुमान् कृते परोपकाराय छन्दानुवर्तिनं आज्ञाकारिणंपुत्रं प्रमदायाः अतिहर्षहेतुभूतायाःपुर्याः । त्यजेत् पृथक्कुर्यात् कोपीत्यर्थः । कृतेइत्यत्रविनापिप्रत्ययमित्युपपदलोपः ॥ १० ॥ **शि०** इदानींभरतस्यापिदुःखातिशयोभवितेतिबोधयन्नाह—**सुखीति** । एकः मयारहितः । सभार्यः कैकेयीसुतोयोभरतःसः सुखीसन् अधिराजवत् कोसलान् बतकिंभोक्ष्यति पालयितेत्यर्थः ॥ ११ ॥ **ति०** एकं मुख्यं सुखं अनुभवितेतिशेषः । ईदृशोभविष्यति "सुखमेक" इतिवापाठः । एकएवराजाभविष्यतीत्यर्थइतितीर्थः ॥ १२ ॥ **ति०** योभरतःकाममनुवर्तते सयथाराजादशरथोविपदमापन्नएवंविपदमापद्यते प्राप्नोतीत्यर्थः । अन्येतु राजादशरथोयथाराजत्वमापन्नस्तथा भरतोराजत्वमापद्यतइत्यर्थइत्याहुः ॥ १३ ॥ **शि०** इदानींकैकेय्यांदुःखातिशयोस्तीतिबोधयन्नाह—**मन्यइति** । ममप्रव्राजनाय प्रव्राजनंनिर्वर्तयितुं । दशरथान्ताय दशरथसिद्धान्तंनिर्वर्तयितुं भरतस्यराज्याय स्वनियु-

[पा०] १ ख. ग. घ. छ. ज. कामाहि. २ ख. सातु. ३ क. अनाथश्चैव. ४ क. ख. ग. ङ—ट. कैकेय्यावश. ५ क—घ. च. ज—ट. तातो. ६ क. ग—छ. झ. ञ. ट. राज्यस्यसर्वस्य. ७ च. सुखमेको. ग. घ. ङ. झ. ट. सुखमेकं. ८ ङ. च. झ. ञ. ट. तातेतु. ९ क. ङ—ट. माश्रिते. १० घ. लोको. ११ ख. प्रव्रजनायच. १२ ट. संतप्ता. १३ क. ख. भरतस्तु.

[1]अपीदानीं न कैकेयी सौभाग्यमदमोहिता ॥ कौसल्यां च सुमित्रां च सं[2]प्रबाधेत मत्कृते ॥ १५ ॥
[3]मा स्म मत्कारणाद्देवी सुमित्रा दुःखमा[4]वसेत् ॥ अयोध्यामित एव त्वं का[5]ल्ये प्रविश लक्ष्मण ॥१६॥
अहमेको गमिष्यामि सीतया सह दण्डकान् ॥ अनाथाया हि नाथस्त्वं कौसल्याया भविष्यसि ॥ १७॥
[6]क्षुद्रकर्मा हि कैकेयी द्वे[7]ष्यमन्याय्यमाचरेत् ॥ प[8]रिदद्या हि धर्मज्ञे भरते मम मातरम् ॥ १८ ॥
नूनं जात्यन्तरे क[9]स्मिन्स्त्रियः पुत्रैर्वियोजिताः ॥ जनन्या मम सौमित्रे त[10]स्मादेतदुपस्थितम् ॥ १९ ॥
मया हि चिरपुष्टेन दुःखसंवर्धितेन च ॥ विप्रायुज्यत कौसल्या फलकाले धिगस्तु माम् ॥ २० ॥
मा स्म सीमन्तिनी काचिज्जनयेत्पुत्रमीदृशम् ॥ सौमित्रे योऽहमम्बाया दद्मि शोकम[11]नन्तकम् ॥२१॥
मन्ये प्रीतिविशिष्टा सा मत्तो लक्ष्मण शारिका ॥ [12]यस्यास्तच्छ्रूयते वाक्यं शुक पादमरेर्दश ॥ २२ ॥

त्वेत्यत्रेतिकरणंबोध्यं ॥ १४ ॥ कैकेयीनसंप्रबाधेतइत्यत्रकाकुः । मत्कृते मत्संबन्धादित्यर्थः ॥ १५ ॥ इत एव समीपप्रदेशादेव ॥ १६ ॥ नाथः रक्षकः ॥ १७ ॥ क्षुद्रकर्मेति "डाबुभाभ्याम्–" इतिडाप् । द्वेष्यं द्वेषार्हस्वकृतद्वेषोचितमित्यर्थः । अन्याय्यं अवमानमित्यर्थः । द्वेषादितिचपाठः । परिदद्याः परिदानं नाम रक्ष्यतयाप्रदानं ॥ १८ ॥ कस्मिंश्चिज्जात्यन्तरे कस्मिंश्चिज्जन्मनि । एतत् पुत्रवियोजनं ॥ १९ ॥ फलकाले पुत्रोत्पत्तिफलस्यमातृशुश्रूषणस्यकाले ॥ २०—२१ ॥ अम्बयावर्धिततिर्यग्जन्तुकृतप्रीतिमात्रमपिनमयाकृतमित्याह—मन्यइति । हेलक्ष्मण सा पूर्वमावाभ्यामनुभूताशारिका । मत्तः मदपेक्षया प्रीतिविशिष्टेतिमन्ये प्रीत्याधिकेतिमन्ये । मदपेक्षयाअधिकांप्रीतिंकौसल्यायाजनयतीत्यर्थः । यद्वा मदपेक्षयाकौसल्यायामधिकप्रीतियुक्तेत्यर्थः । उभयत्रहेतुमाह—यस्याइति । यस्याः शारिकायाः । हेशुक अरेः अरिभूतस्य बिडालस्य । पादं दश खण्डयइति । तत् अनुभूतसदृशं प्रीतिसंजननंवाक्यंश्रूयते अम्बयेतिशेषः । लोकेहिकाचित्पोषिताशारिकासमीपवर्तिनंशुकंप्रतिबिडालं दशादशेतिकूजन्तीदृश्यते । यद्वा अरेः कौसल्याशत्रोःपादंदशेतिवाक्यंश्रूयते । पोषितत्वाविशेषेपि शारिकावदरिनिवर्तनवाचमप्यनुक्तवतोमम जन्मधिगित्यर्थः । अत्रप्रकरणबलेन भगवद्भजनादप्याचार्यसमाश्रयणस्यसुकरोपायत्वंदर्शितंभवति । " नह्यम्मयानितीर्थानिनदेवामृच्छिलामयाः ॥ तेपुनन्त्युरुकालेनदर्शनादेवसाधवः " इत्युक्तेः । तथाहि शारिकेत्यनेनज्ञानकर्मरूपपक्षद्वयवानाचार्योलक्ष्यते । स्त्रीलिङ्गेन स्त्रीप्रायमितरत्सर्वमित्युक्तंभगवत्पारतन्त्र्यमुच्यते । आचार्योभगवदपेक्षयामोक्षानन्दजननेऽधिकसुकरोपायइत्यर्थः । " पशुर्मनुष्यःपक्षीवायेचवैष्णवसंश्रयाः ॥ तेनैवतेप्रयास्यन्तितद्विष्णोःपरमंपदं " इतिवचनात् । कोयमाचार्यइत्यतआह—यस्याइति । यस्याइतिपञ्चमी । यस्मात् तत् गुरुपरम्परयाप्राप्तंवाक्यंरहस्यमन्त्ररूपं श्रूयते । कीदृशंवाक्यमित्यत्राह—शुकेति । हेशुक शुकसमानवर्णभगवन् । अरेः विरोधिभूतस्यसंसारस्य । पादं आधारं संसारबीजभूताहंकारममकाराविक्तत्वमूलकभरतसंबन्धिराज्यपालनाय विद्यमानाकैकेयी संतप्ता अस्मद्वियोगजदुःखाक्रान्तास्तीतिमन्ये । अतएव मत्कृते हर्षध्वंसेसति सौभाग्यमदमोहिता अहमतीवपतिप्रियेतिसौभाग्यविषयकोयोमदो हर्षः तेनअमोहितासाकैकेयी कौसल्यादीन् अ न प्रबाधेत । श्लोकद्वयमेकान्वयि ॥ १४—१५ ॥ **ति०** माता तवेतिशेषः । काले प्रातःकाले । उत्थायेत्यर्थः ॥ १६ ॥ **ति०** हेधर्मज्ञ तेममचमातरं सुमित्रांकौसल्यांचोद्दिश्य गरं विषं हि तु दद्यात् । **शि०** कैकेयीतद्दासीमन्थरा ॥ १८ ॥ **शि०** जात्यन्तरे मनुवंशातिरिक्तक्षत्रियजातौ ॥ १९ ॥ **शि०** चिरपुष्टेन चिरंपोषितेन मयाविप्रायुज्यत । अतः मां वियोगसंपत्तिंधिक् । **ति०** फलकाले सुखानुभवकाले ॥ २० ॥ **ति०** हेलक्ष्मण अंबयापालिताकृतवचनशिक्षाचशारिका मत्तोऽस्मांप्रीतिविशिष्टा अधिकप्रीतियुक्ता इतिमन्ये । यद्यस्मात् तस्यादशारिकायास्सकाशादेवंशत्रुनिग्रहविषयं "शुकपादमरेर्दश" इतिवाक्यंश्रूयते । कौसल्ययेतिशेषः । अस्मत्तस्तु तदपिनेतिभावः । अत्रेदंवाक्यं अरेर्बिडालस्यपादंहेशुकदशेत्यर्थकतयालोकप्रसिद्धं । अरेः कौसल्या-

[पा०] १ ङ. च. छ. झ. ञ. ट. अपीदानींतु. २ ग—ट. साप्रबाधेत. ३ क. ग. ङ. च. छ. झ. ञ. ट. मातास्मत्कारणात्. ४ घ. माविशेत्. ५ क. ख. ग. ङ—ट. काले. ६ घ. क्षुद्रधर्माहि. ७ घ—छ. झ. ञ. ट. द्वेषादन्यायं. ८ ङ. च. छ. झ. ट. परिदद्याद्धिधर्मज्ञगरंते. क. परिदद्यादपिगरंराज्ञीते. घ. परिदद्याद्धिधर्मज्ञोभरतो. ९ घ—छ. झ. ञ. ट. तातस्त्रियः. १० ङ. झ. ट. तदद्यैतदुप. क. ग. घ. च. ज. ञ. तामप्येतदुप. ख. यस्मादेतदुप. ११ ख. अनर्थकं. १२ ङ. छ. झ. ट. यत्तस्याःश्रूयते. ख. यस्यास्तु.

[1]शोचन्त्या अल्पभाग्याया न किंचिदुपकुर्वता ॥ पुत्रेण किमपुत्राया मया कार्यमरिंदम ॥ २३ ॥
अल्पभाग्या हि मे माता कौसल्या रहिता मया ॥ शेते परमदुःखार्ता पतिता शोकसागरे ॥ २४ ॥
एको ह्यहमयोध्यां च पृथिवीं चापि लक्ष्मण ॥ तरेयमिषुभिः क्रुद्धो ननु वीर्यमकारणम् ॥ २५ ॥
अधर्मभयभीतश्च परलोकस्य चानघ ॥ तेन लक्ष्मण नाद्याहमात्मानमभिषेचये ॥ २६ ॥
एतदन्यच्च करुणं विलप्य विजने [2]वने ॥ अश्रुपूर्णमुखो [3]रामो निशि तूष्णीमुपाविशत् ॥ २७ ॥
वि[4]लप्योपरतं रामं गतार्चिषमिवानलम् ॥ समुद्रमिव निर्वेगमाश्वासयत लक्ष्मणः ॥ २८ ॥
ध्रुवमद्य पुरी [5]राजन्नयोध्याऽऽयुधिनांवर ॥ निष्प्रभा त्वयि निष्क्रान्ते गतचन्द्रेव शर्वरी ॥ २९ ॥
नैतदौपयिकं राम यदिदं परितप्यसे ॥ विषादयसि सीतां च मां चैव पुरुषर्षभ ॥ ३० ॥
[6]न च सीता त्वया हीना न चाहमपि राघव ॥ मुहूर्तमपि जीवावो जलान्मत्स्याविवोद्धृतौ ॥ ३१ ॥

त्यर्थः । " अनात्मन्यात्मबुद्धिर्या अस्वेस्वमितियामतिः । अविद्यातरुसंभूतिबीजमेतद्द्विधास्थितं " इत्युक्तेः । दश निवर्तयेत्यर्थः । एवंरूपंवाक्यंयत्सकाशात् श्रूयते समत्त:श्रेष्ठइतिसंबन्धः । प्रकरणेनाप्ययमर्थोभिव्यज्यते । तथाहि अयोध्यापुरपर्यायाद्वैकुण्ठान्निर्गत्यविरजांतीर्त्वासंसारकाननंप्रविश्य " द्वासुपर्णासयुजासखायासमानंवृक्षंपरिषस्वजाते । तयोरन्यः पिप्पलंस्वाद्वत्त्यनश्नन्नन्योअभिचाकशीति " इति वेदान्तोक्तप्रक्रियया शरीराख्यमेकंवृक्षंजीवेनसहास्थाय " ऋतंपिबन्तौसुकृतस्यलोकेगुहांप्रविष्टौपरमेपरार्धे " इत्युक्तरीत्याकर्मफलंभोजयन् स्वानुभवालाभक्लिष्टसूरिजनोत्कण्ठयावर्तमानः संसारिषुस्वागमनप्रयोजनालाभेनचरमोपायनिष्ठामेवपरमोपायं निश्चिकायेत्युच्यते ॥ २२ ॥ अल्पभाग्यायाः अतएवअपुत्रायाः पुत्रकृतप्रयोजनरहितायाः । अतएवशोचन्त्याः अम्वायाः किंचिदपिनोपकुर्वतामयापुत्रेण किंकार्यं किंप्रयोजनं ॥ २३ ॥ नकेवलंप्रयोजनालाभःप्रत्युतदुःखितैवेत्याह—अल्पभाग्येत्यादिश्लोकेन ॥ २४ ॥ तर्हिमातृदुःखनिवारणायराज्यमाक्रम्यतामित्यत्राह—एकइत्यादिश्लोकद्वयेन । तरेयं तरितुंशक्नुयां । आक्रमितुंशक्नुयामित्यर्थः । तर्हिकिमर्थंतथानकृतमित्यतआह—ननुवीर्यमकारणमिति । धर्महानिकरेकृत्येवीर्यंसाधकत्वेननावलम्बनीयंखल्वित्यर्थः ॥ २५ ॥ वीर्यस्यानवलम्बनेहेतुमाह—अधर्मेति । अधर्मभयभीतः अधर्मादुत्पन्नंभयंलोकापवादः तस्माद्भीतः । परलोकस्य नाशाद्भीतइतिशेषः । अहमितिचशेषः । तेन अधर्मपरलोकभीतत्वेनहेतुना ॥ २६ ॥ एतत्पूर्वोक्तमर्थजातं अन्यदित्यनेन तादात्विकविलापस्यवाचामगोचरत्वमुक्तं । विजनेवनइति शोकहेतुत्वोक्तिः । उपाविशत् अतिष्ठदित्यर्थः ॥ २७ ॥ विलप्योपरतमित्यनेन मध्येसमाश्वासानर्हत्वोक्तिः ॥ २८ ॥ आयुधिनां आयुधवतां वर शूरेत्यर्थः । निष्प्रभा भवेदितिशेषः ॥ २९ ॥ परितप्यसइतियदिदमस्ति एतत् परिदेवनं । नौपयिकं नयुक्तं । " युक्तमौपयिकं " इत्यमरः । "उपायाद्ध्रस्वश्च" इतिठक् आकारस्यह्रस्वश्च । अयुक्तत्वमेवाह—विषादयसीति । पुरुषर्षभेत्यनेन पुरुषधौरेयस्यतवनैतद्युक्तं अनेनविलापोनयुक्तइत्यर्थः ॥ ३० ॥ " अयोध्यामितएवत्वंकाल्येप्रविशलक्ष्मण " इतियदुक्तंतत्रोत्तरमाह—नचसीतेति । त्वयाहीनासीताच नजीवतीत्यर्थः । त्वद्विहीनोहमपिनच चएवकारार्थः ।

शत्रोः । पार्ददशेत्यर्थकतयारामेणयोजितमितिवक्रोक्तिरलङ्कारः ॥ २२ ॥ शि० अयोध्यां नित्यंप्राप्तइतिशेषः । पृथिवीं निखिलपृथिवीशत्रून् । चकारेण लोकान्तरशत्रूनपि ॥ २५ ॥ शि० अधर्मभयभीतः संग्रामादन्यत्र रिपूणामपिवधःअधर्मइतिभयेनभीतः परलोकस्य दूरशत्रुजनस्यहन्तानासीतिशेषः । स० मया पितुराज्ञायाअकरणेसर्वेप्येवमेवकुर्युः ततश्चतेषामधर्मोभवेत् अतःअधर्मभयभीतश्च लोकस्याधर्मप्राप्तिभयाद्भीतोऽहं । परलोकस्य परकीयजनस्यसकाशात्भीतइतिबुध्या विवेकेनान्वयः । रामःपितुराज्ञांनाकार्षीदितिलोकापवादभीतश्चेत्यर्थः ॥ २६ ॥ ती० अश्रुपूर्णमुखइत्यस्यायंभावः । श्रीरामस्यपरमकरुणाशालित्वेन स्वानुरक्तजनदुःखासहिष्णुत्वादश्रुपूर्णमुखत्वं नतुवस्तुतः "व्यसनेषुमनुष्याणांभृशंभवतिदुःखितः" इत्युक्तेरिति । स० विलप्य लोकविडंवनार्थं विलापंकृत्वा । तदानीमपिनिशाचरसंचाराद्विडंबोयुक्तः ॥ २७ ॥ ति० जीवावइत्यस्यावृत्त्यानन्द्वयान्वयः । जीवनाभावस्यसर्वे-

[पा०] १ क. ङ—ट. शोचन्त्याश्चाल्प. ख. शोचन्त्यस्त्वल्प. २ ख—च. झ. ञ. ट. बहु. ३ ङ. च. छ. झ. ञ. ट. दीनो. ४ क. घ—छ. झ. ञ. ट. विलापोपरतं. ५ ख. क. घ. छ—ट. रामअयोध्या. ६ ख. नहि.

न हि तातं न शत्रुघ्नं न सुमित्रां परंतप ॥ द्रष्टुमिच्छेयमद्याहं स्वर्गं वाऽपि त्वया विना ॥ ३२ ॥
ततस्तत्र सुखासीनौ नातिदूरे निरीक्ष्य ताम् ॥ न्यग्रोधे सुकृतां शय्यां भेजाते धर्मवत्सलौ ॥३३॥
स लक्ष्मणस्योत्तमपुष्कलं वचो निशम्य चैवं वनवासमादरात् ॥
समाः समस्ता विदधे परंतपः प्रपद्य धर्मं सुचिराय राघवः ॥ ३४ ॥
ततस्तु तस्मिन्विजने वने तदा महाबलौ राघववंशवर्धनौ ॥
न तौ भयं संभ्रममभ्युपेयतुर्यथैव सिंहौ गिरिसानुगोचरौ ॥ ३५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे त्रिपञ्चाशः सर्गः ॥ ५३ ॥

चतुष्पञ्चाशः सर्गः ॥ ५४ ॥

प्रभातेसीतालक्ष्मणाभ्यांसहप्रस्थितेनरामेणसायाह्नेगङ्गायमुनासंगमदेशसंनिहितभरद्वाजाश्रमंप्रतिगमनम् ॥ १ ॥ भरद्वाजेनश्रीरामंप्रत्यर्चनपूर्वकंचित्रकूटगुणानुवर्णनेनतस्यवासार्हस्थानत्वकथनम् ॥ २ ॥ विचित्रकथाकथनपूर्वकंस्वाश्रमेरात्रिंयापितवन्तंरामंप्रतिप्रभातेभरद्वाजेनचित्रकूटगमनाभ्यनुज्ञानम् ॥ ३ ॥

ते तु तस्मिन्महावृक्ष उषित्वा रजनीं शिवाम् ॥ विमलेऽभ्युदिते सूर्ये तस्माद्देशात्प्रतस्थिरे ॥ १ ॥
यत्र भागीरथीं गङ्गां यमुनाऽभिप्रवर्तते ॥ जग्मुस्तं देशमुद्दिश्य विगाह्य सुमहद्वनम् ॥ २ ॥

अहमपिनजीवाम्येवेत्यर्थः । दृष्टान्तार्थंसीताग्रहणं । यद्वा "सीतासमक्षंकाकुत्स्थमिदंवचनमब्रवीत्" इतिसीतापुरुषकारेणशरणागतिकरणात् स्वस्यशरणागतिफलाभावेपुरुषकारभूतसीतायाअपिनेतिभावः । अपिजीवावः यदिजीवावः । तदा जलादुद्धृतौमत्स्याविव । मुहूर्तं स्वल्पकालं जीवावः । यथाजलोद्धृतौमत्स्यौयावज्जलसंसर्गंजीवित्वातद्विलयेविनश्यतः तथा आवामपित्वद्वचनहृदयज्ञानपर्यन्तमितिभावः । तथावक्ष्यतिसुन्दरकाण्डे "नचास्यमातानपितानचान्यः स्नेहाद्विशिष्टोस्तिमयासमोवा । तावद्ध्यहंदूतजिजीविषेयंयावत्प्रवृत्तिंशृणुयांप्रियस्य" इति ॥ ३१ ॥ अथनोत्कण्ठितुमर्हसीत्युक्तस्योत्तरमाह—नहिताततमित्यादिश्लोकेन ॥ ३२ ॥ ततः लक्ष्मणवचनानन्तरं । तत्र पूर्वाश्रितवृक्षमूलेभुक्तिस्थाने । सुखासीनौ सुखोपविष्टौ सुखासीनाचसुखासीनश्चसुखासीनौ । सर्वत्र "पुमान्स्त्रिया" इत्येकशेषः । सीतारामौन्यग्रोधे न्यग्रोधमूले । सुकृतां लक्ष्मणेनसुष्ठुकृतां शय्यांनिरीक्ष्य तांभेजातेइतिसंबन्धः ॥ ३३ ॥ उत्तमंचततपुष्कलंचउत्तमपुष्कलं अतीवभ्रातृस्नेहपुरस्कृतत्वादुत्तमं वक्तव्यस्यसर्वस्योक्तेःपुष्कलंपूर्णार्थं लक्ष्मणस्यवचः आदरान्निशम्य चिरायधर्मं वानप्रस्थधर्मं अधश्शयनादिकंप्रतिपद्य । समस्ताःसमाः वनवासं अत्यन्तसंयोगेद्वीतीया । विदधे लक्ष्मणेनसविधातुमैच्छदित्यर्थः । अन्यथाभूतार्थासंभवः । कविनाप्यादौतथावक्तुमयुक्तं । लक्ष्मणस्यसमस्ताःसमाःप्रतिअनुमतिंविदधइति केचिदाहुः ॥ ३४ ॥ भयं व्याघ्रादिभ्यः । संभ्रमं व्याकुलत्वं । भयहेतुशङ्कया इतस्ततोनिरीक्षणमितियावत् ॥ ३५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने त्रिपञ्चाशः सर्गः ॥ ५३ ॥

महावृक्षे महावृक्षमूले । सामीप्येसप्तमी । विमलेऽभ्युदिते । स्पष्टमुदितइत्यर्थः ॥ १ ॥ यत्रेत्यादिश्लोकद्वयमेकान्वयं । भूमिभागान् वनप्रदेशान् । देशान् वत्सदेशावान्तरदेशान् । एतदेवनानात्वमाह—तत्रतत्रेति । यशस्विनइत्यनेनतत्तद्देशीयैरर्चितत्वमुक्तं

थासत्यत्वप्रतिपादनायद्विरुक्तिः ॥३१॥ ति० नञ्त्रयस्य इच्छेयमितिपदावृत्त्याऽन्वयः ॥ ३२॥ स० धर्मं स्वशुश्रूषणरूपं । प्रपद्यांगीकृत्य । समस्तास्समाः चतुर्दशवर्षाणि । वनवासंप्रतिविदधे लक्ष्मणंसंमतमकरोदित्यर्थः ॥ ३४ ॥ इतित्रिपञ्चाशस्सर्गः ॥ ५३ ॥

[पा०] १ घ. मिच्छामिचाद्याहं. २ च. छ. झ. ञ. ट. चापि. ३ झ. समासीनौ. ४ ख. समीक्ष्य. ५ ख. रामो. ६ ङ. च. छ. झ. ञ. ट. महाबलौमहावने. ७ ख. ग. ट. भागीरथींगङ्गायमुनामभिवर्तते. ८ क. यमुनाहि.

ते भूमिभागान्विविधान्देशांश्चापि [1]मनोरमान् ॥ अदृष्टपूर्वान्पश्यन्तस्तत्रतत्र यशस्विनः ॥ ३ ॥
यथा[2]क्षेमेण [3]गच्छन्स पश्यंश्च विविधान्द्रुमान् ॥ नि[4]र्वृत्तमात्रे दिवसे रामः सौमित्रिमब्रवीत् ॥ ४ ॥
प्रयागमभितः पश्य सौमित्रे धूमसु[5]न्नतम् ॥ अग्नेर्भगवतः केतुं मन्ये संनिहितो मुनिः ॥ ५ ॥
नूनं प्राप्ताः स्म संभेदं गङ्गायमुनयोर्वयम् ॥ [6]तथाहि श्रूयते शब्दो [7]वारिणो वारिर्घट्टितः ॥ ६ ॥
[8]दारूणि परिभिन्नानि वनजैरुपजीविभिः ॥ [10]भरद्वाजाश्रमे चैते दृश्यन्ते विविधा द्रुमाः ॥ ७ ॥
[11]धन्विनौ तौ सुखं गत्वा लम्बमाने दिवाकरे ॥ गङ्गा[12]यमुनयोः संधौ प्रापतुर्निलयं मुनेः ॥ ८ ॥
रामस्त्वाश्रममासाद्य त्रासयन्मृगपक्षिणः ॥ गत्वा मुहूर्तमध्वानं भरद्वाजमुपागमत् ॥ ९ ॥
[13]ततस्त्वाश्रममासाद्य [14]मुनेर्दर्शनकाङ्क्षिणौ ॥ सीतयाऽनुगतौ वीरौ दूरादेवावतस्थतुः ॥ १० ॥
[15]स प्रविश्य महात्मानमृषिं शिष्यगणैर्[16]वृतम् ॥ संशितव्रतमेकाग्रं तपसा लब्धचक्षुषम् ॥ ११ ॥
हुताग्निहोत्रं दृष्ट्वैव [17]महाभागं कृताञ्जलिः ॥ रामः सौमित्रिणा सार्धं सीतया चाभ्यवादयत् ॥१२॥
न्यवेदयत चात्मानं तस्मै लक्ष्मणपूर्वजः ॥ पुत्रौ दशरथस्यावां भगवन्रामलक्ष्मणौ ॥ १३ ॥
भार्या ममेयं वैदेही [18]कल्याणी जनकात्मजा ॥ मां चानुयाता विजनं तपोवनमनिन्दिता ॥ १४ ॥

॥ २—३ ॥ यथाक्षेमेण क्षेमानतिक्रमेण । "यथाऽसादृश्ये" इति पदार्थानतिवृत्तावव्ययीभावः । "तृतीयासप्तम्योर्बहुलं" इत्यलुक् । क्षेमहेत्ववधानमनतिक्रम्येत्यर्थः । निवृत्तमात्रे अर्धमण्डलकालइत्यर्थः ॥ ४ ॥ प्रयागमभितः प्रयागस्याभितः । "अभितःपरितः—" इत्यादिनाद्वितीया । केतुं ध्वजीभूतं धूममितिसंवन्धः । अतः संनिहितोमुनिरितिमन्ये ॥ ५ ॥ संभेदं संगमं । "संभेदःसिन्धुसंगमः" इत्यमरः । वारिघट्टितोवारिणःशब्दः । वारिजनितो वारिशब्दः । वारिणोरन्योन्यघट्टनजःशब्दइत्यर्थः ॥ ६ ॥ वनजैरुपजीविभिः वनोत्पन्नैःफलमूलकाष्ठाद्युपजीविभिः । दारूणीत्यत्रापि दृश्यन्तइत्यनुषज्यते ॥ ७ ॥ लम्बमाने अस्तगिरौलम्बमानइवदृश्यमाने । संधौ संगमेवर्तमानं निलयं आश्रमं तत्समीपप्रदेशंप्रापतुः ॥ ८ ॥ त्रासयन् अपूर्वदर्शनेनत्रासंजनयन् । मुहूर्तं मुहूर्तगम्यं । भरद्वाजं भरद्वाजसमीपं ॥ ९ ॥ दूरादेवावतस्थतुः सायंतनसमयत्वादग्निहोत्रावसानं प्रतीक्षमाणाववतस्थतुरित्यर्थः ॥ १० ॥ सप्रविश्येत्यादिश्लोकद्वयं । प्रविश्य दैवान्निर्गतशिष्यमुखेनेतिशेषः । संशितव्रतं तीक्ष्णव्रतं । एकाग्रं एकप्रधानं । ध्यानपरमितियावत् । तपसा तपोवैभवेन । लब्धचक्षुषं लब्धज्ञानं अतीतानागतवर्तमानयावदर्थगोचरज्ञानयुक्तमित्यर्थः । दृष्ट्वैव दर्शनोत्तरकालमेवेत्यर्थः ॥ ११—१२ ॥ न्यवेदयतेत्यादिश्लोकद्वयमेकान्वयं ।

ति॰ यथा यथासुखं जनानुमानशङ्काभावात्क्षेमेणोपविश्योत्थायचशनैःशनैःस्वेच्छानुरोधेन संपश्यन् समपश्यन् ॥ ४ ॥ **स॰** तस्मादत्रमुनिरेकस्संनिहितइतिमन्ये ॥ ५ ॥ **ति॰** वारिणोः गङ्गायमुनाजलयोः । वारिघर्षः विजातीयवारिसंबन्धः । **स॰** यद्वा वारिणोःशब्दः श्रूयते तत्रदृष्टान्तः—**अरिघर्षजइति** । अर्योःचक्रयोः अर्योर्वैरिणोःसंघर्षजः शब्दोवा शब्दइव । "वाविकल्पोपमानयोः" इत्यभिधानात् ॥ ६ ॥ **ति॰** येषांदारूणिभिन्नानितेद्रुमादृश्यन्तइत्यन्वयः । **स॰** वनजैःकन्दमूलादिभिः उपजीविभिर्वनस्थैः । दारूणिपरिभिन्नानियेषांतेविविधाद्रुमाःछिन्नादृश्यन्ते ॥ ७ ॥ **ति॰** धन्विनांविततावितिपाठे तेषांमध्येविततौमुख्यावितियावत् ॥ ८ ॥ **शि॰** मृगपक्षिणः दुष्टान्मृगान्पक्षिणश्च त्रासयन् । **स॰** त्रासयन् धनुर्धरत्वादितिभावः । **ति॰** भरद्वाजं तदाश्रमं ॥ ९ ॥ **ति॰** दूरादेवावतस्थतुः कार्यवशनिर्गतशिष्यद्वाराविज्ञापनपूर्वकानुमतिलाभार्थमितिभावः ॥ १० ॥ **ति॰** प्रविश्य उटजमितिशेषः ॥ ११ ॥

[पा॰] १ ङ. च. छ. झ. ञ. ट. मनोहरान्. २ क. ग. घ. च. ज. क्रमेण. ३ ङ. छ. झ. ञ. ट. संपश्यन्पुष्पितान्विविधान्. घ. संगच्छन्पश्यंश्च. ज. गच्छन्सन्पश्यंश्च. च. पश्यंश्चपुष्पितान्विविधान. ४ झ. निर्वृत्तमात्रे. ५ ङ. च. छ. झ. ट. मुत्तमं. घ. मुद्गतं. ६ ख. तथापि. ७ ङ. छ. झ. ट. वारिणोर्वारिघर्षजः. ८ क. घ. च. ञ. घट्टजः. ग. ज. घट्टनात्. ९ ख. दारुणिचविभिन्नानि. १० ङ. छ. झ. ट. छिन्नाश्चाप्याश्रमेचैते. ११ क. घ. सुधन्विनौसुखं. च. धन्विनांविततौ. १२ क. यमुनयोर्मध्ये. १३ क. तत्रत्वाश्रम. १४ ख. मुनिदर्शन. १५ क. घ. च. संप्रविश्य. १६ घ. युतं. १७ ख. घ—छ. झ. ञ. ट. महाभागः. १८ क. ग. ङ. च. छ. झ. ञ. ट. कल्याणीवैदेही.

पित्रा प्रव्राज्यमानं मां सौमित्रिरनुजः प्रियः ॥ अयम[1]न्वगमद्भ्राता वनमेव दृढव्रतः ॥ १५ ॥
पित्रा नियुक्ता भगवन्प्रवेक्ष्यामस्तपोवनम् ॥ धर्म[2]मेवं चरिष्यामस्तत्र मूलफलाशनाः ॥ १६ ॥
तस्य तद्वचनं श्रुत्वा राजपुत्रस्य धीमतः ॥ उपानयत धर्मात्मा गामर्घ्यमुदकं ततः ॥ १७ ॥
नानाविधानन्नरसान्वन्यमूलफलाश्रयान् ॥ तेभ्यो ददौ तप्ततपा वासं [3]चैवाभ्यकल्पयत् ॥ १८ ॥
मृगपक्षिभिरासीनो मुनिभिश्च समन्ततः ॥ राममागतमभ्यर्च्य [4]स्वागतेनाह तं मुनिः ॥ १९ ॥
प्रतिगृह्य च तामर्चामुपविष्टं स राघवम् ॥ भरद्वाजोऽब्रवीद्वाक्यं धर्मयुक्तमिदं तदा ॥ २० ॥
चिरस्य खलु काकुत्स्थ प[5]श्यामि त्वामिहागतम् ॥ श्रुतं तव मया [6]चेदं विवासनमकारणम् ॥ २१ ॥
अवकाशो विविक्तोऽयं महानद्योः समागमे ॥ पुण्यश्च रमणीयश्च वसत्विह भवान्सुखम् ॥ २२ ॥
एवमुक्तस्तु वचनं भरद्वाजेन राघवः ॥ प्रत्युवाच शुभं वाक्यं रामः सर्वहिते रतः ॥ २३ ॥
भगवन्नित आसन्नः पौरजानपदो जनः ॥ सुदर्शमिह मां प्रेक्ष्य मन्येऽहमिममाश्रमम् ॥ २४ ॥

सीतालक्ष्मणयोःसर्वात्मनापरतन्त्रत्वादात्मानमित्यनेन तयोरपिग्रहणं । कल्याणी पतिव्रतेत्यर्थः । अनुयातेति न्यवेदयतेतिसंबन्धः ॥ १३—१४ ॥ धर्मं पितृवचनपरिपालनरूपं ॥ १६ ॥ गां मधुपर्काङ्गभूतमहोक्षं । तथाचस्मृतिः "गोमधुपर्कार्होवेदाध्याय्याचार्यऋत्विक्स्नातकोराजावाधर्मयुक्तः" इति । अर्घ्यं पूजाविधेरङ्गं ॥ १७ ॥ अन्नरसान् अदनीयरसान् रसप्रधानान्पदार्थविशेषानित्यर्थः । वन्यमूलफलाश्रयान् वन्यमूलफलप्रकृतिकान् ॥ १८ ॥ मृगपक्षिभिरासीनोमुनिभिश्चेत्यनेन मुनिवैभवात्तिर्यञ्चोपिमुनिनिर्विशेषसंजातविश्वासाःसेवन्तइतिगम्यते । स्वागतेनाह स्वागतमाहेत्यर्थः । यद्वा मृगपक्षिभिः सहेतिशेषः । स्वागतेनाभ्यर्च्येतिसंबन्धः ॥ १९ ॥ मुनिराहेत्येतद्विवृणोति—प्रतिगृह्येति ॥ २० ॥ चिरस्य चिरं ॥ २१—२३ ॥ इतः एतदाश्रमापेक्षया । इह आश्रमे सुदर्शं सुखेनद्रष्टुंशक्यं । प्रेक्ष्य ज्ञात्वा । वैदेहीं मांचप्रेक्षकोजनः इममाश्रममागमिष्यतीत्यहंमन्ये । अनेनकारणेनइहवासंनरोचयइत्यन्वयः । मांप्रेक्ष्यकइत्यत्र "अकेनोर्भविष्यदाधमर्ण्ययोः" इतिषष्ठीप्रतिषेधः । एकान्ते पौरजनाविदिते । पश्य चिन्तय

ति० धर्ममेव वानप्रस्थधर्ममेव । शि० नियुक्ताः साक्षात्परंपरयाचाज्ञप्ताः ॥ १६ ॥ शि० अर्घ्यं अर्घहितमुदकं तदुपलक्षितनिखिलपूजनसामग्रीं ॥ १७ ॥ शि० अन्नरसान् अदनीयरसान् । अन्नशब्दस्यौदनार्थकत्वंतुनात्रसंभवति । "धर्ममेवाचरिष्यामस्तत्रमूलफलाशनाः" इत्यनेनतन्निषेधस्यबोधितत्वात् ॥ १८ ॥ ती० मृगपक्षिभिस्सहाभ्यर्च्येत्यस्यायंभावः । मुनिप्रभावात्तिर्यञ्चोपिराममीश्वरंमत्वामुनिनिर्विशेषास्सन्तःसेवन्तइति । ति० आगतमागतं देजोविशेषान्मर्यादारक्षणायमध्येमध्येस्थित्वानिकटं प्राप्तं रामं मृगपक्षिभिर्मुनिभिश्चसहस्वागतेनाभ्यर्च्य मुनिभिस्सहमुनीरामंसमन्ततआसीनोऽभवदितियोजना । मृगपक्षिणामर्चाच प्रदक्षिणगमनादिरूपावर्णिता ॥ १९ ॥ ती० चिरस्य चिरकालस्य । इहाश्रमेत्वांपश्यामि । अयंभावः । चक्षुराद्यगोचरंत्वामेवमनसि सततमनुसंदधानोऽहं चिरकालस्यइहममपुरतः चक्षुपापश्यामीत्याश्चर्यं । अतोममभाग्यंकिंवर्ण्यतइति लौकिकदृष्टिमनुसृत्याह— श्रुतमिति । ति० चिरस्य चिरकालस्य । इहाश्रमआगतंत्वांपश्यामि । अनेन पूर्वमपिकदाचिदागमनंध्वनितं । पूर्वरामावतारकालिकमागमनंमनसिनिधायैवैपोक्तिः । शि० हेकाकुत्स्थ तव उपागतं समीपागमनं । चिरस्यबहुकालतः पश्यामि कदाऽऽगन्तेति सर्वदैवालोचयामीत्यर्थः । तत्रहेतुः अकारणं स्वेच्छातिरिक्तकारणरहितं । तवविवासनंश्रुतं वाल्मीकिमुखादवगतं ॥ २१ ॥ शि० विविक्तः दुर्जनसंसर्गरहितः ॥२२॥ ती० भगवन्नित्यादिश्लोकत्रयस्यवास्तवार्थस्तु । भगवन् सर्वज्ञ । रावणवधार्थंगूढतयाऽवतीर्णं मांयद्येवंप्रकटीकरोपि तदा सर्वोपिजनः मांसुदर्शं सुष्ठुद्रष्टुं योग्यंसुदर्शं विष्णुंच । "दृश्यतेत्वग्र्यया" इतिश्रुतेः । वैदेहींमांच लक्ष्मींच ज्ञात्वा प्रेक्षकः दिदृक्षुस्सन् इहागमिष्यति । तेनैवंविधप्रकटवासंप्रकटावस्थानंनरोचये । अतोयत्रपरमानन्दैकतानेमयिवैदेहीरमते । "योमृग्यतेहस्तगृहीतपद्मयाश्रियेतरैरङ्गविमृग्यमाणया" इत्यादिरीत्यासर्वैराश्रयणीयापिलक्ष्मीः अनवरतानुभवेप्यद्यारब्धानुभवेव नित्यानुरक्ताभवति । तं आश्रयतइत्याश्रमंजगत् तस्य स्थानमाधारभूतं सर्वोत्तमं स्वरूपगुणैश्वर्यैर्ब्रह्मरुद्रादिभ्यःश्रेष्ठतमंमां ममातिप्रियंत्वमेवैकान्तेपश्य गुह्याद्गुह्यतमंमत्स्वरूपंनप्रकटयेतिरहस्योपदेशः । शि० अजनः कर्माधीनजन्मरहितः नित्यसुखादिरित्यर्थः ॥२४॥

[पा०] १ ख. ग. च. ज. मन्वागमत्. २ क. ङ—ट. मेवाचरिष्यामः. ३ क. चैवान्वकल्पयत्. ४ च. छ. झ. ञ. ट. स्वागतेनागतं. ग. घ. ज. स्वागतेनातिथिं. ५ ङ. छ. झ. ट. पश्याम्यहमुपा. ६ च. चैवं. ङ. छ. झ. ञ. ट. चैव.

आगमिष्यति वैदेहीं मां चापि प्रेक्षको जनः ॥ अनेन कारणेनाहमिह वासं न रोचये ॥ २५ ॥
एकान्ते पश्य भगवन्नाश्रमस्थानमुत्तमम् ॥ रमेत यत्र वैदेही सुखार्हा जनकात्मजा ॥ २६ ॥
एतच्छ्रुत्वा शुभं वाक्यं भरद्वाजो महामुनिः ॥ राघवस्य ततो वाक्यमर्थग्राहकमब्रवीत् ॥ २७ ॥
दशक्रोश इतस्तात गिरिर्यस्मिन्निवत्स्यसि ॥ महर्षिसेवितः पुण्यः सर्वतः सुखदर्शनः ॥ २८ ॥
गोलाङ्गूलानुचरितो वानरर्क्षनिषेवितः ॥ चित्रकूट इति ख्यातो गन्धमादनसंनिभः ॥ २९ ॥
यावता चित्रकूटस्य नरः शृङ्गाण्यवेक्षते ॥ कल्याणानि समाधत्ते न पापे कुरुते मनः ॥ ३० ॥
ऋषयस्तत्र बहवो विहृत्य शरदां शतम् ॥ तपसा दिवमारूढाः कपालशिरसा सह ॥ ३१ ॥
प्रविविक्तमहं मन्ये तं वासं भवतः सुखम् ॥ इह वा वनवासाय वस राम मया सह ॥ ३२ ॥
स रामं सर्वकामैस्तं भरद्वाजः प्रियातिथिम् ॥ सभार्यं सह च भ्रात्रा प्रतिजग्राह धर्मवित् ॥ ३३ ॥
तस्य प्रयागे रामस्य तं महर्षिमुपेयुषः ॥ प्रपन्ना रजनी पुण्या चित्राः कथयतः कथाः ॥ ३४ ॥
सीतातृतीयः काकुत्स्थः परिश्रान्तः सुखोचितः ॥ भरद्वाजाश्रमे रम्ये तां रात्रिमवसत्सुखम् ॥ ३५ ॥
प्रभातायां रजन्यां तु भरद्वाजमुपागमत् ॥ उवाच नरशार्दूलो मुनिं ज्वलिततेजसम् ॥ ३६ ॥
शर्वरीं भगवन्नद्य सत्यशील तवाश्रमे ॥ उषिताः स्मेह वसतिमनुजानातु नो भवान् ॥ ३७ ॥

॥ २४—२६ ॥ अर्थग्राहकं अर्थबोधकंयथाभवति तथा । यद्वा अर्थग्राहकं बह्वर्थवत् अब्रवीत् ॥ २७ ॥ यस्मिन् गिरौनिवत्स्यसि सगिरिरितोदशक्रोशः दशक्रोशावस्थितइत्यर्थः । गन्धमादनसंनिभः गन्धमादनपर्वतसंनिभः । अतीतानागतवर्तमानज्ञोमहर्षिः "गोलांगूलानुचरितोवानरर्क्षनिषेवितः" इतिकेवलत्रिवर्गाभिधानेन एतत्सजातीयाएवरामस्यसहायाअपिभविष्यन्तीतिसूचितवानितिगम्यते ॥ २८—२९ ॥ नरः यावतादूरेणचित्रकूटस्यशृङ्गाण्यवेक्षते तावता कल्याणानि पुण्यकर्माणि । समाधत्ते प्राप्नोति । यद्वा समाधत्ते आचरति । पापेमनोनकुरुते तत्रवसन्किमुतेतिभावः । यद्वा यावता कालेन ॥ ३० ॥ तत्र चित्रकूटे । शरदांशतं तपसाविहृत्य क्रीडन्तइवमहत्तपः परिसमाप्येत्यर्थः । कपालशिरसासहदिवमारूढाः तपश्चरणेननिरन्तरकपालासनेनप्रक्षीणत्वक्छिरोरुहतया कपालावशिष्टशिरसासहदिवमारूढाइत्यर्थः । कपालशिरसेत्येतच्छरीरोपलक्षणं । सशरीराःस्वर्गंगता इत्यर्थः । यद्वा कपालशिराइतिकस्यचिद्दृपेः संज्ञा । कपालशिरसा कपालरूपशिरोयुक्तेनेत्यध्याहृतशरीरपदविशेषणमित्येके । कपालमात्रावशिष्टंशिरोयस्मिन्निति तपोविशेषणमित्येके ॥ ३१ ॥ प्रविविक्तं प्रकर्षेणविजनं ॥ ३२ ॥ सर्वकामैःप्रतिजग्राह अतिथियोग्यसत्कारैर्वशीकृतवानित्यर्थः । [प्रतिजग्राहउपचचार] ॥ ३३ ॥ प्रपन्ना प्राप्ता ॥ ३४—३६ ॥ वसति-

ति० यत्र यस्मिन्नाश्रमस्थाने । तादृशमेकान्तेवर्तमानं पश्य ज्ञात्वानिर्दिशेत्यर्थः । अत्रभगवन्नित्यादिश्लोकत्रयंतीर्थेन मत्स्वरूपंन प्रकटयेत्यन्तेनव्याख्यातं तदयुक्तं । मुनिनारामस्वरूपप्रकटनस्यसर्ववेद्यंयथाभवतितथाप्राक्कृताप्यकरणात्अक्षरमर्यादयापितादृशार्थालाभाच्च । पौरजानपदोजनइतिपदास्वारस्याच्चेतिसुधियोविभावयन्तु । शि० आश्रमं आसमन्तात् अश्रमंश्रमनिवर्तकंस्थानं । यत्रवैदेही रमते रमेत ॥ २६ ॥ ति० राघवस्यार्थग्राहकं तदुक्तप्रयोजनप्रतिपादकं तत् वक्ष्यमाणंअब्रवीत् ॥ २७ ॥ शि० दशक्रोशे त्रिंशत्क्रोशपरिच्छिन्नदेशसंनिधौ । महर्षिसेवितः पर्वतः अवान्तरपर्वतविशिष्टः । गिरिः पर्वतोस्ति । दशशब्दस्यैकशेषेणायमर्थोलब्धः । दशक्रोशपरिमितइतिपर्वतविशेषणेतुनैकशेषकल्पना ॥ २८ ॥ कतक० केचित्तु कपालशिरसेतिशरीरोपलक्षण सशरीरास्स्वर्गंगताइत्याहुः । तन्न । धर्मपुत्रादीनामपिकियद्दूरमेवधर्मवैभवदर्शनायैतच्छरीरेणगमनं ततस्तन्निरासपूर्वकमेवस्वर्गगमनश्रवणात् । शि० कपालशिरसा त्वद्दर्शनफलकनित्यस्थितिमच्छिवेनसह शरदांशतंविहृत्य दिवं प्रमोदविशेषमारूढाः प्राप्ताः एतेन शिवस्यरामानुरागिश्रेष्ठत्वंव्यञ्जितं ॥ ३१ ॥ ति० इहवेति शिष्टाचारमात्रं । स० इतोयाहीत्यस्यानुचितत्वादाह—इहवेति ॥ ३२ ॥ ति० इहाश्रमेशर्वरीमुषिताःस्मः । अहअथेत्यर्थे ॥ ३७ ॥ इतिचतुष्पञ्चाशस्सर्गः ॥ ५४ ॥

[पा०] १ क—घ. च—ट. रमते. २ ङ. च. छ. झ. ञ. ट. राघवस्यतुतद्वाक्यं. ३ क. ख. ग. ज. [illegible]निवत्स्यति ४ ग. ङ. छ. झ. ञ. ट. पर्वतःशुभदर्शनः. ५ ङ. छ. झ. ट. मोहे. ६ ख. मुनयस्तत्र. ७ क. च. निवासं. ८ ङ. ञ. झ. ट. हर्षयन्. ९ घ. ट. पुण्ये. १० ङ. च. छ. झ. ञ. ट. तुशर्वर्यां. ११ ङ. छ. झ. ट. स्मोह.

रात्र्यां तु तस्यां व्युष्टायां भरद्वाजोऽब्रवीदिदम् ॥ मधुमूलफलोपेतं चित्रकूटं [2]व्रजेति ह ॥
वासमौपयिकं मन्ये तव राम महाबल ॥ ३८ ॥
[3]नानानगगणोपेतः किंनरोरगसेवितः ॥ मयूरनादाभिरुतो गजराजनिषेवितः ॥ ३९ ॥
गम्यतां भवता शैलश्चित्रकूटः स विश्रुतः ॥ पुण्यश्च रमणीयश्च बहुमूलफलायुतः ॥ ४० ॥
तत्र कुञ्जरयूथानि मृगयूथानि चाभितः ॥ विचरन्ति वनान्तेऽस्मिंस्तानि द्रक्ष्यसि राघव ॥ ४१ ॥
सरित्प्रस्रवणप्रस्थान्दरीकन्दरनिर्दरान् ॥ चरतः सीतया सार्धं नन्दिष्यति मनस्तव ॥ ४२ ॥
प्रहृष्टकोयष्टिककोकिलस्वनैर्विनादितं तं वसुधाधरं शिवम् ॥
मृगैश्च मत्तैर्बहुभिश्च कुञ्जरैः सुरम्यमासाद्य समावसाश्रमम् ॥ ४३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे चतुष्पञ्चाशः सर्गः ॥ ५४ ॥

पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

भरद्वाजेनप्रभातेस्वाश्रमाच्चित्रकूटंप्रतिप्रस्थितयोरामलक्ष्मणयोर्मार्गोपदेशः ॥ १ ॥ रामलक्ष्मणाभ्यांकाष्ठादिभिःस्वनिर्मितप्लवेनसीतयासहयमुनातरणम् ॥ २ ॥ मध्येमार्गंलक्ष्मणेनरामाज्ञयासीताभिमतफलपुष्पाद्यानयनम् ॥ ३ ॥ रामलक्ष्मणाभ्यांसीतयासहसायाह्नेयमुनातीरेस्वोचितावासस्थानगमनम् ॥ ४ ॥

उषित्वा रजनीं तत्र राजपुत्रावरिंदमौ ॥ महर्षिमभिवाद्याथ जग्मतुस्तं गिरिं प्रति ॥ १ ॥
तेषां [13]चैव स्वस्त्ययनं महर्षिः स चकार ह ॥ [14]प्रस्थितांश्चैव तान्प्रेक्ष्य पिता [15]पुत्रानिवान्वगात् ॥२॥
ततः प्रचक्रमे वक्तुं वचनं स महामुनिः ॥ भरद्वाजो महातेजा रामं सत्यपराक्रमम् ॥ ३ ॥
गङ्गायमुनयोः सन्धि[16]मासाद्य मनुजर्षभौ ॥ कालिन्दीमनुगच्छेतां नदीं पश्चान्मुखाश्रिताम् ॥ ४ ॥

मनुजानातु पूर्वोक्तांवसतिंप्रतिगन्तुमनुज्ञांकरोतीत्यर्थः ॥ ३७ ॥ व्रजेत्यब्रवीदित्यन्वयः । हेति पादपूरणे हर्षेवा । वासमिति तत्रेतिशेषः । औपयिकं युक्तं । "युक्तमौपयिकं" इत्यमरः ॥ ३८ ॥ नानानगगणोपेतः नानावृक्षनिचयोपेतः ॥ ३९—४१ ॥ सरित्प्रस्रवणप्रस्थानिति । सरितोनद्यः प्रस्रवणानितनुतरजलप्रवाहाः प्रस्थाः सानवस्तान् । दरीकन्दरनिर्दरान् दर्यःपाषाणसंश्लेषस्थानानि कन्दराः गुहाः निर्दराःविदीर्णपाषाणसंधयः तान् ॥ ४२ ॥ कोयष्टिकाः टिट्टिभकाः । "कोयष्टिकष्टिट्टिभकः" इत्यमरः ॥ ४३ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने चतुष्पञ्चाशः सर्गः ॥ ५४ ॥

॥१॥ तेषां प्रस्थातुमुद्युक्तानां । अन्वगादितिपाठः । अन्वशादितिपाठे अनुशिष्टवान् मार्गोपदेशमकरोदित्यर्थः ॥ २ ॥ तदेवविवृणोति—ततइति ॥ ३ ॥ प्रथमं गङ्गायमुनयोः संधिमासाद्य पश्चात् पश्चान्मुखाश्रितां गङ्गाजलवेगाभिहत्याकिंचित्पश्चान्मुखप्रवाहंप्राप्तां कालिन्दींनदीं अनुगच्छेतां अनुसृत्यगच्छेतां। पश्चिमाभिमुखौभूत्वागच्छेतां । भवन्तावितिशेषः । [अभिगच्छेतां अभिमुखंगच्छेतां कालिन्द्याअ-

कतक० पश्चान्मुखाश्रितां संगमात्पश्चिमप्रदेशएवाश्रितत्वप्रयुक्तव्यवहारां संगमपूर्वभागेतुगङ्गायाएवव्यवहारइतिभावः । अन्येतु पश्चान्मुखयागङ्गयाश्रितांकालिन्दीमनुगच्छेतामित्यर्थः । अतएवाग्रे कालिन्दीमासाद्येत्युक्तिरित्याहुः । स० आदाय

[पा०] १ क. च. गिरिंव्रज. २ ङ. तंचराम. ३ च. नानागिर. ४ ज. गजवाजि. ५ ख. ज. सुविश्रुतः. ६ छ. कन्दमूल. ७ ङ. च. छ. झ. ञ. ट. चैवहि. ८ ख—ट. वनान्तेषुतानि. ९ ट. न. न्गुहाकन्दरनिर्झरान. घ. गिरिकन्दर. १० ङ. च. झ. ञ. कोयष्टिभ. ११ ङ. छ. झ. ट. विनोदयन्तंचसुखंपरं. ग. न. विनोदयन्तंवसुधाधरं. १२ झ. ट. दसाश्रयं. १३ ङ. च. छ. झ. ञ. ट. स्वस्त्ययनंचैव. १४ ख. ङ. छ. झ. ञ. ट. प्रस्थितान्प्रस्थितांश्चैव. १५ ग. घ. न. पुत्रानिवान्वशात्. ङ. च. छ. झ. ञ. ट. पुत्रानिवौरसान्. १६ ङ. छ. झ. ट. मादायमनुजर्षभ.

अथासाद्य तु कालिन्दीं [1]शीघ्रस्रोतसमापगाम् ॥ तस्यास्तीर्थं [2]प्रचरितं [3]पुराणं प्रेक्ष्य [4]राघवौ ॥
तत्र यूयं प्लवं कृत्वा तरतांशुमतीं नदीम् ॥ ५ ॥
ततो न्यग्रोधमासाद्य महान्तं हरितच्छदम् ॥ [5]विवृद्धं बहुभिर्वृक्षैः श्यामं सिद्धोपसेवितम् ॥
तस्मै सीताऽञ्जलिं कृत्वा [6]प्रयुञ्जीताशिषः शिवाः ॥ ६ ॥
[7]समासाद्य तु तं वृक्षं [8]वसेद्वाऽतिक्रमेत वा ॥ ७ ॥
क्रोशमात्रं ततो गत्वा नीलं [9]द्रक्ष्यथ काननम् ॥ [10]पलाशबदरीमिश्रं [11]रम्यं [12]वंशैश्च यामुनैः ॥ ८ ॥
स पन्थाश्चित्रकूटस्य [13]गतः सुबहुशो मया ॥ रम्यो मार्दवयुक्तश्च [14]वनदावैर्विवर्जितः ॥ ९ ॥
इति पन्थानम[15]आवेद्य महर्षिः संन्यवर्तत ॥ अभिवाद्य तथेत्युक्त्वा रामेण विनिवर्तितः ॥ १० ॥
[16]उपावृत्ते मुनौ तस्मिन्रामो लक्ष्मणमब्रवीत् ॥ कृतपुण्याः स्म [17]सौमित्रे मुनिर्यन्नोऽनुकम्पते ॥ ११ ॥
इति तौ पुरुषव्याघ्रौ मन्त्रयित्वा मनस्विनौ ॥ सीतामेवाग्रतः कृत्वा कालिन्दीं जग्मतुर्नदीम् ॥ १२ ॥
अथासाद्य तु कालिन्दीं शी[18]घ्रस्रोतोवहां नदीम् ॥ चिन्तामापेदिरे [19]सर्वे नदीजलतितीर्षवः ॥ १३ ॥

भिमुखीभूयगच्छेतामित्यर्थः] ॥ ४ ॥ शीघ्रस्रोतसमित्यनेन गङ्गाजलवेगप्रतिहतिस्तिमितजलव्यतिरिक्तप्रदेशउच्यते । तीर्थं अवतरणप्रदेशं । प्रचरितं गमनागमनाभ्यामतिक्षुण्णमित्यर्थः । आंशुमतीं अंशुमतः सूर्यस्यापत्यभूतां ॥ ५ ॥ ततः तरणानन्तरं । न्यग्रोधं तीरस्थं । हरितच्छदं श्यामलपत्रं अतएव श्यामं श्यामनामकं । वृक्षैःसहविवृद्धं यद्वा वृक्षैःश्यामं वृक्षसहितत्वाद्विशेषेणश्यामलं । वृक्षैरित्युपलक्षणेतृतीया । आशिषः मनोरथान् । प्रयुञ्जीत प्रार्थयेत् ॥६॥ वसेद्वातिक्रमेतवा सीतेतिशेषः । श्रान्ताचेत् किंचित्कालंवसेत् । नोचेदतिक्रमेतेत्यर्थः ॥ ७ ॥ ततः दक्षिणतटस्थंन्यग्रोधात् । यामुनैः यमुनासंबन्धिभिः यमुनातीरजैरित्यर्थः ॥ ८ ॥ सः काननं । पथिशब्दापेक्षयापुँल्लिङ्गत्वं । मार्दवयुक्तः सूक्ष्मसिकतावत्त्वात् । वनदावैः वनाग्निभिः । "दवदावौवनारण्यवह्नी" इत्यमरः । तथाप्यत्रदावशब्दोऽग्निमात्रपरः । "विशिष्टवाचकानां" इतिन्यायात् ॥ ९ ॥ अभिवाद्येत्यर्धेनमहर्षिंविशेषयति । तथैवगमिष्यामइत्युक्त्वा अभिवाद्य त्वमाश्रमंगच्छेतिरामेणविनिवर्तितोमहर्षिः न्यवर्ततेतिसंबन्धः ॥ १०—११ ॥ मन्त्रयित्वा पूर्वोक्त-

---

आरभ्य पश्चान्मुखाश्रितां । शि० अत्रद्विवचनंतुसीतारामानतिरेकबुद्ध्या ॥ ४ ॥ ति० अथशुद्धांकालिंन्दीं प्रतिस्रोतोयथाभवति तथासमागतां विपरीतप्रवाहां आसाद्य तस्यास्तीर्थं अवतरणप्रदेशं । प्रचरितं बहुजनगमनागमनाभ्यामदिक्षुण्णंदृष्ट्वा । शि० प्रतिस्रोतस्समागतां प्रवाहमार्गलब्धानेकतीर्थसंगमवतींकालिंदीमासाद्य तीर्थं पवित्रकारकं । तस्याःकालिन्द्याःप्रचरितं विलक्षणप्रचलनं प्रकामंयथास्यात्तथाप्रेक्ष्य ॥ ५ ॥ स० आशिषः अस्माकंपुनरागमनंभवत्विति प्रयुञ्जीत । सिद्धसेवितत्वात्स्त्रियास्तत्रगमनाभावात्प्रार्थनेदोषोनास्तीतिभावः ॥ ७ ॥ शि० नीलंकाननंवनंप्रेक्ष्य मयाबहुशोगतस्य बहुवारंमत्कर्तृकगमनविशिष्टस्यचित्रकूटस्ययःरम्योरमणीयःसः प्रसिद्धःपन्थाःमार्गः त्वयाप्राप्स्यतेइतिशेषः ॥ ८—९ ॥ स० सीतांअग्रतः लक्ष्मणस्तुप्रान्तेकृतवान् । रामस्तुअग्रतःपुरस्तात्कृतवान् । मिलित्वाउभावपिसीतामग्रतःकृत्वेतियुक्तं । "अग्रंप्रान्तेपुरस्ताच्चप्रधानेप्रथमोर्ध्वयोः" इतिविश्वः । एतेन यथाश्रुतार्थग्रहणे रामलक्ष्मणयोरपिपुरस्तात्सीतागच्छतीत्युक्तमासीत् । एवंच "अग्रतोगच्छसौमित्रेसीतात्वामनुगच्छतु । पृष्ठतोऽनुगमिष्यामिसीतांत्वांचानुपालयन्" इत्यादिविरोधइतिपरास्तं । उक्तरीत्याऽग्रशब्दस्योभयार्थकत्वेनविरोधाभावात् ॥ १२ ॥ शि० चिन्तां कालिन्दीतरणोद्देश्यकभरद्वाजोक्तिविषयकस्मृतिं ॥ १३ ॥

[पा०] १ ङ. छ. ज. झ. ट. प्रतिस्रोतःसमागतां. २ घ. सुचरितं. च. ज. प्रचलितं. ३ ङ. च. छ. झ. ञ. ट. प्रकामं. ४ क. ग. ज—ट. राघव. ५ क. प्रवृद्धं. ङ. घ. छ. झ. ञ. ट. परीतं. ६ झ. प्रयुञ्जीताशिषांक्रियां. ङ. ट. प्रयुञ्जीताशिषःक्रियां. ७ ख—च. ज—ट. समासाद्यच. ८ ख. वसेच्चाति. ९ ङ. च. छ. झ. ञ. ट. प्रेक्ष्यच. १० झ. सल्लकीबदरी. ११ क—झ. ट. राम. १२ ङ. छ. झ. वन्यैश्च. १३ ङ. छ. झ. ट. गतस्य. च. ञ. यातःसु. १४ क. ख. ग. ङ. च. छ. झ. ञ. ट. दावैश्चविवर्जितः. १५ ङ. च. छ. झ. ञ. ट. मादिश्य. १६ क. अपावृत्ते. १७ ङ. छ. झ. ट. भद्रंते. १८ ङ. छ. झ. ट. स्रोतस्विनीं. १९ च. छ. झ. ञ. ट. सद्यो.

तौ [1]काष्ठसंघाटमथो [2]चक्रतुस्सुमहाप्लवम् ॥ [3]शुष्कैर्वंशैः [4]समास्तीर्णमुशीरैश्च समावृतम् ॥ १४ ॥
ततो [5]वैतसशाखाश्च [6]जम्बूशाखाश्च वीर्यवान् ॥ चकार लक्ष्मणश्छित्त्वा सीतायाः सुखमासनम् ॥१५॥
तत्र श्रियमिवाचिन्त्यां रामो दाशरथिः प्रियाम् ॥ [7]ईषत्संलज्जमानां [8]तामध्यारोपयत प्लवम् ॥ १६ ॥
पार्श्वे [9]च तत्र वैदेह्या वसने भूषणानि च ॥ प्लवे कठिनकाजं च रामश्चक्रे [10]सहायुधैः ॥ १७ ॥
आरोप्य [11]प्रथमं सीतां संघाटं परिगृह्य तौ ॥ ततः प्रतेरतुर्यत्तौ [12]वीरौ दशरथात्मजौ ॥ १८ ॥
कालिन्दीमध्यमायाता सीता त्वेनामवन्दत ॥ स्वस्ति देवि तरामि त्वां [13]पारयेन्मे पतिर्व्रतम् ॥१९॥
यक्ष्ये त्वां गोसहस्रेण सुराघटशतेन च ॥ स्वस्ति प्रत्यागते रामे पुरीमिक्ष्वाकुपालिताम् ॥ २० ॥
कालिन्दीमथ सीता तु याचमाना कृताञ्जलिः ॥ तीरमेवाभिसंप्राप्ता दक्षिणं [14]वरवर्णिनी ॥ २१ ॥
ततः प्लवेनांशुमतीं शीघ्रगामूर्मिमालिनीम् ॥ तीरजैर्बहुभिर्वृक्षैः संतेरुर्यमुनां नदीम् ॥ २२ ॥
ते [15]तीर्णाः प्लवमुत्सृज्य प्रस्थाय यमुनावनात् ॥ श्यामं न्यग्रोधमासेदुः शीतलं हरितच्छदम् ॥२३॥
न्यग्रोधं [16]तमुपागम्य वैदेही वाक्य[17]मब्रवीत् ॥ नमस्तेऽस्तु महावृक्ष पारयेन्मे [18]पतिर्व्रतम् ॥ २४ ॥
कौसल्यां चैव [19]पश्येयं सुमित्रां च यशस्विनीम् ॥ इति सीताऽञ्जलिं कृत्वा [20]पर्यगच्छद्वनस्पतिम् ॥२५॥
अवलोक्य ततः सीतामायाचन्तीमनिन्दिताम् ॥ दयितां च विधेयां च रामो लक्ष्मणमब्रवीत् ॥२६॥
सीतामादाय गच्छ त्वमग्रतो [21]भरताग्रज ॥ [22]पृष्ठतोऽहं गमिष्यामि सायुधो द्विपदांवर ॥ २७ ॥
यद्यत्फलं प्रार्थयते पु[illegible] जनकात्मजा ॥ तत्त[23]त्प्रदद्या वैदेह्या यत्रास्या रमते मनः ॥ २८ ॥
गच्छतोऽस्तु तयोर्मध्ये बभूव जनकात्मजा ॥ मातङ्गयोर्मध्यगता शुभा नागवधूरिव ॥ २९ ॥

रीत्याकृतार्थतामनुसंधाय ॥ १२—१३ ॥ काष्ठसंघाटः काष्ठनिचयः । उशीरैः वीरणतृणमूलैः । " मूलेस्योशीरमस्त्रियां " इत्यमरः ॥ १४—१५ ॥ अचिन्त्यां अचिन्त्यसौन्दर्यां । कान्तकरग्रहादावश्यकत्वाच्चेषल्लज्जावतीं ॥ १६ ॥ तत्रैव वैदेह्याःपार्श्वे । कठिनकाजं कठिनकं कन्दमूलखननसाधनमायसाग्रंदारु । आजं अजचर्मपिनद्धंपिटकं । द्वन्द्वैकवद्भावः । चक्रे स्थापितवानित्यर्थः ॥ १७ ॥ संघाटं प्लवं । यत्तौ प्लवचालनेयतमानौ ॥ १८ ॥ मेपतिः व्रतं वनवाससंकल्पं । पारयेत् समापयेत् । त्वामुद्दिश्य गोसहस्रेण गोसहस्रप्रदानेन सुराघटशतेनचनैवेद्येन । स्वस्तियथाभवतितथा प्रत्यागतेसति गोसहस्रप्रदानेनसुराघटशतेनचत्वांयक्ष्यइत्यादि याचमाना तीरं प्राप्तेत्यन्वय ॥ १९—२१ ॥ वृक्षैरित्युपलक्षणेतृतीया ॥२२॥ [illegible]मुनावनात् यमुनातीरवनात् ॥ २३—२४ ॥ पर्यगच्छत् प्रदक्षिणंचकार ॥ २५ ॥ अवलोक्य सीतायाः श्रान्त्यश्रान्तीपरीक्ष्येत्यर्थः । आयाचन्तीं मनोरथान्प्रार्थयन्तीं ॥ २६ ॥ भरताग्रजेतिबहुव्रीहिः । अग्रतोगच्छेत्यनेन सीतायाःपुरतोगच्छेत्युक्तं ॥ २७ ॥ अग्रतोगमनफलमाह—यद्यत्फलमित्यादिश्लोकेन ॥ २८

स० आसनं प्लवेउपवेशनार्थं ॥ १५ ॥ स० स्वस्ति सुखंयथाभवतितथा ॥ २० ॥ स० हेभरतानुज बहुव्रीहिः । त्वंसीतामादाय स्वपृष्ठतःकृत्वा । अग्रतः तस्याःपुरस्तात् ॥ २७ ॥

[पा०] १ क. घ. च. संघात. २ ग. घ. ज. चक्रतुस्तु. ३ ङ. छ. झ. ट. शुष्कैर्वन्यैः. ख. शुष्कवंशैः. ४ क. ख. ङ. च. छ. झ. ञ. ट. समाकीर्णं. ५ क. ख. ङ. च. छ. झ. ञ. ट. वैतस. ६ ङ. च. छ. झ. ट. जंबु. ७ क. ग. छ. झ. ञ. ट. त्सलज्जमानां. ८ क. मध्यारोहयत. ९ ख—ट. तत्रच. क. तत्रैव. १० ङ. छ. झ. ट. समाहितः. ११ क. ख. ग. ङ—ट. सीतांप्रथमं. १२ ङ. छ. झ. ट. प्रीतौ. १३ ख. तारयेन्मे. १४ क. जनकात्मजा. च. छ. वरदर्शिनी. १५ ङ. छ. झ. ठ. तेतुतं. १६ ङ. छ. झ. ट. समुपागम्य. ख. तमुपास्थाय. क. तंसमास्थाय. १७ क. च. ञ. लिदमब्रवीत्. ङ. छ. झ. ट. चाभ्यवन्दत. १८ क. व्रतंपतिः. १९ क. ख. ङ. च. छ. पश्यामः. झ. ञ. ट. पश्येम. २० ग. घ. प्रत्यगच्छद्वनस्पतिं. ङ. छ. झ. ट. पर्यगच्छन्मनस्विनी. २१ ङ—ट. भरतानुज. २२ ङ. पृष्ठतोगन्तुमिच्छामि. च. छ. झ. पृष्ठतोऽनु. २३ ङ. च. छ. झ. ञ. ट. त्वंप्रयच्छवैदेह्याः. ख. घ. प्रदद्याद्वैदेह्याः.

एकैकं पादपं गुल्मं लतां वा पुष्पशालिनीम् ॥ [1]अदृष्टपूर्वां पश्यन्ती रामं पप्रच्छ साऽबला ॥३०॥
रमणीयान्बहुविधान्पादपान्[2]कुसुमोत्कटान् ॥ सीतावचनसंरब्ध आनयामास लक्ष्मणः ॥ ३१ ॥
विचित्रवालुकजलां हंससारसनादिताम् ॥ रेमे जनकराजस्य [3]तदा प्रेक्ष्य सुता नदीम् ॥ ३२ ॥
क्रोशमात्रं ततो गत्वा भ्रातरौ रामलक्ष्मणौ ॥ बहून्मेध्यान्मृगान्हत्वा चेरतुर्यमुनावने ॥ ३३ ॥
विहृत्य ते बर्हिणपूगनादिते शुभे वने [4]वानरवारणायुते ॥
समं नदीवप्रमुपेत्य [5]संमतं निवासमाजग्मुरदीनदर्शनाः ॥ ३४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

षट्पञ्चाशः सर्गः ॥ ५६ ॥

प्रभातेसीतालक्ष्मणाभ्यांसहप्रस्थितेनरामेणमार्गेसीतांप्रतिवनरामणीयकादिप्रदर्शनपूर्वकंचित्रकूटमेत्यतत्रवाल्मीक्याश्रमाभिगमनम् ॥ १ ॥ रामेणवाल्मीक्यभ्यनुज्ञयालक्ष्मणेनपर्णशालानिर्मापणम् ॥ २ ॥ तथादेवतायजनादिपूर्वकंसीतालक्ष्मणाभ्यांसहसुमुहूर्तेपर्णशालाप्रवेशः ॥ ३ ॥

अथ रात्र्यां व्यतीतायामवसुप्तमनन्तरम् ॥ प्रबोधयामास शनैर्लक्ष्मणं [6]रघुनन्दनः ॥ १ ॥
सौमित्रे शृणु वन्यानां वल्गु व्याहरतां स्वनम् ॥ संप्रतिष्ठामहे कालः प्रस्थानस्य परंतप ॥ २ ॥
[7]स सुप्तः समये भ्रात्रा लक्ष्मणः प्रतिबोधितः ॥ जहौ निद्रां च [8]तन्द्रीं च प्रसक्तं च [9]पथि श्रमम् ॥३॥
तत उत्थाय ते सर्वे स्पृष्ट्वा नद्याः शिवं जलम् ॥ पन्थानमृ[10]षिणाऽऽदिष्टं चित्रकूटस्य तं ययुः ॥४॥
ततः संप्रस्थितः काले रामः सौमित्रिणा सह ॥ सीतां कमलपत्राक्षीमिदं वचनमब्रवीत् ॥ ५ ॥
आदीप्तानिव वैदेहि सर्वतः [11]पुष्पितान्नगान् ॥ स्वैः पुष्पैः किंशुकान्पश्य मालिनः शिशिरात्यये ॥६॥

—२९ ॥ पप्रच्छ कैषासंज्ञेतिपृष्टवतीत्यर्थः ॥ ३० ॥ पादपानित्येनन स्तवकविशिष्टाः पादपावयवाउच्यन्ते। सीतावचनसंरब्धः सीतावचनेनत्वरितः ॥ ३१ ॥ नदीं यमुनां । सुदूरंतत्तीरेगमनात्तद्दर्शनं ॥ ३२ ॥ मेध्यान् शुचीन् भक्ष्यानितियावत् । चेरतुः भक्षितवन्तौ । चर गतिभक्षणयोः ॥ ३३ ॥ पूगः समूहः । समं अनिम्नोन्नतं । नदीवप्रं नदीतीरं । संमतं निवासं सीताभिमतंवासस्थानं ॥ ३४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने पञ्चपञ्चाशः सर्गः ॥५५॥

अनन्तरं स्वप्रबोधानन्तरं । अवसुप्तं ईषत्सुप्तमित्यर्थः ॥ १ ॥ वन्यानां शुकपिकशारिकादीनां । वल्गु सुन्दरं । कालः प्राप्तइतिशेषः ॥ २ ॥ समये प्रबोधनसमये । तन्द्रीं जाड्यं । जहौ तद्धाप्रभृतीतिशेषः । पथिश्रमं तत्कृतोपचारमित्यर्थः ॥ ३ ॥ नद्याः कालिन्द्याः । स्पृष्ट्वेत्युपलक्षणंप्रातःकालिकस्नानादिकृत्यानां । तंपन्थानं पलाशवनरूपं ॥ ४—५ ॥ आदी-

स० अदृष्टरूपांमितिवि॰रिणतंसत्पादपंगुल्ममित्याभ्यामन्वेति। एकैकमितिवत् ॥ ३० ॥ स० प्रश्नस्त्वपेक्षामूलइतिमत्वा सीता वचने संरब्धः आदरवान् लक्ष्मणः कुसुमोत्करान् पुष्पस्तोमविशिष्टान् । पादपान् तदग्रभागान् । उपलक्षणमेतत् । गुल्मादीनानयामास । तत्तन्नामकथितवानानिन्येच ॥३१॥ स० चेरतुर्भुक्तवन्तौ । परिवेषणकर्त्र्यास्सीतायारामोच्छिष्टभोक्तृत्वेननिमित्तेनतदग्रहणाद्विवचनोपपत्तिः ॥३३॥ स० वारणवानराणामयुतानियस्मिन्नितिव्यधिकरणोबहुव्रीहिः। यद्वा वारणवानरैः आसमन्तायुते । नदीवप्रं यमुनातीरं । "तटेवप्रः" इतिरत्नमाला । उपेत्यतत्रनिवासं आजग्मुश्चक्रुः ॥ ३४ ॥ इतिपञ्चपञ्चाशस्सर्गः ॥ ५५ ॥

ति० अथावसुप्तं स्वप्रबोधानन्तरमपीषत्सुप्तं । एतेन चतुर्दशवर्षपर्यन्तंलक्ष्मणःस्वापहीनोऽनाहारश्चेतिलोकप्रवादोपास्तः । शि० अनन्तरं दूररहितंयथास्यात्तथा । स० अनन्तरंस्वप्रबोधानन्तरंअवसुप्तं निद्रामुद्रितलोचनत्वेनतिष्ठन्तं ॥१॥ ती० मालिनः

[पा०] १ ङ. छ. झ. ञ. ट. अदृष्टरूपां. २ ङ. छ—ट. न्कुसुमोत्करान्. ३ क—ट. सुताप्रेक्ष्यतदा. ४ ग. ङ. च. छ. झ. ञ. ट. वारणवानरायुते. ५ ङ. छ. झ. ञ. ट. सत्वरं. ६ ङ. छ. झ. ट. रघुपुङ्गवः. ७ ङ. छ. झ. ट. प्रसुप्तस्तुततो भ्रात्रासमये. ८ ङ. छ. झ. ञ. ट. तन्द्रां. ९ ख. ङ. च. छ. झ. ञ. ट. परिश्रमं. १० ङ. छ. झ. ट. मृषिभिर्जुष्टं. क. ख. ग. च. ज. ञ मृषिणोद्दिष्टं. घ. मृषिणाजुष्टं. ११ पुष्पितान्द्रुमान्.

पश्य भल्लातकान्[1]फुल्लान्नरैरनुपसेवितान् ॥ फलैः[2]पत्रैरवनतान्नूनं श[3]क्ष्यामि जीवितुम् ॥ ७ ॥
पश्य द्रोणप्रमाणानि लम्बमानानि लक्ष्मण ॥ मधूनि मधुकारीभिः संभृतानि नगेनगे ॥ ८ ॥
एष क्रोशति नत्यूहस्तं शिखी प्रतिकूजति ॥ रमणीये वनोद्देशे पुष्पसंस्तरसंकटे ॥ ९ ॥
मातङ्गयूथानुसृतं पक्षिसंघानुनादितम् ॥ चित्रकूटमिमं पश्य प्रवृद्धशिखरं गिरिम् ॥ १० ॥
समभूमितले रम्ये द्रुमैर्बहुभिरावृते ॥ पुण्ये रं[4]स्यामहे तात चित्रकूटस्य कानने ॥ ११ ॥
ततस्तौ पादचारेण गच्छन्तौ सह सीतया ॥ रम्यमासेदतुः शैलं चित्रकूटं मनोरमम् ॥ १२ ॥
तं तु पर्वतमासाद्य नानापक्षिगणायुतम् ॥ बहुमूलफलं रम्यं [5]संपन्नं सरसोदकम् ॥ १३ ॥
मनोज्ञोऽयं गिरिः सौम्य नानाद्रुमल[6]तायुतः ॥ बहुमूलफलो रम्यः स्वाजीवः प्रतिभाति मे ॥ १४ ॥
मुनयश्च महात्मानो वसन्त्यस्मिञ्शिलोच्चये ॥ अयं वासो [7]भवेत्तावदत्र सौम्य रमेमहि ॥ १५ ॥
इति सीता च रामश्च लक्ष्मणश्च [8]कृताञ्जलिः ॥ अभिगम्याश्रमं सर्वे वाल्मीकिमभिवादयन् ॥ १६ ॥
तान्महर्षिः प्रमुदितः पूजयामास धर्मवित् ॥ आस्यतामिति चोवाच [9]स्वागतं तु निवेद्य च ॥ १७ ॥
[[10]रांघवं प्रीतिसं[11]युक्त इदं वचनमब्रवीत् ॥ ज्ञातं मया रघुश्रेष्ठ त्वदागमनकारणम् ॥
अत्र वासमृषीणां च सकाशे रोचय प्रभो ॥ १८ ॥

इति तेन समाज्ञप्तः प्रीयमाणो महारथः ॥ तथेति प्रतिजग्राह ऋषिणोक्तं कृताञ्जलिः] ॥ १९ ॥
ततोऽब्रवीन्महाबाहुर्लक्ष्मणं लक्ष्मणाग्रजः ॥ संनिवेद्य यथान्यायमात्मानमृषये प्रभुः ॥ २० ॥
लक्ष्मणानय दारूणि दृढानि च वराणि च ॥ कुरुष्वावसथं सौम्य वासे मेऽभिरतं मनः ॥ २१ ॥
तस्य तद्वचनं श्रुत्वा सौमित्रिर्विविधान्द्रुमान् ॥ आजहार ततश्चक्रे पर्णशालामरिंदमः ॥ २२ ॥

प्तानिव आसमन्ताज्ज्वलतइव ! नगान् वृक्षान् । स्वैः पुष्पैः मालिनः मालावतइवस्थितान् । शिशिरात्यये वसन्तसमये ॥ ६ ॥ भल्लातकान् वीरवृक्षान् । फुल्लान् फुल्लपुष्पान् । अनुपसेवितान् दुर्गमत्वादिति भावः । जीवितुंशक्ष्यामि एवमादिजीवनसाधनस्य विद्यमानत्वादितिभावः ॥ ७ ॥ द्रोणप्रमाणानि द्रोणं आढकद्वयंतत्प्रमाणानि तत्प्रमाणमधुपूरितानि । मधूनिकुर्वन्तीतिमधुकार्यः कर्मण्यण् ङीप् । ताभिः मधुमक्षिकाभिरितियावत् । संभृतानि निर्मितानि । नगेनगे वृक्षेवृक्षे लम्बमानानिमधूनि मधुपटलानि पश्य ॥ ८ ॥ नत्यूहः दात्यूहः । वनोद्देशे वनप्रदेशे । पुष्पसंस्तरसंकटे पुष्पमयास्तरणेननिबिडे ॥ ९ ॥ मातङ्गयूथानुसृतं गजकुलैर्व्याप्तं । प्रवृद्धशिखरं उन्नतशिखरं ॥ १०—१२ ॥ तंत्वित्यारभ्यअभिवादयन्नित्यन्तमेकं वाक्यं । सरसोदकं स्वादूदकं । स्वाजीवः शोभनःआजीवोजीविकायस्मिन्सतथोक्तः । शिलोच्चये पर्वते । इति इतिनिश्चित्य । आश्रमं वाल्मीकीयं । अभिवादयन् अभ्यवादयन् । तदानींचित्रकूटेवाल्मीकेर्वासः भरतागमनानन्तरमृषिनिर्गमनकथनात्ततःप्रभृतितमसातीरइतिज्ञेयम् । अतोनबालकाण्डकथाविरोधः ॥ १३—१९ ॥ ततइत्यादिश्लोकद्वयमेकंवाक्यं । यथान्यायं यथाक्रमं । आत्मानमृषयेसंनिवेद्य अमुकस्य पुत्रोहं अयं मद्भ्राता इयंमद्भार्या एतादृशकार्यार्थमागता वयमित्येवमुक्त्वा वराणि जम्बूप्रभृतीनि गृहनिर्माणार्हाणि । तिन्त्रिणीमधूकादेस्त्याज्यत्वात् । आनय आवसथंकुरुष्वेति लक्ष्मणमब्रवीदिति संबन्धः ॥ २०—२२ ॥

श्रेणीभूतान् ॥ ६ ॥ शि० शक्ष्याम शक्ष्यामः ॥ ७ ॥ ति० चित्रकूटेस्थितएववाल्मीकिः रामराज्यप्राप्तिसमयेतमसातीरंगतइतिनविरोधइतिप्राञ्चः । प्राचेतसादयंवाल्मीकिरन्यएवेतितत्वं ॥ १६ ॥ शि० वराणि निषिद्धच्छायकविभीतकादिभिन्नत्वेनोत्कृष्टा-

[पा०] १ क. ख. ङ—ट. न्बिल्वान्. २ ङ. च. छ. झ. ट. फलपुष्पैरव. ३ घ—ट. शक्ष्याम. ४ ख. च. ञ. रंस्यावहे. ५ क. ख. ग. ङ—ट. संपन्नसरसोदकं. ६ क. फलायुतः. ७ ङ. छ. झ. ट. भवेत्तातवयमत्रवसेमहि. ख. भवेत्तावद्वनमत्रवसेमहि. ८ ग. घ. ज. महामतिः. ९ ग. घ. स्वागतंच. ङ. झ. ञ. ट. स्वागतंतं. १० कुण्डलान्तर्गतमर्धपञ्चकं. क. च. पुस्तकयोर्दृश्यते. ११ संयुक्तं.

तां निष्ठितां बद्धकटां दृष्ट्वा रामः सुदर्शनाम् ॥ शुश्रूषमाणमेकाग्रमिदं वचनमब्रवीत् ॥ २३ ॥
ऐणेयं मांसमाहृत्य शालां यक्ष्यामहे वयम् ॥ कर्तव्यं वास्तुशमनं सौमित्रे चिरजीविभिः ॥ २४ ॥
मृगं हत्वाऽऽनय क्षिप्रं लक्ष्मणेह शुभेक्षण ॥ कर्तव्यः शास्त्रदृष्टो हि विधिर्धर्ममनुस्मर ॥ २५ ॥
भ्रातुर्वचनमाज्ञाय लक्ष्मणः परवीरहा ॥ चकार स यथोक्तं च तं रामः पुनरब्रवीत् ॥ २६ ॥
ऐणेयं श्रपयस्वैतच्छालां यक्ष्यामहे वयम् ॥ त्वर सौम्य मुहूर्तोऽयं ध्रुवश्च दिवसोप्ययम् ॥ २७ ॥
स लक्ष्मणः कृष्णमृगं हत्वा मेध्यं प्रतापवान् ॥ अथ चिक्षेप सौमित्रिः समिद्धे जातवेदसि ॥ २८ ॥
तं तु पक्वं समाज्ञाय निष्टप्तं छिन्नशोणितम् ॥ लक्ष्मणः पुरुषव्याघ्रमथ राघवमब्रवीत् ॥ २९ ॥
अयं कृष्णः समाप्ताङ्गः शृतः कृष्णमृगो यथा ॥ देवतां देवसंकाश यजस्व कुशलो ह्यसि ॥ ३० ॥
रामः स्नात्वा तु नियतो गुणवाञ्जप्यकोविदः ॥ संग्रहेणाकरोत्सर्वान्मन्त्रान्सत्रावसानिकान् ॥ ३१ ॥
इष्ट्वा देवगणान्सर्वान्विवेशावसथं शुचिः ॥ बभूव च मनोह्लादो रामस्यामिततेजसः ॥ ३२ ॥

निष्ठितां निश्चलां वातादिनाचालयितुमशक्यां भित्तिसहितां परिनिष्पन्नां । बद्धकटां कुड्यार्थंकल्पितास्तरणां बद्धबाह्यावरणांवा । कटेवर्षावरणयोरितिधातुः । सुदर्शनां शोभनदर्शनां । शुश्रूषमाणं परिचर्यांकुर्वन्तं । एकाग्रं इतःपरंकिंवाआज्ञापयिष्यतीतिसावधानं॥२३॥ ऐणेयं एणसंबन्धि एणाड्ढञ्आर्षः । शालां शालाधिष्ठात्रीस्तत्तद्दिग्वासिनीर्देवताः । तास्तु शय्यादेशेकामलिङ्गेनदेहल्यामन्तरिक्षलिङ्गेनेत्यादिनगरखण्डप्रतिपाद्याः । तादृशयागार्थंपूर्वं वास्तुशमनं वास्तुशान्तिः गृहप्रवेशार्हकर्म कर्तव्यं गृहदेशेवर्तमानभूतपिशाचादीनांशमनंकर्तव्यमित्यर्थः । कर्तव्यंचिरजीविभिरित्यनेन अकरणेआयुःक्षयोदर्शितः । तदुक्तंब्रह्माण्डपुराणे । "नचव्याधिभयंतस्यनचबन्धुजनक्षयः । जीवेद्वर्षशतंस्वर्गकल्पमेवंवसेन्नरः" इति ॥ २४ ॥ कथं कर्तव्यमित्यपेक्षायामाह—कर्तव्यइति । शास्त्रदृष्टः शास्त्रेपुनिर्णीतः । विधिः प्रकारः कर्तव्यः । धर्मं तदनुकूलधर्मशास्त्रं । अनुस्मर अवधेहीत्यर्थः ॥ २५—२६ ॥ श्रपयस्व पच । अयंमुहूर्तः ध्रुवः स्थिरः । अयंशोभनतिथिनक्षत्रयुक्तोदिवसोवासरश्च ध्रुवः स्थिर इत्यर्थः । [अयंसौम्यमुहूर्तः शुभमुहूर्तः । अयंदिवसश्च ध्रुवः यजमानस्थैर्यकारी] ॥ २७ ॥ समिद्धे सम्यग्दीप्ते । जातवेदसि अग्नौ । चिक्षेप पपाचेत्यर्थः ॥ २८ ॥ निष्टप्तं सोष्णं । छिन्नशोणितं ॥ २९ ॥ कृष्णः कृष्णमृगः । समाप्ताङ्गः परिपूर्णावयवः । शृतः पक्वः । कृष्णमृगो यथा पूर्णावयवत्वात् पाकतःश्यामत्वाच्च पूर्वावस्थइवदृश्यतइत्यर्थः । कुशलोसि यजनेसमर्थोसि ॥ ३० ॥ गुणवान् प्रायत्यादिगुणवान् । जप्यकोविदः जप्यमन्त्रेषुसमर्थः । संग्रहेण संक्षेपेण । सत्रावसानिकान् सत्रंवास्तुयागः यैर्मन्त्रैरवसीयतेपरिसमाप्यतेतेसत्रावसानाः सत्रावसानाएवसत्रावसानिकाः । विनयादेराकृतिगणत्वात्स्वार्थेठक् । छान्दसोवृद्ध्यभावः । अकरोत् यावतावास्तुशान्तिकर्मसमाप्यते तावन्मन्त्रान् जजापेत्यर्थः । मन्त्रजपपूर्वकं कर्माण्यकरोदित्यर्थः ॥ ३१ ॥ देवगणान् वास्तुदेव-

---

नि ॥ २१ ॥ ति० बद्धकटां बद्धकवाटां । छान्दसोवर्णलोपः । यद्वा बद्धच्छदिषं । बद्धःकटःवर्षावारकोयस्यामित्यर्थात् ॥ २३ ॥ ती० वास्तुशब्देन गृहाधिष्ठितशिखिपर्जन्यप्रभृतिपञ्चचत्वारिंशद्देवताउच्यंते । तासांशमनंहोमनैवेद्यबलिभिःपूजनं ॥ २४ ॥ बोधायनेनोक्तांयज्ञार्थपशुवधदोषशङ्कांनिवर्तयति—कर्तव्यइति । शास्त्रदृष्टः शास्त्रचोदितः । विधिःकर्तव्यएव । तंधर्ममेवानुस्मर । नात्रहिंसादिदोषप्रसङ्गः । यज्ञविनियुक्तपशूनामुत्तमलोकभागित्वेनवधस्यतेषामनुग्रहत्वाच्च । "नवाउवेतन्म्रियसेनरिष्यसिदेवाँइदेषिपथिभिस्सुगेभिः । यत्रयन्तिसुकृतोनापिदुष्कृतस्तत्रत्वादेवस्सवितादधातु" इतिहिश्रूयते । तस्माद्यज्ञेवधोऽवधइतिचस्मर्यते ॥ २५ ॥ शि० त्वर अत्रविलंबंनकुर्वित्यर्थः । तत्रहेतुःअयंमुहूर्तोध्रुवः ध्रुवसंज्ञकः । निश्चयेनकार्यसाधकइत्यर्थः । ननुपुनरयमागमिष्यतिकिंत्वरयेत्यतआह । अयं विधिः । दिवसः दिवससंबन्धी । रात्रौनकर्तव्यइत्यर्थः ॥ २७ ॥ ति० सर्वः सर्वकर्मार्हः । स० समस्ताङ्गः शिरआदिसर्वावयवोपेतः । सर्वः हिंसितः । अर्वषर्वहिंसायामितिधातोः "धात्वादेः षस्सः" इतिषस्यसत्वेवब-

[पा०] १ क. ख. ग. च. ज. मनुस्मरन्. २ ङ. झ. चकारचयथोक्तंहि. क—घ. च. झ. ज. ञ. ट. चकारचयथोक्तंस. ३ क—ट. दिवसोह्ययं. ४ ङ. छ. झ. ट. सर्वःसमस्ताङ्गः. ५ ङ. छ. झ. ट. मया. ६ ग. ङ. छ. ज. झ. ट. देवतादेव. ७ ङ. झ. ट. गुणवाञ्जप. ८ क. ग. घ. च. ज. विवेशवसतिं.

वैश्वदेवबलिं कृत्वा रौद्रं वैष्णवमेव च ॥ वास्तुसंशमनीयानि मङ्गलानि प्रवर्तयन् ॥ ३३ ॥
जपं च न्यायतः कृत्वा स्नात्वा नद्यां यथाविधि ॥ पापसंशमनं रामश्चकार बलिमुत्तमम् ॥ ३४ ॥
वेदिस्थलविधानानि चैत्यान्यायतनानि च ॥ आश्रमस्यानुरूपाणि स्थापयामास राघवः ॥ ३५ ॥
वन्यैर्माल्यैः फलैर्मूलैः पक्वैर्मांसैर्यथाविधि ॥ अद्भिर्जपैश्च वेदोक्तैर्दर्भैश्च ससमित्कुशैः ॥ ३६ ॥
तौ तर्पयित्वा भूतानि राघवौ सह सीतया ॥ तदा विविशतुः शालां सुशुभां शुभलक्षणौ ॥ ३७ ॥

तां वृक्षपर्णच्छदनां मनोज्ञां यथाप्रदेशं सुकृतां निवाताम् ॥
वासाय सर्वे विविशुः समेताः सभां यथा देवगणाः सुधर्माम् ॥ ३८ ॥
अनेकनानामृगपक्षिसंकुले विचित्रपुष्पस्तबकैर्द्रुमैर्युते ॥
वनोत्तमे व्यालमृगानुनादिते तदा विजह्रुः सुसुखं जितेन्द्रियाः ॥ ३९ ॥
सुरम्यमासाद्य तु चित्रकूटं नदीं च तां माल्यवतीं सुतीर्थाम् ॥
ननन्द हृष्टो मृगपक्षिजुष्टां जहौ च दुःखं पुरविप्रवासात् ॥ ४० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे षट्पञ्चाशः सर्गः ॥ ५६ ॥

ताः । द्वादस्तुभिः ॥ ३२ ॥ वैश्वदेवबलिं वैश्वदेवबलिहरणे । रौद्रं रुद्रदेवताकं । वैष्णवं विष्णुदेवताकंच यागं । वास्तुसंशमनीयानि गृहारिष्टशामकानि । मङ्गलानि मङ्गलकराणिपुण्याहवाचनशान्तिजपादीनि । स्नात्वेति पुनःस्नानकरणं "ततःसर्वौषधीस्नानं यजमानस्यकारयेत्" इतिस्मरणादित्याहुः । वस्तुतस्तु रौद्रयागकरणात्पुनःस्नानं । रौद्रकर्मकरणे अपउपस्पृश्येतिविधानादितिज्ञेयम् । पापसंशमनं पापशब्देन पापप्रधानानिदिवाचरनक्तंचराणिक्रूरभूतान्युच्यन्ते । तेषांसंशमनं । यद्वा पापसंशमनं पञ्चसूनागृहस्थस्येत्याद्युक्तरीत्यासूनारूपपापशमनं । वैश्वदेवबलिमित्यत्रभूतबलिमात्रोक्तिः । अत्रतद्व्यतिरिक्तःपित्रादिविषयः । यद्वा पूर्ववैश्वदेवरूपबलिमित्यर्थः । अत्रसर्वभूतबलिः । यद्वा पूर्वोक्तस्यसर्वस्योपसंहारः ॥३३—३४॥ वेदिस्थलविधानानि बलिहरणादिवेदिस्थलसंस्थानानि । "वेदिःपरिष्कृताभूमिः" इत्यमरः । चैत्यानि गन्धर्वाद्यावासस्थानानि । आयतनानि विष्ण्वाद्यावासस्थलानि । [चैत्यानि देवतास्थानानि । आयतनानि अग्न्यगाराणि । अनुरूपाणि आश्रमस्यानुरूपाणिसूक्ष्माणीत्यर्थः । स्थापयामास मन्त्रतस्तत्तद्देवतानांतत्रतत्रावस्थानंकल्पितवानित्यर्थः] ॥ ३५—३७ ॥ वृक्षपर्णच्छदनां वृक्षपर्णरूपाच्छादनपटलयुक्तां यथाप्रदेशं शास्त्रोक्तप्रदेशमनतिक्रम्य । आग्नेय्यांपाकशालेत्यादि शास्त्रं । सुधर्मा देवसभां "स्यात्सुधर्मादेवसभे"त्यमरः ॥ ३८ ॥ पुष्पस्तबकपदं कर्णावतंसादिपदवन्निर्वाह्यं । व्यालाः सर्पाः गजावा । जितेन्द्रियाइत्यनेन विहारोग्राम्यभिन्नजलक्रीडापुष्पापचयादिरितिसूच्यते ॥ ३९ ॥ तां प्रसिद्धां । सुतीर्थां शोभनजलावतरणप्रदेशां । हृष्टः पुलकितः पुरविप्रवासात् जनितमितिशेषः ॥ ४० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने षट्पञ्चाशःसर्गः ॥ ५६ ॥

योरभेदात्सर्वइतिरूपं ॥ ३० ॥ ती० वास्तुसंशमनीयानि वास्तुदोषसंशमनार्थानिगर्भन्यासादीनि ॥ ३३ ॥ ति० पापसंशमनं पापशमनसाधनं बलिं वैश्वदेवबलिमित्युपसंहारेणवादः ॥ ३४ ॥ ती० चैत्यं गणपत्यायतनं ॥ ३५ ॥ इतिषट्पञ्चाशस्सर्गः ॥ ५६ ॥

[पा०] १ ख. विमानानि. २ क. मूलैःफलैर्माल्यैः. ३ क. ख. च. ञ. समिद्गणैः. ४ ञ. सुकृतानिवासतां. ५ क. च. नानाविध. ६ च. ञ. स्तबकद्रुमैः. ७ क. ख. च. ज. झ. रामो. ८ ख. विप्रवासनात्.

सप्तपञ्चाशः सर्गः ॥ ५७ ॥

गुहचारै रामस्यचित्रकूटगमनादिकं निवेदितेन सुमन्त्रेण गुहसमापृच्छनपूर्वकं सायाह्ने अयोध्याप्रवेशः ॥ १ ॥ तथा स्वानुद्रवत्पौरेपुरामवृत्तान्तनिवेदनपूर्वकमन्तःपुरमेत्यदशरथे रामवृत्तान्तनिवेदनम् ॥ २ ॥ तच्छ्रवणेनकौसल्यादशरथयो-र्मूर्च्छयापतितयोःसतोःसर्वैर्दुःखात्परिदेवनम् ॥ ३ ॥

कथयित्वा सुदुःखार्तस्सुमन्त्रेण चिरं सह ॥ रामे दक्षिणकूलस्थे जगाम स्वगृहं गुहः ॥ १ ॥
भरद्वाजाभिगमनं प्रयागे च सहासनम् ॥ आगिरेर्गमनं तेषां तत्रस्थैरभिलक्षितम् ॥ २ ॥
अनुज्ञातः सुमन्त्रोथ योजयित्वा हयोत्तमान् ॥ अयोध्यामेव नगरीं प्रययौ गाढदुर्मनाः ॥ ३ ॥
स वनानि सुगन्धीनि सरितश्च सरांसि च ॥ पश्यन्नतिययौ शीघ्रं ग्रामाणि नगराणि च ॥ ४ ॥
ततः सायाह्नसमये तृतीयेऽहनि सारथिः ॥ अयोध्यां समनुप्राप्य निरानन्दां ददर्श ह ॥ ५ ॥
स शून्यामिव निश्शब्दां दृष्ट्वा परमदुर्मनाः ॥ सुमन्त्रश्चिन्तयामास शोकवेगसमाहतः ॥ ६ ॥
कच्चिन्न सगजा साश्वा सजना सजनाधिपा ॥ रामसंतापदुःखेन दग्धा शोकाग्निना पुरी ॥ ७ ॥
इति चिन्तापरः सूतो वाजिभिः शीघ्रपातिभिः ॥ नगरद्वारमासाद्य त्वरितः प्रविवेश ह ॥ ८ ॥
सुमन्त्रमभियान्तं तं शतशोथ सहस्रशः ॥ क्व राम इति पृच्छन्तः सूतमभ्यद्रवन्नराः ॥ ९ ॥
तेषां शशंस गङ्गायामहमापृच्छ्य राघवम् ॥ अनुज्ञातो निवृत्तोस्मि धार्मिकेण महात्मना ॥ १० ॥
ते तीर्णा इति विज्ञाय बाष्पपूर्णमुखा जनाः ॥ अहो धिगिति निश्वस्य हा रामेति च चुक्रुशुः ॥ ११ ॥
शुश्राव च वचस्तेषां बृन्दंबृन्दं च तिष्ठताम् ॥ हताः स्म खलु ये नेह पश्याम इति राघवम् ॥ १२ ॥

एवंरामस्यचित्रकूटगमनपर्यन्तवृत्तान्तमभिधाय गुहसुमन्त्रादिवृत्तान्तमृषिःप्रस्तौति—कथयित्वेति । गुहो रामेदक्षिणकूलस्थेसति सुदुःखार्तःसन् सुमन्त्रेण सह चिरंकथयित्वा यावद्रामोक्षिपथमतिक्रामति तावत्पर्यन्तंतत्रैवस्थित्वारामगुणान्कथयित्वेत्यर्थः । स्वगृहंजगाम तेनसहस्वगृहंजगामेत्यर्थः ॥ १ ॥ तेषां रामादीनां भरद्वाजाभिगमनं भरद्वाजसेवनं प्रयागे भरद्वाजेनसहासनं आगिरेश्चित्रकूटपर्यन्तंगमनंच तत्रस्थैः श्रृङ्गिबेरपुरस्थैश्चारैः अभिलक्षितं निवेदितं सुमन्त्रेणसम्यग्विदितमित्यर्थः । गङ्गोत्तरणदिवसनिशा वनस्पतिमूले द्वितीयाभरद्वाजाश्रमे तृतीयायमुनातीरे चतुर्थेऽहनिचित्रकूटगमनं पञ्चमेपुनरागम्यचारैर्निवेदनं ॥ २ ॥ अथ रामवृत्तान्तश्रवणानन्तरं । अनुज्ञातः गुहेनेतिशेषः । गाढदुर्मनाः अत्यन्तदुर्मनाः ॥ ३ ॥ ग्रामाणि ग्रामान् ॥ ४ ॥ ततः ग्रामनगरातिक्रमणानन्तरं । तृतीयेऽहनि श्रृङ्गिबेरपुरान्निर्गमापेक्षयातृतीयदिवसे । यद्वा अहनितृतीयेसायाह्नसमये अह्नःतृतीयकालभूतेसायाह्नकाले अयोध्यांसमनुप्राप्य निरानन्दां तांददर्श ॥ ५—७ ॥ त्वरितःप्रविवेश नगरंजनसंचारशून्यंनिश्शब्दंवर्तते राजाकामवस्थांप्राप्तइतिज्ञातुंत्वरितःप्रविष्टवानित्यर्थः ॥ ८—९ ॥ गङ्गायां गङ्गातीरे । निवृत्तोस्मीतितेषांशशंसेति संबन्धः ॥ १० ॥ ते रामादयः ॥ ११ ॥ बृन्दंबृन्दंचतिष्ठतां संघशस्तिष्ठतां । हताइति येवयं इह अस्मिन्रथे राघवंनपश्यामः इति अस्माद्धेतोः । तेहताःस्मेतिसंबन्धः । दानादिषु अन्तरा मध्येनायकमणिवद्वर्तमानंरामं पुनःजातुकदा-

---

ति० गङ्गोत्तरणतृतीयदिवसेभरद्वाजाश्रमात्प्रतिनिवृत्तदूतमुखात्तावत्पर्यन्तंतद्वृत्तंज्ञात्वातद्दिनएवश्रृङ्गबेरपुरात्सुमन्त्रस्यप्रतिनिवृत्तिरितिबोध्यं । अतएव "रामस्यनिर्गमदिनाद्दिनेषष्ठेऽर्धरात्रके । हाहालक्ष्मणहासीतेहारामेतिमृतोनृपः" इतिपाद्मंसंगच्छते । दिनद्वयेन श्रृङ्गबेरपुरेरामागमनं । तद्वितीयदिनेगङ्गोत्तरणं । तदादिदिनत्रयंसुमन्त्रस्यतत्रस्थितिः । तत्रतृतीयदिवसेमध्याह्नेप्रयागतआगतचारेभ्यो रामवृत्तान्तंलब्ध्वाततःप्रस्थायमध्येऽवस्थानं । ततष्षष्ठेऽपराह्णेऽयोध्याप्रवेशःसुमन्त्रस्य । तदर्धरात्रेराज्ञोमरणं ॥ २ ॥ ति० यत्तः

[पा०] १ ङ. छ. झ. ट. कथयित्वातु. २ ख. तीरस्थे. ३ क. सहवासनं. ङ. झ. ट. चसभाजनं. ४ क. रुपलक्षितं. ५ ङ. झ. ट. पश्यन्यत्तो. ६ ङ. छ. झ. ट. द्वितीयेहनि. ७ ख. शोकेन. ८ ङ. च. छ. झ. ञ. ट. यायिभिः. ९ ङ. च. छ. झ. मभिधावन्तः. ख. ग. मभिधावन्तं. ट. मभियान्तंतु. १० ख. ङ. छ. ज. झ. ट. नराः. ११ ङ. च. छ. झ. ट. विचुक्रुशुः.

दानयज्ञविवाहेषु समाजेषु[1] महत्सु च ॥ न द्रक्ष्यामः पुनर्जातु धार्मिकं राममन्तरा ॥ १३ ॥
किं समर्थं जनस्यास्य किं प्रियं किं सुखावहम् ॥ इति रामेण नगरं पितृवत्[2]परिपालितम् ॥ १४ ॥
वातायनगतानां च स्त्रीणामन्वन्तरापणम् ॥ रामशोका[3]भितप्तानां शुश्राव परिदेवनम्[4] ॥ १५ ॥
स राजमार्गमध्येन सुमन्त्रः पिहिताननः ॥ यत्र राजा दशरथस्तदेवोपययौ गृहम् ॥ १६ ॥
सोवतीर्य रथा[5]च्छीघ्रं राजवेश्म प्रविश्य च ॥ कक्ष्याः स[6]प्ताभिचक्राम महाजनसमाकुलाः ॥ १७ ॥
हर्म्यैर्विमानैः प्रासादैरवेक्ष्याथ समागतम् ॥ हाहाकारकृता नार्यो रामादर्शनकर्शिताः ॥ १८ ॥
आयतैर्विमलैर्नेत्रैरश्रुवेगपरिप्लुतैः ॥ अन्योन्यमभिवीक्षन्तेऽव्यक्तमार्ततराः स्त्रियः ॥ १९ ॥
ततो दशरथस्त्रीणां प्रासादेभ्यस्ततस्ततः ॥ रामशोकाभितप्तानां मन्दं शुश्राव जल्पितम् ॥ २० ॥
स[7]ह रामेण निर्यातो विना राममिहागतः ॥ सूतः किं नाम कौसल्यां शो[8]चन्तीं प्रतिवक्ष्यति ॥ २१ ॥
यथा च मन्ये दुर्जीवमेवं न सुकरं ध्रुवम् ॥ आ[9]च्छिद्य पुत्रे निर्याते कौसल्या यत्र जीवति ॥ २२ ॥
सत्यरूपं तु तद्वाक्यं रा[10]ज्ञः स्त्रीणां निशामयन् ॥ प्र[11]दीप्तइव शोकेन विवेश सहसा गृहम् ॥ २३ ॥
स प्रविश्याष्टमीं कक्ष्यां राजानं दीनमातुरम् ॥ पुत्रशोकपरिद्यूनमपश्यत्पाण्डुरे गृहे ॥ २४ ॥

चिदपिनद्रक्ष्यामः किमितिकाकुः । येनकेनापिदाने क्रियमाणे रामःस्वयंतत्रगत्वातिष्ठति किमर्थं देशेकालेपात्रेचदापयितुं । यज्ञेपिगच्छति किमर्थं न्यायार्जितधनैःकारयितुं तत्तत्कर्मसंदेहविच्छेदविस्मृतज्ञापनादिकंकर्तुंच । विवाहेच मध्येगच्छति किमर्थं उभयवर्गसंघटनायासंमतानामभिमतद्रविणप्रदानाय अस्खलितंकर्मणामनुष्ठापनायच । समाजेषुमहत्सु अन्यत्रापिमहासदस्सु दीर्घसत्रेष्वपीत्यर्थः । यत्रकुत्राप्यदृष्टकार्येष्वितिवा । अत्रसर्वत्रहेतुः—धार्मिकमिति । किमिति अस्यजनस्य किंसमर्थं किंक्षेमंकरंवस्तु किंप्रियंकिंसुखावहमिति रामेण तत्तदभिमतवस्तुप्रदात्रारामेण पित्रेवनगरंपरिपालितं । नगरशब्देननगरस्थजनालक्ष्यन्ते । इतिवचःशुश्रावेतिपूर्वेणसंवन्धः ॥ १२—१४ ॥ अन्वन्तरापणंशुश्राव उभयपार्श्वस्थानामापणानांमध्येमध्येशुश्रावेत्यर्थः । विभक्त्यर्थेऽव्ययीभावः ॥ १५ ॥ पिहिताननः जनदर्शनाक्षमतया ॥ १६ ॥ राजनिर्गमाभावेन महाजनसंकुलत्वं ॥१७॥ हर्म्यैः धनिनांवासैः । विमानैः सप्तभूमिगृहैः । "विमानोस्त्रीदेवयानेसप्तभूमिगृहेपिच" इतिवैजयन्ती । प्रासादैः महाराजार्हगृहविशेषैः । उपलक्षिताःनार्यः समागतं रामेणविनासमागतंसुमन्त्रमवेक्ष्य हाहाकारकृताः कृतहाहाकाराः बभूवुरितिशेषः ॥ १८ ॥ अव्यक्तं अस्पष्टमिति क्रियाविशेषणं ॥ १९—२० ॥ सहरामेणेत्यादिश्लोकत्रयमेकंवाक्यं । यत्रेति विभक्तिप्रतिरूपकोनिपातः प्रथमार्थेवर्तते। यथा "कइत्थावेद यत्रसः" इत्यत्र यथा येनप्रकारेण । अस्मज्जीवितं दुर्जीवं दुःखेनजीवनार्हं मन्ये। एवमेवकौसल्या पुत्रे निर्यातेसति । आच्छिद्य प्रसह्य । जीवतियत्र जीवतीतियत् तत् नसुकरं दुःसंपादं ध्रुवंमन्यइत्येकैकव्यक्त्यपेक्षयाएकवचनं विभक्तिप्रतिरूपकमव्ययंवा । निशामयन् निशमयन् दीर्घश्छान्दसः। शृण्वन्नित्यर्थः ॥ २१—२३ ॥ परिद्यूनं क्षीणं "दिवोऽविजिगीषा-

सावधानः ॥ ४ ॥ विषम० समाधिषु समाजेषु ॥ १३ ॥ ती० अनु अनन्तरं ॥ १५ ॥ ती० प्रासादेभ्यइति सुमन्त्रस्य राजवेश्मप्रविष्टत्वेनततोऽवतीर्णानामितिशेषः । मन्दंजल्पितमिति राजसांनिध्यान्मन्दत्वं । शि० मन्दंशुश्राव । एतेनेन्द्रियपाटवराहित्यंसूचितं । तेनरामवियोगदुःखस्यातिशयवत्त्वंव्यञ्जितम् ॥ २० ॥ ति० यत्र यतः । पुत्रे रामे । आच्छिद्य न्यायप्राप्तमभिषेकमाच्छिद्य त्यक्त्वा निर्यातेसत्यपि कौसल्याजीवति । शि० आच्छिद्य राज्यंत्यक्त्वेत्यर्थः । पुत्रेनिर्याते यत्र यस्मिन्नुपायेसति । कौसल्याजीवति तंध्रुवं निश्चितं । सुकरमुपायंनमन्ये । ननुकौसल्यायानित्यत्वान्मरणाभावेनजीवनंसिद्धमेवेत्यतआहुः । एवंचेत् दुर्जीवं यावद्रामागमनंदुःखेनजीवनं । यथा यथावन्मन्ये । चशब्दश्चेदर्थे । स० यथातस्याः एवंममापिजीवनं नसुकरंध्रुवंमन्ये ॥ २२ ॥ ति० सत्यरूपं परमार्थरूपं तत्स्त्रीणांवाक्यंनिशामयञ्शोकेनप्रदीप्तइवसत्राजगृहंविवेश । अत्रश्लोकद्वयेतीर्थकृतकादि.

[पा०] १ ञ. समाधिषु. २ ख. ङ. छ. झ. ट. पित्रेवपरि. ३ ख. घ—छ. झ. ट. राममेवाभि. ४ ग. घ. परिदेवितं. झ. परिदेवनां. ५ घ. रथात्तूर्णं. ६ ख. ग. ज. सप्ताति. ७ घ. सरामेणविनिर्यातो. ८ ङ. च. छ. झ. ञ. ट. क्रोशन्तीं. ९ क. प्रसह्य. १० क. ख. ग. ङ—ट. राजस्त्रीणां. ११ क. ख. ङ. च. छ. झ. ञ. ट. राजानं.

अभिगम्य तमासीनं नरेन्द्रमभिवाद्य च ॥ सुमन्त्रो रामवचनं यथोक्तं प्रत्यवेदयत् ॥ २५ ॥
स तूष्णीमेव तच्छ्रुत्वा राजा विभ्रान्तचेतनः ॥ मूर्च्छितो न्यपतद्भूमौ रामशोकाभिपीडितः ॥२६॥
ततोऽन्तःपुरमाविद्धं मूर्च्छिते पृथिवीपतौ ॥ उद्धृत्य बाहू चुक्रोश नृपतौ पतिते क्षितौ ॥ २७ ॥
सुमित्रया तु सहिता कौसल्या पतितं पतिम् ॥ उत्थापयामास तदा वचनं चेदमब्रवीत् ॥ २८ ॥
इमं तस्य महाभाग दूतं दुष्करकारिणः ॥ वनवासादनुप्राप्तं कस्मान्न प्रतिभाषसे ॥ २९ ॥
अद्येममनयं कृत्वा व्यपत्रपसि राघव ॥ उत्तिष्ठ सुकृतं तेऽस्तु शोके न स्यात्सहायता ॥ ३० ॥
देव यस्या भयाद्रामं नानुपृच्छसि सारथिम् ॥ नेह तिष्ठति कैकेयी विस्रब्धं प्रतिभाष्यताम् ॥३१॥
सा तथोक्त्वा महाराजं कौसल्या शोकलालसा ॥ धरण्यां निपपाताशु बाष्पविप्लुतभाषिणी ॥३२॥
एवं विलपतीं दृष्ट्वा कौसल्यां पतितां भुवि ॥ पतिं चावेक्ष्य ताः सर्वाः सुस्वरं रुरुदुः स्त्रियः॥३३॥
ततस्तमन्तःपुरनादमुत्थितं समीक्ष्य वृद्धास्तरुणाश्च मानवाः ॥
स्त्रियश्च सर्वा रुरुदुः समन्ततः पुरं तदाऽऽसीत्पुनरेव संकुलम् ॥ ३४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे सप्तपञ्चाशः सर्गः ॥ ५७ ॥

अष्टपञ्चाशः सर्गः ॥ ५८ ॥

दशरथेनसुमन्त्रंप्रतिरामाद्यनर्हवनसंचरणाद्यनुशोचनपूर्वकं तत्तद्वचनप्रकारकथनचोदना ॥ १ ॥ सुमन्त्रेणतंप्रतिरामलक्ष्मण-वचनप्रकारस्यसीतावस्थाप्रकारस्यचनिवेदनम् ॥ २ ॥

प्रत्याश्वस्तो यदा राजा मोहात्प्रत्यागतः पुनः ॥ अथाजुहाव तं सूतं रामवृत्तान्तकारणात् ॥ १ ॥
अथ सूतो महाराजं कृताञ्जलिरुपस्थितः ॥ राममेवानुशोचन्तं दुःखशोकसमन्वितम् ॥ २ ॥

यां'' इतिनिष्ठानत्वं । पाण्डुरइतिविशेषणाद्राजलक्ष्मीर्नास्तीत्युच्यते ॥ २४—२५ ॥ तूष्णींभावेहेतुः—विभ्रान्तचेतनइति ॥ २६ ॥ आविद्धं शोकेनाभिहतं । अभूदितिशेषः । मूर्च्छितेआविद्धमासीत् पतितेबाहू उद्धृत्यचुक्रोशेतिविशेषः ॥ २७—२८ ॥ दूतं संदेशहरं । दुष्करकारिणः दुष्करकार्यकारिणः ॥ २९ ॥ इममनयं पुत्रविवासनं । सुकृतं शोभनं । शोकेविषये सहायतानस्यात् शोकानुवर्तनंमाकृथाइत्यर्थः ॥ ३० ॥ व्यसनानुशयकृततूष्णींभावेहेत्वन्तरंकल्पयति—देवेति । कैकेयी सेतिशेषः । विस्रब्धं सविश्वासं निःशङ्कमितियावत् ॥ ३१ ॥ बाष्पेणविप्लुतं विलुप्तं सगद्गदं यथाभवतितथाभाषिणी ॥ ३२ ॥ एवमिति पतितमितिशेषः ॥ ३३ ॥ समीक्ष्य श्रुत्वा । पुनरेवसंकुलं रामगमनकालइवव्याकुलमासीत् ॥ ३४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने सप्तपञ्चाशः सर्गः ॥ ५७ ॥

प्रत्यागतः सूतस्याभिमुखागतः ॥ १ ॥ अथेत्यादिश्लोकद्वयमेकंवाक्यं । नवग्रहं सद्योगृहीतं । अस्वस्थं

व्याख्या नात्यन्तंसमञ्जसेत्युपेक्षिता ॥ २३ ॥ स० मूर्च्छिते सर्वोच्छ्रितेरामे अपृथिवीपतौसति क्षितौनृपतौपतितेचसतीतिवा ॥ २७ ॥ ति० किंच एवंशोके त्वयाक्रियमाणे तवसहायता सहायसमूहःपरिजनःसर्वोपि । नस्यात् । त्वच्छोकेनसर्वोपिनश्येदित्यर्थः । शि० हेराघव इमं स्वपुत्रप्रव्राजनं । अनयं नीतिविरुद्धमिवकृत्वा । व्यपत्रपसिकिं । नैतद्युक्तमित्यर्थः । अतउत्तिष्ठ । तेसुकृतं सत्यपरिपालनं अस्तु सदैवतिष्ठत्वित्यर्थः ॥ ३० ॥ इतिसप्तपञ्चाशस्सर्गः ॥ ५७ ॥

ति० प्रत्याश्वस्तः कृतोपचारः । मोहात् मोहंपरित्यज्य । प्रत्यागतस्मृतिः प्रत्यागतसंज्ञः । प्रत्यागतःपुनरितिपाठेप्ययमेवार्थः ।

[पा०] १ ङ. छ. झ. ट. विह्वलमानसः. ख. ञ. विभ्रान्तमानसः. २ च. ञ. उत्क्षिप्य. घ. ङ. छ. झ. ट. उच्छ्रित्य. ३ ख. ङ. च. छ. झ. ञ. ट. विलपन्तींतथा. ४ ङ. च. छ. झ. ञ. ट. समन्तादुरुदुः. क. ग. घ. सस्वरं. ५ घ. तदानींपुनः. ६ क. ख. विह्वलं. ७ ङ. छ. झ. ञ. ट. त्वप्रत्यागतस्मृतिः. ८ ङ. छ. झ. ट. तदाजुहाव. ञ. आजुहावाथ. ९ ग. राजासूतं. १० ङ. छ. झ. ट. तदा.

वृद्धं परमसंतप्तं नवग्रहमिव द्विपम् ॥ विनिश्वसन्तं ध्यायन्तमस्वस्थमिव कुञ्जरम् ॥ ३ ॥
राजा तु रजसा धूतं ध्वस्ताङ्गं समुपस्थितम् ॥ अश्रुपूर्णमुखं दीनमुवाच परमार्तवत् ॥ ४ ॥
क्व नु वत्स्यति धर्मात्मा वृक्षमूलमुपाश्रितः ॥ सोऽत्यन्तसुखितः सूत किमशिष्यति राघवः ॥ ५ ॥
दुःखस्यानुचितो दुःखं सुमन्त्र शयनोचितः ॥ भूमिपालात्मजो भूमौ शेते कथमनाथवत् ॥ ६ ॥
यं यान्तमनुयान्ति स्म पदातिरथकुञ्जराः ॥ स वत्स्यति कथं रामो विजनं वनमाश्रितः ॥ ७ ॥
व्यालैर्मृगैराचरितं कृष्णसर्पनिषेवितम् ॥ कथं कुमारौ वैदेह्या सार्धं वनमुपस्थितौ ॥ ८ ॥
सुकुमार्या तपस्विन्या सुमन्त्र सह सीतया ॥ राजपुत्रौ कथं पादैरवरुह्य रथाद्गतौ ॥ ९ ॥
सिद्धार्थः खलु सूत त्वं येन दृष्टौ ममात्मजौ ॥ वनान्तं प्रविशन्तौ तावश्विनाविव मन्दरम् ॥ १० ॥
किमुवाच वचो रामः किमुवाच च लक्ष्मणः ॥ सुमन्त्र वनमासाद्य किमुवाच च मैथिली ॥ ११ ॥
आसितं शयितं भुक्तं सूत रामस्य कीर्तय ॥ जीविष्याम्यहमेतेन ययातिरिव साधुषु ॥ १२ ॥
इति सूतो नरेन्द्रेण चोदितः सज्जमानया ॥ उवाच वाचा राजानं स बाष्पपरिरब्धया ॥ १३ ॥
अब्रवीन्मां महाराज धर्ममेवानुपालयन् ॥ अञ्जलिं राघवः कृत्वा शिरसाऽभिप्रणम्य च ॥ १४ ॥
सूत मद्वचनात्तस्य तातस्य विदितात्मनः ॥ शिरसा वन्दनीयस्य वन्द्यौ पादौ महात्मनः ॥ १५ ॥
सर्वमन्तःपुरं वाच्यं सूत मद्वचनात्त्वया ॥ आरोग्यमविशेषेण यथार्हं चाभिवादनम् ॥ १६ ॥
माता च मम कौसल्या कुशलं चाभिवादनम् ॥ अप्रमादं च वक्तव्या ब्रूयाश्चैनामिदं वचः ॥ १७ ॥
धर्मनित्या यथाकालमग्न्यगारपरा भव ॥ देवि देवस्य पादौ च देववत्परिपालय ॥ १८ ॥
अभिमानं च मानं च त्यक्त्वा वर्तस्व मातृषु ॥ अनु राजानमार्यां च कैकेयीमम्ब कारय ॥ १९ ॥

व्याधिग्रस्तं ॥ २—३ ॥ रजसाध्वस्ताङ्गंधूसरिताङ्गं । धूतं कम्पितं । परमार्तवत् परमार्तइवदीनइत्यर्थः ॥ ४ ॥ पूर्वसर्गेयथोक्तमित्युक्तंविवरीतुंप्रश्नमवतारयति—क्वनुवत्स्यतीत्यादिना ॥ ५ ॥ दुःखमित्येतत्क्रियाविशेषणं । शयनोचितः महार्हशयनोचितः ॥ ६—७ ॥ व्यालैः अजगरादिभिः । मृगैः सिंहव्याघ्रादिदुष्टमृगैः । उपस्थितौ उपाश्रितौ । आसितमित्यादौभावेनिः ॥ ८—११ ॥ आसितं आसनं शयितं शयनं भुक्तं भोजनंच कीर्तय । एतेन रामसंबन्ध्यासनादिकीर्तनेन अहंसाधुषुययातिरिवजीविष्यामि ययातिः सत्सुपतेयमितीन्द्रं प्रार्थ्यस्वर्गाद्भ्रष्टःसाधुसमागमंप्राप्य यथा निवृत्तदुःखोभूत् तद्वदहमपि निवृत्तदुःखोभविष्यामीत्यर्थः ॥ १२ ॥ बाष्पपरिरब्धया कण्ठगतबाष्परुद्धयेत्यर्थः । अतएव सज्जमानया स्खलन्त्या । षस्जगतावितिधातुः धातोरनेकार्थत्वादत्रस्खलनार्थकः ॥ १३ ॥ ॥ १४ ॥ वन्द्यौ वन्दनीयौ ॥ १५ ॥ अन्तःपुरं आरोग्यमभिवादनंचवाच्यं । ब्रूञोद्विकर्मकत्वादप्रधानकर्मण्यन्तःपुरेप्रथमा । क्ताभिहितत्वात् । एवमुत्तरश्लोकेपि ॥ १६ ॥ अप्रमादं धर्मेभर्तरिच । इदं वक्ष्यमाणं ॥ १७—१८ ॥ अभिमानं गर्वं "गर्वोभिमानो-

ती० मोहात् मूर्च्छायाः । प्रत्याश्वस्तः उपचारैरुद्बोधितः । राजाग्रेरामसकाशात्प्रत्यागतः तंसूतं रामवृत्तान्तकारणात् रामवृत्तान्तंप्रष्टुं ॥ १ ॥ स० अस्वस्थं स्वसमूहविकलमिवेतिवा ॥ ३ ॥ ति० परमार्तवत् परमार्तार्हे । स० परमार्तवत् स्वार्थेवतिः । वचइतिशेषः ॥ ४ ॥ स० वत्स्यति वसति । अशिष्यति भुङ्क्ते । वनवासस्यचिरकालत्वाल्लृट्प्रयोगः ॥ ५ ॥ स० पदातयश्चरथाश्चपदातिरथं । सेनाङ्गत्वाद्द्वन्द्वैकवद्भावः । तेनसहिताश्चतेकुञ्जराश्चेतितथा ॥ ७ ॥ ति० मन्दरस्यकार्ष्ण्यमात्राद्वनसादृश्यं । स० मन्दरस्यनानाविधौषधनिधित्वात् भिषजोर्नासत्ययोस्तद्गमनंयथाप्रयोजनपर्यवसायि तथेत्यर्थः ॥ १० ॥ स० साधुषुमध्येययातिर्यथाशुक्रशापप्राप्तजरयाजीवितवान् तथाऽहमपि वलीपलितकार्कश्यविशिष्टोपिरामवार्ताश्रवणेनजीविष्यामीत्यर्थः ॥ १२ ॥ स० वाचेत्येतद्देहलीदीपन्यायेनोभयत्रसंबध्यते । नरेन्द्रेण शुचासज्जमानया स्खलन्त्या । वाचाचोदितः ससूतः ॥ १३ ॥ ती० अनुराजानं

[पा०] १ ङ. च. ज. झ. ट. सूतं. २ ख. ग. नित्यं. ३ घ. सुखार्हं. ग. महार्हं. ४ ङ. छ. झ. ट. मुपाश्रितौ. ५ क. ङ. च. वनंतत्. ६ ज. सुन्दरौ. ७ ङ. च. छ. झ. ञ. ट. परिवद्धया. ८ ङ. च. छ. ञ. देवस्य. ९ क. पुनःपुनः. १० ङ. छ. झ. ट. यथार्हमभि.

कुमारे भरते वृत्तिर्वर्तितव्या च राजवत् ॥ [1]अर्थज्येष्ठा हि राजानो राजधर्ममनुस्मर ॥ २० ॥
भरतः कुशलं वाच्यो वाच्यो मद्वचनेन च ॥ सर्वास्वेव यथान्यायं वृत्तिं वर्तस्व मातृषु ॥ २१ ॥
वक्तव्यश्च महाबाहुरिक्ष्वाकुकुलनन्दनः ॥ पितरं यौवराज्यस्थो राज्यस्थमनुपालय ॥ २२ ॥
अतिक्रान्तवया राजा मा स्मैनं [2]व्यवरोरुधः ॥ कुमारराज्ये जीव[3] त्वं तस्यैवाज्ञा[4]प्रवर्तनात् ॥ २३ ॥
[5]अब्रवीच्चापि मां भूयो भृशमश्रूणि वर्तयन् ॥ मातेव मम माता ते द्रष्टव्या [6]पुत्रगर्धिनी ॥ २४ ॥
इत्येवं मां [7]महाराज ब्रुवन्नेव महायशाः ॥ रामो राजीवता[8]म्राक्षो भृश[9]मश्रूण्यवर्तयत् ॥ २५ ॥
लक्ष्मणस्तु सुसंक्रुद्धो निश्वसन्वाक्यमब्रवीत् ॥ केनायमपराधेन राजपुत्रो विवासितः ॥ २६ ॥
राज्ञा तु खलु कैकेय्या [10]लघु त्वाश्रित्य शासनम् ॥ कृतं कार्यमकार्यं वा वयं येनाभिपीडिताः ॥२७॥
यदि प्रव्राजितो रामो लोभकारणकारितम् ॥ वरदाननिमित्तं वा सर्वथा दुष्कृतं कृतम् ॥ २८ ॥

हंकारः" इत्यमरः । कुलाभिमानमित्यर्थः । मानः चित्तसमुन्नतिः ज्येष्ठपत्नीत्वनिबन्धनांचित्तसमुन्नतिमित्यर्थः । अनुराजानमार्यांचकारय अनुकारयेत्यर्थः । "व्यवहिताश्च" इतिव्यवहितप्रयोगः । अन्वितितुल्यार्थे । "पश्चात्सादृश्ययोरनु" इत्यमरः । राजानं कैकेयींच तुल्यमनुवर्तस्वेत्यर्थः ॥ १९ ॥ राजवत् राज्ञीव । वृत्तिर्वर्तितव्या उपचारःकर्तव्यइत्यर्थः । अर्थज्येष्ठाः अर्थेनैवज्येष्ठाः नतुवयसेत्यर्थः ॥ २० ॥ भरतःकुशलंवाच्यः त्वयेतिशेषः । वाच्योमद्वचनेनच मयोक्तमित्यपिवाच्यइत्यर्थः । यद्वा भरतोमद्वचनेनकुशलंवाच्यः सर्वास्वेवमातृषुयथान्यायं यथाक्रमं । वृत्तिं वर्तस्व वृत्तिंकुरु शुश्रूषस्वेत्यर्थः । इतिवाच्यश्चेतिद्वितीयवाच्यपदान्वयः ॥ २१ ॥ राज्यस्थं प्रधानराज्यस्थं । माव्यवरोरुधः अवरुद्धंमाकार्षीः । अतिक्रान्तवयस्कत्वादितितत्रहेतुः । कुमारराज्ये यौवराज्ये । जीव भोगान्भुङ्क्ष्वेत्यर्थः । इतिचवक्तव्यइत्यन्वयः ॥ २२—२३ ॥ अश्रूणिवर्तयन् करिष्यमाणमातृविषयपीडास्मरणादितिहृदयं । स्वस्यमातृविषयशुश्रूषायाअलाभाद्वा अश्रुवर्तनं । ममममातास्वमातेवत्वयाद्रष्टव्या इतिभरतमुद्दिश्य मांब्रुवन्नेव भृशमश्रूण्यवर्तयत् । शोकजनितरक्तिमानमाह—राजीवताम्राक्षइति । अनन्तरमश्रुमोचनं ततोवक्तव्यस्यानुचितत्वात् अमुमाशयमुत्तरत्रसीतापहरणानन्तरमुद्घाटयिष्यति "सुप्तप्रमत्तकुपितानांवचनैर्भावज्ञानंद्रष्टव्यं" इतिन्यायेन ॥ २४—२५ ॥ तुशब्देन रामवन्नसर्वथाहृदयंजुगोपेत्युक्तं ॥ २६ ॥ येनविवासनेनवयमभिपीडिताः तद्विवासनं अकार्यंतु अकार्यमेव । राज्ञातुकैकेय्याःलघु शासनमाश्रित्य कार्यंवा कार्यमिव कृतंखलु । यद्वा राज्ञाखलु लघु तुच्छं । कैकेय्याः शासनमाश्रित्याकार्यमेवकार्यंकृतं । येनकार्येणवयमभिपीडिताः ॥ २७ ॥ प्रतिज्ञातार्थप्रदानस्यकथमकार्यत्वंतत्राह—यदीति । रामःप्रव्राजितो यदि प्रव्राजितइतियत् । एतत् लोभ-

राज्ञःपश्चात् । कैकेयीं आर्यां श्लाघ्यांकारय । ति० अभिमानः प्रधानमहिषीत्वप्रयुक्तोऽहंकारः । मानः तत्प्रयुक्त इतरतिरस्कारकश्चित्तविकारः । मातृष्वित्यस्य मदीयास्वितिशेषः । अनुगतोराजायस्यास्तांकैकेयीं आर्यां श्लाघ्यांकारय । धारयेति पाठेप्ययमेवार्थः ॥ १९ ॥ ति० भरतेचराजवद्वृत्तिःकार्या । तत्रहेतुः अज्येष्ठाअपिराजानः हि निश्चयेन । पूज्याइतियावत् । राजधर्ममनुस्मर । अर्थज्येष्ठाहीतिपाठे अर्थेनराज्यरूपार्थेनज्येष्ठाः । हियतः अतःपूज्याइतिशेषः । इतिराजधर्ममनुस्मरेति । कतकस्तु राजानमनु राज्ञःपश्चात् आर्यांकैकेयीमभिवादयेत्यर्थः । कैकेयीमभिवादयेतिपाठः । कुमारेचेत्यादिप्राग्वत् कैकेय्यावरबलेनाधिकत्वाद्भरतस्यचराजदत्तार्थवत्त्वेनज्येष्ठत्वात्तयोरभिवादनमंवायायुक्तं । तद्वमुख्यनिवृत्तयेचराजधर्ममनुस्मरेत्याह ॥ २० ॥ शि० यौवराज्यस्थः युवराजसदृशस्त्वं राज्यस्थंपितरं अनुपालय निषेवस्व ॥ २२ ॥ शि० तस्य राज्ञः । आज्ञाप्रवर्तनादेवयौवराज्येऽधिकृतस्त्वं जीवस्व निर्वाहंकुरु । ति० जीवस्व तोषंकुरु ॥ २३ ॥ कतक० अब्रवीदित्यादिश्लोकद्वयंप्रक्षिप्तं ॥ २४ ॥ शि० भृशमश्रूण्यवर्तयदिव । तच्छ्रवणमात्रेणैवाश्रुपूर्णेममनेत्रेअभवतामित्यर्थः । ती० अवर्तत व्यसृजत् ॥ २५ ॥ ति० कैकेय्यालघुशासनंआश्रुत्यप्रतिज्ञायकृतं । यद्वा तद्विवासनंकृतं कार्यंकर्तुयोग्यंवाभवतु अकार्यं अकर्तुयोग्यंवाभावतु । अस्माकंतुपीडासर्वथैवेत्यर्थः ॥ २७ ॥ ती० एतत्प्रव्राजनं लोभकारणकारितंवा अन्यायेनपरद्रव्यापहरणेच्छालोभः सएवकारणंहेतुस्तेनकारितं ।

[पा०] १ झ. अप्यज्येष्ठाहि. २ ङ. छ. ज. झ. ट. व्यपरोरुधः. क. त्समुपारुधः. ३ ङ. झ.. झ. ट. जीवस्व. ४ च. ञ्रवर्ततां. ५ क. ख. अवदच्चापि. ६ क. ख. पुत्रशोकिनी. ७ ङ. छ. झ. ञ. ट. महाबाहुः. ८ ङ. छ. झ. ट. पत्राक्षो. ९ च. ञ. मश्रूण्यवर्तत. १० ग. ङ. छ. ज. झ. ट. लघुचाश्रुत्य. क. सत्यमाश्रुत्य.

इदं तावद्यथाकाममीश्वरस्य कृते[1] कृतम् ॥ रामस्य तु परित्यागे न हेतुमुपलक्षये ॥ २९ ॥
असमीक्ष्य समारब्धं विरुद्धं बुद्धिलाघवात् ॥ जनयिष्यति संक्रोशं राघवस्य विवासनम् ॥ ३० ॥
अहं तावन्महाराजे पितृत्वं नोपलक्षये ॥ भ्राता भर्ता च बन्धुश्च पिता च मम राघवः ॥ ३१ ॥
सर्वलोकप्रियं त्यक्त्वा सर्वलोकहिते रतम्[2] ॥ सर्वलोकोऽनुरज्येत कथं[3] त्वाऽनेन कर्मणा ॥ ३२ ॥
सर्वप्रजाभिरामं हि रामं प्रव्राज्य धार्मिकम् ॥ सर्वलोकं[4] विरुन्ध्येमं[5] कथं राजा भविष्यसि[6] ॥ ३३ ॥

कारणकारितं वरदाननिमित्तंवा कैकेय्याःप्रतिश्रुतवरदाननिमित्तंवा । सर्वथादुष्कृतंकृतं वरदानसमयेवरद्वयस्यभरताभिषेकरामनिष्कासनरूपेणविनियोगाभावात् । यदिशब्दस्वारस्यानुरोधेनेत्थंवायोजनीयं । लोभकारणकारितमितिक्रियाविशेषणं । रामः लोभकारणकारितंवावरदाननिमित्तंवापि यदिप्रव्राजितः तथापि सर्वथादुष्कृतं अकार्यंराज्ञाकृतं । नराज्यंदास्यामीतिप्रतिज्ञातुंशक्यत्वात् ज्येष्ठपुत्रविवासनस्यानुचितत्वाच्चेतिभावः । "नत्वेकपुत्रंदद्यान्नत्वेवज्येष्ठपुत्रं" इतिहिस्मर्यते । लोभकारणकारितइतिपाठेरामविशेषणं । लोभरूपकारणेनप्रेरितइत्यर्थः ॥ २८ ॥ रामस्यपरित्यागेहेतुंनोपलक्षये किंतु ईश्वरस्यकृते स्वतन्त्रव्यापारे स्थितेनराज्ञेतिशेषः । इदं रामप्रव्राजनंयथाकामंतावत् यथेच्छमेवकृतं । यद्वा इदं रामविवासनं ईश्वरस्यकृते ईश्वरप्रयोजनाय । यथाकामंकृतं केवलमीश्वरप्रेरणेनशास्त्रमनवेक्ष्य कृतमित्यर्थः । हि यस्माद्रामस्यपरित्यागेहेतुंनोपलक्षये परित्यागहेतुदोषसद्भावे हिपुत्रविवासनंशास्त्रीयंस्यात् । अयंचोपसंहारश्लोकः ॥ २९ ॥ यथेष्टकरणंचेत्कथमनुतप्तवान्राजेत्यत्राह— असमीक्ष्येति । विरुद्धं अतएव असमीक्ष्यानालोच्य बुद्धिलाघवात् समारब्धं कृतं । राघवस्यविवासनं संक्रोशं दुःखं । जनयिष्यति जनयति । अतोराज्ञोनुतापइतिभावः ॥ ३० ॥ पिताकथंनिन्द्यइत्यत्राह—अहमिति । "गुरोरप्यवलिप्तस्यकार्याकार्यमजानतः । उत्पथंप्रतिपन्नस्यपरित्यागोविधीयते" इतिवचनादितिभावः । भ्राताराघवएव ममपिता "ज्येष्ठोभ्रातापितृसमः" इत्युक्तेः । तस्यपितृत्वाभावेपिभर्तृत्वमस्त्येवेत्याशङ्क्याह—भर्ताचेति । स्वामीत्यर्थः । किंबहुना बन्धुः सर्वविधोपिराघवएव । एतेन परमैकान्तिभिःप्राकृतपित्रादयःपरित्याज्याः भगवानेवनिरुपाधिकःपिता भर्ता बन्धुश्चेत्युक्तंभवति ॥३१॥ कथंमुख्यंपितरंविहायगौणमनुवर्तसेतत्राह—सर्वलोकप्रियमिति । अनेनकर्मणा प्रियपुत्रप्रव्राजनरूपक्रूरकर्मणा । सर्वलोकहितेरतं सर्वलोकप्रियं रामंत्यक्त्वा अनेन कर्मणोपलक्षितं सर्वलोकाहितेरतंसर्वलोकाप्रियमित्यर्थः । त्वात्वांप्रति । सर्वलोकःकथमनुरज्येत कश्चिद्भरततुल्योनुरज्यतां नतुसर्वोपीतिभावः । सर्वलोकनिरुपाधिकबन्धुंत्यक्त्वा सोपाधिकबन्धुंत्वांकथमाश्रयेयमितिहृदयम् ॥३२॥ अनेनेत्युक्तंप्रपञ्चयति—सर्वप्रजाभिराममिति । कथंराजाभविष्यसीत्येवंराजानंब्रूहीत्यब्रवीदितिपूर्वेणान्वयः । सुमन्त्रप्रेपणवेलायांलक्ष्मणादिवाक्याश्रवणेप्यत्रसिद्धवदनुवादसामर्थ्यात्तदानीमेवमुक्तमित्यवगन्तव्यम् ॥३३॥

लोभहेतुनाकैकेयीराज्ञाऽकारयद्वा । **ति०** सर्वथादुष्कृतंकृतं अनुचितंकृतं । एतद्व्यतिरिक्तंवरयेतिसुवचत्वात् । वरदानकालेविशि-
ष्यनियोगाभावाच्च । पतित्वेनभार्याशिक्षणेसमग्राधिकाराच्च । **शि०** यत् राज्ञारामःप्रव्राजितः तत् लोभकारणकारितं लोभकारणेन
राजातीवसत्यवक्ता पुत्रश्चैतस्यातीवाज्ञाकारीतियशोभिकाङ्क्षारूपहेतुनाकारितं कृतं । वरदाननिमित्तंवाकृतं सर्वथा इ इदानीं दुष्कृतं
नकर्तव्यमित्यर्थः । इ इतीदानीमर्थे । "दशैतेराजमातङ्गास्तस्यैवामीतुरङ्गमाः" इत्यादाविवाप्रधानीभूतमपिप्रव्राजनं यत्तच्छब्दाभ्यां
परामृश्यते । अतएवनपुंसकत्वं ॥ २८ ॥ **ती०** इदंतावत् अस्मत्पीडनं । ईश्वरस्यकृतौ देवप्रेरणायांसत्यां । यथाकामं यथेच्छं ।
कृतंभवतु । तथाप्येतावताऽनपराधिनोरामस्यपरित्यागेहेतुभूतमपराधंनोपलक्षये । दैवप्रेरितोपिकेनचिद्दोषेणहेतुनापरित्यजति ।
सदोषोस्मिन्नास्तीत्यर्थः ॥ २९ ॥ **ति०** वस्तुतस्तु केवलमायिकत्वाल्लक्ष्मणादिशरीराणांतेषामेवमुक्तौनदोषइतिबोध्यं ॥ ३१॥ **ति०**
सर्वलोकप्रियंरामंत्यक्त्वास्थितेत्वयि प्राक्सर्वलोकहितेरते संप्रतिसर्वलोकहिते अरतेवा । अनेन क्रूरेणकर्मणा सर्वलोकःकथमनुर-
ज्येत । सर्वलोकहितेरतमितिपाठेरामविशेषणं सर्वलोकप्रियत्वेहेतुतयेतिबोध्यम् ॥३२॥ **शि०** रामंविनापितुरपितत्रस्थितिर्दुर्लभे-
तिबोधयन्नाह—**सर्वेति** । सर्वलोकविरोधेन विरुद्धभाषणेनेत्यर्थः । राजा दशरथः । कथंभविष्यति स्थास्यति वस्थास्यतीत्यर्थः

[पा०] १ च. कृतौ. २ झ. रते. ३ ङ. छ. झ. ट. कथंचानेन. च. कथंत्वेतेन. ४ ङ. छ. झ. ट. सर्वलोकविरोधेन.
५ ख. विरुध्यैतं. ६ ङ. छ. ज. झ. ट. भविष्यति.

जानकी तु महाराज निश्वसन्ती मनस्विनी ॥ भूतोपहतचित्तेव विष्ठिता [2]विस्मिता स्थिता ॥ ३४ ॥
अदृष्टपूर्वव्यसना राजपुत्री यशस्विनी ॥ तेन दुःखेन रुदती नैव मां किञ्चिदब्रवीत् ॥ ३५ ॥
उद्वीक्षमाणा भर्तारं मुखेन परिशुष्यता ॥ मुमोच सहसा बाष्पं मां प्रयान्तमुदीक्ष्य सा ॥ ३६ ॥

तथैव रामोऽश्रुमुखः कृताञ्जलिः स्थितोऽभवल्लक्ष्मणबाहुपालितः ॥
तथैव सीता रुदती तपस्विनी निरीक्षते राजरथं तथैव माम् ॥ ३७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे अष्टपञ्चाशः सर्गः ॥ ५८ ॥

एकोनषष्टितमः सर्गः ॥ ५९ ॥

सुमन्त्रेणदशरथचोदनयातंप्रतिपुनारामस्यवनगमनप्रकारकथनम् ॥ १ ॥ तथाऽयोध्यांप्रतिनिवृत्तिसमयेमध्येमार्गंस्वावगतस्थावरजङ्गमप्राण्यवस्थाप्रकारकथनम् ॥ २ ॥ तथातादृशायोध्याद्यवस्थाप्रकारनिरूपणम् ॥ ३ ॥ दशरथेनसुमन्त्रसमीपे रामशोकाद्बहुधाप्रलापनम् ॥ ४ ॥

[इति ब्रुवन्तं [6]तं सूतं सुमन्त्रं मन्त्रिसत्तमम् ॥ ब्रूहिशेषं पुनरिति राजा वचनमब्रवीत् ॥ १ ॥
तस्य तद्वचनं श्रुत्वा सुमन्त्रो बाष्पविक्लवः ॥ कथयामास भूयोपि रामसंदेशविस्तरम् ॥ २ ॥
जटाः कृत्वा महाराज चीरवल्कलधारिणौ ॥ गङ्गामुत्तीर्य तौ वीरौ प्रयागाभिमुखौ गतौ ॥ ३ ॥
अग्रतो लक्ष्मणो यातः पालयन्रघुनन्दनम् ॥ अनन्तरं च सीताऽथ राघवो रघुनन्दनः ॥
तांस्तथा गच्छतो दृष्ट्वा निवृत्तोस्म्यवशस्तदा] ॥ ४ ॥
मम त्वश्वा निवृत्तस्य न प्रावर्तन्त वर्त्मनि ॥ उष्णमश्रु प्रमुञ्चन्तो रामे संप्रस्थिते वनम् ॥ ५ ॥

तुशब्देनलक्ष्मणाद्वैषम्यमुच्यते । लक्ष्मणोरामशोकविकारमालक्ष्य हृदयनिहितंवचसोद्घाटितवान् सीतातुन तथेति। मयोच्यमानंसीताशोकानुभावमाकर्ण्यक्षुब्धहृदयेनत्वयानभवितव्यमितिद्योतयितुं महाराजेतिसंबोधनं। हृदयस्थशोकातिरेकेणनिश्वसन्ती मनस्विनी गम्भीरमनस्का । भूतोपहतचित्तेव विष्ठिता स्तिमिता । विस्मिता विस्मितेवोत्फुल्लनयना स्थिता ॥३४॥ अदृष्टपूर्वव्यसना अननुभूतपूर्वव्यसना । तत्रहेतुः—राजपुत्रीति । यशस्विनीति तदानीमप्यनुदितकैकेयीनिन्दात्वेनकीर्तिमती । तेनदुःखेन भर्तृदुःखदर्शनजदुःखेन । रुदती रोदनानुभाववतीसती मांकिंचिदपि नैवाब्रवीत् केनचित्संभाषणस्याप्यसह्यत्वात् ॥३५॥ततोभर्तारमश्रुमुखमुद्वीक्षमाणासती परिशुष्यतामुखेनउपलक्षिता मां प्रयान्तमुद्वीक्ष्य सहसाबाष्पंमुमोच रथेगतेकथंपद्भ्यामेवक्रूरंकान्तारंचरिष्यतिरामइति हृदयंधारयितुमशक्ता अश्रूणिमुमोचेत्यर्थः ॥३६—३७॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने अष्टपञ्चाशःसर्गः ॥५८॥

ममवर्त्मनि मत्संबन्धिनिमार्गे । नप्रावर्तन्त नववि-

ति० कथंराजाभविष्यति पितेतिशेषः ॥ ३३ ॥ ति० विस्मृता विस्मृतसर्वप्रयोजनेवस्थिता ॥ ३४ ॥ ति० अब्रवीत् उक्तमितिशेषः ॥ ३७ ॥ इत्यष्टपञ्चाशस्सर्गः ॥ ५८ ॥

ती० मम मयानियमिते मार्गेअश्वानप्रावर्तन्त नन्यवर्तन्त । अयंभावः । शतधृतिभवशतमखमुखविबुधदुर्लभाश्रीरामसेवा अस्माभिर्भाग्यवशाल्लब्धा । सानिर्दयेनदैवेनविघटिता इतःपरंकिंकरिष्यामः । अस्माकंव्यर्थजीवनं किमर्थमित्यत्यन्तदुःखेनाश्रुविमुञ्चन्तः मय्यतिकठिनहृदयेप्रतिनिवृत्तेप्यश्वा न न्यवर्तन्त तथापिमयाकथंचिन्निवर्तिताइति । स० वर्त्मनि मार्गे । नप्रावर्तन्त उत्प-

[पा०] १ ग. ज. जानकीच. २ ङ. झ. ट. विस्मृता. ३ ङ. च. छ. प्रयान्तमुपवीक्ष्य. ४ ध—छ. झ. ञ. ट. स्थितोब्रवील्लक्ष्मण. ख. ग. ततोभवत्. ५ कुण्डलान्तर्गताश्चत्वारःश्लोकाः क. ख. च. ज. पुस्तकेष्वेवदृश्यन्ते. ६ क. ख. च. ज. संदेशं. ७ ज. ब्रूहिशेषं. ८ क. च. ज. वाक्यविक्लवः. ख. वाक्यकोविदः. ९ ज. जटां. १० च. ञ. विवृत्तेपि. ११ क. ख. ङ. झ. ञ. ट. विमुञ्चन्तो.

उभाभ्यां राजपुत्राभ्यामथ [1]कृत्वाऽहमञ्जलिम् ॥ प्रस्थितो रथमास्थाय तद्दुःख[2]मपि धारयन् ॥ ६ ॥
गुहेन सार्धं तत्रैव स्थितोसि दिवसान्बहून् ॥ आशया यदि मां रामः पुनः शब्दापयेदिति ॥ ७ ॥
विषये ते महाराज [3]रामव्यसनकर्शिताः ॥ अपि वृक्षाः परिम्लानाः सपुष्पाङ्कुरकोरकाः ॥ ८ ॥
उपतप्तोदका नद्यः पल्वलानि सरांसि च ॥ परिशुष्कपलाशानि वनान्युपवनानि च ॥ ९ ॥
न च सर्पन्ति [4]सत्त्वानि व्याला न प्रचरन्ति च ॥ रामशोकाभिभूतं [5]तन्निष्कूजमभवद्वनम् ॥ १० ॥
लीनपुष्करपत्राश्च [6]नरेन्द्र कलुषोदकाः ॥ संतप्तपद्माः पद्मिन्यो लीनमीनविहंगमाः ॥ ११ ॥
जलजानि च पुष्पाणि माल्यानि स्थलजानि च ॥ [7]नाद्य भान्त्यल्पगन्धीनि फलानि च यथा[8]पुरम् ॥ १२ ॥
[9]अत्रोद्यानानि शून्यानि प्रलीनविहगानि च ॥ न चाभिरामानारामान्पश्यामि मनुजर्षभ ॥ १३ ॥
प्रविशन्त[10]मयोध्यां मां न कश्चिदभिनन्दति ॥ नरा राममपश्यन्तो निश्वसन्ति मुहुर्मुहुः ॥ १४ ॥

योगक्केशादितिभावः ॥ ५ ॥ राजपुत्राभ्यामितिचतुर्थी । तद्दुःखं तादृशंदुःखं ॥ ६ ॥ गुहेनसार्धं तत्स्नेहितजनसंदर्शनमपिक्केशापहमितिभावः । तत्रैव नतुवर्त्मनि । दिवसानितिवहुवचनेन कपिञ्जलाधिकरणन्यायेनत्रित्वसिद्धिरित्येके । वस्तुतस्तु वनस्पतिमूलेएकदिनं भरद्वाजाश्रमेद्वितीयं यमुनातीरेतृतीयं चतुर्थेचित्रकूटप्रवेशः पञ्चमेगुहचारैस्तत्सर्वंनिवेदितं षष्ठेसूतनिर्गमः । यद्वा द्वितीयदिनेभरद्वाजाश्रमेरामस्यचित्रकूटगमनव्यवसायात्तृतीयदिनेचारैर्निवेदनं चतुर्थेसूतनिर्गमः अतः त्रीन्दिवसान्गङ्गाकूलेस्थितोस्मीत्यर्थः । वहूनितिविशेषणात् रामवियोगेनएकैकस्यदिवसस्यकल्पवत्प्रतिभानमितिदर्शितं । पुनः शब्दापयेत् पुनराह्वयेत् । वनचरमुखेनेतिहृदयं । शब्दशब्दाण्णौतत्कृतापुगन्तोप्ययमस्ति अतोह्वापयतीत्यादिवत्सिद्धम् ॥ ७ ॥ अथ रामस्यसर्वान्तर्यामितादात्म्यंसूचयितुं सर्वेषांरामविरहक्केशंवर्णयति । यद्वा कैकेयीप्रियार्थमविचारेणसहसा कृतंकार्यंसर्वक्षोभनिमित्तमभूदित्याह—विषयइत्यादि । विषये देशे । "देशविषयौतूपवर्तनं" इत्यमरः । अपिशब्देनलतावयःसमुच्चीयन्ते । व्याध्यादिनाएकदेशग्लानिंव्यावर्तयितुं—सपुष्पेत्यादि । सपुष्पाङ्कुरकोरकाः पुष्पाणिअभिनवविकसितानि । अङ्कुराःशाखासु नवपल्लवोद्भेदाः । कोरकाः कलिकाः "कलिकाकोरकः पुमान्" इत्यमरः । तैःसहितावृक्षाअपि परिम्लानाः कठिनकोमलविभागमन्तरेणापिसर्वमेकदैवपरिम्लानमभूदित्यर्थः ॥ ८ ॥ अकात्स्न्र्येनोपतप्तत्वव्युदासायोदकपदं । तेनातपकार्योपतापव्यावृत्तिः । पल्वलानिसरांसिच । पल्वलानीतिदृष्टान्तार्थं । एवंवनानीत्यपि । अनेनाल्पाधिकविभागमन्तरेणपरितप्तत्वंद्योत्यते । उपतप्तोदकाइतिपदंलिङ्गविपरिणामेनपल्वलादौयोजनीयं । वनानि संततजलसेकमन्तरेणप्रवृद्धानि कठिनाकाराणि । उपवनानि जलसेकेनप्रवृद्धान्यतिकोमलानि । परिशुष्कपलाशानि एकरूपेणशुष्कपत्राणि । "पत्रंपलाशं" इत्यमरः ॥ ९ ॥ नसर्पन्ति नगच्छन्ति किन्तु स्तब्धतयातिष्ठन्ति । सत्वानि जन्तवः । व्यालाः हिंस्रपशवः सर्वदासंचारस्वभावा गजावा । नप्रचरन्ति आहारार्थमपिनसंचरन्तीत्यर्थः । गमनवच्छब्दोपिनास्तीत्याह—निष्कूजमिति । निष्कूजं निश्शब्दं ॥ १० ॥ लीनपुष्करपत्राः ग्लान्यतिशयेनजलान्तर्विलीनपद्मपत्राः । लीनाः संचाररहिताः । विहंगमाः जलकाकादयः ॥ ११ ॥ माल्यानि पुष्पाणि । "माल्यंपुष्पेपुष्पदाम्नि" इतिवैजयन्ती । यथापुरं यथापूर्वं । अल्पगन्धीनीतिमत्वर्थीयइनिः । स्वभावस्यदुस्त्यजत्वादल्पत्वं । फलानि रसालपनसादीनि ॥ १२ ॥ उद्यानानि आक्रीडाः । "पुमानाक्रीडउद्यानं" इत्यमरः । शून्यानि निर्जनानि । प्रलीनाः नीडेपुमूर्च्छिताः विहगाः शुकपिकशारिकादयः येषुतानितथोक्तानि । आरामान् कृत्रिमवनानि । "आरामस्स्यादुपवनंकृत्रिमंवनमेवयत्" इत्यमरः । नचाभिरामान् किन्तुनिश्श्रीकान्प-

थेनजग्मुरित्यर्थः । वनंप्रतिसंप्रस्थिते ॥ ५ ॥ ति० वहून् रामस्यगङ्गोत्तरणादिदिनत्रयं । यद्यपि भरद्वाजाश्रमाच्चारप्रतिनिवृत्ति-

[पा०] १ ख. कृत्वामहाञ्जलिं. २ क. समभिधारयन्. घ. मुपधारयन्. ३ ङ. झ. ट. महाव्यसन. ४ क. भूतानि. ५ ङ. च. झ. ञ. ट. तन्निष्कूजमिवतद्वनं. ६ ङ. झ. ञ. ट. नद्यश्च. ७ ङ. झ. ट. नाति. ८ घ. ङ. ज. पुरा. ९ ख. पुरोद्यानानि. १० क. ङ. च. ज. मयोध्यागां.

देव राजरथं दृष्ट्वा विना राममिहागतम् ॥ दुःखादश्रुमुखः सर्वो राजमार्गगतो जनः ॥ १५ ॥
हर्म्यैर्विमानैः प्रासादैरवेक्ष्य रथमागतम् ॥ हाहाकारकृता नार्यो रामादर्शनकर्शिताः ॥ १६ ॥
आयतैर्विमलैर्नेत्रैरश्रुवेगपरिप्लुतैः ॥ अन्योन्यमभिवीक्षन्ते व्यक्तमार्ततराः स्त्रियः ॥ १७ ॥
नामित्राणां न मित्राणामुदासीनजनस्य च ॥ अहमार्ततया किंचिद्विशेषमुपलक्षये ॥ १८ ॥
अप्रहृष्टमनुष्या च दीननागतुरङ्गमा ॥ आर्तस्वरपरिम्लाना विनिश्श्वसितनिस्स्वना ॥ १९ ॥
निरानन्दा महाराज रामप्रव्राजनातुरा ॥ कौसल्या पुत्रहीनेव अयोध्या प्रतिभाति मा ॥ २० ॥
सूतस्य वचनं श्रुत्वा वाचा परमदीनया ॥ बाष्पोपहतया राजा तं सूतमिदमब्रवीत् ॥ २१ ॥
कैकेय्या विनियुक्तेन पापाभिजनभावया ॥ मया न मन्त्रकुशलैर्वृद्धैः सह समर्थितम् ॥ २२ ॥
न सुहृद्भिर्न चामात्यैर्मन्त्रयित्वा च नैगमैः ॥ मयाऽयमर्थः संमोहात्स्त्रीहेतोः सहसा कृतः ॥ २३ ॥

ष्यामीत्यर्थः ॥ १३—१४ ॥ देवराजरथमित्यत्र देवेतिसंबोधनं ॥ १५ ॥ हर्म्यैरित्यादिश्लोकद्वयमेकान्वयं । हाहाकारकृताः कृतहाहाकाराः । आयतैरित्यश्रुवेगातिशयोक्त्यर्थः । निरञ्जनत्वंद्योतयितुंविमलैरित्युक्तं । अभिवीक्षन्तेऽव्यक्तमित्यत्र अव्यक्तमितिपदच्छेदः ॥ १६—१७ ॥ उदासीनेत्यत्रापिनञनुषज्यते । अमित्राणां तवेतिशेषः । रामस्यामित्रप्रसङ्गाभावात् । यद्वा पौरजनस्यामित्राणांपौरजनस्यमित्राणांचउदासीनजनस्य उदासीनजनापेक्षयाआर्ततयाहेतुनाविशेषं नोपलक्षये । कुत्रचित्पुरुषेमित्राणिचनस्वकार्याणि कुर्वन्ति नापिशत्रवोपीतिभावः ॥ १८ ॥ अप्रहृष्टमनुष्येत्यादिश्लोकद्वयमेकान्वयं । विनिश्श्वसितनिस्स्वना दीर्घानिश्श्वासस्वनयुक्ता यद्वा विनिश्श्वसितस्येवनिस्स्वनोयस्याःसा व्याधिविशेषोपरुद्धानिश्श्वासजनवदविरतहाहाकारयुक्तेत्यर्थः । सन्निहितत्वेनकौसल्यांदृष्टान्तीकरोति । पुत्रहीना पुत्रवियुक्ता । एतावताप्रबन्धेन रामस्यसर्वात्मकता ऋषिणानुसंहितेतिप्रबन्धगतवस्तुध्वनिः ॥ १९—२१ ॥ सुमन्त्रे पृष्टस्योत्तरमभिधाय ततोधिकंराज्यपुरुषक्षोभादिकंकथयतिसति तन्समाकृत्यकरणद्योतनार्थमितिबुद्ध्वाङ्गीकारेणोत्तरमाह—कैकेय्येति । विनियुक्तेन "प्रतिज्ञांप्रतिजानीष्वयदित्वंकर्तुमिच्छसि । अथतद्व्याहरिष्यामियदभिप्रार्थितंमया" इत्युक्तक्रमेणविशेषेणनियोगंप्रापितेनेत्यर्थः । पापाभिजनभावया पापविषयजन्मभूम्यभिप्राययुक्तया । यद्वा पापोयोभिजनभावःकुलक्रमागतोऽभिप्रायः स यस्यास्तया । "कुलेप्यभिजनोजन्मभूमौ" इत्यमरः । शंसमेजीववामावानमामुपहसिष्यसि " इत्युक्तवंत्यामात्रातुल्यस्वभावयेत्यर्थः । नसमर्थितं नविचारितं ॥ २२ ॥ निगमः पुरं । "पुरंवणिक्पथोवेदोनिगमः" इत्यमरः । तत्रभवानैगमाःतैः । अत्रापिनेत्यनुषज्यते । अयमर्थः रामप्रवासनरूपार्थः । सुहृद्भिर्मन्त्रयित्वान कृतः अमात्यैश्चमन्त्रयित्वानकृतः नैगमैश्चमन्त्रयित्वान

मत्तृतीयदिवसएवसुमन्त्रप्रस्थानं तथापि तद्दिनेऽल्पावशिष्टदिनपर्यन्तंस्थित्यावहूनित्युक्तं ॥ ७ ॥ ति० अव्यक्तमितिच्छेदः । रामप्रवासजनितपीडयार्ताःपरस्परंसम्यङ्नेक्षन्तइत्यर्थः । स० अव्यक्तं अश्रुपूर्णत्वादितिभावः ॥ १७ ॥ शि० नकारत्रयेणक्रियाप्यावर्त्यते । तेनोपलक्षणेस्वप्रमादाभावःसूचितः ॥ १८ ॥ शि० पापाभिजनभावया पापाःक्रूरकर्मविषयकसंमतिदानजनितपापविशिष्टायेअभिजनाः अभितस्समीपेविद्यमानाजनामन्थरादयः तैस्सह भावोनित्यस्थितिर्यस्यास्तया । कैकेय्याविनियुक्तेन प्रार्थितेन मया यद्यपि मन्त्रकुशलैर्वृद्धैस्सुहृद्भिः सनैगमैः शास्त्रसंपन्नैरमात्यैश्च सहमन्त्रयित्वा नसमर्थितं नकृतं । रामप्रव्राजनमितिशेषः । तथापि अयं रामप्रव्राजनरूपोऽर्थः । संमोहात् अविवेकात् स्त्रीहेतोःसहसा नकृतः नकृतः । नञ्द्वयोपादानंदार्ढ्यबोधनाय । विवेकादेवकृतइत्यर्थः । वाशब्दोयद्यपीत्यर्थे । श्लोकद्वयमेकान्वयि ॥ २२ ॥ स० नैगमैः वेदविचारकुशलैस्सहवर्तन्तइतिसनैगमास्तैः । यद्वा सनैगमैः सनगरस्थैः । " नैगमस्स्यादुपनिषद्वणिजोर्नागरेपिच " इतिविश्वः । सुहृद्भिर्न सुहृद्भिरिव । " नञभावेनिषेधेचस्वरूपार्थेप्यतिक्रमे । ईषदर्थेचसादृश्येतद्विरुद्धतदन्ययोरिति विश्वः । एवंच तैरिवामात्यैर्नचमन्त्रयित्वेत्यर्थः । नसुहृद्भिः शत्रुभिरपि अयमर्थस्सहसाअकृतः । मयातुकृतइतिनसमासमंगीकृत्येत्यर्थंनाव्याख्येयं । ती० नैगमैः वेदशास्त्रविद्भिः ।

[पा०] १ ख. ङ. झ. ट. दूरादश्रुमुखः. २ झ. राजमार्गे. ख. राममार्ग. ३ ख. वीक्ष्यन्त्योव्यक्त. ४ ख—च. ज—ट. द्विशेषं नोपलक्षये. ५ ङ. ज—ट. भातिमे. ६ क. च. ञ. राजा. ७ क. च. ञ. दीनवत्. ८ ङ. झ. ट. सूतमिदंवचनं. क. ञ. ञ. वाचातंसूत. ९ ग. घ. कैकेय्यामि. १० क. सूत. ११ च. ञ. सुमन्त्रितं. १२ ङ. ज. झ. ट. सनैगमैः. क—घ. ञ. ननैगमैः.

भवितव्यतया नूनमिदं वा व्यसनं महत् ॥ कुलस्यास्य विनाशाय प्राप्तं सूत यदृच्छया ॥ २४ ॥
सूत यद्यस्ति ते किंचि[1]न्मया तु सुकृतं कृतम् ॥ त्वं प्रापयाशु मां रामं प्राणाः संत्वरयन्ति माम् ॥२५॥
[2]यद्यद्यापि ममैवाज्ञा निवर्तयतु राघवम् ॥ [3]न शक्ष्यामि विना रामं मुहूर्तमपि जीवितुम् ॥ २६ ॥
अथवाऽपि महाबाहुर्गतो दूरं भविष्यति ॥ मामेव रथमारोप्य शीघ्रं रामाय दर्शय ॥ २७ ॥
वृत्तदंष्ट्रो महेष्वासः क्वासौ लक्ष्मणपूर्वजः ॥ यदि जीवामि साध्वेनं पश्येयं [4]सीतया सह ॥ २८ ॥
लोहिताक्षं महाबा[5]हुमामुक्तमणिकुण्डलम् ॥ रामं यदि न [6]पश्येयं गमिष्यामि यमक्षयम् ॥ २९ ॥
अतो नु किं दुःखतरं [7]योऽहमिक्ष्वाकुनन्दनम् ॥ इमामवस्थामापन्नो नेह पश्यामि राघवम् ॥ ३० ॥
हा राम रामानुज हा हा वैदेहि तपस्विनि ॥ न मां जानीत दुःखेन म्रियमाणमनाथवत् ॥ ३१ ॥
स तेन राजा दुःखेन भृशमर्पितचेतनः ॥ अवगाढः सुदुष्पारं शोकसागरमब्रवीत् ॥ ३२ ॥
रामशोकमहाभोगः सीताविरहपारगः ॥ श्वसितोर्मिमहाव[8]र्तो [9]बाष्पफेनजलाविलः ॥ ३३ ॥
बाहुविक्षे[10]पमीनौघो विक्रन्दितमहास्वनः ॥ प्रकीर्णकेशशैवालः कैकेयी [11]वडवामुखः ॥ ३४ ॥
ममाश्रुवेगप्रभवः कुब्जावाक्यमहाग्रहः ॥ वरवेलो नृशंसाया रामप्रव्राजनायतः ॥ ३५ ॥
[12]यस्मिन्बत निमग्नोऽहं कौसल्ये राघवं विना ॥ दुस्तरो जीवता देवि मयाऽयं शोकसागरः ॥ ३६ ॥

कृतः किन्तु स्त्रीहेतोःसंमोहात्सहसाकृतः ॥ २३ ॥ अथवा इदंव्यसनं यदृच्छया दृष्टहेतुंविना । भवितव्यतयापापेनप्राप्तमितिसंबन्धः ॥ २४ ॥ ते तुभ्यं । सुकृतं उपकारः । संत्वरयन्ति निर्जिगमिषन्तीत्यर्थः ॥ २५ ॥ अद्यापि अस्यांविपद्यपि । ममैवाज्ञायदिप्रवर्तते । तदाराघवंनिवर्तय । तुशब्दोऽवधारणे ॥ २६—२७ ॥ वृत्तदंष्ट्रः कुन्दकुड्मलाकारदंष्ट्रः । यदिपश्येयंजीवामीतिसंबन्धः ॥ २८ ॥ आमुक्तमणिकुण्डलं धृतरत्नकुण्डलं ॥ २९ ॥ नपश्यामीतियत् अतः अदर्शनात् । दुःखतरंकिंनु किमपिदुःखतरंनास्तीत्यर्थः ॥ ३०—३१ ॥ दुःखेन तन्नायःपिण्डस्थानीयेन । अर्पितचेतनः व्याप्तचित्तः । अवगाढः प्रविष्टः ॥ ३२ ॥ अनुभूयमानस्वशोकस्यापरिमेयत्वात्तं सागरत्वेनरूपयति—रामशोकमहाभोगइत्यादिना । रामशोकएवमहानाभोगोवैपुल्यंयस्यसतथा । सीताविरहरूपंपारंगच्छतीतितथा ॥ ३३—३४ ॥ अश्रुवेगस्य प्रभवोमूलहेतुः । सागरोहिवर्षस्यनिदानं । महाग्रहः महाग्राहः । अनेनकुब्जावाक्यमेवरामप्रवासनमूलमितिराज्ञाज्ञातमित्यवगम्यते । नृशंसायाः कैकेय्याः वरएव वेला जलवृद्धिर्यस्य । रामप्रव्राजनमेवायतमायामोदैर्घ्यंयस्यसतथा ॥ ३५ ॥ सागरत्वरूपणप्रयोजनमाह—यस्मिन्नित्यादिश्लोकेन ॥ ३६ ॥

ति॰ नञोऽनेकधाप्रयोगः शोकेनचित्तवैक्लव्यात् । सहसा झटित्यविचारेणैव ॥२३॥ **शि॰** विवेककरणेहेतुंवदन्नाह—भवितव्यतयेति । यत् यस्मात् राक्षसकुलात् अस्य मद्बुद्धिस्थस्य ऋषिसमूहस्य । महद्व्यसनं दुःखं तस्यकुलस्यविनाशाय भवितव्यतया उपलक्षितया । ऋच्छया वनगत्या । इदंदुःखंप्राप्तं ॥ २४ ॥ **ति॰** मदाज्ञयाभवान्गत्वाराघवंनिवर्तयतु । ननुभरतायत्वयाराज्यस्यदत्तत्वात्त्वदाज्ञयामयाकथंगन्तव्यंतत्राह । अद्यापिममैवाज्ञा यावद्भरतागमनमितिभावः ॥ २६ ॥ **ती॰** लक्ष्मणपूर्वजःक्व असावहंमुमूर्षः क्वेत्यनुकर्षः । मुमूर्षोर्मेमरामदर्शनंदुर्लभमित्यर्थः । जीवामि जीवेयमित्यर्थः । **ति॰** जीवामीति तत्समीपगमनपर्यन्तमपिजीवनेसंदेह इतिभावः ॥ २८ ॥ **शि॰** आमुक्तानिपरित्यक्तानिमणिकुण्डलानियेनतं । यमक्षयं यमस्यकालस्यक्षयःअभावोयस्मिंस्तंसाकेतलोकं गमिष्यामि ॥ २९ ॥ **ति॰** अतोन्वित्यतश्शब्दार्थमाह—**इमामिति** । एवमत्यन्तसंनिहितमरणकालेउत्तमलोकदस्वत्स्मरणाभ्यासस्संपादनायभगवताऽऽत्मवियोगःपितुस्संपादितइतितत्वम् ॥ ३० ॥ **कतक॰** वरएववेलामर्यादायस्य । यतोरामप्रव्राजना समुद्रात्कालकूटमिवजाता ॥ ३५ ॥ इत्येकोनषष्टितमस्सर्गः ॥ ५९ ॥

[**पा॰**] १ क—च. ज—ट. न्मयापि. २ क. यदन्यापि. ३ ग. घ. नहिशक्ष्ये. ४ क. सहसीतया. ५ च. ञ. बाहुं सुमुक्त. ६ क. ख. च. ञ. ट. पश्यामि. ७ ख. सोहं. ८ क.—ङ. ज.— ट. वेगः. ९ ङ. झ. ञ. ट. वाष्पवेग. १० ङ. च. झ. ञ. ट. मीनोसौ. ११ क. च. ञ. बडवानलः. १२ ख. तस्मिन्बत.

अशोभनं योऽहमिहाद्य राघवं दिदृक्षमाणो न लभे सलक्ष्मणम् ॥
इतीव राजा विलपन्महायशाः पपात तूर्णं शयने स मूर्च्छितः ॥ ३७ ॥
इति विलपति पार्थिवे प्रनष्टे करुणतरं द्विगुणं च रामहेतोः ॥
वचनमनुनिशम्य तस्य देवी भयमगमत्पुनरेव राममाता ॥ ३८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे एकोनषष्टितमः सर्गः ॥ ५९ ॥

षष्टितमः सर्गः ॥ ६० ॥

रामशोकाक्षिप्तौपरिलुठन्तींकौसल्यांप्रतिसुमन्त्रेणसहेतूपन्यासंरामस्यदुःखाभावोपपादनपूर्वकंसमाश्वासनम् ॥ १ ॥ सुमन्त्रेणकौसल्यांप्रतिसीतासुखावस्थानिरूपणेनतस्याअपरिशोच्यत्वकथनेपितस्यारामादिपरिशोचनेनसमाक्रन्दनान्नोपरमः ॥ २ ॥

ततो भूतोपसृष्टेव वेपमाना पुनःपुनः ॥ धरण्यां गतसत्वेव कौसल्या सूतमब्रवीत् ॥ १ ॥
नय मां यत्र काकुत्स्थः सीता यत्र च लक्ष्मणः ॥ तान्विना [1]क्षणमप्यत्र जीवितुं नोत्सहे ह्यहम् ॥२॥
निवर्तय रथं शीघ्रं दण्डकान्नय मामपि ॥ अथ तान्नानुगच्छामि गमिष्यामि यमक्षयम् ॥ ३ ॥
बाष्पवेगोपहतया स वाचा सज्जमानया ॥ इदमाश्वासयन्देवीं सूतः प्राञ्जलिरब्रवीत् ॥ ४ ॥
त्यज शोकं च मोहं च संभ्रमं दुःखजं तथा ॥ व्यवधूय च संतापं वने [2]वत्स्यति राघवः ॥ ५ ॥
लक्ष्मणश्चापि रामस्य पादौ परिचरन्वने ॥ आराधयति धर्मज्ञः परलोकं जितेन्द्रियः ॥ ६ ॥
विजनेऽपि [3]वने सीता वासं प्राप्य गृहेष्विव ॥ विस्रम्भं [4]लभतेऽभीता रामे [5]संन्यस्तमानसा ॥ ७ ॥
नास्या दैन्यं कृतं किञ्चित्सुसूक्ष्ममपि [6]लक्ष्यते ॥ उचितेव प्रवासानां वैदेही प्रति[7]भाति मा ॥ ८ ॥
नगरोपवनं गत्वा यथा स्म रमते पुरा ॥ तथैव रमते सीता निर्जनेषु वनेष्वपि ॥ ९ ॥
बालेव रमते सीताऽबालचन्द्रनिभानना ॥ रामा, रामे ह्यधीनात्मा विजनेऽपि वने सती ॥ १० ॥

नलभइतियत् इदमशोभनमित्यन्वयः । कविनापिवक्तुमशक्यत्वादिवेत्युक्तम् ॥ ३७ ॥ इति उक्तप्रकारेण। रामहेतोः करुणतरंयथातथा द्विगुणंविलपति पार्थिवे प्रणष्टे मूर्च्छितेसति । देवीपुनरेवभयमगमत् पूर्वंरामस्यकिंभविष्यतीति इदानींभर्तुरपिकिंभविष्यतीतिभयमगमदित्यर्थः ॥ ३८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने एकोनषष्टितमः सर्गः ॥ ५९ ॥

भूतोपसृष्टेव धरण्यांवेपमाना भूतगृहीतेव भूमौपतित्वा विवर्तमानेत्यर्थः। गतसत्वेव गतप्राणेव। "द्रव्यासुव्यवसायेषुसत्वमस्त्रीतुजन्तुषु" इत्यमरः ॥१—२॥ अथतान्नानुगच्छामि तान्नानुगच्छामिचेत् ॥३॥ सज्जमानया विक्लवया ॥ ४ ॥ मोहं रामस्यकिंभविष्यतीत्यज्ञानं । संभ्रमं व्याकुलत्वं । संतापं शोकजनितदेहसंतापं रामोदुःखितोभविष्यतीतिसंतापमित्यर्थः । यस्माद्राघवःसंतापंव्यवधूयवत्स्यति तस्माच्छोकादिकं त्यजेत्यन्वयः ॥५॥ परलोकमाराधयति परलोकंसाधयति । राधसाधसंसिद्धावितिधातुः ॥६॥ लभते भीतेत्यत्रअभीतेतिपदच्छेदः । विस्रम्भं प्रणयं । "विस्रम्भःप्रणयेपिच" इत्यमरः ॥ ७ ॥ कृतं वनवासकृतं । किञ्चिदित्यस्यविवरणं सुसूक्ष्ममिति । प्रवासानामुचितेव प्रवासानांयोग्येव अभ्यस्तवनवासप्रयासेवेत्यर्थः ॥ ८—९ ॥ क्रीडैकरसत्वाद्बालादृष्टान्तः

शि० संतापं प्रातिभासिकमात्रादिवियोगजनितदुःखं ॥ ५ ॥ शि० परलोकं परःसर्वोत्कृष्टःयोलोकोजनस्तंपरमपुरुषमित्यर्थः । किंच परःसर्वोत्कृष्टःलोक्यतेदृश्यतेअसौसतं । किंच परःसर्वोत्कृष्टःलोकोयस्यतंसाकेताधीशमित्यर्थः ॥ ६ ॥ ति० बालेवेति दुःखा.रिज्ञानेनोपमा । तस्यादेहाद्यभिमानाभावान्नाधिजंदुःखमितिभावः । स० रामा योषित् । आरामे आरामइव ॥ १० ॥

[पा०] १ ङ. च. झ. ञ. ट. क्षणमप्यद्य. २ ञ. वसति. ३ च. ञ. वनेऽभीता. ४ च. ञ. लभतेसीता. ५ क. ङ. च. छ. झ. ञ. ट. विन्यस्त. ६ क. ख. लक्ष्ये. ७ ङ. च. छ. झ. ट. भातिमे.

तद्गतं हृदयं ह्यस्यास्तदधीनं च जीवितम् ॥ अयोध्यापि भवेत्तस्या रामहीना तथा वनम् ॥ ११ ॥
पथि पृच्छति वैदेही ग्रामांश्च नगराणि च ॥ गतिं दृष्ट्वा नदीनां च पादपान्विविधानपि ॥ १२ ॥
रामं वा लक्ष्मणं वाऽपि पृष्ट्वा जानाति जानकी ॥ अयोध्याक्रोशमात्रे तु विहारमिव संश्रिता ॥ १३ ॥
इदमेव स्मराम्यस्याः सहसैवोपजल्पितम् ॥ कैकेयीसंश्रितं वाक्यं नेदानीं प्रतिभाति मा ॥ १४ ॥
ध्वंसयित्वा तु तद्वाक्यं प्रमादात्पर्युपस्थितम् ॥ ह्लादनं वचनं सूतो देव्या मधुरमब्रवीत् ॥ १५ ॥

दुःखापरिज्ञानेवाबालादृष्टान्तः । अबालचन्द्रनिभाननेतिच्छेदः । रामे अधीनात्मा आसक्तचित्तेत्यर्थः । यद्वा रामारामे रामरूपारामे ॥ १० ॥ यद्यस्मात्कारणात् अस्याः सीतायाः । हृदयं तद्गतं रामगतं । जीवितंचतदधीनं । तस्माद्वनंरामसहितं अयोध्याभवेत् रामहीनाअयोध्यापि तथा वनंभवेदित्यर्थः ॥ ११ ॥ पथीत्यादिनासीतायाउल्लासउच्यते । दृष्ट्वेतिसर्वत्रान्वेति । रामंलक्ष्मणंवापृच्छति पृष्ट्वाजानातिचअयोध्यायाःक्रोशमात्रे विहारं क्रीडांसंश्रितेवस्थिता । यद्वाविहरन्त्यस्मिन्निितिविहारःतं । अधिकरणेघञ् । उद्यानमित्यर्थः ॥ १२—१३ ॥ अयोध्यानिर्गमकालिकंकैकेयीविषयकंसीतायाःपरुषंवचनंकौसल्यायाःप्रियमिति वक्तुमुपक्रम्य तस्यवृद्धयोर्जीवननिराशाहेतुत्वंमत्वा नोचितमिदंवक्तुमित्यस्मरणव्याजेनोपारमतेत्याह— इदमेवेत्यादि । अस्याः सीतायाःसंबन्धि । इदमेवस्मरामि प्रस्तुतवृत्तान्तमेवस्मरामि । कैकेयीसंश्रितं कैकेयीमुद्दिश्यप्रवृत्तं । सहसा उपजल्पितं हठात्सीतयोक्तवाक्यं । इदानीं मा मांप्रति नभातीति । सूतः प्रमादात् इदंगोपनीयमित्यवधानाभावात् । पर्युपस्थितं सीतावचनत्वेनवक्तुमुपक्रान्तं तद्वाक्यं ध्वंसयित्वा प्रच्याव्य । देव्याः ह्लादनं आह्लादनकरं उपक्रान्तवाक्यवद्देव्यास्संतापाहेतुभूतं मधुरंवचनमब्रवीदितिपदयोजना । सहसा त्वरया । उपजल्पितं अक्रमेणोक्तमित्यस्मरणहेतूपदर्शनं । कैकेयीसंश्रितमित्युपक्रान्तांशः इदं स्मरामीतिपुनःस्मरेतिचोदनावकाशप्रदानं । इदानींभवद्दुःखदर्शनसमयेमामांप्रतिनभातीतिध्वंसनप्रकारः । ध्वंसनहेतुंकविरनुवदति—ध्वंसयित्वातुतद्वाक्यंप्रमादात्पर्युपस्थितमिति । ह्लादनमित्यनेनोपस्थितवचनस्य तापहेतुत्वंद्योत्यते । ननुकैकेयीनिन्दारूपत्वेऽपिदेव्यास्तापकारणमवश्यंगोपनीयं कीदृशंतद्वाक्यंस्यात्किंचिदिदमित्युक्तौ तत्रकिंप्रमाणंस्यात् । उच्यते । अवधेहि । एवंविधंहिकार्यवशाद्धुप्तंक्कुत्रचित्कविर्नविवृणोतिचेत् । सर्वज्ञोपितत्कथमिदमित्यभिदध्यात् । अत्रेमंचप्रमादादुपस्थितंध्वंसितंवृद्धयोःसंतापकरं कैकेयीविषयकंवृत्तान्तंकविरुत्तरत्रव्यक्तीकरिष्यति । युद्धकाण्डेसीतामधिकृत्य "विजगर्हेत्रकैकेयींक्रोशन्तीकुररीयथा" इत्युक्त्वा कैकेयीविषयकंसीतावचनमेवाह "सकामाभवकैकेयिहतोयंकुलनन्दनः" इति । इदंसीताहृदयं । कैकेय्याराज्यलाभेनैवाभीष्टसिद्धेः । रामविवासनाभ्यर्थनस्येदमाकूतं । रामविवासनेहि तद्वियोगं क्षणमपिसोढुमक्षमासीताप्येनमनुगच्छेत् साचलोकोत्तरसुन्दरी केनाप्यपह्रियेत तस्यांचहृतायां रामःस्वत एवनश्येत् ततोमेराज्यंसुप्रतिष्ठितंस्यात् अन्यथालब्धेनापिराज्येननकिञ्चित्प्रयोजनं यतोरामगुणपरवशः सर्वोपिजनस्तद्विधेयःस्यात् । तस्माद्रामोपिविनाशाय विवासनीयइति । इदमेवसीतोक्तं रामोप्यारण्यकाण्डे "सुप्तप्रमत्तकुपितानांवचनैर्भावज्ञानंदृष्टं" इतिन्यायेनवक्ष्यति "कच्चित्सकामाकैकेयीसुखितासा भविष्यति । यानतुष्यतिराज्येनपुत्रार्थेदीर्घदर्शिनी"। अन्यत्रच "यदभिप्रेतमस्मासुप्रियंवरवृतंचयत् कैकेय्यास्तत्सुसंवृत्तंक्षिप्रमद्यैवलक्ष्मण" इति ॥ इममेवार्थंपूर्वसर्गान्तेसूचितवान् "जानकीतुमहाराज निश्वसन्तीतपस्विनी । भूतोपहतचित्तेवविष्ठितावित्स्मिताशिता ॥ अदृष्टपूर्वव्यसनाराजपुत्रीयशस्विनी तेनदुःखेनरुदतीनैवमांकिञ्चिदब्रवीत् ॥ उद्वीक्षमाण भर्तारंमुखेनपरिशुष्यता । मुमोचसहसाबाष्पंमांप्रयान्तमुदीक्ष्यसा" इति ॥ अत्ररोदनमवचनं परिशुष्यतामुखेनभर्तृवीक्षणं पुनःसुमन्त्रवीक्षणं बाष्पमोचनं चकुर्वन्त्यापूर्वोक्तार्थस्मरणं ततएवस्तब्धता भर्तृमुखवीक्षणेनवक्तुमनर्हत्वज्ञानं बाष्पमोचनेनसूतवीक्षणेन श्वश्रूंप्रत्यकथनीयत्वद्योतनं चेतिव्यज्यते । तत्रसीतयोक्तंप्रामादिकमितिजुगोप अत्रतुस्वस्यैवप्रमादोऽर्थव्याजे

[पा०] १ ङ. च. छ. झ. ञ. ट. अयोध्याहि. २ ङ. च. छ. ञ. ट. भवेदस्या. ३ ङ. च. झ. ञ. ट. परिपृच्छति ४ ङ—झ. दृष्ट्वा. ५ क. ख. मैथिली. ६ क. मात्रेहि. ७ ङ. च. छ. झ. ञ. ट. जल्पं. ८ क. ख. घ.—ट. भातिमां.

अध्वना वातवेगेन संभ्रमेणातपेन च ॥ न[1] विगच्छति वैदेह्याश्चन्द्रांशुसदृशी प्रभा ॥ १६ ॥
सदृशं शतपत्रस्य पूर्णचन्द्रोपम[2]प्रभम् ॥ वदनं तद्वदान्याया वैदेह्या न वि[3]कम्पते ॥ १७ ॥
अलक्तरसरक्ताभाव[4]लक्तरसवर्जितौ ॥ अद्यापि चरणौ तस्याः पद्मकोशसमप्रभौ ॥ १८ ॥
नूपुरोद्धुष्ट[5]हेले[6]व खेलं गच्छति भामिनी ॥ इदानीमपि वैदेही त[7]द्रागान्न्यस्तभूषणा ॥ १९ ॥
गजं वा वीक्ष्य सिंहं वा व्याघ्रं [8]वा वनमाश्रिता ॥ नाहारयति संत्रासं बाहू रामस्य संश्रिता ॥२०॥
न शोच्यास्ते न [9]चात्मानः शोच्यो नापि जनाधिपः ॥ इदं हि चरितं लोके प्रतिष्ठास्यति शाश्वतम् ॥२१
वि[10]धूय शोकं परिहृष्टमानसा महर्षियाते पथि सुव्यवस्थिताः ॥
[11]वने रता वन्यफलाशनाः पितुः शुभां प्रतिज्ञां [12]परिपालयन्ति ते ॥ २२ ॥
तथापि सूतेन सुयुक्तवादिना निवार्यमाणा सुतशोककर्शिता ॥
न चैव देवी विरराम कूजितात्प्रियेति पुत्रेति च राघवेति च ॥ २३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे षष्टितमः सर्गः ॥ ६० ॥

नपरिहृतवान् ॥ १४—१५ ॥ अध्वना अध्वगमनेन । संभ्रमेण व्याघ्रादिदर्शनजन्यव्याकुलत्वेन । नविगच्छति नविकरोति ॥ १६ ॥ शतपत्रस्य पद्मस्य । पूर्णचन्द्रोपमप्रभं पूर्णचन्द्रसदृशप्रभं । वदान्यायाः वल्गुवाचः । " वदान्योवल्गुवागपि " इत्यमरः । नविकम्पते नविचलति स्वाभाविकप्रभांनजहातीत्यर्थः ॥ १७ ॥ अद्यापि वनगमनेपि ॥ १८ ॥ तद्रागात् भूषणविषयस्नेहात् । न्यस्तभूषणा चरणाद्यवयवेष्वर्पितभूषणा । वैदेही नूपुरोद्धुष्टहेलेव नूपुरोत्पन्नस्वनानुकारिलीलायुक्तेव । खेलं सलीलंगच्छति । सीतायाः सर्वदासाभरणत्वं " मन्येसाभरणासुप्तासीतास्मिञ्शयनोत्तमे " इत्युत्तरत्रभरतवचनादवगम्यते । यद्वा तद्रागात् रामेणसहगमनकौतुकात् । न्यस्तभूषणा उत्सृष्टनूपुरापि नूपुरोत्कृष्टहेलेव नूपुरसंचितविलासेव ॥ १९ ॥ गजं दर्शनमात्रेणभीषणमहाकायं । वीक्ष्य नतुश्रुत्वा । सिंहं तमपितृणायमत्वा व्याघ्रंवा जन्तुमात्रहिंसकतयासिंहादप्यतिक्रूरं । सिंहदर्शनादपिव्याघ्रदर्शनमतिक्रूरमितिनपतत्प्रकर्षः । वनमाश्रिता विनापिसिंहादीन्स्वतएवभयंकरंप्रदेशमवगाहमानापि । नाहारयति नारोपयति । आहारयतेरारोपार्थकत्वाद्भयभावनामात्रमपिनकरोतीत्यर्थः । नाहारयतीसंत्रासं स्त्रीत्वप्रयुक्तस्वाभाविकभीतिरपिनिर्गता । तत्रहेतुमाह—बाहूरामस्यसंश्रिता । परिघान्तर्गताः किंबिभ्यतीतिभावः ॥ २० ॥ ते रामादयः । आत्मानः वयं । इदंचरितं पितृवचनपरिपालनरूपंचरित्रं । शाश्वतं आचन्द्रार्कं ॥ २१ ॥ महर्षियाते महर्षिभिःप्राप्ते ॥ २२ ॥ तथापीत्युक्तंविवृणोति—सूतेनेत्यादिना सुयुक्तवादिनासूतेन तथानिवार्यमाणापि सुतशोककर्शितत्वात् देवीप्रियेत्यादिकूजितान्नविरराम ॥ २३ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने षष्टितमः सर्गः ॥ ६० ॥

ति० स्वभावरक्ततयापद्मकोशसमप्रभौ नतुमार्गगतिप्रयुक्तकाठिन्यभाजौ ॥ १८ ॥ **ती०** नूपुरोद्धुष्टहेला हेला विलासः । खेलं कान्तं । तद्रागात् गमनाभिनिवेशात् । गमनाभिनिवेशस्यविरोधीनिभूषणान्यधारयन्त्यपिभूषणसमृद्धविलासेव खेलंगच्छतीत्यर्थः । **स०** या खे आकाशे । अलंगच्छति हंसी सेवेयंभामिनी नूपुरोत्कृष्टलीला । तद्रागेण रामस्नेहेनअन्यस्तभूषणाअत्यक्तरामप्रियालङ्कारवती ॥ १९ ॥ **ति०** ते तवात्माप्यतएवनशोच्यः । नराजापि । तेषांसुखश्रवणेनतस्यापिजीवनसंभवात् । इतोपिनशोच्यांशइत्याह—**इदंहीत्यादि** । प्राप्तमपिराज्यंमहाबलोपिपरित्यज्यपितृवचनमपालयदित्येवमादिरामचरितं । स्वार्थमुद्दिश्यभर्तारमपिपरित्यज्यातिघोरंकृतवतीकैकेयीत्यादिद्दइदंरामचरितंशाश्वतंप्रतिष्ठास्यतीत्यनेन तन्नामवदेवास्यसुस्थिरत्वंवदतातस्यैश्वरत्वं ध्वनितं । नह्यन्यचरित्रंशाश्वतंप्रतिष्ठांलभते ॥ २१ ॥ इतिषष्टितमस्सर्गः ॥ ६० ॥

[पा०] १ क. ख. घ. नहिगच्छति. २ घ. चन्द्रनिभप्रभं. ख. चन्द्रोपमद्युति. ३ ख. प्रकंपते. ४ ग. घ. ज. वलक्तकविवर्जितौ. ५ ग. ङ.—ट. नूपुरोत्कृष्ट. ६ ङ. छ. झ. ट. ठ. लीलेव. ७ ठ. तद्रागान्यस्त. ८ ख. घ. वापिवरानना. क. वाबनमागता. ९ क.—ट. चात्माते. १० घ. निर्धूय. ११ ग. वनेचराः. १२ ङ. च. झ. ञ. ट. प्रतिपालयन्ति.

एकषष्टितमः सर्गः ॥ ६१ ॥

पतिव्रतावरिष्ठयापिकौसल्ययापुत्रशोकासहिष्णुतयारामादीनांदुरवस्थासंभावनेनतान्प्रतिपरिशोचनपूर्वकंदशरथोपालंभः १

वनं गते [1]धर्मपरे रामे रमयतांवरे ॥ कौसल्या रुदती [2]स्वार्ता भर्तारमिदमब्रवीत् ॥ १ ॥
यद्यपि त्रिषु लोकेषु प्रथितं ते महद्यशः ॥ सानुक्रोशो वदान्यश्च प्रियवादी च राघवः ॥ २ ॥
कथं [3]नरवरश्रेष्ठ पुत्रौ तौ सह सीतया ॥ दुःखितौ [4]सुखसंवृद्धौ [5]वने दुःखं सहिष्यतः ॥ ३ ॥
सा नूनं तरुणी श्यामा सुकुमारी सुखोचिता ॥ कथमुष्णं च शीतं च [6]मैथिली [7]प्रसहिष्यते ॥ ४ ॥
भुक्त्वाऽशनं विशालाक्षी सूपदंशान्वितं शुभम् ॥ वन्यं नैवारमाहारं कथं सीतो[8]पभोक्ष्यते ॥ ५ ॥
गीतवादित्रनिर्घोषं श्रुत्वा [9]शुभमनिन्दिता ॥ कथं क्रव्यादसिंहानां शब्दं श्रोष्यत्यशोभनम् ॥ ६ ॥
महेन्द्रध्वजसंकाशः क्वनु शेते [10]महाभुजः ॥ भुजं परिघसंकाशमुपधाय महाबलः ॥ ७ ॥
पद्मवर्णं सुकेशान्तं पद्मनिःश्वासमुत्तमम् ॥ कदा द्रक्ष्यामि रामस्य वदनं पुष्करेक्षणम् ॥ ८ ॥
[11]वज्रसारमयं [12]नूनं हृदयं मे न संशयः ॥ अपश्यन्त्या न तं यद्वै [13]फलतीदं सहस्रधा ॥ ९ ॥
[14]यैस्त्वयाऽकरुणं कर्म व्यपोह्य मम बान्धवाः ॥ निरस्ताः परिधावन्ति सुखार्हाः कृपणा वने ॥१०॥
यदि पञ्चदशे वर्षे राघवः पुनरेष्यति ॥ जह्याद्राज्यं च कोशं च [15]भरतेनोपभुज्यते ॥ ११ ॥

स्वार्ता सुतरामार्ता ॥ १ ॥ राघवः दशरथः । सानुक्रोशः वदान्यश्च प्रियवादीचेति तेमहद्यशःत्रिषु लोकेषुप्रथितं यद्यपि तथापि अतिशयिताऽपयशस्करं कृत्यंकृतमितिवाक्यशेषः । तथापि दुःखितौ मार्गेदुःखितौ । तौ वनेकथंदुःखंसहिष्यतइतिवक्ष्यमाणेनान्वयोवा । यद्वा वार्धकेनानाव्रतोपवासादिमहाप्रयासलब्धंज्येष्ठमपिपुत्रमभिषेककालेत्यक्त्वापि प्रतिज्ञांनिरूढवानिति तेमहद्यशस्त्रिषुलोकेषुयद्यपिप्रथितंभवति । राघवश्चवदान्यतयादययाप्रियवचनशीलतयामह्यंवाचापूर्वंदत्तंराज्यंनत्यजामीतिवक्तुमक्षमतयाचराज्यंदत्तवान् अतस्तस्यापिमहद्यशइतियुवयोरिदंयुक्तमस्तु । तथापि तौकथंदुःखंसहिष्यतइतियोजना ॥ २—३ ॥ तरुणी आरब्धयौवना । श्यामा यौवनमध्यस्था । एतत्पदद्वयोपादानेनेषन्न्यूनयौवनमध्यंप्राप्तेत्यवगम्यते । [श्यामातरुणी यौवनमध्यस्थातरुणी नतुयौवनारम्भस्थातरुणीत्यर्थः] ॥ ४ ॥ सूपदंशान्वितं शोभनव्यञ्जनसहितं । नैवारं नीवारसंबन्धिनम् ॥ ५ ॥ क्रव्यादाः मांसभक्षकाः ॥ ६ ॥ महेन्द्रध्वजसंकाश इति महेन्द्रध्वजोनाम इन्द्रधनुः । कदाचित् ध्वजाकारेणपरमाभ्युदयनिमित्ततयाप्रतिभातीत्याहुः ॥ ७ ॥ पद्मवर्णं पद्मपत्रवर्णं । पद्मनिश्वासं पद्मगन्धिनिश्वासं ॥ ८ ॥ नफलति नस्फुटति । ञिफलाविशरणइति धातुः ॥ ९ ॥ त्वयानिरस्ताः ममबान्धवाः रामादयः व्यपोह्य नगरंत्यक्त्वा वनेपरिधावन्तीतियत् एतत् अकरुणंकर्म करुणाराहित्येनकृतंकर्मेत्यर्थः ॥१०॥ चतुर्दशवर्षानन्तरंरामोराज्यंप्राप्स्यतीत्याशङ्क्यपरिहरति—यदीति । पञ्चदशेवर्षेराघवोयदिपुनरेष्यति तथापि राज्यंकोशं जह्यात् त्यजेत् । कुतः यस्मात्कारणात् भरतेनोपभुज्यते भरतेनोपभुक्ततयातेनपुनर्दत्तमपिराज्यंरामस्त्यजेदित्यर्थः । भरतोनोपलक्ष्यतइतिपाठान्तरं । राज्यंकोशंचभरतोजह्यात् इदं तुनोपलक्ष्यते यद्रामः पुनर्भरतदत्तंराज्यं प्रतिगृह्णीयादिति । यद्वा यदिराघवः

ति० परमपतिव्रतापिकौसल्यादुःखातिशयात्पूर्वंजानंत्यपिरेताश्रयव्यवहारवल्लोकाश्रयेणराजानमुपालभते—वनमिति । आर्तातिखिन्ना । स्वार्तेतिपाठेसुतरामार्ता । रुदतीवेतिपाठे इवएवार्थे । यद्वा उक्तार्थध्वननायेवशब्दः ॥ १ ॥ ति० अथापिहेनरवरश्रेष्ठ सीतयासह तौपुत्रौ कथंत्यक्तवानितिशेषः । अथताञ्शोचति—दुःखितावित्यादि ॥ ३ ॥ शि० पद्मवर्णं पद्मवद्वर्ण्यतेकविभि-

[पा०] १ ङ. च. छ. झ. ञ. ट. धर्मरते. २ ङ. झ. चार्ता. ३ च. ञ. नरवरश्रेष्ठौ. ४ घ. सहसंवृद्धौ. ५ घ. ङ. झ. ट. कथं. ६ ख. वैदेही. ७ ङ. छ. झ. ञ. ट. विसहिष्यते. क. घ. च. विसहिष्यति. ८ क. ख. च. भोक्ष्यति. ९ ङ. च. झ. ञ. ट. शुभसमन्विता. १० क. ख. च. ञ. सहानुजः. ११ क. ख. च. ञ. सारमिदं. १२ ङ. देव. १३ च. ञ. फलतीह. घ. दलतीदं. १४ ख. यत्त्वयादारुणं. १५ ग.—छ. झ. ञ. ट. भरतोनोपलक्ष्यते. क. भरतेनोपभोक्ष्यते.

भोजयन्ति किल श्राद्धे केचित्स्वानेव बान्धवान् ॥ ततः पश्चात्[1]समीक्षन्ते कृतकार्या द्वि[2]जर्षभान् ॥ १२ ॥
तत्र ये गुणवन्तश्च विद्वांसश्च द्विजातयः ॥ न पश्चात्तेऽभिमन्यन्ते सुधामपि सुरोपमाः ॥ १३ ॥
ब्राह्मणेष्वपि [3]तृप्तेषु पश्चाद्भोक्तुं द्विजर्षभाः ॥ नाभ्युपैतुमलं प्राज्ञाः शृङ्गच्छेदमिवर्षभाः ॥ १४ ॥
एवं कनीयसा भ्रात्रा भुक्तं राज्यं विशां पते ॥ भ्राता ज्येष्ठो वरिष्ठश्च किमर्थं [4]नावमंस्यते ॥ १५ ॥
न परेणाहृतं भक्ष्यं व्याघ्रः खादितुमिच्छति ॥ [5]एवमेव नरव्याघ्रः [6]परलीढं न [7]मंस्यते ॥ १६ ॥
[8]हविराज्यं पुरोडाशः कुशा यूपाश्च खादिराः ॥ नैतानि यातयामानि कुर्वन्ति पुनरध्वरे ॥ १७ ॥
तथा ह्यात्तमिदं राज्यं हृतसारां सुरामिव ॥ नाभिमन्तुमलं रामो नष्टसोममिवाध्वरम् ॥ १८ ॥
[[9]न चेमां धर्षणां रामः संगच्छेदत्यमर्षणः ॥ दारयेन्मन्दरमपि स हि क्रुद्धः शितैः शरैः ॥
त्वां तु नोत्सहते हन्तुं महात्मा पितृगौरवात् ॥ १९ ॥

पुनरेष्यति तदा भरतःराज्यंकोशंचजह्यादितिनोपलक्ष्यते । करस्थराज्यत्यागस्यासंभावितत्वादित्यर्थः । भरतोयदिभोक्ष्यतइतिचपाठः ॥ ११ ॥ भरतेनोपभुक्ततयापुनर्दत्तमपिराज्यंरामोनभोक्ष्यतइत्यत्रदृष्टान्तमाह—भोजयन्तीत्यादिना । किलेतिवार्तायां । लोके केचिद्ब्राह्मणाः विद्यागुणवयोभ्यधिकेषु विप्रेषुविद्यमानेषुदक्षिणाविशेषप्रापणलोभेनस्वानेवबान्धवान् श्राद्धेभोजयन्ति । ततःपश्चात् तदनन्तरं कृतकार्याः कृतश्राद्धकार्याःसन्तः श्राद्धावसाने द्विजर्षभान् पूर्वभुक्तविप्रापेक्षयाविद्यावृत्तवयोभिःश्रेष्ठान् । समीक्षन्ते इष्टपङ्क्तौभोजयितुमिच्छन्ति । तत्र तदानीं । येगुणवन्तः वृत्तवन्तः । विद्वांसः विद्यावन्तः सुरोपमाः देववत्पूज्यतमाःवृद्धाः द्विजातयः ते पश्चादिष्टपङ्क्तौसुधामपि अमृततुल्यान्नमपि । नाभिमन्यन्ते नाद्रियन्ते । ननुकुतोनाद्रियन्तेब्राह्मणशेषभोजनेशूद्रशेषवन्निषेधाभावादित्यत्राह—ब्राह्मणेष्वित्यादिना । तृप्तेष्वपि ब्राह्मणेषु पूर्वभुक्तानांब्राह्मणत्वेपीत्यर्थः । प्राज्ञाःद्विजर्षभाः ऋषभाःशृङ्गच्छेदमिव निजावमानहेतुंपश्चाद्भोक्तुमिच्छां अभ्युपैतुं नालं नक्षमन्तइत्यर्थः।यद्वा शृङ्गमग्रं शृङ्गेच्छेदोयस्य तच्छृङ्गच्छेदं छिन्नाग्रंतृणं । यथा वृषभा वृषभान्तरजग्धाग्रंतृणं भोक्तुं नालं तद्वदित्यर्थः । शृङ्गच्छेदमिति वृषभभक्षिताग्रतृणनामेत्यप्याहुः ॥ १२—१४ ॥ उक्तमर्थंदार्ष्टान्तिकेयोजयति—एवमित्यादिना । एवं पूर्वोक्तद्विजर्षभवत् । कनीयसा कनिष्ठेन । विशांपते हेप्रजानाथ । वरिष्ठः गुणैः श्रेष्ठः । किमर्थंनावमंस्यते कस्मैप्रयोजनायनतिरस्करिष्यति सर्वात्मनातिरस्करिष्यत्येवेत्यर्थः ॥ १५ ॥ परेण अन्येन वृकगोमाय्वादिना । आहृतं भक्षितशेषत्वेनानीतं । परलीढं परेणास्वादितं परभुक्तशेषमितियावत् । नमन्यते नबहुमन्यते ॥ १६ ॥ हविः चरुप्रमुखं । पुरोडाशः पिष्टादिविकाराः । खादिराइत्येतत् पालाशादीनामुपलक्षणं । यातयामानि परिभुक्तानि यागेविनियुक्तानीतियावत् । "जीर्णंचपरिभुक्तंचयातयाममिदंद्वयं" इत्यमरः । अध्वरे यागान्तरे । पुनर्नकुर्वन्ति नविनियुञ्जते । "मन्त्राः कृष्णाजिनंदर्भाः" इत्याद्ययातयामत्वबोधकवचनेषु दर्भादिशब्दाःकुशादिव्यतिरिक्तपराः ॥ १७ ॥ आत्तं उपभुक्तपूर्वं । हृतसारां गृहीतसारांशां । अभिमन्तुं

गींयतेतत् ॥ ८ ॥ ती० स्वधामपीतिपाठे स्वधां श्राद्धं । शि० ननुशूद्रशेषभोजनस्यनिषिद्धत्वेपिब्राह्मणशेषभोजनस्यनिषेधाभावात्कुतोनस्वीकुर्वन्तीत्यतआह—ब्राह्मणेष्विति । ब्राह्मणेष्वपितृप्तेषु पूर्वभुक्तेषुसत्सु । द्विजोत्तमाः भुक्तशेषं अन्नं । अभ्युपैतुं स्वीकर्तुं । नालं नसमर्थाः । एतेनाभिङ्कारणकपश्चाद्भोजनेअत्याज्यमानभङ्गस्स्यादितिहेतुस्सूचितः । मानस्यात्याज्यत्वेदृष्टान्तः । ऋषभाः वृषभाः । आत्मनःशृङ्गच्छेदमिव । शृङ्गच्छेदेहि तेषांमानभङ्गइतिप्रसिद्धं । यद्वा भुक्तशेषं भुक्तशेषभोजनं । शृङ्गच्छेदमिषमानध्वंसकत्वेनप्रभुत्वविघातकमेवेतिहेतोः ऋषभाः जात्यादिनाश्रेष्ठाः । प्राज्ञा द्विजोत्तमाः । अभ्युपेतुं अङ्गीकर्तुं । नालं नसमर्थाः । "शृङ्गंप्रभुत्वेशिखरेचिह्नेक्रीडांबुयन्त्रके" इतिमेदिनी ॥ १४ ॥ ति० यद्यपि "मन्त्राःकृष्णाजिनंदर्भाः" इतिस्मृत्याकुशानांयातयामत्वदोषोनेत्युक्तं । तथापितज्जीर्णत्वरूपयातयामत्वदोषाभावपरं नतुविनियुक्तविनियोगपरं । "ब्रह्मयज्ञेषुयेदर्भाविनियुक्तानतेऽन्यतः"

[पा०] १ घ. समीहन्ते. २ ङ. झ. ट. द्विजोत्तमान्. ३ ङ. झ. ञ. ट. वृत्तेषुभुक्तशेषंद्विजोत्तमाः. ख. भुक्तेषु. ४ घ. ज.—ट. नावमन्यते. ५ ग. घ. एवमेतन्नर. ६ ज. ट. परालीढं. ७ क.—घ. मंस्यते. ८ घ. हविराज्यपुरोडाशाः. ९ कुण्डलान्तर्गतंश्लोकद्वयंबहुपुकोशेषुनदृश्यते.

ससोमार्कग्रहगणं नभस्ताराविचित्रितम् ॥ पातयेद्यो दिवं क्रुद्धः स त्वां न व्यतिवर्तते ॥
अक्षोभयेद्दारयेद्वा महीं शैलशताचिताम् ॥ २० ॥]
नैवंविधमसत्कारं राघवो मर्षयिष्यति ॥ बलवानिव शार्दूलो वालधेरवमर्शनम् ॥ २१ ॥
नैतस्य सहिता लोका भयं कुर्युर्महामृधे ॥ अधर्मं त्विह धर्मात्मा लोकं धर्मेण योजयेत् ॥ २२ ॥
नन्वसौ काञ्चनैर्बाणैर्महावीर्यो महाभुजः ॥ युगान्त इव भूतानि सागरानपि निर्दहेत् ॥ २३ ॥
स तादृशः सिंहबलो वृषभाक्षो नरर्षभः ॥ स्वयमेव हतः पित्रा जलजेनात्मजो यथा ॥ २४ ॥
द्विजातिचरितो धर्मः शास्त्रदृष्टः सनातनः ॥ यदि ते धर्मनिरते त्वया पुत्रे विवासिते ॥ २५ ॥
गतिरेका पतिर्नार्या द्वितीया गतिरात्मजः ॥ तृतीया ज्ञातयो राजंश्चतुर्थी नेह विद्यते ॥ २६ ॥
तत्र त्वं चैव मे नास्ति रामश्च वनमाश्रितः ॥ न वनं गन्तुमिच्छामि सर्वथा निहता त्वया ॥२७॥
हतं त्वया राज्यमिदं सराष्ट्रं हतस्तथाऽऽत्मा सह मन्त्रिभिश्च ॥
हता सपुत्राऽस्मि हताश्च पौराः सुतश्च भार्या च तव प्रहृष्टौ ॥ २८ ॥

अभिलषितुं । नष्टसोममिवाध्वरमिति अन्येनसोमपाने कृतेसत्ररूपमध्वरं तद्क्षमतायांयथान्योनाभिलषति तद्वदित्यर्थः ॥ १८—२० ॥ वालधेः पुच्छस्य । अवमर्शनं अवमत्यस्पर्शनं ॥ २१ ॥ ननुवयंकिंकुर्मः पौरुषधर्मबलाभ्यांहीनःस्वयमेवगतइत्यत्राह—नैतस्येति । सहिताः मिलिताः । लोकाः चतुर्दशभुवनस्थाः सुरासुरादयः । महामृधे महायुद्धे । एतस्य रामस्य । भयं नकुर्युः भयं कर्तुंनशक्नुयुरित्यर्थः । किन्तुअधर्मं अधर्ममार्गस्थं । लोकं जनं । धर्मेणयोजयेत् "चातुर्वर्ण्यं च लोकेस्मिन्स्वेस्वेधर्मेनियोक्ष्यति" इत्युक्तोरामःस्वयमधर्मंकथंकुर्यादित्यर्थः ॥२२॥ युगान्तः युगान्तकालः । भूतानि पञ्चमहाभूतानि ॥ २३ ॥ तादृशः अवाङ्मनसगोचरपराक्रमयुक्तः । जलजेन मत्स्येन । मत्स्यो ह्यात्मजानेवभक्षयतीतिप्रसिद्धं ॥ २४ ॥ इयताप्रबन्धेनोक्तमुपसंहरति—द्विजातिचरितइति । धर्मनिरते पुत्रे त्वयाविवासिते सति द्विजातिचरितः शिष्टैस्त्रैवर्णिकाचरितः । शास्त्रदृष्टःसनातनोधर्मः ते यदि अस्तिकिमित्यर्थेव्ययमिदं ॥ २५ ॥ एवंराजकृतानीत्यास्वहानिमाह—गतिरित्यादि । एका मुख्या प्रथमेत्यर्थः । द्वितीया भर्त्रभावेगतिरित्यर्थः । ज्ञातयः पित्रादयः । तृतीया भर्तृपुत्राभावेगतिरित्यर्थः । चतुर्थी स्वातन्त्र्यरूपा । तथाचस्मृतिः " पितारक्षतिकौमारेभर्तारक्षतियौवने । वार्धके तनयोरक्षेन्नस्त्रीस्वातन्त्र्यमर्हति " इति ॥ २६ ॥ तत्र तासुगतिषु । त्वंभर्तानभवसि सपत्नीपरतन्त्रत्वात् । मेज्ञातिरपिनास्ति दूरस्थत्वादितिभावः । नवनंगन्तुमिच्छामि सभर्तृकत्वात् । निहता अस्मीतिशेषः ॥२७॥ नकेवलमहमेकाहताअन्येपीत्याह—हतमिति । राज्यं कोसलराज्यं । राष्ट्राणि अन्यानित्वन्मित्रपालितानि । सुतः भरतः तत्रैवतवसुताभिमानात् । भार्या कैकेयी

इत्यनेन विनियुक्तविनियोगनिषेधस्यन्यायेनसर्वत्रलाभादित्याहुः ॥ १७ ॥ ति० यद्वा तुरप्यर्थे । अधर्मं अधर्मप्रवृत्तमपि । लोकं दण्डादिनाधर्मेणयोजयेत् सकथंस्वयमधर्मंकुर्यादित्यर्थः ॥ २२ ॥ शि० सः रामः । पित्रा त्वया स्वयमेवहतः । ऐश्वर्यशोभायास्त्याजितः । तत्रदृष्टान्तः । जलजेन कमलेन । आत्मजः आत्मनःस्वस्यजोजनिर्यस्मात्सःजलपदार्थोयथा । यथा स्वशोभासंपादकजलशोभांस्वातिप्रसृत्याजलजंनिवारयति तथा स्वस्वातन्त्र्येणस्वशोभाजनकीभूतपुत्रशोभांभवान्निवारितवानित्यर्थः । "जोनामृत्युञ्जयेजन्यां" इतिमेदिनी ॥ २४ ॥ ती० यद्वा नकारोत्राध्याहर्तव्यः । तेधर्मनिरतइत्यत्र अधर्मनिरतइतिच्छेदः । शास्त्रदृष्टोद्विजातिचरितः राजर्षिभिराचरितःसनातनोधर्मः तेपुत्रेयदिनस्यात् तर्ह्यधर्मनिरतेतस्मिन् त्वयाविवासितेतद्युक्तंभवेत् । नत्वेवमितिभावः ॥ २५ ॥ रामानु० । तत्र गतित्वेनपरिगणितेषु । त्वंमेनास्ति । अस्तीतिविभक्तिप्रतिरूपकमव्ययं । मेनासीतिपाठस्सम्यक् ॥ २७ ॥ इत्येकषष्टितमस्सर्गः ॥ ६१ ॥

[पा०] १ क. ख. घ.—ट. रभिमर्शनं. २ ङ. झ. ञ. ट. शास्त्रेदृष्टः. ३ छ. पुरातनैः. ङ. झ. ञ. ट. सनातनैः. ४ घ. ङ. च. झ. ञ. ट. नैव. ५ ङ. झ. त्वंममनैवास्ति. ञ. त्वंचैवमेनास्ति. ६ छ. झ. ट. वनमाश्रितः. ७ झ. ट. सर्वथाह्याहता. ङ. सर्वतोह्याहता. ग. सर्वथापिहता. ख. घ. च. ञ. सर्वथाहिहता. क. ज. सर्वथाभिहता. ८ ग. ङ. च. झ. ञ. ट. राष्ट्रमिदं सराज्यं. ९ ङ. झ. ट. हताःस्मसर्वाःसह.

इमां गिरं दारुणशब्दसंश्रितां निशम्य राजाऽपि मुमोह दुःखितः ॥
ततः स शोकं प्रविवेश पार्थिवः स्वदुष्कृतं चापि पुनस्तदा स्मरन् ॥ २९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे एकषष्टितमः सर्गः ॥ ६१ ॥

द्विषष्टितमः सर्गः ॥ ६२ ॥

कौसल्यापरुषभाषणश्रवणेन मृतिसमयेसुतविप्रयोगप्रयोजकमुनिकुमारहननरूपस्वदुष्कृतानुस्मरणेनच परिशोचतादशरथेनसाञ्जलिबन्धंकौसल्यांप्रतिप्रसादनम् ॥ १ ॥ पतिप्रसादनेनविषीदन्त्याकौसल्ययासप्रणामंप्रसादितेनराज्ञारात्रौनिद्रावशाधिगमः ॥ २ ॥

एवं तु क्रुद्धया राजा राममात्रा सशोकया ॥ श्रावितः परुषं वाक्यं चिन्तयामास दुःखितः ॥ १ ॥
चिन्तयित्वा स च नृपो मुमोह व्याकुलेन्द्रियः ॥ अथ दीर्घेण कालेन संज्ञामाप परंतपः ॥ २ ॥
स संज्ञामुपलभ्यैव दीर्घमुष्णं च निश्वसन् ॥ कौसल्यां पार्श्वतो दृष्ट्वा पुनश्चिन्तामुपागमत् ॥ ३ ॥
तस्य चिन्तयमानस्य प्रत्यभात्कर्म दुष्कृतम् ॥ यदनेन कृतं पूर्वमज्ञानाच्छब्दवेधिना ॥ ४ ॥
अमनास्तेन शोकेन रामशोकेन च प्रभुः ॥ द्वाभ्यामपि महाराजः शोकाभ्यामभ्यतप्यत ॥ ५ ॥
दह्यमानः स शोकाभ्यां कौसल्यामाह भूपतिः ॥ वेपमानोऽञ्जलिं कृत्वा प्रसादार्थमवाङ्मुखः ॥६॥
प्रसादये त्वां कौसल्ये रचितोऽयं मयाऽञ्जलिः ॥ वत्सला चानृशंसा च त्वं हि नित्यं परेष्वपि ॥७॥
भर्ता तु खलु नारीणां गुणवान्निर्गुणोपि वा ॥ धर्मं विमृशमानानां प्रत्यक्षं देवि दैवतम् ॥ ८ ॥
सा त्वं धर्मपरा नित्यं दृष्टलोकपरावरा ॥ नार्हसे विप्रियं वक्तुं दुःखिताऽपि सुदुःखितम् ॥ ९ ॥
तद्वाक्यं करुणं राज्ञः श्रुत्वा दीनस्य भाषितम् ॥ कौसल्या व्यसृजद्बाष्पं प्रणालीव नवोदकम् ॥१०॥

तद्वचनकरणात् ॥ २८ ॥ —इमामिति । प्रविवेश तत्रमग्नइत्यर्थः । दुष्कृतंस्मरन् एतादृशदुःखस्यनिदानभूतं किंकर्मपूर्वंकृतमितिस्मरन्नित्यर्थः ॥ २९ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने एकषष्टितमः सर्गः ॥ ६१ ॥

चिन्तयामास अनयासत्यमेवकथितं मयाचान्यैरश्रुतपूर्वंमहदकृत्यंकृतं किमतःपरंकरोमीतिचिन्तयामासेत्यर्थः ॥१—२॥ पुनश्चिन्तामुपागमत् "अत्युत्कटैः पुण्यपापैरिहैवफलमश्नुते " इतिन्यायेनाप्रियपुत्रविश्लेषजंमहद्दुःखमनुभवामिं एतद्धेतुभूतंकिंकर्मकृतमिति पुनश्चिन्तांप्राप्तवानित्यर्थः ॥ ३ ॥ दुष्कृतंकर्म मुनिकुमारवधरूपंकर्म । प्रत्यभात् प्रतीतमभूत् । शब्दवेधिना शब्देनलक्ष्येणवेद्धुंशीलमस्यास्तीतिशब्दवेधी राजावाणोवा ॥ ४ ॥ अमनाः अस्वस्थचित्तः क्षुभितान्तःकरणइत्यर्थः । तेन मुनिकुमारवधजनितेन ॥५॥ अवाङ्मुखःअवनतमुखः । स्वकृतकौसल्याविषयाप्रियजन्ययालज्जयाभीत्याचेतिभावः ॥ ६ ॥ परेष्वपि प्रतिकूलेष्वपि ॥ ७—८ ॥ दृष्टलोकपरावरा दृष्टौलोकेजनेपरावरौ उत्कर्षापकर्षौययासातथोक्ता । सुदुःखितं मांप्रतीतिशेषः ॥ ९ ॥ प्रणाली प्रासादादिषु दार्वादिनिर्मितजलनिर्गममार्गः । "द्वयोःप्रणालीपयसःपदव्यां " इत्यमरः । नवोदकं वर्षजलं ॥ १० ॥

ति० शब्दमेवलक्ष्यदेशस्थंप्राप्यविध्यतीतिशब्दवेधी ॥ ४ ॥ ति० अपकृष्टाअपिभर्तारमेवंनवदन्तीतिभावः ॥ ९ ॥

[पा०] १ ङ. झ. ञ. ट. संहितां. २ ङ. झ. ट. रामेति. ३ च. ट. पुनस्तथास्मरन्. ग. ङ. ज. झ. ञ. पुनस्तथाऽस्मरत्. ४ क. ङ. च. झ. ञ. ट. मोहव्याकुलितेन्द्रियः. ५ क. घ. अतिदीर्घेण. ६ च. संज्ञांप्राप. ७ ङ. च. झ. ञ. ट. पुनश्चिन्तां. ८ घ. मुपाविशत्. ९ ङ. च. झ. ञ. ट. मभितप्यते. १० क. ख. ग. ङ. च. ज.—ट. दह्यमानस्तु. ११ ङ. छ. झ. ट. दुःखितः. क. ख. ग. च. ञ. भूमिपः. १२ क. भर्ताहि. १३ क. प्रामृजत्.

सा मूर्ध्नि बध्वा रुदती राज्ञः पद्ममिवाञ्जलिम् ॥ संभ्रमादब्रवीत्त्रस्ता त्वरमाणाक्षरं वचः ॥ ११ ॥
[1]प्रसीद शिरसा याचे भूमौ निपतिताऽस्मि ते ॥ याचितासि हता देव [2]हन्तव्याऽहं न हि त्वया ॥ १२ ॥
नैषा हि सा स्त्री भवति श्लाघनीयेन धीमता ॥ उभयो[3]र्लोकयोर्वीर पत्या या संप्रसाद्यते ॥ १३ ॥
जानामि धर्मं [4]धर्मज्ञ त्वां जाने सत्यवादिनम् ॥ पुत्रशोकार्तया तत्तु मया किमपि भाषितम् ॥१४॥
शोको नाशयते धैर्यं शोको नाशयते श्रुतम् ॥ शोको नाशयते सर्वं नास्ति शोकसमो रिपुः ॥१५॥
[5]शक्य आपतितः सोढुं प्रहारो रिपुहस्ततः ॥ सोढुमापतितः शोकः सुसूक्ष्मोपि न शक्यते ॥ १६ ॥
[धर्मज्ञाः श्रुतिमन्तोऽपि छिन्नधर्मार्थसंशयाः ॥ यतयो वीर मुह्यन्ति शोकसंमूढचेतसः] ॥ १७ ॥
वनवासाय रामस्य [6]पञ्चरात्रोऽद्य गण्यते ॥ यः शोकहतहर्षायाः पञ्चवर्षोपमो [7]मम ॥ १८ ॥

राज्ञः अञ्जलिं पद्ममिवमूर्ध्निबध्वा पाणिभ्यांगृहीत्वा मूर्ध्निबध्वेत्यर्थः । त्रस्ता धर्माद्भीता ॥ ११ ॥ भूमौनिपतितास्मि प्रणतास्मीत्यर्थः । कुतः यतः तेयाचिता त्वयायाचिताऽहं हतास्मि। अतः त्वयाहंहन्तव्या नहि संहर्तव्यानहि । एतदपराधशान्तयेममप्रहारएवत्वया कर्तव्योनसंहारोदास्याइवेत्यर्थः ॥ १२ ॥ श्लाघनीयेन स्वयंप्रसाद्येन। पत्या लोके या संप्रसाद्यते सास्त्री उभयोर्लोकयोर्नभवति । ऐहिकामुष्मिकसुखभागिनीनभवतीत्यर्थः ॥ १३ ॥ किमपि अविचारितं अनुचितंच । तत् क्षन्तव्यमितिशेषः ॥ १४—१५ ॥ आपतितः हठात्प्राप्तः ॥ १६—१७ ॥ शोकस्यनूतनत्वादशक्यत्वमाह—वनवासायेति । वनवासाय वनेवासंकर्तुं । प्रस्थितस्यरामस्य पञ्चरात्रोद्यगण्यते वनेपञ्चरात्रो वासोगण्यते । अत्रकेचित् प्रथमायांरात्रौतमसातीरे द्वितीयरात्रौजाह्नवीतीरे तृतीयरात्रौगङ्गादक्षिणकूलस्थे वनस्पतौ चतुर्थरात्रौप्रयागे पञ्चमरात्रौयमुनातीरे। ततः सुमन्त्रः षष्ठदिवसेरामश्चित्रकूटंगमिष्यतीतिवृत्तान्तंज्ञात्वा तदहस्सायाह्नसमयेअयोध्यांप्राप्तवान् । ततोत्रपञ्चरात्रगणनमुपपद्यतइत्यूचिरे । अन्येत्वाहुः । गङ्गातरणपर्यन्तंवनवासत्वाभावात् ततःपरंवनस्पतिभरद्वाजाश्रमयमुनातीरचित्रकूटेषुचतस्रोरात्रयः । चतुर्थ्यांसुमन्त्रस्यनिर्गमः पञ्चम्यामिदंवचनमिति । एवंसत्यद्यपदस्वारस्यमिति । ननुसप्तपञ्चाशेसर्गे " भरद्वाजाभिगमनं प्रयागेचसहासनम् । आगिरेर्गमनंतेषांतत्रस्थैरभिलक्षितम् ॥ अनुज्ञातःसुमन्त्रोथयोजयित्वाहयोत्तमान् " । इत्याद्यनन्तरं " ततःसायाह्नसमयेतृतीयेहनिसारथिः । अयोध्यांसमनुप्राप्यनिरानन्दांददर्शह" इत्युक्त्या अयोध्यानिर्गमदिवसमारभ्यषष्ठेहनिकिलरामस्यचित्रकूटप्रवेशः अथचारेभ्यः सप्तमेअष्टमेवा सूतस्य तद्वृत्तान्तश्रवणं ततस्तृतीयेहनिसूतस्यायोध्याप्रवेशः तत्कथंपञ्चरात्रयइतिपरिगण्यते। उच्यते । तृतीयेहनीत्यत्रअह्नस्तृतीयभागइत्यर्थः । आगिरेर्गमनमित्यत्रगमनोद्योगमित्यर्थः । तथाच "गुहेनसार्धंतत्रैवस्थितोस्मिदिवसान्बहून् । आशयायदिमांरामःपुनःशब्दापयेदिति" इत्यत्र बहूनित्युक्त्यादिनत्रयंशृङ्गिबेरपुरेसूतस्यवासः चतुर्थेदिने ऋजुमार्गेणदिवारात्रमागतचारमुखात् रामस्यचित्रकूटप्रवेशोद्योगंनिशम्य तद्दिवससायंकालेवेगेनायोध्याप्रवेशः । तस्मिन्दिनेकौसल्याह—पञ्चरात्रोद्यगण्यत

ति० त्रस्ता अहमपिकैकेयीवत्पतिशोककारिवचनादिकंप्राप्तवतीतिभीता ॥११॥ ति० हेदेव त्वयायाचिता अनुनीताऽहंहतास्मि। ईश्वरेप्सितवैपरीत्यस्यान्याय्यत्वात् । अतस्त्वयाक्षंतव्या न किंतुदासीवत्प्रहर्तव्येत्यर्थः ॥ १२ ॥ शि० धर्मं " पतिःपरुषवन्नवक्तव्यः " इत्यादिरीतिं जानामि । तुस्त्वथाप्यर्थे ॥ १४ ॥ ति० पञ्चरात्रइत्यस्य गतइतिशेषः । तत्रप्रथमातमसातीरे द्वितीयागुहपुरे तृतीयागङ्गातीरे चतुर्थीप्रयागे पञ्चमीयमुनातीरे षष्ठीचित्रकूटे तद्दिनेसुमन्त्रस्यायोध्याप्राप्तिः । अतएवाग्रेषष्ठीतिदशरथोक्तिः । अथवा आद्यदिनेसंपूर्णदिनंस्वनिकटेस्थितत्वेनस्वदेशेतमसातीरएवस्थितत्वेनतद्दिनमगणय्यकौसल्ययाऽद्यपञ्चरात्रोगण्यतइत्युक्तं । यत्तु कतकेननिर्गमनात्सप्तरात्रःसुमन्त्रागमनदिनइत्युक्तं तदज्ञानात् । गङ्गोत्तरणदिनात्तृतीयेऽहनिचारप्रतिनिवृत्त्युत्तरंसायाह्नेतद्दिनएवसुमन्त्रप्रस्थानस्यवक्तुंशक्यत्वात् । "रामस्यनिर्गमदिनाद्दिनेषष्ठे" इतिपूर्वलिखितपाद्मराजातु तमपिगृहीत्वाषष्ठीतिवक्ष्यति ।

[पा०] १ ख. प्रसादं. २ घ.—ञ. क्षन्तव्या. ३ ख. ङ. झ. ञ. ट. लोंकयोर्लोके. ४ घ. धर्मज्ञं. ५ ख.—च. ज.—ट. शक्यमापतितः. ६ ख. च. झ. ट. पञ्चरात्रोत्र. ७ कं. मतः.

तं हि चिन्तयमानायाः शोकोऽयं हृदि वर्धते ॥ नदीनामिव वेगेन समुद्रसलिलं महत् ॥ १९ ॥
एवं हि कथयन्त्यास्तु कौसल्यायाः शुभं वचः ॥ मन्दरश्मिरभूत्सूर्यो रजनी चाभ्यवर्तत ॥ २० ॥
तथा प्रसादितो वाक्यैर्देव्या कौसल्यया नृपः ॥ शोकेन च समाक्रान्तो निद्राया वशमेयिवान् ॥ २१ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे द्विषष्टितमः सर्गः ॥ ६२ ॥

त्रिषष्टितमः सर्गः ॥ ६३ ॥

अर्धरात्रेप्रतिबुद्धेनदशरथेन स्वस्यपुत्रशोकान्मरणप्रयोजकस्वदुष्कृतानुस्मरणेन कौसल्यांप्रतितन्निवेदनोपक्रमः ॥ १ ॥ युवराजत्वावस्थायांमृगयार्थमटवींपर्यटतादशरथेनापररात्रेजलपूरणायकुंभमंभसिनिमज्जयतिकस्मिंश्चिदृषिकुमारे जलपूरणशब्दे गजगर्जितभ्रान्त्यास्वस्यशब्दवेधित्वाभिमानेनशरविमोचनम् ॥ २ ॥ बाणाभिघातार्तेनऋषिकुमारेण वृद्धतरस्वमातृपित्रनुशोचनेनपरिदेवनम् ॥ ३ ॥ ततस्सविपादमानुषभाषणनिर्विण्णेनराज्ञातत्समीपोपसर्पणम् ॥ ४ ॥ ऋषिकुमारेण दशरथेस्ववृत्तान्तंनिवेद्यपितरौप्रतिस्वावस्थानिवेदनचोदनपूर्वकं स्वचोदनयातेनस्वशरीराच्छरोद्धरणेप्राणविमोक्षणम् ॥ ५ ॥

प्रतिबुद्धो मुहूर्तेन शोकोपहतचेतनः ॥ अथ राजा दशरथः स चिन्तामभ्यपद्यत ॥ १ ॥
रामलक्ष्मणयोश्चैवं विवासाद्वासवोपमम् ॥ आविवेशोपसर्गस्तं तमः सूर्यमिवासुरम् ॥ २ ॥
सभार्ये निर्गते रामे कौसल्यां कोसलेश्वरः ॥ विवक्षुरसितापाङ्गां स्मृत्वा दुष्कृतमात्मनः ॥ ३ ॥
स राजा रजनीं षष्ठीं रामे प्रव्राजिते वनम् ॥ अर्धरात्रे दशरथः संस्मरन्दुष्कृतं कृतम् ॥ ४ ॥
स राजा पुत्रशोकार्तः स्मृत्वा दुष्कृतमात्मनः ॥ कौसल्यां पुत्रशोकार्तामिदं वचनमब्रवीत् ॥ ५ ॥
यदाचरति कल्याणि शुभं वा यदि वाऽशुभम् ॥ तदेव लभते भद्रे कर्ता कर्मजमात्मनः ॥ ६ ॥
गुरुलाघवमर्थानामारम्भे कर्मणां फलम् ॥ दोषं वा यो न जानाति स बाल इति होच्यते ॥ ७ ॥

इति । अतोनकिंचिदनुपपन्नं ॥१८॥ नदीवेगेन समुद्रवृद्धिरितिलोकवादः ॥ १९ ॥ कथयन्त्याः कथयन्त्यामित्यर्थः । शुभंवचः । अतिदुःखितावस्थायामपिपत्यनुनयपरत्वाद्वचसःशुभत्वं ॥२०—२१॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने द्विषष्टितमःसर्गः ॥ ६२ ॥

रामलक्ष्मणयोर्विवासात् उपसर्गः महोपद्रवःपुत्रशोकरूपः । आसुरं असुरसंबन्धि । तमः राहुः ॥२॥ विवक्षुः अभूदितिशेषः । असितापाङ्गामित्यनेन निवृत्तक्रोधत्वमुक्तं ॥ ३ ॥ रजनीमिति सप्तम्यर्थेद्वितीया । षष्ठींरजनींप्राप्येतिशेषोवा । संस्मरन् स्थितइतिशेषः ॥ ४—५ ॥ स्मृतमात्मदुष्कृतंवक्तुंतदनुकूलांलोकस्थितिंदर्शयति—यदिति । कल्याणीतिसान्त्वोक्तिः । लोकेपुरुषःशुभंवाअशुभंवायदाचरति परस्यकर्मजं परशुभाशुभप्रापकपुण्यापुण्यात्मककर्मजं । तदेव शुभं वाअशुभंवाफलं आत्मनोपिलभते । तथाचऋषेःपुत्रवियोगकरणेनममापिपुत्रवियोगःप्राप्तइतिभावः ॥ ६ ॥ अन्यामपिलोकस्थितिमाह—गुरुलाघवमिति । कर्मणामारम्भे आरम्भसमये । अर्थानां फलानां । गुरु-

---

विरोधाच्च ॥ १८ ॥ ति० नदीनांवेगेनसमुद्रसलिलमिवेत्युत्प्रेक्षामात्रं नतुतस्यतेनवृद्धिरित्याहुः । परेतु महत्समुद्रसलिलं वेगेन चन्द्रोदयवृद्धिवेगेन । नदीनांहृदि तटद्वयान्तरे यथावर्धतइत्यर्थः । समुद्रगामिनदीनांचन्द्रोदयकालिकसमुद्रवृद्ध्यावृद्धेःकियद्दूरमद्याप्युपलंभादित्याहुः । स० समुद्रसलिलं समुद्रद्वारिध्रियमाणं । यथोक्तंगीताभाष्ये । “अस्तिचेयत्समुद्रेपिद्वारि” इत्यादि ॥ १९ ॥ इतिद्विषष्टितमस्सर्गः ॥ ६२ ॥

ति० आसुरंतमः असुरस्यराहोस्संबन्धितमःआवरणशक्तिःयथासूर्यमावृणोतितद्वत् ॥ २ ॥ ति० तदेवलभतेतल्लभतएवेतिच ॥ ६ ॥ ति० अर्थानांऐहिकानांकर्मणांपारलौकिकानांआरंभे फलंप्रति यो गुरुलाघवंगौरवंलाघवंच । दोषंवा दोषंगुणंवानजानाति केनचिदल्पेनहत्यादिनामहदनिष्टंकेनचिन्महतापियागादिनाल्पफलं । तथेदंकर्मअल्पदोषंबहुगुणं इदंचबहुदोषमल्पगुणं

[पा०] १ घ. तदा. क. ख. ङ. च. झ. ञ. ट. अथप्रह्लादितो. २ ज. मभ्यवर्तत. ३ ख. श्चैवं. ४ ङ. झ. ट. आपेदेउपसर्गस्तं. ५ क. ख. च. झ. ञ. सभार्येविगते. ६ ङ. च. ज—ट. रसितापाङ्गीं. ७ ख. ङ. च. झ. ञ ट. सोस्मरद्दुष्कृतं. ८ क. सुखं.

कश्चिदाम्रवणं छित्वा पलाशांश्च निषिञ्चति ॥ पुष्पं दृष्ट्वा फले गृध्नुः स शोचति फलागमे ॥ ८ ॥
अविज्ञाय फलं यो हि कर्मत्वेवानुधावति ॥ स शोचेत्फलवेलायां यथा किंशुकसेचकः ॥ ९ ॥
सोहमाम्रवणं छित्वा पलाशांश्च न्यपेचयम् ॥ रामं फलागमे त्यक्त्वा पश्चाच्छोचामि दुर्मतिः ॥१०॥
लब्धशब्देन कौसल्ये कुमारेण धनुष्मता ॥ कुमारः शब्दवेधीति मया पापमिदं कृतम् ॥ ११ ॥
तदिदं मेऽनुसंप्राप्तं देवि दुःखं स्वयं कृतम् ॥ [1]संमोहादिह [2]बालेन यथा स्याद्भक्षितं विषम् ॥ १२ ॥
[3]यथाऽन्यः पुरुषः कश्चित्पलाशैर्मोहितो भवेत् ॥ एवं [4]ममाप्यविज्ञातं शब्दवेध्यमयं फलम् ॥ १३ ॥
देव्यनूढा [5]त्वमभवो युवराजो भवाम्यहम् ॥ ततः प्रावृडनुप्राप्ता [7]मदकामविवर्धनी ॥ १४ ॥
[8]उपास्य हि रसान्भौमांस्तप्त्वा च जगदंशुभिः ॥ परेताचरितां भीमां रवि[9]राविशते दिशम् ॥ १५ ॥

लाघवं गुरुत्वंलघुत्वंच । फलंदोषंवा फलंफलहानिं वा । यद्वा सुखरूपतांदुःखरूपतांवा योनजानाति सः बालः अज्ञइत्युच्यते । अल्पफलकंवहुकर्म निष्फलंचकर्मारभमाणोबुद्धिहीनः बहुफलकमल्पंकर्मसफलं कर्मचारभमाणःसुबुद्धिरित्यर्थः । तथाचात्मविनोदरूपाल्पफलं पुत्रवियोगरूपमहाफलहानिकरंमृगयाकर्मकुर्वन्नहमज्ञएवास्मीतिभावः ॥ ७ ॥ फलतारतम्यविचारमन्तरेणकर्मणिप्रवृत्तस्योक्तंबालिशत्वंदृष्टान्तमुखेनविवृणोति—कश्चिदिति । लोकेकश्चित्पुरुषः पुष्पंदृष्ट्वाफलेगृध्नुः साभिलाषःसन् अधिकवर्णमहापुष्पवत्त्वात्तदनुगुणमहाफलंभविष्यतीतिसाभिलाषइत्यर्थः । आम्रवणं चूतवनं अल्पनिर्वर्णपुष्पकं । छित्वा पलाशोपरोधपरिहारार्थंछित्वा । पलाशांश्च किंशुकानेव । निषिञ्चति जलसेचनादिनापोषयति । सः फलागमे फलप्राप्तिकालेसति । अनुपभोग्यफलदर्शनात् शोचति ॥ ८ ॥ दृष्टान्तोक्तंदार्ष्टान्तिकेदर्शयति—अविज्ञायेति । भाविफलमविज्ञाय कर्मत्वेवानुधावति कर्मैवानुसरति तदनुकूलहिंसांतुनपश्यतीत्यर्थः ॥ ९ ॥ एवंसदृष्टान्तमुक्तस्यप्रकृतोपयोगंदर्शयति—सोहमिति । आम्रवणच्छेदनपूर्वकपलाशसेचकतुल्योहमित्यर्थः । आम्रवणंछित्त्वेत्यनेन अभिषेकविघातपूर्वकरामविवासनंलक्ष्यते । पलाशांश्चन्यषेचयमित्यनेन कैकेयीप्रियकरणंलक्ष्यते ॥ १० ॥ एतद्दुःखानुभवस्यनिदानंवक्तुमुपक्रमते—लब्धशब्देनेति । कुमारःशब्दवेधीतिलब्धशब्देन प्राप्तख्यातिनामया इदं वक्ष्यमाणं पापं मुनिकुमारवधरूपंकर्मकृतमितिसंबन्धः । यद्वा लब्धशब्देन लब्धगजतुल्यमुनिपुत्रशब्देनमया शब्दवेधीकुमारइत्यभिमानेन इदं वक्ष्यमाणं । मुनिकुमारवधरूपंपापंकृतं ॥ ११ ॥ शुभंवाअशुभंवापुरुषकृतं कर्मलोकान्तरेजन्मान्तरेवाफलायभवेत् मत्कृतकर्मणस्त्वत्युत्कटत्वादिहैवतत्फलंप्राप्तमित्याह—तदिदमिति । इह लोके । बालेनसंमोहाद्भक्षितंविषं यथादुःखरूपं स्यात्तथैवस्वयंकृतं तदिदंदुष्कृतं मेदुःखरूपं अनुसंप्राप्तं जातमित्यर्थः ॥ १२ ॥ उक्तमर्थंसंग्रहेणदर्शयन्नुपसंहरति—यथान्यइत्यादिना । अन्यः प्राकृतःकश्चित् । पलाशैः पलाशपुष्पैः "फलेलुब्ध" यथामोहितोभवेत् यादृशंपुष्पंतादृशंफलंभविष्यतीतिमोहंप्राप्तोभवेत् । एवंममापि मयापि । शब्दोवेध्योलक्ष्यंयस्यसशब्दवेध्यः शरः शब्दवेध्यमयं शब्दवेध्यविकारभूतं तद्धेतुकमित्यर्थः । फलमविज्ञातं शब्दवेधित्वख्यातिमात्रमेवजानतामयाभाव्यनर्थफलंनविज्ञातमित्यर्थः ॥ १३ ॥ एतादृशशब्दवेधनंकदाप्राप्तमित्याकाङ्क्षायामाह—देवीत्यादिना । अनूढा अकृतविवाहा । युवत्वेसतिराजा युवराजः भवामि अभवं । प्रावृट् वर्षाकालः ॥१४॥ उपास्य गृहीत्वा । रसान् जलानि । जगत् भूमिं । परेताचरितां प्रेताचरिताम् । अतएवभीमां दिशं दक्षिणा-

इत्येवंनजानाति सबालइत्युच्यते नस्तनंधयः । स० गुरु गौरवं । अर्थानांपुरुषार्थसाधकानांकर्मणामारंभे फलंप्रति साधनेषुगौरवंलाघवंच तथादोषं वाशब्दाद्गुणसंग्रहः । अर्थानांसाधनानामितिवा ॥ ७ ॥ ति० फलागमेरामकृतस्वोत्तरक्रियसालभ्यपारलौकिकफलप्राप्तिसमयेवा ॥१०॥ ति० कुमारःअजकुमारः । शब्दवेधीतिलब्धःशब्दोयेनतादृशेनमया शब्दवेधीत्येवंलब्धकीर्तिनेतियावत् । कुमारेण जीवत्पितृकेण ॥ ११ ॥ ति० प्रावृषंवर्णयति—अपास्येति । भौमान्रसान् अपास्य निरस्य शोषयित्वेतियावत् ।

[पा०] १ घ. सन्नेहादिव. २ ख. ङ. ज. बाल्येन. ३ ख. तद्यथापुरुषः. ४ क. घ. ङ. च. झ. ञ. ट. मया. ५ ख. ङ. च. झ. ञ. ट. मिदंफलं. ६ क. त्वयोध्यायां. ७ ङ. च. झ. ञ. ट. ममकामविवर्धिनी. ८ ङ. झ. ट. अपास्यहि. ख. उपास्यच. ९ घ. ङ. च. झ. ञ. ट. सञ्चरते.

तं हि चिन्तयमानायाः शोकोऽयं हृदि वर्धते ॥ नदीनामिव वेगेन समुद्रसलिलं महत् ॥ १९ ॥
एवं हि कथयन्त्यास्तु कौसल्यायाः शुभं वचः ॥ मन्दरश्मिरभूत्सूर्यो रजनी चाभ्यवर्तत ॥ २० ॥
तथा प्रसादितो वाक्यैर्देव्या कौसल्यया नृपः ॥ शोकेन च समाक्रान्तो निद्राया वशमेयिवान् ॥२१॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे द्विषष्टितमः सर्गः ॥ ६२ ॥

त्रिषष्टितमः सर्गः ॥ ६३ ॥

अर्धरात्रेप्रतिबुद्धेनदशरथेनं स्वस्यपुत्रशोकान्मरणप्रयोजकस्वदुष्कृतानुस्मरणेन कौसल्यांप्रतितन्निवेदनोपक्रमः ॥ १ ॥ युवराजत्वावस्थायांमृगयार्थमटवींपर्यटतादशरथेनापररात्रेजलपूरणायकुंभमंभसिनिमज्जयतिकस्मिंश्चिदृषिकुमारे जलपूरणशब्दे गजगर्जितभ्रान्त्यास्वस्यशब्दवेधित्वाभिमानेनशरविमोचनम् ॥ २ ॥ बाणाभिघातार्तेनऋषिकुमारेण वृद्धतरस्वमातृपित्रनुशोचनेनपरिदेवनम् ॥ ३ ॥ ततस्सविषादमानुपभाषणनिर्विण्णेनराज्ञातत्समीपोपसर्पणम् ॥ ४ ॥ ऋषिकुमारेण दशरथेस्ववृत्तान्तंनिवेद्यपितरौप्रतिस्वावस्थानिवेदनचोदनपूर्वकं स्वचोदनयातेनस्वशरीराच्छरोद्धरणेप्राणविमोक्षणम् ॥ ५ ॥

प्रतिबुद्धो मुहूर्तेन शोकोपहतचेतनः ॥ अथ राजा दशरथः स चिन्तामभ्यपद्यत ॥ १ ॥
रामलक्ष्मणयोश्चैवं विवासाद्वासवोपमम् ॥ आविवेशोपसर्गस्तं तमः सूर्यमिवासुरम् ॥ २ ॥
सभार्ये निर्गते रामे कौसल्यां कोसलेश्वरः ॥ विवक्षुरसितापाङ्गां स्मृत्वा दुष्कृतमात्मनः ॥ ३ ॥
स राजा रजनीं षष्ठीं रामे प्रव्राजिते वनम् ॥ अर्धरात्रे दशरथः संस्मरन्दुष्कृतं कृतम् ॥ ४ ॥
स राजा पुत्रशोकार्तः स्मृत्वा दुष्कृतमात्मनः ॥ कौसल्यां पुत्रशोकार्तामिदं वचनमब्रवीत् ॥ ५ ॥
यदाचरति कल्याणि शुभं वा यदि वाऽशुभम् ॥ तदेव लभते भद्रे कर्ता कर्मजमात्मनः ॥ ६ ॥
गुरुलाघवमर्थानामारम्भे कर्मणां फलम् ॥ दोषं वा यो न जानाति स बाल इति होच्यते ॥ ७ ॥

इति। अतोनकिंचिदनुपपन्नं ॥१८॥ नदीवेगेन समुद्रवृद्धिरितिलोकवादः ॥ १९ ॥ कथयन्त्याः कथयन्त्यामित्यर्थः। शुभंवचः। अतिदुःखितावस्थायामपिपत्यनुनयपरत्वाद्वचसःशुभत्वं ॥२०—२१॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने द्विषष्टितमःसर्गः ॥ ६२ ॥

रामलक्ष्मणयोर्विवासात् उपसर्गः महोपद्रवःपुत्रशोकरूपः। आसुरं असुरसंबन्धि। तमः राहुः ॥२॥ विवक्षुः अभूदितिशेषः। असितापाङ्गामित्यनेन निवृत्तक्रोधत्वमुक्तं ॥ ३ ॥ रजनीमिति सप्तम्यर्थेद्वितीया। षष्ठींरजनींप्राप्येतिशेषोवा । संस्मरन् स्थितइतिशेषः ॥ ४—५ ॥ स्मृतमात्मदुष्कृतंवक्तुंतदनुकूलांलोकस्थितिंदर्शयति—यदिति । कल्याणीतिसान्त्वोक्तिः । लोकेपुरुषःशुभंवाअशुभंवायदाचरति परस्यकर्मजं परशुभाशुभप्रापकपुण्यापुण्यात्मककर्मजं । तदेव शुभं वाअशुभंवाफलं आत्मनोपिलभते। तथाचऋषेःपुत्रवियोगकरणेनममापिपुत्रवियोगःप्राप्तइतिभावः ॥ ६ ॥ अन्यामपिलोकस्थितिमाह—गुरुलाघवमिति । कर्मणामारम्भे आरम्भसमये। अर्थानां फलानां। गुरु-

विरोधाच्च ॥ १८ ॥ ति० नदीनांवेगेनसमुद्रसलिलमिवेत्युत्प्रेक्षामात्रं नतुतस्यतेनवृद्धिरित्याहुः। परेतु महत्समुद्रसलिलं वेगेन चन्द्रोदयवृद्धिवेगेन। नदीनांहृदि तटद्वयान्तरे यथावर्धतइत्यर्थः। समुद्रगामिनदीनांचन्द्रोदयकालिकसमुद्रवृद्ध्यावृद्धेःकियद्दूरमप्युपलंभादित्याहुः। स० समुद्रसलिलं समुद्रद्वारिस्थियमानं। यथोक्तंगीताभाष्ये। "अस्तिचेषत्समुद्रेपिद्वारि" इत्यादि ॥ १९ ॥ इतिद्विषष्टितमस्सर्गः ॥ ६२ ॥

ति० आसुरंतमः असुरस्यराहोस्संबन्धितमःआवरणशक्तिःयथासूर्यमावृणोतितद्वत् ॥ २ ॥ ति० तदेवलभतेतल्लभतएवेतिच ॥ ६ ॥ ति० अर्थानांऐहिकानांकर्मणांपारलौकिकानांआरंभे फलंप्रति यो गुरुलाघवंगौरवंलाघवंच । दोषंवा दोषंगुणंवानजानाति केनचिदल्पेनहत्यादिनामहदनिष्टंकेनचिन्महतापियागादिनाल्पफलं । तथेदंकर्मअल्पदोषंबहुगुणं इदंचबहुदोषमल्पगुणं

[पा०] १ घ. तदा. क. ख. ङ. च. झ. ञ. ट. अथप्रह्लादितो. २ ज. मभ्यवर्तत. ३ ख. श्चैवं. ४ ङ. झ. ट. आपेदेउपसर्गस्तं. ५ क. ख. च. झ. ञ. सभार्येविगते. ६ ङ. च. ज—ट. रसितापाङ्गीं. ७ ख. ङ. च. झ. ञ ट. सोस्मरद्दुष्कृतं. ८ क. सुखं.

कश्चिदाम्रवणं छित्वा पलाशांश्च निषिञ्चति ।। पुष्पं दृष्ट्वा फले गृध्नुः स शोचति फलागमे ।। ८ ।।
अविज्ञाय फलं यो हि कर्मत्वेवानुधावति ।। स शोचेत्फलवेलायां यथा किंशुकसेचकः ।। ९ ।।
सोहमाम्रवणं छित्वा पलाशांश्च न्यषेचयम् ।। रामं फलागमे त्यक्त्वा पश्चाच्छोचामि दुर्मतिः ।।१०।।
लब्धशब्देन कौसल्ये कुमारेण धनुष्मता ।। कुमारः शब्दवेधीति मया पापमिदं कृतम् ।। ११ ।।
तदिदं मेऽनुसंप्राप्तं देवि दुःखं स्वयं कृतम् ।। [1]संमोहादिह [2]बालेन यथा स्याद्भक्षितं विषम्।। १२।।
[3]यथाऽन्यः पुरुषः कश्चित्पलाशैर्मोहितो भवेत् ।। एवं [4]ममाप्यविज्ञातं शब्दवेध्यम[5]यं फलम् ।। १३ ।।
देव्यनूढा [6]त्वमभवो युवराजो भवाम्यहम् ।। ततः प्रावृडनुप्राप्ता [7]मदकामविवर्धनी ।। १४ ।।
[8]उपास्य हि रसान्भौमांस्तप्त्वा च जगदंशुभिः ।। परेताचरितां भीमां रवि[9]राविशते दिशम् ।। १५ ।।

लाघवं गुरुत्वंलघुत्वंच । फलंदोषंवा फलंफलहानिं वा । यद्वा सुखरूपतांदुःखरूपतांवा योनजानाति सः बालः अज्ञइत्युच्यते । अल्पफलकंवहुकर्म निष्फलंचकर्मारभमाणोबुद्धिहीनः वहुफलकमल्पंकर्मसफलं कर्मचारभमाणःसुबुद्धिरित्यर्थः । तथाचात्मविनोदरूपाल्पफलं पुत्रवियोगरूपमहाफलहानिकरंमृगयाकर्म कुर्वन्नहमज्ञएवास्मीतिभावः ।। ७ ।। फलतारतम्यविचारमन्तरेणकर्मणिप्रवृत्तस्योक्तंवालिशत्वंदृष्टान्तमुखेनविवृणोति—कश्चिदिति । लोकेकश्चित्पुरुषः पुष्पं दृष्ट्वाफलेगृध्नुः साभिलाषःसन् अधिकवर्णमहापुष्पवत्वात्तदनुगुणमहाफलंभविष्यतीतिसाभिलाषइत्यर्थः । आम्रवणं चूतवनं अल्पनिर्वर्णपुष्पकं । छित्वा पलाशोपरोधपरिहारार्थंछित्वा । पलाशांश्च किंशुकानेव । निषिञ्चति जलसेचनादिनापोषयति । सः फलागमे फलप्राप्तिकालेसति । अनुपभोग्यफलदर्शनात् शोचति ।। ८ ।। दृष्टान्तोक्तंदार्ष्टान्तिकेदर्शयति—अविज्ञायेति । भाविफलमविज्ञाय कर्मत्वेवानुधावति कर्मैवानुसरति तदनुकूलहिंसांतुनपश्यतीत्यर्थः ।। ९ ।। एवंसदृष्टान्तमुक्तस्यप्रकृतोपयोगंदर्शयति—सोहमिति । आम्रवणच्छेदनपूर्वकपलाशसेचकतुल्योहमित्यर्थः । आम्रवणंछित्त्वेत्यनेन अभिषेकविघातपूर्वकरामविवासनंलक्ष्यते । पलाशांश्चन्यषेचयमित्यनेन कैकेयीप्रियकरणंलक्ष्यते ।। १० ।। एतद्दुःखानुभवस्यनिदानंवक्तुमुपक्रमते—लब्धशब्देनेति । कुमारःशब्दवेधीतिलब्धशब्देन प्राप्तख्यातिनामया इदं वक्ष्यमाणं पापं मुनिकुमारवधरूपंकर्मकृतमितिसंबन्धः । यद्वा लब्धशब्देन लब्धगजतुल्यमुनिपुत्रशब्देनमया शब्दवेधीकुमारइत्यभिमानेन इदं वक्ष्यमाणं । मुनिकुमारवधरूपंपापंकृतं ।। ११ ।। शुभंवाअशुभंवापुरुषकृतं कर्मलोकान्तरेजन्मान्तरेवाफलायभवेत् मत्कृतकर्मणस्त्वत्युत्कटत्वादिहैवतत्फलंप्राप्तमित्याह—तदिदमिति । इह लोके । बालेनसंमोहाद्भक्षितंविषं यथादुःखरूपं स्यात्तथैवस्वयंकृतं तदिदंदुष्कृतं मेदुःखरूपं अनुसंप्राप्तं जातमित्यर्थः ।। १२ ।। उक्तमर्थंसंग्रहेणदर्शयन्नुपसंहरति—यथान्यइत्यादिना । अन्यः प्राकृतःकश्चित् । पलाशैः पलाशपुष्पैः "फलेलुब्ध" यथामोहितोभवेत् यादृशंपुष्पंतादृशंफलंभविष्यतीतिमोहंप्राप्तोभवेत् । एवंममापि मयापि । शब्दोवेध्योलक्ष्यंयस्यसशब्दवेध्यः शरः शब्दवेध्यमयं शब्दवेध्यविकारभूतं तद्धेतुकमित्यर्थः । फलमविज्ञातं शब्दवेधिलख्यातिमात्रमेवजानतामयाभाव्यनर्थफलंनविज्ञातमित्यर्थः ।। १३ ।। एतादृशशब्दवेधनंकदाप्राप्तमित्याकाङ्क्षायामाह—देवीत्यादिना । अनूढा अकृतविवाहा । युवत्वेसतिराजा युवराजः भवामि अभवं । प्रावृट् वर्षाकालः ।।१४।। उपास्य गृहीत्वा । रसान् जलानि । जगत् भूमिं । परेताचरितां प्रेताचरिताम् । अतएवभीमां दिशं दक्षिणा-

इत्येवंनजानाति सबालइत्युच्यते नस्तनंधयः । स० गुरु गौरवं । अर्थानांपुरुषार्थसाधकानांकर्मणामारंभे फलंप्रति साधनेषुगौरवंलाघवंच तथादोषं वाशब्दाद्गुणसंग्रहः । अर्थानांसाधनानामितिवा ।। ७ ।। ति० फलागमेरामकृतस्वोत्तरक्रियसालभ्यपारलौकिकफलप्राप्तिसमयेवा ।।१०।। ति० कुमारःअजकुमारः । शब्दवेधीतिलब्धःशब्दोयेनतादृशेनमया शब्दवेधीत्येवंलब्धकीर्तिनेति यावत् । कुमारेण जीवत्पितृकेण ।। ११ ।। ति० प्रावृषंवर्णयति—अपास्येति । भौमान्रसान् अपास्य निरस्य शोषयित्वेतिया-

[पा०] १ घ. सन्नेहादिव. २ ख. ङ. ज. बाल्येन. ३ ख. तद्यथापुरुषः. ४ क. घ. ङ. च. झ. ञ. ट. मया. ५ ङ. च. झ. ञ. ट. मिदंफलं. ६ क. त्वयोध्यायां. ७ ङ. च. झ. ञ. ट. ममकामविवर्धिनी. ८ ङ. झ. ट. अपास्यहि. ख. उपास्यच. ९ घ. ङ. च. झ. ञ. ट. रचरते.

उष्णमन्तर्दधे सद्यः स्निग्धा दद्दशिरे घनाः ॥ ततो जहृषिरे सर्वे भेकसारङ्गबर्हिणः ॥ १६ ॥
क्लिन्नपक्षोत्तराः स्नाताः कृच्छ्रादिव पतत्रिणः ॥ वृष्टिवातावधूताग्रान्पादपानभिपेदिरे ॥ १७ ॥
पतितेनाम्भसा च्छन्नः पतमानेन चासकृत् ॥ आबभौ मत्तसारङ्गस्तोयराशिरिवाचलः ॥ १८ ॥
पाण्डुरारुणवर्णानि स्रोतांसि विमलान्यपि ॥ सुस्रुवुर्गिरिधातुभ्यः सभस्मानि भुजङ्गवत् ॥ १९ ॥
[आकुलारुणतोयानि स्रोतांसि विमलान्यपि ॥ उन्मार्गजलवाहीनि बभूवुर्जलदागमे] ॥ २० ॥
तस्मिन्नतिसुखे काले धनुष्मानिषुमान्रथी ॥ व्यायामकृतसङ्कल्पः सरयूमन्वगां नदीम् ॥ २१ ॥
निपाने महिषं रात्रौ गजं वाऽभ्यागतं नदीम् ॥ अन्यं वा श्वापदं कञ्चिज्जिघांसुरजितेन्द्रियः॥२२॥
[तस्मिंस्तत्राहमेकान्ते रात्रौ विवृतकार्मुकः ॥ तत्राहं संवृतं वन्यं हतवांस्तीरमागतम् ॥
अन्यं चापि मृगं हिंस्रं शब्दं श्रुत्वाऽभ्युपागतम् ॥ २३ ॥]
अथान्धकारे त्वश्रौषं जले कुम्भस्य पूर्यतः ॥ अचक्षुर्विषये घोषं वारणस्येव नर्दतः ॥ २४ ॥
ततोहं शरमुद्धृत्य दीप्तमाशीविषोपमम् ॥ शब्दं प्रति गजप्रेप्सुरभिलक्ष्य त्वपातयम् ॥ २५ ॥
अमुञ्चं निशितं बाणमहमाशीविषोपमम् ॥ तत्र वागुषसि व्यक्ता प्रादुरासीद्वनौकसः ॥
हाहेति पततस्तोये बाणाभिहतमर्मणः ॥ २६ ॥
तस्मिन्निपतिते बाणे वागभूत्तत्र मानुषी ॥ कथमस्मद्विधे शस्त्रं निपतेत्तु तपस्विनि ॥ २७ ॥
प्रविविक्तां नदीं रात्रावुदाहारोऽहमागतः ॥ इषुणाऽभिहतः केन कस्य वां किं कृतं मया ॥ २८ ॥

मित्यर्थः । आविशते आविशतेस्म ॥ १५ ॥ स्निग्धाः शीतलाः । भेकाः मण्डूकाः । सारङ्गाः हरिणाश्चातकावा ॥१६ ॥ क्लिन्नपक्षोत्तराः सिक्तपक्षोपरिभागाः । अतएव स्नाताइवस्थिताः । वृष्टिवातावधूताग्रान् वृष्टिवाताभ्यांकम्पिताग्रानपिपादपान् । कृच्छ्रात् क्लिन्नपक्षत्वेनयत्नात् । अभिपेदिरे आरूढाः ॥ १७ ॥ पतितेन पतमानेन च निरन्तरेणेत्यर्थः । अम्भसा वर्षजलेन । छन्नः मत्तसारङ्गः मत्तगजः । “ सारङ्गोहरिणेभृङ्गे चातकेशबलेगजे ” इतिनिघण्टुः । अचलोगिरिः अचलोनिश्चलः निस्तरङ्गः । तोयराशिः समुद्रइवाबभौ । अचलपदस्यावृत्त्या एकस्यगिरिपक्षस्यविशेष्यत्वं अन्यस्य तोयराशिविशेषणत्वमितिध्येयम् ॥ १८ ॥ गिरिधातुभ्योहेतुभ्यः विमलान्यपिस्रोतांसि पाण्डुरारुणवर्णानि पाण्डुरधातुसंयोगात्पाण्डुरवर्णानि अरुणधातुसंयोगादरुणवर्णानि । सभस्मानि दावानलभस्मसहितानि । भुजङ्गवत् नानावर्णयुक्तसर्पाइव कुटिलानि सुस्रुवुः ॥१९—२० ॥ तस्मिन्नित्यादिश्लोकद्वयमेकंवाक्यं । व्यायामकृतसंकल्पः मृगयाविहारेकृतसंकल्पइत्यर्थः । निपीयतेअस्मिन्नितिनिपानं नद्यवतारस्थलं तस्मिन् । श्वापदं व्याघ्रादिदुष्टमृगं ॥ २१—२३ ॥ पूर्यतइति शत्रन्तत्वमार्षं ॥ २४ ॥ गजप्रेप्सुः गजरूपवेध्यंप्राप्तुमिच्छुः हननेच्छुरित्यर्थः । शब्दंप्रति शब्दंलक्ष्यंकृत्वा । अभिलक्ष्य शब्दकर्तृभूतोगजएतावन्मात्रेतिष्ठतीतिलक्षीकृत्येत्यर्थः शरमपातयमितिसंबन्धः ॥ २५ ॥ यत्रबाणममुञ्चं तत्र वनौकसः वनं ओकःस्थानंयस्य तस्य तपस्विनइतियावत् । व्यक्तावाक् प्रादुरासीदितिसंबन्धः ॥ २६ ॥ विशिष्यवागुदितेत्याह—तस्मिन्नित्यादि । अस्मद्विधे अजातशत्रौ ॥ २७ ॥ प्रविविक्तां प्रकर्षेणनिर्जनां । रात्रौ अपररात्रौ । उदकमाहारयतीत्युदाहारः ।

वत् आविशतइतिपाठान्तरं। उपास्येतिपाठेपिसेवित्वेत्यर्थद्वाराशोषयित्वेत्यत्रैवपर्यवसानंबोध्यं ॥ १५॥ स० कृच्छ्रात् कृच्छ्रव्रतमुद्दिश्यस्नाताइवविद्यमानाः ॥ १७ ॥ शि० अजितेन्द्रियः नजितानिमृगयाविहारादनिवर्तितानिइन्द्रियाणियेनसः । महि प्रशंसनीयं । निपाने नदीजलपानोचितनदीप्रदेशे । अभ्यागतं प्राप्तं षं उपद्रवकारकं । गजं मृगं हिंसार्थमन्वेषणकर्तारं । अन्यद्वाकिंचिच्छ्वापदं व्याघ्रादिकं जिघांसुरहं सरयूंनदीमन्वगाम् । श्लोकद्वयमेकान्वयि । “उपसर्गेपरीक्षेचषकारःपरिकीर्तितः” इत्येकाक्षर:

[पा०] १ क. पतितेनांबुना. २ कुण्डलान्तर्गतःश्लोकःबहुषुकोशेषुनदृश्यते. ३ क. ख. धनुष्मान्कवचीरथी. ४ ङ. झ. ट. मृगं. ५ कुण्डलान्तर्गतमिदमर्धत्रयंबहुषुकोशेषुनदृश्यते. ६ ख—च. ज—ट. रभिलक्ष्यमपातयं. ७ ङ. च. बाणाव्यथित. घ. बाणापीडित. ८ ङ. च. झ. ञ. ट. भूमौ. ९ ङ. च. झ. ञ. निपतेच्च. १० ग—च. ज—ढ. वापकृतं.

ऋषेर्हि न्यस्तदण्डस्य वने वन्येन जीवतः ॥ कथं नु शस्त्रेण वधो मद्विधस्य विधीयते ॥ २९ ॥
जटाभारधरस्यैव वल्कलाजिनवाससः ॥ को वधेन ममार्थी स्यात्किं वाऽस्यापकृतं मया ॥ ३० ॥
एवं निष्फलमारब्धं केवलानर्थसंहितम् ॥ न कश्चित्साधु मन्येत यथैव गुरुतल्पगम् ॥ ३१ ॥
नाहं तथाऽनुशोचामि जीवितक्षयमात्मनः ॥ मातरं पितरं चोभावनुशोचामि मद्वधे ॥ ३२ ॥
तदेतन्मिथुनं वृद्धं चिरकालभृतं मया ॥ मयि पञ्चत्वमापन्ने कां वृत्तिं वर्तयिष्यति ॥ ३३ ॥
वृद्धौ च मातापितरावहं चैकेषुणा हतः ॥ केन स्म निहताः सर्वे सुबालेनाकृतात्मना ॥ ३४ ॥
तां गिरं करुणां श्रुत्वा मम धर्मानुकाङ्क्षिणः ॥ कराभ्यां सशरं चापं व्यथितस्यापतद्भुवि ॥ ३५ ॥
तस्याहं करुणं श्रुत्वा निशि लालपतो बहु ॥ संभ्रान्तः शोकवेगेन भृशमासं विचेतनः ॥ ३६ ॥
तं देशमहमागम्य दीनसत्त्वः सुदुर्मनाः ॥ अपश्यमिषुणा तीरे सरय्वास्तापसं हतम् ॥ ३७ ॥
अवकीर्णजटाभारं प्रविद्धकलशोदकम् ॥ पांसुशोणितदिग्धाङ्गं शयानं शल्यपीडितम् ॥ ३८ ॥
स मामुद्वीक्ष्य नेत्राभ्यां त्रस्तमस्वस्थचेतसम् ॥ इत्युवाच ततः क्रूरं दिधक्षन्निव तेजसा ॥ ३९ ॥
किं तवापकृतं राजन्वने निवसता मया ॥ जिहीर्षुरम्भो गुर्वर्थं यदहं ताडितस्त्वया ॥ ४० ॥
एकेन खलु बाणेन मर्मण्यभिहते मयि ॥ द्वावन्धौ निहतौ वृद्धौ माता जनयिता च मे ॥ ४१ ॥
तौ कथं दुर्बलावन्धौ मत्प्रतीक्षौ पिपासितौ ॥ चिरमाशाकृतां तृष्णां कष्टां संधारयिष्यतः ॥ ४२ ॥

"मन्थौदन—" इत्यादिना उदकशब्दस्योदादेशः । यद्यपिहारशब्देपरेउदादेशोविहितः तथाप्येकदेशविकृतमनन्यवद्भवतीतिदीर्घः छान्दसोवा । किंकृतं किमनिष्टंकृतं ॥ २८ ॥ न्यस्तदण्डस्य उपरतवाङ्मनःकायसंबन्धिपरहिंसस्य । "दण्डोस्त्रीशासनेराज्ञांहिंसायांदमसैन्ययोः" इतिविश्वः ॥ २९ ॥ अर्थी प्रयोजनवान् ॥ ३० ॥ गुरुतल्पगं गुरुदारगं । "तल्पंशयाट्टदारेषु" इत्यमरः ॥ ३१—३३ ॥ हतइत्येतन्मातापितरावित्यत्र वचनविपरिणामेनयोजनीयं । सर्वेनिहताइत्युक्तिर्मातापितृजीवनहेतुभूतस्वस्यवधात् । अकृतात्मना अनिश्चितबुद्धिना । इतिवागभूदितिपूर्वेणान्वयः ॥ ३४ ॥ सशरंचापमित्यनेन शरेमुक्तेपि हस्तलाघवाच्छरान्तरंधनुषिसंहितवानित्यवगम्यते । करुणांगिरंश्रुत्वा करुणाजनकं वचःश्रुत्वा । स्थितस्येतिशेषः ॥ ३५ ॥ लालपतइति यङ्लुगन्ताच्छतृप्रत्ययः । प्रलपतइत्यर्थः । विलपनमित्यर्थसिद्धं ॥ ३६ ॥ दीनसत्वः दीनहृदयः । सुदुर्मनाः अत्यन्तदुःखितमनाः ॥ ३७ ॥ प्रविद्धकलशोदकं पर्यस्तकलशोदकमित्यर्थः । नतुध्वस्तकलशोदकमिति । " ततस्तंघटमादायपूर्णपरमवारिणा " इतिवक्ष्यमाणविरोधात् । पांसुशोणितदिग्धाङ्गं पांसुविशिष्टशोणितेनलिप्ताङ्गं । शल्यपीडितं शराग्रपीडितं ॥ ३८ ॥ त्रस्तं भीतं । अतएवास्वस्थचेतसं व्याकुलचित्तं ॥ ३९ ॥ जिहीर्षुः आहर्तुमिच्छुः । गुर्वर्थे मातापितृनिमित्तं ॥ ४०—४१ ॥ आशाकृतां पुत्रोमेजलमाहरिष्यतीत्याशासहितां । तृष्णां पिपासां

॥ २२ ॥ ति० मम वधेन कःपुमानर्थी । मनुष्यमांसेन नकस्यापिप्रयोजनमितिव्यर्थएवमद्वधइतिभावः । शि० जटाभारधरस्य रव्यादिभाररहितस्येत्यर्थः । ममवधेन कोऽर्थी धनादिमान्स्यात् । नन्वपकारिवधएवार्थइत्यतआह—कस्यमयाऽपकृतं नकस्यापीत्यर्थः ॥ ३० ॥ शि० क्वचित् कस्मिंश्चिल्लोके गुरुतल्पगमिवसाधुनमन्येत एतेन साधुकृतमितिकश्चिदपिनवदिष्यतीत्यर्थः ॥ ३१ ॥ शि० मद्वधेसति मातरंपितरमुभौयआनुशोचामि तथा आत्मनः स्वस्य इमं प्राप्तं जीवितक्षयं नानुशोचामि ॥ ३२ ॥ ति० एकेनेषुणावृद्धौहतौ अहंचहतः । मद्वधेन तयोर्वधस्यसिद्धत्वादित्याशयः ॥ ३४ ॥

[पा०] १ ङ. झ. ञ. ट. कश्चित्साधु. घ. किंचित्साधु. २ क—च. ज—ट. नेमं. ३ क. घ—ङ. झ. करुणं. ४ ङ. च. झ. ञ. ट. ऋषेर्विलपतोनिशि. ख. बहुलालपतोनिशि. ५ ङ. झ. शल्यवेधितं. क. शरपीडितं. ६ ख. घ. ङ. च. झ. ञ. ट. चेतनं. ७ क. ग. ङ. च. प्रत्युवाच. ८ क. ख. ग. ङ. च. झ. ञ. ट. वचः. ९ क—च. ज—ट. तनं. १० घ. ङ. च. झ. ञ. ट. चिरमाशो. ११ घ. ङ. च. झ. ञ. ट. कष्टांतृष्णां. १२ क. कथं.

न नूनं तपसो वाऽस्ति फलयोगः श्रुतस्य वा ॥ पिता यन्मां न [1]जानाति शयानं पतितं भुवि ॥४३॥
जानन्नपि च किं कुर्या[2]दशक्तिरपरिक्रमः ॥ भिद्यमान[3]मिवाशक्तस्त्रातुमन्यो नगो नगम् ॥ ४४ ॥
पितुस्त्वमेव मे गत्वा शीघ्रमाचक्ष्व राघव ॥ न त्वामनुदहेत्क्रुद्धो [4]वनं वह्निरिवैधितः ॥ ४५ ॥
इयमेकपदी राजन्यतो मे पितुराश्रमः ॥ तं प्रसादय गत्वा त्वं न त्वां [5]स कुपितः शपेत् ॥ ४६ ॥
विशल्यं कुरु मां राजन्मर्म मे निशितः शरः ॥ रुणद्धि मृदु सोत्सेधं तीरमम्बुरयो यथा ॥ ४७ ॥
सशल्यः क्लिश्यते प्राणैर्विशल्यो विनशिष्यति ॥ इति मामविशच्चिन्ता तस्य शल्यापकर्षणे ॥ ४८॥
[6]दुःखितस्य च दीनस्य मम शोकातुरस्य च ॥ लक्षयामास [7]हृदये चिन्तां मुनिसुतस्तदा ॥ ४९ ॥
ताम्यमानः स मां कृच्छ्रादुवाच [8]परमार्तवत् ॥ सीदमानो विवृत्ताङ्गो वेष्टमानो गतः क्षयम् ॥५०॥
संस्तभ्य शोकं धैर्येण स्थिरचित्तो [9]भवाम्यहम् ॥ ब्रह्महत्याकृतं [10]पापं हृदयादपनीयताम् ॥ ५१ ॥
न द्विजातिरहं राजन्माभूत्ते मनसो व्यथा ॥ शूद्रायामस्मि वैश्येन जातो [11]जनपदाधिप ॥ ५२ ॥
[12]इतीव वदतः कृच्छ्राद्बाणाभिहतमर्मणः ॥ विघूर्णतो विचेष्टस्य वेपमानस्य भूतले ॥ ५३ ॥
तस्य [13]त्वानम्यमानस्य तं बाणमहमुद्धरम् ॥ स मामुद्वीक्ष्य संत्रस्तो जहौ प्राणांस्तपोधनः ॥ ५४ ॥

जलार्द्रगात्रं तु विलप्य [14]कृच्छ्रान्मर्मव्रणं संततमुच्छ्वसन्तम् ॥
ततः सरय्वां तमहं शयानं [15]समीक्ष्य [16]भद्रेऽस्मि भृशं विपण्णः ॥ ५५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे त्रिषष्टितमः सर्गः ॥ ६३ ॥

कष्टां दुःसहां ॥ ४२ ॥ तपसःश्रुतस्यवेत्यत्र मामकस्येतिविशेषणंदेयं ॥ ४३ ॥ अपरिक्रमः असंचारः पङ्गुरितियावत् । भिद्यमानं वातादिनेतिशेषः ॥ ४४ ॥ राघवेतिसंबोधनात् सरयूतीरेबहुशोमृगयापर्यटनेन पूर्वमेवदशरथंज्ञातवानित्यवगम्यते । नत्वामनुदहेदिति अन्यथादहेदितिभावः ॥ ४५ ॥ एकपदी एकपदन्यासमात्रयुक्तासरणिरित्यर्थः । "वर्तन्येकपदी" इत्यमरः । यतः यत्रैकपद्यां ॥ ४६ ॥ मर्म रुणद्धि पीडयतीत्यर्थः । मृदु सिकतामयं । सोत्सेधं औन्नत्यवत् । अम्बुरयः नदीवेगः ॥ ४७—४८ ॥ दुःखितस्य महदकृत्यंप्राप्तमितिदुःखितस्य । शोकातुरस्य ब्रह्महत्याभविष्यतीतिभिया शोकेनपीडितस्य ॥ ४९ ॥ क्षयंगतः नाशंप्राप्तुमुपक्रान्तः ॥ ५० ॥ संस्तभ्येत्यादिश्लोकद्वयस्य इतिमामुवाचेत्यनेनान्वयः । स्थिरचित्तोभवाम्यहमित्यत्र स्थिरचित्तोभवानघेतिचपाठः । शूद्रायांवैश्येनजातः करणइत्यर्थः । "शूद्राविशोस्तुकरणः" इत्यमरः ॥५१—५२॥ विघूर्णतः कदाचिदतीव वेपमानस्येत्यर्थः । विचेष्टस्य कदाचिदितिशेषः । वेपमानस्य कदाचिदीषत्कम्पमानस्येत्यर्थः । आनम्यमानस्य व्यथयासंकुचिताङ्गस्येत्यर्थः । नानद्यमानस्येतिपाठे अतिशयेननदतइत्यर्थः । उद्धरं उदहरं । अडभावोऽनित्यत्वात् ॥ ५३—५४ ॥ जलार्द्रगात्रमिति । अयं श्लोकःप्रथमदृष्टानुवादः । मर्मणि प्राणस्थाने व्रणःयस्यतं । सरय्वां सरयूतीरे । विषण्णोऽस्मि विषण्णो-

---

ति० तपसःश्रुतस्यचेत्यत्र मामकस्यपित्र्यस्यचेतिशेषः ॥ ४३ ॥ ति० परमार्थवित् परमार्थःशास्त्रतत्वं । परमार्तवदितिपाठेपरमार्तःसन्नित्यर्थः ॥५०॥ ति० धैर्येणशोकंसंस्तभ्याहंस्थिरचित्तोभवामि ममचित्तेमोहोनास्तीत्यर्थः । अतोयद्वदामितच्छृण्वित्यर्थः । शोकंब्रह्महत्यात्रिजं संस्तभ्य त्यक्त्वा । तापं भयं । अर्धर्चादित्वात्तापशब्दः ॥ ५१ ॥ ति० आताम्यमानस्य ताम्यतः । व्यथयासंकुचिताङ्गस्येतियावत् ॥ ५३ ॥ इतित्रिषष्टितमस्सर्गः ॥ ६३ ॥

[पा०] १ ङ. च. झ. ञ. ट. जानीते. २ ङ. च. झ. ञ. ट. दशक्तश्चापरि. ३ ङ. ट. मिवाशक्तिस्त्रातुं. ४ ङ. झ. ट. वनमग्निरिवैधितः. च. ञ. वनमग्निरिवोद्धतः. ५ ग. ङ. झ. ट. संकुपितः. ६ क. दुःखितस्यापि. ७ च. झ. ञ. ट. सत्कृधिश्चिन्तां. ८ च. ज. झ. ट. परमार्थवित्. ९ क. ग. घ. भवानघ. १० झ. तापं. ११ च. झ. ञ. ट. नरवराधिप. १२ क. इत्येवं. १३ क—घ. च. झ. ञ. ट. त्वाताम्यमानस्य. १४ ख. घ. झं. ञ. ट. कृच्छ्रंमर्म. १५ क. ग. संवीक्ष्य. १६ ङ. ङ. च. ज—ट. भद्रेसुभृशं.

चतुष्षष्टितमः सर्गः ॥ ६४ ॥

दशरथेन ऋषिदंपतिसमीपमेत्यतयोःस्वेनतत्पुत्रमारणप्रकारनिवेदनम् ॥ १ ॥ तथा तच्चोदनयातयोस्तत्पुत्रसमीपप्रापणम् ॥ २ ॥ ताभ्यांसुतशरीरेनिपत्यचिरंसकरुणरोदनपूर्वकंतस्मैउदकदानम् ॥ ३ ॥ दिव्यदेहधारिणातेन पित्राश्वासनपूर्वकंस्वर्गगमनम् ॥ ४ ॥ ताभ्यांदशरथंप्रति पुत्रशोकेनमरणप्रापकशापदानपूर्वकंशरीरविसर्जनेनस्वर्गगमनम् ॥ ५ ॥ दशरथेनकौसल्यांप्रति स्वस्यशापप्राप्तिप्रकारनिरूपणपूर्वकमपररात्रेश्रीरामानुस्मरणादिनाप्राणविमोक्षणम् ॥ ६ ॥

वधमप्रतिरूपं तु महर्षेस्तस्य राघवः ॥ विलपन्नेव धर्मात्मा [1]कौसल्यां पुनरब्रवीत् ॥ १ ॥
तदज्ञानान्महत्पापं [2]कृत्वाऽहं सङ्कुलेन्द्रियः ॥ एकस्त्वचिन्तयं बुद्ध्या कथं नु सुकृतं भवेत् ॥ २ ॥
ततस्तं घटमादाय पूर्णं परमवारिणा ॥ आश्रमं तमहं प्राप्य यथाख्यातपथं गतः ॥ ३ ॥
तत्राहं दुर्बलावन्धौ वृद्धावपरिणायकौ ॥ अपश्यं तस्य पितरौ लूनपक्षाविव द्विजौ ॥ ४ ॥
तन्निमित्ताभिरासीनौ कथाभि[3]रपरिक्रमौ ॥ तामाशां मत्कृते हीनौ[4]उदासीनावनाथवत् ॥ ५ ॥
शोकोपह[5]तचित्तश्च भयसंत्रस्तचेतनः ॥ तच्चाश्रमपदं गत्वा भूयः शोकमहं गतः ॥ ६ ॥
[6]पदशब्दं तु मे श्रुत्वा मुनिर्वाक्यमभाषत ॥ किं चिरायसि मे पुत्र पानीयं क्षिप्रमानय ॥ ७ ॥
यन्निमित्तमिदं [7]तात सलिले क्रीडितं त्वया ॥ उत्कण्ठिता ते मातेयं प्रविश क्षिप्रमाश्रमम् ॥ ८ ॥
यद्व्यलीकं कृतं पुत्र मात्रा ते यदि वा मया ॥ न तन्मनसि कर्तव्यं त्वया तात तपस्विना ॥ ९ ॥
[8]त्वं गतिस्त्वगतीनां च चक्षुस्त्वं हीनचक्षुषाम् ॥ समासक्तास्त्वयि प्राणाः किं[9]त्वं नो नाभिभाषसे १०

भवं ॥ ५५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने त्रिषष्टितमःसर्गः ॥ ६३ ॥

विलपन्नेव मध्येस्वपुत्रंविलपन्नेव ॥ १ ॥ संकुलेन्द्रियः व्याकुलेन्द्रियः । सुकृतं सुष्ठुकृतं मुनिकुमारवचनमितिशेषः । इत्यचिन्तयमित्युपस्कार्यं । यद्वा अस्यवधज्ञापनाज्ञापनयोःकिंशुभोदर्कंभवेदित्यचिन्तयमित्यर्थः ॥ २ ॥ ततः मुनिकुमारोक्तज्ञापनमेवश्रेयस्करमितिनिश्चयानन्तरं । यथाख्यातपथंप्राप्य आश्रमंगतइतिसंबन्धः ॥ ३ ॥ परितोनयतिसंचारयतीतिपरिणायकः तद्रहितौ । तन्निमित्ताभिः पुत्रविषयाभिः । कथाभिः उपलक्षितौ । अपरिक्रमौ पङ्गुभूतौ । मत्कृते मन्निमित्तं । तामाशां हीनौ जलानयनाशारहितौ पुत्रविषयाशारहितौवा । उदासीनौ प्रयत्नशून्यौ । तस्यपितरावपश्यमितिसंबन्धः ॥ ४—५ ॥ पुत्रवधेनपूर्वमेवशोकोपहतचित्तः भूयःशोकंगतः तद्दर्शनादतिशयितशोकंगतः ॥ ६ ॥ पदशब्दं चरणविन्यासजशब्दं । चिरायसि विलम्बसे । "तत्करोति—" इतिणिच् ॥ ७ ॥ यन्निमित्तं किंनिमित्तमित्यर्थः । यद्वा यन्निमित्तंत्वयासलिलेक्रीडितं इदंब्रूहीतिशेषः । यन्नदत्तमितिपाठे इदानींपानीयंनदत्तमितियत् तस्मात्त्वयासलिलेक्रीडितमित्यन्वयः । उत्कण्ठिता शोकस्मरणवत्यभूत् ॥ ८ ॥ व्यलीकं अप्रियं । अलीकमितिपाठे अलीकमपराधः । "अलीकमपराधः" इति हलायुधः ॥ ९ ॥ नः अस्मान् इतिमुनिर्वाक्यमभाष-

---

ति० तन्निमित्ताभिः पुत्रनिमित्ताभिः । कथाभिर्हेतुभिः अपरिश्रमावासीनौ पुत्रोजलमानेष्यतीत्येवंरूपांतामाशामुपासीनौ सेवमानौ । मत्कृते मत्कृतदुष्कर्मनिमित्तं । तामाशांप्रति हीनावपितांसेवमानावपश्यमितिपूर्वेणान्वयः । उदासीनावितिपाठे अनाथवदुदासीनौदुःखिताविव । शि० मत्कृते मत्कर्तृकपुत्रवधेसति । हीनौ पुत्ररहितौ । अनाथवत् नाथलाभाववान्निवाहमपश्यं । वि० अपरिक्रमौ संचाराक्षमौ ॥ ५ ॥ शि० भयेन वधजनितदोषेणसंत्रस्तंचेतनंयस्यसःअहं तत् अश्रमं श्रमनिवर्तकं पदं स्थानं गत्वा भूयः तद्दुःखदर्शनेनअधिकंशोकं गतःप्राप्तः । आसमितिशेषः । स० भयमस्यास्तिजनकतासंबन्धेनेति भयं भयवत्

[पा०] १ च. झ. ञ. ट. कौसल्यामिदमब्रवीत्. २ च. झ. ञ. कृत्वासंकुलितेन्द्रियः. ग. घ. ज. कृत्वाहंव्याकुलेन्द्रियः. ३ क. ज. झ. ट. रपरिश्रमौ. ४ झ. वुपासीनौ. ५ क. ग. च. ज. चित्तस्तु. ६ ज. पादशब्दं. ७ ख. तावत्सलिले. ८ क. घ. च. गतिस्त्वमगतीनां. ९ क—घ. ज. किंचिन्नो. च. झ. ञ. ट. कथंत्वं.

मुनिमव्यक्तया वाचा तमहं सज्जमानया ॥ हीनव्यञ्जनया प्रेक्ष्य भीतो भीत इवाब्रवम् ॥ ११ ॥
मनसः कर्मचेष्टाभिरभिसंस्तभ्य वाग्बलम् ॥ आचचक्षे त्वहं तस्मै पुत्रव्यसनजं भयम् ॥ १२ ॥
क्षत्रियोऽहं दशरथो नाहं पुत्रो महात्मनः ॥ सज्जनावमतं दुःखमिदं प्राप्तं स्वकर्मजम् ॥ १३ ॥
भगवंश्चापहस्तोऽहं सरयूतीरमागतः ॥ जिघांसुः श्वापदं कंचिन्निपाने चागतं गजम् ॥ १४ ॥
तत्र श्रुतो मया शब्दो जले कुम्भस्य पूर्यतः ॥ द्विपोऽयमिति मत्वाऽयं बाणेनाभिहतो मया ॥ १५ ॥
गत्वा नद्यास्ततस्तीरमपश्यमिषुणा हृदि ॥ विनिर्भिन्नं गतप्राणं शयानं भुवि तापसम् ॥ १६ ॥
भगवञ्शब्दमालक्ष्य मया गजजिघांसुना ॥ विसृष्टोऽम्भसि नाराचस्तेन ते निहतः सुतः ॥ १७ ॥
ततस्तस्यैव वचनादुपेत्य परितप्यतः ॥ स मया सहसा बाण उद्धृतो मर्मतस्तदा ॥ १८ ॥
स चोद्धृतेन बाणेन तत्रैव स्वर्गमास्थितः ॥ भवन्तौ पितरौ शोचन्नन्धाविति विलप्य च ॥ १९ ॥
अज्ञानाद्भवतः पुत्रः सहसाऽभिहतो मया ॥ शेषमेवंगते यत्स्यात्तत्प्रसीदतु मे मुनिः ॥ २० ॥
स तच्छ्रुत्वा वचः क्रूरं मयोक्तमघशंसिना ॥ नाशक्नोत्तीव्रमायासमकर्तुं भगवानृषिः ॥ २१ ॥
स बाष्पपूर्णवदनो निःश्वसञ्शोककर्शितः ॥ मामुवाच महातेजाः कृताञ्जलिमुपस्थितम् ॥ २२ ॥
यद्येतदशुभं कर्म न त्वं मे कथयेः स्वयम् ॥ फलेन्मूर्धा स्म ते राजन्सद्यः शतसहस्रधा ॥ २३ ॥

तेत्यन्वयः ॥ १० ॥ सज्जमानया स्खलन्त्या । हीनव्यञ्जनया अस्पष्टाक्षरया । "व्यञ्जनंश्मश्रुनिष्ठानचिह्नेष्ववयवेक्षरे" इतिवैजयन्ती । अव्यक्तयावाचाअब्रवमितिसंबन्धः । भीतोपिसन्भीतः भीतोभीतः अत्यन्तभीतइत्यर्थः । [भीतोऽपिसन्नभीतइवाब्रवम्] इवशब्दो वाक्यालंकारे ॥ ११ ॥ उक्तमेवविशदंदर्शयति—मनसइति । मनसः कर्म ऊहापोहात्मकं चेष्टाः इन्द्रियनियमनरूपव्यापाराः ताभिर्वाग्बलं अभिसंस्तभ्य स्खलितांवाचंबलाद्दृढीकृत्येत्यर्थः । तस्मैभयमाचचक्षइतिसंबन्धः । यद्वा वाग्बलमभिसंस्तभ्य लज्जाभीतिप्रभृतिभिः मन्दवचनोभूत्वेत्यर्थः । आचचक्षे इतिलिङुत्तमपुरुषैकवचनं ॥ १२ ॥ महात्मनः तवेतिशेषः । सज्जनावमतं सज्जनावमतिविषयभूतं सत्पुरुषगर्हितमित्यर्थः ॥ १३ ॥ निपाने जलावतारे । आगतंगजं श्वापदं हिंस्रशार्दूलादिकंच । जिघांसुः चापहस्तोहं सरयूतीरमागतः ॥ १४ ॥ पूर्यतः पूर्यमाणस्य । अयं शब्दहेतुःपदार्थः द्विपइतिमत्वाऽयं तवसुतः मया अभिहतः ॥ १५—१८ ॥ उद्धृतेनबाणेनहेतुना अन्धापितरौ मातापितराविति भवन्तावेवशोचन् विलप्यचस्वर्गमास्थितः ॥ १९ ॥ एवंगते एवंप्राप्तेसति । यच्छेषंकर्तव्यंस्यात् शापानुग्रहादिकं तत्प्रति मे मयि । प्रसीदतु शापोवाऽनुग्रहोवायःकर्तव्यस्तंकरोत्वित्यर्थः ॥ २० ॥ अघशंसिना दुःखशंसिना । आयासं व्यसनं । अकर्तुंनाशक्नोत् कृतवानेवेत्यर्थः ॥ २१—२२ ॥ स्मेतिवाक्यालंकारे । फलेत् विशीर्येत् । ञिफलाविशरणइतिधातुः । मच्छा-

तरत्वाभर्तेनकृतंचेतमयस्यसः । भयसंग्रस्तचेतनइतिपाठेतु नक्लेशः । भूयः बाहुल्येन ॥ ६ ॥ ति० सज्जनावमतं सज्जनगर्हितं । प्राप्तं मयाभवताचेतिशेषः ॥ १३ ॥ ति० अयंद्विपइतिमत्वाअहंस्थितः । ततोमयासबाणेनहतः ॥ १५ ॥ ति० गतप्राणं गतकल्पप्राणं वा ॥ १६ ॥ ति० तस्यैव त्वत्पुत्रस्यैव । वचनाद्बाणउद्धृतइत्यन्वयः ॥ १८ ॥ युष्मद्रक्षकेपुत्रे एवंगतेसतिशेषंकर्तव्यंयत्स्यात्तदाश्रमस्थोभगवान्प्रसीदतु तदुद्दिश्यमामाज्ञापयत्वित्यन्वयः । युष्मद्रक्षणमपिमयाकर्तुंशक्यमितिभावः । शि० शेषं शिष्यतेप्रलयेऽपिनश्यतीतिशेषः नित्यलोकस्तं । गते प्राप्तेसति यस्कर्तव्यंस्यात् तद्यथाभवतितथामुनिर्भवान्प्रसीदतु अनुग्रहंनिग्रहंवाकुर्वित्यर्थः । ती० एवंगते प्रमादादेवंप्राप्तेसति शेषं अनन्तरंकर्तव्यंयत्स्यात् तत्प्रसीदतु तदुद्दिश्याज्ञापयत्वित्यर्थः ॥ २० ॥ ति० एवम-

[पा०] १ ग. नदतः. २ च. झ. ञ. ट. भीतचित्तइवा. ३ क. दुःखंमयाप्राप्तं. ४ ख. ग. घ. ज. झ. ट. चागतं. ५ ख. ग. घ. च. ञ.—ट. भगवञ्छब्दो. ६ ख. ग. ङ. च. मत्वाहि. झ. ट. मत्वाहं. ७ झ. ट. तस्मात्त्वत्सुतः. ८ क. स्तेनमयाऽभिहतः. ग. ङ. झ. स्तेनासौनिहतः. ९ ग. मर्मणस्तदा. १० च. छ. झ. ञ. ट. सहसा. ११ ग. छ—ट. भगवन्तावुभौ. १२ ख. ग. ङ. च. ञ. ट. शोचन्नन्धाविति. १३ घ. शेषमेवगतो. ग. शेषमेवंगतो, १४ ङ. झ. ट. मयातदघशंसिना. १५ ङ. झ. झ. ट. नाशक्नोत्तकर्तुं ग. आयासंसमर्तुं. १६ क. ख. भगवान्मुनिः. १७ क. ख. पूर्णनयनो. १८ ङ. च. छ. झ. ञ. ट. मूर्च्छित. १९ ग. नमेस्म ङ. छ. झ. ञ ट. नस्मसं.

क्षत्रियेण वधो राजन्वानप्रस्थे विशेषतः ॥ ज्ञानपूर्वं कृतः स्थानाच्च्यावयेदपि वज्रिणम् ॥ २४ ॥
सप्तधा तु फलेन्मूर्धा[1] मुनौ तपसि तिष्ठति ॥ ज्ञानाद्विसृजतः शस्त्रं तादृशे ब्रह्मवादिनि[2] ॥ २५ ॥
अज्ञानाद्धि[3] कृतं यस्मादिदं तेनैव[4] जीवसि ॥ अपि[5] ह्यद्य कुलं न[6] स्याद्राघवाणां कुतो भवान् ॥२६॥
नय नौ नृप तं देशमिति मां[7] चाभ्यभाषत ॥ अद्य तं द्रष्टुमिच्छावः पुत्रं पश्चिमदर्शनम् ॥ २७ ॥
रुधिरेणावसिक्ताङ्गं प्रकीर्णाजिनवाससम् ॥ शयानं भुवि निःसंज्ञं धर्मराजवशं गतम् ॥ २८ ॥
अथाहमेकस्तं देशं नीत्वा तौ भृशदुःखितौ ॥ अस्पर्शयमहं[8] पुत्रं तं मुनिं सह भार्यया ॥ २९ ॥
तौ पुत्रमात्मनः स्पृष्ट्वा तमासाद्य तपस्विनौ ॥ निपेततुः शरीरेऽस्य पिता चास्येदमब्रवीत्[9] ॥ ३० ॥
नाभिवादयसे माऽद्य न च मामभिभाषसे ॥ किंनु[10] शेषे[11] च भूमौ त्वं वत्स किं कुपितो ह्यसि ॥३१॥
न[12] त्वहं ते प्रियः पुत्र मातरं पश्य धार्मिक[13] ॥ किंनु[14] नालिङ्गसे पुत्र सुकुमार वचो वद ॥ ३२ ॥
कस्य[15] वाऽपररात्रेऽहं श्रोष्यामि हृदयङ्गमम् ॥ अधीयानस्य[16] मधुरं शास्त्रं वाऽन्यद्विशेषतः ॥ ३३ ॥
को मां सन्ध्यामुपास्यैव स्नात्वा हुतहुताशनः ॥ श्लाघयिष्यत्युपासीनः[17][18] पुत्रशोकभयार्दितम् ॥३४॥
कन्दमूलफलं[19] हृत्वा[20] को मां[21] प्रियमिवातिथिम् ॥ भोजयिष्यत्यकर्मण्यमप्रग्रहमनायकम् ॥ ३५ ॥

पेनेतिशेषः ॥ २३ ॥ क्षत्रियेण पालकेन । वानप्रस्थे अज्ञानतःकृतोवधः वज्रिणं इन्द्रमपिस्थानात् च्यावयेत् । ज्ञानपूर्वकृतः ज्ञानकृतस्तु । विशेषतच्च्यावयेत् । अविलम्बोविशेषः ॥ २४ ॥ सप्तधेत्युपलक्षणं बहुधेत्यर्थः । ब्रह्मवादिनि परमात्मज्ञे । ब्रह्मचारिणीतिपाठे चरतेर्गत्यर्थत्वात् "सर्वेगत्यर्थाज्ञानार्थाः" इतिन्यायेन ब्रह्म तत्वं चरितुंज्ञातुं शीलमस्यास्तीति ब्रह्मचारीतस्मिन् । "ज्ञानेतत्वेतपोध्यात्मवेदेपुब्रह्म चोच्यते" इतिनिघण्टुः ॥ २५ ॥ यस्मात्कारणात् इदं दुष्कृतमज्ञानात्कृतं तेनत्वंजीवसि । अपिच अद्य ज्ञानपूर्वकत्वेवधस्य राघवाणांकुलंनस्यात् भवान् कुतःस्यात् जीवेत् । इतिमामुवाचेत्यन्वयः ॥ २६ ॥ नयेत्यादिश्लोकद्वयमेकंवाक्यं । धर्मराजवशंगतंपुत्रंद्रष्टुमिच्छावः । अतः नौतंदेशंनयेतिमामभ्यभाषतेति संबन्धः ॥ २७—२८ ॥ अहंतौनीत्वा अहंतमस्पर्शयमितिसंबन्धेनाहंशब्दद्वयवैयर्थ्यं ॥ २९—३१ ॥ अहंतेप्रियः नतुचेत् मातरंपश्येत्यन्वयः ॥ ३२ ॥ हृदयंगमं मनोहरस्वरं । अधीयानस्य पठतः । अन्यद्वा इतिहासपुराणादिकंवा ॥ ३३ ॥ संध्यामुपास्य नमस्कारपूर्वकंतात्रिकंसंध्यावन्दनंकृत्वेत्यर्थः । हुतहुताशनः कृतहोमः । ननुवैश्याच्छूद्रायांजातोहिकरणस्तस्यकथंहोमाधिकारइति । मैवं । "नमस्कारेणमन्त्रेणपञ्चयज्ञान्समापयेत्" इतिचतुर्थवर्णस्यापिपञ्चमहायज्ञाधिकारः स्मर्यते । ततोप्यधिकस्यकरणस्यस्वोचितमन्त्रैर्होमाधिकारस्यकैमुत्यन्यायसिद्धत्वात् । श्लाघयिष्यति उपचरिष्यतीत्यर्थः ॥ ३४ ॥ कन्दं जलो-

ज्ञानकृतत्वबोधनाच्छेषायुःपर्यन्तंरक्षणस्यापिकर्तव्यतावोधनाच्चमांदैवान्नभस्मसादकरोदित्याह—सप्तेति । तीव्रमायासं भस्मीभावफलकशापप्रदानं ॥ २१ ॥ ति० विशेषतः अन्धत्वानाथत्वादेः ज्ञानपूर्वकृतोयद्ययंवधस्स्यात् तदा तच्छ्रावणजोमत्कोपः वज्रिणमपिस्थानाच्च्यावयेत् ॥ २४॥ ति० स्वापेक्षायातपोन्यूनत्वात् सप्तधेति । ब्रह्मवादिनि ब्रह्मवादिसमे ॥ २५॥ स० द्रष्टुं स्प्रष्टुं । अतएवाग्रे अस्पर्शयमहमित्युक्तं ॥ २७ ॥ शि० धर्मराजवशं गतं धर्मराजात् उत्तमधर्माचरणात् । वशं कान्तिविशेषं । गतं प्राप्तं ॥ २८ ॥ शि० अथ तदाज्ञापनानन्तरं । एकएवाहंनीत्वा अहं सर्वकालंधर्मत्यागाभाववन्तं । अतएव आर्यया भा दीप्त्या सह सहितंतंमुनिंपुत्रं भृशदुःखितौतौमातापितरौ अस्पर्शयं स्पर्शमकारयं । अहमित्यत्र नञ्पूर्वकहाधातोःकर्तरिकः ॥ २९ ॥ कतक० नन्वहमितिपाठः । अप्रियइतिच्छेदः ॥ ३२ ॥ ति० श्लाघयिष्यति श्लाघनमुद्वर्तनंतत्पूर्वकंस्नापयिष्यति । "नाप्सुश्लाघमानस्स्नायात्" इतिब्रह्मचारिप्रकरणस्थापस्तंबस्मृतौतथाव्याख्यानात् ॥ ३४ ॥ ति० कर्मणिसाधुंकर्मण्यमित्यतिथिविशेषणं । भोजयिष्यति

[पा०] १ ङ. झ. ट. भवेन्मूर्धा. २ घ. च. ञ. ब्रह्मचारिणि. ३ ङ. अज्ञानादिकृतं. ४ ङ. छ. झ. तेतेनजीवसे. च. ञ. ट. तेतेनजीवसि. ५ झ. ञ. अपिह्यकुशलं. छ. अपित्वद्यकुलं. ६ ग. नस्यादिक्ष्वाकूणां. ७ च. ञ. मामभ्यभाषत. ८ छ. प्रादर्शयमहं. ९ ख. ङ. च. ज. ट. चैनमुवाचह. छ. त्विदमुवाचह. १० ख. ङ—ट. किंच. ११ ग—च. ज—ट. शेषेतु. क. ख. शेषेद्य. १२ झ. नन्वहं. १३ ङ. छ. झ. ञ. ट. धार्मिकीं. १४ ख. ङ. च. छ. झ. ञ. ट. किंच. १५ ज. अपिवा. १६ क. सततं. १७ क. साधयिष्यति. १८ ख. त्युपासीनं. १९ घ. कथंमूल. २० ङ. दत्ता. २१ ङ. च. झ. ञ. ट. योमां.

इमामन्धां च वृद्धां च मातरं ते तपस्विनीम् ॥ कथं [1]वत्स भरिष्यामि कृपणां पुत्रगर्धिनीम् ॥ ३६ ॥
तिष्ठ [2]मां मागमः पुत्र यमस्य सदनं प्रति ॥ श्वो मया सह गन्तासि जनन्या च समेधितः ॥ ३७ ॥
[3]उभावपि च शोकार्तावनाथौ कृपणौ वने ॥ क्षिप्रमेव गमिष्यावस्[4]त्वयाऽहीनौ यमक्षयम् ॥ ३८ ॥
ततो वैवस्वतं दृष्ट्वा तं प्रवक्ष्यामि भारतीम् ॥ क्षमतां धर्मराजो मे बिभृयात्पितरावयम् ॥ ३९ ॥
दातुमर्हति धर्मात्मा लोकपालो महायशाः ॥ ईदृशस्य ममाक्षय्यामेकामभयदक्षिणाम् ॥ ४० ॥
[5]अपापोसि [6]यदा पुत्र निहतः पापकर्मणा ॥ तेन सत्येन गच्छाशु ये [7]लोकाः शस्त्रयोधिनाम् ॥ ४१ ॥
[8]यान्ति शूरा गतिं यां च संग्रामे[9]ष्वनिवर्तिनः ॥ हतास्त्वभिमुखाः पुत्र गतिं तां [10]परमां व्रज ॥ ४२ ॥
यां गतिं सगरः शैब्यो दिलीपो जनमेजयः ॥ नहुषो धुन्धुमारश्च प्राप्तास्तां गच्छ पुत्रक ॥ ४३ ॥
या गतिः सर्व[11]साधूनां [12]स्वाध्यायात्तपसा च या ॥ [13]यां भूमिदस्याहिताग्नेरेकपत्नीव्रतस्य च ॥ ४४ ॥
गोसहस्रप्रदातॄणां [14]यां या गुरुभृतामपि ॥ देहन्यासकृतां या च तां गतिं गच्छ पुत्रक ॥ ४५ ॥

द्भवानांपद्मादीनां । मूलं स्थलोद्भवानाम् । अकर्मण्यं कर्मानुष्ठानाक्षमं । अप्रग्रहं नीवारादिसंग्रहरहितं । अनायकं अनाथं । रक्षकरहितं यष्टिंगृहीत्वामार्गदर्शकरहितमितिवार्थः ॥ ३५—३६ ॥ तिष्ठमां मांप्रति तिष्ठ । मागमः मागच्छ । समेधितः सहितइत्यर्थः ॥ ३७—३८ ॥ वैवस्वतं यमं । धर्मराजःक्षमतां मत्पुत्रस्यस्वपरिसरागमनविलम्बंसहतां । मे मत्संबन्धी । अयं पुत्रः । पितरौविभृयादितिभारतींप्रवक्ष्यामीतिसंवन्धः ॥ ३९—४० ॥ राज्ञास्वहस्तकृतंहननंपूर्वकृतस्यपापस्यप्रायश्चित्तत्वेनप्राप्तमितिमत्वावदति —अपापइति । पापकर्मणा राज्ञायदानिहतः तदैवापापोसि । तेन अपापत्वेनहेतुना । सत्येन ममसत्येन । शस्त्रयोधिनां येलोकास्तान् आशुगच्छेति योजना । नन्वस्यतपस्विनोब्रह्मलोकप्राप्तिरेववक्तव्या शस्त्रहननमात्रेणशस्त्रयोधिनांलोकंप्राप्यत्वेनवदति एतत्कथमुपपद्यते । उच्यते । “ द्वाविमौपुरुषौलोकेसूर्यमण्डलभेदिनौ । परिव्राड्योगयुक्तश्चरणेचाभिमुखोहतः ” इति शस्त्रयोधिनामुत्कृष्टलोकप्राप्तिश्रवणान्नदोषः ॥ ४१—४३ ॥ एकपत्नीव्रतस्येति इदंचव्रतमनुकूलायांपुत्रिण्यांपत्न्यांबोध्यं ॥ ४४ ॥ यायेति एकस्ययच्छब्दस्य पूर्वेणान्वयः । गुरुभृतां गुरुशुश्रूषाकारिणां । देहन्यासकृतां महाप्रस्थानादिनेति

कर्मण्यमित्येवचपाठः । अप्रग्रहं यष्टिग्रहणपूर्वकमार्गप्रदर्शकरहितं । अतएव । अनायकं स्नानादिकर्मप्रवर्तकहीनमित्यर्थःकतकः । **शि०** योभोजयिष्यति सकः नकोपीत्यर्थः ॥ ३५ ॥ **ति०** मामेत्याबाधेद्विर्वचनं । **स०** मामा गमः क्लेशाधिक्याद्विरुक्तिः ॥ ३७ ॥ **ति०** यमक्षयं यमगृहं ॥ ३८ ॥ **ति०** यमगृहगमनेस्वप्रयोजनमाह—**ततइति** । धर्मराजोमेक्षमतां पुत्रवियोगजनकंपूर्वकृतापराधं । अयंमेपुत्रः पितरौ आवां । विभृयात् पालयतु ॥ ३९ ॥ **ति०** ननुत्वयायाचितेपिकथमेतल्लभ्यतेऽतआह—**दातुमिति** । लोकपालः ईदृशस्य अनाथस्य । अभयदक्षिणां पुत्रदानेन । तदभावेमहाभयप्राप्तेरितिभावः । **कतक०** यतोऽयंमेपुत्रःपितरौबिभृयात् अतोस्यधर्मराजोभवान्क्षमतां शस्त्रघातजन्यदुर्मरणजनकंपापंक्षमतां । एवंमयाप्रार्थितोदुर्मरणजांदुर्गतिंदूरीकृत्य त्वांस्वर्गं नयिष्यति । ईदृशस्यतपस्विनोमम एकां पुत्रतारणरूपामभयदक्षिणांलोकपालत्वाद्दातुमर्हतीत्यर्थः ॥ ४० ॥ **ति०** अथमृतस्यपुनर्लाभमशक्यंमत्वाविश्वामित्रइवत्रिशङ्कुंस्वमहिम्नासुतंस्वर्गंप्रापयति—**अपापोसीत्यादिना** । हेपुत्र पापेनकर्मणा शस्त्रवधलक्षणेन. निहतोयथायद्यपित्वमसि । तथापि तेनमदीयेनसत्येनापापोभूत्वाऽस्त्रयोधिनांलोकान्गच्छ । **शि०** ननुप्रार्थितोपिदुर्लभंमत्वायदि नदास्यतितर्हिकामद्गतिरित्यतआह—**अपापइति** । हेपुत्र पापकर्मणा केनचित्पूर्वादृष्टेनहेतुनानिहतोपित्वं यथा यथावत् अपापः पापरहितोसि । अवशिष्टकिंचित्सूक्ष्मपापफलस्यापिभुक्तत्वान्नेदानींतवपापसंभावनास्तीतितात्पर्यं । तेनहेतुना सत्येन सर्वधर्ममूलभूतसत्यरूपधर्मणोपलक्षितस्त्वंअस्त्रयोधिनांयेलोकास्तान्गच्छ । एतेनाकालमृत्युभीतिस्त्वयानकार्येतिसूचितं । तेनब्रह्मवेत्तृणामकालमरणादिकमकिञ्चित्करमितिसूचितं ॥ ४१ ॥ **शि०** इदानींतवकामचारगतिर्भवितेतिबोधयन्नाह—**येति** ॥ ४४ ॥ **स०** देहन्यासकृतां स्वधर्मकरणेमितांतशक्तिहासेहुताशनादौदेहात्ययस्यधर्मत्वादितिभावः । **शि०** देहन्यासकृतः प्रयागादौबुद्धिपूर्वतनुत्यागक-

[पा०] १ क. ख. ङ. च. छ. झ. ञ. ट. पुत्र. २ क. ख. ङ—ट. मामागमः. ३ ख. उभावपिहि. ४ क. त्वयासह. ५ ग. घ. ज. अपापस्त्वं. ६ ख. ग. घ. च—ट. यथा. ७ ङ. झ. ट. लोकास्तत्र. ८ ङ. छ. झ. ट. यांहिशूरागतिंयान्ति. च. ञ. यांहिशूरागतिंप्राप्ताः. ९ ख. ष्वनिवर्तिनां. १० ङ. पश्चिमां. ११ घ. ङ. च. ञ. ट. भूतानां. १२ ख. ङ. झ. ञ. ट. स्वाध्यायात्तपसश्च. ग. स्वाध्यांयतपसा. १३ ख. ग. ङ—ट. भूमिदस्याहिताग्नेश्च. १४ ङ—ट. गुरुसेवाभृतामपि.

न हि [1]त्वस्मिन्कुले जातो गच्छत्यकुशलां गतिम् ॥ स तु यास्यति येन त्वं निहतो मम [2]बान्धवः ॥४६॥
एवं स कृपणं तत्र पर्यदेवयतासकृत् ॥ [3]ततोसौ कर्तुमुदकं प्रवृत्तः सह भार्यया ॥ ४७ ॥
[4]स तु दिव्येन रूपेण मुनिपुत्रः स्वकर्मभिः ॥ स्वर्गम[5]ध्यारुहत्क्षिप्रं शक्रेण सह धर्मवित् ॥ ४८ ॥
आबभाषे च तौ वृद्धौ [6]सह शक्रेण तापसः ॥ [7]आश्वास्य च [8]मुहूर्तं तु [9]पितरौ वाक्यमब्रवीत् ॥ ४९ ॥
स्थानमस्मि महत्प्राप्तो भवतोः परिचारणात् ॥ भवन्तावपि च क्षिप्रं मम [10]मूलंमुपैष्यतः ॥ ५० ॥
एवमुक्त्वा तु दिव्येन विमानेन वपुष्मता ॥ आरुरोह दिवं क्षिप्रं मुनिपुत्रो जितेन्द्रियः ॥ ५१ ॥
स [11]कृत्वा तूदकं तूर्णं तापसः सह भार्यया ॥ मामुवाच महातेजाः कृताञ्जलिमुपस्थितम् ॥ ५२ ॥
अद्यैव जहि मां राजन्मरणे नास्ति मे व्यथा ॥ [12]यच्छरेणैकपुत्रं मां त्वमकार्षीरपुत्रकम् ॥ ५३ ॥
[[13]कथं तेषां कुले जातः क्षत्रियाणां महात्मनाम् ॥ सर्ववेदविदर्थज्ञो धर्मे न कुरुते मनः ॥
स्त्रीनिमित्तं न ते वैरं क्षेत्रजं वाक्यजं न ते] ॥ ५४ ॥
[14]त्वया तु यदविज्ञानान्निहतो मे [15]सुतः शुचिः ॥ तेन [16]त्वामभि[17]शप्स्यामि सुदुःखमतिदारुणम् ॥५५॥
पुत्रव्यसनजं दुःखं यदेतन्मम सांप्रतम् ॥ एवं त्वं पुत्रशोकेन राजन्कालं [18]करिष्यसि ॥ ५६ ॥

शेषः यद्वा। परलोकप्राप्तिसंकल्पपूर्वकंगङ्गायमुनासंगमादौजलेऽग्नौवातनुंत्यजतामित्यर्थः ॥ ४५ ॥ अस्मिन्कुले तपोनिष्ठानामस्माकंकुले । जातः अकुशलां अशुभां । गतिंनगच्छेत् । अपितु मम बान्धवः पुत्रः त्वं येननिहतः सएवाकुशलांगतिंयास्यति ॥४६॥ उदकं संस्कारपूर्वोदकक्रियाः ॥ ४७ ॥ शक्रेणसहस्वर्गमध्यारुहदित्यनेन मुनिपुत्रंस्वर्गनेतुंशक्रःसमागतइति गम्यते ॥ ४८ ॥ संग्रहेणोक्तंस्वर्गारोहणंविवृणोति—आबभाषइति । तापसःशक्रेणसहतौवृद्धौआबभाषे । आभाषणेपिवृद्धयोरश्रवणात्पुनराहेत्याह—आश्वास्य चेति ॥ ४९ ॥ मूलं समीपं । " आद्येशिफायांनक्षत्रेमूलंकुञ्जसमीपयोः " इतिनिघण्टुः ॥ ५० ॥ वपुष्मता प्रशस्ताकारेण । प्रशंसायांमतुप् ॥ ५१—५२ ॥ जहि प्राणान्मोचय । " हन्तेर्जः " इतिजादेशः । कथंमारणंदुःखाकरत्वादित्यत्राह—मरणेनास्तिमेव्यथेति । व्यथाभावहेतुमाह—यदिति । अतोपिकिंव्यथास्तीतिभावः ॥ ५३—५४ ॥ अभिशप्स्यामि नतुभस्मीकरोमीतिभावः । सुदुःखमतिदारुणमिति क्रियाविशेषणं ॥ ५५ ॥ यद्यस्मात्कारणात् मम एतत् मरणपर्यवसायि । पुत्रव्यसनजंदुःखं अभूदितिशेषः । एवंपुत्रशोकेनकालंकरिष्यसि मृत्युंप्राप्स्यसीत्यर्थः । " कालोमृत्यौचसमये " इति

तीरः । एतेन यामिच्छसितांगच्छेतिसूचितम् ॥ ४५ ॥ **शि०** अस्मिन् तपस्विकुले जातःकश्चिदपिजनः येनहेतुना अकुशलांगतिंनगच्छति तेनैवहेतुना ममबान्धवः निहतस्सभवान् अकुशलांगतिंनैवयास्यति । एतेनब्रह्मवित्तपस्विकुलस्यदोषास्पर्शित्वंसूचितं । तेनतत्कुलस्यब्रह्मवेत्तृत्वंव्यक्तम् ॥ ४६ ॥ **ति०** आरुह्य पुनश्शक्रेणसहागत्याबभाषेइत्यन्वयः । अस्यैवप्रपञ्चः—**आश्वस्येत्यादि**। अत्रवक्तुश्शोकग्रस्ततयाऽऽबभाषे अब्रवीदितिपौनरुक्त्यंनदोषाय। **शि०** शक्रेणसहतापसःतौमुहूर्तमाबभाषे आश्वासयामासेत्यर्थः । आश्वास्यपितरमिदमब्रवीत् । चशब्देन मातरंचाश्वास्य ॥ ४९ ॥ **ति०** भवतोरिति । अनेन मातापितृसेवा धर्मान्तराभावेपिसैवेन्द्रसालोक्यदेतिध्वनितं ॥ ५० ॥ **शि०** येनहेतुनामेबालःत्वयानिहतः तेनैवहेतुनात्वां अतिदारुणं असह्यं सुदुःखंशप्स्येबोधयामि । ऌडुपात्तभविष्यत्त्वस्याविवक्षा। शपोबोधनार्थकत्वंतु "नीवींप्रतिप्रणिहितेतुकरेप्रियेणसख्यश्शपामियदिकिंचिदपिस्मरामि" इत्यादेनामनोरमादौस्पष्टम् ॥ ५५ ॥ कालं पुत्रसंयोगजनितसुखसमयं । करिष्यसि त्यक्ष्यसि । विक्षेपणार्थककृधातोर्ऌट् ॥ ५६ ॥

[पा०] १ क. ख. त्वस्मत्कुले. २ च. बान्धव. ३ ङ. छ. झ. ट. तथोक्त्वा. घ. सतस्सै. ४ छ. सच. ख. ततो. ५ च. मभ्यारुहत्क्षिप्रं. घ. मध्यारुहच्छीघ्रं. ६ ख. ङ. च. झ. ञ. ट. शक्रेणसह. ७ ङ. झ. आश्वस्य. ८ क. ख. च. ञ. मुहूर्तंतौ. ९ ङ. झ. ट. पितरं. १० ख. घ. ङ. झ. ञ. मुपैष्यथः. ११ क. ख. छ. झ. ञ. ट. कृत्वाथोदकं. ङ. कृत्वाप्युदकं. १२ क. ख. ङ. च. झ. ञ. ट. यःशरेण. १३ इदमर्धत्रयं क. पाठेदृश्यते. १४ ङ. च. छ. झ. ञ. ट. त्वयापिचयदज्ञानात्. ख. त्वयायत्तुयदज्ञानात्. १५ ङ. च. छ. झ. ञ. ट. सबालकः. १६ घ. त्वाहंच. ज. त्वामपि. १७ च. छ. झ. ञ. ट. शप्स्येहं. १८ घ. ग. गमिष्यसि.

अज्ञानात्तु हतो यस्मात्क्षत्रियेण त्वया मुनिः ॥ तस्मात्त्वां नाविशत्याशु ब्रह्महत्या नराधिप ॥५७॥
त्वामप्येतादृशो भावः क्षिप्रमे[1]वं गमिष्यति ॥ जीवितान्तकरो घोरो दातारमिव [2]दक्षिणा ॥ ५८ ॥
एवं शापं मयि न्यस्य विलप्य करुणं बहु ॥ चितामारोप्य देहं तन्मिथुनं स्वर्गमभ्ययात् ॥ ५९ ॥
तदेतच्चिन्तयानेन स्मृतं पापं मया स्वयम् ॥ तदा बाल्यात्कृतं देवि शब्दवेध्यनुकर्षिणा ॥ ६० ॥
तस्यायं कर्मणो देवि विपाकः समुपस्थितः ॥ अपथ्यैः सह [3]संभुक्तो व्याधिमन्नरसो यथा ॥ ६१ ॥
[4]तस्मान्मामागतं भद्रे तस्योदारस्य तद्वचः ॥ [5]यदहं पुत्रशोकेन [6]संत्यक्ष्याम्यद्य जीवितम् ॥ ६२ ॥
चक्षुर्भ्यां त्वां न पश्यामि कौसल्ये [7]साधु मा स्पृश ॥ इत्युक्त्वा स रुदंस्त्रस्तो भार्यामा[8]ह च भूमिपः ॥६३॥
[9]एतन्मे सदृशं देवि यन्मया राघवे कृतम् ॥ सदृशं तत्तु तस्यैव यदनेन कृतं मयि ॥ ६४ ॥

वैजयन्ती ॥ ५६ ॥ ब्रह्महत्या बहुपातकमित्यर्थः । अन्यथा वैश्याच्छूद्रायांजातस्यकरणाख्यसंकरजातित्वेन ब्रह्महत्याप्रसक्त्यभावात् ॥ ५७ ॥ एतादृशः पुत्रशोकरूपः । भावः स्वभावः । दातारमिवदक्षिणा यथाविप्रायदक्षिणादत्तादातारंस्वसदृशफलं प्रापयतितथेत्यर्थः । पुत्रशोकातिशयेन इहजन्मन्येवफलमनुभविष्यसीतिधियाक्षिप्रमित्युक्तवान् । दक्षिणाशब्देनदक्षिणाहेतुकंसुकृतंलक्ष्यते ॥ ५८ ॥ देहमित्येकवचनेन चितारोहणकालेदेहयोर्गाढबद्धत्वंलक्ष्यते ॥ ५९ ॥ शब्दवेध्यनुकर्षिणा शब्दवेधिनंबाणंप्रयुञ्जानेन । यद्वा शब्दवेधिनंबाणंमुक्त्वा पुनस्तच्छरीरप्रोतशल्यमनुकृष्टवतेत्यर्थः । चिन्तयानेन मरणपर्यवसायीपुत्रशोकःप्राप्तःअस्यकिंनिदानमितिचिन्तयानेन । एतत्पापंस्मृतं मुनिकुमारवधरूपंपापंस्मृतिविषयमभूदित्यर्थः ॥ ६० ॥ अपथ्यैः व्याधिविवर्धकैःव्यञ्जनैः । सहसंभुक्तः अन्नरसः व्याधिमुल्बणयन्निति शेषः । समुपस्थितोभवति बाधकत्वेनप्राप्तोभवति । अपथ्यैःसहसंभुक्तेव्याधिरन्नरसेयथेतिचपाठः ॥ ६१ ॥ उदारस्य शापप्रदातुरुदारत्वोक्तिरपुत्रस्यपुत्रसंपादनपरत्वात् । यद्वा उदारस्य महतः । “ उदारोदातृमहतोः ” इत्यमरः । वचोमामागतं शापरूपवचनार्थो मांप्राप्तइत्यर्थः ॥ ६२ ॥ मा मां ॥ ६३ ॥ “ इत्युक्त्वासरुदंस्त्रस्तोभार्यामाहचभूमिपः ” इत्यर्धानन्तरं “ एतन्मेसदृशंदेवियन्मयाराघवेकृतम् । सदृशंतत्तुत-

शि० ब्रह्महत्या ब्रह्महत्यासदृशकरणवधजनितपापंत्वांनाविशति । ब्रह्महत्याशब्दः आचारक्विबन्तप्रकृतिककर्तृक्विबन्तः । अतएवब्राह्मणजातिनिषेधकैतत्पुत्रोक्त्यानविरोधः । यदिचेहब्रह्मशब्देनब्रह्मज्ञान्युच्यते तदाशङ्कोत्तरयोर्निर्दलत्वंबोध्यम् ॥ ५७ ॥ ति० यथा तत्तद्वस्तुदक्षिणांदातारं । यथासादक्षिणाऽन्यतःप्राप्ताभवतितद्वत् । शि० दोषस्पर्शित्वाभावेपिपरमात्मेच्छानतिवार्येतिबोधयन्नाह—त्वामिति । जीवितान्तकरः पालनविघातकः अतएवघोरः । एतादृशः मत्खेदसदृशखेदस्य । भावः सत्ता दक्षिणां सर्वस्वादिरूपां दातारंत्वामपि आगमिष्यति । इवोहेतौ । यदिमकाररहितःपाठस्तदा दक्षः अतिसामर्थ्यमस्त्यस्येतिदक्षी तेन दक्षिणा परमात्मेच्छारूपकालेनहेतुनाआगमिष्यतीत्यर्थः ॥ ५८ ॥ शि० एवं अनेनप्रकारेण । मयिशापं भविष्यत्कालिकवस्तुबोधनं । न्यस्य उक्त्वेत्यर्थः ॥ ५९ ॥ स० मयास्वयमेवस्मृतं नतुपरोद्बोधनेन । शब्दवेधीचासौबाणानुकर्षीचेतितथोक्तः तेन । ति० तीर्थस्तु शब्दवेध्यानुशिक्षिणेतिपाठं शब्देनवेद्धुंयोग्यंशब्दवेध्यंमदनुशिक्षितुंशीलंयस्यतेनेत्यर्थंचाह । तदसमञ्जसमिति स्पष्टमेव । शि० यत् आबाल्यात् ईषदज्ञानात् पापंकृतं तच्चिन्तयानेन चिन्तयमानेन शब्दवेध्यनुकर्षिणा शब्दवेधिनाबाणेन अनुकर्षति प्राणानपहरति तच्छीलेनमयातदेतन्मुनिवचनंस्मृतं ॥ ६० ॥ शि० परमात्मेच्छायत्तस्वदुःखस्यकर्मफलत्वेनोत्प्रेक्ष्याह—तस्येति । तस्य मुनिदुःखदानरूपस्य कर्मणः अयंविपाकः फलं समुपस्थितः प्राप्तः । नन्वज्ञानाज्जातस्यकर्मणःकथंफलप्राप्तिरित्यतआह । अपथ्यैः अपक्वहरितालादिभिस्सहअन्नरसेभुक्ते अज्ञानतोपिभक्षितेसतिव्याधिर्यथा ॥ ६१ ॥ शि० जीवितं प्रजापालनं इहलोकेस्थितिमित्यर्थः । संत्यजिष्यामि । अतस्त्वांनपश्यामि अतएवत्वमपिमास्पृश मामितिशेषः । मेतिपाठः अतएवमा मामितिभूषणेव्याख्यातं ॥ ६२ ॥ ति० राघवेयन्मयाकृतंविवासनरूपं तन्मेवृत्तस्यसदृशंन । अनेनरामेण यन्मयिकृतं राज्यं

[पा०] १ ग. मेवं. ख. घ. ञ. ट. मेवागमिष्यति. २ ङ. ज—ट. दक्षिणां. ३ क. ख. ङ. च. ज—ट. संभुक्ते व्याधिरन्नरसे. ४ ख. ट. तस्मान्ममागतं. ५ यदहंपुत्रशोकेनेत्यर्धमारभ्यद्रक्ष्यन्तिनहिमानवाइत्यन्तानांदशानामर्धानांपौर्वापर्यं. क—ट. पुस्तकेषु. इत्युक्त्वा. यदहं. चक्षुर्भ्यां. यमक्षयं. यदिमां. धनंवा. नतन्मे. सदृशंतत्तुदुर्वृत्तमपि. कश्चप्रव्राज्यमानोवा. एवं क्रमेणदृश्यते. च. यदेवं. ६ ङ. च. छ. झ. ञ. ट. संत्यजिष्यामि. ७ क. च. छ. म. ट. त्वंहिमास्पृश. ङ. त्वंहिसंस्पृश. ख. झ. त्वंहिमांस्पृश. घ. ज. साधुमांस्पृश. ८ ङ. झ. ट. माहतुभूमिपः. ध. ज. माहचभूपतिः. ९ क. ख. घ—ट. नतन्मे.

दुर्वृत्तमपि कः पुत्रं त्यजेद्भुवि विचक्षणः ॥ कश्च प्रव्राज्यमानो वा नासूयेत्पितरं सुतः ॥ ६५ ॥
यदि मां संस्पृशेद्रामः सकृदद्य लभेत वा ॥ [धनं वा यौवराज्यं वा जीवेयमिति मे मतिः] ॥
यमक्षयमनुप्राप्ता द्रक्ष्यन्ति न हि मानवाः ॥ ६६ ॥
चक्षुषा त्वां न पश्यामि स्मृतिर्मम विलुप्यते ॥ दूता वैवस्वतस्यैते कौसल्ये त्वरयन्ति माम् ॥ ६७ ॥
अतस्तु किं दुःखतरं यदहं जीवितक्षये ॥ न हि पश्यामि धर्मज्ञं रामं सत्यपराक्रमम् ॥ ६८ ॥
तस्यादर्शनजः शोकः सुतस्याप्रतिकर्मणः ॥ उच्छोषयति मे प्राणान्वारि स्तोकमिवातपः ॥ ६९ ॥
न ते मनुष्या देवास्ते ये चारुशुभकुण्डलम् ॥ मुखं द्रक्ष्यन्ति रामस्य वर्षे पञ्चदशे पुनः ॥ ७० ॥
पद्मपत्रेक्षणं सुभ्रु सुदंष्ट्रं चारुनासिकम् ॥ धन्या द्रक्ष्यन्ति रामस्य ताराधिपनिभं मुखम् ॥ ७१ ॥
सदृशं शारदस्येन्दोः फुल्लस्य कमलस्य च ॥ सुगन्धि मम नाथस्य धन्या द्रक्ष्यन्ति तन्मुखम् ॥ ७२ ॥
निवृत्तवनवासं तमयोध्यां पुनरागतम् ॥ द्रक्ष्यन्ति सुखिनो रामं शुक्रं मार्गगतं यथा ॥ ७३ ॥
कौसल्ये चित्तमोहेन हृदयं सीदतीव मे ॥ वेदये न च संयुक्ताञ्शब्दस्पर्शरसानहम् ॥ ७४ ॥
चित्तनाशाद्विपद्यन्ते सर्वाण्येवेन्द्रियाणि मे ॥ क्षीणस्नेहस्य दीपस्य संसक्ता रश्मयो यथा ॥ ७५ ॥
अयमात्मभवः शोको मामनाथमचेतनम् ॥ संसादयति वेगेन यथा कूलं नदीरयः ॥ ७६ ॥
हा राघव महाबाहो हा ममायासनाशन ॥ हा पितृप्रिय मे नाथ हाद्य क्वासि गतः सुत ॥ ७७ ॥

स्यैवयदनेनकृतंमयि " इतिक्रमः ॥ ६४ ॥ एतदर्थद्वयंक्रमेणोपपादयति—दुर्वृत्तमित्यर्धद्वयेन ॥ ६५ ॥ रामः सकृदप्यद्यमांसंस्पृशेत् लभेतवा चक्षुर्विषयतांप्राप्नुयाद्वा । तदा जीवेयमितिगम्यमानत्वात्तदनुक्तिः । किमर्थमेवमर्थनंकरोषीत्यत्राह—यमेति । यमक्षयं यमगृहमनुप्राप्ताःमानवाः बान्धवान्नद्रक्ष्यन्तिहीत्यर्थः । तस्माज्जीवनकालएवदर्शनमपेक्ष्यत इतिभावः ॥ ६६—६८ ॥ अप्रतिकर्मणः प्रतिक्रियारहितस्य । स्तोकं अल्पं । " स्तोकाल्पक्षुल्लकाः " इत्यमरः ॥ ६९ ॥ मनुष्याः जरायुक्तान भवन्ति किंतु देवाः नित्ययौवनाः । " अहंपुनर्देवकुमाररूपमलंकृतंतंसुतमाव्रजन्तम् । नन्दामिपश्यन्नपिदर्शनेनभवामिदृष्ट्वाचपुनर्युवेव " इतिहिपूर्वमुक्तवान् । चारुशुभकुण्डलं तन्मुखसंयोगात्कुण्डलमतीवशोभांप्राप्तमित्युच्यते ॥ ७०—७२ ॥ मार्गगतं शुक्रंयथा मौढ्यंविहायस्वस्थानगतंशुक्रमिव ॥ ७३ ॥ चित्तमोहेन चित्तस्यमोहोदुःखातिशयप्राप्तमूर्छा तयेत्यर्थः । " मूर्छातुकश्मलंमोहः " इत्यमरः । हृदयं मनसोधिष्ठानं । सीदतीव विशीर्यतीव । संयुक्तान इन्द्रियसंयुक्तान् । नवेदये नजाने ॥ ७४ ॥ हृदयविशरणेनशब्दाद्यज्ञानेहेतुमाह—चित्तनाशादिति । संसक्ताः दीपाविनाभूताः । यथास्नेहनाशकृतदीपनाशाद्रश्मिनाशः एवंशरीरशैथिल्यकृतचित्तनाशादिन्द्रियनाशइतिसूचितं ॥ ७५—७६ ॥ आयासनाशन

स्यस्त्वामद्वचःपरिपालनरूपं तत्तस्यैवसदृशं । अनन्वयोत्रालङ्कारः । मत्सदृशोऽन्यायकृत् रामसदृशउचितकर्ताचकोपिनास्तीत्यर्थः ॥ ६४ ॥ शि० ननुकुतोनमांपश्यसीत्यतआह—यमक्षयमिति । यमस्यकालगतेःक्षयःविध्वंसोयस्मिंस्तं कालागम्यसाकेतलोकमित्यर्थः । ति० अन्वारभेत किंचिद्द्वारावास्पृशेत् । यदिवाधनंकोशंयौवराज्यंवालभेततदाजीवेयं ॥ ६६ ॥ शि० चक्षुषेति मयिविद्यमानास्मृतिःरामभिन्नविषयकस्मरणंविलुप्यते स्मृत्यन्तराभावेहेतुमाह—दूताइति । स्वतस्य स्वःस्वकीयश्चासौसःरामः तस्य । किंच सु शोभनःअतःगुणद्वारासर्वत्रव्याप्तिर्यस्यतस्यरामस्य एते प्रसिद्धा गुणाः दूताव दूताइव । त्वरयन्ति रामसंनिधिंप्रतुं प्राप्तुमुत्साहयन्तीत्यर्थः । वैनिश्चितमेतत् ॥ ६७ ॥ कतक० शुक्रंमार्गगतंयथेतिपाठः । हस्तात्पञ्जराद्वाऽन्यदेशगतं । पुनश्च मार्गं यथास्थानं गतं प्राप्तं शुकं क्रीडाशुकमिवेत्यर्थः । स० शुकमितिपाठे शुकं पञ्जरादुत्पत्यपुनरागतं । अवधूतत्वेनाशक्यदर्शनंकदाचिद्दृष्टपुण्यविशेषेणमार्गंगतंव्यासपुत्रमितिवार्थः ॥ ७३ ॥ ति० संरक्ताः भस्मतांप्राप्ताः । यथादीपस्यरश्मयोविपद्यन्तेतथेन्द्रिया-

[पा०] १ क. ख. ग. ङ. च. झ. ज. ट. सकृदन्वारभेत. घ. सकृदप्यालभेत. २ ग. घ. ज. प्रेक्षन्ते. ३ घ. च. ञ. ततस्तु. ४ ङ. च. झ. ञ. ट. वैप्राणान्. ५ ङ. च. छ. झ. ञ. ट. ताराधिपसमं. ६ ङ. छ. झ. ञ. ट. रामस्य. ७ ङ. झ. ट. येमुखं. ८ ख. ज. शुकं. ९ ङ. च. झ. ञ. ट. वेन्द्रियाणिहि. १० ङ. च. ज—ट. संरक्ताः. ११ क. ख. मचेतसं. १२ घ. तीरं. १३ क. ग.—च. ज.—ट. हाममासि. ख. हाहाक्वासि.

हा कौसल्ये नशिष्यामि हा सुमित्रे तपस्विनि ॥ हा नृशंसे ममामित्रे कैकेयि कुलपांसनि ॥ ७८ ॥
इति रामस्य मातुश्च सुमित्रायाश्च सन्निधौ ॥ राजा दशरथः शोचञ्जीवितान्तमुपागमत् ॥ ७९ ॥
यदा तु दीनं कथयन्नराधिपः प्रियस्य पुत्रस्य विवासनातुरः ॥
गतेऽर्धरात्रे भृशदुःखपीडितस्तदा जहौ प्राणमुदारदर्शनः ॥ ८० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे चतुःषष्टितमः सर्गः ॥ ६४ ॥

पञ्चषष्टितमः सर्गः ॥ ६५ ॥

प्रभातेवन्दिप्रमुखानांसवाद्यघोषमुद्घोषणेपिराज्ञोऽप्रबोधेसमीपवर्तिनीभिःस्त्रीभिरुपायेनतस्यजीवितापगमनिर्धारणेनशोकादुत्क्रोशनम् ॥ १ ॥ ततःप्रबुद्धाभ्यांकौसल्यासुमित्राभ्यामन्याभिश्चस्त्रीभिःशोकादुच्चैःपरिदेवनम् ॥ २ ॥

अथ रात्र्यां व्यतीतायां प्रातरेवापरेऽहनि ॥ वन्दिनः पर्युपातिष्ठंस्तत्पार्थिवनिवेशनम् ॥ १ ॥
सूताः परमसंस्कारा मङ्गलाश्चोत्तमश्रुताः ॥ गायकाः स्तुतिशीलाश्च निगदन्तः पृथक्पृथक् ॥ २ ॥
राजानं स्तुवतां तेषामुदात्ताभिहिताशिषाम् ॥ प्रासादाभोगविस्तीर्णः स्तुतिशब्दो ह्यवर्तत ॥ ३ ॥
ततस्तु स्तुवतां तेषां सूतानां पाणिवादकाः ॥ अपदानान्युदाहृत्य पाणिवादानवादयन् ॥ ४ ॥
तेन शब्देन विहगाः प्रतिबुद्धा विसस्वनुः ॥ शाखास्थाः पञ्जरस्थाश्च ये राजकुलगोचराः ॥ ५ ॥
व्याहृताः पुण्यशब्दाश्च वीणानां चापि निःस्वनाः ॥ आशीर्गेयं च गाथानां पूरयामास वेश्म तत् ॥ ६ ॥

दुःखनाशन ॥ ७७—८० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने चतुःषष्टितमः सर्गः ॥ ६४ ॥

अथेत्यादिश्लोकद्वयमेकंवाक्यं । रात्र्यां रात्रिशेषे । परमसंस्काराः व्याकरणाद्युत्तमसंस्कारयुक्ताः । श्रेष्ठालंकारयुक्तावा । वन्दिनइतिपूर्वमुक्तत्वात्सूताः वंशावलिकीर्तकाः । मङ्गलाः मङ्गलपाठकाः । उत्तमंश्रुतं गान्धर्वशास्त्रश्रवणंयेषांते उत्तमश्रुताः । एतद्विशेषणद्वयंगायकमात्रविशेषणं । अन्यत्सर्वविशेषणं । सर्वत्रपर्युपातिष्ठन्नितिक्रियापदं ॥ १—२ ॥ उदात्ताभिहिताशिषां उदात्तेनउच्चैःस्वरेण अभिहिताःप्रयुक्ताःआशिषोयैस्तेषां । प्रासादाभोगविस्तीर्णः प्रासादेषुआभोगः परिपूर्णता तयाविस्तीर्णः । "आभोगःपरिपूर्णता" इत्यमरः ॥ ३ ॥ स्तुवतां स्तुवत्सुसत्सु । पाणिवादकाः तालगत्याविविधंपाणिभ्यांवादयन्तीतिपाणिवादकाः । अपदानानि वृत्तान्यद्भुतकर्माणि । पाणिवादानवादयन् पाणिवादानकुर्वन्नित्यर्थः ॥ ४ ॥ शाखास्थाः गृहारामवृक्षशाखासुवर्तमानाः । राजकुलगोचराः राजगृहेदृश्यमानाः । विहगाः शुकादयः ॥ ५ ॥ व्याहृताः ब्राह्मणैरुक्ताः । पुण्यशब्दाः पुण्यपुरुषक्षेत्रतीर्थकीर्तनादिरूपाः । पूरयामासुरिति विपरिणामेनयोजनीयं । गाथानां दशरथविषयप्रबन्धविशेषाणां संबन्धि आशीर्गेयं आशीर्वादरूपगानं ॥ ६ ॥

णीत्यर्थः ॥ ७५ ॥ शि० हेतिअनृशंसे क्रूरचेष्टारहिते । अतएव आमित्रे अतिप्रिये कुलपांसनि कुलाधिपप्रकाशिकेकैकेयि ॥ ७८ ॥ शि० जीवितान्तं पालनाभावं अप्रकटसाकेतलोकमित्यर्थः ॥ ७९ ॥ शि० प्राणं पालनंजहौ अप्रकटसाकेतंप्रापेत्यर्थः ॥ ८० ॥ इतिचतुष्षष्टितमस्सर्गः ॥ ६४ ॥

ति० मागधाः वंशावलीकीर्तकाः । शि० मङ्गलाः गणपत्यादिस्तवपाठकाश्च । मागधाश्चेतिपाठान्तरं । राजवंशपरंपरावक्ता॰

[पा०] १ ङ. च. छ. झ. ञ. ट. नपश्यामि. क—घ. ज. विनश्यामि. २ क. ख. ङ. च. झ. ञ. ट. मातुश्चरामस्य. ३ गं. ङ. च. झ. ट. तथातुदीनः. क. ख. घ. ज. तथातुदीनं. ४ क. ख. ङ. झ. ञ. मागधाश्चोत्तमश्रुताः. ज. मागधाश्चोत्तमाशिषः. ग. घ. मङ्गलाश्चोत्तमाशिषः. ५ ग. गायनाः. ६ ङ. झ. ट. श्रुतिशीलाश्च. ७ च. ज. ञ. निनदन्तः. ८ ञ. तत्रउत्तमाभिहिताशिषां. ज. तेषामुदाराभिहिताशिषां. ९ क व्यवर्धत. ख. ग. ज. व्यवर्धत. १० घ. ङ. च. झ. ट. वादान्यवादयन्. ११ ङ. ज, झ. ट. बुद्धाश्चसस्वनुः. च. ञ. बुद्धाश्चसस्वनाः. क. बुद्धाविसस्वनुः. १२ क. शारिकाः. १३ क. वीणानांचैव.

ततः शुचिसमाचाराः पर्युपस्थानकोविदाः ॥ स्त्री[1]वर्षधरभूयिष्ठा उपतस्थु[2]र्यथापुरम् ॥ ७ ॥
हरिचन्दन[3]संपृक्तमुदकं काञ्चनैर्घटैः ॥ आनिन्युः स्नानशिक्षाज्ञा यथाकालं यथाविधि ॥ ८ ॥
मङ्गलालम्भनीयानि प्राशनीयान्युपस्करान् ॥ [4]उपनिन्युस्तथाऽप्यन्याः कुमारीबहुलाः स्त्रियः ॥९॥
सर्वलक्षणसंपन्नं सर्वं विधिवदर्चितम् ॥ सर्वं सुगुणलक्ष्मीवत्त[5]द्बभूवाभिहारिकम् ॥ १० ॥
[6]तत्तु सूर्योदयं यावत्सर्वं परिसमुत्सुकम् ॥ तस्थावनुपसंप्राप्तं किंस्विदित्युपशङ्कितम् ॥ ११ ॥
अथ याः कोसलेन्द्रस्य शयनं प्रत्यनन्तराः ॥ ताः स्त्रियस्तु समागम्य भर्तारं प्रत्यबोधयन् ॥ १२॥
[7]तथाप्युचितवृत्तास्ता विनयेन नयेन च ॥ न ह्यस्य शयनं स्पृष्ट्वा किंचिदप्युपलेभिरे ॥ १३ ॥
ताः स्त्रियः स्वप्नशीलज्ञाश्चेष्टासंचलनादिषु ॥ ता वेपथुपरीताश्च राज्ञः प्राणेषु शङ्किताः ॥
प्रतिस्रोतस्तृणाग्राणां सदृशं सं[9]चकाशिरे ॥ १४ ॥
अथ [10]संवेपमानानां स्त्रीणां दृष्ट्वा च पार्थिवम् ॥ यत्तदाशङ्कितं पापं [11]तस्य जज्ञे विनिश्चयः ॥ १५॥

पर्युपस्थानकोविदाः कालोचितपरिचर्याविचक्षणाः । स्त्रीवर्षधरभूयिष्ठाः अन्तःपुराध्यक्षस्त्रीभिः वर्षधरैःपण्ढैश्चसमृद्धाः परिचारकाइतिशेषः ॥ ७ ॥ हरिचन्दनसंपृक्तं हरिचन्दनसंमिश्रं । स्नानशिक्षाज्ञाः स्नानप्रकारज्ञाः । यथाविधि यथानियमं ॥ ८ ॥ मङ्गलालम्भनीयानि मङ्गलरूपानुलेपनानितैलोद्वर्तनादीनि । स्पर्शनीयानिगवादीनीत्येके । प्राशनीयानि दन्तधावनानन्तरंगण्डूषत्वेनप्राशनीयानि । संपिष्टतिलनारिकेलजीरकादिद्रव्याणि औषधविशेषानितिवार्थः । गङ्गादितीर्थोदकानीतिवार्थः । अनुदिनमखिलदुरितहरणायाखिलकर्मणामधिकारापादनायचप्राशनीयानि कुलाराधनभूतश्रीरङ्गनाथचरणारविन्दसमर्पिततीर्थोदकतुलस्यादीनीतिवार्थः । तीर्थोदकभाजनावरणपेटिकादेरेवपरिचारकैरानयनंज्ञेयं । उपस्करान् दर्पणवस्त्राभरणकुसुमादीनि । कुमारीबहुलाः कुमारीप्रायाः । स्त्रियइतिद्वितीया । वारयोषितइतियावत् ॥ ९ ॥ आभिहारिकं राज्ञेप्रातर्यदाहर्तव्यं मङ्गलार्थमानेतव्यं । तत्सर्वं सर्वलक्षणसंपन्नत्वादिधर्मविशिष्टंबभूव । सुगुणंचतत्लक्ष्मीवच्चेतिसमासः ॥ १० ॥ तत् पूर्वोक्तं परिजनजातं । सूर्योदयंयावत् सूर्योदयात्पूर्वमेव । परिसमुत्सुकं राजसेवासमुत्सुकं । अनुपसंप्राप्तं अनागतंराजानंप्रति । किंस्विदित्युपशङ्कितंसत् तस्थौ । राजानागतः तस्यकिंवास्यादितिशङ्कासंयुक्तंतस्थावित्यर्थः ॥११॥ याः कौसल्यादिव्यतिरिक्ताः । शयनंप्रत्यनंन्तराः शयनसन्निकृष्टाइत्यर्थः । प्रत्यबोधयन् प्रबोधनोचितसविनयमृदुवाक्यैःप्राबोधयन्नित्यर्थः ॥१२॥ तथापि बोधयित्वापि । उचितवृत्ताः स्पर्शनादिव्यापारोचिताः । विनयेन प्रश्रयेण । नयेन युक्त्याच । अस्यशयनं शयनस्थानं । स्पृष्ट्वा किंचिदपि निद्रालक्षणं उच्छ्वासादिकं । नलेभिरे नज्ञातवत्यः ॥ १३ ॥ एतदेवोपपादयति—ताइति । स्वप्नशीलज्ञाः स्वापस्वभावज्ञाः । ताः पूर्वोक्ताःस्त्रियः । चेष्टासंचलनादिषु चेष्टा हस्तपादादिचलनं संचलनं हृदयादिस्पन्दनं आदिशब्देननिश्वासादिकंगृह्यते । तेषुकिंचिन्नोपलेभिरेइत्यनुषङ्गेणसंबन्धः । वेपथुना कम्पेन परीताःव्याप्ताः । ताः स्त्रियः । राज्ञःप्राणेषुशङ्किताःसत्यः प्रतिस्रोतस्तृणाग्राणां नदीप्रवाहाभिमुखवेतसादितृणाग्राणां । सदृशं तुल्यंयथातथा । संचकाशिरे संचकम्पिरइत्यर्थः ॥ १४ ॥ यत्पापं मरणरूपमाशङ्कितं तस्यनि-

रइतितदर्थः । अस्मिन्पक्षे सूतशब्दःपौराणिकार्थकः ॥ २ ॥ **ति०** स्नानशिक्षाज्ञाः अरुणोदयात्पूर्वमेवोषसिस्नानार्थंजलाद्यानेतव्यमितिशिक्षाज्ञाः ॥ ८ ॥ **शि०** स्पृष्ट्वा अत्रास्तिनास्तिवेतिशङ्कानिवृत्त्यर्थंसंस्पृश्य । किंचित् राजनित्यधार्यवस्त्रादिकमपिनोपलेभिरे शय्यायांनप्रापुः । एतेन सवस्त्राभरणशरीरसहितस्साकेतलोकंजगामेतिसूचितं ॥ १३ ॥ **ति०** संचलनाडिषु हृदयकरमूलनाडिषु । चेष्टांनोपलेभिरे । ततोवेपथुयुक्ताराज्ञःप्राणेषुशङ्किताआसन् ॥ १४ ॥ **ति०** संदेहमानानां संदिहानानां । **शि०** तस्यनिश्चयः

[पा०] १ क—ङ. ज—ट. वर्षवर. २ ङ. च. ज—ट. यथापुरा. ३ क. ख. ङ. संयुक्तं. ४ ङ. च. झ. ञ. ट. उपानिन्युस्तथापुण्याः. ५ ङ. छ. झ. ट. त्तदभूदाभि. ६ ङ. छ. झ. ट. ततः. ७ ङ. छ. झ. ट. अथाप्युचित. ८ ङ. झ. ञ. चेष्टांसंचलनाडिषु. ९ क. संचकंपिरे. १० ङ. च. छ. झ. ञ. ट. संदेहमानानां. ११ ङ. छ. ट. तदा.

कौसल्या च सुमित्रा च पुत्रशोकपराजिते ॥ प्रसुप्ते न प्रबुध्येते यथाकालसमन्विते ॥ १६ ॥
निष्प्रभा च विवर्णा च सन्ना शोकेन संनता ॥ न व्यराजत कौसल्या तारेव तिमिरावृता ॥१७॥
कौसल्याऽनन्तरं राज्ञः सुमित्रा तदनन्तरम् ॥ न स्म विभ्राजते देवी शोकाश्रुलुलितानना ॥ १८॥
ते च दृष्ट्वा तथा सुप्ते उभे देव्यौ च तं नृपम् ॥ सुप्तमेवोद्गतप्राणमन्तःपुरमदृश्यत ॥ १९ ॥
ततः प्रचुक्रुशुर्दीनाः सस्वरं ता वराङ्गनाः ॥ करेणव इवारण्ये स्थानप्रच्युतयूथपाः ॥ २० ॥
तासामाक्रन्दशब्देन सहसोद्गतचेतने ॥ कौसल्या च सुमित्रा च त्यक्तनिद्रे बभूवतुः ॥ २१ ॥
कौसल्या च सुमित्रा च दृष्ट्वा स्पृष्ट्वा च पार्थिवम् ॥ हा नाथेति परिक्रुश्य पेततुर्धरणीतले ॥२२॥
सा कोसलेन्द्रदुहिता वेष्टमाना महीतले ॥ न बभ्राज रजोध्वस्ता तारेव गगनाच्च्युता ॥ २३ ॥
नृपे शान्तगुणे जाते कौसल्यां पतितां भुवि ॥ अपश्यंस्ताः स्त्रियः सर्वा हतां नागवधूमिव ॥ २४ ॥
ततः सर्वा नरेन्द्रस्य कैकेयीप्रमुखाः स्त्रियः ॥ रुदन्त्यः शोकसंतप्ता निपेतुर्गतचेतनाः ॥ २५ ॥
ताभिः स बलवान्नादः क्रोशन्तीभिरनुद्रुतः ॥ येन स्थिरीकृतं भूयस्तद्गृहं समनादयत् ॥ २६ ॥
तत्समुत्रस्तसंभ्रान्तं पर्युत्सुकजनाकुलम् ॥ सर्वतस्तुमुलाक्रन्दं परितापार्तबान्धवम् ॥ २७ ॥
सद्यो निपतितानन्दं दीनविक्लवदर्शनम् ॥ बभूव नरदेवस्य सद्म दिष्टान्तमीयुषः ॥ २८ ॥
अतीतमाज्ञाय तु पार्थिवर्षभं यशस्विनं संपरिवार्य पत्नयः ॥

श्रयस्तदाजज्ञइतिसंबन्धः ॥ १५ ॥ पुत्रशोकेनपराजिते आक्रान्ते अतएव यथाकालसमन्विते मृतेइव प्रसुप्ते नप्रबुध्येते ॥ १६ ॥ निष्प्रभा निश्श्रीका । विवर्णा पूर्ववर्णाद्विपरीतवर्णा । शोकेन सन्ना कृशा । संनता कार्श्येननम्रा । तिमिरावृता उत्पातकालोत्थधूमस्तिमिरं तेनावृता । तारेव तारकेव । नव्यराजत ॥ १७ ॥ प्रथमंराजानविभ्राजतेस्म राज्ञोऽनन्तरंकौसल्या शोकाश्रुलुलिताननासती नविभ्राजतेस्म । तदनन्तरंदेवीतथाविधासुमित्रा नविभ्राजतेस्म । भूताद्दशरथात् जीवन्त्योःकौसल्यासुमित्रयोर्विशेषोनासीदित्यर्थः ॥ १८ ॥ सुप्तेतेउभेदेव्यौचदृष्ट्वा सुप्तमेव सन्तमुद्गतप्राणंतंनृपंच । अन्तःपुरं अन्तःपुरजनः । अदृश्यत अपश्यत् ॥ १९—२० ॥ सहसोद्गतचेतने सहसोत्पन्नप्रबोधे ॥ २१—२३ ॥ शान्तगुणे शान्तदेहोष्णस्पन्दनादिगुणे ॥ २४—२५ ॥ सनादः कौसल्याप्रभृतीनांनादः । क्रोशन्तीभिस्ताभिः पश्चात्प्रविष्टकैकेयीप्रभृतिभिः अनुद्रुतः अनुसृतोभूत् । येनानन्तरक्रोशानुद्रुतेनपूर्वनादेनस्थिरीकृतंव्याप्तं तत्सर्वंगृहंसमनादयत् महान्तंप्रतिध्वनिमजनयदित्यर्थः ॥ २६ ॥ पर्युत्सुकजनाकुलं पूर्वपर्युत्सुकजनाकुलंसद्म नरदेवस्यदिष्टान्तमीयुषः नरदेवेमरणंप्राप्तेसति । समुत्रस्तसंभ्रान्तं समुत्रस्तं उद्विग्नं संभ्रान्तं अनवस्थितंच । इत्येवमादिविशेषणयुक्तंबभूवेतिसंबन्धः ॥२७—२८॥ आज्ञाय सम्यग्ज्ञात्वा । पत्नयः पत्न्यः । बाहूप्रगृह्य

तदातस्मिन्कालेजज्ञे ॥ १५ ॥ ती० यद्वा अन्तःपुरस्यकर्तृत्वंकर्मत्वंच । तथाचायमर्थः । अन्तःपुरं स्वमात्मानंउद्गतप्राणं अदृश्यत अपश्यत् कर्तरियक् ॥ १९ ॥ ति० हाभर्तेति हाभर्तरित्यर्थः । स० हाभर्तेति । शोकाभिभूतत्वात्संबोधनाप्रयोगः ॥ २२ ॥ ति० अयोध्याजनपदवाचीकोशलशब्दस्तालव्यमध्यः । कौसल्यापितृदेशवाचीतुदन्त्यमध्यः ॥ २३ ॥ ती० अनुद्रुतः अभिसंवर्धितः । ति० येनानुद्रवणेनस्फीतीकृतोवर्धितःसनादः भूयोऽधिकंतद्गेहंसमनादयत् व्याप्तवान् ॥२६॥ ति० पर्युत्सुकजनाकुलं अपूर्ववृत्तान्तज्ञानायपर्युत्सुकजननिबिडं ॥ २७ ॥ ति० अनाथवत् अनाथार्हं । स० अमाथवत् स्वार्थेवतिः । अथवा जगद्रक्षकेरामेसति अनाथत्वाभावात्तथोक्तिः ॥ २९ ॥ इतिपञ्चषष्टितमस्सर्गः ॥ ६५ ॥

[पा०] १ ङ. छ. झ. ट. निष्प्रभासा. २ ङ. च. छ. झ. ञ. ट. तदा. ३ ख. सर्वमेव. ४ ख. मतप्यत. घ. ममम्थत. ५ क. तंनृपं. ६ क. ङ—ट. भर्तेति. ७ ङ. झ. ञ. ट. भ्राजते. ८ ख. ङ. झ. ट. गगनच्युता. ९ क—च. ज. ञ. ट. स्फीतीकृतो. १० ङ. च. झ. ञ. ट. तत्परित्रस्त. ११ क. ख. च. ज. सुमुलाक्रान्तं. १२ ङ, ज—ट. दीनं. १३ ख. ङ. झ. ञ. ट. तंपरिवार्य.

भृशं रुदन्त्यः करुणं सुदुःखिताः प्रगृह्य बाहू व्यलपन्ननाथवत् ॥ २९ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे पञ्चषष्टितमः सर्गः ॥ ६५ ॥

षट्षष्टितमः सर्गः ॥ ६६ ॥

कौसल्यया दशरथशिरसः स्वाङ्के समारोपणेन कैकेयीगर्हणपूर्वकं रामादीन्प्रति परिशोचनम् ॥ १ ॥ अमात्यादिभिर्दशरथमालिङ्गय विलपन्त्याः कौसल्याया अपसारणेन राजशरीरस्य तैलद्रोण्यां निक्षेपपूर्वकं सायाह्ने शोकात्स्वस्वभवनगमनम् ॥ २ ॥

तमग्निमिव संशान्तमम्बुहीनमिवार्णवम् ॥ हतप्रभमिवादित्यं स्वर्गस्थं प्रेक्ष्य पार्थिवम् ॥ १ ॥
कौसल्या बाष्पपूर्णाक्षी विविधं शोककर्शिता ॥ उपगृह्य शिरो राज्ञः कैकेयीं प्रत्यभाषत ॥ २ ॥
सकामा भव कैकेयि भुङ्क्ष्व राज्यमकण्टकम् ॥ त्यक्त्वा राजानमेकाग्रा नृशंसे दुष्टचारिणि ॥ ३ ॥
विहाय मां गतो रामो भर्ता च स्वर्गतो मम ॥ विपथे सार्थहीनेव नाहं जीवितुमुत्सहे ॥ ४ ॥
भर्तारं तं परित्यज्य का स्त्री दैवतमात्मनः ॥ इच्छेज्जीवितुमन्यत्र कैकेय्यास्त्यक्तधर्मणः ॥ ५ ॥
न लुब्धो बुध्यते दोषान्किंपाकमिव भक्षयन् ॥ कुब्जानिमित्तं कैकेय्या राघवाणां कुलं हतम् ॥ ६ ॥
अनियोगे नियुक्तेन राज्ञा रामं विवासितम् ॥ सभार्यं जनकः श्रुत्वा परितप्स्यत्यहं यथा ॥ ७ ॥
स मामनाथां विधवां नाद्य जानाति धार्मिकः ॥ रामः कमलपत्राक्षो जीवनाशमितो गतः ॥ ८ ॥
विदेहराजस्य सुता तथा सीता तपस्विनी ॥ दुःखस्यानुचिता दुःखं वने पर्युद्विजिष्यति ॥ ९ ॥

बाहूगृहीत्वेत्यर्थः ॥ २९ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने पञ्चषष्टितमः सर्गः ॥ ६५ ॥

॥१॥ राज्ञःशिरउपगृह्य अङ्केकृत्वेत्यर्थः ॥ २—३ ॥ विपथे दुर्मार्गे । सार्थहीना सहायभूतपथिकसंघरहितेत्यर्थः ॥ ४ ॥ त्यक्तधर्मणः त्यक्तधर्मायाः । "धर्मादनिच्केवलात्" इत्यनिच् ॥ ५ ॥ लुब्धः अर्थलिप्सुः । किम्पाकं कुत्सितपाकं । विषमिश्रपाकमित्यर्थः । किम्पाकोनाम काकमर्दनामकविषफलविशेषइतिकेचित् । कुब्जानिमित्तं कुब्जाहेतोः । "निमित्तपर्यायप्रयोगेसर्वासांप्रायदर्शनम्" इतिहेतौप्रथमा ॥ ६ ॥ अनियोगे वरप्रदानसमये वरस्यविशेषनिर्देशाभावेसति । नियुक्तेन इदानींभरताभिषेकरूपेरामविवासनरूपेचकैकेय्यानियुक्तेन । अनुचितनियोगेनियुक्तेनेतिवार्थः । जनकोवैदेहः ॥ ७ ॥ इतः अत्रदेशे । राज्ञा जीवनाशंगतः प्राप्तः । सरामः अनाथां पुत्रविरहेण रक्षकान्तररहितां । विधवांमांनजानाति ॥ ८ ॥ तपस्विनी शोचनीया । दुःखमितिक्रियाविशेषणं ।

स० अंबुहीनं अगस्त्यपानकाले ॥ १ ॥ **ति०** एकाग्रा पुत्रराज्यैकाग्रचित्ता ॥ २ ॥ **ति०** आत्मनोदैवतंभर्तारंपरित्यज्य त्यक्तधर्मणः त्यक्तःस्त्रीधर्मोययातादृश्याःकैकेय्याअन्यत्र अन्या । पुत्रराज्येकाजीवितुमिच्छेत् । परिष्वज्येतिपाठे भर्तारंपरिष्वज्य तेनसहभोगान्भुक्त्वा तंकालान्तरेपरित्यज्येतिशेषः ॥ ५ ॥ **ति०** किंपाकः निंबः । कतकस्तु किंपाकः विषभेदः तंकोपादिनाभक्षयन्नात्महत्यादोषंनबुध्यते तद्वदित्यर्थइत्याह । तत्रलुब्धइतिनात्यन्तंसमञ्जसं । धनलोभादिनापरस्यविषभक्षणंकारयन्यथाहत्यादोषंनबुध्यतेइतिवक्तुमुचितं । यत्कैकेय्याराघवाणांकुलंहतं तत्कुब्जानिमित्तं प्रेरकतया । **स०** लुब्धः वंचितः किंपाकं धत्तूरादिफलं । भक्षयन्यथानबुध्यते तथाराजादोषान्नबुध्यतइतिकेचित् । किंपाकः पलाशंवा । तद्भक्षणेक्षणेनोदरशूलेतिभिषजः । "किंपाकोमहाकालपलाशयोः" इतिमेदिनी ॥६॥ **ति०** जीवन्नेवनाशंअदर्शनंगतः । जीवनाशमितोगतइतिपाठे राज्ञोजीवनाशोयद्भाभवतितथा गतइत्यर्थः । **शि०** जीवन्नाशं जीवतां सफलजन्मनामृषीणांनाशोविध्वंसोयस्मिन्देशे तंदेशंइतोगतः । **ती०** यद्वा जीवनाशमितिपाठे जीवनाशं राज्ञइतिशेषः । मांविधवांचरामोनजानातीतिसंबंधः ॥ ८ ॥ **ति०** चारुतपस्विनी भर्तृसेवनादित्याशयः ॥ ९ ॥

[पा०] १ ग. ङ. च. छ. झ. ञ. ट. भूमिपं. २ क. ङ. छ. झ. ट. भर्तारंतु. च. ञ. भर्तारंच. ३ घ. विनियोगेननियुक्तेन. ख. नियोगेननियुक्तेन. ४ छ. झ. ट. जीवन्नाशं. ५ च. ञ. दीना. ङ. छ. झ. ट. चारु.

[1]नदतां भी[2]मघोषाणां निशासु मृगपक्षिणाम् ॥ [3]निशम्य नूनं संत्रस्ता राघवं संश्रयिष्यति ॥ १० ॥
वृद्धश्चैवाऽल्पपुत्रश्च वैदेहीमनुचिन्तयन् ॥ सोपि शोक[4]समाविष्टो [5]ननु त्यक्ष्यति जीवितम् ॥ ११ ॥
साऽहमद्यैव दिष्टान्तं गमिष्यामि पतिव्रता ॥ इदं शरीरमालिङ्ग्य प्रवेक्ष्यामि हुताशनम् ॥ १२ ॥
तां ततः संपरिष्वज्य विलपन्तीं तपस्विनीम् ॥ [6]व्यपनीय सुदुःखार्तां कौसल्यां व्यावहारिकाः ॥१३॥
[7]तैलद्रोण्यामथामात्याः संवेश्य जगतीपतिम् ॥ राज्ञः [8]सर्वाण्यथादिष्टाश्चक्रुः कर्माण्यनन्तरम् ॥१४॥
न तु [9]संकलनं राज्ञो विना पुत्रेण मन्त्रिणः ॥ सर्वज्ञाः कर्तुमीषुस्ते ततो रक्षन्ति भूमिपम् ॥ १५ ॥
तैलद्रोण्यां [10]तु सचिवैः शायितं तं नराधिपम् ॥ हा मृतोऽयमिति ज्ञात्वा स्त्रियस्ताः [11]पर्यदेवयन् ॥१६॥
[12]बाहूनुद्यम्य कृपणा नेत्रप्रस्रवणैर्मुखैः ॥ रुदन्त्यः शोकसंतप्ताः [13]कृपणं पर्यदेवयन् ॥ १७ ॥
हा महाराज रामेण सततं प्रियवादिना ॥ [14]विहीनाः सत्यसंधेन किमर्थं वि[15]जहासि नः ॥ १८ ॥
कैकेय्या [16]दुष्टभावाया राघवेण [17]वियोजिताः ॥ कथं [18]पतिघ्न्या वत्स्यामः समीपे विधवा वयम् ॥१९॥
स हि नाथः [19]सदाऽस्माकं तव च प्रभुरात्मवान् ॥ वनं रामो गतः श्रीमान्विहाय नृपतिश्रियम् ॥२०
त्वया तेन च वीरेण विना व्यसनमोहिताः ॥ कथं वयं निवत्स्यामः कैकेय्या च विदूषिताः ॥२१॥
[20]यया तु राजा रामश्च लक्ष्मणश्च महाबलः ॥ सीतया सह संत्यक्ताः सा कमन्यं न हास्यति ॥२२॥
ता बाष्पेण च संवीताः शोकेन विपुलेन च ॥ [21]व्यवेष्टन्त निरानन्दा राघवस्य [22]वरस्त्रियः ॥ २३ ॥
निशा [23]चन्द्रविहीनेव स्त्रीव भर्तृविवर्जिता ॥ पुरी नाराजतायोध्या [24]हीनो राज्ञा महात्मना ॥ २४ ॥
बाष्पपर्याकुलजना हाहाभूतकुलाङ्गना ॥ शून्यचत्वरवेश्मान्ता न बभ्राज यथापुरम् ॥ २५ ॥

पर्युद्विजिष्यति भयंप्राप्स्यतीत्यर्थः ॥ ९ ॥ नदतां नदत्सु । निशम्य नादमित्यर्थसिद्धं ॥ १० ॥ अल्पपुत्रः दुहितृमात्रपुत्रः । सोपि जनकोपि ॥ ११ ॥ दिष्टान्तं मरणं । पतिव्रता । " आर्तार्तेमुदितेहृष्टाप्रोषितेमलिनाकृशा । मृतेम्रियेतयापत्यौसास्त्रीज्ञेयापतिव्रता" इत्युक्तपातिव्रत्यविशिष्टा ॥ १२ ॥ व्यावहारिकाः व्यवहारेबाह्याभ्यन्तरसकलराजकृत्येनियुक्ताः । " तत्रनियुक्तः " इतिठक् । अमात्याइत्यर्थः । कौसल्यां भर्त्रालिङ्गनाद्व्यपनीय विमोच्य अन्यतोपनीयेत्यर्थः । तैलद्रोण्यां तैलपूरितकटाहे । जगतीपतिं भूपतिं । संनिवेश्य राज्ञोऽनन्तरकर्तव्यानिसर्वाणिकर्माणि दुःखापनोदनादीनिचक्रुः । अपनिन्युरितिपाठे व्यावहारिकाः व्यवहारविदोलौकिकाः अपनिन्युरित्येकंवाक्यं । तैलद्रोण्यामित्यारभ्यवाक्यान्तरं । आदिष्टाः राजकृत्येष्वादिष्टाःअमात्याः । कर्माणि प्रजाशासनादीनिचक्रुः ॥ १३—१४ ॥ संस्कारंकुतोनचक्रुरित्यत्राह—नत्विति । सर्वज्ञाः सर्वधर्मज्ञाः । अतोनधर्मलोपइतिभावः । अनेनगम्यतेतैलमिश्रत्वे शवस्यपर्युषितत्वदोषोनास्तीति । संकलनं संस्कारं ॥ १५ ॥ तैलद्रोण्यांशायितंनृपंज्ञात्वा । तत्रनिवेशकालेराजदर्शनाभावात् । हामृतोयमिति भूयोपिपर्यवारयन्नित्यर्थः ॥ १६ ॥ नेत्राणांप्रस्रवणंवारिप्रवाहोयेषुतथा ॥ १७—२० ॥ विदूषिताः राज्यगर्वात्तिरस्कृताः ॥२१—२४॥ शून्यचत्वरेति संमार्जनानु-

ति० निशम्यमाना नादमितिशेषः ॥ १० ॥ ती० व्यावहारिकाः अन्तःपुराध्यक्षस्त्रियः ॥ १३ ॥ ती० आदिष्टाः आज्ञप्ताः । वसिष्ठादिभिरितिशेषः । शि० राज्ञोमान्याः राजसत्कृताजनाः ॥ १४ ॥ ति० तवप्रभुः तवजीवनस्यप्रभुः ॥ २० ॥

[पा०] १ ञ. नर्दतां. २ क. घोराणां. ३ क. घ. च. ञ. निशम्यनादं. ङ. छ. झ. ट. निशम्यमाना. ४ क. समायुक्तो. ५ च—ट. नूनं. ६ क—ट. व्यपनिन्युः. ७ ङ. च. झ. ञ. ट. द्रोण्यांतदामात्याः. ट. द्रोण्यांतदामान्याः. ८ ग. ब. सर्वाण्यविक्लिष्टंचक्रुः. क. सर्वाण्यथाश्लिष्टाश्चक्रुः. ९ ङ. छ—ट. संकालनं. १० ङ. छ. झ. ट. शायितंतंसचिवैस्तु. ११ ग. घ. पर्यवारयन्. १२ क. ङ. च. छ. झ. ञ. ट. बाहूनुच्छ्रित्य. ग. बाहूनुद्धृत्य. १३ क. ख. करुणं. १४ ग. ज. विहीनः. १५ क. प्रजहासिनः. १६ ख. दुष्टभावेन. १७ च. झ. ञ. विवर्जिताः. १८ ङ. च. छ. झ. ञ. ट. सपत्न्या. १९ ङ. च. छ. झ. ञ. ट. स्वचास्माकं. २० ङ. छ. झ. ट. ययाच. २१ ख. घ. ङ. च. ज—ट. व्यचेष्टन्त. २२ क. ख. वराःस्त्रियः. २३ ख—च. ज—ट. नक्षत्रहीनेव. २४ क. विना.

गते तु शोकात्त्रिदिवं नराधिपे महीतलस्थासु नृपाङ्गनासु च ॥
निवृत्तचारः सहसा गतो रविः [1]प्रवृत्तचारा रजनी ह्युपस्थिता ॥ २६ ॥
ऋते तु पुत्राद्दहनं महीपतेर्न[2] रोचयन्ते सुहृदः समागताः ॥
इतीव तस्मिञ्शयने न्यवेशयन्विचिन्त्य राजानम[3]चिन्त्यदर्शनम् ॥ २७ ॥
गतप्रभा द्यौरिव भास्करं विना व्यपेतनक्षत्रगणेव शर्वरी ॥
पुरी बभासे रहिता महात्मना न[4] चास्रकण्ठाऽऽकुलमार्गचत्वरा ॥ २८ ॥
नराश्च नार्यश्च समेत्य संघशो विगर्हमाणा भरतस्य मातरम् ॥
तदा नगर्यां नरदेवसंक्षये बभूवुरार्ता[5] न च शर्म लेभिरे ॥ २९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे षट्षष्टितमः सर्गः ॥ ६६ ॥

सप्तषष्टितमः सर्गः ॥ ६७ ॥

परेद्युःप्रभातेसभामागतैर्मार्कण्डेयप्रभृतिभिर्वसिष्ठंप्रतिराज्ञःसदसद्भावाभ्यांजनपदादेर्गुणदोषसंभवकथनपूर्वकंराजपुत्रेषु कस्यचिद्राज्येऽभिषेचनप्रार्थना ॥ १ ॥

[6]आक्रन्दितनिरानन्दा सास्रकण्ठज[7]नाकुला ॥ अयोध्यायामवतता सा व्यतीयाय शर्वरी ॥ १ ॥
व्यतीतायां तु शर्वर्यामादित्यस्योदये ततः ॥ समेत्य राजकर्तारः सभामीयुर्द्विजातयः ॥ २ ॥
मार्कण्डेयोथ मौद्गल्यो [8]वामदेवश्च [9]काश्यपः ॥ कात्यायनो गौतमश्च जाबालिश्च महायशाः ॥ ३ ॥
एते द्विजाः सहामात्यैः पृथग्वाचमुदीरयन् ॥ वसिष्ठमेवाभिमुखाः श्रेष्ठं राजपुरोहितम् ॥ ४ ॥
अतीता शर्वरी [10]दुःखं या नो वर्षशतोपमा ॥ अस्मिन्पञ्चत्वमापन्ने पुत्रशोकेन पार्थिवे ॥ ५ ॥

लेपनवल्यादिशून्यचत्वरादियुक्तेतियावत् । यथापुरं यथापूर्वं ॥ २५ ॥ शोकात् पुत्रशोकात् । निवृत्तचारः निवृत्तकिरणप्रचारः । गतइति अस्तमितिशेषः । प्रवृत्तचारा प्रवृत्ततमःप्रचारा ॥ २६ ॥ समागताः सुहृदः बान्धवाः । पुत्राद्दतेमहीपतेर्दहनंनरोचयन्ते । अनेनातिबलपराक्रमयुक्तसत्पुत्रसद्भावेप्यस्मिन्काले दैववशादेकोप्यसन्निहितः तूष्णीमवस्थानमयुक्तं । अतोयेनकेनापिप्रकारेणसंस्कारःकर्तव्यइतिकैश्चिद्यत्नःकृतइतिगम्यते । तस्मिञ्शयने पूर्वोक्ततैलद्रोण्यां ॥ २७ ॥ व्यपेतनक्षत्रगणा चन्द्रादिसकलतेजोहीना । रामादिसकलराजरहितंतस्योपमा । आस्रकण्ठैः कण्ठस्तंभितबाष्पैः । आकुलानिमार्गचत्वराणियस्याःसातथोक्ता ॥ २८—२९ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने षट्षष्टितमः सर्गः ॥ ६६ ॥

अथाराजकदोषवर्णनं—आक्रन्दितनिरानन्देति । आक्रन्दितेनहेतुनानिरानन्दा अवतता दीर्घा दुःखवशादतिदीर्घभूतेत्यर्थः ॥ १ ॥ राजकर्तारः राजाभिषेककार्यकर्तारः ॥ २—४॥ अस्मिन्पार्थिवे पुत्रशोकेनपञ्चत्वमापन्नेसति याशर्वरी नः अस्माकं । वर्षशतोपमा आसीत् । साशर्वरी दुःखंयथातथा अतीता

स० निवृत्तचारः नितरांवृत्तःप्रवृत्तःचारःअपसर्पणंयस्यसतथा । निवृत्तगतिरितिवा । "चारःप्रवालकृक्षेस्याद्गतौबन्धापसर्पयोः" इतिविश्वः ॥ २६ ॥ ति० सुहृदोवसिष्ठाद्याः । पर्युषितदाहनिषेधवचनानितु विप्रविषयाणीतिनविरोधः ॥ २७ ॥ ति० आकण्ठंधारारूपेणप्रवहद्भिरस्रैरुपलक्षिताःकण्ठायेषांतैराकुलाःमार्गाश्चत्वराश्चयस्यांसा । शि० पुरीवभासे नबभासइत्यर्थः । मगधेष्विवोशीनरेषुभवाइत्यादाविवनञर्थलाभः ॥ २८ ॥ इतिषट्षष्टितमस्सर्गः ॥ ६६ ॥

स० सास्रकण्ठजनैराविला आकुला । अवतता दुःखाद्भूयसीवविद्यमाना ॥ १ ॥

[पा०] १ घ. प्रवृत्ततारा. २ ङ. झ. ट. नीरोचयंस्ते. ३ क. ख. निरीक्ष्यराजानमतीतदर्शनं. ४ झ. ट. कण्ठास्र. ५ घ. ज. रार्ताश्चनशर्म. ६ ङ. छ. ज. झ. ट. आक्रन्दिता. ७ ङ. छ. ट. ठ. जनाविला. ८ क. वामदेवोथ. ९ झ. कश्यपः. १० क. दुःखा.

[1]स्वर्गतश्च महाराजो रामश्चारण्यमाश्रितः ॥ लक्ष्मणश्चापि तेजस्वी रामेणैव गतः सह ॥ ६ ॥
उभौ भरतशत्रुघ्नौ कैकयेषु परंतपौ ॥ पुरे राजगृहे रम्ये मातामहनिवेशने ॥ ७ ॥
इक्ष्वाकूणामिहाद्यैव कश्चिद्राजा विधीयताम् ॥ [2]अराजकं हि [3]नो राष्ट्रं [4]न विनाशमवाप्नुयात् ॥ ८ ॥
नाराजके जनपदे विद्युन्माली महास्वनः ॥ अभिवर्षति पर्जन्यो महीं दिव्येन वारिणा ॥ ९ ॥
नाराजके जनपदे बीजमुष्टिः प्रकीर्यते ॥ नाराजके पितुः पुत्रो भार्या वा वर्तते वशे ॥ १० ॥
[5]नाराजके धनं चास्ति नास्ति भार्याऽप्यराजके ॥ इदमत्याहितं चान्यत्कुतः [6]सत्यमराजके ॥ ११ ॥
नाराजके जनपदे कारयन्ति सभां नराः ॥ उद्यानानि च रम्याणि हृष्टाः पुण्यगृहाणि च ॥ १२ ॥
नाराजके जनपदे यज्ञशीला द्विजातयः ॥ [7]सत्राण्यन्वासते दान्ता ब्राह्मणाः संशितव्रताः ॥ १३ ॥
नाराजके जनपदे महायज्ञेषु यज्वनः ॥ ब्राह्मणा [8]वसुसंपन्ना विसृजन्त्याप्तदक्षिणाः ॥ १४ ॥
नाराजके जनपदे [9]प्रभूतनटनर्तकाः ॥ उत्सवाश्च समाजाश्च वर्धन्ते [10]राष्ट्रवर्धनाः ॥ १५ ॥

॥ ५—६ ॥ राजगृहे राजगृहनामनिपुरे । वर्तेतेइतिशेषः ॥ ७ ॥ इक्ष्वाकूणामितिनिर्धारणेषष्ठी । रामादीनांचतुर्णांमध्येइत्यर्थः । अद्यैवराजाविधानेदोषः—अराजकंहीति ॥ ८ ॥ अराजकत्वस्यविनाशहेतुत्वंप्रपञ्चयति—नाराजकइत्यादिना । विद्युन्मालीत्यादिविशेषणैर्महावर्षोदुर्लभइतिभावः । दिव्येनेत्यनेन शिलावर्षस्तुभविष्यतीतिभावः ॥ ९ ॥ बीजमुष्टिः नप्रकीर्यते फललाभनिश्चयाभावादितिभावः । भार्या वशेनवर्तते व्यभिचारेशिक्षकाभावादितिभावः ॥१०॥ धनंनास्ति चोरभयादितिभावः । भार्यानास्ति बन्धुनिग्रहादितिभावः । इदं वक्ष्यमाणं । अन्यत् पूर्वोक्तभयादन्यत् । अत्याहितं महाभीतिरस्ति । "अत्याहितंमहाभीतिः" इत्यमरः । तदेवाह—कुतइति । सत्यं क्रयविक्रयादिलक्षणं ॥ ११ ॥ सभांनकारयन्ति मनस्स्वास्थ्याभावात् । उद्यानानिनकारयन्ति छेदनभयात् । पुण्यगृहाणि देवतायतनादीनि नकारयन्ति दुर्गनिर्माणभयादितिभावः ॥ १२ ॥ ब्रह्म वेदः तदध्येतारोब्राह्मणाः । "तदधीतेतद्वेद" इत्यण् । सत्राणि महायज्ञान् यत्रसर्वेयजमानाःसर्वेऋत्विजः । नान्वासते नानुतिष्ठन्ति । विघ्नभयात् ॥ १३ ॥ यज्वनः यज्वानः । वसुसंपन्नाअपि धनसंपन्नाअपि । आप्तदक्षिणाः भूरिदक्षिणाः । नविसृजन्ति नंदिशन्ति । आढ्यत्वव्यञ्जनेनदण्डभयादितिभावः ॥ १४ ॥ नटाः नाट्याभिनयसमर्थाः । नर्तकाः नर्तनमात्रसमर्थाः । प्रभूताः बहुलाः नटनर्तकायेषुतेतथोक्ताः । उत्सवाः देवतोत्सवाः । समाजाः तीर्थयात्राः ।

स० पृथग्वाचं भरतानयनाद्युपयुक्तां । ति० केकयेषु तदाख्यदेशेषु । अवान्तरदेशापेक्षयाबहुवचनमितिकतकः । वस्तुतोऽङ्गाइत्यादिवद्बहुवचनान्तएवजनपदवाचीत्यन्ये । स० राजगृहे लुप्तोपमा । दशरथगृहइव ॥ ७ ॥ शि० इहअस्यामयोध्यायां इक्ष्वाकूणांमध्येकश्चिद्राजा रक्षकत्वेनराजसदृशः । ति० विपक्षेबाधकमाह—अराजकंहीति । हि यतः । अराजकंनोराष्ट्रं विनाशमवाप्नुयात् । अतः कश्चिद्राजाविधीयतां । कतक० "राजकंसद्धिराष्ट्रंनोनाशंनावाप्नुयाद्यथा" इतिपाठः । नः अस्माकं राष्ट्रं राजकं राजयुतंसत् । नाशंनाप्नुयाद्यथा तथाकश्चिद्राजाविधीयतामित्यन्वयः । हिर्वाक्यालङ्कारे ॥ ८ ॥ स० विद्युन्माली मौल्याद्यन्तर्गतशिखादिलादिनिः ॥ ९ ॥ शि० बीजमुष्टिः बीजयुक्तकर्षकबद्धकरः । नप्रकीर्यते नमुच्यते । किंचमुष्टेर्बीजंबीजमुष्टिः । राजदन्तादित्वान्मुष्टेःपरत्वं । नप्रकीर्यते नोप्यते । भार्याच पत्युरितिशेषः । ति० बीजमुष्टिर्नप्रकीर्यते बीजानामारोपो नक्रियते फलकालेलुण्टाकशङ्कया ॥ १० ॥ स० भार्यानास्ति विटाद्युपद्रवादितिभावः । ती० अराजकेसति अमार्गवर्तिनांन कुत्रापिभयशङ्केतिभावः ॥ ११ ॥ ती० पुण्यगृहाणिपुण्यसंपादकानि सत्रगृहाणीतियावत् । मठादीनिवा । ति० सभांनकारयन्ति न्यायविचारायेतिशेषः ॥ १२ ॥ शि० आप्तदक्षिणाः आप्ताःविधिप्राप्ताःशास्त्रोक्ताइत्यर्थः । दक्षिणाः । कर्मधारयः । वि० वसुसंपूर्णाः बहुधनाः । आप्तदक्षिणाः शास्त्रेणयथाप्राप्तदक्षिणाः । यज्वनः ऋत्विजःप्रति नविसृजन्ति नदिशन्ति । आढ्यत्वव्यञ्जनेन दण्डभयादितिभावः ॥ १४ ॥

[पा०] १ ङ. च. झ. ञ. ट. स्वर्गस्थश्च. २ क. ञ. अनायकं. ३ ग. घ. ज. नोराज्यं. च. ञ. राष्ट्रंनो. ४ ग. ङ. छ. झ. ञ. ट. विनाशंसमवाप्नुयात्. ५ ख. घ. ङ. छ—ट. अराजकेधनंनास्ति. ६ ग. घ. ज. सौख्यमराजके. ७ च. ञ. सत्राण्युपासते. ८ क—ट. संपूर्णा. ९ ङ. च. छ. झ. ञ. प्रहृष्टनट. १० घ. दुष्प्रवर्धनाः.

नाराजके जनपदे सिद्धार्था [1]व्यवहारिणः ॥ कथाभि[2]रनुरज्यन्ते कथाशीलाः कथाप्रियैः ॥ १६ ॥
नाराजके जनपदे [3]उद्यानानि समागताः ॥ सायाह्ने क्रीडितुं यान्ति कुमार्यो हेमभूषिताः ॥ १७ ॥
[4]नाराजके जनपदे वाहनैः शीघ्रगामिभिः ॥ नरा निर्यान्त्यरण्यानि नारीभिः सह कामिनः ॥१८॥
नाराजके जनपदे धनवन्तः सुरक्षिताः ॥ शेरते विवृतद्वाराः कृषिगोरक्षजीविनः ॥ १९ ॥
नाराजके जनपदे बद्धघण्टा विषाणिनः ॥ [5]अटन्ति राजमार्गेषु कुञ्जराः [6]षष्टिहायनाः ॥ २० ॥
नाराजके जनपदे शरान्सँततमस्यताम् ॥ श्रूयते तलनिर्घोष इष्वस्त्राणामुपासने ॥ २१ ॥
नाराजके जनपदे वणिजो दूरगामिनः ॥ गच्छन्ति [8]क्षेममध्वानं बहुपण्यसमाचिताः ॥ २२ ॥
नाराजके जनपदे चरत्येकचरो वशी ॥ भावयन्नात्मनात्मानं यत्र सायंगृहो मुनिः ॥ २३ ॥
नाराजके जनपदे योगक्षेमं प्रवर्तते ॥ न चाप्यराजके सेना शत्रून्विषहते युधि ॥ २४ ॥
नाराजके जनपदे हृष्टैः परमवाजिभिः ॥ नराः संयान्ति सहसा रथैश्च [11]परिमण्डिताः ॥ २५ ॥
नाराजके जनपदे नराः शास्त्रविशारदाः ॥ [12]संवदन्तोऽवतिष्ठन्ते वनेषूपवनेषु च ॥ २६ ॥
नाराजके जनपदे माल्यमोदकदक्षिणाः ॥ देवताभ्यर्चनार्थाय कल्प्यन्ते नियतैर्जनैः ॥ २७ ॥

एतदुभयाभावेराष्ट्रहानिरित्यभिप्रायेणाह—राष्ट्रवर्धनाइति ॥ १५ ॥ व्यवहारिणः कमप्यर्थमुद्दिश्यान्योन्यंविवदमानाः । सिद्धार्थाः [illegible]जनाः । नभवन्ति निरूपणनियमनकर्तुरभावादुत्कोचप्रायत्वाच्चेतिभावः । यद्वा व्यवहारिणः क्रयविक्रयरूपेणव्यापारेणजीवन्तः । कथाशीलाः इतिहासपुराणादिकथावदनशीलाः । कथाप्रियैः कथासुतत्परैःश्रोतृभिः । कथाभिःहेतुभिः नानुरज्यन्ते अनुरक्तानक्रियन्ते । श्रोतृणांस्वास्थ्याभावादितिभावः । यद्वा कथाशीलाः वावदूकाः कथाभिः वादजल्पवितण्डाभिः । कथाप्रियैः सामाजिकैःसह । नानुरज्यन्ते नतुष्यन्ति । तत्पारितोषिकादिप्रदराजाभावात् ॥ १६ ॥ समागताः संघीभूताः । नयान्ति पुष्पापचयाद्यर्थंसखीभिःसहनयान्ति । चोरभयादितिभावः ॥ १७ ॥ शीघ्रगामिभिर्वाहनैः रथैरित्यर्थः । ननिर्यान्ति परिभवशङ्कयेतिभावः ॥ १८ ॥ विवृतद्वारानशेरते किन्तुबद्धकपाटाएव ॥ १९ ॥ विषाणिनः प्रशस्तदन्ताः । षष्टिहायनाः षष्टिवर्षाः ॥२०॥ अस्यतां क्षिपतां । उपासने अभ्यासे । "स्यादुपासनमभ्यासः" इत्यमरः । तलनिर्घोषः ज्याकरतलनिर्घोषः ॥ २१ ॥ क्षेमं क्षेमावहं । बहुपण्यैःसमाचिताःसमृद्धाः । यद्वा पण्यानांक्रय्यद्रव्याणां समाचिताःदशभाराः । "आचितोदशभारःस्यात्" इत्यमरः । बहवःपण्यसमाचिताःयेषांतेतथोक्ताः ॥ २२ ॥ एकोऽसहायश्चरतीत्येकचरः । वशी जितेन्द्रियः । आत्मना अन्तःकरणेन । आत्मानं परमात्मानं । भावयन् चिन्तयन् । यत्रसायंगृहः यस्मिन्प्रदेशेसायंकालोभवति तत्रगृहंनिवासोयस्यतथासन्नचरति । अन्नप्रदात्रभावादितिभावः ॥ २३ ॥ योगक्षेमं । अलब्धलाभोयोगः लब्धस्यपरिपालनंक्षेमः योगश्चक्षेमश्चयोगक्षेमं । द्वन्द्वैकवद्भावः । विषहते जयति ॥२४॥ परिमण्डिताः भूषिताः ॥२५॥ संवदन्तः व्याकुर्वन्तः । वनेषु मुनीनामावासभूतवनेषु ॥ २६ ॥ कल्प्यन्ते

शि० असिद्धार्थाः अनिष्पन्नप्रयोजनास्सन्तः ॥ १६ ॥ स० कृषिगोरक्षयोस्समाहारःकृषिगोरक्षंतेनजीवन्तीतितथा ॥ १९ ॥ ती० एकचरः यतिः । "अष्टौमासएकाकीयतिश्चरेत्" इतिश्रुतेः ॥२३॥ शि० योगक्षेमः योगेनसहितःक्षेमः नप्रवर्तते ॥ २४ ॥ ति० परिमण्डितैरितिपाठान्तरं ॥ २५ ॥ ति० संवदन्तोपतिष्ठन्ते संवदन्तःउपतिष्ठन्ते । [illegible]स्त्वार्षः । शि० संवदन्तः स्वस्वगृहीतपक्षस्थापनपूर्वकंपरपक्षंनिराकुर्वन्तःसन्तः । नवशिष्यन्ते नशोभिष्यन्ते ॥ २६ ॥

[पा०] १ ख. व्यावहारिकाः. २ ङ. च. छ. झ. ञ. ट. रभिरज्यन्ते. ख. रनुरज्यन्तः. ३ ङ. झ. ञ. तूद्यानानि. ४ १८—१९ तमयोरनयोःश्लोकयोः पौर्वापर्यं झ. पाठेदृश्यते. ५ ख. चरन्ति. ६ ग. घ. ज. षाष्टिहायनाः. ७ क. ख. ग. ङ. च. झ. ञ. न्संततं. ८ ग. दूरमध्वानं. ९ ख. ङ. छ. झ. ट. योगक्षेमः. १० क. प्रचक्षते. ११ क. ख. ङ. च. छ. झ. ञ. ट. प्रतिमण्डिताः. १२ ख. ङ. च. ज. झ. ञ. संवदन्तोपातिष्ठन्ते. ट. संवदन्तोवशिष्यन्ते.

नाराजके जनपदे चन्दनागरुरूषिता[1]: ॥ राजपुत्रा विराजन्ते वसन्त इव शाखिनः ॥ २८ ॥
यथा ह्यनुदका नद्यो यथा वाऽप्यतृणं वनम् ॥ अगोपाला यथा गावस्तथा राष्ट्रमराजकम् ॥ २९ ॥
ध्वजो रथस्य प्रज्ञानं धूमो ज्ञानं विभावसोः ॥ तेषां यो नो ध्वजो राजा स देवत्वमितो गतः ॥३०॥
नाराजके जनपदे स्वकं भवति कस्य चित् ॥ मत्स्या इव नरा[2] नित्यं भक्षयन्ति परस्परम् ॥ ३१ ॥
[3]ये हि संभिन्नमर्यादा नास्तिकाश्छिन्नसंशयाः ॥ तेऽपि भावाय कल्पन्ते राजदण्डनिपीडिताः ॥३२
यथा दृष्टिः शरीरस्य नित्यमेव प्रवर्तते ॥ तथा नरेन्द्रो राष्ट्रस्य प्रभवः सत्यधर्मयोः ॥ ३३ ॥
राजा सत्यं च धर्मश्च राजा कुलवतां कुलम् ॥ राजा माता पिता चैव राजा हितकरो नृणाम् ॥३४॥
यमो वैश्रवणः शक्रो वरुणश्च महाबलः ॥ विशेष्यन्ते नरेन्द्रेण वृत्तेन महता ततः ॥ ३५ ॥
अहो तम इवेदं स्यान्न प्रज्ञायेत किञ्चन ॥ राजा चेन्न भवेल्लोके विभजन्[4]साध्वसाधुनी ॥ ३६ ॥
जीवत्यपि महाराजे तवैव वचनं वयम् ॥ नातिक्रमामहे सर्वे वेलां [5]प्राप्येव [6]सागरः ॥ ३७ ॥
स नः समीक्ष्य द्विजवर्य वृत्तं नृपं विना [7]राज्यमरण्यभूतम् ॥

संपाद्यन्ते ॥ २७ ॥ रूषिताः लिप्ताः ॥ २८ ॥ तथाराष्ट्रमिति नशोभतइतिशेषः ॥ २९ ॥ ध्वजोरथस्येत्यादिदृष्टान्तार्थवचः । प्रज्ञानं ज्ञापकं । ज्ञानं लिङ्गं । ध्वजः प्रकाशकः । इतः अस्माल्लोकात्प्रेत्य देवत्वंगतइत्यर्थः ॥ ३०—३१ ॥ संभिन्नमर्यादाः उल्लङ्घितस्वस्वजातिवर्णाश्रममर्यादाः । अतएवपूर्वं राजदण्डनिपीडिताः ये नास्तिकास्ते इदानीं छिन्नसंशयाः राजदण्डशङ्कारहिताःसन्तः । भावाय सद्भावाय प्रभावायवा । कल्पन्ते समस्तदैष्टिकपीडासमर्थाभवन्तीत्यर्थः ॥ ३२ ॥ दृष्टिःशरीरस्ययथाप्रवर्तते हितसाधकत्वेनाहितनिवारकत्वेनचसदैवप्रवर्तते । सत्यधर्मयोःप्रभवः कारणं । राजापिराष्ट्रस्यतथाप्रवर्तत इत्यर्थः ॥ ३३ ॥ कुलवतां क्षेत्रबीजशुद्धिमतां । कुलं कुलाचारप्रवर्तकः ॥ ३४ ॥ नरेन्द्रेण महतावृत्तेन सर्वप्रकाररक्षणरूपचरित्रेण । विशेष्यन्ते अधःक्रियन्ते । यकिगुणश्छान्दसः । यमस्यदण्डनमात्रं कुबेरस्यधनदत्वमेव इन्द्रस्यपालनमेव । वरुणस्यसदाचारनियमनमेव । एतद्गुणचतुष्टययुक्तत्वान्नरेन्द्रेणयमादयोव्यावर्त्यन्तइत्यर्थः । यद्वा यतोमहतावृत्तेनयुक्तः ततोहेतोः एकैकदिग्वर्तिप्रजारक्षकयमादिभ्यः । विशेष्यते अतिशीयते ॥ ३५ ॥ साध्वसाधुनी लोके विभजन् व्यवस्थापयन् राजानस्याच्चेत् । इदं अराजकत्वं । अहोतमइवस्यात् । यतःकिंचन कर्तव्याकर्तव्यंनप्रज्ञायेत । यद्वा साध्वसाधुनीविभजन्राजा लोकेनभवेच्चेत् इदं जगत् । किंचिदपि । नप्रज्ञायेत नप्रतीयेत । किंतु तमइवस्यात् सूर्याभावइवतमोरूपमेवस्यात् ॥ ३६ ॥ महाराजेजीवत्यपि वयंतववचनं नातिक्रमामहे । इदानींकिमुतेतिभावः ॥ ३७ ॥ हेद्विजवर्य वसिष्ठ । सः त्वं । नः अस्माकं । वृत्तं अराजकत्वप्रमुषितंसर्वकृत्यं । समीक्ष्य नृपंविनाराज्य-

स० वसन्तइवेति । वसन्तादिभागग्रहेऽन्वयः । वसन्तान्तिमग्रहणेव्यतिरेकः । "वसन्तेसर्वसस्यानांजायतेपत्रशातनम् ।" वसन्तकालेयतस्सरागास्तरवः" इत्युभयत्रमानात् ॥ २८ ॥ स० प्रज्ञायतेऽनेनेतिप्रज्ञानं ज्ञापकं । ध्वजः अस्मत्स्वरूपप्रकाशकः । देवत्वं कर्मजदेवत्वं ॥ ३० ॥ ति० स्वकं जीवनमित्यर्थः । स० स्वकं स्वकीयं ॥ ३१ ॥ ती० एवमराजकेदोषानभिधायसराजकेगुणानाह—येत्विति । संभिन्नमर्यादाःत्यक्तमर्यादाः । छिन्नसंशयाःकृत्याकृत्यविचारशून्याः । राजदण्डनिपीडिताःभावाय साधुत्वायकल्पन्तेयोग्याभवन्ति । नृपेसतीतिशेषः ॥ ३२ ॥ शि० किंच महतावृत्तेनयुक्तेननरेन्द्रेणैवयमादयोविशिष्यन्ते ऐश्वर्यविशिष्टाभवन्तीत्यर्थः । एतेन महतांराज्ञांधर्मत्यागेदेवानांह्रासएवेतिसूचितम् ॥३५॥ ति० सूर्याभावे तमइवतमसीव । नकिंचन कर्तव्याकर्तव्येप्रज्ञायेत प्रतीयेत । तमइतिप्रथमा सप्तम्यर्थे । अकारान्ततमशब्दस्यतमेइतिसप्तम्यन्तंवा । "तमस्यपितमंतथा" इतिद्विरूपकोशात् ॥ ३६ ॥ ति० राजनिजीवत्यपितववचनंवयंनातिक्रमाम । अतइदानीमपित्वमेवगतिरितिवसिष्ठंप्रतिसर्वेषामुक्तिः ॥ ३७ ॥ इतिसप्तषष्टितमस्सर्गः ॥ ६७ ॥

[पा०] १ च. ञ. भूषिताः. २ ङ. घ. छ. झ. ञ. ट. जना. ३ च. ञ. येतु. ख. येच. ४ ग. न्साध्वसाध्विति. ५ घ. प्रत्येव. ६ क. ख. सागराः. ७ ख. ङ. च. छ. झ. ञ. ट. राष्ट्रं.

कुमारमिक्ष्वाकुसुतं [1]वदान्यं त्वमेव राजानमि[2]हाभिषिञ्च ॥ ३८ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे सप्तषष्टितमः सर्गः ॥ ६७ ॥

अष्टषष्टितमः सर्गः ॥ ६८ ॥

वसिष्ठेनमार्कण्डेयाद्यनुमत्याभरतशत्रुघ्नानयनायदूतानांप्रेषणम् ॥ १ ॥ दूतानांमार्गगमनप्रकारनिरूपणम् ॥ २ ॥ दूतैराश्वौकेकयनगरप्रवेशः ॥ ३ ॥

[3]तेषां हि वचनं श्रुत्वा वसिष्ठः प्रत्युवाच ह ॥ मित्रामा[4]त्यगणान्सर्वान्ब्राह्मणांस्तानिदं वचः ॥ १ ॥
यदसौ मातुलकुले [5]पुरे राजगृहे सुखी ॥ भरतो वसति भ्रात्रा शत्रुघ्नेन [6]समन्वितः ॥ २ ॥
[7]तच्छीघ्रं जवना दूता गच्छन्तु [8]त्वरितैर्हयैः ॥ आनेतुं भ्रातरौ वीरौ किं [9]समीक्षामहे वयम् ॥ ३ ॥
गच्छन्त्विति ततः सर्वे वसिष्ठं वाक्यमब्रुवन् ॥ [10]तेषां तद्वचनं श्रुत्वा वसिष्ठो वाक्यमब्रवीत् ॥४॥
एहि सिद्धार्थ विजय जयन्ताशोक[11]नन्दन ॥ श्रूयतामितिकर्तव्यं सर्वानेव ब्रवीमि वः ॥ ५ ॥
पुरं राजगृहं गत्वा शीघ्रं शीघ्रजवैर्हयैः ॥ त्यक्तशोकैरिदं वाच्यः शासनाद्भरतो मम ॥ ६ ॥
[12]पुरोहितस्त्वां कुशलं प्राह सर्वे च मन्त्रिणः ॥ त्वरमाणश्च निर्याहि कृत्यमात्ययिकं त्वया ॥ ७ ॥
मा चास्मै [13]प्रोषितं रामं मा चास्मै पितरं मृतम् ॥ भवन्तः शंसिषुर्गत्वा [14]राघवाणामिमं क्षयम् ॥८॥

मरण्यभूतंस्यादित्यपिसमीक्ष्य इक्ष्वाकुसुतं दशरथतनयं । अभिषिञ्चेतियोजना ॥ ३८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने सप्तषष्टितमःसर्गः ॥ ६७ ॥

मित्रामात्यगणान् मित्रभूतामात्यगणान्सुमन्त्रादीन् । ब्राह्मणान् मार्कण्डेयादीन् ॥ १ ॥ राजगृहे राजगृहाख्येपुरे । यद्यस्मात्वसति तत्तस्मात् । जवनाः वेगवन्तः । दूता गच्छन्त्वितिसंबन्धः । किंसमीक्षामहे किंविचारयामः । राज्ञैवभरतायराज्यस्यदत्तत्वादिति भावः ॥ २—३ ॥ तथैवामात्याअनुजानन्तिगच्छन्त्विति ॥ ४ ॥ सिद्धार्थविजयजयन्ताशोकाख्यामन्त्रिसमाननामानोदूताः नतुमन्त्रिणः । मन्त्रिव्यतिरिक्तनन्दनशब्दसहपाठात् । "पुरोहितस्त्वांकुशलंप्राहसर्वेचमन्त्रिणः" इत्युपरिवक्ष्यमाणत्वाच्च । इतिकर्तव्यं कार्यकलापं ॥ ५ ॥ त्यक्तशोकैः भवद्भिरितिशेषः । इदं वक्ष्यमाणंवचनं । ममशासनात् भरतोवाच्यः ॥ ६ ॥ मन्त्रिणः प्राहुरितिविपरिणामः । अत्ययः कालातिपातः तंप्राप्तमात्ययिकं । "विनयादिभ्यष्ठक्" इतिठक् । तादृशंकृत्यमस्ति अतस्त्वरमाणोनिर्याहीतिवाच्यइत्यनुकर्षः । यद्वा अत्ययःकृच्छ्रं तत्रभवमात्ययिकं । "अत्ययोतिक्रमेकृच्छ्रे" इत्यमरः । कृत्यं । अस्तीतिशेषः ॥ ७ ॥ माशंसिषुरित्यन्वयः । राघवाणां क्षयं अपचयं तेजःक्षयमित्यर्थः । "निल-

---

ति० यद्यस्माद्राज्ञाकैकेयीवचनाद्दत्तराज्योभरतोमातुलकुलेवसति ॥ २ ॥ शि० शीघ्रंयथास्यात्तथाजवनाः शीघ्रगमनकर्तारोदूताः भ्रातरावानेतुंहयैस्त्वरितंगच्छन्तु । अतःपरंउत्कृष्टंवयंकिंसमीक्षामहे अतःपरमुत्कृष्टंनास्त्येवेतितात्पर्यम् ॥ ३ ॥ शि० सिद्धार्थादयोमन्त्रिनामानोदूताः नतुमन्त्रिणः नन्दनसाहचर्यादित्येके । यदिचसिद्धार्थादिसाहचर्येणनन्दनोपिमन्त्रीतिव्याख्यायते तदानन्दनइतिकस्यचिन्मन्त्रिणोनामान्तरमितिबोध्यम् । मन्त्रिभिर्दूतकर्मकथंक्रियतइतितुनभ्रमितव्यम् । अतिनिपुणानांसर्वकर्मस्वधिकारात् ॥ ५ ॥ ति० अत्ययं असह्यकालातिक्रमं तदेवात्ययिकं । अतिक्रमेएवीत्यव्ययं । कालातिक्रमेएविनश्यतीतिवाच्योर्थः । त्वदागमनैकाधीनप्रयोजनमस्तीतिया-

विनयादित्वाट्ठक् । तादृशंकृत्यमस्ति । स० त्वया आत्ययिकं अतिक्रमणयोग्यंकृत्यमस्ति । त्वदागमनैकाधीनप्रयोजनमस्तीतियावत् ॥ ७ ॥ ति० इतः स्त्रीरूपान्मूलात् क्षयंमाशंसिषुः माकथयन्तु । स० शंसिषुरिति "माङ्लिलुङ्" इतिलुङ् सर्वलकारापवादः ।

[पा०] १ ङ. च. छ. झ. ञ. ट. तथान्यं. २ ङ. छ. ज. झ. ट. मिहाभिषेचय. ३ क. ख. ग. ङ. च. छ. झ. ञ. ट. तेषांतद्वचनं. ४ ग. घ. ङ. च. ज. ञ. ट. जनान्. ५ ङ. छ. ज. झ. दत्तराज्यःपरंसुखी. ६ ङ. छ. झ. ट. मुदान्वितः. ७ क. च. ञ. तौशीघ्रं. ८ ग. ङ. छ. झ. ट. त्वरितंहयैः. ९ ट. समीक्ष्यामहेपरं. १० क. ग. च. ञ. तेषांतुवचनं. ११ क. घ. च. ञ. नाशन. १२ ग. पुरोहितस्त्वा. १३ ख. प्रेषितं. १४ ङ. झ. ञ. ट. राघवाणामितः.

कौशेयानि च वस्त्राणि भूषणानि वराणि च ॥ क्षिप्रमादाय राज्ञश्च भरतस्य च गच्छत ॥ ९ ॥
दत्तपथ्यशना दूता जग्मुः स्वं स्वं निवेशनम् ॥ केकयांस्ते गमिष्यन्तो हयानारुह्य संमतान् ॥ १० ॥
ततः प्रास्थानिकं कृत्वा कार्यशेषमनन्तरम् ॥ वसिष्ठेनाभ्यनुज्ञाता [1]दूताः संत्वरिता ययुः ॥ ११ ॥
न्यन्तेनापरतालस्य प्रलम्बस्योत्तरं प्रति ॥ निषेवमाणास्ते जग्मुर्नदीं मध्येन मालिनीम् ॥ १२ ॥
ते [3]हस्तिनपुरे गङ्गां तीर्त्वा प्रत्यङ्मुखा ययुः ॥ पाञ्चालदेशमासाद्य मध्येन कुरुजाङ्गलम् ॥ १३ ॥
सरांसि [4]च सुपूर्णानि नदीश्च विमलोदकाः ॥ [5]निरीक्षमाणास्ते जग्मुर्दूताः कार्यवशाद्द्रुतम् ॥ १४ ॥
ते प्रसन्नोदकां दिव्यां नानाविहगसेविताम् ॥ [6]उपातिजग्मुर्वेगेन शरदण्डां [7]जनाकुलाम् ॥ १५ ॥
निकूलवृक्षमासाद्य दिव्यं सत्योपयाचनम् ॥ [8]अभिगम्याभिवाद्यं तं कुलिङ्गां प्राविशन्पुरीम् ॥ १६ ॥
अभिकालं ततः प्राप्य ते [9]बोधिभवनाच्युताम् ॥ पितृपैतामहीं पुण्यां तेरुरिक्षुमतीं नदीम् ॥ १७ ॥
अवेक्ष्याञ्जलिपानांश्च ब्राह्मणान्वेदपारगान् ॥ ययुर्मध्येन बाह्लीकान्सुदामानं च पर्वतम् ॥ १८ ॥

यापचयौक्षयौ " इत्यमरः ॥ ८ ॥ कौशेयानि पट्टवस्त्रविशेषान् । राज्ञः केकयराजस्य ॥ ९ ॥ दत्तपथ्यशनाः दत्तमार्गाशनहेतुभूतद्रव्याइत्यर्थः । स्वनिवेशगमनं स्त्रीप्रभृतीनांस्वप्रयाणंकथयितुं । संमतान् जवनत्वेनाध्वश्रमसहत्वेनचसंमतान् ॥ १० ॥ प्रास्थानिकं प्रस्थानप्रयोजनकं । अनन्तरंकार्यशेषं पाथेयादिकंचकृत्वा । पुनर्वसिष्ठेनाभ्यनुज्ञानं स्वविलम्बस्याल्पत्वंद्योतयितुं ॥ ११ ॥ अपरतालस्य अपरतालोनामगिरिः तस्य । न्यन्तेन नितरामन्तेन चरमप्रदेशेनेत्यर्थः । " अन्तोजघन्यंचरमं " इत्यमरः । प्रलम्बस्य प्रलम्बाख्यगिरेः । उत्तरंप्रति उत्तरभागमुद्दिश्य । तयोर्मध्येनमालिनींनदींनिषेवमाणाजग्मुः अपरतालःपुरस्ताद्दक्षिणोत्तरायतः प्रलम्बःपश्चाद्भागे दक्षिणोत्तरायतःपूर्वापरायतश्चेतिपर्वतसंनिवेशः । प्रथममयोध्यायाःपश्चिमाभिमुखंनिर्गच्छन्तः । तयोर्मध्येनउदङ्मुखाःकियन्तमध्वानंमालिनीतीरमार्गेणगत्वा ततःप्रलम्बस्योत्तरभागेनपश्चिमाभिमुखाजग्मुरित्यर्थः ॥ १२ ॥ तेहस्तिनपुरइत्यादिश्लोकद्वयमेकंवाक्यं । हस्तिनपुरे हस्तिनपुरसमीपे । गङ्गांतीर्त्वाप्रत्यङ्मुखाःसन्तः जग्मुः । तेदूताः मध्येनकुरुजाङ्गलं कुरुजाङ्गलस्यमध्यमार्गेण । " एनपाद्वितीया " इतिद्वितीया । कुरुदेशैकदेशोजाङ्गलः हस्तिनपुरस्य कुरुदेशस्थत्वात्तदन्तर्गतजाङ्गलाख्यदेशंमध्येनपाञ्चालदेशमासाद्य तत्रदेशे सरःप्रभृतीन्निरीक्षमाणाजग्मुः ॥ १३—१४ ॥ शरदण्डां शरदण्डाख्यांनदीं । उपातिजग्मुः उपगम्यातीत्य जग्मुः ॥ १५ ॥ निकूलवृक्षं शरदण्डायाः पश्चिमकूलस्थंपुण्यवृक्षं । दिव्यं देवाधिष्ठानवत् । सत्यमुपयाचनं प्रार्थनं यस्मादित्यन्वर्थनाम सत्योपयाचनमिति अर्थितार्थप्रदमित्यर्थः । अभिवाद्यं सर्वनमस्कार्यं । अभिगम्य प्रदक्षिणीकृत्य । कुलिङ्गांपुरींप्राविशन् ॥ १६ ॥ अभिकालं तदाख्यग्रामं । कुलिङ्गासाहचर्यात् बोधिभवनात् तदाख्यात्पर्वतात् नदीमूलत्वोक्तेः । पितृपैतामहीं दशरथवंश्यानुभूतां । तत्तीरप्रदेशग्रामाइक्ष्वाकूणामितिभावः ॥ १७ ॥ अञ्जलिपानान् अञ्जलिप्रमाणजलमात्राहारान् । ब्राह्मणान् इक्षुमतीतीरवासिनः । मध्येनबाह्लीकान् बाह्लीकदेशानांमध्येन । "एनपाद्वितीया" । सुदामानं सुदामाख्यं ॥ १८ ॥

अतएवाउभावः । इतःकैकेयीनिमित्तंक्षयं अनर्थं । राघवाणांक्षयं विलापं । "विलापापचयौक्षयौ" इतिनिघण्टुः ॥ ८ ॥ ति० अपरतालस्य तदाख्यदेशस्य । न्यन्तेन पश्चिमभागेन ॥ १२ ॥ ति० अभिकालतेजोभिभवनौ ग्रामौ । ततोयोधिवनच्युताइति पाठान्तरं । स० पितृपैतामहीं पितृपितामहजुष्टां । मध्यवृद्धिरार्षेयी ॥ १७ ॥ ति० अञ्जलिनापिबन्तितादृशान्वेदपारगान्ब्राह्मणान्दृष्ट्वेत्यनेन बाह्लीकदेशस्यात्यनाचारत्वंसूचितं । यत्रवेदपारगाब्राह्मणाअपीदृशाः काकथाऽन्येपामिति । तथाचभारतेकर्णपर्वणि

[पा०] १ छ. झ. ट. दूताःसंत्वरितं. क. दूतास्तेत्वरिता. २ ग. निरीक्षमाणाजग्मुस्ते. ३ ख. ग. ङ. च. झ. ट. हास्तिनपुरे. ४ ख. ङ. छ. झ. ट. चसुफुल्लानि. च. ञ. विपुलान्येव. क. चविफुल्लानि. ५ क. ख. ग. ङ. च. छ. झ. ञ. ट. निरीक्षमाणाजग्मुस्ते. ६ च. ञ. ह्यतीत्यजग्मुः. ७ च. छ. झ. ञ. ट. जलाकुलां. ८ ग. घ. ज. अभिवाद्याभिवाद्यं. ९ घ. ङ. च. झ—ठ. तेजोभिभवनाच्युताः.

विष्णोः पदं प्रेक्षमाणा विपाशां चापि शाल्मलीम् ॥ नदीर्वापीस्तटाकानि पल्वलानि सरांसि च ॥१९॥
पश्यन्तो विविधांश्चापि सिंहव्याघ्रमृगाद्विपान् ॥ ययुः पथाऽतिमहता शासनं भर्तुरीप्सवः ॥ २० ॥
ते श्रान्तवाहना दूता विकृष्टेन पथा ततः ॥ गिरिव्रजं पुरवरं शीघ्रमासेदुरञ्जसा ॥ २१ ॥
भर्तुः प्रियार्थं कुलरक्षणार्थं भर्तुश्च वंशस्य परिग्रहार्थम् ॥
अहेडमानास्त्वरया स्म दूता रात्र्यां तु ते तत्पुरमेव याताः ॥ २२ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे अष्टषष्टितमः सर्गः ॥ ६८ ॥

एकोनसप्ततितमः सर्गः ॥ ६९ ॥

रात्रौदुस्स्वप्नदर्शनेनविमनायमानभरतमनोविनोदनायसुहृद्भिर्नानोपायप्रयोगेप्यप्रहृष्यतितस्मिंस्तंप्रतिप्रियसुहृदातत्कारणप्रश्नः ॥ १ ॥ भरतेनतंप्रतिस्वानुभूतदुस्स्वप्नप्रकारनिरूपणपूर्वकंस्वप्नदर्शनस्यस्ववैमनस्यकारणत्वनिवेदनम् ॥ २ ॥

यामेव रात्रिं ते दूताः प्रविशन्ति स्म तां पुरीम् ॥ भरतेनापि तां रात्रिं स्वप्नो दृष्टोऽयमप्रियः ॥ १ ॥
व्युष्टामेव तु तां रात्रिं दृष्ट्वा तं स्वप्नमप्रियम् ॥ पुत्रो राजाधिराजस्य सुभृशं पर्यतप्यत ॥ २ ॥
तप्यमानं समाज्ञाय वयस्याः प्रियवादिनः ॥ आयासं हि विनेष्यन्तः सभायां चक्रिरे कथाः ॥३॥
वादयन्ति तथा शान्तिं लासयन्त्यपि चापरे ॥ नाटकान्यपरे प्राहुर्हास्यानि विविधानि च ॥ ४ ॥

विष्णोःपदं विष्णोःपदाङ्कितंस्थानं। इदंचस्थानंसुदामाख्यपर्वतवर्ति सान्निध्यात्। विपाशां सुदामपर्यन्तनदीं। शाल्मलीं तत्तीरवर्तिशाल्मलीवृक्षं । अत्रमार्गविशेषवर्णनं पुण्यभूमित्वेननराणांसेवनीयत्वद्योतनार्थं ॥ १९—२० ॥ विकृष्टेन विप्रकृष्टेन अतिदूरेणेत्यर्थः। गिरिव्रजमितिकेकयपुरस्यनामान्तरं । शीघ्रशब्दसान्निध्येन अञ्जसाशब्देनमानसत्वरोच्यते । अञ्जसा आर्जवेनेतिवार्थः ॥ २१ ॥ भर्तुः दशरथस्य। प्रियार्थं शीघ्रानीतभरतकृतौर्ध्वदैहिकादिनादशरथस्यपरलोकप्राप्तिहेतुत्वात्। कुलरक्षणार्थं सनाथीकरणेनकुलजातानांसंरक्षणार्थं । भर्तुर्वंशस्य इक्ष्वाकुवंशस्य। परिग्रहार्थं प्रतिष्ठार्थं। यद्वा भर्तुर्वंशोभरतादिःतत्परिग्रहार्थंप्रतिष्ठार्थं। पित्रौर्ध्वदैहिककर्मनिर्वर्तनेनसज्जनपरिग्रहार्थंवा। अहेडमानाः। हेडृअनादरइत्यस्माद्धातोःशानच्। अनादरमकुर्वाणाः सादराइतियावत्। अतएवत्वरयायुक्ताः दूताःरात्र्यामेव अस्तमयानन्तरमपिकियत्कालंगत्वा रात्र्यामेवतत्पुरंयाताः ॥ २२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने अष्टषष्टितमः सर्गः ॥ ६८ ॥

यामेव यस्यामेव। सप्तम्यर्थेद्वितीयाछान्दसी। तां तस्यां। अयं वक्ष्यमाणः ॥ १ ॥ व्युष्टां प्रभातायांसत्यामित्यर्थः। प्रभातस्वप्नःसद्यःफलदइतिद्योतयितुमिदमुक्तं ॥ २ ॥ वयस्याः सुहृदः। आयासं मनःखेदं ॥ ३ ॥ शान्तिं भरतस्यदुःखशान्तिमुद्दिश्य । वाद-

---

"वाह्लीकानामतेदेशानतत्रदिवसंवसेत्" इतिपरे ॥ १८ ॥ ति० "सप्तरात्रेणगत्वावैदूतास्तेश्रान्तवाहनाः" इतिक्वचित्पाठोदृश्यते ॥ २१ ॥ ति० भर्तुः नियोक्तुर्वसिष्ठस्य । प्रियार्थं शीघ्रगमनेनप्रीतिसंपादनार्थं अत्रकतकोक्तसंख्यारीत्यापञ्चश्लोकास्त्रुटिताः ॥ २२ ॥ इत्यष्टषष्टितमस्सर्गः ॥ ६८ ॥

शि० व्युष्टांव्यतीतप्रायां प्रातरित्यर्थः ॥ २ ॥ ति० विनयिष्यन्तः अपनेष्यन्तः ॥ ३ ॥ ति० अपरेलासयन्ति नर्तयन्ति वेश्याः। शान्तिंलोलयन्तीतिपाठः। तस्यशान्तिं तूष्णीमवस्थानं। लोलयन्ति चालयन्ति । श्लोकाद्यर्थप्रश्नव्याजेनेत्यर्थः ॥ ४ ॥

[पा०] १ क. विशालांचविशल्मलीं. घ. विशालांचापिशल्मलीं. २ ङ. झ. ञ. ट. सिंहान्व्याघ्रान्मृगान्द्विपान्. ३ क. ग. च. ज. ञ. पथासता. घ. पथातदा. ख. ङ. छ. झ. ट. सतापथा. ४ ङ. छ. झ. ट. तमाज्ञाय. ५ क. ङ. छ. झ. ट. विनयिष्यन्तः. ख. च. विनशिष्यन्तः. ६ घ. तथावाद्यान्. ग. ज. तथाचान्ये. ङ. च. छ. झ. ञ. ट. तदाशान्तिं. ७ क. च. लासयन्त्यपरेतथा. ञ. लोलयन्त्यपरेतथा. ८ झ. स्माहुः. ख. चाहुः.

स तैर्महात्मा भरतः सखिभिः [1]प्रियवादिभिः ॥ गोष्ठीहास्यानि कुर्वद्भिर्न [2]प्राहृष्यत राघवः ॥ ५ ॥
तमब्रवीत्प्रियसखो भरतं सखिभिर्वृतम् ॥ सुहृद्भिः पर्युपासीनः किं सखे नानुमोदसे ॥ ६ ॥
एवं ब्रुवाणं सुहृदं भरतः प्रत्युवाच ह ॥ शृणु त्वं यन्निमित्तं मे दैन्यमेत[3]दुपागतम् ॥ ७ ॥
स्वप्ने पितरमद्राक्षं मलिनं मुक्तमूर्धजम् ॥ पतन्तमद्रिशिखरात्कलुषे गो[4]मयह्रदे ॥ ८ ॥
प्लवमानश्च मे दृष्टः स त[5]स्मिन्गोमयह्रदे ॥ पिबन्नञ्जलिना तैलं [6]हसन्नपि मुहुर्मुहुः ॥ ९ ॥
ततस्तिलौदनं भुक्त्वा पुनःपुन[7]रधःशिराः ॥ तैलेनाभ्यक्तसर्वाङ्गस्तैलमे[8]वावगाहत ॥ १० ॥
स्वप्नेऽपि सागरं शुष्कं चन्द्रं च पतितं भुवि ॥ उपरुद्धां च जगतीं [9]तमसेव समावृताम् ॥ ११ ॥
औपवाह्यस्य नागस्य विषाणं शकलीकृतम् ॥ सहसा चापि [10]संशान्तं ज्वलितं जातवेदसम् ॥ १२ ॥
अवतीर्णां च पृथिवीं शुष्कांश्च विविधान्द्रुमान् ॥ अहं पश्यामि विध्वस्तान्[11]सधूमांश्चापि पर्वतान् ॥ १३ ॥
पीठे कार्ष्णायसे [12]चैनं निषण्णं कृष्णवाससम् ॥ [13]प्रहसन्ति स्म राजानं प्रमदाः कृष्णपिङ्गलाः ॥ १४ ॥
त्वरमाणश्च धर्मात्मा रक्तमाल्यानुलेपनः ॥ रथेन खरयुक्तेन प्रयातो [14]दक्षिणामुखः ॥ १५ ॥
प्रहसन्तीव राजानं प्रमदा रक्तवासिनी ॥ प्रकर्षन्ती मया दृष्टा राक्षसी विकृतानना ॥ १६ ॥
एवमेतन्मया दृष्टमिमां रात्रिं भयावहाम् ॥ अहं रामोऽथवा राजा लक्ष्मणो वा मरिष्यति ॥ १७ ॥
नरो यानेन यः स्वप्ने खरयुक्तेन याति हि ॥ अचिरात्तस्य [15]धूमाग्रं चितायां संप्रदृश्यते ॥ १८ ॥
एतन्निमित्तं दीनोऽहं [16]तन्न वः प्रतिपूजये ॥ शुष्यतीव च मे कण्ठो न स्वस्थमिव मे मनः ॥ १९ ॥
न पश्यामि भयस्थानं भयं चैवोपधारये ॥ भ्रष्टश्च स्वरयोगो मे च्छाया चो[17]पहता मम ॥ २० ॥
[18]जुगुप्सन्निव चात्मानं न च पश्यामि कारणम् ॥ २१ ॥

यन्ति वीणादिकमितिशेषः। लासयन्ति लास्यंकुर्वन्ति। लास्यं सुकुमारनृत्तं। नाटकानि संस्कृतप्राकृतपैशाचमागधादिमिश्रगद्यपद्यरूपाणि। हास्यानि हासजनकवाक्यानि ॥ ४ ॥ गोष्ठीहास्यानि गोष्ठीसभा सभ्यहास्यानीत्यर्थः ॥ ५ ॥ प्रियसखःअन्तरङ्गसुहृत्। "राजाहस्सखिभ्यष्टच्" इतिटच् ॥ ६—८ ॥ प्लवमानः मण्डूकवत् ॥ ९ ॥ तिलमिश्रओदनः तिलौदनः ॥ १० ॥ तमसासमावृतामिव उपरुद्धां तिरोहितां। औपवाह्यस्य राजवाह्यस्य। "औपवाह्योराजवाह्यः" इतिहलायुधः। नागस्य गजस्य। जातवेदसा अग्निना। अवतीर्णां अधःपतितां। पश्यामीति सर्वत्रान्वयः। वर्तमानसामीप्येवर्तमानवत्प्रयोगः ॥ ११—१३ ॥ कृष्णाश्चपिङ्गलाश्चकृष्णपिङ्गलाः ॥ १४—१६ ॥ उक्तस्वप्नदर्शनफलमाह—एवमित्यादिना। इमांरात्रिं अस्यांरात्रौ। अहंमरिष्यामीतिविपरिणामःकार्यः ॥ १७ ॥ धूमाग्रं धूमशिखा ॥ १८ ॥ एतन्निमित्तं उक्तस्वप्नदर्शनहेतुना ॥ १९ ॥ भयस्थानं भयकारणं। अथच भयमुपधारये अवशतोविभेमि। छाया कान्तिः। "छायात्वनातपेकान्तौ" इतिवैजयन्ती ॥ २० ॥ जुगुप्सन्निव अस्मी-

ति० प्रियसखः सखिमात्रस्यप्रियत्वाविवादाद्रूयोगतिर्ज्ञेया अत्यन्तप्रियइति। नानुमोदसे गानादिनेतिशेषः ॥ ६ ॥ ति० अन्वगाहतेत्यन्तःप्रथमस्स्वप्नः ॥ १० ॥ ति० तमसासमावृतामेवोपरुद्धां तिरोहितां। यद्वा असुररक्षोभिरुपरुद्धां ॥ ११ ॥ ति० एतत् उक्तं। निमित्तं स्वप्नरूपं। दृष्टेतिशेषः। वचोयुष्माकंनप्रतिपूजये। **कतक०** नप्रतिपेप्रियेइतिपाठे युष्माकंवचःप्रतिनभृशं प्रीतोभवामीत्यर्थः। यङन्तात्लट् ॥ १९ ॥ ति० आत्मानंजुगुप्सइव किमर्थंममजन्मेत्यादिरूपेण ॥ २१ ॥

[पा०] १ ङ. छ. झ. ट. प्रियबोधिभिः. २ ख. ग. ज. संहृष्टं. ३ ख. दुपस्थितं. ४ ख. ग. ङ. च. ज—ट. गोमयेह्रदे. ५ क. ख. ग. ङ—ट. गोमयेह्रदे. ६ क. ख. ङ. च. छ. झ. ञ. ट. हसन्निव. ७ क. रवाक्छिराः. ८ ङ. छ. झ. ट. मेवान्वगाहत. ख. घ. ज. मेवाऽवगाहते. ९ झ. तमसैव. १० क. ङ. च. छ. झ. ञ. संशान्ताज्वलिताजातवेदसः. ख. संशुष्कांज्वलितांजातवेदसा. ११ ग. च. छ. झ. ञ. ट. न्सधूमांश्चैव. १२ घ. ङ. छ. ज. झ. ट. चैव. १३ क. ङ—ट. प्रहरन्ति. ग. प्रवहन्ति. १४ ख. दक्षिणांदिशं. १५ झ. ट. धूम्राग्रं. १६ घ—छ. झ. ञ. ट. नवचः. क. नचवः. १७ झ. ञ. ट. चापगता. १८ ग. झ. जुगुप्सइव. ज. जुगुप्सयेव.

इमां[1] हि दुःस्वप्नगतिं निशाम्य[2] तामनेकरूपामवितर्कितां पुरा ॥
भयं महत्तद्धृदयान्न याति मे विचिन्त्य राजानमचिन्त्यदर्शनम् ॥ २२ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे एकोनसप्ततितमः सर्गः ॥ ६९ ॥

सप्ततितमः सर्गः ॥ ७० ॥

भरतेनसुहृत्सुस्वप्नदर्शननिवेदनसमयसमागतैर्दूतैस्तंप्रतिसप्रणामंवसिष्ठनियोगनिवेदनम् ॥ १ ॥ स्वानुयोगाद्दूतैःसर्वेषां- कुशलंनिवेदितेनभरतेनमातामहादिसमापृच्छनपूर्वकमयोध्यांप्रतिकेकयनगरान्निर्गमनम् ॥ २ ॥

भरते ब्रुवति स्वप्नं दूतास्ते क्लान्तवाहनाः ॥ प्रविश्यासह्यपरिघं[3] रम्यं राजगृहं पुरम्[4] ॥ १ ॥
समागम्य[6] तु राज्ञा[7] च राजपुत्रेण चार्चिताः ॥ राज्ञः पादौ गृहीत्वा तु तमूचुर्भरतं वचः ॥ २ ॥
पुरोहितस्त्वां कुशलं प्राह सर्वे च मन्त्रिणः ॥ त्वरमाणश्च निर्याहि कृत्यमात्ययिकं त्वया ॥ ३ ॥
इमानि च महार्हाणि[8] वस्त्राण्याभरणानि च ॥ प्रतिगृह्य विशालाक्ष मातुलस्य[9] च दापय ॥ ४ ॥
अत्र[10] विंशतिकोट्यस्तु नृपतेर्मातुलस्य ते ॥ दशकोट्यस्तु संपूर्णास्तथैव च नृपात्मज ॥ ५ ॥
प्रतिगृह्य[11] तु तत्सर्वं स्वनुरक्तः सुहृज्जने ॥ दूतानुवाच भरतः कामैः संप्रतिपूज्य[12] तान् ॥ ६ ॥
कच्चित्सुकुशली[13] राजा पिता दशरथो मम ॥ कच्चिच्चारोगता[14] रामे लक्ष्मणे च महात्मनि ॥ ७ ॥
आर्या च धर्मनिरता धर्मज्ञा धर्मदर्शिनी[15] ॥ अरोगा चापि[16] कौसल्या माता रामस्य धीमतः ॥ ८ ॥

तिशेषः । कारणं जुगुप्साकारणं ॥ २१ ॥ तामिमां दुःस्वप्नगतिं दुःस्वप्नभेदं । अवितर्कितां पूर्वमविचारितांअमोघामितिभावः । पूर्वचिन्ताकृतत्वेहिवैफल्यं । अचिन्त्यदर्शनं असंभाव्यदर्शनं । अत्रसर्गे " अथस्वप्नेपुरुषंकृष्णंकृष्णदन्तंपश्यतिखरैर्वराहैः " इत्यादिश्रुतिरुपबृंहिता । स्वप्नश्चपूर्वचिन्तापुरस्कृतोनफलति प्रत्यूषेचफलतिसद्यः । यामविलम्बात्फलविलम्बः । फलंच द्रष्टुः दृष्टस्यतत्संबन्धिनोवाभविष्यतीत्यादिकमुक्तं ॥ २२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने एकोनसप्ततितमः सर्गः ॥ ६९ ॥

असह्यपरिघं परैरप्रधृष्यपरिघं । राज्ञा केकयराजेन । राजपुत्रेण युधाजिता । अर्चिताः आनीतोपायननिरीक्षणेनसंमानिताः । राज्ञः भरतस्य । भरतस्यपरमप्रकृतत्वात्तमितिनिर्देशः ॥ १—२ ॥ आत्ययिकं दुष्करं । अत्ययः कृच्छ्रं । " अत्ययोतिक्रमेकृच्छ्रेमरणेदण्डदोषयोः " इतिवैजयन्ती । त्वयाकृत्यं कर्तव्यं । अतोनिर्याहीत्यन्वयः ॥ ३ ॥ विशालाक्षेति विभूषणावलोकनजनितविस्मयोत्फुल्लाक्षत्वमाह । मातुलस्यचदापयेतिसमुच्चयात् प्रथमंमातामहस्यदापय अथमातुलस्यदापयेत्यर्थः ॥ ४ ॥ अत्र वस्त्राभरणादिमहार्हवस्तुजाते । नृपतेः विंशतिकोट्यः विंशतिकोटिमूल्यानिवस्त्राभरणादीनि । मातुलस्यदशकोट्यः दशकोटिमूल्यानि । संपूर्णाः अन्यूना इत्युभयविशेषणं । तथैव तदहमेव । अन्यथा राजतुल्यतयाराजपुत्रदानेतस्यबहुमानएवनभवतीतिभावः ॥ ५ ॥ सुहृज्जने मातुलादौ । स्वनुरक्तः प्रदाप्येतिशेषः । कामैः अभीष्टान्नपानादिभिः ॥ ६ ॥ अरोगता आरोग्यं । आरोग्यतेति पाठेस्वार्थेष्यञ् ॥७॥ आर्या ज्येष्ठमातृत्वे-

---

ति॰ दुस्स्वप्नगतिंनिशम्यहि दुस्स्वप्नं स्मृत्वाहि स्मृत्वैव ॥ २२ ॥ इत्येकोनसप्ततितमस्सर्गः ॥ ६९ ॥
ति॰ राज्ञः केकयराजस्यैवेत्यन्ये ॥ २ ॥ ति॰ आत्ययिकं कालातिक्रमासहं ॥ ३ ॥

[पा॰] १ ङ. झ. ट. इमांच. २ ग. ङ. छ. झ. ट. निशम्यहिलनेक. ३ ङ. छ. झ. ट. परिखं. ४ घ. शुभं. ५ घ. ख. घ—छ. झ. ञ. ट. समागम्यच. ६ ङ. च. छ. झ. ञ. ट. राज्ञाते. ७ ख. ङ. च. झ. ञ. ट. गृहीत्वाच. ८ क. वरार्हाणि. ९ घ. मातुलस्यप्रदापय. ज. मातुलस्यैवदापय. १० क. अथ. ११ क. प्रतिगृह्यच. घ. परिगृह्यतु. १२ क. ग—ट. संप्रतिपूज्यतान्. ख. संप्रतिपूज्यच. १३ ख. ध—छ. झ. ट. कच्चित्सकुशली. १४ ङ. छ. झ. ट. कच्चिदारोग्यता. १५ ङ. झ. ट. धर्मवादिनी. १६ क, वापि.

कच्चित्सुमित्रा धर्मज्ञा जननी लक्ष्मणस्य या ॥ शत्रुघ्नस्य च वीरस्य साऽरोगा चापि मध्यमा ॥९॥
आत्मकामा सदाचण्डी क्रोधना प्राज्ञमानिनी ॥ अरोगा चापि मे माता कैकेयी किमुवाच ह ॥१०॥
एवमुक्तास्तु ते दूता भरतेन महात्मना ॥ ऊचुः संप्रश्रयं वाक्यमिदं तं भरतं तदा ॥ ११ ॥
कुशलास्ते नरव्याघ्र येषां कुशलमिच्छसि ॥ श्रीश्च त्वां वृणुते पद्मा युज्यतां चापि ते रथः ॥ १२ ॥
भरतश्चापि तान्दूतानेवमुक्तोऽभ्यभाषत ॥ आपृच्छेऽहं महाराजं दूताः संत्वरयन्ति माम् ॥ १३ ॥
एवमुक्त्वा तु तान्दूतान्भरतः पार्थिवात्मजः ॥ दूतैः संचोदितो वाक्यं मातामहमुवाच ह ॥ १४ ॥
राजन्पितुर्गमिष्यामि सकाशं दूतचोदितः ॥ पुनरप्यहमेष्यामि यदा मे त्वं स्मरिष्यसि ॥ १५ ॥
भरतेनैवमुक्तस्तु नृपो मातामहस्तदा ॥ तमुवाच शुभं वाक्यं शिरस्याघ्राय राघवम् ॥ १६ ॥
गच्छ तातानुजाने त्वां कैकेयी सुप्रजास्त्वया ॥ मातरं कुशलं ब्रूयाः पितरं च परंतप ॥ १७ ॥
पुरोहितं च कुशलं ये चान्ये द्विजसत्तमाः ॥ तौ च तात महेष्वासौ भ्रातरौ रामलक्ष्मणौ ॥१८॥
तस्मै हस्त्युत्तमांश्चित्रान्कम्बलानजिनानि च ॥ अभिसत्कृत्य कैकेयो भरताय धनं ददौ ॥ १९ ॥
रुक्मनिष्कसहस्रे द्वे षोडशाश्वशतानि च ॥ सत्कृत्य कैकयीपुत्रं केकयो धनमादिशत् ॥ २० ॥

नपूज्या । धर्मनिरता धर्मानुष्ठानपरा धर्मज्ञा ज्ञात्वानुष्ठानमितिन्यायेनानुष्ठानमूलज्ञानयुक्ता । धर्ममेवजनेषुपश्यतीतिर्धर्मदर्शिनी गुणग्राहिणी नतुदोषदर्शिनीत्यर्थः । अप्यरोगेत्यन्वयः । अपिःप्रश्ने । धीमतइत्यनेनपुत्रकृतातिशयउच्यते ॥ ८ ॥ सेति धर्मज्ञत्वस्मरणाभिनयः । मध्यमेत्यनेन " नतेम्वामध्यमातात " इत्यत्रकैकेय्यामध्यमात्वमितरस्यपेक्षया ॥ ९ ॥ आत्मानंकामयतइतिआत्मकामा स्वप्रयोजनपरेत्यर्थः । प्रज्ञैवप्राज्ञा प्राज्ञामात्मानंमन्यतइतिप्राज्ञमानिनी । " मनः " इतिणिनिः । " क्यङ्मानिनोश्च " इति पुंवद्भावः । चण्डी उग्रा । क्रोधना क्रोधवती । मेमाता अप्यरोगा । कैकेयीकिमुवाच स्वबन्धुविषयेकिमुवाचेत्यर्थः । दुःस्वप्नदर्शनदूतागमनाभ्यां । कैकेय्या किञ्चित्कृतंभवेदित्यूहितवान्भरतइतिसूचयति—आत्मकामेत्यादिभिः ॥ १० ॥ महात्मना महाबुद्धिना । एतेनायोध्यावृत्तान्तोनेनज्ञातइतिसूचितं । सप्रश्रयं सविनयं । अनेनसर्वात्मनाअयोध्यावृत्तान्तगोपनंसूच्यते । तदेत्यनेन किंचिद्विलम्बोक्तौभरतोऽन्यथामन्येतेति झटित्युत्तरमुक्तमित्युच्यते ॥ ११ ॥ कुशलाइतिसामान्योक्तिः प्रत्येकोक्त्यासंदेहानुत्पादाय । श्रीः लक्ष्मीः । पद्मा पद्महस्ता । अर्शआद्यच् । राज्यश्रीरितिहार्दोभावः । अमङ्गल्यव्यावृत्तिर्भरतप्रत्याख्या ॥ १२ ॥ एवमुक्तोभरतः दूता मांसंत्वरयन्तीतिमहाराजमापृच्छ इतितान्दूतानभ्यभाषतेतियोजना ॥ १३ ॥ दूतैःसंचोदितोभरतः तान्दूतानेवमुक्त्वा मातामहंवाक्यमुवाच ॥ १४ ॥ मे मां । यदास्मरिष्यसि यदा आगन्तव्यमितिस्मरिष्यसि । तदैष्यामि आगन्तव्यमितिभवत्स्मरणंयदाजानामि तदाआगमिष्यामीत्यर्थः । मेइत्यत्र "अधीगर्थदयेशां—" इतिषष्ठी ॥ १५—१८ ॥ अस्यादौ इत्युक्त्वेत्युपस्कार्यं । तस्मै भरताय । अभिसत्कृत्यददौ श्लाघापूर्वंददावित्यर्थः ॥ १९ ॥ निष्काः वक्षोभूषणानि । " निष्कोस्त्रीहेम्निदीनारेसाष्टेकर्षशतेपले । वक्षोविभूषणेकर्षे " इतिवैजयन्ती । धनं उक्तरूपं । आदिशत् आदायगच्छतेतिभृत्याना-

ति० मातुस्स्वभावानुवादपूर्वंतस्याआरोग्यंपृच्छति—आत्मकामेति । शि० सदा नित्यं । आत्मकामा आत्मनांजीवानांकं सुखंअमतिप्रापयतिसा । अतएवचण्डी । क्रोधना । चण्ड्यांहिंसिकायांक्रोधनंकोपोयस्यास्सा । "चण्डीकात्यायनीदेव्यांहिंस्रकोपनयोषितोः" इतिमेदिनी । प्राज्ञमानिनी प्राज्ञान्तत्वज्ञान्मानयतिपूजयतितच्छीला । अरोगा नित्यंरोगरहिता ॥ १० ॥ ती० श्रीस्त्वांवृणुतइतिलक्ष्मीवरणोक्तिरमङ्गलव्यावृत्त्यर्थानतुराज्यश्रीप्राप्तिपरा । राजमरणादिकंनवक्तव्यमितिवसिष्ठेनोक्तत्वात् ॥ १२ ॥ ती० रुक्मनिष्काणि वक्षोभूषणानि कण्ठभूषणानिवा ॥ २० ॥

[पा०] १ ख. लक्ष्मणस्यसा. घ. लक्ष्मणस्यच. २ क. च. ञ. शत्रुघ्नस्यापि. ३ ङ. छ. झ. ट. वीरस्यअरोगा. ग. घ. धीरस्यसारोगा. ४ ख. चारुमध्यमा. ५ च. सुचण्डीच. ६ क. ग. च. ञ. कैकेयीमातामे. ७ क. ख. ङ—ट. संप्रश्रितं. ८ क. मिदंच. ९ ङ. छ. झ. ञ. ट. सत्कृत्यकेकयोराजाभरतायददौधनम्. ख. सत्कृत्यराजाकैकेयोभरतायददौधनं.

[1]तथाऽमात्यानभिप्रेतान्विश्वास्यांश्च गुणान्वितान् ॥ ददावश्वपतिः [2]क्षिप्रं [3]भरतायानुयायिनः ॥२१॥
ऐरावतानैन्द्रशिरान्नागान्वै प्रियदर्शनान् ॥ खराञ्शीघ्रान्सुसंयुक्तान्मातुलोऽस्मै [4]धनं ददौ ॥ २२ ॥
[5]अन्तःपुरेऽतिसंवृद्धान्व्याघ्रवीर्य[6]बलान्वितान् ॥ [7]दंष्ट्रायुधान्महाकायाञ्शुनश्चोपायनं ददौ ॥ २३ ॥
स दत्तं केकयेन्द्रेण धनं तन्नाभ्यनन्दत ॥ भरतः कैकयीपुत्रो गमनत्वरया तदा ॥ २४ ॥
बभूव ह्यस्य हृदये चिन्ता सुमहती तदा ॥ त्वरया चापि दूतानां स्वप्नस्यापि च दर्शनात् ॥ २५ ॥
स [8]स्ववेश्म व्यतिक्रम्य नर[9]नागाश्वसंवृतम् ॥ प्रपेदे सुमहच्छ्रीमान्राजमार्गम[10]नुत्तमम् ॥ २६ ॥
अभ्यतीत्य ततोऽपश्यदन्तःपुरमुदारधीः ॥ ततस्तद्भरतः श्रीमानाविवेशानिवारितः ॥ २७ ॥
[11]स मातामहमापृच्छ्य मातुलं च युधाजितम् ॥ रथमारुह्य भरतः शत्रुघ्नसहितो ययौ ॥ २८ ॥
रथान्मण्डलचक्रांश्च योजयित्वा [12]परःशतम् ॥ उष्ट्रगोश्वखरैर्भृत्या भरतं यान्तमन्वयुः ॥ २९ ॥

बलेन गुप्तो भरतो महात्मा सहार्यकस्यात्मसमैरमात्यैः ॥
आदाय शत्रुघ्नमपेतशत्रुर्गृहाद्ययौ सिद्ध इवेन्द्रलोकात् ॥ ३० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे सप्ततितमः सर्गः ॥ ७० ॥

ज्ञापयामास ॥ २० ॥ अमा सह प्राणांस्त्यजन्तीत्यमात्याः तान् । अभिप्रेतान् सहायभूतानित्यर्थः । विश्वास्यान् विश्वसनीयान् । अश्वपतिः केकयः ॥२१॥ मातामहकृतसत्कारप्रकारमुक्त्वामातुलकृतसत्कारप्रकारमाह—ऐरावतानित्यादिना । ऐरावतान् इरावतपर्वतभवान्। ऐन्द्रशिरान् इन्द्रशिराख्यपर्वतभवान्। शीघ्रान् वेगवतः। सुसंयुक्तान् परिचितान्॥२२॥ अन्तःपुरइति मातुलइत्यनुषज्यते ॥ २३—२५ ॥ स्ववेश्मव्यतिक्रम्येत्यनेन स्ववेश्मप्रवेशोर्थसिद्धः । तथा च राज्ञामातुलेनच स्वगृहएवकृतसत्कारोमातामह्यादिदर्शनार्थमन्तःपुरं गतवानितिबोध्यं । अथवा भरतस्यदुःस्वप्रदर्शनदुःखदूतागमनवृत्तान्तश्रवणेनकेकयमातुलौस्वगृहमेवागतावितिद्रष्टव्यं । सुमहच्छ्रीमान् सुमहाश्रीमान् ॥ २६ ॥ अभ्यतीत्येति । राजमार्गमितिशेषः ॥ २७ ॥ मातामहं स्वेनैवसहान्तःपुरमागतं । मातुलंच तथाभूतं ॥ २८ ॥ मण्डलचक्रान् वर्तुलचक्रयुक्तान् । परःशतं शतात्परान् । "पङ्क्तिविंशति—" इत्यादिसूत्रेनिपातनाहेकवचनं । रथानुष्ट्रादिभिःसंयोज्य भृत्याः यान्तंभरतमन्वयुः ॥ २९ ॥ महात्मा महाधैर्योभरतः । आर्यकस्य मातामहस्य । बलेनगुप्तः आत्मसमैः स्वप्रभावसदृशैः । अमात्यैःसहशत्रुघ्नमादाय अ[illegible]तशत्रुः निष्कण्टकःसन् । इन्द्रलोकात् सिद्धो देवजातिरिवगृहाद्ययौ ॥ ३० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने सप्ततितमः सर्गः ॥ ७० ॥

शि० अमात्यान् स्वमन्त्रिणः ॥ २१ ॥ ती० ऐरावतान् ऐरावतकुलोद्भवान् ॥ २२ ॥ शि० व्याघ्रवीर्यबलोपमान् व्याघ्रवीर्यबलाभ्यामुपमायेषांतान् । स० व्याघ्रवीर्यस्यबलेनोपमायेषांतेतथा ॥ २३ ॥ शि० [illegible]ण्डलचक्रान् मण्डलानिमण्डलाकारसंपादकानिचक्राणियेषांतान् । परं भिन्नं । शतंरथान् उष्ट्रादिभिर्योजयित्वाभरतमन्वयुः । कतक० मण्डलाकारतयारथप्रवर्तनसाधकंचक्रंमण्डलचक्रं चतुर्दिक्चक्रमध्यस्थं तद्येषांतान् । काश्यादौचतथेदानींप्रसिद्धं ॥ २९ ॥ ति० सभार्यकस्यात्मसमैरितिपाठान्तरं । भार्यासहितइत्यर्थः ॥ ३० ॥ इतिसप्ततितमस्सर्गः ॥ ७० ॥

[पा०] १ घ. ङ. छ. ज. झ. ट. तदा. २ क. ख. ग. ङ. च. छ. झ. ञ. ट. शीघ्रं ३ क. [illegible] ञ. भरतायानुजीविनः. ४ ग. ददौधनं. ५ अन्तःपुरेतिसंवृद्धानितिश्लोकः तस्मैहस्त्युत्तमानितिश्लोकात्परं रुक्मनिष्केतिश्लोकात्पूर्व ङ. छ. झ. ट. पुस्तकेषुदृश्यते. ६ ङ. छ. झ. ट. ठ. बलोपमान्. ७ क. ङ. छ. झ. ट. दंष्ट्रायुधान्. ८ क. ङ. झ. ञ. स्ववेश्माभ्यतिक्रम्य. ख. ग. स्ववेश्मव्यतिक्रम्य. ९ क. ख. ङ. च. छ. झ. ञ. ट. नागाश्वसंकुलं. घ. नागाभिसंकुलं. १० क. ख. ग. ङ—ट. मनुत्तमं. ११ घ. स्वमातामहं. १२ ङ. छ. झ. ट. परंशतं.

एकसप्ततितमः सर्गः ॥ ७१ ॥

केकयपुरादागच्छतोभरतस्यमार्गागमनप्रकारनिरूपणम् ॥ १ ॥ प्रस्थानदिनादष्टमेह्निप्रातरयोध्यामागतवताभरतेनसारथिंप्रतितस्याःशोभावैपरीत्यनिरूपणपूर्वकमप्रहर्षेणैवदशरथगृहप्रवेशः ॥ २ ॥

स प्राङ्मुखो राजगृहादभिनिर्याय राघवः ॥ ततः सुदामां द्युतिमान्संतीर्यावेक्ष्य तां नदीम् ॥ १ ॥
ह्लादिनीं दूरपारां च प्रत्यक्स्रोतस्तरङ्गिणीम् ॥ शतद्रूमतरच्छ्रीमान्नदीमिक्ष्वाकुनन्दनः ॥ २ ॥
ऐलाधाने नदीं तीर्त्वा प्राप्य चापरपर्पटान् ॥ शिलामाकुर्वतीं तीर्त्वा आग्नेयं शल्यकर्तनम् ॥ ३ ॥
सत्यसंधः शुचिः श्रीमान्प्रेक्षमाणः शिलावहाम् ॥ अत्ययात्स महाशैलान्वनं चैत्ररथं प्रति ॥ ४ ॥
सरस्वतीं च गङ्गां च युग्मेन प्रत्यपद्यत ॥ उत्तरं वीरमत्स्यानां भारुण्डं प्राविशद्वनम् ॥ ५ ॥
वेगिनीं च कुलिङ्गाख्यां ह्लादिनीं पर्वतावृताम् ॥ यमुनां प्राप्य संतीर्णो बलमाश्वासयत्तदा ॥ ६ ॥
शीतीकृत्य तु गात्राणि क्लान्तानाश्वास्य वाजिनः ॥ तत्र स्नात्वा च पीत्वा च प्रायादादाय चोदकम् ॥७॥

अत्रदूताः ऋजुदुर्गमार्गेणत्वरितं गिरिव्रजमागताः । भरतस्तु चतुरङ्गबलयुक्ततयावक्रमपिमहामार्गमाश्रित्यययौ । अतोनदीपर्वतादिभेदकीर्तनमितिबोध्यं । सुदामां सुदामाख्यां । नदीं अवेक्ष्य तांसंतीर्य दूरे पारंपरतीरंयस्यास्तांदूरपारां विशालामित्यर्थः । ह्लादिनीं ह्लादिन्याख्यांनदीं । संतीर्य शतद्रूं शतद्र्वाख्यां । प्रत्यक्स्रोतस्तरङ्गिणीं पश्चिमाभिमुखप्रवाहतरङ्गयुक्तांचनदीमतरत् ॥१—२॥ एलानामेलकानां आधानमुत्पत्तिस्थानं तद्वत्त्वादेलाधानाख्येनगरे नदीं पूर्वोक्तांशतद्रूं। तीर्त्वेत्यनुवादः । अपरपर्पटान् पर्पटानामदूरभवोग्रामःपर्पटाः । पर्पटा ओषधिविशेषाः । "अदूरभवश्च" इतिप्राप्तस्याणः "वरणादिभ्यश्च" इतिलुप्। लुपि युक्तवद्व्यक्तिवचनता । पूर्वपर्पटाअपरपर्पटाश्चेतिग्रामद्वयमस्ति । तत्रापरपर्पटान् विश्रान्त्यर्थंप्राप्य । शिलामाकुर्वतीं शिलामासमन्तात्कुर्वतीं शिलाकर्षणस्वभावां अतएवशिलावहामित्यन्वर्थसंज्ञांनदीं तीर्त्वा तस्याआग्नेय्यांदिशिभवमाग्नेयं शल्यंहृदयशल्यं दुःखं कर्तयतिछेदयतीति शल्यकर्तनंनामनगरं । प्रेक्षमाणः सन् अत्ययात् सत्यसंधःशुचिरित्याभ्यां तत्रत्यजनेभ्यईतिवारणं [भीतिवारणं] प्रतिज्ञाय तथैवकृतवानित्युच्यते । चैत्ररथं चैत्ररथतुल्यत्वात्तदाख्यंवनं प्रति उद्दिश्य । महाशैलानत्ययात् तद्दर्शनकुतूहलेन महापर्वतानत्यगादित्यर्थः ॥ ३—४ ॥ सरस्वतीं तदाख्यांनदीं । गङ्गां गङ्गाख्यांकांचिन्नदींपश्चिमसमुद्रगामिनीं गङ्गास्रोतोभेदंवा । युग्मेन संगमेन । प्रत्यपद्यत ययौ । यद्वा युग्मेन द्वन्द्वतयापार्श्वद्वयेप्रवहन्तीमिति शेषः । वीरमत्स्यानां वीरमत्स्याख्यदेशानां । उत्तरं भारुण्डं भारुण्डाख्यंवनं । प्राविशत् ॥ ५ ॥ वेगिनीं वेगयुक्तां । ह्लादिनीं संतोषकारिणीं । पर्वतैरावृतां कुलिङ्गाख्यांनदीं यमुनांप्राप्य । संतीर्णः यमुनासमीपे सन्तीर्णइत्यर्थः । अन्यत्रातिवेगत्वादन्यत्रपर्वतावृतत्वाच्चेतिभावः । आतपखिन्नंबलं मध्याह्नेआश्वासयत् ॥६॥ आश्वासनप्रकारमाह—शीतीकृत्येति । तत्र कुलिङ्गायमुनासंभेदे । दूरगमनेनक्लान्तान् वाजिनःकंचित्कालं

ति० एलधाने तदाख्यग्रामे । नदीं तद्ग्रामवर्तिनीं। अपरपर्वताः जनपदविशेषाः। अपरपर्यटानितिपाठान्तरं । शिलामाकुर्वतीं शिलाकर्षणस्वभावामित्यर्थंइतितीर्थः । स्वमध्यपतितंवस्तुशिलारूपंकुर्वतीमित्यर्थः । तरणंच तद्वार्तिशिलाप्रायकाष्ठनौकयेत्यन्ये । आग्नेयंशल्यकर्तनमिति ग्रामद्वयं तन्मध्येशिलावहानदीतितीर्थः।**कतक०** शिलां तदाख्यनदीं आकुर्वतीनामकंनद्यन्तरं । आग्नेयं आग्नेयदिग्गतं । शल्यकर्षणं तदोषध्युपेतंदेशं ! तत्रचशिलावहानदी ॥ ३ ॥ **रामानु०** गङ्गां "सुचक्षुश्चैवसीताचसिन्धुश्चैवमहानदी । तिस्रस्त्वेतादिशंजग्मुःप्रतीचींचशुभोदकाः" इतिबालकाण्डोक्तप्रकारेणगङ्गाशब्देनगङ्गाभेदस्सिन्धुरुच्यते । यमुनातरणानन्तरंभागीरथीतरणस्यवक्ष्यमाणत्वात् । युग्मेन संगमेन प्रतिपद्य वीरमत्स्यानामुत्तरप्रदेशान्भारुण्डवनंचप्राविशदितिसंबन्धः । उत्तरंवीरमत्स्यानामितिपाठे उत्तरमित्येतद्भारुण्डवनस्यविशेषणम् ॥ ५ ॥ **स०** उदकमादाय परिचारकमुखेन । मध्येमार्गंजलाभा-

[पा०] १ क. ख. ग. ङ—ट. वीर्यवान्. २ घ. उपधाने. ङ. घ. झ. ञ. ट. ऐलधाने. क. ग. च. एलधाने. ३ ङ. झ. पर्वतान्. ४ ख. चाग्नेयं. क. घ. ट. ह्याग्नेयं. ५ ङ. छ. झ. ट. कर्षणं. ६ ङ. छ. झ. ट. अभ्यगात्. ७ क. ग. ङ. च. छ. झ. ञ. ट. प्रतिपद्यच. ८ ग. ङ. झ. उत्तरान्वीर. ख. उत्तरानपि. ९ ख. ङ. च. छ. झ. ञ. ट. कृत्वातु. क. ज. कृत्यच. १० ग. ततः.

राजपुत्रो महारण्यमनभीक्ष्णोपसेवितम् ॥ भद्रो भद्रेण यानेन मारुतः खमिवात्यगात्[1] ॥ ८ ॥
भागीरथीं दु[2]ष्प्रतरामंशुधाने महानदीम् ॥ उपायाँ[3]द्राघवस्तूर्णं प्राग्वटे विश्रुते पुरे ॥ ९ ॥
स गङ्गां प्राग्वटे तीर्त्वा समायात्कुटिकोष्टि[4]काम् ॥ सबलस्तां स तीर्त्वाऽथ समाया[5]द्धर्मवर्धनम् ॥१०॥
तोरणं दक्षिणार्धेन जम्बूप्रस्थ[6]मुपागमत् ॥ वरूथं च ययौ रम्यं ग्रामं दशरथात्मजः ॥ ११ ॥
तत्र रम्ये वने वासं कृत्वाऽसौ प्राङ्मुखो ययौ ॥ उद्यानमुज्जिहानायाः प्रियका यत्र पादपाः ॥१२॥
सा[7]लांस्तु प्रियकान्प्राप्य शीघ्रानास्थाय वाजिनः ॥ अनुज्ञाप्याथ भरतो वाहिनीं त्वरितो ययौ ॥१३
वासं कृत्वा सर्वतीर्थे तीर्त्वा चोत्ता[8]निकां नदीम् ॥ अन्या नदीश्च विविधाः पार्वतीयैस्तुरङ्गमैः ॥१४॥
हस्तिपृष्ठकमासाद्य कुटिकामत्यवर्तत ॥ ततार च नरव्याघ्रो लौ[9]हित्ये स कपीवतीम् ॥ १५ ॥
एकसाले स्थाणुमतीं विनते गोमतीं नदीम् ॥ [[10]उपायाद्राघवस्तूर्णं तीर्त्वा शोणां महानदीम्]॥१६॥
कलिङ्गनगरे चापि प्राप्य सा[11]लवनं त[12]दा ॥ भरतः क्षिप्रमागच्छत्सुपरिश्रान्तवाहनः ॥ १७ ॥

छायास्वाश्वास्य तेषांगात्राणि शीतीकृत्य आर्द्रपृष्ठानिकृत्वा स्वयंस्नात्वा उदकंचपीत्वा उत्तरत्रगन्तव्यदेशस्य निर्जलदेशत्वात्तत्रपानार्थमुदकमादायच प्रायात् ॥७॥ राजपुत्रत्वेन भद्रः मङ्गलाचारयुक्तः।अनभीक्ष्णोपसेवितं अत्यन्तंजनैरनुपसेवितं महारण्यत्वादप्रहतमित्यर्थः। महारण्यं दुर्गमंवनं । भद्रेण भद्रगजरूपेणयानेन । अरण्यसंचारनिपुणोभद्रजातीयः । मारुतःखमिवात्यगात् अतिवेगेनातिक्रान्तवान् । भूमौहिमारुतःपर्वतादिनामन्दीभवति ॥ ८ ॥ अंशुधानेनगरे दुष्प्रतरां भागीरथीं विश्रुते तरणस्थलत्वेनप्रसिद्धे । प्राग्वटेपुरे उपायात् आगच्छत् तत्तरणार्थमितिशेषः ॥ ९ ॥ सबलः सः भरतः । प्राग्वटे तत्समीपे । गङ्गांतीर्त्वा कुटिकोष्ठिकांनदीं समायात् । सः तांतीर्त्वा धर्मवर्धनंग्रामं समायात् प्राप ॥ १० ॥ तोरणंदक्षिणार्धेन तोरणग्रामस्यदक्षिणभागेन । जम्बूप्रस्थंग्रामं उपागमत् । ततोवरूथाख्यंग्रामंययौ ॥ ११ ॥ तत्र तत्समीपे । रम्येवने वासं रात्रिवासंकृत्वा प्रभातेप्राङ्मुखःसन् उज्जिहानायाःनगर्याः उद्यानंययौ । यत्र उद्याने । प्रियकाः बन्धूकाः कदम्बावा सन्ति ॥ १२ ॥ सालान् वृक्षान् । "अनोकहःकुटःसालः" इत्यमरः । पूर्वोक्तवनस्थान्प्रियकवृक्षान् प्राप्य शीघ्रान्वाजिनः आस्थायरथेवध्वा । वाहिनीमनुज्ञाप्यत्वरितोययौ । उज्जिहानायाः परं स्वदेशत्वान्निर्भयंमन्दमागम्यतामितिसेनामनुज्ञाप्य स्वयंत्वरितोययौ ॥१३॥ सर्वतीर्थेग्रामे वासं एकरात्रिवासं कृत्वा । उत्तानिकां उन्नतजलत्वेनतदाख्यां । अन्याःनदीः स्वल्पजलाः । पार्वतीयैः पर्वतदेशोत्पन्नैः । तुरंगमैः रथाश्वैः तीर्त्वेत्यनुषङ्गः । हस्तिपृष्ठवदुन्नतत्वात् हस्तिपृष्ठकाख्यंग्राममासाद्य कुटिकांनदीमत्यवर्तत हस्तिपृष्ठकसमीपेकुटिकामतरदित्यर्थः । लौहित्ये लोहितमृत्त्वाल्लौहित्यनाम्निनगरे । कपीवतीं बहुकपिमत्त्वात्तन्नाम्नीं नदीं । "अन्येषामामपिदृश्यते" इतिदीर्घः ॥ १४—१५ ॥ एकसाले एकसालादूरभवत्वादेकसालाख्येग्रामे स्थाणुमतीं संततजलप्रवाहेणस्थाणुभूतवृक्षत्वात् स्थाणुमतींनामनदीं । निम्नप्रदेशत्वात् विनताख्येनगरे । बहुजलवत्त्वेनगोमत्याख्यांनदींच ततार । भरतः सुपरिश्रान्तवाहनःसन् कलिङ्गनगरसमीपस्थंसालवनं सर्जकवनं। प्राप्य विश्रमार्थंगत्वा। ततस्तदास्वल्पकालएवाग-

वेनवा तीर्थंतयावा ॥ ७ ॥ **ति०** भद्रेण प्रशस्तेनरथेन ॥ ८ ॥ **ति०** अंशुधाने ग्रामे । महानदींगङ्गां दुष्प्रतरांज्ञात्वा प्राग्वटे पुरेआगत्य तत्रतांतीर्त्वा कुटिकोष्ठिकामायात् । तांतीर्त्वा धर्मवर्धनंग्राममगात् । **ती०** अंशुधाने अंशुधानाख्यदेशे । प्राग्वटेपुरेभागीरथीमुपायात् प्राप्तवान् । अपश्यदितिवापाठः ॥ ९—१० ॥ **ति०** सालांस्तुप्रियकानितिपाठेसालशब्दोवृक्षपर्यायः । सतांस्त्वितिपाठेसभरतइत्यर्थः ॥ १३ ॥ **शि०** पार्वतीयशब्दस्स्वार्थाणन्तः ॥ १४ ॥ **ती०** हस्तिपृष्ठकमासाद्य गजपृष्ठमारुह्यकुटिकामत्यवर्तत । अनेन शनैरागन्तव्यमितिसेनायाअनुज्ञादत्ता । तथाप्यनुजीविनःकेचनजनास्सगजास्समागताइत्यवगम्यते । **कतक०**

[पा०] १ ट. मिवाभ्यगात्. ङ. झ. मिवात्यगात्. २ क. ख. ङ. च. छ. झ. ञ. ट. दुष्प्रतरांसोंशुधाने. ३ घ. अपश्यद्राघवः. ४ क. ख. कोष्टगां. घ. तोष्टूकां. ५ ङ. छ. झ. ट. समगाद्धर्म. ६ च. झ. ञ. ट. प्रस्थंसमागमत्. ७ ख. ङ. छ. झ. ट. सतांस्तु. ८ ङ. छ. झ. चोत्तरगां. ख. प्रोत्तानिकां. ९ घ. ज. लोहितेस. क. ख. ग. झ. ञ. ट, लोहित्येस. ङ. छ. लौहित्येच. १० इदमर्धं. ख. पुस्तकेदृश्यते. ११ ज. कालवनं. ङ. मालवनं. १२ क. घ. थ. तथा.

वनं च समतीत्याशु शर्वर्यामरुणोदये ॥ अयोध्यां मनुना राज्ञा निर्मितां संददर्श[1] ह ॥ १८ ॥
तां पुरीं पुरुषव्याघ्रस्सप्तरात्रोषितः पथि ॥ अयोध्यामग्रतो दृष्ट्वा सारथिं[2] वाक्यमब्रवीत् ॥ १९ ॥
एषा नातिप्रतीता मे पुण्योद्याना यशस्विनी ॥ अयोध्या दृश्यते दूरात्सारथे पाण्डुमृत्तिका ॥२०॥
यज्वभिर्गुणसंपन्नैर्ब्राह्मणैर्वेदपारगैः ॥ भूयिष्ठमृद्धै[3]राकीर्णा राजर्षिपरि[4]पालिता ॥ २१ ॥
अयोध्यायां पुरा शब्दः श्रूयते तुमुलो महान् ॥ समन्तान्नरनारीणां तमद्य न शृणोम्यहम् ॥ २२ ॥
उद्यानानि[5] हि सायाह्ने क्रीडित्वोपरतैर्नरैः ॥ समन्ताद्विप्रधावद्भिः प्रकाशन्ते ममान्यदा[6] ॥
तान्यद्यानुरुदन्तीव परित्यक्तानि कामिभिः ॥ २३ ॥
अरण्यभूतेव पुरी सारथे प्रतिभाति[7] मे ॥ न ह्यत्र यानैर्दृश्यन्ते न गजैर्न च वाजिभिः ॥
निर्यान्तो वाऽभियान्तो वा नरमुख्या यथापुरम् ॥ २४ ॥
उद्यानानि पुरा[8] भान्ति मत्तप्रमुदितानि[9] च ॥ जनानां रतिसंयोगेष्वत्यन्त[10]गुणवन्ति च ॥ २५ ॥
तान्येतान्यद्य पश्यामि निरानन्दानि सर्वशः ॥ स्रस्तपर्णैरनुपथं विक्रोशद्भिरिव द्रुमैः ॥ २६ ॥
नाद्यापि श्रूयते शब्दो मत्तानां मृगपक्षिणाम् ॥ संरक्तां[11] मधुरां वाणीं कलं व्याहरतां बहु[12] ॥ २७॥

च्छत् ॥ १६—१७ ॥ सालवनंच शर्वर्यामाशुसमतीत्य अरुणोदयेऽयोध्यांसंददर्श ॥ १८ ॥ पथिसप्तरात्रोषितः अष्टमदिवसे त्वरातिशयेनरात्रावपिगत्वा अरुणोदयसमयेअयोध्यांददर्श । दृष्ट्वासारथिमब्रवीच्च ॥१९॥ एषेत्यादिश्लोकद्वयमेकान्वयं । पाण्डुमृत्तिका गोमयाद्युलेपनाद्याचरणाभावाच्छ्वेतमृत्तिका । एषाऽयोध्या नातिप्रतीतामेदृश्यते नातिसंतुष्टादृश्यते । "सुप्सुपा" इतिसमासः । "प्रतीतोहृषितेख्यातेज्ञातेप्रत्ययितेबुधे" इतिवैजयन्ती । यज्वभिः विधिनेष्टवद्भिः । गुणसंपन्नैः शमदमादिगुणसमृद्धैः । भूयिष्ठं भृशं । ऋद्धैः धनिकैः ॥ २०—२१ ॥ श्रूयतइति वर्तमाननिर्देशस्स्मृतौवर्तमानवद्भानात् । नरविशिष्टानार्योनरनार्यस्तासां ॥ २२ ॥ उद्यानानीतिसार्धश्लोकमेकंवाक्यं । उद्यानानिसायाह्ने गतेत्वितिशेषः । रात्रौक्रीडित्वाउपरतैः प्रातर्विप्रधावद्भिः गृहंप्रतिगच्छद्भिः । नरैः अन्यदा पूर्वं । प्रकाशन्ते अद्यत्वाहतानीति ॥ २३ ॥ प्रकारान्तरमस्याह—अरण्येति यानैः शिबिकादिभिः । निर्यान्तः नगरान्निर्गच्छन्तः । अभियान्तः प्रविशन्तः ॥ २४ ॥ मत्तानि फलपल्लवमकरन्दास्वादेनमत्तशुककोकिलभ्रमरादियुक्तत्वान्मत्तानि । प्रमुदितानि आलवालकरणदोहदसेचनादिनाकन्दलितानि । रतिसंयोगेषु रत्यर्थसंयोगेषु । अत्यन्तगुणवन्ति विविधकुसुमलतागृहदीर्घिकाक्रीडापर्वतादिगुणयुक्तानि । अद्यत्वाहतानीति द्रुमैरुपलक्षितानि पश्यामीत्यन्वयः ॥ २५—२६ ॥ अद्यापि सूर्योदयेपि । मत्तानां स्वस्वाभीष्टफलभोजनेनमत्तानां । अतएव संरक्तां रागयुक्तां । मधुरां रमणीयां । वाणीं कलंयथाभवतितथाव्याहरतां मृगपक्षिणां क्रीडामृगशुकशारिकाप्रभृतीनां । शब्दोनश्रूयते-

हस्तिपृष्ठकमितिएकसालेइतिचश्लोकद्वयंप्रक्षिप्तम् ॥ १५ ॥ ती० पाण्डुमृत्तिका सुधाधवलितसौधनिचयत्वादयोध्यायाःपाण्डुमृत्तिकात्वं । स० अदूरादितिच्छेदः ॥ २० ॥ स० श्रूयतेपुरा अश्रूयतअश्रृणवमित्यर्थः । "पुरिलुङ्चास्मे" इतिभूतानद्यतने विभाषाल्लुङ् । चाल्लडतीतेऽर्थे ॥ २२ ॥ ति० अनु मांलक्षीकृत्य रुदन्तीव । ममान्यथा महारण्यानीवप्रकाशन्ते । स० अन्यथाप्रकाशनमेवदर्शयति—तानीति । कामिभिःपरित्यक्तानीतिहेतोः रुदन्तीवप्रकाशन्तइत्यन्वयः ॥ २३ ॥ ति० मत्तप्रमुदितानि मत्तंप्रमुदितभृङ्गकोकिलादिमन्ति तादृशस्त्रीपुरुषवन्तिच । स० मत्ताश्वते प्रकर्षेणमुत्येषांते । तैरितानि युक्तानि ॥ २५ ॥ ती० स्रस्तपर्णैःअतएवविक्रोशद्भिरिवद्रुमैरुपलक्षितानि । स० विक्रोशद्भिरिवद्रुमैस्सह उद्यानानिपश्यामीत्यन्वयः । यद्वा द्रुमैः एतानि आ सम्यक् हतानियुक्तानि ॥ २६ ॥ स० संरक्तां नानारागसहितां मधुरांवाणींव्याहरतांपक्षिणां कलंव्याहरं-

[पा०] १ क. ग. ङ—ट. सददर्श. २ क. च. रथेसारथिमब्रवीत्. ख. ङ. छ. झ. ञ. ट. सारथिंचेदमब्रवीत्. ३ क. घ. ज. वृद्धैराकीर्णा. ४ ख. ङ. छ. झ. ञ. ट. वरपालिता. ५ क—घ. ज. उद्यानानिच. ६ क. ख. ग—ट. ममान्यथा. ७ ङ. घ. छ. झ. ञ. ट. भातिमां. क. ख. भातिमा. ८ ङ. झ. ञ. ट. पुरा. ९ घ. प्रमुदितानिवा. १० ग. ष्वत्यन्तं. ११ ङ. झ. ट. संरक्तां. च. ञ. सुरक्तां. ख. अत्यर्थमधुरां. १२ क. च. ञ. मुहुः.

चन्दनागरु[1]संपृक्तो[2] धूप[3]संमूर्च्छितोऽतुलः ॥ प्रवाति पवनः श्रीमान्किंनु नाद्य यथा[4]पुरम् ॥ २८ ॥
भेरीमृदङ्गवीणानां कोणसंघट्टितः पुनः ॥ किमद्य शब्दो विरतः सदा[5]ऽदीनगतिः पुरा ॥ २९ ॥
अनिष्टानि च पापानि पश्यामि विविधानि च ॥ निमित्तान्यमनोज्ञानि तेन सीदति मे मनः ॥३०
सर्वथा कुशलं सूत दुर्लभं मम बन्धुषु ॥ तथा ह्यसति संमोहे हृदयं [6]सीदतीव मे ॥ ३१ ॥
विषण्णः श्रान्तहृदयस्त्रस्तः स [7]लुलितेन्द्रियः ॥ भरतः प्रविवेशाशु पुरीमिक्ष्वाकुपालिताम् ॥ ३२ ॥
द्वारेण वैजयन्तेन प्राविशच्छ्रान्तवाहनः ॥ द्वास्स्थैरुत्थाय विजयं पृष्टस्[8]तैः सहितो ययौ ॥ ३३ ॥
स [9]त्वनेकाग्रहृदयो द्वास्स्थं प्रत्यर्च्य तं जनम् ॥ सूतमश्वपतेः [10]क्लान्तमब्रवीत्तत्र राघवः ॥ ३४ ॥
किमहं त्वरया नीतः [11]कारणेन विनाऽनघ ॥ [12]अशुभाशङ्कि हृदयं शीलं च पततीव मे ॥ ३५ ॥
श्रुता नो यादृशाः पूर्वं नृपतीनां विनाशने ॥ आकारांस्तानहं सर्वानिह पश्यामि सारथे ॥ ३६ ॥
संमार्जनविहीनानि परुषाण्युपलक्षये ॥ असंयतकवाटानि श्रीविहीनानि सर्वशः ॥ ३७ ॥
बलिकर्मविहीनानि धूपसंमोदनेन च ॥ अनाशितकुटुम्बानि प्रभाहीनजनानि च ॥
अलक्ष्मीकानि पश्यामि कुटुम्बिभवनान्यहम् ॥ ३८ ॥
अपेतमाल्य[13]शोभान्यप्यसंमृष्टाजिराणि च ॥ देवागाराणि शून्यानि [14]न चाभान्ति यथा[15]पुरम् ॥ ३९॥
देवतार्चाः [16]प्रविद्धाश्च [17]यज्ञगोष्ठ्यस्तथाविधाः ॥ माल्यापणेषु राजन्ते नाद्य [18]पण्यानि वा तथा ॥४०॥

॥ २७ ॥ चन्दनागरुसंपृक्तः चन्दनागरुगन्धसंपृक्तः । धूपसंमूर्छितः धूपव्याप्तः । श्रीमान् रमणीयः ॥ २८॥ कोणसंघट्टितः भेरीमृदङ्गवीणावादनसाधनभूतदण्डहस्ततलाङ्गुल्याद्याहतिजनितः । सदाअदीनगतिरितिपदच्छेदः । पुरा अदीनगतिःशब्दः अद्यपुनःकिमर्थं विरतः उपरतः ॥ २९ ॥ अनिष्टानि अनिष्टसूचकानि । पापानि क्रूराणि । "पापंस्यात्क्रूरपाप्मनोः" इतिवैजयन्ती । अमनोज्ञानि दर्शनमात्रेणदुःखकराणि । निमित्तानि अशुभसूचकानि शिवावाशितादीनि ॥ ३० ॥ संमोहे संमोहकारणे ॥ ३१ ॥ विषण्णः दुःखितः । श्रान्तहृदयः कलुषितमनस्कः । लुलितेन्द्रियः क्षुभितबाह्येन्द्रियः ॥ ३२ ॥ वैजयन्तेन वैजयन्ताख्येन । द्वारेण नगरपश्चिमद्वारेण । अत्ररेइतिगायत्र्यक्षरं । पञ्चसहस्राणिश्लोकानांगतानि ॥ ३३ ॥ अनेकाग्रहृदयः व्याकुलमनाः । प्रत्यर्च्य सोपचारंनिवर्त्य ॥ ३४ ॥ कारणेनविना आह्वानकारणोक्तिंविना । त्वरयानीतः द्रुतंवसिष्ठेनानीतः । अनघेतिचिन्तासमर्थतोक्तिः ॥ ३५ ॥ नः अस्माभिः । आकारान् वक्ष्यमाणान् तान् तादृशान् । इह नगरे ॥३६॥ आकारानेवदर्शयति—संमार्जनविहीनानीत्यादिना । संमार्जनविहीनानि कानिचित्कुटुम्बिभवनानीतिशेषः ॥ ३७ ॥ धूपसंमोदनेन धूमपरिमलेन । विहीनानीत्यनुकर्षः । अनाशितकुटुम्बानि अभोजितकुटुम्बानि । ण्यन्तप्रयोगः । भोजयितॄणामपिदुःखाक्रान्ततयापाकयत्नाभावात् ॥ ३८ ॥ अपेतामाल्यशोभा द्वारिवद्धपुष्पदामशोभा येभ्यस्तानि । शून्यानि पूजकपरिचारकादिरहितानि ॥ ३९ ॥ देवतार्चाः देवपूजाः । प्रविद्धाः लुप्ताः । "अर्चापूजाप्रतिमयोः" इतिवैजयन्ती । यज्ञगोष्ठ्यः यज्ञसभाः । तथाविधाः प्रविद्धाइत्यर्थः ।

तांमृगाणामितिबुद्ध्याविवेकेनान्वयः ॥ २७ ॥ ति० पापानि क्रूराणि काकादयः ॥ ३० ॥ ती० वैजयन्तेनेत्युक्तिरिन्द्रप्रासादसदृशत्वेननिर्मितत्वात् । यद्वा विजयप्रदविन्यासविशेषवत्त्वेन । यद्वा वैजयन्ती पताकाऽस्यास्तीतिवैजयन्तं । अर्शआद्यच् ॥ ३२ ॥

[पा०] १ ङ. झ. चन्दनागुरु. २ क. ङ. ज. झ. संपृक्तधूप. घ. संपृक्तधूम. ३ क. ङ. ज. झ. संमूर्च्छितोऽमलः. ४ ङ. छ—ट. पुरा. ५ ज. सदैवा. ६ क. च. ञ. ट. मेऽवसीदति. ख. मेविषीदति. ७ क. ग. च—ट. संलुलितेन्द्रियः. घ. ङ. संकुलितेन्द्रियः. ८ क. च. ञ. विजयमुक्तस्तैः. ९ च. ट. सचानेकाग्र. १० ग. श्रान्तं. ११ क. ख. कारणानि. १२ घ. अशुभाशंसि. १३ क. ग—ट. शोभानिअसंमृष्टा. ख. शोभानित्यसंमृष्टा. १४ क. च. छ. ज. ञ. ट. नचभान्ति. ख. ग. ङ. झ. नभान्तीह. १५ ख. ग. ङ. छ—ट. पुरा. १६ ज. प्रतिष्ठाश्च. ख. प्रसिद्धाश्च. ग. प्रवृद्धाश्च. १७ छ. झ. यज्ञगोष्ठास्तथैवच. ट. यज्ञगोष्ठास्तथाविधाः. १८ च. ञ. ट. पण्यानिवै.

दृश्यन्ते [1]वणिजोप्यद्य न यथापूर्व[2]मत्र वै ॥ ध्यानसंविग्नहृदया नष्टव्यापारयन्त्रिताः ॥
देवायतनचैत्येषु दीनाः [3]पक्षिगणास्तथा ॥ ४१ ॥
मलिनं चाश्रुपूर्णाक्षं दीनं ध्यानपरं कृशम् ॥ सस्त्रीपुंसं च पश्यामि जनमुत्कण्ठितं पुरे ॥ ४२ ॥
इत्येवमुक्त्वा भरतः सूतं तं दीनमानसः ॥ [4]तान्यरिष्टान्ययोध्यायां प्रेक्ष्य राजगृहं ययौ ॥ ४३ ॥

तां शून्यशृङ्गाटकवेश्मरथ्यां रजोरुणद्वारकपाटयन्त्राम् ॥
दृष्ट्वा [5]पुरीमिन्द्रपुरप्रकाशां दुःखेन संपूर्णतरो बभूव ॥ ४४ ॥
[6]बहूनि पश्यन्मनसोप्रियाणि [7]यान्यन्यदा [8]नास्य पुरे बभूवुः ॥
अवाक्छिरा दीनमना नहृष्टः पितुर्महात्मा प्रविवेश वेश्म ॥ ४५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे एकसप्ततितमः सर्गः ॥ ७१ ॥

द्विसप्ततितमः सर्गः ॥ ७२ ॥

पितृगृहंगतवताभरतेनतत्रतददर्शनात्कैकेयीगृहमेत्यतदभिवादनपूर्वकंतदीयप्रश्नोत्तरत्वेनमातामहादिकुशलमभिधायतां प्रतिदशरथस्थितिप्रश्नः ॥ १ ॥ कैकेय्याभरतंप्रतिराज्ञोलोकान्तरगतेः तद्धेतुतयारामप्रवासनस्य तत्कारणत्वेनस्वीयवरयाचनायाश्चनिवेदनपूर्वकंतत्समाश्वासनेनपितृसंस्करणपूर्वकंराज्येऽभिषेकचोदना ॥ २ ॥

अपश्यंस्तु ततस्तत्र पितरं पितुरालये ॥ जगाम भरतो द्रष्टुं मातरं मातुरालये ॥ १ ॥
अनुप्राप्तं तु तं दृष्ट्वा कैकेयी प्रोषितं सुतम् ॥ उत्पपात तदा हृष्टा त्यक्त्वा सौवर्णमासनम् ॥ २ ॥
स प्रविश्यैव धर्मात्मा स्वगृहं श्रीविवर्जितम् ॥ भरतः [9]प्रतिजग्राह जनन्याश्चरणौ शुभौ ॥ ३ ॥
[10]सा तं मूर्धन्युपाघ्राय परिष्वज्य यशस्विनम् ॥ अङ्के भरतमारोप्य प्रष्टुं समुपचक्रमे ॥ ४ ॥
अद्य ते कतिचिद्रात्र्यश्च्युतस्यार्यकवेश्मनः ॥ अपि नाध्वश्रमः शीघ्रं रथेनापततस्तव ॥ ५ ॥
आर्यकस्ते सुकुशली युधाजिन्मातुलस्तव ॥ प्रवासाच्च सुखं पुत्र सर्वं मे वक्तुमर्हसि ॥ ६ ॥

पण्यानि क्रयपुण्यानि ॥४०॥ ध्यानसंविग्नहृदयाः ध्यानासक्तहृदयाः । नष्टव्यापारयन्त्रिताः नष्टक्रयविक्रयादिव्यापाराः । यन्त्रिताः निरुद्धाश्च । यन्त्रिसंकोचइतिधातुः ॥४१॥ स्त्रीपुंसेति निपातनात् समासान्तोच्प्रत्ययः । समुदायसमुदायिनोर्भेदविवक्षयाजनविशेषणत्वं ॥ ४२ ॥ तान्यरिष्टानिप्रेक्ष्य तंसूतमित्येवमुक्त्वेत्यन्वयः ॥ ४३ ॥ शून्याःजनरहिताः शृङ्गाटकवेश्मरथ्याः चतुष्पथगृहवीथयोयस्यां । रजोरुणद्वारकपाटयन्त्रां रजोभिःअरुणानिमलिनानि द्वारस्थकपाटानां यन्त्राणि दारुबन्धादीनियस्यां । संमार्जनाद्यभावादितिभावः ॥४४॥ अन्यदा पूर्वकाले । अस्य भरतस्य । यानिअप्रियाणिनबभूवुः तानि मनसोप्रियाणिपश्यन्सन् अवाक्शिराः अवनतशिराः । नहृष्टः अहृष्टः महात्मा महाधैर्यः ॥ ४५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने एकसप्ततितमः सर्गः ॥ ७१ ॥

कतिचिदितिप्रश्ने पृथङ्निपातोवा । च्युतस्य निर्गतस्य । आर्यकः मातामहः । अपिःप्रश्ने ॥ ५ ॥ आर्यकःसुकुशली किमितिशेषः । प्रवासात्

शि० तदेवभङ्ग्यन्तरेणबोधयन्नाह—बभूवेति । अन्यदा अन्यस्मिन्कालेया।निअप्रियाणि अस्यपुरेनबभूवुः तानिपश्यन्महात्मा भरतः नहृष्टःहर्षाभावविशिष्टोबभूव । पितुर्वेश्मप्रविवेशच । ति० अन्यदा राजजीवने ॥ ४५ ॥ इत्येकसप्ततितमस्सर्गः ॥ ७१ ॥
स० स्वगृहं स्वमातृगृहं ॥ ३ ॥ स० कतिचित् कियत्यः । शि० कतिरात्र्यः व्यतीताइतिशेषः ॥ ५ ॥

[पा०] १ ख. च. ञ. ट. वणिजोप्यत्र. २ ख. च. ज. ञ. ट. मद्यवै. ३ ङ. झ. ट. पक्षिमृगास्तथा. घ. ज. पक्षिमृगाः स्थिताः. ४ क—छ. झ. ञ. ट. तान्यनिष्टानि. ५ क. छ. झ. ञ. ट. मिन्द्रपुरी. ६ ङ. छ. झ. ट. ठ. बभूव. ७ ज. यान्यन्यथा. ८ ख. नात्र. ९ छ. झ. ट. प्रेक्ष्यजग्राह. १० ख. ङ. च. छ. झ. ञ. ट. तंमूर्ध्निसमुपाघ्राय. क. सामूर्धनिसमाघ्राय.

एवं पृष्टस्तु कैकेय्या प्रियं पार्थिवनन्दनः ॥ आचष्ट भरतः सर्वं मात्रे राजीवलोचनः ॥ ७ ॥
अद्य मे सप्तमी रात्रिश्च्युतस्यार्यकवेश्मनः ॥ अम्बायाः कुशली तातो युधाजिन्मातुलश्च मे ॥ ८ ॥
यन्मे धनं च रत्नं च ददौ राजा परंतपः ॥ परिश्रान्तं पथ्यभवत्ततोऽहं पूर्वमागतः ॥ ९ ॥
राजवाक्यहरैर्दूतैस्त्वर्यमाणोऽहमागतः ॥ यदहं प्रष्टुमिच्छामि तदम्बा वक्तुमर्हति ॥ १० ॥
शून्योऽयं शयनीयस्ते पर्यङ्को हेमभूषितः ॥ न चायमिक्ष्वाकुजनः प्रहृष्टः प्रतिभाति मा ॥ ११ ॥
राजा भवति भूयिष्ठमिहाम्बाया निवेशने ॥ तमहं नाद्य पश्यामि द्रष्टुमिच्छन्निहागतः ॥ १२ ॥
पितुर्ग्रहीष्ये चरणौ तं ममाख्याहि पृच्छतः ॥ आहोस्विदम्ब ज्येष्ठायाः कौसल्याया निवेशने ॥१३॥
तं प्रत्युवाच कैकेयी प्रियवद्घोरमप्रियम् ॥ अजानन्तं प्रजानन्ती राज्यलोभेन मोहिता ॥ १४ ॥
या गतिः सर्वभूतानां तां गतिं ते पिता गतः ॥ राजा महात्मा तेजस्वी यायजूकः सतांगतिः॥१५॥
तच्छ्रुत्वा भरतो वाक्यं धर्माभिजनवाञ्शुचिः ॥ पपात सहसा भूमौ पितृशोकबलार्दितः ॥ १६ ॥
हा हतोस्मीति कृपणां दीनां वाचमुदीरयन् ॥ निपपात महाबाहुर्बाहू विक्षिप्य वीर्यवान् ॥ १७ ॥
ततः शोकेन संवीतः पितुर्मरणदुःखितः ॥ विललाप महातेजा भ्रान्ताकुलितचेतनः ॥ १८ ॥
एतत्सुरुचिरं भाति पितुर्मे शयनं पुरा ॥ शशिनेवामलं रात्रौ गगनं तोयदात्यये ॥ १९ ॥
तदिदं न विभात्यद्य विहीनं तेन धीमता ॥ व्योमेव शशिना हीनमप्शुष्क इव सागरः ॥ २० ॥
बाष्पमुत्सृज्य कण्ठेन स्वार्तः परमपीडितः ॥ प्रच्छाद्य वदनं श्रीमद्वस्त्रेण जयतांवरः ॥ २१ ॥
तमार्तं देवसंकाशं समीक्ष्य पतितं भुवि । निकृत्तमिव सालस्य स्कन्धं परशुना वने ॥ २२ ॥
मत्तमातङ्गसंकाशं चन्द्रार्कसदृशं भुवः ॥ उत्थापयित्वा शोकार्तं वचनं चेदमब्रवीत् ॥ २३ ॥

इतोनिर्गमादारभ्य अपिसुखमित्यनुपक्तापिनाऽन्वयः । एतत्सर्वमेवक्तुमर्हसीतियोजना॥ ६—७ ॥ अद्यरात्रिः अस्मादह्नः पूर्वरात्रिः । सप्तमी। अतः "सप्तरात्रोषितः पथि" इत्यनेन नविरोधः ॥ ८ ॥ राजा मातामहः । धनं प्रागुक्ताश्वादि। यद्ददौ तत् परिश्रान्तं परिश्रान्तवाहनं । अतएवपथ्यभवत् ॥ ९—१० ॥ शून्यः पितृशून्यः । शयनीयः शयनार्हः । इक्ष्वाकुजनः दशरथजनः ॥ ११ ॥ भवतीत्यत्रेतिकरणंद्रष्टव्यं । भूयिष्ठं प्राचुर्येण ॥ १२ ॥ कौसल्यायानिवेशने भवतिकिमित्यनुषञ्जनीयं॥१३॥ अजानन्तं राजवृत्तान्तमजानन्तं । प्रियवत् प्रियमिव । प्रजानन्ती अप्रियमुवाचेत्यन्वयः । तत्रहेतुः—राज्यलोभेनमोहितेति ॥ १४ ॥ अस्यदुःखमनुत्पादयन्तीमृदूक्त्यामरणमाह—येति । यायजूकः इज्याशीलः । "इज्याशीलोयायजूकः" इतिहलायुधः ॥ १५—१७ ॥ शोकेनसंवीतः शोकेनावृतः । मरणदुःखितः मरणश्रवणेनसंजातदुःखः । भ्रान्ताअनवस्थिता आकुलिताखिन्नाचेतना यस्यसः भ्रान्ताकुलितचेतनः ॥ १८ ॥ विलापमेवाह—एतदित्यादिना ॥ १९ ॥ अपूशुष्कःशुष्कापः । आहिताग्न्यादित्वान्निष्ठायाःपरनिपातः । उच्छुष्कइति पाठान्तरं ॥२०॥ कण्ठेन कण्ठस्वरेण । स्वार्तः सुतरामार्तः । अभवदितिशेषः । परमपीडितः मानसव्य-

---

शि० सप्तमी सप्तम्याः ईः गमनंव्यतीतत्वमित्यर्थः । यस्यास्सा अष्टमीत्यर्थः । अतएव सप्तरात्रोषितःपथीतिपूर्वोक्तेननविरोधः ॥ ८ ॥ **शि०** मेमह्यंयद्धनंरत्नंचराजाददौतेनतद्द्वारेणपरिश्रान्तं वाहनजातमितिशेषः ॥ ९ ॥ **शि०** अंबा त्वं वक्तुमर्हसि । **स०** अंब आवक्तुमर्हसीतिच्छेदः ॥ १० ॥ **ति०** अंबाज्येष्ठायाः अंबानांमध्येयाज्येष्ठा तस्याः । निवेशने तिष्ठतीतिशेषः ॥ १३ ॥ **स०** यागतिः देहान्तरेणप्राप्यंस्थानं ॥ १५ ॥ **स०** पुराभाति अभात् । तोयदात्यये शरत्काले ॥ १९ ॥ **ति०** अपूशुष्कमिवसागरंइतिपाठे सागरस्वरूपमित्यर्थः । **स०** शुष्कापइतिपाठे समासान्तोकारप्रत्ययः ॥ २० ॥ **स०** मत्तमातङ्गसंकाशं धूलिप्र-

[पां०] १ ग. च. छ. ञ. ट. आचष्टे. २ ट. ठ. वक्तुमर्हसि. ३ क. ङ. च. छ. झ. ञ. ट. भातिमे. च. भातिमां. ४ अस्मिञ्श्लोकेपूर्वोत्तरार्धयोःपौर्वापर्यं क. पाठेदृश्यते. ५ क. ङ. च. छ. झ. ञ. ट. पादौच. ६ ङ. च. छ. झ. ञ. ट. दंबाज्येष्ठायाः. ७ ग. घ. ज. पतिः. ८ ङ. झ. ट. कृपणं. ९ क. महाबाहुर्भुवि. १० घ. संविग्नः. ११ क—घ. मुच्छुष्कइव. १२ ग. भरतोबाष्पमुत्सृज्य. १३ ङ. छ. झ. स्वात्मनापरिपीडितः. १४ क. ख. घ—छ. झ. ट. मातामातङ्ग. १५ ङ. छ. झ. ट. सुतं.

उत्तिष्ठोत्तिष्ठ किं शेषे [1]राजन्नत्र महायशः ॥ [2]त्वद्विधा न हि शोचन्ति सन्तः सदसि संमताः ॥२४॥
दानयज्ञाधिकारा हि शीलश्रुति[3]वचोनुगा ॥ बुद्धिस्ते बुद्धिसंपन्न प्रभेवार्कस्य [4]मन्दिरे ॥ २५ ॥
स रुदित्वा चिरं कालं भूमौ [5]विपरिवृत्य च ॥ जननीं प्रत्युवाचेदं शोकैर्बहुभिरावृतः ॥ २६ ॥
अभिषेक्ष्यति [6]रामं नु [7]राजा यज्ञं नु यक्ष्यते ॥ इत्यहं कृतसंकल्पो हृष्टो यात्रा[8]मयासिषम् ॥ २७ ॥
तदिदं ह्यन्यथा [9]भूतं व्यवदीर्णं मनो मम ॥ पितरं यो न पश्यामि नित्यं प्रियहिते रतम् ॥ २८ ॥
अम्ब केनात्यगाद्राजा व्याधिना मय्यनागते ॥ धन्या रामादयः सर्वे यैः पिता संस्कृतः स्वयम् ॥२९॥
न नूनं मां महाराजः प्राप्तं जानाति कीर्तिमान् ॥ [10]उपजिघ्रेद्धि मां मूर्ध्नि तातः [11]संनम्य सत्वरम् ॥३०॥
क्व स पाणिः सुखस्पर्शस्तातस्याक्लिष्टकर्मणः ॥ [12]येन मां रजसा ध्वस्तमभीक्ष्णं परिमार्जति ॥३१॥
यो मे [13]भ्राता पिता बन्धुर्यस्य दासोस्मि [14]धीमतः ॥ तस्य मां शीघ्रमाख्याहि रामस्याक्लिष्टकर्मणः ॥३२॥
पिता हि भवति [15]ज्येष्ठो धर्ममार्यस्य जानतः ॥ तस्य पादौ गृहीष्यामि स हीदानीं गतिर्मम ॥३३॥
[16]धर्मविद्धर्मनित्यश्च [17]सत्यसन्धो दृढव्रतः ॥ [18]आर्यः किमब्रवीद्राजा पिता मे सत्यविक्रमः ॥ ३४ ॥
[[19]गुरुरेकः प्रजानां तु पिता मे सत्यविक्रमः] ॥ पश्चिमं साधु संदेशमिच्छामि श्रोतुमात्मनः ॥
इति पृष्टा यथातत्त्वं कैकेयी वाक्यमब्रवीत् ॥ ३५ ॥
रामेति राजा विलपन्हा सीते लक्ष्मणेति च ॥ स महात्मा परं लोकं गतो [20]गतिमतां वरः ॥ ३६ ॥

थायुक्तः ॥ २१—२३ ॥ राजन्निति भरतशोकनिवर्तनार्थमित्युक्तवती । सदसिसंमताः सभ्याइत्यर्थः ॥ २४ ॥ दानयज्ञौअधिक्रियेतेअनयेतिदानयज्ञाधिकारा। तत्रहेतुःशीलेति । शीलंसद्वृत्तं श्रुतिवचोवेदवाक्यं तेअनुगच्छतीतितदनुगा तदनुसारिणी बुद्धिः अध्यवसायः । अर्कस्यप्रभामन्दिरइव सूर्यप्रभायथा स्वस्थानेनिश्चलाभवतितथातेबुद्धिर्निश्चलाभातीत्यर्थः । मन्दरइतिपाठे अर्कस्यप्रभामन्दरइवेत्युक्तिरत्युन्नतमन्दरपर्वतेअर्कप्रभायाःपर्वतान्तरापेक्षयाचिरकालावस्थानात् । [मन्दरइतिपाठे मन्दरशिखरेस्थितस्यार्कस्यप्रभेवाधिकप्रकाशवतीत्यर्थः । उत्तरायणेहिमन्दरगतस्यसूर्यस्यप्रभाऽधिकंप्रकाशतइतिप्रसिद्धम्] ॥ २५—२६ ॥ यज्ञंयक्ष्यतइति यज्ञंकरिष्यतइत्यर्थः । यात्रामयासिषं यात्रामकार्षमित्यर्थः ॥ २७ ॥ व्यवदीर्णं भिन्नं ॥ २८—३० ॥ परिमार्जति परिमार्ष्टि । मां आगतमितिशेषः । क्वसपाणिः गतइतिशेषः ॥ ३१—३४ ॥ आत्मनःसंदेशं मद्विषयसंदेशं ॥ ३५ ॥ एवं पृष्टवन्तंभरतंप्रतित्वांराजा न स्मृतवान् किंतुराममेवस्मरन्स्वर्गमगादितिपितृविषयस्नेहनिवर्त-

क्षेपेणगजसदृशं । चन्द्रार्कसदृशं रामपक्षाणांचन्द्रसदृशं अन्येषांतापकत्वेनसूर्यसदृशमितिविवेकः ॥ २३ ॥ स० स्वमनोविवक्षया राजन्नित्युक्तिः ॥ २४ ॥ ति० श्रुतिःश्रुतं । तपः चान्द्रायणादि । शीलश्रुतिमनोनुगेतिपाठे तदुभयपरिशीलनविषयंयन्मनः संकल्पात्मकं तदनुगाबुद्धिः अध्यवसायात्मिका । अर्कस्यमन्दिरे अर्कमण्डले । तदेवहि तस्यगृहं । स० अर्कप्रभायथामन्दिरे समुद्रे सर्वदाव्याप्ता तथातवबुद्धिरपि लौकिकालौकिकविषयेव्याप्तेत्यर्थः । यद्वा मन्दिरे गृहे । अर्कस्य स्फटिकस्य । प्रभायथा तथातवबुद्धिरपिस्वच्छा । "अर्कोर्कपर्णेस्फटिके" "मन्दिरंनगरेऽगारेमन्दिरोमकरालये" इतिविश्वः ॥ २५ ॥ ति० अयाचिषमितिपाठे मातामहमितिशेषः ॥ २७ ॥ शि० मांप्राप्तंतातोराजानजानाति । नूनं निश्चितमेतत् । अन्यथामांसंनाम्यमूर्ध्निउपजिघ्रेत् । तुरन्यथार्थे ॥ ३० ॥ शि० गुरुरिति । तुयतः मेपिताप्रजानामेकोमुख्यः । गुरुः उपदेष्टा । अतः आत्मनः मत्संबन्धिनं । पश्चिमं अन्तिमं । संदेशं तदुपदिष्टंश्रोतुमिच्छामि । एतेनसंदेशंवदेतिसूचितं ॥ ३५ ॥ ति० विलपन्परलोकंगतः नतुकिंचिदपिसंदेशम-

[पा०] १ क. ख. ग. ङ. च. छ. ञ. राजपुत्र. २ क. त्वद्विधाहिन. ३ क. घ—ट. तपोनुगा. ४ घ. मण्डले. ५ ङ. छ. झ. ट. परिविवृत्य. ६ क. ख. ङ—ट. रामंतु. ७ च. रामोयज्ञेन. ख. राजायने. ८ छ. ट. अयाचिषं. ९ घ. भूतमवदीर्णं. १० ङ. छ. झ. ट. जिघ्रेत्तु. ११ ग. ङ. छ. झ. ञ. ट. संनाम्य. १२ ङ. छ. झ. ट. योहिमां. १३ ज. त्राता. १४ ङ. छ. झ. ट. संमतः. १५ क. श्रेष्ठो. १६ ङ. छ. झ. ट. धर्मविद्धर्मशीलश्च. १७ क. ख. ङ. च. छ. झ. ञ. ट. महाभागो. १८ क. ख. ग. ङ. च. छ. झ. ञ. ट. आर्ये. १९ इदमर्धं. ट. पुस्तकेदृश्यते. २० झ. मतिमतां.

[1]इमां तु पश्चिमां वाचं व्याजहार पिता तव ॥ [2]कालधर्मपरिक्षिप्तः पाशैरिव महागजः ॥ ३७ ॥
[3]सिद्धार्थास्ते नरा राममागतं सी[4]तया सह ॥ लक्ष्मणं च महाबाहुं द्रक्ष्यन्ति पुनरागतम् ॥ ३८ ॥
तच्छ्रुत्वा वि[5]षसादैव द्वितीयाप्रियशंसनात् ॥ विषण्णवदनो भूत्वा भूयः पप्रच्छ मातरम् ॥ ३९ ॥
क्व चेदानीं स धर्मात्मा कौसल्यानन्दवर्धनः ॥ लक्ष्मणेन सह भ्रात्रा सीतया च स[6]मं गतः ॥४०॥
तथा पृष्टा [7]यथातत्त्वमाख्यातुमुपचक्रमे ॥ [8]माताऽस्य युगपद्वाक्यं विप्रियं प्रि[9]यशङ्कया ॥ ४१ ॥
स हि राजसुतः पुत्र चीरवासा महावनम् ॥ दण्डकान्सह वैदेह्या लक्ष्मणानुचरो गतः ॥ ४२ ॥
तच्छ्रुत्वा भरतस्त्रस्तो भ्रातुश्चारित्रशङ्कया ॥ स्वस्य वंशस्य माहात्म्यात्प्रष्टुं समुपचक्रमे ॥ ४३ ॥
कच्चिन्न ब्राह्मणधनं हृतं रामेण कस्य चित् ॥ कच्चिन्नाढ्यो दरिद्रो वा तेनापापो विहिंसितः ॥४४॥
कच्चिन्न [10]परदारान्वा राजपुत्रोऽभिमन्यते ॥ [11]कस्मात्स दण्डकारण्ये [12]भ्रूणहेव विवासितः ॥ ४५ ॥
अथास्य चपला माता तत्स्वकर्म यथातथम् ॥ तेनैव स्त्रीस्वभावेन [13]व्याहर्तुमुपचक्रमे ॥ ४६ ॥
एवमुक्ता तु कैकेयी भरतेन महात्मना ॥ उवाच वचनं हृष्टा [14]मूढा पण्डितमानिनी ॥ ४७ ॥
न ब्राह्मणधनं किञ्चिद्धृतं रामेण कस्य चित् ॥ कच्चिन्नाढ्यो दरिद्रो वा तेनापापो विहिंसितः ॥
न रामः [15]परदारांश्च चक्षुर्भ्यामपि पश्यति ॥ ४८ ॥

नाभिप्रायेणोत्तरमाह—रामेत्यादिना ॥ ३६ ॥ इमामित्यादिश्लोकद्वयमेकान्वयं । सिद्धार्थाः कृतार्थाः । पुनरागतंद्रक्ष्यन्तीति इमांवाचंव्याजहारेतिसंबन्धः ॥ ३७—३८ ॥ द्वितीयाप्रियशंसनात् राजमरणापेक्षयारामस्यदेशान्तरगमनरूपाप्रियस्यद्वितीयत्वं ॥ ३९—४० ॥ यथातथमितिसम्यक्पाठः । यथाचायमितिपाठे अयं वृत्तान्तः यथा तथाऽऽख्यातुमित्यन्वयः । विप्रियं रामविवासनप्रतिपादकं । प्रियशङ्कया एतच्छ्रवणेनभरतस्यप्रियंभविष्यतीतिवितर्केण । "शङ्कावितर्कभययोः" इतिवैजयन्ती । युगपत् राजमरणकथनसमकालमेव । यद्वा युगपदाख्यातुमुपचक्रमइत्युपक्रमस्यवक्ष्यमाणपरत्वात् । "याचितस्तेपिताराज्यंरामस्यचविवासनं" इति वक्ष्यमाणवाक्यार्थाभिप्रायेणयौगपद्यं ॥ ४१ ॥ दण्डकान्महावनमिति वेदाःप्रमाणमितिवन्निर्देशः ॥ ४२ ॥ चारित्रशङ्कया चारित्रंकिमभूदितिशङ्कया । वंशस्यमाहात्म्यात् असदाचारवैमुख्यपूर्वकसदाचारनिरतत्वंवंशस्यमाहात्म्यं ॥ ४३ ॥ ब्राह्मणधनमित्यत्राविभक्तिकोनिर्देशः । कस्यचिद्ब्राह्मणस्येत्यर्थः । यद्वा कस्यचित् कस्माचिद्धेतोरित्यर्थः ॥ ४४ ॥ भ्रूणः श्रुताध्ययनसंपन्नः । "अनूचानोगुणैर्युक्तोत्रतस्वाध्यायवाञ्छुचिः । भ्रूणइत्युच्यतेसद्भिस्त्वेषयोविजितेन्द्रियः" इतिस्मृतेः ॥४५॥ यथातथं यथावृत्तं । निपातनात्साधुः । स्त्रीस्वभावेन चापलेनेत्यर्थः । व्याहर्तुमुपचक्रमे वक्तुंव्यवसितवतीत्यर्थः । अथास्येतिश्लोकोमुनेःखेदाभिनयः एवमितिश्लोकःक्रमिकइतिकेचित् ॥ ४६ ॥ एवमिति । अयंश्लोकः पूर्वानुवादार्थः ॥ ४७ ॥ रामःपरदारान् चक्षुर्भ्यामपिनपश्यति एवंसति नस्पृशतीत्यत्रकिंवक्तव्यमिति

वोचदित्यर्थः ॥ ३६ ॥ **ति०** क्वचेदानीं गतइतिशेषः । समागतः मिलितः ॥ ४० ॥ **ति०** प्रियशंसया प्रियशङ्कया। **शि०** तथा तेनप्रकारेण । पृष्टाऽस्यभरतस्यमाता कैकेयी । प्रियशंसया प्रियबोधनशीलयावाचा । विप्रियं अप्रियत्वेनप्रतिभासमानं । वाक्यं राज्ञोरामादीनांचगमनसूचकवचनं । युगपत् एककालावच्छेदेन । यथान्यायं न्यायमनतिक्रम्य व्याख्यातुं वक्तुमुपचक्रमे । प्रियशङ्कयेतिपाठेतु इदंगमनद्वयं प्रियमप्रियंवेतिसंशयेनोपलक्षितेतिकैकेयीविशेषणम् ॥ ४१ ॥ **ति०** कस्यचित् हेतोरितिशेषः । कस्यचित् अन्यस्यापि धनमितिशेषः । **स०** यद्वारामेणब्राह्मणधनंकिंचिद्वा हृतमितिकस्यापिपुंसः चित् ज्ञानंनेत्यन्वयः ॥४४॥ **ति०**

[पा०] १ ङ. छ. झ. ट. इतीमां. २ झ. कालधर्मं. ३ क. ङ. छ. झ. ञ. ट. सिद्धार्थास्तु. ४ ख. ङ. छ. झ. ट. सहसीतया. ५ ङ. च. छ. झ. ञ. ट. विषसादैवं. ६ ख. ग. ङ—ट. समागतः. ७ ङ. छ. झ. ट. यथान्यायं. ८ च. मातास्यतुमहद्वाक्यं. ख. ग. घ. ज. मातास्यसुमहद्वाक्यं. ९ ङ. छ. झ. ट. प्रियशंसया. १० क. च. परदारान्हि. ११ क. च. ज. ञ. कस्माच. १२ ङ. छ. झ. ट. भ्रातारामो. १३ ४६—४७ तमश्लोकयोःपौर्वापर्यं क. च. पाठयोर्दृश्यते. १४ ख. ग. ङ. झ. ट. वृथापण्डित. १५ क. ख. परदारान्स. ङ. छ. झ. ट. परदारान्स.

मया[1] तु पुत्र श्रुत्वैव[2] रामस्यैवाभिषेचनम् ॥ याचितस्ते पिता राज्यं रामस्य[3] च विवासनम् ॥ ४९ ॥
स स्ववृत्तिं समास्थाय पिता ते[4] तत्तथाऽकरोत् ॥ रामश्च[5] सहसौमित्रिः प्रेषितः[6] सीतया[7] सह ॥५०॥
तमपश्यन्प्रियं पुत्रं महीपालो महायशाः ॥ पुत्रशोकपरिद्यूनः पञ्चत्वमुपपेदिवान्[8] ॥ ५१ ॥
त्वया त्विदानीं धर्मज्ञ राजत्वमवलम्ब्यताम् ॥ त्वत्कृते हि मया सर्वमिदमेवंविधं कृतम् ॥ ५२ ॥
मा शोकं मा च सन्तापं धैर्यमाश्रय पुत्रक ॥ त्वदधीना हि नगरी राज्यं चैतदनामयम् ॥ ५३ ॥
तत्पुत्र शीघ्रं विधिना विधिज्ञैर्वसिष्ठमुख्यैः सहितो द्विजेन्द्रैः[9] ॥
संकाल्य[10] राजानमदीनसत्त्वमात्मानमुर्व्यामभिषेचयस्व ॥ ५४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे द्विसप्ततितमः सर्गः ॥ ७२ ॥

त्रिसप्ततितमः सर्गः ॥ ७३ ॥

भरतेनबहुधाकैकेयीगर्हणपूर्वकंतांप्रतिवनाद्रामस्यायोध्यांप्रत्यानयनेनराज्येऽभिषेचनपूर्वकंस्वस्यतस्मिन्दासीभवनप्रतिज्ञानम् ॥ १ ॥

[[11]कैकेय्याप्येवमुक्तस्तु भरतो राघवानुजः ॥ कर्णौ कराभ्यां प्रच्छाद्य पपात धरणीतले ॥ १ ॥]
श्रुत्वा[12] तु पितरं वृत्तं भ्रातरौ च विवासितौ ॥ भरतो[13] दुःखसंतप्त इदं वचनमब्रवीत् ॥ २ ॥
किंनु[14] कार्यं हतस्येह मम राज्येन शोचतः ॥ विहीनस्याथ पित्रा च भ्रात्रा पितृसमेन च ॥ ३ ॥
दुःखे मे दुःखमकरोर्व्रणे क्षारमिवादधाः[15] ॥ राजानं प्रेतभावस्थं कृत्वा रामं च तापसम् ॥ ४ ॥
कुलस्य त्वमभावाय कालरात्रिरिवागता ॥ अङ्गारमुपगूह्य स पिता मे नावबुद्धवान् ॥ ५ ॥

भावः ॥ ४८ ॥ तेराज्यंरामस्यविवासनंचपितायाचितः पूर्वदत्तवरद्वयविषयत्वेनयाचितइत्यर्थः ॥ ४९ ॥ स्ववृत्तिं स्वप्रतिज्ञारूपांवृत्तिं ॥ ५० ॥ पुत्रशोकपरिद्यनः पुत्रशोकेनपरिद्यूनः तप्तः । विलपन्नित्यर्थोवा । "दिवोविजिगीषायां" इतिनिष्ठानत्वं ॥ ५१ ॥ धर्मज्ञ राजनीतिज्ञ ॥ ५२ ॥ अनामयं निरुपद्रवं ॥ ५३ ॥ संकाल्य संस्कृत्य ॥ ५४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने द्विसप्ततितमः सर्गः ॥७२॥

वृत्तं अतीतं मृतमितियावत् ॥ २ ॥ कार्यं प्रयोजनं । हतस्य भाग्यहीनस्य ॥ ३ ॥ दुःखेदुःखकरणात् व्रणक्षाराधानसादृश्यं ॥ ४ ॥ कालरात्रिः प्रलयकालोत्थितसर्वसंहारशक्तिः । उपगूह्य आलिङ्ग्य

भ्रूणहेवविवासितइतिपाठे सर्वशाखाध्यायीभ्रूणइतितीर्थः। भ्रूणः गर्भइत्यन्ये ॥४५॥ ति० स्त्रीस्वभावेन धर्माधर्महिताहितोचितानुचितविवेकशून्यतारूपेण । शि० स्त्रीस्वभावेन स्त्रीपुंसुतरामभावोयस्यतेन अतिधैर्येणेत्यर्थः । रामानु० भ्रूणहेवविवासितइतिश्लोकानन्तरं एवमुक्तेतिश्लोकश्चेत्सुसंगतंभवति । मध्येअथास्येतिश्लोकोवर्तते । स्थितस्यगतिश्चिन्तनीयेतिन्यायेनास्यव्याख्याक्रियते । व्याहर्तुमुपचक्रमे वक्तुंव्यवसितवतीत्यर्थः । शि० पञ्चत्वं पञ्चभ्यःपञ्चसंख्याकभूतनिर्मितेभ्यः त्वं अन्यं साकेतमित्यर्थः ॥ ५१ ॥
ति० धर्मज्ञ रामवत्पित्राज्ञापालनरूपधर्मज्ञ । शि० ननुकिमर्थमेवंकृतमित्यतआह—त्वत्कृते त्वत्तः अन्यस्य देवादेः कृते कार्यार्थं ॥ ५२ ॥ शि० अदीनसत्त्वं नदीनंक्षीणंसत्त्वंयेनतं । राजानं राजत्वं संकल्प्य वसिष्ठाद्युपदेशपूर्वकंगृहीत्वा । आत्मानं स्वबुद्धिं अभिषेचयस्व राजनीतौस्नापय निवेशयेत्यर्थः । राजशब्दोभावप्रधानः ॥ ५४ ॥ इतिद्विसप्ततितमस्सर्गः ॥ ७२ ॥
ति० पितुः वृत्तं अत्ययः । शि० पितुः वृत्तं वृत्तान्तं ॥ २ ॥ ति० क्षारं खरमूत्रसहितचूर्णं । स० दुःखे पितृदुःखे दुःखं रामविवासनजं । व्रणे छिन्नप्रदेशे । औदधं उदधिभवं । क्षारं लवणरसं ॥४॥ स० कालरात्रिरिव संहारकालिकरात्रिरिव ।
[पा०] १ घ. मयापि. २ घ. श्रुत्वातु. ३ ङ. छ. झ. ञ. ट. रामस्येहा. ख. राज्ञारामाभि. ४ ङ. तेनतथा. ५ ख. ङ. छ. झ. ट. रामस्तु. ६ क. ग. घ. प्रोषितः. ७ क. ख. ग. ङ. च. छ. झ. ञ. ट. सहसीतया. ८ ख. पञ्चत्वंसमुपेयिवान्. ९ च. ञ. मुनीन्द्रैः. १० ङ. ज. ट. संकल्प्य. ख. संस्कार्य. ११ अयंश्लोकः ख. पुस्तकेदृश्यते. १२ क. ग. च. ञ. श्रुत्वाचपितरं. ङ. छ. झ. ट. श्रुत्वाचसपितुर्वृत्तं. १३ ख. भरतःशोकसंतप्तः. १४ छ. ट. किंतु. १५ ङ. झ. ट. मिवाददाः. ठ. मिवौदधं.

मृत्युमापादितो राजा त्वया मे पापदर्शिनि ॥ सुखं परिहृतं मोहात्कुलेऽस्मिन्कुलपांसिनि ॥ ६ ॥
त्वां प्राप्य हि पिता मेऽद्य सत्यसंधो महायशाः ॥ तीव्रदुःखाभिसंतप्तो वृत्तो दशरथो नृपः ॥७॥
विनाशितो महाराजः पिता मे धर्मवत्सलः ॥ कस्मात्प्रव्राजितो रामः कस्मादेव वनं गतः ॥ ८ ॥
कौसल्या च सुमित्रा च पुत्रशोकाभिपीडिते ॥ दुष्करं यदि जीवेतां प्राप्य त्वां जननीं मम ॥ ९ ॥
ननु त्वार्योपि धर्मात्मा त्वयि वृत्तिमनुत्तमाम् ॥ वर्तते गुरुवृत्तिज्ञो यथा मातरि वर्तते ॥ १० ॥
तथा ज्येष्ठा हि मे माता कौसल्या दीर्घदर्शिनी ॥ त्वयि धर्मं समास्थाय भगिन्यामिव वर्तते ॥ ११
तस्याः पुत्रं कृतात्मानं चीरवल्कलवाससम् ॥ प्रस्थाप्य वनवासाय कथं पापे न शोचसि ॥ १२ ॥
अपापदर्शनं शूरं कृतात्मानं यशस्विनम् ॥ प्रव्राज्य चीरवसनं किंनु पश्यसि कारणम् ॥ १३ ॥
लुब्धाया विदितो मन्ये न तेऽहं राघवं प्रति ॥ तथा ह्यनर्थो राज्यार्थं त्वयाऽऽनीतो महानयम् १४
अहं हि पुरुषव्याघ्रावपश्यन्रामलक्ष्मणौ ॥ केन शक्तिप्रभावेन राज्यं रक्षितुमुत्सहे ॥ १५ ॥
तं हि नित्यं महाराजो बलवन्तं महाबलः ॥ अपाश्रितोऽभूद्धर्मात्मा मेरुर्मेरुवनं यथा ॥ १६ ॥
सोहं कथमिमं भारं महाधुर्यसमुद्धृतम् ॥ दम्यो धुरमिवासाद्य वहेयं केन चौजसा ॥ १७ ॥
अथवा मेऽभवेच्छक्तिर्योगैर्बुद्धिबलेन वा ॥ सकामां न करिष्यामि त्वामहं पुत्रगर्धिनीम् ॥ १८ ॥

॥ ५—७ ॥ महाराजःकस्माद्विनाशितः रामःकस्मात्प्रव्राजितइतिसंबन्धः । त्वयासर्वंनिष्फलमेवकृतमितिभावः ॥ ८ ॥ यदिजीवेतां तदादुष्करंजीवेतामिति संबन्धः ॥ ९ ॥ आर्यः ज्येष्ठः । वृत्तिं शुश्रूषां । वर्तते करोतीत्यर्थः । मातरिवर्तते मातरिशुश्रूषते ॥ १० ॥ दीर्घदर्शिनी दूरकालभाव्यनर्थदर्शिनी । " दूरानर्थस्यसंदर्शीदीर्घदृष्टिःप्रकीर्तितः " इति ॥ ११ ॥ तस्याः तादृशधर्मयुक्तायाः ॥ १२ ॥ किंनुपश्यसिकारणं । किंफलंपश्यसीत्यर्थः । फलंहिप्रयोजकतयाकारणं । नकिमपीत्यर्थः ॥ १३ ॥ अहंराघवंप्रति यथा यादृशप्रकारयुक्तः तथा लुब्धयास्ते लुब्धयात्वया । नविदित इतिमन्ये । अविदितत्वेहेतुमाह—तथाहीति । राज्यार्थं ममराज्यार्थं । महानयमनर्थस्त्वया आनीतोहि आनीतःखलु संपादितःखलु ॥ १४ ॥ राघवंप्रत्यहंयादृशइत्युक्तंविवृणोति—अहमिति । अपश्यन्हि अपश्यन्नेव । " हिहेताववधारणे " इत्यमरः । केनशक्तिप्रभावेन शक्त्यतिशयेन । भ्रातृसंपत्तिरेवममशक्त्यतिशयइतिभावः ॥ १५ ॥ नकेवलंममैवरामापेक्षापितुरपीत्याह—तमिति । मेरुर्मेरुवनंयथा मेरुजनितमेरुवनस्यतद्रक्षकत्वं परैराक्रमितुमशक्यत्वसंपादनेन ॥ १६ ॥ केनशक्तिप्रभावेनेत्युक्तमर्थंसदृष्टान्तमाह—सइति । अहं बालः इमं प्रबुद्धपितृधृतं । भारं राज्यभारं । महाधुर्यो महाबलीवर्दः धुरंवहतीति धुर्यः "धुरोयड्ढकौ" इतियत्प्रत्ययः । तेनसमुद्धृतं धुरं भारं । पुंस्त्वमार्षं । दम्यः तरुणवत्सइव । "तर्णकः स्मर्यतेवत्सोदम्योवत्सतरश्चसः " इति हलायुधः । " दम्यवत्सतरौसमौ " इत्यमरश्च । केनौजसा केनावष्टम्भेन । " ओजोवष्टम्भबलयोः " इतिवैजयन्ती । कथं केनप्रकारेण वहेयं ॥ १७ ॥ योगैः सामदानाद्युपायैः । " योगःसन्नहनोपायध्यानसंगतियुक्तिषु " इत्यमरः । बुद्धिबलेन ग्रहणधारणाद्यष्टाङ्गयुक्तबुद्धिबलेनवा । मेशक्तिर्भवेत् । राजपुत्रत्वेनसंभावितत्वात् ।

अङ्गारं अग्निं नावबुद्धवान् धक्ष्यतीतिनज्ञातवान् ॥ ५ ॥ शि० वृद्धः ज्ञानवयोभ्यामधिकः । मेपिता त्वांप्राप्य अद्य अस्मिन्समये । तीव्रदुःखाभिसंतप्तः रामवियोगजनितदुःखाक्रान्तः । अभवदितिशेषः ॥ ७ ॥ ति० सवाकस्माद्वनंगतः । निष्प्रयोजनमेवेत्यर्थः ॥ ९ ॥ शि० अपापदर्शिनं पापंस्वाश्रितजनापराधंपश्यति तच्छीलस्तद्भिन्नस्तं स्वाश्रितापराधविषयकज्ञानाभाववन्तमित्यर्थः । स० अपापदर्शनं पुण्यप्रापकज्ञानविषयं । कारणं प्रव्राजने ॥ १३ ॥ स० मेरुजनितवनस्ययथापरप्रवृत्तिनिरोधकत्वेन

[पा०] १ क. छ. महातपाः. २ ख. ट. वृद्धो. ३ ङ. छ. झ. ट. नन्वार्योपिच. ४ क. वृत्तमनुत्तमं. घ. वृत्तिमनुव्रतां. ५ ञ. तव. ६ घ. ङ. छ. झ. ट. महात्मानं. ७ ङ. झ. शोचसे. ८ घ—छ. झ. ञ. ट. दर्शिनं. ९ ख. महात्मानं. १० क. ङ. ग. झ. ञ. यथा. ११ छ. झ. ट. महौजसं. १२ ङ. छ. झ. ट. उपाश्रितो. १३ ख. ग. ङ. छ—ट. समुद्यतं. १४ च. छ. झ. ट. सहेयं.

न मे विकाङ्क्षा जायेत त्यक्तुं त्वां पापनिश्चयाम् ॥ यदि रामस्य नावेक्षा त्वयि स्यान्मातृवत्सदा ॥१९॥
उत्पन्ना तु कथं बुद्धिस्तवेयं पापदर्शिनि ॥ साधुचारित्रविभ्रष्टे पूर्वेषां नो विगर्हिता ॥ २० ॥
अस्मिन्कुले हि [1]पूर्वेषां ज्येष्ठो [2]राज्येऽभिषिच्यते ॥ अपरे भ्रातरस्तस्मिन्प्रवर्तन्ते समाहिताः ॥ २१ ॥
न हि मन्ये नृशंसे त्वं राजधर्ममवेक्षसे ॥ गतिं वा [3]न विजानासि [4]राजवृत्तस्य शाश्वतीम् ॥ २२ ॥
सततं [5]राजवृत्ते हि ज्येष्ठो [6]राज्येऽभिषिच्यते ॥ राज्ञामेतत्समं तत्स्यादिक्ष्वाकूणां विशेषतः ॥ २३ ॥
तेषां धर्मैकरक्षाणां [7]कुलचारि[8]त्रशोभिनाम् ॥ [9]अत्र चारि[10]त्रशौण्डीर्यं त्वां प्राप्य विनिवर्तितम् ॥ २४ ॥
तवापि [11]सुमहाभागा जनेन्द्राः कुलपूर्वगाः ॥ [12]बुद्धेर्मोहः कथमयं संभूतस्त्वयि गर्हितः ॥ २५ ॥
न तु कामं करिष्यामि [13]तवाहं पापनिश्चये ॥ [14]त्वया व्यसनमारब्धं जीवितान्तकरं मम ॥ २६ ॥
एष त्विदानीमे[15]वाहमप्रियार्थं [16]तवानघम् ॥ निवर्तयिष्यामि वनाद्भ्रातरं स्वजनप्रियम् ॥ २७ ॥

तथापि पुत्रगर्धिनीं पुत्रप्रयोजनाभिलाषवतीं । त्वांसकामांनकरिष्यामि गर्हिताभिलापत्वादितिभावः ॥१८॥ रामस्यत्वयिमातृवत् मातरीव । सदा अवेक्षा भक्तिपूर्वकेक्षणं । यदिनस्यात्तदानींपापनिश्चयांत्वांत्यक्तुंमे विकाङ्क्षा काङ्क्षाराहित्यं । नजायेत काङ्क्षाजायेतैव । रामस्यत्वयिमातृवत्प्रतिपत्तिसद्भावात् । त्वांत्यक्तुंनेच्छामीत्यर्थः ॥ १९ ॥ नःपूर्वेषां पूर्वैः । विगर्हिता इयंबुद्धिः ज्येष्ठेविद्यमानेकनिष्ठस्यराज्यप्रार्थनाविषया बुद्धिः । तवकथमुत्पन्ना ॥ २० ॥ पूर्वेषामितिनिर्धारणेषष्ठी । अपरे कनिष्ठाभ्रातरः । तस्मिन्समाहिताः प्रवर्तन्ते पितृवत्तच्चित्तानुवर्तनेसावधानाजीवन्तीत्यर्थः । तथाहमनुः "ज्येष्ठएवतुगृह्णीयात्पित्र्यंधनमशेषतः । शेषास्तमनुजीवेयुर्यथैवपितरंतथा" इति ॥ २१ ॥ राजधर्मं राज्ञांविहितंधर्मं । नावेक्षसे नाद्रियसे । अथवा राजवृत्तस्य राजसमाचारस्य । गतिं प्रकारंवा । नजानासीतिमन्ये ॥ २२ ॥ नकेवलमस्माकमेवायं धर्मः किंतुसर्वेषामपीत्याह—सततमिति । राजवृत्ते विचार्यमाणइतिशेषः । एतद्राज्ञांसर्वेषांसमं । इक्ष्वाकूणांतु तत् ज्येष्ठाभिषेचनं । विशेषतःस्यात् । अस्खलिताचारत्वादितिभावः ॥ २३ ॥ धर्मेण एकारक्षायेषांतेतथा । कुलचारित्रशोभिनां कुलक्रमागतचरित्रशोभिनां । "चरित्रंचरितंशीलंचारित्रंचसमंमतं" इतिहलायुधः । चारित्रशौण्डीर्यं चरित्रगर्वितत्वं चरित्रजनितसमुन्नतत्वमितियावत् । त्वांप्राप्यविनिवर्तितं त्वत्संबन्धान्निवृत्तमित्यर्थः ॥२४॥ स्वकुलचारित्रक्रममभिधायमातृकुलाचारक्रममप्याह—तवेति । जनेन्द्राः राजानः । कुलपूर्वगाः कुलपूर्वाः कुलज्येष्ठाः तान्गच्छन्तीतिकुलपूर्वगाः । ज्येष्ठाभिषेचनशीलाइत्यर्थः । सुमहाभागाः सुचरित्राः ॥ २५ ॥ फलितमाह—नत्वित्यादिना ॥ २६ ॥ नकेवलमिष्टाकरणं अनिष्टमपितव

मेर्वाश्रयत्वं तथारामोपि परोपद्रवनिवारकत्वेनाश्रयइत्यर्थः ॥ १६ ॥ ति० "त्यजेदेकंकुलस्यार्थे" इतिन्यायेनतवविवासनमेवसांप्रतं तथापिरामस्यत्वयिमातृवद्व्यवहारात्तन्नकर्तुंशक्यमित्याह—नेति ॥ १९ ॥ ति० अस्मदीयेकुलेसर्वेषांज्येष्ठोऽभिषिच्यते नत्वापेक्षिकज्येष्ठः ॥ २१ ॥ ति० राजवृत्तस्य राजधर्मस्य । शाश्वतीं अव्यभिचरितां । गतिं फलमपिनजानासीतिमन्ये ॥ २२ ॥ ति० राज्ञांसर्वमितिपाठे सर्वमित्यत्रच्छान्दसीषष्ठ्यर्थेद्वितीया । सर्वेषामित्यर्थः ॥ २३ ॥ ति० धर्मेणएकेनरक्षारक्षणंयेषां तेषां धर्मैकरक्षाणां । धर्ममेकंरक्षन्तितेषांवा । ती० कुलचारित्रयोगिनां कुलशीलयुक्तानां ॥ २४ ॥ ति० तथात्वय्यपिमहाकुलप्रसूतायामेवंविधबुद्धिकारणंनपश्यामीत्याह—तवापीति । हेसुमहाभागे तदुपपादकंविशेषणं—जनेन्द्रकुलपूर्वकेइति । जनेन्द्रःकैकेयकुलकूटस्थः पूर्वकःकारणंयस्यास्तथाभूते । अतोमहाकुलप्रसूतायास्तवगर्हितोयंबुद्धिमोहस्त्वयिकथंसंभूतइत्यन्वयः ॥ २५ ॥ स० एषोहं । अनघेइतिचिराभ्यासात् असमयेप्यमनस्कतयोक्तिर्वा । "रक्षोहागमलघ्वसन्देहाः" इतिवत् अघाभावोऽनघं तस्मिन् पापाभावे । पुण्यार्थमितियावत् । इतिवार्थःप्रशंसासमयौचित्याज्ज्ञेयः । सुमहाभागेइत्यादिसंबोधनादेः "तांतथागर्हयित्वातु" इत्यादिपुरोवादस्यचशावल्यगेतत्कल्पकमितिमन्तव्यम् ॥ २७ ॥ इतित्रिसप्ततितमस्सर्गः ॥ ७३ ॥

[पा०] १ ङ. छ. झ. ञ. ट. सर्वेषां. २ ग. घ. राजाभिषिच्यते. ३ क. ञ. नाभिजानासि. ४ ग. राज्यवृत्तस्य. ५ ङ. छ. झ. ञ. ट. राजपुत्रेषु. ६ ङ. च. छ. झ. ञ. ट. राजाभिषिच्यते. ७ घ. कुलेचारित्र. ८ ग. ज. योगिनां. ९ क. ख. ग. ङ. छ. झ. ट. अद्य. १० झ. शौटीर्यं. ११ छ. झ. ट. सुमहाभागेजनेन्द्रकुलपूर्वके. १२ क. ख. ग. ङ. छ. झ. ञ. ट. बुद्धिमोहः. १३ घ. त्वयाहं. १४ ख. छ. झ. ञ. ट. त्वया. क. ङ. यथा. १५ क. च. मेवाहंविप्रियार्थं. १६ ठ. तवानघे.

निवर्तयित्वा रामं च तस्याहं दीप्ततेजसः ॥ दासभूतो भविष्यामि सुस्थितेनान्तरात्मना ॥ २८ ॥
इत्येवमुक्त्वा भरतो महात्मा प्रियेतरैर्वाक्यगणैस्तुदंस्ताम् ॥
शोकातुरश्चापि ननाद भूयः सिंहो यथा पर्वतगह्वरस्थः ॥ २९ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे त्रिसप्ततितमः सर्गः ॥ ७३ ॥

चतुस्सप्ततितमः सर्गः ॥ ७४ ॥

भरतेनपुनःपुनःकैकेयीदुश्चेष्टितानुस्मरणेनसमभिवृद्धरोपतयापुनर्विशेषतस्तद्गर्हणम् ॥ १ ॥ तथाकौसल्यायाःपुत्रशोकासहिष्णुत्वेकामधेनुचरित्रंदृष्टान्तीकृत्यरामस्यवनात्प्रतिनिवर्तनेनराज्येऽभिषेचनपूर्वकंस्वेनतत्प्रतिज्ञातवनवासपूरणोक्तिः ॥ २ ॥ तथा शोकातिरेकान्मोहाधिगमेनभुविनिपतनम् ॥ ३ ॥

तां तथा गर्हयित्वा तु मातरं भरतस्तदा ॥ रोषेण महताऽऽविष्टः पुनरेवाब्रवीद्वचः ॥ १ ॥
राज्याद्भ्रंशस्व कैकेयि नृशंसे दुष्टचारिणि ॥ परित्यक्ता च धर्मेण मा मृतं रुदती भव ॥ २ ॥
किंनु तेऽदूषयद्राजा रामो वा भृशधार्मिकः ॥ ययोर्मृत्युर्विवासश्च त्वत्कृते तुल्यमागतौ ॥ ३ ॥
भ्रूणहत्यामसि प्राप्ता कुलस्यास्य विनाशनात् ॥ कैकेयि नरकं गच्छ मा च भर्तुः सलोकताम् ॥ ४ ॥
यत्त्वया हीदृशं पापं कृतं घोरेण कर्मणा ॥ सर्वलोकप्रियं हित्वा ममाप्यापादितं भयम् ॥ ५ ॥
त्वत्कृते मे पिता वृत्तो रामश्चारण्यमाश्रितः ॥ अयशो जीवलोके च त्वयाऽहं प्रतिपादितः ॥ ६ ॥
मातृरूपे ममामित्रे नृशंसे राज्यकामुके ॥ न तेऽहमभिभाष्योस्मि दुर्वृत्ते पतिघातिनि ॥ ७ ॥

करोमीत्याह—एषइति । एषइत्यविलम्बोक्तिः । तव मव्याजेनराज्यंभोक्तुकामायाः ॥ २७ ॥ नकेवलंनिवर्तनं दासश्चतस्यस्यामित्याह—निवर्तयित्वेति । दासभूतः छत्रचामरादिधारणेनकिंकरवृत्तिर्भविष्यामि । इदंचनत्वयिकोपात् किंतुस्वरूपेणेत्याशयेनाह—सुस्थितेनेति । सुप्रतिष्ठितेनान्तःकरणेनेत्यर्थः ॥ २८ ॥ तुदन् व्यथयन् । पर्वतगह्वरस्थः पर्वतगुहास्थः । गुहास्थत्वेसंतोषातिशयात्सिंहस्यनादातिशयइत्यभिप्रायेणविशेषणमिदं ॥ २९ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने त्रिसप्ततितमः सर्गः ॥ ७३ ॥

एवंसामान्यतोमृदुतयानिन्दित्वापुनस्तदपराधस्मरणेनप्रवृद्धरोषः क्रूरंनिन्दति—तामित्यादिना । तथा मृदुतया ॥ १ ॥ भ्रंशस्व भ्रष्टाभव । त्वन्मातृवत्त्वमपिवनंप्रविशेत्यर्थः । मामृतंरुदतीभव प्राणहानिकरकार्यकरणान्मांमृतंमत्वारोदनंकुर्वित्यर्थः । यद्वा मृतं भर्तारमुद्दिश्यरुदतीचमाभव पतिभार्याभावस्यगतत्वादितिभावः ॥ २ ॥ तेकिंन्वदूषयत् तवसंबन्धिकिंनु गुणचारित्रादिकमदूषयत् । तुल्यं युगपत् ॥ ३ ॥ भ्रूणहत्यां भ्रूणहत्यातुल्यपापं । सलोकतां समानलोकत्वं ॥ ४ ॥ घोरेणकर्मणा घोरेणव्यवसायेन । ईदृशं रामविवासनभर्तृमरणरूपं । यत्पापंकृतं तेनसर्वलोकप्रियंरामंत्यक्त्वास्थितस्यममापिभयमापादितं । त्वत्कृतंपापंममापिभयमजनयत् नतुराज्यमितिभावः ॥ ५ ॥ अयशः मातृमुखेनज्येष्ठंविवास्यराजानंनाशितवानित्येवंविधं । प्रतिपादितः प्रापितः ॥ ६ ॥ राज्यकामुकइति अमैथुनेच्छातोनङीपू । नतेहमभिभाष्यइति

स० हित्वा हापयित्वा । **ति०** कर्मणोघोरत्वंच सामान्यविषयवरद्वयस्येदृशविशेषविषयत्वकरणं भयं कैकेयीपुत्रोऽयंतद्वदेवदुष्टस्वभावइतिलोककलङ्करूपं । यद्वा त्वद्दोषतोरामोमांत्यक्ष्यतीतिभयं । यद्वा महापातकयुतायास्तवसंसर्गेण पञ्चमहापातकित्वरूपभयं ॥ ५ ॥ **ती०** जीवलोकेचेतिचकारः परलोकसमुच्चयपरः । प्रतिपादितः प्रापितइत्यर्थः ॥ ६ ॥

[पा०] १ ग. ङ. च. छ. झ. ञ. ट. शोकार्दितश्चापि. २ ख. ङ. छ. ज. झ. ट. मन्दरकन्दरस्थः. ३ झ. ञ. भरतः स्थितां. ४ क. च. ञ. त्यक्ताहि. ख. ङ. छ. झ. ट. त्यक्तासि. ५ क. ग. घ. मांमृतं. ६ ङ. छ. झ. ट. द्रामोराजावा. ७ क. च. ब्रह्महत्यां. ८ घ. मधिप्राप्ता. ९ ङ. छ. झ. ट. तातसलोकतां. १० ङ. चेदृशं.

कौसल्या च सुमित्रा च याश्चान्या मम मातरः ॥ दुःखेन महताऽऽविष्टास्त्वां प्राप्य कुलदूषिणीम् ॥८॥
न त्वमश्वपतेः कन्या धर्मराजस्य धीमतः ॥ राक्षसी तत्र जातासि कुलप्रध्वंसिनी पितुः ॥ ९ ॥
यत्त्वया धार्मिको रामो नित्यं [1]सत्यपरायणः ॥ वनं प्रस्थापितो [2]दुःखात्पिता च त्रिदिवं गतः ॥१०॥
[3]यत्प्रधानासि तत्पापं मयि पित्रा विनाकृते ॥ भ्रातृभ्यां च परित्यक्ते सर्वलोकस्य चाप्रिये ॥ ११ ॥
कौसल्यां धर्मसंयुक्तां वियुक्तां पापनिश्चये ॥ कृत्वा कं प्राप्स्यसे [4]त्वद्य लोकं निरयगामिनि ॥ १२ ॥
किं नावबुध्यसे क्रूरे नियतं [5]वन्धुसंश्रयम् ॥ ज्येष्ठं पितृसमं रामं कौसल्यायात्मसंभवम् ॥ १३ ॥
अङ्गप्रत्यङ्गजः पुत्रो [6]हृदयाच्चापि जायते ॥ तस्मात्[7]प्रियतमो मातुः प्रियत्वान्न तु वान्धवः ॥ १४ ॥
[8]अन्यदा किल धर्मज्ञा सुरभिः सुरसंमता ॥ [9]वहमानौ ददर्शोर्व्यां पुत्रौ [10]विगतचेतसौ ॥ १५ ॥

" कृत्यानांकर्तरिवा " इतिषष्ठी । मत्संभाषणंत्वया नकर्तव्यमित्यर्थः ॥ ७ ॥ याश्चान्याइत्यत्र ताइत्यध्याहारः ॥ ८ ॥ नत्वमश्वपतेःकन्या तत्कुलोचितकन्यानभवसीत्यर्थः । धर्मराजस्य धर्मप्रधानराजस्य । तत्र केकयराजे । उक्तेर्थेहेतुमाह—यदित्यादिना ॥ ९—१० ॥ यत्प्रधानंयस्याःसायत्प्रधाना यत्पापकर्मप्रधानासित्वं तत्पापं तत्कर्मजनितंपापं । पित्राविनाकृते भ्रातृभ्यांपरित्यक्तेमयि संक्रान्तमितिशेषः । संक्रान्तकार्यविशेषणद्वयेनदर्शितं । अप्रियेइतिसंबुद्धिः ॥ ११ ॥ वियुक्तां गुणवत्पुत्रवियुक्तां । कृत्वानिरयगामिनि त्वंकंलोकंप्राप्स्यसे निरयंविनाकंलोकंप्राप्स्यसइत्यर्थः । कंलोकं कं नरकं । निरयगामिनीतिसिद्धवत्कारात् । किमितिक्षेपोक्त्यापूर्वसृष्टाअपर्याप्ताइत्युच्यते । विशेषणद्वयंसंबोधनं ॥ १२ ॥ वन्धुसंश्रयं वन्धूनामाश्रयभूतं । कौसल्यायाआत्मसंभवमित्यत्र कौसल्यायात्मसंभवमित्यार्षःसंधिः । यद्वा पृषोदरादित्वेनआकारलोपः गूढोत्मानप्रकाशतइतिवत् । तेनसम्यक्संधिः । नियतंकिंनावबुध्यसे प्राकृतवद्वन्धुविघातकमवगतासीतिभावः ॥ १३ ॥ औरसपुत्रविश्लेषोमातुरसह्यइतिदर्शयितुं " अङ्गादङ्गात् " इतिश्रुत्यर्थंहृदिनिधायाह—अङ्गेति । अङ्गानि मुखकण्ठवक्षःकुक्षिहस्तपादाः प्रत्यङ्गानि नेत्रनासाङ्गुल्यादीनि तज्जः तत्तेजोजः । " अङ्गादङ्गात्संभवसिहृदयादधिजायसे । आत्मावैपुत्रनामासि " इतिश्रुतावपिवीप्सयाऽङ्गप्रत्यङ्गग्रहः । अङ्गप्रत्यङ्गजत्वंच सर्वाङ्गतेजःसंभूतत्वं । " यदेतद्रेतस्तदेतत्सर्वेभ्योङ्गेभ्यस्तेजःसंभूतं " इतिश्रुतेः । स्त्रियास्तुशोणितमेवरेतः । हृदयात् हृदयपुण्डरीकात् । प्रत्यगात्मस्थानाच्चजायते । तस्मात्पुत्रोमातुःप्रियतमोभवति । वान्धवोभ्रात्रादिः नप्रियतमः किन्तुप्रियएव । एवमातिशयप्रियत्वात्पुत्रस्यतद्वियोगादिदुःखंदुःसहमितिभावः । सुरभिर्वन्धुमात्रेदुःखितवती किंपुनःपुत्रेकौसल्येतिसूचयति—नतुवान्धवइति ॥ १४ ॥ पुत्रशोकोमातुर्दुःसहइत्यत्रेतिहासंप्रमाणयति—अन्यदेत्यादिना । अन्यदा पूर्वकाले ।

स० पितुः ममतवापि ॥ ९ ॥ **स०** गतः गमितः ॥ १० ॥ **स०** निरयगामिनीतिसंबोध्य कंलोकंप्राप्स्यसइत्युक्त्या त्वत्पापस्यनरकोपिनालमितिसूचयति ॥ १२ ॥ **स०** नियतं नियमेन । कौसल्यायाः अयः शुभावहः दैवं तेनात्मसंभवोयस्यतं । यद्वा तस्याआयोलाभोयस्मात्पत्युस्सतथा तस्यात्मसंभवंपुत्रं । **शि०** कौसल्यायाः यातिप्राप्नोति प्रादुर्भवतीत्यर्थः । सचासावात्मसंभवः आत्मनास्वमनसैवसंभवोयस्यतं । अतएवसन्धौनार्षत्वकल्पना ॥ १३ ॥ **ति०** यदेवं तस्मान्मातुरौरसःपुत्रःप्रियतरः । बान्धवाः पितृमात्रादयः प्रियाएव नतुप्रियतराः । एवंचौरसवियोगदुःखमतिदुस्सहमितिभावः । प्रियत्वान्नतुवान्धवइतिपाठंमत्वा तीर्थेनेत्थं व्याख्यातं प्रियत्वादेवनवान्धवः बन्धुभूतदत्तपुत्रादिवन्नभवतीति । तत्रनार्थसामञ्जस्यमितिकतकसंमतपाठएवज्यायान् । **शि०** अङ्ग हेमातः । हृदयात् मनसः । प्राप्य प्रत्यङ्गजः अङ्गमङ्गंप्रतिप्रत्यङ्गं तस्मात् मुखनेत्रवक्षउदरपाणिपादादितेजोभ्यःजायते साकारतांप्राप्नोति सः । अभिजायते उत्पद्यते।तस्माद्धेतोः पुत्रऔरसः मातुःप्रियतरः । इतरेबान्धवास्तुप्रियाएव । एवेनप्रियतरत्वव्यवच्छेदः । नचवांस्तवोदरादिसंबन्धशून्यजन्मवतोरामस्यवास्तवोदरादिसंबन्धवल्लौकिकपुत्रदृष्टान्तेन रामस्यकौसल्यातिप्रियत्वंकथंसाधितमितिवाच्यम् । कौसल्यायास्तादृशाभिनिवेशाङ्गीकारेणादोषात् ॥ १४ ॥ **ति०** किलेत्यैतिह्ये धर्मज्ञाःपुराविदोवृद्धाएवंवदन्तिकिलेत्यर्थः ॥ १५ ॥

[पा०] १ ग. सत्यपराक्रमः. २ ङ. छ. झ. ट. वीरःपितापि. ३ घ. यत्प्रधारयसेतोषं. ४ ङ. छ. झ. ट. ह्यद्य. ५ ख. वुद्धिसंश्रयं. ६ ङ. छ. झ. ट. हृदयाच्चाभि. ग. हृदयादपि. ७ क. ख. ग. च. ञ. प्रियतरो. ङ. प्रियतरोरामःप्रियाएवतुवान्धवाः. छ. ज. झ. ट. प्रियतरोमातुःप्रियाएवतुवान्धवाः. ८ ख. ग. एकदा. ९ घ. लभमानौ. १० घ. विगतचेतनौ.

तावर्धदिवसे श्रान्तौ पुत्रौ दृष्ट्वा महीतले ॥ रुरोद पुत्रशोकेन बाष्पपर्याकुलेक्षणा ॥ १६ ॥
अधस्ताद्व्रजतस्तस्याः सुरराज्ञो महात्मनः ॥ बिन्दवः पतिता गात्रे सूक्ष्माः सुरभिगन्धिनः ॥ १७ ॥
इन्द्रोऽप्यश्रुनिपातं तं स्वगात्रे पुण्यगन्धिनम् ॥ सुरभिं मन्यते दृष्ट्वा भूयसीं तां सुरेश्वरः ॥ १८ ॥
निरीक्षमाणः शक्रस्तां ददर्श सुरभिं स्थिताम् ॥ आकाशे विष्ठितां दीनां रुदन्तीं भृशदुःखिताम् ॥ १९ ॥
तां दृष्ट्वा शोकसंतप्तां वज्रपाणिर्यशस्विनीम् ॥ इन्द्रः प्राञ्जलिरुद्विग्नः सुरराजोऽब्रवीद्वचः ॥ २० ॥
भयं कच्चिन्न चास्मासु कुतश्चिद्विद्यते महत् ॥ कुतोनिमित्तः शोकस्ते ब्रूहि सर्वहितैषिणि ॥ २१ ॥
एवमुक्ता तु सुरभिः सुरराजेन धीमता ॥ प्रत्युवाच ततो धीरा वाक्यं वाक्यविशारदम् ॥ २२ ॥
शान्तं पापं न वः किञ्चित्कुतश्चिदमराधिप ॥ अहं तु मग्नौ शोचामि स्वपुत्रौ विषमे स्थितौ ॥ २३ ॥
एतौ दृष्ट्वा कृशौ दीनौ सूर्यरश्मिप्रतापितौ ॥ अर्द्यमानौ बलीवर्दौ कर्षकेण सुराधिप ॥ २४ ॥
मम कायात्प्रसूतौ हि दुःखितौ भारपीडितौ ॥ यौ दृष्ट्वा परितप्येऽहं नास्ति पुत्रसमः प्रियः ॥ २५ ॥
यस्याः पुत्रसहस्रैस्तु कृत्स्नं व्याप्तमिदं जगत् ॥ तान्दृष्ट्वा रुदतीं शक्रो न सुतान्मन्यते परम् ॥ २६ ॥

किलेत्यैतिह्ये । तथावदन्तिकिलेत्यर्थः । धर्मज्ञा कर्षणकालधर्मज्ञा । सुरभिः कामधेनुः । सुरसंमता देवपूजिता । वहमानौ हलमितिशेषः । विगतचेतसौ मूर्छिताविल्यर्थः । पुत्रौ साक्षात्पुत्रौ । किञ्चिन्निमित्तवशाद्भूमिंगतौ । यद्वा पुत्रौ स्ववंश्यत्वेनपुत्रव्यपदेश्यौ ॥ १५ ॥ अर्धदिवसे दिवसस्यार्धे मध्याह्नइत्यर्थः । अर्धदिवसमितिपाठे "कालाध्वनोरत्यन्तसंयोगे" इतिद्वितीया । सर्वथाएकदेशिसमासः । मध्याह्नपर्यन्तमित्यर्थः ॥ १६ ॥ सुरराज्ञः सुरराजस्य । समासान्तविधेरनित्यत्वाट्टजभावः ॥ १७ ॥ इन्द्रोपि स्वगात्रे पुण्यगन्धिनं रम्यगन्धं । अश्रुनिपातं अश्रुपातं । दृष्ट्वा तांसुरभिं भूयसीं श्रेष्ठां । अमन्यत ॥ १८ ॥ निरीक्षमाणः उपरिनिरीक्षमाणः ॥ १९—॥२०॥ अस्मासु सुरेषुमध्ये । कुतश्चिदपिभूतात् महद्भयंनविद्यतेकच्चित् । प्रायशस्त्वदश्रुमोचनस्यभयसूचकत्वादितिभावः । कुतोनिमित्तइत्यत्र आद्यादित्वात् प्रथमान्तविहिततसि तस्यकुतश्शब्दस्य निमित्तशब्देनसमानाधिकरणेनबहुव्रीहिः । किंनिमित्तकइत्यर्थः । यद्वा । सार्वविभक्तिकस्तसिरित्यनुशासनादत्रप्रथमार्थेतसिप्रत्ययः ॥ २१—२२ ॥ शान्तंपापं प्रतिहतममङ्गलमित्यादिकमनुचितप्रसङ्गश्रवणदोषनिवर्तकवचनविशेषः । वः युष्माकंमध्ये । कुतश्चिदपिपुरुषात्किंचिद्भयंनास्ति किंतु मग्नौ दुःखमग्नौ । विषमेसंकटेस्थितौ स्वपुत्रौप्रतिशोचामि ॥ २३ ॥ एतौदृष्ट्वेतिश्लोकस्यपूर्वश्लोकस्योत्तरार्धेनान्वयः ॥ २४ ॥ पुत्रंविशिंषयति—ममेति । यौदृष्ट्वाअहंपरितप्ये तौ ममकायात्प्रसूतौ । प्रसूतत्वंपरम्परया तस्मात्पुत्रसमःप्रियोनास्तीतियोजना ॥ २५ ॥ कविराह—यस्याइति । मन्यते अमन्य-

ती० पुत्रौ स्ववंश्यत्वेनपुत्रत्वेनव्यपदेशः । ति० अर्धदिवसं दिवसस्यार्धं । व्याप्य वहनेनश्रान्तौ । पुत्रौस्वाङ्गजौ कुतोपिहेतोर्भुवंगतौ । वक्ष्यतिच ममकायात्प्रसूताविति ॥ १६ ॥ स० पुण्यगन्धिनं अश्रुनिपातंदृष्ट्वा आघ्राय इह लोके । भूयसीं उत्तमांमन्यते अमन्यत । तदपेक्षयासौरभ्यमन्यत्रनास्तीतिज्ञातवानितिभावः ॥१८॥ ति० किंचिदपिभयंकुतोपिहेतोर्युष्माकंनास्ति शान्तंपापमित्यादिकं अनुचितश्रवणजदोषनिवर्तकोवचनविशेषोयुष्मद्दुःखजनकंपापंशान्तमित्यर्थकः । स० वः युष्माकं शान्तं सुखनाशकं किंचित्पापं कुतश्चिदपिनास्ति । शि० पापं पापाचरणशीलंरक्षोजातं । शान्तं कालवशेनशान्तिप्राप्तं । अतःकुतश्चिदपि वः युष्माकंदेवानां । किंचिद्भयंनास्ति ॥ २३ ॥ स० ममकायात्प्रसूताविल्यनेन कामधेनुपुत्रयोरेवकेनचिन्निमित्तेनभुविजन्मेतिज्ञायते । अन्यथा तद्वंशभवबलीवर्दानांसर्वत्रविद्यमानत्वेनकयोश्चिद्विषयेशोकायोगेनासांगत्यापत्तेः ॥ २५ ॥ स० व्याप्तं परंपरया । सुतात् औरसात्

[पा०] १ क. ख. घ—छ. झ. ञ. ट. तावर्धदिवसं. २ क—ट. दृष्ट्वापुत्रौ. ३ ङ. छ. झ. पर्याकुलेक्षणं. ४ अयंश्लोकः क. ख. ङ. छ. झ. ट. ञ. पुस्तकेतु. यस्याःपुत्रसहस्रैस्त्वितिश्लोकात्परं. सदाऽप्रतिमवृत्तायाइतिश्लोकात्पूर्वंदृश्यते. ख. ङ. छ. झ. ञ. ट. इन्द्राद्यश्रु. ५ ङ. छ. झ. ञ. ट. तामिहेश्वरः. घ. च. तामिवेश्वरः. ६ क. ख. ङ. च. छ. झ. ञ. ट. निरीक्षमाणस्तांशक्रो. ७ ट. आकाशेऽधिष्ठितां. ८ ट. संतप्तो. ९ क. घ. ङ. च. ज. ञ. किंचिन्न. ङ. क्वचिन्न. १० क. ग. ट. सर्वं. ११ घ. सादेवी. १२ क. ख. च. ञ. किल. १३ क. ख. ग. च. ततो. १४ क—ट. वध्यमानौ. १५ ङ. छ. झ. ट. दुरात्मना, १६ ख. ग. गात्रात्. १७ क. च. परिपीडितौ. १८ घ. यद्दृष्ट्वा.

[1]सदाऽप्रतिमवृत्ताया लोकधारणकाम्यया ॥ श्रीमत्या [2]गुणनित्यायाः स्वभावप[3]रिवेषया ॥ २७ ॥
यस्याः पुत्रसहस्राणि साऽपि शोचति कामधुक् ॥ किं पुनर्या विना रामं कौसल्या वर्तयि[4]ष्यति ॥२८॥
एकपुत्रा च साध्वी च वि[5]वत्सेयं त्वया कृता ॥ तस्मात्त्वं सततं दुःखं प्रेत्य चेह च लप्स्यसे ॥२९॥
अहं ह्य[6]पचितिं भ्रातुः पितुश्च सकलामिमाम् ॥ व[7]र्धनं यशसश्चापि करिष्यामि न संशयः ॥ ३० ॥
[8]आनाययित्वा तनयं कौसल्याया म[9]हाबलम् ॥ स्वयमेव प्रवेक्ष्यामि वनं मुनिनिषेवितम् ॥ ३१ ॥
न ह्यहं पापसंकल्पे पापे पापं त्वया कृतम् ॥ शक्तो धारयितुं पौरैरश्रुकण्ठैर्निरीक्षितः ॥ ३२ ॥
सा त्वमग्निं प्रविश वा स्वयं वा द[10]ण्डकान्विश ॥ रज्जुं ब[11]धान वा कण्ठे न हि तेऽन्यत्परायणम् ॥३३॥
अहमप्य[12]वनिं प्राप्ते रामे सत्यपराक्रमे ॥ कृतकृत्यो भविष्यामि विप्रवासितकल्मषः ॥ ३४ ॥
इति नाग इवारण्ये तोमराङ्कुशचोदितः ॥ पपात भुवि संक्रुद्धो निःश्वसन्निव पन्नगः ॥ ३५ ॥

संरक्तनेत्रः शिथिलाम्बरस्तथा[13] विधूतसर्वाभरणः परंतपः ॥
बभूव भूमौ पतितो नृपात्मजः शचीपतेः केतुरिवोत्सवक्षये ॥ ३६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे चतुस्सप्ततितमः सर्गः ॥ ७४ ॥

त ॥ २६ ॥ भरतवचनं सदेत्यादिश्लोकद्वयमेकंवाक्यं । अप्रतिमं निस्तुलं वृत्तंचरित्रं यस्यास्तस्याः । श्रीमत्याः समृद्धिमत्याः । गुणनित्यायाः नित्यगुणायाः । यस्याः सुरभेः स्वभावपरिवेषया स्वभावेनस्त्रीपुंस्वभावेन मैथुनेन परिवेषआवृत्तिर्यस्यास्तादृश्याः । लोकधारणकाम्यया लोकधारणेच्छया पुत्रसहस्राणिसन्ति सन्तानपरम्परया बहवः पुत्राःसन्तीत्यर्थः । सापिकामधुक् कामधेनुः । यथेष्टसृष्टिक्षमा शोचति अशोचत् । या राममेकंविनावर्तयिष्यति साहिशोचतीतिकिंपुनः ॥ २७—२८ ॥ विवत्सा पुत्रविरहिता । तस्मात् विवत्सात्वकरणात् । लप्स्यसे तत्फलत्वेन ॥ २९ ॥ अपचितिं पूजां । "पूजानमस्यापचितिः" इत्यमरः । भ्रातुरपचितिं राज्यप्रदानरूपां । पितुरिमांसकलामपचितिं और्ध्वदैहिकात्मिकां ॥ ३० ॥ भ्रातुरपचितिमाह—आनाययित्वेत्यादिना ॥ ३१ ॥ पापं रामविवासनरूपं । धारयितुं सोढुं । अश्रुकण्ठैः गद्गदकण्ठैः ॥ ३२ ॥ अस्यपापस्यमरणान्तिकप्रायश्चित्तंविनानिवर्तकान्तरंनास्तीत्यभिप्रायेणाह—सेति । सा बुद्धिपूर्वकमहापापकारिणी । कण्ठेरज्जुंबधान बद्ध्वाम्रियस्वेत्यर्थः । परायणं गतिः ॥३३॥ विप्रवासितकल्मषः अपनीतकिल्बिषः ॥३४॥ इतिसंक्रुद्धः पन्नगइवनिःश्वसन् आरण्ये अरण्यगर्ते । तोमराङ्कुशचोदितः तोमरैरङ्कुशैश्चविद्धोनागइव भुविपपात भरतइतिशेषः ॥ ३५ ॥ शचीपतेःकेतुः इन्द्रध्वजः । उत्सवक्षये उत्सवान्ते ॥ ३६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने चतुस्सप्ततितमः सर्गः ॥ ७४ ॥

॥ २६ ॥ **ती०** स्वभावपरिवेषयेतिपष्ठ्यर्थेतृतीया । लोकधारणकाम्यया लोकसंरक्षणेच्छया । स्वभावपरिवेषया स्वभावःशीलं । परिवेषः पर्यावरणं । स्वभावपरिवेषायाः शीलपर्यावरणायाः । शीलपरिपूर्णायाइत्यर्थः । **ति०** गुणमुख्यायाः सत्यरूपमुख्यगुणवत्याः । लोकधारणकाम्यया प्रवृत्तायाइतिशेषः । **स०** समं सर्वप्राणिषुसेवानुरूपंनतुविषमं । अप्रतिमं असदृशंवृत्तंचारित्रंयस्यास्सा तस्याः । गुणमुख्यायाः गुणैःसर्वापेक्षितदातृत्वादिरूपैःमुख्यायाः । **शि०** स्वभावपरिचेष्टया स्वाभाविकस्वपुत्रव्यापारदर्शनेनहेतुना ॥ २७ ॥ **ति०** अथयशोवर्धनंभ्रातृपूजांचाह—**आनाय्येत्यादि** । महाबाहुं रामं । वनंप्रवेक्ष्यामि तद्व्रतसमाप्तयेतत्प्रतिनिधितयेतिभावः ॥ ३१ ॥ **ति०** कण्ठेरज्जुंबध्वेत्यस्यम्रियस्वेतिशेषः ॥ ३३ ॥ **स०** अवनिं अयोध्याराज्यं ॥ ३४ ॥ **ती०** आरण्योनागइतिवापाठः । **स०** अरण्यइत्यनेन गजानांनूतनग्रहणंध्वन्यते ॥ ३५ ॥ इतिचतुस्सप्ततितमस्सर्गः ॥ ७४ ॥

[पा०] १ ङ. छ. झ. ट. ठ. समाप्रतिम. २ ङ. छ. झ. ञ. ट. गुणमुख्यायाः. च. गुणयुक्तायाः. ३ ङ. छ. झ. ट. परिचेष्टया. क. च. परिचेष्टया. ४ च. ञ. विनशिष्यति. ५ ख. विवत्सेवत्सया. क. घ. च. विवत्सायत्त्वया. ६ ङ. छ. झ. ट. त्वपचितिं. ७ ख. ट. वर्धिनीं. ८ ङ. छ. झ. ट. आनाय्यचमहाबाहुंकोसलेन्द्रंमहाबलं. ९ क. ख. ग. च. ञ. महाद्युतिं. १० क. ङ. च. छ. झ. ञ. ट. विशदण्डकान्. ११ क. ङ. छ—ट. बध्वाथवा. १२ क. ङ—ट. प्यवनीं. १३ क—घ. स्तदा.

अपास्य मातृशुश्रूषामनर्थे सोवतिष्ठताम् ॥ दीर्घबाहुर्महावक्षा यस्यार्योऽनुमते गतः ॥ ४७ ॥
[1]बहुपुत्रो दरिद्रश्च ज्वररोगसमन्वितः ॥ [2]स भूयात्सततं क्लेशी यस्यार्योऽनुमते गतः ॥ ४८ ॥
आशामाशंसमानानां दीनानामूर्ध्वचक्षुषाम् ॥ अर्थिनां वितथां कुर्याद्यस्यार्योऽनुमते गतः ॥ ४९ ॥
मायया रमतां नित्यं [3]परुषः पिशुनोशुचिः ॥ राज्ञो भीतस्त्वधर्मात्मा यस्यार्योऽनुमते गतः ॥ ५० ॥
ऋतुस्नातां सतीं भार्यामृतुकालानुरोधिनीम् ॥ [4]अतिवर्तेत दुष्टात्मा यस्यार्योऽनुमते गतः ॥ ५१ ॥
[5]धर्मदारान्परित्यज्य परदारान्निषेवताम् ॥ [6]त्यक्तधर्मरतिर्मूढो यस्यार्योऽनुमते गतः ॥ ५२ ॥
विप्रलुप्तप्रजातस्य दुष्कृतं ब्राह्मणस्य यत् ॥ [7]तदेव प्रतिपद्येत यस्यार्योऽनुमते गतः ॥ ५३ ॥
पानीयदूषके पापं तथैव विषदायके ॥ यत्तदेकः स लभतां यस्यार्योऽनुमते गतः ॥ ५४ ॥
ब्राह्मणायोद्यतां पूजां [8]विहन्तु कलुषेन्द्रियः ॥ बालवत्सां च गां दोग्धु यस्यार्योऽनुमते गतः ॥ ५५ ॥
तृष्णार्तं सति पानीये विप्रलम्भेन [9]योजयेत् ॥ [10]लभेत तस्य यत्पापं यस्यार्योऽनुमते गतः ॥ ५६ ॥
भक्त्या विवदमानेषु मार्गमाश्रित्य पश्यतः ॥ [11]तस्य पापेन युज्येत यस्यार्योऽनुमते गतः ॥ ५७ ॥
विहीनां पतिपुत्राभ्यां कौसल्यां पार्थिवात्मजः ॥ एवमाश्वासयन्नेव [12]दुःखार्तो निपपात ह ॥ ५८ ॥
[13]तथा तु शपथैः [14]कष्टैः शपमानम[15]चेतनम् ॥ भरतं शोक[16]संतप्तं कौसल्या वाक्यमब्रवीत् ॥ ५९ ॥

संजुष्टात् सत्सेवितात् ॥ ४६ ॥ पुनर्मातृशुश्रूषाग्रहणं तत्त्यागेप्रत्यवायभूयस्त्वद्यातन्नित्यतयाच । मातृशुश्रूषाहि नित्या यतस्तस्यांपतितायामपिशुश्रूषांविदधतिस्मृतयः । अनर्थे अधर्मे ॥ ४७ ॥ बहुपुत्रस्यापिधनिनोदुःखाभावात् अपुत्रस्यदारिद्र्येपिभरणीयाल्पतयाक्लेशाल्पतेतिचविशेषणद्वयं ॥ ४८ ॥ आशंसमानानां स्तुवतां । ऊर्ध्वचक्षुषां उन्नतासनस्थदातृमुखनिरीक्षकाणां । अर्थिनां आशांवितथांकुर्यात् ॥ ४९ ॥ मायया वञ्चनया । रमतां सक्तोभवतु ॥ ५० ॥ ऋतुकालानुरोधिनीं ऋतुस्नानदिवसेस्वसंनिहितां ॥ ५१ ॥ निषेवतां भजतां ॥ ५२ ॥ विप्रलुप्तप्रजातस्य नष्टापत्यस्य संततिहीनस्येत्यर्थः । तदेवदुष्कृतंप्रतिपद्येत ॥ ५३ ॥ पानीयदूषकेविषदायकेचयत्पापं तत् द्वयं एकोलभतामित्यर्थः ॥ ५४ ॥ बालवत्सां अनिर्दशां ॥ ५५ ॥ पानीयेसति गृहेविद्यमानेसति । विप्रलम्भेन वञ्चनया । योयोजयेत् नददातीत्यर्थः । तस्ययत्पापंतल्लभेत ॥ ५६ ॥ विवदमानेषु वादिप्रतिवादिषुविवादंकुर्वत्सु । भक्त्या एकस्मिन्स्नेहेन जयोपायमाश्रित्य । पश्यतः ब्रुवतस्तस्यपापे-

स० अनर्थे भार्यासेवादौ ॥ ४७ ॥ **ती०** यद्वा विप्रलुप्ताविवर्जिता प्रजाता प्रसूता जातापत्याजाया येनतस्य ॥ ५३ ॥ **ती०** बालवत्सां अनिर्दशामित्यर्थः । "सन्धिस्सनिर्दशावत्सागोपयःपरिवर्जयेत्" इतिस्मृतेः ॥ ५५ ॥ **ति०** योजयन् अप्रयच्छन्नितियावत् ॥ ५६ ॥ **ती०** पश्यतः तूष्णींभवतः जयोपायंज्ञात्वापिपक्षपातेनतूष्णींभवतइत्यर्थः । तस्यपापेनयुज्येतेति संबन्धः । अस्मिञ्शपथप्रकरणेश्लोकानांपूर्वोत्तरव्यत्यासःपुनरुक्तिश्चदृश्यते तच्छपथविषयत्वान्नदोषः । **ति०** भक्त्या शिवविष्ण्वादिदेवताभक्त्या । मार्गं तत्तदुपोद्बलकशैववैष्णवादिशास्त्रमाश्रित्य अयमुत्कृष्टःअयंनेतिविवदमानेषुयत्पापं यच्चतयोर्विवादंपश्यतः शृण्वतःपापं तेनयुज्येतेत्यर्थः । तस्यपापेनेतिपाठे तेषांयत्पापं तेन यस्यानुमतेगतस्तस्ययोगःसंबन्धोभूयादित्यर्थः । भावेचयुज्येतेतिप्रयोगः । "अयंपरस्त्वयंनेतिसंरक्षाभिनिवेशिनः । यातुधानाभवन्त्येवपिशाचाश्चनसंशयः" इतिशिवपुराणोक्तेः । "योब्रह्मविष्णुरुद्राणांभेदंयुक्तिनिवेशतः । साधयेदुदरव्याधियुक्तोभवतिमानवः" इतिकर्मविपाकशास्त्रोक्तेश्च । **कतक०** द्वयोस्साम्यस्थापनपूर्वकंतेषांकलहशमनमकुर्वतःकलहप्रियस्ययत्पापंतेनयुज्येतेत्यर्थः । **स०** भक्त्या मार्गविभागेन । विवदमानेषुसत्सु स्वयंतुमार्गे

[पा०] १ ङ. छ. झ. ञ. ट. बहुभृत्यो. २ ङ. छ. झ. ट. समायात्सततंक्लेशं. ३ ख. ङ. झ. ञ. पुरुषः. क. च. पिशुनः पुरुषो. ४ ग. अतिवर्तेदधर्मात्मा. ५ धर्मदारान्परित्यज्येति. पानीयदूषकइतिचश्लोकद्वयं झ. ट. पाठयोः ब्राह्मणायोद्यतामितिश्लोकात्परं तृष्णार्तमितिश्लोकात्पूर्वंदृश्यते. ६ ख. परित्यक्तस्वधर्मोसौ. ७ क. ङ. च. छ. झ. ञ. ट. तदेतत्प्रति. ८ ख. विहन्यात्कलुषेन्द्रियः. ९ क. च. छ. झ. ट. योजयन्. १० क. ख. घ. च—ट. यत्पापंलभतेतत्स्यात्. ग. ङ. यत्पापंलभतेतस्य. ११ झ. तेन. १२ झ. दुःखार्तोनु. १३ ङ. छ. झ. ट. तदार्तं. १४ ज. क्लिष्टैः. १५ ङ. च. ञ. चेतसं. १६ क. च. ञ. संतप्ता.

मम दुःखमिदं पुत्र भूयः समुपजायते ॥ शपथैः शपमानो हि प्राणानुपरुणत्सि मे ॥ ६० ॥
दिष्ट्या न चलितो धर्मादात्मा ते सहलक्ष्मणः ॥ वत्स सत्यप्रतिज्ञो मे सतां लोकानवाप्स्यसि ॥ ६१ ॥
इत्युक्त्वा चाङ्कमानीय भरतं भ्रातृवत्सलम् ॥ परिष्वज्य महाबाहुं रुरोद भृशदुःखिता ॥ ६२ ॥
एवं विलपमानस्य दुःखार्तस्य महात्मनः ॥ मोहाच्च शोकसंरोधाद्बभूव लुलितं मनः ॥ ६३ ॥

लालप्यमानस्य विचेतनस्य प्रणष्टबुद्धेः पतितस्य भूमौ ॥
मुहुर्मुहुर्निश्श्वसतश्च घर्मे सा तस्य शोकेन जगाम रात्रिः ॥ ६४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे पञ्चसप्ततितमः सर्गः ॥ ७५ ॥

षट्सप्ततितमः सर्गः ॥ ७६ ॥

भरतेनवसिष्ठचोदनयातैलद्रोण्याःसमुद्धृतदशरथशरीरस्यसराजवैभवंशिबिकारोपणेनपितृवनप्रापणपूर्वकंयथाविधिसंस्करणम् ॥ १ ॥ तथाकौसल्यादिभिःसहसरय्वांदशरथायोदकदानपूर्वकमयोध्याप्रवेशः ॥ २ ॥

तमेवं शोकसंतप्तं भरतं कैकयीसुतम् ॥ उवाच वदतांश्रेष्ठो वसिष्ठः श्रेष्ठवागृषिः ॥ १ ॥
अलं शोकेन भद्रं ते राजपुत्र महायशः ॥ प्राप्तकालं नरपतेः कुरु संयानमुत्तमम् ॥ २ ॥
वसिष्ठस्य वचः श्रुत्वा भरतो धारणां गतः ॥ प्रेतकार्याणि सर्वाणि कारयामास धर्मवित् ॥ ३ ॥
उद्धृतं तैलसंरोधात्स तु भूमौ निवेशितम् ॥ आपीतवर्णवदनं प्रसुप्तमिव भूपतिम् ॥ ४ ॥

नयुज्येतेतिसंबन्धः ॥ ५७—५९ ॥ उपरुणत्सि पीडयसीत्यर्थः । यद्वा प्राणानुपरुणत्सि रामवियोगेनमेनिर्गच्छतःप्राणान्स्थापयसि । शपथकरणेनममाश्वासोजातइत्यर्थः ॥ ६० ॥ दिष्टया भाग्येन । आत्मा अन्तःकरणं । धर्मात् ज्येष्ठानुवर्तनधर्मात् । मे मह्यं । सहलक्ष्मणः सत्यप्रतिज्ञोसि लक्ष्मणवत्सत्यप्रतिज्ञोसीत्यर्थः । अतः सतांलोकानवाप्स्यसि ॥ ६१—६२ ॥ एवंविलपमानस्य पूर्वोक्तशपथरूपेणविलपतः । शोकसंरोधात् शोकक्रृतसंरोधात् ॥ ६३ ॥ लालप्यमानस्य भृशंप्रलपतः । विचेतनस्य मूर्छितस्य । प्रनष्टबुद्धेः क्षुभितान्तःकरणस्य । घर्मे उष्णंयथाभवतितथा निश्वसतः ॥ ६४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने पञ्चसप्ततितमः सर्गः ॥ ७५ ॥

कैकयीसुतमित्यत्र "केकयमित्रयुप्रलयानांयादेरियः" इतिविहितस्येयादेशस्याभावः ॥ १ ॥ संयानं सम्यग्यानं स्वर्गप्रापकक्रियाजातमित्यर्थः ॥ २ ॥ धारणांगतः धैर्यंप्राप्तः । "मर्यादाधारणास्थितिः" इत्यमरः । स्वस्थान्तःकरणइत्यर्थः । कारयामासेति संक्षेपोक्तिः ॥ ३ ॥ उद्धृतमित्यादिश्लोकद्वयमेकान्वयं। ततःस पुत्रः तैलसंरोधात् तैलद्रोण्याः । उद्धृतं तत-

---

यथावस्थितमाश्रित्यपश्यतः उदासीनतयास्थितस्य ॥ ५७ ॥ ति० लक्षणैः शुभलक्षणैस्सहितः सहलक्षणःते आत्मेत्यर्थः । हेवत्स यदि सत्यप्रतिज्ञोभविष्यसि तदा सतांलोकानवाप्स्यसि कैकेय्यग्रेकृतांरायानयनप्रतिज्ञांसत्यांकुर्विंतिव्यङ्ग्यं । शि० सतां रामादीनां लोकान् कृपादृष्टिपथान् ॥ ६१ ॥ इतिपञ्चसप्ततितमस्सर्गः ॥ ७५ ॥

ति० वसिष्ठः भरतागमनंश्रुत्वाऽऽगतइतिशेषः । स० श्रेष्ठवाक् अतएववदतांश्रेष्ठः ॥ १ ॥ ति० संयानं प्रेतनिर्हारं । स० संयानं देहसंस्कारं ॥ २ ॥ स० धरणीमितिपाठेसाष्टाङ्गनमनामेत्यर्थः । तद्दैवतेनदृष्टत्वादितिभावः । कारयामास अकरोत् । ति०

[पा०] १ ख. ग. शुभलक्षण. छ—ट. सहलक्षणः. २ छ. झ. ञ. ट. सत्यप्रतिज्ञोहि. घ. च. सत्यप्रतिज्ञोसि. ३ ख. घ. ङ. च. छ. लोकमवाप्स्यसि. ४ ङ. महात्मानं. ५ च. पुनःपुनः. ६ छ. झ. ट. संरंभात्. ७ ङ. झ. ट. दीर्घं. ८ ग. घ. ज. महायशाः. ९ ज. संस्कार. १० ख. ग. वसिष्ठवचनं. ११ क. ग. ङ. च. झ. ञ. ट. धरणींगतः. १२ क. ख. ग. ङ. च. झ. ट. कृत्यानि. १३ ङ. छ. झ. ट. उद्धृत्य. १४ ङ. छ. झ. ट. संसेकात्. क. ख. ग. च. ञ. संक्लेदात्. १५ ग. च. ञ. निवेश्यतं. १६ क. घ. ङ—ट. भूमिपं.

संवेश्य शयने चाग्र्ये नानारत्नपरिष्कृते ॥ ततो दशरथं पुत्रो विललाप सुदुःखितः ॥ ५ ॥
किं ते व्यवसितं राजन्प्रोषिते मय्यनागते ॥ विवास्य रामं धर्मज्ञं लक्ष्मणं च महाबलम् ॥ ६ ॥
क्व यास्यसि महाराज हित्वेमं दुःखितं जनम् ॥ हीनं पुरुषसिंहेन रामेणाक्लिष्टकर्मणा ॥ ७ ॥
योगक्षेमं तु ते राजन्कोऽस्मिन्कल्पयिता पुरे ॥ त्वयि प्रयाते स्वस्तात रामे च वनमाश्रिते ॥ ८ ॥
विधवा पृथिवी राजंस्त्वया हीना न राजते ॥ हीनचन्द्रेव रजनी नगरी प्रतिभाति मा ॥ ९ ॥
एवं विलपमानं तं भरतं दीनमानसम् ॥ अब्रवीद्वचनं भूयो वसिष्ठस्तु महामुनिः ॥ १० ॥
प्रेतकार्याणि यान्यस्य कर्तव्यानि विशांपतेः ॥ तान्यव्यग्रं महाबाहो क्रियन्तामविचारितम् ॥११॥
तथेति भरतो वाक्यं वसिष्ठस्याभिपूज्य तत् ॥ ऋत्विक्पुरोहिताचार्यास्त्वरयामास सर्वशः ॥ १२ ॥
ये त्वग्रयो नरेन्द्रस्य चाग्र्यगाराद्बहिष्कृताः ॥ ऋत्विग्भिर्याजकैश्चैव आह्रियन्त यथाविधि ॥ १३ ॥
शिबिकायामथारोप्य राजानं गतचेतसम् ॥ बाष्पकण्ठा विमनसस्तमूहुः परिचारकाः ॥ १४ ॥
हिरण्यं च सुवर्णं च वासांसि विविधानि च ॥ प्रकिरन्तो जना मार्गं नृपतेरग्रतो ययुः ॥ १५ ॥
चन्दनागरुनिर्यासान्सरलं पद्मकं तथा ॥ देवदारूणि चाहृत्य क्षेपयन्ति तथा परे ॥ १६ ॥
गन्धानुच्चावचांश्चान्यांस्तत्र गत्वाऽथ भूमिपम् ॥ ततः संवेशयामासुश्चितामध्ये तमृत्विजः ॥ १७ ॥

तैलापमार्जनाय भूमौनिवेशितंचिरंतैलेस्थापनादापीतवर्णवदनं अवयवशैथिल्याभावात्प्रसुप्तमिवस्थितं दशरथंभूपतिं । उक्तविशेषणेशयने संवेश्य शाययित्वा । सुदुःखितःसन् विललाप ॥ ४—५ ॥ किंतेव्यवसितं त्वयाकिमद्यव्यवसितं । स्वर्गगमनायेतिशेषः ॥ ६—७ ॥ तेपुरे अयोध्यायां । कःजनः योगक्षेमं स्वकीयपुरयोगक्षेमं । कल्पयिता करिष्यति । स्वः स्वर्गं ॥ ८—१० ॥ विशांपतेः प्रजानांपत्युः ॥११॥ ऋत्विक्पुरोहिताचार्यान् ऋत्विजोयज्ञकर्मणिवृताः । पुरोहिताः पुरोहितपरत्वेनशान्तिकपौष्टिकादिक्रियाप्रवर्तकाः । आचार्याः वसिष्ठवामदेवादयः । "त्रय्यां चधर्मकृत्येचशान्तिकर्मणिपौष्टिके । अध्वरेयश्चकुशलःसस्याद्राजपुरोहितः ॥ उपनीयवदेद्वेदमाचार्यः सउदाहृतः" इतिलक्षणं ॥ १२ ॥ अग्न्यगारान् अग्निगृहान् । बहिष्कृताः अन्तःशववत्त्वाद्बहिःप्रतिष्ठापिताः । अग्नयोगार्हपत्यादयः । याजकैः उपद्रष्टृभिः । ऋत्विग्भिश्च आह्रियन्त आनीयन्त ॥ १३—१४ ॥ हिरण्यंच सुवर्णंच रजतंच सुवर्णंच तत्कृतपुष्पाणीत्यर्थः ॥ १५ ॥ चन्दनागरुनिर्यासान् निर्यासोगुग्गुलुः । "गुग्गुलुःकालनिर्यासौ" इति निघण्टुः । चन्दनागरुजनितधूपद्रव्याणीतियावत् । सरलं धूपसरलं । पद्मकं सुरभिकाष्ठविशेषं । क्षेपयन्ति पुरतःपार्श्वतश्चध्रियमाणसौवर्णराजताङ्गारधानीषु धूपार्थमितिशेषः । चन्दनादीनिगन्धान्तानि चिताकाष्ठद्रव्याणीत्येवतुयुक्तं । तद्राक्षेपयन्ति दहनार्थंचितामकुर्वन्नित्यर्थः ॥ १६ ॥ तत्रगत्वाथभूमिपमित्युत्तरशेषः । अथ चिताकल्पनानन्तरं । तत्र चितासमीपेगत्वा तंभूमिपं चितामध्ये ततः शिबिकायाः उद्धृ-

कारयामास तत्करणार्थंमन्त्रिणःप्रेरयामासेत्यर्थः ॥ ३ ॥ स० ते तवसंबन्धिनं त्वन्निर्वाह्यमितियावत् । अस्मिन्पुरे । योगसहितं क्षेमं योगक्षेमं ॥ ८ ॥ शि० अस्य साकेतंप्राप्तस्य । प्रेतकार्याणि परलोकगमनविहितकर्माणिकर्तव्यानि तानि अव्यग्रंयथास्यात्तथा अविचारितं सशरीरंलोकान्तरंगतस्यप्रेतकार्याणिकर्तव्यानिनवेतिसंशयरहितंयथास्यात्तथाक्रियन्तां । एतेनसशरीरगतपुरुषस्यवनादिषुतच्छरीरबुद्धिःकर्तव्येतिसूचितं । तेनकर्मणामवश्यकर्तव्यताव्यञ्जिता । तेनवसिष्ठस्यमर्यादापालकत्वंव्यक्तं ॥ ११ ॥ स० क्षेपयन्ति तत्प्रक्षेपस्तुशवदुर्गन्धप्रतीतिनिरासार्थं ॥ १६ ॥

[पा०] १ क. निवेश्यशयनैकाग्र्ये. २ छ. परिच्छदे. ३ ङ. झ. यास्यसे. ग. यास्यथ. ४ क. ङ. च. छ. झ. ञ. योगक्षेमंतुतेऽव्यग्रं. ज. योगक्षेमयितताराजन्. ५ च. मे. ङ. छ. ज. झ. ञ. ट. मां. ६ क. च. ञ. महानृषिः. ७ ङ. विशांपते. ८ क. ग. च. ञ. तान्यद्यतु. ९ ख. घ. झ. ञ. स्वअभ्यगारात्. क. ग. च. छ. ज. स्वह्यभ्यागारात्. ट. स्वअभ्यागारात्. १० क. ग. ङ. च—ट. तेहूयन्ते ख. घ. तेह्रियन्ते. ११ घ. ङ. छ. झ. ट. चेतनं. १२ झ. स्तमूचुः. १३ ख. ग. ङ. झ. ञ. ट. मार्गे. १४ घ. ज. ट. चितांचकुस्तथा. १५ क—घ. दत्वाथ. १६ ङ. झ. ट. तत्र.

[1]तथा हुताशनं [2]दत्त्वा जे[3]पुस्तस्य तमृत्विजः ॥ जगुश्च ते यथाशास्त्रं तत्र सामानि सामगाः ॥ १८ ॥
शिबिकाभिश्च यानैश्च यथार्हं तस्य योषितः ॥ नगरान्निर्ययुस्तत्र वृद्धैः परिवृतास्[4]तदा ॥ १९ ॥
प्रसव्यं चापि तं चक्रुर्ऋत्विजोऽग्निचितं नृपम् ॥ स्त्रियश्च शोकसंतप्ताः कौसल्याप्रमुखास्तदा ॥२०॥
क्रौञ्चीनामिव नारीणां निनादस्तत्र शुश्रुवे ॥ आर्तानां करुणं काले क्रोशन्तीनां सहस्रशः ॥ २१ ॥
ततो रुदन्त्यो विवशा विलप्य च पुनःपुनः ॥ यानेभ्यः सरयूतीरमवतेरु[5]र्वराङ्गनाः ॥ २२ ॥
कृत्वोदकं ते भरतेन सार्धं नृपाङ्गना मन्त्रिपुरोहिताश्च ॥
पुरं प्रविश्याश्रुपरीतनेत्रा भूमौ दशाहं [6]व्यनयन्त दुःखम् ॥ २३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे षट्सप्ततितमः सर्गः ॥ ७६ ॥

सप्तसप्ततितमः सर्गः ॥ ७७ ॥

भरतेनशत्रुघ्नेनसहद्वादशेऽहनिसकलश्राद्धनिर्वर्तनेनतदङ्गतयाब्राह्मणेभ्योधनरत्नादिनानावस्तुप्रदानम् ॥ १ ॥ त्रयोदशेऽहन्यस्थिसंचयनार्थंचितामूलंगतेनभरतेनविलापपूर्वकंमोहाद्धरण्यांनिपतनम् ॥ २ ॥ भुविनिपतितेनशत्रुघ्नेनापिबहुधापरिदेवनम् ॥ ३ ॥ ततोवसिष्ठसुमन्त्राभ्यांसमाश्वासितौतौप्रतिअमात्यैरस्थिसंचयनादिक्रियासुसंत्वरणम् ॥ ४ ॥

ततो दशाहेऽतिगते कृतशौचो नृपात्मजः ॥ द्वादशेऽहनि संप्राप्ते श्राद्धकर्माण्यकारयत् ॥ १ ॥

त्येतिशेषः । संवेशयामासुः शाययामासुः ॥ १७ ॥ हुताशनंदत्त्वा भरतेनदापयित्वा । जेपुः पैतृमेधिकमन्त्रविशेषानितिशेषः । तस्य परमगत्यर्थमितिशेषः । तमितिहुताशनविशेषणं । हुतं ेताग्निमित्यर्थः । ते उद्गातृप्रभृतयः ऋत्विजः ॥ १८ ॥ यानैः अश्वादिभिः । वृद्धैः परिचारकैः ॥ १९ ॥ अग्निचितं अग्निचयनंकृतवन्तं । तंनृपं ऋत्विजःस्त्रियश्च प्रसव्यं सव्यापसव्यंप्रदक्षिणमप्रदक्षिणंच चक्रुः । [प्रसव्यं अप्रदक्षिणं इदंप्रदक्षिणस्याप्युपलक्षणं] । भरतश्चेत्यर्थसिद्धं । इदंचाग्निदानात्पूर्वंशिबिकास्थेप्रेते क्रमस्याविवक्षितत्वादत्रोक्तं । देशविशेषाचारोऽयंवा ॥ २०—२२ ॥ ताश्चतेच ते । "पुमांस्त्रिया" इत्येकशेषः । दशाहं । "कालाध्वनोरत्यन्तसंयोगे" इतिद्वितीया । भूमौशयानाइतिशेषः । "कियल्लघ्वाशनाभूमौस्वपेयुस्तेपृथक्पृथक्" इत्याशौचिनांपृथक्शयनंहिविहितं । दुःखमाशौचं व्यनयन्त अगमयन् । ननु षोडशाहेन [द्वादशाहेन] भूपालाइतिक्षत्रियस्य [द्वादशाहा] षोडशाहाशौचसद्भावात्कथंदशाहमित्युच्यतइतिचेत् । सत्यं । "क्षत्रियस्तुदशाहेनस्वकर्मनिरतःशुचिः" इत्यादिविशेषशास्त्रानुसारेणोक्तमितिनदोषः । अत्रस्त्रीणांप्रेतप्रदक्षिणमुदकदानंचसूत्रान्तरोक्तंज्ञेयं । तथाचितास्थस्यप्रदक्षिणं च । अतएवाहबोधायनः "प्रदक्षिणमपिबान्धवाः कुर्वन्ति एवंमार्गेपिचितामारोप्यचितायामेवेत्येके" इति । अत्रप्रेतेनसहाग्न्यानयनं चितारोपणं समन्त्रकमग्निदानं प्रदक्षिणीकरणमुदकदानं दशाहमाशौचेन भूमौ शयनमित्येतावन्मात्रं देशकुलसूत्रभेदेनऔर्ध्वदैहिकविशेषउक्तइतिवा प्रधानोक्तिःसर्वग्रहणार्थमितिवा ज्ञेयम् ॥ २३ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने षट्सप्ततितमः सर्गः ॥ ७६ ॥

दशाहे अतिगते अतीते । एकादशाहइत्यर्थः । कृतशौचः कृतशौचापादकपुण्याहवाचननवश्राद्धादिकइत्यर्थः । द्वादशेहनि श्राद्धकर्माणि षोडशमासिकानिसपिण्डीकरणान्तानीत्यर्थः । अकारयत् अकरोदित्यर्थः ।

ति० अग्निचितं अश्वमेधान्तयज्ञकर्तारं ॥ २० ॥ शि० विवशाः कान्तिरहिताः ॥ २२ ॥ इतिषट्सप्ततितमस्सर्गः ॥ ७६ ॥
ती० द्वादशेऽहनिश्राद्धकर्माण्यकारयत् एकादशेऽहनिकर्तव्यश्राद्धकरणपूर्वकंद्वादशेऽहनिश्राद्धकर्माण्यकरोदित्यर्थः । शि० गतेव्यतीतेसति एकादशेऽहनीत्यर्थः । कृतशौचः कृतंशौचंस्वशुद्धिहेतुभूतैकादशाहविहितंकर्मयेनसभरतः । स० कृतशौचः एकादशेऽ

[पा०] १ घ—ट. तदा. २ क. ख. घ—ञ. हुत्वा. ३ ङ. जेपुस्तेतस्यऋत्विजः. झ. ञ. ट. जेपुस्तस्यतदृत्विजः. ख. ज. जेपुस्तस्यतदर्त्विजः. ४ ङ—ट. स्तथा. ५ ङ. छ. झ. ट. नृपाङ्गनाः. ६ ख. व्यचरन्त.

पञ्चसप्ततितमः सर्गः ॥ ७५ ॥

भरतेनमन्त्रिमध्येरामविवासनादिवृत्तान्तस्यैवस्वेनाज्ञाततयातत्रस्वानुमत्यभावनिवेदनपूर्वकंशत्रुघ्नेनसहकौसल्यासमीपगमनम् ॥ १ ॥ तथास्वस्मिन्दोषवुद्ध्यापरुषभाषिणींकौसल्यांप्रतिनानाशपथकरणपूर्वकंरामप्रवासनेस्वस्यानुमत्यभावदृढीकरणम् ॥ २ ॥ पश्चादृजुभावेनकौसल्ययाभरतस्यस्वाङ्कारोपणेनपरिष्वङ्गपूर्वकंदुःखाद्रोदनम् ॥ ३ ॥ भरतेनसशोकंविलापादिनारात्रियापनम् ॥ ४ ॥

दीर्घकालात्समुत्थाय संज्ञां लब्ध्वा[1] च वीर्यवान् ॥ नेत्राभ्यामश्रुपूर्णाभ्यां दीनामुद्वीक्ष्य मातरम् ॥
सोमात्यमध्ये भरतो जननीमभ्यकुत्सयत् ॥ १ ॥
राज्यं न कामये जातु मन्त्रये नापि मातरम् ॥ अभिषेकं न जानामि योऽभूद्राज्ञा[2] समीक्षितः ॥
विप्रकृष्टे ह्यहं देशे शत्रुघ्नसहितो[3]ऽवसम् ॥ २ ॥
वनवासं न जानामि रामस्याहं महात्मनः ॥ विवासनं[4] वा सौमित्रेः सीतायाश्च यथाऽभवत् ॥ ३ ॥
तथैव क्रोशतस्तस्य भरतस्य महात्मनः ॥ कौसल्या शब्दमाज्ञाय सुमित्रामिदमब्रवीत्[5] ॥ ४ ॥
आगतः क्रूरकार्यायाः[6] कैकेय्या भरतः सुतः ॥ तमहं द्रष्टुमिच्छामि भरतं दीर्घदर्शिनम्[7] ॥ ५ ॥
एवमुक्त्वा सुमित्रां[8] सा विवर्णा[9] मलिना कृशा ॥ प्रतस्थे भरतो यत्र वेपमाना विचेतना ॥ ६ ॥
स तु रामानुजश्चापि[10] शत्रुघ्नसहितस्तदा[11] ॥ प्रतस्थे भरतो यत्र[12] कौसल्याया निवेशनम् ॥ ७ ॥
ततः शत्रुघ्नभरतौ कौसल्यां प्रेक्ष्य दुःखितौ ॥ पर्यष्वजेतां दुःखार्तां पतितां नष्टचेतनाम् ॥
रुदन्तौ रुदतीं[13] दुःखात्समेत्यार्यां मनस्विनीम्[14] ॥ ८ ॥
भरतं प्रत्युवाचेदं कौसल्या भृशदुःखिता ॥ ९ ॥
इदं ते राज्यकामस्य राज्यं प्राप्तमकण्टकम् ॥ संप्राप्तं बत कैकेय्या शीघ्रं क्रूरेण कर्मणा ॥ १० ॥
प्रस्थाप्य चीरवसनं पुत्रं मे वनवासिनम्[15] ॥ कैकेयी कं गुणं तत्र पश्यति क्रूरदर्शिनी[16] ॥ ११ ॥

दीनां प्रतिहतेच्छत्वात् । अमात्यमध्ये सुमन्त्रादिमध्ये । अनेनभरतागमनंश्रुत्वा सुमन्त्रादयः इतःपूर्वमागताइतिगम्यते । अभ्यकुत्सयत् मन्त्रिणांज्ञापनाय पुनरप्यनिन्ददित्यर्थः ॥ १ ॥ कैकेय्याकृतंस्वेष्टंनेतिमन्त्रिभ्योज्ञापयति—राज्यमिति । जातु कदाचिदपि । एतत् नकामये नमन्त्रयेइत्युभयत्रापिसंबध्यते । मन्त्रये राज्यार्थमितिशेषः । मन्त्रणं विचारः । नजानामि मदनुज्ञापूर्वकोयंनभवतीत्यर्थः । योमदर्थोभिषेकः राज्ञासमीक्षितश्चिन्तितः अभूत् तमभिषेकंनजानामि । अज्ञानेहेतुमाह—विप्रकृष्टइति ॥ २ ॥ विवासनंवेत्यत्र नजानामीत्यनुकर्षः ॥ ३—४ ॥ दीर्घदर्शिनमित्यनेन रामनिर्गमनंभरतोनसंमन्यत इतिकौसल्याहृदयमितिसूचितम् ॥ ५ ॥ भरतोयत्रस्थितः तत्रप्रतस्थे ॥ ६ ॥ यत्रकौसल्यायानिवेशनंस्थितं तत्रप्रतस्थे ॥ ७ ॥ आर्यां ज्येष्ठांमातरं ॥ ८—९ ॥ कथंराज्यंप्राप्तंतत्राह—संप्राप्तमिति । क्रूरेण रामविवासनपूर्वकेण । कर्मणा वराभ्यर्थनेन ॥ १० ॥ तत्र प्रस्थापने । कंगुणं अतिशयंपश्यति नकमपिगुणं । रामप्रस्थापनं

ति० दीर्घदर्शिनं ऐहिकामुष्मिककर्मणःकालान्तरभाविफलज्ञानक्षमबुद्धिमन्तं ॥ ५ ॥ ति० चापिभ्यांसुमन्त्रादयः । येनमार्गेण निवेशनंप्राप्यतइतिशेषः ॥ ७ ॥ ति० समेत्य आलिङ्ग्य । तादृशसमयेप्यालिङ्गनकरणयोग्यंविशेषणं—मनस्विनीति ॥ १० ॥ ति० त्वमपिमेपुत्रइतितवराज्यदाने नकिमपिमेदुःखं । अपितुचीरवसनंवनचारिणं चीरवसनत्वादिवनचारिवेषंमेपुत्रंरामं

[पा०] १ ख. ङ. छ. झ. ञ. ट. लब्धास. २ ग. द्राजसमीक्षितः. च. ञ. द्राज्ञासमीहितः. ३ ङ. छ. झ. ट. सहितोऽभवं. घ. सहितोवसन्. ४ क. च. ज. ञ. वनवासंच. ख—ङ. छ. झ. ट. विवासनंच. ५ क. ख. ग. ङ. च. छ. झ. ञ. ट. सुमित्रांचेदं. ६ ञ. क्रूरकर्मायाः. घ. क्रूरमाज्ञाय. ७ ख. च. दीर्घदर्शनं. ८ ङ. छ. झ. ट. सुमित्रांतां. क. सुमित्रांवा. ९ ङ. छ. झ. ट. विवर्णवदना. च. ञ. विवर्णामलिनांवरा. १० ख. ङ. छ. झ. ट. राजात्मजश्चापि. ११ क. घ. स्ततः. १२ ङ. छ. झ. ञ. ट. येन. १३ क. ख. ङ. च. छ. झ. ञ. ट. रुदतीदुःखात्समेत्यार्यांमनस्विनी. १४ घ. यशस्विनीं. १५ क. ख. ग. च. ञ. वनचारिणं. १६ च. ञ. क्रूरदर्शना.

क्षिप्रं मामपि कैकेयी प्रस्थापयितुमर्हति ॥ हिरण्यनाभो यत्रास्ते सुतो मे सुमहायशाः ॥ १२ ॥
अथ वा स्वयमेवाहं सुमित्रानुचरा सुखम् ॥ अग्निहोत्रं पुरस्कृत्य प्रस्थास्ये [1]यत्र राघवः ॥ १३ ॥
कामं वा स्वयमेवाद्य तत्र मां नेतुमर्हसि ॥ यत्रासौ [2]पुरुषव्याघ्रः पुत्रो मे तप्यते तपः ॥ १४ ॥
इदं हि तव विस्तीर्णं धनधान्यसमाचितम् ॥ हस्त्यश्वरथसंपूर्णं राज्यं निर्यातितं [3]तया ॥ १५ ॥
इत्यादिबहुभिर्वाक्यैः क्रूरैः संभर्त्सितोऽनघः ॥ विव्यथे [4]भरतस्तीव्रं व्रणे तुद्येव सूचिना ॥ १६ ॥
पपात चरणौ तस्यास्तदा संभ्रान्तचेतनः ॥ विलप्य बहुधाऽसंज्ञो लब्धसंज्ञ[5]स्ततः स्थितः ॥ १७ ॥
एवं विलपमानां तां [6]भरतः प्राञ्जलिस्तदा ॥ कौसल्यां प्रत्युवाचेदं शोकैर्बहुभिरावृताम् ॥ १८ ॥
आर्ये कस्मादजानन्तं गर्हसे मामकिल्बिषम् ॥ [7]विपुलां च मम प्रीतिं [8]स्थिरां जानासि राघवे ॥ १९ ॥
[9]कृता शास्त्रानुगा बुद्धिर्मा भूत्तस्य कदाचन ॥ सत्यसंधः सतांश्रेष्ठो यस्यार्योऽनुमते गतः ॥ २० ॥
[10]प्रैष्यं पापीयसां यातु सूर्यं च प्रति मेहतु ॥ हन्तु पादेन गां सुप्तां यस्यार्योऽनुमते गतः ॥ २१ ॥

विनापिराज्यलाभसंभवात् ॥ ११ ॥ कैकेयीमामपि प्रस्थापयितुमर्हति सर्वस्यराज्यस्यतदायत्तत्वादितिभावः । हिरण्यनाभः हिरण्यवत्स्पृहणीयनाभियुक्तः । नाभिग्रहणंशरीरस्योपलक्षणं ॥ १२ ॥ कैकेयीकृतपापानुबन्धिनस्तवराजसंस्काराधिकारोनास्तीतिध्वनयन्नाह—अथवेति । अग्निहोत्रं राजाग्निहोत्रं । अग्निहोत्रस्यज्येष्ठभार्याधीनत्वात् दशरथेनभरतसंस्कारप्रतिषेधाच्चेतिभावः । एतेन राजशरीरप्रापणमप्यर्थसिद्धं ॥ १३ ॥ तपस्तप्यते तपःकरोतीत्यर्थः । “ तपस्तपःकर्मकस्यैव ” इति कर्मवद्भावादात्मनेपदं ॥ १४ ॥ तवप्रस्थापनेममकाशक्तिस्तत्राह—इदमिति । धनधान्यसमाचितं धनधान्यसंपूर्णं । तया कैकेय्या । निर्यातितं दापितं । “निर्यातनंवैरशुद्धौदानेन्यासार्पणेमतं ” इतिविश्वः ॥ १५ ॥ संभर्त्सितः परपक्षबुद्ध्याभाषितः । व्रणेसूचिनातुद्येव व्यथयित्वेव । पूर्वमेवभ्रातृपितृवियोगखिन्नोपिकौसल्यावाक्यश्रवणखिन्नइत्यर्थः ॥ १६ ॥ चरणौ प्रतीति शेषः । बहुधासंज्ञइत्यत्र असंज्ञइतिपदच्छेदः ॥ १७ ॥ एवंविलपमानां पूर्वोक्तप्रकारेणविलपन्तीं ॥ १८ ॥ अजानन्तं अभिषेकादिकमिति शेषः ॥ १९ ॥ कौसल्ययास्वस्मिन्नारोपितं दोषंपरिहर्तुंशपथवाक्यान्याह—तस्यादिना । आर्यः रामः । यस्यानुमते संमतौसत्यांगतः तस्यशास्त्रानुगाकृताबुद्धिः गुरुणाविधिनिषेधबोधकशास्त्रानुसारित्वेनसुशिक्षिता बुद्धिः । कदाचनमाभूदितिसंबन्धः । यद्यहमार्यप्रवासनेअनुमन्तास्मि तर्हि श्रुतिस्मृतिज्ञानात्प्रच्युतोभूयासमित्यर्थः । एवमुत्तरत्रापिसामान्यनिर्देशोभरतविषयतयायोजनीयः । “ निर्विशेषंनसामान्यं ” इतिन्यायात् । अत्रशपथव्याजेनधर्मविशेषाश्चशिक्ष्यन्तेमुनिनेतिबोध्यं । अत्रच सत्पुरुषविषयापराधेशास्त्रज्ञानभ्रंशोभवतीतिसूचितम् ॥ २० ॥ प्रैष्यं प्रेष्यभावं ।

त्वदागमनादपिपूर्वंशीघ्रंवनंप्रतिप्रस्थाप्य राजानंमारितवतीकैकेयी । तत्र तादृशप्रस्थापने कंगुणंपश्यतीतिनजाने । इतिदुःखमिति शेषः । स्थितेतुरामे सएवपितृवाक्यात्त्वामेवाभिषिच्यरक्षेत् । अतोव्यर्थोऽयंतत्प्रयासइतिभावः ॥ ११ ॥ ति० हिरण्यनाभः हिरण्यवर्णनाभियुक्तः । इदमसाधारणंरामलक्षणं ॥ १२ ॥ ति० अग्निहोत्रमिति राजदेहस्याप्युपलक्षणं । कैकेयीवर्त्मगमने भरतोमेप्रेतकार्यंनकुर्यादितिराज्ञानिषेधादितिभावः ॥ १३ ॥ ति० अथवातवातत्पक्षत्वेराजसंस्कारादिकृत्वापश्चान्मांतत्रनयेत्याह—कामंवेति ॥ १४ ॥ ति० व्रणे प्राचीने । सूचिना सूच्या । प्रतुद्येवसंभर्त्सितः कैकेयीपक्षत्वधियागर्हितः । विव्यथे पितृभ्रातृवियोगखिन्नेनाश्वासनार्थमागतस्थलेपिखेदहेतुवचनश्रवणादितिभावः ॥ १६ ॥ ति० अजानन्तं अत्रत्यवृत्तान्तमितिशेषः । राघवे तद्विषयं । मम हृदिपूर्वंस्थितां विपुलांप्रीतिं जानास्येव । इदानींतु ततोधिका पितृबुद्धेरपितत्रैवोपसंहारात् ॥ १९ ॥ ति० कृतशास्त्रानुगा गुरुशिक्षितश्रुतिस्मृतिमार्गगा बुद्धिर्माभूत् । इतोधिकानर्थाभावादयंपरमःशपथः ॥ २० ॥ ति० प्रैष्यं प्रेष्यत्वंप्रति

[पा०] १ ङ. छ. झ. येन. २ झ. पुरुषव्याघ्रस्तप्स्यतेमेसुतस्ततः. च. ञ. पुरुषव्याघ्रस्तप्यतेमेतपस्सुतः. ट. पुरुषव्याघ्रस्तप्यतेमेसुतस्तपः. ङ. छ. पुरुषव्याघ्रस्तप्स्यतेमेसुतस्तपः. क. पुरुषव्याघ्रस्तप्स्यतेमेतपस्सुतः. ३ ग. ङ. च. छ. ट. तथा. ४ क. च. छ. ज. ट. भरतोतीव. ५ क. ख. ङ. च. छ. झ. ञ. ट. स्तदाभवत्. ६ क. च. ञ. प्राञ्जलिर्भरतःस्थितः. घ. ङ. झ. ट. प्राञ्जलिर्भरतस्तदा. ७ क. च. ञ. विपुलांतु. ८ छ. झ. ट. स्थितां. ९ ङ. च. छ. झ. ञ. ट. कृतशास्त्रानुगा. १० क. ख. ग. ङ. छ—ट. प्रैष्यं.

कारयित्वा महत्कर्म भर्ता भृत्यमनर्थकम् ॥ [1]अधर्मो योस्य सोस्यास्तु यस्यार्योऽनुमते गतः ॥ २२ ॥
परिपालयमानस्य राज्ञो भूतानि पुत्रवत् ॥ [2]ततस्तं द्रुह्यतां पापं यस्यार्योऽनुमते गतः ॥ २३ ॥
बलिषड्भागमुद्धृत्य [3]नृपस्यारक्षतः प्रजाः ॥ अधर्मो योस्य सोस्यास्तु यस्यार्योऽनुमते गतः ॥ २४ ॥
संश्रुत्य च तपस्विभ्यः सत्रे वै यज्ञदक्षिणाम् ॥ [4]तां विप्रलपतां पापं यस्यार्योऽनुमते गतः ॥ २५ ॥
हस्त्यश्वरथसंबाधे युद्धे शस्त्रसमाकुले ॥ मा स्म कार्षीत्सतां धर्मं यस्यार्योऽनुमते गतः ॥ २६ ॥
[5]उपदिष्टं सुसूक्ष्मार्थं शास्त्रं यत्नेन धीमता ॥ स नाशयतु दुष्टात्मा यस्यार्योऽनुमते गतः ॥ २७ ॥
मा च तं व्यूढबाह्वंसं [6]चन्द्रार्कसमतेजसम् ॥ द्राक्षीद्राज्यस्थमासीनं यस्यार्योऽनुमते गतः ॥ २८ ॥
पायसं कृसरं छागं वृथा सोश्नातु [7]निर्घृणः ॥ गुरूंश्चाप्यवजानातु यस्यार्योऽनुमते गतः ॥ २९ ॥
[8]गाश्च स्पृशतु पादेन गुरून्[9]परिवदेत्स्वयम् ॥ मित्रे द्रुह्येत [10]सोत्यन्तं यस्यार्योऽनुमते गतः ॥ ३० ॥
विश्वासात्कथितं किंचित्परिवादं मिथः क्वचित् ॥ विवृणोतु स दुष्टात्मा यस्यार्योऽनुमते गतः ॥३१॥
[11]अकर्ता ह्यकृतज्ञश्च [12]त्यक्तात्मा निरपत्रपः ॥ लोके भवतु [13]विद्वेष्यो यस्यार्योऽनुमते गतः ॥ ३२ ॥

पापीयसां अतिशयेनपापिनां । हीनजातीनांप्रेष्यत्वं हिपापहेतुः । सूर्यंप्रति मेहतु मूत्रपुरीषोत्सर्गंकरोतु सूर्याभिमुखेनमेहनेयत्पापंतत्प्राप्नोत्वित्यर्थः । अनेन सूर्यंप्रतिमेहनंनकर्तव्यमितिसिद्धं । गांपादेनहन्तु पादेनगोहननपापंप्राप्नोतु । पादेनगोहननंदोषः । सुप्तामित्यनेनस्वहननप्रवृत्तगोहननंनदोषायेत्युक्तं ॥ २१ ॥ योभर्ताभृत्यंमहत्कर्मकारयित्वा । "हृक्रोरन्यतरस्यां" इतिद्विकर्मकत्वं । अनर्थकं तंप्रयोजनशून्यंकरोतीति शेषः । अस्यभर्तुः यःअधर्मः सोस्तु ॥ २२ ॥ परिपालयमानस्यराज्ञः राज्ञिपरिपालयतिसति । तंप्रतिद्रुह्यतांपापं । ततः तस्य ॥ २३ ॥ बलिषड्भागं बलिः करः "बलिःपूजापहारेचदैत्यभेदेकरेपिच" इतिवैजयन्ती । षष्ठोभागः षड्भागः बलिश्चासौषड्भागश्चेतिविशेषणसमासः । उद्धृत्य आदाय ॥ २४ ॥ सत्रे यागे । तपस्विभ्यः व्रतोपवासशीलेभ्य ऋत्विग्भ्यः । यज्ञदक्षिणांसंश्रुत्य प्रतिज्ञाय । तांदक्षिणां । विप्रलपतां विरुद्धोक्त्याअपलपतां ॥ २५ ॥ सतां शूराणां । धर्मं अपरावर्तनं । मास्मकार्षीत् परावर्तमानस्ययत्पापंतदस्त्वित्यर्थः ॥ २६ ॥ धीमतागुरुणा यत्नेनोपदिष्टं सुसूक्ष्मार्थं परलोकसाधकरहस्यार्थयुक्तं । शास्त्रं वेदान्तादिविशिष्टार्थं । नाशयतु विस्मरतु ॥ २७ ॥ व्यूढबाह्वंसं व्यूढौसंहतौमांसलौबाहूअंसौचयस्यतं । "व्यूढौविन्यस्तसंहतौ" इत्यमरः । राज्यस्थं प्राप्तराज्यं । आसीनं सिंहासनेआसीनं । तं रामं । माद्राक्षीत् तादृशरामदर्शनभाग्यरहितोभवत्वित्यर्थः ॥ २८ ॥ कृसरं तिलौदनं । छागं अजं । मांसमात्रोपलक्षणमेतत् । वृथाऽश्नातु देवतापित्रतिथिनिवेदनमन्तरेणभुङ्क्तामित्यर्थः । अवजानातु प्रत्युत्थानाभिवादनादिकंनकरोत्वित्यर्थः ॥ २९ ॥ गाः पादेनस्पृशतु हन्तुपादेनेत्यत्रहननमुक्तं । इहतुपादस्पर्शोपिपापहेतुरित्युच्यते । परिवदेत् अपवदेत् । मित्रे द्रुह्येत मित्रायद्रुह्यत्वित्यर्थः ॥ ३० ॥ परिवादं अपवादं । "अपवादोपक्रोशनिर्वादावर्णपरिवादाः" इतिहलायुधः । मिथः रहस्ये । "मिथो-[illegible]रहस्ययोः" इतिवैजयन्ती । विश्वासाद्रहःकथितस्यपरिवादस्यकचिदन्यत्रप्रकटीकरणंपातकमितिभावः ॥३१॥ अकर्ता

॥ २१ ॥ ति० ततः तस्मै । आद्यादित्वाच्चतुर्थ्यर्थेतसिः । तस्यास्त्वितिशेषः ॥ २३ ॥ ति० माद्राक्षीत् तादृशरामदर्शनभाग्यरहितोभवतु ज्येष्ठानुवर्तनरहितोभवत्वित्यर्थः । तावत्पर्यन्तंजीवनंमाभूदितिवा ॥ २८ ॥ शि० छागं छंनिर्मलत्वं [illegible] नगच्छतियस्तंतांबूलादिमित्यर्थः । किंच छः निर्मलश्चासावगोवृक्षःतं तदवयवीभूततुलसीपत्रकमलपद्मादिकमित्यर्थः । वृथा परमात्मसमर्पणमन्तरा । सुनिर्घृणः शास्त्रत्यागहेतुकभविष्यद्दण्डाश्रयीभूतस्वविषयकदयारहितः । अश्नातु ॥ २९ ॥ ति० [illegible] अन्नमितिशेषः ॥ ३० ॥ ती० त्यक्तात्मा उद्बन्धनादिनात्यक्तदेहः । ति० त्यक्तः सज्जनैः ॥ ३२ ॥

[पा०] १ क. च. अधर्मस्तस्य. २ ख. ग. ङ. छ. ज. झ. ट. ततस्तु. ३ ग. ङ. छ. झ. ट. नृपस्यारक्षितुः. ४ ङ. छ. झ. ञ. ट. तांचापलपतां. ५ ङ. उपदिष्टंतु. ६ ङ. छ. झ. ट. चन्द्रभास्करतेजसं. ७ ग. निलशः. ८ ङ. छ. झ. ञ. ट. गवां. ९ घ. छ. झ. ट. न्परिवदेतच. ग. च. ञ. परिवदेचसः. १० ङ. च. छ. झ. ञ. ट. सोत्यर्थं. ११ क. ग. ङ. च. झ. ञ. ट. अकर्ताचाकृतज्ञश्च. १२ ङ. छ. झ. ट. त्यक्तश्च. १३ घ. ङ. छ—ञ. विद्विष्टो.

पु[1]त्रदारैश्च भृत्यैश्च स्वगृहे परिवारितः ॥ स एको मृष्टमश्नातु यस्यार्योऽनुमते गतः ॥ ३३ ॥
अप्राप्य सदृशान्दारानपत्यः प्रमीयताम् ॥ अनवाप्य क्रि[2]यां धर्म्यां यस्यार्योऽनुमते गतः ॥ ३४ ॥
माऽऽत्मनः संततिं द्राक्षीत्स्वेषु दारेषु दुः[3]खितः ॥ आयुः समग्रमप्राप्य यस्यार्योऽनुमते गतः ॥ ३५ ॥
राजस्त्रीबालवृद्धानां वधे यत्पापमुच्यते ॥ भृत्य[4]त्यागे च यत्पापं तत्पापं प्रतिपद्यताम्[5] ॥ ३६ ॥
लाक्षया मधुमांसेन लोहेन च विषेण च ॥ सदैव बिभृयाद्भृत्यान्यस्यार्योऽनुमते गतः ॥ ३७ ॥
संग्रामे स[6]मुपोढे स्म श[7]त्रुपक्षभयंकरे ॥ पलायमानो वध्येत यस्यार्योऽनुमते गतः ॥ ३८ ॥
कपालपाणिः पृथिवीमटतां चीरसंवृतः ॥ भिक्षमाणो यथोन्मत्तो यस्यार्योऽनुमते गतः ॥ ३९ ॥
पा[8]ने प्रसक्तो भवतु स्त्रीष्वक्षेषु च नित्यशः ॥ कामक्रोधाभि[9]भूतस्तु यस्यार्योऽनुमते गतः ॥ ४० ॥
मा[10] स्म धर्मे म[11]नो भूयादधर्मं सु[12]निषेवताम् ॥ अपात्रवर्षी भवतु यस्यार्योऽनुमते गतः ॥ ४१ ॥
संचि[13]तान्यस्य वित्तानि विविधानि सहस्रशः ॥ दस्युभिर्विप्रलुप्यन्तां यस्यार्योऽनुमते गतः ॥ ४२ ॥
उभे सन्ध्ये शयानस्य यत्पापं परिकल्प्यते ॥ तच्च पापं भवेत्तस्य यस्यार्योऽनुमते गतः ॥ ४३ ॥
यदग्निदा[14]यके पापं यत्पापं गुरुतल्पगे ॥ मित्रद्रोहे च यत्पापं त[15]त्पापं प्रतिपद्यताम् ॥ ४४ ॥
देवतानां पितॄणां च मातापित्रोस्तथैव च ॥ मा स्म कार्षीत्स शुश्रूषां यस्यार्योऽनुमते गतः ॥४५॥
सतां लोकात्सतां की[16]र्त्यात्संजुष्टात्कर्मणस्तथा ॥ भ्रश्यतु क्षिप्रमद्यैव यस्यार्योऽनुमते गतः ॥ ४६ ॥

प्रत्युपकारस्याकर्ता । अथाप्यकृतज्ञः आभ्यामेकं पापमुक्तं । त्यक्तात्मा सद्भिःपरिहृतः । अथापिनिरपत्रपः निर्लज्जः । अकृतप्रायश्चित्तइतियावत् । इदमेकंपापं ॥ ३२ ॥ मृष्टमश्नातु इतरेषुकदन्नभुक्षु स्वयंमृष्टंसमीचीनमन्नं अश्नातु ॥ ३३ ॥ सदृशान् समानकुलान् । धर्म्यांक्रियां अग्निहोत्रादिकंच अप्राप्य अनपत्यःसन्प्रमीयतां ॥ ३४ ॥ अप्राप्येत्यादिविवरणं—मात्मनइति । अनेनऋणापाकरणंविनाब्रह्मचर्यादेवसंन्यासःप्रतिषिध्यते । अविरक्तविषयमिदमितिचेन्न ब्रह्मचर्यादेवप्रव्रजेदित्यादेर्दारालाभविषयत्वात् । तत्रैवहि इतरथेत्यनेनायमर्थोदर्शितः ॥ ३५ ॥ राजस्त्रीत्यत्रापि यस्यार्योनुमतेगतइत्यनुषञ्जनीयं ॥ ३६ ॥ भृत्यान् भरणीयान् । लाक्षादिविक्रयलब्धद्रव्येणबिभृयात् रक्षेदित्यर्थः । “लाक्षालवणमांसानिवर्जनीयानिविक्रये” इतिस्मृतेः । अप्यकार्यशतं कृत्वेत्यस्यापवादोयं ॥ ३७ ॥ समुपोढे निकटे । “उपोढोनिकटोढयोः” इतिवैजयन्ती ॥ ३८ ॥ अटतां चरतु । चीरं मलिनं जीर्णवस्त्रं । अनेनशैवमतप्रवेशोनिन्द्यते ॥ ३९—४० ॥ अपात्रवर्षी अपात्रेबहुदायी ॥ ४१ ॥ दस्युभिः तस्करैः ॥ ४२ ॥ उभे इति उभयोःसंध्ययोः ॥ ४३ ॥ गुरुतल्पगे गुरुदारगे ॥ ४४ ॥ देवानांशुश्रूषा अग्निहोत्रादिकर्म संभृतैराज्यचरुपशुपुरोडाशादिभिःप्रीणनं । पितॄणांतु उपरागादिषुमातापितृमरणतिथ्यादिषुचपूर्वोक्तैरन्यैश्चतिलादिभिराराधनं । पितृशुश्रूषयैवमृतमातापितृशुश्रूषाग्रहणसंभवात् मातापित्रोरित्यत्रजीवतोरितिविवक्षितं ॥ ४५ ॥ सतांकीर्त्यात् सद्भिःक्रियमाणश्लाघनात् ।

ति० समुपोढे प्राप्ते ॥ ३८ ॥ **ति०** कपालेति ब्रह्महाभवत्वितिशेषः । तादृशीनिषिद्धाचरणाप्रव्रज्याभवत्वितिवाभावः । **स०** कपालपाणिः स्फुटितघटशकलपाणिः ॥ ३९ ॥ **ति०** दस्युभिर्विप्रलुप्यन्तां त्यागभोगविहीनानिभवन्त्वितिभावः ॥ ४२ ॥ **ति०** उभेसन्ध्ये व्याप्येतिशेषः ॥ ४३ ॥ **स०** पितॄणां व्यवहितानां ॥ ४५ ॥

[पा०] १ झ. पुत्रैर्दासैश्च. क. ग. ङ. छ. ञ. ट. पुत्रैर्दारैश्च. २ क. क्रियाधर्मं. ३ ग. नित्यशः. ४ ङ. छ. त्यागेन. ५ घ. ङ. यस्यार्योऽनुमतेगतः. [अस्मिन्पाठेतत्पापंप्रतिपद्यतामित्यध्याहृत्ययोजनाकार्या]. ६ झ. ट. समुपोढेच. क. च. ञ. समुपोढेतु. ७ क. च. ञ. शत्रुपक्षे. ८ झ. मद्यप्रसक्तो. क. ङ. च. छ. ञ. ट. मद्येप्रसक्तो. ९ क. ङ. छ. झ. ञ. ट. भूतश्च. १० ङ. च. झ. ञ. ट. मास्य. ११ ग. मतिर्भूयात्. १२ क. ग. ङ. च. छ. झ. ञ. ट. सनिषेवतां. १३ ग. संचितानितु. १४ घ. दाहके. १५ घ. यस्यार्योनुमतेगतः. [अस्मिन्पाठेतत्पापंप्रतिपद्यतामित्यध्याहृत्ययोजनाकार्या]. १६ क—छ. झ. ञ. ट. कीर्त्यास्संजुष्टात्.

ब्राह्मणेभ्यो [1]ददौ रत्नं धनमन्नं च पुष्कलम् ॥ वासांसि च महार्हाणि रत्नानि विविधानि च ॥ २ ॥
[2]वास्तिकं बहुशुक्लं च गाश्चापि [3]शतशस्तदा ॥ [4]दासीदासं च यानं च वेश्मानि सुमहान्ति च ॥
ब्राह्मणेभ्यो ददौ पुत्रो राज्ञस्तस्यौर्ध्व[5]दैहिकम् ॥ ३ ॥
ततः प्रभातसमये [6]दिवसेथ त्रयोदशे ॥ विललाप महाबाहुर्भरतः शोक[7]मूर्च्छितः ॥
शब्दापिहित[8]कण्ठस्तु शोधनार्थ[9]मुपागतः ॥ ४ ॥
चितामूले पितुर्वाक्यमिदमाह सुदुःखितः ॥ ५ ॥
तात यस्मिन्निसृष्टोऽहं त्वया भ्रातरि राघवे ॥ तस्मिन्वनं प्रव्रजिते शून्ये त्यक्तोस्म्यहं त्वया ॥ ६ ॥
यस्या गतिरनाथायाः [10]पुत्रः प्रव्राजितो वनम् ॥ तामम्बां तात कौसल्यां त्यक्त्वा त्वं क्व गतो नृप ॥७॥
दृष्ट्वा भस्मारुणं तच्च दग्धास्थिस्थानमण्डलम् ॥ पितुः [11]शरीरनिर्वाणं [12]निष्टनन्विषसाद सः ॥ ८ ॥
[13]स तु दृष्ट्वा [14]रुदन्दीनः पपात धरणीतले ॥ उत्थाप्यमानः शक्रस्य यन्त्रध्वज [15]इव च्युतः ॥ ९ ॥
अभिपेतुस्ततः [16]सर्वे तस्यामात्याः शुचिव्रतम् ॥ अन्तकाले निपतितं ययातिमृषयो यथा ॥ १० ॥
शत्रुघ्नश्चापि भरतं दृष्ट्वा शोकपरिप्लुतम् ॥ [17]विसंज्ञो न्यपतद्भूमौ भूमिपालमनुस्मरन् ॥ ११ ॥

स्वार्थेणिच् ॥ १—२ ॥ वस्तानांछागानांसमूहोवास्तिकं छान्दसष्ठक् । " अजाछागीशुभच्छागवस्तच्छागलकाअजे " इत्यमरः । बहुशुक्लमितिछागविशेषणं रजतंवा । पितृप्रियत्वात् । " शुक्लोयोगान्तरेश्वेतेशुक्लेचरजतेतथा " इतिविश्वः । दासीदासं गवाश्वप्रभृतित्वादेकवद्भावः । ऊर्ध्वंदेहादूर्ध्वदेहः तत्रभवमौर्ध्वदैहिकं । " ऊर्ध्वदेहाच्चेतिवक्तव्यं " इतिठक् ॥ ३ ॥ शब्दापिहितकण्ठः रोदनध्वनिनाव्याप्तकण्ठः । शोधनार्थं स्थलशोधनार्थं । " दहनदेशमुदकुम्भैःस्रवोक्षन्ति " इतिसूत्रात् अस्थिसंचयनार्थमित्यर्थः । सावशेषास्थिनिचयइतिवक्ष्यमाणत्वात् त्रयोदशेप्यस्थिसंचयनंसूत्रान्तरेदृश्यते । यथाहबोधायनः " द्वितीयेह्नि युग्मदिवसेष्वर्धमासान्मासानृतून्संवत्सरंवासंचयनंकुर्यात् " इति ॥ ४ ॥ चितामूलइत्यर्धं ॥ ५ ॥ निसृष्टः दत्तः । प्रव्रजिते प्रव्राजिते । छान्दसोह्रस्वः ॥ ६—७ ॥ भस्मारुणं भस्मयुक्तमरुणंच । अरुणत्वमतिदग्धत्वात् । पितुः शरीरनिर्वाणं शरीरंनिर्वाप्यतेविनाश्यते अस्मिन्नितिशरीरनिर्वाणं । अधिकरणेल्युट् । " निर्वाणोनिर्वृतेमोक्षेविनाशेगजमज्जने " इतिवैजयन्ती । निष्टनन् नितरांस्तनन् । "अभिनिसस्तनःशब्दसंज्ञायां" इतिषत्वं । [भस्मारुणं भस्मनाअरुणं अव्यक्तरागं । दग्धास्थिस्थानमण्डलं दग्धानामस्थ्नांयानिस्थानानिविन्यासविशेषाः तेषांमण्डलं समूहं दृष्ट्वा । अस्थिमण्डलंदृष्ट्वेत्यर्थसिद्धं । पितुः शरीरनिर्वाणं शरीरविनाशं प्रति । निष्टनन् नितरांरोदनशब्दंकुर्वन्] विषसाद दुःखितोऽभूत् ॥ ८ ॥ उत्थाप्यमानः रज्जुभिरुत्थाप्यमानः । च्युतः स्रस्तः । शक्रस्य यन्त्रबद्धोध्वजोयन्त्रध्वजः रज्जुयुक्तोध्वजइव पपात । यथा यन्त्रपतनाद्ध्वजपतनं एवंराजपतनाद्भरतपतनमितिभावः ॥ ९ ॥ अमात्याः ज्ञातयः । शुचिव्रतं । अन्तकाले पुण्यक्षयकाले । निपतितंययातिं ऋषयः दौहित्रभूताइव अभिपेतुः ॥ १० ॥ भरतपतनावधिशत्रुघ्नस्यधैर्यस्थितं तत्पतनानन्तरंतुभूमिपालमनुस्मरन्न्यपतत् ॥ ११ ॥

हनिकर्तव्यप्रेतत्वमोचकश्राद्धंकृत्वेत्यर्थः ॥ १ ॥ कतक० दशाहाभ्यन्तरेऽस्थिसंचयनंकृत्वासकलश्राद्धानन्तरंत्रयोदशेऽहनि चिताभस्मोद्धारपूर्वकंस्थलशुद्धिःकर्तव्येतिक्षत्रियधर्मइतिवाल्मीक्युक्तेर्ज्ञायते ॥ ४ ॥ कतक० शक्रयन्त्रध्वजस्याकाशस्थस्यभूमौपातायोगात्

[पा०] १ ङ. च. छ. झ. ट. धनंरत्नंददावन्नं. २ घ. ज. हास्तिकं. ३ ङ. छ. झ. ट. बहुशस्तदा. ४ छ. झ. दासीदासांश्चयानानि. ङ. दासीदासांश्चयानानि. ५ क—छ. झ. ञ. देहिकं. ६ ख—ङ. छ. झ. दिवसेच. ७ क. घ. च. ञ. कर्शितः. ८ क. घ. ङ. च. ज—ट. कण्ठश्च. ९ क. मिहागतः. १० ग. पुत्रेप्रव्राजिते. ११ ख. ग. घ. ज. शरीरं. १२ छ. झ. ञ. ट. विषसादह. क. निषसादसः. ङ. च. निषसादह. १३ च. सतं. १४ क. रुदन्नार्तः. १५ ङ. छ. झ. ट. इवोच्छ्रितः. १६ छ. सद्यः. १७ ङ. छ. झ. ट. निश्चित्तो.

उन्मत्त इव निश्चेता विललाप सुदुःखितः ॥ स्मृत्वा पितुर्गुणाङ्गानि तानितानि तदातदा ॥१२॥
मन्थराप्रभवस्तीव्रः कैकेयीग्राहसङ्कुलः ॥ वरदानमयोऽक्षोभ्यो मज्जयच्छोकसागरः ॥ १३ ॥
सुकुमारं च बालं च सततं लालितं त्वया ॥ क्व तात भरतं हित्वा विलपन्तं गतो भवान् ॥ १४ ॥
ननु भोज्येषु पानेषु वस्त्रेष्वाभरणेषु च ॥ प्रवारयसि नः सर्वांस्तन्नः कोऽन्यः करिष्यति ॥ १५ ॥
अवदारणकाले तु पृथिवी नावदीर्यते ॥ या विहीना त्वया राज्ञा धर्मज्ञेन महात्मना ॥ १६ ॥
पितरि स्वर्गमापन्ने रामे चारण्यमाश्रिते ॥ किं मे जीवितसामर्थ्यं प्रवेक्ष्यामि हुताशनम् ॥ १७ ॥
हीनो भ्रात्रा च पित्रा च शून्यामिक्ष्वाकुपालिताम् ॥ अयोध्यां न प्रवेक्ष्यामि प्रवेक्ष्यामि तपोवनम् ॥१८॥
तयोर्विलपितं श्रुत्वा व्यसनं चान्ववेक्ष्य तत् ॥ भृशमार्ततरा भूयः सर्व एवानुगामिनः ॥ १९ ॥
ततो विषण्णौ विश्रान्तौ शत्रुघ्नभरतावुभौ ॥ धरण्यां संव्यचेष्टेतां भग्नशृङ्गाविवर्षभौ ॥ २० ॥
ततः प्रकृतिमान्वैद्यः पितुरेषां पुरोहितः ॥ वसिष्ठो भरतं वाक्यमुत्थाप्य तमुवाच ह ॥ २१ ॥
त्रयोदशोयं दिवसः पितुर्वृत्तस्य ते विभो ॥ सावशेषास्थिनिचये किमिह त्वं विलम्बसे ॥ २२ ॥
त्रीणि द्वन्द्वानि भूतेषु प्रवृत्तान्यविशेषतः ॥ तेषु चापरिहार्येषु नैवं भवितुमर्हसि ॥ २३ ॥

गुणाङ्गानि गुणानङ्गानिचेत्यर्थः । तदातदा तानितानि तत्तत्कालोचिताभिमतप्रदानोपलालनकराणिगुणाङ्गानि ॥ १२ ॥ मन्थरेतिसगरव्याख्यावृत्तिः । तीव्रः अगाधइतियावत् । अमज्जयत् अस्मानितिशेषः ॥ १३—१४ ॥ प्रवारयसि एष्वाभरणादिषुकिंतवेष्टंगृहाणेति प्रकर्षेणस्वयंग्राहयासि तत्प्रवारणं ॥ १५ ॥ यापृथिवी धर्मज्ञेनत्वयाविहीना नावदीर्यते नभिद्यते । स्वयमितिशेषः । सा अवदारणकालेतु प्रलयकालेपि । नावदीर्यते नावदीर्येतेत्यर्थः । अवदारणकाले त्वद्विहीनतयाअवदारणस्यप्राप्तकाले । अवदारणकालत्वेहेतुः— त्वयाविहीनेति । धर्मज्ञेनमहात्मना त्वयाराज्ञा एतादृशगुणाढ्येनत्वयेत्यर्थः । विहीनाया सापृथ्वी अवदारणकालेनावदीर्यतइत्यन्वयः ॥ १६ ॥ जीवितसामर्थ्यं जीवनशक्तिः ॥ १७—१८ ॥ आर्ततराः आसन्नितिशेषः ॥ १९ ॥ विश्रान्तौ विशेषेणश्रान्तौ । व्यचेष्टेतां व्यलुण्ठेतां ॥ २० ॥ प्रकृतिमान् प्रशस्तस्वभावः । " प्रकृतिःपञ्चभूतेषुस्वभावेमूलकारणे " इतिवैजयन्ती । वैद्यः विद्यां तत्त्वज्ञानहेतुभूतांवेदान्तविद्यांवेदेतिवैद्यः । वेदान्तविद्याधिगतपरावरतत्त्वयाथात्म्यविज्ञानः सर्वज्ञइतियावत् । " तदधीतेतद्वेद " इत्यण् । " सर्वज्ञभिषजौवैद्यौ " इत्यमरः । एषामितिबहुवचननिर्देशोबुद्धिस्थरामाद्यपेक्षया । पितुः दशरथस्य ॥ २१ ॥ वृत्तस्य संस्कृतस्य । त्रयोदशोयं दिवसः सावशेषास्थिनिचये अस्थिसंचयनाख्येकर्मण्यवशिष्टइत्यर्थः । दशाहमध्येशास्त्रविहितंप्रधानावयवास्थिसंचयनंकृतं त्रयोदशेदिवसेतद्देशीयशिष्टाचारप्राप्तस्थलशोधनमात्रंकृतमिति नस्मृतिविरोधइत्यप्याहुः । स्मृतिश्चास्माभिर्दर्शितैव ॥ २२ ॥ अशनायापिपासे शोकमोहौ जरामृत्यू इत्युक्तानित्रीणिद्वन्द्वानि । भूतेषु जन्तुषु । अविशेषतःप्रवृत्तानि । तेषुचापरिहार्येषुप्राप्तेषु त्वमेवंभवितुंनार्हसि अज्ञवन्मोहेनप्रलपितुं नार्हसि

गृहाद्यलङ्कारार्थध्वजयन्त्ररूपेणध्वजसदृशरूपेणनिर्मितइत्यर्थः । उत्पाततःपतितेनतेनोपमेत्यन्ये ॥ ९ ॥ **ति०** गुणाङ्गानि उपलालनगुणस्याङ्गभूतानिविचित्रवस्त्राभरणादिदानादिकर्माणि । **स०** गुणान् प्रज्ञासौजन्यादीन् । अङ्गानि स्वलालनाश्रयाङ्कहस्तमुखादीनि । तानि तेतानिचतानि ॥ १२ ॥ **ति०** मरदानमयत्वादक्षोभ्यः ॥ १३ ॥ **ति०** प्रवारयति एषुकिंतेऽपेक्षितंगृहाणेतिप्रकर्षेणास्मदिष्टवरणंकारयतिभवान् । तदद्यनःकःकरिष्यति त्वयिगतेइतिशेषः ॥ १५ ॥ **स०** प्रकृतिमान् प्रकृतिजनसहितः ॥ २१ ॥ **ती०** त्रीणिद्वन्द्वानि जन्ममरणे सुखदुःखे लाभालाभौ । एवंभवितुं शोचितुं । **कतक०** त्रीणिद्वन्द्वानि अस्तिजायते वर्धतेअपक्षीयते विपरिणमतेविनश्यतीत्येवंरूपाणि ॥ २३ ॥ इतिसप्तसप्ततितमस्सर्गः ॥ ७७ ॥

[पा०] १ घ. तथातथा. २ क. च. हृद. ३ झ. ढ. प्रवारयति. ख. प्रचारयति. ४ क—च. झ. ञ. ट. कोय. ५. ख. कालेषु. ६ ङ. तुविदीर्यते. ७ ङ. च. झ. ञ. ट. विहीनाया. ८ क. च. ञ. रामेणच. ९ क. च. ञ. चवनं. १० ङ. छ. झ. ट. चाप्यवेक्ष्य. ११ घ. मार्तस्वरा. १२ ग—ट. श्रान्तौच. क. शोचन्तौ. १३ ङ. छ. झ. ढ. धरायांस्म. च. ञ. धरायां समवेष्टेतां. क. ख. घ. धरायांसंव्यवेष्टेतां.

सुमन्त्रश्चापि शत्रुघ्नमुत्थाप्याभिप्रसाद्य च ॥ श्रावयामास तत्त्वज्ञः सर्वभूतभवाभवौ ॥ २४ ॥
उत्थितौ च नरव्याघ्रौ प्रकाशेते यशस्विनौ ॥ वर्षातपपरिक्लिन्नौ पृथगिन्द्रध्वजाविव ॥ २५ ॥
अश्रूणि परिमृद्नन्तौ रक्ताक्षौ दीनभाषिणौ ॥ अमात्यास्त्वरयन्ति स्म तनयौ चापराः क्रियाः ॥२६॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे सप्तसप्ततितमः सर्गः ॥ ७७ ॥

अष्टसप्ततितमः सर्गः ॥ ७८ ॥

शत्रुघ्नेनरामसमीपयात्रांविचारयन्तंभरतंप्रतिलक्ष्मणेनपितृनिग्रहपूर्वकंरामप्रवासाप्रतिषेधनस्यानौचित्यकथनम् ॥ १ ॥ तंप्रतिद्वास्स्थैर्यदृच्छयागृहप्राग्द्वारमागतायाःकुब्जायाग्रहणेनतस्याएवसर्वानर्थनिदानत्वकथनम् ॥ २ ॥ शत्रुघ्नेनसखीमध्यगतायाःकुब्जायाःकेशग्रहणेनकैकेयीभर्त्सनपूर्वकंधरण्यांपरिकर्षणेकैकेय्याभरतंप्रतितन्मोचनयाचना ॥ ३ ॥ शत्रुघ्नेनसयुक्तिकभरतवचनात्कुब्जायामोचनम् ॥ ४ ॥

अथ यात्रां समीहन्तं शत्रुघ्नो लक्ष्मणानुजः ॥ भरतं शोकसंतप्तमिदं वचनमब्रवीत् ॥ १ ॥
गतिर्यः सर्वभूतानां दुःखे किं पुनरात्मनः ॥ स रामः सत्त्वसंपन्नः स्त्रिया प्रव्राजितो वनम् ॥ २ ॥
बलवान्वीर्यसंपन्नो लक्ष्मणो नाम योप्यसौ ॥ किं न मोचयते रामं कृत्वा स पितृनिग्रहम् ॥ ३ ॥
पूर्वमेव तु निग्राह्यः समवेक्ष्य नयानयौ ॥ उत्पथं यः समारूढो नार्या राजा वशं गतः ॥ ४ ॥
इति संभाषमाणे तु शत्रुघ्ने लक्ष्मणानुजे ॥ प्राग्द्वारेऽभूत्तदा कुब्जा सर्वाभरणभूषिता ॥ ५ ॥
लिप्ता चन्दनसारेण राजवस्त्राणि बिभ्रती ॥ विविधं विविधैस्तैस्तैर्भूषणैश्च विभूषिता ॥ ६ ॥

॥ २३ ॥ सर्वभूतभवाभवौ सर्वभूतोत्पत्तिविनाशौ ॥२४—२५॥ परिमृद्नन्तौ मार्जयन्तौ । तनयौ राजपुत्रौ । अपराःक्रियाः अस्थिसंचयनादिकाः । प्रतीतिशेषः ॥ २६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने सप्तसप्ततितमः सर्गः ॥ ७७ ॥

अथ अपरक्रियांनिर्वर्त्यगृहंप्रतिगमनानन्तरं । यात्रां रामसमीपगमनं । समीहन्तं समीहमानं यात्रोद्युक्तमित्यर्थः ॥ १ ॥ सर्वभूतानां प्राणिमात्रस्य । दुःखेसतियोगतिः सआत्मनोदुःखेसतिगतिरिति किंपुनः किंवक्तव्यं । एवंदुःखनिस्तारक्षमोरामः सत्वसंपन्नोपि बलसंपन्नोपि । स्त्रिया अत्यन्ताबलया । वनं प्रव्राजितः । इदमत्यन्तचित्रमितिभावः ॥ २ ॥ पितृपरतन्त्रोरामः किंकरोत्वित्यत्राह—बलवानित्यादिना । नामेतिकुत्सने । " नामप्राकाश्यसंभाव्यक्रोधोपगमकुत्सने " इतिवैजयन्ती । लक्ष्मणोनामयोपीत्यनादरोक्तिः । असौ पितृनिग्रहंकृत्वापि रामंवनवासात् किंनमोचयतेस्म किंनमोचितवान् । इदमप्यपरमाश्चर्यमितिभावः ॥ ३ ॥ पितृनिग्रहेदोषःस्यादित्याशङ्कां परिहरति—पूर्वमित्यादिना । योराजा नार्यावशंगतः उत्पथंसमारूढः अपथंप्राप्तः सः नयानयौ नीत्यनीती । समवेक्ष्य सम्यग्विचार्य । पूर्वमेव अन्यायप्रवृत्तिसमापनात्पूर्वमेव । निग्राह्यइतियोजना ॥ ४ ॥ कुब्जाप्राग्द्वारेऽभूत् स्वाभिलषितोभरताभिषेकः कदाभविष्यतीतिअवसरंप्रतीक्षमाणा भरतशत्रुघ्नाधिष्ठितराजगृहस्यप्राग्द्वारेदैवादागताभूत् ॥५॥ चन्दनसारेण चन्दनपङ्केन । राजवस्त्राणिराजार्हवस्त्राणिकैकेयीदत्तानि । कञ्चुकान्तरीयोत्तरीयादिभेदाद्बहुवचनं । तैस्तैरिति तत्तदवयवोचितत्वमुच्यते । एकैकाभरणेरत्नखचितत्वादिवैविध्यमाह—विविधैरिति । विविधमितिक्रियाविशेषणं । तेनभूषणसंस्थानविशेषउच्यते ॥ ६ ॥

ति० समीहन्तं समीहमानं विचारयन्तमित्यर्थः ॥ १ ॥ ति० दुःखे दुःखजनकसंकटेप्राप्ते । यस्सर्वभूतानांगतिः स्मरणमात्रेणसर्वदुःखनाशकः आत्मनःस्वस्यावयोश्चगतिरितिकिंवक्तव्यं । अनेनातिसंकटेभगवत्स्मरणमेवदुःखनाशेसमर्थनान्यदितिसूचितम् ।

[पा०] १ क. ख. ग. ङ. च. छ. ट. भवाभवं. घ. भवोद्भवं. २ क. ख. ग. ङ. च. छ. झ. ट. तौ. ३ क. ङ. च. छ. झ. ञ. ट. म्लानौ. ४ क—ट. कृत्वापि. ५ ङ. राजानार्या. ६ क. ञ. इतिस्म. ७ च. ञ. चापिभूषिता.

मेखलादामभिश्चित्रैरन्यैश्च [1]शुभभूषणैः ॥ बभासे बहुभिर्बद्धा [2]रज्जुबद्धेव वानरी ॥ ७ ॥
तां समीक्ष्य तदा [3]द्वास्स्थां सुभृशं पापकारिणीम् ॥ गृहीत्[4]वाऽकरुणां कुब्जां शत्रुघ्नाय [5]न्यवेदयत् ॥ ८ ॥
यस्याः कृते वने रामो न्यस्तदेहश्च वः पिता ॥ सेयं पापा नृशंसा च तस्याः कुरु यथामति ॥ ९ ॥
शत्रुघ्नश्च तदाज्ञाय वचनं भृशदुःखितः ॥ अन्तःपुरचरान्सर्वानित्युवाच [6]धृतव्रतः ॥ १० ॥
तीव्रमुत्पादितं दुःखं भ्रातॄणां मे [7]तथा पितुः ॥ [8]यया सेयं [9]नृशंसस्य कर्मणः फलमश्नुताम् ॥ ११ ॥
एवमु[10]क्त्वा तु तेनाशु सखीजनसमावृता ॥ गृहीता बलवत्कुब्जा सा तद्गृहमनादयत् ॥ १२ ॥
ततः सुभृशं[11]संतप्तस्तस्याः [12]सर्वः सखीजनः ॥ क्रुद्धमाज्ञाय शत्रुघ्नं विपलायत [13]सर्वशः ॥ १३ ॥
[14]आमन्त्रयत कृत्स्नश्च तस्याः सर्वः सखीजनः ॥ [15]यथायं समुपक्रान्तो निःशे[16]षान्नः करिष्यति ॥ १४ ॥
सानुक्रोशां वदान्यां च धर्मज्ञां च यशस्विनीम् ॥ कौसल्यां शरणं याम सा हि नो[17]स्तु ध्रुवा गतिः ॥ १५
स च रोषेण [18]ताम्राक्षः शत्रुघ्नः शत्रु[19]तापनः ॥ विच[20]कर्ष तदा कुब्जां क्रोशन्तीं [21]धरणीतले ॥ १६ ॥
[22]तस्या ह्याकृष्यमाणाया मन्थरायास्ततस्ततः ॥ चित्रं बहुविधं भाण्डं पृथिव्यां तद्व्यशीर्यत ॥ १७ ॥
तेन भाण्डेन [23]संस्तीर्णं श्रीमद्राजनिवेशनम् ॥ अशोभत तदा भूयः शारदं गगनं यथा ॥ १८ ॥
स बली बलवत्क्रोधाद्गृहीत्वा [24]पुरुषर्षभः ॥ कैकेयीम[25]भिनिर्भर्त्स्य बभाषे परुषं वचः ॥ १९ ॥
तैर्वाक्यैः परुषैर्दुःखैः कैकेयी भृशदुःखिता ॥ शत्रुघ्नभयसंत्रस्ता पुत्रं शरणमागता ॥ २० ॥

भूषणशब्दोपि मेखलादामभिन्नपरः । गोबलीवर्दन्यायात् । अन्यैः मेखलाप्रदेशधारणीयैः । बद्धेतिविशेषणात् भूषणानिबन्धनस्थानीयानिनतुशोभाकराणीत्युक्तं ॥ ७ ॥ अकरुणां निर्दयां ॥ ८ ॥ वने अभूदितिशेषः । कुरु शिक्षणमितिशेषः ॥ ९—१२ ॥ विपलायतेति "उपसर्गस्यायतौ" इतिरेफस्यलत्वं॥१३॥ आमन्त्रयत अन्योन्यमाह्वयत् । तस्याःसर्वःसखीजनः कृत्स्नः तदितरःसर्वोपिजनः । यथा येनप्रकारेण । अयं शत्रुघ्नः । उपक्रान्तः यथा नः निःशेषान्करिष्यति । जनापेक्षयापुंस्त्वं । वदान्यां वल्गुवाचं । "वदान्योवल्गुवागपि" इतिवैजयन्ती । कौसल्यांशरणंयाम सानोध्रुवागतिरस्त्वित्यन्योन्यमाह्वयदित्यन्वयः ॥ १४—१६ ॥ भाण्डं भूषणं । "वणिङ्मूलधनेपात्रेभाण्डं भूषाश्वभूषयोः" इतिवैजयन्ती । पृथिव्यां तद्व्यशीर्यत विशीर्णमासीत् । [पृथिव्यांतद्विशीर्यते विशीर्णमासीत्] ॥ १७ ॥ शारदं प्रसन्ननक्षत्रमित्यर्थः ॥१८॥ बलवत्क्रोधात् अतीवक्रोधात् । कैकेयीमभिनिर्भर्त्स्येत्यनेनमन्थरामोचनार्थंतदाकैकेयीसमागतेत्यवगम्यते ॥ १९ ॥ शत्रुघ्नभयसंत्रस्तापुत्रंशरणमागतेत्यनेन भर्त्सनानन्तरंतांप्रहर्तुमप्युद्युक्तवानितिसूच्यते ॥२०॥

शि० सरामः नित्यविहारसहितोरामः ॥ २ ॥ **ति०** रज्जुभिरित्यत्रगुरुलघुप्रयुक्तश्छन्दोभङ्ग आर्षः ॥ ७ ॥ **स०** यथाकरिष्यति सम्यक्करिष्यति । "निवृत्तिमार्गःकथितआदौभगवतायथा" इतिश्रीमद्भागवतेसम्यगित्यर्थेयथाशब्दप्रयोगात् । यतुइत्यर्थेवाऽयंनिपातः ॥ १४ ॥ **ति०** पृथिवीतले पातयित्वेतिशेषः ॥ १६ ॥ **ति०** कैकेयीमभिनिर्भर्त्स्य निर्भर्त्सनमत्रहस्तेनदूरीकरणं ॥ १९ ॥ **ति०** पुत्रंशरणमागता । कुब्जामोचनार्थमितिशेषः ॥ २० ॥

[पा०] १ ख. ङ. छ. झ. वर. क. बहु. २ झ. ट. रज्जभिरिववानरी. ३ क. ख. ङ. च. छ. झ. ञ. द्वास्स्थोभृशंपापस्य कारिणीं. घ. द्वास्स्थांसभृशं. ग. द्वास्स्थांसुदृढ. ४ क. ख. घ—ट. त्वाऽकरुणं. ५ झ. न्यवेदयत्. ६ घ. ज. ट. द्रुतंवचः. ७ क. घ. यथा. ८ ख—ङ. झ. ञ. यथा. ९ ङ. नृशंसास्य. १० क. मुक्ताच. ११ क. च. ञ. संत्रस्तः. १२ क. ख. घ. सर्वसखीजनः. १३ ख. ग. सर्वतः. १४ ख. ग. च. छ. झ. ञ. ट. अमन्त्रयत. १५ यथायंसमुपक्रान्तः. क्रुद्धमाज्ञायशत्रुघ्नं आमन्त्रयतकृत्स्नश्च इति ङ. पाठानुपूर्वी. १६ क—छ. झ—ट. निःशेषं. १७ ङ. छ. ञ. ट. नोस्ति. १८ ङ. छ. झ. ट. संवीतः. १९ ङ. छ. झ. ट. शासनः. २० ङ. छ. झ. ट. संचकर्ष. २१ ख. ङ. च. झ. ञ. ट. पृथिवी. २२ क. ङ. च. छ. झ. ञ. ट. तस्यांह्याकृष्यमाणायांमन्थरायामितस्ततः. च. ञ. तस्यांतु. २३ ख. ग. घ. च. ञ. संकीर्णं. छ. झ. ट. विस्तीर्णं. ङ. निस्तीर्णं. २४ ङ. पुरुषोत्तमः. २५ ख. मपि.

[1]तां प्रेक्ष्य भरतः क्रुद्धं शत्रुघ्नमिदमब्रवीत् ॥ अवध्याः सर्वभूतानां प्रमदाः क्षम्यतामिति ॥ २१ ॥
हन्यामहमिमां पापां कैकेयीं दुष्टचारिणीम् ॥ यदि मां धार्मिको रामो नासूयेन्मातृघातकम् ॥२२॥
इमामपि हतां कुब्जां यदि जानाति राघवः ॥ त्वां च मां [2]च हि धर्मात्मा नाभिभाषिष्यते ध्रुवम् ॥२३॥
भरतस्य वचः श्रुत्वा शत्रुघ्नो लक्ष्मणानुजः ॥ न्यवर्तत [3]ततो रोषात्तां मुमोच च मन्थ[4]राम् ॥ २४ ॥
सा पादमूले कैकेय्या मन्थरा निपपात ह ॥ निश्वसन्ती सुदुःखार्ता [5]कृपणं विललाप [6]च ॥ २५ ॥
शत्रुघ्नविक्षेपविमूढसंज्ञां समीक्ष्य कुब्जां भरतस्य माता ॥
शनैः समाश्वासयदार्तरूपां क्रौञ्चीं [7]विलग्नामिव वीक्षमाणाम् ॥ २६ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे अष्टसप्ततितमः सर्गः ॥ ७८ ॥

एकोनाशीतितमः सर्गः ॥ ७९ ॥

चतुर्दशेदिवसेमन्त्रिप्रमुखैर्भरतंप्रतिराज्यस्वीकारप्रार्थना ॥ १ ॥ भरतेनतान्प्रतितत्प्रतिषेधनपूर्वकमभिषेकार्थमयोध्यांप्रति रामानयनायचतुरङ्गबलसाहित्येनवनगमनार्थमार्गनिर्माणायनानाशिल्पिनियोजनचोदना ॥ २ ॥

ततः [8]प्रभातसमये [9]दिवसे च चतुर्दशे ॥ समेत्य [10]राजकर्तारो भरतं वाक्यमब्रुवन् ॥ १ ॥
गतो दशरथः स्वर्गं यो नो [11]गुरुतरो गुरुः ॥ रामं प्रव्राज्य वै ज्येष्ठं लक्ष्मणं च महाबलम् ॥ २ ॥
त्वमद्य भव नो राजा राजपुत्र [12]महायशः ॥ सङ्गत्या नापराध्नोति राज्यमेतदनायकम् ॥ ३ ॥
आभिषेचनिकं सर्वमिदमादाय राघव ॥ प्रतीक्षते त्वां स्वजनः श्रेणयश्च [13]नृपात्मज ॥ ४ ॥
राज्यं गृहाण भरत पितृपैतामहं [14]ध्रुवम् ॥ अभिषेचय चात्मानं पाहि चास्मान्नरर्षभ ॥ ५ ॥

क्षम्यतामित्यब्रवीदित्यन्वयः ॥ २१ ॥ नासूयेत् नगर्हेत ॥ २२ ॥ माभून्मातृहत्या सर्वकुहनामूलभूतेयमेवकुब्जाहन्यतामित्यत्राह—इमामित्यादिना । नाभिभाषिष्यते इत्यब्रवीदितिअनुकृष्टेनपूर्वेणसंबन्धः ॥ २३—२५ ॥ शत्रुघ्नविक्षेपविमूढसंज्ञामिति । विक्षेपोभ्रामणं तेनविमूढसंज्ञां अन्यथाभूतमतिं । विलग्नां वागुरालग्नामितिभावः । विविग्नामितिपाठे कम्पवतीमित्यर्थः ॥ २६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने अष्टसप्ततितमः सर्गः ॥ ७८ ॥

त्रयोदशदिवसपर्यन्तमपरक्रियाव्याप्रुतत्वाच्चतुर्दश इत्युक्तं । समेत्य एकीभूय ॥ १ ॥ गुरुतरोगुरुः परमगुरुरित्यर्थः ॥ २ ॥ " राजानंप्रथमंविन्देत्ततोभार्यांततोधनं " इति मातापित्रादेरपिराज्ञएवान्तरङ्गरक्षकत्वोपदेशात् अनायकमपि एतद्राज्यं सङ्गत्या दैवयोगेन । नापराध्नोति राज्यस्थजनजातमन्योन्यंन द्रुह्यतीत्यर्थः ॥ ३ ॥ प्रकृत्याभिमुख्यमप्यस्तीत्याह—आभिषेचनिकमिति । आभिषेचनिकं अभिषेकप्रयोजनं पदार्थजातं । स्वजनः अमात्यादिः । श्रेणयः नैगमाः । प्रतीक्षन्तइतिविपरिणामः ॥ ४—५ ॥ भा-

---

ति० जानाति ज्ञास्यते । नाभिभाषिष्यते स्त्रीघातिनावितिमत्वेतिभावः ॥ २३ ॥ इत्यष्टसप्ततितमस्सर्गः ॥ ७८ ॥

ती० राजकर्तारः राजाभिषेककर्तारः । स० राजानंकर्तारः राजकर्तारः मन्त्रिणः ॥ १ ॥ ति० रक्षासाधनत्वाद्राजागुरुः तत्राप्ययंगुरुतरः । ज्येष्ठं राज्यार्हं ॥ २ ॥ ती० संगत्या सामन्तामात्यादीनामैकमत्येन । ति० यतएतद्राज्यमनायकंततोराजा भव । ननुज्येष्ठेविद्यमानेकथमहंराजातत्राह—संगत्या ज्येष्ठस्यवनवासंप्रतिपितुराज्ञासंगत्या तवचराज्यंप्रतितदाज्ञासंगत्या राज्यंकुर्वन्नपिभवान्नापराध्नोति धर्मविरोधंज्येष्ठविरोधलोकविरोधान्नप्राप्नोति । पित्राज्ञायाउभाभ्यामपिपालनीयत्वादितिबहवः ॥ ३ ॥

[पा०] १ ख. ङ. छ. झ. ट. तंप्रेक्ष्य. २ क. ख. ग. ङ. छ. झ. ञ. ट. चैव. ३ क. ग. च. तदारोषात्. छ. झ. ट. ततोदोषात्. ४ ङ. छ. झ. ट. मूर्च्छितां. ५ क. करुणं. ६ क—ट. ह. ७ ख. विविग्नामिव. ८ क. प्रभाते. ९ क. ङ. छ—ट. दिवसेऽथ. १० ङ. च. राज्य. ११ घ. राजागुरुस्तव. ग. गुरुतरोमहान्. १२ ग. घ. महायशाः. ख. महाबल. १३ क. च. महाबल. १४ क. ख. ग. महत्.

[एवमुक्तः शुभं वाक्यं द्युतिमान्सत्यवाक्छुचिः ॥] आभिषेचनिकं भाण्डं कृत्वा सर्वं प्रदक्षिणम् ॥
भरतस्तं जनं सर्वं प्रत्युवाच धृतव्रतः ॥ ६ ॥
ज्येष्ठस्य राजता नित्यमुचिता हि कुलस्य नः ॥ नैवं भवन्तो मां वक्तुमर्हन्ति कुशला जनाः ॥ ७ ॥
रामः पूर्वो हि नो भ्राता भविष्यति महीपतिः ॥ अहं त्वरण्ये वत्स्यामि वर्षाणि नव पञ्च च ॥ ८ ॥
युज्यतां महती सेना चतुरङ्गमहाबला ॥ आनयिष्याम्यहं ज्येष्ठं भ्रातरं राघवं वनात् ॥ ९ ॥
आभिषेचनिकं चैव सर्वमेतदुपस्कृतम् ॥ पुरस्कृत्य गमिष्यामि रामहेतोर्वनं प्रति ॥ १० ॥
तत्रैव तं नरव्याघ्रमभिषिच्य पुरस्कृतम् ॥ आनेष्यामि तु वै रामं हव्यवाहमिवाध्वरात् ॥ ११ ॥
न सकामां करिष्यामि स्वामिमां मातृगन्धिनीम् ॥ वने वत्स्याम्यहं दुर्गे रामो राजा भविष्यति ॥ १२ ॥
क्रियतां शिल्पिभिः पन्थाः समानि विषमाणि च ॥ रक्षिणश्चानुसंयान्तु पथि दुर्गविचारकाः ॥ १३ ॥
एवं संभाषमाणं तं रामहेतोर्नृपात्मजम् ॥ प्रत्युवाच जनः सर्वः श्रीमद्वाक्यमनुत्तमम् ॥ १४ ॥
एवं ते भाषमाणस्य पद्मा श्रीरुपतिष्ठताम् ॥ यस्त्वं ज्येष्ठे नृपसुते पृथिवीं दातुमिच्छसि ॥ १५ ॥
अनुत्तमं तद्वचनं नृपात्मजप्रभाषितं संश्रवणे निशम्य च ॥
प्रहर्षजास्तं प्रति बाष्पबिन्दवो निपेतुरार्याननेत्रसंभवाः ॥ १६ ॥

ण्डं उपकरणं ॥ ६ ॥ राजता राजत्वं ॥ ७ ॥ वत्स्यामि रामप्रतिनिधित्वेनेतिशेषः ॥ ८ ॥ आनयिष्यामीत्यत्र इडार्षः ॥ ९ ॥ उपस्कृतं संस्कृतं उपकरणमितिवार्थः । रामहेतोः रामाभिषेकार्थं ॥ १० ॥ पुरस्कृतं पूजितं । " पुरस्कृतःपूजितेरात्यभियुक्तेग्रतःकृते " इतिवैजयन्ती । यद्वा पुरस्कृतं स्वजनदर्शनेनाभिमुखीकृतमित्यर्थः । अध्वरात् यागशालायाः । हव्यवाहं त्रेताग्निं ॥ ११ ॥ मातृगन्धिनीं केवलमातृव्यपदेशां लेशमात्रमातृभावामितिवा । " गन्धोलेशेमहीगुणे " इतिवैजयन्ती ॥ १२ ॥ क्रियतामिति तत्समीपगमनायेतिशेषः । विषमाणि निम्नोन्नतस्थलानि समानिक्रियन्तां । पथिदुर्गविचारकाः मार्गेदुर्गस्थलशोधकाः । यद्वा दुर्गाभिज्ञाः रक्षिणः ॥ १३ ॥ रामहेतोः अनुत्तमंश्रीमद्वाक्यं एवंसंभाषमाणंप्रत्युवाचेतिसंबन्धः ॥ १४ ॥ पद्मा पद्मालया श्रीः ते उपतिष्ठतां त्वत्समीपेअनपायिनीतिष्ठत्वित्यर्थः । नृपसुते नृपसुताय । सएवसुतः ज्येष्ठत्वात् । " इतरेकामजाः स्मृताः " इतिवचनादितिभावः ॥ १५ ॥ संश्रवणे रामानयनप्रतिज्ञाविषये । "आगूसंगरसंधाःप्रतिश्रवः संश्रवःप्रतिज्ञाच " इतिहलायुधः । निशम्य स्थिता-

कतक० पुत्रगृद्धिनीमितिपाङ्कःपाठः । पुत्रगार्धिनीमित्यर्थः । स० मातृगर्धिनीं मातृयोग्यमानापेक्षावर्तीं ॥ १२ ॥ स० दुर्गविचारकाः गन्तुमशक्यमार्गःक्ववर्ततइतिविचारकाः । ति० पथिविद्यमानेषुदुर्गेषु विशेषेणजनांश्चारयन्तीतिपथिदुर्गविचारकाः। पथिदुर्गविशारदाइतिपाठे तत्रविद्यमानदुर्गेचोरादिभीत्यागन्तुमशक्यप्रदेशेरक्षणविशारदाइत्यर्थः ॥ १३ ॥ शि० पद्मा कमलकरा श्रीः लक्ष्मीः । उपतिष्ठतां स्तौतु । वयंनस्तवनेसमर्थाइत्यर्थः । एतेनेदमेवकर्तव्यमितिसूचितम् ॥ १५ ॥ ति० तद्वचनंनिशम्य स्थितानांजनानांप्रति भरतमुद्दिश्यप्रहर्षजाः आर्याननेत्रसंभवाः हर्षयुक्तमुखस्थनेत्रजबिन्दवोनिपेतुरिति तीर्थः । अत्राननपदमधिकं । कतकस्तु नृपात्मजःप्रभाषितमितिसविसर्गपाठः । नृपात्मजःजनैःप्रभाषितं अनुत्तमंतद्वचनंआशीर्वचनं संश्रवणेसम्यक्छ्रवणविषयेप्राप्तंनिशम्यहृष्टोऽभूदितिशेषः । अथतंप्रति तंजनंलक्षीकृत्य । कर्मप्रवचनीयत्वाद्द्वितीया । आर्यस्यपूज्यस्यभरतस्यआर्यंपूज्यंयदाननं । जनाशीर्वादश्रवणजसंतोषेणपूज्यत्वंमुखस्य । तद्वर्तिनेत्रसंभवाः अतएवहर्षजाबिन्दवोनिपेतुः । अनुक्तभरतसौमुख्यकथनं चास्यश्लोकस्यप्रयोजनमित्याह—अत्रकतकपाठस्तद्व्याख्याचज्यायसी । शि० आर्याननेत्रसंभवाः आर्याणांउत्तमानांअननंजीवनं येभ्यः यद्धेतुकानन्दानुमानेनान्येपिसज्जनास्सानन्दाभवन्तीत्यर्थः । तेचतेनेत्रसंभवाः । स० नविद्यतेउत्तमंयस्मात्तदनुत्तमं । संश्रवणे श्रवणीयेरामानयनविषये तद्वचनंनिशम्य ॥ १६ ॥

[पा०] १ क. च. इदमर्धमधिकं. २ ग. चापि. ३ एतदर्धस्यप्रतिनिधितया क. ख. पाठयोः. भरतःस्वजनंसर्वं सरोषमभिवीक्ष्यच । क्षणंपिधायकर्णौसप्रत्युवाचधृतव्रतः. इत्यर्धद्वयंदृश्यते. रूक्षमेवाभिवीक्ष्यचेति ख. पाठः. ४ ग. च. ज. ञ. दृढव्रतः. ५ ख. मेभ्राता. ६ ङ. छ. ट. नववर्षाणि. ७ ख. ग. ङ. च. छ. छ. ञ. ट. आनयिष्यामि. ८ ङ. मातरं. ९ ङ. छ. ज. झ. पुत्रगृद्धिनीं. १० ङ. राजारामो. ११ ख. ग. रुर्व्यांजननेत्र.

ऊचुस्ते वचनमिदं निशम्य हृष्टाः सामात्याः सपरिषदो वियातशोकाः ॥
पन्थानं नरवर भक्तिमाञ्जनश्च व्यादिष्टास्तव वचनाच्च शिल्पिवर्गः ॥ १७ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे एकोनाशीतितमः सर्गः ॥ ७९ ॥

अशीतितमः सर्गः ॥ ८० ॥

भरतामात्यचोदनयाशिल्पिभिरागङ्गातटं शिबिरादिमण्डितचित्रतरसुगममार्गनिर्माणम् ॥ १ ॥

अथ भूमिप्रदेशज्ञाः सूत्रकर्मविशारदाः ॥ स्वकर्माभिरताः शूराः खनका यन्त्रकास्तथा ॥ १ ॥
कर्मान्तिकाः स्थपतयः पुरुषा यन्त्रकोविदाः ॥ तथा वर्धकयश्चैव मार्गिणो वृक्षतक्षकाः ॥ २ ॥
कूपकाराः सुधाकारा वंशकर्मकृतस्तथा ॥ समर्था ये च द्रष्टारः पुरतस्ते प्रतस्थिरे ॥ ३ ॥
स तु हर्षात्तमुद्देशं जनौघो विपुलः प्रयान् ॥ अशोभत महावेगः समुद्र इव पर्वणि ॥ ४ ॥
ते स्ववारं समास्थाय वर्त्मकर्मणि कोविदाः ॥ करणैर्विविधोपेतैः पुरस्तात्संप्रतस्थिरे ॥ ५ ॥

नामितिशेषः । आर्याननेत्रसंभवाइत्यत्र आर्येत्यविभक्तिकनिर्देशः । आर्याणामितियावत् ॥ १६ ॥ हेनरवर तववचनात् शिल्पिवर्गः भक्तिमान् जनः रक्षकश्च पन्थानंप्रति व्यादिष्टाः आज्ञप्ताः। इतीदमूचुरितिसंबन्धः ॥ १७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने एकोनाशीतितमः सर्गः ॥ ७९ ॥

भूमिप्रदेशज्ञाः निम्नोन्नतादिप्रदेशज्ञाः । यद्वा नानादेशविदः । सूत्रकर्मविशारदाः सूत्रकर्मणि निर्जलप्रदेशेष्वगाधवापीकूपादिजलोद्धारसूत्रकर्मणि विशारदाः समर्थाः । यद्वा सूत्रैःकर्म सूत्रकर्म तत्रविशारदाःसमर्थाः तन्तुवायाइत्यर्थः । स्वकर्माभिरताः मार्गरक्षणादिस्वकर्मसावधानाः । खनकाः खननोपजीविनःसुरङ्गादिकृतइत्यर्थः । यन्त्रकाः महाकुल्यादितरणायकाष्ठादिनाउपयन्त्रप्रवर्तकाः वागुरिकावा । कर्मान्तिकाः कर्मणिअन्तोऽवसानमेषामस्तीतिकर्मान्तिकाः परिकल्पितकर्मकारिणः भृतिजीविनइतियावत् । स्थपतयः कारवः । " स्थपतिःकारुभेदेपि " इत्यमरः । पुरुषाः अध्यक्षराजपुरुषाः । यन्त्रकोविदाः क्षेपणीयादियन्त्रकरणसमर्थाः । वर्धकयः तक्षाणः । " तक्षातुवर्धकिः" इत्यमरः । मार्गिणः मार्गसमीकरणसमर्थाः । वृक्षतक्षकाः मार्गनिरोधकवृक्षच्छेदकाः । कूपकाराः कूपनिर्माणसमर्थाः । सुधाकाराः प्रासादस्थलक्षित्यादिलेपनकराः । वंशकर्मकृतः वंशैःकटपिटकशूर्पादिकर्मकराः । समर्थाः कार्यान्तरेषुसमर्थाः । द्रष्टारः पूर्वानुभूतमार्गाः मार्गप्रदर्शकाइतियावत् ॥ १—३ ॥ हर्षात् कर्मकरणस्यदुःखात्मकत्वेपिजनौघस्यहृष्टत्वंरामदर्शनकुतूहलात् । तमुद्देशंप्रयान् रामाधिष्ठितप्रदेशमुद्दिश्यगच्छन् ॥ ४ ॥ ते मार्गशोधकाः । स्ववारं समास्थाय स्वस्वशोध्यमार्गशोधनेअन्योन्यपर्यायकरणंप्राप्य । " निवहावसरौवारौ " इत्यमरः । विविधोपेतैःविविधाःनानाप्रकाराः तानुपेतैः नानाविधैरित्यर्थः । करणैः खनित्रपिटककुठारादिभिःसह । पुर-

स० विधूतकोशाः कंपितखड्गाः ॥ १८ ॥ इत्येकोनाशीतितमस्सर्गः ॥ ७९ ॥
ती० सूत्रकर्मविशारदाः शिबिरादिनिर्माणेसूत्रग्रहणकुशलाः । **ति०** भूमिप्रदेशज्ञाः अन्तस्सजलनिर्जलादिभूमिप्रदेशज्ञाः ॥ **कतक०** निर्जलेष्वगाधवापीकूपादिनिर्माणंसूत्रकर्म । **स०** सूत्रकर्णविशारदाः सूत्रंधृत्वासमानमार्गकारिणः ॥ १ ॥ **ति०** सूपकाराः सूदाः । **स०** द्रष्टारः सेनावतारस्थलद्रष्टारः ॥ ३ ॥ **स०** पर्वणि पौर्णमास्यां ॥ ४ ॥

[पा०] १ ख. ग. परिषदश्चवीतशोकाः. क. घ. च. ज. ञ. परिषदोपियातशोकाः. २ ख—ङ. छ. झ. ट. व्यादिष्टस्तव. ३ क. च. वर्याः. ४ ङ—ट. सूप. ५ च. छ. झ. ट. चर्म. क. कर्मकराः. ६ ग. कर्तारः. ७ ङ. छ. झ. पुरतश्च. ८ ग. घ. विपुलं. ९ ख. ग. ङ. छ. झ. ट. सागरस्येव. क. समुद्रस्येव. घ. संगरस्येवकर्मणि. १० ख. तेस्वकारं. ग. तेस्वभावं. ज. तेस्वपादं.

लता वल्लीश्च गुल्मांश्च स्थाणूनश्मन एव च ॥ जनास्ते चक्रिरे मार्गं छिन्दन्तो विविधान्द्रुमान् ॥ ६ ॥
अवृक्षेषु च देशेषु केचिद्वृक्षानरोपयन् ॥ केचित्कुठारैष्टङ्कैश्च दात्रैश्छिन्दन्क्वचित्क्वचित् ॥ ७ ॥
अपरे वीरणस्तम्बान्बलिनो बलवत्तराः ॥ विधमन्ति स्म दुर्गाणि स्थलानि च ततस्ततः ॥ ८ ॥
अपरेऽपूरयन्कूपान्पांसुभिः श्वभ्रमायतम् ॥ निम्नभागांस्ततः केचित्समांश्चक्रुः समन्ततः ॥ ९ ॥
बबन्धुर्बन्धनीयांश्च क्षोद्यान्संचुक्षुदुस्तदा ॥ बिभिदुर्भेदनीयांश्च तांस्तान्देशान्नरास्तदा ॥ १० ॥
अचिरेणैव कालेन परिवाहान्बहूदकान् ॥ चक्रुर्बहुविधाकारान्सागरप्रतिमान्बहून् ॥ ११ ॥
निर्जलेषु च देशेषु खानयामासुरुत्तमान् ॥ उदपानान्बहुविधान्वेदिकापरिमण्डितान् ॥ १२ ॥
ससुधाकुट्टिमतलः प्रपुष्पितमहीरुहः ॥ मत्तोद्घुष्टद्विजगणः पताकाभिरलंकृतः ॥ १३ ॥
चन्दनोदकसंसिक्तो नानाकुसुमभूषितः ॥ बह्वशोभत सेनायाः पन्थाः सुरपथोपमः ॥ १४ ॥
आज्ञाप्याथ यथाज्ञप्ति युक्तास्तेऽधिकृता नराः ॥ रमणीयेषु देशेषु बहुस्वादुफलेषु च ॥ १५ ॥
यो निवेशस्त्वभिप्रेतो भरतस्य महात्मनः ॥ भूयस्तं शोभयामासुर्भूषाभिर्भूषणोपमम् ॥ १६ ॥
नक्षत्रेषु प्रशस्तेषु मुहूर्तेषु च तद्विदः ॥ निवेशान्स्थापयामासुर्भरतस्य महात्मनः ॥ १७ ॥

त्सात्संप्रतस्थिरे ॥ ५ ॥ लताः मार्गावरणीभूताःशाखाः । "समेशाखालते" इत्यमरः । वल्लीः वीरुधः । गुल्मान् कक्षान् । स्थाणून् शङ्कून् । "स्थाणुरस्त्रीध्रुवः शङ्कुः" इत्यमरः ॥ ६ ॥ टङ्कैः पाषाणभेदनादिसाधनैः । "टङ्कःपाषाणदारणः" इत्यमरः । दात्रैः लवित्रैः । "दात्रंलवित्रं" इत्यमरः । छिन्दन् अच्छिन्दन् ॥ ७ ॥ वीरणस्तम्बान् वीरणतृणकाण्डान् । विधमन्तिस्म अदहन् । ध्मा शब्दाग्निवक्रसंयोगयोरित्यस्माद्धातोर्धमादेशः । बलिनः रूढमूलान् छेत्तुमशक्यानित्यर्थः । दुर्गाणि गन्तुमशक्यानि निम्नोन्नतस्थलानीत्यर्थः । स्थलानि समानिचक्रुरितिशेषः ॥ ८ ॥ कूपान् मार्गस्थान् । आयतंश्वभ्रं अवटंच । पांसुभिरपूरयन् निम्नभागांश्चपांसुभिःसमांश्चक्रुः । प्रपूर्येतिशेषः । यद्वा पूर्वश्लोके दुर्गाणि तृणलतादिच्छन्नानिस्थलानिच विधमन्तिस्मेतियोजना । अतोनपुनरुक्तिः ॥ ९ ॥ बन्धनीयान् जलप्रदेशान् । बबन्धुः सेनासंतरणार्थं सेतुभिर्बबन्धुः । क्षोद्यान् क्षोदार्हान् शर्कराभूयिष्ठप्रदेशान् । संचुक्षुदुः चूर्णयामासुः । भेदनीयान् कच्छादिबहुजलप्रदेशान् । जलनिर्गमनार्थंविभिदुः॥१० परिवाहान् अल्पप्रवाहान् जलोच्छ्वासान् । बन्धनेनबहूदकांश्चक्रुः । यद्वा परिवाहान् दूरस्थतटाकप्रवर्तितान् । बहुविधाकारान् सोपानावतारायनेकप्रकारानित्यर्थः ॥११॥ उदपानान् कूपान् । "पुंस्येवान्धुःप्रहिः कूपउदपानंतुपुंसिवा" इत्यमरः । बहुविधान् नरगजतुरगादिपानयोग्यसरोवाप्यादिभेदेनबहुविधान् । वेदिकापरिमण्डितान् जलपानकालेविश्रान्त्यर्थंतीरेवेदिकालंकृतान् ॥ १२ ॥ ससुधेत्यादिश्लोकद्वयमेकान्वयं । सुधालिप्तकुट्टिमतलोपेतः "कुट्टिमोस्त्रीनिबद्धाभूः" इत्यमरः । प्रपुष्पितमहीरुहः जलसेचनेनेति शेषः । चन्दनोदकसंसिक्तः विश्रान्तिप्रदेशेषुचन्दनयुक्तवारिसिक्तः । नानाकुसुमभूषितः प्रकीर्णनानापुष्पशोभितः ॥ १३—१४ ॥ अथ मार्गकरणानन्तरं । अधिकृताः मार्गशिबिरादिकरणेनियुक्ताः युक्ताः परस्परंयुक्ताः । बहुस्वादुफलेषु रमणीयेषुदेशेषु भरतस्ययो निवेशः यादृशाकारविशिष्टोनिवेशोभिप्रेतः अभिमतः तं तादृशसंनिवेशं । यथाज्ञप्ति यथामति । आज्ञाप्य कर्तुं नियम्य । भूषणोपमं भूषणभूतं स्वतोलंकृतमितियावत् । निवेशं भूषाभिः वितानकनककलशध्वजादिभिः । भूयोपि शोभयामासुः भूषयामासुः ॥ १५—१६ ॥ तद्विदः वास्तुशास्त्रज्ञाः । निवेशान् शिबिराणि ॥१७॥

ति० अरोपयन् छायार्थमितिशेषः ॥ ७ ॥ स० ससुधाकुटिमतलः तत्रतत्रविश्रमार्थंसुधानिबद्धभूप्रदेशसहितः । सुधानाम चूर्णगुडसंमर्दनजन्यकर्दमविशेषः ॥ १३ ॥ ति० निवेशः शिबिरं । भूषणोपमं मार्गस्यालङ्कारसदृशं । अतिरमणीयमितियावत्.

[पा०] १ ग. घ. जनयाश्चक्रिरे. २ छ. पांसुभिर्धूलिशर्करैः. ३ ङ. झ. ट. भागांस्तथैवाशु. क. ख. ग. च. भागांस्तथाकेचित्. ४ क. ख. ग. च. ततस्ततः. ५ ग. ङ. झ. स्तथा. ६ च. ञ. देशांस्ततस्ततः. ख. देशांस्तथापरे. ७ ङ. छ. झ. अचिरेणतु. ८ ख. संक्लिन्नो. ९ क. ख. ग. च. ञ. स्वर्गपथोपमः. १० ख. त्रिदिवोपमं. ११ ग. घ. ङ. सुमुहूर्तेषु.

बहुपांसुचयाश्चापि परिखापरिवारिताः ॥ तत्रेन्द्रकीलप्रतिमाः प्रतोलीवरशोभिताः ॥ १८ ॥
प्रासादमालाविततताः सौधप्राकारसंवृताः ॥ पताकाशोभिताः सर्वे सुनिर्मितमहापथाः ॥ १९ ॥
विसर्पद्भिरिवाकाशे विटङ्काग्रविमानकैः ॥ समुच्छ्रितैर्निवेशास्ते बभुः शक्रपुरोपमाः ॥ २० ॥
[क्वचिद्दर्पनिवेशार्थं मठा वेदिविभूषिताः ॥ क्वचिदापणपण्यानि पथि कृत्वाऽर्थराशयः ॥
दर्शयांचक्रुरत्यर्थं जनाः केचित्पुरे यथा ॥ २१ ॥]
जाह्नवीं तु समासाद्य विविधद्रुमकाननाम् ॥ शीतलामलपानीयां महामीनसमाकुलाम् ॥ २२ ॥
सचन्द्रतारागणमण्डितं यथा नभः क्षपायाममलं विराजते ॥
नरेन्द्रमार्गः स तथा व्यराजत क्रमेण रम्यः शुभशिल्पिनिर्मितः ॥ २३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे अशीतितमः सर्गः ॥ ८० ॥

एकाशीतितमः सर्गः ॥ ८१ ॥

रात्रिशेषेसूतमागधादिभिःसतूर्यघोषंभरतस्तवनारंभेतेनतन्निवर्तनपूर्वकंशत्रुघ्नंप्रतिसशोकोक्तिः ॥ १ ॥ राजसभांप्रविष्टेन वसिष्ठेनभरताद्यानयनायदूतान्प्रतिचोदना ॥ २ ॥ भरतेनामात्यादिभिःशत्रुघ्नेनचसहवसिष्ठाद्यधिष्ठितसभाप्रवेशः ॥ ३ ॥

ततो नान्दीमुखीं रात्रिं भरतं सूतमागधाः ॥ तुष्टुवुर्वाग्विशेषज्ञाः स्तवैर्मङ्गलसंहितैः ॥ १ ॥

बह्वित्यादिश्लोकत्रयमेकंवाक्यं । तत्र मार्गे । बहुपांसुचयाः पांसुशब्देनात्रसूक्ष्मसिकताउच्यन्ते । बहवः पांसुचयायेषुतेतथोक्ताः । परिखापरिवारिताः खेयैर्वृताः इन्द्रकीलप्रतिमाः इन्द्रकीलपर्वतसदृशाः । प्रतोलीवरशोभिताः प्रतोली वीथिः । " रथ्याप्रतोलीविशिखा " इत्यमरः । प्रासादमालावितताः प्रासादादेवगृहाणि । " प्रासादोदेवभूभुजां" इत्यमरः । सौधप्राकारसंवृताः सौधाःराजगृहाणि । यद्वा सौधाः सुधाधवलिताः "तेनरक्तंरागात्" इत्यण् । समुच्छ्रितैः उन्नतैः । अतएव आकाशेविसर्पद्भिरिवस्थितैः विटङ्काग्रविमानकैः विटङ्कयुक्ताग्रविमानैः । " कपोतपालिकायांतुविटङ्कंपुंनपुंसकं " इत्यमरः । विमानानि सप्तभूमिकाःप्रासादाः तैर्बभुः । शक्रपुरोपमाः अमरावतीसदृशाः ॥ १८—२१ ॥ समासाद्य अवधीकृत्य तत्पर्यन्तमित्यर्थः । निवेशावभुरितिपूर्वेणान्वयः उत्तरेणवा । गङ्गाविशेषणैस्ततःपरंनिवेशकरणाशक्यत्वंद्योत्यते ॥ २२ ॥ सचन्द्रतारागणमण्डितमिति । सचन्द्रोयस्तारागणः तेनमण्डितं ॥ २३ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने अशीतितमःसर्गः ॥ ८० ॥

नान्दीमुखीं रामानयनाभ्युदयप्रारम्भयुक्तां । यद्वा भरताभिषेकायवसिष्ठेनकृतनान्दीमुखाभ्युदययुक्तां । यद्वा शोकविगमायकृताभ्युदयामित्यर्थः । रात्रिं रात्रौ

॥ १६ ॥ ति० बहुपांसुचयाइत्यनेनशर्करादिराहित्यंसूचितं । इन्द्रनीलमणिनिर्मिताःप्रतिमाःचित्रप्रतिमायेषुनिवेशेषु ॥ १८ ॥ ति० बितर्दिभिरिव विधिधिष्ण्यैरिवस्थितैरुपलक्षिताःविसर्पद्भिरिवाकाशेइतिपाठान्तरं । तदाऊर्ध्वमूर्ध्वंगच्छद्भिरिवेत्यर्थःकथंचियोज्यः ॥२०॥ ति० जाह्नवींसमासाद्य अभिव्याप्यप्रवर्तितोनरेन्द्रमार्गोव्यराजतेत्यन्वयः ॥२२—२३॥ इत्यशीतितमस्सर्गः ॥८०॥

स० नान्दीमुखीं रामानयनोपयुक्तमङ्गलरात्रिषुप्रथमामित्यर्थः । अल्पावशिष्टामितिशेषः । नोचेत् "कालाध्वनोः—"इतिद्वितीयानस्यादितिज्ञेयं । ति० सविशेषज्ञाः राजनिराजपुत्रेचापेक्षितविशेषस्तवंजानन्तितादृशाः । मङ्गलसंस्तवैः मङ्गलप्रतिपादकैः । शि० नान्दीमुखीं नान्द्याःरामागमनविषयकोद्योगजनितानन्दस्यमुखंप्रारंभोयस्यांतांरात्रिं । ज्ञात्वेतिशेषः । वाग्विशेषज्ञाःस्तवैःखुष्टुवुः । नान्दीमुखींज्ञात्वेत्यनेन रामनिर्गमनानन्तरमेतद्रात्रेःपूर्वं सूतादिभिर्नस्तुतमितिध्वनितं । "नन्दिरानन्दनेद्यूते" इतिविश्वः । अत्रदीर्घःस्वार्थिकाणन्ताद्ङीपिवोध्यः । किंचनन्दःनन्दत्वमेवनान्दः सोस्त्यस्येतिनान्दीतस्यइयाःव्याप्तेर्मुखमारंभोयस्यांतामित्यर्थः ·

[पा०] १ क—ङ. छ. झ. ट. नीलप्रतिमाः. २ ङ—झ. ट. संयुक्ताः. क—घ. संसक्ताः. ३ क. च. ञ. सुम्यक्सुनिर्मित. ४ क. ङ. छ. झ. वितर्दिभिः. ५ क. ज. पुस्तकयोरिदमर्धत्रयंदृश्यते. ६ ग. घ. शीतलामृत. ७ घ. महाजन. ८ ङ. छ. ज. झ. ट. तदा. ९ क. ग. च. विराजते. १० क. च. झ. ञ. सविशेषज्ञाः. ११ ङ. झ. ट. संस्तवैः.

सुवर्णकोणाभिहतः प्राणदद्यामदुन्दुभिः ॥ दध्मुः शङ्खांश्च शतशो नादांश्चोच्चावचस्वरान् ॥ २ ॥
स तूर्यघोषः सुमहान्दिवमापूरयन्निव ॥ भरतं शोकसंतप्तं भूयः शोकैररन्ध्रयत् ॥ ३ ॥
ततः प्रबुद्धो भरतस्तं घोषं संनिवर्त्य च ॥ नाहं राजेति चाप्युक्त्वा शत्रुघ्नमिदमब्रवीत् ॥ ४ ॥
पश्य शत्रुघ्न कैकेय्या लोकस्यापकृतं महत् ॥ विसृज्य मयि दुःखानि राजा दशरथो गतः ॥ ५ ॥
तस्यैषा धर्मराजस्य धर्ममूला महात्मनः ॥ परिभ्रमति राजश्रीर्नौरिवाकर्णिका जले ॥ ६ ॥
यो हि नः सुमहान्नाथः सोपि प्रव्राजितो वनम् ॥ अनया धर्ममुत्सृज्य मात्रा मे राघवः स्वयम् ॥ ७ ॥
इत्येवं भरतं प्रेक्ष्य विलपन्तं विचेतनम् ॥ कृपणं रुरुदुः सर्वाः सस्वरं योषितस्तदा ॥ ८ ॥
तथा तस्मिन्विलपति वसिष्ठो राजधर्मवित् ॥ सभामिक्ष्वाकुनाथस्य प्रविवेश महायशाः ॥ ९ ॥
शातकुम्भमयीं रम्यां मणिरत्नसमाकुलाम् ॥ सुधर्मामिव धर्मात्मा सगणः प्रत्यपद्यत ॥ १० ॥
स काञ्चनमयं पीठं सुखास्तरणसंवृतम् ॥ अध्यास्त सर्ववेदज्ञो दूताननुशशास च ॥ ११ ॥
ब्राह्मणान्क्षत्रियान्वैश्यानमात्यान्गणवल्लभान् ॥ क्षिप्रमानयताव्यग्राः कृत्यमात्ययिकं हि नः ॥ १२ ॥
स राजभृत्यं शत्रुघ्नं भरतं च यशस्विनम् ॥ युधाजितं सुमन्त्रं च ये च तत्र हिता जनाः ॥ १३ ॥
ततो हलहलाशब्दः सुमहान्समपद्यत ॥ रथैरश्वैर्गजैश्चापि जनानामुपगच्छताम् ॥ १४ ॥
ततो भरतमायान्तं शतक्रतुमिवामराः ॥ प्रत्यनन्दन्प्रकृतयो यथा दशरथं तथा ॥ १५ ॥

अपररात्रइत्यर्थः । यद्वा रात्रिं प्राप्येतिशेषः । मङ्गलसंहितैः मङ्गलशब्दसहितैः ॥ १ ॥ सुवर्णकोणाभिहत इति कोणोवादनदण्डः । यामावसानसूचकोदुन्दुभिः थामदुन्दुभिः । प्राणदत् नदतिस्म । नाद्यन्तेएभिरितिनादाःकाहल्यादयः तान् । उच्चावचस्वरान् निम्नोन्नतस्वरान् मन्द्रमध्यमतारररूपेणनानास्वरानित्यर्थः ॥ २ ॥ अरंध्रयत् व्यदारयत् । अरन्धयदितिपाठे अपचत् अतपदित्यर्थः ॥ ३—४ ॥ कैकेय्याहेतुभूतया जायमानं लोकस्य सूतमागधादेः । अपकृतं अनुचितंकर्म पश्य । यद्वा लोकस्य जनस्य । कैकेय्या महद्यथाभवतितथाऽपकृतं । तदेवाह—विसृज्येत्यादि ॥ ५ ॥ राजश्रीः प्रधानेराजनिवर्तमानेज्येष्ठपुत्रस्ययुवराजत्वेन प्राप्तेत्येवमविच्छिन्नाराज्यलक्ष्मीः । अकर्णिकाः कर्णोरित्रं । "कर्णःश्रोत्रमरित्रंच" इतिभुवनः । सोस्यास्तीति कर्णी सएवकर्णिकः कर्णधारकइतियावत् । तद्रहिता ॥ ६—९ ॥ शातकुम्भमयीं स्वर्णमयीं । मणिरत्नसमाकुलां मणिश्रेष्ठसमावृतां । "रत्नंस्वजातिश्रेष्ठेपि" इत्यरः । यद्वा मणयोमुक्ताः । "मणिर्द्वयोरश्मजातौमुक्तादिकेपिच" इत्यमरः । रत्नानि पद्मरागादीनि । अत्रसभामितिविशेष्यं । सगणः सशिष्यगणः ॥ १०—११ ॥ गणवल्लभान् गणाध्यक्षान् । आत्ययिकं अत्ययःकृच्छ्रंतत्रभवमात्ययिकं यत्नसाध्यमित्यर्थः ॥ १२ ॥ सराजभृत्यं राजान्तरङ्गभृत्यसहितं । युधाजिदितिविजयाख्यमन्त्रिणोनामान्तरं सुमन्त्रशब्दसाहचर्यात् । येच तत्र

॥ १ ॥ **ति०** शोकैः शोकोत्पादनैः । अरन्धयत् हिनस्तिस्म । रधपाकहिंसनयोः ॥ ३ ॥ **शि०** हेशत्रुघ्न कैकेय्यास्संबन्धिनो लोकस्यजनस्य मन्थरायाइत्यर्थः । एतेनकैकेय्यानापराधइतिसूचितं । तेनतत्स्वभावस्यातिसरलत्वंव्यञ्जितम् ॥ ५ ॥ **कतक०** अकण्टका कण्टकोनाविकस्तद्रहितेत्यर्थः ॥ ६ ॥ स्वस्यास्तरणसंवृतं सुखकरमृद्वास्तरणावृतं । स्वस्तिकाकारमण्डलवदास्तरणसंवृतमितिवा ॥ ११ ॥ **स०** आत्ययिकं शीघ्रमनुष्ठेयं । वर्ततइतिशेषः ॥ १२ ॥ **ति०** सराजपुत्रं राजपुत्रैरितरैस्सहितंशत्रुघ्नं ॥ १३ ॥ **ति०** हलहलेतिशब्दानुकरणं । **शि०** समुपपद्यत समुपापद्यत ॥ १४ ॥ **ति०** ह्रदइवसभा । ह्रदोत्रसामुद्रः १ भिन्नलिङ्गत्वेपिसहृदयोद्वेगाभावाच्चन्द्रइवमुखमितिवन्नदुष्टोपमा । तिमिरनेकयोजनायामविस्तारोमत्स्यः । नागा जलगजास्सर्पाश्च । मणयोमुक्ताद्याः ।

[पा०] १ घ. च. ज. झ. ट. वाद्यांश्चो. २ छ. झ. ञ. ररन्धयत्. च. रवर्धयत्. क. रजृम्भयत्. ३ ङ. छ. झ. ट. चोक्त्वातं. ४ ट. रिवाकण्टका. ५ ग. च. झ. ञ. विलपन्तमचेतनं. ङ. विलपन्तमनेकधा. ६ ङ. छ. झ. ट. कृपणाः. ७ क. ज. झ. सुस्वरं. ८ क. ञ. दिव्यां. ९ ङ. छ. झ. ट. मणिहेम. १० ङ. छ. झ. ट. स्वस्यास्तरण. क. ख. ग. च. ञ. परार्ध्यास्तरणावृतं. ११ क. ख. च. अध्यास्ते. १२ ख. ग. घ. धर्मज्ञो. १३ क. ख. च. छ. झ. ञ. योधात्. १४ क. च. ञ. शशासह. १५ घ. ब्राह्मणान्वेदविदुषःक्षत्रियान्गणवल्लभान्. १६ झ. पुत्रं. १७ क. घ. ज. झ. ञ. शब्दोमहान्समुदपद्यत. ख. ग. छ. ज. ट. शब्दोमहान्समुपपद्यत.

ह्रद इव तिमिनागसंवृतः स्तिमितजलो म[1]णिशङ्खशर्करः ॥
दशरथसुतशोभिता सभा सदशरथेव ब[2]भौ यथा पुरा ॥ १६ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे एकाशीतितमः सर्गः ॥ ८१ ॥

द्व्यशीतितमः सर्गः ॥ ८२ ॥

वसिष्ठेनसभायांप्रकृतिमध्येभरतंप्रतिराज्यस्यपितृभ्रातृदत्तत्वरूपहेतूक्तिपूर्वकंतत्स्वीकारोक्तिः ॥ १ ॥ भरतेनवसिष्ठंप्रति साधिक्षेपोक्तिपूर्वकमरण्यमेत्यरामानयनाययावच्छक्तिप्रयतनप्रतिज्ञानम् ॥ २ ॥ सुमन्त्रेणभरतचोदनयारामसमीपयात्रार्थंपौरसेनादिसंनाहनपूर्वकंभरतायरथानयनम् ॥ ३ ॥

तामार्य[3]गणसंपूर्णां भरतः प्रग्रहां सभाम् ॥ ददर्श बुद्धिसंप[4]न्नः पूर्ण[5]चन्द्रो निशामिव ॥ १ ॥
आसनानि यथान्यायमार्याणां विशतां त[6]दा ॥ वस्त्राङ्गरागप्रभया द्योतिता सा सभोत्तमा ॥ २ ॥
सा विद्वज्जनसंपूर्णा सभा सुरुचिरा त[7]दा ॥ अदृश्यत घनापाये पूर्णचन्द्रेव शर्वरी ॥ ३ ॥
राज्ञस्तु प्रकृतीः सर्वाः [8]समग्राः प्रेक्ष्य धर्मवित् ॥ इदं पुरोहितो वाक्यं भरतं मृदु चाब्रवीत् ॥ ४ ॥
तात राजा दशरथः स्वर्गतो धर्ममाचरन् ॥ धनधान्यवतीं स्फीतां प्रदाय पृथिवीं तव ॥ ५ ॥
रामस्त[9]था [10]सत्यधृतिः सतां धर्ममनुस्मरन् ॥ नाजहात्पितुरादेशं शशी ज्योत्स्नामिवोदितः ॥ ६ ॥
पित्रा भ्रात्रा च ते दत्तं राज्यं निहतकण्टकम् ॥ तद्भुङ्क्ष्व मुदितामात्यः क्षिप्रमेवाभिषेचय ॥ ७ ॥
उदीच्याश्च प्रतीच्याश्च दाक्षिणात्याश्च केवलाः ॥ [11]कोट्याऽपरान्ताः सामुद्रा रत्ना[12]न्यभिहरन्तु ते ॥८॥

भरते । हिताः हितपराःजनाः तानभ्यानयतेतिपूर्वेणसंबन्धः ॥ १३—१५ ॥ शर्कराशब्देनात्रस्थूलवालुकाउच्यन्ते । ह्रदश्च समुद्रसमीपस्थः तिमिशङ्खादिसाहचर्यात् । अत्रस्तिमितजलेनवसिष्ठस्य तिमिनागाभ्यां भरतशत्रुघ्नयोः मण्यादिभिरमात्यादीनां चसाम्यं ॥ १६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने एकाशीतितमः सर्गः ॥ ८१ ॥

प्रग्रहां नियमवतीं । यद्वा शुक्रबृहस्पत्यादिप्रकृष्टग्रहयुक्तां । तदा निशाविशेषणमिदं ॥ १ ॥ आसनानिविशतां आसनेषूपविशतामित्यर्थः ॥ २ ॥ घनापाये वर्षापगमे शरदीतियावत् । भरताभिषेकायसर्वेअलंकृताः समागताइतिभावः ॥ ३ ॥ प्रेक्ष्य संवादार्थमवलोक्य ॥ ४ ॥ तात वत्स । धर्मं सत्यपरिपालनरूपं । तव तुभ्यं ॥ ५ ॥ तथा पितृवत् । सत्येधृतिः प्रीतिर्यस्यसः सत्यधृतिः । धृङ्प्रीतावितिधातोःस्त्रियांक्तिन्प्रत्ययः । सतां पितृनिदेशवर्तिनां । धर्मं पितृवचनपरिपालनरूपं । "जीवतोर्वाक्यकरणात्प्रत्यब्दंभूरिभोजनात् । गयायांपिण्डदानाच्चत्रिभिःपुत्रस्यपुत्रता " इतिवचनात् ॥ ६ ॥ अभिषेचय आत्मानमितिशेषः ॥ ७ ॥ उदीच्याइति । प्राच्याइत्यपिसिद्धं । केवलाः

शर्कराःसुवर्णखनिमृत्तिकाः । सभायांजलस्थानेसभातेजः । एतदेवध्वनयतास्तिमितजलइत्युक्तं । चित्रस्थतिमिनागसंवृतत्वंमणयश्चस्तंभादिषुविद्यन्तएव । शङ्खाश्चित्रेषुस्वर्णशर्करास्थानेकुट्टिमादौस्वर्णलेपः । प्रकारान्तरेणजलादिवर्णनेतुकवेर्न्यूनतादोषः । ममतु विभक्तिपरिणामेनैषामेवसभायामप्यन्वयान्नदोषः । एतेनवसिष्ठोजलं तिमिनागौभरतशत्रुघ्नौ मण्यादयोऽमात्यपौरजानपदाइतिकतकोक्तमपास्तम् । दशरथसुतशोभितासभा पुरासदशरथासभेवबभावितियोजना । पितृसमानाकारत्वात्पुत्रस्येदानीमपिसदशरथेवेत्युत्प्रेक्षा । पुरायथेत्यंशेउपमेतितयोरत्रसंसृष्टिः ॥ १६ ॥ इत्येकाशीतितमस्सर्गः ॥ ८१ ॥

स० आर्याणांज्ञानवयोवृद्धानांयेगुणस्तैस्संपूर्णां । ग्रामोगतइतिवदत्रापितत्स्थानांग्रहः । ति० प्रग्रहां प्रकृष्टैर्वसिष्ठादिभिर्ग्रहःपरिग्रहोऽधिष्ठातृत्वंयस्यांसा । निशापक्षेप्रकृष्टगुर्वादिग्रहवतीम् ॥ १ ॥ ति० संप्रेक्ष्यच चात्कृतानुमतिकांश्चकृत्वा ॥ ४ ॥ ती० कोट्यापमहोऽधिष्ठातृत्वंयस्यांसा ।

[पा०] १ घ. शङ्खशुक्तिशर्करः. २ ङ. ज. झ. बभूवसापुरा. ३ ठ. गुणसंपूर्णां. ४ ज. संपूर्णः. ५ ङ. झ. ट. पूर्णचन्द्रां. ग. ज. पूर्णचन्द्रंनिशामिव. ६ ज. तथा. ७ ङ. ज. झ. ट. तथा. ८ ङ. झ. ट. ससंप्रेक्ष्यच. ९ ज. स्तदा. १० ङ. झ. ट. सत्यवृत्तिः. ११ ग. ङ. ज. कोटयःपरान्ताः. १२ ङ. झ. ट. न्युपहरन्तु.

तच्छ्रुत्वा भरतो वाक्यं शोकेनाभिपरिप्लुतः ॥ जगाम मनसा रामं धर्मज्ञो धर्मकाङ्क्षया ॥ ९ ॥
स बाष्पकलया वाचा कलहंसस्वरो युवा ॥ विललाप सभामध्ये जगर्हे च पुरोहितम् ॥ १० ॥
चरितब्रह्मचर्यस्य विद्यास्नातस्य धीमतः ॥ धर्मे प्रयतमानस्य को राज्यं मद्विधो हरेत् ॥ ११ ॥
कथं दशरथाज्जातो भवेद्राज्यापहारकः ॥ राज्यं चाहं च रामस्य धर्मं वक्तुमिहार्हसि ॥ १२ ॥
ज्येष्ठः श्रेष्ठश्च धर्मात्मा दिलीपनहुषोपमः[1] ॥ लब्धुमर्हति काकुत्स्थो राज्यं दशरथो यथा ॥ १३ ॥
अनार्यजुष्टमस्वर्ग्यं कुर्यां पापमहं यदि ॥ इक्ष्वाकूणामहं लोके भवेयं कुलपांसनः ॥ १४ ॥
[2]यद्धि मात्रा कृतं पापं नाहं [3]तदपि रोचये ॥ इहस्थो वनदुर्गस्थं नमस्यामि कृताञ्जलिः ॥ १५ ॥
राममे[4]वानुगच्छामि [5]राजा स द्विपदांवरः ॥ त्रयाणामपि लोकानां [6]राज्यमर्हति राघवः ॥ १६ ॥

सिंहासनादिरहिताइत्यपरान्तादिविशेषणं । अपरान्तदेशवासिनोयवनाः कोट्या कोटिसंख्ययाउपलक्षितानिरत्नानि। सामुद्राः समुद्रद्वीपवासिनः ॥ ८ ॥ धर्मज्ञःकुलक्रमागतज्येष्ठाभिषेचनरूपधर्मज्ञः । धर्मकाङ्क्षया ज्येष्ठानुवर्तनरूपधर्मलिप्सया । रामं मनसाजगाम सस्मारेत्यर्थः ॥ ९ ॥ बाष्पकलया अधर्मस्मरणात् रामस्मरणाद्वा बाष्पेणाव्यक्तया । कलहंसस्वरइत्यनेन अभिनिवेशविशेषोद्योत्यते। युवेत्यनेन भोगकालेपिभोगोपकरणजिंहासाचित्रमितिऋषिःस्तौति । सभामध्ये जगर्हे नियमातिक्रमंरहसिबोधयेदितिनियमोपिभग्नः अतिक्रूरमधर्मंनियुक्तवानितिदुःखपारवश्यात् रहस्सदोविभागविस्मरणेन गर्हितवान् । पुरोहितंजगर्हे सम्यक्त्वयास्यकुलस्यभाविहितमवेक्षितमितिनिनिन्द । सभामध्ये बहवःसमेत्य ममैकस्यपारतन्त्र्यंकिमपजिहीर्षन्ति सभामध्ये किमवनेपिमद्धनंमुष्णन्ति ॥ १० ॥ चरितब्रह्मचर्यस्य अनुष्ठितगुरुकुलवासस्य । विद्यास्नातस्य "वेदमधीत्यस्नायात्" इतिस्मृतिप्रक्रिययानिखिलवेदाध्ययनानन्तरभाविस्नानकर्मयुक्तस्य । धीमतः तदर्थज्ञस्य । धर्मेप्रयतमानस्य तदर्थानुष्ठानवतः । मद्विधः शास्त्रवश्योमादृशः ॥ ११ ॥ मद्विध इत्येतद्विवृणोति—कथमित्यादिना । रामविरहोत्तरक्षणेमृतस्यकुक्षौजातोहं कथंतत्त्यक्तंराज्यंपरिगृह्णीयां । मत्स्वरूपपर्यालोचनयापिनाहंराज्यार्हइत्याह—राज्यंचेति । शेषवस्तुष्वेकमेकस्यकिमीष्टे प्रत्युतराज्यंवाकिमितिमांनेष्टे राज्यंचाहंचरामस्य राज्यमपिरामसंबन्धि अहमपिचरामसंबन्धी उभयमपिरामशेषमित्यर्थः धर्मंवक्तुमिहार्हसि लोकेस्वपित्रादिकंनिगृह्यस्वयंराज्यस्यकर्तारःसन्ति तदेतद्व्यक्तावपिभवतीतिमामंस्थाः । इह मद्विषये । मत्प्रकृतिंज्ञात्वाधर्मंवक्तुमर्हसि । धर्मं पाल्यत्वपालकत्वरूपंवक्तुमर्हसि । रामशेषत्वाविशेषे एकंशेषंकथमपरंरक्षेत् तथासतिराज्यमेवमांकिमितिनरक्षेदितिभावः । ननुरत्नपेटिकयोर्द्वयोःशेषत्वाविशेषेपिएकंरक्ष्यमपरंरक्षकंचदृष्टंतद्वदस्त्वितिचेन्न । तत्राहि पेटिका कुञ्चिकादिव्यापारेणस्वामिनारक्षकत्वेनविनियुक्ता नाहमेवंरामेणविनियुक्तः । यथा स्वैकधार्यमपिरत्नमवसरेपेटिकास्थंकरोति तद्वत्स्वेनैवपाल्यमपि राज्यमस्माभिर्यावच्छक्तिप्रसादितोपि अनवसरतयारामोयदामदधीनंकुर्यात्तदा तदाहितशक्तिकस्तत्परतन्त्रः पेटिकावत् यावत्तदागमनं रक्षेयं । अतस्तन्निवर्तनप्रयत्नएवसर्वथाकार्यः । प्रथमतोवरनिर्बन्धादिकृताराज्यस्यास्मदीयत्वबुद्धिः रामसमक्षंगत्वापरिहरणीयेति भावः ॥ १२ ॥ वक्तव्यंधर्ममाह—ज्येष्ठइत्यादिना । दिलीपनहुषशब्दौ चन्द्रसूर्यवंशश्रेष्ठराजोपलक्षणार्थौ ॥ १३ ॥ इक्ष्वाकूणांलोके तत्संबन्धिनिजने ॥ १४ ॥ यद्धीति अनेनाप्राप्तभाषणश्रवणपापस्यप्रायश्चित्तमनुष्ठितं ॥ १५ ॥ द्वौपादौयेषांतेद्विपादः । "संख्यासुपूर्वस्य" इतिलोपःसमासान्तः । अतः "पादःपत्" इतिभस्थलेपदादेशः । तेषां पुरुषाणामित्यर्थः ॥ १६ ॥

रान्ताइत्यत्रपरान्ताइतिच्छेदः । कोट्याउपलक्षिताःपरान्ताः प्राचीदिगन्तवासिनः । ति० सामुद्राः पोतवणिजः ॥ ८ ॥ ति० जगर्हे सर्वज्ञोपि कथमेवमनुचितेमांप्रवर्तयतीत्युक्तवानित्यर्थः । स० जगर्हे मद्धितकरस्त्वंकथंमामनर्थेनियोजयसीत्युक्तवानित्यर्थः

[पा०] १ य. नहुषोयथा. २ ङ. ट. यदि. ३ ख. ग. तदभि. ४ घ. मेवाभि. ५ क—ट. सराजा. ६ क. ङ—ट. राघवोराज्यमर्हति.

तद्वाक्यं धर्मसंयुक्तं श्रुत्वा सर्वे सभासदः ॥ हर्षान्मुमुचुरश्रूणि रामे निहितचेतसः ॥ १७ ॥
यदि त्वार्यं न शक्ष्यामि विनिवर्तयितुं वनात् ॥ वने तत्रैव वत्स्यामि यथाऽऽर्यो लक्ष्मणस्तथा ॥ १८ ॥
सर्वोपायं तु वर्तिष्ये विनिवर्तयितुं बलात् ॥ समक्षमार्यमिश्राणां साधूनां गुणवर्तिनाम् ॥ १९ ॥
विष्टिकर्मान्तिकाः सर्वे मार्गशोधकरक्षकाः ॥ प्रस्थापिता मया पूर्वं यात्राऽपि मम रोचते ॥ २० ॥
एवमुक्त्वा तु धर्मात्मा भरतो भ्रातृवत्सलः ॥ समीपस्थमुवाचेदं सुमन्त्रं मन्त्रकोविदम् ॥ २१ ॥
तूर्णमुत्थाय गच्छ त्वं सुमन्त्र मम शासनात् ॥ यात्रामाज्ञापय क्षिप्रं बलं चैव समानय ॥ २२ ॥
एवमुक्तः सुमन्त्रस्तु भरतेन महात्मना ॥ हृष्टस्तदादिशत्सर्वं यथासंदिष्टमिष्टवत् ॥ २३ ॥
ताः प्रहृष्टाः प्रकृतयो बलाध्यक्षा बलस्य च ॥ श्रुत्वा यात्रां समाज्ञप्तां राघवस्य निवर्तने ॥ २४ ॥
ततो योधाङ्गनाः सर्वा भर्तॄन्सर्वान्गृहेगृहे ॥ यात्रागमनमाज्ञाय त्वरयन्ति स्म हर्षिताः ॥ २५ ॥
ते हयैर्गोरथैः शीघ्रैः स्यन्दनैश्च महाजवैः ॥ सह योधैर्बलाध्यक्षा बलं सर्वमचोदयन् ॥ २६ ॥
सज्जं तु तद्बलं दृष्ट्वा भरतो गुरुसंनिधौ ॥ रथं मे त्वरयस्वेति सुमन्त्रं पार्श्वतोऽब्रवीत् ॥ २७ ॥
भरतस्य तु तस्याज्ञां प्रतिगृह्य च हर्षितः ॥ रथं गृहीत्वा प्रययौ युक्तं परमवाजिभिः ॥ २८ ॥

स राघवः सत्यधृतिः प्रतापवान्ब्रुवन्सुयुक्तं दृढसत्यविक्रमः ॥
गुरुं महारण्यगतं यशस्विनं प्रसादयिष्यन्भरतोऽब्रवीत्तदा ॥ २९ ॥

मध्येकविवाक्यं—तद्वाक्यमिति । सभासुसीदन्तीति सभासदः सभ्याः ॥ १७ ॥ कनिष्ठेलक्ष्मणेआर्यशब्दप्रयोगोज्येष्ठानुवर्तनरूपधर्मनिरतत्वात् । यथार्योलक्ष्मणस्तथा अहंलक्ष्मणश्चेत्यर्थः ॥ १८ ॥ सर्वोपायंवर्तिष्ये सर्वोपायमितिक्रियाविशेषणं सर्वोपायैर्यत्नंकरिष्यइत्यर्थः । आर्यमिश्राणां सदस्यानां । "आर्यमिश्राः पारिषदाःसदस्याःसामवायिकाः" इतिसज्जनः । भवद्भिरागन्तव्यमित्यर्थादुक्तंभवति ॥ १९ ॥ विष्टिकर्मान्तिकाइति । विष्टयो भृतिमन्तरेणजनपदेभ्यःसमानीताः कर्मकराः । कर्मान्तिकाः कर्मान्तेभृतिग्रहीतारः । मार्गशोधकरक्षकाइतिविष्ट्यादिविशेषणं । प्रस्थापितामयापूर्वमित्यभिधानात् वसिष्ठःशिबिरकरणनियोगमजानन्नभिषेकप्रस्तावंकृतवानित्यवगम्यते ॥ २०—२२ ॥ इष्टवत् इष्टार्हं इष्टानुरूपमितियावत् ॥ २३ ॥ ताःप्रकृतयः पौरश्रेणयः । "राज्याङ्गानि प्रकृतयःपौराणांश्रेणयोपिच" इत्यमरः । बलाध्यक्षाः सेनापतयश्च । राघवस्यनिवर्तने निवर्तननिमित्तं । समाज्ञप्तां बलस्यसैन्यस्ययात्रांश्रुत्वा प्रहृष्टाः आसन्निति शेषः ॥ २४ ॥ यात्रागमनं यात्रायाआगमनंसिद्धिं यात्रारूपगमनमितिवा ॥ २५ ॥ गोरथैः वृषभयुक्तरथैः शकटैरित्यर्थः । बलंसर्वमित्यवयवावयविनोर्भेदनिर्देशः ॥ २६ ॥ सज्जं संनद्धं गुरुसंनिधावित्यनुज्ञाकरणार्थमुक्तं ॥ २७—२८ ॥ उक्तमर्थंपुनःसंग्रहेणदर्शयति—सइत्यादिना । सत्यधृतिः अप्रच्युतधैर्यः । सुयुक्तंब्रुवन् गुरुंप्रसादयिष्यन् । उचितवचनेनरामं

९॥ १० ॥ स० आर्यः अग्रजः ॥ १८ ॥ स० विष्टयः वेतनंविनाभुक्तिमात्रदानेनकर्मकर्तारः ॥ २० ॥ स० यात्रागमनं यात्रार्थं रामस्यपुरींप्रत्यागमनरूपयात्रायैगमनं यात्रया रामप्रयाणेननिमित्तेनगमनंवा । यात्रायैश्रीरामदेवार्चनोत्सवायगमनंवा । "यात्रातुयापनोपायेगतौदेवार्चनोत्सवे" इतिविश्वः । हर्षिताः राममानयन्तीतिधिया ॥ २५ ॥ स० योषिद्भिस्सहवर्तन्तइतितथातेचतेबलाध्यक्षाश्च ॥ २६ ॥

[पा०] १ ख. ग. तदाविस्मितमानसाः. २ ख. ग. सर्वोपायैर्यतिष्येतं. क. ञ. सर्वोपायंच. ३ क. ख. ग. च. ञ. वनात. ४ ङ. छ. झ. ट. दक्षकाः. ग. तक्षकाः. ५ ख. ङ—ट. यात्राच. ६ ङ. मन्त्रिकोविदं. ७ घ. प्रदिष्टस्सोदिशत्सर्वं. ग. प्रदिष्टस्सोदिशत्सर्वान्. ८ घ. प्रहृष्टास्ताः. ९ घ. बलस्यवा. १० ङ. ट. ततोऽयोध्याङ्गनाः. ११ ज. मास्थाय. १२ ङ. छ. झ. ञ. ट. शीघ्रं. १३ क. ख. ङ—ट. श्रमनोजवैः. ग. श्शकटैस्तथा. १४ ङ. झ. सहयोषिद्बला. १५ ग. सज्जं. १६ घ. तदाचाज्ञां. १७ ख. ङ. छ. झ. ट. परिगृह्य. १८ क—ग. ङ—ट. गृहीत्वोपययौ. १९ क. ग. ङ. सयुक्तं.

तूर्णं समुत्थाय सुमन्त्र गच्छ बलस्य योगाय बलप्रधानान् ॥
आनेतुमिच्छामि हि तं वनस्थं प्रसाद्य रामं जगतो हिताय ॥ ३० ॥
स सूतपुत्रो भरतेन सम्यगाज्ञापितः संपरिपूर्णकामः ॥
शशास सर्वान्प्रकृतिप्रधानान्बलस्य मुख्यांश्च सुहृज्जनं च ॥ ३१ ॥
ततः समुत्थाय कुलेकुले ते राजन्यवैश्या वृषलाश्च विप्राः ॥
अयूयुजन्नुष्ट्ररथान्खरांश्च नागान्हयांश्चैव कुलप्रसूतान् ॥ ३२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे द्व्यशीतितमः सर्गः ॥ ८२ ॥

त्र्यशीतितमः सर्गः ॥ ८३ ॥

प्रभातेभरतेनामात्यपौरपुरोहितशिल्पिसेनादिसाहित्येननगरान्निर्गत्यदूराध्वातिलंघनेनगुहाधिष्ठितशृङ्गिबेरपुरेगङ्गातीरगमनम् ॥ १ ॥ तथापित्रेउदककदानायपरिजनविश्रान्तयेचतत्रैवसेनादिसंनिवेशनम् ॥ २ ॥

ततः समुत्थितः काल्यमास्थाय स्यन्दनोत्तमम् ॥ प्रययौ भरतः शीघ्रं रामदर्शनकाङ्क्षया ॥ १ ॥
अग्रतः प्रययुस्तस्य सर्वे मन्त्रिपुरोधसः ॥ अधिरुह्य हयैर्युक्तान्रथान्सूर्यरथोपमान् ॥ २ ॥
नवनागसहस्राणि कल्पितानि यथाविधि ॥ अन्वयुर्भरतं यान्तमिक्ष्वाकुकुलनन्दनम् ॥ ३ ॥
षष्टीरथसहस्राणि धन्विनो विविधायुधाः ॥ अन्वयुर्भरतं यान्तं राजपुत्रं यशस्विनम् ॥ ४ ॥
शतं सहस्राण्यश्वानां समारूढानि राघवम् ॥ अन्वयुर्भरतं यान्तं सत्यसन्धं जितेन्द्रियम् ॥ ५ ॥
कैकेयी च सुमित्रा च कौसल्या च यशस्विनी ॥ रामानयनसंहृष्टा ययुर्यानेन भास्वता ॥ ६ ॥
प्रयाताश्चार्यसंघाता रामं द्रष्टुं सलक्ष्मणम् ॥ तस्यैव च कथाश्चित्राः कुर्वाणा हृष्टमानसाः ॥ ७ ॥
मेघश्यामं महाबाहुं स्थिरसत्त्वं दृढव्रतम् ॥ कदा द्रक्ष्यामहे रामं जगतः शोकनाशनम् ॥ ८ ॥

प्रीणयिष्यन्नित्यर्थः ॥ २९ ॥ बलस्ययोगाय बलस्य सन्नहनाय बलस्यसंगतयेवा । " योगःसन्नहनोपायध्यानसंगतियुक्तिषु " इत्यमरः । बलप्रधानान् गच्छ प्रधानशब्दःपुँल्लिङ्गोप्यस्ति ॥ ३०—३१ ॥ वृषलाः शूद्राः । कुलेकुले गृहेगृहे । " कुलंजनपदेगृहे " इत्यमरः । अयूयुजन् सज्जानकुर्वन् । कुलप्रसूतान् उत्तमानित्यर्थः ॥ ३२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने द्व्यशीतितमः सर्गः ॥ ८२ ॥

काल्यं अहर्मुखं " प्रत्यूषोहर्मुखंकाल्यं " इत्यमरः । प्राप्येतिशेषः ॥ १—२ ॥ यथाविधिकल्पितानि भरतनियोगमनतिक्रम्यकल्पितानि । नवनागसहस्राणीत्यनेन पुरस्थगजेपुनवनागसहस्रमात्रंप्रयाणेकल्पितमित्यवगम्यते ॥ ३ ॥ धन्विनोविविधायुधाश्चेत्यनेन योधाउक्ताः ॥ ४ ॥ समारूढानि सादिभिरितिशेषः ॥ ५ ॥ अग्रतोगमनंपश्चाद्गत्तापातिशयात् । यानेनेत्येकवचनं प्रत्येकापेक्षया ॥ ६ ॥ आर्यसंघाताः त्रैवर्णिकसंघाः । तस्यैवकथाः तत्संबन्धिवार्ताः ॥ ७ ॥ तामेवाह—मेघेत्यादिना । मेघश्यामं दूरस्थितत्वेपि

ति० संपरिपूर्णकामः । तस्यापितरामदर्शनेउत्कटेच्छत्वात् ॥ ३१ ॥ इतिद्व्यशीतितमस्सर्गः ॥ ८२ ॥

ति० कैकेयीच स्वकृतेःपुत्रप्रत्याहिततयाजातत्वान्मयाकिंकृतमितिखिन्ना पुनःप्रकृतिमापन्नाहर्षेणययौ । अतएवमध्यमत्वेप्यादौ तदुल्लेखः । यानेनेत्येकवचनंप्रत्येकापेक्षया सौहार्दादेकयानेनैववतिसृणांगमनंवा । स० संतुष्टाइतिच्छत्रिन्यायेनोक्तिः । कैकेय्यास्संदेशेनवातथोक्तिः ॥ ६ ॥ शि० आर्यसंघाताः आर्याणांवसिष्ठादीनांसंघाताःसमूहाः । प्रयाताः अभवन्नितिशेषः ॥ ७ ॥

[पा०] १ च. छ. झ. ञ. ट. लमुत्थाय. २ क. ख. बलेप्रधानान्. ३ ख. आज्ञातु. ४ क. ग. नगरेच. ५ क. ग. घ. च. आयूयुजन्. ६ क. च. ञ. खरान्रथांश्च. ७ झ. ट. काम्यया. ८ ख. ग. ङ. च. छ. झ. ञ. ट. पुरोहिताः. ९ ग. ङ. छ. झ. ट. राजपुत्रंयशस्विनं. १० ङ. छ. ट. संतुष्टा. ११ घ. कथाःशुला. १२ च. ञ. हृष्टचेतसः.

दृष्ट एव हि नः शोकमपनेष्यति राघवः ॥ तमः सर्वस्य लोकस्य समुद्यन्निव भास्करः ॥ ९ ॥
इत्येवं कथयन्तस्ते संप्रहृष्टाः कथाः शुभाः ॥ परिष्वजानाश्चान्योन्यं ययुर्नागरिका जनाः ॥ १० ॥
ये च तत्रापरे सर्वे संमता ये च नैगमाः ॥ रामं प्रतिययुर्हृष्टाः सर्वाः प्रकृतयस्तथा ॥ ११ ॥
मणिकाराश्च ये केचित्कुम्भकाराश्च शोभनाः ॥ सूत्रकर्मकृतश्चैव ये च शस्त्रोपजीविनः ॥ १२ ॥
मायूरकाः क्राकचिका रोचका वेधकास्तथा ॥ दन्तकाराः सुधाकारास्तथा गन्धोपजीविनः ॥ १३ ॥
सुवर्णकाराः प्रख्यातास्तथा कम्बलधावकाः ॥ स्नापकोच्छादका वैद्या धूपकाः शौण्डिकास्तथा १४
रजकास्तुन्नवायाश्च ग्रामघोषमहत्तराः ॥ शैलूषाश्च सह स्त्रीभिर्ययुः कैवर्तकास्तथा ॥ १५ ॥
समाहिता वेदविदो ब्राह्मणा वृत्तसंमताः ॥ गोरथैर्भरतं यान्तमनुजग्मुः सहस्रशः ॥ १६ ॥

त्यक्तुमशक्यंसौन्दर्यमुच्यते । घर्माभितप्ताः पर्जन्यमितिवत् । मेघश्यामं दर्शनमात्रेणसर्वसंतापहरं । महाबाहुं “आयताश्चसुवृत्ताश्च” इतिह्युक्तं । महाबाहुं तादृशसौन्दर्यानुभवदानविषयौदार्ययुक्तं । महाबाहुं तादृशसौन्दर्यभोगप्रदानसमर्थं । “राममिन्दीवरश्यामंसर्वशत्रुनिबर्हणं” इतिवत् । स्थिरसत्त्वं स्थिरव्यवसायं । “द्रव्यासुव्यवसायेपुसत्त्वमस्त्रीतुजन्तुषु” इत्यमरः । स्थिरचित्तमितिचपाठः । आश्रितप्रातिकूल्येनाप्यविकृतमनस्कं । दृढव्रतं अन्तरङ्गैरप्यप्रकम्प्याश्रितरक्षणदीक्षं । कदाद्रक्ष्यामहे रामं तन्मुखावलोकनमात्रंलभ्यतेचेत्कैकेयीव धनजनिततापाःसर्वेपिनिवर्तेरन् । जगतःशोकनाशनं । तस्मिन्सर्वलोकशोकनिवर्तकेसतिकथंवयंशोकाकुलाःस्याम । तदीयसर्वलोकशोकनिवर्तकत्वस्यअस्मच्छोकस्यचकःसंबन्धः । माशुचइत्युक्तवतोप्यस्यातिशयउक्तः ॥ ८ ॥ दृष्टएवरामः सन्निहितश्चेत्सम्मन्दस्मितोमाभूत् कटाक्षपूर्वकंकिंचित्प्रियवचनंचमावोचत्। अस्माभिश्चनयत्नःकार्यः किन्तुदूरेदर्शनमात्रेणास्मच्छोकाःसर्वेविनश्येयुः । तमइत्यादि यथोद्यन् आदित्योदूरस्थितोपिसकललोकान्धकारं निवर्तयति ॥ ९ ॥ परिष्वजानाः परिष्वजमानाः । नगरेचरन्तीतिनागरिकाः “चरति” इतिठक् ॥१०॥ तत्र नगरे । येरामस्यसंमताः येचनैगमाः वणिजः । तेसर्वे सर्वाःप्रकृतयः पौरश्रेणयश्च । रामंप्रतिययुः ॥ ११ ॥ ताःप्रपञ्चयति—मणीत्यादिना । अत्रयच्छब्दरहितस्थलेसोनुपञ्जनीयः । मणिकाराः पद्मरागादिमणिसंस्कारकाः । कुम्भकाराः कुलालाः । शोभनाः स्वकार्यदक्षाइतियावत् । सूत्रकर्मकृतः तन्तुवायादयः । शस्त्रोपजीविनः शस्त्रकारकाः । मायूरकाः मयूरपिच्छैश्छत्रव्यजनादिकारिणः । क्राकचिकाः क्रकचैःकरपत्रैश्चन्दनादिदारुदलनकारिणः । “क्रकचोस्त्रीकरपत्रं” इत्यमरः । रोचकाः दन्तकुड्यवेदिकादिषुकान्त्युत्पादकाः । वेधकाः दारुरत्नादिरन्ध्रकारिणः । दन्तकाराः दन्तैःपुत्रिकापीठशिबिकादिकारकाः । सुधाकाराः प्रासादतलकुड्यादिषुसुधालेपनकर्मकराः । गन्धोपजीविनः चन्दनकस्तूरीकर्पूरकुङ्कुमादिगन्धद्रव्यविक्रयजीविनः । सुवर्णकाराः प्रसिद्धाः । कम्बलधावकाः कम्बलशोधकाः । स्नापकोच्छादकाः स्नापकाः तैलाभ्यङ्गादिस्नानकारिणः । उच्छादकाः अङ्गमर्दकाः । “उच्छादनंसमुल्लेखोद्वाहनोद्वर्तनेषुच” इतिविश्वः । धूपकाः गृहादिषुधूपवासकाः । शौण्डिका मद्यकराः “शुण्डाकरिकरेमद्ये” इतिवैजयन्ती । रजकाः निर्णेजकाः । “निर्णेजकःस्याद्रजकः” इत्यमरः । तुन्नवायाः सौचिकाः । “तुन्नवायस्तुसौचिकः” इत्यमरः । ग्रामघोषमहत्तराः ग्राममहत्तराः घोषमहत्तराश्च । महत्तराः प्रधानभूताः । “घोष आभीरपल्लीस्यात्” इत्यमरः । शैलूषाः भूमिकाधा-

ति० तत्र नगरे । संमताः प्रसिद्धाः ॥ ११ ॥ मायूरकाः लीलामयूरग्राहिणः । इदमुपलक्षणंशुकादिकग्राहिणां । कतक० रोचकाःकाचकुप्यादिकर्तारः ॥१३॥ ति० स्नापकाः उष्णोदकस्नापकाः । उष्णोदकाः अङ्गमर्दकाः । “उष्णोदकंसमुल्लेखोद्वाहनोद्वर्तनेषुच” इतिकोशः ॥ १४ ॥ कैवर्तकारवाइतिपाठे कारवाःकर्माराः ॥ १५ ॥ शि० समाहिताः रामावेशितचित्ताः ॥ १६ ॥

[पा०] १ क. ज. परिष्वजन्तश्च. २ क. ग. ङ. च. छ. झ. ञ. ट. कास्तदा. ३ ग. समेता. घ. समस्ता. ४ क. च. ञ. ययुःसर्वांहृष्टाः. ५ क—घ. च. ञ. स्तदा. ङ. छ. झ. ट. स्शुभाः. ६ ङ. छ. झ. ट. मणिकाराविशेषज्ञाः. ७ ङ. च. छ. झ. ट. वेधकारोचकाः. ८ क. स्तदा. ९ ङ. छ. सूपकाराः. छ. झ. ट. सुधाकारायेच. १० क. च. धारकाः. ङ. छ. झ. ञ. ट. कारकाः. ११ ङ. छ. झ. ट. स्नापकोष्णोदका. १२ ङ. छ. स्तन्तुवायाश्च. १३ ख—ट. यान्ति. १४ ङ. व्रतसंमताः.

सुवेषाः शुद्धवसनास्ताम्रमृष्टानुलेपनाः[1] ॥ सर्वे ते विविधै[2]र्यानैः शनैर्भरतमन्वयुः ॥ १७ ॥
प्रहृष्टमुदिता सेना साऽन्वयात्कैकयीसुतम् ॥ भ्रातुरानयने यान्तं भरतं भ्रातृवत्सलम् ॥ १८ ॥
ते गत्वा दूरमध्वानं रथयानाश्वकुञ्जरैः ॥ समासेदुस्ततो गङ्गां शृङ्गिबेरपुरं प्रति ॥ १९ ॥
यत्र रामसखो वीरो गुहो ज्ञातिगणैर्वृतः ॥ निवसत्यप्रमादेन देशं तं परिपालयन् ॥ २० ॥
उपेत्य तीरं गङ्गायाश्चक्रवाकैरलंकृतम् ॥ व्यवातिष्ठत सा सेना भरतस्यानुयायिनी ॥ २१ ॥
निरीक्ष्या[3]नुगतां सेनां तां[4] च गङ्गां शिवोदकाम् ॥ भरतः सचिवान्सर्वानब्रवीद्वाक्यकोविदः ॥ २२ ॥
निवेशयत मे सैन्य[5]मभिप्रायेण सर्वतः[6] ॥ विश्रान्ताः प्रतरिष्यामः श्व इदानी[7]मिमां नदीम् ॥ २३ ॥
दातुं च तावदिच्छामि स्वर्गतस्य महीपतेः ॥ और्ध्वदेहनिमित्तार्थमवतीर्योदकं नदीम् ॥ २४ ॥
तस्यैवं ब्रुवतोऽमात्यास्तथेत्युक्त्वा समाहिताः ॥ न्यवेशयंस्तांश्छन्देन स्वेनस्वेन पृथक्पृथक् ॥ २५ ॥
निवेश्य गङ्गामनु तां महानदीं चमूं विधानैः परिबर्हशोभिनीम् ॥
उवास रामस्य तदा महात्मनो विचिन्तयानो[8] भरतो निवर्तनम् ॥ २६ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे त्र्यशीतितमः सर्गः ॥ ८३ ॥

रिणः स्त्रीजीविनोवा । अतएव सहस्त्रीभिरित्युक्तं । " शैलालिनस्तुशैलूषाजायाजीवाः " इत्यमरः । कैवर्ताः धीवराः । " कैवर्तेदाशधीवरौ " इत्यमरः । तेसर्वेययुरित्यन्वयः । समाहिताः योगिनः । गोरथैः वृषभयुक्तरथैः शकटैरितियावत् ॥ १२—१६ ॥ ताम्रमृष्टानुलेपनाः रक्तवर्णसंपूर्णाङ्गरागाः ॥ १७ ॥ प्रहर्षः कायिकोरोमाञ्चादिः । प्रमोदोमानसोहर्षः । आनयने आनयननिमित्तं ॥ १८ ॥ शृङ्गिबेरपुरंप्रति दूरमध्वानंगत्वा गङ्गांसमासेदुरितिसंबन्धः । यद्वा शृङ्गिबेरपुरंप्रतीति लक्षणेकर्मप्रवचनीयः । शृङ्गिबेरपुरइत्यर्थः ॥ १९ ॥ अप्रमादेन सावधानतया । रामविरोध्यागमनवारणपरइत्यर्थः । तत्रदेशे । विद्यमानं शृङ्गिबेरपुरंप्रतीतिपूर्वेणान्वयः ॥ २० ॥ व्यवातिष्ठत व्यवस्थिताभूत् ॥ २१—२२ ॥ अभिप्रायेण तत्तदिच्छया । इदानींविश्रान्ताः श्वोनदींप्रतरिष्यामइतिसंबन्धः ॥ २३ ॥ और्ध्वदेहनिमित्तार्थं ऊर्ध्वदेहभवसुखप्रयोजनायेत्यर्थः । नदीमवतीर्य पितुरौर्ध्वदेहनिमित्तार्थमुदकंदातुमिच्छामीत्यन्वयः ॥ २४ ॥ छन्देन इच्छया । " छन्दःश्रुतीच्छापद्येषु " इतिवैजयन्ती ॥ २५ ॥ गङ्गामनुनिवेश्य गङ्गामनुसृत्यनिवेश्य गङ्गाकूलानुसारेणनिवेश्येतियावत् । विधानैः तत्तज्जातिव्यवस्थाकल्पनादिभिः । परिबर्हशोभिनीं परिबर्हो यात्रोपयुक्तपटवेश्माद्युपकरणं । " तथोपकरणंप्रोक्तं परिबर्हःपरिच्छदः " इतिहलायुधः ॥ २६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने त्र्यशीतितमः सर्गः ॥ ८३ ॥

ति० और्ध्वदेहनिमित्तार्थं एतच्छरीरपातोत्तरकालिकदेहभवसुखप्रयोजनायेत्यर्थः । यद्वा एतद्देहपातादूर्ध्वंजातदेहोनिमित्तंयस्य परलोकस्य सऊर्ध्वदेहनिमित्तःपरलोकः । स्वार्थिकोऽण् । तदर्थमित्यर्थः । मध्येमिलितनद्यन्तरेएवमनुक्त्यागङ्गायास्तर्पणेनपितृस्वर्गप्राप्तिकरत्वंसूचितम् ॥ २४ ॥ **ति०** विचिन्तमानः चिन्तयमानइत्यर्थः ॥ २६ ॥ इतित्र्यशीतितमस्सर्गः ॥ ८३ ॥

[पा०] १ ङ. झ. ञ. ट. लेपिनः. २ ङ. छ. झ. ट. विमलैर्यानैः. ३ ङ. छ. झ. ञ. ट. निरीक्ष्यानुत्थितां. ४ क. च. ञ. तांगङ्गांच. ५ ग. सर्वे. ६ ग. घ. सर्वशः. ७ क. ख. घ. च. ञ. इदानींमहानदीं. ङ. छ. झ. ट. इमांसागरङ्गमां. ग. इदानींतुतांनदीं. ८ ङ. छ. झ. ञ. ट. विचिन्तमानो.

चतुरशीतितमः सर्गः ॥ ८४ ॥

सेनावलोकनेनभरतेदोषशङ्किनागुहेनसानुगस्यतस्यगङ्गातरणप्रतिरोधनायदाशानांनौकारक्षणादिनिदेशपूर्वकंभरतभावजिज्ञासयाऽउपायनोपहरणेनतत्समीपगमनम् ॥ १ ॥ तथातंप्रतिस्वोपाहृतफलमूलादिनास्वीयैःसहश्रमापनोदनेनरात्रियापनपूर्वकं परेद्युःपुरतःप्रस्थानप्रार्थना ॥ २ ॥

ततो निविष्टां ध्वजिनीं गङ्गामन्वाश्रितां नदीम् ॥ निषादराजो दृष्ट्वैव ज्ञातीन्सं[1]त्वरितोऽब्रवीत् ॥१॥
महतीऽयमितः सेना सागराभा प्रदृश्यते ॥ नास्यान्त[2]मधिगच्छामि मनसाऽपि विचिन्तयन् ॥२॥
यथा[3] तु खलु दुर्बुद्धिर्भरतः स्वयमागतः ॥ स एष हि महाकायः कोविदारध्वजो र[4]थे ॥ ३ ॥
बन्धयिष्यति वा दा[6]शानथवाऽस्मान्वधिष्यति ॥ अ[5]थ दाशरथिं रामं पित्रा राज्याद्विवासितम् ॥४॥
संप[7]न्नां श्रियम[8]न्विच्छंस्तस्य रा[9]ज्ञः सुदुर्लभाम् ॥ भरतः कैकयीपुत्रो हन्तुं स[10]मधिगच्छति ॥ ५ ॥
भर्ता चैव सखा चैव रामो दाशरथिर्मम ॥ तस्यार्थकामाः संनद्धा [11]गङ्गानूपे प्रतिष्ठत ॥ ६ ॥
तिष्ठन्तु [12]सर्वे दाशाश्च गङ्गामन्वाश्रिता नदीम् ॥ बलयुक्ता नदीरक्षा मांसमूलफलाशनाः ॥ ७ ॥
नावां शतानां पञ्चानां कैवर्तानां शतंशतम् ॥ सन्नद्धानां तथा यूनां तिष्ठन्त्वित्यभ्यचोदयत् ॥ ८ ॥
[13]यदा तुष्टस्तु भरतो रामस्येह भविष्यति ॥ [14]सेयं स्वस्तिमती सेना गङ्गामद्य तरिष्यति ॥ ९ ॥

गङ्गामन्वाश्रितां प्राप्तां अतएव निविष्टां कृतनिवेशां । ध्वजिनीं सेनांदृष्ट्वा । संत्वरितः ससंभ्रमः ॥१॥ इतः इहशृङ्गिबेरपुरे अस्य । सेनारूपवस्तुनः । चिन्तयन्नई मनसापिनास्यान्तमधिगच्छामीतिसंबन्धः ॥२॥ सः इक्ष्वाकुकुलक्रमागतः । कोविदारध्वजः रथेदृश्यते हियस्मात् अतोभरतःस्वयमागतः । यथातुखलु ध्रुवमित्यर्थः । कोविदारध्वजः दुर्बुद्धिरित्यनेन भरतोरामद्रोहाकाङ्क्षयाआगच्छतीतिशङ्कितवानितिगम्यते ॥३॥ तदेवस्थापयिष्यति—बन्धयिष्यतीत्यादिना । दाशानस्मान् बन्धयिष्यति । अथवावधिष्यति हनिष्यति । हनोलटिवधादेशआर्षः । अथ अथवा । दाशरथिं ज्ञातिभूतमितिभावः । विवासितं दुर्बलमित्यर्थः । संपन्नां अप्रच्युतां । रामागमनेहिश्रीःप्रच्युतास्यात् । कैकयीपुत्रइति दुष्प्रकृतिलेहेतुः । तस्यराज्ञः राजत्वार्हस्यरामस्य । सुदुर्लभां ॥ ४—५ ॥ किमतोभवदित्यत्राह—भर्तेति । अर्थकामाः अर्थेच्छवः । यूयमितिशेषः । अनूपे तीरे ॥ ६ ॥ सर्वेदाशाश्च गङ्गामन्वाश्रिताःसन्तः बलयुक्ताः सेनायुक्ताः । नदीरक्षाःनदीतरणमार्गरक्षन्तः । मांसमूलफलाशनाः नावारोपितमांसाद्यशनाःतिष्ठन्तु ॥ ७ ॥ पञ्चानांशतानांनावांएकैकस्यानावः कैवर्तानांशतंशतंतिष्ठतु शतंशतंकैवर्तास्तिष्ठन्त्वित्यर्थः ॥ ८ ॥ रामस्यतुष्टः रामविषयेतुष्टः । यदादुष्टइतिपाठे अदुष्ट-

ति० यदातुखलु यस्माद्धेतोः दुर्बुद्धिर्भरतःस्वयमागतः ततोमहतीसेनाप्रदृश्यतेइत्यन्वयः । रामपीडार्थप्रवृत्तइत्याशयेनदुर्बुद्धितावादः । भरतागमनचिह्नमाह—**सइति** । महाकायः महाप्रमाणः इक्ष्वाकुकुलचिह्नभूतःकोविदारध्वजोरथेदृश्यतेअतोभरतएवायमितिभावः ॥ ३ ॥ **ति०** नन्वायातुभरतःकिमस्माकमतआह—**बन्धयिष्यतीति** । स्वामात्यैरितिशेषः । वधिष्यतीतिवा । अनु ततःपश्चाद्रामंवधिष्यति । इतिमन्येइतिशेषः ॥ ४ ॥ **ति०** ननुरामवधेऽस्यकिंफलमतआह—**संपन्नमिति** । संपूर्णामित्यर्थः । सार्वकालिकीमितियावत् । तस्यराज्ञः रामस्य । सुदुर्लभां तस्मिञ्जीवतिदुष्प्रापां । अतोरामंहन्तुंसमधिगच्छति बुद्धिंप्राप्नोति ॥ ५ ॥ **ति०** नन्वेवं तव काभीतिरत्राह—**भर्तेत्यादि** । एवंचतत्पक्षत्वादस्माकंभीतिरितिभावः । अस्माभिश्चसखित्वादेवरामेष्टंकर्तव्यं । अतोनास्माभिरेतेगङ्गांतारयितव्याः । अतोयूयंतस्य रामस्य अर्थकामाः प्रयोजनेच्छवः । संनद्धाःअत्रगङ्गानूपेमत्संनिधौतिष्ठत ॥ ६ ॥ **ति०** सर्वे मामकादाशास्तु गङ्गांनदीमेवान्वाश्रिताः नदीरक्षाः नदीतरणमार्गविघ्नवन्तः । मांसमूलफलाशनाः एतद्भीत्यातीरेआगन्तुमशक्यतयानावारोपितमांसाद्यशनाः । बलवन्तस्संततस्तिष्ठन्तु ॥ ७ ॥ **ति०** एवंस्थितैरपियुद्धंअरानकार्ये-

[**पा०**] १ ङ. छ. झ. ट. सपरितो. २ ङ. च. छ. झ. ञ. ट. मवगच्छामि. घ. मपगच्छामि. ख. मुपगच्छामि. ३ ङ. छ. झ. ट. यदातु. ४ ङ. रथी. ५ ङ. छ. झ. ट. पाशैरथवा. ग. नागानथवा. घ. न्हनिष्यति. ६ क. ङ. च. छ. झ. ञ. ट. अनु. ख. ग. अहो. ७ च. संपूर्णां. ८ क. च. ज. ञ. श्रियमिच्छन्सतस्य. ९ ग. राज्ञोति. १० ग. ट. समुप. ११ च. गङ्गानूपेपुतिष्ठत. क. घ. ङ. छ—ट. गङ्गानूपेऽत्र. ख. घ. गङ्गाकूलेऽत्र. १२ क. ङ. च. झ. ञ. ट. सर्वदाशाश्च. १३ क. ङ. छ. झ. ट. यदि. १४ ङ. च. छ. झ. ञ. ट. इयं.

इत्युक्त्वोपायनं गृह्य मत्स्यमांसमधूनि च ॥ अभिचक्राम भरतं निषादाधिपतिर्गुहः ॥ १० ॥
तमायान्तं तु संप्रेक्ष्य सूतपुत्रः प्रतापवान् ॥ भरतायाचचक्षेऽथ विनयज्ञो विनीतवत् ॥ ११ ॥
एष ज्ञातिसहस्रेण स्थपतिः परिवारितः ॥ कुशलो दण्डकारण्ये वृद्धो भ्रातुश्च ते सखा ॥ १२ ॥
तस्मात्पश्यतु काकुत्स्थ त्वां निषादाधिपो गुहः ॥ असंशयं विजानीते यत्र तौ रामलक्ष्मणौ ॥१३॥
एतत्तु वचनं श्रुत्वा सुमन्त्राद्भरतः शुभम् ॥ उवाच वचनं शीघ्रं गुहः पश्यतु मामिति ॥ १४ ॥
लब्ध्वाऽभ्यनुज्ञां संहृष्टो ज्ञातिभिः परिवारितः ॥ आगम्य भरतं प्रह्वो गुहो वचनमब्रवीत् ॥ १५॥
निष्कुटश्चैव देशोऽयं वञ्चिताश्चापि ते वयम् ॥ निवेदयामस्ते सर्वे स्वके दासकुले वस ॥ १६ ॥
अस्ति मूलं फलं चैवं निषादैः समुपाहृतम् ॥ आर्द्रं च मांसं शुष्कं च वन्यं चोच्चावचं महत् ॥१७
आशंसे स्वाशिता सेना वत्स्यतीमां विभावरीम् ॥ अर्चितो विविधैः कामैः श्वः ससैन्यो गमिष्यसि॥१८

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे चतुरशीतितमः सर्गः ॥ ८४ ॥

पञ्चाशीतितमः सर्गः ॥ ८५ ॥

भरतेनगुहंप्रतिसश्लाघंभरद्वाजाश्रममार्गप्रश्नः ॥ १ ॥ गुहेनतंप्रतिमार्गप्रदर्शनायदाशैःसहस्वस्यतदनुगमनोक्तिपूर्वकं रामविषयेतदभिप्रायप्रकारप्रश्नः ॥ २ ॥ गुहेनरामविषयेनिजाशयप्रकाशनपूर्वकमासायंपुनःपुनःशोचन्तंभरतंप्रतिसमाश्वासनम् ३

एवमुक्तस्तु भरतो निषादाधिपतिं गुहम् ॥ प्रत्युवाच महाप्राज्ञो वाक्यं हेत्वर्थसंहितम् ॥ १ ॥

इतिपदच्छेदः । स्वस्तिमतीति अन्यथाहन्तव्येतिभावः ॥ ९ ॥ उपायनं कौशेयादि । मांसं मृगाणां ॥ १०—॥ ११ ॥ स्थपतिः प्रभुः । दण्डकारण्येकुशलः तत्रसंचरणसमर्थइत्यर्थः । विजानीते तंदेशमित्यर्थः ॥ १२—१४ ॥ प्रह्वः कृतप्रणामः ॥ १५ ॥ अयंदेशः मदधिष्ठितवनप्रदेशः । तेनिष्कुटः गृहारामभूतः । "गृहारामस्तुनिष्कुटः" इत्यमरः । त्वद्भोगयोग्यइतियावत् । वयंचवञ्चिताः अत्रगमनानिवेदनेनवञ्चिताइत्यर्थः । निवेदनेहिप्रत्युद्गमनादिकंकर्तुंशक्यमितिभावः । सर्वेवयंते त्वदीयाइत्यर्थः । अतः स्वकेदासकुले दासगृहेवसेतितिनिवेदयामः विज्ञापयामः । पूर्वं गङ्गामासाद्येतिगङ्गापर्यन्तमार्गकरणेपि अद्यमनुष्यप्रेरणाभावात्त्वदागमनंनज्ञातवानस्मीतिगुहेनोच्यते ॥ १६ ॥ वन्यं नीवारश्यामाकप्रियङ्ग्वादिधान्यं । आशंसे प्रार्थयामि । स्वाशिता सुष्ठुभोजिता ॥ १७—॥ १८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने चतुरशीतितमः सर्गः ॥ ८४ ॥

हेत्वर्थसंहितं उपपत्तिप्रयोजनाभ्यांयुक्तं ॥ १ ॥

त्याह—यदीति । शि० ननुनावोपिदूरदेशंनेतव्याइत्यतआह—यदीति । अद्यतरिष्यति । तेननावोदूरं ननेतव्याइतिव्यञ्जितं ॥ ९ ॥ शि० तत्रमत्स्यः दैन्यनिवर्तकवायुमानोषधिविशेषः । तथाहि मदः दैन्यस्य सो नाशःतद्वान् अः वायुर्यस्यसः । "अःकृष्णश्शंकरोब्रह्माशक्रस्सोमोऽनिलोऽनलः" इतिमात्रिका । मांसं राजभोग्यवस्तुविशेषः । अस्यतत्वमनुपदमेवव्रक्ष्यते । मधु पुष्परसः ॥ १० ॥ शि० मांसं राजभोग्यवस्तुविशेषश्चास्ति । एतत्स्वीकुर्वित्यर्थः । "मांसंस्यादामिषेक्लीवं" इतिमेदिनीकोशेनमांसशब्दस्यामिषार्थकत्वमवगतं । आमिषशब्दस्यभोग्यवस्तुपरत्वंतु "भोग्यवस्तुनिसंभोगेप्युत्कोचेपललेपिच" इतितत्कोशादेवबोध्यम् ॥ १७ ॥ इतिचतुरशीतितमस्सर्गः ॥ ८४ ॥

स० हेत्वर्थसंहितं हेतुर्लिङ्गवचनं तदर्थसहितमित्यर्थः ॥ १ ॥

[पा०] १ क. समायान्तं. २ ङ. छ. झ. ट. समयज्ञो. ३ ग. श्रीमान्गुहः. ४ ज. लब्ध्वाह्यनुज्ञां. ङ. छ. झ. ट. लब्ध्वानुज्ञांसंप्रहृष्टो. च. ञ. लब्ध्वानुज्ञांसंप्रविष्टो. ५ ग. श्चापि. घ. श्चहि. ६ क. ङ. च. छ. झ. ञ. ट. निवेदयामते. ७ क. ग. ङ. च. छ. झ. ञ. ट. सर्वं. ८ ङ. छ. ज. झ. दाशहृदे. ९ क. ख. ङ. च. छ. झ. ञ. ट. मूलफलं. १० ङ. छ. झ. ट. चैतन्निषादैः. ११ ङ. छ. झ. ट. स्वयमर्जितं. च. ञ. समुपार्जितं. १२ घ. छ. झ. आर्द्रंशुष्कंयथामांसं. च. ञ. आर्द्रंमांसं चसंशुष्कं. ङ. ट. आर्द्रंशुष्कंतथामांसं. क. आर्द्रंमांसंचसंशुष्कं. १३ ङ. छ. झ. ट. तथा. १४ च. ञ. ट. वसत्वेनां. झ. वत्स्यत्येनां. ख. वत्स्यतीह. १५ घ. ङ. छ. गमिष्यति.

ऊर्जितः खलु ते कामः कृतो मम गुरोः सखे ॥ यो मे त्वमीदृशीं सेनामेकोऽभ्यर्चितुमिच्छसि॥२॥
इत्युक्त्वा तु महातेजा गुहं वचनमुत्तमम् ॥ अब्रवीद्भरतः श्रीमान्निषादाधिपतिं पुनः ॥ ३ ॥
कतरेण गमिष्यामि भरद्वाजाश्रमं गुह ॥ गहनोऽयं भृशं देशो गङ्गानूपो दुरत्ययः ॥ ४ ॥
तस्य तद्वचनं श्रुत्वा राजपुत्रस्य धीमतः ॥ अब्रवीत्प्राञ्जलिर्वाक्यं गुहो गहनगोचरः ॥ ५ ॥
दाशास्त्वाऽनुगमिष्यन्ति धन्विनः सुसमाहिताः ॥ अहं त्वाऽनुगमिष्यामि राजपुत्र महायशः ॥६॥
कच्चिन्नदुष्टो व्रजसि रामस्याक्लिष्टकर्मणः ॥ इयं ते महती सेना शङ्कां जनयतीव मे ॥ ७ ॥
तमेवमभिभाषन्तमाकाश इव निर्मलः ॥ भरतः श्लक्ष्णया वाचा गुहं वचनमब्रवीत् ॥ ८ ॥
मा भूत्स कालो यत्कष्टं न मां शङ्कितुमर्हसि ॥ राघवः स हि मे भ्राता ज्येष्ठः पितृसमो मतः॥९॥
तं निवर्तयितुं यामि काकुत्स्थं वनवासिनम् ॥ बुद्धिरन्या न ते कार्या गुह सत्यं ब्रवीमि ते ॥१०॥
स तु संहृष्टवदनः श्रुत्वा भरतभाषितम् ॥ पुनरेवाब्रवीद्वाक्यं भरतं प्रति हर्षितः ॥ ११ ॥
धन्यस्त्वं न त्वया तुल्यं पश्यामि जगतीतले ॥ अयत्नादागतं राज्यं यस्त्वं त्यक्तुमिहेच्छसि ॥ १२ ॥
शाश्वती खलु ते कीर्तिर्लोकाननुचरिष्यति ॥ यस्त्वं कृच्छ्रगतं रामं प्रत्यानयितुमिच्छसि ॥ १३ ॥
एवं संभाषमाणस्य गुहस्य भरतं तदा ॥ बभौ नष्टप्रभः सूर्यो रजनी चाभ्यवर्तत ॥ १४ ॥
संनिवेश्य स तां सेनां गुहेन परितोषितः ॥ शत्रुघ्नेन सह श्रीमाञ्शयनं पुनरागतम् ॥ १५ ॥

स्वस्य रामविषयभक्तिंद्योतयितुं ममगुरोःसखेइत्युक्तं । यस्त्वमेकएव ईदृशीमपरिच्छिन्नांसेनामभ्यर्चितुमिच्छसि तस्यते ऊर्जितः अभिवृद्धः कामः अर्चनामनोरथः कृतःखलु कृतएव । तवादरणेनैववयमर्चिताइतिभावः ॥ २ ॥ महातेजाइतिगाम्भीर्यंद्योतनं । उत्तममित्यनेनार्चनोद्योगमात्रेणतृप्तत्वकथनादवाप्तसमस्तकामत्वमुक्तं । श्रीमानिति तात्कालिकहर्षः ॥ ३ ॥ कतरेण केनमार्गेण । भृशंगहनः अत्यन्तदुष्प्रवेशः । अनूपोदेशः जलप्रायोदेशः । "जलप्रायमनूपंस्यात्" इत्यमरः ॥ ४ ॥ गहनंकाननं गोचरःसंचारप्रदेशोयस्यसः गहनगोचरः । "गहनंकाननंवनं" इत्यमरः ॥ ५ ॥ अहमनुगमिष्यामि अतोनमार्गविषयविचारःकर्तव्यइतिभावः ॥ ६ ॥ नदुष्टः अदुष्टः । "सुप्सुपा" इतिसमासः । रामस्य रामविषये अदुष्टोव्रजसिकच्चित् दुष्टोन व्रजसिकच्चिदितिवासंबन्धः । अक्लिष्टकर्मणइत्यनेन निरपायत्वमुक्तं । शङ्काप्रसक्तौहेतुमाह—इयमिति । अनुकूलोव्रजसिचेत् सेनाव्यर्थेतिभावः । इवशब्दः शङ्कायाईषत्त्वंद्योतयति ॥ ७ ॥ आकाशइवनिर्मलइत्यनेन तच्छङ्कितदोषस्यतत्रप्रसक्तिरेवनास्तीत्युच्यते । आकाशेहिपङ्कानुलेपेसतत्रनप्रसज्जति किंतुस्वहस्तएव मलिनोभवति । श्लक्ष्णया स्वस्मिन्दोषालेपव्यक्रोधया ॥ ८ ॥ यत् यस्मिन्काले कष्टं त्वयाआशङ्कितं कष्टंजायते सकालोमाभूत् । कलिकालेहितादृशप्रसङ्गः अतो मांशङ्कितुंनार्हसि । तत्रहेतुः—राघवइत्यादि । नतेकार्या त्वयानकार्या ॥ ९—१० ॥ संहृष्टवदनः प्रसन्नवदनइत्यर्थः । हर्षितः संजातहर्षः ॥ ११—१२ ॥ कृच्छ्रगतं व्यसनगतं । प्रत्यानयितुं प्रत्यानेतुं । इडार्षः ॥ १३ ॥ संभाषमाणस्य संभाषमाणेसति । नष्टप्रभः अदृष्टप्रभः ॥ १४ ॥ शयनंपुनरागमदिति अत्रपुनःशब्देनगुहागमनात्पूर्वंश्रान्तःशयनेस्थितइतिगम्यते ।

ति० कामः कामनाविषयोमत्सत्कारः । ममकृतएवखलु । तवश्रद्धयैवसर्वंकृतमित्यर्थः ॥ २ ॥ ति० पन्थानंदर्शयन् गन्तव्यपथिसंमुखंहस्तंकुर्वन्पुनःपुनरब्रवीदित्यन्वयः ॥ ३ ॥ ति० आकाशइवेत्युपमयात्रैकालिकमलसंबन्धाभावोदर्शितः ॥ ८ ॥ ति० मे मयि । नतेकार्येतिपाठान्तरम् ॥ १० ॥ ति० गुहेनपरिरक्षितइतिपाठे परिहृतचोरबाधइत्यर्थः ॥ १५ ॥

[पा०] १ ङ. झ. ट. मभ्यर्चयितुं. २ ङ. छ. झ. ट. इत्युक्त्वास. ३ ख. झ. मर्थवत्. ४ न्पन्थानंदर्शयन्पुनः. ५ ङ. छ. झ. ट. पथा. ६ ङ. छ. झ. ट. भूत्वा. ७ ङ. छ. झ. ञ. ट. स्त्वनु. ८ ङ. छ. झ. ट. देशज्ञाः. ९ ग. ङ. छ. झ. ट. चानु. १० ङ. छ. झ. ञ. ट. महाबल. ११ ज. मर्हति. १२ क. ङ. च. छ. ञ. ट. समोमम. ख. समःसखे. १३ ङ. छ. झ. ट. मेकार्या. १४ ग. हृदयः. १५ घ. जगतीपते. १६ क. परिरक्षितः. घ. परिपालितां. ख. परिभाषितः. १७ ख. ङ. च. छ. झ. ञ. ट. सर्म. १८ क. ख. ञ. समुपागमत्.

रामचिन्तामयः शोको भरतस्य महात्मनः ॥ उपस्थितो ह्यनर्हस्य धर्मप्रेक्षस्य तादृशः ॥ १६ ॥
अन्तर्दाहेन दहनः सन्तापयति राघवम् ॥ वनदाहाभिसन्तप्तं गूढोऽग्निरिव पादपम् ॥ १७ ॥
प्रस्रुतः सर्वगात्रेभ्यः स्वेदं शोकाग्निसंभवम् ॥ यथा सूर्यांशुसंतप्तो हिमवान्प्रस्रुतो हिमम् ॥ १८ ॥
ध्याननिर्दरशैलेन विनिश्वसितधातुना ॥ दैन्यपादपसङ्घेन शोकायासाधिशृङ्गिणा ॥ १९ ॥
प्रमोहानन्तसत्त्वेन संतापौषधिवेणुना ॥ आक्रान्तो दुःखशैलेन महता कैकयीसुतः ॥ २० ॥

विनिःश्वसन्वै भृशदुर्मनास्ततः प्रमूढसंज्ञः परमापदं गतः ॥
शमं न लेभे हृदयज्वरार्दितो नरर्षभोऽयूथगतो यथर्षभः ॥ २१ ॥
गुहेन सार्धं भरतः समागतो महानुभावः सजनः समाहितः ॥
सुदुर्मनास्तं भरतं तदा पुनर्गुहः समाश्वासयदग्रजं प्रति ॥ २२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे पञ्चाशीतितमः सर्गः ॥ ८५ ॥

समुपागमदितिवापाठः। पुनःपरितोषितइतिवासंवन्धः वाक्यालंकारोवा ॥ १५ ॥ अनर्हस्य गर्भैश्वर्येणशोकानर्हस्य । महात्मन महाधीरस्यापि । धर्मप्रेक्षस्य शोकमूलपापशून्यस्य । तादृशः अवाङ्मनसगोचरः । भ्रातृभक्तस्येतिभरतविशेषणंवा॥ १६ ॥ दहनः शोकाग्निः । अन्तर्दाहेन चिन्ताग्निना । तम्नंराघवं भरतं । संतापयति सम्यक्ग्लपयतिस्म । वनदाहाभिसंतप्तं वनदाहेनपर्यन्तवनाग्नेरूष्मणासंतप्तंशुष्कं । पादपं गूढोग्निरिव कोटराग्निरिव । अन्तरारभ्यवहिरदहत् । अन्तस्थोप्यालादह्यते अदाह्यत्वंकेवलाग्नेर्हि ॥ १७ ॥ शोकाग्निसंभवंस्वेदंप्रस्रुतः भरतइतिशेषः । स्वेदःशोकाग्निसंभवइतिपाठस्तु नदृष्टान्तानुरूपः । स्वेदंप्रस्रुतः हिमंप्रस्रुत इत्यत्रगत्यर्थत्वात् कर्तरिक्तः ॥ १८ ॥ भरतस्यदुःखं शैलत्वेनरूपयति—ध्यानेत्यादि । ध्याननिर्दरशैलेन दरोगर्तः तस्मान्निर्गतंनिर्दरं ि]ानांसमूहःशैलं रामविषयध्यानमेवनिर्दरशैलंयस्मिन् तेन । ध्यानस्यनिरन्तरत्वेनदरीविदीर्णशिलापङ्क्तिसाम्यं । विविधंनिश्वसितंविनिश्वसितं तदेवधातुर्यस्मिन् । विविधत्वसाम्यात् । दैन्यं करणानांस्वस्वविषयप्रवृत्तिवैमुख्यं तस्यपादपसाम्यमबोधरूपतथा । शोकायासाधिशृङ्गिणा शोकादय एव शृङ्गिणः कृष्णसारादयोयस्मिन् तेन । यद्वा शोकायासाधिभिः शृङ्गिणा शृङ्गवता । दृढत्वसाम्यात् । प्रमोहानन्तसत्वेन प्रमोहाएव अनन्तानिसत्वानिजन्तवोयस्मिन् तेन । "द्रव्यासुव्यवसायेपुंसत्वमस्त्रीतुजन्तपु" इत्यमरः । प्राणभयशङ्काकरत्वात् । संतापौषधिवेणुना संतापाएवओपधयोवेणवश्चयस्मिन् तेन । ओषधिवेणुसाम्यंदुष्प्रवेशत्वात् । आक्रान्तः अभूदिति शेषः । महता अतिगुरुणा । मज्जतेतिपाठे मज्जता अवयवेषुप्रविशता ॥ १९—२० ॥ विनिःश्वसन् चिन्तातिरेकेणश्वासंकुर्वन् । भृशदुर्मनाः अत्यन्तकलुषहृदयः । प्रमूढानष्टासंज्ञायस्यसः प्रमूढसंज्ञः । अतएव परमापदं मरणायार्थसंपत्तिरूपांमूर्छां गतः । शमं ज्वरशान्तिं । अयूथगतः यूथाद्भ्रष्टइत्यर्थः । यूथहतइतिपाठे हतयूथइत्यर्थः ॥ २१ ॥ अथगुहःसमागतइत्याह—गुहेनेति । सजनः सपरिवारः । समाहितः एकाग्रचित्तः। भरतः गुहेनसार्धं सह समागतःसंगतः। अथगुहः सुदुर्मनाः भरतक्लेशदर्शनेनभरतादपिभृशंदुर्मनाःसन् । भरतं अग्रजंप्रति अग्रजंलक्षीकृत्य । समाश्वासयत् ॥ २२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने पञ्चाशीतितमः सर्गः ॥ ८५ ॥

शि० वनेदाहेऽग्निनावनंदाहकवह्निनासंतप्तंपादपं गूढः कोटरादौकेनचित्प्रक्षिप्तः । अत्रवनदाहकाग्निस्थानापन्नोदशरथशोको बोध्यः ॥ १७ ॥ ति० रामविषयकध्यानान्येव निर्दरशैलाःविदारणरहितशिलासमूहायस्मिन् । निश्शेषतोदीर्णशिलासमूहायस्मिन्निति वा । विनिश्वसितमेवगैरिकादिधातुर्यस्मिन् । श्वाससंपर्केणभूषणानामन्यवर्णजननात् ॥ १९ ॥ ति० मज्जता मर्मंकुर्वता सकरणग्राममात्मानमधोनयता ॥ २० ॥ इतिपञ्चाशीतितमस्सर्गः ॥ ८५ ॥

[पा०] १ क. ङ. च. छ. झ. ञ. ट. दाहाग्नि. घ. दाहादि. २ घ. ज. गुहाग्निरिव. ३ छ. ट. प्रस्रुतः. ग. घ. प्रसूतः. ४ क. ङ. ज. स्वेदःशोकाग्निसंभवः. ५ ङ. च. छ. झ. ञ. ट. सूर्याग्नि. ६ च. छ. ञ. ट. प्रस्नुतो. ७ क. ख. च—ञ. मज्जता. ८ ग. दुःखितस्ततः. ९ ख. ग—छ. ञ. ट. नरर्षभोयूथहतो. १० छ. झ. ट. पुनश्शनैः.

षडशीतितमः सर्गः ॥ ८६ ॥

गुहेनभरतंप्रतिनिशिरामनिद्रासमयेजागरितेनसौमित्रिणासहस्वस्यपूर्वप्रवृत्तस्यसंवादस्यानुवादः ॥ १ ॥ तथातंप्रतिरामलक्ष्मणयोःप्रभातेजटाधारणपूर्वकंगङ्गातरणेनभरद्वाजाश्रमगमनस्यनिवेदनम् ॥ २ ॥

आचचक्षेऽथ सद्भावं लक्ष्मणस्य महात्मनः ॥ भरतायाप्रमेयाय गुहो गहनगोचरः ॥ १ ॥
तं जाग्रतं गुणैर्युक्तं शरचापासिधारिणम् ॥ भ्रातृगुप्त्यर्थमत्यन्तमहं लक्ष्मणमब्रवम् ॥ २ ॥
इयं तात सुखा शय्या त्वदर्थमुपकल्पिता ॥ प्रत्याश्वसिहि शेष्वास्यां सुखं राघवनन्दन ॥ ३ ॥
उचितोऽयं जनः सर्वो दुःखानां त्वं सुखोचितः ॥ धर्मात्मंस्तस्य गुप्त्यर्थं जागरिष्यामहे वयम् ॥ ४ ॥
न हि रामात्प्रियतरो ममास्ति भुवि कश्चन ॥ मोत्सुको भूर्ब्रवीम्येतदप्यसत्यं तवाग्रतः ॥ ५ ॥
अस्य प्रसादादाशंसे लोकेऽस्मिन्सुमहद्यशः ॥ धर्मावाप्तिं च विपुलामर्थावाप्तिं च केवलाम् ॥ ६ ॥
सोहं प्रियसखं रामं शयानं सह सीतया ॥ रक्षिष्यामि धनुष्पाणिः सर्वैः स्वैर्ज्ञातिभिः सह ॥ ७ ॥
न हि मेऽविदितं किंचिद्वनेऽस्मिंश्चरतः सदा ॥ चतुरङ्गं ह्यपि बलं प्रसहेम वयं युधि ॥ ८ ॥
एवमस्माभिरुक्तेन लक्ष्मणेन महात्मना ॥ अनुनीता वयं सर्वे धर्ममेवानुपश्यता ॥ ९ ॥
कथं दाशरथौ भूमौ शयाने सह सीतया ॥ शक्या निद्रा मया लब्धुं जीवितं वा सुखानि वा ॥ १० ॥
यो न देवासुरैः सर्वैः शक्यः प्रसहितुं युधि ॥ तं पश्य गुह संविष्टं तृणेषु सह सीतया ॥ ११ ॥
महता तपसा लब्धो विविधैश्च परिश्रमैः ॥ एको दशरथस्यैष पुत्रः सदृशलक्षणः ॥ १२ ॥

अथ आश्वासनानन्तरं । सद्भावं ज्येष्ठानुवर्तनरूपंसमीचीनस्वभावं । आचचक्षइत्यादि भगवद्विषयोपदेशेनूतनपुरातनविभागोनास्ति देशिकावक्तारःसादराः श्रोतारइत्याह । आङीषदर्थे । स्ववागिन्द्रियविषयमेवावदत् नतुकार्त्स्न्येन । अथ भरतस्वभावज्ञानानन्तरं । सद्भावं बाल्यात्प्रभृतिसुस्निग्धइतिसत्ताव्याप्तंस्वभावं । लक्ष्मणस्यमहात्मनः । पयोधिंपाणिनापरिच्छेत्तुमुद्युक्तः भरतायाप्रमेयायएतादृशस्योपदेष्टेतिनास्ति । गुहोगहनगोचरः वन्यवृक्षादितारतम्यमात्रज्ञः । एतादृशस्वभावमविज्ञातवान् । यद्वा रामविरहेणकुत्रचित्कुञ्जेस्थितः तद्देशीयागमनेसमुत्थायनिर्गतः ॥ १ ॥ भरतस्यरामविषयस्नेहमभिवर्धयितुंलक्ष्मणस्यज्येष्ठानुवर्तनरूपंपूर्ववृत्तान्तमाह—तंजाग्रतमित्यादिना । भ्रातृगुप्त्यर्थे अत्यन्तंजाग्रतं शरचापासिधारिणं एकहस्तेशरयुक्तचापं अपरहस्तेअसिंचदधानमित्यर्थः । गुणैः भ्रातृभक्त्यादिगुणैः युक्तं ॥ २—३ ॥ तस्य रामस्य ॥ ४ ॥ मोत्सुकोभूः अस्यांरात्रौरामरक्षणौत्सुक्यंमाकृथाइत्यर्थः । एतद्रक्षणंप्रति तवाग्रतः असत्यंब्रवीम्यपि ब्रवीमिकिं नब्रवीम्येवेत्यर्थः ॥ ५ ॥ स्वस्यैहिकमामुष्मिकंचफलंरामायत्तमित्याह—अस्येत्यादिना । धर्मावाप्तिं आमुष्मिकफलसाधनसिद्धिं । केवलां न्यायप्राप्तामितियावत् ॥ ६—७ ॥ मेविदितमित्यत्र अविदितमितिपदच्छेदः ॥ ८—११ ॥ तपसा अनशनेन । परिश्रमैः यज्ञादिभिरित्यर्थः । एकः मुख्यः । "एकेमुख्यान्यकेवलाः"

शि० गुणैः सेवानुकूलधर्मैः ॥ २ ॥ शि० इयमित्यारभ्य परिदेवयमानस्येत्येतत्पर्यन्तंश्लोकानव्याख्यायन्ते । एकपञ्चाशत्तमेसर्गेगुहलक्ष्मणसंवादेप्रायएतदानुपूर्वीकत्वेनैवपठितत्वादितितद्व्याख्यानेनैवैषांव्याख्यानंबोध्यं ॥ ३ ॥ तनि० केवलां प्रतिबन्धरहितां । धर्मावाप्तिं फलाभिसन्धिरहितांमोक्षपर्यन्तां । अर्थावाप्तिं स्वर्गादिपुरुषार्थप्राप्तिं । अस्मिँल्लोकेसुमहद्यशः ऐहिकपुरुषार्थं महाभागवतत्वप्रयुक्तप्रसिद्धिंवा । अस्य रामस्यप्रसादात् । आशंसे प्रार्थये ॥ ६ ॥ स० अनुनीताः सदुक्तिभिर्निरुत्तरतयाकृताः ॥ ९ ॥ स० सदृशलक्षणः दशरथेविद्यमानास्सर्वेगुणाःरामेवर्तन्तइत्येतावतासादृश्यं । पितृगौरवादेवमुक्तिः । एतादृशएकएवलब्धः ॥ १२ ॥

[पा०] १ ङ—झ. ट. वरचापेषु. २ ख. ग. शुभा. ३ ख. धर्मात्मंस्तव. घ. ज. धर्मार्थंतव. ४ क. ब्रवीम्येतदहंसत्यं सत्येनैवचतेशपे. ५ ज. ट. दयसत्यं. ६ ज. तस्य. ७ क. ख. ङ. च. छ. झ. ञ. ट. मर्थकामौचकेवलं. ८ ग. पुष्कलां. ९ ङ. स्वभावविहितं. १२ छ. झ. ञ. ट. जीवितानि. वा. ङ. जीवनानि. १३ ख. च. सुखानिच. १४ क. ञ. दशरथस्येटः.

अस्मिन्प्रव्राजिते राजा न चिरं वर्तयिष्यति ॥ विधवा मेदिनी नूनं क्षिप्रमेव भविष्यति ॥ १३ ॥
विनद्य सुमहानादं श्रमेणोपरताः स्त्रियः ॥ निर्घोषोपरतं नूनमद्य राजनिवेशनम् ॥ १४ ॥
कौसल्या चैव राजा च तथैव जननी मम ॥ नाशंसे यदि जीवेयुः सर्वे ते शर्वरीमिमाम् ॥ १५ ॥
जीवेदपि च मे माता शत्रुघ्नस्यान्ववेक्षया ॥ दुःखिता या तु कौसल्या वीरसूर्विनशिष्यति ॥ १६ ॥
अतिक्रान्तमतिक्रान्तमनवाप्य मनोरथम् ॥ राज्ये राममनिक्षिप्य पिता मे विनशिष्यति ॥ १७ ॥
सिद्धार्थाः पितरं वृत्तं तस्मिन्काले ह्युपस्थिते ॥ प्रेतकार्येषु सर्वेषु संस्करिष्यन्ति भूमिपम् ॥ १८ ॥
रम्यचत्वरसंस्थानां सुविभक्तमहापथाम् ॥ हर्म्यप्रासादसंपन्नां सर्वरत्नविभूषिताम् ॥ १९ ॥
गजाश्वरथसंबाधां तूर्यनादविनादिताम् ॥ सर्वकल्याणसंपूर्णां हृष्टपुष्टजनाकुलाम् ॥ २० ॥
आरामोद्यानसंपूर्णां समाजोत्सवशालिनीम् ॥ सुखिता विचरिष्यन्ति राजधानीं पितुर्मम ॥ २१ ॥
अपि सत्यप्रतिज्ञेन सार्धं कुशलिना वयम् ॥ निवृत्ते समये ह्यस्मिन्सुखिताः प्रविशेमहि ॥ २२ ॥
परिदेवयमानस्य तस्यैवं सुमहात्मनः ॥ तिष्ठतो राजपुत्रस्य शर्वरी साऽत्यवर्तत ॥ २३ ॥
प्रभाते विमले सूर्ये कारयित्वा जटा उभौ ॥ अस्मिन्भागीरथीतीरे सुखं संतारितौ मया ॥ २४ ॥
जटाधरौ तौ द्रुमचीरवाससौ महाबलौ कुञ्जरयूथपोपमौ ॥
वरेषुचापासिधरौ परंतपौ व्यवेक्षमाणौ सह सीतया गतौ ॥ २५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे षडशीतितमः सर्गः ॥ ८६ ॥

इत्यमरः ॥ १२ ॥ प्रव्राजनकालिकदशरथदशांस्मरन्नाह—अस्मिन्निति । वर्तयिष्यति जीविष्यति ॥१३॥ सुमहानादंविनद्य कृत्वेत्यर्थः । अद्य स्त्रियःउपरताइति मन्येइत्युपस्कार्यं । निवेशनं निवेशनंच ॥१४॥ सर्वेते जीवेयुरितिनाशंसे यदिजीवेयुरिमांशर्वरीमेवेतिसंबन्धः ॥ १५ ॥ शत्रुघ्नस्यान्ववेक्षया शत्रुघ्नसंबन्ध्यवेक्षणेच्छया । वीरसूः कौसल्या दुःखितेतियत् अतोविनशिष्यति । दुःखितायात्वितिपाठःसमीचीनः । तत्पक्षे यादुःखितावीरसूःकौसल्या सातु विनशिष्यत्येवेत्यर्थः ॥ १६ ॥ अतिक्रान्तमतिक्रान्तं सर्वप्रयोजनमतीत्येत्यर्थः ॥ १७ ॥ वृत्तं अतीतं मृतमितियावत् ॥ १८ ॥ हर्म्यप्रासादसंपन्नां हर्म्याणिधनिनांगृहाणि प्रासादाः देवानांराज्ञांचगृहाणि तैःसंपन्नां समृद्धां । सर्वरत्नविभूषितां सर्वैःश्रेष्ठवस्तुभिरलंकृतां । तूर्यनादविनादितां तूर्यस्यनृत्यगीतादिकस्यनादेनविनादितां हर्म्यादिपुकृतप्रतिध्वनिमित्यर्थः । सर्वकल्याणैः सर्वमङ्गलैः संपूर्णां सर्वोत्सवैःसंपूर्णांवा । आरामोद्यानसंपूर्णां आरामाः उपवनानि उद्यानानिराज्ञामसाधारणवनानि तैःसमृद्धां । समाजोत्सवशालिनीं उत्सवसमूहशालिनीं ॥ १९—२१ ॥ सत्यप्रतिज्ञेन तीर्णवनवासप्रतिज्ञेनरामेण । प्रविशेमहि पुरीमितिशेषः ॥ २२ ॥ तिष्ठतोराजपुत्रस्य राजपुत्रसंबन्धिनी शर्वरीअत्यवर्तत निरन्तरपरिदेवनेनरात्रिंयापितवानित्यर्थः ॥२३—२४ ॥ व्यवेक्षमाणौ सर्वतोदत्तावधानौ ॥ २५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीतांबराख्याने अयोध्याकाण्डव्याख्याने षडशीतितमः सर्गः ॥ ८६ ॥

स० तस्मिन्स्वर्गतेइतिद्वितीयार्धेपूरणीयं ॥ १३ ॥ स० समाजोनामसवणिजांमेलनं तद्रूपोयोऽयमुत्सवस्तेनशालतइतितथा । तां ॥ २१ ॥ स० व्यपेक्षमाणौ वन्यंविनाकस्मिन्नपिवस्तुनिअपेक्षारहितौ ॥ २५ ॥ इतिषडशीतितमस्सर्गः ॥ ८६ ॥

[पा०] १ ख. ग. छ. ज. प्रव्रजिते. २ ख. ङ. छ. झ. ट. निर्घोषोविरतोनूनमद्यराजनिवेशने. घ. निर्घोषोपरतंतात मन्येरामनिवेशनं. ३ क. ख. ङ. च. छ. झ. ञ. ट. तेसर्वेजीवेयुः. ४ ग. घ. ज. रजनीं. ५ क. दपिहि. ६ क. ग. ङ. च. ञ. संपन्नां. ७ ग. तस्मिन्. ८ छ. झ. ट. तस्यैवंहि. ग. ज. तस्यैवहि. ९ ग. तस्मिन्. १० ग. महारथौ. ११ ङ. च. छ. झ. ञ. वरेषुधीश्चापधरौ. १२ ग—ट, व्यपेक्षमाणौ.

सप्ताशीतितमः सर्गः ॥ ८७ ॥

भरतेनगुहमुखाद्रामलक्ष्मणयोर्जटाधारणश्रवणाच्छोकेनमोहाद्भूमौनिपतनम् ॥ १ ॥ तथास्वशोकस्यरामादिविपन्मूलकत्व-शङ्किनींकौसल्यांप्रतितत्वनिवेदनेनसमाश्वासनपूर्वकंगुहंप्रतिरामादिभोजनशयनादिवृत्तान्तनिवेदनचोदना ॥ २ ॥ गुहेनतंप्रति सभार्यस्यरामस्यलक्ष्मणकल्पितकुशमयशयनीयशयनादिनिवेदनपूर्वकंतद्रक्षणायलक्ष्मणेनसहस्वस्यजागरणादिनिवेदनम् ॥ ३ ॥

गुहस्य वचनं श्रुत्वा भरतो भृशमप्रियम् ॥ ध्यानं जगाम तत्रैव यत्र तच्छ्रुतमप्रियम् ॥ १ ॥
सुकुमारो महासत्त्वः सिंहस्कन्धो [1]महाभुजः ॥ पुण्डरीकविशालाक्षस्तरुणः प्रियदर्शनः ॥ २ ॥
प्रत्याश्वस्य मुहूर्तं तु कालं परमदुर्मनाः ॥ [2]पपात सहसा [3]तोत्रैर्हृतिविद्ध इव द्विपः ॥ ३ ॥
[[4]भरतं मूर्च्छितं दृष्ट्वा विवर्णवदनो गुहः ॥ बभूव व्यथितस्तत्र भूमिकंपे यथा द्रुमः] ॥ ४ ॥
तदवस्थं तु भरतं शत्रुघ्नोऽ[5]नन्तरस्थितः ॥ परिष्वज्य रुरोदोच्चैर्विसंज्ञः शोककर्शितः ॥ ५ ॥
ततः सर्वाः [6]समापेतुर्मातरो भरतस्य ताः ॥ उपवासकृशा दीना [7]भर्तुर्व्यसनकर्शिताः ॥ ६ ॥
ताश्च तं पतितं भूमौ रुदन्त्यः पर्यवारयन् ॥ कौसल्या त्वनुसृत्यैनं दुर्मनाः परिषस्वजे ॥ ७ ॥
वत्सला स्वं यथा वत्स[8]मुपगूह्य [9]तपस्विनी ॥ परिपप्रच्छ भरतं [10]रुदन्ती शोकलालसा ॥ ८ ॥
पुत्रव्याधिर्न ते कच्चिच्छरीरं [11]परिवाधते ॥ [12]अद्य राजकुलस्यास्य त्वदधीनं [13]च जीवितम् ॥ ९ ॥
त्वां दृष्ट्वा पुत्र जीवामि रामे [14]सभ्रातृके गते ॥ वृत्ते दशरथे राज्ञि नाथ एकस्त्वमद्य नः ॥ १० ॥
[15]कच्चिन्नु लक्ष्मणे पुत्र श्रुतं ते किञ्चिदप्रियम् ॥ पुत्रे [16]वा ह्येकपुत्रायाः सहभार्ये वनंगते ॥ ११ ॥
[17]स मुहूर्तं समाश्वस्य रुदन्नेव महायशाः ॥ कौसल्यां परिसान्त्व्येदं गुहं वचनमब्रवीत् ॥ १२ ॥
भ्राता मे क्वावसद्[18]रात्रौ क्व सीता क्व च लक्ष्मणः ॥ अस्वपच्छयने कस्मिन्किं भुक्त्वा गुह शंस मे ॥ १३ ॥
सोब्रवीद्भरतं हृष्टो निषादाधिपतिर्गुहः ॥ यद्विधं प्रतिपेदे च रामे प्रियहितेऽतिथौ ॥ १४ ॥

यत्रतत्रैव यत्रक्षणे अप्रियंश्रुतंतत्रैवेत्यर्थः । यद्वा यत्रविषये अप्रियंश्रुतं तत्रैवध्यानंजगाम स्वाभिलषितकार्यसंकटंजातमितिचिन्तापारवश्यंप्राप्तइत्यर्थः ॥१॥ सुकुमारइत्यादिश्लोकद्वयमेकान्वयं । प्रत्याश्वस्य मुहूर्तंकालंपरमदुर्मनाः सन् सहसापपात । ससादेतिवापाठः । सुकुमारइत्यादिना तदवस्थानर्हत्वमुच्यते ॥ २—४ ॥ अनन्तरस्थितः निरन्तरंसमीपे स्थितः ॥ ५—६ ॥ अनुसृत्य समीपंप्राप्य ॥ ७ ॥ उपगूह्य परिष्वज्य ॥ ८ ॥ नहिभरतस्यव्याधिश्चातुर्थिकः अपितुरामविरहएव । रामविरहः तेशरीरंबाधते कच्चिदित्यर्थः । अद्येति रामोवनंगतः चक्रवर्तीतुसंस्थितः अतस्त्वमेवेदानीमस्माकंरक्षकइतिनार्थः । किन्तु रामोभवतोमुखवैवर्ण्यंदृष्ट्वानपुनरनागतोभवेत् अवश्यमागमिष्यतीत्येतदवेक्ष्यवयंजीवामः । भवान्नास्तीतिश्रुतंचेत् कइमांदिशमवलोकयेत् ॥ ९—१० ॥ लक्ष्मणेविषये ते त्वया । एकपुत्रायाः ममेतिशेषः ॥ ११ ॥ परिसान्त्व्य त्वच्छङ्कितं किमपिनभवेदिति वदन् परिसान्त्व्येत्यर्थः ॥ १२—१३ ॥ गुहः हृष्टः रामवृत्तान्तकीर्तनस्यावकाशोलब्धइतिसंजातहर्षःसन् । रामे यद्विधं यादृशमुपचारादिकं । प्रतिपेदे अकरोदिति

शि० तपस्विनी अतिविचारशीला ॥ ८ ॥ **स०** वृत्ते सद्वृत्ते । राज्ञिगते ॥ १० ॥ **ति०** भ्रममूर्च्छादेःकारणान्तरंपृच्छति—**कच्चिदिति** । अप्रियं प्राणात्ययरूपं ॥ ११ ॥ **ति०** मुहूर्तंविसंज्ञःसन्पश्चात्समाश्वस्येत्यर्थः । परिसान्त्व्य त्वच्छङ्कितंकिमपिनास्ति किंतुतयोर्जटाधारणश्रवणजदुःखेनमूर्च्छितोस्मीत्युक्त्वा ॥ १२ ॥ **स०** अस्वपदिति । लक्ष्मणंविनावोध्यं ॥ १३ ॥ **शि०** प्रियहिते

[पा०] १ ग. महाद्युतिः. २ क. ङ. झ. ट. ससाद. ३ क—च. ज—ट. हृदिविद्ध. ४ ङ. छ. ज. झ. ट. अयंश्लोकोधिकः. ५ क. नान्तरस्थितः. ६ घ. समासेदुः. ७ क. ख. ग. ङ. च. छ. झ. भर्तृव्यसन. ८ ख. मुपगृह्य. ९ क. च. ज. मनस्विनी. १० क. झ. रुदती. ११ ङ. च. छ. झ. ञ. ट. प्रतिबाधते. १२ क. ख. ङ. च. छ. झ. ञ. ट. अस्यराजकुलस्याद्य. १३ क—च. ज. झ. ट. हि. १४ प्रव्राजिते. १५ घ—ट. कच्चिन्न. १६ क. ग. च. ञ. वाप्येक. १७ क—घ. समुहूर्तात्. १८ क. ख. घ. ङ—ट. द्रात्रिं.

अन्नमुच्चावचं [1]भक्षाः [2]फलानि विविधानि च ॥ रामायाभ्यवहारार्थं [3]बहु चोपहृतं मया ॥ १५ ॥
तत्सर्वं [4]प्रत्यनुज्ञासीद्रामः सत्यपराक्रमः ॥ [5]न तु तत्प्रत्यगृह्णात्स क्षत्रधर्ममनुस्मरन् ॥ १६ ॥
न ह्यस्माभिः प्रतिग्राह्यं सखे [6]देयं तु सर्वदा ॥ इति तेन वयं [7]राजन्ननुनीता महात्मना ॥ १७ ॥
[8]लक्ष्मणेन [9]समानीतं पीत्वा वारि महायशाः ॥ [10]औपवास्यं [11]तदाऽकार्षीद्राघवः सह सीतया ॥ १८ ॥
[12]ततस्तु जलशेषेण लक्ष्मणोप्यकरोत्तदा ॥ वाग्यतास्ते त्रयः [13]सन्ध्यां समुपासत संहिताः ॥ १९ ॥
सौमित्रिस्तु ततः पश्चादकरोत्[14]स्वास्तरं शुभम् ॥ स्वयमानीय बर्हींषि क्षिप्रं राघवकारणात् ॥ २० ॥

यावत् । तदब्रवीत् चकारेणरामकृतंसमुच्चीयते ॥१४॥ उच्चावचं नानाविधमित्यर्थः । भक्षाः भक्षणीयान्यपूपादीनि । अभ्यवहारार्थं भोजनार्थं । बहुचेति अन्यच्चबहु चोष्यलेह्यादिकमुपाहृतं ॥ १५ ॥ रामः तन्नप्रत्यगृह्णात् किन्तु तत्सर्वंप्रत्यनुज्ञासीत् प्रत्यन्वज्ञासीत् पुनर्नीयतामित्यनुज्ञातवान् । क्षत्रधर्मं दानमेवक्षत्रधर्मः नत्वादानमिति । अत्रहीनजातिपरिग्रहत्वात्तत्प्रत्याख्यानं ऋषिभ्यस्तुस्वीकरिष्यतीत्याहुः ॥ १६ ॥ प्रत्यनुज्ञानेहेतुमाह—नेत्यादिना । इत्यनुनीतावयमित्यनेन स्वाङ्घ्रिभक्ताग्रेसरगुहसमर्पितफलादेर्भक्तिपूतत्वेन शवरीविदुरादिन्यायेन परमभागवततयास्वीकार्यत्वेपि स्वप्रियतमपितृमातृप्रमुखबहुजनविश्लेषदुःखप्राग्भारानुभवजनितवैमनस्येन पुण्यनदीतीरे उपवासचिकीर्षयाच गुहसमर्पितंनप्रतिजग्राहरामइतिच गुहेनापिविदितमितिगम्यते ॥ १७ ॥ औपवास्यं उपवासं । स्वार्थेष्यञ् ॥ १८ ॥ जलशेषेण रामपीतजलशेषेण । अकरोत् पानमितिशेषः । वाग्यताः नियतवाचः । सीतायाअपिसंध्यायांध्यानजपादिकमस्त्येव । संहिताः समाहिताः । ननुपूर्वंपुरोवादे " ततश्चीरोत्तरासङ्गः संध्यामन्वास्यपश्चिमात् । जलमेवाददेभोज्यंलक्ष्मणेनाहृतंस्वयं " इत्युक्तं । कथमत्रानुवादे प्रथमंजलादानंपश्चात्संध्योपासनंचोच्यते । सत्यं । तथैवक्रमः इहतु गुहानीतान्नानङ्गीकारे किंभुक्तवान्राम इत्याकाङ्क्षायां लक्ष्मणेनयद्वार्यानीतंतत्पीतमितिप्रसङ्गसंगत्या जलपानंप्रथममुक्त्वा अथसंध्योपासनमुक्तमितिनदोषः ॥ १९ ॥ ततःपश्चात् वारिपानानन्तरं । स्वयंबर्हींषि कुशान् । " बर्हिर्नाग्नौननाकुशे " इति वैजयन्ती । क्षिप्रमानीय राघवकारणात् राघवनिमित्तं । शुभं पवित्रं । स्वास्तरं सुष्ठुआस्तीर्णं शयनमि-

---

प्रियःस्वविषयकप्रीतिमान् । हितःस्वप्रीतिविषयीभूतः । सएवसइतिकर्मधारयः । **ति०** हृष्टः लक्ष्मणवद्भरतस्यापिपूर्णभ्रातृभक्तिदर्शनेनतुष्टः ॥ १४ ॥ **स०** प्रत्यनुज्ञासीत् दृष्टयास्वीकृत्यमह्यंदत्तवान् । क्षत्रधर्मं वन्येनैववनवासंकरिष्यइतिप्रतिज्ञापालनरूपमप्रतिग्रहरूपंवा । प्रथमपक्षे उत्तरश्लोकेस्वाभिप्रेतंनिगूह्यप्रकारान्तरेणरामेणपरिहारःकृतइतिध्येयम् । अतएवानुनीताइत्यत्रासन्धिः । **शि०** क्षत्रधर्मं क्षतः यमदूतकर्तृकहिंसनात् त्रायतेस्वसंसर्गिजनंरक्षतीतिक्षत्रं भागीरथीतीरं तत्रयोधर्मः अन्यदीयवस्तुग्रहणान्निवृत्तिस्तं । किंचक्षत्राणां उपदेशद्वारासंसारदुःखाद्रक्षकाणांमनुप्रभृतीनामुक्तोयोधर्मःभागीरथीतीरेअन्यदीयवस्तुग्रहणान्निवृत्तिस्तमनुस्मरन्बोधयन्सन् । क्षत्रधर्मंअप्रतिग्रहरूपमितिभट्टाद्युक्तिस्तुचिन्त्या । शवर्यादिफलानामग्रहणापत्तेः । भरद्वाजाश्रमस्यतुतदानीमपिप्रवाहाद्दूरवर्तित्वान्नतदीयवस्तुनोनिषेधविषयतेतिदिक् ॥ १६ ॥ **ति०** नहीति । नन्वेवंभरद्वाजादिदत्ताङ्गीकारःकथमितिचेन्न । मधुपर्कादिनाराजपूजायाब्राह्मणंप्रतिविधानेनतद्दत्ताङ्गीकारस्यस्वाभ्युदयफलकत्वेनचतस्ययुक्तत्वात् । गुहस्यनिषादत्वेनराजपूजानधिकारात् । अस्वदेश्यत्वेनकरग्रहणायोग्यत्वाच्चतदीयानङ्गीकारइतिनदोषः । यद्यपिगुहस्यतत्त्वज्ञत्वेनास्त्येवभगवत्पूजाधिकारः तथापि व्रतस्थत्वात्तदभोजनमितितत्वम् ॥ १७ ॥ **ती०** औपवास्यं उपवासं । औपवस्तमितिपाठेप्ययमेवार्थः । **शि०** उपवासं तीर्थविधिप्रयुक्तभोजनाभावमेवाकार्षीत् ॥ १८ ॥ **ति०** त्रयः सुमन्त्रेण । संहिताः समाहितचित्ताः । **स०** त्रयः सीतारामलक्ष्मणाः । सन्ध्यां सन्धौक्रियमाणां । उत्तमस्त्रीत्वाद्वा नानुपपत्तिः । अतएवसंहिताइत्युपपद्यते ॥ १९ ॥

[पा०] १ घ. भक्ष्यं. २ ङ. छ. ट. फलमूलानिचैवहि. ३ घ. ङ. छ. ज. झ. ट. बहुशोपहृतं. ४ क. च. ञ. प्रत्यनुज्ञाप्य. ५ क. ख. ग. च. छ. झ. ञ. ट. नहि. ६ च. ञ. देयंहि. ७ ङ. छ. झ. ट. सर्वेंअनुनीता. ८ ग. ङ. च. छ. झ. ञ. ट. यदानीतं. ९ ङ. छ. झ. ट. पीतंवारिमहात्मना. १० ट. उपवासे. ११ क. तथा. १२ क. ख. ग. च. ञ. ततस्तज्जलं. ङ. ततस्तुपीत. १३ ङ. छ. झ. ञ. संध्यांसमुपासन्त. क. सन्ध्यामुपासतसमाहिताः. १४ क. दास्तरं.

तस्मिन्समाविशद्रामः स्वास्तरे सह सीतया ॥ प्रक्षाल्य च तयोः पादावपचक्राम लक्ष्मणः ॥ २१ ॥
एतत्तदिङ्गुदीमूलमिदमेव च तत्तृणम् ॥ यस्मिन्रामश्च सीता च रात्रिं तां शयितावुभौ ॥ २२ ॥
नियम्य पृष्ठे तु तलाङ्गुलित्रवाञ्शरैः सुपूर्णाविषुधी परंतपः ॥
महद्धनुः सज्यमुपोह्य लक्ष्मणो निशामतिष्ठत्परितोस्य केवलम् ॥ २३ ॥
ततस्त्वहं चोत्तमबाणचापधृत्स्थितोऽभवं तत्र स यत्र लक्ष्मणः ॥
अतन्द्रिभिर्ज्ञातिभिरात्तकार्मुकैर्महेन्द्रकल्पं परिपालयंस्तदा ॥ २४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे सप्ताशीतितमः सर्गः ॥ ८७ ॥

अष्टाशीतितमः सर्गः ॥ ८८ ॥

भरतेनकौसल्यादीन्प्रतिकुशमयरामशय्याप्रदर्शनपूर्वकंतदीयवैभवानुस्मरणेनतंप्रतिपरिशोचनम् ॥ १ ॥ तथाऽऽत्मोपालंभनलक्ष्मणादिप्रशंसनपूर्वकंतत्कालमारभ्यजटाधारणादिनारामस्यप्रतिनिधितयावनवासप्रतिज्ञानम् ॥ २-१८ तथारामस्यायोध्यांप्रतिप्रतिनिवर्तनायबहुधाप्रयतनेपितेनतदनभ्युपगमेतेनैवसहवनवासप्रतिज्ञानम् ॥ ३ ॥

तच्छ्रुत्वा निपुणं सर्वं भरतः सह मन्त्रिभिः ॥ इङ्गुदीमूलमागम्य रामशय्यामवेक्ष्य ताम् ॥ १ ॥
अब्रवीज्जननीः सर्वा इह तेन महात्मना ॥ शर्वरी शयिता भूमाविदमस्य विमर्दितम् ॥ २ ॥

तियावत् । अकरोत् कृतवान् ॥ २० ॥ पादौप्रक्षाल्य गङ्गातीरगमनकृतपङ्कशोधनंकृत्वेत्यर्थः । इदंच रामस्यस्वहस्ताभ्यां सीतायास्तूदकप्रदानेनेतिबोध्यं । अपचक्राम शयनकालेसमीपवर्तनस्यानुचितत्वाद्दूरेस्थितः ॥ २१ ॥ शयितौ । "गत्यर्थाकर्मकश्लिषशीङ्—" इत्यादिना कर्तरिनिष्ठा ॥ २२ ॥ पृष्ठे पश्चाद्भागे इषुधी तूणीरद्वयं । नियम्य बध्वा । शूराणांसव्यापसव्यप्रयोगार्थमिषुधिद्वयधारणमस्ति । तलाङ्गुलित्रवान् । "तलंज्याघातवारणं" इत्यमरः । उपोह्य धृत्वा । अस्यपरितोतिष्ठत् सर्वतोरक्षणार्थंप्रदक्षिणंचचारेत्यर्थः । निशां निशायां । अत्यन्तसंयोगेद्वितीया । केवलमित्यनेनशयननिद्राराहित्यंलक्ष्मणस्योच्यते ॥ २३ ॥ अहंचोत्तमबाणचापधृत् एकोभ्रातानगराद्वनानिनिरगमयत् अयमपरःसुषुप्तिदशायांकिमपिकुर्यादितिशङ्कयासज्जायुधःसन् यत्रयत्रसलक्ष्मणःस्थितः तत्रतत्रस्थितोभवं प्रतिपदंतमनुसृतवानभवमित्यर्थः । अतन्द्रिभिर्ज्ञातिभिरात्तकार्मुकैः । ममपरिकरश्च अयंवनचरोनिषादजातीयः रामेकिञ्चित्करिष्यतिचेत् एनंच प्रहरामइतिसावधाना मांप्रतिपदमन्वसरन्नित्यर्थः । एवमस्थानेभयशङ्किभिःकृतं खलु सनकेनचित्परिभाव्यइत्याह—महेन्द्रकल्पमिति ॥ २४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने सप्ताशीतितमः सर्गः ॥ ८७ ॥

तदित्यादिश्लोकद्वयमेकंवाक्यं । निपुणं सावधानमित्यर्थः । तेन रामेण । इहभूमौ शर्वरीशयिता शर्वर्याशयनंकृतं । निष्ठायाअधिकरणंत्वस्याभिहितत्वाच्छर्वरीशब्दात्प्रथमा इदमेषामासितमितिवत् । इदमस्यविमर्दितमित्यत्राप्यधिकरणेनिष्ठा । "कस्यचवर्तमाने" इतिकर्तरिषष्ठी । अस्मिन्नेतत्कर्तृकंविमर्दन-

---

स० तलेचअङ्गुलयश्चतलाङ्गुलि तत्त्रायतीतितलाङ्गुलित्रं ततोमतुप् ॥ २३ ॥ ति० परिपालयं पर्यपालयं ॥ २४ ॥ इतिसप्ताशीतितमस्सर्गः ॥ ८७ ॥

इदमस्यविमार्दितं अङ्गानामितिशेषः ॥ २ ॥

[पा०] १ क. ख. ततःपादान्व्यपाक्रामत्सलक्ष्मणः. घ. च. ज. ञ. ततःपादानपाक्रामत्स. छ. झ. ट. तयोःपादौव्यपाक्रामत्स. २ ङ. छ. झ. ट. अस्मिन्. ३ घ. त्वरितोस्यकेवलां. ज. त्वरितोस्यकेवलं. ख. ग. परितोस्यकेवलां. ४ क—घ. चापबाणधृत्. ङ. छ. झ. ट. बाणचापभृत्. ५ ङ. झ. ट. अतन्द्रितैः. ६ क. ङ. च. छ. झ. ञ. परिपालयंतदा. ७ ख. भरतस्सर्वंनिपुणं. ८ क. समवैक्षत. ९ ङ. छ. झ. ट. तस्यमहात्मनः. १० ङ. विमर्दनं.

[1] महाभागकुलीनेन महाभागेन धीमता ॥ जातो [2]दशरथेनोर्व्यां न रामः स्वप्तुमर्हति ॥ ३ ॥
अजिनोत्तरसंस्तीर्णे वरास्तरणसञ्चये ॥ शयित्वा पुरुषव्याघ्रः कथं [3]शेते महीतले ॥ ४ ॥
प्रासादाग्रविमानेषु वलभीषु च सर्वदा ॥ [4]हैमराजतभौमेषु वरास्तरणशालिषु ॥ ५ ॥
पुष्पसंचयचित्रेषु चन्दनागरुगन्धिषु ॥ पाण्डुराभ्रप्रकाशेषु शुकसङ्घरुतेषु च ॥ ६ ॥
प्रासादवरवर्येषु [6]शीतवत्सु सुगन्धिषु ॥ उषित्वा [7]मेरुकल्पेषु कृतकाञ्चनभित्तिषु ॥ ७ ॥
गीतवादित्रनिर्घोषैर्वराभरणनिःस्वनैः ॥ मृदङ्गवरशब्दैश्च सततं [8]प्रतिबोधितः ॥ ८ ॥
वन्दिभिर्वन्दितः काले बहुभिः सूतमागधैः ॥ गाथाभिरनुरूपाभिः स्तुतिभिश्च परंतपः ॥ ९ ॥
अश्रद्धेयमिदं लोके न सत्यं प्रतिभाति [9]मा ॥ मुह्यते खलु मे भावः स्वप्नोऽयमिति [10]मे मतिः ॥ १० ॥
न नूनं दैवतं किञ्चित्कालेन बलवत्तरम् ॥ यत्र दाशरथी रामो भूमावेव [11]शयीत सः ॥ ११ ॥
[12]विदेहराजस्य सुता [13]सीता च प्रियदर्शना ॥ दयिता शयिता भूमौ स्नुषा दशरथस्य च ॥ १२ ॥

मित्यर्थः ॥ १—२ ॥ महाभागेन महानुभावेनदशरथेनेति पञ्चम्यर्थेतृतीया ॥ ३ ॥ अजिनोत्तरसंस्तीर्णे अजिनरूपोत्तरच्छदेनसंस्तीर्णे । अजिनशब्देन "कदलीकन्दलीचीनश्चमूरुप्रियकावपि । समूरुश्चेतिहरिणाअमीअजिनयोनयः" इत्युक्तकदल्याद्यजिनं विवक्षितं । वरास्तरणसंचये वराणिअमूल्यानिआस्तरणानियेषुपर्यङ्केषुतेषांसंचयेसमूहे । पर्यङ्कानांबहुत्वं शीतोष्णादिकालोचितान्तर्गृहशिरोगृहादिबाहुल्यात् । यद्वा मार्दवातिशयायानेकास्तरणत्वं । अतिमृदुत्वादजिनस्योपर्यास्तरणत्वं ॥ ४ ॥ प्रासादाग्रविमानेषु विमानतुल्यप्रासादशिखरेषु । वलभीषु कूटागारेषु । "कूटागारेतुवलभी"इतिवैजयन्ती । हैमराजतभौमेषु हैमानिराजतानिभौमानिभूतलानियेषुतेषु । वरास्तरणशालिषु चित्रकम्बलादिशालिषु । पुष्पसंचयचित्रेषु चित्रपुष्पसमूहेषु । चन्दनागरुगन्धिषु चन्दनागरुधूपगन्धिषु । पाण्डुराभ्रप्रकाशेषु तद्वद्धवलेषु । शुकसंघरुतेषु शुकसमूहनादवत्सु । अर्शआदित्वादच्मत्वर्थीयः । प्रासादवरवर्येषुप्रासादवराणामुत्तमेषु । शीतवत्सु शैत्यवत्सु । "शीतंगुणे" इत्यमरः । सुगन्धिषु घनसारादिभिरितिशेषः । उषित्वा शयित्वेत्यर्थः । उपरिप्रतिबोधोक्तेः । मेरुतुल्यत्वेहेतुः—कृतकाञ्चनभित्तिष्विति । गीतवादित्रनिर्घोषैः गीतैस्तदनुगुणवीणादिरावैः । वराभरणनिस्वनैः परिचारिकापाणिचरणनूपुरकङ्कणाद्याभरणशिञ्जितैः । मृदङ्गवरशब्दैः मर्दलविशेषध्वनिभिश्च सततंप्रतिबोधितः । अथ प्रबोधनानन्तरं । काले प्रातःकाले । वन्दिभिः कर्तृभिः सूतमागधैश्च । गाथाभिः गद्यविशेषैः । [पद्यविशेषैः] स्तुतिभिः स्तोत्रप्रबन्धैश्च । वन्दितः स्तुतः । वदिअभिवादनस्तुत्योरितिधातुः । परंतपः अन्यराजशिक्षणपरोरामः । कथंभूमौकेवलायांशेते कथंश्वापदरवैःप्रतिबोध्यते कथमेकाकीतिष्ठतीतिचोपस्कार्यं । गम्यमानत्वादप्रयोगः "यश्चनिम्बंपरशुनायश्चैनंमधुसर्पिषा । यश्चैनंगन्धमाल्याभ्यांसर्वस्यकटुरेवसः" इत्यादिवत् ॥ ५—९ ॥ इदं रामस्यतृणशय्याशयनादिकं । अश्रद्धेयं लोकेपश्यामि । लोकृदर्शनइतिधातुः । तत्रहेतुमाह—नसत्यमिति । किंचमेभावः हृदयं । मुह्यतेखलु मुह्यतिकिमु । रामस्यभूमिशयनश्रवणादिकंभ्रमोवेत्यर्थः । अथवाअयं पूर्वोक्तश्रवणं । स्वप्नापेक्षयापुँल्लिङ्गत्वं । स्वप्नइतिमेमतिः मतं सिद्धान्तइत्यर्थः । कथमन्यथासर्वमिदमसंभाव्यं संभाव्यतइतिभावः ॥ १० ॥ कालेन कालात् । दैवतंबलवत्तरंन नूनं कालस्वबलीयानित्यर्थः । यत्र यस्मात् । दाशरथिः दशरथपुत्रोपि । भूमावेवशयीत तस्मादित्यर्थः ॥ ११ ॥ प्रियदर्शना अतदर्हेत्यर्थः । दयिता रामस्यप्राणेभ्योपिप्रेयसी । शयिता शयितव-

---

[पा०] १ ङ. छ. झ. ट. महाराज. २ ग. दशरथादुर्व्यां. ३ ग. शेतेतुराघवः. ४ ग. हेमराजतवर्णेषु. ख—च. हेमराजतभौमेषु. ५ ज. रम्येषु. ६ क. ग. च. ञ. गीतवत्सु. ७ च. मेघकल्पेषु. ८ ख. ग. संप्रबोधितः. ९ च. छ. ज. मां. ख. मे. १० क. मन्मतं. ११ क. ङ. च. छ. झ. ञ. ट. देवमशेत. १२ ङ. छ. झ. ट. यस्मिन्विदेहराजस्यसुताच. १३ ग. सीतापिप्रियदर्शना.

इयं शय्या मम भ्रातुरिदं[1] हि परिवर्तितम् ॥ स्थण्डिले कठिने सर्वं गात्रैर्विमृदितं[2] तृणम् ॥ १३ ॥
मन्ये साभरणा सुप्ता सीताऽस्मिञ्शयने[3]नोत्तमे ॥ तत्र[4] तत्र हि दृश्यन्ते सक्ताः[5] कनकबिन्दवः ॥ १४ ॥
उत्तरीयमिहासक्तं सुव्यक्तं सीतया तदा[6] ॥ तथा ह्येते प्रकाशन्ते सक्ताः कौशेयतन्तवः[7] ॥ १५ ॥
मन्ये भर्तुः सुखा शय्या येन बाला तपस्विनी ॥ सुकुमारी सती दुःखं न विजानाति मैथिली ॥ १६ ॥
हा हन्तास्मि[8] नृशंसोहं[9] यत्सभार्यः[10] कृते मम ॥ ईदृशीं राघवः शय्यामधिशेते ह्यनाथवत् ॥ १७ ॥
सार्वभौमकुले जातः सर्वलोकस्य[11] संमतः ॥ सर्वलोकप्रियस्त्यक्त्वा[12] राज्यं सुखमनुत्तमम्[13] ॥ १८ ॥
कथमिन्दीवरश्यामो रक्ताक्षः प्रियदर्शनः ॥ सुखभागी न दुःखार्हः शयितो भुवि राघवः ॥ १९ ॥
धन्यः खलु महाभागो[14] लक्ष्मणः शुभलक्षणः ॥ भ्रातरं विषमे काले यो राममनुवर्तते ॥ २० ॥
सिद्धार्था खलु वैदेही पतिं याऽनुगता वनम् ॥ वयं संशयिताः सर्वे हीनास्तेन महात्मना ॥ २१ ॥
अकर्णधारा पृथिवी शून्येव प्रतिभाति मा[15] ॥ गते दशरथे स्वर्गं रामे चारण्यमाश्रिते ॥ २२ ॥
न च प्रार्थयते कश्चिन्मनसाऽपि वसुन्धराम् ॥ वनेऽपि[16] वसतस्तस्य बाहुवीर्याभिरक्षिताम् ॥ २३ ॥
शून्यसंवरणारक्षामयन्त्रितहयद्विपाम् ॥ अपावृत[17]पुर[18]द्वारां राजधानीमरक्षिताम् ॥ २४ ॥
अप्रहृष्टबलां न्यूनां[19] विषमस्थामनावृताम् ॥ शत्रवो नाभिमन्यन्ते[20] भक्ष्यान्[21]विषकृतानिव ॥ २५ ॥

ती । कर्तरिक्तः । हन्तेतिशेषः ॥ १२ ॥ परिवर्तितं परिवर्तनं स्वापकालेश्रमातिशयादितस्ततःशरीरपरिवर्तनपरं । परिवर्तनज्ञापकमाह—स्थण्डिलइति । स्थण्डिले भूतले । कठिनस्थलत्वात् गात्रैःविमृदितं क्षुण्णं । तृणं इदमित्यनुषङ्गः ॥ १३ ॥ साभरणासुप्ता मार्गश्रमादाभरणमनुन्मुच्यसुप्तवती । शयनोत्तमे भर्तृशय्यात्वादितरतल्पेभ्यःश्रेष्ठतमे । साभरणासुप्तेत्यत्रसूचकमाह—तत्रतत्रेति । तत्रतत्र तृणेपुसक्ताः कनकबिन्दवः जाम्बूनदाभरणनिर्गलिताःसूक्ष्मरेणवः ॥ १४ ॥ इह कुशाग्रेषु आसक्तं इदमासञ्जनंसुव्यक्तं सीतया सीतायाः ॥ १५ ॥ याकापिभर्तुः शय्यापतिव्रतायाःसुखेतिमन्ये । यतःसुकुमारीमैथिली सती पतिव्रता । अस्मिन्नपिशयनेशयितादुःखंनजानाति ॥ १६ ॥ हाहन्तेत्येकनिपातः खेदार्थः । अहंनृशंसोस्मि निर्दयोस्मि । ममकृते मन्निमित्तं । कृतेइत्यव्ययं ॥ १७॥ जन्मना शक्तिमत्तया प्रजारञ्जकत्वेन शरीरलक्षणेनच राज्यार्होरामः कथमेतादृशींदुर्दशांप्राप्तइतिखिद्यति—सार्वभौमकुलेजातइत्यादिनाश्लोकद्वयेन ॥ १८—१९ ॥ विषमेकाले संकटेकाले ॥ २० ॥ पतिमनु पतिमनुसृत्य । वनंगतेतिसंबन्धः संशयिताः अस्मत्सेवांरामोङ्गीकरिष्यतिनवेतिसंशयिताः ॥ २१ ॥ अकर्णधारा प्रधानपुरुषरहितेतियावत् । अतएव शून्येवप्रतिभाति ॥ २२ ॥ अनायकत्वेकथं राज्यंनिरुपद्रवंतत्राह—नचेति । कश्चित् सामन्तः । नप्रार्थयते आक्रमितुंनेच्छति ॥ २३ ॥ रामवीर्यविनारक्षकान्तरशून्यत्वमाह—शून्यसंवरणेत्यादि । शून्यसंवरणारक्षां अविद्यमानप्राकाररक्षकां । यद्वा शून्यसंवरणःगुप्तिरहितः आरक्षः गुल्मस्थानंयस्याः सातथा । अयन्त्रिताः रक्षकाणांरामपारवश्येनतैरबद्धाः हयद्विपाःयस्यास्तां । अपावृतानि अपिहितानि पुरद्वाराणियस्यास्तां । अप्रहृष्टबलत्वमरक्षितत्वेहेतुः । न्यूनां साधनविहीनां । विषमस्थां दुर्दशापन्नां । अना-

वि० सर्वगात्रंतृणैर्विमृदितं क्षुण्णमितिसंबन्धः ॥ १३ ॥ ती० सीतया धृतमितिशेषः । यद्वाषष्ठ्यर्थेतृतीया ॥ १५ ॥ ति० मम कृते कैकेयीप्रवृत्तेस्स्वानुमतिराहित्येपिस्वमुद्दिश्यजातत्वादितिभावः ॥१७॥ स० अनावृतां सर्वतःपुररक्षकैरहितां । एतादृशी-

[पा०] १ ङ. झ. ट. रिदमावर्तितंशुभं. २ क. च. ञ. गात्रंविमृदितंतृणैः. ३ क. ख. च.ज. ञ. शयनेतदा. ङ. छ. झ. ट. शयनेशुभा. ग. शयनेशुभे. ४ ख. तत्रतत्रच. ५ क. सिक्ताः. ६ च. तया. ७ ज. कनकतन्तवः. ८ क—म. हतोस्मि. ९ ङ. छ. झ. ट. नृशंसोस्मि. १० घ. यःपितुःसदृशोमम. ११ क—ट. लोकसुखावहः. १२ ङ. छ. झ. ट. सर्वप्रियकरस्त्यक्त्वा. ख. च. ञ. सर्वलोकप्रियंत्यक्त्वा. १३ क. ख. ङ—ट. प्रियं. १४ च. ञ. महाबाहुः. १५ ङ. च. छ. झ. ञ. ट. मे. १६ ङ. छ. झ. ट. वनेनिवसतः. १७ क. ङ. च. छ. झ. ञ. ट. अनावृत. १८ ग. गृहद्वारां. १९ च. झ. शून्यां. २० घ. नानुमन्यन्ते. २१ क. घ. च—ट. भक्ष्यान्.

अद्यप्रभृति भूमौ तु शयिष्येऽहं [1]तृणेषु वा ॥ फलमूलाशनो नित्यं जटाचीराणि धारयन् ॥ २६ ॥
[2]तस्यार्थमुत्तरं कालं निवत्स्यामि सुखं वने ॥ [3]तं प्रतिश्रवमामुच्य [4]नास्य मिथ्या भविष्यति ॥२७॥
वसन्तं भ्रातुरर्थाय शत्रुघ्नो माऽनुवत्स्यति ॥ लक्ष्मणेन [5]सह त्वार्यो ह्ययोध्यां पालयिष्यति ॥ २८ ॥
अभिषेक्ष्यन्ति काकुत्स्थमयोध्यायां [6]द्विजातयः ॥ अपि मे देवताः कुर्युरिमं सत्यं मनोरथम् ॥ २९ ॥
प्रसाद्यमानः शिरसा मया स्वयं बहुप्रकारं यदि [7]नाभिपत्स्यते ॥
ततोऽनुवत्स्यामि चिराय राघवं [8]वने वसन्नार्हति मामुपेक्षितुम् ॥ ३० ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे अष्टाशीतितमः सर्गः ॥ ८८ ॥

एकोननवतितमः सर्गः ॥ ८९ ॥

प्रभातेभरतमुपागतवतागुहेनदाशान्प्रतिनौकानयनचोदना ॥ १ ॥ दाशैर्भरतादीनांनौकादिसाधनैर्गङ्गातारणम् ॥ २ ॥ भरतेनप्रयागवनेसेनान्निवेशनपूर्वकंभरद्वाजदिदृक्षयावसिष्ठादिसाहित्येनतदाश्रमंप्रतिप्रस्थानम् ॥ ३ ॥

[9]व्युष्य रात्रिं तु तत्रैव गङ्गा[10]कूले स राघवः ॥ [11]भरतः काल्यमुत्थाय शत्रुघ्नमिदमब्रवीत् ॥ १ ॥
[12]शत्रुघ्नोत्तिष्ठ किं शेषे निषादाधिपतिं गुहम् ॥ शीघ्रमानय भद्रं ते तारयिष्यति वाहिनीम् ॥ २ ॥
जागर्मि नाहं स्वपिमि [13]तमेवार्यं विचिन्तयन् ॥ इत्येवमब्रवी[14]द्भ्रात्रा शत्रुघ्नोपि प्रचोदितः ॥ ३ ॥

वृतां बाह्यरक्षकरहितां । नाभिमन्यन्ते अभिभवितुंन स्मरन्ति । भक्षान् अपूपादीन् ।विषैः विषमिश्रैःकृतान् ॥२४—२५॥ उक्तसर्वानर्थस्यआत्ममूलकतयातत्प्राय-श्चित्तमाह—अद्येत्यादि । श्लोकद्वयमेकान्वयं । तंप्रति-श्रवं तांप्रतिज्ञां । आमुच्य स्वस्मिन्नासज्य । तस्यार्थं रामार्थमित्यर्थः । उत्तरंकालं चतुर्दशवर्षात्मकेकालेरा-मानुष्ठितव्यतिरिक्तोत्तरकालं वनेवत्स्यामि मिथ्यान भविष्यति प्रतिज्ञेतिशेषः ॥ २६—२८ ॥ देवताः इमंमनोरथंसत्यंकुर्युरपि । संभावनायामपिशब्दः ॥ २९ ॥ शिरसाप्रणामपूर्वकंस्वयं नतुमन्त्रिमुखेन । नाभिपत्स्यते नाङ्गीकरिष्यति । प्रसादमितिशेषः । ततस्तदा । वनेवसन् राघवमनुवत्स्यामि तदनुचरोभ-वामि । अनुचरणंवाकथमङ्गीकरिष्यतीत्यत्राह—ना-र्हतिमामुपेक्षितुमिति । मां भ्रातरंशिष्यंदासमित्यर्थः ॥३०॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायण-भूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने अष्टाशीतितमः सर्गः ॥ ८८ ॥

व्युष्य उषित्वा । रात्रिं रात्रौ । तत्रैव यत्ररामो-शयिष्टतत्रैव । काल्यं प्रत्यूषः । “ प्रत्यूषोहर्मुखंका-ल्यम् ” इत्यमरः । तस्मिन्नित्यर्थः ॥ १ ॥ शत्रुघ्नभद्रं तइति सान्त्वोक्तिः । वाहिनीं गङ्गां । अस्मानित्यर्थ-सिद्धं ॥ २ ॥ नाहंस्वपिमिजागर्मीति भ्रात्राप्रचोदितः शत्रुघ्नोपि तमेवार्यं यस्त्वयाचिन्त्यतेतमेवार्यंविचिन्त-यन्सन् । अहमपिजागर्मि नस्वपिमि इत्येवमब्रवीत् । तथैवेतिपाठे यथात्वं तथैवाहमार्यंविचिन्तयन्नित्यर्थः । चरमपर्वनिष्ठस्यप्रथमपर्वाभिनिवेशस्तत्प्रीत्यर्थतयेति व्यञ्जितं । “ तदवस्थंतुभरतंशत्रुघ्नोऽनन्तरस्थितः ”

मपिविषकृतान्मरणशङ्कयायथानाभिमन्यन्ते तथारामभियानेच्छन्तीत्यर्थः । शि० विषमस्थां विषमाणांअनवस्थितचित्तानांस्थः स्थितिर्यस्यां । शत्रवोनाभिमन्यन्ते तेनरामस्यप्रतापातिशयस्सूचितः ॥ २५ ॥ ति० तस्यव्रतसंकल्पंस्वयंगृहीत्वातत्परिपालनार्थं उत्तरंकालं चतुर्दशवर्षपर्यन्तं । अहंवनेवत्स्यामि । शि० तस्यरामस्यप्रतिनिधिरहं ॥ २७ ॥ इत्यष्टाशीतितमस्सर्गः ॥ ८८ ॥

शि० शत्रुघ्न त्वंकिंशेषे उत्तिष्ठेत्यर्थः । तत्प्रयोजनमाह उत्थायगुहंशीघ्रमानय ॥ २ ॥

[पा०] १ च. तृणेषुच. २ ङ. छ. झ. ञ. ट. तस्याहमुत्तरं. ग. तदर्थमुत्तरं. ३ ङ. छ. झ. ट. तत्प्रतिश्रुतमार्यस्यनैवमि-थ्या. ४ ग. नहि. ५ ङ. छ. झ. ट. सहायोध्यामार्योमे. ६ ग. द्विजोत्तमाः. ७ क. ख. ग. च—ट. नप्रपत्स्यते. ङ. नप्रपत्स्यति. ८ ङ. छ. ट. वनेचिरंनार्हति. झ. वनेचरंनार्हति. ९ ख. उषित्वातत्ररात्रिंतु. ग. उषित्वातत्रतांरात्रिं. १० ज. तीरे. ११ ङ. छ. झ. ज. ञ. ट. काल्यमुत्थायशत्रुघ्नमिदंवचनमब्रवीत्. च. भरतःकल्यं. १२ ङ. छ. झ. ट. शत्रुघ्नोत्थाय. १३ क—ट. तथैवार्यं. १४ ख. ग. ङ. च. ज—ट. भ्राताशत्रुघ्नोविप्रचोदितः.

इति संवदतोरेवमन्योन्यं नरसिंहयोः ॥ आगम्य[1] प्राञ्जलिः काले गुहो भरतं[2]मब्रवीत् ॥ ४ ॥
कच्चित्सुखं नदीतीरेऽवात्सीः काकुत्स्थ शर्वरीम् ॥ कच्चित्ते[3] सहसैन्यस्य तावत्सर्वं[4]मनामयम् ॥ ५ ॥
गुहस्य तंत्तु[5] वचनं श्रुत्वा स्नेहादुदीरितम् ॥ रामस्यानुवशो वाक्यं भरतोपीदमब्रवीत् ॥ ६ ॥
सुखा नः शर्वरी राजन्[6]पूजिताश्चापि ते वयम् ॥ गङ्गां तु नौभिर्बह्वीभिर्दाशाः संतारयन्तु नः ॥ ७॥
ततो गुहः संत्वरितं[7] श्रुत्वा भरतशासनम् ॥ प्रतिप्रविश्य नगरं[8] तं ज्ञातिजन[9]मब्रवीत् ॥ ८ ॥
उत्तिष्ठत प्रबुध्यध्वं भद्रमस्तु[10] च वः सदा ॥ नावः संमनुकर्षध्वं[11] तारयिष्याम वाहिनीम् ॥ ९ ॥
ते तथोक्ताः समुत्थाय त्वरिता राजशासनात् ॥ पञ्च नावां शतान्याशु[12] समानिन्युः समन्ततः[13] ॥१०॥
अन्याः स्वस्तिकविज्ञेया महाघण्टाधरा[14] वराः ॥ शोभमानाः पताकाभिर्युक्तवाताः[15] सुसंहताः[16] ॥११॥
ततः स्वस्तिकविज्ञेयां पाण्डुकम्बलसंवृताम् ॥ सनन्दिघोषां कल्याणीं गुहो नावमुपाहरत् ॥
तामारुरोह भरतः शत्रुघ्नश्च महाबलैः[17] ॥ १२ ॥
कौसल्या च सुमित्रा च याश्चान्या राजयोषितः ॥ पुरोहितश्च तत्पूर्वं गुरवो ब्राह्मणाश्च ये ॥
अनन्तरं राजदारास्तथैव शकटापणाः ॥ १३ ॥
आवासमादीपयतां तीर्थं[18] चाप्यवगाहताम् ॥ भाण्डानि चाददानानां घोषस्त्रिदिवमस्पृशत्[19] ॥१४॥

इतिहिपूर्वमप्युक्तं ॥ ३ ॥ संवदतोःसतोः काले गमनोचितकाले ॥ ४ ॥ शर्वरींतावत् शर्वर्यासाकल्येन । "यावत्तावच्चसाकल्ये" इत्यमरः । सहसैन्यस्यते सेनासहितस्यतव । सर्वमुपकरणं अनामयं निरुपद्रवं ॥ ५ ॥ रामस्यानुवशः रामायत्तः ॥ ६ ॥ सुखा सुखावहा . जातेतिशेषः । राजन्निति रामभक्ततया स्तौति । ते त्वया ॥ ७ ॥ प्रतिप्रविश्य पुनःप्रविश्य ॥ ८ ॥ प्रबुध्यध्वं उत्तिष्ठतेतिक्रमः । तारयिष्यामेत्यत्रविसर्गलोपआर्षः । तारयिष्यामीतिचपाठः ॥ ९ ॥ नावांपञ्चशतानीत्यन्वयः । समन्ततः सर्वावतारेभ्यः ॥ १० ॥ अन्याः क्षुद्राभ्यःपञ्चशतनौभ्यःअन्याः । स्वस्तिकविज्ञेयाः स्वस्तिकःसर्वतोभद्रइत्युक्तस्वस्तिकाख्यरचनाविशेषविशिष्टतयानिर्मितत्वात्स्वस्तिकाइतिविज्ञेयाः । ताश्चनौद्वयसंघटनेनसंपद्यन्ते । चतुर्पुकोणेषुमहाघण्टाधराः वराः राजार्हतयाश्रेष्ठाः । शोभमानाः कनकरूषिततयाशोभमानाः । युक्तवाताः फलककुड्यकरणेन मध्येमध्येगवाक्षनिर्माणेनच महावातनिवारणादुचितवाताः । सुसंहताः राजारोहणस्थानत्वेनायसकीलादिभिर्दृढसंधिबन्धाः । अत्रापिनावआनिन्युरित्यनुकृष्यते ॥ ११ ॥ ततः तासु स्वस्तिकविज्ञेयादिपुमध्ये। पाण्डुकम्बलेनसंवृतां आच्छन्नतलप्रदेशां। सनन्दिघोषां हर्षजनककिङ्किण्यादिघोषयुक्तां। कल्याणीं शोभनां ॥ १२ ॥ भरतशत्रुघ्नव्यतिरिक्तानामन्यासुनौष्वारोहणक्रममाह—कौसल्येत्यादिना । राजयोषितः आगताइतिशेषः । तत्पूर्वं तासांपूर्वं । पुरोहितोगुरवोब्राह्मणाश्चयेआगतास्तेआरुरुहुः । अनन्तरंराजदाराःकौसल्यादयः आरुरुहुः । तथैवशकटापणाः शकटाश्चापणस्थपदार्थाश्चारुरुहुः । एतदारोहणंकर्तृद्वारा ॥ १३ ॥ आवासं सेनानिवेशं । आदीपयतां अग्निनाज्वलयतां । राजभटाहिनिर्गमनकालेश्रीस-

स० काले स्मरणकाले ॥ ४ ॥ **ती०** युक्तवाहाः पर्याप्तकर्णधारयुक्ताः । **ति०** पताकिन्यः बह्वरित्रवत्यः । अरित्रंनावाकर्षणदण्डः ॥ ११ ॥ **ति०** सनन्दिघोषां उपरिप्रतिष्ठितमङ्गलवादित्रघोषसहितां ॥ १२ ॥ **शि०** आदीपयतां वस्तुनिरीक्षणार्थं महादीपादिनाप्रकाशंकुर्वतां ॥ १४ ॥

[**पा०**] १ क. च. ज. आगत्य. २ ङ. छ. झ. ट. वचन. ३ क. ख. घ—ट. कच्चिच. ४ ख. ग. घ. तवसर्वं. ङ. छ. ज. झ. ट. तवनित्यं. ५ घ. ज. ट. वचनंतत्तु. ६ ङ. छ. झ. ट. धीमन्. ७ ख. घ. च. ज—ट. संत्वरितः. ८ ग. नगरीं. ९ ज. ज्ञातिमिदं. क. च. झ. ञ. ज्ञातिगणं. घ. तान्ज्ञातीनिदं. १० क. ख. ङ. च. झ. ञ. ट. मस्तुहि. ११ ङ. छ. झ. ट. समुपकर्षध्वं. १२ क. ङ. छ. झ. ञ. ट. शतान्येव. १३ ङ. समाहिताः. १४ ङ. च. छ. झ. ञ. ट. धराधराः. ग. कृतारवाः. १५ क. ग. ट. पताकिन्योयुक्त. ख. ङ. च. छ. झ. ञ. पताकिन्योयुक्तवाहाः. १६ ग. सुसंयताः. घ. सुसंगताः. १७ क. ग. घ. च. ञ. महायशाः. १८ ज. तीर्थंवा. १९ ङ. छ. झ. ट. घोषस्तुदिवं.

पताकिन्यस्तु ता नावः स्वयं दाशैरधिष्ठिताः ॥ वहन्त्यो जनमारूढं तदा संपेतुराशुगाः ॥ १५ ॥
नारीणामभिपूर्णास्तु काश्चित्काश्चिच्च वाजिनाम् ॥ काश्चिदत्र वहन्ति स्म यानयुग्यं महाधनम् ॥ १६ ॥
ताः स्म गत्वा परं तीरमवरोप्य च तं जनम् ॥ निवृत्ताः काण्डचित्राणि क्रियन्ते दाशबन्धुभिः ॥ १७ ॥
सवैजयन्तास्तु गजा गजारोहप्रचोदिताः ॥ तरन्तः स्म प्रकाशन्ते सध्वजा इव पर्वताः ॥ १८ ॥
नावश्चारुरुहुश्चान्ये प्लवैस्तेरुस्तथा परे ॥ अन्ये कुम्भघटैस्तेरुरन्ये तेरुश्च बाहुभिः ॥ १९ ॥
सा पुण्या ध्वजिनी गङ्गा दाशैः सन्तारिता स्वयम् ॥ मैत्रे मुहूर्ते प्रययौ प्रयागवनमुत्तमम् ॥ २० ॥
आश्वासयित्वा च चमूं महात्मा निवेशयित्वा च यथोपजोषम् ॥

मागमार्थमावासंदहन्तीतिप्रसिद्धिः । तीर्थ अवतरणप्रदेशं । अवगाहतां नावारोहणार्थमहमहमिकयाआगच्छतामित्यर्थः । स्नानंकुर्वतामितिवा । भाण्डानि उपकरणानि । आददानानां मदीयमिदंमदीयमिदमिति त्वरयांस्वीकुर्वतांजनानां । घोषस्त्रिदिवमस्पृशत् महान्घोषोजातइत्यर्थः ॥ १४ ॥ पताकिन्यः वाय्वाकर्षणायकृतपताकाः स्वयंसंपेतुः आशुगत्वेनदाशाधिष्ठानमात्रेणानायासेनजग्मुरित्यर्थः ॥ १५ ॥ संप्रतिता नावःकीदृग्विधाइत्यपेक्षायामाह—नारीणामित्यादि । नारीणामभिपूर्णाः नारीभिरभिपूर्णाः । वाजिनामभिपूर्णाः आरोहणार्हवाजिभिरभिपूर्णाः । दध्नःपूर्णइतिमहाभाष्यकारवचनप्रामाण्यात् पूर्णशब्दयोगे "पूरणगुण—" इत्यादिनाषष्ठी तृतीयार्थेषष्ठीवा । यानयुग्यं यानानिरथशकटादीनि युग्यानिअश्वतरबलीवर्दादीनि । "सर्वोद्वन्द्वोविभाषयैकवद्भवति" इत्येकवद्भावः । महाधनं बहुमूल्यं । "बहुमूल्यंमहाधनं" इत्यमरः ॥ १६ ॥ काण्डचित्राणि काण्डे वारिणि चित्राणिचित्रगमनानि । क्रियन्ते अक्रियन्त । "काण्डोस्त्रीदण्डबाणार्ववर्गावसरवारिषु" इत्यमरः । दाशबन्धुभिः दाशाभासैः दाशस्यगुहस्यबन्धुभिरितिवा । भाराभावकृतलाघवातिशयेननिवर्तनकालिकदाशलीलोच्यते ॥ १७ ॥ सवैजयन्ताः सपताकाः सगृहावा । राजानोहिगजोपरिगृहाणिनिर्माययगच्छन्ति । तरन्तः प्लवन्तः । तॄ प्लवनतरणयोः । सध्वजाः सगमनाः । ध्वज गतौ । जंगमपर्वताइवप्रकाशन्तेइत्यर्थः ॥ १८ ॥ नावः क्षुद्रनावः । प्लवैः तृणकाष्ठनिर्मितैः । कुम्भघटैः कुम्भरूपघटैः सूक्ष्मवदनाघटाःकुम्भाः तेहितरणसाधनानि नघटमात्रं । बाहुभिः केवलबाहुभिः ॥ १९ ॥ पुण्या गङ्गास्नानादिनापूता । ध्वजिनी सेना । स्वयं नतुपरप्रेरणेन । मैत्रेमुहूर्ते दिवसस्यपञ्चदशभागेषुघटिकाद्वयात्मकेतृतीयेमुहूर्ते । "द्वेतुनाड्यौमुहूर्तोस्त्री" इतिवैजयन्ती । मुहूर्तसंख्योक्ताबृहस्पतिना "रौद्रः सार्पस्तथामैत्रःपैत्रोवासवएवच । आप्योवैश्वस्तथाब्राह्मप्राजेशैन्द्रास्तथैवच ॥ ऐन्द्राग्नोनैर्ऋतश्चैववारुणार्यमणोभगी । एतेह्निक्रमशोज्ञेयामुहूर्तादशपञ्चच" इति । [तस्यमैत्रनामत्वंविन्ध्यमाधवीयेप्रोक्तं यथा "आर्द्रोरगमित्रमघावसुजलविश्वाभिजिद्विधिश्चेन्द्राः । ऐन्द्राग्नमूलवरुणार्यमभगयुक्तादिवामुहूर्ताःस्युः" इति]।मैत्रेमुहूर्तेतारितासतीप्रयागवनंययावित्यन्वयः । घटिकाषट्क एवगङ्गातरणमितिभावः । यद्वा मैत्रेप्रयागवनंययावित्यन्वयः । तत्रातिथ्येननिरवधिकभोगलाभात् मुहूर्तविशेषोक्तिः ॥ २० ॥ आश्वासयित्वा सान्त्वयित्वा । यथोपजोषं यथासुखं । "तूष्णीमर्थेसुखेजोषं" इतिवैजयन्ती । ऋषिप्रवर्यं ऋषिश्रेष्ठं [आश्वासयित्वेति ।

ती० दाशबन्धुभिः दाशश्रेष्ठैः ॥ १७ ॥ ती० कुंभाः अधिकप्रमाणाः । घटाः न्यूनप्रमाणाः । स० कुंभघटैः कुंभानांघटासमूहोयेपुमश्वादिषुतेतथातैः । षण्डादिशब्दानांवृक्षसमूहवाचकत्वंयथातद्वद्घटाशब्दस्यकरिसमूहवाचिनइतरसमूहवाचकत्वेपिनक्षतिः । यद्वा अन्ये कुंभैःकलशैः घटैःकरिशिरोभिश्चतेरुः । "घटस्समाधिभेदेभशिरःकुंटकटेषुच" इतिविश्वः । कुंभस्स्यादित्यारभ्यद्विपाङ्गेचेतितत्रैवोक्तेर्विपरीतंवा ॥ १९ ॥ शि० पुण्या नित्यंवसिष्ठादिसंसर्गेणपूता । मैत्रेमुहूर्तेप्रयागवनंप्रययौ । एतेन मुहूर्तद्वयेनगङ्गासंतरणमितिसूचितं ॥२०॥ ति० आश्वासयित्वा विश्राम्य । निवेशयित्वा प्रयागवनेस्थापयित्वा । ती० बृहस्पतिरुचथ्यभार्यायांम-

[पा०] १ ख. स्वदाशैः. २ क. ग. ङ. छ—ट. स्काश्चितु. ३ क. ख. ग. ङ. च. छ. झ. ञ. ट. काश्चित्तत्र. ४ ख. ङ. च. छ. झ. ञ. ट. तासु. ५ घ. काण्डचित्राश्च. ६ ग. वैजयन्ताश्च. ७ क. ग. ङ.—ट. गजारोहैःप्रचोदिताः. ८ क. ङ.-च. ञ. ट. तरन्तिस्म. ख. ग. घ. तरन्तश्च. ९ क. ग. च. नावस्त्वारुरुहुश्चान्ये. १० ख. ङ छ. झ. ट. स्त्वन्ये. ११ ख. ग. पुण्या. १२ ख. ग. घ. च. ज. झ. ट. गङ्गां.

द्रष्टुं भरद्वाजमृषिप्रवर्यमृत्विग्वृतः सन्भरतः प्रतस्थे ॥ २१ ॥
स ब्राह्मणस्याश्रममभ्युपेत्य महात्मनो देवपुरोहितस्य ॥
ददर्श रम्योटजवृक्षषण्डं महद्वनं विप्रवरस्य रम्यम् ॥ २२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे एकोननवतितमः सर्गः ॥८९॥

नवतितमः सर्गः ॥ ९० ॥

भरतेनाश्रमात्क्रोशमात्रदेशेसेनादिनिवेशनपूर्वकंवसिष्ठेनसहपादचारेणैवभरद्वाजसमीपगमनम् ॥ १ ॥ तथावसिष्ठभरद्वाजयोःपरस्परसत्कारसमनन्तरंभरद्वाजपादाभिवादनम् ॥ २ ॥ भरद्वाजेनभरतंप्रतिकुशलप्रश्नपूर्वकंरामविषयेतद्भावप्रकारप्रश्नः ॥ ३ ॥ तथाप्रश्नेनपरिखिद्यताभरतेनऋषिंप्रतिस्वागमनस्यायोध्यांप्रतिनिवर्तनार्थकत्वकथनपूर्वकंरामनिवासस्थानप्रश्नः ॥ ४ ॥ तेनहृष्टेनमहर्षिणातंप्रतिचित्रकूटेरामनिवासनिवेदनपूर्वकंस्वाश्रमएवरात्रियापनेनप्रभातेरामसमीपगमनचोदना ॥ ५ ॥

भरद्वाजाश्रमं दृष्ट्वा क्रोशादेव नरर्षभः ॥ बलं सर्वमवस्थाप्य जगाम सह मन्त्रिभिः ॥ १ ॥

महात्मा महामतिः स्वयंखिन्नोपिअखिन्नइवपराश्वासनपरः । भरतः राज्यभरणदक्षः । "भरतइतिराज्यस्य भरणात्" इति सहस्रानीकवचनात् । चमूं महाजनं । अविशेषेणाश्वासयित्वा महानायासोवोजातइतिप्रियोक्तिभिःसान्त्वयित्वा । यथोपजोषं यथासुखं । निवेशयित्वा यत्रप्रदेशेतेषांसुखंभवतितत्रप्रदेशेतान्निवेशयित्वा । प्रवर्षं प्रकृष्टवर्षं बहुवयस्कमितियावत् । "भरद्वाजोहत्रिभिरायुर्भिर्ब्रह्मचर्यमुवासतंहजीर्णिंस्थविरंशयानं" इतिश्रुतेः । एतेनवयोवृद्धत्वमुक्तं । ज्ञानवृद्धत्वमाह—ऋषिमिति । ऋषदर्शनेइतिधातुः । भरद्वाजं "बृहतोभरद्वाजः" इतिश्रुतिप्रसिद्धं] द्रष्टुं दर्शनपूर्वकमभिवन्दितुं । तादृशस्यऋषेर्विनीतवेषदर्शनीयत्वेन ऋत्विग्भिर्वसिष्ठादिभिः वृतःसन् प्रतस्थे पद्भ्यामेवजगाम ॥ २१ ॥ ब्राह्मणस्य ब्रह्मवेदःतदधीतेब्राह्मणः । "तदधीतेतद्वेद" इत्यण्प्रत्ययः । अधीतबहुवेदस्येत्यर्थः । "भरद्वाजोहत्रिभिरायुर्भिर्ब्रह्मचर्यमुवास" इत्यादिनाकाठकेतथाभिधानात् । महात्मनो महाज्ञानस्य । देवपुरोहितस्य बृहस्पतिपुत्रत्वेनदेवपुरोहितत्वं । "आत्मावैपुत्रनामासि" इतिन्यायात् । भरद्वाजोममतास्यायामुचथ्यभार्यायांबृहस्पतेर्जातइतिभागवतेप्रसिद्धम् । आश्रममभ्युपेत्य आश्रममुद्दिश्यगत्वा । प्रथमंतस्यमहद्वनंददर्श । ब्राह्मणस्य ब्रह्म परमात्मानं वेत्तीतिब्राह्मणः । "तदधीतेतद्वेद" इत्यण्प्रत्ययः । उत्तरसर्गरीत्यासमाधिबलेनसमस्तवस्त्वाह्वानक्षमस्येत्यर्थः । यद्वा "ब्रह्मबृहस्पतिः" इतिश्रुत्या ब्रह्मणोबृहस्पतेरपत्यंब्राह्मणःतस्य । महात्मनः महास्वभावस्य अचिन्त्यशक्तेरित्यर्थः । देवपुरोहितस्य देवपुरोहितपुत्रत्वात् । "आत्मावैपुत्रनामासि" इतिश्रुतेः । विप्रवरस्य निरवधिकवेदाध्ययनसंपन्नस्य । "जन्मनाजायतेशूद्रःकर्मणाजायतेद्विजः । वेदाभ्यासेनविप्रत्वंब्रह्मजानातिब्राह्मणः" इत्यादिस्मृतेः । श्रुतिश्चास्यनिरवधिकवेदाध्ययनसंपत्तिंदर्शयति "भरद्वाजयत्तेचतुर्थमायुर्दद्यांकिमेनेनकुर्याइति ब्रह्मचर्यमेवैनेनचरेयमितिहोवाच" इत्यादिना । आश्रममभ्युपेत्य प्राप्य । रम्योटजवृक्षषण्डं रमणीयपर्णशालाप्रान्तवर्तिवृक्षसमूहयुक्तं । रम्यं स्वतएवमनोज्ञप्रदेशं । महत् स्वसेनानिवेशक्षमं वनंददर्श ॥ २२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने एकोननवतितमः सर्गः ॥ ८९ ॥

भरद्वाजाश्रममित्यादिश्लोकद्वयमेकान्वयं । क्रोशादेव क्रोशात्पूर्वमेव क्रोशमात्रव्यवहितदेशइत्यर्थः ।

ममतायांपुत्रमुत्पादयामास । भर्तुर्भियापुत्रंपरित्यक्तुकामांतांदेवाऊचुः । उचथ्यस्यक्षेत्रजत्वेनबृहस्पतेरौरसत्वेनभरद्वाजमनुंभरेतितस्माद्भरद्वाजइति ॥ २१ ॥ इत्येकोननवतितमस्सर्गः ॥ ८९ ॥

स० क्रोशात् ल्यब्लोपनिमित्तापञ्चमी । क्रोशंम्हित्वाय तत्रजनमस्थाप्यजगाम । शि० क्रोशात् भरद्वाजाश्रमंगत्वाज्ञात्वाद्दृष्ट्वेत्यर्थः ॥१॥

[पा०] १ ङ. च. मृषिप्रवीरं. घ. मुनिप्रवर्यं. ख. मृषिंप्रवर्यं. २ ङ. च. छ. झ. ञ. ट. मृत्विक्सदस्यैः. ३ ङ. छ. झ. ट. वृक्षदेशं. च. ञ. वृक्षखण्डं. ४ क. प्रीतिकरंसुरम्यं. ५ ङ. छ. झ. ट. गत्वा. ६ ङ. छ. झ. ट. जनं. ग. तद्बलंनुसमास्थाप्य.

पद्भ्यामेव हि धर्मज्ञो न्यस्तशस्त्रपरिच्छदः ॥ वसानो वाससी क्षौमे [1]पुरोधाय पुरोधसम् ॥ २ ॥
ततः[2] संदर्शने तस्य [3]भरद्वाजस्य राघवः ॥ मन्त्रिणस्तानवस्थाप्य जगामानुपुरोहितम् ॥ ३ ॥
वसिष्ठमथ दृष्ट्वैव भरद्वाजो महातपाः ॥ संचचालासनात्तूर्णं शिष्यानर्घ्यमिति ब्रुवन् ॥ ४ ॥
समागम्य वसिष्ठेन भरतेनाभिवादितः ॥ अबुध्यत महातेजाः सुतं दशरथस्य तम् ॥ ५ ॥
ताभ्यामर्घ्यं च पाद्यं च दत्त्वा पश्चात्फलानि च ॥ आनुपूर्व्याच्च धर्मज्ञः पप्रच्छ कुशलं कुले ॥ ६ ॥
अयोध्यायां बले कोशे मित्रेष्वपि च [4]मन्त्रिषु ॥ जानन्दशरथं वृत्तं न राजानमुदाहरत् ॥ ७ ॥
वसिष्ठो भरतश्चैनं पप्रच्छतुरनामयम् ॥ शरीरेऽग्निषु [5]वृक्षेषु शि[6]ष्येषु मृगपक्षिषु ॥ ८ ॥
[7]तथेति तत्प्रतिज्ञाय [8]भरद्वाजो महा[9]तपाः ॥ भरतं प्रत्युवाचेदं राघवस्नेहबन्धनात् ॥ ९ ॥
किमिहागमने कार्यं तव राज्यं प्रशासतः ॥ एतदाचक्ष्व मे[10] सर्वं न हि मे शुध्यते मनः ॥१०॥
सुषुवे यममित्रघ्नं कौसल्या नन्[11]दवर्धनम् ॥ भ्रात्रा सह सभार्यो यश्चिरं प्रव्राजितो वनम् ॥ ११ ॥
नियुक्तः [12]स्त्रीनियुक्तेन पित्रा योसौ महायशाः ॥ वनवासी भवेतीह समाः किल चतुर्दश ॥ १२ ॥
कच्चिन्न तस्यापापस्य पापं कर्तुमिहेच्छसि ॥ अकण्टकं भोक्तुमना राज्यं तस्या[13]नुजस्य [14]च ॥ १३ ॥
एवमुक्तो भरद्वाजं भरतः प्रत्युवाच ह ॥ पर्यश्रुनयनो दुःखाद्वाचा संसज्जमानया ॥ १४ ॥
हतोस्मि यदि मामेवं [15]भगवानपि मन्यते ॥ मत्तो न दोषमाशङ्के [16]नैवं माम[17]नुशाधि हि ॥ १५ ॥

न्यस्तशस्त्रपरिच्छदः परिच्छदः आभरणादिकं भृङ्गाराद्युपकरणजातंच । वसानोवाससीक्षौमे भरद्वाजसेवार्थमुष्णीषकञ्चुकादिकमपहायपरिधानमुत्तरीयंचधृत्वागतइत्यर्थः । ननुपूर्वंजटाचीराणिधारयन्नित्युक्तं जटिलंचीरवसनमितिचवक्ष्यति कथमत्रक्षौमवासस्त्वमुच्यते । नैषदोषः । पूर्वंप्रतिज्ञामात्रंकृतंभरद्वाजाश्रमात्परंजटाधारणमिति । पुरोधाय पुरस्कृत्य ॥१—२॥ संदर्शने दूरादर्शने । राघवः रघुवंशवृत्ताभिज्ञः । अनुपुरोहितं पुरोहितस्यपश्चात् । अनोःपश्चादर्थेऽव्ययीभावः ॥ ३ ॥ संचचाल उदतिष्ठत् । अर्घ्यं आनयतेतिशेषः ॥ ४ ॥ समागम्येति सवयस्कत्वान्नमस्काराभावः । अबुध्यतेति वसिष्ठसाहचर्यादितिभावः ॥ ५ ॥ आनुपूर्व्यात् प्रधानक्रमात् । धर्मज्ञः पूजाक्रमधर्मज्ञः । कुले गृहे ॥ ६ ॥ वृत्तं अतीतं मृतमितियावत् । नोदाहरत् तत्प्रसङ्गमेवनकृतवान् ॥ ७ ॥ तपोधनानांशरीराग्न्यादेस्तपस्साधनत्वात् मृगपक्ष्यादीनामाश्रमवासित्वेनशिष्यवत्प्रीतिविषयत्वाच्च तद्विषयःप्रश्नःकृतइत्याह—वसिष्ठइत्यादिना ॥ ८ ॥ तथेतितत्प्रतिज्ञाय सर्वत्रतत्पृष्टमनामयमङ्गीकृत्य । राघवस्नेहबन्धनात् राघवविषयेस्नेहानुबन्धनात् नतु भरतेदोषदर्शनात् ॥ ९ ॥ नशुध्यते शुद्धिंनप्राप्नोति । नविश्वसितीतीतियावत् ॥ १० ॥ सुषुवइत्यादिश्लोकत्रयमेकान्वयं । नन्दवर्धनं आनन्दवर्धनं । चिरंप्रव्राजितः चिरकालमुद्दिश्यप्रव्राजितः । यःएतादृशः तस्य रामस्य राज्यमकण्टकंभोक्तुमनाः अपापस्यतस्यानुजस्यचपापंकर्तुंनेच्छसिकच्चिदितिसंबन्धः ॥ ११—१३ ॥ पर्यश्रुनयनः परिप्लुताश्रुनयनः । संसज्जमानया स्खलन्त्या ॥ १४ ॥ हतोस्मि व्यर्थज-

---

स० क्षौमे चीरे ॥ २ ॥ ति० संदर्शनेआश्रमप्रवेशानन्तरमृषिदर्शनावसरे । शि० संदर्शने संदर्शनार्थं ॥ ३ ॥ शि० वसिष्ठेनसमागम्य परस्परंनमस्कारपूर्वकमालिङ्ग्य ॥५॥ शि० प्रव्राजितः साक्षात्परंपरयावायुष्माभिरितिशेषः । एतेनभवत्स्वकार्यकर्मकारित्वंप्रतीयतइतिसूचितं ॥ ११ ॥ शि० अपापस्य पापनिवर्तकस्यरामस्य । स० रामहननेराज्यमकण्टकंभवतीतिअकण्टकंभोक्तुमनाः । तस्य रामस्यानुजस्यलक्ष्मणस्यच । पापं वधरूपं ॥ १३ ॥ हतोस्मि हतप्रायोस्मि ॥ १५ ॥

[पा०] १ क.—च. ज.—ट. पुरोधायपुरोहितं. छ. पुरोहितपुरस्सरं. २ ख. तत्र. ३ क. च. ञ. महर्षेःसहि. ४ घ. बन्धुषु. ५ ग. झ. शिष्येषुवृक्षेषु. ६ क. ख. ङ. च. ञ. ट. मृगेष्वपिचपक्षिषु. ७ ज. तथैवतंप्रतिज्ञाय. ख. घ. तथैवेति. क. ञ. ञ. तथेतिच. ङ. छ. झ. ट. तथेतितु. ग. सतथेति. ८ घ. ट. भारद्वाजो. ९ ख. घ.—झ. ट. महायशाः. १० झ. ट. सर्वंमे. ११ ख. ग. नन्दिवर्धनं. १२ ङ. च. छ. झ. ञ. ट. स्त्रीनिमित्तेन. १३ ख. घ. तस्याग्रजस्य. १४ क. ग. च. ञ. वै. १५ ङ. छ. ट. भगवानभि. १६ क. ख. च. छ. झ. ञ. ट. मैवं. १७ ख. ज. मनुशास्ति.

न चैतदिष्टं माता मे यदवोचन्मदन्तरे ॥ नाहमेतेन तुष्टश्च न तद्वचनमाददे ॥ १६ ॥
अहं तु तं नरव्याघ्रमुपयातः प्रसादकः ॥ प्रतिनेतुमयोध्यां च पादौ तस्याभिवन्दितुम् ॥ १७ ॥
त्वं मामेवं गतं मत्वा प्रसादं कर्तुमर्हसि ॥ शंस मे भगवन्रामः क्व संप्रति महीपतिः ॥ १८ ॥
वसिष्ठादिभिर्ऋत्विग्भिर्याचितो भगवांस्ततः ॥ उवाच तं भरद्वाजः प्रसादाद्भरतं वचः ॥ १९ ॥
त्वय्येतत्पुरुषव्याघ्र युक्तं राघववंशजे ॥ गुरुवृत्तिर्दमश्चैव साधूनां चानुयायिता ॥ २० ॥
जाने चैतन्मनस्स्थं ते दृढीकरणमस्त्विति ॥ अपृच्छं त्वां तथाऽत्यर्थं कीर्तिं समभिवर्धयन् ॥ २१ ॥
जाने च रामं धर्मज्ञं ससीतं सहलक्ष्मणम् ॥ असौ वसति ते भ्राता चित्रकूटे महागिरौ ॥ २२ ॥
श्वस्तु गन्तासि तं देशं वसाद्य सह मन्त्रिभिः ॥ एतं मे कुरु सुप्राज्ञ कामं कामार्थकोविद ॥ २३ ॥

ततस्तथेत्येवमुदारदर्शनः प्रतीतरूपो भरतोऽब्रवीद्वचः ॥
चकार बुद्धिं च तदा तदाश्रमे निशानिवासाय नराधिपात्मजः ॥ २४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे नवतितमः सर्गः ॥ ९० ॥

न्मास्मि । भगवानपि भूतभविष्यद्वर्तमानज्ञोपीत्यर्थः । मत्तः मत्सकाशात् । मयिदोषंनाशङ्के नोत्प्रेक्षे । मत्कृतोदोषोनास्तीतिसंदेहोपिमेनास्तीत्यर्थः । अभावादितिभावः । अतोमामेवंनानुशाधि एवंकर्णारुन्तुदंवक्तुंनार्हसि ॥ १५ ॥ मातृकृतंत्वत्कृतमेवेत्याशङ्क्याह—नेति । मदन्तरे मदसंनिधौ । नाददे नाङ्गीकृतवानस्मि ॥ १६ ॥ प्रसादकः प्रसादयितुं । "तुमुन्ण्वुलौक्रियायांक्रियार्थायां" इतिण्वुल् ॥ १७ ॥ एवंगतं एवंबुद्ध्वाप्राप्तं । महीपतिः वर्ततइतिशेषः ॥१८॥ याचितः भरतायप्रसन्नोभवेतिप्रार्थितः । प्रसादादुवाच प्रसादंप्राप्योवाच । ल्यब्लोपेपञ्चमी ॥ १९ ॥ गुरुवृत्तिः ज्येष्ठानुवर्तनं । दमः इन्द्रियनिग्रहः । राज्यालोलत्वमितियावत् । साधूनांचानुयायिता सच्चित्तानुवर्तनं । इत्येतत्त्रयंत्वयियुक्तमित्यन्वयः ॥ २० ॥ जाने योगप्रभावेनेतिशेषः । दृढीकरणमस्त्वित्यपृच्छं । स्थूणानिखननन्यायेनदृढीकर्तुमपृच्छमित्यर्थः । कीर्तिं रामविषयसौभ्रात्रजनितां । समभिवर्धयन् । "लक्षणहेत्वोःक्रियायाः" इतिहेत्वर्थेशतृप्रत्ययः ॥ २१ ॥ रामंजाने देशविशेषेस्थितंरामंजानइत्यर्थः ॥ २२ ॥ कामंअभीष्टं । कामार्थकोविद काङ्क्षितार्थप्रदानदक्षेत्यर्थः ॥ २३ ॥ प्रतीतरूपः प्रसिद्धकीर्तिः । "रूपंयशस्याभिरूप्येवर्णेचैवनिरूपणे" इतिनिघण्टुः । यद्वा प्रतीतरूपः प्रकर्षेणहृष्टः । प्रशंसायांरूपप् । चकारबुद्धिंचेति नह्युक्तिरन्याबुद्धिरन्येतिभावः ॥२४॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने नवतितमः सर्गः ॥ ९० ॥

ती० मदन्तरे मयाविना । **ति०** मदन्तरे मद्विषये । यत्तुमयाविनेत्यर्थइति तन्न । अन्तरेणेत्यव्ययस्यैवतदर्थत्वात् । ममत्ववसरवाचीअन्तरशब्दइतिनदोषः । **शि०** मदन्तरे ममअन्तरःदूरगमनंयस्मिन्काले तस्मिन् ॥ १६ ॥ **ति०** दृढीकरणमन्यथाभावान्निवृत्तिः । बहूनामग्रेउक्तोह्यर्थोनान्यथाकर्तुंशक्यते । मुख्यप्रयोजनमाह—कीर्तिंसमभिवर्धयन् । असर्वज्ञजनंप्रतीतिशेषः । हेतौशता । कीर्त्यभिवृद्धिहेतवेऽपृच्छमित्यर्थः ॥ २१ ॥ **स०** कामार्थे कामितार्थे तद्दानइतियावत् । कोविद । यद्वा सुप्राज्ञेत्युपसर्गद्वयेनधर्मविषयकज्ञानवत्त्वस्योक्तत्वादत्रकामार्थयोःकोविदेत्यर्थः ॥ २३ ॥ **शि०** उदारदर्शनः उदारंभरद्वाजौदार्यंपश्यतिसः । प्रतीतरूपः प्रतीतंबोधितंरूपंरामानुयायित्वरूपस्वरूपंयेनसभरतः ॥ २४ ॥ इतिनवतितमस्सर्गः ॥ ९० ॥

[पा०] १ ख. ङ. छ. ज. झ. ट. चास्याभि. ग. चप्रतिवन्दितुं. २ ङ. च. छ. झ. ञ. ट. तं. ३ ग. गतिं. ४ ङ. छ. ट. भगवान्. ५ ख. घ. ज. वसत्यसौ. ६ क. घ. ज. साधूनामनु. ७ क.—घ. च. छ. ज. ट. आपृच्छं. ८ क.—घ. च.—झ. ट. तवात्यर्थं. ९ ङ. छ. झ. ट. अयं. १० ञ. एनं. ११ ङ. छ. ट. महाश्रमेतदा. क.—घ. ज. तदामहाश्रमे. झ. तदाश्रमेतदा.

एकनवतितमः सर्गः ॥ ९१ ॥

ससैन्यपरिवारायभरतायतपोमहिम्नाभरद्वाजकृतात्यद्भुतातिथ्यकरणप्रकारवर्णनम् ॥ १ ॥

कृतबुद्धिं निवासाय तत्रैव स मुनिस्तदा ॥ भरतं कैकयीपुत्रमातिथ्येन न्यमन्त्रयत् ॥ १ ॥
अब्रवीद्भरतस्त्वेनं नन्विदं भवता कृतम् ॥ पाद्यमर्घ्यं तथाऽऽतिथ्यं वने यदुपपद्यते ॥ २ ॥
अथोवाच भरद्वाजो भरतं प्रहसन्निव ॥ जाने त्वां प्रीतिसंयुक्तं तुष्येस्त्वं[1] येनकेनचित् ॥ ३ ॥
सेनायास्तु तवैतस्याः[2] कर्तुमिच्छामि भोजनम् ॥ मम प्रीतिर्यथारूपा त्वमर्हो[3] मनुजाधिप ॥ ४ ॥
किमर्थं चापि[5] निक्षिप्य दूरे[6] बलमिहागतः ॥ कस्मान्नेहोपयातोसि सबलः पुरुषर्षभ ॥ ५ ॥
भरतः प्रत्युवाचेदं प्राञ्जलिस्तं[7] तपोधनम् ॥ ससैन्यो[8] नोपयातोस्मि भगवन्भगवद्भयात् ॥ ६ ॥
राज्ञा[9] च भगवन्नित्यं राजपुत्रेण वा सदा[10] ॥ यत्नतः परिहर्तव्या विषयेषु[11] तपस्विनः ॥ ७ ॥
वाजिमुख्या मनुष्याश्च मत्ताश्च वरवारणाः ॥ प्रच्छाद्य भगवन्[12]भूमिं महतीमनुयान्ति माम् ॥ ८ ॥
ते वृक्षानुदकं भूमिमाश्रमेषूटजांस्तथा ॥ न हिंस्युरिति तेनाहमेक एव[13] समागतः ॥ ९ ॥
आनीयतामितः सेनेत्याज्ञप्तः परमर्षिणा ॥ ततस्तु[14] चक्रे भरतः सेनायाः समुपागमम् ॥ १० ॥
अग्निशालां प्रविश्याथ[15] पीत्वाऽपः परिमृज्य च ॥ आतिथ्यस्य[16] क्रियाहेतोर्विश्वकर्माणमाह्वयत् ॥११॥
आह्वये विश्वकर्माणमहं त्वष्टारमेव च ॥ आतिथ्यं कर्तुमिच्छामि तत्र[17] मे संविधीयताम् ॥ १२ ॥

तत्रैवाश्रमेनिवासाय कृतबुद्धिं निश्चितबुद्धिंभरतं समुनिःआतिथ्येन भोजनपर्यन्तातिथिसत्काराय न्यमन्त्रयत् प्रार्थयामास ॥ १ ॥ वनेयत्फलमूलादिकं । उपपद्यते लभ्यते । तेनतापसाहारेणातिथ्यंकृतंननु एतावन्मात्रेणतुष्टोस्मीतिभावः ॥२॥ प्रहसन्निव प्रहासावेदकानुभावयुक्तेत्यर्थः । मुनिरितःपरंकिंकरिष्यतीतिभरताशयज्ञानेनहासः । त्वांप्रीतिसंयुक्तं मद्विषये संतुष्टंजाने । अतएवकेनचिदुपचारेणतुष्येः तुष्टोभवेः ॥ ३ ॥ भुज्यतइतिभोजनमन्नं । अत्रादौतथापीत्युपस्कार्यं । तथापिममप्रीतिर्यथारूपा यादृशप्रकारा तथात्वमर्हः त्वंतथाप्रीतोभवितुमर्हइत्यर्थः । तथानुमन्तुमर्हसीत्यर्थोवा ॥ ४ ॥ उक्तमेवार्थंव्यतिरेकमुखेनाप्याह—कस्मादित्यादिना ॥ ५ ॥ भगवद्भयात् भवान्कुप्येदितिभयात् ॥ ६ ॥ विषयेषुतपस्विनः स्वकीयदेशेषुवर्तमानाऋषयः । यत्नतःपरिहर्तव्याः ससैन्येनतत्समीपंनगन्तव्यमित्यर्थः ॥ ७ ॥ कोपनिमित्तमाह—वाजिमुख्याइत्यादिना । उटजान् पर्णशालाः॥८—९॥ ततः सेनानिवेशस्थलात् । इतः इह । समुपागमं समानयनं ॥ १० ॥ अग्निशालाप्रवेशःपावनत्वार्थः । देवतासन्निधानस्थलत्वात् । अपःपीत्वा त्रिरितिशेषः । "त्रिराचामेत्" इतिश्रुतेः । परिमृज्य आस्यंद्विरितिशेषः । "द्विःपरिमृज्य" इतिश्रुतेः । चकारेण "सकृदुपस्पृश्यशिरश्चक्षुषीनासिकेश्रोत्रेहृदयमारभ्य " इत्युक्तसंग्रहः । अनेनसर्वकर्माङ्गमाचमनमितिदर्शितं । क्रियाहेतोः करणनिमित्तं ॥ ११ ॥ आह्वानमन्त्रमाह—आह्वयइत्यादिना । आह्वयइत्यात्मनेपदमार्षं । विश्वकर्मा सर्वशिल्पकर्ता । त्वष्टातु तक्षणेनगृहादिनिर्माता । यद्वा त्वष्टारमेवचेत्यवधारणेनासुरविश्वकर्मामयोव्या-

---

ति० आतिथ्येन विशिष्टभोजनोपेतातिथिसत्काररूपहेतुना । फलमपिहेतुः ॥ १ ॥ ति० वनवासित्वेनदरिद्रत्वादेतदधिकातिथ्यकरणेऽसामर्थ्यमन्यतद्त्वाशयेन—**प्रहसन्निवेति** ॥ ३ ॥ ति० भगवद्भयात् भगवदाश्रमपीडाप्रसङ्गभयादित्यर्थः ॥ ६ ॥ स० तवराजत्वंकथमितिमुनिश्शङ्केतेतिमत्वाऽऽह—**राजपुत्रेणवेति** । शि० हेभगवन् तपस्विनोविषयेषु तत्समीपवर्तिदेशेषु

[पा०] १ च. तुष्यत्वं. २ ङ. झ. ट. तवैवास्याः. ३ क. तथार्हो. ४ क.—ट. मनुजर्षभ. ५ ख. चविनिक्षिप्य. ६ क. दूरेचबलमागतः. ७ ग. च. प्राञ्जलिस्तु. ८ ङ. छ. झ. ट. नसैन्येनोप. ९ क. ख. ङ. च. छ. झ. ञ. ट. राज्ञाहि. ग. राज्ञातु. १० ङ. च. छ. झ. ट. तथा. ख. ग. सता. ११ च. विषयेतु. १२ क. महतींभूमिंभगवन्ननुयान्ति. १३ क. ख. ङ. च. छ. झ. ञ. ट. एवागतस्ततः. १४ ङ. छ. झ. ट. तथातु. क. ख. घ. च. ञ. तथातु. ग. तथास. १५ घ. प्रविश्याथ. १६ ख. ग. आतिथ्यसत्क्रिया. १७ च. तच्च.

आह्वये लोकपालांस्त्रीन्देवाञ्शक्रमुखांस्तथा ॥ आतिथ्यं कर्तुमिच्छामि तत्र मे संविधीयताम् ॥ १३
प्राक्स्रोतसश्च या नद्यः प्रत्यक्स्रोतस एव च ॥ पृथिव्यामन्तरिक्षे च समायान्त्वद्य सर्वशः ॥ १४ ॥
अन्याः स्रवन्तु मैरेयं सुरामन्याः सुनिष्ठिताम् ॥ अपराश्चोदकं शीतमिक्षुकाण्डरसोपमम् ॥ १५ ॥
आह्वये देवगन्धर्वान्विश्वावसुहहाहुहून् ॥ तथैवाप्सरसो देवीर्गन्धर्वीश्चापि सर्वशः ॥ १६ ॥
घृताचीमथ विश्वाचीं मिश्रकेशीमलम्बुसाम् ॥ नागदन्तां च हेमां च हिमामद्रिकृतस्थलाम् ॥१७॥
शक्रं याश्चोपतिष्ठन्ति ब्रह्माणं याश्च योषितः ॥ सर्वास्तुम्बुरुणा सार्धमाह्वये सपरिच्छदाः ॥ १८ ॥
वनं कुरुषु यद्दिव्यं वासोभूषणपत्रवत् ॥ दिव्यनारीफलं शश्वत्तत्कौबेरमिहैतु च ॥ १९ ॥
इह मे भगवान्सोमो विधत्तामन्नमुत्तमम् ॥ भक्ष्यं भोज्यं च चोष्यं च लेह्यं च विविधं बहु ॥२०॥
विचित्राणि च माल्यानि पादपप्रच्युतानि च ॥ सुरादीनि च पेयानि मांसानि विविधानि च ॥२१

वर्त्यते ।.तत्र आतिथ्यनिमित्तं संविधीयतां गृहादिसंविधानंक्रियतां ॥ १२ ॥ वक्ष्यमाणान्नपानादिरक्षणायलोकपालानाह्वयति—आह्वयइति । शक्रमुखान् इन्द्रप्रधानान् । शक्रस्यपृथङ्गिर्देशात् । त्रींल्लोकपालान् यमवरुणकुबेरान् । देवानित्यग्न्यादयउच्यन्ते । संविधीयतां पालनंक्रियतां ॥ १३ ॥ सर्वानदीर्द्वेधाविभज्याह्वयति—प्राक्स्रोतसइति । सह युगपत् ॥ १४ ॥ तासांकर्तव्यमाह—अन्याइति । अन्याःकाश्चन मैरेयं मिरादेशेभवंखर्जूरादिहेतुकंमद्यविशेषं। सुरां “ गौडीपैष्टीचमाध्वीचविज्ञेयात्रिविधासुरा” इत्युक्तांत्रिविधां सुरां । सुनिष्ठितां सुनिष्पादितां । इक्षुकाण्डरसोपमं काण्डोवर्गः ॥ १५ ॥ गानार्थमाह्वयति—आह्वयइति । देवगन्धर्वान् मनुष्यगन्धर्वभिन्नान् । हहाहुहूनितिच्छान्दसोह्रस्वः। अप्सरसांद्वैविध्यमाह—देवीर्गन्धर्वीरिति । देवीः देवजातीः । गन्धर्वीः गन्धर्वजातीः । अतएव “एतेवैगन्धर्वाप्सरसांगृहाः” इति श्रौतप्रयोगः ॥ १६ ॥ आवश्यकत्वेनप्रधानाप्सरसोविशिष्याह्वयति—घृताचीमित्यादिना । घृतवदच्यतेपूज्यतइतिघृताची । विश्वैःसमस्तैःअच्यतइतिविश्वाची । मिश्रकेशीं निरन्तरकेशीं श्रेष्ठकेशींवा । बुसेभ्योलमलंबुसां बुसाबुधाः देवाः वर्णविपर्ययः । नागानांदन्ताइवशुभ्राःदन्ताः यस्यास्तांनागदन्तां । हेमां हेमवर्णां । पुनश्चहेमामितिपाठे पूर्वोक्तहेमापेक्षयाअस्याव्यावृत्तिमाह—अद्रिकृतस्थलामिति । अद्रौमहेन्द्रेमयेनकृतनिवासां स्वयंप्रभाबिलस्थामित्यर्थः । हिमामितिपाठे हिमवच्छीतलाङ्गीं । यद्वा हिममस्यास्तीतिहिमा । अद्रिकृतस्थलाचान्या । एवमेतान्यन्वर्थनामानि ॥ १७ ॥ शक्रंयाउपतिष्ठन्ति रम्भोर्वशीमेनकादयः । ब्रह्माणं चतुर्मुखं । तल्लोकेप्यप्सरसः सन्ति । “ तंपञ्चशतान्यप्सरसांप्रतिधावन्ति ” इतिश्रुतेः । इदंचमतान्तरमनुसृत्योक्तं । तुम्बुरुणा तासांगानशिक्षकेण । सपरिच्छदाः नृत्यगीताद्युपकरणसहिताः सालंकारावा ॥ १८ ॥ भोगोपकरणान्याहूयभोगस्थानान्याह्वयति—वनमिति । वनं चैत्ररथाख्यं । तच्चोत्तरकुरुदेशेवर्तते । दिव्यं देवार्हं । वासोभूषणान्येवपत्राण्यस्मिन्सन्तीतिवासोभूषणपत्रवत् । शश्वत् सर्वदा । दिव्यनार्यएवफलानियस्मिंस्तत्तथा एवंभूतंयत्कौबेरमस्ति तत् इहवने एतु आगच्छतु । उत्तरदिक्पालत्वेनकुबेराधिष्ठितत्वात्कौबेरमित्युक्तं । इयंचकुबेरंप्रत्येवोक्तिः । नदीनामिववनस्याह्वानं तदधिष्ठातृदेवताद्वारा ॥ १९ ॥ एवंकुबेरंप्रत्युक्त्वाऽन्नपतिंचन्द्रंप्रत्याह—इहेति । मे मन्निमित्तं । भगवान् माहात्म्यवान् । सोमः ओषधीनामधिपतिश्चन्द्रः उत्तममन्नं विधत्तां संपादयतु । अन्नंचतुर्विधत्वेनविशेषयति—भक्ष्यमित्यादि । भक्ष्यं खाद्यमपूपादि । भोज्यं ओदनादि । चोष्यं शुष्कादि । लेह्यं रसायनादि । विविधं एकैकमनेकविधं । तदपिबहु अनल्पं ॥ २० ॥ पादपप्रच्युतानि नवानीतिभावः ॥ २१ ॥

राज्ञातत्पुत्रेणवाप्रयत्नतःपरिहर्तव्याः त्यक्तव्याः । उपद्रवाइतिशेषः । एतेनोपद्रवभीतेरेवसैन्यंनात्रानीतमितिसूचितम् ॥७॥ ति० ता:स-

[पा०] १ ख. ङ. छ. झ. ट. श. क्रतुरोगमान्. घ. त्वग्निमुखांस्तथा. २ ङ. छ. झ. ट. तिर्यक्स्रोतसः. ३ झ. समायान्त्वद्य. ४ ख. ग. ज. ञ. सुनिष्ठिताः. ५ घ. खण्ड. ६ ख. ग. वाप्सरसस्सर्वागन्धर्व्यः. ङ. छ. झ. वाप्सरसोदेवगन्धर्वीश्चापि. ७ ग. घृताचीमपि. ८ क. ख. ग. ङ. छ. झ. ट. नागदत्तां. ९ छ. झ. ट. सोमामद्रिकृतस्थलीं. ख. ग. हिमाद्रीन्द्र. च. ञ. भीमामद्रि. १० क. ङ. च. छ. झ. ञ. ट. भामिनीः. ११ क. ख. ङ.—ञ. मिहैवतु. ग. मिहैतिच. १२ ग. पेयं च.

एवं समाधिना युक्त[1]स्तेजसाऽप्रतिमेन च ॥ शीक्षास्वरसमायुक्तं [2]तपसा चाब्रवीन्मुनिः ॥ २२ ॥
मनसा ध्यायतस्तस्य प्राङ्मुखस्य कृताञ्जलेः ॥ आजग्मुस्तानि सर्वाणि दैवतानि पृथक्पृथक् ॥ २३ ॥
मलयं [3]दर्दुरं चैव ततः स्वेदनुदोऽनिलः ॥ [4]उपस्पृश्य ववौ [5]युक्त्या सुप्रियात्मा [6]सुखः शिवः ॥ २४ ॥
[7]ततोऽभ्यवर्तन्त घना दिव्याः कुसुमवृष्टयः ॥ [8]दिव्यदुन्दुभिघोषश्च दिक्षु सर्वासु शुश्रुवे ॥ २५ ॥
प्रववुश्चोत्तमा वाता ननृतुश्चाप्सरोगणाः ॥ [9]प्रजगुर्देवगन्धर्वा वीणाः प्रमुमुचुः स्वरान् ॥ २६ ॥
स शब्दो द्यां च भूमिं च प्राणिनां श्रवणानि च ॥ विवेशो[10]च्चारितः श्लक्ष्णः समो लयगुणान्वितः ॥ २७ ॥
[11]तस्मिन्नुपरते शब्दे दिव्ये श्रोत्र[12]सुखे नृणाम् ॥ ददर्श भारतं सैन्यं विधानं विश्वकर्मणः ॥ २८ ॥
[13]बभूव हि समा भूमिः समन्तात्पञ्चयोज[14]ना ॥ शाद्वलैर्बहुभिश्छन्ना नीलवैडूर्यसन्निभैः ॥ २९ ॥
तस्मिन्बि[15]ल्वाः कपित्थाश्च पनसा बीजपूरकाः ॥ [16]आमलक्यो बभूवुश्च चूताश्च फल[17]भूषणाः ॥ ३० ॥

एवमाह्वानेशक्तिविशेषंदर्शयति—एवमित्यादिना । समाधिना योगेन तपसा ज्ञानेन । यद्वा अनशनादिकायक्लेशरूपेण । अतएव तेजसा अनागमेदण्डनसामर्थ्येनचयुक्तःमुनिः शीक्षास्वरसमायुक्तं शीक्ष्यन्तेउपदिश्यन्तेवर्णस्वरादयोनयेतिशीक्षा छान्दसोदीर्घः । शीक्षाप्रतिपाद्यस्वरयुक्तमितिक्रियाविशेषणं । “ दुष्टःशब्दःस्वरतोवर्णतोवामिथ्याप्रयुक्तोनतमर्थमाह । सवाग्वज्रोयजमानंहिनस्तियथेन्द्रशत्रुःस्वरतोपराधात् ” इतिस्वरापराधस्यप्रत्यवायहेतुत्वश्रवणात् । एवं आह्वयेविश्वकर्माणमित्यारभ्योक्तरीत्या । अब्रवीत् आह्वानमन्त्रानजपदित्यर्थः ॥ २२ ॥ मनसा अनन्यपरेणेत्यर्थः । ध्यायतः निरन्तरंचिन्तयतः । प्राङ्मुखस्येत्यदृष्टविशेषार्थं । कृताञ्जलेरितिआह्वानमुद्रोक्ता । तानि पूर्वोक्तानि दैवतानि विश्वकर्मादीनि । मुनिदृष्टिविषयत्वायपृथक्पथक्आजग्मुः ॥ २३ ॥ मलयश्चन्दनालयः दर्दुरस्तत्समीपस्थश्चन्दनोत्पत्तिस्थानभूतो गिरिः तदुभयंचोपस्पृश्य सुप्रियात्मा सुप्रियस्वभावः सुगन्धइत्यर्थः । अतएव सुखः सुखकरः । शिवः शीतलः । युक्त्या अङ्गस्पर्शेन । स्वेदनुदःस्वेदनिवर्तकः । “इगुपध—” इत्यादिनाकप्रत्ययः । अनिलः वायुः । ततः गिरिद्वयाद्ववौ । इन्द्राद्याह्वानेनवाय्वाद्याह्वानमर्थसिद्धं ॥ २४ ॥ घनाः निरन्तराः । “ घनं निरन्तरंसान्द्रं ” इत्यमरः । पुष्पवृष्टयोभ्यवर्तन्त आसन्नित्यर्थः ॥ २५ ॥ प्रववुश्चोत्तमावाताइतिपूर्वोक्तस्यैवाविच्छेदउच्यते । वीणाःप्रमुमुचुःस्वरान् वीणाशब्देनवीणावन्तोलक्ष्यन्ते । तदेकपरत्वव्यञ्जनायस्वरान्मुमुचुः उत्पादयामासुः । असिश्छिनत्तीतिवत्करणेकर्तृत्वोपचारोवा ॥ २६ ॥ सशब्दःद्यांचभूमिंच अधिवसतामितिशेषः । प्राणिनांश्रवणानि श्रोत्राणि विवेश । सशब्दःकीदृशः उच्चारितः वीणादिभिरुत्पादितः । श्लक्ष्णः कोमलः । समः निषादादिषुकुत्रचित् औत्कट्यरहितः मन्द्रमध्यमतारश्रुतिसाम्ययुक्तोवा । लयगुणान्वितः लयोनामनृत्तगीतवाद्यानामेककालविरामः सएवगुणस्तेनान्वितः ॥ २७ ॥ तस्मिन्निति । अनेनगन्धर्वाप्सरसामागमनमात्रंसूचितं । विधानं निर्माणं । तच्चप्रपञ्चयिष्यति—चतुःशालानीत्यादिना ॥ २८ ॥ देवताकृत्यमाह—बभूवेति । शाद्वलैः बालतृणवत्प्रदेशैः । छन्ना व्याप्ता । नीलवैडूर्यसन्निभैः इन्द्रनीलवैडूर्याभ्यांतुल्यैः ॥ २९ ॥ तस्मिन् भूप्रदेशे । बीजपूरकाः मातुलुङ्गकाः । फलान्येवभूषणानियेषांते फलभूषणाइति सर्ववृक्षविशेषणं । आमलक्योबभूवु-

र्बाभामिनीःआह्वयेइतिसंबन्धः । कतक० ब्राह्मणमितिपाठेबृहस्पतिंयाउपतिष्ठन्तीत्यनुकर्षः ॥ १८ ॥ स० घनाः मेघाः । कुसुमवृष्टयः कुसुमवृष्टीः । भरद्वाजतपःप्रभावेणजलवर्षणशीलानामपिपुष्पाभिवर्षित्वंद्रष्टव्यं । यद्वा मेघपुष्पशब्दस्यजलवाचकत्वात्तत्पर्यायेणजलस्यग्रहणमितिद्रष्टव्यम् ॥२५॥ शि० उत्तमाः अनुकूलाः वाताः प्रीत्यतिशयेनविविधजनव्यजनसंभूतपवनाः । प्रववुः चेलुः ।

[पा०] १ ङ छ. झ. ट. मुक्तस्तथा. २ क. च. तपसा. ३ ज. दुर्दुरं. ४ छ. स्पृश्याययौ. ५ घ. युक्तः. ६ ख. ङ. च. छ. झ. ञ. ट. सुखं. ७ घ. ङ. झ. ट. ततोऽभ्यवर्षन्त. ख. ततोह्यवर्तन्त. ८ ख. ङ. च. छ. झ. ञ. ट. देवदुन्दुभि. क. ग. देवदुन्दुभिनिर्घोषो. ९ ग. जगुश्चदेव. १० ङ. छ. झ. ट. शोच्चावचः. क. ग. च. ञ. शोचरितः. ११ ङ. छ. झ. ट. तस्मिन्नेवंगते. १२ क. ङ—ट. श्रोत्रसुखे. ख. श्रोतुंसुखे. १३ ङ. बभूवतु. १४ ङ. च. छ. झ. ञ. ट. योजनं. १५ च. ञ. न्कपित्थाबिल्वाश्च. १६ क. च. ञ. आमलक्योथजंबूश्चबभूवुः. १७ ङ. छ. झ. ट. भूषिताः.

उत्तरेभ्यः कुरुभ्यश्च वनं दिव्योपभोगवत् ॥ आजगाम नदी दि[1]व्या [2]तीरजैर्बहुभिर्वृता ॥ ३१ ॥
चतुःशालानि शुभ्राणि शालाश्च गजवाजिनाम् ॥ हर्म्यप्रासाद[3]संबाधास्तोरणानि शुभानि च ॥ ३२ ॥
सितमेघनिभं [4]चापि राजवेश्म सुतोरणम् ॥ [5]दिव्यमाल्यकृताकारं दिव्यगन्धसमुक्षितम् ॥ ३३ ॥
चतुरश्रमसंबाधं शयनासनयानवत् ॥ दिव्यैः सर्वरसैर्युक्तं दिव्यभोजनवस्त्रवत् ॥
उपकल्पितसर्वान्नं धौतनिर्मलभाजनम् ॥ ३४ ॥
[6]क्लृप्तसर्वासनं श्रीमत्स्वास्तीर्णशयनोत्तमम् ॥ प्रविवेश महाबाहुरनुज्ञातो महर्षिणा ॥
वेश्म तद्रत्नसंपूर्णं भरतः केकयीसुतः ॥ ३५ ॥
अनुजग्मुश्च तं [7]सर्वे मन्त्रिणः सपुरोहिताः ॥ बभूवुश्च मुदा युक्ता [8]दृष्ट्वा तं वेश्मसंविधिम् ॥ ३६ ॥
तत्र राजासनं दिव्यं व्यजनं छत्रमेव च ॥ भरतो मन्त्रिभिः सार्धमभ्यवर्तत राजवत् ॥ ३७ ॥
आसनं पूजयामास रामायाभिप्रणम्य च ॥ वालव्यजनमादाय न्यषीदत्सचिवासने ॥ ३८ ॥
आनुपूर्व्यान्निषेदुश्च सर्वे मन्त्रिपुरोहिताः ॥ ततः सेनापतिः पश्चात्प्रशास्ता च निषेदतुः ॥ ३९ ॥
ततस्तत्र मुहूर्तेन नद्यः पायसकर्दमाः ॥ उपातिष्ठन्त भरतं भरद्वाजस्य [10]शासनात् ॥ ४० ॥
[11]तासामुभयतःकूलं पाण्डुमृत्तिकलेपनाः ॥ रम्याश्चावसथा दिव्या [12]ब्रह्मणस्तु प्रसादजाः ॥ ४१ ॥

रितिपाठः ॥ ३० ॥ वनं आहूतंकौवेरवनं । दिव्योपभोगवत् दिव्योपभोगार्हं । नदीतिजात्यैकवचनं । तीरजैः वृक्षैरितिशेषः ॥ ३१ ॥ चतुःशालानि संजवनानि । "चतुःशालंसंजवनं" इतिहलायुधः । आजग्मुरितिविपरिणामः । तोरणानि वन्धनमालाः । 'बन्धीवन्धनमालातुतोरणंपरिकीर्तितं" इतिहलायुधः । वन्दनमालेतिपाठान्तरं ॥ ३२ ॥ सितमेघेत्यारभ्य धौतनिर्मलभाजनमित्यन्तमेकंवाक्यं । आजगामेति क्रियाद्रष्टव्या । सितमेघनिभं सुधालेपनधवलत्वात् । दिव्यमाल्यकृताकारं दिव्यमालाभिःकृतालंकारं । दिव्यगन्धैर्दिव्यचन्दनैः समुक्षितं सिक्तं । चतुरश्रं चतुष्कोणं । असंबाधं विशालं । शयनासनयानवत् यानं शिबिकादि । रसैः शर्करादिभिः । दिव्यभोजनवस्त्रवत् दिव्यभोजनानिसूक्ष्मशाल्यन्नादीनि दिव्यवस्त्राणिसूक्ष्मवस्त्राणि । उपकल्पितानि सर्वान्नानि नानाविधापूपादीनियस्मिंस्तत् । धौतनिर्मलभाजनं धौतत्वेननिर्मलानिभाजनानियस्मिन् तत्तथा ॥ ३३—३४ ॥ क्लृप्तसर्वासनमित्यत्रस्नानभोजनाद्यासनान्युच्यन्ते । शयनासनेत्यत्रराजासनंतत्साहचर्याच्छयनंचमहाशयनं । स्वास्तीर्णशयनोत्तममित्यत्रनिद्रार्थशयनं । तत्रभरतस्यप्रवेशमाह—प्रविवेशेति । महाबाहुरित्यनेनतदर्हत्वमुच्यते । केकयीसुतइत्यनेन केकयीदत्तराज्येप्यनादरः किमत्रआदरंकरिष्यतीति द्योत्यते । महर्षिणा भरद्वाजेन ॥ ३५ ॥ वेश्मसंविधिं वेश्मसंविधानं ॥ ३६ ॥ राजासनं राजार्हासनं । अभ्यवर्तत अभितोवर्तिष्ट प्रदक्षिणंकृतवानितियावत् । राजवत् राजतुल्यं राममिवेत्यर्थः ॥ ३७ ॥ आसनं पूजयामासेत्यत्र राजवदित्यनुकर्षः । रामाय आसनोपरिस्थितत्वेनभाविताय । वालव्यजनमादाय स्वशेषत्वानुगुणतयेतिभावः । सचिवासने सचिवार्थक्लृप्ते आसने सिंहासनाधःप्रदेशस्थइत्यर्थः ॥ ३८ ॥ सेनापतिः दण्डनायकः । प्रशास्ता शिबिरनियन्ता ॥ ३९ ॥ मुहूर्तेन अल्पकालेन ॥ ४० ॥ उभयतःकूलं उभयोःकूलयोरित्यर्थः । पाण्डुमृत्तिकलेपनाः

अतएवपूर्वेणनपौनरुक्त्यम् ॥ २६ ॥ ती० राजवत् राजार्हं । राजार्हमासनादिकंसर्वंप्रदक्षिणंचकारेत्यर्थः ॥ ३७ ॥ ति० अत्रेदंबोध्यं । भरतेनवाचोक्तमपिराज्यानभिलाषंलोकानश्रद्दध्युः । अतःक्रिययापिसर्वलोकप्रत्यायनायमहर्षिणातपोव्ययेनापीदृशमातिथ्यकरणम् । किंच पुष्पादिभिःपूजेवेयमपिक्रियाविष्णोरंशभूतभरततुष्ट्यइतितत्करणं । किंचभरतंप्रति त्वंदुष्टबुद्ध्याऽऽगतोसीतिकि-

[पा०] १ क. ग. ङ. च. छ. झ. ञ. ट. सौम्या. २ क. ज. कूलजैः. ग. घ. कूलजैरुपशोभिता. ३ छ. झ. ञ. ट. संयुक्ततोरणानि. ङ. संयुक्ताः. ख. ग. च. संघाताः. ४ ख. ग. चारु. ५ ख. घ.—ट. शुक्लमाल्य. ग. शुक्लमाला. ६ छ. कृतसर्वासनं. ७ ग. छ. झ. ट. तेसर्वे. ८ क. ख. घ. च. ज. झ. ञ. तंदृष्ट्वा. ९ ङ. छ. झ. ट. न्यषीदत. १० क. च. ञ. तेजसा. ११ ङ. छ. झ. ट. आसां. १२ क. ख. ग. ङ.—ट. ब्राह्मणस्य.

तेनैव च मुहूर्तेन दिव्याभरणभूषिताः ॥ आगुर्विंशतिसाहस्रा ब्रह्मणा प्रहिताः स्त्रियः ॥ ४२ ॥
सुवर्णमणिमुक्तेन प्रवालेन च शोभिताः ॥ आगुर्विंशतिसाहस्राः कुबेरप्रहिताः स्त्रियः ॥ ४३ ॥
याभिर्गृहीतः पुरुषः सोन्माद इव लक्ष्यते ॥ आगुर्विंशतिसाहस्रा नन्दनादप्सरोगणाः ॥ ४४ ॥
नारदस्तुम्बुरुर्गोपः प्रवराः सूर्यवर्चसः ॥ एते गन्धर्वराजानो भरतस्याग्रतो जगुः ॥ ४५ ॥
अलम्बुसा मिश्रकेशी पुण्डरीकाऽथ वामना ॥ उपानृत्यंस्तु भरतं भरद्वाजस्य शासनात् ॥ ४६ ॥
यानि माल्यानि देवेषु यानि चैत्ररथे वने ॥ प्रयागे तान्यदृश्यन्त भरद्वाजस्य तेजसा ॥ ४७ ॥
बिल्वा मार्दङ्गिका आसञ्शम्याग्राहा विभीतकाः ॥ अश्वत्था नर्तकाश्चासन्भरद्वाजस्य शासनात् ४८
ततः सरलतालाश्च तिलका नक्तमालकाः ॥ प्रहृष्टास्तत्र संपेतुः कुब्जा भूत्वाऽथ वामनाः ॥ ४९ ॥
शिंशुपामलकीजम्ब्वो याश्चान्याः काननेषु ताः ॥ मालती मल्लिका जातिर्याश्चान्याः कानने लताः॥५०
प्रमदाविग्रहं कृत्वा भरद्वाजाश्रमेऽवदन् ॥ सुराः सुरापाः पिबत पायसं च बुभुक्षिताः ॥
मांसानि च सुमेध्यानि भक्ष्यन्तां यावदिच्छथ ॥ ५१ ॥

सुधानुलिप्ताइत्यर्थः । "ङ्यापोः" इतिह्रस्वः । ब्रह्मणः भरद्वाजस्य । उपातिष्ठन्तेत्येतदनुषज्यते ॥४१॥ आगुः आजग्मुः । सहस्रमेवसाहस्रं । ब्रह्मणा चतुर्मुखेन । स्त्रियः अप्सरसः ॥ ४२ ॥ सुवर्णमणिमुक्तेन सुवर्णानिसुवर्णमयाभरणानिमणयोरत्नानिमुक्ताश्चसुवर्णमणिमुक्तंतेन । "जातिरप्राणिनां" इति एकवद्भावः ॥ ४३ ॥ गृहीतः आलिङ्गितः । याभिः यैरित्यर्थः । एतदर्धस्यपूर्वेणवान्वयः । कुबेरप्रहिताः गन्धर्वाप्सरसः । तथाहिश्रुतिः "गन्धर्वाप्सरसोवा एतमुन्मादयन्ति । यउन्माद्यति" इति । याभिर्गृहीताःपुरुषाःसोन्मादाइतिहोच्यतइतिचपाठः । तदा उच्यते श्रुत्येतिशेषः । हेतिप्रसिद्धौ ॥ ४४ ॥ नारदोत्रब्रह्मपुत्रादन्यः । तुम्बुरुसाहचर्यात् । सहिपर्वतसहचरः । आह्वानसमयेतुम्बुरुणेत्यस्योपलक्षणार्थत्वात् । गन्धर्वराजानइतिटजभावआर्षः ॥४५॥ भरतमुपानृत्यन् भरतमुद्दिश्याधिकमनृत्यन् । "उपोधिकेच" इति कर्मप्रवचनीयसंज्ञा । अत्रभरद्वाजस्यशासनादुपानृत्यन्नित्यनेन भरतस्यरामेवृत्तिविशेषमातिथ्यव्याजेनपरीक्षितवानृषिरितिगम्यते ॥४६॥ एवंभरतस्यरामशेषतयैवावस्थानंनतुभोगलौल्येनेत्युक्त्वासेनाभोगंप्रपञ्चयति—यानीत्यादिना । देवेषु देवोद्यानेषु नन्दनादिष्वित्यर्थः । चैत्ररथस्यपूर्वकुरुदेशस्थत्वेनोक्तेरिदंचैत्ररथंतद्बोध्यं । प्रयागे प्रयागस्थितभरद्वाजाश्रमवनवृक्षेष्वित्यर्थः । तेजसा प्रभावेन ॥ ४७ ॥ आहूतानांभरतशेषत्वेनविनियोगात्सैनिकानांनर्तकादीनिदर्शयति—विल्वाइति । विल्वाः विल्ववृक्षाः । मार्दङ्गिकाः मृदङ्गवादकाः । "तदस्यशिल्पम्" इतिठक् । आसन् तद्रूपास्तत्कार्यकारिणोभवन्नित्यर्थः । विभीतकाः कलिवृक्षाः । शम्याग्राहाः तालग्राहकाआसन् । "शम्या यज्ञायुधेतालेमशकेचक्रियान्तरे" इतिवैजयन्ती । भरतेचोक्तं "वह्नितालशम्यातालक्रिया" इति ॥४८॥ सरलाः देवदारुविशेषाः । तालाः प्रसिद्धाः । तिलकाः क्षुरकनामकावृक्षाः । नक्तमालकाः करञ्जनाख्यावृक्षाः । कुब्जाः स्थगुमन्तः । वामनाः ह्रस्वाः । संपेतुः संपन्नाः ॥ ४९ ॥ अथस्त्रीलिङ्गवृक्षाणांस्त्रीभावपरिग्रहमाह—शिंशुपेत्यादि । सार्धश्लोकद्वयमेकान्वयं । शिंशुपादयःप्रमदाविग्रहंकृत्वा यावदिच्छथ तावद्भक्ष्यन्तामित्यवदन्नितिसंबन्धः । सुरापाः हेसुरापानप्रवृत्ताः । इमाःसुराःपिबत । हेबुभुक्षिताः पायसपानेच्छवः । इदंपायसंभक्ष्यतामितिवचनविपरिणामेनानुमितिप्रश्ने तस्यर्षेरसर्वज्ञत्वासामर्थ्यादिशङ्कावारणायस्वसामर्थ्यदर्शनं । अपिच भगवदेकचित्तानांस्वर्गसुखमिहापिभवतीतिभगवद्राम-

[पा०] १ क. च. युक्तेन. २ च. ञ. विभूषिताः. क. चभूषिताः. ३ ख. सहिताः. ४ ख. चोद्यते. ५ ङ. गोप्ताप्रभया. झ. ञ. ट. गोपःप्रभया. ६ च. ञ. पुण्डरीकाच. ७ ङ. छ. झ. ञ. ट. उपानृत्यन्त. ८ ङ. तास्सर्वाभरद्वाजस्य. ९ क. च. ञ. मार्दङ्गिकाश्चासन्. १० क. ङ. च. छ. झ. ञ. ट. तेजसा. ११ ङ. छ. झ. ट. तिलकाःसतमालकाः च. तिलकानागमल्लिकाः. क. तिलकानागमालिकाः. १२ क. ङ. छ. झ. ट. जंबूर्याश्चा. १३ क. ख. घ. ङ. च. ज.—ट. काननेलताः. १४ घ. मल्लिकामालती. १५ क. घ.—ट. ऽब्रुवन्. १६ ङ. च. झ. ञ. ट. सुरां.

उच्छाद्य[1] स्नापयन्ति स्म नदीतीरेषु वल्गुषु ॥ अप्येकमेकं[2] पुरुषं प्रमदाः सप्त चाष्ट च ॥ ५२ ॥
संवाहन्त्यः[3] समापेतुर्नार्यो रुचिरलोचनाः[4] ॥ परिमृज्य तथान्योन्यं[5] पाययन्ति वराङ्गनाः ॥ ५३ ॥
हयान्गजान्खरानुष्ट्रांस्तथैव सुरभेः सुतान् ॥ अभोजयन्[6] वाहनपास्तेषां भोज्यं यथाविधि ॥ ५४ ॥
इक्षूंश्च मधुलाजांश्च भोजयन्ति स्म वाहनान् ॥ इक्ष्वाकुवरयोधानां चोदयन्तो महाबलाः ॥ ५५ ॥
नाश्वबन्धोऽश्वमाजानान्न गजं कुञ्जरग्रहः ॥ मत्तप्रमत्तमुदिता चमूः[7] सा तत्र संबभौ ॥ ५६ ॥
तर्पिताः सर्वकामैस्ते[8] रक्तचन्दनरूषिताः ॥ अप्सरोगणसंयुक्ताः सैन्या वाचमुदैरयन्[9] ॥ ५७ ॥
नैवायोध्यां गमिष्यामो न[10] गमिष्याम दण्डकान् ॥ कुशलं भरतस्यास्तु[11] रामस्यास्तु तथा सुखम् ॥५८॥
इति पादातयोधाश्च हस्त्यश्वारोहबन्धकाः ॥ अनाथास्तं विधिं लब्ध्वा वाचमेतामुदैरयन्[12] ॥ ५९ ॥
संप्रहृष्टा विनेदुस्ते नरास्तत्र सहस्रशः ॥ भरतस्यानुयातारः स्वर्गोऽयमिति चाब्रुवन् ॥ ६० ॥
नृत्यन्ति[13] स्म हसन्ति स्म गायन्ति स्म च सैनिकाः ॥ समन्तात्परिधावन्ति[14] माल्योपेताः सहस्रशः ॥६१॥
ततो भुक्तवतां तेषां तदन्नममृतोपमम् ॥ दिव्यानुद्वीक्ष्य भक्ष्यांस्तानभवद्भक्षणे मतिः ॥ ६२ ॥

पच्यते । सुमेध्यानि परिशुद्धानि ॥ ५०—५१ ॥ उच्छाद्य उद्वर्तनंकृत्वा । " उद्वर्तनोच्छादनेद्वे " इत्यमरः । तैलादिनाशरीरमर्दनंकृत्वेत्यर्थः । वल्गुषु रम्येषु । एकमेकमिति । " एकंबहुव्रीहिवत् " इति बहुव्रीहिवद्भावाभावआर्षः । संवाहन्त्यः संवाहयन्त्यः पादसंवाहनंकुर्वन्त्यः । परिमृज्य जलार्द्रमङ्गंवस्त्रादिनापरिमृज्य अलंकृत्येतिवार्थः । अन्योन्यं रहसि पाययन्ति सुराइतिशेषः ॥ ५२—५३ ॥ वाहनपाः ऋषिप्रभावसिद्धावाहनपाः वाहनरक्षकाः । तेषां हय्यादीनां । यथाविधि यथायोग्यं । भोज्यं तत्तद्वाहनानुगुणंभोज्यमित्यर्थः । हयादीन् अभोजयन् ण्यन्तत्वाद्द्विकर्मकत्वं । सुरभेःसुतान् वृषभान् ॥ ५४ ॥ महाबलाः ऋषिप्रभावसिद्धवाहनपाः । इक्ष्वाकुवरयोधानांवाहनान् वाहनानि । इक्षून् मधुलाजान् मधुमिश्रलाजान् । " भक्ष्येणमिश्रीकरणं " इति समासः । चोदयन्तः भक्षणार्थंप्रेरयन्तःसन्तः भोजयन्तिस्म ॥ ५५ ॥ अश्वंबध्नातीत्यश्वबन्धः अश्वग्राहकः । नाजानात् नज्ञातवान् । तत्रहेतुमाह—मत्तेति । मदकरद्रव्यसेवयामत्ताः प्रमत्ताः मधुपानादिनाकार्याकार्यविवेकशून्याः मुदिताः स्रक्चन्दनादिभोगातिशयेनहृष्टाः । तत्र तदा ॥ ५६ ॥ अप्सरोगणाः वनलताभूताः नलाहूताः तासांभरतवेश्मप्रवेशकथनात् । सैन्याः सेनायांसमवेताः । उदैरयन् उक्तवन्तः ॥ ५७ ॥ उदीरणप्रकारमाह—नेत्यादिना । नगमिष्यामइत्यत्रविसर्गलोपश्छान्दसः । भरतस्यकुशलमस्तु भरतोयथातथावातिष्ठत्वित्यर्थः । एवंरामस्येत्यत्रापि । पादाभ्यामतन्तीतिपादाताः अतसातत्यगमनइतिधातुः । तेचतेयोधाश्चपादातयोधाः । चकाराद्रथिकसमुच्चयः । हस्त्यश्वानामारोहाःसादिनः हस्त्यादिबन्धकाःतद्भृत्याः । तंविधिं सत्कारंलब्ध्वा अनाथाः स्वामिरहिताः स्वतन्त्राइतियावत् । नैवायोध्यामित्येतांवाचमुदैरयन्निति संबन्धः ॥ ५८—५९ ॥ विनेदुः जगर्जुः ॥ ६०—६१ ॥ तदन्नं पूर्वोक्तभक्ष्यादिचतुर्विधान्नं । भक्षणे पुनर्भक्षणे । मतिरभवत्

प्रीतिमाहात्म्यंप्रदर्शयितुंतद्दर्शनेनचतेषांतत्राधिकांप्रीतिमुत्पादयितुंतथाकरणंमुनेरितिदिक् ॥ ३८ ॥ **शि॰** सर्वकामैः सर्वेषांकामाः मनोरथाःयैस्तुतैर्भक्ष्यादिभिः । तर्पिताः । **ति॰** उदीरयन् उदैरयन् ॥ ५७ ॥ **स॰** पदातीनांसमाहारःपादातंतद्रूपायोधाः । **ति॰** अनाथाः अपरतन्त्राइवेत्यर्थंइतिकतकः । अयाचकाइत्यर्थइत्यन्ये । वक्तृणामतिहर्षयुक्ततयाकवेरपिवर्णनीयमयीभावात्पुन॰

[पा॰] १ ङ. छ. झ. ट. उच्छोद्य. २ ङ. अथैकमेकं. च. ट. अप्येकमेकपुरुषं. ३ ख. संवाहयन्तःसंपेतुः. ४ क. ङ. च. छ. झ. ञ. ट. विपुललोचनाः. ५ घ. ङ. छ. झ. ट. तदा. ग. यथान्यायं. ६ ग. अभोजयंस्तदारोहाः. ७ ङ. झ. ट. साचमूस्तत्र. ८ ङ. च. झ. ञ. ट. कामैश्च. क. ख. घ. कामैस्तैः. ९ क. ख. ग. ङ. च. झ. ञ. ट. मुदीरयन्. १० ख. ग. नचगच्छाम. ११ ङ. भरतस्यास्य. १२ क.—ट. मुदीरयन्. १३ क. घ.—छ. झ. ञ. ट. नृत्यन्तश्चहसन्तश्चगायन्तश्चैव. १४ च. छ. झ. धावन्तो.

प्रेष्याश्चेट्यश्च वध्वश्च बलस्थाश्च[1] सहस्रशः ॥ बभूवुस्ते भृशं [2]तृप्ताः सर्वे चाहतवाससः ॥ ६३ ॥
कुञ्जराश्च खरोष्ट्राश्च गो[3]ऽश्वाश्च मृगपक्षिणः ॥ [4]बभूवुः सुभृतास्तत्र [5]नान्यो ह्यन्यमकल्पयत् ॥ ६४ ॥
नाशुक्लवासास्तत्रासीत्क्षुधितो मलिनोपि वा ॥ रजसा ध्वस्तकेशो वा नरः कश्चिददृश्यत ॥ ६५ ॥
आजैश्चापि च वाराहैर्निष्ठानवरसंचयैः ॥ फलनिर्व्यूहसंसिद्धैः [6]सूपैर्गन्धरसान्वितैः ॥ ६६ ॥
पुष्पध्वजवतीः पूर्णाः शुक्लस्यान्नस्य [7]चाभितः ॥ ददृशुर्विस्मितास्तत्र नरा लौहीः सहस्रशः ॥ ६७ ॥
बभूवुर्वनपार्श्वेषु कूपाः पायसकर्दमाः ॥ ताश्च कामदुघा गावो द्रुमाश्चासन्[8]मधुस्रुतः ॥ ६८ ॥
वाप्यो मैरेयपूर्णाश्च मृष्टमांसचयैर्वृताः ॥ प्रतप्तपि[9]ठरैश्चापि मार्गमायूरकौक्कुटैः ॥ ६९ ॥
पात्रीणां च सहस्राणि स्थालीनां नियुतानि च ॥ न्यर्बुदानि च पात्राणि शातकुम्भमयानि च ॥ ७० ॥
स्थाल्यः कुम्भ्यः करम्भ्यश्च दधिपूर्णाः सुसंस्कृताः ॥ यौवनस्थस्य गौरस्य कपित्थस्य सुगन्धिनः ॥ ७१ ॥

भक्ष्यसौष्ठवादितिभावः ॥ ६२ ॥ प्रेष्याः परिचारकाः । चेट्योदास्यः । वध्वोयोधाङ्गनाः । बलेसेनायांतिष्ठन्तीतिबलस्थाः । सर्वविशेषणमेतत् । अहतवाससः नूतनवस्त्राः । यद्वा आहतवाससः निर्णिक्तवाससः ॥ ६३ ॥ खरसहितोष्ट्राः खरोष्ट्राः मृगपक्षिणः क्रीडार्थसैनिकैरानीताः । सुभृताः सुतृप्ताः सुपुष्टावा । तत्र सेनायां । अन्यः अन्यंनाकल्पयत् ऋषिकृतव्यतिरिक्तंअन्नादिकंनाकरोदित्यर्थः ॥ ६४—६५ ॥ आजैरित्यादिश्लोकद्वयमेकान्वयं । आजैः अजमांसैः । वाराहैः वराहमांसैः । निष्ठानवरसंचयैः व्यञ्जनश्रेष्ठसमूहैः । "निष्ठानंव्यञ्जनंस्मृतं" इतिहलायुधः । फलनिर्व्यूहसंसिद्धैः सम्यङ्निष्पन्नफलयुक्तशर्करादिकाथरसैः । "द्वार्यापीडेकाथरसेनिर्व्यूहोनागदन्तके" इतिवैजयन्ती । सूपैः मुद्गाढकीचणकादिसूपैः । गन्धरसान्वितैः पाकभेदोत्थगन्धरसयुक्तैः । पुष्पध्वजवतीः अलंकारार्थपरिकल्पितपुष्पशिल्पवतीः । शुक्लस्यान्नस्यपूर्णाः शुक्लेनान्नेनचपूर्णाः । लौहीः लोहमयपात्रीः । सर्वलोहेषुप्रधानत्वात्सुवर्णमत्रलोहशब्देनोच्यते ॥ ६६—६७ ॥ पायसान्येवकर्दमानियेषुतेतथोक्ताः ताः गावः पूर्वमेव वनचर्यःकामदुघाः यावदभीष्टक्षीरपूरकाः आसन् । "दुहःकब्घश्च" मधुस्रुतः मधुस्राविणः । पाठान्तरं मधुश्च्युतः मधुस्राविणः ॥ ६८ ॥ अत्रासन्नित्यनुपज्यते । प्रतप्तपिठरैः प्रतप्तपिठरसंस्कृतैः । "संस्कृतंभक्षाः" इत्यण् तस्यलुक् । पिठराः कुण्डानि । "उखास्थालीचरुः कुम्भीपिठरःकुण्डमुच्यते" इतिहलायुधः । मार्गमायूरकौक्कुटैः मृगमयूरकुक्कुटमांसैः ॥ ६९ ॥ पात्रीणामित्यारभ्यसंचयाइत्यन्तमेकंवाक्यं । पात्रीणां अन्नधानकुम्भीनां । स्थालीनां व्यञ्जनपात्राणां । नियुतानि लक्षाणि । न्यर्बुदानि दशकोट्यः । पात्राणि भोजनपात्राणि अमत्राणीतियावत् । दधिपूर्णाइतिस्थाल्यादित्रयविशेषणं । स्थाल्यः पिठराः । कुम्भ्यः क्षुद्रकुम्भाः । करम्भ्यः विशालास्यगुरुस्थाल्यः । करम्भ्यः कर्कर्यइत्याहुः । सुसंस्कृताः दधिसंस्कारकशुण्ठ्यादियुक्ताः । यौवनस्थस्य नातिनूतनस्य नातिपुराणस्येत्यर्थः । मथनानन्तरंयामान्तरितस्येत्यर्थः । कपित्थस्य कपित्थपरिमलयुक्ततक्रस्येत्यर्थः । "तक्रंकपित्थंमथितं" इतिवैजयन्ती । गौरस्य शुभ्रस्य । रसालस्य तक्रविशेषस्य । "अपक्वतक्रंसव्योषंचतुर्जातंगुडार्द्रकम् । सजीरकंरसालंस्यान्मज्जिकाशिखरिण्यपि" इतिवैजयन्ती । सव्योषं शुण्ठीपिप्पलीमरिचियुक्तं

रुक्तिर्नदोषाय । शि० उदीरयन् उदैरयन् ॥ ५९ ॥ स० गोऽश्वाः "विभाषावृक्ष—" इत्यादिनापशुद्वन्द्वस्थलेएकवद्भावस्यविकल्पितत्वादयमपिसाधुः । "गवाश्वप्रभृतीनिच—" इत्यस्यायंनविषयः । तथापाठे रूपमेषांविवक्षितं नतुपूर्वोत्तरपदनिर्देशमात्रेतात्पर्यं । तेनपूर्वरूपपक्षेगोऽश्वंगोऽश्वाइतीतिशब्देन्दुशेखरोक्तेः । एवंपूर्वत्रापि । सुभृताः पूर्णोदराः । नार्यः अन्यं ऋष्यकल्पितपदार्थं । नाकल्पयन् नाभुञ्जन् । क्वचिन्नान्योह्यन्यमकल्पयदित्यपिपाठः । तदा अन्यः भरतसेनान्तर्गतोदेशान्तरात्तत्रागतःपुरुषः । अन्यमित्युक्तार्थं ति० अतः मुनिदत्तात् । अन्यपदार्थं नाकल्पयन् नाभुञ्जन्नित्यर्थः ॥ ६४ ॥ ति० निषादादिबलतृप्त्यर्थंप्रतापमात्रेणसंस्कार्याःप्रतप्तास्तथा पिठरःकपालंतेषुसंस्कृताः पक्वाः तैः ॥ ६९ ॥ शि० गौरस्य केसरादिसंसर्गात्पीतवर्णस्य ॥ ७१ ॥

[पा०] १ ख. ङ.—ट. श्चापिसर्वशः. २ ङ. छ. झ. ट. प्रीताः. क. ख. ग. च. ञ. तृप्ताः. ३ ख. गावश्च. ४ ङ. बभूवुस्तेभृशंतत्र. ५ ङ. छ. झ. ट. नातोह्यन्यमकल्पयन्. ठ. नार्योह्यन्यमकल्पयन्. ६ घ. च. ज. धूपैः ७ घ. चोच्छ्रिताः. ८ च.—ट. न्मधुश्च्युतः. क—ङ. न्मधुच्युतः. ९ ङ. छ. झ. ञ. ट. पैठरैश्चापि.

ह्रदाः पूर्णा रसालस्य दध्नः श्वेतस्य चापरे ॥ बभूवुः [1]पायसस्यान्ये [2]शर्करायाश्च सञ्चयाः ॥ ७२ ॥
कल्कांश्चूर्णकषायांश्च स्नानानि विविधानि च ॥ ददृशुर्भाजनस्थानि तीर्थेषु सरितां नराः ॥ ७३ ॥
शुक्लानंशुमतश्चापि दन्तधावनसञ्चयान् ॥ शुक्लांश्चन्दनकल्कांश्च समुद्गेष्ववतिष्ठतः ॥ ७४ ॥
दर्पणान्परिमृष्टांश्च वाससां चापि सञ्चयान् ॥ [3]पादुकोपानहां चैव [4]युग्मानि च सहस्रशः ॥ ७५ ॥
आञ्जनीः कङ्कतान्कूर्चा[5]ञ्शस्त्राणि च धनूंषि च ॥ [6]मर्मत्राणानि चित्राणि शयनान्यासनानि च ॥७६॥
प्रतिपानह्रदान्पूर्णान्खरोष्ट्रगज[7]वाजिनाम् ॥ अवगाह्यसुतीर्थांश्च ह्रदान्सोत्पलपुष्करान् ॥ ७७ ॥
आकाशवर्णप्रतिमान्स्वच्छतोयान्[8]सुखप्लवान् ॥ नीलवैडूर्यवर्णांश्च मृदून्यवससञ्चयान् ॥ ७८ ॥
[9]निर्वापार्थान्पशूनां ते ददृशुस्तत्र सर्वशः ॥ ७९ ॥
व्यस्मयन्त मनुष्यास्ते [10]स्वप्नकल्पं तदद्भुतम् ॥ दृष्ट्वाऽऽतिथ्यं कृतं [11]तादृग्भरतस्य महर्षिणा ॥ ८० ॥
[12]इत्येवं रममाणानां देवानामिव नन्दने ॥ भरद्वाजाश्रमे रम्ये सा रात्रिर्व्यत्यवर्तत ॥ ८१ ॥
प्रतिजग्मुश्च [13]ता नद्यो गन्धर्वाश्च यथागतम् ॥ भरद्वाजमनुज्ञाप्य ताश्च सर्वा वराङ्गनाः ॥ ८२ ॥
तथैव मत्ता मदिरोत्कटा नरास्तथैव दिव्यागुरुचन्दनोक्षिताः ॥

चतुर्जातगुडार्द्रकं चतुर्जातैः एलालवङ्गकक्कोलनागपुष्पैः गुडेनशर्करयाआर्द्रकेनचयुक्तं । कपित्थेनपूर्णाःअपरेह्रदावभूवुःरसालेनपूर्णाअपरेह्रदावभूवुः दध्नापूर्णाश्चापरेह्रदाः । अन्येपायसेनपूर्णाः । पायसस्यान्यइतिपाठः । सर्वत्रतृतीयार्थेषष्ठी। तद्व्यञ्जनार्थंशर्करायाःसञ्चयाःराशयश्चबभूवुरित्यर्थः । शर्करायावसञ्चयाइतिचपाठः । शर्करामिश्रयवविकारापूपसञ्चयाइत्यर्थः॥७०—७२॥ कल्कान् आमलक्यादिकल्कान् । चूर्णकषायान् चूर्णानिमाषादिचूर्णानि कषायाःक्वथितानि । स्नान्येमिरितिस्नानानि तैलोष्णोदकादीनि । भाजनस्थानि कटाहादिमहापात्रस्थानि । तीर्थेषु अवतारेषु ॥ ७३ ॥ शुक्लान् निर्मलान् । अंशुमतः कूर्चवतः । दन्तधावनसञ्चयान् दन्तकाष्ठसमूहान् । स्नानानन्तरमलंकारोपकरणानिदर्शयति—शुक्लानिति । चन्दनकल्कान् चन्दनपङ्कान् । समुद्गेषु संपुटकेषु । “ समुद्गकःसंपुटकः ” इत्यमरः । अवतिष्ठतः वर्तमानान् ॥ ७४ ॥ परिमृष्टान् निर्मलीकृतान् । पादुकाः दारुनिर्मिताः । उपानह्श्चर्मनिर्मिताः । युग्मानि द्वन्द्वानि ॥ ७५ ॥ आञ्जनीः अञ्जनयुक्ताःकरण्डिकाः । कङ्कतान् केशमार्जनान् । “ कङ्कतःकेशमार्जनं ” इतिनिघण्टुः । कूर्चान् स्नानाद्युपयुक्तासनानि श्मश्रुप्रसाधकान्वा । शस्त्राणि योधैरलंकारार्थंधार्याणि । मर्मत्राणानि कवचादीनि ॥ ७६ ॥ प्रतिपानह्रदान् ग्रासग्रहणानन्तरंभुक्तजीर्णार्थंपानार्हह्रदान् । अवगाह्यसुतीर्थान् अवगाहनयोग्यावतारप्रदेशयुक्तान् । सोत्पलपुष्करान् उत्पलमिन्दीवरं पुष्करंपद्मं ॥ ७७ ॥ आकाशवर्णप्रतिमान् आकाशवन्निर्मलानित्यर्थः । सुखप्लवान् सुखेन प्लवः स्नानंयेषुतथोक्तान्। यवससञ्चयान् तृणसमूहान् । “ यवसंतृणमर्जुन ” इत्यमरः ॥ ७८ ॥ पशूनांनिर्वापार्थान् पशुभ्योविश्राणनार्थान् ॥ ७९ ॥ स्वप्नकल्पलोक्तिरयत्नसिद्धत्वात् अपूर्वत्वात् आश्चर्यकरत्वाच्च । तादृक् वाचामभूमिं । भरतस्य भरताय ॥ ८०—८१ ॥ अनुज्ञाप्य अनुज्ञांकारयित्वा ॥८२॥ इदंचातिथ्यकरणमैन्द्रजालिकवन्नमिथ्येत्याह—तथैवे-

ति० पादुकोपानहं समाहारेटच्समासान्तः ॥ ७५ ॥ ति० आकाशेत्यायर्धंपूर्वान्वयि । उपाधिविशेषान्नीलवर्णानित्यर्थः स० आकाशवर्णप्रतिमान् “आकाशोनीलिमोदेति” “भूतमप्यसितंदिव्यदृष्टिगोचरं” इत्याद्युक्तेर्नीलवर्णोपेतान् ॥ ७८ ॥ ति० निर्वापार्थं भक्षणार्थं ॥ ७९ ॥ ति० ताःसर्वाः अप्सरसः ॥ ८२ ॥ इत्येकनवतितमस्सर्गः ॥ ९१ ॥

[पा०] १ ख. ङ. च. ज. झ. ञ. पयसश्चान्ये. २ ङ. च. छ. झ. ट. शर्कराणांच. ३ ङ. झ. पादुकोपानहंचैव. क. घ. ज. पादुकोपानहांचापि. च. ञ. पादुकोपानहश्चापि. ४ क. घ. ङ. च. झ. ञ. ट. युग्मान्यत्र. ५ क. ख. ङ. च. छ. झ. ञ. ट. छत्राणिच. ग. शस्त्राणिविविधानिच. ६ ग. ज. तनुत्राणिच. ७ घ. रथवाजिनां. ८ क. ङ. च. ज. झ. ञ. सुखाप्लवान्. ९ ग. च. छ. झ. ञ. ट. निर्वापार्थंपशूनां. १० घ. स्वर्गकल्पं. ११ ङ. छ. झ. ट. तावद्भरद्वाजमहर्षिणा. १२ क. ग. इत्येषां. ङ. च. इत्येव. १३ ङ. छ. झ. ट. तास्सर्वा.

तथैव दिव्या विविधाः स्रगुत्तमाः [1]पृथक्प्रकीर्णा मनुजैः [2]प्रमर्दिताः ॥ ८३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे एकनवतितमः सर्गः ॥ ९१ ॥

द्विनवतितमः सर्गः ॥ ९२ ॥

भरद्वाजेनप्रभातेसाञ्जलिबन्धंचित्रकूटमार्गंपृच्छन्तंभरतंप्रतितन्निवेदनम् ॥ १ ॥ कौसल्यादिपुतिसृपुभरद्वाजंवन्दमानासु भरतेनमुनिचोदनयातंप्रतितासांनामादिविशेषनिवेदनम् ॥ २ ॥ तथातेनमुनिसमापृच्छनपूर्वकं सेनासंनाहनेनपरिजनैःसह चित्रकूटंप्रतिप्रस्थानम् ॥ ३ ॥

ततस्तां रजनीं व्युष्य भरतः सपरिच्छदः ॥ [3]कृतातिथ्यो भरद्वाजं कामादभिजगाम ह ॥ १ ॥
तमृषिः पुरुषव्याघ्रं [4]प्राञ्जलिं प्रेक्ष्य चागतम् ॥ हुताग्निहोत्रो भरतं भरद्वाजोऽभ्यभाषत ॥ २ ॥
कच्चिदत्र सुखा रात्रिस्तवास्मद्विषये गता ॥ समग्रस्ते जनः कच्चिदातिथ्ये शंस मेऽनघ ॥ ३ ॥
तमुवाचाञ्जलिं कृत्वा भरतोऽभिप्रणम्य च ॥ आश्रमा[5]दभिनिष्क्रान्तमृषिमुत्तमतेजसम् ॥ ४ ॥
सुखोषितोस्मि भगवन्समग्रबलवाहनः ॥ [6]तर्पितः सर्वकामैश्च सामात्यो बलवत्त्वया ॥ ५ ॥
अपेतक्लमसन्तापाः सु[7]भिक्षाः सुप्रतिश्रयाः ॥ अपि प्रेष्यानुपादाय [8]सर्वे स्म सुसु[9]खोषिताः ॥ ६ ॥
[10]आमन्त्रयेऽहं भगवन्कामं [11]त्वामृषिसत्तम ॥ समीपं प्रस्थितं भ्रातुर्मैत्रेणेक्षस्व चक्षुषा ॥ ७ ॥
आश्रमं तस्य धर्मज्ञ धार्मिकस्य महात्मनः ॥ आचक्ष्व [12]कतमो मार्गः कियानिति च शंस मे ॥ ८ ॥

ति । मत्ताः दृप्ताः भोगैस्तृप्ताः । मदिरोत्कटाश्च मद्येनमत्ताश्च । " मत्तेशौण्डोत्कटक्षीवाः " इत्यमरः । तथैवअनुभवकालइवावर्तिषतेत्यर्थः । प्रमर्दिताः प्रकीर्णाश्च भोगवशादितिभावः । पृथक् पूर्वस्रग्भ्योविलक्षणाः ॥ ८३ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने एकनवतितमः सर्गः ॥ ९१ ॥

व्युष्य विशेषेणोषित्वा । सपरिच्छदः सपरिवारः " परिवारःपरिकरःपरिष्कन्दःपरिग्रहः । तथोपकरणंप्रोक्तंपरिवर्हःपरिच्छदः " इतिहलायुधः । कामात् रामप्राप्तीच्छया ॥ १—२ ॥ अस्मद्विषये अस्मदाश्रमे । रात्रिःसुखागताकच्चिदित्यन्वयः । आतिथ्येविषये समग्रः संपूर्णस्तृप्तइतियावत् । अनघेत्यनेनपूर्वंभरताशयपरीक्षणार्थमेवातिथ्यकरणमितिद्योतितं । रामविषयभक्त्यभावेभोगप्रवणःस्यादितिहृदयं ॥ ३ ॥ अभिनिष्क्रान्तमित्यनेन कौसल्यादिसर्वजनदर्शनार्थं भरतागमनकालएवबहिर्निर्गतवानृषिरितिव्यञ्जितं ॥ ४ ॥ बलवत्तर्पितः अतीवतर्पितः । " किमुतातीवबलवत्स्वतिसुष्ठुचनिर्भरे " इतिवैजयन्ती ॥ ५ ॥ अपेतेति । क्लमोग्लानिः संतापोदेहौष्ण्यं । अपिप्रेष्यानुपादाय प्रेष्यानप्यारभ्य सुभिक्षाः समृद्धान्नपानाः सुप्रतिश्रयाः शोभनस्थानाः शोभनगृहाइतियावत् । " स्थानेगोष्ठ्यांसत्रयागेप्रत्याहारेप्रतिश्रयः " इतिवैजयन्ती ॥ ६ ॥ कामं यथेष्टं । " कामंप्रकामंपर्याप्तं निकामेष्टंयथेप्सितं " इत्यमरः । हेभगवन् त्वामामन्त्रये आपृच्छे । भ्रातुःसमीपंकामंप्रस्थितंमां त्वं मैत्रेण मित्रसंबन्धिना चक्षुषा ईक्षस्व ॥ ७ ॥ धर्मेणयोगजधर्मेणजानातीतिधर्मज्ञ योगप्रभावविदितसर्ववृत्तान्तेत्यर्थः । धार्मिकस्य पितृवचनपरिपालनरूपंधर्ममाच-

---

ति० ते जनः समग्रः सम्यक्कृतिकः । अभूदितिशेषः । अनेनहितपएवमहत्सर्वेष्टसाधनंनतुराज्यादीतिऋषिणाबोधितोभरतः ॥ ३ ॥ ति० जनसमूहस्यबहुलात्सर्वेषांस्वदर्शनेनकृतकृत्यत्वायाश्रमान्निष्क्रान्तं ॥ ४ ॥ ति० बलवान् सेनासहितः ॥ ५ ॥ स०

[पा०] १ ङ. छ. ट. पृथग्विकीर्णाः. २ ग. विमर्दिताः. ३ क. च. ञ. कृतातिथ्यं.' ४ क. ख. ङ. च. छ. झ. ञ. प्रेक्ष्यप्राञ्जलिमागतं. ५ छ. झ. ट. दुपनिष्क्रान्तं. ६ ङ. च. छ. झ. ञ. बलवत्तर्पितश्चाहंबलवान्भगवंस्त्वया. ७ क. ग. घ. सुभक्षाः. ८ क. च. ञ. सर्वेपि. ग. सर्वेते. ९ घ. सुखोचिताः. १० क. ख. ग. च. ञ. आमन्त्रयेत्वां. ११ क. ख. ग. च. ञ. त्वमृषि. १२ क. कतरो.

इति पृष्टस्तु भरतं भ्रातृदर्शनलालसम् ॥ प्रत्युवाच महातेजा भरद्वाजो महातपाः ॥ ९ ॥
भरतार्धतृतीयेषु योजनेष्वजने वने ॥ चित्रकूटो गिरिस्तत्र रम्यनिर्दरकाननः ॥ १० ॥
उत्तरं पार्श्वमासाद्य तस्य मन्दाकिनी नदी ॥ पुष्पितद्रुमसंछन्ना रम्यपुष्पितकानना ॥ ११ ॥
अनन्तरं तत्सरितश्चित्रकूटश्च पर्वतः ॥ तयोः पर्णकुटी तात तत्र तौ वसतो ध्रुवम् ॥ १२ ॥
दक्षिणेनैव मार्गेण सव्यदक्षिणमेव वा ॥ गजवाजिरथाकीर्णां वाहिनीं वाहिनीपते ॥
वाहयस्व महाभाग ततो द्रक्ष्यसि राघवम् ॥ १३ ॥
प्रयाणमिति तच्छ्रुत्वा राजराजस्य योषितः ॥ हित्वा यानानि यानार्हा ब्राह्मणं पर्यवारयन् ॥ १४ ॥
वेपमाना कृशा दीना सहदेव्या सुमित्रया ॥ कौसल्या तत्र जग्राह कराभ्यां चरणौ मुनेः ॥ १५ ॥
असमृद्धेन कामेन सर्वलोकस्य गर्हिता ॥ कैकेयी तस्य जग्राह चरणौ सव्यपत्रपा ॥ १६ ॥
तं प्रदक्षिणमागम्य भगवन्तं महामुनिम् ॥ अदूराद्भरतस्यैव तस्थौ दीनमनास्तदा ॥ १७ ॥

रतः । महासनः महाधैर्यस्य । तस्य रामस्याश्रममाचक्ष्व सचाश्रमः कियान् कियद्दूरतः । तस्यमार्गःकतमइतिपृच्छतेमे मह्यं शंसेतियोजना ॥ ८ ॥ महातपाः अतएवमहातेजाः सर्वज्ञानसमर्थइत्यर्थः । रामाश्रमप्रदेशाभिज्ञेषुगुहज्ञातिषुविद्यमानेषु मुनिंप्रतिप्रश्नस्तस्य पूजार्थे ॥ ९ ॥ अर्धतृतीयेष्विति अर्धंतृतीयंयेषांतेष्वर्धतृतीयेषु सार्धयोजनद्वितयइत्यर्थः । अतीतेष्वितिशेषः । अजने मुनिव्यतिरिक्तग्राम्यजनरहिते वने तत्रप्रसिद्धोगिरिः वर्ततइतिशेषः ॥ १० ॥ तस्यगिरेरुत्तरंपार्श्वमासाद्य स्थितामन्दाकिनीनामकाचिन्नदी अस्तीतिशेषः । द्रुमाः काननभिन्नाः ॥ ११ ॥ तत्सरितोमन्दाकिन्याः अनन्तरं समीपे । चित्रकूटस्तिष्ठति नतु व्यवहितपार्श्वे । तयोः सरिद्गिर्योर्मध्ये । पर्णकुटी पर्णशाला कृता तत्रवसतः ध्रुवंयोगप्रभावेनजानामीत्यर्थः ॥ १२ ॥ अस्मादाश्रमात् दक्षिणेनमार्गेणकिंचिद्दूरंगत्वा ततःसव्यदक्षिणं नैर्ऋतदिग्भागोयथाभवतितथावाहिनींवाहयस्व किंचिद्दूरंदक्षिणएकोमार्गः ततःशाखामार्गेणनैर्ऋतदिग्भागगामिनागन्तव्यमिति भावः । कान्तारमार्गस्यसूक्ष्मत्वाद्यथायोग्यंमार्गस्यवामतोदक्षिणतश्चविरलप्रदेशेवाहिनाप्रापयस्वेत्यर्थइत्यप्याहुः ॥ १३ ॥ इति उक्तप्रकारेण । तत्प्रयाणं प्रस्थानं श्रुत्वा । राजराजस्य महाराजस्यदशरथस्य । योषितः कौसल्याद्याः । यानार्हाः यानत्यागानर्हाअपियानानित्यक्त्वा । ब्राह्मणं ब्रह्मविदंभरद्वाजं । पर्यवारयन् वन्दनायेतिशेषः ॥ १४ ॥ वेपमाना वार्धकादपिदर्शनाच्च । कृशा दीना । रामविरहादितिशेषः ॥ १५ ॥ असमृद्धेन अपूर्णेन फलापर्यवसायिनेतियावत् । कामेन मनोरथेन उपलक्षितेतिशेषः । लोकस्यगर्हिता लोकेनगर्हिता । सव्यपत्रपा सलज्जा । रामविवासनहेतुत्वात् ॥ १६ ॥ लज्जावशादेवकौसल्यादिभिःसह मुनेःपुरतः स्थातुमशक्ताप्रदक्षिणव्याजेनभरतंगतेत्याह—तमित्यादिना । दीनमनाः कैके-

अपेतक्लमसंतापाःविगतबाह्याभ्यन्तरसंतापाः ॥ ६ ॥ **ती०** अर्धतृतीयेषु अर्धयुक्ततृतीयेष्वित्यर्थः । सार्धयोजनद्वयेवा । **स०**
अर्धतृतीयंयेषु प्रथमंद्वितीयंतृतीयंचेतित्रिषुयोजनेषु । दशक्रोशपरिमितोमार्गइतियावत् । रम्यंनिर्झरयुक्तंकाननंयस्मिन्सतथा
शि० अर्धतृतीयेषुअर्धमेवतृतीयंयस्मिन् । सार्धद्वयमित्यर्थः । तस्यैकशेषेणकपिञ्जलाधिकरणन्यायेनसार्धसप्तेत्यर्थः । तेषुयो-
जनेषु । अजने दुर्जनरहिते ॥ १० ॥ **स०** आसाद्यप्राप्यतिष्ठतीत्यर्थः । पुष्पितद्रुमसंछन्ना पुष्पितद्रुमैःसम्यक्छन्ना । एतेवृक्षास्ती-
रजाइतिज्ञेयं । पुष्पितकाननेत्येतत्तुविप्रकृष्टतयेतिज्ञातव्यं ॥ ११ ॥ **ति०** तस्याअनन्तरंततपरपार्श्वेचित्रकूटपर्वतं तयोरामलक्ष्मणयोः
पर्णकुटींचद्रक्ष्यसि ॥१२॥ **स०** हित्वा अनारुह्येत्यर्थः । यानार्हाःयानप्रवेशनयोग्याः ॥ १४ ॥ **शि०** सर्वलोकस्यगर्हिता रक्षकत्वे-
नस्वीकारकर्त्री । सव्यपत्रपा सव्यंकौसल्यावामभागंपातिसव्यपा । त्रपतइतित्रपा स्वस्यरामविवासनहेतुत्वस्मृत्याकिंचिल्लज्जावती ।

[पा०] १ ङ. छ. झ. ट. भ्रातुर्दर्शन. २ ख. ग. ङ. छ. झ. ञ. ट. चित्रकूटगिरिः. ३ ङ. संपन्ना. ४ ङ. छ. झ. ञ. ट. दक्षिणेनचं. ७ ख. च. ञ. सव्यंदक्षिणमेवच. क. छ. श्चित्रकूटंचपर्वतं. ५ ङ. छ. झ. ट. पर्णकुटीं. ६ ङ. च. छ. झ. ञ. ट. दक्षिणेनचं. ७ ख. च. ञ. सव्यंदक्षिणमेवच. क. छ. झ. ट. सव्यदक्षिणमेवच. ८ ङ. च. ञ. ट. समाकीर्णां. ९ ग. गदावाहो. १० क. ख. घ—ट. मितिचश्रुत्वा. ११ क. च. ञ. तस्य. १२ छ. झ. ट. तत्र.

ततः पप्रच्छ भरतं भरद्वाजो दृढव्रतः ॥ विशेषं ज्ञातुमिच्छामि मातॄणां तव राघव ॥ १८ ॥
एवमुक्तस्तु भरतो भरद्वाजेन धार्मिकः ॥ उवाच प्राञ्जलिर्भूत्वा वाक्यं वचनकोविदः ॥ १९ ॥
यामिमां भगवन्दीनां शोकानशनकर्शिताम् ॥ पितुर्हि महिषीं देवीं देवतामिव पश्यसि ॥ २० ॥
एषा तं पुरुषव्याघ्रं [1]सिंहविक्रान्तगामिनम् ॥ कौसल्या सुषुवे रामं धातारमदितिर्यथा ॥ २१ ॥
अस्या [2]वामभुजं श्लिष्टा यैषा तिष्ठति दुर्मनाः ॥ [[3]इयं सुमित्रा दुःखार्ता देवी राज्ञश्च मध्यमा ॥]
कर्णिकारस्य शाखेव शीर्णपुष्पा वनान्तरे ॥ २२ ॥
एतस्यास्तु सुतौ देव्याः कुमारौ देववर्णिनौ ॥ उभौ लक्ष्मणशत्रुघ्नौ वीरौ सत्यपराक्रमौ ॥ २३ ॥
यस्याः कृते नरव्याघ्रौ जीवनाशमितो गतौ ॥ राजापुत्रविहीनश्च स्वर्गं दशरथो गतः ॥ २४ ॥
क्रोधनामकृतप्रज्ञां दृप्तां सुभगमानिनीम् ॥ ऐश्वर्यकामां कैकेयीमनार्यामार्यरूपिणीम् ॥ २५ ॥
ममैतां मातरं विद्धि नृशंसां पापनिश्चयाम् ॥ [4]यतोमूलं हि पश्यामि व्यसनं महदात्मनः ॥ २६ ॥
इत्युक्त्वा [5]नरशार्दूलो [6]बाष्पगद्गदया गिरा ॥ स [7]निशश्वास ताम्राक्षो [8]नागः क्रुद्ध इव श्वसन् ॥२७॥
भरद्वाजो महर्षिस्तं ब्रुवन्तं भरतं [9]तथा ॥ प्रत्युवाच [10]महाबुद्धिरिदं वचनमर्थवत् ॥ २८ ॥

यी ॥ १७ ॥ दृढव्रतइत्यनेन सर्वज्ञत्वंलक्ष्यते । सर्वज्ञोपिकैकेयीशिक्षार्थंपप्रच्छेत्यर्थः । विशेषं संज्ञासंज्ञिसंबन्धादिविशेषं इतिकरणमध्याहृत्य इतिपप्रच्छेत्यन्वयः ॥ १८ ॥ धार्मिकः सत्यवादीत्यर्थः । वचनकोविदः वचनेपण्डितः भरद्वाजवचनतात्पर्यज्ञइत्यर्थः । भरतमुखेनमातॄणांस्वभावविशेषप्रतिपादनंहिमुनेराशयः ॥ १९ ॥ शोकानशनकर्शितां शोकानशनाभ्यांकर्शितां । देवतामिव धर्मदेवतामिव । सिंहविक्रान्तगामिनं सिंहवद्विक्रान्तंविक्रमयुक्तंयथाभवतितथागामिनं गमनशीलं । धातारं विष्णुं । "एषधाताविधाताच" इतिवक्ष्यमाणत्वात् । सर्वगुणसंपन्नारामामाताएषाकौसल्येत्यर्थः ॥ २०—२१ ॥ वामभुजंश्लिष्टा कौसल्यायावेपमानाङ्गत्वात्तद्धारणार्थंतद्वामभुजमवधृत्यस्थितेत्यर्थः । दुर्मनाः दुःखितमनाः । दुर्मनस्त्वेदृष्टान्तः—कर्णिकारस्येति । शीर्णपुष्पा म्लानपुष्पा ॥ २२ ॥ एतस्याइत्यत्र उक्तगुणसंपन्नयोर्लक्ष्मणशत्रुघ्नयोर्मातेयमितिबोध्यं । देववर्णिनौ अश्विनीदेवतुल्यौ ॥ २३ ॥ जीवनाशं राक्षसभूयिष्ठंदण्डकारण्यंप्रतिविवासनात् जीवस्यजीवनस्यनाशं । इतः इहवने । क्रुध्यतीतिक्रोधना कर्तरिल्युट् । अकृतप्रज्ञां अशिक्षितबुद्धिं । सुभगमानिनीं सुभगांसुन्दरीमात्मानंमन्यतइतिसुभगमानिनीतां । वस्तुतोऽनार्यां आर्यरूपिणीं । आर्यवद्भासमानां । यतोमूलं यत्कारणकं । आत्मनोमम ॥ २४—२६ ॥ बाष्पगद्गदया रामविवासनस्मरणजबाष्पेणगद्गदया स्खलन्त्या गिरा इत्युक्त्वा । नागः सर्पः ॥ २७ ॥ तथाब्रुवन्तमित्यन्वयः । महाबुद्धिः भाविज्ञः । अर्थवत् प्रयोजनवत् ॥ २८ ॥

सैवसेतिकर्मधारयः । कैकेयीच ॥ १६ ॥ शि० शोकानशनकर्शितां शोकहेतुकभोजनाभावहेतुककृशताविशिष्टां ॥ २० ॥ स० धातारं उपेन्द्रं ॥ २१ ॥ स० देववर्णिनौ देवानांवर्णोरूपमेतयोरस्तीतितथा । यद्वा देवानांवर्णोवर्णनास्तुतिरितियावत् । ययोस्तौ । कुमारौ षण्मुखसमौ । कुःकुत्सितोमारःसौन्दर्येणयाभ्यामितिवा । अतोनसुताविल्यतिरिक्तता ॥ २३ ॥ स० जीवनेपिनाशःजीवनाशः अदर्शनमितियावत् । तंगतौ । शि० जीवनाशं जीवस्यप्रजापालनस्यनाशंअभावं गतौ ॥ २४ ॥ शि० क्रोधेनामप्रसिद्धिर्यस्यास्साक्रोधनामामन्थरा । तस्यांकृतास्थापिताप्रज्ञाबुद्धिर्ययातां मन्थरानुकूलवर्तिनीमित्यर्थः । दृप्तां अहमतीवराजप्रियेतिगर्वविशिष्टां राजातिप्रीतिविषयीभूतामित्यर्थः । अतएवसुभगमानिनीं सुभगानांराज्ञःस्वशुभप्राप्तीच्छावतांकर्तॄणांमानःपूजाअस्ति अस्यास्तां । अतएवऐश्वर्यैःकामयतेशोभतेसातां । आर्यरूपिणीं प्रशस्तरूपविशिष्टां । तत्ववेत्तृसत्कृतिनिरतांवा । नृशंसां रामवियोगहेतुत्वेननृभिःकथ्यमानां । पापनिश्चयां पापेस्वहेतुकवियोगदुःखदानरूपापराधेनिश्चयोयस्यास्तां । यतोयस्याःअमूलंअकारणकं आत्मनोव्यसनं अनवस्थितिंपश्यामि तांअनार्यांकनिष्ठांएतांकैकेयींममातरंविद्धि । स० आर्यरूपिणीं आर्यस्यवस्तुनइवरूपंयस्यास्तां ।

[पा०] १ क. ख. घ. च. ञ. व्याघ्रविक्रान्त. २ क. ख. च. वामंभुजं. ३ इदमर्धं ङ. छ. ज. झ. ट. पुस्तकेषुदृश्यते. ४ घ. ततोमूलं. ५ ग. नृपशार्दूलो. ६ ग. बाष्पोपहतया. ७ ङ. छ. झ. विनिश्वस्यस. ८ क. ख. ग. च. ज. ञ. ट. क्रुद्धोनागइवासकृत्. छ. झ. क्रुद्धोनागइव. ९ ख. ग. ङ. छ—ट. तदा. १० ङ. बुद्धिर्नृशंसांपापनिश्चयां.

न [1]दोषेणावगन्तव्या कैकेयी भरत त्वया ॥ रामप्रव्राजनं ह्येतत्सुखोदर्कं भविष्यति ॥ २९ ॥
देवानां दानवानां च ऋषीणां [2]भावितात्मनाम् ॥ हितमेव भविष्यद्धि रामप्रव्राजनादिह ॥ ३० ॥
अभिवाद्य तु संसिद्धः कृत्वा चैनं प्रदक्षिणम् ॥ आमन्त्र्य भरतः सैन्यं युज्यता[3]मित्यचोदयत् ॥ ३१ ॥
ततो वाजि[4]रथान्युक्त्वा दिव्यान्हेम[5]परिष्कृतान् ॥ अध्यारोह[6]त्प्रयाणार्थी बहून्बहुविधो जनः ॥ ३२ ॥
[7]गजकन्या गजाश्चैव हेमकक्ष्याः पताकिनः ॥ जीमूता इव घर्मान्ते सघोषाः संप्रतस्थिरे ॥ ३३ ॥
विविधान्यपि यानानि महान्ति च लघूनि च ॥ प्रययुः सुमहार्हाणि पादैरेव पदातयः ॥ ३४ ॥
अथ यानप्रवेकैस्तु कौसल्याप्रमुखाः स्त्रियः ॥ रामदर्शनकाङ्क्षिण्यः प्रययुर्मुदितास्तदा ॥ ३५ ॥
[8]चन्द्रार्कतरुणाभासां नियुक्तां शिबिकां शुभाम् ॥ आस्थाय प्रययौ श्रीमान्भरतः सपरिच्छदः ॥ ३६ ॥
सा प्रयाता महासेना गजवाजि[9]रथाकुला ॥ दक्षिणां दिशमावृत्य महामेघ इवोत्थितः ॥ ३७ ॥
वनानि तु व्यतिक्रम्य जुष्टानि मृगपक्षिभिः ॥ गङ्गायाः परवेलायां गिरि[10]ष्वपि नदीषु च ॥ ३८ ॥

सा संप्रहृष्ट[11]द्विजवाजियोधा [12]वित्रासयन्ती मृगपक्षि[13]सङ्घान् ॥
महद्वनं त[14]त्प्रतिगाहमाना रराज सेना भरतस्य तत्र ॥ ३९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे द्विनवतितमः सर्गः ॥ ९२ ॥

दोषेण दोषवत्तया नावगन्तव्या तस्याःदेवप्रेरितत्वादित्यभिप्रायः । तत्रहेतुमाह—रामेति । सुखोदर्कं सुखोत्तरं । अतीतानागतवर्तमानज्ञोमहर्षिर्भाविरावणवधादिकंहृदिनिधायदेवादीनांसुखोदर्कंभविष्यतीत्युक्तवान् ॥ २९—३० ॥ संसिद्धः लब्धाशीर्वादः । आमन्त्र्य आपृच्छ्य । युज्यतां गमनायसंनह्यतामिति स्वसैन्यमचोदयत् ॥ ३१ ॥ वाजिरथान् वाजिनोरथांश्च । युक्त्वा संनह्य । युक्तानितिपाठे सज्जीकृतान् । प्रयाणार्थी प्रयाणकाङ्क्षी ॥ ३२ ॥ गजकन्याः करेणवः । हेमकक्ष्याः हेममयबन्धनरज्जवः । सघोषाः घण्टाघोषयुक्ताः । पताकिनइत्यत्र " पुमान्स्त्रिया " इत्येकशेषः ॥ ३३ ॥ प्रययुरित्यत्रसादिनआरुह्येति शेषः । यद्वा यानानीतितत्स्थालक्ष्यन्ते । पदातयः पादैरेवययुः । यानैःसमंययुरितिभावः ॥ ३४ ॥ यानप्रवेकैः यानोत्तमैः । " प्रवेकानुत्तमोत्तमाः " इत्यमरः ॥ ३५ ॥ चन्द्रार्कतरुणाभासां तरुणचन्द्रार्ककान्ति । नियुक्तां वसिष्ठादिभिराज्ञप्तां । सपरिच्छदः सपरिवारः ॥ ३६ ॥ सेत्यादिश्लोकद्वयमेकंवाक्यं । गङ्गायाः दक्षिणवाहिन्याः । परवेलायां पश्चिमभागे । स्थितेतिशेषः । महासेनावनानिव्यतिक्रम्य गिरिषुनदीषुचविश्रम्येतिशेषः । उत्थितोमेघइव दक्षिणांदिशमावृत्यप्रयातेतिसंबन्धः । यद्वा महासेनागिरिषुनदीषुचवनानिव्यतिक्रम्येतिवाऽन्वयः ॥ ३७—३८ ॥ तत्र तदेत्यर्थः ॥ ३९ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीतांबराख्याने अयोध्याकाण्डव्याख्याने द्विनवतितमःसर्गः ॥ ९२ ॥

यामूलंयस्यव्यसनस्यतद्यतोमूलं ॥ २५—२६ ॥ **ति०** भविष्यदितिशत्रन्तं । जानीहीतिशेषः । एवंदेवादिकृतोऽयंमन्थराद्वाराकैकेय्याबुद्धिमोहइतिभावः । अतएवनैषादोषभागितिबोध्यं । देवादीनांसुखदत्वात् । **स०** दानवानां सतां ॥ ३० ॥ **स०** संसिद्धः संनद्धः ॥ ३१ ॥ **ति०** चन्द्रार्कतरुणाभासां तरुणचन्द्रार्कसदृशीं । क्वचिद्भागेस्फटिकादिनिर्मितां क्वचिद्भागेपद्मरागादिनिर्मितामितियावत् ॥ ३६ ॥ **ती०** गङ्गायाःपरवेलायां दक्षिणकूले निविष्टासासेना उत्थितोमेघइवदक्षिणांदिशमावृत्य गिरिष्वपिनदीषुवनानिव्यतिक्रम्यप्रयातेतिसंबन्धः ॥ ३८ ॥ इतिद्विनवतितमस्सर्गः ॥ ९२ ॥

[पा०] १ ख. ग. दोषेणहिमन्तव्या. २ घ. च. ञ. चमहात्मनां. ३ ङ. ट. मितिचाब्रवीत्. ४ ग. रथान्नागान्युक्तान्. ८ ग. घ. ख. च. ज. रथान्युक्तान्दिव्यान्. ५ ङ. ट. भूपितान्. ६ ङ. च. छ. झ. ञ. ट. त्प्रयाणार्थे. ७ ख. ग. करिण्यश्च. ८ ग. घ. सचार्क. ९ च. छ. झ. ञ. ट. समाकुला. १० छ. झ. ट. गिरिष्वथनदीष्वपि. ११ क. ङ. ज. झ. ट. द्विपवाजियूथा. १२ च. विकासयन्ती. १३ क. च. ञ. यूथान्. १४ क—छ. झ. ञ. ट. त्प्रविगाहमाना.

त्रिनवतितमः सर्गः ॥ ९३ ॥

सैन्यादिभिःसह चित्रकूटमागतवताभरतेनभरद्वाजोक्तलक्षणैस्तस्य चित्रकूटत्व निर्धारणेनसैन्यान्प्रतिरामाश्रमान्वेषणचोदना ॥ १ ॥ रामावासंविचिन्वद्भिर्नातिदूरेधूमदर्शनमावेदितेनभरतेनतद्देशस्यरामावासत्वसंभावनयातत्रैवसेनास्थापनपूर्वकं वसिष्ठसुमन्त्रसाहित्येनतद्देशगमनाध्यवसायः ॥ २ ॥

तया महत्या [1]यायिन्या ध्वजिन्या वनवासिनः ॥ अर्दिता यूथपा मत्ताः सयूथाः संप्रदुद्रुवुः ॥ १ ॥
ऋक्षाः पृषत[2]सङ्घाश्च रुरवश्च समन्ततः ॥ दृश्यन्ते [3]वनराजीषु गिरिष्वपि नदीषु च ॥ २ ॥
स संप्रतस्थे धर्मात्मा प्रीतो दशरथात्मजः ॥ वृतो महत्या [4]नादिन्या सेनया चतुरङ्गया ॥ ३ ॥
सागरौघनिभा सेना भरतस्य महात्मनः ॥ महीं संच्छादयामास प्रावृषि द्यामिवाम्बुदः ॥ ४ ॥
तुरङ्गौघैरवतता वारणैश्च [5]महाजवैः ॥ अनालक्ष्या चिरं कालं तस्मिन्काले बभूव [6]भूः ॥ ५ ॥
स [7]यात्वा दूरमध्वानं [8]सुपरिश्रान्तवाहनः ॥ उवाच [9]भरतः श्रीमान्वसिष्ठं मन्त्रिणां वरम् ॥ ६ ॥
[10]यादृशं लक्ष्यते रूपं यथा चैव [11]श्रुतं मया ॥ व्यक्तं प्राप्ताः स्म तं देशं भरद्वाजो यमब्रवीत् ॥ ७ ॥
अयं गिरिश्चित्र[12]कूटं इयं मन्दाकिनी नदी ॥ एतत्प्रकाशते दूरान्नीलमेघनिभं वनम् ॥ ८ ॥
गिरेः सानूनि रम्याणि चित्रकूटस्य संप्रति ॥ वारणैरवमृद्यन्ते [13]मामकैः पर्वतोपमैः ॥ ९ ॥
मुञ्चन्ति कुसुमान्येते नगाः पर्वतसानुषु ॥ नीला इवातपापाये तोयं तोयधरा घनाः ॥ १० ॥
किंनरा[14]चरितं देशं पश्य शत्रुघ्न [15]पर्वतम् ॥ [16]मृगैः समन्तादाकीर्णं मकरैरिव सागरम् ॥ ११ ॥

यायिन्या गच्छन्त्या । अर्दिताः पीडिताः । यूथपाः गजादियूथनाथाः । " यूथनाथस्तुयूथपः " इत्यमरः ॥ १ ॥ पृषतसङ्घाः बिन्दुमन्मृगसङ्घाः । ऋक्षाः भल्लूकाः । रुरवोबिन्दुरहिताः स्थूलकायाः विकटशृङ्गा मृगाः । दृश्यन्ते अदृश्यन्त । वनराजीष्वित्यादिनाअपूर्वमनुष्यादिदर्शनेनस्तब्धेक्षणाःस्थिताइत्युच्यन्ते ॥ २ ॥ नादिन्या रथघोषहेषितबृंहितादिभिरितिशेषः ॥ ३ ॥ द्यां आकाशं ॥ ४ ॥ अवतता निरन्तरा । तस्मिन्काले गमनकाले । चिरकालमित्यनेनकदाचिल्लक्ष्यतइतिगम्यते ॥ ५ ॥ मन्त्रिणां मन्त्रविदां । यद्वा औचित्यान्मन्त्रशब्दःकार्यविचारेवर्तते ॥ ६ ॥ अस्य देशस्य यादृशंरूपंलक्ष्यते मन्दाकिनीचित्रकूटमध्यवर्तित्वरूपं मयाच यथा येनप्रकारेणश्रुतं भरद्वाजात् तथाऽदृश्यतइतिशेषः ॥ ७ ॥ तदेवाह—अयमित्यादिना । अयं पुरोवर्तीगिरिश्चित्रकूटोभवति तथेयंमन्दाकिनीभवति । एतत् अनयोर्मध्यवर्तिवनं । नीलमेघनिभंप्रकाशते ॥ ८ ॥ अथतद्देशप्राप्तिंदर्शयति —गिरेःसानूनीति । सानूनि एतानीतिसिद्धं । अवमृद्यन्ते भज्यन्ते ॥ ९ ॥ अथरामनिवासत्वेनभोग्यतावुद्ध्यातद्वनंभ्रातरंप्रतिवर्णयति—मुञ्चन्तीत्यादि। एते वकुलाइत्यर्थः । आतपापाये घर्मान्ते वर्षाकाल इतियावत् । तोयधराइति नीलत्वेहेतुः ॥ १० ॥ किंनराचरितंदेशं किंनराचरितदेशरूपंपर्वतं ॥ ११ ॥

ति० वनवाटेषु वनमार्गेषु । "वाटःपथश्चपन्थाश्च" इतिशब्दरत्नमाला ॥ २ ॥ ति० सा मही ॥ ५ ॥ स० भरद्वाजोयंदेशं यादृशं यादृशलक्षणंविशिष्टंअब्रवीत् यथाचमयाश्रुतं तादृशलक्षणंतंदेशं व्यक्तंप्राप्तास्स्म । यतोस्यरूपंतथैवलक्ष्यते । स्मेत्यव्ययंवा आर्षोवाविसर्गलोपः ॥७॥ स० यंभरद्वाजोऽब्रवीदित्यस्यात्राप्यन्वयः । तथायांनदीमब्रवीत्सामन्दाकिनीनदीइयमेवेत्यन्वयः ॥८॥ ति० अवमृद्यन्ते पीड्यन्ते ॥ ९ ॥ ति० अतएवैते नगाः वृक्षाः गजानामाघातेनचलितशाखाः पर्वतसानुषुकुसुमानिमुञ्चन्ति

[पा०] १ ख. ग. गच्छन्त्या. २ ङ. छ. झ. ट. मुख्याश्च. ग. संघाता. ३ छ. झ. वनवाटेषु. ४ घ. च. ञ. यायिन्या. ५ ङ. च. छ. झ. ञ. ट. महाबलैः. ६ ङ. च. छ. झ. ञ. ट. सा. ७ क. ग. ङ. छ. झ. ञ. ट. गत्वा. ८ क. ङ. च. छ. झ. ञ. संपरि. ट. सपरि. ९ ङ. छ. झ. ट. वचनंश्रीमान्. १० घ. तादृशं. ११ ङ. छ. झ. ट. मयाश्रुतं. १२ क. ग. ङ—ञ. कूटस्तथा. १३ च. ट. कामगैः. १४ क. ग. घ. च. ञ. चरितोद्देशं. १५ ख. ङ. छ. झ. ट. पर्वते. १६ क. ख. ग. ङ. छ. झ. ञ. ट. हयैः.

एते मृगगणा भान्ति शीघ्रवेगाः प्रचोदिताः ॥ वायुप्रविद्धा[1] शरदि मेघराजि[2]रिवाम्बरे ॥ १२ ॥
कुर्वन्ति कुसुमापीडाञ्शिरस्सु सुरभीन[3]मी ॥ मेघप्रकाशैः फलकैर्दाक्षिणात्या यथा[4] नराः ॥ १३ ॥
निष्कूजमिव भूत्वेदं वनं घोरप्रदर्शनम् ॥ अयोध्येव जनाकीर्णा[5] संप्रति[6] प्रतिभाति मा[7] ॥ १४ ॥
खुरै[8]रुदीरितो रेणु[9]र्दिवं प्रच्छाद्य तिष्ठति ॥ तं वहत्यनिलः शीघ्रं कुर्वन्निव मम प्रियम् ॥ १५ ॥
स्यन्दनांस्तुरगोपेतान्सूतमुख्यैरधिष्ठितान् ॥ एतान्संपततः शीघ्रं पश्य शत्रुघ्न कानने ॥ १६ ॥
एतान्वित्रासितान्पश्य बर्हिणः प्रियदर्शनान् ॥ एतमा[10]विशतः शीघ्रमधिवासं पतत्रिणः[11] ॥ १७ ॥
अतिमात्रमयं देशो मनोज्ञः प्रतिभाति मा[12] ॥ तापसानां निवासोऽयं व्यक्तं स्वर्गपथो[13] यथा ॥ १८ ॥
मृगा मृगीभिः सहिता बहवः पृषता वने ॥ मनोज्ञरूपा लक्ष्यन्ते[14] कुसुमैरिव चित्रिताः ॥ १९ ॥
साधुसैन्याः प्रतिष्ठन्तां विचिन्वन्तु च कानने[15] ॥ यथा तौ पुरुषव्याघ्रौ दृश्येते रामलक्ष्मणौ ॥ २० ॥
भरतस्य वचः श्रुत्वा पुरुषाः शस्त्रपाणयः ॥ विविशु[16]स्तद्वनं शूरा धूमं[17] च ददृशुस्ततः ॥ २१ ॥
ते समालोक्य धूमाग्रमूचुर्भरतमागताः ॥ नामनुष्ये भवत्यग्निर्व्यक्तमत्रैव राघवौ ॥ २२ ॥

प्रचोदिताः सैनिकैरितिशेषः । प्रविद्धा प्रेरितेतियावत् ॥ १२ ॥ अमी भटाः । मेघप्रकाशैः फलकैः केशवन्धविशेषैः वनसंचारार्थक्लिप्तैरुपलक्षिताःसन्तः । दाक्षिणात्यानरायथा दाक्षिणा[illegible]व । शिरस्सु कुसुमापीडान् कुसुमशेखरान् कुर्वन्ति । "आपीडशेखरोत्तंसावतंसाःशिरसिस्रजः" इतिहलायुधः । दाक्षिणात्याहिकेशानुद्धृत्यबध्वाकुसुमापीडैरलंकुर्वन्ति ॥ १३ ॥ घोरप्रदर्शनं क्रूरदर्शनमिदंवनं पुरानिष्कूजमिवभूत्वा निर्जनंभूत्वेतियावत् । संप्रति जनाकीर्णा अयोध्या सौम्यनगरीव मा मांप्रतिभाति ॥ १४ ॥ हयादिखुरैरुदीरितः उत्थापितोरेणुर्दिवंप्रच्छाद्यतिष्ठति । वहति द्रुतमपनयति । कुर्वन्निवमम प्रियं रामाश्रमदर्शनप्रदानादितिभावः । अनेनावगम्यते रामाश्रमवर्णनंतदधिष्ठितत्वेनप्रीतिहेतुत्वादिति ॥ १५ ॥ वक्ष्यमाणत्रासहेतुत्वेनाह—स्यन्दनानिति । सूतमुख्यैः सारथिमुख्यैः । संपततः रामदर्शनकुतूहलेनसम्यग्ग[illegible] ॥ १६ ॥ वित्रासितान् रथैरितिशेषः । बर्हिणः मयूरान् । एतं शैलं । पतत्रिणः प्रशस्तपक्षानिति बार्हिविशेषणं ॥ १७ ॥ अतिमात्रंमनोज्ञइतिसंबन्धः । अतएवस्वर्गपथोयथा स्वर्गप्रदेशइव । मा मांप्रतिभाति ॥ १८ ॥ पृषताः विन्दुमृगाः ॥ १९ ॥ साधुसैन्याः उचिताःसैनिकाः । "साधुस्त्रिपूचितेसौम्येसज्जनेवार्धुषौपुमान्" इतिवैजयन्ती । प्रतिष्ठन्तां गच्छन्त्वित्यर्थः । दृश्येते दृश्येयातां । लकारव्यत्ययआर्षः ॥ २०—२१ ॥ धूमाग्रं धूमशिखां । अमनुष्ये मनुष्यरहितेदेशे । अग्निःधूमरेखाविशेषनिश्चितः नभवति । अत्र अत्रैव । वह्निमत्प्रदेशेराघवौस्तः । व्यक्तं ध्रुवं

॥ १० ॥ **स०** प्रचोदिताः प्रेरिताः त्रासिताइतियावत् ॥ १२ ॥ **ती०** दक्षिणदिग्भवानराः मेघप्रकाशैः ऋक्षादिनीलचर्मपिनद्ध-
तयानीलमेघतुल्यैःफलकैःसाधनभूतैः शिरस्सुकुसुमापीडान् कुसुमसमूहान् यथाकुर्वन्तिधारयन्ति तथैवामीवृक्षाः कुसुमापीडान्
कुसुमस्तवकान् शिरस्सुधारयन्ति । दाक्षिणात्याहिफलकानृक्षादिचर्मपिनद्धान्कृत्वातेषुपुष्पाणिविकीर्यशिरस्सुधारयन्तीतिप्रसिद्धिः ।
कतक० अमीवृक्षाः निबिडप्रत्यग्रपलाशभूयिष्ठतयामेघवदवभासमानैःफलकैर्महास्कन्धशाखाभिरुपलक्षिताः दाक्षिणात्याःदक्षि-
णदिग्भवाः शशिप्रभान्सुरभीन्कुसुमापीडान्स्तबकशेखरान्कुर्वन्ति । दाक्षिणात्याःशचिप्रभानितिपाठः ॥ १३ ॥ **ति०** इदंवनंपूर्वं
निष्कूजं जनशब्दरहितं अतएवघोरदर्शनंभूत्वा । **स०** पूर्वमपिकतिपयजनसहितत्वान्निष्कूजमिवेत्युक्तिः ॥ १४ ॥ **ती०** दावं वनं
प्रच्छाद्य । "दवदावौवनारण्यवह्नी" इत्यमरः ॥ १५ ॥ **स०** पृषतानांबिन्दुसहितत्वात्कुसुमैश्चित्रिताइवेत्युक्तिः ॥ १९ ॥ **ति०**
साधु यथोचितं प्रतिष्ठन्तां गच्छन्तु । गमनफलं—**विचिन्वन्त्वित्यादि** ॥ २० ॥ **ति०** वनदाहाभावविशिष्टतयाप्रत्यक्षंदृश्य-

[**पा०**] १ ङ. छ. झ. ट. प्रविद्धाश्शरदि. २ ङ. छ. झ. ट. मेघजालाइवा. ख. घ. च. ञ. मेघराज्यइवा. ३ क. सुरभी
नगाः. ४ ङ. च. छ. झ. ञ. ट. नरायथा. ग. नराइव. ५ ग. समाकीर्णा. ६ क. च. ञ. सांप्रतं. ७ ख. ङ. च. ज—ट.
मे. ८ क. च. रुद्दीपितो. ९ च. रेणुर्दावं. १० छ. झ. ट. एवमापततःशैलं. क. ख. ग. एनमापततःशैलं. ११ क. ख.
घ—झ. पतत्रिणां. १२ ङ. च. छ. झ. ञ. ट. मे. १३ ङ. छ. झ. ट. पथोऽनघ. ग. पथोपमः. १४ क. ग. घ. च. ञ.
दृश्यन्ते. १५ क—ट. काननं. १६ ख. व्यचिन्वंस्तद्वनं. १७ क. ङ. च. ज. झ. ट. धूमाग्रं.

[1]अथ नात्र नरव्याघ्रौ राजपुत्रौ परन्तपौ ॥ [2]मन्ये रामोपमाः सन्ति व्यक्तमत्र तपस्विनः ॥ २३ ॥
तच्छ्रुत्वा [3]भरतस्तेषां वचनं साधुसंमतम् ॥ सैन्यानुवाच [4]सर्वांस्तानमि[5]त्रबलमर्दनः ॥ २४ ॥
यत्ता भवन्तस्तिष्ठन्तु नेतो गन्तव्यमग्रतः ॥ अहमेव गमिष्यामि सुमन्त्रो [6]गुरुरेव च ॥ २५ ॥
एवमुक्तास्ततः [7]सर्वे तत्र तस्थुः समन्ततः ॥ भरतो यत्र धूमाग्रं तत्र दृष्टिं [8]समादधात् ॥ २६ ॥
व्यवस्थिता या भरतेन सा चमूर्निरीक्षमाणाऽपि च [9]धूममग्रतः ॥
बभूव हृष्टा नचिरेण [10]जानती प्रियस्य रामस्य समागमं तदा ॥ २७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे त्रिनवतितमः सर्गः ॥ ९३ ॥

चतुर्नवतितमः सर्गः ॥ ९४ ॥

रामेणसीतांप्रतितत्तद्विशेषप्रदर्शनपूर्वकंचित्रकूटवर्णनम् ॥ १ ॥

[11]दीर्घकालोषितस्तस्मिन्गिरौ गिरिव[12]नप्रियः ॥ वैदेह्या प्रियमाकाङ्क्षन्स्वं च चित्तं विलोभयन् ॥ १ ॥
अथ दाशरथिश्चित्रं चित्रकूटमदर्शयत् ॥ भार्याममरसङ्काशः शचीमिव पुरन्दरः ॥ २ ॥
न [13]राज्याद्भ्रंशनं भद्रे न सुहृद्भिर्विनाभवः ॥ मनो मे बाधते दृष्ट्वा रमणीयमिमं गिरिम् ॥ ३ ॥

॥ २२ ॥ अथ यदिनस्तइत्यर्थः । तपस्विनः सन्ति तेप्रष्टव्याइतिभावः ॥ २३ ॥ साधुसंमतं साधूनांन्यायविदांसंमतं । अमित्रबलमर्दनः अमोघशासनइतियावत् ॥ २४ ॥ यत्ताः निःशब्दाः । इतः अस्माद्देशात् । परं अग्रतः । भवद्भिर्नगन्तव्यं अहमेवराजसु मन्त्रिपुसुमन्त्रएव ऋत्विक्षुगुरुर्वसिष्ठएव । धृतिरितिपाठे सुमन्त्रएवोच्यते ॥ २५—२६ ॥ अग्रतोधूमंनिरीक्षमाणापिच अनेनरामदर्शनत्वरातिशयःसूच्यते । व्यवस्थिता भरतेनव्यवस्थापितेत्यर्थः । भरतेनहेतुनाव्यवस्थितावा। साचमूः प्रियस्यरामस्य नचिरेण अचिरेण। समागमंजानतीसती तदा व्यवस्थाकालेपिहृष्टावभूव । जानकीप्रियस्येतिचपाठः ॥२७॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने त्रिनवतितमः सर्गः ॥ ९३ ॥

एवमेतावत्पर्यन्तंभरतकथांप्रस्तुत्य रामस्यचित्रकूटप्रवेशानन्तरदिनेषुविहारतारतम्याभावात् भरतप्राप्तिदिनसंभूतविहारविशेषान्वर्णयति—दीर्घकालेत्यादिनासर्गद्वयेन । आदौश्लोकद्वयमेकान्वयं '। अथ प्रातःकर्तव्यकर्मानुष्ठानानन्तरं । तस्मिन्गिरौ चिरपरिचयेपिवैलक्षण्यातिशयादपूर्ववद्भासमाने । दीर्घकालोषितः मासमात्रमुषितोपि गिरिवनप्रियः । " नवंनवंप्रीतिरहोकरोति " इत्युक्तरीत्या गिरिवनयोर्नवनवत्वापादकप्रीतिकः । वैदेह्याः प्रियेणसहैववनदर्शनकुतूहलायाः । प्रियं प्रीतिमाकाङ्क्षन् । तद्द्वारास्वचित्तंचविलोभयन् प्रीणयन् । अमरसंकाशः कुत्रापिनिर्भयइत्यर्थः । दाशरथिः रामः । चित्रमन्वर्थं चित्रकूटं। भार्यां सर्वात्मनाभरणीयांसीतां । शचींपुरन्दरइव अदर्शयत् । "गतिबुद्धि-"–इत्यादिना द्विकर्मकत्वं ॥ १—२ ॥ राज्यात् भक्तजनपूर्णात् । विनाभवो

मानेइतिशेषः । तस्मान्मनुष्यकारणकवहृयनुपपत्त्याऽत्रैवराघवावितिजानीमः ॥ २२ ॥ **ति०** राजभीत्यानिश्चयेनतथावक्तुमशक्तवन्तःपक्षान्तरमाहुः—**अथेति** । **वि०** पक्षान्तरमाहुः—**अथवेति** । नरव्याघ्रौ अत्रयदिनस्तइतिशेषः ॥ २३ ॥ **ति०** धृतिरित्यशोकमन्त्रिणोनामान्तरं । **स०** सुमन्त्रोधृतिरित्येतौ ममपश्चादागच्छतामितिशेषः ॥ २५ ॥ **स०** समागममुद्दिश्यभरतेनस्थापिता । **वि०** याचमूर्भरतेनव्यवस्थिता व्यवस्थापिता सा वासाय अग्रतोभूमिंनिरीक्षमाणा नचिरेण शीघ्रं । जानकीप्रियस्यरामस्य समागमंनिरीक्षमाणा तदाहृष्टावभूव ॥ २७ ॥ इतित्रिनवतितमस्सर्गः ॥ ९३ ॥

शि० दीर्घकालोषितः त्रीन्मासानुषितः ॥१॥ **तनि०** राज्यात् परमपदैश्वर्यात् भ्रंशनं तत्त्यागइत्यर्थः। "त्यक्त्वावैकुण्ठमुत्तमं"

[पा०] १ च. ञ. अथवातौ. २ क—ट. अन्ये. ३ च. ञ. वचनंतेषांभरतस्साधु. ४ ग. ज. सर्वान्स्वान्. ५ च. ञ. बलसूदनः. ६ क. ग. ङ. च. छ. झ. ट. धृतिरेव. ७ क. ख. ग. ङ. च. छ. झ. ञ. ट. सैन्यास्तत्र. ८ च. समादधौ. क. ख. ग. समादधे. ९ ङ. छ. झ. ञ. ट. भूमिमग्रतः. १० क. च. ञ. जानकीप्रियस्य. ११ क. अथदीर्घोषितः. १२ घ. ङ. छ. झ. ट. वरप्रियः. १३ घ. छ. झ. ट. राज्यभ्रंशनं.

पश्येममचलं भद्रे नानाद्विजगणायुतम् ॥ शिखरैः खमिवोद्विद्धैर्धातुमद्भिर्विभूषितम् ॥ ४ ॥
केचिद्रजतसङ्काशाः केचित्क्षतजसंनिभाः ॥ पीतमाञ्जिष्ठवर्णाश्च केचिन्मणिवरप्रभाः ॥ ५ ॥
पुष्पार्ककेतकाभाश्च केचिज्ज्योतीरसप्रभाः ॥ विराजन्तेऽचलेन्द्रस्य देशा धातुविभूषिताः ॥ ६ ॥
नानामृगगणद्वीपितरक्ष्वृक्षगणैर्वृतः ॥ अदुष्टैर्भात्ययं शैलो बहुपक्षिसमायुतः ॥ ७ ॥
आम्रजम्ब्वसनैर्लोध्रैः प्रियालैः पनसैर्धवैः ॥ अङ्कोलैर्भव्यतिनिशैर्बिल्वतिन्दुकवेणुभिः ॥ ८ ॥
काश्मर्यरिष्टवरुणैर्मधूकैस्तिलकैस्तथा ॥ बदर्यामलकैर्नीपैर्वेत्रधन्वनबीजकैः ॥ ९ ॥
पुष्पवद्भिः फलोपेतैश्छायावद्भिर्मनोरमैः ॥ एवमादिभिराकीर्णः श्रियं पुष्यत्ययं गिरिः ॥ १० ॥
शैलप्रस्थेषु रम्येषु पश्येमान्रोमहर्षणान् ॥ किंनरान्द्वन्द्वशो भद्रे रममाणान्मनस्विनः ॥ ११ ॥
शाखावसक्तान्खड्गांश्च प्रवराण्यम्बराणि च ॥ पश्य विद्याधरस्त्रीणां क्रीडोद्देशान्मनोरमान् ॥ १२ ॥
जलप्रपातैरुद्भेदैर्निष्यन्दैश्च क्वचित्क्वचित् ॥ स्रवद्भिर्भात्ययं शैलः स्रवन्मद इव द्विपः ॥ १३ ॥
गुहासमीरणो गन्धान्नानापुष्पभवान्वहन् ॥ घ्राणतर्पणमभ्येत्य कं नरं न प्रहर्षयेत् ॥ १४ ॥
यदीह शरदोऽनेकास्त्वया सार्धमनिन्दिते ॥ लक्ष्मणेन च वत्स्यामि न मां शोकः प्रधक्ष्यति ॥ १५ ॥

विनावस्थानं । अपृछान्दसः । दृष्ट्वा स्थितस्येतिशेषः । मनोनबाधते नदुःखाकरोतीत्यर्थः । अयोध्यावासिजनविरहजःखेदःसर्वोनिवृत्तइतिभावः ॥ ३ ॥ स्वचित्तविलोभनमुक्त्वामैथिलीप्रियकरणंदर्शयति—पश्येति । खं आकाशं । उद्विद्धैरिवस्थितैः विद्धोत्थितैरिव स्थितैः अभ्रंलिहैरितियावत् । कर्तरिनिष्ठा ॥ ४ ॥ धातुविभूषिताः नानाधात्वलंकृताः । अतएवाचलेन्द्रस्य चित्रकूटस्य । केचिद्देशाः रजतसंकाशाः अत्यन्तशुभ्राः । केचित् क्षतजसंकाशाः रुधिरसदृशवर्णाः । मणिवरप्रभाः इन्द्रनीलप्रभाः । पुष्पार्ककेतकाभाः पुष्पःपुष्परागः । अर्कःस्फटिकः । "अर्कःस्फटिकसूर्ययोः" इत्यमरः । केतकाभाः ईषत्पाण्डुराः । ज्योतीरसप्रभाः ज्योतींषितारा:ज्वालावा । "ज्योतिस्ताराग्निभाज्वालादृक्पुत्रार्थाध्वराग्निषु" इतिवैजयन्ती । रसः पारदः । श्वेतवर्णावान्तरभेदाउच्यन्ते ॥५—६॥ द्वीपी महाव्याघ्रः । तरक्षुः क्षुद्रव्याघ्रः । अदुष्टैः । मुनिजनसंनिधानेन शान्ततयाहिंसादिदोषरहितैः ॥ ७ ॥ असनैः पीतसालैः । लोध्रैः तिरीटैः । प्रियालैः राजादनैः । अङ्कोलैः भव्यैः न्युब्जैः । तिनिशैः स्यन्दनैः । विल्वैः तिन्दुकैः कालस्कन्धैः । वेणुभिः वंशैः । काश्मरीभिः मधुपर्णिकाख्यैर्वृक्षैः । अरिष्टैः निम्बैः । वरुणैः तिक्तशाकैः । मधूकैः गुडपुष्पैः । तिलकैः क्षुरकैः । बदरीभिः आमलकैः । नीपैः कदम्बैः । वेत्रैः धन्वनैः इन्द्रवृक्षैः । बीजकैः बीजप्रचुरफलैः दाडिमैः । पुष्पवद्भिरित्यादि सर्ववृक्षविशेषणं । पुष्यति वर्धयति ॥ ८—१० ॥ रोमहर्षणान दर्शनमात्रतः पुलककरान् । द्वन्द्वशः स्त्रीपुरुषौद्वौद्वावित्यर्थः । मनस्विनः अन्योन्यबद्धमनस्कान् ॥ ११ ॥ खड्गादीनि विद्याधराणामेव । विद्याधराः देवयोनिविशेषाः ॥ १२ ॥ जलप्रपातैः निर्झरैः । उद्भेदैः भुवमुद्भिद्य निर्गतैः स्रवद्भिरितिसर्वविशेषणं ॥ १३॥ घ्राणतर्पणमिति क्रियाविशेषणं ॥ १४ ॥ हे अनिन्दिते सर्वाङ्गसुन्दरि । इह वने । अनेकाःशरदः संवत्सरान् । त्वयालक्ष्मणेन कैङ्कर्यलक्ष्मीवताचसार्धं । यदिवत्स्यामि तदा मांशोकः नगरत्यागजंदुःखं । नप्रधक्ष्यति नपीडयिष्यतीत्यर्थः । अत्रयदीत्युक्त्याभाविविवासस्सू-

---

इतिवत् सुहृद्भिः वैनतेयप्रभृतिभिः । विनाभवः विनावस्थानं मेमनोनबाधते । रमणीयं लीलाविभूतिगतत्वेपिपरमव्योम्नोप्यर्यां रमणीयं । इमंगिरिं वक्ष्यमाणविशेषणयुक्तं ॥३॥ ती० माञ्जिष्ठवर्णाः चित्रवर्णाः ॥५॥ ति० खमिवोद्विद्धैः शीलितादिवत्कर्तरिनिष्ठा । तत्र खस्यवेधकैरित्यर्थः ॥ ४ ॥ ति० अदुष्टैः तपस्विवैभवाद्धिंसादिदोषरहितैः ॥ ७ ॥ ति० कामहर्षणान् देशानितिशेषः ।

[पा०] १ ख. घ. पीतामांजिष्ट., २ ख. कनकाभासाः. ३ ङ. सानुधातु. ४ ङ. छ. झ. ञ. ट. गणैर्द्वीपि. ५ क. ख. ग. ङ. च. छ. झ. ञ. ट. समाकुलः. ६ ङ. ट. पनसैरपि. ७ क. ख. ग. च. ञ. ट. तिमिशैः. ८ ख. ग. ङ. छ. झ. ट. काश्मर्यारिष्ट. ९ ख. ग. ङ. च. छ. झ. ट. वरणैः. १० ङ. ट. तिलकैरपि. ११ न्कामहर्षणान्. १२ घ. पृथक्पृथक्. १३ ग. भरान्. १४ ङ. छ. झ. ञ. ट. न्बहून्. १५ क. च. ञ. यद्यहं. १६ ग. झ. ट. प्रधर्षति.

बहुपुष्पफले रम्ये नानाद्विजगणायुते ॥ विचित्रशिखरे ह्यस्मिन्रतवानस्मि भामिनि ॥ १६ ॥
अनेन वनवासेन मया प्राप्तं फलद्वयम् ॥ पितुश्चानृणता धर्मे भरतस्य प्रियं तथा ॥ १७ ॥
वैदेहि रमसे कच्चिच्चित्रकूटे मया सह ॥ पश्यन्ती विविधान्भावान्मनोवाक्कायसंयतान् ॥ १८ ॥
इदमेवामृतं प्राहू राज्ञि राजर्षयः परे ॥ वनवासं भवार्थाय प्रेत्य मे प्रपितामहाः ॥ १९ ॥
शिलाः शैलस्य शोभन्ते विशालाः शतशोऽभितः ॥ बहुला बहुलैर्वर्णैर्नीलपीतसितारुणैः ॥ २० ॥
निशि भान्त्यचलेन्द्रस्य हुताशनशिखा इव ॥ ओषध्यः स्वप्रभालक्ष्या भ्राजमानाः सहस्रशः ॥२१॥
केचित्क्षयनिभा देशाः केचिदुद्यानसन्निभाः ॥ केचिदेकशिला भान्ति पर्वतस्यास्य भामिनि ॥२२॥

च्यते ॥ १५ ॥ घ्राणरसनचक्षुस्त्वक्श्रोत्रप्रीतिकरेऽस्मिन्वने रतवानस्मि प्रीतियुक्तोस्मि । भामिनि विशेषतस्त्वत्सन्निधानादितिभावः ॥ १६ ॥ नकेवलंसुखस्वलाभः किन्तुपित्रानृण्यबन्धुहर्षावपीत्याह—अनेनेति । फलद्वयमेवाह—पितुरिति । धर्मेविषये पितुः अनृणता आनृण्यं तद्वाक्यकरणमित्यर्थः । भरतस्य प्रियंच भरतस्यभाविस्वकैङ्कर्यमितिभावः ॥ १७ ॥ एवंस्वप्रीतिमुक्त्वासीताप्रीतिंपृच्छति—वैदेहीत्यादिना । वैदेहि भोगोपोद्घातकेलीचुलकितभगवद्वैश्वरूप्यानुभावांस्त्वांजानासिकिं मया भोगस्रोतसिल्वांप्रधानीकुर्वन्तंमांजानासि । [मयाभोगस्रोतसिल्वामप्रधानीकुर्वन्तंमांजानासिकिं चित्रकूटे भोगस्थानसौभाग्यमपिवाङ्मनसाविषयंजानासि] । तटस्थोद्दीपनविभावानप्याह—पश्यन्तीति । मनोवाक्कायाः संयताः यैस्तान् स्ववशीकृतजनमनोवाक्कायानित्यर्थः । मनोवाक्कायसंयतेतिपाठे संनियमितकरणत्रयेत्यर्थः । विविधान् मलयानिलकोकिलालापभ्रमरझङ्कारपुष्पहासप्रभृतिभेदान् । भावान् विभावान् । पश्यन्ती रमसेकच्चित् । यद्वा भावान् किन्नरमृगादीनांचेष्टाः । "भावोलीलाक्रियाचेष्टाभूत्यभिप्रायजन्तुषु" इतिवैजयन्ती ॥ १८ ॥ नकेवलमयंत्रनवासोभोगायआमुष्मिकसाधकश्चेत्याह—इदमिति । वनवासं वनवासरूपं इदं अमृतं अमृतवद्भोग्यंवस्तु । मेप्रपितामहाः मत्पितृवंश्याः । परे पूर्वे राजर्षयः । प्रेत्य प्रारब्धशरीरवियोगं प्राप्य । भवार्थाय संसारविनाशायेत्यर्थः । तमसेदीपोमशकार्थोधूमइत्यादिवन्निर्देशः । प्राहुः प्रोचुः । यद्वा इदमिति लिङ्गव्यत्ययआर्षः । इदं इमंवनवासं वानप्रस्थोचितनियमसहितंवनवासं । अमृतंप्राहुः मोक्षसाधनंप्राहुः । "अमृतंयज्ञशेषेस्यात्पीयूषेसलिलेघृते । अयाचितेचमोक्षेचधन्वन्तरिसुवर्णयोः" इतिवैजयन्ती । प्रेत्यभवार्थाय देवादिदेहान्तरपरिग्रहरूपप्रयोजनायचप्राहुः । रघुवंश्याःराजर्षयः वानप्रस्थोचितं वनवासंस्वर्गसाधनं । अपवर्गसाधनंचप्राहुरित्युक्तंभवति ॥ १९ ॥ विशालाः विपुलाः । बहुलैः उल्बणैः नीलादिभिर्वर्णैरुपलक्षिताः । बहुलाः बहुविधाः । शैलस्य चित्रकूटस्य । शिलाः शतशःअभितः शोभन्ते ॥२०॥ अचलेन्द्रस्य ओषध्यः महौषधयः । स्वंप्रभालक्ष्याः प्रभालक्ष्यस्वस्वरूपाः । अतएवभ्राजमानाः भासमानाः । निशिसहस्रशोभान्ति ॥ २१ ॥ अस्यपर्वतस्य देशाःकेचित् क्षयनिभाः गृहसदृशाः । "धिष्ण्यंधाम

रममाणान् । शि० कामहर्षणान् यथच्छंहर्षेर्विशिष्टान् किंनरान् । स० द्वन्द्वशः द्वन्द्वीभूय रममाणान् ॥ ११ ॥ स० आनृण्यता स्वार्थेष्यञ् । अनृणत्वं ॥ १७ ॥ ति० मनोवाक्कायसंमतान् तत्प्रियान् वर्णनेवाक्प्रियता । भावाः पदार्थाः । संयतेतिपाठे सम्यङ्नियमितकरणत्रयेत्यर्थः । संयताइतिबहुवचनान्तपाठे भावानित्यस्यविशेषणं । लिङ्गव्यत्ययआर्षइतितीर्थः । तत्रनकंचिद्युक्तमर्थंपश्यामः । स० भावान् पदार्थान् मनसावाचाकायेनचसम्यक्स्तुतान् ॥ १८ ॥ ति० वनवासंप्रेत्य एतच्छरीरत्यागोत्तरं । भवार्थाय भवःशिवःहिरण्यगर्भः तल्लोकप्राप्तिरूपायार्थाय प्रयोजनायाऽऽहुरित्येके । स० इदमेव वनवासरूपं प्रेत्य मरणानन्तरं । अमृतं अमृतत्वं तत्साधनमितियावत् । मेप्रपितामहाः राजानः । भवार्थाय भवस्यसंसारस्यअर्थःनिवृत्तिःतस्मैचाहुः । शि० हेराज्ञि भवार्थाय लोककल्याणाय प्रवृत्ताइतिशेषः । परे उत्कृष्टाः राजर्षयोमेप्रपितामहाः मनुप्रभृतयः । प्रेत्य विचार्य । इदं सनियमं । वनवासं अमृतंप्राहुः । सर्वनाम्नामुद्देश्यविधेयान्यतरलिङ्गतेतिनियमात्क्लीबता ॥ १९ ॥ ति० स्वप्रभालक्ष्म्या स्वकान्तिसंपदा ॥ २१ ॥ ति० एकशिलाः अनेकजनावस्थानक्षमैकशिलायुक्ताः ॥ २२ ॥

[पा०] १ ग. फलोपेते. २ ङ. छ. झ. ट. मम. ३ क. ङ. छ. झ. ञ. ट. श्चानृण्यता. घ. रानृण्यता. ४ ङ. छ. झ. ट. संमतान्. ५ ङ. प्रेत्यच. ६ क. ख. ग. ङ. च. झ—ठ. लक्ष्म्या. ७ घ. च. द्वेश्मनिभा.

भित्त्वेव वसुधां भाति चित्रकूटः समुत्थितः ॥ चित्रकूटस्य कूटोसौ दृश्यते सर्वतः शुभः ॥ २३ ॥
कुष्ठपुंनागस्थगरभूर्जपत्रोत्तरच्छादान् ॥ कामिनां स्वास्तरान्पश्य कुशेशयदलायुतान् ॥ २४ ॥
मृदिताश्चापविद्धाश्च दृश्यन्ते कमलस्रजः ॥ कामिभिर्वनिते पश्य फलानि विविधानि च ॥ २५ ॥
वस्वौकसारां नलिनीमत्येतीवोत्तरान्कुरून् ॥ पर्वतश्चित्रकूटोसौ बहुमूलफलोदकः ॥ २६ ॥
इमं तु कालं वनिते विजह्रिवांस्त्वया च सीते सह लक्ष्मणेन च ॥
रतिं प्रपत्स्ये कुलधर्मवर्धनीं सतां पथि स्वैर्नियमैः परैः स्थितः ॥ २७ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे चतुर्नवतितमः सर्गः ॥ ९४ ॥

पञ्चनवतितमः सर्गः ॥ ९५ ॥

रामेणसीतांप्रतितत्तद्विशेषप्रदर्शनपूर्वकंमन्दाकिनीवर्णनम् ॥ १ ॥

अथ शैलाद्विनिष्क्रम्य मैथिलीं कोसलेश्वरः ॥ अदर्शयच्छुभजलां रम्यां मन्दाकिनीं नदीम् ॥ १ ॥
अब्रवीच्च वरारोहां चारुचन्द्रनिभाननाम् ॥ विदेहराजस्य सुतां रामो राजीवलोचनः ॥ २ ॥
विचित्रपुलिनां रम्यां हंससारससेविताम् ॥ कमलैरुपसंपन्नां पश्य मन्दाकिनीं नदीम् ॥ ३ ॥

निकेतनंचसदनंवस्त्यंचवास्तुक्षयः ” इतिहलायुधः । बहुगुहावत्त्वादितिभावः । उद्यानसंनिभाः बहुलतावृक्षवत्त्वात् । एकशिलाः शिलाभेदरहिताः ॥२२—२३॥ कुष्ठं पारिभाव्यं । “ व्याधिःकुष्ठंपारिभाव्यंवाप्यंपाकलमुत्पलं ” इत्यमरः । पुन्नागपुष्पाणि स्थगराणि पुत्रकसंज्ञिकवृक्षविशेषपुष्पाणि । भूर्जपत्राणि भूर्जवृक्षत्वचः एतानिउत्तरच्छदाः उपर्यास्तरणानि येषां तान् । कुशेशयदलायुतान् पद्मदलव्याप्तान् । स्वास्तरान् शयनानीत्यर्थः ॥ २४ ॥ मृदिताः कृतमर्दनाः घ्राणादिभोगेनम्लानाइत्यर्थः । अपविद्धाः त्यक्ताः । फलानीत्यत्रापि मृदितान्यपविद्धानीतियोज्यं ॥ २५ ॥ वस्वौकसारा पूर्वदिगवस्थिताशक्रपुरी । “ वस्वौकसाराशक्रस्यपूर्वस्यांदिशिसंस्थिता ” इतिविष्णुपुराणवचनात् । यद्वा वस्वौकसारा कुबेरपुरी । “ पुरीवस्वौकसारास्याद्विमानंपुष्पकोस्त्रियां ” इतियादवः । नलिनीं मानससरसीं सौगन्धिकाख्यसरसींवा । अत्येतीव रमणीयतया अतिक्रामतीव ॥ २६ ॥ हेवनिते सीते । परैः श्रेष्ठैः । नियमैः सतां राजर्षीणांपथिस्थितःसन् इमंकालं चतुर्दशसमासंमितंकालं । त्वयालक्ष्मणेनच सह इह चित्रकूटे विजह्रिवान् विहृतवान् । विपूर्वाद्धरतेर्लिटः क्वसुरादेशः । पश्चात्कुलधर्मवर्धनीं कुलधर्मःप्रजापालनं तद्वर्धनीं । रतिं राज्यसुखं प्रपत्स्ये ॥ २७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने चतुर्नवतितमः सर्गः ॥ ९४ ॥

एवंवनगिरिप्रदर्शनेनोपलाल्यनदीप्रदर्शनेन।पेलालयति—अथेत्यादिना ॥ १ ॥ अब्रवीदिति । वचने हेतुः तत्सौन्दर्यमित्याशयेनोक्तं—वरारोहामित्यादि । वरारोहां आरुह्यतइतिआरोहोजघनं गुरुजघनामित्यर्थः । चारुचन्द्रनिभाननामित्यनेन रतिरमणनिदर्शितवनगिरिविलोकनकुतूहलविकसितवदनत्वमुक्तं । राजीवलोचनः विस्मयोत्फुल्लनयनइत्यर्थः ॥ २ ॥ पुलिनस्यविचित्रत्वं नवोलपालंकृतत्वात् । सारसाः हंस-

ती० कुष्ठं उत्पलं ॥ २३ ॥ स० वस्वौकसारा कुबेरपुरी । नलिनी इन्द्रपुरी । “वस्वौकसाराश्रीदस्यशक्रस्यनलिनीपुरी” इति हरिः । एवमेवविश्वः । उत्तरान्कुरून् । तन्नामकान् मेरोरुत्तरपार्श्वसमुद्रप्रान्तेविद्यमानान्देशविशेषान् । अतीत्य अतिक्रम्य शोभतइतिशेषः ॥ २६ ॥ ती० कुलधर्मवर्धनीं सत्यप्रतिपालनरूपधर्मवर्धनीं । अष्टाविंशतिःश्लोकाअत्रेतिकतकः ॥ २७ ॥ इतिचतुर्नवतितमस्सर्गः ॥ ९४ ॥

शि० वरारोहां वरः अद्भुतः आरोहः प्रादुर्भावः यस्यास्तां । स० चारुः षोडशकलः ॥ २ ॥

[पा०] १ क. च. ञ. भित्त्वैव. २ ङ. च. छ. झ. ञ. ट. कूटोयं. ३ क. ख. शिवः. ४ ङ. छ. झ. ञ. ट. स्रगरपुन्नाग. ५ ङ. च. छ. झ. ट. मतीत्यैवोत्तरान्. ६ क. ङ. च. छ. झ. ञ. ट. कुसुमैरुप. ७ ख. ग. संछन्नां.

नानाविधैस्तीररुहैर्वृतां पुष्पफलद्रुमैः ॥ राजन्तीं राजराजस्य नलिनीमिव सर्वतः ॥ ४ ॥
मृगयूथनिपीतानि कलुषाम्भांसि सांप्रतम् ॥ तीर्थानि रमणीयानि रतिं सञ्जनयन्ति मे ॥ ५ ॥
जटाजिनधराः काले वल्कलोत्तरवाससः ॥ ऋषयस्त्ववगाहन्ते नदीं मन्दाकिनीं प्रिये ॥ ६ ॥
आदित्यमुपतिष्ठन्ते नियमादूर्ध्वबाहवः ॥ एते परे विशालाक्षि मुनयः संशितव्रताः ॥ ७ ॥
मारुतोद्धूतशिखरैः प्रनृत्त इव पर्वतः ॥ पादपैः पत्रपुष्पाणि सृजद्भिरभितो नदीम् ॥ ८ ॥
क्वचिन्मणिनिकाशोदां क्वचित्पुलिनशालिनीम् ॥ क्वचित्सिद्धजनाकीर्णां पश्य मन्दाकिनीं नदीम् ॥९॥
निर्धूतान्वायुना पश्य विततान्पुष्पसंचयान् ॥ पोप्लूयमानानपरान्पश्य त्वं जलमध्यगान् ॥ १० ॥
तांश्चातिवल्गुवचसो रथाङ्गाह्वयना द्विजाः ॥ अधिरोहन्ति कल्याणि विकूजन्तः शुभा गिरः ॥११॥
दर्शनं चित्रकूटस्य मन्दाकिन्याश्च शोभने ॥ अधिकं पुरवासाच्च मन्ये च तव दर्शनात् ॥ १२ ॥
विधूर्तकलुषैः सिद्धैस्तपोदमशमान्वितैः ॥ नित्यविक्षोभितजलां विगाहस्व मया सह ॥ १३ ॥

विशेषाः । अत्रवस्तुना पृथुजघनकलनूपुरसुन्दरकरपदवदनवतीभवतीवभातीत्यलंकारध्वनिः ॥ ३ ॥ राजराजस्य कुबेरस्य । नलिनीं सौगन्धिकसरसीं ॥ ४ ॥ मृगयूथनिपीतानि अतएवकलुषाणि कुङ्कुमरसाभानिअम्भांसियेपुतानि । तीर्थानि अवताराः । रतिं अवगाहनविषयां प्रीतिं ॥ ५ ॥ काले स्वनियमोचितकाले । अवगाहन्ते मज्जन्ति । प्रियेइत्यन्यत्र दृष्टिर्निवार्यते ॥ ६ ॥ उपतिष्ठन्ते । " उपान्मन्त्रकरणे " इत्यात्मनेपदं । नियमाद्धेतोः परे पूर्वोक्तमुनिभ्योऽन्ये । संशितव्रताः तीक्ष्णनियमाः ॥ ७ ॥ मारुतोद्धूतशिखरैः वायुकम्पितशाखैः । पुष्पाणिसृजद्भिः मुञ्चद्भिः, । पादपैःप्रनृत्तइव नृत्यंकर्तुमुद्युक्तइव । आदिकर्मणिक्तः । लोकेहिनृत्तोद्युक्तः पुष्पाणि परिविकीर्यहस्तौचालयति तद्वदित्युत्प्रेक्षा ॥ ८ ॥ मणिनिकाशोदां मुक्तामणिनिभजलां । उदकस्योदभावआर्षः । क्वचित्तीरे सिद्धजनेनावगाहनोद्युक्तेनावकीर्णां । एतेन श्वेतवसना पृथुजघना कामुकावृतानारीद्योत्यते ॥९॥ वायुनानिर्धूतान् विततान् तीरेव्याप्तान् । पुष्पसंचयान्पश्य जलमध्यगान् पोप्लूयमानान् भृशंपुनःपुनर्वाप्लवमानान् अपरान् पुष्पसंचयांश्च त्वंपश्य । प्रियहृतार्धगलितवसनानारीवलक्ष्यतइतिंव्यङ्ग्यम् ॥ १० ॥ वल्गुवचसः रत्यर्थाह्वानकालिकरम्यवचसः । शुभाः गिरः विकूजन्तः रतिकालिकस्वरान् कुर्वन्तः । रथाङ्गाह्वयनाः चक्राह्वयाः । द्विजाः चक्रवाकाः । तान् पुष्पसंचयान् । अधिरोहन्ति शयनमारोहन्तीत्यर्थः । अनेनचक्रवाकरतिर्दर्शिता ॥ ११ ॥ हेशोभने निर्मत्सरे । चित्रकूटस्यदर्शनं पुरवासाधिकं चित्रकूटवासःपुरवासादप्यधिकसुखावहः । एकान्तभोगस्थानत्वादितिभावः । मन्दाकिन्यादर्शनंतवदर्शनादप्यधिकसुखकरं उद्दीपनत्वादितिभावः ॥ १२ ॥ तपोदमशमान्वितैः अतएव विधूतकलुषैः निष्पापैः । सिद्धैः सिद्धसाधननिष्ठैः । नित्यविक्षोभितजलां सदातत्स्नानेनतत्पादरेणुधन्यांमन्दाकिनीं । मयासहविगाहस्व मामप्रधानीकृत्यजलक्रीडारसमनुभवेत्यर्थः । नित्यविक्षोभितजलामित्यनेन जलक्रीडोपकरणकुसुम्भादिसा-

---

शि० राजराजस्य कुबेरस्य । नलिनीं सौगन्धिकसरसीमिव दशरथस्यसरयूमिववा ॥ ४ ॥ स० प्रनृत्तइतिबहुव्रीहिः ॥ ८ ॥ शि० पुलिनशालिनीं पुलिनाश्रयां । अगाधजलवत्तयानीलजलत्वेनप्रतीयमानामित्यर्थः ॥ ९ ॥ कतक० पश्येहाचलमध्यमइति पाठः । अचलमध्यमे कृशलाचलनाशक्तमध्यवतीत्यर्थः ॥ १० ॥ ति० रथाङ्गाह्वयनाः चक्रवाकाः । रथाङ्गंचक्रंतद्वाचकश्शब्दो ह्वयनेनामनि येषामितिविग्रहः । अधिरोहन्ति पुलिनानीतिशेषः ॥ ११ ॥ स० तवदर्शनान्निमित्तात् चित्रकूटदर्शनं वक्ष्यमाणादधिकंशोभते । स्तुतिपरत्वाद्वा नदोषः ॥ १२ ॥ इतिपञ्चनवतितमस्सर्गः ॥ ९५ ॥

[पा०] १ ङ. सर्वशः. २ ख. मैथिलिप्रतिभान्तिमे. ३ ङ. च. छ. झ. ञ. ट. पुष्पपत्राणि. ४ ङ. छ. झ. ट. तनुमध्यमे. ५ छ. झ. ट. पश्यैतद्वल्गु. क. च. ञ. पश्यैतान्वल्गु. ङ. पश्यतान्वल्गु. ख. ग. तांश्चापिवल्गु. ६ क. घ—छ. झ. ञ. ट. निष्कूजन्तः. ख. ग. निकूजन्तः. ७ क. ख. ङ. च. झ. ञ. ट. तवच. ८ ख. ङ. च. छ- झ. ञ. ट. कल्मषैः. ९ ट. समन्वितैः. १० क. च. नित्यं.

सखीवच्च विगाहस्व सीते मन्दाकिनीं नदीम् ॥ कमलान्यवमज्जन्ती पुष्कराणि च भामिनि ॥ १४ ॥
त्वं पौरजनवद्व्यालानयोध्यामिव पर्वतम् ॥ मन्यस्व वनिते नित्यं सरयूवदिमां नदीम् ॥ १५ ॥
लक्ष्मणश्चापि धर्मात्मा मन्निदेशे व्यवस्थितः ॥ त्वं चानुकूला वैदेहि प्रीतिं जनयथो मम ॥ १६ ॥
उपस्पृशंस्त्रिषवणं मधुमूलफलाशनः ॥ नायोध्यायै न राज्याय स्पृहयेऽद्य त्वया सह ॥ १७ ॥
इमां हि रम्यां मृगयूथशालिनीं निपीततोयां गजसिंहवानरैः ॥
सुपुष्पितैः पुष्पधरैरलंकृतां न सोऽस्ति यः स्यादगतक्लमः सुखी ॥ १८ ॥
इतीव रामो बहु संगतं वचः प्रियासहायः सरितं प्रति ब्रुवन् ॥
चचार रम्यं नयनाञ्जनप्रभं स चित्रकूटं रघुवंशवर्धनः ॥ १९ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे पञ्चनवतितमः सर्गः ॥ ९५ ॥

---

*प्रक्षिप्तः सर्गः ।

चित्रकूटोत्तरपादेक्वचनसुन्दरकन्दरेसीतयासहविहरमाणेनरामेणकदाचनस्वाङ्कशायिन्यास्सीतायामनश्शिलापङ्केनतिलकरचना ॥ १ ॥ तथाकेसरकुसुमैस्सीताकबरीपूरणादिनानाविहरणपूर्वकंपुनस्स्वाश्रमागमनं ॥२॥ रामचोदनेनसीतयालक्ष्मणानीतमृगमांसानांभूतेभ्योबलिप्रदानपूर्वकंताभ्यांदानं ॥ ३ ॥ रामचोदनेनसीतयाकाकेभ्यश्शिष्टमांसपरिरक्षणेकेनचित्काकेन तदीयहारान्तरसंचारेणतस्याःपीडाजननं ॥ ४ ॥ तदवलोकनकुपितेनरामेणतस्मिन्नैषीकास्त्रप्रयोगेतद्राबितेनत्रैलोक्येक्वापि शरणमलभमानेनतेनपुनारामचरणयोःप्रणिपतनं ॥ ५ ॥ रामेणतदेकाक्षिशातनपूर्वकंतत्परिरक्षणं ॥ ६ ॥

रामस्तु नलिनीं रम्यां चित्रकूटं च पर्वतम् ॥ उत्तरे तु गिरेः पादे चित्रकूटस्य राघवः ॥
ददर्श कंदरं रम्यं शिलाधातुसमन्वितम् ॥ १ ॥

मत्प्रीदर्शिता ॥ १३ ॥ सख्यायथा सलिलमवगाहसे तथा मयासहविगाहस्व । कमलानिरक्ताब्जानि । पुष्कराणि सिताम्भोजानि । अवमज्जन्ती अवमज्जयन्ती स्तनजघनाघातजनिततरङ्गैरितिभावः । यद्वा तववदनकान्तिनिर्जिततयालज्जयाअवमज्जयन्तीवेत्युत्प्रेक्षा ॥ १४ ॥ त्वं व्यालान् वनचरजन्तून् । पौरजनवत्पश्य पौरजनप्रीतिंव्यालेपुकुर्वित्यर्थः । एवमुत्तरत्रापि । अतः पौरजनाद्यनवलोकनक्लेशोनकार्य इतिभावः ॥ १५ ॥ लक्ष्मणइति । सौभ्रात्रं अनुकूलभार्यत्वंचसौख्यरसायनमितिभावः ॥ १६ ॥ हेवैदेहि त्वयासहत्रिषवणं त्रिसंध्यं । उपस्पृशन् स्नानं कुर्वन् । मधुमूलफलाशनोहमयोध्यायैनस्पृहये राज्यायचनस्पृहये । "स्पृहेरीप्सितः" इति संप्रदानसंज्ञा ॥ १७ ॥ इमां मन्दाकिनीं । मृगयूथशालिनीं मृगयूथलोलितामितिचपाठः । गजसिंहवानरैः । आश्रममहिम्नाशान्तवैरैरित्यर्थः । निपीततोयामितिपापहरत्वमुक्तं । पुष्पधरैः वृक्षैः । अनेनोद्दीपनत्वमुक्तं । उपस्पृशन्नित्यनुपज्यते । यः अगतक्लमःसुखीनस्यात्सनास्ति सर्वोप्यत्रस्नात्वागतक्लमोभवतीत्यर्थः ॥ १८ ॥ प्रियासहायोरामः सरितंप्रति सरिद्विषये । संगतं प्रसक्तानुप्रसक्तं बहुवचोब्रुवन्सन् । नयनाञ्जनप्रभं नयनयोग्याञ्जनकान्तिं तद्वन्नीलमित्यर्थः । चित्रकूटं चचार चित्रकूटप्रान्ते चचारेत्यर्थः । एतेन पुनःपुरवासनिस्पृहत्वद्योतनायरामस्यवनवासनिर्भरत्वमुक्तं ॥१९॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने पञ्चनवतितमः सर्गः ॥ ९५ ॥

[पा०] १ क. ख. च. ञ. मन्दाकिनीमिमां. २ क. ख. ग. ङ. च. छ. झ. ञ. ट. लक्ष्मणश्चैव. ३ ङ. ट. स्पृहयेच. ख. स्पृहयामि. ४ क. घ. च. छ. ञ. ट. गजयूथलोलितां. ङ. झ. ट. गजयूथलोडितां. ख. ग. गजयूथशालिनीं. ५ ङ. छ. झ. ञ. ट. सुपुष्पितां. ६ ङ. च. छ. झ. ञ. ट. पुष्पभरैः. क. घ. पुष्पफलैः. ७ ख. ग. ङ. च. छ. झ. ञ. ट. स्यान्नगत.

* अयंप्रक्षिप्तःसर्गः ङ. झ. ञ. पुस्तकेषुदृश्यते.

सुखप्रसेकैस्तरुभिः पुष्पभारावलम्बिभिः ॥ संवृतं च रहस्यं च मत्तद्विजगणायुतम् ॥ २ ॥
तद्दृष्ट्वा सर्वभूतानां मनोदृष्टिहरं वनम् ॥ उवाच सीतां काकुत्स्थो वनदर्शनविस्मितः ॥ ३ ॥
वैदेहि रमते चक्षुस्तवास्मिन्गिरिकंदरे ॥ परिश्रमविघातार्थं साधु तावदिहास्यताम् ॥ ४ ॥
त्वदर्थमिह विन्यस्ता त्वियं श्लक्ष्णसमा शिला ॥ यस्याः पार्श्वे तरुः पुष्पैः प्रविष्ट इव केसरैः ॥ ५ ॥
राघवेणैवमुक्ता सा सीता प्रकृतिदक्षिणा ॥ उवाच प्रणयस्निग्धमिदं श्लक्ष्णतरं वचः ॥ ६ ॥
अवश्यकार्यं वचनं तव मे रघुनन्दन ॥ बहुशो भ्रमितश्चाद्य तव चैवं मनोरथः ॥ ७ ॥
एवमुक्त्वा वरारोहा शिलां तामुपसर्प ह ॥ सह भर्त्रानवद्याङ्गी रन्तुकामा मनस्विनी ॥ ८ ॥
तामेवं ब्रुवतीं सीतां रामो वचनमब्रवीत् ॥ रम्यं पश्यसि भूतार्थं वनं पुष्पितपादपम् ॥ ९ ॥
पश्य देवि गिरौ रम्ये रम्यपुष्पाङ्कितानिमान् ॥ गजदन्तक्षतान्वृक्षान्पश्य निर्यासवर्षिणः ॥
झिल्लिकाविरुतैर्दीर्घै रुदतीव समन्ततः ॥ १० ॥
पुत्रप्रियोऽसौ शकुनिः पुत्रपुत्रेति भाषते ॥ मधुरां करुणां वाचं पुरेव जननी मम ॥ ११ ॥
विहगो भृङ्गराजोऽयं सालस्कन्धसमास्थितः ॥ संगीतमिव कुर्वाणः कोकिलेनानुकूजति ॥ १२ ॥
अयं वा बालकः शङ्के कोकिलानां विहंगमः ॥ सुखबद्धमसंबद्धं तथा ह्येष प्रभाषते ॥ १३ ॥
एषा कुसुमिता नूनं पुष्पभारानता लता ॥ दृश्यते मामिवात्यर्थं श्रमादेवि त्वमाश्रिता ॥ १४ ॥
एवमुक्ता प्रियस्याङ्के मैथिली प्रियभाषिणी ॥ भूयस्तरां त्वनिन्द्याङ्गी समारोहत भामिनी ॥ १५ ॥
अङ्के तु परिवर्तन्ती सीता सुरसुतोपमा ॥ हर्षयामास रामस्य मनो मनसिजार्पितम् ॥ १६ ॥
स निघृष्याङ्गुलिं रामो धौते मनःशिलोच्चये ॥ चकार तिलकं तस्या ललाटे रुचिरं तदा ॥ १७ ॥
बालार्कसमवर्णेन तेजसा गिरिधातुना ॥ चकासे विनिविष्टेन ससंध्येव निशा सिता ॥ १८ ॥
केसरस्य च पुष्पाणि करेणामृद्य राघवः ॥ अलकं पूरयामास मैथिल्याः प्रीतमानसः ॥ १९ ॥
अभिरम्य तदा तस्यां शिलायां रघुनन्दनः ॥ अन्वीयमानो वैदेह्या देशमन्यं जगाम ह ॥ २० ॥
विचरन्ती तदा सीता ददर्श हरियूथपम् ॥ वने बहुमृगाकीर्णे वित्रस्ता राममाश्लिषत् ॥ २१ ॥
रामस्तां परिरब्धाङ्गीं परिरभ्य महाभुजः ॥ सान्त्वयामास वामोरूमवभर्त्स्याथ वानरम् ॥ २२ ॥
मनःशिलायास्तिलकः सीतायाः सोऽथ वक्षसि ॥ समदृश्यत संक्रान्तो रामस्य विपुलौजसः ॥ २३ ॥
प्रजहास तदा सीता गते वानरपुंगवे ॥ दृष्ट्वा भर्तरि संक्रान्तमपाङ्गं समनःशिलम् ॥ २४ ॥
नातिदूरे त्वशोकानां प्रदीप्तमिव काननम् ॥ ददर्श पुष्पस्तबकैस्तर्जद्भिरिव वानरैः ॥ २५ ॥
वैदेही त्वब्रवीद्राममशोककुसुमार्थिनी ॥ वयं तदभिगच्छामो वनमिक्ष्वाकुनन्दन ॥ २६ ॥
तस्याः प्रिये स्थितो रामो देव्या दिव्यार्थरूपया ॥ सहितस्तदशोकानां विशोकः प्रययौ वनम् ॥ २७ ॥
तदशोकवनं रामः सभार्यो व्यचरत्तदा ॥ गिरिपुत्र्या पिनाकीव सह हैमवतं वनम् ॥ २८ ॥
तावन्योन्यमशोकस्य पुष्पैः पल्लवधारिभिः ॥ समलंचक्रतुरुभौ कामिनौ नीललोहितौ ॥ २९ ॥
आबद्धवनमालौ तौ कृतापीडावतंसकौ ॥ भार्यापती तावचलं शोभयांचक्रतुर्भृशम् ॥ ३० ॥
एवं स विविधान्देशान्दर्शयित्वा प्रियां प्रियः ॥ आजगामाश्रमपदं सुसंश्लिष्टमलङ्कृतम् ॥ ३१ ॥
प्रत्युज्जगाम तं भ्राता लक्ष्मणो गुरुवत्सलः ॥ दर्शयन्विविधं धर्मं सौमित्रिः सुकृतं तदा ॥ ३२ ॥
शुद्धबाणहतांस्तत्र मेध्यान्कृष्णमृगान्दश ॥ राशीकृताञ्शुष्यमाणानन्यान्कांश्चन कांश्चन ॥ ३३ ॥
तद्दृष्ट्वा कर्म सौमित्रेर्भ्राता प्रीतोऽभवत्तदा ॥ क्रियन्तां बलयश्चेति रामः सीतामथान्वशात् ॥ ३४ ॥
अग्रं प्रदाय भूतेभ्यः सीताथ वरवर्णिनी ॥ तयोरुपददद्भ्रात्रोर्मधु मांसं च तद्वशम् ॥ ३५ ॥

तयोस्तुष्टिमथोत्पाद्य वीरयोः कृतशौचयोः ॥ विधिवज्जानकी पश्चाच्चक्रे सा प्राणधारणम् ॥ ३६ ॥
शिष्टं मांसं निकृष्टं यच्छोषणायावकल्पितम् ॥ तद्रामवचनात्सीता काकेभ्यः पर्यरक्षत ॥ ३७ ॥
तां ददर्श तदा भर्ता काकेनायासितां दृढम् ॥ यस्या हारान्तरचरः कामचारी विहंगमः ॥ ३८ ॥
काकेनारोध्यमानां तां सा मुमोह तदातुरम् ॥ सा चुकोपानवद्याङ्गी भर्तृप्रणयदर्पिता ॥ ३९ ॥
इतश्चेतश्च तां काको वारयन्तीं पुनः पुनः ॥ पक्षतुण्डनखाग्रैश्च कोपयामास कोपनाम् ॥ ४० ॥
तस्याः प्रस्फुरमाणौष्ठं भ्रुकुटीपुटसूचितम् ॥ मुखमालोक्य काकुत्स्थस्तं काकं प्रत्यषेधयत् ॥ ४१ ॥
स धृष्टमानो विगहो रामवाक्यमचिन्तयन् ॥ सीतामभिपपातैव ततश्चुक्रोध राघवः ॥ ४२ ॥
सोऽभिमन्त्र्य शरैषीकामैषीकास्त्रेण वीर्यवान् ॥ काकं तमभिसंधाय ससर्ज पुरुषर्षभः ॥ ४३ ॥
स तेनाभिद्रुतः काकस्त्रींल्लोकान्पर्यगात्ततः ॥ देवैर्दत्तवरः पक्षी हारान्तरचरो लघुः ॥ ४४ ॥
यत्र यत्रागमत्काकस्तत्र तत्र ददर्श ह ॥ इषीकां भूतसंकाशां स रामं पुनरागमत् ॥ ४५ ॥
स मूर्ध्ना न्यपतत्काको राघवस्य महात्मनः ॥ सीतायास्तत्र पश्यन्त्या मानुषीमैरयद्गिरम् ॥ ४६ ॥
प्रसादं कुरु मे राम प्राणैः सामग्र्यमस्तु मे ॥ अस्त्रस्यास्य प्रभावेण शरणं न लभे क्वचित् ॥ ४७ ॥
तं काकमब्रवीद्रामः पादयोः शिरसा गतम् ॥ सानुक्रोशतया धीमानिदं वचनमर्थवत् ॥ ४८ ॥
मया रोषपरीतेन सीताप्रियहितार्थिना ॥ अस्त्रमेतत्समाधाय त्वद्वधायाभिमन्त्रितम् ॥ ४९ ॥
यत्तु मे चरणौ मूर्ध्ना गतस्त्वं जीवितेप्सया ॥ अत्रास्त्यवेक्षा त्वयि मे रक्ष्यो हि शरणागतः ॥५०॥
अमोघं क्रियतामस्त्रमेकमङ्गं परित्यज ॥ किमङ्गं शातयतु ते शरैषीका ब्रवीहि मे ॥ ५१ ॥
एतावद्धि मया शक्यं तत्र कर्तुं प्रियं खग ॥ एकाङ्गहीनं ह्यस्त्रेण जीवितं मरणाद्वरम् ॥ ५२ ॥
एवमुक्तस्तु रामेण संप्रधार्य स वायसः ॥ अभ्यगच्छद्द्वयोरक्षणस्त्यागमेकस्य पण्डितः ॥ ५३ ॥
सोऽब्रवीद्राघवं काको नेत्रमेकं त्यजाम्यहम् ॥ एकनेत्रोऽपि जीवेऽहं त्वत्प्रसादान्नराधिप ॥ ५४ ॥
रामानुज्ञातमस्त्रं तत्काकस्य नयनेऽपतत् ॥ वैदेही विस्मिता तत्र काकस्य नयने हते ॥ ५५ ॥
निपत्य शिरसा काको जगामाशु यथेप्सितम् ॥ लक्ष्मणानुचरो रामश्चकारानन्तरक्रियाः ॥ ५६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे प्रक्षिप्तः सर्गः ॥

षण्णवतितमः सर्गः ॥ ९६ ॥

सीतयासहचित्रकूटप्रस्थेविहरमाणेनरामेणभरतसेनाकोलाहलश्रवणेनतद्धूलीदर्शनेनचलक्ष्मणंप्रतितत्कारणावगमनचोदना ॥ १ ॥ तदर्थंवृक्षाग्रमारूढेनलक्ष्मणेननातिदूरेरथाग्रेकोविदारध्वजावलोकनात्सेनयासहभरतागमननिर्धारणेनतस्मिन्दोषशङ्कयारामंप्रतिस्वेनभरतहननोक्तिः ॥ २ ॥

तां तथा दर्शयित्वा तु मैथिलीं गिरिनिम्नगाम् ॥ निषसाद गिरिप्रस्थे सीतां मांसेन छन्दयन् ॥१॥
इदं मेध्यमिदं स्वादु निष्टप्तमिदमग्निना ॥ एवमास्ते स धर्मात्मा सीतया सह राघवः ॥ २ ॥

एवंप्रासङ्गिकमुक्त्वाप्रकृतमनुसरति—तामित्यादिना । गिरिनिम्नगां गिरिनदीं । मांसेनछन्दयन् वशीकुर्वन् । " वशाभिप्राययोश्छन्दः " इतिवैजयन्ती ॥ १ ॥ वशीकरणप्रकारमाह—इदमित्यादिना । इदं मांसं मेध्यं शुद्धं निर्मलमितियावत् । स्वादु रसवत् । निष्टप्तं प्रतप्तं । इदंशब्देनस्वभुक्तशेषमितिगम्यते ।

शि० मांसेन तापसोपभोग्यफलादिना ॥ १ ॥

तथा तत्रासतस्तस्य [1]भरतस्योपयायिनः ॥ सैन्यरेणुश्च शब्दश्च प्रादुरास्तां नभःस्पृशौ ॥ ३ ॥
एतस्मिन्नन्तरे त्रस्ताः शब्देन महता ततः ॥ अर्दिता यूथपा मत्ताः [2]सयूथा [3]दुद्रुवुर्दिशः ॥ ४ ॥
स तं सैन्यसमुद्भूतं शब्दं शुश्राव राघवः ॥ तांश्च [4]विप्रद्रुतान्सर्वान्यूथपानन्ववैक्षत ॥ ५ ॥
तांश्च विद्रवतो दृष्ट्वा तं च श्रुत्वा च निःस्वनम् ॥ उवाच रामः सौमित्रिं लक्ष्मणं दीप्ततेजसम् ॥६॥
हन्त लक्ष्मण पश्येह सुमित्रा सुप्रजास्त्वया ॥ [5]भीमस्तनित[6]गम्भीरस्तुमुलः श्रूयते स्वनः ॥ ७ ॥
गजयूथानि वाऽरण्ये महिषा वा महावने ॥ वित्रासिता मृगाः सिंहैः सहसा प्रद्रुता दिशः ॥ ८ ॥
राजा वा [7]राजमात्रो वा मृगयामटते वने ॥ अन्यद्वा श्वापदं किंचित्सौमित्रे ज्ञातुमर्हसि ॥ ९ ॥
सुदुश्चरो गिरिश्चायं पक्षिणामपि लक्ष्मण ॥ सर्वमेतद्यथातत्त्वमचिराज्ज्ञातुमर्हसि ॥ १० ॥
स लक्ष्मणः संत्वरितः सालमारुह्य पुष्पितम् ॥ प्रेक्षमाणो दिशः सर्वाः पूर्वां [8]दिशमुदैक्षत ॥ ११॥
उदङ्मुखः प्रेक्षमाणो ददर्श महतीं चमूम् ॥ [9]रथाश्वगजसंबाधां यत्तैर्युक्तां पदातिभिः ॥ १२ ॥
ताम[10]श्वगजसंपूर्णां रथध्वजविभूषिताम् ॥ शशंस सेनां रामाय वचनं चेदमब्रवीत् ॥ १३ ॥
अग्निं संशमयत्वार्यः सीता च भजतां गुहाम् ॥ सज्यं कुरुष्व चापं च शरांश्च कवचं तथा ॥१४॥

एवमास्ते एवंब्रुवन्नास्तइत्यर्थः ॥ २ ॥ तथा उक्तरीत्या । तत्र गिरिप्रस्थे । तस्य आसतः तस्मिन्नासीने सति । सैन्यरेणुः शब्दःसैन्यशब्दश्चोभौ नभस्स्पृशौ सन्तौ प्रादुरास्तां ॥ ३ ॥ एतस्मिन्नन्तरे अस्मिन् शब्दश्रवणसमये । ततः तेन ॥ ४ ॥ सैन्यसमुद्भूतं सैन्योत्पादितं ॥ ५ ॥ दीप्ततेजसमित्यनेन वक्ष्यमाणावेक्षणक्षमत्वमुच्यते ॥ ६ ॥ हन्तेति व्यग्रतायामव्ययं वाक्यारम्भेवा । "वाक्यारम्भेनुकम्पायांहन्तहर्षविषादयोः" इतिवैजयन्ती । पश्य वृक्षमारुह्य प्रेक्षस्व । सुमित्रासुप्रजास्त्वया त्वयासुमित्रासत्पुत्रेति सान्त्वोक्तिः । भीमस्तनितगम्भीरः भयंकरमेघनिर्घोषवद्गम्भीरः । महीस्तनितगम्भीरइतिपाठे भूकम्पजनितशब्दवद्गम्भीरइत्यर्थः ॥ ७ ॥ मृगाइत्यत्रापि वाशब्दःसंबन्धनीयः ॥ ८ ॥ राजमात्रः राजतुल्यः । कश्चिन्मृगयामुद्दिश्यअटते आत्मनेपदमार्षं । श्वापदं व्याघ्रादिहिंस्रपशुः । नपुंसकत्वमार्षं । "व्याघ्रादयोवनचराः पशवःश्वापदामताः" इतिहलायुधः । अन्योवायःकश्चिच्छ्वापदः अटतइतिसंबन्धः ॥ ९ ॥ अयंगिरिः पक्षिणामपिसुदुश्चरोवर्तते पक्षिसञ्चारोपीदानींनास्तीत्यर्थः । सर्वमेतत् पूर्वोक्तकारणेष्वन्यतमं ज्ञातुमर्हसीत्यर्थः ॥ १० ॥ पुष्पितमित्यनेन विरलपत्रतयाऽनावारकत्वमुक्तं । सर्वादिशःप्रेक्षमाणः सामान्येनप्रेक्षमाणःसन् । पूर्वांदिशमुदैक्षत सविशेषमलोकयत् ॥ ११ ॥ तत्रहेतुदर्शनमाह—उदङ्मुखइत्यादिना । यत्तैः सन्नद्धैः ॥ १२ ॥ रथध्वजविभूषितां रथवद्भध्वजैरलंकृतां ॥ १३ ॥ अग्निंसंशमयतु अन्यथाधूमानुसारेणागच्छेत्सेनेतिभावः । सज्यं ज्ययामौर्व्यासहितंकुरुष्व शरांश्चकवचं तथा शरांश्चकवचंचगृहाणेतिशेषः । यद्वा कुरुष्वेत्यनुषङ्गः । करोतेःक्रियासामान्यवाचित्वादौचित्येनशरान् गृहाण कवचंधारये-

स० स्वयूथात् स्वयूथंविच्छिद्य । ल्यब्लोपनिमित्तापञ्चमी ॥ ४ ॥ **ति०** सनिस्स्वनमितिपाठे सइतिपदं ॥ ६ ॥ **वि०** भीमस्तनितगंभीरं भीमंभयंकरंयत्स्तनितंमेघशब्दः तद्वद्गंभीरंयथाभवतितथायोयंस्वनःश्रूयते अस्यकारणंपश्येतियोजना ॥७॥ **स०** सिंहैर्वित्रासितानिगजयूथानि तैश्चवित्रासिताःमहिषावा तैर्महिषैर्वित्रासितामृगाश्चसहसाप्रद्रुताः । तन्निमित्तंपश्येतिपूर्वेणान्वयः । वाशब्दौचार्थे ॥ ८ ॥ **शि०** कश्चिन्महान्प्रबलोयमागतइतिसूचयन्नाह—**सुदुश्चरइति** । पक्षिणां देशान्तरवर्तिखगानामपि अयंगिरिः सुदुश्चरः । किंच अयंगिरिः पक्षिणां सहाययुक्तानामपि सुदुश्चरः स्वतन्त्रतयाचरितुमशक्यः ॥ १० ॥ **स०** सर्वादिशः प्रेक्षमाणःद्रष्टुमारब्धोलक्ष्मणःपूर्वांदिशमवैक्षत ॥ ११ ॥ **ति०** सेनांशशंस सेनांश्रुतशब्दकारणमुक्तवान् ॥ १३ ॥ **शि०** अग्निं अभ्याकारंसेनाक्रोधं ॥ १४ ॥

[पा०] १ घ. भरतस्यानु. २ छ. झ. ट. स्वयूथात्. ३ ङ. च. ञ. विद्रुतादिशः. ४ ख. द्रुतान्भीतान्. ५ क. ख. ग. ज. महीस्तनित. ६ ङ. च. झ. ञ. ट. गंभीरं. ७ ग. ङ. च. ज. ञ. ट. राजपुत्रो. ८ क. ख. घ. ङ. च. झ. ञ. ट. मवैक्षत. ९ ङ. च. छ. झ. ट. गजाश्वरथसंबाधां. १० ङ. छ. झ. ट. रथसंपूर्णां. ग. गणसंपूर्णां.

तं रामः पुरुषव्याघ्रो लक्ष्मणं प्रत्युवाच ह ॥ अङ्गावेक्षस्व सौमित्रे कस्येमां मन्यसे चमूम् ॥ १५ ॥
एवमुक्तस्तु रामेण लक्ष्मणो वाक्यमब्रवीत् ॥ दिधक्षन्निव तां सेनां रुषितः पावको यथा ॥ १६ ॥
संपन्नं राज्यमिच्छंस्तु व्यक्तं प्राप्याभिषेचनम् ॥ आवां हन्तुं समभ्येति कैकेय्या भरतः सुतः ॥ १७ ॥
एष वै सुमहाञ्श्रीमान्विटपी संप्रकाशते ॥ विराजत्युद्गतस्कन्धः कोविदारध्वजो रथे ॥ १८ ॥
[असौ हि सुमहास्कन्धो विटपी च महाद्रुमः ॥ विराजते महासैन्ये कोविदारध्वजो रथे] ॥ १९ ॥
भजन्त्येते यथाकाममश्वानारुह्य शीघ्रगान् ॥ एते भ्राजन्ति संहृष्टा गजानारुह्य सादिनः ॥ २० ॥
गृहीतधनुषौ चावां गिरिं वीर श्रयावहै ॥ अथवेहैव तिष्ठावः संनद्धावुद्यतायुधौ ॥ २१ ॥
अपि नौ वशमागच्छेत्कोविदारध्वजो रणे ॥ २२ ॥
अपि द्रक्ष्यामि भरतं यत्कृते व्यसनं महत् ॥ त्वया राघव संप्राप्तं सीतया च मया तथा ॥ २३ ॥
यन्निमित्तं भवान्राज्याच्च्युतो राघव शाश्वतात् ॥ संप्राप्तोऽयमरिर्वीर भरतो वध्य एव मे ॥ २४ ॥
भरतस्य वधे दोषं नाहं पश्यामि राघव ॥ पूर्वापकारिणां त्यागे न ह्यधर्मो विधीयते ॥ २५ ॥
पूर्वापकारी भरतस्त्यक्तधर्मश्च राघव ॥ एतस्मिन्निहते कृत्स्नामनुशाधि वसुन्धराम् ॥ २६ ॥
अद्य पुत्रं हतं सङ्ख्ये कैकेयी राज्यकामुका ॥ मया पश्येत्सुदुःखार्ता हस्तिभग्नमिव द्रुमम् ॥ २७ ॥

त्यर्थः ॥ १४ ॥ तं एवंसमीक्ष्यवदन्तं । पुरुषव्याघ्रः समीक्ष्यकारीतिभावः । अङ्गेतिसंबोधने । अवेक्षस्व ध्वजचिह्नेनसम्यगालोकय । इमां त्वयादृष्टां । चमूं कस्येयमिति मन्यसे वदेतिशेषः ॥ १५ ॥ रुषितः कुपितः । कर्तरिक्तः । पावकोयथा वह्नितुल्यः ॥ १६ ॥ कैकेय्याः सुतः तत्सुतत्वेनक्रूरप्रकृतिः । भरतः अभिषेचनंप्राप्य कैकेयीवरानुरोधेनाभिषिक्तः तावताप्यतृप्तः । संपन्नं समृद्धं निष्कण्टकमितियावत् । राज्यमिच्छन्सन् तदंशभागिनौआवांहन्तुंसमभ्येति ॥ १७ ॥ भरतागमनेकिंचिह्नमित्यत्राह—एषइति । विटपी ध्वजचिह्नीभूतोवृक्षः प्रकाशते स्पष्टंदृश्यते । तमेवविशिनष्टि—विराजतीति । उद्गतस्कन्धः उन्नतस्कन्धः । उन्नतस्कन्धत्वं लिखितवृक्षद्वारा । कोविदारध्वजः कोविदारवृक्षयुक्तोध्वजः ॥ १८—१९ ॥ एते अश्वारोहाः । अश्वानारुह्यभजन्ति इमंदेशंप्राप्नुवन्तीत्यर्थः । सादिनः गजारोहाः ॥ २० ॥ गृहीतधनुषाविति । दुर्गेस्थित्वायुद्धार्थंगिरेःश्रयणं ॥ २१ ॥ अपिःकामप्रवेदने । नौ आवयोः ॥ २२ ॥ अपिद्रक्ष्यामीत्यारभ्य श्लोकः ॥ २३ ॥ यन्निमित्तं यस्माद्भरताद्धेतोः ॥ २४ ॥ त्यागे वधे ॥ २५ ॥ अपकारश्चनप्रामादिकइत्याह—त्यक्तधर्मइति ॥ २६ ॥ संख्ये युद्धे । "मृधमास्क-

---

शि० प्राप्य त्वामयोध्यांप्रापय्य । राज्यंसंपन्नं संपत्तिविशिष्टमिच्छन्अभिषेचनं भवतोऽभिषेचनंच इच्छन् आवां आसमन्तादिन्द्रियशोषकंभवद्वियोगजनितशोकमित्यर्थः । हन्तुं दूरीकर्तुं । समभ्येति । आवामित्यत्रशोषणार्थकओवैधातोरूपं ॥ १७ ॥ शि० इदानीं भरतान्यत्वेस्वकर्तव्यंप्रार्थयन्नाह—गृहीतेति ॥ २० ॥ शि० विदारः सज्जनहृदयविदारकःध्वजोयस्यसः कः कस्यचित्संबन्धीत्यर्थः । रथः नौ आवयोः । वशमागच्छेत् । यत्कृते यत्प्रयत्नेकृतेसति व्यसनं रहस्यसंभाषणजनितदुःखंसंप्राप्तं । यन्निमित्तं यद्राक्षसवधकारणात् भवान्प्रच्युतः इहशासः । तंभरतं पृथ्वीभारविस्तारकं । किंच भीर्भयमस्त्यस्मिन्कर्मणि तन्नरतं सत्पुरुषेभ्योतिभयप्रदातारमित्यर्थः । राक्षसंद्रक्ष्याम द्रक्ष्यामः ॥ २२ ॥ शि० भरतः इहमद्गमनजनितभारात्यदिअरिः राक्षसादिःसंप्राप्तस्तर्हि सवध्यएव । ननुब्रह्मचर्येस्थितत्वात्कथमस्मत्कर्तृकोवधइत्यतआह—भरतस्य पृथ्वीभारविस्तारकस्यापराधिनोवधे अहंदोषंनपश्यामि ॥ २३ ॥ शि० पूर्वापकारिणामिति । एतस्यपूर्वापकारित्वंतुमुम्यादिवधानिकर्तृत्वेन । त्यागे वधाकरणे अधर्मः । एतेन राक्षससैन्यंचेन्निहन्तव्यमेवेतिसूचितं ॥ २४ ॥ ति० त्यागे वधे ॥ २५ ॥ ती० कलुषेण पापेन कैकेयीरूपकलु-

[पा०] १ घ. च. ज. कस्यैतां. २ क. च. ज. सेनांतां. ३ च. ज. भरतःकैकयीसुतः. ४ क. च. विटपीवप्रकाशते. ख. ग. विटपीवमहाद्रुमः. ५ ङ. छ. झ. ट. त्युज्ज्वलस्कन्धः. ६ अयंश्लोकः घ. ज. पाठयोर्दृश्यते. ७ ङ. ङ. च. छ. झ. ज. ट. धनुषावावां. ८ ङ. ट. द्रक्ष्याम. ९ ङ. छ. झ. ट. एवहि. १० क. च. ज. नहि. ११ ङ. छ. झ. ट. पूर्वापकारिणंहत्वानह्यधर्मेणयुज्यते. ग. पूर्वापराधिनांत्यागेनह्यधर्मोहिजायते. १२ ङ. छ. झ. ट. स्त्यागेधर्मश्च. १३ ङ. छ. झ. ट. भिन्नमिव.

कैकेयीं च वधिष्यामि सानुबन्धां सबान्धवाम् ॥ कलुषेणाद्य महता मेदिनी परिमुच्यताम् ॥ २८ ॥
अद्येमं संयतं क्रोधमसत्कारं च मानद ॥ मोक्ष्यामि शत्रुसैन्येषु कक्षेष्विव हुताशनम् ॥ २९ ॥
अद्यैनच्चित्रकूटस्य काननं निशितैः शरैः ॥ भिन्दञ्शत्रुशरीराणि करिष्ये शोणितोक्षितम् ॥ ३० ॥
शरैर्निर्भिन्नहृदयान्कुञ्जरांस्तुरगांस्तथा ॥ श्वापदाः परिकर्षन्तु नरांश्च निहतान्मया ॥ ३१ ॥
शराणां धनुषश्चाहमनृणोस्मि महामृधे ॥ ससैन्यं भरतं हत्वा भविष्यामि न संशयः ॥ ३२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे षण्णवतितमः सर्गः ॥ ९६ ॥

सप्तनवतितमः सर्गः ॥ ९७ ॥

रामेणभरतेसंक्रुद्धंलक्ष्मणंप्रतिभरतभङ्गकरणेदोषोत्कीर्तनपूर्वकंप्रत्युततस्यशुद्धभावत्वोत्कीर्तनेनपरिसान्त्वनम् ॥ १ ॥ रामोक्त्याव्रीडितेनलक्ष्मणेनसङ्क्रान्तरेणतन्निगूहनपूर्वकंवृक्षादवरोहणेनरामपार्श्वसेवनम् ॥ २ ॥ भरतेनरामाश्रमानुपमर्दायदूरतएवचित्रकूटमभितःसेनास्थापनम् ॥ ३ ॥

सुसंरब्धं तु सौमित्रिं लक्ष्मणं क्रोधमूर्च्छितम् ॥ रामस्तु परिसान्त्व्याथ वचनं चेदमब्रवीत् ॥ १ ॥
किमत्र धनुषा कार्यमसिना वा सचर्मणा ॥ महेष्वासे महाप्राज्ञे भरते स्वयमागते ॥ २ ॥

न्दनंसंख्यं " इत्यमरः ॥ २७ ॥ वधिष्यामि हन्तेर्वधादेशआर्षः । सानुबन्धां मन्थराद्यनुबन्धसहितां । कलुषेण पापेन । " कलुषंवृजिनैनोघमंहोदुरितदुष्कृतं " इत्यमरः ॥ २८ ॥ संयतं स्तम्भितं । असत्कारं तिरस्कारं । मोक्ष्यामि तत्कार्यंकरिष्यामीत्यर्थः । शरव्याजेनमोक्ष्यामीतिवार्थः । कक्षेषु शुष्कगुल्मेषु । मानदेत्यनेन मानंमाच्छेत्सीरित्युच्यते ॥ २९ ॥ शत्रुशरीराणिभिन्दन् एतत्काननं शोणितोक्षितंकरिष्यइत्यन्वयः ॥ ३०—३१ ॥ अहं यतःपूर्वं तत्रतत्र युद्धे शराणांधनुषश्चविषये अनृणःऋणरहितः शत्रुकलेवराहारदानेनपरिहृतऋणः । स्वयंयुद्धेकाप्यपराजितः शत्रुजयैकशीलइत्यर्थः । अतः अस्मीत्यहमर्थेऽव्ययं । अस्मि अहं । महामृधे भाविन्यपियुद्धे । ससैन्यंभरतंहत्वा अनृणइत्यनुकर्षः । अनृणोभविष्यामीत्यन्वयः । वनवासात्पूर्वमपिशम्बरसुतजयादिप्रतिपादनात् तत्र लक्ष्मणस्यापिसहभावावश्यंभावाद्युद्धसंभवः । अस्मीतिक्रियापदंवा । तदा अभवमित्यर्थः । यतः अनृणोऽभवमित्यन्वयः । त्वयापिमद्वीर्यंज्ञातपूर्वमित्यर्थः ॥ ३२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने षण्णवतितमः सर्गः ॥ ९६ ॥

अथकुपितपरिसान्त्वनंसप्तनवतितमे—सुसंरब्धमित्यादि । पूर्वंसुसंरब्धं सुतरांप्रीतं । " संरम्भःप्रणयेपिच " इत्यमरः । अद्यतुतद्वैलक्षण्येन क्रोधमूर्च्छितं । यद्वा क्रोधमूर्च्छितत्वादेवसुसंरब्धं क्रोधकार्ययुद्धोन्मुख्ययुक्तं । तत्रहेतुः सपत्नीपुत्रत्वमित्याह—सौमित्रिमिति । यद्वा सुमित्रापुत्रत्वस्मारणपूर्वकमुक्तवानितिद्योत्यते । रामस्तु इदंवचनंरामादन्यैर्वक्तुमशक्यमितिभावः ॥ १ ॥ अत्र इदानींपरिदृष्टे महेष्वासे उचितविषयशरसन्धातरि । तत्रहेतुः—महाप्राज्ञइति । स्वयंपुरुषप्रेरणंविना आगतेभरतेविषये धनुरादिभिः

येणत्यर्थः । स० सानुबन्धां कुब्जादिपरिवारसहितां । वधेःप्रकृत्यन्तरस्यदंरूपं ॥ २७ ॥ स० असत्कारं अपमानं । मोक्ष्यामि मोचयामि प्रतिकरिष्यामीतियावत् ॥ २८ ॥ स० अनृणः ऋणशून्यः । तत्साधंक्यमप्यभवतीत्याशयः । ति० भरतलक्ष्मणयोरसमतयारामोपकरणत्वाल्लक्ष्मणस्यभरतविषयेएवंवादः । रामस्यतूभयोरपिस्वोपकरणत्वात्क्वापिक्रोधइतितत्त्वम् ॥ ३१ ॥ इतिषण्णवतितमस्सर्गः ॥ ९६ ॥

शि० [illegible] सुसंरब्धं शत्रुभ्रमाद्युद्धोद्योगवन्तं ॥ १ ॥

[पाठ०] १ ड. च. छ. झ. ञ. ट. अद्यैवचित्र. २ ड. च. छ. झ. ञ. ट. छिन्दन्. ३ क. ड. च. छ. झ. ञ. [illegible] अनृणो[illegible]. ४ ड. ङ. झ. ट. भरतं. ५ ग. [illegible]. ६ ड. सुचर्मणा. ७ ङ. छ. झ. महाबलेमहोत्साहे. ट. महाबलो महो[illegible].

पितुः सत्यं प्रतिश्रुत्य हत्वा भरतमागतम् ॥ किं करिष्यामि राज्येन सापवादेन लक्ष्मण ॥ ३ ॥
यद्द्रव्यं बान्धवानां वा मित्राणां वा क्षये भवेत् ॥ नाहं तत्प्रतिगृह्णीयां भक्षान्विषकृतानिव ॥ ४ ॥
धर्ममर्थं च कामं च पृथिवीं चापि लक्ष्मण ॥ इच्छामि भवतामर्थे एतत्प्रतिशृणोमि ते ॥ ५ ॥
भ्रातॄणां संग्रहार्थं च सुखार्थं चापि लक्ष्मण ॥ राज्यमप्यहमिच्छामि सत्येनायुधमालभे ॥ ६ ॥
नेयं मम मही सौम्य दुर्लभा सागराम्बरा ॥ न हीच्छेयमधर्मेण शक्रत्वमपि लक्ष्मण ॥ ७ ॥
यद्विना भरतं त्वां च शत्रुघ्नं चापि मानद ॥ भवेन्मम सुखं किंचित्भस्म तत्कुरुतां शिखी ॥ ८ ॥
मन्येऽहमागतोऽयोध्यां भरतो भ्रातृवत्सलः ॥ मम प्राणात्प्रियतरः कुलधर्ममनुस्मरन् ॥ ९ ॥
श्रुत्वा प्रव्राजितं मां हि जटावल्कलधारिणम् ॥ जानक्या सहितं वीर त्वया च पुरुषर्षभ ॥ १० ॥
स्नेहेनाक्रान्तहृदयः शोकेनाकुलितेन्द्रियः ॥ द्रष्टुमभ्यागतो ह्येष भरतो नान्यथाऽऽगतः ॥ ११ ॥
अम्बां च कैकयीं रुष्य परुषं चाप्रियं वदन् ॥ प्रसाद्य पितरं श्रीमान्राज्यं मे दातुमागतः ॥ १२ ॥
प्राप्तकालं यदेषोऽस्मान्भरतो द्रष्टुमिच्छति ॥ अस्मासु मनसाऽप्येष नाप्रियं किंचिदाचरेत् ॥ १३ ॥
विप्रियं कृतपूर्वं ते भरतेन कदा नु किम् ॥ ईदृशं वा भयं तेऽद्य भरतं योऽत्र शङ्कसे ॥ १४ ॥

किंकार्यं नकिमपीत्यर्थः । महाप्राज्ञोभरतोपियदिधनुर्गृहीत्वास्वयमागतः तदाकिमस्माकंयुद्धोद्योगेनेतिभावः ॥ २ ॥ तत्रयुक्तिमाह—पितुरिति । सापवादेन पित्रा भरतायदत्तंराज्यं रामस्तंहत्वागृहीतवानित्येवंरूपेणापवादेन युक्तं ॥ ३ ॥ युक्त्यन्तरमाह—यदिति । बान्धवादीनां क्षये नाशे लब्धंयद्धनं तन्नगृह्णीयां नेच्छेयमित्यर्थः । विषकृतान् विषमिश्रद्रव्यकृतान् । भक्षान् अपूपादीनिव ॥ ४ ॥ अर्थं पृथिवीभिन्नंरत्नादिकं । भवतां भ्रातॄणामर्थे भवन्निमित्तमित्यर्थः । एतत् उक्तरूपं । प्रतिशृणोमि नातिवर्तइत्यर्थः ॥ ५ ॥ संग्रहार्थं धनसञ्चयार्थं । सुखार्थं तत्सुखार्थं तत्तदभिमतवस्तुप्रदानेनतत्प्रीत्यर्थमित्यर्थः । अपिनातद्वृद्धिःसमुच्चीयते । राज्यमपिबहुच्छिद्रत्वेनापरिग्राह्यतयाममानिष्टमपि । आलभे स्पृशामि । स्पृष्ट्वाशपइत्यर्थः । सत्येनेति मदुक्तंयथासत्यंभवति तथाआयुधंस्पृशामीत्यर्थः ॥ ६ ॥ नेच्छेयं इमामितिशेषः ॥ ७ ॥ शिखी अग्निः । भरतादिसुखाननुगुणंयत्सुखं तदग्निर्भस्मीकुरुतां नतन्ममग्राह्यमित्यर्थः ॥ ८ ॥ एवंलक्ष्मणचित्तानुसारेणपरिहृत्यत्रवस्तुतत्त्वमाह—मन्यइत्यादि श्लोकत्रयमेकान्वयं । द्रष्टुमभ्यागतोह्येषभरतोनान्यथागतइतिमन्येइत्यन्वयः । अयोध्यामागतःमातुलगृहादितिशेषः । भ्रातृवत्सलः भ्रातृपुवत्सलः स्नेही । कुलधर्मं ज्येष्ठस्यराज्यपरिपालनरूपं । स्नेहेन मद्विषयप्रीत्या । आक्रान्तहृदयः तत्परवशइत्यर्थः । शोकेन मद्विवासजनितदुःखेन । आकुलितेन्द्रियः व्याकुलहृदयः । अन्यथा मद्विरोधितया नागतः ॥ ९—११ ॥ रुष्य संरुष्य ॥ १२ ॥ एषभरतः अस्मान् द्रष्टुमिच्छतीतियत् एतत् प्राप्तकालं कालोचितमित्यर्थः ॥ १३ ॥ ते तुभ्यं । भरतेन कदानु कदाचित् । विप्रियं कृतपूर्वंकिं । ईदृशंभयंवा त्वदुक्तसदृशंभयजनकवाक्यंवा कृतपूर्वंकिं [illegible]पूर्वंकिं । यस्त्वमद्य अत्रार्थे अत्रस्थाने[illegible] । भरतं[illegible]सइति

शि० आहवे राक्षससंग्रामार्थं । पितुःसत्यं वनवासबोधकवाक्यंप्रतिश्रुत्य सापवादेनराज्येन इदानींराज्यग्रहणेन[illegible] निवर्तं चभरतं किंकरिष्यामि । सापवादपुरुषस्यस्वजनादिप्राप्तिरपिदुःखदैवेतितात्पर्यं ॥ ३ ॥ ति० क्षये नाशे । कृतेइतिशेषः ॥ ४ ॥ ति० संग्रहार्थं सम्यक्पालनार्थं ॥ ५ ॥ स० यत् यदि । तत् तर्हि । मामितिशेषः ॥ ८ ॥ शि० अप्रियं रामप्रव्राजनं ममप्रीतिविरोधीतिवदन्सन् कैकेयीमंबांरुष्य प्रव्राजनहेतुत्वेनकिंचित्परुषमुक्त्वेत्यर्थः । अपितरं पितृरहितं मांप्रसाद्य [illegible]दनशीलस्सन् । मेराज्यंदातुमागतः ॥ १२ ॥ शि० अभयं भयनिवर्तकं ॥ १४ ॥

[पा०] १ ङ. छ. झ. ट. माहवे. २ ख. गृह्णामि. ३ ख. च. ञ. कृतान्यथा. ४ ख. ह्येतत्. ५ ग. संग्रहार्थान. ६ क. राज्यंचाप्यहं. ७ ग. एवं. ८ ग. सकला. ९ क. च. झ. ट. वापि. १० ग. राघव. ११ ग. झ. ट. प्राणैःप्रिय. १२ क—ञ पुरुषोत्तम. १३ च. ट. शोकव्याकुलितेन्द्रियः. १४ ख. ग. कैकयींरोषात्. ञ. रुष्यकैकेयीं. १५ [illegible] प्रियं. १६ ङ. झ. ञ. ट. मर्हति. १७ ख—च. ज—ट. नाहितं. १८ ङ. झ. ञ. ट. यद्विशङ्कसे.

न हि ते निष्ठुरं वाच्यो भरतो नाप्रियं वचः ॥ अहं ह्यप्रियमुक्तः स्यां भरतस्याप्रिये कृते ॥ १५ ॥
कथं नु पुत्राः पितरं हन्युः कस्यां चिदापदि ॥ भ्राता वा भ्रातरं हन्यात्सौमित्रे प्राणमात्मनः ॥ १६ ॥
यदि राज्यस्य हेतोस्त्वमिमां वाचं प्रभाषसे ॥ वक्ष्यामि भरतं दृष्ट्वा राज्यमस्मै प्रदीयताम् ॥ १७ ॥
उच्यमानोपि भरतो मया लक्ष्मण तत्त्वतः ॥ राज्यमस्मै प्रयच्छेति बाढमित्येव वक्ष्यति ॥ १८ ॥
तथोक्तो धर्मशीलेन भ्रात्रा तस्य हिते रतः ॥ लक्ष्मणः प्रविवेशेव स्वानि गात्राणि लज्जया ॥ १९ ॥
तद्वाक्यं लक्ष्मणः श्रुत्वा व्रीडितः प्रत्युवाच ह ॥ त्वां मन्ये द्रष्टुमायातः पिता दशरथः स्वयम् ॥ २० ॥
व्रीडितं लक्ष्मणं दृष्ट्वा राघवः प्रत्युवाच ह ॥ एष मन्ये महाबाहुरिहास्मान्द्रष्टुमागतः ॥ २१ ॥
अथवा नौ ध्रुवं मन्ये मन्यमानः सुखोचितौ ॥ वनवासमनुध्याय गृहाय प्रतिनेष्यति ॥ २२ ॥
इमां वाऽप्येष वैदेहीमत्यन्तसुखसेविनीम् ॥ पिता मे राघवः श्रीमान्वनादादाय यास्यति ॥ २३ ॥
एतौ तौ संप्रकाशेते गोत्रवन्तौ मनोरमौ ॥ वायुवेगसमौ वीरौ जवनौ तुरगोत्तमौ ॥ २४ ॥
स एष सुमहाकायः कम्पते वाहिनीमुखे ॥ नागः शत्रुंजयो नाम वृद्धस्तातस्य धीमतः ॥ २५ ॥
न तु पश्यामि तच्छत्रं पाण्डुरं लोकसत्कृतम् ॥ पितुर्दिव्यं महाबाहो संशयो भवतीह मे ॥ २६ ॥

योजना ॥ १४ ॥ तइति " कृत्यानांकर्तरिवा " इतिषष्ठी । ते त्वया । भरतः निष्ठुरं अप्रियंचवचः नवाच्यः । भरतस्य अप्रिये अप्रियवचनेकृते उक्तेसति अहंहि अहमेवाप्रियमुक्तः स्यामितिसंबन्धः । स्वाश्रितविषयेकृतापचारः स्वस्मिन्नेवकृतइतिभगवदभिप्रायोऽनेनगम्यते ॥ १५ ॥ पूर्वंदशरथोवध्यतामित्युक्तं इदानींभरतोवध्यतइति इतउपरितूष्णीमवस्थानेकार्यहानिर्भविष्यतीतिभयात्तांरौद्रींबुद्धिंनियम्यनिवर्तयति —कथंन्वित्यादिना । प्राणं प्राणभूतं ॥ १६ ॥ यदि राज्यस्यहेतोः त्वं इमां भरतहिंसारूपां । वाचं प्रभाषसे तर्हिवक्ष्यामि भरतंदृष्ट्वाराज्यमस्मैप्रदीयतां । प्रदीयतामित्यनन्तरमितिकरणंद्रष्टव्यं ॥ १७ ॥ भरतः अस्मैराज्यंप्रयच्छेतिमयाउच्यमानोपि अहृदयमुक्तोपि । तत्त्वतः बाढमितिवक्ष्यत्येव । तथा दास्यामीतिवक्ष्यत्येवेत्यर्थः । एवकारेणतस्यपुनर्निवृत्त्यभावउच्यते ॥१८॥ तस्य रामस्य । हितेरतः नतुस्वार्थपरः । अतएवमङ्गलाशासनपरत्वादस्थानेभयशङ्कयातथोक्तवानिति गम्यते।गात्राणि अवयवान्। प्रविवेशेव लज्जातिशयेनात्यन्तसंकुचितगात्रोऽभूदित्यर्थः ॥ १९ ॥ व्रीडया प्रसङ्गान्तरंप्रस्तौति—त्वामिति । लोकेस्वोक्तिभङ्गेन व्रीडितःपुरुषःप्रस्तावान्तरंहिवदति। आयातइति मन्य इत्यन्वयः ॥ २० ॥ भावज्ञोरामोपि औचित्येनलक्ष्मणकृतप्रस्तावंव्रीडाशमनायप्रपञ्चयामासेत्याह—व्रीडितमिति । तदेवोच्यते—एषइत्यादिना ॥ २१ ॥ नाविति द्विवचनं प्राधान्यात् । मन्यमानःस्मरन् । वनवासं वनवासक्लेशं । अनुध्याय अनुचिन्त्य ॥२२॥ अत्यन्तेत्यनेन तन्मात्रनयनेहेतुरुक्तः ॥ २३ ॥ गोत्रवन्तौ प्रशस्तनामानौ । यद्वा प्रशस्तकुलप्रसूतौ । " गोत्रंनाम्निकुलेपिच " इतिवैजयन्ती । वायुवेगसमौ वेगेनवायुसमावित्यर्थः । तुरगोत्तमौ राजौपवाह्यौ ॥ २४ ॥ कम्पते कपिचलनइतिधातुः । मत्तगजस्वभावोयं । वृद्धः उन्नतः। धीमतः गजपरिपालनज्ञस्य । तातस्यनागः शत्रुंजयः । नतुमयासुयज्ञायदत्तोमातुलाल्लब्धशत्रुंजयइत्यर्थः ॥ २५ ॥ लोकसत्कृतं लोको-

ति० प्राणं प्राणसमंभ्रातरं ॥ १६ ॥ ति० एवमनुचितोक्तिलज्जापरिहारायोचितंवाक्यमाह—तदिति । भरतप्रसङ्गखुलदाशयपरिज्ञानायैवकेवलमुपन्यस्तइत्याशयः ॥ २० ॥ शि० वनवासं वनवासक्लेशं । अनुध्याय संचिन्त्य । गृहाय अथप्रतिनेष्यति माङ्गलिकानयनानुकूलव्यापारंकरिष्यति इत्यहंमन्ये ॥ २२ ॥ ति० गात्रवन्तावितिपाठे प्रशस्तशरीरौ ॥ २४ ॥ ति० पितुरागमनेचिह्नान्तरमाह—सएषइति । कंपते चलति आगच्छति ॥ २५ ॥ ति० इह छत्रविषये । स० आगतोनवेतिसंशयोभवतीत्यर्थः ॥ २६ ॥ ति० इतीव इत्येव ॥ २७ ॥ इतिसप्तनवतितमस्सर्गः ॥ ९७ ॥

[पा०] १ क—घ. च—ट. उच्यमानोहि. २ ङ. छ. झ. ट. तद्वचः. ३ ङ. छ. झ. ट. मंस्यते. ४ क. च. ञ. भावज्ञः. ५ ङ. च. छ. झ ट. चाप्येष. ख. ग. वाप्यथ. ६ ख. ग. दशरथः. ७ ख. ग. मनोहरौ. ८ ङ. छ. झ. ट. वीरौ. ख. ग. वेगे. ९ क. ञ. ञ. एषहि. १० क- ख. ग. ङ—ट. महाभाग. ११ ग. घ. भवतीव.

[1]वृक्षाग्रादवरोह त्वं कुरु लक्ष्मण मद्वचः ॥ इतीव रामो धर्मात्मा सौमित्रिं तमुवाच ह ॥ २७ ॥
अवतीर्य तु सालाग्रात्तस्मात्स समितिंजयः ॥ लक्ष्मणः प्राञ्जलिर्भूत्वा तस्थौ रामस्य पार्श्वतः ॥२८॥
[2]भरतेनापि संदिष्टः संमर्दो न भवेदिति ॥ [3]समन्तात्तस्य शैलस्य सेना वासमकल्पयत् ॥ २९ ॥
अध्यर्धमिक्ष्वाकुचमूर्योजनं [4]पर्वतस्य सा ॥ पार्श्वे न्यविशदावृत्य [5]गजवाजिरथाकुला ॥ ३० ॥
सा चित्रकूटे [7]भरतेन सेना धर्मं पुरस्कृत्य विधूय दर्पम् ॥
प्रसादनार्थं रघुनन्दनस्य [8]विराजते नीतिमता प्रणीता ॥ ३१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे सप्तनवतितमः सर्गः ॥ ९७ ॥

अष्टनवतितमः सर्गः ॥ ९८ ॥

भरतेनगुहशत्रुघ्नौप्रतिस्वस्वपरिवारैस्सहरामाश्रमान्वेषणनियोजनपूर्वकंस्वेनाप्यमात्यादिसाहित्येनतदन्वेषणोक्तिः ॥ १ ॥ तथास्वस्यरामावलोकनौत्कण्ठ्योद्घोषणं ॥ २ ॥ तथारामसांनिध्यात्सीतालक्ष्मणादीनांधन्यताप्रशंसनपूर्वकंपादचारेणवनप्रवेशः ॥ ३ ॥ तथारामाश्रमसंनिहितसालमूलमुपागतवतातेनसमीपेधूमदर्शनात्तस्यैवतदाश्रमत्वाध्यवसायेनसहर्षमाश्रमप्रवेशः ॥४॥

निवेश्य सेनां तु विभुः पद्भ्यां पादवतां वरः ॥ अभिगन्तुं स काकुत्स्थमियेष [9]गुरुवर्तकम् ॥ १ ॥
निविष्टमात्रे सैन्ये तु यथोद्देशं विनीतवत् ॥ भरतो भ्रातरं वाक्यं शत्रुघ्नमिदमब्रवीत् ॥ २ ॥
क्षिप्रं[10] वनमिदं सौम्य नरसङ्घैः समन्ततः ॥ लुब्धैश्च सहितैरेभिस्त्वमन्वेषितुमर्हसि ॥ ३ ॥
गुहो ज्ञातिसहस्रेण शरचापासि[11]धारिणा ॥ समन्वेषतु [12]काकुत्स्थावस्मिन्परिवृतः स्वयम् ॥ ४ ॥
अमात्यैः सह पौरैश्च गुरुभिश्च द्विजातिभिः ॥ [13]वनं सर्वं चरिष्यामि पद्भ्यां परिवृतः स्वयम् ॥ ५ ॥

त्तरमित्यर्थः । इह पितरिविषये । संशयोभवतीहमे इति राघवः प्रत्युवाचेतिपूर्वेणान्वयः ॥ २६ ॥ मद्वचः भरतविषयेशान्तोभवेतिमत्सूचितंवचः । प्रथममर्धमुत्तरार्धेनयोजनीयं ॥ २७ ॥ समितिंपरसैन्यंजयतीति समितिंजयः । "संज्ञायांभृतृवृजिधारिसहितपिदमः" इत्यत्रयोगविभागेनखच् । मुमागमश्च । सन्नद्धइतियावत् । पार्श्वतः भ्रातर्यस्थानेभयशङ्कयेतिभावः ॥ २८ ॥ संमर्दः रामाश्रमस्यपीडा नभवेदितिभरतेनसंदिष्टा आज्ञप्ता । सेना तस्यशैलस्यसमन्तात् नतुतदाश्रमसमीपे ॥ २९ ॥ अधिकमर्धंयस्मिंस्तत् अध्यर्धं योजनं सार्धयोजनमित्यर्थः । पर्वतस्यपार्श्वे आवृत्य न्यविशत् मण्डलाकारेणस्थिता ॥ ३० ॥ चित्रकूटे चित्रकूटसमीपे । नीतिमता सेनयोपरोधेरामस्यप्रसादोनस्यादितिनीतिज्ञेन । भरतेन धर्मंपुरस्कृत्य विनीतवेषेणराजाभिगन्तव्यइतिधर्ममनुसृत्य । दर्पंविधूय स्थितेन रघुनन्दनस्यप्रसादनार्थं प्रणीता आनीतासा सेना विराजते भासिस्म ॥ ३१ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने सप्तनवतितमःसर्गः ॥९७॥

अथभरतस्यरामप्राप्तिरष्टनवतितमेसर्गे—निवेश्येत्यादि । गुरुवर्तकं गुरुवचनानुवर्तकं ॥ १—२ ॥ लुब्धैः व्याधैः ॥ ३—४ ॥ अमात्यैःसह पौरैःसह । गुरुभिः द्विजातिभिश्चपरिवृतः पद्भ्यांसर्वंवनंचरिष्या-

---

ति० पादवतां चरप्राणिनांवरः । स० गुरुवत् पितृवद्वर्तयतीतिगुरुवर्तकः । "ज्येष्ठभ्रातापितुस्समः" इत्युक्तेः ॥ १ ॥ स०मात्रशब्देन भोजनादिकंव्यावर्तयति ॥ २ ॥ ति० पौरैस्सहवर्तमानैरमात्यैः द्विजातिभिस्सहवर्तमानैर्गुरुभिश्चपरिवृतः ॥ ५ ॥

[पा०] १ ग. च. ञ. वृक्षात्समवरोह. क. ख. च. पाठेषु अस्यश्लोकस्यपूर्वोत्तरार्धयोःपौर्वापर्यंदृश्यते. २ क. ख. ग. ङ. च. छ. झ. ञ. ट. भरतेनाथ. ३ ग. समन्तादस्य. ४ ङ. छ. झ. ट. पर्वतस्यह. ५ क. च. ञ. नरवाजिगजाकुला. ६ ङ. छ. झ. ट. नराकुला. ७ ङ. भरतस्य. ८ क. ङ. च. छ. झ. ञ. ट. विरोचते. ९ ख. ग. गुरुवर्तकः. १० ग. क्षिप्रमेववनं. ११ क. ख. ङ. च. झ. ञ. ट. पाणिना. १२ ङ. काकुत्स्थंवनेपरिवृतः. १३ क—ट. सहसर्वं.

यावन्न रामं द्रक्ष्यामि लक्ष्मणं वा महाबलम् ॥ वैदेहीं वा महाभागां न मे शान्तिर्भविष्यति ॥६॥
यावन्न चन्द्रसङ्काशं द्रक्ष्यामि शुभमाननम् ॥ भ्रातुः पद्मपलाशाक्षं न मे शान्तिर्भविष्यति ॥ ७ ॥
यावन्न चरणौ भ्रातुः पार्थिवव्यञ्जनान्वितौ ॥ शिरसा धारयिष्यामि न मे शान्तिर्भविष्यति ॥८॥
यावन्न राज्ये राज्यार्हः पितृपैतामहे स्थितः ॥ अभिषेकजलक्लिन्नो न मे शान्तिर्भविष्यति ॥ ९ ॥
सिद्धार्थः खलु सौमित्रिर्यश्चन्द्रविमलोपमम् ॥ मुखं पश्यति रामस्य राजीवाक्षं महाद्युति ॥ १० ॥
कृतकृत्या महाभागा वैदेही जनकात्मजा ॥ भर्तारं सागरान्तायाः पृथिव्या याऽनुगच्छति ॥११॥
सुभगश्चित्रकूटोसौ गिरिराजोपमो गिरिः ॥ यस्मिन्वसति काकुत्स्थः कुबेर इव नन्दने ॥ १२ ॥
कृतकार्यमिदं दुर्गं वनं व्यालनिषेवितम् ॥ यदध्यास्ते महातेजा रामः शस्त्रभृतांवरः ॥ १३ ॥
एवमुक्त्वा महातेजा भरतः पुरुषर्षभः ॥ पद्भ्यामेव महाबाहुः प्रविवेश महद्वनम् ॥ १४ ॥
स तानि द्रुमजालानि जातानि गिरिसानुषु ॥ पुष्पिताग्राणि मध्येन जगाम वदतांवरः ॥ १५ ॥
स गिरेश्चित्रकूटस्य सालमासाद्य पुष्पितम् ॥ रामाश्रमगतस्याग्नेर्ददर्श ध्वजमुच्छ्रितम् ॥ १६ ॥

मीतिसंबन्धः ॥ ५ ॥ शान्तिः दुःखशान्तिः मङ्गलं वा । " शान्तिः प्रशममङ्गले " इतिवैजयन्ती ॥ ६—७ ॥ पार्थिवव्यञ्जनान्वितौ वज्रध्वजारविन्दाङ्कुशसुधाकलशादिमहाराजलक्षणयुक्तौ । चरणौ यावन्नशिरसाधारयिष्यामि तावत्पर्यन्तंमेशान्तिर्नभविष्यति । यदा रामःस्वयोग्यसिंहासनाधिराज्यमौळिं धृत्वा ममयोग्यंश्रीपादाख्यमौलिंददाति तदामेसकलदुःखशान्तिर्भविष्यतीतिभावः ॥ ८—९ ॥ चन्द्रविमलोपमं निर्मलचन्द्रसदृशं ॥ १० ॥ महाकुलप्रसूतावैदेही । महाभागा महाभाग्यवती । कृतकृत्या कृतार्थाच । तत्फलं तद्धेतुंचाह—भर्तारमिति । पृथिव्याभर्तारमित्यन्वयः ॥ ११ ॥ असौचित्रकूटः सुभगः भाग्यशालीगिरिराजोपमश्च । गिरिराजोपमः हिमवत्पर्वतसदृशः । नन्दने नन्दयतीतिनन्दनं चैत्ररथं । सुभगइत्यादि । सुभगः प्रदेशान्तरेभ्योतिरमणीयः । सुभगः सर्वेषामुद्देश्यतमः । अत्रहेतु यस्मिन्नित्युत्तरार्धेवक्ष्यति । चित्रकूटः स्वभावतोपिरमणीयः । असौगिरिः अयोध्यांपरित्यज्यापिरामेण आदरणीयः । यद्वा गिरिराजोपमः गिरिराजोत्र श्रीनिवाससान्निध्यस्थानभूतोवेङ्कटाचलः । तत्रोभयत्रहेतुमाह—यस्मिन्निति । काकुत्स्थः अयोध्याधिपतिः । स्वदेशंविहाय अपरिचितेयस्मिन्वसति । तत्रानुरूपंदृष्टान्तमाह—कुबेरइति । चैत्ररथवासयोग्यः कुबेरः इन्द्रोद्याने नन्दनइव । यद्वा स्वगृहंविहायस्वगृहोद्यानेविहरमाणोवैश्रवणइववसतीत्यर्थः । " इक्ष्वाकूणामियंभूमिः सशैलवनकानना " इत्युक्तेश्चित्रकूटोपिरामविषयोहि नन्दनोपमानेनरामस्यचित्रकूटेभोग्यताप्रकर्षउच्यते । काकुत्स्थः ककुत्स्थकुलोद्भवः । यथास्वकुलमकृतार्थयत् तथा स्ववासस्थलमप्यकृतार्थयदितिभावः । यद्वा कुबेरइवनन्दने भूवाचकेनकुशब्देनजगदुपलक्ष्यते । बेरं शरीरं कुबेरो जगच्छरीरः परमात्मा नन्दनइव वैकुण्ठनन्दनवनइव ॥१२॥ कृतकार्यं कृतार्थं । दुर्गंदुष्प्रवेशं । व्यालनिषेवितं दुष्टसर्पाश्रितं । कृतकृत्यत्वेहेतुः—यदित्यादि । वनंदुर्गमितिस्थलस्वभावेनवासानर्हत्वमुक्तं । महातेजाइत्यादिना रामवैभवापेक्षयापिवासानर्हत्वमुच्यते ॥१३॥ महातेजाइत्यादिनापद्भ्यांगमनानर्हत्वमुच्यते ॥ १४ ॥ द्रुमजालानिमध्येनद्रुमजालानांमध्येनेत्यर्थः । मध्यशब्दस्यदिग्वाचित्वात् "एनपाद्वितीया"इति द्वितीया । वदतांवरइत्यनेन रामसन्निधौवक्तव्यविशेषंचिन्तयन्नेवजगामेत्युक्तं ॥ १५ ॥ अग्ने-

स० गिरिराजः मेरुः । शि० सुशुभः अत्यन्तशुभकारकः ॥ १२ ॥ ती० कृतकार्यं कृतार्थं स्थावरत्वमोचकरामपादाग्ररजोग्रस्ततयाकृतार्थमित्यर्थः ॥ १३ ॥ स० अग्नेर्ध्वजं धूमं ददर्श स्पष्टंददर्श । पूर्वचारमुखतइतिनपुनरुक्तिः—**कतक०** रामाश्रमग-

[पा०]१ क. च. ज. पश्यामि. २ ख. ग. द्रक्ष्यामिचशुभाननं. ङ. छ. झ. ट. तद्द्रक्ष्यामिशुभाननं. ३ क. ङ. छ. ज. झ. ट. विशालाक्षं. ४ ङ. च. छ. झ. ञ. ट. प्रग्रहीष्यामि. ५ ङ. छ. झ. ट. अभिषिक्तोजल. ६ सिद्धार्थःखल्वितिश्लोकः. ङ. च. छ. झ. ञ. पुस्तकेषु यावन्नचरणावितिश्लोकात्पूर्वंदृश्यते. ७ ङ. छ. झ. ट. सुशुभश्चित्र. ड. शुशुभेचित्र. ८ ङ. छ. झ. ट. राजसमो. ९ ङ. छ. झ. ट. महाराजो. १० क. च. झ. ञ. ट. महाबाहुः. ११ क. घ.—ट. महातेजाः. १२ ङ. छ. झ. ट. मारुह्यसत्वरं. १३ घ. मुत्तमं.

तं दृष्ट्वा भरतः श्रीमान्मुमोह सहबान्धवः ॥ अत्र राम इति ज्ञात्वा गतः पारमिवाम्भसः ॥ १७ ॥
स चित्रकूटे तु गिरौ निशम्य रामाश्रमं पुण्यजनोपपन्नम् ॥
गुहेन सार्धं त्वरितो जगाम पुनर्निवेश्यैव चमूं महात्मा ॥ १८ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे अष्टनवतितमः सर्गः ॥ ९८ ॥

एकोनशततमः सर्गः ॥ ९९ ॥

भरतेनकौसल्याद्यानयनेवसिष्ठनियोजनपूर्वकंशत्रुघ्नंप्रतितत्तच्चिह्नप्रदर्शनेनरामपर्णशालासमीपगमनम् ॥ १ ॥ पर्णशालायांससीतालक्ष्मणंरामंदृष्टवताभरतेनतत्पादपतनेप्रयतमानेनापितदीयतापसवेषावलोकनसमुद्रिक्तशोकाकुलतयातत्पादानवाप्त्यैवभूमौपतनम् ॥ २ ॥ रामेणस्वाभिवादकयोर्भरतशत्रुघ्नयोस्सबाष्पमालिङ्गनम् ॥ ३ ॥ रामलक्ष्मणयोर्गुहसुमन्त्राभ्यांसह संगमः ॥ ४ ॥

निविष्टायां तु सेनायामुत्सुको भरतस्तदा ॥ जगाम भ्रातरं द्रष्टुं शत्रुघ्नमनुदर्शयन् ॥ १ ॥
ऋषिं वसिष्ठं संदिश्य मातॄर्मे शीघ्रमानय ॥ इति त्वरितमग्रे स जगाम गुरुवत्सलः ॥ २ ॥
सुमन्त्रस्त्वपि शत्रुघ्नमदूरादन्वपद्यत ॥ रामदर्शनजस्तर्षो भरतस्येव तस्य च ॥ ३ ॥
गच्छन्नेवाथ भरत स्तापसालयसंस्थिताम् ॥ भ्रातुः पर्णकुटीं श्रीमानुटजं च ददर्श ह ॥ ४ ॥

ध्वजं धूमं । पूर्वंधूमाग्रदर्शनं अधुनात्समीपत्वात्तन्मूलदर्शनमितिनपुनरुक्तिः ॥ १६ ॥ मुमोह मोहसदृशं पारवश्यंप्राप । मुमोदेतिचपाठः । अम्भसः समुद्रस्य पारंगतइव अभूदितिशेषः ॥ १७ ॥ निशम्य दृष्ट्वा । दीर्घाभावआर्षः । तत्समीपस्थजनेभ्यः श्रुत्वेतिवार्थः । अतएवपुण्यजनोपपन्नमित्युच्यते । गुहेनेति प्रधानजनोपलक्षणपरं । चमूंपुनर्निवेश्य अन्वेषणार्थमागतांचमूमपिस्थापयित्वा । महात्मा दृढाध्यवसायः ॥ १८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने अष्टनवतितमः सर्गः ॥ ९८ ॥

अथभरतस्यरामसंगमएकोनशततमे—निविष्टायामित्यादि । निविष्टायांसेनायां स्वयंतत्रक्षणंनिविष्टः सन् उत्सुकः साभिलाषः । शत्रुघ्नमनुदर्शयन् । अनुःकर्मप्रवचनीयः । शत्रुघ्नस्यरामाश्रमसामीप्यचिह्नानि प्रदर्शयन् जगाम ॥ १ ॥ मातॄर्मेशीघ्रमानयेति ऋषिं वसिष्ठंसंदिश्य जगामेत्यन्वयः । अनेन रामावासंनिश्चित्यपश्चादानेष्यामीतिधियामहासेनानिवेशेमातॄर्निवेशितवानितिगम्यते ॥ २ ॥ तत्पश्चाच्छत्रुघ्नः तत्पश्चात्सुमन्त्रश्चगतइत्याह—सुमन्त्रइति । सुमन्त्रोप्यदूरात् समीपे शत्रुघ्नमन्वपद्यत अन्वगच्छत् । तत्रहेतुमाह—रामेति । रामदर्शनजस्तर्षः रामदर्शनमुद्दिश्यजनितोभिलापः । "कामोभिलापस्तर्षश्च" इत्यमरः । तस्य शत्रुघ्नस्यच चकारात् सुमन्त्रस्यचास्तिहीत्यर्थः । सुमन्त्रस्यत्वरितगमनात् वसिष्ठएवमात्रानयनेनियुक्त इत्यावेदितं ॥ ३ ॥ तापसालयसंस्थितां तापसालयानांमध्येस्थितां तापसालयसमानसंस्थानामितिवार्थः । पर्णकुटीं अग्न्यगारभूतांपर्णशालां । उटजं दिदृक्षया समागतैस्तापसैः सहसुखावस्थानार्थमुपकल्पितांपर्णशालां । यद्वा भ्रातुःपर्णकुटीं सीतयासहशयनार्थंनिर्मितांपर्णशालां । श्रीमान् तादात्विकप्रीतिजनितकान्तिमान् । उटजं दिवावस्थानार्थकल्पितंपर्णमण्डपं । यद्वा पर्णशालां महाशालां उटजं तन्मध्यवर्तिसदाव-

तस्यान्तेइतिपाठः तदाश्रमगतशालस्यान्ते उपरिबद्धं उच्छ्रितंध्वजं कोविदारध्वजंदृष्ट्वेत्यर्थः । धूमदर्शनस्यपूर्वमेवजातत्वेनतस्यानिर्णायकत्वात् ॥ १६ ॥ इत्यष्टनवतितमस्सर्गः ॥ ९८ ॥

स० उटजं वहिर्लक्ष्मणनिवासस्थानं । ति० उटजं सभित्तिकवाटं दारुबद्धंगृहंसीतानिवेशार्थंकृतं ॥ ४ ॥

[पा०] १ क.—ङ. छ.—ट. मुमोद. २ क. ग. च. ञ. वान्धवः. ३ ङ. छ. झ. ञ. ट. त्वनः. ४ ग. शत्रुघ्नमहिनोविभुः. ङ. शत्रुघ्नंप्रतिदर्शयन्. ५ च. ञ. भ्रातृवत्सलः. ६ ख. ग. सुमन्त्रस्त्वथ. ७ ङ. छ. ट. मन्ववर्तत. ८ ख. ग. दर्शनजोहर्षो.

शालायास्त्वग्रतस्तस्या ददर्श भरतस्तदा ॥ काष्ठानि चावभग्नानि पुष्पाण्युपचितानि च ॥ ५ ॥
स लक्ष्मणस्य रामस्य ददर्शाश्रममीयुषः ॥ कृतं वृक्षेष्वभिज्ञानं कुशचीरैः क्वचित्क्वचित् ॥ ६ ॥
ददर्श च वने तस्मिन्महतः सञ्चयान्कृतान् ॥ मृगाणां महिषाणां च करीषैः शीतकारणात् ॥ ७ ॥
गच्छन्नेव महाबाहुर्द्युतिमान्भरतस्तदा ॥ शत्रुघ्नं चाब्रवीद्धृष्टस्तानमात्यांश्च सर्वशः ॥ ८ ॥
मन्ये प्राप्ताः स्म तं देशं भरद्वाजो यमब्रवीत् ॥ नातिदूरे हि मन्येऽहं नदीं मन्दाकिनीमितः ॥ ९ ॥
उच्चैर्बद्धानि चीराणि लक्ष्मणेन भवेदयम् ॥ अभिज्ञानकृतः पन्था विकाले गन्तुमिच्छता ॥ १० ॥
इदं चोदात्तदन्तानां कुञ्जराणां तरस्विनाम् ॥ शैलपार्श्वे परिक्रान्तमन्योन्यमभिगर्जताम् ॥ ११ ॥
यमेवाधातुमिच्छन्ति तापसाः सततं वने ॥ तस्यासौ दृश्यते धूमः संकुलः कृष्णवर्त्मनः ॥ १२ ॥

स्थानास्थानं । तथैववक्ष्यति " ददर्शमहतीं " इत्यादिना । ददर्श चिह्नैरुत्प्रेक्षितवान् ॥ ४ ॥ चिह्नान्येवाह—शालायाइत्यादिना । काष्ठानि रात्रौप्रकाशाय ज्वलनीयानि । पुष्पाणि पूजार्थानि ॥ ५ ॥ ईयुषः जलाशयादाश्रमंगच्छतोरामस्य । " उपेयिवाननाश्वाननूचानश्च" इत्यत्र नात्रोपसर्गस्तन्त्रं । अन्योपसर्गपूर्वान्निरुपसर्गाच्चभवत्येवेतिवृत्तिकृतोक्तत्वादनुपसर्गपूर्वादिणःक्वसुः । कुशादिभिः कृतं अभिज्ञानं चिह्नं । अन्योन्यस्यगमनागमनपरिज्ञानार्थंकृतंचिह्नंददर्श ॥६॥ करीषैःकृतान्संचयानित्यन्वयः । शीतकारणात् शीतनिवारणार्थं ॥ ७ ॥ अमात्यान् सुमन्त्रं । बहुवचनं पूजार्थं । यद्वा अनेनैवावगम्यते अन्येप्यमात्याः सुमन्त्रेणसहागताइति ॥ ८ ॥ इतः अस्मात्प्रदेशात् । मन्दाकिनीं नातिदूरेमन्ये प्रत्यासन्नांमन्यइत्यर्थः । अतः यंदेशंभरद्वाजोऽब्रवीत् तंदेशंप्राप्ताःस्मेतिमन्ये । प्राप्ताःस्मेत्येववक्तव्ये मन्यइत्युक्त्या अयमर्थोवगम्यते कैकेय्याराजन्नित्याहूतस्यभाग्यहीनस्यमेनेयंतद्देशप्राप्तिर्भवितुमर्हति किन्तु भ्रमस्वप्रादिष्वन्यतमोयमिति ॥ ९ ॥ उच्चैर्बद्धानिचीराणि उन्नतप्रदेशेचीराणिबद्धानिदृश्यन्ते । तस्मादयंपन्थाः विकाले अकाले सायंकालादौ । गन्तुमिच्छता फलमूलजलादिसंग्रहणार्थं गन्तुमिच्छतालक्ष्मणेन अभिज्ञानकृतः कृताभिज्ञानो भवेत् । अतोऽनेनैवास्माभिर्गन्तव्यमितिभावः ॥१०॥ मार्गेचिह्नकरणंगजपदमर्दनक्लिष्टत्वेनदुर्ज्ञानत्वादित्याशयेनाह—इदंचेति । उदात्तदन्तानां महादन्तानां । " महत्युदात्तउच्चोक्तौ " इतिवैजयन्ती । तरस्विनां वेगवतां । अन्योन्यमभिगर्जतां अन्योन्यंप्रतिगर्जतां । गजानां शैलपार्श्वेपरिक्रान्तमिदं परिक्रमणस्थानमिदं "क्तोधिकरणेच" इत्यधिकरणेक्तः । इदमेषामासितमित्यादिवत् । अस्मिन्मार्गेकुञ्जराःपरिक्रान्ताइत्यर्थः । अन्योन्यकोपातिशयेनवेगाद्दन्तादन्तिप्रहारंकुर्वतामाश्रमप्रवेशस्याशक्यत्वादाश्रमप्रान्तगमनमाश्रमप्रदेशंसूचयतीत्यर्थः ॥ ११ ॥ रामाश्रमस्यात्यन्तसन्निहितत्वज्ञापकंधूमबाहुल्यंदर्शयति—यमिति । तापसाः यमग्निमाधातुमिच्छन्ति सायंप्रातर्होमार्थंसर्वदारक्षितुमिच्छन्ति तस्यकृष्णवर्त्मनः संकुलोसौधूमोदृश्यते । पचनाग्नेर्होमाग्नेश्चव्यावृत्तंसंततस्थायिगार्हपत्याग्निंदर्शयितुंसंकुल[illegible]ब्दः । अतिनिबिडइत्यर्थः । पचनेज्वालानां होमेचाङ्गाराणामपेक्षितत्वान्नतदाधूमनिबिडतासंभव इतिभावः । अनेनरामस्याग्न्याधानाभावाच्छ्रौताग्निरत्रनोच्यते किंतु धार्यःस्मार्ताग्निः । यदिहितस्यत्रेताग्निः स्यात्तदा । रामःकमलपत्राक्षःपुरोधसमथाब्रवीत् । अग्निहोत्रंव्रजलग्रेसर्पिज्ज्वलितपावकं" इतिचरमयात्रायामग्निहोत्रपुरस्कारश्रवणाद्वनयात्रायामपितथादृश्येत । अनुसरन्तोपिहिपौरवृद्धाःसाग्नयएवसमागताइत्युच्यन्ते । किंच " दीक्षितंव्रतसंपन्नंवराजिनधरंशुचिम् । कुरङ्गशृङ्गपाणिंचपश्यन्तीत्वांभजाम्यहं " इतिसीतामनोरथश्रवणाद्राज्याभिषेकात्पूर्वंनयज्ञोनुष्ठितइतिगम्यते । ततोऽयमग्निर्गृह्याग्निरेव । नचतस्याप्यानयनं नपूर्वमुक्तमितिवाच्यं तस्यासमारोपणेनानेतुंशक्य-

ति० एयुप्रः आङ्पूर्वादिणःक्वसुः ॥ ६ ॥ ति० शीतकारणात् । चैत्रशुक्लदशम्यांप्रस्थानेनतत्रकालेवैशाखान्तमपररात्रेशीतस्य जायमानत्वात् । शि० तस्मिन् प्रत्यक्षीभूते । भवने पर्णशालासमीपे । स० करीषवत्करीषैः । " करीषंशुष्कगोमयं" इत्यभिधानात् ॥ ७ ॥ स० आधातुं उपासितुं ॥ १२ ॥

[पा०] १ ङ. स्तथा. २ ख. ङ. च. छ. झ. ञ. ट. ण्यपचितानि. ३ क. ग. च. लक्ष्मणस्यच. ४ ख. ग. छ.—ट. मेयुषः. ५ ङ. छ. झ. ट. भवने. ६ ङ. स्तथा. ७ ख. प्राप्तोस्मि. ८ ग. यथाब्रवीत्. ९ क. च. ञ. दूरेच. ग. दूरेतु.

अत्राहं पुरुषव्याघ्रं गुरुसंस्कारकारिणम् ॥ आर्यं द्रक्ष्यामि संहृष्टो महर्षिमिव राघवम् ॥ १३ ॥
अथ गत्वा मुहूर्तं तु चित्रकूटं स राघवः ॥ मन्दाकिनीमनुप्राप्तस्तं जनं चेदमब्रवीत् ॥ १४ ॥
जगत्यां पुरुषव्याघ्र आस्ते वीरासने रतः ॥ जनेन्द्रो निर्जनं प्राप्य धिङ्मे जन्म सजीवितम् ॥१५॥
मत्कृते व्यसनं प्राप्तो लोकनाथो महाद्युतिः ॥ सर्वान्कामान्परित्यज्य वने वसति राघवः ॥ १६ ॥
इति लोकसमाक्रुष्टः पादेष्वद्य प्रसादयन् ॥ रामस्य निपतिष्यामि सीतायाः लक्ष्मणस्य च ॥ १७ ॥
एवं स विलपंस्तस्मिन्वने दशरथात्मजः ॥ ददर्श महतीं पुण्यां पर्णशालां मनोरमाम् ॥ १८ ॥

त्वात् । नचआत्मसमारोपणेपिसायंप्रातर्होमःकार्यः सतुनोक्तः । प्रत्युत तमसातीरेगङ्गाकूलेवृक्षमूलेभरद्वाजाश्रमेयमुनातटेचसंध्यावन्दनमेवोक्तं । अत्रचश्लोके तापसवनशब्दाभ्यांवनेतापसानांशीतनिवारणप्रकाशकरणकन्दमूलादिपचनसाधनतयासंग्राह्यएवाग्निरुच्यतइतिवक्तुंशक्यते । आधातुं संग्रहीतुमित्यर्थः । अतोऽयमग्निःपचनाद्यर्थएवनतुधार्यः स्मार्ताग्निरितिचेन्न । “ प्रागुदक्प्रवणांवेदिंविशालांदीप्तपावकां ” इतिवक्ष्यमाणविरोधात् । नह्यसंस्कृताग्नेर्वेदिसंबन्धःप्रसिद्धः । प्रागुदक्प्रवणत्वादिवेदिलक्षणंचोच्यमानंवेदिंतत्स्थमग्निंचसंस्कृतावगमयति । यद्येवं कथंतर्हिसायंप्रातर्होमावचनमितिचेन्नह्येकंस्वच्छन्दगामिनामुनिना असत्यामिच्छायामसतिचफलेपुनःपुनर्वक्तव्यं । वक्ष्यतितूपरिष्टात् सुतीक्ष्णाश्रमे “ अथतेग्निंसुरांश्चैववैदेहीरामलक्ष्मणौ । काल्यंविधिवदभ्यर्च्यतपस्विशरणेवने । उदयन्तंदिनकरंदृष्ट्वाविगतकल्मषाः । सुतीक्ष्णमभिगम्यैवमिदंवचनमब्रुवन्” इति । अत्रानुदितहोमपक्षेणोदयात्पूर्वमग्निकार्यवचनादग्निमित्येकवचनाच्च औपासनंसस्यगुक्तमिति एवमेवसर्वत्रद्रष्टव्यमिति। अत्रचाग्निकार्येरामस्यसाक्षात्प्रधानकर्तृत्वेनसीतायाःसहभावेनप्रणयनादिनाच लक्ष्मणस्यसमिदादिसंपादनरूपसहकारित्वेनचान्वयइतिज्ञेयं । तपस्विशरणेवनइत्यनेन अतिसङ्कटदेशेपियथावदनुष्ठानश्रद्धाविशेषउच्यते । अतश्चतुर्दशसुवनवाससंवत्सरेषुसीताहरणपर्यन्तंरामस्यचित्रकूटादिपञ्चवट्यन्तेषुप्रदेशेषु यत्रमाससंवत्सरादिवासेनचिरकालावस्थानं तत्रवहिःस्मार्तनित्याग्निधारणं अन्यत्रात्मनिसमिधिवासमारोप्यहोमकालेवरोप्यसायंप्रातरौपासनमितिदिक् । अस्मिञ्श्लोके चतापसा यमाधातुमिच्छन्तीत्यस्यार्थश्चवर्णितः । तेन चरामाश्रमचिह्नत्वत्पावनत्वमप्युक्तंभवति ॥ १२ ॥ गुरुसंस्कारकारिणं गुरुसंस्कारःश्रेष्ठसंस्कारः मन्त्रोपदेशादिः तत्कारिणं ॥ १३ ॥ राघवः भरतः । तंजनं सहागतंशत्रुघ्नादिकम् ॥ १४ ॥ जगत्यां भूमौ । वीरासने दक्षिणजानूपरिन्यस्तवामपादतयावस्थाने । धिङ्मेजन्मसजीवितमिति मेजन्मप्राणनंचधिगित्यर्थः ॥ १५ ॥ मत्कृतेव्यसनंप्राप्तः कैकेय्याममराज्यप्रापणकृतेराज्यभ्रंशरूपव्यसनंप्राप्तः ॥ १६ ॥ इतिलोकसमाक्रुष्टः एवंप्रकारेणलोकैरपवादंप्रापितः । प्रसादयन् प्रसादनाद्धेतोः । लक्ष्मणस्यचेति तस्यकनिष्ठत्वेपि कार्यगौरवात्पादपतनं । यदिमयाप्रसाद्यमानेरामे लक्ष्मणःकैकेयीकृतापकारंमय्यारोप्यमाप्रसीदेतिरामं निरुन्ध्यात्तर्हिलक्ष्मणस्यापिपादयोर्निपत्यतमपिप्रसादयिष्यामि । यदिरामप्रसादनरूपंकार्यकेवलंसुसाधितं भवेत् तदानींकनिष्ठपादपतनंदोषायेतिभरतहृदयं । [सीतायाश्चपुनःपुनरितिपाठः । सीतायालक्ष्मणस्य चेतिपाठे रामभक्तत्वेनवयोनादृतमितिबोध्यं । “ नपरीक्ष्यवयोवन्द्याः ” इतिस्मरणात् ॥ १७ ॥ एवमित्यारभ्यगुहामिवेत्यन्तमेकंवाक्यं ॥ १८ ॥

शि० मत्कृते मत्प्रयत्ने मत्कर्तृकमातुलगृहप्राप्तौसत्यामित्यर्थः । एतेन मत्कर्तृकस्थितौतत्प्रव्राजनं नस्यादितिसूचितं । तेन चिरकालमन्यत्रस्थितिमत्त्वेनममैवापराधइतिध्वनितं ॥ १६ ॥ शि० रामंप्रसादयन्लक्ष्मणस्यसंनिधौतस्य[illegible]मस्यसीतायाश्चपादेषुपतिष्यामि । लक्ष्मणस्यसंनिधावि[illegible] मदतिप्रार्थनादर्शनंतस्मिन्[illegible]र्द्रचित्तत्वंजनयिष्य[illegible]तिन्[illegible]ज्ञेता ॥ कतक० स्वापराधप्रसादनात्कनीयस्स्वपिप्रणामोलोकप्र[illegible]द्धः । अन्यस्तु श्रद्धाजाड्यात् सीतायाश्चपुनःपुनरितिपाठं[illegible]ति ॥ स० परमाभदानकर्मणैवलक्ष्मणस्यज्येष्ठत्वस्यविव[illegible]त्वाल्लक्ष्मणपादाभिवन्दनंयुक्तं ॥ १७ ॥

[पा०] १ क—ङ. छ. झ. ञ. ट. सत्कार. २ ङ. छ. झ. ट. संहृष्टः. ३ ज. नरेन्द्रो. ४ ख. ज. विजनं. ५ ग. जन्मच. ६ ङ. छ. झ. ञ. ट. रामंतस्यपतिष्यामि. ७ क. ग. घ. च. ज. [illegible]पुनःपुनः. ८ ख. ग. विलपंस्तत्र.

सालतालाश्वकर्णानां पर्णैर्बहुभिरावृताम् ॥ विशालां मृदुभिस्तीर्णां कुशैर्वेदिमिवाध्वरे ॥ १९ ॥
शक्रायुधनिकाशैश्च कार्मुकैर्भारसाधनैः ॥ रुक्मपृष्ठैर्महासारैः शोभितां शत्रुबाधकैः ॥ २० ॥
अर्करश्मिप्रतीकाशैर्घोरैस्तूणीगतैः शरैः ॥ शोभितां दीप्तवदनैस्सर्पैर्भोगवतीमिव ॥ २१ ॥
महारजतवासोभ्यामसिभ्यां च विराजिताम् ॥ रुक्मबिन्दुविचित्राभ्यां चर्मभ्यां चापि शोभिताम् २२
गोधाङ्गुलित्रैरासक्तैश्चित्रैः काञ्चनभूषितैः ॥ अरिसङ्घैरनाधृष्यां मृगैः सिंहगुहामिव ॥ २३ ॥
प्रागुदक्प्रवणां वेदिं विशालां दीप्तपावकाम् ॥ ददर्श भरतस्तत्र पुण्यां रामनिवेशने ॥ २४ ॥
निरीक्ष्य स मुहूर्तं तु ददर्श भरतो गुरुम् ॥ उटजे राममासीनं जटामण्डलधारिणम् ॥ २५ ॥
तं तु कृष्णाजिनधरं चीरवल्कलवाससम् ॥ ददर्श राममासीनमभितः पावकोपमम् ॥ २६ ॥
सिंहस्कन्धं महाबाहुं पुण्डरीकनिभेक्षणम् ॥ पृथिव्याः सागरान्ताया भर्तारं धर्मचारिणम् ॥२७॥

सालोश्वकर्णादन्योवृक्षः । अश्वकर्णः सर्जतरुः । तालोमृदुपर्णःश्रीतालः ॥ १९ ॥ कार्मुकैरितिबहुवचनादभ्यासयोग्यंकार्मुकान्तरमस्तीतिगम्यते । भारसाधनैः गुर्ववयवैः । यद्वा अतिगुरुतररणकार्यसाधनभूतैः । यद्वा भारोधनुःपरिमाणविशेषः । यथोक्तंधनुर्वेदे ईशानसंहितायां । " भारंपलशतंविदुः । तेनभारेणचापानांप्रमाणमुपलभ्यते " इति । रुक्मपृष्ठैः कनकानुलिप्तपृष्ठप्रदेशैः । महासारैः महास्थिरांशैः । " सारो बलेस्थिरांशेच " इत्यमरः ॥ २० ॥ भोगवती सर्पनगरी ॥ २१ ॥ महारजतवासोभ्यां स्वर्णमयकोशाभ्यां । रुक्मबिन्दुविचित्राभ्यां शोभाविशेषायमध्येमध्येशिल्पिनिर्मितकनकबिन्दुविचित्राभ्यां [पाठभेदः आम्रबिन्दुविचित्राभ्यां व्याघ्रचर्मकृतयास्वाभाविकनानावर्णबिन्दुविचित्राभ्यां ।] चर्मभ्यां खेटकाभ्यां । " खेटकंफलकंचर्म " इतिहलायुधः ॥ २२ ॥ गोधाङ्गुलित्रैः गोधा ज्याघातवारणं । अङ्गुलित्रमङ्गुलित्राणं । उपलक्षणेतृतीया । शोभितामित्यनुकर्षोवा । अनाधृष्यां अप्रधृष्यां ॥ २३ ॥ प्रागुदक्प्रवणां प्रागुदग्भागेक्रमनिम्नां । " प्रवणोदक्षिणेप्रह्वेक्रमनिम्नेचतुष्पथे " इतिवैजयन्ती । तत्र रामनिवेशने पूर्वोक्तपर्णशालायामित्यर्थः ॥ २४ ॥ निरीक्ष्येति जटामण्डलधारित्ववैलक्षण्येननिश्चयार्थं मुहूर्तंनिरीक्ष्यतेजोविशेषेणसामान्येनस्वगुरुंज्ञातवानित्यर्थः । अस्मिञ्श्लोकेउत्तरार्धेजटामण्डलधारिणमित्यत्रणकारोगायत्र्याःसप्तमाक्षरं । पट्सहस्राणिश्लोका गताः ॥ २५ ॥ विशेषतोदर्शनमाह—तंत्वित्यादिना । महार्हवसनोपेतस्येदानींततोवैलक्षण्यमाह—तंत्विति । तदेववैलक्षण्यंदर्शयति—कृष्णाजिनधरमिति । कृष्णाजिनधरं उत्तरीयतयाकृष्णाजिनधरं । अधरास्वरत्वेनचीरवल्कलवाससं । कृष्णाजिनधरंचीरवल्कलवाससं पूर्वस्माच्छोभाविशेषयुक्तं । रामं वल्कलादिधारणेप्यपरावर्तमानरमणीयकमुच्यते । आसीनं किंचिदासनमास्थायात्मानंध्यायन्तं । अभितः पावकोपमं तादृशतपोविशेषेणसमंतात्तेजःपरिवृतं । *यद्वा । " नीलतोयदमध्यस्थाविद्युल्लेखेवभास्वरा " इत्युक्तरीत्या विद्युल्लेखामध्यवर्तिनीलतोयदमिवस्थितमित्यर्थः । यद्वा विरोधिनामनभिभवनीयमित्यर्थः । यद्वा उटजे राममासीनं । अयोध्यास्थितसमाजापेक्षया अल्पतरापीयंसभामहतीजाता कुतः अभितःपावकोपमं तत्सभायांसमीपस्थस्यभ्रातुरपिह्यत्रसमीपमागन्तुंनशक्यते । नहिज्वलत्यनलेकस्यापिसमीपमागन्तुंशक्यम् । यद्वा उटजेराममित्यत्र रामं श्यामं । अथोरामौसावित्रावित्यत्रतथाप्रयोगात् । यद्वा पावकोपमं दुर्दर्शमित्यर्थः । अतएवपूर्वश्लोके निरीक्ष्यसमुहूर्तमित्युक्तं ॥२६—

स० महारजतवासोभ्यां कुसुंभवासोभ्यां ॥ २२ ॥ **ति०** प्रागुदक्प्रवणां ईशानभागेनिम्नां ॥ २६३ ॥ **ती०** विशेषणान्तराभिधानार्थं ददर्शेतिपुनर्वचनं । **ति०** अभितः समीपे ॥ २६ ॥

[पा०] १ क. ख. घ. ञ. बाधनैः. २ ङ. छ. झ. ञ. ट. स्तूणगतैः. ३ घ. चविराजितां. ४ ङ. छ. झ. ट. श्चित्रकांचन. ५ क. ख. कनक. ६ ख. तेजसं. ७ ख. ग. पुण्ये. ८ क. ञ. निकेतने. ९ ख. ङ. च. झ. ञ. ट. कृष्णाजिनधरंतंतु.

उपविष्टं महाबाहुं ब्रह्माणमिव शाश्वतम् ॥ स्थण्डिले दर्भ[1]संस्तीर्णे सीतया लक्ष्मणेन च ॥ २८ ॥
तं दृष्ट्वा भरतः श्रीमान्दुःख[2]शोकपरिप्लुतः ॥ अभ्यधावत धर्मात्मा भरतः कैकयीसुतः ॥ २९ ॥
[3]दृष्ट्वैव विललापार्तो बाष्पसंदिग्धया गिरा ॥ अशक्नुवन्[4]धारयितुं धैर्याद्वचनमब्रवीत् ॥ ३० ॥
यः संसदि प्रकृतिभिर्भवेद्युक्त उपासितुम् ॥ वन्यैर्मृगैरुपासीनः सोऽयमास्ते ममाग्रजः ॥ ३१ ॥
वासोभिर्बहुसाहस्रैर्यो [6]महात्मा पुरोचितः ॥ [7]मृगाजिने सोऽयमिह प्रवस्ते धर्ममाचरन् ॥ ३२ ॥
[8]अधारयद्यो विविधाश्चित्राः सुमनस[9]स्तदा ॥ सोऽयं जटाभारमिमं [10]वहते राघवः कथम् ॥ ३३ ॥
यस्य [11]यज्ञैर्यथोद्दिष्टैर्युक्तो[12] धर्मस्य संचयः ॥ शरीरक्लेशसंभूतं स धर्मं परिमार्गते ॥ ३४ ॥
चन्दनेन महार्हेण यस्याङ्गमुपसेवितम् ॥ मलेन तस्याङ्गमिदं कथमार्यस्य सेव्यते ॥ ३५ ॥
[13]मन्निमित्तमिदं दुःखं प्राप्तो रामः सुखोचितः ॥ धिग्जीवितं नृशंसस्य मम [14]लोकविगर्हितम् ॥ ३६ ॥
इत्येवं विलपन्दीनः प्रस्विन्नमुखपङ्कजः ॥ पादावप्राप्य रामस्य पपात भरतो रुदन् ॥ ३७ ॥
दुःखाभितप्तो भरतो राजपुत्रो महाबलः ॥ उक्त्वाऽर्येति [15]सकृद्दीनं पुनर्नोवाच किंचन ॥ ३८ ॥
[16]बाष्पापिहितकण्ठश्च प्रेक्ष्य रामं यशस्विनम् ॥ आर्येत्ये[17]वाथ संक्रुश्य व्याहर्तुं [18]नाशकत्तदा ॥ ३९ ॥
शत्रुघ्नश्चापि रामस्य ववन्दे चरणौ रुदन् ॥ [19]तावुभौ स समालिङ्ग्य [20]रामश्चाश्रूण्यवर्तयत् ॥ ४० ॥

ततः सुमन्त्रेण गुहेन चै[21]व [22]समीयतू राजसुतावरण्ये ॥
दिवाकरश्चैव निशाकरश्च यथाऽम्बरे शुक्रबृहस्पतिभ्याम् ॥ ४१ ॥

॥ २७ ॥ ब्रह्मापेक्षयास्य वैलक्षण्यमुच्यते—शाश्वतमिति । स्थण्डिले भूमौ ॥ २८ ॥ द्वितीयो भरतशब्द उत्तरश्लोकेन संबध्यते ॥ २९ ॥ दृष्ट्वैव दर्शनमात्रेणेत्यर्थः । आर्तः खिन्नः । तामार्तिं धारयितुमशक्नुवन् बाष्पसंदिग्धया शोकोष्मणासंदिग्धवर्णया । गिरा उपलक्षितः ॥ ३० ॥ संसदि सभायां । युक्तः अर्हः ॥ ३१ ॥ बहुसाहस्रैः बहुसहस्रमूल्यैः । उचितः अलं कर्तुमिति शेषः । षष्ठ्यर्थे तृतीया वा । मृगाजिने मृगचर्मणी । प्रवस्ते आच्छादयति ॥ ३२—३३ ॥ यथोद्दिष्टैः यथाविहितैः । यथादृष्टैरिति पाठे शास्त्रेष्विति शेषः । युक्तः योग्यः ॥ ३४—३८ ॥ वक्तुमशक्यत्वे हेतुमाह—बाष्पापिहितकण्ठ इत्यादिना । बाष्पापिहितकण्ठः बाष्पनिरुद्धकण्ठः ॥ ३९—४० ॥ राजसुतौ रामलक्ष्मणौ

ति० अभ्यधावत धावन्निव त्वरया जगाम । अत्र भरतस्यैवकवेरपि वर्णनीयमर्याभावेनातिहर्षाविष्टत्वादत्र प्रकरणे द्विरुक्तिर्न दोषाय ॥ २९ ॥ **शि०** आर्तः सेवकादिरहितरामदर्शनजनितखेदं प्राप्तो भरतः । धैर्यात् वारयितुं खेदं निवारयितुं अशक्नुवन् अतएव वचनं व्यक्तवाचं । अब्रुवन्सन् बाष्पसंदिग्धया गद्गदाक्षरयेत्यर्थः । गिरा विललाप । विलापप्रकारमाह—**यस्संसदीति** ॥ ३१ ॥ **ती०** मृगाजिनैरिति पाठे मृगाजिनैराच्छादनं करोतीत्यर्थः । **ति०** धर्मं पितृवचनपरिपालनरूपं ॥ ३२ ॥ **स०** यस्य यज्ञैः यद्विषयकयज्ञैरन्येषां धर्मसंचयो युक्तः स रामस्स्वशरीरक्लेशसंभूतं धर्मं परिमार्गते ॥ ३४ ॥ **ति०** मलेन दण्डवत् त्रिषवणाप्लवमात्रान्मलस्थितिरङ्गे ॥ ३५ ॥ **ति०** पादावप्राप्येति दुःखातिशयवशात् ॥ ३७ ॥ **स०** वनौकसः ऋषयः ॥ ४२ ॥ इत्येकोनशततमस्सर्गः ॥ ९९ ॥

[पा०] १ ञ. चर्म. २ क. ख. ङ. च. छ. झ. ञ. ट. मोह. ३ ञ. ट. दृष्ट्वैवं. ४ क. झ. ञ. ट. न्वारयितुं. ५ क. झ. ञ. ट. मब्रुवन्. ६ ग. महार्थः. ७ ग. घ. मृगाजिनैः. ८ घ. ङ. छ. ज. झ. आधारयत्. ९ ग. छ.—ञ. स्सदा. क. स्तथा. ङ. ट. स्स्रजः. १० क. ख. ग. ङ. च. छ. झ. ञ. ट. सहते. ११ ग. यथामृष्टैः. क. ख. ङ. च. छ. झ. ञ. ट. यथादिष्टैः. ज. यथादृष्टैः. १२ घ. युक्तैर्धर्मस्य. १३ च. ट. यन्निमित्त. १४ ग. लोके. १५ ख. ग. सकृद्दीनः. १६ ङ. छ. झ. ट. बाष्पैःपिहित. ग. बाष्पोपहित. १७ क. ख. ङ. च. छ. झ. ञ. ट. वाभि. १८ ख. घ. ङ. छ.—ट. नाशकत्ततः. ग. नाशकत्पुनः. १९ ङ. च. छ. झ. ञ. ट. तावुभौच. क. ग. घ. तावुभौसु. २० ख.—छ. झ. ञ. ट. रामोऽप्यश्रूणि. २१ क. तेन. २२ ग. समेयतू.

तान्पार्थिवान्वारणयूथपाभान्समागतांस्तत्र महत्यरण्ये ॥
वनौकसस्तेऽपि समीक्ष्य सर्वेऽप्यश्रूण्यमुञ्चन्प्रविहाय हर्षम् ॥ ४२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे एकोनशततमः सर्गः ॥ ९९ ॥

शततमः सर्गः ॥ १०० ॥

रामेणभरतस्यस्वाङ्कारोपणेनपित्रादिकुशलप्रश्नपूर्वकंप्रश्नव्याजेनराजनीतिशिक्षणम् ॥ १ ॥

जटिलं चीरवसनं प्राञ्जलिं पतितं भुवि ॥ ददर्श रामो दुर्दर्शं युगान्ते भास्करं यथा ॥ १ ॥
कथंचिदभिविज्ञाय विवर्णवदनं कृशम् ॥ भ्रातरं भरतं रामः परिजग्राह बाहुना ॥ २ ॥
आघ्राय रामस्तं मूर्ध्नि परिष्वज्य च राघवः ॥ अङ्के भरतमारोप्य पर्यपृच्छत्समाहितः ॥ ३ ॥
क नु तेऽभूत्पिता तात यदरण्यं त्वमागतः ॥ न हि त्वं जीवतस्तस्य वनमागन्तुमर्हसि ॥ ४ ॥

॥ ४१ ॥ तान् तादृशसुखयुक्तान् । समागतान् संगतान् ॥ ४२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने एकोनशततमः सर्गः ॥ ९९ ॥

दर्शनमात्रेणभरतोराज्यंपालयतीतिकृत्वाराज्यनीतिंपृच्छतिशततमे—यद्वा अथभगवान्रामः प्रश्नव्याजेनराज्यरक्षणपरिपालनप्रकारान्शिक्षयति पश्चाद्दशरथात्ययश्रवणभरतस्थण्डिलशयनादिव्यापारेणतदुपदेशावकाशाभावात्—जटिलमित्यादि । जटिलं समीचीनमालिकादृष्टाचेदियंभरतस्यकेशार्हत्वेवंदशरथोवदति सएवजटांबध्वातिष्ठतीतिरामोविस्मयते । चीरवसनं श्लाघ्यचीनाम्बरंदृष्टंचेद्बालस्यभरतस्यवसनार्हमिदमितिपितावदति सएवेदानींवल्कलधारीतिप्रति । प्राञ्जलिं पितायाचनापूर्वकंदिशतिचेद्यः स्वीकरोति ससंप्रतिस्वाभिमतस्यस्वयमर्थीभवति । पतितं भुवि अङ्केभरतमारोप्येतिस्थितिर्नलब्धा । कुसुमशय्यापि कठिनीभवेदितिमत्वा उत्सङ्गेएवपित्राशायितः ससंप्रतिस्थलेपतितः । ददर्शरामोदुर्दर्शं दत्तांदृष्टिमनाकृष्य स्थितस्यरामस्यदर्शनायोग्यतयास्थितं । यद्वा दुर्दर्शं जटिलत्वादिवेषेणस्नेहितजनस्यदुष्प्रेक्ष्यंदुर्दर्शं दुःखेनद्रष्टुंयोग्यं कृच्छ्रेणाप्यभिज्ञातुमयोग्यमितियावत् । युगान्तेभास्करंयथा नकेवलंरामस्य सर्वस्यापिजनस्यदुर्दर्शतयास्थितमितिभावः । यद्वा युगान्तेभास्करंयथा युगान्तेभुविपतितंभास्करमिवस्थितं अनेनपूर्ववन्महत्तरतेजोराहित्यं तादृशावस्थानर्हत्वंचव्यज्यते । [युगान्तेभुविपतितं भास्करंयथेत्यनेन महत्तरतेजोराशित्वं तादृशावस्थानर्हत्वंचोच्यते] ननुगङ्गातीरे "अद्यप्रभृतिभूमौतुशयिष्येहंतृणेषुवा । फलमूलाशनोनित्यं जटाचीराणिधारयन् " इतिजटावल्कलधारणंप्रतिज्ञातं पुनर्नवतितमेभरद्वाजदर्शनसमये । "वसानो वाससीक्षौमे " इतिक्षौमवस्त्रंधृतवानित्युच्यते । अत्रतु जटिलंचीरवसनमितिसिद्धवदनूद्यते कथमेतत्संगच्छतइतिचेदत्राहुः । प्रतिज्ञायारात्रौकृतत्वादपरेद्युर्भरद्वाजदर्शनानन्तरं जटावल्कलेधृतवानित्यविरोधइति । अयंचपरिहारः पुरैवास्माभिःप्रतिपादितः ॥ १ ॥ कथंचिदभिविज्ञानस्येहेतुद्वयं—विवर्णवदनं कृशमिति ॥ २—३ ॥ अतिदुःखितस्यभरतस्यदुःखमपनेतुंप्रश्नव्याजेनधर्मानुपदिशति—क्वन्वित्यादि । तेपिताक्वन्वभूदितिप्रश्नभङ्ग्या लोकान्तरंगतः किमितिसिद्ध्यति ।

स० जटिलमिति । ननु अद्यप्रभृतिभूमौतुशयिष्ये 'जटाचीराणिधारयन्' इतिगुहसंनिधौभरतेनजटाधारणंप्रतिज्ञामात्रंकृतं नतुतद्धारणं । "वसानोवाससीक्षौमे" इतिभरद्वाजावलोकनप्रकरणेतथोक्तिः तस्मात्कथमितिचेत्सत्यं । महर्षिपुरतस्ससैन्येन ऋषिचर्यानप्रदर्शनीयेतितत्पूर्वमभूत्वा अनन्तरं जटादिदर्शने रामकृपाभवेदितितद्धृतवानितिकात्रकथंता । भुविपतितमित्युभयत्रान्वेति । दुर्दर्शं द्रष्टुमयोग्यं ॥ १ ॥ ति० जीवतस्तस्य । सर्वांहित्वेतिशेषः । नार्हसि । मदसंनिधौतवैव

[पा०] १ ध. ङ. छ. झ. ट. यूथपाहान्. २ क. ङ. छ—ट. स्तेऽभि. ख. स्तेहि. ३ ख. ङ. च. छ. झ. ञ. ट. नवेंऽश्रूणि. ४ .. भरतं. ५ ग. कथंचिन्नपि. ६ घ. ङ. च. ञ. ट. पाणिना. ७ क. ख. संपरिष्वज्य. ८ ग. बाहुना. ... ख. ङ. च. .. ञ. राघवं. ९ ङ. छ झ ञ. ट. पर्यपृच्छत्सादरं.

चिरस्य बत पश्यामि दूराद्भरतमागतम् ॥ दुष्प्रतीकमरण्येऽस्मिन्किं तात वनमागतः ॥ ५ ॥
कच्चिद्धारयते तात राजा यत्त्वमिहागतः ॥ कच्चिन्न दीनः सहसा राजा लोकान्तरं गतः ॥ ६ ॥
कच्चित्सौम्य न ते राज्यं भ्रष्टं बालस्य शाश्वतम् ॥ ७ ॥
कच्चिच्छुश्रूषसे तात पितरं सत्यविक्रमम् ॥ ८ ॥
कच्चिद्दशरथो राजा कुशली सत्यसङ्गरः ॥ राजसूयाश्वमेधानामाहर्ता धर्मनिश्चयः ॥ ९ ॥
स कच्चिद्ब्राह्मणो विद्वान्धर्मनित्यो महाद्युतिः ॥ इक्ष्वाकूणामुपाध्यायो यथावत्तात पूज्यते ॥ १० ॥
सा तात कच्चित्कौसल्या सुमित्रा च प्रजावती ॥ सुखिनी कच्चिदार्या च देवी नन्दति कैकयी॥११॥
कच्चिद्विनयसंपन्नः कुलपुत्रो बहुश्रुतः ॥ अनसूयुरनुद्रष्टा सत्कृतस्ते पुरोहितः ॥ १२ ॥
कच्चिदग्निषु ते युक्तो विधिज्ञो मतिमानृजुः ॥ हुतं च होष्यमाणं च काले वेदयते सदा ॥ १३ ॥

तत्रहेतुः—यदिति । तदुपपादयति—नहीति । जीवतः जीवति । अनादरेषष्ठी । वनंनागन्तुमर्हसि शुश्रूषणपरत्वादितिभावः । यद्वा तस्यत्वद्विरहासहिष्णुत्वादिति । रामस्यप्रश्नान्तरसंबन्धदर्शनेनभरतो नोत्तरमुक्तवानितिबोध्यम् ॥ ४ ॥ बतेत्यद्भुते । "खेदानुकम्पासन्तोषविस्मयामन्त्रणेबत" इत्यमरः । दूरात् दूरावस्थितकेकयनगरात् । दुष्प्रतीकं वैवर्ण्यादिनादुर्ज्ञेयावयवं । "अङ्गंप्रतीकोवयवः" इत्यमरः । किं किमर्थं ॥ ५ ॥ अस्मिन्नरण्येतवकिंप्रयोजनं प्रयोजनंद्वेधासंभवति राजनिजीवतितदाज्ञयामद्दर्शनं राजनिमृतेस्वबाल्येनबलवद्भिरपहृतराज्यत्वं वा । आद्यमाह—कच्चिदिति । धारयतइति प्राणानितिशेषः । यस्मात्त्वमिहागतः तस्माद्राजाप्राणान् धारयतेकच्चित् । राजाजीवतिचेत् त्वामत्रागच्छन्तंन सहेतेतिभावः । कच्चिन्नधरतइतिपाठान्तरं । तदा देहंधारयितुंनशक्नोतिकच्चिदित्यर्थः ॥ ६ ॥ द्वितीयंपक्षंप्रश्नद्वयेनदर्शयति—कच्चिदित्यादि । राज्यंभ्रष्टंनकच्चित् प्रजानुरागोविद्यतेकच्चिदित्यर्थः ॥ ७ ॥ कच्चिच्छुश्रूषसइति । पितृशुश्रूषानादरेणकिमागतोसीतिपक्षान्तरम् ॥ ८ ॥ अथराज्ञआरोग्यंपृच्छति—कच्चिद्दशरथइति । कुशली अनामयः । राज्ञोव्याधिपरिभूतत्वात् तत्कथनायकिमागतोसीतिपक्षान्तरं । सत्यसङ्गरः सत्यप्रतिज्ञः । सत्यप्रतिज्ञांप्रेक्ष्यपश्चात्तापेनकिमकुशलंप्राप्तइतिहार्दोभावः । आहर्ता संपादयिता कर्तेतियावत् । धर्मेनिश्चयोयस्यसधर्मनिश्चयः ॥ ९ ॥ सः प्रसिद्धः । ब्राह्मणः ब्रह्मवित् । "तदधीतेतद्वेद" इत्यण् । विद्वान् सर्वविद्यासुकुशलः । धर्मनित्यः ज्ञानानुगुणमनुष्ठातेत्यर्थः । महाद्युतिः तत्कृतब्रह्मवर्चसयुक्तः । इक्ष्वाकूणामुपाध्यायः कुलगुरुः वसिष्ठः यथावत् यथापूर्वं । तातवत्संपूज्यते बहुमन्यते ॥१०॥ सा पूर्वंदुःखिततया अनुभूता । कौसल्यासुखिनीकच्चित् । प्रजावती सुप्रजाः । सुमित्राचसुखिनीकच्चिदित्यन्वयः । आर्येतिस्वमातुरपिबहुमानोक्तिः । कैकेयी नन्दतिकच्चित् राज्यलाभेनेतिशेषः ॥ ११ ॥ विनयसंपन्नः निरहंकारः । कुलपुत्रः सत्कुलप्रसूतः । बहु श्रुतमवधारणंयस्यसतथा । अनसूयुः छान्दसउप्रत्ययः । अनुद्रष्टा वसिष्ठोपदिष्टानामुपद्रष्टा । तेपुरोहितइत्यनेन रामस्यसुयज्ञइवभरतस्यापि प्रातिस्विकः कश्चित्पुरोहितोस्तीतिगम्यते । सुयज्ञएवोच्यतइत्यप्याहुः । सत्कृतः पूजितःकच्चिदित्यन्वयः । अनेनपुरोहितःसदासत्कर्तव्यइतिशिक्षितं । एवमुत्तरत्रापियोजनीयम् ॥ १२ ॥ "पितृव्यपुत्रेसापत्ने

पितृशुश्रूषाया अवश्यकर्तव्यत्वादितिभावः ॥ ४ ॥ ति० दुष्प्रतीकमितिभरतविशेषणं वनविशेषणंच । आद्येकार्श्यवैवर्ण्यादिनादुर्ज्ञेयाकारं । वनमपिभीषणतया । तथा ईदृशंवनंकिमागतः किमागमनप्रयोजनमीदृशारण्यइत्यर्थः । अरण्यंगजाद्युपभोग्यं तद्वर्तिवनं आम्रादियुक्तं मनुष्यभोग्यमितिभेदः ॥ ५ ॥ शि० यत् यं । त्वक्त्वेतिशेषः । त्वमिहागतः सराजाधरते प्रजाःपाल्यत्वेनस्वीकरोतिकच्चित् । राजादीनःसन् लोकान्तरंनगतःकच्चित् ॥६॥ शि० सत्यसंगरः निष्कपटयोद्धा । ति० धर्मेनिश्चितः धर्मेनिश्चितंनिश्चयोयस्यसः ॥ ९ ॥ ति० यद्वा वैद्यान् चिकित्साप्रवीणान्ब्राह्मणानित्यर्थः । "अपूतोह्येषोमेध्योयोऽभिषज्यति" इतिश्रुत्युक्तनिन्दातु

[पा०] १ क. ख. ग. ङ.—ट. कच्चिन्नुधरते. २ क. ख. ग. ङ. छ. झ. ञ. ट. पितुःसत्यपराक्रम. ३ घ. कुलीनः.
४ ग. विगतज्वरः. ५ ङ. छ. झ. ट. निश्चितः. ६ क—घ. च.—ट. तातकच्चिच्चकौसल्या. ७ क.—घ. ज. दार्यासा. ८ घ. संमतस्ते. ९ घ. दानज्ञो.

कच्चिद्देवान्पितॄन्मातॄर्गुरून्पितॄं[1]समानपि ॥ वृद्धांश्च तात[2] वैद्यांश्च ब्राह्मणांश्चाभिमन्यसे ॥ १४ ॥
इष्वस्त्रवरसंपन्नमर्थशास्त्रविशारदम् ॥ सुधन्वानमुपाध्यायं कच्चित्त्वं तात[3] मन्यसे ॥ १५ ॥
कच्चिदात्मसमाः शूराः श्रुतवन्तो जितेन्द्रियाः ॥ कुलीनाश्चेङ्गितज्ञाश्च कृ[4]तास्ते तात मन्त्रिणः ॥१६॥
मन्त्रो विजयमूलं हि राज्ञां भवति राघव ॥ सुसंवृतो मन्त्र[5]धरैरमात्यैः शास्त्रकोविदैः ॥ १७ ॥
कच्चिन्निद्रावशं नैषीः कच्चित्का[6]ले प्रबुध्यसे ॥ कच्चिच्चापररात्रेषु चिन्तयस्यर्थनैपुणम् ॥ १८ ॥
कच्चिन्मन्त्रयसे नैकः कच्चिन्न बहुभिः सह ॥ कच्चित्ते मन्त्रि[7]तो मन्त्रो राष्ट्रं न परिधावति ॥ १९ ॥
कच्चिदर्थं विनिश्चित्य लघुमूलं महोदयम् ॥ क्षिप्रमारभसे क[8]र्तुं न दीर्घयसि राघव ॥ २० ॥
क[9]च्चित्ते सुकृतान्येव कृतरूपाणि वा पुनः ॥ विदुस्ते सर्वकार्याणि न कर्तव्यानि पार्थिवाः ॥ २१ ॥

परनारीसुतेषुच । विवाहदानयज्ञादौपरिवेदोनदूषणं'' इतिस्मरणाद्वैमातुरेष्वधिवेदनदोषाभावाद्यज्ञोपिकृतइत्यारोप्यपृच्छति—कच्चिदग्निष्विति । अथवा अग्निषु अग्निकार्येषु । युक्तः सावधानः नियुक्तोवा । अग्निशुश्रूषणपरइत्यर्थः । विधिज्ञः अग्निहोत्राद्यश्वमेधान्तसकलयागविधिज्ञः । मतिमान् ऊहापोहादिकल्पनचतुरः । ऋजुः प्रत्यक्षपरोक्षयोरेकरूपानुष्ठानवान् एकरूपकरणत्रयइतिवार्थः । पुरोहितइतिशेषः । काले तत्तद्धोमकाले । वेदयते तुभ्यंज्ञापयतिकच्चित् ॥ १३ ॥ अभिमन्यसे बहुमन्यसे । देवेषुबहुमतिः यज्ञादिभिराराधनं । पितृषुमातृषुचवचनकरणशुश्रूषणे । भृत्यानितिपाठे तत्रबहुमतिः । दानं गुरुष्वनुवर्तनाभिमतकरणादि । पितृसमेषुज्ञातिष्वर्थदानं वृद्धादिषु नमस्कारादि । वृद्धाः ज्ञानशीलवयोभिः । विद्यायेषांसन्तीतिवैद्याः विद्वांसः तान् । ब्राह्मणान् ब्रह्मविदः । यद्वा वैद्यान् भिषजः । तेषांबहुमतिश्चधनादिनापरितोषणं । ब्राह्मणानितिजातिमात्रपरोवा । तदा विद्याशीलादिकमपरीक्ष्यब्राह्मणत्वमात्रेणयथायोग्यंबहुमानंविवक्षितम् ॥ १४ ॥ इष्वस्त्रवरसंपन्नमिति । इषवः अमन्त्रकाबाणाः । अस्त्राणि समन्त्रकाः । वरशब्दः प्रत्येकमभिसंबध्यते । अर्थशास्त्रं नीतिशास्त्रं । सुधन्वानं सुधन्वनामकं । उपाध्यायं धनुर्वेदाचार्यं । मन्यसे बहुमन्यसे ॥ १५ ॥ आत्मसमाः विश्वसनीयाइतियावत् । शूराः धीराइतियावत् । श्रुतवन्तः नीतिशास्त्रज्ञाः । "श्रुतंशास्त्रावधृतयोः" इत्यमरः । जितेन्द्रियाः परैरलोभनीयाइतियावत् । कुलीनाः प्रामाणिककुलोत्पन्नाः । ते त्वया ॥ १६ ॥ एतादृशमन्त्रिकरणेकिंकारणंतत्राह—मन्त्र इति । सुसंवृतः सुतरांगुप्तः । शास्त्रकोविदैः नीतिशास्त्रनिपुणैः । मन्त्रधरैरमात्यैः सुसंवृतोमन्त्रोहि विजयमूलंभवतीत्यन्वयः ॥ १७ ॥ अर्थनैपुणं अर्थविषयसामर्थ्यमितियावत् ॥ १८ ॥ एकोनमन्त्रयसेकच्चित् एकेनमन्त्रेक्रियमाणेतस्यकुत्रचिदभिनिवेशेनगुणागुणयोर्याथार्थ्यग्रहणंनसिद्ध्येदितिभावः। बहुभिःसहनमन्त्रयसेकच्चित् । बहुभिःसहमन्त्रणेपिप्रथमंतावदैकमत्यंनघटते मन्त्रभेदश्चभवेदितिभावः । राष्ट्रं जनपदं । नपरिधावति नव्याप्नोति । पूर्वंमन्त्रसंवरणमन्यहेतुतयोक्तं अत्रतुस्वतन्त्रतयोच्यतइतिनपुनरुक्तिः ॥ १९ ॥ लघुमूलं लघुसाधनं । महोदयं महाफलं । अर्थं कार्यं । विनिश्चित्यक्षिप्रमारभसेकच्चित् । नदीर्घयसि नविलम्बसेकच्चित् । एवमन्वयव्यतिरेकाभ्यामुक्तं । "क्षिप्रमक्रियमाणस्यकालःपिबतितत्फलं" इतिभावः ॥ २० ॥ पार्थिवाः सामंतनृपाः । ते सर्वकार्याणि मन्त्रितसर्वकार्याणि । सुकृतान्येव सुनिष्पन्नान्येवविदुः कच्चित् । कृतरूपाणि कृतप्रायाणिवा क्षिप्रमेवफलोन्मुखानीतियावत् । कर्तव्यानिनविदुः मन्त्रेणकर्तव्यतयानिश्चितानिकरणात्पूर्वंनविदुरित्यर्थः ॥ २१ ॥

शास्त्रानभिज्ञचिकित्साप्रवृत्तपरा । शास्त्राभिज्ञस्यभैषज्यंमहतेपुण्याय । तज्जीविकापरोवानिषेधइतिदिक् ॥ १४ ॥ शि० अस्त्रवरशब्देनैवेषूणांग्रहणेसिद्धे पुनरिषूपादानं तद्विषयकज्ञानवत्तायाअतिशयप्रतिपादनाय ॥ १५ ॥ शि० इङ्गितज्ञाः कथनमन्तराप्यभिप्रायविज्ञातारः ॥१६॥ ति० मान्त्रिधुरैः मन्त्रिश्रेष्ठैः ॥१७॥ स० बहुभिः नूतनैः ॥१९॥ शि० पार्थिवाः खण्डमण्डलेश्वराः ॥२१॥

[पा०] १ क.—ट. पितॄन्भृत्यान्. २ क. घ. तत्र. ३ च. ञ. नावमन्यसे. ४ ग. सत्कृतास्तात. ५ ङ. छ.—ट. मन्त्रिधुरैः. ६ छ. झ. ञ. त्कालेवबुध्यसे. ङ. त्कालेनबुध्यसे. क. ख. च. त्कालेवि. ७ ग. ञ. मन्त्रिते. ८ ङ. छ. झ. ट. कर्म. ९ ङ. छ. झ. ञ. ट. कच्चिन्नु. क. ग. कच्चित्तु.

कच्चिन्न तर्कैर्युक्त्या वा ये चाप्यपरिकीर्तिताः ॥ त्वया वा तव वाऽमात्यैर्बुध्यते तात मन्त्रितम् ॥२२॥
कच्चित्सहस्रान्मूर्खाणामेकमिच्छसि पण्डितम् ॥ पण्डितो ह्यर्थकृच्छ्रेषु कुर्यान्निःश्रेयसं महत् ॥२३॥
सहस्राण्यपि मूर्खाणां यद्युपास्ते महीपतिः ॥ अथवाऽप्ययुतान्येव नास्ति तेषु सहायता ॥ २४ ॥
एकोऽप्यमात्यो मेधावी शूरो दक्षो विचक्षणः ॥ राजानं राजमात्रं वा प्रापयेन्महतीं श्रियम् ॥ २५ ॥
कच्चिन्मुख्या महत्स्वेव मध्यमेषु च मध्यमाः ॥ जघन्यास्तु जघन्येषु भृत्याः कर्मसु योजिताः ॥२६॥
अमात्यानुपधातीतान्पितृपैतामहाञ्छुचीन् ॥ श्रेष्ठाञ्श्रेष्ठेषु कच्चित्त्वं नियोजयसि कर्मसु ॥ २७ ॥
कच्चिन्नोग्रेण दण्डेन भृशमुद्वेजितप्रजम् ॥ राष्ट्रं तवानुजानन्ति मन्त्रिणः कैकयीसुत ॥ २८ ॥
कच्चित्त्वां नावजानन्ति याजकाः पतितं यथा ॥ उग्रप्रतिग्रहीतारं कामयानमिव स्त्रियः ॥ २९ ॥

मन्त्रितंकार्यंत्वयावा तवामात्यैर्वाहेतुभिः तर्कैः ऊहैः । युक्त्यावा अनुमानेनवा । येचाप्यपरिकीर्तिताः अनुक्ताः इङ्गितादयः । तैर्वानवुध्यतेकच्चित् परैरितिशेषः । भवान् भवदीयामात्याश्च मन्त्रितार्थविषयपराभ्यूह्यस्थानानिसूक्ष्माण्यपिस्थगयान्तिकच्चिदित्यर्थः ॥ २२ ॥ मूर्खाणांसहस्रात् मूर्खसहस्रंपरित्यज्यापि । ल्यब्लोपेपञ्चमी । पण्डितं विमृश्यकारिणं । एकमिच्छसिकच्चित् । पण्डितपरिग्रहेहेतुमाह—पण्डितइति । अर्थकृच्छ्रेषु कार्यसंकटेषु । [अर्थकृच्छ्रेषु अर्थसंकटेषु] महन्निःश्रेयसं महदैश्वर्यं । प्रापयेदित्यर्थः [महन्निःश्रेयसं । अव्यभिचारितफलसाधनोपायं] कुर्यात् उपदिशेदित्यर्थः ॥ २३ ॥ एवमन्वयेनोपपाद्यव्यतिरेकमुखेनोपपादयति—सहस्राणीति । उपास्ते आश्रयति संगृह्णातीत्यर्थः । नास्तीत्यस्मात्पूर्वं तथापीत्युपस्कार्यं । सहायता मन्त्रोपायसहायत्वं ॥ २४ ॥ पण्डितशब्दार्थंविवृण्वन्नाह—एकइति । मेधास्यास्तीतिमेधावी । "अस्मायामेधास्रजोविनिः" इतिविनिः । झटितिपरोपन्यस्तार्थग्रहणपटुरित्यर्थः । शूरः स्थिरबुद्धिः । दक्षः विचारसमर्थः । विचक्षणः अभ्यस्तनीतिशास्त्रः ॥ २५ ॥ मुख्याःभृत्याः महत्सु मुख्येष्वेव । कार्येषु वचनपरिवेषणादिषु । कच्चिन्नियोजिताः नतुहीनेषुकार्येषु । मध्यमाः जात्यादिना मध्यमाभृत्याः मध्यमेष्वेवकार्येषु शय्यासनानयनादिषुनियोजिताः नतूत्तमाधमकार्येषु । जघन्याः जात्यादिहीना भृत्याः जघन्येष्वेवकार्येषु पादप्रक्षालनपादुकानयनपादसंवाहनादिषु । नियोजिताः नतूत्तममध्यमेषुकार्येषुयोजिताःकच्चित् । अन्यथामहद्वैशसंभवेदितिभावः ॥२६॥ भृत्येपूक्तंन्यायममात्येष्वतिदिशति—अमात्यानिति । उपधातीतान् स्वव्यतिरिक्तेष्वर्थाद्युपाधिरहितान् । यद्वा सुपरीक्षातीतान् । "उपधा सुपरीक्षास्यात्" इतिवैजयन्ती । श्लाघ्यवस्त्राभरणादिकंपुरुषमुखेनसंप्रेष्य अन्तःपुरप्रेषितंपरराजप्रेषितमितिप्रलोभ्य परीक्षांकुर्वन्तिराजानः तामतीतानित्यर्थः । पितृपैतामहान् कुलक्रमागतान् । शुचीन् करणत्रयशुद्धियुक्तान ॥ २७ ॥ तव उग्रेणदण्डेन उद्वेजितप्रजं पीडितप्रजायुक्तं । राष्ट्रं राज्यं । मन्त्रिणः नानुजानन्ति नानुमन्यन्तेकच्चित् । राजानं त्वामुग्रदण्डान्निवर्तयन्ति कच्चिदित्यर्थः ॥ २८ ॥ उग्रप्रतिग्रहीतारमित्युपमानोपमेययोःसाधारणविशेषणं । उग्रेणदण्डोपायेनादण्डेभ्योधनग्रहणंकुर्वन्तंत्वां उग्रप्रतिग्रहीतारं उग्रेण दुर्दानेनधनप्रतिग्रहीतारं । पतितं यष्टुकामंपतितं । याजकाऋत्विजइव । उग्रेणकर्मणा बलात्कारेण

स० युक्त्या सामान्यानुमानेन । तर्कैः अर्थापत्तिभिः । यद्वा तर्कैःदूषणानुमानैः । युक्त्या साधनानुमानेन ॥ २२ ॥ ति० सहस्रैः । स० मूर्खाणांसहस्रैः एकं अन्यं पण्डितं । "एकेमुख्यान्यकेवलाः" इत्यमरः ॥ २३ ॥ ति० उपधा उत्कोचःयुक्तैरपीतिशेषः । स० उपधातीतान् उपाधिकृतभक्तिरहितान् सहजस्नेहवत इतियावत् ॥२७॥ तमतीतान् तदग्राहिणः । यद्वोपाधिप्रयुक्तसंश्रयरहितान् । ति० उद्वेजिताःप्रजाःमन्त्रिणश्च राष्ट्रे तव त्वां नावजानन्ति नावमन्यन्तेकच्चित् ॥ २८ ॥ कतक० याजकाः किंचित्पापानुसंधानेनपतितमिव त्वामयाज्योऽयमितिमत्वानावजानन्तिकिल । तत्रदृष्टान्तः—उग्रेत्यादि । स्त्रियःकुलस्त्रियः । उग्राख्यहीनजातीयस्त्रीप्रतिग्रहीतारं तांचकामयानं कामयमानं तस्यामत्यन्तासक्तंतथाऽवजानन्तीत्यर्थः ॥ परेतु उग्रप्रतिग्रहीतारं उग्रदिशवः

[पा०] १ क. तवचा. २ ङ. छ. झ. ट. त्सहस्रैर्मूर्खाणां. ३ ग. तेषुनास्ति. ४ ग. ङ. छ.—ट. राजपुत्रं. ५ ख. ङ. च. छ. झ. ञ. ट. जघन्याश्च. ६ ख. ङ. छ. ज. झ. ट. भृत्यास्तेतात. ७ क. ग. ङ. च. छ. झ. ञ. ट. मुद्वेजिताःप्रजाः. ८. ङ. झ. ञ. ट. राष्ट्रंतवाव. घ. ज. राज्यंतवानु. ९ ङ. छ. झ. उग्राप्रति.

उपायकुशलं वैद्यं भृत्यसंदूषणे रतम् ॥ शूरमैश्वर्यकामं च यो न हन्ति स वध्यते[1] ॥ ३० ॥
कच्चिद्धृष्टश्च शूरश्च मतिमान्[2]धृतिमाञ्छुचिः ॥ कुलीनश्चानुरक्तश्च दक्षः सेनापतिः कृतः ॥ ३१ ॥
बलवन्तश्च कच्चित्ते मुख्या युद्धविशारदाः ॥ दृष्टापदाना विक्रान्तास्त्वया सत्कृत्य मानिताः ॥३२॥
कच्चिद्बलस्य भक्तं च वेतनं च यथोचितम् ॥ संप्राप्तकालं[3] दातव्यं ददासि न विलम्बसे ॥ ३३ ॥
कालातिक्रमणाच्चैव[4][5] भक्तवेतनयोर्भृताः ॥ भर्तुः[6] कुप्यन्ति दुष्यन्ति सोनर्थः सुमहान्स्मृतः ॥ ३४ ॥
कच्चित्सर्वेऽनुरक्तास्त्वां कुलपुत्राः प्रधानतः ॥ कच्चित्प्राणांस्तवार्थेषु संत्यजन्ति समाहिताः ॥ ३५ ॥
कच्चिज्जानपदो विद्वान्दक्षिणः प्रतिभानवान् ॥ यथोक्तवादी दूतस्ते कृतो भरत पण्डितः ॥ ३६ ॥

प्रतिग्रहीतारं कामयानंपुरुषंस्त्रियइव । वचनाज्जानन्तिकच्चित् । प्रजाइतिशेषः । प्रजावमानहेतुभूतं न्यायातिक्रमेणोग्रकरग्रहणंत्वयिनास्तिकच्चिदितिभावः ॥ २९ ॥ उपायकुशलमिति । उपायेषु सामाद्युपायेषु । कुशलंनिपुणं । वैद्यं कणिकोक्तकुटिलनीतिविद्याविदं । [चाणक्याद्युक्तकुटिलनीतिशास्त्रविदं] भृत्यसंदूषणेरतं अन्तरङ्गभृत्यानांसंदूषणे असद्दोषोद्घाटनेनतद्विघटनेरतं । शूरं राजहिंसनेपिनिर्भयं । ऐश्वर्यकामं क्रमेणराजैश्वर्याक्रमणकामंच पुरुषंयोनहन्ति सराजा तैरेववध्यते राज्याद्भ्रष्टोभवतीत्यर्थः । एवंविधःपुरुषः त्वत्सन्निधौनवर्ततेकच्चिदित्यर्थः ॥ ३० ॥ संग्राह्यसेनापतिगुणानाह—कच्चिद्धृष्टइति । हृष्यतीति हृष्टः राजकृतसत्कारेणसंतुष्टः । यद्वाधृष्टइतिच्छेदः । धृष्टः व्यवहारेषुप्रगल्भः । शूरः परनिग्रहपरः । मतिमान् तत्तत्समयानुगुणस्वपरसेनाव्यूहच्छेदनसेनानयनादिचतुरबुद्धियुक्तः । धृतिमान् विपदिप्रशस्तधैर्यः । शुचिः बाह्याभ्यन्तरशुद्धियुक्तः । यद्वा शुचिः स्वामिनिसविश्वासः । कुलीनः सत्कुलप्रसूतः । अनुरक्तः स्वस्मिन्निरवधिकप्रीतिमान् । दक्षः कार्यकुशलः । एवंविधःसेनापतिःकृतःकच्चित् । तादृशंपूर्वसेनापतिं विहायातादृशमन्यंनपरिगृहीतवानसि कच्चिदित्यर्थः ॥ ३१ ॥ बलवन्तः अत्यन्तबलाः । ते प्रसिद्धाः । मुख्याः गणमुख्याः । युद्धविशारदाः युद्धेसमर्थाः । दृष्टं साक्षात्कृतं । अपदानंपूर्ववृत्तंपौरुषंयेषांतेतथोक्ताः । विक्रान्ताः शूराः । “ शूरोवीरश्चविक्रान्तः ” इत्यमरः । सत्कृत्यमानिताः पारितोषिकदानपूर्वकंश्लाघिताःकच्चित् ॥ ३२ ॥ बलस्य सैन्यस्य । संप्राप्तकालं कालप्राप्तं । दातव्यं तत्तत्कालेदेयं । भक्तं अन्नं वेतनं प्रतिमासंदेयांभृतिंच । यथोचितं तत्तत्कार्योचितं । ददासि नविलंबसेकच्चित् कालातिक्रमणंविनाददासिकच्चित् ॥ ३३ ॥ विलम्बेदोषमाह—कालातिक्रमणादिति । भृताः भृतिजीविनः भटाइतियावत् । भर्तुः कुप्यन्ति भर्तारंप्रतिकुप्यन्ति । दुष्यन्ति कोपेनविकृताभवन्ति । सविकारः सुमहाननर्थःस्मृतः अनर्थकरोभवेदित्यर्थः ॥ ३४ ॥ कुलपुत्राः क्षत्रियकुलप्रसूताः ज्ञातयइतिवा । प्रधानतः प्रधानाः । सार्वविभक्तिकस्तसिः ॥ ३५ ॥ जानपदः स्वजनपदभवः । परजनपदभवश्चेत्पक्षपातमाचरेत् । विद्वान् पराभिप्रायज्ञः । दक्षिणः समर्थः । प्रतिभानवान् प्रत्युत्पन्नमतिः परोक्तस्याविलम्ब्यमुचितोत्तरज्ञइतियावत् । यथोक्तवादी उक्तमनतिक्रम्यसंदेशप्रतिसंदेशवदनशीलः कार्योपयोगितयाबहुमुखं व्याहरन्नपिस्वाम्युक्तमजहदेवव्यवहर्तेतियावत् । पण्डितः परिच्छेत्ता । “परिच्छेदोहिपाण्डित्यं” इत्युक्तेः ॥ ३६ ॥

तत्प्रतिग्रहीतारं अल्पपुंस्त्वं । तत्प्रतिग्रहीतुरीदृशषण्डतायाःकर्मविपाकशास्त्रेउक्तेरित्याहुः ॥२९॥ **ती०** वैद्यं विद्याविदं नीतिशास्त्रज्ञमितियावत् । शूरं मरणनिर्भयं । **कतक०** भृत्यंसंदूषणेरतमितिपाठः । उपायकुशलंराज्ञस्सकाशादर्थग्रहणार्थं व्याधिवर्धनोपायकुशलं । वैद्यं भिषजं । स्वामिसंदूषणेरतं भृत्यं सेवकंच । राजानमपच्छिद्यतदैश्वर्यकामं शूरं सेवकरूपंप्रभुंच । योनहन्ति सराजातैरेव भिषजादिभिर्हन्यतेइत्यर्थः । **शि०** ऐश्वर्यकामं स्वातन्त्र्येणराजैश्वर्यभोगेच्छावन्तं । अतएवभृत्यसंदूषणे भृत्यचित्तचालकयत्ने । रतं उपायेषु रोगप्रवर्तननिवर्तनयत्नेषु । कुशलं निपुणं । शूरंवैद्यं भिषजं योनहन्ति सहन्यते तेनवैद्येनेतिशेषः ॥ ३० ॥ **ती०** भक्तं

[पा०] १ ङ. छ. झ. ट. हन्यते. २ क. ङ. च. छ. झ. ञ. ट. धृतिमान्मतिमान्. ग. मतिमान्द्युतिमान्. ३ ग. च. काले. ४ ग. कालस्यातिक्रमाच्चैव. ५ क. ङ. च. ञ. क्रमणेनैव. छ. झ. ट. क्रमणश्चैव. ६ ङ. छ. झ. ट. भर्तुरप्यतिकुप्यन्ति.

कच्चिदष्टादशान्येषु स्वपक्षे दश पञ्च च ॥ त्रिभिस्त्रिभिरविज्ञातैर्वेत्सि तीर्थानि चारकैः[1] ॥ ३७ ॥
कच्चिद्व्यपास्तानहितान्प्रतियातांश्च सर्वदा[2] ॥ दुर्बलाननवज्ञाय वर्तसे रिपुसूदन ॥ ३८ ॥
कच्चिन्न लोकायतिकान्ब्राह्मणांस्तात सेवसे ॥ अनर्थकुशला ह्येते बालाः पण्डितमानिनः ॥ ३९ ॥

अन्येषु परपक्षेषु । अष्टादशतीर्थानि स्वपक्षेपञ्चदशतीर्थानिच । अविज्ञातैः , परस्परमन्यैश्चाविज्ञातैः । विज्ञातत्वे तेषां सांकेतिकव्यवहारःप्रादुष्यात् । एकस्मिंस्तीर्थेत्रिभिस्त्रिभिःचारकैः वेषान्तरधारिभिश्चारैः । कृत्रिमार्थेकप्रत्ययः । वेत्सिकच्चित् एतानिन्यायतोऽन्यायतोवाप्रवर्तन्तइति जानासिकच्चिदित्यर्थः।तानीमान्यष्टादश नीतिशास्त्रोक्तानितीर्थानि मन्त्रिपुरोहितयुवराजसेनापतिदौवारिकान्तर्वंशिककारागाराधिकृतार्थसंचयकृत्कार्यनियोजकप्राड्विवाकसेनानायकनगराध्यक्षकर्मान्तिकसभ्यधर्माध्यक्षदण्डपालदुर्गपालराष्ट्रान्तपालाः । एष्वेवमन्त्रिपुरोहितयुवराजव्यतिरिक्तानि । स्वपक्षे पञ्चदशतीर्थानि मन्त्रिपुरोहितयुवराजसेनापतयःप्रसिद्धाः । दौवारिकः अन्तःपुरादिद्वाररक्षणाधिकृतजननिर्वाहकः । अन्तर्वंशिकः अन्तःपुरकार्यनिर्वाहकः । कारागारं अपराधिनांबन्धनगृहं तत्राधिकृतः कारागाराधिकृतः । अर्थसंचयकृत् धनाध्यक्षः । कार्यनियोजकः राजाज्ञायाःबहिःप्रचारकर्ता । प्राड्विवाकः व्यवहारप्रष्टा । तल्लक्षणमुक्तं " विवादेपृच्छतिप्रश्नंप्रतिप्रश्नंतथैवच । प्रियपूर्वंप्राग्वदतिप्राड्विवाकस्ततःस्मृतः " इति । सेनानायकः सेनायाःभृतिजीवनादिदानाध्यक्षः । नगराध्यक्षः रात्रौनगरशोधननगरद्वारप्राकारादिरक्षणसंविधानादिकर्ता । कर्मान्तिकः कार्यान्तेवेतनग्राहिणांसैनिकव्यतिरिक्तानां सर्वेषांराज्ञः सकाशात् एकधास्वयंवेतनंगृहीत्वाप्रत्येकंतद्योदापयति सः । सभ्यः प्रतिदिनंसभालंकरणराजमन्त्रिप्रभृतिसमुचितासनविधानसभ्यानयनासभ्यनिरोधनयथोचितनिवेशनसभानिःशब्दीकरणसभारक्षणादिविधायिजननिर्वाहकः । धर्माध्यक्षः दायभागादिविषयेविवादं कुर्वतांविवादपदविशोधनपूर्वकं यथाधर्मशास्त्रं विवादशमनकर्ता । दण्डपालः परस्वापहरणाद्यपराधकारिणां राजाज्ञाप्रकारेणकरशिरश्छेदादिविधायिजननियोजकः । दुर्गपालः गिरिजलवनादिदुर्गसंततरक्षकजननिर्वाहकः । राष्ट्रान्तपालः स्वराष्ट्रसीमान्तेसर्वासुदिक्षु परराजाक्रमणादिनिवारणायसदातद्रक्षणंकुर्वतांनिर्वाहकः । स्वकीयमन्त्रिपुरोहितयुवराजानपरीक्ष्याः तेषांसदास्वसमीपवर्तित्वेनतत्स्वभावस्यस्वेनैवज्ञातत्वात् । तथोक्तंनीतिशास्त्रे । " चारान्विचारयेत्तीर्थेष्वात्मनश्चपरस्यच । पाषण्डादीनविज्ञातानन्योन्यमितरैरपि । मन्त्रिणंयुवराजंचहित्वास्वेषुपुरोहितं " इति । स्वेषुमन्त्रिणंयुवराजं पुरोहितंचहित्वेत्यन्वयः । एषां तीर्थशब्दवाच्यत्वमुक्तं हलायुधे । " योनौजलावतारेचमन्त्राद्यष्टादशस्वपि । पुण्यक्षेत्रेतथापात्रेतीर्थंस्यादर्शनेष्वपि " इति ॥ ३७ ॥ व्यपास्तान् निष्कासितान् । प्रतियातान् पुनरागतान् । अहितान् शत्रून् दुर्बलाननवज्ञाय वर्तसेकच्चित् दुर्बलाइत्यवज्ञांकृत्वान वर्तसे कच्चिदितिभावः । प्रतियानमवष्टम्भमन्तरेणन संभवतीतिमत्वा तेषुसावधानतयास्थातव्यमितिभावः ॥ ३८ ॥ लोकायतिकान् लोकेष्वायतंविस्तृतंलोकायतंप्रत्यक्षप्रमाणं यद्वा लोकायतशब्दाभ्यांप्रत्यक्षमनुमानंचोच्यते लोक्यतेसाक्षात्क्रियतेनेनेतिलोकः प्रत्यक्षप्रमाणं । आ समन्ताद्व्याप्यधूमादिसमीपवर्तीवह्न्यादिर्यत्यतेगृह्यतेनेनेति आयतमनुमानं तदेषामस्तीतिलोकायतिकाः । " अतइनिठनौ " इतिठन्प्रत्ययः । नास्तिकाबौद्धचार्वाकादयः । तान् ब्राह्मणान् नसेवसेकच्चित् । असेवायांहेतुमाह—अनर्थेति । अर्थेषु तत्त्वार्थेषुकुशलाः यथावज्ज्ञानवन्तः तेनभवन्तीत्यनर्थकुशलाः । यद्वा अनर्थः धर्मानुष्ठानश्रद्धावैकल्यतन्मूलकसज्जनबहिष्कारनरकपतनादिः तत्रकुशलाः दु-

अन्नं । एतद्व्रीह्यदीनामप्युपलक्षणं ॥ ३३ ॥ **स०** अष्टादशानि मन्त्र्यादीनि । तदुक्तं "मन्त्रीपुरोहितश्चैवयुवराट्सैन्यनायकः । द्वारपोन्तःपुरचरोबन्धनागारनायकः । धनाध्यक्षोराज्ञआज्ञाज्ञापकोव्यवहारकृत् । धर्माधिकारीसभ्यश्चसेनावेतनदायकः । कर्मान्तेवेतनग्राहीनगराध्यक्षएवच । राष्ट्रान्तपालोदुष्टानांदण्डनाधिकृतस्तथा । जलादिदुर्गपालश्चतीर्थान्यष्टादशैवतु" इति ॥३७॥ **ति०** लोकायतिकान् चार्वाकमतानुसारिणः प्रत्यक्षमात्रप्रमाणकान् । अपरे लोकायतिकाः शुष्कतर्कवावदूकाः । ब्राह्मणत्वेपितदपरिग्रहेहेतुमाह—**अनर्थेति** ॥ **शि०** अनर्थकुशलाः अनर्थे सर्वार्थविघातके परमार्थबुद्धिनिवर्तने कुशलाः निपुणाः ।

[**पा०**] १ ङ. छ. झ. ञ. ट. चारणैः. २ ग. सर्वशः.

धर्मशास्त्रेषु मुख्येषु विद्यमानेषु दुर्बुधाः ॥ बुद्धिमान्वीक्षिकीं प्राप्य निरर्थं प्रवदन्ति ते ॥ ४० ॥
वीरैरध्युषितां पूर्वमस्माकं तात पूर्वकैः ॥ सत्यनामां दृढद्वारां हस्त्यश्वरथसंकुलाम् ॥ ४१ ॥
ब्राह्मणैः क्षत्रियैर्वैश्यैः स्वकर्मनिरतैः सदा ॥ जितेन्द्रियैर्महोत्साहैर्वृतामार्यैः सहस्रशः ॥ ४२ ॥
प्रासादैर्विविधाकारैर्वृतां वैद्यजनाकुलाम् ॥ कच्चित्सुमुदितां स्फीतामयोध्यां परिरक्षसि ॥ ४३ ॥
कच्चिच्चित्यशतैर्जुष्टः सुनिविष्टजनाकुलः ॥ देवस्थानैः प्रपाभिश्च तटाकैश्चोपशोभितः ॥ ४४ ॥
प्रहृष्टनरनारीकः समाजोत्सवशोभितः ॥ सुकृष्टसीमा पशुमान्हिंसाभिः परिवर्जितः ॥ ४५ ॥
अदेवमातृको रम्यः श्वापदैः परिवर्जितः ॥ परित्यक्तो भयैः सर्वैः खनिभिश्चोपशोभितः ॥ ४६ ॥
विवर्जितो नरैः पापैर्मम पूर्वैः सुरक्षितः ॥ कच्चिज्जनपदः स्फीतः सुखं वसति राघवः ॥ ४७ ॥

वोधनेनतत्संपादकाइत्यर्थः । वालाः तत्त्वज्ञानविरोध्यज्ञानयुक्ताः । अथचपण्डितमानिनः अपण्डितमात्मानंपण्डितंमन्वानाः । एतेअनर्थकुशलाहि ॥ ३९ ॥ अनर्थकुशलत्वमेवोपपादयति—धर्मशास्त्रेष्विति । दुर्बुधाः वेदमार्गविपरीतबुद्धयः । ते मुख्येषु तामसस्मृतिपुराणादिव्यावृत्तेषुसात्त्विकमहर्षिप्रणीतेषु सज्जनादरणीयेषु । धर्मशास्त्रेषु धर्मप्रमापकशास्त्रेषु विद्यमानेषु । तत्संप्रदायपरंपरयापठ्यमानेषुसत्सु । आन्वीक्षिकींबुद्धिंप्राप्य शुष्कतर्कविषयांबुद्धिमास्थाय । निरर्थं निष्प्रयोजनंप्रवदन्ति । " आर्षंधर्मोपदेशंचवेदशास्त्राविरोधिना । यस्तर्केणानुसंधत्तेसधर्मंवेदनेतरः" इतिस्मृतेः ॥ ४० ॥ वीरैरित्यादिश्लोकत्रयमेकंवाक्यं । अयोध्यां सत्यनामांपरिरक्षसिकच्चित् । सत्यनामां । " डावुभाभ्यामन्यतरस्यां " इतिडाप् । अयोध्येतिनामसत्यंयथाभवतितथारक्षसि कच्चिदित्यर्थः । सत्यनामात्वमूलं—वीरैरध्युषितामित्यादि । तत्फलानिसत्यनामात्वादीनि । आर्यैः पूज्यैः । तत्रहेतवः—स्वकर्मनिरतत्वादयः । वैद्यजनाकुलां वैद्यजनाःविद्वज्जनाः तैरावृतां । सुमुदितां सुसंतुष्टजनामित्यर्थः । स्फीतां समृद्धां ॥ ४१—४३ ॥ कच्चिच्चित्यशतैरित्यादिश्लोकचतुष्टयमेकंवाक्यं । चित्यशतैः चैत्यशतैरितिचपाठः । उभयत्रापि अश्वमेधान्तमहायज्ञचयनप्रदेशसमूहैरित्यर्थः । सुनिविष्टजनाकुलः सुप्रतिष्ठितजनव्याप्तः । सुप्रतिष्ठितत्वंच राजन्वत्त्वसुवृष्ट्यारोग्यादिदेशगुणा-

कृष्टचित्ततयादेशान्तरजिगमिषाराहित्येनतत्रैवासक्तत्वं । देवस्थानैः देवालयैः । प्रपाभिः पानीयशालाभिः । मार्गप्रवर्तिताभिरितिशेषः । " प्रपापानीयशालिका " इत्यमरः । तटाकैः सस्यादिवृद्धिनिमित्तैर्महाजलाशयैः । समाजोत्सवशोभितः समाजैः धर्मनिर्णयार्थसभाभिः । यद्वा नदीतटाकादितीरवनेषुसमस्तवस्तुविक्रयसौकर्यायनिखिलजनविदिततयाकृतवारसंकेतः । कृतापणोवणिजांसमूहः समाजइत्युच्यते । यद्वा समाजयुक्तोत्सवशोभितः । सुकृष्टसीमा अकृष्टा ईषत्कृष्टाचभूमिर्नतत्रास्तीत्यर्थः । यद्वा सर्वदासुकृष्टप्रायसीमा अकृष्टपच्यभूमियुक्तइत्यर्थः । पशुमान् गवाजादिपशुसमृद्धः । हिंसाभिः ईतिभिःषड्भिः । " अतिवृष्टिरनावृष्टिर्मूषिकाःशलभाःखगाः । अत्यासन्नाश्चराजानःषडेताईतयःस्मृताः " इत्युक्ताभिःपरिवर्जितः । यद्वा परस्परहिंसारहितइत्यर्थः । अदेवमातृकः देवमातृकदेशरहितः वृष्ट्येकनिष्पाद्यसस्यकदेशरहितइत्यर्थः । सरयूतीरस्थत्वेनसर्वतोनदीमातृकइति यावत् । " नद्यम्बुजीवनोदेशोनदीमातृकउच्यते । वृष्टिनिष्पाद्यसस्यस्तुविज्ञेयोदेवमातृक " इतिहलायुधः । रम्यः आरामादिशोभितत्वेनरमणीयः । श्वापदैः व्याघ्रादिहिंस्रपशुभिः परिवर्जितः । भयैःसर्वैः भयहेतुभिश्चोरादिभिः सर्वैः । परित्यक्तःपरितस्त्यक्तः । तत्समीपदेशेपिचोरादिभयंनास्तीत्यर्थः । खनिभिः रत्नसुवर्णरजताद्याकरैः । " खनिःस्त्रियामाकरःस्यात् "

सन्तीतिशेषः ॥ ३९ ॥ ति० आन्वीक्षिकी तर्कविद्या । शुष्कतर्कविद्याजनितांबुद्धिमवलम्ब्यनिरर्थंनिष्प्रयोजनंवदन्ति । यथा आत्मनोज्ञानाश्रयत्वं ईशोजगन्निमित्तकारणं नित्यज्ञानादिगुणकश्चेत्यादिश्रुतिविरुद्धवादाभिप्रायमिदं ॥ ४० ॥ शि० वैद्यजनाकुलां वैद्यजनैः वैद्यानांजनकैः मुख्यभिषग्भिरित्यर्थः । आकुलां व्याप्तां । समुदितां सम्यगुदितंस्वकल्याणार्थमुच्चारणंयस्यास्तां । ति० समुदितां

[पा०] १ ख. ग. वाच्यमानेषु. २ ग. सैन्य. ३ क. ख. ङ. च. ज. झ. ट. रसमुदितां. ४ ङ. छ. ज. झ. ट. रक्षसे. ५ क.—ट. कच्चिच्चैत्य. ६ क. प्रभिन्ननर. ७ ख. सेवितः. ८ घ. शुनिमान्. ९ क. ख. ग. ङ. च. छ. झ. ञ. ट. न्हिंसाभिरभि.

कच्चित्ते दयिताः सर्वे कृषिगोरक्षजीविनः ॥ वार्तायां [1]संश्रितस्तात [2]लोको हि सुखमेधते ॥ ४८ ॥
तेषां गुप्तिपरीहारैः कच्चित्ते भरणं कृतम् ॥ रक्ष्या हि राज्ञा धर्मेण सर्वे विषयवासिनः ॥ ४९ ॥
कच्चित्स्त्रियः [3]सान्त्वयसि कच्चि[4]त्ताश्च सुरक्षिताः ॥ कच्चिन्न श्रद्दधास्यासां कच्चिद्गुह्यं न भाषसे ॥ ५० ॥
कच्चिन्नागवनं गुप्तं कच्चित्ते सन्ति धेनुकाः ॥ कच्चिन्न गणिकाश्वानां कुञ्जराणां च तृप्यसि ॥ ५१ ॥
कच्चिद्दर्शयसे नित्यं [5]मनुष्याणां विभूषितम् ॥ उत्थायोत्थाय पूर्वाह्णे राजपुत्र [6]महापथे ॥ ५२ ॥
कच्चिन्न सर्वे कर्मान्ताः प्रत्यक्षास्तेऽविशङ्कया ॥ सर्वे वा पुनरुत्सृष्टा मध्यमेवात्र कारणम् ॥ ५३ ॥
[7]कच्चित्सर्वाणि दुर्गाणि धनधान्यायुधोदकैः ॥ यन्त्रैश्च [8]परिपूर्णानि तथा शिल्पिधनुर्धरैः ॥ ५४ ॥
आयस्ते विपुलः कच्चित्कच्चिदल्पतरो व्ययः ॥ अपात्रेषु न ते कच्चित्कोशो गच्छति राघव ॥ ५५ ॥

इत्यमरः । पुनःकच्चिच्छब्देन प्रतिविशेषणंप्रश्नाइति गम्यते । "आद्यन्तयोःप्रयुक्तोयंकुतोनान्वेतिमध्यतः। प्रष्टव्यतायांतुल्यायांकेनार्धजरतीक्रमः । आदरातिशयोनेनश्रीमत्कोसलगोचरः । गम्यतेरघुनाथस्यमुक्तियेंनापिपीलिकम् " ॥ ४४— ४७ ॥ कृषिगोरक्षजीविनः वैश्याः । दयिताःकच्चित् अर्थसंपादनद्वारा अभिमताः । वार्तायां क्रयविक्रयात्मकवाणिज्येसति । "वार्तावागिङ्गितोदन्तवाणिज्यादिषुवर्तत" इतिवैजयन्ती । संश्रितोलोकः त्वत्संश्रितोजनःसुखमेधतेहि ॥ ४८ ॥ गुप्तिपरीहारैः इष्टप्रापणानिष्टनिवारणैः । ते त्वया तेषांभरणं पोषणंकृतं कच्चित् । तस्यावर्जनीयत्वमाह—रक्ष्याहीति ॥ ४९ ॥ स्त्रियः स्वस्त्रियः । सान्त्वयसि तदनुकूलतया वर्तसे । सुरक्षिताः अन्यपुरुषसंभाषणादिभ्यइतिशेषः । आसां स्त्रीणां वचनमितिशेषः । नश्रद्दधासि आदरेणयथार्थबुद्ध्यानश्रृणोषीत्यर्थः । गुह्यंनभाषसे ताभ्यइतिशेषः । स्त्रीणामतिचञ्चलमतित्वेनरहस्यभेदप्रसङ्गादितिभावः ॥ ५० ॥ नागवनं गजोत्पत्तिस्थानभूतंवनं । तदरक्षणे परैर्गजग्रहणप्रसङ्गइतिभावः । धेनुकाः गजग्रहणसाधनभूताः करिण्यः । "करिणीधेनुकावशा"इत्यमरः । गणिकाश्वानां गणिकाः करिण्यः । "वेश्याकरिण्योर्गणिका" इतिवैजयन्ती । गणिकाश्चाश्वाश्चगणिकाश्वाः तेषांगणिकाश्वानां कुञ्जराणां च नतृप्यसिकच्चित् तत्संपादनविषयेतृप्तिंनप्राप्नोषिकच्चिदित्यर्थः । "पूरणगुण—" इत्यादिना समासप्रतिषेधेनसूचिताषष्ठी ॥ ५१ ॥ विभूषितं आत्मानमितिशेषः । महापथे सभायामितियावत् । प्रातःसभांस्थित्वा मनुष्याणां विभूषितमात्मानंदर्शयसेकच्चिदितिसंबन्धः । अन्यथा राजारोग्येतेषां शङ्कास्यादितिभावः ॥ ५२ ॥ कर्मान्ताः कर्मान्तिकाः कर्मकराइतियावत् । अविशङ्कया ते नप्रत्यक्षाःकच्चित् निर्भयतयात्वत्सन्निधिंप्राप्तानकच्चिदित्यर्थः । अथवा तेसर्वे पुनः उत्सृष्टानकच्चित् दर्शनाप्रदानेनपरित्यक्तानकच्चिदित्यर्थः । अविशङ्कया प्रवेशे अवज्ञादिकंसंभवेत् दर्शनाभावेकार्यहानिःस्यात् अतःअत्रकर्मान्तिकविषये मध्यमेवकारणं । अतिदर्शनादर्शनयोर्मध्यमरीत्याश्रयणमेवार्थसिद्धिकारणं । अतिदर्शनेदृप्तानांतेषां स्वामिन्यनादरःस्यात् अत्यदर्शनेस्वकार्यविज्ञापनावसरालाभात्किमनेनेतिकोपःस्यात् राजकार्यहानिश्च । तस्माद्यथोचितसमयेदर्शनप्रदानमेवोचितमितिभावः ॥ ५३ ॥ दुर्गाणि औदकपार्वतवार्क्षैरिणधान्वनानि । धनधान्यायुधोदकैः यन्त्रैःशिल्पिभिर्धनुर्धरैश्च परिपूर्णानिकच्चित् । अत्रकामन्दकः "औदकंपार्वतंवार्क्षमैरिणंधान्वनंतथा । जलान्नायुधयन्त्राढ्यंवीरयोधैरधिष्ठितम् । गुप्तिप्रधानमाचार्यादुर्गं समनुमेनिरे" इति ॥ ५४ ॥ आयः धनागमः । कोशः सञ्चितधनं । अपात्रेषु नटविटगायकेषु । नग-

सिद्धां ॥ ४३ ॥ ति० प्रभिन्ननरनारीकइतिपाठेप्रभेदस्संतोषः ॥ ४५ ॥ स० कृषिगोरक्षजीविनः "ङ्यापोः—संज्ञाच्छन्दसोर्बहुलं" इतिह्रस्वः । कृषिगोरक्षमितिसमाहारोवा । वस्तुतस्तु गौरक्ष्यमित्येवपाठः । गवांरक्षायेषांतेगोरक्षाः जनाः तेषांभावोगौरक्ष्यं । गोरक्षणमितियावत् । इतिपरः गीताभाष्यव्याख्यानेव्याचख्यौ ॥ ४८ ॥ कतक० गुप्तपरीहारैरितिपाठः । गुप्त्यर्थंनियुक्तैराजमनुष्यैः क्रियमाणतस्करायनर्थपरिहारैः । ते त्वया । भरणंकृतंकच्चित् ॥ ४९ ॥ शि० ते त्वया ॥ ५० ॥

[पा०] १ ङ. छ. झ. सांप्रतंतात. २ ग. ङ. छ. झ. ट. लोकोयं. ३ ङ. छ. झ. ट. सान्त्वयसे. ४ ख.—ङ. छ. ज. झ. ट. त्तास्ते. ५ घ.—झ. ट. मानुषाणां. ६ क. घ. च. ज. ञ. महारथ. ख. ग. महायशः. ७ ख. ङ. च. छ. झ. ञ ट. कच्चिद्दुर्गाणिसर्वाणि. ८ ख.—ट. प्रति.

देवतार्थे च पित्र्यर्थे ब्राह्मणाभ्यागतेषु च ॥ योधेषु मित्रवर्गेषु कच्चिद्गच्छति ते व्ययः ॥ ५६ ॥
कच्चिदार्यो विशुद्धात्माऽऽक्षारितश्चोरकर्मणा ॥ अपृष्टः शास्त्रकुशलैर्न लोभाद्बध्यते शुचिः ॥ ५७ ॥
गृहीतश्चैव पृष्टश्च काले दृष्टः सकारणः ॥ कच्चिन्न मुच्यते चोरो धनलोभान्नरर्षभ ॥ ५८ ॥
व्यसने कच्चिदाढ्यस्य दुर्गतस्य च राघव ॥ अर्थं विरागाः पश्यन्ति तवामात्या बहुश्रुताः ॥ ५९ ॥
यानि मिथ्याभिशस्तानां पतन्त्यस्राणि राघव ॥ तानि पुत्रपशून्घ्नन्ति प्रीत्यर्थमनुशासतः ॥ ६० ॥
कच्चिद्वृद्धांश्च बालांश्च वैद्यमुख्यांश्च राघव ॥ दानेन मनसा वाचा त्रिभिरेतैर्बुभूषसे ॥ ६१ ॥
कच्चिद्गुरूंश्च वृद्धांश्च तापसान्देवतातिथीन् ॥ चैत्यांश्च सर्वान्सिद्धार्थान्ब्राह्मणांश्च नमस्यसि ॥ ६२ ॥
कच्चिदर्थेन वा धर्ममर्थं धर्मेण वा पुनः ॥ उभौ वा प्रीतिलोभेन कामेन च न बाधसे ॥ ६३ ॥
कच्चिदर्थं च धर्मं च कामं च जयतांवर ॥ विभज्य काले कालज्ञ सर्वान्वरद सेवसे ॥ ६४ ॥

च्छतिकच्चित् तेभ्योपरिमितंनदेयमितिभावः ॥५५॥ धनव्ययस्योचितविषयमाह—देवतार्थइत्यादिना ॥५६॥ विशुद्धात्मा विशुद्धस्वभावः । शुचिः करणत्रयशुद्धियुक्तः । आर्यः सज्जनः । यदृच्छया चोरकर्मणा । आक्षारितः अभिशस्तः "आक्षारितःक्षारितोभिशस्तः" इत्यमरः । शास्त्रकुशलैः अपृष्टः प्रश्नेनअशोधितःसन् लोभाद्धनलोभान्नवध्यतेकच्चित् ॥ ५७ ॥ पृष्टः प्रश्नैःशोधितः । कालेकालविशेषे दृष्टः सकारणः चौर्यलब्धद्रव्यवत्तयावादृष्टः । लोभात् मुषितंधनंतवदास्यामीतितद्दत्तधनलोभात् । नमुच्यतेकच्चित् ॥ ५८ ॥ आढ्यस्य दुर्गतस्य दरिद्रस्यच । व्यसने विवादरूपसङ्कटेप्राप्ते । अर्थं व्यवहारं । "अर्थःस्याद्विषयेमोक्षे शब्दवाच्येप्रयोजने । व्यवहारेधनेशास्त्रेवस्तुहेतुनिवृत्तिषु" इतिवैजयन्ती । विरागाः विगतधनरागाः । पश्यन्ति परीक्षन्तेकच्चित् ॥ ५९ ॥ मिथ्याभिशस्तानां राज्ञां अविचार्यप्रवर्तितमिथ्याभियोगानांप्रजानां यानि अस्राणि अश्रूणि पतन्ति तानि प्रीत्यर्थमनुशासतः राज्ये न्यायान्यायावविचार्यकेवलभोगार्थराज्यं कुर्वतइत्यर्थः ॥ ६० ॥ दानेन अभिमतवस्तुप्रदानेन । मनसास्नेहेन । वाचा सान्त्ववचनेन । एतैस्त्रिभिर्बुभूषसे प्राप्तुमिच्छसि वशीकर्तुमिच्छसिकच्चिदितियावत् । भूप्राप्तावात्मनेपदीतिगणपाठेपठितत्वादात्मनेपदी ॥ ६१ ॥ चैत्यान् देवतावासभूतचतुष्पथस्थमहावृक्षान् । सिद्धार्थान् निष्पन्नप्रयोजनान् यागादिनालब्धामुष्मिकप्रयोजनानितियावत् ॥ ६२ ॥ अर्थेनधर्मंनबाधसेकच्चित् धर्मार्जनयोग्येपूर्वाह्णे अर्थार्जनंकृत्वाधर्मंनबाधसेकच्चिदित्यर्थः । धर्मेणार्थंनबाधसे अर्थार्जनयोग्येअपराह्णेधर्मार्जनंकृत्वाअर्थंननाशयसिकच्चिदित्यर्थः । प्रीतिलोभेन सुखाभिलाषेण हेतुना । कामेन सायंकालविहितेनकामेन । उभौवानबाधसेकच्चित् । यद्वा अर्थेनहेतुनाधर्मंनबाधसेकच्चित् । धर्मंहित्वाअर्थंनगृह्णासीत्यर्थः । तथाधर्मेणहेतुना कुटुम्बनिर्वाहाद्यपेक्षितमर्थंनबाधसे । धर्मार्थावुभावपि प्रीतिलोभेन सुखेच्छया । कामेनचहेतुना नबाधसे । गणिकादिसक्तावुभयमपिहिनश्यति ॥ ६३ ॥ उक्तमर्थंसविशेषमाह—कच्चिदिति । अर्थंचधर्मंचका-

ति० आर्यः साधुः । शुद्धात्मापिसन् अपकर्मणा स्तेयागम्यागमनादिदोषेण । क्षारितः अभिशस्तः । शास्त्रकुशलैः धर्मशास्त्रकुशलैः । अदृष्ट एव अनिर्णीतदोषएव । लोभात् धनलोभात् । शुचिरपि न वध्यते नदण्ड्यते कच्चित् ॥ ५७ ॥ ति० दुर्बलस्य दरिद्रस्यच व्यसनेविषादरूपसंकटे राजकीयैकनिवर्त्येप्राप्ते । तवामात्याः विरागास्सन्तः विगतधनरागास्सन्तः अर्थं तयोर्व्यवहारंपश्यन्तिकच्चित् ॥ ५९ ॥ शि० पादन्यासानीतिपाठान्तरं । तदा जायन्तइतिशेषः । आर्षंनपुंसकत्वं ॥ शि० प्रीत्यर्थं एकत्रप्रीतिसंपादनार्थं ॥ ६० ॥ शि० चैत्याः अग्निचयनस्यस्थलानि ॥ ६२ ॥

[पा०] १ ख. घ. ब्राह्मणेष्वागतेषु. २ ङ. झ. ट. दार्योपि. ३ ङ. छ. झ. ट. श्चापकर्मणा. ४ घ. ङ. छ. ञ. ट. अदृष्टः. ५ क.—च. दृष्टश्च. ६ क. च. पृष्टः. ७ ग. व्यसनैः. ८ च. छ. झ. ट. दुर्बलस्य. ९ क. ख. घ. न्यास्राणि. च.—ञ. न्त्यश्रूणि. १० क. च. ज. पुत्रान्पशून्. ११ ख. ङ. छ. झ. ट. वैद्यान्मुख्यांश्च. १२ ग. त्रिभिरेव. १३ ग. ज. दैवतातिथीन्. १४ ग. वैद्यांश्च. १५ ग. सिद्धांश्च. १६ घ. श्चानुमन्यसे. ख. श्चनमस्यसे. १७ च. ञ. उभौच. १८ ग. योगेन. १९ क. ख. ग. ङ. च. छ. झ. ञ. ट. नविबाधसे. २० क. ङ. च. छ. झ. ञ. ट. कामंचधर्मंच. २१ ङ. कालेच. २२ ख. ग. च. ञ. ट. भरत.

कच्चित्ते [1]ब्राह्मणाः शर्म सर्वशास्त्रार्थकोवि[2]दाः ॥ [3]आशंसन्ते महाप्राज्ञ पौरजानपदैः सह ॥ ६५ ॥
नास्तिक्यमनृतं क्रोधं प्रमादं दीर्घ[4]सूत्रताम् ॥ [5]अदर्शनं ज्ञानवतामालस्यं पञ्चवृत्तिताम् ॥ ६६ ॥
एकचिन्तनमर्थानामनर्थज्ञैश्च मन्त्रणम् ॥ निश्चितानामनारम्भं मन्त्रस्यापरिरक्षणम् ॥ ६७ ॥
[6]मङ्गलस्याप्रयोगं च प्रत्युत्थानं च सर्वतः ॥ कच्चित्त्वं वर्जयस्येताश्राजदोषांश्चतुर्दश ॥ ६८ ॥
दश पञ्च चतुर्वर्गान्सप्त[7]वर्गं च तत्त्वतः ॥ अष्टवर्गं च त्रिवर्गं विद्यास्तिस्रश्च राघव ॥ ६९ ॥

मंच सर्वान कालेविभज्यसेवसे प्रातर्दानादिधर्मकालः तदनन्तरं आस्थान्यां राज्यविचारेणार्थकालः रात्रौकामकालइत्येवंविभज्यसेवसइत्यर्थः । जयतांवर तेषांकालांतरेप्रवृत्तिनिवर्तनसमर्थेत्यर्थः ॥ ६४ ॥ ...र्म सुखं । आशंसन्ते प्रार्थयन्ते ॥६५॥ नास्तिपरलोकइतिमतिर्यस्यसनास्तिकः "अस्तिनास्तिदिष्टंमतिः" इतिठञ् । तस्यभावःनास्तिक्यं । अनृतं असत्यवचनं । क्रोधं मातापित्राचार्यब्राह्मणदुर्बलादिपुकृतापराधेष्वपितद्विषयकंक्रोधं । प्रमादं अनवधानत्वं । दीर्घसूत्रतां चिरक्रियत्वं । "दीर्घसूत्रश्चिरक्रियः" इत्यमरः । ज्ञानवतां सज्जनानां अदर्शनं दर्शनाकरणं । ज्ञानिनांदर्शनंहिनिखिलश्रेयोमूलम् । आलस्यं मदकरवस्तुसेवाजनितं कार्यापटुकरणकत्वमित्यर्थः। पञ्चवृत्तितां पञ्चेन्द्रियपरवशतां ॥ ६६ ॥ अर्थानामेकचिन्तनं राज्यकार्याणांमन्त्र्यनादरेणस्वयमेकएवस्थित्वापर्यालोचनं । अनर्थज्ञैः विपरीतार्थदर्शिभिः ॥ ६७ ॥ मङ्गलस्यप्रातर्दर्पणाद्यवलोकनस्य अप्रयोगं अननुष्ठानं । मङ्गलाद्यप्रयोगमितिपाठे अमङ्गलाचरणमित्यर्थः । सर्वतःप्रत्युत्थानं नीचस्यानीचस्याप्यागमनेप्रत्युत्थानमित्यर्थः । यद्वा सर्वदिगवस्थितशत्रूद्देशेनयुगपद्दण्डयात्रामितिवा । एतांश्चतुर्दशेत्यनेन अन्येषामपिबहूनांदोषाणांविद्यमानत्वंतेषुसर्वेपूक्तानामवश्यहेयत्वंचज्ञायते ॥ ६८ ॥ दशवर्गादिकान् बुद्ध्वा यथावदनुमन्यसेकच्चित् दशवर्गादिकान् त्याज्यत्वेनोपादेयत्वेनचज्ञात्वा यथावदनुतिष्ठसिकच्चिदितिवाक्यार्थः । पूर्वोक्तसंग्रहोयमुपदेशः । दशवर्गस्तावत् "मृगयाऽक्षोदिवास्वापःपरिवादःस्त्रियोमदः । तौर्यत्रिकंवृथाटयाचकामजोदशकोगुणः" इतिमनुनोक्तः । तौर्यत्रिकं नृत्यगीतवाद्यं । वृथाट्या वृथापर्यटनं । कामन्दकस्तु प्रकारान्तरेण "लोभक्रोधालस्यासत्यवचनत्वप्रमादभीरुत्वास्थिरत्वमौढ्यानयावमन्तृत्वानिदशवर्गः" इत्याशयेनाह । "लुब्धःक्रूरोलसोसत्यःप्रमादीभीरुरस्थिरः । मूढोनयोवमन्ताच सुखच्छेद्योरिपुर्मतः" इति । पञ्चवर्गः पञ्चदुर्गाणि । तथाहमनुः "औदकंपार्वतंवार्क्षमैरिणंधान्वनं तथा । शस्तंप्रशस्तमतिभिर्दुर्गंदुर्गोपचिन्तकैः" इति । यद्वा पञ्चवर्गः पञ्चविधवैराणि । अत्रापिकामन्दकः "सापत्नंवस्तुजंस्त्रीजंवाग्जातमपराधजम् । वैरप्रभेदनिपुणैर्वैरंपञ्चविधंस्मृतं" इति । चतुर्वर्गः सामदानभेददण्डाः । यथाकामन्दकीये "सामदानंचभेदश्चदण्डश्चेतिचतुर्विधं" इति । यद्वा चतुर्विधमित्राणिवा । यथाहकामंदकः "औरसंतंतुसंबन्धंतथा वंशक्रमागतम् । रक्षितंव्यसनेभ्यश्चमित्रंज्ञेयंचतुर्विधं" इति । यद्वा धनानांन्यायार्जनादिधर्मचतुष्टयंवा । तदपितत्रैवोक्तं । "न्यायेनार्जनमर्थस्यरक्षणंवर्धनंतथा । सत्पात्रेप्रतिपत्तिश्चराज्यवृत्तंचतुर्विधं" इति । सप्तवर्गः स्वाम्यमात्यादिः । यथोक्तं "स्वाम्यमात्यश्चराष्ट्रंचदुर्गंकोशोबलंसुहृत् । परस्परोपकारीदंराज्यंसप्ताङ्गमुच्यते" इति । यद्वा स्वपक्षस्थजनावान्तरभेदसप्तकंवा । यथाह "निजोथमैत्रश्चसमाश्रितश्चसुबन्धुजः कार्यसमुद्भवश्च । भृत्योगृहीतोविविधोपचारैःपक्षंबुधाः सप्तविधंवदन्ति" इति । यद्वा प्रधानव्यूहाःसप्तवा सप्तवर्गः । यथा "श्येनःसूचीचवज्रश्चशकटोमकरस्तथा । दण्डाख्यःपद्मनामाचव्यूहाःसप्तप्रधानतः" इति । अष्टवर्गमाहकामन्दकः "कृषिवाणिज्यदुर्गाणि

स० दीर्घसूत्रितां चिरकालकृतं दोषंराजादेर्यस्सूचयतितद्धर्मं । पञ्चवृत्तितां मनोबुद्ध्यहङ्कारचित्तचेतनारूपाणिपञ्चवृत्तानियस्य मनसस्तन्मनः पञ्चवृत्तं तदस्यास्तीतिपञ्चवृत्तीमनस्वी तस्यभावः पञ्चवृत्तितातां । गुर्वाद्याज्ञोल्लङ्घनेस्वच्छन्दवृत्तितामितियावत् । शि० क्रोधं ब्राह्मणसंप्रदानकं कोपानुचितान्यसंप्रदानकंवा यागादौसर्वसंप्रदानकंवाकोपं ॥ ६६ ॥ शि० मङ्गलानां माङ्गलिकशब्दानां आदौकार्यप्रारंभसमये अप्रयोगं । ति० मङ्गलाद्यप्रयोगं मङ्गलस्य आदौ प्रातःकाले अप्रयोगं अनुष्ठानं ॥ ६८ ॥

[पा०] १ ङ. छ. झ. ब्राह्मणः. २ ङ. छ. झ. कोविदः. ३ ङ. छ. झ. आशंसते. ४ ठ. सूत्रितां. ५ ग. अमाननंचसाधूनां. ६ क. ग. च. छ. झ. ञ. ट. मङ्गलाद्यप्रयोगं. ज. मङ्गलान्यप्रयोगं. ७ ख. ग. ज. वर्गांश्च.

इन्द्रियाणां जयं बुद्ध्वा षाड्गुण्यं दैवमानुषम् ॥ कृत्यं विंशतिवर्गं च तथा प्रकृतिमण्डलम् ॥ ७० ॥
यात्रादण्डविधानं च द्वियोनी सन्धिविग्रहौ ॥ कच्चिदेतान्महाप्राज्ञ यथावदनुमन्यसे ॥ ७१ ॥

सेतुःकुञ्जरबन्धनम् । खन्याकरः करादानंशून्यानांचनिवेशनम् । अष्टवर्गमिमंसाधुस्वस्थवृत्तोनलोपयेत् " इति । यद्वा पैशुन्याद्यष्टकमष्टवर्गः । यथा "पैशुन्यंसाहसंद्रोहमीर्ष्यासूयार्थदूषणम् । वाग्दण्डयोश्चपारुष्यंक्रोधजोपिगुणोष्टकः " इति । ईर्ष्या क्षान्त्यभावः क्षान्तिविरोधीवाक्कश्चिद्गुणः अज्ञदुर्वलकृतापराधासहिष्णुत्वमितियावत् । असूयातु गुणेष्वपिदोषारोपः । वाक्पारुष्यंदण्डपारुष्यंचगुणद्वयम् । अथत्रिवर्गः धर्मार्थकामाः । यद्वा उत्साहप्रभुत्वमन्त्रशक्तयस्त्रिवर्गः । यद्वा परेषांक्षयस्थानवृद्धयः " क्षयस्थानंचवृद्धिश्चत्रिवर्गोनीतिवेदिनां " इत्यमरः । यद्वा अशक्यसमुद्यमादिकार्यव्यसनत्रयं । यथाहकामन्दकः "वस्तुष्वशक्येषुसमुद्यमश्चशक्येषुमोहादसमुद्यमश्च । शक्येष्वकालेषुसमुद्यमश्चत्रिधैवकार्यंव्यसनंवदन्ति" इति । तिस्रोविद्याः त्रयीवार्तादण्डनीतयः । "आन्वीक्षिकीत्रयीवार्तादण्डनीतिश्च" इति विद्यायाश्चतुर्विधत्वेपिआन्वीक्षिक्यास्त्रय्यामन्तर्भावः । तथाहकामन्दकः "त्रयीवार्तादण्डनीतिरितिविद्याहिमानवाः । त्रय्याएवविशेषोयमियमान्वीक्षिकीमता " इति । त्रयी वेदः । वार्ता कृषिगोरक्षवाणिज्यं । दण्डनीतिर्नीतिशास्त्रं । इन्द्रियाणांजयं जयोपायं । षड्गुणाएवषाड्गुण्यं स्वार्थेष्यञ् । तेच संधिविग्रहयानासनद्वैधीभावसमाश्रयाः । देवमानुषं देवमनुष्येभ्यआगतव्यसनमित्यर्थः । दैवंमानुषंचव्यसनं प्रत्येकंपञ्चविधं यथाहकामंदकीये " हुताशनोजलं व्याधिर्दुर्भिक्षंमरणंतथा । इतिपञ्चविधंदैवंमानुषंव्यसनंपरम् । आयुक्तकेभ्यश्चोरेभ्यःपरेभ्योराजवल्लभात् । पृथिवीपतिलोभाच्चव्यसनंपञ्चधाभवेत् " इति । आयुक्तकाः अधिकारिणः । कृत्यं अलब्धवेतनावमानितकोपितभीषितेषुशत्रुसंवन्धिष्वभिमतवस्तुप्रदानेनकर्तव्यंभेदनं । अत्राप्याहकामन्दकः " अलब्धवेतनोलुब्धोमानीचाप्यवमानितः । क्रुद्धश्चकोपितोऽकस्मात्तथाभीतश्चभीषितः । यथाभिलषितैःकामैर्भिन्द्यादेतांश्चतुर्विधान् " इति । असंधेयाः विग्राह्याः वालवृद्धादयोविंशतिविधाः । प्रतिपक्षनृपतयो विंशतिवर्गइत्युच्यते । यथाहकामन्दकीये " वालोवृद्धोदीर्घरोगीतथाज्ञातिवहिष्कृतः । भीरुकोभीरुजनकोलुब्धोलुब्धजनस्तथा । विरक्तप्रकृतिश्चैवविषयेष्वतिसक्तिमान् । अनेकचित्तमन्त्रश्चदेवब्राह्मणनिन्दकः । दैवोपहतकश्चैवदैवचिन्तकएवच । दुर्भिक्षव्यसनोपेतोवलव्यसनसंकुलः । अदेशस्थोवहुरिपुर्युक्तोऽकालेनयश्चसः । सत्यधर्मव्यपेतश्चविंशतिःपुरुषाअमी । एतैः संधिनकुर्वीतविगृह्णीयात्तुकेवलं " इति । ज्ञातिवहिष्कृतः वन्धुजनवहिष्कृतः । भीरवःजनाःमन्त्रिसेनापतियोधाःयस्यसः भीरुजनकः । एवमेवलुब्धजनइत्यत्रापि । लुब्धाः अत्यन्तधनाशापराः । दैवोपहतकः महर्षिशापाद्यभिहतः । दैवचिन्तकः दैवमेवसर्वंकुर्यादितिमत्वापुरुषव्यापारमकुर्वाणः । वलव्यसनं सेनाविलयः । अदेशस्थः प्रोषितः । अकालेनयुक्तः क्रूरग्रहदशाभागादियुक्तः । यद्वा विग्रहकारणभूतोराज्यापहारादिविंशतिवर्गः । अत्रचकामन्दकः " राज्यस्त्रीस्थानदेशानांज्ञातीनांचधनस्यच । अपहारोमदोमानःपीडावैषयिकीतथा । ज्ञानार्थशक्तिधर्माणांविघातोदैवमेवच । मित्रार्थयोश्चावमानस्तथावन्धुविनाशनम् । भूतानुग्रहविच्छेदस्तथामण्डलदूषणम् । एकार्थाभिनिवेशित्वमितिविग्रहयोनयः " इति । अत्रापहारशब्दः पूर्वैःपञ्चभिःसंवध्यते । वैषयिकीपीडा विषयपारवश्यं । विघातशब्दोज्ञानादिभिश्चतुर्भिरन्वेति । दैवशब्देन देवाइन्द्रादयउच्यन्ते । तेषांविरोध्यपिविग्राह्यः । यथा दशरथस्य इन्द्रविरोधीशम्बरः । मित्रार्थयोरित्यत्र मित्रंमित्रार्थस्तदनुवन्धीचेत्यर्थः । यद्वा मित्रं मित्रस्यार्थःतद्धनं । अर्थस्यावमानोहरणमेव । भूतानुग्रहविच्छेदः लोकानुग्रहराहित्यं । मण्डलदूषणं मण्डलशब्देनस्वमन्त्रिसेनापतिसुहृदादिरुच्यते । तस्य दूषणं तद्विघटनं । एकार्थाभिनिवेशित्वं स्वाभिमतविषयाभिलाषित्वं । प्रकृतयश्चमण्डलंच प्रकृतिमण्डलं । प्रकृतयस्तावत् "अमात्यराष्ट्रदुर्गाणिकोशोदण्डश्चपञ्चमः । एताः प्रकृतयस्तज्ज्ञैर्विजिगीषोरुदाहृताः" इतिकामन्दकोक्ताः । मण्डलं द्वादशविधराजात्मकं । मध्यतोविजि-

कतक० राज्यस्त्रीस्थानदेशानांज्ञातिधनयोश्चयस्यापहारस्तेपट् । मदमानदेशपीडावन्तस्त्रयः । ज्ञानार्थशक्तिधर्माणांयेषां विघातस्तेचत्वारः । दैवचिन्तकः रिपुमित्रावमन्तारौ वन्धुविनाशनंयस्यलोकानुग्रहरहितःदूषितमण्डलः एकार्थाभिनिवेशित्वंयस्य एतेविग्राह्याएव ॥ ७० ॥

मन्त्रिभिस्त्वं [1]यथोद्दिष्टैश्चतुर्भिस्त्रिभिरेव वा ॥ कच्चित्समस्तै[2]र्व्यस्तैश्च मन्त्रं मन्त्रयसे मिथः[3] ॥ ७२ ॥
कच्चित्ते सफला वेदाः कच्चित्ते सफलाः क्रियाः ॥ कच्चित्ते सफला दाराः कच्चित्ते सफलं श्रुतम् ॥७३॥

गीपुः तस्यशत्रुःमित्रंशत्रोर्मित्रंमित्रमित्रंशत्रुमित्रमित्रं चेतिपुरोवर्तिनःपञ्च । पार्ष्णिग्राहःआक्रन्दःपार्ष्णिग्राहासारः आक्रन्दासारश्चेतिपृष्ठभागस्थाश्चत्वारः । पार्श्वस्थोमध्यमः । तेषांबहिरवस्थितउदासीनश्चेति । तथाचकामन्दकः " संपन्नस्तुप्रकृतिभिर्महोत्साहःकृतश्रमः । जेतुमेषणशीलश्चविजिगीषुरितिस्मृतः । अरिर्मित्रमरेर्मित्रंमित्रमित्रमतःपरम् । तथारिमित्रमित्रंच विजिगीषोःपुरःसराः । पार्ष्णिग्राहस्ततःपश्चादाक्रन्दस्तदनन्तरः । आसारावनयोश्चैवविजिगीषोस्तुपृष्ठतः । अरेश्चविजिगीषोश्चमध्यमोभूम्यनन्तरः । अनुग्रहेसंहतयोर्व्यस्तयोर्निग्रहेप्रभुः । मण्डलाद्बहिरेतेषामुदासीनोबलाधिकः । अनुग्रहेसंहतानांव्यस्तानांच वधेप्रभुः " इति । अत्रशत्रुमित्रशब्दौ पुरस्तादव्यवहितानन्तरराष्ट्राधिपतिमेकव्यवहितानन्तरराष्ट्राधिपतिंचक्रमेणवदतः । पार्ष्णिग्राहाक्रन्दशब्दावपिपृष्ठतस्तादृशौक्रमेणवदतः । नतुप्रसिद्धशत्रुमित्रपरौ । " विषयानन्तरोराजाशत्रुर्मित्रमतःपरम् । उदासीनःपरतरःपार्ष्णिग्राहस्तुपृष्ठतः" इत्यमरः । आसारः सुहृद्बलं । "आसारःस्यान्मित्रबले" इतिरत्नमाला । मध्यमशब्देनच अरिविजिगीषोर्व्यस्तयोःसमस्तयोश्च निग्रहानुग्रहसमर्थः पार्श्वदेशस्थःकश्चिदुक्तेभ्योन्यो राजोच्यते । नतुमध्यवर्ती । उदासीनशब्देनच एतेषांसर्वेषामपिव्यस्तानांसमस्तानांचनिग्रहानुग्रहसमर्थःकश्चिद्विप्रकृष्टदेशस्थोराजोच्यते । यात्रादण्डविधानं यात्रा यानं दण्डस्यसैन्यस्यविधानं संविधानं व्यूहभेदविधानं । यद्वा दण्डःशत्रुनिरसनं तस्य विधानंप्रकारः । यात्राचदण्डविधानंचयात्रादण्डविधानं प्रकृतिमण्डलमित्यत्रात्रचैकवद्भावः । सेनाव्यूहभेदाःपूर्वमुक्ताः शत्रुनिरसनप्रकाराश्चस्फुटाःसुज्ञेया इति यात्राशब्दितंयानंप्रदर्श्यते । तच्चपञ्चविधं बलातिशयेनपार्ष्णिग्राहादिभिर्विगृह्यशत्रूद्देशेनयानं विगृह्ययानं । पार्ष्णिग्राहादिभिःसंधिंकृत्वाशत्रूद्देशेनयानं संधाययानं । सामन्तैःसमेत्ययानंसंभूययानं । अन्योद्देशेनयात्राप्रसङ्गमुत्पाद्य अन्यंप्रतियानंप्रसङ्गतोयानं । अन्यप्रसङ्गंकृत्वाबलवत्तयातमुपेक्ष्यतन्मित्रोद्देशेनयानमुपेक्ष्ययानमिति । यथाकामन्दकीये " विगृह्यसंधायतथासंभूयाथप्रसङ्गतः । उपेक्ष्य चेतिनिपुणैर्यानंपञ्चविधंस्मृतं " इति । द्वियोनीइति संधिविग्रहयानासनद्वैधीभावसमाश्रयाःषड्गुणाः पृथक्पथक् प्रतिपादिताः । इदानींद्वैगुण्यमतावलम्बनेन यानादीन्संधिविग्रहयोरन्तर्भाव्यवदति । यानासनेविग्रहस्यस्वरूपं द्वैधीभावसमाश्रयौसंधेरूपं । तत्रविजिगीषोररिंप्रतियात्रा यानं तयोर्मिथःप्रतिबद्धशक्त्योः कालप्रतीक्षयातूष्णीमवस्थानमासनं । दुर्बलस्यप्रबलयोर्द्विषतोर्वाचिकमात्मसमर्पणंद्वैधीभावः । तथाह " बलिनोर्द्विषतोर्मध्येवाचात्मानंसमर्पयन् । द्वैधीभावेनवर्तेतकाकाक्षिवदलक्षितः " इति । अरिणापीड्यमानस्यबलवदाश्रयणंसमाश्रयइतिविवेकः । तदुक्तं कामन्दकेन " यानासनेविग्रहस्यरूपंसद्भिरितिस्मृतम् । संधेश्चसंधिमार्गज्ञैर्द्वैधीभावसमाश्रयौ " इति । एतान् पूर्वोक्तन् । यथावदनुमन्यसे अनुतिष्ठसिकच्चिदित्यर्थः । उक्तदशवर्गादीनांतत्त्वंज्ञात्वाहेयान् जहासि ग्राह्यान्गृह्णासिकच्चिदितियावत् ॥ ६९—७१ ॥ यथोद्दिष्टैः शास्त्रोक्तमन्त्रिलक्षणलक्षितैः । यथोद्दिष्टमितिपाठे नीतिशास्त्रोक्तमन्त्रविचारमार्गमनतिक्रम्येत्यर्थः । बहुभिर्मन्त्रकरणेमन्त्रभिन्नत्वसंभवादेकमत्याभावाच्चचतुर्भिस्त्रिभिरेववेत्युक्तं । व्यस्तैस्तत्तन्मतंपरिज्ञायसमस्तैश्चतुर्भिस्त्रिभिर्वापरिगणितैर्मन्त्रिभिः । मिथः रहसि मन्त्रंमन्त्रयसेकच्चित् ॥ ७२ ॥ राज्ञामवश्यंसंपादनीयानर्थान्पृच्छति—कच्चित्तेसफलावेदाइति । तेवेदाः त्वदधीतावेदाः सफलाःकच्चित् अग्निहोत्राद्यनुष्ठानेनसफलीकृताःकच्चित् । क्रियन्तेसाध्यन्तइतिक्रियाः धनानि । धनानित्वत्संपादितानि दानभोगाभ्यांसफलीकृतानिकच्चित् । तेदाराः सफलाः कच्चित् रतिपुत्राभ्यांसफलाः कच्चित् । तेश्रुतं शास्त्रश्रवणं सफलंकच्चित् शीलवृत्ताभ्यांसफलंकच्चित् । तथाच

ति० क्रियाः राजकार्याणि तत्तदुद्देश्यफलयुक्तानि । स० क्रियाः औपासनादिरूपाः ॥ ७३ ॥

[पा०] १ ख. ङ. छ. झ. ट. यथोद्दिष्टंचतुर्भिः. २ क. ग. ग. व्यस्तैर्वा. ३ ङ. छ. झ. ट. युधि.

कच्चिदेषैव ते बुद्धिर्यथोक्ता मम राघव ॥ आयुष्या च यशस्या च धर्मकामार्थसंहिता ॥ ७४ ॥
यां वृत्तिं वर्तते तातो यां च नः प्रपितामहाः॥ तां वृत्तिं वर्तसे कच्चिद्या च सत्पथगा शुभा ॥७५॥
कच्चित्स्वादुकृतं भोज्यमेको नाश्नासि राघव ॥ कच्चिदाशंसमानेभ्यो मित्रेभ्यः संप्रयच्छसि ॥७६ ॥
राजा तु धर्मेण हि पालयित्वा महामतिर्दण्डधरः प्रजानाम् ॥
अवाप्य कृत्स्नां वसुधां यथावदितश्च्युतः स्वर्गमुपैति विद्वान् ॥ ७७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे शततमः सर्गः ॥ १०० ॥

एकोत्तरशततमः सर्गः ॥ १०१ ॥

भरतेनरामंप्रतिस्वकुलाचारानुसारणेनतदभिषेचनप्रार्थनपूर्वकंतच्छोकहेतुकत्वेनपितुःस्वर्गतिनिवेदनम् ॥ १ ॥

रामस्य वचनं श्रुत्वा भरतः प्रत्युवाच ह ॥ किं मे धर्माद्विहीनस्य राजधर्मः करिष्यति ॥ १ ॥

महाभारते "अग्निहोत्रफलावेदाः दत्तभुक्तफलंधनम् । रतिपुत्रफलादाराः शीलवृत्तफलंश्रुतं" इति ॥ ७३ ॥ आयुष्या यशस्या धर्मकामार्थसंहिता उक्ता एषाबुद्धिर्ममयथा तथैवतववर्ततेकच्चित् ॥७४॥ अथ उक्तानुक्तंसकलंसंग्रहेणदर्शयति—यामित्यादिना । वृत्तिमाचरन् वर्तते अवर्तिष्ट । यद्वा दशरथमरणस्याज्ञातत्वाद्वर्ततइत्युक्तिः । पितामहस्य अजस्य चिरंराज्यपरिपालनाभावात् प्रपितामहाः इत्युक्तं । प्रपितामहाः प्रपितामहप्रभृतयः । यथा "सप्तमीशौण्डैः" इत्यत्रशौण्डादिभिरितिवृत्तिकारः । अत्रअ..न्तेत्यध्याहार्यं । पित्राद्यननुष्ठितस्याननुष्ठानेप्राप्तेआह—याचसत्पथगाशुभेति । सत्पथगा सन्मार्गानुसारिणी । शुभा अनिन्दिता ॥ ७५ ॥ स्वादुकृतं मधुरतयासिद्धं । आशंसमानेभ्यः धनमितिशेषः ॥ ७६ ॥ एवमाचरतोराज्ञऐहिकामुष्मिकफले दर्शयति—राजात्वित्यादिना । तुशब्देन राजवैलक्षण्यमुच्यते।हिःप्रसिद्धौ । पालयित्वा महीमितिशेषः।महामतिःउक्तनीतिधर्मज्ञः । दण्डधरःयुक्तदण्डधरः । यथावत् पूर्वराजवत् । इतः अस्माल्लोकात् । च्युतः प्रारब्धकर्मावसाने मृतइत्यर्थः । विद्वान् शरीरभिन्नात्मज्ञानवान् ॥ ७७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्यानेशततमःसर्गः ॥ १०० ॥

रामस्यवचनंश्रुत्वाभरतःप्रत्युवाचहेत्यादिरयंसर्गएवात्रलेखनीयः । तंतुरामःसमाश्वास्यभ्रातरंगुरुवत्सलमित्यादिसर्गस्तु लेखकैःप्रमादाल्लिखितः । तस्योक्तप्रश्नोत्तरत्वाभावात् अत्रभरतोच्यमानपितृमरणश्रवणानन्तरंरामस्यदुःखितत्वाश्रवणात् । अत्रमहेश्वरतीर्थेनसर्गपौर्वापर्यवैपरीत्यमनालोच्यस्वदृष्टकोशमात्रप्रामाण्येन तंतुरामःसमाश्वास्येत्यादिकंसर्गमेवैकोत्तरशततमंमन्वानेन तत्सर्गव्याख्यानान्ते तत्रत्यार्थविरोधमालोच्यैवमाक्षेपपरिहारावुक्तौ । ननु "आर्यतातःपरित्यज्यकृत्वाकर्मसुदुष्करम् । गतःस्वर्गंमहाबाहुःपुत्रशोकाभिपीडितः" इति "इमाःप्रकृतयः सर्वाविधवामातरश्चयाः । त्वत्सकाशमनुप्राप्ता" इति चभरतेनोक्ते रामस्तदानीमशोचन् तदुल्लङ्घ्याभिषेकप्रत्याख्यानमेवकिमितिकृतवान् । नैषदोषः । तस्मिन्भरतवाक्यप्रबन्धेपितृमरणमानुषङ्गिकत्वेनोक्तं राज्यस्वीकरणमेवप्राधान्येनोक्तं अतोरामस्त्वेवंमन्यते । पितापुत्रशोकेनमृतकल्पोनपुनर्जीविष्यतीतिमृतइत्युच्य-

---

ति० इतश्च्युतः इतः एतद्देहलोकाभ्यां । शि० राजा सर्वत्रप्रकाशमानेनधर्मेणोपलक्षितः ॥७७॥ इतिशततमस्सर्गः॥१००॥

ति० अथभरतः पितृवृत्तान्तप्रश्नोत्तरमुक्त्वाकच्चित्प्रश्नोत्तरमाह—**रामस्येति** । धर्मात् राज्यायोग्यत्वेनराजधर्माद्राज्यात् विहीनस्यत्वत्पृष्टराजधर्मोमेकोपयुक्तः अनुपनीतयागवत् । अतोऽनवसरदुस्स्थांमयि "कच्चिन्नुधरते" इत्यादिप्रश्नइतिभावः । शि० राजधर्मः राजधर्मोपदेशः । तनि० धर्मात् रामकैङ्कर्यरूपपरमैकान्तिधर्मात् स्वरूपनिरूपकशेषत्वधर्माद्वा । विहीनस्य राजधर्मः तद्विरोधिसामान्यधर्मः ॥ १ ॥

[पा०] १ च. ञ. देपाच. २ ङ. छ. झ. ञ. ट. महीपतिः. ३ रामस्यवचनंश्रुत्वेत्यादिरयंसर्गः झ. ञ. ठ. पुस्तकेषु १०२ तमसर्गतयावर्तते ।

शाश्वतोऽयं सदा धर्मः स्थितोस्मासु नरर्षभ ॥ ज्येष्ठपुत्रे स्थिते राजन्न कनीयान्नृपो भवेत् ॥ २ ॥
स समृद्धां मया सार्धमयोध्यां गच्छ राघव ॥ अभिषेचय चात्मानं कुलस्यास्य भवाय नः ॥ ३ ॥
राजानं मानुषं प्राहुर्देवत्वे स मतो मम ॥ यस्य धर्मार्थसहितं वृत्तमाहुरमानुषम् ॥ ४ ॥
केकयस्थे च मयि तु त्वयि चारण्यमाश्रिते ॥ दिवमार्यो गतो राजा यायजूकः सतां मतः ॥ ५ ॥
निष्क्रान्तमात्रे भवति सहसीते सलक्ष्मणे ॥ दुःखशोकाभिभूतस्तु राजा त्रिदिवमभ्यगात् ॥ ६ ॥
उत्तिष्ठ पुरुषव्याघ्र क्रियतामुदकं पितुः ॥ अहं चायं च शत्रुघ्नः पूर्वमेव कृतोदकौ ॥ ७ ॥
प्रियेण खलु दत्तं हि पितृलोकेषु राघव ॥ अक्षय्यं भवतीत्याहुर्भवांश्चैव पितुः प्रियः ॥ ८ ॥
त्वामेव शोचंस्तव दर्शनेप्सुस्त्वय्येव सक्तामनिवर्त्य बुद्धिम् ॥
त्वया विहीनस्तव शोकरुग्णस्त्वां संस्मरन्नस्तमितः पिता ते ॥ ९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे एकोत्तरशततमः सर्गः ॥ १०१ ॥

ते मातरश्चविधवाकल्पाइति विधवाइत्युच्यन्ते।अनेनम-माभिषेचनमेवप्राधान्येनोच्यतइति। अतोशोचन्नभिषे-कप्रत्याख्यानंकृतवान् स्ववाक्ये पितृमरणानुवादस्यचा-यमेवार्थइति। अत्रायंपरिहारोनयुज्यते। यदिचपितामृ-तकल्पत्वेनमृतइत्युच्यतइतिरामोगृह्णीयात् तदा "व्या-दिश्यचमहातेजादिवंदशरथोगतः" इतिनानुवदेत् । यस्तुस्वाशयंस्वयमेवैवमितिवदति तस्यान्येनगत्यन्त-रेसतितद्विरुद्धाभिप्रायकल्पनंकथंकर्तुंशक्यं । अतोने-नैवानुवादेनरामेणपितामृतइत्येवगृहीतमितिभाति । किंच प्रकृतीनांमातृणांचसमागमनात्पूर्वं "इमाः प्रकृतयःसर्वाविधवामातरश्चयाः । त्वत्सकाशमनु-प्राप्ताःप्रसादंकर्तुमर्हसि" इत्यङ्गुल्यादिनिर्देशानुपपत्ते-श्च। अतः तंतुरामःसमाश्वास्येत्यादिसर्गाः वसिष्ठं पुरतःकृत्वेतित्र्युत्तरशततमसर्गान्तरंचतुरुत्तरशततम-सर्गत्वेनलेखनीयःपठनीयश्च । तथाचेत्सङ्गतःस्यात् । अतोत्ररामस्यवचनंश्रुत्वेत्ययंसर्गएवव्याख्यायते । ध-र्मात् त्वत्सेवारूपमुख्यधर्मात् । यद्वा धर्मात् त्वदुक्त-राजधर्मानुष्ठानहेतुभूतराजभावात्। राजधर्मः त्वदुक्त-नीतिस्थः ॥ १ ॥ कुतस्तेराजभावाभावइत्यत्राह— शाश्वतइति । अस्मासुअस्मत्पूर्वेषु ॥ २ ॥ भवाय भद्राय । "भवोभद्रेहरेप्राप्तौसत्तासंसारजन्मसु" इतिवैजयन्ती ॥ ३ ॥ नसर्वसुलभंराजत्वमित्याह— राजानमिति । प्राहुः प्राकृताजनाइतिशेषः । सः राजा । मम देवत्वेमतः देवत्वेनसंमतइत्यर्थः ॥ ४ ॥ एवंसन्निहितनीतिप्रश्नस्योत्तरमुक्त्वा प्राथमिकराजवि-षयप्रश्नस्योत्तरमाह—केकयस्थइति। यायजूकः इज्या-शीलः । "इज्याशीलोयायजूकः" इत्यमरः ॥ ५ ॥ मन्निर्गमनानन्तरंकतिदिवसेपुराजादिवंगतइत्यत्राह— निष्क्रान्तमात्रइति ॥ ६—७ ॥ भवद्भ्यांदत्तेकिंमया-पिदातव्यमित्यत्राह—प्रियेणेति ॥ ८ ॥ प्रियत्वमेवद-र्शयति—त्वामेवेति । रुग्णः पीडितइतियावत् ॥९॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने एकोत्तरश-ततमःसर्गः ॥ १०१ ॥

तनि० अयं पूर्वोक्तः शाश्वतः निश्चसिद्धः अस्मासुसदास्थितः । शत्रुघ्नलक्ष्मणापेक्षयाबहुवचनं । नरर्षभ पुरुषोत्तम । **ति०** शाश्वतः कुलक्रमागतः । अस्मासु अस्मत्पूर्वेषु । यथेतिपाठे यथाशास्त्रं स्थितः प्रतिष्ठितः । **स०** राजा राज्ञा । **तनि०** येलोकाः राजानंमानुषंप्राहुः तएवयस्यतेधर्मार्थसहितंवृत्तममानुषंप्राहुः मनुष्यसंस्थानत्वेप्यतिमानुषशीलवृत्तत्वेपरतिलङ्घितसर्वलो-कसाम्यत्वेन देवत्वे नारायणत्वे। ममसंमतइत्यर्थः। **ती०** देवत्वप्रापकतपश्चरणंविहायममराज्याभिषेकेणकिमित्यतआह—**राजान-मिति**। यद्यपिराजानंमानुषंप्राहुः तथापिममदेवत्वेसंमतः । कुतः यस्यवृत्तममानुषं दिव्यं देवत्वसंपादकमित्यर्थः। तपश्चरणेन क्लेशद्वारादेवत्वं राज्यपरिपालनेनभोगद्वारादेवत्वमितिभावः । **स०** राजानंलौकिकं मानुषंप्राहुः ममतु त्वंदेवत्वेसंमतः । तत्रहेतुः **यस्येति** ॥ ६३ ॥ **ति०** उक्तमपि राजमरणंरामेणविषयान्तरोत्तरदानादश्रुतमिवमत्वापुनस्तदेवाह—**केकयस्थइति** ॥ ५ ॥ **ति०** कृतोदकाविति कृतसपिण्डीकरणान्तसर्वकृत्यौ ॥ ७ ॥ इत्येकोत्तरशततमस्सर्गः ॥ १०१ ॥

[पा०] १ क. ङ. च. झ. ञ. ट. ज्येष्ठे. २ क. ञ. राज्ञांन. ङ. ८. झ. ट. ठ. राजान. ३ क. ङ. च. छ. झ. ञ. ट. कनीयान्भवेन्नृपः. ४ क. च. ञ. तुचमयि. ५ ग. मय्यस्थिते. ६ ङ. झ. ट. श्रीमान्स्वर्गंगतो. ७ ग. मलगान. ८ क.—ट. किल. ९ ख. ङ. छ.—ट. अक्षयं. १० ङ. छ. झ. ट. संस्मरन्नेवगतः.

द्व्युत्तरशततमः सर्गः ॥ १०२ ॥

पितुःस्वर्गतिश्रवणजशोकसंमूर्च्छितस्यरामस्यभरतादिभिःसलिलसेचनादिनामूर्च्छापनोदनम् ॥ १ ॥ रामेणपित्रनुशोचनेनबहुधापरिदेवनम् ॥ २ ॥ भरतादिभिःसमाश्वासितेनरामेणसीतासमाश्वासनपूर्वकंमन्दाकिनीमेत्यपित्रेजलदानपूर्वकंनिवापदानम् ॥ ३ ॥ ततःपर्णशालामेत्यरुदतांरामादीनांतुमुलशब्दश्रवणसंभ्रान्तैर्भरतसैनिकैस्तादृग्भ्रातृसमागमावलोकनायसरभसंतत्समीपगमनम् ॥ ४ ॥ रामेणतेषांयथार्हंसंमाननम् ॥ ५ ॥

तां श्रुत्वा करुणां वाचं पितुर्मरणसंहिताम् ॥ राघवो भरतेनोक्तां बभूव गतचेतनः ॥ १ ॥
तं तु वज्रमिवोत्सृष्टमाहवे दानवारिणा ॥ वाग्वज्रं भरतेनोक्तममनोज्ञं परंतपः ॥ २ ॥
प्रगृह्य बाहू रामो वै पुष्पिताग्रो यथा द्रुमः ॥ वने परशुना कृत्तस्तथा भुवि पपात ह ॥ ३ ॥
तथा निपतितं रामं जगत्यां जगतीपतिम् ॥ कूलघातपरिश्रान्तं प्रसुप्तमिव कुञ्जरम् ॥ ४ ॥
भ्रातरस्ते महेष्वासं सर्वतः शोककर्शितम् ॥ रुदन्तः सह वैदेह्या सिषिचुः सलिलेन वै ॥ ५ ॥
स तु संज्ञां पुनर्लब्ध्वा नेत्राभ्यामास्रमुत्सृजन् ॥ उपाक्रामत काकुत्स्थः कृपणं बहु भाषितुम् ॥६॥
स रामः स्वर्गतं श्रुत्वा पितरं पृथिवीपतिम् ॥ उवाच भरतं वाक्यं धर्मात्मा धर्मसंहितम् ॥ ७ ॥
किं करिष्याम्ययोध्यायां ताते दिष्टां गतिं गते ॥ कस्तां राजवराद्धीनामयोध्यां पालयिष्यति ॥८॥
किंनु तस्य मया कार्यं दुर्जातेन महात्मनः ॥ यो मृतो मम शोकेन मया चापि न संस्कृतः ॥ ९ ॥
अहो भरत सिद्धार्थो येन राजा त्वयाऽनघ ॥ शत्रुघ्नेन च सर्वेषु प्रेतकृत्येषु सत्कृतः ॥ १० ॥
निष्प्रधानामनेकाग्रां नरेन्द्रेण विनाकृताम् ॥ निवृत्तवनवासोपि नायोध्यां गन्तुमुत्सहे ॥ ११ ॥

करुणां शोकावहां । यद्वा अकरुणां करुणारहितां क्रूरामितियावत् ॥ १ ॥ तंत्वित्यादिश्लोकद्वयमेकं वाक्यं । दानवारिणा इन्द्रेण । बाहूप्रगृह्य पाणिनापाणिंनिष्पीडय उद्धृत्यवा । वाग्वज्रमित्यस्यपूर्वश्लोकादनुषक्तेनश्रुत्वेत्यनेनान्वयः ॥ २—३ ॥ तथेत्यादिश्लोकद्वयं । कूलघातेन मर्दनदन्तकण्डूाचकृतेनकूलप्रहारेण परिश्रान्तं । अतएवप्रसुप्तंकुञ्जरमिवस्थितं मूर्च्छितमित्यर्थः । सलिलेन सर्वतःसिषिचुः सर्वगात्राणिमोहशान्तयेसिक्तवन्तः । यतःअमृतंवाआपस्तस्मादद्भिरेवतांतमभिषिञ्चन्तीतिश्रुतिरपिहिवदति ॥ ४—५ ॥ उपाक्रामत उपाक्रमत । दीर्घआर्षः ॥ ६—७ ॥ दिष्टां कालकल्पितां । "कालोदिष्टोप्यनेहापि" इत्यमरः । यद्वा दिष्टां दैवकल्पितां । "दैवंदिष्टंभागधेयं" इत्यमरः । राजवरात् तृतीयार्थेपञ्चमी । [पाठान्तरंकिंकरिष्यामीत्यस्यभावमुद्घाटयति— राजवरेति । राजवराधीनां तद्रक्षणाधीनामित्यर्थः] ॥ ८ ॥ पितृमरणहेतुभूतत्वात्तत्संस्कारानुपयोगाच्चात्मानंविगर्हते— किंनुतस्येति ॥ ९ ॥ अनघ "पुत्रमन्त्येतुकर्मणि" इत्युक्तपितृसंस्काररूपभाग्यविघटकपापरहित । अहंहि तादृशपापवानितिभावः । येनकारणेनत्वयाशत्रुघ्नेनच सर्वेषुप्रेतकृत्येषुप्राप्तेषु राजासत्कृतः ॥ १० ॥ एकाग्रा अनाकुला । "अनाकुलेपिचैकाग्रः" इत्यमरः । सान भवतीत्यनेकाग्रा तां आकुलामितियावत् ॥ ११ ॥

शि० मरणसंहितां अन्यागम्यलोकान्तरगमनकर्तृत्वेनमरणसदृशगमनसंयुक्तां ॥ १ ॥ ति० बाहूप्रगृह्य अतिशिथिलौकृत्वा । भरतादिदर्शनेनहर्षात् पुष्पिताग्रद्रुमसादृश्यं । स० कृत्तः छिन्नः ॥३॥ शि० दुर्जातेन दुःखेनपितृकर्तृकातियागाविनाजातंजनिर्यस्यतेन । मया महात्मनस्तस्यपितुः किंकार्यं । भूयः पिता ममशोकेन अमृतः लोकान्तरगमनकर्तृत्वेनमृतसदृशः सः मयानसंस्कृतः यात्राकालेम[illegible]रंनप्राप्तः ॥ ९॥ ति० सत्कृतः संस्कारकर्मणापूजितः ॥ १० ॥ ति० निष्प्रधानां प्रधानहीनां अतएव

[पा०] [illegible] २ क. ङ. च. छ. झ. ञ. ट. रामोबाहू. ३ ङ. झ. ट. पुष्पिताग्रइव. ४ घ. स्तदाभूमौ. ५ क. ख. घ.—ट. ह्रिपतितं. ग. विपतितं. ६ ग. च. ञ. कर्शिताः. ७ च. ज. ञ. सलिलेनतु. ८ छ.—ञ. मश्रुमुत्सृजन्. ९ क. ख. ग. च. ञ. उपाक्रमत. १० ग. जगतीपतिं. ११ क. च. ञ. धर्मज्ञं. १२ ग. तातेचत्रिदिवं. १३ ङ. दुर्जनेन. १४ ङ. छ. झ. ट. राजयानग. १५ क. कार्येषु. १६ क. घ. च. ञ. संस्कृतः.

समाप्तवनवासं मामयोध्यायां परंतप ॥ कोनु शासिष्यति पुनस्ताते लोकान्तरं गते ॥ १२ ॥
पुरा प्रेक्ष्य सुवृत्तं मां पिता यान्याह सान्त्वयन् ॥ वाक्यानि तानि श्रोष्यामि कुतः कर्णसुखान्यहम् ॥१३॥
एवमुक्त्वा स भरतं भार्यामभ्येत्य राघवः ॥ उवाच शोकसन्तप्तः पूर्णचन्द्रनिभाननाम् ॥ १४ ॥
सीते मृतस्ते श्वशुरः पित्रा हीनोसि लक्ष्मण ॥ भरतो दुःखमाचष्टे स्वर्गतं पृथिवीपतिम् ॥ १५ ॥
ततो बहुगुणं तेषां बाष्पं नेत्रेष्वजायत ॥ तथा ब्रुवति काकुत्स्थे कुमाराणां यशस्विनाम् ॥ १६ ॥
ततस्ते भ्रातरः सर्वे भृशमाश्वास्य राघवम् ॥ अब्रुवञ्जगतीभर्तुः क्रियतामुदकं पितुः ॥ १७ ॥
सा सीता श्वशुरं श्रुत्वा स्वर्गलोकगतं नृपम् ॥ नेत्राभ्यामश्रुपूर्णाभ्यामशकन्नेक्षितुं पतिम् ॥ १८ ॥
सान्त्वयित्वा तु तां रामो रुदन्तीं जनकात्मजाम् ॥ उवाच लक्ष्मणं तत्र दुःखितो दुःखितं वचः १९
आनयेङ्गुदिपिण्याकं चीरमाहर चोत्तरम् ॥ जलक्रियार्थं तातस्य गमिष्यामि महात्मनः ॥ २० ॥
सीता पुरस्ताद्व्रजतु त्वमेनामभितो व्रज ॥ अहं पश्चाद्गमिष्यामि गतिर्ह्येषा सुदारुणा ॥ २१ ॥
ततो नित्यानुगस्तेषां विदितात्मा महामतिः ॥ मृदुर्दान्तश्च शान्तश्च रामे च दृढभक्तिमान् ॥२२॥
सुमन्त्रस्तैर्नृपसुतैः सार्धमाश्वास्य राघवम् ॥ अवातारयदालम्ब्य नदीं मन्दाकिनीं शिवाम् ॥ २३ ॥
ते सुतीर्थां ततः कृच्छ्रादुपागम्य यशस्विनः ॥ नदीं मन्दाकिनीं रम्यां सदापुष्पितकाननाम् ॥२४॥
शीघ्रस्रोतसमासाद्य तीर्थं शिवमकर्दमम् ॥ सिषिचुस्तूदकं राज्ञे तत एतत्ते भवत्विति ॥ २५ ॥

शासिष्यति कार्येपुनियोक्ष्यतीत्यर्थः ॥ १२ ॥ सुवृत्तं शोभनंनियोगाचरणरूपंवृत्तंयस्यतं । कुतः कस्मात्पुरुषात् ॥ १३ ॥ अभ्येत्य अभिमुखोभूत्वा ॥ १४ ॥ दुःखमित्येतत् क्रियाविशेषणं । इत्युवाचेतिपूर्वेणान्वयः ॥ १५—१६ ॥ क्रियतामित्यत्रेतिकरणंद्रष्टव्यं ॥ १७—१९ ॥ इङ्गुदिपिण्याकं तपस्विभोज्यंतापसतरुबीजपिण्याकं । अनिःसारिततैलंपिष्ठाचूर्णीकृत्य पिण्डीकृतमिङ्गुदिबीजमेव पिण्याकत्वेनोपचर्यते । "इङ्गुदीतापसतरुः" इत्यमरः । चीरं वासउदकदानार्थं [चीरं स्नानार्थपरिधानं] उत्तरं उत्तरीयंच ॥ २० ॥ अभितः पश्चात् । "अभितःपरितः—" इत्यादिना एनामितिद्वितीया । सुदारुणा सुतरांदुःसहा । गतिः दुखिनांगतिः । एषाहि स्नानाद्यर्थंस्त्रीबालपुरःसराखल्वित्यर्थः । तथाचसूत्रं "सर्वेकनिष्ठप्रथमाअनुपूर्वंइतरेस्त्रियोग्रे" इति ॥ २१ ॥ नित्यानुगः कुलक्रमानुगतानुचरः । विदितात्मा ज्ञातात्मस्वरूपः ॥२२—२३ ॥ ते सीतालक्ष्मणरामाः । स्त्रियोप्युदकंदिशन्तीतिशास्त्रसिद्धं। शीघ्रस्रोतसं नदीमुपागम्य अकर्दमंतीर्थं अवतारप्रदेशमासाद्य । तत हेतात । ते तुभ्यं । एतद्भवत्वित्युच्चार्यउदकंसिषिचुः ददुरित्यर्थः । स्नानमर्थात्सिद्धं । सीतायाः स्नानमात्रेन्वयोवा । कृच्छ्रादित्यनेनतेषांदुःखातिशयात्स्खलितगमनमुच्यते । सुतीर्थामित्यनेनपुण्यतीर्थत्वमुक्तं । उपगम्येत्यनेन नदीतीरेपिकंचित्कालंरोदनाचारउक्तः । यशस्विनइत्यनेन शास्त्रानतिक्रमउक्तः । रम्यामित्यनेन दुःखशान्तिहेतुत्वमुक्तं । पुष्पितकाननामित्यनेन उदकदान-

---

अनेकाग्रां बहुनायकां । अत्रोभयत्रहेतुः **नरेन्द्रेणविनाकृतामिति** ॥ ११ ॥ **स०** यान्याह तानि तज्जातीयानि ॥ १३ ॥ **स०** भार्यां लक्ष्मणंचेत्यपिग्राह्यं ॥ १४ ॥ **ति०** स्वर्गतिरूपंदुःखं । **तनि०** तेश्वशुरः त्वय्यत्यन्तप्रीतियुक्तश्श्वशुरः । पित्राहीनोसिलक्ष्मणेत्यनेन त्वमेवपित्राहीनः नाहमितिगम्यते । "नसंवृत्तःपितामम" इतिवक्ष्यमाणत्वात् ॥ १५ ॥ **ति०** उत्तरं उत्तमं नवीनंचीरं । **स०** गमिष्यामि नदींप्रतीतिशेषः ॥ २० ॥ **शि०** कान्तः तेजस्वी ॥ २२ ॥ **ति०** तत ३ एतद्भवत्वित्युच्चार्य सिषिचुः ददुः । ततेत्येतत्पितुर्नामगोत्ररूपोपलक्षणं बोध्यं । संबोधनेप्लुतकरणादसंधिः । केचित्तुततेत्युक्तौनामाद्युच्चारणस्यनप्रयो-

[पा०] १ ग. घ. ज. श्रोत्र. २ क. ख. ङ. च. झ. ञ. ट. मुक्त्वाथ. ३ ङ. च. छ. झ. ञ. ट. पितृहीनोसि. ४ ख. ङ. छ. झ. ञ. ट. स्वर्गतिंपृथिवीपतेः. ५ ख. एवं. ६ ङ. छ. झ. दुःखितं. ७ ङ. छ. झ. स्वर्गतंश्रुत्वाश्वशुरंतंमहानृपं. ८ क. ख. ग. ङ. च. छ. झ. ञ. ट. पूर्णाभ्यांनशशाकेक्षितुं. ९ ङ. छ. झ. ट. प्रियं. १० च. छ. झ. ट. रुदतीं. ११ क. दुःखितंदुःखितो. १२ क. ङ. छ. झ. ट. कान्तश्च. १३ क. ग. ङ. छ. झ. ट. उपगम्य. १४ ग. दीर्घस्रोतसं. १५ ग. शुचिं. १६ क. ग. श्चोदकं. १७ क. ग. ङ.—ट. तत ३ एतद्भवत्विति.

प्र[1]गृह्य च महीपालो जलपूरितमञ्जलिम् ॥ दिशं याम्यामभिमुखो रुदन्वचनमब्रवीत् ॥ २६ ॥
एतत्ते राजशार्दूल विमलं तोयमक्षयम् ॥ पि[2]तृलोक[3]गतस्याद्य मद्दत्तमुपतिष्ठतु ॥ २७ ॥
ततो मन्दाकिनीतीरा[4]त्प्रत्युत्तीर्य स राघवः ॥ पितुश्चकार तेजस्वी निर्वा[5]पं भ्रातृभिः सह ॥ २८ ॥
ऐङ्गुदं [6]बदरीमिश्रं पिण्याकं दर्भसंस्तरे ॥ न्यस्य रामः सुदुःखार्तो रुदन्वचनमब्रवीत् ॥ २९ ॥
इदं भुङ्क्ष्व महाराज प्रीतो यदशना वयम् ॥ [7]यदन्नः पुरुषो भवति तदन्नास्तस्य देवताः ॥ ३० ॥
ततस्तेनैव मार्गेण प्रत्युत्तीर्य [8]नदीतटात् ॥ आरुरोह नरव्याघ्रो रम्यसानुं महीधरम् ॥ ३१ ॥
ततः पर्णकुटीद्वारमासाद्य जगतीपतिः ॥ परिजग्राह [9]बाहुभ्यामुभौ भरतलक्ष्मणौ ॥ ३२ ॥
तेषां तु रुदतां शब्दा[10]त्प्रतिश्रुत्कोऽभवद्गिरौ ॥ भ्रातॄणां सह वैदेह्या सिं[11]हानामिव नर्दताम् ॥ ३३ ॥
महाबलानां रुदतां कुर्वतामुदकं पितुः ॥ विज्ञाय तुमुलं शब्दं त्रस्ता भरतसैनिकाः ॥ ३४ ॥
अब्रुवंश्चापि रामेण भरतः सङ्गतो ध्रुवम् ॥ ते[12]षामेव म[13]हाञ्छब्दः शोचतां पितरं मृतम् ॥ ३५ ॥
अथ वासा[14]न्परित्यज्य तं सर्वेऽभिमुखाः स्वनम् ॥ अप्येकमनसो जग्मुर्यथास्थानं प्रधाविताः ॥३६॥
हयैरन्ये गजैरन्ये रथैरन्ये स्वलङ्कृतैः ॥ सुकुमारास्तथैवान्ये पद्भिरेव नरा ययुः ॥ ३७ ॥
अचिरप्रोषितं रामं चिरविप्रोषितं यथा ॥ द्रष्टुकामो जनः सर्वो जगाम सहसाऽऽश्रमम् ॥ ३८ ॥
भ्रातॄणां त्वरिता[15]स्तत्र द्रष्टुकामाः समागमम् ॥ ययुर्बहुविधै[16]र्यानैः खुरनेमिस्वना[17]कुलैः ॥ ३९ ॥

समाप्तिपर्यन्तमनातपत्वमुक्तं । शीघ्रस्रोतसमित्यनेन स्नानकालेस्रोतोभिमुखत्वमुक्तं । शिवं शुद्धं । अकर्दमंतीर्थमासाद्येत्यनेन तीरेसेचनमुक्तं ॥ २४—२५ ॥ दानप्रकारमाह—प्रगृह्येत्यादिना ॥ २६ ॥ दानमन्त्रमाह—एतदित्यादिना ॥ २७ ॥ भ्रातृभिःसह मन्दाकिनीतीरात्प्रत्युत्तीर्यपितुर्निवापं पिण्डप्रदानं।चकार मन्दाकिनीतीरात्समुत्तीर्येत्युदकदानदेशात्किंचित्प्रदेशान्तरगमनवचनात् सपिण्डीकरणमेवकृतमित्यवगम्यते । दशाहात्यये उदकदानंविनापिण्डदानस्याचोदितत्वात् उदकसेचनवत्कनिष्ठेनलक्ष्मणेनपिण्डदानानुक्तेश्च ॥२८—३२ ॥ प्रतिश्रुत्कः प्रतिध्वनिः ॥ ३३ ॥ महाबलानामित्यादिश्लोकद्वयमेकंवाक्यं । त्रस्ताः किं भविष्यतीतिधियाउद्विग्नाः । उद्वेगानन्तरंनिश्चित्यवदन्तिस्मेत्याह—अब्रुवन्नित्यादिना । मृतंपितरंउद्दिश्येतिशेषः ॥ ३४—३५ ॥ स्वनमभिमुखाः स्वनोत्पत्तिदिगभिमुखाइत्यर्थः । यथास्थानं शब्दोत्पत्तिप्रदेशमनतिक्रम्यप्रधाविताः शीघ्रगतियुक्ताः ॥ ३६ ॥ सुकुमाराइति हयैरित्यादिभिरुक्तानांत्रयाणांविशेषणं । सुकुमारत्वाभावे दुःखितंरामंप्रतिपद्भ्यामेवगन्तव्यत्वात् ॥ ३७—३८ ॥ एषांयानैर्गमनं दर्शनत्वरया । ययुर्बहुविधैर्यानैरिति खुरनेमिसमाहतेतिचपाठः । ययुर्बहुविधैर्युक्तैरितिपाठे युक्तैः सज्जैः । यानैरिति

जनं अस्मादेवाचारादित्याहुः। स० हेतत तात । दूराद्धूतेचेतिप्लुतता ॥ २५ ॥ ति० एतदेवविवृणोति—**प्रगृह्येति** । याम्यां दक्षिणां । यत्त्वाधुनिकनिबन्धेषुसुमन्तुनाम्नालिखितंवचनं क्षत्रियाणामुदङ्मुखजलदानबोधकं तन्निर्मूलं । एतदाचारविरोधात् । निकृष्टक्षत्रियपरंवा । रुदन्नित्यनेन पित्रादिविषयेरोदने ननिषेधइतिसूचितं ॥ २६ ॥ ति० नचयदाकदाचित्पितुर्मरणश्रवणेपुत्रस्यदशाहाशौचतायास्स्मृतिप्रोक्तत्वेन कथंकृतक्रियस्यपितुः प्रथमदिनएवपिण्डदानमितिवाच्यं । तस्यास्स्मृतेः क्षत्रियेतरविषयत्वात्कलिविषयत्वाद्वा नदोषः ॥ २८ ॥ ति० ऐङ्गुदं इङ्गुदिबीजसंबन्धि । बदरैः बदरफलैः ॥ २९ ॥ ति० ननुराज्ञेकथंपिण्याकपिण्डदानंतत्राह **यदशनाइति** । यदशनाइत्यस्य तदशनाअस्मत्पितरइतिशेषः । तत्रसामान्येनार्थान्तरन्यासमाह—**यदन्नइति** । स० वयंयदशनाः । बहुव्रीहिः । तदिदंभुङ्क्ष्वच ॥३०॥ स० प्रतिशब्दःशब्दजन्यशब्दः ॥ ३३ ॥ स० त्रस्ताः किंनवीनाकाचिदापत्प्राप्तेतिभीताः ॥ ३४ ॥

[पा०] १ ङ. छ. झ. ट. प्रगृह्यतु. २ घ. पितृलोकं. ३ ख. गतस्यास्य. ४ ङ. छ. झ. ट. तीरंप्र. ५ ङ. छ. झ. ञ. ट. निर्वापं. ६ क. ग. ङ. छ. झ. ञ. ट. बदरैर्मिश्रं. ७ ङ. यदन्नंपुरुषोश्नाति. ८ ङ. छ. झ. ट. सरित्तटात्. ९ क. ख. ङ. च. छ. झ. ञ. ट. पाणिभ्यां. १० ङ. छ.—ट. ठ. त्प्रतिशब्दो. ११ ख. ग. ङ.—ट. सिंहानांनर्दतामिव. १२ क. च. ञ. तेषामेष. १३ ग. घ. ज. महाशब्दः. १४ ङ.—ट. वाहान्. १५ क. ख. ङ. च. छ. झ. ञ. ट. स्तेतु. १६ क. घ. ज. युक्तैः. १७ क. ग. ङ. च. छ. झ. ञ. ट. समाकुलैः.

सा भूमिर्बहुभिर्यानैः खुरनेमिसमाहता ॥ मुमोच तुमुलं शब्दं द्यौरिवाभ्रसमागमे ॥ ४० ॥
तेन वित्रासिता नागाः करेणुपरिवारिताः ॥ आवासयन्तो गन्धेन जग्मुरन्यद्वनं ततः ॥ ४१ ॥
वराहवृकसङ्घाश्च महिषाः सर्पवानराः ॥ व्याघ्रगोकर्णगवया वित्रेसुः पृषतैः सह ॥ ४२ ॥
रथाङ्गसाह्वा नत्यूहा हंसाः कारण्डवाः प्लवाः ॥ तथा पुंस्कोकिलाः क्रौञ्चा विसंज्ञा भेजिरे दिशः ॥४३॥
तेन शब्देन वित्रस्तैराकाशं पक्षिभिर्वृतम् ॥ मनुष्यैरावृता भूमिरुभयं प्रबभौ तदा ॥ ४४ ॥
ततस्तं पुरुषव्याघ्रं यशस्विनमरिंदमम् ॥ आसीनं स्थण्डिले रामं ददर्श सहसा जनः ॥ ४५ ॥
विगर्हमाणः कैकेयीं सहितो मन्थरामपि ॥ अभिगम्य जनो रामं बाष्पपूर्णमुखोऽभवत् ॥ ४६ ॥
तान्नरान्बाष्पपूर्णाक्षान्समीक्ष्याथ सुदुःखितान् ॥ पर्यष्वजत धर्मज्ञः पितृवन्मातृवच्च सः ॥ ४७ ॥

स तत्र कांश्चित्परिषस्वजे नरान्नराश्च केचित्तु तमभ्यवादयन् ॥
चकार सर्वान्सवयस्यबान्धवान्यथार्हमासाद्य तदा नृपात्मजः ॥ ४८ ॥
स तत्र तेषां रुदतां महात्मनां भुवं च खं चानुनिनादयन्स्वनः ॥
गुहा गिरीणां च दिशश्च सन्ततं मृदङ्गघोषप्रतिमः प्रशुश्रुवे ॥ ४९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे द्व्युत्तरशततमः सर्गः ॥ १०२ ॥

त्र्युत्तरशततमः सर्गः ॥ १०३ ॥

वसिष्ठेनकौसल्यादिभिःसहरामाश्रमंप्रतिप्रस्थानम् ॥ १ ॥ कौसल्ययामध्येमार्गंसपत्नीःप्रतिमन्दाकिनीतीरेदक्षिणाग्रदर्भेषु-दशरथायरामन्यस्तेङ्गुदिपिण्याकप्रदर्शनेनराजानंप्रतिसकरुणंपरिशोचनम् ॥ २ ॥ कौसल्यादिभिराश्रमेरामदर्शनम् ॥ ३ ॥ रामलक्ष्मणाभ्यांतत्पादाभिवादनम् ॥ ४ ॥ कौसल्ययास्वपादाभिवादिनींसीतामालिङ्ग्यतांप्रतिशोचनम् ॥ ५ ॥ रामेणवसिष्ठ-पादाभिवादनपूर्वकंतेनसहोपवेशनम् ॥ ६ ॥ भरतेनमन्त्रिप्रभृतिभिःसहतत्समीपेडपवेशनम् ॥ ७ ॥

वसिष्ठः पुरतः कृत्वा दारान्दशरथस्य च ॥ अभिचक्राम तं देशं रामदर्शनतर्षितः ॥ १ ॥
राजपत्न्यश्च गच्छन्त्यो मन्दं मन्दाकिनीं प्रति ॥ ददृशुस्तत्र तत्तीर्थं रामलक्ष्मणसेवितम् ॥ २ ॥
कौसल्या बाष्पपूर्णेन मुखेन परिशुष्यता ॥ सुमित्रामब्रवीद्दीना याश्चान्या राजयोषितः ॥ ३ ॥

शेषः ॥ ३९—४० ॥ आवासयन्तः मदगन्धेनावासयन्तः । एतेन ब्रूनृगजानामपिरामदर्शनहर्षोद्योत्यते ॥ ४१ ॥ गोकर्णः गोरिवकर्णौयस्यसगोकर्णः । महापृषतविशेषः ॥ ४२ ॥ नत्यूहाः जलरङ्कवः । " नत्यूहोजलरङ्कुःस्यात् " इतिहलायुधः । प्लवाः स्थूलबकविशेषाः ॥ ४३—४५ ॥ सहितः अन्योन्यसंगतः ॥ ४६—४७ ॥ चकार संमानमितिशेषः ॥ ४८—४९ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने द्व्युत्तरशततमः सर्गः ॥ १०२ ॥

अथमातृसमागमस्त्र्युत्तरशततमे । रामदर्शनतर्षितः

शि० अकल्मषं कल्मषनिवर्तकं ॥ ४५ ॥ शि० अत्रविगर्हणं शिखीनष्टइत्यादाविवविशेषणांशेपर्यवसन्नं । अतएवोत्तरत्ररामालिङ्गनंसंगच्छते ॥ ४६ ॥ ति० अनुविनादयन् प्रतिध्वनयन् ॥ ४९ ॥ इतिद्व्युत्तरशततमस्सर्गः ॥ १०२ ॥

[पा०] १ ङ. झ. ञ. ट. रथनेमि. २ क. ख. ङ. च. छ. झ. ञ. ट. मृगसिंहाश्च. ग. मृगसङ्घाश्च. ३ ङ. छ. झ. ञ. ट. सृमरास्तथा. ४ ङ. छ. झ. ट. रथाह्वहंसानत्यूहाःप्लवाःकारण्डवाःपरे. च. रथाङ्गकाःसदात्यूहाः. ञ. रथाङ्गाह्वाःसनत्यूहाः. ५ घ. पक्षिसंवृतं. ६ घ. मानुषैः. ७ क. ग. ङ. च. छ. झ. ञ. ट. मकल्मषं. ८ घ. तांस्तदाबाष्प. ९ ख. ततश्च. १० क. ख. ग. ङ. च. छ. झ. ञ. ट. ततस्स. ११ ख.—ट. विनादयन्. १२ च. ञ. महागिरीणां. १३ क. घ.—ट. प्रतिमोविशुश्रुवे. ख. ग. प्रतिमोपि. १४ ट. कर्शितः. क. ग. हर्षितः. १५ क. पत्न्यस्तु. १६ ख. ग. च. छ. झ. ञ. मब्रवीद्दीनां. ङ. मब्रवीदेनां.

इदं तेषामनाथानां क्लिष्टमक्लिष्टकर्मणाम् ॥ वने प्राक्केवलं तीर्थं ये ते निर्विषयीकृताः ॥ ४ ॥
इतः सुमित्रे पुत्रस्ते सदा जलमतन्द्रितः ॥ स्वयं हरति सौमित्रिर्मम पुत्रस्य कारणात् ॥ ५ ॥
जघन्यमपि ते पुत्रः कृतवान्न तु गर्हितः ॥ भ्रातुर्यदर्थसहितं सर्वं तद्विहितं गुणैः ॥ ६ ॥
अद्यायमपि ते पुत्रः क्लेशानामतथोचितः ॥ नीचानर्थसमाचारं सज्जं कर्म प्रमुञ्चतु ॥ ७ ॥
दक्षिणाग्रेषु दर्भेषु सा ददर्श महीतले ॥ पितुरिङ्गुदिपिण्याकं न्यस्तमायतलोचना ॥ ८ ॥
तं भूमौ पितुरार्तेन न्यस्तं रामेण वीक्ष्य सा ॥ उवाच देवी कौसल्या सर्वा दशरथस्त्रियः ॥ ९ ॥
इदमिक्ष्वाकुनाथस्य राघवस्य महात्मनः ॥ राघवेण पितुर्दत्तं पश्यतैतद्यथाविधि ॥ १० ॥
तस्य देवसमानस्य पार्थिवस्य महात्मनः ॥ नैतदौपयिकं मन्ये भुक्तभोगस्य भोजनम् ॥ ११ ॥
चतुरन्तां महीं भुक्त्वा महेन्द्रसदृशो विभुः ॥ कथमिङ्गुदिपिण्याकं स भुङ्क्ते वसुधाधिपः ॥ १२ ॥
अतो दुःखतरं लोके न किंचित्प्रतिभाति मा ॥ यत्र रामः पितुर्दद्यादिङ्गुदीक्षोदमृद्धिमान् ॥ १३ ॥
रामेणेङ्गुदिपिण्याकं पितुर्दत्तं समीक्ष्य मे ॥ कथं दुःखेन हृदयं न स्फोटति सहस्रधा ॥ १४ ॥
श्रुतिस्तु खल्वियं सत्या लौकिकी प्रतिभाति मां ॥ यदन्नः पुरुषो भवति तदन्नास्तस्य देवताः ॥ १५ ॥
एवमार्ता सपत्न्यस्ता जग्मुराश्वास्य तां तदा ॥ ददृशुश्चाश्रमे रामं स्वर्गच्युतमिवामरम् ॥ १६ ॥

रामदर्शनेसंजाताभिलाषः । " कामोभिलापस्तर्षश्च " इत्यमरः ॥ १—३ ॥ ते प्रसिद्धा रामादयः । ये प्राक् निर्विषयीकृताः राज्यान्निष्कासिताः वने तेषां क्लिष्टमुपमर्दितं । इदंतीर्थं अवतरणं । केवलं निश्चितं । " केवलंनिश्चितेक्लीबेवाच्यवत्त्वेककृत्स्नयोः " इतिवैजयन्ती ॥४—५॥ जघन्यं हीनं जलाहरणादिकर्म कृतवान्नपि नगर्हितः । कुतइत्यत्राह—भ्रातुरिति । भ्रातुः ज्येष्ठभ्रातुः । अर्थसहितं प्रयोजनसहितं । यत्कर्म तत्सर्वं गुणैर्विहितं । " ज्येष्ठभ्रातापितृसमः " इतिवचनात्पितृशुश्रूषावद्गुणायकल्पतइत्यर्थः ॥ ६ ॥ क्लेशानामतथोचितः इदानींयादृशक्लेशानुभवस्तादृशक्लेशानामनुचितः । ते अयंपुत्रः नीचानर्थसमाचारं निकृष्टदुःखप्रचुरसमाचारसहितं । सज्जं उद्युक्तं । कर्म अद्यप्रमुञ्चत्वपि अपिशब्दःसंभावनायां । " अपिःसंभावनाप्रश्नगर्हाशङ्कासमुच्चये " इतिवैजयन्ती । भरतप्रार्थनयारामेणस्वराज्येस्वीकृते लक्ष्मणस्यनीचकर्मप्रमोचनंसंभवेदितिभावः ॥ ७ ॥ पितुरिति चतुर्थ्यर्थेषष्ठी ॥ ८—१० ॥ औपयिकं प्राप्तं । "युक्तंस्यादुचितंन्याय्यंप्राप्तमौपयिकंतथा" इतिहलायुधः ॥ ११—१२ ॥ राज्यैश्वर्ययोग्यतयाऋद्धिमानित्युक्तिः ॥ १३ स्फोटति स्फुटति ॥ १४ ॥ सत्या सत्यार्था । लौकिकी लोकविदिता लोकप्रसिद्धेतियावत् । देवताइतिश्रुतिः

ति० प्राक्कलनं वहुव्रीहिरयं । प्रथमपरिग्रहवत् । तीर्थं पुण्यतीर्थं । गङ्गायमुनापरपारभवमिदमेव । प्राक्केवलमितिपाठआधुनिककल्पितः । नापितत्रार्थसामञ्जस्यमितिकतकः । तत्रापिपाठे प्राक्परिगृहीतमितिशेषः । प्राक्परिगृहीतंतीर्थं जलानयनादिव्यवहारोपयोगीमार्गः । इदमेवेतिकेवलं निश्चितमित्यर्थोवक्तुंशक्यः । स० क्लिष्टं दुःखरोहं । प्राक्कलनं वहुदिनमारभ्यस्नानाद्यर्थपरिगृहीतं । तीर्थं अवतारप्रदेशः । इतिनिश्चयइतिशेषः ॥ ४ ॥ वक्ष्यमाणसौमित्रिपदव्याख्यानंसुमित्रेपुत्रस्तइति ॥ ५ ॥ ति० गुणैः ज्येष्ठत्वसौभ्रात्रधार्मिकत्वादिभिर्विशिष्टस्यभ्रातुर्यदर्थरहितं प्रयोजनरहितं तदेवगर्हितंभवति । शि० भ्रातुरर्थरहितंयत् तदेव सर्वं । गुणैः गुणवद्भिर्गर्हितं ॥ ६ ॥ ति० क्लेशानां अनुभूयमानानां । तथा यथानुभवमुचितोनेत्यतथोचितः । ते अयंपुत्रः नीचाहोंयोऽनर्थः दुःखजनकः समाचारः अनुष्ठानंयस्मिंस्तत्तथा सज्जं प्रस्तुतं । यथोक्तंकर्ममुञ्चतु रामस्यप्रत्यावर्तिष्यमाणत्वादितिभावः ॥ एकःशत्रुघ्नस्तुभरतसंगादेतत्कर्मनकरोत्येव अयमपिमुञ्चत्वित्यपेरर्थः ॥ ७ ॥ ति० स्त्रियः प्रतीतिशेषः ॥ ९ ॥ ति० औपयिकं उचितं ॥ ११ ॥ ति० चतुरन्तां चतुस्समुद्रावसानां ॥१२॥ ति० क्षोदं पिष्टं । स० यत्रयत् । अतः अस्मात् ॥१३॥

[पा०] १ ङ. छ. झ. ट. प्राक्कलनं. २ ङ. छ. झ. ट. रहितं. ३ ङ. छ. झ. ट. तद्गर्हितं. ४ ङ. अथायं. ५ घ. पुमर्दत्तं. ६ क. ङ. च. छ. झ. ञ. ट. भुवि. ७ घ. कामं. ख. कथमैङ्गुद. ८ ग. घ. भुङ्क्तेस. ९ ङ. छ. झ. ट. मे. च. ञ. मां. १० ङ. छ. झ. ट. मे. च. ज. ञ. मां. ११ घ. ज. मार्ताः. १२ क. ञ. स्वर्गाच्युतं.

सर्वभोगैः परित्यक्तं रामं संप्रेक्ष्य मातरः ॥ आर्ता मुमुचुरश्रूणि सस्वरं शोककर्शिताः ॥ १७ ॥
तासां रामः समुत्थाय जग्राह चरणाञ्शुभान् ॥ मातॄणां मनुजव्याघ्रः सर्वासां सत्यसङ्गरः ॥ १८ ॥
ताः पाणिभिः सुखस्पर्शैर्मृद्वङ्गुलितलैः शुभैः ॥ प्रममार्जू रजः पृष्ठाद्रामस्यायतलोचनाः ॥ १९ ॥
सौमित्रिरपि ताः सर्वा मातॄः संप्रेक्ष्य दुःखितः ॥ अभ्यवादयतासक्तं शनै रामादनन्तरम् ॥ २० ॥
यथा रामे तथा तस्मिन्सर्वा ववृतिरे स्त्रियः ॥ वृत्तिं दशरथाज्जाते लक्ष्मणे शुभलक्षणे ॥ २१ ॥
सीताऽपि चरणांस्तासामुपसंगृह्य दुःखिता ॥ श्वश्रूणामश्रुपूर्णाक्षी साँ बभूवाग्रतः स्थिता ॥ २२ ॥
तां परिष्वज्य दुःखार्तां माता दुहितरं यथा ॥ वनवासकृशां दीनां कौसल्या वाक्यमब्रवीत् ॥२३॥
विदेहराजस्य सुता स्नुषा दशरथस्य च ॥ रामपत्नी कथं दुःखं संप्राप्ता निर्जने वने ॥ २४ ॥
पद्ममातपसंतप्तं परिक्लिष्टमिवोत्पलम् ॥ काञ्चनं रजसा ध्वस्तं क्लिष्टं चन्द्रमिवाम्बुदैः ॥ २५ ॥
मुखं ते प्रेक्ष्य मां शोको दहत्यग्निरिवाश्रयम् ॥ भृशं मनसि वैदेहि व्यसनारणिसंभवः ॥ २६ ॥
ब्रुवन्त्यामेवमार्तायां जनन्यां भरताग्रजः ॥ पादावासाद्य जग्राह वसिष्ठस्य चँ राघवः ॥ २७ ॥

पुरोहितस्याग्निसमस्य वै तदा बृहस्पतेरिन्द्र इवामराधिपः ॥
प्रगृह्य पादौ सुसमृद्धतेजसः सहैव तेनोपविवेश राघवः ॥ २८ ॥
ततो जघन्यं सहितैः स्वमन्त्रिभिः पुरप्रधानैश्च सहैव सैनिकैः ॥
जनेन धर्मज्ञतमेन धर्मवानुपोपविष्टो भरतस्तदाऽग्रजम् ॥ २९ ॥
उपोपविष्टस्तु तथा स वीर्यवांस्तपस्विवेषेण समीक्ष्य राघवम् ॥
श्रिया ज्वलन्तं भरतः कृताञ्जलिर्यथा महेन्द्रः प्रयतः प्रजापतिम् ॥ ३० ॥
किमेष वाक्यं भरतोऽद्य राघवं प्रणम्य सत्कृत्य च साधु वक्ष्यति ॥
इतीव तस्यार्यजनस्य तत्त्वतो बभूव कौतूहलमुत्तमं तदा ॥ ३१ ॥
स राघवः सत्यधृतिश्च लक्ष्मणो महानुभावो भरतश्च धार्मिकः ॥

संस्येत्यन्वयः ॥ १५—१८ ॥ रामस्यायतलोचना इतिपाठः ॥ १९ ॥ असक्तं अविरतं । "अविरतमनवरतंस्यादेकार्थमनारतमसक्तमपि" इतिहलायुधः ॥ २० ॥ ववृतिरे चक्रुरित्यर्थः ॥ २१—२४ ॥ तेमुखंप्रेक्ष्य स्थितामितिशेषः । मां मनसिस्थितःसन्निति शेषः । आश्रयं आश्रयभूतंकाष्ठादिकं ॥ २५—२८ ॥ ततोजघन्यं वसिष्ठरामोपवेशादनन्तरं । उपोपविष्टः । "प्रसमुपोदःपादपूरणे" इतिद्विर्वचनं ॥ २९ ॥ कृताञ्जलिः अभूदितिशेषः ॥ ३० ॥ इतीवेत्यत्र इवश-

स० सत्यसंगरः सत्याकैकेय्यासह नविद्यतेसंगरः कलहोयस्यसः । सत्यप्रतिज्ञइतिवा ॥ १८ ॥ ति० पृष्ठात् पृष्ठदेशात् । "पृष्ठंतुचरमंतनोः" इत्यमरः ॥ १९ ॥ स० आसक्तं आसक्तिपूर्वकं स्नेहपूर्वकमितियावत् ॥ २० ॥ ति० वनवासकृतांदीनां वनवासकृतदीनत्ववतीमितियावत् । शि० वनवासेकृतंप्रयत्नीयस्यास्तां अतएवदीनांक्षीणत्वेनप्रतीयमानां ॥ २३ ॥ ति० शोकाग्निः आश्रयं गृहमिव ॥ आशयमितिपाठेप्याशयोगृहमेव आशय्यतेऽत्रेतिव्युत्पत्तेः ॥ २६ ॥ ति० जघन्यं जघनभागं पृष्ठभागमाश्रितस्सन्नुपोपविष्टोबभूवेत्यन्वयः । शि० जघन्यं निम्नदेशमवलोक्य तत् आग्रजं अग्रजासनं१ उपोपविष्टः ॥ २९ ॥

[पा०] १ ग. ङ. झ. ट. तंभोगैःसंपरित्यक्तं. छ. तंभोगैःपरिसंत्यक्तं. २ च. सुस्वरं. ३ ङ. च. छ. झ. ञ. ट चरणांवुजान्. ४ ग. घ. ज. शुभस्पर्शैः. ५ घ. ज. दलैः. ६ ख. ग. च. दुःखिताः. ७ घ.—छ. झ. ञ. ट. संबभूव. ८ ग. ङ. छ. झ. ट. कृतां. ९ ङ. छ. झ. ट. विजने. १० क. ङ. झ. ञ. ट. सराघवः. ११ क. ख. ग. ङ. च. झ. ञ. ट. समस्यतस्यवै. १२ ङ. इवामराग्रजः. १३ क. ख. सहतैः. १४ ङ. छ. झ. ट. स्वमन्त्रिभिः. १५ क. ख. ङ. च. झ. ञ. ट. तथैव. १६ ङ. छ. झ. ट. तदाति. क.—घ. च. ज. ञ. तदास. १७ च. ञ. सर्वतो.

वृताः सुहृद्भिश्च विरेजुरध्वरे यथा सदस्यैः सहितास्त्रयोऽग्नयः ॥ ३२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे त्र्युत्तरशततमः सर्गः ॥ १०३ ॥

चतुरुत्तरशततमः सर्गः ॥ १०४ ॥

रामेणतापसवेषधारिणंभरतंप्रतिराज्यपरित्यागेनवनंप्रत्यागमननिमित्तप्रश्नः ॥ १ ॥ भरतेनरामंप्रतिकैकेयीगर्हणपूर्वकं सप्रणामंराज्यस्वीकारप्रार्थना ॥ २ ॥ रामेणभरतंप्रतिपितृवाक्यपरिपालनस्योभाभ्यामवश्यंकर्तव्यत्वसमर्थनपूर्वकंतत्रभागद्वय परिकल्पनेनस्वेनवनवासरूपस्वभागपरिग्रहणदृष्टान्तीकरणेनराज्यपरिपालनरूपतदीयभागपरिग्रहणचोदना ॥ ३ ॥

तं तु रामः समाज्ञाय भ्रातरं गुरुवत्सलम् ॥ लक्ष्मणेन सह भ्रात्रा प्रष्टुं समुपचक्रमे ॥ १ ॥

किमेतदिच्छेयमहं श्रोतुं प्रव्याहृतं त्वया ॥ यस्मात्त्वमागतो देशमिमं चीरजटाजिनी ॥ २ ॥

किंनिमित्तमिमं देशं कृष्णाजिनजटाधरः ॥ हित्वा राज्यं प्रविष्टस्त्वं तत्सर्वं वक्तुमर्हसि ॥ ३ ॥

इत्युक्तः कैकयीपुत्रः काकुत्स्थेन महात्मना ॥ प्रगृह्य बलवद्भूयः प्राञ्जलिर्वाक्यमब्रवीत् ॥ ४ ॥

आर्यं तातः परित्यज्य कृत्वा कर्म सुदुष्करम् ॥ गतः स्वर्गं महाबाहुः पुत्रशोकाभिपीडितः ॥ ५ ॥

स्त्रिया नियुक्तः कैकेय्या मम मात्रा परन्तप ॥ चकार सुमहत्पापमिदमात्मयशोहरम् ॥ ६ ॥

सा राज्यफलमप्राप्य विधवा शोककर्शिता ॥ पतिष्यति महाघोरे निरये जननी मम ॥ ७ ॥

तस्य मे दासभूतस्य प्रसादं कर्तुमर्हसि ॥ अभिषिञ्चस्व चाद्यैव राज्येन मघवानिव ॥ ८ ॥

ब्दोवाक्यालंकारे ॥ ३१—३२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीतांवराख्याने अयोध्याकाण्डव्याख्याने त्र्युत्तरशततमःसर्गः॥१०३॥

अथरामभरतयोरुक्तिप्रत्युक्तीचतुरुत्तरशततमे— तंत्वित्यादिना । गुरुवत्सलं गुरौत्वस्मिन् भक्तं । समाज्ञाय ज्ञात्वा प्राप्तराज्यपरित्यागेनजटावल्कलधारणादिनाचत्वस्मिन्भक्तियुक्तंज्ञात्वेत्यर्थः । समाश्वास्येति पाठे प्रियवचनादिभिः सम्यगाश्वास्येत्यर्थः ॥ १ ॥ यस्मात्कारणात् त्वं चीरजटाजिनीसन् इमंदेशमागतः एतत् एतत्कारणंकिं । अहंत्वयाप्रव्याहृतंश्रोतुमिच्छेयं श्रोतुमिच्छामि नतुऊहेयेतिभावः ॥ २ ॥ एवमुक्तेपि शोकेनतूर्ष्णींस्थितंपुनःपृच्छति—किंनिमित्तमित्यादि- श्लोकद्वयेन । काकुत्स्थेन बलवत्प्रगृह्य गाढंपरिष्वज्य तत्सर्ववक्तुमर्हसीतिभूयउक्तः कैकयीपुत्रः प्राञ्जलिर्वाक्यमब्रवीदित्यन्वयः ॥ ३—४ ॥ सुदुष्करंकर्मकृत्वा ज्येष्ठार्हराज्यंस्त्रीनियोगात्कनिष्ठसात्कृत्येत्यर्थः । आर्यं त्वां परित्यज्य विवास्य ॥ ५ ॥ सुमहत्पापं सुपुत्रस्य वनेप्रव्राजनरूपं ॥ ६ ॥ सा एवंरूपपापप्रेरणकर्त्री ॥ ७ ॥ तस्य कैकेयीसंवन्धात्प्राप्तापवादस्येत्यर्थः ।

ति० त्रयोऽग्नयः शत्रुघ्नस्याप्राधान्येनपरिहरणात् ॥ **स०** लक्ष्मणशत्रुघ्नयोरेकोदरजत्वाच्छत्रुघ्नस्यपृथगनुक्तिः ॥ ३२ ॥ इतित्र्युत्तरशततमस्सर्गः ॥ १०३ ॥

ति० एवंकच्चित्प्रश्नानन्तरंस्वस्यराजत्वाभावंसूचयितुंतदुत्तरमप्रयच्छन्तंभरतंप्रतिरामेणागमनप्रयोजनप्रश्नः **तंत्विति** । समाज्ञाय कुशलप्रश्नव्याजेनसर्वधर्मान्ज्ञापयित्वा ॥ १ ॥ **ति०** पूर्वंपृष्टमेवार्थं क्वनुतेऽभूत्पितेत्येवंरूपंभङ्ग्यन्तरेणपुनःपृष्टंज्ञात्वातदुत्तरमाह—**आर्येति** । परित्यज्य अस्मान्सर्वानिमंचलोकमितिशेषः । आर्यंपरित्यज्येतिपाठे विवास्येत्यर्थः । **स०** पुत्रशोकाभिपीडितः पुत्रोवनंगतइतिशोकेनाभिपीडितः । **शि०** हे आर्य स्त्रिया मत्पत्न्या । प्रार्थितयेतिशेषः । ममममात्राकैकेय्या नियुक्तः प्रार्थितः । तातः सुदुष्करंकर्मकृत्वा त्वांप्रव्राज्येत्यर्थः । परित्यज्य प्रकटायोध्यामितिशेषः । स्वर्गं अप्रकटसाकेतंगतः । अतस्साकैकेयी इदंमहत्पापं चकार । स्त्रियाप्रार्थितयेत्यनेन मन्थरामाण्डव्योरतिप्रीतिस्सूचिता । तेनमाण्डवीकर्तृकमेवेदंसर्वमितिसूचितं । श्लोकद्वयमेकान्वयि ॥ ५ ॥ **ति०** सुमहदितिपाठे सेत्यध्याहारः ॥ ६ ॥ **शि०** नरके नरोच्चारितनिन्दाशब्दे । पतिष्यति अपतत् । लृडुपात्तभविष्यत्त्वस्याविवक्षा ॥७॥ **ति०** एवंपितृमरणेश्रुतेतदुचितकृत्येकृतेततःपरंयद्वक्तव्यंतत्संक्षेपेणाधुनैवब्रूतेभरतः—**तस्यम-**

[पा०] १ क. ग. च. सुहृद्भिस्तु. २ ङ. छ. झ. ट. विरेजिरेऽध्वरे. ३ अयंसर्गः ङ. च. झ. ञ. ठ. पुस्तकेषु १०१ तमसर्गतयादृश्यते. ४ ग. घ. समाश्वास्य. ५ घ. च. ञ. भरतं. ६ ख. ग. जटाधरः. ज. जटाजिनः. ७ ख. ग. ङ. छ.—ट. यन्निमित्तं. ८ ग. छ. झ. ट. आर्यतातः. ९ ङ. ट. सामहत्. १० क. ग. च. छ. झ. ञ. ट. नरके. ११ ख. राज्येस्मिन्ममराघव.

इमाः प्रकृतयः सर्वा विधवा मातरश्च याः ॥ त्वत्सकाशमनुप्राप्ताः प्रसादं कर्तुमर्हसि ॥ ९ ॥
तदानुपूर्व्या[1] युक्तं[2] च युक्तं चात्मनि मानद ॥ राज्यं प्राप्नुहि धर्मेण सकामान्सुहृदः कुरु ॥ १० ॥
भवत्वविधवा भूमिः समग्रा पतिना त्वया ॥ शशिना विमलेनेव शारदी रजनी यथा ॥ ११ ॥
एभिश्च सचिवैः सार्धं शिरसा याचितो मया ॥ भ्रातुः शिष्यस्य दासस्य प्रसादं कर्तुमर्हसि ॥१२॥
तदिदं शाश्वतं पित्र्यं सर्वं प्रकृतिमण्डलम्[3] ॥ पूजितं पुरुषव्याघ्र नातिक्रमितुमर्हसि ॥ १३ ॥
एवमुक्त्वा महाबाहुः सबाष्पः कैकयीसुतः ॥ रामस्य शिरसा पादौ जग्राह विधिवत्पुनः ॥ १४ ॥
तं मत्तमिव मातङ्गं निःश्वसन्तं पुनः पुनः ॥ भ्रातरं भरतं रामः परिष्वज्येदमब्रवीत् ॥ १५ ॥
कुलीनः सत्त्वसंपन्नस्तेजस्वी[5] चरितव्रतः ॥ राज्यहेतोः कथं पापमाचरेत्त्वद्विधो[6] जनः ॥ १६ ॥
न दोषं त्वयि[7] पश्यामि सूक्ष्ममप्यरिसूदन ॥ न चापि जननीं बाल्यात्त्वं विगर्हितुमर्हसि ॥ १७ ॥
कामकारो महाप्राज्ञ गुरूणां सर्वदा[8]ऽनघ ॥ उपपन्नेषु दारेषु पुत्रेषु च विधीयते ॥ १८ ॥
वयमस्य यथा लोके संख्याताः सौम्य साधुभिः ॥ भार्याः[9] पुत्राश्च शिष्याश्च त्वं[10]मनुज्ञातुमर्हसि ॥१९॥
वने वा चीर[11]वसनं सौम्य कृष्णाजिनाम्बरम् ॥ राज्ये वा[12]ऽपि महाराजो[13] मां वासयितुमीश्वरः ॥२०॥

राज्येनं हेतुना ॥ ८—९ ॥ आनुपूर्व्यायुक्तं ज्येष्ठानुक्रमेणसंगतं । आत्मनियुक्तंच भरणसमर्थेत्वय्येवप्राप्तं ॥ १० ॥ पतिनेति नाभावआर्षः । रजनीयथा रजनीव । भूमिः शशिनेवत्वया अविधवाभवतु ॥ ११ ॥ एभिः ममैकस्यशोकाश्रुपातमसहमानः कथमेषामश्रूणिसहिष्य तइतिमत्वायुद्धायसंनद्धैरिवरथगजतुरगपदातिभिः सार्धमागतोस्मि । सचिवैः ममहियाचनमुपेक्ष्यं अस्मद्राज्यनिर्वाहकैःपूजनीयैःसचिवैर्याचितंतवानतिक्रमणीयंहि । याचितः ममाग्रतःस्थितिरेवालंतव कार्यकरणाय किंपुनर्याचनेपिकृते । शिरसायाचितः शिरसायाचतस्तस्यवचनंनकृतंमयेतिखलु तवहृदयमनुशेते । मया एतावत्पर्यन्तंत्वमेवमांयाचित्वाममनोरथंपूरितवानसि । भ्रातुः किमर्थंयाचितव्यंतवानुजो नभवामिकिं । शिष्यस्य अनुजोभूत्वाभवतासहकिमंशभाक्तिष्ठामि मन्त्रसंबन्धोपित्वत्तःखलु । दासस्य शिष्योभूत्वाक्रयविक्रयार्होनभवामिकिं । अतःप्रसादं कर्तुमर्हसि उक्तैरमोघैः हेतुभिर्ममयाच्ञांसफलांकुरुष्व ॥ १२ ॥ एभिश्चसचिवैरित्यस्यविवक्षितंदर्शयति— तदिति । तत् पुरवर्तनदशायामसन्निहितं । इदं इदानींसन्निहितं । शाश्वतं सनातनं परम्पराप्राप्तमितियावत् । पूजितं पूजार्हं । प्रकृतीनांमन्त्रिप्रभृतीनांमण्डलं समूहं । नातिक्रमितुमर्हसि तद्वचनंनातिक्रमणीयमित्यर्थः ॥ १३ ॥ महाबाहुः प्रसारितबाहुरितियावत् । कैकयीसुतः मातुर्दोषादियमवस्थेतिभावः । पुनरिति पूर्वंयाचितवान् ततःशरणागतिमकरोदित्यर्थः ॥१४—१५ ॥ कुलीनः महाकुलप्रसूतः । सत्त्वसंपन्नः सत्त्वगुणसंपन्नः । पापं ज्येष्ठविषयप्रातिकूल्यरूपं ॥ १६ ॥ बाल्यात् अज्ञानादित्यर्थः ॥ १७ ॥ कामकारः स्वच्छन्दकरणं । उपपन्नेषु शिष्यदासादिषु ॥ १८ ॥ लोकेभार्यादयः साधुभिर्यथासंख्याताः नियाम्यत्वेनपरिगणिताः । वयमपि तथादशरथस्येति त्वंज्ञातुमर्हसि । अनुर्निरर्थकः ॥ १९ ॥ चीरंद्रुमवल्क-

इति । स० मे मयि ॥ ८ ॥ स० प्रकृतयः सप्तप्रधानपुरुषाः ॥ ९ ॥ ति० यतश्च त्वं आनुपूर्व्या ज्येष्ठत्वलक्षणया । युक्तः यतश्च आत्मनि त्वयि । अभिषेचनंयुक्तं । तस्माद्धर्मेणराज्यंप्राप्नुहि ॥ १० ॥ स० भूमिः अविधवा यथा सम्यक् भवतु । पतिनेत्यार्षः । लाक्षणिकोवापतिशब्दः । शारदी शरत्कालसंबन्धिनीरजनी । शशिनेव । यथेत्यस्यसम्यगित्यर्थकत्वंतु "निवृत्तिमार्गःकथितआदौभगवतायथा" इतियथेतिसुधोक्तेर्ज्ञेयं ॥ यद्वा शशिनोनिष्कलङ्कत्वरूपविमलत्वस्यक्वाप्यभावात्संपूर्णकलत्वेनविमलववद्विद्यमानेनशशिनारजनीयथातथेत्यर्थः ॥ ११ ॥ शि० यदित्वत्सदृशोनाचरेत्तर्हित्वंनाचरेरितिकिंवक्तव्यमितिकाव्यार्थापत्तिरलङ्कारो ध्वनितः । एतेनत्वयिराज्याकाङ्क्षानास्तीत्यस्माभिर्ज्ञातमितिसूचितं ॥ १६ ॥ ती० गुरूणां महतां । उपपन्नेषु युक्तेषु । संमतेष्वित्यर्थः । महान्तोप्यभिमतदारादिषुस्नेहंकुर्वन्तीतिभावः । ति० गुरूणां पित्रादीनां । कामकारः स्वच्छन्दाचरणमित्यर्थः । स्वेच्छा-

[पा०] १ ङ. ट. तथा. २ ङ. छ. झ. ञ. ट. युक्तश्च. ३ क. ङ. च. छ. झ ट. सचिवमण्डलं. ४ क. ङ. च. छ. झ. ञ. ट. भरतःपुनः. ५ ङ. सत्यसंकल्पः. ६ क. ङ. च. छ. झ. ञ. माचरेन्मद्विधो. ७ क. तव. ८ ख. ग. ज. सर्वथा. ९ ख. भार्यापुत्रश्चशिष्यश्च. १० क.—ट. त्वमपि. ११ ज. सौम्यवसनंचीरकृष्णा. १२ क. चापि. १३ ग. महाबाहो.

यावत्पितरि धर्मज्ञे गौरवं लोकसंत्कृतम् ॥ तावद्धर्मभृतां श्रेष्ठ जनन्यामपि गौरवम् ॥ २१ ॥
एताभ्यां धर्मशीलाभ्यां वनं गच्छेति राघव ॥ मातापितृभ्यामुक्तोऽहं कथमन्यत्समाचरे ॥ २२ ॥
त्वया राज्यमयोध्यायां प्राप्तव्यं लोकसंत्कृतम् ॥ वस्तव्यं दण्डकारण्ये मया वल्कलवाससा ॥ २३ ॥
एवं कृत्वा महाराजो विभागं लोकसंनिधौ ॥ व्यादिश्य च महातेजा दिवं दशरथो गतः ॥ २४ ॥
स च प्रमाणं धर्मात्मा राजा लोकगुरुस्तव ॥ पित्रा दत्तं यथा भागमुपभोक्तुं त्वमर्हसि ॥ २५ ॥
चतुर्दशसमाः सौम्य दण्डकारण्यमाश्रितः ॥ उपभोक्ष्ये त्वहं दत्तं भागं पित्रा महात्मना ॥ २६ ॥

यदब्रवीन्मां नरलोकसत्कृतः पिता महात्मा विबुधाधिपोपमः ॥
तदेव मन्ये परमात्मनो हितं न सर्वलोकेश्वरभावमप्यहम् ॥ २७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे चतुरुत्तरशततमः सर्गः ॥१०४॥

पञ्चोत्तरशततमः सर्गः ॥ १०५ ॥

भरतेनरामंप्रतिपित्रास्वस्यैराज्यदाने पित्रैकैकेय्यनुमत्यास्वेनतस्यैराज्यदानोक्तिपूर्वकंतत्स्वीकारप्रार्थना ॥ १ ॥ रामेणस्ववनगमनस्यात्महेतुकत्वज्ञानेनदूयमानंभरतंप्रतिशास्त्रार्थोपन्यासेनसमाश्वासनपूर्वकंराज्यपालनचोदना ॥ २ ॥

ततः पुरुषसिंहानां वृतानां तैः सुहृद्गणैः ॥ शोचतामेव रजनी दुःखेन व्यत्यवर्तत ॥ १ ॥

ल्वंवसनमुत्तरीयंयस्यतं । कृष्णाजिनं अम्बरं अधरम्बरं यस्यतं । ईश्वरः नियन्ता ॥ २० ॥ पितरि यावत् यत्परिमाणकंगौरवं । जनन्यामपि तावत् तत्परिमाणकंगौरवं कर्तव्यमितिशेषः । यत्तच्छब्दाभ्यां "यत्तदेतेभ्यःपरिमाणेवतुप्" इतिवतुप् ॥ २१ ॥ फलितमाह—एताभ्यामिति । समाचरे समाचरामि कथं समाचराणीत्यर्थः ॥ २२—२४ ॥ पित्रादत्तंभागं यथा यथावत् । उपभोक्तुमित्यन्वयः ॥ २५—२६ ॥ परमात्मनोहितं आत्मनःपरंहितं ॥ २७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने चतुरुत्तरशततमः सर्गः ॥ १०४ ॥

अथपुनर्भरतस्यकैकेयीनिर्वन्धकृतपितृनियोगपरिहारोचितंवचनपूर्वकंप्रार्थनंरामस्यचतत्समाश्वासनंतत्त्वोपदेशेनेत्येतत्पञ्चोत्तरशततमे—ततःपुरुषसिंहाना-

---

नियोजनमितियावत् ॥ १८ ॥ स० एवंविभागं तद्बोधकवाक्यं ॥ २४ ॥ ति० यथाभागं पितृकल्पितचतुर्दशवर्षपर्यन्तं । अनेन तदनन्तरमहंभोक्ष्यामीतिसूचितं । मात्रापि चतुर्दशवर्षपर्यन्तंवनवासएववृतः नतुसर्वथामेराज्यत्यागः पित्रापि तावदेवानुमतमितिभावः ॥२५॥ ती० ननु "आर्यैतातःपरित्यज्यकृत्वाकर्मसुदुष्करम् । गतस्स्वर्गंमहाबाहुःपुत्रशोकाभिपीडितः" इति "इमाःप्रकृतयस्सर्वाविधवामातरश्चयाः । त्वत्सकाशमनुप्राप्ताः" इतिभरतेनोक्ते रामस्तदानीमशोचंस्तदुल्लंघ्याभिषेकप्रत्याख्यानमेवकिमितिकृतवान् । नैषदोषः तस्मिन्भरतवाक्यप्रबन्धेपितृमरणमानुषङ्गिकत्वेनोक्तं प्राधान्येनराज्यस्वीकरणमेवोच्यते । अतोरामस्तदेवंमन्यते पितापुत्रशोकेनमृतकल्पोनपुनर्जीविष्यतीतिमृतइत्युच्यते । मातरश्च विधवाकल्पाइतिविधवाइत्युच्यन्ते । अनेनममाभिषेकवचनमेवप्राधान्येनोच्यतइत्यशोचन्नभिषेकप्रत्याख्यानंकृतवान् । स्ववाक्येपिपितृमरणानुवादस्यचायमेवपरिहारः ॥ ति०पितामहात्मा ब्रह्मणातुल्यः । अव्ययं सर्वलोकेश्वरत्वं ब्रह्मत्वं पित्रननुमतमितिशेषः । नहितमित्यन्वयः । ननुपितृमरणश्रवणोत्तरंशोकमुल्लङ्घ्याभिषेकप्रत्याख्यानमेवकुतइतिचेच्छृणु । भरतस्याभिषेककरणप्रत्याशावारणायकैकेय्यालोकानांचान्यथासंभावनावारणायशोककालेपिधैर्यमवलंब्यतत्करणं शोककालेप्येवंधैर्यंकर्तव्यमितिलोकोपदेशायेतिममप्रतिभाति ॥ कतक० गतस्स्वर्गमितिभरतेनोक्ते पितृमरणोचितसर्वकार्यकरणेकृते भरतः "तस्यमे" इत्याद्युक्तवान् । कविस्तु संक्षेपेणादावुक्त्वाऽग्रेविस्तरेणवदतीतिप्रायःकवेस्स्वभावः ॥२७॥ इतिचतुरुत्तरशततमस्सर्गः ॥ १०४ ॥

शि०शोचतां रामानयनोपायंचिन्तयतामित्यर्थः ॥ १ ॥

[पा०] १ क. ख. ग. ङ. छ. झ. ञ. ट. धर्मज्ञ. २ क. ख. ङ. च. छ. झ. ञ. ट. सत्कृते. ३ ङ. च. छ. झ. ञ. ट. कृतां. ४ ङ. संमतं. ५ ख. ग. ङ. छ. झ. ट. एवमुक्त्वा. ६ ग. महाभागो. ७ क. च. ञ. महाभागोदिवं. ८ क. धर्मज्ञ. ९ ट. चयद्दत्तं. ग. तुतद्दत्तं. ख. तुमेदत्तं. १० घ. पित्राभागं. ११ ग. चिरमात्मनो. १२ ङ. झ. ट. मव्ययं.

रजन्यां सुप्रभातायां भ्रातरस्ते सुहृद्वृताः ॥ मन्दाकिन्यां हुतं जप्यं कृत्वा राममुपागमन् ॥ २ ॥
तूष्णीं ते समुपासीना न कश्चित्किंचिदब्रवीत् ॥ भरतस्तु सुहृन्मध्ये रामं वचनमब्रवीत् ॥ ३ ॥
सान्त्विता मामिका माता दत्तं राज्यमिदं मम ॥ तद्ददामि तवैवाहं भुङ्क्ष्व राज्यमकण्टकम् ॥ ४ ॥
महतेवाऽम्बुवेगेन भिन्नः[1] सेतुर्जलागमे ॥ दुरावारं त्वदन्येन राज्यखण्डमिदं महत् ॥ ५ ॥
गतिं खर इवाश्वस्य तार्क्ष्यस्येव पतत्रिणः ॥ अनुगन्तु न शक्तिर्मे गतिं तव महीपते ॥ ६ ॥
सुजीवं नित्यशस्तस्य यः परैरुपजीव्यते ॥ राम तेन[2] तु दुर्जीवं यः परानुपजीवति ॥ ७ ॥
[3]यथा तु रोपितो वृक्षः पुरुषेण विवर्धितः ॥ ह्रस्वकेन दुरारोहो रूढस्कन्धो महाद्रुमः ॥ ८ ॥
स [4]यथा पुष्पितो भूत्वा फलानि न विदर्शयेत् ॥ स तां नानुभवेत्प्रीतिं यस्य हेतोः [5]प्ररोपितः ॥ ९ ॥

मित्यादि ॥ १ ॥ हुतं होमं ॥ २—३ ॥ दत्तमन्यथयितुमशक्तोहमितिरामोवदेदितिमत्वातस्यपरिहारानुगुणंवचनमाह—सान्त्वितेति । ममेयंमामिका शैषिकोण् । " तवकममकावेकवचने " इत्यण् । सन्नियोगेनास्मच्छब्दस्यममकादेशः आदिवृद्धिश्च । "प्रत्ययस्थात्—" इत्यत्रमामकनरकयोरुपसंख्यानात्ककारात्पूर्वस्याकारस्यइकारः । मातृविरोधे नस्वीकुर्यादितिमत्वाह—सान्त्वितेति । दत्तस्यान्यथाकरणमनुचितमितिरामोवदेदितिपरिहरति—दत्तमिति । त्रयएवाधनाइतिन्यायेनदासस्यस्वंत्वदीयमिति ददामीत्यर्थः ॥ ४ ॥ त्वमेवराज्यंरक्षेत्याशङ्क्याह—महतेति । जलागमेति । जलागमे वर्षाकाले । दुरावारं आवरीतुमशक्यं । राज्यखण्डं नवखण्डेपुभरतखण्डाख्यं राज्यं कोसलरूपखण्डंवा ॥ ५ ॥ राज्यस्यदुरावारत्वमुक्त्वास्वस्याशक्तिमाह—गतिमिति । खरेत्यविभक्तिकनिर्देशः खरस्येत्यर्थः । प्रकृतिभावआर्षः । पतत्रिणः पक्षिमात्रस्य । अश्वस्यगतिमनुगन्तुंखरस्ययथा नशक्तिः गरुडस्यगतिमनुगन्तुंकेवलपक्षिणोयथाचशक्तिर्नास्ति तथेत्यर्थः ॥ ६ ॥ तवशक्तिर्नास्तिचेदन्यः कश्चिद्राज्यंरक्षत्वित्यत्राह—सुजीवमिति । नित्यशः नित्यं ॥ ७ ॥ उचितंचत्वद्रक्षणमेवेत्याह—यथेत्यादिना । श्लोकत्रयमेकान्वयं । यथात्वितिनिपातसमुदायोयमुदाहरणोपक्रमद्योतनार्थः । केनचित्पुरुषेण रोपितः बीजावापेनोत्पादितः योवृक्षः पुत्रःसंवर्धितः । ह्रस्वकेन वामनेन । दुरारोहः क्रमेणरूढस्कन्धः । महाद्रुमोजातः सयथापुष्पितोभूत्वा फलानिनविदर्शयेत् सरोपयिता यस्यफलस्य हेतोः हेतुना । तंवृक्षंरोपितवान् तां फलविषयिणीं । प्रीतिं नानुभवेत् । विनयेनप्रत्येकंवक्तुमशक्तःसमुदायरूपेणदर्शयति । भर्तात्वमस्मान्भृत्यान् नशाधि यदि एषोपमेति एषा पूर्वोक्तमर्थजातमुपमा । उपमाशब्दापेक्षयास्त्रीलिङ्गत्वं । रोपयिता अभिवृद्धोवृक्षः पुष्पदर्शनंफलादर्शनंचोपमेत्यर्थः । तमर्थमुपमेयमर्थजातंवेत्तुमर्हसि भावज्ञानकुशलःखल्वसीत्यर्थः । रोपयितुर्दशरथउपमेयः । वर्धितमहावृक्षस्यभवान् पुष्पदर्शनस्याभिषेचनौन्मुख्यंफलाननुभवस्यभवतोराज्यापरिपालनमित्येतत्सर्वंत्वंजाना-

ति० मन्दाकिन्यांतत्तीरे । **ति०** द्वारमितिपाठे उटजद्वारमित्यर्थइतिकेचित् । तन्न उत्तरसर्गेमन्दाकिनीतीरेराममुवाचेत्युक्तेः । तस्माद्राममितिपाठेरामाधिष्ठितनदीमित्यर्थउचितः ॥ २ ॥ **ति०** माता कैकेयी प्रथमंराज्ञा राज्यदानेनसान्त्विता कृताश्वासा । अनन्तरं या ममेदंराज्यंदत्तं तद्राज्यमकण्टकं उक्तप्रकारेणपितृवचनस्यापिपरिपालनात्प्रत्यूहरहितं ॥४॥ **ति०** अश्वगतिमनुगंतुंखरोयथानशक्तः तार्क्ष्यगत्यनुगमनेयथेतरपक्षिणोनशक्ताः तथातवगतिंत्वदीयांराज्यपालनशक्तिमनुगंतुंमेनशक्तिः इवशब्दोयथार्थे । निपातानामनेकार्थत्वात् ।**शि०** तवगतिंसामर्थ्यमित्यर्थः ॥ ६ ॥ **ति०** यःपरैर्नित्यशउपजीव्यते तस्यसुजीवं शोभनंजीवनमित्यर्थः । भावघञन्तंक्लीबमपिक्वचित् । "घञबजपाःपुंसि" इतितुप्रायिकमितिबोध्यं । तस्येत्यर्थेतेनेत्यार्षं । दुर्जीवं दुःखंजीवनं । तस्मात्तवराज्यकरणमेवोचितमितिभावः । **स०** यः परैरुपजी० ते तस्यजीवं सुजीवं । दुर्जीवं । "ईषद्दुस्सुपु—" इत्यादिनाखल् । तादृशंदुर्जीवं ते तव नतु माभुत् ॥ ७ ॥ **ती०** लोकरक्षणार्थंदशरथेनोत्पाद्यवर्धितस्सकलसद्गुणसंपन्नस्त्वं यदिलोकरक्षणंनकुर्यास्तदातस्यलोकस्यदशरथस्यचत्वयानप्रयोजनमित्यस्योपदेशमुखेनफलादर्शनवृक्षौपम्यमाह—यथात्वित्यादिश्लोकत्रयेण ॥८॥ **ति०** प्रभावितः उत्पादितः । यत्र रक्षण-

[पा०] १ ङ. ज. भिन्नसेतुः. २ क. घ. च. ञ. तस्य. ३ ङ. यथात्वारोपितो. ४ क. ग. ङ. च. छ. झ. ञ. ट. यदा. ५ क. ग. घ. ज. झ. ञ. प्रभावितः. ख. सरोपितः.

एषोपमा महाबाहो तमर्थं वेत्तुमर्हसि ॥ यदि त्वमस्मान्वृषभो भर्ता भृत्यान्न शाधि हि ॥ १० ॥
श्रेणयस्त्वां महाराज पश्यन्त्वग्र्याश्च सर्वशः ॥ प्रतपन्तमिवादित्यं राज्ये स्थितमरिंदमम् ॥ ११ ॥
त्वयाऽनुयाने काकुत्स्थ मत्ता नर्दन्तु कुञ्जराः ॥ अन्तःपुरगता नार्यो नन्दन्तु सुसमाहिताः ॥ १२ ॥
तस्य साध्वित्यमन्यन्त नागरा विविधा जनाः ॥ भरतस्य वचः श्रुत्वा रामं प्रत्यनुयाचतः ॥ १३ ॥
तमेवं दुःखितं प्रेक्ष्य विलपन्तं यशस्विनम् ॥ रामः कृतात्मा भरतं समाश्वासयदात्मवान् ॥ १४ ॥
नात्मनः कामकारोस्ति पुरुषोऽयमनीश्वरः ॥ इतश्चेतरतश्चैनं कृतान्तः परिकर्षति ॥ १५ ॥
सर्वे क्षयान्ता निचयाः पतनान्ताः समुच्छ्रयाः ॥ संयोगा विप्रयोगान्ता मरणान्तं च जीवितम् ॥ १६ ॥
यथा फलानां पक्वानां नान्यत्र पतनाद्भयम् ॥ एवं नरस्य जातस्य नान्यत्र मरणाद्भयम् ॥ १७ ॥
यथाऽगारं दृढस्थूणं जीर्णं भूत्वाऽवसीदति ॥ तथैव सीदन्ति नरा जरामृत्युवशंगताः ॥ १८ ॥

सीत्यर्थः । एतत्सर्वं महाबाहोइत्यनेनसूचितम् ॥ ८—१० ॥ श्रेणयः पौरश्रेणयः । अग्र्याः प्रधानाः ॥ ११—१३ ॥ दुःखितं स्वप्रार्थनानङ्गीकारेणदुःखितं । विलपन्तं ममहेतोरार्यविवासनंपितुर्मरणमित्यादि जातमितिप्रलपन्तं । कृतात्मा सुशिक्षितबुद्धिः धैर्यवान्वा ॥ १४ ॥ कैकेयीप्रेरितोराजाभवांश्चनमद्वनवासहेतुः किन्तुदैवमेवेतितत्त्वदृष्ट्याभरतंदुःखान्निवर्तयितुमुपक्रमते—नात्मनइत्यादि । आत्मनः पुरुषस्य । कामकारः ऐच्छिकव्यापारोनास्ति । यतोयंपुरुषः अनीश्वरः अस्वतन्त्रइत्यर्थः । इतश्च एतस्माद्देशाद्देशान्तरं । इतरतः अन्यदेशाच्च एनंदेशं कृतान्तः स्वतन्त्रदैवमेव परिकर्षति आकर्षति । "दैवेकृतान्तःसिद्धान्तेयमाकुशलकर्मणोः" इतिवैजयन्ती । यथोक्तं भगवतागीताचार्येण "ईश्वरःसर्वभूतानांहृद्देशेऽर्जुनतिष्ठति। भ्रामयन्सर्वभूतानियन्त्रारूढानिमायया" इति ॥ १५ ॥ अपरिहरणीयवस्तुस्वभावपर्यालोचनायांपितृमरणेनापिशोकस्यावकाशोनास्तीत्यमुमर्थमाह—सर्वइति । निचयाः धनसंचयाः सर्वेबहुशःसंपादिताअपि क्षयान्ताः क्षयपर्यवसायिनः । चोरेण क्षामेन राज्ञावा नश्यन्तीत्यर्थः । समुच्छ्रयाः अत्यन्तसमुन्नताअपि । पतनान्ताः अत्युन्नतपदस्थिता ब्रह्मेन्द्रादयोपि स्वस्वाधिकारसमाप्तिदशायांतत्पदभ्रंशपर्यवसायिनइतियावत् । संयोगाः पुत्रमित्रकलत्रादिसंबन्धाअपि । विप्रयोगान्ताः विरहपर्यवसायिनः । जीवितंच उत्कृष्टजीवनमपि । मरणान्तं अपरिहार्यमरणाधीनभङ्गशालीत्यर्थः । पितृमरणशोकेनैवमुच्यते भरतेनेत्यारोप्य तदपनोदनंकृतमस्मिञ्श्लोकेपादत्रयोक्तार्थत्रयंदृष्टान्तार्थं । तुरीयपादश्चदार्ष्टान्तिकंदशरथमरणमभिप्रैति । अतः अपरिहार्यकालकृतत्वात्पितृमरणमपिनशोचनीयमितिभावः ॥ १६ ॥ प्रथमश्लोके वनगमनंनमयास्वतन्त्रेणकृतमपित्वीश्वरकृतमित्युक्तं । द्वितीयश्लोकेदशरथमरणंचकालकृतमतस्तत्रापिनशोचनीयमित्युक्तं । अथद्वितीयश्लोकोक्तंसदृष्टान्तंप्रपञ्च-

---

काले । शि० यस्यहेतोः प्ररोपितः तस्याभावादितिशेषः ॥ ९ ॥ वृषभः सर्वश्रेष्ठः भर्ता त्वं अस्मान्भृत्यान्नशाधि तदा एषातन्नोपमा । तत्तस्माद्धेतोः तदर्थं राज्यरूपार्थं । वेत्तुं लब्धुं । अर्हसि "वृषभःश्रेष्ठवृषयोः" इतिमेदिनी ॥ १० ॥ स० श्रेणयः नानाजनसंघाः ॥ ११ ॥ ति० तस्यवचः साध्विति अनुमन्यन्तेतियोजना । अन्वमन्यन्तेत्यर्थः ॥ १३ ॥ शि० कृतात्मा कृतः आत्मा वनगमनायप्रयत्नोयेनसरामः ॥ १४ ॥ स० कृतान्तोदैवं । इतः एतल्लोकाद्देहाद्वा । इतरतः लोकान्तरादपि परिकर्षति कर्मफलमनुभावयति ॥ १५ ॥ शि० मुख्यंदुःखंमरणदुःखमितितस्यैवप्रतिक्रियाविचारणीयेतिबोधयन्नाह—**यथेति** । यथापक्वानांफलानां तालादिजन्यानांपतनादन्यत्र अन्यस्मिन्काले भयं काकादिपक्षिभक्षणभीतिर्नास्ति । तथा जातस्यनरस्य मरणात् मर्त्यलोकादन्यत्रभयंनास्ति । एतेन मर्त्यलोकादन्यत्रनयनेयत्नःकर्तव्यइतिसूचितम् । स० मरणादन्यत्र अन्यस्मान्नभयं ॥ १७ ॥

[पा०] १ ङ. छ. झ. ञ. ट. तदर्थं. २ क. ख. ङ.—ट. यत्र. ३ च. ञ. भृत्यान्भर्तान. क. भृत्यान्भक्तान्. ४ ग. छ. झ. ट. राज्यस्थित. ५ ङ. तातानु. छ. झ. तवानु. ६ च. ञ. चरा. ७ ङ. च. छ. झ. ञ. ट. साध्वनुमन्यन्त. ८ घ. वीक्ष्य. ९ ङ. छ. झ. ट. कामकारोहि. १० घ. मरणान्तंतु. ११ ग. ङ. छ. झ. ट. भूत्वोप. १२ क. ख. ङ. च. छ. झ. ञ. ट. तथाव.

अत्येति रजनी या तु सा न प्रतिनिवर्तते ॥ यात्येव यमुना पूर्णा समुद्रमुदकाकुलम् ॥ १९ ॥
अहोरात्राणि गच्छन्ति सर्वेषां प्राणिनामिह ॥ आयूंषि क्षपयन्त्याशु ग्रीष्मे जलमिवांशवः ॥ २० ॥
आत्मानमनुशोच त्वं किमन्यमनुशोचसि ॥ आयुस्ते हीयते यस्य स्थितस्य च गतस्य च ॥ २१ ॥
सहैव मृत्युर्व्रजति सह मृत्युर्निषीदति ॥ गत्वा सुदीर्घमध्वानं सह मृत्युर्निवर्तते ॥ २२ ॥
गात्रेषु वलयः प्राप्ताः श्वेताश्चैव शिरोरुहाः ॥ जरया पुरुषो जीर्णः किं हि कृत्वा प्रभावयेत् ॥२३॥
नन्दन्त्युदित आदित्ये नन्दन्त्यस्तमिते रवौ ॥ आत्मनो नावबुध्यन्ते मनुष्या जीवितक्षयम् ॥२४॥
हृष्यन्त्यृतुमुखं दृष्ट्वा नवंनवमिहागतम् ॥ ऋतूनां परिवर्तेन प्राणिनां प्राणसंक्षयः ॥ २५ ॥
यथा काष्ठं च काष्ठं च समेयातां महार्णवे ॥ समेत्य च व्यपेयातां कालमासाद्य कंचन ॥ २६ ॥
एवं भार्याश्च पुत्राश्च ज्ञातयश्च धनानि च ॥ समेत्य व्यवधावन्ति ध्रुवो ह्येषां विनाभवः ॥ २७ ॥
नात्र कश्चिद्यथाभावं प्राणी समभिवर्तते ॥ तेन तस्मिन्न सामर्थ्यं प्रेतस्यास्त्यनुशोचतः ॥ २८ ॥

यतियथेत्यादिना ॥ १७—१८ ॥ समुद्रस्योदकाकुलत्वविशेषणं यमुनायाःसर्वथाऽनिवर्त्यत्वाय ॥ १९ ॥ गच्छन्तीतिप्रथमाबहुवचनमहोरात्रविशेषणं । अंशवः सूर्यस्येतिशेषः ॥ २० ॥ शोकविषयंनिर्धारयति—आत्मानमिति । आयुस्ते यतोहीयते अतःपरलोकचिन्तामेवकुर्वित्यर्थः ॥ २१ ॥ मृत्युःसर्वथादुष्परिहरइत्याह—सहैवेति ॥ २२ ॥ कालान्तरेतथैवकरिष्यामीत्यत्राह—गात्रेष्वित्यादिना । तस्माद्बाल्यएवआत्मज्ञानाययतेतेत्युक्तंभवति । किंहिकृत्वा पूर्वोक्तोपद्रवपरिहारत्वेनकमुपायंकृत्वा आत्मानंप्रभुंकुर्यादित्यर्थः ॥२३॥ बाल्येपिपुरुषाणांविवेकोदुर्लभइत्याह—नन्दन्तीत्यादिना । आदित्येऽदितेनन्दन्ति अर्थार्जनकालोयमागतइति । रवौ अस्तमितेपिनन्दन्ति कामोपभोगकालोयमागतइति । आत्मनोजीवितक्षयंनावबुध्यन्ते संच्छिद्रघटेगृहीतंजलमिवप्रतिक्षणमायुःक्षीयतइतिनजानन्ति । जीवितकालएवपरलोकहितंकर्तुंनेच्छन्तीत्यर्थः ॥ २४ ॥ तत्तदृत्वागमंदृष्ट्वा नानाभोगहेतुरितिहृष्यन्ति । प्रत्युतऋत्वागमोऽनर्थहेतुरित्याह—ऋतूनां परिवर्तेनेति ॥ २५ ॥ श्लिष्टानांविश्लेषस्यावश्यंभावित्वात्तदपिनशोचनीयमित्यभिप्रायेणाह—यथाकाष्ठमितिश्लोकद्वयेन । विनाभवः वियोगः ॥२६—२७॥ अस्मिँल्लोकेकश्चिदपिप्राणी यथाभावंनसमभिवर्तते यथाभिलाषंबन्धुभिःसहनवर्तते । तेनकारणेन प्रेतस्य मृतस्यहेतोः । अनुशोचतः पुरुषस्य तस्मिन् मरणनिवारणे । सामर्थ्यंनास्ति । [अस्मिन्बद्धलोकेकश्चिदपि ब्रह्मादिस्तम्बपर्यन्तेपुकोपिजन्तुः । यथाभावं यथाभिलापं । अप्रतिहतसंकल्पतयेत्यर्थः । नसमभिवर्तते । कश्चिदित्यनेन मानुषाद्यपेक्षयाचिरकालवर्तिनां शक्त्यतिशयभाजामपिब्रह्मादीनामधिकारावसाने मरणं दुर्निवारमेवेत्याशयः । तेन एवमप्रतिहतसंकल्पत्वाभा-

---

रामानुजीयं । समुद्रंलवणार्णवमितिपाठस्सम्यक् । ति० अतीतरजन्यप्रतिनिवृत्तौदृष्टान्तोयमुनायात्येव नप्रतिनिवर्ततइत्यर्थः । उदकार्णवमित्यत्रोदकपदमधिकं । स० समुद्रंयथाभवतितथा सचिह्नमितितदर्थः । उदकार्णवमितिदध्यादिसमुद्रव्यावृत्त्यर्थं ॥ १९ ॥ ति० गच्छन्तीतिशत्रन्तं । आशयेइतिपाठेजलाशयइत्यर्थः ॥ २० ॥ ति० आयुस्तु यस्य यस्यकस्यापीत्यर्थः । ती० आत्मानमनुशोच नश्वरफलसाधनेषुव्यापृतंत्वामेवानुशोचेत्यर्थः । स० आत्मानमनुशोच आयुर्गच्छतिश्रेयस्साधनंकिंमयाकार्यमितिचिन्तय । शि० स्थितस्य कदाचिदिहलोकेविद्यमानस्य । गतस्य कदाचिद्देवलोकंप्राप्तस्यचयस्यप्राकृतजनस्य आयुर्हीयते तमात्मानंशरीरिणं । अनुशोच तद्दुःखनिवर्तकयत्नंकुर्वित्यर्थः । अन्यं प्राकृतविलक्षणं मां । किं किमर्थमनुशोचसि ॥ २१ ॥ ति० सहेति । अन्तर्यामिणएवमृत्युरूपत्वात् । अतोपरिहार्यस्सइतिभावः ॥ २२ ॥ स० वलयः जराज्ञापकाङ्गशैथिल्यानि । ति० यद्वा किंकृत्वा कमुपायंकृत्वा । एतत्सर्वपरिहारेसमर्थोभवेदित्यर्थः । शि० वलयः जराकृताकारविशेषाः । किंकृत्वाप्रभावयेत् । एतेनास्मत्प्रयत्नमन्तरामृत्युनिवृत्तिर्नभवितेतिसूचितं ॥ २३ ॥ ति० आत्ममुखमितिपाठे स्वस्वाभिमुखमृतूनांपरिवर्तंदृष्ट्वा हृष्यन्तीत्यर्थः ॥ २५ ॥ ति० अत्र संसारे । कश्चिदपिप्राणी यथाभावं यथाप्राप्तंस्वभावंमृतिजनिलक्षणं । नसमतिवर्तते नलङ्घयति ।

[पा०] १ ङ. अतीता. २ ङ. छ. झ. ञ. ट. पूर्णं. ३ घ. ज. समुद्रंलवणार्णवं. क. ख. ग. ङ. च. छ. झ. ञ. ट. समुद्रमुदकार्णवं. ४ छ. झ. ट. आयुस्तु. ५ छ. झ. ट. स्थितस्याथ. ख. ग. स्थितस्यापि. ६ ख. सुदूरं ग. ञ. सदीर्घं. ७ छ. झ. ट. मितेऽहनि. क. च. ञ. मितेऽपिच. ८ क. ख. ङ. च. छ. झ. ञ. ट. वसूनि. ९ ङ. छ. झ. ट. समतिवर्तते.

यथा हि सार्थं गच्छन्तं ब्रूयात्कश्चित्पथि स्थितः ॥ अहमप्यागमिष्यामि पृष्ठतो भवतामिति ॥२९॥
एवं पूर्वैर्गतो मार्गः पितृपैतामहो ध्रुवः ॥ तमापन्नः कथं शोचेद्यस्य नास्ति व्यतिक्रमः ॥ ३० ॥
वयसः पतमानस्य स्रोतसो वाऽनिवर्तिनः ॥ आत्मा सुखे नियोक्तव्यः सुखभाजः प्रजाः स्मृताः ॥३१॥
धर्मात्मा स शुभैः कृत्स्नैः क्रतुभिश्चाप्तदक्षिणैः ॥ धूतपापो गतः स्वर्गं पिता नः पृथिवीपतिः ॥३२॥
भृत्यानां भरणात्सम्यक्प्रजानां परिपालनात् ॥ अर्थादानाच्च धर्मेण पिता नस्त्रिदिवं गतः ॥ ३३ ॥
कर्मभिस्तु शुभैरिष्टैः क्रतुभिश्चाप्तदक्षिणैः ॥ स्वर्गं दशरथः प्राप्तः पिता नः पृथिवीपतिः ॥ ३४ ॥
इष्ट्वा बहुविधैर्यज्ञैर्भोगांश्चावाप्य पुष्कलान् ॥ उत्तमं चायुरासाद्य स्वर्गतः पृथिवीपतिः ॥ ३५ ॥
आयुरुत्तममासाद्य भोगानपि च राघवः ॥ स न शोच्यः पिता तातः स्वर्गतः सत्कृतः सताम् ॥ ३६ ॥
स जीर्णं मानुषं देहं परित्यज्य पिता हि नः ॥ दैवीमृद्धिमनुप्राप्तो ब्रह्मलोकविहारिणीम् ॥ ३७ ॥
तं तु नैवंविधः कश्चित्प्राज्ञः शोचितुमर्हति ॥ तद्विधो यद्विधश्चापि श्रुतवान्बुद्धिमत्तरः ॥ ३८ ॥
एते बहुविधाः शोका विलापरुदिते तथा ॥ वर्जनीया हि धीरेण सर्वावस्थासु धीमता ॥ ३९ ॥

वेन । प्रेतस्य मृतस्यहेतोः । अनुशोचतःपुरुषस्य तस्मिन्मरणनिवारणेसामर्थ्यंनास्ति । अतः ब्रह्मादीनामप्यपरिहार्येशोकंविहायसर्वानर्थनिवृत्तयेप्रयतेतेति भावः] ॥ २८ ॥ यथेत्यादिश्लोकद्वयं। गच्छन्तंसार्थं पथिकसमूहं । पथिस्थितःपुरुषोयथा अहमप्यागमिष्यामीतिब्रूयादनुगच्छतिच । एवं पूर्वैर्वश्यैः गतः प्राप्तोमार्गः । पितृपैतामहः पितृपितामहसंबन्धी । तैरपिप्राप्तइतियावत् । ध्रुवः पुत्रादिभिरपिगन्तव्यत्वेन निश्चितः ॥ २९—३० ॥ उक्तमर्थमुपसंहरति—वयसइत्यादिना । "यस्यचभावेनभावलक्षणं" इतिसप्तम्यर्थेषष्ठी । वाशब्दइवार्थः । अनिवर्तिनिस्रोतसीव वयसिपतमाने अनिवर्तितयागच्छतिसति । आत्मा सुखे सुखहेतौधर्मे । नियोक्तव्यः परलोकहितचिन्तयेतिशेषः । यतः प्रजाः सुखभाजः धर्मसाध्यसुखासक्ताः स्मृताइतियोज्यं ॥ ३१ ॥ एवंलोकस्थितिः अस्मत्पितरंप्रतितु नशोकगन्धोपिकार्यइत्याशयेनाह—धर्मात्मेत्यादिना ॥ ३२ ॥ धर्मेण अर्थादानात् धर्मेणकरादिग्रहणात् ॥ ३३ ॥ इष्टैः जनानांस्वस्यचाभिमतैः । शुभैःकर्मभिः महापथेषुतटाकनिर्माणादिभिः ॥ ३४—३५ ॥ उत्तमं तत्पूर्वराजायुरपेक्षया अधिकतमं । आयुः भोगानपिचासाद्यस्वर्गतः सतांसत्कृतः सपिता नशोच्यइत्यन्वयः ॥ ३६ ॥ दैवीमृद्धिं देवसंबन्धिसंपदं दिव्यदेहादिलाभरूपामित्यर्थः ॥ ३७ ॥ एवंविधः प्राज्ञइति भरतगुणंप्रत्यक्षेणनिर्दिशति । एवंविधइत्युक्तमुद्घाटयति—तद्विधइति । श्रुतवान् बुद्धिमत्तरश्च यद्विधोसि तद्विधइत्यर्थः ॥ ३८ ॥ बहुविधाः दशरथमरणमद्विवासनादिभेदेनबहुप्रकाराः । विलापरुदिते प्रलापाश्रुमोचनेच । वर्जनीयेइतिविपरिणामेना-

त्वेनहेतुना प्रेतस्य संबन्धसामान्येषष्ठी । प्रेतमनुशोचतोस्य तस्मिन् स्वीयप्रेतभावनिवर्तने । सामर्थ्यंनास्ति ॥२८॥ ति० पैतृपितामहैः । वृद्धिरार्षी । पितृपैतामहैरित्यर्थः ॥ ३० ॥ ती० उत्तमं पापप्रसङ्गरहितं ॥ ३५ ॥ ति० श्रुतवान् अधीतात्मविद्यः । तद्विधोयद्विधश्चासीतिपाठे श्रुतवान्बुद्धिमत्तरश्चयद्विधोसि तद्विधोभवान्नशोचितुमर्हसीत्यर्थइतितीर्थः । ब्रह्मलोकंप्राप्तस्यात्यन्तंशोकोनुचितइति भावः । शि० तं प्राकृतविलक्षणसंपत्तिविशिष्टंराजानं । एवंविधःराजसदृशःकश्चित्प्राज्ञः । त्वद्विधोमद्विधश्च श्रुतवान् शास्त्रज्ञः । शोचितुंनार्हति ॥ ३८ ॥ इतिपञ्चोत्तरशततमस्सर्गः ॥ १०५ ॥

[पा०] १ झ. पैतृपितामहैः. ङ. छ. ज. ट. पितृपैतामहैः. २ घ. धर्मात्माथ. ङ. छ. ज. झ. ट. धर्मात्मासु. ३ क. च. ञ. सर्वैः. घ. कृत्स्नैः. ४ ञ. स्वर्गंदशरथःप्राप्तःपिता. धूतपापोगतइत्येतदारभ्य सनशोच्यःपितेत्येतत्पूर्वं विद्यमानान्यष्टावर्धानि झ. पुस्तकेनदृश्यन्ते. ट. पुस्तकेतु. भृत्यानांभरणादितिश्लोकवर्जंशिष्टानिषडर्धानि नदृश्यन्ते. तत्रापि. भृत्यानांभरणादितिश्लोकस्तु सनशोच्यःपितेत्यनन्तरं सजीर्णंमानुषमित्यर्धात्पूर्वंदृश्यते. ५ ख. ग. घ. ज. ञ. ट. अर्थदानाच्च. ६ क. ख. ग. च. ञ. कर्मभिस्सुशुभैः. ७ क. च. श्चापिसुपुष्कलान्. ८ आयुरुत्तममित्यर्धं ञ. पुस्तकेनदृश्यते. ९ क. ख. ग. ननः. च. नतु. छ. झ. ञ. नस. १० ग. छ. झ. जीर्णंमानुषं. ११ ग. दैवींवृत्तिं. ख. च. दैवींसिद्धिं. ङ. दैववृद्धिं. १२ ख. घ. त्वद्विधोमद्विधश्चासि. ग. ङ. च. ज.—ट. त्वद्विधोमद्विधश्चापि. १३ घ. विधादुःखा. १४ घ. ङ. छ. झ. ट. तदा.

[1]स स्वस्थो भव मा [2]शोचीर्यात्वा [3]चावस तां पुरीम् ॥ तथा [4]पित्रा नियुक्तोसि वशिना [5]वदतांवर ॥४०॥
यत्राहमपि तेनैव नियुक्तः पुण्यकर्मणा ॥ तत्रैवाहं करिष्यामि पितुरार्यस्य शासनम् ॥ ४१ ॥
न मया शासनं तस्य त्यक्तुं न्याय्यमरिंदम ॥ [6]तत्त्वयाऽपि सदा [7]मान्यं स वै बन्धुः स नः पिता ॥४२
तद्वचः पितुरेवाहं संमतं धर्म[8]चारिणः ॥ कर्मणा पालयिष्यामि वनवासेन राघव ॥ ४३ ॥
धार्मिकेणानृशंसेन नरेण [9]गुरुवर्तिना ॥ भवितव्यं नरव्याघ्र [10]परंलोकं जिगीषता ॥ ४४ ॥
आत्मानमनुतिष्ठ त्वं स्वभावेन नरर्षभ ॥ निशाम्य तु शुभं वृत्तं पितुर्दशरथस्य नः ॥ ४५ ॥

इत्येवमुक्त्वा वचनं महात्मा पितुर्निदेशप्रति[11]पालनार्थम् ॥
यवीयसं भ्रातरमर्थवच्च प्रभुर्मुहूर्ताद्विरराम रामः ॥ ४६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे पञ्चोत्तरशततमः सर्गः ॥१०५॥

षडुत्तरशततमः सर्गः ॥ १०६ ॥

भरतेनरामंप्रतिसहेतूपन्यासंबहुधाराज्यस्वीकारप्रार्थनापूर्वकंतेनायोध्यांप्रत्यनागमनेस्वेनापितद्वगमनेप्रतिज्ञानम् ॥ १ ॥
रामेणपितृवचनपरिरक्षणदीक्षिततयाभरतप्रार्थनानङ्गीकारेपौरैःकौसल्यादिभिश्चरामंप्रतिप्रार्थना ॥ २ ॥

एवमुक्त्वा तु वि[12]रते रामे वचनमर्थवत् ॥ ततो मन्दाकिनीतीरे रामं प्रकृतिवत्सलम् ॥
उवाच भरतश्चित्रं धार्मिको धार्मिकं वचः ॥ १ ॥
को हि स्यादीदृशो लोके यादृशस्त्वम[13]रिन्दम ॥ न त्वां प्रव्यथयेद्दुःखं प्रीतिर्वा न प्रहर्षयेत् ॥ २ ॥
सं[14]मतश्चासि वृद्धानां तांश्च पृच्छसि संशयान् ॥ ३ ॥
यथा मृतस्तथा जीवन्यथाऽसति तथा सति ॥ यस्यैष बुद्धिलाभः स्यात्परितप्येत केन सः ॥ ४ ॥

न्वयः ॥ ३९ ॥ मद्विवासनंत्वयापिमान्यमित्याह—सस्वस्थइत्यादिना । यात्वा गत्वा । तांपुरीं आवस अधितिष्ठ ॥ ४० ॥ यत्र वनरूपेस्थाने ॥४१—४४॥ स्वभावेनात्मानमनुतिष्ठ राजभावेनभवन्तंयोजयेत्यर्थः। निशाम्य दृष्ट्वा ज्ञात्वेतियावत् ॥ ४५ ॥ यवीयसं यवीयांसं ॥ ४६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने पञ्चोत्तरशततमः सर्गः ॥ १०५ ॥

अथरामंप्रतिभरतस्यश्लाघ्यतरोचितोत्तरं षडुत्तरशततमे । अस्मिन्सर्गेश्लोकव्यत्यासःसर्गभेदश्चदृश्यते तच्छुद्धयेक्रमेणव्याक्रियते—एवमुक्त्वात्विति। निरुत्तरमुक्तवन्तंरामंप्रतिमुखान्तरेणोत्तरस्योच्यमानत्वाच्चित्रमित्युक्तं ॥ १—२ ॥ वृद्धानां त्रैविद्यवृद्धानां। संमतः सर्वज्ञत्वेनसंमतः । तथापि तान्संशयान पृच्छसीतिसंवन्धः ॥ ३ ॥ पितृवियोगादिजनितदुःखेनमयाकथितमितिहिभवतोक्तंममतादृशदुःखप्रसङ्ग एवनास्तीत्याह—यथामृतइति । मृतः पुरुषोयथाद्वे-

---

शि० चित्रं अनेकविधयुक्तिविशिष्टं ॥ १ ॥ ति० वृद्धानांसंमतोपि धर्मविषयेरामवदेववर्तितव्यमितिदृष्टान्तभूतोपिलोकमर्यादामनुसरंस्तान्वृद्धान्संशयान् संशयास्पदधर्मान्पृच्छसि । एवंच सर्वज्ञाप्तकामत्वात्तवनदुःखमितिभावः ॥ ३ ॥ ति० यथामृतस्तथाजीवन् । अस्यंयथाजीवंस्तथामृतइतिवाक्यशेषआर्थिकोयोज्यः । यथा मृतस्त्यक्तदेहआत्मादेहपुत्रादिभिरसंवन्धस्तथा जीवन्नपितैरसंबन्धः । नित्यशुचिसुखचिदात्मनोनित्याशुचिदुःखजडेनदेहेनतदीयैश्चासंवन्धात् । यथाच जीवन्स्वकर्मानुरूपंसंसरति

[पा०] १ गं. तत्स्वस्थो. ख. ज. सुखस्थो. २ क. ख. घ.—ट. शोकोयात्वा. ३ क. ख. ग. ज. ञ. चवस. ४ ख. पितृनियुक्तोसि. ५ क. ददतां. ६ ख. ट. सत्वया. ७ ख.—ट. मान्यः. ८ च. छ. झ. ञ. ट. चारिणां. ९ ख. घ. गुणवर्तिना. १० क. ख. च. लोकजिगीषया. ध. लोकजिगीषुणा. ११ ख. पालनाय. १२ ङ. विरतोरामो. १३ ग. च. मरिंदमः. १४ ङ. छ.—ट. संमतश्चापि.

परावरज्ञो यश्च स्यात्तथा त्वं मनुजाधिप ॥ स एवं व्यसनं प्राप्य न विषीदितुमर्हति ॥ ५ ॥
अमरोपमसत्त्वस्त्वं महात्मा सत्यसङ्गरः ॥ सर्वज्ञः सर्वदर्शी च बुद्धिमांश्चासि राघव ॥ ६ ॥
न त्वामेवं गुणैर्युक्तं प्रभवाभवकोविदम् ॥ अविषह्यतमं दुःखमासादयितुमर्हति ॥
[एवमुक्त्वा तु भरतो रामं पुनरथाब्रवीत्] ॥ ७ ॥
प्रोषिते मयि यत्पापं मात्रा मत्कारणात्कृतम् ॥ क्षुद्रया तदनिष्टं मे प्रसीदतु भवान्मम ॥ ८ ॥
धर्मबन्धेन बद्धोस्मि तेनेमां नेह मातरम् ॥ हन्मि तीव्रेण दण्डेन दण्डार्हां पापकारिणीम् ॥ ९ ॥
कथं दशरथाज्जातः शुद्धाभिजनकर्मणः ॥ जानन्धर्ममधर्मिष्ठं कुर्यां कर्म जुगुप्सितम् ॥ १० ॥
गुरुः क्रियावान्वृद्धश्च राजा प्रेतः पितेति च ॥ तातं न परिगर्हेयं दैवतं चेति संसदि ॥ ११ ॥
को हि धर्मार्थयोर्हीनमीदृशं कर्म किल्बिषम् ॥ स्त्रियाः प्रियं चिकीर्षुः सन्कुर्याद्धर्मज्ञ धर्मवित् ॥१२॥

षविषयोनभवति जीवन्नपितथा । यथाअसतितथा सति अविद्यमानेवस्तुनियथारागोनास्ति विद्यमानेवस्तुन्यपितथा । इत्येषबुद्धिलाभोयस्य सकेनहेतुनापरितप्येत नकेनापीत्यर्थः । भवदुक्तप्रकारेणममदुःखलेशोपिनास्तीतिभावः ॥ ४ ॥ किमर्थंतर्हिशोकमूलवचनंत्वयोक्तमित्याशङ्क्यभवद्व्यसनासहतयेत्याह—परावरज्ञइति । यः परावरज्ञः त्रिकालज्ञः आत्मानात्मज्ञोवा परमात्मजीवात्मस्वरूपज्ञोवा । सः एवंव्यसनं प्राप्यापिव्यथितुंनार्हति तथात्वमपीतिसंबन्धः । अथापितवराज्यभ्रंशवनवासरूपव्यसनंत्वद्विश्लेषंचाहंकथं सहेयेतिभावः ॥ ५ ॥ अमरोपमेतिपृथक्पदं । सत्त्वः सत्त्वगुणसंपन्नः । अर्शआद्यच् । स्वाश्रितानांसत्त्वगुणकार्यतत्त्वज्ञानप्रवर्तकत्वाद्वा सत्त्वइत्युच्यते । “सत्त्वस्यैषप्रवर्तकः” इतिहिश्रुतिः । महात्मा महाधैर्यः । अतएव सत्यसङ्गरः सत्यप्रतिज्ञः । सर्वज्ञइत्यादिभिः त्रिभिर्भूतवर्तमानभावियावद्वस्तुज्ञानवत्त्वमुक्तं ॥ ६ ॥ प्रभवाभवकोविदं उत्पत्तिविनाशज्ञमित्यर्थः । भूतानामितिशेषः । अविषह्यतममपि अस्मदादीनामितिशेषः । दुःखं राज्यभ्रंशवनवासादिहेतुकं । नासादयितुमर्हति नाभिभवितुमर्हति ॥ ७—८ ॥ धर्मबन्धेन धर्मपाशेन ॥ ९ ॥ जुगुप्सितं लोकगर्हितं ॥ १० ॥ क्रियावान् यज्ञादिक्रियावान् । संसदि सभायां ॥ ११ ॥ धर्मार्थयोर्हीनं

तथा मृतोपिस्वकर्मानुरूपंपरत्र । किंच यथाजीवन्सर्वैस्संबद्धस्तथा मृतोपि । सर्वात्मत्वादस्य । किंच यथाऽसति अविद्यमाने । नरागोजायते तथा सति विद्यमानेपि । रागोनयुक्तः । यथावा सति साधौ । द्वेषोनयुक्तस्तथाऽसति असाधावपि । द्वेषोनयुक्तः । किंच यथाऽसतिप्रप[illegible]ऽनुरागस्तथा सति ब्रह्मणियुक्तः । किंच सति ब्रह्मणि । तन्निष्ठितस्ययथानबन्धोमुक्तिश्चभवति तथा लोकसंग्रहार्थमसन्निष्ठस्यापिनबन्धोमुक्तिश्चभवति । यस्य त्वादृशस्य । एषः उक्तार्थविषयकोबुद्धिलाभस्स्यात्सराजयोगी केनपरितप्येत नकेनापिहेतुनेत्यर्थः । शि० यथामृतः लोकान्तरंप्राप्तः । तथाजीवन् इहलोकेस्थितोपि यथा सति सत्पुरुषे । यथापराधदण्डः तथा असति असत्पुरुषेपि । यस्यैषबुद्धिलाभस्स्यात्सकेनहेतुनापरितप्येत नकेनापीत्यर्थः ॥ ४ ॥ स० व्यसनंव्यसनावस्थां प्राप्यापि विषीदितुं विषादंप्राप्तुं । नार्हति । तत्रदृष्टान्तो—यथात्वमिति । विषीदितुमित्यत्रसीदादेशइडागमश्चार्षः ॥ ५ ॥ स० अमरोपमसत्वः देवसमबलः । बुद्ध्यारोहार्थमेतत् । सर्वज्ञः सामान्यज्ञानवान् । सर्वदर्शी सर्वसाक्षी । बुद्धिमान् सर्वविषयकविशेषज्ञानवान् । मतुपाऽयमर्थोलभ्यते ॥ ६ ॥ ति० एवंचत्वामेवंविधं यद्यपिदुःखंनपीडयति तथापिमादृशंपीडयत्येवेति “स्वस्थोभवमाशोक” इत्यस्योत्तरमेतत्पर्यन्तं ॥ ७ ॥ शि० मात्रा मातृसदृशत्वेनमाननीययामन्थरया । अयंमातृशब्दआचारक्विबन्तप्रकृतिककर्तृक्विबन्तः ॥ ८ ॥ शि० धर्मबन्धेन स्त्रीनहन्तव्येतिवचनरूपबन्धनेन । ति० इमां सर्वान्तर्यामिणस्तवद्वेषिणीं ॥ ९ ॥ शि० शुभाभिजनकर्मणः शुभेअ[illegible]कर्मणीयस्यतस्मात् । ती० अधर्मिष्ठं अधर्मप्रचुरत्वात् । कर्म राज्यापहरणरूपमित्यर्थः । स० कर्म मातृहननरूपं ॥ १० ॥ शि० वृद्धः ज्ञानवयोभ्यामधिकः । अतएव गुरुः पूजनीयइत्यर्थः ॥ ११ ॥ एवंगुरुत्वादिहेतुभिर्यद्यप्यहंनपरिगर्हे तथापि वस्तुतोगर्ह्यएवेत्याह—कोहीति । धर्मार्थयोर्हीनं ताभ्यांहीनं कामप्रधानं । स०

[पा०] १ ख. घ. च. छ. झ. ट. स्याद्यथा. २ ख. छ. ज. श्चापि. ३ ख. ज. प्रभावाभाव. ४ इदमर्धं क. ख. ग. च. पुस्तकेपुदृश्यते. ५ ङ. छ. झ. ट. शुभाभिजन. ६ ङ. छ. झ. ट. मधर्मंच. ७ ङ. ज. झ. स्त्रियः.

अन्तकाले हि भूतानि मुह्यन्तीति पुराश्रुतिः ॥ राज्ञैवं कुर्वता लोके प्रत्यक्षं सा श्रुतिः कृता ॥१३॥
साध्वर्थमभिसन्धाय क्रोधान्मोहाच्च साहसात् ॥ तातस्य यदतिक्रान्तं प्रत्याहरतु तद्भवान् ॥ १४ ॥
पितुर्हि यदतिक्रान्तं पुत्रो यः साधु मन्यते ॥ तदपत्यं मतं लोके विपरीतमतोऽन्यथा ॥ १५ ॥
तदपत्यं भवानस्तु मा भवान्दुष्कृतं पितुः ॥ अभिपत्ता कृतं कर्म लोके धीरविगर्हितम् ॥ १६ ॥
कैकेयीं मां च तातं च सुहृदो बान्धवांश्च नः ॥ पौरजानपदान्सर्वांस्त्रातु सर्वमिदं भवान् ॥ १७ ॥
क्व चारण्यं क्व च क्षात्रं क्व जटाः क्व च पालनम् ॥ ईदृशं व्याहतं कर्म न भवान्कर्तुमर्हति ॥ १८ ॥
एष हि प्रथमो धर्मः क्षत्रियस्याभिषेचनम् ॥ येन शक्यं महाप्राज्ञ प्रजानां परिपालनम् ॥ १९ ॥
कश्च प्रत्यक्षमुत्सृज्य संशयस्थमलक्षणम् ॥ आयतिस्थं चरेद्धर्मं क्षत्रबन्धुरनिश्चितम् ॥ २० ॥
अथ क्लेशजमेव त्वं धर्मं चरितुमिच्छसि ॥ धर्मेण चतुरो वर्णान्पालयन्क्लेशमाप्नुहि ॥ २१ ॥
चतुर्णामाश्रमाणां हि गार्हस्थ्यं श्रेष्ठमाश्रमम् ॥ आहुर्धर्मज्ञ धर्मज्ञास्तं कथं त्यक्तुमर्हसि ॥ २२ ॥

धर्मार्थाभ्यांहीनं कामप्रधानमितियावत् ॥ १२ ॥ अन्तकाले विनाशकाले । मुह्यन्ति मोहंप्राप्नुवन्ति विपरीतबुद्धिंप्राप्नुवन्तीतियावत् ।पुराश्रुतिः पुरातनीगाथेत्यर्थः ॥ १३ ॥ क्रोधात् विषमद्यैवपास्यामीत्युक्तकैकेयीक्रोधात् । मोहात् कैकेयीविषयमोहात् । साहसात् साहसकरणात् अविमृश्यकारित्वादितियावत् । तातस्य यदविक्रान्तं यद्धर्मातिक्रमणं । तत्साध्वर्थमभिसन्धाय समीचीनार्थस्मृत्वा। भवान् प्रत्याहरतु निवर्तयतु॥१४॥ साधुमन्यते साधुकर्तुंमन्यतइत्यर्थः । तदपत्यंमतं पितुरपतनहेतुत्वात्तदेवापत्यत्वेनसंमतं ॥ १५॥ तदपत्यंभवानस्तु तादृशमपत्यमस्तु माऽभिपत्ता प्राप्नुंनार्हतीत्यर्थः ॥ १६—१८ ॥ तापसधर्मावलम्बनंक्षत्रियाणामप्यस्तीत्याशङ्क्याह—एषहीत्यादिना ॥ १९ ॥ प्रत्यक्षं परिदृश्यमानत्यागभोगयुक्तं । धर्मं परलोकश्रेयःसाधनं प्रजापालनरूपंधर्मं । उत्सृज्य संशयस्थं अप्रत्यक्षं अङ्गलोपादिसंभावनयासंशयितफलसिद्धिकमित्यर्थः । अलक्षणं लक्षणरहितं । क्रियाशक्तिरपूर्ववेतिदुर्निरूपमित्यर्थः । आयतिस्थं कालान्तरभाविफलं । अनिश्चितं क्षत्रियेणप्रथममिदमनुष्ठेयमितिकेनापिप्रमाणेनानिश्चितं । तापसधर्मं कःक्षत्रियः चरेत् नकोपीत्यर्थः ॥२०॥ अथक्लेशजमेवत्वंधर्मंचरितुमिच्छसि तथापिचातुर्वर्ण्यपालनतत्तद्धर्मस्थापनादिक्लेशयुक्तत्वाद्राज्यपालनमेवाचरेत्याह—अथेति ॥ २१ ॥ सर्वाश्रमधर्मापेक्षयाश्रेष्ठतमोगार्हस्थ्यधर्मः कथंत्यज्यतइत्याह—चतुर्णामिति ॥

धर्मज्ञाः धर्मविदोयेन तस्यसंबुद्धिः । हेधर्मज्ञ कोहिधर्मंविदितिवा ॥ १२ ॥ ति० प्रत्यक्षा सत्या ॥ १३ ॥ ति० तातस्ययदतिक्रान्तं । भावेनिष्ठा । ज्येष्ठाभिषेकलक्षणसाध्वर्थानुष्ठानं तत् साध्वर्थमभिसंधाय राजोक्तार्थेपुक्तमस्यसाधुत्वमितिविचार्य प्रत्याहरतु निवर्तयतु । शि० अर्थमभिसंधाय अर्थबुद्धिंकृत्वा । तातस्ययदतिक्रान्तं अभिषेकातिक्रमणं तद्भवान्प्रत्याहरतु ॥ १४ ॥ ति० अतिक्रान्तं अतिक्रमस्तं । साधुमन्यते तद्वैपरीत्याचरणेनसाधुयथातथासंपादयति तदपत्यं । स० यःपुत्रःसाधुमन्यते तदेवापत्यं । विधेयापेक्षयातच्छन्दे नपुंसकता । अतोन्यथाचेत्पितृकृतातिक्रमणस्यसाधुत्वेनज्ञानाभावेविपरीतं अनपत्यमेवतदिति भावः । नञ्पूर्वात्पत्लृपतनेइत्यस्मात्करणेयत्प्रत्ययेरूपं । अपतनहेतुरपत्यमित्युक्तंभवति ॥ १५ ॥ ति० अतीति । यत् तत्कृतं दशरथकृतंकर्म तदति धर्ममतिक्रम्यप्रवृत्तं । अतएव लोकेधीरैर्विगर्हितं । अतस्तदनुमननमनुचितमिति । पितृवचसःपरिपाल्यत्वेयुक्तंधर्मवदभिषेकवचनमेवपरिपाल्येतिव्यङ्ग्यं । स० तदपत्यं अन्वर्थकापत्यशब्दवाच्यः । पितुर्दुष्कृतंभवान् नानुमन्यतामितिशेषः ॥ १६ ॥ स० सर्वांस्त्रातुंइदंसर्वमदुक्तं भवान् अनुमन्यतामितिशेषः ॥ १७ ॥ ति० ननुवानप्रस्थाश्रमःक्षत्रियस्याप्यस्ति तत्राह—एषहीति । येनाभिषेचनेनपालनं तद्रूपधर्मसंपादनं प्रथमः आद्योधर्मइत्यर्थः । एवंच सआश्रमोराज्यपरिपालनोत्तरं वार्धके उचितः नापिसमुख्योधर्मइतिभावः ॥ १९ ॥ ति० तस्यामुख्यत्वमेवदर्शयति—कश्चेति । प्रत्यक्षं प्रत्यक्षसुखसाधनं धर्मं प्रजापालनरूपमुत्सृज्य संशयस्थं अप्रत्यक्षत्वात् । कोहितद्वेद यद्यमुष्मिँल्लोके अस्तिवानवेतिश्रुत्याभिनीयमानसन्देहास्पदं । अलक्षणं असुखलक्षणं । आयतिस्थं उत्तरवयःप्राप्यं । अनिश्चितं अनित्यानुष्ठानं । नहिप्रजापालनवत्क्षत्रियस्यनित्यप्राप्तोऽयंधर्मः ।

[पा०] १ ख. कालेषु. २ क. ङ. च. छ. झ. ञ. ट. प्रत्यक्षा. ३ क.—ट. समति. ४ घ. भवान्मा. ५ ग. ङ. छ. झ. ञ. ट. अतियत्तत्कृतं. ६ ख. ग. वीर. ७ ख. पदानेतान्. ८ ख.—ठ. स्त्रातुं. ९ ङ. छ. झ. मुत्तमं. १० क.—ट. आहुः. ११ ङ. छ. झ. ट. मिच्छसि. ख. मर्हति.

श्रुतेन बालः स्थानेन जन्मना भवतो ह्यहम् ॥ स कथं पालयिष्यामि भूमिं भवति तिष्ठति ॥२३॥
हीनबुद्धिगुणो बालो हीनः स्थानेन चाप्यहम् ॥ भवता च विनाभूतो न वर्तयितुमुत्सहे ॥ २४ ॥
इदं निखिलमव्यग्रं राज्यं पित्र्यमकण्टकम् ॥ अनुशाधि स्वधर्मेण धर्मज्ञ सह बान्धवैः ॥ २५ ॥
इहैव त्वाभिषिश्चन्तु सर्वाः प्रकृतयः सह ॥ ऋत्विजः सवसिष्ठाश्च मन्त्रवन्मन्त्रकोविदाः ॥ २६ ॥
अभिषिक्तस्त्वमस्माभिरयोध्यां पालने व्रज ॥ विजित्य तरसा लोकान्मरुद्भिरिव वासवः ॥ २७ ॥
ऋणानि त्रीण्यपाकुर्वन्दुर्हृदः साधु निर्दहन् ॥ सुहृदस्तर्पयन्कामैस्त्वमेवात्रानुशाधि माम् ॥ २८ ॥
अद्यार्य मुदिताः सन्तु सुहृदस्तेऽभिषेचने ॥ अद्य भीताः पलायन्तां दुर्हृदस्ते दिशो दश ॥ २९ ॥
आक्रोशं मम मातुश्च प्रमृज्य पुरुषर्षभ ॥ अद्य तत्रभवन्तं च पितरं रक्ष किल्बिषात् ॥ ३० ॥
शिरसा त्वाऽभियाचेऽहं कुरुष्व करुणां मयि ॥ बान्धवेषु च सर्वेषु भूतेष्विव महेश्वरः ॥ ३१ ॥
अथैतत्पृष्ठतः कृत्वा वनमेव भवानितः ॥ गमिष्यति गमिष्यामि भवता सार्धमप्यहम् ॥ ३२ ॥

तथा हि रामो भरतेन ताम्यता प्रसाद्यमानः शिरसा महीपतिः ॥
न चैव चक्रे गमनाय सत्त्ववान्मतिं पितुस्तद्वचने व्यवस्थितः ॥ ३३ ॥
तदद्भुतं स्थैर्यमवेक्ष्य राघवे समं जनो हर्षमवाप दुःखितः ॥
न यात्ययोध्यामिति दुःखितोऽभवत्स्थिरप्रतिज्ञत्वमवेक्ष्य हर्षितः ॥ ३४ ॥

॥ २२ ॥ स्वशक्त्यापिभवतैवराज्यंपालयितव्यमित्याह—श्रुतेनेति । श्रुतेन विद्यया । स्थानेन पदेन प्राप्तिक्रमेणेत्यियावत् ॥ २३ ॥ कथमेवमुच्यतेबालत्वस्यममापितुल्यत्वात् भवदपेक्षयाऽहंकियान्वृद्धइत्यतआह—हीनेति । हीनबुद्धिगुणः सद्गुणबुद्धिरहितः । वर्तयितुं स्थातुं । भवताविनातूष्णींस्थातुमपिनोत्सहे किंपुनाराज्यंकर्तुमितिभावः ॥ २४—२५ ॥ सह संभूय ॥ २६ ॥ विजित्य स्थितइतिशेषः । मरुद्भिः देवैः ॥ २७ ॥ रामंराज्याङ्गीकरणायप्रोत्साहयति—ऋणानीत्यादिना । दुर्हृदः शत्रून् ॥ २८—२९ ॥ आक्रोशं शापं । "शाप आक्रोशआक्षेपः" इतिहलायुधः । जनकर्तृकमितिशेषः । तत्रभवन्तं पूज्यं । तत्रभवानत्रभवानितिशब्दौवृद्धैः पूज्येप्रयुज्येते ॥ ३० ॥ मयि बान्धवेषुच करुणांकुर्वितिसंबन्धः । महेश्वरोविष्णुः । "यद्वेदादौस्वरःप्रोक्तोवेदान्तेच प्रतिष्ठितः । तस्यप्रकृतिलीनस्ययःपरःसमहेश्वरः" इति पूर्वप्रकृतदहरविद्याकरणमन्त्रप्रणवप्रकृतिभूताकारवाच्योमहेश्वरइत्युक्तेः । दहरोपास्यश्चापहतपाप्मत्वादिगुणकः पुरुषोत्तमः । "सउत्तमःपुरुषः" इतितत्समानप्रकरणेछान्दोग्येश्रवणात् । अपहतपाप्मत्वंचरुद्रस्यनास्ति । "अनपहतपाप्मावाअहमस्मि" इतिरुद्रेणैवोक्तेः । भूतसंहाराधिकृतस्यरुद्रस्यभूतेषुकरुणाच गगनकुसुमतुल्या । अतः "सएकाकीनरमते नततोविजुगुप्सितः" इत्यादिश्रुतिस्मृत्यादिभिःसुप्रसिद्धापारकारुण्यवात्सल्यादिगुणगणः पुरुषोत्तमएवमहेश्वरइतिदिक् ॥ ३१—३२ ॥ गमनाय अयोध्यांप्रतीतिशेषः । तद्वचने तस्मिन्वचने ॥ ३३ ॥ समं युग-

नित्यत्वेतद्रहितदशरथादेःपापित्वप्रसङ्गः । तं क्षत्रबन्धुः क्षत्राणांबन्धुरितिसमासेनक्षत्रियकुलसंमतइत्यर्थः । निन्दायांबन्धुच्प्रत्यान्तस्तु निन्द्यक्षत्रियादिवाचीतिकतकः । कश्चरेत् नकोपीत्यर्थः । अन्येतु क्षत्रबन्धुरपि निन्द्यक्षत्रियोपि राज्यानर्होपीदृशंधर्मंन चरेत्, किंपुनर्वाच्यंराज्याधिकारीत्यर्थमाहुः ॥ २० ॥ ति० वर्तयितुं जीवितुमपि ॥ २४ ॥ शि० अग्र्यं पौर्वकालिकं ॥ २५ ॥ ति० ऋणानीति । "जायमानोवैब्राह्मणस्त्रिभिर्ऋणवाञ्जायते" इतिश्रुतौब्राह्मणपदमुपलक्षणमितिभावः । अत्र अयोध्यायां । स्थित्वेतिशेषः ॥ २८ ॥ ति० दुष्प्रदाः दुःखप्रदाः ॥ २९ ॥ ति० आक्रोशं निन्दां ॥ ३०—३१ ॥ शि० महेश्वरः महादेवइव ति० पृष्ठतःकृत्वा तिरस्कृत्य । मत्प्रार्थनामितिशेषः । इतोपिवनमेव जनसंबाधभयेनास्माद्वनादपिवनान्तरमित्यर्थः ॥ ३२ ॥ इतिषडुत्तरशततमस्सर्गः ॥ १०६ ॥

[पा०] १ ख. बालोज्ञानेन. २ घ. भवतोप्यहं. ३ ट. मध्यग्र्यं. ४ ग. घ. पित्र्यंराज्यं: ५ ख. ङ. च. छ. झ. ञ. ट. मन्त्रविन्मन्त्र. ६ ङ. छ. ज. झ. ट. पलायन्तुदुष्प्रदाः. क. च. ञ. पलायन्तामरयस्ते. ७ क. ख. ग. ङ. च. छ. झ. ञ. ट. अथवापृष्ठतः. ज. अथैतत्पृष्ठतः. ८ ग. भवानिह. ९ क. ङ. च. ज.—ट. प्रतिष्ठितः.

तमृत्विजो नैगमयूथवल्लभास्तदा विसंज्ञाश्रुकलाश्च मातरः ॥
तथा ब्रुवाणं भरतं प्रतुष्टुवुः प्रणम्य रामं च ययाचिरे सह ॥ ३५ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे षडुत्तरशततमः सर्गः ॥ १०६ ॥

सप्तोत्तरशततमः सर्गः ॥ १०७ ॥

दशरथेनस्वस्मैराज्यदानेकैकेय्यांतस्यकाममोहस्यहेतुतांमन्वानंभरतंप्रतिरामेणराज्यदानस्यकन्याशुल्कप्रत्युपकारोभयरूपत्वकथनेनराज्ञिदोषाभावोपपादनम् ॥ १ ॥ तथापुत्रशब्दनिर्वचनेनपितुस्तारणस्यपुत्रसाधारण्योक्तिपूर्वकंतंप्रतिराज्यरक्षणचोदना ॥ २ ॥

पुनरेवं ब्रुवाणं तं भरतं लक्ष्मणाग्रजः ॥ प्रत्युवाच ततः श्रीमाञ्ज्ञातिमध्येऽभिसत्कृतः ॥ १ ॥
उपपन्नमिदं वाक्यं यत्त्वमेवमभाषथाः ॥ जातः पुत्रो दशरथात्कैकेय्यां राजसत्तमात् ॥ २ ॥
पुरा भ्रातः पिता नः स मातरं ते समुद्वहन् ॥ मातामहे समाश्रौषीद्राज्यशुल्कमनुत्तमम् ॥ ३ ॥
दैवासुरे च संग्रामे जनन्यै तव पार्थिवः ॥ संप्रहृष्टो ददौ राजा वरमाराधितः प्रभुः ॥ ४ ॥
ततः सा संप्रतिश्राव्य तव माता यशस्विनी ॥ अयाचत नरश्रेष्ठं द्वौ वरौ वरवर्णिनी ॥ ५ ॥
तव राज्यं नरव्याघ्र मम प्रव्राजनं तथा ॥ तौ च राजा तदा तस्यै नियुक्तः प्रददौ वरौ ॥ ६ ॥

पत् ॥ ३४ ॥ नैगमयूथवल्लभाः निगमःपुरंतत्रभवाः नैगमाः । " निगमोनिश्चयेवेदेपुरेपथिवणिक्पथ " इतिवैजयन्ती । यूथवल्लभाः गणमुख्याः । विसंज्ञाश्रुकलाः विगतसंज्ञाः अश्रुक्लिन्नाश्चेत्यर्थः ॥ ३५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने षडुत्तरशततमः सर्गः ॥ १०६ ॥

अभिसत्कृतः भरतेनस्तोत्रादिनासम्यगभिपूजितः ॥ १—२ ॥ काममोहेनपित्राकृतमितिपितरंनिन्दन्तं भरतंप्रतिरामोमोहहेतुप्रसक्तिरेवनास्तीतिदुष्परिहरंहेत्वन्तरमाह—पुरेत्यादिना । राज्यशुल्कंसमाश्रौषीत् तवपुत्रिकायांयोजनिष्यतेतस्मैराज्यंदास्यामीतिप्रतिज्ञां कृतवान् ॥ ३ ॥ दैवासुरे देवासुरसंबन्धिनि । वरं वरद्वयं ॥ ४ ॥ तवमाता संप्रतिश्राव्य शपथंकारयित्वा । ततः द्वौवरौ अयाचतेतिसंबन्धः ॥ ५ ॥ याच्ञाप्रकारमाह—तवेत्यादिना । ननुकैकेयीस्वोद्वाहकालेकन्याशुल्कत्वेनभरतस्यप्राप्तंराज्यंवरविषयत्वेन कथमयाचत । उच्यते । बाल्यवृत्तान्तत्वाच्चिरकालान्तरितत्वाच्चसन्निहितंवरद्वयमेवयाचितवतीतिनदोषः । मध्येप्राप्तस्यापिवरद्वयस्य । " किंनस्मरसिकैकेयि " इतिमन्थरयास्मारितत्वाच्चिरकालवृत्तान्तस्यविस्मरणमुपपन्नमेव । ननुदशरथउद्वाहकालेकैकेयीपुत्रायप्रतिश्रुतंराज्यंरामायदातुंकथमुद्युक्तवात् । सत्यं । " उद्वाहकालेरतिसंप्रयोगेप्राणात्ययेसर्वधनापहारे । विप्रस्यचार्थेप्यनृतंवदेयुःपञ्चानृतान्याहुरपातकानि " इतिन्यायेनदोषाभावंहृदिनिधायतथाकृतवानितिनदोषः । केकयोपिरामगुणानुविद्धतयाराज्यंनदौहित्रायययाचित-

---

ति० उपपन्नं युक्तिमत् । तत्रहेतुः **जातइत्यादि** । स० यतोतइतिशेषः ॥ २ ॥ ति० ननु "स्त्रीपुनर्मविवाहेचवृत्त्यर्थंप्राणसंकटे । गोब्राह्मणार्थेहिंसायांनानृतंस्याज्जुगुप्सितं" इतिस्मृतेःकौसल्यायांविद्यमानायांकैकेयीविवाहस्य नर्मविवाहत्वात्तत्प्रतिज्ञाहानिर्नदोषायेत्यतआह—**देवासुरेचेति** । देवासुरे तत्संबन्धिनि । एवंचोपकारप्रत्युपकाररूपत्वादेतदनृतेमहान्दोषइतिभावः । शि० वरं वरद्वयं । स० देवासुरइति । मत्वर्थीयाच्प्रत्ययान्तोऽयंशब्दः । देवसहिताअसुरायस्मिन्नित्युत्तरपदलोपीसमासोवा । शि० राजा अत्यनुरागवान् ॥ ४ ॥ ती० उमासंहितायांपार्वतींप्रतिशिववचनं । "पट्टाभिषेकसमयेभवेयंस्मारितोह्यहम् । त्वयावाऽन्येनभूपालतथाचेत्करवाण्यहम् । इत्थंप्रतिज्ञामकरोदाहिताग्न्यग्रणीर्नृपः" इतिकैकेयीविवाहसमयेकेकयदशरथसंकेतस्यविद्यमानत्वाच्चादोषः ॥ ५ ॥ ति० तद्वरं तद्रूपवरं ॥ ६ ॥

[पा०] १ ख.—ट. स्तथा. २ ग. भरतंच. ३ क. ग. च. ञ. ब्रुवाणंतु. ४ ख. ञ. भरताग्रजः. ५ क.—घ. च. ज. ञ. मध्येोंते. ङ. छ. झ. ट. मध्येसु. ६ घ. नःस. ७ क. नराधीशं. ग. नरव्याघ्रं. ८ ख.—ट. तच. ९ ग.—ट. तथा. १० क. ङ.—ञ. वरं.

तेन पित्राऽहमप्यत्र नियुक्तः पुरुषर्षभ ॥ चतुर्दश वने वासं वर्षाणि वरदानिकम् ॥ ७ ॥
सोहं वनमिदं प्राप्तो निर्जनं लक्ष्मणान्वितः ॥ सीतया चाप्रतिद्वन्द्वः सत्यवादे स्थितः पितुः ॥ ८ ॥
भवानपि तथेत्येव पितरं सत्यवादिनम् ॥ कर्तुमर्हति राजेन्द्र क्षिप्रमेवाभिषेचनात् ॥ ९ ॥
ऋणान्मोचय राजानं मत्कृते भरत प्रभुम् ॥ पितरं चापि धर्मज्ञं मातरं चाभिनन्दय ॥ १० ॥
श्रूयते हि पुरा तात श्रुतिर्गीता यशस्विना ॥ गयेन यजमानेन गयेष्वेव पितॄन्प्रति ॥ ११ ॥
पुन्नाम्नो नरकाद्यस्मात्पितरं त्रायते सुतः ॥ तस्मात्पुत्र इति प्रोक्तः पितॄन्यत्पाति वा सुतः ॥ १२ ॥
एष्टव्या बहवः पुत्रा गुणवन्तो बहुश्रुताः ॥ तेषां वै समवेतानामपि कश्चिद्गयां व्रजेत् ॥ १३ ॥
एवं राजर्षयः सर्वे प्रतीता राजनन्दन ॥ तस्मात्त्राहि नरश्रेष्ठ पितरं नरकात्प्रभो ॥ १४ ॥
अयोध्यां गच्छ भरत प्रकृतीरनुरञ्जय ॥ शत्रुघ्नसहितो वीर सह सर्वैर्द्विजातिभिः ॥ १५ ॥
प्रवेक्ष्ये दण्डकारण्यमहमप्यविलम्बयन् ॥ आभ्यां तु सहितो राजन्वैदेह्या लक्ष्मणेन च ॥ १६ ॥

त्वं राजा भरत भव स्वयं नराणां वन्यानामहमपि राजराण्मृगाणाम् ॥
गच्छ त्वं पुरवरमद्य संप्रहृष्टः संहृष्टस्त्वहमपि दण्डकान्प्रवेक्ष्ये ॥ १७ ॥
छायां ते दिनकरभाः प्रबाधमानं वर्षत्रं भरत करोतु मूर्ध्नि शीताम् ॥
एतेषामहमपि काननद्रुमाणां छायां तामतिशयिनीं सुखी श्रयिष्ये ॥ १८ ॥

वान् । रामोपिसुमन्त्रादिभ्यइदंरहस्यंश्रुतवान् । अत एव हि तेश्शृण्वन्तोनुमान्यस्थितवन्तइतिद्रष्टव्यम् ॥६॥ तेन कैकेय्यैप्रतिश्रुतराज्येन । अत्रवने दण्डकारण्ये । वरदानिकं वरदाननिमित्तकं । वासंनियुक्तइतिसंबन्धः ॥ ७ ॥ अप्रतिद्वन्द्वः केनापिवारयितुमशक्यइतियावत् ॥ ८—९ ॥ ऋणान्मोचयराजानं स्वाभिषेचनेन कैकेय्याऋणाद्राजानंमोचयेत्यर्थः ॥ १० ॥ स्वोक्तार्थस्यावश्यकर्तव्यत्वेसंमतिमाह—श्रूयतइत्यादिना । गयेन गयाख्येन । गयेषु गयाख्येषुप्रदेशेषु ॥ ११ ॥ पुन्नाम्नोनरकात्त्रायतइतिपुत्रः । पितॄन्पाति तदुःशक्रुतेष्टापूर्तादिनास्वर्लोकंप्रापय्यरक्षतीत्यर्थः ॥१२॥ एष्टव्याः काङ्क्षितव्याः ॥ १३ ॥ एवं उक्तप्रकारेण । प्रतीताः निश्चितवन्तः ॥ १४—१६ ॥ मृगाणांराजराट् भवामि मृगाणांरञ्जकः शिक्षकश्चभवामीत्यर्थः । अत्रमृगशब्देन तत्तुल्यामुनयोलक्ष्यन्ते । यद्वा भाविसुग्रीवरञ्जनवालिवधादीनांबीजन्यासोयं ॥ १७ ॥ वर्षत्रं छत्रं

ति० अत्र दण्डकाख्येवने । चतुर्दशवर्षाणिवरदानिकंवरदाननिमित्तकंवासं । नियुक्तः तंप्रतिप्रेरितइत्यर्थः । अत्रायमप्यर्थः । देवेभ्योमद्दत्तवरदाननिमित्तकं । अन्तर्यामिणातथाप्रेरणात् । अतएवात्रदण्डकारण्येएतत्प्रसंगेनैवतत्प्रयोजननिष्पत्तेरिति ॥ ७ ॥ ति० ननुवनेरक्षआदिभ्योनानादुःखसंभावनेत्यतः—अप्रतिद्वन्द्वइति । समाधिकबलशत्रुहीनः । सर्वेपिमत्तोहीनबलाएवेति नतद्रयाक्षशङ्केतिव्यङ्ग्योऽर्थः । आपाततस्तु अप्रतिद्वन्द्वः स्पर्धारहितइति । शि० अप्रतिद्वन्द्वः शीतोष्णादिबाधारहितोऽहंइदंवनंप्राप्तः स० अप्रतिद्वन्द्वःनियामकशून्यः ॥ ८ ॥ ति० अर्हसीत्यार्षं । अर्हतीतिपाठान्तरं । अतएवसंबोधनं—राजेन्द्रेति । स० अभिषेचनात् स्वस्यतिशेषः ॥ ९ ॥ ति० ऋणात् कैकेयीसंबन्धिऋणात् । मत्कृते मत्प्रीत्यर्थं । त्राहीत्यार्षं । अभिनन्दय नतु निन्दय । तत्कृतस्यअर्थस्यबहूपकारकत्वादितिव्यङ्ग्यं ॥ १० ॥ ति० पितॄन्प्रति पितृप्रीतिमुद्दिश्य ॥ ११ ॥ ति० पितॄन्पातीत्यर्थे पुत्रस्यपृषोदरादित्वात्साधुत्वं ॥ १२ ॥ स० समवेतानां मिलितानांमध्ये ॥ १३ ॥ ति० एवं पितृपरलोकसाधनं । स० नरकात् प्रतिश्रुतवराप्रदानकृतात् । शि० नरकात् जनापवादशब्दात् ॥ १४ ॥ शि० राजराट् राजराजोप्यहंमृगाणांराजाभवामीतिशेषः ॥ १७ ॥ स० दिनकरभाइतिद्वितीयान्तं । प्रवा..नानंसत् छायांकरोतु ॥ १८ ॥ इतिसप्तोत्तरशततमस्सर्गः ॥१०७॥

[पा०] १ च. विजनं. २ ग. द्वन्द्वस्तस्यवाक्ये. ३ च. ज. झ. मर्हसि. ४ ख. ज. ञ. ट. राजेन्द्रं. ५ ख. ङ. च. छ. झ. ञ. ट. त्राहिधर्मज्ञ. ६ क. ख. घ. ज. चापि. ७ ङ. ७. झ. ट. धीमता. ८ क. घ.—छ. झ. ञ. ट. पितॄन्यःपाति. ९ झ. ञ. ट. सर्वतः. १० च. ञ. समवेतानांयदि. ११ ङ. छ. झ. ट. रघुनन्दन. १२ ङ. झ. ट. रुपरञ्जय. १३ ङ. छ. झ. ट. वीरवैदेह्या. १४ क.—घ. च. ज. ञ. भवभरत. १५ ख. ग. घ. प्रबाधमानां. १६ ग. कानने. १७ ख. ग. ङ. छ. झ. ट. मनैः च. ञ. सुखं.

[१]शत्रुघ्नः कुशलमतिस्तु ते सहायः सौमित्रिर्मम विदितः प्रधानमित्रम्।।
चत्वारस्तनयवरा वयं नरेन्द्रं सत्यस्थं भरत चराम मा [२]विषादम्।।१९।।

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे सप्तोत्तरशततमः सर्गः।।१०७।।

अष्टोत्तरशततमः सर्गः ।। १०८।।

रामेणभरतेनिरुत्तरीकृतेजाबालिनानास्तिकमताश्रयणेनरामंप्रतिराज्यस्वीकारचोदना।।१।।

आश्वासयन्तं भरतं जाबालिर्ब्राह्मणोत्तमः।। उवाच रामं धर्मज्ञं धर्मापेतमिदं वचः।।१।।
साधु राघव मा भूत्ते [३]बुद्धिरेवं निरर्थिका।। प्राकृतस्य नरस्येव [४]ह्यार्यबुद्धेर्मनस्विनः।।२।।
कः कस्य पुरुषो बन्धुः [५]किमाप्यं कस्य केनचित्।। [६]यदेको जायते जन्तुरेक एव विनश्यति।।३।।
तस्मान्माता पिता चेति राम [७]सज्जेत यो नरः।। उन्मत्त [८]इव स ज्ञेयो नास्ति कश्चिद्धि कस्य चित् ।।४।।
यथा ग्रामान्तरं गच्छन्नरः [९]कश्चित्क्वचिद्वसेत्।। उत्सृज्य च तमावासं प्रतिष्ठेतापरेऽहनि।।५।।
एवमेव मनुष्याणां पिता माता गृहं वसु।। आवासमात्रं काकुत्स्थ सज्जन्ते नात्र सज्जनाः।।६।।
पित्र्यं राज्यं [१०]परित्यज्य [११]स नार्हसि नरोत्तम।। आस्थातुं कापथं दुःखं विषमं बहुकण्टकम्।।७।।
समृद्धायामयोध्यायामात्मानमभिषेचय।। एकवेणीधरा हि त्वां नगरी संप्रतीक्षते।।८।।
राजभोगाननुभवन्महार्हान्पार्थिवात्मज।। विहर त्वमयोध्यायां यथा शक्रस्त्रिविष्टपे।।९।।
न ते कश्चिद्दशरथस्त्वं च तस्य न कश्चन।। अन्यो राजा [१२]त्वमन्यः स तस्मात्कुरु [१३]यदुच्यते।।१०।।

सुखीश्रयिष्य इति पाठः।। १८ ।। चराम करवामेत्यर्थः।। १९ ।। इति श्री गोविन्दराज विरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने सप्तोत्तरशततमः सर्गः।।१०७।।

एवं रामेणोक्ते निरुत्तरतयास्थितंभरतमालोक्यहितपरतयाजाबालिश्चार्वाकमतमाश्रित्योत्तरमाह अष्टोत्तरशततमे-आश्वासयन्तमित्यादिना। ब्राह्मणोत्तम इत्यनेन वक्ष्यमाणं नास्तिकवचनमहृदयमितिद्योत्यते। धर्मापेतंवैदिकधर्मापेतं।।१।। बुद्धिः साधुमाभूत्सम्यङ्निवर्त्यतामित्यर्थः।।२।। कस्य पुरुषस्य केनचित्साधनेन, किमाप्यं नकिमपीत्यर्थः।।३। ४।। आवासमात्रमिति मार्गस्थसत्रशालायां विश्रमार्थं क्षणंनिवासेपितद्विसृज्यगच्छतःपथिकस्य तच्चिन्ताननुवृत्तिवत् यावत्संश्लेषमेवमातापित्रादयोनुवर्तनीयाः विश्लेषेतत्स्मृतिरपिविफला किमुततत्प्रीत्यर्थकार्याचरणमितिभावः।।५-६।। रामाभिप्रायेणेदं परप्रतीत्यापरोबोधनीयइतिन्यायात्। कापथं कुत्सितमार्गं। दुःखं दुःखप्रदं। विषमं यौवनानुचितं। बहुकण्टकं अनेकोपप्लवसहितं। कापथमित्यनेनानुचितवानप्रस्थमार्ग-एवोच्यते।।७।। एकवेणीधरा व्रतपरायणेत्यर्थः। नगरी तदधिदेवता ।।८-९।। यदुच्यते मयेतिशे-

---

स. धर्मापेतं धर्मविरुद्धं। चार्वाकमतावलंबनात्।।१।। ति. साधु सम्यग्युक्तिमत् इदंवचइतिपूर्वान्वय्येतत्। इदं शब्दार्थो - राघवेत्यादि। प्राकृतस्य पामरस्य। एवं बुद्धिः पितृवचःपरिपालनीयमित्येवंरूपा। शि. प्राकृतस्येवेत्युक्त्या-रामस्यप्राकृतविलक्षणत्वंसूचितं।।२।। स. सज्जेत आसक्तोभवेत्।।४।। ति. कापथं वनमार्गं आस्तिकसेव्यंमार्गं च।।७।। स. यदुच्यते मया। ति. उक्तंसंबन्धाभावमुपसंहरति- नेति। मिथ्यापितृवचनाभिनिवेशमुक्त्वाराज्यंकुर्विति यदुच्यते तत्कुरु। अन्यः त्वज्जनकादन्यः। संप्रति राजा। एवंचक्षणभङ्गवादेनान्यत्वंगूढाशयतयोक्तं। नन्वेवमपितत्संताननिविष्टतयाकश्चित्संबन्धो भवेत् अन्यथापितरंविनापिपुत्रोत्पत्तिरस्यादितिचेन्न। तावतापिनिमित्तकारणत्वमेव नोपादानत्वं तेन यूकालिक्षादेरिवतवापि तेन

[पा.] १. ङ छ, झ, ट, शत्रुघ्नस्त्वतुलमतिस्तु, २. ड, ट, विषीद, ३. ग, रेषा, ४. ख, महाबुद्धेस्तपस्विनः, क, ग, ङ, छ, झ, ञ, ट, ह्यार्यबुद्धेस्तपस्विनः, ५. ख, किं कार्यं, ६. ङ, छ, झ, ट, एको हि. ७. ग. घ. सज्जति, ८. घ. इति. ९. ङ, च, छ, झ, ञ, ट, द्वहिर्वसेत्. १०. क.घ. - छ. झ. ञ. ट. मुमुत्सृज्य, ११. ख. नार्हसित्वं, १२. क.च. ञ. त्वमप्यन्यस्तस्मात्. ङ. छ. झ. ट. त्वमन्यस्तु. ख.ग.घ. ज. त्वमन्यश्च. १३ घ. यथोच्यते.

बीजमात्रं पिता जन्तोः शुक्रं रुधिरमेव च ॥ संयुक्तमृतुमन्मात्रा पुरुषस्येह जन्म तत् ॥ ११ ॥
गतः स नृपतिस्तत्र गन्तव्यं यत्र तेन वै ॥ प्रवृत्तिरेषा मर्त्यानां त्वं तु मिथ्या विहन्यसे ॥ १२ ॥
अर्थधर्मपरा येये तांस्ताञ्शोचामि नेतरान् ॥ ते हि दुःखमिह प्राप्य विनाशं प्रेत्य भेजिरे ॥१३॥
अष्टकापितृदैवत्यमित्ययं प्रसृतो जनः ॥ अन्नस्योपद्रवं पश्य मृतो हि किमशिष्यति ॥ १४ ॥
यदि भुक्तमिहान्येन देहमन्यस्य गच्छति ॥ दद्यात्प्रवसतः श्राद्धं न तत्पथ्यशनं भवेत् ॥ १५ ॥
दानसंवनना ह्येते ग्रन्था मेधाविभिः कृताः ॥ यजस्व देहि दीक्षस्व तपस्तप्यस्व संत्यज ॥ १६ ॥
स नास्ति परमित्येव कुरु बुद्धिं महामते ॥ प्रत्यक्षं यत्तदातिष्ठ परोक्षं पृष्ठतः कुरु ॥ १७ ॥

षः ॥ १० ॥ पिता जन्तोर्बीजमात्रं अल्पकारणं । प्रधानकारणंतु ऋतुमन्मात्रा संयुक्तंधृतं । शुक्लंरुधिरमेवच शुक्लंशोणितमेवतत् शुक्लशोणितं पुरुषस्यजन्मकारणं ॥ ११ ॥ तेन नृपेण । यत्र येषुभूतेषुगन्तव्यं सनृपतिस्तत्रगतः पञ्चभूतेषुलयंप्राप्तइत्यर्थः । पञ्चभूतमयत्वान्नरपतिशरीरस्य तदतिरिक्तस्यात्मनोऽभावात् । मर्त्यानां मरणशीलानां । एषाप्रवृत्तिः अयंस्वभावइत्यर्थः । त्वंतुमिथ्याविहन्यसे मिथ्याभूतेनसंबन्धेनपीड्यसे ॥ १२ ॥ अर्थधर्मपराः प्रत्यक्षसौख्यं विहायकेवलार्थसंपादनपराः धर्मपराश्च । इतरान् केवलप्रत्यक्षसुखानुभवपरान् । अर्थधर्मपरविषयशोकहेतुमाह—तेहीति । प्रेत्यापिविनाशं दुःखंभेजिरइति संबन्धः ॥ १३ ॥ धर्मस्याफलत्वेस्थालीपुलाकन्यायेन किंचिदुदाहरणमाह—अष्टकापितृदैवत्यमिति । अयं जनः अष्टका अष्टकाश्राद्धं पितृदैवत्यं प्रतिसांवत्सरिकमितियत्कर्म । कर्तुमितिशेषः । प्रसृतः प्रवृत्तः । अत्र तत्सर्वमितिशेषः । अन्नस्य उपद्रवं क्षयं । पश्य तत्सर्वैस्वभोज्यान्नस्यनिरर्थकक्षयहेतुं आलोचयेत्यर्थः । तत्र हेतुमाह—मृतोहिकिमशिष्यतीति ॥ १४ ॥ उक्तमेवार्थंतर्कमुखेनद्रढयति—यदीति । अन्येनभुक्तमन्नमन्यस्यदेहंगच्छतियदि तर्हि प्रवसतः श्राद्धंदद्यात् पथिगच्छन्तमुद्दिश्यभोजयेत् । तत् अन्यभुक्तमन्नंपथ्यशनं भवेत् पथिकस्यपाथेयंभवेत् नचैवंदृश्यते अतः श्राद्धादिकंमृतस्याशनंनभवतीतिभावः ॥ १५ ॥ एवमेकत्रवैदिककर्मणिफलव्यभिचारदर्शनात्सर्वत्रापिवैदिके न फलप्रसक्तिरित्याह—दानसंवननाइत्यादिना । दानसंवननाः दानायवशीकरणोपायाः । "संवननंकर्मणावशीकरणं" इतिहलायुधः । मेधाविभिः परद्रव्यग्रहणकुशलबुद्धिभिः । यजस्व देवताराधनंकुरुष्व । संत्यज अर्थेषणादीन्सम्यक्त्यज । अत्रेतिकरणंद्रष्टव्यं । यजस्वेत्यादिरूपाग्रन्थाः मेधाविभिः कृताइत्यन्वयः ॥१६॥ सः पितृवचनंपरिपालनीयमितिमन्यमानः त्वं परंपर-

---

कश्चित्संबन्धइत्याशयः ॥ १० ॥ ति० बीजमात्रं निमित्तकारणमात्रं । मात्रपदेनोपादानत्वव्यावृत्तिः । तर्ह्युपादानंकिंतत्राह—ऋतुमन्मात्रेति । ऋतुमत्यामात्रेत्यर्थेपुंवद्भावः । यत्तादृश्यामात्रागर्भेधृतंसंयुक्तंपरस्परमिलितंशुक्रंशोणितंच तदिहलोकेपुरुषस्य शरीरस्यजन्म उपादानकारणंभवतीत्यर्थः । एवंचशुक्रशोणितयोगादाकृष्टपञ्चभूतसमूहएवपुरुषश्चेतनः नतस्यकेनचित्संबन्धइत्याशयः ॥ ११ ॥ ति० विहन्यसे राज्यरूपात्पुरुषार्थादितिशेषः ॥ १२ ॥ ति० नन्वर्थविघातेपिधर्मोमेभविष्यतीत्यत्राह—अर्थेत्यादि । अर्थे प्रत्यक्षसिद्धपुरुषार्थेप्राप्ते तंपरित्यज्ययेयेआस्तिकाःधर्मपराः ताञ्शोचामि । धर्मफलभोक्तुरभावादितिभावः । तदेवाह—तेहीति । प्रेत्य अन्तसमयंप्राप्य । विनाशंभेजिरे नत्वत्रोपार्जितधर्मस्यतत्रावस्थितिरस्ति । स० अर्थधर्मपराः अर्थशब्दोनिवृत्तिपरः । अर्थेन निवृत्त्या । प्राप्तराज्यपरित्यागेनेतियावत् । धर्मपराः । ते इहदुःखं प्रारब्धं । प्रेत्य मृत्वाविनाशं अदर्शनं । लेभिरे प्राप्तवन्तः । णशअदर्शनइतिधातोः ॥ १३ ॥ स० अशिष्यति भक्षयिष्यति ॥१४॥ ति० भोक्त्रभावेनदूषितमप्यर्थंयुक्त्यन्तरेणदूषयति—यदीति । प्रवसतामुद्दिश्यकृत्वाश्राद्धंदद्यात् । प्राप्तकालेलिङ् । तद्दानमेवोचितमित्यर्थः । नतुतत्पथ्यशनं । तस्मैदीयमानंपथ्यशनंपाथेयंभवेन् न्याय्यमितिशेषः । भारवहनेनदुःखदत्वादितिभावः । एतेनैवन्यायेनदेवार्थदानमपिव्यर्थमित्युक्तादितं ॥ १५ ॥ ति० एवंवैदिकाचारेप्रदूष्यतत्प्रतिपादकागमाप्रामाण्यमाह—दानेति । यजस्वदेवपूजांकुरु । दीक्षस्व यागार्थं । तपः चान्द्रायणादि । संत्यज प्रव्रजेत्येवंपराः वेदादयोग्रंथाः । मेधाविभिः वार्तादिनाजीवनेक्लेशंपश्यद्भिः पामरप्रतारणायानायासेनधनग्रहणायकृताः । अतोनतेप्रमाणमितिभावः ॥ १६ ॥ ति० परं ऐहिकात्परं परलोकप्रयोजनंकिंचिद्धर्माख्यं । नास्ती-

[पा०] १ च. जन्तोर्युक्तंतच्छुक्लशोणितं. ङ. छ. झ. ञ. जन्तोःशुक्रंशोणितमेव. ट. जन्तोःशुक्रशोणितमेव. २ ङ. च. छ. झ. ञ. ट. भूतानां. ३ प. च. ञ. येच. ४ ग. ङ. छ. झ. ट. लेभिरे. ५ ङ. छ. झ. ट. त्प्रवसतां. ६ ङ. च. छ. झ. ञ. ट. मित्येतत्कुरु.

स तांबुद्धिं पुरस्कृत्य सर्वलोकनिदर्शिनीम् ॥ [1]राज्यं त्वं प्रतिगृह्णीष्व भरतेन प्रसादितः ॥ १८ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे अष्टोत्तरशततमः सर्गः ॥१०८॥

नवोत्तरशततमः सर्गः ॥ १०९ ॥

रामेणनिपुणतरोपन्यासेनजाबालिदर्शितनास्तिकवादनिराकरणम् ॥ १ ॥ जाबालिनास्वेननास्तिकवादपरिग्रहेकारण निवेदनपूर्वकंश्रीरामप्रसादनम् ॥ २ ॥

जाबालेस्तु वचः श्रुत्वा रामः [2]सत्यात्मनां वरः ॥ उवाच परया [3]भक्त्या [4]स्वबुद्ध्या चाविपन्नया ॥१॥
भवान्मे प्रियकामार्थं वचनं यदिहोक्तवान् ॥ अकार्यं कार्यसङ्काशमपथ्यं पथ्यसंमितम् ॥ २ ॥
निर्मर्यादस्तु पुरुषः पापाचारसमन्वितः ॥ मानं न लभते सत्सु भिन्नचारित्रदर्शनः ॥ ३ ॥
कुलीनमकुलीनं वा वीरं पुरुषमानिनम् ॥ चारित्रमेव व्याख्याति शुचिं वा यदि वाऽशुचिम् ॥४॥
अनार्यस्त्वार्य[5]संकाशः शौचाद्धीनस्तथा शुचिः ॥ लक्षण्यवदलक्षण्यो दुःशीलः शीलवानिव ॥ ५ ॥
अधर्मं धर्मवेषेण [6]यदीमं लोकसंकरम् ॥ अभिपत्स्ये शुभं हित्वा [7]क्रियाविधिविवर्जितम् ॥ ६ ॥
कश्चेतयानः पुरुषः कार्याकार्यविचक्षणः ॥ [8]बहुमंस्यति मां लोके दुर्वृत्तं लोकदूषणम् ॥ ७ ॥

लोकानुभाव्यं यत्प्रत्यक्षं प्रत्यक्षसिद्धंराज्यभोगादिकं । तदातिष्ठप्रतिगृह्णीष्व परोक्षं परोक्षसुखफलकंपितृवचनपरिपालनादिकं ॥ १७ ॥ तांबुद्धिं प्रत्यक्षादन्यन्नास्तीतिबुद्धिं । सर्वलोकनिदर्शिनीं सर्वजनसंमतामित्यर्थः ॥१८॥ इतिश्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने अष्टोत्तरशततमः सर्गः ॥ १०८ ॥

अथजाबालिमतनिरासपूर्वकं वैदिकमतस्थापनंनवोत्तरशततमेसर्गे—जाबालेरित्यादिना । सत्यात्मनां सत्यबुद्धीनां भक्त्या । वैदिकधर्मश्रद्धया । अविपन्नया जाबालिवचनैः सांदृष्टिकैरप्यचलितया ॥ १ ॥ प्रियकामार्थं प्रियविषयेच्छासिद्ध्यर्थं यद्वचनमुक्तवान् तत् कार्यसंकाशं कार्यवत्प्रतीयमानं । अकार्यं पथ्यसंमितं पथ्यवदवभासमानं । अपथ्यं दुःखोदर्कमितियावत् एवंवचनंदूषितं ॥ २ ॥ अथवक्तारंदूषयति—निर्मर्यादइत्यादिना । निर्मर्यादः मर्यादारहितः । अतएव पापाचारसमन्वितः तत्रहेतुः—भिन्नचारित्रदर्शनइति । दर्शनं मतं वेदविहिताद्भिन्नाचारप्रतिपादकमतप्रवर्तकइत्यर्थः । एवंभूतःपुरुषः सत्सु मानं पूजां । नलभते प्रत्युत निन्दामेवलभतइत्यर्थः ॥ ३ ॥ पापाचारलेकिंप्रमाणमित्याशङ्क्य तदुक्तिरेवप्रमाणमित्याह—कुलीनमित्यादिना । पुरुषमानिनं । अतिधीरमित्यर्थः । चारित्रं उक्तरूपाचारः ॥ ४ ॥ एतादृशपुरुषोपदेशश्रवणेस्वस्यानर्थंदर्शयतिश्लोकत्रयेण—अनार्यइत्यादिना । अनार्यएवसन्नार्यसंकाशः शौचाद्धीनएवसन्शुचिरिव लक्षण्यवत् शिष्टलक्षणयुक्ततुल्यएवसन् । अलक्षण्यः लक्षणहीनः । शीलवानिवसन्दुःशीलः अहं शुभंहित्वा शुभसाधनं वैदिकधर्मंहित्वा । लोकसंकरं लोकसंकरकारकं । क्रियाविधिविवर्जितं वैदिकक्रिययावेदविधिनाचवर्जितंइमं त्वदुक्तमधर्मं । धर्मवेषेण धर्मत्वेनाभिपत्स्ये स्वीकरि-

---

तिबुद्धिंकुरु । परोक्षं अनुमानशब्दादिगम्यं ॥ १७ ॥ **ति०** सतां प्रत्यक्षसिद्धस्यैवसत्यत्वंवदतां । तएवहिसाध्वोनतुशब्दप्रमाणकादेस्सत्यत्वंवदन्तइतिभावः । भिन्नेपदेवा । सः त्वं ॥ १८ ॥ इत्यष्टोत्तरशततमस्सर्गः ॥ १०८ ॥

ति० सत्यपराक्रमः सत्यप्रधानःपराक्रमोयस्यसः । विप्रतिपन्नया जाबाल्युक्तार्थेप्रतिपत्तिरहितया । बुद्ध्यायुक्तस्सन् सूत्त्या वेदलक्षणसुवचनालंबनेन । उवाच । **स०** अविप्रतिपन्नया वेदाद्यविरुद्धया ॥ १ ॥ **ति०** आर्यसंस्थानः तत्सदृशः ॥ ५ ॥ **ति०** यद्यहंत्वदुपदिष्टंलोकसंकरकारकंअधर्ममार्गं धर्मवेषेणयुक्तोऽभिपत्स्ये तदाविधिविवर्जितां श्रुत्याद्युक्तविधानरहितां । क्रियांकृत्वातत

[पा०] १ ङ. छ. ट. सर्वंनिगृह्णीष्व. २ ख. ज. सत्यवतां. घ. ङ. छ. झ. ट. सत्यपराक्रमः. ३ क. ङ. च. छ. झ. ञ. ट. सूत्त्या. ख. युत्त्या. ४ ङ. छ. झ. ट. बुद्ध्याविप्रतिपन्नया. ५ ग. घ. ङ. छ.—ट. संस्थानः. ६ ङ. छ. झ. ञ. ट. यद्यहं. ७ ङ. छ. झ. ट. क्रियांविधिविवर्जितां. ८ ङ. च. छ. झ. ञ. ट. बहुमन्येत.

कस्य धास्याम्यहं वृत्तं केन वा स्वर्गमाप्नुयाम् ॥ अनया वर्तमानो हि वृत्त्या हीनप्रतिज्ञया ॥ ८ ॥
कामवृत्तस्त्वयं लोकः कृत्स्नः समुपवर्तते ॥ यद्वृत्ताः सन्ति राजानस्तद्वृत्ताः सन्ति हि प्रजाः ॥९॥
सत्यमेवानृशंसं च राजवृत्तं सनातनम् ॥ तस्मात्सत्यात्मकं राज्यं सत्ये लोकः प्रतिष्ठितः ॥ १० ॥
ऋषयश्चैव देवाश्च सत्यमेव हि मेनिरे ॥ सत्यवादी हि लोकेऽस्मिन्परमं गच्छति क्षयम् ॥ ११ ॥
उद्विजन्ते यथा सर्पान्नरादनृतवादिनः ॥ धर्मः सत्यं परो लोके मूलं स्वर्गस्य चोच्यते ॥ १२ ॥
सत्यमेवेश्वरो लोके सत्यं पद्मा श्रिता सदा ॥ सत्यमूलानि सर्वाणि सत्यान्नास्ति परं पदम् ॥१३॥
दत्तमिष्टं हुतं चैव तप्तानि च तपांसि च ॥ वेदाः सत्यप्रतिष्ठानास्तस्मात्सत्यपरो भवेत् ॥ १४ ॥
एकः पालयते लोकमेकः पालयते कुलम् ॥ मज्जत्येको हि निरय एकः स्वर्गे महीयते ॥ १५ ॥
सोहं पितुर्नियोगं तु किमर्थं नानुपालये ॥ सत्यप्रतिश्रवः सत्यं सत्येन समयीकृतः ॥ १६ ॥

ष्यामियदि दुर्वृत्तंमां चेतयानः ज्ञानवान् कःपुरुषः लोकेबहुमंस्यति नकोपीत्यर्थः॥५—७॥ नकेवलंबहुमानहानिः परलोकहानिश्चेत्याह—कस्येत्यादिना। अहं हीनप्रतिज्ञया वनवासप्रतिज्ञारहितया । अनयावृत्त्या "परोक्षंपृष्ठतःकुरु"इतित्वदुक्तयावृत्त्यावर्तमानः सन्। वृत्तं त्वदुक्ताचरणं । कस्य धास्यामि आधास्यामि उपदेक्ष्यामीत्यर्थः । दास्यामीतिपाठान्तरं । केनवासाधनेनस्वर्गमाप्नुयामितियोजना ॥ ८ ॥ त्वदुक्ताचरणेसर्वलोकस्यापिपरलोकहानिःस्यादित्याह—कामवृत्तइत्यादिना ॥ ९ ॥ सत्यप्रशंसापूर्वकंसत्यनिष्ठांदर्शयन्सत्यपरत्वरूपस्वमतंस्थापयति—सत्यमेवेत्यादिना । अनृशंसं भूतानुकम्पाप्रधानं सनातनंच राजवृत्तं सत्यमेव सत्यरूपमेव तस्मात् राजवृत्तस्यसत्यरूपत्वात् । राज्यं राज्यस्थजनजातं । सत्यात्मकं सत्यरूपं सत्यप्रधानमितियावत् । लोकइतिजात्येकवचनं ॥ १० ॥ मेनिरे उत्कृष्टमितिशेषः । परमंक्षयं परमंधाम । "धिष्ण्यं धामनिकेतनंचसदनंवस्त्यंचवास्तुक्षयः" इतिवैजयन्ती ॥ ११ ॥ उद्विजन्ते जनाइतिशेषः ॥ १२ ॥ ईश्वरःनियन्ताव्यवस्थापकइतियावत् ॥ १३ ॥ सत्यप्रतिष्ठानाः सत्याधाराः । सत्यप्रतिष्ठानानीतिविपरिणम्यपूर्वार्धेनयोज्यं ॥ १४ ॥ प्रस्तुतसत्यनिष्णातस्यैहिकामुष्मिकफलं तद्रहितस्यनिरयप्राप्तिंचदर्शयति—एकइत्यादिना ॥ १५ ॥ सत्यप्रतिश्रवः सत्यसन्धः

एवंशुभंहित्वा अशुभंप्राप्नुयामितिशेषः ॥ ६ ॥ शि० हीनप्रतिज्ञया हीना निवृत्ता प्रतिज्ञायस्यां तया अनयावृत्त्यावर्तमानोऽहं वृत्तं स्वधर्मच्युतिरूपवृत्तान्तं । कस्ययास्यामि प्रापयिष्यामि कथयिष्यामीत्यर्थः । केनकर्मणा उपलक्षितंजनंस्वर्गं अवाप्नुयां प्रापयेयं ॥ ८ ॥ ति० सत्यपरः सत्यंपरंश्रेष्ठंयस्यसः धर्मः सर्वस्यमूलमुच्यते ॥ १२ ॥ ति० लोके ईश्वरस्सत्यमेव सत्यपदवाच्यइतिप्रसिद्धइत्यर्थः । तथा सद्भिराश्रितोधर्मः सत्ये सत्यपदवाच्येईश्वरे । प्रतिष्ठितः । आदौतस्यैवधर्मोपदेष्टृत्वादित्यर्थः । सत्येपद्माप्रतिष्ठितेतिपाठान्तरं । पद्मा लक्ष्मीः । सत्यमूलानिसर्वाणीत्यनेन जगदुपादानप्रवर्तकत्वेनसर्वाधिष्ठानत्वेनचतत्सिद्धिर्दर्शिता । तस्यैवतत्त्वेहेतुमाह । सत्यात्परंपदंनास्ति । अनेन तदितरस्यसर्वस्यमिथ्यात्वमचेतनत्वंचदर्शितं । एतेन चेतनानधिष्ठिता मायैवजगदुपादानकारणमितिनिरस्तं । चेतनाधिष्ठानंविनातत्परिणामासंभवात् । तस्याःपरिणामित्वेनमिथ्यात्वेनचेतनाधिष्ठानत्वासंभवाच ॥ १३ ॥ ति० एवंनास्तिकंप्रतीश्वरंप्रसाध्यवेदप्रामाण्यंसाधयति—**दत्तमित्यादि** । दत्तादीनिप्रतिपादयन्तोवेदाः सत्यप्रतिष्ठानाः सत्यादीश्वरात् श्वासप्रश्वासवदाविर्भूताइतिवक्तृदोषशंकाकलङ्कराहित्येनतत्प्रतिपादितदानादीनांफलसंवाददर्शनेनच सर्वत्राप्रामाण्यशङ्कारहिताः किंतुस्वतःप्रमाणभूताएवेतिभावः । तस्मात् सत्यस्यईश्वरवाचकवाच्यत्वेनतदभेदात्सत्यपरः सत्यपरिपालनतत्परोभवेदित्यर्थः ॥ १४ ॥ ति० वेदोक्तधर्माधर्मफलस्यप्रत्यक्षमनुभूयमानत्वेनतत्प्रामाण्यंसिद्धमित्याह—**एकइति** । लोकं राज्यं । कुलं स्वकुलमात्रं । एतेनपालनसाधनधर्मफलतारतम्यस्यवेदोक्तस्यानुभवोदर्शितः । निरयोत्रदुःखं । स्वर्गश्च सुखं । तेनधर्माधर्मफलानुभवोदर्शितः । स० एकः अन्यः । "एकेमुख्यान्यकेवलाः" इत्यमरः ॥ १५ ॥ स० सत्येनशपथेन समयीकृतः कैकेय्याप्रतिज्ञावान्कृतः यतः अतः कथंनानुपालये । कृतमित्यपिपाठः । ति० सोहं उक्तरीत्याएवंविवेकवानित्यर्थः ।

[पा०] १ क. ख. ग. ङ. च. छ. झ. ट. यास्याम्यहं. २ क. वृत्तिं. ३ क. ग. ङ.—ट. वर्तमानोहं. ४ ङ. छ. झ. ञ. ट. वृत्तोन्वयं. क.—घ. च. ज. वृत्तस्त्वयं. ५ क. ख. ऋषयश्चहि. ६ ङ. छ. झ. ट. परंगच्छतिचाक्षयं. ७ ङ. छ. झ. ञ. ट. सत्यपरो. ८ ङ. छ. झ. ट. सर्वस्य. ९ ङ. च. छ. झ. ट. सत्येधर्मःसदाश्रितः. घ. सत्यंपद्मासनाश्रिता. ख. ग. ज. सत्यंपद्मासमाश्रिता. १० घ. सुतपांसि. ११. ङ. नरके. १२ क. ख. ङ. छ. झ. ञ. ट. निर्देशं. १३ ङ. छ. झ. ट. कृतं.

नैव लोभान्न मोहाद्वा न ह्यज्ञानात्तमोन्वितः ॥ सेतुं सत्यस्य भेत्स्यामि गुरोः सत्यप्रतिश्रवः ॥१७॥
असत्यसन्धस्य सतश्चलस्यास्थिरचेतसः ॥ नैव देवा न पितरः प्रतीच्छन्तीति नः श्रुतम् ॥ १८ ॥
प्रत्यगात्ममिमं धर्मं सत्यं पश्याम्यहं स्वयम् ॥ भारः सत्पुरुषाचीर्णस्तदर्थमभिमन्यते ॥ १९ ॥
क्षात्रं धर्ममहं त्यक्ष्ये ह्यधर्मं धर्मसंहितम् ॥ क्षुद्रैर्नृशंसैर्लुब्धैश्च सेवितं पापकर्मभिः ॥ २० ॥
कायेन कुरुते पापं मनसा संप्रधार्य च ॥ अनृतं जिह्वया चाह त्रिविधं कर्म पातकम् ॥ २१ ॥
भूमिः कीर्तिर्यशो लक्ष्मीः पुरुषं प्रार्थयन्ति हि ॥ स्वर्गस्थं चानुपश्यन्ति सत्यमेव भजेत तत् ॥२२॥
श्रेष्ठं ह्यनार्यमेव स्याद्यद्भवानवधार्य माम् ॥ आह युक्तिकरैर्वाक्यैरिदं भद्रं कुरुष्व ह ॥ २३ ॥

॥ १६ ॥ लोभात् राज्यलोभात् । मोहात् विप्रलम्भवाक्यजनितचित्तविभ्रमात् । अज्ञानात् तमोन्वितः तमोगुणयुक्तः । सत्यस्य "करिष्यामितवप्रीतिंसुकृतेनापितेशपे"इत्यस्यसत्यवचनस्य । सेतुं मर्यादां ॥ १७ ॥ चलस्य चलस्वभावस्य । प्रतीच्छन्ति हव्यकव्यादिकमितिशेषः । नः अस्माभिः । श्रुतं ॥ १८ ॥ अहं सत्यं सत्यरूपमिमंधर्मं प्रत्यगात्मंस्वयंपश्यामि आत्मानंप्रत्यविनाभूतत्वेनप्रवृत्तंपश्यामीत्यर्थः । सत्पुरुषाचीर्णः सत्पुरुषैराचरितः संपादितइतियावत् । भारः जटावल्कलादिभारः । तदर्थं सत्यरूपधर्मार्थं । अभिमन्यते अभिमतोभवति ॥ १९ ॥ पूर्वैराचरितंसत्यंपरित्यज्य त्वदुक्तरीत्याराज्यंनाङ्गीकरिष्यामीत्याह—क्षात्रमित्यादिना । अधर्मं अधर्मप्रचुरं । धर्मसंहितं धर्मलेशसहितं । अधर्मप्रचुरधर्मलेशयुक्तक्षत्रियधर्ममहंत्यक्ष्यइत्यर्थः ॥ २०—२१ ॥ कीर्तिःवितरणजनिताप्रथा । यशः पौरुषनिबन्धनं । पुरुषं करणत्रयेणसत्यनिष्णातं । अनुपश्यन्ति अनुसृत्यपश्यन्ति अनुबध्नन्तीतियावत् ॥ २२ ॥ श्रेष्ठमित्यवधार्यनिश्चित्य । इदंभद्रंकुरुष्वेति भवान्युक्तिकरैर्वाक्यैः यदाह तदनार्यमेवस्यात् ॥२३॥

ननुस्त्रीवशतयापितृकृतेननियोगेकिमियतानिर्बन्धनेनतत्राह—**सत्येति** । यतोमेपितासत्यप्रतिश्रवः स्वप्रतिज्ञातसत्याङ्गीकारवान् । समयीसदाचरवान् । अतस्तेनसत्येनसत्यपरिपालनेनहेतुनासत्यमेवमांप्रतिकृतं उक्तमित्यर्थः । **शि०** राजा यतस्सत्यप्रतिश्रवः अतस्सत्येन सत्यपरिपालनहेतुना । सत्यमेवकृतंआज्ञापितमित्यर्थः । एतेन धर्मपरिपालनमेवप्रव्राजनेहेतुरितिसूचितं ॥ १६ ॥ **ति०** पूर्वसत्यप्रतिश्रवः शपथपूर्वकंकृतप्रतिज्ञस्सन् नैवभेत्स्यामि नभेत्स्यामि नचभेत्स्यामीतित्रिवारोक्त्यासर्वथादार्ढ्यंसूचितं । **स०** तमः तत्कार्यंकोपादि । गुरोः पितुः ॥ १७ ॥ **स०** उपासकस्यचञ्चलत्वादेव तेपिदेवाद्याः अस्थिरचेतसस्सन्तः नप्रतीच्छन्तिगृह्णन्ति । हव्यादिकमितिशेषः ॥ १८ ॥ **स०** प्रत्यगात्मं अञ्चन्तिगच्छन्तिनानायोनिष्वितिप्रत्यञ्चः । तेचतेआत्मानः अगात्मानोजीवाः । अगात्मनःप्रतिविद्यमानंप्रत्यगात्मं । वीप्सायामव्ययीभावः । "अनश्च" इतिटच् । सत्यं सत्यपरिपालनं ध्रुवं मुख्यंधर्मंपश्यामि । भारः जटाभारः यतः धर्मार्थंसत्पुरुषैश्चीर्णः अतस्तदर्थं अभिनन्द्यते आद्रियते ॥ १९ ॥ **ति०** ननुस्वधर्मो राज्यपालनमेवकिमितिनाभिनन्द्यतेतत्राह—**क्षात्रमिति** । धर्मसंहितं धर्मवत्प्रतिभासमानं वस्तुतोऽधर्मं पित्राज्ञाभङ्गकरत्वात् । क्षुद्रादिभिस्सेवितं ईदृशंक्षात्रधर्मं पित्राज्ञाभङ्गेनराज्यकरणरूपं । अहंत्यक्ष्ये नतुन्याय्यंक्षात्रधर्ममितिभावः ॥२०॥ **ति०** अस्य पापस्य शरीरसाध्यत्वेपि कायिकवाचिकमानसिकसकलपापप्रसक्तिरित्याह—**कायेनेति** । आदौमनसा एवंकर्मकरिष्यइतितत्पापंसंप्रधार्य ततोजिह्वया कृतं धर्मजनकं ततोभिन्नमनृतं तत्कर्म कर्तव्यत्वेनजिह्वयातत्सहायभूतेषुपुरुषेष्वाह । ततःकायेनकुरुते । अतःपापंकर्म क्रियारूपंपापं त्रिविधं कायिकवाचिकमानसिकरूपत्रिविधजनकमित्यर्थः । तेनकायिकंपापंबहुदुःखजनकमितिभावः । कलौतुपापसंकल्पादितोनदोषइत्युक्तंभागवते । "नानुद्वेष्टिकलिंसम्राट्सारङ्गइवसारभुक् । कुशलान्याशुसिद्ध्यन्तिनेतराणिकृतानियत्" सम्राट् परीक्षित् । सारमाह—कुशलानि पुण्यानि । आशु संकल्पमात्रात् । सिद्ध्यन्ति यथामानसपूजा । इतराण्यपिपापानिसंकल्पमात्रान्नफलन्ति । यत् यतः । तानिकृतान्येवफलन्तीतितदर्थः । **शि०** कायेनयत्पापंकुरुतेतत् जिह्वयाअनृतंयदाहतच्च मनसाअसंप्रधार्य अनिश्चित्यैवयत्कुरुते दुर्मार्गेधावतीत्यर्थः । तच्च पापं । अतःपातकंत्रिविधं । मनोवाक्कायत्रितयसंबन्धित्वात्त्रिप्रकारकं । एतेन सत्यप्रतिज्ञत्वत्यागपूर्वमेतद्राज्यकरणेत्रिविधपापसंबन्धोभविष्यतीतिसूचितं ॥ २१ ॥ **ति०** अवधार्य युक्तत्वेननिश्चित्य ।

[पा०] १ घ. मोहान्नलोभाद्वा. २ क. ख. ग. ङ. च. छ. झ. ञ. ट. नचाज्ञानात्. ३ ङ. च. छ. झ. ञ. ट. ध्रुवं. ४ ङ. छ. झ. ञ. ट. सत्पुरुषैश्चीर्णः. ५ ख. ग. ङ.—ट. मभिनन्द्यते. ६ ख. घ. ङ. ट. क्षात्रधर्मं. ७ क. ङ. च. छ. झ. ट. संप्रधार्यतत्. ख. ग. संप्रधारयन्. ८ ग. चेमं. ख. वक्ति. ९ छ. पापमात्मजं. १० च.—ट. सत्यंसमनुवर्तन्ते सत्यमेवभजेत्ततः. ११ ख. ग. चानुबध्नन्ति.

कथं ह्यहं प्रतिज्ञाय वनवासमिमं गुरौ ॥ भरतस्य करिष्यामि वचो हित्वा गुरोर्वचः ॥ २४ ॥
स्थिरा मया प्रतिज्ञाता प्रतिज्ञा गुरुसन्निधौ ॥ प्रहृष्यमाणा सा देवी कैकेयी चाभवत्तदा ॥ २५ ॥
वनवासं वसन्नेवं शुचिर्नियतभोजनः ॥ मूलैः पुष्पैः फलैः पुण्यैः पितॄन्देवांश्च तर्पयन् ॥ २६ ॥
संतुष्टपञ्चवर्गोहं लोकयात्रां प्रवर्तये ॥ अकुहः श्रद्दधानः सन्कार्याकार्यविचक्षणः ॥ २७ ॥
कर्मभूमिमिमां प्राप्य कर्तव्यं कर्म यच्छुभम् ॥ अग्निर्वायुश्च सोमश्च कर्मणां फलभागिनः ॥ २८ ॥
शतं क्रतूनामाहृत्य देवराट् त्रिदिवं गतः ॥ तपांस्युग्राणि चास्थाय दिवं याता महर्षयः ॥ २९ ॥

अमृष्यमाणः पुनरुग्रतेजा निशम्य तन्नास्तिकवाक्यहेतुम् ॥
अथाब्रवीत्तं नृपतेस्तनूजो विगर्हमाणो वचनानि तस्य ॥ ३० ॥
सत्यं च धर्मं च पराक्रमं च भूतानुकम्पां प्रियवादितां च ॥
द्विजातिदेवातिथिपूजनं च पन्थानमाहुस्त्रिदिवस्य सन्तः ॥ ३१ ॥
तेनैवमाज्ञाय यथावदर्थमेकोदयं संप्रतिपद्य विप्राः ॥
धर्मं चरन्तः सकलं यथावत्काङ्क्षन्ति लोकागममप्रमत्ताः ॥ ३२ ॥

" प्रत्यक्षंयत्तदातिष्ठपरोक्षंपृष्ठतःकुरु " इत्यन्तस्यजावालिवाक्यजातस्योत्तरमभिधाय " राज्यंत्वंप्रतिगृह्णीष्वभरतेनप्रसादितः " इत्यस्याप्युत्तरमाह—कथमित्यादिना ॥ २४ ॥ प्रतिज्ञा प्रतिज्ञाता कृतेत्यर्थः ॥ २५ ॥ वनवासमित्यादिश्लोकद्वयमेकंवाक्यं । वनवासं वसन् कुर्वन्नित्यर्थः । नियतभोजनः नियतवन्याहारः । संतुष्टपञ्चवर्गः परितुष्टपञ्चेन्द्रियवर्गः । लोकयात्रां पितृवचनपरिपालनरूपलोकवर्तनं । " गमनेवर्तनेयात्रा " इतिवैजयन्ती । अकुहः अकृत्रिमः ॥ २६—२७ ॥ अष्टकोदाहरणेनवैदिककर्मणांनिष्फलत्वंयदुक्तंतत्रपरिहारमाह—कर्मभूमिमित्यादिना । यच्छुभंकर्म तत्कर्तव्यं जनैरितिशेषः । तत्रफलवदनुष्ठानंदर्शयति—अग्निरित्यादि । कर्मणां कर्मभूमिकृतस्वस्वकर्मणां । फलभागिनः अग्नित्वादिफलंप्राप्तवन्तः ॥ २८ ॥ क्रतूनांशतं आहृत्य कृत्वेत्यर्थः । प्रवासिनंप्रतिश्राद्धकरणविधेरभावात् विहितस्थलेकुत्रापिन व्यभिचारइतिभावः ॥ २९ ॥ नास्तिकवाक्यहेतुं । " यदिभुक्तमिहान्येनदेहमन्यस्यगच्छति । दद्यात्प्रवसतःश्राद्धंनतत्पथ्यशनंभवेत् " इत्यादिनास्तिकवाक्यरूपतर्कं विगर्हमाणः मनसिविगर्हमाणः ॥ ३०—३१ ॥ तेनहेतुना विप्राः एवमर्थंयथावत् आज्ञाय ज्ञात्वा । एकोदयंसंप्रतिपद्य ऐककण्ठ्यंप्राप्य । सकलं धर्मं स्वस्ववर्णाश्रमोचितधर्मं । अप्रमत्ताः सावधानाः । यथावच्चरन्तः अनुतिष्ठन्तः । लोकागमं स्वर्गादिलो-

युक्तिकरैः युक्तिरेवकरःकरणंयेषांतैर्नाक्यैः । श्रेष्ठंहि श्रेष्ठमिवाह तदनार्यं अन्याय्यमेवस्यात् ॥ २३ ॥ ति० गुरोःपुरतः इमं गुर्वाज्ञप्तं । गुरोर्वचोहित्वेत्यन्वयः ॥ २४ ॥ ति० कैकेयीचेति । एवंचतस्याहर्षदस्यपुनरहर्षदत्वमत्यन्तमनुचितमितिभावः ॥२५॥ ति० तर्पयन् प्रतिज्ञांपालयिष्यामीतिशेषः ॥ २६ ॥ ति० श्रद्दधानः आस्तिकः । लोकयात्रांप्रवाहये प्रवाहरूपेणप्रवर्तयामीत्यर्थः । शि० किंच संतुष्टपञ्चवर्गः संतुष्टेनसंतोषेणपञ्चौव्यक्तौवर्गौसीतालक्ष्मणौयस्य ॥ २७ ॥ वि० फलभागिनः अग्नित्वादिकंकर्मफलत्वेनप्राप्तवन्तः । अतस्सर्वैरपिशुभकर्मैवकर्तव्यमितिभावः स० कर्मणांफलभागिनः अस्मिन्वर्षेकर्मकृत्त्वैवप्राप्तपदाः ॥ २८ ॥ ति० शतमिति । अनेनपूर्वोक्तंसमर्थितं । अतीतानागतज्ञेन्द्रादीनांतत्तत्फलानुभवेनतत्तद्वेदभागप्रामाण्यंदर्शितंच । स० त्रिदिवं स्वर्गं । गतः स्वामित्वेनप्राप्तः । महर्षयइत्यनेन पारत्रिकसुखास्तित्वनिश्चयेनैवतपःकरणं नतुभ्रान्त्येति ॥ २९ ॥ ति० नास्तिकवाक्येहेतुं नास्तिपरलोकइतिवचनोपपादकं "यदिभुक्तमिहान्येन" इत्याद्युक्तशुष्कतर्करूपं । अमृष्यमाणः जावालिमितिशेषः । तस्य जाबालेः अनेन नास्तिकवृत्तयोब्राह्मणाअपिराज्ञोऽवश्यंवाग्दण्डेनदण्ड्याइतिसूचितं । ति० अथ पुनः । तमब्रवीदितिसंबन्धः ॥ ३० ॥

[पा०] १ ख. ग. ङ. च. छ. झ. ञ. ट. गुरोः. २ ङ.—ट. प्रहृष्टमानसा. ३ क.—ट. मूलपुष्पफलैः. ञ. पत्रपुष्पफलैः. ४ क. ख. ध. पितृदेवांश्च. ५ छ. गामिनः. ६ ङ. छ. झ. ट. प्राप्ता. ७ ख. घ. हेतुवाक्यं.

निन्दाम्यहं कर्म पितुः कृतं तद्यस्त्वामगृह्णाद्[1]विषमस्थबुद्धिम् ॥
बुद्ध्याऽनयैवंविधया चरन्तं सुनास्तिकं धर्मपथादपेतम् ॥ ३३ ॥
यथा हि चोरः स तथाहि बुद्धस्तथागतं नास्तिकमत्र विद्धि ॥
तस्माद्धि यः शङ्क्यतमः प्रजानां [2]न नास्तिकेनाभिमुखो बुधः स्यात् ॥ ३४ ॥
[3]त्वत्तो जनाः पूर्वतरे [4]वराश्च शुभानि कर्माणि बहूनि चक्रुः ॥
जित्वा सदेमं च परं च लोकं तस्माद्द्विजाः स्वस्ति [5]हुतं कृतं च ॥ ३५ ॥
धर्मे रताः सत्पुरुषैः समेतास्तेजस्विनो दानगुणप्रधानाः ॥
अहिंसका वीतमलाश्च लोके भवन्ति पूज्या मुनयः प्रधानाः ॥ ३६ ॥
इति ब्रुवन्तं वचनं [6]सरोषं रामं महात्मानमदीनसत्त्वम् ॥
उवाच [7]तथ्यं पुनरास्तिकं च सत्यं वचः सानुनयं च विप्रः ॥ ३७ ॥
न नास्तिकानां वचनं ब्रवीम्यहं न [8]चास्तिकोऽहं न च नास्ति किंचन ॥

कप्राप्तिंकाङ्क्षन्तीति ॥ ३२ ॥ विपमस्थबुद्धिं । अवैदिकमार्गनिष्णातबुद्धिं । अनयाबुद्ध्याचरन्तं चार्वाकमतानुसारिणींबुद्धिंपरान्प्रत्युपदिश्याचरन्तमित्यर्थः। सुनास्तिकं परलोकोनास्तीतिबुद्धियुक्तं । सुशब्देनवैदिकवत्स्थित्वाचार्वाकमतप्रवर्तकइत्युच्यते । निन्दामि वैदिककर्मभ्योबहिष्करोमि ॥ ३३ ॥ प्रत्यक्षैकप्रमाणवादीयदिकश्चिद्राज्येस्यात्सोपिबहिष्करणीयइत्याह—यथेत्यादिना । चोरोयथानिराकरणीयः सः वेदबाह्यत्वेनप्रसिद्धोपि । तथाहि तथैव । अत्र अस्मिँल्लोके । नास्तिकं चार्वाकं । तथागतं बुद्धतुल्यंविद्धि । तस्माद्यः प्रजानांशङ्क्यतमः अवैदिकत्वेनशङ्कनीयः । तेन नास्तिकेनबुधोभिमुखोनस्यात् ॥ ३४ ॥ ऐहिकामुष्मिकफलसाधनेधर्मेशिष्टाचारंप्रमाणयति—त्वत्तइत्यादिना । त्वत्तःपूर्वतरे पुरातनाश्च वराश्च ज्ञानतःश्रेष्ठाश्चजनाः बहूनिशुभानिकर्माणिचक्रुः ते इमंपरंचलोकंजित्वा सदा वर्तन्तइतिशेपः । सदावर्तमानत्वंचग्रहनक्षत्रादिरूपेणदृश्यमानत्वात् । "सुकृतांवाएतानिज्योतींषियन्नक्षत्राणि" इतिश्रुतेः । तस्मात् कर्मानुष्ठानस्यैहिकामुष्मिकसकलफलसाधनत्वात् । द्विजाः स्वस्ति मङ्गलात्मकंकर्म हुतंयज्ञादिकृतंच तपोदानादिकंच कुर्वन्तीतिशेषः । एवंप्रत्यक्षमेवनप्रमाणं तदतिरिक्तानांवेदानामपिप्रमाणत्वात् । तत्त्वंच तेषां महाजनपरिग्रहात् । सचापौरुषेयत्वेन तच्चाविच्छिन्नसंप्रदायत्वेसतिअस्मर्यमाणकर्तृकत्वात् । वैदिकानि चकर्माणिसफलानि अग्निरविसोमनक्षत्रेन्द्रादिफलभोगस्याबाधितप्रत्यक्षसिद्धत्वात् । अन्यकृतभोजनस्यपथिकाशनत्वाभावस्तु अदर्शनादविहितत्वाच्चेत्युक्तं ॥ ३५—३६ ॥ तथ्यं यथार्थं । सत्यं सद्भ्योहितं ॥ ३७ ॥ धर्मसंकटेप्राप्तेसर्वमतज्ञेनविदुषायत्किंचिन्मतमवलम्ब्यापितस्यपरिहरणीयत्वात् महतोराज्यस्या-

ति० चरन्तं लोकनाशायाटन्तं । विषमस्थबुद्धिं अवैदिकदुर्मार्गप्रतिष्ठितबुद्धिं । त्वां योमेपिताअगृह्णात् याजकत्वेनस्वीकृतवान् तत्पितुःकर्मनिन्दामि ॥ ३३ ॥ ति० बुद्धः बुद्धमतानुसारी तथा चोरवद्दण्ड्यः इति हि प्रसिद्धं । नास्तिकं चार्वाकं । तथागतं तत्सदृशं चोरवद्दण्ड्यंविद्धि । नास्तिकविशेषस्तथागतः । तमपिचोरवद्दण्डयामीतिशेषइत्यन्ये । वेदप्रामाण्यापहर्तृत्वेनतेषामपिचोरत्वात् । दण्डयितुंशक्यतमोयस्सचोरवदेवदण्ड्यः । दण्डायोग्येतुनास्तिकेबुधोऽभिमुखोनस्यात् । तत्संभाषणादि नकुर्यादित्यर्थः ॥ ३४ ॥ ति० यतः त्वत्तः अन्येइतिशेषः । त्वदन्येद्विजाजनाः पूर्वतरे श्रेष्ठाः । आर्षमिदं । यदेतिपाठे नाध्याहारापेक्षा । तस्यैवयतइत्यर्थकत्वात् । बहूनिशुभानिचक्रुः । इमंलोकं परंचलोकंछित्वा ऐहिकामुष्मिकफलकामनांत्यक्त्वापि वेदोक्तोऽयंधर्मइत्येतावतैवकर्माणिचक्रुरितितात्पर्यं । तस्मात् द्विजाः स्वस्ति अहिंसासत्यादिकं कृतं तपोदानपरोपकारादि । हुतं यज्ञादि कुर्वते वेदप्रामाण्यादेव ॥ ३५ ॥ ति० मुनयः वसिष्ठाद्याः पूज्याभवन्तिलोके नत्वादृशाइत्यर्थः ॥ ३६ ॥ ति० इतिधिक्कृतोजाबालिः स्वविषयकोपशमनायाह—इतीति । पथ्यं परमार्थं ॥ ३७ ॥ नेति । एवंचसर्वमतज्ञेनकालविशेषेअन्यथावाग्व्यवहारेपिनत-

[पा०] १ ख. विषयस्थबुद्धिः. २ झ. ट. ट. सनास्तिके. ३ अ. वृत्तःपराः. क. त्वत्तोवराः. ४ ङ. छ. झ. ट. द्विजाश्च. क. जनाश्च. ५ ङ. च. छ. झ. ञ. ट. कृतंहुतंच. ६ ङ. च. छ. झ. ट. सदोपं. ७ ङ. च. छ. झ. ग. ट. पथ्यं. ८ क. घ. च. झ. ञ. ट. नास्तिकोहं.

समीक्ष्य कालं पुनरास्तिकोऽभवं भवेय काले पुनरेव नास्तिकः ॥ ३८ ॥
स चापि कालोऽयमुपागतः शनैर्यथा मया नास्तिकवागुदीरिता ॥
निवर्तनार्थं तव राम कारणात्[1]प्रसादनार्थं तु मयैतदीरितम् ॥ ३९ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे नवोत्तरशततमः सर्गः ॥१०९॥

दशोत्तरशततमः सर्गः ॥ ११० ॥

वसिष्ठेनजाबालयेरुष्टंरामंप्रतितद्भावकथनेनपरिसान्त्वनम् ॥ १ ॥ तथातंप्रतिज्येष्ठस्यैवराज्यार्हतेतिव्याप्तेरव्यभिचारप्रदर्शनायब्रह्माणमारभ्यदशरथावधिवंशानुक्रमकीर्तनपूर्वकंज्येष्ठत्वहेतुनाराज्यस्वीकारचोदना ॥ २ ॥

क्रुद्धमाज्ञाय [2]रामं तं वसिष्ठः प्रत्युवाच ह ॥ जाबालिरपि जानीते लोकस्यास्य [3]गतागतिम् ॥ १ ॥
निवर्तयितुकामस्तु त्वामेतद्वाक्यमु[4]क्तवान् ॥ इमां लोकसमुत्पत्तिं लोकनाथ निबोध मे ॥ २ ॥
[5]सर्वं सलिलमेवासीत्पृथिवी [6]यत्र निर्मिता ॥ ततः समभवद्ब्रह्मा स्वयंभूर्दैवतैः सह ॥ ३ ॥

नायकत्वरूपसंकटपरिहारायत्वांनिवर्तयितुंमयानास्तिकमतमुपन्यस्तं नत्वहंवस्तुतोनास्तिकइत्याह—ननास्तिकानामित्यादिना । किंचन परलोकादिकंनास्तीतिन अस्त्येव । समीक्ष्यकालं पुनरास्तिकोभवं यदावादिनाऽन्येननास्तिकमतमवलम्ब्यते तंकालंसमीक्ष्य अहंपुनरास्तिकमतावलम्ब्यभवं । अन्यैर्वादिभिर्नास्तिकमतमवलम्ब्यकुतर्कोद्घाटने तदानीमहमेवत्वदुक्तरीत्याशतशस्तत्खण्डनमकार्षमित्यर्थः । तर्हीदानींनास्तिकमतंकुतोवलम्बितवानसीत्यत्राह—भवेयकालेपुनरेवनास्तिकइति । तादृशोहमेवपुनः काले धर्मसंकटकाले । नास्तिकोभवेय धर्मसंकटकालप्रयुक्तोयंमम नास्तिकवादइत्यर्थः । भवेयेत्यनेन इतःपरमपि कस्मिंश्चिद्धर्मसंकटकाले नास्तिकमतमवलम्बनीयमेव नच तावतावस्तुतोनास्तिकत्वंममभवेदितिभावः ॥ ३८ ॥ तादृशधर्मसंकटकालएवायमित्याह—सचापीति। एवमपिपरमवैदिकस्यतवनयुक्तमेतादृशंवचनमित्याशङ्क्याह—निवर्तनार्थमित्यादिना । निवर्तनार्थं तवनिवृत्तिज्ञापनार्थं तववेदमार्गादविचाल्यत्वस्यलोकानांप्रकटीकरणार्थमित्यर्थः । कारणात् भरतकारणात् । भरतमुखोल्लासायतवप्रसादनार्थंचेत्यर्थः ॥ ३९ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने नवोत्तरशततमःसर्गः ॥ १०९ ॥

अथवसिष्ठोजाबालिवचनयाथार्थ्यप्रदर्शनेनतद्विषयकोपंनिवर्त्यस्वाभिमतंज्येष्ठस्यैवराज्यार्हतारूपंनिवर्तनोपायंप्रतिपादयति—क्रुद्धमित्यादिना । लोकस्य जनस्य । गतं गमनं । भावेनिष्ठा । परलोकप्राप्तिं तत इहागतिंचजानीते । नासौनास्तिकइत्यर्थः ॥१॥ निवर्तनार्थमिति तदुक्तमपिसत्यमित्याह—निवर्तयितुकामइत्या-

स्यनास्तिकत्वंभवतीतिभावः ॥ ३८ ॥ **ति०** कारणात् तादृशकालागमनकारणात् । **ति०** कारणात् त्वदीयास्तिकत्वाद्यतिशयस्य लोकेअतिप्रसिद्धिसंपादनरूपकारणात् । नास्तिकवागुक्ता । **स०** यथानास्तिकवागुदाहृता तथा कारणात् तवकोपरूपनिमित्तात् । त्वत्प्रसादनार्थं एतत् आस्तिकवचनं ॥ इतिनवोत्तरशततमस्सर्गः ॥ १०९ ॥

स० क्रुद्धं जाबालये ॥ १ ॥ **स०** सर्वं सर्वत्र । सलिलं लक्ष्म्यात्मकं । तत्र सलिले । **ति०** पूर्वाहान्तेऽपहृतंसर्वंजगत् पराह्नादौसलिलमेव सविग्रहहिरण्यगर्भात्मनाऽवस्थितमभूत् । तत्र सलिलान्तः । पृथिवी निर्मिता सलिलरूपेणभगवतास्वेच्छया । ब्रह्मा विराड्रूपोदैवतैस्सह । " अग्निर्वाग्भूत्वामुखंप्राविशत् " इत्याद्युपदिष्टरीत्या । **वि०** सलिलमेव एकार्णवोदकमेवासीत् । नारायणाधिष्ठितमितिशेषः । ततोनारायणात् स्वयंभूर्ब्रह्मा समभवत् । नाभिपद्मेइतिशेषः । ननुसर्वनाम्नःप्रधानपरामर्शित्वात्कथमिहनारायणपरामर्शइतिचेन्न । " दशैतेराजमातङ्गास्तस्यैवामीतुरङ्गमाः" इत्यादावप्रधानपरामार्शित्वदर्शनेनतस्यौत्सर्गिकत्वात् ॥३॥

[पा०] १ ख.— ट. प्रसादनार्थंच. २ क.—ट. रामंतु. ३ ख. गतागतं, ४ क. ख. ङ. च. छ. झ. ञ. ट. मब्रवीत्. ५. ख. सलिलंसर्वमेवा. ६ ङ. छ. झ. ञ. ट. तत्र.

स वराहस्ततो भूत्वा प्रोज्जहार वसुन्धराम् ॥ असृजच्च जगत्सर्वं सहपुत्रैः कृतात्मभिः ॥ ४ ॥
आकाशप्रभवो ब्रह्मा शाश्वतो नित्य अव्ययः ॥ तस्मान्मरीचिः संजज्ञे मरीचेः कश्यपः सुतः ॥५॥
विवस्वान्कश्यपाज्जज्ञे मनुर्वैवस्वतः सुतः ॥ स तु प्रजापतिः पूर्वमिक्ष्वाकुस्तु मनोः सुतः ॥ ६ ॥
यस्येयं प्रथमं दत्ता समृद्धा मनुना मही ॥ तमिक्ष्वाकुमयोध्यायां राजानं विद्धि पूर्वकम् ॥ ७ ॥
इक्ष्वाकोस्तु सुतः श्रीमान्कुक्षिरेवेति विश्रुतः ॥ कुक्षेरथात्मजो वीरो विकुक्षिरुदपद्यत ॥ ८ ॥
विकुक्षेस्तु महातेजा बाणः पुत्रः प्रतापवान् ॥ बाणस्य तु महाबाहुरनरण्यो महायशाः ॥ ९ ॥
नानावृष्टिर्बभूवास्मिन्न दुर्भिक्षं सतां वरे ॥ अनरण्ये महाराजे तस्करो नापि कश्चन ॥ १० ॥
अनरण्यान्महाबाहुः पृथू राजा बभूव ह ॥ तस्मात्पृथोर्महाराजस्त्रिशङ्कुरुदपद्यत ॥
स सत्यवचनाद्वीरः सशरीरो दिवं गतः ॥ ११ ॥
त्रिशङ्कोरभवत्सूनुर्धुन्धुमारो महायशाः ॥ धुन्धुमारो महातेजा युवनाश्वो व्यजायत ॥ १२ ॥
युवनाश्वसुतः श्रीमान्मान्धाता समपद्यत ॥ मान्धातुस्तु महातेजाः सुसन्धिरुदपद्यत ॥ १३ ॥
सुसन्धेरपि पुत्रौ द्वौ ध्रुवसन्धिः प्रसेनजित् ॥ यशस्वी ध्रुवसन्धेस्तु भरतो रिपुसूदनः ॥ १४ ॥

दिना । ज्येष्ठस्यैवराज्यार्हतांवक्तुमारभते—इमामित्यादि । लोकनाथ तवैवतत्प्रत्यक्षंहीतिभावः ॥ २—४ ॥ आकाशप्रभवइत्यत्राकाशशब्दःपरब्रह्मपरः । " आकाशोहवैनामरूपयोर्निर्वहितातेयदन्तरातद्ब्रह्म " इतिश्रुतेः । इत्थमेवाव्यक्तप्रभवोत्रह्मेतिबालकाण्डोक्तमपि । शाश्वतःप्रवाहरूपेणनित्यः । नित्यः इतरापेक्षयाचिरकालस्थायी । अन्यथा आकाशप्रभवइतिविरुध्यते । अव्ययः तस्मात्स्थानात्तस्यमोक्षसिद्धेः ॥ ५ ॥ वैवस्वतः विवस्वत्संबन्धी । तस्येक्ष्वाकुवंशकूटस्थत्वंचदर्शयति —सलिलादिना । " मनुनामानवेन्द्रेणयापुरीनिर्मितास्वयं " इतितस्यायोध्यानिर्मातृत्वोक्तिः ॥६—११॥ युवनाश्वएव महातेजःप्रभावेनमहाबलधुन्धुनामकासुरमारणाद्धुन्धुमारसंज्ञामलभतेत्यर्थः ॥ १२—१३ ॥ सुसंधेरिति । ज्येष्ठस्यध्रुवसंधेर्वंशकथनाज्ज्येष्ठस्यैव-

ति० ततस्सत्रिमूर्तेर्विराजोविष्ण्वात्मकोंशोवराहरूपोभूत्वा वसुंधरांप्रोज्जहार । तस्यैवविराजोरजःप्रधानस्सृष्टिव्यापारवानंशोब्रह्मेतिव्यवह्रियमाणः सर्वंजगत् पुत्रैस्सह निजानुग्रहप्राप्तसृष्ट्यादिशक्तिमद्भिर्दक्षादिभिस्सहासृजत् । **स०** सः भगवान् चतुर्मुखान्तर्यामितयाप्रसक्तः । वसुंधरां रसातलगतामितिशेषः । कृतात्मभिः शिक्षितमनस्कैः । **वि०** ननुपृथिव्यास्सलिलेनिमग्नत्वात्कदैवतान्यभवन्नित्याकाङ्क्षायामाह—**सवराहइति** । सः नारायणः । ततोब्रह्मनासारंध्राद्वराहोभूत्वा वसुंधरां प्रोज्जहार सलिलादुद्धृत्यतदुपरिस्थापयामासेत्यर्थः । सएवनारायणोब्रह्ममूर्तिः पुत्रैस्सहसर्वमसृजत् । वक्ष्यत्युत्तरकाण्डे " संक्षिप्यहिपुरालोकान्मायया स्वयमेवहि । महार्णवेशयानोप्सुमांत्वंपूर्वमजीजनः । पद्मेदिव्येऽर्कसंकाशेनाभ्यामुत्पाद्यमामपि । प्राजापत्यंत्वयाकर्ममयिसर्वंनिवेशितं " इति ॥ ४ ॥ **ति०** नन्वसावेवसर्वादिर्नेत्याह—**आकाशेति** । आकाशपदेनकारणोपाधिकंब्रह्मेश्वराख्यं । ब्रह्मेतित्रिमूर्तेर्ग्रहणं । अस्मिन्शाश्वतत्वनित्यत्वाव्ययत्वान्यापेक्षिकाणि । तस्मात् विराजोब्रह्मणः । **स०** आसमन्तात्काशमानत्वादाकाशो भगवान् । तत्प्रभवोब्रह्मा तदन्तर्गतस्तच्छब्दवाच्योहरिरपिग्राह्यः ॥ ५ ॥ **वि०** तत्रमन्वन्तामानसीसृष्टिः । मनोः क्षेत्रेइक्ष्वाकुः ॥ ६ ॥ **स०** सत्यवचनात् त्वांस्वर्गंप्रापयिष्यइतिविश्वामित्रसत्यवचनात् ॥ ११ ॥ **वि०** धुन्धुमाराद्युवनाश्वइति । त्रिशङ्कुसुतो युवनाश्वइत्यन्यत्रश्रूयमाणंकल्पान्तरविषयं । यद्वा युवनाश्वएवमहातेजःप्रभवत्वाद्धुन्धुमारसंज्ञांलभते । यद्वाऽन्यत्रत्रिशङ्कुसुतइत्य-

[पा०] १ घ. क. ख. च. ज. ञ. स्मृतः. ङ. छ. झ. ट. स्वयं. २ ज. मनुः प्रजापतिः. सतुप्रजापतिःपूर्वमित्यर्धस्यस्थाने. क. पाठे. सतुप्रजापतिःपूर्वमिक्ष्वाकूणांमहात्मनां । जजानाङ्गिरसंब्रह्माप्रचेतसमथाङ्गिराः । मनुःप्रचेतसःपुत्रइक्ष्वाकुस्तु मनोःसुतः । इत्यर्धत्रयंदृश्यते. ३ ख. तस्येयं. ४ क. ख. ङ. च. छ. झ. ञ. ट. कुक्षिरित्येव. ५ ख. नःश्रुतं. ज. नःश्रुतः. ६ ङ. च. छ. झ. ट. वीर. ७ ङ. च. झ. ञ. बाणस्यच. ८ ङ. च. झ. ञ. महातपाः. ९ च. नचावृष्टिः. १० क. ङ. च. झ. ट. दुर्भिक्षः. ११ ख. ङ. छ.—ट. वापि. च. वान. १२ ख. ग. ङ. छ. झ. ट. न्महाराज. ञ. न्महातेजाः. १३ ङ. च. छ. ञ. ट. महातेजाः. १४ ग. द्धीरः. १५ क. ग. त्रिशङ्कोस्त्वभवत्. १६ क.—ट. धुन्धुमारान्महा. १७ ख. मान्धातुश्च. १८ ज. सुतःश्रीमान्सुसंधिः. १९ घ. दृढसंधिः. २० घ. दृढसंधेस्तु. २१ रघुनंदन.

भरतात्तु महाबाहोरसितो नाम जायत ॥ यस्यैते प्रतिराजान उदपद्यन्त शत्रवः ॥
हैहयास्तालजङ्घाश्च शूराश्च शशिबिन्दवः ॥ १५ ॥
तांस्तु सर्वान्प्रतिव्यूह्य युद्धे राजा प्रवासितः ॥ स च शैलवरे रम्ये बभूवाभिरतो मुनिः ॥१६॥
द्वे चास्य भार्ये गर्भिण्यौ बभूवतुरिति श्रुतिः ॥ १७ ॥
[तत्र चैका महाभागा भार्गवं देववर्चसम् ॥ ववन्दे पद्मपत्राक्षी काङ्क्षिणी पुत्रमुत्तमम् ॥]
एका गर्भविनाशाय सपत्न्यै सा गरं ददौ ॥ १८ ॥
भार्गवश्च्यवनो नाम हिमवन्तमुपाश्रितः ॥ तमृषिं समुपागम्य कालिन्दी त्वभ्यवादयत् ॥ १९ ॥
स तामभ्यवदद्विप्रो वरेप्सुं पुत्रजन्मनि ॥ पुत्रस्ते भविता देवि महात्मा लोकविश्रुतः ॥
धार्मिकश्च सुशीलश्च वंशकर्तारिसूदनः ॥ २० ॥
कृत्वा प्रदक्षिणं हृष्टा मुनिं तमनुमान्य च ॥ पद्मपत्रसमानाक्षं पद्मगर्भसमप्रभम् ॥
ततः सा गृहमागम्य देवी पुत्रं व्यजायत ॥ २१ ॥
सपत्न्या तु गरस्तस्यै दत्तो गर्भजिघांसया ॥ गरेण सह तेनैव जातः स सगरोऽभवत् ॥ २२ ॥
स राजा सगरो नाम यः समुद्रमखानयत् ॥ इष्ट्वा पर्वणि वेगेन त्रासयन्तमिमाः प्रजाः ॥ २३ ॥
असमञ्जस्तु पुत्रोऽभूत्सगरस्येति नः श्रुतम् ॥ जीवन्नेव स पित्रा तु निरस्तः पापकर्मकृत् ॥ २४ ॥
अंशुमानपि पुत्रोऽभूदसमञ्जस्य वीर्यवान् ॥ दिलीपोंऽशुमतः पुत्रो दिलीपस्य भगीरथः ॥ २५ ॥

राज्येस्थापितत्वमुक्तं ॥ १४ ॥ जायतेत्यत्राडभावः । अनित्यत्वात् । प्रतिराजानः सामन्ताः शत्रवः । उदपद्यन्त आसन्नित्यर्थः । हैहयाद्यास्तत्तद्देशाधिपतयः ॥ १५ ॥ प्रतिव्यूह्य युद्धंकृत्वा । राजा असितः । शैलवरे हिमवति । रम्ये निर्भयतयास्थातुंयोग्ये । मुनिः सन्नभिरतोबभूव अन्यथा तस्मादपि शैलात्प्रवासयेयुरितिभावः ॥ १६ ॥ श्रूयतइतिश्रुतिः जनवादइत्यर्थः ॥१७—१९॥ अभिवादनप्रसन्नोविप्रःपुत्रजन्मनिविषये वरेप्सुं तां अभ्यवदत् उवाच । महात्मा महामतिः । लोकविश्रुतः सर्वलोकप्रसिद्धः । पुत्रोभवितेत्यभ्यवददित्यन्वयः ॥ २० ॥ सादेवी तंमुनिं अनुमान्य संपूज्य । ततोगृहमागम्य पद्मपत्रसमानाक्षं पद्मगर्भसमप्रभंपुत्रं । व्यजायत व्यजीजनत् ॥२१—२२ ॥ यः इष्ट्वा दीक्षांकृत्वा । पर्वणिवेगेन अम्बुवेगेन इमाः प्रजाः त्रासयन्तंसमुद्रं । अखानयत् ॥२३॥ नः

स्यतत्पौत्रइत्यर्थः ॥ १३ ॥ ति० तान् हैहयादिचतुर्विधशत्रून् । युद्धस्वसैन्यप्रतिव्यूह्यावस्थितोपि शत्रुबाहुल्यात्तज्जयोशक्यइतिबुद्ध्या प्रवासितः संजातप्रवासोवभूव । शत्रुजयोद्देशेनतपसेहिमवद्गिरिंजगामेत्यन्वयः । शि० पित्राप्रवासितः शत्रुबाहुल्यात्पराजयशङ्कयाविवासितः । मुनिः परमात्ममननशीलोवभूव ॥ १६ ॥ ति० तेनैवसह जातइतिशेषः ॥ २२ ॥ ति० अखानयत् स्वपुत्रैरितिशेषः । इष्ट्वा दीक्षितोभूत्वा । वेगेन खननवेगेन । त्रासमानः उद्वेजयत् । शि० यः पर्वणि इष्ट्वा दीक्षांगृहीत्वा । स० इमाःप्रजाः हैहयादिरूपाः ॥ २३ ॥ शि० पापकर्मकृदिव । एवइवार्थे । स० पापकर्मकृत् तद्वत्प्रदर्शकः । श्रीमद्भागवतेतस्य पुनर्योगेनकुमारप्रदर्शकत्वोक्तिः ॥ २४ ॥

[पा०] १. क. च. ज. महाबाहुः. २ क. नामतोऽभवत्. ३ घ. ङ. छ. झ. ञ. ट. शशबिन्दवः. ४ ख. ग. तांश्च. ५ क. श्रुतं. ६ इदमर्धद्वयं क. ङ. च. छ. झ. ञ. ट. पाठेपुदृश्यते. ७ ख. गर्भविनाशार्थं. ञ. पुत्रविनाशाय. ८ ग. चगरं. क. ख. ट. तुगरं. ङ. च. छ. झ. ञ. गरलं. ९ ख. राम. १० ङ. च. झ. ञ. ट. साऽभ्युपागम्य. क. समुपागत्य. ११ ग. चाभ्यवादयत्. ख. साभ्यवादयत्. १२ ङ. च. छ. झ. ञ. ट. मभ्यवदत्प्रीतो. १३ ङ. च.—ट. सुभीमश्च. क. महाबाहुः. १४ ङ. छ. झ. ट. श्रुत्वा. १५ च. नत्वा. ञ. स्तुत्वा. ङ. छ. झ. ट. कृत्वा. १६ ख. ग. घ. मभिवाद्य. १७ ख. ग. विशालाक्षी. घ. समानाक्षी. १८ ङ. झ. पत्नीपुत्रमजायत. १९ ङ. छ. झ. ट. तस्मात्स. २० क.—ट. त्रासयानइमाः. २१ क. च. ञ. अंशुमानस्य. ख. घ. ज. अंशुमानिति.

भगीरथात्ककुत्स्थस्तु काकुत्स्था येन विश्रुताः ॥ ककुत्स्थस्य च पुत्रोऽभूद्रघुर्येन तु राघवाः ॥ २६ ॥
रघोस्तु पुत्रस्तेजस्वी प्रवृद्धः पुरुषादकः ॥ कल्माषपादः सौदास इत्येवं प्रथितो भुवि ॥ २७ ॥
कल्माषपादपुत्रोऽभूच्छङ्खणस्त्विति विश्रुतः ॥ यस्तु तद्वीर्यमासाद्य सहसैन्यो व्यनीनशत् ॥ २८ ॥
शङ्खणस्य च पुत्रोऽभूच्छूरः श्रीमान्सुदर्शनः ॥ सुदर्शनस्याग्निवर्ण अग्निवर्णस्य शीघ्रगः ॥ २९ ॥
शीघ्रगस्य मरुः पुत्रो मरोः पुत्रः प्रशुश्रुकः ॥ प्रशुश्रुकस्य पुत्रोऽभूदम्बरीषो महाद्युतिः ॥ ३० ॥
अम्बरीषस्य पुत्रोऽभून्नहुषः सत्यविक्रमः ॥ नहुषस्य च नाभागः पुत्रः परमधार्मिकः ॥ ३१ ॥
अजश्च सुव्रतश्चैव नाभागस्य सुतावुभौ ॥ अजस्य चैव धर्मात्मा राजा दशरथः सुतः ॥ ३२ ॥
तस्य ज्येष्ठोसि दायादो राम इत्यभिविश्रुतः ॥ तद्गृहाण स्वकं राज्यमवेक्षस्व जगं नृप ॥ ३३ ॥
इक्ष्वाकूणां हि सर्वेषां राजा भवति पूर्वजः ॥ पूर्वजे नावरः पुत्रो ज्येष्ठो राज्येऽभिषिच्यते ॥ ३४ ॥

स राघवाणां कुलधर्ममात्मनः सनातनं नाद्य विहन्तुमर्हसि ॥
प्रभूतरत्नामनुशाधि मेदिनीं प्रभूतराष्ट्रां पितृवन्महायशः ॥ ३५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे दशोत्तरशततमः सर्गः ॥ ११० ॥

एकादशोत्तरशततमः सर्गः ॥ १११ ॥

वसिष्ठेनरामंप्रतिपित्रपेक्षयामातुराचार्यस्यचाभ्यर्हितत्वोपपादनपूर्वकंतद्वचनानुरोधेनाश्रितपारतन्त्र्यरूपस्वासाधारणधर्मपरिरक्षणायभरतप्रार्थनासफलीकरणस्यज्यायस्त्वोक्तिः ॥ १ ॥ रामेणतंप्रत्याचार्यापेक्षयामातापित्रोरेवाभ्यर्हितत्वसमर्थनपूर्वकं पितृवचनपालनस्यप्रथमंप्रतिज्ञाततयाऽनतिक्रमणीयत्वोक्तिः ॥ २ ॥ निरुत्तरीकृतेनभरतेनरामस्यपुरतःप्रत्युपवेशनायकुशानामास्तरणम् ॥ ३ ॥ रामेणतस्यक्षत्रियाणामधर्म्यत्वोक्तौभरतेनतंप्रतितत्प्रतिनिधितयास्वेनवनवासपूरणोक्तिः ॥ ४ ॥ रामेण प्रतिनिध्यपेक्षणस्यासमर्थविषयतयास्वस्यनिन्द्यत्वोक्त्याप्रतिज्ञासमापनानन्तरमयोध्याप्रत्यागमोक्त्याभरतपरिसान्त्वनम् ॥ ५ ॥

वसिष्ठस्तु तदा राममुक्त्वा राजपुरोहितः ॥ अब्रवीद्धर्मसंयुक्तं पुनरेवापरं वचः ॥ १ ॥

श्रुतं । अस्माभिःश्रुतमित्यर्थः ॥ २४—२७ ॥ तद्वीर्यं वसिष्ठशापाद्राक्षसत्वंप्राप्तस्यकल्माषपादस्य पराक्रमं । आसाद्य व्यनीनशत् विनाशंप्राप्तवानित्यर्थः । राक्षसत्वात्कल्माषपादेनस्वपुत्रएवविनाशितइत्यर्थः ॥२८—३२ ॥ दायादः सुतः । "दायादौसुतबान्धवौ" इत्यमरः ॥ ३३ ॥ पूर्वजेविद्यमाने अपरःकनिष्ठपुत्रो राज्ये नाभिषिच्यते किंतुज्येष्ठएवेत्यन्वयः ॥ ३४ ॥ सत्वं आसनः संबन्धिनांराघवाणांसनातनंपरम्परयाऽऽगतं कुलधर्मं ज्येष्ठाभिषेचनरूपं । अद्यभवन्तमारभ्यनविहन्तुमर्हसि । अन्येनरक्षितुंचाशक्यमित्याह—प्रभूतेति । रत्नानि श्रेष्ठवस्तूनि । प्रभूतराष्ट्रां बहुविधावान्तरजनपदयुक्तां ॥ ३५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने दशोत्तरशततमः सर्गः॥११०॥

अथरामनिवर्तनोपायान्पुनरुपन्यस्यनिरस्यत्येकाद-

ति० रघोः पुत्रः प्रवृद्धादिनामचतुष्टयेनप्रसिद्धः ॥ २७ ॥ कतकस० यः शङ्खणस्तुतत्प्रसिद्धं वीर्यं पराक्रमं । युद्धेप्राप्य दैवात्सहसैन्योव्यनीनशत् नष्टोभूत् स्वार्थेणिः ॥ २८ ॥ ति० अजोनाभागस्यज्येष्ठपुत्रः ॥३२॥ इतिदशोत्तरशततमस्सर्गः ॥ ११० ॥

ति० मन्वादीनारभ्यैतावत्पर्यन्तंज्येष्ठेनैवराज्यंपर्यपाल्यतेतिश्रुतेपितदनङ्गीकारमालोच्यपितृवचनादपिपितुस्तवचगुरोर्ममवचनं

[पा०] १ ङ. च. छ. झ. ञ. ट. त्ककुत्स्थश्च. २ क. ङ.—ट. येनतुस्मृताः. ३ क. ख. ग. ङ. च. झ. ञ. ट. ककुत्स्थस्यतु. ४ क. ख. ङ. च. छ. झ. ञ. ट. नःश्रुतं. ५ घ. सतुदैवेनविधिनाससैन्योऽभ्यनशत्पुरा. ६ ख. ग. च. ज. ञ. सहसेनो. ७ ख.—ङ. छ.—ञ. शङ्खणस्तु. ८ ख. ङ. च. झ. ञ. ट. महामतिः. ९ ग. घ. ज. स्मृतः. १० ख. गतंनृपं. क. ग. ङ.—ट. जगन्नृप. ११ ङ. छ. झ. ट. राजाभि. क. ञ. भ्राताऽभि. १२ क.—घ. च. ज. ञ. विहातुं. १३ ङ. छ. झ. ट. वसिष्ठस्स.

[1]पुरुषस्येह जातस्य भवन्ति [2]गुरवस्त्रयः ॥ आचार्यश्चैव काकुत्स्थ पिता माता च राघव ॥ २ ॥
पिता ह्येनं जनयति पुरुषं पुरुषर्षभ ॥ प्रज्ञां ददाति चाचार्यस्तस्मात्स गुरुरुच्यते ॥ ३ ॥
[3]सोहं ते पितुराचार्यस्तव चैव परंतप ॥ मम त्वं वचनं कुर्वन्नातिवर्तेः सतां गतिम् ॥ ४ ॥
इमा हि ते [4]परिषदः श्रेणयश्च द्विजास्तथा ॥ एषु तात चरन्धर्मं नातिवर्तेः सतां गतिम् ॥ ५ ॥
वृद्धाया धर्मशीलाया मातुर्नार्हस्यवर्तितुम् ॥ [5]अस्यास्तु वचनं कुर्वन्नातिवर्तेः सतां गतिम् ॥ ६ ॥
भरतस्य वचः कुर्वन्याचमानस्य राघव ॥ आत्मानं नातिवर्तेस्त्वं सत्यधर्मपराक्रम ॥ ७ ॥
एवं मधुरम्[6]उक्तस्तु गुरुणा राघवः स्वयम् ॥ प्रत्युवाच समासीनं वसिष्ठं पुरुषर्षभः ॥ ८ ॥
यन्मातापितरौ वृत्तं तनये कुरुतः सदा ॥ न सुप्रतिकरं तत्तु मात्रा पित्रा च यत्कृतम् ॥ ९ ॥
यथाशक्तिप्रदानेन स्नापनोच्छादनेन च ॥ नित्यं च प्रियवादेन तथा संवर्धनेन च ॥ १० ॥

शोत्तरशततमे—वसिष्ठस्त्वित्यादिना ॥ १ ॥ एवंकुलधर्मोपपादनेपि सर्वंतत् पितृनियोगव्यतिरिक्तविषयमितिमत्वातूष्णींस्थितस्यरामस्याशयंजानन्वसिष्ठःपुनर्निवर्तनहेत्वन्तरमाह—पुरुषस्येत्यादिना ॥ २ ॥ पितेति मातुरप्युपलक्षणं । शरीरमेवमातापितरौजनयत इत्यर्थः । तस्मात् प्रज्ञादानात् गुरुः मातापितृभ्यांगरीयानित्यर्थः । “ सहिविद्यातस्तंजनयति तच्छ्रेष्ठंजन्म”इतिवचनादितिभावः ॥ ३—४ ॥ परिषदः ब्राह्मणसमूहाः । श्रेणयः पौरजनाः । द्विजाः क्षत्रियाः । वैश्याश्च तेत्वत्संबन्धिनः येषुविषयेधर्मपरिपालनरूपंचरन् सतांगतिं सतांपूर्वेषांराज्ञां मार्गंनातिवर्तेः नातिवर्तेथाः ॥ ५ ॥ अवर्तितुं शुश्रूषामकर्तुंनार्हसि। अस्यास्तु पितुःशतगुणंमातेत्युक्तायाः ॥६॥ याचमानस्य सान्त्वित्रामामिकामातेत्यादिप्रार्थयमानस्य । आत्मानं आत्मभूतंभरतंनातिवर्तेथाइत्युदारधीः । सत्यधर्मनिष्णातत्वस्वभावमित्यपरे । स्वासाधारणधर्मत्वादाश्रितपारतन्त्र्यंनातिवर्तेथाइत्याचार्याः । सएवहिसर्वेश्वरस्यस्वभावः स्वतःसिद्धः सत्यधर्मपराक्रमेतिदृष्टान्तार्थं । यथासत्यवचनमनतिक्रमणीयं यथाचधर्मोनातिक्रमणीयः तथाआश्रितपारतन्त्र्यमपीत्यर्थः । सत्यधर्मयोः पराक्रमः अनुष्ठानशूरत्वंयस्येतिवहुव्रीहिः ॥ ७—८ ॥ “ सतिधर्मिणिधर्माश्चिन्त्यन्ते ” इतिन्यायेनसर्वधर्मसंपादनबीजभूतशरीरोत्पादकत्वात् अत्यन्ताज्ञानदशायामपिसर्वप्रकारसंरक्षणेनबहुविधोपकारकत्वाच्चाचार्यवचनादपिपितृवचनमवश्यंकर्तव्यं। अतएव “मातृदेवोभव पितृदेवोभव आचार्यदेवोभव” इतिचरमपर्वण्याचार्यउपात्तइत्यभिप्रायेणाह—यन्मातेत्यादिनाश्लोकद्वयेन। तनये तनयसंपादननिमित्तं यद्वृत्तं व्रतोपवासदेवताराधनादिकं कुरुतः तन्नसुप्रतिकरं सुतरामशक्यप्रत्युपक्रियं । मात्रापित्राच उत्पत्त्यनन्तरंयथाशक्तिप्रदानेन स्तन्यान्नादिप्रदानेन स्नापनोच्छादनेन नित्यंप्रियवादेनसदासंवर्धनेनच यत्कृतं तच्च नसुप्रति-

---

करणीयमितिवक्तुमुपक्रमतेवसिष्ठइत्याह—**वसिष्ठइति** । राजपुरोहितः राज्ञःपुरोहितंचिन्तयतीतिराजपुरोहितः ॥ १ ॥ **ति०** गुरवः उपास्याः । **स०** इत्येतेगुरवः ॥ २ ॥ **ति०** जनयति शरीरमात्रेण । प्रज्ञांददाति उपनयनसंस्कारपूर्ववेदविषयांप्रज्ञांददाति । तस्मादाचार्यएव गुरुसमवायेगुरुः गरीयानुच्यते । तदुक्तमापस्तंबेन । “ आचार्यश्श्रेष्ठोगुरूणांसहिविद्यातस्तंजनयतितच्छ्रेष्ठंजन्म शरीरमेवमातापितरौजनयतः जीर्यत्स्वभावंसर्वयोनिसुलभंप्राकृतंमलजंशरीरं ” इति ॥ ३ ॥ **ति०** नातिवर्तेः नातिवर्तेथाः । सद्गतिभ्रंशोनभवतीत्यर्थः ॥ ४ ॥ **वि०** नृपाः माण्डलिकाः ॥ ५ ॥ **ति०** मातुःशुश्रूषणेवचनकरणेच अवर्तितुंनार्हसीत्यर्थः । **स०** अवर्तितुं अतिवर्तितुं ॥ ६ ॥ **ति०** आत्मानंत्वांप्रति राज्यप्रत्यर्पणपूर्वंप्रतिनिवृत्तिंयाचमानस्यभरतस्यवचःकुर्वन्नित्यर्थः ॥७॥ **स०** मातापितरौसंभूय तनयेयद्वृत्तं पालनादिरूपं कुरुतः । तन्नसुप्रतिकरं प्रत्युपकारार्हंनभवतीत्यर्थः । नकेवलमुभाभ्यां कृतंनसुप्रतिकरं किंतुमात्रापित्राचयत्प्रातिस्विकंकृतंतदपिनसुप्रतिकरं ॥ ९ ॥ **ति०** यथाशक्तिप्रदानेन बालस्यजीवनार्थपदार्थभोजनशक्त्यनुरोधतःक्षीरान्नादिप्रदानेन । उच्छादनं उद्वर्तनं तिलपिष्टादिना । संवर्धनं क्रीडनं । **स०** उच्छादनं उद्वर्तनं गलप्रान्तगत-

[पा०] १ घ. ङ. छ. ज. ट. पुरुषस्यहि. २ ङ. छ. झ. ट. गुरवस्सदा. ३ क. ग.—छ. झ. ञ. ट. सतेहं.— ४ ङ. छ. झ. ट. परिषदोज्ञातयश्चनृपास्तथा. ५ ज. तस्यास्तु. ङ. च. छ. झ. ञ. ट. अस्याहि. ६ ग. घ. च. ज. मुक्तस्सन्गुरुणा. ङ. छ. झ. ट. मुक्तस्सगुरुणा.

स हि राजा [1]जनयिता पिता दशरथो मम ॥ [2]आज्ञातं यन्मया तस्य न तन्मिथ्या भविष्यति ॥११॥
[3]एवमुक्तस्तु रामेण भरतः प्रत्यनन्तरम् ॥ उवाच [4]परमोदारः सूतं परमदुर्मनाः ॥ १२ ॥
[5]इह मे स्थण्डिले शीघ्रं कुशानास्तर सारथे ॥ आर्यं प्रत्युपवेक्ष्यामि यावन्मे [6]न प्रसीदति ॥ १३ ॥
[7]अनाहारो निरालोको धनहीनो यथा द्विजः ॥ [8]शेष्ये पुरस्ताच्छालाया [9]यावन्न प्रतियास्यति ॥१४॥
स तु राममवेक्षन्तं सुमन्त्रं प्रेक्ष्य दुर्मनाः ॥ कुशोत्तरमुपस्थाप्य भूमावे[10]वास्तरत्स्वयम् ॥ १५ ॥
तमुवाच महातेजा रामो राजर्षिसत्तमः ॥ किं मां भरत कुर्वाणं तात [11]प्रत्युपवेक्ष्यसि ॥ १६ ॥
ब्राह्मणो ह्येकपार्श्वेन नरान्रोद्धुमिहार्हति ॥ न तु [12]मूर्धाभिषिक्तानां विधिः प्रत्युपवेशने ॥ १७ ॥
उत्तिष्ठ नरशार्दूल हित्वैतद्दारुणं व्रतम् ॥ पुरवर्यामितः क्षिप्रमयोध्यां याहि राघव ॥ १८ ॥
आसीनस्त्वेव भरतः पौर[13]जानपदं जनम् ॥ उवाच सर्वतः प्रेक्ष्य [14]किमार्यं नानुशासथ ॥ १९ ॥
ते [15]तमूचुर्[16]महात्मानं पौरजानपदा जनाः ॥ काकुत्स्थमभिजानीमः [17]सम्यग्वदति राघवः ॥ २० ॥
[18]एषोपि हि [19]महाभागः पितुर्वचसि तिष्ठति ॥ अतएव न शक्ताः स्मो व्यावर्तयितुमञ्जसा ॥ २१ ॥

करं ॥९—१०॥ जनयितापितेति गौणपितृव्यावृत्तिः। आज्ञातं प्रतिज्ञातं। एवंप्रथमंप्रतिज्ञातत्वात् मातृवचनंभ्रातृवचनंचकर्तुंनार्हामीतिभावः ॥ ११ ॥ प्रत्यनन्तरं समीपस्थं परमोदारः सान्त्वितामामिकेत्यादिनादत्तराज्यनिर्वाहकः ॥ १२ ॥ इहस्थण्डिलेभूमौकुशानास्तर आस्तृणीहि । पावनत्वार्थमित्यर्थः । अत एववक्ष्यति—कुशानास्तीर्यराघवइति । प्रत्युपवेक्ष्यामि प्रतिरोत्स्यामीत्यर्थः ॥ १३ ॥ प्रत्युपवेशप्रकारमाह—अनाहारइति । निरालोकः अवकुण्ठिताननः धनहीनः वृद्ध्यर्थमृणप्रदानान्निर्धनः । शेष्ये शयिष्ये । इडभावआर्षः ॥ १४ ॥ राममवेक्षन्तं रामानुज्ञांकाङ्क्षन्तमित्यर्थः । कुशोत्तरं कुशास्तरणं । उपस्थाप्य आनीय । स्वयमेवास्तरत् आस्तृणात् शयनंकृतवानित्यर्थः ॥ १५ ॥ किंकुर्वाणं किमपकारंकुर्वाणं । तातेतिसान्त्वनार्थमुक्तं ॥ १६ ॥ एकपार्श्वेन एकपार्श्वशयनेन । मूर्धाभिषिक्तानां अभिषिक्तक्षत्रियाणां ॥ १७—१८ ॥ नानुशासथेत्यत्र इतिकरणंबोध्यं ॥ १९ ॥ काकुत्स्थंरामं । अभिजानीमः अभितोजानीमः सत्यसन्धंजानीमइत्यर्थः ॥ २० ॥ सम्यग्वदतीत्येतदुपपादयति—एषइत्यादिना । अञ्जसा शीघ्रं व्यावर्तयितुंनशक्ताःस्मइतितंभरतमूचुरित्यन्वयः

मृत्तिकाद्युद्वासनमितियावत् ॥ १० ॥ **ति०** जनयिता उत्पादकःपिता नतुगौणः । पिता यदाज्ञापयत् वनवासरूपं । एवंचभवदाज्ञातःपूर्वंतेनाज्ञादानान्मयाचावश्यमितिप्रतिज्ञानात्भवदाज्ञयापितदन्यथाकरणमधुनाऽत्यन्तमनुचितमितिभावः ॥ ११ ॥ **ति०** आर्यंप्रत्युपवेक्ष्यामि आर्यमुद्दिश्यप्रत्युपशयनकर्मकरिष्यइत्यर्थः । तच्चोपरोद्धव्यस्यगृहद्वारसमीपेकुशेषुयावत्कार्यसिद्धिनिराहारतयाऽवकुण्ठिताननस्य एकपार्श्वेनैवपार्श्वान्तरपरिवृत्तिराहित्येनशयनमिति । **वि०** धनहीनः वृद्ध्यर्थमृणंदत्वातद्ग्रहणार्थमधमर्णावरोधकोत्तमर्णः अधनइत्यर्थः । सयथाशेते तद्वदहंशये यावन्मां मद्वचनमङ्गीकृत्यप्रतियास्यति अयोध्यामित्यर्थः । **स०** शालायाः पुरस्तात्मामुद्दिश्यप्रतियास्यति त्वद्विधानंकरोमीत्यायास्यति । **कतक०** निराहारइत्यादिपद्यंप्रक्षिप्तं ॥ १४ ॥ **स०** रामं तन्मुखं । सः भरतः । दुर्मनाः मद्वचनंनश्रृणोतीतिदुःखितमनाः ॥ १५ ॥ **ति०** किंकुर्वाणं किमन्याय्यं कुर्वाणं ॥ १६ ॥ **ति०** ब्राह्मणः धनादिनावियोजितइतिशेषः । अनेनक्षत्रियाणामेतत्करणेप्रायश्चित्तमितिसूचितं । **स०** एकपार्श्वेन परिवर्तनरहितैकभागशयनेन ॥१७॥ **स०** आर्यंरामंकिंनानुशासथ नानुशिष्टेत्यर्थः । अयोध्यांप्रतिगन्तुमितिशेषः ॥ १९ ॥ **स०** काकुत्स्थं रामंप्रति । राघवोभवान् सम्यग्वदतीत्यभिजानीमः ॥ २० ॥ **स०** तर्हिकिमर्थंरामंप्रतिकिमपिनोच्यतेभवद्भिरित्यतआह—**एषोपीति** । रामोपीत्यर्थः । **ति०** एषोपिमहाभागोरामः पितुर्वचसितिष्ठति । तदपिसम्यगेव । यदेवं अतएवेत्यर्थः । अत्रभगवतास्वव्यावर्तननिश्चयेनाग·

[पा०] १ ङ. च. छ. झ. ञ. ढ. दशरथोपिताजनयिता. २ ङ. छ. झ. ट. आज्ञापयन्मांयत्तथ्य. ३ च.—ठ. एवमुक्तेतु. ४ ग.—ट. विपुलोरस्कः. ५ छ. झ. ट. इहतु. ङ. इहत्वं. ६ ङ. झ. संप्रसीदति. ७ ङ. छ. झ. ट. निराहारो. ८ ङ. छ. झ. ञ. ट. शये. ९ ङ. च. झ. ञ. यावन्मांप्रति. १० घ. ङ. झ. ट. वास्थितस्स्वयं. ११ ङ.—ट. प्रत्युपवेक्ष्यसे. १२ क. ख. घ. ज. मूर्धावसिक्तानां. १३ ख. जानपदाञ्जनान्. १४ च. ट. किमर्थं. १५ ङ. छ. झ. ट. तदोचुः. ग. तथोचुः. १६ ख. महात्मानः. १७ ख. सत्यंवदति. १८ ङ. एषोपीह. १९ ग. महाबाहुः.

तेषामाज्ञाय वचनं रामो वचनमब्रवीत् ॥ एवं निबोध वचनं सुहृदां धर्मचक्षुषाम् ॥ २२ ॥
एतच्चैवोभयं श्रुत्वा सम्यक्संपश्य राघव ॥ उत्तिष्ठ त्वं महाबाहो मां च स्पृश तथोदकम् ॥ २३ ॥
अथोत्थाय जलं स्पृष्ट्वा भरतो वाक्यमब्रवीत् ॥ शृण्वन्तु मे परिषदो मन्त्रिणः श्रेणयस्तथा ॥ २४ ॥
न याचे पितरं राज्यं नानुशासामि मातरम् ॥ आर्यं परमधर्मज्ञं नानुजानामि राघवम् ॥ २५ ॥
यदि त्ववश्यं वस्तव्यं कर्तव्यं च पितुर्वचः ॥ अहमेव निवत्स्यामि चतुर्दश समा वने ॥ २६ ॥
धर्मात्मा तस्य तथ्येन भ्रातुर्वाक्येन विस्मितः ॥ उवाच रामः संप्रेक्ष्य पौरजानपदं जनम् ॥ २७ ॥
विक्रीतमाहितं क्रीतं यत्पित्रा जीवता मम ॥ न तल्लोपयितुं शक्यं मया वा भरतेन वा ॥ २८ ॥
उपधिर्न मया कार्यो वनवासे जुगुप्सितः ॥ युक्तमुक्तं च कैकेय्या पित्रा मे सुकृतं कृतम् ॥ २९ ॥
जानामि भरतं क्षान्तं गुरुसत्कारकारिणम् ॥ सर्वमेवात्र कल्याणं सत्यसन्धे महात्मनि ॥ ३० ॥
अनेन धर्मशीलेन वनात्प्रत्यागतः पुनः ॥ भ्रात्रा सह भविष्यामि पृथिव्याः पतिरुत्तमः ॥ ३१ ॥
वृतो राजा हि कैकेय्या मया तद्वचनं कृतम् ॥ अनृतान्मोचयानेन पितरं तं महीपतिम् ॥ ३२ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे एकादशोत्तरशततमः सर्गः ॥ १११ ॥

॥ २१—२२ ॥ एतदुभयं मद्वचनंपौरजनवचनंचेत्यर्थः । सम्यक्संपश्य कर्तव्यंसम्यङ्निरूपय । मांच स्पृशतथोदकमिति क्षत्रियाविहितप्रत्युपवेशनप्रायश्चित्तार्थमित्यर्थः । वसिष्ठादिषुविद्यमानेषुस्वस्पर्शनविधेः इतः परमेवंविधंनक्रियतइतिशपथार्थंजलंस्पृष्ट्वामांस्पृशेत्यपिसिद्धम् ॥ २३—२४ ॥ नयाचे नयाचितवान् । नानुशासामि नानुशास्मि एवंकुर्वितिनानुशिष्टवानस्मीत्यर्थः । नानुजानामि वनवासायनानुज्ञातवानस्मीत्यर्थः ॥ २५ ॥ अवश्यपितुर्वचः कर्तव्यंवनेवस्तव्यंचेतियदिमन्यसे तर्हिअहमेवत्वत्प्रतिनिधित्वेनवने वत्स्यामि त्वंतुमत्प्रतिनिधित्वेनायोध्यांपालय एवंचसत्युभाभ्यांसम्यक्पितृवचनंकृतंभवेदितिभावः । इति भरतोवाक्यमब्रवीदित्यन्वयः ॥ २६—२७ ॥ आहितं आधिरूपेणन्यस्तं . विक्रयस्त्यागः क्रयः स्वीकारइति भेदः । महावनवासंदत्त्वातन्मूल्यत्वेनराज्यंस्वीकृतवान् । यद्वा ममवनवाससमाधिकृत्वातवराज्यंदापितवान् । तल्लोपयितुनशक्यमित्यर्थः ॥ २८ ॥ वारुणस्नानाशक्तस्यमान्त्रस्नानवदशक्तस्यैवप्रतिनिधिस्वीकारः । अहंतुवनवासेशक्तः अतः प्रतिनिध्याचरणंनपितृऋणमोचनमित्याह—उपाधिरित्यादिना । उपधिः प्रतिनिधिरित्यर्थः । मयाशक्तेनजुगुप्सितः हीनकल्पत्वेननिन्दितः । " हीनकल्पंनसेवेतप्रभुःसन्विभवेसति " इतिवचनादितिभावः । कैकेय्या युक्तंयोग्यमेवोक्तं । पित्राचसुकृतंधर्म्यंकृतं । आवाभ्यांतदकरणेहीनकल्पकरणेचपितुरनृतंस्यात् ॥ २९—३१ ॥ पितरंअनेन

तानामपिपौरादीनामन्तर्यामिविधयास्वानुकूलवचनप्रयोगःकारितः । भरतस्यतुयशःख्यापनायज्येष्ठेकनिष्ठेनवंवर्तितव्यमितित्रिलोकव्यवहारबोधनायचतथाप्रवर्तनमितिप्रतिभाति ॥ २१ ॥ ति० वचनमब्रवीत् भरतंप्रतीतिशेषः । निबोध शृणु ॥ २२ ॥ ति० उभयं त्वद्विषयंमद्विषयंचवचनं । श्रुत्वा संपश्य विचारय । विचारेणापिकर्तव्यंनिश्चेतुमशक्तश्चेत्तुमयोक्तंकुर्वितिशेषः । स्वोक्तमेवाह—उत्तिष्ठेति । स० उदकंस्पृश आचाम ॥ २३ ॥ ती० नाभिजानामीतिपाठे आर्यंवनवासोयुक्तंनज्ञातवानस्मीत्यर्थः । शि० नानुजानामि वनवासायानुमतिंनाकार्षं । एतेनस्वापराधाभावस्सूचितः ॥ २५ ॥ स० नस्य भ्रातुः ॥ २७ ॥ स० जीवता मत्पित्रा यद्विक्रीतं मूल्यंगृहीत्वादत्तं । आहितं मर्यादाविशेषंकृत्वान्यस्तं । क्रीतं मूल्यंदत्वागृहीतं तदनेन मयावा लोपयितुंनशक्यं आवयोरुभयोःपुत्रत्वाविशेषात् । तथाचेदंराज्यंकैकेय्यांचतुर्दशवर्षपर्यन्तंन्यस्तमितिभावः ॥ २८ ॥ ति० उक्तौ कृतौ चयुक्तत्वं वररूपऋणापाकरणार्थत्वाद्दृढप्रकारकत्वाच । अतस्तयोर्वचनमवश्यमेवकार्यमितिशेषः । अयुक्तत्वादिलेहितुरोःप्रकृतिमस्येत्यादिन्यायविषयत्वंस्यादितिभावः ॥ २९ ॥ स० क्षान्तं क्षमावन्तं । अत्रभरते सर्वं राज्यपालनादिकं कल्याणमिति संभावयामीतिशेषः ॥ ३० ॥ शि० वनात्पुनःप्रत्यागतोहं धर्मशीलेनभ्रात्राभरतेनसह पृथिव्याउत्तमःपतिर्भविष्यामि ॥ ३१ ॥ विक्रीतमित्यादिनापौ-

[पा०] १ ख. ततश्चैव. २ ङ. सम्यक्त्वंपश्य. ३ ग. ज. महाभाग. ४ झ. शृणुयुस्तथा. ५ ख. ग. शासामि. ६ ङ. छ. झ. ट. एवंप्रभ. ७ घ. नाभिजनामि. ८ क. ङ. च. छ. झ. ञ. ट. वर्षसमाः. ९ ङ. च. छ. ञ. ट. सत्येन. १० ञ. शान्तं. ११ ख. पितरंते. ज. पितरंतु.

द्वादशोत्तरशततमः सर्गः ॥ ११२ ॥

रामभरतसंभाषणशुश्रूषयागगनाङ्गणमुपागतैर्देवादिभिस्तत्संभाषणप्रशंसनम् ॥ १ ॥ तथाभरतंप्रतिरामेणपितुरानृण्याय वनवासस्यावश्यंकर्तव्यत्वोक्तिपूर्वकंस्वस्यावासगमनम् ॥ २ ॥ रामंप्रतिनिवर्तनेउपायान्तरमनुपलभमानेनभरतेनराज्यपालने स्वस्यशक्त्यभावकथनपूर्वकंपुनस्सप्रणामंरामंप्रतिप्रार्थनम् ॥ ३ ॥ रामेणभरतंप्रतिस्वस्यदुस्त्यजप्रतिज्ञत्वकथनेभरतेनतंप्रतिहेमपादुकाद्वयप्रदर्शनेनतत्रनिजपदार्पणपूर्वकंस्वस्मैतद्दानप्रार्थना ॥ ४ ॥ रामेणपादुकादानेभरतेनतंप्रतिचतुर्दशवर्षसमाप्त्यनन्तरदिनेऽनागमनेस्वेनाग्निप्रवेशप्रतिज्ञानम् ॥ ५ ॥ रामेणतदङ्गीकरणेनसपरिष्वङ्गंभरतशत्रुघ्नविसर्जनपूर्वकंयथोचितसंमाननेनसकलजनानांगमनाभ्यनुज्ञानेनस्वपर्णशालाप्रवेशः ॥ ६ ॥

तमप्रतिमतेजोभ्यां भ्रातृभ्यां रोमहर्षणम् ॥ विस्मिताः सङ्गमं प्रेक्ष्य समवेता महर्षयः ॥ १ ॥
अन्तर्हितास्त्वृषिगणाः सिद्धाश्च परमर्षयः ॥ तौ भ्रातरौ महात्मानौ काकुत्स्थौ प्रशशंसिरे ॥ २ ॥
स धन्यो यस्य पुत्रौ द्वौ धर्मज्ञौ धर्मविक्रमौ ॥ श्रुत्वा वयं हि संभाषामुभयोः स्पृहयामहे ॥ ३ ॥
ततस्त्वृषिगणाः क्षिप्रं दशग्रीववधैषिणः ॥ भरतं राजशार्दूलमित्यूचुः सङ्गता वचः ॥ ४ ॥
कुले जात महाप्राज्ञ महावृत्त महायशः ॥ ग्राह्यं रामस्य वाक्यं ते पितरं यद्यवेक्षसे ॥ ५ ॥
सदानृणमिमं रामं वयमिच्छामहे पितुः ॥ अनृणत्वाच्च कैकेय्याः स्वर्गं दशरथो गतः ॥ ६ ॥
एतावदुक्त्वा वचनं गन्धर्वाः समहर्षयः ॥ राजर्षयश्चैव तदा सर्वे स्वां स्वां गतिं गताः ॥ ७ ॥

राज्यपरिपालनेन अनृतान्मोचयेत्यर्थः ॥ ३२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने एकादशोत्तरशततमःसर्गः ॥ १११ ॥

अथभरतस्यसमाधानकृत्वाप्रस्थापनंद्वादशोत्तरशततमे — तमित्यादि । भ्रातृभ्यांसंगमं भ्रात्रोःपरस्परमन्योन्यसौहार्देनकृतंसंगमं प्रेक्ष्य विस्मिताअभूवन्निति शेषः ॥१॥ अन्तर्हिताः पूर्वमेवान्तर्धानं प्राप्ताः ऋषिगणाः राजर्षिगणाः । सिद्धाः देवजातिविशेषाः । परमर्षयः देवर्षयः । इदमुक्तरत्र "एतावदुक्त्वावचनंगन्धर्वाः समहर्षयः । राजर्षयश्चैव" इत्यत्रव्यक्तीभविष्यति ॥ २ ॥ धर्मविक्रमौ धर्मशूरौ । वयमुभयोः संभाषां श्रुत्वा स्पृहयामहे पुनःपुनः श्रोतुमिच्छाम इत्यर्थः ॥ वयंययोरुभयोः संभाषां श्रुत्वास्पृहयामहे तादृशौधर्मज्ञौधर्मविक्रमौद्वौपुत्रौयस्य । सधन्यइत्यन्वयः ॥ ३ ॥ सङ्गताः एककण्ठ्यंप्राप्ताः ॥ ४ ॥ पितरंयद्यवेक्षसे रजनमाख्यायपुनर्भरतंप्रत्याह — वृत इति । तद्वचनं तस्याः कैकेय्या वचनं । मया कृतं । मोचयन्नेव मोचयमानेन । एवमुक्तकरणेनत्वमपिपितरमनृतान्मोचयेतिध्वनिः ॥ शि० राज्ञा कैकेय्याः कृतः यद्दीयते तेनस्वीकृतः । मयाच तद्वचनं कृतं स्वीकृतं । अतः अनेनत्वत्कर्तृकराज्यपरिपालनेनमत्कर्तृकवनवाससंमतिदानेनचपितरमनृतान्मोचय ॥ ३२ ॥ इत्येकादशाधिकशततमःसर्गः ॥ १११ ॥

ति० समुपेताः स्वार्थंरावणवधसंपत्त्यैतत्रस्थलेसमवेताः । महर्षयोनारदाद्याः । स० तंसंगमं परस्परमेलनं । भ्रातृभ्यां भ्रात्रोः । प्राधान्यादुभयोक्तिः । संगमंप्रेक्ष्य विस्मिताअभूवन् ॥ १ ॥ ति० अन्तर्हिताः अदृश्यरूपाआकाशस्थाः ॥ २ ॥ स० सदायौ सद्धुत्कृष्टौ । नकेवलंधर्मज्ञौ किंतु धर्मविक्रमौ धर्मप्रवर्तकौ ॥ ति० उभयोः संभाषां संभाषणंश्रुत्वा उभाभ्यांस्पृहयामहे प्रीतामभवामः । शि० सदास्पृहयामहे पुनःपुनःश्रोतुमिच्छामः ॥ ३ ॥ स० पितरंयद्यवेक्षसे सत्यवचनंयदीच्छसीत्यर्थः ॥ ५ ॥ ति० सदानृणं सतास्वकृतसमीचीनानुष्ठानेनआसर्वतोऽनृणमित्यर्थः । अनृणत्वात् रामप्रतिज्ञयेतिशेषः । यदिराम इदानीं विपरीतंकुर्यात्प्रतिनिधिद्वारावाऽनुतिष्ठेत्तदातेपितुःपुनःस्वर्गभ्रंशएवेतिध्वनिः । स० पितुःसदाऽनृणं ऋणरहितं इच्छामहे । साचेच्छाऽत्र सत्येवपर्याप्ताभवतीतिभावः । कैकेय्याअनृणत्वात् तांसंवरऋणरहितत्वादित्यर्थः । शि० यतः कैकेय्याअनृणत्वात् अनृणत्वंप्राप्य

[पा०] १ ङ. च. ज.—ट. समुपेता. २ ङ. छ. झ. ब. ट. अन्तर्हितामुनिगणाः. च. ज. अन्तर्हिताऋषिगणाः. ३ ङ. छ. झ. ट. स्थिताश्च. ४ ङ. च. छ. झ. ञ. ट. महाभागौ. क. ख. महावीर्यौ. ५ छ. झ. ट. सदार्यौराजपुत्रौ. ङ. सभार्यौराजपुत्रौ. ६. क. धर्मवत्सलौ. घ. सत्यविक्रमौ. ७ क. ख. सुभाषितां. ८ क. सिद्धाः. ९ ख. रघुशार्दूलं. १० क. मूचुस्ते. ११ ख. घ. महाव्रत. १२ च. ज. एवमुक्त्वातु. १३ क. सगन्धर्वामहर्षयः. १४ क.—ट. तथा.

ह्लादितस्तेन वाक्येन शुभेन शुभदर्शनः ॥ रामः संहृष्टवदनस्तानृपीनभ्यपूजयत् ॥ ८ ॥
स्रस्तगात्रस्तु भरतः स वाचा सज्जमानया ॥ कृताञ्जलिरिदं वाक्यं राघवं पुनरब्रवीत् ॥ ९ ॥
राजधर्ममनुप्रेक्ष्य कुलधर्मानुसंततिम् ॥ कर्तुमर्हसि काकुत्स्थ मम मातुश्च याचनाम् ॥ १० ॥
रक्षितुं सुमहद्राज्यमहमेकस्तु नोत्सहे ॥ पौरजानपदांश्चापि रक्तान्रञ्जयितुं तथा ॥ ११ ॥
ज्ञातयश्च हि योधाश्च मित्राणि सुहृदश्च नः ॥ त्वामेव प्रतिकाङ्क्षन्ते पर्जन्यमिव कर्षकाः ॥ १२ ॥
इदं राज्यं महाप्राज्ञ स्थापय प्रतिपद्य हि ॥ शक्तिमानसि काकुत्स्थ लोकस्य परिपालने ॥ १३ ॥
इत्युक्त्वा न्यपतद्भ्रातुः पादयोर्भरतस्तदा ॥ भृशं संप्रार्थयामास राममेव प्रियंवदः ॥ १४ ॥
तमङ्के भ्रातरं कृत्वा रामो वचनमब्रवीत् ॥ श्यामं नलिनपत्राक्षं मत्तहंसस्वरं स्वयम् ॥ १५ ॥
आगता त्वामियं बुद्धिः स्वजा वैनयिकी च या ॥ भृशमुत्सहसे तात रक्षितुं पृथिवीमपि ॥ १६ ॥
अमात्यैश्च सुहृद्भिश्च बुद्धिमद्भिश्च मन्त्रिभिः ॥ सर्वकार्याणि संमन्त्र्य सुमहान्त्यपि कारय ॥ १७ ॥

पितरंसुखास्थितंयदिमन्यसइत्यर्थः ॥ ५—८ ॥ सज्जमानया स्खलन्त्या । स्वमनोरथस्यसर्वथाअसिद्धत्वात् शिथिलगात्रत्वंसज्जमानवाक्त्वंच ॥ ९ ॥ राजधर्मं राज्यपरिपालनधर्मं। कुलधर्मानुसंततिं ज्येष्ठाभिषेकरूपकुलधर्मस्यानुस्यूतिं ॥ १०—११ ॥ सुहृदः शोभनहृदयाः। पर्जन्यं रसदव्द्मिन्द्रंवा। "पर्जन्यौरसदव्देन्द्रौ" इत्यमरः ॥ १२—१३ ॥ एवंस्वबुद्धिशक्त्युपन्यस्तोपायान्तरवैफल्यदर्शनेनगत्यन्तराभावाद्भरतोराममेवप्रपद्यतेइत्याह—इत्युक्त्वेति ॥ १४ ॥ तमङ्कइति स्वप्रपदनस्यामोघत्वात् तदानींपूर्वकृतदेवसंघशरणागतिफलप्रदानप्रवृत्त्यनुकूलपितृवचनपरिपालनावरुद्धावसरतयातन्निर्वर्तनानन्तरंफलप्रदित्सुस्तावद्विलम्बसहनायसान्त्वपूर्वमङ्कमारोपयति । रामदिव्यदेहसंस्पर्शकृतपुष्ट्यतिशयद्योतनायश्याममित्यादिविशेषणं मत्तहंसस्वरत्वमादरातिशयंद्योतयति । किंचस्वररामणीयकेनपूर्वहंसभूतावस्थासूचकेन सदात्वत्करपुष्करहंसभूतमपिमां कथंवियोजयितुमिच्छसीतिचसूच्यते । स्वयमङ्केकृत्वेत्यन्वयः ॥ १५ ॥ स्वजा सहजा । वैनयिकी विनयोगुरुशिक्षा ततः प्राप्ताइयं उभयाकाराबुद्धिः । त्वामागता त्वांपूर्वमेवप्राप्तवती । अतोभृशमुत्सहसे शक्नोषि ॥ १६ ॥ अमात्यैः प्रधानसचिवैः । मन्त्रिभिः

कैकेय्यैवरंदत्वेत्यर्थः । दशरथस्स्वर्गंगतः । अतोरामंसदावनवासक्लेशेनापिपितुरनृणं ऋणनिवर्तकंवयमिच्छामहे । एतेन रामकर्तृकवनवासमन्तराराज्ञोभिलाषपूर्तिर्नभविष्यतीतिसूचितं । तेनरावणवधार्थमेवराज्ञारामःप्रेषितइतिव्यञ्जितं ॥ ६ ॥ **वि०** अभ्यपूजयत् सम्यग्ज्ञांधर्मतोरक्षितवन्तइत्युक्तवानित्यर्थः । **स०** ह्लादितः तोषितः । पूर्वमपिशुभदर्शनः विशेषतस्संहृष्टवदनस्सन् शुशुभे स्वावतारकार्याभिमुख्यादितिभावः ॥ ८ ॥ **ति०** त्रसगात्रः उद्विग्नगात्रः । स्रस्तगात्रइतिपाठान्तरं ॥ ९ ॥ **ति०** राजधर्ममथ प्रेक्ष्यकालधर्मांश्चसंततमितिपाठे अथ अथवा । कालधर्मान् कालकृतस्वशक्तिमन्निष्ठतदभावलक्षणान् । प्रेक्ष्य विचार्य ॥ १० ॥ **ति०** अथकालकृतांस्वस्यरक्षणाशक्तिंदर्शयति—**रक्षितुमिति** । एकः असहायः । **स०** तदा त्वद्वियोगकाले । रक्तान् त्वय्यनुरक्तान् । रञ्जयितुं मयिस्नेहमुत्पादयितुं ॥ ११ ॥ **ति०** अतइदंराज्यंप्रतिपद्य स्वीकृत्य । कस्मिंश्चित्स्थापयहि । हिर्वाक्यालङ्कारे । हि यतः । सः त्वद्दत्तराज्यः लोकपालनेशक्तिमान्भवति । शक्तिमानसीतिपाठे अयंमदीयइतिस्वीकारमात्रेणलोकस्यसमस्तस्यपालनेशक्तिमानसि । रामस्यराज्यमित्येतावल्लोकपरिपालनेऽपेक्षितसहायतयेत्यर्थः ॥ १३ ॥ **ति०** इयंबुद्धिः मद्वनवासविरोधिनी । स्वीयत्वेनाङ्गीकृत्यस्थापनविषया । आगता जाता । सा स्वजा स्वाभाविकी वैनयिकीच इतराच सर्वादुष्टेतिभावः । अथ यात्वयास्वस्याशक्तिरुक्तापालनेसानास्त्येवेत्याह—**भृशमिति** । **स०** इयं मद्वचनानुकूला । त्वदीयत्वेनस्वीकृत्य यत्रक्वचनस्थापयेत्येवंरूपा । **शि०** वैनयिकी पित्रादिसेवाजनितविनयजन्या । स्वजा स्वंस्वकीयधर्मं प्रजापालनमित्यर्थः । जनयतिउत्पादयति सा यात्वामागताप्राप्ता इयंबुद्धिः तयाबुद्ध्या पृथिवींरक्षितुंत्वंभृशमुत्सहसे । एतेनमत्कर्तृकायोध्यागमनंनप्रार्थनीयमितिसूचितं । तेनायोध्यागम-

[पा०] १ ङ. च. छ. झ. ट. शुशुभे. २ ङ. छ. झ. ञ. ट. रामधर्ममिमं. ३ ङ. छ. झ. ट. संततं. ४ ङ. छ. झ. ट. तदा. ५ ङ. च. छ. झ. ट. ज्ञातयश्चापि. ६ ञ. पौराश्च. ७ च. ञ. पालय. ८ ङ. छ. झ. ट. शक्तिमान्सहि. ९ ङ. छ. झ. ट. एवमुक्त्वापतद्भ्रातुः. १० छ. झ. ट. राघवेऽतिप्रियंवदन्. क. च. ज. ञ. राममेवंप्रियंवदन्. ११ क. ग. च. भरतं. १२ ङ. च. ज.—ट. हंसस्वरःस्वयं. १३ क. पृथिवीमिमां. १४. क. ङ. छ. झ. ट. महान्त्यपिहि.

लक्ष्मीश्चन्द्रादपेयाद्वा हिमवान्वा हिमं त्यजेत् ॥ अतीयात्सागरो वेलां न प्रतिज्ञामहं पितुः ॥ १८ ॥
कामाद्वा तात लोभाद्वा मात्रा तुभ्यमिदं कृतम् ॥ न तन्मनसि कर्तव्यं वर्तितव्यं च मातृवत् ॥१९॥
एवं ब्रुवाणं भरतः कौसल्यासुतमब्रवीत् ॥ तेजसाऽऽदित्यसंकाशं प्रतिपच्चन्द्रदर्शनम् ॥ २० ॥
अधिरोहार्य पादाभ्यां पादुके हेमभूषिते ॥ एते हि सर्वलोकस्य योगक्षेमं विधास्यतः ॥ २१ ॥
सोधिरुह्य नरव्याघ्रः पादुके ह्यवरुह्य च ॥ प्रायच्छत्सुमहातेजा भरताय महात्मने ॥ २२ ॥
स पादुके संप्रणम्य रामं वचनमब्रवीत् ॥ चतुर्दश हि वर्षाणि जटाचीरधरो ह्यहम् ॥ २३ ॥
फलमूलाशनो वीर भवेयं रघुनन्दन ॥ तवागमनमाकाङ्क्षन्वसन्वै नगराद्बहिः ॥ २४ ॥
तव पादुकयोर्न्यस्तराज्यतन्त्रः परंतप ॥ चतुर्दशे हि संपूर्णे वर्षेऽहनि रघूत्तम ॥
न द्रक्ष्यामि यदि त्वां तु प्रवेक्ष्यामि हुताशनम् ॥ २५ ॥
तथेति च प्रतिज्ञाय तं परिष्वज्य सादरम् ॥ शत्रुघ्नं च परिष्वज्य भरतं चेदमब्रवीत् ॥ २६ ॥
मातरं रक्ष कैकेयीं मा रोषं कुरु तां प्रति ॥ मया च सीतया चैव शप्तोसि रघुसत्तम ॥ २७ ॥
इत्युक्त्वाऽश्रुपरीताक्षो भ्रातरं विससर्ज ह ॥ २८ ॥

उपमन्त्रिभिः ॥१७॥ मयादेवर्षिसंघैश्चपुनःपुनरुच्यमानोप्ययंनिवर्तनेच्छांनत्यजेदिति तदिच्छा सवासना त्याजयितव्येति स्वप्रतिज्ञादार्ढ्यंदर्शयति—लक्ष्मीरित्यादिना । नप्रतिज्ञां अतीयामितिशेषः ॥ १८ ॥ त्रिया कामकृतत्वात्त्यक्तुमियंप्रतिज्ञाऽर्हेत्याशङ्कयाह—कामादित्यादिना । कामात् त्वद्विषयस्नेहात् । लोभात् त्वद्भ्राज्ञेनराज्यकरणलोभात् । मातृवत् मातरीव ॥ १९ ॥ तेजसादित्यसंकाशमित्यनेनानिवर्त्यप्रतिज्ञत्वमुच्यते ।प्रतिपच्चन्द्रदर्शनमित्यनेन क्रमेणराज्येपूर्णप्रतिष्ठत्वंसर्वैरपि पूज्यत्वंचद्योत्यते ॥ २० ॥ अथमध्यस्थेनोभयोर्हितपरेणवसिष्ठेननियुक्तोभरतःप्रार्थयते—अधिरोहेत्यादिना । अतएवभरद्वाजंप्रतिभरतोवसिष्ठोक्तिमनुवदिष्यति "एतेप्रयच्छसंहृष्टःपादुकेहेमभूषिते" इति ॥२१॥ अथरामः स्वप्रतिज्ञांभरतकृतप्रपत्तिंचनिर्वहंस्तथाकरोति—सइति । प्रायच्छत् गृहाणेत्यन्वयुङ्क्त ॥ २२ ॥ सइत्यादिसार्धश्लोकत्रयमेकान्वयं । चतुर्दशेवर्षेसंपूर्णे सति अहनि उत्तरवर्षादिमदिने । प्रवेक्ष्यामीत्यन्तेइति

नेनिरन्तरवनवासविषयकप्रतिज्ञाहानिर्नभविवेतिसूचितम् ॥ १६ ॥ **तनि०** लक्ष्मीः कान्तिः । चन्द्रादपेयात् इन्दुक्षयादिष्वतथादर्शनात् । उदाहरणान्तरमाह—**हिमवान्वेति** । ग्रीष्मकालेहिमवतोपिहिमपरिक्षयसंभवात् । सागरोप्यतीयाद्वेलां प्रलयेवेलोल्लङ्घनसंभवात् । **शि०** लक्ष्मीः शोभा अपेयात् रात्रावपगच्छेत् ॥ १८ ॥ **ति०** तुभ्यं तव । कामात् देवानामिच्छातः । लोभाद्वा लोभादेव । तेषांदेवलोकराज्यलोभात् । तवमात्रा देवैरेवमन्थराद्वारा इदं कृतं कारितमितिगूढोर्थः । **स०** कामात् ईशेच्छायाएव । लोभाद्वा लोभादिव । मातृवत् मन्मातृवत् ॥ १९ ॥ **ती०** तेजसादित्यसंकाशमित्यनेन परैरप्रधृष्यत्वं प्रतिपच्चन्द्रमित्यनेन सर्वैरपिपूज्यतयादृश्यमानत्वं वर्धिष्णुत्वं चिरमदर्शनंचद्योत्यते ॥ २० ॥ **स०** हेआर्य अधिरोह पादुकयोःपादौस्थापयेत्यर्थः । एतेचपादुके भरतेन सहानीतेइतिबोध्यं । अन्यथा रामस्यवस्त्राणिगृहीत्वाऽजिनानिदत्तवत्याःकैकेय्यारामायहेमपादुकादानस्यानुचितत्वात् ॥ **ति०** एते उटजसन्निहिते । अधिरोहेत्यनेन भद्रासनस्थानीयपादुकयोःप्रतिनिधिभूतयोरारोहणेनराज्यप्रतिपत्तिःकारिता । **शि०** विधास्यतइत्यनेन पादुकयोश्चेतनत्वंध्वनितं । तेन तयोःप्राकृतविलक्षणत्वंसूचितं ॥ २१ ॥ **ति०** सरामःपादुके अधिरुह्य व्यवमुच्य पुनस्ततोवमुच्य भरतायप्रायच्छत् । एतेन प्रतिनिधिदानद्वाराराज्यरक्षानियोगःकृतः । प्रतिपद्यस्थापयेतिचिरंभरतप्रार्थनंचसाधितं । अधिरोहणेनशक्तिविशेषस्यतत्रस्थापनं । यद्दर्शनेनसर्वज्ञत्वसंपत्तिरितिबोध्यं । तदुक्तंपाद्मे "ज्ञात्वातदाज्ञांताभ्यांचभरतःक्षितिमन्वशात्" इति । ताभ्यांपादुकाभ्यांतद्दर्शनमात्रेणेदृशेविषयेभगवतएवमाज्ञेतिज्ञात्वातथाव्यवहारमकरोदित्यर्थः । भरतस्तुपाञ्चजन्यावतारत्वादाच्छादितसार्वज्ञइत्यनेनसूचितम् । भगवत्स्पर्शेनाचेतनेपिसार्वज्ञदानशक्तिमत्त्वमितिभगवन्माहात्म्यातिशयद्वारारामस्येश्वरत्वंचसूचितं ॥ २२ ॥ **ति०** शप्तोसि रोषाकरणायेतिशेषः ॥ २८ ॥

[पा०] १ च. ञ. हिमवाञ्शीततां. २ ङ. झ. ट. व्यवमुच्य. ३ च. ञ. प्रायच्छत्स. ४ क. ङ. छ. झ. ञ. ट. न्यस्तराज्यतन्त्रं. ख. ग. न्यस्तोराज्यभारः. ५ ग. ज. वर्षेहिरघुनन्दन. ६ क. घ. ज. संपरिष्वज्य. ७ घ. शत्रुघ्नंभरतंचेदंरामोवचनमब्रवीत्. ८ ङ. च. छ. झ. ञ. ट. वचनं. ९ ख. घ.—ट. रघुनन्दन.

स पादुके ते भरतः प्रतापवान्स्वलंकृते संपरिपूज्य धर्मवित् ॥
प्रदक्षिणं चैव चकार राघवं चकार चैवोत्तमनागमूर्धनि ॥ २९ ॥
अथानुपूर्व्यात्प्रतिनन्द्य तं जनं गुरूंश्च मन्त्रिप्रकृतीस्तथाऽनुजौ ॥
व्यसर्जयद्राघववंशवर्धनः स्थिरः स्वधर्मे हिमवानिवाचलः ॥ ३० ॥
तं मातरो बाष्पगृहीतकण्ठ्यो दुःखेन नामन्त्रयितुं हि शेकुः ॥
स त्वेव मातॄरभिवाद्य सर्वा रुदन्कुटीं स्वां प्रविवेश रामः ॥ ३१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे द्वादशोत्तरशततमः सर्गः ॥ ११२ ॥

त्रयोदशोत्तरशततमः सर्गः ॥ ११३ ॥

वसिष्ठादिभिःसहायोध्यांप्रस्थितेनभरतेनभरद्वाजाश्रममेत्यतदभिवादनम् ॥ १ ॥ तथातस्मिन्स्वस्यरामपादुकालाभादिरूपचित्रकूटवृत्तवृत्तान्तनिवेदनपूर्वकंतदामन्त्रणेनसकलैस्सहपुनरयोध्यांप्रतिप्रस्थानम् ॥ २ ॥ परिजनैस्सहयमुनागङ्गातरणेनशृङ्गवेरमेत्यततोनिर्गत्यायोध्यांदृष्टवताभरतेनसुमन्त्रंप्रतितस्यानिष्प्रभत्वप्रदर्शनम् ॥ ३ ॥

ततः शिरसि कृत्वा तु पादुके भरतस्तदा ॥ आरुरोह रथं हृष्टः शत्रुघ्नेन समन्वितः ॥ १ ॥
वसिष्ठो वामदेवश्च जाबालिश्च दृढव्रतः ॥ अग्रतः प्रययुः सर्वे मन्त्रिणो मन्त्रपूजिताः ॥ २ ॥
मन्दाकिनीं नदीं रम्यां प्राङ्मुखास्ते ययुस्तदा ॥ प्रदक्षिणं च कुर्वाणाश्चित्रकूटं महागिरिम् ॥ ३ ॥
पश्यन्धातुसहस्राणि रम्याणि विविधानि च ॥ प्रययौ तस्य पार्श्वेन ससैन्यो भरतस्तदा ॥ ४ ॥
अदूराच्चित्रकूटस्य ददर्श भरतस्तदा ॥ आश्रमं यत्र स मुनिर्भरद्वाजः कृतालयः ॥ ५ ॥

करणं । इत्यत्रकीदितिपूर्वेणान्वयः ॥ २३॥२४॥२५—२६॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने द्वादशोत्तरशततमः सर्गः ॥ ११२ ॥

अथ भरतस्यायोध्याप्रवेशस्त्रयोदशोत्तरशततमे । पादुकांशिरसिकृत्वा शत्रुंजयमूर्ध्नि निक्षिप्तपादुकेसादरमादायस्वमूर्ध्न्याधायेत्यर्थः । पादुकांशिरसिकृत्वाहृष्टः "यावन्न चरणौ भ्रातुः पार्थिवव्यञ्जनान्वितौ । शिरसा धारयिष्यामि न मे शान्तिर्भविष्यति" इतिस्वप्रार्थितस्यानुगुणकिरीटधारणंकृत्वाहृष्टः पूर्वस्मात्त्रयभीतः इदानीं-पादुकाप्राप्त्याहृष्टः ॥ १ ॥ मन्त्रपूजिताः अमोघकार्यविचारनैपुण्यात्पूजिताः ॥ २ ॥ सीतारामयोर्जलक्रीडादिभिःरम्यांमन्दाकिनीं रामनिवासत्वेनमहाप्रभावंचित्रकूटंगिरिंचप्रदक्षिणंकुर्वाणाः सन्तः प्राङ्मुखाययुः ॥ ३ ॥ धातूनितिविहायनानाधातून् दृग्भ्यांपिबन्निवपश्यन् तस्यचित्रकूटस्यपार्श्वेनययौ ॥ ४ ॥ अदूरादिति । चित्रकूटसौन्दर्यदर्शनाकृष्टचित्ततयाअदूरादिवभासमानम्

ति० संपरिगृह्य शिरसीतिशेषः । उत्तमनागमूर्धनि राजोपवाह्यगजमस्तके । तस्यकालाभिषिक्तराजाधिरोहणभिप्रेतिशेषः । सर्वलोकप्रख्यापनार्थमेतत् ॥ २९ ॥ शि० अथव्यसर्जयत् मङ्गलंप्रयापयामास ॥ ३० ॥ शि० रुदन् स्वगमनाभावेनरोदयन् ॥ ति० सर्वाः सकैकेयीकाः । अनेनकैकेय्यादौपरीहितत्वसूचितम् रुदन् रुद्रन्निव ॥ ३१ ॥ इतिद्वादशोत्तरशततमस्सर्गः ॥ ११२ ॥

तनि० पादुकेशिरसिकृत्वाहृष्टः "यावन्न चरणौ भ्रातुः पार्थिवव्यञ्जनान्वितौ । शिरसाधारयिष्यामि नमे शान्तिर्भविष्यति" इतिस्वप्रार्थितस्यानुगुणकिरीटधारणंकृत्वाहृष्टः । पूर्वस्मात्त्रयभीतः इदानींपादुकाप्राप्त्याहृष्टः ॥ ति० यद्वा शिरसीत्यस्यगजशिरसीत्येवार्थः ॥ १ ॥ ति० यत्र यमुनादक्षिणकूले । अतएवचित्रकूटस्यादूरात् । अनेनयमुनादक्षिणतटेपिकश्चिद्भरद्वाजाश्रमइतिज्ञायते ।

[पा०] १ ङ. छ. झ. ट. स्वलंकृतेमहोज्वले. २ क. ग.—ट. संपरिगृह्य. ख. संप्रतिगृह्य. ३ च. ञ. राघवः. ४ क. ख. घ. ङ. च. ज.—ट. प्रतिपूज्य. ५ घ. ङ. च. ज.—ट. मन्त्रीन्प्रकृतीः. ६ घ. स्तदा. ७ क.—ट. स्थितः. ८ ख. घ. चामन्त्रयितुंन. ९ ङ. झ. ट. सचैव. १० घ. शीघ्रं. ११ छ. झ. शत्रुघ्नसहितस्तदा. ग. शत्रुघ्नेनसमंततः. १२ घ. प्रकुर्वाणाः. १३ ग. न्सानुसहस्राणि. १४ ख. ज. स्तथा.

स तमाश्रममागम्य भरद्वाजस्य बुद्धिमान् ॥ अवतीर्य रथात्पादौ ववन्दे भरतस्तदा ॥ ६ ॥
ततो हृष्टो भरद्वाजो भरतं वाक्यमब्रवीत् ॥ अपि कृत्यं कृतं तात रामेण च समागतम् ॥ ७ ॥
एवमुक्तः स तु ततो भरद्वाजेन धीमता ॥ प्रत्युवाच भरद्वाजं भरतो भ्रातृवत्सलः ॥ ८ ॥
स याच्यमानो गुरुणा मया च दृढविक्रमः ॥ राघवः परमप्रीतो वसिष्ठं वाक्यमब्रवीत् ॥ ९ ॥
पितुः प्रतिज्ञां तामेव पालयिष्यामि तत्त्वतः ॥ चतुर्दश हि वर्षाणि या प्रतिज्ञा पितुर्मम ॥ १० ॥
एवमुक्तो महाप्राज्ञो वसिष्ठः प्रत्युवाच ह ॥ वाक्यज्ञो वाक्यकुशलं राघवं वचनं महत् ॥ ११ ॥
एते प्रयच्छ संहृष्टः पादुके हेमभूषिते ॥ अयोध्यायां महाप्राज्ञ योगक्षेमकरे तव ॥ १२ ॥
एवमुक्तो वसिष्ठेन राघवः प्राङ्मुखः स्थितः ॥ पादुके अधिरुह्यैते मम राज्याय वै ददौ ॥ १३ ॥
निवृत्तोऽहमनुज्ञातो रामेण सुमहात्मना ॥ अयोध्यामेव गच्छामि गृहीत्वा पादुके शुभे ॥ १४ ॥
एतच्छ्रुत्वा शुभं वाक्यं भरतस्य महात्मनः ॥ भरद्वाजः शुभतरं मुनिर्वाक्यमुवाच तम् ॥ १५ ॥
नैतच्चित्रं नरव्याघ्र शीलवृत्तवतां वर ॥ यदार्यं त्वयि तिष्ठेत्तु निम्ने सृष्टमिवोदकम् ॥ १६ ॥
अमृतः स महाबाहुः पिता दशरथस्तव ॥ यस्य त्वमीदृशः पुत्रो धर्मज्ञो धर्मवत्सलः ॥ १७ ॥
तमृषिं तु महात्मानमुक्तवाक्यं कृताञ्जलिः ॥ आमन्त्रयितुमारेभे चरणावुपगृह्य च ॥ १८ ॥
ततः प्रदक्षिणं कृत्वा भरद्वाजं पुनःपुनः ॥ भरतस्तु ययौ श्रीमानयोध्यां सह मन्त्रिभिः ॥ १९ ॥

॥ ५ ॥ सइति । भरद्वाजस्यपादौववन्दइत्यन्वयः ॥ ६ ॥ अपिशब्दःप्रश्ने । रामेणकिंसमागतंसंगतं भवतारामेण कृत्यंभवत्प्रयोजनंकिंकृतमित्यर्थः ॥ ७—८ ॥ गुरुणावसिष्ठेन । पितुरिति । चतुर्दशवर्षाणिवनेवस्तव्यमितिकैकेयीनिमित्तंकृतापितुर्याप्रतिज्ञास्ति तामेवपितुःप्रतिज्ञां तत्त्वतःपालयिष्यामीत्यब्रवीदितिसंबन्धः ॥ ९—१० ॥ हेमभूषितेइत्यनेन रामायप्रीत्यासमर्पयितुमभिनवतयानिर्माय्यनगराद्भरतेनानीतेइतिगम्यते । योगक्षेमकरे अपूर्ववस्तुलाभोयोगः । लब्धस्यपरिपालनंक्षेमः । एते पादुकेप्रयच्छेतिवसिष्ठःप्रत्युवाचहेतिसंबन्धः ॥ ११ ॥ १२— १५ ॥ आर्यं ज्येष्ठानुवर्तनरूपंश्रेयः । निम्ने तटाकादौ । सृष्टंधृतम् ॥ १६ ॥ "प्रजामनुप्रजायसेतदुतेमर्त्यामृतं" इतिश्रुत्युक्तरीत्या सत्पुत्रलाभात्त्वत्पितादशरथः अमृतइत्याह अमृतइति ॥ १७ ॥ आमन्त्रयितुमारेभे धिनयेनामन्त्रणोन्मुखइवस्थितइत्यर्थः ॥ १८ ॥ ततः तदनुज्ञानन्तरं । अत्र पुनःपुनरित्यनेनैकप्रदक्षिणेन कार्यमित्युक्तं । प्रदक्षिणविशेषणेन प्रणामस्तुसकृदेवेत्युक्तंभवतीत्याचार्याः । केचित्तु एकहस्तप्रणामैकप्रदक्षिणयोरिव एकप्रणामस्यापिनिषिद्धत्वात् पुनःपुनरितिविशेषणस्यात्रार्थिकेवा पूर्वश्लोकोक्ताभिवादनतत्ल-

अतएवाग्रेभरद्वाजामन्त्रणोत्तरं "ततस्तेयमुनांतीर्त्वे"तिवक्ष्यति । संप्रतितत्रस्थितिस्तुरामभरतयोस्संवादंशिष्यद्वाराज्ञटितिश्रोतुमिति बोध्यं ॥ स० यत्र प्रयागे ॥ ५ ॥ ति० प्रयच्छ प्रतिनिधित्वेनेतिशेषः । योगक्षेमकरोभवेति एतद्वाराभरतेसकलंसंपादनेते तिशेषः ॥ १२ ॥ ति० हेमविकृते हेम्नाविचित्रतयाकृते । ममराज्याय मद्राज्यरक्षाशक्त्यनुग्रहार्थमित्यर्थः । शि० ननुपूज्यभरतप्रार्थनयारामकर्तृकपादुकादानस्योक्तत्वेनेदंविरुद्धमितिवाच्यं । गुरावीश्वरत्वबुध्याकर्तृत्वंकरणत्वंचेत्यादिशुद्धाकर्तृत्वस्यैश्वर्येपर्यवसन्नत्वेनवसिष्ठस्यैवमुख्यकर्तृत्वेनादोषात् ॥ १३ ॥ ति० आर्यं शोभनचरित्रं । त्वयितिष्ठेदितियत् तत् उत्सृष्टमुदकं निम्नेतिष्ठेदितिवन्नचित्रं । निम्नेतिछान्दससप्तम्यन्तं ॥ १६ ॥ शि० आमन्त्रयितुं गमनायप्रार्थयितुं ॥ ति० आमन्त्रयितुमारेभे आमन्त्रणंकृतवान्

[पा०] १ ख. ग. घ. ज. मासाद्य. २ ङ. झ. वीर्यवान्. ३ क.—ङ. छ. ज. झ. कुलनन्दनः. ञ. ट. रघुनन्दनः. ४ च. समागतः. ५ ख. ग. च. ज. तदा. ६ क. ङ. च. छ. झ. ञ. ट. धर्मवत्सलः. ७ क. याच्यन् नापि. ८ ग. चतुर्दशञ्च. ९ ङ. झ. ट. करोमव. १० क. ख. ङ. च. छ. झ. ञ. ट. हेमविकृते. ११ क. ख. ङ. क. छ. झ. ञ. ट. तेददौ. १२ क. च. ञ. भरद्वाजस्तुभरतं. ज. भरद्वाजःशुभरतं. १३ क. ख. ङ. च. छ. झ. ञ. ट. मुदाहरत्. ग. मुवाचह. १४ च. नैवचित्रं. १५ ङ. चित्रं. छ. झ. ञ. ट. नरव्याघ्रेशीलवृत्तविदांवरे. १६ ङ. झ. ञ. ट. निम्नोत्सृष्ट. ख. ग. घ. च. ज. निम्नेसृष्ट. १७ ङ. छ. झ. ञ. ट. अनृणः. १८ ख. ङ. छ. झ. ञ. ट. धर्मात्मा. १९ ग. समहात्मानं. ख. ङ. च. छ. ञ. ञ. ट. तुमहाप्राज्ञं.

यानैश्च शकटैश्चैव हयैर्नागैश्च सा चमूः ॥ पुनर्निवृत्ता विस्तीर्णा भरतस्यानुयायिनी ॥ २० ॥
ततस्ते यमुनां दिव्यां नदीं तीर्त्वोर्मिमालिनीम् ॥ ददृशुस्तां पुनः सर्वे गङ्गां शुभजलां नदीम् ॥२१
तां रम्यजलसंपूर्णां संतीर्य सहबान्धवः ॥ शृङ्गिबेरपुरं रम्यं प्रविवेश ससैनिकः ॥ २२ ॥
शृङ्गिबेरपुराद्भूयस्त्वयोध्यां संददर्श ह ॥ २३ ॥
अयोध्यां च ततो दृष्ट्वा पित्रा भ्रात्रा विवर्जिताम् ॥ भरतो दुःखसंतप्तः सारथिं चेदमब्रवीत् ॥२४॥
सारथे पश्य विध्वस्ता साऽयोध्या न प्रकाशते ॥ निराकारा निरानन्दा दीना प्रतिहतस्वरा ॥२५॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे त्रयोदशोत्तरशततमः सर्गः ॥११३

चतुर्दशोत्तरशततमः सर्गः ॥ ११४ ॥

वाल्मीकितावहुनिदर्शनप्रदर्शनेनायोध्यायाःशोभाराहित्यनिरूपणम् ॥ १ ॥ अयोध्यांप्रविष्टवताभरतेनसुमन्त्रंप्रत्ययोध्यायानिश्शोभत्वप्रदर्शनपूर्वकंशोकात्पितृनिवेशप्रवेशः ॥ २ ॥

स्निग्धगम्भीरघोषेण स्यन्दनेनोपयान्प्रभुः ॥ अयोध्यां भरतः क्षिप्रं प्रविवेश महायशाः ॥ १ ॥
बिडालोलूकचरितामालीननरवारणाम् ॥ तिमिरंभ्याहतां कालीमप्रकाशां निशामिव ॥ २ ॥
राहुशत्रोः प्रियां पत्नीं श्रिया प्रज्वलितप्रभाम् ॥ ग्रहेणाभ्युत्थितेनैकां रोहिणीमिव पीडिताम् ॥३॥
अल्पोष्णक्षुब्धसलिलां घर्मोत्तप्तविहंगमाम् ॥ लीनमीनझषग्राहां कृशां गिरिनदीमिव ॥ ४ ॥
विधूमामिव हेमाभामध्वराग्नेः समुत्थिताम् ॥ हविरभ्युक्षितां पश्चाच्छिखां विप्रलयं गताम् ॥ ५ ॥
विध्वस्तकवचां रुग्णगजवाजिरथध्वजाम् ॥ हतप्रवीरामापन्नां चमूमिव महाहवे ॥ ६ ॥

ध्येवाप्रणामेप्यन्वयेन नकोपिविरोधइत्याहुः । अयोध्यामुद्दिश्ययायावित्यन्वयः ॥ १९ ॥ भरतस्यैवसेनायाश्चित्रकूटान्निवृत्तिमाह—यानैरिति ॥ २० ॥ भरतमनुसृत्यसेनानुयानप्रकारमाह—ततइति । यमुनांतीर्त्वागच्छन्तस्तेसर्वे गङ्गांददृशुरितिसंबन्धः ॥ २१—२४ ॥ निराकारा निर्गतशोभनाकारा ॥ २५ ॥ इति श्रीगोविन्दराजविरचितेश्रीमद्रामायणभूषणेपीताम्बराख्यानेअयोध्याकाण्डव्याख्याने त्रयोदशोत्तरशततमः सर्गः ॥ ११३ ॥

पूर्वसर्गान्तिमश्लोकोक्तंविस्तरेणदर्शयति चतुर्दशोत्तरशततमे । उपयान् समीपमागच्छन् ॥ १॥ कालींकृष्णपक्षसंबन्धिनीम् ॥ २ ॥ राहुशत्रोः चन्द्रस्य ॥ ३—४ ॥ हविरभ्युक्षितां दध्यादिहविषाअभ्युक्षितां। शिखां प्रव

॥ १८ ॥ ति० यमुनांतीर्त्वा तस्मिन्नेवदिनेभरद्वाजंदृष्ट्वा गङ्गांददृशुरित्यर्थइतिकश्चित् । तत्तुपूर्वोक्तरीत्याऽसामञ्जस्याद्धेयं । जलस्य शिवत्वंरम्यत्वंच दर्शनमात्रेणसकलपापापहन्तृत्वंमधुरत्वंच ॥ २१ ॥ ति० शृङ्गबेरपुरादिति । निर्गत्येतिशेषः ॥ २३ ॥ ति० विध्वस्ता विध्वस्तशोभा । निराकारा निरलङ्कारा ॥ २५ ॥ इतित्रयोदशाधिकशततमस्सर्गः ॥ ११३ ॥

ति० आसमन्तात्लीनानिश्लिष्टानिलग्नानि नराणांवारणानिकवाटानियस्यां । शि० आलीनानिपिहितानि नरचारणानि नराणांचारणानिमुखानियस्यांतां । किंच आलीनानि निवृत्तानि नराणांप्रतीहाराणांवारणानिनिवारणानियस्यांसातां ॥ २ ॥ ति० विधूमां अतएवहेमाभां अग्नेस्समुत्थितांशिखामिवा । पूर्वंरामस्थितिसमयेजाज्वल्यमानरूपतयास्थितां पश्चात् रामविवासनकाले हविरभ्युक्षितां होमीयपयस्सिक्तां अतएव विप्रलयंगतांशिखामिवस्थितां । अध्वराग्नेस्समुत्थितामितिपाठोबहुसंमतः तत्राप्यर्थःप्रागव-

[पा०] १ क.—ट. शिवजलां. २ ज. रम्यांतांजल. ग. तांपुण्यजल. ३ ज. बान्धवैः. ४ ग. संददर्शसः. ५ क. ख. ङ. च. छ. झ. ञ. ट. अयोध्यांतुतदा. ६ क. च. ञ. भ्रात्राचवर्जितां. ग. भ्रात्रादिराकृतां. ख. भ्रात्राचवर्जितः. ७ क. वाक्यमब्रवीत्. ८ ङ. छ. झ. ट. विध्वस्ताअयोध्या. ९ क. ख. घ.—छ. झ. ञ. ट. प्रतिहतस्वना. १० . . तिमिरेणाहतां. ११ क. ख. घ. ङ. छ. ज. झ. ट. ग्रहेणाभ्युदितेनैकां. १२ ङ. झ. ञ. ट. घर्मतप्त, क. घर्मातप्त. १३ ङ. छ. झ. ट, हेमाभांशिखामग्नेः. १४ ग. समुच्छ्रितां. १५ क. ख. प्रविलयं.

[1]सफेना सस्वना [2]भूत्वा सागरस्य समुत्थिताम् ॥ प्रशान्तमा[3]रुतोद्धूतां जलोर्मिमिव निःस्वनाम् ॥७॥
त्यक्तां यज्ञायुधैः सर्वैरभिरूपैश्च याजकैः ॥ सुत्याकाले [4]विनिर्वृत्ते वेदिं गतरवामिव ॥ ८ ॥
गोष्ठमध्ये स्थितामार्तामचरन्तीं [5]तृणं नवम् ॥ गोवृषेण परित्यक्तां गवां पत्नीमिवोत्सुकाम् ॥ ९ ॥
प्रभाकराद्यैः सुस्निग्धैः प्रज्वलद्भिरिवोत्तमैः ॥ [6]वियुक्तां मणिभिर्जात्यैर्नवां मुक्तावलीमिव ॥ १० ॥
सहसा [7]चलितां स्थानान्महीं पुण्य[8]क्षयाद्गताम् ॥ संहृतद्युति[9]विस्तारां तारामिव दिवश्च्युताम् ॥ ११॥
पुष्पनद्धां वसन्तान्ते मत्त[10]भ्रमरनादिताम् ॥ [11]द्रुतदावाग्नि[12]विप्लुष्टां [13]क्लान्तां वनलतामिव ॥ १२ ॥
संमूढनिगमां [14]स्तब्धां संक्षिप्तविपणापणाम् ॥ प्रच्छन्नशशिनक्षत्रां द्यामिवाम्बुधरै[15]र्वृताम् ॥ १३ ॥
क्षीणपानो[16]त्तमैर्भिन्नैः शरावैरभिसंवृताम् ॥ हतशौण्डामि[17]वाकाशे पानभूमिमसंस्कृताम् ॥ १४ ॥
वृक्णभूमितलां निम्नां वृक्णपात्रैः समावृताम् ॥ उपयुक्तोदकां [18]भग्नां प्रपां निपतितामिव ॥ १५ ॥
विपुलां विततां चैव युक्तपाशां तरस्विनाम् ॥ भूमौ बाणैर्विनिष्कृत्तां पतितां ज्यामिवायुधात् ॥ १६
सहसा युद्धशौण्डेन हयारोहेण वाहिताम् ॥ नि[19]क्षिप्तभाण्डामुत्सृष्टां किशोरीमिव दुर्बलाम् ॥ १७ ॥
[20]शुष्कतोयां महामत्स्यैः कूर्मैश्च बहुभिर्वृताम् ॥ प्रभिन्नतटविस्तीर्णां वापीमिव हृतोत्पलाम् ॥ १८ ॥
पुरुषस्याप्रहृष्टस्य प्रतिपिद्धानुलेपनाम् ॥ संतप्तामिव शोकेन गात्रयष्टिमभूषणाम् ॥ १९ ॥

ग्योत्थितज्वालाम् ॥ ५—७ ॥ यज्ञायुधैः स्फ्यादिभिः । सुत्याकाले सुत्यादिवसे ॥ ८ ॥ अचरन्तींअभक्षयन्तीम् ॥९॥ प्रभाकराद्यैः पद्मरागाद्यैः ॥ १० ॥ ११ ॥ वसन्तान्ते ग्रीष्मे द्रुतदावाग्निविप्लुष्टां वेगवद्दावाग्निनाईपद्दग्धाम् ॥१२॥ संमूढनिगमां जनसंचाररहितमार्गां । "निगमोनिश्चयेवेदेपुरेपथिवणिक्पथे" इतिवैजयन्ती । संक्षिप्तविपणापणां संकुचितविक्रयां संकुचितनिषद्यांच ॥ १३ ॥ क्षीणपानोत्तमैः क्षीणमधूत्तमैः । शरावैः चषकाकारैः । हतशौण्डां हतमत्तजनां आकाशे अनावृतप्रदेशे ॥ १४ ॥ वृक्णभूमितलां विदीर्णभूमितलां । वृक्णपात्रैःभिन्नपात्रैः ॥ १५ ॥ विततां अटनीद्वयव्याप्तां आरोपितामितियावत् । युक्तपाशांयुक्तरज्जुं । तरस्विनां वीराणां । बाणैः विनिष्कृत्तां छिन्नामितियावत् । आयुधात् धनुषः ॥ १६ ॥ युद्धशौण्डेन आहवसमर्थेन । निक्षिप्तभाण्डां अवरोपिताश्वभूषां । उत्सृष्टां वाहनानर्हां

देव । शिखामित्यस्यचावृत्तिः ॥ ५ ॥ **ति०** समुत्थितां प्रबलमारुतेनसमुत्थितां । अतएवसफेनां सस्वनांऊर्मिमिव भूत्वा तत्सदृशंरूपंप्राप्य पश्चात् प्रशान्तमारुतेनउत्अल्पंधूतांकंपितां अतएवनिस्स्वनांसागरस्यजलोर्मिमिवस्थितां । **स०** ऊर्मिमिवरूपंपूर्वं भूत्वा प्राप्य ॥ ७ ॥ **स०** यज्ञायुधैः याज्ञीयायुधाकारस्फ्यादिभिः । सुत्याकाले यज्ञकाले । सुनिर्वृत्ते निष्पन्नेसति । रवः ध्वनिः ॥ ८ ॥ **ति०** गोष्ठः व्रजं । गोवृषेण गोश्रेष्ठेन । यद्वा गवांप्रियेणवृषेणत्यक्तां अतएवार्तां तत्रोत्सुकां नवंतृणमचरन्तीं अभक्षयन्तीं । गवांतरुणवृषाणांपत्नीमिवस्थितां । गवांपङ्क्तिमिवेतिपाठान्तरं । पत्नीमित्यस्यपङ्क्तिमित्यर्थंतीर्थआह तच्चिन्त्यं ॥ ९ ॥ **ती०** मा...भिः नायकमणिभिः । **ति०** प्रभाकराद्यैः स्फटिकाद्यैरितिकतकोक्तंतुनयुक्तं । **स०** प्रज्वलद्भिः अग्निभिरिवोत्तमैः ॥ १० ॥ **ति०** चरितां चलितां । पुण्यक्षयेतिलुप्तसप्तम्यन्तं । पुण्यक्षयेसतिमहींप्राप्तां । **स०** संहृतद्युतिविस्तारां उपसंहृतप्रकाशां । क्षीणपुण्यत्वात् ॥ ११ ॥ **ति०** संमूढाः शोकाकुलचित्ताः निगमाःवणिजोयस्यां ॥ १३ ॥ **ति०** हतशौण्डां हतमद्यपां ॥ १४ ॥ **ति०** वृक्णभूमितलां भिन्नचत्वरां । भग्नां भग्नस्तंभां । उपयुक्तोदकां समाप्तोदकां ॥ १५ ॥ **स०** युक्तपाशां धनुष्कोट्योःस्थापनार्थमुभयत्र

[पा०] १ क. ख. घ.—ट. सफेनांसस्वनां. ग. सफेनांसस्वरां. २ घ. काले. ३ ख. घ.—ट. मारुतोद्धूतां. ४ च. ञ. चनिर्वृत्ते. ङ. छ. झ. ट. सुनिर्वृत्ते. ५ क. ख. ङ—ट. नवंतृणं. ६ ङ. ट. मुक्तां. ७ ङ. छ—ट. चरितां. ८ च. छ. झ. ञ. ट. क्षयोद्गतां. ९ घ. ज. विस्तीर्णां. १० क. ङ. छ. झ. ट. भ्रमरशालिनीं. ख. च. ञ. भ्रमरताडितां. ग. भ्रमरलालितां. ११ ख. ग. च. द्रुतं. क. भृशं. १२ घ. ज. संप्लुष्टां. १३ ख. च. लतामिवचदुर्बलां. १४ क. ख. ः, च. छ. झ. ञ. ट. सर्वां. १५ ङ. छ. झ. ट. युतां. १६ ङ. छ. ञ. ट. भग्नैः. १७ ग. घ. ङ. छ.—ट. भिपन्नस्तां. १८ घ. भिन्नां. १९ क. ख. ङ. च. छ. झ. ञ. ट. निहतांप्रतिसैन्येनबडवामिवपातितां. २० शुष्कतोयामित्यादिश्लोकत्रयं. झ.—ठ. पुस्तकेषुन दृश्यते.

प्रावृषि प्रविगाढायां प्रविष्टस्याभ्रमण्डलम् ॥ प्रच्छन्नां नीलजीमूतैर्भास्करस्य प्रभामिव ॥ २० ॥
भरतस्तु रथस्थः सञ्श्रीमान्दशरथात्मजः ॥ वाहयन्तं रथश्रेष्ठं सारथिं वाक्यमब्रवीत् ॥ २१ ॥
किंनु खल्वद्य गम्भीरो मूर्च्छितो न निशम्यते ॥ यथापुरमयोध्यायां गीतवादित्रनिःस्वनः ॥ २२ ॥
वारुणीमदगन्धश्च माल्यगन्धश्च मूर्च्छितः ॥ धूपितागरुगन्धश्च न प्रवाति समन्ततः ॥ २३ ॥
यानप्रवरघोषश्च स्निग्धश्च हयनिस्वनः ॥ प्रमत्तगजनादश्च महांश्च रथनिःस्वनः ॥
नेदानीं श्रूयते पुर्यामस्यां रामे विवासिते ॥ २४ ॥
चन्दनागरुगन्धांश्च महार्हाश्च नवस्रजः ॥ गते हि रामे तरुणाः संतप्ता नोपभुञ्जते ॥ २५ ॥
बहिर्यात्रां न गच्छन्ति चित्रमाल्यधरा नराः ॥ नोत्सवाः संप्रवर्तन्ते रामशोकार्दिते पुरे ॥ २६ ॥
सह नूनं मम भ्रात्रा पुरस्यास्य द्युतिर्गता ॥ न हि राजत्ययोध्येयं सासारेवार्जुनी क्षपा ॥ २७ ॥
कदा नु खलु मे भ्राता महोत्सव इवागतः ॥ जनयिष्यत्ययोध्यायां हर्षं ग्रीष्म इवाम्बुदः ॥ २८ ॥
तरुणैश्चारुवेषैश्च नरैरुन्नतगामिभिः ॥ संपतद्भिरयोध्यायां नाभिभान्ति महापथाः ॥ २९ ॥
एवं बहुविधं जल्पन्विवेश वसतिं पितुः ॥ तेन हीनां नरेन्द्रेण सिंहहीनां गुहामिव ॥ ३० ॥

तदा तदन्तःपुरमुज्झितप्रभं सुरैरिवोत्सृष्टमभास्करं दिनम् ॥
निरीक्ष्य सर्वं तु विविक्तमात्मवान्मुमोच बाष्पं भरतः सुदुःखितः ॥ ३१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे चतुर्दशोत्तरशततमः सर्गः ॥ ११४ ॥

किशोरीं वाल्बडवां ॥ १७—१९ ॥ प्रविगाढायां प्रवृद्धायां भास्करस्यप्रभामिवस्थितां। उक्तविशेषणविशिष्टामयोध्यांप्रविवेशेतिपूर्वेणान्वयः ॥ २०–२१ ॥ किंनु खलु अहोकष्टंजातमित्यर्थः ॥ २२ ॥ वारुणीमदगन्धः वारुण्याः मदोत्पादकोगन्धइत्यर्थः ॥ २३—२६ ॥ सासारा वेगवद्वृष्टिसहिता । "आसारःस्यात्प्रसरणेवेगवृष्टौसुहृद्बले" इतिवैजयन्ती । अर्जुनी शुक्लपक्षसंबन्धिनी ॥ २७ ॥ महोत्सवः ग्रीष्मेअम्बुदइवच अयोध्यायां कदामेभ्राता हर्षंजनयिष्यतीतिसंबन्धः ॥ २८ ॥ उन्नतगामिभिः सगर्वगमनैरित्यर्थः । महापथाः राजमार्गाः ॥ २९ ॥ एवंबहुविधंजल्पन्निति पाठः ॥३०॥ सुरैरुत्सृष्टं अभास्करंदिनमिव उज्झितप्रभं अन्तःपुरंनिरीक्ष्येतिसंबन्धः । विविक्तं विजनं। "विविक्तौपूतविजनौ" इत्यमरः । पुराकिलदेवासुरयुद्धेअसुरैर्देवाःपराजिताःस्वर्भानुनाचभानुःपातितः तदानींकियान्कालोदिवारात्रविभागरहितोभूत्। ततःपरं ब्रह्मनियोगादत्रिःस्वतेजसासप्तरात्रंसूर्याधिपत्यंचकारेतिपौराणिकीकथा । अग्निःस्वतेजसेतिपाठान्तरम् ॥ ३१ ॥ इतिश्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने चतुर्दशोत्तरशततमःसर्गः ॥ ११४ ॥

पाशसहितां ॥ १६ ॥ **ति०** मूर्छितः व्याप्तः **स०** मूर्छितः समुत्कृष्टः । **शि०** वारुणी वरुणप्रेषिताओषधिः तस्यामदगन्धः ॥२३॥ **कतक०** भास्करहीनंदिनं । कविकल्पितमत्रोपमानं । **ति०** विभक्तं विगतसंस्कारं । भक्तंसेवितंसंस्कृतं तद्भिन्नमितियावत् ॥ ३१ ॥ इति चतुर्दशोत्तरशततमस्सर्गः ॥ ११४ ॥

[पा०] १ अयंश्लोकः. ख. च. पुस्तकयोः. पुष्पनद्धामितिश्लोकात्परंसंमूढनिगमामितिश्लोकात्पूर्वंदृश्यते. २ क. ङ. छ. झ. ञ. ट. चन्दनागरु. ख. च. धूपेनागरु. ३ ङ. च. ञ. सुस्निग्धहय. ४ ग. उन्मत्तगज. ५ ङ. झ. ञ. वनस्रजः. ६ क.—ट. गतेरामेहि. ७ क.—ट. साहि. ८ घ. ज. सहभ्रात्रा. ९ ख. हृता. १० क. नविराजति. ११ क. कदातु. १२ क. ख. घ. च. ज. ञ. नविभान्ति. ग. नातिभान्ति. १३ एवंबहुविधमित्यर्धस्यस्थाने, " इतिब्रुवन्सारथिना दुःखितोभरतस्तदा । अयोध्यांसंप्रविश्यैवविवेशवसतिंपितुः । " इत्येकःश्लोकः, ख. ङ. च. छ. झ. ञ. ट. पुस्तकेषुदृश्यते. ख. अयोध्यांचप्रविश्यैवं. च. ञ. विवेशभवनंपितुः. १४ ङ. छ. झ. ट. रिवोत्कृष्टं. १५ ख.—ट. सर्वंत्रविभक्तं. १६ क. ख. ङ. सदुःखितः.

पञ्चदशोत्तरशततमः सर्गः ॥ ११५ ॥

भरतेनवसिष्ठाद्यनुमत्यामातॄणामयोध्यायांस्थापनपूर्वकंशत्रुघ्नादिभिःसहनन्दिग्रामप्रवेशः ॥ १ ॥ मुनिवेषधारिणाभरतेन तत्रसमस्तराजोपचारैरामपादुकयोराज्येऽभिषेचनपूर्वकंराज्यपालनम् ॥ २ ॥

ततो निक्षिप्य मातॄः स अयोध्यायां दृढव्रतः ॥ भरतः शोकसंतप्तो गुरूनिदमथाब्रवीत् ॥ १ ॥
नन्दिग्रामं गमिष्यामि सर्वानामन्त्रयेऽद्य वः ॥ तत्र दुःखमिदं सर्वं सहिष्ये राघवं विना ॥ २ ॥
गतश्च हि दिवं राजा वनस्थश्च गुरुर्मम ॥ रामं प्रतीक्षे राज्याय स हि राजा महायशाः ॥ ३ ॥
एतच्छ्रुत्वा शुभं वाक्यं भरतस्य महात्मनः ॥ अब्रुवन्मन्त्रिणः सर्वे वसिष्ठश्च पुरोहितः ॥ ४ ॥
सुभृशं श्लाघनीयं च यदुक्तं भरत त्वया ॥ वचनं भ्रातृवात्सल्यादनुरूपं तवैव तत् ॥ ५ ॥
नित्यं ते बन्धुलुब्धस्य तिष्ठतो भ्रातृसौहृदे ॥ आर्यमार्गं प्रपन्नस्य नानुमन्येत कः पुमान् ॥ ६ ॥
मन्त्रिणां वचनं श्रुत्वा यथाऽभिलषितं प्रियम् ॥ अब्रवीत्सारथिं वाक्यं रथो मे युज्यतामिति ॥ ७॥
प्रहृष्टवदनः सर्वा मातॄः समभिवाद्य सः ॥ आरुरोह रथं श्रीमाञ्शत्रुघ्नेन समन्वितः ॥ ८ ॥
आरुह्य च रथं शीघ्रं शत्रुघ्नभरतावुभौ ॥ ययतुः परमप्रीतौ वृतौ मन्त्रिपुरोहितैः ॥ ९ ॥
अग्रतो गुरवस्तत्र वसिष्ठप्रमुखा द्विजाः ॥ प्रययुः प्राङ्मुखाः सर्वे नन्दिग्रामो यतोऽभवत् ॥ १० ॥
बलं च तदनाहूतं गजाश्वरथसंकुलम् ॥ प्रययौ भरते याते सर्वे च पुरवासिनः ॥ ११ ॥
रथस्थः स हि धर्मात्मा भरतो भ्रातृवत्सलः ॥ नन्दिग्रामं ययौ तूर्णं शिरस्याधाय पादुके ॥ १२ ॥
ततस्तु भरतः क्षिप्रं नन्दिग्रामं प्रविश्य सः ॥ अवतीर्य रथात्तूर्णं गुरूनिदमुवाच ह ॥ १३ ॥
एतद्राज्यं मम भ्रात्रा दत्तं संन्यासवत्स्वयम् ॥ योगक्षेमवहे चेमे पादुके हेमभूषिते ॥ १४ ॥
भरतः शिरसा कृत्वा संन्यासं पादुके ततः ॥ अब्रवीद्दुःखसंतप्तः सर्वं प्रकृतिमण्डलम् ॥ १५ ॥
छत्रं धारयत क्षिप्रमार्यपादाविमौ मतौ ॥ आभ्यां राज्ये स्थितो धर्मः पादुकाभ्यां गुरोर्मम ॥१६॥

अथभरतस्यनन्दिग्रामेस्थित्वाराज्यपरिपालनंपञ्चदशोत्तरशततमे ॥ १ ॥ राघवंविनादुःखं राघवंविनाप्राप्तंदुःखम् ॥ २—४ ॥ सुभृशंश्लाघनीयंचेति पाठः । सदृशमितिपाठे कुलस्यसदृशमित्यर्थः ॥ ५ ॥ नानुमन्येत वचनमितिशेषः ॥ ६—१३ ॥ मातृवरव्याजेनपित्रादत्तंराज्यंभरतःकरोतीतिजनवादोमाभूदितिधियावदति एतदित्यादिना । संन्यासवत् सम्यङ्क्षिप्तद्रव्यमिव । अनेनान्यूनतयाप्रत्यर्पणीयत्वंध्वन्यते । निक्षेपवद्दत्तस्यराज्यस्यरक्षणादिस्वातन्त्र्यमपि स्वस्यनास्तीतिदर्शयति योगक्षेमवहेचेति ॥ १४ ॥ संन्यासं पादुके स्वप्रतिनिधित्वेनन्यस्तेपादुके ॥ १५ ॥ छत्रमित्येतच्चामरादीनामुपलक्षणं । अतएवधारयतेति बहुवचनं । आर्यपादाभेदभावनया पादुकयोरिमाविति पुँल्लिङ्गनिर्देशः । पादुकाभ्यामितिहेतौतृतीया ॥ १६ ॥

ति० नन्दिग्रामो यतोभवेत् येनमार्गेणसप्राप्तोभवेत् तेनययुः ॥ १० ॥ ति० पादुकेसंन्यासं पादुकात्मकंसद्वस्तुन्यासं । वेदाःप्रमाणमितिवत्साधु । स० संन्यासं ममागमनपर्यंतंत्वयितिष्ठत्विति संन्यस्यतइतिसंन्यासं । कर्मणिघञन्तः " घञबन्ताःपुंस्येव " इतिनियमोनास्तीतिसंबन्धमनुवर्तिष्यतइतिभाष्यादौस्पष्टमुक्तेर्युक्तःपादुकेइत्यनेनान्वयः ॥ १५ ॥ शि० स्थितः स्थापितः । अन्त-

[पा०] १ ङ. छ. झ. ट. मातॄस्ताः २ क. ग. च. ञ. ह्ययोध्यायां. ३ झ. ञ. ट. नामन्त्रयेत्र. ४ ङ. छ. झ. ट. गतश्चाहो. ५ क. ख. ग. ङ.—ट. वनस्थस्स. ६ ख. ग. ङ.—ट. मार्गमार्यं. ७ घ. प्रहृष्टमनसः. ८ ङ. छ. झ. ट. समभिभाष्यच. च. ञ. समभिवाद्यच. ९ ख. घ. च. ज. ञ. शीघ्रंशत्रुघ्नेन. १० क. ख. ग. ङ. च. छ. झ. ट. ह्ययतु. ११ ङ. छ. झ. ट. क्षिप्रं. क. दीप्तं. १२ ग. ङ. छ. झ. ञ. ट. गुरवस्सर्वे. ख. घ. च. गुरवस्तस्य. १३ ग. ग्रामंसमन्ततः. ङ. छ. झ. ञ. ट. ग्रामोयतोभवेत्. १४ ग. तद्बलंचयथाभूतं. १५ ख. ग. रथाश्वगजसंकुलं. १६ क. ग.—ट. सतु. १७ ङ. छ. झ. ञ. ट. शिरस्यादाय. १८ ङ. झ. ट. भरतस्तुततः. १९ ख. च. ञ. शीघ्रं. २० ङ. छ. झ. ट. निदमभाषत. २१ ङ. छ. झ. ट. संन्यासमुत्तमं. २२ ख. च. ञ. तस्य. २३ क. ख. राज्यस्थितो.

[1]भ्रात्रा हि मयि संन्यासो निक्षिप्तः याहृदादसौम्[2] ॥ तमिमं पालयिष्यामि राघवागमनं प्रति ॥१७॥
क्षिप्रं संयोजयित्वा तु राघवस्य पु[3]नः स्वयम् ॥ चरणौ तौ तु रामस्य द्रक्ष्यामि सहपादुकौ ॥ १८॥
ततो निक्षि[4]प्तभारोऽहं राघवेण समागतः ॥ निवेद्य गुरवे राज्यं भजिष्ये गु[5]रुवृत्तिताम् ॥ १९ ॥
राघवाय च संन्यासं दत्त्वेमे वरपादुके ॥ राज्यं चेदमयोध्यां च धूतपापो भ[6]वामि च ॥ २० ॥
[7]अभिषिक्ते तु काकुत्स्थे [8]प्रहृष्टमुदिते जने ॥ प्रीतिर्मम यशश्चैव भवेद्राज्याच्चतुर्गुणम् ॥ २१ ॥
एवं तु विलपन्[9]दीनो भरतः स महायशाः ॥ नन्दिग्रामेऽकरोद्राज्यं दुःखितो मन्त्रिभिः सह ॥२२॥
स वल्कलजटाधारी मुनिवेषधरः प्रभुः ॥ नन्दिग्रामेऽवसद्[10]वीरः ससैन्यो भरतस्[11]तदा ॥ २३ ॥
[12]रामागमनमा[13]काङ्क्षन्भरतो भ्रातृवत्सलः ॥ भ्रातुर्वचनकारी च [14]प्रतिज्ञापारगस्तथा ॥ २४ ॥
पा[15]दुके त्वभिषिच्याथ नन्दिग्रामेऽवसत्तदा ॥ [[16]सवालव्यजनं छत्रं धारयामास स स्वयम् ॥
भरतः शासनं सर्वं पादुकाभ्यां न्य[17]वेदयत् ॥ २५ ॥
ततस्तु भरतः श्रीमानभिषिच्यार्यपादुके ॥ तदधीनस्तदा राज्यं कारयामास स[18]र्वदा ॥ २६ ॥
तद[19]ा हि यत्कार्यमुपैति किंचिदुपायनं चोपहृतं महार्हम् ॥
स पादुकाभ्यां प्रथमं निवेद्य चकार पश्चाद्भरतो य[20]थावत् ॥ २७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे पञ्चदशोत्तरशततमः सर्गः ॥११५॥

अयंसंन्यासः पादुकारूपप्रतिनिधिः । पालयिष्यामिरक्षिष्यामि ॥ १७–१८ ॥ राघवेण समागतः संगतः । गुरवेराज्यंनिवेद्य रामायराज्यंप्रत्यर्प्य ततः गुरुवृत्तितांभजिष्ये पितरीवशुश्रूषांकरिष्यामीत्यर्थः ॥ १९ ॥ धूतपापइत्यत्रपापशब्देन कैकेयीनिमित्तमयशउच्यते ॥ २० ॥ प्रहृष्टमुदिते प्रहृष्टःपुलकितगात्रः । मुदितः संजातमानसहर्षः ॥२१—२३॥ रामागमनमाकाङ्क्षन्नित्यादि । पादुकाभ्यांन्यवेदयत् विज्ञापयामास ॥ २४—२५ ॥ आर्यपादुकेअभिषिच्य राज्याभिषेकमार्यपादुकयोः कृत्वेत्यर्थः। तदधीनः पादुकापरतन्त्रः ॥ २६ ॥ तदा पादुकेपुरस्कृत्यराज्यपालनसमये । उपायनं उपहारः । " उपायनमुपग्राह्यमुपहारः " इत्यमरः ॥ २७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने पञ्चदशोत्तरशततमः सर्गः ॥ ११५ ॥

भावितणिजर्थः ॥ १६ ॥ **तनि०** यत्कार्यं राज्यपरिपालनकृत्यं । उपायनमित्यत्रयदित्यनुवर्तते । उपायनं पत्रफलपुष्पादिकं । पादुकाभ्यांप्रथमंनिवेद्येत्यनेन प्रतिदिनंपादुकार्चातन्निवेदितस्वीकारश्चध्वन्यते । यथावच्चकारेतिहव्यकव्यादिषुविनियोगोव्यज्यते ॥ २७ ॥ इतिपञ्चदशोत्तरशततमस्सर्गः ॥ ११५ ॥

[पा०] १ क. ङ. च. छ. झ. ञ. ट. भ्रात्रातु. ग. ममभ्रात्राहि. २ घ. भ्रातुरागमनं. ३ क. ग. पुनस्त्वहं. ४ ग. पादोहं. ५ झ. गुरुवर्तितां. ६ ख. ङ. च. छ. झ. ञ. ट. भवाम्यहं. ७ अभिषिक्तेत्वित्यादिश्लोकद्वयं. झ. पाठेनदृश्यते. ८ ख. च. ञ. प्रहृष्टे. ९ ग. न्वीरो. १० क. ङ. झ. ञ. द्धीरः. ११ च. स्तथा. १२ रामागमनमितिश्लोको झ. पाठे नदृश्यते. १३ क ख. च. काङ्क्षीचभरतो. घ. ज. माकाङ्क्षीभरतो. १४ ञ. तस्यपादुकयोःसदा. १५ घ. ज. पादुके अभिषिच्याथ ग. पादुके अभिषिच्याशु. १६ इदमर्धं ङ. छ.—ट. पुस्तकेषुदृश्यते. १७ झ. निवेदयन् १८ घ. वैतदा. १९ क. ख. घ. च. ज. यदाहि. २० क. यथाभवेत्.

षोडशोत्तरशततमः सर्गः ॥ ११६ ॥

रामेणेङ्गितादिनामुनिकुलस्याश्रमान्तरजिगमिषाविज्ञानेनकुलपतिंप्रतितत्कारणप्रश्नः ॥ १ ॥ तेनरामंप्रतिचित्रकूटेतदवस्थाहेतुकखरादिराक्षसकृतदुस्सहोपद्रवस्यतत्कारणत्वकथनपूर्वकंसगणस्यात्मनआश्रमान्तरगमनाभ्यनुज्ञानप्रार्थना ॥ २ ॥ रामेणसबहुमानंमुनिगणप्रस्थापनपूर्वकंस्वावासप्रवेशः ॥ ३ ॥

प्रतिप्रयाते भरते वसन्रामस्तपोवने ॥ लक्षयामास सोद्वेगमथौत्सुक्यं तपस्विनाम् ॥ १ ॥
ये तत्र चित्रकूटस्य पुरस्तात्तापसाश्रमे ॥ राममाश्रित्य निरतास्तानलक्षयदुत्सुकान् ॥ २ ॥
नयनैर्भृकुटीभिश्च रामं निर्दिश्य शङ्किताः ॥ अन्योन्यमुपजल्पन्तः शनैश्चक्रुर्मिथः कथाः ॥ ३ ॥
तेषामौत्सुक्यमालक्ष्य रामस्त्वात्मनि शङ्कितः ॥ कृताञ्जलिरुवाचेदमृषिं कुलपतिं ततः ॥ ४ ॥
न कच्चिद्भगवन्किंचित्पूर्ववृत्तमिदं मयि ॥ दृश्यते विकृतं येन विक्रियन्ते तपस्विनः ॥ ५ ॥
प्रमादाच्चरितं कच्चित्किंचिन्नावरजस्य मे ॥ लक्ष्मणस्यर्षिभिर्दृष्टं नानुरूपमिवात्मनः ॥ ६ ॥
कच्चिच्छुश्रूषमाणा वः शुश्रूषणपरा मयि ॥ प्रमादाभ्युचितां वृत्तिं सीता युक्तं न वर्तते ॥ ७ ॥

अथरामस्यचित्रकूटान्निर्गमनंषोडशोत्तरशततमे । सोद्वेगं सभयं । औत्सुक्यं आश्रमान्तरगमनाभिलाषं लक्षयामास । इङ्गिताकारादिभिरितिशेषः ॥ १ ॥ पुरस्तात् पूर्वे । चित्रकूटस्यतापसाश्रमेराममाश्रित्यये निरतास्तान् उत्सुकान् गमनोत्सुकान् । अलक्षयत् राम इत्यनुषङ्गः ॥ २ ॥ रामं निर्दिश्य प्रदर्श्य । मिथः रहस्ये । "मिथोऽन्योन्यरहस्ययोः" इतिवैजयन्ती ॥ ३ ॥ आत्मनिशङ्कितः स्वस्मिन् संजातशङ्कः ॥ ४ ॥ हेभगवन्मयिपूर्ववृत्तं विकृतंनदृश्यतेकच्चित् । येनतपस्विनोविक्रियन्ते इदंकिंचित् किमिदमित्यर्थः ॥ ५ ॥ प्रमादात् अनवधानात् । मे अवरजस्य लक्ष्मणस्य । आत्मनोनानुरूपमिव किंचिच्चरितंऋषिभिर्दृष्टंनकच्चिदित्यन्वयः ॥ ६—७ ॥

ति० येतापसाः । चित्रकूटस्याश्रमे । सन्धिरार्षः । राममाश्रित्यनिरताः नितरांरताः सानन्दाः तानुत्सुकानलक्षयत् । अत्रेदंबोध्यं । चैत्रशुक्लदशम्यांपुष्येरामवनप्रस्थानं । ततः पूर्णिमायामर्धरात्रेदशरथमरणं । ततःपक्षेणभरतागमनमयोध्यायां । तत और्ध्वदैहिकेनपक्षोगतः । एवंवैशाखेगतेज्येष्ठेभरतस्यचित्रकूटंप्रतिप्रस्थानं । अग्रेवर्षाकालेसंनिहितेसतिकार्तिक्यन्तंचित्रकूटेवासो रामस्य । तदनन्तरंतापसौत्सुक्यलक्षणं । नतुभरतनिवृत्त्यनन्तरमेवैतदिति । अतएवपाद्मे भरतस्यायोध्यांप्रतिनिवृत्त्यनन्तरमुक्तं "राघवश्चित्रकूटाद्रौसानुजोऽरमतप्रिया । कदाचिदङ्केवैदेह्यानिद्राणेरघुनन्दने । ऐन्द्रःकाकस्समागम्यजानकींवीक्ष्यकामुकः । विददारनखैस्तीक्ष्णैःपीनोन्नतपयोधरम् । तद्दृष्ट्वाराघवःक्रुद्धःकुशंजग्राहपाणिना । ब्राह्मेणास्त्रेणसंयोज्यचिक्षेपध्वाङ्क्षमारणे । तंदृष्ट्वाघोरसंकाशंज्वलत्कालानलोपमम् । दृष्ट्वाकाकःप्रदुद्रावनिनदन्दारुणस्वनम् । वायसस्त्रिषुलोकेषुबभ्रामभयपीडितः । यत्रयत्रययौकाकःशरणार्थंचवायसः । तत्रतत्रतदस्त्रंतुप्रविवेशभयावहम् । ब्रह्माणमिन्द्रंरुद्रंमांशरणार्थीजगामसः । तंदृष्ट्वावायसंभीतंदेवतानररक्षिम । नशक्तास्स्मवयंत्रातुंराघवास्त्राद्भयङ्करात् । इत्यब्रूममहादेवाअन्यथास्त्रंदहेच्चनः । पुनश्चागाद्विधिंकाकोदययाविधिनाहतम् । भोभोबलिभुजांश्रेष्ठतमेवशरणंव्रज । सएवरक्षकःश्रीशश्शरणागतवत्सलः । इत्युक्तस्सोथबलिभुग्ब्रह्मणारघुनन्दनम् । उपेत्यसहसाभूमौनिपपातभयातुरः । प्राणसंशयमापन्नंदृष्ट्वासीतातुवायसम् । त्राहित्राहीतिभर्तारमुवाचदयिताविभुम् । तच्छिरःपादयोस्तस्ययुयुजेचाथजानकी । तमुत्थाप्यकरेणाथकृपापीयूषसागरः । ररक्षासौनिजास्त्रात्पायतदेकाक्षिददौतदा । वायसोपिमुहुर्नत्वासीतायैराघवायच । स्वर्लोकंप्रययौहृष्टोराघवेणाभिपालितः । ततोरामोमहातेजावैदेह्यालक्ष्मणेनच । उवासचित्रकूटाद्रौस्तूयमानोमहर्षिभिः ।" इति । शि० किञ्चिद्वक्तव्यविषयकौत्सुक्यविशिष्टान् ॥ २ ॥ ति० कथमलक्षयत्तत्राह । नयनैरित्यादि । निर्दिश्य प्रदर्श्य । शङ्किताः रामःकिंमंस्यतइतिभीताः । नयनादिभिःप्रदर्श्यान्योन्यमुपजल्पन्तः आह्वयन्तः । शनैरुपांशुकथाश्चक्रुः । अयंरामइहसस्त्रीकआस्तेराक्षसाश्चैतद्द्वेषेणेहसंचरन्तोस्मान्बाधन्ते । अतोन्यत्रगन्तव्यमित्येवंरूपाःकथाश्चक्रुः ॥ ३ ॥ ति० शङ्कत अशङ्क

[पा०] १ घ.—छ. झ. ञ. ट. यातेतु. २ ङ. छ. झ. ट. स्तदावने. ३ झ. भ्रुकुटीभिश्च. ४ ग. घ. राममुद्दिश्य, ५ ख. शङ्कया. ङ. झ. शङ्कत. ६ ख. तदा. ७ क. ख. ङ. छ. झ. ञ. किंचित्कच्चिन्नावरजस्य. ८ क. लक्ष्मणस्यहिनिर्दिष्टं. छ. लक्ष्मणस्यापिनिर्दिष्टं. ९ ख. नानुकूलं. १० क. च्छुश्रूषमाणापि. ख. ग. च. ञ. च्छुश्रूषमाणावा. ११ क. ग. च. छ. झ. ट. प्रमदाभ्युचितां. १२ घ. ङ. छ. झ. ञ. ट. युक्तां.

अथर्षिर्जरया वृद्धस्तपसा च जरां गतः ॥ वेपमान इवोवाच रामं भूतदयापरम् ॥ ८ ॥
कुतः कल्याणसत्त्वायाः कल्याणाभिरतेस्तथा ॥ चलनं तात वैदेह्यास्तपस्विषु विशेषतः ॥ ९ ॥
त्वन्निमित्तमिदं तावत्तापसान्प्रति वर्तते ॥ रक्षोभ्यस्तेन संविग्नाः कथयन्ति मिथः कथाः ॥ १० ॥
रावणावरजः कश्चित्खरो नामेह राक्षसः ॥ उत्पाट्य तापसान्सर्वाञ्जनस्थाननिकेतनान् ॥ ११ ॥
धृष्टश्च जितकाशी च नृशंसः पुरुषादकः ॥ अवलिप्तश्च पापश्च त्वां च तात न मृष्यते ॥ १२ ॥
त्वं यदाप्रभृति ह्यस्मिन्नाश्रमे तात वर्तसे ॥ तदाप्रभृति रक्षांसि विप्रकुर्वन्ति तापसान् ॥ १३ ॥
दर्शयन्ति हि बीभत्सैः क्रूरैर्भीषणकैरपि ॥ नानारूपैर्विरूपैश्च रूपैर्विकृतदर्शनैः ॥ १४ ॥
अप्रशस्तैरशुचिभिः संप्रयोज्य च तापसान् ॥ प्रतिघ्नन्त्यपरान्क्षिप्रमनार्याः पुरतः स्थिताः ॥ १५ ॥
तेषु तेष्वाश्रमस्थानेष्वबुद्धमवलीय च ॥ रमन्ते तापसांस्तत्र नाशयन्तोऽल्पचेतसः ॥ १६ ॥
अपक्षिपन्ति स्रुग्भाण्डानग्नीन्सिञ्चन्ति वारिणा ॥ कलशांश्च प्रमृद्नन्ति हवने समुपस्थिते ॥ १७ ॥
तैर्दुरात्मभिरामृष्टानाश्रमान्प्रजिहासवः ॥ गमनायान्यदेशस्य चोदयन्त्यृषयोऽद्य माम् ॥ १८ ॥
तत्पुरा राम शारीरीमुपहिंसां तपस्विषु ॥ दर्शयन्ति हि दुष्टास्ते त्यक्ष्याम इममाश्रमम् ॥ १९ ॥
बहुमूलफलं चित्रमविदूरादितो वनम् ॥ पुराणाश्रममेवाहं श्रयिष्ये सगणः पुनः ॥ २० ॥

तपसाचजरांगतः सुदीर्घतपाइत्यर्थः ॥ ८ ॥ कल्याणसत्त्वायाः कल्याणस्वभावायाः । "सत्त्वोस्त्रीजन्तुषुक्लीबोऽध्यवसायेपराक्रमे । आत्मभावेपिशाचादौद्रव्येसत्त्वास्वभावयोः" इतिवैजयन्ती ॥ ९ ॥ त्वन्निमित्तं त्वत्तोहेतोः । रक्षोभ्यःसमागतं इदं वक्ष्यमाणमुपद्रवजातं । तापसान्प्रति वर्तते । तेनरक्षस्संजातोपद्रवेण । संविग्नास्तापसाः । मिथः रहसि । कथाः रक्षोविषयिणीः तदुपद्रवविषयिणीश्चकथयन्ति ॥१०॥ ताएवाह रावणावरजइत्यादिना । श्लोकद्वयमेकंवाक्यं । उत्पाट्य उत्खाय निष्कास्येतियावत् । जितेनजयेन काशतेप्रकाशतइतिजितकाशी । यद्वा जिताहवः । "जितकाशीजिताहवः" इतिहलायुधः ॥११—१२॥ विप्रकुर्वन्ति अपकुर्वन्ति ॥ १३ ॥ बीभत्सैः जुगुप्सितैः । क्रूरैः भीषणकैः भयंकरैः । नानारूपैः अनेकप्रकारैः । विरूपैः लोकविलक्षणसंस्थानैः । विकृतदर्शनैः विकृतदृष्टिभिः । रूपैः शरीरैः । दर्शयन्ति भयमितिशेषः ॥ १४ ॥ अप्रशस्तैः अशुभैः । अशुचिभिः अशुचिद्रव्यैः संप्रयोज्य ॥ १५ ॥ अबुद्धंअविदितंयथाभवतितथा अवलीय निलीय । रमन्ते विहरन्ति । अल्पचेतसः क्षुद्रबुद्धयः ॥ १६ ॥ हवनेसमुपस्थिते होमकर्मणिप्रवृत्ते ॥ १७ ॥ प्रजिहासवः प्रकर्षेणहातुमिच्छवः ॥ १८ ॥ पुरादर्शयन्ति दर्शयिष्यन्ति । यावत्पुरानिपातयोर्लडितिलट् ॥ १९—२० ॥

तेत्यर्थः । शि० कुलपतिं संघाधीशंऋषिंवाल्मीकिं ॥ ४ ॥ वि० स्खलनं स्वभावविपर्यासः । स० अन्तेकथनात्सीतायाबुद्धौपरिवर्तनात्तद्विषयएव । कल्याणसत्वायाःमङ्गलदेव्याः । कल्याणेत्वयिअभिरतिर्यस्यास्सातस्याश्चलनमितिवा । विशेषतइत्यनेन साधारणस्थलेपिमङ्गलकार्याचलनंनास्तीतिसूचयति ॥ ९ ॥ स० काशः मौञ्जीरज्ज्वात्मकः यस्मिन्नाहवेसकाशीत्युच्यते । ततोबहुव्रीहिः "जितकाशीजिताहवः" इतिहलायुधः । ति० जितकाशी जितभयोवा ॥ १२ ॥ स० असृग्भाण्डानि रक्तपात्राणि अवक्षिपन्ति ॥ १७ ॥ ति० प्रजिघांसवः । परित्यक्तुमिच्छवः । मिथोमिलिताः ॥ १८ ॥ ति० अश्वस्य नविद्यतेश्वः संचयो

[पा०] १ छ. परः. २ ख. वृत्तायाः. ३ घ. ङ. छ. झ. ट. रतेस्सदा. ञ. रुचेस्सदा. ४ ख. ञ. स्खलनं. ५ क. च. तातत‍ापसान्. ६ ङ. कथयन्तिस्मतेमिथः. ७ ङ. छ. झ. ट. निवासिनः. ८ क. ख. ङ. च. झ. ञ. ट. रूपैरसुखदर्शनैः. छ. रूपैरसुरदर्शनैः. ९ क. ङ. झ. ञ. ट. संप्रयुज्यच. छ. संप्रसह्यच. १० ख. च. ञ. क्षिप्रमायया. ११ क. ख. घ.—ट. स्थितान्. १२ घ. छ.—ट. अवक्षिपन्ति. १३ न्त्यसृग्भाण्डान्यग्नी. १४ ङ. झ. ञ. ट. प्रमर्दन्ति. १५ क. ख. ङ. च. छ. झ. ञ. ट. राविष्टान्. १६ ग. छ. झ. जिघांसवः. १७ च. झ. ञ. न्त्यृषयोमिथः. १८ क. दर्शयन्तिस्म. ख. दर्शयन्तिसु. १९ ख. च. ञ. त्यक्ष्यामस्त्विमं. २० क. ख. च. ञ. दितोपरं. २१ क. ख. ग. च. ञ. कण्वस्याश्रम. ङ. छ. झ. ट. अश्वस्याश्रम. २२ ख. च. ञ. गमिष्ये.

खरस्त्वय्यपि चायुक्तं पुरा तात प्रवर्तते ॥ सहास्माभिरितो गच्छ यदि बुद्धिः प्रवर्तते ॥ २१ ॥
सकलत्रस्य संदेहो नित्यं यत्तस्य राघव ॥ समर्थस्यापि वसतो वासो दुःखमिहाद्य ते ॥ २२ ॥
इत्युक्तवन्तं रामस्तं राजपुत्रस्तपस्विनम् ॥ न शशाकोत्तरैर्वाक्यैरवरोद्धुं समुत्सुकः ॥ २३ ॥
अभिनन्द्य समापृच्छ्य समाधाय च राघवम् ॥ स जगामाश्रमं त्यक्त्वा कुलैः कुलपतिः सह ॥२४

रामः संसाध्य त्वृषिगणमनुगमनाद्देशात्तस्मात्कुलपतिमभिवाद्य ऋषिम् ॥
सम्यक्प्रीतैस्तैरनुमत उपदिष्टार्थः पुण्यं वासाय स्वनिलयमुपसंपेदे ॥ २५ ॥
आश्रमं त्वृषिविरहितं प्रभुः क्षणमपि न विजहौ स राघवः ॥
राघवं हि सततमनुगता स्तापसाश्चार्षचरितधृतगुणाः ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे षोडशोत्तरशततमः सर्गः ॥११६॥

सप्तदशोत्तरशततमः सर्गः ॥ ११७ ॥

बहुदोषदर्शनेनचित्रकूटवासारोचनात्स्थानान्तरंप्रतिप्रस्थितेनरामेणमध्येमार्गमत्र्याश्रममेत्यतदभिवादनम् ॥ १ ॥ अत्रिणारामंप्रत्यनसूयातपःप्रभाववर्णनपूर्वकंतत्समीपेसीताप्रेपणचोदना ॥ २ ॥ अत्रिभार्ययाऽनसूयया सीतांप्रतितत्प्रशंसनपूर्वकंपातिव्रत्यधर्मोपदेशः ॥ ३ ॥

राघवस्त्वथ यातेषु तपस्विषु विचिन्तयन् ॥ न तत्रारोचयद्वासं कारणैर्बहुभिस्तदा ॥ १ ॥
इह मे भरतो दृष्टो मातरश्च सनागराः ॥ सा च मे स्मृतिरन्वेति तान्नित्यमनुशोचतः ॥ २ ॥

अयुक्तमितिक्रियाविशेषणं । पुराप्रवर्तते प्रवर्तिष्यते ॥ २१ ॥ संदेहः संदेहजनकः । यत्तस्य संनद्धस्य । दुःखं दुःखहेतुः ॥ २२ ॥ उत्तरैर्वाक्यैरवरोद्धुंनशशाक मयिवर्तमानेयुष्माकंकाभीतिः अहमेवपरितो रक्षामीत्युत्तरवाक्यैर्निरोद्धुंनशशाक ॥ २३ ॥ कुलैः ऋषिसंघातैः । " कुलंसंघातवंशयोः " इतिवैजयन्ती ॥ २४ ॥ रामः ऋषिगणंतस्माद्देशात् आश्रमप्रदेशात् । अनुगमनात् संसाध्य प्रस्थाप्य । कुलपतिमभिवाद्य तैरुपदिष्टार्थः उपदिष्टप्रयोजनःसन् । वासायपुण्यंस्वनिलयं । उपसंपेदेइतिसंबन्धः ॥२५॥ राघवः ऋषिविरहितमप्याश्रमंक्षणंनविजहौ मुनिशून्यतयातदैवत्याज्यमप्याश्रमं मुनिविषयप्रेम्णाक्षणंन त्यक्तवानित्यर्थः । आर्षचरितधृतगुणाः रामस्यार्षचरित्रेणसंचितगुणाः हियस्मात्कारणात् तापसाः राममनुगताःतस्मात् तत्प्रेम्णा क्षणंनजहाविति । वृत्तं तुश्लोकद्वयस्यापिचिन्त्यम् ॥ २६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने षोडशोत्तरशततमः सर्गः ॥ ११६ ॥

अथरामस्यात्र्याश्रमप्रवेशः सप्तदशोत्तरशततमे ॥ १ ॥ बहुकारणान्येवाह इहमइत्यादिना ॥ २ ॥

यस्यतस्यमहर्षेः । स० पृषोदरादित्वात्साधु । एतेनरक्षोभयनिवारणक्षमत्वंतस्यदर्शितं ॥ २० ॥ ति० नित्ययुक्तस्यापि सदासावधानस्यापि । रक्षोनिग्रहेसमर्थस्यापि सकलत्रस्य । हेतुगर्भमेतत् ॥ इहाश्रमे । सन्देहः सन्देहवानेववासः । अर्शआद्यच् । अतस्त्वयाप्यत्रावस्थानमनुचितमितिव्यङ्ग्यं ॥ २२ ॥ शि० राघवं अभिनन्द्य प्रशस्य । समाश्वास्य समाश्वासनंकृत्वा । समाधाय चित्तेनिधाय ॥ २४ ॥ इतिषोडशोत्तरशततमस्सर्गः ॥ ११६ ॥

ति० अनुविचिन्तयन् वक्ष्यमाणलक्षणमुपाधिं ॥ १ ॥ ति० मे मया । सामेस्मृतिः मांनित्यमनुशोचतस्तानन्वेति विषयी-

[पा०] १ ख. ङ. च. झ. ञ. ट. राम. २ क.—घ. छ. झ. नित्ययुक्तस्य. ङ. च. ञ. ट. नित्यंयुक्तस्य. ३ ख.—छ. ञ. ट. हिसतो. झ. सहितो. ४ ख. च. बहुधा. ग. घ. ज. रामस्तु. ५ ख.च.—ट. रवबद्धुं. ६ क.—घ. च.—ट. समुत्सुकं. ७ ट. समाश्वास्य. ८ घ. ङ. च. झ. ञ. ट. संसाध्यऋषिगणं. ९ ख. च. ञ. गमनात्तस्माद्देशात्. १० च. रनुगमनउप. ११ ग. घ. च. ञ. मभिसंपेदे. क. ख. मभिसंप्रपेदे. १२ च. आश्रमंऋषिगणरहितं. झ. आश्रमम्दृषि. १३ क. ग. ङ. छ. झ. ञ. ट. नजहौ. १४ क. राघवंसतत. १५ क. ख. ज. ट. श्चर्षिचरिते. ङ. छ. झ. ञ. श्चार्षचरिते. घ. श्चार्षचरितगृहीतधृत. १६ ख. ग. ङ च. छ. झ. ञ. ट. स्तपयातेषु. १७ ङ. झ. ट. सर्वेष्वनुविचिन्तयन्. क. तपस्विष्वनुचिन्तयन्.

स्कन्धावारनिवेशेन तेन तस्य महात्मनः ॥ हयहस्तिकरीषैश्च [1]उपमर्दः कृतो भृशम् ॥ ३ ॥
[2]तस्मादन्यत्र [3]गच्छाम इति संचिन्त्य राघवः ॥ प्रातिष्ठत स वैदेह्या लक्ष्मणेन च [4]संगतः ॥ ४ ॥
सोऽत्रेराश्रममासाद्य [5]तं ववन्दे महायशाः ॥ [6]तं चापि भगवानत्रिः पुत्रवत्प्रत्यपद्यत ॥ ५ ॥
स्वयमातिथ्यमादिश्य सर्वम[7]स्य सुसत्कृतम् ॥ सौमित्रिं च [8]महाभागां सीतां च समसान्त्वयत् ॥६॥
पत्नीं च [9]समनुप्राप्तां वृद्धामामन्त्र्य सत्कृताम् ॥ सान्त्वयामास [10]धर्मज्ञः सर्वभूतहिते रतः ॥ ७ ॥
अनसूयां महाभागां तापसीं धर्मचारिणीम् ॥ प्रतिगृह्णीष्व वैदेहीमब्रवीदृषिसत्तमः ॥
रामाय चाचचक्षे तां तापसीं धर्मचारिणीम् ॥ ८ ॥
दशवर्षाण्यनावृष्ट्या दग्धे लोके निरन्तरम् ॥ यया मूलफले सृष्टे जाह्नवी च प्रवर्तिता ॥ ९ ॥
उग्रेण तपसा युक्ता नियमैश्चाप्यलंकृता ॥ दशवर्षसहस्राणि यया तप्तं महत्तपः ॥ १० ॥
अनसूया [11]व्रतैः स्नाता प्रत्यूहाश्च [12]निवर्तिताः ॥ देवकार्यनिमित्तं च यया संत्वरमाणया ॥
दशरात्रं कृता रात्रिः सेयं मातेव तेऽनघ ॥ ११ ॥

स्कन्धावारनिवेशेन सेनानिवेशेन।करीषैश्चउपमर्दइत्यत्रवाक्यसंहितायाअनित्यत्वान्नसंधिकार्यं। "पदेपुसंहितानित्यानित्याधातूपसर्गयोः। नित्यासमासेवाक्येतुसाविवक्षामपेक्षते" इतिवचनात् ॥ ३ ॥ प्रातिष्ठत प्रस्थितः ॥ ४—५ ॥ आतिथ्यमादिश्य आतिथ्यं कृत्वा ॥ ६ ॥ सत्कृतां सर्वैः सत्कृताम् ॥ ७ ॥ प्रतिगृह्णीष्वेत्यत्र इतिकरणंद्रष्टव्यं ॥ ८ ॥ दशवर्षाणीत्यारभ्य सेयंमातेवतेनघेत्यन्तमेकंवाक्यं । दशवर्षाण्यनावृष्ट्यालोकेदग्धेसति ययास्वतपोमहिम्ना निरन्तरं मूलफलेसृष्टे जाह्नवीचप्रवर्तिता । ययादशवर्षसहस्राणिमहत्तपस्तप्तं कृतं। ययाव्रतैः कृच्छ्रचान्द्रायणादिभिः। प्रत्यूहाः तपोविघ्नाश्च।निवर्तिताः निरस्ताः। देवकार्यनिमित्तंसंत्वरमाणयायया दशरात्रमेकारात्रिश्चकृता दशरात्रावधिकःकालएकरात्रत्वेन कृतइत्यर्थः। इयंकथापुराणेषुद्रष्टव्या । उग्रेणतपसायुक्ता नियमैश्चाप्यलंकृता सेयमनसूया तेमातेव मातृवत्पूजनीयेत्यर्थः ॥ ९—

करोति। एवंचताशब्दतत्स्मरणेनममापिशोकोवर्धतइतिभावः ॥ २ ॥ ति० राजधानीतोनिर्गतायास्सेनायानिवासस्थानं स्कन्धावारः। तेन पुरतोदृश्यमानेन। अनेनस्मृत्युद्बोधकमुक्तं। उपमर्दः भूमेरशुचिता। स० स्कन्धावाराः शिविराणि ॥ शि० स्कन्धावारः सेनासमूहः तस्यनिवेशेन निवासेनहेतुना ॥ ३ ॥ ति० तमपिजगत्कारणमपिरामंलोकव्यवहारानुसारेणपुत्रवदङ्गीचकार आलिङ्गनमूर्धाघ्राणादिभिः ॥ ती० ववन्दे। वस्तुतस्तु–ववन्दे अस्तौषीत्। पुत्रवत् पुंसः पुरुषान् भक्तान् त्रायतेइतिपुत्रः। तद्वत्। प्रत्यपद्यत ईश्वरत्वेनप्राप्तवानित्यर्थः ॥ ५ ॥ ति० तं देशं । अनुप्राप्तां । वाचा सत्कृतां । आमन्त्र्य संबोध्य । सान्त्वयामास प्रीत्यासीतांदर्शयामास । अनन्तरंवैदेहींप्रतिगृह्णीष्वेत्यब्रवीदित्यर्थः। स० सान्त्वयामास कुशलप्रश्नादिनातोषयामास ॥ ७ ॥ शि० तापसीं परमात्मविचारनिरतां ॥ ८ ॥ ति० फलमूले ऋषीणांजीवनायेतिशेषः । जाह्नवीचप्रवर्तिता। दशवर्षमनावृष्ट्याभूमेर्निर्जलत्वात्तेषांस्नानार्थमन्त्रसिद्धिवैभवेनावाहिता। स्वाश्रमेइतिशेषः ॥ ९ ॥ ति० अनसूयाव्रतैः तत्कृतैर्व्रतैः स० दशरात्रं चात्संख्याव्ययादेः इत्युक्तेरच्। देवकार्यनिमित्तं। अत्रेयंकथापौराणिकी। अनसूयायाःकाचनसखीपतिव्रताऽभूत्। साचकांचनवेश्यांदृष्ट्वातत्संगंकामयमानंस्वपतिंस्वस्कन्धेसमारोप्यतद्गृहंगन्तुमारेभे । तत्समयेमाण्डव्यऋषिश्चोरबुद्ध्याराजभटैश्शूले समारोपितः। सचमार्गेपतिव्रतायाः पत्यापदास्पृष्टोतीवव्यथितोभूत्। तंचदशाहाभ्यन्तरेसूर्योदयेसतिम्रियस्वेतिशशापमाण्डव्यः। ततस्तद्भार्यासूर्योदयानन्तरंकिलमद्भर्तुर्मरणं सएवमाभूदित्यूचे। ततश्चतत्प्रभावात्सूर्येऽनुदितेयज्ञादिलोपेप्राप्ते देवाब्रह्माणमासाद्य प्रार्थयामासुः। सचावादीत् तत्सखीमनसूयांप्रार्थयत। साभवत्कार्यं करोतीति । ततस्तैः प्रार्थितासत्यनसूया दशरात्रावधिकालमेकरात्रित्वेनकृत्वासूर्योदयानन्तरंतद्भर्तुर्मरणेसतिपुनरुज्जीवयिष्यामइतिवरंददतेत्युक्त्वातैर्वरंगृहीत्वादेवकार्यंकृतवतीति ॥ ११ ॥

[पा०] १ ग. च. ञ. ह्युपमर्दः. २ ख. अस्मादन्यत्र. ३ च. छ. ट. गच्छामि. ४ क. संवृतः. ५ च. ञ. ववन्देतं. ६ ख. च. छ. ञ. तंचसभगवान्. ७ ज. मर्घ्यं. ८ क. ख. ङ. छ. झ. ञ. ट. महाभागं. ९ ङ. छ. झ. ट. तमनुप्राप्तां. १० च. ञ. सर्वज्ञः. ११ ख. व्रतस्नाता. क, ग.—ट. व्रतैस्तात. १२ क.—घ. छ. ज. झ. ट. निवर्हिताः.

तामिमां सर्वभूतानां नमस्कार्यां [1]यशस्विनीम् ॥ अभि[2]गच्छतु वैदेही वृद्धामक्रोधनां [3]सदा ॥ १२ ॥
[4]अनसूयेति या लोके कर्मभिः ख्यातिमागता ।[तां शीघ्रमभिगच्छ त्वमभिगम्यां तपस्विनीम्]॥१३॥
एवं ब्रुवाणं तमृषिं तथेत्युक्त्वा स राघवः ॥ सीता[5]मुवाच धर्मज्ञामिदं वचन[6]मुत्तमम् ॥ १४ ॥
राजपुत्रि श्रुतं त्वेतन्मुनेरस्य समीरितम् ॥ श्रेयोर्थमात्मनः शीघ्रमभिगच्छ तपस्विनीम् ॥ १५ ॥
सीता त्वेतद्व[7]चः श्रुत्वा राघवस्य हि[8]तैषिणः ॥ तामत्रिपत्नीं धर्मज्ञामभिचक्राम मैथिली ॥ १६ ॥
शिथिलां वलितां वृद्धां जरापाण्डुरमूर्धजाम् ॥ सततं वेपमानाङ्गीं प्रवाते [9]कदली यथा ॥ १७ ॥
[10]तां तु सीता महाभागामनसूयां पतिव्रताम् ॥ अभ्यवादयदव्यग्रा [11]स्वनाम समुदाहरत् ॥ १८ ॥
अभिवाद्य च वैदेही तापसीं तामनिन्दिताम् ॥ बद्धाञ्जलिपुटा हृष्टा पर्यपृच्छदनामयम् ॥ १९ ॥
ततः सीतां महाभागां दृष्ट्वा तां धर्मचारिणी ॥ सान्त्वयन्त्यब्रवीद्धृष्टा दिष्ट्या धर्ममवेक्षसे ॥२०॥
त्यक्त्वा ज्ञातिजनं सीते मानमृद्धिं च भामिनि ॥ अवरुद्धं वने रामं दिष्ट्या त्वमनुगच्छसि ॥२१॥
नगरस्थो वनस्थो वा [12]पापो वा यदि वा शुभः ॥ यासां स्त्रीणां प्रियो भर्ता तासां लोका महोदयाः २२
दुःशीलः कामवृत्तो वा [13]धनैर्वा परिवर्जितः ॥ स्त्रीणामार्यस्वभावानां परमं दैवतं पतिः ॥ २३ ॥
नातो विशिष्टं पश्यामि बान्धवं विमृशन्त्यहम् ॥ सर्वत्र योग्यं वैदेहि तपःकृतमिवाव्ययम् ॥ २४॥
[14]न त्वेनमवगच्छन्ति गुणदोषमसत्स्त्रियः ॥ [15]कामवक्तव्यहृदया भर्तृनाथाश्चरन्ति याः ॥ २५ ॥

---

११ ॥ या कर्मभिरनन्यशक्यैः परानुग्रहार्थतपोविशेषैः । अनसूया असूयारहितेतिलोकेख्यातिमागता । यद्वाकर्मभिः पातिव्रत्यवर्धकैःअन्याभिःकर्तुमशक्यैःपतिरक्षणादिकर्मभिः । अनसूया अस्पर्धनीयमाहात्म्ययुक्तत्वादसूयितुमशक्या इतिलोकेख्यातिमागता तामिमांवैदेही अभिगच्छत्वितिसंबन्धः ॥१२॥१३—१६॥ शिथिलामित्यादिश्लोकद्वयमेकान्वयम् । शिथिलां श्लथसंधिबन्धावयवसंनिवेशां । वलितां संजातवलिकाम् ॥ १७—१८॥ अनामयं आरोग्यं । "अनामयंस्यादारोग्यं" इत्यमरः ॥ १९ ॥ दिष्ट्या भाग्येन । धर्ममवेक्षसे पातिव्रत्यधर्ममवधानेनसमीक्षसे ॥२०॥ ज्ञातिजनं बन्धुजनं । मानमहंकारं । वनेअवरुद्धं चतुर्दशवर्षाणिवनेवस्तव्यमितिपित्रानियुक्तं ॥ २१—२३ ॥ सर्वत्रयोग्यं सर्वावस्थासुरक्षणसमर्थं ॥ २४॥ कामवक्तव्यहृदयाः कामविषयवक्तव्यहृदयाः कामरूपार्थाभिलाषिण्यइतियावत् । यद्वा मदनविधेयहृदयाः। भर्तृनाथाः भर्तृणांनाथभूताः भर्तृनियामिकाइत्यर्थः । यद्वा भर्तारंनाथन्तेयाचन्तइतितथा परपुरुषकाङ्क्षिण्य

ति० ननुवैदेह्याअल्पवयस्त्वेनव्यवहारानभिज्ञत्वात्क्वचिद्व्यवहारेस्खलनेऽनर्थस्स्यादतआह—अक्रोधनांसदेति ॥ १२ ॥ रामानु० श्रेयोर्थमात्मनश्शीघ्रमभिगच्छतपस्विनीमित्यतःपरं सीतात्वेतदित्यादिश्लोकः । ति० अस्यमुनेःसमीरितंवचनंयतश्श्रुतं अतआत्मनश्श्रेयोर्थमित्यादि ॥ १५ ॥ ति० तां अनसूयेत्यन्वर्थनाम्नीं । अभिगम्यां अक्रोधनत्वात् ॥ ति० समुदाहरत् । अभिवादनांगत्वेनेतिशेषः ॥ १८ ॥ ति० अनामयमिति तपस्विनांस्वायत्तकुशलतयाऽऽरोग्यप्रश्नएवोचितइतिभावः ॥ १९ ॥ ति० धर्मचारिणीं भर्तृसमानधर्मचारिणीं । दिष्ट्या दैवयोगेन ॥ २० ॥ ति० मानं राजसुताऽहंकथंवनंगच्छेयमित्येवंरूपं ॥२१॥ ति० शुभः अनुकूलः । अशुभः प्रतिकूलः । प्रियः लौकिकालौकिकनिमित्ततोप्रियत्वानास्पदं ॥ २२ ॥ ति० अतोविशिष्टं भर्तुर्विशिष्टं । बान्धवं इष्टबन्धुं । सर्वत्रयोग्यं इहामुत्रचेष्टसाधनतयाभजनयोग्यं । तपःकृतं भावेनिष्ठा । तपोनुष्ठानमितियावत् ॥ २४ ॥ ति० कामवक्तव्यहृदयाः कामाधीनहृदयाः । " गृह्याधीनौतुवक्तव्यौ " इत्यमरः । भर्तृनाथाः भर्तृणांनाथभूतास्तन्नियन्त्र्यः । यद्वा भर्तॄन्भोगार्थंनाथन्तेयाचन्तेताःपरपुरुषकांक्षिण्यः । ताश्चरन्ति स्वेच्छयाइतस्ततोयान्ति । स० कामवक्तव्यहृदयाः यथाकामं

[पा०] १ ङ. च. झ. ञ. ट. तपस्विनीं २ ख. गच्छेत्तु. ३ ख. च. ञ. सतीं. ४ अनसूयेत्यर्धं तांशीघ्रमित्युत्तरार्धसहितं सीतात्वेतदितिश्लोकात्पूर्वं राजपुत्रिश्रुतमितिश्लोकात्परं घ.—छ. झ. ञ. ट. पुस्तकेपुदृश्यते. ५ ङ. छ. झ. ट. मालोक्य. ६ ङ. छ. झ. ट. मब्रवीत्. ७ क. च. ञ. चैतद्वचः. छ. तद्वचनं. ८ ङ. छ. ट. यशस्विनी. क. घ. हितैषिणी. ९ ङ. छ. झ. ट. कदलीमिव. १० ज. ततःसीतामहाभागादृष्ट्वातांधर्मचारिणीम्. ११ ख. घ. च. छ. झ. ट. स्वंनाम. १२ च. पापीवा. ख. ङ. छ. झ. ञ. ट. शुभोवायदिवाऽशुभः. १३ ख. घ. धनीवायदिवाऽधनः. १४ क.—ज. ञ. ट. नेत्थमव. झ. नत्वेवमनु. १५ ख. काममव्यक्तहृदया.

प्राप्नुवन्त्ययशश्चैव धर्मभ्रंशं च मैथिलि ॥ अकार्यवशमापन्नाः स्त्रियो याः खलु तद्विधाः ॥ २६ ॥
[1]त्वद्विधास्तु गुणैर्युक्ता दृष्टलोकपरावराः ॥ स्त्रियः स्वर्गे चरिष्यन्ति यथा धर्म[2]कृतस्तथा ॥ २७ ॥
[3]तदेवमेनं त्वमनुव्रता सती पतिव्रतानां समयानुवर्तिनी ॥
भव स्वभर्तुः सहधर्मचारिणी यशश्च धर्मं च ततः समाप्स्यसि ॥ २८ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे सप्तदशोत्तरशततमः सर्गः ॥ ११७

अष्टादशोत्तरशततमः सर्गः ॥ ११८ ॥

सीतयाऽनसूयांप्रतिरामगुणगणानुवर्णनपूर्वकंकैमुत्येनतस्मिन्स्वेननिरुपचरितोपचारकरणोक्तिः ॥ १ ॥ तथास्वस्यपूर्वमेव मात्राद्युपदेशेनपातिव्रत्यधर्माभिज्ञत्वकथनपूर्वकंतदुपदेशप्रशंसनम् ॥ २ ॥ अनसूययास्वस्यतपस्समृद्धिमत्त्वकथनेनाभीष्टार्थवरणचोदनेप्यनिच्छन्त्यैसीतायैपरितोषाद्दिव्यमाल्याभरणादिदानम् ॥ ३ ॥ सीतयाऽनसूयांप्रतितच्चोदनयास्वस्वयंवरादिवृत्तान्तप्रतिपादनम् ॥ ४ ॥

सा त्वेवमुक्ता वैदेही [4]त्वनसूयाऽनसूयया ॥ प्रतिपूज्य वचो मन्दं प्रवक्तुमुपचक्रमे ॥ १ ॥
[5]नैतद[6]दाश्चर्यमार्याया यन्मां [7]त्वमनुभाषसे ॥ विदितं तु ममाप्येतद्यथा नार्याः पतिर्गुरुः ॥ २ ॥
यद्यप्येष भवेद्भर्ता [8]ममार्ये [9]वृत्तवर्जितः ॥ [10]अद्वैधमुपचर्तव्यस्तथाप्येष मया भवेत् ॥ ३ ॥
किंपुनर्यो गुणश्लाघ्यः सानुक्रोशो जितेन्द्रियः ॥ स्थिरानुरागो धर्मात्मा [11]मातृवत्पितृवत्प्रियः ॥४॥
यां वृत्तिं वर्तते रामः कौसल्यायां [12]महाबलः ॥ [13]तामेव नृपनारीणामन्यासामपि वर्तते ॥ ५ ॥

इत्यर्थः ॥ २५—२७ ॥ समयानुवर्तिनी आचारानुवर्तिनी । "समयाः शपथाचारकालसिद्धान्तसंविदः" इत्यमरः । भर्तुः सहधर्मचारिणीभवस्व भव । आर्षमात्मनेपदं । ततः भर्तुः सहधर्मचारित्वेन । यशश्च धर्मंच कालान्तरानुभाव्यसुखसाधनमदृष्टंच समाप्स्यसि । यद्वा भर्तुः सहधर्मचारिणी । एवंभूतात्वं ततः भर्तुस्सहधर्मचारित्वरूपहेतोःयशश्चभवस्वप्राप्नुहीत्यर्थः । धर्मंचसमाप्स्यसि । भूप्राप्तावात्मनेपदीतिगणपाठात् प्राप्त्यर्थस्सभवतेरात्मनेपदं । पातिव्रत्यधर्मेण सर्वैःश्लाघांप्राप्य कालान्तरेतज्जन्यादृष्टद्वारानिरतिशयंश्रेयःसमवाप्स्यसीत्यर्थः । इतिधर्मचारिण्यनसूयासीतामब्रवीदितिसंबन्धः ॥ २८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने सप्तदशोत्तरशततमः सर्गः ॥ ११७ ॥

अथसीताऽनसूयासंवादोऽष्टादशोत्तरशततमे।अनसूया असूया रहिता। पातिव्रत्यधर्मोपदेशं गुणत्वेनगृहीतवतीत्यर्थः ॥१—२॥ अद्वैधं द्वैधीभावरहितं । उपचर्तव्यः गुणवत्त्वनिर्गुणत्वभेदंविहायसम्यगुपचरणीयइत्यर्थः ॥ ३ ॥ मातृवत्प्रियः प्रियपरत्वात् । पितृवत्प्रियः अत्यंतहितपरत्वेन ॥ ४ ॥ नृपनारीणां

वचनशीलाः । गुणदोषं "सर्वोद्वन्द्वोविभाषयैकवद्भवति" इत्येकवद्भावःगुणेनसहितोदोषइत्युत्तरपदलोपोवा ॥२५॥ ति० दृष्टोलोकः परोऽवरश्चयाभिस्ताः । स० दृष्टाः लोकेपराअवराश्चयाभिस्ताः ॥ २७ ॥ इतिसप्तदशोत्तरशततमस्सर्गः ॥ ११७ ॥

ति०अनुभाषसे शिक्षयसि । नार्यागुरुःपतिरितियथाभवत्योपदिष्टंएतद्विदितं एतद्विषयकंज्ञानंममापि ॥ २ ॥ ती० एषमेभर्तावृत्तिवर्जितोयद्यपि ॥ ति० एषभर्तायद्यप्यनार्यः पूज्यनरित्रहीनः । वृत्तिवर्जितः जीवनरहितः दरिद्रश्चभवेत् । तथापि मया मद्विधया । अत्र भर्तरि । अद्वैधंप्रकारद्वयरहितंयथाभवतितथा वर्तव्यं वर्तितव्यं । प्रीतिप्रकारेणैववर्तितव्यमित्यर्थः ॥ ३ ॥ ती०

[पा०] १ घ. तद्विधास्तु. २ क. ख. ग. ङ. च. छ. झ. ञ. ट. पुण्यकृतः. ३ ङ. छ. झ. ट. तदेवमेतं. ग. तदेतमेवं. ४ ख. च. ञ. ह्यनसूया. ज. अनसूया. ५ क. नतदाश्चर्यं. ६ ख. ग. छ. ज. झ. ट. मार्यायां. ७ ख. ग.घ. ज. मभिभाषसे. ८ ङ. च. छ. झ. ञ. ट. अनार्यो. क. ख. ममार्यो. ९ ख. वित्तवर्जितः. ङ. छ. ज. झ. ट. वृत्तिवर्जितः. १० ङ. छ. झ. ट. अद्वैधमत्रवर्तव्यं. घ. अवश्यमुपचर्तव्यः. ११ ग. घ. च. ज. ञ. मातृवर्तीपितृप्रियः. क. मातृवर्तीपितुःप्रियः. १२ क. ख. ग. महायशाः. १३ घ. तांवृत्तिं.

सकृद्दृष्टास्वपि स्त्रीषु नृपेण नृपवत्सलः ॥ मातृवद्वर्तते [1]वीरो मानमुत्सृज्य धर्मवित् ॥ ६ ॥
आगच्छन्त्याश्च विजनं वनमेवं भयावहम् ॥ [2]समाहितं मे श्वश्र्वा च [3]हृदयेतद्धृतं महत् ॥ ७ ॥
[4]पाणिप्रदानकाले च यत्पुरा त्वग्निसंनिधौ ॥ [5]अनुशिष्टा जनन्याऽसि वाक्यं तदपि मे धृतम् ॥८॥
[6]नवीकृतं च तत्सर्वं [7]वाक्यैस्ते धर्मचारिणि ॥ पतिशुश्रूषणान्नार्यास्तपो नान्यद्विधीयते ॥ ९ ॥
सावित्री पतिशुश्रूषां कृत्वा स्वर्गे महीयते ॥ तथावृत्तिश्च याता त्वं पतिशुश्रूषया दिवम् ॥ १० ॥
वरिष्ठा सर्वनारीणामेषा च दिवि देवता ॥ रोहिणी न विना चन्द्रं मुहूर्तमपि दृश्यते ॥ ११ ॥
एवंविधाश्च प्रवराः स्त्रियो भर्तृदृढव्रताः ॥ देवलोके महीयन्ते पुण्येन स्वेन कर्मणा ॥ १२ ॥
ततोऽनसूया संहृष्टा श्रुत्वोक्तं सीतया वचः ॥ शिरस्याघ्राय चोवाच मैथिलीं हर्षयन्त्युत ॥ १३ ॥
नियमैर्विविधैराप्तं [8]तपो हि महदस्ति मे ॥ तत्संश्रित्य बलं सीते छन्दये त्वां [9]शुचिस्मिते ॥ १४ ॥
[10]उपपन्नं मनोज्ञं च वचनं तव मैथिलि ॥ प्रीता चास्[11]म्युचितं किं ते करवाणि [12]ब्रवीहि मे ॥ १५ ॥
तस्यास्तद्वचनं श्रुत्वा विस्मिता मन्द[13]विस्मया ॥ कृतमित्यब्रवीत्सीता तपोबलसमन्विताम् ॥ १६ ॥
सा त्वेवमुक्ता धर्मज्ञा तया प्रीततराऽभवत् ॥ सफलं च [14]प्रहर्षं ते हन्त सीते करोम्यहम् ॥ १७ ॥
इदं दिव्यं [15]वरं माल्यं वस्त्रमाभरणानि च ॥ अङ्गरागं च वैदेहि [16]महार्हं चानुलेपनम् ॥ १८ ॥

सप्तम्यर्थेषष्ठी ॥५—६ ॥ श्वश्र्वा कौसल्यया। यत्पातिव्रत्यधर्माचरणंसमाहितं उपदिष्टमित्यर्थः ॥७—९॥ तथावृत्तिस्त्वंचदिवंयातेत्युक्तिः पातिव्रत्यतपोमाहात्म्येनस्वर्गस्यहस्तगतत्वात् ॥ १०—११ ॥ भर्तृदृढव्रताः अतिसंकटदशायामपिभर्तृविषयदृढव्रतयुक्ताः ॥ १२ — १३ ॥ छन्दये वरंवृणीष्वेतिप्रार्थये ॥ १४ — १५ ॥ मन्दविस्मया मन्दस्मितेत्यर्थः ॥१६॥ प्रहर्षं ते तुभ्यं। सफलंकरोमि करिष्यामि ॥ १७ ॥ अङ्गरागः कुङ्कुमहरिचन्दनादिः । अनुलेपनं कर्पूरागरुकस्तूरीप्र-

मातृवर्ती मातृशुश्रूषकः । पितृप्रियः पितुःप्रीतिविषयइत्यर्थः । **ति०** मातृवत्पितृवत्प्रियः । मयीतिशेषः । प्रियः प्रीतिमान् । ममेतिवाशेषः । प्रीतिविषयइत्यर्थः । ४ । **ति०** अन्यासामपि नृपनारीणांसुमित्रादीनांविषयेपीत्यर्थः । तथा अन्यासामपिविषये मदतिरिक्तस्त्रीमात्रविषयेपि । तामेववृत्तिंकुरुतइत्यर्थः । नृपनारीणामित्यनेनैवसुमित्रादीनांलाभादित्यन्ये ॥ ५ ॥ **ति०** नृपेण दशरथेन । मानं अहंमहाप्रभुरित्यभिमानंत्यक्त्वेत्यर्थः । अन्यमते उक्तार्थंसत्यत्वप्रत्यायनायैतदुक्तिरितिबोध्यं । **स०** सकृद्दृष्टासु भुक्तासु ॥ ६ ॥ **ति०** यच्च स्वैः आत्मीयैर्बन्धुवर्गैः । पतिशुश्रूषणादिप्रकारैर्बोधितमर्थजातं तच्चमेनविस्मृतंत्वित्यर्थः ॥ ९ ॥ **स०** सावित्री सत्यवान्नामकश्चिद्राजा तस्यपत्नी । सावनेमृतंस्वभर्तारं यमंप्रतोष्यतद्वरादुज्जीवितवतीत्यादिकथाज्ञेया । यातेतिसिद्धवत्कृत्योक्तिः ॥ **ति०** तथावृत्तिः सावित्रीसमानवृत्तिः । **कतक०** तपोर्थमिहवर्तमानापिपतिसेवयामूर्त्यन्तरेणदिवंयातेत्यर्थः ॥१०॥ **शि०** दिवं समस्तसिद्धिप्राप्तिजनितातिप्रमोदंयाता । **ति०** रोहिणीति । पूर्वकृतपतिशुश्रूषावशादेवंपतिसाहित्यंप्राप्तमितिभावः ॥ ११ ॥ **ति०** प्रवराःस्त्रियः अरुन्धत्यादयः ॥ १२ ॥ **ति०** विस्मिता जाताश्चर्या । अहोतपसोमाहात्म्यंयन्ममापिवरदानेसामर्थ्यं । कृतं भवत्याअनुग्रहेणैवसर्वंमेपूर्णंनकिंचित्कर्तव्यमस्तीतिभावः । **शि०** अविस्मितातदैश्वर्यविषयकविस्मयरहिता ॥ १६ ॥ **ति०** तया लोभरहितवाचा । प्रहर्षं लोभराहित्यजंस्वनिष्ठं। ते त्वद्विषयं ॥ **वि०** तेप्रकर्षं त्वन्निष्ठमेवदिव्यवैभवं । त्वत्पूजनेनस्वात्मनिसफलं फलजनकंकरोमीत्यर्थः । हंतेतिहर्षे ॥ १७ ॥ **ति०** उद्वर्तनेनाङ्गानिरञ्जयतीत्यङ्गरागः केसरचन्दनादिजः । अनुलेपनंतुकर्पूरागरुकस्तूरीकक्कोलैर्यक्षकर्दमइत्युक्तप्रकारोदिव्यगन्धद्रव्यकल्पइतितीर्थः । कतकस्तु अङ्गरागं अङ्गरञ्जनकरं अनुलेपनं

[पा०] १ घ. धीरो. ख. रामो. २ क. ङ. छ.—ट. हितंहिमेश्वश्र्वा. ख. हितंतुमेश्वश्र्वा. ३ ख. ङ. छ. झ. ञ. ट. हृदयेयत्स्थिरंमम. ग. हृदयेऽवस्थितंमहत्. क. च. हृदयेयत्स्थितंमम. ४ ग. ग्रहणकाले. ५ ङ. च. झ. ञ. ट. अनुशिष्टं. ६ ङ. च. छ. झ. ञ. नविस्मृतंतुमेसर्वं. ट. नवीकृतंचमेसर्वं. ७ झ. वाक्यैस्स्वैर्धर्मे. ८ ग. तपोभिर्महत्. ९ क. ख. ग. ङ. च. झ. ट. शुचिव्रते. १० क.—छ. झ. ञ. ट. उपपन्नंच युक्तंच. ११ क. स्म्युच्यतांकिंते. झ. ट. स्म्युच्यतांसीते. १२ ख. च. ञ. ब्रवीहितत्. ङ. झ. ट. प्रियंचकिं. १३ ख. ग. विस्मिता. १४ च. ञ. प्रकर्षं. १५ क. ग. परं. १६ क. ख. ङ. च. छ. झ. ञ. ट. महार्हमनु.

मया दत्तमिदं सीते तव गात्राणि शोभयेत् ॥ [1]अनुरूपमसंक्लिष्टं नित्यमेव भविष्यति ॥ १९ ॥
अङ्गरागेण दिव्येन लिप्ताङ्गी जनकात्मजे ॥ शोभयिष्यसि भर्तारं यथा श्रीर्विष्णुमव्ययम् ॥ २० ॥
सा वस्त्रमङ्गरागं च भूषणानि स्रजस्तथा ॥ मैथिली प्रतिजग्राह प्रीतिदानमनुत्तमम् ॥ २१ ॥
प्रतिगृह्य च तत्सीता प्रीतिदानं यशस्विनी ॥ श्लिष्टाञ्जलिपुटा [2]तत्र [3]समुपास्त [4]तपोधनाम् ॥ २२ ॥
तथा सीतामुपासीनामनसूया दृढव्रता ॥ वचनं प्रष्टुमारेभे [5]कांचित्प्रियकथामनु ॥ २३ ॥
स्वयंवरे किल प्राप्ता त्वमनेन [6]यशस्विना ॥ राघवेणेति मे सीते कथा श्रुतिमुपागता ॥ २४ ॥
तां कथां श्रोतुमिच्छामि [7]विस्तरेण च मैथिलि ॥ [8]यथाऽनुभूतं कात्स्न्र्येन [9]तन्मे त्वं वक्तुमर्हसि ॥ २५ ॥
एवमुक्ता तु [10]सा सीता [11]तां ततो धर्मचारिणीम् ॥ श्रूयतामिति [12]चोक्त्वा वै कथयामास तां कथाम् २६
[13]मिथिलाधिपतिर्वीरो जनको नाम धर्मवित् ॥ [14]क्षत्रधर्मेह्यभिरतो न्यायतः शास्ति मेदिनीम् ॥ २७ ॥
तस्य लाङ्गलहस्तस्य [15]कर्षतः क्षेत्रमण्डलम् ॥ अहं किलोत्थिता भित्त्वा जगतीं नृपतेः सुता ॥ २८ ॥
स मां [16]दृष्ट्वा नरपतिर्मुष्टिविक्षेपतत्परः ॥ पांसुकुण्ठितसर्वाङ्गीं [17]जनको विस्मितोऽभवत् ॥ २९ ॥
अनपत्येन च स्नेहादङ्कमारोप्य च स्वयम् ॥ [18]ममेयं तनयेत्युक्त्वा स्नेहो मयि निपातितः ॥ ३० ॥
अन्तरिक्षे च वागुक्ता प्रति माऽमानुषी किल ॥ एवमेतन्नरपते धर्मेण तनया तव ॥ ३१ ॥
ततः प्रहृष्टो धर्मात्मा पिता मे मिथिलाधिपः ॥ अवाप्तो विपुलामृद्धिं मामवाप्य नराधिपः ॥ ३२ ॥

मुखपरिमलमिलितं ॥ १८ ॥ अनुरूपं त्वद्गात्रानुरूपं। असंक्लिष्टं अवाधितशोभमित्यर्थः । भर्तारंशोभयिष्यसीत्यन्ते इत्यब्रवीच्चेत्यध्याहारः । सा अनसूया । प्रीततराभवत् शोभयिष्यसीत्यब्रवीच्चेतिसंबन्धः ॥१९—२२ ॥ प्रियकथामनु प्रियांकथामुद्दिश्यसीतांप्रष्टुंवचनमारेभे वचनंवक्तुमारेभेइत्यर्थः ॥ २३ ॥ श्रुतिमुपागता श्रुतिपथंप्राप्ता ॥ २४—२७ ॥ कर्षतः । "षड्वेनकृपति" इतिश्रुत्या शोधनंकुर्वतः । क्षेत्रमंडलं यागोपयोगिक्षेत्रं चयनस्थानमित्यर्थः ॥ २८ ॥ मुष्टिविक्षेपतत्परः । "याजाताओषधयः इतिचतुर्दशभिरोषधीर्वपति" इत्युक्तप्रकारेण ओषधिमुष्टिविकिरणतत्परः ॥ २९ ॥ अनपत्येनचतेन स्नेहान्मामङ्कमारोप्य इयंममतनयेतिचोक्त्वास्नेहोमयिनिपातितः । अङ्कं उत्सङ्गं ॥ ३० ॥ माप्रति मामुद्दिश्य । एवमेतन्नरपते धर्मेणतनयातवेति अन्तरिक्षे अमानुषीवागुक्ता। यद्वा वागुक्ताप्रतिमेत्यत्र अप्रतिमेतिच्छित्वा वाग्विशेष-

---

दिव्यगन्धद्रव्यकल्पमित्यर्थइत्याह । इदमेवचयुक्तं ॥ १८ ॥ **ति०** शोभयेत् शोभयिष्यति । अनुरूपं त्वदेकोचितं । नित्यमेवासंक्लिष्टं उपभोगेप्यशुचित्वमृदितत्वादिदोषरहितंभविष्यति ॥ १९ ॥ **ति०** शोभयिष्यसीत्यनेन त्वत्पूजयाभर्तुरपिपूजाकृतेतिसूचितं ॥ **शि०** किंच श्रीः लक्ष्मीस्त्वं अव्ययं विकारशून्यं विष्णुं स्वप्रकाशद्वारासर्वत्रपूर्णं भर्तारं स्वपतिं यथा यथावत् शोभयिष्यसि ॥ **स०** श्रीः मूलरूपा ॥ २० ॥ **ति०** क्षत्रियात्वात्प्रतिग्रहानधिकारेणप्रीतिदानमित्युक्तं । लक्ष्म्युद्देशेनब्राह्मणादिभ्यो दत्तमक्षयंचेत्साक्षाल्लक्ष्म्यैप्रीत्यादत्तंतथेतिकिंवक्तव्यमितिदिव्यैतद्दानमनसूयायाइतिबोध्यं ॥ २१ ॥ **कतक०** मुष्टिविक्षेपतत्परः निम्नोन्नतसमीकरणायमृत्तिकामुष्टिविक्षेपतत्परः ॥ २९ ॥ **शि०** अनपत्येन अपत्यान्तररहितेन । अंकमारोप्य मामितिशेषः ॥ ३० ॥ **ति०** प्रतिमामानुषी प्रतिमयास्वरूपेणमानुषी मनुष्यवाक्यतुल्यावागन्तरिक्षेउक्ता । तांवाचमाह—**एवमिति** । एतत् ममेयंतनयेत्येतत् । एवं अर्थवदेव । यतोहेनरपतेधर्मेणन्यायेनएषा त्वत्क्षेत्रजातत्वात्तवतनयैव । **शि०** अप्रतिमा उच्चारयितृस्वरूपरहिता । अमानुषी मानुषवाक्सदृशी । वाक्उक्ता प्रादुर्भूता ॥ ३१ ॥ **ति०** मामवाप्य यज्ञभूमेरितिशेषः ।

[पा०] १ घ. अनुरूपंतुसंश्लिष्टं. २ क.—ङ.—छ.—ट. धीरा. ३ ग. समुपास्ते. ४ च. ञ. तपस्विनीं. ५ क.—ट. कथांकांचिदनुप्रियां. ६ च. ञ. यशस्विनी. ७ घ. विस्तरेणतु. क. विस्तरेणैव. ८ ङ. छ. झ. ट. यथाभूतंच. ९ क. तन्मेवक्तुंत्वमर्हसि. ख. तथामेवक्तुमर्हसि. १० च. ञ. तांसीता. ११ ङ. च. छ. झ. ञ. ट. तापसींधर्म. ख. तांतथाधर्म. १२ ख. चोक्त्वाथ. १३ घ. मिथिलायाःपतिः. १४ ग. ङ. च. झ. ञ. ट. क्षत्रकर्मण्यभिरतो. १५ क. ग. ङ.—ट. कृषतः. १६ ख. नरपतिर्दृष्ट्वा. १७ ख. ग. ङ. छ. झ. ञ. ट. विस्मितोजनकोऽभवत्. १८ क. ममैव.

दत्ता चास्मीष्टवद्देव्यै ज्येष्ठायै पुण्यकर्मणा[1] ॥ तया संभाविता चास्मि स्निग्धया मातृसौहृदात् ॥३३॥
पतिसंयोग[2]सुलभं वयो दृष्ट्वा तु मे पिता ॥ चिन्तामभ्यगमद्दीनो वित्तनाशादिवाधनः ॥ ३४ ॥
सदृशाच्चापकृष्टाच्च लोके कन्यापिता जनात् ॥ प्रधर्षणामवाप्नोति शक्रेणापि समो भुवि ॥ ३५ ॥
तां धर्षणामदूरस्थां दृष्ट्वा[3] चात्मनि पार्थिवः ॥ चिन्तार्णवगतः पारं नाससादाप्लवो यथा ॥ ३६ ॥
अयोनिजां हि मां ज्ञात्वा नाध्यगच्छद्[4]विचिन्तयन् ॥ सदृशं चानुरूपं[5] च महीपालः पतिं[6] मम ॥३७
तस्य बुद्धिरियं जाता चिन्तयानस्य संततम् ॥ स्वयंवरं तनूजायाः करिष्यामीति धीमतः[7] ॥ ३८ ॥
महायज्ञे तदा[8] तस्य वरुणेन महात्मना ॥ दत्तं धनुर्वरं प्रीत्या तूणी चाक्षयसायकौ[9] ॥ ३९ ॥
असंचाल्यं मनुष्यैश्च यत्नेनापि[10] च गौरवात् ॥ तन्न शक्ता नमयितुं स्वप्नेष्वपि नराधिपाः ॥ ४० ॥
तद्धनुः प्राप्य मे पित्रा व्याहृतं सत्यवादिना[11] ॥ समवाये नरेन्द्राणां पूर्वमामन्त्र्य पार्थिवान् ॥ ४१ ॥
इदं[12] च धनुरुद्यम्य सज्यं यः कुरुते नरः ॥ तस्य मे दुहिता भार्या भविष्यति न संशयः ॥ ४२ ॥
तच्च दृष्ट्वा धनुःश्रेष्ठं गौरवाद्गिरिसन्निभम् ॥ अभिवाद्य नृपा जग्मुरशक्तास्तस्य तोलने ॥ ४३ ॥
सुदीर्घस्य[13] तु कालस्य राघवोऽयं महाद्युतिः ॥ विश्वामित्रेण सहितो यज्ञं द्रष्टुं समागतः ॥
लक्ष्मणेन सह भ्रात्रा रामः सत्यपराक्रमः ॥ ४४ ॥
विश्वामित्रस्तु धर्मात्मा मम पित्रा सुपूजितः ॥ प्रोवाच पितरं तत्र भ्रातरौ[14] रामलक्ष्मणौ ॥ ४५ ॥
सुतौ[15] दशरथस्येमौ[16] धनुर्दर्शनकाङ्क्षिणौ ॥ धनुर्दर्शय[17] रामाय राजपुत्राय दैविकम् ॥ ४६ ॥
इत्युक्तस्तेन विप्रेण तद्धनुः समुपानयत् ॥ [तद्धनुर्दर्शयामास[18] राजपुत्राय दैविकम् ॥ ४७ ॥]
निमेषान्तरमात्रेण तदानम्य सवीर्यवान्[19] ॥ ज्यां समारोप्य झटिति पूरयामास[20] वीर्यवत् ॥ ४८ ॥

णतयावायोज्यं ॥३१—३२॥ इष्टवद्देव्यै इच्छावत्यै देव्यै। पुण्यकर्मणा अनवरतयज्ञादिकर्मयुक्तेनजनकेन। संभाविता। संवर्धितेत्यर्थः ॥ ३३ ॥ पतिसंयोगेसति सुलभं अन्यथा दुर्लभमित्यर्थः । पतिसंयोगंविनास्थातुमशक्ययौवनावस्थावदित्यर्थः ॥ ३४ ॥ प्रधर्षणांतिरस्क्रियां ॥ ३५ ॥ अप्लवः प्लवरहितः ॥ ३६ ॥ सदृशं अभिजनवृत्तादिनातुल्यं । अनुरूपं प्रादुर्भूतयौवनाप्रतिमरूपलावण्यादिनायोग्यं ॥३७—३८॥ वरुणेनदत्तं वरुणेनातिसहकारिणादत्तं ॥३९—४१॥ भविष्यति नसंशयइत्यत्र इतिकरणंद्रष्टव्यम् ॥४२॥ तोलने चालने

मल्लाभोत्तरंतस्यमहतीसमृद्धिर्जातेतिभावः ॥ ३२ ॥ **रामानु०** पुण्यकर्मणेतितृतीयान्तःपाठः । केचिच्चतुर्थ्यन्तंपठित्वादेवीविशेषणंकुर्वन्ति ॥ **ति०** इष्टमितिभावेक्तः । इष्टमिच्छा । तद्वत्यै विषयतासंबन्धेनेत्यक्षरार्थः । यद्वा सन्तानेच्छावत्यैदेव्यैइत्यर्थः ॥ ३३ ॥ **शि०** पतिसंयोगसुलभं पतिसंयोगःसुलभोयस्मिंस्तत् । वित्तनाशात् अर्जितवित्तस्यादर्शनात् । अधनइवदीनोमे पिता ॥ ३४ ॥ **शि०** सदृशात् कुलादिनास्वतुल्याद्वरपित्रादेः । अपकृष्टात् वरमातुलादेश्च ॥ ३५ ॥ **ति०** महायज्ञे दक्षयज्ञे । तस्यमत्पितृपूर्वजस्यदेवरातस्यतदाशत्रुजयसमर्थधनुर्लाभायतपःकरणकाले । दक्षयज्ञेहिशिवेनपीडितादेवाश्शिवंसंप्रार्थ्यधनुर्याचितवन्तः । सचदेवेभ्योदत्वोक्तवानिदंदेवरातायदीयतामिति । ततोदेवैर्वरुणद्वारादेवरातायदत्तं।यद्वा व्रियतेसर्वैर्देवैरितिव्युत्पत्त्यावरुणश्शिवएव ॥ **शि०** उःशंभुश्चासौअरुणोलोहितश्चवरुणस्तेन । स्वभागाकल्पनजनितकोपहेतुकारुण्यविशिष्टशिवेनेत्यर्थः । दत्तंदेवैर्दापितं ॥ ३९ ॥ **स०** नमयितुं नामयितुं ॥ ४० ॥ **स०** सवीर्यवान् वीर्यवद्भिर्निरीक्षकैःक्षोणीशैस्सहितः सवीर्यवान् । अने-

[पा०] १ ङ. छ. झ. ट. कर्मणे. २ ख. भर्तृसंयोग. ३ ङ. च. छ. झ. ञ. ट. संदृश्यात्मनि. ४ क. च. छ. झ. ञ. ट. नाध्यगच्छत्स. ख. नाध्यगच्छत्सु. ५ ङ. छ. झ. चाभिरूपं. ६ ख. ग. घ. च. ञ. पिता. ७ ङ. छ. झ. ट. धर्मतः. ८ ज. तथा. ९ ङ. च. छ. झ. ञ. ट. चाक्षय्य. १० छ. बलेनापि. ११ ञ. सूक्ष्मवादिना. १२ ख. इदंहि. १३ ख. च. ञ. सुदीर्घस्याथ. १४ ग. छ. झ. ट. राघवौ. १५ क. ख. च. ञ. पुत्रौ. १६ छ. स्यैतौ. १७ धनुर्दर्शयेत्यर्धं ङ. छ. झ. पाठेषुनदृश्यते. १८ तद्धनुर्दर्शयामासेत्यर्धं ङ. छ. झ. पाठेषुदृश्यते. १९ ख. सराघवः. क. च. सुवीर्यवान्. ङ. झ. ट. महाबलः. २० क. वीर्यवद्बलवद्धनुः. ख. ङ. छ. झ. ञ. ट. पूरयामासवीर्यवान्.

तेन[१] पूरयता वेगान्मध्ये भग्नं द्विधा धनुः ॥ तस्य शब्दोऽभवद्भीमः पतितस्याशनेरिव[३] ॥ ४९ ॥
ततोऽहं[४] तत्र रामाय पित्रा सत्याभिसन्धिना ॥ निश्चिता दातुमुद्यम्य[५] जलभाजनमुत्तमम् ॥ ५० ॥
दीयमानां न तु तदा प्रतिजग्राह राघवः ॥ अविज्ञाय पितुश्छन्दमयोध्याधिपतेः प्रभोः ॥ ५१ ॥
ततः श्वशुरमामन्त्र्य वृद्धं दशरथं नृपम् ॥ मम[६] पित्रा त्वहं दत्ता रामाय विदितात्मने ॥ ५२ ॥
मम चैवानुजा साध्वी ऊर्मिला प्रियदर्शना[७] ॥ भार्यार्थे लक्ष्मणस्यापि दत्ता[८] पित्रा मम स्वयम् ॥५३
एवं दत्ताऽस्मि रामाय तदा[९] तस्मिन्स्वयंवरे[१०] ॥ अनुरक्ताऽस्मि[११] धर्मेण पतिं वीर्यवतां वरम् ॥ ५४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे अष्टादशोत्तरशततमः सर्गः ॥११८॥

एकोनविंशत्युत्तरशततमः सर्गः ॥ ११९ ॥

अनसूययास्वदत्तदिव्यमाल्याभरणादिविभूषितांसीतांप्रतिसायंकालवर्णनपूर्वकंरामसमीपगमनचोदना ॥ १ ॥ सीतया स्वावलोकनसंहृष्टरामंप्रतिस्वस्यैदिव्यमाल्याभरणादिवितरणपूर्वानसूयावृत्तान्तकथनम् ॥ २ ॥ तापसकुलार्चितेनरामेण सीतयासहरात्रियापनपूर्वकंप्रभातेगमनायमुनिगणंप्रत्यापृच्छनम् ॥ ३ ॥ तथास्वेषांराक्षसकृतोपद्रवनिवेदनेनतन्निधनप्रार्थनपूर्वकंमुनिकुलप्रदर्शितवर्त्मनासीतालक्ष्मणाभ्यांसहदण्डकारण्यप्रवेशः ॥ ४ ॥

अनसूया तु धर्मज्ञा श्रुत्वा तां[१२] महतीं कथाम् ॥ पर्यष्वजत बाहुभ्यां शिरस्याघ्राय मैथिलीम् ॥१॥
व्यक्ताक्षरपदं चित्रं भाषितं मधुरं त्वया ॥ यथा स्वयंवरं[१३] वृत्तं तत्सर्वं[१४] हि श्रुतं मया ॥
रमेऽहं[१५] कथया ते[१६] तु दृढं मधुरभाषिणि ॥ २ ॥
रविरस्तंगतः श्रीमानुपोह्य रजनीं शिवाम्[१७] ॥ दिवसं प्रतिकीर्णानामाहारार्थं[१८] पतत्रिणाम् ॥
संध्याकाले निलीनानां निद्रार्थं[१९] श्रूयते ध्वनिः ॥ ३ ॥
एते[२०] चाप्यभिषेकार्द्रा मुनयः कलशोद्यताः ॥ सहिता उपवर्तन्ते[२१] सलिलाप्लुतवल्कलाः ॥ ४ ॥

॥४३—५०॥ छन्दं अभिप्रायं । "वशाभिप्राययोश्छन्दः" इतिवैजयन्ती ॥५१—५४॥ इतिश्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने अष्टादशोत्तरशततमःसर्गः ११८

अथात्र्याश्रमे रजनीमुषित्वा प्रातर्निर्गमएकोनविंशत्युत्तरशततमे ॥ १—२ ॥ उपोह्य समीपंप्रापय्य । स्वसंचाराद्विमुक्तंप्रदेशंप्रापय्येत्यर्थः ॥ ३ ॥ कलशो-

---

ननैकान्तिकतास्यप्रमेयस्येतिसूच्यते । विश्वासौईर्ष्यः प्रेर्यश्चसगरुडोस्यास्तीतिसवा ॥ ४८ ॥ स० जलभाजनं कमण्डलुं उद्यम्य दातुमुद्यता ॥ ५० ॥ स० ममश्वशुरं आमन्त्र्य आकारयित्वा ॥ ५२ ॥ इत्यष्टादशोत्तरशततमस्सर्गः ॥ ११८ ॥

ति० स्वयंवरंवृत्तं स्वयंवरोवृत्तः । अर्धर्चादेस्स्वयंवरः ॥ शि० यथास्वयंवरं स्वयंवरमनतिक्रम्ययत्त्वयाभाषितं तद्वृत्तं वृत्तान्तं सर्वं मयाश्रुतं । तेकथयादृढंयथास्यात्तथारमेय विहरेय ॥ २ ॥ शि० रविस्तुरजनीमुपोह्यसमीपंप्रापय्यअस्तंगतः ॥ दिवसंप्राप्य आहारार्थपरिकीर्णानांचतुर्दिक्षुगतानां । संन्ध्याकालेप्राप्तेसतिनिद्रार्थंनिलीनानां स्वस्वावासस्थानेषुस्थितानांपतत्रिणां पक्षिणां । ति० निलीनानां निलीयमानानां ॥ ३ ॥ शि० उपवर्तन्ते समीपेदृश्यन्तइत्यर्थः । स० उपवर्तन्ते शालांप्रत्यागच्छन्ति ॥ ४ ॥

[पा०] १ ङ. छ. झः तेनापूरयता. क. तेनकृष्टंतदा. २ ख. च. ञ. महद्धनुः. क. तदाधनुः. ३ क. ख. ङ. च. छ. झ. ञ. ट. स्याशनेर्यथा. ४ ख. अहंच. ५ क.—ठ. उद्यता. ६ ग. मात्रापित्रापिरामायदत्ताहं. ७ ङ. च. छ. झ. ञ. ट. शुभदर्शना. ८ ग.—च. ज. ञ. पित्रादत्ता. ९ ङ. छ. झ. ट. तथा. १० क. ख. ग. च. ञ. तंत्रस्वयंवरे. ११ क.—घ. च. ज. ञ. अनुरक्ताच. १२ छ. तांतुमहत्कथां. १३ क.-ग. स्वयंवरे. १४ ङ. छ. झ. ट. तत्सर्वंच. १५ ङ. छ. झ. ट. रमेय. १६ च. ञ. देवि. १७ ङ. च. झं. ञ. ट. शुभां. १८ ख. ङ. च. छ. झ. ञ. ट. परिकीर्णानां. १९ घ. निद्रार्थे. २० च. ञ. एतेवैह्यभिषेकाय. क. ख. एतेचाप्यभिषेकाय. २१ क. ह्युपवर्तन्ते.

[1]ऋषीणामग्निहोत्रेषु हुतेषु विधिपूर्वकम् ॥ कपोताङ्गारुणो धूमो दृश्यते [2]पवनोद्धतः ॥ ५ ॥
अल्पपर्णा हि तरवो घनीभूताः समन्ततः ॥ वि[3]प्रकृष्टेऽपि देशेऽस्मिन्न प्रकाशन्ति वै दिशः ॥ ६ ॥
रजनीचरसत्त्वानि प्रचरन्ति समन्ततः ॥ तपोवनमृगा ह्येते वेदितीर्थेषु शेरते ॥ ७ ॥
सं[4]प्रवृद्धा निशा सीते नक्षत्रसमलंकृता ॥ ज्योत्स्नाप्रावरणश्चन्द्रो दृश्यतेऽभ्युदितोऽम्बरे ॥ ८ ॥
गम्यतामनुजानामि रामस्यानुचरी भव ॥ कथयन्त्या हि मधुरं [5]त्वयाऽहं परितोषिता ॥ ९ ॥
अलंकुरु च तावत्त्वं प्रत्यक्षं [6]मम मैथिलि ॥ प्रीतिं जनय मे वत्से दि[7]व्यालंकारशोभिता ॥ १० ॥
[8]सा तथा समलंकृत्य सीता सुरसुतोपमा ॥ प्रणम्य शिरसा त[9]स्यै रामं त्वभिमुखी ययौ ॥ ११ ॥
[10]तथा तु भूषितां सीतां ददर्श वदतांवरः ॥ राघवः प्रीतिदानेन तपस्विन्या जहर्ष च ॥ १२ ॥
[11]न्यवेदयत्ततः सर्वं सीता रामाय मैथिली ॥ प्रीतिदानं तपस्विन्या वसनाभरणस्र[12]जम् ॥ १३ ॥
प्रहृष्टस्त्वभवद्रामो लक्ष्मणश्च महारथः ॥ मैथिल्याः सत्क्रियां दृष्ट्वा मा[13]नुषेषु सुदुर्लभाम् ॥ १४ ॥
[14]ततस्तां [15]शर्वरीं प्रीतः पुण्यां [16]शशिनिभाननः ॥ अर्चितस्तापसैः सिद्धै[17]रुवास रघुनन्दनः ॥ १५ ॥
तस्यां रात्र्यां [18]व्यतीतायाम[19]भिषिच्य हुताग्निकान् ॥ आपृच्छेतां नरव्याघ्रौ तापसान्वनगो[चरान्] ॥ १६ ॥
तावूचुस्ते वनचरास्तापसा धर्मचारिणः ॥ वनस्य तस्य संचारं राक्षसैः समभिप्लुतम् ॥ १७ ॥
रक्षांसि पुरुषादानि नानारूपाणि राघव ॥ वसन्त्यस्मिन्महारण्ये व्यालाश्च रुधिराशनाः ॥ [१८] ॥

द्यताः उद्यतकलशाः ॥ ४ ॥ कपोताङ्गारुणः कपोतकन्धरावदव्यक्तरागः । "अव्यक्तरागस्त्वरुणः" इत्यमरः ॥ ५ ॥ विप्रकृष्टेपिदेशेअल्पपर्णाःयेतरवस्तेपि समन्ततः घनीभूताहि अव्यक्तपर्णान्तरालत्वात्सान्द्रीभूताइव । तत्रहेतुमाह नप्रकाशन्तिवैदिशइति ॥ ६ ॥ वेदितीर्थेषु वेद्यवतरणप्रदेशेषु ।"तीर्थमन्त्राद्युपाध्यायशास्त्रेष्वम्भसिपावने । पात्रोपधावतरणेषु" इतिवैजयन्ती ॥ ७—८ ॥ अनुजानामि अनुमतिं करोमि । अनुचरीभवेतिपाठः ॥ ९ ॥ अलंकुरु आत्मानमितिशेषः ॥ १०—१२ ॥ प्रीत्यादीयतइति प्रीतिदानं । कर्मणिल्युट् । वसनाभरणस्रजांसमाहारोवसनाभरणस्रजं । "द्वन्द्वाच्चुदषहान्तात्समाहार" इतिसमासान्तष्टच् । वसनाभरणस्रजामितिपाठे प्रीतिदानमितिभावेल्युट् ॥ १३—१५ ॥ अभिषिच्यहुताग्निकान् स्नात्वाकृतहोमान् ॥ १६ ॥ वनस्यसंचारं कंदमूलफलाद्याहरणार्थसंचारं । राक्षसैः समभिप्लुतं सम्यगुपद्रुतमूचुः ॥१७॥ व्यालाः हिंस्रपशवः । "सर्पेहिंस्र-

ति० कपोताङ्गवत् पारावतकण्ठवदरुणोमेचकः । " श्यामेरक्तेऽरुणोर्केच " ॥ ५ ॥ **ति०** विप्रकृष्टेन्द्रियेदेशे इन्द्रियविप्रकृष्टे दूरेदेशेइत्यर्थः । **स०** अल्पपर्णाः संकुचितपत्राः तरवः अतसीप्रमुखावृक्षाः ॥ ६ ॥ **ति०** वेदितीर्थेषु अग्निहोत्रवेदिसंबन्धात्पुण्यक्षेत्ररूपाश्रमप्रदेशेषु । तीर्थशब्दः पुण्यक्षेत्रवाची ॥ ७ ॥ **ति०** चन्द्रोदृश्यतइत्यनेनकार्तिक्युत्तरंप्रतिपदियात्रेतिसूचितं ॥ ८ ॥ **स०** मद्दत्तालङ्कारपदार्थैर्ममप्रत्यक्षं आत्मानमलङ्कुरु ॥ **ति०** प्रीतिंजनय अलङ्कृत्यदिव्यस्वस्वरूपानुभावनेनेतिशेषः ॥ १० ॥ **शि०ति०** पुण्यां अनसूयासमर्पितपुण्यालङ्कारादिविशिष्टांशशिनिभाननांसीतां दृष्ट्वाशर्वरीं रात्रिंउवास ॥ **स०** पुण्यांशशिनिभाननां तांसीतांप्रति प्रीतस्सन्सर्वैस्तापसैस्सहशर्वरीमुवास ॥ १५ ॥ **ति०** आपृच्छेतां वनान्तरगमनार्थमितिशेषः ॥ १६ ॥ **स०** संचरन्त्यत्रेतिसंचारोदेशःतं ॥ १७ ॥ **स०** व्यालाः वनगजाः । **शि०** नानारूपाणि अनेककवेषधराणि । व्यालाः सर्पाः हिंस्रपशवः

[पा०] १ ङ. च. झ. अग्निहोत्रेचऋषिणाहुतेच. २ ख. घ. च. पवनोच्छ्रितः. ख. पवनोत्थितः. ३ ङ. छ. झ. ट. विप्रकृष्टेन्द्रियेदेशेन. ग. विप्रकृष्टेहिदेशेस्मिन्. ख. घ. ज. विप्रकृष्टेपिवैदेशे. ४ क.—च. झ. ञ. ट. संप्रवृत्ता. ५ ङ. छ. झ. ञ. ट. त्वयाऽहमपि. ६ घ. देविमैथिलि. ७ ख.—ट. दिव्यालंकारशोभिनी. क. सर्वालंकारशोभिनी. ८ ख.—ङ. ज. झ. ट. सातदा. च. ञ. तत्रसा. ९ ङ. छ. झ. ट. पादौ. १० च. ञ. तथाविभूषितां. ङ. छ. तथाऽनुभूषितां. ११ ख. च. ज. ञ. न्यवेदयततत्सर्वं. १२ क. ग. च. छ. झ. ञ. ट. स्रजां. १३ ग. मानुषेष्वतिदुर्लभां. १४ ङ. झ. ट. ततस्स. १५ घ. रजनीं. १६ ङ. छ. झ. ञ. ट. शशिनिभाननां. १७ ङ. छ. झ. ट. सर्वैरुवास. १८ क. प्रभातायां. १९ ख. मभिषिक्तान्हुता.

उच्छिष्टं वा प्रमत्तं वा तापसं [1]धर्मचारिणम् ॥ अदन्त्यस्मिन्महारण्ये तान्निवारय राघव ॥ १९ ॥
एष पन्था महर्षीणां फलान्याहरतां वने ॥ अनेन तु वनं दुर्गं [2]गन्तुं राघव ते क्षमम् ॥ २० ॥
[3]इतीव तैः प्राञ्जलिभिस्तपस्विभिर्द्विजैः कृतस्वस्त्ययनः परंतपः ॥
वनं सभार्यः प्रविवेश राघवः सलक्ष्मणः सूर्यइवाभ्रमण्डलम् ॥ २१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये चतुर्विंशत्सहस्रिकायां संहितायां अयोध्याकाण्डे एकोनविंशत्युत्तरशततमः सर्गः ॥ ११९ ॥

इति अयोध्याकाण्डः समाप्तः ॥ २ ॥

पशूव्यालौ" इत्यमरः ॥ १८—२० ॥ तैः प्राञ्जलिभिः तपस्विभिः द्विजैः कृतस्वस्त्ययनः कृतमङ्गलाशीर्वचनः ॥ २१ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने एकोनविंशत्युत्तरशततमः सर्गः ॥ ११९ ॥

इत्थंश्रीमच्छठारेश्चरणसरसिजद्वन्द्वनिर्द्वन्द्वसेवानिर्धूताशेषमोहोनिरुपमधिपणःकौशिकानांकुलेन्दुः ॥ गोविन्दार्योनिवार्यप्रतिकथकगजस्तोमपञ्चास्यरूपष्टीकांपीताम्बराख्यांव्यतनुतविपुलां साधु साकेतकाण्डे ॥ १ ॥ अयोध्याकाण्डं समाप्तम् ॥ २ ॥

श्व । उभयार्थलाभस्त्वेकशेषवृत्त्या ॥ १८ ॥ ति० उच्छिष्टं अशुचिं । प्रमत्तं असावधानं ॥ १९ ॥ ति० क्षमं युक्तं ॥ २० ॥ ति० इतीरितः एवमुपदिष्टमार्गः । स० अभ्रमण्डलंआकाशमण्डलं मेघमण्डलंवा ॥ " अभ्रंनभस्स्वर्गवलाहकेपु" इतियादवः ॥ २१ ॥ इत्येकोनविंशत्युत्तरशततमस्सर्गः ॥ ११९ ॥

[पा०] १ ङ. च. झ. ट. ब्रह्मचारिणं. ख. वनचारिणं. २ क. गन्तुमर्हसिते. ३ ङ. छ. झ. ट. इतीरितः.

इदं अयोध्याकाण्डम् कुंभघोणस्थने टी. आर्. कृष्णाचार्येण टी. आर्. व्यासाचार्येण च
मुंबय्यां निर्णयसागरमुद्रायन्त्रे मुद्रापितम् । शकाब्दाः १८३३ सन १९११.